ॐ तत्सत्

श्रीगणेशाय नमः

श्रीमद्भागवतम्

अनेकव्याख्यासमलङ्कृतम्

—:❀:—

प्रथमः स्कन्धः

अथ प्रथमोऽध्यायः

ॐ नमो भगवते वासुदेवाय

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

अर्थेषु (कार्य्याकार्य्येषु) अन्वयादितरतश्च (अन्वव्यतिरेकाभ्यां योऽस्ति), (अत एव) अस्य (जगतः) जन्मादि (जन्मस्थितिभङ्गं) यतः (भवति तं), (ततः) यः (च) अभिज्ञः (सर्वज्ञः) स्वराट् (स्वतःसिद्धज्ञानवान् तं), यत् (यस्मिन् ब्रह्मणि वेदे) सूरयः (ब्रह्मादयोऽपि) मुह्यन्ति (तत्) ब्रह्म (तं वेदं) आदिकवये (ब्रह्मणे) हृदा (मनसैव यः) तेने (प्रकाशितवान् तं), (किञ्च) यथा तेजोवारिमृदां विनिमयः (अन्यस्मिन्नन्यावभासः तेजसि वारिबुद्धिर्मृगतृष्णायां मृदि काचादौ जलबुद्धिरित्यादि तथा) यत्र (शुद्धभगवत्स्वरूपे) त्रिसर्गः (मायागुणसर्गः भूतेन्द्रियदेवतारूपः) अमृषा (सत्यः) (मृषा वा) (किञ्च) स्वेन धाम्ना (तेजसा) सदा निरस्तकुहकं सत्यं परं (परमेश्वरं) धीमहि (ध्यायेम) इति समस्तान्वयः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

ॐनमो भगवते परमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीरामचन्द्राय।
वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि। यस्यास्ते हृदये सम्वित् तं नृसिंहमहं भजे ॥ १ ॥
विश्वसर्गविसर्गादिनवलक्षणलक्षितम्। श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥ २ ॥
माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ। वन्दे परस्परात्मानौ परस्परनतिप्रियौ ॥ ३ ॥
सम्प्रदायानुरोधेन पौर्वापर्यानुसारतः। श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ॥ ४ ॥
काहं मन्दमतिः क्वेदं मथनं क्षीरवारिधेः। किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः ॥ ५ ॥
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्। यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ६ ॥
श्रीमद्भागवताभिधः सुरतरुस्ताराङ्कुरः सज्जनिः स्कन्धैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः।
द्वात्रिंशत्त्रिशतञ्च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्टदोऽतिसुलभो वर्वर्ति सर्वोपरि ॥ ७ ॥

अथ नानापुराणशास्त्रप्रबन्धैश्चित्तप्रसत्तिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणानुवर्णनप्रधानं श्रीमद्भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रत्यूहनिवृत्त्यादिसिद्धये तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणं मङ्गलमाचरति–जन्माद्यस्येति। परं

परमेश्वरम्। धीमहि इति, ध्यायतेर्लिङि च्छान्दसं ध्यायेम इत्यर्थः। बहुवचनं शिष्याभिप्रायकम्। तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति। तत्र स्वरूपलक्षणम्–सत्यमिति। सत्यत्वे हेतुः–यत्र यस्मिन् ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपोऽमृषा सत्यः–यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत् प्रतीयते तं परं सत्यमित्यर्थः। अत्र दृष्टान्तः–तेजोवारिमृदामिति। विनिमयो व्यत्ययो व्यत्यासोऽन्यस्मिन्नन्यावभासः, स यथाधिष्ठानसत्तया सत्यवत् प्रतीयते तद्वदित्यर्थः। तत्र तेजसि वारिबुद्धिर्मरीचिकायां प्रसिद्धा, मृदि काचादौ वारिबुद्धिः, वारिणि काचादिबुद्धिरित्यादि यथायथमूह्यम्। यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तम्। यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति। यत्रेत्यनेन प्राप्तमुपाधिसम्बन्धं वारयति–स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं मायालक्षणं यस्मिन् तम्। तटस्थलक्षणमाह—जन्माद्यीति। अस्य विश्वस्य जन्मस्थितिभङ्गा यतो भवन्ति तं धीमहीति। तत्र हेतुः–अन्वयादितरतश्च अर्थेषु आकाशादिकार्येषु परमेश्वरस्य सद्रूपेणाऽन्वयात् अकार्येभ्यः खपुष्पादिभ्यस्तद्व्यतिरेकाच्च। यद्वा अन्वयशब्देनानुवृत्तिः, इतरशब्देन व्यावृत्तिः। अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत्। व्यावृत्तत्वात् विश्वं कार्यं घटकुण्डलादिवदित्यर्थः। यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तत् ततो भवतीति सम्बन्धः। तथा च श्रुतिः–"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति" इत्याद्या। स्मृतिश्च–'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये' इत्याद्या। तर्हि किं प्रधानं जगत्कारणत्वाद् ध्येयमभिप्रेतम्? नेत्याह–अभिज्ञो यस्तं 'स ईक्षत लोकन्नु सृजा इति स इमान् लोकानसृजत' इत्यादिश्रुतेः 'ईक्षतेर्नाशब्दम्' इति न्यायाच्च। तर्हि किं जीवो ध्येयः स्यान्नेत्याह–स्वराट् स्वेनैव राजते यस्तं स्वतःसिद्धज्ञानमित्यर्थः। तर्हि किं ब्रह्मा ध्येयः 'हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्' इति श्रुतेः। नेत्याह—तेने इति। आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यस्तेने प्रकाशितवान्। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इत्यादिश्रुतेः। ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं सत्यं; तत्तु हृदा मनसैव तेने विस्तृतवान्। अनेन बुद्धिवृत्तिप्रवर्त्तकत्वेन गायत्र्यर्थोऽपि दर्शितः। वक्ष्यति हि–'प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम्' इति। ननु ब्रह्मा स्वयमेव सुप्तप्रतिबुद्धन्यायेन वेदमुपलभताम्। नेत्याह—यद्यस्मिन् ब्रह्मणि सूरयोऽपि मुह्यन्ति। तस्माद् ब्रह्मणोऽपि पराधीनज्ञानत्वात् स्वतः सिद्धज्ञानः परमेश्वर एव जगत्कारणम्। अत एव सत्योऽसतः सत्ताप्रदत्वाच्च परमार्थसत्यत्वेन सर्वज्ञत्वेन च निरस्तकुहकस्तं धीमहीति गायत्र्या प्रारम्भेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत् पुराणमिति दर्शितम्। यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे 'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम्॥ अष्टादशसहस्राणि पुराणं तन् प्रकीर्तितम्" इति। पुराणान्तरे च—'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारम्भस्तद्वै भागवतं विदुः' इति। पद्मपुराणे च अम्बरीषं प्रति श्रीगौतमवचनम्—'अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु। पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम्' इति। अत एव भागवतं नामान्यदित्यपि न शङ्कनीयम्॥ १॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

ॐ स्वस्ति श्रीगणेशाय नमः॥

श्रीकृष्णं राधिकानाथं वृन्दावननिकुंजगम्। बल्लवीगणसंवीतमाश्रये सर्वकारणम्॥ १॥
ॐ स्वस्ति श्रीगणेशाय नम इत्यस्य व्याकृतिम्। श्रीवंशीधरशर्माहं करोमि विदुषां मुदे॥ २॥

अथ सर्वशास्त्रारंभ इयमेव दशाक्षरी विद्या स्मर्यते, तत्कथमन्येषां श्रीमहाविष्णवादीनां स्मरणस्यापि "मंगलानाञ्च मंगलम्" इत्यादिवाक्यैर्मंगलस्यापि मंगलत्वान्न स्मर्यते? इति चेत्–तत्रेदमवधेयम्–अस्यामेव दशाक्षर्यां स्मृतायां सर्वदेवस्मरणसंभवादियमेव स्मर्या। किंचास्या दशाक्षर्याः सर्वदेवतानां मूलमंत्रत्वादप्यादौ जपो न्याय्यः; मूलमंत्रलक्षणस्य गरुडोक्तस्यात्र सत्त्वात्। तथा हि–"प्रणवादि नमोंतं च चतुर्थ्यंतं च सत्तम। देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः॥" इति। देवपूजायां जपरूपपूजाया एव श्रैष्ठ्यम्, "यज्ञानां जपयज्ञोऽस्मि" इति श्रीमुखोक्तेः। कथमत्र सर्वदेवतास्मरणमिति चेत्–तद्दर्शयन्नाह। तथा हि–"कार्यारंभे गणेशश्च पूजनीयः प्रयत्नतः॥" इति स्मृतेस्तस्यैवादिपूज्यत्वं विघ्ननाथत्वेन विघ्नवारकत्वात्। 'श्रीगणेशाय नमः'। नम आदियोगे चतुर्थी सर्वत्र बोध्या। गण्यन्ते दुःखप्रदत्वेनेति गणा विघ्नाः। "समूहे भगणे विघ्ने प्रमथे द्रियदैवते। यमसैन्ये स्तवार्हेषु पार्षदे च गणः स्मृतः॥" इत्यनेकार्थध्वनिवाग्विलासे। 'गण संख्याने' धातोः कर्मण्यप्रत्ययः। ईष्टे उपद्रवनाशकत्वेन द्योतत इतीशः। 'ईश ऐश्वर्ये', अतः कर्तरीगुपधात् कः। "ईशः स्वामिनि शंकरे" इति वामनः। गणानां विघ्नानां प्रमथानां वेशः स्वामी गणेशो हेरंबः। "रुद्रे विनायके विष्णौ विष्वक्सेने विधातरि। मुख्याधिष्ठातृसैन्येषु गणेशः परिकीर्तितः॥" इत्यप्यनेकार्थध्वनिवाग्विलासे। श्रिया कीर्त्या दीप्त्या ऋद्धिसिद्धिभ्यां वा सहितो गणेशः श्रीगणेशस्तस्मै तथा। "ऋद्धिश्रीकीर्तिदीप्त्याशीर्गंगासु श्रीरितीरितः।" इत्यपि तत्रैव। स्वस्त्यस्तु नमस्कर्तुरिति शेषः। 'ओमित्यंगीकारे ब्रह्मणि च' इत्यव्ययपाठात्। एतत्सर्वैः कायादावंगीकार्यमिति भावः। "अनाराध्य गणाध्यक्षं

यत्कर्म क्रियते नरैः। तन्न सिद्धिमवाप्नोति ह्यत आदौ तमर्चयेत्'' इति पुराणात्। यद्वा कथंभूताय श्रीगणेशाय ? ॐ। कोऽर्थः ?। ब्रह्मरूपिणे। अव्ययत्वादेव चतुर्थ्या लुक्। सत्यपि लुकि विभक्त्यर्थानपायस्य 'उपविष्णुदेही'त्यादिप्रयोगेषु दर्शनादव्ययस्य तत्तद्विभक्त्यंतविशेषणत्वे न दोष इत्यवधेयमत्र। तथा च श्रुतिः-''ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं ब्रह्मासि'' इति। अत्र विशेष्यसंबद्धत्वादन्ययोगव्यवच्छेदकेनैवकारेण ''पार्थ एव धनुर्धरः'' इत्यत्र च पार्थादन्यत्र धनुर्धरत्वस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते। अतः श्रेयस्कामैः सर्वैरपि स एवाराध्यः, तत्पूजां विनान्यपूजाया वैयर्थ्यस्मरणेन फलजनकत्वायोगात्। 'अवश्यापेक्षितानपेक्षितयोरपेक्षितं समर्पणीय' मिति न्यायेन तदाराधनस्यावश्यकत्वात्कृते च तस्मिन् ''विद्यार्थी लभते विद्यां धनार्थी लभते धनम्। पुत्रार्थी लभते पुत्रं मोक्षार्थी परमं पदम्॥'' इत्यादिवचनेभ्यः सर्वेष्टलाभसंभवे ''अनधीते महाभाष्ये व्यर्था स्यात्पदमंजरी। अधीतेऽपि महाभाष्ये व्यर्था स्यात्पदमंजरी'' इति न्यायेनान्याराधने प्रयोजनाभावात्। सूर्याद्याराधनफलारोग्यादिमोक्षांतकथनानंतरं 'सर्वमिच्छेद्गणाधिपात्' इति स्मरणमप्यत्र मानम्। तस्मादेव ब्रह्माद्युत्पत्तिस्तत एव तेषां सृष्ट्यादिसामर्थ्यलाभश्च। अथ च गणपतेस्तत्त्वेन वर्णनमुपासनार्थं वास्तवाभेदबोधनार्थञ्च। न चैतावतान्यदेवानाराधनापत्तिः; प्रयाजादिषु कृतेष्वपि ज्योतिष्टोमादीनामननुष्ठानापत्तेः, इतरोपास्तिविधायकवाक्याप्रामाण्यापत्तेश्च। 'सर्वमिच्छेत्' इति तु विनायकाराधनस्य परंपरया सर्वत्रोपगमोपयोगवर्णनपरं न त्वितरनिषेधपरं तद्विधिविरोधात्। प्रयाजादयोऽङ्गानि, ज्योतिष्टोमो ह्यंगी; न ह्यंगैकदेशे कृते सर्वांगिनो यथा सिद्धिस्तथा श्रीगणेशार्चनस्य यज्ञादिकर्मप्रारंभरूपैकांगत्वान्न तत्कृते सर्वयज्ञसिद्धिरिति गणेशपक्षः॥ १॥

विष्णुपक्षेऽप्यस्य व्याख्या—ॐ नमः। कोर्थः ?। ब्रह्मणे नमः। ''ॐमित्येकाक्षरं ब्रह्म'' इति ब्रह्मोपनिषदि श्रीगीतायां चाव्ययपाठेऽपि। ''ॐमित्यंगीकारे ब्रह्मणि च''। अव्ययत्वादेव विभक्तिलुक्। किंभूताय ॐ ?। श्रीगणेशाय। श्रयति विष्णुचरणमिति श्रीर्लक्ष्मीः। किबत्र कर्तरि। ''कटप्रुवि-'' त्यादिना दीर्घः। ''कमला श्रीर्हरिप्रिया'' इत्यमरात्। श्रिया लक्ष्म्या गणाः पार्षदा इंद्राद्यास्तेषामीशः प्रेरकस्तस्मै। ''इंद्राद्याः पार्षदा यस्याः सा लक्ष्मीर्वरदास्तु मे'' इति पुराणांतरोक्तेः। यः श्रीपतिः स एव तदीयगणानां पतिः। पुरुषस्य स्त्रीपतित्वात्तत्संबंधिनिखिलोपकरणपतित्वस्य प्रथितत्वादतो लक्ष्मीगणानां पतिर्विष्णुरेवेति। किंभूताय ॐ ?। स्वस्ति कल्याणरूपिणे। स्वस्तीति कल्याणेऽर्थेऽव्ययम्। अत एवात्रापि पूर्ववच्चतुर्थ्या लुक्। ''मंगलं भगवान्विष्णुः'' इत्याद्युक्तेः। ''नमस्ते कमलाकांत सर्वकल्याणरूपिणे'' इति पुराणाच्च। ॐमित्यत्र ॐशब्दस्य ब्रह्मवाचित्वं स्वीकृतम्। तच्च सगुणस्यैवेति ज्ञेयम्। ''द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च'' इति श्रुतेर्ब्रह्मणो द्वैविध्यप्रसिद्धेर्मूर्तं सगुणममूर्तं च निर्गुणम्। निर्गुणस्य लक्ष्म्यादिपतित्वममूर्तत्वादेव न संगच्छते। सगुणस्य तु ''लक्ष्मीकांतं कमलनयनम्'' इत्यादिवाक्यात्॥ ''श्रियः पतिर्यज्ञपतिर्धरापतिः'' इति द्वितीयस्कंधोक्तेः। ''श्रियः पतिः श्रीमति शासितुं जगत्'' ''इत्यादिमहाकविप्रयोगाच्च तत्संगच्छत एवेति॥ २॥

श्रीविष्णोः सर्वदेवाधिपत्येनोत्कृष्टत्वात्तत्पक्षेऽन्योऽप्यर्थः। ॐ ज्ञानं तदेव स्वं धनं येषां ते। ॐस्वाः योगिनः ''भक्तिर्धनं भक्तिमतां ज्ञानं हि योगिनां धनम्। विद्याधनं च विदुषां शीलं हि योषितां धनम्॥'' इत्यभियुक्तोक्तेः। ''महेशे ब्रह्मणि विष्णौ त्रिगुण्यां प्रणवेऽपि च। ॐकारः शब्द्यते शुद्धौ ज्ञाने त्रय्यां च कोविदैः॥'' इत्यनेकार्थध्वनिवाग्विलासोक्तेः। ''स्वः स्वीयात्मधनेषु च'' इति हलायुधः। ॐस्वा ज्ञानयोगिनस्तैः स्तीर्यते ध्यायत इति ॐस्वस्तिर्विष्णुः। 'स्तृञाच्छादन' इत्यस्मादौणादिको डिप्रत्ययस्ततष्टिलोपे रूपसिद्धेः। धातूनामनेकार्थत्वाद्ध्यानार्थतापि स्तृणातेर्युक्तैव। ''धातवश्चोपसर्गाश्च निपाताश्चेति ते त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्'' इति वैयाकरणराद्धांतात्। अत एवोक्तं ''योगिभिर्ध्यानगम्यं'', ''ध्यायंति यं योगिनः'' इति च। श्रिया सर्वोत्कृष्टकीर्त्या गण्यते संख्यायते स्तूयते वेति श्रीगणः; ''सर्वोत्कृष्टा यस्य कीर्तिस्स श्रीगण उदाहृतः'' इति निरुक्तेः। न हि विष्णोरधिका कस्यचिदपि कीर्तिरस्ति। ''न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः'' इति श्रीगीतास्वर्जुनोक्तेः। स चासावीशः सर्वनियंता चेति श्रीगणेशः। 'सर्वस्येशानः सर्वस्य वशी च' इति श्रुतेः। पुनरोंस्वस्तिशब्देन कर्मधारयः। ॐस्वस्तिश्चासौ श्रीगणेशश्चेति तथा। कोऽर्थः ?। विष्णवे नमः। ''विष्णुरेव परं ब्रह्म'' इति स्कांदोक्तेः॥ ३॥

परब्रह्मध्यानस्य परमानंदहेतुत्वात्पुनर्विष्णुपक्ष एव व्याख्यायते—''यदुवंशेऽवतीर्णस्य विष्णोर्वीर्याणि शंस नः'' इति श्रीदशमोक्तेर्विष्णुशब्दः श्रीकृष्ण एव मुख्यया वृत्त्या वर्तते, अत एवामरसिंहेन जैनेन प्रतिपक्षीभूतेनापि विष्णुनामकथनोत्तरं 'वसुदेवोऽस्य जनकः' इत्युक्त्या तस्यैव विष्णुत्वं व्याख्यातम्। अत एव श्रीव्यासदेवेनाप्युक्तम्—''एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्'' इति। ॐविष्णुशब्दवाच्यः कृष्णस्तेन स्वस्ति कल्याणं यस्य तदोंस्वस्ति व्रजमंडलं ''व्रजभूमिविहारी च व्रजमंडलस्वस्तिकृत्'' इति व्रजमाहात्म्योक्तेः। तस्य ॐस्वस्तिनो व्रजमंडलस्य श्रीः शोभा गण्यते, येन स ॐस्वस्तिश्रीगणः श्रीकृष्णः ''शोभा कल्याणलक्ष्मीषु श्रीशब्दः सेवने श्रुतौ'' इति मार्तंडः। ''व्रजाभा कृष्णचंद्रेण गण्यते सर्वदा प्रभो'' इत्यपि व्रजमाहात्म्ये। पुनरीशशब्देन पूर्ववत्कर्मधारये पूर्ववत्॥ ४॥

अपरोऽप्यर्थः कृष्णपक्ष एव। ॐकृष्णस्तेन स्वस्ति कल्याणं यासां ता ॐस्वस्तयो गोप्यः। ''सख्यः स्वस्तिकृदस्माकं न हि नंदात्मजं विना'' इति व्रजमाहात्म्येऽन्योन्यं गोप्युक्तेः। ''व्रजजनार्तिहन् वीरयोषिताम्'' इति श्रीदशमोक्तेश्च। ॐ स्वस्तीनां गोपीनां

श्रीः शोभा कल्याणं वा यया सा। ॐस्वस्तिश्रीः राधा, "राधा, गोपीकदंबस्य शोभा सृष्टेह चात्मना" इति। आत्मना श्रीकृष्णेन स्ववामांगतः सर्वगोपीनां समूहस्य शोभा राधैव सृष्टेति निरूपितं ब्रह्मवैवर्ते। सा गण्यते पत्नीत्वेन येन स ॐस्वस्तिश्रीगणः स चासावीशश्चेति तथा। यद्वा ॐस्वस्तिश्रिया गणा गोपीसमूहास्तेषामीशस्तथा राधापतये गोपीनाथाय वा कृष्णाय नम इत्यर्थः॥ ५॥

ॐशुद्धिस्तां सूत इति ॐसूराचारः "शुद्धिराचारमाश्रिता" इत्युक्तेः। तेनासंति दीप्यंत इत्योंस्वस्तय ऋषयः 'अस गति-दीप्त्यादानेषु' भौवादिकस्ततस्तिप्रत्ययः। तान्श्रीणाति हिनस्तीति ॐस्वस्तिश्री रावणः। धातूनामनेकार्थत्वादत्र श्रीणातिर्हिंसार्थकः, प्रत्ययोऽत्र क्विप्, तस्य गणा राक्षसास्तेषामीः संपत्तिः ॐस्वस्तिश्रीगणेस्तां शमयति रावणादिवधेन नाशयतीति ॐस्वस्ति श्रीगणेशो रामचंद्रस्तस्मै नमः। अत्र ण्यन्ताच्छमेर्डप्रत्ययः॥ ६॥

अथवा "ज्ञानं महेश्वरादिच्छेत्" इत्युक्तेर्ज्ञानकामनया शिवपक्षेऽपि व्याख्यास्यामः। अवति पालयति विश्वमित्योम्। औणादिकप्रयोगः, ॐविष्णुस्तस्यैव पालकत्वात्। सुष्ठु दुष्टादितिजनाशकत्वेन साधुत्राणार्थमस्तिर्भवनमवतारो यस्य स स्वस्तिर्विष्णुः। "संरक्षणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे॥" इति श्रीमुखोक्तेः। "स्वस्तिदः स्वस्तिकृत्स्वस्ति" इति विष्णुसहस्रनामस्वपि स्वस्तिशब्दो विष्णुवाचको दृश्यते। ॐ चासौ स्वस्तिश्चेति ॐस्वस्तिः। यद्यपि स्वस्तिशब्दोऽव्ययेषु पठितः, तथापि "न तु शब्दनिर्देशे" इत्युक्तेर्विभक्तेलुङ्नेति ज्ञेयम्॥ ॐस्वस्ति श्रयति सेवत इति ॐस्वस्तिश्रीर्महादेवः। "यमामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै। स एष साक्षात्पुरुषः पुराणः" इति पार्वतीं प्रति स्वयं शिवेनाष्टमस्कंधे मोहिन्युपाख्याने उक्तत्वात्। "तव वरदवरांघ्रावाशिषेहाखिलार्थे यदि रचितधियं मां विद्यलोकोपविद्धम्" इति दक्षोपाख्याने च। "अतो महेशोऽपि विहाय भेदबुद्धिं सदा सेवत एव विष्णुम्" इति विद्वन्मोदतरंगिण्यां चिरंजीवभट्टोक्तेश्च। गणाः प्रमथास्तेषामीशो गणेशः, 'गणः संघे च प्रमथे' इत्यभिधानात्। ॐस्वस्तिश्रीश्चासौ गणेशश्चेति तथा, शिवाय नम इत्यर्थः॥ ७॥

नन्वयमपि पक्षो विष्णोरेव, ॐस्वस्ति श्रयतीत्यनया निरुक्त्या विष्णोः प्राधान्यस्य शिवस्य च सेवकत्वस्योक्तत्वात्। यस्य पक्षो यत्र वर्ण्यते तत्र तस्यैव महत्त्वं वर्ण्यते, अतो मृडमहत्त्वसूचकोऽपरः पक्षोऽत्र विरच्यते। ॐमा शुद्धया स्वस्ति कल्याणं येषां ते ॐस्वस्तयो विप्राः "शुद्धया ब्राह्मणतावृद्धिरशुद्धया शूद्रता भवेत्" इत्यादिपुराणात्। तैः श्रीयते सेव्यत इति ॐस्वस्तिश्रीर्महादेवः "त्वं हि भगवन्देवेषु ब्राह्मणोऽहं मनुष्येषु ब्राह्मणः ब्राह्मणो हि ब्राह्मणमुपधावति" इति जाबालोपनिषदुक्तेः, "शिवो विप्रो हरिः क्षत्री" इत्यादिपराशरपुराणोक्तेश्चेशस्य ब्राह्मणदेवत्वाद्ब्राह्मणसेव्यत्वमस्तीति। ईं लक्ष्मीं गच्छतीतीगो विष्णुः 'लक्ष्मीरीकार उच्यते' इत्येकाक्षरात्। ईगेन नम्यत इतीगणः शिवः। निपातनान्नस्य णः। प्रत्ययश्चात्र डः। स चासावीशश्चेतीगणेशः, यद्वा ॐज्ञानं सूते इति ॐसूर्वेदः "वेदो वै ज्ञानकारणम्" इत्युक्तेः। ॐसुवो वेदस्यास्तिराविर्भावो यस्मात्स ॐस्वस्तिर्महादेवः। "त्वं शब्दयोनिर्जगदादिरात्मा" इति "सांख्यात्मनः शास्त्रकृतस्तवेक्षा" इति चाष्टमस्कंधे महादेवं प्रति लोकपालोक्तेः। "शास्त्रयोनित्वात्" इति सूत्राच्च। श्रीं गगयति भार्यात्वेनेति श्रीगणो विष्णुस्तस्येशः श्रीगणेशः, "सदाहं शंकरं सेवे वैकुंठेशोऽपि भो सुराः॥" इति पाद्मपुराणात्। ॐस्वस्तिश्चासौ श्रीगणेशश्चेति ॐस्वस्तिश्रीगणेशस्तस्मै तथा शिवाय नम इत्यर्थः॥८॥ "आरोग्यं भास्करादिच्छेत्" इति स्मृतेर्वक्तृश्रोत्रोरारोग्याप्तये श्रीसूर्यं प्रणमति। ॐशब्देन ब्रह्मविष्णुरुद्राणां बोधो भवति, "अकारो वासुदेवः स्यादुकारः शंभुरुच्यते। मकारो विधिवाचकः" इत्येकाक्षरात्। स्वर् स्वर्गे तप्यते सर्वोत्कृष्टत्वेनेष्ट इति स्वस्तिरिंद्रः स्वरव्ययोपपदात्तप ऐश्वर्येऽस्माद्दैवादिकात्कर्तरि डिप्रत्यय औणादिकः। श्रिया धनसंपत्त्या गण्यत इति श्रीगणः कुबेरः 'कुबेरः श्रीगणः श्रीदः शिवमित्रो धनाधिपः।' इत्यभिधानात्। स्वस्तिश्च श्रीगणश्चेति स्वस्तिश्रीगणौ इंद्रकुबेरौ, ॐमा विष्णुरुद्रब्रह्मभिः सहितौ स्वस्तिश्रीगणौ ॐस्वस्तिश्रीगणौ, तयोरीश ॐस्वस्तिश्रीगणेशस्तस्मै। तथा तदुक्तं भविष्योक्तादित्यहृदये–"ब्रह्मेंद्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः" इति इश एव वंद्यते न त्वनीशः। यतः सर्वैर्ब्रह्मादिदेवैः सूर्यो वंद्यतेऽतः स एव तेषामीश इति भावः। तथा च सूर्याय नमः, अस्त्वित्यध्याहार्यम्। "नहि क्रियाविनिर्मुक्तं वाक्यं भवती" त्युक्तेः। "कर्तृकर्मक्रियादीनां यदि स्थानं न लभ्यते। अध्याहारं तदा कुर्यान् मुख्यार्थप्रतिपत्तये॥" इत्यभियुक्तोक्तेश्च। अपेक्षितपदानयनमध्याहारः। इति सूर्यपक्षः॥ ९॥

चंद्रस्य "सोमोऽस्माकं ब्राह्मणानां राजा" इति सर्ववेदाधिकरणब्राह्मणकुलस्याधीशत्वात्सर्वकर्मारंभेऽनुकूलचंद्रस्यैव शुभं भवति। "कुर्याच्चंद्रबले सर्वम्" इति ज्योतिःशास्त्रोक्तेश्च प्रथमं तं नमति। श्रिया दीप्त्या विशिष्टा गणा भगणास्तेषामीशः श्रीगणेशः, यद्वा श्रिया शास्त्रसंपत्त्या विशिष्टो गणः श्रीगणः ब्राह्मणसमूहस्तस्येशस्तस्मै। किंभूताय श्रीगणेशाय? ॐ। कोऽर्थः? ब्रह्मरूपिणे, "नक्षत्राणामहं शशी" इति श्रीमुखोक्तेः। पुनः स्वस्ति कल्याणकारिणे "पितृदेवमनुष्याणां स्वस्तिकर्ता निशाकरः।" इत्यादिपुराणात्। इह स्वस्तिपदं स्वस्तिकर्तरि लाक्षणिकम्। लक्षणा हि मुख्यार्थबाधे गौणार्थकल्पनम्। सा चानेकविधा। 'मंचाः क्रोशंति' 'शोणो धावती'त्याद्युदाहरणैरुदाहृता ग्रन्थेषु। यथेह मंचपदं मंचस्थे शोणपदं रक्तवर्णवत्पश्वादौ लाक्षणिकं तथात्रापि स्वस्तीति स्वस्तिकर्तरि। लक्षणाबीजं त्वन्वयानुपपत्तिः। क्वचित्क्वचिच्च तात्पर्यानुपपत्तिः। इह च तात्पर्यानुपपत्तिरेवेत्यलमतिप्रसंगेन। इति चन्द्रपक्षः॥ १०॥

अथोंकारस्य "ओङ्कारो वै सर्वा वाग्" इत्यादिश्रुतेः सर्ववाग्रूपत्वात्तद्ध्यानस्य च "कामदं मोक्षदं चैव" इत्युक्तेः सर्वाभीष्टहेतुत्वाच्चादौ तदेवाह-ॐस्वस्ति श्रीगणेशाय नमः। अत्र षट् पदच्छेदाः कार्याः। हे श, कोऽर्थः ? हे वरेण्य "शश्च शोभावरेण्ययोः" इति वामनः। ननु हेशब्दः संबुद्धिद्योतको भवत्यत्र तदभावात्कथं हेशेत्युक्तं ? तत्रोच्यते-"हेशब्देन विनापि स्यात्क्वचिदंतेऽपि हेपदम्। यथा राम प्रसीद त्वं राम हे त्वां भजाम्यहम्" इति प्रबोधचंद्रिकोक्तेर्हेशब्देन विनापि संबुद्धिर्न विरुद्धेति। अथ प्रकृतम्। त्वमों, कोऽर्थः ? ॐकारमक्षरं ब्रह्मस्वरूपमयध्याय। 'अय गता'वित्यस्य धातूनामनेकार्थत्वाद्ध्यानार्थतापि। "अनुक्तमप्यूहति पंडितो जनः" इत्यादिप्रयोगदर्शनादनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति बहुधा प्रपञ्चितं शाब्दिकैरतोऽयतेः परस्मैपदप्रयोगोऽपि न विरुद्ध इति। नन्वोङ्कारस्य ध्यानं न कोऽपि करोतीति चेत्तत्राह—"ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायंति योगिनः। कामदं मोक्षदञ्चैव ॐकाराय नमो नमः" इति मंत्रात्। तद्ध्यानं तु योगिनोऽपि कुर्वंत्यन्येषां तु का कथेति भावः। किंभूतम् ॐ ?। नमः। सर्वोत्कृष्टत्वेन नमस्कारार्हम्। 'णम् प्रह्वत्वे' इत्यस्मादौणादिकोऽसुप्रत्ययः। सर्वोत्कृष्टत्वञ्च प्रणवस्य ब्रह्मविद्योपनिषदि व्याख्यातम्-"ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः। शरीरं तस्य वक्ष्यामि स्थानं कालं लयं तथा॥ तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः। तिस्रो मात्रार्द्धमात्राश्च अक्षरस्य शिवस्य च॥ ऋग्वेदो गार्हपत्यश्च पृथिवी ब्रह्म एव च। अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः॥ यजुर्वेदोऽन्तरिक्षञ्च दक्षिणाग्निस्तथैव च। विष्णुश्च भगवान्देव उकारः परिकीर्तितः। सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च। ईश्वरः परमो देवो मकारः परिकीर्तितः॥ सूर्यमंडलमाभाति अकारः शंखमध्यगः। उकारश्चंद्रसंकाशस्तस्य मध्ये व्यवस्थितः॥ मकारश्चाग्निसंकाशो विधूमो विद्युतोपमः। तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्नितेजसः॥ शिखा च दीपसंकाशा यस्मिन्नुपरि वर्तते। अर्द्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता। पद्मसूत्रनिभा सूक्ष्मा शिखा या दृश्यते परा। सा नाडी सूर्यसंकाशा सूर्यं भित्त्वा तथापरम्॥ द्वासप्ततिसहस्राणि सूर्यं भित्त्वा तु मूर्द्धनि। वरदः सर्वभूतानां सर्वं व्याप्यैव तिष्ठति॥ कांस्यघंटानिनादस्तु यथा लीयति शांतये। ॐकारस्तु तथा योज्यः शांतये सर्वमिच्छता॥ यस्मिन् संलीयते शब्दस्तत्परं ब्रह्म गीयते। ध्रुवं हि चिंतयेद्ब्रह्म सोऽमृतत्वाय कल्पते॥" इति। कस्मै ? स्वस्ति। कोऽर्थः ?। स्वस्तये मोक्षाय। अत्र चतुर्थी त्वव्ययत्वादेव न। "कल्याणे भवने मोक्षे स्वस्तीत्युक्तस्तथा हरौ" इत्यभिधानात्। यद्वा, किंभूतमोंस्वस्ति ? मंगलरूपम्। "सर्वेषां मंगलानां च बीजं प्रणव एव हि" इत्यादिसंहितोक्तेः। च पुनः श्रीगणे कामाप्त्यै श्रियंते स्पृहयालुभिरिति श्रियः कामाः, गण्यते प्राप्यत इति गण्, गणनं प्रापणमित्यर्थः। धातूनामनेकार्थत्वादाप्त्यर्थाद्भर्भावे क्विपि रूपम्। श्रियां गण्, श्रीगण् तस्मै तथा। तथा च "ॐकारं बिन्दुसंयुक्तम्" इति मंत्रार्थोऽत्र ध्वनितः। इत्योंकारपक्षः॥ ११॥

अथ च शास्त्रज्ञानस्य "गुरुमूलमिदं सर्वं शास्त्रज्ञानं सुरेश्वरि" इति शंभुवाक्यात्। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति श्वेताश्वतरश्रुतेश्च गुरुभक्तिजन्यत्वादादौ गुरुनतिरेव कार्या, अ... गुरुपक्षेऽपि दशाक्षरीं योजयति—ॐज्ञानं तदेव स्वं धनमोंस्वं तेन ज्ञानधनेन स्तभ्नाति विकर्मप्रवृत्त्या संसारे भ्रमन्तं शि... रुणद्धीत्योंस्वस्तिर्गुरुः। "गिरतीह पाप्मानम्" इति श्रुतिप्रतिपादितो गुरुपदार्थोऽनेन ध्वनितः। 'स्तंभु रोधने' अस्मात्कैय्या... कादौणादिको डिप्रत्ययः कर्तरीति। अत्र दृष्टांतः-यथा कृतापराधं नरं गृहीत्वा राजपार्श्वे गच्छंतं तत्प्रियः कश्चिद्धनं द... ततस्तं मोचयति, एवं गुरुरपि ज्ञानधनं दत्त्वा कर्मणः सकाशान्मोचयति शिष्यमिति ध्येयः। न हि गुरूपदेशं विना संस... शाम्यतीति भावः। श्रीर्लक्ष्मीस्तां गच्छति प्राप्नोतीति श्रीगोविष्णुस्तं नमतीति श्रीगणः। साधनमस्य शिवपक्षे वर्णि... ॐस्वस्ति श्रीगणपदाभ्यामत्र "श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्यर्थोऽपि ध्वनितः। ॐस्वस्तिश्चासौ श्रीगणश्चेति ॐस्वस्तिश्री... पुनरीशपदेन कर्मधारयः पूर्ववत्। किञ्च "आचार्यवान्पुरुषो वेद" इति श्रुतेर्भगवत्स्वरूपज्ञानमपि गुरुप्रसादादेव भवत... विस्तरेण। इति गुरुपक्षः॥ १२॥

इन्द्रस्य सर्वदेवराजत्वात्सोऽपि शास्त्रादौ ध्येय एवेत्यत इंद्रपक्षेऽप्यस्य योजनामाह-ओमा विष्णुना वामनरूपेण ... कल्याणं यस्य स ॐस्वस्तिरिन्द्रः श्रिया समेधिता गणाः श्रीगणा देवाः "श्रिया समेधिताः सर्वे उपारमत विग्रहात्" इति ब्रह्मप्रे... नारदस्य देवासुरसंग्रामे देवान्प्रत्युक्तेः। अत्र मध्यमपदलोपी समासः, तेषामीशः॥ श्रीगणेशॐस्वस्तिश्चासौ श्रीग... ॐस्वस्तिश्रीगणेशस्तस्मै इंद्राय नमः॥ १३॥

अथ शेषस्य सर्वाधारत्वात्सर्वसर्पगणमुख्यत्वेन सर्पादिभीतिवारणाय तमप्यत्र नमस्करोति-शाय नमः। कोऽर्थः ? शेषा... नमः। "शं वदंति बुधाः शेषम्" इत्येकाक्षरात्। किंभूताय शाय ?। ॐस्वस्तिश्रीगणे। ॐशब्देन सत्त्वादिगुणत्रयमुच्यते "त्रिगुण्यां प्रणवेऽपि च" इत्यभिधानात्। तथा च ओमा गुणत्रयेण सुष्ठु अस्ति भवनं यस्य तदोंस्वस्तिभवनमत्र स्थितिसंहारयो... रप्युपलक्षणम्। तच्च ब्रह्मांडं तस्य श्रीः शोभा गण्यतेऽत्रेत्योंस्वस्तिश्रीगण् तस्मै, तथा गणसंख्यानेऽतोऽधिकरणे क्विप्। सहस्रशि... रसश्शेषस्य कस्मिंश्चिच्छिरोमुकुटैकदेशे सिद्धार्थ इव शोभा ब्रह्मांडस्येति पञ्चमस्कंधादौ विशेषतः प्रपंचितम्। व्याख्यानि च विस्तरभियेह न लिखितानि। इति शेषपक्षः॥ १४॥

"अनाराध्य जगद्धात्रीं विष्णुभक्तिर्न जायते ।" इति ब्रह्मवैवर्ते प्रकृतिखंडोक्तेः, किञ्च "आराधिता सैव नृणां भोगस्वर्गापवर्गदा" इति मार्कंडेयोक्तेश्चैहिकामुष्मिकफलार्थिभिरवश्यं दुर्गा सेव्या । अतस्तत्पक्षेऽप्यस्या योजनां कुर्मः-ॐभ्यो वासुदेवादिभ्यः सुष्ठु अस्ति भवनं यस्याः सा ॐस्वस्तिः । "यद्भूच्छांभवं तेजस्तेनाजायत तन्मुखम् । ब्रह्मणस्तेजसा पादौ" इत्याद्युक्तेः । ॐभ्य इति बहुवचनं सप्तशतीस्तवप्रसिद्धदेवग्रहणार्थम्, अन्यथा ब्रह्मादित्रयाणामेव ग्रहणं स्यादिति । यद्वोंभ्यो विष्ण्वादिभ्यः सुष्ठु अस्तिराविर्भावो यासां ता ॐस्वस्तयो वैष्णव्याद्याः शक्तयः । तदुक्तम् "ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः । शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः" इति मार्कंडेयोक्तेः । ताभिः श्रीयुतिर्यस्याश्चंडिकायाः सा ॐस्वस्तिश्रीस्तस्या गणो महाकाली-महालक्ष्मी-महासरस्वतीरूपस्तस्येशो मूलप्रकृतिरूपस्तस्मै नमः । अत्र पुंस्त्वं तु "नागं लिंगं च योनिं च बिभ्रती नृपमूर्द्धनि" इति रहस्योक्तेस्तस्याः पुंरूपत्वं स्त्रीरूपत्वञ्चास्तीति न विरुद्धम् । "पुंस्त्वं नास्ति शंभुविधिकृष्णे स्त्रीत्वं नास्ति, तथैव भवान्याम् ।। कमलायां च तथैव च वाण्याम्" इति रघुनाथतीर्थोक्तेश्च । यद्वा ॐस्वस्तिश्रिया गणा भैरवादयस्तेषामीशाः, यद्वा "निश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका । त एव सद्यः संभूता गणाः शतसहस्रशः ।।"इत्युक्तेर्गणा निःश्वासाद्भूतास्तेषामीशा तस्यै नमः । अस्या आर्षत्वाट्टाबाडागमाद्यभावेन पुंस्त्वम् । ऋषिरत्र वेदः । वैदिकत्वं चास्य सर्ववाङ्मयादित्वेनापौरुषेयत्वादिति । "अपौरुषेयं वाक्यं वेदः" इति पूर्वमीमांसायां वेदलक्षणोक्तेः । न हि केनचित्पुरुषेणैतद्रचितमनादित इत्थमेवेयं दशाक्षरी विद्येति प्रसिद्धेः । इति दुर्गापक्षः ।। १५ ।।

अथ "वाय्वधीनमिदं जगत्" इत्यादिपुराणात्सर्वचेष्टाहेतुत्वाद्वायुमप्यत्र नमस्करोति-ॐभिस्सत्त्वरजस्तमोभिः सुष्ठु अस्ति भवनं स्थित्युत्पत्तिसंहृतिरूपं यस्य तद्ब्रह्मांडमोंस्वस्ति, तस्य श्रीः कल्याणं येन स ॐस्वस्ति श्रीर्वायुः "त्वं वायो सर्वब्रह्मांडे स्वस्तिकृत्प्राणदः सदा । त्वदधीनमिदं सर्वं जगतश्चेष्टितं विभो ।। अतीव कश्मलो देहस्त्वत्संयोगात्परः शुचिः । त्वत्त्यक्तस्तु पवित्रोऽपि विप्रदेहोऽशुचिर्भवेत् ।। पवित्राणां पवित्रस्त्वं मंगलानां च मंगलम्" इत्यादिसंहितोक्तेः । गण्यंते ज्ञानकर्मोपकारकत्वेनेति गणा इंद्रियाणि, तेषामीशः प्रवृत्तिहेतुत्वात्स्वामी गणेशः । प्राणवायुं विना किमपि कर्तुमिन्द्रियगणैर्न शक्यते, तेषां तदधीनत्वात् । प्राणेंद्रियसंवादोऽपि श्रूयते शास्त्रे । तथा हि-इंद्रियैरुक्तं-वयं शरीरधारकाणि, प्राणैरुक्तं वयमिति; परस्परं विवादकत्वात्तन्निर्णयाय ब्रह्मपार्श्वं गताः । ब्रह्मणोक्तं शरीरान्निर्गत्य पृथक्पृथक् प्रवेशः पुनः शरीरे क्रियतां, यत्प्रवेशेन शरीरमुत्तिष्ठते तदेव महदिति श्रुत्वा सर्वाणींद्रियाणि प्रविष्टानि । शरीरे चेष्टापि नागता, पुनर्ब्रह्मणा वायुं प्रत्युक्तं, त्वं प्रविश । ततः प्रविष्टे वायौ शरीरमुत्थितमभूत्ततो ब्रह्मणोक्तमयमेव शरीरधारकः सर्वेभ्यो महान्सर्वेषां भवतां स्वामीति । तथा च श्रुतिः "अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति" इति । अत एव वक्ष्यते-"उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा" इति प्रथमपंचदशाध्याये । अथ प्रकृतमनुसरामः । ॐ स्वस्तिश्रीश्चासौ गणेशश्चेति तथा तस्मै प्राणरूपाय वायवे नमः । इति वायुपक्षः ।। १६ ।।

"ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम्" इति स्मृतेः, "अग्निमीळे पुरोहितम्" इति श्रुतेश्च, पुरोग्रेऽग्निमहमीळे ईडे डलयोरैक्यात् । किंभूतं हितं ? सर्वहितकरम् "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।।" इति । तथा च पूर्वमग्निरेव हितेप्सुभिः सेव्योऽतोऽग्निपक्षेऽपि दशाक्षरीं योजयति-ॐमा ज्ञानेन स्वस्ति कल्याणं येषां ते ॐ स्वस्तयो जीवाः, "ऋते ज्ञानान्न मुक्तिः" इति श्रुतेः, "कषायपक्तिः कर्माणि ततो ज्ञानं प्रवर्तते । ज्ञानान्मोक्षमवाप्नोति" इति स्मृतेश्च । ताञ्श्रीवाञ्श्रयत्याश्रयतीत्योंस्वस्ति श्रीः संसारस्तस्य गणो लोभादयः । "न विद्यते ते ग्रहणानुबंधः कुतो नु तद्भेतव [illegible]कृताः । लोभादयो ये बुधलिंगभावाः ।।" इति गोवर्धनधारिणं प्रतींद्रोक्तेः । अग्रहणानुबंधः संसारस्तद्धेतवः, तत्कृता [illegible]नकृता इत्यर्थः । अत्र संसारस्य लोभादीनां चाज्ञानकार्यत्वेन समानत्वाद्गणगणिभावो ध्येयः । तस्य संसारगणस्य लोभादेरीशो [illegible]कः । अत्रायमाशयः-अग्नेर्यज्ञादिकर्मणो मुख्यसाधनत्वात्तत्साध्या चांतःकरणशुद्धिः । सा च लोभादिनिवृत्तिरूपैवातः [illegible]न्तःकरणे ज्ञानमुदेति । अत एवोक्तम् "कर्मणा ज्ञानमातनोति ज्ञानेनामृती भवति अथामृतानि कर्माणि" इति श्रुत्या कर्म[illegible]नसाध्येन यागादिनेत्यर्थः । तथा चाग्नये नमः । इत्यग्निपक्षः ।। १७ ।।

श्रीधर्मराजस्य सर्वरोगाधिपत्वाद्धर्माधर्मविवेचकत्वेन सर्वलोकहिताय प्रवृत्तत्वाच्च शास्त्रादौ वक्त्रध्येतॄणां रोगादिभयापत्तये ध्येयत्वान्नमस्करोति—ॐविष्णुः स च गदाधरो गयाक्षेत्राधीशरूपोऽत्र ग्राह्यस्तेन स्वस्तिर्मुक्तिर्येषां ते ॐस्वस्तयः पितरः । "गदाधरो गयाक्षेत्रे पितॄणां मोक्षदायकः ।" इति बृहन्नारदीयोक्तेः । तैः श्रीयते सेव्यते इत्योंस्वस्तिश्रीर्धर्मराजः । "यस्यामग्निष्वात्तादयः पितृगणाः" इत्यादिपंचमस्कंधोक्तेः । गणा निजसैनिकास्तेषामीशो गणेशः 'यमः सैन्ये स्तुत्यनरे' इति कोशात् । पुनरोंस्वस्तिश्रीश्चासौ गणेशश्चेति तथा तस्मै । यद्वा ओमा ज्ञानेनार्थात्तत्सहशेन गयापिंडप्रदानेन स्वस्ति येषां त ॐस्वस्तयः पितरः । श्रिया-त्रिलोकलक्ष्म्या विशिष्टा ये गणा एकत्रिंशत्संख्याः "विश्वो विश्वभुगाराध्य" इत्यादिना मार्कंडेयोक्तास्ते श्रीगणा ॐस्वस्तीनां पितॄणां श्रीगणास्तेषामीशः स्वामी धर्मराजस्तस्मै नमः "वाराणस्यां च यो वासो हरिभक्तिस्तथैव च । गयापिंडप्रदानं च ब्रह्मज्ञानं च तत्समम्" इति बृहन्नारदीयात् । इति धर्मराजपक्षः ।। १८ ।।

अथ च कुबेरस्य सर्वधनाधिपत्वात्तदाप्तये सोऽपि नमस्कार्य इति । ओमा शंकरेण स्वस्ति कल्याणं यस्य स ॐस्वस्तिः कुबेरस्तस्य शिवसखत्वप्रसिद्धेः । सखा हि सख्युः कल्याणं करोत्येवेति भावः । श्रीणां धनानां रक्षका गणाः श्रीगणा यक्षास्तेषामीशः श्रीगणेशः, ॐस्वस्तिश्चासौ श्रीगणेशश्चेति तथा तस्मै कुबेराय नम इत्यर्थः । इति कुबेरपक्षः ॥ १९ ॥

वरुणस्य जलाधीशत्वेन जलभीनिवृत्तये तमपि नमस्करोति–ॐज्ञानं तदेव स्वमोंस्वं तत् स्तृणंत्याच्छादयंत्योंस्वस्तीनि रत्नानि मुक्ताहीरकादीनि "न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः । श्रीमदादाभिजात्यादिर्यत्र स्त्रीद्यूतमासवः" इति दशमे नारदोक्तेः । अत्र स्तृणातेर्डिः । तैः श्रीर्यस्य स ॐस्वस्ति श्रीर्वरुणः । "मुक्तावैदूर्यहीरकैः । अलंकृतशरीराय वरुणाय नतोऽस्म्यहम्" इति मंत्रात् । गणानां यादोगणानामीशो गणेशः "यादोगणानामृषभं प्रचेतसम्" इति तृतीयस्कंधोक्तेः । ॐस्वस्तिश्रीश्चासौ गणेशः ॐस्वस्तिश्रीगणेशस्तस्मै वरुणाय नम इत्यर्थः । इति वरुणपक्षः ॥ २० ॥

अथ वागधिष्ठातृदेवीमप्रतिबद्धवाग्व्यापाराय नमति–ॐज्ञानं सूत इत्योंसूः सरस्वती, "बुद्धिप्रदां शारदाम्" इत्युक्तेः । अस्ति श्रीरणयेत्यस्तिश्रीः "धनं शोभां सर्वमानं लभते वाक्प्रसादतः ॥" इत्यादिपुराणात् । ॐसूश्चासावस्तिश्रीरित्योंस्वस्तिश्रीः । गणानां छात्रादिसमूहानामीशोऽनयेति गणेशा ॐस्वस्तिश्रीश्चासौ गणेशा च ॐस्वस्तिश्रीगणेशा, तस्यै तथा यथा पुंस्त्वमत्र तथा व्याख्यातमधस्तात् सरस्वत्यै नम इत्यर्थः ॥ २१ ॥

श्रीभागवतपक्षेऽपि व्याख्यायते । तथा हि–"व्यासो नारायणः स्वयम्" इत्युक्तेरोंव्यासस्तस्य स्वस्ति स्वास्थ्यं येन तदों-स्वस्ति श्रीभागवतं श्रीः कीर्तिर्गण्यते संख्यायते येन तत् "विद्यावतां भागवते परीक्षा" इत्याद्युक्तेः, यद्वा श्रिया सर्वोत्कृष्टकीर्त्या गण्यते यत्तच्छ्रीगणम्; "क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा । तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥" तथा "राजंते तावदन्यानि पुराणानि सतां गणे । यावन्न श्रूयते साक्षाच्छ्रीमद्भागवतं परम् । तथा भागवतं नाम पुराणं ब्रह्मसंमितम्" इति चोक्तेः । ॐस्वस्ति च तच्छ्रीगणं चेति ॐस्वस्तिश्रीगणं तदेशं ब्रह्मरूपत्वात् । ॐस्वस्तिश्रीगणेशं तस्मै श्रीमद्भागवताय नम इत्यर्थः । अत्र विशेषापेक्षा चेत्तर्हि आद्यपद्यव्याख्याशत्यां श्रीभागवतपक्षो दृश्यः । ग्रंथविस्तरभियात्र बहु वक्तव्यमप्युज्झितमिति ॥ २२ ॥

अथ व्याख्यातां दशाक्षरीं विद्यां पुनरुल्लिख्य श्रीमद्भागवतं श्रीवंशीधरशर्मा दशाक्षरीनमस्कृतदेवानुकम्पया टीकान्तर-सम्मत्या व्याकरोति—

ॐस्वस्तिश्रीगणेशाय नमः । गणेशं गिरिजासूनुं श्रीस्कंदं श्रीशिवं गुरून् ॥ भारतीं बुद्धिदां देवीं मातरं पितरं तथा ॥ १ ॥ नमस्कृत्याखिलान्कुर्वे टीकाकारांश्च भक्तितः ॥ श्रीधरस्वामिभावार्थदीपिकायाः प्रकाशनम् ॥ २ ॥ हरिविधिवसिष्ठशक्तिपराशरव्यास-शुकदेवान् ॥ वैशंपायनमुग्रश्रवसं च नुमः पुराणगुरुमुख्यान् ॥ ३ ॥ त्रय्यारुणिं कश्यपञ्च सावर्णिमकृतव्रणम् ॥ रोमहर्षणहारीतौ मैत्रेयञ्च मृकंडजम् ॥ ४ ॥ शेषं सांख्यायनं चाथ चतुरः सनकादिकान् ॥ श्रीमहाभारतं वेदान्कणादं जैमिनिं मुनिम् ॥५॥ पतंजलि-मक्षपादं व्यासञ्च कपिलं हरिम् ॥ छन्दःकृतः शोककृतः साहित्यकृतिनोऽखिलान् ॥ ६ ॥ श्रीनृसिंहं प्रणम्यैव श्रीधरस्वामिनः कृतेः ॥ विवृतिं श्रीधरस्यैव प्रसादादधुना ब्रुवे ॥ ७ ॥ श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा ॥ भविष्यति तत्कृपया तदभिव्यक्तिराशु मे ॥ ८ ॥ कचिच्च श्रीधरत्यक्तपदानामपि वर्णनम् ॥ यथामति माथुराणां प्रेरणातो मुहुर्मुहुः ॥९॥ करिष्यामि विदां प्रीत्यै क्षमंतां ते मम त्वराम् ॥ पूर्वाचार्यानुमहान्मे सर्वेऽर्थाः प्रतिभांतु वै ॥१०॥ वृंदारण्यांतर्गते नंदजेन सेवाकुंजे संयुतां कीर्त्तिजाताम् ॥ नत्वा तस्याः प्राप्य चाज्ञां स्वबुद्ध्या कुर्वे व्याख्यां श्रीधरस्वामिवृत्तेः ॥ ११ ॥ वंशीधरः कौशिकगोत्रगौडवंश्यः कृती श्रीधरवृत्तिवृत्तिम् ॥ करोमि तत्त्यक्तपदव्रजस्य तथा गुरूणामनुकंपयैव ॥ १२ ॥ येषां न चेतो हरिभक्तिमध्ये मग्नं न षट्शास्त्रसमुद्रमध्ये ॥ ते नैव ज्ञास्यंति मम प्रयासानन्धा यथा वारवधूविलासान् ॥ १३ ॥ विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् ॥ नहि वंध्या विजानाति गुर्वीं प्रसववेद-नाम् ॥ १४ ॥ तथापि क्रियते ग्रंथः संति यद्यपि दुर्जनाः ॥ न हि दस्युभयाल्लोको दैन्यवानेव वर्त्तते ॥ १५ ॥ किञ्च ॥ वंदेऽहं दुर्जनान्पूर्वं सज्जनांश्च ततः परम् ॥ मुखप्रक्षालनात्पूर्वं पायुप्रक्षालनं यथा ॥ १६ ॥ लोके गरीयसी माता मातृतोऽप्यधिकः खलः ॥ माता पुनाति हस्ताभ्यां खलास्तु जिह्वया मलम् ॥ १७ ॥ अतिविशदहृदयाधिगम्ये काव्ये खिद्यति नरो न जाड्ये स्वे ॥ निंदति कंचुककारं प्रायः शुष्कस्तनी नारी ॥ १८ ॥ किञ्च ॥ खलो मृगयते दोषं गुणपूर्णेषु वस्तुषु ॥ वने पुष्पफलाकीर्णे पुरीषमिव सूकरः ॥ १९ ॥ यदत्र स्खलितं किञ्चिद्विद्वांसः पूरयंतु तत् ॥ यदत्र सौष्ठवं किंचित्तद्गुरोरेव मे न हि ॥ यदत्रासौष्ठवं किंचित्तत्सर्वं मे गुरोर्नहि ॥ २० ॥ अल्पं गुणं परेषां प्रथितं कुर्वंति साधवो लोके ॥ तेषामेष स्वभावस्तृप्ताः स्युस्ते परोदयेनैव ॥ २१ ॥ इति ॥ न मे शास्त्रबलं किञ्चिन्न च बुद्धिबलं कचित् ॥ प्रवृत्तो बलमाश्रित्य गुरूणां केवलं कृतौ ॥ २२ ॥ तरणज्ञानहीनो ना यथा तरति नौकया ॥ नदीं प्रबलदुस्तीर्यामयत्नेन तथा ह्यहम् ॥ २३ ॥ श्रीगुरूणां बलेनैव तरिष्यामि न संशयः ॥ शास्त्रसिन्धुं विज्ञजनैर्दु-स्तीर्यमपि सर्वथा ॥ २४ ॥ यशोदात्मज गोपीश यथा प्रेरयसीह माम् ॥ तथा ब्रवीमि मे नाथ दोषो मास्तु कदाचन ॥ २५ ॥ श्रीविश्वनाथविजयध्वजजीवगोस्वामीचित्सुखश्वसनजादिभिरीरितायाः ॥ टीका अतीवगहनाः सुविलोक्य शास्त्रं श्रीभारतं च

रचितोऽयमपि प्रबंधः ॥ २६ ॥ अथ माथुरविद्वज्जनप्रेरणया श्रीवंशीधरशर्मा माथुरमण्डलावतीर्णश्रीकृष्णप्रीतये श्रीधरस्वामिभावार्थदीपिकारंभकृतश्रीरामप्रणतिलक्षणं मंगलं व्याकरोति–"ॐ नमः श्रीपरमहंसे"ति ॥ हंस-परमहंस-श्रीपरमहंसभेदात्त्रिधा हंसा भवंति । तत्र हंसा हि दुग्धजलविभेदनिपुणाः संति । येषां चंचुस्पर्शाज्जलाद्दुग्धं पृथग्भवति, ते च दुग्धं पीत्वांबु त्यजंति । परमहंसास्तु चिज्जडविभेदनिपुणा भवंति, ते च जडांशं प्रधानं पुरुषरूपमात्मानं पृथग्वर्णयित्वा स्वशिष्येभ्यो ज्ञापयंति । श्रीपरमहंसा हि चैतन्यैकनिष्ठाः प्रकृतिं सर्वथा विचारेण त्यक्त्वा कदापि तां न स्मरंति, किन्तु सर्वदा चैतन्यरूपमेव परमात्मानं भावयंति । ते च शुद्धप्रेमभक्ताः श्रीविष्णुमेवान्येभ्योऽप्युपदिशंति प्रकृतिं तच्छक्तित्वात्ततो भिन्नां नेच्छंति । प्रकाशशक्तिः रवेरिव तैः श्रीपरमहंसैः श्रीनारदादिशुद्धभक्तैरास्वादितः सेवितश्चासौ चरणकमलयोश्चिदेव मकरंदो यस्य तस्मै, भक्तजनानां मानसे चेतसि निवासो यस्य तस्मै, श्रयति सेवते सदा रामचरणमिति श्रीः । रमन्ते योगिनो ध्यानेन क्रीडन्त्यत्रेति रामः । यद्वा राति कुक्षौ विश्वं गृह्णाति प्रलये इति रः । यद्वा रापयति प्रकाशयति सर्वमिति रः । 'रा दीप्त्यादानयोः', अतः पक्षे केवलात्पक्षेऽतर्भावितण्यर्थाड्डुः । अम्यते प्राप्यते भक्त्यादिनेत्यमः । 'अम गत्यादौ' । रश्चासावमश्चेति रामः । जगज्जन्मादिहेतुर्मुक्तप्राप्य इत्यर्थः । चंदत्यानंदयति त्रैलोक्यं रावणादिवधेनेति चन्द्रः । रामश्चासौ चंद्रश्चेति रामचंद्रः, श्रिया सहितो रामचन्द्रः श्रीरामचंद्रस्तस्मै । रात्यखिलं यद्वा राजते रघोः कुले वा रामः । यद्वा राणां राक्षसानां मरणं येनेति वा राम इति । अत्राथर्वणीयरामतापनीयोपनिषत्प्रमाणम्–"चिन्मयेऽस्मिन्महाविष्णौ जाते दाशरथे हरौ । रघोः कुलेऽखिलं राति राजते यो महीस्थितः ॥ स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः । राक्षसा येन मरणं यांति स्वोद्रेकतोऽथ वा ॥ रामनाम भुवि ख्यातमभिरामेण वा पुनः । राक्षसान्मर्त्यरूपेण राहुर्मनसिजं यथा ॥ प्रभाहीनांस्तथा कृत्वा राज्यार्हाणां महीभृताम् । धर्ममार्गचरित्रेण ज्ञानमार्गेण नामतः ॥ यथा ध्यानेन वैराग्यमैश्वर्यं यस्य पूजनात् । तथा रात्यस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥ रमंते योगिनोऽनंते नित्यानंदे चिदात्मनि । इति रामपदेनासौ परब्रह्माभिधीयते ॥ चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थे ब्रह्मणो रूपकल्पना" इत्यादि । ननु श्रीमद्भागवतशास्त्रे आदिमध्यावसानेषु श्रीकृष्णस्यैव प्रतिपाद्यत्वं मुख्यत्वेनास्त्यतस्तन्मंगलमेवादौ विधेयमस्ति, यद्वा श्रीधरस्वामिनो हीष्टदेवः श्रीनृसिंहोऽस्ति, तन्मङ्गलं वा विधेयम् । वस्तुतस्तु "कार्यारंभे गणेशश्च पूजनीयः प्रयत्नतः" इति स्मृतेर्गणेशमङ्गलस्याप्यावश्यकत्वमस्ति, तत्कुतः श्रीरामचंद्रमंगलं कृतमिति चेत्, अत्रेदमवधेयम्—यद्यपि श्रीभगवतः सर्वावताररूपाणां वस्तुतस्तुल्यतैव, तथापि श्रीरामचंद्रं विना समुद्रे सेतुर्न कुत्राप्यवतारे कृतोऽस्ति, अतस्तत्कृपया ममापि श्रीभागवतार्णवटीकारूपसेतुकरणं भूयादिति विमृश्यैव श्रीरामनतिरूपं मंगलं कृतमिति प्रतीयते । यद्वा बालगोपालानां श्रीराम एव परमेश्वरत्वेनावसितोऽतः सर्वप्रसिद्धपरेशनतिरेवादौ युक्तेति ॥ १ ॥

रसाकारब्रह्मभजनेनैवाभीप्सितचतुर्वर्गसिद्धिरिति श्रीमद्भागवतसिद्धांतं सूचयन्निजेष्टस्मरणमंगलमाह-वागीशेति । वाचामीशा सरस्वती । यद्वा ईशा विधिनिषेधयोर्जीवान्नियमयंती वेदलक्षणा वागिति । अनेन वदनस्मरणेनापरविद्यावाप्तिर्ध्वनिता । श्रीर्हेमरेखारूपेणास्ते इति । अनेनोरःस्मरणेनेष्टसंपल्लाभो ध्वनितः । तदेवमपरविद्यालक्ष्म्यवाप्त्या त्रिवर्गसिद्धिः सूचिता । संवित् परविद्या । अनेन हृदयस्मरणेन मोक्षावाप्तिश्च सूचिता । तदुक्तं-"या वै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥" इति । वक्ष्यति च–"धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः । एकमेव हरेस्तत्र कारणं पादसेवनम्" इति । व्रियते विक्षिप्यते चेतस्त्रैलोक्यं वाऽनेनेति ना विषयसमूहो हिरण्यकशिपुश्च, तं हिनस्तीति नृसिंहस्तम् । यद्वा नृणां सिंहः श्रेष्ठतमो वीर्यवत्तरश्चेति नृसिंहः । तदुक्तं नृसिंहतापनीये-"अथ कस्मादुच्यते नृसिंहमिति ? यस्मात्सर्वेषां भूतानां सिंहो वीर्यतमः श्रेष्ठतमश्च तस्मान्नृसिंह आसीत्परमेश्वरो जगद्धितं वा एतद्रूपमक्षरं भवति । 'प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥' तस्मादुच्यते नृसिंहमिति" ॥ २ ॥

विश्वसर्गेति ॥ कृष्णाख्यमिति नामरूपोक्त्यापि मायातत्कार्यरहितमित्याह—परं धाम, मुक्तप्राप्यमित्यर्थः । इत्थमेव "वेत्ता च वेद्यं च परं च धाम" इति भाष्यकृद्भिर्व्याख्यातं जगतो धामेति लक्ष्यरूपतोपपादनम् । श्रीदशमे व्याख्यातव्यमपीहौत्सुक्याच्छ्रीकृष्णं प्रणौति स्वामी विश्वसर्गेति ॥ वयं तदनिर्वचनीयमियत्तया गुणरूपादि वेयदीदृगिति वक्तुमशक्यं धाम तेजोरूपं ब्रह्म नमाम । बहुत्वं शिष्याभिप्रायम् । नमतेः "विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । लोट् च" इति प्रार्थनायां लोट् । नमनेन प्रार्थयाम इत्यर्थः । ननु यत्तदोर्नित्यसंबंधादत्र यच्छब्दोपादानं कथं न कृतमिति चेत्तत्राह—'तत्त्वमसी'ति श्रुतौ 'तदिति ब्रह्मणो नामे'ति श्रुतौ च तच्छब्दस्य ब्रह्मवाचकत्वदर्शनात्तच्छब्दोऽत्र ब्रह्मवाचकः । सोऽहं हंस इत्यत्र च । ततश्चात्र यच्छब्दोपादानं नापेक्षते "प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" इति काव्यप्रकाशोक्तेः । यथा कुमारसंभवे "कला च सा कांतिमती कलावतः" इत्यत्रेति । "गृहदेहत्विट्प्रभावा धामानी"त्यमरः । किंभूतं ? श्रीयते सेव्यते ब्रह्मादिभिः श्रीकृष्णेन वेति श्री राधा "सर्वैरापूज्यते देवै राधा वृन्दावने वने" इति ब्रह्मांडे ब्रह्मोक्तेः, "यच्चित्यमखिलेश्वरैः" इति तत्रैव नारदोक्तेश्च । "राधैवाराध्यते मया" इति श्रीकृष्णोक्तेश्च । "राध्यते सा भगवता राधा इत्यभिधा स्फुटम् ।" इत्यादिपुराणोक्तेश्च श्रीशब्दो राधार्थकः । यद्वा श्रयत्याराध्नोति सर्वदा वृन्दावननिकुंजगं श्रीनंदनंदनमिति निरुक्त्यापि श्री राधैव । "वृंदावने निकुंजस्थो राध्यते सर्वदा यया । नन्दसूनुरतो राधा सोच्यते मुनिसत्तम" इति नारदीयात् । कृषति निजसमीपमाकर्षति वेणुरवेण

बल्लवीगणमिति कृष्णो यशोदानंदनः। ननु मधुरगीतादिना त्वन्येऽपि प्रमदागणमाकर्षन्ति तत्र को विशेष इत्यरुच्याह—कृषति विलिखति निजानां संसारमिति कृष्णः। सदानन्दरूपो भक्तजनपापौघनाशकश्च "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति तापनीश्रुतेः सदानंदरूपः। "कोटिजन्मकृतं पापं कृषिरित्युच्यते बुधैः। तन्नाशनकरो देवः कृष्ण इत्यभिधीयते॥" इति ब्रह्मवैवर्तोक्तेः। पापौघनाशकश्च कृष्णपदार्थः। श्रिया राधया सहितः कृष्णः श्रीकृष्णः। यद्वा "श्रीश्च ते लक्ष्मीश्च ते पत्न्यौ" इति श्रुतौ श्रीपदेन राधा लक्ष्मीपदेन चाभ्यां तुलसीसरस्वत्यौ ग्राह्ये। "लक्ष्मी सरस्वती विष्णोस्तुलसी च तृतीयिका। गंगा चतुर्थी विज्ञेया भार्या वैकुंठवासिनः॥" इति प्रकृतिखंडे बहुधोक्तेः। 'श्री'शब्देनैव गंगाया अपि ग्रहणम्। तथा च श्रीश्च श्रीश्च श्रीश्च श्रीश्चेत्येकशेषसमासेन श्रिय इति स्यात्। तथा च श्रीभी राधा-रामा-गंगा-गीभिस्सहितः कृष्णः श्रीकृष्णः स आख्याऽभिधा यस्य तच्छ्रीकृष्णाख्यम्। 'गोस्त्रियोः' इति ह्रस्वः। एतेनैताभिस्सह श्रीकृष्णनत्या प्रेमसंपत्पावित्र्यवाग्वैभवाश्च नमस्कर्तुरवश्यं भाविन इति ध्वनितम्, पुनः सर्गश्च विसर्गश्च सर्गविसर्गौ, विश्वस्य सर्गविसर्गौ विश्वसर्गविसर्गौ, तावादी येषां स्थानादीनां तानि च नवलक्षणानि विश्वसर्गविसर्गादिनवलक्षणानि तैर्नवभिर्लक्षितं लक्ष्यत्वेन ज्ञापितं; यद्यपि "अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः॥" इति लक्षणानि दशोक्तानि, तथापीहाश्रयरूपस्य दशमस्य लक्ष्याभिप्रायेण नवेत्युक्तिर्बोध्या। पुनः परं सर्वेभ्यः परतरम् "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥" इति श्रुतेः। यद्वा परं निर्भयम्, "भीषास्माद्वातः पवते" इत्यादिश्रुतेः "यद्बिभेति स्वयं भयम्" इत्युक्तेश्चास्मात्सर्वेषां भयं न त्वस्य कस्यचिदपि तदित्यर्थः। अन्येषां देवानां गृहीतशस्त्रत्वेन सभयत्वप्रतीतेः श्रीकृष्णस्य वंशीविभूषितकरत्वान्निर्भयत्वं स्फुटमिति। पुनर्जगतामनेकब्रह्मांडानां धामेति तत्पुरुषेणाश्रयरूपलक्ष्यत्वञ्च स्फुटमेव। "ईदृग्विधाविगणितांडपराणुचर्या वाताध्वरोमविवरस्य च ते महित्वम्" इति परमेष्ठ्युक्तेः। जगंति स्थावरजंगमात्मकानि सर्वाणि धामानि यस्येति समासस्तु सर्वांतर्यामितामाह। अत एव वक्ष्यति "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इति। ननु "तस्मा इदं भागवतं पुराणं दशलक्षणम्" इत्युक्तेः सर्गादीनि दश महापुराणलक्षणानि श्रीमद्भागवतस्यैव संति कथं तानि श्रीकृष्णस्य संजाघटतीति। तत्रेदमवधेयम्—"इदं भागवतं नाम पुराणं ब्रह्मसंमतम्" इत्युक्तेः "तेनेयं वाङ्मयी मूर्तिः श्रीकृष्णस्य न संशयः" इति पाद्मोक्तेश्च श्रीकृष्णश्रीभागवतयोर्भेदाभावेनैक्यात्तत्रापि तानि न विरुद्धानीति। किञ्चैतानि च सर्गादीनि सर्वमहापुराणसाधारणानि श्रीभागवतस्य लक्षणान्युक्तानि यच्चासाधारणं लक्षणं तदिहैव मात्स्याद्युक्तं वक्ष्यति "ग्रंथोऽष्टादशसाहस्र" इत्यादिना। लक्षणञ्च लक्ष्यतावच्छेदकसमनियतत्वम्। लक्ष्यं च यदुद्दिश्य लक्षणं प्रवर्त्तते इति। इह च महापुराणं लक्ष्यं, तत्र लक्ष्यतावच्छेदकं महापुराणत्वं, तत्समनियतत्वं सर्गादिदशकस्येति समन्वयः। श्रीभागवतस्य महापुराणत्वं तु द्वादशे वक्ष्यति—"श्रीमद्भागवतं नाम सर्गादिदशलक्षणम्। महापुराणमल्पश्च पंचलक्षणमिष्यते॥" इति। यत्त्वमरसिंहेन 'पुराणं पंचलक्षणम्' इत्युक्त्वा पंचलक्षणस्यैव पुराणत्वं प्रतिपादितं तदल्पपुराणविषयमेव; अन्यथा 'दशलक्षणसंयुक्तं पुराणं कवयो विदुः। केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया।" इति व्यासोक्तिर्व्याकुप्येतेति॥ ३॥

अथ हरिहरयोरभेदज्ञानान्निर्बाधेष्टसिद्धिरिति बोधयन्नेतौ स्मरति—माधवेति॥ मायाः लक्ष्म्या धवः पतिर्मधुवंशे भवो वा, मां मायां धुनोति "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया।" इत्युक्तेर्द्रावयतीति वा माधवो विष्णुः, उमायाः पार्वत्याः धव उमाधवः, स च स च माधवोमाधवौ। 'मा मायालोकमात्रोः' इति 'धवः पतिर्धवो भीरुः' इति च धरणिः। 'उमा कात्यायनी गौरी' इत्यमरः। सशक्तिकनतिस्तु वर्णनशक्त्याधिक्यलाभायेति ध्येयम्। ईशाविति ईश्वरद्वयासंभवादभेद एव तयोः पर्यवस्यतीत्याह—नामरूपादिभेदस्तु तत्तद्भक्तप्रीतिवशाज्जात इति। तदुक्तं—"हरहर्योः प्रकृत्यैक्यं साधनैक्यं तथापि तौ। प्रत्यये भजतां रुच्यां संप्राप्तौ भिन्नरूपताम्॥" इति हरिहरशब्दयोस्तदर्थभूतविष्णुशिवयोश्च प्रकृतिश्चिद्रूपतास्वभावो 'हृञ् हरणे' इति धातुश्च साधनं भजनादिकं कर्त्राद्यर्थप्रत्ययगुणोत्पादनञ्च प्रत्ययः, प्रतीतिः अकारेकारौ च रुचिरिच्छा मेघश्यामकर्पूरगौरकांतिश्च रूपं चतुर्भुजपंचमुखत्वादि अकारांतेकारांतशब्दरूपं च। भजतां नामसेविनाम्। इच्छयाऽकारेकारादिप्रत्यये कृते सतीत्यन्वयः। अथ भक्तानां प्रत्यये प्रतीतौ कांत्या भिन्नरूपतामिति च। सर्वाश्च ताः सिद्धयो जन्मौषधितपोमंत्रयोगजरूपास्तासां विधायिनौ कर्तारौ। जन्मसिद्धयः पक्ष्यादीनां वियद्गमनाद्या औषधिसिद्धयो रसायनादिना वलीपलितादिनाशनादयस्ताम्रादेः स्वर्णरूप्यादिसंपादनाद्याश्च तपःसिद्धयो यथा कर्दमादीनां विमानसंपादनाद्या मंत्रसिद्धयो वृश्चिकसर्पादेर्विषहरणाद्याः योगसिद्धयोऽणिमाद्या इति विवेकः। परस्परमात्माऽभेदो ययोस्तौ परस्परात्मानौ परस्परैकस्वरूपौ 'शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः। ईषदप्यंतरं कृत्वा रौरवं नरकं व्रजेत्" इत्यादिपुराणात्। "यो हरिः स शिवः साक्षाद्यः शिवः स हरिः स्मृतः" इति हरिवंशाच्च, "मम रुद्रस्य यः कश्चिदंतरं परिकल्पयेत्। तस्य पुण्यक्रियाः सर्वा निष्फलाः स्युर्न संशयः" इति पाद्मे सत्यां प्रति श्रीकृष्णोक्तेश्च। पुनः परस्परं या नुतिः स्तुतिस्सा प्रिया ययोस्तौ। शिवस्तुत्या विष्णुः प्रीणाति विष्णुस्तुत्या च शिवः प्रीणातीति। 'नतिप्रियौ' इति पाठे तु परस्पराणामन्योन्यभक्तानां या नतिस्सा प्रिया ययोस्तौ तथा वैष्णवो भूत्वा यदि शिवं नमति तदा विष्णुः प्रीणाति शैवो भूत्वा

यदि विष्णुं नमति तदा शिवः प्रीणातीति। "शैवो भूत्वा नमेद्विष्णुं तेन शंभुः प्रसीदति। वैष्णवश्चेन्नमेच्छंभुं तेन विष्णुः प्रसीदति॥" इति संहितोक्तेः। किञ्च लंकाविजयावसरे श्रीरामचन्द्रेणाब्धितटे शिवलिंगं संस्थाप्य तस्य 'रामेश्वर' इति नाम कृतं तदाकर्ण्य, मुनिभिः श्रीरामः पृष्टः–भगवान्! कोऽस्य पदस्यार्थः ?। तदा श्रीरामेणोक्तं–रामस्येश्वरो रामेश्वरः, पुनश्च संज्ञयाकुलितैः श्रीशिवः पृष्टः–भगवन्नब्धितटश्रीरामस्थापितरामेश्वराख्यलिंगस्य कोऽर्थः ? तदा श्रीशिवः प्राह–राम ईश्वरो यस्येति रामेश्वरः पुनर्मुनिभिर्विमृष्टमेतौ परस्परस्तुतिप्रियत्वाद्वस्तुत एकस्वरूपावेवेति। तदुक्तं–"रामस्तत्पुरुषं ब्रूते बहुव्रीहिं महेश्वरः। रामेश्वरपदे प्राप्ते मुनयः कर्मधारयम्" इति॥ ४॥

संप्रदायेति॥ संप्रदायो ब्रह्मादिपरंपरागताद्वैतरूपस्तदनुवर्तनेऽपि पौर्वापर्यस्मरणमावश्यकम्, अन्यथा "कृष्णस्तु भगवान्स्वयम्" इत्यादिपूर्वापरवाक्यानालोचने 'अथाहमंशभागेन' इत्यादावंशावतारत्वादिव्याख्यानं स्यात्। अथवा संप्रदायः श्रीमद्भागवतव्याख्यानपद्धतिः सा यथा ब्रह्मणा नारदं प्रति "त्वमेतद्विपुलीकुरु" इत्युक्त्वा "यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय" इत्यादिरूपा। हरिलीलाप्राधान्येन श्रीभागवतं वर्णय, न तु भक्तिरसविघातेन केवलं तत्त्वमिति। यथा भगवत्पादैः "मामेव ये प्रपद्यंते" इत्यादिपदानां भगवदेकशरणाद्यर्थं विहाय ब्रह्मात्मैक्यज्ञानार्थतादिव्याख्यातं तथात्र भक्तिप्राधान्यविधौ "भक्तिः सिद्धेर्गरीयसी। भक्त्याहमेकया लभ्यः" इत्यादौ भक्तिरसविघातकं ज्ञानादिप्राधान्यतया व्याख्यानं न कार्यमिति ब्रह्मणा पद्धतिर्विहिताऽत एव "नंदगोपकुमाराय" इत्यादौ नंदयतीति नंदः, गां वेदलक्षणां वाणीं पातीति गोपः, कुमविद्यां मारयतीति कुमारः, नन्दश्चासौ गोपश्चासौ कुमारश्चेत्येवं भागवतं व्याचिकीर्षुः कश्चिद्विपश्चितिः श्रीकृष्णेनैव वारित इति महाजनप्रसिद्धेः। तथा च ब्रह्मोपदिष्टसंप्रदायानुरोधेनेत्यर्थः। तदनुरोधेऽपि पौर्वापर्यानालोचने कृष्णेशतया व्याख्यानं मायाप्रतिबिंबत्वं मायिकविग्रहत्वं मन्वाद्यभिप्रेतकेवलभेदादिव्याख्यानं च स्यात्। स्वरसतः पौर्वापर्यालोचने नैतदिति ध्येयम्। अक्षरार्थपदार्थवाक्यार्थास्तु श्रीभागवतस्य दुर्ज्ञेया इति मत्वाह–श्रीभागवतस्य भावार्थानां निर्गलितानां यद्वा श्रीभागवते श्रीकृष्णे यो भावो भक्तिः स एवार्थः प्रयोजनं यस्यास्सा चासौ दीपिका चेति तथा वितन्यते विस्तार्यते॥ ५॥

वस्तुतो नाहं भावार्थप्रकाशनेऽपि शक्त इत्याह–क्वेति। द्वौ कशब्दौ महदंतरं द्योतयतः। यत्र क्षीराब्धौ मंदरोऽयुतयोजनप्रमाणो गिरिभेदः मज्जत्यधो गच्छति तत्रैव क्षीराब्धौ परमाणुर्जालांतर्गतदृश्यत्रसरेणुषष्ठो भागः। तदुक्तं–"जलांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः। तस्य षष्ठतमो भागः परमाणुः स उच्यते॥" इति॥ ६॥

मूकमिति॥ वाचालं भूषितं पर्याप्तं वा, लंघयते। इह लंघनफलस्यानात्मगामित्वादात्मनेपदं नेष्टमिति न ध्येयम्; "ततान सोपानपरंपरामिव" इत्यादौ कालिदासादिभिस्तन्मर्यादाया अनादृतत्वात्। अत्र 'परमानंदमाधव' इति गुरुनामेति संप्रदायविदस्तेन गुरुवंदनमपि फलितम्। "एका क्रिया द्व्यर्थकरी प्रसिद्धा रसालसेकः पितृतर्पणञ्च" इति न्यायात्। मूकोऽत्र शास्त्राभ्यासरहितो ज्ञेयः। इह ध्रुवो दृष्टांतः। पंगुः पादरहितः। अत्र दृष्टांतो गरुडाग्रजः। यद्वा यत्कृपा यत्सामर्थ्यं वाचालमपि मूकं करोतीति। अत्र दृष्टांतः कात्यायनः। "कात्यायनो हि शंकरदत्तसूत्रव्याख्याप्रवृत्तपाणिनिं पराजिग्ये, स च रुद्रं प्रति वृत्तं श्रावयामास। रुद्रेणोक्तं–मदभिमुखं शास्त्रार्थे तं योजय, पुनस्तमहं शासिष्यामीति। स तथैव कृतवान्पुनः खंडनप्रवृत्तं कात्यायनं शंकरोऽहमित्युक्त्वा मूकं चकार। पुनः स रुद्रं ध्यानेनाराध्य वाग्व्यापारं लेभे, रुद्राज्ञया पाणिनिन्यूनतां स्ववार्तिकैः पूरयामास"त्यैतिह्यात्। इहापि विष्णुशिवयोरभेद एवाभिप्रेतः॥ ७॥

भक्तिभक्तभगवन्माहात्म्यप्रतिपादकं शास्त्रमपि श्रवणपठनपूजनवंदनादिभिः काममोक्षादिप्रदं किमुत भक्ता भक्तिर्भगवांश्चेति व्यंजयितुं श्रीमद्भागवतशास्त्रं स्तौति–श्रीमदिति। श्रीमद्भागवतमिति षडक्षरमभिधा यस्य "श्रीमद्भागवते महामुनिकृते" इति मूले व्यवहारात्। भागवतमिति व्यवहारस्तु भामा सत्येतिवत्। "तारः प्रणव ॐकार" इति विश्वः। स ब्रह्मैव जनिर्बीजं यस्य सः। स्कन्धैः प्रकांडैः ततो विस्तृतः। तनोतेः क्तः। प्रविलसंती देदीप्यमाना या भक्तिः सैवालवालः परितः कृतजलस्थित्यर्थं मध्यपरिमाणः खातस्तत्रोदयोऽत्र स्थितिर्यस्य सः। द्वात्रिंशच्च त्रयश्च शतानि चेति त्रिपदद्वंद्वः। 'कपिंजलानालभेत' इतिवदनिर्द्धारितविशेषं बहुत्वं त्रित्वे पर्यवस्यति; तेन पञ्चत्रिंशदधिकशतत्रयसंख्याकाः शाखा इत्यर्थः। समाहारोत्तरद्वंद्वे तु त्रिशतीति स्यादिति। एतेनाघासुरवधाद्यध्यायाभिप्रायं द्वात्रिंशतपदमिति कस्यचिदुत्प्रेक्षितं प्रत्युक्तम्; हरिलीलाग्रंथे बोपदेवेन–"निरोधो दशमस्कंधे नवत्यध्याय ईरित" इत्युपक्रम्य "वधश्च वत्सबकयोस्तथाघासुरभोगिनः। वत्सचोरब्रह्ममोहो ब्रह्मणा स्तवनं हरेः॥' इत्युक्तत्वेन तद्विरोधापत्तेः। अष्ट दश च सहस्राणीति पृथक्पदेनान्वयः। समासे त्वष्टादशेति स्यात्। इष्टं सकामानां त्रिवर्गं निष्कामानामपवर्गं च ददातीतीष्टदः। अतिसुलभो नृणां कल्पवृक्षापेक्षया। सुरतरुर्हि स्वर्गं गत्वा लभ्यते, अयं त्वत्रैव लभ्यते इत्यत उक्तम्–अतिसुलभ इति। सर्वेभ्यः पुराणेतिहासादिशास्त्रेभ्य उपर्युपरिष्टादलौकिकफलदत्वादतिशयेन वर्तते॥ ८॥

तदेव दर्शयितुं ग्रंथावतरणिकामाह—अथेति। नानापुराणानां श्रीमद्भागवतेतराणां शास्त्राणां धर्मशास्त्रवेदांतशास्त्राणाञ्च प्रबंधै रचनाभिः। चित्तस्य प्रसक्तिं प्रसादम्। तत्र तत्र पुराणेतिहासादिप्रबंधेषु श्रीमद्भगवतः श्रीकृष्णस्य गुणानां लीलानां वर्णनं प्रधानं मुख्यं यत्र तद्भागवतशास्त्रं प्रारिप्सुः प्रारंभं कर्तुमिच्छन्। तस्मिञ्शास्त्रवर्णनादौ ये प्रत्यूहा विघ्नास्तेषां निवृत्त्यादिसिद्धये आदिना पुनर्विघ्नाभावसिद्धये तस्मिन्भागवते प्रतिपाद्या या परदेवता परब्रह्मरूपा तस्या यदनुस्मरणं मुहुः स्मरणं तदेव लक्षणं स्वरूपं यस्य तत्तथा। "मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथंते वीरपुरुषका आयुष्मत्पुरुषकाश्चाध्येतारो भवन्ति" इति भाष्यात्। यद्यपि शास्त्राणि "कपिलस्य कणादस्य गौतमस्य पतंजलेः। व्यासस्य जैमिनेश्चापि शास्त्राणि षड् विदुर्बुधाः॥" इत्यभियुक्तोक्तेः षडेव संति। तथापीह सर्वधर्मादिपुरुषार्थशासनान्मुख्यं शास्त्रत्वं श्रीव्यासप्रणीतत्वाच्च षडंतर्वर्तित्वमपीति। किञ्च प्रकरणप्रतिपाद्यार्थानां कात्स्न्र्येन प्रतिपादको ग्रंथः शास्त्रमेतस्य शास्त्रलक्षणस्यापि यथाकथंचिदत्र घटनादप्यस्य शास्त्रत्वमेवेत्यलम्। जन्मादीति॥ परं परमेश्वरं बिंबभूतमीश्वरमित्यर्थः। तेन मायाप्रतिबिंबितेश्वरव्यावृत्तिः। द्वेधाऽत्र प्रक्रिया—तत्राद्या यथा अविद्याप्रतिबिम्बो जीवः मायाप्रतिबिम्ब ईश्वरः। स चोपाधिभूतमायायास्त्रैगुण्यात्तत्तद्गुणविशिष्टमायाप्रतिबिम्बभेदेन ब्रह्मविष्णुशिवरूपो बिम्बभूतस्तु परमेश्वरो निरुपाधिकं ब्रह्मैवास चादिनारायणः श्रीकृष्ण इत्यादिपदैर्व्यवह्रियते। शिवपुराणादौ शिवादिपदैश्च। स च न स्वांशमायाप्रतिबिम्बितेश्वरधर्मैः सृष्ट्यादिकर्तृत्वादिभिरभिलिप्यते। द्वितीया यथा—अविद्या माया च। एकैव तत्प्रतिबिम्बो जीवः बिम्बभूतं चैतन्यमीश्वरो निरुपाधिक एक एव सृष्ट्याद्यारोपितधर्मैर्ब्रह्मविष्ण्वादिभेदव्यवहारभाक्। बिम्बत्वप्रतिबिम्बत्वाभ्यामनाक्रांतं शुद्धचैतन्यं निर्द्धर्मकं ब्रह्मेति द्विधैव प्रक्रियात्र शास्त्रे ह्युपलभ्यते। सर्वथैतच्छास्त्रपरमतात्पर्यगोचरो बिम्बभूतपरमेश्वरो निर्गुणं ब्रह्मैव तत्रोपलभ्यमानगुणानां चिन्मयत्वेन प्रकृतिपरिणामभूतगुणाश्रयत्वाभावात्। स्पष्टं चेदम्—"मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकम्। सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः॥" इत्यादौ। तमेव परमेश्वरमेव॥ स्वरूपतटस्थेति॥ यत्स्वरूपांतर्गतं सदितरव्यावृत्ततया लक्ष्यं बोधयति तत्स्वरूपलक्षणं यथा—गोः सास्नाशृंगादियावल्लक्ष्यकालमनवस्थितत्वेन स्वरूपानंतर्गतं यल्लक्ष्यमितरव्यावृत्तं बोधयति तत्तटस्थलक्षणम्। यथा गोविशेषस्यालंकारविशेषादि देवदत्तगृहस्य काकादि वा। प्रकृते सत्यं ज्ञानमानंदश्च परमेश्वरस्वरूपमेव सत्। असज्जडदुःखप्रपञ्चव्यावृत्ततया बोधयतीति स्वरूपलक्षणं संपद्यते। जगज्जन्मादिकारणत्वं तु तटस्थलक्षणम्। न हि तत्सर्वदास्ति, प्रलयादिकाले तत्तदभावात्। अतः स्वरूपानंतर्गतं सदाकाशादिव्यावृत्तमीश्वरं लक्षयतीति तटस्थलक्षणमिति। त्रयाणामहंकारसंवलितानां तमोरजःसत्त्वानां सर्गो भूतेंद्रियदेवतारूपस्तामसाहंकाराद्भूतसर्गो राजसादिंद्रियसर्गस्सात्त्विकादिंद्रियाधिष्ठातृदेवतासर्ग इति विवेकः। यत्र परमेश्वरे इत्यर्थ इति॥ 'मृत्तिकेत्येव सत्यम्, इत्यादावन्यत्रापि सत्यशब्दप्रयोगस्त्वापेक्षिक एव। परमसत्यत्वं तु परमेश्वरस्यैवेति भावः। अत्रान्यसत्तयाऽन्यस्य सत्यत्वे इत्यर्थ इति। न हि परसत्तया परस्य सत्यत्वं वास्तवं भवतीति भावः। तत्रेति वाक्यालंकारे, यथायथेति यथायथम्। यथास्वे यथाशब्दस्य द्वित्वमूह्यमिति। वारिणि समुद्रजले दूरत्वदोषेण नीलशिलाबुद्धिः कामलया शंखे पीतबुद्धिश्च। यथा सदसि दुर्योधनस्य स्थलभ्रमः, यथा वान्धकारस्थरक्तरूपमृदि खदिरांगारभ्रमः इत्यादिपदाद् ग्राह्यम्। मिथ्यापदार्थस्यामिथ्यात्वसाधनं न शोभनमिति चेत्तत्राह—यद्वेति॥ आधाराधेयभावेन सोपाधिकत्वमाक्षिप्यापाकरोति—तत्रेत्यादिना। कुहकमज्ञानम्। अनावृतसंविद्रूपे बिम्बभूत ईश्वरेऽज्ञानाश्रयत्वासंभवात्। अज्ञानविषयमात्रेण भ्रमाधिष्ठानता। न च तावतैश्वर्यहानिः, अज्ञानविषये मण्यादौ कपर्दिकाद्यारोपेऽपि स्वरूपप्रकाशादेर्बाधादर्शनात् जन्मादि यस्य स्थितिभंगस्य तथा तद्गुणसंविज्ञानः, यत इत्यव्ययनिर्देशः कारणस्याविकृतत्वमाह—तत्र परमेश्वरस्य कारणत्वे सद्रूपेण घटः सन्पटः सन्नित्येवं रूपेण यत्सत्त्वे यत्सत्त्वं सोऽन्वयः घटादिसत्त्वे सत्तासत्त्वस्य दृश्यमानत्वादन्वयः। आदिना वंध्यात्मजादिग्रहः। यदभावे यदभावः स व्यतिरेकः। खपुष्पाद्यभावे तत्र सत्ताया अप्यभावात्खपुष्पं सदिति प्रयोगादर्शनाद्व्यतिरेकः। अत्र न केवलं सत एवान्वयव्यतिरेकौ विमृश्यौ। किं तु मृदादिस्तस्यैव सतस्तौ। तथा च मृदादिविशिष्टसत्ताव्यतिरेकाधिकरणं तु तत्त्वादिभावरूपमपि प्रसिद्धं तत्कथमलीकस्य खपुष्पादेस्तदधिकरणतेत्यपरितोषादाह—यद्वेति॥ अनुवृत्तिस्तादात्म्येन प्रतीतिः व्यावृत्तिर्भेदः कार्येषु कारणस्यानुवृत्तिर्यथा सुवर्णकटकं सुवर्णमिति तादात्म्येन प्रतीतेः। कार्यस्य कारणावस्थायां नानुवृत्तिः। यथा सुवर्णे कुंडलं कटकं वेति प्रतीत्यभावात्। ननु मीमांसकैर्जगज्जन्माद्यनंगीकारात् कथं जन्मादिकारणत्वं भगवत इति चेदाह—यद्वा सावयवत्वेत्यादि॥ घटादिष्वात्मनि च गृहीतान्वयव्यतिरेकव्याप्तिकस्य सावयवत्वादिहेतोरस्य पदवाच्यजगति पक्षे परामर्शादिसामग्रीबलाद्यजन्मादि निश्चितं तद्यतो भवतीति संबंधः। हेतुपुरस्सरान्वयव्याप्तिः साध्याभावपुरस्सरा व्यतिरेकव्याप्तिरिति भेदः। तथा च इदं विश्वं जन्मादिमत्सावयवत्वात्। यत्र सावयवत्वं घटादौ तत्र जन्मादिमत्त्वं .यत्र जन्माद्यभाव आत्मनि तत्र सावयवत्वाभाव इति तटस्थलक्षणप्रतिपादिकां श्रुतिमाह—तथा चेति॥ यतः परेशात् इमानि चराचराणि भूतानि जीवानि प्रयंति प्रलयं प्राप्नुवंति यद्यमभिसंविशंति सर्वतः प्रविशंतीति श्रुतिपदार्थः। एतदर्थिका स्मृतिरप्यस्तीत्याह—स्मृतिश्चेति॥ आदौ सृष्ट्यारम्भे यो युगस्यागमस्तत्र चान्तमध्ये यत्र तिष्ठंतीत्यप्यनुसंधेयम्। "अव्यक्तादीनि भूतानि" इत्यादिश्रीगीतोक्तेरव्यक्तशब्दवाच्यप्रधानमत्र भगवच्छ्रीव्यासस्य ध्येयं प्रतीयत इत्याशंक्य समाधत्ते—तर्हीति॥ तर्हि शास्त्रारंभे प्रधानं प्रकृतिः अभितो जानातीत्यभिज्ञः सर्वज्ञानवान् स परमेशः ऐक्षत विचारयामास अहं लोकान्नु इति वितर्के सृजै रचयानि। इमान् सर्वान्, श्रुत्यर्थनिर्णायको न्यायः, न्यायाच्छारीरिकसूत्रादित्यर्थः।

सांख्याभिमतं प्रधानं जगत्कारणं न, तत्र हेतुरशब्दमिति । अशब्दत्वाद्वेदाप्रतिपाद्यत्वात् । नहि वेदो जडं प्रतिपादयति तत्र हेतुः, ईक्षतेः 'स ऐक्षत' इत्यत्र जगत्कर्तरीक्षणश्रवणात् । नन्वीश्वरस्य कर्तृत्वादिकं वैषम्यादिदोषाप्रसंगार्थं जीवकर्मापेक्षं जीवश्च धर्मादिकर्ता कर्मद्वारेश्वरस्य सृष्ट्यादिप्रयोजकत्वेन कारणताजयकर्तृबोधप्रयोजके जेतृत्वश्रुतेः । यथा च जीवो ध्येयत इति नेति । अविद्या वृत्तज्ञानैश्वर्यस्य जीवस्य ध्याने फलाभावात् । इत्यर्थं इति अल्पज्ञानजीवध्याने प्रयोजनाभावात्स्वतःसिद्धज्ञानमेव वयं धीमहीति ।

ननु समष्टिजीवस्य हिरण्यगर्भस्य "हिरण्यगर्भः" इत्यादिश्रुतेस्तदैश्वर्यस्यान्यतः प्राप्त्यश्रवणात्तन्निदानज्ञानस्यापि तथात्वाव-गतेरनावृत्तत्वमिति श्रुत्यर्थः स्पष्ट एव ॥ नेति ॥ नानाविधस्तोत्रैस्तुष्टस्तस्मै वेदं ददाविति व्यंजयति कविपदम् । यः परेशः विदधाति उत्पादयति प्रहिणोति ददाति तस्मै ब्रह्मणे तं देवं देदीप्यमानं हि स्फुटं स्वबुद्धिप्रकाशकमहं मुमुक्षुः शरणं संसाराद्रक्षकमित्यर्थः । अत्राक्षिपति–नन्विति ॥ स्वानि शिक्षादियुक्तानि लक्षणानि यस्याः सा स्वलक्षणा । ऋषीणां ज्ञानदानामृषभः श्रेष्ठः, विशेषत इदं पद्यं द्वितीयस्कंधे व्याख्यास्यते । पुनराक्षिपति–नन्विति ॥ इह लोकेऽत्यतिप्रसिद्धोऽर्थो न्यायः पूर्वेद्युराचार्याद्विदमधीत्य सुप्त्वा परेद्युः प्रबुद्ध आचार्यनिरपेक्ष एव पठति तद्वद्दैनंदिनकल्पेऽपि । महाकल्पादौ तु जातिस्मरवददृष्टविशेषात्कल्पांतरानुष्ठितकर्मोपासनबल-लब्धब्रह्मत्वाधिकारः कल्पांतरस्थवेदं स्मरत्वित्यर्थः । सूरयोऽपि कपिलादयोऽपि । अत एव स्वतःसिद्धज्ञानत्वादेव । असतः प्रपञ्चस्य गायत्र्या सर्वगायत्रीमंत्राव्यभिचारि धीमहीति पदसंवलितगायत्र्यर्थेन प्रारंभेणेत्यर्थः । चतुर्विंशत्यक्षरत्रिपाच्छंदसा प्रारंभ इत्यर्थो न युक्तः । चतुर्वेदैकगोचरतादृशच्छन्दोविशेषस्य क्वाप्यदर्शनेनैकस्मिन्नेव पुराणे तदसंभवात् । गायत्र्यर्थतास्येत्थम्–सवितृपदं जगत्प्रसवकारणपरं, तदर्थो 'जन्माद्यस्य यत' इत्यनेन पालनादिक्रीडार्थकदेवपदार्थोऽप्यनेनैव जन्मादीत्यादिपदेन पालनादिग्रहात् वाक्यपदार्थः, परपदेन परत्वोपपादकानि, सत्यादिपदानि भर्गपदार्थो धामपदेन । धीमहीति पदं स्वरूपेणैव तृतीयपादार्थः । 'तेने ब्रह्महृदे' त्यादिना समष्टिगर्भबुद्धिप्रेरकत्वोक्तेः सर्वव्यष्टिबुद्धिप्रेरकता त्वर्थसिद्धेति । गायत्रीमंत्रेण पदेन वा या ब्रह्मविद्या ख्यायते सारूप्यते प्रतिपाद्यते येन तद्रूपं, प्रतिपाद्यप्रतिपादकाभेदविवक्षया श्रीमद्भागवतमित्यर्थः । ब्रह्मविद्यापदेनात्र सगुणनिर्गुणविद्य-योर्ग्रहणम् । अत्र प्रमाणमाह–यथोक्तमित्यादि । गायत्रीं गायत्र्यर्थं धर्मस्य 'धर्मः प्रोज्झितकैतव' इत्युक्तलक्षणभागवतधर्मा-देर्विस्तरः वृत्रासुरस्य परमभागवतत्वात्तद्वधचरितस्यापि भागवतलक्षणत्वम् । अत्र सिंहपदेन सिंहासनं लक्ष्यते । भीमभीमसेनादिवत् । प्रोष्ठपद्यां भाद्रशुक्लपूर्णायाम् । अष्टादशसहस्राणि तत्पुराणं वेदाः प्रमाणमितिवद्व्यधिकरणसंबंधः । पुराणांतरे वामनपुराणे इत्यर्थः । हयग्रीवेणाश्वशिरोयुक्तेन दधीचिमुनिना प्रवर्तिता नारायणवर्माख्या ब्रह्मविद्येत्यर्थः । नारायणवर्मणो ब्रह्मविद्यात्वञ्च "एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतौ सत्यशंकितः" इत्यत्र टीकोत्थापितवचनेन गम्यते । शुकाय प्रोक्तं शुकप्रोक्तम् । केचित् शुकं प्रीणातीति शुकप्रो व्यासस्तेन प्रोक्तमित्याहुः । यद्वा शुकेन परीक्षिते प्रोक्तमिति चास्य शास्त्रस्यागताख्याने-नैव प्रवृत्तेर्वक्ष्यमाणत्वात् । अत एव लक्षणोक्तिपूर्वकं पाठादिविधानादेवेत्यर्थः । अयं भावः–न लक्षणोक्तिं विना भागवतं दद्यादित्येवं दानादिविधाने भगवता प्रोक्तंभागवतमिति समाख्यां विचार्य च "एवं चकार भगवान् व्यासः कृपणवत्सलः" इत्युक्त्या भगवद्व्यास-प्रणीतत्वेन पुराणमात्रस्य भागवतत्वसंभवात् शिवविष्ण्वादिदेवपाणिन्यादिमुनिष्वपि भगवच्छब्दप्रयोगात्तत्प्रतिपादकशिवविष्णु-ब्रह्मपुराणादेरष्टाध्याय्यादेश्च भागवतत्वसंभवाच्च न सामंजस्येन पदार्थनिर्णयः । तथा च भागवतं नामान्यच्छिवविष्णुपुराणादिक-मेव स्यादि-त्यतिव्याप्तिशंका स्याल्लक्षणोक्तौ विशेषनिर्णये न शंकनीयं न शंकितुं योग्यं भवति, सर्वत्र लक्षणोक्तेरतिव्याप्त्यादिनिरा-सार्थायाः सत्त्वात् । इत्यपि न शंकनीयमित्यत्रेत्यपीत्युक्त्या ब्रह्मविद्यारूपत्वोक्ते कर्मविद्यावन्मुमुक्षुभिरसेव्यमित्यपि न शंकनीयमिति बोध्यते । आलयमित्यादौ मुक्तादिसेव्यत्वस्य वक्ष्यमाणत्वाच्च गरुडपुराणेऽप्यस्य प्रशंसा । "अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यभूतोऽसौ वेदार्थपरिबृंहितः ॥ पुराणानां सामरूपः साक्षाद्भगवतोदितः । ग्रंथोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः" इति ब्रह्मसूत्राणामर्थोऽकृत्रिमो भाष्यभूत इत्यर्थः, तस्मात्तद्भाष्यभूते स्वतः सिद्धे तस्मिन्सत्यर्वाचीनमन्यद्भाष्यं स्वस्वकपोलकल्पितं तदनु-गतमेवादरणीयमिति गम्यते । भारतार्थस्य विनिर्णयो यत्र सः । एतेन भारतेनास्य कथाविरोधो हि प्रातीतिको न वस्तुतः; पदार्थानां दुर्ज्ञेयत्वात् । भारतस्यापि तात्पर्यं भागवतवद्भगवत्येवेत्यर्थः । यद्वा भारतस्यार्थविनिर्णयो वेदार्थतुल्यत्वेन विशिष्य निर्णयो यत्रेति गायत्रीभाष्यभूतोऽसाविति । यत्तु द्वादशे "ॐनमस्त" इत्यादिगद्येषु तदर्थत्वेन सूर्यः स्तुतस्तत्परमात्मदृष्ट्यैव, न तु स्वातंत्र्येणेत्य-दोषः । तथैवाग्रे शौनकवाक्यम् "ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः" इति । न चास्य भर्गस्य सूर्यमंडलमात्राधिष्ठानत्वम् । मंत्रे वरेण्यशब्देनात्र च ग्रंथे परशब्देन पारमैश्वर्यपर्यंततादर्शितत्वात् । तदेवमग्निपुराणेऽप्युक्तं–"ध्यानेन पुरुषोऽयं च द्रष्टव्यः सूर्यमंडले । सत्यं सदाशिवं ब्रह्म तद्विष्णोः परमं पदम् ॥" इति । भविष्येऽपि 'ध्येयः सदासवितृमंडलमध्यवर्ती नारायणः सरसि-जासनसंनिविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥' इति । श्रीमद्भागवताभिध इति ॥ भागवतत्वं तु भगवत्प्रतिपादकत्वं श्रीमत्त्वं भगवन्नामादेरिव तादृशस्वाभाविकशक्तिमत्त्वम् । नित्ययोगे मतुप् । अतः समस्ततयैव निर्दिश्य नीलोत्प-लवद्भगवन्नामत्वमेव बोधितम्, अन्यथा त्वविमृष्टविधेयांशतादोषः स्यात् । "अविमृष्टविधेयांशः समासपिहिते विधौ । विशंति विशिखप्रायकटाक्षाः कामिनां हृदि" इति चंद्रालोकोक्तेः । अत्र विशंतीवद्विशंतीति विधेयं तच्च प्रकृतसमासेन प्राप्यते । विशिख-कटाक्षयोः साम्यमात्रं तु प्राप्यत इति । अत एवोक्तम्–श्रीमद्भागवते महामुनिकृते इति ॥ अष्टादशसहस्रसंख्यागणनाप्रकारस्त्वित्थम्–

दीर्घवृत्तगद्यानुष्टुप्छन्दस्समूहे ग्रंथे द्वात्रिंशदक्षरात्मिकानुष्टुप्परिमाणेन गणनायां पंचोनद्विशत्युत्तरषोडशसहस्रसंख्या १६१९५ संपद्यते। उवाचमंत्राः सप्तत्यधिकद्वादशशतसंख्याकाः १२७० । अर्द्धश्लोकाः शतद्वयसंख्याः २०० । इति श्रीमद्भागवतेऽमुकस्कंधे प्रथमादिरध्याय इति वाक्यानामपि व्यासविरचितत्वेन ग्रंथसंख्यांतर्गतत्वेन तत्संख्या ३३५ । पञ्चत्रिंशदुत्तरत्रिशतीसंकलनयाष्टादशसहस्रसंख्या १८००० संपत्तिः। यद्वा चंडीसप्तशतीन्यायेन मंत्रविभागेनापीयं संख्या संभाव्यते। तथा हि-अनुष्टुप्श्लोकगद्यार्धरूपमंत्रा एकादशसहस्राणि द्विसप्तत्युत्तरे द्विशती च ११२७२ दीर्घवृत्तश्लोकानां षट्पंचाशदधिकसप्तविंशति २७५६ संख्याकानामर्धकानि मंत्रा द्वादशाधिकसार्द्धपञ्चसहस्राणि ५५१२ अनुष्टुबर्द्धकान्येकादशाधिकद्विशती २११ उवाचमंत्राणां सप्तत्यधिकद्वादशशतसंख्यानां मध्ये पञ्चषष्ट्युत्तरद्विशतानामनुवादरूपाणां पुरोवादशेषतया तावतो विहायावशिष्टा उवाचमंत्राः पंचोत्तरसहस्रं १००५, सर्वसंकलनयाष्टादशसहस्राणि १८००० आपातत एव संख्या। तेन तत्तदध्यायेषु तत्तन्मंत्रगणनया संख्यानाधिक्यसंकलनमूह्यम्। हेमाद्रिप्रभृतिधर्मशास्त्रग्रंथेषु कालखंडादौ 'कलिं सभाजयंत्यार्याः' इत्यादिश्रीमद्भागवतवचनोदाहरणेन कलिधर्मादिकांडत्रयरूपत्वेन सकलवेदादिसाररूपत्वं 'सर्ववेदेतिहासानां सारं सारं समुद्धृतम्' इति वक्ष्यमाणत्वाच्च। किञ्च मुमुक्षूपकाराय हेमाद्रिप्रेरितबोपदेवेन कृते मुक्ताफलग्रंथे पुराणांतरं विहाय श्रीमद्भागवतश्लोकानामेवोदाहरणादेतस्यैव मोक्षैकफलरूपत्वेन मुमुक्षुसेव्यत्वं व्यज्यते। तथा च ग्रंथांतरे तत्पद्यं "विद्वद्धने सशिष्येण भिषक्केशवसूनुना। हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत्॥" इति। अत एव स्वाम्युदाहृतं 'यदीच्छसि भवक्षय'मित्युक्तम्। अत्र 'शुकप्रोक्त'मिति विशेषणेन विष्णुपुराणादीनां योगवृत्त्या भागवतत्वनिरासः। शुकाय प्रोक्तं शुकप्रोक्तं, "शुकमध्यापयामास निवृत्तिनिरतं मुनिः" इत्युक्तेश्चतुर्थीतत्पुरुषः। किञ्च योगवृत्त्या पुराणांतरस्यापि भागवतत्वे हेमाद्रिमाधवमधुसूदनस्वामिकमलाकरभट्टानंतदेवपर्यंतैर्महानिबंधकारैर्निरुपपदं भागवतमुच्चार्यैव पुराणस्यास्य वचांसि नोदाह्रियेरन्, किंत्वन्यभागवतव्यावर्तकविशेषणमुपादीयेत भागवत इत्युक्त्वान्यपुराणवाक्यमप्युदाह्रियेत। न चैवं क्वाप्युपलभ्यते, तस्मादिदमेव भागवतं न त्वन्यत्। किं च श्रीनारदपुराणे पुराणसूत्रेषु मरीचये ब्रह्मणा भागवतसूत्राण्यप्युक्तानि। तथा हि—"ब्रह्मोवाच। मरीचे शृणु वक्ष्यामि वेदव्यासेन यत्कृतम्। श्रीमद्भागवतं नाम पुराणं ब्रह्मसंमितम्॥ तदष्टादशसाहस्रं कीर्तितं पापनाशनम्। सुरपादपरूपोऽयं स्कंधैर्द्वादशभिर्युतः॥ भगवानेव विप्रेन्द्र विश्वरूपी सनातनः। तत्र तु प्रथमे स्कंधे सूतर्षीणां समागमे॥ व्यासस्य चरितं पुण्यं पांडवानां तथैव च। पारीक्षितमुपाख्यानमितीदं समुदाहृतम्॥ परीक्षिच्छुकसंवादे सृष्टिद्वयनिरूपणम्। ब्रह्मनारदसंवादे देवताचरितामृतम्॥ पुराणलक्षणं चैव सृष्टिकारणसंभवः। द्वितीयोऽयं समुदितः स्कंधो व्यासेन धीमता॥ चरितं विदुरस्याथ मैत्रेयेणास्य संगमः। सृष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः॥ कापिलं सांख्यमप्यत्र तृतीयोऽयमुदाहृतः। सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः॥ पृथोः पुण्यं समाख्यानं ततः प्राचीनबर्हिषः। इत्येष तुर्यो गदितो विसर्गस्कंध उत्तमः॥ प्रियव्रतस्य चरितं तद्वंश्यानां च पुण्यदम्। ब्रह्मांडांतर्गतानां च लोकानां वर्णनं ततः॥ नरकस्थितिरित्येष संस्थाने पंचमो मतः। अजामिलस्य चरितं दक्षसृष्टिनिरूपणम्॥ वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम्। षष्ठोऽयमुदितः स्कंधो व्यासेन परिपोषणे॥ प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम्। सप्तमो गदितो वत्स वासनाकर्मकीर्तनम्॥ गजेन्द्रमोक्षणाख्यानं मन्वंतरनिरूपणे। समुद्रमंथनं चैव बलिवैभवबंधनम्॥ मत्स्यावतारचरितमष्टमोऽयं प्रकीर्तितः। सूर्यवंशसमाख्यानं सोमवंशनिरूपणम्॥ वंश्यानुचरितं प्रोक्तो नवमोऽयं महामते। कृष्णस्य बालचरितं कौमारं च व्रजस्थितिः॥ कैशोरे मथुराख्यानं यौवने द्वारकास्थितिः। भूभारहरणं चात्र निरोधे दशमः स्मृतः॥ नारदेन तु संवादो वसुदेवस्य कीर्तितः। यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च॥ यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः। कलिनृपकथापूर्वं कलिधर्मास्ततो हरेः॥ अवतारश्च कल्क्याख्यो युगधर्मास्ततो लयः। चतुर्धा वर्णितो मोक्षः परीक्षिन्नृपतेस्ततः॥ वेदशाखाप्रणयनं पुराणस्य च लक्षणम्। मार्कंडेयकथा प्रोक्ता सूर्यव्यूहस्ततः परम्॥ पुराणसंख्याकथनमाश्रये द्वादशो ह्ययम्। इत्येवं कथितं वत्स श्रीमद्भागवतं तव॥ श्रोतुर्वक्तुश्चोपदेष्टुरनुमोदितुरेव च। साहाय्यकर्तुर्गदितं भुक्तिभक्तिविमुक्तिदम्॥ प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम्। देयं भागवतायेदं द्विजाय प्रीतिपूर्वकम्॥ संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता। योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा॥ स पुराणश्रवणजं फलमाप्नोति निश्चितम्॥" इति। यत्तु शारीरके भागवतमतनिरसनं तद्धयग्रीवपंचरात्रे गणितभागवताख्यतंत्रस्यैवेति तत्रैव स्पष्टम्।

वासनाभाष्यसंबंधोक्तिविद्वत्कामधेनुहनुमद्भाष्यतत्त्वभावार्थदीपिकापरमहंसप्रियाशुकहार्दमनोहरातोषिणीसंदर्भिण्यादयष्टीकाग्रंथाश्चित्सुखाचार्यगौडाचार्यवल्लभाचार्यशंकराचार्यविजयध्वजादिभिः कृता बहुतरा विराजंते, तथापि श्रीधरस्वामिकृतटीकाया भगवत्प्रियत्वेन सर्वसंमतत्वात्सर्वत्र प्रसिद्धत्वाच्च व्याख्यातुमुत्सहे। भगवत्प्रियत्वं चास्याः काश्यां प्रसिद्धम्। कदाचिद् द्वैतवादिवैष्णवैरुक्तं श्रीधरस्वामिकृतटीकायामद्वैतस्य हठाद्वर्णनमतो व्यासाभिप्रायबोधिकास्त्वन्या एव टीकाः संति। ततः काशीस्थविद्वज्जनैरुक्तं—श्रीमदिष्टदेवः श्रीजगन्नाथो यद्येवं वदिष्यति तदैतदंगीकुर्मः। तदर्थं सर्वटीकानामंकितपत्राणि श्रीकाशीस्थश्रीजगन्नाथाख्यविष्णुमंदिरे स्थापितानि। कश्चिद् ब्राह्मणबालस्तदानयनार्थं प्रेषितः श्रीभगवदग्रस्थापितसंकलितपत्रेभ्य एकं पत्रमानयेत्युक्त्वेति। तत्र तैः श्रीधरीयटीकापत्रमधः स्थापितमपि भगवता ततो निष्कास्य "व्यासो वेत्ति शुको वेत्ति शेषमैत्रेयनारदाः। पराश-

रोद्धवो वायुपुत्रश्चैव बृहस्पतिः ॥ एतेषां निखिलाः शिष्याः श्रीमद्भागवतं विदुः। श्रीधरः सर्वथा वेत्ति श्रीनृसिंहप्रसादतः ॥" इति तत्र लिखित्वा बालाय दत्तम्। एवं त्रिर्दत्तं; ततः सर्वैरुक्तमियमेव भगवत्प्रिया श्रीव्यासाभिप्रायबोधिका टीके'ति ॥

अत्र निराकारब्रह्मपरतया व्याख्यातमपि श्रीकृष्णलीलाया अत्र प्राधान्येन प्रतिपादनात्साकारब्रह्मपक्षेऽपि व्याख्यायते। तत्र परं परिपूर्णावतारित्वेनांशावतारेभ्य उत्कृष्टं श्रीकृष्णं धीमहीत्यन्वयः। अस्य स्वरूपलक्षणमाह—धाम्ना स्वेनेति ॥ आत्मीयेन माथुराख्येन धाम्ना स्थानेन तन्निवासिनां सदा निरस्तं कुहकं मायाकार्यं संसारलक्षणं येन तम्। लीलामाह—जन्मेति ॥ आद्यस्य जन्मादिविकाररहितस्यापि यतः यत्र वसुदेवगृहे। सप्तम्यर्थे तसिः। तस्मादितरद् इतरत्र नंदगृहेऽपि योऽन्वयादन्वगच्छत्। परेणैव य इति पदेनान्वयः। कस्माद्धेतोरन्वगात्तत्राह अर्थेषु कंसवंचनादिप्रयोजनेषु। अभिज्ञ इति। यद्वाललीलारासलीलादिलोकोत्तरविलासरूपेष्वर्थेष्वभिज्ञस्तादृशार्थसंपादननिपुण इत्यर्थः। ततः स्वराट् स्वैर्गोकुलवासिगोपालादिभिरेव राजत इति गोपाललीलस्याप्यव्याहतैश्वर्यमाह—तेन इति ॥ यो ब्रह्मणे ब्रह्माणं विस्मापयितुं हृदा संकल्पमात्रेण ब्रह्म सत्यज्ञानानंतानंदमात्रैकरसमूर्तिमयं वत्सपालादिरूपं वैभवं विस्तारितवान्, यत् यत्र सूरयो बलरामचतुर्मुखादयो मुह्यंति तत्त्वं ज्ञातुं न शक्नुवन्ति केयं वा कुत आयाता सत्या वा कतरे न" इत्याद्युभयोक्तेः। यद्वा यल्लौकिकालौकिकतादृशलीलाभिः सूरयो लीलातत्त्वज्ञा भक्ता मुह्यंति प्रेमातिशयोदयेन विवशा भवंति। यदित्युत्तरत्राप्यन्वेति यद्याभ्यो लीलाभ्यस्तेजोवारिमृदां यथा यथावत् विनिमयो भवति तन्मुखकांत्या चंद्रादेर्निस्तेजस्त्वं तन्निकटवस्तूनां तत्तेजसा चंद्राधिकतेजोवत्त्वं वेणुनादलीलया वारिणः कठिनत्वं मृदः पाषाणादेर्द्रवत्वमिति यत्र श्रीकृष्णे निमित्ते सति त्रिसर्गः त्रिषु गोकुलमथुराद्वारवतीपुरेषु सर्गः गोपालराधिकादेरक्रूरोद्धवादे रुक्मिण्यादेश्च प्रादुर्भावः अमृषा तेषां गोलोकवैकुण्ठादिवासित्वेन तद्विग्रहाणाञ्च भगवदवतारतुल्यत्वादिति काशीनाथः। विश्वनाथस्तु इह खलु निखिलकल्याणगुणमाधुर्यवारिधौ महैश्वर्यसम्राजि स्वयं भगवति परमभास्वत्यधिधरणि यथासमयं बिलस्यांतर्हिते नानाशास्त्रपुराणेतिहासादीनां सर्वजननिकायत्रायकत्वरूपेष्वर्थेषु यामिकेष्विव कालेन दैवाद्वैगुण्योदयादालस्येनेव केषुचित्प्रसुप्तेषु तेष्वेव मध्ये कैश्चित्कैश्चित्प्रत्युत 'जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान्व्यतिक्रम' इत्यादितोऽवगतैरनर्थकारैश्चौरैरिवोद्भूय तत्तत्प्रणेतृपर्यंतानां सर्वेषां चित्तप्रसादरूपेषु महाधनेष्वपहृतेषु "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इति "परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥" इति श्रीगीतोक्तनिमित्तलब्धक्षणतया यादस्सु महामीन इव विहंगेषु श्रीहंस इव नृषु स्वयं भगवान् श्रीकृष्ण इव देवेषूपेन्द्र इव वेदेषु श्रीमद्भागवताख्यं शास्त्रचूडामणिः ॥ "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह। कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥" इति वचनव्यंजितश्रीकृष्णप्रतिमूर्तिकत्वेन ममाहमेवाभिरूपः कैवल्यादिति निरस्ततद्विनान्यसादृश्यतया श्रीशुकपरिक्षिद्भ्यां श्रीकृष्ण एव ज्योतिःषु सहस्रांशुरिव पुराणेषु भास्वान्द्वादशस्कंधात्मकोऽष्टादशसहस्रच्छदनो महाजनवांछितार्थकल्पतरुरिवावततार। तत्प्रणेता प्रथमत एवाचार्यचूडामणिः श्रीकृष्णद्वैपायनः स्वाभीष्टदैवतध्यानलक्षणमंगलमाचरति—जन्माद्यस्येति। परमतिशयेन सत्यं सर्वकालदेशवर्तिनं परमेश्वरं धीमहि ध्यायेम। बहुवचनेन कालदेशपरंपराप्राप्तान्सर्वानेव जीवान्स्वांतरीकृत्य स्वशिक्षया तान्ध्यानमुपदिशन्नेव क्रोडीकरोति। अनेन "अथातो ब्रह्मजिज्ञासा" इति सूत्रार्थः फलतो विवृतः। ध्यानस्यैव जिज्ञासायाः फलत्वात्तस्य परमैश्वर्यमाह—अस्य जगतो जन्मादि जन्मस्थितिभंगं यतो भवति तम्। तर्हि किं कालं ध्यायथ न। अन्वयादितरतश्च अन्वयव्यतिरेकाभ्यां घटे मृदन्वयः मृदि घटव्यतिरेक इवेत्युपादानकारणमित्यर्थः। चकारात्स एव निमित्तकारणं च कालस्य तत्प्रभावरूपत्वात्। यद्वाऽन्वयात्प्रलये विश्वस्य परमेश्वरेऽनुप्रवेशात् इतरतश्च सर्गे ततो विभागाच्च पृथिव्या जलमिव जलस्य तेज इव योऽधिष्ठानकारणमित्यर्थः। यद्वाऽन्वयात्कारणत्वेन यत्कर्तृकानुप्रवेशाजन्मकर्मफलदातृत्वेन यत्कर्तृकानुप्रवेशात्स्थितिः संहारकत्वेन रुद्ररूपेण यत्कर्तृकानुप्रवेशाद् भंगश्च यतो भवति तम्। अत्र कारणस्य कार्यसमन्वितत्वमेव कार्यानुप्रवेशो ज्ञेयः। तत्कार्यस्य विश्वस्य तत्स्वरूपत्वं वारयन्विशिनष्टि—इतरत इति। सृज्य-पाल्यसंहार्याद्विश्वतः स्वरूपशक्त्याभिन्नात् चकारान्मायाशक्त्या तदभिन्नाच्च एवं "जन्माद्यस्य यतः" इति "तत्तु समन्वयात्" इति सूत्रद्वयमुक्तम्।

ननु च परमेश्वरस्योपादानत्वे विकारो दुर्वारस्तस्मात्प्रकृतिरेवोपादानं, परमेश्वरस्तु निमित्तमित्युच्यताम्। मैवं,—"यः सर्वज्ञः सर्ववित्" इति "स ऐक्षत लोकान्नु सृजा" इति "तदैक्षत बहु स्यां प्रजायेय" इत्यादिभिःश्रुतिभिश्चेतनस्यैव जगत्कारणत्वप्रतिपादनात्परमेश्वर एव जगत उपादानं निमित्तं च। तत्र प्रकृतेस्तच्छक्तित्वाच्छक्तिशक्तिमतोरभेदात् प्रकृतिद्वारकमेव तस्योपादानत्वं, स्वरूपेण तु प्रकृत्यतीतत्वात्तस्य निर्विकारत्वमेव। यथोक्तं भगवता—"प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥" इति। प्रकृतेः स्वातंत्र्येणोपादानत्वमेव शास्त्रासंमतम्, तस्मात्परमेश्वरः सर्वज्ञ एव स्वातंत्र्येण जगत्कारणमुच्यते; न तु जडा प्रकृतिरित्याह—अर्थेषु सृज्यासृज्यवस्तुमात्रेष्वभिज्ञो यस्तमित्यर्थः। अनेन "ईक्षतेर्नाशब्दम्" इति सूत्रार्थ उक्तः। स चायं प्रक्रांतं ब्रह्म जगत्कारणं भवति। कुतः? ईक्षतेः ईक्षणात् जगत्कारणत्वप्रतिपादकश्रुतिवाक्येषु तस्यैव विचारविशेषात्मकेक्षणश्रवणात्। अतो ब्रह्म नाशब्दं शब्दप्रमाणकं न भवति, किन्तु शब्दप्रमाणकमेवेति। तत्र श्रुतयः "तदैक्षतेति सदेव सोम्येदमग्र आसीत्" इति "आत्मा वा इदमेक एवाग्र आसीदिति तस्माद्वा एतस्मादात्मन आकाश-

स्सम्भूत" इति 'यतो वा इमानि' इत्याद्याः। स्मृतिश्च "यतः सर्वाणि भूतानि भवंत्यादियुगागमे" इत्याद्या। ननु तदानीं महदाद्यनुत्पत्तेस्तस्य क्षणादिसाधनं न संभवतीत्यत आह–स्वराडिति। स्वस्वरूपेणैव तथा तथा राजत इति–"न तस्य कार्यं करणं च विद्यते" इत्यादि "स्वाभाविकी ज्ञानबल-क्रिया च" इति श्रुतेः। ननु जगत्सृष्टौ ब्रह्मणः स्वातन्त्र्यमैश्वर्यञ्चावगम्यते, "हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्" इति श्रुतेः, स एव ध्येयोऽस्त्वित्यत आह–तेन इति। ब्रह्मस्वतत्त्वं वेदं वा अतो ब्रह्मणोऽपि पारतंत्र्यं सूरीणामपि तत्र मोहाद् ब्रह्मणोऽपि न स्वतः शक्तिरिति। अनेन "नेतरोऽनुपपत्तेः" इति सूत्रार्थो विवृतः। ननु धीमहीति ध्यानम्, विषयत्वेन तस्य साकारत्वमभिप्रेतम्, अकारणञ्च त्रिगुणसृष्टत्वम्, तथात्वे चानित्यत्वं प्रसज्येतेत्यत आह–तेज इति। यथाऽज्ञानं तेजसि वारीदमिति वारिणि च स्थलमित्यादिबुद्धिस्तथैव पूर्णचिन्मयाकारे त्रिसर्गस्त्रिगुणसर्गोऽयमिति बुद्धिर्मृषैव। "तमेकं गोविंदं सच्चिदानंदविग्रहम्। वृन्दावनसुरतरुतलातलासीनम्" इति गोपालतापिनीश्रुतेः। "अर्द्धमात्रात्मको रामो ब्रह्मानंदैकविग्रहः" इति रामतापिन्याश्च "ऋतं सत्यं परं ब्रह्म पुरुषं नृकेशरिविग्रहम्" इति नृसिंहतापिन्याश्च "निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः। आनन्दमात्रमुखपादसरोरुहादि" रिति ध्यानबिंदूपनिषदश्च। "नन्दव्रजजनानंदी सच्चिदानंदविग्रहः" इति ब्रह्मांडपुराणात् "सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्" इति महावाराहाच्च "स्वेच्छामयस्य न तु भूतमयस्य" इति च "बबंध प्राकृतं यथा" इति "त्वय्येव नित्यसुखबोधतनौ" इति "शाब्दं ब्रह्म वपुर्दध दि" ति "सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः" इत्यादिश्रीभागवतादावपि तदाकारस्यामायिकत्वावगमात् "अनिंद्रिया अनाहारा अनिष्पन्नाः सुगंधिनः। एकांतिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः ॥" इति नारायणीयात्। "देहेन्द्रियासुहीनानां वैकुंठपुरवासिनाम्" इति सप्तमस्कंधाच्च तद्भक्तानामपि श्वेतद्वीपवैकुंठपुरवासित्वेन साकारत्वे लब्धेऽनिंद्रिया इत्यादिभिर्मायिकाकारत्वनिषेधात्तदाकारस्यामायिकत्वे कः संशयः ?। यत्तु–"माययोपात्तविग्रहम्" इति नवमे वक्ष्यति, तत्र च मायया कृपयेत्यर्थः। तत्रैव विशेषतो व्याख्यास्यामः। ननु तदप्यत्र केचिद्विवदन्त इत्यत आह–धाम्नेति धाम्ना स्वरूपशक्त्या स्वभक्तनिष्ठस्वानुभवप्रभावेण वा प्रतिपदसमुच्छलन्माधुर्यैश्वर्यभ्राजि श्रीविग्रहेण वा स्वेनासाधारणेन सदा कालत्रय एव निरस्ताः कुहका कुतर्कनिष्ठा येन तम्। "तर्काप्रतिष्ठानात्" इति सूत्रार्थः सूचितः। अत्र "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनु स्वाम्" इति श्रुत्या स्वशब्देन तनोः स्वरूपभूतत्वे लब्धे तथा प्रकृतिक्षोभात्पूर्वमेव 'बहु स्याम्' इति "स ऐक्षत" इत्यादिश्रुतिभिस्तदीयमनोनयनोदरमायिकत्वेऽवगमिते "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुत्या स्वाभाविकत्वे प्रकटमुक्ते "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणम् ॥" इत्यत्र 'न योजयेदि'ति लिङा 'परदारान्न गच्छेत्' इतिवत्तत्र कुतर्कयोजनाया निषिद्धत्वेऽपि यद्यसुरास्तदीयश्रीविग्रहं लक्षीकृत्य युक्तिशरानादित्सवो निरयेऽपि पतिष्यंति तदा पतंतु, तैरलं संलापेन। अथात्र शास्त्रे "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्" इति दशमस्याश्रयतत्त्वस्यैवांगित्वे तस्य च श्रीकृष्णरूप एव मुख्यत्वे तदसाधारणधर्मप्रस्तुतावप्यस्य प्रथमपद्यस्यौचिती भवत्यतस्तदेकपरस्य व्याख्यांतरस्यावकाशः। तद्यथा–'सत्यव्रतं सत्यपरम्' इत्यादौ 'सत्यात्मकं त्वां शरणं प्रपन्नाः" इति श्रीकृष्णजन्मारंभोक्तेः "सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम्। सत्यात्सत्यञ्च गोविंदस्तस्मात्सत्यो हि नाम ते" इत्युद्योगपर्वणि सञ्जयकृतकृष्णनाम्नां निरुक्तेश्च सत्यं श्रीकृष्णं धीमहि। "नराकृति परं ब्रह्म" इति ब्रह्मांडपुराणात्तस्मात्कृष्ण एव तु ध्यायेदिति गोपालतापिनीभ्यश्च परं स्वेन धाम्ना श्रीमथुराख्येन सर्वत्र तदानीं कृपया दर्शितेन श्रीविग्रहेण च सदा निरस्तं कुहकं जीवानामविद्या येन तं मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा। तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते। इति गोपालतापनीप्रसिद्धेः "श्रवणात्कीर्तनाद्ध्यानात्पूयंतेऽन्तेवसायिनः। तव ब्रह्ममयेशस्य किमुतेक्षाभिमर्शिनः ॥" इति दशमोक्तेश्च 'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः।

ननु तद्विग्रहस्य प्रापंचिकलोकदृश्यत्वाद्यद्यद् दृश्यं तदनित्यं घटवदिति न्यायेनानित्यत्वं प्रसज्येतेत्यत आह–तेजोवारिमृदामिति ॥ त्रयाणां दृश्यभूतानां यथा तथावद्विनिमयः परस्परमिलनं यत्र यथाभूतस्त्रिसर्गस्त्रिगुणसृष्टो देहो मृषा मिथ्यैव येन तत्त्रितयसृष्टस्तद्विग्रह उच्यते, तेन मृषैवोच्यत इत्यर्थः। प्रपंचातीतस्यापि तस्य यत्प्रापंचिकैरसुरैर्दर्शनं तत्खलु विचित्रलीलासाधिकया तदिच्छया दुस्तर्क्यस्वरूपयैव पित्तदूषितरसनैर्नरैर्मत्स्यंडिकाचर्वणमिव तन्माधुर्यानुभवहीनं तदन्यैश्च दुस्तर्क्यतत्कृपाप्रभावात्तन्माधुर्यानुभवसहितमेव। तदुक्तम्–"अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः। तेभ्य; स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशञ्च यच्छन् ॥" इत्यतोऽदृश्यस्यापि यद् दृश्यत्वं तत्कृपाया एव महैश्वर्यं ज्ञापयतीति ज्ञेयम्। अत एव भागवतामृतधृतं नारायणाध्यात्मवचनं "नित्याव्यक्तोऽपि भगवानीक्ष्यते निजभक्तितः। तामृते परमानंदं कः पश्येत्तमिमं प्रभुम्" इति तत्रत्या कारिका। अतः स्वयंप्रकाशत्वशक्त्या सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयः कृत इति, एवमेव "तासां मध्ये साक्षाद् ब्रह्म गोपालपुरी" इत्यादिश्रुतेर्ब्रह्मभूतानामपि तद्धामादीनां दृश्यत्वं ततश्च यद्यद् दृश्यं चिद्भिन्नं तत्तद्भिन्नं घटवदित्यनुमिमते भागवताभिज्ञाः।

एवमेव सारमूलकारणं कृपामुक्त्वा तस्य लीलामाह–अस्य यतो यत्र वसुदेवगृहे जन्मादि जन्मैश्वर्यप्रकटनपूर्ववृत्तकथनादि तत इतरतश्चेतरत्र नंदगृहे अनु अयादयमेवागच्छत्। किमर्थमयात् ? अर्थेषु कंसवंचनादिषु व्रजसंबंधिवात्सल्यादिप्रेमप्रकाशरूपेषु चाऽभिज्ञः न त्वन्यपरतंत्र इत्याह—स्वेनैव राजते इति ॥ यद्वा स्वैः पित्रादिभिः श्रीनंदाद्यैर्विराजमानत्वार्थमित्यभिप्रायः। न च

तत्र तत्र तत्तत्प्रेमाधीनतया तादृशलीलाविशिष्टत्वेऽपि तस्य मौग्ध्यमेव प्रत्येतव्यमित्याह—आदिकवये ब्रह्मणेऽपि ब्रह्म ब्रह्मात्मकं वत्सबालकादि तेने प्रकाशयामास। तच्च हृदा संकल्पमात्रेणैव यत्र योगमायावैभवे सूरयो भवनारदादयोऽपि मुह्यंति, यद्वाऽऽदिकवेः स्वकुलस्यादिपुरुषः कविर्विज्ञश्च यस्सत्यव्रतमनुस्तस्मै ब्रह्म निर्विशेषं स्वरूपं तेने स्वांशमत्स्यद्वेवोक्त्या प्रकाशयामास। तदुक्तिर्यथा—"मदीयं महिमानं च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि।" इति व्याख्यातं च श्रीधरस्वामिचरणैः। मे मयाऽनुगृहीतं प्रसादीकृतं ब्रह्मापरोक्षीकृतं वेत्स्यसीति ब्रह्मणस्तत्प्रसादीकृतत्वं च वेदस्तवारंभे व्याख्यास्यते। अथ तस्यापि शांतदास्यादिरसपरिकरविशिष्टत्वेऽपि। "तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः।" इत्यादिभ्यो व्रजदेवीसाहित्येन परममाधुर्योदयात्तदीयरसस्यातिशयेनोपादेयतां दर्शयन्पुनरप्यर्थांतरमत्रावकाशते। तद्यथा–आद्यस्य शृंगाररसस्य जन्म यतस्तं धीमहि पूर्वं तस्य परमार्थदर्शिभिः सद्भिर्विगीतत्वेन सतोऽपि नाश एवासीदिति भावः। अन्वयात्संयोगात् इतरतश्च विप्रलंभात् संयोगविप्रलंभाभ्यामेव शृंगाररसः सपरिकरः संपद्यत इति भावः। भीमसेनो भीम इतिवदाद्यरसोऽप्याद्यशब्देनोच्यते। यद्वाऽत्र 'पिबत भागवतं रस'मित्युक्तेः शास्त्रस्य रसरूपत्वादाद्यस्येत्यनेनार्थप्रत्यासत्त्या रसस्येत्यस्यैव विशेष्यपदस्योपस्थितेः किं वा संयोगविप्रयोगाभ्यां निष्पत्तिः स्वप्रतियोगिनं रसमेवोपस्थापयत्यतो न्यूनपदता नाशंकनीया। प्रत्युत तथा प्राप्तत्वेनादिरसस्य रहस्यत्वमेव द्योतितं तत्रालंबनविभावत्वे तस्यान्यतो वैशिष्ट्यमाह—अर्थेषु चतुःषष्टिकलादिरसोपयोगिसमस्तवस्तुषु अभिज्ञो विदग्धः। न च प्राकृतनलादिनायकवत्कालकर्मादिग्रस्त इत्याह—स्वराट्। किञ्च रसो ह्यन्यत्र नैव प्रसज्ज्येतेत्याह—य आदिकवये आदिरसस्य कवये भरताय हृदैव तदीयमनसैव ब्रह्म आदिरसस्य तत्त्वं तेने, रसस्यैकतानत्वोद्घाटनार्थमित्यर्थः। 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः। तदपि यत्र तत्त्वे सूरयः कवयो मुह्यंति, प्राकृतनलादिनायकनिष्ठतया वर्णनात्। तत्र दृष्टान्तः—तेज इति। तेजआदिषु वार्यादिबुद्धिरिव भगवदेकनिष्ठे रसे प्राकृतजननिष्ठत्वबुद्धिरित्यर्थः। यत्र कृमिविडभस्मांतनिष्ठेषु प्राकृतनायकेष्वतिनश्वरेषु रसो न भवति विचारतो विभाववैरूप्यात्, तद्विपरीतं घृणामयं वैरस्यमेवोत्पद्यते तत्रैव रसं वर्णयंतीत्यर्थः। किं च त्रयाणां वाच्यलक्ष्यव्यंग्यानामर्थानां ध्वनिगुणालंकाराणां वा सर्गो निर्माणप्रपंचः अमृषा सत्य एव भवन्नलौकिकत्वेन चमत्कारी स्यात्। अन्यत्र प्राकृतनायके कविप्रौढोक्तिमात्रप्राणो मिथ्यैवेत्यर्थः। ननु रसं केचिन्न मन्यन्ते तत्राह–धाम्ना माधुर्यास्वादसाक्षात्कारचमत्कारप्रकारेण स्वेनासाधारणेन निरस्ताः कुहका जरन्मीमांसका येन तम्। अथ तासामपि मध्ये "कस्याः पदानि चैतानि याताया नंदसूनुना। अनयाराधितो नूनं भगवान्हरिरीश्वरः।" इत्यादिभिः परममुख्यायाः श्रीवृंदावनेश्वर्याः साहित्येन परम एव माधुर्योत्कर्षो भवति, अतस्तत्प्रदर्शकोऽप्यर्थोऽस्मिन्नादिमे पद्येऽन्वेष्टव्यः। स यथा—यतो याभ्यामेवाद्यस्य रसस्य जन्म प्रादुर्भावः यावेवादिरसविद्यायाः परमनिधानमित्यर्थः। तत्र यश्च इतरत इति ल्यब्लोपे पंचमी। इतरां कान्तां परित्यज्यान्वयात्। "अत्रावरोपिता कांता पुष्पहेतोर्महात्मना। अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः" इत्यादिदृष्ट्या अनुगतेर्हेतोः अर्थेषु रसोपयोगिधीरललितेत्यादिमयमुख्यरसेष्वज्ञः। या च तत एव हेतोः स्वेन कांतेनैव राजत इति स्वराट्, स्वाधीनकांतेत्यर्थः। यश्च तत्तत्प्रकाशनार्थमादिकवये आदितो जन्मारभ्यैव कवयो तत्त्वज्ञाय श्रीशुकदेवाय ब्रह्म श्रीभागवतं मूर्द्धन्यरसमयं रासपञ्चाध्यायिकं हृदा तेने। "इदं भागवतं नाम पुराणं ब्रह्मसंमितम्" इति "शुकमुखादमृतद्रवसंयुतम्" इति "शुकवागमृताब्धीन्दु" इत्यादिभ्यः। यद्यतः श्रीभागवताद् यत्र रासे सति सूरयो मुह्यंति रसास्वादजनितामानंदमूर्च्छां प्राप्नुवंति। यद्वा सूरयो भक्ताः किं वा याभ्यां श्रवणनयनादिविषयीभूताभ्यां सूरयस्तत्परिकरभूता भक्ता मुह्यंति महाविज्ञा अपि मूढा भवन्तो धर्मविपर्ययं प्राप्नुवंतीत्यर्थः। तत्र दृष्टान्तेनाँपरानपि संगृह्णाति तेजोवारिमृदां यथा विनिमयः स्वस्वधर्मव्यत्ययः तत्र तेजसां चंद्रादीनां तदीयरासलीलादर्शनात्स्तंभेन स्वीयचलत्वधर्मव्यत्ययः। वारिणां तन्मुरलीवाद्यादिना स्तंभेन मृद्धर्मः मृदामपि पाषाणादीनां द्रवेण वारिधर्मश्च यथेति यत्र ययोः स्वेन धाम्ना प्रभावेण तिसृणां श्रीभूलीलानां गोपीमहिषीलक्ष्मीणां वांतरंगा बहिरंगा तटस्थानां वा शक्तीनां सर्गोऽमृषा सत्य एव सदा तासां तद्धाममयत्वाद् यत्रेत्यधिष्ठानकारणत्वात्। याभ्यां सृष्टाः श्र्यादयः स्वमहसा सदा वर्तंत एवेत्यर्थः। यत्तदोर्नित्यसंबंधात्। तौ निरस्तकुहकं निष्कपटं यथा स्यात्सत्यं यथार्थस्वरूपं यथा स्यात्परं सर्वोत्कृष्टं यथा स्यात्तथा धीमहीति शास्त्रस्यास्य विषयो दर्शितः। अथ तथाभूतमप्याश्रयत्वं येनैव लभ्यते स शास्त्रस्याभिधेयो भक्तियोगस्तथा स एव परमकाष्ठामापन्न श्रीभगवदाकर्षको भवन्प्रेमाभिधः प्रयोजनं च। अनेन श्लोकेन स भक्तियोगोऽवश्यं माननीय इत्यतोऽर्थांतरमत्र तंत्रेणांतर्भवति। तद्यथा—"सत्यं तदेव सत्यं तदुहैव मंगलं यदुत्तमश्लोकयशोऽनुगीयते" इति द्वादशोक्तेः। तत्रापि परं श्रेष्ठं परं वास्तववस्तुरूपत्वात् त्रिगुणातीतं तथा सत्यं सद्भ्यो हितं परमकल्याणगुणमयं भक्तियोगं धीमहि। यदुक्तं—"लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।।" इति। "न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि। मयानुमोदितः सम्यङ्निर्गुणत्वादनाशिषः।।" इति च श्रुतिश्च गोपालतापिनी "विज्ञानघनानंदघना सच्चिदानंदैकरसे भक्तियोगे तिष्ठति" इति। तस्य प्रभावमाह—यत एवाद्यस्य परमेश्वरस्य जन्म उपासकेषु भगवत्त्वेन प्रादुर्भावः। तथा इतरतः इतरेष्वर्थेषु निष्कामकर्मयोगज्ञानयोगेष्वन्वयात्। यत्साहित्याद्यस्य जन्म, उपासकेषु परमात्मत्वेन ब्रह्मत्वेन च साक्षात्कारो भवेदित्यन्वयः।

ननु ज्ञानेन केवलेनैव ब्रह्मसाक्षात्कारः प्रसिद्धस्तत्राह—योऽभिज्ञः अभि सर्वतो भावेन ज्ञा ज्ञानं यतः ज्ञानस्य सात्त्विकत्वाद् गुणातीताया भक्तेस्तत्रान्वयं विना परमात्मनो ब्रह्मत्वज्ञानमेव न भवेदित्यर्थः। "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते

ज्ञानमलं निरंजनम्'' इत्याद्युक्तेः, "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्यादेश्च । ननु ब्रह्मसाक्षात्कारार्थो ज्ञानयोगो यथा भक्तिमपेक्षते तथैव भगवत्साक्षात्कारार्थमपि भक्तियोगो ज्ञानयोगमपेक्षतामिति चेत्तत्राह—स्वराट् स्वेनैव राजत इति सः । सम्राडिव स्वतंत्रो न कस्याप्यधीन इत्यर्थः । "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥" इति विधिवाक्यान्मेघाद्यमिलितेन केवलेन सौरकिरणेनेव ज्ञानाद्यमिश्रेणेति तीव्रेणेत्यस्यार्थः । तथा—"यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । सर्वं तद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥" इत्यादिवाक्याच्च । प्रत्युत "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥" इति तत्साहित्यनिषेधश्रवणाच्च । किं चैतादृशो भक्तियोगो भक्तानुग्रहं न लभत इत्याह—तेने इति । ब्रह्म हृदि यस्य तेन ब्रह्महृदा नारदेनादिकवये व्यासाय तेने प्रकाशितः ।

ननु सर्वज्ञस्य व्यासस्यापि भक्तियोगज्ञानमन्याधीनं कथं प्रतीमस्तत्राह—मुह्यंतीति । सूरयो वसिष्ठादयोऽपि यद्यस्मिन्मुह्यन्ति गुणातीतभक्तियोगे गुणजन्यानां बुद्ध्याद्यंतःकरणानां स्वतः प्रवेशाशक्तेर्मोहमज्ञानमेव प्राप्नुवंतीत्यर्थः । "यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति । कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने ॥" इति हंसगुह्योक्तेः । ननु भक्तियोगो न केवलं गुणातीत एव, तस्यापि तृतीयस्कंधे गुणमयत्वदर्शनादित्यत आह–यत्र त्रिसर्गस्त्रिगुणसृष्टत्वं मृषा; अवास्तव इत्यर्थः । यथा तेजोवारिमृदां विनिमयो मेलनं निस्तेजो निर्जलमपि निर्धूलिकमपि दुग्धं तन्नमिति जलवदिति मलिनमिति तत्तन्मेलनाद्भवति यथा तथैव त्रिगुणातीतोऽपि भक्तियोगः । पुरुषवर्तिसत्त्वादिगुणयोगात्सात्त्विको राजसस्तामसश्चोच्यते । ननु भक्तियोगस्य त्रिगुणातीतत्वे बहवो विवदंते तत्राह–धाम्ना स्वेनेति । स्वस्वरूपेणालौकिकमाधुर्यमयेन भवगोचरीभूतेनैव निरस्ताः कुहकाः कुतर्कवंतो येन तम् । न ह्यनुभूयमानेऽर्थे प्रमाणापेक्षेति भावः । इह किल "अध्यात्मदीपमतितितीर्षतां तमोऽन्धम्" इति "कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः" इत्याभ्यां श्रीभागवतस्य प्रदीपत्वं, "पुराणार्कोऽधुनोदितः" इत्यनेनार्कत्वं, "निगमकल्पतरोर्गलितं फलं रसम्" इत्यनेन रसमयफलत्वं, "हरिलीलाकथाव्राताऽमृतानंदितसत्सुरम्" इत्यनेन मोहिनीत्वं च दृश्यते । तत्रास्मिन्पद्ये प्रथमेन व्याख्यानेन दीपत्वं, द्वितीयेनार्कत्वं, तृतीयचतुर्थपंचमेन रसमयफलत्वम् । किंच पद्मानामेवैषामर्थानां परमदुर्लभातिस्वादुत्वेनामृतत्वाद्भक्तानामेव तत्संप्रदानभूतत्वेन देयत्वात् तत्तद्वाचकस्य शास्त्रस्यास्य तत्परिवेष्टत्वेन मोहिनीत्वं च ज्ञेयम् । एवं च यद्यपि सर्वस्य द्वादशस्कंधस्यैव शास्त्रस्यास्य रसमयफलत्वार्कत्वदीपत्वादीनि, तदपि 'भूम्ना व्यपदेशा भवंती'ति न्यायेन सर्गनिरोधे च कचित्तादृशस्तुत्यादौ चाध्यात्ममात्रप्रकाशत्वेन दीपत्वं विसर्गस्थानपोषणादिषु धर्मार्थकाममोक्षाणामन्येषाञ्चाशेषविशेषाणां प्रवृत्तनिवृत्तविहितनिषिद्धसाधनफलानामपि प्रकाशकत्वेनार्कत्वमाश्रयतत्त्वस्य भगवतस्तत्तद्भक्तानां च जन्मकर्मादिलीलाभक्तिप्रेमादौ च प्रस्तुते रसमयफलत्वं तत्र तत्रैव भक्तानुकूलेनार्थेन स्वभक्तवर्गानन्दनार्थं तत्प्रतिकूलेनार्थेनासुरसंघव्यामोहार्थं मोहिनीत्वं च ज्ञेयम् । न चास्य शास्त्रसाक्षाद्भक्तिरसमयस्य तत्तत्प्रतिकूलार्थप्रस्तुतिरसंगतेति वाच्यम् , सर्वशक्तिपरिपूर्णस्य साक्षाद्भगवत इवास्यापि विविधाधिकारिस्वस्वहृदयानुरूपार्थं सर्वशक्तिलिंगप्रकाशकत्वमौचित्यात् "मल्लानामशनिः" इत्यत्र "विराडविदुषाम्" इतिवत्सर्वं समंजसम् ॥ १ ॥ अत्र विजयध्वजः—

परं गुणैः पूर्णमिति 'पॄ पालनपूरणयो'रिति धातोः । द्विविधा हि देवता ग्रन्थारम्भे नमस्कारादिमंगलक्रियामर्हति—आधिकारिकी अभीष्टा चेति । यथा ज्योतिःशास्त्रे सूर्यादिग्रहलक्षणा देवताधिकारिकी, नमनादिक्रियापि वरप्रेमादिविषयाद्यभीष्टा तथा भगवांस्तूभयरूप इत्यभिप्रेत्याह—परमिति । परमात्मा हि सर्वप्राणिनां संसारोन्मूलनायात्र शास्त्रे प्रतिपाद्यते, "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वन्तरन्तरं यदयमात्मा' इति श्रुतेः । स एव परमप्रेमविषयः परोऽपि नारायण एव नान्यः कश्चिदिति "तदेतत्परमं ब्रह्म वेदवादेषु पठ्यते । स देवः पुंडरीकाक्षः स्वयं नारायणः परः" इति हरिवंशे नारायण एव 'पर'शब्देनोक्तः । "ब्रह्मविदाप्नोति परम्" इति श्रुतेश्च । धीमहि ध्यायेम 'जन्माद्यस्य यत' इत्यादिविशेषणैः परशब्दोक्तान्गुणान् विशिनष्टि—पालनपूरणाभ्यां यथासम्भवं सृष्ट्यादयो वाच्या इत्यूहनीयम् । अलौकिकवस्तुनो लक्षणोपदेशमन्तरेण ज्ञातुमशक्यत्वाच्छशविषाणतुल्यं तदित्यतो लक्षणमाह—जन्माद्यस्येति । अस्य प्रत्यक्षस्य जगतो जन्मादि यस्य तज्जन्मादि, तद्गुणसंविज्ञानो बहुव्रीहिः, यतो यस्माद्भवतीति शेषः । 'आदि' शब्देन स्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा गृह्यन्ते, न केवलस्थितिसंहारौ; श्रुतिस्मृतिविरोधात् । यथा सास्नादिमान् गौरिति वृद्धोपदिष्टः सास्नादिमन्तं पदार्थमश्वादिभ्यो व्यावृत्तं गोशब्दवाच्यं प्रत्येति, तथा 'जन्मादिकारणं पर'मिति श्रुत्याचार्योपदिष्टं जन्मादिकं प्रत्येकं परब्रह्मलक्षणतया ज्ञातव्यम् ; वेदांतशास्त्रेषु प्रतिपादितत्वात् । ननु परस्य जन्मादिकारणत्वं कुत इति तत्राह—अन्वयादिति । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" इत्यादिश्रुतीनाम् , "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । स्रष्टा पाता तथैवात्ता निखिलस्यैक एव हि" इत्यादिस्मृतीनां जगत्कारणे हरावन्वयाद् उपक्रमोपसंहारादितात्पर्यलिङ्गात्परब्रह्मैव जगत्कारणं नान्यदिति भावः । ननु रुद्रादीनामपि जगत्कारणत्वं श्रूयते, कथं परस्यैवेत्यवधार्यते ? उच्यते, यद्यपि रुद्रादीनां वेदैकदेशप्रतिपाद्यत्वमस्ति तथाप्यनन्तवेदपदकदम्बप्रतिपादितत्वं विष्णोरेव, "सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिभ्यः । ननु श्रुत्यादेः पिपीलिकादिलिपिवदप्रमाणत्वान्माणवकदृष्टशार्दूलकल्पेन तेन तन्निश्चयाभावादतः परमाणुपुंजस्यैव कारणत्वमिति तत्राह—इतरत इति ॥ प्रत्यक्षागमाभ्यनुगृहीतादितरस्मात्तर्कात्परब्रह्मणः कारणत्वं

ज्ञायते। 'समुदाय उभयहेतुकेऽपि तदप्राप्तिरि'ति भगवता कृष्णद्वैपायनेन निरस्तत्वात्। अस्यार्थः वैशेषिकस्तावत्परिमाणभेदेन देहादेराशुतरविनाशित्वांगीकारादात्मनः स्थायित्वांगीकाराच्चार्धवैनाशिकः। सर्वक्षणिकत्ववादिनस्तु पूर्णवैनाशिका इत्यर्द्धवैनाशिका इत्यर्द्धवैनाशिकवैशेषिकमतनिराकरणानन्तरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियते इत्यवान्तरसंगतिर्द्रष्टव्या। तत्र तावद् बुद्धमुनिनाऽऽगम उपदिष्टः। स चागमो वैभाषिकसौत्रान्तिकविज्ञानवादिसर्वशून्यवाद्याख्यचतुर्विधशिष्यप्रतिवैचित्र्याय चतुर्विधो भवति। तत्र वैभाषिकसौत्रांतिकयोर्ज्ञानं तदतिरिक्तपदार्थाश्च सर्वे क्षणिकाः सत्यभूताः सन्ति। इयान्परमभेदः—वैभाषिकस्य घटादिपदार्थाः प्रत्यक्षाः, सौत्रान्तिकस्य तु ज्ञाने घटाद्याकारे उत्पन्ने तेनाकारेणाप्रत्यक्षघटादयोऽनुमीयन्त इति। तत्रादौ वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्वाविशेषात् तयोर्मतमेकीकृत्य तन्मतं प्रमाणमूलं भ्रान्तिमूलं वेति संदेहे प्रमाणमूलमिति प्राप्तम्। तथा हि—पृथिव्यप्तेजोवायवश्चत्वारि भूतानि चतुर्विधपरमाणुपुंजस्वरूपाणि, एवं भौतिकानि रूपादिविषयेन्द्रियाणि परमाणुपुंजस्वरूपाणि। न हि परमाणुसमूहव्यतिरेकेणावयविभूतं किंचित्कार्यमस्तीति परमाणहेतुक एव पृथिव्यादिसमुदायो बाह्यः। आध्यात्मिकश्च समुदायस्कंधहेतुकः। तथा हि—रूपविज्ञानवेदनासंज्ञासंस्काराश्च पंच, ते स्कंधास्तत्र रूपस्कंधः सविषयेन्द्रियाणि विषयाणां रूपादीनामाध्यात्मिकत्वमाध्यात्मिकेन्द्रियसम्बन्धाद् द्रष्टव्यम्। अहमित्यालयविज्ञानप्रवाहो विज्ञानस्कन्धः, सुखादिप्रत्ययो वेदनास्कन्धः। गौरश्व इत्यादिशब्दादिविशिष्टवस्तुविषयकसविकल्पकप्रत्ययः संज्ञास्कन्धः, रागद्वेषमोहधर्माधर्माः संस्कारस्कन्धः। तत्र विज्ञानस्कन्धश्चित्तमित्यात्मेति च गीयते। इतरे स्कन्धाश्चैत्ताः। एतेषां चित्तचैत्तानां स्कन्धानां समुदायः सर्वव्यवहारास्पद आध्यात्मिकश्च स्कन्धहेतुक इति सर्वक्षणिकत्ववादिनो वैभाषिकसौत्रांतिकयोर्मतं तन्निराकरोति—समुदाय उभयहेतुकेऽपि तदप्राप्तिरिति। उभयहेतुकेऽपि समुदाये परमाणुहेतुके बाह्यसमुदाये स्कन्धहेतुके चाध्यात्मिकसमुदाये तदप्राप्तिस्तस्य समुदायस्याप्राप्तिरित्यर्थः। अचेतनानां परमाणूनां स्कन्धानां च स्वतः समुदायायोगादन्यस्य च स्थिरस्य समुदायकर्तुश्चेतनस्यानभ्युपगमादिति सूत्रवाक्यशेषः। अत्र श्रुत्याद्यनुगृहीततर्काभावात् केवलतर्कस्याप्रतिष्ठितत्वात्।

ननु कार्यं कारणपूर्वकं कार्यत्वादिति कारणसामान्यमात्रं सिद्धं; विशेषतः कुतः सिद्धिरिति चेत्—सत्यम्; प्रधानादेरचेतनत्वेन बुद्धिपूर्वककर्तृत्वानुपपत्तेरस्वातंत्र्याच्च क्षित्यादेश्चेतनकर्तृकत्वं परिशेषसिद्धं, चेतनाद्धि पित्रादेः पुत्राद्युत्पत्तिदर्शनात्तद्दृष्टांतेन ब्रह्मादिचेतनजातं परमचेतनाद्विष्णोरुत्पद्यत इति शुष्कोऽयं तर्कः समुत्तिष्ठते। चशब्दः समुच्चये, वेदानामपौरुषेयत्वेन कर्तृप्रसिद्ध्यभावादसंदिग्धप्रमाणत्वेन तदनुगृहीततर्कस्यापि प्रतितर्कपराहतिर्नाशंकनीयेत्यस्मिन्नर्थे वा। अनेन "अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयात्" इति चतुःसूत्री च व्याख्याता। जिज्ञासैव धीमहीत्यनेनोच्यते। वेदविचारनिर्णेतृगुणोपसंहाररूपत्वात्। इयानेव विशेषः—ध्यानमेव ज्ञानसाधनं न कर्मादिकमित्यतो धीमहीति पदं, कर्मणा शुद्धांतःकरणस्य ध्यानसंभवात्। यस्तु श्रुतिस्मृती अनादृत्य केवलतर्केण ब्रह्मणो जन्मादिकारणत्वं घटयितुं प्रत्यवतिष्ठति स ऽन्वयव्यतिरेकात्मकतर्केणापहस्तितव्य इत्यतो वा आह—अन्वयादितरतश्चेति ॥ अन्वयात् अन्वयानुमानाद् इतरतो व्यतिरेकानुमानात्तौ च दर्शितौ। चशब्दस्तु परोक्ततर्कस्य केवलस्य व्याप्तिशून्यत्वादस्य च प्रत्यक्षगृहीतव्याप्तिकत्वेन बलीयस्त्वादप्रतिहतः स्वार्थं साधयतीत्येतस्मिन्नर्थे वर्त्तते। यथांबादेरचेतनस्य स्पंदनादिप्रवृत्तिदर्शनेन प्रधानस्य कारणत्वं किं न स्यात्तत्राह—अर्थेष्विति ॥ अर्थेषु पटादिषु अभिज्ञः सर्वतोषविशेषाकारं जानातीत्यभिज्ञः। प्रधानस्य जडत्वेन ज्ञानाश्रयत्वलक्षणासंभवान्नितरां न सर्वज्ञत्वं; विष्णोस्तु सर्वज्ञत्वं स्मृतिश्रुतिसिद्धम्—"यः सर्वज्ञः सर्ववित्। तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप" इत्यादिना। नन्वस्य हेतोः सर्वज्ञे रुद्रादावपि वृत्तेरसाधकत्वमिति तत्राह—स्वराडिति ॥ स्वयमेव राजत इति स्वराट्। स्वस्य स्वयमेव राजा नान्योऽधिपतिरिति च। अयं भावः—"यं कामये तमुग्रं कृणोमि" इति रुद्रादीनां श्रीप्रसादायत्तज्ञानादिगुणवत्त्वदर्शनात् "मम योनिरप्स्वान्तः" इति। श्रियश्च विष्णवनुगृहीतज्ञानादिमत्त्वदर्शनाद्विष्णोश्चानन्याधीनज्ञानादिगुणवत्त्वात्तद्गतानां विशेषाणामनंतानां तैरज्ञातत्वान्न तेषां निरुपमचरितसर्वज्ञत्वम्, अतो न तेषु तस्य हेतोर्व्यभिचार इति स एव कर्त्तेति। "न ते विष्णो जायमान एष भूताधिपतिः" इत्यादिश्रुतिरनन्याधिपतित्वे सर्वाधिपतित्वे च मानम्। स्रष्टुराज्ञांतररहित इति वा स्वराट्। स्वात्मानं स्वयमेव राजयति वा प्रकाशयति न परेच्छयेति वा। ननु श्रुतीनामनंतत्वादेकत्र हरेरनन्याधीनत्वकथनसंवादतः कुतो निश्चयः परोऽनन्याधीनस्तत्राह—तेन इति ॥ यः पर आदिकवये चतुर्मुखाय ब्रह्म सांगं वेदं हृदा स्नेहेन तेने विस्तारितवान्। तस्य सकृदुपदेशमात्रेणाशेषग्रहणसामर्थ्येऽपि विस्तारितमिति "वक्तव्यं ब्रह्म गुरुणा चतुर्वारमथापि वा" इत्युपदेशशास्त्रमनुसृत्य 'तेन' इत्युक्तम्, शिष्यशिक्षायै तथोपदेशसंभवात्। चतुर्मुखस्य वेदोपदेशेन हरेरनन्याधिपत्वे किमायातमिति चेत्—न; "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव" इति श्रुतौ चतुर्मुखस्य निरतिशयमाहात्म्यकथनात्तदुपदेष्टृत्वात्तस्यानन्याधिपतित्वसिद्धेः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः सकलवेदविद्योपदेशोऽपि सिद्धः। आदिकवित्वं च ब्रह्मणः "कविर्यः पुत्रः स इमा चिकेत" इत्यादिश्रुतिसिद्धम्। "ब्रह्मा वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः" इति। 'हृत्स्नेहे मनसि स्निग्धे सुहृद्रन्थौ हरावपी'त्यभिधानम्। न प्रहेलिकावदुपदेश इति द्योतनाय 'हृदे'त्युक्तम्। तेने ब्रह्मेति सर्वज्ञत्वे हेत्वंतरं वा सकलचेतनराड्युत्तमस्य चतुराननस्योपदेष्टुः शार्ङ्गपाणेः सर्वज्ञत्वं न्यायप्राप्तमिति भावः। "वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात्" इति श्रुतौ नारायणविषयज्ञाने

ज्ञायते। 'समुदाय उभयहेतुकेऽपि तदप्राप्तिरि'ति भगवता कृष्णद्वैपायनेन निरस्तत्वात्। अस्यार्थः वैशेषिकस्तावत्परिमाणभेदेन देहादेराशुतरविनाशित्वांगीकारादात्मनः स्थायित्वांगीकाराच्चार्धवैनाशिकः। सर्वक्षणिकत्ववादिनस्तु पूर्णवैनाशिका इत्यर्द्धवैनाशिका इत्यर्द्धवैनाशिकवैशेषिकमतनिराकरणानन्तरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियते इत्यवान्तरसंगतिर्द्रष्टव्या। तत्र तावद् बुद्धमुनिनाऽऽगम उपदिष्टः। स चागमो वैभाषिकसौत्रान्तिकविज्ञानवादिसर्वशून्यवाद्याख्यचतुर्विधशिष्यप्रतिवैचित्र्याय चतुर्विधो भवति। तत्र वैभाषिकसौत्रांतिकयोर्ज्ञानं तदतिरिक्तपदार्थाश्च सर्वे क्षणिकाः सत्यभूताः सन्ति। इयान्परमभेदः—वैभाषिकस्य घटादिपदार्थाः प्रत्यक्षाः, सौत्रान्तिकस्य तु ज्ञाने घटाद्याकारे उत्पन्ने तेनाकारेणाप्रत्यक्षघटादयोऽनुमीयन्त इति। तत्रादौ वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्वाविशेषात् तयोर्मतमेकीकृत्य तन्मतं प्रमाणमूलं भ्रान्तिमूलं वेति संदेहे प्रमाणमूलमिति प्राप्तम्। तथा हि—पृथिव्यप्तेजोवायवश्चत्वारि भूतानि चतुर्विधपरमाणुपुंजस्वरूपाणि, एवं भौतिकानि रूपादिविषयेन्द्रियाणि परमाणुपुंजस्वरूपाणि। न हि परमाणुसमूहव्यतिरेकेणावयविभूतं किंचित्कार्यमस्तीति परमाणहेतुक एव पृथिव्यादिसमुदायो बाह्यः। आध्यात्मिकश्च समुदायस्कंधहेतुकः। तथा हि—रूपविज्ञानवेदनासंज्ञासंस्काराश्च पंच, ते स्कंधास्तत्र रूपस्कंधः सविषयेन्द्रियाणि विषयाणां रूपादीनामाध्यात्मिकत्वमाध्यात्मिकेन्द्रियसम्बन्धाद् द्रष्टव्यम्। अहमित्यालयविज्ञानप्रवाहो विज्ञानस्कन्धः, सुखादिप्रत्ययो वेदनास्कन्धः। गौरश्व इत्यादिशब्दादिविशिष्टवस्तुविषयकसविकल्पकप्रत्ययः संज्ञास्कन्धः, रागद्वेषमोहधर्माधर्माः संस्कारस्कन्धः। तत्र विज्ञानस्कन्धश्चित्तमित्यात्मेति च गीयते। इतरे स्कन्धाश्चैत्ताः। एतेषां चित्तचैत्तानां स्कन्धानां समुदायः सर्वव्यवहारास्पद आध्यात्मिकश्च स्कन्धहेतुक इति सर्वक्षणिकत्ववादिनो वैभाषिकसौत्रांतिकयोर्मतं तन्निराकरोति—समुदाय उभयहेतुकेऽपि तदप्राप्तिरिति। उभयहेतुकेऽपि समुदाये परमाणुहेतुके बाह्यसमुदाये स्कन्धहेतुके चाध्यात्मिकसमुदाये तदप्राप्तिस्तस्य समुदायस्याप्राप्तिरित्यर्थः। अचेतनानां परमाणूनां स्कन्धानां च स्वतः समुदायायोगादन्यस्य च स्थिरस्य समुदायकर्तुश्चेतनस्यानभ्युपगमादिति सूत्रवाक्यशेषः। अत्र श्रुत्याद्यनुगृहीततर्काभावात् केवलतर्कस्याप्रतिष्ठितत्वात्।

ननु कार्यं कारणपूर्वकं कार्यत्वादिति कारणसामान्यमात्रं सिद्धं; विशेषतः कुतः सिद्धिरिति चेत्—सत्यम्; प्रधानादेरचेतनत्वेन बुद्धिपूर्वककर्तृत्वानुपपत्तेरस्वातंत्र्याच्च क्षित्यादेश्चेतनकर्तृकत्वं परिशेषसिद्धं, चेतनाद्धि पित्रादेः पुत्राद्युत्पत्तिदर्शनात्तद्दृष्टांतेन ब्रह्मादिचेतनजातं परमचेतनाद्विष्णोरुत्पद्यत इति शुष्कोऽयं तर्कः समुत्तिष्ठते। चशब्दः समुच्चये, वेदानामपौरुषेयत्वेन कर्तृप्रसिद्ध्यभावादसंदिग्धप्रमाणत्वेन तदनुगृहीततर्कस्यापि प्रतितर्कपराहतिर्नाशंकनीयेत्यस्मिन्नर्थे वा। अनेन "अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयात्" इति चतुःसूत्री च व्याख्याता। जिज्ञासैव धीमहीत्यनेनोच्यते। वेदविचारनिर्णेतृगुणोपसंहाररूपत्वात्। इयानेव विशेषः—ध्यानमेव ज्ञानसाधनं न कर्मादिकमित्यतो धीमहीति पदं, कर्मणा शुद्धांतःकरणस्य ध्यानसंभवात्। यस्तु श्रुतिस्मृती अनादृत्य केवलतर्केण ब्रह्मणो जन्मादिकारणत्वं घटयितुं प्रत्यवतिष्ठति सोऽन्वयव्यतिरेकात्मकतर्केणापहस्तितव्य इत्यतो वा आह—अन्वयादितरतश्चेति॥ अन्वयात् अन्वयानुमानाद् इतरतो व्यतिरेकानुमानात्तौ च दर्शितौ। चशब्दस्तु परोक्ततर्कस्य केवलस्य व्याप्तिशून्यत्वादस्य च प्रत्यक्षगृहीतव्याप्तिकत्वेन बलीयस्त्वादप्रतिहतः स्वार्थं साधयतीत्येतस्मिन्नर्थे वर्त्तते। यथांबादेरचेतनस्य स्पंदनादिप्रवृत्तिदर्शनेन प्रधानस्य कारणत्वं किं न स्यात्तत्राह—अर्थेष्विति॥ अर्थेषु पटादिषु अभिज्ञः सर्वतोषविशेषाकारं जानातीत्यभिज्ञः। प्रधानस्य जडत्वेन ज्ञानाश्रयत्वलक्षणासंभवान्नितरां न सर्वज्ञत्वं; विष्णोस्तु सर्वज्ञत्वं स्मृतिश्रुतिसिद्धम्—"यः सर्वज्ञः सर्ववित्। तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप" इत्यादिना। नन्वस्य हेतोः सर्वज्ञे रुद्रादावपि वृत्तेरसाधकत्वमिति तत्राह—स्वराडिति॥ स्वयमेव राजत इति स्वराट्। स्वस्य स्वयमेव राजा नान्योऽधिपतिरिति च। अयं भावः—"यं कामये तमुग्रं कृणोमि" इति रुद्रादीनां श्रीप्रसादायत्तज्ञानादिगुणवत्त्वदर्शनात् "मम योनिरप्स्वान्तः" इति। श्रियश्च विष्ण्वनुगृहीतज्ञानादिमत्त्वदर्शनाद्विष्णोश्चानन्याधीनज्ञानादिगुणवत्त्वात्तद्गतानां विशेषाणामनंतानां तैरज्ञातत्वान्न तेषां निरुपमचरितसर्वज्ञत्वम्, अतो न तेषु तस्य हेतोर्व्यभिचार इति स एव कर्त्तेति। "न ते विष्णो जायमान एष भूताधिपतिः" इत्यादिश्रुतिरनन्याधिपतित्वे सर्वाधिपतित्वे च मानम्। स्रष्टुराज्ञांतररहित इति वा स्वराट्। स्वात्मानं स्वयमेव राजयति वा प्रकाशयति न परेच्छयेति वा। ननु श्रुतीनामनंतत्वादेकत्र हरेरनन्याधीनत्वकथनसंवादतः कुतो निश्चयः परोऽनन्याधीनस्तत्राह—तेन इति॥ यः पर आदिकवये चतुर्मुखाय ब्रह्म सांगं वेदं हृदा स्नेहेन तेने विस्तारितवान्। तस्य सकृदुपदेशमात्रेणाशेषग्रहणसामर्थ्येऽपि विस्तारितमिति "वक्तव्यं ब्रह्म गुरुणा चतुर्वारमथापि वा" इत्युपदेशशास्त्रमनुसृत्य 'तेन' इत्युक्तम्, शिष्यशिक्षायै तथोपदेशसंभवात्। चतुर्मुखस्य वेदोपदेशेन हरेरनन्याधिपत्वे किमायातमिति चेत्—न; "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव" इति श्रुतौ चतुर्मुखस्य निरतिशयमाहात्म्यकथनात्तदुपदेष्टृत्वात्तस्यानन्याधिपतित्वसिद्धेः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः सकलवेदविद्योपदेशोऽपि सिद्धः। आदिकवित्वं च ब्रह्मणः "कविर्यः पुत्रः स इमा चिकेत" इत्यादिश्रुतिसिद्धम्। "ब्रह्मा वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः" इति। 'हृत्स्नेहे मनसि स्निग्धे सुहृद्बन्धौ हरावपी'त्यभिधानम्। न प्रहेलिकावदुपदेश इति द्योतनाय 'हृदे'त्युक्तम्। तेने ब्रह्मेति सर्वज्ञत्वे हेत्वंतरं वा सकलचेतनराश्युत्तमस्य चतुराननस्योपदेष्टुः शार्ङ्गपाणेः सर्वज्ञत्वं न्यायप्राप्तमिति भावः। "वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात्" इति श्रुतौ नारायणविषयज्ञाने

स्वातन्त्र्यकथनात्तदुपदिष्टज्ञानेनैव तज्ज्ञानं कथं संगच्छत इत्याशंक्य "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेस्तत्प्रसादायत्तं तज्ज्ञानं, न तु स्वप्रतिभया; अन्यथा ज्ञानमेव न स्यादुक्तहेतोरित्यभिप्रेत्याह—मुह्यन्ति यत्सूरय इति ॥ भूतभविष्यद्वर्त्तमानब्रह्मादयो यत्प्रसादमन्तरेण मुह्यन्ति, 'मुह वैचित्त्ये' इति धातोस्त्रितिर्ज्ञानं न जानन्ति, कश्चिदन्यथा च जानन्तीत्यर्थः । तस्माद्ब्रह्मादिचेतनराश्यचिन्त्यमहिमामहीधर इति प्रतीयते । नन्वीश्वरः सृष्ट्यादौ प्रवर्तमानः प्रयोजनार्थी सृजत्यन्यथा वा ? न प्रथमः; यत्प्रयोजनार्थं प्रवर्त्तते पूर्वं तदभावादपूर्णत्वेनाशक्तत्वात्सृष्ट्यनुपपत्तेः । न द्वितीयः; प्रवृत्तिमात्रस्य स्वप्रयोजनोद्देशेन दृष्टत्वाद् वृथा तदनुपपत्तेः; अतो मायामयी सृष्टिरेष्टव्येत्यत आह—तेजोवारीति ॥ तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गो यत्र भगवति मृषैव पूर्वाप्राप्तप्रयोजनप्रापको नेत्यर्थः । कथं तर्हि प्रवृत्तिः ? इति चेदुच्यते—"देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा", "लोकवत्तु लीलाकैवल्यम्" इति श्रुतिसूत्रबलादाप्तसमस्तप्रयोजनस्य हरेर्लीलयैव प्रवृत्तिरिति भावः, जीवेश्वरजडानां सर्गस्त्रिसर्गः । यथैकमेव मूलं तेजः स्वकार्येषु पार्थिवादिपदार्थेषु बहुधा भूत्वा प्रविशति बहिश्च मथनादिनाविर्भवति; तथेश्वरोऽपि जगत्सृष्ट्वा बहुरूपीभूय जगदन्तः प्रविशति, बहिश्च भक्तानुकम्पया वासुदेवादिबहुरूप आविर्भवति—अयमीश्वरसर्गः । दीपाद्दीपान्तरोत्पत्तिर्यथा—तथा ईश्वरसर्ग इति वा । यथा सूर्यादितेजसां जलाद्युपाधिनिमित्तैर्बहूनि प्रतिबिम्बानि जायन्ते तथैव सूक्ष्मस्थूलशरीराद्युपाधिनिमित्तैः प्रतिबिम्बभूता जीवा हरेरुत्पद्यन्ते—एष जीवसर्गः । यथा कुलालो मृदमुपादानीकृत्य घटादीन्सृजति तथेश्वरो जडप्रकृतिमुपादाय महदहंकाराद्यशेषजडपदार्थान्सृजति—इत्येष जडसर्गः । अनेन मायामयी सृष्टिरित्यस्य किमायातमिति चेदुच्यते—यत्रेश्वर इति । विशेषणादन्यत्र जगत्यमृषा मिथ्या न भवति । तथा च योजना—यथा तेजोवारिमृदां विनिमयः कार्यमर्थक्रियायोग्यत्वात्सदसद्विलक्षणो न भवति, तथा यत्र यदाधारतया क्रियमाणस्त्रिसर्गो मृषा न भवति, अतोऽर्थक्रियोपपत्तिरेव मिथ्यात्वबाधिकेति भावः । ननु तेजःकार्यं स्फुलिंगादि वारिकार्यं फेनादि मृत्कार्यं घटादि यथा मिथ्या तथा यत्र जगन्मृषेत्यर्थः स्यात् । तथा च श्रुतिः "वाचारंभणं विकारः", अनुमानं च विमतं मिथ्या दृश्यत्वादित्यतो मायामयी सृष्टिरित्यत आह—धाम्नेति ॥ स्वेन धाम्ना स्वरूपज्ञानमहिम्ना सदा निरस्तं कुहकमिंद्रजालादिमाया येन यस्य वा स तथा तं, यः सर्वज्ञः 'अथैनमाहुः सत्यकर्मेति विश्वं सत्यम्' इत्यादिश्रुतिविरोधादुदाहृतश्रुतेरर्थांतरत्वसंभवान्नित्यनिरस्तेंद्रजालो विष्णुर्मायामयीं सृष्टिं न विदधाति, किंतु सत्यमेव । लोके चासमर्थः सन्निंद्रजालादिकं सृजति, न तु समर्थः । विष्णुस्तु नित्यपरिपूर्णशक्तिः किमर्थं तत्करोतीत्यर्थः, मुक्तव्यावृत्तये सदेत्युक्तं, तेषां मुक्तेः पूर्वं बन्धनात्केन कुहकत्वसंभवात् । ननु विष्णोः सदानिरस्तकुहकत्वे मुक्तव्यावृत्तिर्घटेत । तदेव कुत इति चेत् तत्राह–सत्यमिति ॥ सत्यं निर्दुःखनित्यनिरतिशयानंदाद्यनुभवरूपं "सच्छब्द उत्तमं वक्ति ह्यानंदंतीति वै वेदात् । येति ज्ञानं समुद्दिष्टम्" इति वचनान्नित्यनिरस्तकुहकत्वेन मुक्तव्यावृत्तिर्युज्यते इति भावः । एतदुक्तं भवति—उपक्रमादितात्पर्ययुक्त्युपेतसर्वश्रुतिस्मृतितातपर्यपर्यालोचनया सर्वजगत्सृष्ट्यादिकर्तृत्वात्सर्वज्ञत्वाच्चतुर्मुखज्ञानोपदेष्टृत्वात्स्वानुग्रहमंतरेण दुर्ज्ञेयत्वात्स्वप्रयोजनानुद्देशेन केवललीलयैव जगत्सर्जनादिप्रवृत्तिमत्त्वात्सत एव नित्यनिरस्तेंद्रजालत्वेन सत्यमहिमत्वान्नित्यनिर्दुःखनिरतिशयानंदानुभवस्वरूपत्वाच्च सर्वगुणपूर्णो विष्णुः सर्वैर्ध्येय इति तात्पर्यार्थः ।

ननु 'धीमही' ति च्छान्दसः प्रयोगः कस्मात्कृतः ? । उच्यते–गायत्रीप्रतिपाद्यं नारायणाख्यं परं ब्रह्मैव, न तु सूर्यः "चक्षोः सूर्यो अजायत" इति श्रुत्या तदंगजननोक्तेरिति दर्शयितुं यथा वेदाध्ययनोपक्रमे गायत्र्यभिधीयते विशिष्टफलहेतुत्वात्तथा भागवतोपक्रमे इति वा गायत्र्याशेषवेदप्रतिपाद्यो नारायण एव भागवते प्रतिपाद्यते इति वा इतरेषां भगवत्कृतत्वेन तत्परत्वेति तद्व्यावृत्तये वा इतरेभ्योऽप्यस्य माहात्म्याधिक्यप्रकटनायेति वा धीमहीति छांदसं पदं प्रायुंक्त भगवान्बादरायण इति । अथोपनिषद्व्याख्यानमाह–तं परं सत्यं वयं धीमहीति संबंधः । सत्यमबाध्यं तत्र किंचिद्व्यवहारमात्राबाध्यं तद्व्यावर्त्तयन्नाह–परमिति । परमार्थसत्यमत्यंताबाध्यमित्यर्थः । तथा च श्रुतिः "सत्यस्य सत्यम्" इति "प्राणा वै सत्यं तेषामेष सत्यम्" इति प्राणशब्दोदितानां स्थूलसूक्ष्मभूतानां व्यवहारतः सत्यानामधिष्ठानभूतं परमार्थसत्यमात्मानं दर्शयति । एवं "सत्यं ज्ञानमनंतं ब्रह्म" "ऐतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि" इत्यादिश्रुतिरपि ब्रह्मात्मशब्दोदितं परं तत्त्वमबाध्यं दर्शयति-सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च परमार्थसत्यत्वम् । नहि निरधिष्ठानो भ्रमोऽस्ति, न वा निरवधिबाधः । तत्र सर्वभ्रमाधिष्ठानत्वं जन्माद्यस्येत्यादिना दर्शितम् । सर्वबाधावधित्वं च 'तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषे' त्यादिना । तं परं सत्यं सर्वाधिष्ठानसन्मात्रमखंडवाक्यार्थभूतं श्रुत्वा मत्वा च वयं मुमुक्षवो ध्यायेम निदिध्यासेम । ध्यानमत्र निदिध्यासनरूपमेवाभिप्रेतं न तूपासनम् । निदिध्यासनं हि वस्तुस्वरूपापेक्षप्रत्ययानंतरितशाब्दज्ञानसंततिरूपम् । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः" इति श्रुत्या "ततस्तु तं पश्यति निष्कलं ध्यायमानः' इत्यादिश्रुत्या चात्मसाक्षात्कारसाधनत्वेन विहितम् । उपासनन्तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रतंत्रं मानसक्रियाप्रवाहरूपं यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्नित्यादि । इदं च वस्तुस्वरूपानपेक्षमपि तदविरोधि किंचिद्विरोध्यपि यथा वाचं धेनुमुपासीतेत्यादि । द्विविधमप्युपासनं श्रुत्या च ब्रह्मणि निषिद्धम्–"तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति शुद्धगोचराया वृत्तेरुपनिषन्मात्रकरणकत्वात् "तं त्वौपनिषदम्" इति श्रुतेस्तस्या एव चावर्त्यमानाया निदिध्यासनरूपत्वाद्युक्तं शुद्धगोचरत्वम् । एतावन्मात्रपर्यवसानाच्च सर्वसाधनविधीनां धीमहीत्युक्तम् । एतस्य च मंगलत्वं "सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान्मंगलायतनो हरिः" इत्यादिशास्त्रसिद्धम् । एवं शुद्धस्य ब्रह्मणो निदिध्यास्यमानस्य

परमार्थसत्यतामुपपादयितुं तत्पदार्थरूपतामाह—जन्माद्यस्येत्यादिना। अस्य प्रत्यक्षादिसकलप्रमाणसंनिधापितस्य जगतो जन्मादि जन्मस्थितिभंगं यतो भवति तं सत्यं धीमहीति संबंधः। तथा च श्रुतिः–"यतो वा इमानि भूतानि जायंते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशंति" इत्याद्याः, "आनंदो ब्रह्मेति व्यजानात्। आनंदादेव खल्विमानि भूतानि जायंते" इत्याद्या जगज्जन्मलयस्थितिकारणतां ब्रह्मणो दर्शयति। यत इति प्रकृतौ पंचमी, "जनिकर्तुः प्रकृतिः" इति पाणिनिस्मरणात्। जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः। "सर्वादीनि सर्वनामानि" इतिवत्। जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। ननु "असद्वा इदमग्र आसीत्" इति श्रुत्या कार्येष्वनुस्यूतत्वाच्छून्यमेव जगत्कारणमस्तु, नेत्याह–अन्वयादिति॥ इदं सदिदं सदिति सद्रूपस्यैव कार्येष्वनुस्यूतत्वात्। इतरतश्च असतोऽनन्वयात् शून्यमिदमिति प्रतीत्यभावात्। "कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेत" इति वाक्येनासतः कारणताप्रतिषेधाच्च सद्रूपं ब्रह्मैव जगदुपादानमित्यर्थः। "सदेव सोम्येदमग्र आसीत्" इति श्रुतिवाक्यान्वयात्। इतरतश्च "असद्वा इदमग्र आसीत्" इत्यसतः सत्तानन्वयाच्चेति वा, तथा चासत्पदं सूक्ष्मत्वेन गौण्या वृत्त्या सत्येव योजनीयम्। एतच्च "समाकर्षात्" इति समन्वयाध्याये चतुर्थपादे चतुर्थाधिकरणे प्रकृतस्यैव सत्यज्ञानादिलक्षणस्याकर्षणम् प्रतिपादनमाकर्षः नामरूपादिराहित्यं सूत्रेण व्याख्यातम्। इतरतश्चेत्यत्र चकारादसतोऽन्वयलाभः। अथ वा कार्यान्वयाद् ब्रह्म कारणमित्युक्तेः कार्यान्वयात्कार्यविनाशे तस्य विनाशमाशंक्योक्तम्—इतरतश्चेति। तथा हि-घटनाशेऽपि तदन्विता मृन्न नश्यति। तत्कस्य हेतोर्घटे भिन्ने शरावादौ तस्या अन्वयात्। एवं सदपि इतरत इतरत्र कार्यांतरे तदुपलंभान्वयादित्यर्थः। वाक्यार्थानुपपत्त्यादिदोषाच्च नासतो जगत्कारणतेत्याह—अर्थेष्वभिज्ञ इति॥ न हि सतोऽप्यर्थानविदित्वा कश्चिद्रचितुं शक्यते, किं पुनरवस्तुनेति भावः। तथा च श्रुतिः–"यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते" इति "सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्। तदैक्षत बहुस्यां प्रजायेय" इत्याद्या च। स्वरूपसाधनप्रयोजनादिविज्ञानवत एव जगत्कारणत्वं दर्शयति–अभितः सर्वप्रकारेण। सामान्यतो विशेषतश्च सर्वं वस्तु जानातीत्यभिज्ञः 'सर्वविदि' ति पदद्वयार्थो दर्शितः। अर्थानामभिज्ञ इति दर्शिते अर्थेष्विति सप्तमी, सर्वत्रैकरूपैवावृत्त्या कल्पितत्वरूपा विषयतेति सूचयति–अथवान्वयादितरतश्चार्थेष्विति पूर्वेणैव संबंधः। एवं च सर्वज्ञत्वोपादानत्वेन परमाणुकारणवादः प्रधानकारणवादश्च निराकृतः। ननु मा भूत् कारणता परमाणूनां, प्रधानस्य तु भविष्यति; सत्त्वपरिणामेन सर्वज्ञत्वसंभवात् ब्रह्मणश्च निर्द्धर्मकत्वेन सर्वज्ञानाभावेनाकर्तृत्वादित्यत आह—स्वराडिति। स्वयमेव राजते प्रकाशत इति स्वराट्, अन्यानपेक्षप्रकाशरूप इत्यर्थः। तथा च सविता प्रकाशत इत्यादिवत्कर्तृत्वौपचारिकत्वेन सर्वविषयज्ञानस्वरूपत्वस्य विवक्षितत्वान् न प्रधानस्याचेतनस्य कारणताप्रसंग इत्यर्थः। एवं चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा समर्थिता भवति। अन्यथा प्रधानविज्ञाने तत्कार्यज्ञानसंभवेऽपि तत्कार्याणां ज्ञानासंभवात् ब्रह्मणि विदिते तु पुरुषाणां स्वत एव तद्रूपत्वात् इतरेषां च तत्र कल्पितत्वेन तद्व्यतिरेकात् "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यादिश्रुत्या "कस्मिन्नु भगवतो विज्ञाते सर्वमिदं विज्ञातं भवति" इत्याद्यया "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञातमिदं सर्वं विदितम्" इत्याद्यया च प्रतिपादितैकविज्ञानप्रतिज्ञोपपत्तेः। ननु ब्रह्मकारणत्वेऽप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा नोपपद्यते, वेदस्यापौरुषेयत्वेन स्वातंत्र्याभ्युपगमात् तस्य ब्रह्मकार्यत्वेन पौरुषेयत्वेनाप्रामाण्यप्रसंगात्। किं बलाद्ब्रह्मकारणतापि व्यवस्थाप्येत? तस्मात्संकोचितायां प्रतिज्ञायां स्वकार्यापेक्षया प्रधानमपि लब्धप्रसवमित्याशंक्याह—तेन इत्यादि। ब्रह्म वेदं यस्तेने विस्तारितवान् श्वासप्रश्वासादिवल्लीलयाविर्भावितवान्। तथा च श्रुतिः—"अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इत्याद्या वेदस्यापि ब्रह्मोपादानतां दर्शयति। न च ब्रह्मकार्यत्वे सति तस्य पौरुषेयत्वं पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णानामनित्यत्वेऽप्यानुपूर्वीविशेषस्य पुरुषजन्यत्वान्मीमांसकंमन्यस्यापि वेदाप्रामाण्यप्रसंगः। वर्णनित्यत्वमात्रेणैवापौरुषेयत्वव्यवस्थापने लौकिकवाक्यस्यापि तत्प्रसंगः। तस्मान्मानांतरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षत्वलक्षणाप्रामाण्यप्रयोजकम्। तच्च न वेदे वेदार्थस्य मानांतरागोचरत्वात्। इदमेव श्रुत्या निःश्वसितदृष्टांतेन दर्शितम्। यथा हि निश्वासः पुरुषाज्जायमानोऽपि न पुरुषचिकीर्षाजन्यः, सुषुप्तावपि तद्दर्शनात्। एवं वेदो ब्रह्मणः सकाशाज्जायमानोऽपि न ब्रह्मचिकीर्षाजन्यस्तदर्थस्य वेदातिरिक्तमानाविषयत्वात्। तथा च वेदतदर्थज्ञानयोस्तुल्यकालत्वान्न ब्रह्मणः सार्वज्ञ्यव्याघातो न वा वेदस्य पौरुषेयत्वम्; एवं च सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न संकोचनीया; बाधकाभावात्। अत्र चेदृशमनुमानं सूचितम्—वेदनिष्ठा सर्वार्थप्रकाशनशक्तिः सदुपादाननिष्ठा; कार्यगतप्रकाशनशक्तित्वात्। वह्न्युपादानकदीपगतप्रकाशनशक्तिवत्, अतो वेदोपादानत्वेनापि ब्रह्मणः सार्वज्ञ्यसिद्धिः। केचित्तु हिरण्यगर्भ एव वेदवक्ता जगत्कारणञ्चेत्याहुः, तन्निराकरोति हृदा आदिकवय इति। आदिकविर्हिरण्यगर्भस्तस्मै हृदा सह यो ब्रह्म तेने अंतःकरणं सूक्ष्मपंचभूतकार्यमुत्पाद्य तदुपाधेर्हिरण्यगर्भस्य वेदतदर्थज्ञानं कारितवानित्यर्थः। तथा च श्रुतिः "यो ब्रह्माणं विदधाति" इत्याद्या हिरण्यगर्भतद्वेदाविर्भावयोः परमेश्वराधीनतां दर्शयति। तदपि हृदा मनसैव तेने, न तु मुखेनाध्यापितवानिति वा। अनेन सर्वांतर्यामित्वं दर्शितम्। तथा च श्रुतिः—"य सर्वेषु भूतेषु तिष्ठन्सर्वभूतेभ्योऽन्तरात्मा यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यंतरो यमयत्येष त आत्मांतर्याम्यमृत" इत्याद्यौ सर्वांतर्यामित्वेन परमात्मानं प्रतिपादयति। ननूदाहृतश्रुतीनां ब्रह्मणि प्रामाण्यं न संभवति; ब्रह्मणः सिद्धत्वेन मानांतरायोग्यत्वात् अंततः स्वरूपचैतन्यस्यैव मानान्तरत्वात्। तथा च तत्संवादेश्रुतीनां नाज्ञातज्ञापकत्वलक्षणं प्रामाण्यं,

विसंवादे तु बाधितविषयत्वात्सुतरामप्रामाण्यम्। तथा च प्रधानपरमाण्वादिकारणताबोधकमनुमानं लब्धावकाशं भविष्यतीत्यत आह—मुह्यंतीति। यद्यत्र यस्मिन्विषयेऽखंडानंदाद्वयरूपचिन्मात्रलक्षणे सूरयस्तार्किकादयो मुह्यंति मोहमज्ञानमनुभवंति। मोहो हि द्विविधः—आवरणरूपो विक्षेपरूपश्च। तत्रावरणरूपोऽप्यसत्त्वावरणरूपो भानावरणरूपश्चेति द्विविधः। तत्र नास्ति शुद्धं ब्रह्म न भासते वेति द्विविधो मोहः। वेदांतशास्त्रविचारपराणां तु परोक्षज्ञानेनासत्त्वावरणनिवृत्तावप्यभानावरणमनुवर्तत एव; नास्ति प्रतीत्यनुदयेऽपि मम न भाति ब्रह्मेति तेषां प्रतीतेः। अत एव ते तद्भानावरणनिवर्तकस्य साक्षात्कारस्य साधनान्यनुतिष्ठंति। एवं च विक्षेपोऽप्यावरणकार्यभ्रमविशेषरूपः प्रत्यक्ष एव। यतो जीवाद्भिन्न एवेश्वरो जगतो निमित्तकारणमात्रमेवेति तार्किकवैशेषिकपातंजलपाशुपतादयो व्यवहरंति। सांख्यमीमांसकादयस्तु जगन्निमित्तकारणत्वेनापीश्वरं नोपयंति, किं तु प्रधानपरमाण्वाद्येव तेन रूपेणोपास्यमाहुः। तस्माद्ब्रह्मविषयकमोहस्यापरोक्षत्वात्स्वरूपचैतन्यस्य च तत्साधकत्वेन तदनिवर्त्तकत्वान्निवर्त्तकवृत्त्युत्पादनेन वेदांतानां प्रामाण्यमव्याहतमेव सिद्धत्वेऽपि ब्रह्मणो मानांतरायोग्यत्वं रूपादिहीनत्वेन व्युत्पादितं भाष्यकारप्रभृतिभिः। एवं पूर्वार्द्धेन तत्पदवाच्यार्थमुक्त्वा परार्द्धेन तल्लक्ष्यं वक्तुमारभते—"अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यते।" इति न्यायेन—तेजोवारीत्यादिना। यत्र ब्रह्मणि त्रयाणां तेजोबन्नानां सर्गस्त्रिसर्गः स मृषा मिथ्यैव शुक्तौ रजतवत्। छांदोग्ये सृष्टिप्रकरणे त्रयाणां तेजोबन्नानां साक्षात्पठितत्वात् त्रिसर्ग इत्युक्तं, वियदधिकरणन्यायेन तु पंचभूतसर्ग इति द्रष्टव्यम्। तथा हि—"न वियदश्रुतेः" वियदाकाशो नोत्पद्यते, कुतः? छांदोग्ये तदुत्पत्तेरश्रवणात्, यद्यपि "आत्मन आकाशः संभूत" इति श्रुतिरस्ति, तथापि सा गौणीति गूढोऽभिसंधिः। तथा चाकाशोत्पत्तेरनभ्युपगमादेव न विरोधः। गूढाभिसन्धिमजानानः शंकते अस्ति तु[1]शब्दो वियतोऽनुत्पत्तिवारणार्थः कृतः। छांदोग्ये वियदुत्पत्त्यभावेऽपि सा श्रुतिस्तैत्तिरीयकेऽस्तीत्यर्थः। तथा च विरोधस्तदवस्थ इति शंकितुरभिप्रायः। २ एकदेशी स्वाभिप्रायं प्रकटयति, गौण्यसम्भवात्। ३ न ह्याकाशोत्पत्तिश्रुतिर्मुख्या, किन्तु गौणी। कुतः? असंभवात्। आकाशोत्पत्तौ समवायिकारणादिसामग्र्यभावाद्विभुत्वेन नित्यत्वानुमानाच्चाकाशोत्पत्तेरसंभवादित्यलं प्रसक्तानुप्रसक्त्या। स्वीकृतेऽपि पांचभौतिकसर्गे त्रिवृत्सर्गस्तु सर्वथास्त्येवेति ज्ञेयम्। तन्मिथ्यात्वे दृष्टांतमाह—तेजोवारिमृदां विनिमयो व्यत्यासः व्यामिश्रीभावोऽन्यावभासरूप इति यावत्। तथा च श्रुतिः "यदग्ने रोहितं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचरंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्" इत्यादिना। कृत्स्नस्यापि विकारस्यानृततां दर्शयति–न ह्यारंभवादो वा परिणामवादो वा संभवति। तथा हि—परमाणुः परमाण्वंतरेण पूज्यमानो द्व्यणुकमारभते इत्युपेयते। तत्र द्व्यणुकासमवायिकारणीभूतः संयोगः परमाण्वोः कात्स्न्येन वा समवाय्येकदेशेन वा? आद्ये प्रथिमानुपपत्तिः। द्वितीये सावयवत्वापत्तिः। एवं परिणामोऽपि प्रधानस्य कात्स्न्येन वैकदेशेन वा? आद्ये कारणविनाशापत्तिः। द्वितीये सावयवत्वापत्तिः। न चेष्टमेवैतत्। सावयवत्वे तस्यापि जन्यत्वेन मूलकारणविनाशापत्तिः। एवं कार्यमपि कारणव्यापारात्प्रागसत् सद्वा? आद्ये कार्यकारणभावाग्रहः, नहि खपुष्पेण समं कस्यचित्सम्बन्धो गृह्यते, उत्पन्नघट इव प्रागभावप्रतियोगित्वेनासतोऽपि कार्यत्वं भविष्यतीति चेत्—हंत प्रागभावप्रतियोगित्वं निराश्रयं वा साश्रयं? आद्ये शशविषाणतुल्यता। द्वितीये सत्कार्यवादापत्तिः; प्रागभावप्रतियोगित्वाश्रयत्वेनैव कार्यसत्त्वांगीकारात्। न च सत्कार्यवादोऽपि घटते। अविद्याकारकव्यापारवैयर्थ्यापातात् आविर्भावतिरोभावयोरपि सदसत्त्वविकल्पग्रासात्। तस्मात्सदसद्विलक्षणत्वेनानिर्वचनीयतैव कार्यकारणयोरिति विवर्तवादोऽवशिष्यते। तथा चाविद्यावशाच्छुद्धे ब्रह्मणि द्वैताभासो मिथ्येत्यर्थः। नन्वविद्याकार्याणामसत्त्वेऽप्यविद्यायाः सत्यत्वमस्तु, अनादिभावत्वात् ब्रह्मवत् कल्पकशून्यत्वाच्च। नहि द्वैतप्रपञ्चकल्पनाहेतोरविद्यायाः कल्पकांतरमस्ति, स्वस्या एव कल्पकत्वे आत्माश्रयात्। अविद्यांतराभ्युपगमे चानवस्था स्यात्। तथा चैकविज्ञानेन सर्वविज्ञानव्याघातोऽनिर्मोक्षापत्तिश्चेत्यत आह—धाम्ना स्वेन सदा निरस्तं नित्यनिवृत्तं कुहकं कपटमविद्याख्यं यस्मिंस्तत्तथा। तत्र हेतुः—स्वेन धाम्नेति। अखंडानंदाद्वितीयचैतन्यरूपत्वादित्यर्थः। तथा च श्रुतिः "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिः। अन्यथानुपपद्यमानैरेकाद्वितीयशब्दैरखंडमेव वस्तु प्रतिपादयति दृग्दृश्यसंबंधानुपपत्त्या कल्पितत्वेनैवाविद्यायाश्चैतन्यभास्यत्वनियमाच्च एकस्या एव च स्वपरसाधारणकल्पनामूलत्वान्नविद्यांतराभ्युपगमः उत्पत्त्यनंगीकारेण ज्ञप्तेश्च नित्यत्वेन नात्माश्रयादिदोषः। अनादिभावत्वं चात्मनो नित्यत्वे प्रयोजकं न भवति, किंतु परमार्थसत्यत्वमविद्यायाश्चसदसद्विलक्षणत्वाज्ज्ञाननिवर्त्यत्वोपपत्तेः। तथा च मायातत्कार्यहीनः परमात्मा तत्पदलक्ष्यो दर्शितः। एतेनैव त्वंपदलक्ष्योऽपि दर्शितः। तस्यापि मायातत्कार्यशरीरादिहीनत्वात्। जाग्रत्स्वप्नसुषुप्तिसाक्षिणस्तद्धर्त्त्वाभावात्। एवं च पदार्थज्ञानपूर्वकवाक्यार्थबोधे सति तदावृत्तिरूपं निदिध्यासनमुपपन्नम्। अथ जन्माद्यस्य यत इत्यनेनानंदरूपत्वं दर्शितम्, "आनंदादेव खल्विमानि भूतानि जायंते" इत्यादिश्रुतेः। 'अन्वयादि' त्यनेन सद्रूपत्वं नित्यत्वं विभुत्वं; च सर्वदेशकालान्वयबोधनात्। 'स्वराडि' त्यनेन स्वप्रकाशज्ञानरूपत्वं, धाम्ना स्वेन निरस्तकुहकमित्यनेनाद्वितीयत्वम्। 'सत्य' मित्यनेन परमार्थत्वमिति सत्यं ज्ञानमनंतं ब्रह्मेत्यादिना वाक्यार्थो दर्शितः। अथ च त्वंपदार्थोऽपि शक्यतेऽनेन श्लोकेन दर्शयितुं श्लेषालंकारस्यात्यंतचारुत्वात्। तथा हि—यो जीवोऽस्य देहेंद्रियादेर्जन्मादिविकारजातमन्वयादनुगतवान् अविद्ययात्मन्यारोपितवांस्तं परं सत्यं धीमहीति संबंधः। अस्य कीदृशस्य? यतः गच्छतः सर्वदा परिणममाणस्येत्यर्थः। जन्मादि गच्छत इति वा जातो

देवदत्तो मृतो देवदत्त इत्यादिप्रतीतेः। 'तद्यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवमस्मादात्मनः सर्व एव आत्मनो व्युच्चरंती'ति जन्मश्रुतेश्च। स्वत एव जन्मादिमाञ्जीवोऽस्तु नेत्याह—इतरतश्चेति। जन्माद्ययोगत्वादित्यर्थः। तथाच श्रुतिः "न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्, अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इत्याद्या स्मृतिश्च। भगवद्गीता जीवस्य जन्मनाशौ वारयति कृतहान्यकृताभ्यागमादिदोषप्रसंगादुपाध्युत्पत्तिमात्रेणैव व्युच्चरन्तीत्यादिश्रुत्युपपत्तेस्तद्गुणसारत्वादित्यादिन्यायाच्चेति चकारार्थः। 'तद्गुणसारत्वात्तु व्यपदेशः प्राज्ञत्वात्'। अस्यार्थः—तुशब्दः पूर्वपक्षनिरासाय। अणुर्जीवः किं ब्रह्मणस्तत्त्वांतरमुत विकारः, आहोस्विद्ब्रह्मणो भिन्नः? नाद्यः; एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाबाधात्। न द्वितीयः; निर्विकारत्वात्। तस्मात्सर्वश्रुत्यनुसारी तृतीयः पक्षः परिशिष्यते। तथा च ब्रह्मणो नवाधिकमहत्त्वावगमाज्जीवोऽप्यनवधिकमहत्त्ववान् "स वा एष महानज आत्मा योऽयं" विज्ञानमयस्य जीवस्य स्वतो महत्त्वावगमाच्च "एषोऽणुरात्मा चेतसा वेदितव्य" इत्येतन्न जीवविषयं वेदितव्यत्वश्रवणात्, किन्तु चक्षुराद्यविषयत्त्वेन दुर्विज्ञेयब्रह्मविषयम्। 'बालाग्रशतभागस्ये'ति वाक्यं तु जीवस्यौपाधिकमणुत्वमनूद्य स चानंत्याय कल्पत इति वाक्यशेषेणानंत्यमपरिच्छिन्नत्वं बोधयति। किञ्चात्मनोऽणुत्वे देहव्याप्युपलंभो न स्यात्, न च चंदनबिंदुदृष्टांतः। तस्य सावयवत्वेनावयवद्वारा व्यापित्वसंभवात्। नापि व्याप्यज्ञानाद्व्याप्तिकार्यसंभवः। गुणिव्यतिरेकेण गुणावस्थानां योगेन व्यापिज्ञानस्यासम्भवात्। न च गंधन्यायेन गुणस्य ज्ञानस्य गुणिव्यतिरेकसंभवः; गंधस्यापि गणत्वेन साश्रयस्यैवागमनांगीकारात्। अन्यथा गुणत्वव्याहतेर्गंधस्य द्रव्यत्वेन तद्दृष्टांतो भवेत्। प्रज्ञया शरीरमारुह्येत्येतदपि प्रज्ञया बुद्ध्याख्यांतःकरणेनेति व्याख्येयम्। कथं तर्हि जीवेऽणुत्वव्यपदेशः? तद्गुणसारत्वादिति ब्रूमः। तस्या बुद्धेर्गुणा अणुत्वोत्क्रांतिगत्यागतिसुखदुःखादयस्ते गुणाः सारं प्रधानं यस्य जीवस्य स तथा तस्य भावस्तत्त्वं तस्मात्तद्व्यपदेशोऽणुत्वादिव्यपदेशो न तु स्वाभाविकः प्राज्ञवत्, प्राज्ञस्य परमात्मनः सगुणेषूपासनेषु "दहरोऽस्मिन्नंतराकाशः अणीयान् व्रीहेर्यवाद्वे" त्यादिषूपाधिवशाद्यथाणुत्वादिकं व्यपदिश्यते तद्वदित्यर्थः। किं च देहमिंद्रियं मनः प्राणं च केचिदात्मत्वेन प्रतिपन्नास्तान्निराकरोति। अर्थेष्वभिज्ञ इति। न हि भौतिकानां देहेंद्रियप्राणमनसां ज्ञातृत्वं संभवति, घटादावपि तत्प्रसङ्गात्। एतेषां चानित्यत्वादात्मनित्यत्वस्य च व्यवस्थापितत्वात्। एतेन विभुत्वमपि व्याख्यातम्। नित्यत्वं हि मध्यमपरिमाणत्वेऽनुपपद्यमानं परमाणुत्वे वा परममहत्त्वे वा व्यवतिष्ठेत। तत्र परमाणुत्वे सकलशरीरव्यापिसुखदुःखानुपलंभप्रसंगात्सकलदेहव्यापिकार्योपलब्धेश्च परममहत्त्व एव नित्यत्वं व्यवतिष्ठेत। एतेन देहाद्यतिरिक्तोऽपि देहपरिमाण एवात्मेति क्षपणकपक्षो निरस्तः। अस्तु तर्हि देहेन्द्रियातिरिक्तो विभुरेवात्मा ज्ञानाश्रयो न तु ज्ञानरूप इति मतं तत्राह—स्वराडिति। स्वयमेव राजत इति स्वराट्। स्वप्रकाशज्ञानरूप इत्यर्थः। "अत्रायं पुरुषः स्वयं ज्योतिर्भवति" इत्यादिश्रुतेः संदेहविपर्ययाद्यविषयत्वे सदा भासमानत्वात्। स्वजन्यज्ञानविषयत्वे च कर्तृकर्मविरोधात्। ज्ञोऽत एवेति न्यायाज्ज्ञानरूप एवात्मेत्यर्थः। अविरोधाध्याये तृतीयपादे द्वादशाधिकरणे ज्ञो नित्यचैतन्यरूपोऽयमात्मा अत एवोत्पत्त्यसंभवादेव परमात्मवदिति न्यायार्थः। ननु जीवस्य स्वप्रकाशज्ञानरूपत्वे जन्मादिशून्यत्वे च ब्रह्मणो भेदकाभावात्स्वत एव च ब्रह्माभिन्नत्वे शास्त्रारंभो निरर्थकः। ब्रह्मावबोधस्य सर्वदा विद्यमानत्वादित्यत आह—तेनेऽब्रह्महृदा य आदिकवय इति। हृदा मनसा उपाधिना तादात्म्यापन्नः सन्नब्रह्म ब्रह्मविपरीतं कर्तृत्वभोक्तृत्वादिलक्षणं संसारसंचरणरूपं विस्तारितवान्। तथा च श्रुतिः—"समासमानः सन्नुभौ लोकावनु संचरति ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वा" इत्याद्या धीसंबंधादसंसारिणोऽसंसारितां दर्शयति। तथा च तन्निवृत्तये ब्रह्मात्मतोपदेशो युक्त इत्यर्थः। संसारस्य मोक्षहेतुतां दर्शयति—आदिकवय इति। आदिभूतं च यत्कं सुखं ब्रह्मानंदरूपो मोक्ष इत्यर्थः। तस्य वयः प्राप्तिः, तदर्थम् 'अयवय गता' विति स्मरणात्। निमित्तात्कर्मयोगे चेयं सप्तमी। 'चर्मणि द्वीपिनं हंती' तिवत्। न हि संसाराभावे श्रवणमननादिसाधनानुष्ठानं संभवति। न च तदभावे तत्त्वज्ञानोदयः। न च तमंतरेणानाद्यविद्यानिवृत्तिरिति मोक्षार्थमेव संसारं विस्तारितवानित्यर्थः। तथा च श्रुतिः—"रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इंद्रो मायाभिः पुरुरूप ईयते" इति च "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावैदहं ब्रह्मास्मीति तस्मात्सर्वमभवत्।" इति च। संसारद्वाराऽविद्यानिवृत्तिरूपं मोक्षं दर्शयति। ननु तर्हि भवतु स्वप्रकाशज्ञानरूप आत्मा, किं तु नानंदरूपः प्रतिशरीरं भिन्नश्चेति सांख्यमतं तत्राह—मुह्यंति यत्सूरय इति। यत्र यस्मिञ्जीवस्वरूपे सूरयस्तार्किकाद्यपेक्षया सुधियोऽपि मुह्यंति भ्राम्यंति शुद्धस्वरूपं जानाना अपि आनंदरूपत्वं प्रतिदेहमेकत्वं ब्रह्माभिन्नत्वं चाजानंतः। तथा च श्रुतयः "एष एव परमानंद" इति "एको देवः सर्वभूतेषु गूढः" इति "अयमात्मा ब्रह्म" इति तादृग्रूपतां जीवस्य बोधयंति। "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मादन्तरं यदयमात्मा" इति श्रुत्यंतराच्च परमप्रेमास्पदत्वादानंदरूपत्वं नानात्वे भोगव्यवस्थानुपपत्तेश्च प्रतिदेहमेकत्वम्। न हि विभूनामात्मनां सर्वदेहसंबंधित्वाविशेषे कर्मप्रदेशानां भिन्नदिक्त्वमपि भोगनियामकं भवितुमर्हति, अविशेषात्। एकात्मवादे तु तत्तदंतःकरणावच्छिन्नप्रदेशानां भिन्नत्वादुपपद्यत एव व्यवस्था देहभेदादेव च प्रतिसंधानाभावः। एवं च भेदकशून्यत्वाद् ब्रह्माभिन्नत्वमसिद्धम्। तदभिन्नत्वं तु सिद्धमेव लक्षणैक्यात्। एवं त्वंपदवाच्यार्थं पूर्वार्द्धेन प्रतिपाद्य तल्लक्ष्यमुत्तरार्द्धेन वक्तुमध्यारोपापवादन्यायेनारभते—तेजोवारिमृदां यथा विनिमय इत्यादिना। यत्रात्मनि त्रयाणां स्थूलसूक्ष्मकारणोपाधीनां जाग्रत्स्वप्नसुषुप्त्यवस्थाहेतूनां सर्गः संसर्गो मृषा मिथ्यैव। न तु परमार्थतः। "स यत्तत्र न किंचित्पश्यत्यनन्वागतस्तेन

भवत्यसंगो ह्ययं पुरुष" इत्यादिश्रुतिभ्यः साक्ष्यस्य साक्षिधर्मानुपपत्तेर्भास्यस्य घटादेर्भासकदीपादिधर्मत्वादर्शनात्। मिथ्यात्वे दृष्टांतः-'तेजोवारिमृदां यथा विनिमय' इत्यादिना। वारिणि करकारूपे मृद्बुद्धिः। एवं काचादिरूपायां मृदि तेजोबुद्धिरित्युदाहार्यम्। तथा चेदमनुमानं सूचितम्—आत्मनि जाग्रदादिबुद्धिर्मृषा तदभाववति तद्बुद्धित्वात्। तेजसि वारिबुद्धिवत्। तदभाववत्त्वं चात्मनः श्रुतिस्मृतिन्यायैर्निश्चितमिति नासिद्धिः। एवं लक्षणैक्येन ब्रह्माभिन्नत्वं दर्शयति—धाम्ना स्वेन सदानिरस्तकुहकमिति तदेवं तत्पदार्थत्वं पदार्थतदैक्यकथनद्वारेण शास्त्रस्य विषयो दर्शितः। श्रवणमननयोस्तृतीयश्च निदिध्यासनमिह प्रतिपाद्यते, श्रवणमननवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात् चतुर्लक्षणमीमांसारूपत्वं चास्य सूचितम्। तथा हि—पूर्वार्द्धेन "जन्माद्यस्य यत" इति न्यायः साक्षादेव दर्शितः। अन्वयादित्यनेन "तत्तु समन्वयात्" इति। अर्थेष्वभिज्ञ इत्यनेन "ईक्षतेर्नाशब्दम्" इति। तेने ब्रह्महृदेत्यादिना "शास्त्रयोनित्वाद्" इति। मुह्यंति यत्सूरय इत्यनेन "एतेन सर्वे व्याख्याता व्याख्याता" इत्यन्तो न्यायकलापः सूचित इति समन्वयाध्यायो व्याख्यातः १ तेजोवारिमृदामित्यादिना "तदनन्यत्वमारंभणशब्दादिभ्यः" इत्यादिन्यायसूचनादविरोधाध्यायार्थ; २ धीमहीत्यनेन "सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवद्" इत्यादिन्यायसूचनात्साधनाध्यायार्थः; ३ धाम्ना स्वेन सदा निरस्तकुहकं परं सत्यमिति फलाध्यायार्थः, ४ अविद्यातत्कार्यनिवृत्त्युपलक्षितपरमानंदरूपावशेषात्। पूर्वोक्तन्यायार्थस्तु अस्य जगतो यतो जन्मादि तद्ब्रह्मेव साक्षाद्वेदांतप्रतिपाद्यं कुतः? समन्वयात्। सम्यगन्वयः समन्वयस्तस्मात्। अन्वयस्य सम्यक्त्वं तात्पर्यवत्त्वं वेदांता न कर्त्रादिप्रतिपादका भिन्नप्रकरणस्थत्वात्। तुशब्दोऽवधारणे इति। अशब्दं प्रधानं न जगत्कारणम्। कुतः? ईक्षतेः। जगत्कर्तरीक्षितृत्वश्रवणादिति शास्त्रं वेदस्तद्योनित्वं तत्कर्तृत्वं तस्माद् ब्रह्म सर्वज्ञमित्यर्थः। एतेन प्रधानवादनिराकरणेन ये हेतवोऽशब्दत्वाचेतनत्वैकविज्ञानप्रतिज्ञानुपपत्त्यादयस्तेषामण्वादिपक्षेऽपि साम्येन सर्वेऽणुस्वभावासत्कारणवादा निराकृतत्वेन व्याख्याताः। अभ्यासोऽध्यायसमाप्त्यर्थः। तस्माद् ब्रह्मणः प्रपंचस्यानन्यत्वं पृथक्सत्ताराहित्यं कुतः? आरंभणशब्दादिभ्यः। एकविज्ञानात्सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं दृष्टांत उपन्यस्तः। "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ज्ञानफलभूतसाक्षात्कारे श्रवणाद्यपेक्षया सहकार्यं तदस्य मौनस्य निदिध्यासनाख्यस्य विधिरित्यर्थः। ननु 'गार्हस्थ्यमाचार्यकुलं वानप्रस्थं मौन' मित्यत्र मौनशब्दस्य पारिव्रज्ये प्रयोगात्कथमत्र मौनं निदिध्यासनं स्यादत आह—तृतीयमिति। श्रवणमननद्वयापेक्षया तृतीयं निदिध्यासनमेवात्र मौनं विधेयमित्यर्थः। तत्रेतराश्रमसमभिहारबलान्निदिध्यासनप्रधानपारिव्रज्यं मौनशब्देन लक्ष्यते इति भावः। कस्यायं मौनविधिस्तत्राह—तद्वत इति। ब्रह्मपरोक्षज्ञानवतः पूर्ववाक्ये प्रकृतस्य संन्यासिन इत्यर्थः। ननु सूक्ष्मवस्तुसाक्षात्कारे निदिध्यासनस्य प्राप्तत्वान्न विधेयत्वमत आह—पक्षे नेति। यस्मिन्पक्षे भेददर्शनप्राप्तिः, तस्मिन्पक्षे प्राप्त्यभावाद्विधिरर्थवानित्यर्थः। ननु ब्रह्मपरवाक्ये कथं मौनविधिरित्याशंक्य दृष्टांतमाह—विध्यादिवदिति। यथा दर्शपूर्णमासप्रधानपरे वाक्येऽन्वाधानादेरंगजातस्य विधिस्तद्वदित्यर्थः। प्रधानमारभ्यांगपर्यंतो विधिस्तदादिर्विध्यादिः प्रधानमिति यावत्। अत एव प्रयाजादिर्विध्यंत इत्यर्थः। ब्राह्मण्यस्य फलत्वान्न विधिकल्पना विफलेत्यर्थः। अथ प्रकृतमनुसरामः—एवं सति परमहंससंहितेति समाख्योपपद्यते। परमहंसानां वेदांतवाक्यार्थनिदिध्यासननिष्ठत्वात्। अत्रत्योपाख्यानां तत्तात्पर्यकत्वात्। अत्र गायत्र्यर्थसूचनाद्गायत्रीवदनिशं जप्तव्या गायत्र्यधिकारिभिरेव पठितव्या चेति दर्शितम्। अत्र च सर्गादीन्यपि दशलक्षणान्यनेन पद्येन सूचितानि। 'जन्माद्यस्य यत' इत्यनेन सर्गविसर्गस्थानानि तृतीयचतुर्थपंचमस्कंन्धव्युत्पाद्यानि सूचितानि। 'तेने ब्रह्म हृदा य आदिकवय' इत्यनेन भक्तानुग्रहलक्षणं षष्ठस्कंधव्युत्पाद्यम्। 'मुह्यंति यत्सूरयः' इत्यनेन कर्मवासनारूपा गतिः सप्तमस्कंधव्युत्पाद्या। मन्वन्तरेशानुकथेऽष्टमस्कंधप्रमेये स्थानमध्य एवांतर्भूते। 'तेजोवारिमृदां यथा विनिमये'इत्यनेन निरोधो दशमस्कंधार्थो दर्शितः। 'धाम्ना स्वेन सदा निरस्तकुहक' मित्यनेन मुक्तिरेकादशस्कंधार्था दर्शिता। 'सत्यं परमि' त्यनेनाश्रयो द्वादशस्कंधार्थो दर्शितः। 'धीमही' त्यात्मनेपदोत्तमपुरुषप्रयोगादधिकारी प्रथमस्कंधार्थस्तेनैव च ध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कंधार्थः इति कृत्स्नभागवतार्थसूचनमिति। अस्मिन्नेव पद्ये विशेषतो द्वादशस्कन्धकथासूचको लीलाकल्पद्रुमाख्यो ग्रंथोऽपि मया वंशीधरशर्मणैव संदृब्धस्तत्र सर्वाः कथाः स्फुटाः प्रतीयंत इति। व्याख्यानं चैतदौपनिषद्भ्यो रोचते। सात्वतास्तु वर्णयंति पंचीकृतपंचमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिविराडन्तर्यामिरूपमौतमित्यनिरुद्ध इति चाख्यायते। एवमपंचीकृतमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिहिरण्यगर्भान्तर्यामिरूपमनुज्ञातेति प्रद्युम्न इति चाख्यायते। एवं स्थूलसूक्ष्मभूतकारणीभूतं यन्मायात्मकमव्याकृतं तदुपहितं शुद्धचैतन्यं तन्निष्ठचिदाभासोपलक्षितमनुज्ञेति संकर्षण इति चाख्यायते। अनुपहितं तु चैतन्यं सर्वानुस्यूतं सन्मात्रं सर्वसाक्षिपरमानंदघनोऽविकल्प इति वासुदेव इति चाख्यायते। संकर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्त्तत एव। उपाधिकृतः केवलं विशेषः। एतच्च नृसिंहतापनीयोत्तरभागे व्याख्यातम्। औतानुज्ञात्रनुज्ञाविकल्पैः। स्थूलसूक्ष्मबीजसाक्षिभिरिति बहुकृत्वोऽभ्यासेन। अत्र च वासुदेवः परमात्मा संकर्षणो जीवः प्रद्युम्नस्तु मनोऽनिरुद्धोऽहंकार इति पाञ्चरात्रिकप्रक्रिया नादरणीया, तद्वचनविरोधाच्चेत्याद्युत्पत्त्यसंभवादित्यधिकरणे व्याख्यातम्। केवलं परमात्मैवानुपहितो वासुदेवः कारणोपहितः संकर्षणः सूक्ष्मभूतोपहितः प्रद्युम्नः स्थूलभूतोपहितोऽनिरुद्ध इति व्यथाव्याख्यानमेवादरणीयं श्रौतत्वादुपपन्नत्वाच्च। एवं स्थिते योजना चेत्थम्—परं सत्यं वासुदेवाख्यं

धीमहि उपास्महे। ध्यानमत्रोपासनमेवाभिप्रेतम्, चतुर्व्यूहरचनाया उपासनार्थत्वात्। नन्वनुपहितस्य वासुदेवस्य बुद्धावनारोहात्कथमुपास्यत्वं ? सत्यम्; अनिरुद्धादिरूपमप्यविवक्षितोपाधिसंबंधवासुदेवात्मकमेव क्षेत्रकूपद्वारादिकमिवाविवक्षिततत्तदुपाधिसंबंधमाकाशात्मकमेव विवक्षितोपाधिसंबंधे तु पृथग्व्यपदेशभेदं लभते, न तु तावता वस्त्वन्यता भवति। तथा च तया द्वारा वासुदेवे मनोवृत्तिः कार्येति वक्तुमारभते—जन्माद्यस्येत्यादिना। अस्य जगतश्चतुर्दशभुवनरचनात्मकस्य ब्रह्माण्डस्य जन्मादिविकारजातं यतो भवति तं धीमहीति संबंधः। तस्य जगद्विरचनयोग्यतामाह—अर्थेष्वभिज्ञ इति। ब्रह्मांडाभिमानिविराडपेक्षया वैलक्षण्यमाह—स्वराडिति। ब्रह्मांडावच्छिन्नचिदाभासो हि विराड् जीवः, अयं तु तद्बिम्बभूतस्तदंतर्यामी स्वयमेव राजत इति स्वराट्। बिम्बभूतत्वेनान्यानपेक्षत्वात्। एवमनिरुद्धमोतमुक्त्वा प्रद्युम्नमनुज्ञातारमाह—तेने ब्रह्म हृदा य आदिकवय इति। आदिकवये सूक्ष्मभूतावच्छिन्नचिदाभासाय हिरण्यगर्भसूत्रादिसंज्ञकाय ब्रह्म वेदं तदंतर्यामिरूपेण बिंबभूतो यस्तन्मनसैव तेने हिरण्यगर्भवैलक्षण्यं स्वयमेवोक्तं संप्रति संकर्षणमनुज्ञामाह। ननु हिरण्यगर्भाय कारणोपाधिः संकर्षणो वेदमुपदिशतामिति चेदत्राह—मुह्यंतीति। यस्मिन्वेदे सूरयः कपिलादयोऽपि संकर्षणस्यापि कारणोपहितत्वान्मोहोऽस्ति न तद्बिंबभूते परमात्मनीति। अथाविकल्पं वासुदेवमाह—यत्र वासुदेवे त्रिसर्गोऽनिरुद्धप्रद्युम्नसंकर्षणरूपो भेदो मृषैव। मिथ्यात्वे दृष्टांतः—तेजोवारीति। धाम्ना स्वरूपस्फूर्त्या निरस्तमपास्तं कुहकं विराडाद्युपाधिरूपं यत्र तत्तथा। एतेनानिरुद्धादयो वासुदेवानतिरिक्ता एव तद्रूपेणैवोपास्या न पृथक्त्वेन। अन्वयादितरतश्चेति हेतुद्वयं जन्मादीत्यत्र ध्येयम्। निजाभासरूपेण विराडादावन्वयाद्बिम्बरूपेण तेभ्यो व्यतिरेकादिति। १२ अथ श्रीभागवतप्रतिपाद्यार्थो भगवानतारी श्रीकृष्ण एतदवतारगुणवर्णनप्राचुर्यमन्यत्प्रासंगिकमिति स्थितम्। तत्र तावच्छ्रीवेदव्यासो नानाशास्त्रप्रबंधेन निरूपितश्रीकृष्णचारित्रोऽपि तत्र तत्र निरूपणाभावाच्चित्तस्वास्थ्यमलभमानो नारदोपदेशेन विदिततत्स्वरूपभक्तियोगः संस्तद्गुणप्रधानं श्रीमद्भागवतमारब्धुकामः। परममंगलमेव श्रीकृष्णं ध्यायति—जन्माद्यस्येति। परं परमेश्वरं श्रीकृष्णं हृदा मनसा धीमहि ध्यायेम। कथंभूतं ? सत्यं सर्वप्रकारेण सत्यम्। तदुक्तं गर्भस्तुतौ ब्रह्मादिभिः "सत्यव्रतम्" इत्यादि। इत्यनेन सत्यशब्दवाच्यः श्रीकृष्ण एव दर्शितः। ननु तस्यापि देहसंबंधात्कथं सत्यत्वमित्याशंक्याह—यत्र त्रिसर्गो मृषेति। यत्र श्रीकृष्णे त्रयाणां तमआदिगुणानां सर्गो भूतेंद्रियदेवतारूपोऽर्थाद्देहो मृषैव। आत्मनामप्यात्मत्वात्। तदुक्तं श्रीदशमे "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्। जगद्धिताय सोऽप्यत्र देहीवाभाति मायया॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम्। योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक्" । तस्माद्योगमायया परब्रह्मणो नराकृतित्वम्। अत्र दृष्टांतः—तेजोवारिमृदामिति। धाम्ना स्वरूपप्रकाशेन निरस्तः स्वयोगमायाकृतः कुहकः कपटो यस्य तं सूतीगृहे निजरूपेणाविर्भावात्। तत्रैव योगमायया नरबालकत्वं, तत्तु श्रीवत्सकौस्तुभादिचिह्नैः पूतनाशोषणविश्वदर्शनाद्यैश्वर्यप्रकाशैश्च सदैव निरस्तमिति। एवं तावत्स्वरूपलक्षणेन ध्यात्वा तटस्थलक्षणेन च तमेव ध्यायति—जन्माद्यस्येति। यतो यस्य। सार्वविभक्तिकतसि रूपम्। यस्यान्वयादन्वयप्रवर्तकरूपाद् गुणावताराद्ब्रह्मविष्णुरुद्रादस्य विश्वस्य जन्मादि तम्। अग्रे वक्ष्यति "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः" इति तटस्थलक्षणेन जगत्कारणमुक्त्वा ब्रह्मादीनां कारणत्वं तस्याह—इतरत इति। यतो यस्येतरस्माद्वयात् श्रीनारायणात्स्वराट् ब्रह्मा बभूव। कथंभूतः ? स्वराट् अर्थेषु सृष्टिकार्येष्वभिज्ञो निपुणः श्रीकृष्णस्यैव मूर्तिर्नारायण इति ब्रह्मापि वक्ष्यति "नारायणोऽङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया" इत्यादिना ब्रह्मेत्युपलक्षणं तस्यैव महाविष्णुरूपाद् ब्रह्मादित्रयाणामपि ज्ञेयम्। तदुक्तं बृहन्नारदीये नारदेन सनत्कुमारं प्रति—"सृष्ट्यर्थमसृजद्देवो दक्षिणांगात्प्रजापतिम्। मध्ये रुद्राख्यमीशानं जगदंतकरं मुने॥ पालनायास्य जगतो वामांगाद्विष्णुमव्ययम्। आदिसर्गे महाविष्णुरेवं त्रित्वमवाप्तवान्॥" इति ब्रह्मसंहितायाञ्च "वामांगादसृजद्विष्णुं दक्षिणांगात्प्रजापतिम्। ज्योतिर्लिंगमयं शंभुं कूर्चदेशादवासृजत्॥" तस्माद्यस्य गुणावताराद्विश्वस्य जन्मादि भवति इतरस्माद् गुणावताराणां जन्म तं श्रीकृष्णाख्यं परं ब्रह्म परमेश्वरं धीमहीति। अथ वाऽन्वयव्यतिरेकाभ्यामस्य विश्वस्य जन्मादि भवति यतस्तं "यतो वा इमानि भूतानि" इत्यादिश्रुतेः, "यतः सर्वाणि भूतानि भवंत्यादियुगागमे" इत्यादिस्मृतेश्च। एक एव सृष्ट्यादि करोतीत्येतद्वत्साहरणप्रस्तावे व्यक्तिभूतं "यावद्वत्सपवत्सकाल्पकवपुः" इत्यादिना केवलात्सृष्टिर्दर्शिता। "एवमात्मात्मनात्मनं वत्सपालमिषेण सः। पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः॥" इत्यनेन पालकत्वं दर्शितम्। "तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यब्रह्माद्वयं परमनंतमगाधबोधम्। वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट॥" इत्यनेन स्वयमेव संहारकत्वं च दर्शितमिति। किं च परमगुरुत्वं च तस्य दर्शयति—तेन इति। आदिकवये ब्रह्मणे ब्रह्मरूपमात्मानं तेने। तथा हि—द्वितीये ब्रह्माणं प्रति स्वयं वदति "अहमेवासमेवाग्रे नान्यत्" इत्यादि। तथोद्धवाग्रे स्वयमेव वदति तृतीये "पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय" इत्यादि। तथा हंसावतारे यदुक्तं तत्सर्वमर्जुनोद्धवादिभ्यः कथितवान् अखंडज्ञानाप्रच्युतस्वरूपत्वाच्च। तदुक्तम्—"एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्" इति। नन्वेवंभूतः परमेश्वरश्चेत्तर्हि तस्य गोपबालकैः सह यथेच्छभोजनादि उग्रसेनादीनां कैंकर्यं वर्णाश्रमादिधर्माचरणमिति ? सत्यं; तस्य कैंकर्यं केऽपि न जानंतीत्याह—मुह्यंतीति। यद्यस्मिन्कृष्णे सूरयो ब्रह्मरुद्रादयो मुह्यंति तत्त्वं न जानंति। तदुक्तं दशमे "शक्रशर्वपरमेष्ठिपुरोगाः कवय आनतकंधरचित्ताः। कश्मलं ययुर-

निश्चिततत्त्वा"दिति । तस्मादेवं सर्वभूतस्वरूपं परं ब्रह्म परमेश्वरं नारायणं पुरुषाद्यवतारकारणं सर्वान्तर्यामिणं सर्वसेव्यं श्रीकृष्णं धीमहीति । अतस्तस्मिन्नेव परब्रह्मत्वाद्याविर्भावात् । तथा हि—अघासुरशिशुपालदंतवक्त्रादीनां जीवतत्त्वं तस्मिन्नेव प्रविष्टं परब्रह्मत्वाद् ब्रह्मत्वं यशोदाबंधने व्यक्तीभूतं ब्रह्ममहेश्वरयमवरुणेंद्रकंदर्पा लीलयैव पराजिताः परमेश्वरत्वात् । नारायणस्वरूपं ब्रह्महृदेऽक्रूरेण दृष्टं सर्वकारणत्वमर्जुनेन विश्वरूपदर्शने दृष्टमंतर्यामित्वं परीक्षिता गर्भे दृष्टं सर्वसेव्यत्वं राजसूये दृष्टम् । एवं सर्वावतारकार्याणि तत्तत्समये व्यक्तिभूतानीति दिक् । एवं स्वामिचरणैः संप्रदायविशुद्ध्यर्थं कथितं तदेवं स्पष्टतया दर्शितम् । इदानीं तदवशिष्टानर्थानेकीकरोति । तत्र तावत्कर्मयोगज्ञानयोगभक्तियोगाः सम्यक्सर्वत्र निरूपितास्तन्मध्ये भक्तियोगेनैव भगवाञ्छ्रीकृष्णो लभ्यते नान्यैरिति भागवते वक्तुं तमपि स्मरति—जन्माद्यस्येति । तं सत्यं भक्तियोगं धीमहि । कथंभूतं ? परं, कर्मज्ञानाभ्यां परं श्रेष्ठम् । येन विना तयोरसिद्धेः । तदुक्तं बृहन्नारदीये "अश्वमेधसहस्रं वा कर्म वेदोदितं कृतम् । तत्सर्वं निष्फलं ब्रह्मन् यतो भक्तिविवर्जितम् ॥ धर्मार्थकाममोक्षाख्याः पुरुषार्था द्विजोत्तम । हरिभक्तिपराणां वै संपद्यंते न संशयः ॥" इत्यादिनाऽतो धर्मादीनां तदाश्रयत्वात्सत्यत्वमित्याह—यत्रेति । यत्र भक्तियोगे त्रिसर्गो धर्मार्थकामानां सर्गः पुनः पुनरुद्भवोऽमृषा सत्यः । आश्रयस्य सत्यत्वेनाश्रितानां सत्यतेति भावः । यथा तेजोवारिमृदां विनिमयस्तद्वत् । तदुक्तं बृहन्नारदीये "यथा भूमिं समाश्रित्य सर्वे जीवंति जंतवः । तथा भक्तिं समाश्रित्य सर्वकार्याणि साधयेत्" इत्यादिना । स्वयं तु धर्मादिभ्यः पृथगित्याह—धाम्नेति । स्वेन धाम्ना प्रकाशेन निरस्तं ज्ञानकर्मांगत्वादि कुहकं येन तस्मात् ज्ञानकर्मसंसर्गरहितया भक्त्यैव भगवत्प्राप्तिरिति दर्शितम् । वक्ष्यत्येकादशे "भक्त्याहमेकया ग्राह्य" इति । एवं भक्तिद्वारा कर्मयोगसिद्धिमुक्त्वा ज्ञानयोगस्यापि तद्द्वारा सिद्धिमाह—जन्माद्यस्येति । जन्म आद्यं यस्य षड्भावविकारस्य स जन्माद्यस्तस्य जन्माद्यस्त जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति षड् योजनिकेयम् । अर्थेषु मायाकार्येषु देहेषु जन्माद्यस्याभिज्ञस्तत्त्वज्ञो जनो यतो भक्तियोगात् स्वराट् स्वरूपस्थं ब्रह्मान्वयात्प्राप्तवान् । तदुक्तं दशमे "पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया । विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते परां गतिम् ॥" इति भक्तियोगं विना मोहं प्राप्य स्वार्थाद् भ्रश्यंतीत्याह—इतरत इति । यद्यस्मादितरतः केवलाज्ज्ञानयोगाच्चकारात्कर्मयोगात्सूरयः सम्यगभिज्ञा अपि मुह्यंति स्वार्थाद्भ्रश्यंति । तदुक्तं "येऽन्येऽरविन्दाक्ष विमुक्तमानिनः" इत्यादि । अत्र स्वानुभवमाह—तेन इति । यो भक्तियोगः कवये ब्रह्ममादि आद्यं यद्वस्तु श्रीकृष्णाख्यं तद्धृदा तेने विस्तीर्य प्रकाशितवान् । अत्रैव वक्ष्यति "भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले । अपश्यत्पुरुषं पूर्णं मायाञ्च तदुपाश्रयाम् ॥" इति तस्मादेवंभूतं भक्तियोगं धीमहीति भक्तियोगपक्षः ॥ अथ देहात्मपक्षः—एवंभूतो भक्तियोगो देहातिरिक्तशुद्धात्मज्ञाने सति संभवति, अत एव देहत आत्मा पृथक्, आत्मनश्च देहोऽपि पृथगिति तृतीयस्कंधादौ वक्तुमुभावपि युगपत्स्मरति—जन्माद्यस्येति । तं सत्यमात्मानं सत्यात्परिभिन्नं देहं धीमहि । उभयोः प्राधान्याच्चकारादिनिर्देशो न कृतः । कोऽसौ देहस्तत्राह यत्रेति । यत्र देहे त्रिसर्गः त्रयाणां मायागुणानां सर्गश्चतुर्विंशतितत्त्वसमूहः अमृषा सत्यः । कथंभूतः सर्गः ? तेजोवारिमृदां यथा यथावत्परिणामो यत्र सः । तत्र तेजसा रुधिरत्वं वारिणा क्लिन्नत्वं श्लेष्मत्वं वा मृदा मांसत्वमिति विनिमयः । वाय्वाकाशयोर्विकाराभावान्न निर्देशः । आत्मनि तु त्रिसर्गो मृषैव ज्ञेयः, देहादात्मनः पृथक्त्वात् । ननु देहात्मनोः पृथक्त्वे सति कथं देहस्य जडस्य जन्मादिकम् ? आत्मनोऽपि चिदंशस्य भोक्तृत्वमित्याशङ्क्याह—जन्माद्यस्येति । यतो यस्यात्मनोऽन्वयात्संबंधादस्य देहस्य जन्ममरणादि तथा देहस्यान्वयादस्यात्मनोऽपि जन्ममरणसुखदुःखभोक्तृत्वादि भवति, न तु स्वतस्तं च तं च । तत्र प्रकृतिपरिणामो देहः पुरुषांश आत्मा तस्मादुभयसंयोगादेवोभयोर्जन्मादि नान्यथेति । तदुक्तं वेदस्तुतौ-"न घटत उद्भव" इत्यादिना । किंचात्मनोऽन्वयाद्यो देहः अर्थेषु विषयेष्वभिज्ञो निपुणो भवति । आत्मा तु इतरतो देहाहंकाराभावात्स्वराट स्वरूपस्थो विराजते यः तं च तं च । किंच तेन इति । आत्मान्वयाद्देहः आदिकवये परमेश्वराय तं प्राप्तुं ब्रह्ममयं यज्ञं विस्तारितवान् । "तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्" इति गीतोक्तेः । यथा देहान्वयादात्मापि यदा गर्भस्थः सन्ब्रह्मज्ञानं तेने तं च तं च । तदुक्तं तृतीये जीवस्तुतौ-"ज्ञानं यदेतददधात्कतमः स देवः" इत्यादिना । नन्वेवं चेत्तर्हि कथं मिथ्याभूते देहे विवेकिनामप्यात्मत्वेनाभिनिवेशो दृश्यते ? सत्यम्; आत्मतत्त्वस्य दुर्ज्ञेयत्वादित्याह—मुह्यंतीति । यद्यस्मिन्नात्मनि सूरयस्तत्त्वज्ञा अपि मुह्यंति । तदुक्तं गीतासु "आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्" इति नन्वेवंभूतश्चेदात्मा कथं तर्हि तस्य विकारित्वं कथं वा बंध इत्याशंक्याह—धाम्नेति । स्वेन धाम्ना स्वरूपस्फुरणेन निरस्तो दूरीकृतो मायाकृतज्ञानदेहसंबंधविकारादिकपटो यस्य तम् । आत्मा सदैव निर्विकारो देहात्पृथक्स्थतुरीयावस्थायां योगिभिर्लभ्यते । तदुक्तमेकादशे "सन्ने यदेंद्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः" इति तथा देहात्मवादिनामपि या देहात्मबुद्धिः सा निरस्ता । तद्यथा-धाम्ना स्वाश्रयेण मिथ्यात्वं दृश्यत एव । अत एवोभावपि सत्यासत्यत्वेन धीमहीति देहात्मपक्षे व्याख्यानम् । एतद्भक्तियोगपक्षे देहात्मपक्षव्याख्याद्वयं विद्वज्जनविनोदाय कृतमपि पारमार्थिकं ज्ञातव्यम् । प्रतिपदं प्रमाणवत्त्वात् । अथेदानीं मथुरामंडलवासिनां प्रीतये व्याख्यांतरमारभते—तत्र यस्तु तपोयोगसमाधिभिरप्यदृश्यो भगवान्, स तु मथुरामंडल आविर्भूतोऽतस्तमपि स्मरति—तं सत्यं मथुरामंडलं धीमहि । अत्र "मंडलं त्रिषु" इत्यमरोक्तेः पुल्लिंगत्वेन निर्देशोऽप्युचित एव । कथंभूतं ? परं सर्वतीर्थपुरीणां श्रेष्ठं, चतुर्धा मोक्षप्रदत्वात् । तदुक्तं वाराहे "काश्यादयो यद्यपि संति पुर्यस्तासां तु

मध्ये मथुरैव धन्या । या जन्ममौंजीव्रतमृत्युदाहैर्नृणां चतुर्धा विदधाति मुक्तिम् ॥" इति । न केवलं चतुर्धा मोक्षप्रदत्वेनैव तस्य परत्वमपि तु परमेश्वरनित्यसंबंधादपीत्याह—जन्मेति यत इति । सार्वविभक्तिकस्तसिरूपं सप्तम्यंतम् । यतो यस्मिन् मथुरामंडले आद्यस्यादिपुरुषस्य श्रीकृष्णस्य जन्म तम् । कुतः ? अन्वयात् नित्यसंबंधात् , "मथुरा भगवान्यत्र नित्यं संनिहितो हरिः" इत्युक्तेः । हेत्वंतरमितरतो ब्रह्मादिप्रार्थनातश्च । किं च यः अर्थेषु योग्यायोग्यदानपात्रेषु अभिज्ञो वेत्ता तं "त्रिवर्गदा कामिनां या मुमुक्षूणां च मोक्षदा । भक्तीच्छोर्भक्तिदा या तु मथुरां को न तां वसेत् ॥" इति वाराहोक्तेः । यः स्वराट् स्वप्रकाशो ज्योतिर्मयस्तम् । किं च य आदिकवये विवेकिने जीवाय मृत्युकाले हृदा हृदि ब्रह्म मंत्रं तारकं तेने तम् । तस्मिन्काले कविश्चेत्स्वयमेव जानातु, नेत्याह—मुह्यंतीति । यद्यस्मिन्मृत्युकाले सूरयो विवेकिनोऽपि मुह्यंति व्यामोहं गच्छंति । अत एव संन्यासिनोऽपि विविक्तक्षेत्रमाश्रयंते । ननु ज्योतिर्मयश्चेत्कथं लोकैरन्यथा दृश्यते ? सत्यमविवेकिनामन्यस्मिन्नन्याभास इत्याहुः—तेज इति । तेजसि धातुरत्नाभासः यमुनामृते वारिबुद्धिः चिंतामणौ मृत्तिकाप्रतीतिरिति साधारणी दृष्टिरज्ञाततत्त्वानां भवति "भूमिश्चिंतामणिस्तोयममृतम्" इत्याद्युक्तेः । मथुरामाहात्म्ये तु "मथुरायां प्रकुर्वंति पुरीसाधारणीदृशम् । ते नराः खलु विज्ञेयाः पापराशिभिरन्विताः ॥" इति । नन्वेवं चेत्कथ-मत्रोच्चनीचादीनां जन्म तत्राह—यत्रेति । यत्र मथुरायां त्रिसर्गस्त्रयाणामुच्चनीचमध्यमानां सर्ग उत्पत्तिर्मृषैव ज्ञेया । यत्र सर्वेषां लक्ष्मीविष्णुरूपत्वात् । तदुक्तं संहितायां—"स्त्री लक्ष्मीः पुरुषो विष्णुः" इत्यादिना । यद्वा त्रयाणां नरतिर्यक्स्थावराणां सर्गो जन्म मृषा, सर्वेषां भगवज्जनत्वात् । "अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणैः" इत्यादिना "हंतायमद्रिरबले"-त्यादिना स्थावराणां पार्षदत्वमुक्तम् । "प्रायो बतांग विहगा मुनयो वनेऽस्मिन्" इति तिरश्चां भागवतत्वमुक्तम् । "स्त्री लक्ष्मीः पुरुषो विष्णुरि"त्यादिना मनुष्याणां तत्स्वरूपत्वमुक्तं, तस्मादत्र स्थावरादिजन्म मृषैव ज्ञेयम् । नन्विदमेव मथुरा-मंडलमिति कथं ज्ञायते तत्राह—धाम्नेति । धामाश्रयः श्रीकृष्णः स्वेन धाम्ना स्वाश्रयेण श्रीकृष्णेन केशवगोविंदगो-पालादिना स्वमूर्तिभेदेन निरस्तं लोकानां कुहकं भ्रांतिज्ञानं यस्मिंस्तं तस्मादेवंभूतं द्वादशारण्यसहितं श्रीमथुरा-मण्डलं धीमहीति मथुरामंडलपक्षः । अथ सर्वोत्सवानां मध्ये रासोत्सवः श्रेष्ठतमः, स तु मथुरामंडलांतर्वर्तिनि श्रीवृंदावने नित्यं वर्तते तं दशमे पञ्चाध्याय्या निरूपयितुमत्र स्मरति—जन्माद्येति । यतो यस्माद्रासोत्सवाद्धेतोरन्वयात्क्षत्रियकुला-दितरतो वैश्यकुलादाद्यस्य श्रीकृष्णस्य जन्माविर्भावस्तं परमोत्कृष्टं रासोत्सवं हृदा मनसा धीमहि । वसुदेवगृहान्नंदगृहे यशोदात्म-जत्वेन तस्याविर्भाव इत्यर्थः । किमर्थं धीमहि तत्राह । आदिकवये श्रीकृष्णं प्राप्तुमित्यर्थः । "तुमर्थाच्चे"ति चतुर्थी, स्नानाय व्रजतीत्यादिवत् । कथंभूतं ? सत्यं, सत्यानुष्ठानात् । पुनश्च धाम्नेति । स्वेन धाम्ना सदैव निरस्तो दूरीकृतः श्रीकृष्णगोपकन्यानामन्यो-न्यसंभवः कपटो येन तं तस्माच्छ्रीकृष्णस्य यत्कापट्यं सर्वाः स्त्रियो विहायैकां गृहीत्वा पलायनं तामपि त्यक्त्वांतर्द्धानादिकं तथा गोपकन्यानामपि यत्कापट्यमन्योन्यवंचनादिकं श्रीकृष्णेऽपि कृतघ्नोऽयमित्यसूयया यदंतः कोपादिकमेतत्सर्वं रासस्य महिम्ना निरस्तमित्यर्थः । तद्यथा—"न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापिवः" इत्यादिना स्वस्य निष्कापट्यमुक्तमिति । ननु कोऽयं रासोत्सवो यस्यायं महिमा तत्राह—तेज इति । यत्र रासे तेजोवारिमृदां यथा विनिमयः यथायोग्यं विनिमयो विपरिवर्तनं तद्यथा तेजसां चंद्रादीनां गतिविसरणात्स्थगितत्वं वारिणां यमुनादिजलानां स्रोतसां परिवर्तनं मृद्भूमिस्तस्य विनिमय उच्छूनत्वं रोमांचितत्वमिति । तदुक्तं तत्रैव "कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः । कामार्दिताः शशांकश्च सगणो विस्मितोऽभवत्" इत्यनेन । तेजसां गतिविस्मरणत्वमुक्तं "नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः" इत्यादिना वारिणां गतिवैप-रीत्यमुक्तं "किं ते कृतं क्षितितपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि" इत्यादिना मृत्तिकाया विनिमय उक्त इति । किंच यत्र त्रिसर्गोऽमृषा त्रयाणां नृत्यगीतवाद्यानां सर्गः संभवोऽमृषा सत्यः । यतस्तेन सर्वं जगदावृतम् । तदुक्तम्—"उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः । कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम्" इति । नन्वेवंभूतो रासः कथं नंदादिभिर्न दृष्टस्तत्राह—अर्थेष्विति । अर्थेषु दर्शनयोग्यविषयेष्वेव स्वराट् विराजमानो नान्यत्र । यतोऽभिज्ञः विचक्षणः । अयमर्थः—नन्दादीनां गोपानां लज्जाविषयत्वाद्दर्शनायो-ग्यत्वमन्येषां मर्त्यानां मांसचक्षुष्ट्वाद्दर्शनायोग्यत्वं गंधर्वादीनां तदभावात्तैर्दृष्ट इति । तदुक्तं—"नभस्तावद्विमानशतसंकुलम् । दिवौकसां सदाराणाम्" इति । "जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलम्" इति "कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः" इत्यादिना । ननु रासो नामोत्सवधर्मविशेषोऽमूर्तः कथं तस्य स्वराट्त्वमभिज्ञत्वञ्चेति चेदाह—रासकर्तॄणां ये गुणास्ते रासोत्सवे उपचर्यंते; 'मंचाः क्रोशंति, सभा भाति, स्थाली पचती'तिवत् । अतो रासकर्तॄणां या शोभा भुजविधुतादिभिरुक्ताऽभिज्ञत्वादिकं च सर्वं रासस्येत्यु-पचर्यते । अहो रासस्थानां महिमानं पश्यतेत्याह—तेन इति । यद्यस्मिञ्छ्रीकृष्णे सूरयो ब्रह्मादयोऽपि मुह्यंति, तद्ब्रह्म श्रीकृष्णाख्यमेक-मपि यो रासस्तेन विस्तारितवान् । तं धीमहीति । तदुक्तं "रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः । योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः । कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः" इत्यादिनाऽतः सर्वोत्कृष्टं रासोत्सवं धीमहीति रासमंडलपक्षः । अत्र व्याख्याशतकमपि मया पृथगेव रचितं, विस्तरभियेह नो निक्षिप्तम् । तथा श्रीभागवतस्य सर्वकथा-प्रदर्शकलीलाकल्पद्रुमाख्यनिबंधोऽपि सपादशतव्याख्यात्मकोऽप्यत्र मया संबद्धः, सोऽपि विस्तरभियैवेह नो निक्षिप्तः । अत्र श्लोके "सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणवत्त्वाच्छार्दूलविक्रीडितं छंदः ॥ १ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

इह खलु परमकारुणिकः परमहंसपरिव्राजकाचार्यः श्रीधरयतीन्द्रः प्रारिप्सितायाः श्रीमद्भागवतटीकाया निर्विघ्नेन परिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनफलं शिष्टाचारानुमितस्मृतिपरिकल्पितश्रुतिबोधितकर्त्तव्यताकं स्वाभिमतदेवतातत्त्वानुसन्धानात्मकं मङ्गलमाचरति—वागीशा यस्य वदने इति। ईशा विधिनिषेधयोः जीवान् नियमयतीति वेदलक्षणा वाक् यस्य मुखे वर्त्तते अनेन तद्वदनानुसरणात् अपरा विद्यावाप्तिर्ध्वनिता । यदुरसि श्रीर्हेमरेखारूपेणास्ते इति सच्चिन्मूर्त्तौ भगवति चिज्जडभागाभावेन देहदेहिभागासम्भवेऽपि तद्वदनादिस्मरणात् इष्टसाधनसम्पल्लाभसिद्धिर्ध्वनिता तावता विद्यालक्ष्मीभ्यां त्रिवर्गलाभसिद्धेस्तद्वदनादिस्मरणात् त्रिवर्गलाभसिद्धिरिति । यस्य हृदये संवित् परा विद्या आस्ते इति तद्भजनाद् ब्रह्मात्मैक्यज्ञानरूपपराविद्यावाप्तिरिति मुक्तिसिद्धिः अत्र हृदयसंविदोरभेदात् पूर्ववद् व्यपदेशः । तं भगवन्तं श्रीनरसिंहमूर्तिं कीर्त्तननमनादिभिः सेवे इत्यर्थः ।

ततः श्रीमद्भागवतप्रतिपाद्यं श्रीकृष्णाख्यं सर्वाश्रयं परमात्मानं नमस्करोति विश्वसर्गविसर्गादीति । आदिपदेन स्थानं पोषणमूतिर्मन्वन्तराणि ईशानुकथा निरोधो मुक्तिरिति सप्तानां लक्षणानां ग्रहणम् । तत्र परमेश्वरात् कर्त्तुर्गुणानां परिणामात् आकाशादीनां शब्दादीनामिन्द्रियाणां महत्तत्त्वाहङ्कारतत्त्वयोश्च यत् विराड्रूपेण स्वरूपेण च जन्म स सर्गः । चतुर्मुखब्रह्मणा कृतश्चराचरसर्गो विसर्गः। भगवतः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम्। स्वभक्तेषु भगवदनुग्रहः पोषणम्। कर्मणां वासना एव ऊतयः, कर्मभिर्वर्धन्ते संश्लिष्यन्ते वेति ऊतिशब्दार्थः। भगवदनुगृहीतानां सतां मन्वन्तराधिपतीनां धर्मो मन्वन्तराणि। हरेरवतारानुचरितम् अस्यानुवर्तिनाञ्च सतां कथा ईशानुकथाः। हरेर्योगनिद्रावलम्बनानन्तरं जीवानां स्वोपाधिभिः सह शयनं लयो निरोधः। अविद्यया अध्यस्तं कर्तृत्वादि हित्वा ब्रह्मतया व्यवस्थितिर्मुक्तिरिति । एवमेतत्पुराणोक्तेन विश्वसर्गादिनवलक्षणेन लक्षितं यत् श्रीकृष्णाख्यं परं धाम तत् जगद्धाम नमामीत्यर्थः। धाम इति आश्रयशब्दार्थः। तत्र सृष्टिर्लयश्च यतो भवति अध्यवसीयते प्रकाशते च स ब्रह्मेति परमात्मेति प्रसिद्ध आश्रय इति। तदनेन 'अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः। दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्। वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा' इति द्वितीयस्कन्धान्तर्गतदशमाध्यायस्य प्रथमादिसंख्यश्लोकग्रन्थार्थोऽपि संक्षेपतो दर्शित इति ॥

एवं निर्गुणत्वेन प्रणम्य तमेव बहुश्रुतिस्मृतिसिद्धहरिहराद्वैतत्वप्रदर्शनपूर्वकं सगुणत्वेनाभिवन्दते—माधवोमाधवाविति । वन्दने कारणम्—सर्वसिद्धिविधायिनाविति । हेतुगर्भविशेषणमेतत् । नन्वीश्वर एक एव सर्वशास्त्रसिद्धः कथमुभयोरीशत्वम् ? वदतो व्याघातात्; इति चेत्—मैवं; शब्दार्थयोरिव नाममात्रं तयोर्भेदसहिष्णुत्वेऽपि परमार्थतोऽभेद एवेत्याशयेनाह—परस्परात्मानाविति परस्परनतिप्रियाविति । भक्तकृतेनैकतरस्य नमस्कारेणोभौ प्रीतौ भवतः परस्परतादात्म्यादित्यर्थः ॥

व्याख्याक्रमं प्रतिजानीते—सम्प्रदायानुरोधेनेति 'गुरुपरम्परागतसदुपदेशः सम्प्रदायः' इति भरतः। 'अनुरोधोऽनुवर्त्तनम्' इत्यमरः। तथा च गुरुपरम्परागतसदुपदेशानुवर्त्तनेनेत्यर्थः। न चाहमेव केवलं गुरुपरम्परागतसदुपदेशानुवर्त्तने प्रवृत्तोऽस्मि, किन्त्वेवं बहव एव प्रवृत्ता इत्याह—पौर्वापर्यानुसारत इति किञ्चात्र सम्प्रदायविदः—सम्प्रदायोऽत्र ब्रह्मादिपरंपरागताद्वैतरूपः, तदनुवर्त्तनेऽपि पौर्वापर्यानुसरणमावश्यकम्, अन्यथा 'कृष्णस्तु भगवान् स्वयम्' इति (१. ३. २८.) इत्यादिपूर्वापरवाक्यानालोचनेन 'अथाहमंशभागेन' (१०. २. ९) इत्यादावंशावतारत्वादिव्याख्यानं स्यात्। यद्वा यथा भगवता ब्रह्मणा नारदं प्रति—'यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय' (२. ७. ५२) इति हरिलीलाप्राधान्येन श्रीभागवतं वर्णय, न तु भक्तिरसविघातेन केवलं तत्त्वमित्युपदिष्टं तथेति ॥

ग्रन्थमहिमप्रदर्शनाय तद्व्याख्याने स्वायोग्यतामाह—काहमिति। तत्र भगवत्कृपया सर्वं भवतीति सूचयन् पुनस्तमभिवन्दते—मूकमिति। मूकं सामान्यतो वाक्शक्तिहीनं ध्रुवमिति वा पङ्गुं सामान्यतो गतिशक्तिशून्यं अरुणमिति वा। गिरिं पर्वतं सुमेरुमिति वा।

अथैतत्पुराणारूपकालङ्कारेण स्कन्धाध्यायादिसंख्यां सूचयन् स्तौति—श्रीमदिति। श्रीमद्भागवताभिधः सुरतरुकल्पवृक्षः सर्वोपरि सर्वशास्त्रोपरि वर्वर्ति अतिशयेन वर्तते। कथम्भूतस्ताराङ्कुरः ?। तारः प्रणवः स एव अंकुरः प्ररोहो यस्य सः। सज्जनिः ततः विस्तृतः। सतः नारायणात् जनिरुत्पत्तिर्यस्य सः। किञ्च द्वादशभिः स्कन्धैः स्थूलशाखाभिः प्रविलसन्ती उद्रिक्ता या भक्तिः सा एव आलवालः तस्मिन्नेव उदयो यस्य स इत्यर्थः। आलवालश्च तरुमूले जलरक्षणार्थं मृदादिरचितपरिधिविशेषः। पुनस्तस्यैवार्थतो विशेषणमाह—द्वात्रिंशत्त्रिशतञ्च यस्य विलसच्छाखा इति। वर्तते इति शेषः। तथाहि—द्वाभ्यामधिका त्रिंशत् द्वात्रिंशत्, शतञ्च शतञ्च शतञ्च शतानि, द्वात्रिंशच्च त्रयश्च शतानि च तेषां समाहारः। द्वात्रिंशत्त्रिशतम्। एवं सति पञ्चत्रिंशदधिकशतत्रयाध्यायाः (३३५) भवन्तीति महामहोपाध्यायगोपालभट्टाचार्यकृतव्याख्यालेशाख्यटिप्पनी, तत्रादौ द्वात्रिंशदित्यत्र 'शाकपार्थिवादीनाम्' इति समासः। ततः शतमित्यत्रैकशेषात्

शतानीति। ततो द्वात्रिंशच्च त्रयश्च शतानि चेति समाहारद्वन्द्वेनैकत्वमिति ज्ञेयम्। किञ्च—द्वात्रिंशच्च त्रयश्च शतानि चेति त्रिपदद्वन्द्वः 'कपिञ्जलानालभेत' इत्यत्रेवानिर्द्धारितविशेषं बहुत्वं त्रित्वे पर्यवस्यति। तेन पञ्चत्रिंशदधिकशतत्रयसंख्याकाः शाखा इत्यर्थः। समाहारोत्तरद्वन्द्वे तु त्रिशतीति स्यादिति वत्साहरणलीलारम्भे प्रपञ्चितम्। एतेनाघासुरवधाद्यध्यायाभावाभिप्रायं द्वात्रिंशत्पदमिति केनचिदुत्प्रेक्षितं प्रत्युक्तमिति भागवतटीकायां धर्मसिन्ध्वादिनिबन्धकारः श्रीकाशीनाथोपाध्यायः। अपि च—द्वात्रिंशदिति शाकपार्थिवादीनां सिद्धये 'उत्तरपदलोपस्योपसंख्यानम्' इति वार्त्तिकेन मध्यमपदलोपितत्पुरुषसमासं कृत्वा द्वाभ्यामधिका त्रिंशदिति विग्रहेण साधनीयम्। तच्च पृथक् पदम्। ततः शतमित्यत्रैकशेषात् शतानीति। ततः त्रयश्च शतानि चेति बहुप्रकृतिकद्वन्द्वे 'बहुतप्रकृतिरेव द्वन्द्व एकवत्'इत्यनुशासनादेकत्वं, तथा च त्रिशतमित्युत्तरं चशब्दस्यापि सार्थक्यम्। अथवा शतानीत्यत्र कपिञ्जलालभनन्यायेन अनिर्णीतबहुत्वस्यानवस्थाभिया त्रित्वमात्रे पर्यवसानात् त्रिशतमेव ज्ञेयमिति नव्यसूरिणः। केचित्तु द्वात्रिंशत्त्रिशतमिति पदान्तर्गतशतशब्दस्य त्रित्वपर्यवसायित्वस्वीकारभीरवो दशमस्कन्धस्याघासुरवधादिद्वादशाद्यध्यायत्रयाणामभागवतत्वं मन्यन्ते। अहो किमेषां मनोराज्यविजृम्भकाणां कूपमण्डूकानां साहसम्! तैः किं ऋग्वेदीयमन्त्रभागवतं तथा बोपदेवीयमुक्ताफलहरिलीलादिग्रन्थोऽपि नादर्शि ?। पश्यन्तु तावत् ऋग्वेदीयमन्त्रभागवतस्य वृन्दावनकाण्डीय—द्वितीयसर्गे 'हिंकृण्वती वसुपत्नी वसूनाम्' इत्यारभ्य 'यस्मिन् वृक्षे मध्वदः सुपर्णा' इति (१०, ११, १२, १३, १४,) मन्त्रान् तदीयनीलकण्ठकृतटीकाश्च, किञ्च बोपदेवीयमुक्ताफले विष्णुभक्तानामद्भुतरसकथने दशमाद्यङ्के 'तदस्तु मे नाथ स भूरिभाग' इत्यादिना गृहीतान् दशमस्कन्धीय-चतुर्दशाध्यायस्य त्रिंशत्तमश्लोकावधि चतुस्त्रिंशत्तमश्लोकपर्यन्तान् तदीयकैवल्यदीपिकाख्यटीकाश्च तथा तदीयहरिलीलाग्रन्थे दशमस्कन्धवर्णनप्रघट्टने 'वधश्च वत्सबकयोस्तथाघासुरभोगिनः। वत्सचौरब्रह्ममोहो ब्रह्मणा स्तवनं हरेः' इत्येकादशश्लोकं मधुसूदनसरस्वतीकृततट्टीकाञ्च। वस्तुतस्तु तेषां मते 'द्वात्रिंशत्त्रिशतम्' इति पदान्तर्गतत्रिशतपदमेव न सिद्ध्येत्, शतत्रयबोधनाय समाहारद्वन्द्वातिरिक्तान्यसमासाप्राप्त्या तत्साधनस्य शशशृङ्गायमाणत्वात्। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट' इत्यनुशासनेन समाहारद्विगौ 'द्विगोश्च' इति ङीपो दुर्वारत्वेन त्रिलोकी पञ्चशूलीतिवत् त्रिशतीति प्रयोगापत्तेः। किञ्चात्र बहुतरप्राचीनपुस्तकसम्मतद्वादशस्कन्धीयद्वादशाध्यायोक्तेनाघासुरवधो धात्रेत्यादिलीलानुवादकेनाष्टाविंशतितमश्लोकेनापि तल्लीलानुवादो दृश्यते। परमहंसप्रियादिप्राचीनटीकाकाराणां सम्मतिरपि दरीदृश्यते। श्रीश्रीधरयतीन्द्रोऽपि दशमस्कन्धीयप्रथमाध्याये स्कन्धानुक्रमणिकाकथने 'कृता नवतिरध्याया' इति। एवं 'नवतिरध्याया' इत्यनेन च दशमस्कन्धस्य पुनःपुनर्नवत्यध्यायान्वितत्वमुक्त्वा 'प्रोक्ताध्यायत्रयस्यापि व्याख्यानमचीकरत्' इति। तथा च व्याख्यालेशाद्युक्तिरेव समीचीनेति सर्वं चतुरस्रम्। पुनरर्थतो विशेषमाह—सहस्राणीति। अष्टादश च सहस्राणीति पृथक्पदेनान्वयः। समासे अष्टादशेति स्यात्। अष्टादश सहस्राणि अलं भूषणस्वरूपाणि पर्णानि श्लोकस्थानीयानि यस्य भवन्तीत्यध्याहारः। अत्र तु सुविख्यातमहाभारतादिटीकाकारसहामहोपाध्यायनीलकण्ठादिबहुप्राचीनसूरिसम्मतः काशीकाश्मीरादिसर्वदेशप्रचलितवेदव्यासाभिप्रेताष्टादशसहस्रश्लोकसंख्याक्रमोऽयम्—प्रत्येकम् उवाचान्त एकैकश्लोकः आर्य्यादिनानाविधच्छन्दसां गद्यानां पुष्पिकाणाञ्च द्वात्रिंशदक्षरगणनया ये अनुष्टुप्श्लोका भवन्ति ते प्रसिद्धानुष्टुप्श्लोकाश्चेति। काशीनाथोपाध्यायेन चण्डीसप्तशतीपाठक्रमेणापि अष्टादशदशसहस्रसंख्याः परिगणिता इति तद्व्याख्याने स्पष्टम्। पुनश्च कथम्भूतः ? इष्टदोऽतिसुलभश्चेति।

एवं मङ्गलाचरणादिकं कृत्वैतत्पुराणकथने व्यासस्य प्रवृत्तेः कारणमाह—अथेति। नारदोपदेशतः एतत्स्कन्धीयपञ्चमाध्यायोक्तप्रकारेण नारदोपदेशादित्यर्थः। परमित्यस्यार्थः परमेश्वरमिति, स्वरूपतटस्थलक्षणाभ्यां तस्यैव बोधितत्वात्। तथा च श्रुतिः—'तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम्। पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्' इति (श्वेता० ६ खं. ७ मं.)। ध्यायतेर्लिङि छान्दसमिति। अत्रोपाध्यायः—लिङि विधिलिङि। छान्दसमिति। 'ध्यै चिन्तायाम्' इत्यस्मात् 'व्यत्ययो बहुलम्' इति सूत्रेण परस्मैपदव्यत्ययादात्मनेपदं 'छन्दस्युभयथा' इत्युभयसंज्ञायां सार्वधातुकत्वात् सीयुटः सकारलोपः, आर्द्धधातुकत्वाच्छभावः, बाहुलकात् ध्यायतेः सम्प्रसारणं, 'हल' इति दीर्घः, इत्येवं वैदिकप्रक्रियासूत्रैः साधनीयमिति। बहुवचनं शिष्याभिप्रायकमिति। इह खलु कर्त्तुः सविशेषणत्वाभावाद् बहुवचनमात्मनि सम्यगेव 'अस्मदो द्वयोश्च' इति पक्षे तद्विधानात्। तथा च श्रीधरस्वामिनां क्लिष्टकल्पनं निरर्थकमिति न शङ्कनीयम्। यतः 'अस्मदो द्वयोश्च' इति सूत्रम् अविशेषणास्मच्छब्दोत्तरबहुवचनप्रत्ययस्यैकत्वार्थे लक्षणाग्राहकम्। यद्यविशेषणास्मच्छब्दोत्तरबहुवचनस्य शक्तिप्रतिपाद्यरूपार्थप्रयोगनिर्वाहसम्भवः स्यात् तर्हि लक्षणाप्रयोगोऽनुचितः, सति शक्यार्थसम्भवे लक्षणाग्रहणस्य शास्त्रानभिमतत्वात्। किञ्च अविशेषणस्यास्मद एकत्वरूपशक्यार्थे यद् बहुवचनं विहितं तदौपचारिकमिति शाब्दिकशिरोमणिगोपीचन्द्रसम्मतम्। एवञ्च सति बहुत्वरूपशक्यार्थसम्भवस्थले ह्यौपचारिकबहुवचनस्याग्राह्यत्वं स्पष्टमेव, तस्य चारोपितरूपत्वादिति। अत एव 'धीमहि' इत्यत्र बहुवचनं शिष्याभिप्रायकमिति श्रीधरस्वामिलिखनं बहुत्वरूपशक्यार्थसूचकमिति समीचीनमिति दिक्। तथाहि—धीमहि ध्यायेम समस्तजीवाभिप्रायेण बहुत्वमिति भागवतव्याख्यालेशाख्यटिप्पण्यामाद्यश्लोके गायत्र्यर्थव्याख्याने सुविख्यातमहामहोपाध्यायगोपालभट्टाचार्यः। धीमहीति बहुवचनं कालदेशपरम्परास्थितस्य सर्वस्यापि तत्कर्तव्यताभिप्रायेणानन्तकोटिब्रह्माण्डान्त-

योगिनां पुरुषाणामंशीभूते भगवत्येव ध्यानस्याभिधानादिति श्रीमद्भागवतसन्दर्भस्य तृतीयसन्दर्भे विख्याततनामा द्वैतवादाचार्यः श्रीजीवगोस्वामी। धीमहि ध्यायेम बहुवचनेन कालदेशपरम्पराप्राप्तान् सर्वानेव जीवान् स्वान्तरङ्गीकृत्य स्वशिक्षया तान् ध्यातुमुपदिशन्नेव क्रोडीकरोतीति सारार्थदर्शिन्याख्यभागवतटीकायां विश्वनाथचक्रवर्त्ती चेति। स्वरूपतटस्थलक्षणाभ्यामिति। तदुक्तं—'स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपे प्रवेशात् स्वरूपेऽनिवेशात्। स्वरूपस्य सिद्धिर्द्विधा लक्षणाभ्यां यथा काकवन्तो गृहाः खं त्रिलक्ष' इति। स्वसम्पत्तिसमर्पकत्वे सतीतरव्यावर्त्तकत्वं स्वरूपत्वम्। यद्वा यत् स्वरूपान्तर्गतं सत् इतरव्यावृत्ततया लक्ष्यं बोधयति तत् स्वरूपलक्षणं, यथा गोः सास्नाशृङ्गादि। स्वरूपाप्रविष्टत्वे सति विशेषणान्तरं संसूच्य इतरव्यावर्तकत्वं तटस्थत्वम्। यद्वा यावल्लक्ष्यकालमनवस्थितत्वेन स्वरूपानन्तर्गतं सत् यल्लक्ष्यं इतरव्यावृत्तं बोधयति तत्तटस्थलक्षणं, यथा गोविशेषस्य अलङ्कारविशेषादि, देवदत्तगृहस्य काकादि वा। प्रकृते सत्यं ज्ञानमानन्दश्च परमेश्वरस्वरूपमेव सत्, असज्जडदुःखप्रपञ्चव्यावृत्ततया बोधयतीति स्वरूपलक्षणं सम्पद्यते। जगज्जन्मादिकारणत्वं तु तटस्थलक्षणं, न हि तत् सर्वदास्ति, प्रलयादिकाले तदभावात्। अतः स्वरूपानन्तर्गतं सदाकाशादिव्यावृत्तमीश्वरं लक्षयतीति तटस्थलक्षणमिति। तत्र स्वरूपलक्षणस्य मुख्यत्वात् आवृत्तिक्रममुल्लङ्घ्य प्रथमं व्याख्यायते—तत्र स्वरूपलक्षणमिति। सत्यपदं ज्ञानानन्दयोरुपलक्षणम्। यत्र यस्मिन्नधिष्ठाने इत्यर्थः। भूतेन्द्रियेति। तमःसर्गः आकाशादिभूतपञ्चकं, रजःसर्गः कर्मेन्द्रियपञ्चकं, प्राणपञ्चकञ्च सत्त्वसर्गः, ज्ञानेन्द्रियपञ्चकं प्राणपञ्चकञ्च सत्त्वसर्गः, ज्ञानेन्द्रियपञ्चकम् अन्तःकरणचतुष्टयं तत्तदिन्द्रियाद्यधिष्ठातृदेवताश्चेति विभागः। उपाधिसम्बन्धमिति आधाराधेयभावम्। तथा सति द्वैतप्रसङ्गः स्यादिति भावः। स्वेनेति। स्वेनैव स्वस्वरूपेणैवेत्यर्थः। धाम्नेत्यस्यार्थः—महसेति। महसा तेजसा चिद्रूपेणेति यावत्। कं ब्रह्मसुखं पटते आच्छादयतीति कपटम् अज्ञानमित्यर्थः। माययैव भेदो भवति, सा च माया अखण्डचिद्रूपे एतस्मिन् वस्तुतो नास्त्येव, कुत उपाधिप्रसङ्ग इति भावः। लक्षणान्तरं प्रतिजानीते तटस्थेति। तत्र जन्मादीति जन्म उत्पत्तिरादिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थितिभङ्गः समाहारः समासार्थः, समाहारे नपुंसकत्वैकत्वयोः सत्त्वात्। जन्मादीति नपुंसकैकवचनम्। यत इति पञ्चम्यर्थे तसिर्निमित्तोपादानोभयपरः। यस्मात् परमेश्वरात् कर्तुरुपादानाच्च भवतीत्यर्थः। यत इत्यव्ययनिर्देशेन कारणस्याविकृतत्वं ध्वन्यते। तत्र परमेश्वरस्योभयविधकारणत्वे हेतुः—अन्वयादिति। यत्सत्त्वे यत्सत्त्वमन्वयः, यदभावे यदभावो व्यतिरेकः, यथा मृदः कुलालस्य वा सत्त्वे घटोत्पत्तिसत्त्वम्, तदभावे तदभावाधिकरणे तन्त्वादौ घटोत्पत्त्यभाव इत्यन्वयव्यतिरेकौ प्रत्यक्षौ मृदादेः कारणत्वे घटादेः कार्यत्वे च मानम्। तथा यत्र यत्र सद्रूपेण परमेश्वरस्य सत्त्वं घटः सन् इति प्रत्यक्षतो दृश्यते तत्र कार्य्यत्वं यत्र खपुष्पादौ तदभावः, खपुष्पं सत् खपुष्पमस्तीत्यनुभावाभावात् तत्र कार्य्यत्वस्याभाव इति अन्वयव्यतिरेकौ ईश्वरस्य कारणत्वं जगतः कार्य्यत्वञ्च बोधयेते इत्यर्थः। अत्रार्थपदेन कार्य्यार्थकेन अन्वयग्रहाधिकरणमुपात्तं, व्यतिरेकग्रहाधिकरणं खपुष्पादिकन्तु व्यतिरेकार्थकादितरपदादाक्षेपलभ्यमिति बोध्यम्। ननु मृदादिव्यतिरेकग्रहाधिकरणं तन्त्वादिभावरूपं प्रसिद्धं खपुष्पादिकं त्वलीकमनुपाख्यं तस्य कथं व्यतिरेकग्रहाधिकारणता इत्यपरितोषादाह—यद्वेति। अन्वयादिपदस्य यत्सत्त्वे इत्यादिरर्थः पारिभाषिकः, तं विहाय अवयवार्थयोगी यौगिकोऽर्थः परिगृह्यत इत्यर्थः। अनुवृत्तिस्तादात्म्येन प्रतीतिः। व्यावृत्तिर्भेदः। अर्थेषु कार्यकारणेषु कारणस्यानुवर्त्तमानत्वे कार्य्यस्य व्यावृत्तत्वञ्च दृश्यते। तेन यदनुवर्त्तमानम् तत् कारणं, यच्चावृत्तं तत् कार्यमिति निश्चेतव्यम्। सुवर्णादि कारणं हि कारणावस्थायाम् अनुवर्त्तते, इदं सुवर्णकुण्डलं सुवर्णकटकं सुवर्णमिति तादात्म्येन प्रतीयमानत्वात्। कटककुण्डलादिकार्य्यन्तु परस्परं कारणावस्थायाञ्च नानुवर्त्तते, कुण्डले सुवर्णपिण्डे च कटकादितादात्म्यप्रतीत्यभावात्। अतः कुण्डलं कटकं न सुवर्णपिण्डाः कटकं नेत्येवं भेदेन प्रतीयमानत्वात् व्यावृत्तत्वं कार्य्यस्य। एवं घटः सन् पटः सन् इति विश्वकार्य्ये सद्रूपं ब्रह्मानुवर्त्तते। घटादिकार्य्यन्तु पटादौ कार्य्ये सृष्टेरग्रे कारणावस्थायाञ्च नानुवर्त्तते, सृष्टिप्राक्कालिकं ब्रह्म घटो न, घटः पटो नेत्यादिभेदप्रतीतेः। अतो व्यावृत्तत्वात् विश्वं कार्य्यं सद्रूपं ब्रह्म कारणमिति भावः। ननु सिद्धान्ते निमित्तोपादानत्वोभयविधकारणत्वं परमेश्वरस्येष्टम्। अनुवृत्तिश्चोपादानस्यैव मृदादेर्घटादौ दृश्यते, न तु निमित्तस्य कर्त्तुः कुलालादेः; अतोऽनुवृत्तिव्यावृत्तिहेतुना कार्यकारणभावसाधने परमेश्वरस्योपादानत्वमेव सिद्ध्येत्, न तु कर्त्तृत्वमपि, किञ्च पूर्वमीमांसकैः सृष्टिप्रलयानभ्युपगमात् जगतो जन्मादेरप्रसिद्धौ जन्मादिकारणत्वं कथं तटस्थलक्षणं स्यादित्याशङ्कायामाह—यद्वा सावयवत्वादन्वयेति। अत्रान्वयेतरपदाभ्याम् अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्च गृह्यते। तेनार्थेष्विति बहुवचनव्यञ्जितवस्तुपरिच्छेदसहचारितसावयवत्वादिहेतोरध्याहारः सूच्यते। तथा च अर्थेषु घटपटादिकार्य्येषु आत्मनि च गृहीतान्वयव्यतिरेकव्याप्तिकस्य सावयवत्वादिहेतोरस्येतिपदवाच्यजगति पक्षे परामर्शादिकारणसामग्रीबलाद् यज्जन्मादि निश्चितं तद् यतो भवति तं धीमहीत्यन्वयः। तत्र हेतुपुरःसरा व्याप्तिः अन्वयव्याप्तिः, साध्याभावपुरःसरा व्याप्तिर्व्यतिरेकव्याप्तिः। तथा च प्रयोगः—इदं विश्वं जन्मादिमत् सावयवत्वात्। यत्र यत्र सावयवत्वं घटपटादौ तत्र जन्मादिमत्त्वम्। यत्र जन्मादिमत्त्वाभाव आत्मनि तत्र सावयवत्वाभावः। तथा पृथिव्यादिजगतोऽपि सावयवत्वाज्जन्मादिमत्त्वसिद्धिः। एवं परिच्छिन्नत्वदृश्यत्वादिहेतौ तस्य व्याप्तिपक्षतादिकं बोध्यम्। एवञ्च अन्वयव्यतिरेकव्याप्तिमदनुमानेन जगति जन्मादिकं प्रसाध्य तत्कारणत्वम् उभयविधं परमेश्वरस्य श्रुत्यैव साधनीयमित्यभिप्रायः। तदाह—तथा च श्रुतिरिति। 'यतो वा इमानि' इति तैत्तिरीया श्रुतिः चरमवल्ल्यां १ अनुवाकस्य अन्वयव्याप्तिकमेव-

अनुमानं न व्यतिरेकव्याप्तिकम् इति वेदान्तिमते व्यतिरेकपदेन अर्थापत्तिर्ग्राह्या। तथा च सावयवत्वाद्यन्यथाऽनुपपत्त्या च यज्जन्मादि सिद्धयति तद् यत इत्यर्थः। यतो निमित्तोपादानरूपात् परमेश्वरात् भूतानि आकाशादीनि स्थूलशरीरान्तानि जायन्ते जातानि सन्ति येन जीवन्ति पोषणपालनादिकं लभन्ते प्रयन्ति नश्यन्ति सन्ति यदभिसंविशन्ति यस्मिंस्तादात्म्येन प्रविशन्ति तद् ब्रह्मेति श्रुत्यर्थः। आदिपदेन 'सच्च त्यच्चाभवत्' इति तैत्तिरीयोपनिषदि आद्यवल्ल्यां ६ अनुवाकस्य ६ श्रुत्यैकदेशः 'तदात्मानं स्वयमकुरुत' (उक्तवल्ल्यां ७ अनुवाकस्य आद्यश्रुत्यैकदेशः) इत्यादिश्रुत्यन्तरसंग्रह इति। तत्र स्मृतिमप्युदाहरति—स्मृतिश्चेति। तामाह—यतः सर्वाणीति (महाभारतीयशान्तिपर्वणि दानधर्मोत्तरे विष्णुसहस्रनामप्रकरणे १३ वचनम्), ननु नेयं श्रुतिरीश्वरस्य जगदुपादानत्वादिपरा चेतनद्रव्योपादानत्वादर्शनात्, घटादिकार्य्यं हि मृदाद्यचेतनोपादानकं दृश्यते, तेन मोहजडदुःखात्मकजगतस्तत्सदृशं त्रिगुणं प्रधानमेव उपादानं युक्तं, पुरुषसन्निधानमात्रेण प्रधानं स्वयमेव जगदाकारेण भवति, न तत्र कर्त्तुरीश्वरापेक्षा तस्मात् 'यतः प्रधानात् भूतानि जायन्ते प्रधानमेवात्मानं जगदाकारेण कुरुते' इत्येवं श्रुतिभिरपि प्रधानमेव जगत्कारणत्वेन प्रतिपाद्यत इति शङ्कते—तर्हीति। प्रधानं त्रिगुणात्मकम्, अव्यक्तमित्यर्थः। सिद्धान्तमाह—नेति। अभिज्ञः सर्वज्ञ इत्यर्थः। प्रमाणमाह—स ईक्षत इति। (ऐतरेयोपनिषदि १ खण्डे १ ब्राह्मणम्)। स सर्वज्ञः स्वाभाव्यादात्मा एकः सन् ईक्षत ऐक्षत आलोचितवानिति यावत्। ननु प्रागुत्पत्तेरकार्यकारणत्वात् कथमीक्षितवानिति नाशङ्कनीयं, सर्वज्ञः स्वाभाव्यात्। तथा च श्रुतिः-'अपाणिपादो जवनो ग्रहीता' इत्यादि (श्वेताश्वतरोपनिषदि ३ अ. १९ मन्त्रः) केनाभिप्रायेणेत्याह लोकान् अम्भःप्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान् नु सृजा सृजेयेत्यर्थः। 'स इमानिति' (ऐतरेये १ खण्डे २ ब्राह्मणम्)। एवमालोच्य स इमान् लोकान् असृजत इत्यर्थः। जगत्कारणस्य ईक्षणश्रवणाज्जडस्य प्रधानस्य ईक्षणाऽसम्भवात् श्रुतिभिश्चेतनमेव जगत्कारणं प्रतिपाद्यते न प्रधानम्। जडमेव द्रव्योपादानम् इत्यादिनियम आरम्भादिवादे दृष्टो न तु विवर्त्तवादे। रज्ज्वादौ सर्पादिभ्रमे जडरज्ज्वादेरपि सर्पादिचेतनत्वोपादानत्वादिदर्शनात् न विलक्षणत्वादित्यादि (शारीरके २ अ० १ पा० ४) सूत्रैः 'यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्' इत्यादिश्रुत्या च जगद्विसदृशस्यैव ईश्वरस्योपादानत्वसम्भवोक्तेश्चेति भावः। विस्तरोऽत्राकरे द्रष्टव्यः। न्यायः श्रुत्यर्थनिर्णायकसूत्रसमुदायः। तत्र 'ईक्षतेर्नाशब्दम्' इति शारीरकमीमांसायाम् आदितः पञ्चमाधिकरणे सिद्धान्तसूत्रम्। अस्यार्थः—न साङ्ख्याभिमतं प्रधानं जगत्कारणमिति प्रतिज्ञा। तत्र अशब्दमिति हेतुगर्भं विशेषणम्। अशब्दत्वात् वेदशब्दाप्रतिपाद्यत्वादित्यर्थः कुतो वेदशब्दाप्रतिपाद्यत्वम् इति शङ्कायामाह—ईक्षतेरिति। 'स ईक्षत' इत्यादिश्रुतिषु जगत्कारणस्येक्षणश्रवणादीक्षणम् जडे प्रधाने न सम्भवतीति वेदशब्दाप्रतिपाद्यम्, अतो न कारणमिति न्यायोक्तिः ईक्षणश्रुतिरपि कथञ्चित् प्रधाने योज्यत इत्यादिशङ्कानिकरनिनिरासाय। नन्वीश्वरस्य कर्त्तृत्वादिकं वैषम्यादिदोषाप्रसङ्गार्थं जीवकर्मापेक्षं वाच्यं, जीवश्च धर्मादिकर्मणां कर्त्ता उपादानश्चेति कर्मद्वारेश्वरस्य सृष्ट्यादिप्रयोजकत्वेन जगदुभयविधकारणत्वं पर्य्यवस्यति लोके जयकर्त्तृयोधप्रयोजके जेतृव्यवहारदर्शनात्। तथा च जीवो ध्येयः स्यादिति शङ्कते—तर्हि किं जीव इति समाधत्ते नेत्याहेत्यादि। अविद्यावृतज्ञानस्य जीवस्य ध्याने फलाभावात् स्वतःसिद्धज्ञानस्वरूपं धीमहीति भावः। ननु समष्टिजीवस्य हिरण्यगर्भस्य अनावृतज्ञानैश्वर्य्यश्रुतेः स ध्येयोऽस्त्विति शङ्कते—तर्हि किमिति। अग्रे व्यष्टिजीवोपाधिकभौतिकसृष्टेः पूर्वं हिरण्यगर्भः समुत्पन्नो जातः सन् भूतश्च-जीवादिसङ्घस्यैकः पतिरासीदिति श्रुत्यर्थः। अत्रैश्वर्य्यस्यान्यतः प्राप्त्यश्रवणात् तन्निदानस्य ज्ञानस्यापि तथात्वावगतेरनावृतत्वमिति भावः। समाधत्ते—नेत्याहेत्यादि। आदिकवये ब्रह्मण इति। तत्र नानाविधस्तोत्रैस्तुष्टस्तस्मै वेदं प्रकाशितवान् इति व्यञ्जयितुं कविपदं तत्स्तोत्राणां निर्देशत्वाय—आदीति। य इति। यः परमेश्वरः पूर्वं महाकल्पादौ ब्रह्माणं विदधाति उत्पादयति दैनन्दिनकल्पादौ सुप्तं प्रबोधयति यश्च तस्मै ब्रह्मणे वेदान् प्रहिणोति ददाति तद्बुद्धौ प्रकाशयतीत्यर्थः। उभयत्र भूतार्थे लट्। "तं देवमात्मबुद्धिप्रकाशं देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे" इति (नृसिंहतापनीय) श्रुतेः आत्मज्ञानप्रदम्। यद्वा 'अहं ब्रह्मास्मि' इत्यादिमहावाक्योत्थधीवृत्तित्वेन ब्रह्माकारबुद्धौ स्वप्रकाशतया प्रकाशत इति तं ह प्रसिद्धं मुमुक्षुर्मोक्तुमिच्छुरहं वै निश्चितं शरणं प्रपद्ये तदेकशरणो भवामीत्यर्थः। भगवच्छरणत्वाविशेषः-'तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा। भगवच्छरणत्वं स्यात् साधनाभ्यासपाकतः ॥' इति वचनैर्भगवद्गीताटीकायां 'सर्वधर्मान् परित्यज्य' (गीता अ० १८ श्लो० ६६) इत्यत्र भक्तिरसायनाख्यग्रन्थादौ च पूज्यपादमधुसूदनसरस्वत्यादिभिरुक्तः। तत्राद्यस्य मृदुत्वं द्वितीयस्य मध्यत्वं तृतीयस्याधिमात्रत्वमुक्त्वा अम्बरीषगोपीप्रह्लादप्रभृतयस्तत्र तत्र भूमिकायामुदाहर्त्तव्या इति दर्शितश्चेति चिन्त्यम्। मनसैवेति। मनस्येव प्रकाशितवान् सप्तम्यर्थे तृतीया। मनसि यथा वेदस्फूर्त्तिः स्यात्तथा मनोवृत्तिं प्रवर्त्तयामास इत्यर्थः। अनेन बुद्धिवृत्तिप्रवर्त्तकत्वेनेति। समष्टिजीवस्य ब्रह्मणो बुद्धिवृत्तिप्रवर्त्तकत्वेन व्यष्टिभूतानां जीवानामपि तत्प्रवर्त्तकत्वं बोध्यम्। भगवता ब्रह्मणो हृदि प्रथमं प्रकाशितो वेदस्तन्मुखतः प्रादुर्भूत इत्यर्थं स्पष्टयितुं द्वितीयस्कन्धस्य (४ अ० श्लो० २२) श्लोकमाह—प्रचोदितेति। पुरा कल्पादौ अजस्य ब्रह्मणो हृदि सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येन भगवता प्रेरिता सती वेदवाणी तस्यास्यतो मुखतः किल प्रादुर्भूता। स्वानि शिक्षादियुक्तानि लक्षणानि यस्याः। ऋषीणां ज्ञानप्रदानां श्रेष्ठ इति तदर्थः। पुनश्चोदयति—ननु ब्रह्मेति। लोकेष्वतिप्रसिद्धोऽर्थोऽपि न्यायपदाभिधः। यथा पूर्वेद्युराचार्य्याद्वेदमधीत्य सुप्त्वा परेद्युः गुरुनिरपेक्ष एव वेदं पठति तद्वद्दैनन्दिनकल्पे, महाकल्पादौ तु जातिस्मरवददृष्टविशेषात्

कल्पान्तरानुष्ठितकर्मोपासनबललब्धब्रह्मत्वाधिकारः कल्पान्तरस्थं वेदं स्मरत्वित्यर्थः । तत् परिहरति—नेति । यस्मिन् ब्रह्मणि वेदे सूरयोऽधिकारिणो ब्रह्मादयोऽपि मुह्यन्तीत्यर्थः । पूर्वोक्तस्मृतिपुराणबलात् ब्रह्मणः कल्पादौ वेदविषये मोहो निश्चीयते, तेन सुप्तप्रबुद्धन्यायस्य जातिस्मरत्वकल्पनस्य च बाध इत्यर्थः । पूर्वपक्षे हिरण्यगर्भश्रुतौ तु श्रुत्यन्तरोक्ता परमेश्वराज्ज्ञानादिप्राप्तिरुपसंहर्त्तव्येति भावः । उक्तश्लोकार्थं निगमयति—अत एवेत्यदिना । स्वतःसिद्धज्ञानस्य परमेश्वरस्य प्रातीतिकजगत्कारणत्वेन सत्यत्वं प्रदर्श्य परमार्थसत्यतामाह—असत इति । परमात्मा सत्यो भवितुमर्हति, असतो जगतः सत्ताप्रदत्वात् रज्जुसर्पवदित्यनुमानेन परमात्मनः अनारोपितसत्यत्वं बोद्धव्यमिति ।

गायत्र्या प्रारम्भेण चेति । सर्वगायत्रीमन्त्राव्यभिचारिधीमहीतिपदसंवलिगायत्र्यर्थेन प्रारम्भेणेत्यर्थः । अत्यन्तसुगोप्यायाः सर्वमन्त्रादिरूपाया गायत्र्याः प्रकाश्यतया पठानर्हत्वादपि गायत्र्यर्थेन प्रारम्भ इति बोध्यम् । 'जन्माद्यस्य' इत्यत्र समग्रगायत्र्यर्थसन्निवेशलक्षणा बहुविधव्याख्या सुबोधिन्यादिबहुटीकाकृद्भिः कृता, तत्रातिविशदत्वादत्र व्याख्यालेशोक्तव्याख्येयं परिगृह्यते । 'जन्माद्यस्य यत' इत्यनेन सवितुरित्यस्यार्थ उक्तः । यतः सूते इति सविता अत्र, स्थितिप्रलयावप्युपलक्षणीयौ । परमित्यनेन वरेण्यपदस्यार्थ उक्तः, उभयोरपि श्रेष्ठवाचकत्वात् । सत्यमित्यनेन भर्गपदस्यार्थ उक्तः, यतो ब्रह्मैव सदन्यदसत्यम् । तत्पदार्थस्तु विशेषणतया न स्वतन्त्रः । यद्वा तत् प्रसिद्धं स्वराडित्यनेन देवपदस्यार्थ उक्तः, यतो दीव्यति स्वतः प्रकाशते इति देवः स्वेनात्मनैव राजते इति स्वराट् । प्रकाशोऽत्र ज्ञानं तस्य द्योतनात्मकत्वात् । यदुक्तं ज्योतिर्वज्ज्ञानानि भवन्तीति तेन स्वतःसिद्धज्ञानः स्वप्रकाशः, अन्येषान्तु तदधीनप्रकाशः । तेन ब्रह्मेत्यादिपदपञ्चकेन 'धियो यो नः प्रचोदयात्' इति वाक्यस्यार्थ उक्तः । यो हि ब्रह्मणोऽपि वेदप्रदानेन प्रज्ञामचालीत्, स तु सर्वेषामस्माकं जीवानां बुद्धिवृत्तीः प्रवर्त्तयति, न त्वन्य इति वाक्यार्थः । धीमहीति तुल्यमेव । यद्वा बुद्धिवृत्तिप्रवर्त्तनेन पालनमुक्तं श्रेयः कर्माचरणेन निर्विघ्नसंसारचक्रवर्त्तनात् विपरीतप्रवर्त्तनेन संहारश्च, अतो जन्मस्थितिभङ्गहेतुत्वम् इति तात्पर्यार्थः । यद्वा तदित्यव्ययं तं भर्गो भर्गं द्वितीयायां प्रथमा 'सुपां सुलुक्' इत्यनेन तं भर्गं परं ब्रह्म धीमहि ध्यायेम । समस्तजीवाभिप्रायेण बहुत्वम्, बिभर्ति पुष्णाति पालयतीति भर्गम् । भृञो गमादित्वात् गः बाहुलयाद् गुणश्च । जगदधिष्ठानं पालकञ्चेत्युक्तम् । किञ्च भञ्जति नाशयतीति भर्गः, औणादिको गः निरुक्तौ लोपगुणौ, प्रलयकर्त्तारमित्यर्थः । कथंभूतं ? सवितुः सवितारं जगदुद्भवकारणम् । पूर्ववत् षष्ठी । अनेन 'जन्माद्यस्य यत' इत्यस्यार्थ उक्तः । तदित्यस्यार्थः सत्यं परमित्यनेनैवोक्तः, यतो ब्रह्मैवाबाधितं सत् अन्यदसत् । जगदधिष्ठानत्वेन प्रलयावधित्वं तत्कर्तृत्वञ्चोक्तम् । कथंभूतं ? वरेण्यं वृणोति सर्वं व्याप्नोति इति वरेण्यस्तम् । 'अन्वयादितरतश्चार्थेषु' इत्यनेन अयमर्थ उक्तः, उपादानतया कार्य्यजातव्यापनात् । व्रियते प्रार्थ्यते चतुर्वर्गान् सर्वैरसौ इति वरेण्यस्तं सर्वस्य दातारं सर्वेश्वरञ्चेत्यर्थः । अत एव तस्यैव ध्यानमुचितम्, एतत् तु परमित्यनेनोक्तम् । एतेन यद् ब्रह्म सृष्टिस्थितिप्रलयकारि जगदधिष्ठानं जगद्व्यापि सर्वेश्वरं तद्ध्यायेमेत्यर्थः । एवमपि निर्लेपत्वमाह—देवस्येति । देवमित्यर्थः । पूर्ववद्विभक्तिव्यत्ययः । दीव्यति द्योतते प्रकाशते इति देवः । नित्यं स्वप्रकाशत्वेन निरञ्जनः । एतत् तु 'स्वराट्' इत्यनेन 'धाम्ना स्वेन सदा निरस्तकुहकम्' इत्यनेन चोक्तम् । किञ्च देवयति असदपि सद्रूपेण प्रकाशयतीति देवः । एतत् तु यत्र 'त्रिसर्गो मृषे'त्यनेनोक्तं मिथ्याभूतस्य मायात्रिगुणसर्गस्य स्वसत्तया तद्वत् प्रतीतिकरणात् । बुद्धिवृत्तिप्रवर्त्तकत्वेन तस्य भक्तिमुक्तिप्रदत्वमाह । धिय इत्यादि व्याख्यातम् । धियो बुद्धिवृत्तीः । प्रचोदयात् प्रवर्त्तयति । एतेन य यः सृष्ट्यादिकर्त्ता सर्वेश्वरः सर्वव्यापी बुद्धिप्रवर्त्तकः तं ध्यायेम, सत्कर्मसु नोऽस्मान् प्रवर्त्त्य भक्तिमुक्ती ददातु इति वाक्यार्थः । एतत् सर्वं तेनेत्यादिपदैरुक्तम् । यद्वा 'राहोः शिर' इतिवत् सवितुरित्यत्राभेदेऽपि भेदोपचारः सवितुर्जगत्कारणस्य तत् तं भर्गः भर्गं तेजःस्वरूपं ब्रह्म धीमहीत्यन्वयः । अन्यत् सर्वं पूर्ववदिति गायत्र्याख्येति । गायत्रीमन्त्रेण गायत्रीपदेन वा आख्यायते या ब्रह्मविद्या सा रूप्यते प्रतिपाद्यते येनेति तद्रूपं, प्रतिपाद्यप्रतिपादकयोरभेदविवक्षया विद्यास्वरूपमेव वा श्रीमद्भागवतमित्यर्थः । यथोक्तमित्यनेन प्रतिज्ञातं मत्स्यपुराणवचनमुदाहरति—यत्रेति सार्द्धद्वाभ्याम् । अधिकृत्य आश्रित्य हेमसिंहसमन्वितं सुवर्णसिंहासनारूढम् । प्रौष्ठपद्यां भाद्रीयायाम् । 'पुराणान्तरे च' इत्यनेन प्रतिज्ञातं वामनपुराणीयं स्कन्दपुराणीयञ्च वचनमाह—ग्रन्थोऽष्टादशसाहस्र इति सार्द्धेन । हयग्रीवब्रह्मविद्या हयग्रीवेणोक्ता ब्रह्मविद्या षष्ठस्कन्धीयनवमाध्यायप्रसिद्धा इति । पद्मपुराणीयपातालखण्डवचनमाह—अम्बरीषेति सम्बोधनम् । शुकेन प्रोक्तं शुकप्रोक्तमिति । नचैवं सति शुकानुक्तस्य प्रथमस्कन्धस्य द्वादशस्कन्धीयषष्ठाध्यायैकदेशावधिसमाप्तिपर्यन्तस्य च ग्रन्थस्य भागवतत्वासिद्धिरिति वाच्यम्, अनागताख्यानेनैव गायत्र्यर्थद्योतक 'जन्माद्यस्य' इत्यारभ्य 'विष्णुरातममूमुचत्' इत्यन्ताया अनादिसिद्धाया भागवतसंहिताया व्यासादध्ययनपूर्वकं परीक्षितं प्रति शुकेनोक्तत्वात् । तथाहि—'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम् ॥ ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः । गायत्र्या च समारम्भस्तद् वै भागवतं विदुः' इति । 'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमश्लोकचरितं चकार भगवानृषिः ॥ तदिदं ग्राहयामास सुतमात्मवतां वरम् । सर्ववेदेतिहासानां सारं सारं समुद्धृतम् । स तु संश्रावयामास महाराजं परीक्षितम् ॥' (१ स्कं. ३ अ. ४० । ४१ श्लो०) । 'स वै मह्यं महाराज भगवान् बादरायणः । इमां भागवतीं प्रीतः संहितां वेदसम्मिताम्' (१२ स्कं. ४ अ. ४२ श्लो.) इति च । यद्वा शुकप्रोक्तं शुकाय शुकस्य तृप्तये प्रोक्तं कथितं व्यासेनेति शेषः । अश्वाय घास इतिवत् । तथाहि–'स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम् । शुकमध्यापयामास निवृत्तिनिरतं

मुनिः' (१ स्कं. अ ८ श्लो.) ; अत्रानुक्रम्यशब्देन शोधयित्वेति ज्ञेयम् । न च संक्षेपेण कृत्वेति वाच्यम् । 'स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः । कस्य वा बृहतीमेतामात्मारामः समभ्यसत्' (१ स्कं. ७ अ. ९ श्लो.) 'हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः । अध्यगान्महदाख्यानम्' (१ स्कं. ७ अ. ११ श्लो.) इति शास्त्रविरोधादिति । पठस्व स्वमुखेनापीति । अत्र अपीत्यनेन प्रतिनिधिनाऽपि पाठयस्वेति सूचितम् । अत एव भागवतं नामान्यदित्यपि न शङ्कनीयमिति । अत्रोपाध्यायः—ननु लक्षणमनुक्त्वैव दानश्रवणादिविधानं युक्तं, भगवता प्रोक्तं भागवतं भगवत इदं प्रतिपादकं भागवतमिति समाख्ययैव भागवतपदार्थज्ञानसम्भवादित्याशङ्कायामाह—अत एवेति । लक्षणोक्तिपूर्वकं दानपाठनादिविधानादेवेत्यर्थः । अयं भावः—लक्षणोक्तिं विना भागवतं दद्यादित्येवं दानादिविधाने 'एवम्प्रकार भगवान् व्यासः कृपणवत्सलः' (१ स्कं. ४ अ. २४ श्लो.) इत्युक्त्या भगवद्व्यासप्रणीतत्वेन पुराणमात्रस्य भागवतत्वसम्भवात् श्रीविष्णुशिवयोर्द्वयोरपि भगवत्त्वेन तत्प्रतिपादकविष्णुशिवपुराणादेरपि भागवतत्वसम्भवाच्च न सामञ्जस्येन पदार्थनिर्णयः । तथा च भागवतं नामान्यत् शिवविष्णुपुराणादिकमेव स्यात्, लक्षणोक्तौ तु यथोक्तलक्षणलक्षितं शुकपरीक्षितसंवादरूपं द्वादशस्कन्धात्मकं भागवतमिति विशेषनिर्णयेन न शङ्कनीयं शङ्कितुं योग्यं न भवति, सर्वत्र लक्षणोक्तेरतिव्याप्त्यादिनिरासार्थायाः सत्त्वात् । इत्यपि न शङ्कनीयमित्यपि ब्रह्मविद्यारूपत्वोक्त्या कर्मविद्यावन्मुमुक्षुभिरसेव्यमित्यपि न शङ्कनीयम् इति बोध्यते । पिबत भागवतं रसमालयम्' इत्यादौ (१ स्कं. ३ श्लो.) मुक्तादिसेव्यत्वस्य वक्ष्यमाणत्वाच्चेति सद्भिर्विभावनीयम् । तथा च गारुडे—'अर्थोऽयं ब्रह्मसूत्राणां भारार्थविनिर्णयः । गायत्रीभाष्यभूतोऽसौ वेदार्थपरिबृंहितः ॥ पुराणानां सामरूपः साक्षाद्भगवतोदितः । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः' इत्यत्रैतस्य ब्रह्मसूत्रार्थत्वात् ब्रह्मविद्यारूपत्वं व्यञ्जितम् । वेदेषु सामवत् पुराणेषु श्रेष्ठत्वात् सामरूपत्वम् । 'कस्मै येन विभाषितोऽयम्' इत्युपसंहारात् साक्षात् भगवदुक्तत्वम् । अतः साक्षाद्भगवता प्रोक्तं भागवतमिति निरुक्त्या योगरूढोऽयं भागवतशब्दो न केवलं यौगिकः इति न विष्णुपुराणादेर्भागवतत्वमिति । किञ्चात्र परमहंसपरिव्राजकाचार्य्यरामाश्रमयतीन्द्रः—अथ भागवतं नामान्यदित्यपि न शङ्कनीयमिति श्रीधरस्वामिवचनाच्छङ्का प्रागस्तीति गम्यते, अन्यथा न शङ्कनीयमिति किमर्थमिति चेत्, उच्यते—मीमांसकवैशेषिकादिभिर्वेदस्य प्रामाण्यं साधितमिति प्राग्वेदाप्रामाण्यशङ्का स्थिता इति न स्वीकार्य्यमिति । वस्तुतस्तु श्रीधरस्वामिनां नायमाशयः, प्राक् शङ्का स्थितेति, किन्त्वन्य एव । तथाहि—सर्गादीनि दशलक्षणानि यत्रोक्तानि तद्भागवतमिति स्थिते द्वितीयस्कन्धस्य भागवतत्वमस्तु, दशानामपि लक्षणानां संक्षेपेणोक्तत्वात्, तृतीयादीनामपि तदस्तु, सर्गाद्यैकैकस्योक्तत्वात् । प्रथमस्कन्धस्य तु न कथमपि भागवतत्वम्, एकस्यापि लक्षणस्यानुक्तत्वादिति शङ्कते कश्चित्, तत् स्वामिभिर्निराक्रियते—अत एवेति । अन्यत् प्रथमव्यतिरिक्तं भागवतं नामेत्यपि न शङ्कनीयं प्रथमस्कन्धविशिष्टमेव भागवतं ज्ञेयमित्यर्थः । तत्र हेतुः—अत एव उक्तलक्षणवशादेव । अष्टादशसहस्रत्वद्वादशस्कन्धसम्मितत्वगायत्रीसमारब्धत्वादीनां प्रथमेन विना असम्भवात् उपोद्घातत्वेनाधिकारिनिरूपणेन प्रथमस्यापि भागवतत्वमस्तीत्यर्थः । यथा 'अशोच्यानन्वशोचस्त्वम्' इत्यारभ्य (गी. २ अ. ११ श्लो.) भगवद्गीतात्वेऽपि ततः प्राक्तनस्य ग्रन्थस्योपोद्घातत्वेन गीतात्वमिति । किञ्चात्र नव्याः—भगवत्या इदं भागवतमिति व्युत्पत्त्या गङ्गेशोपाध्यायेन देवीपुराणमेव भागवतशब्देन व्यवहृतमिति रीत्या पूर्वमपि सा शङ्कासीत्तन्निवृत्तये स्वामिभिस्तथोक्तमिति चेत्—मन्यसे मन्यताम्; आस्तिकानां श्रुतिस्मृत्यादिप्रामाण्याशङ्काभावेऽपि जैमिनीयानां वेदानां काठककौथुमादिसमाख्यावदर्शने पौरुषेयत्वमाशङ्क्य तत्समाधानवदाचारमाधवादौ स्मृतीनामप्रामाण्यमाशङ्क्य तन्निरासवत् स्थूणानिखननन्यायेनैतद्दृढीकरणस्यावश्यकत्वात् टीकाकाराणामित्यवधेयम् । अलमत्र विस्तरेणेति ॥ १ ॥

श्रीमद्वीरराघवव्याख्या

श्रीमते रामानुजाय नमः ।

वन्दे वात्स्यमहोबलार्यतनयं वात्सल्यवारांनिधिं श्रीशैलेशगुरुं श्रियःपतिमपि प्राचार्यपारंपरीम् ।
तुर्यं व्यूहमशेषहेतुमजितस्याजं तदुत्संगजं देवर्षिप्रवरं पराशरसुतं व्यासं च वैयासकिम् ॥ १ ॥
श्रीशैलपूर्णादखिलेतिहासपुराणजालं समवाप्य येन । प्रावर्ति सन्दर्शयतेव शिष्यभावं मुनिं लक्ष्मणमाश्रयेऽहम् ॥२॥
श्रीरामानुजयोगिपूर्णकरुणापात्रं महान्तं ततः संप्राप्ताखिलवेदविद्यमखिलान् यो द्राविडान् व्याकरोत् ।
वेदान्तान्कुरुकेश्वरं गुणनिधिं श्रीविष्णुचित्तं गुरुं वात्स्यं तं वरदं च वाग्विजयजं व्यासार्यमीडीमहि ॥ ३ ॥
श्रीमद्भागवतं पुराणमखिलं व्याख्यातृभिर्व्याकृतं व्यासार्यैर्यतिराजभाष्यवचसामर्हं बुधानां मुदे ।
मन्दानामपि मादृशामवगमायाहं तदा दर्शितं पन्थानं समुपाश्रितो विवृणुयां मत्साहसं क्षम्यताम् ॥ ४ ॥

तत्रभगवान्पाराशर्य्यः सत्यवत्यां भगवदंशेनावतीर्णो बादरायणोऽखिलहेयप्रत्यनीककल्याणगुणगणेन परेण ब्रह्मणा विरचितेऽस्मिन् ब्रह्मादिस्तम्बपर्यन्ते देवमनुष्यपशुपादपस्त्रीपुंसचातुर्वर्ण्यचातुराश्रम्यादिभेदभिन्ने जगति तदुपकल्पिततदाराधनोपयुक्तकरणकलेवरान् चतुर्मुखादिपरंपराप्रवर्तितनिःश्वसितरूपधर्मार्थकाममोक्षपुरुषार्थचतुष्टयतत्साधनावबोधयधीतवेदानपि स्वस्वकर्मवासनानुवर्त्तिबुद्ध्यनुगुणप्रवृत्तं कर्मानुगुणगर्भजन्मजरामरणादिसांसारिकदुःखोपहताननवगतवेदार्थान् जनानवलोक्यानुकम्पित-

मनास्तदुज्जिजीविषया तेषां दुरवबोधं प्रतिजन्महितोपदेशेन मातापितृसहस्रेभ्यः प्रतिवत्सलतमं भागद्वयात्मकं वेदं व्याचिख्या-सुस्तावत्स्वशिष्येण भगवता जैमिनिना महर्षिणा पूर्वभागं व्याख्याप्य स्वयमुत्तरभागं समीचीनैः शारीरकनयैर्व्याख्याय प्रायशः पूर्वभागोपबृंहणात्मकं पंचमवेदत्वेन प्रसिद्धं श्रीमहाभारताख्यमितिहासं निर्माय प्राधान्येन वेदान्तार्थोपबृंहणात्मकं श्रीमद्भागवताख्यपुराणरत्नं चिकीर्षुस्तावदिष्टदेवतोपासनात्मकं मंगलमाचरति प्रथमश्लोकेन—जन्मादीत्यादिना। यद्यपि केचिदिदं पुराणं शुककर्तृकमिति वदन्ति, यद्यपि चोपनिषद्भागोपबृंहणपरेषु तत्रापि सात्त्विकतया प्रत्यक्षश्रुत्यनुगुणार्थतया च प्रबलेषु प्रबन्धेषु वाशिष्ठपौत्रप्रत्यक्षश्रुत्यभीष्टतमपंचमश्रुतिप्रवर्त्तकभगवदंशपाराशर्यतनयपरमर्षिप्रणीतं पुराणं श्रीमद्भागवतमशेषजगत्प्रथितं परम-निःश्रेयसाभ्यर्थिभिरत्यन्तमुपादेयं, यथा पाद्मे अम्बरीषं प्रति गौतमेनोक्तम्—'अम्बरीष शुकप्रोक्तं शृणु भागवतं सदा। पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम्' इति श्रीव्यासार्यसूत्रैश्च शुककर्तृकत्वमवगम्यते, तथापि तत्र प्रणीतमित्यस्य प्रवर्त्तितमित्यर्थः, पाराशर्येत्यस्य कृतेति शेषः, तनयेत्यस्य तदित्यादिः। अन्यथैतत्पुराणस्थबहुवचनविरोधापत्तेः। तथाहि—तावदस्मिन्नेव ग्रन्थे तृतीयाध्याये 'उत्तमश्लोकचरितं चकार भगवानृषिः। निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्। तदिदं ग्राहयामास सुतमात्म-विदां वरं' इति व्यासकर्तृकत्वं स्पष्टं प्रतीयते। तथा श्रीनारदस्याज्ञयैतत्पुराणनिर्माणं तथास्मिन्नेव स्कन्धे स्पष्टीभविष्यति 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे। लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां' इति। तथा द्वितीये प्रथमेऽध्याये 'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्। अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम्' इति शुकोक्तेरपि तदवगम्यते, तथा नवमे द्वाविंशेऽध्याये 'यस्यां पराशरात्साक्षादवतीर्णो हरेः कला। वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम्॥ हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणिः। मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ' इति शुकोक्तेश्च तदवगम्यते, उदाहृतव्यासार्यश्रीसूक्तिगतहेतुभिरेवास्य पुराणरत्नस्य प्रामाण्यमत एवोपादेयत्वं च स्पष्टमवगम्यत इति न तत्रास्माभिः कार्यो यत्नः पुराणान्तरसंवादाच्च तदनन्तरमेव स्फुटीभविष्यति। अत्र गायत्र्युपक्रमत्वं प्रतीयते—धीमहीति शब्दतः पदान्तरैरर्थतश्च तदुपक्रमत्वप्रत्यभिज्ञानात् गायत्र्युपक्रमत्वं चास्य स्कान्दे पुराणे उत्तरखण्डे—'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥ गायत्र्या च समारम्भो यत्र भागवतं विदुः' इति। तथा चोक्तं मात्स्ये—'आरभ्य यत्र गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधश्चापि यत्र भागवतं विदुः' इति। तत्र 'जन्माद्यस्य यतः' इति जगत्कारणत्वप्रतिपादनेन तदर्थकसवितृशब्दार्थ उक्तः। वेदान्तप्रसिद्धिं द्योतयता 'यत' इति पदेन तच्छब्दार्थश्च सूचितः। 'सूरय' इत्यनेन वरेण्यशब्दार्थ उक्तः। उक्तं हि सर्वज्ञैः सावित्रीविवरणे—'वरेणीयं वरेण्यं तु वरा ध्यातार ईरिता' इति। तेन इत्यादिना देवशब्दार्थ उक्तः, 'द्योतनः सर्वभावानां द्योतमानः स्वयं सदा। अज्ञानमखिलं द्यन्' इति तत्रोक्तम्।

द्यन् खण्डयन् 'दो अवखंडने' द्योतनः प्रकाशकः। जन्मादीत्यनेन च देवशब्दार्थ उक्तः; जगद्व्यापारो हि तल्लीला, 'धाम्ने'त्यादिना भर्गशब्दार्थ उक्तः, 'भर्गस्तेजः समाख्यातं' 'भर्जयत्यखिलं कष्ट'मिति च तत्र युक्तम्। स्वराट् स्वतन्त्रः प्रेरकत्वेन धीप्रचोदनं द्योतनं धियो धीपूर्विकाश्चेष्टाः, 'प्रेरणं तु प्रचोदनं' इति हि तत्रोक्तं, एवं प्रदर्शितया दिशा गायत्र्युपक्रमत्वसिद्धिः। अथ पदानि योज्यन्ते—प्रबन्धस्य वेदान्तार्थोपबृंहणरूपतां दर्शितां द्योतयति—जन्मादीति। 'यतो वा इमानि भूतानि जायन्ते' इति वेदान्तार्थप्रत्यभिज्ञानात् शरीरकार्थसंग्रहं चात्र द्योतयति; शारीरकद्वितीयसूत्रस्यैवादावुपादानात्। श्रुत्यर्थप्रत्यभिज्ञानादेव 'परं धीमही'त्यत्र 'ब्रह्म'इत्यध्याहारो बोध्यः। अस्य चिदचिन्मयस्य जगतो यतो जन्मादि तं सत्यं परं ब्रह्म धीमहीत्यन्वयः, कारणं तु 'ध्येय' इति श्रुतेरिति भावः। एवमन्येषामपि यच्छब्दानां जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः, जन्मस्थितिलयं अन्यपदार्थः, अत एव नपुंसकमेकवचनत्वम-तद्गुणसम्विज्ञानबहुव्रीहित्वे सृष्टिकारणत्वासिद्धिः। तथा स्थितिलययोरेवान्यपदार्थत्वेन जन्मादिशब्दस्य द्विवचनान्तत्वे 'ईदूदेद्द्विवचनम्' इति प्रगृह्यसंज्ञायां सन्ध्यभावप्रसङ्गः, तद्गुणसंविज्ञानबहुव्रीहित्वपक्षेऽपि जन्मादित्रयाणामसमुदितानामन्यपदार्थत्वे जन्मादिशब्दस्य बहुवचनान्तत्वापत्तिः जन्मन एवान्यपदार्थत्वं समस्यमानपदार्थत्वं च विरुद्धम्। जन्म प्रत्येव तस्यादित्वानुपपत्तिश्च। अतो जन्मस्थितिलयसमाहारमन्यपदार्थं विवक्षित्वा जन्मादीति तद्गुणसंविज्ञानबहुव्रीहिः प्रयुक्तः, तस्यान्यपदार्थस्य गुणा विशेषणानि समस्यमानपदार्था इति यावत् तेषां समित्येकीकारे संविज्ञानं विशेष्यभूतान्यपदार्थान्तर्भावे ज्ञानं यस्माद्बहुव्रीहेर्लम्बकर्णो गत इत्यादिः स तद्गुणसम्विज्ञानो बहुव्रीहिः। तद्विपरीतश्चित्रगुरित्यादिस्त्वतद्गुणसम्विज्ञानः। यतो जन्मादि तद्धीमहीत्यनेन जन्मादि-कारणत्वं ब्रह्मणो लक्षणं विवक्षितं, 'यतो वा इमानि'इत्यादिश्रुतौ प्रतिवाक्यं तद्ब्रह्मेत्यनुक्तेरनेकलक्षणवैयर्थ्याच्च जन्मादिहेतुत्वसमुदाय एकं लक्षणं, नतु जन्मकारणत्वं स्थितिकारणत्वं लयकारणत्वं चेत्यनेकं लक्षणम्। अत्र हि 'सत्यं परं ब्रह्म धीमहि' इत्येतावन्मात्रोक्तौ ब्रह्मशब्दस्य बृहन्महदादिशब्दपर्यायत्वाभिधानेन प्रकृतिजीवादिपरत्वस्यापि सम्भवात् तेषामेवात्र ध्येयत्वं प्रसक्तं, तद्व्युदासायात्र ध्येयस्य ब्रह्मणो निरतिशयबृहत्त्वं तदेव स्वरूपगुणबृहत्त्वं तदेव ब्रह्मशब्दप्रवृत्तिनिमित्तं प्रकृत्यादि'षु ब्रह्मशब्दस्त्वौपचारिकश्चेति वक्तुमत्र लक्षणमुच्यते। तत्र चैकेनैव समुदायलक्षणेन ध्येयस्य ब्रह्मणो निरतिशयबृहत्त्वलाभात् तत एव प्रकृत्यादिव्युदासान्नानेकलक्षण-त्वम्, अन्यथा सृष्टिकारणत्वमात्रान्तरानुकूलज्ञानशक्त्याद्यलाभेऽपि स्थित्याद्यनुकूलज्ञानशक्त्याद्यलाभेन निरतिशयबृहत्त्वासिद्धिः। नच त्रितयोक्तावपि मोचकत्वोपयोगिज्ञानशक्त्याद्यलाभ इति वाच्यं; मोक्षस्य स्थितिलयान्यतरान्तर्भूतत्वेन तत्कारणोक्त्यैव तल्लाभात् स्थितिर्नामानिष्टपरिहारपूर्वकेष्टप्रापणरूपा मोचकत्वं च तादृशमेव, यदि चायं मोक्ष आत्यन्तिकनाशरूपं इष्टस्तर्हि लयान्तर्भूतः।

५

यत इति हेतौ पञ्चमी। ननु 'जनिकर्तुः प्रकृति'रित्यपादानसंज्ञायां पञ्चमी, तथा सति स्थितिलययोरनन्वयः स्यात्। 'जनिकर्तुः प्रकृति'रिति सूत्रे हि प्रकृतिशब्द उपादानकारणवाची; जायमानस्योपादानमपादानसंज्ञकमिति तत्सूत्रार्थात्। अत्र तत्सूत्रविहितापादानसंज्ञानिमित्तपंचम्यभ्युपगमे जन्मकारणत्वस्य लक्षणत्वलाभेऽप्यादिशब्दग्राह्यस्थितिलयकारणत्वस्य लक्षणत्वाभावात् तयोरनन्वयः स्फुट एव। हेत्वर्थपंचम्यान्तु हेतुत्वस्य निमित्तोपादानसाधारण्यात्तदन्वय उपपन्नः, तत्र भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वमुपादानत्वं निमित्तत्वं नाम कर्तृत्वं, एवं चात्र जगज्जन्मादि प्रत्युपादानत्वनिमित्तत्वरूपोभयविधकारणत्वं ब्रह्मणो लक्षणं विवक्षितम्। ननु लोके मृत्कुलालयोर्विभिन्नयोरेवोपादानत्वनिमित्तत्वदर्शनात्कथमेकस्योभयविधकारणत्वमित्यत्राह—अन्वयादितरतश्चार्थेष्विति। अर्थेषु कार्यभूतेषु देवमनुष्यादिष्वन्वयादनुवृत्तेरुपादानत्वम्, इतरतो व्यतिरेकादनन्वयात्प्रकृतिपुरुषाभ्यां विलक्षणत्वेन तन्नियन्तृतया पृथगेवावस्थानान्निमित्तत्वं चैकस्यैव ब्रह्मण उपपन्नमित्यर्थः। कुलालस्यासर्वशक्तेर्घटादिषु मृत्कार्येष्वनन्वयान्नोपादानत्वम्। अचेतनाया मृदस्तु व्यतिरेकाभावान्निमित्तत्वं, ब्रह्मणस्तु प्रत्यक्षादिप्रमाणान्तरानवगतस्य केवलवेदान्तैकसमधिगम्यस्य चिदचिद्विलक्षणस्योभयविधकारणत्वोपयुक्तसार्वज्ञ्यसर्वशक्तियुक्तस्यान्वयव्यतिरेकयोर्वेदान्तेभ्योऽवगतत्वादुभयविधकारणत्वोपपत्तिरिति भावः। वेदान्ताश्च 'सर्वं खल्विदं ब्रह्म' 'ऐतदात्म्यमिदं सर्वं' 'अयमात्मा ब्रह्म' 'तत्त्वमसि' इत्यादयोऽन्वयप्रतिपादकाः, 'तदैक्षत' 'यः पृथिव्यान्तिष्ठन्पृथिव्यां अन्तरोऽयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति' इत्याद्या व्यतिरेकप्रतिपादकाः। यद्वैवम्विधानामुभयविधकारणत्वनिर्वाहकान्वयव्यतिरेकप्रतिपादकानामुभयविधकारणत्वप्रतिपादकानां 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' 'तदैक्षत बहु स्यां प्रजायेय' 'सन्मूलाः सोम्येमाः सर्वाः प्रजा' इत्यादीनां च वेदान्तानां ब्रह्मणि प्रतिपादकतयाऽन्वयात्, अर्थेषु इतरतोऽनन्वयात् प्रकृतिपुरुषादिषूभयविधकारणत्वप्रतिपादकत्वेनान्वयाभावाच्च ब्रह्मैवोभयविधकारणमित्यर्थः।

यथा ब्रह्मस्वरूपगुणादिकं शास्त्रैकसमधिगम्यं तथा तदुभयविधकारणत्वं ब्रह्मण्येव शास्त्रेभ्योऽवगतं, नतु प्रकृत्यादिष्विति भावः। अस्मिन्पक्षे 'अन्वयादि'त्यनेन समन्वयाध्यायप्रथमपादार्थ उक्तः, 'इतरत' इत्यनेन त्रिपाद्यर्थः, ब्रह्म कारणमेव ब्रह्मैव कारणमित्ययोगान्ययोगव्यवच्छेदेन कारणत्वं हि समन्वयाध्याये समर्थितम्। पूर्वव्याख्याने त्वनुवृत्त्यननुवृत्तिभ्यामुपादाननिमित्तत्वनिर्वाहकाभ्यां तदुभयविधकारणत्वे प्रसाधिते अर्थादेव प्रकृत्यादीनामकारणत्वसिद्धेरयोगान्ययोगव्यवच्छेदावर्थादेव सिध्यतः। यद्वा समन्वयादुभयविधकारणत्वस्य ब्रह्मण्येव सङ्गतेरर्थेषु प्रकृत्यादिषु इतरतोऽसङ्गतेश्च ब्रह्मण एव कारणत्वमित्यर्थः। 'एकमेवाद्वितीयम्' इत्यनेन हि कृत्स्नस्य जगत एकमेवोभयविधकारणमवगतं, तत्र प्रकृत्यादिषूभयविधकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वाद्यभावस्य ब्रह्मणि तत्सद्भावस्य च श्रुतिभ्य एव 'यः सर्वज्ञः सर्ववित्' 'सत्यकामः सत्यसङ्कल्पः' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' 'ज्ञाज्ञौ द्वावजावीशानीशौ' 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादिभ्योऽवगमादुभयविधकारणं ब्रह्मैवेति भावः। अस्मिन्पक्षे सार्वज्ञ्यसर्वशक्तित्वादिगुणप्रतिपादकत्वेन वेदान्तानां ब्रह्मण्यन्वयात्तस्मिन्नुभयविधकारणत्वोपपत्तिः, तदुपपत्तेश्च जन्मादिकारणत्वस्य लक्षणत्वसिद्धिरवगन्तव्या। अस्मिन्नपि पक्षे अयोगान्ययोगव्यवच्छेदौ शाब्दौ, यद्वा ब्रह्मलक्षणेन प्रतिपत्तव्यम्, अनुमानेनाप्यवगन्तुं शक्यत्वात्। अप्राप्ते हि शास्त्रमर्थवत् शास्त्रैकप्रमाणकत्वेऽपि वा तस्मिन्प्रवृत्तिनिवृत्त्युभयरूपरहिते अपुरुषार्थस्वरूपे न वेदान्तानां बोधकत्वेनान्वयः, पुरुषार्थपर्यवसानासम्भवान्न शास्त्रं प्रमाणमित्यत आह—अन्वयादितरतश्चार्थेष्विति। अत्र 'अन्वयात्' इत्यनेन समन्वयाधिकरणसिद्धान्तार्थ उक्तः। शास्त्रयोन्यधिकरणार्थदत्र विवक्षितः, शास्त्रयोन्यधिकरणस्य लक्षणाक्षेपपरिहाररूपत्वेन लक्षणकथनेनैव तदाक्षेपपरिहारयोरप्यत्र विवक्षितत्वप्रतीतेः, समन्वयाधिकरणन्तु शास्त्रयोन्यधिकरणाक्षेपपरिहाररूपमिति तत् 'अन्वयादि'त्यनेन प्रदर्शितम्। अयम्भावः—न तावदनुमानगम्यं ब्रह्म तस्यासम्भवात्, यद्यपि घटादिवत् सावयवत्वादिना जगतः कार्यत्वमनुमीयते, कार्यं च तदभिज्ञकर्तृकमित्यनभिज्ञजीवव्यतिरिक्तः कृत्स्नजगन्निर्माणचतुर ईश्वरोऽनुमातुं शक्यते, तथापि लाघवात्कार्यत्वादिहेतुनाऽनुमीयमानो यः कश्चित्कर्त्ता जीव एव स्यात्, तस्य दृष्टत्वात्; तेन जीवक्लृप्तौ लाघवम्, ईश्वरक्लृप्तौ गौरवमिति नेश्वरसिद्धिः। ननु जीवानामल्पज्ञत्वात्कथं महीमहीधराद्यर्थकर्तृत्वमिति चेत्—न; तत्तद्विलक्षणपुण्यविशेषोपचितशक्तिविशेषाणां विश्वामित्रादीनामेव तत्संभवात्। अस्त्वेकस्मिन्नण्डे विश्वामित्रोऽन्यत्र स नास्तीति चेत्—न; अन्यत्राप्यन्यस्य विद्यमानत्वाद्भवद्भिरनन्ता एव योगिनः कल्प्यन्ते सर्वज्ञाः सर्वशक्तयश्चेति तैरेव तत्र विश्वसृष्टिः प्रवर्तताम्, किमनेन नित्यज्ञानचिकीर्षाप्रयत्नवत्तया विजातीयतया परिकल्पितेन? तथा चान्यथासिद्धिदूषितानि कार्यत्वाद्यनुमानानि ईश्वरमनुमातुं न प्रभवन्ति, तर्हि सर्वकार्यमेककर्तृककार्यत्वादिति साधयाम इति चेत्, तर्ह्यनेककर्तृकेषु घटादिषु व्यभिचारः अन्यथासिद्धिर्वा? नह्येककर्तृकत्वाभावे कोऽपि विरोधः स्यात्, अनेककर्तृकं न भवति कार्यत्वादित्युक्तेऽप्ययमेव दोषः, तस्मादनुमानानामनेकदोषदुष्टत्वाद्वेदान्तवाक्यानामप्राप्तत्वलक्षणं तात्पर्यलिङ्गमस्त्येवेति लक्षणमुपपन्नमिति। नापि प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणोऽपुरुषार्थरूपत्वात्तत्र न पुरुषार्थपर्यवसायिनां वेदान्तानां च तात्पर्यमिति वाच्यम्; अन्वयाद्वेदान्तानां निरतिशयपुरुषार्थरूपे ब्रह्मणि तत्स्वरूपरूपादितात्पर्यकतयान्वयादितरतस्तद्व्यतिरिक्तेष्वर्थेषु पुरुषार्थाभासेषु "एवमेवामुत्र पुण्यचितो लोकः क्षीयत" इत्यादिभिः प्रतिषेधाच्च तत्र शास्त्रं प्रमाणमेवेति। ब्रह्मणः पुरुषार्थरूपत्वं तु "आनन्दो

ब्रह्म खं ब्रह्म रसो वै स रसं ह्येवायं लब्ध्वानन्दीभवति यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयती" त्यादिभिरवगतं, निरतिशयसुखस्यैव पुरुषार्थत्वात् अयोगव्यवच्छेदिकां सर्वज्ञादिगुणवत्तामाह—अभिज्ञ इति । अभितः सर्वदा सर्वत्र सर्वं जानातीत्यभिज्ञः, सर्वज्ञ इदं च सार्वज्ञ्यं, निमित्तकारणत्वोपयुक्तं; तच्चोपादानकारणत्वोपयुक्तसर्वशक्तित्वस्याप्युपलक्षणं सर्वज्ञत्वात् सर्वशक्तित्वात्तस्योभयविधकारणत्वमुपपन्नमिति भावः । ननु सार्वज्ञ्यादिकं सुकृतहेतुकं स्यादित्येवं रूपं कर्मवश्यत्वमध्येयत्वापादकमाशङ्क्याह—स्वराडिति । स्वराट् स्वतन्त्रः अकर्मवश्यः कर्मवश्यानां प्रेरकः तस्माद्ध्येय एवेति भावः । यद्वा सार्वज्ञ्यत्वादिकं सुकृतहेतुकं चेत् सुकृतस्य तन्मूलकसार्वज्ञ्यादेश्च परिमितत्वसंभावनया कृत्स्नजगत्कारणत्वासिद्धिः, ततश्च कारणं तु ध्येय इति श्रुतिविरुद्धम् । अकारणवस्तुध्यानमनुचितमित्यत्राह—स्वराडिति । स्वेनैव राजते प्रकाशते सर्वं विषयीकरोति, न तु कर्मणेति स्वराट् । अनेन सार्वज्ञ्यादिकं स्वरूपानुबन्ध्येव, न तु कर्ममूलकमित्युक्तम् । एवं सार्वज्ञ्यादिगुणवत्ताकथनेन ब्रह्मणोऽकारणत्वव्यवच्छेदरूपोऽयोगव्यवच्छेद उक्तः, स एव पुनराक्षिप्य परिह्रियते—तेन इत्यादिना । अत्रेयमाशङ्का—यद्यपीश्वरः प्राक् सृष्टेरेक एव सन् सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः स्वयमेव विचित्रं जगत्स्रष्टुं शक्नोति, तथापीश्वरकारणत्वं न सम्भवति, प्रयोजनवत्त्वात्; विचित्रसृष्टेरीश्वरस्य च प्रयोजनाभावात् । बुद्धिपूर्वकारिणामारम्भे द्विविधं हि प्रयोजनं—स्वार्थः परार्थो वा । नहि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किंचित्प्रयोजनमनवाप्तमवाप्यते । नापि परार्थः; अवाप्तसमस्तकामस्य परार्थता हि परानुग्रहणेन भवति; न चेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत् करुणावान् सृजति, प्रत्युत सुखैकतानमेव जनयेज्जगत्करुणया हि सृजन्, अतः प्रयोजनाभावान्न ब्रह्मणः कारणत्वमुपपद्यते, इतीमामाशङ्कामर्थादेवापनयन्नाह—तेन इत्यादिना । हृदा सङ्कल्पेनादिकवये चतुर्मुखाय ब्रह्मधर्मादिपुरुषार्थतत्साधनादिकं निरतिशयपुरुषार्थस्वरूपगुणादिकं चावेदयतीति तथा तं वेदं तेने विस्तृतवान् प्रकाशितवान् प्रादादिति यावत्, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुत्यर्थोऽत्रानुसंधेयः । शास्त्रप्रवर्तनं हितार्थमेवं च तुल्यन्यायतया जगत्सृष्टिरपि हितार्थैवेति सूचितम् । ततश्च कारुण्याच्चेतनानामपवर्गोपयुक्तज्ञानप्रवृत्तिनिष्पादककरणकलेवरप्रदानाय जगत्सृष्टिः तदपि परिपूर्णत्वादिति च फलितम् । गर्भजन्मादिदुःखानुभवस्तु स्वस्वकर्ममूलक इति नेश्वरस्य दोष इति भावः । 'तेन' इत्यादिना नामप्रपञ्चसृष्टिरुच्यते इति केचित्;—तत्र; नामकल्पनस्य सृष्ट्यन्तर्भावेण पृथगुक्त्यनपेक्षत्वात् । नामरूपव्याकरणं हि सृष्टिः, 'नामरूपे व्याकरवाणि तन्नामरूपाभ्यां व्याक्रियत' इति श्रुतेर्ब्रह्मशब्दस्य नामधेयपर्यायत्वाभावाच्च । स हि वेदपर्यायशब्दः ब्रह्म च स एव मूलं 'कृष्णो ब्रह्म च ब्राह्मणाश्चे'ति प्रयोगाच्चेति 'कवय' इत्यस्यानन्वयापत्तेश्च । यच्छास्त्रप्रवर्तनेन चिकीर्षितं हितं तद्दर्शयितुं तत्प्रवर्तनाभावेऽनर्थं दर्शयन्विशिनष्टि—मुह्यन्ति यत् सूरय इति । सूरयो ज्ञानवन्तः उपासका यं प्रति मुह्यन्त्यपरिच्छेद्यवैभवत्वाद्व्याकुलीभवन्तीत्यर्थः । अपरिच्छिन्नब्रह्मानुसंधानं हि शास्त्रप्रवर्तनस्य परमं प्रयोजनं शास्त्रप्रवर्तनाभावे अपरिच्छेद्यस्वरूपरूपगुणविभूत्यादीन् मानान्तरानवगम्यान्निरतिशयपुरुषार्थरूपानवगन्तुमशक्ताः सूरयो मुह्येयुः, अत एषां मोहो मा भूदित्येतदर्थं ब्रह्म तेन इत्यर्थः । यदिति पाठे यद्यस्माच्छास्त्रप्रवर्तनाभावे मुह्यन्ति । अतो ब्रह्म तेन इत्यन्वयः । यद्वा 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुख' मित्यभियुक्तोक्तेश्चिकीर्षितकृत्स्नप्रबन्धार्थरूपवस्तुनः शारीरकाध्यायचतुष्टयार्थरूपस्यात्र प्रबन्धादौ निर्देष्टव्यत्वेन तत्र तावत् 'कवय' इत्यन्तेन समन्वयाध्यायार्थरूपं वस्तु निर्दिष्टं—मुह्यन्तीत्यादिना विनिमय इत्यन्तेन । द्वितीयाध्यायार्थरूपं वस्तु निर्दिश्यते । 'सूरय' इत्यनेन द्वितीयाध्यायाद्यधिकरणार्थानां 'तेजोवारिमृदां यतो विनिमय' इत्यनेन तदाध्यायान्त्यस्य संज्ञा मूर्तिक्लृप्त्यधिकरणस्य चात्र प्रत्यभिज्ञानात् । एवं चायमर्थः सूरयः कपिलहिरण्यगर्भकणभक्षाक्षपादक्षपणकपशुपत्यादयः साङ्ख्ययोगादितन्त्रप्रणेतारः प्रकृत्याद्युपादानत्वनिमित्तमात्रेश्वरवादिनो यं प्रति मुह्यन्ति, ईश्वरस्य सूक्ष्मचिदचिद्विशिष्टस्य जगद्रूपेण परिणामं तदुपयुक्तसर्वशक्त्यादिगुणयोगं चाजानन्तः प्रधानस्योपादानत्वं वदन्तस्तन्निर्वोढुं चासमर्था व्याकुलीभवन्तीत्यर्थः । 'यत्' इति पाठे यस्मिन् विषयभूते ब्रह्मणि मुह्यन्तीत्यर्थः । 'तेने ब्रह्म हृदा य आदिकवय' इत्येतदपि द्वितीयाध्यायार्थनिर्देशपरमिति कश्चित्संप्रदायः; तत्र न प्रयोजनवत्त्वाधिकरणार्थप्रत्यभिज्ञानात् । यद्वा प्रतिपिपादयिषितार्थ प्रामाण्यजिज्ञासायां वेदान्तानामेव तत्र तत्प्रमापकत्वं वक्तुं, कृत्स्नस्य वेदस्यानादिनिधनाविच्छिन्नसम्प्रदायासम्भाव्यदोषगन्धतां पूर्वतन्त्रनिर्णीतां स्मारयितुं, 'तेने ब्रह्म हृदा य आदिकवये' इत्युक्तम्; एवं कारणत्वासम्बन्धव्यवच्छेदरूपोऽयोगव्यवच्छेद उक्तः । अथान्येषु प्रधानादिषु कारणत्वसम्बन्धव्यवच्छेदरूपान्ययोगव्यवच्छेदाक्षेपपरिहारौ सूचयन् ध्येयं परमात्मानं विशिनष्टि—तेजोवारिमृदां यतो विनिमय इति । अत्रैवमाशङ्क्यते-तावत्पुरुषस्याकारणत्वं नोपपद्यते, कारणत्वावगमात् । तथा हि तावत् "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति त्रिवृत्करणनामरूपव्याकरणे समानकर्तृके प्रतीयेते । त्रिवृत्करणं च हिरण्यगर्भरूपसमष्टिजीवकर्तृकं चतुर्मुखसृष्टेष्वण्डान्तर्वर्त्यग्न्यादिषूपदेशात् "यदग्ने रोहितं रूपं तेजसस्तदपाम्" इत्यादिभिः त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु एवं च त्रिवृत्कर्तैककर्तृकं नामरूपव्याकरणमप्यण्डाधिपतिचतुर्मुखकर्तृकमेवेति तमिममाक्षेपमभिप्रेत्य समाधत्ते—तेजोवारिमृदां यतो विनिमय इति । विनिमयः परस्परं मिश्रीकरणं तेजोवारिमृदां तेजोऽबन्नानां विनिमयः, यतो ब्रह्मणः चतुर्मुखादेरित्यर्थः । अयं भावः—तावत्त्रिवृत्करणं ह्यण्ड-

सृष्ट्यर्थम् 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन्प्रजाः स्रष्टुमसमागत्य कृत्स्नशः। समेत्यान्योऽन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते'। इत्यादिभिर्वैष्णवादिवचनैस्तस्यावगमात्। अण्डसृष्ट्यनन्तरं चतुर्मुखोत्पत्तिः,। 'तदण्डमभवद्धैमं' 'तस्मिन् जज्ञे स्वयं ब्रह्मा' इति स्मरणात्। एवं चाण्डोत्पत्तेः प्राक्तनं त्रिवृत्करणं परमात्मकर्तृकमेवेति तत्कर्त्रैककर्तृकं नामरूपव्याकरणमपि परमात्मकर्तृकमेवेति। तस्यैव जगत्कारणत्वं, नतु जीवप्रधानयोरिति; तर्हि 'यदग्ने रोहितं रूपम्' इत्यादि त्रिवृत्करणोपदेशपरश्रुतिविरोध इति चेत्—मैवम्; तत्र ह्यण्डान्तर्वर्तिष्वग्न्यादिषु न त्रिवृत्कृतभूतकार्यत्वप्रदर्शनायाग्न्यादीनां भूतत्रयात्मकत्वमात्रमुपदिश्यते। 'यथा' इति पाठे यथाविनिमयः यथायथं विनिमयः। यत इति पूर्वस्मादनुषङ्गः। नन्वेवमपि न ब्रह्मण्युपादानकारणत्वं, तद्धि 'अथ परा यया तदक्षरमधिगम्यते' 'निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम्' इत्यादिभिर्निर्विकारमवगतम्। उपादानकारणत्वं च भाव्यव्यवस्थाविशेषवतः प्रागवस्थायोगित्वरूपं तच्च ब्रह्मणि नोपपद्यते, तथा सति ब्रह्मणो विकाराश्रय त्वापत्तेरुक्तश्रुतिविरोधप्रसङ्गादित्याशङ्कामभिप्रेत्याह—यत्र त्रिसर्गो मृषेति। त्रयाणां सत्त्वरजस्तमसां सर्गः सृज्यत इति सर्गः। कर्मणि घञ्, गुणत्रयसृष्टः प्रपञ्चो यत्र यस्मिन् यत्स्वरूपेण मृषा मिथ्या, नास्तीति यावत्, त्रिसर्गस्य सत्त्वादिगुणगतत्वेन नतस्य ब्रह्मस्वरूपगतत्वमिति विकाराभावान्न निर्विकारश्रुतिविरोध इति भावः।

ननु विकाराश्रयत्वरूपं कारणत्वं निर्विकारत्वं चेत्युभयं परस्परविरुद्धं कथमेकस्मिन्नुच्यते? इति चेत्—शृणु; तावत् ईश्वरप्रधानयोः स्वरूपभेदः सर्वसिद्धान्तसंप्रतिपन्नः। तथा जीवेश्वरयोरपि 'क्षरं प्रधानममृताक्षरं हरः' 'क्षरात्मानावीशते देव एकः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः। पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं' 'ज्ञाज्ञौ द्वावजावीशनीशौ' 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। भोक्ता भोग्यं प्रेरितारं च मत्वा' 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादिभिः स्वरूपस्वभावभेदः श्रावितः। एवं स्वरूपतः स्वभावतश्चात्यन्तविलक्षणयोः कार्यकारणोभयावस्थयोः प्रकृतिपुरुषयोः परमात्मानं प्रति शरीरत्वम् 'यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन् योऽव्यक्तमन्तरे संचरन् यस्याव्यक्तं शरीरं योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरम्' इत्यादिभिः श्रावितम्। एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं जगत्स एवेत्याहुः।

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजते' त्यारभ्य 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' 'ऐतदात्म्यमिदं सर्वं' 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो!' इति तथा 'सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत' 'स तपस्तप्त्वा इदं सर्वमसृजते' त्यारभ्य 'सत्यं चानृतं च सत्यमभवदि'त्याद्याः। तदेवं भोक्तृभोग्यनियन्तृत्वेन विभक्तस्वभावान् प्रतिपाद्य भोग्यगतनुत्पत्त्यादिकं भोक्तरि जीवे प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य भोग्यभूतप्रधानगतमुत्पत्त्यादिकं भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य तस्य नियन्तृत्वं सर्वदा सर्वज्ञत्वं सत्यसंकल्पत्वं करणाधिपाधिपत्वं विश्वस्य पतित्वं च प्रतिपाद्य सर्वावस्थावस्थितयोश्चिदचितोस्तं प्रति शरीरत्वं च तस्य चात्मत्वं प्रतिपादितम्। अतः सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म तत्कदाचित्स्वस्माद्विभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति, तत्कारणावस्थं ब्रह्म कदाचिच्च विभक्तनामरूपस्थूलचिद्वस्तु शरीरं तच्च कार्यावस्थं, तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिसत्तया स्वरूपान्यथाभावरूपविकारो भवति। चिदंशस्य च संकुचितज्ञानस्य कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानसङ्कोचावकाशात्मकस्वभावान्यथाभावरूपविकारो भवति। उभयप्रकारविशिष्टे नियन्त्रेशे तदवस्थतदुभयविशिष्टतारूपविकारो भवति। कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः; अत एवैकस्यावस्थान्तरापत्तिरूपविकारापेक्षया 'येनाश्रुतं श्रुत'मित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो 'यथा सोम्यैकेने' त्यादिना दर्शितः। ईदृशज्ञानसङ्कोचविनाशकतत्तद्देहसम्बन्धवियोगाभिप्राया जीवस्योत्पत्तिमरणवादिन्या 'प्रजापतिः प्रजा असृजते' त्याद्याः श्रुतयः अचिदंशवत् स्वरूपान्यथात्वाभावाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो नित्यत्ववादिन्यश्च। "न जायते म्रियत" इत्याद्या "नित्यो नित्यानाम्" इत्याद्याश्च श्रुतयः स्वरूपान्यथात्वज्ञानसङ्कोचविकाशरूपोभयविधानिष्टविकाराभावाभिप्रायाः। 'निष्क्रियं निष्फलं' 'स वा एष महानज आत्मा अजरोऽमृतो ब्रह्म', 'नित्यो नित्यानाम्' इत्याद्याः परमात्मविषयाः श्रुतयः। अतः स्थूलसूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत्सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासंकरोऽप्युपपन्नतरः। यथा शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव तत्तच्छौक्ल्यादिसम्बन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसंकरः। तथा चिदचिदीश्वरसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसंकरः।

इयांस्तु विशेषः—तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च, इह तु चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात्तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्य इति स्वभावभेदस्तदसंकरश्च दृष्टान्तदार्ष्टान्तिकयोस्तुल्यः । एवञ्च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरं, स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात्कार्यत्वमुपपन्नतरमवस्थान्तरापत्तिरेव हि कार्यतेति सर्वमनवद्यमिति । तत्र जन्मादीत्यादिना जगदुपादनत्वं, सूक्ष्मचिदचिद्विशिष्टब्रह्मनिष्ठं, 'तेने' इत्यादिना 'मृषे' त्यन्तेन निमित्तकारणत्वं, विशेष्यभूतशुद्धस्वरूपनिष्ठमिति च सूचितं; शास्त्रप्रवर्त्तनत्रिवृत्करणनामरूपव्याकरणत्रिसर्गस्रष्टृत्वादेर्विशेष्यनिष्ठत्वप्रतीतेः । एवमेकस्यैव ब्रह्मणो विशिष्टाकारेण जगदुपादानत्वं शुद्धस्वरूपेण निमित्तकारणत्वं चेत्युभयविधकारणत्वं समर्थितम् । एवञ्च जन्मादिकारणत्वं विशिष्टब्रह्मणो विशेषणभूतं लक्षणं विशुद्धस्वरूपस्य तूपलक्षणतया लक्षणमित्यवगन्तव्यं; तस्य शुद्धस्वरूपनिष्ठत्वाभावस्य 'यत्र त्रिसर्गो मृषे' त्यनेनावगतत्वात् । न च तदनिष्ठस्य कथं लक्षणत्वं, तदसाधारणधर्मस्यैव लक्षणत्वादिति वाच्यम् । इतरव्यावृत्तवस्तुप्रत्यायकत्वस्यैवात्रोपलक्षणत्वेन विवक्षितत्वात्, जगत्कारणत्वस्य शुद्धस्वरूपनिष्ठस्यापि तदुपलक्षणतया सकलेतरव्यावृत्तत्वेन ब्रह्मप्रत्यायकत्व सम्भवात् । नच तस्य शुद्धस्वरूपोपलक्षणत्वमपि न सम्भवति, तस्य तदवृत्तित्वादिति वाच्यम् । तटस्थस्यापि शाखाग्रत्वस्य चन्द्रोपलक्षकत्वदर्शनात् विशेष्यनिष्ठत्वानिष्ठत्वाभ्यां विशेषणत्वोपलक्षणत्वयोर्भेदः । ततश्च कारणत्वस्य ब्रह्मनिष्ठतया विशेषणत्वं, प्रपञ्चगतजन्मादेस्तु ब्रह्मस्वरूपानिष्ठतयोपलक्षणत्वमिति विभावनीयम् । 'यत्र त्रिसर्गो मृषे' त्यनेनोपादानत्वप्रयुक्ताचिद्गतदोषो निवारितः । अथ चेतनगतं भ्रान्त्यादिकमन्यच्च सर्वमवद्यं नेति वदन् चिदचिद्व्यावृत्तं ब्रह्मस्वरूपं शोधयन् विशिनष्टि—धाम्नेति । ननु जगज्जन्मादिकारणत्वलक्षणेनैव सकलेतरवस्तुव्यावृत्तिः सिद्धेति किमनेन प्रयत्नेनेति चेत्—न; जगज्जन्मादिकारणत्वैरकारणत्वव्यावृत्तिसिद्धावपि जीवजडजातीयत्वशङ्का स्यादेव, कम्बुग्रीवादिमत्त्वरूपसंस्थानविशेषवत्त्वादिना पटादिव्यावृत्तघटादेर्गन्धवत्त्वादिना तज्जातीयत्वदर्शनात्, अबादेस्तदभावेन तच्छङ्कानिवृत्तिदर्शनात्; अतस्तन्निवृत्त्यर्थं धाम्नेत्यादिविशेषणानि । ननु संस्थानविशेषो हि घटपटादिभ्य एव व्यावर्तयति, नतु पृथिवीमात्रात् पटस्यापि पृथ्वीत्वात्; एवञ्च संस्थानादिकं येभ्यः पटादिभ्यो व्यावर्त्तयति तद्विजातीयत्वमपि तेनैव सिद्धम्; अबादेरपि पृथिवीमात्रव्यावर्त्तकाप्त्वादियोगादेव हि पृथिवीजातीयात्संस्थानादिना वैजात्यं न सिद्ध्यति, तस्माद्व्यावर्त्तकत्वमपि संस्थानादेर्नास्ति; प्रकृते तु कारणत्वं जीवादिभ्यो ब्रह्म व्यावर्त्तयतीति कथं तेनाकारणेभ्यो जीवादिभ्यो वैजात्यं तदन्तर्भावायोग्यत्वादिस्वरूपं न सिद्ध्येत्? । तदनिष्ठजातियोगित्वन्तु धाम्ना निरस्तकुहकत्वादिना लक्षणान्तरेणापि न सिद्ध्यति, कारणत्ववन्निरुपाधिकधामनिरस्तकुहकत्वादेरप्यजातिरूपत्वात्, तस्माद्धाम निरस्तकुहकत्वादिवत्कारणत्वमपि स्वेतरसर्वव्यावर्त्तकमिति चेत्–उच्यते; वैजात्यं हि तद्वृत्तिधर्मयोगराहित्यं, तच्च व्यावृत्तिबोधककारणत्वबलान्न सिद्ध्यति । न हि धर्मभेदग्राहकसामर्थ्येव तद्धर्माभावग्राहिका, किन्तु सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणो लक्षणमिदं जगज्जन्मादिकारणत्वमिति । ततो विशिष्टस्येतरव्यावृत्तितद्वैजात्यसिद्धावपि केवले विशेष्यस्य विशेषणभूतचिदचित्साजात्यशङ्कायां तद्वारणार्थं धामनिरस्तकुहकत्वादिकं स्वरूपलक्षणम् । वस्तुतस्तु 'यतो वे' त्यादिश्रुत्या ब्रह्मण्युपादानत्वस्याप्यवगमात् तस्य च मृदादौ विकारादौ दोषसहचरितत्वदर्शनाद् ब्रह्मण्यपि तत्प्रयुक्तदोषशङ्कावारणार्थं निरुपाधिक-धाम-निरस्तकुहकत्वादिविशेषणत्रयमिति न तद्वैयर्थ्यशङ्केति ।

अत्र 'धाम्ने' त्यादिविशेषणत्रयेण "सत्यं ज्ञानमनन्तम्" इति श्रुत्युक्तं विशेषणत्रयं प्रत्यभिज्ञाप्यते, 'धाम' पदेन ज्ञानपदस्य 'पर' पदेनाधिक्यवाचिनाऽनन्तपदस्य 'सत्य' पदेन तस्य च प्रत्यभिज्ञानात् । धाम्ना तेजसा नित्यासङ्कुचितज्ञानरूपेण स्वेन स्वाभाविकेन निरुपाधिकेनेति यावत्, निरस्तकुहकं वञ्चकविषयभूतं वस्त्विति यावत्, तद्यस्य तं नित्यनिरुपाधिकासंकुचितधर्मभूतज्ञानेनावगतवस्तुरहितमित्यर्थः । अनेन मुक्तजीवा व्यावृत्ताः । तेषां भक्तिदशायामसंकुचितज्ञानत्वेऽपि तस्य परमात्मप्रसादायत्तत्वेन सोपाधिकत्वात् बद्धदशायामभावेन नित्यत्वाभावाच्च 'सत्य' पदं निरुपाधिकसत्तायोगिकं परमपुरुषमाह । तेन विकारास्पदमचेतनं तत्संसृष्टचेतनश्च व्यावृत्तः, नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् । परशब्दोऽधिकवाची संस्थानप्रमाणादपरिच्छिन्नाधिक्यपरः, अनन्तमित्यर्थः । आनन्त्यं चात्र देशकालवस्तुपरिच्छेदरहितत्वरूपं, तच्च सगुणत्वात्स्वरूपस्य स्वरूपेण गुणैश्चाभिप्रेतम् । अनेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपस्वगुणा नित्यसिद्धा व्यावृत्ताः, विशेषणानां व्यावर्त्तकत्वात् । सत्यादिवाक्यस्यात्र प्रत्यभिज्ञानादेव विशेष्यसमर्पकं ब्रह्मपदमध्याह्रियते, एवं च जगज्जन्मादिना लक्षणेनावगतस्वरूपं ब्रह्म सकलेतरवस्तुविजातीयमिति लब्धम् । तत्र देशपरिच्छेदो नाम सर्वदेशवर्तित्वरूपः । इदमत्र भवति, अत्र तु न भवतीत्येवंविधः । कालपरिच्छेदस्त्विदमिदानीं भवतीदानीं तु न भवतीत्येवंविधः । वस्तुपरिच्छेदो नाम सर्ववस्तुसामानाधिकरण्याभावः, स्वापेक्षयोत्कृष्टवस्तुसद्भावो वा तदभावो वस्तुपरिच्छेदराहित्यम् । तत्राद्ये वस्तुपरिच्छेदराहित्यं ब्रह्मस्वरूपस्यैव, न तु तद्गुणानां; तत्स्वरूपस्य सर्ववस्तुशरीरकत्वेन सर्ववस्तुसमानाधिकरण्ये सत्त्वेऽपि तद्गुणानामसम्भवात् । द्वितीये तद्गुणानामपि तत्संभवति, ब्रह्मगुणापेक्षया उत्कृष्टगुणानामभावादिति विवेकः । सामानाधिकरण्यञ्च द्विविधं-शब्दसामानाधिकरण्यमर्थसामानाधिकरण्यं चेति । तत्र शब्दसामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानामेकस्मिन् विशेष्ये पर्यवसानमभिधानमित्यर्थः । यथा नीलोत्पलशब्दयोः । अर्थसामानाधिकरण्यं तु भिन्नार्थानामेकस्मिन्नर्थे वृत्तिः; यथा नीलत्वोत्पलत्वादीनाम् । अत्र विशेष्यसमर्पणायाध्याहृतो

ब्रह्मशब्दः स्वभावतो निरस्तनिखिलदोषमनवधिकातिशयासंख्येयकल्याणगुणगणं पुरुषोत्तममाह । तथा चाभाषि भगवद्भिः श्रीरामानुजमुनिभिः—'ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते । बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः, बृहत्त्वञ्च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थ' इति । तत्र स्वरूपेण गुणैश्च निरतिशयबृहत्त्वं ब्रह्मशब्दप्रवृत्तिनिमित्तं; स्वभावत इत्यादिविशेषणद्वयं तु 'ब्रह्म' शब्दस्य पुरुषोत्तमपरत्वप्रतिपादनोपयोगितयोक्तं, नतु प्रवृत्तिनिमित्ततया बृहत्त्वस्य निरतिशयत्वं नामानन्त्यम् । ननु "बृंहति बृंहयति तस्मादुच्यते परं ब्रह्म बृहत्त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते" इति श्रुतिस्मृतिभ्यां बृहत्त्वबृंहणत्वे उभे च प्रवृत्तिनिमित्ततयावगते, कथमिह बृहत्त्वमात्रं प्रवृत्तिनिमित्तमुच्यते ? गुणतो बृहत्त्वे बृंहणत्वस्याप्यन्तर्गतत्वादिति भावः । "स चानन्त्याय कल्पत" इति श्रुतिप्रसिद्धं सकलसङ्कोचनिवृत्तिपूर्वकनिरवधिकज्ञानविकाशरूपानन्त्यावहत्वं हि बृंहणत्वं, तद्धि सकलहेयप्रत्यनीकत्वक्षान्तिकारुण्यादिमोक्षप्रदत्वौपयिकगुणवत्त्वं, ब्रह्मशब्दश्च योगरूढिभ्यां श्रीनिवासमभिधत्ते । तथा च स्मर्यते श्रीमति गारुडे पुराणे 'वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि । तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने !' इत्यारभ्य 'यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः । तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारत' इति । अनेन जगत्कारणभूतवस्तुविशेषजिज्ञासायां देवताविशेषावगमश्च सिद्धः । उक्तप्रकारेण सर्वविलक्षणं श्रियःपतिं धीमहि उपासिषीमहीत्यर्थः । धियं कुर्यामिति विग्रहे धीशब्दात् 'तत्करोति' इति णिचीष्टवद्भावात् "प्रकृत्यैकाच्" इति प्रकृतिभावाट्टिलोपाभावे तस्मादाशिषि लिङि "णिचश्च" त्यात्मनेपदे आगमशास्त्रस्यानित्यत्वादार्षत्वाद्वा सीयुडिटोरभावे "णेरनिटि" इति णिलोपे च 'धीमही' ति रूपम् । वेदनोपासनध्रुवानुस्मृतिचिन्तास्मृतिभक्त्यादिशब्दपर्यायस्य धीशब्दस्य ध्यानमर्थः, लिङस्त्वलभ्यलिप्सारूपा आशीः । अनेन 'आशीर्नमस्क्रिया वस्तुनिर्देशो वा' इत्यभियुक्तोक्ताशीश्च कृता भवति । अत्रोक्तविशेषणविशिष्टस्य ध्येयस्य ब्रह्मणो ध्यातुः स्वस्मादुत्कृष्टत्वावगमात् स्वस्य च ततोऽपकृष्टत्वावगमात्प्रह्वीभावावगमान्नमस्क्रियापि कृता भवति । पूर्वद्विकप्रतिपाद्यार्थरूपवस्तुसंग्रहस्तु 'जन्मादी' त्यादिना 'विनिमय' इत्यन्तेन कृतः पुरस्तादेव दर्शितः । 'यत्र त्रिसर्गो मृषे' त्यनेन प्रकृतिपुरुषगतदोषप्रसङ्गपरिहारपरेण जीवदोषकीर्त्तनपरतार्तीयप्रथमपादार्थः 'तेने सत्य' मित्यादिविशेषणेन च उभयलिङ्गपादार्थश्च निर्दिष्टः । धामनिरस्तकुहकत्वादनेकगुणविशिष्टब्रह्मणो ध्येयत्वोक्त्या गुणोपसंहारपादार्थश्च सूचितः । 'धीमही' त्युक्तस्योपासनस्यानेकसाधनत्वापेक्षत्वप्रसिद्ध्या अङ्गपादार्थश्च सूचितः । अध्याहृतब्रह्मशब्दप्रवृत्तिनिमित्तभूतबृहत्त्वान्तर्भूतबृंहणत्वेनाभिप्रेतेन तुरीयफलाध्यायार्थश्च सूचितः । एवमभियुक्ताभिमतं त्रिविधं मङ्गलं मनसापि कर्तुं शक्यमपि शिष्यशिक्षायै ग्रन्थादौ शब्दतोऽपि कृतमित्यवगन्तव्यम् । 'यत्र त्रिसर्गो मृषा धाम्ने' त्यादिना 'परम्' इत्यन्तेन निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वकीर्त्तनात् सगुणनिर्गुणश्रुत्योर्विषयभेदश्च दर्शितः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रीगणेशाय नमः । श्रीवेदव्यासायः नमः । श्रीगुरुभ्यो नमः । श्रीलक्ष्मीनारायणाय नमः ।
श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः । ॐ नमो नारायणाय ॥

यतो जन्माद्यस्य श्रुतिसुनयमानैकविषयात् स्वतन्त्रस्तन्त्रज्ञो गुरुरपि गुरोर्यश्च जगताम् ॥
विमूढा यत्तत्त्वं प्रकटमिह वेत्तुं सुमनसो मुकुन्दं ध्यायामापहतकुहकं तं स्वमहसा ॥ १ ॥
त्रिसर्गो यत्रायं लसति चिदचिद्विष्णुविषयोऽनलोको नानेयं विकृतिरिव तेजोजलमृदाम् ॥
विशुद्धं चैतन्यं प्रकृतिविकलं यं च विततं परं ब्रह्मात्मानं स्मर हृदय सत्यं गुरुतमम् ॥ २ ॥
यदीयकृतिरञ्जसा सुमनसां सुमानं सतां सती सकलसन्नता सकलवेदवाणीनिधिः ॥
स चित्सुखपयोनिधिः सरसिजेक्षणः श्रीपतिः पराशरशरीरजः शरणमस्तु मे सन्ततम् ॥ ३ ॥
मम वचसि मङ्गलदेवता प्रणयततिं सन्निदधात्वियम् । विलसदुरसीव मधुद्विषः कमलवनमध्य इवान्वहम् ॥ ४ ॥
जयति जनकः शम्भोरम्भोजनाभसुताग्रणीः प्रथमकवीनां मुख्यो यः सर्वजीवननायकः ॥
श्रुतिवितता वाग् यस्य ब्राह्मी प्रमाणमनाकुलं परमविषये सम्यक् प्रेक्षावतां न मृषा क्वचित् ॥ ५ ॥
हिमकरलसद्बिम्बद्योतः सुधारसजित्वरीं स मम सुदृशं देयादानन्दतीर्थमहामुनिः ॥
मणिगणवराः शाणोल्लीढा इवाधिसमुन्विषः शमदमगुणा यत्रोल्लसन्ति सन्ततमेधसि ॥ ६ ॥
चरणनलिने दैत्यारातेर्भवार्णवान्तरसत्तरीम् । दिशतु विशदां भक्तिं मह्यं महेन्द्रतीर्थयतीश्वरः ॥ ७ ॥
क शब्दः काभ्यासः श्रुतिरपि गुरोः काप्रसरणीः समीक्षा पौराणी क खलु विबुधा मत्सरधियः ॥
तथापि व्यामोहाद् गुरुगुरुकटाक्षैकशरणो मनाग् व्याकुर्वेऽहं भागवतपुराणं प्रगहनम् ॥ ८ ॥
आचार्यैरपरैरपि प्रविवृते मार्गे मनश्चोदितां खद्योतस्तपनप्रकाशितपदे किं तत्र कुर्यादिति ॥
तन्मार्गानुगमेन वाक्तनुमनःशुद्धिक्रियायै ततः श्रीमद्भागवतं पुराणमतुलं व्याकर्तुकामो यते ॥ ९ ॥

तदस्यां पद्यायां झटिति कृतयात्रे मयि कृपां महान्तः कुर्वन्तो दिवि भुवि वसन्तः सदयनाः ॥
निरस्तासूया ये परमपदभक्तिक्षितिधरोद्वहप्रह्वग्रीवा विपुलकरुणाः सर्वसुहृदः ॥ १० ॥
आनन्दतीर्थविजयतीर्थौ प्रणम्य मस्करिवरवन्द्यौ ॥ तयोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतपुराणम् ॥ १० ॥

अथ कलिमलापनुत्तये विधिभवपुरःसरैरमरवरैरादरात् प्रार्थितो दितिसुतबलभरपरिखिन्नधरणितले चिरसमयसमाचीर्णतपसा सत्यवत्यां पराशरादवतीर्णो व्यासनामा मुरमथनः समुद्धृतसमुत्सन्ननिगमकल्पतरुरल्पमतिमनुजदयालुः शाखोपशाखाभेदेन विभक्तवेदस्तदर्थनिर्णयेच्छुर्विरचितब्रह्मसूत्रस्तदनधिकारिजनापवर्गाय प्रकाशितपुराणसंहितो वेदान्तार्थप्रकाशिकां द्वादशस्कन्धसम्मिताम् अष्टादशसहस्रसंख्योपेतां भागवतपुराणसंहितां चिकीर्षुः कालदोषेण पिहितान् भागवतधर्मानाविश्चिकीर्षुर्निरन्तरापरोहितब्रह्मस्वरूपो निरन्तरायोऽपि प्रेक्षावच्छिक्षायै मङ्गलाचरणानामनेकप्रयोजनाय च सर्वेष्टदेवतां नारायणाख्यामनुस्मरति—जन्माद्यस्य यत इति । अत्र यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । अस्य जगतो जन्मादि यतः यश्चार्थेष्वभिज्ञः यश्च स्वराट् यश्च ब्रह्म हृदा आदिकवये तेने यं प्रति सूरयो मुह्यन्ति तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गोऽपि यत्र मृषा तं स्वेन धाम्ना सदा निरस्तकुहकं सत्यं परं धीमहीति समस्तान्वयः ॥

तत्र प्रथमं परं धीमहीति व्यस्तान्वयः, पश्चादाकाङ्क्षावशादादितः सर्वेषामन्वयः, परं पूर्णं गुणैरिति शेषः । 'पॄ पालनपूरणयोः' इति धातोः । द्विविधा हि देवता ग्रन्थारम्भे नमस्कारादिमङ्गलक्रियामर्हति–आधिकारिकी अभीष्टा चेति । यथा ज्योतिःशास्त्रे सूर्यादिग्रहलक्षणदेवताधिकारिकी नमनादिक्रियार्हा परमप्रेमादिविषया ह्यभीष्टा चेति । भगवांस्तूभयरूप इत्यभिप्रायेण 'पर' मित्युक्तम् । परमात्मा हि सकलप्राणिनां संसारोन्मूलनायास्मिन् शास्त्रे प्रतिपाद्यते "तदेतत् प्रेयः पुत्रात् प्रेयोऽन्यस्मात्सर्वस्मादन्तरं यदयमात्मा" इति श्रुतेः, स एव परमप्रेमविषयः । परोऽपि नारायण एव नान्यः कश्चित्, "यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते । स देवः पुण्डरीकाक्षः स्वयं नारायणः पर" इति हरिवंशे सत्यतपःप्रश्नोत्तरत्वेन दुर्वाससः प्रतिवचने परस्य नारायणत्वोक्तेः । "ब्रह्मविदाप्नोति परम्" इति श्रुतेश्च । 'धीमहि' ध्यायेम 'जन्माद्यस्य यत' इत्यादिविशेषणैः परशब्दोक्तान् गुणान् विशिनष्टि । पालनपूरणाभ्यां यथासम्भवं सृष्ट्यादयो वाच्या इत्यूहनीयम् । अलौकिकवस्तुनो लक्षणोपदेशमन्तरेण ज्ञातुमशक्यत्वात् शशविषाणकल्पं तदित्यतो वा लक्षणमाह—जन्माद्यस्य यत इति । अस्य प्रत्यक्षस्य जगतो जन्म आदिर्यस्य तज्जन्मादिति तद्गुणसंविज्ञानो बहुव्रीहिः, यतो यस्मात् भवतीति शेषः, आदिशब्देन स्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा गृह्यन्ते, न केवलं स्थितिसंहारौ, श्रुतिस्मृतिविरोधात् । यथा सास्नादिमान् गौरिति वृद्धोपदिष्टसास्नादिमन्तं पदार्थमश्वादिभ्यो व्यावृत्तं गोशब्दवाच्यं प्रत्येति, तथा जगज्जन्मादिकारणं परमिति श्रुत्याचार्योपदिष्टं जन्मादिकं प्रत्येकं परब्रह्मलक्षणतया ज्ञातव्यं, वेदान्तसूत्रेषु प्रतिपादितत्वात् । ननु परस्य जन्मादिकारणत्वं कुत इति तत्राहुः—अन्वयादिति । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" इत्यादिश्रुतीनाम्, 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु ॥' इत्यादिस्मृतीनां च जगत्कारणे हरावन्वयात्, उपक्रमोपसंहारादितात्पर्यलिङ्गात् परं ब्रह्मैव जगत्कारणं नान्यदिति भावः । ननु रुद्रादीनामपि जन्मादिकारणत्वं श्रूयते, अतः कथं परस्यैवेत्यवधार्यते ? उच्यते—यद्यपि रुद्रादीनां वेदैकदेशप्रतिपाद्यत्वमस्ति तथाप्यनन्तवेदकदम्बप्रतिपादितत्वं विष्णोरेव । 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभ्यः । ननु श्रुत्यादेः पिपीलिकादिलिपिवत् अप्रमाणत्वान्माणवकदृष्टशार्दूलकल्पनेन तन्निश्चयाभावादतः परमाणुपुञ्जस्यैव कारणत्वमिति तत्राह—इतरत इति । प्रत्यक्षागमाभ्यामनुगृहीतादितरस्मात्तर्कात् परब्रह्मणः कारणत्वं ज्ञायते, 'समुदाय उभयहेतुकोऽपि तदप्राप्तिः' इति भगवता कृष्णद्वैपायनेन परमाणुपुञ्जवादस्य निरस्तत्वात् । अत्र श्रुत्याद्यनुगृहीततर्काभावात् केवलतर्कस्याप्रतिष्ठितत्वात् । ननु कार्यं कारणपूर्वकं कार्यत्वादिति कारणसामान्यमात्रं सिद्धं, विशेषतः कुतः सिद्धिरिति चेत्—सत्यं; प्रधानादेरचेतनत्वेन बुद्धिपूर्वककर्तृत्वानुपपत्तेरस्वातन्त्र्याच्च क्षित्यादेश्चेतनकर्तृकत्वं परिशेषसिद्धं, चेतनाद्धि पित्रादेः पुत्राद्युत्पत्तिदर्शनात्तद्दृष्टान्तेन ब्रह्मादिचेतनजातं परमचेतनाद्विष्णोरुत्पद्यत इति सुशकोऽयं तर्कः समुत्तिष्ठते । चशब्दः समुच्चये, वेदानामपौरुषेयत्वेन कर्तृप्रसिद्ध्यभावादसंदिग्धप्रमाणत्वे तदनुगृहीततर्कस्यापि प्रतितर्कपराहतिर्नाशङ्कनीयेत्यस्मिन्नर्थे वा । अनेन 'अथातो ब्रह्मजिज्ञासा' 'जन्माद्यस्य यतः' 'शास्त्रयोनित्वात्' 'तत्तु समन्वयात्' इति चतुःसूत्री च व्याख्याता । जिज्ञासैव 'धीमही'त्यनेनोच्यते, वेदविचारनिर्णीतगुणोपसंहाररूपत्वात् । इयानेव विशेषः—ध्यानमेव ज्ञानसाधनं न कर्मादिकमित्यतो 'धीमही'ति पदं कर्मणः शुद्धान्तःकरणस्य ध्यानसंभवादिति । यस्तु श्रुतिस्मृती अनादृत्य केवलतर्केण ब्रह्मणो जन्मादिकारणत्वं विघटय्य प्रत्यवतिष्ठते सोऽन्वयव्यतिरेकात्मकतर्केणापहसितव्य इत्यतो वाह—अन्वयादितरत इति । अन्वयात् अन्वयानुमानात् इतरतो व्यतिरेकानुमानात्, ते च दर्शिते । चशब्दस्तूक्ततर्कस्य केवलस्य व्याप्तिशून्यत्वादस्य च प्रत्यक्षगृहीतव्याप्तिकत्वेन बलीयस्त्वादप्रतिहतः स्वार्थं साधयतीत्येतस्मिन्नर्थे वर्त्तते । ननु यथा पयोऽम्ब्वादेरचेतनस्य स्पन्दनादिप्रवृत्तिदर्शनात्तन्निदर्शनेन प्रधानस्य कारणत्वं किं न स्यादिति तत्राह—अर्थेष्विति । अर्थेषु घटपटादिष्वभितः सर्वतः अशेषविशेषाकारेण जानातीत्यभिज्ञः, प्रधानस्य जडत्वेन ज्ञानाश्रयत्वलक्षणासम्भवान्नितरां न

सर्वज्ञत्वं, विष्णोस्तु सर्वज्ञत्वं श्रुतिस्मृतिसिद्धम्—'यः सर्वज्ञः स सर्ववित्' 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप!' इत्यादि। नन्वस्य हेतोः सर्वज्ञे रुद्रादावपि वृत्तेरसाधकत्वमिति तत्राह—स्वराडिति। स्वयमेव राजत इति स्वराट्, स्वस्य स्वयमेव राजा नान्योऽधिपतिरिति वा। अयं भावः—'यं कामये तं तमुग्रं कृणोमी'ति रुद्रादीनां श्रीप्रसादायत्तज्ञानादिगुणवत्त्वदर्शनात् 'मम योनिरप्स्वन्तः' इति श्रियश्च विष्णवनुगृहीतज्ञानादिमत्त्वदर्शनाद्विष्णोस्त्वनन्याधीनज्ञानादिगुणवत्त्वात्तद्गतानां विशेषाणामनन्तानां तैरज्ञातत्वान्न तेषां निरुपचरितसर्वज्ञत्वम्, अतो नान्येषु तस्य हेतोर्व्यभिचार इति स एव सर्वकर्त्तेति। "न ते विष्णो जायमानः स एष सर्वेश्वर एष भूताधिपतिः" इत्यादिश्रुतिरनन्याधिपतित्वे सर्वाधिपत्ये च मानं, स्रष्टृराजान्तररहित इति वा स्वराट्, स्वात्मानं स्वयमेव राजयति प्रकाशयति न परेच्छयेति वा।

ननु श्रुतीनामनन्तत्वादेकत्र हरेरन्याधीनत्वकथनसम्भावादतः कुतो निश्चयः? परो नान्याधीन इति तत्राह—तेन इति। यः पर आदिकवये चतुर्मुखाय ब्रह्म साङ्गं वेदं हृदा स्नेहेन तेने विस्तारितवान्, तस्य सकृदुपदेशमात्रेणाशेषविशेषग्रहणसामर्थ्येऽपि 'वक्तव्यं ब्रह्मगुरुणा चतुर्वारमथापि वा।' इत्युपदेशशास्त्रमनुसृत्य 'तेन' इत्युक्तं; शिष्यशिक्षायै तथोपदेशसम्भवात्, चतुर्मुखस्य वेदोपदेशेन हरेरनन्याधिपतित्वस्य किमायातमिति चेत्—न; 'प्रजापते नत्वदेतान्यन्यो विश्वा जातानि परिता बभूव।' इति श्रुतौ चतुर्मुखस्य निरतिशयमाहात्म्यकथनात्तदुपदेशात्तस्यानन्याधिपतित्वसिद्धेः। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः सकलवेदविद्योपदेशोऽपि सिद्धः। आदिकवित्वं च ब्रह्मणः 'कविर्यः पुत्रः स इमाचिकेत" इत्यादिश्रुतिसिद्धम्। 'ब्रह्म देवस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः।' इत्यभिधानं "हृत्स्नेहे मनसि स्निग्धे सुहृद्बन्धौ हरावपि" इति च। न प्रहेलिकावदुपदेश इति द्योतनाय 'हृदे'त्युक्तं, 'तेने ब्रह्मे'ति सर्वज्ञत्वे युक्त्यन्तरं वा। सकलचेतनराश्युत्तमस्य चतुराननस्योपदेष्टुः शार्ङ्गपाणेः सर्वज्ञत्वं न्यायप्राप्तमिति भावः। 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।' इति श्रुतौ नारायणविषयज्ञाने स्वातन्त्र्यकथनात्तदुपदिष्टज्ञानेनैव तज्ज्ञानं कथं सङ्गच्छत इत्याशङ्क्य, 'यमेवैष वृणुते तेन लभ्य' इति श्रुतेः। तत्प्रसादायत्तज्ञानेनैतद्विषयं ज्ञानं, न तु स्वायत्तम्, अन्यथा ज्ञानमेव न स्यादुक्तहेतोरित्यभिप्रेत्याह—मुह्यन्ति यं सूरय इति। भूतभविष्यद्वर्त्तमानब्रह्मादयो यत्प्रसादमन्तरेण मुह्यन्ति, 'मुह वैचित्ये' इति धातोश्चित्तिं ज्ञानं न जानन्ति, कचिदन्यथा च जानन्तीत्यर्थः। 'तेने' इत्युक्तेरस्माद् ब्रह्मादिचेतनराश्यचिन्त्यमहिमा महीधरः प्रसादाभावे इति प्रतीयते। नन्वीश्वरः सृष्ट्यादौ प्रवर्तमानः प्रयोजनार्थी भवति, अन्यथा वा? न प्रथमः; यत्प्रयोजनार्थं प्रवर्त्तते तस्य तत्पूर्वं तदभावादपूर्णत्वेनाशक्तत्वात् सृष्ट्यनुपपत्तेः। न द्वितीयः; प्रवृत्तिमात्रस्य स्वप्रयोजनोद्देशेन दृष्टत्वाद् वृथा तदनुपपत्तेः, अतो मायामयी सृष्टिरेष्टव्येत्यत आह—तेजोवारीति। तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गः यत्र यस्मिन् भगवति विषये मृषैव पूर्वाप्राप्तप्रयोजनप्रापको न भवति, कथं तर्हि प्रवृत्तिरिति चेत्,—उच्यते—'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा', 'लोकवत्तु लीलाकैवल्यम्' २।१।३३ इति श्रुतिसूत्रबलादाप्तसमस्तप्रयोजनस्य हरेः लीलयैव प्रवृत्तिरिति भावः। जीवेश्वरजडानां सर्गस्त्रिसर्गः, यथा एकमेव मूलं तेजः स्वकार्य्येषु पार्थिवादिपदार्थेषु बहुधा भूत्वा प्रविशति, बहिश्च मथनादिना विर्भवति तथेश्वरोऽपि जगत् सृष्ट्वा बहुरूपीभूय जगदन्तः प्रविशति, बहिश्च भूतानुकम्पया वासुदेवादिबहुरूप आविर्भवति। अयमीश्वरसर्गः। दीपाद्दीपान्तरोत्पत्तिर्यथा तथेश्वरसर्ग इति वा। यथा सूर्यादितेजसां जलाद्युपाधिनिमित्तैः बहूनि प्रतिबिम्बानि सूर्यकान्तादीनि सूर्यादेर्जायन्ते, तथैव सूक्ष्मस्थूलशरीराद्युपाधिनिमित्तैः प्रतिबिम्बभूता जीवा हरेरुत्पद्यन्ते। एष जीवसर्गः। यथा कुलालो मृदमुपादानीकृत्य घटादीन् सृजति तथेश्वरो जडप्रकृतिमुपादाय महदहङ्काराद्यशेषजडपदार्थान् सृजति। एष जडसर्गः। अनेन मायामयी सृष्टिरित्यस्य किमायातमिति चेदुच्यते—यत्रेश्वर इति विशेषणादन्यत्र जगत्मृषा मिथ्या न भवति। तथा च योजना—यथा तेजोवारिमृदां विनिमयः कार्यम् अर्थक्रियायोग्यत्वात् सदसद्विलक्षणो न भवति, तथा यत्र यदाधारतया क्रियमाणस्त्रिसर्गो मिथ्या न भवति। अर्थक्रियोपपत्तिरेव मिथ्यात्वबाधिकेति भावः। ननु तेजःकार्यं केशोण्ड्रकादि वारिकार्य्यं फेनादि मृत्कार्य्यं घटादि यथा मिथ्या तथा यत्र जगन्मिथ्येत्यर्थः स्यात्। तथा च श्रुतिः—"वाचारम्भणं विकारः"। अनुमानं च—विमतं मिथ्या, दृश्यत्वादित्यतो मायामयी सृष्टिरित्यत आह—धाम्नेति। स्वेन धाम्ना स्वरूपज्ञानमहिम्ना सदा नित्यं निरस्तं कुहकम् इन्द्रजालादिमाया येन यस्य वा स तथोक्तः तं यः सर्वज्ञः "अथैनमाहुः सत्यकर्मेति"। 'विश्वं सत्य'मित्यादिश्रुतिविरोधादुदाहृतश्रुतेरर्थान्तरत्वसम्भवादनुमानस्य व्याप्तिशून्यत्वेन तद्विरोधाभावान्नित्यनिरस्तेन्द्रजालो विष्णुर्मायामयीं सृष्टिं न विदधाति। किन्तु सत्यामेव। लोके वा समर्थः सन् इन्द्रजालादिकं सृजति, न तु समर्थः। विष्णुस्तु नित्यपरिपूर्णशक्तिः किमर्थं तत् करोतीत्यर्थः। मुक्तव्यावृत्तये 'सदा' इत्युक्तम्, तेषां मुक्तेः पूर्वं बन्धभाक्त्वेन कुहकत्वसम्भवात्। ननु विष्णोः सदा निरस्तकुहकत्वे मुक्तव्यावृत्तिर्घटते, तदेव कुत इति तत्राह—सत्यमिति। सत्यं निर्दुःखनित्यनिरतिशयानन्दाद्यनुभवरूपम् "सच्छब्द उत्तमं ब्रूयादानन्दन्तीति वै वदेत्। येति ज्ञानं समुद्दिष्टम्" इति वचनान्नित्यनिरस्तकुहकत्वेन मुक्तव्यावृत्तिर्युज्यत इति भावः। एतदुक्तं भवति—उपक्रमादितात्पर्ययुक्त्युपेतसर्वश्रुतिस्मृतितात्पर्यपर्यालोचनया जगत्सृष्ट्यादिकर्तृत्वात् सर्वज्ञत्वादनन्याधिपतित्वाच्चतुर्मुखज्ञानोपदेष्टृत्वात् स्वानुग्रहमन्तरेण दुर्ज्ञेयत्वात् स्वप्रयोजनानुद्देशेन केवललीलयैव जगत्सर्जनादिप्रवृत्तिमत्त्वात् स्वत एव निरस्तेन्द्रजालत्वेन सत्यमहिमत्वान्निर्दुःखनित्यनिरतिशयानन्दाद्यनुभवरूपत्वाच्च सर्वगुणपूर्णो विष्णुः सर्वैर्ध्येय इति वा तात्पर्यार्थः। ननु 'धीमही'ति छान्दसः प्रयोगः कस्मात् कृतः? उच्यते—गायत्री-

प्रतिपाद्यं नारायणाख्यं परं ब्रह्मैव न सूर्यः, तस्य 'चक्षोः सूर्यो अजायत' इति श्रुत्या तदङ्गजननोक्तेरिति दर्शयितुं यथा वेदाध्ययनोपक्रमे गायत्र्यभिधीयते, विशिष्टफलहेतुत्वात्, तथा भागवतोपक्रमे इति वा गायत्र्याद्यशेषवेदप्रतिपाद्यो नारायण एव भागवते प्रतिपाद्यत इति वा इतरेषां भगवत्कृतत्वेन तत्परत्वेऽपि तद्व्यावृत्तये इति वा इतरेभ्योऽप्यस्य माहात्म्याधिक्यप्रकटनायेति वा 'धीमही'ति छान्दसम्पदं प्रायुङ्क्त भगवान् बादरायणः। तथा च मत्स्यपुराणे पुराणदानमाहात्म्ये प्रस्तावमाहात्म्ये तल्लक्षणं प्रदर्श्यते— 'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधश्चापि यत्तद्भागवतं विदुः॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदम्। अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम्' इति। स्कान्दे—'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारम्भो यत्र भागवतं विदुः' इति। गारुडे च—'अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः। गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः॥ पुराणानां साररूपः साक्षाद्भगवतोदितः। द्वादशस्कन्धसंयुक्तः शतविच्छेदसंयुतः। ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः' इति। अन्ये 'चतुर्विंशत्साहस्रं भागवतम्' इति वदन्ति, तदसम्प्रदायविदां वचनमित्युपेक्षणीयम्। गायत्र्यर्थोऽप्यनेन श्लोकेन सूचितः। तथा हि—तत्सवितुर्देवस्येत्यस्यार्थः—जन्माद्यस्य यत इत्यादीति, "वामं वरेण्यं परम्" इत्यभिधानाद् वरेण्यमित्यस्य व्याख्यानम्—परमिति, भर्ग इत्यस्य व्याख्यानं—धाम्ना स्वेन सदा निरस्तकुहकमिति, भर्गः सकलदुरितभर्जनं ज्योतीरूपं तत्पदार्थव्याख्यानम्—स्वराडिति, धियो यो नः प्रचोदयादित्यस्य विवरणं—तेने ब्रह्म हृदा य आदिकवये इति। यः सविता जन्मादिकर्त्ता नः अस्माकं धियः धर्मादिविषया बुद्धीः; उपलक्षणमेतत्—सर्वेन्द्रियाणि इत्यादिस्वतत्त्वविषयं ज्ञानं गुरुमुखेनोपदिश्य तज्ज्ञानसाधनानि सर्वाणि करणानि प्रचोदयात् प्रचोदयति स्वात्मविषयतया प्रेरयति तस्य सवितुर्देवस्य क्रीडादिगुणसम्पन्नस्य नारायणस्य अनन्याधीनतया तत्तत्त्वाद्व्याप्तत्वात्तद्वरेण्यं सकलगुणाकरतया परममङ्गलं भर्गः ज्योतीरूपं भरणगमनयोगात् सर्वज्ञं वा वपुः ज्ञानादिगुणरचितकरचरणाद्यवयवमिति यावत् धीमहि ध्यायेम। ज्ञानमेव तत्प्रीतिजनकं न कर्मादिकं तस्मात् तच्चिन्तनं कर्त्तव्यमित्यर्थः।

यत्तु केनचिद्वेदसम्मितैवंविधग्रन्थव्याख्यानारम्भसमये प्रजल्पितम्—'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना। आक्षेपश्च समाधानमिति व्याख्यानलक्षणम्॥ अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत्। विप्रकृष्टं च सन्दध्यादानुपूर्व्यं च कल्पयेत्॥ लिङ्गं धातुं विभक्तिं च योजयेच्चानुलोमतः। वाक्यार्थस्यानुसारेण तेषां च प्रत्ययोऽपि च' इति,—तदनुपासितग्रन्थसम्प्रदायवित्सज्जनचरणैरुपेक्षितमिति विदुषां परिषदि न स्वारस्यमाधत्ते। नहि यथा वेदादावकारीत्यत्राकरोदिति पदम् अशक्यनिवेशनं, तथात्राप्यतिरिक्तं पदं सन्त्यज्य हीनमप्रयोज्यं यत एतद्व्याख्यानम्। तल्लक्षणं न भवति, तस्माद्यथास्थितग्रन्थव्याख्यानमेव सज्जनचित्तरञ्जनमिति सन्तोष्टव्यम्। ननु नायं श्लोकार्थः—किन्त्वन्य एव; तथा हि—तं सत्यं धीमहि 'ननु मृत्तिकेत्येव सत्य'मिति मृदादेरपि सत्यत्वं श्रूयते तद्वदस्यापीति तत्राह—परमिति। मृदादेः कार्यापेक्षया सत्यत्वमयन्तु पारमार्थिकः सत्यः "तत्सत्यं स आत्मा" इति श्रुतेः, परमसत्यस्यावाङ्मनोगोचरस्य कथं ध्यातृध्यानध्येयादिव्यवहारगोचरत्वमित्याशङ्क्याह—जन्मादीति। अस्य जगतो जन्मस्थितिभङ्गा यतः परात्सत्यात् तं धीमहीत्यर्थः; 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिसिद्धजगत्कारणत्वरूपेणावाङ्मनोगोचरस्यापि ध्यातृध्यानादिव्यवहारो घटत इति भावः। ननु ब्रह्मणः सिद्धरूपत्वात्प्रमाणान्तरागोचरत्वमतस्तत्र वेदान्तानामनुवादकत्वादप्रामाण्यमित्याशङ्क्याह—अन्वयादिति। वेदान्तानां ब्रह्मण्येवान्वयात्तात्पर्यादित्यर्थः। तथा च श्रुतिस्मृती—'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इति प्रमाणान्तरसिद्धत्वेन ह्यनुवादकत्वं सिद्धमित्यपि ज्ञातव्यम्। न केवलं श्रुत्यन्वयात् स्मृत्यन्वयाच्चेत्याह—इतरतश्चेति। 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे'ति स्मृतितश्चेत्यर्थः। अथवा प्रतिपदोक्तविवक्षितार्थसिद्धये हेतुमाह—अन्वयादितरतश्चेति। अस्ति प्रकाशते इति ब्रह्मणश्च कार्यप्रपञ्चे मृदादेरिव घटादौ समन्वयादितरतः प्रकाशव्यतिरेकेण कदाचिदपि कस्याप्यप्रतिभासान्मृदादिव्यतिरेकेण घटादेरिवेत्यन्वयव्यतिरेकौ दर्शितौ, अथवा ब्रह्मणि कारणापन्ने महदादिकार्य्यदर्शनादन्यथाऽदर्शनादिति सत्तास्थित्योरन्वयव्यतिरेकौ दर्शितौ। ननु तर्हि सांख्यपरिकल्पितं प्रधानमेव जगत्कारणमस्तु, किं ब्रह्मणेति तत्राह—अर्थेष्वभिज्ञ इति। उत्पाद्यसर्वपदार्थेष्वभिज्ञः सः अभितः सर्वतः सर्वमिदं जानातीति एवम्विधस्यैव कारणत्वं नेतरस्य प्रधानस्य जडत्वान्न सर्वज्ञत्वम्। तथा च "यः सर्वज्ञः" इति श्रुतिः; तर्ह्यर्थेष्वभिज्ञानां जीवानामेव जगत्कारणत्वमस्त्वित्याशङ्क्याह—स्वराडिति। स्वयमेव राजत इति स्वराट्, जीवानां परिच्छिन्नज्ञानत्वेन पराधीनत्वान्न स्रष्टृत्वं सम्भवतीत्यर्थः। "एष सर्वेश्वरः एष सर्वलोकपाल" इति श्रुतेः। नन्वीश्वरस्यापि "न तस्य कार्यं करणं च विद्यत" इति श्रुत्या कार्यकारणाद्यभावात् कथं सर्वज्ञत्वमिति तत्राह—तेने ब्रह्मेति। आदिकवये ब्रह्मणे यः ब्रह्म ऋग्वेदादिलक्षणं साङ्गं वेदं हृदा मनसा मनोमात्रेण साधनान्तरनिरपेक्षतया तेने स्वरमात्रावर्णपदवाक्यादिक्रमेण विस्तारितवान्, ब्रह्मण उपाधिभूतां बुद्धिं निर्माय तत्र वेदं प्रकाशितवानित्यर्थः। अथवा हृदोपनिषदा सह सङ्कल्पमात्रेण कार्यकारणसम्बन्धरहितोऽपि भगवान् सर्वान्तर्यामी ब्रह्मादिकार्यकारणसाक्षित्वेन सर्वज्ञ इत्यर्थः। एवं जगत्कारणे सच्चिदानन्दात्मके वेदैकवेद्ये निरवद्ये सर्वेश्वरे परैरुद्भाव्यदोषकलापि नास्तीत्यभिधत्ते—मुह्यन्तीति। यं प्रति सूरयः कपिलादयः शास्त्रप्रणेतारः मुह्यन्तीत्युक्ते तत्प्रणीतशास्त्रस्य निर्मूलत्वेनाप्रामाण्यात्तद्विरोधिग्रन्थो नास्तीत्यर्थः। नानाऽसत्तर्ककलिलान्तःकरणदुराग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये भगवति को नु दुर्घट

इति श्लोके अतः परमसत्यादप्युत्पन्नस्य जगतः कुतः सत्यत्वं ? किन्तु मिथ्यात्वमेवेति दर्शयति— तेजोवारीति। विनिमयः कार्यं- तेजोविनिमयः केशोण्डकादिः, वारिणो विनिमयः हिमकरकादिः, मृदो विनिमयो घटादिः, यथा येन प्रकारेण तथा कारणसत्ता- प्रतीतिव्यतिरेकेण कार्यस्य पृथक्सत्ताप्रतीतिशून्यत्वमेवात्र मिथ्यात्वं, तद्वत्तेजोवारिमृदामपि कारणसत्ताप्रतीतिव्यतिरेकेण कार्य्यस्य पृथक्सत्ताप्रतीत्यभावात् मिथ्यात्वमित्यर्थः। किं च त्रिवृत्कृतानां चोभयेषां दृष्टान्तदार्ष्टान्तिकव्याजेन मिथ्यात्वं कथित- मिति सम्प्रदायविदामभिप्रायः। ननु ब्रह्मणो जगत्कारणत्वे क्रियाकारकादिसम्बन्धात् 'असङ्गो ह्ययं पुरुष' इति विरुद्धमेतेत्यतो वाह—तेजोवारीति।। त्रिसर्गस्त्रयाणां सर्गः तेजोवारिमृदां सर्गः। उपलक्षणं चैतत्—पञ्चभूतानां सृष्टिः यत्र मृषा, कथं ? यथा तेजोवारिमृदां विनिमयो मिथ्या तथा जगदपि मिथ्येत्यर्थः। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः। इदानीमेवंविधप्रपञ्चकारणत्वेन कल्पितमायासम्बन्धनिबन्धनं किञ्चिदपि चिद्रूपपरमसत्यात्मके ईश्वरे स्वदृष्ट्या वस्तुगत्यापि नास्तीति दर्शयति—धाम्नेति। धाम्ना प्रकाशेन स्वेन स्वरूपभूतेनात्मचैतन्येनोपचारतः कारणत्वेन कल्पितेन सदा सर्वदा निरस्तं निराकृतं कुहकं कपटाख्यं येन स तथोक्तः तं सदेति। जीवाद्वैलक्षण्यप्रदर्शनाय अर्थादसङ्गत्वं कूटस्थत्वं चोक्तं, तस्मादेकमेव ब्रह्मोपहितानुपहितभेदेन "द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चैवामूर्तञ्च" इति श्रुत्या प्रतिपाद्यते। तत्र सगुणब्रह्मोपासनाजनितेन ज्ञानेन शुद्धान्तःकरणस्य निर्गुणब्रह्मोपास्तौ बुद्धिरुपतिष्ठते। ततश्च 'सकलं स्वात्मानं पश्यन्नात्मव्यतिरिक्तं किंचिदप्यपश्यन्निर्गुण एवाव- तिष्ठते' इत्येषोऽर्थोऽनेन प्रतिपाद्यते, नापरोऽप्रामाणिक इति तदेतत्। कण्ठशोषणप्रलापज्वलनज्वालातुल्यमिति न परीक्षकाः क्षण- मपि कटाक्षेण प्रेक्षन्ते, पूर्वापरपर्य्यालोचनया स्वोत्प्रेक्षितयुक्तिविरुद्धत्वाच्छ्रुतिस्मृतीनामतात्पर्य्यार्थत्वात् प्रत्यक्षादिप्रमाणप्रहरण- प्रहतशिरस्कत्वादाचार्यैस्तत्र तत्र निराकृतत्वाच्छ्रुत्यादीनां मिथ्यात्वपरत्वे विरोधस्य दर्शितत्वादसदुक्तार्थे बहुप्रमाणसम्भवाद् ग्रन्थबाहुल्यभयान्न तन्निराकरणं प्रपञ्च्यते। न हि अपरस्परसम्भूतं किमन्यत् कामहैतुकम्" इति वदतां सम्प्रदायवित्त्वमिति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीश्रीराधाकृष्णाभ्यां नमः ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥
श्रीमद्भागवतं नौमि यस्यैकस्य प्रसादतः। अज्ञातानपि जानाति सर्वः सर्वागमानपि ॥ २ ॥
श्रीभागवतसन्दर्भान् श्रीमद्वैष्णवतोषणीम्। दृष्ट्वा भागवतव्याख्या लिख्यतेऽत्र यथामति ॥ ३ ॥
यदत्र स्खलितं किञ्चिज्जायतेऽनवधानतः। ज्ञेयं न तत्तत्कर्तॄणां समाहर्त्तुर्ममैव तत् ॥ ४ ॥
येषां प्रोत्साहनेनास्मि प्रवृत्तोऽत्यन्तसाहसे। ते दीनानुग्रहव्यग्राः शरणं मम वैष्णवाः ॥ ५ ॥

अथ श्रीभागवतलोकहिताभिलाषपरतया श्रीभागवतसन्दर्भनामानं ग्रन्थमारभमाणो महाभागवतकोटिबहिरन्तर्दृष्टि- निष्टङ्कितभगवद्भावं निजावतारप्रचारप्रचारितस्वस्वरूपभगवत्पदकमलावलम्बिदुर्लभप्रेमपीयूषमयगङ्गाप्रवाहसहस्रं स्वसम्प्रदाय- सहस्राधिदैवं श्रीश्रीकृष्णचैतन्यदेवनामानं भगवन्तं कलियुगेऽस्मिन् वैष्णवजनोपास्यावतारतयार्थविशेषालिङ्गितेन श्रीभागवत- संवादेन स्तौति—

कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम्। यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥

एकादशस्कन्धस्य कलियुगोपास्यप्रसङ्गे पद्यमिदम्। अस्यार्थविशेषस्तत्रैव दर्श्यते। तन्निर्लितार्थमाह—

अन्तः कृष्णं बहिर्गौरं दर्शिताङ्गादिवैभवम्। कलौ सङ्कीर्तनाद्यैः स्मः कृष्णचैतन्यमाश्रिताः ॥

अथ निजगुरुपरमगुरू स्तौति—

जयतां मथुराभूमौ श्रीलरूपसनातनौ। यौ विलेखयतस्तत्त्वज्ञापकौ पुस्तिकामिमाम् ॥१॥
तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ। दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥२॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम्। पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥३॥
पूर्वं यान्येव वाक्यानि धृतान्यर्थविशेषतः। तानि मूलक्रमेणापि धार्याणि क्रमलब्धये ॥४॥
धार्याण्यर्थविशेषार्थमधृतान्यपि कानिचित्। तत्रेतिशब्दः कर्तव्यः कचिद्व्याख्या च केवला ॥५॥
स्थानञ्च मुहुरङ्काभ्यां ज्ञेयं सन्दर्भवाक्ययोः। तत्राङ्कास्तत आशब्दात् तदङ्कादिर्विवतीष्यताम् ॥६॥
व्याशब्दात् तद्गतव्याख्यागतं तद्वाक्यमीयताम्। तथा पुनश्चेति शब्दादन्यत्रापीति दृश्यताम् ॥७॥
यत्र व्याख्यागतं वाक्यव्याख्यानं तच्छिदाकृते। द्वौ तत्र प्रणवौ लेख्यौ तयोर्मध्यन्तु गृह्यताम् ॥८॥
यः स्कन्धाध्याययोरङ्कः स तु तच्छेदकः स्फुटम्। न तत्र प्रणवोपेक्षापीति सर्वत्र वीक्ष्यताम् ॥९॥

अत्र सर्वग्रन्थार्थं संक्षेपेण दर्शयन्नपि मङ्गलमाचरति—

यस्य ब्रह्मेति संज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ताप्यंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च ।
एकं यस्यैव रूपं विलसति परमे व्योम्नि नारायणाख्यं स श्रीकृष्णो विधत्तां स्वयमिह भगवान् प्रेम तत्पादभाजाम् ॥

अथैवं सूचितानां श्रीकृष्णवाच्यवाचकतालक्षणसम्बन्धतद्भजनलक्षणाभिधेयतत्प्रेमलक्षणप्रयोजनानां निर्णयाय पूर्वं तत्त्वसंदर्भादिषट्सन्दर्भा निरूपिताः । अधुना तु श्रीमद्भागवतक्रमव्याख्यानाय तत्रापि सम्बन्धाभिधेयप्रयोजननिर्णयदर्शनाय च सप्तमः क्रमसन्दर्भोऽयमारभ्यते—

श्रीभागवतनिध्यर्थो टीकादृष्टिरदायि यैः । श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान् ॥ १ ॥
स्वामिपादैर्न यद् व्यक्तं यद् व्यक्तं चास्फुटं क्वचित् । तत्र तत्र च विज्ञेयः सन्दर्भः क्रमनामकः ॥ २ ॥
[अथात्र परिभाषेयं ज्ञातव्या यदपेक्ष्यते । मूलं सटीकमङ्काद्यैः परिच्छेद्यं सहानया ॥
अङ्का वाक्यान्त एवात्र देयाः पद्यान्ततो नतु । बहुपद्यैकवाक्यत्वे गर्भाङ्का बिन्दुमस्तकाः ।
यस्मिन् पद्ये नास्ति टीका तदप्यंकेन योजयेत् । एकपद्यान्यवाक्यत्वे संख्याशब्दास्तु कान्तकाः ॥
बहुपद्यैकवाक्यत्वेऽप्यमी ज्ञेयास्तथाविधाः । यथार्धकं युग्मकञ्च त्रिकमित्याद्युदाहृतिः ॥]

'जन्माद्यस्ये'त्यत्र श्रीश्रीधरस्वामिचरणानामयमभिप्रायः—परं परमेश्वरमिति । न पुनरभेदवादिनामिव चिन्मात्रं ब्रह्मेत्यर्थः, ध्येयध्यातृध्यानभेदावगमात् । सत्यमिति । तदुपलक्षणत्वेन "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तलक्षणमित्यर्थः । "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च" इति श्रुतेः । "बृहत्त्वाद् बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति विष्णुपुराणोक्ताच्चात्रापि शक्तिमत्त्वेन ब्रह्मशब्दस्य परमेश्वरवाचकत्वात् । तत्र सत्यत्वसाधकं—यत्र त्रिसर्गो मृषेति । यत्र यदाश्रयतयेत्यर्थः । अत्र दृष्टान्तः—तेज इति । तद्वद् यत्रारोपित इत्यर्थः । तदारोपकर्तृत्वं चास्माकं जीवानामेवेति लभ्यते । यत्रारोप्यते तच्च परं यद्यचेतनं चेतनं वा स्यात्तदा जीवानामेवारोपकर्तृत्वेन तत्र स्वाज्ञानस्य त्रिवर्गस्य सम्बन्धो न स्यात्, किन्तु जीवेष्वेव मरीचिकादाविव जलादेस्तद्भ्रमहेत्वज्ञानस्य च । किन्त्वत्र तत्तु चेतनमभिज्ञ इति योजयिष्यमाणत्वात् । तत्रैव 'स्वराडि'त्यनेन ज्ञानरूपस्यापि स्वरूपज्ञानेनैव ज्ञातृत्वाङ्गीकाराच्च । ततो यद्व्यष्ट्यंशोपाधिकत्वेन जीवा भ्रान्ताः स्युस्तस्य समष्ट्युपाधित्वेन स तु सुतरां तादृशः स्यादित्याशङ्कामनूद्य सिद्धान्तयति—यत्रेत्यनेनेति । महसेति । स्वतः सिद्धपरमज्ञानशक्तित्वेनेत्यर्थः, तथाग्रे व्याख्यास्यमानत्वात् । स्वरूपमात्रे वाक्ये स्वशब्देनैव चरितार्थता स्यात् । कथञ्चित् तन्मात्रे वाच्येऽपि हेतुत्वलक्षणेन तृतीयार्थेन तच्छक्तित्वमेव बोधयेत् । द्वितीयादीनां प्रातिपदिकार्थ एव विहितत्वात् । तस्य च ज्ञानोपाधिरूपत्वे स्वशब्दवैयर्थ्यं स्यात् । कुहकमत्र मायोपाधिकृतभ्रमपराभवः, "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति श्रीमदर्जुनवचनात् । किन्तु 'यत्रे'त्यनेन लब्धस्य परमेश्वरस्य चिन्मात्रेण स्वरूपांशेन सततानुभूयमानस्वाभेदमेवालम्ब्य भ्रमाधिष्ठानत्वं स्वीकृतं, न तु जीवस्य स्वाभेदमननांशेन । परमेश्वरस्य तु धातुरपि (ध्यातुमपि) प्रार्थनीय । तया स्वानुभवातीतत्वात्तदेकवस्तुत्वं व्याहन्येतेति विवेचनीयम् । अथ तत्तत् सर्वं घटयितुं तटस्थलक्षणम् । जन्माद्यस्य यत इति । न तु मरीचिकादौ जलादिवत् केवलमारोपितं स्वतस्त्वन्यत्र सिद्धं, किन्त्वनादिपरम्परया तत्रैव यदारोपितत्वं तन्मात्रसिद्धत्वाद्यत एवास्य जन्मादीति गम्यते, तद्दृष्टान्तेनैव जन्मादिसिद्धौ 'जन्माद्यस्य यत' इत्यस्य पुनरुक्तत्वापातात् । ततोऽस्य जन्मादौ हेतुः—अन्वयादितरतश्चार्थेष्विति । तत्र प्रथमोऽर्थस्तु अन्वयेन तस्यैव कारणत्वबोधकः, व्यतिरेकेण तदकार्यस्यासत्त्वबोधको ज्ञेयः । अत्र व्यतिरेकपदेनार्थेतरदाक्षेपलब्धम् । तच्च खपुष्पादिरूपमिति । तथा व्याख्यातम् । द्वितीयस्तृतीयश्च तस्य कारणत्वं विश्वस्य कार्यत्वं बोधयतीति । अत्र द्वितीये त्वर्थशब्दः कार्यकारणपरः । कारणस्य स्वावस्थायां कार्यावस्थायाञ्चानुवृत्तित्वम् । कार्याणान्तु परस्परं कारणावस्थायाञ्च व्यावृत्तत्वं ज्ञेयम् । एवं शून्यवादारम्भवादौ परिहृतौ । तथा च बहिर्मुखप्रवृत्त्यर्थं युक्तीः प्रदर्श्य अन्तर्मुखान् प्रति "शास्त्रयोनित्वात्" १।१।३। इति न्यायेन श्रुतीर्दर्शयति—तथा चेति । अत्र च 'यतो वा इमानि भूतानि' इत्यादिवाक्यवत्व्यतिरेकोऽपि ज्ञेयः। कथमसतः सज्जायेतेत्यादि । तत्र यस्य मरीचिकादृष्टान्तेन प्राप्तमचेतनत्वं स्पष्टमेव निवारयन् परमतं प्रधानञ्च प्रत्याचष्टे—तर्हीत्यादिना अभिज्ञ इति । तत्रास्तु तावदचेतनत्वमभि सर्वतो भावेन च तज्ज्ञातृत्वं श्रूयते इत्यर्थः । तत्तत्सर्वविचारात्मकत्वादीक्षणस्य "ईक्षतेर्नाशब्दम्" १।१।५ इत्यस्यायमर्थः—परमतं प्रधानं विश्वकारणं न भवति—न विद्यते शब्दः प्रमाणं यत्र तथाभूतं हि तत् । कुतोऽशब्दत्वं तस्य तत्राह—ईक्षतेरिति । सच्छब्दवाच्यकारणव्यापाराभिधायित्वेन तत्रेक्षधातोः श्रवणात् । ईक्षणञ्च चेतन एव सम्भवति । प्रधानं त्वचेतनमिति । ननु यत्र त्रिसर्ग आरोप्यते तद्भवत्वचेतनं यस्त्वारोपकर्ता जीवः स खलु सर्वारोपकत्वाच्चेतनः सर्वज्ञश्च स्यात् । तस्य च 'बहु स्या' मित्यादिवाक्यं स्वज्ञानकल्पित्वेन स्वप्नद्रव्यवन् स्वाभेदापेक्षयेत्याशङ्क्याह—तर्हि किं जीवः स्यादिति । सिद्धान्तयति—नेत्याहेति । परसिद्धज्ञातत्वेन सर्वज्ञत्वं सर्वस्रष्टृत्वञ्च न स्यात् । तस्मादन्तर्यामिश्रुत्युक्तं तत्सिद्धज्ञानत्वेनारोपणकर्तृत्वमपि तत एव सिद्ध्यतीति कर्तृत्वमपि तस्यैव स्यादिति भावः । तत्रोदाहरणाभासेन विरिञ्चेः स्वतः सिद्धज्ञानत्वमाशङ्क्याह—तर्हि किमिति । सिद्धान्तयति—नेत्याह, तेन इतीति । तदेवं ज्ञानप्रदत्वेन मोक्षप्रदत्वमपि

दर्शितम् । एवं जीवस्य तज्ज्ञानस्य च तस्मादत्यन्तभेदप्राप्तावपि सिद्धान्तितं—'सत्य' मित्यनेनैव, तत्सत्तयैव सर्वसत्तास्वीकारात् । तदेवं सर्वसत्ताप्रदं सर्वाधिष्ठानं सर्वदोषास्पृष्टं स्वरूपसिद्धसर्वज्ञानादिसमवेतं सर्वकर्तृ मोक्षदातृ च सत्यानन्दज्ञानस्वरूपं परं ध्येयमिति वाक्यार्थः ।

स्वतः सिद्धज्ञानादित्वं शारीरकभाष्यादौ च "ईक्षतेर्नाशब्दम्" इत्यत्र स्वीकृतं प्रकृतिक्षोभात् पूर्वमीक्षणानुपपत्त्या । मन्त्रौ चेमावुदाहृतौ—'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स । वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इति । 'न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति च । अत्राद्वैतवादिनः समादधते—'यदि ज्ञेयं स्यात्तदा तस्य ज्ञातृत्वमपि तथा स्यात् , त्रिसर्गस्याज्ञान-कल्पितत्वादज्ञानस्य सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वादज्ञानिनो जीवस्य च तेनाज्ञानेनैव पृथक् प्रतीतत्वात् सत्यत्वं नास्त्येव, ततो ज्ञातृत्वमपि तत्र नास्त्येव, तथा शक्त्यन्तरमपी'ति । वैष्णवास्तु तदभ्युपगमवादेनैव वदन्ति । तर्हि किं मिथ्यैवेदं जीवानां भातीत्यपि ज्ञानं तस्याव्यभिचारि स्यात् । येन च ज्ञानेन मृषा निरस्यते तस्य तु सत्यत्वमेव स्यात् । किञ्च विश्वकार्यान्यथानुपपत्त्या यथा परमकारणरूपं तदभ्युपगम्यते तथा तच्छक्तिरपि स्वाभाविक्येवाभ्युपगम्यते । कार्यविशेषोत्पत्तौ किञ्चित्कारणत्वेनैव कारणतया वस्तुविशेषाङ्गीकारात् किञ्चित्कारणत्वमेव स्वाभाविकशक्तिरिति । तदेवमज्ञानातिरिक्तस्वाभाविकज्ञानेन स्वगत-विशेषत्वे प्राप्ते 'स्वाभाविकी ज्ञानबलक्रिया चे'ति प्रतिपादितम् । तदेव स्वरूपशक्तिरिति सैव सर्वं भगवत्तत्त्वं साधयेत् । 'तेने ब्रह्म हृदे'ति व्यञ्जितमस्यैव महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादिश्रुत्यन्तरम् । तस्य च निःश्वासस्याप्राकृतत्व-व्यञ्जकम् "नासदासीन्नो सदासीत् तम आसीत्" इति श्रुत्यन्तरञ्च समुदितं सत्तस्याप्राकृतमूर्तित्वमपि व्यञ्जयति । तत्तन्निषेधस्तु प्राकृतपरिच्छिन्ननिषेधपर एव । यथोक्तं द्वितीयस्कन्धे वैकुण्ठवर्णने—'न यत्र माये'ति, दशमे च—'दर्शयामास लोकं स्वं गोपानां तमसः परम्' इति ।

अत एवात्मारामाणामपि तच्छक्तिवैभवानुभवे परमानन्दविशेषो जायते । 'आत्मारामाश्च मुनय' इत्यादिभ्यः । अतो जीवानां तादृशशक्त्यैव तदीयरश्मिस्थानीयत्वेन नित्यसिद्धानां तन्मायावृतज्ञानानां तज्ज्ञानसिद्धये स एव ध्येय इति । 'तं *धीमही'त्यादिप्रमाणवचनेन गायत्रीशब्देन तत्सूचकतदव्यभिचारि'धीमहि'पदसंवलिततदर्थं एवेष्यते । सर्वेषामपि मन्त्राणामादि-*रूपायास्तस्याः साक्षाल्लिखनानर्हत्वात् । तदर्थता च 'जन्माद्यस्य यत' इति प्रणवार्थः सृष्ट्यादिशक्तिमत्तत्त्ववाचित्वात् । 'यत्र त्रिसर्गो मृषे'ति व्याहृतित्रयार्थः । उभयत्रापि लोकत्रयस्य तदनन्यत्वेन विवक्षितत्वात् । 'स्वराडि'ति सवितृप्रकाशकपरमतेजोवाचि । 'तेने ब्रह्म हृदे'ति बुद्धिवृत्तिप्रेरणाप्रार्थना सूचिता । तदेवं कृपया स्वाध्ययनाय बुद्धिवृत्तिं प्रेरयतादिति भावः । तच्च तेजस्तत्र 'अन्तस्तद्धर्मोपदेशात्' (१ । १ । २०) इत्यादि । संप्रतिपन्नं यन्मूर्त्तं तदनाद्यनन्तमूर्तिमदेव ध्येयमिति । एवमग्निपुराणे गायत्र्यर्थः श्रीभगवानेवाभिमतः । तद्वचनानि तत्त्वसन्दर्भे दृश्यानि । अत्रैवाग्रे दर्शयितव्यानि । 'धर्मविस्तर' इत्यत्र धर्मशब्दः परमधर्मपरः, "धर्मः प्रोज्झितकैतवोऽत्र परम" इत्यत्र प्रतिज्ञातत्वात् । स च भगवद्ध्यानादिलक्षण एवेति व्यक्तीभविष्यति । वृत्रासुरवधोपेतमिति । तस्य परमभागवतत्वात्तद्वधरूपस्य चरितस्य श्रीभागवतलक्षणत्वेन धृतिः । पुराणान्तरे वामनसंज्ञे, हयग्रीवब्रह्मविद्येति वृत्रासुरवध-साहचर्येण नारायणवर्मैवोच्यते । 'हयग्रीव' शब्देन ह्यत्राश्वशिरा दधीचिरेव लभ्यते । तेनैव च प्रवर्त्तिता नारायणवर्माख्या ब्रह्मविद्या । तस्याश्वशिरस्त्वं षष्ठे—'यद्वा अश्वशिरोनामे'त्यत्र प्रसिद्धं नारायणवर्मणो ब्रह्मविद्यात्वञ्च । 'एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्याञ्च सत्कृतौ सत्यशङ्कितः ॥' इत्यत्र टीकोत्थापितवचनेन चेति । एवं स्कान्दप्रभासखण्डे च—यत्राधिकृत्य गायत्रीमित्यादि । 'सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः । तद्वृत्तान्तोद्भवं लोके तच्च भागवतं स्मृतम् ॥' लिखित्वा तच्चे-त्यादि । अष्टादशसहस्राणीत्यादीति । श्रीमद्भागवतस्य श्रीमद्भगवत्प्रियत्वेन भागवताभीष्टत्वेन च परमसात्त्विकत्वमाह—पद्मपुराणे च इति । तत्रैव च श्रीगौतमस्याम्बरीषं प्रति प्रश्नः—'पुराणं त्वं भागवतं पठसे पुरतो हरेः । चरितं दैत्यराजस्य प्रह्लादस्य च भूपते !' ॥ तत्र वञ्जुलीमाहात्म्ये तस्य तस्मिन्नुपदेशः—'रात्रौ तु जागरः कार्यः श्रोतव्या वैष्णवी कथा । गीता नामसहस्रञ्च पुराणं शुकभाषितम् ॥ पठितव्यं प्रयत्नेन हरेः सन्तोषकारणम्' इति । स्कान्दप्रह्लादसंहितायां द्वारिकामाहात्म्ये—'श्रीमद्भागवतं भक्त्या पठते हरिसन्निधौ । जागरे तत्पदं याति कुलवृन्दसमन्वितः' इति । श्रीतत्त्ववादिधृते गारुडवचने च पूर्णः सोऽयमतिशयः—'अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः । पुराणानां सामरूपः साक्षाद्भगवतोदितः । द्वादशस्कन्धयुक्तोऽयं शतविच्छेदसंयुतः । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध' इति । ब्रह्मसूत्राणामर्थः तेषामकृत्रिमभाष्यभूत इत्यर्थः । तस्मात्तद्-भाष्यभूते स्वतःसिद्धे तस्मिन् सत्यर्वाचीनमन्यदन्यद्भाष्यं स्वस्वकपोलकल्पितं तदनुगतमेवादरणीयमिति गम्यते । भारतार्थस्य विनिर्णयो यत्र सः भगवत्येव तात्पर्यात्तस्यापि यद्वा भारतस्यार्थविनिर्णयो वेदार्थतुल्यत्वेन विशिष्य निर्णयो यत्रेति । गायत्रीभाष्य-रूपोऽसाविति । यत्तु द्वादशे 'ॐनमस्ते' इत्यादिगद्येषु तदर्थत्वेन सूर्यः स्तुतः तत्परमात्मदृष्ट्यैव, न तु स्वातन्त्र्येणेत्यदोषः । यथैवाग्रे श्रीशौनकवाक्यम्—'ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरे'रिति । न चास्य भर्गस्य सूर्यमण्डलमात्राधिष्ठानत्वं; मन्त्रे वरेण्यशब्देनात्र च ग्रन्थे परशब्देन पारमैश्वर्य्यपर्य्यन्तताया दर्शितत्वात् । तदेवमग्निपुराणेऽप्युक्तम्—'ध्यानेन पुरुषोऽयञ्च द्रष्टव्यः

सूर्यमण्डले। सत्यं सदाशिवं ब्रह्म तद्विष्णोः परमं पदम्' इति। श्रीमद्भागवताभिध इति। भागवतत्वं भगवत्प्रतिपादकत्वम्, श्रीमत्त्वं भगवन्नामादेरिव तादृशस्वाभाविकशक्तिमत्त्वम्। नित्ययोगे मतुप्। अतः समस्ततयैव निर्दिश्य नीलोत्पलवत् तन्नामत्वमेव बोधितम्; अन्यथा त्वविमृष्टविधेयांशतादोषः स्यात्। अत एवोक्तं श्रीमद्भागवते—'महामुनिकृत' इति। गारुडे च "ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध" इति, स्कान्दे च—"श्रीमद्भागवतं भक्त्या पठते हरिसन्निधौ" इति। टीकाकृद्भिरपि 'श्रीमद्भागवताभिध' इति। अतः कश्चित् केवलभागवताख्यत्वन्तु सत्यभामा भामेतिवत्। पुराणानां सामरूप इति। वेदेषु सामवत् पुराणेषु श्रेष्ठ इत्यर्थः। साक्षाद्भगवतोदित इति। 'कस्मै येन विभाषितोऽय'मित्युपसंहारवाक्यानुसारेण ज्ञेयम्। 'शतविच्छेदसंयुत' इति विस्तरभिया न विव्रियते संवत्सरप्रदीपधृतस्कान्दवचने। तदेवं श्रीमद्भागवतं सर्वशास्त्रचक्रवर्तिपदमाप्तमिति स्थिते 'हेमसिंहासनारूढ'मिति तैर्यद् व्याख्यातं तदेव युक्तम्। अतः श्रीमद्भागवतस्यैवाभ्यासावश्यकत्वं श्रेष्ठत्वञ्च स्कान्दे निर्णीतम्—'शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसंग्रहैः। न यस्य तिष्ठते गेहे शास्त्रं भागवतं कलौ॥ कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ। गृहे न तिष्ठते यस्य स विप्रः श्वपचाधमः॥ यत्र यत्र भवेद्विप्रः शास्त्रं भागवतं कलौ। तत्र तत्र हरिर्याति त्रिदशैः सह नारद॥ यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने! अष्टादशपुराणानां फलं प्राप्नोति मानव' इति॥ तदेवं परमार्थविवित्सुभिः श्रीभागवतमेव साम्प्रतं विचारणीयमिति स्थितम्। अत एव सत्स्वपि नानाशास्त्रेष्वेतदेवोक्तम्—'कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः' इति। अर्कतारूपकेण तद्विना नान्येषां सम्यग्वस्तुप्रकाशकत्वमिति प्रतिपाद्यते। यस्यैव श्रीमद्भागवतस्य भाष्यभूतं श्रीहयशीर्षपञ्चरात्रे शास्त्रकथनप्रस्तावे गणितं तन्त्र भागवतभिधं तन्त्रम्। यस्य साक्षात् श्रीहनुमद्भाष्यवासनाभाष्यसम्बन्धोक्तिविद्वत्कामधेनुतत्त्वदीपिकाभावार्थदीपिका परमहंसप्रियाशुकहृदयादयो व्याख्याग्रन्थास्तथा मुक्ताफलहरिलीलाभक्तिरत्नावल्यादयो निबन्धाश्च विविधा एव तत्तन्मतप्रसिद्धमहानुभावकृता विराजन्ते, यदेव च हेमाद्रिग्रन्थस्य दानखण्डे पुराणदानप्रस्तावे मत्स्यपुराणीयतल्लक्षणधृत्या प्रशस्तम्। परिशेषखण्डस्य कालनिर्णये च कलियुगधर्मनिर्णये "कलिं सभाजयन्त्यार्या" इत्यादिकं यद्वाक्यत्वेनोत्थाप्य यत्प्रतिपाद्यधर्म एव कलावङ्गीकृतः। संवत्सरप्रदीपे च तत्कर्त्रा 'शतशोऽथ सहस्रैश्चे'त्यादिकं प्राग्दर्शितस्कान्दवचनजातमुत्थाप्य सर्वकलिदोषतः पावित्र्याय कतिचिच्छ्रीमद्भागवतवचनानि लेख्यानीति लिखितानि। अत एव सर्वगुणयुक्तत्वमस्यैव दृष्टं—'धर्मः प्रोज्झितकैतवः' इत्यादौ 'वेदाः पुराणं काव्यञ्च प्रभुर्मित्रं प्रियेव च। बोधयन्तीति हि प्राहुस्त्रिवृद्भागवतं स्मृतम्' इति। मुक्ताफले हेमाद्रिकारवचने चेति—'मत्स्यादीनां यत्पुराणाधिक्यं श्रूयते तत्त्वापेक्षिक'मिति॥

अथ स्वव्याख्या—जन्माद्यस्येति। अत्र पूर्वार्द्धस्यार्थः—'अर्थोऽयं ब्रह्मसूत्राणा'मिति गारुडोक्तेरस्य महापुराणस्य ब्रह्मसूत्राकृत्रिमभाष्यात्मकत्वात् प्रथमं तदुपादायैवावतारः। तत्र पूर्वम् "अथातो ब्रह्मजिज्ञासा" इति व्याचष्टे—तेजोवारिमृदामित्यर्द्धेन। योजनायां प्राथमिकत्वादस्य पूर्वत्वम्। अत्र 'ब्रह्मजिज्ञासे'ति व्याचष्टे—परं धीमहीति। परं श्रीभगवन्तं धीमहि ध्यायेम। तदेवं मुक्तप्रग्रहया योगवृत्त्या बृहत्त्वात् ब्रह्म यत् यत् सर्वात्मकं तद्बहिश्च भवति, तत्तु निजरश्म्यादिभ्यः सूर्य इव सर्वेभ्यः परमेव स्वतो भवतीति मूलरूपभगवत्प्रदर्शनाय परपदेन ब्रह्मपदं व्याख्यायते, तच्चात्र भगवानेवेत्यभिमतं, पुरुषस्य तदंशत्वात् निर्विशेषब्रह्मणो गुणादिहीनत्वात्। उक्तं हि श्रीरामानुजाचार्यचरणैः—'सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः प्रवृत्तः, बृहत्त्वञ्च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्यार्थः, स च सर्वेश्वर एवे'ति। उक्तञ्च प्रचेतोभिः—'न ह्यन्तो यद्विभूतीनां सोऽनन्त इति गीयत' इति। अत एव विविधमनोहरानन्ताकारत्वेऽपि तत्तदाकाराश्रयपरमाद्भुतमुख्याकारत्वमपि तस्य व्यञ्जितम्। तदेवं मूर्त्तत्वे सिद्धे तेनैव परत्वेन तस्य विष्ण्वादिरूपकभगवत्त्वमेव सिद्धं तस्यैव ब्रह्मशिवादिपरत्वेन दर्शितत्वात्। अत्र जिज्ञासेत्यस्य व्याख्या—धीमहीति। यतस्तज्जिज्ञासायास्तात्पर्य्यं तद्ध्यान एव। तदुक्तमेकादशे स्वयं भगवता 'शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि। श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षति' इति।

'ततो धीमही'त्यनेन (श्रीरामानुजमतं) जिज्ञासापदं निदिध्यासनपरमेवेति स्वीयत्वेनाङ्गीकरोति श्रीभागवतनामा सर्ववेदादिसाररूपोऽयं ग्रन्थ इत्यायातम्। 'धीमही'ति बहुवचनं कालदेशपरम्परास्थितस्य सर्वस्यापि तत्कर्त्तव्यताभिप्रायेण। अनन्तकोटिब्रह्माण्डान्तर्यामिणां पुरुषाणामंशीभूते भगवत्येव ध्यानस्य विधानात्। अनेनैकजीववादजीवनभूतो विवर्तवादोऽपि निरस्तः। ध्यायतिरपि भगवतो मूर्त्तत्वमेव बोधयति, ध्यानस्य मूर्त एवोत्कृष्टार्थत्वात्। सति च सुसाध्ये पुमर्थोपाये दुस्साध्यस्य पुरुषाप्रवृत्त्या स्वत एवापकर्षात् तदुपासकस्यैव युक्ततमत्वनिर्णयाच्च। तथा च श्रीगीतोपनिषदः—'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते' इति। इदमेव च विवृतं ब्रह्मणा—'श्रेयःसृतिं भक्तिमुदस्य ते विभो! क्लिश्यन्ति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम्' इति।

अत एवास्य ध्येयस्य स्वयं भगवत्त्वमेव साधितं शिवादयश्च व्यावृत्ताः। तथा 'धीमही'ति लिङा द्योतिता पृथगनुसन्धानबहिःप्रार्थनाध्यानोपलक्षितं भगवद्भजनमेव परमपुरुषार्थत्वेन व्यनक्ति—ततो भगवतस्तु तथात्वं स्वयमेव सुव्यक्तम्। ततश्च

यथोक्तपरममनोहरमूर्त्तित्वमेव लक्ष्यते। तथा च 'साम्नि बृहद्वामं बृहत् पार्थिवं बृहदन्तरीक्षं बृहद्दिवं बृहद्वामं बृहद्भ्यो वामवामेभ्यो वामम्' इति। तदेवं ब्रह्मजिज्ञासेति व्याख्यातम् 'अथात' इत्यस्य व्याख्यामाह—सत्यमिति। यतस्तत्र 'अथ' शब्द आनन्तर्ये, 'अतः' शब्दः पूर्ववृत्तस्य हेतुभावे वर्त्तते तस्मादथेति स्वाध्यायक्रमतः प्राक्प्राप्तकर्मकाण्डपूर्वमीमांसया सम्यक् कर्मज्ञानादनन्तरमित्यर्थः। 'अत' इति तत्क्रमतः समनन्तरप्राप्तब्रह्मकाण्डे तूत्तरमीमांसया निर्णेयसम्यगर्थेऽधीतचरात् यत्किञ्चिदनुसंहितार्थात्। कुतः ? कुतश्चिद्वाक्याद्धेतोरित्यर्थः। पूर्वमीमांसायाः प्रकृतार्थविरोधितर्कोपन्यासरूपपूर्वपक्षत्वेन उत्तरमीमांसात्मके सम्यगर्थनिर्णायकसिद्धान्तानुकूलतर्कोपन्यासरूपोत्तरपक्षेऽस्मिन्नवश्यापेक्षत्वादविरुद्धांशेन सहायत्वात् कर्मणः शान्त्यादिलक्षणसत्त्वशुद्धिहेतुत्वाच्च तदन्तरमित्येव लभ्यम्।

वाक्यानि चैतानि 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति', 'न स पुनरावर्त्तत इति स चानन्त्याय कल्पत' इति, 'निरञ्जनः परमं साम्यमुपैती'ति, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति च। तदेतदुभयं विवृतं (श्रीरामानुजेन) शारीरके मीमांसापूर्वभागजातस्य कर्मणोऽल्पास्थिरफलत्वं तदुपरितनभागावसेयस्य ब्रह्मज्ञानस्य त्वनन्ताक्षयफलत्वं श्रूयते। अतः पूर्ववृत्तात् कर्मज्ञानादनन्तरं ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह सर्वादिवृत्तिकारो भगवान् बौधायनः— 'वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषे'ति।

एतदेव पुरञ्जनोपाख्याने च दक्षिणवामकर्णयोः पितृहूदेवहूशब्दनिरुक्तौ व्यक्तमस्ति—'तदेवं सम्यक् कर्मकाण्डज्ञानादनन्तरं ब्रह्मकाण्डगतेषु केषुचिद्वाक्येषु स्वर्गाद्यानन्दस्य वस्तुविचारेण दुःखरूपत्वव्यभिचारिसत्ताकत्वज्ञानपूर्वकं ब्रह्मणस्त्वव्यभिचारिपरमानन्दत्वेन सत्यत्वज्ञानमेव ब्रह्मजिज्ञासायां हेतु'रिति। 'अथात' इत्यस्यार्थे लब्धे तन्निर्गलितार्थमेवाह—सत्यमिति। सर्वसत्तादावव्यभिचारिसत्ताकमित्यर्थः, 'परम्' इत्यनेनान्वयात्। 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र श्रुतौ च 'ब्रह्म' इत्यनेन तदेव मन्यस्व तदिच्छाधीनसत्ताकत्वेन व्यभिचारिसत्ताकत्वमायाति। तदेतदवधिव्यभिचारिसत्ताकमेव ध्यायन्तो वयम्, इदानीं तु अव्यभिचारिसत्ताकं ध्यायेमेति भावः। अथ परत्वमेव व्यनक्ति—धाम्नेति। 'धाम'शब्देनात्र प्रभाव उच्यते प्रकाशो वा "गृहदेहत्विट्प्रभावा धामानि' इत्यमरादिनानार्थवर्गात् न तु स्वरूपम्। तथा 'कुहक'शब्देनात्र प्रतारणकृदुच्यते, तच्च जीवस्वरूपावरणविक्षेपकारित्वादिना मायावैभवं ज्ञेयम्। तदुक्तम्—मायां व्युदस्य चिच्छक्त्येति। तस्या अपि शक्तेरागन्तुकत्वे 'स्वेने'त्यस्य वैयर्थ्यं स्यात्। स्वस्वरूपेणेत्येव व्याख्याते तु स्वेनेत्यनेनैव चरितार्थता स्यात्। यथाकथञ्चित् तथा व्याख्यानेऽपि कुहकनिरसनलक्षणा शक्तिरेवापद्यते। सा च साधकतमतारूपा तृतीयया व्यक्तेति। एतेन मायातत्कार्यविलक्षणं यद्वस्तु तत्तस्य स्वरूपमिति स्वरूपलक्षणमपि गम्यम्। तच्च 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति 'नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतिप्रसिद्धमेव, एतच्छ्रुतिलक्षकमेव च सत्यमिति विन्यस्तम्। तदेवं स्वरूपशक्तिश्च साक्षादेवोपक्रान्ता। अतः सुतरामेवास्य भगवत्त्वं स्पष्टम्। अथ सत्यत्वे युक्तिं दर्शयति—यत्रेति। ब्रह्मत्वात् सर्वत्र स्थिते वासुदेवे भगवति यस्मिन् स्थितस्त्रयाणां गुणानां भूतेन्द्रियदेवतात्मको यस्यैवेशितुः सर्गोऽप्ययममृषा शुक्त्यादौ रजतादिकमिवारोपितो न भवति, किन्तु 'यतो वा इमानी'ति श्रुतिप्रसिद्धे ब्रह्मणि यत्र सर्वदा स्थितत्वात्।

'संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्'' (२।४।२०) इति न्यायेन यदेककर्तृकत्वाच्च सत्य एव। तत्र दृष्टान्तेनाप्यमृषात्वं साधयति—तेजआदीनां विनिमयः परस्परांशव्यत्ययः परस्परस्मिन्नंशेनावस्थितिरित्यर्थः। स यथा मृषा न भवति किन्तु यथैवेश्वरनिर्माणं तथेत्यर्थः। 'इमास्तिस्रो देवतास्त्रिवृदेकैका भवति। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यत् शुक्लं यदपां यत् कृष्णं तदन्नस्ये'ति श्रुतेः।

तदेवमर्थस्यास्य श्रुतिमूलत्वात् कल्पनामूलस्त्वन्योऽर्थः स्वत एव परास्तः। तत्र च सामान्यतया निर्दिष्टानां तेजआदीनां विशेषत्वे संक्रमणं न शाब्दिकानां हृदयमध्यारोहति। यदि च तदेवामंस्यत तदा 'वार्यादीनि मरीचिकादिषु यथे'त्येवावक्ष्यत। किञ्च तन्मते ब्रह्मतस्त्रिसर्गस्य मुख्यं जन्म नास्ति किन्त्वारोप एव जन्मेत्युच्यते, स पुनर्भ्रमादेव भवति, भ्रमश्च सादृश्यावलम्बी, सादृश्यन्तु कालभेदेनोभयमेवाधिष्ठानं करोति; रजतेऽपि शुक्तिभ्रमसम्भवात्। न चैकात्मकं भ्रमाधिष्ठानं, बह्वात्मकन्तु भ्रमकल्पितमित्यस्ति नियमः। मिथोमिलितेषु विदूरवर्तिधूमपर्वतवृक्षेष्वखण्डमेघभ्रमसम्भवात्। तदेवं प्रकृतेऽप्यनादित एव त्रिसर्गः प्रत्यक्षं प्रतीयते। ब्रह्म च चिन्मात्रतया स्वत एव स्फुरदस्ति। तस्मादनाद्यमायाक्रान्तस्य जीवस्य यथा सद्रूपतासादृश्येन ब्रह्मणि त्रिसर्गभ्रमः स्यात्, तथा त्रिसर्गेऽपि ब्रह्मभ्रमः कथं न कदाचित् स्यात् ?। ततश्च ब्रह्मण एवाधिष्ठानत्वमित्यनिर्णये सर्वनाशप्रसङ्गः। ततश्च श्रुतिमूल एव व्याख्याने सिद्धे सोऽयमभिप्रायः—यत्र हि यन्नास्ति किन्त्वन्यत्रैव दृश्यते, तत्रैव तदारोपः सिद्धः। ततश्च वस्तुतस्तदयोगात् तत्र तत्सत्तया तत्सत्ता कर्तुं न शक्यत एव। त्रिसर्गस्य तु तच्छक्तिविशिष्टात् भगवतो मुख्यवृत्त्यैव जातत्वेन श्रुतत्वात् तद्व्यतिरेकेण व्यतिरेकात् तत्रैव सर्वात्मके सोऽस्ति। ततस्तस्मिन् न चारोपितश्च। आरोपस्तु तथापि 'धाम्ने'त्यादिरीत्यैवाचिन्त्यशक्तित्वात् तेन लिप्तत्वाभावेऽपि तच्छङ्कारूप एव। तथा च 'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा' इत्यनुसारेण

तत्सत्तया तत्सत्ता भवति। ततो भगवतो मुख्यं सत्यत्वं, त्रिसर्गस्य च न मृषात्वमिति। तथा च श्रुतिः–'सत्यस्य सत्यमिति यथा प्राणो वै सत्यं तेषामेष सत्य'मिति प्राणशब्दोदितानां स्थूलसूक्ष्मभूतानां व्यवहारतः सत्यत्वेनाधिगतानां मूलकारणभूतं परमसत्यं भगवन्तं दर्शयतीति। अथ तमेव तटस्थलक्षणेन च तथा व्यञ्जयन् विशदार्थतया ब्रह्मसूत्राणामेव विवृतिरियं संहितेति, बुबोधयिषया च तदनन्तरं सूत्रमेव प्रथममनुवदति—जन्माद्यस्य यत इति। जन्मादीति सृष्टिस्थितिप्रलयं तद्गुणसंविज्ञानो बहुव्रीहिः। अस्य विश्वस्य ब्रह्मादिस्तम्बपर्यन्तानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यविविधविचित्ररचनारूपस्य यतो यस्मात् अचिन्त्यशक्त्या स्वयमुपादानरूपात् कर्त्रादिरूपाच्च जन्मादि तं परं धीमहीत्यन्वयः।

अत्र विषयवाक्यञ्च–'भृगुर्वै वारुणिर्वरुणं पितरमुपससार–अधीहि भगवो ब्रह्मे'ति आरभ्य 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मे'ति 'तत् तेजोऽसृजते'त्यादि च। जन्मादिकमिहोपलक्षणं, न तु विशेषणं; ततस्तद्ध्याने तन्न प्रविशति, किन्तु शुद्ध एव सन्ध्येय इति। किञ्चात्र प्रागुक्तविशेषणविशिष्टविश्वजन्मादेस्तादृशहेतुत्वेन सर्वशक्तित्वं सत्यसङ्कल्पत्वं सर्वज्ञत्वं सर्वेश्वरत्वं च तस्य सूचितम्। 'यः सर्वः सर्ववित् यस्य ज्ञानमयं तपः। यः सर्वस्य वशी'त्यादिश्रुतेः। तथा परत्वेन निरस्ताखिलहेयप्रत्यनीकस्वरूपत्वं ज्ञानाद्यनन्तकल्याणगुणत्वञ्च सूचितम्। "न तस्य कार्यं करणञ्च विद्यत" इत्यादिश्रुतेः।

ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति, तन्मते "ब्रह्मजिज्ञासा जन्माद्यस्य यत" इत्यसङ्गतं स्यात्, 'निरतिशयं बृहत् बृंहणञ्चे'ति निर्वचनात् 'तच्च ब्रह्म जगज्जन्मादिकारण'मिति। वचनाच्च एवमुत्तरेष्वपि सूत्रेषु सूत्रोदाहृतश्रुतिगणेषु चेक्षणान्वयदर्शनात् सूत्राणि सूत्रोदाहृतश्रुतयश्च नात्र प्रमाणम्। तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वात् न निर्विशेषवस्तुनि प्रमाणम्। जगज्जन्मादिभ्रमो यतस्तद्ब्रह्मेति स्वोत्प्रेक्षापक्षे च न निर्विशेषवस्तुसिद्धिः भ्रममूलमज्ञानमज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात्। साक्षित्वं हि प्रकाशैकरसतयोच्यते। प्रकाशत्वन्तु जडाद्व्यावर्त्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति। तथा सति सविशेषत्वम्। तदभावे प्रकाशतैव न स्यात् तुच्छतैव स्यात्। किञ्च 'तेजो वारिमृदा'मित्यनेनैव तेषां विवक्षितं सेत्स्यतीति 'जन्माद्यस्य यतः' (१।१।२) इत्यप्रयोजकं स्यात्।

अतस्तद्विशेषवत्त्वे लब्धे स च विशेषः शक्तिरूप एव शक्तिश्चान्तरङ्गा बहिरङ्गा तटस्था चेति त्रिधा दर्शिता। तत्र विकारात्मकेषु जगज्जन्मादिषु साक्षाद्धेतुता बहिरङ्गाया एव स्यात् इति सा मायाख्या चोपक्रान्ता तटस्था च वयं 'धीमही'त्यनेन। अथ यद्यपि भगवतोंऽशात् तदुपादानभूतप्रकृत्याख्यशक्तिविशिष्टात् पुरुषादेवास्य जन्मादि तथापि भगवत्येव तद्धेतुता पर्यवस्यति समुद्रैकदेशे यस्य जन्मादि तस्य समुद्रत एव जन्मादीतिवत्। तथोक्तम्–'प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम्' इति। तस्य भगवतो 'जन्माद्यस्य यत' इत्यनेनापि मूर्तत्वमेव लक्ष्यते। यतो मूर्तस्य जगतो मूर्तिशक्तेर्निधानरूपता दृशानन्तपरशक्तीनां निधानरूपोऽसावित्याक्षिप्यते, तस्य परमकारणत्वाङ्गीकारात्। न च तस्य मूर्त्तत्वे सत्यन्यतो जन्मापतेत् अनवस्थापत्तेरेकस्यैवादित्वेनाङ्गीकारात् 'सांख्यानामव्यक्तस्येव' 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप' इति श्रुतिनिषेधात् अनादिसिद्धयाप्राकृतस्वाभाविकमूर्तित्वेन तस्य तत्प्रसिद्धेश्च। तदेवं मूर्तत्वे सिद्धे स च मूर्तो विष्णुनारायणादिसाक्षाद्रूपकः श्रीभगवानेव नान्यः। तथा च 'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥' इत्यादिकं तत्प्रतिपादकं सहस्रनामादौ। तत्रैव तु यथोक्तम्–'अनिर्देश्यवपुः श्रीमानि'ति। एवञ्च स्कान्दे 'स्रष्टा पाता च संहर्त्ता स एको हरिरीश्वरः। स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते॥ एकदेशक्रियावत्त्वान्न तु सर्वात्मनेरितम्। सृष्ट्यादिकं समस्तन्तु विष्णोरेव परं भवेत्' इति।

महोपनिषदि च—'स ब्रह्मणा सृजति स रुद्रेण विलापयति'इत्यादिकम्। अत एव विवृतम्–'निमित्तं परमीशस्य विश्वसर्गनिरोधयोः। हिरण्यगर्भः सर्वश्च कालस्यारूपिणस्तत' इति॥ तत्र यो रूपरहितः कालः कालशक्तिस्तस्य निमित्तमात्रत्वमिति व्यधिकरण एव षष्ठी। तथा 'आद्योऽवतारः पुरुषः परस्ये'त्यादि, 'यदंशतोऽस्य स्थितिजन्मनाशा' इत्यादि च। तदेवमत्रापि तथाविधमूर्तिर्भगवानेवोपक्रान्तः। तदेवं तटस्थलक्षणेन परं निर्धार्य तदेव लक्षणं ब्रह्मसूत्रे 'शास्त्रयोनित्वात्' (१।१।३) 'तत्तु समन्वयात्' (१।१।४) इत्येतन्सूत्रद्वयेन स्थापितमस्ति। तत्र पूर्वसूत्रस्यार्थः कुतो ब्रह्मणो जगज्जन्मादिहेतुत्वं तत्राह–'शास्त्रं योनिर्ज्ञानकारणं यस्य तत्त्वात् यतो वा इमानि'त्यादिशास्त्रप्रमाणकत्वादिति। नात्र दर्शनान्तरवत् तर्कप्रमाणकत्वं तर्काप्रतिष्ठानादत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयत्वाद् ब्रह्मणश्चेति भावः। वैशेषिकाणान्त्वविरोधाध्याये तर्काः–'लोकवत्तु लीलाकैवल्यम्' (२।१।३३) इत्यादिना निराकरिष्यन्ते। अत्र तर्काश्चैवम्–ईश्वरः कर्त्ता न भवति; प्रयोजनशून्यत्वात्, मुक्तात्मवत्, तनुभुवनादिकं जीवकर्तृकं कार्यत्वाद् घटवत्, विमतिविषयः कालो न लोकशून्यः; कालत्वात्, वर्त्तमानकालवदित्यादि। तदेवं दर्शनान्तरानुगुण्येनेश्वरानुमानं दर्शनान्तरप्रातिकूल्यपराहतमिति शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः। शास्त्रन्तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविजातीयसार्वज्ञ्यसत्यसंकल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारविचित्रगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति

न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धः। अत एव स्वाभाविकानन्तनित्यमूर्त्तिमत्त्वमपि तस्य सिद्ध्यति। अथोत्तरसूत्रस्यार्थः—ब्रह्मणः कथं शास्त्रप्रमाणकत्वं तत्राह—तत्त्विति। 'तु'शब्दः प्रसक्ताशङ्कानिवृत्त्यर्थः। तच्छास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव, कुतः? समन्वयात्। अन्वयव्यतिरेकाभ्यामुपपादनं समन्वयस्तस्मात्। तत्रान्वयः—'सत्यं ज्ञानमनन्तं ब्रह्मे'ति 'आनन्दो ब्रह्मे'ति 'एकमेवाद्वितीयम् ब्रह्मे'ति 'तत् सत्यं' 'स आत्मे'ति 'सदेव सोम्येदमग्र आसीदि'ति 'ब्रह्म वा इदमेकमेवाग्र आसीदि'ति 'आत्मा वा इदमेक एवाग्र आसीदि'ति 'आत्मैवेदमग्र आसीत्' 'पुरुषविध इति पुरुषो ह वै नारायण इति एको ह वै नारायण आसीदि'ति 'तदैक्षत बहु स्यां प्रजायेये'ति 'तस्माद् वा एतस्मादात्मन आकाशः सम्भूत' इति 'तत्तेजोऽसृजते'ति 'यतो वा इमानि भूतानि जायन्त' इति 'पुरुषो ह वै नारायणोऽकामयत' 'अथ नारायणादजोऽजायत' 'यतः प्रजाः सर्वाणि भूतानि', 'नारायणः परं ब्रह्म तत्त्वं नारायणः परम्। ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' इत्यादिषु।

अथ व्यतिरेकः 'कथमसतः सज्जायेते'ति 'को ह्येवान्यात् कः प्राण्यात्' 'यदेष आकाश आनन्दो न स्यादि'ति 'एको ह वै नारायण आसीन्न ब्रह्म न च शङ्करः' इत्यादिषु। अन्येषाञ्च वाक्यानां समन्वयस्तत्रैव वक्ष्यते। 'आनन्दमयोऽभ्यासात्' (१।१।१२) इत्यादिना। स चैवं परमानन्दस्वरूपत्वेनैव समन्वितो भवतीति तमुपलभ्यैव परमपुरुषार्थसिद्धेर्न प्रयोजनशून्यत्वमपि। तदेवं सूत्रद्वयार्थे स्थिते तदेतद्व्याचष्टे—अन्वयादितरतश्चार्थेषु इति। अर्थेषु नानाविधेषु वेदवाक्यार्थेषु सत्सु अन्वयादन्वयमुखेन यतो यस्मादेकस्मादस्य जन्मादि प्रतीयते तथा इतरतो व्यतिरेकमुखेन च यस्मादेवास्य तत् प्रतीयत इत्यर्थः। अत एव तस्य श्रुत्यन्वयव्यतिरेकदर्शितेन परमसुखरूपत्वेन परमपुरुषार्थत्वञ्च ध्वनितम्। 'एको ह वै नारायण आसी'त्यादिशास्त्रप्रमाणत्वेन प्राक्स्थापितरूपत्वञ्चे'ति। अथ 'ईक्षतेर्नाशब्दम्' (१।१।५) इति व्याचष्टे—अभिज्ञ इति। तत्र सूत्रस्यार्थः—इदमाम्नायते छान्दोग्ये—'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं ब्रह्म' 'तदैक्षत बहु स्यां प्रजायेये'ति 'तत्तेजोऽसृजते'त्यादि। तत्र परोक्तं प्रधानमपि जगत्कारणत्वेनायाति। तच्च नेत्याह—ईक्षतेरिति। यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दमानुमानिकं प्रधानमित्यर्थः। यतोऽशब्दमतो न तदिह प्रतिपाद्यम्। कुतोऽशब्दत्वं तस्येत्याशङ्क्याह—ईक्षतेः, सच्छब्दवाच्यसम्बन्धिव्यापारविशेषाभिधायिनः ईक्षतेर्धातोः श्रवणात्। तदैक्षतेति। ईक्षणं चाचेतने प्रधाने न सम्भवेत्। अन्यत्र चेक्षापूर्विकैव सृष्टिः "स ऐक्षत लोकान्नु सृजा" इत्यादौ। ईक्षणञ्चात्र तदशेषसृज्यविचारात्मकत्वात् सर्वज्ञत्वमेव क्रोडीकरोति तदेतदाह—अभिज्ञ इति। ननु तदानीम् 'एकमेवाद्वितीयम्' इत्युक्तेस्तस्येक्षणसाधनं न सम्भवति, तत्राह—स्वराडिति। स्वस्वरूपेण एव तथा तथा राजत इति। 'न तस्य कार्यं करणञ्च विद्यते' इत्यादौ 'स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेः। एतेनेक्षणवन्मूर्त्तिमत्त्वमपि स्वाभाविकमित्यायातं निःश्वसितस्याप्यग्रे दर्शयिष्यमाणत्वात्। तच्च यथोक्तमेवेति। अथ 'शास्त्रयोनित्वादि'त्यस्यार्थान्तरं व्याचष्टे—तेन इति। तच्चार्थान्तरं यथा— कथं तस्य जगज्जन्मादिकर्तृत्वं कथं वा नान्यतन्त्रोक्तस्य प्रधानस्य न चान्यस्येति तत्राह—शास्त्रस्य वेदलक्षणस्य योनिः कारणं तद्रूपत्वात्। 'एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं सूत्राण्युपसूत्राणि खिलान्युपखिलानि चे'ति श्रुतेः।

शास्त्रं हि सर्वप्रमाणागोचरविविधानन्तज्ञानमयं, तस्य च कारणं ब्रह्मैव श्रूयते इति तदेव मुख्यं सर्वज्ञम्। तादृशं सर्वज्ञत्वं विना च सर्वसृष्ट्यादिकमन्यस्य नोपपद्यते इति प्रोक्तलक्षणं ब्रह्मैव जगत्कारणं न प्रधानं न च जीवान्तरमिति। एतदेव विवृत्याह—तेन ब्रह्म हृदा य आदिकवय इति। ब्रह्म वेदमादिकवये ब्रह्मणे ब्रह्माणं प्रति हृदा अन्तःकरणद्वारैव न तु वाग्द्वारा तेने आविर्भावितवान्। अत्र बृहद्वाचकेन ब्रह्मपदेन सर्वज्ञानमयत्वं तस्य ज्ञापितम्। हृदेत्यनेनान्तर्यामित्वं सर्वशक्तित्वञ्च भगवतो ज्ञापितम्। आदिकवय इत्यनेन तस्यापि शिक्षानिदानत्वात् शास्त्रयोनित्वञ्चेति। श्रुतिश्चात्र—'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति। अनेन च शयनलीलाव्यञ्जितनिःश्वसितमयवेदो ब्रह्मादिविविधानुचराश्रयः पद्मनाभस्तदादिमूर्तिकः श्रीभगवानेवाभिहितः। विवृतञ्चैतत् 'प्रचोदिता येन पुरा सरस्वती'त्यादिना। अथ 'तत्तु समन्वयादि'त्यस्यार्थान्तरम्, यथा शास्त्रयोनित्वे हेतुश्च दृश्यते इत्याह—तत्त्विति। समन्वयोऽत्र सम्यक् सर्वतोमुखोऽन्वयो व्युत्पत्तिर्वेदार्थपरिज्ञानम् तस्मात्, तत्तु शास्त्रनिदानत्वं निश्चीयत इति। जीवे सम्यग्ज्ञानमेव नास्ति, प्रधानं त्वचेतनमेवेति भावः। "स वेत्ति विश्वं न च तस्य वेत्ता" इत्यादिश्रुतेः। तदेतस्य तदीयसम्यग्ज्ञानं व्यतिरेकमुखेन बोधयितुं जीवानां सर्वेषामपि तदीयसम्यग्ज्ञानाभावमाह—मुह्यन्तीति। सूरयः शेषादयोऽपि यत् यत्र शब्दब्रह्मणि। तदेतद्विवृतं स्वयं भगवता—'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन' इति। अनेन च साक्षाद्भगवानेवाभिहितः। तथा दशलक्षणार्थोऽप्यत्रैव दृश्यः। तत्र सर्गविसर्गस्थाननिरोधाः 'जन्माद्यस्य यत' इत्यत्र। 'मन्वन्तरेशानुकथे च स्थानान्तर्गते। पोषणं तेन' इत्यादौ 'ऊतिर्मुह्यन्ती'त्यादौ। मुक्तिर्जीवानामपि तत्सान्निध्ये सति कुहकनिरसनव्यञ्जकेन धाम्नेत्यादौ आश्रयः परं सत्यमित्यत्र। स च स्वयं भगवत्त्वेन श्रीकृष्ण एवेति पूर्वोक्तप्रकार एव व्यक्त इति। तदेवमस्मिन्नुपक्रमवाक्ये सर्वेषु पदवाक्यतात्पर्येषु तस्य ध्येयस्य सविशेषत्वं मूर्तिमत्त्वं श्रीभगवदाकारत्वञ्च व्यक्तम्। तच्च युक्तं, स्वरूपवाक्यान्तरव्यक्तत्वात्। समस्तवेदस्तुत्यर्थं संगृह्यानुस्मारयति। योऽस्योत्प्रेक्षक इति निमित्त-

रणत्वम्। 'योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः। यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम्' इति।

अतो 'धर्मः प्रोज्झिते'त्यादावनन्तरवाक्येऽपि 'किं वा परै'रित्यादिना तत्रैव तात्पर्यं दर्शितम्। तथोपसंहारवाक्याधीनार्थत्वादुपक्रमवाक्यस्य नातिक्रमणीयत्वमेव 'कस्मै येन विभाषितोऽयम्' इत्यादिना दर्शितं तस्य तादृशविशेषवत्त्वादिकम् यथैव। 'आत्मगृहीतिरितरवदुत्तरात्' (३।३।१७) इत्यत्र शङ्करशारीरकस्यापरस्यां योजनायामुपक्रमोक्तस्य सच्छब्दवाच्यस्यात्मत्वमुपसंहारस्थादात्मशब्दात् लभ्यते, तद्वदिहापि चतुःश्लोकीवक्तुर्भगवत्त्वं दर्शितं श्रीव्याससमाधावपि तस्यैव ध्येयत्वम्। तदेव च 'स्वसुखनिभृते'त्यादि श्रीशुकहृदयानुगतमिति। यद्वा पुनश्च विष्णुपुराणीयभगवच्छब्दनिरुक्तिवत् साक्षाच्छ्रीकृष्णाभिधेयत्वेनापि योजयति—जन्माद्यस्येति। "नराकृति परं ब्रह्म" इति पुराणवर्गात्। "तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्" इति श्रीगोपालतापनीश्रुतेश्च। परं श्रीकृष्णं धीमहि। अस्य स्वरूपलक्षणमाह—सत्यमिति। 'सत्यव्रतं सत्यपरं त्रिसत्य'मित्यादौ। 'सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम्। सत्यात् सत्यञ्च गोविन्दस्तस्मात् सत्यो हि नामतः॥' इत्युद्यमपर्वणि सञ्जयकृतश्रीकृष्णनाम्नां निरुक्तौ च तथा श्रुतत्वात्। एतेन तदाकारस्याव्यभिचारित्वं दर्शितम्। तटस्थलक्षणमाह—धाम्ना स्वेनेत्यादि। स्वेन स्वस्वरूपेण धाम्ना श्रीमथुराख्येन। सदा निरस्तं कुहकं मायाकार्यलक्षणं येन तम्॥ 'मथ्यते तु जगत् सर्वं ब्रह्मज्ञानेन येन वा। तत्सारभूतं यद्यस्यां मथुरा सा निगद्यत' इति श्रीगोपालोत्तरतापनीप्रसिद्धेः। लीलामाह—आद्यस्य नित्यमेव श्रीमदानकदुन्दुभिव्रजेन्द्रनन्दनतया श्रीमथुराद्वारकागोकुलेषु विराजमानस्यैव स्वस्य कस्मैचिदर्थाय लोके प्रादुर्भावापेक्षया यतः श्रीमदानकदुन्दुभिगृहात् जन्म तस्माद् य इतरतश्च इतरत्र श्रीव्रजेश्वरगृहेऽपि अन्वयात् पुत्रभावतः तदनुगतत्वे नागच्छत्। उत्तरेणैव 'य' इति पदेनान्वयः। 'यत' इत्यनेन तस्मादिति स्वयमेव लभ्यते। कस्मात्? अन्वयात्। तत्राह–अर्थेषु कंसवञ्चनादिषु तादृशभाववद्भिः श्रीगोकुलवासिभिरेव सर्वानन्दकदम्बकादम्बिनीरूपा सा कापि लीला सिद्ध्यतीति तल्लक्षणेषु वा अर्थेषु अभिज्ञः। ततश्च स्वराट् स्वैर्गोकुलवासिभिरेव राजत इति तत्र तेषां प्रेमवशतामापन्नस्याप्यव्याहतैश्वर्य्यमाह–तेन इति। य आदिकवये ब्रह्मणे ब्रह्माणं विस्मापयितुं हृदा सङ्कल्पमात्रेणैव ब्रह्म सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तिमयं वैभवं तेने विस्तारितवान्। यद्यतस्तथाविधलौकिकालौकिकतासमुचितलीलाहेतोः सूरयस्तद्भक्ता मुह्यन्ति प्रेमातिशयोदयेन वैवश्यमाप्नुवन्ति। 'यत्' इत्युत्तरेणाप्यन्वयात्। यद् यत एव तादृशलीलातः तेजोवारिमृदामपि यथा यथावद्विनिमयो भवति। तत्र तेजसश्चन्द्रादेर्विनिमयो निस्तेजोवस्तुभिः सह धर्मपरीवर्त्तः। तच्छ्रीमुखादिरुचा चन्द्रादेर्निस्तेजस्त्वविधानात् निकटस्थनिस्तेजोवस्तुनः स्वभासा तेजस्वितापादानाच्च। तथा वारिद्रवश्च कठिनं भवति वेणुवाद्येन। मृत्पाषाणादिश्च द्रवतीति। यत्र श्रीकृष्णे त्रिसर्गः श्रीगोकुलमथुराद्वारकावैभवप्रकाशः अमृषा सत्य एवेति।

अथ श्रीवृन्दावने तदीयस्वरूपशक्तिप्रादुर्भावाश्च व्रजदेव्यः। यथा ब्रह्मसंहितायाम्—'आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः। गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि' इति। ताभिः श्रीगोपिकाभिः कलाभिः शक्तिभिः निजरूपतया स्वीयतया शक्तित्वञ्च तासां पूर्वोक्तोत्कर्षेण परमपूर्णप्रादुर्भावाणां सर्वासामपि 'लक्ष्मीसहस्रशतसम्भ्रमसेव्यमान'मिति 'श्रियःकान्ताकान्तः परमपुरुष' इति च 'गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभ'मिति च ज्ञापयति। गोप्य एव श्रियः कान्तं मनोहरम् एकान्तवल्लभं रहोरमणम्। एतदभिप्रायेणैव स्वायम्भुवागमेऽपि श्रीभूलीलाशब्दैस्तत्प्रेयसीत्रयमुपदिष्टम्। तस्माल्लक्ष्मीत्वेऽप्यासां कुरुपाण्डवन्यायेन 'नायं श्रियोऽङ्ग' इत्यादि लक्ष्मीतोऽप्युत्कर्षवर्णनं परमव्योमादिस्थिताभ्यस्तत्तन्नाम्ना एव प्रसिद्धाभ्यो लक्ष्मीभ्य आधिक्यविवक्षयेति मन्तव्यम्। श्रीवृन्दावनलक्ष्म्यस्त्वेता एवेति। तास्तु नित्यसिद्धा एव, आसां महत्त्वन्तु ह्लादिनीसारवृत्तिविशेषप्राधान्यात्। तदुक्तम्—'आनन्दचिन्मयरसप्रतिभाविताभिः' इति। आनन्दचिन्मयरसेन प्रेमरसविशेषेण भाविताभिस्तत्प्रधानाभिरित्यर्थः। अत एव तत्प्राचुर्य्यप्रकाशनाचिन्त्यानन्तशक्तियुक्तस्य भगवतः श्रीकृष्णस्यापि तासु परमोल्लासप्रकाशो भवति, येन ताभी रमणेच्छा जायते। तथैवाह—भगवानपि ता रात्रीरिति। न केवलमेतावन्मात्रम्, किन्त्वेताभिः समं परप्रेमोल्लासावधित्वमवगम्यते, तथाह—त्रैलोक्यलक्ष्म्येकपदं वपुर्दधदिति। व्यरोचताधिकं तातेति। तत्रातिशुशुभे ताभिरिति च। अथ तासां नामानि श्रूयन्ते भविष्योत्तरमल्लद्वादशीप्रसङ्गे श्रीकृष्णयुधिष्ठिरसंवादे–'गोपीनामानि राजेन्द्र! प्राधान्येन निबोध मे। गोपाली पालिका धन्या विशाखा ध्याननिष्ठिका॥ राधानुराधा सोमाभा तारका दशमी तथा' इति। तथेति दशम्यपि तारकानाम्न्येवेत्यर्थः। स्कान्दे प्रह्लादसंहितायां द्वारकामाहात्म्ये 'श्रीललितोवाचे'त्यादिना—'ललिता श्यामला धन्या विशाखा राधा शैव्या पद्मा भद्रे'त्येतान्यष्टैव गृहीतानि। अथ च 'वनिताशतकोटिभि'रित्यागमप्रसिद्धेरन्यान्यपि लोकशास्त्रयोरवगन्तव्यानि।

---

१. वृन्दावनमुद्रिताष्टटीकान्वितभागवतपुस्तके त्वयं पाठस्तद्द्वाविंशतिपृष्ठे आचतुर्दशपङ्क्तेस्त्रयोविंशतिपङ्क्तिं यावत् 'सत्य एव' इत्यन्तः मुद्रितः, स एव पुनः षड्विंशतिपृष्ठे दृश्यते। तदधस्ताच्च 'तत्रायुक्तोऽपि बङ्गाक्षरप्रामादिकपाठानुसारेण लिखितोऽधिक इत्युपेक्षणीयः, किन्त्वत्रैव स पाठो युक्तो ग्राह्य' इति टिप्पण्यामुल्लेखितं दरीदृश्यते। अस्माभिस्तु पूर्वत्र मुद्रितः पाठोऽस्थानपतित इति निष्कासितः।

अत्र शतकोटिधान्यान्यनुपपत्त्यापि तासां तन्महाशक्तित्वमहालक्ष्मीत्वमेवावगम्यते, तदेवं परममधुरप्रेमवृत्तिमयीषु तास्वपि तत्सारांशोद्रेकमयी श्रीराधिका तस्यामेव प्रेमोत्कर्षपरमावधित्वस्य दर्शितत्वात्, यत्र च तत्प्रेमवैशिष्ट्यं तत्रैव प्रकाशाधिक्यमपि। अत एव श्रीवृन्दावने राधिकाया एव परमलक्ष्मीत्वम्, अत एव सतीष्वन्यासु तास्वपि मुख्यत्वाभिप्रायेणैव, तस्या एव श्रीवृन्दावनाधिपत्येन नामग्रहणम्। पाद्मे च—'वृन्दावनाधिपत्यञ्च दत्तं तस्यै प्रतुष्यता। कृष्णेनान्यत्र देवी तु राधा वृन्दावने वने' इति। अत एव विशेषतः श्रीराधायास्तादृशत्वं बृहद्गौतमीये। तथा हि श्रीवलदेवं प्रति श्रीकृष्णवाक्यम्—'सत्त्वं तत्त्वं परतत्त्वञ्च तत्त्वत्रयमहं किल। त्रितत्त्वरूपिणी सापि राधिका मम वल्लभा॥ प्रकृतेः पर एवाहं सापि मच्छक्तिरूपिणी। सात्त्विकं रूपमास्थाय पूर्णोऽहं ब्रह्म चित्परः॥ ब्रह्मणा प्रार्थिता सम्यक् सम्भवामि युगे युगे। तया सार्द्धं त्वया सार्द्धं नाशाय देवताद्रुहाम्'॥ इत्यादि सत्त्वं कार्यत्वं तत्त्वं कारणत्वं ततोऽपि परत्वं चेति यत् तत्त्वत्रयं तदहमित्यर्थः। तत्रैवाग्रे श्रीराधायाः—'देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परा' इति। ऋक्परिशिष्टश्रुतिश्च तथैवाह—'राधया माधवो देवो माधवेनैव राधिका'। विभ्राजन्ते जनेष्वा इति। विभ्राजन्तो 'विभ्राजत आ सर्वत' इति श्रुतिपदार्थः। एतत् सर्वमभिप्रेत्य मूर्धन्यश्लोके तादृशोऽप्यर्थः सन्दधे—जन्माद्यस्येति। यतोऽन्वयात् अन्वेति अनुगच्छति सदा निजपरमानन्दशक्तिरूपायां तस्यां श्रीराधायामासक्तो भवतीत्यन्वयः। श्रीकृष्णस्तादृशाद् यस्मात् तथा इतरतः इतरस्याश्च तस्य सदा द्वितीयायाः श्रीराधाया एव यतो यस्य आद्यस्य आदिरसस्य जन्म प्रादुर्भावः यावेव आदिरसविद्यायाः परमनिधानमित्यर्थः। अत एव तयोरत्यद्भुतविलासमाधुरीधुरीणतामुद्दिशति—यः अर्थेषु तत्तद्विलासकलापेषु अभिज्ञो विदग्धः या च स्वेन तथा तथाविधेन आत्मना राजते विलासतीति स्वराट्, अत एव सर्वतोऽप्याश्चर्यरूपयोस्तयोर्वर्णने मम तत्कृपैव सामग्रीत्याह—आदिकवये प्रथमं तल्लीलावर्णनमारभमाणाय मह्यं श्रीवेदव्यासाय हृदा अन्तःकरणद्वारैव ब्रह्म निजलीलाप्रतिपादकं शब्दब्रह्म यस्तेने आरम्भसमकालमेव युगपत् सर्वमिदं महापुराणं मम हृदि प्रकाशितवानित्यर्थः। एतच्च प्रथमस्य सप्तम एव व्यक्तम्। यद् यस्यां ब्रह्मादयोऽपि मुह्यन्ति स्वरूपसौन्दर्यगुणादिभिरत्यद्भुता केयमिति निर्वक्तुमारब्धा निश्चेतुं न शक्नुवन्ति एवम्भूता सा यदि मयि कृपां नाकरिष्यत् तदा लब्धमाधवतादृशकृपस्यापि मम 'तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः। वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन्॥' इत्यादिना तस्या लीलावर्णनलेशोऽपि साहससिद्धिरसौ नाभविष्यदेवेति भावः। तयोराश्चर्यरूपत्वमेव व्यनक्ति—तेजोवारिमृदामचेतनानामपि यथा येन प्रकारेण विनिमयः परस्परं स्वभावविपर्ययो भवति तथा विभ्राजत इति शेषः। वाक्यशेषञ्च भावाभिभूतत्वेन न वक्तुं शक्तवानिति गम्यते। तत्र तेजसश्चन्द्रादेस्तत्पदनखकान्तिविस्फारितादिना वारिमृद्वन्निस्तेजस्त्वधर्मावाप्तिर्वारिणो नद्यादेश्च वंशीवाद्यादिना रव्यादितेजोवदुच्छलताप्राप्तिः। पाषाणादेर्मृद्वच्च स्तम्भताप्राप्तिः। मृदश्च पाषाणादेस्तत्कान्तिकन्दलीच्छुरितत्वेन तेजोवदुज्ज्वलताप्राप्तिर्वंशीवाद्यादिना वारिवच्च द्रवताप्राप्तिरिति। तदेतत् सर्वं तस्य लीलावर्णने प्रसिद्धमेव। यत्र यस्याञ्च विद्यमानायां त्रिधा सर्गः श्रीभूलीलेति शक्तित्रयीप्रादुर्भावोऽथवा द्वारकामथुरावृन्दावनानीति स्थानत्रयगतशक्तिवर्गत्रयप्रादुर्भावो वृन्दावन एव रसव्यवहारेण सुहृदुदासीनप्रतिपक्षनायिकारूपत्रिभेदानां सर्वासामपि व्रजदेवीनामेव प्रादुर्भावो वा मृषा वृथैव। यस्याः सौन्दर्यादिगुणसम्पदा ता रताः कृष्णे न किञ्चिदिव प्रयोजनमर्हन्तीत्यर्थः। ततः 'धीमही'ति यच्छब्दलब्धेन तच्छब्देनान्वयः। परमशक्तिशक्तिमत्त्वेनातिशयितमहाभावरसेन वा परस्परमभिन्नतां गतयोरनयोरैक्येनैव विवक्षितं—तदिति। अत एव सामान्यतया परामर्शात् नपुंसकत्वञ्च। कथम्भूतं? स्वेन धाम्ना स्वप्रभावेण सदा निरस्तं स्वलीलाप्रतिबन्धकानां कुहकं माया येन तत्। तथा सत्यं तादृशत्वेन नित्यसिद्धम्। यद्वा परस्परं विलासादिभिरनवरतमानन्दसन्दोहदाने कृतसत्यमिव जातं तत्र निश्चलमित्यर्थः। अत एव परम् अन्यत्र कुत्राप्यदृष्टगुणलीलादिभिः विश्वविस्मापकत्वात् सर्वतोऽप्युत्कृष्टम्। अत्र एकोऽपि धर्मो भिन्नवाचकतया वाक्ययोर्निर्दिष्ट इत्युभयसादृश्यावगमात् प्रतिवस्तूपमानालङ्कारोऽयम्। इयञ्च मुहुरुपमितिमाला प्रतिवस्तूपमा। तेन तैस्तैर्मिथो योग्यतया निबद्धत्वात् समनामापि। एतदलङ्कारेण च अहो परस्परं परस्मात् परमपि तन्मिथुनीभूतं किमपि तत्त्वं मिथोगुणगणमाधुरीभिः समतामेव समवाप्तमिति सकलजीवजीवातुतमरसपीयूषधाराधाराधरतासम्पदा कस्मै वा निजचरणकमलविलासं न रोचयतीति स्वतःसम्भवि वस्तु व्यज्यते। तदाहुः—'प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथग्' इति। इयं मायापि दृश्यते इति च। एवम् 'समं स्यादानुरूप्येण श्लाघायोग्यस्य वस्तुन' इति। तथा—'वस्तु वालङ्कृतिर्वापि विधार्थः संभवी स्वतः। कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य वेति षट्॥ षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः। अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम्' इति। अतः सर्वतोऽपि सान्द्रानन्दचमत्कारकश्रीवृन्दावनेऽपि परमाद्भुतप्रकाशः श्रीराधया युगलितः श्रीकृष्ण इति। तदुक्तं—'राधया माधवो देव' इत्यादिना। तदेवं सन्दर्भचतुष्टयेन सम्बन्धो व्याख्यातः, तस्मिन्नपि सम्बन्धे श्रीराधामाधवरूपेणैव प्रादुर्भावः, तस्य समन्वितः परमप्रकर्षः। एतदर्थमेव 'व्यतानिषमिमाः सर्वा अपि परिपाटी'रिति पूर्णः सम्बन्धः॥

गौरश्यामरुचोज्ज्वलाभिरमलैरक्ष्णोर्विलासोत्सवैर्नृत्यन्तीभिरशेषमादनकलावैदग्धदिग्धात्मभिः॥
अन्योऽन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः सदा राधामाधवमाधुरीभिरभितश्चित्तं ममाक्रम्यताम्॥ १॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीराधाकृष्णाभ्यां नमः।

कृपासुधावृष्टिभृतः स्वभक्तिस्वर्वाहिनी खेलितजीवपङ्क्ती। श्रीकृष्णचैतन्यघनः स विद्युद्गौरो मनोव्योमनि नश्चकास्तु ॥ १ ॥
नित्यानन्दाद्वैतचैतन्यमेकं तत्त्वं नित्यालंकृतब्रह्मसूत्रम्। नित्यैर्भक्तैर्नित्यया भक्तिदेव्या भातं नित्यं धाम्नि नित्ये भजामः ॥ २ ॥

रूपं नाम सनातनं गुरुकृपां नित्यान् गुणांस्तस्य तान् श्रीमद्भागवतात्तथैव विदितान् जुष्टाचिरेणाश्रयन्।
दृष्ट्वा वैष्णवतोषणीं प्रभुमतं विज्ञाय सन्दर्भतट्टीकां स्वाम्यनुकम्पितोऽस्य विदधे सारार्थसंदर्शिनीम् ॥ ३ ॥

न काचिन्मे वैदुष्यहह समुहासाहस इह स्वमौढ्यं वा हेतुर्निरुपधिकृपा या (वा) भगवतः।
प्रभुत्वं वा हीनेऽप्युदयति यदाद्ये प्रहसितं द्वितीये त्वानन्दं प्रतिपदमिदं धोक्ष्यति सताम् ॥ ४ ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे। तदीयप्रियदास्याय मां मदीयमहं ददे ॥ ५ ॥

सुरतरुफलदीपाहस्करब्रह्मधर्मान् यदिदमधितशास्त्रं नातिचित्रं तदेतत्।
हरिचरितसुधानां पायनाय प्रपेदे सदसि सदसतां यन्मोहिनीत्वं स्तुमस्तत् ॥ ६ ॥

इह खलु निखिलकल्याणगुणमाधुर्यवारिधौ महैश्वर्यसम्राजि स्वयं भगवति परमभास्वत्यधिधरणि यथासमयं विलस्यान्तर्हिते नानाशास्त्रपुराणेतिहासादीनां सर्वजननिकायत्रावकत्वरूपेष्वर्थेषु यापिकेष्विव कालेन दैवाद्वैगुण्योदयालस्येनेव केषुचित् प्रसुप्तेषु तेष्वेव मध्ये कैश्चित् कैश्चित् प्रत्युत "जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रम" इत्यादितोऽवगतैरनर्थाकारैश्चौरैरिवोद्भूय तत्तत्प्रणेतृपर्यन्तानां सर्वेषां चित्तप्रसादरूपेषु महाधनेष्वपहृतेषु; 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्' इति 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्' इति श्रीगीतोक्तनिमित्तलब्धलक्षणतया यादःसु महामीन इव, मृगेषु यज्ञवराह इव, विहङ्गमेषु श्रीहंस इव, नृषु स्वयं भगवान् श्रीकृष्ण इव, देवेषूपेन्द्र इव, वेदेषु श्रीमद्भागवताख्यः शास्त्रचूडामणिः। 'कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह। कलौ नष्टदृशामेव पुराणार्कोऽधुनोदित' इति वचनव्यञ्जितश्रीकृष्णप्रतिमूर्तिकत्वेन ममाहमेवाभिरूपः कैवल्यादिति निरस्ततद्भिनान्यसादृश्यतया श्रीशुकपरीक्षिद्भ्यां श्रीकृष्ण एव ज्योतिःसु सहस्रांशुरिव पुराणेषु भास्वान् द्वादशस्कन्धात्मकोऽष्टादशसहस्रच्छदनो महाजनवाञ्छितार्थकल्पतरुरिवावततार। तत्प्रणेता प्रथमत एवाचार्यचूडामणिः श्रीकृष्णद्वैपायनः स्वाभीष्टदेवतध्यानलक्षणं मङ्गलमाचरति—जन्माद्यस्येति। परमातिशयेन सत्यं सर्वकालदेशवर्तिनं परमेश्वरं धीमहि ध्यायेम। बहुवचनेन कालदेशपरम्पराप्राप्तान् सर्वानेव जीवान् स्वान्तरङ्गीकृत्य स्वशिक्षया तान् ध्यानमुपदिशन्नेव क्रोडीकरोति। अनेन 'अथातो ब्रह्मजिज्ञासा' (१।१।१) इति सूत्रार्थः फलतो विवृतः, ध्यानस्यैव जिज्ञासायाः फलत्वात्। तस्य परमैश्वर्य्यमाह—अस्य जगतो जन्मादि जन्मस्थितिभङ्गं यतो भवति तम्। तर्हि किंकालं ध्यायथ ? न; अन्वयादितरतश्च अन्वयव्यतिरेकाभ्यां घटे मृदन्वय इव मृदि घटव्यतिरेक इवेत्युपादानकारणमित्यर्थः। चकारात् स एव निमित्तकारणञ्च कालस्य तत्प्रभावरूपत्वात्। यद्वा, अन्वयात् प्रलये विश्वस्य परमेश्वरे अनुप्रवेशात् इतरतश्च सर्गे ततो विभागाच्च। पृथिव्या जलमिव जलस्य तेज इव योऽधिष्ठानकारणमित्यर्थः। यद्वा, अन्वयात् कारणत्वेन यत्कर्तृकादनुप्रवेशात् जन्मकर्मफलादातृत्वेन यत्कर्तृकादनुप्रवेशात् स्थितिः संहारकत्वेन रुद्ररूपेण यस्कर्तृकादनुप्रवेशाद् भङ्गश्च यतो भवति तम्। अत्र कारणस्स कार्य्यसमन्वितत्वमेव कार्य्येऽनुप्रवेशो ज्ञेयः। तत्कार्य्यस्य विश्वस्य तत्स्वरूपत्वं वारयन् विशिनष्टि—इतरत इति। सृज्यपाल्यसंहार्याद्विश्वतः स्वरूपशक्त्या भिन्नात्। चकारान्मायाशक्त्या तदभिन्नाच्च। एवम् 'जन्माद्यस्य यतः' (१।१।२) इति, 'तत्तु समन्वयात्' (१।१।२) इति सूत्रद्वयमुक्तम्। ननु च परमेश्वरस्योपादनत्वे विकारो दुर्वारस्तस्मात् प्रकृतिरेवोपादानं, परमेश्वरस्तु निमित्तमित्युच्यताम्। मैवम्; 'यः सर्वज्ञः सर्वविदि'ति 'स ऐक्षत लोकान्नु सृजा' इति 'तदैक्षत 'बहु स्यां प्रजायेयेत्यादिश्रुतिभिश्चेतनस्यैव जगत्कारणत्वप्रतिपादनात् परमेश्वर एव जगत उपादानं निमित्तञ्च। तत्र प्रकृतेः तच्छक्तित्वात् शक्तिशक्तिमतोरभेदात्। प्रकृतिद्वारकमेव तस्योपादानत्वम् स्वरूपेण तु प्रकृत्यतीतत्वात् तस्य निर्विकारत्वञ्च यथोक्तं भगवता—'प्रकृतिर्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम्' इति प्रकृतेः स्वातन्त्र्येणोपादानत्वमेव शास्त्रसम्मतम्। तस्मात् परमेश्वरः सर्वज्ञ एव स्वातन्त्र्येण जगत्कारणमुच्यते। न तु जडा प्रकृतिरित्याह—अर्थेषु सृज्यासृज्यवस्तुमात्रेषु अभिज्ञो यस्तमित्यर्थः। अनेन 'ईक्षतेर्नाशब्दम्' (१।१।५) इति सूत्रार्थ उक्तः। स चायम् प्रक्रान्तं ब्रह्म जगत्कारणं भवति। कुतः ? ईक्षतेः, ईक्षणात् जगत्कारणत्वप्रतिपादकश्रुतिवाक्येषु तस्यैव विचारविशेषात्मकेक्षणश्रवणात्। अतो ब्रह्म नाशब्दम् अशब्दप्रमाणकं न भवति, किन्तु शब्दप्रमाणकमेवेति। अथ श्रुतयः 'तदैक्षत बहु स्या'मिति 'सदेव सोम्येदमग्र आसीदि'ति, 'आत्मा वा इदमेक एवाग्र आसीदि'ति 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इति, 'यतो वा इमानि भूतानि जायन्त इत्याद्याः।' स्मृतिश्च—'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये' इति। ननु तदानीं महदाद्यनुत्पत्तेस्तस्य ईक्षणादिसाधनं न सम्भवतीत्यत आह—

स्वराट्, स्वस्वरूपेणैव तथा तथा राजत इति। "न तस्य कार्य्यं करणञ्च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः। ननु जगत्सृष्टौ ब्रह्मणः स्वातन्त्र्यमैश्वर्य्यं चावगम्यते। 'हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदि'ति श्रुतेः। स एव ध्येयोऽस्त्वित्यत आह—तेन इति। आदिकवये ब्रह्मणे यो ब्रह्म वेदं स्वतत्त्वं वा तेने प्रकाशयामास। अतो ब्रह्मणोऽपि पारतन्त्र्यम्। ननु ब्रह्मणोऽन्यतो वेदाध्ययनाद्यप्रसिद्धं सत्यं, तत्तु हृदा मनसैव तेने। 'प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत् किलास्यत' इति, किं वा 'सुदृष्टं हृदि मे तदैव' इत्यादेः। अनेन बुद्धिवृत्ति-प्रवर्त्तकत्वेन गायत्र्यर्थश्च दर्शितः। तदुक्तं मात्स्ये—'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवत-मिष्यते॥' पुराणान्तरे च—'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥ गायत्र्या च समारम्भस्तद्वै भागवतं विदुः' इति। ननु सुप्तप्रतिबुद्धन्यायेन ब्रह्मा स्वयमेव वेदं तत्त्वं वा उपलभताम् इत्यत आह—यत् यस्मिन् वेदे तदीये तत्त्वे वा सूरयोऽपि मुह्यन्ति अतस्तस्मिन् ब्रह्मणः स्वतो न शक्तिः। एतेन 'नेतरोऽनुपपत्तेः' (१।१।१६) इति सूत्रार्थो विवृतः। ननु धीमहीति ध्यानविषयत्वेन तस्य साकारत्वमभिप्रेतम्। आकाराणाञ्च त्रिगुणसृष्टत्वम् तथात्वे चानित्यत्वं प्रसज्जे-दित्यत आह—तेजोवारिमृदां यथा विनिमयः विपर्य्ययः अन्यस्मिन्नन्यावभासः, यथा अज्ञानां तेजसि वारीदमिति वारिणि स्थलमिति मृदि काचादौ च वारीदमिति बुद्धिः, तथैव यत्र पूर्णचिन्मयाकारे त्रिसर्गः त्रिगुणसर्गोऽयमिति बुद्धिर्मृषा मिथ्यै-वेत्यर्थः। 'तमेकं गोविन्दं सच्चिदानन्दविग्रहम्। वृन्दावनसुरभूरुहतलासीनम्।' इति गोपालतापनीश्रुतेः "अर्द्धमात्रात्मको रामो नन्दैकविग्रह" इति रामतापन्याश्च। 'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरिविग्रह'मिति नृसिंहतापन्याश्च। 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः'॥ 'आनन्दमात्रमुखपादसरोरुहादि' इति ध्यानबिन्दूपनिषदश्च। 'नन्दव्रजजना-नन्दी सच्चिदानन्दविग्रह' इति ब्रह्माण्डपुराणात्। 'सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृ-तिजाः क्वचित्।" इति महावाराहाच्च। स्वेच्छामयस्य न तु भूतमयस्येति च। बबन्ध प्राकृतं यथेति। त्वय्येव नित्यसुखबोध-तनाविति। शाब्दं ब्रह्म वपुर्दधदिति। 'सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तय' इत्यादि श्रीभागवतादपि तदाकारस्यामायिकत्वाव-गमात्। 'अनिन्द्रिया अनाहारा अनिष्पन्नाः सुगन्धिनः। एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः॥' इति नारायणीयात्। 'देहेन्द्रियासुहीनानां विकुण्ठपुरवासिनाम्' इति सप्तमस्कन्धाच्च। तद्भक्तानामपि श्वेतद्वीपविकुण्ठपुरवासित्वेन साकारत्वे लब्धे अनिन्द्रिया इत्यादिभिर्मायिकाकारत्वनिषेधात् तदाकारस्यामायिकत्वे कः संशयः?

ननु तदप्यत्र केचन विवदन्ते इत्यत आह—धाम्नेति। धाम्ना स्वरूपशक्त्या स्वभक्तनिष्ठस्वानुभवप्रभावेण वा प्रतिपद-समुच्छलनमाधुर्य्यैश्वर्यभ्राजिश्रीविग्रहेण वा स्वेन असाधारणेन सदा कालत्रय एव निरस्ताः कुहकाः कुतर्कनिष्ठा येन तम्। एतेन 'तर्काप्रतिष्ठानात्' (२।१।११) इति सूत्रार्थः सूचितः। यत्र 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति श्रुत्या स्वशब्देन तनोः स्वरूपभूतत्वे लब्धे तथा प्रकृतिक्षोभात् पूर्वमेव 'बहु स्या'मिति 'स ऐक्षते'त्यादिश्रुतिभिस्तदीयमनोनयनादेरमायि-कत्वेऽवगमिते। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुत्या स्वाभाविकत्वे प्रकटमुक्ते—'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्' इति। अत्र न योजयेदिति लिङा 'परदारान् न गच्छेदि'तिवत् तत्र कुतर्कयोजनाया निषिद्धत्वेऽपि यद्यसुरास्तदीयश्रीविग्रहं लक्ष्यीकृत्य युक्तिशरानादित्सवो निरयेऽपि पतिष्यन्ति, तदा पतन्तु तैरलं संलापनेनेति। अथात्र शास्त्रे—'दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्' इति दशमस्याश्रयतत्त्वस्यैवाङ्गित्वे तस्य च श्रीकृष्णरूप एव मुख्यत्वे तदसाधारणधर्मप्रस्तुतावप्यस्य प्रथमपद्यस्यौचिती भवति, अतस्तदेकपरस्य व्याख्यान्तरस्यावकाशः। तद्यथा—'सत्यव्रतं सत्यपर'मित्यादौ 'सत्यात्मकं त्वां शरणं प्रपन्ना' इति श्रीकृष्णजन्मारम्भोक्तेः। 'सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम्। सत्यात् सत्यञ्च गोविन्दस्तस्मात् सत्यो हि नामतः' इत्युद्यमपर्वणि सञ्जयकृतकृष्णनाम्नां निरुक्तेश्च सत्यं श्रीकृष्णं धीमहि "नराकृति परं ब्रह्म" इति ब्रह्माण्डपुराणात्। 'तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्' इति श्रीगोपालतापनीभ्यश्च परम्। स्वेन धाम्ना श्रीमथुराख्येन सर्वत्र तदानीं कृपया दर्शितेन श्रीविग्रहेण च सदा निरस्तं कुहकं जीवानामविद्या येन तम्, 'मथ्यते तु जगत् सर्वं ब्रह्मज्ञानेन येन वा। तत् सारभूतं यद्यस्यां मथुरा सा निगद्यते॥' इति गोपालोत्तरतापनीप्रसिद्धेः। 'श्रवणात् कीर्त्तना-द्ध्यानात् पूयन्तेऽन्तेवसायिनः। तव ब्रह्ममयस्येश! किमुतेक्षाभिमर्शिन' इति दशमोक्तेश्च। "गृहदेहत्विट्प्रभावा धामानि" इत्यमरः। ननु तद्विग्रहस्य प्रापञ्चिकलोकदृश्यत्वात् यद् यद् दृश्यं तदनित्यं घटवदिति न्यायेनानित्यत्वं प्रसज्जेदित्यत आह—तेजोवारिमृदां त्रयाणां दृश्यभूतानां यथा यथावद् विनिमयः परस्परमि(मे)लनं यत्र तथाभूतस्त्रिसर्गस्त्रिगुणसृष्टो देहो मृषा मिथ्यैव येन तत् त्रितयसृष्टस्तद्विग्रह उच्यते, न मृषैवोच्यत इत्यर्थः। प्रपञ्चातीतस्यापि तस्य यत् प्रापञ्चिकैरसुरैर्दर्शनं तत् खलु विचित्र-लीलासाधिकया तदिच्छया दुस्तर्क्यस्वरूपयैव पित्तदूषितरसनैर्नरैर्मत्स्यण्डिकाचर्वणमिव तन्माधुर्य्यानुभवहीनम्। तदन्यैस्तु दुस्तर्क्यतत्कृपाप्रभावात् तन्माधुर्य्यानुभवसहितमेव। यदुक्तम्—'अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप! पपुर्दृशिभि-र्नृनार्य्यः। तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशञ्च यच्छन्॥' इत्यतोऽदृश्यस्यापि तस्य यद्दृश्यत्वं तत् कृपाया एव महैश्वर्यं ज्ञापयतीति ज्ञेयम्। अत एव भागवतामृतधृतं नारायणाध्यात्मवचनम् 'नित्यव्यक्तोऽपि भगवानीक्ष्यते

निजशक्तितः । तामृतं परमानन्दं कः पश्येतामितं प्रभुम्' इति । तत्रत्या कारिका च । 'ततः स्वयं प्रकाशत्वशक्त्या स्वेच्छाप्रकाशया । सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयः कृत' इति । 'एवमेव तासां मध्ये साक्षात् ब्रह्म गोपालपुरी ही'त्यादिश्रुतेर्ब्रह्मभूतानामपि तद्धामादीनां दृश्यत्वम् । ततश्च, यद् यद् दृश्यं चिद्भिन्नं तदनित्यं घटवदित्यनुमिमते भागवताभिज्ञाः । एवमवतारमूलकारणं कृपामुक्त्वा तस्य लीलामाह—अस्य यतो यत्र वसुदेवगृहे जन्मादि जन्मैश्वर्य्यप्रकटनपूर्ववृत्तकथनादि । तत इतरतश्च इतरत्र च नन्दगृहे अनु अयात् ? अयमेवागच्छत् । किमर्थमयात् अर्थेषु कंसवञ्चनादिषु व्रजसम्बन्धिवात्सल्यादिप्रेमप्रकाशरूपेषु वा अभिज्ञः । न त्वन्यपरतन्त्र इत्याह—स्वेनैव राजत इति । यद्वा स्वैः पित्रादिभिः श्रीनन्दाद्यैर्विराजमानत्वार्थमित्यभिप्रायः । न च तत्र तत्र तत्प्रेमाधीनतया तादृशलीलाविशिष्टत्वेऽपि तस्य मौग्ध्यमेव प्रत्येतव्यमित्याह—आदिकवये ब्रह्मणेऽपि ब्रह्म ब्रह्मात्मकं वत्सबालकादि तेने प्रकाशयामास । तच्च हृदा सङ्कल्पमात्रेणैव । यत्र योगमायावैभवे सूरयो भवनारदाद्योऽपि मुह्यन्ति । यद्वा आदिकवये स्वकुलस्यादिपुरुषः कविर्विज्ञश्च यः सत्यव्रतमनुस्तस्मै ब्रह्म निर्विशेषं स्वरूपं तेने स्वांशमत्स्यदेवोक्त्या प्रकाशयामास । तदुक्तिर्यथा—'मदीयं महिमानञ्च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि' इति । व्याख्यातञ्च श्रीधरस्वामिचरणैः—मे मया अनुगृहीतं प्रसादीकृतं ब्रह्म अपरोक्षीकृतं वेत्स्यसीति ब्रह्मणस्तत् प्रसादीकृतत्वञ्च वेदस्तवारम्भे व्याख्यास्यते । अथ तस्यापि शान्तदास्यादिरसपरिकरविशिष्टत्वेऽपि "तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः" इत्यादिभ्यो व्रजदेवीसाहित्येन परममाधुर्य्योदयात् तदीयरसस्यातिशयेनोपादेयतां दर्शयत् पुनरप्यर्थान्तरमत्रावकाशते । तद्यथा आद्यस्य शृङ्गाररसस्य जन्म यतस्तं धीमहि । पूर्वं तस्य परमार्थदर्शिभिः सद्भिर्विगीतत्वेन सतोऽपि नाश एवासीदिति भावः । अन्वयात् संयोगात् इतरतश्च विप्रलम्भात् संयोगविप्रलम्भाभ्यामेव शृङ्गाररसः सपरिकरः सम्पद्यत इति भावः । भीमसेनो भीम इतिवदाद्यरसोऽप्याद्यशब्देनोच्यते । यद्वा अत्र 'पिबत भागवतं रस' मित्युक्तेः शास्त्रस्यास्य रसरूपत्वादाद्यस्येत्यनेनार्थप्रत्यासत्त्या रसस्येत्यस्यैव विशेष्यपदस्योपस्थितेः । किं वा संयोगवियोगाभ्यां निष्पत्तिः स्वप्रतियोगिनं रसमेवोपस्थापयत्यतो न्यूनपदता नाशङ्कनीया । प्रत्युत तथा प्राप्तत्वेनादिरसस्य रहस्यत्वमेव द्योतितम् । तत्रालम्बनविभावत्वे तस्यान्यतो वैशिष्ट्यमाह—अर्थेषु चतुःषष्टिकलादिरसोपयोगिसमस्तवस्तुषु अभिज्ञः विदग्धः । न च प्राकृतनलादिनायकवत् कालकर्मादिग्रस्त इत्याह—स्वराट् किञ्च रसो ह्यन्यत्र नैव प्रसज्जेदित्याह—य एवादिकवये आदिरसस्य कवये भरताय हृदैव तदीयमनसैव ब्रह्म आदिरसस्य तत्त्वं तेने, रसस्यैकतानत्वोद्घाटनार्थमित्यर्थः । "वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः । तदपि यत्र तत्त्वे सूरयः कवयो मुह्यन्ति प्राकृतनलादिनायकनिष्ठतया वर्णनात् । तत्र दृष्टान्तः—तेज इति । तेजआदिषु वार्य्यादिबुद्धिरिव भगवदेकनिष्ठे रसे प्राकृतजननिष्ठत्वबुद्धिरित्यर्थः । यत्र कृमिविड्भस्मान्तनिष्ठेषु प्राकृतनायकेषु अतिनश्वरेषु रसो न भवति विचारतो विभाववैरूप्यात् तद्विपरीतं घृणामयं वैरस्यमेवोत्पद्यते तत्रैव रसं वर्णयन्तीत्यर्थः । किञ्च यत्र त्रयाणां वाच्यलक्ष्यव्यङ्ग्यानामर्थानां ध्वनिगुणालङ्काराणां वा सर्गः निर्माणप्रपञ्चः अमृषा सत्य एव भवन्नलौकिकत्वेन चमत्कारी स्यात् । अन्यत्र प्राकृतनायके कविप्रौढोक्तिमात्रप्राणो मिथ्यैवेत्यर्थः । ननु रसं केचिन्न मन्यन्ते तत्राह—धाम्ना माधुर्य्यास्वादसाक्षात्कारचमत्कारप्रभावेण स्वेन असाधारणेन निरस्ताः कुहका जरन्मीमांसका येन तम् । अथ तासामपि मध्ये 'कस्याः पदानि चैतानि याताया नन्दसूनुना । अनयाराधितो नूनं भगवान् हरिरीश्वरः' । इत्यादिभिः परममुख्यायाः श्रीवृन्दावनेश्वर्य्याः साहित्येन परम एव माधुर्य्योत्कर्षो भवति, अतस्तत्प्रदर्शकोऽप्यर्थोऽस्मिन् आदिमे श्लोकेऽन्वेष्टव्यः । स यथा–यतो याभ्यामेव आद्यस्य रसस्य जन्म प्रादुर्भावः । यावेव आदिरसविद्यायाः परमनिधानमित्यर्थः । तत्र यश्च इतरतः इति ल्यब्लोपे पञ्चमी । इतराः कान्ताः परित्यज्य अन्वयात् 'अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना । अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥' इत्यादिदृष्ट्या अनुगतेर्हेतोः अर्थेषु रसोपयोगिधीरललितत्वादिमयमुख्यरसेष्वभिज्ञः । या च तत एव हेतोः स्वेन कान्तेनैव राजते इति स्वराट् स्वाधीनकान्तेत्यर्थः । यश्च तत्तत्प्रकाशनार्थं आदिकवये आदितो जन्मारभ्यैव कवये तत्त्वज्ञाय श्रीशुकदेवाय ब्रह्म श्रीभागवतं मूर्द्धन्यरसमयरासपञ्चाध्यायीकं हृदा तेने "इदं भागवतं नाम पुराणं ब्रह्मसम्मित" मिति । शुकमुखादमृतद्रवसंयुतमिति । शुकवागमृताब्धीन्दुरित्यादिभ्यः यत् यतः श्रीभागवतात् यत्र रासे (वा) सति सूरयो मुह्यन्ति रसास्वादजनितामानन्दमूर्च्छां प्राप्नुवन्ति, यद्वा ययोः सूरयो भक्ताः किं वा याभ्यां श्रवणनयनादिविषयीभूताभ्यां सूरयस्तत्परिकरभूता भक्ता मुह्यन्ति, महाविज्ञा अपि मूढा भवन्तो धर्मविपर्य्ययं प्राप्नुवन्तीत्यर्थः । तत्र दृष्टान्तेनापरानपि संगृह्णाति—तेजोवारिमृदां यथा विनिमयः स्वस्वधर्मव्यत्ययः । तत्र तेजसां चन्द्रादीनां तदीयरासलीलादर्शनात् स्तम्भेन स्वीयचलत्वधर्मव्यत्ययः । वारीणां तन्मुरलीवाद्यादिना स्तम्भेन मृद्धर्मः । मृदामपि पाषाणादीनां द्रवेण वारिधर्मश्च यथेति । यत्र ययोः स्वेन धाम्ना प्रभावेण तिसृणां श्रीभूलीलानां गोपीमहिषीलक्ष्मीनां वा अन्तरङ्गबहिरङ्गतटस्थानां वा शक्तीनां सर्गोऽमृषा सत्य एव । सदा तासां तद्धाममयत्वात् यत्रेत्यधिष्ठानकारणत्वात् याभ्यां सृष्टाः श्र्यादयः स्वमहसा सदा वर्त्तन्त एवेत्यर्थः, यत्तदोर्नित्यसम्बन्धात् । तौ निरस्तकुहकं निष्कपटं यथा स्यात् सत्यं यथार्थस्वरूपं यथा स्यात् परं सर्वोत्कृष्टं यथा स्यात् तथा धीमहि इति शास्त्रस्यास्य विषयो दर्शितः । अथ तथाभूतमप्याश्रयत्वं येनैव लभ्यते स शास्त्रस्याभिधेयो भक्तियोगस्तथा स एव परमकाष्ठामापद्य श्रीभगवदाकर्षको भवन् प्रेमाभिधः प्रयोजनञ्चेत्यनेनैव श्लोकेन स भक्तियोगोऽवश्यं माननीय

इत्यतोऽर्थान्तरमत्र मन्त्रेणान्तर्भवति। तद्यथा—'सत्यम्। तदेव सत्यं तदु हैव मङ्गलं यदुत्तम-श्लोकयशोऽनुगीयते' इति द्वादशोक्तेः। तत्रापि परं श्रेष्ठं परं वास्तववस्तुरूपत्वात् त्रिगुणातीतम्। तथा सत्यं सद्भ्यो हितं परमकल्याणगुणमयं भक्तियोगं धीमहि। यदुक्तम्—'लक्षणं भक्तियोगस्य निर्गुणस्येत्युदहृतम्' इति 'न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि। मयानुमोदितः सम्यङ् निर्गुणत्वादनाशिष' इति च। श्रुतिश्च गोपालतापनी—'विज्ञानघनानन्दघनसच्चिदानन्दैकरसे भक्तियोगे तिष्ठती'ति। तस्य प्रभावमाह—यत एवाद्यस्य परमेश्वरस्य जन्म उपासकेषु भगवत्त्वेन प्रादुर्भावः तथा इतरतः इतरेष्वर्थेषु निष्कामकर्मयोगज्ञानयोगेषु अन्वयात् यत्साहित्याच्च आद्यस्य जन्म उपासकेषु परमात्मत्वेन ब्रह्मत्वेन च साक्षात्कारो भवेदित्यन्वयः। ननु ज्ञानेन केवलेनैव ब्रह्मसाक्षात्कारः प्रसिद्धस्तत्राह—योऽभिज्ञः अभि सर्वतो भावेन ज्ञा ज्ञानं यतः ज्ञानस्य सात्त्विकत्वाद् गुणातीताया भक्तेस्तत्रान्वयं विना परमात्मनो ब्रह्मणश्च ज्ञानमेव न भवेदित्यर्थः। "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानम्" इत्यादेः। "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वत" इत्यादेश्च। ननु ब्रह्मसाक्षात्कारार्थं ज्ञानयोगो यथा भक्तिमपेक्षते तथैव भगवत्साक्षात्कारार्थमपि भक्तियोगो ज्ञानमपेक्षताम् इति चेत्तत्राह—स्वराट् स्वेनैव राजते इति सः। सम्राडिव स्वतन्त्रो न कस्याप्यधीन इत्यर्थः।

'अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥' इति विधिवाक्यान्मेघाद्यमिलितेन केवलेन सौरकिरणेनेव ज्ञानाद्यमिश्रेणेति तीव्रेणेत्यस्यार्थः। तथा—'तत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा॥' इत्यादिवाक्याच्च। प्रत्युत,—'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥' इति तत्साहित्यनिषेधश्रवणाच्च। किञ्चैतादृशो भक्तियोगो भक्तानुग्रहं विना न लभ्यत इत्याह—तेने इति। ब्रह्म हृदि यस्य तेने ब्रह्महृदा नारदेन आदिकवये व्यासाय तेने कृपया प्रकाशितः। ननु सर्वज्ञस्य व्यासस्यापि भक्तियोगज्ञानमन्याधीनं कथं प्रतीमस्तत्राह—मुह्यन्तीति। सूरयो वसिष्ठादयोऽपि यत् यस्मिन् मुह्यन्ति। गुणातीते भक्तियोगे गुणजन्यानां बुद्ध्याद्यन्तःकरणानां स्वतः प्रवेशाशक्तेः मोहमज्ञानमेव प्राप्नुवन्तीत्यर्थः।

'यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति। कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने' हंसगुह्योक्तेः। ननु भक्तियोगो न केवलं गुणातीत एव तस्यापि तृतीयस्कन्धे त्रिगुणमयत्वदर्शनादित्यत आह—यत्र त्रिसर्गः त्रिगुणसृष्टत्वं मृषा अवास्तव इत्यर्थः। यथा तेजोवारिमृदां विनिमयो मेलनम्। निस्तेजोऽपि निर्जलमपि निर्धूलिकमपि दुग्धं तप्तमिति जलवदिति मलिनमिति तत्तन्मेलनाद्भवति यथा तथैव त्रिगुणातीतो भक्तियोगः पुरुषवर्तिसत्त्वादिगुणयोगात् सात्त्विको राजसस्तामसश्चोच्यते। ननु भक्तियोगस्य त्रिगुणातीतत्वे बहवो विवदन्ते तत्राह—धाम्ना स्वेनेति। स्वस्वरूपेणालौकिकमाधुर्य्यमयेन भक्तानामनुभवगोचरीभूतेनैव निरस्ताः कुहकाः कुतर्कवन्तो येन तं न ह्यनुभूयमानेऽर्थे प्रमाणापेक्षेति भावः। "इह किलाध्यात्मदीपमतितितीर्षतां तमोऽन्ध" मिति, "कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीप" इत्याभ्यां श्रीभागवतस्य प्रदीपत्वम्। "पुराणार्कोऽधुनोदित" इत्यनेनार्कत्वम्। 'निगमकल्पतरोर्गलितं फलं रस' मित्यनेन रसमयफलत्वम्। 'हरिलीलाकथाव्राताम्ृतानन्दितसत्सुर' मित्यनेन मोहिनीत्वं च दृश्यते। तत्रास्मिन् पद्ये प्रथमेन व्याख्यानेन दीपत्वं, द्वितीयेनार्कत्वं, तृतीयचतुर्थपञ्चमेन रसमयफलत्वम्। किञ्च, पञ्चानामेवैषामर्थानां परमदुर्लभातिस्वादुत्वेनामृतत्वात् भक्तानामेव तत्सम्प्रदानभूतत्वेन देवत्वात् तत्तद्वाचकस्य शास्त्रस्यास्य तत्परिवेष्टृत्वेन मोहिनीत्वञ्च ज्ञेयम्। एवञ्च यद्यपि सर्वस्य द्वादशस्कन्धस्यैव शास्त्रस्यास्य रसमयफलत्वार्कत्वदीपत्वादीनि तदपि 'भूम्ना व्यपदेशा भवन्ती'ति न्यायेन सर्गे निरोधे च क्वचित् तादृशस्तुत्यादौ च अध्यात्ममात्रप्रकाशकत्वेन दीपत्वम्। विसर्गस्थानपोषणादिषु धर्मार्थकाममोक्षाणाम् अन्येषाञ्चाशेषविशेषाणां प्रवृत्तनिवृत्तविहितनिषिद्धसाधनफलानामपि प्रकाशकत्वेनार्कत्वम्। आश्रयतत्त्वस्य भगवतस्तद्भक्तानाञ्च जन्मकर्मादिलीलाभक्तिप्रेमादौ च प्रस्तुते रसमयफलत्वम्; तत्र तत्रैव भक्त्यनुकूलेनार्थेन स्वभक्तवर्गानन्दनार्थं तत्प्रतिकूलेनार्थेनासुरसंघव्यामोहनार्थं मोहनीत्वञ्च ज्ञेयम्। न चास्य शास्त्रस्य साक्षाद्भक्तिरसमयस्य तत्तत्प्रतिकूलार्थप्रस्तुतिरसङ्गतेति वाच्यम्; सर्वशक्तिपरिपूर्णस्य साक्षाद् भगवत इवास्यापि विविधाधिकारिस्वस्वहृदयानुरूपार्थग्रहणार्थं सर्वशक्तिलिङ्गप्रकाशकत्वस्यौचित्यात् 'मल्लानामशनि' रित्यत्र 'विराडविदुषा' मितिवदिति सर्वं समञ्जसम्॥ १॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

अगणितगुणसिन्धुः स्वप्रपन्नैकबन्धुः सकलभुवनहेतुः सर्वसौन्दर्यहेतुः॥
विगतसकलदोषो वेदवेद्यः परेशो भवतु मम गतिः स सर्वदा गोपवेषः॥ १॥
नत्वा हंसं कुमारं च देवर्षिं निम्बभास्करम्। श्रीभागवतसिद्धान्तप्रदीपोऽयं विरच्यते॥ २॥

इह खलु वेदव्यासात्मना भगवान् सर्ववेदोपबृंहणार्थं महाभारतं निर्मायाथ वेदान्तोबृंहणार्थं श्रीमन्नारदाज्ञया मुमुक्षवनुग्रहाय पञ्चत्रिंशदधिकत्रिशताध्यायनिबद्धद्वादशस्कन्धयुतं कल्पद्रुमवदभीष्टार्थप्रदं श्रीमद्भागवतं महापुराणं प्रारिप्सुर्ग्रन्थविषय-

भूतस्य परब्रह्मपरमात्मादिपदवाच्यस्य भगवतो मङ्गलाचरणव्याजेन लक्षणं वदन् परपक्षान्निराकरोति—जन्माद्यस्येति । ब्रह्म नास्तीति बाह्यपक्षं तावन्निराकरोति—सत्यं धीमहीति । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिप्रोक्तं भगवन्तं वयं ध्यायेमेत्यर्थः । स्वर्गादिप्राप्तेः परमपुरुषार्थत्वं मन्यमानस्य जैमिनेर्मतं निराकर्तुं जगत्कारणप्राप्तिः परमपुरुषार्थ इति सूचयन् सत्यं विशिनष्टि—परमिति । परं विश्वकारणम् । एतदेव द्रढयितुमाह—जन्माद्यस्य यतोऽन्वयादितरत इति । अन्वयादनुवृत्तेः कार्योपादानतयानुगमनात् इतरतोऽनन्वयात्सृज्यमानविश्वेक्षणसृजननियमनादिनिमित्तकर्तृव्यापाराच्च यद्वान्वेति कार्याकारं प्राप्नोतीत्यन्वयः । विश्वोपादानहेतुः इतरस्तदीक्षणादिना तन्निमित्तहेतुः एवंभूतात् "तदात्मानं स्वयमकुरुत तदैक्षत बहु स्याम्" इत्यादिश्रुतिप्रोक्ताद्यतो हेतोः अस्य विश्वस्य जन्मादि जन्मस्थितिभङ्गमोक्षं भवति तमित्यर्थः । यत इत्यत्र 'जनिकर्तुः प्रकृतिः' (१ । ४ । ३०) इति जायमानहेतोरपादानसंज्ञायाम् 'अपादाने पञ्चमी' (२ । ३ । २८) इति पञ्चमी । कूर्माङ्गप्रसारणापसारणन्यायेन सर्वात्मनः सर्वद्वैताद्वैतभूतस्य सर्वत्रोपादानत्वस्य निमित्तत्वस्य चोपपत्तेः सर्वात्मत्वं च । 'सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः । तस्यापि भगवान् कृष्णः किमतद्वस्तु रूप्यताम् ॥' इत्यादौ स्फुटीभविष्यति । तथा च श्रुतिः—'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मे'ति । यतो जायन्ते इति जन्मोक्तिः, येन जीवन्तीति स्थित्युक्तिः, यं प्रयन्तीति प्रलयोक्तिः, अभिसंविशन्तीति मोक्षोक्तिः । विस्तरस्तु वेदान्तकौस्तुभाख्ये सूत्रभाष्ये द्रष्टव्यः । प्रधानजगत्कारणवादिकपिलमतं निराकर्तुमाह—योऽर्थेष्वभिज्ञः । अर्थेषु सृज्यमानेषु विविधविचित्रप्रकारेषु यः अभिज्ञस्तम्, "यः सर्वज्ञ" इति श्रुतेः । ननु बहुषु वेदपुराणप्रसिद्धेषु सत्सु एकस्य जगत्कारणत्वे किं बीजमित्यत आह—स्वराडिति । तेने ब्रह्म हृदा य आदिकवये इति च । यः शिवादिपित्रे पद्मजायापि वेदं प्रकाशितवान् तम् । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।' इति श्रुतेः । नन्वेवंभूतं जगद्धेतुं कपिलादयः कुतो न जानन्त्यत्राह—मुह्यन्ति यत्सूरय इति । असदेव जगदुत्पद्यते तत्रापि परमाणुभ्य एव इति वैशेषिकमतं निराकर्तुमुत्पत्तेः प्रागपि कारणात्मना जगत्सदेव पुनः परमेश्वरशक्तिगुणेभ्य एव जायते इत्याह—तेजो वारिमृदां यथा विनिमय इति । यथा तेजोवारिमृदां विस्फुलिङ्गबुद्बुदघटादिरूपो विनिमयो विकारः सदेव जायते तथा यत्र अमृषा सदेव कारणात्मना विद्यमान एव त्रिसर्गः त्रयाणां प्रकृतिगुणानां सृज्यते इति सर्गः । कर्मणि घञ्, उत्पद्यते इत्यर्थः । "सदेव सोम्येदमग्र आसीत्" इति श्रुतेः मायावादिना तु यत्र त्रिसर्गोऽमृषा यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत्प्रतीयते इति व्याख्यातं,-तदसत्; "सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतिविरोधात् जगत्सत्यं सदुपादानकत्वात् घटवत् इत्यन्वयात्, न यत्सदुपादानकं न तत् सत्यं खपुष्पवत् इति व्यतिरेकाच्च हेतोः निर्दोषत्वमाह—धाम्ना स्वेन सदा निरस्तकुहकमिति । परमात्मा स्वधाम्नैव सदा निरस्तकुहकः कुहकोपलक्षितसर्वत्रिगुणसर्गजन्यदोषास्पृष्टस्तमित्यर्थः । वक्ष्यते चैतत्—"एतदीशानमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न लिप्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रयात् ॥" उपक्रमश्लोके 'जन्माद्यस्य यतः' (१।१।२) इति वेदान्तसूत्रोपन्यासो वेदान्तानां तथा धीमहीति गायत्रीपदोपन्यासश्च गायत्र्याः फलितार्थप्रकाशकं श्रीमद्भागवतमिति द्योतयति—सत्यत्वादिमत्त्वे सति जगज्जन्मादिहेतुत्वे मुख्यस्य शास्त्रविषयस्य भगवतो ब्रह्मणो लक्षणं, यत्तु सत्यमिति स्वरूपलक्षणं, जन्माद्यस्येति तटस्थलक्षणं, तन्न; जगत्कर्तृत्वस्य धर्मस्य "सोऽसृजत्सर्वाँल्लोकान्" इति श्रुतेः, स्वरूपे उपपन्नत्वेन तटस्थलक्षणस्यासम्भवात् । विस्तरस्तु प्राचां ग्रन्थेषु द्रष्टव्यः ॥ १ ॥

श्रीमधुसूदनसरस्वतीकृता भागवतभावार्थप्रकाशिका व्याख्या

हरिः ॐ तत् सत् ।

श्रीकृष्णं परमं तत्त्वं नत्वा तस्य प्रसादतः । श्रीभागवतपद्यानां कश्चिद् भावः प्रकाश्यते ॥ १ ॥
अनुदिनमिदमायुः सर्वदा सत्प्रसङ्गैर्बहुविधपरितापैः क्षीयते व्यर्थमेव ।
परिचरितसुधाभिः सिच्यमानं तदेतत् क्षणमपि सफलं स्यादितीयं मे श्रमोऽत्र ॥ २ ॥

कृत्स्नग्रन्थतात्पर्यविषयीभूतमर्थं दर्शयन् भगवान् बादरायणस्तमेव ध्येयत्वेनोपशिक्षयन् मङ्गलमाचरति—जन्माद्यस्येति । तं परं सत्यं वयं धीमहीति सम्बन्धः । सत्यम् अबाध्यम् । तत् किंस्विद् व्यवहारमात्राबाध्यं तद्व्यावर्त्तनायाह—परमिति । परमार्थसत्यम्, अत्यन्ताबाध्यमित्यर्थः । तथा च श्रुतिः—'सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति प्राणशब्दोदितानां व्यवहारतः सत्यानाम् अधिष्ठानभूतं परमार्थसत्यमात्मानं दर्शयति—'एवं सत्यं ज्ञानमनन्तं ब्रह्म, ऐतदात्म्यमिदं सर्वं, तत् सत्यं स आत्मा तत्त्वमसी'त्यादि श्रुतिरपि ब्रह्मात्मशब्दोदितं परं तत्त्वमबाध्यं दर्शयति—सर्वभ्रमाधिष्ठानत्वात् सर्वबाधावधित्वाच्च परमार्थसत्यम् । न हि निरधिष्ठानो भ्रमोऽस्ति, न वा निरवधिर्बाधः, तत्र सर्वभ्रमाधिष्ठानत्वं 'जन्माद्यस्य यत' इत्यादिना दर्शितम् । सर्वबाधावधित्वञ्च तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषेत्यादिना । तं परं सत्यं सर्वाधिष्ठानसन्मात्रमखण्डवाक्यार्थभूतं श्रुत्वा मत्वा च वयं मुमुक्षवो ध्यायेम निदिध्यासेम । ध्यानमत्र निदिध्यासनरूपमेवाभिप्रेतं न तूपासनम् । निदिध्यासनं हि—वस्तुस्वरूपापेक्षप्रत्ययानन्तरितशाब्दज्ञानसन्ततिरूपम् । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुत्या 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इत्यादिश्रुत्या च आत्मसाक्षात्कारसाधनत्वेन विहितम् । उपासनन्तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रं तत् मानसक्रियाप्रवाहरूपं यथा—'यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद्वषट् करिष्यन्नि'त्यादि । इदञ्च वस्तुस्वरूपान-

पेक्षमपि तदविरोधि किञ्चित् । तद्विरोध्यपि यथा "वाचं धेनुमुपासीत" इत्यादि । द्विविधमप्युपासनं श्रुत्या ब्रह्मणि निषिद्धम् । 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति शुद्धगोचराया वृत्तेरुपनिषन्मात्रकरणकत्वात् 'तन्त्वौपनिषदम्' इत्यादिश्रुतेस्तस्य एव चावर्त्त्यमानाया निदिध्यासनरूपत्वाद् युक्तं शुद्धगोचरत्वम् । एतावन्मात्रपर्य्यवसानाच्च सर्वसाधनविधीनां 'धीमही'त्युक्तम् । एतस्य च मङ्गलत्वम् 'सर्वदा सर्वकार्य्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥' इत्यादिशास्त्रसिद्धम् । एवं शुद्धस्य ब्रह्मणो निदिध्यास्यमानस्य परमार्थसत्यतामुपपादयितुं तत्पदार्थस्वरूपतामाह—जन्माद्यस्य यत इत्यादिना । अस्य प्रत्यक्षादि-सकलप्रमाणसन्निधापितस्य जगतो जन्मादि जन्मस्थितिभङ्गं यतो भवतीति तं सत्यं धीमहीति सम्बन्धः । तथा च श्रुतिः—'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति' इत्याद्याः; 'आनन्दो ब्रह्मेति व्यजानात्, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्याद्या च । जगज्जन्मस्थितिलयकारणतां ब्रह्मणो दर्शयति—यत इति । प्रकृतौ पञ्चमी, 'जनिकर्तुः प्रकृतिः' (१।४।३०) इति पाणिनिस्मरणात् । जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः 'सर्वादीनि सर्वनामानि' (१।१।२७) इतिवत् । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्त्यपेक्षञ्च ।

ननु "असद्वा इदमग्र आसीत्" इति श्रुतेः शून्यमेव जगत्कारणमस्तु, नेत्याह—अन्वयादिति । इदं सदिदं सदिति सद्रूपस्यैव कारणस्य कार्येष्वनुस्यूतत्वात् इतरतश्च असतोऽनन्वयात् शून्यमिदमिति प्रतीत्यभावात् "कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेत" इति वाक्येनासतः कारणताप्रतिषेधाच्च सद्रूपं ब्रह्मैव जगदुपादानमित्यर्थः । "सदेव सौम्येदमग्र आसीत्" इति श्रुतिवाक्यान्वयात् इतरतश्च 'असद्वा इदमग्र आसी'दित्यसतः सत्तान्वयाच्चेति वा । तथा चासत्यमिदं सूक्ष्मत्वेन गौणया वृत्त्या सत्ये च योजनीयम् । एतच्च 'समाकर्षात्' (१।४।१६) इति सूत्रेण व्याख्यातम् । इतरतश्च इत्यत्र चकारादसतोऽन्व-यलाभः । अथवा कार्य्यान्वयात् ब्रह्म कारणमित्युक्ते कार्यविनाशे तस्य विनाशमाशङ्क्योक्तम्—इतरतश्चेति । तथा हि घटनाशेऽपि तदन्विता मृन्न विनश्यति, घटभिन्ने शरावादौ तस्या अन्वयात्; एवं सदपि इतरतः इतरत्र कार्यान्तरे तदुपलभ्यान्वयादित्यर्थः । वाक्यार्थानुपपत्त्यादिदोषाच्च नासतो जगत्कारणतेत्याह—अर्थेष्वभिज्ञ इति । न हि सतात्पर्य्येणाविदित्वा कश्चिद्रचयितुं शक्यते, किं पुनरवस्तुनेति भावः । तथा च श्रुतिः—'यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' इति, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेय' इत्याद्या चित्स्वरूपसाधनप्रयोजनादिविज्ञानवत एव जगत्कारणत्वं दर्शयति–अभितः सर्वप्रकारेण सामान्यतो विशेषतश्च सर्वं वस्तु जानातीति अभिज्ञः सर्वज्ञः सर्वविदिति पदद्वयार्थो दर्शितः । अर्थेष्विति सप्तमी, सर्वत्रैकरूपैव वृत्त्या कल्पिततत्त्वरूपा विषयतेति सूचयति—अथवा अन्वयादितरश्चार्थेष्विति पूर्वेणैव सम्बन्धः । एवञ्च सर्वज्ञत्वोपादानत्वेन परमाणुकारणवादः प्रधानकारणवादश्च निराकृतः । ननु मा भूत् कारणता परमाणूनां, प्रधानस्य तु भविष्यति सत्त्वपरिणामेन सार्वज्ञ्यसम्भवात् ब्रह्मणश्च निर्धर्मकत्वेन सर्वज्ञानाकर्तृत्वादित्यत आह—स्वराडिति । स्वयमेव राजते प्रकाशते इति स्वराट्, अन्यानपेक्षः प्रकाशरूप इत्यर्थः । तथा च "सविता प्रकाशत" इत्यादिवत् कर्तृत्वौपचारि-कत्वेन सर्वविषयज्ञानरूपस्य विवक्षितत्वात् न प्रधानस्याचेतनस्य कारणताप्रसङ्ग इत्यर्थः । एवञ्चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा समर्थिता भवति, अन्यथा प्रधानविज्ञानेन तत्कार्यज्ञानसम्भवेऽपि तदकार्याणां पुरुषाणां ज्ञानासम्भवात् ब्रह्मणि विदिते तु पुरु-षाणां स्वत एव तद्रूपत्वात्, इतरेषाञ्च तत्र कल्पितत्वेन तदव्यतिरेकात् ।

"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यादिश्रुत्या 'कस्मिन्नु भगवन् विज्ञाते सर्वमिदं विज्ञातं भवती' त्याद्यया 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदित'मित्याद्यया च प्रतिपादितैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः । ननु ब्रह्मकारणत्वेऽप्येकविज्ञाने सर्वविज्ञानप्रतिज्ञा नोपपद्यते; वेदस्यापौरुषेयत्वेन स्वातन्त्र्याभ्युपगमात् तस्य ब्रह्मकार्यत्वे पौरुषेयत्वेना-प्रामाण्यप्रसङ्गात् किम्बला ब्रह्मकारणतापि व्यवस्थाप्येत, तस्मात् सङ्कोचितायां प्रतिज्ञायां स्वकार्यापेक्षया प्रधानमपि लब्धप्रसर-मित्याशंक्याह--तेने इत्यादि । ब्रह्म वेदं यस्तेने विस्तारितवान् श्वासप्रश्वासादिवल्लीलया आविर्भावितवान् । तथा च श्रुतिः--'अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेद' इत्याद्या वेदस्यापि ब्रह्मोपादानतां दर्शयति--न च ब्रह्मकार्यत्वे सति तस्य पौरुषेयत्वं पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णानां नित्यत्वेऽप्यानुपूर्वीविशेषस्य पुरुषजन्यत्वात् मीमांसकम्मन्यस्यापि वेदाप्रामाण्य-प्रसङ्गः, वर्णनित्यतामात्रेणैवापौरुषेयत्वव्यवस्थापने लौकिकवाक्यस्यापि तत्प्रसङ्गः, तस्मान्मानान्तरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षत्वलक्षणाप्रामाण्यप्रयोजकम् । तच्च न वेदे, वेदार्थस्य मानान्तरागोचरत्वात् । इदमेव श्रुत्या निःश्वसितदृष्टान्तेन दर्शितम् । यथा हि निःश्वासः पुरुषाज्जायमानोऽपि न पुरुषचिकीर्षाजन्यः, सुषुप्तावपि दर्शनात्; एवं वेदो ब्रह्मणः सकाशाज्जायमानोऽपि न चिकीर्षाजन्यः, तदर्थस्य वेदातिरिक्तमानाविषयत्वात् । तथा वेदतदर्थज्ञानयोस्तुल्यकालत्वान्न ब्रह्मणः सार्वज्ञ्यव्याघातो न वा वेदस्य पौरुषेयत्वम् । एवञ्च सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न सङ्कोचनीया, बाधकाभावात् । अत्र चेदमनुमानं सूचितं–वेदनिष्ठ-सर्वार्थप्रकाशनशक्तिः सदुपादाननिष्ठा, कार्यगतप्रकाशनशक्तित्वात्, वह्न्युपादानकदीपगतप्रकाशनशक्तिवदिति । अतो वेदोपादान-त्वेनापि ब्रह्मणः सार्वज्ञ्यसिद्धिः । केचित् हिरण्यगर्भ एव वेदप्रवक्ता जगत्कारणञ्चेत्याहुस्तन्निराकरोति--हृदा य आदिकवये इति । आदिकविर्हिरण्यगर्भस्तस्मै हृदा सह यो ब्रह्म तेने अन्तःकरणं सूक्ष्मपञ्चमहाभूतकार्यमुत्पाद्य तदुपाधेर्हिरण्यगर्भस्य वेदार्थज्ञानं

कारितवानित्यर्थः। तथा च श्रुतिः—'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह वेदमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति हिरण्यगर्भाद्वेदाविर्भावयोः परमेश्वराधीनतां दर्शयति—तदपि हृदा मनसा एव तेने, न तु मुखेनाध्यापितवानिति वा। अनेन सर्वान्तर्यामित्वं दर्शितम्। तथा च श्रुतिः—'यः सर्वेषु भूतेषु सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो मयत्येष त आत्मान्तर्याम्यमृत' इत्याद्या सर्वान्तर्यामित्वेन परमात्मानं प्रतिपादयति।

ननु उदाहृतश्रुतीनां ब्रह्मणि प्रामाण्यं न सम्भवति, ब्रह्मणः सिद्धत्वेन मानान्तरायोग्यत्वात्। अन्ततः स्वरूपचैतन्यस्यैव मानान्तरत्वात्। तथा च तत्संवादे श्रुतीनां नाज्ञातज्ञापकत्वलक्षणं प्रामाण्यं, विसंवादे तु बाधितविषयत्वात् सुतरामप्रामाण्यम्। तथा च प्रधानपरमाण्वादिकारणताबोधकमनुमानं लब्धावकाशं भविष्यतीत्याह—मुह्यन्ति यत् सूरय इति। यत् यत्र यस्मिन् विषये अखण्डानन्दाद्वये स्वरूपचिन्मात्रलक्षणे सूरयस्तार्किकादयो मुह्यन्ति मोहमज्ञानमनुभवन्ति। मोहो द्विविधः—आवरणरूपो विक्षेपरूपश्च। आवरणरूपोऽपि असत्त्वावरणरूपः अभानावरणरूपश्चेति द्विविधः। तत्र नास्ति शुद्धं ब्रह्म न भासते चेति द्विविधोऽपि मोहो वेदान्तशास्त्रविचारविमुखैरनुभूयते। वेदान्तशास्त्रविचारपराणां तु परोक्षज्ञानेनासत्त्वावरणनिवृत्तावप्यभानावरणमनुवर्तत एव, नास्ति ब्रह्मेति प्रतीत्यनुदयेऽपि मम न भाति ब्रह्मेति तेषां प्रतीतेः, अत एव ते तदभानावरणनिवर्तकस्य साक्षात्कारस्य साधनान्यनुतिष्ठन्ति। एवञ्च विक्षेपावरणकार्यभ्रमविशेषरूपं प्रत्यक्षमेव यतो जीवाद् भिन्न एवेश्वरो जगतो निमित्तकारणमात्रमेवेति तार्किकवैशेषिकपातञ्जलपाशुपतादयो व्यवहरन्ति। साङ्ख्यमीमांसकादयस्तु जगन्निमित्तकारणत्वेनापि नेश्वरमुपपादयन्ति, किन्तु प्रधानपरमाण्वाद्येव तेन रूपेणोपास्यमित्याहुः। तस्मात् ब्रह्मविषयकमोहस्यापरोक्षत्वात् स्वरूपचैतन्यस्य च तत्साधकत्वेन तदनिवर्त्तकत्वात्तन्निवर्त्तकवृत्त्युत्पादनेन वेदान्तानां प्रामाण्यमव्याहतमेव। सिद्धत्वेऽपि च ब्रह्मणो मानान्तरायोग्यत्वं रूपादिहीनत्वेन व्युत्पादितं भाष्यकारप्रभृतिभिः। एवं पूर्वार्द्धेन तत्पदवाच्यार्थमुक्त्वा परार्द्धेन तल्लक्ष्यं वक्तुमारभमाणः "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत" इति न्यायेनाह—तेजोवारीत्यादिना। यत्र ब्रह्मणि त्रयाणां तेजोऽबन्नानां सर्गः त्रिसर्गः स मृषा मिथ्यैव शुक्तौ रजतवत् छान्दोग्ये सृष्टिप्रकरणे त्रयाणां तेजोऽबन्नानां साक्षात् पठितत्वात् 'त्रिसर्ग' इत्युक्तम्। वियदधिकरणन्यायेन तु पञ्चभूतसर्ग इति द्रष्टव्यम्। तन्मिथ्यात्वे दृष्टान्तमाह—तेजोवारिमृदां यथा विनिमय इति। विनिमयो व्यत्ययः व्यत्यासः व्यामिश्रीभावः अन्यस्मिन्नन्यावभासरूप इति यावत्। तथा च श्रुतिः—'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्'। इत्यादिना कृत्स्नस्यापि विकारस्यानृततां दर्शयति—न ह्यारम्भवादो वा परिणामवादो वा सम्भवति। तथा हि—परमाणुः परमाण्वन्तरेण संयुज्यमानो द्व्यणुकमारभत इत्यभ्युपेयते। तत्र द्व्यणुकासमवायिकारणभूतः संयोगः परमाण्वोः कार्त्स्न्येन वा समवायादेकदेशेन वा ?। आद्ये प्रथमानुपपत्तिः। द्वितीये सावयवत्वापत्तिः। एवं परिणामोऽपि प्रधानस्य कार्त्स्न्येन वा ? एकदेशेन वा ?। आद्ये कारणविनाशापत्तिः। द्वितीये सावयवत्वापत्तिः। न चेष्टमेवैतत्, सावयवत्वे तस्यापि जन्यत्वेन मूलकारणत्वानुपपत्तिः। एवं कार्यमपि कारणव्यापारात् प्राक् असत् सद् वा ?। आद्ये कथं कार्यकारणभावग्रहः ? न हि खपुष्पेण समं कस्यचित् सम्बन्धो गृह्यते। ननूत्पद्यते घट इतिवत् प्रतियोगित्वेनासतोऽपि कार्यत्वं भविष्यतीति चेत्,—हन्त प्रागभावप्रतियोगित्वं निराश्रयं साश्रयं वा ? आद्ये शशविषाणतुल्यता। द्वितीये सत्कार्यवादापत्तिः। प्रागभावप्रतियोगित्वाश्रयत्वेनैव कार्यसत्त्वाङ्गीकारात्। न च सत्कार्यवादोऽपि घटते, कारणव्यापारवैयर्थ्यापत्तेः। आविर्भावतिरोभावयोरपि सदसत्त्वविकल्पग्रासात्। तस्मात् सदसद्विलक्षणत्वेनानिर्वचनीयतैव कार्यकारणयोरिति विवर्तवादोऽवशिष्यते। तथा च अविद्यावशात् शुद्धे ब्रह्मणि द्वैताभासो मिथ्येत्यर्थः। नन्वविद्याकार्याणामसत्यत्वेऽपि अविद्यायाः सत्यत्वमस्तु, अनादिभावत्वात् ब्रह्मवत् कल्पकशून्यत्वाच्च। न हि द्वैतप्रपञ्चकल्पनाहेतोरविद्यायां कल्पकान्तरमस्ति, स्वस्या एव कल्पकत्वे आत्माश्रयत्वात् अविद्यान्तराभ्युपगमे चानवस्थानात् तथा विज्ञानेन चैकसर्वविज्ञानव्याघातः अनिर्मोक्षापत्तिश्चेत्यत आह—धाम्ना स्वेन सदा निरस्तकुहकमिति। सदा निरस्तं नित्यनिवृत्तं कुहकं कपटमविद्याख्यं यस्मिन् तत्तथा तत्र हेतुः—स्वेन धाम्नेति। अखण्डानन्दाद्वितीयचैतन्यरूपत्वात् इत्यर्थः। तथा च श्रुतिः—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादिरन्यथानुपपद्यमानैरेकैवाद्वितीयशब्दैरखण्डमेव वस्तु प्रतिपादयति—दृग्दृश्यसम्बन्धानुपपत्त्या कल्पितत्वेनैवाविद्यायाश्चैतन्यभास्यत्वनियमाच्च एतस्या एव च स्वपरसाधारणकल्पनामूलत्वान्नाविद्यान्तराभ्युपगमदोषः। उत्पत्त्यनङ्गीकारेण ज्ञप्तेश्च नित्यत्वेन नात्माश्रयदोषः। अनादिभावत्वञ्चात्मनो नित्यत्वप्रयोजकं न भवति, किन्तु परमार्थसत्यत्वम्। अविद्यायाः सदसद्विलक्षणत्वात् ज्ञाननिवर्त्यत्वोपपत्तिः। तथा च मायातत्कार्यहीनः परमात्मा तत्पदलक्ष्यो दर्शितः। एतेनैव त्वम्पदलक्ष्योऽपि दर्शितः, तस्यापि मायातत्कार्यशरीरादिहीनत्वात् जाग्रत्स्वप्नसुषुप्तिसाक्षिणस्तद्वत्त्वाभावात्। एवञ्च पदार्थज्ञानपूर्वकवाक्यार्थबोधे सति तदा वृत्तिरूपं निदिध्यासनमुपपन्नम्। अथ 'जन्माद्यस्य यत' इत्यनेनानन्दरूपत्वं दर्शितम्। 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिश्रुतेः 'अन्वयादि'त्यनेन सद्रूपत्वं नित्यत्वं विभुत्वं च सर्वदेशकालान्वयबोधात्। 'स्वराडि'त्यनेन स्वप्रकाशज्ञानरूपत्वं, 'धाम्ना स्वेन निरस्तकुहक' मित्यनेनाद्वितीयत्वं, 'सत्य'मित्यनेन परमार्थत्वमिति। 'सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म' इत्यादिवाक्यार्थो दर्शितः।

अथ च त्वम्पदार्थोऽपि शक्यते अनेन श्लोकेन दर्शयितुं श्लेषालङ्कारस्यात्यन्तचारुताहेतुत्वात्। तथा हि—यो जीवः अस्य देहेन्द्रियादेर्जन्मादिविकारजातम् अन्वयात् अनुगतवान् अविद्ययात्मन्यारोपितत्वात् तं परं सत्यं धीमहीति सम्बन्धः। अस्य कीदृशस्य ? यतः गच्छतः सर्वदा परिणममानस्येत्यर्थः। जन्मादि गच्छत् इति वा। ननु जातो देवदत्तो मृतो देवदत्त इति प्रतीतेः। तद्यथा 'अग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मवतः सर्वं एव आत्मानो व्युच्चरन्ती'ति श्रुतेश्च। स्वत एव जन्मादिमान् जीवोऽस्तु, नेत्याह—इतरतश्चेति। जन्माद्ययोग्यत्वादित्यर्थः। तथा च श्रुतिः—'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्' इति, 'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।' इत्याद्या स्मृतिश्च जीवस्य जन्मविनाशौ वारयति—कृतहानाकृताभ्यागमादिदोषप्रसङ्गादुपाध्युत्पत्तिमात्रेणैव व्युच्चरन्तीत्यादिश्रुत्युपपत्तेस्तद्गुणसारत्वादिन्यायाच्चेति चकारार्थः। देहमिन्द्रियं मनः प्राणञ्च केचिदात्मत्वेन प्रतिपन्नास्तान् निराकरोति—अर्थेष्वभिज्ञ इति। न हि भौतिकानां देहेन्द्रियप्राणमनसां ज्ञातृत्वं सम्भवति, घटादावपि तत्प्रसङ्गात् एतेषां चानित्यत्वात् आत्मनित्यत्वात्, आत्मनित्यत्वस्य च व्यवस्थापितत्वात्। एतेन विभुत्वमपि व्याख्यातम्। विभुत्वं हि मध्यमपरिमाणत्वे नोपपद्यमानं परमाणुत्वे वा परममहत्त्वे वा व्यवतिष्ठेत। एतेन देहाद्यतिरिक्तोऽपि देहपरिमाण एवात्मेति क्षपणकपक्षो निरस्तः। तत्र परमाणुत्वे सकलशरीरव्यापिसुखदुःखानुपलम्भप्रसङ्गात्, सकलदेहव्यापकोऽस्तु तर्हि देहेन्द्रियातिरिक्तो विभुरेवात्मा ज्ञानाश्रयो न तु ज्ञानरूप इति तत्राह—स्वराडिति। स्वयमेव राजत इति स्वराट् स्वप्रकाशज्ञानरूपः, न तु ज्ञानाश्रय इत्यर्थः। 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' इत्यादिश्रुतेः संदेहविपर्ययाद्यविषयत्वेन सर्वदा भासमानत्वात् स्वजन्यज्ञानविषयत्वे च कर्तृकर्मविरोधात्। 'ज्ञोऽत एव' (२।३।१९) इति न्यायात् ज्ञानरूप एवात्मेत्यर्थः। ननु जीवस्य स्वप्रकाशज्ञानरूपत्वे जन्मादिशून्यत्वे च ब्रह्मणो भेदकाभावात् स्वत एव च ब्रह्माभिन्नत्वे शास्त्रारम्भो निरर्थकः, ब्रह्मावबोधस्य सर्वदा विद्यमानत्वादित्यत आह—तेने ब्रह्म हृदा य आदिकवये इति। हृदा मनसा तदुपाधिना तादात्म्यापन्नः सन् अब्रह्म ब्रह्मविपरीतं कर्तृत्वभोक्तृत्वादिलक्षणं संसारं सन्तरणरूपं विस्तारितवान्। तथा च श्रुतिः—'स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव स धीः शब्नो भूत्वा' इत्याद्या सम्बन्धादसंसारिणोऽपि संसारितां दर्शयति—तथा च तन्निवृत्तये ब्रह्मात्मत्वोपदेशो युक्त इत्यर्थः। संसारस्य मोक्षहेतुतां दर्शयति—आदिकवय इति। आदिभूतं कं सुखं ब्रह्मानन्दरूपो मोक्ष इत्यर्थः। तस्य वयः प्राप्तिस्तदर्थम्। 'अयवय गता'विति स्मरणात्, 'निमित्तात् कर्मयोगे' (२।३।२६ वा०) चेयं सप्तमी, चर्मणि द्वीपिनं हन्तीतिवत्। न हि संसाराभावे श्रवणमननादिसाधनानुष्ठानं सम्भवति। न च तदभावे तत्प्रज्ञानोदयः, न च तमन्तरेण अनाद्यविद्यानिवृत्तिरिति मोक्षार्थमेव संसारं विस्तारितवानित्यर्थः। तथा च श्रुतिः—'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाये'ति 'इन्द्रो मायाभिः पुरुरूप ईयत' इति च 'ब्रह्म वा इदमग्र आसीदि'ति 'आत्मानमेव वेदाहं ब्रह्मास्मीति तस्मात्तत् सर्वमभवदि'ति च। संसारद्वारा अविद्यानिवृत्तिरूपं मोक्षं दर्शयति। ननु तर्हि भवतु स्वप्रकाशज्ञानरूप आत्मा, किन्तु नानन्दरूपः प्रतिशरीरं भिन्नश्चेति सांख्यमतं तत्राह—मुह्यन्ति यत् सूरय इति। यत् यत्र यस्मिन् जीवस्वरूपे सूरयः तार्किकाद्यपेक्षया सुधियोऽपि सांख्याः मुह्यन्ति भ्राम्यन्ति शुद्धस्वरूपं जानन्तोऽपि आनन्दरूपत्वं प्रतिदेहमेकत्वं ब्रह्माभिन्नत्वमजानन्तः। तथा च श्रुतयः—'एष एव परम आनन्द' इति 'एको देवः सर्वभूतेषु गूढ' इति। 'अयमात्मा ब्रह्मे'ति तादृग्रूपतां जीवस्य बोधयन्ति। 'तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादान्तरं यदयमात्मा' इति श्रुत्यन्तराच्च परमप्रेमास्पदत्वादानन्दरूपत्वम्। नानात्वे भोगव्यवस्थानुपपत्तेः प्रतिदेहमेकत्वम्। नहि विभूनामात्मनां सर्वदेहसम्बन्धित्वाविशेषे कर्मादिकमपि भोगनियामकं भवितुमर्हति, अविशेषात्। एकात्मवादे तु तदन्तःकरणावच्छिन्नप्रदेशानां भिन्नत्वादुपपद्यत एव व्यवस्था, देहभेदादेव च प्रतिसन्धानाभावः। एवञ्च भेदकशून्यत्वान् ब्रह्माभिन्नत्वमपि सिद्धं लक्षणैक्यात्। एवं त्वम्पदवाच्यार्थं पूर्वार्धेन प्रतिपाद्य तल्लक्ष्यमुत्तरार्धेन वक्तुमध्यारोपापवादन्यायेनारभते— तेजोवारिमृदां यथा विनिमय इत्यादिना। यत्र आत्मनि त्रयाणां स्थूलसूक्ष्मकारणोपाधीनां जाग्रत्स्वप्नसुषुप्त्यवस्थाहेतूनां सर्गः संसर्गो मिथ्यैव न तु परमार्थतः। स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति 'असंगो ह्ययं पुरुष' इत्यादिश्रुतिभ्यः। साक्ष्यस्य साक्षिधर्मानुपपत्तेः, भास्यस्य घटादेर्भासकदीपादिधर्मत्वादर्शनात्। मिथ्यात्वे दृष्टान्तः—तेजोवारीति। वारिणि करकारूपे मृद्बुद्धिः। एवं काचादिरूपायां मृदि तेजोबुद्धिरित्युदाहार्यम्। तथा चेदमनुमानं सूचितम्—आत्मनि जाग्रदादिबुद्धिर्मृषा तदभाववति तद्बुद्धित्वात् तेजसि वारिबुद्धिवत्। तदभाववत्त्वञ्चात्मनः श्रुतिस्मृतिन्यायैर्निश्चितमिति नासिद्धिः। एवं लक्षणैक्येन ब्रह्माभिन्नत्वं दर्शयति—धाम्ना स्वेन सदा निरस्तकुहकमिति। एष एव तत्पदार्थत्वम्पदार्थतदैक्यकथनद्वारेण शास्त्रस्य विषयो दर्शितः। तत्र श्रवणमनननिदिध्यासनयोस्तृतीयञ्च निदिध्यासनमिह प्रतिपाद्यते, मनननिदिध्यासनवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात्। चतुर्लक्षणमीमांसारूपत्वञ्चास्य सूचितम्। तथा हि—पूर्वार्धेन 'जन्माद्यस्य यतः' (१।१।२) इति न्यायः साक्षादेव दर्शितः। 'अन्वयादि'त्यनेन 'तत्तु समन्वयात्' (१।१।४) इति 'अर्थेष्वभिज्ञ' इत्यनेन 'ईक्षतेर्नाशब्दम्' (१।१।५) इति। 'तेने ब्रह्म हृदे'त्यादिना 'शास्त्रयोनित्वात्' (१।१।३) इति। 'मुह्यन्ति यत् सूरय' इत्यनेन 'एतेन सर्वे व्याख्याता व्याख्याताः' (१।४।२९) इत्यन्तो न्यायकलापः सूचित इति समन्वयाध्यायो व्याख्यातः। 'तेजोवारिमृदा'मित्यादिना 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (२।१।१४) इत्यादिन्यायसूचनादविरोधाध्यायार्थः। 'धीमही'त्यनेन 'सह कार्यान्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्'

इत्यादिन्यायसूचनात् साधनाध्यायार्थः । 'धाम्ना स्वेन सदा निरस्तकुहकं सत्यं पर'मिति फलाध्यायार्थः, अविद्यातत्कार्यनिवृत्त्युपलक्षित-परमानन्दरूपविशेषात् । एवं सति 'पारमहंसी संहितेति' समाख्योपपद्यते, परमहंसानां वेदान्तवाक्यार्थनिदिध्यासनरूपत्वादत्रत्योपाख्यानानां तत्तात्पर्यकत्वात् । एवं 'ध्यायेमे'ति पदस्थाने 'धीमही'ति छान्दसप्रयोगात् गायत्रीरूपत्वमस्याः सूचितम् । 'तत् सवितुर्वरेण्य'-मित्यस्यार्थः 'स्वराडि'त्यनेन सूचितः । 'भर्गो देवस्य धीमही'त्यस्यार्थः 'जन्माद्यस्य यत' इत्यादिना सूचितः । 'धियो यो नः प्रचोदयादि'त्यस्यार्थः 'तेने ब्रह्म हृदे'त्यादिना सूचितः । तथा च गायत्रीवदनिशं जप्तव्यैषा संहितेति दर्शितम् । लक्षणञ्च श्रीभागवतस्य सूचितम् । तथा च मत्स्यपुराणे पुराणदानप्रस्तावे—'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । वृत्रासुरवधोपेतं तद्वै भागवतं विदुः ॥' इति गायत्र्युपक्रमो लक्षणत्वेनोक्तः । एवञ्च सर्गादीन्यपि दशलक्षणान्यनेन श्लोकेन सूचितानि—'जन्माद्यस्य यत' इत्यनेन सर्गविसर्गस्थानानि तृतीयचतुर्थपञ्चमस्कन्धव्युत्पाद्यानि सूचितानि । 'तेने ब्रह्म हृदा य आदिकवय' इत्यनेन भक्तानुग्रहलक्षणं पोषणं षष्ठस्कन्धव्युत्पाद्यं सूचितम् । 'मुह्यन्ति यत् सूरय' इत्यनेन कर्मवासनारूपा ऊतिः सप्तमस्कन्धव्युत्पाद्या सूचिता । मन्वन्तरेशानुकथे अष्टमनवमस्कन्धप्रमेये स्थानमध्ये एवान्तर्भूते । 'तेजोवारिमृदां यथा विनिमय' इत्यनेन निरोधो दशमस्कन्धार्थो दर्शितः । 'धाम्ना स्वेन सदा निरस्तकुहक'मित्यनेन मुक्तिरेकादशस्कन्धार्थो दर्शितः । 'सत्यं पर' मित्यनेनाश्रयो द्वादशस्कन्धार्थो दर्शितः । 'धीमही'त्यात्मनेपदोत्तमपुरुषप्रयोगादधिकारी प्रथमस्कन्धार्थः । तेनैव ध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कन्धार्थः । इति कृत्स्नभागवतार्थसूचनम् । तदेतद् व्याख्यानमौपनिषदाय रोचते । सात्त्वतास्तु वर्णयन्ति—पञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं तदभिमानि विराडन्तर्यामिरूपम् ओतम् इत्यनिरुद्ध इति चाख्यायते । एवमपञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिहिरण्यगर्भान्तर्यामिरूपम् अनुज्ञात इति प्रद्युम्न इति चाख्यायते । एवं स्थूलसूक्ष्मभूतकारणीभूतं यन्मायात्मकमव्याकृतं तदुपहितं शुद्धचैतन्यं तन्निष्ठचिदाभासोपलक्षितम् अनुज्ञा इति सङ्कर्षण इति चाख्यायते । अनुपहितन्तु चैतन्यं सर्वानुस्यूतसन्मात्रं सर्वसाक्षिपरमानन्दघनमविकल्प इति वासुदेव इति चाख्यायते । सङ्कर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्तत एव । उपाधिकृतः केवलं नामविशेषः । एतच्च नृसिंहतापनीयोत्तरभागे व्याख्यायते । 'ओतानुज्ञातानुज्ञाविकल्पैः स्थूलसूक्ष्मबीजसाक्षिभि'रिति बहुकृत्वोऽभ्यासेन अत्र च वासुदेवः परमात्मा सङ्कर्षणो जीवः, प्रद्युम्नस्तु मनः अनिरुद्धोऽहङ्कार इति पाञ्चरात्रिकप्रक्रिया नादरणीया, तद्वचनविरोधात् श्रुतिविरोधाच्चेत्यादि 'उत्पत्त्यसम्भवात्' (२।२।४०) इत्यधिकरणे व्याख्यातम् । केवलं परमात्मैवानुपहितो वासुदेवः कारणोपहितः सङ्कर्षणः सूक्ष्मभूतोपहितः प्रद्युम्नः स्थूलभूतोपहितोनिरुद्ध इति यथाव्याख्यानमेवादरणीयम् , श्रौतत्वादुपपन्नत्वाच्च । एवं स्थिते श्लोकयोजना—परं सत्यं वासुदेवाख्यं वयं धीमहि उपास्महे । ध्यानमत्रोपासनरूपमेवाभिप्रेतं, चतुर्व्यूहरचनाया उपासनार्थत्वात् । नन्वनुपहितस्य वासुदेवस्य बुद्धावनारोहात् कथमुपास्यत्वम् ? सत्यम्–अनिरुद्धादिरूपमप्यविवक्षितोपाधिसम्बन्धं वासुदेवात्मकमेव श्रोत्रकूपद्वारादिकमिवालक्षिततदुपाधिसंबंधमाकाशात्मकमेव । विवक्षितोपाधिसंबंधे तु पृथग्व्यपदेशभेदं लभते, न तु तावता वस्त्वन्यत्वं भवति । तथा च तद्द्वारा वासुदेवे मनोवृत्तिः कार्येति वक्तुमारभते–जन्माद्यस्य यत इत्यादिना । अस्य जगतश्चतुर्दशभुवनरचनात्मकस्य ब्रह्माण्डस्य जन्मादिविकारजातं यतो भवति तं धीमहीति सम्बन्धः । तस्य जगद्विरचनयोग्यतामाह–अर्थेष्वभिज्ञ इति । ब्रह्माण्डाभिमानिविराडपेक्षया वैलक्षण्यमाह–स्वराडिति । ब्रह्माण्डावच्छिन्नचिदाभासो हि विराड् जीवः । अयन्तु तद्बिम्बभूतस्तदन्तर्य्यामी स्वयमेव राजत इति स्वराट् , बिम्बभूतत्वेन अन्यानपेक्षत्वात् । एवमनिरुद्धमत्रिमुक्त्वा प्रद्युम्नमनुज्ञातमाह—तेने ब्रह्म हृदा य आदिकवय इति । आदिकवये सूक्ष्मभूतावच्छिन्नचिदाभासाय हिरण्यगर्भसूत्रादिसंज्ञकाय जीवाय ब्रह्म वेदं तदन्तर्यामिरूपेण बिम्बभूतो यस्तन्मनसैव तेने इति हिरण्यगर्भवैलक्षण्यं स्पष्टमेवोक्तम् । सङ्कर्षणरूपतामाह—मुह्यन्ति यत् सूरय इति । यत्र त्रिगुणात्मकमायाप्रतिबिम्बस्य जगत्कारणस्य बिम्बभूते सर्वान्तर्य्यामिणि सङ्कर्षणाख्ये सूरयोऽपि भ्राम्यन्ति स्थूलसूक्ष्मप्रपञ्चद्वयं भ्रान्त्या कल्पयन्ति प्रधानपरमाण्वादिरूपेण वा भ्राम्यन्ति । वासुदेवरूपतामाह—तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषेति । त्रिविधः सर्गः त्रिसर्गः, आध्यात्मिक आधिभौतिक आधिदैविकश्चेति । स यत्र मृषा सर्वथा असन्नेवेत्यर्थः । अपह्नववचनो 'मृषा' शब्दः त्रयाणामनिरुद्धप्रद्युम्नसङ्कर्षणोपाधीनां सर्गः संसर्गो यत्र मृषेति वा । तदेवमुपहितत्वेऽनुपहितत्वे स्वेन धाम्ना सदा निरस्तकुहकं निवृत्ताविद्यातत्कार्य्यबिम्बभूतत्वेनोपाधितद्धर्मैरसंस्पृष्टमत एव परं सत्यं वासुदेवाख्यं ध्यायेमेति निर्गलितोऽर्थः । अत्रानिरुद्धपुरुषावतारो नारायणः प्रलयोदकशायी भुवनकमलमूलभूत इति सविस्तरं मूले एव व्यक्तीभविष्यति । इतरेषामपि रूपं वक्ष्यते । विस्तरश्चास्य प्रक्रियायां मोक्षधर्मे नारायणीयोपाख्यान इति तदेतद्व्याख्यानं पौराणिकाय रोचते ।

केवलभक्तिकारिकास्तु—केवलवासुदेवावतारश्रीकृष्णमात्रपरतया योजयन्ति । सङ्कर्षणप्रद्युम्नानिरुद्धानां स्वसमाख्ययैव पृथगवतीर्णत्वाद्वासुदेवावतार एव श्रीकृष्णः कार्ष्णेयाध्यात्माद्युपाख्यानेष्वपि तथैव प्रतिपाद्यते, इहापि "कृष्णस्तु भगवान् स्वयम्" इति । तस्मात्तत्परतयैव सर्वाणि पदानि योजनीयानि–तं परं सत्यं वासुदेवात्मकं श्रीकृष्णं वयं ध्यायेम । तस्य सर्वप्रेमास्पदत्वेन ध्येयतामाह–जन्माद्यस्य यत इति । यतः श्रीकृष्णात् यस्मिन् श्रीकृष्णे वा आद्यस्य रतिभावस्य प्रेमाख्यस्य जन्म भवति, सर्वेषामिति शेषः । रतिभावस्य चाद्यत्वम् 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥'

इति भरतेनादौ पाठात् । सर्वप्राणिरतिविषयत्वं च परमानन्दरूपत्वात् । तथा च वक्ष्यति "त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्" इति दुर्वाससा चात्मवरत्वं 'सर्वप्राणिनां प्रियो भवेः' इति वरो दत्त इति शान्तिपर्वणि दानधर्मे पठ्यते । प्रेमाख्यस्य रतिभावस्योत्पत्तौ कारणमाह—अन्वयादितरतश्चेति । अन्वयः सन्निकर्षः इतरो विप्रकर्षस्ताभ्याम्, तथा च वक्ष्यति-'गोपीनां परमानंद आसीद्गोविन्ददर्शने । क्षणं युगशतमिव यासां येन विनाभवत् ।।' इति 'यर्ह्यम्बुजाक्षापससार भो! भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः क्षणोऽभवद्रविं विनाक्ष्णोरिव नस्तवाच्युत ।।' इति तथा सन्निकर्षविप्रकर्षाभ्यां जायमानो रतिभावः स्थायी, तद्विषयः श्रीकृष्णो भक्तिरसावलम्बनं विभाव इत्यर्थः। विस्तरेण चैतद्वक्ष्यते। ननु तस्मिन् जायमानोऽपि प्रेमा निरर्थकः, तेनाज्ञानात् राजादिषु प्रेमापरिज्ञानेन विपरीतकार्यस्यापि दर्शनादित्यत आह—अर्थेष्वभिज्ञ इति। सर्वेष्वर्थेषु मनोवृत्त्यादिरूपेष्वपि सर्वप्रकारेण ज्ञः, एवञ्च सार्वज्ञ्यान्नास्त्यज्ञानकृतं वैयर्थ्यम् । प्रेमापरिज्ञानेऽपि तदाश्रयजनोपकारासामर्थ्यमाशङ्क्याह स्वराडिति । स्वतन्त्रः सर्वशक्तिरित्यर्थः । शक्तिह्रासे हि पारतन्त्र्यं स्यात्, तथा च न असामर्थ्यकृतं वैयर्थ्यम् । ननु गोपबालकस्य कथं सर्वज्ञत्वं सर्वशक्तित्वं चेत्यत आह—तेने ब्रह्म हृदा य आदिकवय इति । आदिकवये ब्रह्मणो वत्साहरणद्वारा स्वरूपजिज्ञासवे ब्रह्म निजरूपं सत्यज्ञानादिलक्षणं सर्वशक्ति च यस्तेने विस्तारितवान् प्रदर्शितवान् तदपि हृदा सङ्कल्पमात्रेणैवेत्यर्थः । तथा च वक्ष्यति—'तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनन्तमगाधबोधम् । वत्सान् सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ।।' इत्यादि ।

ननु ब्रह्मा स्वयमेव जानाति; सर्वज्ञत्वात्, किं तज्ज्ञापनेनेत्यत आह—मुह्यन्ति यत् सूरय इति । यत् यत्र श्रीकृष्णस्वरूपे सूरयो ब्रह्मादयो मुह्यन्ति इदमित्थमिति निश्चयं कर्तुं न शक्नुवन्ति, तन्मायायाः सर्वमोहकत्वात्तथा च भगवतोक्तं गीतासु—'नाहं प्रकाशः सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ।।' इति ब्रह्मणो मोहे हेत्वन्तरं वदन् कारुणिकत्वं दर्शयति—तेजोवारिमृदामित्यादिना । ब्रह्मणा वत्सेषु तत्पालकेषु तदुपकरणशिक्यादिषु च स्वसृष्टेषु भौतिकेष्वपहृतेषु यत्र श्रीकृष्णे त्रिसर्गः त्रयाणां वत्सतत्पालकतदुपकरणानां सर्गः प्रादुर्भावाज्जात इति शेषः । तत्र दृष्टान्तः—'तेजोवारिमृदां विनिमयो यथे'ति । त्रिवृत्कृतभूतारब्धो यथा ब्रह्मणा कृतो वत्सतत्पालकतदुपकरणरूपः सर्गस्तथैव भगवता कृतः सच्चिदानन्दस्वरूपत्वेनाभौतिकोऽपि भौतिकवदृश्यत इत्यर्थः । तथा च वक्ष्यति—'एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः । सत्याः के कतरे नेति ज्ञातुं नेष्टे कथञ्चन ।।' इति । तथा च के मया सृष्टा भौतिकाः के च भगवता सृष्टा अभौतिका इति निर्णयासामर्थ्ये च ब्रह्मणो मोहो युक्त इत्यर्थः । ननु भगवता किमित्यन्ये सृष्टाः ? ब्रह्मणा हृतानामेवानेतुं शक्यत्वादित्यत आह—मृषेति । मर्षणं मृषा सहिष्णुतारूपा क्षमेत्यर्थः । 'मृष क्षमायाम्' इति स्मरणात् । तथा च वक्ष्यति—'ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च । उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ।।' इति तेषामानयने ब्रह्मणोऽसन्तोषस्तदन्येषां तत्तुल्यानां करणे तद्वन्धूनामिति विचार्य परमकारुणिकेन भगवता अन्ये सृष्टा इत्यर्थः । ननु महामायेन ब्रह्मणा विहितां मायां कथं कृष्णो ज्ञातवान् ? ज्ञात्वा वा किमिति क्षान्तवान् ? एतादृशेऽपराधे कोपस्योचितत्वादित्याशङ्क्याह—धाम्ना स्वेन सदा निरस्तकुहकमिति । निरस्तं नितरां निराकृतं कुहकं कपटं ब्रह्मणा कृतं मोहनं तन्निमित्तकोपादिकञ्च येन इति तथा तम् । तत्र हेतुः—धाम्ना स्वेन सदेति । स्वरूपेण आत्मतत्त्वेन इनरूपेण प्रभुत्वेन सर्वनियामकत्वेन सदनं सत् अवस्थानं स्वेन सत्तया धाम्ना तद्रूपेण प्रभावेणेत्यर्थः । तथा चान्तर्यामित्वात् परिज्ञानम्, आत्मत्वाच्च क्रोधाभाव इति सर्वमनवद्यम् । एवं च सर्वप्रियत्वेन परमानन्दरूपः सर्वज्ञः सर्वशक्तिः सर्वमोहनः सर्वसुखप्रदः सर्वापराधसहिष्णुः सर्वात्मा परमकारुणिको विदग्धतरश्च श्रीकृष्णो भक्तिरसालम्बनत्वेन सम्पूर्णग्रन्थप्रतिपाद्य इति ध्वनितम् । विशेषणद्वारा विशेष्योपस्थितिश्चालङ्कारिकाय रोचतेतराम् । साक्षादनभिधानञ्च अतिरहस्यत्वात्, अर्थभेदः कथञ्चन प्रतिपत्तॄणां विचित्रप्रज्ञानां विनोदायेत्यलमतिविस्तरेण । भक्तिरसानुभवप्रकारश्च सर्वोऽप्यस्माभिर्भक्तिरसायने अभिहितः, अत्रापि कियान् वक्ष्यते ।। १ ।।

श्रीराधामोहनतर्कवाचस्पतिगोस्वामि भट्टाचार्यकृता तत्त्वसार व्याख्या

ॐ नमो नन्दसूनवे

श्रीकृष्णचरणाम्भोजे परानन्दामृताम्बुधौ । मनोमधुव्रतो नित्यं रमतां मल्लताङ्कितः ।।
श्रीकृष्णभावलुब्धेन राधामोहनशर्मणा । श्रीमद्भागवतस्यायं तत्त्वसारः प्रकाश्यते ।।

अथ द्वापरज्ञानवैकल्ये पुनर्ज्ञानवर्त्मप्रदर्शनाय ब्रह्मादिदैवतैरर्थितो भगवान् नारायणः व्यासत्वेनाववतार । ततश्च वेदान् बहुधा विभज्यापि तज्ज्ञानशक्तिविहीना मन्दमतयोऽल्पायुषो लोकाः कलौ भविष्यन्ति इति निश्चित्य स्त्रीशूद्रद्विजबन्धूनामपि निःश्रेयसाय भारतं पुराणान्तराणि च कृत्वा तत्रापि श्रीकृष्णगुणवर्णनमन्यधर्माद्यनुवादेन कीर्त्तितमिति चित्तप्रसत्तिमलभमानो वेदव्यासो नारदोपदेशतः श्रीकृष्णगुणवर्णनप्रधानं भागवताख्यं स्वकृतवेदान्तसूत्रव्याख्यानमयं प्रारिप्सुस्तत्प्रतिपाद्यं परममङ्गलं ग्रन्थादौ निर्दिदेश—जन्माद्यस्येति पद्येन ।। तथा च स्कान्दे 'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किञ्चित्तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ।। १ ।। गौतमस्य ऋषेः शापाज् ज्ञाने त्वज्ञानतां गते । संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ।। २ ।।

शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्य्यैस्तु भगवान् पुरुषोत्तमः ॥ ३ ॥ अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ॥ ४ ॥ चतुर्द्धा व्यभजत्तांस्तु चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥५॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥ ६ ॥' प्रथमे—'स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा । धर्म्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतम् ।' अथ भारतादिव्यपदेशेन कर्मकाण्डवेदार्थमादिश्य परमार्थसाधनब्रह्मज्ञानसाधनप्रतिपादकश्रीभागवतपुराणमाह—जन्माद्यस्येत्यादिना । एतच्चाग्रे स्फुटीकृतम्—"भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः" इत्यादिना धर्मकाण्डवेदार्थस्य बाहुल्येन प्रदर्शकत्वमुक्तं भारतस्य—'भवतानुदितप्रायं यशो भगवतोऽमलम् । येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥ यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः । न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा विरमन्त्युशिक्क्षयाः ॥ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि । नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् । कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ अथो महाभाग ! भवानमोघदृक् शुचिश्रवाः सत्यव्रतो धृतव्रतः । उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥' इति । नारदोपदेशानन्तरं श्रीभागवताख्यमहापुराणप्रकटनादस्य परमार्थसाधनत्वम् । तथाहि—'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम् ॥ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे । भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ॥' अत्र कृष्णभक्तेरुद्देश्यकथनेन परं 'धीमहि' त्यत्र 'पर'पदेन कृष्ण एवोक्तः । एतेन 'अथातो ब्रह्मजिज्ञासा' (१।१।१) इति सूत्रं व्याख्यातम् । तत्राथशब्द आनन्तर्यार्थः । आनन्तर्यञ्च प्रागुक्तकर्मकाण्डपूर्वमीमांसाधीनसम्यक्कर्मकाण्डज्ञानस्य । भारतादिकञ्च पूर्वमीमांसानुसारीति । 'अतः'शब्दो हेत्वर्थः । "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादितो वेदात् कर्मफलस्यानित्यत्वबोधनात् "ब्रह्मविदाप्नोति पर"मिति "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्या ब्रह्मावगतेर्नित्यफलावबोधनाच्च । कर्म्मज्ञानानन्तरं ब्रह्मजिज्ञासा इत्यर्थः । अत्र 'ब्रह्मणो जिज्ञासेति कर्मपरषष्ठीतत्पुरुषेण ब्रह्म जिज्ञास्यं ज्ञातुमिष्टमित्यर्थो लभ्यते । ब्रह्मज्ञानस्य इष्टत्वे च ब्रह्मज्ञानमेव कार्यतया पर्यवस्यति । तथोक्तम् "समाधिनानुस्मर तद्विचेष्टितम्" इति "तद्ब्रह्म विजिज्ञासस्व" इति श्रुतौ विजिज्ञासस्व विजानीहीत्यर्थः । ब्रह्मज्ञानस्यैव निःश्रेयससाधनत्वेन विधेयत्वात् "विज्ञाय प्रज्ञां कुर्वीत" इति विज्ञानेच्छायाश्च विज्ञाने विधेयत्वावगमनेनैव सम्पत्तेस्तस्या अविधेयत्वाच्च सन्प्रत्ययार्थो न विवक्षित इति विज्ञानत्वं समाधिरूपं तस्यैव साक्षात् परमेश्वरज्ञानसाधनत्वात् । अत एव रामानुजचरणैः "ब्रह्मजिज्ञासेत्यत्र जिज्ञासापदं निदिध्यासनपर" मित्युक्तम् । अनेन च ग्रन्थेन व्यासं प्रति नारदोपदेशेन कर्मकाण्डपरभारतादीनामनुपादेयत्वमस्यैव ब्रह्मपरत्वेनोपादेयतेत्युक्त्या परब्रह्मश्रीकृष्ण एव जिज्ञास्य इत्युक्तम् । अथ पूर्वमीमांसाज्ञानानन्तरमेवोत्तरमीमांसया ब्रह्म जिज्ञास्यमित्येवाथातो ब्रह्मजिज्ञासा इत्यत्राथशब्देन बोधितम्, तन्न सङ्गतं भाति; प्रागनधीतधर्मशास्त्रस्यापि वेदान्तविचारप्रवृत्तेः । धर्मज्ञानब्रह्मज्ञानयोः फलभेदाच्च । न च मोक्षविरोधिऋणत्रयापाकरणस्य ब्रह्मजिज्ञासायामपेक्षितत्वेन तत्र च देवर्णस्य यज्ञादिनिवर्त्यत्वात् यज्ञादेश्च पूर्वमीमांसार्थावधारणसम्पाद्यत्वात् आनन्तर्यक्रमो विवक्षितः । तथा च श्रुतिः–'जायमानो वै ब्राह्मणस्त्रिभिरृणैरृणी जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यो यज्वा ब्रह्मचारी वासीत' इति । स्मृतिश्च–'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यधः ॥' (म० अ० ६ श्लो० ३५) इति वाच्यम् । 'न यदि वा इतरथा ब्रह्मचर्यादेव प्रव्रजेत् यदहरेव विरजेत्तदहरेव प्रव्रजेत् अथ पुनरव्रती व्रती वा किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामः ।' याज्ञवल्क्यः 'प्रवव्राज ये प्रजामीषिरे ते श्मशानानि भेजिरे ये प्रजा नेषिरेऽमृतत्वं भेजिरे ।' इत्यादिश्रुत्या ऋणापाकरणं विनापि ब्रह्म विविदिषोः संन्यासविधानात् ऋणत्रयापाकरणपरश्रुत्यादीनामविरक्तविषयत्वात् । न चात्राथशब्दो मङ्गलार्थ एवेति वाच्यं; मङ्गलस्य ग्रन्थसमाप्तिप्रतिकूलविघ्नविनाशस्य च ब्रह्मजिज्ञासायामनपेक्षितत्वेनानन्वयात् । अर्थान्तरप्रयुक्तस्याथशब्दस्यैव मंगलरूपत्वात् । 'सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिःसृतौ । ॐकारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ॥ तद्धेतुत्वं यतश्चापि तृतीयोऽत उदाहृतः । अकारः सर्ववागात्मा परब्रह्माभिधायकः ॥ तत्त्वौ प्राणात्मकौ प्रोक्तौ व्याप्तिस्थितिविधायकौ । अतश्च पूर्वमुच्चार्याः सर्वत्र ते सतां मताः ॥ अथातःशब्दयोरेवं वीर्यमाज्ञाय तत्त्वतः । सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते ॥' इति गारुडादिति चेत्, उच्यते–पूर्वमीमांसायां विहितस्य स्वर्गादिफलस्य परमपुरुषार्थशङ्कायामुत्तरमीमांसायां स्वर्गादिफलस्य क्षयिष्णुत्वेन हेयत्वमापाद्य निःश्रेयससाधनत्वेन ब्रह्मज्ञानमेवोपादेयमिति निर्णीतं; तत्र च निरस्यज्ञानापेक्षत्वात् सिद्धान्तस्येति निरस्यस्वर्गादिफलकपूर्वमीमांसानन्तर्यं ब्रह्मजिज्ञासायामिति । तथोक्तं बौधायने—'वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषा' इति । एवम् 'तपसा किल्बिषं हन्ति विद्ययामृतमश्नुते । ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणा ॥' इति स्मृत्या कर्मणां दुरितनाशद्वारा चित्तशुद्धत्वसम्पादनेन ब्रह्मज्ञानोपकारकता इति चित्तशुद्धिश्च 'प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे । गुणान्विताायानुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे ॥' इत्याद्युक्त्या । तथा चाधिकारसम्पत्त्यर्थं पूर्वमीमांसापेक्षा,

एवञ्च कर्माचरितचित्तशुद्ध्याद्यधिकारानन्तर्यमेवाथशब्दार्थः । तदुक्तम् गारुडे–'आनन्तर्येऽधिकारार्थे मङ्गलार्थे तथैव च । अथशब्दस्त्वतःशब्दो हेत्वर्थे समुदीरित' इति । अधिकारिणमाह-भागवततंत्रे 'आ ब्रह्मस्तम्बपर्यन्तमसारञ्चाप्यनर्थकम् । विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥ स उत्तमाधिकारी स्यात् सन्न्यस्ताखिलकर्मवान् ॥' इति, येषां कर्मजिज्ञासां विनापि चित्तशुद्धिस्तेषां प्राक्तनसाधनं लक्ष्यत इति । ब्रह्मपदञ्च श्रीकृष्णपरं स्वयंरूपत्वेन तस्यैव निर्णेयत्वादिति । 'राजायं गच्छती' त्यत्र सपरिकरराजग्रहणवत् अत्र ब्रह्मज्ञानशब्देन तत्साधनान्यपि लक्ष्याणीति । इत्थञ्च प्रकटितसूत्रार्थकनारदोपदेशतत्तात्पर्यपर्यवसितभगवन्निदिध्यासनं स्वाचरितपरममङ्गलमादौ शिष्यशिक्षार्थं निर्दिशति—परं धीमहीति । परं निरतिशयतत्त्वं धीमहि ध्यायेम । ध्यायतेर्लिङ् छान्दसः । बहुवचनं शिष्याभिप्रायम् । अथातःशब्दतात्पर्यपर्यवसितं परतत्त्वध्यानहेतुविशेषणमाह—सत्यमिति । अव्यभिचारिसत्ताकमित्यर्थः । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः । अत्र स्वामिचरणैर्व्याख्यातमेव, स्वरूपतटस्थलक्षणाभ्यामुपलक्षयतीति, स्वरूपं स्वमेव लक्षणं व्यावर्तकं स्वरूपलक्षणम् । तटस्थं यावल्लक्ष्यकालानवस्थितं विशेषणं तटस्थलक्षणमित्यर्थः । यथा पृथिव्यादेर्गन्धादिकमुत्पत्तिकाले घटादौ प्रलयकाले परमाणौ व्यभिचारेण तटस्थम् । सत्यत्वे हेतुः—यत्र यस्मिन् त्रिसर्गोऽमृषा सत्यः प्रतीयते इति शेषः । त्रयाणां मायागुणानां तमो-रजः-सत्त्वानां सर्गः कार्यं भूतेन्द्रियदेवतारूप इत्यर्थः । यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत् प्रतीयते तं परं सत्यमित्यर्थः । सत्यतया प्रतीतिस्तु घटः सन् इत्यादिरूपा, अन्यसत्यं सत्यत्वेन प्रतीयमानं मिथ्या प्रपञ्चाधिष्ठानत्वात् यथा जलाधिष्ठानं तेज इत्यनुमानेन सत्यत्वसिद्धिः । अथवा आरोपाधिकरणस्य ब्रह्मणः सत्यत्वं विना आरोप्यमिथ्यासर्गस्य सत्यत्वेन प्रतीतिरनुपपन्ना इत्यनुपपत्तिज्ञानेन ब्रह्मणः सत्यत्वसिद्धिः । अथवा घटः सन्नित्यादिप्रतीतिरधिष्ठानसत्तावलम्बिनी अधिष्ठानसत्तातिरिक्तसत्ताभाववति सदभेदविषयकत्वात् , तेजसि जलप्रतीतिवदित्यनुमानेन ब्रह्मणः सत्यत्वसिद्धिः, पक्षधर्मताबलादिति । 'तेजोवारिमृदां यथा विनिमय' इति दृष्टान्तं व्याकरोति—अन्यस्मिन् अन्यावभास आरोपः, अयं 'विनिमय'शब्दार्थः । ननु ब्रह्मसत्तया घटादिभानेन नीरूपस्यापि ब्रह्मणश्चाक्षुषापत्तिरित्यतस्त्रिधा सत्ता स्वीकार्या । तथा हि—पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्तेति । तत्राद्या ब्रह्मणः; द्वितीया घटादेः प्रपञ्चस्य, तृतीया रज्जुसर्पादेः । पारमार्थिकत्वञ्च ध्वंसप्रागभावाप्रतियोगित्वम् । व्यावहारिकी चार्थक्रियोपयोगिनी वस्तुविचारे बोधिता अविद्याप्रयोज्या चेति । प्रातिभासिकी च अधिष्ठानगता आरोप्यप्रतिभासमाना स्फटिकादौ सन्निहितजपाकुसुमलौहित्यवत् व्यवहारानुपयोगिनी आगन्तुकदोषप्रयोज्या चेति । आगन्तुकदोषाश्च चाकचक्यादयः शुक्तिरूपादौ स्वप्नोपलब्धगजादौ च निद्रादय इति । घटादौ च प्रातिभासिकसत्त्वैव सद्व्यवहारे जलाहरणादिव्यवहारानुपपत्तेः व्यावहारिकसत्तान्तरं स्वीकृतमित्यादिकमालोक्य कल्पान्तरमाह—यद्वा, तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तमिति । अत्र मिथ्यात्वं पारमार्थिकत्वावच्छिन्नप्रतियोगिताकसत्तात्यन्ताभाववत्त्वम् । कार्यजातं मिथ्या ब्रह्मेतरत्वात् रज्जुसर्पवदित्यनुमानसिद्धप्रपञ्चमिथ्यात्वज्ञापनात् मिथ्यात्वप्रयोजकब्रह्मेतरत्वस्य ब्रह्मण्यसत्त्वेन मिथ्यात्वाभावेनार्थायातं सत्यत्वमिति भावः । अथ कालदेशपरिच्छेदहेतुनैव मिथ्यात्वं प्रपञ्चस्य निर्णेयम् , अस्य च तदभावान्न मिथ्यात्वम् इति । श्रुतिश्च—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो !' इत्युपसंहरन्ती ब्रह्मणः सत्यत्वं स्वगतसजातीयभेदशून्यत्वरूपमेकत्वं स्वगतविजातीयभेदशून्यत्वरूपमद्वितीयत्वञ्च दर्शयित्वा 'ऐतदात्म्य' मित्यनेन विश्वस्य ब्रह्मारोपितत्वं दर्शितवती । एवं 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुत्या वाचारम्भणत्वेनानृतत्वं दर्शितम् । एवं जगतो मिथ्यात्वं घटादिप्रतीतिरारोपरूपैव सदधिष्ठानमन्तरेण न सम्भवति, निरधिष्ठानारोपाभावात् ; तदधिष्ठानस्यासत्त्वे अनवस्थानादित्यवश्यं प्रपञ्चाधिष्ठानं सदित्यङ्गीकार्यम् । तस्य सत्यत्वं तत्स्वरूपमेव स्वनियतसत्ताकधर्मस्य स्वरूपानतिरेकात् । अतः 'सत्यत्वं स्वरूपलक्षण' मित्युक्तं टीकायाम् । महसा स्वप्रकाशज्ञानेन कपटं मायावैभवं जन्मादीति जन्मादिर्यस्य इति तद्गुणसंविज्ञानबहुव्रीहिणा जन्मस्थितिभङ्गमित्युक्तम् । भङ्गः प्रलयः । मूले 'इतरत' इति इतरपदस्य 'जन्मादी' त्यनेन 'यत' इत्यनेन 'अर्थेषु' इत्यनेन चान्वयः । तत्र जन्मादीत्यस्य इतरपदार्थान्वये षष्ठ्यर्थे प्रथमा, इतरपदस्य च अत्यन्ताभावपरत्वम् , तेषां जन्माद्यभावादित्यर्थः । 'अर्थेषु' इत्यस्य इतरपदार्थान्वये पञ्चम्यर्थे सप्तमी । इतरपदस्य च भेदावच्छिन्नपरत्वं तसिलश्च पञ्चमीस्मारकत्वं तेनार्थांतरेभ्योऽकार्येभ्यः । 'यत' इत्यत्र यस्य इति षष्ठ्यर्थे पञ्चमी अवधित्वविवक्षया साध्वी, अन्यथा भेदप्रतियोगिवाचकपद एव पञ्चम्या इतरादिपदयोगेऽनुशिष्टत्वात् पञ्चम्यनुपपत्तेः । 'सार्वविभक्तिकस्तसिल्' इति सूत्रानुस्मरणेऽर्थेषु अकार्येषु इत्यपि स्यात् । इत्थं च कार्यजन्माद्यभावप्रयोजकाभावप्रतियोगित्वे सति कार्यान्वयप्रतियोगित्वं कार्यजनकतादिप्रयोजकं लब्धं यत्तादृशकार्यान्वयप्रतियोगित्ववत् तज्जगदुत्पत्त्यादिजनकमिति व्याप्त्या जगदुत्पत्त्यादिकारणतया ब्रह्मसिद्धिरिति ज्ञापितम् । ब्रह्मणो विवर्तोपादानत्वं, न तु परिणामोपादानत्वम् इति बोधनाय सद्रूपेणेति पूरितं, परिणामोपदानत्वमुपादानसत्तासमानसत्ताककार्योत्पादः, विवर्त्तोपादानत्वञ्च उपादानसत्ताविषमसत्ताककार्योत्पादः । वस्तुतः 'जन्मादी' त्यत्रादिपदेनैव जन्माद्यभाव उपस्थाप्यते, तस्य च 'इतरत' इत्यनेनान्वयः, अर्थेषु सद्रूपेणान्वयात् । यतोऽस्य जन्मादि इत्येकोऽर्थः । अनर्थेभ्यो यद्व्यतिरेकात् जन्माद्यभाव इत्यपरोऽर्थः । तथा च धूमेन हेतुना यथा कारणस्य वह्नेरनुमानं तथा कार्येण जन्मादिहेतुना जगति पक्षे किञ्चित् सदन्वयसाधने परिशेषाद् ब्रह्मणः सिद्धिरित्यन्वयादित्यन्तेन सूचितम् । 'इतरत' इत्यनेन च

खपुष्पादिकं किञ्चित् प्रतियोगिताकाभावप्रयुक्तव्यतिरेकप्रतियोगि जन्माद्यभावादित्यनुमानेन पक्षसाध्यहेतुस्पष्टतया व्यतिरेकप्रतियोगितया ब्रह्मणः सिद्धिरिति सूचितम् । अत्र 'इतरत' इत्येकपदोपस्थापितार्थानाम् अन्वये व्युत्पत्तिविरोधः अलीकखपुष्पादिभानविरोधश्चेत्यतो व्याख्यान्तरमाह टीकायाम्—अनुवृत्तत्वादिति । समन्वयादित्यस्यार्थः—अन्वयश्च यत्पदार्थे ब्रह्मणि अनुवृत्तत्वं व्यापकत्वमनुस्यूतत्वं भेदाप्रतियोगित्वं, तत्र प्रमाणं—"सर्वं खल्विदं ब्रह्म" इति श्रुतिः । जगतो ब्रह्मस्वरूपत्वं ब्रह्मणो जगदुपादानत्वं विना न सम्भवति इति जगत्कारणं ब्रह्मेति । न च ब्रह्मनिष्ठभेदाप्रतियोगित्वेन ब्रह्मकारणत्वं ब्रह्मणः स्यादिति वाच्यं; तदन्यत्वे सति तन्निष्ठभेदाप्रतियोगित्वस्यैव प्रयाजकत्वात् । वस्तुतस्तु जगति ब्रह्मभेदो वर्तते, तदस्वीकारे जगतः सत्तापत्तिरतो वक्ष्यति "सत इदमुत्थितं सदिति चेन्नतु तर्कहत" मित्यादि । "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुत्या ब्रह्मतादात्म्याध्यासेन जगतो ब्रह्मविवर्त्तोपादानकत्वं बोध्यते । इत्थं चानुस्यूतत्वं व्यापकत्वं वा अनुवृत्तत्वं बोध्यम्; अनुस्यूतत्वञ्चात्र भेदाप्रतियोगितया भानविषयत्वमिति व्यतिरेकत इत्यस्यार्थमाह—व्यावृत्तत्वात् इत्यस्येत्यनेनान्वयः । व्यावृत्तत्वञ्चानुवृत्तत्वाभाव एव । न च घटादिव्यावृत्तत्वं पटादावपीति घटादिकार्यत्वं पटादावपि स्यादिति वाच्यं; तत्स्वरूपत्वे सति तद्व्यावृत्तस्य तत्कार्यताप्रयोजकत्वात्, तत्स्वरूपमात्रस्य प्रयोजकत्वे स्वस्यापि स्वकार्यतापत्तेः । अत्र च 'यत' इति पञ्चम्या कारणत्वमेव प्रत्याय्यते, तन्निरूपकत्वमेव जन्मादौ लभ्यते । न तु विश्वनिष्ठकार्यत्वमपीति व्यावृत्तत्वादिति अनन्वयापत्तिरित्यतः कल्पान्तरमाह टीकायाम्—सावयवत्वादिति । एतच्च पूरितमन्वयव्यतिरेकप्रयोज्याकाङ्क्षानिवृत्तये । अन्वयः कदाचित् सत्त्वं, व्यतिरेकः कदाचिदसत्त्वम् । मूलेऽस्येत्यस्य पृथिव्यादेरित्यर्थः । तथा च पृथिव्यादिकं सहेतुकजन्मादिकं कादाचित्कत्वात् घटादिवदित्यनुमानेन सहेतुकत्वसिद्धौ अन्यत्र बाधात् ब्रह्मैव सिद्ध्यति इति अत्र तात्पर्यम् । अत्रार्थेष्वित्यन्वयः 'अभिज्ञ' इत्यनेन बोध्यः । ननु 'श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ॥ श्रुतिस्मृतिसहायं तत् प्रमाणान्तरमुत्तमम् । प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा' इति कूर्मपुराणेन "तर्काप्रतिष्ठानात्" इति सूत्रेण च तर्कस्यास्वातंत्र्योक्तेरेतद्ग्रन्थस्यानुमानमात्रमूलकत्वेऽप्रामाण्यशङ्का स्यादित्यतः श्रुतीः प्रमाणयति—'यतो वा' इत्यादीः । "ईक्षतेर्नाशब्दम्" (१ । १ ५) इति न्यायाच्च इति सांख्यपरिकल्पितसत्त्वादिगुणत्रययुक्तं प्रधानं न जगत्कारणं ब्रह्म यतोऽशब्दम् । अशब्दत्वञ्च शब्दाप्रतिपाद्यत्वम् । शब्दश्चात्र 'यतो वा इमानि' इत्यादिश्रुतिवाक्यम् । तथा च 'यतो वा' इत्यादिश्रुत्या प्रधानस्य जगत्कर्तृत्वाबोधनात् न तस्य ब्रह्मत्वमिति । ननु तादृशश्रुत्यैव कथं न प्रधानस्य जगत्कर्तृत्वं बोध्यते इत्यत आह—ईक्षतेः ईक्षणकर्तृत्वश्रवणात्, 'स ऐक्षत बहु स्या' मित्यादिजगत्कर्तृत्वस्येक्षणकर्तृत्वबोधकश्रुतिबोधघटितत्वादिति यावत् । न चायं हेतुः शब्दनिष्ठः, न तु प्रधाननिष्ठ इति स्वरूपासिद्ध इति वाच्यम्; ईक्षितृजगत्कर्तृत्वबोधकत्वेन हेतुना प्रधानाबोधकत्वसिद्धौ तुल्यवित्तिवेद्यतया प्रधानेऽपि शब्दबोध्यत्वाभावः सिध्यतीति । प्रधानस्य तादृशशब्दबोध्यत्वाभावः सिध्यतीति प्रधानस्य तादृशशब्दबोध्यत्वाभावे प्रयोजकञ्च जडत्वेनेक्षणकर्तृत्वबाध एव । विशेषश्च भाष्ये तट्टीकादौ च द्रष्टव्यः । अत्र जगतो मिथ्यात्वे प्रमाणाभावः । न च ब्रह्मभिन्नत्वमेव मानं ब्रह्मभिन्नत्वस्यैवासिद्धेः । मिथ्याधिकरणभेदाङ्गीकारेऽपि भवन्मते जगति तद्बाधापरीहारात् । न च कालदेशपरिच्छेदहेतुनैव मिथ्यात्वं साध्यमप्रयोजकत्वात् । न च रज्जुसर्पदृष्टान्त एव प्रयोजक इति वाच्यम्; 'अयं सर्प' इति रज्जुज्ञाने अन्यत्र सिद्धस्य सर्पादेरभेदो रज्ज्वादौ पुरोवर्तिनि दोषवशाद्भासते । ननु तत्र मिथ्या रज्ज्वारोपितसर्पादेर्भानमिति दृष्टान्तासिद्धेश्च, किञ्चारोपो हि प्रसिद्धे वस्तुनि अन्यत्र प्रसिद्धस्य दोषवशाद्भवति, जगतो मिथ्यात्वे खपुष्पादितुल्यस्य तस्यारोपासम्भवः, जगद्भानस्यारोपरूपत्वे रज्जुसर्पारोपवदर्थक्रियाकारित्वं घटादेर्न स्यात् । व्यावहारिकसत्त्वस्याङ्गीकारे तस्य मिथ्यात्वेन तेन व्यवहारसिद्धिः । तस्य सत्यत्वे च सिद्धे ब्रह्मातिरिक्तमिति बुद्ध्या जीवोपाधेः सादित्वे प्राक्तनादृष्टादेरभावात् बुद्ध्याद्युत्पाद एव न स्यात् । न च युगपन्न सकलबुद्ध्यादिसृष्टिः स्वीक्रियते, पित्राद्यदृष्टवशाच्च पुत्रादिजीवोपाधिजन्म स्वीक्रियते इति वाच्यं; "सदेव सोम्येदमग्र आसीत्" इति श्रुत्या अवान्तरप्रलये ब्रह्मातिरिक्तवस्तुमात्रत्वासत्त्वाप्रतिपादनेनाविद्याया अभावात् कुतः प्रपञ्चसर्ग इति सृष्टिसहकारिमायास्वभावोऽदृष्टादेस्तदानीं सत्तावश्यकतया सदेवेत्येवकारेण स्थूलप्रपञ्चस्यैव निषेधात् अविद्यालिङ्गशरीरादीनामनादित्वमङ्गीकार्यम्, अनादित्वे च तेषां नित्यत्वमायाति; अनादिभावस्य नित्यत्वनियमात् इति द्वैतसिद्धेः । साक्षितया सर्वत्र ब्रह्मावस्थानेन सर्वस्य ब्रह्मत्वमुक्तं श्रुत्यादाविति, इत्यस्य प्रपञ्चस्य नश्वरत्वमेव, न तु मिथ्यात्वमिति सात्वतमतानुसारेण श्रीमत्सन्दर्भसम्मतव्याख्या लिख्यते । यथा 'धीमही'ति निर्विशेषवस्तुनो ध्यानाशक्यतया मूर्तिमान् भगवान् एव परशब्दप्रतिपाद्य इति सूचितम् । निर्विशेषस्य कथञ्चिद्ध्येयत्वेऽपि तद्ध्यानस्य बहुतरक्लेशसाध्यत्वात् फलस्यानतिशयत्वाच्च तत्र प्रेक्षावतामप्रवृत्तेः । तथा च भगवद्गीतासु'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यत' इति ।

'नैष्कर्म्यमप्यच्युतभाववर्जित'मित्यनेन मूर्तभजनस्यैव नित्यत्वमुक्तमिति तद्ध्याने हेतुमाह सत्यमिति । एतच्च प्राग्व्याख्यातम् । परत्वमेव व्यञ्जयति—धाम्ना स्वेनेति । 'धाम'शब्देन तेजोवाचिना स्वप्रकाशत्वसाधर्म्येण स्वप्रकाशज्ञानमुच्यते तदात्मकेन स्वेन रूपेण निरस्तं कुहकं मोहविक्षेपादिकारितया माया यस्मादिति धामशब्देन ज्ञानमयी शक्तिरुच्यते । 'मायां व्युदस्य चिच्छक्त्या' इत्युक्तेः । 'स्वेने'त्यनेन चिच्छक्तेरन्तरङ्गत्वं 'निरस्तकुहक'मित्यनेन मायाया बहिरङ्गत्वं दर्शितम् ।

तेन मायागुणराहित्येन निर्गुणनिरञ्जनत्वादिकस्वरूपभूतगुणवत्त्वेन च सर्वशक्तिमत्त्वादिकम्। 'यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। यस्मादेतद्ब्रह्म नामरूपमन्यच्च जायते॥' 'सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत बहु स्यां तत्तेजोऽसृजत सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेः। 'न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेश्च। 'ह्लादिनी सन्धिनी संवित्त्वय्येका सर्व्वसंश्रये। ह्लादतापकरी मिश्रा त्वयि ता गुणवर्जिते॥' इति विष्णुपुराणाञ्च। सर्वं विन्दत इति सर्व्ववित् सर्व्वशक्तिरित्यर्थः। 'तप ऐश्वर्य्ये' इति दिवादिपठितधातुनिष्पन्नत्वात् तपःशब्देन ऐश्वर्यमुच्यते। ज्ञानमयम् इच्छाप्रधानं, ज्ञानपदेनेच्छाया मयट्प्रत्ययेन प्राधान्यस्याभिधानात्। अथवा ज्ञानमयं चिच्छक्तिविलसितमित्यर्थः। अथवा यस्य ज्ञानं यद्गोचरज्ञानं तन्मयं तदात्मकं तपः। मायानिरसनलक्षणतपःसाधनं "तमेव विदित्वातिमृत्युमेति नान्यः पन्था" इति श्रुतेः। ब्रह्म वेदं सर्वस्य वशी सर्वनियन्ता इत्यर्थः। अथवा 'धाम'शब्देन प्रभाव उच्यते। "गृहदेहत्विट्प्रभावा धामानि" इत्यमरात्। सत्यत्वे युक्तिमाह—यत्रेति। 'तत्सृष्ट्वा तदेवानुप्रविशत्' इति श्रुत्या बोधितजगत्कारणे अन्तर्यामितया सर्वत्र स्थिते यस्मिन् स्थितोऽयं त्रिसर्गोऽमृषा सत्यः रज्जौ सर्पादिवदारोपितो न भवति, किन्तु सत्य एव असत्यत्वे सत्कार्यत्वानुपपत्तेः। असति प्रवेशासंभवात् नियम्यत्वाधेयत्वयोरसम्भवाच्च। एवमसतः सत्कारणत्वाद्यनुपपत्तेः। सदेव ब्रह्म कारणमन्तर्यामिजगदाधार इत्युन्नेयम्। सतः सञ्जायत इति नियमात् सदसतोस्तादात्म्यानुपपत्तेः सतो विवर्त्तः प्रपञ्च इत्यनुपादेयम्। तथा चोक्तं भगवद्गीतासु—'नासतो विद्यते भावो नाभावो विद्यतेऽसतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः' इति। अत्रासतः आकाशात् न भावः न सदुत्पत्तिः। सतः सकाशात् न अभावः न असदुत्पत्तिः। तत्त्वदर्शिभिर्विवेचकैः अनयोरुभयोरन्तो याथार्थ्यं सत्यत्वरूपं दृष्टः, न त्वन्यैरित्यर्थः। 'सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्य'मिति च श्रुतेः। 'अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते' इति श्रुतेश्च। तेषां प्राणशब्दोदितस्थूलसूक्ष्मभूतानां व्यवहारतः सत्यत्वेनावगतानां मूलकारणभूतं परमसत्यं ब्रह्मेति तदर्थः। परन्तु भगवतः सत्यत्वं नित्यतया मुख्यं प्रपञ्चसत्यत्वमागमापायितया गौणम्। तेन प्रपञ्चो नश्वर इति अमृषात्वेऽपि मिथ्यात्वप्रवाद इति तु बोध्यम्। सत्यत्वे दृष्टान्तः—तेजोवारिमृदां यथा विनिमयः परस्परांशव्यत्ययः परस्मिन्नवस्थितिः। तथा च श्रुतिः—'इमास्तिस्रो देवतास्त्रिवृदेवैका भवति यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' इति। अथवा तेजोवारिमृदां यथा यथावद्विनिमयः परस्परस्मिन् परस्परांशसमाहारः स्थूलप्रपञ्चः यथावत् विनिमयः यत्रेति वा। त्रिसर्गः त्रयाणां मायागुणानां कार्यरूपः अमृषा सत्यः यत्र यस्मिन् शासितरि भवति तं सत्यं धीमहीत्यर्थः। यद्वा मृषा मृषावत् नश्वर इत्यर्थः। तथा च ब्रह्मणः सत्यत्वं विना शासनकर्तृत्वानुपपत्तिरिति।

अत्र सूत्रद्वयम्—"अक्षरमम्बरान्तधृतेः" (१ । १ । ९), 'सा च प्रशासनात्' (१ । ३ । १०) इति। तत्राद्यस्यायमर्थः—अम्बरान्तस्य आकाशपर्यन्तस्य सर्वस्य धृतेर्धारणात् ब्रह्मैवाक्षरं सत्यम्। तथा च श्रुतिः—'एतस्मिन्नक्षरे गार्ग्येक ओतश्च प्रोतश्च' इति 'स उ दधार पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा। भर्ता सन् भ्रियमाणो बिभर्ति एको देवो बहुधा निविष्ट' इत्यादि। स्कन्दपुराणाच्च—'पृथिव्यादि प्रकृत्यन्तं भूतं भव्यं भवच्च यत्। विष्णुरेको बिभर्तीदं नान्यस्तस्मात् क्षमो धृतौ॥' सा च धृतिः प्रशासनादित्याह द्वितीयसूत्रेणात्र। श्रुतिरपि—'एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत' इत्यादि। धृतिः पतनाभावः। तेजआदितिसृणां समाहारमाह श्रुतिः—'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'ति। तिसृणां देवतानां तेजोऽबन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतं त्रिवृतं त्रिरूपां करवाणीतीक्षणं परमा देवता कृतवती चेत्यर्थः। त्रिवृत्करणञ्च तेजोऽबादीनां भूतानामेकैकं द्विधा विभज्य पुनरेकैकभागस्य द्विधा विभागं स्वस्वद्वितीयं स्थूलभागं परित्यज्य अन्यदीयस्थूलभागयोरेकैकभागस्य योजनम्। त्रिवृत्करणानां पञ्चीकरणमेव लक्षितम्, परन्तु आकाशस्य सर्वावकाशतया वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात् तयोस्तेजआदिष्वन्तर्भावं सिद्धवत् कृत्वा त्रिवृत्करणं श्रुतावुक्तमिति। एतदेव तटस्थलक्षणविशेषणेन द्रढयति—जन्माद्यस्य यत इति। अस्य विश्वस्य जन्मादि यत इति तत्परत्वमित्यर्थः। तथा च श्रुतिः—'यतो वा इमानी'त्यादि। विश्वं सहेतुकं जन्मादिमत्त्वात् इत्यनुमानमत्र प्रमाणम्। ननु ईश्वरो न कर्ता प्रयोजनशून्यत्वात् मुक्तात्मवदित्यादिसत्प्रतिपक्षस्थापनेन परमेश्वरे जगत्कर्तृत्वानुमानं संदिग्धप्रामाण्यकम्। तथोक्तं—"तर्काप्रतिष्ठानात्" इत्यादिसूत्रे इति शास्त्रमेव प्रधानं प्रमाणेन वक्तव्यम्। तथोक्तं—"शास्त्रयोनित्वात्" (१।१।३) इति सूत्रेण शास्त्रं योनिः प्रमाणं यस्येति शास्त्रयोनिः तत्त्वात्। तत्र कथं शास्त्रयोनित्वमित्याशङ्कायां "तत्तु समन्वयात्" (१।१।४) इति सूत्रान्तरमुक्तम्। तदर्थश्च तत् शास्त्रयोनित्वं, 'तु' शब्दः प्रसक्ताशङ्कानिवृत्त्यर्थः, समन्वयः अन्वयव्यतिरेकाभ्यामुपपादनं तस्मात्। तत्रान्वयेन उपपादनं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि, व्यतिरेकेणोपपादनं 'कथमसतः सज्जायेतेति' 'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इत्यादिना प्रयोजनशून्यत्वेऽपि सृष्ट्यादिकर्तृत्वे श्रुतिष्वानन्दरूपताप्रतिपादनेनैव समाहितम्। तथोक्तं नारायणसंहितायाम्—'सृष्ट्यादिकं हरेरेव प्रयोजनमपेक्षते। कुरुते केवलानन्दादुन्मत्तस्येव नर्तनम्' यथेति तदेव। 'शास्त्रयोनित्वात्' 'तत्तु समन्वयात्' (१।१।४) इति सूत्रद्वयार्थं प्रमाणत्वेनाह—अन्वयादितरतश्चार्थेष्विति। अर्थेषु नानाविधेषु वेदवाक्यार्थेषु सत्सु अन्वयात् अन्वयमुखेन व्यतिरेकतश्च व्यतिरेक-

मुखेन श्रुतिवाक्येन यतोऽस्य जन्मादि प्रतीयते इत्यर्थः। तथा च जन्मादीत्यनन्तरं प्रतीयते इति पूरणीयम्। अथवा इतरत इति सप्तम्यन्तं, च अप्यर्थे, तथा च इतरेषु अर्थेषु सत्स्वपि अन्वयात् सर्ववेदवाक्यानां तात्पर्यावधारणात् तत्र "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतीनां साक्षात्परत्वं 'अस्थूलमनण्वह्रस्व'मित्यादिवाक्यानां निषेधावधित्वेन इन्द्रमुपासीतेत्यदिदेवतान्तरपराणामपि सर्वेषामंशीभूते तस्मिन् परमेश्वरे पर्यवसानेन। 'येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्' इति भगवदुक्तेः, श्रुत्यध्याये च 'कथमन्यथा भवन्ति भुवि दत्तपदानि नृणाम्' इति। एवं क्रियापराणामपि वेदानां ज्ञानसाधने भगवत्परत्वम्। एवं जगत्कर्तृत्वादीनामन्यत्र बाधेन तत्र तात्पर्यावधारणादस्य विश्वस्य जगत्कर्तृत्वं निराकृतम्। ननु ब्रह्मणि श्रुत्यन्वयो दर्शितः, तत्कथं सङ्गच्छते ? ब्रह्मणो निर्गुणत्वात् वेदस्य सगुणपरत्वात्। अत एव श्रुतिरपि—'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति, 'अशब्दमस्पर्शमरूप'मित्यादि च इत्यत आह—स्वराट् स्वेषु स्वकीयेषु भक्तेषु राजते प्रकाशते इत्यर्थः। 'भक्त्याहमेकया ग्राह्य' इत्युक्तेः। भक्तेक्षणीयत्वादेव श्रुतिगोचरत्वमिति। तथा च श्रुतिः—'तन्त्वौपनिषदं पुरुषं पृच्छामि' इति। 'सतं परं पुरिशयं पुरुषमीक्षते' इति च। एतेन 'ईक्षतेर्नाशब्दम्' (१।१।५) इति व्याख्यातम्। ब्रह्मेतिपक्षः पूरणीयः, ब्रह्म नाशब्दं न शब्दागोचरम्, ईक्षतेः ईक्षणविषयत्वादिति तदर्थादशब्दत्वञ्च अनन्तगुणत्वात् अभक्तज्ञानागोचरत्वाच्च। ननु हिरण्यगर्भादीनामस्तु जगत्कर्तृत्वमित्यत आह—तेने ब्रह्महृदेति। आदिकवये ब्रह्मणेऽपि ब्रह्म ब्रह्मपरतया वेदं तेने उपादिदेश, तं धीमहीत्यर्थः। एतेन जगत्कर्तृत्ववेदकर्तृत्वबोधनेन हिरण्यगर्भस्य वेदोपदेशश्रवणेन च न हि हिरण्यगर्भस्य तत्त्वमिति फलितम्। एवं वेदस्य ब्रह्मबोधकत्वेन शास्त्रगम्यत्वरूपशास्त्रयोनित्वं प्राप्तं शास्त्रस्य योनिः करणम् इति व्युत्पत्तिलब्धं 'शास्त्रयोनित्वात्' इति शास्त्रस्यार्थान्तरं ब्रह्म तेने इत्यनेनोक्तवान्। स चोपदेशः हृदान्तःकरणद्वारैव, न तु वाग्द्वारा। एतेनान्तर्यामितया बुद्धिवृत्तिप्रेरकत्वमुक्तम्। तथा च श्रुतिः—'यो ब्रह्माणं विदधाती'त्यादि। 'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदोऽजायत' इत्यादि च। स्मृतिश्च "प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते" इति। निःश्वसितञ्च निर्विशेषस्यासम्भवादतो मूर्तिमदेव वस्तु लक्ष्यम्, अनुमानञ्च वेदः पौरुषेयः वाक्यत्वादित्यादि। ननु वेदस्य ब्रह्मपरत्वे कथं क्रियामात्रपरत्वं जैमिनिप्रभृतयो वदन्ति इत्यत आह—यत्सूरयोऽपि मुह्यन्ति। अत्र अनेन श्लोकेन गायत्र्यर्थो दर्शितः। तथा हि—'जन्माद्यस्ये'त्यनेन सवितुरित्यस्यार्थः। 'परम्' इत्यनेन वरेण्यमित्यस्यार्थः। 'धाम्ना स्वेने'त्यनेन भर्ग इत्यस्यार्थः 'स्वराडि'त्यनेन देवस्येत्यस्यार्थः। 'तेने ब्रह्म हृदे'त्यनेन धियो यो नः प्रचोदयादित्यस्यार्थः प्रकटितः। गायत्र्यां देवस्येति अभेदे षष्ठी बोध्या। उक्तञ्च 'यत्राधिकृत्य गायत्री'मित्यादि ॥ १ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

वन्दे श्रीकृष्णदेवं मुरनरकभिदं वेदवेदान्तवेद्यं लोके भक्तिप्रसिद्ध्यै यदुकुलजलधौ प्रादुरासीदपारः ॥
यस्यासीद्रूपमेव त्रिभुवनतरणे भक्तिवच्च स्वतन्त्रं शास्त्रं रूपं च लोके प्रकटयति मुदा यः स नो भूतिहेतुः ॥ १ ॥
कर्ता ज्ञः सकलस्य यो निगमभूः सर्वस्वरूपोऽपि सन् सर्वस्यापि विधारणो विजयते निर्दोषसर्वेष्टदः ॥
यो लीलाभिरनेकधा वितनुते रूपं निजं केवलः सोऽयं वाचि ममास्तु पूर्णगुणभूः कृष्णावतारः पतिः ॥ २ ॥
श्रीमद्वल्लभविद्वदीशविलसद्वंशाब्धिपूर्णेन्दवे श्रीगोपीपतिवन्दिने सुमनसि ब्रह्मामृतस्यन्दिने ॥
श्रीमल्लक्ष्मणभट्टसूरिरिति यन्नामाखिलाभीष्टदं तस्मै तातमहाशयाय हरये कुर्मो नमः सिद्धये ॥ ३ ॥
श्रीमद्भागवतागमः सुरतरुर्लोके फलत्वं गतो भाषाभेदविभेदतस्त्रयमपि स्यान्नो विरुद्धं महत् ॥
भक्त्यंशे फलताप्रमाणसुबले वेदत्वमर्थः पुनः स्कन्धैर्द्वादशभिर्युतः सुरतरुः शाखाद्विवह्निद्वयम् ॥ ४ ॥
अर्थं तस्य विवेचितुं न हि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपतिः ॥
दत्त्वाऽऽज्ञां च कृपावलोकनपटुर्यस्मादतोऽहं मुदा गूढार्थं प्रकटीकरोमि बहुधा व्यासस्य विष्णोः प्रियम् ॥ ५ ॥
लक्षणां नैव वक्ष्यामि न न्यूनादन्यपूरणम् । आर्थिकं तु प्रवक्ष्यामि परोक्षकथनादृते ॥ ६ ॥
अविरोधेन सप्तानामर्थानामिह सङ्गतिः । उत्तरोत्तरदौर्बल्यं वाच्यं संकोचतः परम् ॥ ७ ॥
भाषात्रयविरोधश्च कल्पभेदात्समाहितः । भाषात्रयविभेदश्च लक्षणैर्ज्ञाप्यते पुनः ॥ ८ ॥
अर्थत्रयं तु वक्ष्यामि निबन्धेऽस्ति चतुष्टयम् । अत्र सन्तः स्वसंतोषैराज्ञां यच्छन्तु सिद्धये ॥ ९ ॥

अथ व्याख्या—भगवदाज्ञया भक्तिजनिकां संहितामारभमाणः शिक्षार्थं मङ्गलमाचरन् बीजभावेन प्रथमं गायत्र्यर्थमुपनिबबन्ध जन्माद्यस्येति। अत्र हि श्लोकत्रयस्यासंगतिः। कथारूपं हि भागवतं, तत्तु नैमिष इत्यादिना निरूप्यते। तत्रोच्यते—'यत्राधिकृत्य गायत्री वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥' यथा हि यज्ञात्मको वृत्रः तद्वधनिरूपणेनात्र भक्तिः प्रवर्त्तयिष्यते। गायत्री हि वेदमाता वेदत्रयार्थप्रतिपादिका भवति। तदर्थो भागवते प्रथमं बीजार्थं निरूप्यते—यथा वेदस्तथा भागवतमिति, एकबीजात्। अतो गायत्र्यर्थनिरूपणेन वेदविरोधो वेदादौर्बल्यञ्च परिहृतम्। किञ्च यथा हि वेदे यज्ञियाः पदार्था

योगजधर्मेणानुभूयन्ते फलसाधनसहिताः, तथात्रापि च योगजधर्मेण व्यासस्त्रयमनुभूतवान् "पुरुषो मायया बन्धो, मोचनं भक्तिहेतुकम्" इति 'अपश्यत्पुरुषं पूर्ण' मित्यादिना। एषा हि समाधिभाषा। तत्र हि पुरुषप्रयत्नो भक्तावेव माहात्म्यज्ञानपूर्वकं "सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा" इति वैष्णवतन्त्रवचनात् माहात्म्यज्ञानपूर्वकसुदृढ-सर्वतोऽधिकस्नेहो भक्तिः। सुदृढः सर्वतोऽधिकस्नेहस्त्वात्मत्वेन विज्ञाते भवति, माहात्म्यज्ञानं तु सृष्ट्यादिभिः, तत्र द्वयं साधयितुमेषा भागवती संहिता। यथा हि यज्ञा ब्रह्मात्मावगतिश्च काण्डद्वयार्थः अन्योऽन्यहेतुभूतः, तथात्र द्वयमपि भक्तिहेतुरिति निरूपयितुं गायत्रीबीजं 'वेदो वृक्षा भागवतं फल'मिति निरूप्यते। अतः काण्डद्वयार्थनिष्णातोऽपि अफलवृक्ष इव व्यर्थ इति भागवतारम्भः। तदत्र श्लोकत्रयेण निरूप्यते—यद्यपि, प्रणवो व्याहृतयश्च तथा भवन्ति, तथापि तेषामर्थः स्पष्टो नेति गायत्र्यर्थो निरूप्यते। किञ्च अग्न्युपस्थाने हि गायत्री नियुक्ता। तत्सवितुर्वरेण्यमित्याह—प्रसूत्या इति। तथा मन्देहादिनिवारणे च गायत्र्याभि-मन्त्रिता आप ऊर्ध्वं विक्षिपन्तीत्यादिना। तेन निर्विघ्नं वाक्प्रसवार्थं गायत्र्या भगवदुपस्थानं कुर्वाणो गायत्र्यर्थमाह—तत्र गायत्र्यां जगत्प्रसवकर्तृत्वेन सर्वकर्तृत्वं, देवत्वेन च सर्वज्ञत्वं, षष्ठीद्वयेन निरूप्यते। वरेण्यमिति भक्तिबीजं, भर्ग इति संसारनिवृत्तिः। भर्जयत्यखिलाविद्यामिति। अतस्तदेव धीमहीति। आवश्यकत्वं चाह—'धियः सर्वेन्द्रियाण्येव मनसा सह सर्वदा। प्रेरयेद्यः समस्तानां तद्ध्यानं सर्वथा हितम्' इति।

तदत्राप्याह—जन्मादि अस्य यत इति। जन्म आद्यस्य आकाशस्य यत इति वा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति श्रुतेः। गायत्र्यर्थे हि प्रसवमात्रमुक्तं न स्थितिप्रलयौ, वरेण्यभर्गःशब्दाभ्यां च पश्चात्सूचितौ, तदत्राप्युत्तरार्द्धे सूचयिष्यते। अथवा सूचितमप्यर्थमादाय उत्पत्तिस्थितिप्रलया निरूप्यन्ते। जन्मादिपदेन "यतो वा इमानि भूतानि जायन्त" इति श्रुतेः, जन्म आदिर्यस्य स्थितिभङ्गस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। उत्पत्तिस्थितिभङ्गस्येति वा तद्गुणसंविज्ञानः। वेदार्थप्रतिपादकत्वान्नाधिकपुनरुक्ती, अस्येति ब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यस्येति माहात्म्यं, यत इत्यव्ययनिर्देशः अविकृतत्वाय, सर्वजगद्बीजमपि ब्रह्म न विकृतमिति निरूपयितुं, यथा कामधेनोः कल्पवृक्षात् चिन्तामणेर्मन्त्रादेश्च जायमानाः पदार्था दृश्यन्ते, न हि ते विकृता भवन्ति। अनेन 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' (२।१।२६) इति पूर्वपक्षः परिहृतः। यत्तदोर्नित्यसम्बन्धेऽपि शब्दन्यूनतादोषपरिहाराय अध्याहारः कर्तव्यः, यद्यपि तथापि गायत्र्यन्तर्गततच्छब्दव्याख्यान-रूपस्य 'सत्यं पर'मिति पदद्वयस्य विद्यमानत्वान्नाध्याहारः। तत्र ब्रह्मणः समवायित्वं प्रकृतेर्निमित्तत्वमिति केचिदाहुः, विपरीत-मित्यन्ये, कर्तृत्वमात्रमित्यपरे, तत्सर्वनिराकरणायाह—अन्वयादितरतश्चेति। अन्वेतीत्यन्वयः, समवायिकारणमितरत् निमित्तकारणं, यत्र येन यतो यस्येत्यादिश्लोकोक्ताः अनुक्ताश्चकारेग परिगृहीताः। अतः अभिन्ननिमित्तोपादानं जगत् ब्रह्मकारणकमित्युक्तं भवति। स्थितिप्रलयादावपि यथापेक्षं ग्रहणात् न समवायकथनदोषः। अथवा, वैनाशिकप्रक्रियाया अनङ्गीकारान्नाशेऽप्यव्यक्तस्थितेः समवाय्यपेक्षाऽस्त्येव, प्रत्यक्षानुग्राहकावन्वयव्यतिरेकाविह न भवतः। न हि ब्रह्मणो जगत्कारणत्वं प्रत्यक्षसिद्धं, श्रुतिसिद्धं तु तत्, न वा ब्रह्मणः कचिद्व्यतिरेकः सम्भवति, खपुष्पादिकमपि तत्सत्तयैव भासते, 'यदस्ति तदस्ति यन्नास्ती'ति वाक्याच्च, तस्मात् सर्वप्रकारेणापि ब्रह्मैव जगत्कारणमित्युक्तं भवति। जगत्कारणत्वेन तदुपयोगिसर्वज्ञत्वे सिद्धेऽपि लोकवत् फलाज्ञानं सम्भवतीति तदाह—अर्थेष्वभिज्ञ इति। अनतिप्रयोजनाय सप्तमी, एकस्यापि प्रयोजनस्य बहुप्रयोजनार्थत्वं ज्ञापयितुं बहुवचनं, ज्ञानशक्तेः प्रयोजनानां च न समासः। तेन न हर्षविषादौ, अर्थशब्दः प्रयोजनवाची। अथवा अर्थेषु निमित्तेषु चतुर्विधपुरुषार्थसिद्ध्यर्थं जगज्जननमित्यर्थः। सर्वजीवानां सर्वपुरुषार्थसिद्ध्यर्थं जगदित्युक्तं भवति। एकस्यापि प्रयोजनस्य प्रयोजनकार्यकारणपरम्पराणां ज्ञानमभिशब्दार्थः। ज्ञानमार्गे केचन स्वार्थमेव सर्वं करोतीत्याहुः, तन्निराकरणायाह—स्वराडिति। यद्यपि जीवा अपि स्वरूपमेव, तथापि प्रकारभेदान्न दोषः, स्वेनैव राजते, न विषयेषु रमत इत्यर्थः। अथवा–विराडन्तर्गतः स्वराट्, तेन पूर्वोक्तसर्वज्ञता समर्थिता भवति। अक्लेशार्थं वा स्वरूपानन्दे रमत इत्यर्थः। एतावता रूपप्रपञ्चकारणत्वमुक्तम्। नामप्रपञ्चकारणत्वमाह—तेने इत्यादिना। यद्यप्यविशेषेण कारणत्वं वक्तुं शक्यं, तथापि रूपप्रपञ्चे आसक्तानां जीवानां निवारणार्थं भेदेनोक्तं, बन्धमोक्षयोः प्रकारभेदेन निरूपणार्थं वेदजगतोर्भिन्नतया निरूपणम्। त्रिविधाप्युत्पत्तिर्वेदे नास्ति, किन्तु प्रलये सूक्ष्मतयावस्थानम्। यथा वर्णानामनेकभाषावितततत्वं विस्तारः, तथा श्रुतेरपि वेदशाखाभेदेन विस्तारः। ब्रह्म वेदम् अविकृतत्वाय तथा वचः। हृदेति मनःपूर्वकं स्वार्थमेतदिति भावः। पुराणेन सहेति वा "पुराणं हृदयं स्मृतम्" इति वचनात्।

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति ब्रह्मार्थं वेदविस्तारः। भगवत्तात्पर्यं वेद एव, न लोक इति वा 'हृदे'त्युक्तम्। य इति। गायत्रीतृतीयपादस्य ग्रहणं, तेन सर्वप्रेरकत्वमायाति, अन्यथा वैयर्थ्यापत्तेः, यत इत्यस्यैव सर्ववाक्येषु विभक्तिविपर्ययेण योजयितुं शक्यत्वात्। आदिकवये ब्रह्मणे। वेदमार्गेण ब्रह्मैवमुच्यत इत्यर्थः। अन्येषां वेदार्थनिष्ठा-नामपि तद्रूपेणैव मुक्तिरिति भावः। शब्दरसाभिज्ञत्वाय 'कवि' पदप्रयोगः। गोपनार्थमन्यथा कथनसामर्थ्याय वा। न ह्यन्यस्तादृशो-ऽस्तीत्यादिपदं कविदोषाभावायेति वा। नानाविधस्तोत्रेण वा सन्तुष्टो भगवान् तस्मै वेदं प्रकाशितवानित्यादिकविपदप्रयोगः। अन्येषां वेदानुपयोगे हेतुमाह—मुह्यन्तीति। यस्मिन् वेदे सूरयोऽपि मुह्यन्तीत्यर्थः। वेदार्थे वा। यज्ञान् लौकिकान् फलसम्बन्धमात्रे

वैदिकान् ब्रह्म च जीवानामात्ममात्रमिति सांख्या योगिनश्च, न वैदिकाः पौराणिकाः परं सद्वादिनोऽपि पुरुषपर्यवसिताः, न तु पुरुषोत्तमविदः । अन्ये च तदनुवर्तिनः । मोहे भगवदप्रतिपत्तिर्हेतुः । तस्माद्भगवानेव तत्प्रपन्नो वा वेदार्थवित् । वेदस्य सर्वसमर्थत्वात् कामनया क्लिष्टेषु प्राणिषु कामनासिद्ध्यर्थं वेदप्रचारः । तथैव शाखाप्रणयनं, तथैव पुरूरवसो हृदि कचित् प्रणवमात्रं वा "वेद प्रणव एवाग्र" इति वचनात् , सर्वथा वेदोपयोगो ब्रह्मण एव स्थितः । अत एव वेदतात्पर्याज्ञानात् अन्यथा वेदार्थवक्तार उपेक्षणीयाः । प्रपञ्चेन बन्धः, वेदेन मोक्षः, उभाभ्यां हरिः क्रीडतीति माहात्म्यमेवं पूर्णगुणविग्रहत्वमुक्त्वा निर्दोषत्वं वदन् भर्गः-शब्दार्थमाह—तेजोवारीति । वरणीयत्वं वा बोधयति, मायातत्कार्यसम्बन्धलेशाभावप्रतिपादनात् । दोषाभावपक्षे तु दोषो द्विविधः–स्वत एव दुष्टतापादकः सेवकानुद्धारो वा । तत्राद्याभावमाह—तेजोवारीति । देहेन्द्रियान्तःकरणधर्मसम्बन्धो दोषः । स च प्रत्येकमिति दृष्टान्तबाहुल्यम् । सात्त्विकादिभेदेन वा, पृथिव्यप्तेजसामन्योऽन्यस्मिन् अन्योऽन्यावभासो यथा मृषा, द्रष्टुरेव तथा बुद्धिजनकः, नतु विषयस्तादृश इत्यर्थः । तेजसि वारिबुद्धिः मरीचितोये । वारिणि पृथिवीबुद्धिः तमिस्रायां जलादौ । तथा मण्यादिष्वग्निबुद्धिः । मृदि काचादौ वारिबुद्धिः । मेघेषु चन्द्रबुद्धिः । चन्द्रकिरणे वस्त्रबुद्धिः । सजातीयभ्रमाश्च शुक्तिरजतादिषु । ते यथा जीवानां बुद्धिपरिकल्पिताः, तथा च भगवति देहेन्द्रियान्तःकरणवत्त्वमवतारादिषु मृषेत्याह—यत्र त्रिसर्गो मृषेति । यत्रेति निमित्ताधिकरणयोर्ग्रहणं, ततो गुणत्रयकार्यदेहेन्द्रियमनांसि तद्धर्माः तत्कारणं वा तदधिकरणानि तदर्था वा अध्यासेन वसन्तीत्यर्थः । केवलमिथ्यात्वप्रतिपादने यत्रेति वैयर्थ्यापत्तेः सर्वाधारत्वाच्च ब्रह्मणः तेनाध्यासेनैवेति वक्तव्यमेतदर्थमेव दृष्टान्तानाह—लोकदृष्ट्या प्रतीतिः । अन्यस्मिन् ब्रह्मणि अन्यधर्माणां देहेन्द्रियादिधर्माणां प्रतीतिर्मिथ्येति । प्रवृत्तिप्रकाशतद्राहित्यवैधर्म्यस्य स्पष्टस्यापि सतः, यथान्यस्मिन्नन्योऽन्याध्यासः । केचिद्भगवति देहेन्द्रियाणि परिकल्प्य तेषां चिदानन्दत्वं परिकल्पयन्ति । केचिच्चिदानन्दे देहेन्द्रियाणि, केचिच्चले कृष्णे जडजीवसम्बन्धं कल्पयन्ति, जडजीवविशेषे वा सामर्थ्यम् । केचिच्छरीरे मायातद्वतोरध्यासं प्रकल्पयन्ति, मायाविशिष्टे स्वेच्छयैव शरीरसम्बन्धं वा । सर्वेषां तेषां बुद्धिरेव भ्रान्ता, न ब्रह्मणि शरीरेन्द्रियसम्बन्धः । यथा पुनर्ब्रह्मणि व्यवहारः, तथोत्तरत्रैव वक्ष्यते । एवं भगवति जडजीवधर्मा मृषेत्युक्तं, मायातत्कार्यसम्बन्धलेशाभावात् वरणीयं सुन्दरमिति स्वतो दोषाभाव उक्तः । भजनीयगुणान् वदन् सेवकोद्धारमाह—धाम्ना स्वेनेति । स्वरूपस्फूर्त्यैव सर्वेषां सर्वाविद्यानाशक इत्यर्थः । स्वरूपमेवाविद्यानाशकं प्रमेयबलमेतत् । सदेति । न कलिकालादिः प्रतिबन्धकः; कुहकम् कापट्यं, देहेन्द्रियात्मभाव इति यावत् , तस्मिन्निराकृते शिष्टं स्वत एव भविष्यति । एतेन "भर्जयत्यखिलाविद्याम्" इति 'भर्गस्'शब्दः सकारान्तो व्याख्यातः । तच्छब्दं व्याचष्टे—सत्यं परमिति । कालत्रयाबाधितं सर्वलोकप्रसिद्धं सत्यं परं श्रेष्ठं पुरुषोत्तमरूपं सर्ववेदप्रसिद्धं, धीमहीति ध्यायेम प्रीतिं वा कुर्म इत्यर्थः । इदमेवोभयत्र पदं वैदिकत्वबोधनाय । अनेन वेदसंमितं पुराणमित्युक्तं भवति एवं बीजभावो निरूपितः ॥ १ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

श्रीकृष्णाय नमः । श्रीगोपीजनवल्लभाय नमः ।

नमः श्रीवल्लभाचार्यचरणाब्जनखेन्दवे । यत्प्रकाशितहृद्देशा भक्त्यम्भोधितरङ्गिताः ॥ १ ॥
प्रभञ्जनशिलाशनिव्यथितसर्वदिङ्मण्डले सुरेश्वरनिदेशतः प्रलयवारिदे वर्षति ।
क्षितिध्रविमर्दीकृतक्षितिधरद्रुहः स्वीकृतव्रजेक्षितसुधाम्बुधेर्भगवतः कृपायै नमः ॥ २ ॥

अथ श्रीमद्भागवतं व्याचिख्यासवः श्रीमदाचार्यचरणास्तत्प्रतिपाद्यं भगवन्तमिष्टसिद्ध्यर्थं नमस्यन्ति—वन्दे श्रीकृष्णदेवमिति । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इति श्रुतेः 'कृष्ण'शब्देन परं वस्तूच्यते । श्रिया सहितः कृष्णः स चासौ देवश्च तं वन्देऽभिवादये स्तौमि चेत्यर्थः । 'श्री'पदेन ब्रह्मानन्दरूपायाश्चिच्छक्तेर्देवीरूपाया मायायाश्च सङ्ग्रहः । 'कृष्ण'पदेनावताररूपस्यापि सङ्ग्रहः । 'देव'पदेन लीलावैशिष्ट्यम् । तेन यः परपुरुषो द्विविधया श्रिया चतुर्भिर्व्यूहैर्नानावतारैः क्रीडति, स भजनीय इति सर्वस्य श्रीभागवतस्यार्थः । 'अपश्यत् पुरुषं पूर्ण' मित्यादिसन्दर्भेण तथा निश्चयात् । यद्यपि तेषु तेषु तन्त्रेषु तत्तद्व्यूहो भगवान् प्रतिपाद्यते, तथापि श्रीभागवते साक्षान्नारायणोदितपञ्चरात्ररीतिकश्चतुर्व्यूह एव प्रतिपादित इति तान् वदन्तः प्रथममनिष्टवारणार्थं तत इष्टप्राप्त्यर्थं च सङ्कर्षणवासुदेवव्यूहरूपत्वं विशेषणाभ्यां बोधयन्ति—मु[१]रनरकभिदं वेदवेदान्तवेद्यमिति । श्रीभागवते हि प्रादुर्भूत एव भगवानुच्यते । तत्रोक्तव्यूहाभ्यां कार्यसिद्धौ पूर्णाविर्भावः किमर्थमिति शङ्कानिवृत्त्यर्थमाहुः—लोक इत्यादि । अपारो यः प्रादुरासीदित्यन्वयः । 'तथा परमहंसाना' मिति वाक्यमत्रानुसन्धेयम् । अधिकरणनिर्देशेन प्रद्युम्नव्यूहरूपताप्यत्रोक्ता, तस्यैव वंशसम्बन्धात् । अनिरुद्धव्यूहत्वमाहुः—यस्यासीद्रूपमेव त्रिभुवनतरण इति । त्रिभुवनसहितं तरणं त्रिभुवनतरणम् । निमित्ते सप्तमी । तन्निमित्तम् । प्रवृत्तिनिवृत्तिभेदेन द्विविधस्य धर्मस्य फलं त्रिलोकी मोक्षश्च तदुभयनिमित्तभूतं यस्य रूपमेवासीत् । अस्तिरुत्पत्त्यर्थः । 'हरितो रोहितादासीत्' इत्यादिप्रयोगात् । कुण्ठिते त्रिलोक्यादिहेतौ धर्मे तद्रक्षा[२]र्थं

१. दैत्यसंहारकत्वात् संकर्षणस्य मुरनरकभिदमिति विशेषणेन तद्बोधनम् , वेदवेदान्तवेद्यस्यैव मोक्षदातृत्वात् द्वितीयविशेषणेन वासुदेवव्यूहबोधनमिति भावः । २. धर्मरक्षारूपानिरुद्धकार्यदर्शनेन तद्रूपत्वमित्यर्थः ।

प्रकटमित्यर्थः । 'यदा यदा ही' त्यादिवाक्यमत्रानुसन्धेयम् । एवं रूपावतरणप्रयोजनमुक्त्वा नामावतरणप्रयोजनमाहुः—भक्तीत्यादि । प्रथमश्रोऽवधारणे, द्वितीयोऽप्यर्थे । तथा च, यथा मुदा स्वार्थं स्वतन्त्रभक्तिं प्रकटितवान् , तथा शास्त्रात्मकं रूपमपि मुदैव प्रकटित-वानित्यर्थः । एतेन श्रीभागवतप्रकटने भगवदानन्द एव सङ्गतिरित्युक्तम् । एतत्कथनप्रयोजनमाहुः—स नो भूतिहेतुरिति । व्याख्यान-रूपसम्पद्धेतुः सोऽस्माकमस्त्वित्यर्थः (१) ।

आनुकूल्यमात्रेण व्याख्यानसम्पत्संभवेपि 'तत्र भगवदनधिष्ठाने तस्य लौकिकतुल्यतासंभवात् तन्निवारणाय तत्र पतित्वेन भगवत्स्थितिं प्रार्थयन्तः पूर्वमपि वाचि स्थितिं बोधयितुं श्रुतिसूत्रादिप्रतिपाद्यं तत्स्वरूपमाहुः कर्ता ज्ञ इत्यादि । य ईदृशो विजयते, य एवं वितनुते, स मम वाचि पतिरस्त्विति सम्बन्धः । 'कर्ता ज्ञः सकलस्ये'त्यनेन 'यतो वा इमानी'ति 'जन्माद्यस्य यत' इति श्रुतिसूत्रोक्तरूपत्वमुक्तम् । 'निगमभू'रित्यनेन शास्त्रयोनित्वसूत्रोक्तरूपत्वमुक्तम् । सर्वस्वरूपोपि सन् सर्वस्यापि विधारण इत्यनेनो-पादानत्वमात्मत्वं सेतुत्वं चोक्तम् । तेन वाच्यपि स्थितिः साधिता । अन्तर्यामिब्राह्मणे 'यो वाचि तिष्ठ'न्निति श्रवणात् । प्रार्थित-पूरकत्वमाहुः निर्दोषसर्वेष्टद इति । निर्दोषाणां सर्वेष्टदातेत्यर्थः । तेन प्रार्थितप्राप्तौ जीवधर्म एव हेतुः, न तु भगवद्धर्म इत्यपि बोधितम् । इष्टदाने प्रकारमाहुः यो लीलाभिरित्यादि । तापनीयानुसारेण मूलरूपतुल्यत्वं बोधयितुमाहुः पूर्णगुणभूरिति । एवं मूल-रूपमवताररूपं च श्रीभागवतप्रतिपाद्यं निरूपितम् (२) ।

अतः परं शिष्टाचारप्राप्तं पितृनमस्कारं कुर्वन्ति श्रीमदित्यादि । अत्र श्रीगोपीपतिवन्दित इत्यनेन परंपरया विष्णुस्वामि-मतानुवर्तिगोपालोपासकत्वं सूचितम् । सुमनसीत्यादिना ज्ञानोपदेशकथनादहंग्रहोपासकत्वम् । नाममाहात्म्यकथनेनाहंग्रहोपासना-जनितसामर्थ्यवत्त्वम् । पूर्णोपासकत्वबोधनाय हरय इति (३) ।

एवं कृतं मङ्गलं शिष्यशिक्षार्थमुपनिबध्य मुख्यमध्यमजघन्याधिकारिणां यथार्हफलदातृत्वस्यारम्भे स्फुटमनुक्तत्वात् सर्वेषां श्रवणे प्रवृत्तिः कुण्ठिता भवेदिति तन्निवृत्त्यर्थं तत्तत्फलानुकूलं श्रीभागवतस्वरूपमिति निरूपयन्ति श्रीमद्भागवतेति । लोके इति । दैवसृष्टौ । नन्वेकस्यैवागमत्वं सुरतरुत्वं फलत्वं चेति त्रिरूपत्वं कथमित्याशङ्कायां समादधते भाषेत्यादि । 'भाषास्तु त्रिविधाः प्रोक्ता' इति वाक्यात् भाषाणां लौकिकीमतान्तरसमाधिभाषाणां यो भेदो नानात्वं तेन यो विभेदस्तारतम्यं तस्मा-द्धेतोस्त्रयं पूर्वोक्तरूपत्रयं विरुद्धं नो स्यात्, यत इदं पुराणं महत् । मह पूजायाम् । पूजितमतो हेतोरित्यर्थः । नन्वेवं सत्यंशेन तथात्वम् , न तु सर्वस्य, ततश्च त्रिरूपत्वं भज्येतैव, यथा हि नखकेशनेत्रादिषु रूपान्तरसत्त्वेपि पुरुषो गौर एव व्यपदिश्यते, न तु नानारूप इति तद्विदिति शङ्कायां प्रतियोगिभेदेन पुरुषस्य पितृपुत्रादिरूपत्ववत् तत्तदधिकारिभेदे फलभेदात्तथात्वं समर्थयन्ति भक्त्यंश इत्यादि । 'यस्यां वै श्रूयमाणाया'मिति वाक्ये भक्त्युत्पादकत्वकथनात् तस्यां जातायां स्वतन्त्रपुरुषार्थत्वेन श्रवणादिना आस्वाद्यमाने भक्त्यंशे तं प्रति सम्पूर्णस्यैव फलता फलरूपत्वम् । इदं भगवता पूर्वमिति वाक्ये भगवत्प्रकाशितत्वकथनात् 'सर्व-वेदेतिहासाना'मिति वाक्ये सारत्वकथनात् तदनुसंदधानात् प्रति प्रमाणसुबले, प्रमाणस्य शब्दस्य सुष्ठु यद्बलमनपेक्षत्वरूपं तस्मिन्नंशे संपूर्णस्यैव वेदत्वं वेदरूपत्वम् । 'विप्रोधीयात्प्नुयात्प्रज्ञा'मित्यादिवाक्यार्थमनुसन्दधानान् प्रति अर्थे, तत्तत्पुरुषार्थे सुरतरुस्तत्तत्काम-पूरणात् । अतस्त्रिरूपत्वं संपूर्णस्यैवोपपन्नमित्यर्थः । एवञ्च 'केवल्यैकप्रयोजन'मित्यत्रैकशब्दो मुख्यवाचीति बोध्यम् । तथा केवल्यपदमपि लीलामोक्षोभयपरम्, 'लोकवत्तु लीलाकैवल्य'मिति सूत्रे लीलाया अपि तथात्वेनोक्तेः । अतो न कोपि शङ्कालेशः ।

प्रक्षिप्ताध्यायनिवृत्त्यर्थं शाखासङ्ख्यामाहुः शाखाद्विबह्विद्वयम् । ३३२ । अङ्कानां वामतो गतिः । इयमेव सङ्ख्या श्रीधरीयेपि, 'द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखा' इति कथनात् । यद्यपि काव्यवदलङ्कारा आचार्यैर्नादृताः, तथापि केचन श्रुतौ सूत्रेप्यादृताः, यथा 'असावादित्यो देवमधु' इत्यत्र, 'शरीररूपकविन्यस्तगृहीते'रित्यत्र । अतस्तद्बोधनायात्र रूपकमादृतमिति ज्ञेयम् । इदं च मूलेप्यभिप्रेतम्, अन्यथा भागेषु स्कन्धपदं व्यासचरणा न प्रयुञ्ज्युः (४) ।

एवं तत्तत्फलानुकूलं श्रीभागवतस्वरूपं निरूप्य पूर्वं बहुभिर्व्याख्यातत्वेपि स्वस्य तत्र प्रवृत्तौ सङ्गतिं वदन्तो व्याख्यानं प्रतिजानते 'अर्थमित्यादि । विवे विगतं वं सुखं यस्मादिति विवस्तादृशे लोके सति तस्य श्रीभागवतस्यार्थं अर्चितुम्, 'अर्च पूजने' 'अच इत्येके' इति पाणिनिना पठितत्वात् पूजितुं वक्ष्यमाणरीत्या सत्यार्थाविरोधेन प्रकटीकरणमेव पूजनं तत्कर्तुम् , हि यतो हेतोः वैश्वानरादन्यो विभुर्न । विभुत्वे हेतुः वाक्पतेरिति । 'उत त्वः पश्यन्न ददर्श वाच'मित्यत्र यथा जाया स्वतनुं पत्ये प्रकटयति, एवं वागपि कस्मैचिदेव स्वार्थं प्रकटयतीति श्रवणात् । तत्र दृष्टान्तानुरोधेन दार्ष्टान्तिकेपि स्वपतावेव प्रकटयतीति ज्ञायते । पतित्वं

---

१. व्याख्यानरूपस्ववचने । २. त्रिरूपत्वम् । ३. अर्थमित्यादि । वस्तुतस्तु यङ्लुगन्ताद्विचेः पर्याप्तवचनेष्वलमर्थेष्विति सूत्रेण तुमुन् । न च गुणो यङ्लुकोरित्यभ्यासस्य गुणे सति वेवेचितुमिति रूपं शंक्यम्, संज्ञापूर्वकविधेरनित्यत्वात् । नाभ्येकाच उपदेशेनुदात्तादितीण्निषेधः शंक्यः । 'श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकी'त्यनुशासनेन तन्निषेधादिति।

वह्नावेव । 'तस्याग्निरास्यं निर्भिन्नं लोकपालोविशत्पदम्' । वाचा 'स्वांशेने'ति वाक्ये वाचोऽग्न्यंशत्वस्य स्मरणात् । तत्र तादृशेऽर्थार्चनहेतौ विभुत्वे सति श्रीपतिर्भगवान् व्यासवत् स्वांशं मां मानुषतनुं विधाय, आज्ञां च अर्थात् तत्कर्तुं दत्त्वा, 'यस्मात्कृपावलोकनपटुर्जातः, अत उक्तहेतोर्व्यासस्य विष्णोः प्रियं गूढार्थं मुदा बहुधा प्रकटीकरोमि । अत्र गूढार्थप्रकटीकरणे आज्ञाजनिता मुद्धेतुः । बहुधा प्रकटने उभयप्रियत्वं हेतुः । अतस्तथेत्यर्थः (५) ।

प्रकटने प्रकारमाहुः लक्षणां नैवेति । सप्तानामिति । शास्त्रस्कन्धप्रकरणाध्यायवाक्यपदाक्षरीयाणाम् । इहेति । अस्मिन् व्याख्याने । सङ्कोचत इति । व्यवहारप्रयोजनकाच्छक्ति'संकोचात् । अर्थत्रयं तु वक्ष्यामीति । सोपपत्तिकमत्र वक्ष्यामि । निबन्धेस्ति चतुष्टयमिति । शास्त्रस्कन्धप्रकरणाध्यायानां येऽर्थास्तच्चतुष्टयं निबन्धे सोपपत्तिकमस्तीत्यतोत्तरत्रयं वक्ष्यामीत्यर्थः । शेषं स्फुटम् ।

प्रथमे श्लोके । भगवदाज्ञयेति । 'दूतानामिव वर्णित'मिति न्यायकेन नारदोपदेशेनेत्यर्थः । ननु बीजभावेनैवोपनिबन्धेत्यत्र किं प्रमाणमित्याकाङ्क्षायां प्रसङ्गतः श्लोकत्रयसङ्गतिं व्युत्पादयन्ति अत्र हीत्यादि । ततश्च श्लोकत्रयार्थापत्तिरेव प्रमाणत्वेन फलिष्यति । गायत्र्यर्थस्य बीजत्वमुपपादयितुं प्रथमं लक्षणवाक्ये वृत्रासुरवधकथनप्रयोजनमाहुः यथा हीत्यादि । यज्ञात्मकत्वं तु '"तत्त्वष्टाहवनीयमुपप्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वे'ति श्रुतेराहुत्युत्पन्नत्वाद्बोध्यम् । भक्त्यात्मकत्वं च 'अहं हरे तवे'त्यादिषु तद्वाक्येष्वेव प्रकटम् । न चायं श्रौतानुवादः । 'जज्ञे त्वष्टुर्दक्षिणाग्नौ' इत्युत्पत्तिस्थानभेदकथनादिविरोधात् । तथा च प्रतिबन्धकनिवृत्त्यै वेदवदत्र 'तन्निरूपणमित्यर्थः । गायत्र्यारंभकथनप्रयोजनमाहुः गायत्रीत्यादि । ततश्च यदि बीजत्वाय गायत्र्यर्थनिरूपणं न स्यात्, तदा लक्षणवाक्ये 'गायत्रीमधिकृत्य धर्मविस्तारो वर्ण्यते' इत्यादिकं नोक्तं स्यात् । अतस्तथेति भावः । एवं चात्र लक्षणवाक्ये उभयोक्त्या भक्तिजनकधर्मनिरूपकत्वं भक्तिप्रतिबन्धनिवर्तकतन्निरूपकत्वं च लक्षणत्वेनोक्तं ज्ञेयम् । एवं प्रथमश्लोकसङ्गतिर्हेतुतारूपोक्ता ।

द्वितीयस्याहुः किञ्चेत्यादि, संहितेत्यन्तम् । एषेति । व्यासानुभूतरूपा । किं तेनेत्याहुः तत्र हीत्यादि । तथा च धर्मपदेन भक्त्यर्थः प्रयत्नः उच्यते । वेद्यमित्यादिना ज्ञानस्य कथनेन ज्ञानस्य व्यापारता निरूप्यते । अयमेव च वेदार्थः । द्वितीयस्कन्धे 'भगवान् ब्रह्म कार्त्स्न्येने'ति वक्ष्यमाणत्वात् । तावता वेदस्य वृक्षरूपताभिसन्धीयते । सुदृढ इत्यादि । एतेन दशस्कन्धानामर्थः सङ्गृहीतो ज्ञेयः । द्वादशे आश्रयनिरूपणेनात्मत्वस्य, शेषैश्च नवभिः प्रत्येकं त्रिविधानामुत्पत्तिस्थितिप्रलयानां निरूपणेन माहात्म्यज्ञानपूर्वकसुदृढसर्वाधिकस्नेह एव पर्यवसानात् ।

तृतीयस्याहुः यथा हि यज्ञा इत्यादि । अन्योन्यहेतुभूत इति । परस्परोपकारकः । भक्तिहेतुरिति । साक्षात्परंपरया च तथा । निरूप्यत इति । तृतीये पानोपदेशान्निरूप्यते । अत इत्यादि । तथा चोपोद्घातसङ्गत्या श्लोकत्रयनिरूपणमित्यर्थः । ननु द्वादशे स्कन्धे ॐकारं प्रकृत्य 'स सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति कथनात् बीजता प्रणवस्य स्फुटा । 'ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यान'मित्यादिश्रुतेश्च । एवं व्या'हृतिष्वपि स्मर्यते इति तत्सर्वमतिहाय कुतो गायत्र्या एवार्थो निरूप्यत इत्यत आहुः यद्यपीत्यादि । नन्वेवं सति गायत्र्येव कुतो नोपनिबद्धेत्यत आहुः किञ्चेत्यादि । तथा च विनियोगद्वयदर्शनेनार्थे सन्देहात् तन्निरासायार्थमेवोक्तवान् । ततश्चोपस्थानस्थले 'एकं सद्विप्रा' इति श्रुतिस्वारस्येन तत्राप्यग्न्यन्तर्यामिणि तद्वदने तद्रूपके भगवत्येव तात्पर्यम्, न त्वग्नौ । भगवत्सामर्थ्येनैव च म'न्देहादिनिवारणम् । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत'इतिवद्वाक्यमात्रेणापि विनियोगसंभवेनार्थसन्देहानपायात् । निवारणे चेत्यत्र चोनुक्तसमुच्चायकः । तेनोपनयने विनियोगोपि सङ्गृह्यते । अत एवमर्थकथने विनियोगत्रयस्यापि परस्परानुगुण्यमिति बोधयितुमर्थकथनमिति भावः ।

एवमर्थकथने उपपत्तिमुक्त्वा श्लोकं व्याख्यातुं प्रथमं गायत्र्यर्थमाहुः तत्रेत्यादि । अत्र षष्ठ्यन्तद्वयस्यार्थोक्त्या सूर्यो निवारितः । भर्गःशब्दस्यासुनन्तत्वबोधनेन शिवो निवारितः । धीपदव्याख्याने निरङ्कुशसर्वेन्द्रियप्रेरकत्वबोधनादितरवारणे ब्रह्मपरत्वे चोपपत्तिरुक्ता ज्ञेया । इदं यथा तथा प्रहस्ताख्ये वादे प्रपञ्चितं मयेति नात्रोपपाद्यते । जन्म आद्यस्येति पक्षस्येतरैरनुक्तत्वात् तत्र प्रमाणमाहुः तस्माद्धेत्यादि । ननु जन्मादित्रयमनादृत्य जन्मैवात्र किमिति गृह्यते इत्यत आहुः गायत्र्यर्थ इत्यादि । तथा च

---

१. येनासौ वक्तव्यं प्रतिपद्यत इति । २. अर्थो भागवतार्थः तस्यार्चनं पूजनम्, तत्र हेतुः, सप्तार्थप्रकटनम्, तत्र विभुत्वे सतीत्यर्थः । ३. व्यवहारः प्रयोजनम्, यस्यैतादृशाच्छक्तिसंकोचात् । यथा शास्त्रार्थपदशक्तिः समग्रा भागवतार्थेऽस्ति, एवं स्कन्धार्थपदशक्तिर्न, किन्तु स्कन्धार्थे एव । एवमुत्तरत्रापि शक्तिसंकोचोवधेयः । ४. स यज्ञवैशसं कृत्वा प्रासहा सोममपिवत्, तस्य यदत्यशिष्यत्, तत् त्वष्टाहवनीयमुपप्रावर्तयत् । स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत् तद् वृत्रस्य वृत्रत्वम् । यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्य इन्द्रः शत्रुरभवदिति श्रुतेः । आहवनीयहोमं कृत्वा उप समीपे पश्चाद् दक्षिणाग्नौ प्रावर्तयत् । परावर्त्य दक्षिणाग्नौ होमं कृतवान् । आभिचारिकास्तत्रैव हुताः । ५. भक्तित्वम् । ६. भूर्भुवः सुवरिति लोकत्रयं व्याहृतिशब्देनोच्यते । 'भूर्भुवःसुवरिति वा तिस्रो व्याहृतयः'इति तैत्तिरीयश्रुतेः । ७. मन्देहादिराक्षसनाम्नैव द्वीपप्रसिद्धिः । अत उक्तं 'मन्देहारुणे द्वीप' इति श्रुतौ ।

गायत्र्यनुरोधात्तथेत्यर्थः। ननु यद्येवं तर्हि जन्मादीतिपक्षः किमित्युक्त इत्याकाङ्क्षायां तत्रोपपत्तिं वदन्त आहुः अथवेत्यादि। तथा च श्रुतिसिद्धत्वात् सोपि सङ्गृह्यते इत्यर्थः। स्थितिभङ्गस्येत्यादि। स्थितिसहितो भङ्गः स्थितिभङ्गः उत्तरपदलोपी समासः। जन्मादीति सामान्ये नपुंसकम्। अत्र जन्मनः कुटादिशब्दे कुटस्येव समुदायघटकत्वेनावयवत्वात्तदुपलक्षितसमुदायवर्तिधातुभ्यो विवक्षितप्रत्ययानां ङिद्भावे यथा न संविज्ञानम्, तथात्र जन्मन इत्यतद्गुणसंविज्ञान इत्यर्थः। अधिकोक्त्यादिपरिहारायैवं व्याख्यातम्। अस्मिन् पक्षे कल्पनाबाहुल्यमित्यरुच्या पक्षान्तरमाहुः उत्पत्तीत्यादि। जन्मनः समुदायविशेषणत्वविवक्षायां स इत्यर्थः। तर्ह्यधिकोक्त्यादिदूषणस्यावकाश इत्यत आहुः वेदार्थेत्यादि। तथा च 'यतो वे'त्यादिश्रुत्यर्थसङ्ग्रहपूर्वकमत्र तथोच्यते इत्यदोष इत्यर्थः। अनेनेति। कामधेन्वादिवदविकृतत्वबोधकाव्ययनिर्देशेन। विपरीतमित्यत्र परमाणुकारणवादस्यापि सङ्ग्रहः। अन्वेतीत्यन्वय इति। अनुर्लक्षणे, तत्तल्लक्षीकृत्य यस्तत्र तत्र व्याप्य वर्तते सोन्वय इत्यर्थः। एवञ्च, अनारोपितानागन्तुकरूपेणानुवृत्तिः समवाय इति तत्स्वरूपमपि बोधितं ज्ञेयम्। यत्रेत्यादि। एतेनाखण्डब्रह्मवाद उक्तः। ननु व्यासचरणैस्तर्कपादे समवायो दूषित इति कथं समवायिकारणं ब्रह्मेत्युच्यते इत्यत आहुः स्थितीत्यादि। आदिपदेन भावविकारान्तरम्। यथापेक्षमिति। तत्तदनुकूलाधारत्वेन। तथा च व्यासपादैर्वैशेषिकादिप्रतिपन्नो दूष्यते, न तु तादात्म्यरूपोपीत्यतो न दोषः। कारणस्य नित्यत्वेनातिरिक्तपक्षेपि 'यत्र येने'ति श्लोके यथापदोक्तप्रकारमध्ये प्रवेशादपि न दोष इत्यर्थः। नन्वतिरिक्तपक्षे समवायस्य प्रलये अपेक्षाकथनमनुपपन्नम्, तस्य सम्बन्धत्वेन द्विनिष्ठत्वात्कार्यरूपप्रतियोगिनाश आधारनाशेन तत्स्थितेर्वक्तुमशक्यत्वादित्यत आहुः अथवेत्यादि। ननु लोकसिद्धावन्वयव्यतिरेकौ विहाय किमित्येवं व्याख्यायते इत्यत आहुः प्रत्यक्षेत्यादि। ननु तयोः शब्दानुग्राहकत्वाङ्गीकारेपि को दोष इत्यतः आहुः नवेत्यादि। एतेन श्रीधरोक्तिर्निरस्ता ज्ञेया। सिद्धमाहुः तस्मादित्यादि। सर्वप्रकारेणेति। समवायित्वेन निमित्तत्वेनाधिष्ठानत्वेन प्रयोजकत्वेन चेत्यर्थः। अनतिप्रयोजनाय सप्तमीति। वैराग्यस्य पूर्णत्वेन कस्यापीप्सिततमत्वाभावेन कर्मषष्ठीमनुक्त्वा विषयसप्तम्युक्तेत्यर्थः। एतदेव विशदयन्ति ज्ञानशक्तेरित्यादिना। अर्थशब्देन कथं फललाभ इत्यत आहुः प्रयोजनवाचीति। 'अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि'ति कोशादित्यर्थः। एवमौदासीन्ये उपेक्षा आयातीति परार्थसृष्टौ पुरुषार्थसिद्धिर्न स्यादिति तदर्थं पक्षान्तरमाहुः अथवेत्यादि। तथा च 'निमित्तात् कर्मयोग'इत्यनेन फले सप्तमी। सा च कर्मभूतानां जीवानां योगस्य स्वस्वामिभावाद्यात्मकस्य यथापेक्षं सत्त्वात् बोध्या। तथा च जीवानामर्थेष्वभिज्ञ इत्यर्थः। प्रकारभेदादित्यादि। जीवानां स्वरूपत्वेपीश्वरत्वस्य तत्राप्रकारत्वात् तदर्थं सृष्टिकरणं न स्वराट्त्वव्याघातकमित्यर्थः। रमणश्रुत्यनुसारेण सृष्टेः स्वार्थत्वमङ्गीकृत्य पक्षान्तरमाहुः अथवेत्यादि। तेनेति। रूढ्यादरेण। अपुष्टार्थत्वमाशङ्क्य पक्षान्तरमाहुः अक्लेशार्थ वेत्यादि। तथा च प्रलयप्रयोजनमनेनोच्यते इत्यर्थः। एतावतेति। प्रथमपादेनेत्यर्थः। नास्तीति। तिरोभावाभावेन वेदस्वरूपस्य नित्यत्वान्नास्तीत्यर्थः। सूक्ष्मतयेति। भस्त्रावत्सङ्कुच्येत्यर्थः। तेन इत्यस्यार्थमाहुः य इत्यादि। यदिति लुप्तसप्तमीकमिति ज्ञापयन्ति यस्मिन्निति। वैदिकानिति। एवं वदन्तो मीमांसका मुह्यन्तीति शेषः। आत्ममात्रमिति वदन्तो वेदान्तैकदेशिनो मुह्यन्तीति शेषः। नैयायिकाद्यास्तु शिष्टापरिग्रहेण सूरित्वाभावादेव व्यावर्तिता ज्ञेयाः। ननु सूरित्वे कथं मोह इत्यत आहुः मोह इत्यादि। 'ज्ञानिनामपि चेतांसी'ति 'मामेव ये प्रपद्यन्त' इति वाक्यद्वयविचारेण तथावसीयत इत्यर्थः। नन्वन्यस्य वेदार्थवित्त्वाभावे मीमांसकादिरीत्या यज्ञादिकरणेन फलाभाव आपाद्येत, तथा सति पुत्रेष्ट्यादावपि विसंवादः स्यादित्यत आहुः वेदस्येत्यादि। अत्र गमकद्वयमाहुः तथैवेत्यादिना। मन्दमत्यर्थं वेदविभाजनात्। पुरूरवसः कामनायामेव त्रेतायां त्रयीप्राकट्यात्तथेत्यर्थः। कचिदिति। पुरूरवसः पूर्वकृतयुगे वेत्यर्थः। 'वेदः प्रणव एवे'ति 'यो ब्रह्माण'मिति वाक्यद्वयविचारेण सिद्धं व्यासाशयमाहुः सर्वथेत्यादि। जलादावित्यादिपदेन यथा दुर्योधनस्य 'स्थलं मत्वा जलेऽपत'दिति मयमायाभ्रमस्तादृशः सङ्गृह्यते। मण्यादिष्विति। पार्थिवेषु। मेघेष्विति। वारिप्रधानेषु। एवं षड्भिर्दृष्टान्तैरेकैकस्मिन् द्वौ द्वौ विनिमयावुक्तौ। तत्र प्रथमषष्ठौ तेजोविषयौ, द्वितीयपञ्चमौ वारिविषयौ, तृतीयचतुर्थौ मृद्विषयौ बोध्यौ। सजातीयभ्रमा इत्यादिना 'तमिमं मन्यते लोको ह्यसङ्गमपि सङ्गिनम्। आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुध'इत्यादिभ्रमाः सङ्गृहीताः। अवतारादिष्वित्यादिपदेन प्राप्तफला भक्ता ग्राह्याः। 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिना'मिति वाक्यात्। एतदेव स्फुटीकुर्वन्ति निमित्ताधिकरणयोरित्यनेन। तथा च यदर्थः यन्निष्ठश्च त्रिसर्गो मृषेत्यर्थः। तत्कारणमिति प्रकृतिः। तदधिकरणानीति गुणाः। तदर्था इति रूपादयः। ननु मायावादिवद्देहेन्द्रियादीनां केवलमिथ्यात्वप्रतिपादने को दोष इत्यत आहुः केवलेत्यादि। खपुष्पाधारत्वस्य कुत्राप्यव्यवहारात् त्रिसर्गस्य तद्वत्केवलमिथ्यात्वप्रतिपादने तथेत्यर्थः। दूषणस्य लौकिकत्वात् नैर्बल्यमाशङ्क्य तदुपष्टम्भाय दूषणान्तरगर्भं हेत्वन्तरमाहुः सर्वाधारत्वादिति। 'सदायतनाः सत्प्रतिष्ठा' इत्यत्र ब्रह्मणः सर्वाधारत्वं श्राव्यते। सर्वस्य मिथ्यात्वे तदपि विरुध्येतेत्यर्थः। गमकान्तरमाहुः एतदर्थमित्यादि। एतदर्थमिति। अन्यत्र त्रिसर्गस्य सत्यत्वार्थम्। तथा च दृष्टान्तेषु तथैव सिद्धत्वादपि दार्ष्टान्तिके त्रिसर्गेन्यत्र सत्यत्वमुपेत्यैव ब्रह्मणि मिथ्यात्वं वक्तुमुचितमित्यर्थः। सिद्धमाहुः लोकदृष्ट्या प्रतीत इति। तत्र हेतुः अन्यस्मिन्नित्यादि। तथा चोक्तहेतोस्त्रिसर्गोऽवतारादिषु लोकदृष्ट्या प्रतीत इत्यर्थः। तत्र दृष्टान्तार्थं स्पष्टयन्ति प्रवृत्तीत्यादि। तेनान्यत्र सतां संसर्गिणां ब्रह्मणि संसर्ग एव मिथ्येति साधयित्वा संसर्गबोधकानि षण्मतान्याहुः केचिदित्यादिना। बद्धे कृष्ण इति। आविष्टे कृष्ण इत्यर्थः। ननु यद्येवं तर्हि कथं भगवति देहादिव्यवहार इत्यत आहुः यथेत्यादि। उत्तरत्रेति।

एवमित्यादि । तथा चाध्यासराहित्येनाविवृत्ताविद्यत्वात् तन्निवारकत्वरूपो भर्गःशब्दार्थ उक्त इत्यर्थः । शिष्टमिति । यथाधिकारमभयम् । उभयत्रेति । गायत्र्यामत्र चेत्यर्थः ॥ १ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ ब्रह्मादिनर्त्तको यस्तु गोपीभिः सह नृत्यति ॥ कृपासिन्धुः स मे कुर्याट्टीकापूर्तिमनोरथम् ॥ १ ॥ श्रीमन्मुकुन्दरायाणां गोपालानां तथैव च ॥ व्यासादीनां स्वपितॄणामाचार्याणां महात्मनाम् ॥ २ ॥ पादपद्मं नमस्कृत्य प्रार्थयित्वा पुनः पुनः ॥ वल्लभाचार्यवंश्येन श्रीमद्गोपालसूनुना ॥ ३ ॥ श्रीमद्गिरिधराख्येन स्वान्तःकरणतुष्टये ॥ बालानां सुखबोधाय भजनानन्दसिद्धये ॥ ४ ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ स्फुटार्था ऋजुमार्गेण क्रियते नातिविस्तरा ॥ ५ ॥ यद्यपि श्रीमद्भागवतार्थप्रतिपादकाः सुबोधिन्यादयो बहवो ग्रन्थाः सन्ति, तथापि केषाञ्चित् सङ्क्षिप्तत्वेन केषाञ्चिद् भूयस्त्वेन काठिन्येन च तत्र बालानां प्रवेशो न भवति, अतो मया ऋजुमार्गेण यथापेक्षितग्रन्थेन चेयं टीका विरच्यते 'तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्त्तव्यश्चेच्छताऽभयम्' इत्यादिना श्रीभागवते श्रवणादिविषयत्वेन भगवानुक्तः, तत्र स्वरूपस्य श्रवणादेरसम्भवात् तल्लीलाप्रतिपादकाः शब्दाः श्रोतव्याः कीर्त्तितव्याश्चेत्यायाति । तथा च आनन्दात्मकस्य भगवतो लीला द्वादशस्कन्धात्मकस्य सम्पूर्णस्य श्रीभागवतस्यार्थः । तत्र लीलानां सर्गादिभेदेन दशविधत्वात् तासां च क्रमेण तृतीयादिस्कन्धेषु निरूपणात् तत्तत्स्कन्धस्य तत्तदेवार्थः । लीलाश्रवणकीर्त्तनयोः अधिकारसाधनसापेक्षत्वात् क्रमेण तयोः प्रथमद्वितीयस्कन्धयोर्निरूपणादधिकारः साधनं च क्रमेण प्रथमद्वितीयस्कन्धयोरर्थः । तत्र हीनमध्यमोत्तमभेदेन अधिकारस्य त्रिविधत्वात् तन्निरूपके प्रथमस्कन्धे प्रकरणत्रयम् । तत्र हीनाधिकारे जिज्ञासुत्वामात्सर्यश्रवणादरवत्त्वरूपश्रोतृगुणत्रयस्य अधीतशास्त्रत्वचातुर्यगुह्यज्ञानवत्त्वरूपवक्तृगुणत्रयस्य च मुख्यत्वज्ञापनाय अध्यायत्रयेण हीनाधिकारनिरूपणं क्रियते । मध्यमाधिकारेऽपि भगवत्कृपाभगवदीयत्वभगवदेकत्वरूपश्रोतृवक्तृगुणत्रयस्य च मुख्यत्वज्ञापनाय तस्याप्यध्यायत्रयेण निरूपणं क्रियते । उत्तमाधिकारस्य दृढवैराग्यसापेक्षत्वात् वैराग्यस्य भगवदेकतानत्वरूपस्यैव दृढत्वात् भगवतश्च पुरुषोत्तमरूपत्वात् तदेकतानताद्योतकद्वादशाङ्गपुरुषाधिक्यद्योतनाय त्रयोदशाध्यायेन उत्तमाधिकारप्रकरणनिरूपणं क्रियते । एवं प्रथमस्कन्धे एकोनविंशतिरध्याया भवन्ति । तत्र तु प्रथमेऽध्याये ह्यवतारादिप्रश्नतः ॥ जिज्ञासाधीतशास्त्रत्वं श्रोतृवक्त्रोर्निरूप्यते ॥ १ ॥ अथ महाभारतादिनानाशास्त्रप्रबन्धान् कृत्वाऽपि तैश्चित्तप्रसन्नतामलभमानः तत्र तत्र अपरितुष्यन्नारदोपदेशतः श्रीमद्भगवल्लीलावर्णनप्रधानं श्रीमद्भागवतशास्त्रं प्रारिप्सुर्वेदव्यासो 'लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥ येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः' इत्यादिशास्त्रप्रसिद्धं ग्रन्थप्रचयपरिसमाप्तिफलकं स्वमनसा कृतं श्रीभागवतप्रतिपाद्यभगवत्स्मरणात्मकं मङ्गलं शिष्यपरम्पराशिक्षार्थं ग्रन्थादौ निबध्नाति—जन्माद्यस्य यत इति । जन्म आद्यस्य आकाशस्य यतो भवति "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इति श्रुतेः । यद्वा अस्य प्रत्यक्षादिप्रमाणसिद्धस्य अनन्तकोटिब्रह्माण्डात्मकस्य जगतो जन्मादि जन्मस्थितिभङ्गं यतो भवति "यतो वा इमानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इत्यादिश्रुतेः । तं परं सर्वोत्कृष्टं परमार्थरूपं सत्यं सच्चिदानन्दविग्रहं भगवन्तं धीमहि वयं ध्यायेमेत्यन्वयः । शिष्यसाहित्याभिप्रायेण बहुवचनम् । कुतो भगवतः सकाशादेव जगतो जन्मादीत्यपेक्षायामाह—अर्थेषु कार्यमात्रेष्वन्वयात् उपादानकारणतया सदिदमसदिदमिति प्रतीत्यानुवृत्तत्वादित्यर्थः । इतरतश्चेति निमित्तकारणत्वाच्चेत्यर्थः । चकारात् 'यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्' इति श्लोकोक्ता अधिकरणादयोऽपि ग्राह्याः । ननु निमित्तत्वं च कर्तृत्वसाधारणं तत्कथमीदृशस्य मनसाऽप्याकलयितुमशक्यस्य सर्वस्य जगतः सर्वज्ञं विना कर्तृत्वं सम्भवति, सर्वत्र तत्तत्कार्येषु तत्तज्ज्ञानवत एव कर्तृत्वदर्शनादित्याशङ्क्याह—अभिज्ञ इति । यः अभितः सर्वप्रकारेण सामान्यतो विशेषतश्च सर्वं जानातीत्यभिज्ञः सर्वज्ञस्तमित्यन्वयः । एवमग्रेऽपि यत्पदस्य तत्पदशेषेणान्वयः । कथं तस्य सर्वज्ञता सिद्धा यदि जगत्कर्तृत्वेन तदान्योन्याश्रयापत्तिरित्याशङ्क्याह—तेने इति । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्रुतेः, आदिकवये ब्रह्मणे ब्रह्म वेदं यस्तेने विस्तारितवानित्यर्थः । शब्दरसाभिज्ञतासूचनाय कविपदम् । तस्य कविदोषराहित्यसूचनायादिपदम् । ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धमेवेत्याशङ्क्याह—हृदेति । सत्यम् , तत्तु हृदा स्वसङ्कल्पमात्रेणैव, न तु लोकरीत्येत्यर्थः । ननु भवत्वेवं सर्वज्ञता, तथापि तज्ज्ञानप्रदः कश्चिदन्य एव स्यादित्याशङ्क्याह—स्वराडिति । यः स्वेनैव स्वरूपज्ञानेन राजते इति तथा, स्वतस्सिद्धज्ञानवानित्यर्थः । ननु कथं तस्य सच्चिदानन्दविग्रहत्वं रामकृष्णाद्यवतारेष्वस्मदादिवद्भौतिकत्वादिप्रतीतेरित्याशङ्क्याह—यत्रेति । यत्र भगवद्विग्रहे त्रिसर्गः त्रयाणां प्रकृतिगुणानां तमोरजस्सत्त्वानां सर्गो भूतेन्द्रियदेवतारूपो मृषा मिथ्यैवेत्यर्थः । तत्र दृष्टान्तमाह—तेजोवारिमृदां यथा विनिमयः व्यत्ययः अन्यस्मिन्नन्यावभासो भ्रान्तिस्तथा सच्चिदानन्दविग्रहे भगवत्यपि त्रिगुणकार्यदेहेन्द्रियादिप्रतीतिरपि भ्रान्तिरेवेत्यर्थः । तेजसि सूर्यमरीचौ वारिबुद्धिः । तमिस्रायां रात्रौ वारिणि पृथिवीबुद्धिः । मृदि काचादौ वारिबुद्धिः । भगवद्विग्रहस्य तत्कृपां विना दुर्ज्ञेयत्वादेव मुह्यन्ति यत्सूरय इति । यत् यस्मिन् भगवद्विग्रहे सूरयो विवेकिनो ब्रह्मादयोऽपि मुह्यन्ति,

काऽन्यस्य मोहकथेत्यर्थः। ननु भवत्वेवं तथापि तद्ध्यानेन कथं तवाभीष्टसिद्धिरित्यपेक्षायामाह--धाम्नेति। स्वेन धाम्ना स्वरूपस्फूर्त्यैव सदा निरस्तं दूरीकृतं कुहकं ध्यातॄणां कापटयं देहेन्द्रियाद्यात्मभावरूपमविद्याख्यं येन तमित्यर्थः। तत्राप्यविद्यानिवर्त्तनेन कलिकालादेः प्रतिबन्धकत्वमित्याशयेनाह--सदेति। तथा चाविद्यानिवृत्त्या यथावदर्थस्फुरणान्ममाभीष्टसिद्धिरिति भावः। यथा कामधेनोः कल्पवृक्षाच्चिन्तामणेर्मन्त्रादेश्च जायमानाः पदार्था दृश्यन्ते, तथापि कामधेन्वादयो विकृता न भवन्ति तथा जगद्बीजरूपोऽपि भगवान् विकृतो न भवतीति ज्ञापयितुं यत इत्यव्ययनिर्देशः। तेन जगत्कारणत्वप्रदर्शनेन भगवत आनन्दात्मत्वमपि सूचितम् "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इति श्रुतेः। स्वराडित्यनेन चित्त्वं सूचितम्। अर्थेष्वन्वयादित्यनेन सर्वदेशकालाद्यन्वयबोधनाद्विभुत्वं सूचितम्। सत्यता च सत्यमिति स्पष्टैवोक्ता। तथा च "सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुत्यनुसारेण सर्वव्यापकः सच्चिदानन्दविग्रहो निरस्तनिखिलदोषपूर्णगुणको भगवानिति प्रदर्शितम्। धीमहीति गायत्र्या प्रारम्भेणैकबीजत्वादस्य वेदादौर्बल्यं परिहृतम्। "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते" इति पुराणान्तरोक्तं भागवतलक्षणं च दर्शितम्॥ १॥

हिन्दी अनुवाद

श्रीसूतजीसे शौनकादि ऋषियोंका प्रश्न

जिससे इस जगत् की सृष्टि, स्थिति और प्रलय होते हैं—क्योंकि वह सभी सद्रूप पदार्थोंमें अनुगत है और असत् पदार्थोंसे पृथक् है; जड नहीं चेतन है; परतन्त्र नहीं, स्वयंप्रकाश है; जो ब्रह्मा अथवा हिरण्यगर्भ नहीं प्रत्युत उन्हें अपने संकल्पसे ही जिसने उस वेदज्ञानका दान किया है; जिसके सम्बन्ध में बड़े-बड़े विद्वान् भी मोहित हो जाते हैं; जैसे तेजोमय सूर्यरश्मियोंमें जलका, जलमें स्थलका, स्थलमें जलका भ्रम होता है, वैसे ही जिसमें यह त्रिगुणमयी जाग्रत्-स्वप्न-सुषुप्तिरूपा सृष्टि मिथ्या होनेपर भी अधिष्ठान-सत्तासे सत्यवत् प्रतीत हो रही है, उस अपनी स्वयंप्रकाश ज्योतिसे सर्वदा और सर्वथा माया और मायाकार्यसे पूर्णतः मुक्त रहनेवाले परम सत्यरूप परमात्माका हम ध्यान करते हैं॥ १॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ॐ नमो भगवते वासुदेवाय॥

इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति—धर्म इति। अत्र श्रीमति सुन्दरे भागवते परमो धर्मो निरूप्यते। परमत्वे हेतुः—प्रकर्षेण उज्झितं कैतवं फलाभिसन्धिलक्षणं कपटं यस्मिन् सः। प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः। केवलमीश्वराराधनलक्षणो धर्मो निरूप्यते। अधिकारितोऽपि धर्मस्य परमत्वमाह—निर्मत्सराणां परोत्कर्षासहनं मत्सरः, तद्रहितानां सतां भूतानुकम्पिनाम्। एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं, ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्यमाह—वेद्यमिति। वास्तवं परमार्थभूतं वस्तु वेद्यम्, न तु वैशेषिकाणामिव द्रव्यगुणादिरूपम्। यद्वा 'वास्तव'शब्देन वस्तुनोंऽशो जीवो वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत् सर्वं वस्त्वेव, न ततः पृथगिति वेद्यं, अयत्नेनैव ज्ञातुं शक्यमित्यर्थः। ततः किमत आह—शिवदं परमसुखदं, किञ्च आध्यात्मिकादितापत्रयोन्मूलनञ्च। अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितम्। कर्तृतोऽपि श्रैष्ठ्यमाह—महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते। देवताकांडविषयगतं श्रैष्ठ्यमाह—किं वेति। परैः शास्त्रैः तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते स्थिरीक्रियते। वाशब्दः कटाक्षे। किन्तु विलम्बेन कथञ्चिदेव, अत्र तु शुश्रूषुभिः श्रोतुमिच्छुभिरेव तत्क्षणादेवावरुध्यते। ननु इदमेव तर्हि किमिति सर्वे न शृण्वन्ति तत्राह—कृतिभिरिति। श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः। तस्मादत्र काण्डत्रयार्थस्य च यथावत्प्रतिपादानादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं, अतो नित्यमेतदेव श्रोतव्यमिति भावः॥ २॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ॐ स्वस्ति श्रीगणेशाय नमः॥

कांडत्रयं हि देवताकांड-कर्मकांड-ज्ञानकांडरूपं विषयो येषां शास्त्राणां तेभ्यः परमः सर्वोत्कृष्टः। ननु वैशेषिकादिशास्त्रस्याऽप्यंततस्तात्पर्यं वास्तववेदने एव। सर्वपदार्थनिरूपणं विना तद्भिन्नत्वेन तत्स्वरूपस्य दुर्ज्ञेयत्वात्तदर्थमेव तेन पदार्थविवेचनं कृतमिति चेत्तत्राह--यद्वेति। इत्यर्थ इति। शास्त्रांतरोक्तसाधनानां दुःसंपाद्यत्वादिति भावः। ततः ततो भगवतो न पृथक्, वास्तव-

वस्तुवेदनात् ॥ परमसुखं श्रीकृष्णप्रेमादि तत्प्रदम् । किं तु तद्रूपमेव । तदुक्तं "मनसा वचसा चैव गृह्यतेऽन्यैरपींद्रियैः । अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा" इत्येकादशे श्रीहंसावतारेण सनकादीन्प्रतीति । द्रव्यगुणादीनामवास्तवत्वं पराशरपुराणे खंडनादौ बहुधा प्रपंचितमेव । अवास्तववस्तुचिंतनेन युगसहस्रेणापि पुरुषार्थसिद्धिर्न भवेत् । अतस्तत्र रतिं त्यक्त्वेदमेवानवरतं मुमुक्षुभिश्चिंत्यमिति भावः ॥ ततो वास्तववस्तुचिंतनेन किं स्यादत आह—किञ्चेति । आधिदैविकाध्यात्मिकाधिभौतिकभेदेन तापस्त्रिधा । तथाहि आत्मानं शरीरमंतःकरणं वाधिकृत्य यज्जायते तदाध्यात्मिकं वातपित्तादिकोपजन्यं कामादिजन्यञ्च । तत्र भूतानि प्राणिनोऽधिकृत्य यज्जायते तदाधिभौतिकं व्याघ्रचौराद्युत्थम् । देवा अग्न्यादयस्तानधिकृत्य यज्जायते तदाधिदैविकं दाहशीतादिकृतं यक्षराक्षणग्रहाद्यावेशनिबंधनं चेति विवेकः । अनेन तापत्रयोन्मूलनपूर्वकपरमशिवाप्तिकथनेन । संक्षेपतश्चतुःश्लोकीरूपेण, 'स मुनिर्भूत्वा समचिंतयदि'ति श्रुतेः । यद्वा "कस्मै येन विभासितोऽयमतुल" इत्युक्तन्यायेन संपूर्ण एव कृते अन्यशास्त्रश्रवणादिना देवतांतरस्यैव हृदि वासो भवति, अस्य श्रवणादिना तु साक्षाद्धरेरेवेत्याह—देवताकांडविषयगतमिति । अत्राक्षिपति—नन्विति । इत्यर्थ इति । "जन्मांतरे यदा पुण्यं तदा भागवतं लभेदि"ति पाद्मोक्तेः । अयं भावः—यत इदमेव सर्वशास्त्रेभ्यः श्रेष्ठम् । किञ्च कांडत्रयार्थोऽप्यत्र यथावत्तत्तत्स्थले प्रतिपादितः, ततोऽपीदमेव सेव्यमिति संदर्भेण धर्मस्य परमत्वं हरिभक्त्युत्पादकत्वेनैव । "स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे" इत्युक्तं तद्युक्तमेव । विजयध्वजस्तु श्रीमत्वं नाम श्रूयमाणरमणीयतयाऽर्थपर्यालोचनतया वाऽस्येतरेभ्यः श्रैष्ठ्यं "राजंते तावदन्यानि पुराणानि सतां गणे । यावन्न श्रूयते साक्षाच्छ्रीमद्भागवतं परम् ॥" इति । ध्रियतेऽधः पतन्पुरुषोऽनेनेति धर्मः । धारयतीति धरो भगवान्समीयते ज्ञायतेऽनेनेति वा । दधाति कर्तारं रमयति मिनुते हिनस्ति पापमिति भगवत्प्राप्तिसाधनभूतः । "धरति यस्मादधो यांतं ज्ञायते येन वा हरिः । कर्तारं यो मोदयति हंति पापं सदाऽखिलम् ॥ तेन धर्म इति प्रोक्तो रूपसिद्धिर्निपाततः" इति शब्दार्थनिर्णयोक्तेः । ननु धर्मोऽन्यत्रापि प्रतिपाद्यते, किमत्रैवेति तत्राह—प्रोज्झितकैतवः कितवस्य भावः कैतवं, प्रकर्षेणोज्झितं कैतवं येन स तथोक्तः । कितवो नाम लोके मनस्यन्यदभिसंधायान्यदभिधत्ते, अन्यदेवाभिचरति, तद्वदत्रापि भगवत्प्रीतिमंतरेण स्वर्गादिफलं मनस्यनुसंधाय भगवद्गुणप्रतिपादनलोलुपनिरासार्थमन्यथा वदन्स्वात्मनो देहेंद्रियाणामीश्वराधिष्ठितत्वमीश्वरनियम्यत्वं निगूह्य हरेः कारयितृत्वं फलदातृत्वमप्यगणय्याहमेवेदं करिष्ये । अर्थी समर्थो विद्वानहमेव स्वतंत्र इति बुद्ध्या कितवेन क्रियमाणो धर्मः कैतव इत्युच्यते । अतोऽफलकामनयैव धर्मः कर्तव्य इत्ययमर्थोऽत्र प्रतिपाद्यत इत्यर्थः । "तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये" इति विष्णुपुराणोक्तेः । तर्ह्येतावता पूर्यत इति चेत्तत्राह—परम इति । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥" इति स्मृतेर्भगवदर्पणतः परमो भवतीत्यर्थः । परः परमात्मा मीयतेऽनेनेत्येतदभिप्रायेण परम इत्यभ्यधायि "परोऽरिपरमात्मनोः" इतीत्यभिधानात्परः शत्रुः संसाराख्यो मीयते प्रलीयते इति वा । 'मीञ् हिंसायाम्' । किं च यतोऽन्योऽधिकतमः सुखहेतुर्न भवति स परमो धर्मः स च भक्तियोगलक्षण एव । तथा च भारते भीष्मयुधिष्ठिरसंवादे "को धर्मः सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा" इति । किं च "एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः । भक्तियोगो भगवति तन्नामग्रहणादिभिः । नृणामयं परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान्साक्षात्सर्वात्मा येन तुष्यति" इति सप्तमोक्तेः । केषामधिकारः कश्च साक्षाद्विषय इति तत्राह—निर्मत्सराणामिति । भावप्रधानो निर्देशः । निर्गतं मात्सर्यं येषां ते तथोक्तास्तेषां प्रशस्तकर्मणां सतामपि कचिन्मात्सर्यं स्यात् ॥ अत उक्तं निर्मत्सराणामिति वेद्यं ज्ञेयम् ॥ कृद्योगे षष्ठी । सतामिति वा वास्तवं नित्यनिरस्तदोषं वस्तु अप्रतिहतनित्यवसनशीलं दुःखनिवृत्तिसुखप्राप्तिलक्षणस्य पुरुषार्थत्वात्तदभाववत्त्वात्किमनेनेति तत्राह—शिवदमिति । परमानंदं ददातीति वा आध्यात्मिकादिसकलदुःखनिवर्तकत्वं च "वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृतः" इत्यभिधानान्मुनयो ब्रह्मादयस्तेभ्योऽप्यतिशयितसर्वज्ञत्वान्महामुनिर्व्यासः साक्षान्नारायणः । "कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ॥" इति भारतोक्तेः । तेन कृते । ननु किमितीश्वरतुष्टिकरो भक्तियोगलक्षणो धर्म ईश्वरश्चात्र प्रतिपाद्यो न धर्मादिरिति तत्राह—किं वेति ॥ भक्तियोगलक्षणधर्मस्य हरेरपरोक्षज्ञानमुत्पाद्य तत्प्रसादांतरंगसाधनत्वेनापवर्गलक्षणानश्वरफलहेतुत्वाद्बहिर्मुखमनोरंजकत्वेन स्वर्गादिक्षयिष्णुफलमुत्पाद्य संसारावृत्तिहेतुत्वाद्धर्मादिकथनैः किं वा प्रयोजनं न किमपीत्यतस्तानंतरेण भक्तियोगलक्षणधर्मस्तद्विषय ईश्वरश्चात्र प्रतिपाद्यत इत्यर्थः । ननु दृष्टफलस्य प्रवृत्तिहेतुत्वात्किमत्र दृष्टफलमिति तत्राह—ईश्वर इति । अस्मिञ्छ्रीमद्भागवते शास्त्रे सम्यगभ्यस्यमाने कृतिभिः शिक्षितबुद्धिभिः शुश्रूषुभिः मनोवाक्कर्मभिर्गुर्वादिपरपुरुषपरिचर्याकरणकुशलैः साधनसामग्र्युपेतैरेभिः । ईश्वरो लक्ष्मीशादिचेतनगणाद्वर उत्तमः तत्प्रवर्त्तनशीलो वा परमात्मा हृदि हृदयकमले सद्यः शीघ्रं तत्क्षणात्कालव्यवधानमन्तरेणावरुध्यते भक्तिश्रृंखलया बद्धो दृश्यत इत्यर्थः । अत्र सद्यस्तत्क्षणशब्दावधिकारिविशेषद्योतकतया प्रयुक्तौ । ये साधनसामग्रीमंतस्तेषां यस्मिन्क्षणे ग्रंथोपक्रमस्तस्मिन्नेव क्षणे भगवान्दृश्यते । तदुक्तं "शनकैर्भगवल्लोकान्नृलोकं पुनरागतः" इति । ये भविष्यत्साधनसंपत्तिसंपादनयोग्यास्तेषामपि सद्यः साधनसामग्र्यां सत्यां दृश्यते । किं च भक्तियोगलक्षणधर्मे ईश्वरविषयतया निर्मत्सरसदधिकारिभिः प्राप्यं निर्दुःखपरमानंदाख्यं प्रयोजनमित्येतत्त्रितयमत्र प्रतिपाद्यते इत्यभिप्रायेणात्रेति त्रिशः कथितः । कर्मवेदब्रह्मकांडार्थोऽप्यत्रैव निर्णीयते इति विशेषणं भिन्नत्वबोधनाय वा धर्म इति कर्मकाण्डार्थः । निर्मत्सराणां सतामिति देवताकांडार्थः ।

देवानामेव मात्सर्यराहित्येन मुख्यसत्त्वेनोत्तमाधिकारत्वाच्च। वेद्यमिति ब्रह्मकांडार्थः। तस्मान्नारायणावतारेण सर्वज्ञतमेन कृष्णद्वैपायनेनात्युत्तमेन प्रणीतत्वात्प्रमाणतममिदं श्रीमद्भागवतं सर्वहितेप्सुभिरभ्यसनीयमिति सिद्धम्।

ब्राह्मणपक्षेऽप्यस्य योजनास्ति। ब्राह्मणा एव सर्वथा शास्त्रप्रवर्तकत्वेन शास्त्रादौ ध्येया इति मनसि निधाय व्यासदेवः स्वशिष्येभ्यो वदति मत्कृतव्याख्याशतके जन्माद्यस्येत्यस्य ब्राह्मणसंघे योजितत्वादत्रेत्यनेन ब्राह्मणपरामर्शः, त्यदादीनां बुद्धिस्थपरामर्शकत्वात्। भो शिष्याः! अत्र विप्रसंघे धरति नरके पततमिति। किं भूतः? प्रकर्षेणोज्झितं कैतवं पाखंडलक्षणं यस्मिन्स तथा, वेदविहित इत्यर्थः। तत्र हेतुः, पर उत्कृष्टो मा यस्मात्स परमः सर्वोत्कृष्टः श्रीकृष्णभक्तिलक्षणस्तं विना मोक्षासिद्धेः। तद्वक्ष्यति श्रीदशमे ब्रह्मा "श्रेयःसृतिं भक्तिमुदस्य ते विभो! क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिना" मिति। सतां सदाचारपराणां वास्तवं परमार्थभूतं वस्तु ब्रह्मात्रैव वेद्यं ब्रह्मकुलादेव वेद्यं ज्ञातुं योग्यं, पंचम्यर्थे त्रल्प्रत्ययः, ब्रह्मकुलस्यैवाचार्यत्वात् "आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे।" इति वाराहोक्तेः "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः। श्रोत्रियत्वं हि ब्राह्मण एव पर्यवस्यति। "जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियशब्दभाक्" इति स्मृतेः॥ "ब्रह्मिष्ठं ब्राह्मणं गुरुमुपासीत" इति श्रुतौ तु स्फुट एवायमर्थ उक्त इति। आधुनिकैर्विप्रद्विड्भिस्तु "जन्मना जायते शूद्रः" इति पाठः कल्पित,ः स चानादरणीय एव। न हि ब्राह्मणाच्छूद्रो ब्राह्मण्यां जायते गोर्गर्दभोत्पत्तिप्रसंगात्। "ब्राह्मण्यां ब्राह्मणाज्जातः स हि ब्राह्मण ईरित" इति जातूकर्ण्यस्मृतेर्बाधप्रसंगाच्च। यच्च कैश्चिदुक्तं 'ब्रह्म जानातीति ब्राह्मणः' इति, तथात्वे 'गच्छतीति गौ' रिति निरुक्तेः यूकाया अपि गोत्वं स्यात्। अतस्तदपि नादरणीयम्। लक्षणस्यैव वस्तुनिर्णायकत्वं, न निरुक्तेः। किंभूतानां सताम्? परोत्कर्षासहनं मत्सरस्तद्रहितानाम्। पाखंडानुगा हि विप्रोत्कर्षं न सहंते। ते चेत्थं वदंति यथान्ये प्राणिनस्तथा विप्राः, न तेषु किंचिदाधिक्यं किमर्थं वयं तानाश्रयाम इति। ये मत्सरिणस्तद्भिन्नानां शास्त्रमार्गानुयायिनामित्यर्थः। किंभूतं वस्तु? शिवं परमानंदं ददातीति शिवदं मोक्षदमित्यर्थः। प्रकाशरूपस्य रवेः प्रकाशदत्ववच्चित्ररूपस्यापि ब्रह्मणः शिवदत्वं न विरुद्धमिति। पुनः अध्यात्माधिदैवाधिभूतरूपतापत्रयाणामुन्मूलनमुत्पाटनकरम्। अध्यात्मतापाः कामादयः अधिदैवा वाय्वग्नितडित्पातादिजन्या अधिभूतास्सर्पव्याघ्रादिजन्या इति विवेकः। किंभूते विप्रसंघे? श्रीमद्भागवते "ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्" इति श्रुतेर्वेदाभ्यास एव श्रीः सा विद्यतेऽस्यास्मिन्वेति श्रीमान् "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीर्यते॥" इति स्मृतेर्भगः षड्विधमैश्वर्यं सोऽस्यास्तीति भगवान्कृष्णस्तं भगवंतमुपास्त इति भागवतः। अत्र कारकादण्, श्रीमांश्चासौ भागवतश्चेति श्रीमद्भागवतस्तस्मिंस्तथा। श्रोत्रिये ब्रह्मनिष्ठे चेत्यर्थः। पुनर्मह्यते पूज्यते सर्वैरिति महान्। मन्यते जानाति सर्वमिति मुनिः। महतेस्तु, मन्यतेरिश्च प्रत्ययः। महांश्चासौ मुनिर्महामुनिर्महावंद्यो महामुनिः इति गोपालसहस्रनामसु पठितत्वान्महामुनिः श्रीकृष्णस्तेन कीर्त्यते स्तूयते इति महामुनिकृतस्तस्मिंस्तथा "कृत संशब्दे" इत्यतः कर्मणि कः, धातोरुपधाया ह्रस्वश्च निपातनादुणादौ बोध्यः। "ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम्। बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः॥" इत्यादिना हरिणा विप्राः स्तुता दृश्यंते। अन्यत्रापि "इयं ब्राह्मणनौ राजन्विपरीता भवार्णवे। तरन्त्यधोगता यस्या मज्जन्त्युपरिवर्तिनः" इत्यादिना, 'श्रीमद्भागवत' इत्यत्र च ब्राह्मणा विष्णोरुपासका उक्ताः। महामनिकृत इत्यत्र च विष्णुर्ब्राह्मणोपासक उक्तः, इतश्च विरोधः प्रतीयते। न हि स्तोतैव स्तुत्यः स्तुत्यश्च स्तोता लोके कुत्रचिदपीदृश्यते,—इति चेदत्रेदमवधेयम् "ब्रह्मा विष्णुः शिवो विप्राः सर्वदेवैः प्रपूजिताः। परस्परं स्तुवंत्येते लीलया भेदभावनात्" इत्यादिपुराणात्। किञ्च परैर्विप्रद्विड्भिः किमीश्वरो हृद्यवरुध्यते किं तु न कदापि। अत्र विप्रसंघे शुश्रूषुभिः शुश्रूषां कुर्वद्भिस्तत्क्षणादेवावरुध्यते स्थिरीक्रियते। किंभूतो हरिः?। द्योनाब्धिना शयनार्थं वर्तते इति सद्यः। "द्योब्धियौः स्यात् त्रिविष्टपम्" इति सौभरिनाममालायाम्। "विप्रद्विषं नरं दृष्ट्वा हरिर्दूरात्पलायते। विप्राणां सेवनादाशु हरिरायाति मानसे॥" इति संहितोक्तेः। "सर्वं सहे महाराज विप्रद्वेषं न वै क्वचित्। विप्रा मे देवदेवस्य सदोपास्या न संशयः॥" इत्यादिनारदपुराणाच्च। तर्हि सर्वे विप्रानेव कथं न सेवन्ते तत्राह—कृतिभिर्जन्मांतरे कृतपुण्यपुञ्जैर्जन्मांतरीयपुण्यं विना तत्र विश्वासो न जायते। तदुक्तं—"तीर्थे देवे गुरौ विप्रे ईशनाम्नि च पार्थिव। स्वल्पपुण्यवतां लोके विश्वासो नैव जायते॥" इति पुराणांतरे युधिष्ठिरं प्रति श्रीकृष्णोक्तेरिति ब्राह्मणपक्षः। एतच्छास्त्रस्य श्रीकृष्णभक्तिप्रतिपादकत्वाद्भक्तियोगेऽप्येनं योजयति। 'भोः शिष्या' इति संबोध्य व्यासो वदति भागवते। भगवतो विष्णोरयं भागवतो भक्तियोगस्तस्मिन्धर्मोऽस्ति। तत्र श्रीविष्णुपूजनादिरूपधर्मस्य विद्यमानत्वात्। किंभूतो धर्मः? न विद्यते त्रपा नामोच्चारणदंडवत्प्रणत्यादिषु येषां तेऽत्रपा वैष्णवास्ते रमंते क्रीडंतत्यत्रेत्यत्रपरमः, यद्वा न विद्यते त्रपा स्त्र्यादिदर्शनादिषु येषां तेऽत्रपाः शुकादयस्ते रमंतेऽत्यत्रपरमः। वैष्णवेतरास्तु हरिनामोच्चारणादौ लज्जंते मृषाभाषणपरस्त्र्युपरि पतनादौ तु न लज्जंते। तदुक्तं"नामोच्चारेऽथ साष्टांगप्रणतौ श्रीहरेर्नृणाम्। अभक्तानां यथा लज्जा जायते न तथा ध्रुवम्॥ मृषोक्तौ व्यभिचारादौ भक्तानां त्वन्यथा ततः" इत्यादिना बहु प्रपञ्चितं श्रीहरिभक्तिप्रदीपे। इत्यभिप्रेत्यैव भगवंतं कुंती वक्ष्यति "जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्। नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम्॥" इति। एकादशेऽपि भगवाननुद्धवं वक्ष्यति 'रजःसत्त्वतमोनिष्ठः' इत्यारभ्य 'मानिनां चातिस्तब्धानां मद्वार्तापि

न रोचते' इत्यंतेन। पुनः प्रोज्झितं प्रकर्षेण त्यक्तं कैतवं फलाभिसंधिलक्षणं यत्र स तथा। "फलेच्छा यत्र जायेत स स्याद्धर्मः सकैतवः। निष्कामो यो भवेद्धर्मः स शुद्धः परिकीर्तितः॥" इति स्मृतेः। यद्वा प्रकर्षेणोज्झितं कैतवं लक्षणं यत्रेति तथा। तद्वक्ष्यति चित्रकेतूपाख्याने "जितमजित तदा भगवता यदाह भागवतं धर्ममनवद्यम्। निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय॥ विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति यदन्यत्र। विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः" इति। इत्यभिप्रेत्यैवोद्धवं प्रति भगवताप्युक्तं "कर्मशुद्धिर्मदर्पणम्" इति। सतां सदाचारतत्पराणां वास्तवं सत्यभूतं वस्तु परमात्माऽत्र भक्तियोग एव वेद्यः, "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति श्रीमुखोक्तेः, "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति शिष्टोक्तेश्च। "न युज्यमानया भक्त्या भगवत्यखिलात्मनि। सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये॥" इति श्रीकपिलोक्तेश्च। "भक्त्याऽहमेकया ग्राह्य" इत्यादि बहुश उक्तेश्च। "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः परमात्मैव सत्यं वस्त्विति। किंभूतं वस्तु? निर्मत्सराणां शिवदं मोक्षफलदम्। सासूयानां जातमपि ज्ञानं न फलपर्यवसायि, "निःश्रेयसकरं ज्ञानं सुवृत्तानां प्रजायते। दुर्वृत्तानां कथमपि जातमप्यन्यथा भवेत्॥" इति पुराणांतरात्। पुनः किंभूतं? तापयंति क्लेशयन्तीति तापाः कामक्रोधलोभास्त एव त्रयस्तापत्रयास्तेषामुत्पाटनकरम्। "तपंति विविधांस्तापानैतान्मद्गतचेतस" इति कपिलोक्तेः। पुनः श्रीमत्। 'श्री' शब्दोदिता राधा, तद्युतमित्यर्थः। एतेन श्रीराधाकृष्ण एव परमार्थभूतं वस्तु, तद्भिन्नं सर्वमवस्त्वेव। "यस्मिन्सर्वं विलीयेत वस्तु तत्परमार्थकम्। एतादृशं परं ब्रह्म राधाकृष्णो न संशयः॥" इति गोस्वाम्युक्तेः। "कृष्णात्परं किमपि तत्त्वमहं न जाने" इति मधुसूदनस्वाम्युक्तेश्च। "सर्वेषामेव भावनां भावार्थो भवति स्थितः। यस्यापि भगवान्कृष्णः किमु तद्वस्तु रूप्यताम्॥" इति वक्ष्यमाणत्वात्स एव सर्वं परमार्थभूत इत्यादि बहुश उक्तेश्च। किंभूते भागवते? महामुनयो नारदादयस्तैः कृते प्रवर्तिते। यद्वा महामुनिर्विष्णुरेव तेन प्रवर्तिते उद्धवादिभ्य उपदिष्ट इत्यर्थः। परैर्भक्तियोगेतरैः सांख्ययोगादिसाधनैरीश्वरः। किं सद्यो हृद्यवरुध्यते स्थाप्यते वेति विलंबेन। अत्र शुश्रूषुभिर्भक्तियोगं सेवमानैस्तत्क्षणादेवावरुध्यते। "न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता॥" इति भगवदुक्तेः। अत्र विशेषो हि मत्कृतायपद्यव्याख्याशत्युत्तरपद्यद्वयव्याख्यायां च द्रष्टव्यः। अत्रानेकजन्मानुष्ठितसुकृतत्वेन मत्सरादिदोषरहितः शुद्धांतःकरणोऽधिकारी साधनतया श्रवणादिधर्मस्तत्प्राप्यतया सच्चिदानंदात्मको भगवांश्च विषयः। निखिलदुःखनिवृत्तिपूर्वकपरमानंदावाप्तिश्च फलापरपर्यायं प्रयोजनं, ग्रंथस्य विषयेण प्रतिपाद्यप्रतिपादकभावः, प्रयोजनेन साध्यसाधनभावश्च संबंध इत्यनुबंधचतुष्टयं बोध्यम्। पूर्वोक्तं छन्दः॥ २॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनीव्याख्या

इदानीं मंगलाचरणानंतरं कांडत्रयविषयेभ्यः कांडत्रयं ज्ञानकर्मोपासनारूपं विषयः प्रवृत्त्युद्देश्यं प्रतिपाद्यं येषु तेभ्यः सर्वशास्त्रेभ्य ईश्वराराधनलक्षणः ईश्वरार्पितवर्णाश्रमधर्मः। निर्मत्सराणामिति। विशेषणस्वारस्यात्सच्छब्देन भूतानुकंपिनामिति व्याख्यातं, एवं निरुक्तधर्मवर्णनप्रकारेण कर्मकांडविषयेभ्यः कर्मकांडमेव विषयः प्रतिपाद्यं येषु स्मृतिशास्त्रेषु तेभ्यः, एवं ज्ञानकांडमेव विषयः प्रतिपाद्यं येषु तेभ्योऽपि पूर्वार्थे क इह नु वेदवतावरजन्मलयोऽग्रसरमित्युक्तदुर्ज्ञेयस्य ब्रह्मणो ज्ञेयत्वापत्तिरतो यद्वेति। वास्तवश्च जीवः वास्तवी च माया वास्तवं जगत् एषामेकभावो वास्तवं, 'नपुंसकमनपुंसकेने'त्येकशेषः, यथा शुक्लश्च शुक्लं च शुक्लमिति इति वेद्यमितीतिशब्दस्याध्याहारः। कथंभूतं तत्? तापत्रयोन्मूलनम्। तत्खलु आध्यात्मिकं आधिभौतिकमाधिदैविकं च। तत्राध्यात्मिकं द्विविधं–शारीरं मानसं च। वातपित्तश्लेष्मणां वैषम्यनिमित्तं शारीरं, कामक्रोधलोभमोहभयेर्ष्याविषयविशेषादर्शननिबंधनं मानसं, ततः तादृशज्ञानात् अनेन तादृशज्ञानकथनेन 'महामुनि'शब्दस्य नारायणवाचकत्वे 'स मुनिर्भूत्वा समचिंतयदि'ति श्रुतिः प्रमाणम्। ननु कांडत्रयाच्छ्रैष्ठ्यं न वेदबाह्यत्वप्रतीतिरत आह—तस्मादिति। कांडत्रयवैशिष्ट्यात्। अत्र श्रीमति भागवते॥ २॥

श्रीमद्वीरराघवव्याख्या

अथ विषयप्रयोजनसंबंधाधिकारिरूपमनुबंधचतुष्टयमाह द्वितीयश्लोकेन—'प्रोज्झितकैतव' इत्यादिना। विषयो नाम प्रधानप्रतिपाद्यवस्तुरूपः। स चात्र धर्मः, सोऽपि साध्यः सिद्धश्चेति द्विविधः–सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो महाभारते दृष्टः। यथा 'ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः। ते वदंति महात्मानं कृष्णं धर्मं सनातनम्' इति तथाभियुक्तैश्चालौकिकत्वे सति श्रेयःसाधनत्वं धर्मशब्दप्रवृत्तिनिमित्तं मन्वानैः सिद्धरूपेऽर्थे धर्मशब्दः प्रयुक्तः। 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते। तेषामैंद्रियकत्वेऽपि न तद्रूपेण धर्मते' ति। तत्र सिद्धधर्मः परमात्मा 'अमृतस्यैष सेतु' रित्यादिशास्त्रेण तस्यालौकिकत्वे सति श्रेयःसाधनत्वावगमात्। साध्यधर्मस्तु परमात्माराधनात्मिका भक्तिः, तत्र 'सताम्' इत्यंतेन साध्यधर्म उच्यते। 'वेद्य' मित्यादिना 'तापत्रयोन्मूलन' मित्यंतेन सिद्धधर्मः। 'ईश्वर' इत्यादिना प्रयोजनमुच्यते, तच्चापि द्विविधं व्यवहितमव्यवहितं चेति। तत्राद्यन्तेन हृदीश्वरावस्थापनमव्यवहितं फलम्। तापत्रयनिवृत्तिस्तु भगवदनुभवपरंपरया व्यवहितं फलम्। संबंधोऽपि द्विविधः—साध्यसाधनभावरूपः प्रतिपाद्यप्रतिपादकभावरूपश्चेति। तत्र प्रयोजनोक्त्या साध्यसाधनभावरूपः विषयोक्त्या प्रतिपाद्यप्रतिपादकभाव-

रूपश्चार्थो विवक्षितः। एवं सिषाधयिषुः प्रतिपिपत्सुरूपो मुमुक्षुरधिकार्यर्थतो विवक्षितो वेदितव्यः। तत्र साध्यधर्ममाह—धर्म इति। अत्रास्मिन्पुराणे प्रोज्झितकैतवः परमो निर्मत्सराणां सतां धर्मः साध्यतयोच्यत इत्यर्थः। कैतवं वंचनं; प्रोज्झितं नितरां त्यक्तं कैतवं यस्मिन्। अनेन विप्रलिप्सामूलबाह्यागमोक्तचैत्यवंदनादिव्यावृत्तिः। 'निर्मत्सराणां सता' मिति संबंधसामान्ये षष्ठी। निर्मत्सराणां सतां संबंधी धर्मोऽत्र साध्यतयोच्यत इत्यर्थः। संबंधश्चानुष्ठेयानुष्ठानभावरूपः। 'निर्मत्सराणां सतां धर्म' इत्यनेन वेदोक्ताभिचारादिव्यावृत्तिः। अभिचारादयो हि मत्सरादिमतामनुष्ठेयाः। परमः सर्वोत्कृष्टः अनेन क्षुद्रफलप्रदकाम्यकर्मव्यावृत्तिः। यद्वा 'मत्सर' शब्दः कामादीनां प्रदर्शनार्थः शमदमाद्युपेतानां मुमुक्षूणां धर्मः। अनेन स्वर्गाद्यर्थकर्मव्यावृत्तिः परमः 'सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधि'रित्युक्तप्रकारेण भगवत्सन्तोषैकफलत्वात्परमः। एवं साध्यधर्मरूपो विषय उक्तः। अथैवंविधमोक्षैकप्रयोजनसाध्यधर्मसमाराध्यमेतत्पुराणवेद्यं परब्रह्मात्मकं सिद्धधर्मरूपं विषयमाह—वेद्यमिति। सतामित्येतत्काकाक्षिन्यायादत्रापि संबध्यते। अत्रास्मिन्महामुनिकृते श्रीमद्भागवताख्ये पुराणे, अन्वर्थमिदं नाम भगवतः स्वरूपरूपगुणविभूतिप्रतिपादकत्वेन भगवत इदं भागवतमिति व्युत्पत्तेः। सतां वेद्यं वस्तु वास्तवं शिवदं तापत्रयोन्मूलनं वास्तवत्वादिगुणविशिष्टमित्यन्वयः। महामुनिना श्रीबादरायणेन कृते मुनेर्महत्त्वम्। अत्रासंभाव्यमानपौरुषेयदोषगन्धापौरुषेयप्रत्यक्षः श्रुतिवाक्येन, 'स होवाच व्यासः पाराशर्य' इत्यनेनाप्ततमतया श्रावितत्वरूपं विवक्षितम्। अनेनास्य पुराणस्य वक्तृवैलक्षण्यवत्त्वं सिद्धं, अत एव प्रमाणतमत्वं च इतरदेवतानामसद्गुणारोपेण स्तोतव्यत्वात्तद्व्यावृत्त्यर्थं वास्तवमित्युक्तम्। वस्तुनो भावो वास्तवं, युवादित्वाद्भावयनांत 'युवादिभ्योऽण्' इत्यण्, ततो मत्वर्थीयोऽच्, स्वाभाविकधर्मयुक्तमित्यर्थः। शिवदं मंगलदं मोक्षानंदप्रदम्। अनेनेष्टप्रापकत्वमुक्तम्। तापत्रयोन्मूलनं आध्यात्मिकादितापत्रयोच्छित्तिकरम्। अनेनानिष्टनिवर्तकत्वमुक्तं, यद्वा 'वास्तव'शब्देन शास्त्रांतराभ्युपेताब्रह्मात्मकस्वतन्त्रप्रधानादेर्वैलक्षण्यमभिप्रेतम्। अब्रह्मात्मकप्रधानादीनामप्रामाणिकत्वात् इतरविशेषणद्वयेन क्षुद्रोपद्रवशतोपप्लुतपरिमितसुखप्रददेवतांतरव्यावृत्तिः। एवं मोक्षसाधनधर्मस्तत्समाराध्यपरदेवता चास्य प्रबंधस्य विषय इत्युक्तं; यत एवेदमीदृशविशिष्टविषयकस्तत एव न शास्त्रांतरैः प्रयोजनमस्तीत्याह—किंवाऽपरैरिति। अपरैः शास्त्रजालैः, किं वा न किंचिदपि प्रयोजनमस्तीत्यर्थः। अथ प्रयोजनमाह—ईश्वर इत्यादिना। शुश्रूषुभिः श्रवणेच्छामात्रवद्भिः अत एव तत्क्षणात् कृतिभिर्धन्यैः सद्य एतत्पुराणश्रवणानंतरमेव हृदीश्वरोऽवरुध्यते। श्रुतिपथेन हृदयं प्रविशतीत्यर्थः। 'यत्नेन चित्ते विनिवेशयंति' इति न्यायेन दुर्ग्रहस्येश्वरस्यायत्नेन हृद्यवस्थानमव्यवहितं फलं तापत्रयनिवृत्तिश्च भगवदनुभवपरंपरया फलमित्युक्तं भवति। प्रयोजनेन साध्यसाधनभावरूपः विषयेण प्रतिपाद्यप्रतिपादकभावरूपश्च संबंधोऽधिकारी चार्थसिद्ध इति पुरस्तादेवोक्तम्॥ २॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु 'जन्माद्यस्य यत' इत्यनेन सकलपुराणार्थस्य संक्षेपतो दर्शितत्वात्किमुत्तरश्लोकेनेत्यतो ग्रंथारंभे मंगलाचरणाद्युक्त्या नारायणस्य प्रस्तुतत्वं, न तु साक्षाद्विषयत्वेन, विषयस्त्वन्य एवेति शंकानिरासार्थं विषयतत्साधनाधिकारिप्रयोजनानि द्वितीयश्लोकेन दर्शयति—धर्म इति। ननु यदिष्टसाधनत्वाबोधकं प्रायस्तदेव प्रमाणतयोपादेयं, अतः कथमस्य ग्रंथस्येत्यतो वाऽऽह—धर्म इति। अत्र श्रीमद्भागवते प्रोज्झितकैतवः परमो धर्मः प्रतिपाद्यते। अत्र श्रीमद्भागवते निर्मत्सराणां सतां वेद्यं वास्तवं शिवदं तापत्रयोन्मूलनं वस्तु प्रतिपाद्यते। किं विशिष्टे? महामुनिकृते, अपरैः किं वा शुश्रूषुभिः कृतिभिः अत्र श्रीमद्भागवते अभ्यस्यमाने ईश्वरः सद्यस्तत्क्षणात् हृदि अवरुध्यत इत्येकान्वयः। अत्रास्मिन् श्रीमद्भागवते, श्रीमत्त्वं नाम श्रूयमाणरमणीयताऽर्थपर्यालोचनया चास्येतरेभ्यः आधिक्यम्। तथा चोक्तं—'राजंते तावदन्यानि पुराणानि सतां गणे। यावन्न दृश्यते साक्षाच्छ्रीमद्भागवतं पर' मिति। ध्रियत अनेन अधः पतन् पुरुष इति धर्मः, धारयतीति धरो भगवान्समीयते ज्ञायते अनेनेति वा, दधाति कर्तारं रमयति मनुते हिनस्ति पापमिति वा भगवतः प्राप्तिसाधनभूतः। ननु धर्मोऽन्यत्रापि प्रतिपाद्यते, किमत्रैवेति तत्राह—प्रोज्झित इति। प्रोज्झितकैतवः कितवस्य भावः कैतवं प्रकर्षेणोज्झितं कैतवं येन सः तथोक्तः 'कितवो नाम लोके मनस्यन्यद' भिसन्धायान्यदभिधत्ते अन्यदेवाभिचरति तद्वदत्रापि भगवत्प्रीतिमंतरेण स्वर्गादिफलं मनस्यनुसंधाय भगवद्गुणप्रतिपादनलोलुपनिगमार्थं अन्यथा वदन् स्वात्मनो देहेंद्रियाणामीश्वराधिष्ठितत्वमीश्वरनियम्यत्वं निगूह्य हरेः कारयितृत्वं फलदातृत्वमपि अगणय्य 'अहमेवेदं करिष्ये' 'अर्थी समर्थो विद्वानहमेव स्वतंत्र' इति बुद्धया वा युक्तः कितवः, तेन क्रियमाणो धर्मकैतव इत्युच्यते। अतोऽफलकामनयैव धर्मः कर्तव्य इत्ययमर्थोऽत्र प्रतिपाद्यत इत्यर्थः। 'तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये' इति श्रीविष्णुपुराणे। तर्ह्येतावता पूर्यत इति तत्राह—परम इति। 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्॥' इति स्मृतेः भगवदर्पणतः परमो भवतीत्यर्थः। किंच परः परमात्मा मीयतेऽनेनेत्येतदभिप्रायेण परम इत्यभिधायि 'परोऽरिपरमात्मनो' रित्यभिधानात्। स परः शत्रुः संसार मीयते प्रलीयते इति वा, 'मीङ् हिंसायां' 'प्रमीया हिंसा च संज्ञपन' मित्यभिधानं, किंच यतो अधिकतमः सुखहेतुर्भवति स परमो धर्मः, स च भक्तियोगलक्षण एव। तथा च भारते भीष्मयुधिष्ठिरसंवादे—'को धर्मः सर्वधर्माणां भवतः परमो मत' इति पृष्टे 'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः। यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा' इति उक्तं च—'एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः॥ नृणामयं

परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान्साक्षात्सर्वात्मा येन तुष्यती'ति स्वोक्तेः। केषामधिकारः, कश्च साक्षाद्विषय इति तत्राह—'निर्मत्सराणा'मित्यादिना, भावप्रधानो निर्देशः, निर्गतं मात्सर्यं येषां ते तथोक्ताः, तेषां सतां प्रशस्तकर्मणां पुरुषाणां सतामपि कचित्कचिन्मात्सर्यं स्यात्तन्न कर्तव्यं स्वोत्तमेष्वित्यतो निर्मत्सराणामित्युक्तं ज्ञेयम्। 'कृद्योगे षष्ठी'ति सतामिति। वेदनं ज्ञानमेव न कर्मादिकमित्यतो वेद्यमित्युक्तम्। वास्तवं नित्यनिरस्तदोषं पूर्णगुणं वस्तु अप्रतिहतनित्यत्वेन वसनशीलत्वादित्यर्थः। दुःखनिवृत्तिसुखप्राप्तिलक्षणस्य पुरुषार्थत्वात्तदभावात्किमनेनेति तत्राह—शिवदमिति। परमानंदं ददाति च तापत्रयोन्मूलनं आध्यात्मिकादिसकलदुःखनिवर्तकं च 'वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत' इत्यभिधानान्मुनयो ब्रह्मादयः तेभ्योऽप्यतिशयित-सार्वज्ञ्यान्महामुनिर्व्यासः साक्षान्नारायणः 'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभु'मिति वचनं तेन कृते प्रणीते। ननु किमिति ईश्वरतुष्टिकरो भक्तियोगलक्षणो धर्म ईश्वरश्चात्र प्रतिपाद्यो न धर्मादिरिति। तत्राह—किं वेति। भक्तियोगलक्षणधर्मस्य हरेरपरोक्ष-ज्ञानमुत्पाद्य तत्प्रसादांतरंगसाधनत्वेनापवर्गलक्षणानश्वरफलहेतुत्वाद्बहिर्मुखमनोरंजकत्वेन स्वर्गादिक्षयिष्णुवत् फलमुत्पाद्य संसारा-वृत्तिहेतुत्वात् धर्मादिकथनैः किं वा प्रयोजनं? न किमपीत्यतः तानंतरेण भक्तियोगलक्षणधर्मस्तद्विषय ईश्वरश्चात्र प्रतिपाद्यत इत्यर्थः। ननु दृष्टफलप्रवृत्तिद्वाराऽदृष्टफलप्रवृत्तिदर्शनात् किमत्र दृष्टफलमिति तत्राह—ईश्वर इति। अस्मिन् भागवतशास्त्रे सम्यग-भ्यस्यमाने कृतिभिः शिक्षितबुद्धिभिः शुश्रूषुभिः मनोवाक्कर्मभिः गुर्वादिपरमपुरुषपरिचर्याकरणकुशलैः साधनसामग्र्युपेतैरेभिः ईश्वरः लक्ष्मीशादिचेतनगणाद्वर उत्तमः तत्प्रवर्तनशीलो वा परमात्मा हृदि हृदयकमले सद्यः शीघ्रं तत्क्षणात्कालव्यवधान-मंतरेण अवरुध्यते भक्तिशृंखलया बद्धो दृश्यत इत्यर्थः। अत्र 'सद्यः-तत्क्षण'शब्दावधिकारिविशेषद्योतकतया प्रयुक्तौ। ये साधन-सामग्रीमंतस्तेषां यस्मिन्क्षणे ग्रंथोपक्रमस्तस्मिन् क्षण एव भगवान् दृश्यते। तदुक्तं—'शनकैर्भगवल्लोकान्नृलोकं पुनरागत' इति। ये भविष्यत्साधनसंपत्तिसंपादनयोग्यास्तेषामपि सद्यःसाधनसामग्र्यां सत्यां दृश्यते, यन्नियतं कालांतरभावि तज्झटिति भवत्येवेति च वक्तुं शक्यत्वाद् भक्तियोगलक्षणधर्मेश्वरौ विषयतया निर्मत्सरसदधिकारिभिः प्राप्तं निर्दुःखपरमात्मानंदाख्यं प्रयोजनमित्येतत्त्रि-तयमत्र प्रतिपाद्यत इत्यभिप्रायेणात्रेति त्रिशः कथितम्, न तु सगुणब्रह्मतत्तुष्टिकरः परमधर्मः निराकारं निर्गुणं ब्रह्म चेति त्रितयाभि-प्रायेणात्रेति त्रित्वमिति कर्मदेवब्रह्मकांडार्थोऽप्यत्रैव निर्णीत इति वा धर्म इति कर्मकांडार्थः। 'निर्मत्सराणां सतां'मिति देवताकांडार्थः। देवतानामेव मात्सर्यराहित्येन मुख्यसत्त्वेनोत्तमाधिकारित्वाच्च वेद्यमिति ब्रह्मकांडार्थः। तस्मान्नारायणावतारेण सर्वज्ञतमेन कृष्णद्वैपायनेनाप्ततमेन प्रणीतत्वेन प्रमाणतमत्वादिदं श्रीमद्भागवतं सर्वमुमुक्षुभिर्निरंतरमभ्यसनीयमिति सिद्धम् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ वक्ष्यमाणशास्त्रस्य कर्मज्ञानभक्तिप्रतिपादकेभ्यस्त्रिकांडविषयशास्त्रेभ्यो वैशिष्ट्यं दर्शयन् क्रमादुत्कर्षमाह—धर्म इति। अत्र यस्तावद्धर्मः निरूप्यते स खलु 'स वै पुंसां परो धर्मो यतो भक्तिरधोक्षज'इत्यादिकया 'अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रम-विभागशः। स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषण'मित्यन्तया गीत्या, भगवत्सन्तोषणैकतात्पर्येण शुद्धभक्त्युत्पादनतया निरूपणात् परम एव। यतः सोऽपि तदेकतात्पर्यात् प्रोज्झितकैतवः। प्रशब्देन सालोक्यादिसर्वप्रकारमोक्षाभिसन्धिरपि निरस्तः। यत एवासौ तदेकतात्पर्यत्वेन निर्मत्सराणां फलकामुकस्यैव परोत्कर्षासहनमत्सरस्तद्रहितानामेव तदुपलक्षणत्वेन पश्वालम्भने दयालूनामेव च सतां स्वधर्मपराणां विधीयते। एवमीदृशं स्पष्टमनुक्तवतः कर्मशास्त्रादुपासनाशास्त्राच्चास्य तत्तत्प्रतिपादकांशेऽपि वैशिष्ट्यमुक्तम्, उभयत्र वै परमधर्मोत्पत्तेः। तदेवं साक्षाच्छ्रवणकीर्तनादिरूपस्य वार्ता तु दूरत एव आस्तामिति भावः। अत्र ज्ञानशास्त्रेभ्योऽ-प्यस्य पूर्ववद्वैशिष्ट्यमाह—वेद्यमिति। तैर्व्याख्यातं भगवद्भक्तिनिरपेक्षप्रायेषु तेषु प्रतिपादितमपि 'श्रेयःसृतिं भक्तिमुदस्य' इत्यादि-न्यायेन वेद्यं निःश्रेयसं न भवतीति। वस्तुनस्तस्य सशक्तित्वमाह—तापत्रयं मायाकार्यमुन्मूलयति तन्मूलभूताविद्यापर्यन्तं खंडय-तीति स्वरूपशक्त्या। तथा शिवं परमानन्दं ददात्यनुभावयतीति च तयैवेत्यनेनेदं ज्ञाप्यते। अन्यत्र मुक्तावनुभवभ्रमनेनेऽप्य-पुरुषार्थत्वापातः स्यात्। तन्मननादत्र तु वैशिष्ट्यमिति। न चास्य तत्तद्दुर्लभवस्तुसाधनत्वे तादृशनिरूपणसौष्ठवमेव कारणमपि तु स्वरूपमपीत्याह—श्रीमद्भागवतत्वं भगवत्प्रतिपादकत्वम्। श्रीमत्त्वं श्रीभगवन्नामादेरिव तादृशस्वाभाविकशक्तिमत्त्वम्। नित्ययोगे मतुप्। अत एव समस्ततयैव निर्दिश्य नीलोत्पलादिवत्तन्नामत्वमेव बोधितम्, अन्यथा त्वविमृष्टविधेयांशतादोषः स्यात्। अत उक्तं गारुडे 'ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध' इति। 'श्रीमद्भागवतं भक्त्या पठते हरिसन्निधा'विति। टीकाकृद्भिरपि—श्रीमद्भागवताभिधः सुरतरुरिति। अतः कचित् केवलं भागवताख्यत्वं तु सत्यभामा भामेतिवत्। तादृशप्रभावे कारणं परमश्रेष्ठ-कर्तृकत्वमप्याह—महामुनिः श्रीभगवान् तस्यैव परमविचारपारङ्गतत्वात् महाप्रभावगणशिरोमणित्वाच्च। 'स मुनिर्भूत्वा सम-चिन्तयत्' इति श्रुतेः। तेन प्रथमं चतुःश्लोकीरूपेण संक्षेपतः प्रकाशिते। 'कस्मै येन विभाषितोऽयम्' इत्याद्यनुसारेण सम्पूर्ण एव वा प्रकाशिते। तदेवं श्रैष्ठ्यजातमन्यत्रापि प्रायः सम्भवतु नाम, सर्वज्ञानशास्त्रपरमज्ञेयपुरुषार्थशिरोमणिश्रीभगवत्साक्षात्कारस्त्वत्रैव सुलभ इति वदन् सर्वोर्ध्वप्रभावमाह—किं वेति। अन्यैर्मोक्षपर्यन्तकामनारहितेश्वराराधनलक्षणधर्मब्रह्मसाक्षात्कारादिभिरुक्तै-रनुक्तैर्वा साध्यैरत्र किं वा कियद्वा माहात्म्यमुपपन्नमित्यर्थः। यतो य ईश्वरः कृतिभिः कथञ्चित्तत्साधनानुक्रमलब्धया भक्त्या कृतार्थैः

सद्यस्तत्क्षणमेव व्याप्य हृदि स्थिरीक्रियते । स एवात्र श्रोतुमिच्छद्भिरेव तत्क्षणमारभ्य सर्वदैवेति । तस्मादत्र काण्डत्रयरहस्यस्य प्रव्यक्तप्रतिपादनादेर्विशेषत ईश्वराकर्षिविद्यारूपत्वाच्च इदमेव सर्वशास्त्रेभ्यः श्रेष्ठम् । अत एवात्रेति पदस्य त्रिरुक्तिः कृता, सा हि निर्धारणार्थेति । अत एव नित्यमेतदेव सर्वैः श्रोतव्यमिति भावः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

श्रीभागवतस्य शास्त्ररूपत्वेन शास्त्राणां च जीवहिताहितप्रदर्शकत्वेन हिताहितयोश्चाधिकारिभेदाद्वादिभेदाच्च वैविध्ये सर्वमूलभूतहितस्य निश्चयाशक्तेर्विषीदतः श्रोतॄनानन्दयन्नस्मादेव सर्वतोऽपि सार एव पदार्थः सर्वैरेव प्राप्तो भवतीति स्पष्टमाह—धर्म इति । अत्र श्रीमति भागवते ईश्वर आश्रयतत्त्वं श्रीकृष्णः कृतिभिर्निर्मत्सरैरेव तत्पद्योक्तलक्षणाधिकारिभिरित्यर्थः । श्रवणादिभिः सद्य एव हृदि अवरुध्यते वशीक्रियत इति प्रेमा सूचितः । तस्य प्रेमैकवश्यत्वात् 'प्रणयरशनया धृताङ्घ्रिपद्म' इति । 'न रोधयति मां योग' इत्यादिभ्यश्च । ततश्च तत्क्षणादेव शुश्रूषुभिरिति । तत्क्षणमारभ्य तेषां श्रवणेच्छा च भवेदिति श्रद्धातः पूर्व्वमेव श्रवणे प्रेमा भवेत् । किं पुनः श्रद्धायां सत्यामिति भावः । 'सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत् कृष्णनाम' इतिवत् । तथा ह्युक्तमलौकिकपदार्थानां शक्तेरचिन्त्यत्वप्रस्तावे 'यत्र स्वल्पोऽपि सम्बन्धः सद्धियां भावजन्मन' इति ईश्वरे मनः स्थिरीक्रियते इत्येव परमपुरुषार्थ उच्यते । अत्र तु ईश्वरो मनसि अवरुध्यते इति ततस्तन्निर्गमनासामर्थ्यं तच्चावरोधनं सद्य एव विनापि श्रद्धयेति कापि श्रीकृष्णाकर्षणीयं महाविद्येति गम्यते । अत्र 'कृतिभि'रिति 'सद्य' इति पदाभ्यामकृतिभिस्त्वसद्यः किञ्चिद्विलम्बेनेति लभ्यते । 'भावुकाः पिबत' इति 'संसारिणां करुणया ह'इत्युक्तिभ्यामुभयेषामप्यत्राधिकारात् श्लेषेण तस्य श्रीकृष्णस्य क्षणादुत्सवाद् हेतोरिति प्रेममयेन हृदा अवरोधादेव तस्य परमानन्द उत्पद्यत इति तत्सुखतात्पर्येण प्रेम्णो लक्षणमप्युक्तम् । अतः किं वापरैः शास्त्रैस्तदुक्तसाधनैर्वा, न किमपि फलमित्यर्थः । एवमस्य शास्त्रस्य प्रयोजनवैशिष्ट्यमुक्तं, कर्तर्यपि वैशिष्ट्यमाह—महामुनिः श्रीभगवान् "स मुनिर्भूत्वा समचिन्तय"दिति श्रुतेः । तेन कृते प्रथमं चतुःश्लोकीरूपेण संक्षेपतः प्रकाशिते 'कस्मै येन विभाषितोऽयमतुल' इत्युक्तेस्ततः सम्पूर्ण एव प्रकाशिते । श्रवणादिभिः किमत्र ज्ञायते इत्यपेक्षायामाह—वेद्यमिति । वास्तवं आदिमध्यावसानेषु स्थिरं यद्वस्तु तन्निर्मत्सराणां वेद्यं विदितुं साक्षादनुभवितुं शक्यं, तेन समत्सराणां तु श्रवणाद्यवृत्त्या मत्सरापगम एवेति तैरपि नात्र प्रयत्नाभावः कर्तव्यः । तत्पक्षेऽपि वेद्यं वेदितुमर्हमित्यर्थलाभादिति भावः । तच्च भगवतः स्वरूपं नामरूपगुणादिवैकुण्ठादिधामानि च भक्ताश्च भक्तिश्चेति अन्यज्जगदादि सर्वमवास्तवमस्थिरं वस्त्वित्यर्थे लब्धे वैकुंठादिजगदाद्योर्वस्तुत्वेऽपि वास्तवत्वावास्तवत्वाभ्यां भेदश्च बोधितः । ततश्च मिथ्याभूतखपुष्पादिकमेवावस्तु इत्यायातं; वेदनेन किं स्यात् तत्राह—शिवदं प्रेमवत्पार्षदत्वमित्यनुसंहितं फलं तापत्रयविनाशो मोक्ष इत्यननुसंहितं फलञ्च दर्शितम् । अत्र किमनुष्ठेयमित्यपेक्षायामाह—धर्म इति । प्रकर्षेण उज्झितं कैतवं फलाभिसन्धिलक्षणं कपटं यस्मिन् स इति सकामकर्मयोगो व्यावृत्तः । प्रशब्देन मोक्षाभिसन्धिरपि निरस्त इति निष्कामकर्मशमदमाद्यङ्गज्ञानयोगाष्टाङ्गयोगाश्च व्यावृत्ताः । 'परम' इति सर्वश्रेष्ठत्वेन सर्वसुकरत्वे फलप्राप्तावप्यहेयत्वेन च शुद्धभक्तियोग एव उक्त इत्यभिधेयतत्त्वं विशिष्य दर्शितम् । 'स वै पुंसां परो धर्म' इत्यग्रिमोक्तेरत्र पुंमात्रस्यैवाधिकारित्वं ज्ञेयम् । तथा अत्रात्रेति पदस्य त्रिरुक्तिर्निर्द्धारणार्था । अत्रैवेश्वरोऽवरुध्यते, नान्यत्र; अत्रैव वास्तवं वस्तु वेद्यं, नान्यत्र; अत्रैव प्रोज्झितकैतवो धर्मः, नान्यत्रेत्यन्ययोगव्यवच्छेदः । अत्रावरुध्यत एवेत्यादिरयोगव्यवच्छेदकश्च ज्ञेयः ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

श्रीसर्वेश्वराय नमः । एवं मंगलमिषेण श्रीमद्भागवतविषयभूतस्य भगवतो लक्षणमुक्त्वाऽथ श्रीमद्भागवतशास्त्रस्य विषयप्रयोजनसम्बन्धाधिकारोऽन्यशास्त्रेभ्यः श्रैष्ठ्यं चाह—धर्म इति द्वाभ्यां श्लोकाभ्याम् । श्रीमद्भागवते भगवत्स्वरूपगुणादिवर्णनरूपा श्रीर्विद्यते यस्मिंस्तच्छ्रीमत् । भगवत इदं भागवतं तच्च तच्च तत् । एवंविधे भगवच्छास्त्रे महामुनिकृते महामुनिना सर्ववेदार्थविदा भगवदवतारेण पाराशर्येण मयैव कृते । कर्तृतोऽपि शास्त्रश्रैष्ठ्यकथनार्थमिदमुक्तं, न तु स्वप्रशंसार्थम् । परोत्कर्षासहनादिदोषवर्जितानां सताम् । निर्मत्सराणाम् प्रोज्झितकैतवः प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्स परमो धर्मो भक्तिलक्षणो वेद्यः । किंचात्र तापानामाध्यात्मिकाधिदैविकाधिभूतानामुन्मूलनं निर्नाशकं शिवदं मुक्तिदं तापत्रयोपलक्षितकार्यकारणरूपप्रकृतिसम्बन्धातिक्रमपूर्वकभगद्भावापत्तिलक्षणमोक्षप्रदं वस्तुलक्षणं श्रीकृष्णाख्यं तत्त्वं वेद्यम् । किंचात्र वास्तवं वस्तुनस्तस्यैव सम्बन्धि चेतनाचेतनात्मकं पदार्थद्वयं वेद्यम् । तत्र चेतनः पदार्थो ज्ञानस्वरूपो ज्ञानाश्रयः कर्तृत्वभोक्तृत्वादिधर्मवान् अणुपरिमाणको बद्धमुक्तादिभेदवान् जीवः, अचेतनपदार्थश्च प्राकृताप्राकृतकालभेदात्त्रिविधः । एवं चिदचिद्ब्रह्माख्यं तत्त्वत्रयं वेद्यमित्यर्थः । एवं कर्तृतोऽधिकारितो विषयतश्च शास्त्रश्रैष्ठ्यमुक्त्वा सद्य इष्टार्थप्रदत्वेनापि तद्दर्शयति—अत्र शुश्रूषुभिः श्रोतुमिच्छद्भिरेव पुण्यकृद्भिरीश्वरः श्रीकृष्णः सद्यो हृद्यवरुध्यते स्थिरीक्रियते । परैः शास्त्रैस्तदुक्तसाधनैर्वा किमवरुध्यते सद्यो नेत्यर्थः । किं चात्र पंचार्था अपि अनेनैव श्लोकेन प्रतिपादयितुं प्रतिज्ञाताः । तथा हि वस्तूपास्योऽर्थः, चेतन उपासक-

रूपोऽर्थः। कृपाफलरूपोऽर्थो भगवद्भावापत्तिलक्षणा मुक्तिः, चतुर्थो भक्तिरसः, पंचमोऽर्थो विरोधी, स च परशब्देन सूचितः। अन्यशास्त्राणि तदुक्तसाधनानि तदधिकारिणश्च भागवतधर्मेतत्फलादौ च विरोधिन इति भावः। ते चोक्ताः पूर्वाचार्येण— 'उपास्यरूपं तदुपासकस्य च कृपाफलं भक्तिरसस्ततः परम्। विरोधिनो रूपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पंचसाधुभि'रिति। अपि विषयस्तत्त्वत्रयं पंचार्थाश्च वाच्यवाचकभावः सम्बन्धः। निर्मत्सरोऽधिकारी मुक्तिः प्रयोजनमिति संक्षेपार्थः॥ २॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं बीजभावो निरूपितः। मध्यभावं निरूपयन् कल्पद्रुमत्वमाह—धर्मो ज्ञानं च साधनम्। भगवदाविर्भावः साध्यः, तदनु तत्र प्रवेशः फलम्। एतत् सर्वं भागवतादेव भवतीति विशिष्टकल्पद्रुमत्वं, विधिसंबंधो धर्मलक्षणम्। वेदश्च प्रमाणम्। स यज्ञात्मको धर्मः। आचारोऽपि धर्मः पौराणिकः। सत्यादयोऽपि धर्माः। तपःप्रभृतयश्च श्रवणादयश्च। तत्र यज्ञेषु पूर्वोक्तन्यायेन अतद्धेतोरपि फलसाधनतयोक्तरूपेण, स्वर्गादिपदभ्रमजननाद्वा कापट्यं संभवति। आचारेऽपि शुद्ध्यशुद्धी विधीयेते समानेष्वपि— वस्तुष्वित्यादिन्यायेन प्रवृत्तिसंकोचार्थं, गुणदोषौ विधीयेते, इति कापट्यम्। सत्यादिष्वपि व्यवहारस्य संनिपातत्वात् कापट्यम्। तपःप्रभृतिषु च कः क्षेमो निजपरयोः क्रियान्वाऽर्थः स्वपरद्रुहा धर्मेण 'कर्षयंतः शरीरस्थं भूतग्राममचेतस' इति वाक्यात् कापट्यम्। सर्वत्र विहितनिषेधात् कापट्यप्रतीतिः। न तथा श्रवणादिषु किंचित् कापट्यमस्ति। तद्धर्मकर्तृष्वपि कापट्याभावः प्रशब्दार्थः। प्रकर्षेण कैतवं उज्झितं यस्मात् स श्रवणादिधर्मो भागवत एव, परमश्चायं भगवद्धर्मत्वात्, परो मीयत इति भगवत्साक्षात्कार-हेतुत्वाद्वा परमः। कर्तृवैशिष्ट्यादपि धर्मोत्कर्षमाह—निर्मत्सराणां सतामिति। परोत्कर्षासहनं मत्सरो दोषः। कृपालुत्वादिधर्मसंबंधो गुणः। दोषाभावगुणयुक्ताः अस्य धर्मस्य संबंधिन इत्युत्कर्षः। अन्यत्र मात्सर्यादय स्पष्टा एव। ज्ञानमप्यत्रैवेत्याह—वेद्यमित्यादि। अत्र वास्तवं वस्तुवेद्यं यज्ञब्रह्मकालपुरुषा एव सर्वत्र वेद्या उक्ताः, तेषामपि वस्तुस्वरूपो भगवानत्र वै वेद्य उक्तः। तदेव हि वास्तवं रूपं सर्वेषाम्। किंच स्वप्रकाशस्यापि वेद्यता अत्रैव शास्त्रे सिद्धा नान्यत्र। अन्यत्र वेद्यस्यावास्तवत्वं, वस्तुनश्च वेद्यत्व-मिति स्थितिः। अविद्यावद्विषयत्वं च। भागवते तु मुक्तानामधिकारः। सर्वावेद्यस्यापि भगवतस्तदिच्छया प्राकट्ये वेद्यत्वं, अन्यत्र पर्यवसितबुद्धीनामेव तादृशे अवास्तवत्वप्रतीतिः। सर्वेषां वा वास्तवं रूपं वेद्यमिति। यज्ञादिषु कृतेषु ज्ञातेषु च न शांतपरमानंदा-वाप्तिः। पारलौकिकत्वाच्च तस्य फलस्य। सांप्रतं दुःखानुभवश्च। आत्मज्ञानेऽपि शांततापरं न परमानंदस्तस्यैव परमानंदत्वं शास्त्रैर्वि-प्रतिषिद्धं, भगवत्साक्षात्कारे तु अन्ततः सायुज्ये वा शांतता परमानंदः। तत्क्षणमेव तापत्रयस्योन्मूलनम्। तस्मादत्रैव फलं साधनं चेति ज्ञानोत्कर्षः। शब्दरसाभिज्ञानामपि इदमेवोत्कृष्टमित्याह। श्रीमति लक्ष्मीयुक्ते भागवते—दशरसयुक्त इति यावत्। काव्येष्व-प्येतच्छायारूपमस्ति। तथापि निंदितत्वं कर्तृदोषात्। तदत्र शंकितमपि नेत्याह—महामुनिकृत इति। वेदव्यासकृत इत्यर्थः। समाधा-वनुभूय कृतत्वात् समाधिभावार्थं 'महामुनिकृत'मित्युक्तम्। असाधारणमुपासनाकांडोत्कर्षमाह—मंत्रशास्त्रमुपासनाकांडः पंचरात्रं च। तत्र मंत्रशास्त्रे देवता स्वाधीना भवति। परमेश्वररूपा पंचरात्रेऽपि मंत्राधिष्ठानस्वरूपेणैव स्वाधीनता, तथा स्थानाधिष्ठानेष्वपि। साक्षात्पुराणपुरुषस्त्वत्रैव हृद्यवरुध्यते। अत एव परैर्भगवद्व्यतिरिक्तप्रतिपादितैर्भेदेन प्रतिपादितैर्वा किं नाकिंचिदपीत्यर्थः। वाशब्दस्त्वनादरे। अत्र तु ईश्वरः कर्तुमकर्तुमन्यथाकर्तुं समर्थः, अदृष्टकालादिबाधकं परिहृत्य कर्तुं, अदृष्टादिकृतं दूरीकर्तुं च भ्रांतेष्वपि भक्तेष्वन्यथाकर्तुं च समर्थ ईश्वरः। सद्य इति। भागवतश्रवणमात्रेण हृदयारूढो भवति। विचारचिंतनव्यतिरेकेणापि। अत्र प्रतिपादकानां महापुरुषत्वात् तद्वाक्यं दुर्बोधमिति बोधनप्रकारमाह—'कृतिभिः शुश्रूषुभि'रिति बुद्धेः कौशलकृतित्वं उक्तबोधो-पयोगिशुश्रूषा तु कथनोपयोगिनी। तदुभयसंपत्तौ तत्क्षणादेवावरुध्यत इत्यर्थः। अथवा भागवतस्योत्कर्षमाह—किंवा परैरिति। भागवतस्य उत्कर्षहेतुभिः अन्यैरुक्तैः 'अलं वे'त्यनादरे। अर्थतः शब्दतः उत्कर्षप्रकारबहवः संत्येव। तथाप्ययं महानुत्कर्षः। यद् भगवानेव सद्यो हृद्यवरुध्यते। कैः ? अत्र शुश्रूषुभिः। सा श्रवणेच्छा महाभाग्यैरेवेत्याह–कृतिभिः कुशलैः। भाषात्रयविरोधपरि-हारेण पदवाक्ययोर्भगवत्परता हि ज्ञातव्या। अन्यथा श्रुतं भवति। तत्क्षणादिति तदानीमेव भगवदर्थं प्रयत्नदर्शनात्। तस्मात् सर्वोत्कृष्टं भागवतमिति वस्तुनिर्देशः॥ २॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

धर्मः प्रोज्झितेत्यत्र मध्यमभावमिति। बीजफलयोरन्तरा वर्तमानं वृक्षभावमित्यर्थः। कण्ठतः कल्पद्रुमत्वानुक्तेः कथं तत्प्रत्ययः इत्यतस्तदुपपादयन्ति धर्म इत्यादिना। धर्म इति श्रवणादिरूपः। ज्ञानमिति। भगवज्ज्ञानम्। विशिष्टकल्पद्रुम-त्वमिति। कामिताधिकदानात् तथा। वेदश्चेति। चो वेदाविरुद्धसमुच्चायकः। पूर्वोक्तन्यायेनेति। सूरिमोहकत्वेन। उक्तरूपेणेति। विधिबोधितत्वरूपेण। भागवत एवेत्येवकारेण भारतेपि कैतवं बोधितम्। भारते भगवद्धर्माणामप्यतिफलवचनात् कैतवम्, अत्र तु न क्वापि प्ररोचने'ति सूक्ष्मटीकायां कथनात्। कृपालुत्वेत्यादि। एकादशे भगवता साधुलक्षणत्वेन तेषामेवोक्तत्वात्तथेत्यर्थः। अविद्यावद्विषयत्वमिति। वेद्यस्येत्यनुषज्यते। शिवपदं विवृण्वन्ति यज्ञादिष्वित्यादि। नन्वत्र व्यासैर्मत्कृतमित्येव कुतो नोक्तम्,

अत आहुः समाधावित्यादि। तथा च भगवत्प्रेरणया कृतत्वेन स्वस्यास्वातन्त्र्यज्ञापनाय तथोक्तिरिति भावः। उपासनाकाण्डोत्कर्षमिति। अत्र पञ्चमीतत्पुरुषः। स्थानाधिष्ठानेष्विति। मथुरादिष्वपि तत्त्वाविष्टत्वादिरूपेणैव[1] स्वाधीनतेत्यर्थः। प्रतिपादकानामिति। ब्रह्मनारदादीनाम्। वस्तुनिर्देश इति। मङ्गलरूप इत्यर्थः॥ २॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु धर्मज्ञानोपासनाप्रतिपादकानां ग्रन्थानां बहूनां विद्यमानत्वात् किमर्थोऽस्यारम्भः किमर्थं चास्य श्रवणमिति श्रोतृप्रवृत्तिप्रतिबन्धकरूपायाः शङ्काया निरासाय श्रोतृप्रवर्त्तनाय चास्य श्रीमद्भागवतस्य काण्डत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं च विषयप्रयोजनसम्बधाधिकारिरूपमनुबन्धचतुष्टयं च दर्शयति—धर्म इति। अत्र श्रीमद्भागवते परमः शास्त्रान्तरोक्तधर्मेभ्य उत्कृष्टो धर्मो निरूप्यते इति शेषः। कथमेतस्योत्कृष्टत्वमित्यपेक्षायामाह—प्रोज्झितकैतव इति। प्रकर्षेण उज्झितं निराकृतं कैतवं कापट्यं परद्रोहफलाभिसन्ध्यादिलक्षणं यस्मिन् सः, श्रवणादिरूपो धर्म इत्यर्थः। यज्ञतपःप्रभृतिधर्मे तु परद्रोहादिकापट्यमस्ति 'कः क्षेमो निजपरयोः कियान् वाऽर्थः स्वपरद्रुहा धर्मेण।' 'कर्षयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥' इत्यादौ निन्दाश्रवणात्। प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः। अत्र प्रतिपाद्यानां श्रवणकीर्त्तनादिलक्षणानां धर्माणां बहुत्वेऽपि भगवत्स्वरूपप्राप्तिलक्षणफलैक्याद्धर्म इत्येकवचनम्। तथाच मन्वादिधर्मशास्त्रैरस्य न गतार्थत्वं तेषां संसारहेतुकाम्यधर्मप्रतिपादनप्रधानत्वादिति भावः। श्रीमत्त्वं च नानाविधरसव्यञ्जकमधुरयथार्थशब्दवत्त्वं तेनापि न ग्रन्थान्तरेणास्य गतार्थता, तत्र श्रीमत्त्वाभावात्। अधिकारितोऽपि धर्मस्य परमत्वमाह—निर्मत्सराणां सतामिति। परोत्कर्षासहनं मत्सरो दोषस्तद्रहितानां सतां साधूनां—ते साधवः 'समचित्ताः प्रशान्ता विमन्यवः' इत्याद्युक्तकृपालुत्वादिगुणवतां सम्बन्ध्ययं, धर्म इत्यर्थः। यदि काम्यधर्मे तु मत्सरिण एवाधिकारिण इति स्पष्टमेवेति भावः। एवं कर्मकाण्डविषयेभ्यः शास्त्रेभ्योऽस्य श्रैष्ठ्यमुक्तम्। अथ ज्ञानकाण्डविषयेभ्यः शास्त्रेभ्योऽप्यस्य श्रैष्ठ्यमाह—वेद्यमिति। वास्तवं जगज्जन्मादिकारणत्वेन पूर्वोक्तं परमार्थभूतमेव वस्त्वत्र ग्रन्थे वेद्यं श्रोतॄणां वेदनार्हं, न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं प्राकृतं वस्त्वित्यर्थः। तद्वेदने च किं फलमित्यपेक्षायां परमानन्दावाप्तिर्निखिलदुःखनिवृत्तिश्चेत्याह—शिवदमिति, परमानन्दप्रदमित्यर्थः। आध्यात्मिकादितापत्रयोन्मूलनं च आध्यात्मिको ज्वरशोकादिजनितः, आधिदैविको ग्रहावेशादिजनितः, आधिभौतिकः शीतोष्णव्याघ्रसर्पादिजनितश्च तापः। एवं च यत्परमपुरुषार्थभूतं शुद्धं तत्त्वं वासुदेवाख्यं चतुर्लक्षणमीमांसया विचार्य मुमुक्षुभिस्त्रैवर्णिकैः परमहंसपरिव्राजकैरेव कथञ्चिद्वेदनीयं तदत्र स्त्रीशूद्रादिभिरपि वेदितुं शक्यं, स्त्रीशूद्रादीनां चतुर्लक्षणमीमांसाश्रवणेऽनधिकारस्य तत्रैव व्युत्पादितत्वात्। मन्दमतीनां च त्रैवर्णिकानामधिकारसत्त्वेऽपि तादृशदुरूहतर्केष्वप्रवेशात्, इह त्वलौकिकरसव्यञ्जकैरेव शब्दैः कोमलोक्त्या भूयोभूयस्तत्प्रतिपादनात्। मन्दमध्यमोत्तमानां सर्वेषां तद्वेदनं भवतीति महानुत्कर्षोऽन्यग्रन्थादस्य सिद्ध्यतीति भावः। ननु तथाप्याधुनिकत्वादन्यकविप्रणीतकाव्यवदप्रमाणं स्यादित्याशङ्क्याप्तकर्तृकत्वेनाप्यस्य श्रैष्ठ्यमाह—महामुनिकृत इति। भगवदवतारत्वान्महान् पूज्यो भगवान् बादरायणः, स एव सततं मननशीलत्वान्मुनिस्तेनापि नारदोपदेशमासाद्य कृते रचिते इत्यर्थः। यद्वाऽस्य श्लोकस्य व्यासवचनत्वान्महामुनिरत्र भगवानेव, तेन सङ्क्षेपतो ब्रह्मण उपदिष्टत्वात्तत्कृते इत्यर्थः। तथाच नाप्रामाण्यशङ्कालेशोऽपि किन्तु प्रमाणतमत्वमेवास्य 'सर्ववेदेतिहासानां सारं सारं समुद्धृतम्' इति वक्ष्यमाणत्वादिति भावः। एवं ज्ञानकाण्डविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्त्वा उपासनाकाण्डविषयेभ्यः शास्त्रेभ्योऽप्यस्य श्रैष्ठ्यमाह—किंवा परैरित्यादिना। परैरेतद्भिन्नैर्नारदपञ्चरात्रादिभिर्ग्रन्थैः किंवा-वेति कटाक्षे न किञ्चिदपि प्रयोजनमित्यर्थः। ननु कथं तेषां निष्प्रयोजनत्वमित्यपेक्षायामाह—ईश्वर इत्यादिना। ईश्वरः प्रथमश्लोकोक्तो जगज्जन्मादिकर्ता भगवान् वासुदेवः अत्र भागवते शुश्रूषुभिः एतद्ग्रन्थश्रवणेच्छावद्भिरेव हृद्यवरुद्ध्यते प्रेमरसनया बद्ध्यते, किं पुनः श्रवणपरैः। तदपि न विलम्बेन किन्तु सद्यस्तत्रापि तत्क्षणादेवेत्यन्वयः। सद्यस्तत्क्षणादिति पदद्वयोपादानमतिशैघ्र्यसूचनाय। ईश्वरस्य स्वतन्त्रस्यावरोधनं नाम स्वाधीनतयाऽवस्थापनं, तदपि न विस्तृते देशे किन्तु स्वहृदि अतिसंकुचिते स्थले, तदपि श्रवणेच्छामात्रेणैवातिशीघ्रं वेति कियानतिशयोऽस्य वक्तुं शक्य इत्यनेनैव प्रयोजनसिद्धेरन्येषां निष्प्रयोजनत्वं भवत्येवेति भावः। तर्हि सर्वे इदमेव कुतो न शृण्वन्ति तथापि ग्रन्थान्तरस्य वैयर्थ्यं स्यादित्याशङ्क्याह—कृतिभिरिति। पुण्यवद्भिः कुशलैरित्यर्थः। पुण्यैर्विनेतच्छ्रवणेच्छैव नोदेतीति पुण्यविधुरा ग्रन्थान्तरं शृण्वन्तीति न तद्वैयर्थ्यमिति भावः। अत्रानेकजन्मानुष्ठितसुकृतत्वेन मत्सरादिदोषरहितः शुद्धान्तःकरणोऽधिकारी, साधनतया श्रवणादिधर्मस्तत्प्राप्यतया सच्चिदानन्दात्मको भगवांश्च विषयः, निखिलदुःखनिवृत्तिपूर्वकपरमानन्दावाप्तिश्च फलापरपर्यायं प्रयोजनम्, ग्रन्थस्य विषयेण प्रतिपाद्यप्रतिपादकभावः प्रयोजनेन साध्यसाधनभावश्च सम्बन्ध इत्यनुबन्धचतुष्टयं दर्शितम्॥ २॥

---

१. तत्त्वादिरूपेणेति पाठः।

हिन्दी अनुवाद

महामुनि व्यासदेवके द्वारा निर्मित इस श्रीमद्भागवत महापुराण में मोक्षपर्यन्त फलकी कामनासे रहित परम धर्मका निरूपण हुआ है । इसमें शुद्धान्तःकरण सत्पुरुषोंके जाननेयोग्य उस वास्तविक वस्तु परमात्माका निरूपण हुआ है, जो तीनों तापोंका जड़से नाश करनेवाली और परम कल्याण देनेवाली है । अब और किसी साधन या शास्त्रसे क्या प्रयोजन ? जिस समय भी सुकृती पुरुष इसके श्रवणकी इच्छा करते हैं, ईश्वर उसी समय अविलम्ब उनके हृदयमें आकर बन्दी बन जाता है ॥ २ ॥

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयतेऽपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह । निगमेति । निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात्तस्य फलं भागवतं नाम तत्तु वैकुण्ठगतं नारदेनानीय मह्यं दत्तम् । मया च शुकस्य मुखे निहितम् । तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णम् । न तूच्चनिपातेन स्फुटितमित्यर्थः । एतच्च भविष्यदपि भूतवन्निर्दिष्टम् । अनागताख्यानेनैवास्य शास्त्रस्य प्रवृत्तेः । अत एवामृतरूपेण द्रवेण संयुतम् । लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धम् । अत्र शुको मुनिः । अमृतं परमानन्दः । स एव द्रवो रसः । "रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति" इति श्रुतेः । अतो हे रसिका हे रसज्ञास्तत्रापि भावुका हे रसविशेषभावनाचतुराः । अहो भुवि गलितमित्यलभ्यलाभोक्तिः । इदं भागवतं नाम फलं मुहुः पिबत । ननु त्वगष्ट्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यं तत्राह । रसं रसरूपम् । अतस्त्वगष्ट्यादेर्हेयांशस्याभावात्फलमेव कृत्स्नं पिबत । अत्र च रसतादात्म्याविवक्षया रसवत्त्वस्य विवक्षितत्वाद् गुणवचनेऽपि रसशब्दे मतुपः प्राप्त्यभावात्तेन विनैव रसं फलमिति सामानाधिकरण्यम् । तत्र फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं, रसमित्युक्तेऽपि गलितस्य रसस्य पातुमशक्यत्वात्फलमिति द्रष्टव्यम् । नच भागवतामृतपानं मोक्षेऽपि त्याज्यमित्याह । आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य । नहीदं स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव । वक्ष्यति हि । "आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः" इति ॥ ३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

कल्पितं संकल्पितं राति ददातीति कल्पतरुः । पृषोदरादित्वादार्षत्वाद्वा कल्पितपदस्थेकारस्याकारः । यद्वा कल्पमतीव समर्थं चतुर्वर्गं तरति ददातीति कल्पतरुः । तस्य स्वाश्रितेभ्यो वांछितविविधपुरुषार्थरूपफलदायित्वेपि यत्साहजिकं तदिदं भागवतं फलं श्लेषेण भगवत्स्वामिकमिदं तेनैव स्वभक्तेभ्यो दत्तमिति तान्विना न कस्याप्यत्र स्वत्वारोपे शक्तिरिति भावः । गलितमिति । वृक्षपक्वतया स्वयमेव पतितं न तु बलात्पातितमिति । स्वादु संपूर्णत्वं न चोच्चनिपातेन स्फुटितमित्यर्थ इति । नाप्यनतिमधुरं चेत्याह । शुकेति । परमोर्ध्वचूडातः श्रीनारायणाद् ब्रह्मशाखायां ततोऽधस्तान्नारदशाखायां ततोऽधस्ताद्व्यासशाखायां ततः शुकमुखं प्राप्यातपान्मध्विवामृतद्रवं संयुतं शुकेनैव तेन स्वचंच्वाऽमृतनिष्क्रमणार्थं द्वारमपि कृतम् । अथ च तेन स्वादितत्त्वादतिमधुरं ततः सूतादिशाखातः शनैः शनैः पतनादखंडितं तेन गुरुपरंपरां विना स्वबुद्धिबलेनास्वादने श्रीभागवतस्याखंडितत्वे पानाशक्तिश्च सूचिता । अनागताख्यानमनादित्वं तेनैवेदं शास्त्रं प्रवृत्तं न तु व्यासदेवेन रचितं व्यासस्य प्राकट्यकर्तृत्वमेव नतूत्पादकत्वं कल्पितत्वे तु प्राकृतगाथावत्संसारनिस्तारकत्वमप्यस्य न सेत्स्यति । "कृतवान्द्वापरस्यांते" इत्यादौ करणं प्राकट्यकरणमित्येवं व्याख्येयम् । श्रीभगवतापि सृष्ट्यादौ ब्रह्मणे स्वस्मिन्नित्यस्थितमेवोपदिष्टं न तु कल्पयित्वा साक्षाद्वेदरूपत्वादस्य "पुराणं ब्रह्मसंमितम्" इत्याद्युक्तेर्ब्रह्मसंमितत्वं ब्रह्मण एव संपनीपद्यते । न त्वन्यवस्तुनस्तथात्वे रंगस्य हेमसाम्यं शूद्रस्य ब्राह्मणसाम्यं वैश्वामित्रवर्तुलाकारचरहीत्याख्यातस्य गोधूमसाम्यञ्च स्यादतोऽनाद्येतत्पुराणमेतच्च विशेषत आद्यपद्यव्याख्याशत्यां मत्कृतायां भागवतपक्षव्याख्याने वर्णितमस्तीत्युपरम्यते । किञ्च "पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ । त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ अंगानि चतुरो वेदाः पुराणन्यायविस्तरम् । मीमांसा धर्मशास्त्रञ्च प्रतिगृह्य मया कृतम् ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ॥ व्यासरूपमहं कृत्वा संहरामि युगे युगे । चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥ तथाष्टादशधा कृत्वा भूर्लोकेस्मिन्प्रकाश्यते । अद्यापि देवलोकेस्मिञ्शतकोटिप्रविस्तरम् ॥ तदर्थोत्र चतुर्लक्षं संक्षेपेण प्रकीर्तितम्" ॥ इति मात्स्यपञ्चाशत्तमाध्याये मनुं प्रति श्रीमत्स्योक्तेः

पुराणानामनादित्वमेव। अत्राक्षिपति। नन्विति। अष्टिः सावरणबीजम्। आदिना तदंतस्तृणादिग्रहः। अतो रसरूपत्वात्। तादात्म्यं ताद्रूप्यम्। ननु रसवदिति मतुपा भाव्यं रूपवान्घट इतिवत्। अन्यथा फलसामाधिकरण्यं न स्यात्तत्राह। अत्र चेति। अत्र प्रकृते रसवत्त्वस्याविवक्षितत्वान्मतुपः प्राप्तिरेव नास्तीति तं मतुपं विनैव रसतादात्म्यविवक्षया फलसामानाधिकरण्यमित्यर्थः। ननु मतुपो लोपेनापि तद्वत्त्वविवक्षया नीलो घट इतिवत्सामानाधिकरण्यसंभवात्किमर्थं मतुपः प्राप्त्यभाव उच्यतेऽत आह। अगुणवचनेपीति। गुणं मुक्त्वा गुणिनि ये पर्यवस्यन्ति शब्दास्तेभ्यो मतुपो लोपो भवति। रसशब्दस्तु गुणवाची न तु गुणिनि पर्यवसायी रसः शर्करेत्यादिप्रयोगदर्शनात्। मतुपो लोपेन सामानाधिकरण्यासंभवात्साधुत्वार्थं मतुपो प्राप्तिरेवेत्यर्थः। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति। अगुणं गुणभिन्नं वक्तीत्यगुणवचनस्तस्मिंस्तथा। तत्र स्वीकृतेपि सामानाधिकरण्ये हेयांशः त्वगादिः। तन्निवृत्त्यर्थं हेयांशनिवृत्तये। भागवतामृतपानस्य सदा सेव्यत्वमाह। न चेति। मोक्षः सालोक्यादिर्जीवन्मुक्तत्वं वा तमभिव्याप्य तत्र तत्र भगवल्लीलागानप्रसिद्धेः। यद्वा लयः रसास्वादजनितः प्रलयोऽष्टमः सात्त्विकस्तत्पर्यंतम्। पिबतेत्यनेन पाने स्तंभाद्याः सात्त्विका भवन्तीति ज्ञेयम्। तत्र प्रलये सति पानस्यास्पष्टत्वात्। यद्यपि विरामस्तदपि पुनः प्रबोधे सति पुनरपि प्रलयपर्यन्तं पिबत नतु त्यजतेति मुहुरिति पदम्। यद्वा मुहुरिति पीतस्यापि पुनः पाने स्वादाधिक्यमेवेत्यहो इत्यतिविस्मये। रसिकाः हे रसज्ञा इति भक्तानामेव जातरतित्वाद्रतेरेव स्थायिभावत्वात्स्थायिन एव रस्यमानत्वान्नात्र ज्ञानिकर्मयोगिनां कोपि दाय इति भावः। हे भावुकाः! तत एव यूयमेव कुशलिनोऽन्येऽमंगला एवेति भावः। भावका इति पाठे भावकत्त्वव्यापारवन्तः। तथा हि भावकत्त्वव्यापारेण भाव्यमानः स्थायी भुज्यते इति भट्टनायकमतम्। अत्र श्लेषेण भगवतः स्वरूपं रस एव भवति। तथाहि तैत्तिरीयकोपनिषदि "ब्रह्मविदाप्नोति परम्" इत्युक्त्वा ब्रह्मणः सकाशादाकाशादिक्रमेणान्नमयविराट्पुरुषपर्यन्तां सृष्टिमुक्त्वा तस्य चान्तरतः क्रमेण "तस्माद्वा एतस्मात्" इत्यादिनान्नमयप्राणमयमनोमयविज्ञानमयानन्दमया आम्नायन्ते। तेष्वप्यानन्दमयस्यैव "आनन्दमयोऽभ्यासात्" इत्यनेन ब्रह्मत्वं मतभेदे च तत्पुच्छस्यैव। "आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्यनेन ब्रह्मत्वं ब्रह्मण एव प्रतिष्ठात्वं च प्रतिपादितम्। तदनन्तरं च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति" इति श्रुतेः। तत्र श्रुतौ च स इत्यनेन प्रक्रांत आनन्दमयो वा तत्पुच्छं ब्रह्म वा न परामृश्यते पृथक्पृथगुत्तरोत्तरार्थप्रकर्षप्रतिपादिकास्वन्नमयादिश्रुतिष्वन्ते तस्याः पाठात्प्रक्रमभंगापत्तेः। ततश्च तस्या अयमर्थः। स प्रसिद्धो वै निश्चितं रस एव आनंदमयात्तथा ब्रह्मतोऽप्यांतरं प्रकृष्टं "ब्रह्मणो हि प्रतिष्ठाहम्" इत्यनेन श्रीकृष्णस्यैव ब्रह्मतः प्रकृष्टत्वं "मल्लानामशनिः" इत्यत्र तस्मिन्नेव यौगपद्येन सर्वरसस्य साक्षादुपलब्धेस्तत्र च शृङ्गारादिसर्वरसकदम्बमूर्तिर्भगवान्स्तदभिप्रायेण बभाविति श्रीस्वामिचरणानां व्याख्यानाच्च तस्यैव सर्वरसरूपत्वंचातः श्रीगीताश्रीभागवताभ्यामेव रसशब्देन श्रीकृष्णो व्याख्यातः। तमेवायं विज्ञानमयो लब्ध्वांनदपरावधिकाष्ठां प्राप्नोति "सैषानंदस्य मीमांसा भवति" इति तदुत्तरश्रुत्या रस एव तस्मिन्नानंदविचारपर्यवसानज्ञापनात्। यद्वाऽयमानंदमयोपि "द्विजात्मजा मे युवयोर्दिदृक्षुणा" इति "विस्मापनं स्वस्य च सौभगर्द्धेः इति" इत्यादिभ्यस्तमेव लब्ध्वानंदी भवतीति। ततश्च तं रसं श्रीकृष्णं फलं निगमकल्पतरोः सकाशाद्गलितम्। न तु तत्र साक्षात्स्थितमिति तदर्थं निगमो नान्वेष्टव्यः, किन्तु शुकमुखमेवेत्याह। शुकमुखादिति फलमिदमतिस्वादु ज्ञात्वा तत आकृष्य व्यासेन स्नेहात्स्वपुत्रमुख एव निहितमिति संभाव्यत इति भावः। किंवा शुकमुखादिति हेतौ पंचमी। येषामहं प्रिय आत्मेत्यादि शुकवाक्यप्रामाण्याद् भुवि व्रजभूमावुत्पद्य हे भावुका रसिकाः प्रियाः सत्यः भागवतं भगवत्स्वरूपभूतं रसमाधुर्यं पिबत। यद्वा भगवतः श्रीकृष्णस्य रसमालयं लयः श्लेषालिंगनमिति यावत्। 'ली श्लेषणे' इति धातुपाठात्। तमभिव्याप्य एतदभिप्रायेण न्यायरत्नाकरेऽप्युक्तं "परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः। विचिनुत भवनेषु बल्लवीनामुपनिषदर्थमुलूखले निबद्धम्॥" इति। अमृतोऽनश्वरो यो द्रवो मनोनयनद्रौत्यं तत्संयुतं यथा स्यात्तथा पिबतेत्यधरपानं सूचितमिदमेव निगमकल्पतरोर्गलितं परिपक्वं फलमिति फलतो गोपीजनानुगतिमयी रागानुगाख्या भक्तिरादिष्टा। यतो निगमोपि तल्लोभादेव बृहद्वामनदृष्टां तादृशीं भक्तिं विधाय व्रजभूमावुत्पद्य शतसहस्रशो गोप्यो भूत्वा तदधरामृतरसं पपाविति वेदस्तुतौ दृष्टमिति अतिरहस्योर्थः। "ब्रह्मणो हि प्रतिष्ठाहम्" इत्येतत्केचिदन्यथा व्याचक्षते। सत्यं तदप्राकरणिकत्त्वात्कल्पितत्वादयुक्तमेव मंतव्यं किं त्वेवमेव युक्तम्। तथाहि "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च। शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च॥" इति। अनयोरर्थः। ननु त्वद्भक्त्या कथं निर्गुणब्रह्मप्राप्तिः सा तु अद्वितीयतदेकानुभवेन भवेत्तत्राह। ब्रह्मणो हीति। हि यस्मात्परमप्रतिष्ठात्वेन प्रसिद्धं श्रुतौ यद्ब्रह्म तस्याप्यहं प्रतिष्ठा प्रतिष्ठीयतेऽस्मिन्निति प्रतिष्ठाश्रयः। अन्नमयादिषु श्रुतिषु सर्वत्रैव प्रतिष्ठापदस्य तथार्थत्वात्। अत एवामृतस्य मोक्षस्याप्यहं प्रतिष्ठा। तस्य लक्षणया स्वर्गादिपरत्वं वारयति। अव्ययस्येति। तथा शाश्वतस्य साधनफलदशयोरपि स्थितस्य धर्मस्य भक्त्याख्यस्याहं प्रतिष्ठा तथा तत्प्राप्यस्यैकांतिकस्य सुखस्य प्रेम्णश्च प्रतिष्ठाऽतः सर्वस्यापि मदधीनत्वात्कैवल्यकामनया कृतेन मद्भजनेन ब्रह्मणि लीयमानो ब्रह्मधर्ममपि प्राप्नोतीति। अत्र श्रीविष्णुपुराणमपि प्रमाणम्। "शुभाश्रयः सचित्तस्य सर्वगस्य तथात्मनः" इति! व्याख्यातं च तत्रापि स्वामिचरणैः सर्वगस्यात्मनः परब्रह्मणोप्याश्रयः प्रतिष्ठा। तदुक्तं भगवता "ब्रह्मणो हि

प्रतिष्ठाहम्'' इति। यथा विष्णुधर्मेपि नरकद्वादशीप्रसंगे ''प्रकृतौ पुरुषे चैव ब्रह्मणोपि च स प्रभुः। यथैक एव सर्वात्मा वासुदेवो व्यवस्थितः ॥'' इति। तत्रैव मासर्क्षपूजाप्रसंगे ''यथाच्युतत्वं परतः परस्मात्स ब्रह्मभूतात्परतः परात्मा। तथाच्युतत्वं कुरु वांछितं तन्ममापदं चापहराप्रमेय ॥'' इति। तथाहि हरिवंशेपि विप्रकुमारानयनप्रस्तावेऽर्जुनं प्रति भगवद्वाक्यं ''तत्परं परमं ब्रह्म सर्वं विभजते जगत्। ममैव तद्धनं तेजो ज्ञातुमर्हसि भारत॥'' इति। ब्रह्मसंहितापि ''यस्य प्रभा प्रभवतो जगदंडकोटिकोटिष्वशेषवसुधादि-विभूतिभिन्नम्। तद्ब्रह्म निष्कलमनंतमशेषभूतं गोविंदमादिपुरुषं तमहं भजामि॥'' इति। अत एव श्रुतिश्च गोपालतापिनी ''योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपालस्तस्मै वै नमो नमः'' इति। संदर्भस्तु त्रिकांडतोपि श्रैष्ठ्ये तदीयावयवसारत्व-निर्देशेन दोषपरिहारपूर्वकं कारणांतरं योजयन्पूर्वतोपि वैशिष्ट्यमाह। निगमेति। हे भावुकाः परममंगलायनाः ये रसिका भगवत्प्रीतिरसज्ञा इत्यर्थः। ते यूयं वैकुंठात् क्रमेण भुवि पृथिव्यामेव गलितमवतीर्णं निगमकल्पतरोः सर्वफलोत्पत्तिभुवः शाखो-पशाखाभिर्वैकुंठमप्यध्यारूढस्य वेदरूपतरोर्यत्खलु रसरूपं श्रीभागवताख्यं फलं तद् भुव्यपि स्थिताः पिबत आस्वाद्यांतर्गतं कुरुत। श्रीभागवताख्यं यच्छास्त्रं तत्खलु रसवदपि रसस्यैकमयताविवक्षया रसशब्देन निर्दिष्टं भागवतशब्देनैव तस्य रसस्यान्यदीयत्वं व्यावृत्तं भागवतस्य तदीयत्वाक्षेपात्। शब्दश्लेषेण च भगवत्संबंधिरसमिति गम्यते। स च रसो भगवत्प्रीतिमय एव। ''यस्यां वै श्रूयमाणायाम्'' इत्यादिफलश्रुतेः। यन्मयत्वेनैव श्रीभगवति रसशब्दः प्रयुज्यते ''रसो वै सः'' इति स एव च प्रशस्यते ''रसं ह्येवायं लब्ध्वानंदी भवति''। अत्र रसिका इत्यनेन प्राचीनर्वाचीनसंस्कारणामेव तद्विज्ञत्वं दर्शितम्। गलितमित्यनेन रसस्य सुपाकिमत्त्वेनाधिकस्वादुत्वमुक्त्वा शास्त्रपक्षे सुनिष्पन्नार्थत्वेनाधिकस्वादुत्वं दर्शितं रसमित्यनेन फलपक्षे हेयांशरहितत्वम्। भागवतमित्यनेन सत्स्वपि फलांतरेषु निगमस्य परमफलत्वेनोक्त्या तस्य पुरुषार्थत्वं दर्शितम्। एवं तस्य रसात्मकस्य फलस्य स्वरूपतोऽपि वैशिष्ट्ये सति परमोत्कर्षबोधनार्थं वैशिष्ट्यांतरमाह शुकेति। अत्र फलपक्षे कल्पतरुवासित्वादलौकिकत्वेन शुकोप्य-मृतमुखोभिप्रेयते। ततस्तन्मुखं प्राप्य यथा तत्फलं विशेषतः स्वादु भवति यथा परमभागवतमुखसंबंधं भगवद्गुणमपि ततस्ता-दृशपरभागवतवृंदमहेंद्रश्रीशुकदेवमुखसंबंधं किमुतेति भावः। अत एव परमस्वादुपरमकाष्ठाप्राप्तत्वात्स्वतोऽन्यतश्च तृप्तिरपि न भविष्यतीत्यालयं मोक्षानंदमभिव्याप्य पिबतेत्युक्तम्। तथा च वक्ष्यते परिनिष्ठितोपीत्यादि। अनेनास्वाद्यांतरवन्नेदं कालांतरे-प्यास्वादकबाहुल्येपि व्ययिष्यतीति दर्शितम्। यद्वा तत्र तस्य रसस्य भगवत्प्रीतिमयत्वेपि द्वैविध्यं तत्प्रीत्युक्तत्वं तत्प्रीतिपरिणामत्वं चेति। यथोक्तं द्वादशे ''कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम्। वैराग्यविज्ञानविवक्षया विभो वचोवि-भूतीर्न तु पारमार्थ्यम्॥ यत्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः। तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिम-भीप्समानः॥'' इति। ततः सामान्यतो रसत्वमुक्त्वा विशेषतोऽप्याह अमृतेति। अमृतं तल्लीलारसः 'हरिलीलाकथाव्रातामृतानंदि-तसत्सुर' इति द्वादशे श्रीभागवतविशेषणात्। लीलाकथारसनिषेवणमिति तस्यैव रसत्वनिर्देशाच्च। सत्सुरमिति। संतोऽत्रा-त्मारामाः इत्थं सतां ब्रह्मसुखानुभूत्येत्यादिवत् त एव सुरा अमृतमात्रस्वामित्वात्। अत्रामतद्रवपदेन लीलारसस्य सार एवोच्यते। तस्मादेवं व्याख्येयम्। यद्यपि प्रीतिमयरस एव श्रेयांस्तथाप्यस्त्यत्र विवेकः। रसानुभविनो यत्र द्विविधाः। पिबतेत्युपदेश्याः स्वतस्तदनुभविलीलापरिकराश्च। अत्र लीलापरिकरा एव रससारमनुभवंति अंतरंगत्वात्। परे तु यत्किंचिदेव बहिरंगत्वात्। यद्यप्येवं तथापि तदनुभवमयरससारं स्वानुभवमयेन रसेनैकतया विभाव्य पिबत। यतस्तादृशतया तादृशशुकमुखाद्गलितं प्रवाह-रूपेण वहंतमित्यर्थः। तदेवं भगवत्प्रीतेः परमरसतापत्तिः शब्दोपात्तैव। अन्यत्र च सर्ववेदांतसारमित्यादौ तद्रसामृततृप्तस्येत्यादि। एवमेवाभिप्रेत्य भावुका इत्यत्र रसविशेषभावनाचतुरा इति स्वामिचरणैर्व्याख्यातम्। तथा ''स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातु-मिच्छेन्न रसग्रहो जनः'' इत्यादि। अत्र वैकुंठस्थितकल्पतरुफलस्य रसमात्ररूपत्वं च यथा हयशीर्षपंचरात्रे पञ्चतत्त्वनिरूपणे ''द्रव्यतत्त्वं शृणु ब्रह्मन्प्रवक्ष्यामि समासतः। सर्वभोगप्रदा यत्र पादपाः कल्पपादपाः॥ गंधरूपं स्वादुरूपं द्रव्यं पुष्पादिकं च यत्। हेयांशा-नामभावाच्च रसरूपं भवेच्च तत्॥ त्वग्बीजं चैव सर्वेषां हेयांशं किल यद्भवेत्। सर्वं तद्भौतिकं विद्धि न ह्यभूतमयं हि तत्॥ रसवद्भौतिकं द्रव्यमत्र स्याद्रसरूपकम्'' इति। अत्र वैकुंठे इति तत्प्रकरणलब्धम्। ''द्रुतविलंबितमाह नभौ भरौ'' इति लक्षणवत्त्वा-दिदं छंदो द्रुतविलंबितं नामेति॥ हे भावुकाः कल्याणेप्सवः ''भावुकं भविकं भव्यम्''। इत्यमरः। भावुकमस्ति प्राप्यत्वेन येषां ते भावुकाः। मत्वर्थीयोच्। पुनर्हे रसिका रसज्ञाः। यूयं भुवि अमृतं मोक्षस्तस्य द्रवः प्राप्तिस्तेन संयुतं युक्तं विप्रकुलं पिबत आदरेण सेवध्वं यद्वा ''वन संभक्तौ'' इति धातुरार्षत्वाददादिकोत्र बोध्यस्तस्य लोटो मध्यमपुरुषबहुवचनेऽपि पूर्वमिदं रूपं अनु-नासिकस्य लोपः। इह सूत्रे वनतेरपि गृहीतत्वात्। ''वष्टि भागुरिः'' इति अप्युपसर्गाकारलोपः। ''भूत्वा द्विला द्विजवरस्त्वं वैमामुपेष्यसि केवलम्'' इति श्रीकृष्णेन मुचुकुंदं प्रत्युक्तेः। विप्रदेहस्यैव मोक्षहेतुत्वात्। किं भूतम् अमृतद्रवसंयुतं ? शुकः श्रीशुकः मुखं प्रधानं येषु ते शुकमुखा योगीश्वरा नारदादयः तैरत्यते सातत्येन प्राप्यते इति शुकमुखात् ''अत सातत्यगमने'' अतः क्विप्। नारदेन कदाचित्सत्यभामादत्तः कृष्णः सदा ब्राह्मणदेहो मे भवत्विति प्रार्थितस्तथेत्युच्चारयित्वा मुक्त इति प्रसिद्धं हरिवंशे। पुनः निगमो वेदः स एव कल्पतरुस्तस्य फलं फलमस्त्यमिन्निति फलम्। मत्वर्थीयोच्। वेदफलं चाध्ययनाध्यापनादि। तद्विप्रकुलेऽस्त्ये-वेति भावः। पुनः किंभूतं भगवन्तमुपास्ते इति भागवतस्तं ''किमु मत्कलया पुनः'' इति श्रुतदेवं प्रति श्रीमुखोक्तेः। पुनः किम्भूतं

रस आनंदो मीयते प्राप्यतेऽनयेति रसमा सरस्वती तस्या आलयं स्थानम्। पुनः किंभूतं 'गॄ विज्ञाने' गीर्य्यते ज्ञायते परतत्त्वमनेनेति गरो ज्ञानं तज्जातमस्येति गरितं रलयोरैक्याद्गलितमिति। अहो अद्भुतेऽव्ययं तथा च "श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्यर्थो ध्वनितोऽत्रेति। इति ब्राह्मणपक्षेऽप्ययं योज्यः। "ब्रह्मिष्ठं ब्राह्मणं गुरुमुपासीत" इति श्रुत्यर्थश्च ॥ ३ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

इदानीमिति। निगमेति। नितरां गमयति धर्मादिचतुर्विधपुरुषार्थसाधनानि बोधयतीति निगमो वेदः। वेदफलरूपत्वादस्य प्रमाणतमत्वमपि ध्वनितम्। अनागताख्यानेनेति। यद्यप्येतद्ग्रन्थप्रणयनोपक्रमदशायामस्य शुकमुखाद् भुवि गलितत्वं न विद्यते, तथापि व्यासस्य सर्वज्ञत्वाद् भविष्यदपि भूतवत् कृत्वा तेनैवमुक्तमिति भावः। अगुणवचनेऽपि अविशेषणेऽपीत्यर्थः। अत्र 'रस'शब्दस्य विशेष्यत्वेऽपि रसवत्त्वे विवक्षाभावात्, न तदुत्तरं मतुपः प्राप्तिरिति भावः। तेन विनैव मतुप्प्रत्ययं विनैव। सामानाधिकरण्यं विशेष्यविशेषणभावः ॥ ३ ॥

श्रीमद्वीरराघवव्याख्या

एवं विषयप्रयोजनकथनेऽपि प्रामाण्यनिश्चयं विना श्रवणं नोपपद्यत इत्याशंक्य वेदांतमूलत्वं वदन् चेतनानभिमुखयति तृतीयश्लोकेन—निगमकल्पतरोरित्यादिना। हे रसिका रसज्ञाः भावुकाः भगवत्संशीलनपराः! निगमो वेदः स एव कल्पतरुस्तस्य फलं फलरूपमिदं श्रीभागवतं पुराणं आलयमामरणं पुनः पिबत। निगमस्य कल्पतरुत्वनिरूपणं धर्मार्थकाममोक्षपुरुषार्थचतुष्टयतत्साधनद्वारा धर्मादिफलजनकत्वात्, भागवतस्य तत्फलत्वनिरूपणं निगमसारांशरूपत्वात्, 'खादत'इत्यनुक्त्वा 'पिबत'इति वदन्न् तत्सूचयति आम्रादिफलेष्विवानुपादेयांशस्त्वग्बीजादिरूपः कल्पतरुफले नास्ति, किंतु केवलं पेयः कृत्स्नो रस एव सन्नपि त्वग्बीजादिरप्युपादेयम्। एवमस्मिन्नपि पुराणे नानुपादेयांशो विद्यते, अपि तु सर्वोऽप्युपादेय एवेति। निगमद्रुमफलत्वं चास्य पुराणस्य स्वप्रधानप्रतिपाद्यनिरतिशयानंतब्रह्मानंदसाधनभूतभक्तिद्वारावगंतव्यम्। एवम् 'अमृतद्रवसंयुतम्' इत्यादीन्यपि विशेषणानि। निगमफलत्वं स्वर्गादितत्साधनावबोधिवेदपूर्वभागोपबृंहणात्मककल्पसूत्रादेरप्यस्तीति तद्व्युदासायाह—अमृतद्रवसंयुतमिति। अमृतं मोक्षः मुक्तिः कैवल्यम्, 'निर्वाणश्रेयोनिःश्रेयसामृतम्'इति मुक्त्यादिशब्दपर्यायत्वस्मरणात्, स एव द्रवः सारांशस्तेन संयुतं रसं रसवत् गुणवचनेभ्यो 'मतुपो लुगिष्ट' इति लुक्। भगवदनुभवानन्दवदनेन भक्तिरूपत्वं सिद्धम्। भक्तिर्नाम 'स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयत' इति स्मरणात् प्रीतिमद्भगवत्स्मरणम्। फलमत्र सम्यग्ज्ञानात्मकं विवक्षितं, 'शुकमुखाद्गलित' मित्युक्तार्थं फलं शुकाख्यपक्षिमुखपातितं सुग्रहं स्यात्तद्वद्वेदवृक्षशाखाग्रगतं ज्ञानफलं शुकमुखसंबंधात्सुलभमित्यर्थः। 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजात' इति श्रुत्यनुसारेण बादरायणेः शुकाख्यपक्षिस्वरूपिण 'आलयादि'ति पाठे आमरणादित्यर्थः। निगमद्रुमफलत्वरूपणेन वेदमूलत्वं 'शुकमुखाद्गलित' मित्यनेन केवलनिवृत्तिधर्मपरायणास्वादितत्वप्रतीत्या शिष्टपरिगृहीतत्वमत एव प्रामाण्यं मुमुक्षुभिरतीवोपादेयत्वं चेत्यादि फलितम्। यद्यप्येतत्प्रबंधनिर्माणोपक्रमदशायामस्य शुकमुखास्वादितत्वं न विद्यते, तथापि भविष्यदभिप्रायेण त्रैकालज्ञस्य निर्मातुरेवमुक्तिः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवं ज्ञातफलानामपि प्रेक्षावतां प्रशंसाविधिभ्यां भागवतशास्त्रश्रवणाभ्यासे क्षिप्रप्रवृत्तिः स्यादिति प्रशस्य विधत्ते—निगमकल्पतरोरिति। भुवि भावुका रसिकाः यन्निगमकल्पतरोर्गलितं शुकमुखादमृतद्रवसंयुतं भागवतं फलं तस्य रसमालयं मुहुः पिबतेत्येकान्वयः। मर्त्यलोके भवनशीलरसज्ञा यूयं निगमयति नितरां ज्ञापयत्यपेक्षिताशेषपुरुषार्थानिति निगमो वेदः, स एव कल्पतरुः कल्पितं संकल्पितं भक्ताकांक्षितं तरति वितरति ददातीति कल्पतरुः सुरपादपः। उपसर्गः स्वयं धातुलीनमर्थं प्रकाशयति न स्वत उत्पादयतीति वृत्तिकारवचनदर्शनात्तरतिर्दानार्थोऽपि भवति। 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्' इत्यभिधानाच्च। तस्माद्व्यासनाम्ना मया गलितं पातितं शिवावतारस्य मत्पुत्रस्य शुकनाम्नो मुनेर्मुखात्परीक्षिते प्रवचनादमृतद्रवेण संयुतं पूर्वमप्यमृतवत् द्रवसंयुतं पश्चाच्छुकाचार्यमुखप्रवचनेनातीव द्रवीकृतमित्यर्थः। तथा च पद्मपुराणे अंबरीषं प्रति गौतमवचनं–'अंबरीष शुकप्रोक्तं शृणु भागवतं सदा। पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ॥' इति। भागवताख्यं फलं निष्पन्नं पक्वमिति यावत्। तस्य फलस्य मधुरं रसं लिंगशरीरमोक्षपर्यंतं मुहुः परावृत्य श्रवणांजलिपुटैः पिबत पानं कुरुत श्रवणादिनाऽऽस्वादयतेत्यर्थः। 'अहो' इति बालानुन्मुखीकरोति। अस्य फलस्यामृतरसास्वादसुखानुभवं पश्यतेति रसशब्दस्य तिक्तादिषु षट्सु वृत्तावप्यमृतद्रवेत्यादिस्वोक्तेस्तदन्यथानुपपत्त्या मधुररसो ग्राह्यः। पानप्रारंभसमयेऽतिमधुर एवायं रसः इति वा अहो इति। निगमकल्पः वेदाख्यकल्पवृक्षः 'कल्पः सुरपादपेऽपि संप्रोक्त'इति वचनात्तमेव तारयति प्रकाशयतीति निगमकल्पतरुः तस्माच्छुकाचार्याननात् गलितं व्याख्यातं परीक्षिते इति शेषः। अमृतं कैवल्यं तस्य द्रवो गतिः तया युक्तं कैवल्यप्रापकमिति यावत्। रससंपत्तेर्निवासस्थानं भागवतं फलं पिबतेति वा। अत्र पिबतिर्भक्षणार्थः, अनेकार्थत्वाद्धातूनाम्। न चायमाचार्योक्तोऽर्थो नेत्यश्रद्धेयं, चतुर्मुखमुखलेखबुद्धिगोचरापरि-

मितार्थभागवततात्पर्यार्थं दर्शयतां पूर्णमतीनामाचार्याणामप्ययं कश्चित् बुद्धिसमुद्रतरंग इति निश्चित्य वक्तुं शक्यत्वात् । भुवि गलितमिति वा देवलोके देवैः पीयमानं सज्जनमनुजकृपया भुवि पातितमित्यर्थः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्रिकांडतोऽपि श्रैष्ठ्य तदीयावयवसारत्वनिर्देशेन दोषपरिहारपूर्वकं कारणान्तरं योजयन् पूर्वतोऽपि वैशिष्ट्यमाह—निगमेति । हे भावुकाः ! परममङ्गलायना ये रसिका भगवत्प्रीतिरसज्ञा इत्यर्थः । ते यूयं वैकुण्ठात् क्रमेण भुवि पृथिव्यामेव गलितमवतीर्णं निगमकल्पतरोः सर्वफलोत्पत्तिभुवः शाखोपशाखाभिर्वैकुंठमप्यध्यारूढस्य वेदरूपतरोर्यत् खलु रसरूपं श्रीभागवताख्यं फलं तत् भुव्यपि स्थिताः पिबत आस्वाद्यान्तर्गतं कुरुत श्रीभागवताख्यं यच्छास्त्रं तत् खलु रसवदपि रसैकमयभावविवक्षया रसशब्देन निर्दिष्टं भागवतशब्देनैव तस्य रसस्यान्यदीयत्वं व्यावृत्तम् । भागवतस्य तदीयत्वेन रसस्यापि तदीयत्वाक्षेपात् शब्दश्लेषेण च भगवत्सम्बन्धिरसमिति गम्यते । स च रसो भगवत्प्रीतिमय एव । 'यस्यां वै श्रूयमाणाया'मित्यादि फलश्रुतेः यन्मयत्वेनैव श्रीभगवति रसशब्दः श्रुतौ प्रयुज्यते 'रसो वै स' इति स एव च प्रशस्यते । 'रसं ह्येवायं लब्ध्वानन्दी भवती'ति । अत्र 'रसिका' इत्यनेन प्राचीनार्वाचीनसंस्काराणामेव तद्विज्ञत्वं दर्शितम् । 'गलित' मित्यनेन रसस्य सुपाकिमत्त्वेनाधिकस्वादुत्वमुक्त्वा शास्त्रपक्षे सुनिष्पन्नार्थत्वेनाधिकस्वादुत्वं दर्शितम् । 'रस' मित्यनेन फलपक्षे हेयांशरहितत्वं दर्शितम् । तथा 'भागवत' मित्यनेन सत्स्वपि फलान्तरेषु निगमस्य परमफलत्वेनोक्त्या तस्य परमपुरुषार्थत्वं दर्शितम् । एवं तस्य रसात्मकस्य फलस्य स्वरूपतोऽपि वैशिष्ट्ये सति परमोत्कर्षबोधनार्थं वैशिष्ट्यान्तरमाह—शुकेति । अत्र फलपक्षे कल्पतरुवासित्वादलौकिकत्वेन शुकोऽप्यमृतमुखोऽभिप्रेयते । ततस्तन्मुखं प्राप्य यथा तत्फलं विशेषतः स्वादु भवति तथा परमभागवतमुखसंबन्धं भगवद्गुणवर्णनमपि । ततस्तादृशपरमभागवतवृन्दमहेन्द्रश्रीशुकदेवमुखसंबद्धं किमुतेति भावः । अत एव परमस्वादु परमकाष्ठाप्राप्तत्वात् स्वतोऽन्यतश्च तृप्तिरपि न भविष्यतीत्यालयं मोक्षानन्दमप्यभिव्याप्य पिबतेत्युक्तम् । तथा च वक्ष्यते—'परिनिष्ठितोऽपी'त्यादि । अनेनास्वाद्यान्तरवन्नेदं कालान्तरेऽप्यास्वादकबाहुल्येऽपि व्ययिष्यतीत्यपि दर्शितम् । यद्वा तत्र तस्य रसस्य भगवत्प्रीतिमयत्वेऽपि द्वैविध्यं–तत्प्रीत्युपयुक्तत्वं तत्प्रीतिपरिणामत्वं चेति । यथोक्तं द्वादशे 'कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम् । विज्ञानवैराग्यविवक्षया विभोर्वचोविभूतिर्नतु पारमार्थ्यम् ॥ यस्तूत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः । तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥' इति । ततः सामान्यतो रसत्वमुक्त्वा विशेषतोऽप्याह–अमृतेति । अमृतं तल्लीलारसः । 'हरिलीलाकथाव्रातामृतानन्दितसत्सुर'मिति द्वादशे श्रीभागवतविशेषणात् लीलाकथारसनिषेवणमिति तस्यैव रसत्वनिर्देशाच्च । सत्सुरमिति सन्तोऽत्रात्मारामाः । इत्थं सतां ब्रह्मसुखानुभूत्येत्यादिवत् । त एव सुरा अमृतमात्रस्वादित्वात् अत्र त्वमृतलीलारसस्य सार एवोच्यते । तस्मादेवं व्याख्येयं—यद्यपि प्रीतिमयरस एव श्रेयान्, तथाप्यस्त्यत्र विवेकः । रसानुभविनो ह्यत्र द्विविधाः—पिबतेत्युपदेश्याः स्वतस्तदनुभविनो लीलापरिकराश्च । तत् लीलापरिकरा एव रससारमनुभवन्ति अन्तरङ्गत्वात् । परे तु यत्किञ्चिदेव बहिरङ्गत्वात् । यद्यप्येवं तथापि तदनुभवमयरससारं स्वानुभवमयेन रसेनैकतया विभाव्य पिबत । यतस्तादृशतया तादृशशुकमुखाद्गलितं प्रवाहरूपेण वहन्तमित्यर्थः । तदेवं भगवत्प्रीतेः परमरसतापत्तिः शब्दोपात्तैव । अन्यत्र च 'सर्ववेदान्तसार'मित्यादौ तद्रसामृततृप्तस्येत्यादेः । एवमेवाभिप्रेत्य 'भावुका' इत्यत्र 'रसविशेषभावनाचतुरा' इति टीका । तथा 'स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जन' इत्यादि । अत्र वैकुण्ठस्थितकल्पतरुफलस्य रसमात्ररूपत्वञ्च । यथा श्रीहयशीर्ष पंचरात्रे पंचतत्त्वनिरूपणे 'द्रव्यतत्त्वं शृणु ब्रह्मन् प्रवक्ष्यामि समासतः । सर्वभोगप्रदा यत्र पादपाः कल्पपादपाः ॥ गन्धरूपं स्वादुरूपं द्रव्यं पुष्पादिकञ्च यत् । हेयांशानामभावाच्च रसरूपं भवेच्च तत् ॥ त्वग्बीजञ्चैव हेयांशं कठिनांशञ्च यद्भवेत् । सर्वं तद्भौतिकं विद्धि न ह्यभूतमयं हि तत् ॥ रसवद्भौतिकद्रव्यमत्र स्याद्रसरूपक'मिति । अत्र 'वैकुंठ' इति तत्प्रकरणलब्धम् ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या

एवमस्य शास्त्रशिरोमणेरीश्वरावरोधकत्वादिप्रभावमयमैश्वर्यमुक्त्वा माधुर्यञ्चाह—निगमेति । निगमो वेदः स एव कल्पतरुः तस्य स्वाश्रितेभ्यो वाञ्छितविविधपुरुषार्थरूपफलदायित्वेऽपि तरुत्वात् यत् साहजिकं तदिदं भागवतं फलम् । श्लेषेण भगवत्स्वामिकमिदं तेनैव स्वभक्तेभ्यो दत्तमिति तान् विना न कस्याप्यन्यस्यात्र सत्त्वारोपे शक्तिरिति भावः । गलितमिति । वृक्षपक्वतया स्वयमेव पतितं, न तु बलात् पातितमिति स्वादुसंपूर्णत्वम् । न चोच्चनिपातनेन स्फुटितं नाप्यनतिमधुरं चेत्याह—शुकेति । परमोद्ध्र्वचूडातः श्रीनारायणात् ब्रह्मशाखायां ततोऽधस्तान्नारदशाखायां ततोऽधस्ताद्व्यासशाखायां ततः शुकमुखं प्राप्य आतपान्मध्विव अमृतद्रवसंयुतम् । शुकेनैव तेन स्वचञ्च्वा अमृतनिष्क्रमणार्थं द्वारमपि कृतम् । अथ च तेन स्वादितत्वादतिमधुरं ततः सूतादिशाखातः शनैः शनैः पतनादखंडितं, तेन गुरुपरम्परां विना स्वबुद्धिबलेनास्वादने श्रीभागवतस्य खण्डितत्वे पानाशक्तिः सूचिता । ननु कथं फलमेव पातव्यमित्यत आह—रसमिति । रसस्वरूपमेवेदं फलं, नात्र त्वगष्ठ्यादिर्हेयांशोऽस्तीति भावः । लयो मोक्षः सालोक्यादिजीवन्मुक्तत्वं वा तमभिव्याप्य तत्र तत्र भगवल्लीलागानप्रसिद्धेः । यद्वा लयः रसास्वादजनितः प्रलयोऽष्टमः सात्त्विक-

स्तत्पर्यन्तं पिबतेत्यनेन पाने स्तम्भाद्याः सात्त्विका भवन्तीति ज्ञेयम् । तत्र प्रलये सति पानस्यास्पष्टत्वात् यद्यपि विरामस्तदपि पुनः प्रबोधे सति पुनरपि प्रलयपर्यन्तं पिबत, ननु त्यजतेति मुहुरिति पदम् । यद्वा मुहुरिति पीतस्यापि पुनः पाने स्वादाधिक्यमेवेत्यहो इत्यतिविस्मये । रसिकाः हे रसज्ञा इति भक्तानामेव जातरतित्वाद्रतेरेव स्थायिभावत्वात् स्थायिन एव रस्यमानत्वात् नात्र ज्ञानिकर्मियोगिनां कोऽपि दाय इति भावः । हे भावुकास्तत एव यूयमेव कुशलिनो अन्येऽमङ्गला एवेति भावः । 'भावका' इति पाठे भावकत्वव्यापारवन्तः । तथा हि—भावकत्वव्यापारेण भाव्यमानः स्थायी भुज्यते इति भट्टनायकमतम् । अत्र श्लेषेण भगवतः स्वरूपं रस एव भवति । तथा हि तैत्तिरीयकोपनिषदि 'ब्रह्मविदाप्नोति पर'मित्युक्त्वा ब्रह्मणः सकाशात् आकाशादिक्रमेणान्नमय-विराट्पुरुषपर्यन्तां सृष्टिमुक्त्वा तस्य चान्तरन्तःक्रमेण 'तस्माद्वा एतस्मादन्य' इत्यादिना अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया आम्नायन्ते । तेष्वपि आनन्दमयस्यैव 'आनन्दमयोऽभ्यासादि' त्यनेन ब्रह्मत्वम् । मतभेदे च 'तत् पुच्छस्यैव आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठे' त्यनेन ब्रह्मत्वं ब्रह्मण एव प्रतिष्ठात्वञ्च प्रतिपादितम् । तदनन्तरञ्च 'रसो वै सः; रसं ह्येवायं लब्ध्वानन्दी भवती' ति श्रूयते । तत्र श्रुतौ च 'स' इत्यनेन प्रक्रान्त आनन्दमयो वा तत् पुच्छं ब्रह्म वा न परामृश्यते, पृथक् पृथगुत्तरोत्तरार्थप्रकर्षप्रतिपादिकासु अन्नमयादिश्रुतिषु अन्ते तस्याः पाठात् प्रक्रमभङ्गापत्तेः । ततश्च तस्या अयमर्थः—स प्रसिद्धो वै निश्चितं रस एव आनन्दमयात् तथा ब्रह्मतोऽपि आन्तरः प्रकृष्टः, 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यनेन श्रीकृष्णस्यैव ब्रह्मतः प्रकृष्टत्वम् । 'मल्लानामशनि' रित्यत्र तस्मिन्नेव यौगपद्येन सर्वरसस्य साक्षादुपलब्धेस्तत्र च शृङ्गारादिसर्वरसकदम्बमूर्तिर्भगवांस्तदपि प्रायेण बभाविति श्रीस्वामिचरणानां व्याख्यानाच्च तस्यैव सर्वरसरूपत्वं च । अतः श्रीगीताश्रीभागवताभ्यामेव रसशब्देन श्रीकृष्ण एव व्याख्यातः, 'तमेवायं विज्ञानमयो लब्ध्वा आनन्दपरावधिकाष्ठां प्राप्नोति, सैषानन्दस्य मीमांसा भवति' इति तदुत्तरश्रुत्या रस एव तस्मिन्नानन्दविचारपर्यवसानज्ञापनात् । यद्वा अयमानन्दमयोऽपि 'द्विजात्मजा मे युवयोर्दिदृक्षुणे'ति विस्मापनं स्वस्य च सौभगर्द्धे' रित्यादिभ्यः 'तमेव लब्ध्वानन्दी भवती' ति । ततश्च तं रसं श्रीकृष्णं फलं निगमकल्पतरोस्तस्मात् सकाशात् गलितं न तु तत्र साक्षात् स्थितमिति । तदर्थं निगमो नान्वेष्टव्यः, किन्तु शुकमुखमेवेत्याह—शुकमुखादिति । फलमिदमतिस्वादु ज्ञात्वा तत आकृष्य आनीय व्यासेन स्नेहात् स्वपुत्रमुख एव निहितमिति संभाव्यत इति भावः । किं वा शुकमुखादिति हेतौ पञ्चमी, 'येषामहं प्रिय आत्मे' त्यादि शुकवाक्यप्रामाण्यात् । भुवि व्रजभूमावुत्पद्य हे भावुकाः रसिकाः स्त्रियः ! सत्यं भागवतं भगवत्स्वरूपभूतरसमाधुर्यं पिबत । यद्वा भगवतः श्रीकृष्णस्य रसं आलयं लयः श्लेष आलिङ्गनमिति यावत् , तमभिव्याप्य । अमृतोऽनश्वरो यो द्रवो मनोनयनद्रवैत्यं तत् संयुक्तं यथा स्यात् तथा पिबतेत्यधरपानं सूचितमिदमेव निगमकल्पतरोर्गलितं परिपक्वं फलमिति फलतो गोपीजनानुगतिमयी रागानुगाख्या भक्तिरादिष्टा। यतो निगमोऽपि तल्लोभादेव बृहद्वामनदृष्टां तादृशीं भक्तिं विधाय व्रजभूमावुत्पद्य शतसहस्रशो गोप्यो भूत्वा तदधरामृतरसं पपाविति । वेदस्तुतौ दृष्टमिति अतिरहस्योऽर्थः । ननु 'ब्रह्मणो हि प्रतिष्ठाह' मित्येतत्केचिदन्यथा व्याचक्षते—सत्यं; तदप्राकरणिकत्वात् कल्प्यत्वादयुक्तमेव मन्तव्यं, किन्त्वेवमेव युक्तम् । तथा हि—'माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।' ति । अनयोरर्थः—ननु त्वद्भक्त्या कथं निर्गुणब्रह्मप्राप्तिः ? सा तु अद्वितीयतदेकानुभवेन भवेत् तत्राह—ब्रह्मणो हीति । हि यस्मात् परमप्रतिष्ठात्वेन प्रसिद्धं श्रुतौ 'यद्ब्रह्म तस्याप्यहं प्रतिष्ठा' प्रतिष्ठीयतेऽस्मिन्निति प्रतिष्ठा आश्रयः, अन्नमयादिषु श्रुतिषु सर्वत्रैव प्रतिष्ठापदस्य तथार्थत्वात् । अत एवामृतस्य मोक्षस्याप्यहं प्रतिष्ठा । तस्य लक्षणया स्वर्गादिपरत्वं वारयति—अव्ययस्येति । तथा शाश्वतस्य साधनफलदशयोरपि स्थितस्य धर्मस्य भक्त्याख्यस्य अहं प्रतिष्ठा । तथा तत्प्राप्यस्य ऐकान्तिकस्य सुखस्य प्रेम्णश्च प्रतिष्ठा । अतः सर्वस्यापि मदधीनत्वात् कैवल्यकामनया कृतेन मद्भजनेन ब्रह्मणि लीयमानो ब्रह्मधर्ममपि प्राप्नोतीति । अत्र श्रीविष्णुपुराणमपि प्रमाणं—'शुभाश्रयः सचित्तस्य सर्वगस्य तथात्मनः' इति । व्याख्यातञ्च तत्रापि श्रीस्वामिचरणैः 'सर्वगस्यात्मनः परब्रह्मणोऽप्याश्रयः प्रतिष्ठा ।' तदुक्तं भगवता 'ब्रह्मणो हि प्रतिष्ठाह' मिति । तथा विष्णुधर्मेऽपि नरकद्वादशीप्रसङ्गे 'प्रकृतौ पुरुषे चैव ब्रह्मण्यपि च स प्रभुः । यथैक एव सर्वात्मा वासुदेवो व्यवस्थित' इति । तत्रैव मासर्क्षपूजाप्रसङ्गे 'यथाच्युतस्त्वं परतः परस्मात् स ब्रह्मभूतात् परतः परात्मा । तथाच्युत त्वं कुरु वाञ्छितं तन्ममापदं चापहराप्रमेये'ति । तथा हरिवंशेऽपि विप्रकुमारानयनप्रस्तावे अर्जुनं प्रति श्रीभगवद्वाक्यं 'तत् परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारते'ति । ब्रह्मसंहितापि 'यस्य प्रभा प्रभवतो जगदण्डकोटिकोटिष्वशेषवसुधादि-विभूतिभिन्नम् । तद्ब्रह्म निष्कलमनन्तमशेषभूतं गोविन्दमादिपुरुषं तमहं भजामी'ति । अत एव श्रुतिश्च गोपालतापनी—'योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपालस्तस्मै वै नमो नम' इति ॥ ३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निगमकल्पतरुफलरूपत्वादस्यान्यशास्त्रेभ्यः श्रैष्ठ्यमाह—निगमेति । निगमो वेदः स एव कल्पतरुः, तस्य शुकमुखाद्गलितमिदं फलम् । सर्ववेदसारं श्रीमद्भागवताख्यं महापुराणमित्यर्थः । 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मिति वक्ष्यमाणात् । अखिलत्वसूचनार्थं फलमित्युक्तम् । असारांशवर्जितत्वसूचानार्थं रसमित्युक्तम् । अमृतेन मोक्षरूपेण द्रवेण रसेन प्रतिपादकतया

संयुतम् । हे रसिकाः हे भक्तिरसास्वादकुशलाः हे भावुकाः हे भावविशेषकुशलाः, आलयं मोक्षमभिव्याप्य पिबत मुमुक्ष्वस्थामारभ्य मुक्तावस्थायामपि पिबतेत्यर्थः । मुक्तावुपास्योपासकस्वरूपभेदः 'सोऽश्नुते सर्वान् कामान् ब्रह्मणे'त्यादिश्रुतिभिः प्रतिपादित एव । 'भुवि गलित' मित्यनेन वैकुंठादेवेदं मुमुक्षूपकारार्थं भगवता ब्रह्मादिद्वारा प्रवर्तितमित्यस्य शास्त्रस्य वेदसारभूतस्य नित्यता सूच्यते ॥ ३ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

काव्यवद्रूपकनिरूपणे स्पष्टोऽर्थो भवति यद्यपि तथापि भागवते तथा कथनमनुचितम्, सर्ववेदसारोद्धारत्वात् । रूपकादिकं तु बुद्धिपरिकल्पितम् । अतो वाच्यार्थ एव वक्तव्यः तत्र प्रमेयस्याप्रसिद्धावपि एतद्वाक्यान्यथानुपपत्त्या तादृशं प्रमेयमस्तीति बोद्धव्यम् । तत्र व्यापकवैकुंठे अक्षरात्मके प्रणवबीजो वेदतरुरस्ति । ततः व्यासाख्यभगवदवतारे आदिनारायणावतारे वा सर्वजनाह्लादनार्थं मूर्तिभूतं देवतात्मकं तस्य फलमानीतम् । तदत्र निरूप्यते । मध्वादिवत् । 'तत्र असौ वा आदित्यो देवमध्वि' ति स्वर्गस्थानां सूर्यो मधु यथास्माकं सारघं तथा स्वर्गे कल्पवृक्षवत् वैकुंठेऽपि वेदैकसमधिगम्ये शब्दरसात्मकः, कल्पवृक्षः । न तु लक्षणा, वेदस्योत्कर्ष आर्थिकः । नितरां गमयति ब्रह्म बोधयतीति परमोपनिषत् निगमः । स एव कल्पतरुः सर्वफलदानसमर्थः । कल्पः स चासौ तरुश्चेति कल्पतरुः । निगम एव कल्पतरुः । अतिपक्वं हि फलं गलति । स्वत एव पतति । आगमनसमये पतितं वा शकुंतमिव फलं समानीतमिति भावः । शुको व्यासपुत्रः मुक्तत्वादधिकारी । पिता हि उत्कृष्टं पुत्रमुखे प्रयच्छति । फलं च विशेषतः । तच्च रसात्मकम् । निर्झरैर्जलमिव सर्वेन्द्रियैः संबद्धं प्रेमरसं जनयति । तदेकीभूतं, हृदये ह्रद इव तिष्ठति । तत्र भागवतं संश्लिष्टं सत् भक्तिरसालोडितं मुखान्निःसरतीति । शुकमुखं प्राप्य, अमृतं मोक्षमपि द्रावयति, शिथिलं करोतीति भक्तिरसः अमृतद्रवः । तेन संयुतं, अनेन रसादप्यधिकरस उक्तः । यदपि वृक्षोत्कर्ष एव तादृशफलजननादायाति । तथापि उत्कर्षहेतुः फलजननमिति प्रकृतोत्कर्षः । अथवा शब्दात्मके वृक्षे शब्दात्मकमेव फलम् । सर्ववेदार्थविचारे भगवद्धृदय एव फलितम् । निर्द्धारितार्थप्रतिपादकशब्दराशिः । "शुद्धाश्च सुखिनश्चैवं ब्रह्मविद्याविशारदाः । भगवत्सेवने योग्या नान्य इत्यर्थतः फलम्" । अयमर्थो गोप्योऽपि भक्तचिंतया परवशस्य भगवतो हृदयादागतमिति गलितम् । अन्ये भगवद्रूपा अवतारा अधिकारिणो वा अतोऽत्यंतविरक्ते, शुके ग्रंथार्थः फलितः । अतस्तद्धृदये भक्तिरसः स्थितः । भागवतं च स्थितं, मुखान्निर्गमनसमये समानाधिकरणभक्त्या सह, निर्गच्छतीति तथेत्यर्थः । सम्यग्योगो हि यथाकथंचिच्छ्रवणेऽपि अधिकारिहृदये भक्त्यावेशात् । पिबतेत्युपदेशः । स्वाध्यायोऽध्येतव्य इतिवत् बहिःस्थितस्य इन्द्रियादिद्वारा अन्तःप्रवेशनं पानं तत् द्रवद्रव्यस्येति रसमित्युक्तम् । भागवतमिति ग्रंथनाम । भगवत्संबद्धमिति वा । शब्दश्रवणे न अर्थज्ञानं नेतरं रसास्वादनमतिरिक्तमिव भवति । सीत्कारेण तस्य पानात् तथा भागवतं पातव्यम्, नतु श्रवणमात्रं कर्तव्यमित्यर्थः त्वगस्थ्यादिकन्तु नास्ति । निर्बीजदाडिमादिवत् । रसात्मकान्यपि कानिचित्फलानि संति, यथा पृथिव्यादिरसा उद्गीथांताः । तथा रसात्मकस्य भगवतो भागवत रसः । ततः स्पर्शनमात्रयोग्यं न भवति, किंतु पानयोग्यमित्यर्थः । अस्य रसस्य ब्रह्मतामाह—आलयमिति । सर्वाधारभूतम् । आसमंताल्लयो यस्मादिति । सर्वप्रपंचलयहेतुभूतं वा । आ ईषल्लयो मोक्षो यस्मादिति वा । मोक्षेच्छां परित्यज्य तत्पातव्यमिति । मुहुरिति व्यासस्य परवशत्वमापादयंति—अन्यथा रसिकाः स्वयमेव पास्यंतीति व्यर्थवचनं स्यात् । मुहुः पानं वा विधीयते रसज्ञानाय । प्राकृतकर्णैरापानतस्तद्रसास्वादनं न भवतीति, वक्ष्यति च । परस्परत्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्मा इति । 'अहो रसिका' इत्याश्चर्येण संबोधनम् । भवतामेवार्थे अयं रसः समानीत इति । भूमौ भावुकाः भविष्णवः भावनाचतुरा वा । विस्मृतेऽपि रसे भावनया रसाभिनिवेशं कुर्वंतीति मुहुः पानं संभवति । भुवि भाग्यवतां च । बहुवचने च एकस्य रसाभिनिवेशो न भवतीति सूचितम् । एव बीजमध्यभावफलरूपतामुक्त्वा श्रोतॄनभिमुखीकृत्य शास्त्रमारभते ॥ ३ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

निगमकल्पतरोरित्यत्र । रूपकादरणे निगमकल्पतरुपदे उपमितसमासादन्यत्र च सादृश्याद्गौणीप्रसक्त्या कैतवे जातेऽन्यत्रापि तथा शङ्का स्यादिति तन्निवृत्तयेऽत्रोक्तस्यार्थस्य वाच्यत्वमुपपादयितुं रूपकानादरे हेतुमाहुः काव्यवदित्यादिना । बुद्धिपरिकल्पितमिति । व्याकरणे व्युत्पत्तिपक्षवत्पुराणादिषु लोकसिद्धानुवादेपि शब्दार्थयोः सहजसम्बन्धाभावेन तथेत्यर्थः । प्रमेयस्वरूपमाहुः तत्र व्यापीत्यादि । ननु शब्दस्य मूर्तिभूतत्वं रसात्मकत्वं चाप्रयोजकमित्याशङ्कायां वेदात्मकस्य शब्दस्य तथात्वं स्पष्टयन्ति तत्रेत्यादि । तथा च यथा 'सैषा त्रय्येव विद्या तपती'ति श्रुत्या वेदात्मकत्वेन निश्चितस्याप्यादित्यस्य मधुविद्यायां मूर्तिभूतत्वं रसात्मकत्वं च सिद्धम्, तथेहापीत्यर्थः । न च 'कल्पनोपदेशाच्च मध्वादिवदविरोध'इति सूत्रे व्यासपादैर्मधुविद्यायां गौणी प्रतिपादितेति तद्विरोधात् कथमत्र वाच्यार्थप्रतिपत्तिरिति वाच्यम्; 'वैषम्यनैर्घृण्य'सूत्रस्य लोकबुद्ध्यनुसारित्ववदस्य वादिबुद्ध्यनुसारित्वात् । पञ्चशिखप्रणीतसाङ्ख्यसमासवृत्तौ सूर्यस्य चक्षुरधिदैवतत्वेन सिद्धस्य श्रुत्युक्तमधुत्वासंभवे तेनापि तत्र गौण्येवादरणीयेति तद्वदजाशब्देपि गौण्यादरणीयेति बोधनार्थत्वात् । अन्यथा ईक्षत्यादिष्वपि गौणीप्रसक्त्या सिद्धान्तभङ्गप्रसङ्गात् । 'श्रुतेस्तु शब्दमूलत्वा'दि-

त्यादिसूत्रवैयर्थ्यापातात्। अतो 'वैषम्य'सूत्रस्य तथात्वे 'आत्मकृति' सूत्रवदेतस्य तथात्वे ईक्षत्यादिसूत्राणामेव गमकत्वान्न तद्विरोधः। नापि भाष्यविरोधः। 'कल्पनोपदेशाच्चे'ति चकारस्य परोक्षवादबोधकत्वेन व्याख्याततयास्यैवार्थस्यादरणादिति। अतः परं प्रत्यक्षविरोधोऽवशिष्यते, तं परिहर्तुमाहुः तथेत्यादि। तथाच विरोधाल्लक्षणाङ्गीकारे स्वाप्रत्यक्षमात्रे तथापत्त्या शक्त्युच्छेदे शास्त्रमेव विप्लूयेतेत्यन्यथानुपपत्त्यात्र शक्तिरेवादरणीयेत्यर्थः। ननु श्रीभागवतस्य वेदफलत्वमुक्तम्, तत्र फलं द्विविधम्, जघन्यं शिरस्थं च, आद्यं पनसादि, द्वितीयमाम्रादि, वेदे च काण्डद्वयम्, तत्र पूर्वकाण्डफलत्वे 'त्रैगुण्यविषया वेदा' इत्यस्यापि जघन्यत्वं स्यादिति तन्निवारणाय निगमपदस्यार्थमाहुः वेदस्येत्यादि। परमोपनिषदित्यनेन बृहज्जबालादिरूपा निवार्यते। तत्र भस्मग्रहणविध्यादिनिरूपणेन नितरां ब्रह्मगमकत्वाभावादिति। शिरस्थस्यापि फलस्यापक्वत्वे तथा रसाभावादस्यापि तथात्वे एतत्प्रतिपादितार्थस्याप्युत्कृष्टत्वं न स्यादिति तदभावाय गलितपदतात्पर्यमाहुः अतीत्यादि। अनधिकारिणि वृक इव, देवकार्यार्थं बलाविव, भगवद्वाक्यत्वाच्छलवादोपि संभवतीति तदभावायाहुः शुक इत्यादि। पिता हीत्यादि च। अमृत इवेत्यादेस्तात्पर्यमाहुः तच्चेत्यादि। तच्चेति। श्रीभागवतम्। चोऽयर्थः प्रेमसमुच्चायकः। तदेकीभूतमित्यत्र तत्पदेन प्रेम बोध्यम्। अयमर्थः। सञ्जातभक्तीनामेव हृद्यारोहतीति तदितरेषामर्थे 'भगवान् ब्रह्म कार्त्स्न्येने'ति वक्ष्यमाणमनुसन्धाय पक्षान्तरमाहुः अथवेत्यादि। तादृशशब्दराशिप्रतिपाद्यार्थरूपं फलमाहुः शुद्धा इत्यादि। तथा चैवमर्थे बुद्धे मन्दानामपि प्रवृत्तिर्भवतीत्यर्थः। तादृशशब्दप्रकाशे हेतुमाहुः अयमित्यादि। फलप्राप्तौ निदर्शनमाहुः अन्य इत्यादि। संयुतत्वेपि निदर्शनमाहुः सम्यगित्यादि। इतिवदिति। आवश्यकत्वायेत्यर्थः। फलस्य रसात्मकत्वे प्रत्यक्षविरोधपरिहाराय दृष्टान्तमाहुः निर्बीजेत्यादि। कानिचिदिति। द्राक्षाविशेषपीलुतूदादीनि। ननु तथापि पेयत्वं तु दुर्घटमित्यत आहुः यथेत्यादि, भावुका भविष्णव इति। 'लषपतपदस्थाभूवृषे'त्यनेन ताच्छील्याद्यर्थे भुव उकञ्। भुवश्चेत्यत्र चकारेण भाषायाः समुच्चये इष्णुच् 'भूष्णुर्भविष्णुर्भविते'त्यमरः। तथा च भवनसाधुकारिण इत्यर्थः। णिजन्तादेतमंगीकृत्य पक्षान्तरमाहुः भावनेत्यादि। भाग्यवाचिभावुकशब्दादर्श आद्यचि कृतेऽप्येवं प्रयोगो भवतीति तमप्यर्थं सङ्गृह्णन्ति भाग्यवतामिति ॥ ३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं सर्वशास्त्रेभ्योऽस्य श्रेष्ठत्वमुक्तम्, इदानीं सर्वशास्त्रशिरोमणिवेदफलत्वादस्य प्रमाणतमत्वं सूचयन्निदमेव परमादरेण श्रोतव्यमित्याह—निगमेति। नितरां गमयति धर्मादिचतुर्विधपुरुषार्थसाधनानि बोधयतीति निगमो वेदः, अतः स एव कल्पतरुः कल्पः सर्वपुरुषार्थदाने समर्थः स चासौ तरुश्च इति व्युत्पत्तेः, तस्य फलं 'सारं सारं समुद्धृतम्' इति वक्ष्यमाणत्वात् सारभूतमिदं भागवतं भगवता प्रणीतं भगवत्प्रतिपादकं च शुकमुखाद् भुवि गलितं हे रसिकाः रसज्ञाः तत्रापि भावुकाः हे रसविशेषविभावनचतुराः मुहुः निरन्तरं पिबतेत्यन्वयः। भागवतं शुकमुखात् भुवि गलितमित्यनेन एतत्तु वैकुण्ठगतं भगवता ब्रह्मणे दत्तं, तेन नारदाय दत्तं, तेन चानीय मह्यं दत्तं, मया च शुकस्य मुखे निहितं, ततश्च परीक्षिता श्रुतं, एवं शिष्यप्रशिष्यादिरूपपल्लवपरम्परया शनैरखण्डमेवावतीर्णं, न तूच्चनिपातेन स्फुटितमिति सूचितम्। यद्यप्येतत्प्रबन्धनिर्माणोपक्रमदशायामस्य शुकमुखाद्गलितत्वं न विद्यते, तथापि निर्मातुर्व्यासस्य त्रैकालज्ञत्वाद्भविष्यदपि भूतवत्कृत्वा तेनैवमुक्तम्। इदं च श्रुत्वा स्वचित्ते प्रयत्नेन स्थापनीयं न तु श्रवणमात्रं कर्त्तव्यमिति सूचयितुं शृणुतेति पदं विहाय पिबतेत्युक्तम्, बहिस्थदुग्धादिपदार्थस्यान्तःस्थापनस्यैव पानपदार्थत्वात्। एकाकिनो यथावदेतद्रसाविर्भावो न भवतीति सूचयितुं रसज्ञा इति बहुवचनम्, परस्परं त्वगुणवादसीधुपीयूषनिर्यापितदेहधर्मा इति वक्ष्यमाणत्वात्। ननु त्वगष्ठ्यादिकं विहायैव फलाद्रसः पीयते इति प्रसिद्धमेव, तत्कथं फलस्यैव पानं विधीयते इत्याशङ्क्य रसरूपत्वेन त्वगष्ठ्यादिहेयांशस्याभावात् फलमेव कृत्स्नं पिबतेत्याशयेनाह—रसमिति। अत्र च रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षितत्वात् गुणवचनेऽपि रसशब्दे मतुपः प्राप्त्यभावात् तेन विनैव रसं फलमिति सामानाधिकरण्यम्। अत्र फलमित्युक्ते पानासम्भवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तम्। रसमित्युक्तेऽपि गलितस्य रसस्य पातुमशक्यत्वात् फलमित्युक्तम्। अहो भुवि गलितमित्यलभ्यलाभोक्तिः। कथमस्य दुर्लभत्वमित्यपेक्षायामाह—अमृतद्रवसंयुतमिति। अमृतं मोक्षस्तमपि द्रावयति तिरस्करोतीति तथा भक्तिरसस्तेन संयुतं, सहितमित्यर्थः। यथा हि लोके शुकेन गृहीतं फलं अमृतमिवातिस्वादु भवति तथेदमपि सर्वतो विरक्तेन जीवन्मुक्तेन शुकेन गृहीतत्वादपि स्वादु। अतएव नास्य पानं जीवन्मुक्तदशायामपि त्याज्यमित्याहुः—आलयमिति। लयो मोक्षः, अभिविधावाकारः, लयमभिव्याप्य पिबतेत्यन्वयः। नहीदं स्वर्गादिसुखवज्जीवन्मुक्तैरुपेक्ष्यते, किन्तु सेव्यते एव 'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः' इति वक्ष्यमाणत्वात् ॥ ३ ॥

हिन्दी अनुवाद

रसके मर्मज्ञ भक्तजन! यह श्रीमद्भागवत वेदरूप कल्पवृक्षका पका हुआ फल है। श्रीशुकदेवरूप तोतेके मुखका सम्बन्ध हो जाने से यह परमानन्दमयी सुधासे परिपूर्ण हो गया है। इस फलमें छिलका, गुठली आदि त्याज्य अंश तनिक भी नहीं है। यह मूर्तिमान् रस है। जब तक शरीरमें चेतना रहे, तब तक इस दिव्य भगवद्-रसका निरन्तर बार-बार पान करते रहो। यह पृथ्वीपर ही सुलभ है ॥ ३ ॥

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः । सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥
त एकदा तु मुनयः प्रातर्हुतहुताग्नयः । सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥

ऋषय ऊचुः

त्वया खलु पुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥
यानि वेदविदां श्रेष्ठो भगवान् बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥
वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिवैशिष्ट्येन सुखसेव्यत्वेन च श्रोतॄनभिमुखीकृत्य शास्त्रमारभते । नैमिश इति । ब्रह्मणा विसृष्टस्य मनोमयस्य चक्रस्य नेमिः शीर्यते कुंठीभवति यत्र तन्नेमिशं नेमिशमेव नैमिशम् । तथा च वायवीये । "एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते । यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम् । प्रणिपत्य महादेवं विससर्ज पितामहः ॥ तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् । प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥" इति । नैमिष इति पाठे वराहपुराणोक्तं द्रष्टव्यम् । तथाहि गौरमुखमृषिं प्रति भगवद्वाक्यम् "एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् । भविष्यति यथार्थं वै ब्राह्मणानां विशेषकम् ॥" इति । अनिमिषः श्रीविष्णुरलुप्तदृष्टित्वात्तस्य क्षेत्रे । तथा चात्रैव शौनकादिवचनम् "क्षेत्रेऽस्मिन्वैष्णवे वयम्" इति । स्वः स्वर्गे गीयत इति स्वर्गायो हरिः स एव लोको भक्तानां निवासस्थानं तस्मै तत्प्राप्तय इत्यर्थः । सहस्रं समाः संवत्सरा अनुष्ठानकालो यस्य तत्सत्रं सत्रसंज्ञकं कर्मोद्दिश्यासत उपविविशुः । यद्वा आसताकुर्वतेत्यर्थः । आलभेत निर्वपति उपयंतीत्यादिवत्प्रत्ययोच्चारणमात्रार्थत्वेनास्तेर्धात्वर्थस्याविवक्षितत्वात् ॥ ४ ॥ ❀ ❀ प्रातःकाले हुता एव हुता अग्नयो यैस्ते । अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितम् । इदं वक्ष्यमाणमादरात्पप्रच्छुः ॥ ५ ॥ ❀ ❀ विविदिषितानर्थान्प्रष्टुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः । त्वयेति त्रिभिः श्लोकैः । इतिहासो महाभारतादिस्तत्सहितानि । न केवलमधीतान्यपि त्वाख्यातान्यपि व्याख्यातानि च । उत अपि यानि धर्मशास्त्राणि तान्यपि ॥ ६ ॥ ❀ ❀ किंच यानीत्यादि । विदां विदुषां मध्ये श्रेष्ठो व्यासो यानि वेद । परावरे सगुणनिर्गुणे ब्रह्मणि विदंतीति तथा ॥ ७ ॥ ❀ ❀ वेत्थ जानासि । सौम्य हे साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाह । ब्रूयुरिति । स्निग्धस्य प्रेमवतः । उत एव । गुह्यं रहस्यमपि ब्रूयुरेव ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

भागवतारंभे पुनर्मंगलमाचरति ॐमिति । "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ ॥" इति । ननु कंठभेदनात्कुतो मांगलिकत्वमिति चेन्न, महतां दूषणं भूषणमिति न्यायेन नीलकंठवत् । किञ्च शास्त्रस्यास्य प्रणवार्थविवृतिरूपत्वञ्च सूचयति नैमिश इति । निरुक्तौ प्रमाणमाह । तथा चेति । मूर्द्धन्यषांतपाठे प्रमाणांतरमाह । नैमिष इति । विशेषकं वैशिष्ट्यापादकम् । अत्रेदं विवक्षितम् । यत्र कामादीञ्शत्रूञ्शीघ्रमेव हंतुं प्रभवेत्तत्र वसेदिति भावः । इत्यर्थ इति । "तुमोप्रयुक्तस्य" इति कर्मणि चतुर्थी बोध्यात्रेति भावः । प्रथमं शौनकादीनां सकामकर्मपरत्वमेवासीद्रोमहर्षणसंगेन ततो नानापुराणादिशास्त्रश्रवणमननादिभिर्जिज्ञासुत्वमिति प्रसिद्धिः । ततश्च साधोरुग्रश्रवसः संगेन भक्तिरसे स्पृहा । तदुक्तं "कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् । आपाययति गोविंदपादपद्मासवं मधु ॥" इति । ततश्च जिज्ञासुत्वमपि शिथिलं कुर्वतां तेषां भक्तौ प्रवेशे स्वर्गार्थकं सत्रं तच्च मिषमेवाभूत् । तदुक्तं "कथायां सक्षणा हरेः" इति । एतच्च श्रीभागवतश्रोतृषु तेषु कर्मिषु कर्मनिष्ठाव्यवधानेन भक्तेः प्रभावद्योतनं तथैव श्रीभागवतवक्तरि श्रीशुकदेवेपि "परिनिष्ठितोपि नैर्गुण्ये" इत्यादिभिर्ब्रह्मनिष्ठाव्यवधानेनेति । यद्वा स्वः स्वर्गे गीयत इति स्वर्गायो हरिः उरुगाय इति वत् । तस्य लोको वैकुंठस्तस्मै । ये ऋत्विजस्त एव यजमानाः । यत्र बहुकर्तृकयागस्तत्र सत्रशब्दः प्रयुज्यते, यद्वा "बहुभ्यो दीयते यत्र तृप्यंति प्राणिनो बहु । कर्तारो बहवो यत्र तत्सत्रमभिधीयते ॥" इति नीलकंठः । ननु सहस्रसममित्युक्तेः "शौनकस्य कुलपतेः सत्रे द्वादशवार्षिके" इति भारतविरोधस्तु द्वाभ्यां बिंदुभ्यामधिका दशेति द्वादश । दशसंख्याकांकोपरि बिंदुद्वयपातनेन सहस्रं भवतीति समासेन परिहरणीयः । कल्पांतरापेक्षया वा द्वादशेति पाठो भारतेऽस्तीति । यद्वा "यो मासः स संवत्सर" इति श्रुतेः । सहस्रमासिको वा यागो ज्ञेयः । एतद्वनपर्वणि पंचत्रिंशाध्यायेऽस्ति "मासः प्रतिनिधिः" इत्यत्र नीलकण्ठेनोक्तम् । उद्दिश्येत्यध्याहारे तु गौरवमेव प्रतिभाति । तं विनाप्यर्थसिद्धेः । "कर्तृकर्मक्रियादीनां यदि स्थानं न लभ्यते । अध्याहारं तदा कुर्यान्मुख्यार्थप्रतिपत्तये ॥" इत्यभियुक्तोक्तेरत आह ।

यद्वेति। इत्यर्थ इति "सर्वेषामेव धातूनामंतर्भूतकृञर्थता। सा वाच्या प्रत्ययार्थेन ह्येवं भाट्टादयो जगुः॥" इत्युक्तेरिति भावः। तत्तद्धात्वर्थस्तत्र तत्र न संभवतीति धातुं विना केवलप्रत्ययोच्चारणं न युज्यते। "न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययश्च।" इत्युक्तेः। प्रत्ययस्य तिबादेरुच्चारणमेवार्थः प्रयोजनं यत्र तादृशतया धात्वर्थस्याविवक्षितत्वात्। "कृञर्थानुगतकर्तृवाचि प्रत्यये न कृञर्थस्तु समर्प्यते" इति। तथाहि "अग्निष्टोमीयपशोरालभनमालभते, अमावास्यायां पितृभ्यः श्राद्धं निर्वपति, अष्टवर्षायाः परिणयनमुपयंति" इति। इहालभते, कुरुते, निर्वपति, करोति, उपयंति, कुर्वंतीत्यर्थो विधेयः। कृञर्थानुगतप्रत्ययार्थस्यैव कर्तृरूपस्य विवक्षा, न तु धात्वर्थस्येति। "वायव्यं श्वेतमालभेत, अग्नये चरुं निर्वपति, प्रतितिष्ठंति ह वा एते य एता रात्रीरुपयंति" इत्यादीनामादिपदाद् ग्रहः। रात्रीः सत्राणि "शौनः सर्वविवेकः स्यात्" इति लीलावत्याम्। सर्वो विवेको यस्य सः सर्वविवेकः स एव शौनकः। सर्वविवेकोपि भगवद्भक्तानामेव भवति सर्वव्यापिनो भगवतो याथार्थ्येन ज्ञातत्वात्। भगवद्भावरसिको मुनिवरः स आदिर्येषां ते तथा। यद्वा शुनकस्यापत्यं शौनकः। "शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः" इति नवमस्कंधे वक्ष्यमाणत्वात्। विजयध्वजस्तु निमिषा ऋषिसेव्यफला वृक्षविशेषास्तेषां क्षेत्रं "चित्रकृन्निमिषो नेमिर्वञ्जुलोऽथापुराच्छदः" इत्यभिधानात्। निमिषनाम्नर्षिणा यत्र तपश्चीर्णं तन्नैमिषम्। तत्र सतः सुजनान् त्रायत इति सत्रम्। सतो ब्रह्मणस्त्राणमनेनेति यज्ञाभावे वेद एव लुप्येतेत्यर्थः॥ ४॥ ॐ ॐ ननु "ब्राह्मण्यां क्षत्रियाज्जातः सूतः" इति स्मृतेस्तस्य विलोमजातीयत्वेन शूद्रत्वात् "श्वचर्माणि यथा क्षीरमपेयं स्याद् द्विजातिभिः। तथा शूद्रमुखाच्छास्त्रं न श्रोतव्यं कदाचन॥" इति भारतादिस्मृतेश्च। कथमतीव विज्ञाः शौनकादयः सूतात्साक्षाद्वेदरूपं श्रीभागवतं शुश्रुवुरिति चेदत्रेदमवधेयम्। न ह्ययं जातिसूतः। अस्योत्पत्तिस्तु वायुपुराणे "वैन्यस्य तु पृथोर्यज्ञे वर्तमाने महात्मनः। सूत्यायामभवत्सूतः प्रथमं वर्णवैकृतम्॥ ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः। जुहावेन्द्राय दैवेन ततः सूतो व्यजायत। शिष्यहव्येन संपृक्तमभिभूतं गुरोर्हविः। अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतम्॥" इति। किंच "अग्निकुंडसमुद्भूत सूत निर्मलमानस" इति पुराणांतराच्च। रोमहर्षणो "ब्राह्मण्यां क्षत्रियाज्जातः सूत" इत्युक्तलक्षणो न जातिसूतः किं त्वग्निजः। ब्रह्मासनार्हता त्वस्य ब्राह्मणसंकल्पादेव धृष्टद्युम्नस्य क्षत्रियत्ववत्। यद्वा "अग्निर्वै ब्राह्मणः" इति श्रुतेरग्निजत्वेन ब्राह्मणत्वादेव ब्रह्मासनं मुनिभिर्दत्तमन्यथा "व्यासासनोपवेशाच्च शूद्रश्चांडालतां व्रजेत्। विप्रस्यैवाधिकारोस्ति व्यासासनसमाक्रमे॥ धर्माणां श्रुतिगीतानामुपदेशे तथा द्विज॥" इति संहितोक्तिर्व्याकुप्येत। किंच ब्रह्मासनं वैशंपायनहारीतशांतव्रतमार्कंडेयादिसमानस्तत्सजातीय एवार्हतीति न हीनः। न महांतः शौनकादयो हीनात्परं रहस्यं जगृहुरिति वक्तुं युक्तम्। "न हीनतः परमभ्याददीत" इति श्रुतेः। "नीचादप्युत्तमा विद्या ग्राह्या" इति त्वाक्त्परं वृत्त्युपयोगिविद्यापरं वा। अत एव तद्वधाद्बलरामेण ब्रह्महत्याव्रतं चीर्णमिति स्मर्यते। "यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन। चरिष्यत" इति दशमे बलदेवं प्रति शौनकोऽपि वक्ष्यति च। सूतशब्दस्तु तत्र कथाप्रवक्तृसाम्यादेव पुराणानां प्रवक्तृत्वे "वरयेद् ब्राह्मणं गुरुम्" इति पुराणांतरेपि स्मर्यते। जातिसूतेषु पौराणिकपदप्रयोगः प्राचीनराज्ञामुत्साहौदार्यादिगुणवर्णनादेवेति। यद्यपि "मन्ये त्वा विषये वाचां स्नातमन्यत्र छांदसात्" इत्युक्तिस्तु जातिसूतविषयैव, तथापि त्वयि सूतशब्दप्रयोगात्त्वय्युपचर्यतेऽन्यथा "पुराणं ब्रह्मसंमितम्" इत्युक्तेः श्रीभागवतवक्तृत्वमपि न संभवतीति रहस्यम्। सत्कृतं तद्योग्यसत्कारैः पूजितम्। आसीनं सुखोपविष्टम्। अनेन हुतहुताग्नय इत्युच्चारणेन॥ ५॥ ॐ ॐ अनघेति। त्वयि सूतपदप्रयोगो हि हविर्वैपरीत्येनैव न तु जात्यभिप्रायेणातोहं विलोमजो ब्राह्मणेभ्यः कथमुपदिशामीति शंकां मा कार्षीर्यतस्त्वमनघोसीति भावः। पुराणानि मात्स्यादीनि, भारतादीतिहासादिना बाल्मीकीयादिग्रहः। चादुपपुराणान्यपि धर्मशास्त्राणि मनुयाज्ञवल्क्यादिप्रणीतस्मृतयः "मन्वाद्याः स्मृतयो धर्मशास्त्रमित्यभिधीयते" इति संग्रहोक्तेः। अधीतानीत्युक्त्या वेदवत्तासां गुरुमुखादेव पठनं न्याय्यमिति सूचितम्। उतेति पादपूरणेप्यर्थे वा। उतापि॥ ६॥ ॐ ॐ अन्यदाह किञ्चेति। भगवान्साक्षान्नारायणत्वात्। "व्यासो नारायणः स्वयम्" इत्यादिपुराणात्। बदरीणां समूहो बादरं तदुपलक्षितमयनं निवासस्थानं "तस्मिन्स्व आश्रमे व्यासो बदरीखंडमण्डिते" इति वक्ष्यमाणत्वात्। यद्वा वादाननीश्वरवादादीन् रिणाति हिनस्तीति बादरायणः। 'री गतिरेषणयोः' रेषणं हिंसा कार्येगुण् वृद्ध्यायौ। अन्ये श्रीवसिष्ठप्रभृतयः। हे सूतेति। पौराणिकस्त्वमसीति भावः। "सूताः पौराणिकाः प्रोक्ताः पुराणं सर्वसंग्रहः" इति धरणिदेवः॥ ७॥ ॐ ॐ हे सौम्येति। सौम्यस्वभावत्वात्त्वयि गुरुप्रसादोऽवश्यमिति भावः। गुह्यं चेत्कथं ब्रूयुस्तत्राह। स्निग्धस्येति। ब्रूयुरिति विधिलिङेव। त्वयि स्निग्धे शिष्ये तेषामवश्यमेव रहस्यप्रकाशकत्वं तव च सर्वरहस्यविज्ञत्वमवगम्यते। अतस्तानपि प्रति स्वमतमेवोत्कृष्य ब्रुवतो मुनीनपहाय सर्वमतवक्ता त्वमेवास्माभिः पृच्छ्यस इति भावः॥ ८॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

ॐमिति। 'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभा'विति स्मरणादत्र प्रणवोपन्यासः शास्त्रारम्भे मङ्गलार्थः। अनेनास्य शास्त्रस्य प्रणवार्थविवृतिरूपत्वमपि सूचितम्। विस्तरोऽस्यान्यत्र (अस्माभिः प्रकाश्यमाने श्रीभागवतरहस्यसंदर्भे) द्रष्टव्यः। आलभत इति। 'पश्वालम्भनमालभते मासवापं निर्वपति कुशोपयमनम्

उपयन्ती'त्यादौ तिङर्थस्य कृत्यर्थमात्रस्य ग्रहणवदित्यर्थः । प्रत्ययोच्चारणमात्रार्थत्वेनेति । मुख्यधात्वर्थाविवक्षितत्वे दृष्टान्तः प्रकृतार्थान्वितस्वार्थान्वयबोधकत्वं प्रत्ययानामिति व्युत्पत्तिभङ्गोऽत्र स्वीक्रियते इति भावः ॥ ४ ॥ ❀ ❀ वक्ष्यमाणस्य बुद्ध्या सन्निहितत्वादिदमा निर्देश इत्याचार्यशैली ॥ ५-६ ॥ ❀ ❀ परावरे इति । परः त्रिलिङ्गः उत्तर इति 'अश्वरश्चरम' इति च मेदिनी ।अत एव श्रीश्रीधरस्वामिना ब्रह्मविशेषणत्वेन तदर्थमुक्तं सगुणनिर्गुणब्रह्मणी इति केचित् ॥ ७-२३ ॥

श्रीमद्वीरराघवव्याख्या

तदेवमनुष्ठितत्रिविधमंगलप्रदर्शितानुबन्धचतुष्टयप्रामाण्यो भगवान् बादरायणस्त्रैकालज्ञोऽस्य चिकीर्षितस्य वेदान्तार्थोपबृंहणरूपस्य पुराणस्य परीक्षिच्छौनकशुकसूताद्यष्टप्रतिवक्तृप्रश्नोत्तरमुखेन भाविनीं प्रवृत्तिमालोच्य तत्र तेषां प्रश्नोत्तररूपान् श्लोकान् स्वयमेव तत्र तत्र निर्मित्सुस्तावदुपोद्धातरूपेऽस्मिन्प्रथमस्कंधे प्रथमप्रष्टुः परीक्षितः प्रतिवक्तुः शुकस्य चैकत्र समावेशः । प्रतिवक्तुः शुकस्य समागमं परीक्षित्प्रश्नोद्योगहेतुप्रायोपवेशं तन्निमित्तविप्रशापं च विवक्षुः प्रायोपवेशात् प्राक्तनं जन्मावधिकं पारीक्षितं वृत्तांतं, ततः प्राक्तनं तत्पित्रादिवृत्तांतं तथैव तत्प्रबंधकर्तुः स्वस्यैव तन्निर्माणनिमित्तदर्शनसमागतदेवर्षेश्च संवादे तदाज्ञयैतत्प्रबंधनिर्माणं च शौनकसूतप्रश्नोत्तरमुखेन विवक्षुस्तावच्छौनकादीनां प्रश्नप्रकारं वक्तुं तदुपोद्धातमाह—नैमिष इति । अत्र केचिच्छौनकादिप्रश्नरूपाः श्लोकास्तदर्वाचीनैर्निर्मायात्र तत्र तत्र निबद्धाः, परीक्षिदादिप्रश्नादिरूपास्तु सूतेनेति वदंति—तदसारं, त्रैकालज्ञस्य प्रबंधप्रबद्धुरेव तन्निर्माणोपपत्तेः । नहि सद्विद्यानंदवल्लीप्रतर्दनविद्यादिषु श्वेतकेतुर्हारुणेय आह तदा पितोवाच—'भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति' । 'प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगामे'त्यादीनां प्रश्नोत्तररूपाणां श्रौतवचसामाधुनिकत्वं वक्तुं युक्तम् । ननु वेदे कर्तुरभावाद्वेद एव प्रश्नोत्तररूपे प्रतिपिपादयिषितानर्थान्प्रतिपादयति । अत्र तु पौरुषेयेऽन्यकर्तृकाणामपि वचसां संदर्भस्तत्र तत्र न दोषावह इति चेत्, एवमपि कृत्स्नप्रबंधस्यैककर्तृकत्वासिद्धेः कृत्स्नस्य पुराणप्रपंचस्य प्रश्नोत्तररूपत्वेन कानि ग्रन्थकर्तुर्वचांसि कानि चेतरेषामिति विभागस्याशक्यत्वाच्च तस्माद्यथोक्तमेव युक्तम् । शौनक आदिर्येषां ते मुनयः ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठीभवति यत्र तन्निमिषं तदेव नैमिषं । तच्च वायुपुराणे प्रसिद्धम् ॥ 'नैविश' इति पाठे निविशंत्यत्र महर्षय इति निविशं, तदेव नैविशं, इत्यन्वर्थं नाम नैविषाख्ये निमिषक्षेत्रे भगवत्सान्निध्यवतीति भावः । स्वर्गाय लोकाय स्वर्गो निरतिशयानन्दः तादृशो लोकः परं पदं तस्मै तत्प्राप्तये तत्साधनं सत्रं सहस्रसहस्रं संवत्सरमासतानुष्ठितवंतः 'स्वर्गो लोकोऽत्र परमपदमेव अनन्ते स्वर्गे लोकेऽजय्ये प्रतितिष्ठतीति स्वर्गे लोकेऽमृतत्वं भजंत' इति श्रुत्यनुरोधेनास्य निर्देशात् । अन्यथा शौनकादय इति न घटते । 'दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाये'ति वदतः परमभागवतस्य शौनकस्य प्रसिद्धस्वर्गाद्यर्थित्वायोगात् ऋत्विज एव यत्र यजमानास्तत्सत्रं, यद्वा 'सत्र'शब्देन भगवद्गुणानुभवात्मकं ब्रह्मसत्रं विवक्षितम् । तथा च तल्लक्षणं वक्ष्यति दशमे श्रुतिगीतायां 'तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे' इति । अत एवासीना दीर्घसत्रेणेति वक्ष्यमाणोपपत्तिः ॥ ४ ॥ ❀ ❀ त इति । ते शौनकादयो मुनयः कदाचित्प्रातर्हुतहुताग्नयः । हुतेत्यर्हार्थे क्तः । हुतेन होमार्हद्रव्येण पयःसर्पिरादिना साधनेन हुता अग्नयः आहवनीयादयो यैस्तथभूताः सत्कृतं यथोचितं बहुमतमासीनमुपविष्टं च सूतमिदं वक्ष्यमाणमादरादादरपूर्वकं पप्रच्छुः ॥ ५ ॥ ❀ ❀ प्रश्नमेवाह—त्वयेत्यादिना यावदध्यायसमाप्ति । तावद्युष्मत्प्रश्नोत्तरं वक्तुं नाहं समर्थ इत्याशंकां निराकुर्वंत आहुः—त्वयेति । हे अनघ शास्त्रार्थाज्ञाननिमित्तकर्मरूपपापरहित ! जातिप्रयुक्तावमत्वरूपाघरहितेति वा । त्वयेतिहाससहितानि सर्वपुराणानि उत अपि च यानि धर्मशास्त्राणि मानवादीनि तानि सर्वाण्यधीतान्याख्यातानि च ॥ ६ ॥ ❀ ❀ कानि तानि पुराणधर्मशास्त्राणीत्यत आहुः—यानीति । वेदविदां स्वरूपतोऽनुष्ठानपर्यंतार्थतश्च वेदं विदन्तीति तथा तेषां मध्ये श्रेष्ठो भगवान् बादरायणः तथाविधा अन्ये च मुनयः पराशरादयो मन्वादयश्च परावरविदः परं परमात्मतत्त्वमवरप्रकृतिपुरुषतत्त्वं तद्विदः तत्त्वज्ञा याथात्म्यविदः यानि पुराणानि धर्मशास्त्राणि च विदुस्तान्यधीतान्याख्यातानि चेति पूर्वेणान्वयः । वेदविच्छ्रेष्ठो बादरायणोऽन्ये च मुनयो यानि विदुरित्यनेन स्मृतीतिहासपुराणानां वेदमूलत्वम् । अत एव प्रामाण्यं च दर्शितम् ॥ ७ ॥ ❀ ❀ नन्वपशूद्राधिकरणन्यायेन अनधिकृतशारीरकोऽहं इतिहासपुराणाध्ययनजापातप्रतीतिमान्कथं भवत्प्रश्नस्योत्तरं वक्तुं प्रभुरितीमां शंकां वारयंत आहुः—वेत्थेति । हे सौम्य ! सदनुग्रहात्सतो व्यासस्यानुग्रहात् पुराणाद्यर्थरूपं वस्तु यथावद्वेत्सि नत्वापातत इति भावः । सदनुग्रहादपि कथं शारीरकाध्ययनं निर्णेतव्यं वस्तुतत्त्वमहंविद्यामित्यत आहुः—ब्रूयुरिति । स्निग्धस्यानुरक्तस्य त्वादृशस्य शिष्यस्य गुरवो बादरायणादयो गुह्यमपि ब्रूयुः, शारीरकमुखेनानुक्त्वा केवलमुपदिशेयुरिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु 'ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा । अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधौ ॥' इति स्मृतेः प्रकारांतरेणापि पुरुषार्थः स्यात्, किमनेनेत्यतोऽनेनैव पुरुषार्थो नान्येनेति ख्यापनयास्य शिष्टपरिगृहीतत्वज्ञापनाय श्रोतृप्रवक्तॄणां महापुण्यफलवत्त्ववेदनाय च शौनकादिमुनिवरसूतप्रश्नप्रतिवचनरूपामाख्यायिकामाह—नैमिष इति । शौनकादय ऋषयः अनिमिषक्षेत्रे

नैमिषे स्वर्गाय लोकाय सहस्रसमं सत्रमासतेत्येकान्वयः । शुनकस्यापत्यं शौनकः, तदेव तस्य नाम शौरिरितिवत् स आदिर्येषां ते तथोक्ताः । ऋषयस्त्रिकालदर्शिनः, मन्त्रद्रष्टारो वा, अनिमिषक्षेत्रे श्रीनरहर्यादिसुरवरसंनिधानावासे निमिषां ऋषिसेव्यफलाः वृक्षविशेषाः तस्मिन् सन्तीति नैमिषं 'चित्रकृन्निमिषो नेमिः, चक्रलोथायुगच्छद' इत्यभिधानात्, विशिष्टक्षेत्रदर्शनाय देवप्रेरितस्य सुदर्शनस्य नेमिर्यस्मिन् विशीर्यते तन्निमिषं, तदेव नैमिषं इति यत्तच्चिंत्यम्, निमिषनाम्ना ऋषिणा यत्र तपश्चीर्णं तत्संबंधाद्वा नैमिषैतस्मिन्नैमिषारण्ये स्वरतो विष्णुः तेन गतो लोको वैकुण्ठाख्यः तस्मै सदानन्दज्ञानमूर्तित्वात्स्वर्गो विष्णुः लोक आश्रयः तदर्थमिति वा स्वरिति विष्णुस्तं गमयति प्रापयति ज्ञापयतीति स्वर्गः, 'लुक् प्रकाशन' इति धातोर्लोकः प्रकाशं ज्ञानं विष्णुस्तद्विषय-पुराणधर्मज्ञानार्थमिति वा नतु मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्यय इति दुःखासंभिन्नदेवसेव्यदेशविशेषायेति, तस्य नश्यत्वश्रुतेः । सहस्रं समा यस्मिंस्तत्तथोक्तं वर्षसहस्रसमाप्यमित्यर्थः । सतः सुजनान् त्रायत इति सतो ब्राह्मणस्त्राणमस्येति वा सत्रं प्रशस्ततरकर्मसु श्रेष्ठमिति वा सत्रं बहुकर्तृकं यागविशेषम् आसत उपाविशन्, अदीक्षयन्नित्यर्थः ॥ ४ ॥ ❀ ❀ ये सत्रयागे दीक्षितास्ते मुनयः सर्वज्ञा अपि एकदा कस्मिंश्चित्काले स्वाश्रमं प्रत्यागतं सत्कृतं तद्योग्यसत्कारैः पूजितमासीनं सुखं पीठे उपविष्टं सूतम् इदं स्वबुद्धिस्थितं पप्रच्छुः । किंविशिष्टाः ? आदृताः विनीताः तेनापि पूजिता इति । वा हुतं हविरश्नातीति हुताशनोऽग्निः, प्रातःकाले हुतः हुताशनो यैस्ते तथोक्ताः, हुतेन पयआदिद्रव्येण हुतोऽग्निर्यैस्ते हुतहुताग्नय इत्यसत्, हुतशब्दस्य पयआदिष्वपाठात् । तुर्लोकानुकम्पाद्योतकः । पृच्छतेर्द्विकर्मकत्वात् सूतमिदं पप्रच्छुरिति कर्मद्वयं युज्यते ॥ ५ ॥ ❀ ❀ प्रशंसितः प्रवक्ता सूतः स्वप्रश्नोत्तरं संतुष्य सम्यग्वक्तीति हृदि कृत्वा प्रष्टव्यार्थं पृष्ठतः कृत्वा तं प्रशंसंति शौनकादय इत्याह—त्वया खल्विति । अनघ "दुःखैनोव्यसनेष्वघम्" इत्यभिधानान्निरस्तसमस्तकार्यव्यसन ! त्वया सेतिहासानि पुराणानि चशब्दादुपपुराणानि अधीतानि वेदवत्पठितानि आख्यातानि व्याख्यातान्यपि यानि मनुयाज्ञवल्क्यादिप्रणीतानि धर्मशास्त्राणि तान्युत अपि अधीत्य व्याख्यातानीत्येकान्वयः ॥ ६ ॥ ❀ ❀ तस्य ज्ञानेयत्तां वदंतीत्याह—यानीति । वेदविदां श्रेष्ठः बादरायणो भगवान् यानि वेद अन्ये च परापरविदः मुनयः तान्येव विदुः, किंच ते मुनयो वेदादन्यत्र यानि विदुः हे सौम्य ! त्वं तत्त्वतः तत्सर्वं वेत्थेत्येकान्वयः । वेदवादरतानां वादिनामाश्रयत्वाद्बादरायणः, बवयोः सावर्ण्यात् बादरायणसंबंधि यत् बादरं अयनं स्थानं यस्य स तथोक्त इति वा, परं ब्रह्म अपरं ब्रह्म विदंतीति परापरविदः अतीतानागतविदो वा, हे सौम्य ! भक्तिज्ञानलक्षणसोमार्ह 'विद कृतौ' इति धातोः भगवान्यानि वेद चकार, अन्ये च मुनयो यानि चक्रुः तत्सर्वं जानासीति वा, गुरवः स्निग्धस्य स्नेहलक्षणभक्तिसंपन्नस्य शिष्यस्य गुह्यमप्यतिगोप्यमपि ब्रूयुरुत अपि तत्संभावितमित्यन्वयः, ब्रूयुरपिबेत्यर्थ इति वा ॥ ७-८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्रापि महापुराणस्यास्य प्रश्नोत्तराभ्यां श्रीकृष्णैकपरत्वं दर्शयितुमाह—ॐ नैमिष इत्यादि । टीकायामासतेत्यस्य व्याख्यान्तरे त्विदं ज्ञेयम्—तत्तद्धात्वर्थस्तत्र तत्र न सम्भवतीति धातुं विना च केवलप्रत्ययोच्चारणं न युज्यते इति प्रत्ययस्य तिबादेरर्थः प्रयोजनं तत्र तादृशतया धात्वर्थस्याविवक्षितत्वात् कृञर्थानुगतकर्तृवाचिप्रत्ययेन कृञर्थस्तु समर्प्यते इति ॥ ४-५ ॥ ❀ ❀ त्वयेति युग्मकम् । तत्त्वतो याथार्थ्येन । तत्तु गुह्यमिति चेत्तथापि वक्तव्यमित्याहुः—ब्रूयुरिति ॥ ६-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् । लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥ १ ॥
तमश्छन्नदृशां यैनैः कृते भावार्थदीपिका । कृता कृपालवस्तेऽत्र श्रीधरस्वामिनो गतिः ॥ २ ॥
व्याख्या लेख्या तदीयया भक्तिचित्तप्रमोदिनी । काचित् प्रभूणां काचित्तु श्रीमद्गुरुकृपोदिता ॥ ३ ॥

तदेवं श्रोतॄनभिमुखीकृत्य श्रीभागवतकथारम्भे पुनर्मङ्गलमाचरति—ओमिति । तदुक्तं—'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभा'विति । शास्त्रस्यास्य प्रणवार्थविवृतिरूपत्वं सूचयति—नैमिष इति । ब्रह्मणा सृष्टस्य मनोमयचक्रस्य नेमिः शीर्यते यत्र तन्नेमिशं नेमिशमेव नैमिशम् । तथा च वायवीये—'एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते । यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम् । प्रणिपत्य महादेवं विससर्ज पितामहः । तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम् ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत । तद्वनं तेन विख्यातं नैमिशं मुनिपूजित'मिति । विविधभक्तिवासनावतां जनानां मध्ये यस्य यस्य यत्र यत्रैव स्थले शाम्यद्वेगं मनः स्थिरीभवति तस्य तस्य तत्र तत्रैव श्रीमद्भागवतार्थावगाहनेन स्वाभीप्सितं सिध्यति इत्येतन्मात्रविवक्षया प्रथमत एव शास्त्रस्य 'नैमिश' इत्यन्वर्थपदस्य न्यासो ज्ञेयः । मूर्द्धन्यषकारान्तपाठे वराहपुराणोक्तं द्रष्टव्यम् । तथा हि गौरमुखमृषिं प्रति भगवद्वाक्यं 'एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् । अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् । भविष्यति यथार्थं वै ब्राह्मणानां विशेषक'मिति । अत्रापि पाठे यत्र कामादीन् शत्रून् शीघ्रमेव निहन्तुं प्रभवेत् तत्रैव वसेदिति विवक्षितम् । स्वर्गायेति । प्रथमं शौनकादीनां सकामकर्मपरत्वमेवासीत् । रोमहर्षणसंगेन ततो नानापुराणादिशास्त्रश्रवणमननादिभिर्जिज्ञासुत्वमिति प्रसिद्धिः ।

ततश्च साधोरुरुश्रवसः संगेन भक्तिरसे स्पृहा। यदुक्तं—'कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविन्दपादपद्मासवं मध्वि'ति। ततश्च जिज्ञासुत्वमपि शिथिलीकुर्वतां तेषां भक्तौ प्रवेशे स्वर्गार्थकं सत्रं तत्र मिषमेवाभूत्। यदुक्तं 'कथायां सक्षणा हरे'रिति। एतच्च श्रीभागवतश्रोतृषु तेषु कर्मिषु कर्मनिष्ठाव्यवधानेन भक्तेः प्रभावद्योतनं तथैव श्रीभागवतवक्तरि श्रीशुकदेवोऽपि परिनिष्ठितोऽपि 'नैर्गुण्य' इत्यादिभिर्ब्रह्म परिनिष्ठाव्यवधानेनेति। यद्वा स्वः स्वर्गे गीयत इति स्वर्गायो हरिः उरुगाय इतिवत्, तस्य लोको वैकुण्ठस्तस्मै। अनिमिषो विष्णुः तस्य 'क्षेत्रेऽस्मिन् वैष्णवे वय'मिति तेषामुक्तेः। सहस्रं समाः संवत्सराः अनुष्ठानकाला यस्य तत् सत्रसंज्ञं कर्म उद्दिश्य आसत उपविविशुः। यद्वा आसत अकुर्वत, अग्निष्टोमीयपशोरालभनमालभते। अमावास्यायां पितृभ्यः श्राद्धं निर्वपति। अष्टवर्षायाः कन्यायाः पाणिग्रहणमुपयन्तीतिवत्। धात्वर्थस्य बाधात् तत्सामान्यक्त्वर्थे एवात्रासधातुर्वर्तितः॥ ४॥ ❀ ❀ हुता एव हुता अग्नयो यैस्ते॥ ५॥ ❀ ❀ इतिहासो भारतादिः। आख्यातानि व्याख्यातानि॥ ६॥ ❀ ❀ विदां विदुषां परावरे सगुणनिर्गुणे ब्रह्मणी विदन्तीति ते॥ ७॥ ❀ ❀ स्निग्धस्य गुरुविषयकस्नेहवतः शिष्यस्य गुरवो गुह्यमपि ब्रूयुरिति विधिलिङैव त्वयि स्निग्धे शिष्ये तेषामवश्यमेव रहस्यप्रकाशकत्वं तव च सर्वरहस्यविज्ञत्वमवगम्यते। अतस्तानपि प्रति स्वं मतमेवोत्कृष्य ब्रुवतो मुनीन् अपहाय सर्वमतवक्ता त्वमेवास्माभिः पृच्छ्यसे इति भावः॥ ८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

उक्तार्थं विस्तरतस्तत्तत्प्रश्नोत्तरैर्वक्तुं भगवान्वेदाचार्यः शास्त्रमाविष्करोति—नैमिशे इति। तपोवनपरीक्षार्थमृषिभिः प्रार्थितेन ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुण्ठीभवति। 'यत्र तन्निमिशं तदेव नैमिश'मिति वायुपुराणादवगंतव्यम्। वाराहपुराणे तु—'उवाच निमिषेणैव निहतं दानवं बलम्। अरण्येऽस्मिन् ततस्तेन नैमिषारण्यसंज्ञित'मित्युक्तम्। अनिमिषक्षेत्रे विष्णुक्षेत्रे सहस्रसमं सहस्रसंवत्सरनिष्पाद्यम्। 'सत्रं कर्तारो बहवो यत्र हीज्यन्ते बहवस्तथा। बहुभ्यो दीयते यत्र तत्सत्रमभिधीयते'इति। एवंभूतं कर्मोपदिश्यासतोपविविशुः। कस्मै प्रयोजनाय? स्वर्गाय लोकाय स्वः स्वर्गलोकस्तत्र गीयते इति स्वर्गायो भगवान्, तल्लोकप्राप्तये। यद्वा 'ये स्वर्गे लोकेऽमृतत्वं भजंते' इति श्रुतेः 'स्वर्ग'शब्दो भगवल्लोकपरः, तस्मै स्वर्गाय लोकाय, स च लोकः सत्यलोकादुपरिप्रोक्तो मुद्गलोपाख्याने—'ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम्। शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदु'रिति। जापकोपाख्याने च 'एते वै निरयास्तात लोकस्य परमात्मनः। अभयं चानिमित्तं च न तत्क्लेशसमावृतम्॥ द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव चे'त्यादि। विस्तरस्तु वेदान्तकौस्तुभे द्रष्टव्यः॥ ४॥ ❀ ❀ प्रातःकाले हुता एव हुता अग्नयो यैस्ते। आसीनं स्वस्थम्॥ ५-६॥ ❀ ❀ विदां मध्ये श्रेष्ठः बादरायणो यानि वेद। श्रेष्ठत्वे हेतुः—भगवानिति। 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छती'ति स्मृत्युक्तेः। ब्रह्मणी विदन्तीति। परावरविदोऽन्ये च यानि विदुः। तानि त्वया आख्यातान्यप्यधीतानीति पूर्वेणान्वयः॥ ७-८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत्र भागवतस्य परंपरागताः सप्तार्थाः कथार्थतोऽतिरिक्ता भवंति। अतो नान्यटीकासु ते निरूप्यंते। ते हि निबंधे 'शास्त्रे स्कंधे प्रकरणेऽध्याये वाक्ये पदेऽक्षरे। एकार्थं सप्तधाजानन्नविरोधेन मुच्यत' इति निरूपिताः। तत्र आनंदस्य हरेर्लीला शास्त्रार्थः। भक्तिजनिका हि संहिता। सृष्ट्यादीनां लीलात्वे ज्ञाते भक्तिर्भवति, न कार्यत्वे, कौतुकाधिष्ठितेन अनायासत्वेन क्रियमाणं कर्म लीला; तदा हि महत्त्वं निर्दुष्टत्वं च भवति। सा च लीला मुख्या दशविधा 'अत्र सर्गो विसर्गश्चे'ति श्लोकेन निरूपिता। सा च तृतीयादिदशमस्कंधैर्निरूप्या। श्रोतृवक्तृलक्षणं प्रथमे। अंगनिरूपणं द्वितीये। अतो द्वे गौणलीले। एवं द्वादश। तत्र प्रथमे स्कंधे अधिकारिलीला निरूप्यते हीनमध्यमोत्तमत्वतः। भागवतार्थज्ञाने प्रकारबोधनाय। नहि सर्वैरेकविधं भागवतं बुध्यते। सूतशौनकाभ्यां बुद्धमेकविधम्। तथा नारदव्यासाभ्यामपरविधम्। तथा शुकपरीक्षिद्भ्यामुत्कृष्टं एवं त्रैविध्यनिरूपणेन, यथाधिकारमर्थावबोधो भविष्यति, तत्र प्रथमं हीनाधिकार उच्यते अध्यायत्रयेण प्रश्नोत्तराभ्याम्। प्रश्न एकविधः उत्तरं द्विविधमिति। तत्र श्लोकद्वयेन प्रश्नसंगतिमाह। स्वरूपसंगतिभेदेन तत्र स्वरूपमाह–नैमिष इति। पुण्यतीर्थे पुण्यक्षेत्रे, यज्ञादिभिः शुद्धाः यज्ञरूपभगवदाविष्टाः, भगवत्प्रश्ने प्रथमाधिकारिणः। स्वरूपतोऽधिकारिणः। नेमिः शीर्यत इति नेमिशं, नेमिशमेव नैमिशं, प्रजापतिसृष्टस्य मनोमयचक्रस्य ऋषीणां तपःस्थानज्ञापनार्थं यत्रास्य नेमिः शीर्यत इति पुण्याधिक्यमुक्तम्। 'नैमिष' इति पाठे यत्र निमिषमात्रेण दानवबलं निहतमिति नैमिषं सर्वदोषनिवारकम्। तस्य क्षेत्रस्य विष्णुर्देवतेत्याह अनिमिषक्षेत्र इति। अनिमिषो विष्णुस्तस्य क्षेत्रे दोषाभावगुणावुक्तौ। ऋषयो मंत्रद्रष्टारः शौनकादय इति प्रसिद्धाः। ऋषिपरंपरायां सत्रं सहस्रसममिति नाम यस्य, सहस्रसंवत्सरे साध्ये सत्रे समाना एव ऋत्विगध्वर्य्वादयः यत्र कर्म कुर्वन्ति तत्सत्रं, तत्र, पूर्वं सहस्रसंवत्सरे सत्रे, अलौकिकभगवदाविर्भावो दृष्टः। 'विश्वसृजः प्रथमाः सत्रमासत' इत्यादौ। तथात्रापि सहस्रसमे आरब्धे, भागवतरूपस्य भगवत आविर्भावो भविष्यतीति ज्ञात्वा ऋषीणां सत्रारंभ

इत्यर्थः । स्वर्गाय भगवदानंदांशभूतः स्वर्गः । लोकात्मकस्तु महानैशः स ह्यत्र फलं, नतु स्वर्गीयत इति स्वर्गायो विष्णुः स चासौ लोकश्चे ति; 'स्वर्गाय वा एतानि लोकाय हूयंत' इति श्रुतिविरोधात् । स च सुखविशेषशरीरः । देवविशेषो लोकरूपः । 'देवेभ्यो वै स्वर्गो लोकः स्थिरोऽभवदि' त्यत्र तथा निर्णयात् । सत्रे सर्वत्र आसतिरेव कृतिवाची । एवं तेषां स्वरूपोत्कर्ष उक्तः । संगतिमाह । ॥ ४ ॥ ❀ ❀ उत्सर्गकालोऽयं दीक्षाकालो वा नित्यनैमित्तिकसर्वहोमान् कृत्वा भगवत्कथाश्रवणार्थे सावकाशा जाता इत्याह— प्रातर्हुतहुताग्नय इति । एकदेति हरिगाथोपगायनकाल उक्तः । तदैव सूतादीनामागमनं मुनय इति अलौकिकपरिज्ञानमुक्तम् । येन सूतपरिज्ञानं भवति । तत्प्रसंगे अन्येषां प्रश्नव्यावृत्त्यर्थं त इति प्रातरेव हुता एवाग्नयः पुनर्हुता येषान्ते प्रातर्हुतहुताग्नयः । न च वेदविरोधः शंकनीयः । तुशब्देन पक्षान्तरस्वीकारात् । तथाकरणे मननहेतुः कालगुणविशेषपरिज्ञानात् । अत एवाग्रे वक्ष्यति—'कर्मण्यस्मिन्ननाश्वास'इति । सत्कारसंभाषणादिना । ब्रह्मासनदानेन वा सूतः पौराणिकः उग्रश्रवाः । ब्राह्मणानां सदसि अन्येषामनुपवेशनात् । उत्थितस्य च पुनर्वैयग्र्यात् कथान्यूनभावाच्च तन्निराकरणाय आसीनमित्युक्तम् । भगवत्कथारसाभिनिवेशादहमहमिकया सर्वैः पृष्ट इति बहुवचनम् । इदमिति वक्ष्यमाणं सूतस्य भगवदादरात् पप्रच्छुरादरेण वा सर्वत्र भगवत्कथायामान्तरो भावो मुख्यः, नतु वाक्यमात्रम् । अत्र षट् प्रश्ना भगवद्विषयकाः कर्तव्याः । षड्गुणत्वाद् भगवतः । तदर्थं वक्तारमभिनन्दन्ति त्रिभिः ॥ ५ ॥ ❀ ❀ खल्विति स्तुतिव्यावृत्तिः । पुराणान्याकरस्थानि । मूलसंहिताचतुष्टयं वा । इतिहासो भारतम् । चकारादन्याश्च कथाः प्रगाथादयः । विद्योपजीवनं न करोतीत्यनघेत्युक्तम् । आख्यातान्यप्यधीतानि । पूर्वमधीत्य व्याख्याय पुनः पुनरधीतानीत्यर्थः । तदैव निःसन्देहः । धर्मशास्त्राणि चाधीतानि । "धर्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम् । जीवेश्वरविचारेण द्विधा ते हि निरूपिताः ॥" तत्रेश्वरविचारिताश्चत्वारो वेदा एव । जीवविचारितास्तु स्मृतिषु धर्मः, नीतिशास्त्रे अर्थः, वात्स्यायनादिषु कामः, सांख्यादिषु मोक्षः, तत्र तावत् सर्वज्ञत्वं न भवति यावद् भगवच्छास्त्रापरिज्ञानम् । तदर्थमाह— धर्मशास्त्राणीति । उत यानि प्रसिद्धानि अर्थशास्त्रादीनि लौकिकानि वा । सूतपारंपर्येण ज्ञातान्येव ज्ञातानि, नतु ब्राह्मणैर्ज्ञातानि इति शंकां वारयितुमाह ॥ ६ ॥ ❀ ❀ धर्मार्थकामाः सूतपारंपर्येणापि ज्ञायन्ते, मोक्षशास्त्राणि तु ब्राह्मणैरेव, तत्र सूतस्याज्ञानं संभवति, तन्निवृत्त्यर्थमाह—विदां श्रेष्ठो ज्ञानिनां श्रेष्ठः यानि वेदेति मोक्षशास्त्राणि सर्वाणि गृहीतानि । ननु तानि कथं व्यासस्तस्मै कथयेदित्याशंक्याह—भगवानिति । भगवतः सर्वं संभवति । तथाप्यनधिकारिणे कथमाहेत्याशंक्याह—बादरायण इति ॥ अतितपसा तदधिकारसंपादनशक्तिरुक्ता । "नह्यकस्मात् गुरोर्ज्ञानं शिक्षितं स्यात् सुपुष्कल"मिति वाक्यादसार्वज्ञ्यमित्याशंक्याह— अन्ये च मुनय इति । ते च मननशीला ज्ञानिनः अज्ञानादुपदेश इति न मन्तव्यं, यतः सूतः प्रसिद्धः, इति पुनः संबोधनं, तर्हि कथमुपदेश इत्यत आह—परावरविदो विदुरिति । परे ब्रह्मादयः, अवरे अस्मदादयः, भूतभविष्यत्काला वा तान् जानन्तीति ईश्वरेच्छा तथैव कालश्च तथेति बोधनार्थं तथा वचनं फलितमाह ॥ ७ ॥ ❀ ❀ शिष्यगुणानाह—सौम्येति । हे शांत ! सेवादिगुणानां साधारण्येऽपि, असुरत्वाच्छूद्रस्य क्रौर्यादयः सम्भवन्ति, तदभावश्चेत् सिद्धा अन्ये सद्गुणा इति भावः । सूतेति संबोधनात् वेदव्यतिरिक्तमिति ज्ञातव्यम् । आपाततो ज्ञानं वारयति—तत्त्वत इति । उपदेशेऽपि कथमनधिकारिणो ज्ञानमित्याशंक्याह—तदनुग्रहादिति । गुरूणामनुग्रहात् सर्वं भवतीत्यर्थः । एवं सार्वज्ञ्यमुक्त्वा प्रथमतः फलं पृच्छन्ति—तत्र तत्रेति ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नैमिष इत्यत्र । न कार्यत्व इति । अत एवोपनिषदादिभ्यो न भक्तिः, तेषु सृष्ट्यादीनां कार्यत्वेनैव श्रावणादिति भावः । अनायासत्वेनेति । न विद्यते आयासो यस्येत्यनायासस्तत्त्वेनेत्यर्थः । स्वरूपसङ्गतिभेदेनेति । प्रश्नकर्तृस्वरूपवक्तृसङ्गत्योः कथनेनेत्यर्थः । शीर्यत इति । अत्रेति शेषः । प्रजापतीत्यादितदुक्तं वायवीये 'भ्रमतोऽधर्मचक्रस्य यत्र नेमिरशीर्यत । कर्मणा तेन विख्यातं नैमिशं मुनिपूजित'मिति । निमिषमात्रेणेत्यादि । तदुक्तं वाराहे भगवता गौरमुखमुनिं प्रति 'उवाच निमिषेणेदं निहितं दानवं बलम् । अरण्येस्मिन् ततस्त्वेतन्नैमिषारण्यसंज्ञितम् ॥ भविष्यती'त्यादिना सहस्रसंव'त्सरसाध्यमिति । एतेनास्मिन् सत्रे सहस्रदिनसाध्यत्वं वदन्तो भाट्टा निरस्ता वेदितव्याः । श्रीबलदेवतीर्थयात्रायां 'यावत्सत्रं समाप्यत' इति वाक्ये सत्र एव सूतवधात् । तस्यैवेदानीमप्यनुवर्तमानत्वात् । न च 'कलिमागतमाज्ञाये'ति वाक्ये आरम्भस्यैव बोधनादिदं सत्रमन्यदेवेति वाच्यम्, तथापि परीक्षिद्राजस्य त्रिवर्षत्वाभावाद्युष्मदभिमतासिद्धेः । 'त्रिवृतः संवत्सरा' इत्यादौ लक्षणां विनैव निर्वाहाच्चेति । तत्र भगवदाविर्भावस्तु तृतीयस्कन्धीये सत्रे 'पुरा विश्वसृजां वसूना'मिति श्लोके सुबोधिन्यां प्रदर्शितः । भगवन्दानन्दांशभूत इति । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः । श्रीधरमतं दूषयन्ति न तु स्वर्गीयतेत्यादि । लोकात्मकस्य स्वरूपमाहुः स चेत्यादि । तेन गृहविमानात्मके विद्यमानेपि यदभावे तत्र न सुखं तादृशो देवविशेषो लोकाधिदैविक इत्यर्थः ॥ ४ ॥ ❀ ❀ त एकदेत्यत्र । ननु 'नाडिकाः षट्पञ्चाशत् प्रात'रिति वाक्ये यदा षट्पञ्चाशच्च नाडिका व्यतियन्ति, ततः प्रातः । तत्र होमो वेदोदितसूर्योदयानन्तरहोमं विरुणद्धीति तत्राहुः न चेत्यादि । पक्षान्तरस्वीकारादिति । 'पूर्वात् परबलीयस्त्व'न्यायेन वैष्णवपक्षस्वीकारादित्यर्थः ।

१. दित ।

'उमिति प्रतिपद्यते' इति श्रुतौ स्फुटमिदमिति 'आदरादलोपा'धिकरणाज्ज्ञेयम् । तदुपपादयन्ति तथेत्यादिना । अन्येषामिति । क्षत्रधर्मोपजीवित्ववैद्यत्वरूपमध्यमजघन्यवृत्तिसूतानाम् । सूतोत्पत्तिवृत्ती तु वायवीये उक्ते । 'वैन्यस्य हि पृथोर्यज्ञे वर्तमाने महात्मनः । सूत्यायामभवत्सूतः प्रथमं वर्णवैकृतम् ॥ ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः । जुहावेन्द्राय देवाय ततः सूतो व्यजायत ॥' तस्य मुख्यां वृत्तिं पौराणिकीमुक्त्वा 'मध्यमो ह्येष सूतानां क्षत्रधर्मोपजीवनम् । रथनागाश्वचरितं जघन्यं च चिकित्सित'मिति । न्यूनभावादिति । अनादरादित्यर्थः । भगवदादरादिति, 'ल्यब्लोपे पञ्चमी' । भगवदादरं वीक्ष्येत्यर्थः । आदरोक्तितात्पर्यमाहुः सर्वत्रेत्यादि ॥ ५ ॥ ❀ ❀ त्वयेत्यत्र । आकरस्थानीति शतकोटिप्रविस्तरस्थानि । मूलसंहिताचतुष्टयमिति । सांख्ययोगपाशुपतवैष्णवरूपमिति प्रतिभाति ॥ ६ ॥ ❀ ❀ अन्ये चेत्यत्र । वित्पदासङ्गत्या पक्षान्तरमाहुः भूतभविष्यत्काला इति । भूता भविष्यन्तश्चार्थाः कालश्चेत्यर्थः ॥ ७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य ग्रन्थस्य विषयप्रयोजनादिवैशिष्ट्यसुखसेव्यत्वादिप्रदर्शनेन श्रोतॄनभिमुखीकृत्य शास्त्रप्रवृत्तिसङ्गतिमाह—नैमिश इति । ब्रह्मणा विसृष्टचक्रस्य नेमिः शीर्यते कुण्ठीभवति यत्र तन्नेमिशं, नेमिशमेव नैमिशं तस्मिन्नित्यर्थः । तथा चोक्तं वायवीये—"एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते । यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसङ्काशं चक्रं सृष्ट्वा मनोमयम् । प्रणिपत्य महादेवं विससर्ज पितामहः ॥ तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम् । प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम्' इति । नैमिष इति मूर्द्धन्यषकारपाठे तु वाराहपुराणोक्तं द्रष्टव्यम् । तथाहि गौरमुखमृषिं प्रति भगवद्वाक्यम्—'एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसञ्ज्ञितम् । भविष्यति यथार्थं वै ब्राह्मणानां विशेषकम्' इति । अनिमिषः श्रीविष्णुः अलुप्तदृष्टित्वात्तस्य क्षेत्रे । तथा चात्रैव शौनकादिवचनम् 'क्षेत्रेऽस्मिन्वैष्णवे वयमासीनाः' इति । स्वर्गाय लोकायेति स्वर्गः प्रसिद्धो देवलोकस्तस्मै, तत्प्राप्तय इत्यर्थः । प्रथमं शौनकादीनां सकामकर्मपरत्वमेवासीत् पश्चात्सूतसङ्गेन ततो नानापुराणश्रवणमननादिभिर्भक्तिरुत्पन्नेति ज्ञेयम् । यद्वा वैष्णवत्वेन स्वर्गार्थिताया असम्भवात् स्वः स्वर्गे गीयत इति स्वर्गायो हरिः स एव लोको भक्तानां निवासस्थानं तस्मै, तत्प्राप्तये इत्यर्थः । यद्वा स्वर्गलोको वैकुण्ठः, तस्यापि 'स्वर्वासं मेऽभिकांक्षन्ति' इति स्वर्गवाचिपदेन भगवतैकादशस्कन्धे उक्तत्वात् तत्प्राप्तये इत्यर्थः । यद्वा स्वर्गायेति भगवदानन्दांशलाभायेत्यर्थः । अत एव कलियुगे साक्षाद्भगवदाविर्भावासम्भवेऽपि नामात्मकस्य श्रीभागवतरूपस्य भगवत आविर्भावो जातः । तदनन्तरं लोकाय वैकुण्ठलोकप्राप्तये चेत्यर्थः । शौनकादयः सहस्रसमं सहस्रं समाः संवत्सराः अनुष्ठानकालो यस्य तत् सत्रं यजमाना एव सर्वे ऋत्विक्कर्म कुर्वन्ति तत्सत्रसञ्ज्ञकं कर्मोद्दिश्य आसत उपविविशुरित्यर्थः । यद्वा "पशोरालभनमालभन्त, श्राद्धं निर्वपति, पाणिग्रहणमुपयन्ति" इत्यादिवत्प्रत्ययोच्चारणमात्रार्थत्वेनासधात्वर्थस्याऽविवक्षितत्वात् आसत अकुर्वतेत्यर्थः । न च शङ्कनीयमस्य कर्मण इदं फलं भविष्यत्येवेति कथं तेषां निश्चयो येन सत्रे प्रवृत्तिरिति, ऋषित्वेन भूतभविष्यदर्थनिश्चयादिति भावे तान्विशिनष्टि—ऋषय इति ॥ ४ ॥ ❀ ❀ ते पूर्वोक्ताः शौनकादय इदं वक्ष्यमाणमर्थं आदरात् आदरपूर्वकं सूतं पप्रच्छुरित्यन्वयः । तुशब्दोऽवधारणार्थकः । त एव पप्रच्छुर्नान्यः कश्चित्तदा किञ्चित्पप्रच्छेत्यर्थः । एकदेति कथोचितकाले इत्यर्थः । तदेव कालविशेषं दर्शयंस्तान् विशिनष्टि—प्रातर्हुतहुताग्नय इति । हुतेत्यर्हार्थे क्तः । प्रातःकाले हुतेन होमार्हेण पयोघृतादिद्रव्येण हुता अग्नय आहवनीयादयो यैस्ते, यद्वा प्रातर्हुता एव पुनर्हुता अग्नयो यैस्ते । इति नित्यनैमित्तिकक्रियानुष्ठानानन्तर्यं कालस्य दर्शितम् । अयमुग्रश्रवा नाम सूतोऽस्मज्जिज्ञासितमर्थं जानातीति कथं तेषां परिज्ञानं जातमित्यपेक्षायां मुनित्वात्सर्वज्ञास्ते इति सूचयन्नाह—मुनय इति । तथापि सूतस्य हीनत्वेन कथायोग्यस्थानोपवेशनासम्भवेनोत्थितेनोदासीनेन च तेन कथं कथनं सम्भवति, येन पप्रच्छुरिति शङ्कां निवारयन्नाह—सत्कृतमासीनं चेति । मुनीनामाज्ञयाऽऽसीनमुपविष्टं, ब्रह्मासनदानेन सत्कृतं चेत्यर्थः ॥ ५ ॥ ❀ ❀ आदरश्चात्र तस्य सर्वशास्त्रज्ञानातिशयकथनं तदेव दर्शयति—त्वयेति त्रिभिः श्लोकैः । खलुशब्दो निश्चयार्थः । तेन न केवलं स्तुतिमात्रं कुर्मः, किन्तु निश्चितमेव वदाम इति सूचयन्ति । इतिहासो महाभारतादिस्तत्सहितानि पुराणानि—उत अप्यर्थे—यान्यपि मानवादीनि धर्मशास्त्राणि तानि च त्वयाऽधीतानि आख्यातानि श्रावितानि च । तव तु जातिप्रयुक्तो दोषो नास्तीति सूचयन्तः सम्बोधयन्ति—हे अनघेति ॥ ६ ॥ ❀ ❀ ननु सूतपारम्पर्येणागतानि धर्मार्थकामविषयाणि शास्त्राण्येव सूतेन ज्ञातुं शक्यानि न ऋषिप्रणीतानि मोक्षविषयाणीति तैः संसारहेतुभूतैर्ज्ञातैरपि किमित्याशङ्क्याहुः—यानीति । यानि विदां ज्ञानिनां मध्ये श्रेष्ठो बादरायणो वेद, परं परमात्मानमवरं प्रकृत्यादितत्त्वं विदन्ति ते परावरविदोऽन्ये च मुनयो यानि विदुस्तत्सर्वं शास्त्रजातं त्वं वेत्थ जानासीत्युत्तरेणान्वयः । व्यासस्य विदां श्रेष्ठत्वे हेतुमाह—भगवानिति । अनेन तदुपदेशो विस्मृत्या तिरोभवितुं नार्हतीत्यपि सूचितम् । तव च पुराणादिवृत्तिरुत्तमा तेनापि तज्ज्ञानमावश्यकमिति सूचयन्तः सम्बोधयन्ति—हे सूतेति ॥ ७ ॥ ❀ ❀ आपाततो ज्ञानं वारयन्ति—तत्त्वत इति । तत्त्वतो ज्ञाने हेतुमाहुः—

तदनुग्रहादिति । तेषां महतां व्यासादीनामनुग्रहादित्यर्थः । अनुग्रहेऽपि हेतुमाहुः—स्निग्धस्य प्रेमवतः शिष्यस्य गुह्यं सुगोप्यमपि तत्त्वं गुरवो ब्रूयुरेवेत्यन्वयः । उतेत्यवधारणे । तव च शिष्यगुणाः सन्तीत्यतोऽपि गुह्यकथनं सम्भवतीति भावेन सम्बोधयन्ति—हे सौम्येति ॥ ८ ॥

हिन्दी अनुवाद

कथाप्रारम्भ

एक बार भगवान् विष्णु एवं देवताओंके परम पुण्यमय क्षेत्र नैमिषारण्यमें शौनकादि ऋषियोंने भगवत्-प्राप्तिकी इच्छासे सहस्र वर्षोंमें पूरे होनेवाले एक महान् यज्ञका अनुष्ठान किया ॥ ४ ॥ ❀ ❀ एक दिन उन लोगोंने प्रातःकाल अग्निहोत्र आदि नित्यकृत्योंसे निवृत्त होकर सूतजीका पूजन किया और उन्हें ऊँचे आसनपर बैठाकर बड़े आदरसे यह प्रश्न किया ॥ ५ ॥ ❀ ❀ ऋषियोंने कहा—सूतजी ! आप निष्पाप हैं । आपने समस्त इतिहास, पुराण और धर्मशास्त्रोंका विधिपूर्वक अध्ययन किया है तथा उनकी भलीभाँति व्याख्या भी की है ॥ ६ ॥ ❀ ❀ वेदवेत्ताओंमें श्रेष्ठ भगवान् बादरायणने एवं भगवान्के सगुण-निर्गुण रूपको जाननेवाले दूसरे मुनियोंने जो कुछ जाना है—उन्हें जिन विषयोंका ज्ञान है, वह सब आप वास्तविक रूपमें जानते हैं । आपका हृदय बड़ा ही सरल और शुद्ध है, इसीसे आप उनकी कृपा अनुग्रहके पात्र हुए हैं । गुरुजन अपने प्रेमी शिष्यको गुप्त-से-गुप्त बात भी बता दिया करते हैं ॥ ७-८ ॥

तत्र तत्राञ्जसाऽऽयुष्मन् भवता यद्विनिश्चितम् । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥
प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः । मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ १० ॥
भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः । अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ।
ब्रूहि नः श्रद्दधानानां येनात्मा सम्प्रसीदति ॥ ११ ॥
सूत जानासि भद्रं ते भगवान् सात्वतां पतिः । देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंजसा ग्रंथार्जवेन । एकांततः श्रेयोऽव्यभिचारि श्रेयःसाधनम् ॥ ९ ॥ ❀ ❀ अन्येपि बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चिन्वंतु नेत्याहुः प्रायेणेति । हे सभ्य साधो अस्मिन्युगे कलावल्पायुषो जनास्तत्रापि मंदा अलसास्तत्रापि सुमंदमतयस्तत्रापि मंदभाग्याः विघ्नाकुलास्तत्राप्युपद्रुताः रोगादिभिः ॥ १० ॥ ❀ ❀ न च बहुशास्त्रश्रवणेऽपि तावतैव फलसिद्धिरित्याहुः । भूरीणीति । भूरीणि कर्माण्यनुष्ठेयानि येषु तानि । समुद्धृत्य येनोद्धृतवचनेनात्मा बुद्धिः संप्रसीदति सम्यगुपशाम्यति ॥ ११ ॥ ❀ ❀ प्रश्नान्तरं सूत जानासीति पंचभिः । भद्रं ते इत्यौत्सुक्येनाशीर्वादः । भगवान्निरतिशयैश्वर्यादिगुणः । सात्वतां सच्छब्देन सत्त्वमूर्तिर्भगवान्स उपास्यतया विद्यते येषामिति सत्वंतो भक्ताः । स्वार्थेऽण् राक्षसवायसादिवत् । तस्य चाश्रवणमार्षम् । तदेवं सात्वंत इति भवति । तेषां पतिः पालकः । यस्यार्थविशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तर्हि तत्सर्वमेव ब्रवीमीति किं तत्राह । तत्रेति । आयुष्मन्निति । त्वया बहुकालं व्याप्य तान्यधीत्य विचारितानीति भावः । यद्वा वयं ब्राह्मणाः स्वोपकारकेभ्योऽप्याशिषमेव दद्म इत्यत एवमायुष्मान्भविष्यसीति भावः । अंजसा शीघ्रं तत्र तत्र झटित्यर्थबोधकवाक्येष्वित्यर्थः । एकांततः एकांतेन सर्वथेत्यर्थः । यद्वा प्रथमान्तात्तसिः । एकमद्वितीयञ्च तारतम्यगणनायामंतर्भूतञ्च यतोऽन्यदधिकं श्रेयो नास्तीत्यर्थः । तच्च प्रेमैव । ननु स्वर्गापवर्गादिकं ब्रह्मपरमात्मभगवत्सु मुख्यस्य भगवत्स्वरूपस्यापि वशीकारकत्वादित्यग्रिमग्रन्थे व्यक्तीभविष्यति । "तत्र तत्रांजसा" इत्यादिना "अतः साधो" इत्यंतेन सर्वशास्त्रसारोद्धारप्रश्नः प्रथमः । तत्रोत्तरं "स वै पुंसाम्" इत्यादिना "वासुदेवे" इत्यंतेन ॥ ९ ॥ ❀ ❀ ननु मन्मुखात्तत्सर्वं श्रुत्वा युष्मदादय एव श्रेयो निश्चिन्वंतु । हे सभ्येति देशकालपात्रज्ञोसीति भावः । अस्मिन्कलौ प्रायेणाल्पायुषस्तत्राप्यल्पायुष्ट्वे पि तत्रापि सालसत्वेपि तत्रापि मंदमतित्वेपि तत्रापि विघ्नाकुलत्वेपि–अत्र चक्रवर्ती–यदि कथंचिद्दीर्घायुषस्तर्हि मंदाः परमार्थेष्वलसाः । यदि केचिन्निरलसा अपि तर्हि निर्बुद्धयः । यदि सुबुद्धयोपि स्युस्तदा मंदभाग्यास्त्वादृशसाधुसंगहीनाः, यदि लब्धसुसंगा अपि तदोपद्रुताः रोगाद्युपद्रववशात्तन्मुखाच्छ्रोतुं श्रुत्वा वा स्वश्रेयो निश्चित्य तत्तदनुष्ठातुं नावकाशं लभंत इति ॥ १० ॥ ❀ ❀ तावतैव बहुशास्त्रश्रवणेनैव । किंच तादृशस्य श्रेयसः साधनेषु मध्ये यन्मुख्यं कलिकालवर्त्तिभिर्जनैः सुशक्यं च तत्साधनं वदेति पृच्छति । श्रोतव्यानि

शास्त्राणि । प्रसीदति निर्मलीभवति । तच्च श्रवणकीर्तनादिकमेवेत्यग्रे ज्ञास्यते । साधो इति सारग्राहिणः परोपकारनिरता एव साधवो भवंतीति भावः । अत्र श्रोतव्येषु 'श्रद्धालवे नित्यमनुव्रताय वाच्यम् ।' इति वक्ष्यमाणत्वात् ॥ ११ ॥ ❀ ❀ 'सूत जानासि' इत्यारभ्य 'कलिमलापहम्' इत्यंतो द्वितीयः प्रश्नः । सूतेति । अहो सूत त्वय्येते महानुभावा अपि सूतान्मत्तः पृच्छन्तीति विमृश्य झटिति वाच्यमिति भावः । यथा रक्ष एव राक्षसः वय एव वायसस्तथा सात्वत एव सात्वता इति तस्याणप्रत्ययस्य तदेवसणुप्रत्ययाश्रवणे । अत्र सन्दर्भः । नानावतारावतारिष्वपि सत्सु महापुराणप्रारम्भ एव श्रीशौनकादीनां श्रीकृष्णैकतात्पर्यम् । यथात्र पूर्वं सामान्यतोऽस्माभिरेकांतश्रेयस्त्वेन सर्वशास्त्रसारत्त्वेनात्मप्रसादहेतुत्वेन च यत्पृष्टं तदेतदेवास्माकं भवति यच्छ्रीकृष्णलीलावर्णनमित्यभिप्रेत्याहुः । भद्रं त इति । श्रीकृष्णलीलाप्रश्ने महादरौत्सुक्यादाशीर्वादः । सात्वतां यादवानां वा । जातो जगद्द्वयो बभूव । यद्वा "सातिः सुखे" सौत्रो धातुर्ण्यंतात्तस्मात्क्विपि सात्परमात्मा स सेव्यतयास्त्येषामिति मतुपि सात्त्वंतो भक्तास्तेषां पतिरिति । यस्य चिकीर्षया तच्च स्वयशःख्यापनमेव न तु भूभारहरणादेश्चिकीर्षया । वस्तुतः सिद्धांतसिद्ध-श्रवणस्मरणार्हाणि करिष्यन्निति कुंतीवाक्यपर्यवसानात् देवक्यां यशोदायां 'द्वे नाम्नी नंदभार्याया यशोदा देवकीति च ।' वसुना गोधनेन "वसु धने सुवर्णादौ गोष्वग्नौ गणदैवते" इति कोशात् । दीव्यति द्योतते इति वसुदेवः । वसुषु दीव्यति द्योतत इति वा वसुप्रवर इत्यर्थः । यद्वा वसुश्चासौ देवश्चेति वसुदेवो नंदः "द्रोणो वसूनां प्रवरो धरया सह भार्यया । जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ॥" इति श्रीदशमोक्तेः । यथाश्रुतार्थस्तु प्रसिद्ध एव । एतेन कृष्णावतारद्वयमस्ति नंदगृहे वसुदेवगृहे च । तयोर्द्वयोरेव लीलायाः प्रश्न इति ध्येयं सुमतिभिः । एवमग्रेऽपि ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

एवं तस्य प्रतिवचनसामर्थ्यमाविष्कृत्य प्रष्टव्यं पृच्छंति—तत्रेति, हे आयुष्मन् ! पुंसामेकांततो नियमेन निरतिशयं श्रेयो यत् यतः साधनाच्छ्रेयो भवेत्तद् भवता तत्र तत्र पुराणादिषु निश्चितं निर्णीतं नोऽस्मभ्यं शंसितुं प्रख्योतुमर्हसि । एवमुक्त-साधनभूतो धर्मः पृष्टः किं निरतिशयं श्रेयः को वा तत्साधनभूतो धर्म इति प्रश्नार्थः ॥ ९ ॥ ❀ ❀ अथ त्रिवर्गसाधनानामश्रोतव्यत्वं सूचयंतस्तन्निष्ठानां दौर्भाग्यं तैः श्रोतव्यानां बहुत्वं च वदंतः सर्वशास्त्रार्थसारभूतं मुक्तिसाधनमेव पृच्छंति—प्रायेणेति सार्धाभ्याम् । सभ्यास्मिन्कलौ युगे जना मानवाः प्रायेणाल्पायुषः । अनियतशतवर्षायुषः, अनेन कृतादियुगेष्विव यथेष्टं भोगानंतरं मुमुक्षोदयाऽ-संभव उक्तः । मंदा मंदप्रकृतयः नितरां मंदबुद्धयः, उपद्रुताः तापत्रयवर्गत्रयतृष्णाभ्यामिति शेषः । 'सुमंदमतय' इत्यनेन झटिति श्रेय-स्तत्साधनानवगमः सूचितः । 'मंदा' इत्यनेन श्रेयःसाधनोपसंहाराऽसामर्थ्यं सूचितम् । 'उपद्रुता' इत्यनेन कथंचिच्छ्रेयःसाधनोद्योगस्या-नेकांतरायविहतत्वम् । अत एव ते जना मंदभाग्या दुर्भगा इत्यर्थः ॥ १० ॥ ❀ ❀ हि यस्मादुपद्रुता अत एव तैर्विभागशः स्वस्वापेक्षितधर्मादिसाधनभेदेन श्रोतव्यानि भूरिकर्माण्यायासबहुलानि कर्माणि बहूनि संतीति पौंडरीकवाजपेयादिभेदेन भूरीणि एकैकस्मिन्ननेकेतिकर्तव्यताकलापवत्त्वेन भूरिकर्माणीति । यत एवमतोऽत्र श्रोतव्येषु मध्ये यत्सारमनिष्टनिवर्तकमिष्टप्रापकं सारं साधनं तन्मनीषया सूक्ष्मया धिया समुद्धृत्य दध्नो घृतमिवोद्धृत्य श्रद्दधानानां नोऽस्माकं ब्रूहि सारं विशिंषंति—येनेति ! येन सारेणात्मा चित्तं संप्रसीदति रागादिभिरकलुषं स्यात् तत्सारं ब्रूहीत्यन्वयः । प्रायेणेत्यल्पायुरादिभिः प्रत्येकं संबध्यते—प्रायेण मंदा इत्यादिना । तेन "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये" इति भगवद्वचनार्थः स्मारितः । 'येनात्मा संप्रसीदती'त्यनेनात्मप्रसादार्थमेव तावन्मुमुक्षुभिर्वर्तितव्यम् । सति चात्मप्रसादे "प्रसादे सर्वदुःखानां हानिरस्योप-जायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठति" इत्युक्तरीत्या दुःखहान्यादिरर्थादेव भवतीति सूचितम् । यद्वा येन सारभूतेन साधनेनात्मा संप्रसीदति प्रसन्नो भवतीत्यर्थः । एवं च "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन" इति वक्ष्यमाणरीत्या ततः सर्वं संपद्यत एवेति भावः । भूरीणि श्रोतव्यानि विभागशः संति, तत्र सारं ब्रूहीत्यनेन भूरिकर्माणि न श्रोतव्यानि प्रतीयंते । यद्यपि कर्माण्यपि फलद्वारा हानाय स्वरूपेणोपादानाय च श्रोतव्यान्येव । अन्यथा सांसारिकफलनिर्वेदासंभवेन निःश्रेयःसाधनाव-बोध्याध्यात्मशास्त्रशुश्रूषाया एवासंभवात् परमात्मोपासनस्यानभिसंहितफलकर्मोपकार्यत्वज्ञानाभावप्रसंगाच्च, तथाप्येकयैवोक्त्या सर्वाणि फलतस्त्याज्यान्युपासनांगतया यथाशक्त्यानुष्ठेयान्येतावदेव श्रोतव्यं मुमुक्षुभिरभिप्रायेणैवमुक्तम् ॥ ११ ॥ ❀ ❀ एवं मुक्तिसाधनं पृष्ट्वाऽथ तदनुग्राहकेषु प्रधानतमं "श्रवणं कीर्तनं विष्णोः स्मरण" मित्यादिषु प्रथमोपात्तं भगवच्चरित्रश्रवणं चिकीर्ष-वस्तत्रापि साधुपरित्राणायावतीर्णसमनंतरं श्रीकृष्णावतारचरितं पृच्छंति—सूत इत्यादि षड्भिः । हे सूत ! तुभ्यं भद्रं कल्याणमस्तु । सात्वतां भक्तानां पतिः पालयिता भगवान् वसुदेवस्य अपादानस्य संबंधविवक्षया षष्ठी, वसुदेवात्तद्भार्यायां देवक्यां यस्य चिकीर्षया यत्कर्म कर्तुमिच्छया जातोऽवतीर्णः । तत्सर्वं त्वं जानासीति ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदानीमभिमतार्थमाहुरित्याह—तत्रेति । आयुष्मन् प्रशस्तायुष सूत ! भवता तत्र पुराणादिष्वंजसा ऋजुमार्गेण यत्पुंसा-मेकांततः श्रेयो निश्चितं तन्नः शंसितुमर्हसीत्यन्वयः ॥ ९ ॥ ❀ ❀ ननु किमिति संक्षिप्य कथनं विस्तरेण किं न स्यादिति

तत्राह—प्रायेणेति । अस्मिन् कलौ युगे जनाः अल्पायुषः अत एव मर्त्याः मरणशीला मंदाः कर्मकरणशक्तिशून्याः सुमंदमतयः अत्यल्पप्रज्ञा मंदभाग्याः अल्पपुण्यभागिनः कुष्ठभगंदरादिव्याधिभिरुपद्रुताः । प्रायेणेति प्रत्येकमभिसंबध्यते । बहुलमेवं कश्चिदेवोक्तार्थे अन्यथा स्यादित्यर्थे वर्तते इत्यन्वयः ॥ १० ॥ ❀ ❀ अल्पायुष्यादिभिः अत्यंतं दुर्बलानां श्रेयःसाधनशास्त्राणि हित्वा अर्थादिविषयानेकशास्त्रश्रवणं दुःशकमित्याहुरित्याह—भूरीणीति । विभागशः प्रत्येकं विभक्तानि तथाभूतानि भूरीणि बहूनि भूरिकर्माणि व्यापारवंति श्रोतव्यानर्थादिविषयशास्त्राणि संतीति यदित्यन्वयः । प्रश्नार्थं निगमयति—अत इति । एवमर्थादिविषयशास्त्रज्ञानं दुःशकं श्रेयःपरिपंथि च आयुरादिकं चाल्पमतः साधो हीनजात्युत्पन्नत्वेऽपि निर्दोषः, अत्रैषु शास्त्रेषु यत्सारं तन्मनीषया बुद्ध्या समुद्धृत्य इदमेवोपादेयमिति नः ब्रूहि । किमर्थं ? भूतानां भद्राय, येन भवदुक्तसारश्रवणेनात्मा हरिराशु प्रसीदति; अनुग्रहोन्मुखो भवतीत्येकान्वयः ॥ ११ ॥ ❀ ❀ सारश्च हरेः कृष्णावतारकथैवेत्यावयवंतः पुनराहुरित्याह—सूतेति । भो सूत ! जानासि सकलमिति शेषः, ते तुभ्यं भद्रं मंगलमस्तु, ते तव बिंबभूतं भद्रं सर्वमंगलं भगवन्तं जानासीति वा । सात्त्वतां पतिर्भगवान् यस्य कार्यविशेषस्य चिकीर्षया वसुदेवस्य सकाशाद्देवक्यां जातः तद्द्वारा प्रकाशितः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पुंसां कलिभाविपर्यन्तपुरुषाणाम् ॥ ९ ॥ ❀ ❀ कलिपुरुषानेव वर्णयति—मन्दभाग्याः स्वल्पपुण्याः ॥ १० ॥ ❀ ❀ भूरीणीति सार्धकम् । श्रोतव्यानि शास्त्राणि । 'ब्रूहि भद्राय भूताना'मिति क्वचित् पाठः ॥ ११ ॥ ❀ ❀ सूतेत्यादि नवकं नानावतारावतारिष्वपि सत्सु महापुराणप्रारम्भ एव श्रीशौनकादीनां श्रीकृष्णैकतात्पर्यमिदम् । यथा अत्र पूर्व्वं सामान्यतोऽस्माभिरेकान्तश्रेयस्त्वेन सर्व्वशास्त्रसारत्वेन आत्मसुप्रसादहेतुत्वेन च यत् पृष्टं तदेतद्देवास्माकं भाति यत् श्रीकृष्णलीलावर्णनमित्यभिप्रेत्याहुः—सूतेति । भद्रं त इति श्रीकृष्णलीलाप्रश्नेन सहादरौत्सुक्येनाशीर्व्वादः । भगवान् स्वयमेव सम्पूर्णैश्वर्य्यादियुक्तः । सात्वतां सात्वतानाम् । नुडभाव आर्षः । यादवानामित्यर्थः, जातो जगद्दृश्यो बभूव ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

तर्हि तत्तत् सर्वमेव ब्रवीमीति किं तत्राहुः—तत्रेति । आयुष्मन्निति । त्वया बहुकालं व्याप्य तान्यधीत्य विचारितानीति भावः । अञ्जसा शीघ्रं, तत्र तत्र झटित्यर्थबोधकवाक्येष्वित्यर्थः । एकान्ततः एकान्तेन सर्वथेत्यर्थः । यद्वा प्रथमान्तात्तसिः । एकं अद्वितीयञ्च तारतम्यगणनायामन्तभू तञ्च यतोऽन्यदधिकं श्रेयो नास्तीत्यर्थः । तच्च प्रेमैव, न तु स्वर्गापवर्गादिकं ब्रह्म परमात्मभगवत्सु मुख्यस्य भगवत्तत्स्वरूपस्यापि वशीकारकत्वादित्यग्रिमग्रंथे व्यक्तीभविष्यति ॥ ९ ॥ ❀ ❀ ननु मन्मुखात्तत्तत् सर्वं श्रुत्वा युष्मदादय एव श्रेयो निश्चिन्वन्तु तत्राहुः—हे सभ्य देशकालपात्रज्ञ ! अस्मिन् कलौ प्रायेण जना अल्पायुष एव, यदि कथञ्चिद् दीर्घायुषस्तर्हि मन्दाः परमार्थेष्वलसाः, यदि केचिन्निरलसा अपि तर्हि निर्बुद्धयः, यदि सुबुद्धयोऽपि स्युस्तदा मन्दभाग्याः तादृशसाधुसङ्गहीनाः, यदि लब्धसुसङ्गा अपि तदा उपद्रुताः रोगाद्युपद्रववशात् तन्मुखात् श्रोतुं श्रुत्वा वा स्वश्रेयो निश्चित्य तत्तदनुष्ठातुं नावकाशं लभन्त इति । यद्वा अल्पायुषस्तत्रापि मन्दा इत्यादि ॥ १० ॥ ❀ ❀ तादृशस्य श्रेयसः साधनेषु मध्ये यन्मुख्यं कलिकालवर्तिभिर्जनैः सुशक्यञ्च तत् साधनं वदेति पृच्छन्ति—भूरीणि कर्म्माण्यनुष्ठेयानि यत्र तानि श्रोतव्यानि साधनानि तादृशसाधनप्रतिपादकानि शास्त्राणि वा । येनात्मा बुद्धिः प्रसीदति । तच्च श्रवणकीर्त्तनादिकमेवेत्यग्रे ज्ञास्यते ॥ ११ ॥ ❀ ❀ तच्च साधनसारं श्रवणकीर्त्तनादिकं श्रीकृष्णयशोविषयकमेव वाचयितुं पुनः पृच्छन्ति—सूतेति । भद्रं त इत्यौत्सुक्येनाशीर्वादः । सन्तो भक्ता एव स्वविभुत्वेन वर्त्तन्ते यस्य स सत्वान् विष्णुः स एव भजनीयो येषामिति भक्तौ इति सूत्रेणाण् । सात्वता वैष्णवास्तेषां पतिर्नुडभावस्त्वार्षः । किं वा सातिः सुखार्थः सौत्रो धातुर्हेतुमण्ण्यन्तः । "अनुपसर्गाल्लिम्प-" (३।१।१३८) इति सूत्रोक्तस्तस्माद्वा सरूपन्यायेन क्विपि सात् परमात्मा स सेव्यतयाऽस्त्येषामिति मतुपि सात्वन्तो भक्तास्तेषां पतिरिति । वसुदेवस्य देवक्यां भार्य्यायां यस्य चिकीर्षया तच्च स्वयशःख्यापनमेव तस्यैव नतु भूभारहरणादेश्चिकीर्षयेति वस्तुतः सिद्धान्तसिद्धं "श्रवणस्मरणार्हाणि करिष्यन्नि"ति कुन्तीवाक्यपर्यवसानात् ।

तस्य जिज्ञासया किं फलमिति चेत् श्रुत्वा आत्मानं कृतार्थीकरिष्याम इत्याहुः—यस्येति सार्द्धैस्त्रिभिः । यस्यावतार एव क्षेमाय मोक्षाय भवाय भूत्यै सम्पत्तये किं पुनः स इत्यर्थः ॥ १२-१३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अंजसा अनायासेन शास्त्रापीडनेन । एकांततः श्रेयः अव्यभिचारिश्रेयःसाधनं नोऽस्मभ्यं हे आयुष्मञ्शंसितुमर्हसि ब्रूहीत्युपाश्रयप्रश्नः ॥ ९ ॥ ❀ ❀ प्रश्नांतरं कर्तुं कर्तृकर्मणोरन्योन्यवैषम्यमाहुः । प्रायेणेति सार्द्धेन ॥ १० ॥ ❀ ❀ अतः कर्तृकर्मणोरन्योन्यानर्हत्वाद्धेतोः ॥ अत्र शास्त्रे सारं सर्वशास्त्रनिष्पन्नं प्राप्यम् ॥ ब्रूहीति उपेयप्रश्नः ॥ ११ ॥ ❀ ❀ सूतेति । सात्वतां वैष्णवं शास्त्रं तदाचक्षते इति सात्वतस्तेषां पतिः । णिचि क्विपि णिलोपे रूपम् ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

फलार्थं हि साधनं मृग्यते। अतः किं फलं किमफलमिति भवति विचारणा। अभ्युदयो निःश्रेयसं वा भवति फलम्। अन्यद्वा, सर्वत्र दूषणान्यग्रे वक्ष्यंते। अतः संदेहात्प्रश्नः। तथापि प्रमाणबलविचारेण निर्णयस्तदाह। अंजसा ग्रंथार्जवेन आयुष्मन्नित्याशीर्भयाभावो वा सूच्यते। गुरूणामन्योन्यं विप्रतिपत्तावपि, बहुगुरुत्वेन बुद्धिवैशद्यात् स्वतो निर्धारणं संभवतीत्याह—भवता यद्विनिश्चितमिति। पुंसां स्वतंत्राणां, एकांततः श्रेयः कदापि सर्वान् प्रति श्रेयस्त्वं न त्यजतीत्यर्थः। स्वर्गिणां पुत्रादिषु न श्रेयस्त्वम्। तथा मुक्तानां मुक्तौ इति। किमत्रैकांततः श्रेयः इत्यर्थः। तदस्मभ्यं शंसितुमर्हसि। द्वितीयं प्रश्नमाह—प्रायेणेति सार्द्धाभ्याम्। साधनविषयकोऽयं प्रश्नः। स्वस्य ऋषित्वेन चिरजीवित्वात् तद्व्यतिरेकेणाह ॥ ९॥ ❀ ❀ अनेन ऋषिव्यतिरिक्तानामयमुपाय इति गम्यते। आद्यस्तु तेषाम्। पुंसां न इति वा सामानाधिकरण्यं अल्पमायुर्येषां ते अल्पायुषः। अनेन सहस्र-समादयो न तेषां साधनमित्युक्तम्। प्रकृतानुपयोगात् अकथनमाशंक्याह—सभ्य इति। सभामर्हतीति सभ्यः। "सभां वा न प्रवेष्टव्य" मिति धर्मबोधनाय संबोधनम्। अत्यावश्यकमहत्कालसाध्यसाधनत्वे, अवक्तव्यत्वमाशंक्य कलिदोषेणैवाल्पायुष्ट्वं न स्वभावतः। तथा च कलिदोषपरिहारकेण तादृशेन साधनेन, आयुषोऽपि वृद्धिरित्यभिप्रायेणाह—कलावस्मिन् युग इति। तस्य कलेः कालांतरत्वे इदानीमुपायस्यावक्तव्यत्वमाशंक्याह—अस्मिन्निति। युगपत्प्रयोगस्तत्रत्यानां पूज्यत्वाय। सहजसंसारित्वाभावाय जना इति। प्रादुर्भावादुत्कृष्टत्वम्। एवं सहजदोषमुक्त्वा आगंतुकदोषमाह मंदा इत्यादिभिश्चतुर्भिर्विशेषणैः। मंदा अलसाः आलस्यं चित्तजाड्यम्। सुष्ठु मंदा मतिर्येषामिति ज्ञानेंद्रियदोषः। मंदभाग्या इति अदृष्टस्य कर्मेन्द्रियत्वाद्दोषः। उपद्रुता रोगादिभिरिति। चत्वारो दोषाः, एवमागंतुकदोषा उक्ताः। कालांतरेण व्यापृता इत्याह—भूरीणीति॥ १०॥ ❀ ❀ अयं बाह्यो दोषः "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृदि' ति लौकिककर्मव्यापृताः। ततोऽपि विहितकर्मव्यापृताः। तत्र प्रमाणविचारे प्रकरणशः धर्मादिशास्त्राणि ज्ञातव्यानि। तानि च भूरीणि कर्माणि येष्विति भूरिकर्माणि। न च श्रवणमात्रेण कृतार्थता। किन्तु तदुक्तानि कर्माण्यपि कर्तव्यानि। ततो महान् दोषो बाह्यः। एवं त्रिदोषग्रस्तानामुपायं कथयेत्याहुः—अतः इति। प्रत्युपकारापेक्षाभावाय संबोधनं साधो इति। परदुःखदूरीकरणं साधोरावश्यकमिति भावः। अन्यार्थमुक्तस्य प्रासंगिकस्य वा साधनस्य निराकरणायाह—अत्रे ति। एतादृशे दोषे अत्रापि बहूनि साधनानि चेत्, यत् सारं, तत् समुद्धृत्य वक्तव्यम्। यत्तदोर्नित्यसंबंधान्नाध्याहारदोषः। यदिति प्रसिद्धं वा, सारं पारंपर्यफलव्यभिचारादिदोषरहितम्। एकवचनेन असाधारण्यं सुगमत्वं चोक्तम्। प्रकरणेन विधयो बध्यंत इति न्यायेन यद्यपि सर्वं प्रकरणेषु सुसंबद्धं, तथापि तत्तत्स्थानादुद्धृत्य वक्तव्यमित्याह—समुद्धृत्येति। प्रकरणेषु तद्धर्मशून्यत्वाभावाय। मनीषयेति बुद्ध्यैवोद्धरणं, न कृतितः। मनस ईषा मनीषा। मनश्चांचल्यनिवारिका बुद्धिः। प्रार्थनायां प्राप्तकाले वा लोट्। भद्रं कल्याणं, त्रिविधदुःखाभावपूर्वकमहत्सुखावाप्तिः। तद् भगवत्प्रसादादिति चेत्तत्राह—येनात्मा सुप्रसीदतीति। येनैव हेतुना आत्मा भगवान् सुप्रसीदति। तर्हि तथैव कथयेत्यर्थः। भूतानामिति। पिशाचवज्जीवानां परिभ्रमणबोधनेन दया सूचिता। एवं फलसाधने प्रश्ने निरूपिते तत्राविर्भूतो भगवानेव फलसाधनं चेत्याशंक्य भगवदवतारो लोकानामर्थे वेति संदेहात् अवतारप्रयोजनं पृच्छंति—सूत जानासीति॥ ११॥ ❀ ❀ इदं त्वतिगूढमिति को वेद न जानातीति संदेहात्पृच्छंति—जानासीति। मुखप्रसादं दृष्ट्वा जानातीति ज्ञात्वा, हर्षेणाशीराहुः—भद्रं त इति। अस्त्वित्यर्थात्। महति ज्ञानोपदेशे दक्षिणा ह्येषा। श्रुतमस्ति, देवक्यां जातः कृष्णो भगवानिति। तत्र संदेहः—भगवतः षड्गुणैश्वर्यसंपन्नस्य ब्रह्मणः कार्यकारणार्थं न देहसंबंध उपेक्ष्यते। जीवधर्मास्तु ब्रह्मणि न संत्येव। प्रादुर्भावप्रकारस्तु जीवानामिव अतः संदेहः। किंच, सात्वतां पतिः सत्त्वैकनिष्ठाः सात्वंतः देवा मुक्ता वा। तत्परित्यज्य मनुष्येषु संसारेषु कथमाविर्भावः? पतितत्वात्तेषां परित्यागोनुचितः। किंच देवा मुक्ताः सनकादयो वा, तेपि ब्रह्मणो देहान्मनसो वा, उत्पद्यंते, न स्त्रियां, तत्रापि कस्यचित् कन्यायां देवक्यामिति देवकस्य कन्या देवकी। तथाच अप्सु नारायणावतारवन्न भवति। तत्रापि विशेषः वसुदेवस्येति, वसुदेवस्य भार्या पराधीना भगवदवतारे न भार्यादिविशेषसंबंधः, किन्तु संबंधमात्रमिति षष्ठीमात्रप्रयोगः। अतस्तादृशस्य तादृशावतारे किं कार्यं, तर्हि तथा न भविष्यतीत्याशंक्याह—जातः कंसादिवधस्त्वन्यस्मादपि भवतीत्यभिप्रायः, अतः यस्य चिकीर्षया जातः तन्नः कथयेति संबंधः। अनेन प्रासंगिकं प्रयोजनं निवारितम्। कालादिबाध्यता च। नन्वस्त्येव प्रयोजनं कारणदर्शनात्, योगेन च तज्जानंतीत्याशंक्याहुः—तन्नः शुश्रूषमाणानामिति॥ १२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

प्रायेणेत्यत्र। अनेनेति। अल्पायुष्ट्वकथनेन। आद्य इति। सहस्रसमादिरूपः। धर्मबोधनायेति। अस्मिन् वाक्ये सभाप्रविष्टस्य जानतस्तूष्णींभावेपि दोषकथनात्तद्बोधनायेत्यर्थः। साधनस्य इति। उत्तरकथनस्येति शेषः। पूज्यत्वायेति। 'कलौ खलु भविष्यन्ति नारायणपरायणा' इति वाक्यात्तथेत्यर्थः॥ १०॥ ❀ ❀ अत इत्यत्र। यदिति प्रसिद्धं वा सारमिति। 'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दं नापेक्षत' इति न्यायस्य यच्छब्देपि तुल्यत्वात् पक्षान्तरमाहुः यदित्यादि। पारम्पर्यफलव्यभिचारेति।

व्यभिचारशब्दो द्वन्द्वान्ते श्रूयमाणत्वादुभयत्र सम्बध्यते। ईषेति। 'ईष गतिहिंसादानेषु'। महत्सुखावाप्तिरिति। अत्र षष्ठीतत्पुरुषात् परममहत्परिमाणमितिवद्वात्वाभावः ॥ ११॥ ❀ ❀ सूत जानासीत्यत्र। जीवधर्मा इति। अविद्याकामकर्माणि। मुक्ता वेति। सनकादय इत्यर्थः ॥ १२॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं सर्वज्ञत्वेन तस्य प्रवचनसामर्थ्यमुक्त्वा प्रष्टव्यं पृच्छन्ति—तत्र तत्रेति। हे आयुष्मन्निति सम्बोधनेन तस्मिन्नायुः सञ्चारयन्ति। तत्र तत्र शास्त्रे यत्पुंसामेकान्ततः श्रेयः अविनाशि फलं भवता विनिश्चितं तन्नोऽस्मभ्यं त्वमञ्जसा ग्रन्थार्जवेन शंसितुं कथितुमर्हसीत्यन्वयः ॥ ९॥ ❀ ❀ एवं फलं पृष्ट्वा युष्माकं महतामग्रे मया हीनेन किं वक्तव्यं ग्रन्थानां विद्यमानत्वात्तद्विचारेण भवन्तः स्वजिज्ञासितं स्वयमेव विनिश्चिन्वन्त्वितीमामाशङ्कां परिहर्तुं कलियुगे मनुष्यदोषान् वदन्तः श्रेयस्साधनं पृच्छन्ति—प्रायेणेति सार्द्धेन च द्वयेन। "सभां न प्रविशेत्प्राज्ञः सभ्यदोषमनुस्मरन्। अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते" इति शास्त्रानुसारेण निर्वचनार्हस्य सभां प्रविष्टस्य तवाकथने दोषो भविष्यतीति सूचयन्तः सम्बोधयन्ति—हे सभ्य इति। अस्मिन्कलौ युगे जना मनुष्याः प्रायेणाल्पायुषस्तेन शास्त्रविचारमध्ये एव यदि मरणं स्यात्तदा तदुक्तानुष्ठानं तु नैव स्यात्। आयुस्सत्त्वेऽपि प्रायेण मन्दा अलसास्तेन शास्त्रविचार एव न सम्भवति। आलस्याभावे विचारप्रवृत्ता अपि प्रायेण सुमन्दमतयः, तथाच शास्त्रार्थ एव तेषां यथावन्न स्फुरति स्फूर्तिमन्तोऽपि प्रायेणोपद्रुताः रोगादिना कामकर्मभिश्च व्याकुलाः, अतः शास्त्रविचारावसर एव नास्ति कथमेवमित्यपेक्षायामाहुः—मन्दभाग्या इति। मन्दं दुष्टं भाग्यं प्रारब्धं कर्म येषां ते तथेत्यर्थः। प्रसिद्धमेवैतत्प्रत्यक्ष इति द्योतयितुमाहुः—हीति। न केवलं बहुशास्त्रश्रवणेन फलप्राप्तिः, किन्तु तदुक्तानुष्ठानादेव प्रायेणैतावत्तु जीवनमेव दुर्लभमिति भावेनाहुः—भूरीणि कर्माणि अनुष्ठेयानि येषु तानि भूरीणि शास्त्राणि विभागशः वर्णाश्रमविभागपूर्वकं श्रोतव्यानीति न सर्वे एकविधाः एवंविधाः वा इति प्रायोग्रहणम् ॥ १०॥ ❀ ❀ यस्मात्कलियुगदोषेणास्माकं स्वतश्शास्त्रश्रवणादिना फलप्राप्तिनिश्चयो नास्त्यतो हेतोः हे साधो अत्र शास्त्रेषु यत्सारं सर्वानिष्टनिवर्त्तकाव्यभिचारि परमश्रेयस्साधनं येन चात्मा परमात्मा भगवान् सुप्रसीदति तन्मनीषया मनस ईषा चाञ्चल्यनिवर्त्तिका बुद्धिस्तया स्वबुद्ध्या सम्यक् यथावदुद्धृत्य नोऽस्माकं ब्रूहीत्यन्वयः। 'श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः' इति शास्त्रानुसारेण स्वेषां श्रवणाद्यधिकारित्वं दर्शयन्ति—श्रद्दधानानामिति। हे साधो इति सम्बोधनेन स्वपरकार्यं साधयतीति साधुस्तथाविधस्य तवास्मत्प्रश्नोत्तरदानेनास्माकं दुःखदूरीकरणमेवोचितमिति सूचितम्। भगवत्प्रसादे सति किमपि दुर्लभं नास्तीति तु सामान्यतो वयं जानीमः, परन्तु भगवत्प्रसाद एव केन भवतीति विशेषतो न जानीमः। अतस्तद्वक्तव्यमित्याशयेनोक्तं येनात्मा सुप्रसीदतीति ॥ ११॥ ❀ ❀ पूर्णानन्दस्य भगवतोऽवतारो लोके किमर्थं इति पृच्छन्ति—सूतेति। भगवदभिप्रायं को वेदेत्युत्तरदानेऽभीष्टसिद्धिर्न स्यादत एवमयं मा वदत्विति तं प्रोत्साहयितुं सम्बोधयन्त आशिषं ददति। हे सूत ते तव भद्रं कल्याणं भवत्विति शेषः। तत्र सामान्यतः श्रुतमस्ति सात्वताम्पतिः सच्छब्देन सत्त्वमूर्तिर्भगवान् स्वयमेव स उपास्यतया विद्यते येषां ते सत्त्वन्तो भक्ताः देवा जीवन्मुक्ता नारदसनकादयश्च तेषां पतिः पालको भगवान् वसुदेवस्य भार्यायां देवक्यां जात इति सङ्कल्पमात्रेणानन्तब्रह्माण्डकर्तुस्तस्य निरतिशयषड्गुणपूर्णस्याविद्याकामकर्मादिजीवधर्माभावान्न कार्यार्थं देहसम्बन्धोऽपेक्ष्यते सङ्कल्पेनैव तत्कर्तुं शक्यत्वात्। प्रादुर्भावप्रकारस्तु जीवानामिवातो महान् संशयो जायते इति यस्य कार्यविशेषस्य चिकीर्षया कर्तुमिच्छयैवं जातस्तत्किं त्वं जानासीत्यन्वयः ॥ १२॥

हिन्दी अनुवाद

आयुष्मन्! आप कृपा करके यह बतलाइये कि उन सब शास्त्रों, पुराणों और गुरुजनोंके उपदेशोंमें कलियुगी जीवोंके परम कल्याणका सहज साधन आपने क्या निश्चय किया है? ॥ ९॥ ❀ ❀ आप संत-समाजके भूषण हैं। इस कलियुगमें प्रायः लोगोंकी आयु कम हो गयी है। साधन करनेमें लोगोंकी रुचि और प्रवृत्ति भी नहीं है। लोग आलसी हो गये हैं। उनका भाग्य तो मन्द है ही, समझ भी थोड़ी है; इसके साथ ही वे नाना प्रकारकी विघ्न-बाधाओंसे घिरे हुए भी रहते हैं ॥ १०॥ ❀ ❀ शास्त्र भी बहुत-से हैं। परन्तु उनमें एक निश्चित साधनका नहीं, अनेक प्रकारके कर्मोंका वर्णन है। साथ ही वे इतने बड़े हैं कि उनका एक अंश सुनना भी कठिन है। आप परोपकारी हैं। अपनी बुद्धिसे उनका सार निकालकर प्राणियोंके परम कल्याणके लिये हम श्रद्धालुओंको सुनाइये, जिससे हमारे अन्तःकरणकी शुद्धि प्राप्त हो ॥ ११॥ ❀ ❀ प्यारे सूतजी! आपका कल्याण हो। आप तो जानते ही हैं कि यदुवंशियोंके रक्षक भक्तवत्सल भगवान् श्रीकृष्ण वसुदेवकी धर्मपत्नी देवकीके गर्भसे क्या करनेकी इच्छासे अवतीर्ण हुए थे ॥ १२॥

तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम्। यस्यावतारो भूतानां क्षेमाय च भवाय च ॥ १३ ॥

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्। ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥ १४ ॥

व्यभिचारशब्दो द्वन्द्वान्ते श्रूयमाणत्वादुभयत्र सम्बध्यते । ईषेति । 'ईष गतिहिंसादानेषु' । महत्सुखावाप्तिरिति । अत्र षष्ठीतत्पुरुषात् परममहत्परिमाणमितिवद्दात्वाभावः ॥ ११ ॥ ❀ ❀ सूत जानासीत्यत्र । जीवधर्मा इति । अविद्याकामकर्माणि । मुक्ता वेति । सनकादय इत्यर्थः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं सर्वज्ञत्वेन तस्य प्रवचनसामर्थ्यमुक्त्वा प्रष्टव्यं पृच्छन्ति—तत्र तत्रेति । हे आयुष्मन्निति सम्बोधनेन तस्मिन्नायुः सञ्चारयन्ति । तत्र तत्र शास्त्रे यत्पुंसामेकान्ततः श्रेयः अविनाशि फलं भवता विनिश्चितं तन्नोऽस्मभ्यं त्वमञ्जसा ग्रन्थार्जवेन शंसितुं कथितुमर्हसीत्यन्वयः ॥ ९ ॥ ❀ ❀ एवं फलं पृष्ट्वा युष्माकं महतामग्रे मया हीनेन किं वक्तव्यं ग्रन्थानां विद्यमानत्वात्तद्विचारेण भवन्तः स्वजिज्ञासितं स्वयमेव विनिश्चिन्वन्त्वितीमामाशङ्कां परिहर्तुं कलियुगे मनुष्यदोषान् वदन्तः श्रेयस्साधनं पृच्छन्ति—प्रायेणेति सार्द्धेन च द्वयेन । "सभां न प्रविशेत्प्राज्ञः सभ्यदोषमनुस्मरन् । अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते" इति शास्त्रानुसारेण निर्वचनार्हस्य सभां प्रविष्टस्य तवाकथने दोषो भविष्यतीति सूचयन्तः सम्बोधयन्ति—हे सभ्य इति । अस्मिन्कलौ युगे जना मनुष्याः प्रायेणाल्पायुषस्तेन शास्त्रविचारमध्ये एव यदि मरणं स्यात्तदा तदुक्तानुष्ठानं तु नैव स्यात् । आयुस्सत्त्वेऽपि प्रायेण मन्दा अलसास्तेन शास्त्रविचार एव न सम्भवति । आलस्याभावे विचारप्रवृत्ता अपि प्रायेण सुमन्दमतयः, तथाच शास्त्रार्थ एव तेषां यथावन्न स्फुरति स्फूर्तिमन्तोऽपि प्रायेणोपद्रुताः रोगादिना कामकर्मभिश्च व्याकुलाः, अतः शास्त्रविचारावसर एव नास्ति कथमेवमित्यपेक्षायामाहुः—मन्दभाग्या इति । मन्दं दुष्टं भाग्यं प्रारब्धं कर्म येषां ते तथेत्यर्थः । प्रसिद्धमेवैतत्प्रत्यक्ष इति द्योतयितुमाहुः—हीति । न केवलं बहुशास्त्रश्रवणेन फलप्राप्तिः, किन्तु तदुक्तानुष्ठानादेव प्रायेणैतावत्तु जीवनमेव दुर्लभमिति भावेनाहुः—भूरीणि कर्माणि अनुष्ठेयानि येषु तानि भूरीणि शास्त्राणि विभागशः वर्णाश्रमविभागपूर्वकं श्रोतव्यानीति न सर्वे एकविधाः एवंविधाः वा इति प्रायोग्रहणम् ॥ १० ॥ ❀ ❀ यस्मात्कलियुगदोषेणास्माकं स्वतश्शास्त्रश्रवणादिना फलप्राप्तिनिश्चयो नास्त्यतो हेतोः हे साधो अत्र शास्त्रेषु यत्सारं सर्वानिष्टनिवर्त्तकाव्यभिचारि परमश्रेयस्साधनं येन चात्मा परमात्मा भगवान् सुप्रसीदति तन्मनीषया मनस ईषा चाञ्चल्यनिवर्त्तिका बुद्धिस्तया स्वबुद्ध्या सम्यक् यथावदुद्धृत्य नोऽस्माकं ब्रूहीत्यन्वयः । 'श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः' इति शास्त्रानुसारेण स्वेषां श्रवणाद्यधिकारित्वं दर्शयन्ति—श्रद्दधानानामिति । हे साधो इति सम्बोधनेन स्वपरकार्यं साधयतीति साधुस्तथाविधस्य तवास्मत्प्रश्नोत्तरदानेनास्माकं दुःखदूरीकरणमेवोचितमिति सूचितम् । भगवत्प्रसादे सति किमपि दुर्लभं नास्तीति तु सामान्यतो वयं जानीमः, परन्तु भगवत्प्रसाद एव केन भवतीति विशेषतो न जानीमः । अतस्तद्वक्तव्यमित्याशयेनोक्तं येनात्मा सुप्रसीदतीति ॥ ११ ॥ ❀ ❀ पूर्णानन्दस्य भगवतोऽवतारो लोके किमर्थं इति पृच्छन्ति—सूतेति । भगवदभिप्रायं को वेदेत्युत्तरदानेऽभीष्टसिद्धिर्न स्यादत एवमयं मा वदत्विति तं प्रोत्साहयितुं सम्बोधयन्त आशिषं ददति । हे सूत ते तव भद्रं कल्याणं भवत्विति शेषः । तत्र सामान्यतः श्रुतमस्ति सात्वताम्पतिः सच्छब्देन सत्त्वमूर्तिर्भगवान् स्वयमेव स उपास्यतया विद्यते येषां ते सत्त्वन्तो भक्ताः देवा जीवन्मुक्ता नारदसनकादयश्च तेषां पतिः पालको भगवान् वसुदेवस्य भार्यायां देवक्यां जात इति सङ्कल्पमात्रेणानन्तब्रह्माण्डकर्तुस्तस्य निरतिशयषड्गुणपूर्णस्याविद्याकामकर्मादिजीवधर्माभावान्न कार्यार्थं देहसम्बन्धोऽपेक्ष्यते सङ्कल्पेनैव तत्कर्तुं शक्यत्वात् । प्रादुर्भावप्रकारस्तु जीवानामिवातो महान् संशयो जायते इति यस्य कार्यविशेषस्य चिकीर्षया कर्तुमिच्छयैवं जातस्तत्किं त्वं जानासीत्यन्वयः ॥ १२ ॥

हिन्दी अनुवाद

आयुष्मन् ! आप कृपा करके यह बतलाइये कि उन सब शास्त्रों, पुराणों और गुरुजनोंके उपदेशोंमें कलियुगी जीवोंके परम कल्याणका सहज साधन आपने क्या निश्चय किया है ? ॥ ९ ॥ ❀ ❀ आप संत-समाजके भूषण हैं । इस कलियुगमें प्रायः लोगोंकी आयु कम हो गयी है । साधन करनेमें लोगोंकी रुचि और प्रवृत्ति भी नहीं है । लोग आलसी हो गये हैं । उनका भाग्य तो मन्द है ही, समझ भी थोड़ी है; इसके साथ ही वे नाना प्रकारकी विघ्न-बाधाओंसे घिरे हुए भी रहते हैं ॥ १० ॥ ❀ ❀ शास्त्र भी बहुत-से हैं । परन्तु उनमें एक निश्चित साधनका नहीं, अनेक प्रकारके कर्मोंका वर्णन है । साथ ही वे इतने बड़े हैं कि उनका एक अंश सुनना भी कठिन है । आप परोपकारी हैं । अपनी बुद्धिसे उनका सार निकालकर प्राणियोंके परम कल्याणके लिये हम श्रद्धालुओंको सुनाइये, जिससे हमारे अन्तःकरणकी शुद्धि प्राप्त हो ॥ ११ ॥ ❀ ❀ प्यारे सूतजी ! आपका कल्याण हो । आप तो जानते ही हैं कि यदुवंशियोंके रक्षक भक्तवत्सल भगवान् श्रीकृष्ण वसुदेवकी धर्मपत्नी देवकीके गर्भसे क्या करनेकी इच्छासे अवतीर्ण हुए थे ॥ १२ ॥

तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् । यस्यावतारो भूतानां क्षेमाय च भवाय च ॥ १३ ॥

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥ १४ ॥

यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः। सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥ १५ ॥
को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः। शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंग हे सूत तन्नोऽनुवर्णयितुमर्हसि। सामान्यतस्तावद्यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥ १३ ॥ ❋ ❋ तत्प्रभावमनुवर्णयंतस्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वंति। आपन्न इति त्रिभिः। संसृतिमापन्नः प्राप्तः विवशोऽपि गृणन्। ततः संसृतेः। अत्र हेतुः। यद् यतो नाम्नो भयमपि स्वयमेव बिभेति ॥ १४ ॥ ❋ ❋ किं च यस्य पादौ संश्रयो येषामत एव प्रशमः अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः सन्निधिमात्रेण सेविताः सद्यः पुनंति। स्वर्धुनी गंगा तस्याः आपस्तु तत्पादान्निःसृताः न तु तत्रैव तिष्ठन्ति अतस्तत्सम्बन्धेनैव पुनंत्योऽपि अनुसेवया पुनंति न तु सद्य इति मुनीनामुत्कर्षोक्तिः ॥ १५ ॥ ❋ ❋ पुण्यश्लोकैरीड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः कलिमलापहं संसारदुःखोपशमनम् ॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य जिज्ञासया किं फलमिति चेत् श्रुत्वात्मानं कृतार्थीकरिष्याम इत्याहुः। यस्यावतार एव क्षेमायेत्यादि। किं पुनः स इत्यर्थः ॥ १३ ॥ ❋ ❋ विवशोपि विशेषेण पराधीनः सन्नपि यस्य श्रीकृष्णस्य नाम। तस्य सर्वावतारित्वादवतारनाम्नामपि तत्रैव पर्यवसानात्। अत एव साक्षाच्छ्रीकृष्णादपि तत्तन्नामप्रवृत्तिः प्रकारान्तरेण श्रूयते श्रीविष्णुपुराणे। तत्र तु "अखिलानामेव भगवन्नाम्नां कारणान्यभवन्" इति गद्यं, तदिदं च वासुदेवदामोदरगोविंदकेशवादिनाम ज्ञेयम्। ततः संसृतेः अत्र घोरामिति विवश इति सद्य इति पदत्रयेणाजामिलादयः सूचिताः। स्वयं भगवानितिवत्। मूलभूतं भयं महाकाल एव बिभेति किं पुनर्मृत्युर्यमश्च किमुततरां यमदूता इति ॥ १४ ॥ ❋ ❋ अन्यदाधिक्यमाह किञ्चेति। यस्य श्रीकृष्णस्य। पाद इत्येकत्वं सामान्याभिप्रायम्। पादावित्यर्थः। "प्रशमो भगवन्निष्ठबुद्धिता शमो मन्निष्ठता बुद्धेः" इति स्वयं श्रीभगवद्वाक्यात्स एव। प्रकृष्टः प्रशमः साक्षात्पूर्णभगवच्छ्रीकृष्णलीलाकृष्टचित्तमुनयः श्रीशुकदेवादयः सद्यः पुनंति सवासनपापेभ्यः शोधयन्ति। स्वर्धुनी गंगा। "योऽसौ निरञ्जनो देवश्चित्स्वरूपो जनार्दनः। स एव द्रवरूपेण गंगांभो नात्र संशयः" इति। स्वयं तथाविधरूपा अपि साक्षाच्छ्रीवामनदेवचरणनिरसृता अपि अनुसेवया साक्षात्सेवाभ्यासेनैव शोधयन्ति न तु सन्निधानमात्रेण। साक्षात्सेवयापि न सद्य इति। तस्या अपि श्रीकृष्णमाश्रितानामुत्कर्षादुत्कर्षः। एवमेव तद्यशसोप्याधिक्यं वर्ण्यते। "तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित्पादशौचम्" इति। टीका च इतः पूर्वं स्वस्सरिदेव सर्वतोधिकं तीर्थमित्यासीत्। इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्त्तिरूपमेतत्स्वःसरिद्रूपं पादशौचं तीर्थमूनमलं चक्रे इत्येषा। विश्वनाथस्तु यत्पादावेव संश्रित्यैव वर्त्तमानाः सद्य इति स्मृतिमात्र एव पुनंति अविद्यामालिन्यानि शोधयन्ति किं पुनर्दृष्टाः स्पृष्टाः सेविता वेति व्याख्येयम्। "येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः। किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः" इत्यनेनैकार्थप्राप्तेः। स्वर्धुन्या आप इत्यत्रापि तस्याः सकाशाद् दूरदेशं नीता इत्येव व्याख्येयम्। "मुक्तिस्त्वद्दर्शनादेव न जाने स्नानजं फलम्" इति वाक्यार्थविरोधात्। किंच स्वर्द्धुन्या दर्शनादेव साधूनां तु स्मरणादपि मुक्तिरिति तदपि साधूनामेवोत्कर्षो ज्ञेयः। ततश्च तास्तु तत्पादान्निसृता एवातस्तत्सम्बन्धेन पुनन्त्योपि उपर्युपरि स्पृष्टाः सत्यः पुनन्ति। तुर्विकल्पे सेवया प्रणत्यादिना वाहता वा। स्वर्द्धुन्याप इति समासांताभावस्त्वार्षः ॥ १५ ॥ ❋ ❋ शुद्धिरात्मप्रसादः। "येनात्मा सुप्रसीदति" इति पूर्वोक्तेः। यशः ब्रह्मरुद्रेंद्रजयादिकं रासक्रीडादिकं चासाधारणमेव। "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। पुण्यश्लोकस्तु वैदेहः पुण्यश्लोको जनार्दनः ॥ पुण्यश्लोकः शान्तनवः पुण्यश्लोको बलिः स्मृतः। पुण्यश्लोको व्यासदेवः पुण्यश्लोकाः सनादयः ॥" इत्यादि पुराणोक्तेः। पुण्यश्लोकैर्युधिष्ठिराद्यैः। यद्वा पुण्यश्लोकश्चासावीड्यकर्मा चेति कर्मधारयः। कलेर्युगसम्बन्धीनि मलानि कलिं स्वांगावेशेन दुष्कृतप्रवर्त्तकत्वरूपं मलानि कायिकादिपापान्यपहंतीति। तथा को वेत्युक्त्या सर्वैः स्वांतःकरणशोधनार्थं कृष्णयश एव श्राव्यमिति भावः। सूत जानासीत्यारभ्य कोवेत्यंतेन कृष्णावतारप्रयोजनतच्चरितयोः प्रश्नाविति ज्ञेयम्। "तस्य कर्माण्युदाराणि" इत्यादिना विश्वसृष्ट्यादिलीलाप्रश्नः। तस्योत्तरं "स एवेदं ससर्जाग्रे" इत्यादिना। उदाराणि भक्ताभीष्टप्रदानि परमानन्ददानि वा, "उदारो दातृमहतोः" इत्यमरः। दधदिति वर्त्तमानकालेन तदवताराणां नित्यत्वं तस्य च परिपूर्णत्वं कलाः पुरुषादिरूपा दधतस्तत्तदंशानप्यादाय तस्यावतीर्णस्य सत इति सन्दर्भः ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

तस्माद्वक्तुमर्हसीत्याहुः तदिति। तच्छ्रीकृष्णचरितं श्रोतुमिच्छतां नोस्माकं वर्णितुमंग हे सूत! अर्हसि। 'अर्हसी' त्यनेन सदनुगृहीतः कार्त्स्न्येन तच्चरित्रवेदी त्वं वक्तुं प्रभुरिति सूचितं महोपकर्तृत्वात्तदवतारचरित्रमवश्यं शुश्रूषितव्यमित्यभिप्रायेण

तदवतारं विशिषंति—यस्येति। यस्य भगवतोऽवतारः। श्रीकृष्णरूपो भूतानां विभवाय योगापरपर्यायेष्टोदयाय क्षेमाय तत्पालनाय च। भक्तानामित्यनुक्त्या भूतानामिति वदतामयमभिप्रायः—शत्रूणामपि दमनपूर्वकमपवर्गदायित्वेन महोपकर्त्तेति किमु वक्तव्यम्? तदवतारो भूतानां योगक्षेमार्थं इति॥ १३॥ ❀ ❀ यतस्तन्नामैवानिष्टपरिहारेष्टप्रापणक्षममेवेत्यभिप्रायेण नामप्रभावमाहुः—आपन्न इति। घोरां गर्भजन्म-जरा-मरणादिरूपां संसृतिमापन्नः प्राप्तः पुमान् शत्रुरपि विवशः पारवश्येनापीत्यर्थः। यस्य श्रीकृष्णस्य यच्छब्दात्मको वा भगवतस्तस्येत्युत्तरत्रान्वयः। नामगृणन्नुच्चैर्देहाऽवसान इति शेषः ततः संसृतेः सद्य एव विमुच्येत मुक्तो भवेत्। कथं पारवश्येनाप्युच्चारणमात्रेणापि शत्रुरपि मुच्येतेत्यत्रोच्चारणं विशिषंति—यद्बिभेति स्वयंभव इति। यन्नामोच्चारणं प्रति भवः संसारः स्वयं बिभेति। 'भय'मिति पाठेऽपि जन्म—मरणादिभयहेतुत्वाद्भव एव भयशब्देन विवक्षितः। देहावसानकालिक-भगवन्नामोच्चारणस्याव्यवधानेन मुक्तिसाधनत्वमितरकालिकस्य तु कर्मज्ञानयोगादिवद्भक्तियोगानुग्राहकत्वेन तद्द्वारेति विवेकः। एतच्च षष्ठेऽजामिलोपाख्याने प्रपंचयिष्यते॥ १४॥ ❀ ❀ आस्तां तावदवताराणां नाम माहात्म्यं तदीयानां माहात्म्यमेव वाङ्मनसामगोचरमित्यभिप्रायेणाहुः—यदिति। हे सूत! यस्य भगवतः पादसंश्रयाः पादावेव प्राप्यत्वेन प्रापकत्वेन संश्रयंत इति तथा। मुनयस्तत्पदारविंदमननशीलाः प्रशमायनाः शमदमादिगुणानामाश्रयाः तदीयाः स्पृष्टाः, पादयोरिति शेषः।पादस्पर्शमात्रेणापीति भावः। सद्य एव, पुनंति स्पृष्टानिति शेषः। एवं तत्पादसंबंधिन्याः स्वर्धुन्या गंगाया आपोऽप्यनुसेवया स्नानपानादिरूपया सेवया पुनंति स्वर्धुन्यापस्त्वनुसेवया पुनन्ति मुनयस्तदीयास्तूपस्पर्शमात्रेणापि पुनंतीति केचिद्व्याचक्षते। यथा स्वर्धुन्यापोनुसेवया पुनंति तथा मुनयोऽप्युपस्पृष्टाः पुनंतीति दृष्टांतो वाभिप्रेतः॥ १५॥ ❀ ❀ उक्तैरन्यैश्च गुणैस्तं विशेषतस्तच्चरित्रमवश्यात्म-शुद्धिमिच्छद्भिः श्रोतव्यमित्यभिप्रायेणाहुः—को वेति। तस्योक्तविधस्य पुण्यस्य शृण्वतां वदतां च पुण्यावहः श्लोक्यत इति श्लोको यशो यस्य। अत एव स चासावीड्यं स्तुत्यं कर्म चरित्रं यस्य तस्य भगवतो यशः कलिमलापहं कलिप्रयुक्तपापहंतृचित्तशुद्धिकामः को वा पुमान्न शृणुयात्? सर्वोऽपि शृणुयादेवेत्यर्थः॥ १६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

यस्यावतारो भूतानां क्षेमायैहिकामुष्मिकसुखाय विभवायाभिवृद्धये भवति। अंग हे वत्स! तस्य कृष्णस्य तं कार्यविशेषं चरित्रापरपर्यायं शुश्रूषमाणानामस्माकमनुवर्णितुं सम्यग्वक्तुमर्हसीत्येकान्वयः। सात्वतामिति। सत् ब्रह्म कृष्णाख्यमुपास्यमेषा-मस्तीति सत्वंतः त एव सात्वंतः प्रज्ञादित्वात् स्वार्थे अण्, तस्यादर्शनं छांदसम्; यद्वा सातिः सौत्रो धातुः सुखार्थः वासरूपन्याये क्विपि सात् सखा परमात्मा स एषामस्तीति सात्वंतो भक्तास्तेषां पतिः मरुत्वतामितिवत्सात्वतामिति रूपसिद्धिः। यद्वा सात्वतप्राति-पदिकात्तत्करोति तदाचष्ट इति णिचि कृते क्विप् चेति क्विपि च कृते णिचो लोपे अतो लोपे च सात्वतामिति रूपसिद्धिः। सात्वतां पंचरात्रोक्तानुष्ठानकारिणां यादवानां वा॥ १३॥ ❀ ❀ सारत्वात् कृष्णचरितमेवानुवर्णनीयं नान्यद्यतस्तस्य वासुदेवादि-नामोच्चारणादखिलबंधनिवृत्तिः तत्र किं वक्तव्यं तच्चरितश्रवणमननाभ्यामित्याशयवंत आहुरित्याह—आपन्न इति। भवः संसारः अहंकाररूपेण बंधको रुद्रो वा यं प्रति बिभेति भयादपसृतो भवति यन्नाम यस्य नाम गृणन् उच्चारयन् विवशः बह्वभ्यासात् घोरां संसृतिमापन्नः पुरुषः ततः घोरसंसारात्सद्यस्तदानीमेव विमुच्येत विशिष्टां मुक्तिमाप्नोति॥ १४॥ ❀ ❀ किंच यत्पादसंश्रयाः यस्य पादावेव संश्रयो येषां ते तथोक्ताः प्रकृष्टः शमो भगवन्निष्ठैवायनमाश्रयो येषां ते प्रशमायना मुनयः यैः प्राणिभिरुपस्पृष्टास्तान् सद्यः पुनंति पवित्रीकुर्वंति, 'यत्पादसंश्रयात्' इति पाठे यच्चरणनिषेवणादात्मानं पुनंतीत्यर्थः, तत्र निदर्शनमनुसेवया अनुसेवनेन निषेवणेन उपस्पर्शनस्नानाचमनादिना स्वर्धुनी गंगेव यथा लोकं पुनाति तथेत्यन्वयः। 'स्वर्धुन्याप'इति पाठे गंगाजलपरमाणवः चिरकालसेवया मुनयः सद्य इति शेषः॥ १५॥ ❀ ❀ पुण्यश्लोकैर्ब्रह्मादिभिः ईड्यं स्तुत्यं कर्म कंसवधादिचरितं यस्य स तथा पुण्यश्लोकश्चायमीड्यकर्मेति वा, तस्य हरेः कलिमलापहं कलिनिमित्तं मलं पापलक्षणमपहंतीति यशश्चरितापरपर्यायं शुद्धि-कामः अंतःकरणनिर्मलतां कामयमानः को वा पुरुषः न शृणुयादित्येकान्वयः॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सामान्यतस्तावत् यस्यावतारमात्रं क्षेमायेत्यादि॥ १३॥ ❀ ❀ विवशोऽपि विशेषेण पराधीनः सन्नपि। यस्य श्रीकृष्णस्य नाम। तस्य सर्वावतारित्वादवतारनाम्नामपि तत्रैव पर्यवसानात्। अत एव साक्षाच्छ्रीकृष्णादपि तत्तन्नामप्रवृत्तिः प्रकारान्तरेण श्रूयते श्रीविष्णुपुराणे। 'तत्र त्वखिलानामेव भगवन्नाम्नां कारणान्यभवन्नि'ति हि गद्यम्। तदिदञ्च वासुदेवदामोदर-गोविन्दकेशवादिनामवज्ज्ञेयम्॥ १४॥ ❀ ❀ किञ्च यत्पादेति। यस्य श्रीकृष्णस्य पादौ सम्यगाश्रयौ येषाम्। अत एव प्रशमायनाः। शमो भगवन्निष्ठबुद्धिता। "शमो मन्निष्ठता बुद्धे"रिति स्वयं श्रीभगवद्वाक्यात्। स एव प्रकृष्टः प्रशमः साक्षात् पूर्णभगवच्छ्रीकृष्णसम्बन्धित्वात् प्रशम एव अयनं वर्त्म आश्रयो येषां ते श्रीकृष्णलीलारसाकृष्टचित्ता मुनयः श्रीशुकदेवादयः सद्यः पुनन्ति सवासनपापेभ्यः शोधयन्ति। स्वर्धुनी गङ्गा तस्या आपस्तु "योऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्दनः। स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः" इति स्वयं तथाविधरूपा अपि साक्षाच्छ्रीवामनदेवचरणान्निःसृता अपि अनुसेवया साक्षात् सेवाभ्यासेनैव

तथा शोधयन्ति न सन्निधिमात्रेण सेवया साक्षात् सेवयापि न सद्य इति । तस्या अपि श्रीकृष्णमाश्रितानामुत्कर्षात्तस्योत्कर्षः । एवमेव ततस्तद्यशसोऽप्याधिक्यं वर्ण्यते । "तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित् पादशौच"मिति । टीका च इतः पूर्वं स्वःसरिदेव सर्वतोऽधिकं तीर्थमित्यासीत्, इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्तिरूपमेतत् स्वःसरिद्रूपं पादशौचं तीर्थमूनमल्पं चक्रे इत्येषा ॥ १५ ॥ ❀ ❀ एतस्य दशमस्कन्धस्यैव संवादितां व्यनक्ति—को वेति । शुद्धिकामोऽपि यतः कलियुगस्यापि मलापहं यस्मादेवं तस्मात् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततः संसृतेः । अत्र 'घोरामिति, विवश इति, सद्य' इति पदत्रयेण अजामिलादयः सूचिताः । यत् यतो नाम्नः एकस्मादपि स्वयं भयं स्वयं भगवानितिवन्मूलभूतं भयं महाकाल एव बिभेति किं पुनर्मृत्युर्यमश्च किमुत यमदूता इति भावः ॥ १४ ॥ ❀ ❀ यत्पादावेते संश्रित्यैव वर्तमानाः सद्य इति स्मृतमात्रा एव पुनन्ति, अविद्यामालिन्यानि शोधयन्ति, किं पुनर्दृष्टाः स्पृष्टाः सेविता वेति व्याख्येयम् । "येषां संस्मरणात् पुंसः सद्यः शुद्ध्यन्ति वै गृहाः । किं पुनर्दर्शनस्पर्शपादशौचासनादिभि"रित्यनेनैकार्थ्यप्राप्तेः । स्वर्धुन्या आप इत्यत्रापि तस्याः सकाशाद् दूरदेशं नीता इत्येव व्याख्येयम् । "मुक्तिस्त्वद्दर्शनादेव न जाने स्नानजं फलम्" इति वाक्यार्थविरोधात् । "किंच स्वर्धुन्या दर्शनादेव साधूनां स्मरणादपि" मुक्तिरिति । तदपि साधूनामेवोत्कर्षो ज्ञेयः । ततश्च तास्तत्पादान्निःसृता एव अतस्तत्सम्बन्धेन पुनन्त्योऽपि उप उपरि स्पृष्टाः सत्यः पुनन्ति । नुर्विकल्पे, सेवया प्रणत्यादिना वा । आहृता वा । स्वर्धुन्याप इति समासान्ताभाव आर्षः ॥ १५ ॥ ❀ ❀ शुद्धिरात्मप्रसादः येनात्मा सुप्रसीदतीति पूर्वोक्तेः । यशः ब्रह्मरुद्रेन्द्रजयादिकं रासक्रीडादिकं चात्रासाधारणमेव ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संसृतिं संसारलक्षणम् । ततः संसृतेर्विमुच्येत मुक्तो भवति ॥ १४-१६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

बहूनामस्माकं श्रवणेच्छापूरणाय कथनीयम् । नहि श्रवणेच्छा योगेन निवर्तते । न वा योगः सर्वैः कर्तुं शक्यते । न वा योगेन भगवदीयः पदार्थो ज्ञातुं शक्यः श्रवणव्यतिरेकेण । अत एव भगवद्वाक्यं साक्षात् परंपरया वा भगवन्मुखोक्तं गुरुमुखात् श्रुतम्, अनु पश्चाद्वर्णयितुमर्हसि । पठितस्य हि अनुवचनमावश्यकम् । मंत्रादावपि परमधिकारविशेषे तच्छुश्रूषमाणानां वक्तव्यमेव, अंगेति कोमलसंबोधनम्, अंगत्वेन स्वाधीनत्वाय, असाधारणं तु प्रयोजनं पृच्छयते । साधारणं तु ज्ञायत इत्याहुः—यस्यावतार इत्यादिसार्द्धैस्त्रिभिः । तत्र प्रथममवतारद्वारा रूपप्रयोजनमाह—यस्येति । यस्य सामान्यतोऽप्यवतरणं, देवतिर्यङ्नरादिषु अलौकिकतेजसः संक्रमणं, भूतानां जातमात्राणां स्थावरजंगमानां क्षेमाय ऐहिकसर्वसुखाय । चकारात् सर्वदुःखनिवृत्तये भवाय मोक्षाय चकारादविद्यानिवृत्तये । भू सत्तायामिति सन्मात्रत्वायेत्यर्थः । 'चितितन्मात्रेण तदात्मकत्वात्' । (४।४।६) इति चैतन्ये अनुप्रवेशो वा चकारार्थः । एवं सर्वेषामभ्युदयनिःश्रेयसार्थं भगवदवतार इत्युक्तम् । उत्पत्स्यमानानां तु नाम्ना पुरुषार्थसिद्धिरिति तन्माहात्म्यमाह—आपन्न इति ॥१३॥ ❀ ❀ घोरां संसृतिं, सर्पादियोनिभूतां, महाव्याध्यादिरूपां वा, आपन्नः, यस्य अवतारस्य नाम विवशः परवशः वेः कालस्य वशो वा, गृणन्नुच्चरन्नेव ततः सद्यो विमुच्यते, तत्राह अंतकाले कालस्याधिकारी भयनामा कश्चित् मृत्युपाशेन सर्वानेव गृह्णाति । यच्चतुर्थस्कंधे वक्ष्यते 'सैनिका भयनाम्न' इत्यत्र । सद्यस्तस्य पाशान्मुंचति ननु कथं स नामकथनमात्रेण पाशान्मुञ्चति तत्राह—यद्बिभेति यस्मान्नाम्नो भयं स्वयं बिभेति । स्वरूपनाशेन बिभेति । ननु बहिःपदार्थनाशेन । एवं हि भगवन्नाममाहात्म्यं, यत् श्रोतॄन् मुक्तान् करोति । ततो भयमपि मुच्यते इत्यर्थः । अथवा स्वरूपभूतं भयमपि मुच्यत इत्यर्थः । द्वैतदृष्टिर्गच्छति । "द्वितीयाद्वै भयं भवतीति" श्रुतेः । अतः अग्रे उत्पत्स्यमानानां नाम्नामुक्तिः ॥१४॥ ❀ ❀ ननु नामोच्चारणसामर्थ्यरहितानां वृक्षपश्वादीनां का गतिरिति चेत्तत्राह—यत्पादसंश्रया इति । भक्तस्पर्शेन तेऽपि मुच्यंत इत्यर्थः । यस्य भगवतः पादौ संश्रयभूतौ येषाम् । भगवतः समाश्रयणं ज्ञानमार्गेऽपि भवति । यथा च ज्ञानिनां देहाध्यासाभावात् तत्स्पर्शेन न मुक्तिः किंतु तदुपदेशेनेति, तद्व्यावृत्त्यर्थं 'पाद' पदप्रयोगः । पादसंश्रयणं भक्तिमार्ग एव । गुरुत्वप्रकारव्यावृत्त्यर्थं समुपसर्गः । सूतेति संबोधनं पावित्र्यानुभवज्ञापनार्थं, यथा सूतोऽपि सन् महापुरुषकृपया, ब्राह्मणैर्यज्ञादिष्वपि संव्यवहारं संभजते । ऋषयो मंत्रद्रष्टारः । प्रशमायनाः ज्ञानिनः प्रकृष्टः शमः अयनं येषामिति ते । उभयेऽपि यत्पादसंश्रयाः, पुनंतीति योजना । अथवा पादसंश्रयाः ऋषयः प्रशमायनाश्च भूत्वा, ज्ञानकर्मणीति प्राप्य, त्रितयसंपन्नाः, सर्वे पावित्र्यहेतवो भवंति । स्वयं हि शुद्धाः संतः परान् पुनंति । अतः स्वशुद्ध्यर्थं ज्ञानकर्मणी युक्ते, ननु साक्षात्पावनसंबंधस्तयोः । उपस्पृष्टाः समीपे देहसंबंधमात्रेण पुनंतीत्यर्थः । कालव्यवधानेन हि सर्वत्र पावनं दृष्टम् । "त्रिःस्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं संवत्सरादेवात्मानं पुनीत" इत्यादिभिः । 'मुनये' इति पाठेऽपि मननं कर्मयोगो वा । क्षौर्यादिना स्पर्शव्यावृत्त्यर्थं उपेति । अग्रेण वा संबंधः । तेषां तु दृष्ट्यादिनापि पावनं संभवति । स्वर्धुन्यापो गंगाजलमनुसेवया पुनाति भगवत्सेवकानेव पुनातीत्यर्थः; "प्रायश्चित्तानि चीर्णानी" ति वाक्यात् । 'सद्यः पुनाति गंगेय' मित्यपि । नारायणसंमुखीकरणद्वारा पुनंति । अथवा

उपस्पृष्टाः स्वर्धुन्यापः सद्यः पुनंतीति दृष्टांतः । नु इति वितर्के, भगवद्भक्ताः गंगा च पुनंतोपि भगवत्सेवया पुनंति, नान्यथेति वितर्कः । आपाततः पावनं तु नात्र विवक्षितं, परमपावनं तु मायास्पर्शाभावः ॥ १५ ॥ ❀ ❀ एवं सार्धाभ्यां भगवद्रूपनामसंबंधिनां माहात्म्यमुक्ते शंका भवति, कथमित्यवगतं भगवच्छास्त्रव्यतिरेकेण इति, अवगते तु पुनः शास्त्रप्रश्ना अनुपपन्नाः इत्यत आह–भगवद्यशःश्रवणेनास्माकं हृदये स्वतः स्फुरितम् । अतः सामान्यतो ज्ञानं विशेषार्थं प्रश्नः । यद्यपि भक्तिभावात्, स्वतः पुरुषार्थत्वेन, भगवद्यशःश्रवणं न भवति, तथापि सन्मार्गवर्तिनां शुद्धिरपेक्षत इति तदर्थं श्रवणम् । विशेषतः कलौ देशकालद्रव्यकर्तृमंत्रकर्मणां षण्णामप्यशुद्धकरणात् । स्वातंत्र्यव्यावृत्त्यर्थक इति । वेत्यानादरे, अश्रोतारो दैत्यांशा न गण्यंत एवेति । जीवानां स्वत उत्कृष्टा ब्राह्मणा एव, शुद्धिः भगवत इत्युक्तम् । तस्येत्यवतीर्णस्य सुलभत्वाय । लौकिकं प्रभुस्तोत्रवत् अन्नादकर्तृकव्यावृत्त्यर्थमाह–पुण्यश्लोकेड्यकर्मण इति । पुण्याः श्लोकाः कीर्तिर्येषाम् । कीर्तनकर्तृणामपि कीर्तिर्यत्र सर्वान् पुनाति, तत्र किं वक्तव्यम् ? कीर्तनस्य सर्वपावकत्वम् । तानपि पुनातीति वा । तेषां पावित्र्यापेक्षा नास्तीति वा । अनेन कीर्तिः पवित्रेष्वेव प्रतिष्ठितेति बोधितम् । कर्मसामान्यग्रहणादुत्कर्षाधायककर्मव्यतिरिक्तान्यपि कर्माणि पावनानीत्युक्तम् । पुण्यश्लोकवचनादेवं ज्ञायते । कीर्तिमद्भिः सह संबंधः प्रायेण सर्वेषां भवति । ते च भगवंतमेव कीर्तयंते । अतो भगवत्कीर्तिश्रवणं सुलभमिति । अत्र आपाततोऽपि शुद्धिः श्रवणेन तत्र शुद्धिकामः कथं च शृणुयात् आधारोत्कर्षाधायकसर्वलोकाह्लादकविसर्पिगुणः कीर्तिर्यशः कलौ सर्वेषाम् अपहतपाप्मत्वाभावान्न तैः कलिदोषनिवृत्तिः । भगवतस्तु कालात्परत्वात्तत्कीर्तेरपि तत्परत्वं, अतः कलिदोषनिवर्तकमिति ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

यस्यावतार इत्यत्र । भवशब्दस्य संसारवाचित्वेन प्रसिद्धस्यान्यैः संपत्त्यर्थकत्वेन व्याख्यातस्याप्यत्र प्रकरणानुरोधात् मोक्षवाचित्वे उपपत्तिमाहुः भू सत्तायामित्यादि । मोक्षे सत्यविद्यानिवृत्तेरर्थादेव सिद्धेश्चकारवैयर्थ्यमित्यरुच्या पक्षान्तरमाहुः चितीत्यादि । चैतन्येऽनुप्रवेशः परममोक्षः ॥ १३ ॥ ❀ ❀ आपन्न इत्यत्र । तन्माहात्म्यमाहेति । अवतारस्य मोक्षार्थत्वं समर्थयितुमाहेत्यर्थः ॥ १४ ॥ ❀ ❀ यत्पादेत्यत्र । तयोरिति । ज्ञानकर्मणोः । तत्र हेतुः कालेत्यादि । अग्रेण वा सम्बन्ध इति । उपस्पृष्टा इति । अस्येति शेषः । तत्र हेतुः तेषामित्यादि । 'सा राजन् दर्शनादेव ब्रह्महत्यापहारिणी'त्यस्य यमुनासङ्गमोत्तरकालविषयत्वात् 'अनुसेवये'त्युपलक्षणे तृतीया, 'जटाभिस्तापस' इतिवदित्याशयेनाहुः भगवदित्यादि । पुनन्तीति । आप इत्यर्थात् । एवं व्यतिरेकेऽङ्गीक्रियमाणे योजना क्लिष्टा भवतीति पक्षान्तरमाहुः अथवेत्यादि । नन्वेवं बहुषु वाक्येषु लक्षणादिक्लेशः प्रसज्यत इत्याशङ्क्य तद्दोषनिवृत्तय आहुः आपातत इत्यादि । तथा च न क्वापि वाक्ये क्लेश इत्यर्थः ॥ १५ ॥ ❀ ❀ को वेत्यत्र । स्वतन्त्रव्यावृत्त्यर्थमिति । स्वाभाविकाश्रोतृव्यावृत्त्यर्थमित्यर्थः । पुण्यश्लोका ईड्यकर्माणो येनेति समासमभिप्रेत्यार्थान्तरमाहुः तानित्यादि । ईड्यकर्मण इत्यर्थः । अस्यापुष्टार्थत्वमाशङ्क्य प्रथमपक्षस्यैव तात्पर्यान्तरमाहुः तेषामित्यादि कीर्तिरिति । ईड्यपदबोधिता सेत्यर्थः । यशो लक्षयन्ति आधारेत्यादि प्रतापवारणाय सर्वलोकाह्लादकेति । चन्द्रकिरणादिवारणाय गुण इति । विसर्पीति तु स्वभावकथनम् ॥१६॥

श्रीगिरिधरकृता बालप्रबोधिनी

यदि जानासि तर्हि शुश्रूषमाणानां श्रोतुमिच्छतां नोऽस्माकं तद्भगवदवतारप्रयोजनं त्वं वर्णितुं वर्णयितुमर्हसीत्यन्वयः । ननु हीनजातिरहं कथं वर्णनयोग्य इत्याशङ्क्य शास्त्ररहस्यज्ञत्वेन त्वमस्मत्समुदाये प्रविष्टोऽसीति सूचयन्तः सम्बोधयन्ति—हे अङ्गेति । असाधारणं प्रयोजनं पृच्छ्यते साधारणं प्रयोजनं तु ज्ञायत एवेत्याशयेन तद्दर्शयति—यस्येति । यस्य श्रीकृष्णस्यावतारो भूतानां जातमात्राणां स्थावरजङ्गमानां क्षेमाय ऐहिकसुखाय । चकारात्सर्वदुःखनिवृत्तये च । भवाय भू सत्तायामिति स्मरणात्सन्मात्रत्वाय मोक्षाय । चकारादविद्यानिवृत्तये चाभूदिति शेषः ॥ १३ ॥ ❀ ❀ एवं सर्वेषामभ्युदयनिःश्रेयसार्थं भगवदवतार इत्युक्तं, तत्रावतारकाल उत्पन्नानां तत्तत्फलं भवतु, भगवतो वैकुण्ठगमनानन्तरोत्पत्स्यमानानां तत्फलं कथं स्यादित्याशङ्कायां इदानीन्तनानामपि तन्नामोच्चारणादिनैव पुरुषार्थसिद्धिरिति भगवन्माहात्म्यं वदन्तस्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वन्ति—आपन्न इति त्रिभिः । घोरां निरन्तरतापत्रयवत्त्वेन भयङ्करां संसृतिं जन्ममरणादिलक्षणं संसारमापन्नः प्राप्तः प्राणी विवशः मरणसमये कालपाशगतोऽपि यस्य भगवतो नाम गृणन्नुच्चरन् ततः संसारभयात् सद्यस्तत्क्षणमेव विमुच्यते विमुक्तो भवेत् । तत्र हेतुमाहुः—यदिति । यस्मान्नामोच्चारणाद्धयं सैनिकाभयनाम्न इत्यत्र चतुर्थस्कन्धे वक्ष्यमाणः कालस्याधिकारी भयनामा कश्चिद्देवो यो मृत्युपाशेन सर्वानेव गृह्णाति स स्वयमेव बिभेति । यच्छब्दानां 'को वा भगवतस्तस्य' इति तृतीयश्लोकस्थेन तच्छब्देनान्वयः ॥ १४ ॥ ❀ ❀ नन्वेवमग्र उत्पत्स्यमानानां चेतनानां नामोच्चारणेन मुक्तिरित्युक्तं तत्र नामोच्चारणसामर्थ्यरहितानां वृक्षपश्वादीनां कथमुद्धार इति शङ्कायामाहुः—यत्पादेति । यस्य भगवतः पादावेव संश्रयः आश्रयो येषां ते भक्ता उपस्पृष्टाः तथा यत्पादसंश्रयाः स्वर्धुन्याः गङ्गाया आपः जलानि अनुसेवया स्नानपानादिनाऽप्युपस्पृष्टा जन्तून्सद्य एव पुनन्तीत्यन्वयः । ननु कथमेवं सर्वविषयान् विहाय भक्तानां तत्पादाश्रयणमिति शङ्कायामाहुः—मुनय इति । मननशीलत्वान्मननेनैतत्सम्भवतीति भावः । विषयाविष्टचित्तानां मननमपि कथं सङ्गच्छते इत्यपेक्षायामाहुः—प्रशमायना इति, शमदमादिगुणवन्त इत्यर्थः । तत्रान्तः-

करणनिग्रहः शमः, बाह्येन्द्रियनिग्रहो दमः। न चेदमसम्भावितं व्यासादिमहापुरुषकृपया त्वं सूतोऽप्यसत्सभाप्रवेशेन प्रश्नयोग्योऽसीत्यनुभवसिद्धमेवेति सूचयन्तः सम्बोधयन्ति—हे सूतेति। तथाच भगवद्भक्तस्पर्शेन गङ्गाजलस्पर्शेन च इदानीन्तनानामप्युद्धार इति दर्शितम्। तत्र स्वर्धुन्याप इत्यन्यासामपि यमुनादिनद्यपामुपलक्षणं 'यत्र गङ्गादयो नद्यः' इति वक्ष्यमाणत्वात्। न च तत्स्पर्शरहितानां कथमुद्धार इति वाच्यम्, सर्वोद्धारे जगदुच्छेदप्रसङ्गात्, तस्य च भगवतोऽनभिप्रेतत्वात्, तथाच केषाञ्चिदधिकारिणामेव तत्स्पर्शेनोद्धारो भगवतोऽभिप्रेत इति बोध्यम्॥ १५॥ ❀ ❀ यदि नामसङ्कीर्त्तनादिनैव संसारभयनिवृत्तिस्तदा तस्य भगवतो यशः को वा न शृणुयात् सर्वोऽपि शृणुयादेवेत्यन्वयः। ननु कीर्त्तनमात्रेण संसारभयनिवृत्तिश्चेत्तदा सर्व एव कुतो न कीर्त्तयन्त इत्यपेक्षायामनेकजन्मसुकृतानुष्ठानं विना भगवद्यशश्श्रवणसङ्कीर्तनादि दुर्लभमिति सूचयन्तो भगवन्तं विशिंषन्ति—पुण्यश्लोकेड्यकर्मण इति, पुण्यश्लोकैः अनेकजन्मसुकृतानुष्ठानेन पुण्याः श्लोकाः यशांसि येषां तैः ईड्यानि स्तव्यानि कीर्तनीयानि कर्माणि यशांसि यस्य तस्येत्यर्थः। ननु सर्वे तु तद्यशः शृण्वन्तो नैव दृश्यन्ते, कथमुच्यते को न शृणुयादितीत्याशङ्क्याहुः—शुद्धिकाम इति, स्वान्तःकरणविशुद्धिकाम इत्यर्थः। ननु भगवद्यशसः कथं विशुद्धिहेतुत्वमित्यपेक्षायामाहुः—कलिमलापहमिति। कलियुगे यथावद्यज्ञानुष्ठानादेरशक्यत्वाद् इदमेव मलापहं सर्वदोषनिवर्तकमित्यर्थः॥ १६॥

हिन्दी अनुवाद

हम उसे सुनना चाहते हैं। आप कृपा करके हमारे लिये उसका वर्णन कीजिये; क्योंकि भगवान्‌का अवतार जीवोंके परम कल्याण और उनकी भगवत्प्रेममयी समृद्धिके लिये ही होता है॥ १३॥ ❀ ❀ यह जीव जन्म-मृत्युके घोर चक्रमें पड़ा हुआ है—इस स्थितिमें भी यदि वह कभी भगवान्‌के मङ्गलमय नामका उच्चारण कर ले तो उसी क्षण उससे मुक्त हो जाय; क्योंकि स्वयं भय भी भगवान्‌से डरता रहता है॥ १४॥ ❀ ❀ सूतजी! परम विरक्त और परमशान्त मुनिजन भगवान्‌के श्रीचरणोंकी शरणमें ही रहते हैं, अतएव उनके स्पर्शमात्रसे संसारके जीव तुरंत पवित्र हो जाते हैं। इधर गङ्गाजीके जलका बहुत दिनोंतक सेवन किया जाय, तब कहीं पवित्रता प्राप्त होती है॥ १५॥ ❀ ❀ ऐसे पुण्यात्मा भक्त जिनकी लीलाओंका गान करते हैं, उन भगवान्‌का कलिमलहारी पवित्र यश भला, आत्मशुद्धिकी इच्छावाला ऐसा कौन मनुष्य होगा, जो श्रवण न करे॥ १६॥

तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः। ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥ १७॥
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः। लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥ १८॥
वयं तु न वितृप्याम उत्तमश्लोकविक्रमे। यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे॥ १९॥
कृतवान् किल वीर्याणि सह रामेण केशवः। अतिमर्त्यानि भगवान् गूढः कपटमानुषः॥ २०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

प्रश्नांतरम्। तस्येति उदाराणि महांति विश्वसृष्ट्यादीनि। सूरिभिर्नारदादिभिः। कलाः ब्रह्मरुद्रादिमूर्तीः॥ १७॥ ❀ ❀ अथेति प्रश्नांतरे। अवतारकथाः स्थित्यर्थमेव तत्तदवसरे ये मत्स्याद्यवतारास्तदीयाः कथाः। स्वैरं लीलाः कुर्वतः। श्रीकृष्णावतारप्रयोजनप्रश्नेनैव तच्चरितप्रश्नोऽपि जात एवेति ज्ञातव्यम्॥ १८॥ ❀ ❀ अत्यौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छन्तस्तत्रात्मनस्तृप्त्यभावमावेदयंति वयं त्विति। योगयागादिषु तृप्ताः स्मः। उद्गच्छति तमो यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे। तत्र हेतुः। यद्विक्रमं शृण्वताम्। यद्वा अन्ये तृप्यंतु नाम वयं तु नेति तुशब्दस्यान्वयः। अयमर्थः त्रेधा ह्यलंबुद्धिर्भवति। उदरादिभरणेन वा रसाज्ञानेन वा स्वादुविशेषाभावाद्वा। तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वान्न भरणमित्युक्तम्। रसाज्ञानमित्यनेन चाज्ञानतः पशुप्रवृत्तिर्निराकृता। इक्षुभक्षणवद्रसांतराभावेन तृप्तिं निराकरोति। पदे पदे प्रतिक्षणं स्वादुतोऽपि स्वादु॥ १९॥ ❀ ❀ अतः श्रीकृष्णचरितानि कथयेत्याशयेनाहुः। कृतवानिति। अतिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्धनोद्धरणादीनि। मनुष्येष्वसंभावितानीत्यर्थः॥ २०॥

श्री वंशीधरकृतो भावार्थदीपिकाप्रकाशः

"अथाख्याहि" इत्यादिनावतारांतरकथाप्रश्नस्तस्योत्तरं तृतीयाध्यायः। श्रीकृष्णस्य तावन्मुख्यत्वेन कथय। अथ तदनंतरमानुषंगिकतयैवेत्यर्थः। हरेः श्रीकृष्णस्य प्रकरणबलात् अवताराः पुरुषावतारा गुणावतारा लीलावताराश्च तेषां कथाः लीलाः सृष्ट्यादिकर्मरूपा भूभारहरणादिरूपाश्च आत्ममायया निजेच्छया शक्त्या "आत्ममाया तदिच्छा स्याद् गुणमाया जडात्मिका" इति महासंहितातः। शुभा अमायिकीः। दधत इति वर्त्तमानकालेन लीलानां नित्यत्वं आत्ममायया योगमाययेति विश्वनाथः। अथावतारनिर्णयः सर्वप्रधानानन्यापेक्षिमहैश्वर्यमाधुर्य्यैः श्रीकृष्ण एव स्वयंरूपः प्रायस्तस्य तुल्यशक्तिधारी यः

स तस्य विलासः। यथा वैकुंठनाथः न्यूनशक्तिधारी यः स स्वांशः यथा मत्स्यकूर्मादिः। यत्रैकशक्तिसंचारमात्रं स आवेशः यथा पृथुनारदादिः। पुरुषावतारगुणावतारलीलावतारभेदादवतारास्त्रिधा। महत्स्रष्टा कारणोदशायी प्रकृत्यंतर्यामी संकर्षणांशः पुरुषः प्रथमः। गर्भोदशायी समष्टिविराडंतर्यामी प्रद्युम्नांशो द्वितीयः पुरुषः। क्षीरोदशायी व्यष्टिविराडंतर्याम्यनिरुद्धांशस्तृतीयः पुरुष इति पुरुषावताराः। सत्त्वगुणेन विष्णुः पालनकर्त्ता क्षीरोदनाथ एव। रजोगुणेन ब्रह्मा सृष्टिकर्त्ता गर्भोदशायिनाभिपद्मोद्भवः। क्वचित्कल्पे तु तादृशपुण्यकारी जीव एव ब्रह्मा। तदा तत्रेश्वरस्य सृष्टिशक्तिसंचारेणावेशादावेशावतार एव। रजोगुणयोगाद् गुणावतारत्वमपि विष्णुना तस्य साम्यं तु क्वचित्कल्पे स्वयमेव ब्रह्मा भवति। यथा यज्ञः स्वयमेवेंद्रो जात इति। पातालादिसत्यलोकांतः समष्टिविराट्स्थूलो ब्रह्मण एव विग्रहः प्राकृतः। सोपि ब्रह्मा शुद्धो जीवः हिरण्यगर्भस्तस्यांतर्यामी तु गर्भोदशायीश्वर एव। अथ तमोगुणेन रुद्रः संहारकर्त्ता कचिद्विष्णुरेव सदाशिवः। किञ्च सदाशिवः स्वयं रूपांगविशेषस्वरूपो निर्गुण एव सगुणः शिवश्चांशः। ब्रह्मा तु शिवान्नाधिकः, सगुणत्वेप्यस्य विष्णुना साम्यमेवेति गुणावताराः। लीलावतारास्तु चतुःसननारदवाराहमत्स्ययज्ञनरनारायणकपिलदत्तहयग्रीवहंसपृश्निगर्भर्षभपृथुनृसिंहकूर्मधन्वंतरिमोहिनीवामनपरशुरामरघुनाथव्यासबलभद्रकृष्णबुद्ध-कल्कीत्यादयः, एते प्रतिकल्पं प्रादुर्भवन्ति। मन्वंतरावतारास्तु यज्ञविभुसत्यसेनहरिवैकुंठजितवामजसार्वभौमविष्वक्सेनर्षभधर्मसेतुसुधामयोगेश्वरबृहद्भानवः। युगावतारास्तु शुक्लरक्तपीतकृष्णाः। एषां मध्ये केचिदावेशाः केचित्प्रभावाः केचिद्वैभवाः केचित्परावस्थाः। चतुःसननारदहरिविष्णुपृथुप्रभृतय आवेशाः। ततोधिकशक्तिमंतः प्रभावा मोहिनीधन्वंतर्यृषभव्यासदत्तशुकादयः। ततोधिकशक्तिप्रकाशवैभवा मत्स्यकूर्मनरनारायणवराहहयग्रीवपृश्निगर्भबलदेवयज्ञादयः। ततोप्यधिकशक्तिमंतः परावस्था उत्तरोत्तरश्रेष्ठास्त्रयः नृसिंहरामकृष्णाश्च। कृष्ण एव स्वयं भगवान्न ततोधिकः कोऽप्यस्ति। तस्य वासस्थानानि पूर्वपूर्वमुख्यानि चत्वारि। व्रजमधुपुरद्वारावतीगोलोकाख्यानि। सपरिवारो बलदेवसहितो व्रजे पूर्णतमः, मथुरायां पूर्णतरः। द्वारकायां प्रद्युम्नानिरुद्धसहितः सपरिवारः पूर्णः। गोलेके पूर्णकलोपि वृंदावनीयलीलत्वात्पूर्णतमसजातीयः। पूर्वपूर्वेषु माधुर्याधिक्यतारतम्यादैश्वर्यच्छादनतारतम्यम्। उत्तरोत्तरेषु माधुर्यह्रासतारतम्यादैश्वर्यप्रकाशतारतम्यम्। यस्या जलेऽनेककोटिब्रह्मांडानि महाविष्णुरोमकूपगतानि तस्या विरजाया महावैकुंठलोकपरिखीभूताया उपरि महावैकुंठलोकः। तदूर्ध्वभागे गोलोकस्तत्र गोलोकनाथः श्रीकृष्णो देवलीलः सपरिवारो वर्त्तते। तस्य विलासो महावैकुंठनाथः परव्योमनाथनामा। तस्य विलासो वासुदेवस्तस्य विलासः परमात्मा। ब्रह्म च निर्विशेषरूपम्। गोलोकनाथस्य द्वितीयव्यूहो बलदेवस्तस्य विलासो महावैकुंठे संकर्षणस्तस्यांशः कारणार्णवशायी। तस्य विलासो गर्भोदशायी ब्रह्मांडांतर्यामित्वेन प्रद्युम्नांशस्तस्य विलासः क्षीरोदशायी। अनिरुद्धांशः तस्य विलासोंतर्यामी। मत्स्याद्यवतारास्तु गर्भोदशायिविलासाः। द्वारकामथुरावृंदावनाख्ये धामत्रये श्रीकृष्णस्य नरलीलत्वादैश्वर्याधिक्यतारतम्यात्क्रमेण माधुर्याधिक्यतारतम्यम्। सा लीला द्विधा। प्रकटाऽप्रकटा च। या बाल्यपौगण्डविलाससहस्रस्य सपरिकरस्य श्रीकृष्णस्यानंतप्रकाशेन नित्यमेवाप्रकटलीला वर्त्तन्ते ता एवैकेनैव प्रकाशेन सपरिकरेण कृष्णेन यदा प्रपंचे क्रमात्प्रकाश्यन्ते तदा प्रकटा इति। गमनागमने तु तत्तद्धामतः प्रकटलीलायामेवेति विशेषः। एकमेव वृंदावनमेकैव मथुरा एकैव द्वारवती ब्रह्मांडसमूहकोटिमध्यगतभारतभूमौ तत्तद्दंडवासिजनैर्दृश्यते। प्रकटलीला च जन्मादिमौशलांता प्रत्येकब्रह्मांडसमूहे क्रमेण तत्रतत्रस्थैर्दृश्या। यथा ज्योतिश्चक्रस्थ एव सूर्ये किरणावलीति। यथा ज्योतिश्चक्रस्थ एव सूर्ये एकस्मिन्वर्षे पूर्वाह्णादिकं समाप्यान्यस्मिन्वर्षे प्रकाशयति एवमेव कृष्णः प्रकटप्रकाशो निजधामस्थ एव एकस्मिन्ब्रह्मांडे बाल्यादिलीलाः समाप्य प्रकटयति। अन्यस्मिन्किमपि न प्राकट्येत। बाल्यादिलीला नित्या एव सच्चिदानंदरूपाः। मौशलमहिषीहरणलीलास्तु कृत्रिमा एवेंद्रजालवत्। लीलांतरस्थनित्यत्वसंगोपनार्थत्वमेतयोरुपासकाभावात्। किञ्च प्रकटलीलायामपि श्रीवृंदावनस्य मणिमयभूम्यादिकल्पवृक्षादिमत्त्वं तत्परिवारेण केनचिदपि न दृश्यते, दृश्यते च केनचित्तदिच्छावशात्। प्रकटलीलासमाप्त्यनंतरं तु तत्रस्थजनेन भजनाधिक्येनात्युत्कंठायां जातायामेव दृश्यते। तत्रापि स्ववासनातदिच्छानुसाराभ्यामिति विवेकः। एवं च सर्वरूपेभ्यो व्रजेंद्रनंदनस्य मुख्यत्वम्। सर्वधामतो गोकुलस्य मुख्यत्वम्। तत्रापि "चतुर्द्धा माधुरी तस्य व्रज एव विराजते। ऐश्वर्यक्रीडयोर्वेणोस्तथा श्रीविग्रहस्य च"। भागवतास्तु "मार्कंडेयोंबरीषश्च वसुर्व्यासो विभीषणः। पुंडरीको बलिश्शंभुः प्रह्लादो विदुरोद्धवौ॥ दाल्भ्यः पराशरो भीष्मो नारदाद्याश्च वैष्णवाः॥ १७॥ ❀ ❀ एषु प्रह्लादः श्रेष्ठस्ततोऽपि पांडवास्तेभ्योपि केचिद्यादवास्तेष्वप्युद्धवस्तस्मादपि व्रजदेव्यस्ताभ्योपि राधेति। तदुक्तं "त्रैलोक्ये पृथिवी धन्या यत्र वृंदावनं वनम्। यत्र राधासखीवर्गस्तत्र राधा प्रिया मम॥" इति कृष्णवाक्यं भागवतामृतेस्तीत्यलं प्रसक्तानुप्रसक्त्या॥ १८॥ ❀ ❀ वयं त्वित्यादिद्वयं सूत जानासीत्येतत्प्रश्नानुवाद एव। अत्रोभयत्रोत्तरं "भावयत्येष सत्त्वेन" इति लोकपालनं तच्चरितमप्युक्तम्। एवं षट्प्रश्नाः द्वितीयाध्याये चत्वार्युत्तराणि। तत्र श्रवणे उत्तमैः श्लोक्यते कीर्त्यत इति उत्तमश्लोकः। अलमिति न मन्यामहे। एतेन योगयागादिषु तृप्ताः स्म इति भावः। तत्रातृप्तौ बहुश्रवणे कथं तृप्तिर्नेति चेत्तत्राह। यद्वेति। अत्राशयमाह। अयमर्थ इति। तत्र त्रिधालंबुद्धिमध्ये आकाशत्वादिति। "कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्" इति तल्लक्षणात्। विक्रमस्य चामूर्तत्वान्न भरणम्। पदे पदे प्रतिसुप्तिरिंडतमेव स्वादु स्वादुचर्वितस्येक्षुदंडादेरिव न रसत्वेन हेयत्वं प्रत्युतातिस्वादुत्वेन परमोपादेयत्वमिति॥ १९॥ ❀ ❀ यतस्तत्रालंबुद्ध्यभावः अतो हेतोः। इत्यर्थ इति

न हि बलयुतेनापि नरेण पर्वतश्चालयितुमपि शक्यते कुत उद्धर्तुमिति भावः। ननु मानुषः कथमतिमर्त्यानि कृतवांस्तत्राह। कपटमानवः। अत एव गूढः। स्वतस्तु तद्रूपतयैव भगवान्। अत एव स्यमंतकाहरणे 'पुरुषं प्राकृतं मत्वा' इत्यतेन जांबवतोऽन्यथाज्ञानव्यंजकेन वाक्येन तस्य प्राकृतत्वं निषिद्धय पुरुषत्वं स्थाप्यते। एवं "मायामनुष्यस्य वदस्व विद्वन्" इत्यादिष्वपि ज्ञेयम्। यस्मात्कपटमानुषस्तस्माद् गूढः। विश्वनाथः नराकृतिपरब्रह्मत्वान्मर्त्योऽप्यतिमर्त्यानि तात्कालिकमनुष्येष्वसंभावितानि तदपि गूढः। तत्र हेतुः कपटं भक्तहितार्थं ब्रह्मावेशादिना प्रार्थनलक्षणं मानुषेषु प्राकृतेषु जरासंधादिषु यस्य तथा। कपटं प्रेमविलासार्थं धर्मोपदेशादिलक्षणं मानुषेषु वेणुनादाकृष्टगोपीजनेष्वप्राकृतेषु यस्य सः सप्तम्याः परनिपातः। गड्वादित्वात्। तेषां तेषां मायया मोहनात् प्रेम्णा मोहनाच्चैवंकपटो नेश्वरो भवितुमर्हतीति प्रत्यायनाद् गूढ इत्यर्थः॥ २०॥

श्रीमद्वीरराघवव्याख्या

अतो लीलया न तु कर्मणेति भावः। कलाः मूर्तीरवतारांतररूपाः दधतस्तस्योदाराणि विपुलानि सूरिभिर्नारदपराशरपाराशर्यादिभिः परिगीतानि च कर्माणि चरितानि श्रद्धानानां नोऽस्मभ्यं ब्रूहीति लीलयेत्यनेनावताराणामकर्ममूलत्वमुक्तम्। 'कलाः दधत' इत्यनेन श्रीकृष्णस्यावतारित्वप्रतीत्या पूर्णावतारत्वं सूचितं; तेनैवावतारांतरकथाप्रश्नश्च कृत इत्यर्थः॥ १७॥ ❀ ❀ लीलयेत्यनेनावताराणामकर्ममूलत्वमुक्तम्। अथावतारचेष्टितानामकर्ममूलत्वं वदंतः कार्त्स्न्येन तदवतारचरित्राणि पृच्छंति—अथेति। हे धीमन्नात्ममायया आत्मनः स्वस्य मायया आश्चर्यशक्तियुक्तेन। आश्चर्यत्वं मायाशब्दप्रवृत्तिनिमित्तं संकल्परूपज्ञानेन वा "मायावयुनम्" इति नैघंटुकाः "मायया सततं वेत्ति प्राणिनां च शुभाशुभ" मिति ज्ञानेऽभियुक्तप्रयोगः स्वैरं यथा तथा लीलाश्चेष्टा विदधतः कुर्वत ईश्वरस्य सर्वनियंतुर्हरेराश्रित-दुरितहरस्य भगवतः शुभाः शृण्वतां वदतां च शुभावहाः अवतारकथाः। अथ कार्त्स्न्येनाख्याहि कथय। "मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेति" नैघंटुकाः। आत्ममायया स्वैरं लीला विदधत इत्यनेन देवमनुष्यादिजातीयानामवतारचेष्टानामात्मीयसंकल्पमूलत्वमकर्मवश्यत्वप्रयुक्तत्वं च सूचितम्॥ १८॥ ❀ ❀ नन्वाभीक्ष्ण्येण श्रुता एव भगवदवतारकथा भवद्भिस्तस्ताः किमर्थं पृच्छयंते तत्राहुः—वयं यदुत्तमश्लोकचरितं शृण्वतामपि रसज्ञानां पदे पदे क्षणे क्षणे पुनः पुनर्वा स्वादु रुचिजनकं भवति पूर्वश्रवणापेक्षयोत्तरश्रवणेतीव रुचिकरमेव भवति इति श्रुतमपि पुनः पुनर्नवमेव भवतीति भावः। यद्यस्मात्पदे पदे स्वादुतः स्वादु तदुत्तमश्लोकविक्रमे न वितृप्याम इत्यन्वयः॥ १९॥ ❀ ❀ युक्तं चैतदित्यभिप्रायेणाहुः—कृतवानिति। कपटमानवः छद्ममानवः, मनुष्यवत्प्रतीयमान इत्यर्थः। एवमपि भगवान्पूर्णषाड्गुण्यः तथापि गूढः तत्त्वतोऽयमीश्वर इति केनापि न ज्ञातः। केशवः "क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां त्वदंगसंभूतौ तस्मात्केशवनामवानि"ति रूढ्निरुक्तकेशवपदपुष्कलप्रवृत्तिनिमित्ताश्रयः श्रीकृष्णो बलरामसहितः अतिमर्त्यान्यतिमानुषाणि मनुष्यैः कर्तुमशक्यानीति यावत्, वीर्याणि चेष्टितानि कृतवानेवेति प्रसिद्धिः। मानुषाणि हि कर्माणि सकृत् श्रुतानि पुनः पुनः शुश्रूषां जनयेयुः, भगवद्वीर्याण्यतिमानुषत्वाद्विलक्षणविषयत्वादेव स्वविषयां शुश्रूषामप्युत्तरोत्तराधिकां विलक्षणां जनयंति, तत्र किमु वक्तव्यमित्यर्थः। अतस्तत्र न वितृप्याम इति भावः। अतो भगवत्कर्मश्रवणे श्रद्धावतां नो तानि कथयेत्यर्थः॥ २०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

न केवलं कृष्णकथैव वक्तव्या मत्स्याद्यवतारांतरकथापीत्याह—तस्य कर्माणीति। लीलया मत्स्यादिकलाः दधतः तस्य हरेः सूरिभिर्ब्रह्मादिभिः परिगीतान्युदाराण्यक्लिष्टान्युद्गतदोषाणि वा कर्माणि ब्रूहीत्येकान्वयः॥ १७॥ ❀ ❀ तदेवास्माकं वर्णनीयमित्यभिप्रेत्याहुरित्याह—अथेति। यत एवं यच्छ्रद्दधानानामस्माकं कलिमलापहमथ तस्मादात्ममायया स्वरूपभूतेच्छया स्वैरं यथेष्टं लीलाः प्रलयजलविहारादिक्रीडाः विदधत ईश्वरस्य स्वतंत्रस्य हरेः शुभाः मंगला अवतारकथाः हे धीमन्नस्माकमाख्याहीत्येकान्वयः॥ १८॥ ❀ ❀ भवतां बहुशः श्रुतहरिकथानां किमित्ययमुत्कण्ठाविशेष इत्यत उच्यते—वयमिति। वयमुत्तमश्लोकस्य हरेर्विक्रमैः श्रुतैर्न वितृप्यामः, अन्येषां तृप्तिरस्तु वा, नास्माकमलंबुद्धिरित्येतस्मिन्नर्थे तुशब्दः यद्विक्रमजातं शृण्वतां रसविवेकविदुषां स्वादु स्वाद्यति मधुरं भवतीत्येकान्वयः "रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे" इति तद्विशेषज्ञा वा रसज्ञाः॥ १९॥ ❀ ❀ संप्रति कृष्णावतारचरितश्रवण एव उत्कंठाविशेष इत्यभिप्रेत्याहुरित्याह—कृतवानिति। स्वमहिम्ना गूढः कपटमानुषः केशवो भगवान् रामेण सह यानि मर्त्यवीर्यमतिक्रम्य विद्यमानानि वीर्याणि पराक्रमलक्षणानि कृतवान् किल तान्यस्माकं ब्रूहीत्येकान्वयः। मानुषेष्वपि कं सुखं पटति प्राप्नोतीति कपटमानुषः इत्यर्थोपि ग्राह्य इति॥ २०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्येति। उदाराणि परमानन्ददातॄणि जन्मादीनि। स्वयं परिपूर्णस्य लीलया अन्या अपि कलाः पुरुषादिलक्षणा दधतः तत्तदंशानप्यादाय तस्यावतीर्णस्य सत इत्यर्थः॥ १७॥ ❀ ❀ अथेति। श्रीकृष्णस्य तावन्मुख्यत्वेन कथय।

अथ तदन्तरं आनुषङ्गिकतयैवेत्यर्थः । हरेः श्रीकृष्णस्य । प्रकरणबलात् अवताराः पुरुषावताराः गुणावताराः लीलावताराश्च तेषां कथाः लीलाः सृष्ट्यादिमर्मरूपाः भूभारहरणादिरूपाश्च । आत्ममायया निजेच्छारूपया शक्त्या । "आत्ममाया तदिच्छा स्याद् गुणमाया जडात्मिकेति" महासंहितातः ॥ १८ ॥ ❀ ❀ टीकायामिक्षुभक्षणवदिति । इक्षुभक्षणे यथा स्वादविशेषाभावो भवति तथात्र नेत्यर्थः । भगवद्विक्रममात्रे तु न तृप्याम एव । तत्रापि "तीर्थं चक्रे नृपोन" मित्याद्युक्तलक्षणस्य सर्वतोऽप्युत्तमश्लोकस्य श्रीकृष्णस्य विक्रमे विशेषेण न तृप्यामः ॥ १९ ॥ ❀ ❀ ननु कथं वा मानुषः सन्नतिमर्त्यानि कृतवान् तत्राह—कपटमानुषः । पार्थिवदेहविशेष एव मानुषशब्दः प्रतीतः, तस्मात् कपटेनैवासौ तथा भातीत्यर्थः । वस्तुतस्तु—नराकृतेरेव परब्रह्मत्वेनासत्यपि प्रसिद्धमानुषत्वे नराकृतिनरलीलत्वेन लब्धमप्रसिद्धमानुषत्वमस्त्येव । तत् पुनरैश्वर्याव्याघातकत्वान्न प्रत्याख्यायत इति भावः । अत एव स्यमन्तकाहरणे 'प्राकृतं पुरुषं मत्वे'त्यनेन जाम्बवतोऽन्यथाज्ञानव्यञ्जकेन वाक्येन तस्य प्राकृतत्वं निषिध्य पुरुषत्वं स्थाप्यते । एवं "मायामनुष्यस्य वदस्व विद्वन्नि" त्यादिष्वपि ज्ञेयम् । यस्मात् कपटमानुषः तस्मादेव गूढः । स्वतस्तु तद्रूपतयैव भगवानिति ॥ २०-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कर्माण्यवतारान्तरसाधारणान्यसुरवधादीनि । उदाराणि भक्ताभीष्टप्रदानि । कला अवतारान् दधत इति वर्त्तमानकालेन तदवताराणां नित्यत्वं तस्य च पूर्णत्वमायातम् ॥ १७ ॥ ❀ ❀ शुभा अमायिकीर्विदधत इति वर्तमानकालेन लीलानां नित्यत्वम् । आत्ममायया योगमायया ॥ १८ ॥ ❀ ❀ उत्तमः सर्वश्रेष्ठः श्लोको यशो यस्य सः । यद्वा, उत्तमैः श्लोक्यते कीर्त्यते इति तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे, तेन यागयोगादिषु तृप्ताः स्म इति भावः । यद्विक्रमणं शृण्वताम् । यद्वा अन्ये तृप्यन्तु नाम वयं तु नेति तुशब्दस्यान्वयः । अयमर्थः—त्रेधा ह्यलंबुद्धिर्भवति । उदरादिभरणेन वा रसाज्ञानेन वा स्वादविशेषाभावाद्वा तत्र शृण्वतामित्यनेन श्रोतस्याकाशत्वात् विक्रमस्य चामूर्तत्वात् न भरणम् । रसज्ञानमिति रसज्ञानेन पशुवत्तृप्तिर्निराकृता । पदे पदे प्रतिसुप्तिङन्तमेव प्रतिक्षणमेव वा स्वादुतोऽपि स्वाद्विति चर्वितस्य इक्षुदण्डादेरिव न नीरसत्वेन हेयत्वं प्रत्युतातिस्वादुत्वेन परमोपादेयत्वमिति ॥ १९ ॥ ❀ ❀ विक्रममेव स्पष्टीकुर्वन्ति—कृतवानिति । अतिमर्त्यानि नराकृतिपरब्रह्मत्वात् मर्त्योऽपि मर्त्यानतिक्रान्तानि गोवर्द्धनोद्धरणादीनि तात्कालिकमनुष्येष्वसंभावितानीत्यर्थः । तदपि गूढः । तत्र हेतुः—कपटमानुषः । कपटं भक्तहितार्थं ब्रह्मवेषादिना प्रार्थनलक्षणं मानुषेषु प्राकृतेषु जरासन्धादिषु यस्य । तथा कपटं प्रेमविलासार्थं धर्मोपदेशादिलक्षणं मानुषेषु वेणुनादाकृष्टगोपीकुलेष्वप्राकृतेषु यस्य सः, गडवादित्वाद् सप्तम्याः परनिपातः । तेषां तेषां मायामोहनात् प्रेम्णा मोहनाच्चैवं कपटी नेश्वरो भवितुमर्हतीति प्रत्यायनाद् गूढ इत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रश्नांतरं—तस्येति । उदाराणि विश्वजन्मादीनि ॥ १७ ॥ ❀ ❀ प्रश्नांतरमथेति ॥ १८ ॥ ❀ ❀ भगवद्गुणश्रवणे श्रद्धातिशयं भगवत्तत्त्वाभिज्ञत्वं भगवद्गुणश्रवणे प्राप्तावसरत्वं चाहुः—क्रमाद्वयमित्यादित्रिभिः । उत्तमश्लोकयशांसि यस्य तस्य विक्रमे चरित्रे ॥ १९ ॥ ❀ ❀ क उत्तमश्लोक इत्यपेक्षायामाहुः—कृतवानिति । भगवान् षडैश्वर्यवान् केशवः "क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवांगसंभूतौ तस्मात् केशवनामवानि" ति हरिवंशे शिवेनैवोक्तत्वात् । ब्रह्मेशजनकः मरणधर्मानतिक्रांतानि वीर्याणि कृतवान्, यः स उत्तमश्लोकः । नन्वेवमितरे कुतो न जानंतीत्यत आहुः—गूढः । मायामोहितैर्दुर्ज्ञेयः । कुतः ? अतः कपटमानवः । कपटानां मायाश्रितानां मानवः मनुष्यवत्प्रतीयमानः । वक्ष्यति च "मायाश्रितानां नरदारकेणे"ति ॥ २०-२१ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं प्रयोजनप्रश्नमाह—तस्य कर्माणीति । तादृशप्रयोजनस्य श्रुतस्य हृदये समागमनार्थंकर्माण्येव पृच्छंति तस्य कर्माणीति । कर्मश्रवणे न सत्फलं भगवता देयमित्यपि नास्ति अन्यानि च फलानि कर्मैव पात्रापात्रविवेचनव्यतिरेकेणैवान्येभ्योपि बहु-प्रयच्छंतीत्याह उदाराणीति । उदारादिविशेषणानि न व्यावर्त्तकानि किन्तु कर्मोद्देशेनोदारत्वादि विधीयते प्रथमत एव विशेष्यनिर्देशात् अवांतरफलप्राप्त्यर्थमुदारत्वनिर्देशः मुख्यं फलं भगवत एव तेषामज्ञानाभावमाह परिगीतानि सूरिभिरिति परितो गीतानीति । सर्वतो दूराद् ब्रह्मणः सम्भवः सूरिभिरित्यन्यथाकथनव्यावृत्तिः तर्हि शौनकादीनामपि सुलभत्वादकथनमित्याशक्याह श्रद्दधानानामिति । श्रद्धया हि पुनः पुनः श्रवणेच्छानिरूपिता कदाचिदपि रुच्यभावो नास्तीत्यभिप्रायेणाहुः लीलया दधतः कला इति । अनायासेन हर्षात् क्रियमाणा चेष्टा लीला तया नूतना एव कलाः प्रतिक्षणं ध्रियंते भगवता यथातथा तत्कर्मणामपि चंद्रस्येव नूतनकलासंबंधात् कदाचिदपिनारुचिः इदं हि विशेषणं पूर्वोक्तनिर्वाहकम् ॥ १७ ॥ ❀ ❀ एवमेकोपक्रमेण प्रयोजनकर्मणी पृष्टे । अथ भिन्नोपक्रमेण अवतारकथां पृच्छन्ति-अथाख्याहीति । यद्यपि केचन अवताराः तत्तदुपाख्यानश्रवणोपक्रमेण सर्वेऽवताराः सविशेषं ज्ञातव्याः । अत औत्सुक्यात् पृथक् पृष्टः । अथेति भिन्नोपक्रमे । हरेरिति । सामान्यतोऽवतारे परदुःखदूरीकरणं निमित्तमित्युक्तम् ।

अवतारस्वरूपस्य दुर्ज्ञेयत्वात् न सर्वजनानां ज्ञानमिति विशेषसंबोधनम्। धीमन्निति। अवताराणां कथाः। कथमवतारः, कस्यावतारः, कुत्रावतार इति किमर्थमवतारः। चतुर्धा कथावक्तृश्रोतृप्रवर्त्तकानां शुभफलप्रदाः। वस्तुतोऽपि शुभा लोके पुत्रजन्मकथावत्। यत्रापि येष्ववतारेषु स्वेच्छया लीलावताराः ते वक्तव्या इत्याह—लीला विदधत इति। स्वैरमिति मर्यादातिक्रमेणापि,तत्र हेतुरीश्वरस्येति, सर्वभवनसामर्थ्यं माया अन्यथा करणनिर्वाहे दोषाभावे च हेतुत्वेन निर्दिष्टा। आत्मेति नान्येन ज्ञातुमुल्लंघितुं वा शक्या ॥ १८ ॥ ❀ ❀ नन्वेवं विशेषेण सर्वार्थपरिज्ञानवतां किं पुनः श्रवणेनेत्याशंक्याह—वयं त्विति। ये पुनः भगवत्कथारूपानभिज्ञाः, ते कियत्कालं श्रुत्वा निवर्तंते। न ह्यत्र रसज्ञा निवर्तंते। तस्माद्ये निवर्तंते ते तृप्ताः संतस्ते निवर्ततां, वयं तु पुनः न वितृप्याम एव। कुतो निवृत्ता भविष्यामः? निवृत्तिस्त्रेधा संभवति। इतोऽप्युत्कृष्टे रसांतरे संभवति। अस्याप्यभावे वा रसाज्ञानाद्वा। तत्र आद्यं निराकरोति– उत्तमश्लोकविक्रम इति। उत्तमैर्मुक्तैः ब्रह्मानंदानुभवयुक्तैरपि, श्लोक्यते भगवान्। तद्यथा–तथात्थं 'इ भूतगुणो' हरिरित्यत्र वक्ष्यते। तस्मान्न भगवत्कथारसादधिको रसः कश्चिदस्ति। ब्रह्मानंदरसोऽपि न्यून इति। अनेनैव दुर्लभतापि निवारिता। तस्य च विशेषेण क्रमः पादविक्षेपो यत्र स पराक्रमः। विशेषेण क्रियाशक्त्याविर्भावः स च पूर्णः सर्वत्र। तस्मान्न दुर्लभता। तृतीयं निराकरोति–यच्छृण्वतामिति। रसज्ञानं च, यथा हि लोके सूपकारविद्यासु नेच्छानिवृत्तिः। किं पुनर्मूर्तत्वादुदरपूरणेन निवृत्तिः। तथा श्रवणेपि विशेषोप्युक्तः। श्रवणेन गृहीतस्यामूर्त्तत्वात्। किं च, रसाभिज्ञाः सर्वथा ततो न निवर्त्तंते। रसस्यानिवर्त्तकत्वात्। अस्य चा रसस्य परात्परत्वात् किंच स्वादु स्वादु पदे पद इति यथाधिकारमत्र हि रसाविर्भावः। यथा यथा ह्यज्ञानं निवर्तते तथा तथा भगवद्रसास्वादो भवति, यथा यथा द्वारविमोकेऽन्नस्य प्रथमप्रयोगे हि अविद्यायाः पूर्णत्वात् अल्परसास्वादः, ततः प्रथमश्रवणे काचिदविद्या निवृत्ता चेत्तदा द्वितीयेऽधिको रसः। एवमुत्तरत्रापि। परमो रसः सर्वथामुक्तानाम्। किंच वाक्यसमुदाये भगवान् प्रतीतः पुनः प्रत्येकवाक्येषु ततः पदेपि पद्यते ज्ञायतेऽनेनेति पदं प्रकृतिः प्रत्ययश्च। तेन अक्षरार्थत्वेन ज्ञातो भगवानतिरसप्रद इत्यर्थः॥ १९ ॥ ❀ ❀ किंच, विशेषाकारेण कृष्णावतारकथा श्रोतव्येत्यभिप्रायेणाह–कृतवानिति। किलेति प्रसिद्धे, आश्चर्येणात्र प्रसिद्धिरुक्ता, अवस्थासाधनविरहेपि वीर्यकरणात्। अतः कृष्णावतारवीर्याणि किल अलौकिकानि। किंच एकत्रैकदा अविशेषेणावतारेण च वीर्याणि न क्रियंते; अत्र तु रामेण सहेत्युभयरूपकरणमुक्तम्। किंच सर्वेष्ववतारेषु ब्रह्मेशयोर्न सुखदानं, तयोरपि गुणाधिष्ठातृत्वेन स्पर्द्धादिसंभवात्। तयोरर्थे हिताकरणात् तद्भक्तवधाच्च। तदत्र किमपि नास्तीत्याह—केशव इति। कश्च ईशश्च केशौ। केशयोर्वममृतं यस्मादिति तयोरप्यानंददायी। वीर्याणामुत्कर्षमाह–अतिमर्त्यानीति। अतिक्रांतं मर्त्यं येभ्य इति। वीर्यश्रवणे हि, पुनर्न मर्त्यशरीरसंबंध इत्यर्थः। अथवा मर्त्यमतिक्रांतानि, आनंदमात्रकरपादमुखोदरादित्वात्। तत्र हेतुर्भगवानिति, न भगवदवतार इत्यर्थः। तर्हि कथं शरीरप्रतीतिस्तत्राह–गूढः कपटमानुष इति। अयं लोको हि गुप्तः स्वचिदानंदरूपतां न प्रकाशयति। तत्र हेतुभूतं विशेषणं—कपटमानुष इति। कपटेन लोकानां बुद्धिमोहनप्रकारेण मानुषः। तदेव रूपं मानुषरूपवत् प्रतिभासयतीत्यर्थः॥ २०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्य कर्माणीत्यत्र। अवान्तरफलेति। अवान्तरफलं शुद्धिरूपम्। तथाचाविचारेण सर्वेषां शुद्धिदानार्थमुदारत्वोक्तिरित्यर्थः ॥ १७॥ ❀ ❀ वयं त्वित्यत्र। पदशब्दस्याक्षरवाचकत्वाय योगमाहुः पद्यत इत्यादि॥ १८॥ ❀ ❀ कृतवानित्यत्र। येभ्य इति हेतौ पञ्चमी बोध्या॥ २०॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं श्रवणोत्सुक्यमाविष्कृत्य भगवच्चरितानि पृच्छन्ति—तस्येति। तस्य भगवतः श्रीकृष्णस्य कर्माणि नोऽस्माकं ब्रूहीत्यन्वयः। वयं श्रवणाधिकारिण इति सूचयन्त आहुः—श्रद्दधानानामिति। भगवच्चरितमाधुनिका अपि वर्णयन्ति परन्तु तद्वाक्येऽप्रामाण्यशङ्का भवतीति तद्वारणायाहुः—परिगीतानि सूरिभिरिति, सूरिभिर्विवेकिभिर्नारदपराशरपाराशर्यप्रभृतिभिः परिगीतानीत्यर्थः। ननु तच्छ्रवणे भवतां किमित्याग्रह इत्यपेक्षायामाहुः—उदाराणीति, योग्यायोग्यविचारं विनैव श्रवणकीर्तनपराणां यथेष्टं धर्मादिचतुर्विधपुरुषार्थप्रदानीत्यर्थः। ननु कथमेवम्प्रभावाणि कर्माणीत्यपेक्षायामाहुः—लीलया दधतः कला इति। अनायासेन स्वेच्छया हर्षात् क्रियमाणा चेष्टा लीला तयैककला ब्रह्मरुद्रमत्स्यकच्छपाद्यनन्ता नानाविधा मूर्तीस्तत्रापि प्रतिक्षणं चन्द्रस्य कला एव जनाह्लादकानि स्वरूपान्तराणि च दधतो धारयत इत्यर्थः। अनेन भगवत्कर्मणां नास्मदादिकर्मवत्प्रारब्धाधीनत्वमिति मत्स्याद्यवतारावतारित्वेन श्रीकृष्णस्य पूर्णावतारत्वं च दर्शितं अत एवावतारान्तरकथाप्रश्नः। तथा च ऐश्वर्याद्यचिन्त्यानन्तगुणपूर्णस्य श्रीकृष्णस्य कर्मणामुक्तप्रभावत्वे न कश्चिच्छङ्कालेश इति भावः ॥ १७ ॥ ❀ ❀ एवमेकोपक्रमेण श्रीकृष्णावतारप्रयोजनकर्मणि पृष्टे अथ भिन्नोपक्रमेण तदन्यावतारकथाः पृच्छन्ति—अथेति। भिन्नोपक्रमो न ह्येतज्ज्ञानं सर्वसाधारणं येनान्यः प्रष्टव्यस्त्वं तु सर्वं जानासीत्यत्याग्रहेण पृच्छयसे इति सूचयन्तः सम्बोधयन्ति—हे धीमन्निति। हरेर्भक्तदुःखहरणशीलस्य अतः श्रवणकीर्तनादिपराणां स्वभक्तानां संसारदुःखदूरीकरणार्थमेव स्वैरं यथेष्टं मर्यादातिक्रमेणापि आत्मनः स्वस्य मायया अचिन्त्यशक्तिरूपया नानाविधलीलाः विदधतः ईश्वरस्य सर्वथा सर्वकरणे समर्थस्य शुभाः वक्तृश्रोतृप्रवर्तकानां यथेष्टं धर्मादिशुभफलावहाः

अवतारकथास्त्वमाख्याहीत्यन्वयः। कोऽवतारः किमर्थः कथं कुत्र किमाकारश्चेत्यादि सर्वं कथयेत्यर्थः ॥१८॥ ❀ ❀ नन्वश्रुतभगवच्छास्त्राणां विशेषतः सर्वार्थपरिज्ञानाभावात् एवं प्रश्न एव न सङ्गच्छतेऽतो भवद्भिस्तच्छास्त्रं श्रुतं विशेषतः सर्वार्थपरिज्ञानवन्तश्चेति तु प्रश्नेनैव ज्ञायते तर्हि किं पुनः प्रश्नेन श्रवणेन वेत्याशङ्क्याहुः—वयं त्विति। उद्गच्छति तमः अविद्या यस्मात्स उत्तमस्तथाभूतः श्लोको यस्य स उत्तमश्लोकः। यद्वा उत्तमैर्ब्रह्मानन्दानुभवयुक्तैर्जीवन्मुक्तैरपि सनकादिभिः श्लोक्यते इत्युत्तमश्लोको भगवांस्तस्य विक्रमे विविधप्रकारलीलायां येऽन्ये रसानभिज्ञाः पशुतुल्याः कियत्कालं तच् श्रुत्वा तृप्ताः सन्तस्ततो निवर्तन्ते ते निवर्त्तन्तां, वयं तु न तत्र विशेषेण तृप्यामः अलम्प्रत्ययं न लभामहे इत्यन्वयः। तत्र हेतुमाहुः—यदित्यादिना। त्रिधा ह्यलम्बुद्धिर्भवति, उदराद्याधारभरणेन वा रसाज्ञानेन वा स्वादुविशेषाभावाद्वा। तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वाच्छब्दस्य च गुणत्वेन द्रव्यव्यतिरिक्तत्वान्न तस्य तेन भरणं सम्भवतीति दर्शितम्। रसज्ञानामित्यनेन चाज्ञानतः पशुवदलम्बुद्धिर्निराकृता। इक्षुभक्षणवद्रसान्तराभावेनालम्बुद्धिं निराकरोति—यद्विक्रमं पदे पदे प्रतिक्षणं स्वादुतोऽपि स्वादु भवतीति। यथा यथा श्रवणेनाविद्यानिवृत्तिस्तथा तथा लीलारसास्वादोऽधिकः, यथा यथा ज्वरनिवृत्तिस्तथा तथाऽन्नरसास्वादोऽधिकस्तद्वदिति भावः ॥ १९ ॥ ❀ ❀ तत्रापि केशवः को ब्रह्मा ईशः श्रीमहादेवस्तयोरपि वं अमृतं यस्मात्स तयोरप्यानन्ददायी भगवान् ऐश्वर्यादिषड्गुणपूर्णः श्रीकृष्णः रामेण बलेन सह यानि वीर्याणि पराक्रमान् कृतवांस्तत्र तु वयं नैव वितृप्यामः अतस्तानि प्राधान्येन कथयेति शेषेणान्वयः। तत्र तृप्त्यभाव आश्चर्यजनकत्वं हेतुः प्रसिद्ध एवेति सूचयन्ति—किलेति। कथं तेषामाश्चर्यजनकत्वमित्यपेक्षायामाहुः—अतिमर्त्यानीति, मर्त्यानतिक्रान्तानि गोवर्धनोद्धरणादीनि मनुष्येष्वसम्भावितानीत्यर्थः। ननु यद्ययं सच्चिदानन्दात्मकः साक्षाद्भगवानेव तर्हि कथमस्मदादितुल्यतया प्रतीयते इत्याशङ्कायामाहुः—गूढ इति। स्वाचिन्त्यया शक्त्या गुप्तः सन् सच्चिदानन्दात्मकतां न प्रकाशयतीत्यर्थः। तत्र हेतुभूतविशेषणान्तरमाहुः—कपटमानुष इति। कपटेन लोकानां बुद्धिमोहनप्रकारेण मानुषः, तदेव सच्चिदानन्दात्मकं रूपं मानुषरूपवत्प्रतिभासयतीत्यर्थः ॥ २० ॥

हिन्दी अनुवाद

लीलासे ही अवतार धारण करते हैं नारदादि महात्माओंने उनके उदार कर्मोंका गान किया है। हम श्रद्धालुओंके प्रति आप उनका वर्णन कीजिये ॥ १७ ॥ ❀ ❀ बुद्धिमान् सूतजी! सर्वसमर्थ प्रभु अपनी योगमायासे स्वच्छन्द लीला करते हैं। आप उन श्रीहरिकी मङ्गलमयी अवतार-कथाओंका अब वर्णन कीजिये ॥ १८ ॥ ❀ ❀ पुण्यकीर्ति भगवान्‌की लीला सुननेसे हमें कभी भी तृप्ति नहीं हो सकती; क्योंकि रसज्ञ श्रोताओंको पद-पदपर भगवान्‌की लीलाओंमें नये-नये रसका अनुभव होता है ॥ १९ ॥ ❀ ❀ भगवान् श्रीकृष्ण अपनेको छिपाये हुए थे, लोगोंके सामने ऐसी चेष्टा करते थे मानो कोई मनुष्य हो। परन्तु उन्होंने बलरामजीके साथ ऐसी लीलाएँ भी की हैं, ऐसा पराक्रम भी प्रकट किया है, जो मनुष्य नहीं कर सकते ॥ २० ॥

कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्। आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥
त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम्। कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम् ॥ २२ ॥
ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि। स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः २३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

ननु याजनाध्यापनादिव्यग्राणां कुतः एतच्छ्रवणावकाशः स्यादत आहुः। कलिमिति। कलिमागतं ज्ञात्वा तद्भिया विष्णुपदं गन्तुकामाः दीर्घसत्रेण निमित्तेनात्र वैष्णवे क्षेत्रे आसीनाः हरेः कथायां सक्षणाः लब्धावसराः ॥ २१ ॥ ❀ ❀ अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनंदंति। त्वमिति। कलिं संसारं निस्तर्तुमिच्छताम्। अर्णवं तितीर्षतां कर्णधारो नाविक इव ॥ २२ ॥ ❀ ❀ पुनः प्रश्नांतरम्। ब्रूहीति। धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वस्वरूपमित्यर्थः। अस्य चोत्तरम् "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह" इत्ययं श्लोकः ॥ २३ ॥

इति श्रीमद्भागवते प्रथमस्कंधे भावार्थदीपिकायां टीकायां प्रथमोऽध्यायः ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु याज्ञिकानां युष्माकमीदृशं कृष्णयशःश्रवणौत्सुक्यमति चित्रमित्याक्षिपति। नन्विति। सत्यं संप्रत्यस्माकं याज्ञिकत्वं प्रथामात्रमेव जातमिति जानीहीत्याहुः। कलिमिति। लब्धोत्सवाः। क्षण उत्सवे कालविशेषेऽवकाशे च ॥ २१ ॥ ❀ ❀

सत्त्वहरं धैर्यहरम् 'सत्त्वं धैर्ये गुणे सत्ये' इत्यभिधानात् ॥ २२ ॥ ❀ ❀ योगेश्वर इति सामर्थ्यं ब्रह्मण्य इति दयालुत्वं स्वां काष्ठां स्वीयां स्थितिं मर्यादाम्। सा च (१) साविर्भावात् सपादशतवर्षान्ते प्रापञ्चिकजनदृष्टयाविषयतैव "काष्ठोत्कर्षे स्थितौ दिशि" इति 'मर्यादा धारणस्थितिः' इति चामरः। धर्मो भक्तिज्ञानलक्षणः। तत्र पुंसाम् एकान्ततः श्रेय इति साधनविषयः। सर्वशास्त्रसारं "ब्रूहि नः श्रद्धधानानां येनात्मा सुप्रसीदति" इति (२) देवक्यां किमर्थं जातः "तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुम्" इति (३) तस्य कर्माणि "ब्रूहि नः श्रद्धधानानां लीलया दधतः कला" इति (४) "अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा" इति (५) "ब्रूहि योगेश्वरे कृष्णे धर्मः कं शरणं गत" इति (६) षडेव प्रश्नाः एतत्प्रत्युत्तराण्येव सप्रसंगानि श्रीभागवतमिति विवेचनीयम् ॥ २३ ॥

इति भावार्थदीपिकाप्रकाशे वंशीधरशर्मसंदब्धे प्रथमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवव्याख्या

ननु भगवद्वीर्याणि बहूनि महता कालेन श्रोतव्यानि, भवतां तु नित्यं तपश्चरतां कोऽवसर इत्याहुः—कलिमिति। कलिं तपोविघ्नकरं कलियुगमागतं प्रवृत्तं विज्ञायालक्ष्य वयमुपायांतरेण कलिं जेतुमशक्ता हरेः कलिकृतदोषहरस्य भगवतः कथायां निमित्तभूतायां कथाश्रवणार्थमित्यर्थः, सक्षणाः सावसराः लब्धावसरा इति यावत्, अस्मिन्वैष्णवे विष्णोः संबंधिनि तत्सान्निध्यवति क्षेत्रे नैमिषाख्ये दीर्घसहस्रेण सहस्रवत्सरपर्यंतेन ब्रह्मसत्रेण अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया, दीर्घसत्रार्थमित्यर्थः। आसीना उपविष्टा वयं भवामः ॥ २१ ॥ ❀ ❀ किंच पुंसां सत्त्वहरं तपआदिसारहरमत एव दुस्तरमुपायांतरैस्तर्तुं जेतुमशक्यं कलिं निस्तितीर्षतां तर्तुमिच्छतां नोऽस्माकमर्णवं सागरं निस्तितीर्षतां जनानां कर्णधार इव त्वं धात्रा ईश्वरेण संदर्शितः, उपायत्वेनेति शेषः। दैववशादिदं संपन्नमिति भावः ॥ २२ ॥ ❀ ❀ स्वस्ववर्णाश्रमधर्मेणैव कलिं तरतः किं हरिकथाश्रवणेनेति इमां शंकां निराकुर्वंतः प्रश्नमुपसंहरन्ति—ब्रूहीति। ब्रह्मणि ब्रह्मकुले साधुः ब्रह्मण्यः तस्मिन् धर्मवर्मणि धर्मस्य वर्मवत्कवचवत्पालके योगेश्वरे भक्तियोगाराध्ये श्रीकृष्णेऽधुना स्वां काष्ठामभियोगप्रकर्षं स्वां दिशं वा वैकुण्ठलोकमिति यावत्। उपेते गते सति धर्मः वर्णाश्रमानुकूलः कं कृष्णादन्यं कं शरणं रक्षितारं गतः गच्छेन्न कमपीत्यर्थः। अधुना धर्मगोप्तुरभावात् कलिनाभिभूतो धर्मस्तं जेतुमप्रभुः। अतः केवलं कलिघ्नं भगवच्चरितमेव ब्रूहि इत्यर्थः ॥ २३ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेश्चक्रवर्तिनः श्रीशैलगुरोः सुतेन तच्चरण-
कमलपरिचर्याप्रसादिततत्सूक्तिसमधिगतश्रीभागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघव-
विदुषा लिखितायां श्रीभागवतचंद्रिकायां श्रीमद्भागवतस्य प्रथमस्कंधे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दीर्घसत्रे दीक्षितानामस्माकं हरिकथाश्रवणावसरोऽस्तीत्याहुरित्याह—कलिमागतमिति। आगतं प्रविष्टं कलिमाज्ञायास्मिन् वैष्णवे क्षेत्रे दीर्घसत्रेणासीना व्यापारांतरं विहाय वयं हरेः कथायां कथाश्रवणे सक्षणाः सावसरा इत्येकान्वयः ॥ २१ ॥ ❀ ❀ पुंसां सत्त्वगुणहरं दुस्तरं तर्तुमशक्यं कलिं निस्तितीर्षतां नितरां तर्तुमिच्छतां नः हे सूत त्वं धात्रा दैवेन संदर्शितः क इव दुस्तरमर्णवं निस्तितीर्षतां सांयात्रिकाणां कर्णधार इव कर्णधारो यूपकाग्रस्थायी पुरुषः ॥ २२ ॥ ❀ ❀ प्रश्नांतरं कुर्वंतीत्याह—ब्रूहीति। अधुना धर्मरूपाणि कर्माणि यस्य स धर्मकर्मा तस्मिन्। ब्रह्मण्ये ब्राह्मणहितकारिणि अणिमाद्यष्टयोगेश्वरे भक्तिज्ञानलक्षणयोगे वा योगीश्वरे वा "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥" इति वचनात्सच्चिदानंदलक्षणे कृष्णे स्वां काष्ठां गुणपूर्णस्वरूपमुपेते गतवति सति पूर्वनिर्दिष्टो धर्मः भक्तिज्ञानलक्षणः। कं पुरुषं शरणं गत इति तमस्माकं ब्रूहीत्येकान्वयः। पुंसामेकांतत इति श्रेयः साधनविषयः (१) ब्रूहि भद्रायेति प्रत्यगात्मविषयः (२) अर्हस्यंगानुवर्णितुमिति कृष्णावतारविषयः (३) ब्रूहि नः श्रद्धधानानामिति यशोविषयः (४) अथाख्याहीत्यवतारांतरविषयः (५) ब्रूहि योगेश्वर इति धर्मविषयः (६) एवं षट्प्रश्नाः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रूहीति। स्वां काष्ठां दिशं निजनित्यधामेत्यर्थः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु याज्ञिकानां युष्माकमीदृशं कृष्णयशःश्रवणौत्सुक्यमतिचित्रम् ; । सत्यं—सम्प्रति त्वमस्माकं याज्ञिकत्वं प्रथमात्रमेव जातमिति जानीहीत्याहुः—कलिमिति । सक्षणा लब्धावसराः सोत्सवाः ॥ २१ ॥ ❀ ❀ कर्णधारो नाविकः ॥ २२ ॥ ❀ ❀ धर्मस्य वर्मणि कवचवद्रक्षके । तत्र हेतुः—योगेश्वर इति सामर्थ्यं ब्रह्मण्य इति दयालुत्वम् । स्वां काष्ठां स्वीयां स्थितिं मर्यादाम् । सा च स्वाविर्भावात् सपादशतवर्षान्ते प्रापञ्चिकजनदृष्टविषयता एव । 'काष्ठोत्कर्षे स्थितौ दिशी'ति 'मर्यादाधारणा स्थिति'रिति चामरः ॥ २३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

नन्वहं भवद्भिः कुतो ज्ञात इत्यत आहुः—त्वमिति । प्रश्नांतरं—ब्रूहीति ॥ २३ ॥

इती श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे प्रथमाध्यायार्थप्रकाशः सम्पूर्णः ॥ १ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तस्मात् त्वया वक्तव्यमिति सिद्धे । श्रवणे स्वाधिकारमाहुः द्वाभ्याम्—कलिमागतमिति । 'कलौ तु सर्वधर्माणां निवृत्तिरिति सूतके ।' सावकाश इव कलौ सावकाशाः, धर्माधिकारे हि सति धर्मत्यागभयात् वैयग्र्यं करणं वा संभवति मर्यादातिक्रमे पुनः पापबाहुल्यात् भगवत्कथारुचिरेव निवृत्ता भवति, तस्मात् सर्वदोषनिवर्तकः । कलिरिति । तस्मिन्नागते कथायां सक्षणा वैष्णवा इति यत्र कचित् कथाश्रवणे दैत्यैर्बुद्धिनाशः संभवति तदा सर्वं नश्येत्, तन्निवृत्त्यर्थं क्षेत्रेऽस्मिन्नित्युक्तम् ; किंच सत्रवेदिरस्येषा ततोपि न दैत्यसंबंध इति अस्मिन्निति निर्देशः कलिकालादेः स्मार्त्तत्वात्कथं वैदिकविचारेणानधिकार इत्याशंक्याह आसीना दीर्घसत्रेणेति । तथा च दीक्षितानामन्यकर्मनिवृत्तिः श्रौतात्समाप्तौ पुनः कर्मसंबंधात् दीर्घसत्रारंभः तस्मात् सर्वथा सावकाशा इत्याह कथायां सक्षणा इति । यदि कथासमारभ्यते तदासहस्रसंवत्सरमितः कालः क्षणायत इति क्षणपदप्रयोगः न सर्वत्र सक्षणाः किंतु हरेः कथायामेव ॥ २१ ॥ ❀ ❀ अत्र ह्येका सामग्री न्यूना सा भगवता संपादितेत्याह—त्वं नः संदर्शित इति धात्रा सर्वकर्त्री भगवता ब्रह्मणा वा कथारसाभिज्ञेन त्वं च नः अस्मदीयः स्वाधीनस्वकथाभावे दुस्तरः कलिः दुःखेन तरस्तरणं यस्येति । ननु कथारहिता अपि कलिं तरिष्यंति ऋषयः, को भवत्सु विशेष इत्यत आह—सत्त्वहरमिति । विवेकधैर्यज्ञानहरं सत्त्वगुणे गते रजस्तमोभ्यां लयविक्षेपावेव, अतस्तेषां सर्वस्वनाशे न कलेस्तरणं भविष्यतीति भावः । अभीष्टकाले अभीष्टदेशसंबंधाभावः कर्णधाररहितसमुद्रे तथा भक्त्यभावे कलौ ॥ २२ ॥ ❀ ❀ किंच धर्मेण सह पूर्वं वयं स्थिताः वयं त्वत्र समागताः कथायां नियुक्ताः धर्मस्य का वार्तेति षष्ठं प्रश्नमाहुः—ब्रूहि योगेश्वर इति । एतच्च ब्रूहि धर्मस्य हि ग्लानौ तद्रक्षार्थं स भगवानवतरति "यदा यदा हि धर्मस्ये" ति वाक्यात् योगोपि धर्मरक्षकः । "अयं हि परमो धर्म" इति वाक्यात् तस्यापीश्वरे कृष्णे ब्राह्मणा अपि धर्मं प्रतिपालयंति तद्योगावताररब्रह्मण्यरूपे भगवति कृष्णे स्वां काष्ठां वैकुण्ठं गते धर्मस्य संभावितशरणाभावात् भगवद्विषयकबुद्धेः धर्मकार्यरूपाया विद्यमानत्वात् धर्मोऽस्तीति प्रतीतेः 'धर्मः कं शरणं गत' इति प्रश्नः ॥ २३ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कलिमित्यत्र । सर्वदोषनिवर्तक इति । विहितकर्मादिरूपप्रतिबन्धकनिवर्तक इत्यर्थः ॥ २१ ॥

इति सुबोधिनीप्रकाशे प्रथमस्कन्धे प्रथमाध्यायविवृतिः ॥ १ ॥

श्रीगिरिधरकृता बालप्रबोधिनी ।

ननु भगवद्वीर्याणि बहूनि सन्त्यतस्तच्छ्रवणे महान् कालोऽपेक्ष्यते, भवतां तु कर्मणि सँल्लग्नानां क तच्छ्रवणावकाश इत्याशङ्क्याहुः—कलिमिति । कलौ हि गृहे स्थितानां विषयाविष्टचित्तत्वेन लौकिकव्यापारासक्त्या वैदिकं कर्म वा कथाश्रवणादि भगवद्भजनं वा न सम्भवतीति कलिमागतमाज्ञाय ज्ञात्वा दीर्घेण सहस्रसंवत्सरपर्यन्तेन सत्रसञ्ज्ञकेन यागविशेषेण गृहान्निस्सरणे निमित्तमात्रेणास्मिन् नैमिषारण्यसञ्ज्ञके वैष्णवे यत्र कुत्रचित् स्थितौ दैत्योपद्रवसम्भवात्तत्परिहाराय विष्णुसम्बन्धिनि क्षेत्रे वयमासीनाः । अतो हरेः कलिदोषहरस्य भगवतः कथायां कथाश्रवणार्थं सक्षणा लब्धावसरा एवेत्यन्वयः ॥ २१ ॥ ❀ ❀ अत्र ह्येका वक्तृरूपा सामग्री न्यूना साऽपि भगवता सम्पादितेत्याहुः—त्वमिति । पुंसां भगवद्विमुखानां विषयाविष्टचित्तानां दुस्तरं भगवद्भजनातिरिक्तोपायसहस्रैरपि तर्तुं विजेतुमशक्यं कलिं निस्तितीर्षतां निस्तर्तुमिच्छतां नोऽस्माकं त्वं भगवद्भक्तस्तत्कथाश्रवणेन

तत्पारप्रापको धात्रा भगवताऽन्तर्यामिणैव सन्दर्शितः प्रेषित इत्यन्वयः। कलेर्दुस्तरत्वे हेतुमाहुः—सत्त्वहरमिति। कलेस्तरणं नाम तद्दोषान् रागलोभक्रोधादीन् विवेकधैर्यादिना तिरस्कृत्य शुभाचरणेन स्वोद्धार एव। सत्त्वं सत्त्वकार्यभूतान् रागादिनिवर्त्तकान् विवेकधैर्यादिगुणानेव तावद्धरतीति। तत्र स्वोद्धारोऽशक्य एवेति भावः। प्रेषणे दृष्टान्तमाहुः—कर्णधार इवार्णवमिति, दुस्तरमर्णवं समुद्रं तितीर्षतां यथाऽन्तर्यामिणा कर्णधारो नाविकः प्रेष्यते तद्वदित्यर्थः॥ २२॥ ❀ ❀ इदानीं कलियुगे धर्मरक्षकं पृच्छति—ब्रूहीति। "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥" इत्यादिवाक्यानुरोधात् धर्मवर्मणि कवचवद्धर्मस्य रक्षके श्रीकृष्णेऽधुना स्वां काष्ठां दिशं लोकं वैकुण्ठमुपेते गते सति धर्मः कं शरणं गतः सम्भावितस्य धर्मरक्षकस्यादर्शनात् तत्कार्यस्य भक्त्यादेर्दर्शनाद्धर्मोऽस्तीति प्रतीतेस्तद्रक्षकोऽप्यस्तीति ज्ञायत एव, परन्तु स कस्तं ब्रूहीत्यन्वयः। योगेन धर्मस्य रक्षणं भवतीति चेत्तर्हि योगप्रवर्त्तकस्तद्रक्षकश्च स एवेति तदपि न सङ्गच्छते इत्याशयेनाहुः—योगेश्वर इति। अस्य चोत्तरं 'कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह। कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः॥' इत्ययं श्लोको भविष्यति॥ २३॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता प्रथमे तत्र हीनाधिकाररूपणे॥ विवृतः प्रथमोऽध्यायो जिज्ञासुत्वादिरूपकः॥ ३॥

हिन्दी अनुवाद

कलियुगको आया जानकर इस वैष्णवक्षेत्रमें हम दीर्घकालीन सत्रका संकल्प करके बैठे हैं। श्रीहरिकी कथा सुननेके लिये हमें अवकाश प्राप्त है॥ २१॥ ❀ ❀ यह कलियुग अन्तःकरणकी पवित्रता और शक्तिका नाश करनेवाला है। इससे पार पाना कठिन है, जैसे समुद्रसे पार जाने वालोंको कर्णधार मिल जाय, उसी प्रकार इससे पार पानेकी इच्छा रखनेवाले हमलोगोंसे ब्रह्माने आपको मिलाया है॥ २२॥ ❀ ❀ धर्मरक्षक, ब्राह्मणभक्त, योगेश्वर भगवान् श्रीकृष्णके अपने धाममें पधार जानेपर धर्मने अब किसकी शरण ली है—यह बताइये॥ २३॥

पहला अध्याय समाप्त

अथ द्वितीयोऽध्यायः

व्यास उवाच

इति सम्प्रश्नसंहृष्टो विप्राणां रौमहर्षणिः । प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥

सूत उवाच

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥
यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ३ ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः । द्वितीये तूत्तरं सूतश्चतुर्णामाह तेष्वथ ॥ १ ॥

विप्राणामित्येवंभूतैः सम्यक्प्रश्नैः सम्यग्पृष्टो रोमहर्षणस्य पुत्रः उग्रश्रवास्तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे उपक्रांतवान् ॥ १ ॥ ❀ ❀ प्रवचनस्योपक्रमो नाम गुरुदेवतानमस्कार इति तमाह यमिति त्रिभिः । तत्र स्वगुरोः शुकस्यैश्वर्यं तच्चरितेनैव द्योतयन्नाह । यमिति यं प्रव्रजंतं संन्यस्य गच्छंतम् अनुपेतं मामुपनयस्वेत्युपनयनार्थमाचार्यमनुपसन्नम् । यद्वा केनाप्यनुपेतमननुगतमेकाकिनमित्यर्थः । तत्र हेतुः अपेतकृत्यं कृत्यशून्यं कर्ममार्गे अप्रवर्तमानं नैष्ठिकत्वात् । द्वैपायनो व्यासो विरहात्कातरो भीतः सन्पुत्र ३ इति प्लुतेन आजुहाव आहूतवान् । दूरादाह्वाने प्लुते सत्यपि संधिरार्षः तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः प्रत्युत्तरमुक्तवंतः । पितुः स्नेहानुबंधपरिहाराय यो वृक्षरूपेण उत्तरं दत्तवानित्यर्थः । तं मुनिमानतोऽस्मि । तन्मयत्वोपपादनाय विशेषणम् । सर्वभूतानां हृत् मनः अयते योगबलेन प्रविशतीति सर्वभूतहृदयस्तम् ॥ २ ॥ ❀ ❀ तत्कृपालुतां दर्शयन्नाह । य इति । अंधं गाढं तमः संसाराख्यमतितर्तुमिच्छताम् । पुराणानां मध्ये गुह्यं गोप्यम् । तत्र हेतुत्वेन चत्वारि विशेषणानि । स्वो निजोऽसाधारणोऽनुभावः प्रभावो यस्य तत्स्वानुभावम् । अखिलश्रुतीनां सारम् । एकमद्वितीयमनुपममित्यर्थः । आत्मानं कार्यकारणसंघातमधिकृत्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकम् । उपयामि शरणं व्रजामि ॥ ३ ॥ ❀ ❀ जयत्यनेन संसारमिति जयो ग्रंथः तमुदीरयेदिति स्वयं तथोदीरयन्नन्यान्पौराणिकानुपशिक्षयति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवं पूर्वोक्तरीत्या तेषु षट्सु चतुर्णां शास्त्रसारवीर्यैकर्मपालनरूपाणाम् । "रोमाणि हर्षयांचक्रे श्रोतॄणां यः स्वभाषणैः । कर्मणा प्रथितस्तेन रोमहर्षणसंज्ञया" इति कौर्मोक्तेरन्वर्थनामैव सूतो न तु डित्थादिवदर्थशून्यनामेति । उग्रस्य नृसिंहतापनीयोपनिषत्प्रतिपाद्यस्य वस्तुनः श्रवः श्रवणं यस्य स उग्रश्रवा अपि तथाविधनामा ॥ १ ॥ ❀ ❀ तत्र त्रिषु । अनुपनीतस्य प्रव्रजनाऽनर्हत्त्वादाह । यद्वेति । इत्यर्थः इति । उप समीपमितः प्राप्त उपेतः, न उपेतोऽनुपेतोऽसंग इति भावः । तावासंगत्वे द्विर्गता अंतर्गता वाऽऽपोत्रेति द्वीपः "ऋक्पू" इत्यः समासांतः । "द्व्यंतरुपसर्गेभ्योऽप ईत्" द्वीप एवायनं स्थानं यस्य स तथा सत्यवत्या तत्र लज्जया स्थापितत्वादिति महाभारतादवसेयम् । केचित् "पुलिनं द्वीपमुच्यते" इत्याहुस्तन्मते पुलिनं जलादचिरनिर्गतं क्षेत्रं तदेवायनं तपोभूमिरस्येति तथा । ततः स्वार्थिकाणि द्वैपायनः । प्लुतेन त्रिमात्रस्वरांतेन । पुत्र इत्येवं रूपेण "अप्लुतवदितौ" इति सूत्रे इतिशब्दे प्लुतोऽप्लुतवदित्यत्रावैदिक इतिशब्दो गृहीतोऽस्य शास्त्रस्य साक्षाद्वेदरूपत्वादत्राप्लुतत्वं न भवति । किंतु प्लुतत्वमेवेत्यभिप्रेत्य स्वामिचरणैर्व्याख्यातं संधिरार्ष इति । इत्यर्थ इति । यथास्मासु जन्यजनकभावे विद्यमानेपि पितृपुत्रव्यवहारो नास्ति तथा त्वय्यपि नास्त्यतः पुत्रेत्याह्वानं व्यर्थमित्यर्थः । यद्वाऽयं सर्वभूतानि हरति प्राप्नोत्यंतर्यामितयेति सर्वभूतहृत् । अतोपि पुत्रेत्याह्वानं सर्वांतर्यामिणि न युज्यत इति भावः । अत्र संदर्भः । अथोपक्रमे स्वगुरुं नमस्कुर्वंस्तत्साद्गुण्यं स्मरति द्वाभ्याम् । तत्र यमित्यत्र तन्मयतयेति तच्छब्देन तत्तादात्म्यापन्नः परमात्मोच्यते । स हि तदानीं ध्यानावेशेन

प्राप्तसर्वांतर्यामितादात्म्यः। 'दृष्टानुयांतम्' इत्यादेर्वक्ष्यमाणत्वात्। यत एव तस्य तदुत्तरदानानुसंधानराहित्ये सति तत्पक्षपातेनांतर्यामिणैव स्वयं तरूणामपि द्वारा तदुत्तरं दत्तमिति। यद्वा न केवलं सर्वात्मब्रह्मनिष्ठत्वान्निरपेक्षेपि तस्मिन्पितैव स्निग्धो जातः, अपि तु तरवोऽपि जाता इत्याह। तन्मयतया तद्वत्स्नेहमयतया तरवोऽपि अभि तदाभिमुख्येन नेदुः। किमुतान्ये जीवा इत्यर्थः। एतच्च तत्प्रभावादेव ज्ञेयम्। अत एव सर्वभूतानां हृदयं यस्मिंस्तम्। अनपेतमिति चित्सुखपाठांतरम्। विश्वनाथस्तु अत्रैवं सूतस्य परामर्शः। एतत्प्रश्नोत्तरं सर्वशास्त्रसारं किमपि वस्त्वहं ब्रवीमि। तेन चेदेषामात्मा न प्रसीदेत्तर्हि किं भविष्यति 'येनात्मा सुप्रसीदती'त्युक्तत्वात्। ततश्च सारेष्वपि मध्ये यस्यात्मप्रसादकत्वं भव्यैर्निरूपितं सोऽन्वेषणीयः। तत्रापि केषांचिन्मते सांख्यस्यैव केषांचिन्मीमांसादेः केषांचिदुपनिषदामेव केषांचित्तदर्थतात्पर्यनिर्णायकानां वेदांतसूत्राणामेवात्मप्रसादकत्वमस्ति यद्यपि तदपि न तत्प्रत्येतव्यं तेषामपि मुख्यस्य तत्तत्सर्वमतविदुषोपि कृतवेदांतसूत्रस्य श्रीकृष्णद्वैपायनस्यापि चित्ताप्रसाददृष्टेः। ततश्च यदाविर्भावेन तस्याप्यात्मा प्रसीदति स परीक्षिन्महासदसि तस्थुषामेव तेषां सर्वसारवादिनां महाज्योतिषामग्र एव परीक्षयोत्तीर्णं शुद्धं जांबूनदमिवात्मप्रसादकत्वे निर्विवादमेव। यत्स्थिरं व्यराजत तदेव श्रीभागवतं मम वक्तव्यमभूदिति ततस्तद्वक्तारं श्रीशुकदेवं शरणं यामीति तं प्रणमति यमिति॥ प्रव्रजंतं संन्यस्य गच्छंतम्। अनुपेतं निकटमप्यप्राप्तम्। अपेतकृत्यमुपनयनादिरहितम्। हे पुत्रेति प्लुतेनाजुहाव। न केवलं परमनिरपेक्षेपि तस्मिंस्तत्पितैव स्निग्धोभूदपि तु "येनार्चितो हरिस्तेन तर्पितानि जगंत्यपि। रज्यंति जंतवस्तत्र स्थावरा जंगमा अपि॥" इति पाद्मोक्तेस्तरवोपीत्याह। तन्मयतया शुकमयतया तरवोऽपि अभिमुख्येन हेतुना हे पुत्रेति प्रतिध्वनिमिषेण व्यासवदाजुहुवुः। यो हि यस्मिन्नासज्जति स तन्मय उच्यते। यथा 'स्त्रीमयः कामुकः' इति। ततश्च सर्वेषां भूतानां हृदयं मनो यस्मिंस्तम्। तेन सर्वमनोहरे भगवद्विग्रह इव तस्मिन्स्नेहोयं न प्राकृतमोह इति व्यासस्याप्यविवेकोयमिति दोषः पराहतः। यद्वा तदा तन्मयतया शुकरूपतया तरवोभिनेदुः प्रतिध्वनिमिषेण हे पुत्रेति प्रत्युत्तरं ददुः। यदि तवाहं पुत्रस्तदा त्वमपि मे पुत्र इत्यतः "कस्य के पितृपुत्राद्या मोह एव हि कारणम्" इति तत्त्वमविज्ञाय किमिति मुह्यसीति व्यंजयामासुः। तन्मयत्वोपपादनाय सर्वभूतानां हृत् मनोऽयते योगबलेन प्रविशतीति सर्वभूतहृदयस्तम्। तेन स एव ममाप्यंतः प्रविश्य मन्मुखेनैव श्रीभागवतं वदतु। यो हि जडानपि वृक्षान्प्रविश्य प्रत्युत्तरेण पितरमपि समादधौ स एव चेतनं मां प्रविश्य श्रीभागवतेनैषां श्रोतृणामात्मानं प्रसादयत्विति प्रवचनकाले श्रीभागवतस्य वक्तान्योपि ध्यायेदिति सूचितम्॥२॥

❋ ❋ तद्वृत्तिस्तदितरावृत्तिरसाधारणः यः श्रीमद्भागवतशास्त्रस्य प्रभावः सोन्यत्र नास्तीत्यर्थः संदर्भः। अतो य एवं साक्षाच्छ्रीकृष्णद्वैपायनेपि स्वपितर्यनुसंधानरहित आसीत्स एव श्रीभगवल्लीलावर्णनमयश्रीमद्भागवतनामैतद्ग्रंथावेशेनेदृशोपि जात इत्याह य इति। तदेतच्छ्रीसूतस्य शास्त्रोपक्रमाय श्रीगुरुप्रणतिरूपं वाक्यं 'स्वसुखनिभृतचेता' इत्यादिना तदुपसंहाराय तद्रूपेण वाक्येनैकीकृत्य व्याख्यायते। यः खलु "हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः। मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ" इत्यनुसारेण पुराणगुह्यमिदं श्रीभागवताख्यमाह गिरा प्रकाशयामास तं "तत्राभवद्भगवान्व्यासपुत्रः" इत्यस्य पूर्वोत्तरं प्रघट्टकानुसारेण मुनीनां गुरुमुपयामि शरणमाश्रये। कीदृशं तत् तत्राह। किं वापरैरीश्वर इत्याद्यनुसारेणासाधारणप्रभावम्। पुनः कीदृशं तत्। तत्राह "स्वसुखनिभृतचेताः" इत्याद्यनुसारेणात्मानं स्वचित्तमधिकृत्य वर्तते यत्परमरहस्यमजितरुचिरलीलाख्यं तत्त्वं तस्य दीपकं प्रकाशकम्। नन्वेवं चेत्तर्हि कथं प्रकाशयते तत्राह। अंधंकरणं यत्तमः सर्वावरकमज्ञानं तर्तुमिच्छतां संसारिणां करुणया तेषु यत्कारुण्यं तेन प्रीत्यर्थः। यद्यप्यजितरुचिरलीलारहस्यं न ते जानंति तथापि तत्पर्यंतप्रकाशकं तत्प्रकाशयामासेत्यहो करुणाया गरिमा दृश्यतामिति भावः। सेयञ्च तस्य करुणा तल्लीलानुभवेन तत्स्वभावलाभाजाता केवलात्मारामत्वे "भजतोपि न वै केचिद्भजंत्यभजतः कुतः। आत्मारामा आप्तकामा अकृतज्ञा गुरुद्रुहः" इति श्रीभगवद्वाक्यविरोधादसौ न स्यादेवेति च। विश्वनाथस्तु अस्मिन्नर्थे तस्य कृपालुत्वमेव हेतुरस्त्येवेत्याह। य इति। संसारिणां करुणयाहेति न केवलमयं परीक्षिदेव तारयितव्यः किं त्वग्रेपि जनिष्यमाणास्संसारिणोऽनेनैव तरंत्विति तदैव सर्वानर्वाचीनान्सस्मारेति भावः। अंधं गाढं तमोऽविद्यामतिशयेन सुखेनैव तरीतुमिच्छतामात्मन्यधिष्ठितानि तत्त्वानि महदादीनि तेषां दीपं प्रकाशकमिति मुमुक्षूणामविद्याक्षयोऽनुसंहितं फलमुक्तं शुद्धभक्तानां त्वखिलानां श्रुतीनामुपनिषदां सारं श्लेषेण श्रुतीनां श्रवणानां श्रोत्रेंद्रियास्वाद्यानां सारमिति। अतः पूर्वोक्तं निगमकल्पतरुफलत्वमेवास्य सूचितम्। अपूर्वोक्तव्याख्यानङ्गीकारे "स संहितां भागवतीम्" इति "यत्रैषा सात्वती श्रुतिः" इत्यादिवाक्यैर्वेदवाचकसंहिताश्रुतिपदाभ्यां श्रीभागवतस्योक्तत्वेन साक्षाद्वेदाविर्भावकर्तृश्रीहयग्रीवभगवत्प्रेरितसरस्वतीप्रसादलब्धसूत्रसारस्वतव्याकरणप्रणेतृपरमाप्तश्रीस्वरूपान्तानुभूत्यादिमस्करिणा कारकप्रक्रियायां छान्दसप्रयोगोदाहरणे "दध्ना जुहोति" "पुनन्तु ब्रह्मणस्पतिः" इति वाक्यसमभिव्याहृतेन श्रीदशमस्कन्धीयेन "व्रजतीर्विरेजुः" इत्युदाहरणेनोपबृंहित—साक्षाद्वेदरूपत्वेन चास्य प्रश्नोऽपि श्रीशौनकर्षेर्न संभाव्येत। शौनकनामान्वर्थताव्याघातापत्तेः। "शोनः सर्वविवेकः स्यात्"इति लीलावतीकोशात्सर्वविवेकत एव शौनकत्वम् अद्विजातिसूतं प्रति तत्कृतप्रश्ने तन्न सेत्स्यतीति तत्त्वम्। त एव स्वः स्वत एवानुभावो सोत्कर्षप्रभावज्ञापको यस्य तत्। स्वसुखनिभृतचेता इत्यत्राजितरुचिरलीलाकृष्टसार इति हरेर्गुणाक्षिप्तमतिराख्यानं यदधीतवानित्यादिभ्यः। यद्वा स्वस्यानुभावः प्रभावो यस्मात्। यद्व्याख्यानादेव शुकस्य सर्वमुनिभ्योप्युत्कर्षोभूदिति भावः। एकमनुपममद्वितीय-

मित्यर्थः। मुनीनां परीक्षित्सभोपविष्टानां नारदव्यासादीनामपीदमश्रुतचरमिव जातमिति तानपि श्रीशुकदेव उपदिदेश। देश्यमिति ॥३॥ ❀ ❀ गुरुं नत्वा। देवतादीन्प्रणमति। नारायणमिति। देशाधिकारित्वेन नरनारायणावस्याधिष्ठातृदेवते निर्दिष्टे। नरोत्तममिति। पुरुषोत्तमः श्रीकृष्णोऽस्य देवता सरस्वती शक्तिश्चकाराद्व्यास ऋषिः। व्यासमिति पाठे स्पष्ट एव। बीजं तु प्रणवो ज्ञेयः। छंदोत्र प्राधान्येन गायत्र्येव ज्ञेया। तयैवारब्धत्वात्। तान्नमस्कृत्य। जयेति क्रियापदमाक्षेपलब्धं श्रीकृष्णसंबोधनकमुदीरयेदिति। स्वयं तथोदीरयन्नन्यानपि पौराणिकानुपशिक्षयति। अत्र क्त्वाप्रत्ययेनैवानंतर्ये सिद्धे तत इति कर्तृविशेषणं तन्यते विस्तार्यते स्वबुद्ध्यनुरूपो ग्रंथोऽनेनेति ततः। केचित्तु नरशब्दोत्र गुरुपरो ग्राह्यः नृणाति नयोपदेशेन शिष्यं संसारादुद्धरतीति नर इति व्युत्पत्तेः। नरोत्तमशब्देन वायुर्ग्राह्यः नरेषूत्तमो नरा उत्तमा येनेति वा नरोत्तमस्तं विना देहस्यास्पृश्यत्वदर्शनात्। प्राणेन्द्रियसंवादेषूपनिषत्कथायां वायोरेवोत्कर्षस्य श्रवणाच्च। वायोर्नतिस्तु वक्तुः शरीरादिस्वास्थ्यार्थं श्रोतॄणामपि तथात्वार्थं चेति ज्ञेयम्। श्रुतौ तु साक्षाद् ब्रह्मैवोक्तः "ॐ नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारम्"। जयति संसारमनेनेति जयः पुराणमहाभारतादिः। तदुक्तम् "अष्टादशपुराणानि रामस्य चरितं तथा। कार्ष्णं वेदं पञ्चमञ्च यन्महाभारतं विदुः॥ तथैव विष्णुधर्माश्च शिवधर्माश्च शाश्वताः। जयेति नाम तेषां च प्रवदंति मनीषिणः॥" इति भविष्ये॥ ४॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

पुंसामेकान्ततः श्रेयश्चावतारप्रयोजनम्! तस्य कर्म्माण्यपि तथा चावतारकथा अपि॥ १॥ कृष्णावतारचरितं धर्म्मः कं शरणं गतः। इत्येवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः॥ २॥ इत्युदीची॥ १॥ २॥ ३॥ ❀ ❀ नरः भगवदवतारविशेषस्तम्। तस्य विशेषणं नरोत्तममिति ज्ञेयम्॥ ४–५॥

श्रीमद्वीरराघवव्याख्या

एवं संपृष्टः निःश्रेयससाधनतदनुग्राहकप्राधान्यतमश्रीकृष्णचरित्रं सूतः शौनकादीनां प्रश्नमभिनन्दयंस्तेषामुत्तररूपं श्रीभागवताख्यं पुराणमाहेत्याह बादरायणः इतीति। अत्र श्रीसूत उवाच इति संप्रश्नसंपृष्ट इति क्वचित् पाठो दृश्यते, स चासंगतः इतीत्यादिश्लोकस्य सूतोक्तित्वाभावात् यं प्रव्रजंतमित्यादि हि सूतोक्तिरतस्ततः प्रागेव सूत उवाचेति पठितुं युक्तमिहतु श्रीव्यास उवाचेति। इतीत्थं विप्राणां शौनकादीनां तैः प्रश्नैः संहृष्टो रौमहर्षणिः रोमहर्षणस्यापत्यं पुमान् सूतः तेषां विप्राणां वचः प्रश्नात्मकं वचः प्रतिपूज्याभिनंद्य प्रतिवक्तुं प्रतिवचनरूपपुराणमिदं वक्तुं उपचक्रमे आरेभे। विप्राणामित्यनेन सापेक्षस्यापि संप्रश्नशब्दस्य नित्यसापेक्षत्वादार्षत्वाद्वा समासः तेषां विप्राणां वचः। प्रतिपूज्येति वान्वयः। संप्रश्नसंहृष्ट इति पाठान्तरं, तदा समीचीनः प्रश्नो यस्य तस्मै प्रतिवचनाय संपृष्टं प्रत्युत्तरं वक्तुं हृष्ट इत्यर्थः। यद्वा विप्राणामित्यस्य वच इत्यनेनैवान्वयः। सं शोभनाः प्रश्ना येषां तैः शौनकादिभिः संपृष्ट इत्यर्थः॥ १॥ ❀ ❀ प्रश्नानामुत्तररूपमिदं पुराणं शुश्रावयिषुरन्यैरपि श्रावयितृभिरेवं कार्यमिति सूचयितुमेतत्पुराणप्रथमप्रवर्त्तकत्वरूपमहोपकर्तृबादरायणिरूपगुरुनमस्कारस्तच्चरणवरणात्मकं मंगलमाचरति सूतः यं प्रव्रजंतमिति द्वाभ्यां द्वैपायनः–श्रीव्यासः विरहकातरः सन् यं पुत्रेत्याजुहावाहूतवान्। तदा तन्मयतया तरवोभिनेदुः तं सर्वभूतहृदयं मुनिमानतोऽस्मीत्यन्वयः। कथंभूतं प्रव्रजन्तं दैवपैत्रादीन्परित्यज्य व्रजन्तम्। अनुपेतमुपेतरहितमसहायमित्यर्थः। अपेतं कृत्यं यस्य तं कर्त्तव्यांशरहितं निष्पन्नब्रह्मोपासनत्वात्कृतकृत्यमिति भावः, प्रव्रजन्तमित्यनेन देहानुबन्धित्याग उक्तः। अनेन ममताराहित्यं फलितम्। अनुपेतमित्यनेनासहायत्वमुक्तम्। अनेन देहपोषकसहायांतरराहित्यं सूचितं, तेन च देहात्मभ्रमरूपाहंकारराहित्यं फलितम्। द्वैपायनो विरहकातर आजुहावेत्यनेन द्वैपायनादप्यतिशयितज्ञानवत्त्वं सूचितम्। यद्यपि पुत्रेत्यस्य दूराद्धानविषयवाक्यत्वात् दूराद्धूते च॥ ८।२।८४। इति प्लुतत्वे सति प्लुतप्रगृह्या अचि नित्यम् ६।१।१२५। इति प्रकृतिभावे च सति संधिर्दुर्लभस्तथापि "गुरोरनृत" ८।२।८६। इत्यत्र प्राचामिति योगं विभज्य सर्वस्य प्लुतस्य वैकल्पिकत्वाभ्युपगमात्। अग्नीत्प्रेषणे परस्य च।८।२।९२। इति सूत्रे सर्वः प्लुतः साहसमनिच्छता "विभाषा कर्त्तव्या इति" महाभाष्यकारोक्तेश्च प्लुताभावपक्षे संधिः सुलभ एवेति बोध्यं, साहसं शास्त्रत्यागस्तदनिच्छता शास्त्रमनुरुन्धानेनेत्यर्थ इति हरदत्तो व्याख्यदिति केचित्। वस्तुतस्त्वितिशब्दस्यैव वाक्यान्तत्वेन पुत्रशब्दे प्लुतप्रसंग एव नास्ति। अनुकार्यस्य पुत्रशब्दस्य संबोधनविषयत्वे पुत्रानुकरणस्य तस्य तदभावाच्च। तन्मयतयेत्यत्र मयट् प्राचुर्ये संबंधमात्रे वा तत्प्रचुरतया तत्संबंधितया वा तरवोऽभिनेदुः शुकात्मका वयमित्येवंरूपेण प्रतिदध्वनुरित्यर्थः। तत्प्राचुर्यं च तरूणां शुकेन व्याप्त्याधिष्ठितत्वादवगंतव्यम्। संबंधमात्रे मयट्पक्षेऽपि ज्ञानद्वाराधिष्ठेयभावरूप एव संबंधो बोध्यः। स्वरूपेण तर्वधिष्ठातृत्वासंभवात् "एषोऽणुरात्मा आराग्रमात्रो ह्यवरोपि दृष्ट" इत्यादिभिः श्रुतिभिर्जीवस्वरूपस्याणुत्वावगमात्। तत्स्वरूपेणानेकाधिष्ठातृत्वासंभवात्। यद्यपि धर्मभूतज्ञानस्यापि "स चानन्त्याय कल्पत" इत्यादिश्रुतिभिर्मुक्तिदशायामेवानंत्यमवगतं, तथापि शुकस्य परिनिष्पन्नब्रह्मोपासनत्वेन मुक्तानामिव निवृत्तज्ञानसंकोचककर्मरूपावरणत्वादपरिच्छिन्नधर्मभूतज्ञानद्वाराऽनेकतर्वधिष्ठातृत्वमुक्तम्। अत एव तन्मयतया तरवोभिनेदुरत एव सर्वभूतहृदयं सर्वभूतानां हृदयते गच्छति ज्ञानद्वारा व्याप्नोतीति सर्वभूतहृदयस्तम्। अय गताविति धातुः। यद्वा सर्वभूतानां

हृदयं यस्य ज्ञानद्वारा व्याप्यं स सर्वभूतहृदयस्तम् । यद्वा हृदयशब्देन धर्मभूतं ज्ञानं लक्ष्यते, हृदयस्य ज्ञानसाहचर्यात् । सर्वभूतेषु हृदयं धर्मभूतं ज्ञानमधिष्ठानं यस्य स तं मुनिं स्वात्मपरमात्मयाथात्म्यमननशीलं श्रीशुकमिति विशेष्यमध्याहार्य्यम् । आनत इति कर्त्तरि क्तः नमस्कृतवानस्मीत्यर्थः ॥ २ ॥ ❀ ❀ य इति । यः करुणया पुराणगुह्यम् "विशेषणं विशेष्येण बहुलम्" ॥ २।१।५७ ॥ इति बहुलग्रहणात् विशेष्यस्यापि पुराणशब्दस्य पूर्वनिपातः गुह्यं पुराणम् । पुराणगतं गुह्यमाह तं मुनीनामपि गुरुं व्याससूनुमुपयामि शरणं व्रजामि । पुराणं कथंभूतं स्वानुभावं स्वेन शुकेनानुभावं कर्मणि घञ् प्रथममनुभूतमित्यर्थः, अखिलानां सारो यस्मिन्प्रतिपाद्यस्स तथा वेदपूर्वभागार्थभूतकर्मणामप्युत्तरत्र पुराणे भगवदाराधनरूपतायास्तत्र तत्र प्रतिपादनादखिलश्रुतिसारमित्युक्तम् । एवं स्वतुल्याधिकपुराणान्तररहितम् । अध्यात्मदीपम् । आत्मन्यधीत्यध्यात्ममिति विभक्त्यर्थेऽव्ययीभावः । स्वात्मपरमात्मयाथात्म्यप्रकाशने दीपतुल्यमित्यर्थः । अतितितीर्षतां संसृतिं तर्तुमिच्छारहितानामपि संसारिणां तमोऽन्धं तमः संसृतिरुचिजनकमज्ञानमंधयति तिरोधाययति निवर्त्तयतीति तथा ॥ ३ ॥ ❀ ❀ एवं श्रावयितृभिरादौ महोपकर्तुर्बादरायणेर्नमस्कारात्मकं मंगलमनुष्ठेयमिति सूचितम् । न केवलं बादरायणिरेव नमस्कार्यः, अपि त्वन्येपि नारायणादय इत्यभिप्रायेणाह । नारायणमिति । नारायणादीन्नमस्कृत्य ततो जयमुदीरयेत्कथयेत् श्रावयेदिति यावत् । जयमित्यस्यैव पुराणस्यान्वर्थं नामांतरम् अखिलदुरितजयाविनाभूतत्वाज्जयमिति । तत्र नरनारायणयोर्बदर्याश्रमवासिनोर्भगवदवतारभूतयोः "यो वै भारतवर्षेऽस्मिन् क्षेमाय स्वस्तये नृणाम् । धर्मज्ञानसमोपेत आकल्पादास्थितस्तपः" इति वक्ष्यमाणरीत्या शिष्याचार्यरूपेण स्वानुष्ठानद्वाराखिलधर्मप्रवर्त्तकत्वेन नारदादिमुखेनाखिलाध्यात्मशास्त्रप्रवर्त्तकत्वेन च गुरूणामपि गुरुत्वेन महोपकर्तृत्वात्तन्नमस्कृतिरवश्यं कार्येति भावः । वागधिष्ठातृदेवतात्वात् सरस्वती नमस्कार्येत्यभिप्रायेण सरस्वतीमित्युक्तं, देवस्य चतुर्मुखस्य स्त्री देवी तां "पुंयोगादाख्यायाम् ॥ ४।१।४८ ॥" इति ङीष् । अत्र सरस्वत्याश्चतुर्मुखसम्बन्धप्रत्यायकदेवीत्वविशेषणेन चतुर्मुखनमस्कृतिरपि कार्येति सूचितम् । चतुर्मुखो हि अनिरुद्धाख्यभगवत्तुरीयव्यूहनाभिकमलसंभूततपस्तोषितानिरुद्धोपदिष्टभागवतचतुःश्लोकीं कृत्स्नैतत्पुराणनिदानभूतां नारदायोपदिदेश । अतः सोपि महानुपकर्तैव गुरुश्चेति नमस्कार्य इत्यभिप्रायः । अनेनैवानिरुद्धनारदयोरपि नमस्कार्यत्वमर्थसिद्धं वेदितव्यम् । अनिरुद्धाच्चतुःश्लोक्यधिगमो नारदाय तदुपदेशश्च द्वितीये स्पष्टीभविष्यति । नारदाच्चतुःश्लोकीमधिगम्य कार्त्स्न्येनैतत्पुराणनिर्मातृत्वेनोपकर्तृतमत्वाद्व्यासो नमस्कार्य इत्यभिप्रायेण व्यासमित्युक्तम् । तत्रायं क्रमो विवक्षितः तावन्नमस्कार्यः शुकस्ततो व्यासस्ततो नारदस्ततः सरस्वतीतद्वल्लभौ ततोऽनिरुद्धः ततश्च नरनारायणाविति ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शौनकादिविप्राणामिति पूर्वोक्तैः षड्भिः समीचीनैः प्रश्नैः सम्यक्पृष्टः रोमहर्षणस्य अपत्यं रौमहर्षणिः सूतस्तेषां शौनकादीनां वचः प्रतिपूज्य प्रवक्तुं व्याख्यातुमुपचक्रम इत्येकान्वयः । एतद्व्यासवचनम् ॥ १ ॥ ❀ ❀ शौनकादिप्रश्नपरिहारतया भागवतपुराणं व्याकर्तुकामः उग्रश्रवाः स्वेष्टगुरुं रुद्रावतारं श्रीशुकमुनिं प्रणमति यमिति । विरहकातरः पुत्रवियोगे कातरः अधीर इव स्थितः स द्वैपायनो यदा प्रव्रजन्तमनुपेतमपेतकृत्यं पुत्रेत्याजुहाव तदा तन्मयतया तरवोपि नेदुः अहं सर्वभूतहृदयं तं मुनिं सर्वज्ञमानतोस्मीत्येकान्वयः । द्वीपो नदीमध्यप्रदेशः स अयनमालयः यस्य सः तथा द्वीपायनः, स एव द्वैपायनः द्वीपस्यापत्यं द्वैपायनः नदीद्वीपे समुत्पन्नत्वात्तदपत्यत्वनिर्देश औपचारिकः, तद्वत्पराशरसुतत्वमप्यौपचारिकमिति ज्ञापयितुमेतदेव प्रसिद्धनामाकरोत् । प्रव्रजन्तं सर्वपरित्यागरूपमाश्रममाश्रयंतं तत्र कारणमाह अनुपेतं देहाद्यभिमानशून्यं केनापि सख्या रहितमेकाकिनमिति वा । न चोपनयनशून्योऽनुपेतः अनुपनीतस्य प्रव्रजनायोगात् न च प्रव्रजनं संन्यासः किं तर्हि प्रकर्षेण गमनमेवेति वाच्यम्, "यदहरेव विरजेत्तदहरेव प्रव्रजेदि"ति गौतमसूत्रविरोधात्, अपगतं कृत्यं यस्मात्सोपेतकृत्यस्तं कृतकृत्यम्, अपेतं निराकृतं कृत्यं छेदनकर्म येन स तथा अवाप्ताहिंसालक्षणाश्रमत्वात्तमिति वा पुत्रेति दूरादाह्वाने प्लुताभावश्छांदसः । सर्वगतत्वज्ञापनाय वा तन्मयतया अहंकारात्मकरुद्रावतारशुकस्य व्याप्तिमत्तया वृक्षा अपि प्रतिशब्दं नेदुः किमुत शरीरिण इति द्योतयितुमपिशब्दः । सर्वभूतानां हृत्स्थानमयते गच्छतीति सर्वभूतहृदयस्तं अहंकारतत्त्वाभिमानित्वेन सर्वत्र स्थितमित्यर्थः ॥ २ ॥ ❀ ❀ पुनरपि भक्त्युद्रेकात्तमेव प्रणमति य इति । यः स्वानुभावं ब्रह्म आह उपादिशत् यश्चांधंतमः अंधत्वापादकमज्ञानं तितीर्षतां तर्तुमिच्छतां संसारिणां जीवानां करुणया अखिलानां श्रुतीनामर्थज्ञापकतया सारमुत्तमम्, अखिलस्य जगतः श्रुतेः श्रवणेंद्रियस्य सारं सुखदं वा एकं सकलपुराणोत्तमम् । देहादीश्वरपर्यंततत्त्वानि दीपयति प्रकाशयतीत्यध्यात्मदीपम् । पुराणगुह्यं पुराणेषु गोप्यं पुराणस्य भगवतः सन्निधातुं योग्यमिति वा, भागवताख्यं पुराणं मम व्याचख्यौ मुनीनां गुरुं तं व्याससूनुं श्रीशुकमुपयामि शरणं गच्छामीत्येकान्वयः । अखिलश्रुतीः सरति गच्छति विषयतयेत्यखिलश्रुतिसारः कर्मण्यण् प्रत्ययः वेदार्थं सारभूतमिति वा, अध्यात्मं देहः तत्र दीपवद्वर्तमानं पुराणेषु गोपितं स्वानुभावं ममोपदिदेशेति वा ॥ ३ ॥ ❀ ❀ इष्टदेवतां शास्त्रगुर्वादीन् प्रणमति नारायणमिति । नारायणं शास्त्रप्रतिपाद्यं तथा तमेव शास्त्रकर्तृत्वाद् गुरुं व्यासं च नमस्कृत्य सकलभाग्यात्मिकां श्रियं देवीं तथा परमगुरुं नरोत्तमं वायुं तथा विद्याभिमानिनीं सरस्वतीं तथोपसाधकं नरं शेषं प्रणम्य ततस्तेषां प्रसादात् श्रीभागवताख्यं ग्रन्थमुदीरये

व्याख्यास्ये भवत्प्रश्नपरिहारित्वेनेति शेष इत्येकान्वयः। श्रीभागवतादिसर्वशास्त्रप्रवक्तृश्रोतृभिस्ते अवश्यं नमस्कार्या इति द्योतयितुमेवेत्युक्तिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

टीकायां षट् प्रश्ना इति। तत्र तत्राञ्जसा इत्यादिना सूत जानासीत्यन्तेन कृष्णावतारप्रयोजनकृष्णचरितयोः प्रश्नौ। वयन्त्वित्यादि द्वयं सूत जानासीत्येतत्प्रश्नस्यैवानुवादः। तत्रोभयत्रोत्तरम्। भावयत्येष सत्त्वेनेति लोकपालनं हि तच्चरित्रमपि। एवमेव हि प्रथमाध्याये टीकाप्रतिज्ञाताः षट्प्रश्ना उपपद्यन्ते। द्वितीयेऽध्याये चत्वारि उत्तराणि। चतुर्थस्य तत्प्रश्नोत्तरस्य तत्रान्यत्रादर्शनात्। तस्य कर्म्माणीत्यादिना विश्वसृष्ट्यादिलीलाप्रश्नः, तस्योत्तरं स एवेदं ससर्जाग्रे इत्यादिना। अथाख्याहीत्यादिना अवतारकथाप्रश्नः। तस्योत्तरं तृतीयोऽध्यायः। ब्रूहि योगेश्वर इत्यादिना धर्म्माश्रयः प्रश्नः। तस्योत्तरं कृष्णे स्वधामोपगते इत्याद्यं तृतीयाध्यायपद्यमेव ॥ १ ॥ ❀ ❀ अथोपक्रमे स्वगुरुं नमस्कुर्व्वन् तत्साद्गुण्यं स्मरति द्वाभ्याम्। तत्र यमित्यत्र तन्मयतयेति तच्छब्देन तत्तादात्म्यापन्नः परमात्मोच्यते। स हि तदानीं ध्यानावेशेन प्राप्तसर्व्वान्तर्यामितादात्म्यः। दृष्ट्वानुयान्तमित्यादिवक्ष्यमाणात्। यत एव तस्य तदुत्तरदानानुसन्धानराहित्ये सति तत्पक्षपातेनान्तर्य्यामिणैव स्वयं तरूणामपि द्वारा तदुत्तरं दत्तमिति। यद्वा न केवलं सर्व्वात्मब्रह्मनिष्ठत्वान्निरपेक्षेऽपि तस्मिन् पितैव स्निग्धो जातः अपि तु तरवोऽपि जाता इत्याह तन्मयतया तद्वत्स्नेहमयतया तरवोऽपि अभि तदाभिमुख्येन नेदुः। किमुतान्ये जीवा इत्यर्थः। एतच्च तत्प्रभावादेवेति ज्ञेयम्। अत एव सर्व्वभूतानां हृदयं यस्मिन् तम्। अनपेतमिति चित्सुखपाठान्तरम् ॥ २ ॥ ❀ ❀ अतो य एवं साक्षाच्छ्रीकृष्णद्वैपायनेऽपि स्वपितर्य्यनुसन्धानरहित आसीत् स एव श्रीभगवल्लीलावर्णनमयश्रीमद्भागवतनाम्नैतद्ग्रन्थावेशेनेदृशोऽपि ज्ञात इत्याह य इति। तदेतच्छ्रीसूतस्य शास्त्रोपक्रमाय श्रीगुरुप्रपत्तिरूपं वाक्यं स्वसुखनिभृतेत्यादिना तदुपसंहाराय तद्रूपेण वाक्येनैकीकृत्य व्याख्यायते। यः खलु "हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः। मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥ इत्याद्यनुसारेण पुराणगुह्यमिदं श्रीमद्भागवताख्यमाह गिरा प्रकाशयामास। तं तत्राभवद्भगवान् व्यासपुत्र इत्यस्य पूर्व्वोत्तरग्रघट्टकानुसारेण मुनीनां गुरुमुपयामि शरणमाश्रये। कीदृशं तत् तत्राह किं वा परैरीश्वर इत्याद्यनुसारेणासाधारणप्रभावं, पुनः कीदृशं तत् तत्राह निगमकल्पतरोरित्याद्यनुसारेणाखिलश्रुतिसारं, पुनः कीदृशं तत्राह निम्नगानां यथा गङ्गेत्याद्यनुसारेण पुराणानां मुख्यं, पुनः कीदृशं तत्राह स्वसुखनिभृतचेता इत्याद्यनुसारेणात्मानं स्वचित्तमधिकृत्य वर्त्तते यत् परमरहस्यमजितरुचिरलीलाख्यं तत्त्वं तस्य दीपं प्रकाशकं, नन्वेवं चेत् कथं तर्हि प्राकाशयत् तत्राह अन्धङ्करणं यत्तमः सर्व्वावरकमज्ञानं तत्तरीतुमिच्छतां संसारिणां करुणया तेषु यत् कारुण्यं तद्वशतयेत्यर्थः। यद्यप्यजितरुचिरलीलारसरूपं रहस्यं न ते जानन्ति तथापि तत्पर्य्यन्तप्रकाशकं तत् प्रकाशयामासेत्यहो करुणाया वरिमा दृश्यतामिति भावः। सेयञ्च तस्य करुणा तल्लीलानुभवेन तत्स्वभावलाभाज्जाता। केवलारामत्वे "भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः। आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥" इति श्रीभगवद्वाक्यविरोधादसौ न स्यादेवेति च ॥ ३ ॥ ❀ ❀ नारायणमित्यत्र शास्त्रस्यास्य नरनारायणावधिष्ठातृदेवते निर्द्दिष्टे। चकाराच्छ्रीकृष्णोऽस्य देवता। सरस्वती शक्तिः। चकाराद्व्यास ऋषिः। व्यासमिति पाठे स्पष्ट एव। बीजं तु प्रणव एव ज्ञेयः ॐ नैमिश इत्युक्तत्वात्। छन्दोऽत्र गायत्री ज्ञेया, तयैवारब्धत्वात्। तस्मात्ते नमस्या इति भावः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तत्र पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसीति। सर्व्वशास्त्रसारं ब्रूहि नः श्रद्धधानानां येनात्मा संप्रसीदतीति। देवक्यां किमर्थं जातस्तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुमिति। तस्य कर्म्माणि ब्रूहि नः श्रद्धधानानां लीलया दधतः कला इति। अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा इति। ब्रूहि योगेश्वरे कृष्णे धर्म्मः कं शरणं गत इति। षडेव प्रश्नाः। एतत्प्रत्युत्तराण्येव सप्रसङ्गानि श्रीभागवतमिति विवेचनीयम्।

द्वितीये त्वभिधेया श्रीभक्तिः प्रेमा प्रयोजनम्। विषयो भगवानत्रेत्यर्थत्रयनिरूपणम् ॥ रोमहर्षणस्य पुत्र उग्रश्रवाः ॥ १ ॥ ❀ ❀ अत्रैवं सूतस्य परामर्शः। एतत्प्रश्नस्योत्तरं सर्व्वशास्त्रसारं किमपि वस्त्वहं ब्रवीमि। तेन चेदेषामात्मा न प्रसीदेत् तर्हि किं भविष्यति येनात्मा सुप्रसीदतीत्युक्तत्वात्। ततश्च सारेष्वपि मध्ये यस्यात्मप्रसादकत्वं भव्यैर्निरूपितं सोऽन्वेषणीयः। तत्रापि केषाञ्चिन्मते सांख्यस्यैव केषाञ्चिन्मीमांसादेः केषाञ्चिदुपनिषदामेव केषाञ्चित्तदर्थतात्पर्य्यनिर्णायकानां वेदान्तसूत्राणामेवात्मप्रसादकत्वमस्ति यद्यपि तदपि न तत् प्रत्येतव्यं, तेषामपि मुख्यस्य तत्तत् सर्व्वमतविदुषोऽपि कृतवेदान्तसूत्रस्य श्रीकृष्णद्वैपायनस्यापि चित्ताप्रसाददृष्टेः। ततश्च यदाविर्भावेन तस्यापि आत्मा प्रसीदति स्म। परीक्षिन्महासदसि तस्थुषामेव तेषां सर्व्वसारवादिनां महाज्योतिषामग्र एव परीक्षयोत्तीर्णं शुद्धं जाम्बूनदमिवात्मप्रसादकत्वे निर्व्विवादमेव यत् स्थिरं व्यराजत तदेव श्रीभागवतं मम वक्तव्यमभूदिति। ततस्तद्वक्तारं श्रीशुकदेवं शरणं यामीति तं प्रणमति यमिति। प्रव्रजन्तं संन्यस्य गच्छन्तम्। अनुपेतं निकटमप्राप्तम्। अपेतकृत्यमुपनयनादिरहितम्। हे पुत्र इति प्लुतेनाजुहाव।

न केवलं परमनिरपेक्षेऽपि तस्मिंस्तत्पितैव स्निग्धोऽभूदपि तु "येनार्चितो हरिस्तेन तर्पितानि जगन्त्यपि । रज्यन्ति जन्तवस्तत्र स्थावरा जङ्गमा अपि ॥" इतिपाद्मोक्तेस्तरवोऽपीत्याह तन्मयतया शुकमयतया तरवोऽपि आभिमुख्येन हेतुना हे पुत्र इति प्रतिध्वनिमिषेण व्यासवदाजुहुवुः । यो हि यस्मिन्नासज्जति स तन्मय उच्यते । यथा स्त्रीमयः कामुक इति । ततश्च सर्व्वेषां भूतानां हृदयं मनो यस्मिंस्तम् । तेन सर्व्वमनोहरे भगवद्विग्रहे इव तस्मिन् स्नेहोऽयं न प्राकृतमोह इति व्यासस्याप्यविवेकोऽयमिति दोषः पराहतः । यद्वा तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः प्रतिध्वनिमिषेण हे पुत्र इति प्रत्युत्तरं ददुः । यदि तवाहं पुत्रस्तदा त्वमपि मे पुत्र इत्यतः । "कस्य के पितृपुत्राद्या मोह एव हि कारणम् ।" इति तत्त्वमविज्ञाय किमिति मुह्यसीति व्यञ्जयामासुः । तन्मयत्वोपपादनाय विशेषणं सर्व्वभूतानां हृत् मनः अयते योगबलेन प्रविशतीति सर्व्वभूतहृदयस्तम् । तेन स एव ममाप्यन्तः प्रविश्य मन्मुखेनैव श्रीभागवतं वदतु । यो हि जडानपि वृक्षान् प्रविश्य प्रत्युत्तरेण पितरमपि समादधौ स एव चेतनं मां प्रविश्य श्रीभागवतेनैव एषां श्रोतृणामात्मानं प्रसादयत्विति प्रवचनकाले श्रीभागवतस्य वक्तान्योऽपि ध्यायेदिति विधिश्च सूचितः ॥ २ ॥ ❀ ❀ अस्मिन्नर्थे तस्य कृपालुत्वमेव हेतुरस्त्येव इत्याह य इति । संसारिणां करुणयाहेति । न केवलमयं परीक्षिदेव तारयितव्यः, किन्त्वन्येऽपि जनिष्यमाणाः संसारिणोऽनेनैव तरन्त्विति तदैव सर्व्वानर्व्वाचीनान् ससारैवेति भावः । अन्धं गाढं तमोऽविद्याम् अतिशयेन सुखेनैव तरीतुमिच्छताम् । आत्मनि अधिष्ठितानि तत्त्वानि महदादीनि तेषां दीपं प्रकाशकमिति मुमुक्षूणामविवक्षया योऽनुसंहितं फलमुक्तं शुद्धभक्तानाञ्च अखिलानां श्रुतीनाम् उपनिषदां सारं श्लेषेण श्रुतीनां श्रवणानां श्रोत्रेन्द्रियस्य आस्वाद्यानां सारमिति । अतः पूर्व्वोक्तं निगमकल्पतरुफलत्वमेवास्य सूचितम् । अत एव स्वः शुक एवानुभावः रसोत्कर्षप्रभावज्ञापको यस्य तं स्वसुखनिभृतचेता इत्यत्र अजितरुचिरलीलाकृष्णसार इति 'हरेर्गुणाक्षिप्तमतिर्व्याख्यानं यदधीतवान्' इत्यादिभ्यः । यद्वा । स्वस्यानुभावः प्रभावो यस्मात् तं, तद्व्याख्यानादेव शुकस्य सर्व्वमुनिभ्योऽप्युत्कर्षोऽभूदिति भावः । एकमनुपममद्वितीयमित्यर्थः । मुनीनां परीक्षित्सभोपविष्टानां नारदव्यासादीनामपीदमश्रुतचरमिव जातमिति तानपि श्रीशुकदेव उपदिदेश देश्यमिति सन्दर्भः ॥ ३ ॥ ❀ ❀ गुरुं नत्वा देवतादीन् प्रणमति नारायणमिति । देशाधिकारित्वेन नरनारायणावस्याधिष्ठातृदेवते । नरोत्तममिति । पुरुषोत्तमः श्रीकृष्णोऽस्य देवता सरस्वती शक्तिश्चकाराद्व्यास ऋषिः । व्यासमिति पाठे स्पष्ट एव । बीजन्तु प्रणवो ज्ञेयः । छन्दोऽत्र प्राधान्येन गायत्र्येव ज्ञेयो तथैवारब्धत्वात् । तान्नमस्कृत्य जयेति क्रियापदमाक्षेपलब्धं श्रीकृष्णसम्बोधनकम् । उदीरयेदिति स्वयं तथोदीरयन्नन्यानपि पौराणिकानुपशिक्षयति । जयत्यनेन संसारमिति जयो ग्रन्थमिति वा । अत्र क्त्वाप्रत्ययेनैवानन्तर्य्ये सिद्धे तत इति कर्तृविशेषणं क्तप्रत्ययान्तं ज्ञेयमिति केचित् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपायोपेयभगवच्चिकीर्षिततदुदारकर्मविषयाणां चतुर्णां प्रश्नानामुत्तरार्थोयमध्याय आरभ्यते इतीति । इतिसंप्रश्नसंहृष्टः । इत्येवमुक्तप्रकारैः षड्भिः विप्राणां सम्यक् प्रश्नैः सम्यग् हृष्टः । "रोमाणि हर्षयांचक्रे श्रोतॄणां यः सुभाषितैः । कर्मणा तेन कथितो रोमहर्षण इत्युत ॥" इत्युक्तलक्षणस्य रोमहर्षणस्य पुत्रः उग्रश्रवाः प्रश्नानां विस्तरत उत्तरभूतं श्रीमद्भागवतं शुश्रावयिषुः तेषां वचः मुनयः साधुपृष्टोऽहमित्यनेन प्रतिपूज्य प्रवक्तुं "स वै पुंसां परो धर्मः" इत्याद्यध्यायद्वयेन संक्षेपतः षण्णां प्रश्नानामुत्तरं वक्तुम् उपचक्रमे यं प्रव्रजंतमित्यादित्रिभिः । गुर्वादिनमस्काररूपमुपक्रमं कृतवानित्यर्थः ॥ १ ॥ ❀ ❀ तत्र स्वगुरुं प्रणमति । यमिति । यं प्रवृत्तकर्मत्यागित्वादपेतकृत्यम् । अनुपेतम् एकाकिनम् । प्रव्रजंतम् "अंधकारे प्रवेष्टव्यं दीपो यत्नेन धार्यताम् ।" इति द्वैपायनोपदेशादेव प्रवृत्तिमार्गं त्यक्त्वा गच्छंतम् । भागवतपुत्रस्यातिदुर्ल्लभत्वाद्विरहकातरः । द्वैपायनो भगवान् हे पुत्रेत्याजुहाव आहूतवान् यदा तदा तन्मयतया तरवोभिनेदुः । शुकेति व्यासेनोक्ते सति भोरिति शुकेन प्रत्युत्तरे दत्ते द्रुमादयोपि भोरिति शुकवदभिनादं चक्रुरित्यर्थः । एतन्मोक्षधर्मे द्रष्टव्यम् । तं मुनिमानतोस्मि । "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥" इति श्रुत्यर्थानुसारेण गुरोर्वासुदेवाभिन्नत्वमाह सर्वभूतहृदयमिति, सर्वेषां ब्रह्मादिस्तंबपर्यंतानां हृदि व्यापकतयाऽयते गच्छतीति स तम् अय गतावित्यस्य रूपम् । सर्वांतर्यामिणं वासुदेवमित्यर्थः । 'आचार्यं मां विजानीयादि'ति वक्ष्यमाणाच्च ॥ २ ॥ ❀ ❀ यः संसारिणां बुभुक्षूणां तमोन्धं संसारमतितितीर्षतां मुमुक्षूणां मुनीनां मुक्तानां च आलयं पिबतेत्युक्तेश्च करुणया पुराणगुह्यम् । पुराणानां मध्ये गोप्यम् । श्रीमद्भागवतमाह तमुपयामि शरणं व्रजामि । पुराणगुह्यत्वे चत्वारि विशेषणानि स्वो निजः सर्वोपकारकभूतोनुभावः प्रभावो यस्य तत् सर्ववेदार्थभूतभगवत्प्रतिपादकतया श्रुतीनां सारम् एकमनुपमम् । सर्वत्र हेतुमाह अध्यात्मदीपमिति आत्मनि जीवे वर्तमानमध्यात्मम् 'यद्विज्ञानेन सर्वं विज्ञातं भवति, य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मानं वेदे'त्यादिश्रुत्यर्थभूतं भगवत्तत्त्वं तस्य प्रकाशकम् ॥ ३ ॥ ❀ ❀ श्लोकद्वयेन श्रीगुरुं प्रणम्येदानीं हरिं नारदादींश्च प्रणमन् हयादीन्प्रणम्य शास्त्रमुदीरयेदित्यन्यं प्रत्युपदिशति नारायणमिति । "अर्थे धर्मे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदि'ति प्रथमपर्वोक्तेश्चतुर्वर्गप्रतिपादकस्यापि महाभारतस्य परमो विषयः परब्रह्मनारायणादिपदाभिधेयः श्रीकृष्णः तत्प्रणामार्थे तत्रास्य श्लोकस्य प्रतिपर्वपाठः श्रीमद्भागवतस्य तु भगवत्स्वरूपगुणशक्त्यादिप्रधानस्य मोक्षैकप्रयोजनत्वादवश्यं तदुपक्रमादौ

भगवान्सर्ववेदेतिहासादिविषयो नमनीयः। अतो नारायणं यद्वंदनवेदनादिना सर्वेषां वंदनवेदनादिसिद्धिस्तं जन्माद्यस्येत्यत्रोक्तलक्षणं शास्त्रविषयमुपास्यं नरं च तदंशभूतं तत्सखायं तदुपासनतच्छास्त्रश्रवणादावुपकर्तारम्, अन्यनरव्यावृत्त्यर्थमाह नरोत्तमम्। सरस्वतीं देवीं च भगवच्छक्तिविशेषभूतां भगवच्छास्त्रकथनश्रवणादावुपकर्त्रीं व्यासं च शास्त्राचार्यं नमस्कृत्यैव जयमुदीरयेत्। कथयेत्। महाभारते तु जयो नामेतिहासोयमित्युक्तं तमुदीरयेदिह तु जयं श्रीमद्भागवतमिति भेदः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

श्रीकृष्णाय नमः ॥ कथाश्रवणमात्रेण मनोरथमहार्णवे। निमग्नान्सूतदानेन सुज्जहार ऋषीन् हरिः ॥ १ ॥
फलसाधनरूपाणां निर्णयः कर्मणामपि। त्रयाणां वक्ष्यतेऽध्याये द्वितीयेऽन्यत्र शेषिणाम् ॥ २ ॥

प्रथममुत्तराणि वक्तुं देवतागुरुनमस्कारमंगलमभिनन्दनं च सूतः करोतीति व्यास आह इति संप्रश्नेति। एवं पुरुषार्थपर्यवसायिभिः संप्रश्नैः सम्यग्विषयकैः प्रश्नैः सम्यगादरपूर्वकं पृष्टः विप्रैरिति प्रा पूरणे विशेषेण वक्तारमात्मानं वा भक्त्या पूरयंतीति विप्राः, अवश्यं तेषां वचने उत्तरं देयमिति रौमहर्षणिः रोमहर्षणस्यापत्यं रौमहर्षणिः रोम्नस्तु सर्वदा हर्षणं यस्य तस्य सर्वदा भक्त्युद्रेकः तथैवायमिति ज्ञापयति। प्रतिपूजनमभिनंदनं सामान्यतस्तद्ग्रन्थाद्बहिरिति ज्ञातव्यम् ॥ १ ॥ ❀ ❀ क्रमानुरोधात् अग्रे त्वभिनंदनं सामान्योत्तरत्वेन ज्ञातव्यं, प्रवक्तुमिति स्वबुद्ध्या निर्द्धारितार्थं भागवतं च वक्तुमुपचक्रमे देवतागुरुनमस्कारं च कृतवान्। तत्रादौ गुरुनमस्कारमाह द्वाभ्यां वैराग्यज्ञानाभ्यां, तत्र प्रथमं वैराग्यमाह यं प्रव्रजंतमिति। अत्र हि यथा विरक्तस्तथा तथाधिकारी, तत्र शुकस्य पूर्वजन्मन्येव ज्ञानसहितत्वात् योग्यदेहार्थं विष्णोर्व्यासस्य सकाशाद्देहं प्राप्य उग्रभसंपत्तौ संगतनाशभयात् पूर्वसंस्कारस्य दृढत्वात् इदानीमनुपनीत एव प्रव्रजति। व्यासस्याधिकारित्वाद्देहादिधर्माः प्रवर्तंते बलिष्ठस्य हि भयाभावः बलं भगवत एवेति कोपादिना गमनं वारयति, पुत्रेति निवारणे हेतुः। अनुपेतमिति गमने हेतुः, अपेतकृत्यमिति कार्ये विद्यमाने हि उपनयनं, विष्णोः सकाशाज्जातस्य पुनः संस्कारो नापेक्षते मोहे हेतुः। द्वैपायन इति द्विर्गता आपो यत्र तत् द्वीपमयनं जन्मस्थानं यस्य यमुनांतर्जले तथोत्पन्नत्वात् पराशरध्यातभगवदवताराद्वा सर्वं सुस्थं, नारदोपदेशात्पूर्वं विस्मृतात्मत्वाद्विरहकातरः। विरहेण कातरो दीनः पुत्रेति आह्वानं कृतवान्, प्रेम्णासन्न कंठत्वात् प्लुताभावस्ततः संधिः। 'स सर्वमभवद्'िति ब्रह्मज्ञाने फलस्योक्तत्वात् सर्वभावः स्फुरति। योगेन प्रवेशोपि संभवति, कर्तुः प्राधान्येपि यच्छब्देन कर्मसंबंधात् तच्छब्देन कर्मैवोच्यते यमिति तन्मयतया शुकमयतया विष्णोः सकाशादुत्पन्नास्तरवः। शुकोपि वैष्णवी वै वनस्पत इति श्रुतेः एकोपादानकत्वात्तन्मयत्वमभिनंदनं प्रतिध्वानरूपम्। अथवा "वाग्देवेभ्योपाक्रमद्यज्ञायातिष्ठमाना सा वनस्पतीन् प्राविशत् सैषा वाग्वनस्पतिषुवदतीति श्रुतेः वृक्षेभ्य एव शब्दोत्पत्तिः। तेषां कथने हेतुं वदन् शुकस्य ब्रह्मभावमाह सर्वभूतहृदयमिति। सर्वभूतानां हृत् अयते प्रेरणार्थं गच्छतीति सर्वभूतेषु हृदयं यस्येति प्रेरणसामर्थ्यं वा गतस्य तूष्णींभावं निवारयति मुनिमिति ब्रह्मात्मभावं विचारयंतमासर्वतो नतोऽस्मि, सर्वत्रास्य विद्यमानत्वात् ॥ २ ॥ ❀ ❀ एवं प्रथमं ज्ञानवैराग्ये उक्त्वा पश्चात् भक्त्या भगवद्भजनेऽतीव विशेषमाह यः स्वानुभावमिति। संगभयान्निवृत्तम् चिरमनने भगवदावेशे सति व्याससमीपागमनं भागवतपाठश्चार्थाल्लक्ष्यते, तदनु भागवतरसाभिनिविष्टमुनिभ्य उपदिशति तदाह गुरुं मुनीनामिति भागवतस्य स्वरूपोत्कर्षाय चत्वारि विशेषणानि प्रमेयरूपतां प्रमाणरूपताम् असाधारण्यसाधनोत्तमरूपतां प्रतिपादयंति क्रमेण। तत्र स्वानुभावं भागवतस्य भगवद्रूपत्वात् यथा भगवतः स्वः असाधारणोनुभावः सर्वभक्तेषु तथा भागवतस्यापि तच्चिंतकेषु। किंच अखिलश्रुतिसारं कर्मज्ञानकांडादिष्वपि प्रतिपादितस्य भक्तिशेषत्वकथनात् सर्वश्रुतितात्पर्यविषयभगवत्प्रतिपादनाच्च सर्वश्रुतिसारम् अखिलपदेन च देवदैत्यादिषु प्रवृत्तायाः श्रुतेस्तदभिप्रायेणार्थकथनेऽखिलत्वमापद्यते तन्निवार्यते आकरस्थितानां सर्ववेदानामर्थरसभूतमित्यर्थः, एकमित्यसाधारणम्, अन्यथा एतस्यापि रसांतरसंभावना स्यात् बहूनां तादृशानां निर्द्धारणात् अध्यात्मदीपमिति, बहिः संति दीपाः बोधकाः पुरुषाश्च आत्मनि पुनर्विरलाः, वाचा बोधयत्येव नहि तादृशो भागवतादन्य उपायोस्ति गुरूपदेशतपःसाधनव्यतिरेकेण येन सर्वेषामात्मसाक्षात्कारो भवेत्। यथा गृहे दीपे स्थापिते घटादीनां न गुर्वाद्यपेक्षा तथा भागवते सति न काप्यपेक्षेत्यर्थः। अन्धं तमः अतितर्तुमिच्छताम् अध्यात्मदीपमिति योजना। आत्मानमधीति, आत्मसंबंधिसर्वपदार्थानां न केवलं मुनिभ्य एवाह संसारिणामपि करुणया परीक्षित्सभादिष्वपीत्यर्थः। यथा मलापाकरणे वस्त्रादौ मलनिवृत्तिः शुद्धिश्च भवति शुभ्राणां तु कर्मयोग्यतैव तथा संसारिणां मुनीनां च विशेष इति भावः। मायाशुकव्यावृत्त्यर्थं व्याससूनुमिति उपयामि शरणं गच्छामि इदानीमेव समीपे गत्वा तद्वाक्यं श्रुत्वा कथयिष्यामीत्युपशब्दार्थः ॥ ३ ॥ ❀ ❀ असाधारणं मंगलमुक्त्वा सर्वैः कर्त्तव्यं साधारणं मंगलमाह नारायणमिति। जयो नाम पुराणादिकृष्णद्वैपायनेरितः। अष्टादशपुराणानि भारतं तत्प्रकीर्त्तितम् ॥ नारायणे व्यास इति वाच्यवक्तृस्वरूपकः। एक एव परो ह्यात्मा आदावंते निवेशितः ॥ उपसाधको नरश्चोक्तश्चकारात् गुरुमानपि। अवश्यमेवकारेण सूत्रात्मा च नरोत्तमः ॥ देवी भाग्यात्मिका नृणां वाक्यरूपा सरस्वती। सर्वे ते भगवद्रूपास्तस्मान्नम्या हि ते सदा ॥" व्यासेन क्रियमाणे तु नमस्कारे न व्यासपदप्रयोगः। सरस्वतीसमीपे चकारः तद्वक्तारं बोधयति तस्मात् पाठद्वयमपि लोकव्यवस्थया बोद्धव्यम् ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ द्वितीयाध्यायं विवरिषवः सङ्गतिमाहुः कथेति द्वाभ्याम् । तथा च प्रश्नोत्तरभावः प्रथमाग्रिमाणां द्वितीयतृतीययोरवसरः शेषशेषिभावो वा सङ्गतिरित्यर्थः । फलसाधनरूपाणामिति । फलं च साधनरूपाणि चेति द्वन्द्वः । रूपाणि प्रकाराः शेषिणामिति । संसर्गे मत्त्वर्थीयः । शिष्टानामवतारार्थधर्मिणाम् । यं प्रव्रजन्तमित्यत्र । दूरादाह्वाने दूराद्धूते चेत्यनेन प्लुते जाते 'प्लुतप्रगृह्या' इत्यनेन प्रकृतिभावात्सन्ध्यनुपपत्तिमाशङ्कयाहुः प्रेम्णेत्यादि । तथा चात्र सन्धेरार्षत्वं वदतः श्रीधरस्य विरहकातरपदतात्पर्याज्ञानमित्यर्थः । अभिनेदुरित्यनेनोक्तस्य प्रतिध्वानरूपस्याभिनंदनस्य वृक्षयुक्ते देशे अभाव इति तत्र तमुपपादयितुमाहुः स सर्वेत्यादि । तथा चातो वृक्षेष्वप्युत्तरदानरूपः प्रतिध्वनिर्युक्त इत्यर्थः । नन्वत्र यन्मयतया प्रतिध्वनिरुक्तः, सः कः, ज्ञानयोगयोः शुके व्यासे च सत्त्वादित्याकाङ्क्षायामाहुः कर्तुरित्यादि । एतदुपष्टम्भायैतन्नियामकं शुकनिष्ठमाहुः विष्णोरित्यादि । एवं व्याख्यानं श्रीधरीयेपि । परमेवं व्याख्याने शुकस्तरुरूपेणोत्तरं दत्तवानिति भवति । तथा सति मूलोक्तं तरूणामभिनादकर्तृत्वं च विरुध्यत इत्यरुच्या पक्षान्तरमाहुः अथ वेत्यादि । अस्मिन् पक्षे तन्मयतयेत्यस्याजुहावेत्यनेन सम्बन्धः । अर्थस्तु शुकमयत्वमेव । तथा सति मूलेऽभिनादकथनप्रयोजनाभाव इति शङ्कायामाहुः तेषामित्यादि । तथा च सर्वभूतहृदयपदेन तदर्थसिद्धिः । अन्यथैतस्यानतिप्रयोजनत्वम् । अत इदमेव व्याख्यानं युक्तमिति भावः ॥ २ ॥ ❀ ❀ य इत्यत्र । विशेषमाहेति । इतरेष्वपि ज्ञानदातृत्वेन गुरुत्वरूपं विशेषमाहेत्यर्थः । एतस्येति । सूतस्येत्यर्थः । तादृशानामिति । पुराणानाम् । 'सूत त्वं पूजितोस्माभिः सारात्सारं वदस्व न' इत्येवंजातीयवाक्यानां तत्रापि सत्त्वादिति । तथा च तद्व्यावृत्त्यर्थमेकपदमित्यर्थः ॥ ३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

द्वितीये त्वृषिप्रश्नानामुत्तरस्य प्रदानतः । श्रोतुर्वक्तुरमात्सर्यं चातुर्यं च निरूप्यते ॥ १ ॥ ॥ एवमृषिभिः पृष्टः सूतः किं कृतवानित्यपेक्षायां व्यास आह—इतीति । इत्येवम्भूतैः विप्राणां सम्यक् प्रश्नैः सम्यग्पृष्टो रौमहर्षणिः रोमहर्षणनाम्नः सूतस्य पुत्र उग्रश्रवास्तेषां वचः प्रतिपूज्य अभिनन्द्य प्रवक्तुमुत्तरं दातुं प्रचक्रमे उपक्रान्तवानित्यन्वयः । सम्प्रश्नसम्पृष्ट इति पाठे तु समीचीनैः प्रश्नैः सम्यगादरपूर्वकं पृष्टो विप्रैस्तेषां विप्राणां वचः प्रतिपूज्येत्यन्वयः । उग्रश्रवा इति तन्नाम विहाय रौमहर्षणिरिति पितृनामग्रहणपूर्वकनामग्रहणेन भगवद्भक्त्युद्रेकेण सर्वदा रोमसु हर्षणं यस्य तस्य पुत्रोऽप्ययं तादृश एवेति सूचितम् ॥ १ ॥ वचः प्रतिपूजनप्रवचनोपक्रमयोः मूलोक्तक्रमाद्वैपरीत्येन क्रमो बोध्यः, मूले तथैव स्पष्टत्वात्, तत्र प्रवचनस्योपक्रमो नाम गुरुदेवतानमस्काररूपः, तत्र गुरुं नमस्करोति—यमिति । यं प्रव्रजन्तं सन्न्यस्य गच्छन्तं अनुपेतं मामुपनयस्वेत्युपयनार्थमनुपसन्नम् । तत्र हेतुमाह—अपेतकृत्यं कृत्यशून्यं सदा भगद्ध्यानपरत्वेन कर्तव्यान्तररहितम् । सति हि कर्त्तव्ये तदङ्गतया उपनयनमपेक्ष्यते तस्य तु कृतकृत्यत्वान्नोपनयनादिसंस्कारापेक्षेति भावः । अत एव तद्विरहेण कातरो भीतो द्वैपायनो व्यासो यदा हे पुत्रेति आजुहाव आहूतवान् तदा तन्मयतया शुकव्याप्ततया तरवोऽभिनेदुः प्रत्युत्तरमुक्तवन्तः, पितुः स्नेहानुबन्धपरिहाराय यो वृक्षद्वारोत्तरं दत्तवानित्यर्थः, तं श्रीशुकं मुनिं ब्रह्मात्मानुसन्धानपरं आ सर्वतो नतोऽस्मीत्यन्वयः । तन्मयत्वोपपादनाय विशिनष्टि—सर्वभूतानां हृन्मनः अयतेऽन्तर्यामितया प्रविशतीति सर्वभूतहृदयस्तमिति । प्रव्रजन्तमित्यनेन सर्वत्र ममताराहित्यं द्वैपायनादपि अतिशयितज्ञानविरक्त्यादिमत्त्वं च सूचितम् ॥ २ ॥ ❀ ❀ एवं श्रीशुकं तत्प्रभाववर्णनपूर्वकं नमस्कृत्येदानीं तत्कृपालुतां दर्शयन्मुनिप्रश्नोत्तरदाने सामर्थ्यलाभाय तं शरणं व्रजति—य इति । यः संसारिणां करुणया पुराणेषु गुह्यं सर्वपुराणसारभूतं श्रीभागवतमाह तं व्याससूनुं श्रीशुकमुपयामि शरणं व्रजामीत्यन्वयः । ननु कथमस्य संसारनिवर्तकत्वमित्याशङ्कयाह—अध्यात्मदीपमिति । अन्धं गाढं तमः जन्ममरणादिसंसारकारणीभूतमविद्याख्यमतितितीर्षतां अतितर्तुमिच्छतामध्यात्मदीपं आत्मानं कार्यकारणसङ्घातरूपं अधिकृत्य वर्तमानं आत्मतत्त्वमध्यात्मं तस्य दीपं, दीपवत्प्रकाशकमित्यर्थः । कुत एवमित्यपेक्षायामाह—स्वानुभावमिति । स्वः निजः असाधारणः अनुभावः प्रभावोऽविद्यानिवर्त्तकत्वरूपो यस्य तदित्यर्थः । अत एवैकं स्वतुल्याधिकपुराणान्तररहितं, निरुपममित्यर्थः । कथमेवम्भूतं तदित्यपेक्षायामाह—अखिलश्रुतिसारमिति, कर्मोपासनाज्ञानप्रतिपादककाण्डत्रयविषयाणां अत्र यथावत्प्रतिपादनात् सर्वश्रुतिसारमेवेदमित्यर्थः । नन्वन्येऽपि मुनयो बहवः सन्ति, तान् विहाय शुकमेव कथं शरणं व्रजसीत्यपेक्षायामाह—गुरुं मुनीनामिति । यः स्वप्रभावेण मुनीनामपि ज्ञानं यथावत्प्रकाशयति तच्छरणेनैव ममाभीष्टसिद्धिर्नान्यथेति भावः ॥ ३ ॥ ❀ ❀ एवमसाधारणं स्वगुरुनमस्काररूपं मङ्गलं कृत्वा सर्वसाधारणं देवतानमस्काररूपं मङ्गलं स्वयं कुर्वन्नन्यानपि पौराणिकान् शिक्षयति—नारायणादीन्नमस्कृत्यैव जयत्यनेनाविद्यामिति जयः पुराणेतिहासादिग्रन्थस्तमुदीरयेत् कथयेदित्यन्वयः । नारायणं नरं च भगवदवताररूपम् । अन्यनरव्यावृत्त्यर्थमाह—नरोत्तममिति । चकारो नमस्कृत्येत्यस्यानुकर्षणार्थः । एवमग्रेपि । लोकेऽपि काचिदन्या सरस्वती नाम्नी स्यात्तद्व्यावृत्त्यर्थमाह—देवीमिति, वागधिष्ठातृदेवतां सरस्वतीं च नमस्कृत्येत्यर्थः । चैवेत्यत्र व्यासमिति पाठान्तरम् ॥ ४ ॥

हिन्दी अनुवाद

भगवत्कथा और भगवद्भक्तिका माहात्म्य

श्रीव्यासजी कहते हैं—शौनकादि ब्रह्मवादी ऋषियों के ये प्रश्न सुनकर रोमहर्षणके पुत्र उग्रश्रवाको बड़ा ही आनन्द हुआ। उन्होंने ऋषियोंके इस मङ्गलमय प्रश्न का अभिनन्दन करके कहना आरम्भ किया ॥ १ ॥ ❀ ❀ सूतजीने कहा—जिस समय श्रीशुकदेवजीका यज्ञोपवीत-संस्कार भी नहीं हुआ था, सुतरां लौकिक-वैदिक कर्मोंके अनुष्ठानका अवसर भी नहीं आया था, उन्हें अकेले ही संन्यास लेनेके उद्देश्यसे जाते देखकर उनके पिता व्यासजी विरहसे कातर होकर पुकारने लगे—'बेटा ! बेटा !' उस समय तन्मय होनेके कारण श्री शुकदेवजीकी ओरसे वृक्षोंने उत्तर दिया। ऐसे सबके हृदयमें विराजमान श्रीशुकदेव मुनिको मैं नमस्कार करता हूँ ॥ २ ॥ ❀ ❀ यह श्रीमद्भागवत अत्यन्त गोपनीय—रहस्यात्मक पुराण है। यह भगवत्स्वरूपका अनुभव करानेवाला और समस्त वेदोंका सार है। संसारमें फँसे हुए जो लोग इस घोर अज्ञानान्धकारसे पार जाना चाहते हैं, उनके लिये आध्यात्मिक तत्त्वोंको प्रकाशित करनेवाला यह एक अद्वितीय दीपक है। वास्तवमें उन्हींपर करुणा करके बड़े-बड़े मुनियोंके आचार्य श्रीशुकदेवजीने इसका वर्णन किया है। मैं उनकी शरण ग्रहण करता हूँ ॥ ३ ॥ ❀ ❀ मनुष्योंमें सर्वश्रेष्ठ भगवान् के अवतार नर-नारायण ऋषियों को, सरस्वती देवी को और श्रीव्यासदेवजी को नमस्कार करके तब संसार और अन्तःकरण के समस्त विकारों पर विजय प्राप्त करानेवाले इस श्रीमद्भागवत महापुराण का पाठ करना चाहिये ॥ ४ ॥

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम् । यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ॥ ५ ॥
स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता ययाऽऽत्मा सम्प्रसीदति ॥ ६ ॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ॥ ७ ॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका व्याख्या

तेषां वचः प्रतिपूज्येति यदुक्तं तत्प्रतिपूजनं करोति। हे मुनयः साधु यथा भवति तथाहं पृष्टः। यतो लोकानां मंगलमेतत्। यद्यतः कृष्णविषयः संप्रश्नः कृतः। सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानादेवमुक्तम् ॥ ५ ॥ ❀ ❀ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहीति तत्रोत्तरम्। स वै पुंसामिति। अयमर्थः धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः। यतस्तु धर्माच्छ्रवणादरादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकांतिकं श्रेय इति। कथंभूता ? अहैतुकी हेतुः फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनभिभूता ॥ ६ ॥ ❀ ❀ ननु "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेन" इत्यादिश्रुतिभ्यो धर्मस्य ज्ञानांगत्वं प्रसिद्धं तत्कुतो भक्तिहेतुत्वमुच्यते ? सत्यम्। तत्तु भक्तिद्वारेणेत्याह। वासुदेव इति। अहैतुकं शुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः ॥ ७ ॥ ❀ ❀ व्यतिरेकमाह। धर्म इति। यो धर्म इति प्रसिद्धः स यदि विष्वक्सेनस्य कथासु रतिं नोत्पादयेत्तर्हि स्वनुष्ठितोऽपि सन्नयं श्रमो ज्ञेयः। ननु मोक्षार्थस्यापि धर्मस्य श्रमत्वमस्त्येवात आह। केवलं विफलः श्रम इत्यर्थः। नन्वस्ति तत्रापि स्वर्गादि-फलमित्याशंक्यैवकारेण निराकरोति। क्षयिष्णुत्वान्न तत्फलमित्यर्थः। ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिश्रुतेर्न तत्फलस्य क्षयिष्णुत्वमित्याशंक्य हिशब्देन साधयति। "तद्यथेह कर्मचितो लोकः क्षीयते" इति तर्कानुगृहीतया श्रुत्या क्षयिष्णुत्वप्रतिपादनात् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

हे मुनय इति। मननशीला एवैतादृशप्रश्नान्कुर्वन्तीति भावः। अत एवोत्तरेष्वपि पद्येष्वधोक्षजवासुदेवसात्वताम्पति-कृष्णशब्दास्तत्प्राधान्यविवक्षयैव पठिताः। अत्र श्रेयःप्रश्नस्याप्युत्तरं लोकमंगलमित्येतावतैव दत्तं भवति। तथाप्यात्मप्रसाद-हेतोश्च 'येनात्मा सुप्रसीदति' इत्यनेन ये नव प्रश्नास्तत्र प्रश्नेषु अत्राशयमाह। अयमर्थ इति। तत्र द्वयोर्मध्ये। अत्र विश्वनाथः "सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहि" इति प्रश्नद्वयस्योत्तरमाह। स वा इति। पुंसां पुम्मात्राणामेव धर्मः परः परमः श्रवणकीर्त्त-नादिलक्षणः। यदुक्तं "एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामश्रवणादिभिः" इत्यतः परशब्द-विशेषो धर्म्मो भक्तियोग एव भवेदिति। तथात्र वतुप्प्रत्ययेनैवकारेण चैतदन्यस्य परधर्मत्वं च निषिद्धं यतो भक्तिः प्रेमलक्षणा भवेत्। अहैतुकीं हेतुं विनैवोत्पद्यमानातिसगुणा व्यावृत्ताः। ननु महानयमपलापः क्रियते। मैवं श्रवणकीर्त्तनादिरूपो यो धर्मः स भक्तिरेव साधननाम्नी सैव पाकदशायां प्रेमनाम्नी ते द्वे अपि भक्तिशब्देनैवोच्येते। 'भक्त्या संजातया' 'भक्त्या बिभ्रत्युत्पुलकां

तनुम्' इति "यतो भक्तिरधोक्षजे" इत्यादिषूत्तरस्या भक्तेः पूर्वा भक्तिः कारणं पकाम्रस्य कारणमामाम्रमितिवत्। स्वादभेदनिबन्धनमेव तस्य कारणत्वं बालबोधनार्थं काल्पनिकमेव न तु वास्तवम्। न ह्येकस्यैव पुरुषस्य बाल्ययौवनाद्यनेकावस्थावतो हेतुहेतुमद्भावस्तात्त्विक इति घटपटौदनादिषु मृत्तन्तुतंडुलादीनां नामरूपलोप इवेति। न तादृशत्वमत्र व्याख्यातुं शक्यमित्यवसेयम्। न च भक्तेः प्रसिद्धो हेतुः साधुसंग एवास्तीति वाच्यम्, तस्याप्यादौ श्रद्धा ततः साधुसंगोथ भजनक्रिये। तत्रादौ भक्तेर्द्वितीयभूमिकात्वेनोक्तत्वात् भक्तित्वमेव 'स्यान्महत्सेवया विप्रा' इत्यग्रेपि व्याख्यास्यमानत्वाच्च। किञ्च दानव्रततपोहोमादिनिष्कामकर्मयोगश्च ज्ञानांगभूतायाः सात्त्विक्या एव भक्तेः कथंचिद्धेतुर्भवति न तु निर्गुणायाः। "यन्न योगेन सांख्येन दानव्रततपोध्वरैः। व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि" इत्येकादशोक्तेः। न च निर्गुणाया भक्तेर्भगवत्कृपैव हेतुरिति वाच्यम्, तस्यापि हेतावन्विष्यमाणेऽनवस्थानात्। न च सा निरुपाधिरेव केवला हेतुरिति वाच्यम्, तस्या असार्वत्रिकत्वेन भगवति वैषम्यप्रसक्तेः। किंच भक्तकृपैव हेतुरित्युक्तेर्न किंचिदसामंजस्यम्। उत्तमभक्तानां वैषम्याभावेपि "प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः" इति मध्यमभक्तलक्षणे वैषम्यस्य दर्शनात्। ततश्च भगवतो भक्त्यधीनत्वात् भक्तकृपानुगामिनी भगवत्कृपा हेतुरिति सिद्धांतः। ननु तर्हि कथं भक्तेरहैतुकत्वमभूत्? उच्यते। भगवत्कृपाया भक्तकृपांतर्भूतत्वाद्भक्तकृपायाश्च भक्तसंगांतर्भूतत्वाद्भक्तसंगस्य भक्त्यंगत्वादहैतुकत्वमेव सिद्धम्। किंच भक्तकृपाया हेतुर्भक्तस्यैव तस्य हृदयवर्तिनी भक्तिरेव। तां विना कृपोदयसंभवाभावात् सर्वप्रकारेणापि भक्तेर्भक्तिरेव हेतुरिति निर्हेतुकत्वं सिद्धं भक्तिमते। भक्तिभक्तभजनीयतत्कृपादीनां न पृथग्वस्तुत्वमिति भक्तेः स्वप्रकाशकत्वेन भक्तिप्रकाश्यत्वेपि भगवतः स्वप्रकाशकत्वं नानुपपन्नमिति। अप्रतिहता केनापि निवारयितुमशक्या। तथा हि तल्लक्षणे "मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ" इति वक्ष्यते। उक्तं च श्रीरूपगोस्वामिचरणैः "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे" इति। ज्ञानकर्मादिभिरनावृतेति वा। यया भक्त्यात्मा मनः सम्यगेव प्रसीदतीति। कामनामालिन्ये सति मनःप्रसादहेतुत्वासंभवादस्या भक्तेर्निष्कामत्वं स्वत एवागतम्॥ ५-६॥ ❀ ❀ अत्राक्षिपति। नन्विति। वेदानुवचनं वेदाभ्यसनम्। अनाशकेन जीवाभयप्रदानेनेत्यर्थः। इत्यर्थ इति। "यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम्।" इत्युक्तेस्तर्कस्य विरोधित्वात्तदविषयमिति भावः। अत्र विश्वनाथः—ननु स एव किमाकार आत्मप्रसाद इत्यपेक्षायां सर्वदुर्विषयवैमुख्यापादकभगवद्रूपगुणमाधुर्यानुभवज्ञानमय एवायमित्याह। वासुदेव इति। प्रकर्षेण योजितस्संबद्धो दाससख्यादिसम्बन्धयुक्तः कृत इति यावत्। श्लेषेण प्रयोजनीकृतः। भक्तियोगस्य भक्तियोग एव प्रयोजनं नान्य इत्येवं विचारित इत्यर्थः। जनयतीति। ज्ञानवैराग्यार्थं पृथग्यत्नो भक्तैर्न कर्त्तव्य इति भावः। आशु शीघ्रं तत्काल एवेत्यर्थः। यद्वक्ष्यते "भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्" इति। ननु तर्हि ज्ञानान्मोक्ष एव भावीति तत्राह। अहैतुकम्। अन्नस्य हेतोर्वसतीतिवद्धेतुः प्रयोजनं तदत्र सायुज्यं तन्नार्हतीति। तेन भगवद्रूपगुणमाधुर्यानुभवमयमेव ज्ञानमायातम्। एवमेव चतुर्थेपि वक्ष्यते "वासुदेवे भगवति भक्तियोगः समाहितः। सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति" इति। तत्र सध्रीचीनप्रकारं खलु मोक्षादिफलांतराभिसक्तिराहित्यमेवेति व्याख्यास्यते। "सोचिरादेव राजर्षे स्यादच्युतकथाश्रयः। शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः" इत्यनंतरवाक्ये च तत्कारणं स एव दृष्ट इति। एवं च भक्तेः कारणं प्रयोजनं च भक्तिरेवेति व्यवस्थितम्। यद्वाऽकारो वासुदेवः स एव हेतुः प्रयोजनं यस्य तत्तथा भगवत्प्रसादजनकमित्यर्थः॥ ७॥ ❀ ❀ वासुदेवभक्तिजनकत्वे धर्मस्य परत्वमन्यथाश्रमत्वमित्येवं व्यतिरेकमाह। विष्वक्सर्वव्यापिनी सेनेव सेना भक्तिलक्षणा भक्तसंसारदुःखजेतृत्वाद्यस्य स विष्वक्सेनः। अत्राक्षिपति। नन्विति। इत्यर्थ इति। तस्य तु मोक्षाख्यं फलमपि। स तु सर्वथा श्रम एवेति भावः। पुनराक्षिपति नन्विति। तत्रापि मोक्षसाधनेतरधर्मेपि तत्फलं दत्त्न नश्यतीत्युक्तेरतस्य नाशशीलत्वादफलत्वमेवेति भावः। पुनराक्षिपति। नन्विति। चातुर्मास्यो यागविशेषः सुकृतं पुण्यफलमक्षय्यमविनाशीत्यर्थः। कर्मणा चितः संपादितः कर्मचितो घटादिः पुण्यचितः स्वर्गादिः। अत्र विश्वनाथः—ननु वर्णाश्रमाचारलक्षणो धर्मः परः कथं न तत्राह। धर्म इति। यः पुंसां विप्रादीनां सुष्ठ्वनुष्ठितो धर्मः स विष्वक्सेनकथासु रतिं नोत्पादयेत् "कर्मणा पितृलोक" इति श्रुतेः। कर्मणां रत्यनुत्पादकत्वं च "कर्मभिर्वा त्रयीप्रोक्तैः" इत्यादौ न। "यत्रात्मप्रदो हरिः" इति चतुर्थे नारदोक्तेरेव व्यक्तम्। यदा च रतिं नोत्पादयेत्तर्हि केवलं श्रम एव पितृलोकादेर्नश्वरत्वात्। तस्मात्स्वधर्मं त्यक्त्वा श्रवणकीर्त्तनादिलक्षणः पूर्वोक्तः परो धर्म एवानुष्ठेय इति भावः। यद्वा ननु च "अस्मिंल्लोके वर्त्तमानः स्वधर्मस्थोनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया" इति श्रीभगवदुक्तेर्निष्कामभक्तियोग एव भक्तेर्हेतुरस्ति तत्कथं भक्तिरहैतुकीत्युच्यते। सत्यम्। तत्र कर्मयोगस्य ज्ञानजनकत्वमिव न साक्षाद्भक्तिजनकत्वं व्याख्यातुं शक्यम्। मध्ये यदृच्छयेति पदोपादानात्। ततश्च तत्र पुंसि भक्तेर्यदृच्छा स्वैरिता यदि स्याद्दैवादस्य निरपेक्ष एव शुद्धभक्तेः प्रवेशः स्यात्तदा तामपि स प्राप्नोतीति तत्रार्थः। 'यदृच्छास्वैरिता' इत्यभिधानात्। कष्टकल्पनया व्याख्यांतरे भक्तेः स्वप्रकाशत्वं न सिध्येदिति तदनादृतमित्यतो निष्कामोपि कर्मयोगो न भक्तेर्हेतुरित्याह। धर्म इति। य इति। "स वै पुंसां परो धर्मः" इति पद्योक्तात्परमधर्मादन्यो वर्णाश्रमाचारलक्षणः स्वनुष्ठितो निष्कामोपि धर्मो विष्वक्सेनकथासु रतिं प्रीतिं नोत्पादयेत्स केवलं श्रम एव। यदीति गर्हायाम्। श्रमजनकत्वाद्गर्हित इत्यर्थः। 'यदि गर्हाविकल्पयोः' इति मेदिनी। यद्वाऽसंदेहेपि

संदेहवचनं "यदि वेदाः प्रमाणम्" इतिवत् । "धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि" इत्यत्र यदीतिशब्दो निश्चये इति श्रीस्वामिचरणानां व्याख्यानाच्च । यद्वा ननु प्रसिद्धधर्मादपि कचिद्धरिकथासु रतिरुत्पद्यते इति श्रूयते । सत्यम् । तया विना धर्मफलाप्राप्तेः । सा खल्वौपाधिक्येव न तात्त्विकीत्याह । धर्म इति । य इति । स प्रसिद्धो धर्मः काम्यो नित्यो वा, स विष्वक्सेनकथासु रतिं यदि नोत्पादयेत्तदा श्रम एव । अयमर्थः—यथा कर्षकाणां नृपे प्रीतिं कृषिरेवोत्पादयत्यन्यथा तस्याः फलाप्राप्तेरेवमेव धर्मोपि विष्वक्सेनप्रीतिं विना स्वस्य वैफल्यदर्शनायैव तत्र विवेकिनां प्रीतिमुत्पादयेदेव । स यद्यविवेकिनां नोत्पादयेत्तदा श्रम एव । यथा नृपे प्रीतिं विना कृषिफलस्यालाभाच्छ्रम एव । तथा हरौ भक्तिं विना प्रवृत्तनिवृत्तधर्मफलयोः स्वर्गादिज्ञानयोरलाभाच्छ्रमः । तदुक्तं "कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ।" इति । यथा च कृषौ प्रीत्यनुरोधादेव नृपे प्रीतिर्न तु वस्तुतस्तथैव धर्मप्रीत्यनुरोधादेव तत्कथासु प्रीतिर्न तु तत्र वस्तुत इति विवेचनीयम् । अत एव प्रह्लादेनोक्तं "नान्यथेहावयोरर्थो राजसेवकयोरिव" इति । संदर्भस्तु "निर्णीते केवलम्" इत्यमरः । केवलमित्यव्ययेन निमित्तमात्रलक्षणधर्मफलस्य ज्ञानस्य साध्यत्वं सिद्धस्यापि नश्वरत्वं तत्रापि तेनैव हिशब्देन "यस्य देवे परा भक्तिः" इत्यादिश्रुतिप्रमाणत्वं "नैष्कर्म्यमप्यच्युतभाववर्जितम् ।" इत्यादि "श्रेयः सृतिं भक्तिमुदस्य ते" इत्यादि । "आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यतोनादृतयुष्मदंघ्रयः" इत्यादिवचनप्रमाणत्वं च सूचितं श्लोकद्वयेन । भक्तिर्निरपेक्षा । ज्ञानवैराग्ये तु तत्सापेक्षे इति लभ्यते ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

यज्ञादीनां विशेषणमनाशकेनेति । कामानाशनमनाशकं तेन निष्कामेनेति यावत् ॥ ७ ॥ ❀ ❀ विष्वक्सेनस्येति । विसूची व्यापिका सेना यस्य स विष्वक्सेनः भगवन्नारायणनामविशेष इति तस्येत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

तदेवं "मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् । जपतां जुह्वतां नित्यं विनिपातो न विद्यते" इत्युक्तरीत्या कृतगुरुदेवतोपासनात्मकमंगलस्तावत्प्रश्नमभिनंदति । मुनय इति हे मुनयः भवद्भिः साधु यथा भवति तथा लोकमंगलमिति प्रश्नसाधुत्वे हेतुः । लोकमंगलविषयकत्वात्प्रश्नः कृतः मङ्गलानां च मंगलमित्युक्तरीत्या निरतिशयः मंगलस्वरूपकृष्णविषयकसंप्रश्नः कृतस्ततो लोकमंगलमहं पृष्ट इत्यर्थः, कृष्णसंप्रश्नस्य लोकमंगलविषयत्वमेवोपपादयति येन कृष्णेन तद्विषयकप्रश्नेन वा हेतुना चात्मा चित्तं सुष्ठु प्रसन्नं भवति प्रश्नोत्तराभ्यां सस्वरूपगुणविभूतिः कृष्णोऽनुसंहितश्चित्तगतमालिन्यमपनयति चित्तप्रसादादेव लोकानां सर्वाणि मंगलानि सुलभान्येवेति भावः ॥ ५ ॥ ❀ ❀ तत्र यत्तावत्पृष्टं "भवता यद्विनिश्चितं पुंसामेकांततःश्रेयस्तन्नः शंसितुमर्हसि" इति किं निरतिशयं श्रेयः को वा तत्साधनभूतो धर्म्मः श्रेष्ठ इति तत्र गर्भजरामरणाद्यनर्थरूपसंसृतिनिवृत्तिपूर्वकब्रह्मानन्दानुभवात्मको मोक्ष एव निरतिशयं श्रेयः तत्साधनभूतधर्मश्च परब्रह्मोपासनात्मिका विजातीयप्रत्ययान्तराव्यवहिता प्रत्यक्षतापन्ना प्रीत्यात्मिका तद्भक्तिरेव "तन्निष्पत्तिश्चानाभिसंहितफलैर्वर्णाश्रमधर्मैर्ज्ञानयोगशमदमादिभिः सत्संगत्यादिप्रणाल्या च भगवद्गुणश्रवणादिरुचिजननद्वारा भवतीति वक्तुं तावद्भक्तियोगानुग्राहक एव वर्णाश्रमप्रयुक्तो धर्मः श्रेष्ठस्तदन्यस्त्वभिसंहितफलः पुनः संसृतिहेतुत्वेनानर्थावह इत्याह स वा इति त्रिभिः । यतोऽनभिसंहितफलाद्धर्माद्वर्णाश्रमानुगुणादनुष्ठितादधोक्षजे भक्तिर्भवति स एव धर्मः पर उत्कृष्टः । भक्तिमपि विशिनष्टि अहैतुकी फलोपाधिरहिता अप्रतिहिता अंतरायानुपहता अव्यवहितेति पाठांतरं तदा विजातीयप्रत्ययांतराव्यवहिता यया भक्त्या आत्मा सुप्रसीदति पूर्वाल्पभक्तिरुत्तरभक्तिप्रकर्षोपयिकमनोनैर्मल्यहेतुरित्यर्थः । यद्वा ययात्मा सुप्रसीदति इत्यनेन प्रीत्यात्मकत्वमुच्यते अनुकूलज्ञानेनैव हि चित्तप्रसादः प्रतिकूलेन तु चित्तविक्षेप एव अनुकूलज्ञानमेव ह्यानंदः सुखं प्रीतिश्चेति पर्य्यायांतरैरुच्यते अव्यवहितेत्यनेन तैलधारावदविच्छिन्नस्मृतिसंतानरूपत्वमुक्तम् ॥ ६ ॥ ❀ ❀ नन्वव्यवहितेत्ययुक्तं शब्दादिविषयासक्तमनसाऽकामेनापि मध्ये मध्ये विषयांतरानुध्यानव्यवहितत्वप्रसंगादिति शंकां निराकुर्वन्नुक्तभक्तेरेव विशेषणांतरमाह । वासुदेव इति । भगवति षाड्गुण्यपरिपूर्णे वासुदेवे प्रयोजितो भक्तियोगः वैराग्यमाशु जनयति । "सर्वत्रासौ समस्ते च वसत्यत्रेव वै यतः । ततः स वासुदेवेति विद्वद्भिः परिगीयते" इति निरुक्तवासुदेवशब्देन सर्वांतरात्मत्वं सर्वाधारत्वं भगवच्छब्देन षाड्गुण्यपूर्त्तिश्चोक्ता । सर्वांतरात्मकत्वेन निरतिशयत्वं लब्धम् । आत्मैव हि निरतिशयप्रियः । एवमनेन पदद्वयेन शब्दादिलौकिकविषयेभ्यो वैलक्षण्यमभिप्रेतम् । एवं च विषयस्य विलक्षणत्वादेव तदनुध्यानरूपो भक्तियोगः । शब्दादिविषयेष्वनासक्तिरूपवैराग्यमाशु जनयति । कस्मिंश्चिद्विषये विलक्षणे अनुरागातिशयस्त्वविषयांतरवैतृष्ण्यावहत्वदर्शनात् । तस्माद्भक्तियोगनिष्ठमनसः शनैर्विषयांतरवैतृष्ण्यस्यार्थादेवोदयाद्विषयांतरानुध्यानाव्यवहितत्वं भक्तेः संपत्स्यत एवेति भावः । तथा यदहैतुकम् । "नाहं वेदेन तपसा" इत्युक्तरीत्या भक्तिव्यतिरिक्तहेत्वंतरालभ्यज्ञानसाक्षात्कारात्मकं तच्च जनयति अनेन भक्तेः साक्षात्कारात्मकत्वं विशेषणमुक्तम् ॥ ७ ॥ ❀ ❀ तदेवं श्लोकद्वयेनोक्तविधभक्त्यनुग्राहक एवानभिसंहितफलवर्णाश्रमप्रयुक्तधर्मः श्रेष्ठ इत्युक्तम् अथास्य धर्मस्य भगवद्गुणादिरुचिजननद्वारा भक्तियोगानुग्राहकत्वं वदन्नभिसंहितफलधर्मस्य श्रमफलकत्वमाह । धर्म इत्येकेन यः सम्यगनुष्ठितोऽपि धर्मः पुंसां विष्वक्सेनस्य भगवतः कथासु रतिं रुचिं यदि नोत्पा-

दयेत्तर्हि स धर्मः केवलं श्रम एव श्रमफलक एव संसृतिरूपानर्थावह एवेत्यर्थः, रतिं नोत्पादयेदित्यनेन रत्येकप्रयोजनतयानुष्ठितो धर्मः पर ऐहिकामुष्मिकफलार्थस्तु श्रमफलक इति प्रतीतेः फलानभिसंध्यभिसंधिभ्यां धर्मस्योत्कृष्टत्वापकृष्टत्वे वेदितव्ये ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

संप्रति सूतः शौनकादिप्रश्नसंहृष्टस्तत्प्रश्नं स्तौतीत्याह मुनय इति । कृष्णविषयः समीचीन प्रश्नः कृत इति यद्यस्मात् अतोऽहं भवद्भिः साधुसर्वसाधनेषूत्तमसाधनं प्रति पृष्टः न केवलमुभयेषामस्माकं साधु, किंतु लोकं मंगलयतीति श्रवणमननाभ्यां कल्याणजनकत्वादित्यर्थः, कुतः येन कृष्णसंप्रश्नेनात्मा परमात्मा मनो वा प्रसीददति तस्मादित्येकान्वयः ॥ ५ ॥ ❀ ❀ भगवद्भक्तिजनकत्वात् कृष्णसंप्रश्न एव परमधर्म इत्याह स वा इति । यतः कृष्णसंप्रश्नात् अधोक्षजे अहैतुकी अव्यवहिता भक्तिर्भवति पुंसां परमधर्मः स वा इत्येकान्वयः । अक्षजन्यज्ञानमधः कृत्वाऽतीत्य वर्तत इत्यधोक्षजः भगवत्प्रसादमंतरेण काम्यफलहेतुशून्याहैतुकी विक्षेपादन्यप्रसंगादिव्यवधानशून्याऽव्यवहिता 'नचान्योसावन्योहमस्मीति नाविष्णुः कीर्तयेद्विष्णुमि'त्यादिश्रुतिस्मृतिनिषिद्धत्वात् भेदबुद्ध्यपरपर्यायव्यवधानशून्येत्यर्थ इति "व्यवधानं तिरोधानमथोच्यत" इत्यभिधानविरोधात् । न च श्रुतिस्मृतिविरोधः अनयोः अन्यार्थत्वात् अविष्णुः न विष्णुर्यस्य स तथा अतद्भक्त इत्यर्थः । अन्यः स्वतंत्रः अप्रतिहतेति पाठे अस्खलितेत्यर्थः, यया भक्त्या आत्मा आशु प्रसीददति । समुद्धृत्य मनीषयेत्युक्तं दर्शयति स इति । स एव परो धर्मः यतो धर्माद्धोक्षजे भक्तिर्भवतीति वा ॥ ६ ॥ ❀ ❀ भक्तिरपि वैराग्यद्वारेण अपरोक्षज्ञानसाधनमित्याह वासुदेव इति । वासुदेवे भगवति प्रयोजितो भक्तियोगः वैराग्यं यदहैतुकं ज्ञानं तच्च जनयतीत्येकान्वयः । वसति सर्वत्र स्वस्मिन् सर्वं वासयतीति वा वासुः क्रीडादिकरणाद्देवः वासुश्चासौ देवश्चेति वासुदेवः तस्मिन्, भक्तिलक्षण उपायः भक्तियोगः वैराग्यं विषयेष्वसारताबुद्धि अकारवाच्यविष्णुप्रसाद एव हेतुर्निमित्तं यस्य तत्तथोक्तं द्रव्यलाभादिहेतुसंबंधींद्रजालादिज्ञानं न भवतीति वा ॥ ७ ॥ ❀ ❀ ननु नित्यनैमित्तिकादिधर्माणां सत्त्वात्कथमस्यैव परमत्वमित्याशंक्य तेषामपि कृष्णकथारतिजनकतया तत्साधनत्वेन परमत्वमित्याह धर्म इति । यः पुरुषैः स्वनुष्ठितो धर्मः विष्वक्सेनकथाश्रयां रतिं नोत्पादयेत्तर्हि पुंसां स केवलं श्रम एव हीत्येकान्वयः । शास्त्रोक्तसदाचारद्रव्यदेशकालादिभिर्नियततया सुष्ठ्वनुष्ठितः यन्नाम्नि कीर्तिते विष्वक् सर्वतः अंचति दैत्यसेनामिति विष्वक्सेनस्तस्य कथासु रतिं निरंतराभ्यासरूपां केवलं श्रम एव क्रियाकाले उत्तरकालेपि दुःखस्वरूपत्वादायास एवेत्यर्थः । हिशब्देनानेवंवित् महत्पुण्यं कर्म करोति तद्धास्यांततः क्षीयत इति श्रुतिप्रसिद्धिं दर्शयति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

इतिसंप्रश्नसंहृष्ट इत्याद्यनन्तरं नारायणं नमस्कृत्य इत्याद्यन्तेन पुराणमुपक्रम्यैवाह मुनय इति । टीका च तेषां वचः प्रतिपूज्येति यदुक्तं तत् प्रतिपूजनं करोति । हे मुनयः साधु यथा भवति तथाहं पृष्टः यतो लोकानां मङ्गलमेतत् यतः कृष्णविषयः संप्रश्नः कृतः सर्व्वशास्त्रार्थसारोद्धारप्रश्नस्यापि श्रीकृष्णे पर्यवसानादेवमुक्तमित्येषा । यदिति । अत एवोत्तरेष्वपि पद्येषु अधोक्षजवासुदेवसात्वतां पतिकृष्णशब्दास्तत्प्राधान्यविवक्षयैव पठिताः । अत्र श्रेयःप्रश्नस्याप्युत्तरं लोकमङ्गलमित्यनेनैव तावद्दत्तं भवति तथात्मसुप्रसादहेतोश्च येनात्मा सुप्रसीदतीत्यनेन । समिति क्वचित् पाठः ॥ ५ ॥ ❀ ❀ तदेवं सर्व्वशास्त्रसारस्य श्रीकृष्णाख्यस्वयंभगवदाविर्भावप्रश्नलक्षिततद्भक्तिलक्षणस्य श्रेयसः परमसर्व्वोत्तमत्वं बोधयितुं भगवदाविर्भावमात्रस्य भक्तेः सर्व्वोत्तमश्रेयस्त्वमाह स वै इत्यादिना । अतो वै कवय इत्यन्तेन ग्रन्थेन । यतो धर्म्मात् अधोक्षजे भक्तिः तत्कथाश्रवणादिषु रुचिर्भवति । धर्म्मः स्वनुष्ठित इत्यादौ व्यतिरेकेण दर्शयिष्यमाणत्वात् । स वै स एव । "स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणमि"ति वक्ष्यमाणरीत्या तत्सन्तोषणार्थमेव कृतो धर्म्मः परः सर्व्वतः श्रेष्ठः, न निवृत्तिमात्रलक्षणोऽपि वैमुख्याविशेषात् । तथा च श्रीनारदवाक्यं नैष्कर्म्यमपीत्यादौ "कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म्म यदप्यकारणमि"ति । ततः स एवैकान्तिकं श्रेय इत्यर्थः । अनेन भक्तेस्तादृशधर्म्मतोऽप्यतिरिक्तत्वमुक्तम् । तस्या भक्तेः स्वरूपगुणमाह—स्वत एव सुखस्वरूपत्वादहैतुकी फलान्तरानुसन्धानरहिता अप्रतिहिता तदुपरि सुखदपदार्थान्तराभावात् केनाप्यवबोधयितुमशक्या (केनापि व्यवधातुमशक्या) च ॥ ६ ॥ ❀ ❀ जातायाञ्च तस्यां रुचिलक्षणायां भक्त्यां तयैव श्रवणादिलक्षणसाधनभक्तियोगः प्रवर्त्तितः स्यात् । ततश्च यस्यास्ति भक्तिर्भगवत्यकिञ्चनेत्याद्यनुसारेण भगवत्स्वरूपादिज्ञानं ततोऽन्यत्र वैराग्यञ्च तदनुगाम्येव स्यादित्याह वासुदेव इति । अहैतुकं ज्ञानम् आशु ईषत्तच्छ्रवणमात्रेण जनयति । ज्ञानञ्च यदहैतुकमिति पाठः क्वचित् ॥ ७ ॥ ❀ ❀ वासुदेवतोषणाभावेन यदि तत्कथासु तल्लीलावर्णनेषु रतिं रुचिं नोत्पादयेत् तदा श्रम एव स्यात् न तु फलम् । कथारुचेः सर्व्वत्र वाच्यत्वात् श्रेष्ठत्वाच्च सैवोक्ता । तदुपलक्षणत्वेन भजनान्तररुचिरप्युद्दिष्टा । एवशब्देन प्रवृत्तिलक्षणकर्म्मफलस्य स्वर्गादेः क्षयिष्णुत्वम् । हिशब्देन तत्रैव "यथेह कर्म्मजितो लोकः क्षीयते" इति सोपपत्तिकश्रुतिप्रमाणत्वम् । "निर्णीते केवलमिति'मरकोषात् केवलमित्यव्ययेन निवृत्तिमात्रलक्षणधर्म्मफलस्य सिद्धस्यापि नश्वरत्वं तत्रापि तेनैव हिशब्देन "यस्य देवे परा भक्तिरि"त्यादिश्रुतिप्रमाणत्वम् । "नैष्कर्म्यमप्यच्युतभाववर्जितमि"त्यादि

ज्ञानस्यासाध्यत्वं 'श्रेयःसृतिं भक्तिमुदस्य ते विभो' इत्यादि "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोनादृतयुष्मदङ्घ्रय" इत्यादिवचनप्रमाणत्वञ्च सूचितम्। श्लोकद्वयेन भक्तिर्निरपेक्षा ज्ञानवैराग्ये तु तत्सापेक्षे इति लभ्यते। तदेवं भक्तिफलत्वेनैव धर्मस्य साफल्यमुक्तम्॥ ८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तेषां वचः प्रतिपूज्येति यदुक्तं तत् करोति। हे मुनयः साधु पृष्टः कुतः यतो लोकमङ्गलमेवाहं पृष्टः, तदेव कुतः यद्यस्मात् कृष्णविषयः सम्यक् प्रश्नः कृतः, सर्व्व एव प्रश्नः श्रीकृष्णविषयः कुतोऽवसितस्तत्राह येन प्रश्नेनैव आत्मा प्रसीदतीति श्रीकृष्णस्यैव सद्य आत्मप्रसादकत्वमस्मदनुभवसिद्धमिति भावः॥ ५॥ ❀ ❀ सर्व्वशास्त्रसारमैकान्तिकं श्रेयो ब्रूहीति प्रश्नद्वयस्योत्तरमाह स वै पुंसां पुम्मात्राणामेव धर्म्मः परः परमः श्रवणकीर्त्तनादिलक्षणः, यदुक्तम् "एतावानेव लोकेऽस्मिन् पुंसां धर्म्मः परः स्मृतः। भक्तियोगो भगवति तन्नामश्रवणादिभिः॥" इत्यतः परशब्दविशेष्यो धर्म्मो भक्तियोग एव भवेदिति तथात्र मतुप्प्रत्ययेनैवकारेण चैतदन्यस्य परधर्म्मपदवाच्यत्वञ्च निषिद्धम्। यतो भक्तिः प्रेमलक्षणा भवेत्। अहैतुकी हेतुं विनैवोत्पद्यमाना इति सगुणा व्यावृत्ता। ननु महानयमपलापः क्रियते। मैवम्, श्रवणकीर्त्तनादिरूपो यो धर्म्मः स भक्तिरेव साधननाम्नी सैव पाकदशायां प्रेमनाम्नी। ते द्वे अपि भक्तिशब्देनैवोच्येते। तदपि "भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुमिति 'यतो भक्तिरधोक्षजे' इत्यादिषु उत्तरस्या भक्तेः पूर्व्वा भक्तिः कारणं पक्वाम्रस्य कारणं आमाम्रमितिवत्, स्वादभेदनिबन्धनमेव तस्य कारणत्वं बालबोधनार्थं काल्पनिकमेव न तु वास्तवम्। न ह्येकस्यैव पुरुषस्य बाल्ययौवनाद्यनेकावस्थावतो हेतुहेतुमद्भावस्तात्त्विक इति। घटपटौदनादिषु मृत्तण्डुलादीनां नामरूपलोप इवेति न तादृशत्वमत्र व्याख्यातुं शक्यमित्यवसेयम्। न च भक्तेः प्रसिद्धो हेतुः साधुसङ्ग एवास्तीति वाच्यम्, तस्यापि "आदौ श्रद्धा ततः साधुसङ्गोऽथ भजनक्रिये"त्यादौ भक्तेर्द्वितीयभूमिकात्वेनोक्तत्वात् भक्तित्वमेव स्यान्महत्सेवया विप्रा इत्यग्रेऽपि तथा व्याख्यास्यमानत्वाच्च। किञ्च दानव्रततपोहोमादिर्निष्कामकर्म्मयोगश्च ज्ञानाङ्गभूतायाः सात्त्विक्या एव भक्तेः कथञ्चिद्धेतुर्भवति न तु निर्गुणायाः "यन्न योगेन सांख्येन दानव्रततपोऽध्वरैः। व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद्यत्नवानपी"त्येकादशोक्तेः। न च निर्गुणाया भक्तेर्भगवत्कृपैव हेतुरिति वाच्यम्, तस्यापि हेतावन्विष्यमाणे अनवस्थानात्। न च सा निरुपाधिरेव केवलाहेतुरित्यपि वाच्यम्। तस्या असार्व्वत्रिकत्वेन भगवति वैषम्यप्रसक्तेः। किञ्च भक्तकृपैव हेतुरित्युक्ते न किञ्चिदसामञ्जस्यम्। उत्तमभक्तानां वैषम्याभावेऽपि "प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यम" इति मध्यमभक्तलक्षणे वैषम्यस्य दर्शनात्। ततश्च भगवतो भक्ताधीनत्वात् भक्तकृपानुगामिनी भगवत्कृपा हेतुरिति सिद्धान्तः। ननु तर्हि कथं भक्तेरहैतुकत्वमभूत्? उच्यते, भगवत्कृपाया भक्तकृपान्तर्भूतत्वादुक्तकृपायाश्च भक्तसंगान्तर्भूतत्वादुक्तसंगस्य भक्त्यंगत्वादहैतुकत्वमेव सिद्धम्। किञ्च भक्तकृपाया हेतुर्भक्तस्यैव तस्य हृदयवर्त्तिनी भक्तिरेव, तां विना कृपोदयसम्भवाभावात्। सर्व्वप्रकारेणापि भक्तेर्भक्तिरेव हेतुरिति निर्हेतुकत्वम् सिद्धम्। भक्तिमते भक्तिभक्तभजनीयतत्कृपादीनां न पृथग्वस्तुत्वमिति भक्तेः स्वप्रकाशकत्वेन भक्तिप्रकाश्यत्वेऽपि भगवतः स्वप्रकाशकत्वं नानुपपन्नमिति अप्रतिहता केनापि निवारयितुमशक्या। तथाहि तल्लक्षणे "मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥" इति वक्ष्यते। उक्तञ्च श्रीरूपगोस्वामिचरणैः "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे" इति ज्ञानकर्म्मादिभिरनावृतेति वा। यया भक्त्या आत्मा मनः सम्यगेव प्रसीदतीति कामनामालिन्ये सति मनःप्रसादहेतुत्वासम्भवादस्या भक्तेर्निष्कामत्वं स्वत एवायातम्॥ ६॥ ❀ ❀ ननु स एव किमाकार आत्मप्रसाद इत्यपेक्षायां सर्व्वदुर्विषयवैमुख्यापादकभगवद्रूपगुणमाधुर्यानुभवज्ञानमय एवायमित्याह वासुदेव इति। प्रकर्षेण योजितः सम्बद्धः दास्यसख्यादिसम्बन्धयुक्तः कृत इति यावत्। श्लेषेण प्रयोजनीकृतः भक्तियोगस्य भक्तियोग एव प्रयोजनं नान्य इत्येव विचारित इत्यर्थः। जनयतीति ज्ञानवैराग्यार्थं पृथक् यत्नो भक्तैर्न कर्त्तव्य इति भावः। आशु शीघ्रं तत्काल एवेत्यर्थः। यद्वक्ष्यते "भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्॥" इति। ननु तर्हि ज्ञानान्मोक्ष एव भावीति तत्राह अहैतुकम्। अन्नस्य हेतोर्वसति इतिवद्धेतुः प्रयोजनं तदत्र सायुज्यं तन्नार्हतीति तेन भगवद्रूपगुणमाधुर्य्यानुभवमयमेव ज्ञानमायातम्। एवमेव चतुर्थेऽपि वक्ष्यते। "वासुदेवे भगवति भक्तियोगः समाहितः। सध्रीचीनेन वैराग्यं ज्ञानञ्च जनयिष्यती"ति। तत्र सध्रीचीनप्रकारः खलु मोक्षादिफलान्तराभिसन्धिराहित्यमेवेति व्याख्यास्यते। "सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः। शृण्वतः श्रद्दधानस्य नित्यदास्यादधीयत" इत्यनन्तरवाक्ये तत्कारणञ्च स एव दृष्ट इति। एवञ्च भक्तेः कारणं प्रयोजनञ्च भक्तिरेवेति व्यवस्थितम्॥७॥ ❀ ❀ ननु वर्णाश्रमाचारलक्षणो धर्म्मः कथं न परस्तत्राह धर्म्म इति। यः पुंसां विप्रादीनां सुष्ठु अनुष्ठितो धर्म्मः स विष्वक्सेनकथासु रतिं नोत्पादयेत्। "कर्म्मणा पितृलोक" इति श्रुतेः कर्म्मणां रत्यनुत्पादकत्वञ्च। कर्म्मभिर्वा त्रयीप्रोक्तैरित्यादौ न यत्रात्मप्रदो हरिरिति चतुर्थे नारदोक्तेरेव व्यक्तम्। यदि च रतिं नोत्पादयेत् तर्हि केवलं श्रम एव पितृलोकादेर्नश्वरत्वात्। तस्मात् स्वधर्म्मं त्यक्त्वा श्रवणकर्त्तनादिलक्षणः पूर्व्वोक्तः परो धर्म्म एवानुष्ठेय इति भावः। यद्वा ननु च "अस्मिन् लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति

मद्भक्तिश्च यदृच्छया ।।" इति श्रीभगवदुक्तेर्निष्कामकर्मयोग एव भक्तेर्हेतुरस्ति तत् कथं भक्तिरहैतुकीत्युच्यते । सत्यम् , तत्र कर्म्मयोगस्य ज्ञानजनकत्वमिव न साक्षात् भक्तिजनकत्वं व्याख्यातुं शक्यं मध्ये यदृच्छयेति पदोपादानात् । ततश्च तत्र पुंसि भक्तेर्यदृच्छा स्वैरिता यदि स्यात्तदैवादन्यनिरपेक्ष एव शुद्धभक्तेः प्रवेशः स्यात् तदा तामपि स प्राप्नोतीति तत्रार्थः । "यदृच्छा स्वैरितेत्य"भिधानात् । कष्टकल्पनया व्याख्यानान्तरे भक्तेः स्वप्रकाशत्वं न सिद्ध्येदिति तदनादृतमित्यतो निष्कामोऽपि कर्म्मयोगो न भक्तेर्हेतुरित्याह धर्म्म इति । य इति । स वै पुंसां परो धर्म्म इति पद्योक्तात् परमधर्म्मादन्यो यो वर्णाश्रमाचारलक्षणः स्वनुष्ठितो निष्कामोऽपि धर्म्मो विश्वक्सेनकथासु रतिं प्रीतिं नोत्पादयेत् स केवलं श्रम एव । यदीति गर्हायां श्रमजनकत्वाद् गर्हित इत्यर्थः । "यदि गर्हा विकल्पयोरि"ति मेदिनी । यद्वा असन्देहेऽपि सन्देहवचनं यदि वेदाः प्रमाणमितिवत् । "धत्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नी"त्यत्र यदीति शब्दो निश्चय इति श्रीस्वामिचरणानां व्याख्यानाच्च । यद्वा ननु प्रसिद्धधर्म्मादपि कचिन् हरिकथासु प्रीतिरुत्पद्यते इति श्रूयते । सत्यम् , तया विना धर्म्मफलाप्राप्तेः सा खल्वौपाधिक्येव न तात्त्विकीत्याह धर्म्म इति । य इति । स प्रसिद्धो धर्म्मः काम्यो नित्यो वा विष्वक्सेनकथासु रतिं प्रीतिं यदि नोत्पादयेत् तदा श्रम एव । अयमर्थः यथा कर्षकाणां नृपे प्रीतिं कृषिरेवोत्पादयत्यन्यथा तस्याः फलाप्राप्तेरेवमेव धर्म्मोऽपि विष्वक्सेनकथासु प्रीतिं विना स्वस्य वैफल्यदर्शनायैव तत्र विवेकिनां प्रीतिमुत्पादयेदेव । स यद्यविवेकिनां नोत्पादयेत् तदा केवलं श्रम एव । यथा नृपे प्रीतिं विना कृषिफलस्यालाभात् श्रम एव तथैव हरौ भक्तिं विना प्रवृत्तनिवृत्तधर्मफलयोः स्वर्गादिज्ञानयोरलाभात् श्रमः । यदुक्तम् "कुतः शाश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ।" इति । यथा च कृषौ प्रीत्यनुरोधादेव नृपे प्रीतिः न तु वस्तुतस्तथैव धर्म्मे प्रीत्यनुरोधादेव तत्कथासु प्रीतिर्न तु तत्र वस्तुत इति विवेचनीयम् । अत एव प्रह्लादेनोक्तम् "नान्यथेहावयोरर्थो राजसेवकयोरिवे"ति ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे मुनयः भवद्भिरहं साधु यथा भवति तथा पृष्टःयतः कृष्णसंप्रश्नः कृतः, जातावेकवचनम् । उपायादिप्रश्नानां सर्वेषां श्रीकृष्णे पर्यवसानादेकवचनम् , येन प्रश्नेन भवतां पृच्छकानां मम वक्तुश्च का कथा लोकानां श्रोतृणामपि मंगलं स्यात् । वक्ष्यति च "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं पृच्छकं श्रोतॄन् तत्पादसलिलं यथा ।।" इति येनात्मा जीवः सुष्ठु प्रसन्नो भवति भगवज्ज्ञानभक्तिद्वारा परमानंदं प्राप्नोतीत्यर्थः ।। ५ ।। ❀ ❀ प्रथमप्रश्नस्योत्तरमाह स इति । यतोऽधोक्षजे तत्कथाश्रवणादौ रुच्युत्पादद्वारा "भक्तिरेवैनं वर्द्धयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषः भक्तिरेव भूयसी"त्यादिश्रुतिप्रोक्ता भक्तिर्भवेत्स यज्ञव्रततपस्तीर्थवाससहस्रसेवादिनानाविधोऽनभिसंहितफलः धर्मः उपाय इत्यर्थः । स्वर्गाद्यभिसंधिपूर्वकस्य हेयत्वं वक्तुं धर्मं विशिनष्टि पर इति, भक्तिं विशिनष्टि अहैतुकी अनभिसंहितफला, यद्वा श्रीकृष्णकृपेतरहेतुरहिता अप्रतिहता विरोधिभिरनभिभूयमाना यया परमोपायभूतया आत्मा जीवः वक्ष्यमाणमुपेयं प्राप्य तद्भावापन्नः सन् प्रसीदति प्रसन्नो भवति । तदुक्तं मोक्षधर्मे "ज्ञात्वात्मस्थं हरिं चैव न निवर्तंति तेऽव्ययाः । प्राप्य तत्परमं स्थानं मोदंतेऽक्षरमव्ययम्"इति ।। ६ ।। ❀ ❀ "त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् । त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्"इति भालविश्रुतिप्रोक्तं संसाराद्वैराग्यं जनयति । यदहैतुकं भक्तीतरोत्पादकशून्यम् 'ऋते ज्ञानान्न मुक्तिः, ब्रह्मविदाप्नोति परमि'त्यादिश्रुतिप्रोक्तं ज्ञानं तच्च जनयति । प्रथम उपायो धर्मस्ततोहरिकथाश्रवणादिरूपा भक्तिः सा वैराग्यमुत्पाद्य भगवत्साक्षात्कारज्ञानाकारतया जात इति फलितोऽर्थः ।। ७ ।। ❀ ❀ विष्वक्सेनकथासु उक्तलक्षणहरिभक्तिसाधनरूपेषु हरिकथाश्रवणादिषु भक्तिभेदेष्वित्यर्थः ।। ८ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

अभिनन्दनं वदन् प्रश्नानां निर्द्धारितार्थमाह मुनय इति । फलं कृष्ण एव सर्वप्राणिनामैहिकामुष्मिकफलदाता च स एव भुक्तिमुक्ती च लीला अवताराश्च धर्मरक्षकश्च स एव, अतः षण्णां प्रश्नानां स एवार्थः, द्वितीयप्रश्ने द्वितीयं फलमेभ्य एव भवति । हे मुनयः निर्द्धारितार्थाः यद्यपि यदेव पृच्छ्यते तत्रैवोत्तरं देयं तथापि पृष्टमेव साधु इदमेव हि लोकानां मंगलं यत् कृष्णः पृच्छ्यते येन च आत्मा कृष्णः प्रसीदति अंतःकरणस्यापि भगवतस्तद्धर्माणां वा आवेशे प्रसादः । इदं सामान्योत्तरं शास्त्रान्तरश्रवणानन्तरं मननिदिध्यासनाभ्यां कार्यसिद्धिः, अत्र तु सा प्रश्नैरेवेति प्रश्न एव शास्त्रसमाप्तिः ।। ५ ।। ❀ ❀ इदानीं फलसाधने एकीकृत्य स्वाधिकारानुसारेण शास्त्रार्थं निरूपयति दशभिः । भगवत्साक्षात्कारः फलं साधनपारम्पर्ये प्रथमतो धर्मः, अन्तिमो भगवत्प्रसादः, सच खंडशः सर्वत्र साधनेषु वक्तव्यः, तथा सति परान्ते महाप्रसादे सति भगवानात्मानमाविष्करोति तत्र भक्तिस्त्रिविधा ज्ञानं च त्रिविधं रुचिः श्रवणादिः प्रेमवती भक्तिस्त्रिविधा आत्मज्ञानं तत्त्वज्ञानं भगवद्ध्यानं चेति त्रिविधं धर्मो वैराग्यं च साधनं तत्परम्परायां यथायोग्यं विवेचनं निरूप्यते । तत्र प्रथमेकां शृङ्खलामाह स वै पुंसामिति । धर्मः साधनम् । भक्तिफलं तत्र विहितश्रवणादीनां धर्मरूपाणां पृष्टप्रकारेणैव भक्तिसाधकत्वं स्नानादीनामदृष्टद्वारा तत्र साधनान्तरानुप्रवेशे व्यभिचारोऽपि सम्भवति । अत्र प्रथमं स्नानादिधर्मनिर्द्धारः क्रियते प्रमाणस्य तुल्यत्वेपि फलबलाद्विशेषः । अतः वै निश्चयेन पुंसां परो धर्मः स यतो भक्तिः श्रद्धा-

मद्भक्तिश्च यदृच्छया ।।" इति श्रीभगवदुक्तेर्निष्कामकर्म्मयोग एव भक्तेर्हेतुरस्ति तत् कथं भक्तिरहैतुकीत्युच्यते । सत्यम् , तत्र कर्म्मयोगस्य ज्ञानजनकत्वमिव न साक्षात् भक्तिजनकत्वं व्याख्यातुं शक्यं मध्ये यदृच्छयेति पदोपादानात् । ततश्च तत्र पुंसि भक्तेर्यदृच्छा स्वैरिता यदि स्याद्दैवादन्यनिरपेक्ष एव शुद्धभक्तेः प्रवेशः स्यात् तदा तामपि स प्राप्नोतीति तत्रार्थः । "यदृच्छा स्वैरितेत्य"भिधानात् । कष्टकल्पनया व्याख्यानान्तरे भक्तेः स्वप्रकाशत्वं न सिद्ध्येदिति तदनादृतमित्यतो निष्कामोऽपि कर्म्मयोगो न भक्तेर्हेतुरित्याह धर्म्म इति । य इति । स वै पुंसां परो धर्म्म इति पद्योक्तात् परमधर्म्मादन्यो यो वर्णाश्रमाचारलक्षणः स्वनुष्ठितो निष्कामोऽपि धर्म्मो विश्वक्सेनकथासु रतिं प्रीतिं नोत्पादयेत् स केवलं श्रम एव । यदीति गर्हायां श्रमजनकत्वाद् गर्हित इत्यर्थः । "यदि गर्हा विकल्पयोरि"ति मेदिनी । यद्वा असन्देहेऽपि सन्देहवचनं यदि वेदाः प्रमाणमितिवत् । "धत्ते पदं त्वमविता यदि विघ्नमूर्द्धनी"त्यत्र यदीति शब्दो निश्चय इति श्रीस्वामिचरणानां व्याख्यानाच्च । यद्वा ननु प्रसिद्धधर्म्मादपि कचिन् हरिकथासु प्रीतिरुत्पद्यते इति श्रूयते । सत्यम् , तया विना धर्म्मफलाप्राप्तेः सा खल्वौपाधिक्येव न तात्त्विकीत्याह धर्म्म इति । य इति । स प्रसिद्धो धर्म्मः काम्यो नित्यो वा विष्वक्सेनकथासु रतिं प्रीतिं यदि नोत्पादयेत् तदा श्रम एव । अयमर्थः यथा कर्षकाणां नृपे प्रीतिं कृषिरेवोत्पादयत्यन्यथा तस्याः फलाप्राप्तेरेवमेव धर्म्मोऽपि विष्वक्सेनकथासु प्रीतिं विना स्वस्य वैफल्यदर्शनायैव तत्र विवेकिनां प्रीतिमुत्पादयेदेव । स यद्यविवेकिनां नोत्पादयेत् तदा केवलं श्रम एव । यथा नृपे प्रीतिं विना कृषिफलस्यालाभात् श्रम एव तथैव हरौ भक्तिं विना प्रवृत्तनिवृत्तधर्मफलयोः स्वर्गादिज्ञानयोरलाभात् श्रमः । यदुक्तम् "कुतः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ।" इति । यथा च कृषौ प्रीत्यनुरोधादेव नृपे प्रीतिः न तु वस्तुतस्तथैव धर्म्मे प्रीत्यनुरोधादेव तत्कथासु प्रीतिर्न तु तत्र वस्तुत इति विवेचनीयम् । अत एव प्रह्लादेनोक्तम् "नान्यथेहावयोरर्थो राजसेवकयोरिवे"ति ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे मुनयः भवद्भिरहं साधु यथा भवति तथा पृष्टःयतः कृष्णसंप्रश्नः कृतः, जातावेकवचनम् । उपायादिप्रश्नानां सर्वेषां श्रीकृष्णे पर्यवसानादेकवचनम् , येन प्रश्नेन भवतां पृच्छकानां मम वक्तुश्च का कथा लोकानां श्रोतॄणामपि मंगलं स्यात् । वक्ष्यति च "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं पृच्छकं श्रोतॄन् तत्पादसलिलं यथा ।।" इति येनात्मा जीवः सुष्ठु प्रसन्नो भवति भगवद्ज्ञानभक्तिद्वारा परमानंदं प्राप्नोतीत्यर्थः ।। ५ ।। ❀ ❀ प्रथमप्रश्नस्योत्तरमाह स इति । यतोऽधोक्षजे तत्कथाश्रवणादौ रुच्युत्पादद्वारा "भक्तिरेवैनं वर्द्धयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषः भक्तिरेव भूयसी"त्यादिश्रुतिप्रोक्ता भक्तिर्भवेत्स यज्ञव्रततपस्तीर्थवासमहत्सेवादिनानाविधोऽनभिसंहितफलः धर्मः उपाय इत्यर्थः । स्वर्गाद्यभिसंधिपूर्वकस्य हेयत्वं वक्तुं धर्मं विशिनष्टि पर इति, भक्तिं विशिनष्टि अहैतुकी अनभिसंहितफला, यद्वा श्रीकृष्णकृपेतरहेतुरहिता अप्रतिहता विरोधिभिरनभिभूयमाना यया परमोपायभूतया आत्मा जीवः वक्ष्यमाणमुपेयं प्राप्य तद्भावापन्नः सन् प्रसीदति प्रसन्नो भवति । तदुक्तं मोक्षधर्मे "ज्ञात्वात्मस्थं हरिं चैव न निवर्तंति तेऽव्ययाः । प्राप्य तत्परमं स्थानं मोदंतेऽक्षरमव्ययम्"इति ।। ६ ।। ❀ ❀ "त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् । त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्"इति भालविश्रुतिप्रोक्तं संसाराद्वैराग्यं जनयति । यदहैतुकं भक्तीतरोत्पादकशून्यम् 'ऋते ज्ञानान्न मुक्तिः, ब्रह्मविदाप्नोति परमि'त्यादिश्रुतिप्रोक्तं ज्ञानं तच्च जनयति । प्रथम उपायो धर्मस्ततोहरिकथाश्रवणादिरूपा भक्तिः सा वैराग्यमुत्पाद्य भगवत्साक्षात्कारज्ञानाकारतया जात इति फलितोऽर्थः ।। ७ ।। ❀ ❀ विष्वक्सेनकथासु उक्तलक्षणहरिभक्तिसाधनरूपेषु हरिकथाश्रवणादिषु भक्तिभेदेष्वित्यर्थः ।। ८ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

अभिनन्दनं वदन् प्रश्नानां निर्द्धारितार्थमाह मुनय इति । फलं कृष्ण एव सर्वप्राणिनामैहिकामुष्मिकफलदाता च स एव भुक्तिमुक्ती च लीला अवताराश्च धर्मरक्षकश्च स एव, अतः षण्णां प्रश्नानां स एवार्थः, द्वितीयप्रश्ने द्वितीयं फलमेभ्य एव भवति । हे मुनयः निर्द्धारितार्थाः यद्यपि यदेव पृच्छ्यते तत्रैवोत्तरं देयं तथापि पृष्टमेव साधु इदमेव हि लोकानां मंगलं यत् कृष्णः पृच्छ्यते येन च आत्मा कृष्णः प्रसीदति अंतःकरणस्यापि भगवतस्तद्धर्माणां वा आवेशे प्रसादः । इदं सामान्योत्तरं शास्त्रान्तरश्रवणानन्तरं मननिदिध्यासनाभ्यां कार्यसिद्धिः, अत्र तु सा प्रश्नैरेवेति प्रश्न एव शास्त्रसमाप्तिः ।। ५ ।। ❀ ❀ इदानीं फलसाधने एकीकृत्य स्वाधिकारानुसारेण शास्त्रार्थं निरूपयति दशभिः । भगवत्साक्षात्कारः फलं साधनपारम्पर्ये प्रथमतो धर्मः, अन्तिमो भगवत्प्रसादः, सच खंडशः सर्वत्र साधनेषु वक्तव्यः, तथा सति परान्ते महाप्रसादे सति भगवानात्मानमाविष्करोति तत्र भक्तिस्त्रिविधा ज्ञानं च त्रिविधं रुचिः श्रवणादिः प्रेमवती भक्तिस्त्रिविधा आत्मज्ञानं तत्त्वज्ञानं भगवद्ध्यानं चेति त्रिविधं धर्मो वैराग्यं च साधनं तत्परम्परायां यथायोग्यं विवेशनं निरूप्यते । तत्र प्रथमेकां शृङ्खलामाह स वै पुंसामिति । धर्मः साधनम् । भक्तिफलं तत्र विहितश्रवणादीनां धर्मरूपाणां पृष्टप्रकारेणैव भक्तिसाधकत्वं स्नानादीनामदृष्टद्वारा तत्र साधनान्तरानुप्रवेशे व्यभिचारोऽपि सम्भवति । अत्र प्रथमं स्नानादिधर्मनिर्द्धारः क्रियते प्रमाणस्य तुल्यत्वेपि फलबलाद्विशेषः । अतः वै निश्चयेन पुंसां परो धर्मः स यतो भक्तिः श्रद्धा-

माह—ययेति। यया भक्त्याऽऽत्मा सुप्रसीदतीत्यर्थः। साऽपि कीदृशीत्यपेक्षायामाह—अहैतुकीति, हेतुः फलाभिसन्धिस्तद्रहितेत्यर्थः, विघ्नरूपैर्लौकिककार्यान्तरैरप्रतिहता अव्युच्छिन्ना चेति ॥ ६ ॥ ❀ ❀ ननु "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेन" इत्यादिश्रुतिभ्यो वर्णाश्रमधर्मस्य ज्ञानहेतुत्वं प्रसिद्धं तत्कुतो भक्तिहेतुत्वमुच्यते इति चेत्, सत्यं, परन्तु भक्तिद्वारेणैव ज्ञानाङ्गत्वमित्याह—वासुदेव इति। 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततः स वासुदेवेति विद्वद्भिः परिगीयते' इति निरुक्तेर्वासुदेवशब्देन सर्वान्तरात्मत्वं सर्वाधारत्वं चोक्तम्। तस्मिन् भगवति निरतिशयैश्वर्यादिषड्गुणपूर्णे भक्तियोगः प्रकर्षेण दीर्घकालादरनैरन्तर्येण योजितः कृतः आशु शीघ्रमेव ज्ञानं जनयतीत्यन्वयः। ननु घटपटादिविषयकं ज्ञानं सर्वदैव भवति विनश्यति च तज्जनने भक्तेः क उत्कर्ष इत्याशङ्क्य ज्ञानं विशिनष्टि—यदहैतुकमिति। हेतुरनुमानादितर्कस्तदगोचरं ब्रह्मात्मैक्यसाक्षात्काररूपं औपनिषदमित्यर्थः। ननु भवतु कदाचित्तथा ज्ञानं तथापि विषयान्तरासक्त्या तत्तु तिरोहितं स्यादेवेत्याशङ्क्याह—वैराग्यं चेति। विषयान्तरवैतृष्ण्यमपि स एव च जनयतीति न तज्ज्ञानं कदापि तिरोहितं भवतीति भावः ॥ ७ ॥ ❀ ❀ तदेवं फलाभिसन्धिमन्तरेणानुष्ठितो भगवद्भक्तिद्वारा ज्ञानवैराग्यजनक एव परो धर्म इत्युक्तम्, फलाभिसन्धिना तु कृतः स एव श्रमरूपानर्थहेतुरपरो धर्म इति फलसङ्कल्पतदभावाभ्यामेव धर्मेऽपकर्षोत्कर्षौ न स्वरूपत इत्याह—धर्म इति। यो धर्मः स्वनुष्ठितः सम्यक् कृतोऽपि विष्वक् सर्वतः सेना आज्ञारूपा यस्य तस्य भगवतः कथासु यदि पुंसां रतिं नोत्पादयेत्तदा स श्रम एव श्रमफलक एवेत्यन्वयः। ननु कथारुच्याद्युत्पादकधर्मानुष्ठानेऽपि श्रमो भवत्येवेत्याशङ्क्याह—केवलमिति। तस्य श्रमावहत्वेऽपि भक्त्युत्पादनद्वारा मोक्षफलकत्वात् स श्रमः सफलः, अयं तु विफलः श्रम इत्यर्थः। नन्वस्ति तत्रापि कामितं स्वर्गादिफलमित्याशङ्कानिराकरणार्थ एवकारः। स्वर्गादेः क्षयिष्णुत्वात्तस्य फलत्वमेव न सम्भवतीति भावः। ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिश्रुतेर्न तत्फलस्य क्षयिष्णुत्वमिति शङ्कानिरासाय हिशब्दः। "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति तर्कानुगृहीतया श्रुत्या क्षयिष्णुत्वप्रतिपादनस्य सिद्धत्वात् तर्कानुगृहीतत्वेनास्या बलवत्त्वात् पूर्वश्रुतेस्तु प्रवृत्त्यर्थरोचनापरत्वेन दुर्बलत्वादिति भावः ॥ ८ ॥

हिन्दी अनुवाद

ऋषियो! आपने सम्पूर्ण विश्वके कल्याणके लिये यह बहुत सुन्दर प्रश्न किया है; क्योंकि यह प्रश्न श्रीकृष्णके सम्बन्ध में है और इससे भलीभाँति आत्मशुद्धि हो जाती है ॥ ५ ॥ ❀ ❀ मनुष्योंके लिये सर्वश्रेष्ठ धर्म वही है, जिससे भगवान् श्रीकृष्णमें भक्ति हो—भक्ति भी ऐसी जिसमें किसी प्रकारकी कामना न हो और जो नित्य-निरन्तर बनी रहे; ऐसी भक्तिसे हृदय आनन्दस्वरूप परमात्माकी उपलब्धि करके कृतकृत्य हो जाता है ॥ ६ ॥ ❀ ❀ भगवान् श्रीकृष्णमें भक्ति होते ही, अनन्य प्रेमसे उनमें चित्त जोड़ते ही निष्काम ज्ञान और वैराग्यका आविर्भाव हो जाता है ॥ ७ ॥ ❀ ❀ धर्मका ठीक-ठीक अनुष्ठान करनेपर भी यदि मनुष्यके हृदयमें भगवान् की लीला-कथाओंके प्रति अनुरागका उदय न हो तो वह निरा श्रम-ही-श्रम है ॥ ८ ॥

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते। नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ ९ ॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता। जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥
तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया[1]। पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं हरिभक्तिद्वारा तदितरवैराग्यात्मज्ञानपर्यंतः परो धर्म इत्युक्तम्। अन्ये तु मन्यंते धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेंद्रियप्रीतिस्तत्प्रीतेश्च पुनरपि धर्मार्थादिपरंपरेति। यथाहुः "धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते" इत्यादि, तन्निराकरोति धर्मस्येति द्वाभ्याम्। आपवर्ग्यस्य उक्तन्यायेनापवर्गपर्यंतस्य धर्मस्यार्थाय फलत्वायार्थो नोपकल्पते योग्यो न भवति। तथार्थस्याप्येवंभूतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय नहि स्मृतो मुनिभिः ॥ ९ ॥ ❀ ❀ कामस्य च विषयभोगस्येंद्रियप्रीतिर्लाभः फलं न भवति, किं तु यावता जीवेत तावानेव कामस्य लाभः। जीवनपर्याप्त एव कामः सेव्य इत्यर्थः। जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति, किंतु तत्त्वजिज्ञासैवेति ॥ १० ॥ ❀ ❀ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव, धर्म एव हि तत्त्वमिति केचित्तत्राह। तत्त्वविदस्तु तदेव तत्त्वं वदंति। किं तत् यज्ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं व्यावर्तयति। ननु तत्त्वविदोऽपि विगीतवचना एव। मैवम्। तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह। औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानित्यभिधीयते ॥ ११ ॥ ❀ ❀ तच्च तत्त्वं सपरिकरया भक्त्यैव प्राप्यत इत्याह। तच्चेत्यन्वयः। ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानं परोक्षम्। तच्च तत्त्वमात्मनि क्षेत्रज्ञे पश्यंति। किं तत् आत्मानं परमात्मानम्। श्रुतेन वेदांतादिश्रवणेन गृहीतया प्राप्तयेति भक्तेर्दार्ढ्यमुक्तम् ॥ १२ ॥

---

१. प्रा. पा. युक्तयः।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदितरो हरिभक्तीतरः स्वर्गादिस्तत्र वैराग्यं जिहासात्मज्ञानं पर्यंतः फलं यस्य स परो धर्म इति। विश्वनाथस्तु-किञ्चात्र चतुर्विधा जनाः कर्मिणो ज्ञानिनो योगिनो भक्ताश्च। तत्र "धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते" इति दृष्टया धर्मस्यार्थः फलं, तस्य कामस्तस्येंद्रियप्रीतिरिन्द्रियप्रीतौ च सत्यां तदर्थं पुनरपि धर्मादिपरंपरा। यथा कर्मिणां न तथोत्तरेषां त्रयाणामित्याह। धर्मस्य शमदमादेर्यमनियमादेश्च श्रवणकीर्त्तनादेश्चार्थः सर्वथा भवन्नप्यर्थाय फलत्वाय न कल्पते तमनुसंधाय तत्तदप्रवृत्तेः। यतः आपवर्ग्यं-स्यापवर्गप्रयोजनकस्य तदस्य प्रयोजनमित्यर्थे "स्वर्गादिभ्यो यः" इति स्वार्थिकाणंताद्यः प्रत्ययः। तेनापवर्ग एवानुसंहितं फलमिति भावः। ज्ञानियोगिनोर्मतेऽपवर्गो मोक्षः भक्तमते प्रेमभक्तिः। यथावर्णविधानमपवर्गश्च भवति। योसौ भगवति वासुदेवेऽनन्यनि-मित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंग इति पञ्चमस्कंधे वक्ष्यमाणत्वात्। "येनाप-वर्गाख्यमदभ्रबुद्धिः" इत्यादौ "खगेंद्रध्वजपादमूलम्" इत्यस्मिन्नेव स्कंधे वक्ष्यमाणत्वाच्च "निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जना-र्दन। मुक्ता एव हि भक्तास्ते तव विष्णो यतो हरे॥" इति स्कांदरेवाखंडाच्च। तथाऽर्थस्य धनादेः कामो विषयभोगः लाभाय फलत्वाय न। यतो धर्म एवैकांतं मुख्यफलं यस्य तस्य धर्म एवानुसंहितं फलमिति भावः। तथा ज्ञानियोगिनां शमदमादियमनि-यमाद्यनुकूले कर्मिणश्च धर्मविशेषेऽर्थस्य विनियोगः। भक्तस्य तु भगवतो भागवतानां वा सेवायां स्पष्ट एव॥ ९ ॥ ❀ ❀ इत्यर्थ इति "सत्यां क्षितौ किं" इत्यादि "चीराणि किं पथि न संति" इत्याद्युक्तन्यायेनेति भावः। अत्र ज्ञानिनां योगिनां वार्थकामेंद्रिय-प्रीतयो ज्ञानयोगयोरानुषंगिकफलानि कर्मफलत्वेनैव व्यपदिश्यन्ते। ज्ञानयोगयोस्तयोर्निष्कामकर्मपरिणामत्वादतो ज्ञानिनां योगिनां च दृष्टे सुखदुःखे कर्मफले एवोच्येते। भक्तानां त्वर्थकामेंद्रियप्रीतयो भक्तेरेवानुषंगिकफलानीति भक्तेः कर्मपरिणामत्वाभावान्न तेषां कर्मफलत्वव्यपदेशः। अतो भक्तानां दृष्टं सुखं भक्तिफलमेव। दुःखं तु "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः। अतोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखितम्" इत्यादिभगवद्वचनाद्भगवदुत्थं भक्त्यपराधफलञ्च यथायोगं विवेचनीयम्। अग्रे स्वामिव्या-ख्यानमेव॥ १० ॥ ❀ ❀ अत्राक्षिपति। नन्विति। पुनराक्षिपति। विगीतवचना विरुद्धवचनाः। अत्र विश्वनाथः-तत्त्वमेव किं तत्राह यदद्वयं ज्ञानं तत्तत्त्वम्। ज्ञानमेव किं तत्राह ब्रह्मेति। शब्द्यते ब्रह्मेतिपदेन यदुच्यते ज्ञानिभिस्तज्ज्ञानं तन्मते ज्ञानं निराकारं ज्ञातृज्ञेयादिविभागशून्यं, 'चित्सामान्यं चिद्विशेषाणां भगवद्धामादीनां तदनन्यत्वमननात्। जीवमाययोस्तच्छक्तित्वेन तदैक्यादिदंकारास्पदस्य कार्यस्य विश्वस्य कारणमात्रात्मकत्वादद्वैतम्। तथा परमात्मेति योगिभिर्यदुच्यते न तज्ज्ञानम्। एतन्मते परमात्मनश्चिदेकरूपत्वाज्ज्ञानमात्रत्वम्। ज्ञानमात्रत्वेपि साक्षित्वादेर्ज्ञानविशेषस्याश्रयत्वमपि द्युमणिदीपादेर्ज्योतीरूपत्वेपि ज्योतिष्म-त्त्वमिव नानुपपन्नम्। केचित्स्वदेहांतर्हृदयावकाशे "प्रादेशमात्रं पुरुषं वसंतम्" इत्यादेः साकारत्वञ्च मायायाः शक्तित्वान्मायिकानां च तदन्यत्वाज्जीवस्य तद्विभिन्नांशत्वात्ततो द्वितीयत्वाभावादद्वयत्वम्। तथा भगवानिति भक्तैर्यदुच्यते तज्ज्ञानमेतन्मते पूर्ववत् ज्ञानमात्रत्वेपि भगशब्दवाच्यषडैश्वर्यस्याप्यप्राकृतत्वेन चिन्मात्रत्वात्तद्रूपत्वम्। तदुक्तं विष्णुपुराणे "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गु-णादिभिः॥" इति। तथैव द्विभुजत्वचतुर्भुजत्वादिभिर्विविधचिद्घनाकारैर्बहिरंतर्वर्तित्वेपि 'न च्यवंते च मद्भक्ता महत्यां प्रलयापदि' इति स्कांदादिवाक्यैः सदैव सेव्यसेवकादिविभागेप्यद्वयत्वं पूर्ववत्तच्छक्तीनां चिदादीनां तद्विलासानां च वैकुंठादीनां तदभिन्नत्वम-ननात्। ततो भिन्नत्वभावनैवाद्वयपदेन व्यावृत्ता। एवं च भगवतः सामान्यस्वरूपमात्रस्योपादेयत्वे ज्ञानिन्यधिकारिणि ब्रह्मेति अंतर्यामित्वादिद्वित्रधर्मवत्त्वस्योपादाने योगिन्यधिकारिणि परमात्मेति अचिंत्यानंतचिदानंदमयस्वरूपगुणलीलाद्यनेकधर्मवत्त्वस्य ग्रहणयोग्यतायां भक्ताधिकारिणि भगवानिति स एवैको भाति। किंच "यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्" इति "कृष्णाय परमात्मने" इति "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्।" इति "ब्रह्मणो हि प्रतिष्ठाहम्" इति "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इत्यादिवचनेभ्यस्तथा भगवदुपासकानां मोक्षप्राप्तेरपि दर्शनात्। ब्रह्मपरमात्मोपासकानां तु प्रेमप्राप्त्यदर्शनाद्भगवत एव ब्रह्मत्वपरमात्मत्वे इत्यतो भगवत्त्वमेव मूलमिति द्रष्टव्यम्। अत्र ब्रह्मोपासकेभ्यो ज्ञानिभ्यः सकाशात्परमात्मोपासको योगी श्रेष्ठः। तेभ्यो योगिभ्योपि भगवदुपासकः श्रेष्ठ इति तारतम्यं गीतासु दृष्टं यथा "तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ योगिनामपि सर्वेषां मद्गतेनांतरात्मना। श्रद्धावा-न्भजते यो मां स मे युक्ततमो मतः" इति। योगिनामिति पंचम्यर्थे षष्ठी। संदर्भस्तु विगीतवचना इति। स्वामिव्याख्याने परस्परमिति शेषः। तत्त्वस्य नामांतरैरभिधानादिति धर्मिणि सर्वेषामभ्रमाद्धर्मे एव तु भ्रमादिति। यद्वा किं तत्त्वमित्यपेक्षायामाह वदंतीति। ज्ञानं चिदेकरूपमद्वयत्वं चास्य स्वयंसिद्धतादृशातादृशतत्त्वांतराभावात्स्वशक्त्येकसहायत्वात्परमाश्रयं तं विना तासाम-सिद्धत्वाच्च। तत्त्वमिति परमपुरुषार्थताद्योतनाय परमसुखरूपत्वं तस्य ज्ञानस्य बोध्यतेऽत एव तस्य नित्यत्वं च दर्शितम्। अत्र श्रीमद्भागवताख्य एव शास्त्रे क्वचिदन्यत्रापि तदेकं तत्त्वं त्रिधा शब्द्यते क्वचिद्ब्रह्मेति क्वचित्परमात्मेति क्वचिद्भगवानिति च। किं तत्र श्रीव्याससमाधिलब्धाद्भेदाज्जीव इति च शब्द्यत इति नोक्तमिति। तत्र शक्तिवर्गलक्षणतद्धर्मातिरिक्तं केवलं ज्ञानं ब्रह्मेति शब्द्यते। अंतर्यामित्वमयमायाशक्तिप्रचुरचिच्छक्त्यंशविशिष्टं परमात्मेति, परिपूर्णसर्वशक्तिविशिष्टं भगवानिति, एवमेवोक्तं

श्रीजडभरतेन "ज्ञानं विशुद्धं परमात्ममेकमनंतरं त्वबहिर्ब्रह्म सत्यम् । प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति" इति "तस्मै नमो भगवते ब्रह्मणे परमात्मने ।" इत्यत्र वरुणकृतस्तुतौ टीका च 'परमात्मने सर्वजीवनियंत्रे' इत्येषा । ध्रुवं प्रति मनुना च "त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ" इति । अत्रानंदमात्रं विशेष्यं समस्ताः शक्तयो विशेषणादिविशिष्टो भगवानित्यायातम् । भगवच्छब्दार्थश्च विष्णुपुराणे प्रोक्तः "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥" इति ॥ ११ ॥ ❀ ❀ तत्प्राप्तिसाधनमाह । तज्ज्ञानं त्रिरूपं मुनयो मननशीला ज्ञानिनो योगिनो भक्ताश्च पश्यंति । तत्र ब्रह्मेति मते आत्मनि च तत्पदार्थे ईश्वरे आत्मानं त्वंपदार्थं जीवं पश्यंत्यनुभवंति । परमात्मेति मते आत्मन्यंतर्हृदये आत्मानमंतर्यामिणं पश्यंति ध्यानेनालोकयंति । भगवानिति मते आत्मनि मनसि चकाराद्बहिश्च स्फुरंतमात्मानं भगवंतं स्वलोचनाभ्यामेव तन्माधुर्यमास्वादयंति । भक्त्येति । आदौ गुरुमुखात् श्रुत्वा पश्चाद्गृहीता तया भगवद्विषयिण्यैव, श्रवणकीर्त्तनादौ भक्तिशब्दस्य रूढेर्ब्रह्मोपासकैः परमात्मोपासकैश्च स्वस्य साध्यसिद्ध्यर्थं भगवति भक्तिः कर्त्तव्यैव । ज्ञानवैराग्ये पृथगेव । तेषामुभे येषां साधने ज्ञेये । भक्तमते भक्त्योत्थे एव ते भक्तेः प्रेमत्वव्यंजके ज्ञेये । "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इति शुद्धभक्तानां पृथक्त्वयोर्निषेधात् । अथवा तच्च त्रिरूपं ज्ञानं भक्तास्तु भक्त्यैवानुभवितुं शक्नुवंतीत्याह । तच्छ्रद्दधानाः केचित्तद्विरूपमप्यनुभवितुं साभिलाषा भवंतीत्यर्थः । तदा भक्त्यैव पश्यंति । तेन ब्रह्मपरमात्मनोः साधने ज्ञानयोगौ भक्त्यैव सिद्धौ स्यातामिति भावः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

आपवर्ग्यस्येति । निवृत्तिलक्षणो धर्म्म एव सेव्यः, न तस्य फलमर्थ इति भावः ॥ ९-११ ॥ ❀ ❀ तदिति । तदित्यस्य एतत्पद्यीयपरपादोक्तचकारेण अन्वय इत्यर्थः । (एवमत्र श्रद्धधाना इत्यनेन श्रद्धोक्ता सा तु वेदान्तवाक्येषु विश्वासः, ज्ञानं नित्यानित्यवस्तुविवेकः, वैराग्यमिहामुत्रफलभोगविरागः, एतद्युक्तया परमेश्वरानुरागलक्षणया भक्त्या जीवब्रह्मैक्यरूपं तत्त्वं साक्षाद् विन्दन्तीत्यर्थः) ॥ ११-१२ ॥

श्रीमद्वीरराघवव्याख्या

तदेवमनभिसंहितफलो भगवद्गुणश्रवणादिरुचिजननद्वारा भक्तियोगानुग्राहक एव धर्मः, परोऽन्यस्तु श्रमफलक इत्युक्तम् । अथोक्तविधधर्मानुग्राह्यभगवद्भक्तियोगसाध्यमोक्षस्यैव निरतिशयपुरुषार्थत्वमिति दर्शयितुं धर्मार्थकामानां स्वतः पुरुषार्थत्वं धर्मस्यार्थार्थत्वमर्थस्य कामार्थत्वं कामस्येन्द्रियतृप्त्यर्थत्वमिन्द्रियतृप्तेर्जीवनस्य पुनर्धर्मार्थत्वमित्यादिरूपां चक्रवत्परिवृत्तिं लौकिकाभिमतां च निरस्य धर्मादीनामपि परम्परया निरतिशयपुरुषार्थरूपमोक्षसाधनभक्तियोगानुग्राहकत्वमाह धर्मस्येति त्रिभिः । तत्र धर्मस्य फलमर्थः अर्थफलं कामः कामफलमिन्द्रियतृप्तिरिति लौकिकानां मतम् । तत्र धर्मफलत्वमर्थस्य निरस्यति धर्मस्येत्यर्धेन । आपवर्ग्यस्यापवर्गसाधनस्य अनभिसंहितफलत्वे सति परम्परया निरतिशयपुरुषार्थरूपमोक्षसाधनीभविष्यतो धर्मस्यार्थाय प्रयोजनायार्थः धनं न प्रकल्पते, धनं धर्मस्य फलं न भवतीत्यर्थः । धर्मस्यार्थफलकत्वरूपलौकिकमतानुवादेनैव स्वतः पुरुषार्थत्वमपि निरस्तं वेदितव्यम् । एवमुत्तरत्रापि द्रष्टव्यम् । एकस्यैव दानयागादिरूपस्य धर्मस्य फलाभिसंध्यनभिसंधिरूपाकारभेदेनोत्कृष्टापकृष्टफलसाधनत्वेऽवगते सति तत्रानभिसंहितफलत्वरूपाकारानादरेण सहेतरपुरुषार्थरूपार्थार्थत्ववादरूपं लौकिकानां मतमती [illegible]नादरणीयमिति भावः । अर्थकामस्यार्थफलत्वं निरस्यति । नार्थस्येति । धर्मैकान्तस्य धर्मैकप्रयोजनस्यार्थस्य वित्तस्य ला[illegible]य प्रयोजनाय कामो न स्मृतः । अर्थस्य प्रयोजनं न कामो भवतीत्यर्थः । अत्र कामशब्देन काम्यते इति काम इति व्युत्पत्त्यान्नपानादिरुच्यते ॥ ९ ॥ ❀ ❀ अथ कामस्येन्द्रियतृप्तिफलकत्वं निरस्यति कामस्येति । यावतान्नपानादिना कामेन काम्यमानेन वस्तुना जीवति तावतोऽन्नादेर्भोग्यवस्तुनः लाभः फलं नेन्द्रियतृप्तिः, किन्तु देहधारणमेवान्नपानादिकामफलमित्यर्थः । अथ जीवनस्य पुनर्धर्मार्थत्वं निरस्यति । जीवस्य जीवनस्य प्रयोजनं तत्त्वजिज्ञासैव, न तु इह लोके यः कर्मभिः साध्यो धर्मः सोर्थः प्रयोजनम् । अत्र धर्मार्थकामजीवनानां क्रमेणार्थकामेन्द्रियतृप्तिधर्मार्थत्वं निरस्य तेषां क्रमेणापवर्गधर्मदेहधारणमात्रतत्त्वजिज्ञासार्थत्वोक्तेः अयं भावः । सति वित्ते तेनानभिसंहितफलं धर्मं संपाद्य तेन धर्मेणापवर्गसाधनभूतं भक्तियोगमुपकुर्यात् । सति तु कामे तेन देहधारणमात्रोपयुक्तेन देहं धृत्वा तेन देहेन भजनीयतत्त्वजिज्ञासा कार्येति ॥ १० ॥ ❀ ❀ जीवस्य प्रयोजनं तत्त्वजिज्ञासैवेत्युक्तम् । किं तत्त्वं यज्जिज्ञासितव्यमित्यत आह वदंतीति । यज्ज्ञानं ज्ञानस्वरूपं ज्ञानगुणकं च अद्वयं स्वतुल्याभ्यधिकवस्त्वंतररहितमवयवभेदरहितं वा जात्यादिभेदरहितं वा ब्रह्मपरमात्मभगवच्छब्दाभिहितं तदेव तत्त्वमिति तत्त्वविदो वदंति । ब्रह्मपरमात्मभगवच्छब्दाः सामान्यविशेषशब्दाः प्रयुक्ताः । एवं प्रयुंजानस्य सदाकाशादिशब्दा अपि कारणवाक्यगता भगवत्परा इत्यभिप्रायः ॥ ११ ॥ ❀ ❀ एवं परधर्मादिवर्गस्यापि परंपरयाऽपवर्गसाधनत्वं प्रसंगाद् भजनीयवस्तुस्वरूपं चोक्तम् । अथ यद्विवक्षितं मोक्ष एव निरतिशयं श्रेयस्तत्साधनं तु भक्तिरेव । तन्निष्पत्तिश्च वर्णाश्रमधर्मज्ञानयोगसमाधिभिरिति तदुपपादयति तदित्यादिभिः सार्द्धैर्दशभिः । तत्तस्माद् भक्तियोगानुग्राहकस्यैव धर्मस्य परत्वात्त्रिवर्गस्यापि परंपरयापवर्गा-

र्थत्वादपवर्गातिरिक्तनिरतिशयपुरुषार्थाभावाच्चेत्यर्थः । श्रुतं यज्ञादिकर्म तस्य कर्त्तव्यतया वेदे श्रुतत्वात्तेन गृहीतयाऽनुगृहीतया ज्ञानवैराग्याभ्यां युक्तया भक्त्या आत्मनि जीवात्मन्यंतरात्मतया स्थितं ब्रह्मादिशब्दवाच्यं भगवंतं श्रद्दधाना एते एवंविधया भक्त्या पश्यंति । ज्ञानशब्देन प्रत्यगात्मयाथात्म्यज्ञानयोगो विवक्षितः । वैराग्यं विषयांतरेषु वैतृष्ण्यं तेन शमादिसंग्रहः । एभिरंगैरुपकृतया भक्त्या आत्मनि स्थितं परमात्मानं पश्यंति साक्षात्कुर्वंति इत्यनेन भक्तेरेव परमात्मदर्शनसमनंतरभाविमोक्षसाधनत्वमुक्तम् । कर्मयोगज्ञानयोगयोः शमादीनां च भक्तियोगानुग्राहकत्वं च "भिद्यते हृदयग्रंथिरि"ति श्रुत्या तदर्थानुवादिना वक्ष्यमाणश्लोकेन च मोक्षस्य दर्शनानंतरभावित्वमवगतम् । एवं च भक्त्या पश्यंति इत्यस्य दर्शनरूपापन्नाया भक्तेरव्यवधानेन मोक्षसाधनत्वमित्यभिप्रायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु धर्मस्य भगवत्कथारत्यजनकत्वे कथं श्रमैकफलत्वं धर्मादर्थोऽर्थात्कामः कामात्सुखमित्यर्थशास्त्रादौ प्रसिद्धेरिति तत्राह धर्मस्येति । अपवर्गो मोक्षः, तत्साधनमापवर्ग्यं तस्य धर्मस्य इहार्थः काञ्चनादिद्रव्यमर्थाय फलाय न कल्पते, हि यस्मात्तस्माद्धरिकथारतिजनकत्वमेव फलमित्यर्थः । धर्म एव एकान्तं नियमेन फलं यस्य स धर्मकान्तः तस्य धर्मसाधनस्यार्थस्य कामो लाभाय प्रयोजनाय न स्मृतः, विद्वद्भिरिति शेषः । अत्रापि हिशब्दो हेतौ ॥ ९ ॥ ❋ ❋ कामस्येन्द्रियप्रीतिर्लाभो न भवति, तर्ह्यशनाच्छादनाद्यभावे क्षुधादिना मरणमेव स्यात्तत्राह जीवेतेति । यावतार्थादिना जीवति शरीरयात्रानिर्वाहको भवति तस्मादर्थशास्त्रादौ प्रतिपादितक्रमो बहिर्मुखानामिति भावः । ब्रह्मार्पणबुद्ध्याऽकृतस्य कर्मणो भगवत्कथारतिसाधनत्वमित्याह जीवस्येति । इह कर्मभिर्योऽर्थः भगवत्कथारतिलक्षणः सः अतत्त्वजिज्ञासोर्जीवस्य न भवति, भगवत्तत्त्वमजानतः पुरुषस्य तदनर्पणबुद्ध्या कृतैः कर्मभिः फलमैहिकामुष्मिकं न स्यादिति भावः ॥ १० ॥ ❋ ❋ ननु अतत्त्वजिज्ञासोरित्युक्तं किं तत्तत्त्वं येन तदज्ञस्य कर्मभिः पुरुषार्थो न स्यादिति तत्राह वदंतीति । अद्वयमसमाधिकं ज्ञानं ज्ञानस्वरूपं देशकालादिषु बृंहितत्वात्सर्वांतर्यामित्वादैश्वर्यादिगुणवत्त्वात् ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ ❋ ❋ 'सत्तामात्रं तु यत्किंचित्सदसच्चाविशेषणम् । उभाभ्यां भाष्यते साक्षाद्भगवान् केवलः स्मृतः ॥' यच्च सत्तामात्रं केवलानंददेहमत एव यत्किंचिल्लोकविलक्षणं तत्तत्त्वं वदंतीति त्रिकालेप्यनन्यथाभूतमेकविधं ब्रुवते, न ब्रह्मणो ज्ञानस्वरूपत्वं युक्तिमल्लोके ज्ञानस्य विषयापेक्षयोत्पत्तिविनाशधर्मदर्शनादस्यापि तथात्वेनानित्यत्वप्रसंगादिति तत्राह सदसदिति । सत्कार्यमसत्कारणं च अविशेषणं न स्वनियतविशेषापादकं यस्येति शेषः, विषयापेक्षया अनुत्पाद्यमिति उभाभ्यां सदसद्भ्यां भाष्यते मृत्स्रष्टृघटस्रष्टृमृज्ज्ञातृघटज्ञात्रित्याद्यनंतकार्यकारणविशिष्टतया व्यवह्रियते । अतो भगवान् साक्षात्केवलः प्रकृतिसंबंधविधुरः स्मृतः । यद्विषयज्ञानं भक्तियोगं जनयेत् तत् ब्रह्म किं प्रमाणगोचरः उताऽगोचरः ? गोचरश्चेद्घटादिवदब्रह्मत्वमगोचरश्चेन्नास्त्येवेत्याशंक्योभयदोषपरिहारायाह वदंतीति । न वयं प्रमाणैरनुमिमीमहे, न चैतावता नास्ति किं तर्हि यद्ज्ञानमद्वयं ज्ञातृज्ञेयलक्षणरहितं तत्त्वविदस्तत्तत्त्वं जगदाकारेण विवर्तत इति वदंति तदेव वेदांतिभिर्ब्रह्मेति परमात्मेति भगवानिति शब्द्यते, तत्रायं विभागः बृहत्त्वात् ब्रह्मेति वेदांतिनः, परं केवलमादानादिकर्तृत्वादात्मेति योगिनः, षड्गुणयुक्तत्वाद् भगवानिति पौराणिकाः, तत्रापि किं तत्सत्यमिति तत्राह सत्तेति । तस्मादत्र सगुणं प्रमाणवेद्यं न निर्गुणमिति शास्त्रमथितार्थ इति केचिद्व्याचक्षते तदसारम् , अत्रैव पूर्वापरवाक्यार्थपर्यालोचनया स्वविरोधात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

तत्र यदन्ये मन्यन्ते धर्म्मस्यार्थः फलं तस्य कामः तस्य चेन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्म्मादिपरम्परेति तच्चान्यथैवेत्याह द्वाभ्याम् । धर्म्मस्येति । आपवर्ग्यस्य यथावर्णविधानमपवर्गश्च भवति योऽसौ भगवति सर्व्वात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिबन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्ग इति पञ्चमस्कन्धगद्यानुसारेण अपवर्गो भक्तिः । तथा च स्कान्दे रेवाखण्डे "निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्द्दन । मुक्ता एव हि भक्तास्ते तव विष्णो यतो हरे" इति । तत उत्करीत्या भक्तिसम्पादकस्येत्यर्थः ॥ ९ ॥ ❋ ❋ तदेवं तच्च ज्ञानं यस्या भक्तेरवान्तरफलमुक्तं सैव परमं फलमिति भावः ॥ १० ॥ ❋ ❋ वदन्तीति तैर्व्याख्यातम् । तत्र विगीतवचना इत्यत्र परस्परमिति शेषः । तत्त्वस्य नामान्तरैरभिधानादिति धर्मिणि सर्व्वेषामभ्रमात् धर्म्मे एव तु भ्रमादिति । यद्वा किं तत्त्वमित्यपेक्षायामाह वदन्तीति । ज्ञानं चिदेकरूपम् । अद्वयत्वं चास्य स्वयंसिद्धतादृशातादृशत्वान्तराभावात् स्वशक्त्येकसहायत्वात् परमाश्रयं तं विना तासामसिद्धत्वाच्च । तत्त्वमिति परमपुरुषार्थताद्योतनया परमसुखरूपत्वं तस्य ज्ञानस्य बोध्यते । अत एव तस्य नित्यत्वञ्च दर्शितम् । अद्वयमिति तस्याखण्डत्वं निर्दिश्यान्यस्य तदनन्यत्वविवक्षया तच्छक्तित्वमेवाङ्गीकरोति । अत्र श्रीमद्भागवताख्य एव शास्त्रे कचिदन्यत्रापि तदेकं तत्त्वं त्रिधा शब्द्यते, कचिद् ब्रह्मेति कचित् परमात्मेति कचिद् भगवानिति च । किन्त्वत्र श्रीव्याससमाधिलब्धाद्भेदात् जीव इति च शब्द्यते इति नोक्तमिति ज्ञेयम् । तत्र ब्रह्मभगवतोर्व्याख्यातयोः परमात्मा स्वयमेव व्याख्यातो भवतीति प्रथमतस्तावेव प्रस्तूयेते । मूलानुक्रमाद्वैशिष्ट्यद्योतनाय

तथा विन्यासः । अयमर्थः—तदेकमेवाखण्डानन्दस्वरूपं तत्त्वं थूत्कृतपारमेष्ठ्यादिकानन्दसमुदायानां परमहंसानां साधनवशात् तत्तादात्म्यमापन्ने सत्यपि तदीयस्वरूपशक्तिवैचित्र्यांशग्रहणासमर्थे चेतसि यथा सामान्यतो लक्षितं तथैव स्फुरदविविक्तशक्ति-शक्तिमत्त्वभेदतया प्रतिपाद्यमानं ब्रह्मेति शब्द्यते । अथ तदेव तत्त्वं स्वरूपभूतयैव शक्त्या कमपि विशेषं धर्त्तुं परासामपि शक्तीनां मूलाश्रयरूपं तदनुभवानन्दसन्दोहान्तर्भावितताद‍ृशब्रह्मानन्दानां भागवतपरमहंसानां तथानुभवैकसाधकतमतदीयस्वरूपानन्द-शक्तिविशेषात्मकभक्तिभावितेष्वन्तर्बहिरपीन्द्रियेषु परिस्फुरद्‍विविक्तताद‍ृशशक्तिशक्तिमत्त्वभेदेन प्रतिपाद्यमानं भगवानिति शब्द्यते इति । परमात्मा सुतरां व्याख्यातः । तत्र शक्तिवर्गलक्षणतद्धर्म्मातिरिक्तं केवलं ज्ञानं ब्रह्मेति शब्द्यते । अन्तर्यामित्वमयमाया-शक्तिप्रचुरचिच्छक्त्यंशविशिष्टं परमात्मेति, परिपूर्णसर्व्वशक्तिविशिष्टं भगवानिति । एवमेवोक्तं श्रीजडभरतेन "ज्ञानं विशुद्धं परमात्ममेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् । प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ती"ति । "तस्मै नमो भगवते ब्रह्मणे परमात्मने" इत्यत्र वरुणकृतस्तुतौ टीका च परमात्मने सर्व्वजीवनियन्त्रे इत्येषा । ध्रुवं प्रति श्रीमनुना च "त्वं प्रत्यगात्मनि तदा भगवत्यनन्ते आनन्दमात्र उपपन्नसमस्तशक्ताव"ति । अत्रानन्दमात्रं विशेष्यं समस्ताः शक्तयो विशेषणानि, विशिष्टो भगवा-नित्यायातम् । भगवच्छब्दार्थश्च श्रीविष्णुपुराणे प्रोक्तः "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणा-दिभिरि"ति ॥ ११ ॥ ❀ ❀ तच्च त्रिधाविर्भावयुक्तमेव तत्त्वं भक्त्यैव साक्षादपि क्रियत इत्याह तदिति । भक्त्या तत्कथादिरुचेरेव परावस्थारूपया प्रेमलक्षणया । तत् पूर्व्वोक्तं तत्त्वं आत्मनि शुद्धे चेतसि पश्यन्ति च । कीदृशं तत् आत्मानं स्वरूपाख्यजीवाख्य-मायाख्यशक्तीनामाश्रयम् । ज्ञानवैराग्ययुक्तया स्वात्मजाभ्यां ताभ्यां सेवितया । अत एव ते पृथक् च विशिष्टं च स्वेच्छया पश्यन्तीत्यायाति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चात्र लोके चतुर्विधा जनाः कर्म्मिणो ज्ञानिनो योगिनो भक्ताश्च । तत्र "धर्म्मादर्थश्च कामश्च स किमर्थं न सेव्यते" इति दृष्ट्या धर्म्मस्य अर्थः फलं अर्थस्य कामः कामस्य इन्द्रियप्रीतिः इन्द्रियप्रीतौ च सत्यां तदर्थं पुनरपि धर्म्मादिपरम्परा यथा कर्म्मिणां न तथा उत्तरेषां त्रयाणामित्याह—धर्म्मस्य शमदमादेर्यमनियमादेः श्रवणकीर्त्तनादेश्च अर्थः सर्व्वथा भवन्नपि अर्थाय फलत्वाय न कल्पते, तमनुसन्धाय तत्तदप्रवृत्तेः । यतः आपवर्ग्यस्य अपवर्गप्रयोजनकस्य । तदस्य प्रयोजनमित्यर्थे स्वर्गादिभ्यो य इति स्वार्थिकाणन्तात् यप्रत्ययः । तेन अपवर्ग एव अनुसंहितं फलमिति भावः । ज्ञानियोगिनोर्मते अपवर्गो मोक्षः । भक्तमते प्रेमभक्तिः । यथावर्णविधानमपवर्गश्च भवति "योऽसौ भगवति वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्या-ग्रन्थिबन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्ग" इति पञ्चमस्कन्धात् येनापवर्गाख्यमदभ्रबुद्धिरित्यादौ खगेन्द्रध्वजपादमूलमिति प्रथमस्कन्धाच्च । "निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्द्दन । मुक्ता एव हि भक्तास्ते तव विष्णो यतो हरे" इति स्कान्दरेवाखण्डाच्च । तथा अर्थस्य कामो लाभाय फलत्वाय न यतो धर्म्मैकान्तस्य धर्म्म एव अनुसंहितं फलमिति भावः । तथा ज्ञानियोगिनोः शमदमादियमनियमाद्यनुकूले कस्मिंश्चन धर्म्मविशेषे अर्थस्य विनियोगः । भक्तस्य तु भगवतो भागवतानां वा सेवायां स स्पष्ट एव ॥ ९ ॥ ❀ ❀ कामस्य विषयभोगस्य इन्द्रियप्रीतिर्लाभः फलं न भवति, किन्तु यावता जीवेत तावानेव जीवनपर्य्याप्तः कामः सेव्यत इत्यर्थः । अत्र ज्ञानिनां योगिनां वार्थकामेन्द्रिय-प्रीतयो ज्ञानयोगयोरानुषङ्गिकफलानि कर्म्मफलत्वेनैव व्यपदिश्यन्ते । ज्ञानयोगयोस्तयोर्निष्कामकर्म्मपरिणामत्वादतो ज्ञानिनां योगिनाञ्च दृष्टे सुखदुःखे कर्म्मफले एवोच्येते । भक्तानां त्वर्थकामेन्द्रियप्रीतयो भक्तेरेवानुषङ्गिकफलानि । भक्तेः कर्म्मपरिणामत्वा-भावात् न तेषां कर्म्मफलत्वव्यपदेशः । अतो भक्तानां दृष्टं सुखं भक्तिफलमेव । दुःखन्तु "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥" इत्यादिभगवद्वचनात् भगवदुत्थं भक्त्यपराधफलञ्चेति यथायोग्यं विवेचनीयम् । जीवस्य जीवनस्य तत्त्वजिज्ञासा फलं कर्म्मभिः पुनरप्यनुष्ठितैर्य इह प्रसिद्धः स्वर्गादिः स नैव ॥ १० ॥ ❀ ❀ तत्त्वमेव किं तत्राह वदन्तीति । यदद्वयं ज्ञानं तत् तत्त्वम् । ज्ञानमेव किं तत्राह ब्रह्मेति । शब्द्यते ब्रह्मेति पदेन यदुच्यते ज्ञानिभिस्तद् ज्ञानम् । तन्मते ज्ञानं निराकारं ज्ञातृज्ञेयादिविभागशून्यं चित्सामान्यं चिद्विशेषाणां भगवद्धामादीनां तदनन्यत्वमननात् । जीवमाययोस्तच्छक्तित्वेन तदैक्यादिदङ्कारास्पदस्य कार्यस्य विश्वस्य कारणमात्रात्मकत्वादद्वैतम् तथा परमात्मेति योगिभिर्यदुच्यते तज् ज्ञानम् । एतन्मते परमात्मनश्चिदेकरूपत्वाज्ज्ञानमात्रत्वं ज्ञानमात्रत्वेऽपि साक्षित्वादेर्ज्ञानविशेषस्याश्रयत्वमपि । द्युमणिदीपादे-र्ज्योतीरूपत्वेऽपि ज्योतिष्मत्त्वमिव नानुपपन्नम् "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तमि"त्यादेः साकारत्वञ्च मायायाः शक्तित्वान्मायिकानाञ्च तदन्यत्वाज्जीवस्य तद्विभिन्नांशत्वात् ततो द्वितीयत्वाभावादद्वयत्वम् । तथा भगवानिति भक्तैर्य-दुच्यते तज्ज्ञानम् । एतन्मते पूर्व्ववज्ज्ञानमात्रत्वेऽपि भगशब्दवाच्यषडैश्वर्यस्यापि अप्राकृतत्वेन चिन्मात्रत्वात् तद्रूपत्वम् । यदुक्तं विष्णुपुराणे—"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजां-स्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरि"ति । तथैव द्विभुजत्वचतुर्भुजत्वादिविविधचिद्घनाकारैर्बहिरन्तर्वर्त्तित्वेऽपि

"न च्यवन्ते च यद्भक्ता महत्यां प्रलयापदी"ति स्कान्दादिवाक्यैः सदैव सेव्यसेवकसेवादिविभागेऽपि अद्वयत्वं पूर्ववत्तच्छक्तीनां चिदादीनां तद्विलासानां च वैकुण्ठादीनां तदभिन्नत्वमननात् ततो भिन्नत्वभावनैवाद्वयपदेन व्यावृत्ता। एवञ्च भगवतः सामान्यस्वरूपमात्रस्योपोदयत्वे ज्ञानिन्यधिकारिणि ब्रह्मेति अन्तर्यामित्वादिद्वित्रधर्म्मवत्त्वस्योपादाने योगिन्यधिकारिणि परमात्मेति। अचिन्त्यानन्तचिदानन्दमयस्वरूपरूपगुणलीलाद्यनेकधर्म्मवत्त्वस्य ग्रहणयोग्यतायां भक्तेऽधिकारिणि भगवानिति स एवैको भाति। "किञ्च यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनमि"ति। 'कृष्णाय परमात्मने' इति। 'मदीयं महिमानञ्च परं ब्रह्मेति शब्दितमि'ति। 'ब्रह्मणो हि प्रतिष्ठाहमि'ति 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि'त्यादिवचनेभ्यस्तथा भगवदुपासकानां मोक्षप्राप्तेरपि दर्शनात् ब्रह्मपरमात्मोपासकानाञ्च प्रेमप्राप्त्यदर्शनाद् भगवत एव ब्रह्मत्वपरमात्मत्वे इत्यतो भगवत्त्वमेव मूलमिति द्रष्टव्यम्। अत्र ब्रह्मोपासकेभ्यो ज्ञानिभ्यः सकाशात् परमात्मोपासको योगी श्रेष्ठः। तेभ्यो योगिभ्योऽपि भगवदुपासकः श्रेष्ठ इति तारतम्यं गीतासु दृष्टम्। यथा "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोधिकः। कर्म्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्ज्जुन॥ योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो माम् स मे युक्ततमो मत" इति। योगिनामिति पञ्चम्यर्थे षष्ठी श्रीरामानुजाचार्यचरणैर्व्याख्यातेति॥ ११॥ ❀ ❀ तत्प्राप्तिसाधनमाह। तज्ज्ञानं त्रिरूपं मुनयो मननशीला ज्ञानिनो योगिनो भक्ताश्च भक्त्या पश्यन्ति। तत्र ब्रह्मेति मते आत्मनि च तत्पदार्थे ईश्वरे आत्मानं त्वम्पदार्थं जीवं पश्यन्त्यनुभवन्ति। परमात्मेति मते आत्मन्यन्तर्हृदये आत्मानमन्तर्यामिणं पश्यन्ति ध्यानेनालोकयन्ति। भगवानिति मते आत्मनि मनसि चकाराद्बहिश्च स्फुरन्तम् आत्मानं भगवन्तं पश्यन्ति स्वलोचनाभ्यामेव तन्माधुर्यमास्वादयन्ति। भक्त्येति। आदौ गुरुमुखाच्छ्रुता पश्चाद्गृहीता तया भगवद्विषयिण्यैव, श्रवणकीर्त्तनादौ भक्तिशब्दस्य रूढेर्ब्रह्मोपासकैः परमात्मोपासकैश्च स्वस्वसाध्यसिद्ध्यर्थं भगवति भक्तिः कर्त्तव्यैव। ज्ञानवैराग्ययुक्तयेति ज्ञानवैराग्ये पृथगेव तेषामुभयेषां साधने ज्ञेये। भक्तमते भक्त्युत्थे एव ते भक्तेः प्रेमत्वव्यञ्जके ज्ञेये। "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे"ति। शुद्धभक्तानां पृथक्तयोर्निषेधात्। अथवा तच्च त्रिरूपं ज्ञानं भक्तास्तु भक्त्यैवानुभवितुं शक्नुवन्तीत्याह। तच्छ्रद्दधानाः केचित् तत्त्रिरूपमप्यनुभवितुं साभिलाषा भवन्तीत्यर्थः। तदा भक्त्यैव पश्यन्ति। तेन ब्रह्मपरमात्मनोः साधने ज्ञानयोगौ भक्त्यैव सिद्धौ स्यातामिति भावः॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेव कर्मज्ञानवैराग्यभक्तिभेदाद्बहुविध उपाय इत्युक्तम्, इदानीं तु जीवनफलं धर्मस्तत्फलमर्थस्तत्फलं कामस्तत्फलमिंद्रियप्रीतिः पुनर्जीवनं पुनस्तत्फलं धर्म इत्येवं चक्रवत्पौनःपुन्यं केचिन्मन्यंते तन्निराकरोति धर्मस्येति द्वाभ्याम्। आपवर्ग्यस्योक्तरीत्यापवर्गसाधनस्य धर्मस्य अर्थः भोग्यपदार्थः स्वर्गादिः अर्थाय फलत्वाय न कल्पते योग्यो न भवति। धर्मकांतस्य नियमेन धर्मसाधनस्य अर्थस्य कामः भोगः लाभाय फलत्वाय न हि स्मृतः॥ ९॥ ❀ ❀ कामस्येंद्रियप्रीतिः लाभः फलं न, किन्तु यावता कामेन जीवेत तावतः कामस्य लाभः जीवनं फलमित्यर्थः। जीवस्य जीवनस्य यः कर्मभिः साध्यः स नार्थः फलं न भवति। जीवनस्य धर्मद्वारा स्वर्गादिः फलं न भवतीति यावत्, किंतु तत्त्वजिज्ञासा फलं भवति। तत्त्वजिज्ञासाशब्दस्य लक्षणया तत्त्वविचारे वृत्तिः॥१०॥ ❀ ❀ जीवनस्य फलं तत्त्वविचार एवेत्युक्तम्। इदानीं तत्त्वमपि चिंत्यते तत्र तावत्केचिदाहुरात्मा जड इति। अन्ये त्वाहुः क्षणिकः, अपरे कर्मांगमात्मानमाहुः। केचिदाहुः परमात्मा नास्ति, नानात्मानः स्वतंत्राः संतीति। केचित्प्रकृतिविकृतिभिन्नं पुष्करपलाशवदसंगं निर्धर्मकं पुरुषं वदंति ते सर्वे वेदबाह्याः। स्वकपोलकल्पिततत्त्ववादिनः। श्रेयस्कामैर्मुमुक्षुभिर्दूरतो हेया इत्याह वदंतीति। अत्रैकैकस्य विशेषणस्य परपक्षनिराकरणत्वादितिशब्दावृत्तिः, यत्र स नास्ति तत्रापि योज्यः। तत्त्वविदस्तु यच्छब्द्यते शब्दैरनादिसिद्धैर्वेदैर्यदभिधीयते तत्तत्त्वं वदंति। "सर्वे वेदा यत्पदमामनंति, तं त्वौपनिषदं पुरुषं पृच्छामी"ति श्रुतेः। "वेदैश्च सर्वैरहमेव वेद्य" इति स्मृतेः 'शास्त्रयोनित्वात्॥ १।१।३॥' इति सूत्राच्च। कथंभूतं वदंति ज्ञानम्? ज्ञातृत्ववत्त्वे सति ज्ञानस्वरूपमिति वदंति न तु जडम् अद्वयम्, क्षणिकविज्ञानप्रवाहविपरीतमेकमनादिसिद्धज्ञानरूपमिति ब्रह्मेति बृहद्वस्तुभूतं वदंति, न तु जीवकर्तृककर्मांगम्। परमात्मेति सर्वेभ्यो जीवेभ्यो हि उत्कृष्टं वदंति। भगवानिति षाड्गुण्यसिंधुं वदंति न पुनर्निर्धर्मकम्॥ ११॥ ❀ ❀ तद्वेदैकसमधिगम्यं तत्त्वं ज्ञानवैराग्ययुक्तया भक्त्यैव साक्षात्क्रियत इत्याह। तच्छ्रद्दधाना इति॥ १२॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

ननु कामितं फलं पुरुषार्थः, तत्साधकस्य कथं न धर्मत्वम्? तत्राह धर्मस्येति। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि"ति कोशात् अर्थशब्दस्य पंचार्थाः। तत्र शब्दप्रकरणाभावान्नाभिधेयत्वम्, उपपदस्याभावान्न निवृत्तित्वं, ततो रैवस्तुप्रयोजनान्यवशिष्यन्ते, तत्र धनपशुपुत्रादयो रैरूपाः, ते धर्मकार्या न भवन्ति। धर्मो हि चोदनालक्षणः, तत्र लौकिकत्वेन विधिस्पर्शाभावान्न धर्मत्वम् अन्यथा भेषजपानादेरपि धर्मत्वं स्यात् तथा प्रतिग्रहस्य अपूर्वांशस्तु नास्त्येव। किंच एते हि वस्तुतोऽनर्थाः, आत्मनाशकत्वात्। तथा च यथा श्येनादयो न धर्माः, तथा धनार्था अपि साधनधर्माः ये पुनर्द्धर्माः ते न धनादिसाधका इत्यर्थः। तथा न परमार्थाय स्यादित्याह आपवर्ग्यस्येति। अपवर्गसम्बन्धिनः अपवर्गपर्यन्तं वा क्रियमाणस्य। ननु धर्मार्थकाममोक्षाश्चत्वारः पदार्थाः पूर्वपूर्व-

साधनरूपाः, तथा च धर्मः कथं नार्थाय तत्राह नार्थस्येति । अदृष्टाद् दृष्टं हि बलवत् अर्थेन हि धर्मो दृश्यते न हि धर्मेणार्थः । धर्म एव एकः अन्तः पर्यवसितं कार्यं यस्येति । तथा च येन केनाप्युपायेन अर्थं संपाद्य धर्मः कर्त्तव्यः, ननु धर्मेणार्थसंपादनं, ननु तर्हि अर्थः सर्वसाधकोऽस्तु, कामस्यापि तत्कार्यत्वेन दर्शनात् । तत्राह कामो लाभायेति कामो विषयसुखमिन्द्रियविषयाधानं हि तत् तत्र विषयांशेनार्थोपयोगः रूपादीनामेव विषयत्वात् न च विषयादिरूपादिसंपादकः, सिद्धानि रूपाणि अन्यस्य भवन्तीति यद्विपरीतमायातम् अर्थे प्राप्ते रूपादि गच्छति गते चार्थे रूपादिप्राप्तिरिति परावृत्तावपि साध्यसाधनता चेत्तत्रापि वैपरीत्यमुक्तं, तथा च वस्तुव्यत्यासे च तत् अर्थेनार्थे च न कामः । न च विषया एव अर्थरूपाः कामसाधका इति वाच्यम् , लोकप्रसिद्ध्यभावात् अर्थसाधकस्यापि धर्मत्वापत्तेश्च । लोके साहचर्यमात्रेण साधकत्वप्रतीतिः कदर्यस्यार्थवतोऽपि कामाभावाच्च पश्वादीनामर्थाभाववतामपि कामदर्शनाच्च । तथा मस्करिणः, तथा च "आत्मकामाप्तकाम" इति श्रुतेः, तथा च कचित् कचित् साहचर्यदर्शनेन न साधनभाव इति हिशब्दार्थः ॥९॥ ❀ ❀ किं च तुष्यतु दुर्जन इति न्यायेन अर्थेन कामः साध्यतां, स कियान् कामः कीदृशश्च ? जीवनमात्रपर्यवसितश्चेत् स च आब्रह्मतृणस्तंबपर्यन्तं स्वतः सिद्धो नार्थसाध्यः अर्थेन्द्रियप्रीतिरूपः, अनलत्वात् तस्य न पूर्त्तिरस्ति "न जातु कामः कामानामि"ति वचनात् अनुभवाच्च, प्रवृत्तिस्तु भ्रान्त्या । तथा च कामो विषयभोगः इंद्रियप्रीतिहेतुर्न भवति । लाभपदं देहलीप्रदीपन्यायेनोभयत्र संबध्यते, तस्मात् क्रमः साधनपरम्परारूपः कामे न जीवनमर्थरूपं जीवने धर्मः ज्ञानं च तेन च मोक्ष इत्यभिप्रायेणाह जीवस्य तत्त्वजिज्ञासेति । जीवस्य जीवनस्य तत्त्वजिज्ञासा तत्त्वविचारः इच्छापूरकज्ञानसाधकः जीवस्य तत्त्वजिज्ञासालाभ इति पूर्वेण सम्बन्धः । कर्मभिः साध्यः यः कामो वा अर्थो वा धर्मस्तु न केवलं कर्मसाध्यः किन्तु श्रुतिबोधितकर्मसाध्यः । तत्रापि इह कर्मभिः साध्यो न पुरुषार्थः संसारविषयकः यो वा दैवगत्या प्राप्तः सोपि न भवतीति चकारार्थः ॥ १० ॥ ❀ ❀ तत्त्वजिज्ञासेत्यत्र संदेहः तत्त्वानां जिज्ञासा तत्त्वस्य वेति । तत्त्वपदेऽपि संदेहः तस्य भावास्तत्त्वमनारोपितं रूपं वा । तस्य भाव इति पक्षे पूर्वोक्तस्याभावात् न किंचित्तत्त्वं स्यात् , समुदायपक्षे अभ्रांतज्ञानाविषयत्वेन सर्वमेव तत्त्वं स्यात् । तत्त्वानां जिज्ञासेति सांख्यपरिकल्पितानां मध्ये एकस्यापि जिज्ञासा कठिना । तत्त्वस्य जिज्ञासेति तु न सर्वेषामेकतत्त्वमस्ति शास्त्राणामन्योन्यविरोधात् , तस्मात्कथं तत्त्वजिज्ञासेत्याशंक्याह वदंति तत्तत्त्वविद इति । यद्यपि सर्वे स्वस्वशास्त्रे तत्त्वविद इति प्रसिद्धाः, तथापि प्रमाणबलविचारेण वेदानां सर्वोपजीवकत्वात् वेदार्थविदस्तत्त्वविद इति मंतव्यम् । ननु सर्वेऽपि वेदार्थविदः ऋषित्वात् , सत्यं, तथाप्यन्योन्यविरोधात् केचनैव तत्त्वविद इति वक्तव्यं, तत्र येष्वक्षरमात्रेऽपि वेदे न विरोधः ते तत्त्वविद इति मंतव्यं, न च ते न संत्येवेति मंतव्यं, वेदस्य प्रमाणस्य विद्यमानत्वात् । ते किंवदंतीत्यत आह यत् तद्विषयं ज्ञानमिति द्वैतनिवर्त्तकं ज्ञानं तत्त्वमित्यर्थः । तत्त्वज्ञाने मोक्ष इति सर्वजनीनत्वात् । श्रुतिस्मृतिपुराणेषु तस्यैव नामभेद इत्याह क्रमेण 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति शब्दमात्रं भिद्यते न त्वर्थभेदोऽस्तीत्यर्थः ॥ ११ ॥ ❀ ❀ तदेवं तत्त्वपर्यंतं पदार्थानां स्वरूपं क्रमं चोक्त्वा फलितमाह तच्छ्रद्दधाना इति तत्तस्माद्धेतोः तद्ब्रह्म वा तत्रैवं क्रमः जीवस्य तत्त्वजिज्ञासाफलमुक्तं तच्च साक्षात्कारपर्यवसितं, तत्र विचारसहितप्रमाणेन यद्यपि निर्विचिकित्सं शाब्दज्ञानं भवति, तथाप्यंतःकरणदोषात् न साक्षात्कारः सिध्यति, तदर्थं प्रथमं धर्मः ततोऽतःकरणशुद्धौ वेदादिसत्प्रमाणे श्रद्धा ततस्तदर्थस्य मननं ततो निदिध्यासनेन साक्षात्कार इव ज्ञानं ततो विषयेषु वैराग्यं ततः श्रवणादिसाधनभक्तिः ततः परमभक्तिः ततः सर्वत्र भगवत्साक्षात्कारः हृदि बहिरपीत्यर्थः । आत्मानं तं भगवंतमात्मरूपं तत्र यावत्साधनं साध्यस्थितिः । तत्र ज्ञानवैराग्ययोः सहभावनिरूपणात् भक्तिर्मुख्या, तस्याः स्थितिहेतुमाह श्रुतिगृहीतेति । श्रुत्या गृहीता भवति यथा यथा श्रवणं तथा तथा भक्तिस्थितिः ततः सर्वमिति ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

धर्मस्येत्यत्र । ननु भवतु सामान्यधर्मस्य तथात्वम् , तस्य 'दतो धावती'त्यादिवदफलसंस्कारत्वेन स्वतःफलवत्त्वाभावात् , मुख्यकर्माभावे केवलस्य तस्याप्रयोजकत्वाच्च, परन्तु फलसाधकत्वेन विहितस्य काम्यस्य कथं न धर्मत्वमित्याकाङ्क्षायां तस्य तथात्वमुपपादयन्ति पुत्रादीत्यादि । फलस्येत्यादि । तस्मिन् पुत्रादिरूपेण फलत्वाभिमानस्याविद्याकार्यत्वेन तस्य तथात्वादित्यर्थः । तथा चानर्थसाधकत्वेनार्थत्वाभावान्न धर्म इति भावः । तत्स्वरूपं किमित्याकाङ्क्षायां तत्परिच्छिन्दन्ति किन्त्वित्यादि । भित्त्यादिकृतिवदिति । यथा कामनाविशेषरूपे निमित्ते भित्त्यादिकरणेन स्वसम्बन्धो नियम्यते, तथा तादृशधर्मेणापि कामनाविशेषरूपे निमित्ते स्वस्य सम्बन्धो नियम्यत इति तथेत्यर्थः । 'काम्ये नैमित्तिकत्वम् , नैमित्तिके विकारः स्या'दिति सूत्रात् सिद्धम् । ननु यथा 'यस्याहिताग्नेरग्निर्गृहान् दहेत् , सोग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपे'दित्यादौ नैमित्तिकस्यापि निर्वापस्य धर्मत्वम् , एवं 'चित्रया यजेत पशुकामः' 'दैविकया निर्वपेत् प्रजाकाम' इत्यादावपि चोदनारूपस्य धर्मलक्षणस्य सत्त्वात् कथं न धर्मत्वमित्यत आहुः तत्रेत्यादि । ननु तत्र 'देवांश्च याभिर्यजत' इतिवद्यदुपबन्धाद्यभावात् कथमनुवादत्वनिश्चय इत्यत आहुः चित्तेत्यादि । 'क्षुत आचामे'दित्यादिना शुद्धिविधायकशास्त्रेण, 'शुद्धः कर्माचरे'दित्यादिना च शुद्धेरङ्गत्वावगमात् तस्या बाह्याया इवान्तर्याया अप्यावश्यकत्वात् तदभावेनाधिकाराभावात् 'यदेव विद्यया करोति तत्तदेवास्य वीर्यवत्तरं भवति' 'विदुषः कर्मसिद्धिः स्यात्तथा

नाविदुषो भवे'दित्यादिभिश्च ज्ञानस्याप्यङ्गतया वाक्यतात्पर्यज्ञानस्याप्यावश्यकत्वात्, तदभावेनान्यथाकरणे देवताधिष्ठानाभावात् क्रियाया लौकिकत्वम्। तथा च शुष्केष्टिवदनुकरणरूपत्वात् यजतिवैयर्थ्यमित्यर्थः। हेत्वन्तरमाहुः फलमित्यादि। तथा च यथा 'देवांश्चे'त्यत्र वाक्यान्तरसिद्धानुवादकत्वम्, तथा तेषु लोकसिद्धानुवादकत्वमिति यजतिवैयर्थ्यमित्यर्थः। ननु कामितमित्यादि। 'चोदनालक्षणोर्थो धर्म' इति सूत्रस्य 'वेदेन प्रयोजनमुद्दिश्य विधीयमानोर्थो धर्म' इत्यर्थकथनात् कामितमित्यकथनात् कामितस्यैव प्रयोजनत्वात् तत्साधकस्य कथं न धर्मत्वमित्यर्थः। ननु वाक्येषु तत्तत्फलोद्देशेनैव तस्य तस्य यागादेर्विधानदर्शनात् कथं विधिस्पर्शाभावोवगन्तुं शक्य इत्यत आहुः अन्यथेत्यादि। लौकिकेपि विधिस्पर्शो यद्यभ्युपेयते, तदा तथा स्यात्, अतस्तत्र तृतीयाबोधितकरणत्वेन फलसिद्धिः, न तु धर्मत्वमपि तत्र प्रयोजकम्, अतस्तदनुरोधेन लक्षणार्थस्तथा न शक्यवचन इत्यर्थः। ननु तया क्रियया अपूर्वजननात् कथं न तस्या धर्मत्वमित्यत आहुः अपूर्वेत्यादि। आरोग्यधनादिरूपदृष्टफललाभेनादृष्टस्यापूर्वस्य कल्पनमप्रयोजकम्, अतो नेत्यर्थः। ननु यागोत्तरं कालविलम्बेन फलजननात् मध्येऽपूर्वं क्रिययैवोत्पद्यत इत्यवश्यमङ्गीकर्तव्यम्, अन्यथा तदैव फलं स्यात्, नैव स्याद्वा। तत्राद्ये प्रत्यक्षविरोधः, अन्त्ये श्रुतौ दोषप्रसक्तिः, तदुत्पद्यत एवेति कथं न धर्मत्वमिति शङ्कायां तदुत्पत्तिमुपगम्य दूषणान्तरमाहुः, किञ्चैते हीत्यादि। एवं रैरूपस्यार्थस्य धर्मकार्यत्वं खण्डितम्। शेषं खण्डयन्ति तथा नेत्यादि। अपरत्वान्न परमार्थरूपाः। 'प्रकर्षेण युज्यते' इति 'युज्यतेऽनेने'ति वा प्रयोजनं तदुभयरूपत्वाभावान्न प्रयोजनरूपा इत्यर्थः। नन्वेवं सति काम्येष्टिपशुकाण्डस्य धर्मपरत्वहानिः, तथा च 'वेदोखिलो धर्ममूल'मित्यखिलविरोध इत्याशङ्कायां गौणधर्मत्वं तत्रोपगम्याहुः किञ्च धर्म इत्यादि। तथा चेयमत्र व्यवस्था, यदा लौकिकफलासक्त्या वेदस्य तत्परत्वं निश्चित्य काम्यं कर्म करोति, तदा तस्य श्येनादिवदनर्थत्वात् न धर्मत्वम्। यदा च भगवत्कृपादिना तस्यौषधरोचनवत् प्ररोचनयातिबहिर्मुखसांमुख्यार्थतां ज्ञात्वा लोकसंग्रहाय करोति, तदा गौणधर्मत्वमित्युभयथापि पुत्रादीनां लौकिकानां न धर्मफलत्वमिति सिद्धम्। एवं धर्मस्यार्थसाधकत्वं दूषितम्। अतः परमर्थस्य कामसाधकत्वं दूषयितुं धर्मसाधकत्वं च साधयितुमग्रिममवतारयन्ति नन्वित्यादि। पूर्वपूर्वसाधनरूपा इति। पूर्वं पूर्वं यथा स्यात्तथा साधनरूपा इत्यर्थः। 'धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते' इत्यादि 'कामाः फलभूताश्च धर्मार्थयो'रित्यादि चात्र साधकं ज्ञेयम्। अत्र कामस्य मोक्षसाधकत्वं 'प्रजापतिरमृतमानन्द इत्युपस्थ' इति दृष्टान्तद्वारा प्रतिभाति। एवं कार्यकारणभावं प्रत्यक्षविरोधाद् दूषयन्ति भक्त्यादित्यादि। दृश्यत इति। होमदानादिरूपो दृश्यते। तथा च यथा 'एष उ एव साधु कर्म कारयती'त्यादिश्रुत्युक्तमपि ईश्वरप्रवर्तकत्वमतं मीमांसकैर्नाद्रियते, तथा अपूर्वद्वारा धर्मोऽर्थसाधक इति मतं दृष्टविरोधान्मुमुक्षूणामप्यनादरणीयमित्यर्थः। तर्हीति। अर्थत्वेन धर्मत्वेन कार्यकारणभावव्यभिचारेपि कामत्वेनार्थत्वेन कार्यकारणभावस्याढ्येषु दर्शनात् धर्मत्वेनार्थत्वेन कार्यकारणभावस्य साधितत्वादव्यभिचाराच्चेत्यर्थः। इदं दूषयन्ति काम इत्यादि। विषयसुखमिति। 'इन्द्रियाणां स्वे स्वे विषये आनुकूल्येन प्रवृत्तिः काम' इति कामसूत्रे आनुकूल्यपदेन सुखस्य बोधनात् तदेव कामः। तथा चायमपि कार्यकारणभावः प्रत्यक्षविरुद्ध इत्यर्थः। ननु विषयकोटावर्थस्य निवेशात् विषयकारणतायाश्चाङ्गीकारात् कथं प्रत्यक्ष विरोध इत्यत आहुः तत्रेत्यादि। विषयांशेऽर्थस्य स्रक्चन्दनवनिताधनादिरूपस्य उपयोगोपि न, इति कुतस्तरां कारणतेत्यर्थः। ननु मास्त्वर्थस्य कामं प्रति साक्षात्कारणता, तथापि स्रक्चन्दनवसनादिभी रूपादीनामुत्कर्षः सम्पाद्यते इत्युत्कर्ष प्रयोजकतया कारणत्वं केन वार्यतामित्यत आहुः न चेत्यादि। अर्थ इति शेषः। कुतो नेत्यत आहुः सिद्धानीत्यादि। अर्थस्य किं स्वनिष्ठरूपादिसम्पादनेन कामजनकत्वम्, उतार्थान्तरनिष्ठतत्सम्पादनेनेति विचारणीयम्। तत्राद्यं प्रत्यक्षविरुद्धम्, स्रगादेः स्वगुणोत्कर्षसंपादकत्वादर्शनात्। द्वितीयं चेत्, तत्रापि विचारणीयम्, किं भोक्तृनिष्ठतत्सम्पादनेन, उत भोग्यनिष्ठतत्संपादनेन। तत्राद्ये त्वर्थे प्राप्ते रूपादिकं गच्छति। युद्धप्रतिग्रहादिनार्थप्राप्तौ तथा दर्शनात्। अर्थस्य विषयनाशकत्वेन कामनाशकत्वम्। द्वितीये तु स्वीयोर्थो भोग्याधीनो भवतीति स्वतो गतेर्थे रूपादिविषयप्राप्तिरित्यर्थनाशनद्वारा विषयस्यैव कामजनकत्वम्, न त्वर्थस्य विषयोत्कर्षजननद्वारेत्युभयथा वैपरीत्यमायातमित्यर्थः। ननु द्वितीये स्वीयार्थस्य भोग्याधीनतया गमनेपि तेन भोग्यरूपकस्त्र्यादेरर्थस्य स्वाधीनतासंपादनात्तेन स्त्र्यादिना चोत्कृष्टविषयसुखसिद्धेरर्थस्य कामजनकत्वं सिद्धमिति चेत्, तत्राहुः परावृत्तावित्यादि। साध्यसाधनतेति। कामसाधनता। तथा चार्थस्यार्थान्तरसाधकतया कामजनकतया कामजनकत्वं यद्युपेयते, तदापि स्त्रिया पुत्ररूपार्थप्राप्तौ स्त्रीरूपनाशदर्शनात् विषयनाशनद्वारा कामनाशकत्वरूपं पूर्वोक्तमेव वैपरीत्यमापततित्यर्थः। सिद्धमाहुः तथा चेत्यादि। अर्थरूपा इति। अर्थ्यते अभीप्स्यते इत्यर्थ इति योगेनार्थरूपा इत्यर्थः। लोकेत्यादि। 'रूढिर्योगमपहरती'ति न्यायात्तथेत्यर्थः। अर्थेत्यादि। एवं प्रयोजकत्वेनार्थस्य कामजनकत्वाङ्गीकारेऽर्थस्य धर्मजनकत्वदर्शनादर्थसाधकस्य करदण्डचौर्यादेरपि धर्मजनकत्वापत्तेरित्यर्थः। तर्हि लोके कथं साधनत्वप्रत्यय इत्यत आहुः लोक इत्यादि। तर्हि प्रसिद्धेः सार्वजनीनत्वात्तादृशप्रतीतेः भ्रान्तत्वं कथं वक्तुं शक्यमित्यत आहुः कदर्यस्येत्यादि। ननु कदर्यत्वस्य प्रतिबन्धकत्वात् नान्वयव्यभिचार इत्यत आहुः पश्वादीनामित्यादि। ननु तृणारणिमणिन्यायेन पशुत्वस्यापि व्यक्तिविशेषं प्रति कारणत्वे व्यतिरेकव्यभिचारोपि नेत्यत आहुः तथेत्यादि। तथा चान्वयव्यतिरेकव्यभिचारदर्शनात् प्रसिद्धिर्देहात्मप्रसिद्धिवद् भ्रान्तेत्यर्थः। तथा चेत्यादि। घटादिरूपा पृथिवी, लोहलेख्या, पार्थिवत्वात्, वृक्षादिवदित्यत्र लोहलेख्यत्वपार्थिवत्वयोरिव साहचर्यमात्रमप्रयोजकमित्यर्थः। एवं कामो लाभायेति व्याख्यातम्। ननु मास्तु कामार्थयोरवच्छेदकावच्छेदेन

कार्यकारणभावः, परं तत्तद्व्यक्तित्वावच्छिन्नः सः प्रत्यक्षेण वसनालङ्कारवनितादिषु प्रमितः केन वार्यतामित्याकाङ्क्षायां कामस्य नेत्यर्थं व्याकुर्वन्ति किञ्चेत्यादि । जीवनमात्रपर्यवसित इति । 'शरीरस्थितिहेतुत्वादाहारसधर्माणो हि कामा' इति वात्स्यायनसूत्रसिद्धः । अनशनादिना रोगादिदर्शनात् तन्निवृत्त्या जीवनमात्रसाधक इत्यर्थः । स्वतः सिद्ध इति । ईश्वरनिर्मितः । मतान्तरे अदृष्टनियतः । सुखात्मकस्य कामस्यात्र ग्रहणे साध्यसाधनभावव्याघातात्कामपदमत्र लाक्षणिकत्वेन व्याकुर्वन्ति विषयभोग इति । उभयत्रेति । पूर्वोर्धोत्तरार्धयोः । क्रम इति । उच्यमानोङ्गीकार्य इति शेषः । अर्थो वेति । स जीवनस्यार्थो न इति शेषः ॥ ९-१० ॥ ❀ ❀ वदन्तीत्यत्र । समुदायपत्र इति । तेषां भावस्तत्त्वमिति पक्षे । सर्वोपजीवकत्वादिति । सर्वे उपजीवका यस्य तस्य तथात्वात् , सर्वोपजीव्यत्वादित्यर्थः ॥ ११ ॥ ❀ ❀ तच्छ्रद्दधाना इत्यत्र । तच्छब्दस्य पूर्वपरामर्शित्वात् पूर्वश्लोकोक्तं धर्ममादाय श्लोकोक्तसाधनानां क्रमं वदन्ति तदर्थमित्यादि ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं फलाभिसन्धिराहित्येन ईश्वरप्रीत्यर्थमनुष्ठितस्य वर्णाश्रमधर्मस्य परम्परया मोक्षहेतुत्वात् परत्वं तस्यैव फलाभिसन्धिना अनुष्ठितस्य धर्मस्य संसारहेतुत्वादपरत्वमित्युक्तम् , तत्र ये 'धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते' इति वदन्तो धर्मस्यार्थफलकत्वमर्थस्य कामफलकत्वं कामस्येन्द्रियप्रीतिफलकत्वमिन्द्रियप्रीतेश्च पुनरपि धर्मादिपरम्पराहेतुत्वमिति मन्यन्ते तन्मतं निराकरोति—धर्मस्येति द्वयेन । आपवर्ग्यस्य उक्तन्यायेन फलाभिसन्धिराहित्येन भक्तिद्वारा अपवर्गसाधनस्य धर्मस्य अर्थो धनपशुपुत्रादिरूपः अर्थाय फलत्वाय नोपकल्पते योग्यो न भवति । तथाच मोक्षमनादृत्य धनाद्यभिसन्धिना धर्मो नानुष्ठेयः, तथानुष्ठानपरा मूर्खा एवेति भावः । तेषां मूर्खत्वं तु 'किं प्रजया करिष्यामः किं धनेन' इत्यादिशास्त्रसिद्धमेवेति सूचयन्नाह–हीति । तथा धर्मैकान्तस्य धर्मे एकस्मिन् मोक्षहेतुत्वेन साधनोत्तमे अन्तः पर्यवसानं यस्य तस्य अर्थस्य कामः काम्यते इति कामो विषयभोगो लाभाय फलत्वाय तत्त्वदर्शिभिर्न स्मृतो न निरूपितः । एतदपि शास्त्रप्रसिद्धमेवेति सूचयन्नाह—हीति । तथाच धर्मासाधारणकारणीभूतोऽर्थो विषयभोगार्थं न विनियोजनीयस्तदर्थं विनियोजयन्तो मूर्खा एवेति ज्ञेयम् ॥ ९ ॥ ❀ ❀ कामस्य विषयभोगस्येन्द्रियप्रीतिः ऐन्द्रियकं सुखं लाभः फलं न भवति, किन्तु जीवनमेव, अतो यावताऽन्नादिभोगेन जीवेत तावदेव भोक्तव्यं, नेन्द्रियसुखार्थमिति शेषः । यश्चेह लोके कर्मभिस्तत्तद्व्यापारैः प्रसिद्धोऽर्थो भोग्यपदार्थः स्रक्चन्दनवनितादिरूपः स जीवस्य जीवनस्यार्थः फलं न भवति, किन्तु तत्त्वजिज्ञासा तत्त्वविषयको विचार एव फलम् । तथाच तत्त्वविचारं विहाय विषयासक्तिर्न कर्त्तव्या, तदासक्ता मूर्खा एवेति भावः ॥ १० ॥ ❀ ❀ किं तत्तत्त्वं यज्जिज्ञासितव्यमित्यपेक्षायामाह–वदन्तीति । तत्त्वविदो वेदस्य सर्वप्रमाणोपजीवकत्वात् वेदान्तिनो यज्ज्ञानं चिद्रूपं तदेव तत्त्वमिति वदन्ति । ननु वेदानुयायिनोऽपि विरुद्धवचना एवेत्याशङ्क्याह–ब्रह्मेति । उपनिषत्सु ब्रह्मेति स्मृतिषु परमात्मेति पुराणेषु भगवानिति तदेव तत्त्वं शब्द्यतेऽभिधीयते । तथा च नाममात्रे भेदो न वस्तुभेद इति भावः । तत्र हेतुमाह—अद्वयमिति, सजातीयविजातीयस्वगतभेदरहितमित्यर्थः ॥ ११ ॥ ❀ ❀ तच्च तत्त्वं केन साधनेन प्राप्यते न तत्प्राप्तिमन्तरेण केवलविचारमात्रेणैव कृतार्थतेत्यपेक्षायां सपरिकरया भक्त्यैव तत्प्राप्यते इत्याह—तदिति तच्च तत्त्वमात्मानं परमात्मानं आत्मनि कार्यकारणसङ्घात एव श्रुतेन श्रवणेन यद्वा कर्त्तव्यतया श्रुतेन स्वधर्मानुष्ठानेन गृहीतया उत्पन्नया ज्ञानं शास्त्रजन्यं परोक्षज्ञानं वैराग्यं विषयवैतृष्ण्यं ताभ्यां युक्तया भक्त्या श्रद्दधानाः श्रद्धावन्तो मुनयो मननशीलाः पश्यन्ति साक्षात्कुर्वन्तीत्यन्वयः ॥ १२ ॥

हिन्दी अनुवाद

धर्मका फल है मोक्ष । उसकी सार्थकता अर्थप्राप्तिमें नहीं है । अर्थ केवल धर्मके लिये है । भोगविलास उसका फल नहीं माना गया है ॥ ९ ॥ ❀ ❀ भोगविलासका फल इन्द्रियों को तृप्त करना नहीं है, उसका प्रयोजन है केवल जीवन-निर्वाह । जीवनका फल भी तत्त्वजिज्ञासा है । बहुत कर्म करके स्वर्गादि प्राप्त करना उसका फल नहीं है ॥ १० ॥ ❀ ❀ तत्त्ववेत्ता लोग ज्ञाता और ज्ञेयके भेदसे रहित अखण्ड अद्वितीय सच्चिदानन्दस्वरूप ज्ञानको ही तत्त्व कहते हैं । उसीको कोई ब्रह्म, कोई परमात्मा और कोई भगवान्के नामसे पुकारते हैं ॥ ११ ॥ ❀ ❀ श्रद्धालु मुनिजन भागवतश्रवणसे प्राप्त ज्ञान-वैराग्ययुक्त भक्तिसे अपने हृदयमें उस परमतत्त्वरूप परमात्माका अनुभव करते हैं ॥ १२ ॥

अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः । स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १३ ॥
तस्मादेकेन मनसा भगवान् सात्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १४ ॥
यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् । छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् ॥ १५ ॥
शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः । स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

धर्मस्य फलं भक्तिर्नार्थकामादिकमितीममर्थमुपपाद्योपसंहरति। अत इति। हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनम्। संसिद्धिः फलम् ॥ १३ ॥ ❀ ❀ यस्माच्च भक्तिहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह। तस्मादिति। एकेनैकाग्रेण मनसा ॥ १४ ॥ ❀ ❀ भक्तिरहितो धर्मः केवलं श्रम एवेति प्रपंचितम्। इदानीं तु भक्तेर्मुक्तिफलत्वं प्रपंचयति। यदिति। यस्यानुध्यानं सैवासिः खड्गस्तेन युक्ताः विवेकिनो ग्रंथिमहंकारं निबध्नाति यत्कर्म तच्छिंदंति तस्य कथायां रतिं को न कुर्यात् ॥ १५ ॥ ❀ ❀ ननु सत्यमेव कर्मनिर्मूलनी हरिकथारतिः तथापि तस्यां रुचिर्नोत्पद्यते किं कुर्मः तत्राह शुश्रूषोरिति। पुण्यतीर्थनिवेषणान्निष्पापस्य महत्सेवा स्यात् तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

तदेवं धर्मः स्वनुष्ठित इत्यादिना कर्मणः श्रमत्वमेव ज्ञानयोगयोरपि "श्रेयःसृतिं भक्तिमुदस्य ते विभो" इति। "नैष्कर्म्यमप्यच्युतभाववर्जितम्" इति। "पुरेह भूमन्बहवोपि योगिनः" इत्यादिभ्यो भक्त्या विना श्रमत्वमेव। भक्तेश्च कर्मयोगज्ञानादौ मिश्रिताया एव शुद्धाया आत्मप्रसादकत्वं प्रकरणतोऽवगतम्। तत्रैव शंकते ननु ज्ञानयोगयोरप्रवृत्तौ न काचिच्चिंता। कर्मणां तु नित्यानामकरणे महान्प्रत्यवायो दुर्गतिहेतुस्तत्र का वार्त्तेत्यत आह अतः पुंभिरिति। यत उक्तन्यायेनोत्कृष्टावपि ज्ञानयोगौ भक्त्येव सिद्धौ भवेतां भक्तिश्च ताभ्यां विनापि स्वयं सिद्ध्यति, अतो हेतोर्हरितोषणं भक्त्यैव जातं चेत्तदा धर्मस्य संसिद्धिः। यो यत्नादनुष्ठितोपि कर्मिणां सांगोपांगतया प्रायः सिद्धो न भवति सोपि भक्तिमतामननुष्ठितोपि सम्यगेव सिद्धो भवति। "यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्" इत्यादौ "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा" इति भगवदुक्तेः। तेन कर्माकरणजनितप्रत्यवायो भक्तानां पराहतः। ननु यदि भक्त्या धर्म्मः संसिद्धस्तर्हि धर्मफलमपि तैर्लभ्यताम्। सत्यम्। सकामत्वे सति लभ्यत एव, निष्कामत्वे सति तेषां नैष्कर्म्यमेव भवति। तथा च गोपालतापनीयश्रुतिः "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम्" इति। तदेवं "यथा तरोर्मूलनिषेचनेन" इति न्यायेन भक्त्यैव धर्म्माः संसिद्धा एवातो भक्तानां कर्मण्यधिकार एव दूरीकृतो भगवता। तदुक्तम्। "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति। "धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः" इति। "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति। तदपि यत्प्राच्यादिभक्तानामनन्यानामपि कर्मिकुलसंघट्टगतत्वेनैव तदनुरोधवशादीषत्कर्मकरणमेव श्रद्धाराहित्यात्। "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" इति भगवदुक्तेः। संदर्भस्तु तदेवं श्रुतगृहीतया मुनयः श्रद्दधाना इति पदत्रयेण तस्या एव भक्तेर्दौर्लभ्यं दर्शितम्। यद्गुरोः सकाशाद्वेदांताद्यखिलशास्त्रार्थविचारद्वारा यदि स्वावश्यकपरमकर्त्तव्यत्वेन जायते। पुनश्च "भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्" इति यत्। यदि विपरीतभावनात्याजकौ मननयोग्यताममताभिनिवेशौ स्यातां ततः श्रद्दधानैः सा भक्तिरुपासनाद्वारा लभ्यत इति। अतः श्रुतिरपि तदर्थमागृह्णाति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः" इति। अत्र निदिध्यासनमुपासनं दर्शनं साक्षात्कार उच्यते। सा चैवं दुर्लभा भक्तिः श्रीहरितोषणे प्रयुक्तात्स्वानिदिध्यासनमुपासनं भाविकधर्मादपि लभ्यते। तस्माद्धरितोषणमेव तस्य परमं फलमित्याह। अत इति। स्वनुष्ठितस्य बहुप्रयत्नेनाच्छिद्रमुपार्जितस्येति तुच्छे स्वर्गादिफले तत्प्रयोगोऽतीवायुक्त इति भावः ॥ १३ ॥ ❀ ❀ भक्तिहीनो भक्तिः श्रवणादिरुचिस्तद्विहीनस्तदनुत्पादक इत्यर्थः, तस्माद्भक्तिप्रधान इति। यद्वा यद्येवं श्रीहरिसंतोषकस्यापि धर्मस्य श्रवणादिलक्षणा भक्तिरेव फलं तत्प्रवर्त्तिताश्च ज्ञानवैराग्यादिगणास्तदा साक्षाच्छ्रवणादिरूपा भक्तिरेव कर्त्तव्या, किं तत्तदाग्रहेणेत्याह तस्मादिति। एकेन धर्माद्याग्रहशून्येन श्रवणं नामगुणादीनां तथा कीर्त्तनञ्च ॥ १४ ॥ ❀ ❀ ननु च "मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति "श्रद्धालुर्मे कथां शृण्वन्" इति "जातश्रद्धो मत्कथाम्" इत्यादिभगवदुक्तेः कथायां श्रद्धावानेव भक्तावधिकारीत्यतः श्रद्धा कथं स्यादित्यत आह। यदन्विति। स्वसञ्चितधनेभ्यः पृथक्कृत्य किंचिन्मात्रमेकैकदिनभोजनार्थं जनाः स्वग्रंथौ निबध्नंति यथा तथैव ग्रंथिनिबन्धनं वर्तमानजन्मयोग्यं प्रारब्धं कर्म तदपि छिंदंति। तस्य कथायां रतिं प्रीतिं को न कुर्यादिति तत्कथायां प्रीतिरपि सहसा जायते, किं पुनरधिकारव्यंजिका श्रद्धेति भावः। युक्ताः संयतचित्ता वा ॥ १५ ॥ ❀ ❀ अत्राक्षिपति नन्विति। इत्यर्थ इति। रुच्युत्पादनार्थमियमेव पद्धतिर्ग्राह्येति भावः। अत्र संदर्भः "पुण्यतीर्थनिवेषणादिभिः" इति अयमप्येको मार्गः स्यात्। "ते पुनंत्युरुकालेन" इत्यादिना। "सद्यः पुनंत्युपस्पृष्टाः" इत्यादिना च ऋजुमार्गोप्यस्ति। यद्वा नन्वेवमपि तस्य कथारुचिर्मंदभाग्यानां न जायते इत्याशंक्य तत्र सुगमोपायं वदंस्तामारभ्य नैष्ठिकभक्तिपर्यंतां भक्तिमुपदिशति पञ्चभिः। शुश्रूषोरिति। "भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदा" इत्याद्यनुसारेण प्रायस्तत्र महत्संगो भवतीति तदीयटीकानुमत्या च पुण्यतीर्थतीर्थनिषेवणाद्धेतोर्लब्धा यदृच्छया महत्सेवा तया वासुदेवकथारुचिः स्यात्कार्यांतरेणापि तीर्थे भ्रमतां महतां प्रायस्तत्र भ्रमतां तिष्ठतां वा दर्शनस्पर्शसंभाषणादिलक्षणसेवा स्वत एव संपद्यते। तत्प्रभावेण तदीयाचरणे श्रद्धा भवति, तदीय-

स्वाभाविकपरस्परभगवत्कथायां किमेते संकथयंतीति तच्छृणोमीति तदिच्छा जायते, तच्छ्रवणेन च तस्यां रुचिर्जायत इति। तथा च महद्भ्य एव श्रद्धा झटिति कार्यकरेति भावः। तदुक्तं श्रीकपिलेन "सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति।" विश्वनाथस्तु कथायां प्रीतेराविर्भावप्रकारं शृणुतेत्याह। शुश्रूषोरिति। महत्सेवया यादृच्छिकमहत्कृपाजनितया महतां सेवया जातश्रद्धस्य पुंसः पुण्यतीर्थं सद्गुरुस्तस्य निषेवणं चरणाश्रयणं स्यात् "निपानागमयोस्तीर्थमृषिजुष्टेजले गुरौ।" इत्यमरः। तस्माच्च शुश्रूषोः सेवमानस्य वासुदेवकथारुचिः स्यादित्यन्वयः। यद्वा पुण्यतीर्थानां श्रीमद्भागवतादिशास्त्राणां गंगादिनदीव्रजभूम्यादिक्षेत्राणां सेवयेत्यर्थः॥ १६॥

श्रीमद्वीरराघवव्याख्या

श्रुतगृहीतयेत्यनेन वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वमुक्तं, धर्मः स्वनुष्ठितः पुंसामित्यादिना धर्मस्य भक्तियोगानुग्रहप्रकार उक्तः, इदानीमन्यथापि तदनुग्रहप्रकारं दर्शयति अत इति। यतो भक्तेरेव साक्षान्मुक्तिसाधनत्वमतो हे द्विजश्रेष्ठाः पुंभिर्वर्णाश्रमविभागश अवस्थितस्येति शेषः। तद्वर्णाश्रमानुगुणस्येत्यर्थः। वर्णादिभेदेनास्थितैः पुंभिरिति वा सम्यगनुष्ठितस्य पंचमहायज्ञादिरूपस्य संसिद्धिः फलं हरितोषणमेव। अयं भावः स्वनुष्ठिताद्धर्मात् भक्तियोगप्रतिबन्धनिवृत्त्यनुकूलसंकल्पहेतुर्हरितोषः ततश्च भक्तियोगसंपन्नप्रतिबन्धपापक्षयस्ततो भक्तियोगनिष्पत्तिरिति। यद्वा हरिस्तुष्यते येनानुध्यानेन तद्धरितोषणम्। तदेव धर्मस्य स्वनुष्ठितस्य संसिद्धिः फलम्। भक्तियोगोत्पत्तिप्रतिबंधनिरसनद्वारा हरितोषहेतुभक्तियोगनिष्पत्तिरेव धर्मस्य फलमित्यर्थः। अन्यथा "धर्मेण पापमपनुदति अविद्यया मृत्युं तीर्त्वे"त्यादिश्रुतेर्द्धर्मस्य भक्तियोगोत्पत्तिप्रतिबन्धकपापनिरासकत्वं वदंत्या विरोधापत्तेः धर्मस्यैव हरितोषफलकत्वे भक्तेर्वैयर्थ्यापत्तेश्च। ननु "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने"ति भक्तियोगस्यैव सर्वदुरितनिवर्तकत्वस्मरणात्। भक्तियोगवद्धर्मस्यापि हरितोषहेतुत्वमेव युक्तमिति चेच्छृणु प्रापकप्रतिबंधकं प्राप्तिप्रतिबंधकं चेति द्विविधं दुरितम्। तत्र प्रापकस्य भक्तियोगस्य यदुत्पत्तिप्रतिबन्धकं दुरितं तद्धर्मापनोद्यम्। एवं धर्मनिरस्तप्रतिबन्धके भगवत्प्रापकभक्तियोगे निष्पन्ने तेन यद्भगवत्प्राप्तिप्रतिबन्धकं दुरितं तदपनोद्यते तदभिप्रायकाणि ज्ञानाग्निरित्यादीनि वचनानि॥ १३॥ ❀ ❀ एवं वर्णाश्रमधर्मस्य भक्तियोगोपकारस्तत्प्रकारश्च भक्तियोगप्रतिबन्धनिरसनेन भगवद्गुणादिश्रवणरुचिजनकद्वारा वेति द्विधा संदर्शितः। अथ तुल्यन्यायतया भगवद्गुणस्वरूपादिश्रवणादीनामपि भक्तियोगोपकारकत्वमुपकारप्रकारं च वक्तुं तेषामवश्यकर्त्तव्यतां तावदाह तस्मादिति द्वाभ्याम्। तस्माद्धर्मस्य भक्तियोगानुग्राहकत्वतत्प्रकारप्रदर्शनादेव तुल्यन्यायतया भगवद्भक्तियोगोपकारकत्वेन सात्वतां भक्तानां पतिर्भगवानेकेनैकाग्रेण मनसा नित्यदा श्रोतव्यः कीर्तितव्यः ध्येयः स्मर्त्तव्य पूज्यश्च, ध्यानमत्र श्रुतार्थप्रतिष्ठापनात्मकं मननापरपर्यायं स्मरणं विवक्षितम्। भक्त्यात्मकस्य श्रवणाद्यनंतरभावित्वं हि वक्ष्यते॥ १४॥ ❀ ❀ यस्य भगवतोनुध्या अनुध्यानं भक्तिः सैवासिः खड्गस्तेन युक्ताः सहिता कोविदाः कुशलाः कर्मैव ग्रंथिस्तद्रूपं निबंधनं बंधनं छिंदंति। कर्मणो ग्रंथित्वरूपणं ग्रंथिवद्दुर्मोच्यत्वात् दुर्विमोच्येन कर्मणा निबध्यत इति निबंधनं कर्मायत्तः संसारस्तं छिंदंति इति वा तस्य कथासु रतिं को वा पुमान्न कुर्यात्सर्वोपि कुर्यादेवेत्यर्थः। यस्य भक्तिरनर्थावहसंसृतिनिरासहेतुस्तस्य महोपकर्तुर्भक्तियोगस्यानुग्राहकतया तत्कथासु रतिं सर्वोऽपि जनः कुर्यादेवेत्यर्थः॥ १५॥ ❀ ❀ यद्यपि धर्मः स्वनुष्ठितः पुंसामिति धर्मस्य वासुदेवकथारुचिजननद्वारा भक्तियोगानुग्रहकत्वोक्त्यैव कथारुचिजनकत्वमप्युक्तमेव भवति, तथापि न साक्षादेव धर्मः कथारतिहेतुः, अपितु सत्संगादिद्वारा हेत्वंतरेण वेत्याह शुश्रूषोरिति। श्रोतुमिच्छोः स्वधर्मनिरस्तशुश्रूषाप्रतिबंधकस्येत्यर्थः। श्रद्धायुक्तस्य पुंसः वासुदेवकथायां रुचिः हे विप्राः महतां सेवया पुण्यतीर्थानां गंगादीनां निषेवणाच्च भवति॥ १६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तदाह तदिति। एवमुक्तप्रकारेण ब्रह्मपरमात्माद्यनंतवैदिकादिपदवाच्यतया सगुणः सर्वजगत्कर्ता परमात्मैव तत्त्वमिति यस्मात्तस्मान्मुनयो ज्ञानिनः श्रद्दधानाः शास्त्रोक्तवस्तुगत्यास्तिक्यबुद्धियुक्तश्रुतिगृहीतया वेदांतश्रवणेन दृढगृहीतया तत्त्वज्ञानेन विषयवैराग्येण युक्तया भक्त्या तमेवात्मानं परमात्मानमात्मनि हृदि पश्यंति। चकारः "स्वात्मन्येवात्मानं पश्येदि"ति श्रुतिप्रसिद्धिद्योतको न त्वात्मनि क्षेत्रज्ञे जीवे आत्मानं परमात्मानं पश्यंति परमात्मनि क्षेत्रज्ञं चेति समुच्चयार्थः। तस्माज्जगदाकारेण विवर्तितं तत्त्वमन्यन्निर्गुणमन्यत्तत्त्वमिति नार्थः॥ १३॥ ❀ ❀ उपसंहरति अत इति हे द्विजश्रेष्ठाः संसिद्धिः फलम्॥ १४॥ ❀ ❀ कृष्णसंप्रश्नस्य परमधर्मत्वं निगमयति तस्मादिति। यतः कृष्णसंप्रश्नस्यैव परमधर्मत्वं तस्माद्धेतोः एकेन एकाग्रेण चकारौ परस्परसमुच्चयार्थौ श्रवणादितत्तत्काले कर्तव्यं न कश्चित्कालो वृथा यापनीय इत्यस्मिन्नर्थे नित्यदाशब्दः॥ १५॥ ❀ ❀ फलदर्शनं पुरोधाय प्रवृत्तिदर्शनाच्छ्रवणादिना किं फलमिति तत्राह यदिति। यं भगवंतमनुसवनं निरंतरं ध्यातुं शीलमेषामिति यदनुध्यायिनः युक्ताः मनोयोगयुक्ताः कर्मपाशेन नितरां बंधनं तत् छिंदति तस्य कथासु रतिं को न कुर्यात्। अतः श्रवणादिफलमपरोक्षज्ञानद्वारा मुक्तिरेव॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं श्रुतगृहीतया मुनयः श्रद्दधाना इति पदत्रयेण तस्या एव भक्तेर्दौर्लभ्यं दर्शितम् । सद्गुरोः सकाशात् वेदान्ताद्यखिलशास्त्रार्थविचारश्रवणद्वारा यदि स्वावश्यकपरमकर्त्तव्यत्वेन ज्ञायते । पुनश्च "भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेदि"तिवद् यदि विपरीतभावनात्याजकौ मननयोग्यतामननाभिनिवेशौ स्यातां ततः श्रद्दधानैः सा भक्तिरुपासनद्वारा लभ्यत इति । अतः श्रुतिरपि तदर्थमागृह्णाति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति । अत्र निदिध्यासनमुपासनम् । दर्शनं साक्षात्कार उच्यते । सा चैवं दुर्लभा भक्तिः श्रीहरितोषणे प्रयुक्तात् स्वाभाविकधर्म्मादपि लभ्यते तस्माद्धरितोषणमेव तस्य परमं फलमित्याह अत इति । स्वनुष्ठितस्य बहुप्रयत्नेनाच्छिद्रमुपार्जितस्येति तुच्छे स्वर्गादिफले तत्प्रयोगोऽतीवायुक्त इति भावः ॥ १३ ॥ ❀ ❀ तस्मादिति तैर्व्याख्यातम् । तत्र भक्तिविहीन इति । भक्तिः श्रवणादिरुचिस्तद्विहीनस्तदनुत्पादक इत्यर्थः । तस्माद्भक्तिप्रधान इति भक्तिः श्रवणादिरुचिरित्यर्थः । यद्वा यद्येवं श्रीहरिसन्तोषकस्यापि धर्म्मस्य फलं श्रवणादिरुचिलक्षणा भक्तिरेव तत्प्रवर्त्तिताश्च ज्ञानवैराग्यादिगुणा इत्यायातम् । तदा साक्षात् श्रवणादिरूपा भक्तिरेव कर्त्तव्या, किं तत्तदाग्रहेणेत्याह तस्मादिति । एकेन कर्म्माद्याग्रहशून्येन । श्रवणमत्र नामगुणादीनां तथा कीर्त्तनञ्च ॥१४॥ ❀ ❀ तत्र चान्तिमभूमिकापर्यन्तां सुगमां शैलीं वक्तुं धर्म्मादिकष्टनिरपेक्षेण युक्तिमात्रेण तत्प्रथमभूमिकां श्रीहरिकथारुचिमुत्पादयन् तस्य गुणं स्मारयति यदिति । कोविदा विवेकिनः । युक्ताः संयतचित्ताः । यस्य हरेरनुध्या अनुध्यानं चिन्तनमात्रं सैवासिः खड्गः तेन ग्रन्थिं नानादेहेष्वहङ्कारं निबध्नाति यत् तत् कर्म्म छिन्दन्ति तस्यैवम्भूतस्य परमदुःखादुद्धर्त्तुः कथायां रतिं रुचिं को न कुर्यात् ॥ १५ ॥ ❀ ❀ शुश्रूषोरिति तैर्व्याख्यातम् । तत्र पुण्यतीर्थनिषेवणादिभिरिति अयमप्येको मार्गः स्यात् । 'ते पुनन्त्युरुकालेने'त्यादिना 'सद्यः पुनन्त्युपस्पृष्टा' इत्यादिना च । ऋजुमार्गोऽप्यस्ति अत एव यद्वा नन्वेवमपि तस्य कथारुचिर्मन्दभाग्यानां न जायत इत्याशङ्क्य तत्र सुगमोपायं वदन् तामारभ्य नैष्ठिकभक्तिपर्यन्तां भक्तिमुपदिशति पञ्चभिः । तत्र शुश्रूषोरिति । "भुवि पुरुपुण्यतीर्थसदनान्यृषयोविमदा" इत्याद्यनुसारेण प्रायस्तत्र महत्सङ्गो भवतीति तदीयटीकानुमत्या च पुण्यतीर्थनिषेवणाद्धेतोर्लब्धा यदृच्छया या महत्सेवा तया वासुदेवकथारुचिः स्यात् । कार्यान्तरेणापि तीर्थं भ्रमतो महतां प्रायस्तत्र भ्रमतां तिष्ठतां वा दर्शनस्पर्शनसम्भाषणादिलक्षणा सेवा स्वत एव संपद्यते, तत्प्रभावेण तदीयाचरणे श्रद्धा भवति । ततः तदीयस्वाभाविकपरस्परभगवत्कथायां किमेते संकथयन्ति तत् शृणोमीति तदिच्छा जायते । ततश्च तच्छ्रवणेन तस्यां रुचिर्जायत इति क्रमः । तथाच महद्भ्य एव श्रुता झटिति कार्यकरीति भावः । तथाच श्रीकपिलदेववाक्यम् "सतां प्रसङ्गान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः । तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यती"ति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तदेवं धर्म्मः स्वनुष्ठित इत्यादिना कर्म्मणः श्रमत्वमेव ज्ञानयोगयोरपि "श्रेयःसृतिं भक्तिमुदस्य ते विभो' इति । 'नैष्कर्म्म्यमप्यच्युतभाववर्जितमि'ति । 'पुरेह भूमन् बहवोऽपि योगिन" इत्यादिभ्यो भक्त्या विना श्रमत्वमेव । भक्तेस्तु कर्म्मयोगज्ञानाद्यमिश्रिताया एव शुद्धाया आत्मप्रसादकत्वं प्रकरणतोऽवगतम् । तत्रैवं शङ्कते ननु ज्ञानयोगयोरप्रवृत्तौ न काचिच्चिन्ता । कर्म्मणां तु नित्यानामकरणे महान् प्रत्यवायो दुर्गतिहेतुस्तत्र का वार्त्तेत्यत आह अतः पुंभिरिति । यत उक्तन्यायेनोत्कृष्टावपि ज्ञानयोगौ भक्त्यैव सिद्धौ भवेताम् । भक्तिस्तु ताभ्यां विनापि स्वयं सिद्ध्यति । अतो हरितोषणं भक्त्यैव जातं चेत् तदा धर्म्मस्य संसिद्धिः । यो यत्नादनुष्ठितोऽपि कर्म्मिणां साङ्गोपाङ्गतया प्रायः सिद्धो न भवति सोऽपि भक्तिमताम् अननुष्ठितोऽपि सम्यगेव सिद्धो भवति । "यत् कर्म्मभिर्यत् तपसा ज्ञानवैराग्यतश्च यत्" इत्यादौ "सर्व्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'ति श्रीभगवदुक्तेः । तेन कर्म्माकरणजनितप्रत्यवायो भक्तानां पराहतः । ननु यदि भक्त्या धर्म्मः संसिद्धस्तर्हि धर्म्मफलमपि तैर्लभ्यतां, सत्यम् , सकामत्वे सति लभ्यते एव, निष्कामत्वे सति तेषां नैष्कर्म्यमेव भवति । तथा च श्रुतिर्गोपालतापनी "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्म्यम् ।" तदेवं "यथा तरोर्मूलनिषेचनेने"ति न्यायेन भक्त्यैव धर्म्माः संसिद्धा एवातो भक्तानां कर्म्मण्यधिकार एव दूरीकृतः । भगवता यदुक्तम् "तावत् कर्म्माणि कुर्व्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत" इति । "धर्म्मान् संत्यज्य यः सर्व्वान् मां भजेत् स च सत्तमः" इति 'सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रजे'ति । (तथा सति यथा तरोर्मूलनिषेचनेनेत्यादौ यथैव सर्व्वार्हणमच्युतेज्या इत्यत्र यथाच्युतपूजनमेव सर्व्वेषां देवपित्रादीनामर्हणरूपं भवति तद्वदत्र हरितोषणमेव स्वनुष्ठितधर्म्मस्य सम्यक् सिद्धिरूपं भवतीत्यर्थः । तथा चाच्युतस्य पूजने तोषणे च जाते देवपित्रादिनां पूजनरूपस्य स्वनुष्ठितधर्म्मस्य संसिद्धिः स्वयमेव जातेति भावः । एवमेव दृष्टान्तेऽपि तरोर्मूलनिषेचनेनैव शाखापल्लवादीनां सेचनं स्वयमेव जातमिति ज्ञेयम्) तदपि यत् प्राच्यादिभक्तानामनन्यानामपि कर्म्मिकुलसंघट्टगतत्वेनैव तदनुरोधवशादीषत् कर्म्मकरणं तत् कर्म्माकरणमेव, तत्र श्रद्धाराहित्यात् । "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् । असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह इह ॥" चेति भगवदुक्तेः ॥ १३ ॥ ❀ ❀ यस्मादेवं तस्मादेकेन कर्म्मज्ञानाद्यनुविद्धासाशून्येन ॥ १४ ॥ ❀ ❀ ननु च "मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत" इति श्रद्धालुर्मे कथाः शृण्वन्निति जातश्रद्धो मत्कथास्वित्यादि भगवदुक्तेः

कथायां श्रद्धावानेव भक्तावधिकारीत्यतः श्रद्धा कथं स्यादित्यत आह यदन्विति। यस्यानुध्यानमेवासिः खड्गस्तेन युक्ताः सहिताः जनाः ग्रन्थिनिबन्धनं ग्रन्थिरहङ्कारो निबध्यते येन तत् कर्म्म। यद्वा स्वसञ्चितधनेभ्यः पृथक्कृत्य किञ्चिन्मात्रमेकैकदिनभोगार्थं जनाः स्वग्रन्थौ निबध्नन्ति यथा तथैव ग्रन्थिनिबन्धनं वर्त्तमानजन्मभोग्यं प्रारब्धं कर्म्म तदपि छिन्दन्ति तस्य कथायां रतिं प्रीतिं को न कुर्यादिति तत्कथायां प्रीतिरपि सहसा जायते किं पुनरधिकारव्यञ्जिका श्रद्धेति भावः॥ १५॥ ❀ ❀ तदपि कथायां प्रीतेरेवाविर्भावे प्रकारं शृणुतेत्याह शुश्रूषोरिति। महत्सेवया यादृच्छिकमहत्कृपाजनितया महतां सेवया श्रद्दधानस्य जातश्रद्धस्य पुंसः पुण्यतीर्थं सद्गुरुस्तस्य निषेवणं चरणाश्रयणं स्यात्। "निपानागमयोस्तीर्थमृषिजुष्टजले गुराविं"त्यमरः। तस्माच्च शुश्रूषोस्तस्य वासुदेवकथासु रुचिः स्यादित्यन्वयः॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

अतः धर्मस्यापवर्ग्यत्वात् संसिद्धिः फलम्॥ १३॥ ❀ ❀ यस्माद्धर्मस्य हरितोषणं फलं तस्मात् एकेन हरितोषणफलकधर्मप्रधानेन॥ १४॥ ❀ ❀ अनुध्यासिना ध्यानखड्गेन कर्म छिंदंति कथंभूतं ग्रंथिनिबंधनं देहादावात्मत्वबुद्ध्यादिरूपं ग्रंथिं निबध्नातीति तत्॥ १५-१८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं द्वितीयप्रकारेण ज्ञानमुक्तं तत्र द्वितीये धर्मस्य सम्बन्धमाह अतः पुंभिरिति। धर्मसामान्यस्य प्रथमे साधनता उक्ता, विशेषस्य तु द्वितीये, ततो भगवत्प्रसादव्यतिरेकेण नान्तःकरणशुद्धिर्नवा रुचिः, अतः धर्मस्य मुख्यं फलं भगवत्प्रसादः बीजसंस्कारसंस्कृताः कुर्वंति धर्मपोषकभगवदिच्छया वा ममैव कामो भूतानामिति वाक्यात् पुंभिरिति कर्मणि प्रयोगेणैव ह्यापितमनुष्ठानेन कर्मैवोपक्षीणं न कर्त्तेति तदेव हि भगवत्प्रसादः, अन्यथा कर्मणैव फलमिति द्विजश्रेष्ठा इति द्विजेभ्यः श्रेष्ठाः त्रिजन्मानः, अनेन भवद्भिः क्रियमाणेन कर्मणा भगवान् पुष्यतीति सूचितम्। वर्णधर्माः शमदमादयः कालद्रव्ययज्ञादिभेदा वा गुरुशुश्रूषादय आश्रमधर्माः, शस्प्रत्ययेन च परमधर्मो निवारितः, तेन च "विधर्मः परधर्मश्चेति दोषो निवारितः, सम्यगनुष्ठानं कालादिभिः षड्भिः शुद्धैर्ज्ञात्वाऽनुष्ठानं स एव वा धर्मः "अधर्मो ह्यन्यथा भवेदि"ति वाक्यात् सम्यक्सिद्धिः फलम्॥ १३॥ ❀ ❀ यद्यपि "धर्मो विश्वस्य जगतः प्रतिष्ठेत्यादिश्रुत्या बहूनि धर्मस्य फलानि सन्ति, तथापि भगवान् सत्त्वेन परितुष्यति तदा सफलं नो चेत् धर्मो व्यर्थ इत्यर्थः। आत्मार्थं हि सर्वं सर्वेषामात्मा च भगवान् "येषां न तुष्टो भगवानि"ति वाक्यार्थो हिशब्देन सूचितः। तत्रैवं संदेहः बहव एव वर्णाश्रमविभागेन धर्मान् कुर्वन्ति, न च तेषु भगवच्छास्त्रानुसारिणी भक्तिरुपलभ्यते, अतो ज्ञायते भगवान्न परितुष्ट इति तथा च कर्मकरणदशायां व्यभिचारदर्शनात् कथं निर्विचिकित्सा प्रवृत्तिः, अतः येषु धर्मेषु न व्यभिचारः ते विशेषेण कर्त्तव्या इत्याह तस्मादिति। यस्मादन्यत्र व्यभिचारोऽपि अतः श्रवणादिकमेव कर्त्तव्यमिति श्रवणादिकमपि धर्मः "शृणुयात् श्रावयेदि"ति विधिस्पर्शात् एकेन मनसेति वैयग्र्याभावयुक्तेन श्रवणस्य यथा न व्यभिचारः तथाग्रे वक्ष्यति अन्यधर्मपरित्यागो वा सूच्यते एकेनेति भगवानिति श्रवणादिविषयत्वं न जीवपुरःसरतया किं तत् साक्षाद् ब्रह्मणः, तत्रापि वैष्णवशास्त्रानुसारेण एतदेव सूचयति सात्वतां पतिरिति शुद्धे सत्त्वे आविर्भूतः सत्त्वो भगवान् स वर्त्तते येषां ते सात्त्वन्तः तत्र "बहुलं छन्दसी"ति वकारलोपः, तेषामलौकिकत्वात्तेषां पतिः सर्वनिर्वाहकः, स्वस्यापि तथात्वे न काचिच्चिन्तेतिभावः। श्रवणादीनां सुलभत्वाय वा यतः स्वपतिः सर्वैरेव श्रूयते कीर्त्यते च इदं च, श्रवणादिकं धर्मरूपं प्रकरणात्। द्वितीयस्कन्धे तु भक्तिरूपो लक्ष्यते भगवद्वाचकैः पदैर्वाक्यैश्च भगवति शक्तितात्पर्यनिर्द्धारः श्रवणं शक्तितात्पर्यनिर्द्धारबोधनं कीर्त्तनं तथा ज्ञातानां वा स्वत एवोच्चारणम् उभयं संगृहीतं, चकारेण अन्योन्यनिर्वाहकत्वं च तदग्रे वक्ष्यते इदं द्वयं बाह्येंद्रियसाध्यम्, आंतरमाह ध्येयः पूज्यश्चेति ध्यानं भगवति चित्तस्थिरीकरणं भगवन्मूर्त्तेरनुसंधानं वा पूजा बाह्यांतरभेदेन द्विधा चकारेण संगृहीता। व्यासंगांतराभावाय नित्यदेति तस्मादयमेव मुख्यो धर्मः सर्वथा कर्त्तव्य इति॥ १४॥ ❀ ❀ ननु तथापि रत्यभावात् कथमेतत्सेत्स्यतीत्याशंक्याह यदनुध्यासिनेति। सर्वत्रालौकिकेषु पदार्थेषु माहात्म्यश्रवणाद्रुचिरुत्पद्यते तत्र भगवच्छास्त्रस्याप्रसिद्धावपि योगादीनां प्रसिद्धत्वाद् भगवद्ध्यानं प्रसिद्धं तस्याप्येवं माहात्म्यमंगभूतस्यापीत्यसिपदप्रयोगः। यस्यानुध्यानं सैवासिः, नचापि सेवने भगवत्प्रसादः किंतु तेनैव युक्ताः कर्म छिंदंति कर्मसु विद्यमानेषु जन्मानुच्छेदात् तेषां वा भुक्तानामक्षयाद् भोगेव वा तत्क्षये तद्धेतुना पुनः कर्मान्तरार्जनात् कर्मविच्छेदः कठिनः। तदपि ध्यानेन भगवतीति छिंदंतीत्युक्तम्। ननु किं, कर्मच्छेदनमात्रेण जीवभावस्य, विद्यमानत्वादित्याशंक्याह ग्रंथिनिबंधनमिति ग्रंथिरविद्यया चिदचिद्ग्रंथिः मोहग्रंथिश्च तन्नितरां बध्नातीति ग्रंथिनिबंधनं पूर्वं वासनारूपेण विद्यमानस्य कर्मणैव दृढीकरणम्, अतस्तदभावे सोऽपि गमिष्यतीति भावः घुणाक्षरन्यायं वारयति बहुवचनम्। अत्र हि नैपुण्यमपेक्ष्यते अनुध्यानस्यान्यत्र विनियोगसंभवात् अतो योगसिद्धिमनपेक्ष्य ज्ञानेनाविद्यामेव निवर्तयन्ति ते कोविदाः तत्र ध्यानस्य स्वतो माहात्म्यजनकत्वं नास्ति, विषयध्यानस्य सुतरां बंधहेतुत्वात्। अतो भगवन्माहात्म्येनैव तस्य तत्त्वमित्याह तस्येति तादृशस्येत्यर्थः, यत्र तद्धर्मेणापि कार्यसिद्धिः तत्र यदा कथाभिः स एव चित्ते युक्तो भवतीत्याभिप्रायेणाह को न

कुर्यादिति ॥१५॥ ❀ ❀ अकर्तॄणां माहात्म्यज्ञानाभावः, एवं द्वितीया भक्तिर्निरूपिता । एवं ज्ञानभक्ती मध्यमे निरूप्य उत्तमे निरूपयति शुश्रूषोरित्यादिसप्तभिः । अत्राह फलमुखानि साधनानि निरूप्यंते, येषु व्यभिचारशंकापि नास्ति वैराग्यं च हेतुः । तत्रायं क्रमः आदौ गृहत्यागेन तीर्थपर्यटनम्, अन्यथा महत्सेवायामुद्वेगः स्यात् ततो महत्संगः ततस्तेषां सेवा ततो भगवत्कथाश्रवणं ततः कथारुचिः ततः कथायां तेषु च श्रद्धा ततः शुश्रूषेति एवमेतादृशधर्मेण स्वरूपोपकारिणाऽव्यभिचारिणा शुश्रूषा उत्पद्यते, अत्र पूर्वपूर्वसाधनानां दृढत्वात् नोत्तरेषां निवृत्तिः, तादृशाधिकारो दुर्लभ इति सूचितम् । शुद्धसत्त्वे ह्याविर्भूतस्य श्रवणे सद्यश्चित्तप्रसाद इति वासुदेवेत्युक्तम्, अस्यांगीकाराय महत्पदप्रयोगः, पुण्यरूपं तीर्थं पुण्यतीर्थं कुरुक्षेत्रं गंगा च तयोर्नितरां सेवनं देववज्जलस्य सेवनम् ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

अतः पुम्भिरित्यत्र । बीजेत्यादि । पञ्चाग्निविद्याप्रकारेण सिद्धशरीरास्तादृशं धर्मं कुर्वन्तीत्यर्थः । तादृशशरीराभावेपि केचन तादृशधर्मकर्तारो दृश्यन्ते, तत्र कारणाकाङ्क्षायामाहुः धर्मेत्यादि । ममैष काम इति । इदं षष्ठस्कन्धे प्राचेतसं दक्षं प्रति भगवद्वाक्यम् 'प्रीतोहं ते प्रजानाथ यत्तेस्योद्बृंहणं तपः । ममैष कामो भूतानां यद् भूयासुर्विभूतय' इति । अत्र दक्षकृततपःपोषकत्वेन प्रकृतार्थसिद्धिः । कर्मणि प्रयोग इत्यादि । कर्मणि प्रयोगे हि 'देवदत्तेन तण्डुलः पच्यत' इत्यादौ क्रियाजन्यं विक्लित्तिरूपं फलं कर्मरूपे तण्डुल एव, न तु कर्तरि देवदत्ते । तथात्रानुष्ठाने सुष्ठुत्वेन धर्म एव यदोपक्षीणो भवति विक्लित्त्या तण्डुल इव सुष्ठुत्वेन व्याप्तो भवति, न तु कर्तापि तज्जन्यप्रतिष्ठादिना, प्रतिष्ठादिफलेप्सुर्न भवतीत्यर्थ इति । फलमिति । कर्तृकामितम्, न भगवत्प्रसाद इत्यर्थः । शमादय इति । 'शमो दमः तपः शौच' मिति गीताद्युक्ताः । कालद्रव्ययज्ञादिभेदा इति । कालयज्ञभेदा अग्निहोत्रादयः । द्रव्ययज्ञादिभेदाः 'द्रव्ययज्ञास्तपोयज्ञा' इति वाक्योक्ताः शस्प्रत्ययेनेति मङ्गलवचन एव शस्प्रत्ययस्य प्राचुर्येण प्रयोगात् तेन तथेत्यर्थः स एव वा धर्म इति । यः स्वनुष्ठितः स एव धर्म इत्युद्देश्यविधेयभावादित्यर्थः । सुबोधिन्यां संसिद्धिर्ह्यात्मतोषणमिति पाठो भाति ॥ १३ ॥ ❀ ❀ यदनुध्यासिनेत्यत्र । तद्धे तुनेति । क्षयहेतुना भोगेनेत्यर्थः विद्यमानस्येति । चिदचिद्ग्रन्थेर्मोहग्रन्थेश्चेत्यर्थः । घुणाक्षरन्यायमिति । घुणः कीटः, तच्चरणेन यदृच्छया कदाचिद्भूमौ अक्षराणि भवन्ति तन्न्यायमित्यर्थः । बहुवचनमिति । यद्येक एव यदनुध्यानेन कर्मग्रन्थिनिबन्धनं छिनत्ति, तदायं न्यायः प्रसरेत्, किन्तु बहव इति कोविदा इत्यर्थः, स्वत इति । ध्यानत्वेन रूपेण तद्धर्मेणेति ध्यानरूपेणेत्यर्थ ॥ १५ ॥ ❀ ❀ एवमित्यादि । कामादिभगवत्तोषान्तया श्रवणादिधर्मपरम्परया । शुश्रूषोरित्यत्र । निरूपयतीति गृहत्यागादिशुश्रूषान्तकथनेन निरूपयतीत्यर्थः सूचितमिति । वाक्येन सूचितम् । अस्याङ्गीकारायेति । किरातहूणान्ध्रे' तिवाक्यात् भगवदाश्रिताश्रयणे शुद्धिरिति महत्पदेन भगवदाश्रिता एव गृह्यन्ते, तथा च तत्सेवने अस्याप्यङ्गीकारो भवतीति ज्ञापनाय तथा प्रयोग इत्यर्थः ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एतावता फलितमाह—अत इति । यतोऽर्थकामादीनां संसारहेतुत्वाद्धर्मफलत्वं न सम्भवति, अतो हेतोर्हे द्विजश्रेष्ठाः वर्णाश्रमविभागेन पुम्भिः सुष्ठु सम्यक् अनुष्ठितस्य धर्मस्य संसिद्धिः परमं फलं हरिस्तुष्यत्यनेनेति हरितोषणं भक्तियोग एव, नार्थकामादीत्यन्वयः । द्विजश्रेष्ठा इति सम्बोधनेन भवतां धर्मानुष्ठानेन तु भगवत्तोषिका भक्तिरुत्पद्यते एवेति सूचितम् ॥१३॥ ❀ ❀ अथ यद्यपि प्रथमतो वर्णाश्रमधर्मानुष्ठानं ततोऽन्तःकरणविशुद्धिस्ततो भगवत्कथारुच्यात्मिका भक्तिस्ततस्तत्कथाश्रवणं ततो भगवत्परोक्षज्ञानं विषयेषु वैराग्यञ्च ततो मननं निदिध्यासनं च ततश्च प्रेमप्रवाहरूपा भक्तिः ततश्च परमफलरूपो भगवत्साक्षात्कार इति क्रमो विवक्षितः, तथापि वर्णाश्रमधर्मानुष्ठानसत्त्वेऽपि विघ्नवशाद्भक्त्याद्यदर्शनेन व्यभिचारनिश्चयादव्यभिचारिसाधनान्तराण्याह—तस्मादिति । यस्माद्धर्मेषु व्यभिचारो दृश्यते तस्मादेकेन एकाग्रेण मनसा भगवान् सर्गादिदशविधलीलायुक्तः श्रोतव्यः । तथाविध एव कीर्तितव्यश्च ध्येयः पूज्यश्च । कदाचिच्छ्रवणादिसत्त्वेऽपि भक्त्यदर्शनेन व्यभिचारस्य तुल्यत्वमाशङ्क्य निरन्तरं श्रवणादि प्रत्येकं यथासम्भवं कर्त्तव्यमित्याह—नित्यदेति । ननु भगवत्कथाश्रवणादि यद्विधीयते तदतिदुष्करमेव संसारिणामित्याशङ्क्याह—सात्वताम्पतिरिति, सात्त्वतां भक्तानां पतिः पालकः । तथाच श्रवणाद्युन्मुखानां स्वभक्तानां सहायतां स्वयमेव करिष्यतीति तत्सुकरमेवेति भावः ॥१४॥ ❀ ❀ सर्वत्र तन्माहात्म्यश्रवणादेव तत्र रतिर्भवतीति भगवन्माहात्म्यवर्णनपूर्वकं तत्कथारतिमुत्पादयति—यदनुध्यासिनेति । यस्यानुध्या अनु निरन्तरं ध्यानमेवासिः खड्गस्तेन युक्ताः कर्म च्छिन्दन्ति तस्य कथारतिं को न कुर्यादित्यन्वयः, ननु कर्मविच्छेदेऽपि किं स्यादित्याशङ्क्याह—ग्रन्थिनिबन्धनमिति । ग्रन्थिः चिदचिद्ग्रन्थिरूपोऽहङ्कारस्तं नितरां बध्नाति दृढीकरोतीति तथाभूतं कर्मेत्यर्थः । तथाच कर्मविच्छेदेनैव तद्धेतुकाहङ्कारस्यापि विच्छेदात् तद्धेतुकसंसारविच्छेदे विमुक्तिरेव स्यादिति भावः । यद्वा कर्मग्रन्थिनिबन्धनमित्येकमेव पदम् । कर्मैव ग्रन्थिर्ग्रन्थिवद्दुर्मोच्यत्वात्तद्रूपं निबन्धनं छिन्दन्ति । यद्वा कर्मरूपं ग्रन्थिं नितरां बध्नातीति तथा तद्देहाद्यात्माध्यासलक्षणमविद्याख्यं छिन्दन्तीत्यर्थः । सर्वथापि विमुक्तिरेव फलम् । कर्मापि त्रिविधम्—प्रारब्धं सञ्चितं आगामि च । तत्र प्रारब्धस्य भोगेनैव नाशः, भगवद्भक्तेष्वागामिकर्मास्पर्शस्य 'स्वैरं चरन्ति मुनयोऽपि न नह्यमानाः' इति वक्ष्यमाणत्वात् । अतोऽत्र सञ्चितकर्मविच्छेदो बोध्यः । ननु तर्हि संसारदुःखनिवर्त्तकत्वेन महाफलत्वात् सर्वे एव भगवद्ध्यानपराः कुतो न भवन्ती-

त्यपेक्षायां मूर्खत्वादेवेति हेतुं सूचयन् तान्विशिनष्टि—कोविदा इति, परमविवेकिन इत्यर्थः ॥ १५ ॥ ❀ ❀ भवत्वेवं संसारदुःखनिवर्तिका भगवत्कथारतिः, परन्तु सैव कथमुत्पद्यते इत्यपेक्षायामाह—शुश्रूषोरिति। हे विप्रा इति सम्बोधनेन विप्रत्वाद्युष्माकं नैतद्गुप्तमिति सूचयति। पुण्यतीर्थानि कुरुक्षेत्रपुष्करगङ्गाप्रयागादीनि तेषां नितरामादरेण सेवनात्प्रतिबन्धकपापनिवृत्त्या महत्सङ्गस्ततस्तेषां सेवा तथा तद्धर्मे तेषु च श्रद्धा, ततो भगवत्कथाश्रवणेच्छा ततस्तच्छृण्वतस्तस्यां रुचिः स्यादिति क्रमोऽत्र बोध्यः ॥ १६ ॥

हिन्दी अनुवाद

शौनकादि ऋषियों! यही कारण है कि अपने-अपने वर्ण तथा आश्रमके अनुसार मनुष्य जो धर्मका अनुष्ठान करते हैं, उसकी पूर्ण सिद्धि इसीमें है कि भगवान् प्रसन्न हों ॥ १३ ॥ ❀ ❀ इसलिये एकाग्र मनसे भक्तवत्सल भगवान्का ही नित्य-निरन्तर श्रवण, कीर्तन, ध्यान और आराधन करना चाहिये ॥ १४ ॥ ❀ ❀ कर्मोंकी गाँठ बड़ी कड़ी है। विचारवान् पुरुष भगवान् के चिन्तनकी तलवारसे उस गाँठको काट डालते हैं। तब भला, ऐसा कौन मनुष्य होगा, जो भगवान्की लीला-कथामें प्रेम न करे? ॥ १५ ॥ ❀ ❀ शौनकादि ऋषियो! पवित्र तीर्थोंका सेवन करनेसे महत्सेवा, तदनन्तर श्रवणकी इच्छा, फिर श्रद्धा, तत्पश्चात् भगवत्-कथामें रुचि होती है ॥ १६ ॥

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः। हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ १७ ॥
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया[1]। भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥
तदा रजस्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥ १९ ॥
एवं प्रसन्नमनसो भगवद्भक्तियोगतः। भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततश्च। शृण्वतामिति। पुण्ये श्रवणकीर्तने यस्य सः। सतां सुहृत् हितकारी। हृदि यान्यभद्राणि कामादिवासनास्तानि। अंतःस्थो हृदयस्थः सन् ॥ १७ ॥ ❀ ❀ ततश्च नष्टप्रायेष्विति। सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात्प्रायोग्रहणम्। भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपकाभावात् ॥ १८ ॥ ❀ ❀ रजश्च तमश्च ये च तत्प्रभवाः भावाः कामादयः एतैरनाविद्धमनभिभूतम्। प्रसीदत्युपशाम्यति ॥ १९ ॥ ❀ ❀ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततश्च रुचेरनंतरमंतस्थः कथाद्वारा भावनापदवीं गतः ॥ १७ ॥ ❀ ❀ नष्टप्रायेष्विति। नामापराधलक्षणस्याभद्रस्य कश्चन कश्चन प्रबलो भागः क्षीणत्वं गच्छन् रतिपर्यंतोपि भवतीति भावः। निष्ठा चित्तैकाग्र्यं तां प्राप्ता ॥ १८ ॥ ❀ ❀ रजस्तमोभ्यां भाव उत्पत्तिर्येषां ते चित्तविक्षेपलयादयः। आदिशब्दात् क्रोधमोहमात्सर्याणि। अनाविद्धमविकृतं भवति। तेन विषयेष्वरुच्या श्रवणकीर्तनादिषु स्वादुत्वभानलक्षणा रुचिर्भवतीत्यायातम्। तेन पूर्वदशायां कामलोभाद्यैस्तीक्ष्णशरायितैराविद्धं चेतः कथं प्रसीदतु, कथं वा कीर्तनादेः सम्यगास्वादं लभताम्। न हि व्याधिना जर्जरितायान्नादिकं सम्यग्रोचते इति भावः। ततश्च सत्त्वे शुद्धसत्त्वमूर्तौ भगवति स्थितमासक्तम्। तदैव त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरित्याद्युक्तरीत्या सर्ववासनानाशाच्चित्तं शुद्धसत्त्वमयं सद्भगवत्तत्त्वसाक्षात्कारयोग्यं भवतीति भावः ॥ १९ ॥ ❀ ❀ एवं पूर्वोक्तप्रकारेणासक्तिपूर्वकं प्रतिक्षणं भगवतः कृष्णस्य भजनं कुर्वतः प्रसन्नमनस उत्पन्नरतेरित्यर्थः, रत्या विना सर्वथा विषयासंस्पर्शस्यानुत्पत्तेस्तेन विना च मनःप्रसादासंभवादिति। ततश्च भगवति भक्तियोगः प्रेमा तस्माच्च भगवत्तत्त्वस्य स्वरूपगुणलीलैश्वर्यमाधुर्यस्य विज्ञानमनुभव इत्यनुसंहितं भक्तेः फलमुक्तम्। "जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम्।" इति यत्पूर्वमुक्तं तदिदमेव ज्ञेयम्। मुक्तसंगस्योत्पन्नवैराग्यस्य त्यक्तकामादिवासनस्येति यावत् ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

श्रवणादीनां भक्तियोगोपकारप्रकारं दर्शयति शृण्वतामिति द्वाभ्याम्। पुण्यं शृण्वतां कीर्तयतां च पुण्यावहं श्रवणं कीर्त्तनं च यस्य स कृष्णः स्वकथां शृण्वतां सतां साधूनां हृदयांतःस्थितः सन्नभद्राणि भक्तियोगोत्पत्तिप्रतिबंधकानि दुरितानि विधुनोति। सुहृदिति हेतुगर्भमिदं सुहृत्त्वाद् धुनोतीत्यर्थः ॥ १७ ॥ ❀ ❀ ततः किमत आह नष्टप्रायेष्विति नित्यं

---

१. प्रा० पा०—भगवदाश्रयात्।

भागवतानां सतां सेवया तत्सेवापूर्वकभगवद्गुणश्रवणेनेत्यर्थः । अभद्रेषु नष्टप्रायेषु सत्सु उत्तमश्लोके भगवति नैष्ठिकी दृढा भक्तिर्भवति । नष्टप्रायेष्विति प्रायोग्रहणेन भक्तियोगापनोद्यं प्राप्तिप्रतिबंधकमुत्तरपूर्वार्धरूपं त्ववशिष्यत इति सूचितम् । एवं तुल्यन्यायतया स्वधर्मेणाप्युपायोत्पत्तिप्रतिबंधकमात्रमेव निरस्यत इति सम्यगुक्तं प्राक् ॥ १८ ॥ ❀ ❀ कथमभद्रेषु नष्टेष्वपि भक्तिर्भवतीत्यत्राह तदेति । नृणां सततं महत्सेवैव धर्मस्तस्मादभद्रेषु नष्टेषु तन्मूलाः चित्तविक्षेपावरणहेतवो रजस्तमसोर्भावा धर्माः कार्यभूता इति यावत् , ये कामलोभादयः संति आदिशब्दग्राह्याः क्रोधमोहादयस्ते सर्वे नश्यंति । नष्टेषु च रजस्तमोभावेषु एतै रजस्तमोभावैरनाविद्धमविक्षिप्तमविमूढं चात एव सत्त्वे रजस्तमोभ्यामनभिभूते सत्त्वगुणे स्थितं सत्त्वप्रधानं सत् स्थिरं सदिति यावत्प्रसीदति । प्रसन्ने च चेतसि नैष्ठिकी भक्तिरप्युद्भवतीति भावः ॥ १९ ॥ ❀ ❀ तदेवाहण्वमिति । एवमुक्तरीत्या प्रसन्नं मनो यस्य तस्य विरक्तस्य पुंसः नैष्ठिकी भक्तिर्भवतीति शेषः । तस्माच्च भक्तियोगाद् भगवत्तत्त्वविज्ञानं भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं ज्ञानं जायते । दृष्ट इत्यनंतरोक्तेः तच्च ज्ञानं परभक्तेः फलम् "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप"तिवचनात् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

हरिकथारतिः केन स्यादिति तत्राह शुश्रूषोरिति । हे विप्राः शुश्रूषोर्गुर्वादिपरिचर्याशीलस्य वेदादिषु श्रद्दधानस्य महतां सेवया पुण्यतीर्थानां भागवतादिसच्छास्त्राणां गंगादितीर्थानां च नितरां सेवनाच्च वासुदेवकथारतिः स्यादित्येकान्वयः ॥ १७ ॥ ❀ ❀ श्रवणफलमाह शृण्वतामिति । सुहृदनिमित्तबंधुः पुण्ये श्रवणकीर्तने यस्य स तथा ॥ १८ ॥ ❀ ❀ सर्वामंगलनाशफलमाह नष्टेति । लिंगशरीरभंगपर्यंतमभद्राणां संभवात् प्रायेष्वित्युक्तं नैष्ठिकी अचला उत्तमः उद्गतदोषः श्लोकः कीर्तिर्यस्य स तथोक्तः तस्मिन् ॥ १९ ॥ ❀ ❀ भक्तिफलमाह तदेति । यदा हरावचला भक्तिस्तदा ये रजआदयो भावाः एतैरनाविद्धमसंसक्तं शुद्धसत्त्वे स्थितं वा बलज्ञानसमाहारवति हरौ स्थितं वा चेतः प्रसीदति । सकलदोषविधुरतया निरंतरं परमात्मानं स्मरतीत्यर्थः । रजस्तमोभ्यां भाव उत्पत्तिर्येषां ते तथोक्ताः कामलोभादयः चकारात्प्रमादादय इति वा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कथाद्वारा अन्तःस्थो भावनापदवीं गतः सन् हृदि अभद्राणि वासनाः ॥ १७ ॥ ❀ ❀ नष्टप्रायेषु न तु ज्ञानमिव सम्यक् नष्टेष्वेवेति भक्तेर्निर्गलस्वभावत्वमुक्तम् । भक्तिरनुध्यानरूपा । नैष्ठिकी सन्ततैव भवति ॥ १८ ॥ ❀ ❀ तदैव "त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरि"त्याद्युक्तरीत्या सर्व्ववासनानाशात् चित्तं शुद्धसत्त्वमग्नं सत् भगवत्तत्त्वसाक्षात्कारयोग्यं भवतीत्याह तदेति ॥ १९ ॥ ❀ ❀ एवं पूर्व्वोक्तप्रकारेण प्रसन्नमनसस्ततो मुक्तसङ्गस्य त्यक्तकामादिवासनस्य भक्तियोगतः पुनरपि क्रियमाणात् विज्ञानं साक्षात्कारः मनसि बहिर्व्वा भावनां विनैवानुभवो यः स जायते ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ततश्च शृण्वतामिति क्रमेण श्रवणकीर्त्तने उक्ते। ततश्च हृदि यान्यभद्राणि पापानि तान्यन्तःस्थः सन् विधुनोतीति स्मरणम् ॥ १७ ॥ ❀ ❀ भागवतानां वैष्णवानां भागवतस्य शास्त्रस्य च । नष्टप्रायेष्विति नामापराधलक्षणस्याभद्रस्य कश्चन कश्चन प्रबलो भागः क्षीणत्वं गच्छन् रतिपर्यन्तोऽपि भवतीति भावः । नैष्ठिकी निष्ठा चित्तैकाग्र्यं तां प्राप्ता ॥ १८ ॥ ❀ ❀ रजस्तमोभ्यां भाव उत्पत्तिर्येषां ते विक्षेपलयादयः । आदिशब्दात् क्रोधमोहमात्सर्याणि अनाविद्धं अविकृतं भवति तेन विषयेष्वरुच्या श्रवणकीर्त्तनादिषु स्वादुत्वभानलक्षणा रुचिर्भवतीत्यायातम् । तेन पूर्व्वदशायां कामलोभाद्यैस्तीक्ष्णशरायितैराविद्धं चेतः कथं प्रसीदतु कथं वा कीर्त्तनादेः सम्यगास्वादं लभताम् ? न हि व्यथाजर्जरितस्यान्नादिकं सम्यक् रोचते इति भावः । ततश्च सत्त्वे शुद्धसत्त्वमूर्त्तौ भगवति स्थितम् आसक्तम् ॥ १९ ॥ ❀ ❀ एवमनेन प्रकारेणासक्तिपूर्व्वकं प्रतिक्षणं भगवतः कृष्णस्य भजनं कुर्व्वतः प्रसन्नमनसः उत्पन्नरतेरित्यर्थः । रत्या विना सर्व्वथा विषयासंस्पर्शस्यानुत्पत्तेस्तेन विना च मनः प्रसादासम्भवादिति । ततश्च भगवति भक्तियोगः प्रेमा तस्माच्च भगवतस्तत्त्वस्य स्वरूपगुणलीलैश्वर्यमाधुर्यस्य विज्ञानमनुभवः इत्यनुसंहितं भक्तेः फलमुक्तम् । "जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकमि"ति यत् पूर्व्वमुक्तं तदिदमेव ज्ञेयम् । मुक्तसङ्गस्य उत्पन्नवैराग्यस्य ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ये रजआदयः ये च तज्जाः कामाद्याः एतैः अनाविद्धम् अनभिभूतं चेतो यदा भवति तदा सत्त्वे स्थितं सत् प्रसीदति ॥ १९-२२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नन्ववहेलनं कथंचिदपि ततः किमत आह शृण्वतामिति । एतादृशसाधनेनोत्पन्नायां शुश्रूषायां न श्रवणादिनिवृत्तिः कदाचिदिति शृण्वतामित्युक्तम् । स्वकथामिति । स्वरूपभूताः कथाः स्वीयकथात्वे भगवतः स्वतंत्रत्वान्न कार्यकारणं संभवति । कथायां स्वस्यापि स्वतो माहात्म्ये तु तयैव वशीकृतः सर्वं कुर्यादिति एतादृशकथाबाहुल्यं कृष्णावतार एवेति कृष्ण इत्युक्तं, भक्तियोगविधानार्थं

चावतारः निरंतरमुत्पन्नानां पापानां निवृत्तौ नान्यदपेक्षते साधनं, किंतु श्रवणकीर्तनाभ्यामेव भवतीति, शुद्धं हृदयं भगवान् प्रविशतीत्यभिप्रायेणाह पुण्यश्रवणकीर्तनः । श्रोतृवक्तृदोषौ न संबध्येते, अपहतपाप्मत्वात्तयो यतश्च श्रवणकीर्त्तने उत्पद्यमाने पापसामानाधिकरण्येनोत्पद्येते एव सूर्योदयसंभावनायामेव तमोनिवृत्तिवत् श्रवणासंभावनायामेव पापनिवृत्तिरित्यर्थः । बहिः स्थितस्य अंतःकार्यकारणासंभवात् इच्छामात्रेण तत्करणे लोकानां प्रतीत्यभावेन अभजनापत्तेर्दृष्टे संभवत्यदृष्टकल्पनायाः असंभवात् सर्वत्र स्थितस्य क्लेशाभावाच्च हृद्यंतस्थितस्य क्लेशाभावाच हृद्यंतस्थित एव करोति हृदये हि केचन पदार्था बहिः स्थिता अपि भवंति केचनांतः स्थिताः, तत्र येषु विस्मरणसंभावना ते बहिः स्थिताः । प्रकृते भगवतः विस्मरणसंभावनापि नास्तीत्यंतस्थित इत्युक्तम् । तादृशस्य तथाकरणमुचितमिति भावः । अभद्राणि कर्मादीनि पापस्य पूर्वमेव निवृत्तत्वात् । विशेषेण धूननं शिथिलीकरणं यथा जलकर्दमलवत् पुनर्मेलनं न भवति तथेत्यर्थः । तथा चास्मिन् पक्षे प्रथमशृङ्खलास्वसाध्या द्वितीया भगवत्साध्या तदैव तृतीया भवतीति क्रमेण बोध्यते । कामादीनामशिथिलत्वे भक्तिर्नोत्पत्स्यत इति । ननु भगवत एवं करणे को हेतुस्तत्राह सुहृत्सतामिति । सुहृत्सहकार्यैककर्त्ता मित्रमिति यावत् ॥ १७ ॥ ❀ ❀ सुहृद्भिः श्रवणाद्युपदेशेन प्रथमपरंपरायां कृतायां द्वितीयां चेद्भगवान्न कुर्यात्तदा मित्रत्वं भज्येतेति धुतेषु कामादिषु तत्स्यात्तदाह नष्टप्रायेष्विति । धुता एव कामादयो न नाशिता इति कचित्तेषां सत्त्वं प्रतीयते । श्रवणे आग्रह इव प्रतिबंधे क्रोध एव तत्संबंधे लोभः प्रभवेदित्यादि बोधयितुं प्रायोग्रहणम् । तथा च तेषां प्रतिबंधकत्वाभावात् भगवत्कथाया नित्यं श्रवणं भगवद्भक्तानां च सेवनं च नित्यं भवतीत्याह नित्यमिति । पूर्वं कथायाः श्रवणमेव इदानीं देववत्संभावनमिति सेवार्थः, एवं कथायां क्रियमाणायां भगवति प्रेमोत्पद्यत इत्याह भगवतीति । अत्र सर्वत्र भगवच्छब्देन शुद्धं परं ब्रह्मोच्यते । उत्तमः श्लोक इति, उत्तमैः श्लोक्य इति उत्तमा वा श्लोका यस्येति सद्भिः कथया च सहिते भक्तिर्भवतीत्यर्थः । ततश्च जातायामपि भक्तौ संतः कथाश्च न त्यज्यंत इति भावः महतापि बाधकेनाचलनं निष्ठा निष्ठां प्राप्ता नैष्ठिकी । तथाहि कालाद्युपद्रवा न स्फुरिष्यंतीत्यर्थः ॥ १८ ॥ ❀ ❀ एतावत्पर्यंतपुरुषप्रयत्नः अग्रिमस्त्वयमेव भवतीत्याह तदेति त्रिभिः । तदा तु चित्तस्य स्वरूपं नश्यति त्रिगुणात्मकं हि तत् । तथा च स्वस्वकार्यं गुणाः कुर्वंत्येव तथाच तद्धृदयं कदाचिदपि भगवदासक्तं न भवति । यदा पुनः रजस्तमसोः सत्त्वता भवति यथा स्पर्शमणिस्पर्शेन ताम्रलोहयोः सुवर्णता तथाच त्रिभिर्निर्मितं पात्रं सर्वं स्वर्णं भवति तथा भक्त्या स्पृष्टं चित्तं सर्वं सत्त्वं भवति रजस्तमोभावाः कामक्रोधादयः कामलोभादयश्च मिश्रस्वभावाः चकारान्मिश्रा अन्येपि भावाः ते तटस्थतया निर्दिष्टा ये च प्रसिद्धा मोहादयस्तान् सर्वान् गतगृहानिव निर्दिशति । अत एव न प्रथमार्थे क्रियासंबंधः । ननु ते आगंतुकं प्राप्ता अपि पूर्ववासनया कथं चित्तेन न संबध्यंते इत्यत आह चेत इति । एते हि सूत्ररूपाः मूलगुणव्यतिरेकेण न वेधनसमर्थाः अत एतैरनाविद्धं चित्तं स्थितं भवति तदा लयावस्थां प्राप्नुवदपि चित्तं निरंतरोत्पन्नभक्त्यनुरोधेन भूतसत्त्वनिमित्तं भगवदावेशेन प्रसीदति । प्रसादो हि तेन कार्यकर्तॄणां सर्वकार्यसिद्धिहेतुप्रकाशविशेषः ॥ १९ ॥ ❀ ❀ तेन यज्जातं तदाह एवमिति । एवं पूर्वोक्तप्रकारेण स्थिरसाधनपरं परया प्रसन्नं मनो यस्य मनसः सत्त्वात्मकत्वे "सत्त्वात् संजायते ज्ञानमि"ति सर्ववस्तूनां तत्त्वज्ञानं भवति, न तु भगवत्स्वरूपज्ञानं तस्य गुणता तत्त्वेन गुणकार्यशक्यत्वाभावात् । अत आह भगवद्भक्तियोगत इति अन्तःकरणप्रसादो भक्त्यर्थमेव भक्त्यैव तु भगवज्ज्ञानं "भक्त्या मामभिजानाती"ति वाक्यात् तत्त्वपदेन यावानित्याद्यर्थः परिगृहीतः, विपदेन करतलामलकज्ञानवत् ज्ञानविशेषो विवक्षितः । अत्र संन्यासोऽप्यंगत्वेनापेक्ष्यत इत्याह मुक्तसंगस्येति । अंतर्बहिः संगनिवृत्तिः "विषयाविष्टचित्तानां विष्णवावेशः सुदूरत" इति न्यायेन परित्यागव्यतिरेकेण न भगवदावेशः अतो न साक्षात्कार इति संन्यासस्य कारणत्वम् ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

शृण्वतामित्यत्र । स्वशब्दस्यात्मीयेपि रूढत्वात्तद्विहाय कुत एवं व्याख्यायते इत्यत आहुः स्वीयेत्यादि । स्वीया इति व्याख्याने स्वस्येमा इत्यर्थात् कथासम्बन्धिनो भगवतः स्वातन्त्र्याद्धृदि आयाति, नायाति वा, ततश्चाभद्रधूननमपि सन्दिग्धं स्यात्, अतस्तद्विहायैवं व्याख्यायते इत्यर्थः । पुण्यशब्दार्थमाहुः अपहतेत्यादि । कामादीनीति । आदिपदेनाविद्या कर्म च । क्रमेणेति । शुश्रूषोः शृण्वताम्, नष्टप्रायेष्विति श्लोकक्रमेणेत्यर्थः ॥ १७ ॥ ❀ ❀ नष्टप्रायेष्वित्यत्र । भगवद्भक्तानां चेति । चकारेण तत्कथा समुच्चीयते ॥ १८ ॥ ❀ ❀ तदेत्यत्र । कामलोभादीनां मिश्रसत्त्वभावस्यानुभाविकत्वादाहुः कामक्रोधादय इति । तटस्थतयेति । तद्वाचकशब्दाकथनात्तथेत्यर्थः । यत्पदस्य कामादिविशेषणत्वे तत्पदाध्याहारापत्तिः, अतस्तन्निवृत्तये यत्पदार्थमाहुः ये चेति । कामक्रोधादि कामलोभादिमोहादयः, एतैरनाविद्धमिति योजना । गतगृहानिवेति । गृहाणि रजस्तमसी, तद्रहितानि वेत्यर्थः । कथमित्यत आहुः अत एवेत्यादि । रजस्तमोरूपगृहाभावादेव तद्धर्माणां सत्ताभावाद्भवन्तीति न क्रियासम्बन्ध इत्यर्थः । मूलगुणसूचिव्यतिरेकेणेति । अन्तःस्थो भगवानभद्राणि धुन्वंस्तानपि कुण्ठितान् करोतीति तेषां सूचित्वाभावो ज्ञेयः । तदा लयावस्थामित्यादि । रजस्तमोरूपमूलगुणकौण्ठ्ये भगवता कृते सत्त्वस्थे भगवति लीयमानमित्यर्थः । सत्त्वनिमित्तमिति । सत्त्वार्थम् । सत्त्व इति । मूलस्थसप्तमीव्याख्यानमिदम्, तेनेति । चित्तेन ॥ १९ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कथां शृण्वतां फलमाह्—शृण्वतामिति। स्वकथां शृण्वतां हृदयान्तःस्थितः सन् श्रीकृष्णस्तत्रत्यानि अभद्राणि पापनिवृत्तेस्तीर्थसेवादिनैव सूचितत्वात् कामक्रोधलोभादिवासनारूपाणि विधुनोति दूरीकरोतीत्यन्वयः। एतादृशकथाबाहुल्यं कृष्णावतार एवेति सूचयितुमाह-कृष्ण इति। नन्वेवं सञ्चितपापविनाशेऽपि निरन्तरमुत्पद्यमानानां पापानां कथं निवृत्तिः? अन्यथा तैरेव पुनः श्रवणप्रतिबन्धः स्यादित्याशङ्कयाह—पुण्यश्रवणकीर्त्तन इति, पुण्यं शृण्वतां कीर्तयतां च पुण्यावहं श्रवणं कीर्त्तनं च यस्य सः तथा च "पुण्येन पापमपनुदति" इति श्रुतिप्रामाण्यात् कथाश्रवणकीर्तनपराणां पापानां तच्छ्रवणादिजन्यपुण्येनैव दूरीकरणान्न तदर्थसाधनान्तरापेक्षेति भावः। ननु किमर्थं भगवानेवं करोतीत्यपेक्षायामाह—सुहृदिति। सतां स्वतो भक्तानां सुहृत् मित्रमिति यावत्। कृपयैव तत्करोति न ततः किञ्चिदप्यपेक्षते इति भावः। बहिस्थितस्यान्तःकार्यकरणासम्भवात् सर्वत्र व्यापकतया सर्वस्य हृदयस्थत्वेन तस्याल्पदेशहृदयस्थितिक्लेशाभावाच्च हृद्यन्तस्थित एव अभद्राणि विधुनोतीत्युक्तम्। न च तदा सर्वेषां हृदि स्थितत्वात् सर्वेषामेवाभद्राणि कुतो न दूरीकरोतीति शङ्कनीयम्, अस्याः शङ्कायाः सतामित्यनेनैव पदेन निरस्तत्वात्। श्रवणादिपराणां स्वभक्तानामेव तानि दूरीकरोति, न सर्वेषाम्, अन्यथा संसारोच्छेदप्रसङ्गात्तस्य चानभीष्टत्वादिति ज्ञेयम्। शास्त्रप्रसिद्धत्वाद्युक्तिसम्भवाच्च नात्र सन्देह इति सूचयन्नाह—हीति॥ १७॥ ❀ ❀ ततः किं फलं भवतीत्यपेक्षायामाह—नष्टप्रायेष्विति। नित्यं निरन्तरं भागवतानां भगवद्भक्तानां भागवतशास्त्रस्य च सेवया भक्तसेवापूर्वकभगवद्गुणश्रवणेन अभद्रेषु कामक्रोधादिषु नष्टप्रायेषु सत्सु भगवति परमेश्वरे भक्तिर्भवतीत्यन्वयः। भक्तिरपि साध्यसाधनभेदेन द्विधा। तत्र साधनभक्तिरपि कथाश्रवणकीर्तनादिरूपा, तत्र रुच्यात्मिका च, तत्र साधनभक्तिनिराकरणाय भक्तिं विशिनष्टि—नैष्ठिकीति। महतापि बाधकेनाचालनं निष्ठा, तां प्राप्ता नैष्ठिकी, निश्चलप्रेमप्रवाहरूपेत्यर्थः। एवं फलभूतायां भक्तौ जातायां प्रयोजनाभावात् साधनभूता श्रवणादिभक्तिस्त्याज्या ग्राह्या वेत्यपेक्षायां भगवन्तं विशिनष्टि—उत्तमश्श्लोक इति। उद्गतं तमोऽविज्ञानलक्षणं येषां ते उत्तमसस्तैरपि श्लोक्यते स्तूयते इति तथा तस्मिन्नित्यर्थः। तथाच भक्तौ जातायामपि श्रवणादित्यागो नास्तीति भावः। सर्वथा कामादिवासनानाशस्तु भगवत्साक्षात्कारानन्तरमेवेति सूचयितुं प्रायोग्रहणम्॥ १८॥ ❀ ❀ एवं भगवता कामादिनिराकरणेऽपि दृढा भक्तिः कथं भवतीत्यपेक्षायां चित्तप्रसादादित्याह—तदेति। यदा भगवदावेशदशायां ये रजस्तमोभावाः रजस्तमसोः कार्यभूताश्चित्तविक्षेपावरणहेतवः कामलोभादयः—आदिपदेन क्रोधमोहादयश्च—भगवत्सम्बन्धादेव नष्टप्राया भवन्ति तदा तैरेतैरनाविद्धं अतएव सत्त्वे स्थितं सत् चेतः प्रसीदति लयविक्षेपहेत्वभावात् भगवत्सम्बन्धाच्च स्वच्छं चित्तं प्रसन्नं भवति। यथा स्पर्शमणिस्पर्शेन ताम्रलोहसुवर्णैर्निर्मितं पात्रं सर्वमेव सुवर्णं भवति, तथा त्रिगुणमपि चित्तं भगवत्सम्बन्धात् सर्वसत्त्वं भवतीति ततो निश्चला भक्तिर्भवतीति शेषः॥१९॥ ❀ ❀ ततश्च किं भवतीत्यपेक्षायां 'सत्त्वात्सञ्जायते ज्ञानं, भक्त्या मामभिजानाति, भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप' इत्यादिवाक्यानुसारेण भगवत्साक्षात्कार एवेत्याह—एवमिति। एवमुक्तप्रकारेण प्रसन्नं मनो यस्य तस्य भगवद्भक्तियोगतो मुक्तसङ्गस्य विषयाद्विरक्तस्य पुरुषस्य भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं विज्ञानं जायते इत्यन्वयः। ननु 'विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः। वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्' इति वाक्यात्कथं विषयासक्तस्य प्रसन्नमनसोऽपि भगवद्भक्तिस्तत्तत्त्वविज्ञानं वा सम्भवतीत्याशङ्कयाह-मुक्तसङ्गस्येति। मनसः प्रसादस्य विषयवैतृष्ण्याविनाभूतत्वात्प्रसन्नमनसो मुक्तसङ्गत्वं भवत्येवेति भक्त्याद्युत्पत्तौ न किञ्चित्प्रतिबन्धकमिति भावः॥ २०॥

हिन्दी अनुवाद

भगवान् श्रीकृष्णके यशका श्रवण और कीर्तन दोनों पवित्र करनेवाले हैं। वे अपनी कथा सुननेवालोंके हृदय में आकर स्थित हो जाते हैं और उनकी अशुभ वासनाओंको नष्ट कर देते हैं; क्योंकि वे संतोंके नित्यसुहृद् हैं॥ १७॥ ❀ ❀ जब श्रीमद्भागवत अथवा भगवद्भक्तोंके सेवनसे अशुभ वासनाएँ नष्ट हो जाती हैं, तब पवित्रकीर्ति भगवान् श्रीकृष्णके प्रति स्थायी प्रेमकी प्राप्ति होती है॥ १८॥ ❀ ❀ तब रजोगुण और तमोगुणके भाव–काम और लोभादि शान्त हो जाते हैं और चित्त इनसे रहित होकर सत्त्व गुण में स्थित एवं निर्मल हो जाता है॥ १९॥ ❀ ❀ इस प्रकार भगवान्की प्रेममयी भक्तिसे जब संसारकी समस्त आसक्तियाँ मिट जाती हैं, हृदय आनन्दसे भर जाता है, तब भगवान्के तत्त्वका अनुभव अपने-आप हो जाता है॥२०॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे॥ २१॥

अतो वै कवयो नित्यं भक्तिं परमया मुदा। वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम्॥ २२॥

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥ २३॥

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनम्॥ २४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ज्ञानफलमाह। भिद्यत इति। हृदयमेव ग्रंथिश्चिज्जडग्रथनरूपोऽहंकारः। अत एव सर्वे संशयाः असंभावनादिरूपाः। कर्माण्यनारब्धफलानि। आत्मनि स्वरूपभूते ईश्वरे दृष्टे साक्षात्कृते सति। एवकारेण ज्ञानानंतरमेवेति दर्शयति॥ २१॥ ❀ ❀ तत्र च सदाचारं दर्शयन्नुपसंहरति। अत इति। आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषो दर्शितः॥ २२॥ ❀ ❀ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेऽपि वासुदेवस्याधिक्यमाह। सत्त्वमिति। इह यद्यप्येक एव परः पुमानस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं हरिविरिंचिहरेति संज्ञाः केवलं भिन्नाः धत्ते। 'हरिविरिंचिहरा इति वक्तव्ये संधिरार्षः। तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः॥ २३॥ ❀ ❀ उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टान्तमाह। पार्थिवात्स्वतः प्रवृत्तिप्रकाशरहिताद्दारुणः काष्ठात्सकाशाद् धूमः प्रवृत्तिस्वभावः त्रयीमयो वेदोक्तकर्मप्रचुरः ईषत्कर्मप्रत्यासत्तेः। तस्मादप्यग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात्। एवं तमसः सकाशाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकम्। तुशब्देन लयात्मकात्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वात्। यत्सत्त्वं तत्साक्षाद्ब्रह्मदर्शनम्। अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः॥ २४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अविद्या वा हृदयग्रंथिः भिद्यत इति कर्मकर्तरि प्रयोगेणाविद्याध्वंसो भक्तानामननुसंहितं फलम्। अत एवाहंकारादिध्वंसादेव। आदिपदाद्विपरीतभावनादिग्रहः। आत्मनीतीश्वरविशेषणम्। यद्वात्मन्येव मनस्येव दृष्टे किं पुनः साक्षात् दृष्टे सतीति स्फूर्तिसाक्षात्कारावुक्तौ "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः॥ भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः। निष्ठा रुचिरथासक्ती रतिः प्रेमाथ दर्शनम्॥ हरेर्माधुर्यानुभव इत्यर्थाः स्युश्चतुर्दश" इति विश्वनाथः। संदर्भस्तु तस्य च परमानन्दैकरूपत्वेन स्वतः फलरूपस्य साक्षात्कारस्यानुषंगिकफलमाह। भिद्यंत इति। श्रवणमननादिप्रधानानामपि तस्मिन्द्रष्टव्येव सर्वे संशयास्समाप्यंत इत्यर्थः। अतः श्रवणेन तावज्ज्ञेयगता संभावना छिद्यते। मननेन तद्गतविपरीतभावना। साक्षात्कारेण आत्मयोग्यतागतासंभावनाविपरीतभावने इति ज्ञेयम्। क्षीयंते तदिच्छामात्रेणैव तदाभासः किञ्चिदेव तेष्ववशिष्यत इत्यर्थः॥ २१॥ ❀ ❀ तत्र चात्मसाक्षात्कारेण दुःखनिवृत्तिरूपहेतोर्भक्तिमार्गे च, अतो निःशेषदुःखनिवृत्तबुद्धिगोचरसुखानुभवलक्षणमोक्षाख्यपुरुषार्थलाभात्। परमया मुदेति कर्मानुष्ठानवन्न साधनकाले साध्यकाले वा भक्त्यनुष्ठानं दुःखरूपं प्रत्युत सुखरूपमेवेत्यर्थः॥ आत्मप्रसादिनीं विष्णुप्रसादजननीं वा॥ २२॥ ❀ ❀ तदेव वासुदेवभजनमेव। संदर्भस्तु तदेवं कर्मज्ञानवैराग्ययत्नपरित्यागेन भगवद्भक्तिरेव कर्तव्येति मतम्। कर्मविशेषरूपं देवतांतरभजनमपि न कर्तव्यमित्याह सप्तभिः। तत्रान्येषां का वार्त्ता। सत्यपि श्रीभगवत एव गुणावतारत्वे श्रीविष्णुवत्साक्षात्परब्रह्मत्वाभावात्सत्त्वमात्रोपकारकाभावाच्च। प्रत्युत रजस्तमोबृंहणत्वाच्च। ब्रह्मशिवावपि श्रेयोर्थिभिर्नोपास्यावित्याह। सत्त्वमिति द्वाभ्याम्। इह यद्यप्येक एव पुमानस्य विश्वस्य स्थित्यादये स्थितिसृष्टिलयार्थं तैः सत्त्वादिभिर्युक्तः पृथक्पृथक् तदधिष्ठाता, तथापि परस्तदसंश्लिष्टः सन् हरिविरिंचिहरेति संज्ञा भिन्ना धत्ते, तत्तद्रूपेणाविर्भवतीत्यर्थः। तथापि तत्र तेषां मध्ये श्रेयांसि धर्मार्थकाममोक्षाख्यानि शुद्धफलानि सत्त्वतनोरधिष्ठितसत्त्वशक्तेः श्रीविष्णोरेव स्युः अयम्भावः—उपाधिदृष्ट्या तौ द्वौ सेवमाने रजस्तमसोर्घोरमूढत्वात् भवंतोपि धर्मार्थकामा नातिसुखदा भवंति। तथोपाधित्यागेन सेवामाने भवन्नपि मोक्षो न साक्षान्न च झटिति। किं तु कथमपि परमात्मांश एवायमित्यनुसंधानाभ्यासेनैव परमात्मन एव भवति। तत्र तत्र साक्षात्परमात्माकारेणाप्रकाशात्। तस्मात्ताभ्यां श्रेयांसि न भवंतीति। अथोपाधिदृष्ट्यापि श्रीविष्णुं सेवमाने सत्त्वस्य शांतत्वाद्धर्मार्थकामा अपि सुखदाः। तत्र निष्कामत्वेन तु तं सेवमाने "सत्त्वात्संजायते ज्ञानम्" इति चोक्तेर्मोक्षश्च साक्षात्। अत उक्तं स्कांदे "बंधको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः॥" इति। उपाधिपरित्यागेन तु पंचमः पुरुषार्थो भक्तिरेव भवति। तस्य परमात्माकारेणैव प्रकाशात्। तस्माच्छ्रीविष्णोरेव श्रेयांसि स्युरिति। अत्र विश्वनाथः एवं कर्मज्ञानादिकमतिक्रम्य भक्तेरेव यथा कर्तव्यत्वमुक्तं तथैव देवतांतरोपासनामप्यपहाय भगवानेवोपास्य इत्युच्यते। स च भगवानेक एवापि क्रीडयाऽवतरन्ननेकोपि भवति। "बहुमूर्त्येकमूर्तिकम्" इति दशमात्। तस्यावतारा द्विविधाश्चिच्छक्त्या मायाशक्त्या च। चिच्छक्त्या मत्स्यकूर्मादयो भजनीया एव। मायाशक्त्या च ये सत्त्वरजस्तमोभिर्विष्णुब्रह्मरुद्रास्तेषु विष्णुरेव भजनीय इत्याह। सत्त्वमिति। यद्यप्येक एव पुमानादिपुरुषः अस्य विश्वस्य स्थित्याद्यर्थं तैस्सत्त्वादिभिर्युक्तो हर्यादिसंज्ञा धत्ते। संधिरार्षः। पर इति। गुणैर्युक्तोप्यचिंत्यशक्त्या तेभ्यो बहिः पृथक् स्थित्यैव तेषामस्पर्शनात्परोऽयुक्त इत्यर्थः। तदपि श्रेयांसि भक्तानामभीष्टानि तत्र तेषु मध्ये सत्वतनोः "भेजिरे मुनयोथाग्रे भगवंतमधोक्षजम्। सत्त्वं विशुद्धं क्षेमाय कल्पंते ये तु तानिह" इत्युत्तरश्लोकदृष्ट्या विशुद्धसत्त्वात्मकशरीराद्धरेरेव स्युः। "साक्षी चेताः केवलो निर्गुणश्च" इति "सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः" इति "हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः" इत्यादिश्रुतिस्मृतिविरोधाद्धरी मायागुणस्य सत्त्वस्य युक्तत्वेपि तस्यायोग एव। सत्त्वस्य प्रकाशरूपत्वादौदासीन्याच्च। तेन सच्चिदानन्दवस्तुनो महाप्रकाशकस्योपरागासंभवात्प्राकृतसत्त्वस्य न हि हरिशरीरारंभकत्वम्। रजस्तमसोस्तु विक्षेपरूपत्वावरण-

रूपत्वाभ्यानुपकारकत्वापकारकत्वाभ्यां च ताभ्यामानंदस्य विक्षिप्तत्वमावृतत्वमित्युपरागसंभवात् । ब्रह्मरुद्रयो रजस्तमस्तनुत्वमेवेति तयोः सगुणत्वं हरेर्निर्गुणत्वञ्च युक्तिसिद्धमेव । निर्गुणत्वेपि प्राकृतसत्त्वस्य प्रकाशरूपेण तत्समीपवर्त्तितया तत्र स्थितत्वाद्विश्वपालन-लक्षणस्तद्धर्मे औदासीन्येन हरौ प्रतीयते । न च तेन तस्य निर्गुणत्वं व्याहतमिति वाच्यम् । संयोगसमवायसंबंधाभ्यां प्राकृतसत्त्वस्य तत्रासंभवात्सामीप्यसंबंधेनैव तत्र स्थितत्वादिति । स्वभक्तिज्ञानस्फूर्तिसाक्षात्कारादिदानेनैवासक्त्यैव । स्वभक्तपालनं तु स्वरूपभूतस्य शुद्धसत्वस्य धर्मो ज्ञेयः । किञ्चात्र ब्रह्मणो हिरण्यगर्भत्वात् "नेतरोनुपपत्तेः" इति न्यायेन तस्येश्वरत्वाभावात् । जीवत्वेन तद्वति रजसि परमेश्वरस्य योगात्तत्रावेशादेवावतारत्वम् । तदुक्तं ब्रह्मसंहितायाम्—"भास्वान्यथाश्मशकलेषु निजेषु तेजः स्वीयं कियत्प्रकटयत्यपि तद्वदत्र । ब्रह्मा य एव जगदंडविधानकर्ता गोविंदमादिपुरुषं तमहं भजामि" इति । शिवस्य तु जीवत्वाभावाद् गुण-युक्तेश्वरत्वमेव । तदुक्तं तत्रैव "क्षीरं यथा दधिविकारविशेषयोगात्संजायते न तु ततः पृथगस्ति हेतोः । यः शंभुतामपि तथा समुपैति कार्याद्गोविंदमादिपुरुषं तमहं भजामि" इत्यतो ब्रह्मशिवयोर्मध्ये शिवस्येश्वरत्वमिति केचिदाहुः । केचित्तु तैर्युक्त इति नियामकसंबंधेन सामीप्यसंबंधेन च योगो ज्ञेयः । तत्र सत्वादीनां नियामकतासंबंधेन सति पुरुषः स्वस्वरूपेण स्थितो निर्गुण एव भवति । रजसि तमसि च संयोगसंबंधेन योगे स एव पुरुषो ब्रह्मा रुद्रश्च सगुण एव भवति । सत्त्वे सामीप्यसम्बन्धेन योगे स एव पुरुषो विष्णुस्वरूपेण स्थितो निर्गुण एव भवतीत्याचक्षते । अतएव योगो नियामकतया गुणैः संबंध उच्यते, अतः स तैर्न युज्येत । तत्र स्वांशपरस्य य इति भागवतामृतकारिकार्थ उपपद्यत इति । अत्र च शास्त्रांतरविचारतो वस्तुतो ब्रह्मादित्रयाणामभेद एव । "त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनो ब्रह्मन्स शांतिमधिगच्छति" इति चतुर्थस्कंधोक्तेरभेदस्यैव शांतिपदवाच्यमोक्षहेतुत्वात्स एवात्र विचार्य्यते । तथा हि । एक एवेशः स्वोपाधिमायागुणत्रयप्रयुक्तसर्गादिकर्मभेदेन ब्रह्मविष्णु-रुद्रशब्दैरुच्यते । यथैक एव क्षेत्रे बीजवापं कुर्वन्नावापकः सस्योपेतं तदेव क्षेत्रं जलसेकादिना पालयन् पालकोन्ते दात्रादिना तदुपसंहरँल्लावक इत्युच्यते । तत्र कारणीभूतरजोगुणग्रहणेन सर्वप्रपंचस्य स्रष्टा सन्स एव ब्रह्मेत्युच्यते । हिरण्यगर्भस्तु यद्यप्य-पंचीकृतस्रष्टृत्वाभावान्न ब्रह्मा । तथापि पंचीकृतभूतभौतिकस्रष्टृत्वात्कचिद्ब्रह्मेत्युपचर्यते । स च जीवः कल्पांतरीयसूत्रात्माहंग्रहो-पासनया तद्भावं प्राप्त इति प्रसिद्धमितिहासादिषु । अतस्तदीशत्वबोधका वाचस्तदंतर्यामिपरा एव । एवं विराड्वह्नीन्द्रसूर्यादी-शत्वबोधका अपीति बोध्यम् । तदंतर्यामिणश्च वस्तुतस्तदभेदेपि भेदव्यपदेशाच्चान्य इत्यादिसूत्रेभ्यः "यश्चादित्ये तिष्ठन्नादित्या-दन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमंतरो यमयति । भीषास्माद्वातः पवते" इत्यादिश्रुतिभ्यश्च व्यावहारिकभेदोपि स्वीक्रियते । कारणीभूतसत्त्वगुणमादाय सर्वचराचरप्रपञ्चं पालयन्स विष्णुरित्युच्यते । तादृशतमोगुणमादाय उपसंहरन्स एव रुद्र इति कथ्यते । एवञ्चैकस्यैव वस्तुनः परब्रह्मपरमशिवमहाविष्णुवासुदेवादिशब्दगोचरस्य चतुर्मुखचतुर्भुजपंचमुखरूपाः पुमाकारा वाणीरमोमारूपास्त्र्याकाराः लीलाविग्रहाः । ननु चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पंचमुखाकारो हरस्य वाण्याकारो विधे रमाकारो हरेरुमाकारो हरस्य विग्रह इति विशिष्य वक्तव्यम् । गुणत्रयभेदेन तदवच्छिन्नानां भेदात् । तथा च कथमेकस्ये-त्युक्तमिति चेच्छृणु । चतुर्भुजशरीरिणः पालकत्वप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यं, दैत्यसंहारादिरूपस्य तमोऽवच्छिन्नरुद्रकार्यस्य दर्शनात् । तस्य सुरादिरक्षणफलकत्वेपि तमःकार्यत्वेन तदवच्छिन्नरुद्रकार्यत्वात् । एवं पंचमुखाकारावच्छिन्नस्येशस्य त्रिपुरादि-दैत्यसंहर्तृत्वेपि न केवलरुद्रत्वरूपनिर्णयः । संहारस्य देवादिपालनफलकत्वेन विष्णुकार्यत्वात् । "शिव एको ध्येयः शिवंकरः । प्रज्ञा च तस्मात्प्रसृता पुराणी" इत्यादि श्रुत्या "स मोचयति सुप्रीतः । मोचयामि श्वपाकं वा" इत्यादिस्मृत्या च मुक्तिदानादिरूपस्य सत्त्वावच्छिन्नविष्णुकार्यस्य प्रतीतेश्च । "तमूचुर्भ्रातरो रुद्रः सेवितः सात्त्विकैर्जनैः । मोचयेत्सत्वसंयुक्तः पूजयेशमतो हरम् ॥" इति । कौर्मे तु रुद्रे साक्षादेव सत्त्वयोगः प्रतिपादितः । एतेन तामसत्वेन रुद्रस्यापकर्षत्वप्रलापो मूर्खाणां निरस्तः । निरंतरे दुःखमयसंसारपरिवृत्तिश्रांतानां जीवानां कंचित्कालं विक्षेपविगमसमुल्लसदात्मानंदानुभवेन विश्रांतिं संपादयितुकामस्य तस्य संहाराय तमोग्रहणस्य दुश्चिकित्सव्रणपीडितानां व्रणं शिशमयिषोः शस्त्रग्रहणन्यायेन "निदानज्ञस्य भिषजो रुग्णहिंसां प्रयुंजतः । न किंचिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका ॥" इति शिवपुराणव्याख्यानेन निरतिशयकरुणांबुधित्वलिंगात् । ब्रह्मकोटौ गुणवश्य-त्वासंभवात् । निद्रालस्यादेस्तमःकार्यस्य तत्राप्रसिद्धेश्च । तमोयोगमात्रेण तत्पारवश्यस्य शंकितुमशक्यत्वात् । अन्यत्राप्यति-प्रसंगादुत्कर्षापकर्षाभावे श्रुतिस्मृतिविगीतत्वस्य प्रतिपिपादयिष्यमाणत्वाच्च "सत्त्वोद्रिक्तस्ततो ब्रह्मा" इति विष्णुपुराणादौ ब्रह्मणोपि सत्त्वगुणयोगेन विष्णुत्वं प्रतीयते । भारते चातिवृद्धानां प्रजानां विधेः कोपाग्निनोपसंहर्तृत्वस्य स्मरणेन रुद्ररूपत्वं चावगम्यते । वासिष्ठे तु "सत्त्वं देवा हरादयः" इति साम्येन सर्वेषां शुद्धसत्त्वप्रधानमायोपाधित्वमुक्तम् । एवं भवान्या दैत्यादिसंहर्तृत्वेपि पालनरूपविष्णुकार्यप्रतीतेः । "नृणां भवति मुक्तये" इति मार्कण्डेयोक्तमोचकत्वरूपसत्त्वावच्छिन्नविष्णुकार्यप्रतीतेश्च । महिषा-सुरयुद्धेऽसंख्यगणोत्पादकत्वरूपरजोवच्छिन्नब्रह्मकार्यप्रतीतेश्च न केवलरुद्ररूपत्वनिर्णयः । ननु मोक्षप्रदत्वादिकमिदं महालक्ष्या उक्तं "सा चान्यैव समष्टिरूपा" इति मार्कण्डेयप्राधानिकरहस्यगततन्माहात्म्यालोचनेन बुध्यते । तथा च कथमनेन पार्वत्या मोचकत्वाद्युक्त्या विष्ण्वादिरूपतोच्यते इति चेत् । सत्यम् , एवं प्रतीयतेऽल्पश्रुतानाम् । बहुश्रुतैस्तूमावतार एव सेति निर्द्धार्य्यते । तथाहि मार्कण्डेये तस्य महिषशुंभादिहंतृत्वं नंदपुत्रीत्यादिकं च यदुक्तं तत्सर्वं हरिवंशे गौर्या उक्तम् । तत्र तावत्प्रद्युम्नशंबरयुद्धे

"हतायां सर्वमायायां शंबरोऽचिंतयत्पुनः । अस्ति मे कालदंडाभो मुद्गरो हेमभूषितः । पुरा यो मम पार्वत्या दत्तः परमतुष्टया ॥ गृहाण शंबरेमं त्वं मुद्गरं हेमभूषितम् । मायांतकरणं नाम सर्वासुरविनाशनम् । अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ । शुंभश्चैव निशुंभश्च सगणौ सूदितौ मया" इति पार्वत्या एव ससैन्यशुंभहंतृत्वमुक्तम् । ततः शक्रप्रेषितनारदेन मुद्गरवृत्तांतं तस्य शांत्यै गौर्युपासनं चोपदिश्य गते सति दैत्येन तस्मिन्गृह्यमाणे सति तदुपादानाद् द्वादशादित्योत्थान्महोत्पातान्दृष्ट्वा प्रद्युम्नः शंभुप्रियां हृदि स्मृत्वा भूमौ शिरसा प्रणम्य तुष्टाव "ॐनमः कात्यायन्यै गुहस्य जनन्यै नमः । नमस्त्रैलोक्यमायायै कात्यायन्यै नमो नमः ॥ नमस्ये शुंभमथिनीं निशुंभहृद्विदारिणीम् । विंध्यवासिनीं दुर्गघ्नीं रणदुर्गां रणप्रियाम् ॥ त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम् । सिंहवाहां नमस्यामि" इत्यादिना मध्यमोत्तमचरितोक्तं सर्वं गुप्तमत्र विषयमुपपादितम् । प्रथमचरितदेवता तु योगनिद्रारूपा तामसी शक्तिः । सा च रुद्रांतर्भूतैवेति न विवादः । यद्यपि तत्र शुंभनिशुंभयोः शूलखड्गाभ्यां हननमत्र तु मुद्गरेणेति विरोधस्तथापि स कालभेदेनापास्तुं शक्यः । "वैवस्वतेन्तरे" इत्यादिभगवत्युक्तेः । हरिवंश एवानिरुद्धविष्णुकृते भीष्मपर्वणि पार्थकृते च स्तवे पुराणांतर्गतोमामाहात्म्यवचनेष्वयमेवार्थः स्पष्टः । ग्रन्थविस्तरभिया वाक्यानि नेह लिख्यंते । यानि तूमादेर्महालक्ष्मीविभूतित्ववचांसि तानि विष्ण्वादेर्नृसिंहविभूतित्वबोधकवचांसीवोपासनार्थस्तुतिपराणि । वस्तुतस्तु गौरीत्वमेवेत्यादीनि साक्षादभेदपराण्येव । अन्यथा "त्वमक्षरं ब्रह्म" इत्यादेरपि तादृशवाक्यगणे पठितस्य तथात्वप्रसंगेनाक्षरस्य परब्रह्मणोपि स्तुत्यश्रीरामादिविभूतित्वप्रसंगः । अवतारावतारिणोश्चात्यंताभेद एव । किञ्च "न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मायाहं परं ब्रह्म स विष्णुः परमेश्वरः" इति कौर्मे शिवयैव स्वस्या विष्णुरूपत्वमुक्तम् । "सदाशिवांकमारूढा शक्तिरिच्छाह्वया शिवा । महालक्ष्मीः" इति शैवे साक्षान्महालक्ष्मीरूपतो माया इत्युक्ता । लक्ष्मीतन्त्रे लक्ष्म्याः काल्यादेः स्वावतारत्वोक्तेरपि सोभयोरभेदपरैव, "हिरण्यगर्भरुचिरौ स्त्रीपुंसौ कमलासनौ" इत्यादिप्राधानिकरहस्ये रमाया रजोवच्छिन्नब्रह्मरूपत्वं प्रतीयते अतोस्या न केवलविष्णुरूपत्वनिश्चयः । न चैतेनास्याः केवलं विधिरूपत्वमस्तु । कौर्मे "इयं सा परमा शक्तिर्मन्माया ब्रह्मरूपिणी" इति विष्णूक्त्या विष्णुपुराणादिवचनैश्चास्या विष्णुरूपत्वस्यापि प्रतीतेः । एवम् "मोक्षदे मुक्तिमार्गे" इत्यादिरुद्रयामलोक्त्या सरस्वत्या मोक्षादिरूपसत्त्वावच्छिन्नकार्यप्रतीतेः । "सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ" इति प्राधानिकरहस्ये श्वेतरूपत्वात्साक्षात्सत्त्वयोगोक्तेश्च न केवलब्रह्मरूपत्वनिर्णयः । एतच्च शिवेऽपि तुल्यम् । तस्मात्सर्वेषां सर्वे देहा इति सिद्धम् । तथा च एकरूपत्वमेव सर्वेषां पर्यवसन्नम् । तदुक्तं हरिवंशे "यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः । एकमूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ॥ वरदा लोककर्त्तारो लोकनाथाः स्वयंभुवः । अर्द्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिताः ॥" इत्यादि । एतेन "रुद्रो नारायणश्चैवेत्येकं सत्त्वं द्विधा कृतम्" इत्यादिभारतादिवचनमाश्रित्य शिवविष्णू एव सत्त्वावच्छिन्नेशरूपौ । ब्रह्मा तु जीव एवेशाविष्टः स्रष्टा भवतीति ब्रुवाणा निरस्ताः । यत्तु हरादिषु कचित्कस्माचित्कस्यचित्कदाचित्केनचिन्निमित्तेन लीलया वाविर्भाव उच्यते, सोपि विचार्य्यमाण ऐक्य एव पर्यवस्यति । तथाहि कचिद्विधेरुभयोराविर्भाव उच्यते । यथा "यथा यजुर्भ्योथ विष्णुम्" इत्यादिश्रुतावष्टमूर्त्तिब्राह्मणे चान्यत्रापि पुराणादिषु कचिकचिद्धरात् । तथा च श्रुतिः "अण्डं हिरण्मयं रुद्रस्य वीर्यात्प्रथमं संबभूव तत्र ब्रह्मा विष्णुर्जातः" इत्यादि । हरिवंशे च हरं प्रति हरिवचनम् "अहं ब्रह्मा कपिलोथाप्यनंतः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्यः ॥" इति कचिद्धरेर्यथा "नारायणाद्ब्रह्मा जायते नारायणादिन्द्रो जायते नारायणाद् द्वादशादित्या रुद्रः सर्वे देवताः" इत्यादिश्रुतौ । यथा च भारते "त्वद्विस्तारो यतो ब्रह्मा अहं भूतपतिस्तथा" इति एवमन्यान्यपि शैववैष्णवादिसत्तेषूदाहृतानीदृशानि वचांसि स्मर्तव्यानि । एतानि कल्पभेदेन व्यवस्थितानि । एतद्व्यतिविस्तरेण श्रीवसिष्ठो वासिष्ठे श्रीरामं प्रति कथयामास । तत्रैवेशश्चाह वसिष्ठं प्रति "एवं सर्गे हि कस्मिंश्चित्प्रथमोऽथ सदाशिवः । कस्मिंश्चिद्विष्णुरित्युक्तो नाभ्युत्पन्नपितामहः । पितामहस्स कस्मिंश्चित्कस्मिंश्चिदपि चेतरः ॥" इति । इतरो दुर्गाभैरवविनायकादिः । तेषामपि तन्माहात्म्यबोधकपुराणादिभागेषु ब्रह्माद्युद्भवहेतुत्वसिद्धेः । भगवान्वायुश्चाह "ब्रह्मनारायणौ पूर्वं रुद्रः कल्पांतरेऽसृजत् । कल्पांतरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः ॥ विष्णुश्च भगवांस्तद्वद् ब्रह्माणमसृजत्पुनः । नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनः शिवः ॥ एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः । परस्परस्माज्जायंते परस्परजयैषिणः ॥ तत्तत्कल्पांतवृत्तांतमधिकृत्य महर्षिभिः । प्रभावः कथ्यते तेषां परस्परसमुद्भवात् ॥" इति । कौर्मे च "कचिद्रुद्रः कचिद् ब्रह्मा कचिद्विष्णुः प्रशस्यते । नान्येन तेषामाधिक्यं न्यूनत्वं वा कथंचन ॥ तत्तत्कल्पांतवृत्तांतमधिकृत्य महर्षिभिः । तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति" इत्युक्तम् । मार्कंडेयेपि "विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥" इत्यादिना दुर्गाया विष्ण्वाद्युदयमुक्त्वा यस्तद्देहेभ्योऽस्या उद्भव उक्तः सोपि कालभेदेन व्यवस्थितः । एवं गणेशपुराणादौ विनायकादेर्ब्रह्माद्याविर्भाव उक्तः सोपि समाधातुं शक्य इति न कुत्रापि विरोधः । इत्थं सर्वेषां सत्त्वतनुत्वात्सत्त्वतनुत्वेन या विध्यादेरप्युपासना सापि श्रेयोहेतुरिति सिद्धम् । अत्र बहु वक्तव्यमस्ति ग्रन्थविस्तरभिया नोक्तमित्यलम् ॥ २३ ॥ ❋ ❋ ईषत्कर्मप्रत्यासत्तेर्धूमदर्शने सत्यधुनाग्निरप्याविर्भवति । जातश्चाधुना होमनैकट्यमिति ज्ञानात् । इतिभाव इति । उपाधिरेव वैशिष्ट्यावैशिष्ट्यहेतुस्स्वतस्त्वेकरूपतैवेत्याशयः । अत्र सन्दर्भः–अत्र यत् त्र्याणामभेदवाक्येनोपजातमतयो विवदन्ते । तत्रेदं ब्रूमः । यद्यपि तारतम्यमिदमधिष्ठानगतमेव । अधिष्ठाता तु परः पुरुष एक एवेति

भेदासम्भवात्सत्यमेवाभेदवाक्यम्। यथापि तस्य तत्र तत्र साक्षात्त्वासाक्षात्त्वभेदेन प्रकाशेन तारतम्यं दुर्निवारमेवेति सदृष्टांतमाह पार्थिवादिति। पार्थिवान्न तु धूमवदंशेनाग्नेयात्। तत्र तत्र वेदोक्तकर्मणः साक्षात्प्रवृत्तिप्रकाशरहिताद् दारुणः यज्ञियात् मंथनकाष्ठात्सकाशादंशेनाग्नीयो धूमस्त्रयीमयः पूर्वापेक्षया वेदोक्तकर्माधिक्याविर्भावास्पदं तस्मादपि स्वयमग्निस्त्रयीमयः साक्षात्तदुक्तकर्माविर्भावास्पदम्। एवं काष्ठस्थानीयात्सत्त्वगुणविदूरात्तमसः सकाशाद्धूमस्थानीयं किंचित्सत्त्वसंनिहितं रजो ब्रह्मदर्शनं वेदोक्तकर्मस्थानीयस्य ब्रह्मणस्तु तत्तदवतारिणः पुरुषस्य प्रकाशद्वारम्। यदग्निस्थानीयं सत्त्वं साक्षाद्ब्रह्मणो दर्शनं साक्षादेव सम्यक्तत्तद्गुणरूपाविर्भावद्वारम्। अतो ब्रह्मशिवयोरसाक्षात्त्वं सिद्धमिति भावः। तथा च श्रीवामनपुराणे "ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः। ब्रह्मणि ब्रह्मरूपः स शिवरूपः शिवे स्थितः॥ पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः।" इति श्रीदशमे च शिवः शक्तियुतः "शश्वत् त्रिलिंगोगुणसंवृतः" इत्यादौ "हरिर्हि निर्गुणः साक्षादीश्वरः प्रकृते परः। स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत्॥" अत एव श्रीविष्णोरेव परमपुरुषेण साक्षादभेदोक्तिः "सृजामि तन्नियुक्तोहम्" त्यादिना द्वितीये तदुक्तं स एव विष्णुरिति। श्रुतिश्च "पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजो जायते यतः प्रजाः सर्वाणि भूतानि। नारायणः परं ब्रह्म तत्त्वं नारायणः परः। ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलमिति" "एको नारायण आसीन्न ब्रह्मा न च शंकरः। स मुनिर्भूत्वा समचिंतयत्। तत एवैते व्यजायंत। विश्वे हिरण्यगर्भोऽग्निर्वरुणरुद्रेंद्रा" इति च। एवं त्रिदेवीपरीक्षायामपि श्रीविष्णोरेवाबाध्यत्वं स्पष्टम्। एवं भगवदवतारानुक्रमणिकासूत्राणां भेदमंगीकृत्यैव केवलश्रीदत्तस्य गणना सोमदुर्वाससोस्त्वगणना। तदेवं श्रीविष्णोरेव सर्वोत्कर्षे स्थिते यदन्यत्र विष्णुशिवयोर्भेदे नरकः श्रूयते। तदनैकान्तिकवैष्णवशास्त्रत्वादनैकान्तिकवैष्णवपरमेव। तद्विपरीतं हि श्रूयते पाद्मोत्तरखंडादौ "यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः। समत्वेनैव वीक्षेत स पाखंडी भवेद् ध्रुवम्॥" इत्यादि। तथा च विष्णुधर्मोत्तरांते लिंगस्फोटनृसिंहोपाख्यानम्। विष्वक्सेननामा विप्रः कश्चिदेकान्ते विष्णुभक्त आसीत्तस्य पृथिवीं भ्रमतो दैवात्केनचिद् ग्रामाध्यक्षपुत्रेण मिलनमभूत। तयोः संकथा चेयम् "देवकर्मण्यशक्तिर्मे तात पूजय शंकरम्। देवतायतनं गत्वा तत्र तात प्रतिष्ठितम्॥ लिंगमस्ति सुरेशस्य महादेवस्य निर्मलम्। एवमुक्तः प्रत्युवाच वयमेकांतिनः श्रुताः॥ चतुरात्मा हरिः पूज्यः प्रादुर्भावगतोथवा। पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ मा चिरम्" इत्यादिका। ततो ग्रामाध्यक्षपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन्स इदं विचारयामास भवतु तत्रैव गच्छाम इति। ततो लिंगसमीपं गत्वा तस्मिन्नधिष्ठाने श्रीनृसिंहाय नम इति पुष्पांजलौ विक्षिप्ते तच्छ्रुत्वा पुनः शिरश्छेत्तुमुद्यतस्य तल्लिंगं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि छिन्नानीति। तदेतदुक्तं स्कांदे "शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यत्" इति। मोक्षधर्मे नारायणीयोपाख्याने "सांख्यं च योगश्च सनातने द्वे वेदाश्च सर्वे निखिलेपि राजन्। सर्वैः समस्तैरृषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम्" इति। महाभारते "यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते। स हेमराशिमुत्सृज्य पांशुमुष्टिं जिघृक्षति॥" इति। अत एवोक्तं नारदेन "अविस्मृतं तं परिपूर्णकामं स्वेनैव लाभेन शमं प्रशांतम्। विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्त्ति सिंधुम्॥" श्रीहरिवंशे "हरिरेव सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः। विष्णुमंत्रं सदा विप्राः पठध्वं ध्यात केशवम्॥" इति। अत एव विष्णुमंत्रजापकस्याधिक्यं श्रीनृसिंहतापिन्यां श्रुतौ "अनुपनीतशतमेकमेकेनोपनीतेन तत्समम्उपनीतशतमेकमेकेन गृहस्थेन तत्समं गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समं वानप्रस्थशतमेकमेकेन यतिना तत्समं यतीनां शतं पूर्णमेकेन रुद्रजापेन तत्समं रुद्रजापकशतमेकमेकेनाथर्वांगिरसशिखाध्यापकेन तत्समम्। अथर्वांगिरसशिखाध्यापकशतमेकमेकेन मंत्रराजाध्यापकेन तत्समम्" इति। मंत्रराजः श्रीनृसिंहमंत्र एव। अत एवोक्तं वाराहे "जन्मांतरसहस्रेषु समाराध्य वृषध्वजम्। वैष्णवत्वं लभेद्धीमान्सर्वपापक्षये सति" इति। यत्तु श्रीभागवत एव "त्रयाणामेकभावानां यो न पश्यति वै भिदाम्। सर्वभूतात्मतां ब्रह्मन्स शांतिमधिगच्छति" इत्यादि। तत्खलु श्रीविष्णोः सकाशादन्यास्वातंत्र्यापेक्षयैव। तदुक्तं श्रीब्रह्मणा "सृजामि तन्नियुक्तोहं हरो हरति तद्वशः। विष्णुः पुरुषरूपेण परिपाति त्रिशक्तिधृक्" इति। श्रीसंकर्षणेन च "ब्रह्मा हरोहमपि यस्य कलाः कलायाः" इति। "यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्" इति च। एतदभिप्रेत्यैवोक्तं पाद्मेपि "शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः" इति। अत्र श्रीविष्णुनेति तृतीयाया निर्देशादत्रैव श्रीशब्ददानाच्च श्रीमतः सर्वशक्तियुक्तविष्णोः सर्वव्यापकत्वेन तन्नाम्नस्तस्माद्यः शिवस्य गुणनामादि सकलं धिया भिन्नं स्वतंत्रं पश्येदित्यर्थः। अतो मार्कण्डेयं प्रति श्रीशिववाक्यं चेदमेव--"न ते मय्यच्युतेऽत्रे च भिदामण्वपि चक्षते। नात्मनश्च परस्यापि तद्युष्मान्वयमीमहि॥" तत्तेभ्योपि सर्वसमदृष्टिभ्यो वयं युष्मानेव ईमहि प्रियत्वेन जानीम इति। "अथ भागवता यूयं प्रियाः स्थ भगवान्यथा। न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित्" इति चतुर्थे तस्यैवोक्तेः। अत एव तत्पूर्वं "नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत। भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये" इति। श्रीशिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य तस्य देव्यै महिमदर्शनार्थं हृदि छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता। यथोक्तं "किमिदं कुत एवेति समाधेर्विरतो मुनिः" इति। "तच्चान्यथा न संभवति" इति। श्रुतौ च श्रीविष्णोरेव सर्वोत्कर्षत्वमुक्तम्, "यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं सु मेधाम्" इत्यादिना। तस्मात्तदीयत्वेनैव ब्रह्मरुद्रभजने न दोषः। "स आदिदेवो जगतां परो गुरुः" इति, "वैष्णवानां यथा शंभुः" इत्याद्यंगीकारात्। यथानुष्ठितं श्रीप्रह्लादेन "ततःसंपूज्य शिरसा

ववंदे परमेष्ठिनम् । भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः ॥" इति । युधिष्ठिरेण च "क्रतुराजेन गोविन्द राजसूयेन पावनीः । यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो ॥" इति । "स्वतन्त्रेण तु भजने भृगुशापो दुरत्यय" इति । तथा चतुर्थे "भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् । भवव्रतधरा ये च ये च तान्समनुव्रताः ॥ पाखंडिनस्ते भवंतु सच्छास्त्रपरिपन्थिनः ॥" इत्यादि । वेदविहितमेवात्र भवव्रतमनूद्यतेऽन्यविहितत्वे पाखंडिविधानायोगः स्यात् । पूर्वत एव पाखण्डित्वसिद्धेः । तस्मात्स्वतंत्रत्वेनैवोपासनायामयं दोषः । यतश्च तत्रैव तेन श्रीजनार्दनस्यैव वेदमूलत्वमुक्तम् । "अत एव हि लोकानां शिवः पन्थाः सनातनः । यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥" इति । एष वेदलक्षणः । यत्प्रमाणः यत्र मूलमित्यर्थः । स्वतन्त्रोपासनायां तत्प्राप्तिः श्रीगीतोपनिषत्स्वेव निषिद्धा । "येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेपि मामेव कौंतेय यजन्त्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि माम्" इति । अवज्ञानादिकं तु सर्वथा परिहरणीयम् । यथा पाद्मे "हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः । इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ॥" श्रीभगवद्वाक्यं च "यो मां समर्चयेन्नित्यमेकान्तं भावमास्थितः । विनिंदन्देवमीशानं स याति नरकं ध्रुवम् ॥" गौतमीये च "गोपालं पूजयेद्यस्तु निंदेद्यन्यदेवताः । अस्तु तावत्परो धर्मः पूर्वधर्मो विनश्यति ॥" "हयशीर्षा मां पथि देवहेलनात्" इति नारायणवर्मणि तदागःप्रायश्चित्तं चतुर्थे नंदीश्वरशापश्च "संसरन्त्विह ये चामुमनु शर्वावमानिनम्" इति । अत्र विशेषजिज्ञासा चेत्परमात्मभक्तिसंदर्भौ दृश्यौ । विश्वनाथस्तु आवरणविक्षेपप्रकाशधर्माणां तमोरजःसत्त्वानां यथोत्तरं श्रैष्ठ्यम् । तथा सत्त्वस्य शुद्धसत्त्वे प्रातिकूल्याभावं च सदृष्टांतमाह । पार्थिवात्स्ववृत्तिप्रकाशप्रवृत्तिरहिताद्दारुणः काष्ठाद्धूमः प्रवृत्तिस्वभावः श्रेष्ठस्ततोऽप्यग्निः प्रवृत्तिप्रकाशधर्मकः वेदोक्तकर्मसाधनत्वात्त्रयीमयः । एवं तमसो लयात्मकत्वाद्रजो विक्षेपकं श्रेष्ठम् । ततोपि सत्त्वं लयविक्षेपशून्यं ब्रह्मदर्शनं "सत्त्वात्संजायते ज्ञानम्" इत्युक्तेः । शुद्धसत्त्वे तस्य प्रातिकूल्याभावेनोपरागाभाव उक्तः । तेन ब्रह्मदर्शने तस्य व्यवधायकत्वाभाव एव साधकत्वमौपचारिकं भक्त्या विना ब्रह्मदर्शनासंभव इत्यग्रिमग्रंथे प्रतिपादनात् । एवं च "आनन्दो ब्रह्मणो रूपम्" इति परमेश्वरस्यानन्दरूपत्वात् "माया परैत्यभिमुखे च विलज्जमाना" इत्यादेर्मायागुणानां रजःसत्त्वतमसां परमेश्वरस्पर्शे स्वतः सामर्थ्याभावात्परमेश्वरेणैव स्वेच्छया तत्स्पर्शे स्वीकृतेपि ब्रह्मणि विक्षेपविशिष्टो विष्णौ प्रकाशविशिष्टः शिवे आवरणविशिष्ट आनन्द इत्यत आनन्दस्य प्रकाशयुक्तत्वे न क्षतिरिति विष्णुरेवोपास्य इति विवेकः । अत्र दारुणि शुद्धतेजस उपलब्धेर्धूमे त्वनुपलब्धेर्धूमस्थानीयाद्रजसः सकाशाद्दारुस्थानीयं तमः श्रेष्ठं तत्कार्यसुषुप्तावपि केवलात्मानुभवादिति रजस्तमोवतोर्ब्रह्मरुद्रयोर्मध्ये रुद्र एव श्रेष्ठ इति केचिदाहुः । अतो भगवदवतारत्वे त्रयाणां साम्यम् । गुणोपरागानुपरागाभ्यामसाम्यं चेत्यभेदभेदप्रतिपादकानि पौराणिकवाक्यानि संगमनीयानि । अत्र "असंगो ह्ययं पुरुषः" इति श्रुतेः परमात्मा जीवात्मा च यद्यपि स्वरूपतो गुणसंगरहित एव भवति, तदपि परमात्मनश्चिन्महोदधित्वात्परमेश्वरत्वात्स्वातंत्र्यात्स्वैरलीलत्वाच्च स्वेच्छयैव स्वकर्तृकेण गुणस्पर्शेन शंभुत्वे सति गुणकार्यक्रोधादिमत्त्वेप्यात्मारामत्वमसंसारित्वं स्वाज्ञानापचयश्च भवति । जीवात्मनश्च चित्कणत्वादल्पप्रकाशकत्वादीशितव्यत्वादस्वातंत्र्यादल्पबलत्वाच्च गुणकर्तृक एव तत्स्पर्शे सति स्वज्ञानलोपः संसारश्च भवतीति विवेचनीयम् ॥२४॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

सत्त्वमिति । (सत्त्वं सत्वमिति च द्विविध एव शब्दः कोषादिषु प्रसिद्धः ।) अयम्भावः ब्रह्मविष्णुमहेशानां भेदस्तावन्नास्त्येव 'एकः परः पुरुष' इत्युक्तेः । तथापि यत् सत्त्वतनोर्वासुदेवादेव श्रेयांसि स्युरित्युक्तम् । तद्वस्तुतारतम्यान्न, किन्तु गुणतारतम्यादेव । एवञ्च सत्त्वोपाधेर्ब्रह्मणो हरस्य च सेवया श्रेयांसि स्युरेवेति विचारितं दशमस्कन्धे (८८ अध्याये) हरिर्हि निर्गुणः साक्षादिति पञ्चमश्लोकटीकायां स्वामिपादैरिति व्याख्यालेशः ॥ २३ ॥ * * प्रवृत्तिप्रकाशरहितादिति । प्रवृत्तिः कर्मारम्भः तस्य हेतुः प्रकाशः दीप्तिः तद्रहितात् न हि केवलदारुसान्निध्ये होमप्रत्यासत्तिः । एवं लयात्मके तमसि ब्रह्मज्ञानलेशोऽपि नास्ति । मध्यमानाद्दारुणः सकाशात् धूममुत्पन्नं दृष्ट्वाग्न्युत्पत्त्याशंसया होमारम्भप्रत्यासत्तेः ईषदिति । एवं कर्म्मस्वभावे रजसि कर्म्मणा शुद्धस्य ब्रह्मज्ञानाशंसा रजसो विक्षेपकत्वात् न तथा सर्व्वदा ब्रह्मप्रकाशकत्वं किन्तु ईषदिति । प्रकाशस्वभावे तु सत्त्वे साक्षात् ब्रह्मप्रकाशः यथा अग्नौ होमः इत्यर्थः । एतदुपाधिविषयविशेषः दशमस्कन्धीयाष्टाशीतितमाध्यायस्य पञ्चमश्लोकीयस्वामिकृतटीकायां द्रष्टव्यः ॥ २४–२७ ॥

श्रीमद्वीरराघवव्याख्या

एवं साक्षात्कारपर्यंतभगवद्भक्तियोगसाध्यं फलमाह भिद्यत इति । आत्मनि परमात्मनीश्वरे भगवति दृष्ट एव दृष्टमात्रे सत्येवास्य द्रष्टुः पुंसः सर्वकर्माणि भगवत्प्राप्तिप्रतिबंधकानि उत्तरपूर्वाघरूपाणि क्षीयंते नश्यंत्यत एव तन्मूलकाः सर्वे संशयाः नश्यंति । सर्वशब्देनान्यथाज्ञानविपरीतज्ञानाज्ञानसंग्रहः । ततस्तन्मूलको हृदयग्रंथिवदनिर्मोच्योऽहंममाभिमानो भिद्यते समूला संसृतिर्निवर्तते तन्निवृत्तौ च ब्रह्मप्राप्तिस्तदनुभवश्चायत्नसिद्ध इति भावः ॥ २१ ॥ * * उक्तार्थस्यानुष्ठानं दर्शयति अत इति । यतो मोक्ष एव निरतिशयपुरुषार्थस्तत्साधनं तु भक्तिरेवातः कवयो निरतिशयश्रेयस्तत्साधनाभिज्ञाः परमया मुदा भगवति वासुदेवे

भक्तिमात्मप्रसादिनीं कुर्वंति ॥ आत्मप्रसादिनीं भक्तिं कुर्वंतीत्यनेनारब्धभक्तियोगस्य चित्तप्रसादोपि शनैः शनैः भक्तियोगादेव भवतीति सूचितम् ॥ २२ ॥ ❀ ❀ ननु सृष्ट्यादिकारणेषु ब्रह्मरुद्रादिदेवेषु सत्सु कथं वासुदेवभक्तिरेव मोक्षोपायत्वेनोच्यत इति शंकायामाह सत्त्वमित्यादिना यावदध्यायसमाप्ति । तत्र भगवान्वासुदेवहिरण्यगर्भरुद्राख्यजीवशरीरकतया स्वावताररूपेण च जगत्सृष्टिस्थितिलयकारणभूतस्तत्र साक्षाद्वासुदेवभक्तिरेव मोक्षोपायभूता तच्छरीरभूतहिरण्यगर्भादिभक्तिश्च "यो यो यां यां तनुं भक्त" इत्याद्युक्तरीत्या तत्तल्लोकादिप्राप्त्युपायः यद्यपि हिरण्यगर्भादिजीवशरीरकतया तद्रूपेणावस्थितः परमात्मैव, तथापि कर्तृत्वभोक्तृत्वादिकं जीवगतमेव न परमात्मगतम् । नहि शरीरगतधर्माणां शरीरिणि प्रसक्तिरित्ययमर्थोऽत्र प्रतिपाद्यते, सत्त्वमिति सत्त्वादयस्त्रयः प्रकृतेर्गुणाः प्रकृतेरिति सावधारणं विवक्षितं प्रकृतेरेव गुणा नतु जीवस्येश्वरस्य वेत्यर्थः । तैः सत्त्वादिभिर्युक्तः परः पुरुषः परमपुरुषः योगोऽत्र शरीरात्मभावरूपो विवक्षितः । एक सृष्टेः प्रागिति शेषः "सदेव सौम्येदमग्र आसीदि"त्यादिश्रुत्यनुरोधात् । एकत्वं च कार्यदशावस्थानामरूपविभागप्रयुक्तबहुत्वप्रतिसंबंधिनामरूपविभागाभावप्रयुक्तविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वं सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकस्यैक एव सन्नित्यर्थः । अस्य स्थूलचिदचिदात्मकस्य जगतः स्थित्यादये स्थितिसृष्टिलयार्थं स्थितिप्राथम्यं भगवत्प्राथम्यविवक्षया परमपुरुष एव ब्रह्मरुद्ररूपेण तन्मध्ये स्वावताररूपेण स्थितिसृष्ट्यादिकृद्धरिविरंचिहरेति संज्ञा ब्रह्मविष्णुरुद्रसंज्ञाः, इतिः प्रकारार्थः, तेन रूपसंग्रहः, हर्यादिरूपाणि तद्वाचकानि हर्यादिनामानि च धत्ते बिभर्त्ति । तत्र सत्त्वं तनुः शरीरमधिष्ठेयं यस्य तस्मात्सत्त्वप्रवर्त्तकाद्विष्णोरेव नृणां भजतां श्रेयांसि ज्ञाननिष्पत्तिभवनिवृत्तिपरप्राप्तिरूपाणि स्युः खलु । सर्वकारणत्वात्सर्वस्मात्परत्वात्सम्यग् ज्ञानवर्द्धकसत्त्वप्रवर्त्तकत्वाच्च वासुदेवभक्तिरेव मोक्षप्रदेत्यर्थः । नन्वेक एव हर्य्यादिसंज्ञा धत्ते इत्यनेन हर्यादीनां परस्परं संज्ञाभेद एव, न वस्तुभेद इति प्रतीत्या त्रयाणामैक्यमेव द्रष्टव्यं तथा च श्रूयते "ब्रह्मा नारायणः शिवश्च नारायण" इति स्मर्येते च ब्रह्मनारायणाख्योसौकल्पादौ भगवान्यथा । प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः ॥ ततः स भगवान्विष्णू रुद्ररूपधरोऽव्ययः । ततः कालाग्निरुद्रोसौ भूत्वा सर्वहरो हरिः ॥ सर्गस्थित्यंतकारिणीं ब्रह्मविष्णुशिवात्मिकाम् । संज्ञां संयाति भगवानेक एव जनार्दन ॥ इति ततश्च वासुदेवस्य सर्वस्मात्परत्वं नोपपद्यते किं चैक एव हर्यादिसंज्ञा धत्त इत्यनेन न हर्यादिभ्यः परं तत्त्वमस्तीत्यवगम्यते । युक्तं चैतत् अत एव विष्णुर्मन्वादयः कालः यस्मिन् ब्रह्मा विष्णुरुद्रेंद्राः सर्वे संप्रसूयंते तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरं तदरूपमनामयं य एतद्विदुरमृतास्ते भवंतीति विष्णोरपि परतत्त्वविभूतित्वं तत उत्पत्तिः पुरुषशब्दनिर्दिष्टनारायणातिरिक्ततत्त्वस्य मोक्षहेतुत्वमित्यादिकं सर्वं श्रूयमाणं संगच्छते । किंचामृतस्यैष सेतुरिति सेतुवद्भगवतोऽन्यप्रापकत्वोक्तेश्च त्रिमूर्त्युत्तीर्णमेव सर्वजगत्कारणमिति नारायणस्य न परत्वं नापि तद्भजनान्मुक्तिः कारणं तु ध्येयमिति श्रुतिविरोधप्रसंगादिति चेदत्रोच्यते—न तावत्त्रिमूर्त्यैक्यमुपपन्नं नारायणाद्ब्रह्मा जायते नारायणद्रुद्रो जायते नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि छंदांसि नारायणादेव समुत्पद्यंते । एको ह वै नारायण आसीन्न ब्रह्मा नेशान एको ह वै नारायण आसीन्न ब्रह्मा न च शंकरः ॥ स मुनिर्भूत्वा समचिंतयत् तत एते व्यजायंत विश्वे हिरण्यगर्भोग्निर्यमवरुणरुद्रेंद्राः तन्नाभिपद्मादभवत् स ह महात्मा प्रजापतिः तत्र ब्रह्मा चतुर्मुखोजायत सोग्रे भूतानां मृत्युमसृजत ॥ त्र्यक्षं त्रिशिरस्कं त्रिपादं खंडपरशुम् । ब्रह्मणः पुत्राय ज्येष्ठाय "ब्रह्मा दक्षादयः कालस्तथैवाखिलजंतवः । विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥ रुद्रः कालांतकाद्याश्च समस्ताश्चैव जंतवः । चतुर्विधाश्च ते सर्वे जनार्दनविभूतयः ॥ अद्यो नारायणो देवस्तस्माद्ब्रह्मा ततो भवः । परो नारायणो देवस्तस्माज्जातश्चतुर्मुखः ॥ तस्माद्रुद्रोऽभवद्देवी क इति ब्रह्मणो नाम ईशोहं सर्वदेहिनाम् । आवां त्वदंगसंभूतौ तस्मात्केशवनामभाक् ॥ तवांतरात्मा मम च ये चान्ये देहिसंज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचित् ॥ एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ॥ तदा दर्शितपंथानौ सृष्टिसंहारकारकौ ॥ विष्णुरात्मा भगवतो भवस्यामिततेजसः ॥ सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते ॥ हरो हरति तद्वशः इत्यादिश्रुतिस्मृतिभ्यः ब्रह्मरुद्रयोः परमपुरुषसृज्यत्वतद्विभूतित्वतदवरत्वतत्प्रसादायत्तज्ञानवत्त्वतच्छरीरत्वादिधर्म्माणां तदैक्यविरुद्धानामवगतत्वात् । 'ब्रह्मा नारायणः शिवश्च नारायण' इत्यादिसामानाधिकरण्यस्य च 'सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते । हरो हरति तद्वश' इति प्रमाणांतरानुगुण्येनांतरात्मतया आकृत्यधिकरणन्यायेन शरीरवाचिनां शरीरिपर्यंतत्वेनाप्युपपत्तेः । बहुप्रमाणावगतभेदस्य निर्वाहासंभवाच्च नापि नारायणादुत्तीर्णं तत्त्वान्तरमस्ति'विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरम् , 'यमंतः समुद्रे कवयो वयंति न तस्येशे कश्चन तस्य नाममहद्यशः ॥ परात्परं यन् महतो महांतम् । न तत्समश्चाभ्यधिकश्च दृश्यते, अग्निरवमो देवानां विष्णुः परमः । मत्तः परतरं नान्यत्किंचिदस्ति धनंजय । आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् । एकस्तिष्ठति विश्वात्मा स तु नारायणः स्मृतः ॥ न परः पुंडरीकाक्षाद् दृश्यते पुरुषर्षभः । परं हि पुण्डरीकाक्षान्न भूतो न भविष्यति ॥ न विष्णोः परमो देवो विद्यते नृपसत्तम । न वासुदेवात्परमस्ति दैवतम् । न वासुदेवं प्रणिपत्य सीदति ॥ देशतः कालतो व्याप्तिर्मोक्षदत्वं तथैव च । हरेर्विभूतिमात्रं तु केवलं संप्रभाषितम् ॥ न देवः केशवात्परः राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् परः पराणां सकला न यत्र क्लेशादयः संति परावरेश" इत्यादिभिर्बहुभिः प्रमाणैर्विष्णोः सर्वाधिकत्वप्रदर्शनपूर्वकं तदधिकदेवतांतरनिषेधात् ब्रह्मविष्णुरुद्रेंद्रास्ते सर्वे संप्रसूयंत इत्यत्र तु विष्णोरुत्पत्तिरवताररूपा स्वसंकल्पमूलोच्यते, न तु ब्रह्मरुद्रादीनामिव कर्ममूला । कारणवाक्येष्वेकस्यैव कृत्स्नजगत्कारणत्वावगमात् त्रयाणां समुच्चित्य कारणत्वानुपपत्तेः कारणत्वोपास्यत्वबोधकवाक्यगतानां शिवशंभ्वादि-

सामान्यशब्दानां छागपशुन्यायेन विशेषवाचिनारायणशब्दार्थपर्यवसानोपपत्तेः अचितः सर्वकारणत्वानुपपत्तेरीक्षणार्थविरोधाच्च रुद्रादीनाम् अनपहतपाप्मा वा अहमस्मीत्यादिना कार्यत्वकर्मवश्यत्वादिश्रवणाद्वासुदेवादिपदवाच्यस्य कुत्रापि कर्मवश्यत्वाद्यश्रवणात् तदुत्पत्तेश्च 'अजायमानो बहुधा विजायत' इत्यवताररूपत्वश्रवणात् अजायमान इति कर्मायत्तोत्पत्तिनिषेधाच्च कर्मकृतत्वस्यापोदितत्वाच्चेतरोत्पत्तेस्तथापवादकाभावाच्च ततो यदुत्तरतरमित्यनेन किमुच्यते इति चेदुच्यते—त्रिमूर्त्तिमध्ये रक्षकत्वेनावतीर्णस्य नारायणस्य अस्येशाना जगतो विष्णुपत्नीत्यादिनावगतस्याद्भ्यः संभूत इत्यत्र पूर्वानुवाकोक्तं महापुरुषत्वं वेदाहमेतमित्यनेनैव वाक्येन प्रत्यभिज्ञाप्य तस्य श्रियः पतित्वमहापुरुषत्वादिश्रवणात्तमेव सर्वोत्तरं महापुरुषं यस्मात्परं नापरमस्ति किंचित् यस्मान्नाणीयो न ज्यायोस्ति कश्चित् वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमिति प्रत्यभिज्ञाप्योपरि च 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी च भगवानि'ति सहस्रशीर्षत्वादिधर्मान्प्रत्यभिज्ञाप्य तयोर्वाक्ययोर्मध्ये प्रयुक्तस्य ततो यदुत्तरमिति वाक्यस्य संदंशन्यायेन नारायणपरत्वस्यावश्यकत्वात् तत इत्यस्य शब्दतोऽर्थतश्च प्रत्यभिज्ञापि तत्तद्धेतुपरामर्शत्वस्यैव न्याय्यत्वादन्यथा यस्मात्पुरुषादपरं व्यतिरिक्तं परमुत्कृष्टं नास्तीति पूर्ववाक्येनोक्तं पुरुषमेव परामृश्य तद्व्यतिरिक्तस्योत्तरत्वप्रतिपादने पूर्वापरव्याघातप्रसंगाच्च । तत उक्तहेतुभ्यः यत्पुरुषशब्दवाच्यं तत्त्वं तदेवोत्तरं तत्त्वमिति अमृतस्यैष सेतुरित्यनेनापि विष्णोर्न तत्त्वांतरप्रापकत्वमुच्यते अपितु स्वप्राप्तौ स्वयमेव हेतुरिति दिक् ॥ २३ ॥ ❀ ❀ ननु प्रकृतिगुणत्वेन समानेऽपि कथं मोक्षहेतुः कथमितरौ गुणौ तदहेतू सर्वमपि मोक्षहेतुर्न वा स्यादिति शंकायां दृष्टांतेन गुणानां वैषम्यमुपपादयति पार्थिवादिति । दारुण इति पंचमी पार्थिवात्पृथिवीपरिणामरूपाद्दारुणः काष्ठात्तावद्धूमः उत्पद्यते तस्माद्धूमादनंतरमित्यध्याह्रियते धूमो ह्यग्नेः पूर्वमुत्पद्यते तस्माद्धूमादनंतरमग्निरुत्पद्यते स च त्रयीमयः यथा पार्थिवदारूत्पन्नत्वाविशेषेऽपि धूमो न प्रकाशकः न च स्वर्गाद्यौपयिकः अग्निस्तु प्रकाशकः त्रयीप्रतिपाद्यतारूपेण स्वर्गप्रदश्चेति तयोर्दृष्टकार्यवैषम्यसिद्धिः । एवं सुषुप्तस्य पुरुषस्य तमोगुणानंतरं मनसो नाविलत्वहेतुर्यत्सत्त्वं तदेव ब्रह्मदर्शनसाधनमिति कार्यवैचित्र्योपपत्तिरित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निरंतरं हरिस्मरणफलमाह एवमिति । भगवत्तत्त्वविज्ञानं स्वबिंबापरोक्षविज्ञानम् ॥ २१ ॥ ❀ ❀ अपरोक्षज्ञानफलमाह भिद्यत इति । आत्मनि हृत्कमलकर्णिकामध्ये स्वबिंबे सर्वेश्वरे दृष्ट एव तस्मिन् क्षण एव हृदयग्रंथ्याख्यलिंगं मनो भिद्यते । तस्मिन् भिन्ने सति ईश्वरादितत्त्वविषयाः सर्वसंशयाः छिद्यंते । तेषु छिन्नेषु सत्सु पूर्वकृतपापकर्माणि क्षीयंते उत्तराणि न श्लिष्यंत इत्येकान्वयः । संसारच्छेदनमेवापरोक्षज्ञानफलमिति भावः । आत्मनि जीवे ईश्वरे ब्रह्मणि जीवे दृष्टे चेति परस्परभेदनिरासेनाहमेव ब्रह्मेत्येवं दृष्टे व्यतिहारन्यायेन हृदयग्रंथिरहंकारः भिद्यत इति केचित्तदयुक्तं श्रुतिस्मृतिविरोधात् । 'सत्यमात्मा सत्यो जीवः, द्वासुपर्णावित्यात्मनि भिदाबोधः भेदसृष्ट्यभिमानेनेति भागवतज्ञानादद्वैतज्ञाननिषेधाच्च ॥२२॥ ❀ ❀ निगमयति अत इति । अतो निःशेषदुःखनिवृत्त्यलंबुद्धिगोचरसुखानुभवलक्षणमोक्षाख्यपुरुषार्थलाभाद्धि कवयः परमया मुदा आत्मप्रसादनीं भक्तिं वासुदेवे भगवति कुर्वतीत्येकान्वयः । आत्मप्रसादनीं मनसो नैर्मल्यापादनीं विष्णुप्रसादजननीं वा, मुक्तामुक्ताश्चेत्युभयेऽपि हरौ भक्तिं कुर्वंतीत्येतस्मिन्नर्थे वैशब्दः । उक्तश्रवणभक्त्यादिलभ्यमुक्तौ कोऽधिकारीत्याशंक्य सात्त्विकप्रकृतिरेव तत्राधिकारीति वक्तुं सत्त्वादिगुणांस्तदाश्रयांश्चाह सत्त्वमिति । सत्त्वं रजस्तम इत्येते त्रयो गुणाः जडप्रकृतेः स्वरूपभूताश्चित्प्रकृत्यभिमताः हरेर्जगदुत्पत्तौ उपादानभूताः तैर्गुणैः स्वयमगुणः सन्नपि तत्प्रवर्तकतया युक्तः परः पुरुषोऽस्य जगतः स्थित्यादये पालनसृष्टिसंहारान्कर्तुं हरिविरिंचिहरेति संज्ञाः नामानि एव धत्ते विष्णुर्ब्रह्मा शिव इति संज्ञावत्त्वेनावतरति । तत्र सत्त्वगुणसंबंधविधुरोऽपि सत्त्वगुणप्रवर्तनेन जगत्पालयन् विष्णुसंज्ञो हरिरनन्याधिष्ठिततया पृथगेव स्थितः, चतुर्मुखस्थो ब्रह्माख्यो विष्णुः स्वयमरजा अपि रजोगुणमुपादानीकृत्य जगत्सृजन्नास्ते, शिवाख्यो विष्णुः स्वयमतमा अपि तमोगुणप्रवर्तकतया जगत्संहरन् शिवे तिष्ठति, तत्सन्निधानविशेषादेव कमलासनवृषासनयोर्ब्रह्मशिवसंज्ञः । तस्माद्धरेरेव त्रिसंज्ञाः न तु लोकप्रसिद्धहरिब्रह्मशिवभेदनिरासेन संज्ञाः । तथात्वे 'ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्मणि ब्रह्मरूपः सन्नि'त्यादिवामनपुराणविरोधात् । एवं त्रयोऽपि गुणा विष्ण्वाश्रयास्तथापि सात्त्विकराजसतामसशरीरिणां नृणां मध्ये सत्त्वतनौ सात्त्विकशरीरिणि देवप्रकृतौ जीवराशावेव श्रवणभक्त्यादिश्रेयांसि स्युर्न राजसतामसशरीरिषु मिश्रमनुष्येषु असुरेषु च इत्येकान्वयः । सत्त्वतनोर्विष्णोः केवलं भवतीति दर्शयितुं मूर्तित्रयस्वरूपमाह सत्त्वमिति । सत्त्वादयः प्रकृतेर्गुणास्तैर्युक्त एकः परपुरुषः हर्यादित्रिसंज्ञा धत्ते । किमर्थं जगतः स्थितिसृष्टिभंगार्थं तत्र तेषां त्रयाणां मध्ये सत्त्वगुणः तनुः शरीरं यस्य सः सत्त्वतनुः तस्माद्विष्णोः श्रेयांसि स्युरिति वाणी न युक्ता केवलो निर्गुणश्चेति श्रुतिव्याकोपात् , न चास्याः सर्वगुणराहित्यमर्थः । सत्यं ज्ञानमनंतं ब्रह्म 'गुणाः सर्वेपि वेत्तव्या ध्यातव्याश्च न संशयः । आनंदादयः प्रधानस्ये'ति स्मृतिसूत्रैर्ज्ञानादिगुणगणविधानात् अत्रापि साक्षी चेता केवलं इत्यादिसाक्षित्वादिगुणप्रतीतेश्च । तस्मात्सत्त्वादिगुणराहित्यमेवास्या अर्थ इति संतोष्टव्यम् । किंच हरिविरिंचिहरा इत्युक्तिं विहाय हरेत्युक्तेः प्रमाणसिद्धः कश्चिदर्थविशेषोस्तीति विज्ञायते सच सकलसुरवरपुरटमुकुटपटलकोटितटपरिघट्टितचरणकमलपरागैः श्रीमद्वादरायणांतेवासिप्रवरैः श्रीमदानंदतीर्थभगवत्पादाचार्यैर्दर्शित इति नोऽस्माभिरत्र प्रयतितव्यम् ॥ २३ ॥ ❀ ❀ ननु त्रयाणां गुणानां

प्रकृतत्वादविशेषेण कथं सत्त्वस्यैव श्रेयःप्राप्तिहेतुत्वमित्याशंक्य सात्त्विकानामेवोत्तमत्वेन ब्रह्मविद्याधिकारित्वप्रतिपादनाय गुणत्रितये सत्त्वगुणस्योत्तमत्वं सोदाहरणमाह पार्थिवादिति । अत्रोत्तमपदमध्याहृत्य व्याख्येयम् । पार्थिवात्पृथिवीकार्याद्दारुणो वृक्षात् पार्थिवो धूम उत्तमः लोकोपकारकमेघरूपत्वात्तस्मात् धूमात् पार्थिवोऽग्निरुत्तमः कीदृशः त्रय्यां प्रतिपाद्यत इति त्रयीमयः सकलपदार्थप्रकाशकः । अत्र यथा वृक्षधूमाग्नीनां पार्थिवत्वाऽविशेषेऽप्यग्निराधानेन संस्कृतो विशिष्टपुरुषार्थसिद्धये याज्ञिकैरुत्तमत्वेन पूज्यते तथा प्राकृतात्तमसस्तमोगुणाद्रजोगुण उत्तमः तस्मात्सत्त्वं परं ब्रह्मादिसकलदेवतातत्त्वप्रकाशकः यद्यस्मात्सत्त्वगुणाद् ब्रह्मदर्शनं ब्रह्मज्ञानं भवतीति शेषः, यत्सत्त्वं ब्रह्म दर्शयत्यपरोक्षयतीति तस्मात्सात्त्विका एव ब्रह्मज्ञानाधिकारिण इति सिद्धम् । अनेन चेतनानामपवर्गनरकतमःप्राप्तियोग्यानां त्रैविध्यं सूचितम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्य च परमानन्दैकरूपत्वेन स्वतः फलरूपस्य साक्षात्कारस्यानुषङ्गिकं फलमाह भिद्यत इति । हृदयग्रन्थिरूपाऽहङ्कारः । सर्व्वसंशयाश्छिद्यन्त इति श्रवणमननादिप्रधानानामपि तस्मिन् दृष्ट एव सर्व्वे संशयाः समाप्यन्त इत्यर्थः । तत्र श्रवणेन तावज्ज्ञेयगतासम्भावना छिद्यते । मननेन तद्गतविपरीतभावना । साक्षात्कारेणात्मयोग्यतागतसम्भावनाविपरीतभावने इति ज्ञेयम् । क्षीयन्ते तदिच्छामात्रेणैव तदाभासः किञ्चिदेव तेष्ववशिष्यत इत्यर्थः ॥ २१ ॥ ❀ ❀ अत्र प्रकरणार्थे सदाचारं दर्शयन्नुपसंहरति अत इति । न केवलमेतावद्गुणत्वं तस्याः किन्तु परमया मुदेति कर्म्मानुष्ठानवन्न साधनकाले साध्यकाले वा भक्त्यनुष्ठानं दुःखरूपं प्रत्युत सुखरूपमेवेत्यर्थः । अत एव नित्यम् । साधकदशायां सिद्धदशायाञ्चैतावत् कुर्व्वन्तीत्युक्तम् ॥ २२ ॥ ❀ ❀ तदेवं कर्म्मज्ञानवैराग्ययत्नपरित्यागेन भगवद्भक्तिरेव कर्त्तव्येति मतम् । कर्म्मविशेषरूपं देवतान्तरभजनमपि न कर्त्तव्यमित्याह सप्तभिः । तत्रान्येषां का वार्त्ता सत्यपि श्रीभगवत एव गुणावतारत्वे श्रीविष्णुवत् साक्षात् परब्रह्मत्वाभावात् सत्त्वमात्रोपकारकत्वाभावाच्च । प्रत्युत रजस्तमोबृंहणत्वाच्च ब्रह्मशिवावपि श्रेयोऽर्थिभिर्नोपास्याविल्याह सत्त्वमिति द्वाभ्याम् । इह यद्यप्येक एव पुमान् अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिलयार्थं तैः सत्त्वादिभिर्युक्तः पृथक् पृथक् तत्तदधिष्ठाता तथापि परः तत्तदसंश्लिष्टः सन् हरिविरिञ्चिहरेति संज्ञा भिन्ना धत्ते । तत्तद्रूपेणाविर्भवतीत्यर्थः । तथापि तत्र तेषां मध्ये श्रेयांसि धर्म्मार्थकाममोक्षभक्त्याख्यानि शुभफलानि सत्त्वतनोरधिष्ठितसत्त्वशक्तेः श्रीविष्णोरेव स्युः । अयं भावः–उपाधिदृष्ट्या तौ द्वौ सेवमाने रजस्तमसोर्घोरमूढत्वात् भवन्तोऽपि धर्म्मार्थकामा नातिसुखदा भवन्ति । तथोपाधित्यागेन सेवमाने भवन्नपि मोक्षो न साक्षान्न च झटिति किन्तु कथमपि परमात्मांश एवायमित्यनुसन्धानाभ्यासेनैव परमात्मन एव भवति । तत्र तत्र साक्षात् परमात्माकारेणाप्रकाशात् तस्मात्ताभ्यां श्रेयांसि न भवन्तीति । अथोपाधिदृष्ट्यापि श्रीविष्णुं सेवमाने सत्त्वस्य शान्तत्वात् धर्म्मार्थकामा अपि सुखदाः । तत्र निष्कामत्वेन तु तं सेवमाने सत्त्वात् संजायते ज्ञानमिति कैवल्यं सात्त्विकं ज्ञानमिति चोक्तेर्म्मोक्षश्च साक्षात् । अत उक्तं स्कान्दे "बन्धको भवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः" इति । उपाधिपरित्यागेन तु पञ्चमः पुरुषार्थो भक्तिरेव भवति । तस्य परमात्माकारेणैव प्रकाशात् । तस्माच्छ्रीविष्णोरेव श्रेयांसि स्युरिति ॥ २३ ॥ ❀ ❀ अत्र तु यत् त्रयाणामभेदे वाक्येनोपजप्तमतयो विवदन्ते तत्रेदं ब्रूमः । यद्यपि तारतम्यमिदमधिष्ठानगतमेव, अधिष्ठाता तु परः पुरुष एक एवेति भेदासम्भवात् सत्यमेवाभेदवाक्यम्, तथापि तस्य तत्र तत्र साक्षात्त्वासाक्षात्त्वभेदेन प्रकाशेन तारतम्यं दुर्निवारमेवेति सदृष्टान्तमाह पार्थिवादिति । पार्थिवात् न तु धूमवदंशेनाग्नेयात् । तत एव वेदोक्तकर्म्मणः साक्षात् प्रवृत्तिप्रकाशरहिताद् दारुणः यज्ञियात् मन्थनकाष्ठात् सकाशात् अंशेनाग्नेयो धूमस्त्रयीमयः । पूर्व्वापेक्षया वेदोक्तकर्म्माधिक्याविर्भावास्पदम् । तस्मादपि स्वयमग्निस्त्रयीमयः । साक्षात्तदुक्तकर्म्माविर्भावास्पदम् । एवं काष्ठस्थानीयात् सत्त्वगुणविदूरात् तमसः सकाशात् धूमस्थानीयं किञ्चित् सत्त्वसन्निहितं रजोब्रह्मदर्शनम् । वेदोक्तकर्म्मस्थानीयस्य ब्रह्मणस्तु तत्तदवतारिणः पुरुषस्य प्रकाशद्वारम् । यदग्निस्थानीयं सत्त्वं तत् साक्षाद् ब्रह्मणो दर्शनम् । साक्षादेव सम्यक् तत्तद्गुणरूपाविर्भावद्वारम् । अत्र दारुस्थानीयं तमः धूमस्थानीयं रजः अग्निस्थानीयं सत्त्वं त्रय्युक्तकर्म्मस्थानीयं ब्रह्म । पार्थिवादिति । यथा धूमोंऽशेनाग्नेयो भवति दारु तु तथा नेति । तत्र स्वल्पं त्रयीमयत्वं भवति । एवं रजसः सत्त्वसन्निहितत्वं तथा तमसो नेति ब्रह्मसन्निहितत्वं स्वल्पं ज्ञेयम् । ततश्च त्रय्युक्तकर्म्म यथाग्नावेव साक्षात् प्रवर्त्तते नान्ययोस्तद्वत् परब्रह्मभूतो भगवानपि सत्त्व एवेत्यर्थः । अतो ब्रह्मशिवयोर्द्वयोरसाक्षात्त्वं श्रीविष्णोस्तु साक्षात्त्वं सिद्धमिति भावः । तथा च श्रीवामनपुराणे "ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्मणि ब्रह्मरूपः स शिवरूपः शिवे स्थितः ॥ पृथगेव स्थितो देवो विष्णुरूपी जनार्द्दन" इति । श्रीदशमे च 'शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृत' इत्यादौ 'हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः । स सर्व्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेदि'ति । अत एव श्रीविष्णोरेव परमपुरुषेण साक्षादभेदोक्तिः । 'सृजामि तन्नियुक्तोऽहमि'त्यादिना द्वितीये । तदुक्तं स उ एव विष्णुरिति । श्रुतिश्च "पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजोऽजायत । यतः प्रजाः सर्व्वाणि भूतानि । नारायणः परं ब्रह्म तत्त्वं नारायणः परम् । ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलमिति । एको नारायण आसीन्न ब्रह्मा न च शङ्करः । स मुनिर्भूत्वा समचिन्तयत् तत एवैते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्व्वरुणरुद्रेन्द्रा" इति च । एवं त्रिवेदीपरीक्षायामपि श्रीविष्णोरेवाराध्यत्वं स्पष्टम् । एवं भगवदवतारानुक्रमणिकासूत्राणां भेदमङ्गीकृत्यैव केवलश्री-

वृत्तस्य गणनासोमदुर्वाससोरस्वगणना । तदेवं श्रीविष्णोरेव सर्व्वोत्कर्षे स्थिते यदन्यत्र श्रीविष्णुशिवयोर्भेदे नरकः श्रूयते तदनैकान्तिकवैष्णवशास्त्रत्वादनैकान्तिकवैष्णवपरमेव । तद्विपरीतं हि श्रूयते पाद्मोत्तरखण्डादौ । 'यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव वीक्षेत स पाखण्डी भवेद्ध्रुवमि'त्यादि । तथा च विष्णुधर्म्मोत्तरान्ते लिङ्गस्फोटनृसिंहोपाख्यानम् । विष्वक्सेननामा विप्रः कश्चिदेकान्तविष्णुभक्त आसीत् । तस्य पृथिवीं क्रमतो दैवात् केनचिद् ग्रामाध्यक्षपुत्रेण मिलनमभूत् । तयोः संकथा चेयम् । "देवकर्म्मण्यशक्तिर्मे तात पूजय शङ्करम् । देवतायतनं गत्वा तत्र तात प्रतिष्ठितम् ॥ लिङ्गमस्ति सुरेशस्य महादेवस्य निर्म्मलम् । एवमुक्तः प्रत्युवाच वयमेकान्तिनः श्रुताः । चतुरात्मा हरिः पूज्यः प्रादुर्भावगतोऽथवा । पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ मा चिरमि"त्यादिका । ततो ग्रामाध्यक्षपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन् स इदं विचारयामास । भवतु तत्रैव गच्छाम इति । ततो लिङ्गसमीपं गत्वा तस्मिन्नधिष्ठाने श्रीनृसिंहाय नम इति पुष्पाञ्जलौ विक्षिप्ते तत् श्रुत्वा पुनः शिरश्छेत्तुमुद्यतस्य तल्लिङ्गं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि च्छिन्नानीति । तदेतदुक्तं स्कान्दे 'शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यदि'ति । मोक्षधर्म्मे नारायणीयोपाख्याने 'सांख्यञ्च योगश्च सनातने द्वे वेदाश्च सर्व्वे निखिलेऽपि राजन् । सर्व्वैः समस्तैरृषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणमि'ति । महाभारते 'यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते । स हेमराशिमुत्सृज्य पांशुमुष्टिं च जिघृति ॥' अत एवोक्तं श्रीनारदेन 'आवासतं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् । विनोपसर्पत्यपरम् हि बालिशः श्वलाङ्गुलेनातितितर्त्ति सिन्धुम् ॥' श्रीहरिवंशे 'हरिरेव सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः । विष्णुमन्त्रं सदा विप्राः पठध्वं ध्यात केशवमि'ति । अत एव विष्णुमन्त्रजापकस्याधिक्यं श्रीनृसिंहतापन्यां श्रुतौ 'अनुपनीतशतमेकमेकेनोपनीतेन तत्समम् । उपनीतशतमेकमेकेन गृहस्थेन तत्समम् ॥ गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समम् । वानप्रस्थशतमेकमेकेन यतिना तत्समम् ॥ यतीनां शतं पूर्णमेकेन रुद्रजापकेन तत्समम् । रुद्रजापकशतमेकमेकेनाथर्व्वाङ्गिरसशिखाध्यापकेन तत्समम् । अथर्व्वाङ्गिरसशिखाध्यापकशतमेकमेकेन मन्त्रराजाध्यापकेन तत्सममि'ति । मन्त्रराजश्च श्रीनृसिंहमन्त्र एव । अत एवोक्तं वाराहे 'जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् । वैष्णवत्वं लभेद्धीमान् सर्व्वपापक्षये सती'ति । यत्तु श्रीभागवत एव 'त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्व्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छती'त्यादि, तत् खलु श्रीविष्णोः सकाशात् अन्यास्वातन्त्र्यापेक्षयैव । तदुक्तं श्रीब्रह्मणा 'सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृगि'ति । श्रीसङ्कर्षणे च 'ब्रह्मा भवोऽहमपि यस्य कलाः कलाया' इति । 'यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूदि'ति च । एतदभिप्रेत्यैवोक्तं पाद्मेऽपि 'शिवस्य श्रीविष्णोर्य इह गुणनामादिसकलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः ।' इति । अत्र श्रीविष्णुनेति तृतीयाया अनिर्देशादत्रैव श्रीशब्ददानाच्च श्रीमतः सर्व्वशक्तियुक्तविष्णोः सर्व्वव्यापकत्वेन तन्नाम्नस्तस्माद् यः शिवस्य गुणनामादिसकलं धिया भिन्नं स्वतन्त्रं पश्येदित्यर्थः । अतो मार्कण्डेयं प्रति श्रीशिववाक्यञ्चेदमेव 'न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते । नात्मनश्च परस्यापि तद्युष्मान् वयमीमहि ॥' तत्तेभ्योऽपि सर्व्वत्र समदृष्टिभ्यो वयं युष्मानेव ईमहि प्रियत्वेन जानीम इति । 'अथ भागवता यूयं प्रियाः स्थ भगवान् यथा । न मद्भागवतानाञ्च प्रेयानन्योऽस्ति कर्हिचिदि'ति चतुर्थे तस्यैवोक्तेः । अत एव तत्पूर्वं 'नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत । भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये' इति श्रीशिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य तस्य देव्यै महिमदर्शनार्थं हृदि च्छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता । यथोक्तं 'किमिदं कुत एवेति समाधेर्विरतो मुनिरि'ति । तच्चान्यथा न सम्भवतीति । श्रुतौ च श्रीविष्णोरेव सर्व्वोत्कर्ष उक्तः 'यं कामये तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामि'त्यादिना । तस्मात्तदीयत्वेनैव ब्रह्मरुद्रभजने न दोषः । 'स आदिदेवो भजतां परो गुरुरि'ति । 'वैष्णवानां यथा शम्भुरि'त्याद्यङ्गीकारात् । यथानुष्ठितं श्रीप्रह्लादेन 'ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम् । भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः' इति । श्रीयुधिष्ठिरेण च 'क्रतुराजेन गोविन्द राजसूयेन पावनीः । यक्ष्ये विभूतीर्भवतस्तत् सम्पादय नः प्रभो' इति । स्वतन्त्रत्वेन भजने भृगुशापो दुरत्ययः । यथा चतुर्थे 'भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् । भवव्रतधरा ये च ये च तान् समनुव्रताः ॥ पाखण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः ॥' इत्यादि । वेदविहितमेवात्र भवव्रतमनूद्यते । अन्यविहितत्वे पाखण्डित्वावधानायोगः स्यात्, पूर्व्वत एव पाखण्डित्वसिद्धेः । तस्मात् स्वतन्त्रत्वेनैवोपासनायामयं दोषः । यतश्च तत्रैव तेन श्रीजनार्द्दनस्यैव वेदमूलत्वमुक्तं 'एष एव हि लोकानां शिवः पन्थाः सनातनः । यं पूर्व्वे चानुसन्तस्थुर्यत् प्रमाणं जनार्द्दनः' इति । एष वेदलक्षणः । यत्प्रमाणं यत्र मूलमित्यर्थः । स्वतन्त्रोपासनायां तत्प्राप्तिः श्रीगीतोपनिषत्स्वेव निषिद्धा । 'येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥ अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥" इति । अवज्ञादिकन्तु सर्व्वथा परिहरणीयम् । यथा पाद्मे 'हरिरेव सदाराध्यः सर्व्वदेवेश्वरेश्वरः । इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ॥' श्रीभगवद्वाक्यञ्च 'यो मां समर्च्चयेन्नित्यमेकान्तभावमास्थितः । विनिन्दन् देवमीशानं स याति नरकं ध्रुवम् ॥' गौतमीये च 'गोपालं पूजयेद्यस्तु निन्दयेदन्यदेवताम् । अस्तु तावत् परो धर्म्मः पूर्व्वधर्म्मो विनश्यति ॥' हयशीर्षे मां

पथि देवहेलनादि'ति श्रीनारायणवर्म्मणि तदागःप्रायश्चित्तं चतुर्थे नन्दीश्वरशापश्च 'संसरन्निह ये चामुमनुसर्व्वावमानिनमि'ति । अत्र विशेषजिज्ञासा चेत् परमात्मभक्तिसन्दर्भौ द्रष्टव्यौ । तदुक्तं ब्रह्मसंहितायां 'भास्वान् यथाश्मशकलेषु निजेषु तेजः स्वीयं कियत् प्रकटयत्यपि तद्वदत्र । ब्रह्मा य एव जगदण्डविधानकर्त्ता गोविन्दमादिपुरुषं तमहं भजामी'ति । 'दीपार्च्चिरेव हि दशान्तरमभ्युपेत्य दीपायते विवृतहेतुसमानधर्म्मा । यस्तादृगेव हि च विष्णुतया विभाति गोविन्दमादिपुरुषं तमहं भजामी'ति । क्षीरं यथा दधिविकारेत्यादि । नच दधिदृष्टान्तेन विकारित्वमायाति "तस्य श्रुतेस्तु शब्दमूलत्वादि"ति न्यायेन मुहुः परिहृतत्वात् । यथोक्तं 'यत उदयास्तमयौ विकृतेर्मृदि वा विकृतादि'ति । दृष्टान्तत्रयेण तु क्रमेणेदं लभ्यते । सूर्यकान्तस्थानीये ब्रह्मोपाधौ सूर्यस्येव तस्य किञ्चित् प्रकाशः । दधिस्थानीये शम्भूपाधौ क्षीरस्थानीयस्य न तादृगपि प्रकाशः । दशान्तरस्थानीये विष्णूपाधौ तु पूर्ण एव प्रकाशः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

हृदयग्रन्थिरविद्या भिद्यत इति कर्म्मकर्त्तरि प्रयोगेणाविद्याध्वंसो भक्तानामननुसंहितं फलम् । एवमेव 'छिद्यन्ते सर्व्वसंशयाः' असम्भावानादिरूपाः । आत्मनीति ईश्वर इत्यस्य विशेषणम् । यद्वा आत्मन्येव मनस्येव दृष्टे किं पुनः साक्षाद् दृष्टे सतीति स्फूर्त्तिसाक्षात्कारावुक्तौ । "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः । भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः ॥ निष्ठा रुचिरथासक्ती रतिः प्रेमाथ दर्शनम् । हरेर्माधुर्यानुभव इत्यर्थाः स्युश्चतुर्दश" ॥ २१ ॥ ❀ ❀ परमया मुदेति साधनदशायामपि कष्टाभाव उक्तः ॥ २२ ॥ ❀ ❀ एवं कर्म्मज्ञानादिकमतिक्रम्य भक्तेरेव यथा कर्त्तव्यत्वमुक्तं तथैव देवतान्तरोपासनामप्यपहाय भगवानेवोपास्य इत्युच्यते । स च भगवानेक एवापि क्रीडयावतरन्ननेकोऽपि भवति 'बहुमूर्त्यैकमूर्त्तिकमि'ति दशमात् । तस्यावतारा द्विविधाः चिच्छक्त्या मायाशक्त्या च । चिच्छक्त्या मत्स्यकूर्मादयो भजनीया एव । मायाशक्त्या च ये सत्त्वरजस्तमोभिर्विष्णुब्रह्मरुद्रास्तेषु विष्णुरेव भजनीय इत्याह सत्त्वमिति । इह यद्यपि एक एव पुमान् आदिपुरुषः अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिलयार्थं तैः सत्त्वादिभिर्युक्त एव हरिविरिञ्चिहरा इति संज्ञा धत्ते । सन्धिरार्षः । परः इति गुणैर्युक्तोऽपि अचिन्त्यशक्त्या तेभ्यो बहिः पृथगवस्थित्यैव तेषामस्पर्शनात् परः अयुक्त इत्यर्थः । तदपि श्रेयांसि भक्तानामभीष्टानि । तत्र तेषु मध्ये सत्त्वतनोः । "भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् । सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिहे"त्युत्तरश्लोकदृष्ट्या विशुद्धसत्त्वात्मकशरीरात् हरेरेव स्युः । "साक्षी चेताः केवलो निर्गुणश्चे'ति । 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।' इति 'हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः पर" इत्यादिश्रुतिस्मृतिविरोधात् । हरौ मायागुणस्य सत्त्वस्य युक्तत्वेपि तस्य योग एव । सत्त्वस्य प्रकाशरूपत्वादौदासीन्याच्च तेन सच्चिदानन्दवस्तुनो महाप्रकाशस्योपरागासंभवात् प्राकृतसत्त्वस्य न हि हरिशरीरारम्भकत्वम् । रजस्तमसोस्तु विक्षेपरूपत्वावरणरूपत्वाभ्यामुपकारकत्वापकारकत्वाभ्याञ्च ताभ्यामानन्दस्य विक्षिप्तत्वमावृतत्वमित्युपरागसंभवात् ब्रह्मरुद्रयो रजस्तमस्तुल्यत्वमेवेति तयोः सगुणत्वं हरेर्निर्गुणत्वञ्च युक्तिसिद्धमेव । निर्गुणत्वेऽपि प्राकृतसत्त्वस्य प्रकाशरूपेण तत्समीपवर्त्तितया तत्र स्थितत्वाद्विश्वपालनलक्षणस्तद्धर्म्म औदासीन्येन हरौ प्रतीयते । न च तेन तस्य निर्गुणत्वं व्याहतमिति वाच्यं, संयोगसमवायसम्बन्धाभ्यां प्राकृतसत्त्वस्य तत्रासम्भवात् । सामीप्यसम्बन्धेनैव तत्र स्थितत्वादिति । स्वभक्तिज्ञानस्फूर्त्तिसाक्षात्कारादिदानेनैवासक्त्यैव । स्वभक्तपालनं तु स्वरूपभूतस्य शुद्धसत्त्वस्य धर्मो ज्ञेयः । किञ्चात्र ब्रह्मणो हिरण्यगर्भत्वात् 'नेतरोऽनुपपत्तेः १।१।१७' इति न्यायेन तस्येश्वरत्वाभावात् जीवत्वेन तद्वति रजसि परमेश्वरस्य योगात् तत्रावेशादेवावतारत्वम् । यदुक्तं ब्रह्मसंहितायाम् "भास्वान् यथाश्मशकलेषु निजेषु तेजः स्वीयं कियत् प्रकटयत्यपि तद्वदत्र । ब्रह्मा य एव जगदण्डविधानकर्त्ता गोविन्दमादिपुरुषं तमहं भजामि" इति । शिवस्य तु जीवत्वाभावाद् गुणयुक्तेश्वरत्वमेव । यदुक्तं तत्रैव, 'क्षीरं यथा दधिविकारविशेषयोगात् संजायते न तु ततः पृथगस्ति हेतोः । यः शम्भुतामपि तथा समुपैति कार्याद्गोविन्दमादिपुरुषं तमहं भजामी'त्यतो ब्रह्मशिवयोर्मध्ये शिवस्येश्वरत्वमिति केचिदाहुः । केचित्तु तैर्युक्त इति नियामकसम्बन्धेन संयोगसम्बन्धेन सामीप्यसम्बन्धेन च योगो ज्ञेयः । तत्र सत्त्वादीनां नियामकसम्बन्धेन योगे सति पुरुषः स्वस्वरूपेण स्थितो निर्गुण एव भवति । रजसि तमसि च संयोगसम्बन्धेन योगे स एव पुरुषो ब्रह्मा रुद्रश्च सगुण एव भवति । सत्त्वे सामीप्यसंबन्धेन योगे स एव पुरुषो विष्णुः स्वरूपेण स्थितो निर्गुण एव भवतीत्याचक्षते । अत एव योगो नियामकतया गुणैः सम्बन्ध उच्यते । अतः स तैर्न युज्यते स्वांशः परस्य यः इति भागवतामृतकारिकार्थ उपपद्यत इति ॥ २३ ॥ ❀ ❀ आवरणविक्षेपप्रकाशधर्म्माणां तमोरजःसत्त्वानां यथोत्तरं श्रैष्ठ्यं तथा सत्त्वस्य शुद्धसत्त्वे प्रातिकूल्याभावञ्च सदृष्टान्तमाह पार्थिवात् स्वप्रवृत्तिप्रकाशप्रवृत्तिरहितात् धूमः प्रवृत्तिस्वभावः श्रेष्ठस्तस्मादप्यग्निः प्रवृत्तिप्रकाशधर्म्मकः वेदोक्तकर्म्मसाधनत्वात् त्रयीमयः । एवं तमसो लयात्मकात् रजो विक्षेपकं श्रेष्ठम् । तस्मादपि सत्त्वं लयविक्षेपशून्यं ब्रह्मदर्शनम् । सत्त्वात् संजायते ज्ञानमित्यादेः शुद्धसत्त्वे तस्य प्रातिकूल्याभावेनोपरागाभाव उक्तः । तेन ब्रह्मदर्शने तस्य व्यवधायकत्वाभाव एव साधकत्वमौपचारिकं, भक्त्या विना ब्रह्मदर्शनासम्भव इत्यग्रिमग्रन्थे प्रतिपादनात् । एवञ्च आनन्दो ब्रह्मणो रूपमिति परमेश्वरस्यानन्दरूपत्वात् । 'माया परैत्यभिमुखे च विलज्जमाना' इत्यादेर्मायागुणानां रजःसत्त्वतमसां परमेश्वरस्पर्शे स्वतः सामर्थ्याभावात् परमेश्वरेणैव

स्वेच्छया तत्स्पर्शे स्वीकृतेऽपि ब्रह्मणि विक्षेपविशिष्टो विष्णौ प्रकाशविशिष्टः शिवे आवरणविशिष्ट आनन्द इत्यत आनन्दस्य प्रकाशयुक्तत्वे न क्षतिरिति विष्णुरेवोपास्य इति विवेकः। अत्र दारुणि शुद्धतेजस उपलब्धेर्धूमे तु तदनुपलब्धेर्धूमस्थानीयाद्रजसः सकाशात् दारुस्थानीयं तमः श्रेष्ठं तत्कार्य्यसुषुप्तावपि केवलात्मानुभवादिति रजस्तमोगुणवतोर्ब्रह्मरुद्रयोर्मध्ये रुद्र एव श्रेष्ठ इति केचिदाहुः। अतो भगवदवतारत्वे त्रयाणां साम्यम्। गुणोपरागानुपरागाभ्यामसाम्यञ्चेत्यभेदभेदप्रतिपादकानि पौराणिकवाक्यानि सङ्गमनीयानि। अत्र 'असङ्गो ह्ययं पुरुष' इति श्रुतेः। परमात्मा जीवात्मा च यद्यपि स्वरूपतो गुणसङ्गरहित एव भवति, तदपि परमात्मनश्चिन्महोदधित्वात् परमेश्वरत्वात् स्वातन्त्र्यात् स्वैरलीलत्वाच्च। स्वेच्छयैव स्वकर्तृकेण गुणस्पर्शेन शम्भुत्वे सति गुणकार्यक्रोधादिमत्त्वेऽप्यात्मारामत्वमसंसारित्वं स्वाज्ञानापचयश्च भवति। जीवात्मनस्तु चित्कणत्वादल्पप्रकाशकत्वादीशितव्यत्वादस्वातन्त्र्यादल्पबलत्वाच्च गुणकर्तृक एव तत्स्पर्शे सति स्वज्ञानलोपः संसारश्च भवतीति विवेचनीयम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

नित्यं परमया मुदा वासुदेवे भक्तिं कुर्वंतीत्युक्तं तच्च वासुदेवस्य निःसमानाधिकत्वे सत्युपपद्येतेत्याकांक्षायां भगवतो निःसमानाधिकत्वं दर्शयति सत्त्वमित्यादिना। एकः समानाधिकशून्यः परः पूर्णः सर्वज्ञः सर्वशक्तिः पुरुषः प्रकृत्याख्यशक्तिनियंता "एकमेवाद्वितीयं ब्रह्म परः पराणां सकला न यत्र क्लेशादयः संति परावरेशे। पुरुष एवेदं सर्वं प्रधानक्षेत्रज्ञपतिर्गुणेशः सत्यकामः सत्यसंकल्प" इत्यादिश्रुतिप्रसिद्धः 'स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि। वासुदेवात्परो ब्रह्मन्न चान्यर्थोऽस्ति तत्त्वतः ॥' इत्यादिनात्रैव प्रसिद्धः श्रीवासुदेवः सर्वचेतनाचेतनप्रवर्तको विश्वसिसृक्षुः महदादिपृथिव्यंतं सर्वं विश्वं केनापि स्वांशेन स्रष्टुमशक्यं स्वयं सृष्ट्वा पुनरस्य विश्वस्यांतरीयस्थित्यादये स्थितिसृष्टिसंहारार्थं ये शक्तिभूतायाः प्रकृतेः सत्त्वरजस्तम इति गुणास्तैर्युक्तः स्वावतारेण स्वांशभूतक्षेत्रज्ञद्वयेन तानधिष्ठाय स्थितः हरिविरंचिहरेति संज्ञाः धत्ते बिभर्ति, संधिरार्षः। तत्र सृष्ट्यर्थं स्वप्रसादविषयेण स्वशक्तिलेशोपबृंहितेन स्वांशभूतेन क्षेत्रज्ञविशेषेण रजोगुणयुक्तेन विरंचिरिति संज्ञां धत्ते, तथैव संहारार्थमपरेण क्षेत्रेज्ञेन स्वकीयसंहारशक्तिलेशोपबृंहितेन तमोगुणाधिष्ठात्रा हर इति संज्ञां धत्ते, तथा जीवानां विश्वपालनाधिकारयोग्यतामदृष्ट्वा स्वावतारेण स्थित्यर्थं सत्त्वगुणनियंतृतया हरिरिति संज्ञां धत्ते। एवमर्कचंद्रेंद्राद्या अपि वासुदेवेनैव तत्तदधिकारेषु नियुक्ता इति ज्ञेयम्। तथा चोक्तं विष्णुधर्मोत्तरे विष्णुपुराणे च "ब्रह्मा शंभुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः। एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा ॥ जगत्कार्यावसाने तु वियुज्यंते च तेजसा। नहि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् ॥ स्थितौ स्थितं महाप्राज्ञ भवत्यन्यस्य कस्यचिदि"ति वक्ष्यति च 'सृजामि तन्नियुक्तोहं हरो हरति तद्वश' इति। तत्र तेषु त्रिगुणाधिष्ठातृषु मध्ये नृणां श्रेयांसि तु साधनसंपत्तिबंधनिवृत्तिपरमपदप्राप्तिरूपाणि सत्त्वतनोः सत्त्वनियंतुः सकाशादेव स्युः। तस्य वासुदेवावतारत्वात्, अतः सर्वकारणः सर्वशक्तिसर्वज्ञः परमकारुणिकः समानातिशयशून्यः श्रीवासुदेव एव भजनीयः ॥ २३ ॥ ❀ ❀ रजस्तमोऽधिष्ठातृभ्यां सत्त्वाधिष्ठातुः वासुदेवावतारतया श्रेयःप्रदत्वेन श्रैष्ठ्यमुक्तमिदानीरजस्तमोभ्यां सत्त्वस्य श्रेयोद्धारत्वेन श्रैष्ठ्यमाह पार्थिवादित्यादिना। पार्थिवात् पृथिवीविकारात् दारुणः काष्ठात् धूमोऽग्निप्रत्यायकस्तस्मादग्निः श्रेष्ठः यतस्त्रयीमयऋग्यजुःसामोक्तकर्मप्रचुरः, एवं तमसस्तु रजस्तस्मात्सत्त्वं श्रेष्ठं यद्यस्माद्धेतोः सत्त्वं ब्रह्मदर्शनं ब्रह्मसाक्षात्कारद्वारभूतम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं विज्ञाने जाते यत्फलं तदाह भिद्यत इति चिदचिद्ग्रंथिरविद्याकार्यं तद्ज्ञानेन निवर्त्तते 'यस्मिन् ज्ञाते सर्वमिदं विज्ञातं भवती'ति सर्ववस्तूनां यथार्थज्ञाने सर्वे संदेहा निवर्तंते। मिथ्याज्ञानसलिलासिक्तायामात्मभूमौ कर्मबीजं प्ररोहति, नतु तत्त्वज्ञाननिदाघनिष्पीतसलिलतयौषरायामिति कर्माण्यपि क्षीयंते। एतत्सर्वं न येन केनापि प्रकारेण जातज्ञानकार्यं, किंतु ब्रह्मात्मैक्यानुभवकार्यमित्याह दृष्ट एवेति। आत्मत्वेन भगवदनुभवेनान्यथेत्येवकारार्थः, आत्मनो ह्यनीश्वरत्वेन जाताः पदार्था ईश्वरत्वेन निवर्त्तंते अन्यस्यैश्वर्यत्वे ज्ञातेऽपि न ह्यन्यस्येश्वरत्वात् ज्ञानं स्वस्य संसारहेतुर्भवति ॥ २१ ॥ ❀ ❀ एवं सर्वप्रकरणार्थं निरूप्य कुत्र पुरुषप्रयत्नः पर्यवसित इति संदेहे प्रयत्नविषयमाह अतो वै कवय इति। शुद्धे सत्त्वात्मके अंतःकरणे आविर्भूते भगवति परमप्रेम कर्तव्यमिति प्रयत्ननिष्कर्षः। तेन भगवत्प्रसादः अंतःकरणे भगवत्साक्षात्कारो वेति फलं वै निश्चयेन स्वस्यैवं निश्चयः कवयः शब्दतात्पर्याभिज्ञाः शब्दबलविवेकादेवमर्थप्रत्यय इति भावः। साधनस्य सुखात्मकत्वादपि सदा भक्तिं कुर्वंति क्षणे क्षणे प्रतिक्षणं भगवदाविर्भावेन परमा मुद्योत्पद्यते विषयस्तु सत्त्वगुणाविर्भूतः भक्तिश्च ज्ञानजनिका प्रयत्नभक्तौ साधनत्वेनेति शब्दबलविवेकश्च इति प्रथमाधिकारः ॥ २२ ॥ ❀ ❀ तत्र विषये संदेहाः कोयं नियमः सत्त्वमूर्त्तावेव भक्तिः कर्त्तव्येति रजस्तमोमूर्त्तावपि भक्तिकरणं ब्रह्मज्ञानसाधकं, तथाच विष्णुभक्तिवच्छिवादिभक्तिरपि ज्ञानसाधिका ब्रह्मणस्तुल्यत्वादित्याशंक्य तत्र निर्द्धारमाह पंचभिः सत्त्वमित्यादिभिः। ब्रह्मणो विशेषत्वाभावेपि उपाधिवैशिष्ट्येन फलवैशिष्ट्यं नतु चैतन्यस्वरूपं भिद्यते, केषांचिद्वैष्णवानां मत इव तेपि गुणा न ब्रह्मणः। तथा सति

उच्चावचगुणजनकत्वेन स्वरूपमपि विलक्षणं स्यात्, कार्यवशात्तथापेक्षायां न दोषः। एकस्यैव स्नानभोजनांतःपुरकार्यदर्शनात्। ननु पुरुषस्त्रिगुणः तस्माद् गुणप्रेरणया तत्तत्कार्यकरणं संभवति प्रकृतेऽपि तथा चेत् गुणांतरपरंपरया अनवस्था स्यात्। ततः कश्चित्सहजो गुणसंबन्धो वक्तव्यः। तथा सति स्वरूपमपि भिद्येतेति चेत् अत्र हि बहवो वादिनः पृथक् पृथक् निरूपयंति। सांख्यास्तु नित्यसंबन्धं प्रकृतेराहुः। अन्ये तु नास्त्येव संबन्धः, भ्रमादेव प्रतीयत इत्याहुः। भागवतसिद्धांते तु भगवति सहजं कर्तृत्वं तत्र किंचिद्रूपं प्रकृतिपुरुषविभेदेन द्विरूपत्वमापद्यते, यथा भौतिकनिर्माणे भूतापेक्षा तथा प्राकृतनिर्माणे करणत्वेन प्रकृत्यपेक्षा। नैतावता स्वरूपे दोषो वा संभवतीति एक एव पुरुषोऽस्य जगतः उत्पत्तिस्थितिप्रलयार्थं गुणत्रयमाददानः पर एव पुरुषो ब्रह्मभूतः हरिविरिंचिहर इति "सर्वो द्वंद्वो विभाषा एकवद्भवति" इति न्यायेन संज्ञात्रयं संधत्ते सुपां सुलुगिति लुग्वा, इतिशब्दो वा द्वंद्वांते श्रूयमाणः सर्वत्राभिभिवध्यते, संज्ञायाः स्वरूपमात्रत्वान्न प्रत्ययोत्पत्तिः यथा 'देवदत्तेति संज्ञा' इतिशब्दः प्रकारार्थश्च, तेन अन्यापि संज्ञा एकस्य बह्व्यः संतीत्यर्थः। तथाद्वैते गुणाः कार्यार्थं करणत्वेन गृहीता अपि निरंतरग्रहणादुपाधिरूपा जाताः। तेन यद्भजनं तदुपाधावेव पर्यवसितं भवतीति सत्त्वोपाधिरेव सेव्य इत्यभिप्रायेणाह श्रेयांसीति। तत्रैवं निर्णयः सेवकः सेव्यं यादृशं रूपं पश्यति स्वस्यापि तादृशं रूपं संपादयति। साधनानि च तानि यद्यपि अपहतपाप्मानं भगवंतम् अन्यथा कर्तुं न शक्नुवंति तथापि जीवमन्यथा कुर्वंत्येव। ततश्च यादृशेन रूपेण साधनेन वा नान्यथाभावः तादृशरूपवानेवेश्वरः सेव्यः, नाशशंकाभावात्। यदि पुनः सेवकस्य बुद्धिर्निरुपाधिपर्यवसायिनी तत्र यत्र कचिद् सेवायामपि न काचित् चिंता, यथा ब्रह्मविदः तं यथायथोपासत इत्यत्र तथा निर्णयात् श्रेयांसि शुभफलानि तत्र भजनीयरूपेषु खल्विति संमतिः सोपपत्तिका सा निरूपिता। सत्त्वतनोरिति तनुशब्दात् दृष्टोपाधित्वमुक्तं नृणां साधारणजीवानां नियतानां तु तेन सहोपाधिरिति सर्वं सुस्थम्॥ २३॥ ❀ ❀ अयमर्थो गूढ इति दृष्टांतमाह पार्थिवादिति। प्रकाशापेक्षिणा हि तेजो मृग्यते तत्राप्यग्निसाध्योऽग्निः, स च लोकदारुप्रतिष्ठितः, तानि पुनः पृथिवीप्रकृतिकानि तेषां पृथिवीसंबंधः वृक्षरूप इति यावत्, तत्र छेदनेन शोषेण वा काष्ठताजलांशकत्वेन धूमजनकत्वं तेजोंशेनाग्निजनकत्वमिति, तत्राप्यलौकिकाहवनीयादिदेवतासंबंधे वेदप्रतिपाद्यत्वं तत्र लोके कालांतराग्नीच्छायां सार्द्रभूसंबद्धकाष्ठसंग्रहः, ततः पार्थिवशब्देनोक्तं तस्मादपि धूमः शुक्लः ततोपि लोकांतरे प्रकाशार्थं त्रयीमयस्ततः पूर्वरूपं मृत्पिण्डसमानकाष्ठता अंतिममाहवनीय इति। अथवा जले आधारमात्रत्वं दातुः संपादयति धूमः शोषणं पाकमग्निः, एवं घटस्यामस्य नोपकारसंपादकत्वं तेजस एवोपाधिवैलक्षण्यात् तथा ब्रह्मणोपि तमसा लौकिकभोगसंपादकत्वं रजसा कर्मसत्त्वेन ज्ञानमिति यद्ब्रह्मेति पूर्वोक्तरूपता उक्ता। यद्ब्रह्म तमसः तस्माद् ब्रह्मरजः तदुन्नतं ततोपि सत्त्वं तत्तु ज्ञानरूपमेवेति दर्शनमनुभवः, अदूरविप्रकर्षेण एतदुक्तमित्यर्थः। अनेन सोपहितं कार्यमपि विलक्षणं जनयतीत्युक्तं पूर्वश्लोके जीवपुरःसरेण त्रैविध्यं निरूपितमनेन तु ब्रह्मपुरःसरेणेति विशेषः॥ २४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भिद्यत इत्यत्र। विद्याया अविद्यानाश इव पुनरविद्यया विद्यानाशोपि भवतीत्याहुः आत्मनो हीत्यादि। 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' विति जाताः पदार्था इत्यर्थः। न निवर्तन्त इति। नारदेन तथात्वस्याग्रे वक्ष्यमाणत्वात्। जातेपीति। न निवर्तन्त इति पूर्वेण सम्बन्धः॥ २१॥ ❀ ❀ अतो वै इत्यत्र। कृतेरनित्यत्वात् नित्यं कृत्यसंभवेन यावज्जीवाग्निहोत्रे सायंप्रातःकालवदत्र कालविशेषो विवक्षितस्तस्य वाक्येऽदर्शनात् सदापदव्याख्यातमपि कालं पुनर्व्याकुर्वन्ति क्षणे क्षण इति। एवमप्यपुष्टार्थत्वमित्यतो मुत्पदेन तद्योजयन्ति प्रतिक्षणमित्यादि। सूतादीनामधिकारस्य स्वरूपमाहुः विषय इत्यादि। विषय इति। भक्तिविषयः॥ २२॥ ❀ ❀ सत्त्वमित्यत्र। ब्रह्मणोपीत्यत्रापिः शङ्कानाहार्याम्। शेषस्याभावेपीति। गुणशेषत्वाभावेपि। उपाधीत्यादि। तथा चोपाधीनां सत्त्वादीनां प्रयोजकत्वात्तथेत्यतो नियम इत्यर्थः। केषाञ्चिदिति। माध्वानाम्। इवेति। वैधर्म्ये दृष्टान्तः। न ब्रह्मण इति। 'निर्गुणस्य गुणात्मन' इत्यत्र द्वितीयस्कन्धे वक्ष्यमाणा नेत्यर्थः। अत्र चैतन्यस्वरूपभेदवादी शङ्कते नन्वित्यादि। पुरुष इति। शारीरः। गुणप्रेरणयेति। गुणकृतप्रेरणया। साङ्ख्यास्त्वित्यादि। तेषां कार्येश्वरवादात् प्रकृत्या नित्यसम्बद्धं चैतन्यमेवेश्वर इति तेषां मतम्। अन्ये इति। पातञ्जला मायावादिनश्च। भ्रमादिति। उपधानप्रयुक्तात् भ्रमात्। किञ्चिद्रूपमिति। कूटस्थचैतन्यस्याक्षरात्मन एकदेशः। ननु प्रकृतिपुरुषौ विना कार्यादर्शनात्करणरूपौ तौ विना तयोर्निर्माणासंभवात् तौ नित्यावेव स्वीकार्यौ, ततश्च साङ्ख्यवत्तत्रैव विश्रान्तिरापद्येतेति को विशेषः साङ्ख्यात्, अथ भ्रमात्सम्बन्धो वाच्यः, तर्हि को विशेषो मायावादिभ्य इत्याकाङ्क्षायां तौ विनापि तयोर्जननं दृष्टान्तेन समर्थयन्ति यथेत्यादि। प्रकृत्यपेक्षेति। न प्रकृतिपुरुषनिर्माण इति शेषः। नैतावतेति। न तज्जननोत्तरं सत्येनापि तत्सम्बन्धेन। लुग्वेति। हर्यादिशब्दाज्जातस्य सोर्लुक्। न प्रत्ययोत्पत्तिरिति। डुदाञ् दाने। अत सातत्यगमन इत्यादाविव द्वन्द्वान्तादपि सा नेत्यर्थः। संपादयतीति तत्क्रतुन्यायेन संपादयति। तानीति। सत्त्वादीनि। नाशशङ्काभावादिति। सत्त्वोपाधेः स्थापकत्वात्तथेत्यर्थः। मुख्यपक्षमाहुः यदीत्यादि। तेन सहोपाधिरिति। यादृशं यं भजन्ति तेन सह स एवोपाधिस्तेषामपि भवति। तथा च तस्योपाधिनिवृत्तौ तत्सायुज्यं प्राप्तानां तेषामप्युपाधिनिवृत्तिः, न तु ततः पूर्वमित्यर्थः॥ २३॥ ❀ ❀ पार्थिवादित्यत्र। अयमर्थो गूढ इत्यादि। स्वरूपैक्येपि उपाधिवैशिष्ट्येन फलवैशिष्ट्यरूपोऽर्थ उपाधेरप्रयोजकत्वस्फूर्त्या सन्देहेन ज्ञातुमशक्य इति दृढोपाधि-

त्वेन तत्तत्कार्यजननत्वे दृष्टान्तमाहेत्यर्थः। तत्रापीति। तेजोमार्गेणापि। तेषामिति। तेजोदृढोपाधिभूतानां दारूणाम्। इतीति उपाधिभूतानां तेषां एवं स्वनिष्ठोपाधिवशेन तत्तत्कार्यजनकत्वम्। तत्रापीति तदुपहितेनाग्नावपि। एवं तेजोदृढोपाधिभूतानां दारूणां स्वावान्तरोपाधिवशेन त्रयीमयत्वपर्यन्तं हीनमध्यमोत्तमकार्यजनकत्वं व्याख्यातम्। एवं व्याख्याने उपाधेरेव कार्यजनकत्वमायाति, न तूपहितस्य, इत्यतः प्रकारान्तरेणाहुः तत्र लोक इत्यादि। तदिति। सामान्ये नपुंसकम्। अधूमः शुष्क इति। सङ्ग्रह इति शेषः। पूर्वं रूपमिति। अग्नेः प्राथमिकं रूपम्। अस्मिन्नपि पक्षे प्राथमिकरूपस्य तथोपकारकत्वं नायातीत्यतः पक्षान्तरमाहुः अथवा जल इत्यादि। भूयसो जलस्य स्वल्पाग्निनाशकत्वादार्द्रामघटे विद्यमानेपि जले तस्य घटस्याग्न्याधारत्वं दारु संपादयतीत्यर्थः। पूर्वोक्तरूपतेति। दृढोपाधिरूपता। कार्यमिति। सेवककार्यम्। जीवपुरःसरेणेति। नृणामित्युक्त्या तथेत्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ततश्च कृतकृत्यः सन् संसारबन्धाद्विमुच्यते इत्याह—भिद्यते इति। आत्मनि स्वरूपभूते ईश्वरे दृष्टे सत्येव अस्य द्रष्टुः पुरुषस्य हृदयग्रन्थिः ग्रन्थिरिव दुर्मोचत्वात् चिदचिद्रूपत्वाच्च हृदय एव ग्रन्थिर्भिद्यते। अत एव सर्वे संशयाः देहेन्द्रियाद्यात्माभिमानरूपाः, यद्वा देहेन्द्रियादावात्माभिमानदर्शनात् शास्त्रेण च देहेन्द्रियादिव्यतिरिक्तात्मप्रतिपादनाद्देहादिरेवात्मा ततो भिन्नो वेत्याकाराश्छिद्यन्ते। अत एव देहाद्यात्माभिमानहेतुकान्यनारब्धफलानि कर्माणि क्षीयन्ते। ततश्च भोगेन प्रारब्धकर्मक्षये देहपातानन्तरं विमुच्यते। 'तस्य तावदेव चिर'मिति श्रुतेः। देहादिव्यतिरिक्तब्रह्मात्मैक्यसाक्षात्कारे सत्येव देहाद्यात्माभिमानो निवर्त्तते नान्यथा, सर्वत्राधिष्ठानसाक्षात्कारस्यैव भ्रमनिवर्त्तकत्वदर्शनादिति सूचनार्थ एवकारः ॥ २१ ॥ ❀ ❀ एतावता ग्रन्थेनोक्तेऽर्थे सदाचारं प्रमाणयति–अत इति। यतो भक्त्यैव प्रसन्नः सन् भगवानाविर्भवति अतएव कवयो विवेकिनो निरतिशयश्रेयस्तत्साधनाभिज्ञाः परमया मुदा कायक्लेशाद्यभावात् हर्षेणैव नित्यं सर्वदा आत्मप्रसादनीं परमात्मनः प्रसादहेतुभूतां भगवति भक्तिमेव कुर्वन्तीत्यन्वयः। कुत्र भक्तिं कुर्वन्तीत्यपेक्षायामाह–वासुदेव इति। 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इति वाक्याद्वसुदेवशब्दितशुद्धसत्त्वे आविर्भूते विष्णावित्यर्थः ॥ २२ ॥ ❀ ❀ ननु तत्र तत्र ब्रह्मरुद्रयोरपि परब्रह्मत्वेन निरूपणात्तयोरपि भजनं पुरुषार्थपर्यवसायि भवेदेव कुतो वासुदेवस्यैव भजनीयत्वमित्याशङ्क्य ब्रह्मादीनां त्रयाणामेकात्मत्वेऽपि सत्त्वादिगुणोपाधिभेदात् तत्र सत्त्वोपाधेर्वासुदेवस्यैवाधिक्यमित्याह—सत्त्वमिति। यद्यपि यः सृष्टेः प्रागेकः परः पुरुषः पुरुषोत्तमः स एवेहेदानीं सत्त्वं रजस्तम इति ये प्रकृतेर्गुणास्तैर्युक्तः सन् अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं हरिविरिञ्चिहरेति सञ्ज्ञाः केवलं भिन्ना धत्ते, तथापि खलु निश्चयेन तत्र तेषां हर्यादित्रयाणां मध्ये सत्त्वतनोर्वासुदेवादेव नृणां तद्भक्तानां श्रेयांसि शुभफलानि स्युर्भवन्तीत्यन्वयः। तत्र रजोगुणाङ्गीकारेण सृष्ट्यर्थं विरिञ्चिरिति सञ्ज्ञा, स्थित्यर्थं च सत्त्वगुणाङ्गीकारेण हरिरिति सञ्ज्ञा, उपसंहारार्थं च तमोगुणाङ्गीकारेण हर इति सञ्ज्ञेति विवेकः। 'हरिविरिञ्चिहरा इति' वक्तव्ये सन्धिरार्षः। यद्यपि तत्तत्कार्यार्थं स्वातन्त्र्येण स्वेच्छया गृहीता गुणास्तस्मिन् भगवति लयविक्षेपादीन् स्वदोषानाधातुं न शक्नुवन्ति, तथापि 'श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः' इति वाक्यादुपासनया उपाधौ पर्यवसानादुपासकेषु स्वगुणदोषान् सम्पादयन्त्येव। अतः सत्त्वस्य शान्तिजनकत्वात् सत्त्वोपाधिर्वासुदेव एव भजनीयस्तमोरजसोर्लयविक्षेपोपपादकत्वान्न तदुपाधिकयोः रुद्रब्रह्मणोर्भजनीयत्वम्। न च तर्हि 'त्रयाणामेकभावानां यो न पश्यति वै भिदाम्। सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति' इत्यादिषु कथं ब्रह्मरुद्रयोर्विष्णुतुल्यत्वमुपासनीयत्वं चोक्तमिति शङ्कनीयम्, यदि तु सेवकस्य बुद्धिरुपाधिपर्यवसायिनी न स्यात्तदा यत्र कुत्रापि सेवायां न काचिच्चिन्ता, पुरुषोत्तमस्य सर्वत्रैकत्वादित्यभिप्रायेण तुल्यत्वं ब्रह्मरुद्रयोरुक्तम्। अत्र तु सोपाधिकभजने सत्त्वोपाधेर्विष्णोरेव भजनीयत्वमुक्तमतो न शङ्कालेशोऽपीति ध्येयम् ॥ २३ ॥ ❀ ❀ ननु प्रकृतिगुणत्वाविशेषेऽपि कथं सत्त्वस्य ज्ञानहेतुत्वं न तमोरजसोरपीत्याशङ्क्य स्वभाववैचित्र्यादिति सदृष्टान्तमाह—पार्थिवादिति। यथा पार्थिवात् पृथिवीपरिणामरूपात् स्वतःप्रवृत्तिप्रकाशरहिताद्दारुणः काष्ठात्सकाशाद् धूमः प्रवृत्तिस्वभावः त्रयीमयः वेदोक्तकर्मप्रचुरः ईषत्कर्मप्रत्यासत्तेः, अग्निस्तु तस्मादपि त्रयीमयः साक्षात् कर्मसाधनत्वात् तथा तमसः सकाशाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकम्। तुशब्देन लयात्मकात्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किञ्चिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वात्। यत्तु सत्त्वं तत्तु साक्षाद् ब्रह्मदर्शनम्। अतस्तदुपाधीनां रुद्रादीनामपि यथोत्तरमेव वैशिष्ट्यमिति भावः ॥ २४ ॥

हिन्दी अनुवाद

हृदयमें आत्मस्वरूप भगवान्‌का साक्षात्कार होते ही हृदयकी ग्रन्थि टूट जाती है, सारे सन्देह मिट जाते हैं और कर्मबन्धन क्षीण हो जाता है ॥ २१ ॥ ❀ ❀ इसीसे बुद्धिमान् लोग नित्य-निरन्तर बड़े आनन्दसे भगवान् श्रीकृष्णके प्रति प्रेम-भक्ति करते हैं, जिससे आत्मप्रसादकी प्राप्ति होती है ॥ २२ ॥ ❀ ❀ प्रकृतिके तीन गुण हैं—सत्त्व, रज और तम।

इनको स्वीकार करके इस संसारकी स्थिति, उत्पत्ति और प्रलयके लिये एक अद्वितीय परमात्मा ही विष्णु, ब्रह्मा और रुद्र—ये तीन नाम ग्रहण करते हैं। फिर भी मनुष्योंका परम कल्याण तो सत्त्वगुण स्वीकार करनेवाले श्रीहरिसे ही होता है ॥ २३ ॥ ❀ ❀ जैसे पृथ्वीके विकार लकड़ीकी अपेक्षा धूआँ श्रेष्ठ है और उससे भी श्रेष्ठ है अग्नि—क्योंकि वेदोक्त यज्ञ-यागादिके द्वारा अग्नि सद्गति देनेवाला है—वैसे ही तमोगुणसे रजोगुण श्रेष्ठ है और रजोगुणसे भी सत्त्वगुण श्रेष्ठ है; क्योंकि वह भगवान्का दर्शन करानेवाला है ॥ २४ ॥

भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् । सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥ २५ ॥
मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ । नारायणकलाः[1] शान्ता[2] भजन्ति ह्यनसूयवः ॥ २६ ॥
रजस्तमःप्रकृतयः समशीला भजन्ति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥
वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वासुदेवभक्तौ पूर्वाचारं प्रमाणयति । भेजिर इति । अथातो हेतोरग्रे पुरा विशुद्धं सत्त्वं सत्त्वमूर्तिं भगवंतमधोक्षजम् । अतो येताननुवर्तंते त इह संसारे क्षेमाय कल्पंते ॥ २५ ॥ ❀ ❀ नन्वन्यानपि केचिद्भजंतो दृश्यंते । सत्यम् । मुमुक्षवस्त्वन्यान्न भजंति किं तु सकामा एवेत्याह मुमुक्षव इति द्वाभ्याम् । भूतपतीनिति पितृप्रजेशादीनामुपलक्षणम् । अनसूयवो देवतांतरानिंदकाः संतः ॥ २६ ॥ ❀ ❀ रजस्तमसी प्रकृतिः स्वभावो येषां ते । अत एव पितृभूतादिभिः समं शीलं येषाम् । श्रिया सहैश्वर्यं प्रजाश्चेप्संतीति तथा ते ॥ २७ ॥ ❀ ❀ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तम् । सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्याम् । वासुदेव एव परस्तात्पर्यगोचरो येषां ते । ननु वेदा मखपरा दृश्यंते इत्याशंक्य तेऽपि तदाराधनार्थत्वात्तत्परा एवेत्युक्तम् । मखा इति । योगा योगशास्त्राणि । तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत इति । अथ शब्दार्थः । यतः सत्त्वतनोरेव श्रेयांसि अत इत्यर्थः । विश्वनाथस्तु विशुद्धं सत्त्वं स्वरूपभूता चिच्छक्तिरेव तन्मयम् । "विद्याविद्याभ्यां भिन्नः ।" इति गोपालतापनीश्रुतेः "छायातपौ यत्र न गृध्रपक्षौ" इति स्मृतेश्च । "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः" इति दशमाच्च । विष्णुवपुषो मायातीतत्वात् । मायाशक्तिवृत्तिविद्यैव विशुद्धसत्त्वशब्दवाच्येति न व्याख्येयम् । क्षेमाय मोक्षाय ॥ २५ ॥ ❀ ❀ अत्राक्षिपति नन्विति । अन्यान्भैरवादीन् । अथातो हेतोर्विशुद्धसत्त्वरूपत्वादित्यर्थः ॥२६–२७॥ ❀ ❀ ननु वेदैरेव पित्रादयो भजनीयत्वेनोच्यंते तेषां को दोषस्तत्राह वासुदेव एव परस्तात्पर्यगोचरस्तात्पर्यविषयो येषां ते "कालेन प्रलये नष्टा वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥" इति "किं विधत्ते किमाचष्टे" इत्यतो "मां विधत्तेऽभिधत्ते माम्" इत्यादिभगवदुक्तेश्च । "ब्रह्मावधार्यात्मगुणानुवादम्" इति वाराहचरितोक्तेश्च "वेदैश्च सर्वैरहमेव वेद्यः" इति गीतोपनिषद्येवकारेणान्ययोगव्यवच्छेदाच्च । वेदतात्पर्यमनवबुद्ध्यैव पित्रादीन्भजंतीति भावः । पुनराक्षिपति नन्विति । मखादिपरत्वं दृश्यते सत्यम् , "स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः । आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥" इति श्रीनारदोक्तेर्मखादौ वेदस्य तात्पर्याभावात् "धर्मो यस्यां मदात्मकः" इति भगवदुक्तेः । "तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते" इति श्रीदेवहूत्युक्तेः । "यथा तरोर्मूलनिषेचनेन" इति नारदोक्तेश्च वासुदेव एव वेदतात्पर्यावगमाच्च सर्ववेदार्थः केवलभगवद्भक्तिरेवेति । यद्वा मखस्य वासुदेवभुजाद्यंगविभूतींद्रादिदेवताराधनमयत्वेन वासुदेवपरत्वमादिभरतचरिते प्रसिद्धम् । "संप्रचरत्सु नानायागेषु विरचितांगक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिंगानामर्थनियामकतया साक्षात्कर्त्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु यजमानो ये यज्ञभाजो देवास्तान्पुरुषावयवेष्वभ्यध्याय दि"त्याद्युक्तेः । योगस्यापि कापिलेये भगवद्ध्यानादिपरत्वं प्रसिद्धम् , कर्मणामपि तत्समर्पणं विना फलासिद्धेस्तत्परत्वम् ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वासुदेव इति । वसति भूतेषु अन्तर्यामितया इति वासुः दीव्यति द्योतते न क्वापि सज्जते इति देवः । स चासौ स चेति सर्वत्र नियामकतया तिष्ठन्नपि क्वापि न सक्त इत्यर्थः । यद्वा वसंत्यत्र भूतानीति वासुः स च देवः सर्व्वाधिष्ठानमपि नोपाधिभूतः । यद्वा वसुदेवे शुद्धसत्त्वे प्रकाशते इति वसुदेवः शैषिकश्चाण् । वक्ष्यति हि चतुर्थस्कन्धे (३ अं० २३ श्लो०) 'सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृत' इति व्याख्यालेशः ॥ २८–२९ ॥

---

१. प्रा. पा. कलां । २. प्रा. पा. शान्तां ।

श्रीमद्वीरराघवव्याख्या

यतः सत्त्वस्यैव ब्रह्मदर्शनत्वं ततश्च सत्त्वप्रवर्तकाद्विष्णोरेव नृणां श्रेयांस्यत एव सत्त्वतनुं विष्णुमेव मुनयोऽभजन्नित्याह भेजिर इति। अथ तस्मादग्रे पूर्वकाले मुनयः विशुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वशरीरकं तत्प्रवर्तकं भगवंतमधोक्षजं भेजिरे उपासांचक्रिरे। एवमिह तान्मुनीननुसृत्य सत्त्वतनुं भगवंतं ये जना उपासते इत्यर्थः, ते क्षेमाय कल्पंते श्रेयोयुक्ता भवंतीत्यर्थः। रजस्तमःप्रधानौ ब्रह्मरुद्रौ भजंतस्तु न क्षेमाय कल्पंते अपि त्वंतवत्फलभाजो भवंतीति भावः॥ २५॥ ❀ ❀ ननु केचिद् ब्रह्मरुद्राद्युपासका अपि दृश्यंते, सर्वेऽपि विष्णुमेव किं न भजंत इति शंकायामुपासकानां स्वस्वगुणानुसारेणोपास्यदेवताविषयकोपासनायां रुचिर्जायत इत्याह मुमुक्षव इति द्वाभ्याम्। मुमुक्षवः सत्त्वगुणप्रधानाः अनसूयवः घोररूपान्भूतपतीन् रुद्रादींस्तमःप्रधानान् हित्वा शांताः शुद्धसत्त्वप्रवर्तका नारायणस्य कला अवतारान् भजंति। अनसूयव इत्यनेन विष्णुभक्तानां देवतांतरेषु तदुपासकेषु चासूयाराहित्यं देवतांतरभक्तानां तु विष्णौ तत्परेषु चासूयावत्त्वं चास्तीति सूचितम्॥ २६॥ ❀ ❀ रजस्तमःस्वभावास्तु जनाः समशीलान् रजस्तमःस्वभावान्पितृभूतेशान् रुद्रादीन्प्रजेशान् हिरण्यगर्भादीन् आदिशब्देन संकीर्णदेवताः सरस्वतीप्रभृतीश्च "प्रेतान् भूतगणांश्चान्ये यजंते तामसा जनाः" इत्युक्तान्भजंति। कथंभूताः श्रीमच्चैश्वर्यमाधिपत्यं च प्रजाः पुत्रादयश्च ता ईप्सता आप्तुमिच्छंतीति तथाभूताः। अनेन विष्णुभक्तानामनन्यप्रयोजनत्वमनंतस्थिरफलप्राप्तिरन्येषां त्वंतवत्फलप्राप्तिश्चेति सूचितम्॥ २७॥ ❀ ❀ अथ "सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति, इष्टापूर्ते बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः, तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः, वेदैश्च सर्वैरहमेव वेद्यः, यो यो यां यां तनुं भक्त" इत्युक्तरीत्या भागद्वयात्मकवेदवेद्यश्चतुर्मुखरुद्रादिशरीरकस्तदंतर्यामितयांतवच्छ्रियैश्वर्यादिफलदश्च वासुदेव एवेत्यभिप्रायेणाह वासुदेवपरा इति द्वाभ्याम्। वेदाः पूर्वोत्तरभागद्वयात्मका वेदाः वासुदेवपराः वासुदेवः परस्तात्पर्यभूमिर्येषां तथाभूताः। नन्वग्न्यादिदेवतोद्देश्यकयागदानहोमादिकर्मप्रतिपादकपूर्वभागस्य कथं वासुदेवपरत्वमित्यत आह वासुदेवपरा मखा इति। मखा अग्न्यादिदेवतापूजात्मका यागादयो वासुदेवपराः वासुदेवः परः प्रधानतया आराध्य एषां तथाभूताः, अग्न्यादिशरीरकतया तद्रूपो वासुदेव एव मखैराराध्य इत्यर्थः। केवलमग्न्यादिदेवतापूज्यमात्रत्वाभिमानेन ये मखाननुतिष्ठंति तेषामपि तत्समीहितं फलं तैरविज्ञातोपि वासुदेवोऽग्न्याद्यंतर्यामितयाराधितः प्रयच्छतीति भावः। एवमाराधितोंतवत्फलं प्रयच्छतीति भावः तथा चोक्तम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते॥" इति। एवं तुल्यन्यायतया वेदांतेषु क्वचित्क्वचित्कालाग्निरुद्रोपनिषत्प्रतर्दनविद्यादिषु रुद्रेंद्राद्युपासनात्मका योगा अपि रुद्रादिशरीरकवासुदेवविषया इत्याह वासुदेवपरा योगा इति वासुदेवः परो विषयो येषां त इत्यर्थः प्रायशो वेदांतेषु विहिता योगा वासुदेवविषया एव श्रूयंते, क्वचिदापाततो रुद्रादिविषयत्वेन प्रतीयमाना अपि तत्तत्प्रकरणगतैर्लिंगैः रुद्रादिष्वसंभाव्यमानैस्तच्छरीरकवासुदेवविषयत्वेनैव निश्चीयंत इति भावः। एवं निखिलनिगमवेद्यो वासुदेव एवेत्युक्तम्। अथ तत्पूर्वभागोपबृंहणात्मकतन्मूलकस्मृत्यादिप्रतिपाद्यः स्मार्तक्रियाराध्यश्च स एवेत्याह—वासुदेवपराः क्रिया इति। क्रियाः स्मार्त्यः, श्रौतीनां तु मखा इत्युक्तत्वात् पूर्ववदर्थः॥ २८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उक्तार्थे शिष्टाचारं दर्शयति भेजिर इति। अथ तस्मात्सात्त्विकानां उत्तमाधिकारत्वात् अग्रे पूर्वं मुनयो ज्ञानिनो ब्रह्मादयोऽधोक्षजं भेजिरे। तस्मादिह गुणेषु विशुद्धं सत्त्वं क्षेमाय मोक्षाय कल्पते नेतरौ तमोरजोगुणौ मुक्तये न कल्पेते इत्येकान्वयः॥ २५॥ ❀ ❀ इदानीमपि सदाचारं दर्शयति मुमुक्षव इति। ब्रह्मादिपरमसात्त्विका वासुदेवं भेजिर इति यस्मादथ तस्मादसूयादिदोषरहिता दुस्तरसंसारात् मुमुक्षवः वर्तमानभविष्यत्सात्त्विका अपि घोररूपान् राजसतामसान् भूतपतीन् रुद्रादीन् हित्वा शांताः परिपूर्णसुखात्मिकाः वासुदेवकलाः भगवन्मूर्तीः संप्रति भजंति भजिष्यंति हि चेत्येकान्वयः॥ २६॥ ❀ ❀ इदानीं प्रसंगात्तामसराजससेव्यानाह रज इति। श्रियैश्वर्यप्रजेप्सवः रजस्तमःप्रकृतयः पुरुषाः समशीलान् पितृभूतप्रजेशादीन् भजंतीत्येकान्वयः। 'निर्दोषं हि समं ब्रह्मे'ति वचनात् समं ब्रह्म तच्छीलान् सेवकस्य यच्छीलं सेव्यस्यापि तच्छीलमस्तीति वा समशीलान्। श्रीकामः प्रजेशानैश्वर्यकामः भूतपतीन्प्रजाकामः पितॄन् श्रियं च ऐश्वर्यं च प्रजां च प्राप्तुमिच्छंतः श्रियैश्वर्यप्रजेप्सवः॥ २७॥ ❀ ❀ सकलशास्त्रतात्पर्यपर्यालोचनया सकलैरवश्यं सेव्यः श्रीनारायण एवेत्यभिप्रेत्याह वासुदेवपरा इति। अत्र वेदा वासुदेवपरा इत्यादिप्रतिपादनमन्वेतव्यम्। वासुदेवगुणोत्कर्षप्रतिपादनतात्पर्यवंतः मखाः संसारमदं खनंतीति नाशयंतीति मखाः अग्निष्टोमादयः वासुदेवोद्देश्याः नान्योद्देश्याः। योगाः अष्टांगाः वासुदेवविषयाः श्रुतिस्मृतिविहितसंध्योपासनादिकाः क्रियाः॥ २८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवतान्तरपरित्यागेनापि भगवद्भक्तौ सदाचारं प्रमाणयति—भेजिर इति। सत्त्वं विशुद्धं विशुद्धसत्त्वात्मकमूर्त्तिम्। भगवन्तं प्राकृतसत्त्वातीतञ्च। तस्य विवृतं भगवत्सन्दर्भे सप्तदशाधिकशततमवाक्यमारभ्य द्रष्टव्यम्॥ २५॥ ❀ ❀ नन्व-

न्यान् भैरवादीन् देवानपि केचिद्भजन्तो दृश्यन्ते। सत्यम्। यतस्ते सकामाः किन्तु मुमुक्षवोऽप्यन्यान्न भजन्ते किमुत तद्भक्त्येक-पुरुषार्था इत्याह मुमुक्षव इति॥ २६॥ ❀ ❀ ननु कामलाभोऽपि लक्ष्मीपतिभजने भवत्येव, तर्हि कथमन्यांस्ते भजन्ते तत्राह रज इति। रजस्तमःप्रकृतित्वेनैव पित्रादिभिः समं शीलं येषाम्। समशीलत्वादेव तद्भजने प्रवृत्तिरित्यर्थः॥ २७॥ ❀ अतो वासुदेव एव भजनीय इत्युक्तम्। सर्व्वशास्त्रतात्पर्यञ्च तत्रैवेत्याह द्वाभ्याम्। अत्र योगादीनां कथञ्चिद्भक्तिसचिवत्वेनैव तत्परत्वं मुख्यं द्रष्टव्यम्। वेदानाञ्च कर्म्मकाण्डगतानामेव ज्ञेयम्। केषाञ्चित् साक्षाद्भक्तिपरत्वमपि दृश्यत इति। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥" इत्यादेः॥ २८–२९॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अथ अत एव विशुद्धं सत्त्वं स्वरूपभूता चिच्छक्तिरेव तन्मयं विद्याविद्याभ्यां भिन्न इति गोपालतापनीश्रुतेः। 'छाया-तपौ यत्र न गृध्रपक्षावि'ति स्मृतेश्च। 'सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तय' इति दशमाच्च। विष्णुवपुषो मायातीतत्वान् माया-शक्तिवृत्तिविद्यैव विशुद्धसत्त्वशब्दवाच्येति न व्याख्येयम्। ये तान् मुनीननुवर्त्तन्ते ते इह संसारे मोक्षाय कल्पन्ते॥ २५॥ ❀ ❀ भूतपतीनिति पितृप्रजेशादीनामप्युपलक्षणम्। अनसूयवः तत्तद्देवानिन्दकाः॥ २६॥ ❀ ❀ प्रकृतिः स्वभावः अतएव पितृभूतादिभिः समं शीलं येषां ते। श्रियेति सहार्थे तृतीया॥ २७॥ ❀ ❀ ननु वेदैरेव पित्रादयो भजनीयत्वे-नोच्यन्ते तेषां को दोषस्तत्राह। वासुदेव एव परस्तात्पर्य्यगोचरो येषां ते "कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता। मयादौ ब्रह्मणे प्रोक्ता धर्म्मो यस्यां मदात्मक" इति। किं विधत्ते किमाचष्टे इत्यतो मां विधत्तेऽभिधत्ते मामित्यादि भगवदुक्तेरते वेदतात्पर्य्यमबुद्ध्वैव पित्रादीन् भजन्तीति भावः। ननु वेदानां मखयोगादिपरत्वं तत्र तत्र प्रकटं दृश्यते। सत्यम् "स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः। आहुर्धूम्रधियो वेदं सकर्म्मकमतद्विद" इति श्रीनारदोक्तेर्मखयोगादौ वेदस्य तात्पर्य्याभावात् धर्म्मो यस्यां मदात्मक इति श्रीभगवदुक्तेः। "तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते" इति श्रीदेवहूत्युक्तेः। "यथा तरोर्मूलनिषेचनेने"ति नारदोक्तेश्च वासुदेव एव तात्पर्य्यावगमाच्च सर्व्ववेदार्थः केवला भगवद्भक्ति रेवेति। यद्वा मखस्य वासुदेवभुजाद्यङ्गविभूतीन्द्रादिदेवताराधनमयत्वेन वासुदेवपरत्वमादिभरतचरिते प्रसिद्धम्। योगस्यापि भगवद्ध्यानादिपरत्वं कापिलेये प्रसिद्धम्। कर्म्मणामपि तत्समर्पणं विना फलासिद्धेस्तत्परत्वम्॥ २८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथशब्दो हेत्वर्थः, अतो हेतोः सत्त्वाधिष्ठातुः सत्त्वस्य च श्रेष्ठत्वाद् अग्रे ये मुनयः सनकप्रभृतयः ते सत्त्वं सत्त्वनियंतारं विशुद्धं विशेषतः शुद्धं प्राकृतदोषास्पृष्टमधोक्षजं भगवंतं भेजिरे उपासांचक्रिरे। इह ये तान्मुनीननु तदनु-वर्त्तिनः क्षेमाय मोक्षाय कल्पंते॥ २५॥ ❀ ❀ लोके वेदे च वासुदेवोपासकः ब्रह्मरुद्राद्युपासकाश्च दृश्यंते, तत्राधिकारि-भेदाद्व्यवस्थामाह मुमुक्षव इत्यादिद्वाभ्याम्। भूतपतीन् रुद्रादीन् बहुवचनेन पितृप्रजेशादीनां ग्रहणम्॥ २६॥ ❀ ❀ समशीलाः पितृभूतपत्यादिभिः समं शीलं येषां ते॥ २७॥ ❀ ❀ पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसीत्युपायप्रश्ने कृते उपायाकांक्षायां सत्याम् 'अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया। ब्रूहि नः श्रद्दधानानामि'त्युपेयाकांक्षापूरणार्थं सर्वशास्त्रसारं ब्रूहीति प्रश्नः कृतस्तत्रोत्तरमाह वासुदेवपरा वेदा इति। वासुदेवः परो मुख्यो विषयो येषां ते वासुदेवपराः "सर्वे वेदा यत्पदमामनंती"ति श्रुतेः 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रीमुखवचनाच्च पूर्वोक्तः सपरिकरो भक्तियोग उपायः सर्वशास्त्रसारं वासुदेवतत्त्वं तदेवोपेयमिति भावः। वेदानां नानार्थपरत्वमाशंक्य वेदोक्तरीत्यैव सर्वश्रुतीनां वासुदेवे समन्वयमाह। वासुदेवपरा मखाः मखा यज्ञाः विवित्सोत्पादनद्वारा वासुदेवपराः "तमेवमात्मानं ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेने'ति श्रुतेः। योगाः इन्द्रियसंयमादयः वासुदेवपरा एव "यदा पंचावतिष्ठंते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिमि"ति श्रुतिप्रोक्ताः समनस्केंद्रियबुद्ध्यादिसंयमो वासुदेवध्यानार्थः, बहुवचनेन "यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति श्रुत्युक्तः वैराग्ययोगो गृह्यते। क्रियाः सर्वाः वेदोक्ताः वासुदेवपराः "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमि"ति श्रीमुखोक्तेः॥ २८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत्र सदाचारं प्रमाणयति भेजिर इति। आत्मार्थं भजने भगवंतमेव भेजिरे इत्यात्मनेपदात् बहुवचनादाचारदार्ढ्यकर्तृ-दोषाभावमाह मुनय इति। मननपर्यंतं पदार्थानुष्ठानेन सत्त्वमुक्तम्। अथेत्यज्ञानदशायां भजनं निवारितं मुनयो भूत्वा पश्चाद्भजंत इत्यर्थः। अग्रे सत्ययुगे पुरातनयुग इत्यादिवाक्यात् ब्रह्मरूपतामलौकिकरूपतां चाह पदद्वयेन भगवंतमधोक्षजमिति। उपाधेर्मुख्यता-प्रतिपादनार्थं सत्त्वमिति सामानाधिकारण्येन प्रतिपादनं, विशुद्धमिति ब्रह्मादिषु विद्यमानसत्त्वनिवृत्तिः, तेषां किं फलं जातमिति जिज्ञासायां किंतु तेषां फलं वक्तव्यं तत्सेवका अपि मुच्यंत इत्याह कल्पंत इति। तानन्नु ये तत्सेवका ये तन्मार्गवर्त्तिनो वा

तेऽपि क्षेमाय स्वरूपानंदाय कल्पन्त इत्यर्थः, तत्रापि इहैव न भवांतरे, तस्माच्छ्रीशुद्धफलसाधकत्वात् सत्त्वरूपमेव सेव्यमित्युक्तम् ॥ २५ ॥ ❀ ❀ धर्मावतारा: ज्ञानक्रिया शक्तिरूपाः, मत्स्याद्यवतारान् रामादिरूपांतरेषु दृष्टबुद्धिरहिता भजंत इत्यर्थः। नेदं भक्तिमार्गभजनं किंतु जीवानां स्वपुरुषार्थसिद्धये धर्ममार्गेण तथा सति सर्वथा निःसंदिग्धमेव भजंते न नृसिंहादिरूपं, भक्तिमार्गे तु विषयस्य प्राधान्यात् प्रयोजनस्य दुर्बलत्वात्सर्वाण्येव रूपाणि भजनीयानि ॥ २६ ॥ ❀ ❀ रूपांतरे भजनसामग्र्याः स्वरूपमाह रजस्तम इति। शरीरगुणस्वभावभेदेन गुणास्त्रिविधाः, तत्र स्वाभाविका अनुल्लंघनीयाः शरीररूपा मौढ्यदशायामेव बलिष्ठाः, धर्मरूपास्तु संगशास्त्रैर्वर्धंते च तत्र ये विवेकिनोपि सच्छास्त्रं सत्संगं ज्ञात्वापि स्वभावतो राजसास्तामसाश्च तादृशानेव भजंते। भजनं हि सख्यपर्यवसायि तच्च समानरूप एव भजंतीति समानशीलानेव भजंत इति निश्चयार्थः। तयोः परिकरोपि तादृश इति ज्ञापयितुं पितरो भूतानि प्रजाश्च तेषामीशाः कालशिवब्रह्मरूपाः ते आदिभूता येषां तान् क्षुद्रदेवान् भजंते। तत्र श्राद्धादिना पितृभजने शक्तिभजने च धनप्राप्तिः फलम् ईश्वरभजने त्वैश्वर्यप्राप्तिः प्रजेशभजने प्रजायाः, तत्रापि सेवाप्राप्तिस्तु दुर्लभा दातृणां तामसत्वात् ॥ २७ ॥ ❀ ❀ एवं सत्त्वमूर्त्तौ भजनं सोपपत्तिकमुपपाद्य तत्रैव सर्वप्रमाणानां साधनानां च तत्रैव परिसमाप्तिरित्याह वासुदेवपरा वेदा इति श्लोकद्वयेन। प्रथमाधिकारे सर्वगुणमयमिति ज्ञानं मुख्यं युक्तेः प्राधान्यात्। अतः सत्त्वपरत्वं सर्वेषामिति तत्र वेदाः सात्त्विकं प्रमाणं यज्ञाश्च सात्त्विकाः योगाः स्नानादिक्रियाश्च ज्ञानं तपः आचारः स्वर्गश्च सात्त्विकः, अन्यप्राधान्यप्रतिपादकानि तु शास्त्राणि न प्रमाणानि, किंतु राजसानि, तामसानि एवं साधनान्यपि। एवं सर्वसात्त्विकभावः कर्त्तव्य इति प्रथमाधिकारः। एत एव मध्यमाधिकारकरणे अन्यथा वक्तव्याः। उत्तमाधिकारे च सर्वेषामेषां च अंतःकरणशोधकत्वात्सत्त्वपरत्वं सुखफलत्वाच्च सुखस्य सात्त्विकत्वात् शुद्धांतःकरणे स्फुरितब्रह्मानंदस्यापि सात्त्विकत्वं सर्वाणि पंचशास्त्राणि श्रुतिसांख्ययोगपशुपतिवैष्णवाख्यानि मुख्यानि, अंगभूतं च धर्मशास्त्रं, सर्वेषां तत्रेदं वैष्णवं शास्त्रं, पशुपतिमतं तु परमतोपन्यासेनोक्तम् अपेक्षितरूपेण प्रमाणं नतु सर्वथा। तत्र यावदन्येषां त्रयाणां धर्मशास्त्रस्य च नैकवाक्यता तावन्न वैष्णवशास्त्रस्य दार्ढ्यमित्येकवाक्यता निरूप्यते। तत्र प्रथमं वेदवेदार्थो यज्ञश्च तथा सांख्यं तदुक्तं परमसाधनं तपश्च धर्मशास्त्रं तदुक्तं च गतिश्च तदेतत्सर्वं वासुदेवपरमित्यर्थः ॥ २८–२९ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भेजिरे इत्यत्र। सत्त्वमुक्तमिति। कार्योक्त्यानुमापितमित्यर्थः। सामानाधिकरण्येन प्रतिपादनमिति विरुद्धार्थयोरभेदान्वये समानविभक्तिकत्वस्य तन्त्रत्वात्तथेत्यर्थः। स्वरूपानन्दायेति। जीवानन्दाय ॥ २५ ॥ ❀ ❀ मुमुक्षव इत्यत्र। तथा सतीति। धर्मे सति। नेति। शान्तत्वसन्देहान्नेत्यर्थः। भजनीयानीति। भक्ताभयङ्करत्वाद्भजनीयानीत्यर्थः ॥ २६ ॥ ❀ ❀ रज इत्यत्र। निश्चयार्थं इति। वैशब्द इत्यर्थः। ईश्वरभजन इति। भूतेशभजने ॥ २७ ॥ ❀ ❀ वासुदेवेत्यत्र। सर्वगुणमयमिति। सत्त्वमित्यर्थात्। गुणशब्दोत्र दोषविरुद्धपरः। युक्तेः प्राधान्यादिति। प्रथमाधिकारे युक्तेः प्राधान्यादित्यन्वयः। सर्वाणि पञ्चेति। 'साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथेति' मोक्षधर्मवाक्यात्तथेत्यर्थः। परमतोपन्यासेनेति। 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च। परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यत' इति परस्पराङ्गकथने तत्रैव पाशुपतानुक्तेस्तथेत्यर्थः। अपेक्षितरूपेणेति। 'सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते। यथागतं तथा ज्ञानं निष्ठा नारायणः परः' इति तत्रैव वाक्यात् पाशुपतस्यापि वासुदेवपरत्वे सिद्धे पुरःस्फूर्तिकस्य पशुपतिभजनस्य प्रथमाधिकारत्वबोधकेन रूपेणेत्यर्थः। वासुदेवपरमिति। पूर्वोक्तरीत्या प्रमाणप्रमेयसाधनानां सत्त्वेन फलस्य सुखांशत्वेन च वासुदेवतात्पर्यकत्वम् ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

न केवलमिदानीमेव भगवन्तं भजन्ति किन्तु पूर्वमपि विवेकिनस्तं भजन्ति स्मेत्याह—भेजिरे इति। यतः सत्त्वमेव ब्रह्मदर्शनं यतश्च सत्त्वमूर्तेर्वासुदेवादेव नृणां श्रेयांसि भवन्ति अथ तस्मादेव अग्रे पूर्वकाले मुनयो विशुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वमूर्तिं भगवन्तं वासुदेवमेव भेजिरे उपासाञ्चक्रिरे इत्यन्वयः। ननु यद्येवं तदा सर्वे एव तं कुतो न भजन्ते स्म यदि च केचित्साधारणा भजन्ते स्म सदा तद्भजनेऽपि किं तेषामप्रामाणिकत्वादिति शंकानिराकरणाय मुनय इत्युक्तम्। तथाच मननशीला एव शास्त्रगुरुभ्यां तस्य भजनीयत्वं निश्चित्य तं भेजिरेऽन्येषां साधारणानां तथात्वेन तत्परिज्ञानाभावान्न सर्वसाधारणभजनापत्तिरिति भावः। यस्य दुर्ज्ञेयत्वमेव दर्शयति—अधोक्षजमिति। अधः अक्षजमिन्द्रियजन्यं ज्ञानं यस्मात्तमतीन्द्रियमित्यर्थः। मिश्रं सत्त्वं तु ब्रह्मादिष्वप्यस्तीति तद्वारणायाह—विशुद्धमिति। एवं भजने तेषां किं फलं जातमिति जिज्ञासायां किं नु तेषां फलं वक्तव्यं तदनुयायिनोऽपि विमुच्यन्ते एवेत्याह—कल्पन्ते इति। ये त्विहेदानीं तान्मुनीननुवर्तन्ते तेऽपि क्षेमाय स्वरूपानन्दाय कल्पन्ते योग्या भवन्तीत्यर्थः ॥ २५ ॥ ❀ ❀ नन्वन्यानपि भजन्तो दृश्यन्ते, सत्यं,परन्तु मुमुक्षवस्त्वन्यान्न भजन्ति किन्तु सकामा एवेत्याह—मुमुक्षव इति द्वयेन। 'यो यच्छ्रद्धः स एव सः' इति शास्त्रविचारानन्तर्यमथशब्दार्थः। मुमुक्षवः सत्त्वप्रधानाः घोरत्वापत्तिभयेन घोररूपान् तामसान् भूतपतीन् रुद्रादीन् हित्वा विहाय शान्ताः शुद्धसत्त्वात्मिकाः नारायणस्य कला अवतारान् भजन्तीत्यन्वयः।

तर्हि तेषां तेषु त्यागहेत्वसूया जाता भविष्यतीत्याशङ्क्याह—अनसूयव इति। अनेन भगवद्भक्तानां देवतान्तरेषु तदुपासकेषु चासूयाराहित्यं देवतान्तरभक्तानां तु भगवति तदुपासकेषु चासूयावत्त्वं चास्तीति सूचितं भवति। प्रसिद्धं चैतदिति सूचयन्नाह—हीति परगुणेषु दोषारोपोऽसूया ॥ २६ ॥ ❀ ❀ रजस्तमसी प्रकृतिः स्वभावो येषां ते तु जनाः पितृभूतप्रजेशादीनेव भजन्ति। वैशब्दोऽवधारणे। भजनं हि सख्यपर्यवसायि सख्यं च समशीलेष्वेव भवति न विषमस्वभावेष्वित्यभिप्रेत्याह—समशीलानिति, रजस्तमस्स्वभावानित्यर्थः। प्रथमान्तपाठेऽप्ययमेवार्थः। तत्र पितॄणामीशा अर्यमादयः, भूतेशा रुद्रादयः, प्रजेशा हिरण्यगर्भादयः। तेषां तद्भजने प्रयोजनमाह—श्रियैश्वर्यप्रजेप्सव इति, श्रिया सम्पद्रूपया सहैश्वर्यमाधिपत्यं प्रजाश्च पुत्रादीनीप्सन्तीति तथाभूताः। अनेन भगवद्भक्तानामनन्यप्रयोजनवत्त्वमनन्तफलप्राप्तिः अन्यभक्तानां तु अन्तवत्फलप्रयोजनवत्त्वं तत्प्राप्तिश्चेति सूचितम् ॥ २७ ॥ ❀ ❀ न केवलं मोक्षप्रदत्वेनैव वासुदेवो भजनीयः, किन्तु "सर्वे वेदा यत्पदमामनन्ति। तपांसि सर्वाणि च यद्वदन्ति। वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिप्रामाण्येन सर्वशास्त्रतात्पर्यगोचरत्वादपि स एव भजनीय इत्याशयेनाह वासुदेवपरा वेदा इति द्वयेन। वासुदेवः परः तात्पर्यगोचरो येषां ते वासुदेवपरा वेदाः। अनेनैव वेदमूलत्वात् सर्वाण्यपि शास्त्राणि वासुदेवपराणीत्यर्थात् ज्ञेयम्। ननु तेषामपि मखयोगक्रियादिनानार्थपरत्वात् कथं वासुदेवपरत्वमित्याशङ्क्य मखादीनां तत्तद्देवताराधनपरत्वेन प्रतीतावपि तेषां फलप्रदानेऽन्तर्याम्यधीनत्वात् मुख्यतया सर्वदेवतान्तर्यामिवासुदेवाराधनपरत्वात् तत्प्रतिपादकशास्त्राणामपि वासुदेवपरत्वं युक्तमेवेत्याशयेन मखादीनामपि तत्परत्वमाह—वासुदेवपरा मखा इति, वेदपूर्वभागप्रतिपादिता मखा अपि वासुदेवपराः। यथोक्तं गीतासु—'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते' इति। तथा पातञ्जलादिशास्त्रोक्ता यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष्टाङ्गा योगा अपि वासुदेवपराः। तथा पञ्चरात्रादिवैष्णवशास्त्रोक्ताः क्रियाः पूजाप्रकारा अपि वासुदेवपराः ॥ २८ ॥

हिन्दी अनुवाद

प्राचीन युगमें महात्मालोग अपने कल्याणके लिये विशुद्ध सत्त्वमय भगवान् विष्णुकी ही आराधना किया करते थे। अब भी जो लोग उनका अनुसरण करते हैं, वे उन्हींके समान कल्याणभाजन होते हैं ॥ २५ ॥ ❀ ❀ जो लोग इस संसारसागरसे पार जाना चाहते हैं, वे यद्यपि किसीकी निन्दा तो नहीं करते, न किसीमें दोष ही देखते हैं, फिर भी घोररूपवाले—तमोगुणी-रजोगुणी भैरवादि भूतपतियोंकी उपासना न करके विष्णु भगवान् और उनके अंश—कलास्वरूपोंका ही भजन करते हैं ॥ २६ ॥ ❀ ❀ परन्तु जिनका स्वभाव रजोगुणी अथवा तमोगुणी है, वे धन, ऐश्वर्य और सन्तानकी कामनासे भूत, पितर और प्रजापतियोंकी उपासना करते हैं; क्योंकि इन लोगोंका स्वभाव उन (भूतादि) से मिलता-जुलता होता है ॥ २७ ॥ ❀ ❀ वेदोंका तात्पर्य श्रीकृष्णमें ही है। यज्ञोंके उद्देश्य श्रीकृष्ण ही हैं। योग श्रीकृष्णके लिये ही किये जाते हैं और समस्त कर्मोंकी परिसमाप्ति भी श्रीकृष्णमें ही है ॥ २८ ॥

वासुदेवपरं ज्ञानं वासुदेवपरं तपः। वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥
स एवेदं ससर्जाग्रे भगवानात्ममायया। सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥ ३० ॥
तया विलसितेष्वेषु गुणेषु गुणवानिव। अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥ ३१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

ज्ञानं ज्ञानशास्त्रम्। ननु च तज्ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तम्। तपोऽत्र ज्ञानम्। धर्मो धर्मशास्त्रं दानव्रतादिविषयम्। ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं साऽपि तदानंदांशरूपत्वात्तत्परैवेत्युक्तम्। यद्वा वेदा इत्यनेनैव तत्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तम्। तत्र ननु तेषां मखयोगक्रियादिनानार्थपरत्वान्न तदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यम् ॥ २९ ॥ ❀ ❀ ननु जगत्सर्गतत्प्रवेशनियमनादिविलासयुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते। कथं वासुदेवपरत्वं सर्वस्य तत्राह। स एवेति चतुर्भिः। एतैरेव श्लोकैस्तस्य कर्माण्युदाराणि ब्रूहीति प्रश्नस्योत्तरमुक्तम्। सदसद्रूपया कार्यकारणात्मिकया अगुणश्चेत्यन्वयः। स्वतो निर्गुणोऽपि सन्नित्यर्थः ॥ ३० ॥ ❀ ❀ भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमनलक्षणां लीलामाह। तयेति विलसितेषूद्भूतेषु गुणेष्वाकाशादिष्वंतः प्रविष्टः सन्गुणवानिव मदधीना एते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा। यतो विज्ञानेन चिच्छक्त्या विजृंभितोऽत्यूर्जितः ॥ ३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ज्ञानशास्त्रं वेदान्तशास्त्रम्। अत्राक्षिपति नन्विति। तत्परत्वं ज्ञानशास्त्रेणापि वासुदेव एव ज्ञेयत्वेन प्रतिपाद्यतेऽतस्तस्यापि तत्परत्वमेव। "यस्य ज्ञानमयं तपः" इति श्रुतेस्तपो ज्ञानम्। येन ज्ञेयसाक्षात्कारस्तज्ज्ञानम् "ज्ञानं ज्ञेयं परं ब्रह्म" इति स्मृतेर्ज्ञानस्य

वासुदेवस्वरूपत्वात्तदपि तत्परमेव। यत्र दानानां व्रतानाञ्च महिमा वर्ण्यते तच्छास्त्रं महाभारतादि। अत्राक्षिपति नन्विति। तद्धर्मेशास्त्रम्। आदिना कुबेरादिलोकपालग्रहः। तस्य परमात्मन आनन्दांशरूपत्वात् "तस्यैवानन्दस्य मात्रामुपजीवन्त्यन्यानि" इत्यादिश्रुतेः। अत्र हस्तिपदन्यायेन वेदस्य सर्वमूलत्वाद्भिन्नत्वेन कथनमनुचितमिति चेत्तत्राह–यद्वेति। तत्र पूर्ववाक्ये ॥ २९ ॥ ❀ ❀ पुनराक्षिपति। नन्विति। सर्गः सृष्टिः प्रवेशः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुत्युक्तः प्रवेशः। नियमनं "यः पृथिवीमंतरा यमयति" इत्याद्यन्तर्यामिब्राह्मणोक्तम्। आदिना पालनादिग्रहः। वस्तुनि सत्यरूपे ब्रह्मणि "सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेः। सर्वेशास्त्राणां समन्वयस्तात्पर्यम्। तत्राह–यस्मिन्सर्वशास्त्रसमन्वयः स एव परमात्मा भगवान्वासुदेवः "वेदैश्च सर्वैरहमेव वेद्यः" इति गीतोक्तेः। ब्रह्मण एवापरपर्यायो भगवच्छब्दवाच्यो वासुदेवो नान्य इति "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्युक्तेः। इत्यर्थं इति। वस्तुतो निर्गुण एव मायया सगुण इव स आभातीति भावः ॥ ३० ॥ ❀ ❀ प्रतियोगिनोत्रांतःकरणानि देहा वा तेषां नानात्वेन सांख्यादिमतमादायाह–क्षेत्रज्ञरूपेणेति। अवस्थितः सदा स्थितो यथा तथा विश्वात्मांतर्यामी भूतेषु प्राणिषु। यदि तेष्वेवाग्निर्मथनेन प्रकटीकृतः स्यात्तदा तान्येव दहति। एवमेव श्रवणादिभिः साधनैः साक्षात्कृतः परमात्मा मायिकमुपाधिं जीवस्य दूरीकरोतीति भावः ॥ ३१–३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

प्रश्नस्य पूर्वाध्यायान्तर्गतसप्तदशश्लोकोक्तस्य उत्तरं भवतीति शेषः ॥ ३०—३१ ॥

श्रीमद्वीरराघवव्याख्या

अथ वेदांतार्थोपबृंहणार्थतया प्रवृत्तकपिलाद्यागमोक्तप्रकृतिपुरुषविषयकज्ञानमपि प्रकृतिपुरुषशरीरकपरमात्मविषयकमेवेत्याह वासुदेवपरं ज्ञानमिति। ज्ञानं प्रकृतिपुरुषविषयकं वासुदेवविषयकं विशेषणबुद्धिशब्दयोर्विशेष्यपर्यंतत्वादित्यर्थः। कपिलादिभिस्तु तथा न बुद्धमिति भावः, तथा वेदांतार्थोपबृंहणपरं मन्वादिस्मृत्युक्तकृच्छ्रचांद्रायणानशनादितपश्च वासुदेवाराधनरूपमित्याह वासुदेवपरं तप इति। किं बहुना सर्वे वैदिकाः स्मार्ताश्च धर्मास्तत्प्राप्या गतयश्च वासुदेवाधीना इत्याह वासुदेवपरो धर्मो वासुदेवपरा गतिरिति ॥ २९ ॥ ❀ ❀ कथं वेदादीनां वासुदेवपरत्वमित्याशंकायां "तदात्मानं स्वयमकुरुतेत्युक्तरीत्या सूक्ष्मचिदचिद्विशिष्टं स्वात्मानं जगद्रूपेण परिणमय्य तत्तद्रूपेण वासुदेवस्यैवावस्थानाद्वासुदेवात्मकं विना वस्त्वभावादित्याह स इति द्वाभ्याम्। अग्रे सृष्टेः प्राक्स एव वासुदेव एव नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयावस्थित इत्यर्थः। एवकारेण तच्छब्दपरामृष्टभगवद्वाचकवासुदेवशब्दावयवार्थेन चेदं लब्धम्। यद्वा इदं परिदृश्यमानं जगदग्रे सृष्टेः प्राक्स एवासीदित्यध्याहारः। "सदेव सौम्येदमग्र आसीदि"ति स्थानप्रमाणात्। एवं चेदमित्यनेन नामरूपविभागभिन्नं जगन्निर्दिश्य तस्य वासुदेवरूपेणावस्थानोक्त्या वियदादिवत्स्वांतरव्यावर्त्तकैवकारप्रयोगेण च "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"ति स्मृत्यनुरोधाच्च अन्यथा न कर्माविभागादिति चेन्नानादित्वादित्युक्तन्यायेनाकृताभ्यागमकृतविप्रणाशादिदोषप्रसंगाच्च सूक्ष्मचिदचिद्विशिष्टत्वं लब्धम्। सृष्टेः प्रागेवमवस्थितो भगवानात्मनः स्वस्य मायया स्वशरीरभूतया गुणमय्या सत्त्वादिगुणप्रचुरतया सदसद्रूपया महदादिपृथिव्यंतकार्यकारणरूपेण परिणममाणया विभुर्व्यापकः सदसद्रूपेष्वंतरात्मतयानुप्रविष्ट इत्यर्थः। अथागुणः व्याप्य तद्गुणैरस्पृष्ट इदं जगत्ससर्ज ॥ ३० ॥ ❀ ❀ एवं समष्टिव्यष्ट्यवस्था चिदंतर्यामितया तत्कारणतया च तद्रूपेणावस्थानमुक्तम्। अथोभयावस्थप्रकृतिसंसृष्टजीवशरीरकतया तदंतरात्मतया तद्रूपेण वासुदेवस्यैवावस्थितिमाह तयेति। तयात्ममायया विलसितेषु रचितेषु एषु परिदृश्यमानेषु गुणशब्दो लाक्षणिकः गुणकार्यभूतशब्दादिस्तंबपर्यंतेष्वित्यर्थः, विज्ञानेन जीवेन "विज्ञानं यज्ञं तनुते, य आत्मनि तिष्ठन्यो विज्ञाने तिष्ठन्नि"ति श्रुतिप्रयोगात् तेन विजृम्भितः विशिष्टतच्छरीरक इत्यर्थः। "यस्य विज्ञानं शरीरम्" इति श्रुतेः। यद्वा विज्ञानरूपेण विजृम्भितः भाष्यमाणः तच्छरीरतया तदंतरात्मतया च तद्रूपेण प्रकाशमान इत्यर्थः। अंतः प्रविष्टः जीवद्वारा देवादिशरीरेष्वनुप्रविष्टः गुणवानिव साक्षाद्देवादिशरीरतच्छरीरकजीवगतधर्मवानिवाभाति। इवशब्दस्यायमभिप्रायः "काठिन्यवान्यो बिभर्ति नृसिंहरूपी भगवांश्चेत" इत्यत्र काठिन्यञ्चेत्यादिवच्छरीरभूतजीवे हेयसंबंधः। न तु शरीरिणि वासुदेवे इति। तथा तस्यैकस्यैव देवादिशरीरभेदेनानेकधावस्थितिश्चेति ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ज्ञानम् औपनिषदं, तपः कृच्छ्रचांद्रायणादिकायक्लेशः, धर्मो दानादिः गम्यत इति गतिः फलं परलोकः। अनेन हरेरखिलऋग्वेदादिशास्त्रमुख्यविषयत्वेन सर्वोत्तमत्वमुक्तम् ॥ २९ ॥ ❀ ❀ अत्र हेतुमाह स एवेति। यः सर्ववेदांतादिमुख्यविषयः परमसात्त्विकब्रह्मादीष्टदेवता वासुदेवः सोसावेवागुणः सत्त्वादिगुणविधुरः मुख्यकारणं वा विभुर्व्याप्तः भगवान्नारायणः अग्रे सृष्टेः पूर्वमात्ममायया स्वेच्छया निमित्तकारणरूपया सदसद्रूपया व्यक्ताव्यक्तरूपया गुणमय्या सत्त्वादगुणात्मिकजडप्रकृत्योपादानकारणरूपया चेदं जगत्ससर्जेत्येकान्वयः। अतो विष्णुरेव सत्यजगत्स्रष्टृत्वात्सर्वोत्तम इत्यर्थः ॥ ३० ॥ ❀ ❀ नियंतृत्व-

मपि तदेकनिष्ठमित्याह तयेति। स हरिः तया सदसद्रूपया विलसितेषु भूतभौतिकदेहेंद्रियाद्यात्मना परिणतेष्वेषु गुणेषु अंतःप्रविष्टो गुणवान् जीव इवाभाति अज्ञानामिति शेषः। कुतः विज्ञानेन विजृम्भितः विज्ञानपूर्णः इदं हेतुगर्भं विशेषणं नानाकर्मविपाकिनां जीवानां विज्ञानाभावादस्य परिपूर्णत्वात्तेन नियम्यत्वं तेषामिति भावः॥ ३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

(तदेवं तद्भजनस्यैवाभिधेयत्वं दर्शयित्वा पूर्वोक्तं सर्वशास्त्रसमन्वयमेव स्थापयति स एवेदमिति) ननु भवतु स्वयं भगवतो वासुदेवस्य तादृशत्वं गुणावतारस्य विष्णोः किमायातमित्याशङ्क्य तत्पर्यन्तानामन्येषामपि तदभिन्नत्वं दर्शयितुं प्रकरोति स एवेति पञ्चभिः। इदं महदादिविरिञ्चिपर्यन्तम्। एवं प्रवेशादिकापि उत्तरश्लोकेषु द्रष्टव्या। तत्र स एवेति महत्स्रष्टा तदभिन्नत्वेन दर्शितः॥ ३०॥ ❀ ❀ तयेत्यण्डसंस्थितः पुरुषः॥ ३१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ज्ञानतपसोर्ब्रह्मपरत्वमेव कर्म्मयोगस्य पूर्वश्लोकोक्तेः धर्म्मपदेन परमधर्म्मः श्रवणकीर्त्तनादिर्गतिस्तत्प्राप्यप्रेमापवर्गादिस्तयोस्तु वासुदेवपरत्वमेव॥ २९॥ ❀ ❀ किञ्च ये पितृभूतप्रजेशादयो भजनीयास्तेषामपि स्रष्टा वासुदेव एवेति स एव सेवार्ह इत्याह स एवेति। सदसद्रूपया कार्यकारणात्मिकया। स्वयं त्वगुणः॥ ३०॥ ❀ ❀ सृज्यानां तेषां स एवान्तर्यामीत्याह त्रिभिः। गुणेषु गुणोपाधिकजीवेषु तया मायया विलासविषयीकृतेषु गुणवानिव गुणसंसर्गवानिव भाति न तु तथा, यतो विज्ञानेन चिच्छक्त्या विजृम्भितः अत्यूर्जितः॥ ३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

ज्ञानं ज्ञानप्रधानमुपनिषद्रहस्यं वासुदेवपरमेव, तपः तीर्थवासदेहशोषणव्रतनियमादिरूपं वासुदेवपरमेव, धर्मः स्वस्ववर्णाश्रमधर्मः वासुदेवपरः, गतिरर्चिरादिमार्गरूपा वासुदेवपरा एव॥ २९॥ ❀ ❀ अथ तस्य कर्माण्युदाराणि ब्रूहीति प्रश्नस्योत्तरमाह स एवेति चतुर्भिः। स एव वासुदेवः विभुः असौ मम हृदि भासमानः आत्ममायया स्वशक्तिभूतया सदसद्रूपया स्थूलसूक्ष्मरूपया गुणमय्या सत्त्वादिगुणप्रचुरया अगुणस्तद्गुणास्पृष्टस्वरूपः इदं चिदचिद्रूपमग्रे ससर्ज्ज सूक्ष्मचिदचिच्छक्तिरेक एव विभुर्देशकालवस्तुपरिच्छेदशून्यः सजातीयविजातीयभेदशून्यः अचिच्छक्तिं सूक्ष्मरूपां महदादिस्तम्बपर्यंतस्थूलाकारतया सृष्टिसमये प्रसार्य चिच्छक्तिं जीवाख्यां देवमनुष्यादिनानादेहरूपायां स्थूलावस्थापन्नायां प्रकृतौ यथाकर्म संस्थाप्येदं विश्वं शक्तिद्वयात्मकं ससर्ज्ज। शक्तिद्वयस्य शक्तित्वेन भिन्नत्वेपि शक्तिमद्भिन्नस्थितिप्रवृत्त्यसंभवाच्छक्तिमतोऽभिन्नत्वं ज्ञेयम्, एवं सति शक्तिमतो जगदुपादानकारणत्वान्निर्गुणत्वं वर्तते जगत्कर्तृत्वेन स्वाभाविकगुणवत्त्वं चोपपद्यते इति॥ ३०॥ ❀ ❀ एवं भगवतः विश्वरचनात्मकं कर्म दर्शयित्वा प्रवेशलक्षणं कर्म दर्शयति। तयेति। तया गुणमय्या विलसितेषु रचितेषु गुणकार्येषु महदादिस्तंबपर्यंतेषु भगवान् विज्ञानेन ज्ञानस्वरूपेण स्वांशेन जीवेन स्वकृतपुण्यापुण्यकर्मफलभोगाय विजृम्भितः। प्रवर्त्तितः यद्वा विज्ञानेन जीवकर्मफलदानाय स्वसंकल्पेन विजृम्भितः प्रवर्त्तितः अतः प्रविष्टः गुणवान् इव वैषम्यनैर्घृण्यलक्षणलौकिकगुणयुक्त इव आभाति प्रतीयते न तु वैषम्यनैर्घृण्यवान्, तत्तत्कर्मसापेक्षत्वात्॥ ३१॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं सोपपत्तिकं फलसाधनस्वरूपं निर्णीतं तृतीयं कृष्णावतारप्रयोजनप्रश्नं प्रथमाधिकारात् अवतारतुल्येनात्रानुक्त्वा पश्चादवतारेष्वेव कथयिष्यति। ततश्च चतुर्थः प्रश्नः तस्य कर्माणीति तत्रोत्तरमाह स एवेदमिति पंचभिः। सृष्टिप्रवेशनानात्वभोगरक्षारूपाः पंचलीलाः क्रमेण पंचभिः प्रतिपाद्याः सगुणनिर्गुणयोर्भेदाभावाय स एवेति। सृष्टिस्त्वगुणादेव गुणत्रयेणापि सृष्टिः रजोमिश्रितेन तत्तमोमिश्रितेन त्रयेणापि संहारः तथा सत्त्वमिश्रितेन पालनमिति शुद्धास्त्वधिष्ठातृदेवताशरीररूपाः इदं जगत् दृश्यस्य सर्वस्यापि जगतः कार्यत्वं न त्वाकाशादेर्नित्यतेति अग्रे प्रथमम् "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी"ति श्रुत्या साक्षात्सर्वकारणं प्रथमा सृष्टिः। अन्येपि सृष्टिभेदाः संति ते निबंधे निरूपिताः। भगवानिति वैष्णवशास्त्रे एवेयं प्रथमा सृष्टिः। वैदिके तु स्वधर्मत्वशक्तिकालकर्मस्वभावानां सृष्टिः प्रथमा। अतोऽनंतगुणपूर्ण एव भगवान् स्वस्य मायया शक्त्या सर्वभवनसामर्थ्यरूपया इदमात्मभूतं जगत् सृष्टवान्। मायास्वरूपमाह सदसद्रूपयेति। साह्युच्चनीचसर्वप्रतिकृतिरूपा। तस्यामात्मानं संयोज्य प्रकटीकुर्वन् जगद्रूपेण जायते। एवं सति सुगमा सृष्टिर्भवति सुवर्णकाराणां प्रतिमादिनिर्माणवत् सा हि भगवन्निकटे तिष्ठति। निद्रापि शक्तिः सा जीवं भगवत्समीपे नयति, तत्र मायापर्यंतं गमने स्वप्नः, भगवत्पर्यंतं गमने सुषुप्तिः, पुनश्च सा यथास्थानमानयति। विद्या तु भगवत्समीपमेव नयति नानयति। एवमनंताः शक्तयो भगवतः। वेदे तु मायासाधनराहित्येनैव स्वत एवात्मानं जगद्रूपं करोतीत्युच्यते घटितपूरणपात्रभेदवद्वैदिकपौराणिकजगतो भेदः व्यलीकपक्षस्तु न प्रामाणिकः। चकारादन्येपि सृष्टिप्रकाराः सूच्यंते। असाविति भगवद्धर्मनिरूपणेन हृदये स्फुरितं भगवंतं बहिः पश्यन्निवांगुल्या निर्दिशति।

स्वस्वानंतगुणस्पर्शेन तादृशाकृतिरूपा गुणमयी भवति। तेषामुत्तममध्यमनिकृष्टभेदेन त्रिराशित्वात् सत्त्वरजस्तमोगुणवाच्यता। अस्याः पुनः स्पर्शेन भगवति गुणाकृतित्वम्, अतः अगुणः प्राकृतगुणरहितः, कथं ? स्वसंबंधेनैव मायाया गुणवत्त्वम्। कथं वा मायायां प्रविष्टोपि जगद्रूपेण जातोप्यगुणस्तत्राह विभुरिति सर्वसमर्थ इत्यर्थः॥ ३०॥ ❀ ❀ एवं सद्रूपेण जगत्सृष्टिमुक्त्वा आनंदरूपेणांतर्यामिसृष्टिमाह तयेति। तया मायया आकारसमर्पणेन विलसितेषु चित्रेषु देवादिदेहेषु भूतेषु च गुणेषु येषु परिदृश्यमानेषु गुणवानिव तेषां तेषां तत्रैव प्रवर्त्तनात् खदिरांगाररक्तिमेव अंतःप्रविष्टः स एवाभाति अयोगोलकनिविष्टाग्निवत् बहिरपि स्फुरति आसमंताद्भाति चिज्जडांशयोर्ज्ञानशक्तितिरोभावोस्ति तद्वदत्रापि भविष्यतीत्याशंक्याह विज्ञानेन विजृम्भित इति। अत्रांतर्यामिणः सर्वज्ञस्य जीवं सर्वत्र प्रेरयतः तद्विधज्ञानवतः कार्यावेशेन स्फुरणमिव विजृम्भा तद्वानित्यर्थः॥ ३१॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एवमिति। फलसाधनयोर्बोधकत्वेन परम्परात्रयेण विषयादिबोधनेन चेत्यर्थः। निर्णीतमिति। फलं वासुदेवसाक्षात्कारः सर्वेषां श्रेयस्तत्साधनं च धर्मादिकथारत्यन्तमात्मप्रसादनमिति निर्णीतमित्यर्थः। अवतारतुल्यत्वेनेति। अवतारान्तरतुल्यत्वज्ञानेन। कथयिष्यतीति। अवसरसङ्गत्यात्र वक्तुमुचितमिति तत्र कथयिष्यतीत्यर्थः। स एवेदमित्यत्र। पञ्चभिरिति। एतेन पञ्चमः श्लोकः कृष्णवतारप्रयोजनप्रश्नोत्तररूप इति श्रीधरमतं निवारितम्। तत्र सामान्यतः कथनेन विशेषाकांक्षाया अपूरणात्। सृष्टिस्त्वगुणादेवेति। मूलसृष्टिः प्राथमिकी सा तथा, अगुणादेव गुणसृष्टेर्वक्तव्यत्वादित्यर्थः। गुणत्रयेणापीत्यादि। ब्रह्मणः शिवस्य विष्णोश्च शुद्धरजस्तमःसत्त्वरूपत्वात्तादृशेभ्यः प्रत्येकं रजस्तमःसत्त्वमिश्रणे सृष्टिसंहारपालनानि भवन्तीत्यर्थः। एतच्च वायुसंहितादौ ब्रह्मा पुरुषकालविराड्भिः, विष्णुरनिरुद्धप्रद्युम्नसंकर्षणैः, शिवो भवमृडहरैः सृष्टिस्थितिसंहारान् करोतीत्येवं प्रकारेण बोधितम्। कौर्मेपि। 'एका भगवतो मूर्तिर्ज्ञानरूपा शिवामला। वासुदेवाभिधाना सा गुणातीता सुनिष्कला॥ द्वितीया रुद्रसंज्ञा स्यात्तामसी शेषसंज्ञिता। विहन्ति सकलं चान्या वैष्णवी परमा तनुः॥ सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता। जगत्पालयते सर्वं सा विष्णुप्रकृतिर्ध्रुवा॥ चतुर्थी वासुदेवस्य मूर्तिर्ब्रह्मेति संज्ञिता। राजसी चानिरुद्धाख्या पुरुषः सृष्टिकारिके'ति। एतेनैव सगुणनिर्गुणयोरभेदोपि सिद्धो ज्ञेयः। गुणस्यासनत्वस्फूर्तावगुणत्वात्तदभिमानित्वस्फूर्तौ तस्यैव सगुणत्वादिति। एवमेव ब्रह्मशिवयोरपि निर्गुणसगुणभावो ज्ञेयः। ननु त्रिभ्योपि कार्यत्रये शुद्धा गुणाः कथं बोद्धव्या इत्यत आहुः शुद्धा इत्यादि। इयमिति। मायाकरणिका। वैदिकप्रथमसृष्टेः सकाशादस्याः को भेद इत्यत आहुः वैदिके त्वित्यादि। तथा च वेदे शक्तेर्जननम्, अस्यां तु सा करणम्, तेन सा सृष्टिरितः प्राथमिकीत्यर्थः। प्रतिकृतिरूपेति। सञ्चायकरूपा। संयोज्येति। पूरयित्वा। चकारसूचितमर्थं वक्तुं प्रसङ्गादाहुः निद्रापीत्यादि। वैदिकपौराणिकजगतोर्भगवद्रूपत्वाविशेषेपि यो भेदस्तं प्रकारं बोधयितुमाहुः वेदे त्वित्यादि। स्वस्यानन्तेत्यादि। वैदिक्यां सृष्टावुत्पन्ना सा भगवत्स्पर्शेन सङ्क्रान्तभगवद्गुणा सती गुणमयी भवतीत्यर्थः। गुणाकृतित्वमिति। पूरितपात्रन्यायेन तथात्वम्। प्राकृतगुणरहित इति। गुणानां प्राकृतत्वस्य भगवत्सम्बन्धानन्तरभावित्वात्तथेत्यर्थः॥ ३०॥ ❀ ❀ तयेत्यत्र। अन्तर्यामिणोन्तःप्रविष्टस्य क्वचिदीषत्क्वचिद् भूयः स्फुरणे दृष्टान्तद्वयमाहुः खदिरेत्यादि। तथा च प्रेरकत्वस्य तद्धर्मत्वाद्यत्र स्वल्पं तद्यथास्मदादिषु तत्रेषद्भानम्, यत्र भूयस्तत्रासमन्ताद्भानम्, यथा नृपादिष्विवति भावः। प्रथमे आर्षीषदर्थः। स्फुरणमिति। तत्तज्ज्ञानस्य प्रकाशः। अस्मिन् मते जीववदुपाधिवशेनैकस्यैवान्तर्यामिणोपि नानात्वं ज्ञेयम्॥ ३१॥

श्रीगिरिधरकृता बालप्रबोधिनी

तथा वेदोत्तरभागप्रतिपादितं ज्ञानमपि वासुदेवपरमेव। तथा धर्मशास्त्रोक्तं कृच्छ्रचान्द्रायणादितपोऽपि वासुदेवपरम्। तथा दानादिधर्मः पूर्त्तसञ्ज्ञकः स्मृतिप्रतिपादितोऽपि वासुदेवपरः। स च धर्मः—'वापीकूपतडागादिदेवतायतनानि च॥ अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते' इत्याद्युक्तः। ननु क्वचित् क्वचित् तत्तद्धर्माणां स्वर्गादिलोकप्राप्तिफलत्वं प्रतीयते तत्कथं तेषां वासुदेवपरत्वमित्याशङ्क्य स्वर्गादिलोकानामपि "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेर्वासुदेवानन्दांशरूपत्वात् सर्वेषां धर्माणां वासुदेवपरत्वमित्याह—वासुदेवपरा गतिः गम्यते इति गतिः स्वर्गादिलोको वासुदेवपर एव॥ २९॥ ❀ ❀ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते कथं तेषां वासुदेवपरत्वमित्याशङ्क्य तथाभूतो वासुदेव एवातो युक्तं तेषां तत्परत्वमिति सूचयन् भगवतो जगत्कर्तृत्वादिलीलामाह—स एवेति पञ्चभिः। स वासुदेव एव स्वयमगुणो निर्गुणोऽपि गुणमय्या सत्त्वादित्रिगुणात्मिकया अत एव सदसद्रूपया कार्यकारणरूपेण परिणममानया चात्मनः स्वस्य मायया अनन्ताचिन्त्यरूपधारणसमर्थया प्रकृत्याऽग्रे सृष्ट्यादौ इदं विश्वं ससर्जेत्यन्वयः। ननु माययाऽपीत्थं कथमात्मानं विश्वं कर्तुं शक्यते तथात्वेऽपि कथं न विकारित्वं स्यान्मायासम्बन्धस्य विद्यमानत्वादित्याशङ्क्याह—विभुरिति, सर्वथा सदा सर्वत्र समर्थ इत्यर्थः। तत्र हेतुमाह—भगवानिति, यतो निरतिशयैश्वर्यादिपूर्ण इत्यर्थः॥ ३०॥ ❀ ❀ एवं भगवतो जगत्कारणत्वमुक्त्वा तत्प्रवेशनियमलक्षणां लीलामाह—तयेति। तया स्वमायया विलसितेषु विरचितेषु एषु दृश्यमानेषु गुणेषु

गुणकार्येषु पञ्चमहाभूतेषु ब्रह्मादिस्तम्बपर्यन्तशरीरेषु चान्तःप्रविष्टो निर्गुणोऽपि गुणवानिव शरीरादिमानिव जीववदाभाति, न तत्पृथक्त्वस्वरूपेण। तथापि विज्ञानेन चिच्छक्त्या विजृम्भितः प्रकाशमानः, नतु जीववदाच्छादितचैतन्यरूपः इत्यर्थः॥ ३१॥

हिन्दी अनुवाद

ज्ञानसे ब्रह्मस्वरूप श्रीकृष्णकी ही प्राप्ति होती है। तपस्या श्रीकृष्णकी प्रसन्नताके लिये ही की जाती है। श्रीकृष्णके लिये ही धर्मोंका अनुष्ठान होता है और सब गतियाँ श्रीकृष्णमें ही समा जाती हैं॥ २९॥ ❀ ❀ यद्यपि भगवान् श्रीकृष्ण प्रकृति और उसके गुणोंसे अतीत हैं, फिर भी अपनी गुणमयी मायासे जो प्रपञ्चकी दृष्टिसे है और तत्त्वकी दृष्टिसे नहीं है—उन्होंने ही सर्गके आदिमें इस संसारकी रचना की थी॥ ३०॥ ❀ ❀ ये सत्त्व, रज और तम—तीनों गुण उसी मायाके विलास हैं, इनके भीतर रहकर भगवान् इनसे युक्त-सरीखे मालूम पड़ते हैं। वास्तवमें तो वे परिपूर्ण विज्ञानानन्दघन हैं॥ ३१॥

यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु। नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्॥ ३२॥
असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः। स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान्॥ ३३॥
भावयत्येष सत्त्वेन लोकान् वै लोकभावनः। लीलावतारानुरतो[1] देवतिर्यङ्नरादिषु॥ ३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने द्वितीयोऽध्यायः॥ २॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

बहुलीलारूपत्वमाह। यथेति। स्वयोनिषु स्वाभिव्यंजकेषु। अवहितो निहितः। विश्वात्मा पुमान्परमेश्वरः। भूतेषु प्राणिषु। अंतर्यामिणोऽपि प्रतियोगिनानात्वेन नानात्वमिवोच्यते। क्षेत्रज्ञरूपेण वा॥ ३२॥ ❀ ❀ भोगरूपां लीलामाह। असाविति। असौ हरिर्भूतसूक्ष्माणि चेंद्रियाणि चात्मा मनश्च तैः स्वयं निर्मितेषु भूतेषु चतुर्विधेष्विति भोगे स्वातंत्र्यं द्योत्यते। तद्गुणांस्तत्तदनुरूपान्विषयानिच्छया भुंक्ते भोजयतीति णिजर्थो वा ज्ञेयः। पालयतीति वा। तदा त्वात्मनेपदमार्षम्। "भुजोऽनवने" इति स्मरणात्॥ ३३॥ ❀ ❀ इदानीं सूत जानासीति प्रश्नस्योत्तरमाह। भावयति पालयति। एतत्तु सर्वावतारसाधारणं प्रयोजनम्। विशेषतः कृष्णावतारस्य कुंतीस्तुतौ वक्ष्यते। लोकभावनो लोकभर्ता। देवादिषु ये लीलावतारास्तेष्वनुरतोऽनुरक्तः॥ ३४॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे भावार्थदीपिकायां टीकायां द्वितीयोऽध्यायः॥ २॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भुंक्ते इति। जीवानां भोक्तृत्वमंतर्यामिणा विना न सिद्ध्यतीति जीवस्य तदीयतटस्थशक्तित्वाद्वा जीवद्वारा स्वयमंतर्यामी भुंक्त इति युज्यत इति। जीववदीशस्य गुणभोक्तृत्वं सर्वथानुचितमेवेति मन्वानं प्रत्याह-भोजयतीति। णिजर्थोन्तर्भावितणिजर्थः। इत्यर्थः। धातोः पालनार्थमादायाह-पालयतीति। तदा पालनार्थांगीकारेऽनवनेऽपालने भुजेरात्मनेपदं भवतीति। स्मरणात्पाणिनिसूत्रात्॥ ३३॥ ❀ ❀ लोकान्भावयत्युत्पादयति ब्रह्मद्वारेति तथाभूतो विष्णुः। एतत् विश्वपालनलक्षणम्। आदिशब्दात्स्तंभाच्छ्रीनृसिंहाविर्भावश्रवणात्तत्रापि लीलावतारानुगत इति ज्ञेयम्॥ ३४॥

इति श्रीमद्भागवते प्रथमस्कन्धे भावार्थदीपिकाप्रकाशे द्वितीयोऽध्यायः॥ २॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

प्रतियोगिनानात्वेन उपाधिनानात्वेनेति पूर्वाचार्याः॥ ३२॥ ❀ ❀ भुजोऽनवने इति पाणिनीयव्याकरणस्य प्रथमाध्यायीयतृतीयपादस्य षट्षष्टितमं सूत्रम्॥ ३३ ❀ ❀ भावयतीति श्लोकेन सूत जानासीति द्वादशादिश्लोकोक्तप्रश्नद्वयस्योत्तरमुक्तमिति ज्ञेयम्। श्रीकृष्णावतारप्रयोजनकथनेन तन्मूलकतच्चरितप्रश्नस्याप्युत्तरकथनसिद्धेरिति॥ ३४॥

**इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-
दीपन्याख्यदीपिकाटिप्पण्यां द्वितीयोऽध्यायः॥ २२॥**

श्रीमद्वीरराघवव्याख्या

एतदेव दृष्टांतमुखेनोपपादयति। यथेति। अभिव्यक्तिस्थानमात्रं योनिशब्देनोक्तम्। न तु तदुपादानं न हि प्रकृतिर्जीवस्योपादानं न वा वह्नेर्दारूपादानं किन्तु निमित्तम्। "अग्नेरापः अद्भ्यः पृथ्वी"ति हि सृष्टिक्रमः। यथादारुभ्योवह्निरवहितः व्यतिरिक्त

१. प्रा० पा०—लीलावतारानुरतस्तिर्यङ्नरसुरादिषु।

एवावसन्स्वयोनिषु स्वाभिव्यक्तिस्थलेषु दारुषु नानेकधेव भाति ज्वलति, अग्नित्वस्यैकरूपत्वेऽपि तार्णपार्णशाखादिभेदवान् भाति । एवं प्रकृतिपरिणामरूपदेहेष्वभिव्यक्तो जीवो ज्ञानानंदरूपत्वेनैकरूपोऽपि देवोऽहं मनुष्योऽहमिति देवादिभेदभिन्नो भातीत्यर्थः । पुम्शब्दो जीववाची तच्छरीरपरमात्मपर्यंतः पुमान् विश्वात्मा जीवशरीरकः सर्वेश्वर एक एव देवादिरूपेण नाना भातीत्यर्थः । दारुषु भूतेष्विति दृष्टांतदार्ष्टांतिकयोरधिष्ठेयबहुत्वोक्त्या यथाह्रस्वत्वस्थूलत्ववक्रत्वादिभेदश्च दारुगत एव नाग्निगतः तथा देवत्वाज्ञत्वदुःखित्वादिभेदोऽपि न विश्वात्मगतः किन्तु देवादिशरीरदारुभेदस्तद्गततच्छरीरकजीवगत इति सूचितम् । वह्निर्विश्वात्मेत्येकत्वनिर्देशेनाग्निवद्विश्वात्मनोऽपि सर्वत्रावस्थितस्य स्वरूपतः स्वभावतो वा नावस्थांतरापत्तिरिति सूचितम् । इयांस्तु विशेषः दारुष्वग्निः साक्षादभिव्यक्तो नाना भाति दार्ष्टान्तिके जीवद्वारा देवादिरूपेण नाना भाति इति जीवविशिष्टदेवादिशरीराणामेवाधिष्ठेयत्वात् ॥ ३२ ॥ ❀ ❀ यथा विश्वात्मनः स्वशरीरभूतप्रकृतिपुरुषद्वारा देवादिरूपेण नानाभानमेवं सुखःदुःखादिभोक्तृत्वं तन्निमित्तं कर्तृत्वं च स्वशरीरभूतजीवद्वारैव स्वतस्तु तदुभयरहित इत्याह असाविति । असौ विश्वात्मा गुणमयैः सत्त्वादिगुणपरिणामरूपत्वेन तत्प्रचुरैर्भूतसूक्ष्मादिरूपैर्भावैः पदार्थैस्तत्र भूतानि पृथिव्यादीनि सूक्ष्माणि गंधादीनीद्रियाणि श्रोत्रादीनि ज्ञानेंद्रियाणि वागादीनि कर्मेन्द्रियाणि पादादीनि चात्मांतःकरणं जीवो वा एभिः । स्वेनैव कर्त्रा निर्मितेषु भूतेषु देवादिषु निर्विष्टः जीवद्वारानुप्रविष्टः तद्गुणान्पृथिव्यादिभूतगुणान् गंधादीन्विषयान्भुंक्ते जीवद्वारा विषयान् भुंक्ते न तु स्वत इत्यर्थः । भोक्तृत्वसमव्याप्तं कर्तृत्वमप्यत्र विवक्षितं जीवद्वारा पुण्यापुण्यरूपाणि कर्माणि च करोतीत्यर्थः । अत्र विश्वात्मेत्युच्यमानं भोक्तृत्वं कर्तृत्वं च प्रयोजककर्तृत्वं विवक्षितम् ॥ ३३ ॥ ❀ ❀ यद्वा । सत्त्वं रजस्तम इति प्रकृतेर्गुणाः स्युरित्यादिना सर्वकारणात् परमपुरुषादेवोपास्यमानान्नृणां श्रेयांसि कारणत्वेनोपास्यत्वमोक्षप्रदत्वादीनां "कारणं तु ध्येय अमृतस्यैष सेतुरित्या"दिप्रमाणैरेकनिष्ठत्वावगमात् न तु ब्रह्मरुद्रादिभ्यः, तेषां कर्मवश्यत्वसुखदुःखादिभोक्तृत्वादिनोपासकतुल्यत्वादिति सूचितम् । अथ तदुपपादनाय सर्वजीवानां परमपुरुषसृष्टकर्मानुगुणकरणकलेवरादिसंबंधं तत्प्रयुक्तकर्तृत्वं भोक्तृत्वमेषां कर्मवश्यत्वप्रयुक्तत्वेनौपाधिकत्वं स्वभावतस्तु ज्ञानैकाकारत्वं चेत्याह स एवेत्यादिचतुर्भिः । यथोक्त एवार्थः तयेति तया इति आत्ममायया विलसितेषु रचितेषु एषु गुणेषु गुणकार्येषु ब्रह्मादिशरीरेष्वंतःप्रविष्टो जीव इति शेषः, पुमानित्यस्योत्तरश्लोकादपकर्षो वा विज्ञानेन स्वधर्मभूतज्ञानेन विजृंभितः देहमात्मत्वेनाभिमन्वान इत्यर्थः, गुणवानिव देवत्वादिधर्मवानिवाभाति देवोहं मनुष्योहं कृशोहं स्थूलोहमित्यभिमन्यत इत्यर्थः । इवशब्देन वस्तुतो देहविलक्षणस्तद्गतधर्मैरस्पृष्ट एवेति सूच्यते ॥ क० ॥ तदेव दृष्टांतेनोपपादयति यथेति । यथैक एव वह्निः स्वयोनिषु स्वाभिव्यक्तिस्थानेषु तृणपर्णादिष्वभिव्यक्तो नानेव भाति तार्णत्वपार्णत्वादिभेदेन भाति, इवशब्देन वस्तुतो वह्नित्वेन रूपेणैकरूप एव, एवं विश्वात्मा विश्वस्याचेतनजातस्यात्मा पुमान् जीवोपि भूतेषु देवादिशरीरेषु नानेव भाति देवोहं मनुष्योहमित्यादिरूपेण नाना भाति वस्तुतो ज्ञानैकाकारेणैकरूप एवेत्यर्थः ॥ पुमानिति जात्यभिप्रायक एकत्वनिर्देशः "एको व्रीहिः सुसंपन्नः सुपुष्टं कुरुते प्रजा" इत्यत्र व्रीहिशब्दवत् । एवं च जीवैकत्वभ्रमो न कार्यः । दृष्टांतेपि वह्नित्वेनैकेनापि व्यक्तिभेदोभिप्रेतः । न चैवमेकैकस्य जीवस्य देवादिशरीरस्थस्य युगपन्नानाप्रतिभानाभाव इति वाच्यम् , एकैक एव जीवः क्रमेण देवमनुष्यादिशरीरराण्युपाददानः देवोहं मनुष्योहमित्याभातीत्येवमभिप्रायात् । नहि दृष्टांतेपि तार्णस्य वह्नेः पार्णत्वेन भानमस्ति ॥ ख ॥ असौ जीवः गुणमयैः सत्त्वादिगुणत्रयात्मकभगवन्मायापरिणामरूपैः पृथिव्यादिभूतगंधादितन्मात्राज्ञानेंद्रियकर्मेंद्रियांतःकरणैर्भावैः पदार्थैः स्वनिर्मितेषु स्वकर्मानुसारेण निर्मितेषु भूतेषु देवादिशरीरेषु निर्विष्टः गुणान् शब्दादिविषयान् भुंक्ते, तन्निमित्तानि कर्माणि च पुण्यापुण्यरूपाणि करोतीति च विवक्षितं वेदितव्यम् । यद्वा तया विलसितेष्वित्यादिभिः केवलं परमात्मैव प्रतिपाद्यते तदा विज्ञानेनेत्यस्य संकल्परूपज्ञानेनेत्यर्थः, पुमान्परमपुरुषः गुणान् भुंक्ते इत्यस्य लीलारसरूपान् गुणान् भुंक्ते इत्यर्थः ॥ ग ॥ ❀ ❀ तदेवं पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसीत्यस्योत्तरमुक्तम् । 'सूत जानासि भद्रं ते' इत्यादिना श्रीकृष्णावतारं तच्चरित्रं तदितरावतारतच्चरित्रादिकं च पृष्टं तत्र श्रीकृष्णावतारं तच्चरित्रादिकं विशिष्य दशमैकादशस्कंधाभ्यां सर्वावतारांस्तच्चरित्राणि च विशिष्य तत्र तत्र तृतीयादिषु विवक्षुस्तावत्समासतः सर्वावतारसाधारणं प्रयोजनमाह भावयतीति । एष सर्वेश्वरो लोकस्रष्टृत्वेन लोकान् भावयन्कर्मवश्यांश्चेतनानुज्जीवयितुं सत्त्वेनोपलक्षितः शुद्धसत्त्वमूर्त्तिः तिर्यङ्नरसुरादिषु लीलावतारेष्वनुरतो भवति । भावयतीति पाठे लोकभावनो लोकस्रष्टा एव सर्वेश्वरः तिर्यगादिषु मत्स्यादिषु मध्ये ये लीलाया अवतारास्तेष्वनुरतः लीलावतारैर्भक्तेष्वनुरतो वा सत्त्वेन लोकान् भावयति त्रायति साधुपरित्राणाय मत्स्याद्यवतारं धत्त इत्यर्थः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे प्रथस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

न च स्थानभेदादद्वयस्य हरेर्भेदाशंका कार्येत्याह यथेति । यथैको वह्निः स्वस्वयोनिषु स्वस्य व्यक्तिस्थानेषु दारुषु व्यवहितः भूतानामदृश्यतया स्थितः नानेव भाति मथनादिनेति शेषः दारूणानामानंत्यात्तथैको विश्वात्मा विश्वव्याप्तः पुमान् भूतेषु प्रविष्टो

नानेव भाति न तु नाना "नेह नानास्ति किंचने"ति श्रुतेः। अग्नेः कश्चिद्विशेषसंभवोपि नास्य कश्चिद्विशेष इति इवशब्दार्थः ॥ ३२ ॥ ❀ ❀ न च दुर्भगशरीरेषु प्रविष्टस्य जीववद्दुःखभोगः संभाव्यत इत्याह असाविति। असौ परमात्मा सत्त्वादिगुणमयैः सत्त्वादिगुणविकारैः भूत-सूक्ष्मेंद्रियात्मभिः पंचमहाभूतपंचतन्मात्रादशेंद्रियमनोभिर्भावैः तत्त्वैरुपादानरूपैः स्वनिर्मितेषु स्वेन तत्त्वेषु प्रविष्टेन विरचितेषु भुतेषु निर्विष्टः योगैश्वर्यादसंगतया प्रविष्टस्तद्गुणानानंदादीनेव भुंक्ते, न तु दोषनिर्मित्तदुःखादीन्। तस्माद् दुर्भगशरीरस्थत्वेऽपि न दुःखादिभोगस्तस्य स्वातंत्र्यादित्यर्थः ॥ ३३ ॥ ❀ ❀ उत्तराध्याये अथाख्याहीति प्रश्नं परिहरिष्यन् तदर्थं संक्षेपतो दर्शयति भावयन्निति। लोकभावनः जगदुत्पादकः सत्त्वेन गुणेन इतरगुणानभिभूय लोकान् भावयन् पालनेन वर्धयन्नेष परपुरुषस्तिर्यङ्नरसुरादिषु तिर्यग्वराहादिजातिषु नरेषु मनुष्येषु देवेषु आदिशब्दात्स्तंभादिषु लीलावतारानुगतो भवतीति विशेषणान्वयः। लीलयैवावतारान् अनुगच्छति न तु पूर्वकर्मणा। यो योवतारो जगदवनादावनुकूलः स्यात्तं तमवतारं गृह्णातीत्यस्मिन्नर्थे अनुशब्दः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथेति। सर्व्वभूतस्थः पुरुषः ॥ ३२ ॥ ❀ ❀ असाविति तत्तल्लीलावान् ॥ ३३ ॥ ❀ ❀ भावयतीति विष्णुरिति ज्ञेयम्। एतेन पूर्वोक्तेषु ब्रह्मत्वादिषु त्रिषु परमात्मत्वं दर्शितम्। अन्ये द्वे दर्शयिष्येते ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवहितः सदा स्थितो यथा तथा विश्वात्मा अन्तर्यामी भूतेषु प्राणिषु। यदि तेष्वेवाग्निर्मथनेन प्रकटीकृतः स्यात् तदा तान्येव दारूणि दहति। एवमेव श्रवणादिभिः साधनैः साक्षात्कृतः परमात्मा मायिकमुपाधिं जीवस्य दूरीकरोतीति ध्वनिः ॥ ३२ ॥ ❀ ❀ असौ विश्वात्मा भूतसूक्ष्माणि विषयाश्च इन्द्रियाणि च आत्मा मनश्च त्रैगुणमयैर्भावैः स्वनिर्म्मितेषु देवतिर्यगादिषु भूतेषु निर्विष्टः प्रविष्टः सन् तद्गुणान् तदनुरूपान् विषयान् वैषयिकसुखानि भुङ्क्त इति जीवानां भोक्तृत्वमन्तर्यामिणा विना न सिद्ध्यतीति वा जीवस्य तदीयतटस्थशक्तिद्वारा जीवद्वारा स्वयमन्तर्यामी भुङ्क्त इति प्रयुज्यते भोजयति जीवानिति णिजर्थो वा ज्ञेयः ॥ ३३ ॥ ❀ ❀ ❀ एवमन्तर्यामिणः प्रतियोगिनानात्वेन नानात्वमौपाधिकमुक्तम्। भगवतस्तु विनैवोपाधिं नित्यैव लीलया स्वरूपेणैव नानात्वमाह। भावयति पालयतीति। यद्वा लोकान् भागवतं स्वप्रेमयुक्तान् करोतीति सर्व्वावतारसाधारणप्रयोजनं लोकभावनः यतो लोककर्त्ता ॥ ३४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वितीयः प्रथमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ प्रेरणरूपं कर्म भगवतो दर्शयति यथेति। आर्द्रशुष्कोत्तमाधमादिषु स्वयोनिषु स्वाभिव्यक्तिस्थानेषु दारुषु वह्निरेक एव अवहितः समास्थितः नानेव भाति तत्तत्काष्ठस्वभावानुसारेण सर्वप्रतापकोपि अल्पानल्पग्राह्याग्राह्यतया नानेव भाति, न तु नाना तथा विश्वात्मा सर्वात्मा पुमान् परमपुरुषः भूतेषु स्थावरजंगमेषु हन्यहंत्रादिषु एक एव प्रेरकतया समास्थितः तत्तत्कर्मानुगुण्यात् अन्योन्यविषमप्रेरकतया नानेव प्रतीयते नतु नानेत्यर्थः ॥ ३२ ॥ ❀ ❀ अथ स्वभक्तवशवर्तिनो वासुदेवस्य स्वभक्तार्पितपदार्थभोगरूपं कर्म दर्शयति असौ विश्वात्मा भूतसूक्ष्मेंद्रियात्मभिः भूतसूक्ष्माणि च समनस्कानि वागादीनि यानींद्रियाणि च जीवरूपा आत्मानश्च तैः गुणमयैः सत्त्वादिगुणप्रचुरैः जीवानामपि गुणमयोभयदेहयोगात्तन्मयत्वमुपचर्यते एवंविधैश्चिदचिद्रूपैर्भावैः स्वेन भगवता निर्मितेषु भूतेषु ब्रह्मादिस्तंबपर्यंतेषु निर्विष्टः तद्गुणान् भुंक्ते "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" इति श्रीमुखोक्तेः ॥ ३३ ॥ ❀ ❀ अथ 'सूत जानासि भद्रं ते भगवान् सात्वतां पतिः। देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया॥' इति प्रश्नस्योत्तरमाह भावयतीति। लोकभावनः लोकान् भावयति। उत्पादयतीति स तथा सर्वलोककारणभूतः "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्' इति श्रीमुखवचनात् देवतिर्यङ्नरादिष्वाविर्भावस्थानेषु सत्त्वेन नियम्य गुणेनोपलक्षितः लीलावतारानुरतः लीलावतारैर्वामनवराहादिरूपैरनुरतस्तत्तत्काले धर्मत्राणार्थमुद्यतो भवति यः। एवं भवद्भिर्देवक्यां वसुदेवस्य जातो यस्य चिकीर्षयेति यस्य चिकीर्षितं पृष्टं स भगवान् लोकान् भावयति स्म देवक्यां

जातः सन्निति शेषः । तत्र कांश्चित्पुत्रत्वादिना सुखयति स्म कांश्चिज्ज्ञानैश्वर्यदानेन पालयति स्म कांश्चिदसुरादिभ्यः कांश्चित्संसार-भयात् नानाशास्त्रार्थोपदेशेन पालयति स्म । विस्तरस्तु देवक्यामाविर्भावप्रयोजनं कुंतीस्तुतौ द्रष्टव्यम् ॥ ३४ ॥

इती श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवमन्तर्यामिभावं निरूप्य जीवभावं निरूपयन् नानात्वलीलामाह यथेति । 'अवस्थितेरिति काशकृत्स्नः ॥ १।४।२२ ॥' इतिवत् केनचिद्रूपेणावस्थितो भगवानेव जीव इति तद्रूपमुच्यते दारुषु यथा वह्निस्तथा भूतभौतिकेषु जीवः स चैकः उपाधिव्यतिरेकेण स्वतो वैलक्षण्याभावात् यथा मथनव्यतिरेकेण काष्ठेष्वग्निर्न प्रतीयते तथा योगव्यतिरेकेणांतःकरणे जीवः यथाकरणाद्यवयवाः शरीरेभ्यो न भिद्यंते तथा महाकाष्ठे सर्वत्रैक एव विद्यमानो मथनस्थानेषूद्गच्छति तथा प्रतीयते च भेदः स च न प्रामाणिकः महाकाष्ठे एकस्यैव वह्नेः सिद्धत्वात्तथा काष्ठबहुत्वेप्यनुमंतव्यम् । एवं सर्वेषु देहेषु सर्वेषु भूतेषु च तिरोहितः समवस्थितः स जीव इति हिशब्दार्थः, किंच यत्र हि आविर्भवति तत्र तिष्ठतीति निश्चितं योगेन ज्ञानेन वाऽयं सर्वत्र आविर्भवति, अतस्तानि भूतानि यानि रूपाणि तेष्वेक एव वह्निर्नानाप्रतीयत इत्यर्थः । किंच विश्वात्मा चायं विश्वस्यैकमेव हि स्वरूपं एक वचनप्रयोगात्तस्यात्मा कथमनेको भवेत् उपाधिभेदात् भेद इव प्रतीयते चकाराद्भौतिकेषु, किंच पुमानयं ब्रह्मांडविग्रहः स्वराट् पुरुष एक एव सर्वत्र ब्रह्मांडे तस्य चावयवभूतानि मध्यस्थानि भूतानि भौतिकानि च तेषां भेदप्रतीतावपि पुरुषो न भिद्यते यथा करचरणादिषु नानाभेदप्रतीतावपि अधिष्ठातुर्भेदः तथा सर्वत्र ब्रह्मांडे पुरुषस्येति ॥ ३२ ॥ ❀ ❀ एक एव सर्वत्र गुप्तो नानेव प्रतीयमानो जीव इत्युक्तं भवति । तद्रूपेणैव भोगलीलेत्याह असाविति । चतुर्विधा हि सदृशसृष्टिः अंतःकरणम् इन्द्रियाणि तन्मात्राणि भूतानि चेति । तानि त्रिगुणात्मकानि । गुणमयत्वकथनात् स्वांशरूपता निरूपिता । तैर्निर्मितेषु देवतीर्यङ्नरादिषु भूतेषु नितरांविष्टः अनध्यासेन स्थितो भुंक्ते । विषयानात्मसात्करोति । भोगमुत्तरत्र स्पष्टीकरिष्यामः । एतावता भोगसृष्टिभेद उक्तो भवति । साक्षात्सृष्टेः पूर्वं निरूपणात् मायाकरणकत्वाच्चापि हेतुभूतादीनां करणत्वं कर्तृत्वं स्वस्मिन्निर्मितेषु स्वार्थं वा निर्मितेषु स्वेन वा निर्मितेष्विति गुणाश्रयः । तत्र सात्त्विकामन्तःकरणम् । सात्त्विकराजसानीन्द्रियाणि । राजसतामसानि तन्मात्राणि । तामसानि भूतानि चेति । धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं चतुर्द्धा भेदः । देहेन धर्मः तन्मात्रैरर्थः इंद्रियैः कामः अंतःकरणेन मोक्ष इति । तत्र जीवस्यैकत्र मुख्यतया स्थितौ अन्ये ह्यंगभावं प्राप्नुवंति । अत एव तद्गुणान् चतुर्विधपुरुषार्थरूपान् भुंक्त इत्युक्तम् ॥ ३३ ॥ ❀ ❀ एवं भोगलक्षणलीलामुपपाद्य तत्सिद्धये पालनलक्षणलीलामाह । भावयतीति । भावयति पालयति एष एव जीवरूपेण अभिन्नः पालने सत्त्वगुण एक एव करणं लोकान् भुवनजनरूपान् । अथवा सत्त्वेन भावयति सत्त्वयुक्तान् करोतीत्यर्थः । उभयत्र हेतुमाह लीलावतारानुरत इति । अवतारैर्दैत्यानां वधं विधाय सर्वलोकान् पालयति । अवतारैश्चरित्राणि विधाय सर्वान् लोकान् सत्त्वयुक्तान् करोति मुक्तये । ननु सत्त्वमात्रेण कथं मुक्तिः अवतारैर्वा कथं पालनं तत्राह । लोकभावन इति । लोकैर्भावनं यस्येति मुक्तिप्रकारः । अवताराणामविद्यमानदशायामपि भावनैव सर्वानिष्टनिवृत्तेः पालनमित्यर्थः । अथवा लोकान् भावयतीति । सर्वदा लोकानां चिंतया तेषामेव दुःखनिवारणाय अवतारान् कृत्वा पालयतीत्यर्थः । ननु कथं तमःप्रकृतिषु लीलेत्यत्र आह अनुरत इति । यथा जीवास्तत्र तत्र रताः रतिव्यतिरेकेण तादृशशरीराभावात् । तदनुस्वयमपि रत इत्यर्थः । देवादयः सत्त्वादिभेदाः, आदिशब्देन मिश्रभेदाः । अनेनायुक्तेष्वपि सर्वेषु भगवदवतारो ज्ञातव्यः । वक्ष्यति च 'अवतारा ह्यसंख्येया' इति देवेषु वामनः तिर्यक्षु मत्स्यादयः नरेषु रामादयः मिश्रेषु नृसिंहादय इति ॥ ३४ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे द्वितीयाध्यायविवरणम् ॥ २ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

असावित्यत्र । स्वांशरूपतेति । गुणानां भगवदंशत्वात्तथेत्यर्थः । नितरामिति । एतेन निर्विष्टपदे वर्णागमो बोधितः । कर्तृकरणयोर्भेदेन सृष्टिभेदं समर्थयन्ति साक्षादित्यादिना । हेतु इत्यत्र 'इह तु' इति पाठो भाति । सप्तमीसमासे चतुर्थीसमासे च करणत्वम्, तृतीयासमासे कर्तृत्वमिति त्रिधापि सृष्ट्योर्भेद एवेत्यर्थः । मुख्यतया स्थिताविति । दृढाध्यासे ॥ ३३ ॥ ❀ ❀ भावयतीत्यत्र । उभयत्र हेतुमाहेति । एतेन लीलाभिरवतारैरिति तृतीययोर्लुप्ता पदभेदो बोधितः ॥ ३४ ॥

इति प्रथमस्कन्धसुबोधिनीप्रकाशे द्वितीयाध्यायविवरणम् ॥ २ ॥

श्रीगिरिधरकृता बालप्रबोधिनी ।

एवमन्तर्यामिभावं निरूप्य जीवभावं निरूपयन् [सदृष्टान्तां नानात्वलीलामाह—यथेति । स्वयोनिषु स्वाभिव्यक्तिस्थानेषु काष्ठेषु अवहितो निहितो वह्निर्यथैक एव नानेव भाति काष्ठभेदेन भिन्न इव काष्ठह्रस्वत्वस्थूलत्ववक्रत्वादिना सोऽपि तथा भाति तथैव विश्वात्मा भगवानेक एव भूतेषु जरायुजाण्डजस्वेदजोद्भिज्जभेदभिन्नेषु ब्रह्मादिस्थावरान्तशरीरेषु पुमान् जीवरूपः सन्नानेव

भातीत्यन्वयः। अयं दृष्टान्तः प्रसिद्ध एव नात्र सन्देहः कश्चिदिति सूचयन्नाह—हीति ॥ ३२ ॥ ❀ ❀ तद्रूपेण भोगलीलामाह—असाविति। भूतानि पृथ्व्यप्तेजोवाय्वाकाशरूपाणि पञ्चमहाभूतानि सूक्ष्माणि रूपरसगन्धस्पर्शशब्दात्मकानि इन्द्रियाणि च आत्माऽन्तःकरणं च तैर्गुणमयैर्भावैर्गुणकार्यभूतैः स्वेन निर्मितेषु भूतेषु चतुर्विधशरीरेषु असौ भगवानेव जीवरूपेण निर्विष्टस्तत्तदिन्द्रियानुरूपान् गुणान् विषयान् भुङ्क्ते इत्यन्वयः ॥ ३३ ॥ ❀ ❀ अथ 'सूत जानासि भद्रं ते' इत्यादिना यच्छ्रीकृष्णावतारप्रयोजनं तच्चरितं च पृष्टं तत्तु विशिष्य दशमस्कन्धादिषु वक्ष्यते, इदानीं तु सर्वावतारसाधारणं प्रयोजनं वदन् पालनरूपां लीलामाह—भावयतीति। देवादिषु ये लीलावतारास्तेषु अनुरतः अनुरक्तः संस्तत्तदवतारैरेष वासुदेव एव सत्त्वेन गुणेन युक्तो लोकान् सजीवान् अनन्तकोटिब्रह्माण्डात्मकान् भावयति पालयति। ततो लोकभावनः लोककर्त्ता यदि कर्त्ता न पालयेत्तदा कः पालयेत्? लीलावतारानुरत इत्यनेनैव पालने तस्यायासो नास्तीति सूचितम्। वै एवकारार्थ। तत्र देवेषु वामनादयः, तिर्यक्षु मत्स्यादयः, नरेषु रामकृष्णादयः, आदिपदेन मिश्रेषु नरसिंहहयग्रीवादयः ॥ ३४ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्र हीनाधिकारवर्णने ॥ विवृतो द्वितीयोऽध्यायश्चामात्सर्यादिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

अग्नि तो वस्तुतः एक ही है, परन्तु जब वह अनेक प्रकारकी लकड़ियोंमें प्रकट होती है तब अनेक-सी मालूम पड़ती है। वैसे ही सबके आत्मरूप भगवान् तो एक ही हैं, परन्तु प्राणियोंकी अनेकतासे अनेक-जैसे जान पड़ते हैं ॥ ३२ ॥ ❀ ❀ भगवान् ही भूत-तन्मात्रा, इन्द्रिय तथा अन्तःकरण आदि गुणोंके विकारभूत भावोंके द्वारा नाना प्रकारकी योनियोंका निर्माण करते हैं और उनमें भिन्न-भिन्न जीवोंके रूपमें प्रवेश करके उन-उन योनियोंके अनुरूप विषयोंका उपभोग करते-कराते हैं ॥ ३३ ॥ ❀ ❀ वे ही सम्पूर्ण लोकोंकी रचना करते हैं और देवता, पशु-पक्षी, मनुष्य आदि योनियोंमें लीलावतार ग्रहण करके सत्त्वगुणके द्वारा जीवोंका पालन-पोषण करते हैं ॥ ३४ ॥

दूसरा अध्याय समाप्त

अथ तृतीयोऽध्यायः

सूत उवाच

जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥
यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका व्याख्या

अवतारकथाप्रश्ने तृतीये तूत्तराभिधा । पुरुषाद्यवतारोक्त्या तत्तच्चारित्रवर्णनैः ॥ १ ॥

यदुक्तम् 'अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः' इति तदुत्तरत्वेनावतारानुक्रमिष्यन्प्रथमं पुरुषावतारमाह । जगृह इति पंचभिः । महदादिभिर्महदहंकारपंचतन्मात्रैः सम्भूतं सुनिष्पन्नम् । एकादशेंद्रियाणि पंच महाभूतानीति षोडश कला अंशा यस्मिन् । यद्यपि भगवद्विग्रहो नैवंभूतस्तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यम् ॥ १ ॥ ❀ ❀ कोऽसौ भगवानित्यपेक्षायां तं विशिनष्टि । यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तत्र च योगः समाधिस्तद्रूपां निद्रां विस्तारयतो नाभिरेव ह्रदस्तस्मिन्यदंबुजं तस्मात्सकाशाद्ब्रह्मासीदभूत्पाद्मे कल्पे स पौरुषं रूपं जगृहे ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

अवतारकथानां प्रश्ने या उत्तराभिधा उत्तरकथनं सा तृतीयेऽध्याये तत्तदवतारचरित्रवर्णनपूर्वकमुच्यते (१) अत्र "कलाश्च पञ्चभूतानि ज्ञानकर्मेन्द्रियाणि च । पंच पंच मनश्चेति षोडशोक्ता महर्षिभिः" इति तीर्थः । "यस्मिन्नेताः षोडकलाः प्रविशन्ति" इति श्रुतेः । अत्र सन्दर्भः–तत्र ब्रह्मेति परमात्मेत्यत्र यो भगवान्निर्दिष्टः स एवेदमित्यादौ च यस्यैवाविर्भावा महत्स्रष्ट्रादयो विष्णुपर्यंता निर्दिष्टाः स भगवान्स्वयं श्रीकृष्ण एवेति पूर्वदर्शितशौनकाद्यभीष्टनिजाभिमतस्थापनाय परमात्मनो विशेषानुवादपूर्वकं दर्शयितुं तत्प्रसंगेनान्यानवतारान्कथयितुं तत्रैव ब्रह्म च निर्देष्टुमारभते जगृहे इति । यः श्रीभगवान्पूर्णषडैश्वर्यत्वेन पूर्णो निर्दिष्टः स एव पौरुषं रूपं पुरुषत्वेनाम्नायते । यद्रूपं तदेवादौ सर्गारम्भे जगृहे प्राकृतप्रलये स्वस्मिंल्लीनं सत्प्रकटतया स्वीकृतवान् । किमर्थं तत्राह–लोकसिसृक्षया तस्मिन्नेव लीनानां लोकानां समष्टिव्यष्ट्युपाधिजीवानां प्रादुर्भावनार्थमित्यर्थः । कीदृशं सत्तद्रूपं लीनमासीत्तत्राह–महदादिभिः संभूतं मिलितम् अंतर्भूतमहदादितत्त्वमित्यर्थः । "संभूयांभोधिमभ्येति महानद्या नगापगाः" इत्यादौ हि संपूर्वो भवतिर्मिलनार्थः । अत्र हि महदादीनि लीनान्यासन्निति । तदेवं "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । एकन्तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥" इति नारदीयतन्त्रादौ महत्स्रष्टृत्वेन प्रथमं पुरुषाख्यं यद्रूपं श्रूयते "तस्मिन्नाविरभूल्लिंगे महाविष्णुर्जगत्पतिः" इत्यादि । "नारायणः स भगवान्नापस्तस्मात्सनातनात् । आविरासन्कारणार्णोनिधिः संकर्षणात्मकः । योगनिद्रां गतस्तस्मिन्सहस्रांशुः स्वयं महान्" इत्यादिब्रह्मसंहितादौ कारणार्णवशायिसंकर्षणत्वेन श्रूयते । तदेव जगृहे इति प्रतिपादितम् । पुनः कीदृशं षोडशकलं तत्सृष्ट्युपयोगिपूर्णशक्तिरित्यर्थः । तदेवं यस्तद्रूपं स भगवान् । यत्तु तेन गृहीतं तत्तु स्वसृज्यानामाश्रयत्वात्परमात्मेति पर्यवसितम् । विश्वनाथस्तु पूर्वाध्यायान्ते लीलावतारानुरत इत्युक्तं तत्र कास्तस्य लीलाः केऽवतारा इत्यपेक्षायां प्रथमं पुरुषावतारमाह–जगृह इति पंचभिः । पौरुषं पुरुषाकारं पुरुषसंज्ञं वा । ननु जगृह इति चेदुच्यते तर्हि तद्रूपं पूर्वं नासीदित्यवगत्या तद्रूपस्याऽनित्यत्वं प्रसक्तमित्यत आह सम्यग्भूतं परमसत्यं पूर्वपूर्वमपि सदैव स्वरूपेण स्थितमेव तज्जगृहे । लोकसृष्ट्यर्थमुपादत्त । ग्रहणस्य विद्यमानवस्तुविषयत्वात् । घटस्याविद्यमानत्वे घटं जग्राहेति प्रयोगादर्शनाच्च । राजा सेनान्यं दिग्विजिगीषया स्वसंगे जग्राहेतिवत् । "युक्ते क्ष्मादावृते भूतं प्राण्यतीते समेषु" इत्यमरः । इतरत्रापि 'स एव प्रथमं देव' इत्यादौ सर्वत्र संभूतमिति पदमनुवर्त्तनीयम् । महदादिभिर्महत्तत्त्वाहंकारादिभिर्लोकानां समष्टिव्यष्टीनां भुवनानां वा स्रष्टुमिच्छा तया षोडशैव कला यस्मिन् राकाचन्द्रमिव मत्स्यकूर्माद्यवतारानपेक्ष्य परिपूर्णमित्यर्थः । "कला तु षोडशो भागः" इत्यमरः । अत्र योयं भगवान्स परव्योमनाथस्तेन गृहीतं यत्षोडशकलं रूपं स महाविष्णुः प्रकृतीक्षणकर्त्ता संकर्षणांशः कारणार्णवशायी प्रथमः पुरुषो भागवतामृतोक्तयुक्त्या ज्ञेयः । यद्वा "ताः षोडशकलाः प्रोक्ता वैष्णवैः शास्त्रदर्शनात्" शक्तित्वेन ता भक्तिविवेकादिषु संमताः "श्रीभूः कीर्तिरिलाकान्तिर्लीलाविद्येति सप्तकम् । विमलाद्या नवेत्येता मुख्याः षोडश शक्तयः । विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च । प्रह्वी सत्या तथेशानाऽनुग्रहेति नव स्मृताः ॥" इति ॥ १ ॥ ❀ ❀ तत्र चैकार्णवे पाद्मे ब्राह्मे । विश्वनाथस्तु यस्य पुरुषस्यांभसि

स्वरोमकूपस्थे ब्रह्माण्डान्तरे एकैकप्रकाशेन प्रविश्य स्वसृष्टे गर्भोदे शयानस्य यस्यावयवानां संस्थानैः प्रदेशविशेषैर्लोकविस्तरः पातालादिसत्यांतभुवनविन्यास इत्ययं प्रथमः। पद्मनाभोऽनिरुद्धांशो गर्भोदशायी द्वितीयो ज्ञेयः। यस्तु पूर्वाध्याये "हरिविरिंचिहरेतिसंज्ञा" इत्यत्र हरिरिति पठितः स क्षीरोदशायी अनिरुद्धांशस्तृतीयः पुरुषो ज्ञेय इति पुरुषत्रयम्। अत्र प्रथमः प्रकृतेरंतर्यामी द्वितीयः समष्टिविराजस्तृतीयो व्यष्टीनामिति त्रय एवांशेनान्तर्यामिणः। तदुक्तं "एकं तु महतः स्रष्टृ" इत्यादिना। एवं चैतत्प्रकरणव्यंजिका महाविष्णोर्लीलाकथापरिपाटी चेयं यदैव तस्य पुनरपि प्रदेशविशेषे शयनेच्छाऽजनिष्ट तदा कारणार्णवे शयान एव स्वनिश्श्वासनिष्क्रमणप्रथमक्षणे स्वशक्तिं मायामैक्षिष्ट। तया च तदिंगितज्ञया तदिच्छाबलाल्लब्धसामर्थ्यया महत्तत्त्वादितत्त्वानि स्वत एव निष्कास्य ब्रह्माण्डं तैः सृष्ट्वा स्वप्रभुर्विज्ञाप्यते स्म। हे नाथ शयितुमागच्छेति। ततोसौ तत्र गत्वा निमेषमात्रं शयित्वा यदैव पुनरागतवांस्तदैव तद्ब्रह्माण्डं शयनमन्दिरं निर्माल्यमिव माययैव स दूरीचकार। पुनरपि नवीनमन्दिरे तं शाययितुमेवं च ब्रह्मणः परार्द्धद्वयं गच्छति स्म। तदुक्तं तृतीये "निमेष उपचर्यते" इति। सन्दर्भस्तु यस्य च तादृशत्वेन तत्र शयानस्य अवयवसंस्थानैः साक्षाच्छ्रीचरणादिसन्निवेशैः लोकस्य विस्तरो विस्तारो विराडाकारः प्रपञ्चः कल्पितः यथा तदवयवसन्निवेशास्तथैव "पातालमेतस्य हि पादमूलम्" इत्यादिना नवीनोपासकान्प्रति मनःस्थैर्याय प्रख्यापितः, न तु वस्तुतस्तदेव तस्य रूपमित्यर्थः। यद्वा "चन्द्रमा मनसो जातः" इत्यारभ्य "पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयत्" इत्यादिश्रुतेस्तैस्तैर्हेतुभूतैर्लोकविस्तारो रचित इत्यर्थः। तथा च मोक्षधर्मे नारायणीये गर्भोदके शयानस्य रूपांतरेण श्वेतद्वीपपतेर्वाक्यम् "असन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययम्। स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोप्यजीजनत्॥ प्रद्युम्नादनिरुद्धोहं सर्गो मम पुनः पुनः। अनिरुद्धात्तथा ब्रह्मा तत्रादिकमलोद्भवः। ब्रह्मणः सर्वभूतानि स्थावराणि चराणि च॥" तत्रैव वेदव्यासः "परमात्मेति यं प्राहुः साङ्ख्ययोगविदो जनाः। महापुरुषसंज्ञां स लभते स्वेन कर्मणा॥ तस्मात्प्रभूतमव्यक्तं प्रधानं यद्विदुर्बुधाः। अव्यक्ताद्व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात्॥ अनिरुद्धो हि लोकेषु महानात्मेति कथ्यते। योऽसौ व्यक्तत्वमापन्नो निर्ममे च पितामहम्" इति। तदेवं संकर्षणस्य वैभवमुक्त्वाऽनिरुद्धस्याप्याह—अनिरुद्धो हीति। लोकेषु प्रत्येकब्रह्माण्डेषु महानात्मा परमात्मा व्यक्तत्वं प्राकट्यं प्रद्युम्नादिति शेषः। सूतेन त्वभेदविवक्षया प्रद्युम्नः पृथङ्नोक्तः "विष्णोस्तु त्रीणि रूपाणि" इतिवत्। सेयं प्रक्रिया द्वितीयस्कन्धस्य षष्ठे दृश्यते। यथा "स एव आद्यः पुरुषः" इत्यादिपद्ये टीका। स एवाद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादिकं करोतीत्येषा। एवम् "आद्योऽवतारः पुरुषः परस्य" इत्यस्य टीका परस्य भूम्नः पुरुषः प्रकृतिप्रवर्त्तकः यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः स आद्योवतार इत्येषा। तथा तृतीयस्य विंशे "दैवेन" इत्यादिकं "सोनु" इत्यन्तं सटीकं प्रकरणमत्रानुसंधेयम्। तस्माद्विराट्त्वेन तद्रूपं न व्याख्येयम्। तस्माच्च वासुदेवस्थानीयो भगवान्पुरुषादन्य एवेत्यायातम्॥ २॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

अथाख्याहीति पूर्वाध्यायस्य अष्टाविंशश्लोकः॥ १-८॥

श्रीमद्वीरराघवव्याख्या

तदेवं प्रथमेऽध्याये प्रश्नः कृतः द्वितीये तु सर्वप्रवर्त्तकभगवद्भक्तेरेव मोक्षप्रदत्वाद्भगवदीयप्रबंध एव श्रोतव्य इति स्थापितमवतारप्रयोजनं चोपक्षिप्तम्। अथ भगवदवतारविशेषं तच्चरितानि विस्तरेणोपरिविवक्षता सूतेन भगवतोनेकेवताराः संति इति प्रतिपाद्यते तृतीयाध्याये जगृहे इत्यादिना। अवताराश्च द्विविधाः अनुप्रवेशावताराः स्वेन रूपेणावताराश्चेति। अकर्महेतुत्वाविशेषादुभयत्रावतारशब्दप्रयोगः कृतः। द्विविधानपि तान्वक्तुं तदुपयोगित्वेन प्रथमं चेतनमिश्रं प्रकृतिप्राकृतजातमेकं शुद्धसत्त्वमयमपरं चेति रूपद्वयं भगवतोस्तीति विवक्षन्पूर्वं प्रकृतिप्रकृतात्मरूपपरिग्रहमाह जगृह इति। पुरुषाः क्षेत्रज्ञास्तत्संबंधि पौरुषं तन्मिश्रमित्यर्थः। एकादशेंद्रियपंचभूतात्मकः षोडशकला यस्मिंस्तत्तथा महदादिभिः संभूतं रूपमण्डकारणं समष्टितत्त्वजातमिह रूपशब्देन विवक्षितं समुदायस्य महदादिभिः संभूतमित्युक्तं लोकसिसृक्षया जगृहे ब्रह्मांडतदंतर्वर्तिकार्यजातसिसृक्षया रूपं जगृहे इत्यर्थः॥ १॥ ❀ ❀ अथ स्वासाधारणं रूपमाह यस्येति। प्रथमस्येति शब्दस्य योर्थः स तद्वा इति तच्छब्देन परामृश्यते। द्वितीयं तु यस्येति पदं चतुर्मुखपरम्। चतुर्मुखशरीराद्धि देवमनुष्यादिसृष्टिः पुराणांतरेषु दृष्टा। यस्यावयवसंस्थानैर्यच्छरीरावयवपरिणामैर्देवमनुष्यादिलोकविस्तरः स ब्रह्मा विश्वसृजां मरीच्यादीनां पतिः यस्यांभसि शयानस्य योगनिद्रां वितन्वतः अनिरुद्धस्य नाभिहृदांबुजादासीत्तद्भगवतो रूपमूर्जितं विशुद्धं सत्त्वं शुद्धसत्त्वमयमिति श्लोकद्वयस्यैकवाक्यम्। तस्य रूपस्य ज्ञानदृश्यमपरिच्छेद्यत्वं सर्वावतारनिदानत्वं चाह यस्याम्भसीति सार्द्धेन। यद्वा जगृह इत्यादिश्लोकानामेवमर्थः—अजडेष्वनुप्रवेशरूपेण च द्विविधावतारे तत्र प्रथमस्य देवादिष्वनुप्रवेशरूपत्वात्तत्र वक्तव्यस्वभावात्स्वेन रूपेणावतारोपयोगिदिव्यमंगलविग्रहयोग उच्यते। यस्यानिरुद्धस्यावयवसंस्थानैः शरीरभूतप्रकृत्येकदेशपरिणामैर्लोकविस्तरः कल्पितस्तस्य भगवतो रूपं शुद्धसत्त्वमयमूर्जितमुत्कृष्टमित्यर्थः॥ २॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भावयन्नेष सत्त्वेनेति द्वितीयाध्यायांते सूचितानवतारान् कथयितुं प्रथमतः परमपुरुषाख्यभगवदभिव्यक्तिप्रकार**माह जगृह इति। भगवानादौ** लोकसिसृक्षया महदादिभिः संभूतं षोडशकलं पौरुषं रूपं जगृह इत्येकान्वयः। प्रलयकालीन-

स्वगूहकतमःपानेन परमपुरुषाख्यं निजं रूपमाविश्चक्रे। न तु विराड्रूपं महदादिभिः प्रलयकाले स्वोदरनिविष्टैर्महदहंकारादि-सप्तप्रकृतिविकृतिभिः शरीरस्थानीयादिभिः संभूतं सहितं कलाश्च पंचभूतानि ज्ञानकर्मेंद्रियाणि च 'पंच पंच मनश्चेति षोडशोक्ता महर्षिभिरि'ति षोडशकला अंतर्गता यस्मिन्निति तत् षोडशकलम्। "यस्मिन्नेताः षोडशकलाः प्रभवंती'ति श्रुतेः प्राणादिषोडश-कलासहितं वा। सिसृक्षया सृष्टीच्छया। यः प्राक् जगत्संहृत्य सूक्ष्मरूपतया स्वोदरे निवेश्य प्रलयोदके श्रीपर्यंके श्रीभुजांतर्गतः प्रकृतिमयतमसा निगूढः स्थितः स एव परमपुरुषः पुनरुत्पत्तिकाले स्वगूहकं तमः पीत्वाऽऽत्मानं प्रकाशितवानित्येतदेवात्र पुरुषरूपग्रहणमभिप्रेतं रामकृष्णादिवल्लोकव्यक्त्यभिप्रायोऽपीत्युक्तं भवति ॥ १ ॥ ❀ ❀ एवं स्वगूहकतमःपानेन प्रकाशितः परमपुरुषः महदादितत्त्वान्युत्पाद्य तैर्ब्रह्मांडं सृष्ट्वा तदंडांतः प्रविश्यांतरुदके शेषपर्यंकशायिनाभेर्लोकात्मकं पद्मं निर्माय पद्मनाभनामा भूत्वा तस्मात्पद्माच्चतुर्मुखमस्राक्षीदित्याह यस्येति। अंभसि शयानस्य योगनिद्रां वितन्वतः यस्य भगवतः नाभिहृदांबुजाद्विश्वसृजां दक्षादीनां पतिर्ब्रह्मा आसीत् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु पूर्व्वं ब्रह्मादितया त्रिधैव तत्त्वमेकमुक्तम्। तत्र ब्रह्मणः किं लक्षणं भगवत्परमात्मनोर्वा तत्र तत्र विशेषः कश्चिद् वा किमस्तीति श्रीशौनकादिप्रश्नमाशङ्कय ब्रह्मेति परमात्मेत्यत्र यो भगवान् निर्दिष्टः स एवेदमित्यादौ च यस्यैवाविर्भावा महत्-स्रष्ट्रादयो विष्णुपर्यन्ता निर्दिष्टाः, स भगवान् स्वयं श्रीकृष्ण एवेति पूर्व्वदर्शितशौनकाद्यभीष्टनिजाभिमतस्थापनाय परमात्मनो विशेषा-नुवादपूर्व्वकं दर्शयितुं तत्प्रसङ्गेनान्यानवतारान् कथयितुं तत्रैव ब्रह्म च निर्देष्टुमारभते जगृह इति। यः श्रीभगवान् पूर्णषडै-श्वर्य्यत्वेन पूर्व्वं निर्दिष्टः स एव पौरुषं रूपं पुरुषत्वेनाम्नायते यद्रूपं तदेवादौ सर्गारम्भे जगृहे प्राकृतप्रलये स्वस्मिन् लीनं सत् प्रकटतया स्वीकृतवान्। किमर्थम्? तत्राह लोकसिसृक्षया। तस्मिन्नेव लीनानां लोकानां समष्टिव्यष्ट्युपाधिजीवानां सिसृ-क्षया प्रादुर्भावनार्थमित्यर्थः। कीदृशं सत् तद्रूपं लीनमासीत्तत्राह महदादिभिः सम्भूतं मिलितम्। अन्तर्भूतमहदादितत्त्व-मित्यर्थः। "सम्भूयाम्भोधिमभ्येति महानद्या नगापगेत्या"दौ हि सम्भवतिर्म्मिलनार्थः। तत्र हि महदादीनि लीनान्यासन्निति। तदेवं "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। एकन्तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्॥ तृतीयं सर्व्वभूतस्थं तानि ज्ञात्वा विमुच्यते"इति। नारदीयतन्त्रादौ महत्स्रष्टृत्वेन प्रथमं पुरुषाख्यं रूपं यत् श्रूयते (तस्मिन्नाविरभूल्लिङ्गे महा-विष्णुर्ज्जगत्पतिरित्यादि। नारायणः स भगवानापस्तस्मात् सनातनात्॥ आविरासन् कारणार्णोनिधिः सङ्कर्षणात्मकः। योग-निद्रां गतस्तस्मिन् सहस्रांशुः स्वयं महानित्यादि) यच्च ब्रह्मसंहितादौ कारणार्णवशायिसङ्कर्षणत्वेन श्रूयते। तदेव जगृह इति प्रतिपादितम्। पुनः कीदृशं तद्रूपं तत्राह षोडशकलं तत्सृष्ट्युपयोगिपूर्णशक्ति इत्यर्थः। तदेवं यस्तद्रूपं जगृहे स भगवान्। यत्तु तेन गृहीतं तत्तु स्वसृज्यानामाश्रयत्वात् परमात्मेति पर्यवसितम्॥१॥ ❀ ❀ तस्य पुरुषरूपस्य विसर्गनिदानत्वमपि प्रतिपादयितुमाह सार्धेन यस्याम्भसि शयानस्येति। यस्य पुरुषरूपस्य द्वितीयेन व्यूहेन ब्रह्माण्डं प्रविश्य अम्भसि गर्भोदके शयान-स्येत्यादि योज्यम्। अत्र टीकायां पाद्म इत्यत्र ब्राह्म इति वाच्यम् (पुरुषावयवैर्लोकरचनोक्तेः)॥ २॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवतारकथा ब्रूहीत्यस्योत्तरतयोच्यते। भगवान् जन्मकर्म्मभ्यां तृतीयेऽनेकमूर्त्तिमान्॥ पूर्व्वाध्यायान्ते लीला-वतारानुरत इत्युक्तम्। तत्र कास्तस्य लीलाः के वा अवतारा इत्यपेक्षायां प्रथमं पुरुषावतारमाह जगृह इति पञ्चभिः। पौरुषं पुरुषाकारं पुरुषसंज्ञं वा। ननु जगृहे इति चेदुच्यते तर्हि तद्रूपं पूर्व्वं नासीदित्यवगत्या तद्रूपस्यानित्यत्वं प्रसक्तमित्यत आह सम्यग् भूतं परमसत्यं पूर्व्वपूर्व्वमपि सदैव स्वरूपेण स्थितमेव, तत् जगृहे लोकसृष्ट्यर्थमुपादत्ते। ग्रहणस्य विद्यमानवस्तुविषयत्वात्। घटस्याविद्यमानत्वे घटं जग्राहेति प्रयोगादर्शनाच्च राजा सेनान्यं दिग्विजिगीषया 'स्वसङ्गे जग्राहेति'वत्। "युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिष्वि"त्यमरः। उत्तरत्रापि स एव प्रथमं देव इत्यादौ सर्व्वत्र सम्भूतमिति पदमनुवर्त्तनीयम्। महदादिभिर्मह-त्तत्त्वाहङ्कारादिभिर्लोकानां समष्टिव्यष्टीनां भुवनानां वा या स्रष्टुमिच्छा तया षोडशैव कला यस्मिन्निति राका चन्द्रमिव मत्स्यकूर्म्माद्यवतारानपेक्ष्य परिपूर्णमित्यर्थः। "कला तु षोडशो भाग" इत्यभिधानात्। अत्र योऽयं भगवान् स परव्योमा-धिनाथः। तेन गृहीतं यत् षोडशकलं रूपं स महाविष्णुः प्रकृतीक्षणकर्त्ता सङ्कर्षणांशः कारणार्णवशायी प्रथमः पुरुषो भागवता-मृतोक्तयुक्त्या ज्ञेयः॥ १॥ ❀ ❀ यस्य पुरुषस्य अम्भसि स्वरोमकूपस्थब्रह्माण्डान्तरे एकैकप्रकाशेन प्रविश्य स्वसृष्टे गर्भोदे शयानस्य योगः समाधिस्तद्रूपां निद्रां विस्तारयतः यस्य नाभिहृदाम्बुजस्य अवयवानां संस्थानैः प्रदेशविशेषैर्लोकविस्तरः पातालादि-सत्यान्तभुवनविन्यासः, इत्ययं पद्मनाभः प्रद्युम्नांशो गर्भोदशायी द्वितीयो ज्ञेयः। यस्तु पूर्व्वाध्याये हरिविरिञ्चिहरेति संज्ञा इत्यत्र हरिरिति पठितः स क्षीरोदशायी अनिरुद्धांशस्तृतीयः पुरुषो ज्ञेय इति पुरुषत्रयम्। अत्र प्रथमः प्रकृतेरन्तर्यामी। द्वितीयः समष्टिविराजः। तृतीयो व्यष्टीनामिति। त्रय एवांशेनान्तर्यामिणः। तदुक्तं 'एकन्तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्। तृतीयं

सर्व्वभूतस्थं तानि ज्ञात्वा विमुच्यत ॥' इति। एवञ्चैतत्प्रकरणव्यञ्जिता महाविष्णोर्लीलाकथापरिपाटी चेयम्। यदैव तस्य पुनरपि प्रदेशविशेषे शयनेच्छा अजनिष्ट तदा कारणार्णवे शयान एव स्वनिश्वासनिष्क्रमणप्रथमक्षणे स्वशक्तिं मायामैक्षिष्ट। तया च तदिङ्गितज्ञया तदिच्छाबलाल्लब्धसामर्थ्यया महत्तत्वादितत्त्वानि स्वत एव निष्काश्य ब्रह्माण्डं तैः सृष्ट्वा स्वप्रभुर्विज्ञाप्यते स्म हे नाथ शयितुमागच्छेति। ततोऽसौ तत्र गत्वा निमेषमात्रं शयित्वा यदैव पुनरागतवान् तदैव तद्ब्रह्माण्डं शयनमन्दिरं निर्म्माल्यमिव माययैव स दूरीचकार। पुनरपि नवीनमन्दिरे तं शाययितुमेवञ्च ब्रह्मणः परार्द्धद्वयं गच्छति स्म। यदुक्तं तृतीये निमेष उपचर्यंत इति ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

'अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा' इत्यस्योत्तरमाह जगृहे इत्यादिना। भगवान्स्वाभाविकैश्वर्यादिगुणवान् महदादिभिः संभूतं संजातं षोडशकलम् एकादशेंद्रियाणि पंचमहाभूतानि षोडशकलाः अंशाः यस्मिन् तत् पौरुषं पुरुषाः क्षेत्रज्ञास्तत्संबंधिनिखिलबद्धजीवालयं पुरुषस्य स्वावतारस्य नियम्यं वा समष्टिकार्यात्मकं व्यष्ट्युपादानभूतं रूपम् लोकसिसृक्षया जगृहे। तस्य हि पुरुषावतारस्य शरीरत्रयं ज्ञेयम्, तत्रैकं सूक्ष्मं 'अतः परं यदव्यक्तमि'ति वक्ष्यमाणम्, द्वितीयं विराडाख्यम्, तृतीयमप्राकृतम्। तस्य च पुरुषनारायणानिरुद्धादीनि नामानि विराट्शरीरे वर्तमानत्वात्स एव वैराज इत्युच्यते। शरीरतद्वतोरभेदविवक्षया विराडित्युच्यते। एतत्सर्वं द्वितीयस्कंधे स्फुटीभविष्यति ॥ १ ॥ ❀ ❀ तत एव ब्रह्मोत्पत्तिमाह यस्येति। यदुक्तं मोक्षधर्मे श्रीमुखेन 'तपो यज्ञश्च स्रष्टा च पुराणः पुरुषो विराट्। अनिरुद्ध इति प्रोक्तो लोकानां प्रभवाप्ययम् ॥ ब्रह्मेति रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः। प्रसादात्प्रादुरभवत्पद्मं पद्मनिभेक्षण ॥ ततो ब्रह्मा समभवदि'त्यादि ॥ २ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

निरूपिताः पंचलीलाः फलसाधननिर्णये। तृतीये त्ववशिष्टानामवतारार्थधर्मिणाम् ॥ कृष्णावतारकार्यार्थं न सूतो ज्ञातवान् स्फुटम्। अतः साधारणं प्रोक्तं निर्णयश्च तथाधिकः ॥ षट्प्रश्नपूरणं तेन वस्तुतः पंचपूरणम् अथाख्याहि हरेर्धीमन्निति पृथक्तयावतारप्रश्नात् अध्यायांतरेणावतारानाह जगृहे इति षड्विंशत्या। अवतरणमवतारः व्यापिवैकुण्ठात् भगवतः प्रपंचसमागमनं, तत्र यद्यप्यक्षरकालकर्मस्वभावावतरणमस्ति तथापि तेषु द्वैतरूपता वर्त्तत इति नावतारत्वं, लीला विदधतः स्वैरमिति प्रश्ने विशेषकथनाद्वा नहि तेषु स्वेच्छास्ति। भूतलीला द्विविधा, साक्षात्परंपराभेदेन भौतिकलीलापि द्विविधा ब्रह्मांडं निर्मायानिर्माय च। निर्माणपक्षेपि यथा दशरथपुत्रेषु कश्चिदवतारः कश्चिन्न, तथा विश्वसृजां गर्भो विराट् कदाचित् ब्रह्मशरीरं कदाचिज्जीवशरीरम्। तत्र ब्रह्मशरीरपक्षे तत्रत्यानां मुक्तिः सुलभा। अतः प्रथमं पुरुषावतारत्वमाह पंचभिः। अत्र तादृशाधिकारिजीवस्याभावात् स्वयमेव पुरुषो जातः। विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यानीत्यपि। एतादृशविषयं पुरुषशब्दस्त्रेधा व्युत्पद्यते-पुरि वसतीति पुरमुषतीति पुरा आस्त इति च पुरास इति। आकारे व्यत्ययो बहुलमित्युकारः। अस्मिन् पक्षे न शरीरसंबंधः। प्रथमपक्षे न संप्रसारणषत्वे। उष दाह इति प्रथमे जीवोऽपि भवति द्वितीयतृतीययोस्तु भगवानेव भवति। तत्र द्वितीयमाह तत्प्रायःपिंडेग्निरिव अंडजत्वादंतरेव सर्वनिर्माणं सर्वस्यापि मुक्तिदानार्थमिति। अस्य ब्रह्मांडस्य पुरुषाकृतिरूपत्वं न पुरुषत्वं ममायतनमुत्तममिति वचनात् शुद्धसत्त्वात्मत्वं शरीरमिव पुरुषरूपं तत्त्वैर्निर्मितं स्वयं गृहीतवान् अधिकारिव्यावृत्त्यर्थं भगवानिति। अप्सु बीजब्रह्मांडवैलक्षण्यायाह महदादिभिरिति महदहंकारपंचतन्मात्राभिः सप्तभिः एकादशेंद्रियाणि पंच महाभूतानि च षोडशकलाः, एवंप्राकृतिको गणस्त्रयोविंशः। अस्यां सृष्टौ प्रकृतिपुरुषौ स्वयमेव, अतो न किंचिदवशिष्टमियं हि आद्या सृष्टिः। द्वितीयादिसृष्टावधिकारिपुरुषार्थं ब्रह्मांडदेहः परिगृहीतः ॥ १ ॥ ❀ ❀ ननु कानुपपत्तिः कीदृशस्य कर्तृत्वमित्यत आह यस्यांभसीति। नेदं दैनंदिनप्रलयशयनं किंतु वैष्णवतंत्रोक्तं चतुर्मूर्तिसृष्टिहेतुभूतनारायणशयनं, तदुक्तम् 'आसीदुदारगुणवारिधिरि'त्यादौ। स हि स्वोदरस्थान् जीवान् निर्मिमीते तत्रोदरात्सर्वथा बहिर्निर्गमने सायुज्यसृष्टिवदयुक्तं स्यात्। अतो ब्रह्मांडरूपं द्वितीयं कोशमुत्पाद्य तत्र सर्वान् सृजति। नन्वस्य शयनपरित्यागेन सृष्टिकरणे महान् क्लेश इत्याशंक्य शयानादेव सर्वं जातमित्याह अंभसि शयानस्येति। भगवान् शयान एव स्थितः अंभसीति शीतलकोमलत्वे शय्यायाः सूचिते। ननु शयनं नाम स्वरूपविस्मरणेन मायाया भगवतो वा समीपगमनं, तत् कथं भगवति संभवतीत्याशंक्याह योगनिद्रामिति। नहि भगवान् शेते वस्तुतः अस्ति च योगभूतनिद्रा काचिच्छक्तिः। सा हि जीवानां क्लेशनाशिनी स्वसमीपं चानयति गुह्यं च प्रकटीकरोति। तामल्पभूतां स्वरूपे प्रसार्य महतीं कार्यक्षमां च सृष्ट्युपयोगाय करोतीत्यर्थः। तदर्थं प्रयतमानैरेव सृष्टिः क्रियत इति भावः। तथा भगवत्यपि जातमित्याह नाभिह्रदांबुजादिति। उदरस्थजगज्ज्ञापनाय नाभिपदं पंकजाशोषाय ह्रदः, अंबुजं च त्रैलोक्यात्मकं तेन भगवतो माहात्म्यमपि सूचितं प्रथमकार्यत्वात् ब्रह्मशब्दवाच्य एव कर्तृत्वेन स्वातंत्र्यख्यापनाय परं पुल्लिंगनिर्देशः। ततो मरीच्यादयोपि जाताः। तेषामयमाज्ञापकश्च जात इत्याह विश्वसृजां पतिरिति। पतिशब्देन अनुल्लंघ्या तस्याज्ञेति सूचितम्। अनेन हि शयनादेव सर्वलोका उत्पन्ना इत्युक्तम् ॥ २ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ तृतीयाध्यायं विवरिषवः सङ्गतिं वदन्तः कृष्णावतारप्रयोजनस्यानुक्तत्वं ज्ञापयितुं पूर्वोक्तमनुवदन्ति निरूपिता इत्यादि । निर्णय उच्यत इति शेषः । अवतारेति । अवतारा रामादयः अर्थाः, सर्वसामर्थ्यो भगवान धर्मी पुरुषस्तेषामित्यर्थः । तेनावसरः सङ्गतिरित्यर्थः । अनुक्तत्वे श्रोतृजिज्ञासापूर्तिः कथमित्याकाङ्क्षायामाहुः कृष्णेत्यादिसार्धम् साधारणमिति । सामान्यमुत्तर-'मसा' विति श्लोके । निर्णय इति । देवतिर्यङ्नरादिषु अवतारनिर्णयोऽधिकः विशेष इति पूर्वश्लोके इत्यर्थः । तेनेति । निर्णयेन । षष्ठस्योत्तरमत्राध्याये कथ्यत इत्यत आहुः वस्तुत इति । जगृहे इत्यत्र । अवतारकथोत्तरस्य पुरुषमारभ्यैव कथने बीजमाहुः यद्यपीति । 'अव्यक्तोऽक्षर इत्युक्त' इति गीतावाक्ये परमधामत्वकथनादक्षरं व्यापिवैकुण्ठात्मकं तस्याधिभौतिकमाध्यात्मिकं वा प्रकृतिपुरुषजनकं तदंशाः कालकर्मस्वभावाः कार्याणि तत्त्वानि तेषु 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' 'कालरूपोवतीर्ण' इत्यादिवाक्यैरवतरणमस्ति, तथापि द्विरूपता योनित्वाधिकारित्वादिरूपता वर्तत इति तथेत्यर्थः । द्वैतरूपतेत्यपि पाठेऽयमेवार्थः । ननु मनुष्यत्वादिना द्विरूपताग्रे वक्ष्यमाणेषु कुमाराद्यवतारेषु वर्तते इति द्विरूपता नाक्षरादित्यागबीजत्वेन शक्यवचनेत्यरुच्या पक्षान्तरमाहुः लीला इत्यादि । केचिदत्र विराड्जीवान्तर्यामिणो भगवतो विराड्रूपेणोपासनार्थं ब्रह्माण्डस्य भगवच्छरीरत्वं कल्पनयोच्यत इत्याहुः, तथा सति 'जगृह' इति भूतप्रयोगो विरुध्येत इति, तदभावाय विराजो वस्तुतो भगवच्छरीरं वक्तुं पीठिकामाहुः भूतेत्यादि । अत्र साक्षाल्लीला 'एतस्माज्जायते प्राण' इत्यादिश्रुत्युक्ता । द्वितीया तु 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्याद्युक्ता । ब्रह्माण्डं विराड्रूपम् । निर्माणपक्षः पुरुषसूक्ते । अनिर्माणस्तूक्तश्रुतिषु ज्ञेयः । ननु पुंसूक्ते ब्रह्माण्डस्य जीवशरीरताप्युच्यते, तस्य का गतिरित्यत आहुः निर्माणपक्ष इत्यादि । कश्चिन्नेति । भारते सभापर्वणि यमसभायां दाशरथे रामस्य कथनात्कस्मिंश्चित्कल्पे रामावतारो नेत्यर्थः । मुक्तिः सुलभेति । भगवत्त्वेन ज्ञानादि दत्वापि मोचयतीति सुलभा । जीवत्वे तु 'युक्तं भगैः स्वैरितरत्र चाध्रुवे' रिति ध्रुवत्वाभावादेकांशस्थितविश्वो ददातीत्येतदपेक्षया सा मुक्तिर्न सुलभा । किञ्च तत्तद्वर्षस्थानां श्रीकृष्णावतारातिरिक्तोपासकानां जीवोपासकतया न मुक्तिः सुलभा । 'एतन्नानावताराणां निधानं बीजमव्यय' मिति श्रीकृष्णावतारातिरिक्तावताराणां पुरुषावतार-निधानत्वात् । ब्रह्मत्वे तु ब्रह्मनिधानत्वादवताराणामिति तदुपासकानां मुक्तिः सुलभेत्यर्थः । अस्त्वेवं द्वैविध्यम्, तथाप्यत्र ब्रह्म-शरीरत्वं कुत इत्यपेक्षायामाहुः अत्रेत्यादि । प्रमाणमत्राहुः विष्णोरित्यादि । इदं वाक्यं श्रीधरीये, 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते' इति । रूपत्रित्वे बीजमाहुः पुरुषशब्द इत्यादि । एतास्तिस्रोपि व्युत्पत्तयः श्रौत्यः । 'पुरा आसे' ति 'पुरमुषती' ति द्वयं बृहदारण्यके पुरुषविधब्राह्मणे 'स यत्पूर्वोस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मादुच्यते पुरुष इति' । तृतीयापि तत्रैव मधुब्राह्मणे 'पुरः पुरुष आविशत्' इति । अस्मिन् पक्ष इति । तृतीयपक्षे देहाध्यासो नेत्यर्थः । पुरा विद्यमानत्वेन शरीरोत्पत्तेः पूर्वमेव तत्सत्ताज्ञापनात् । मधुब्राह्मणश्रुतेः, अध्यासस्तु परमाणूनां रेतःकणाश्रयजीवेन मिलने रजस्वला……वकरणे भवति, प्रकृते तु तदभावः । 'उष दाह इती' ति पक्षे त्वमिति शेषः जीवोपीति । पुरि वसनसम्भवाज्जीवोपि भवतीत्यर्थः । भगवानेवेति । पुरदाहपुरासनयोर्जीवे अभावादिति भावः । द्वितीय एवात्रोच्यत इत्यत्र गमकमाहुः अण्डजत्वादित्यादि । प्रकरणानुरोधेन मुक्त्यर्थमेवावतारकथाप्रश्नस्यापि सिद्धेस्तदर्थकस्यैवोत्तरस्य वाच्यत्वादन्तर्निर्माणस्य खगादिष्वन्तरेव दृष्टत्वात् । अतोऽत्र द्वितीय एवोच्यत इत्यर्थः । नन्वेवं सति तृतीयपक्ष एवाङ्गीकार्य इत्यत आहुः अस्येत्यादि । मूले 'पौरुषं रूप' मित्यनेन पुरुषसम्बन्धित्वमुच्यते । तेन पुरुषविधमभिप्रेतम् । तदेवैकादशेपि 'तन्माया-फलरूपेणे' त्यादिना भगवता निरूपितमतस्तथेत्यर्थः । यदि तृतीयपक्षः स्यात्, अन्तर्यामीव प्रविशेत्, प्रकृते तु सर्वनिर्माणं भोगश्चेति द्वितीयपक्ष एवेति भावः । अधिकारीति । अधिकारी जीवो नास्तीति बोधनार्थम् । व्याख्याने तु वाक्यार्थ उक्त इत्यपौनरुक्त्यम् । अप्स्विति । तृतीयस्कन्धे षष्ठे 'हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् । आण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः ॥ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् । विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥ एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः । आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यत' इत्यत्रोक्ताप्सु बीजजब्रह्माण्डम् । एवं त्रयोविंशे सिद्धे सत्त्वादिगुणानां पुरुषस्य च ब्रह्माण्डे न्यूनतां परिहरन्ति अस्यां सृष्टाविति । स्वयमिति 'आसीज्ज्ञानमयो ह्यर्थ' इत्यादिवाक्येभ्यः । न किञ्चिदिति । प्रकृतेरंशत्रयं पुरुषः स्वयं चेत्यष्टाविंशतितत्त्वेषु न किञ्चिदवशिष्टमित्यर्थः । अवशिष्टानामत्रैवान्तर्भावे वा । अधिकारीति । ब्रह्मादीनामित्यर्थः ॥ १ ॥ ❀ ❀ यस्याम्भसीत्यत्र । ननु केति । देहपरिग्रहं विना केत्यर्थः । दैनंदिनेति । ब्रह्मकल्पान्ते नैमित्तिकप्रलय इत्यर्थः । सायुज्यसृष्टिवदिति । सायुज्योत्तरं पुनस्तेषां सृष्टिवदित्यर्थः । योगभूतत्वं तस्याः स्फुटीकुर्वन्ति गुह्यं चेत्यादि । यथा योगो गुप्तं जीवं प्रकटीकरोति, तथेयं सुषुप्तौ प्राज्ञसम्बन्ध्यानन्दं प्रकटीकरोतीति इत्यर्थः । तदर्थमिति । आनन्दार्थं योगार्थं वेत्यर्थः ॥ २ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तृतीये भगवल्लीलावर्णनेन समासतः । श्रोतुः प्रेम तथा वक्तुर्गुह्यज्ञानं निरूप्यते ॥

एवं सामान्यतो भगवदवतारप्रयोजनमुक्त्वा यदुक्तं 'अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः' इति तदुत्तरत्वेनावतारान् तच्चरितानि चानुक्रमिष्यन् प्रथमं पुरुषावतारमाह—जगृहे इति । महदादिभिः महदहङ्कारपञ्चतन्मात्रैः सप्तभिः सम्भूतं रचितं

ब्रह्माण्डात्मकं एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश कलाः अंशा यस्मिंस्तत् षोडशकलं पौरुषं रूपं सृष्ट्यादौ लोकानां प्राणिनां तद्योग्यपदार्थानां च सिसृक्षया स्रष्टुमिच्छया भगवान् जगृहे गृहीतवानित्यन्वयः। भगवतः पुरुषाख्यानि त्रीणि रूपाणि। तथा चोक्तं विष्णुस्वामिना—'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते' इति। तदत्र विराडन्तर्यामी 'पातालमेतस्य हि पादमूलम्' इत्यादिना वक्ष्यमाणः उपास्यतया ग्राह्यः॥ १॥ ❀ ❀ कोऽसौ भगवान् य एवं रूपं गृहीतवानित्यपेक्षायामाह—यस्येति। यस्याम्भसि एकार्णवोदकशयानस्य नाभिरेव ह्रदस्तस्मिन् यदम्बुजं तस्मात्सकाशात् ब्रह्मा आसीत् अभूत् पाद्मे कल्पे। स भगवान् पौरुषं रूपं जगृहे इत्यन्वयः। ननु शयानस्येत्युक्त्या तस्यापि किं तमोरूपा निद्राऽस्तीत्याशङ्क्याह—योगेति। योगः समाधिस्तद्रूपां निद्रां विस्तारयत इत्यर्थः। भगवतो माहात्म्यातिशयं सूचयंस्तदुत्पन्नस्य ब्रह्मणो माहात्म्यमाह—विश्वेति। विश्वसृजां दक्षमरीच्यादीनां पतिरधिष्ठातेत्यर्थः॥ २॥

हिन्दी अनुवाद

श्रीसूतजी कहते हैं—सृष्टिके आदिमें भगवान्ने लोकोंके निर्माणकी इच्छा की। इच्छा होते ही उन्होंने महत्तत्त्व आदिसे निष्पन्न पुरुषरूप ग्रहण किया। उसमें दस इन्द्रियाँ, एक मन और पाँच भूत ये सोलह कलाएँ थीं॥ १॥ ❀ ❀ उन्होंने कारण जलमें शयन करते हुए जब योगनिद्राका विस्तार किया, तब उनके नाभि सरोवरमेंसे एक कमल प्रकट हुआ और उस कमलसे प्रजापतियोंके अधिपति ब्रह्माजी उत्पन्न हुए॥ २॥

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम्॥ ३॥

पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्।
सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत्॥ ४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कीदृशं रूपं तदाह। यस्येति। ननु कीदृशो विग्रहस्तस्य योऽम्भसि शेते स तदाह। तत्तस्य भगवतो रूपं तु विशुद्धं रजआद्यसंभिन्नमत एवोर्जितं निरतिशयं सत्त्वम्॥ ३॥ ❀ ❀ एतच्च योगिनां प्रत्यक्षमित्याह। पश्यंतीति। अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुस्तेन। सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतम्। सहस्रं मूर्धादयो यस्मिन् तत्। सहस्रं यानि मौल्यादीनि तैरुल्लसच्छोभमानम्॥ ४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ तस्य पुरुषस्य सामान्यत एकत्वेन स्वरूपमाह तदिति। तत् श्रीभवतः पौरुषं रूपं, वै प्रसिद्धौ। विशुद्धोर्जित-सत्त्वादिभिर्व्यक्तत्वाच्छक्तिस्वरूपयोरभेदाच्च तद्रूपमेवेत्यर्थः। उक्तं च द्वितीयं पुरुषव्यूहमधिकृत्य स्वरूपत्वं तद्रूपस्य "नातः परं परम यद्भवतः स्वरूपम्" इत्यत्र विशुद्धं जात्यंशेनापि रहितम्। स्वरूपशक्तिवृत्तित्वात्। ऊर्जितं सर्वतो बलवत्। परमानन्द-रूपत्वात्। "को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः। तस्मात्साक्षाद्भगवद्रूपे तु कैमुत्यमेवा-यातमिति॥ ३॥ ❀ ❀ तदेव पुरुषस्य द्विधा स्थानकर्मणी उक्तं स्वरूपवदाकारं त्वेकप्रकारमाह पश्यन्तीति। अदः पौरुषं रूपमदभ्रचक्षुषा भक्त्याख्येन "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।" इत्युक्तेः। "भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति" इत्यादिश्रुतेश्च। प्रथमपुरुषस्य सहस्रपादादित्वं परमात्मसंदर्भे व्यंजितम्। तृतीयस्याष्टमं तु द्वितीयं पुरुषव्यूहमुपलक्ष्य "वेणुभुजां-घ्रिपांघ्रेः" इति "दोर्दण्डसहस्रशाखम्" इति "किरीटसाहस्रहिरण्यशृङ्गम्" इति च। तथा नवमस्य चतुर्दशे "सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात्। जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः" इति॥ ४॥

श्रीमद्वीरराघवव्याख्या

पश्यंतीति अत एतदनिरुद्धाख्यं रूपमदभ्रचक्षुषाऽनल्पज्ञानेन मनसा पश्यंति "मनसा तु विशुद्धेन, दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरि'त्याद्युक्तरीत्या योगपरिशुद्धमनसा पश्यंतीत्यर्थः। प्रत्येकं सहस्रसंख्याकैः पादादिभिरद्भुतं तथा प्रत्येकं सहस्रं मूर्द्धादयो यस्मिंस्तत् तत्र श्रवणे श्रोत्रे सहस्रेण मौलिभिः किरीटैरंबरैर्वस्त्रैश्च कुंडलैश्चोपशोभमानं रूपं भवतीति॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स एव पुनर्ब्रह्मांडे नाभ्या आसीदंतरिक्षमित्यादिना अंतरिक्षादिलोककल्पकावयववान् पुरुषाख्योवततारेत्यभिप्रेत्याह यस्येति। पातालमित्यादिलोकविस्तरः चतुर्दशभुवनविस्तरः यस्य पुरुषानाम्नः अवतीर्णस्यावयवसंस्थानैश्चरणाद्यवयवविन्यासैः कल्पितः तदुत्पन्नत्वेन तदाधारत्वेन विद्भिर्निरूपितः न तु तदात्मत्वेन सच्चिदानंदरसब्रह्मचैतन्यमविद्यादर्पणे प्रतिबिंबितं स जीव

इत्यभिधीयते तदेव ब्रह्म वशीकृतमायमीश्वर इति तत्र सच्चिदानंदब्रह्मलक्षणपुरुषो भगवानीश्वरः पौरुषं रूपं जगृहे पौरुषं विराड्रूपं स्वमायया कल्पितं महदहंकारादिभिः संभूतमुत्पन्नमत एव पंचभूतादिषोडशकलोपेतं किमर्थं अनेन लोकसिसृक्षया। कोसौ भगवानित्यपेक्षायामाह यस्येति। स्वमायापरिणतभूतसूक्ष्मेषु शयानस्य तत्तद्रूपेण व्याप्तस्य योगनिद्रां जगत्कारणमायाशक्तिं वितन्वतो विस्तारयतः सृष्टौ प्रेरयतो यस्य नाभिह्रदांबुजात् पंचीकृतभूतनिष्पन्नलोकपद्मात् ब्रह्माऽऽसीद्यस्य ब्रह्मोत्पादकजगत्पद्मस्यावयवविन्यासैः पद्मदलायमानैर्लोकविस्तारः कल्पितः। न वस्तुतः सत्यः। तद्भगवतस्त्रैलोक्यात्मकं प्रथमं रूपमिति केचित्तद् दूषयति तदिति। भगवतस्तद्रूपं पुरुषादिरूपत्रयं विशुद्धं निर्दोषम् ऊर्जितम् उद्रिक्तं सत्त्वं संपूर्णबलज्ञानादिसर्वगुणसमूहं वा-इति पदेन परकृताप-व्याख्यानस्य प्रमाणविरोधं च दर्शयति "निरनिष्टो निरवद्य" इति श्रुतेर्नित्यनिरस्ताविद्याविलासस्य ब्रह्मणो विद्यादर्पणे प्रतिबिंबीभूय जीवत्वं न घटते। नहि नित्यनिर्मुक्तशिरोवेदनो लीलया कदाचित्तद्वान् स्यामिति कामयते, पंचीकरणमपि स्वकल्पनामंतरेण न प्रमाणपदवीमध्यास्ते। अत उपेक्षणीयमेतन्मतम्॥ ३॥ ❀ ❀ इतोपि तन्मतमयुक्तमित्याह पश्यंतीति। अदभ्रचक्षुषः पूर्णज्ञानाः ब्रह्मादयः अदो रूपत्रयं पश्यंति कीदृशं सहस्रशब्दोऽनंतत्ववाची प्रत्येकमभिसंबध्यते सहस्रं पादा ऊरवश्च भुजाश्च आननानि च सहस्रपादोरुभुजाननानि तैरद्भुतं सहस्रं मूर्धश्रवणाक्षिनासिका यस्मिन् तत्तथोक्तं सहस्रमौल्यंबरकुंडलैरुल्लसच्छोभमानं निरस्ताऽविद्यैरुत्तमाधिकारिभिर्ब्रह्मादिभिरपरोक्षतया दृष्टत्वान्नैतद्रूपत्रयं मायाकल्पितमिति भावः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

व्यक्तत्वं प्राकट्यं प्रद्युम्नादिति शेषः। सूतेन त्वभेदविवक्षया प्रद्युम्नः पृथङ्नोक्तः। विष्णोस्तु त्रीणि रूपाणीतिवत्। सेयं प्रक्रिया द्वितीयस्कन्धस्य षष्ठे दृश्यते, यथा 'स एष आद्यः पुरुष' इत्यादि-पद्ये टीका। स एष आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादिकं करोतीत्येषा। एवमाद्योऽवतारः पुरुषः परस्यैतस्य च टीका। परस्य भूम्नः। पुरुषः प्रकृतिप्रवर्त्तकः। यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः स आद्योऽवतार इत्येषा। तथा तृतीयस्य विंशे दैवेनेत्यादिकं सोऽन्वित्यन्तं सटीकमेव प्रकरण-मत्रानुसन्धेयम्। तस्माद्विराट्त्वेन तद्रूपं न व्याख्यातं, तस्माच्च वासुदेवस्थानीयो भगवान् पुरुषादन्य एवेत्यायातम्। अथ तस्य रूपद्वयस्य सामान्यत एकत्वेन स्वरूपमाह तदिति। तत् श्रीभगवतः पौरुषं रूपम्। वै प्रसिद्धौ। विशुद्धोर्जितसत्त्वादिभिर्व्यक्तत्वात् शक्तिस्वरूपयोरभेदाच्च तद्रूपमेवेत्यर्थः। उक्तञ्च द्वितीयं पुरुषव्यूहमधिकृत्य स्वरूपत्वं तद्रूपस्य। नातः परं परमयंदुवतः स्वरूप-मित्यत्र। विशुद्धं जाड्यांशेनापि रहितं स्वरूपशक्तिवृत्तित्वात् ऊर्जितं सर्व्वतो बलवत् परमानन्दरूपत्वात्। 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यादि'ति श्रुतेः। तस्मात् साक्षाद्भगवद्रूपे तु कैमुत्यमेवायातम्॥ ३॥ ❀ ❀ तदेवं पुरुषस्य द्विधा स्थानकर्म्मणी उक्त्वा स्वरूपवदाकारस्यैकप्रकारमाह पश्यन्तीति। अदः पौरुषं रूपम्। अदभ्रचक्षुषा भक्त्याख्येन। 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेत्यु'क्तेः। "भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयती" त्यादिश्रुतेश्च। तत्र प्रथमपुरुषस्य सहस्रपादादित्वं परमात्मसन्दर्भे व्यञ्जितम्। तृतीयस्य चतुर्थे तु द्वितीयं पुरुषव्यूहमुपलक्ष्य वेणुभुजाङ्घ्रिपाङ्घ्रेरिति दोर्दण्ड-सहस्रशाखमिति किरीटसाहस्रहिरण्यशृङ्गमिति च तथा नवमस्य चतुर्दशे 'सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात्। जातस्या-सीत् सुतो धातुरत्रिः पितृसमो गुणैरि'ति॥ ४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तन्मूर्त्तीनामप्राकृतत्वमाह। विशुद्धं रजआद्यमिश्रम् अत एवोर्जितं श्रेष्ठम् अप्राकृतं सच्चिदानन्दघनमित्यर्थः॥ १३॥ ❀ ❀ एतच्च भक्त्या सिद्धानां प्रत्यक्षमित्याह पश्यन्तीति। अदभ्रमनल्पम् अप्राकृतं यच्चक्षुस्तेन॥ ४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्य स्थूलशरीरावयवसंस्थानैः लोकविस्तरः कल्पितः यद्विशुद्धमप्राकृतं तत्तु भगवतो मुख्यं रूपम्॥ ३॥ ❀ ❀ अदभ्रचक्षुषा अनल्पज्ञानेन सहस्रेण प्रत्येकमनंतैः पादादिभिरद्भुतम्, सहस्रं प्रत्येकं मूर्द्धादयो यस्मिन् तत् प्रत्येकं सहस्रेण मौल्यादिभिरुल्लसत् शोभमानम्॥ ४-५॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

तेषां स्थानं वक्तुं लोकशब्दस्य भुवनवाचित्वात् तेषां जडत्वेन स्वतो जननाभावात् निद्रितस्य तज्जननमित्याशंक्य पुरुषशरीरस्थूलावयवा एव तथाविधा जाता इत्याह यस्यावयवसंस्थानैरिति। स च युक्त्या मध्ये भावे तिष्ठतीति ज्ञायते। वस्तुतस्तु जीवात्मकः सर्वकार्येषु निर्विष्ट इति अयमूर्ध्वगोलो देहः, यैर्यैर्यथा यथा स्थितैर्येये लोकास्तानग्रे वक्ष्यति 'पातालमेतस्य हि पादमूल-मि'त्यादिभिः। शरीरे लोकनिर्माणे लोकानामनित्यत्वमाशंक्य निराकरोति विस्तर इति। एवं भुवनजननिर्माणेनावतारप्रयोजनमुक्त्वा ब्रह्मांडांतरवत् इदमपि केवलं जडमित्याशंक्य पूर्वोक्तमवताररूपमुपसंहारार्थमनुवदति तद्वै भगवत इति। तत् पूर्वोक्तं ब्रह्मांडरूपमुक्तो-

पपत्तिवैशब्देनोच्यते तद्भगवत एव रूपं नान्यत्किंचिदित्यर्थः। ननु भगवतः प्राकृतं रूपमेव नास्ति, शुद्धसत्त्वात्मकमेव भवति, तत्कथं ब्रह्मांडस्य देहत्वमत आह विशुद्धं सत्त्वमिति। शुद्धसत्त्वात्मकमेवेदं शरीरमित्यर्थः। ऊर्जितमिति न शांतं किंतु सर्वकार्यकरणोन्मुखमित्यर्थः। हर्षेणोत्फुल्लता ऊर्जः तद्रजोगुणव्यतिरेकेणापि भगवदावेशेन भवति ॥ ३ ॥ ❀ ❀ ननु ब्रह्मांडस्य परिग्रहः करणत्वेनापि संभवति तत्कथमेकांततो देहत्वमित्याह पश्यंतीति। योगिनां योगजधर्मसाक्षात्कार एव भगवदवतारत्वे प्रमाणं प्राकृतचक्षुषा भगवतः प्रतिकृतिरूपत्वेन वेदप्रतिपाद्यस्य संबंधे शरीरमपि विश्वतश्चक्षुरिति श्रुतिप्रतिपादितरूपवद् ध्येयं जातमित्याह सहस्रपादोरुभुजाननाद्भुतमिति। सहस्रमित्यपरिमितं नाम 'अनेकवक्त्रनयनमि'ति गीताप्रतिपादितरूपवत् सहस्रपादोरुभुजाननैः अत्यद्भुतम्, अत्र क्रियाशक्तिप्रधानानि चत्वार्यंगानि निरूपितानि, गतिश्च सृष्टिजननं गतिश्च परिभाषणमिति ज्ञानप्रधानान्याह सहस्रमूर्द्धश्रवणादिनासिकमिति सहस्रं मूर्द्धसु श्रवणे अक्षिणी नासिके च यस्य त्रीण्येव द्विदैवत्यानि ज्ञानांगानि प्रसिद्धानि न बहिरासनेन्द्रियं त्वांतरमेव आननपदेनैव संगृहीतम्। त्वचो न नानात्वपरिकरमाह 'सहस्रमौल्यंबरकुण्डलोल्लसदि'ति। सहस्रं मौलयः मुकुटानि अंबराणि कुंडलानि च तैरुल्लसदतिशोभायुक्तमित्यर्थः। परिकराणामवरोहप्रकारेण प्रतीतत्वाद्यथाक्रमं निर्देशः ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यस्यावयवेत्यत्र। स चेति। विराड्देहः मध्यभाव इति। वृक्षभावे जरायुभावे वेति प्रतिभाति। बीजं पूर्वभावः, वृक्षो मध्यभावः, फलमुत्तरभावः। बीजं पूर्वभावः, जरायुर्मध्यभावः, देह उत्तरभाव इति जरायुभावे जरायोरन्तरव्याप्तावत्रापि तथात्वसिद्धया 'अवयवसंस्थानैः कल्पित' इति विरुद्धं स्यात्, अत आहुः वस्तुतस्त्विति। उक्तोपपत्तिरिति। बीजत्वरूपेत्यर्थः, तथा च भगवतो रूपं तत्, भगवतो बीजत्वादिति भावः। रजोनुवेधाभावेपि कार्योन्मुखत्वे हेतुं व्याकुर्वन्ति हर्षेणेत्यादि ॥ ३ ॥ ❀ ❀ पश्यन्तीत्यत्र। करणत्वेनेति। लोकरचनायां करणत्वेन, यतो लोकरचना ब्रह्माण्डेन जायत इति। अतो न पुरुषो नावतार इत्यर्थः। रूपमिति। करादिविशिष्टं रूपं व्यवहारयोग्यम्, साकारता चानन्दयोगात्। तथा च सदानन्दमित्यर्थः। सृष्टिजननमिति। गुह्यादिस्थानानां गुरुपदेनैव ग्रहणात् अत्र सृष्टिजननमुक्तम्। न नानात्वमिति। श्रोत्रातिरिक्तेन्द्रियाण्यपेक्ष्यापि न नानात्वम्, किन्त्वेकत्वमेव, सर्वत्र स्पर्शोपलब्धेरित्यर्थः। पादपदेन भुजपदेन वोपलक्षितं न नानात्वमिति। तथा चासङ्ग्रहेप्यर्थादेव त्वगिन्द्रियमपि सिद्धमित्यर्थः। एवमेव शिष्टं कर्मेन्द्रियं बोध्यम् ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यद्रूपं भगवान् गृहीतवांस्तत्कीदृशमित्यपेक्षायामाह यस्येति। योऽम्भसि शेते तस्य रूपं कीदृशमित्यपेक्षायामाह—तदिति। भगवतस्तद्रूपं तु विशुद्धं रजस्तमोभ्याममिश्रम्, अत एवोर्जितं निरतिशयं सत्त्वात्मकमित्यर्थः ॥ ३ ॥ ❀ ❀ ननु पुरुषावतारे किं प्रमाणं कीदृशो वा तस्य विग्रह इत्यपेक्षायां योगिजनप्रत्यक्षमेव तत्र प्रमाणमित्याह—पश्यन्तीति। अदभ्रमनल्पं योगजधर्मेण सिद्धं दिव्यं यच्चक्षुस्तेन अदः पुरुषरूपं पश्यन्तीत्यन्वयः। तद्विशिनष्टि–सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतम्, सहस्रं मूर्द्धादयो यस्मिंस्तत्, सहस्रं यानि मौल्यादीनि तैरुल्लसत् शोभमानम् ॥ ४ ॥

हिन्दी अनुवाद

भगवान्के उस विराट रूपके अङ्ग-प्रत्यङ्गमें ही समस्त लोकोंकी कल्पना की गयी है, वह भगवान्का विशुद्ध सत्त्वमय श्रेष्ठ रूप है ॥ ३ ॥ ❀ ❀ योगीलोग दिव्यदृष्टिसे भगवान्के उस रूपका दर्शन करते हैं। भगवान्का वह रूप हजारों पैर, जाँघें, भुजाएँ और मुखोंके कारण अत्यन्त विलक्षण है, उसमें सहस्रों सिर, हजारों कान, हजारों आँखें और हजारों नासिकाएँ हैं। हजारों मुकुट, वस्त्र और कुण्डल आदि आभूषणोंसे वह उल्लसित रहता है ॥ ४ ॥

एतन्नानावताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ ५ ॥
स एव प्रथमं देवः कौमारं सर्गमास्थितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥ ६ ॥
द्वितीयं तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥ ७ ॥
तृतीयमृषिसर्गं च देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतत्तु कूटस्थं न त्वन्यावतारवदाविर्भावतिरोभाववदित्याह एतदिति। एतदादिनारायणरूपम्। निधीयतेऽस्मिन्निति निधानम्। कार्यावसाने प्रवेशस्थानमित्यर्थः। बीजमुद्गमस्थानम्। बीजत्वेऽपि नान्यबीजतुल्यं किं त्वव्ययम्। न केवलमवता-

राणामेव बीजं किंतु सर्वप्राणिनामपीत्याह। यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥ ५ ॥ ❀ ❀ सनत्कुमाराद्यवतारं तच्चरित्रं चाह। स एवेति। कौमार आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि। यः पौरुषं रूपं जगृहे स एव देवः कौमाराख्यं सर्गमास्थितः सन्ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार। प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया ॥ ६ ॥ ❀ ❀ वराहावतारमाह। द्वितीयमिति। अस्य विश्वस्य भावायोद्भवाय। महीमुद्धरिष्यन्निति कर्मोक्तिः। एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयम् ॥ ७ ॥ ❀ ❀ नारदावतारमाह तृतीयमिति। ऋषिसर्गमुपेत्य तत्र च देवर्षित्वमुपेत्येत्यर्थः। सात्वतं वैष्णवं तंत्रं पंचरात्रागममाचष्टोक्तवान्। यतस्तंत्रान्निर्गतं कर्मत्वं बंधहेतुत्वं येभ्यस्तानि निष्कर्माणि तेषां भावो नैष्कर्म्यम्। कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

कूटस्थं लयविक्षेपशून्यम्। इत्यर्थ इति। अंशीभूतमिति भावः ॥ ५ ॥ ❀ ❀ अथ प्राचुर्येण तदवतारान्कथयंस्तदैक्यविवक्षया तदंशांशिनामप्याविर्भावमात्रं गणयति विंशत्या। तत्र स एवेति योऽम्भसि शयानो यश्च सहस्रपादादिरूपः स एव पुरुषाख्यो देवः। "एते चांशकलाः सर्वे कृष्णस्तु भगवान्स्वयम्" इत्युपसंहारस्यापि संवादात्। "ब्रह्मा विप्रो विधाता च" इत्यभिधानात्। निर्देशः कथनं तन्मात्रापेक्षया "निर्देशः शासनेऽपि स्यात्कथनोपान्तयोः" इति मेदिनी ॥ ६ ॥ ❀ ❀ सूकरस्येदं सौकरम् ॥ ७ ॥ ❀ ❀ तत्र च ऋषिसर्गेपि इत्यर्थ इति। देवत्वे सति ऋषित्वं ब्रह्मपुत्रर्षित्वमिति भावः। "ये जाता ब्रह्मणो देहात्ते देवर्षय ईरिताः। सृष्ट्यादौ कर्दमाद्या वै देवता अपि ते स्मृताः" इत्युक्तेः। निष्कर्मशब्दे कर्मशब्दो भावप्रधानो ज्ञेयोऽत उक्तं निर्गतं कर्मत्वम्। इत्यर्थ इति। "एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः। त एवात्मविनाशाय कल्पन्ते कल्पिताः परे" इत्युक्तन्यायेन बन्धकानामपि मोचकत्वमिति भावः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

एतदनिरुद्धाख्यं रूपं नानाविधानामवताराणां निदानं मूलकारणं बीजं कृत्स्नजगद्बीजभूतं कृत्स्नजगत्स्रष्टृचतुर्मुखोत्पत्तिस्थानत्वादिति भावः। अव्ययमपक्षयविकाररहितमनेनाप्राकृतत्वमुक्तं यस्येति, यस्य भगवतोऽनिरुद्धस्यांशांशेन शरीरभूतचिदचित्तत्त्वैकदेशेन देवादयः सृज्यंते ॥ ५ ॥ ❀ ❀ स देवः परमपुरुष एव ब्रह्मा चतुर्मुखशरीरकः सन्प्रथमं कौमारं सर्गं सनत्कुमारादिसर्गमास्थितः सनकादिरूपेणावतीर्ण इत्यर्थः, अखंडितं निर्विघ्नं ब्रह्मचर्यमूर्ध्वरेतस्कत्वोपेतं भगवदुपासनं चकार। ते च कुमाराः प्रथमावताररूपाः प्रथममिति विशेषणाद् द्वितीयमित्यनंतरोक्तेश्च इमे च कुमारा अनुप्रवेशावताररूपाः। तथा चतुर्मुखोपि ब्रह्मरूपधरः "ब्रह्मा नारायणात्मक" इत्यादिभिः सृष्ट्यादिकाले तदात्मकतया योगिभिश्चिंत्यत्ववचनात् भगवता शौनकेन च "आब्रह्मस्तंबपर्यंता जगदंतर्व्यवस्थिताः। प्राणिनः कर्मजनितसंसारवशवर्त्तिनः॥ यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः। अविद्यांतर्गताः सर्वे ते हि संसारगोचराः॥ पश्चादुद्भूतबोधास्ते ध्यानेनैवोपकारकाः। नैसर्गिको न वै बोधस्तेषामप्यन्यतो यत" इति चतुर्मुखसनकादीनां जगदंतर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयत्वानर्हतामुक्त्वा बद्धानामेव सतां पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां च स्वतः शुद्धिविरहेण मुमुक्षूपास्यत्वनिषेधात् "सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते" इति श्रीजन्मरहस्यवचनैकार्थ्याच्च। तदेवं चतुर्मुखसनकादयः भगवदनुप्रवेशावतारः प्रथमश्चेत्युक्तं भवति। ब्रह्मचर्यं चचारेत्यवतारप्रयोजनमुक्तमेवमुत्तरत्रापि द्रष्टव्यम् ॥ ६ ॥ ❀ ❀ अथ वराहावतारमाह द्वितीयं त्विति। अस्य जगतः भवायाभ्युदयाय रसातलगतां महीं पृथ्वीमुद्धरिष्यन्यज्ञेशो भगवान् द्वितीयं सौकरं वाराहं वपुरादत्त जगृहे, वराहो द्वितीयावतार इत्यर्थः। अयं च स्वेन रूपेणावतारः। यज्ञेश इत्यनेन यज्ञाराध्यत्वतत्फलदत्वयोः कथनात्तच्छरीरकत्वायुक्तः वपुरुपादत्तेति वपुर्मात्रपरिग्रहोक्तेः अस्य भवायेति केवलसाधुपरित्राणार्थत्वसूचनाच्च ॥ ७ ॥ ❀ ❀ नारदावतारमाह तृतीयमिति। तृतीयं वपुरुपादानमृषिसर्गः ऋषिरूपजन्मेत्यर्थः तत्र तृतीयेवतारे स भगवान् देवर्षित्वं नारदरूपमापद्य नारदाख्यं जीवमनुप्रविश्येत्यर्थः सात्वतं तं पंचरात्रशास्त्रमाचष्टावोचत्प्रवर्त्तयामासेत्यर्थः। तंत्रं विशिनष्टि यतस्तंत्रात् कर्मणां निवृत्तिधर्मवतां नैष्कर्म्यं निवृत्तिधर्मविरहं प्रवृत्तिधर्माणामकर्त्तव्यतावगम्यत इति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

त्रयाणां रूपाणां मध्ये पद्मनाभाख्यं रूपमवतारकारणमित्याह एतदिति। यत्क्षीरार्णवशायि पद्मनाभाभिधं रूपं एतन्मत्स्यादिनानावताराणां बीजं व्यंजकं निधानम्। अंततोत्र सर्वावतारा निधीयंते एकीक्रियंत इति न व्येतीत्यव्ययं यस्य पद्मनाभस्यांशांशेन सामर्थ्यैकदेशेन देवादयः सृज्यंते स पद्मनाभ एव सर्वावतारहेतुरित्यर्थः ॥ ५ ॥ ❀ ❀ स एव पद्मनाभो देवः प्रथमं स्वस्मादेव कौमारं सनत्कुमाराभिधमवतारम् आस्थितः ब्रह्मा बृंहितः स्वतः पूर्णो विशिष्टजनशिक्षणायान्यैर्दुश्चरब्रह्मचर्यमखंडितमप्रतिहतं यथा भवति तथा चचारेत्यर्थः। सनत्कुमारोन्यः सनकादिषु पठितः ॥ ६ ॥ ❀ ❀ रसातलगतां महीमुद्धरिष्य-

न्तुद्धर्तुकामो यज्ञेशः श्रीनारायणोऽस्य जगतः भवाय तु स्थित्यर्थमेव सौकरं सूकरस्य वराहस्य विद्यमानं वपुरुपादत्तेत्यन्वयः ॥ ७ ॥ ❀ ❀ ऋषिषु सर्गोभिव्यक्तिर्यस्य स तथोक्तः ऋषीणां स्वभावो यस्य स तं तृतीयं महिदासाभिधावतारमुपेत्य देवर्षित्वं चोपेत्य स भगवांस्तत्रावतारे सात्वतं पंचरात्रं नाम ग्रंथविशेषमाचष्ट व्याचख्यौ नारदादेरिति शेषः । यतः सात्वततंत्रोक्तानुष्ठानात्कर्मणा नैष्कर्म्यं मोक्षसाधनत्वं स्यादित्यन्वयः 'सर्गः स्वभावनिर्मोकनिश्चयाध्यायसृष्टिषु'त्यभिधानं, श्रुत्यादिप्रसिद्धिद्योतकेन वैशब्देन देवर्षित्वं नारदत्वमुपेत्येत्यपव्यख्यानमपहस्तितमिति ज्ञातव्यम् । भो शौनकादयः तृतीयमृषिसर्गं वित्तेति वा तदवतारप्रयोजनमाह देवर्षित्वमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

तत्र श्रीभगवन्तं सुष्ठु स्पष्टीकर्तुं गर्भोदकस्थस्य द्वितीयस्य पुरुषव्यूहस्य नानावतारित्वं विवृणोति एतदिति । एतद्-ब्रह्माण्डस्थमित्यर्थः । निधानं सागराणां समुद्र इव सदैवाश्रयः अत एवाव्ययम् अनपक्षयं बीजम् उद्गमस्थानम् ॥ ५ ॥ ❀ ❀ अथ प्राचुर्येण तदवतारान् कथयन् तदैक्यविवक्षया तदंशांशिनामयविर्भावमात्रं गणयति विंशत्या । तत्र स एवेति । योऽम्भसि शयानो यश्च सहस्रपादादिरूपः स एव पुरुषाख्यो देवः । 'एते चांशकलाः पुंसः' इत्युपसंहारस्यापि संवादात् । कौमारं चतुःसन-रूपम् ॥ ६-७ ॥ ❀ ❀ तृतीयमिति । ऋषिसर्गमुपेत्य तत्रापि देवर्षित्वं श्रीनारदत्वमुपेत्य कर्म्मणां कर्म्माकारेणापि सतां श्रीभगवद्धर्माणां यतस्तन्त्रात् नैष्कर्म्यं कर्मबन्धमोचकत्वेन कर्म्मभ्यो निर्गतत्वं तेभ्योऽभिन्नत्वं प्रतीयत इति शेषः ॥ ८-९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षोडशकलत्वेन यत् पूर्णत्वमुक्तं तद्दर्शयति एतदिति । बीजत्वेऽपि नान्यबीजतुल्यं किन्तु निधानं निधिराशीभूतमित्यर्थः । वक्ष्यमाणा अवतारा एतस्यांशा इति भावः । न व्येतीत्यव्ययं नित्यं यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेनेति । देवादयो विभू-तय उक्ताः ॥ ५ ॥ ❀ ❀ सनत्कुमाराद्यवतारं तच्चरितं चाह स एवेति । यस्याशांशेन देवादयः सृज्यन्ते स एव पद्मनाभ इत्यर्थः । कौमारं सर्गमाश्रितः कुमारेषु प्रादुर्भावं प्राप्तः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार स्वयमाचरन् लोकेषु प्रचारयामा-सेत्यर्थः । प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया ॥ ६ ॥ ❀ ❀ भवाय क्षेमाय । उद्धरिष्यन्निति कर्म्मोक्तिः । एवं सर्व्वत्रा-वतारस्तत्कर्म्म चोक्तमित्यनुसन्धेयम् ॥ ७ ॥ ❀ ❀ ऋषिषु सर्गं प्रादुर्भावम् उपेत्य तत्र च देवर्षित्वं नारदत्वमुपेत्येत्यर्थः । सात्वतं पञ्चरात्रागमम् । यतस्तन्त्रात् कर्म्मणां तत्रोक्तानां नैष्कर्म्यं कर्म्मबन्धमोचकत्वम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीकुमारावतारमाह स एवेति । स एव भगवान् कौमारं सर्गं प्रादुर्भावमाश्रितः ब्रह्मा ब्राह्मणो भूत्वा अखंडितं दुश्चरं नैष्ठिकं ब्रह्मचर्यं संप्रदायप्रवृत्त्यर्थं चचार एतेनावतारप्रयोजनमप्युक्तम् एवमुत्तरत्रापि द्रष्टव्यम् । प्रथमद्वितीयादिशब्दाः निर्देशमात्रा-पेक्षया ॥ ६ ॥ ❀ ❀ अथ वराहावतारमाह द्वितीयमिति । अस्य जगतः भवाय उद्भवाय उपादत्त जगृहे ॥ ७ ॥ ❀ ❀ नारदावतारमाह तृतीयमिति । सः भगवान् तृतीयम् ऋषिसर्गम् ऋषिजन्म उपादत्त तत्र देवर्षित्वमुपेत्य यतस्तंत्रात् कर्मणां निवृत्तलक्षणानां नैष्कर्म्यं ज्ञायते निर्गतं कर्म संसारहेतुत्त्वं येभ्यस्तानि निष्कर्माणि तद्भावो नैष्कर्म्यम्, तत्तंत्रं सात्त्वतं वैष्णवम् अवोचत् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु "वाचं धेनुमुपासीते"तिवत् उपासनाप्रकारेण भगवद्रूपत्वेन जगतो ध्यानसंभवात् कथमेकांततोवतार इत्याशंक्याह एतन्नानावताराणामिति । अयमर्थः अवताराणां मूलभगवान्मूलावतरणं वा तत्र तत्त्वनिर्मितत्वान्न भगवान् तद्यद्यवताररूपमपि न भवेत् अवताराणां मूलमपि न भवेत् अवतारोत्कर्षश्च । अतः पुरुषस्यावतारत्वेन संदेहः । नानावताराणां मत्स्यादीनां निधीयतेऽस्मिन्निति निधानं स्थानं बीजमुद्गमे हेतुः तच्चाविनाशि कंदवदंकुरोत्पत्तौ न नश्यतीत्यर्थः । अवतारप्रयोजनं सूचितं विस्तारयति यस्यांशांशेनेति । अंशो ब्रह्मा तस्य मरीच्यादिः जघनादयो वा देवादयः सात्त्विकादिप्रधानाः ॥ ५ ॥ ❀ ❀ एवं पुरुषावतारमुक्त्वा तत्-प्रकृतिरूपान् तदंशसृष्टावप्यवतारानाह स एवेत्याद्येकविंशश्लोकैः । सर्वत्रावतारनामप्रयोजनं चोच्यते अवतरणरूपस्य तुल्यत्वेन आवेशावतारयोरविशेषेण निरूपणं "सत्त्वरूपशरीरेषु ब्रह्मणः संक्रमः स्मृतः । अशुद्धशुद्धभेदेन शरीराणामतो द्विधा" कार्यकाले संक्रमणमावेशः सर्वदा परतंत्रनिर्णयो वैष्णवतंत्रे निरूपितः "क्रियाशक्त्या ज्ञानशक्त्या चावतारं करोत्यजः । वाराहादिस्वरूपेषु बलकार्यं जनार्दनः ॥ दत्तव्यासादिरूपेषु ज्ञानकार्यं तथा प्रभुः । मत्स्यकूर्मवराहाश्च सिंहवामनभार्गवाः ॥ राघवः कृष्णबुद्धौ च कृष्ण-द्वैपायनस्तथा । कपिलो दत्त ऋषभः शिशुमारो रुचेः सुतः । नारायणो हरिः कृष्णस्तापसो मनुरेव च । महिदासस्तथा हंसः स्त्रीरूपो हयशीर्षवान् । तथैव वडवावक्त्रः कल्की धन्वंतरिः प्रभुः । इत्याद्याः केवलो विष्णुर्न विशेषोत्र कश्चन ॥ श्रीब्रह्मरुद्रशेषाश्च कवींद्रः

काम एव च। कामपुत्रोऽनिरुद्धश्च सूर्यश्चंद्रो बृहस्पतिः। धर्म एषां तथा भार्या दक्षाद्या मनवस्तथा॥ मनुपुत्राश्च ऋषयो नारदः पर्वतस्तथा। कश्यपः सनकाद्याश्च ब्रह्माद्याश्चैव देवताः। भरतः कार्तवीर्यश्च वैनाद्याश्चक्रवर्त्तिनः। गयश्च लक्ष्मणाद्याश्च त्रयो रोहिणिनंदनाः॥ प्रद्युम्नो रौक्मिणेयश्च तत्पुत्राश्चानिरुद्धकः। नरः फाल्गुन इत्याद्या विशेषा वशिनो हरेः॥ इहोक्तिरविशेषेण सामान्यत इति स्फुटम्।" प्रथमं ब्राह्मणः सनकादय उत्पन्नाः तदावेशस्तस्य प्रयोजनं ब्रह्मचर्यमिति। न हि जीवस्य ब्रह्मचर्यत्वं संभवति इंद्रियवत्त्वात्। यथाहि क्षुदग्निराविर्भूतः सोढुमशक्यः, एवं बीजाधारकामाग्निरपि तत्र यथा जलपानं तथा स्त्रीप्रेक्षणादि यथान्नतृप्तिस्तथास्त्रिया रेतोनिवृत्तिः। तत्र मनसा स्त्रीनामस्मरणेन रेतोधारणं ब्रह्मचर्यं भगवदावेशेनैव भवतीति प्रथमं सनत्कुमारः। स एव देवो नारायणः कौमारं सनत्कुमाररूपं स्त्रीभिर्जलरूपैः बीजे वृद्धे यौवनं भवति, तदभावात्तेषु सर्वदा कौमारमेव कुत्सितो मारो यस्मादिति दुश्चरणमिति लोकेऽस्य चरणमप्रसिद्धम् अखंडितं यथा भवति तथा अस्य हि प्रतिक्षणं नाशसंभवः॥ ६॥ ❁ ❁ स्वर्गादौ जगन्निर्माणे अस्य प्रपञ्चस्य भूयस्त्वं न भवेदिति वराहेण भूम्युद्धरणं द्वितीयम्। एषामवताराणां विचारो द्वितीयस्कंधे करिष्यते। अत्र तूद्देशमात्रेण निरूपणम्। आदिवराहकल्पे निर्मिता भूमिः वराहकल्पे उद्धृता तदाह रसातलगतामिति। विरोधपरिहारं चाग्रे वक्ष्यामः, उद्धारं करिष्यन् सौकरं वपुरुपादत्त। नायं पुरुषावतारः किंतु यज्ञाधिष्ठातृधर्मरूपभगवदवतारः क्रियायास्तन्मूलकत्वात् अयं मन्युरूपः क्षत्रिये प्रतिष्ठित इति द्वितीयत्वम्॥ ७॥ ❁ ❁ नारदे हि भगवदावेशः 'ऋषयो हि मंत्रद्रष्टारः' ते च कर्मांगभूता इति तृतीयत्वं द्रव्यदेवतामन्त्रभेदेन वा स पुरुष एव प्रथमतो ऋषिसर्गमुपेत्य तत्रावतारकार्यमपश्यन् ततो देवर्षित्वमुपेत्य नारदे आवेशं प्राप्य सात्वतं वैष्णवं तंत्रं पंचरात्ररूपम् आचष्ट। भगवत्परिचर्यानिरूपणं न भगवद्व्यतिरेकेणान्यशक्यमिति कर्मणां प्ररोहनाशास्तेनेति-परिचर्यायां सर्वाणि कर्माणि अंगभावं भजंते। परिचर्याया भगवद्भक्तित्वेन भगवत्त्वे सर्वेषामेव नैष्कर्म्यम्॥ ८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एतन्नानेत्यत्र। जघनादय इति। ब्रह्मणोंशा जघनादयः, तेभ्योपि सृष्टिस्मरणात्॥ ५॥ ❁ ❁ स एव प्रथममित्यत्र। स्मृत इति। अवतारत्वेन पञ्चरात्रस्मृतावुक्तः। शुद्धभावेनेति। शुद्धसत्त्वात्मकमिश्रसत्त्वात्मकभावेन। द्वैविध्यमिति शेषः। द्विधेति। अवतारो द्विधा। परमिति अवतरणम्। नन्वत्राविशेषेण कथनादवतारावेशभेदः कुतो निश्चेय इत्यत आहुः तत्र निर्णय इत्यादि। नारायण इति। धर्मपुत्रः। कृष्णस्तापस इति। कूर्मपुराणादौ साम्बजननार्थं तपः कुर्वाणः। मनुरिति। स्वायंभुवः। कामकामपुत्रौ व्यूहरूपौ। नरो धर्मपुत्रः। विशेषावेशिन इत्यत्र विशेषपदं सूतादिव्यावृत्त्यर्थम्, कथावदनादिकाले तेष्वप्यावेशादिति। अविशेषेणेति। सङ्क्रमणशैल्येन, न तु कालविचारेणेत्यर्थः। तत्र गमकमाहुः स्फुटमिति। 'अन्ये चांशकला' इत्यत्र पदद्वयोक्त्या निर्णयात्तथेत्यर्थः॥ ६॥ ❁ ❁ द्वितीयमित्यत्र। एतस्यावतारिका स्वर्गादावित्यादि। न भवेदिति। स्वर्गादेः कर्मभूमित्वाभावान्न भवेदित्यर्थः। द्वितीयस्कन्ध इति। सप्तमाध्याये। आदिवराह इत्यादि। एतच्च तृतीयस्कन्धे त्रयोदशाध्याये वर्तते। आदिस्तु सर्वेषां च कल्पानामाधिदैविकं रूपम्। 'सृजतोर्मोक्षनिर्वार्भिः प्लाव्यमाना रसां गते'ति वाक्यात्। अग्र इति। तृतीयस्कन्धत्रयोदशाध्याये। वराहकल्पे वराहजन्मदिने निर्मिते। विरोधेति। अत्र विराजो वाराहोत्पत्तिः, तत्र ब्रह्मण इति विरोधस्तत्परिहारम्। अत्र प्रथमद्वितीयादिशब्दो निर्देशमात्रापेक्षया श्रीधरीय उक्तः, तन्न, किन्तु हेत्वन्तरेणेति तं बोधयितुमाहुः अयं मन्युरूप इत्यादि। 'पशूनां वा एष मन्युर्यद्वराह' इति श्रुतेस्तद्रूप अश्वमेधादिरूपेण क्षत्रिये प्रतिष्ठित इति ब्राह्मणोत्तरभावित्वात् द्वितीयत्वमित्यर्थः। नारदस्य पूर्वभावित्वात् सङ्ख्या विरुध्यत इत्यत एवमुक्तम्। एवमग्रेपि बोद्धव्यम्॥ ७॥ ❁ ❁ तृतीयमित्यत्र। इति तृतीयत्वमिति। अधिकरणकर्मणोरपेक्षतया तथेत्यर्थः। अधिकरणत्वस्य नारदेपि सत्त्वात् पक्षान्तरमाहुः द्रव्येत्यादि। तेनेति। परिचरणेन॥ ८॥

श्रीगिरिधरकृता बालप्रबोधिनी

तर्हि तन्मूलभूतं जलशायिरूपं नित्यमनित्यं वेत्याकाङ्क्षायां कूटस्थं सदैवैकरूपं तन्नान्यावतारवदाविर्भावतिरोभाववदित्याह-एतदिति। एतत् आदिनारायणरूपं नानावताराणां निधानं निधीयतेऽस्मिन्निति तथा कार्यावसाने प्रवेशस्थानम्। तथा बीजं प्रादुर्भावस्थानम्। ननु बीजत्वे तस्य विकारित्वं स्यादित्याशङ्क्याह-अव्ययमिति, क्षयवृद्ध्यादिविकाररहितमित्यर्थः। एतद्रूपेणावस्थितेः प्रयोजनमाह-यस्येति। यस्यांशो ब्रह्मा तदंशो मरीच्यादिस्तेन देवतिर्यङ्नरादयः सृज्यन्ते इत्यर्थः॥ ५॥ ❁ ❁ सनत्कुमाराद्यवतारांस्तच्चरितानि चाह-स इति। यः पौरुषं रूपं जगृहे स एव देवः क्रीडापरः कौमारं सर्गमाश्रितः सनत्कुमारादिरूपः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचारेत्यन्वयः। ननु ब्रह्मचर्यं तु जीवा अपि चरन्त्येव तेन कथं तस्य भगवदवतारत्वसिद्धिरित्याशङ्क्याह-अखण्डितमिति। एवं ब्रह्मचर्यं भगवद्व्यतिरिक्तेन कर्तुमशक्यमिति भावः॥ ६॥ ❁ ❁ वाराहावतारमाह-द्वितीयमिति। अस्य विश्वस्य भावाय उद्भवाय रसातलगतां महीमुद्धरिष्यन् यज्ञेशो विष्णुर्द्वितीयं तु सौकरं वपुरुपादत्त गृहीतवा-

नित्यन्वयः ॥ ७ ॥ ❀ ❀ नारदावतारमाह–तृतीयमिति । स भगवान् तृतीयमृषिसर्गं गृह्णन् देवर्षित्वमुपेत्य सात्वतं वैष्णवं तन्त्रं पञ्चरात्रागममाचष्ट उक्तवान् । एतदपि भगवद्व्यतिरिक्तेन कर्तुमशक्यमित्याशयेनाह–नैष्कर्म्यमिति । यतस्तन्त्रात् निर्गतं कर्मत्वं बन्धहेतुत्वं येभ्यस्तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं कर्मणा भवति । भगवत्सेवापरत्वेन मोचकत्वमेव भवति तदाचष्टेत्यन्वयः ॥८॥

हिन्दी अनुवाद

भगवान्का यही पुरुषरूप, जिसे नारायण कहते हैं, अनेक अवतारोंका अक्षय कोष है—इसीसे सारे अवतार प्रकट होते हैं। इस रूपके छोटे-से-छोटे अंशसे देवता, पशु-पक्षी और मनुष्यादि योनियोंकी सृष्टि होती हैं ॥ ५ ॥ ❀ ❀ उन्हीं प्रभुने पहले कौमारसर्गमें सनक, सनन्दन, सनातन और सनत्कुमार—इन चार ब्राह्मणोंके रूपमें अवतार ग्रहण करके अत्यन्त कठिन अखण्ड ब्रह्मचर्य का पालन किया ॥ ६ ॥ ❀ ❀ दूसरी बार इस संसारके कल्याणके लिये समस्त यज्ञोंके स्वामी उन भगवान्ने ही रसातलमें गयी हुई पृथ्वीको निकाल लानेके विचारसे सूकररूप ग्रहण किया ॥ ७ ॥ ❀ ❀ ऋषियोंकी सृष्टिमें उन्होंने देवर्षि नारदके रूपमें तीसरा अवतार ग्रहण किया और सात्वत तन्त्रका (जिसे 'नारद-पाञ्चरात्र' कहते हैं) उपदेश किया; उसमें कर्मोंके द्वारा किस प्रकार कर्मबन्धनसे मुक्ति मिलती है ? इनका वर्णन है ॥८॥

तुर्ये धर्मकलासर्गे नरनारायणावृषी । भूत्वाऽऽत्मोपशमोपेतमकरोद् दुश्चरं तपः ॥ ९ ॥
पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥ १० ॥
षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया । आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥
ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत । स यामाद्यैः सुरगणैरपात्स्वायम्भुवान्तरम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नरनारायणावतारमाह । तुर्ये इति । तुर्ये चतुर्थेऽवतारे । धर्मस्य कलांशो भार्येत्यर्थः । "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः । तस्याः सर्गे । ऋषिः भूत्वेत्येकावतारत्वं दर्शयति ॥ ९ ॥ ❀ ❀ कपिलावतारमाह । पंचम इति । आसुरये तन्नाम्ने ब्राह्मणाय । तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन् शास्त्रे तत्सांख्यम् ॥ १० ॥ ❀ ❀ दत्तात्रेयावतारमाह । षष्ठमिति । अत्रेरपत्यत्वं तेनैव वृतः सम्प्राप्तः । "अत्रेरपत्यमभिकांक्षत आह तुष्टः" इति वक्ष्यमाणत्वात् । कथं प्राप्तः । अनसूयया मत्सदृशापत्यमिषेण मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः । आन्वीक्षिकीमात्मविद्याम् । प्रह्लादादिभ्यश्च । आदिपदाद्य-दुहैहयाद्या गृह्यंते ॥ ११ ॥ ❀ ❀ यज्ञावतारमाह । तत इति । स यज्ञो यामाद्यैः स्वस्यैव पुत्रा यामा नाम देवास्तदाद्यैः सह स्वायंभुवं मन्वंतरं पालितवान् । तदा स्वयमिंद्रोऽभूदित्यर्थः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्यपि कलांशकः षोडशांशे वर्त्तते तथाप्यत्रार्द्धे एव ज्ञेयः । दायविभागप्रकरणे "कला ज्येष्ठाय दातव्या कलायामितरे सुताः" इति कलाऽर्द्धं ज्येष्ठाय पुत्राय दायाद्भागो देयः कलायामपरार्द्धभागे इतरे पुत्रा भागिन इत्यर्थः । "कला स्यादंशमात्रके" इति मेदिन्युक्तेर्वा कलाशब्दोऽर्धपरः । अत उक्तं भार्येत्यर्थ इति । वक्ष्यमाणश्रुतिप्रामाण्याद्भार्यैवार्धमिति भावः । यत्पत्नीति लोके कथ्यते एष आत्मनो देहस्यार्धोऽर्धभागः । यद्यपि समेंशकेऽर्धशब्दस्य क्लीबत्वं भवति तथाप्यत्रार्षत्वात्पुंस्त्वमिति भावः । "पुंस्यर्धोऽर्धं समेंऽशके" इत्यमरः । भूत्वेति व्यक्तिद्वयत्वेऽप्येकावतारतामाह ॥ ९ ॥ ❀ ❀ सिद्धेशः योगीश्वरः । तत्त्वानां प्रकृत्यादीनां ग्रामः संघः "ग्रामः संघे चावसथे" इति कोशात् । "ऋषिं प्रसूतं कपिलम्" इति श्रुतावपि कपिलावतारो वर्णितः ॥ १० ॥ ❀ ❀ इत्यर्थ इति । भक्तवात्सल्येन भक्ताभीष्टसंपादकत्वादिति भावः । यद्वाऽनसूययाऽत्रिपत्न्या वृतः । तदुक्तं ब्रह्माण्डे पतिव्रतोपाख्याने "अनसूयाब्रवीन्नत्वा देवान्ब्रह्मेशकेशवान् । यूयं यदि प्रसन्ना मे वराहा यदि चाप्यहम् । प्रसादाभिमुखाः सर्वे मम पुत्रत्वमेष्यथ" इति । श्रीविष्णोरेवावतारोयमिति । श्रुतिरपि "यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः । अत्र यस्तमन्वविंदन्न ह्यन्येऽशक्नुवन्" इति सूर्यमात्मानं स्वर्भानुर्माया तमसा विपर्ययेणाविध्यत् जीवत्वमनयत् । अत्रेरप-त्यान्यात्रेयो दत्तात्रेयः बहुत्वं पूजार्थम् । तमात्मानं साक्षादीश्वरं ज्ञानवन्तम् । ईश्वरावतारत्वेन मायावशत्वाभावादित्यर्थः । अन्ये त्वविद्यावृतत्वान्न विदुरिति श्रुतिपदार्थः । अलर्काय राज्ञे । आदिना यदुग्रहः ॥ ११ ॥ ❀ ❀ ततस्तदनु आकूत्यां स्वायंभुवपुत्र्यां रुचेः प्रजापतेः यज्ञो नाम "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" इति श्रुतेः । इत्यर्थ इति । तदान्यस्य देवपालनासमर्थत्वात्स स्वयमेवेंद्राधिकारं शिष्टवानिति भावः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

भार्येति । धर्म्मस्य भार्यायाम्, मूर्त्तिनाम्न्यामिति शेषः ॥ ९ ॥ ❀ ❀ आसुरिस्तावत् तत्रभवतः कपिलदेवस्य आद्यशिष्य इतीश्वरकृष्णीयसाङ्ख्यकारिकायां सुस्पष्टम् ॥ १० ॥ ❀ ❀ अत्रेरपत्यमिति द्वितीयस्कन्धीयसप्तमाध्यायस्य चतुर्थश्लोकः । अन्वीक्षते आत्मा इत्यन्वीक्षा, तामधिकृत्य कृताम् । तामेवाह स्वामिपादः आत्मविद्यामिति ॥ ११-१२ ॥

श्रीमद्वीरराघवव्याख्या

तुर्ये इति । धर्मकलासर्गे धर्मात्पितुः कलासर्गे देहजन्मरूपे तुर्ये चतुर्थावतारे नरनारायणाख्यावृषी भूत्वा आत्मोपशम इन्द्रियनिग्रहः तेनोपेतं दुश्चरम् इतरैश्चर्तुमशक्यं तपश्चकार ॥ ९ ॥ ❀ ❀ पंचम इति पंचमोवतारः कपिलो नाम कपिलाख्यः सिद्धानामात्मयाथात्म्यानुसंधानयोगेन सिद्धानां स्वस्वरूपापन्नानामीशः कालेन प्रवर्त्तयितृरहितेन कालेन विप्लुतं तिरोहितं सांख्यं कथंभूतं तत्त्वानां प्रकृतिमहदादीनां ग्रामस्य कलापस्य विनिर्णयो याथात्म्यनिर्णयो यस्मात्तथाभूतमासुरये प्रोवाच । आसुरिर्नाम-सिद्धेषु प्रधानस्तस्मै ॥ १० ॥ ❀ ❀ षष्ठमिति अत्रेः प्रजापतेरपत्यत्वं प्रति वृतः मम पुत्रो भवेत्यत्रिणा वृत इत्यर्थः, अनसूययाऽत्रेर्भार्यया प्राप्तः तस्यः पुत्रो दत्तात्रेयाख्यो भूत्वेत्यर्थः अलर्काय प्रह्लादादिभ्यश्चान्वीक्षिकीमध्यात्मविद्यामूचिवान्, तं षष्ठमवतारं विद्यादिति यत्तच्छब्दाध्याहारेणान्वयः, षष्ठं षष्ठरूपं त्विति वा ॥ ११ ॥ ❀ ❀ तत इति । ततः सप्तमेऽवतारे रुचेस्तद्भार्याया-माकूत्यां व्यजायत स च यज्ञ इति प्रसिद्धः, स यज्ञः याम आद्यो येषां तैः सुरगणैः सह स्वायंभुवमन्वंतरमपात्पालयामास ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भो शौनकादयः! तुरीयं चतुर्थं शृणुत कथं स पद्मनाभः धर्मनाम्नि भगवति कलासर्गे स्वांशावतारे नाम्ना नरनारायणावृषी भूत्वा अज्ञलोकदृष्ट्यात्मनोंतःकरणस्य उपशमेनाधिकशांत्या उपेतं युक्तम् अन्यैः कर्तुमशक्यं तपः अकरोदित्येकान्वयः । अत्र कलासर्ग इत्युक्त्या नारायणस्यावतारत्वं नरे तु विशेषावेश इति ज्ञातव्यम् । तुर्ये इति केचित्पठंति, तत्र तुर्ये चतुर्थे धर्मकलासर्ग इति सुगमोन्वयः ॥ ९ ॥ ❀ ❀ पंचमोवतारोपि कपिलो नामेत्यन्वयः । स सिद्धेशः कपिलः कालबलेन तिरोहितं तत्त्वानां चतुर्विंशतिसंख्यकानां ग्रामः समूहः तस्य विशेषेण निर्णयो भगवत्परत्वेन यस्मिंस्तत्तथोक्तम् । सांख्यं भगवज्ज्ञानप्रतिपादनपरं वेदार्थपरिबृंहितं नाम्ना आसुरये सच्छिष्याय प्रोवाचेति पश्चादन्वयः । अत्राज्ञलोकप्रसिद्धसांख्यशास्त्रप्रणेता कपिलः तच्छिष्यः आसुरिश्चान्य एवेति सतां संप्रदायः । यः पद्मनाभः अनसूयया अत्रिपत्न्या वृतः अत्रेऋषेरनसूयायामपत्यत्वं प्राप्तः आन्वीक्षिकीं तत्त्वविद्यामलर्काय प्रह्लादादिभ्यश्चोचिवान् तमवतारं षष्ठं वित्त ॥ ११ ॥ ❀ ❀ ततः स पद्मनाभः सप्तमो रुचेः आकूत्यां पत्न्यां यज्ञोभ्यजायत जातः, स यज्ञो नाम्ना यामा आद्या येषां ते तथा तैः सुरगणैः सह स्वायंभुवमन्वंतरमपात् अरक्षदित्यन्वयः । प्रतिमन्वंतरं देवानां नामभेदाद्यामा इत्युक्तम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

पञ्चम इति । आसुरिनाम्ने विप्राय ॥ १० ॥ ❀ ❀ षष्ठमिति । अत्रिणा तत्सदृशपुत्रोत्पत्तिमात्रं प्रकटं याचितमिति चतुर्थस्कन्धाद्यभिप्रायः । एतद्वाक्येनानसूयया तु कदाचित् साक्षादेव श्रीमदीश्वरस्यैव पुत्रभावो वृतोऽस्तीति लभ्यते । उक्तञ्च ब्रह्माण्डपुराणे पतिव्रतोपाख्याने "अनसूयाब्रवीन्नत्वा देवान् ब्रह्मेशकेशवान् । यूयं यदि प्रसन्ना मे वराहाँ यदि वाप्यहम् । प्रसादाभिमुखाः सर्व्वे मम पुत्रत्वमेष्यथ" इति श्रीविष्णोरेवावतारोऽयम् ॥ ११—१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

तुर्ये चतुर्थेऽवतारे धर्म्मस्य कला अंशः भार्येत्यर्थः, "अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । तस्यां सर्गे प्रादुर्भावे ऋषी भूत्वेति द्वाभ्यामेकावतारं दर्शयति ॥ ९ ॥ ❀ ❀ आसुरये तन्नाम्ने ब्राह्मणाय ॥ १० ॥ ❀ ❀ अनसूयया अत्रेः पत्न्या वृतः सन्नपत्यत्वं प्राप्तः । यदुक्तं ब्रह्माण्डपुराणे पतिव्रतोपाख्याने "अनसूयाब्रवीन्नत्वा देवान् ब्रह्मेशकेशवान् । यूयं यदि प्रसन्ना मे वराहाँ यदि चाप्यहम् ॥ प्रसादाभिमुखाः सर्व्वे मम पुत्रत्वमेष्यथ" इति । आन्वीक्षिकीमात्मविद्याम् प्रह्लादादिभ्यश्च ॥ ११ ॥ ❀ ❀ स यज्ञः यामाद्यैः स्वस्यैव पुत्रा यामा नाम देवास्तदाद्यैः सह स्वायंभुवं मन्वन्तरं पालितवान् तदा स्वयमिन्द्रोऽभूदित्यर्थः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नरनारायणावतारमाह तुर्ये इति । धर्मकलासर्गे तपोलक्षणधर्मभागार्थसर्गे ॥ ९ ॥ ❀ ❀ कपिलावतारमाह पंचम इति । आसुरये शिष्याय । हेयसांख्यप्रवर्तकोन्य इत्याकरे स्थितम् ॥ १० ॥ ❀ ❀ दत्तात्रेयावतारमाह मम पुत्रो भवेत्यनसूयया वृतः सन् तद्भर्तुरत्रेरपत्यत्वं षष्ठं जन्म प्राप्तः आन्वीक्षिकीम् अध्यात्मविद्याम् ॥ ११ ॥ ❀ ❀ यज्ञावतारमाह तत इति सप्तमेऽवतारे स भगवान् यामः आद्यो येषां तैः सह स्वायंभुवं मन्वंतरम् अपात्पालयामास ॥ ११ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

नरनारायणयोश्चतुर्थाश्रमधर्मप्रतिपादकत्वेन तुरीयत्वम् अथवा ब्रह्मचर्ययज्ञभगवत्परिचर्योपशमाः क्रमेणाश्रमधर्माः धर्मकराः श्रद्धादयः तासां सर्गे जाते पश्चान्मूर्तौ भूतधर्मरूपा मूर्तिः धर्मस्तु वेदमूल इति मूर्त्या ऋषिरूपेणाविर्भूतौ । पारमहंस्य-धर्मो द्विविध इति सहस्रकवचवधार्थमित्यन्यत्र नारायणोवतारः नरे आवेशः, तयोस्तपोज्ञानसहितमित्याह आत्मोपशममिति आत्मनः उपशमः शांतिः ज्ञानं ज्ञानसाध्या वा सर्वत्र हि तपः क्रोधसहितः, शांतिसहितस्तु लोके दुर्लभ इति दुश्चरमित्युक्तम् ॥ ९ ॥ ❀ ❀ सांख्यस्य वेदानंतरभावित्वात् श्रमानंतरत्वेन पंचमत्वम् । पूर्वं हि पुराणेषु सांख्यं सिद्धं तत्पुराणानामप्रचारात् योगादिभिः सांकर्याच्च संन्यासस्य चांगभूतस्याभावात् सांख्यं कालेन विप्लुतं पुनः कालविप्लवशंकां वारयति सिद्धेश इति । सिद्धियुक्ताः सिद्धाः तेषां मनः सिद्धयैव न प्लुतं भविष्यतीति भावः । आसुरिऋषिः इदं ज्ञानं स्त्रीशूद्रसाधारणमिति प्रवर्त्तकस्य तादृशं नाम । संख्या हि पदार्थानामसांकर्यप्रतिपादिका भवति साधर्म्यवैधर्म्यरूपा, तस्याः फलमाह तत्त्वग्रामविनिर्णयमिति तत्त्वानां समूहस्य विशेषेण निर्णायकम् ॥ १० ॥ ❀ ❀ योगस्य षष्ठत्वात्तत्प्रवर्तकमाह षष्ठमिति । अनसूया मत्सादृश्यव्याजेन मामेव वृतवतीतीर्ष्या-भावेन मात्रा वा, आन्वीक्षिकी योगपुरःसरात्मविद्या अलर्को राजा स हि राजसः तत्र शास्त्रपरिनिष्ठायाः संदिग्धत्वात् प्रह्लादादिभ्य उक्तवान् । प्रह्लादस्तु स्पष्टः ॥ ११ ॥ ❀ ❀ एवं ब्राह्मणानां षड्विधत्वमुक्तम् । षट्कर्माणि ब्राह्मणे प्रसिद्धानि, त्रीणि क्षत्रिये, तदर्थं त्रीनाह यज्ञऋषभपृथुरूपान् शत्रुजयः धर्मनिष्ठा प्रजापालनं चेति त्रिषु प्रतिष्ठितम् अतो भिन्नप्रक्रमं वक्तुं तत इत्याह । आकूतिर्मनुकन्या, स च यज्ञः रुचेर्जातोपि पुत्रिकापुत्रः यज्ञो हि ब्राह्मणैः क्रियमाणः क्षत्रिये फलति तथा सोपि यामाद्यैः प्रथममन्वंतरदेवादिभिश्चतुर्विधैः समं तपसि स्थितमनुरक्षां विधाय तदंतरं पालितवानिति अवतारप्रयोजनम् । प्रियव्रतादयस्तु कल्पांतरे राजानः प्रथममसमर्था इत्यग्रे उपपादयिष्यते ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तुर्ये धर्मकलेति श्लोकं व्याचक्षते । नरनारायणेत्यादि । अत्र तुरीयत्वोपपादनाय ब्रह्मचर्येत्यादि फक्किकापेक्षिता, तदग्रे अथवेत्यादि । धर्माकरा इत्यत्र धर्मकलेत्येवं क्रमः पाठश्च प्रतिभाति । पक्षान्तरमुपपादयन्ति श्रद्धेत्यादिना द्विविध इत्यन्तैः । श्रद्धादयः स्वायंभुवदक्षसुताः धर्मपत्न्यस्ताश्च धर्मकलाः, 'अर्द्धो वा एष आत्मनो यत्पत्नी'ति श्रुतेः । द्विविध इति । भक्तियुक्तः एकः, वैराग्ययुक्तोपर इति तथा । तथा च धर्मचातुर्विध्यात्तुरीयत्वमित्यर्थः । अन्यत्रेति । नात्र तद्विवक्षितमित्यर्थः । ज्ञानसाध्येति । सुखरूपा । तादृशमिति । कपान् विषयात्मकान् लातीति । स्त्रीशूद्रयोः स्त्रीशूद्रयोः पापयोनित्वेन विषयात्मकत्वात् तयोर्हितमिति ज्ञापनाय कपिल इति नामेत्यर्थः । ॥ ११ ॥ ❀ ❀ ततः सप्तम इत्यत्र । ब्राह्मणानां षड्विधत्वमिति । यद्यपि वाराहस्य क्षत्रिये प्रतिष्ठितत्वम्, तथापि प्राकट्यं ब्रह्मणः सकाशात् ब्रह्मभावेनेति सङ्ख्यापूर्तिः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

नरनारायणावतारमाह–तुर्ये इति । तुर्ये चतुर्थेऽवतारे धर्मस्य कलांऽशः भागः "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेर्भार्या, तस्याः सर्गे पुत्रत्वे नरनारायणावृषी भूत्वा आत्मनोऽन्तःकरणस्योपशमः शान्तिस्तदुपेतं तत्सहितं दुश्चरमन्यैश्चरितुमशक्यं तपश्चचार जनशिक्षार्थं कृतवानित्यन्वयः ॥ ९ ॥ ❀ ❀ कपिलावतारमाह–पञ्चम इति । पञ्चमोऽवतारः कपिलो नाम कपिलाख्यः सिद्धानां आत्मयाथात्म्यानुसन्धानेन स्वस्वरूपापन्नानामीशः सन् कालेन प्रवर्त्तकरहितेन विप्लुतं तिरोहितं साङ्ख्यं शास्त्रमासुरये तन्नाम्ने ऋषये प्रोवाचेत्यन्वयः । तत्प्रवचनमपि भगवद्व्यतिरिक्तेन कर्तुमशक्यमिति सूचयन् साङ्ख्यं विशिनष्टि–तत्त्वेति, तत्त्वानां प्रकृतिपुरुषमहदादीनां ग्रामस्य कलापस्य विशेषेण याथात्म्येन निर्णयो यस्मात्तथाभूतमित्यर्थः ॥ १० ॥ ❀ ❀ दत्तात्रेयावतारमाह–षष्ठमिति । अनसूयया अत्रिभार्यया वृतः सन्–तथोक्तं ब्रह्माण्डपुराणे पतिव्रतोपाख्याने 'अनसूयाऽब्रवीन्नत्वा देवान् ब्रह्मेशकेशवान् । यूयं यदि प्रसन्ना मे वराहा यदि चाप्यहम् ॥ प्रसादाभिमुखाः सर्वे मम पुत्रत्वमेष्यथ' इति महाप्रजामात्मसमां मह्यं प्रयच्छन्त्विति चिन्तयन्निति वक्ष्यमाणत्वात् अनसूयया मत्सदृशापत्यमिषेण मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्–यदत्रेरपत्यत्वं प्राप्तस्तं षष्ठमवतारं विद्धीति शेषेणान्वयः । तदवतारप्रयोजनमाह–अलर्को नाम राजा तस्मै प्रह्लादादिभ्यश्च आन्वीक्षिकीमात्मविद्यामूचिवानिति ॥ ११ ॥ ❀ ❀ यज्ञावतारमाह–तत इति । ततः सप्तमेऽवतारे रुचिप्रजापतिसकाशात्तस्य भार्यायां यज्ञनामको भगवानजायत । तच्चरितमाह–स इति । स च यज्ञो रुचिगृहे जातोऽपि पुत्रिकाधर्मेण मातामहेन स्वायम्भुवेन मनुना स्वगृहं नीतः स्वयमिन्द्रः सन् याम आद्यो येषां तैः सुरगणैः सह तस्य स्वायम्भुवस्यान्तरं मन्वन्तरमपात् पालयामासेत्यन्वयः ॥ १२ ॥

हिन्दी अनुवाद

धर्मपत्नी मूर्तिके गर्भसे उन्होंने नर-नारायणके रूपमें चौथा अवतार ग्रहण किया । इस अवतारमें उन्होंने ऋषि बनकर मन और इन्द्रियोंका सर्वथा संयम करके बड़ी कठिन तपस्या की ॥ ९ ॥ पाँचवें अवतारमें वे सिद्धोंके स्वामी कपिलके रूपमें

प्रकट हुए और तत्त्वोंका निर्णय करनेवाले सांख्य-शास्त्रका, जो समयके फेरसे लुप्त हो गया था, आसुरि नामक ब्राह्मणको उपदेश किया ॥ १० ॥ ❀ ❀ अनसूयाके वर माँगनेपर छठे अवतारमें वे अत्रिकी संतान—दत्तात्रेय हुए। इस अवतारमें उन्होंने अलर्क एवं प्रह्लाद आदिको ब्रह्मज्ञानका उपदेश किया ॥ ११ ॥ ❀ ❀ सातवीं बार रुचि प्रजापतिकी आकूति नामक पत्नीसे यज्ञके रूपमें उन्होंने अवतार ग्रहण किया और अपने पुत्र याम आदि देवताओंके साथ स्वायंभुव मन्वन्तरकी रक्षा की ॥ १२ ॥

अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः । दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥ १३ ॥
ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः । दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥
रूपं स जगृहे मात्स्यं चाक्षुषोदधिसम्प्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥ १५ ॥
सुरासुराणामुदधिं मथ्नतां मन्दराचलम् । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

ऋषभावतारमाह । अष्टम इति । सर्वाश्रमनमस्कृतमंत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन्नाभेराग्नीध्रपुत्रादृषभो जातः ॥ १३ ॥ ❀ ❀ पृथ्ववतारमाह ऋषिभिरिति । पार्थिवं वपुः राजदेहं पृथुरूपम् । पाठांतरे पृथोरिदं पार्थवम् । ओषधीरित्युपलक्षणम् । इमां पृथ्वीं सर्वाणि वस्तूनि दुग्ध अदुग्ध । अडागमाभावस्त्वार्षः । हे विप्रास्तेन पृथ्वीदोहनेन । सोऽयमवतार उशत्तमः कमनीयतमः । वश कांतावित्यस्मात् ॥ १४ ॥ ❀ ❀ मत्स्यावतारमाह । रूपमिति । चाक्षुषमन्वंतरे य उदधीनां संप्लवः संश्लेषस्तस्मिन् यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रताय माया प्रदर्शिता यथाऽकांडे मार्कण्डेयायेति द्रष्टव्यम् । महीमय्यां नावि । नौकारूपायां मह्यामित्यर्थः । अपाद्रक्षितवात् । वैवस्वतमिति भाविनी संज्ञा ॥ १५ ॥ ❀ ❀ कूर्मावतारमाह । कमठः कूर्मस्तद्रूपेणैकादशेऽवतारे विभुर्दध्रे दधार ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

मेरुदेवी नाभिनृपपत्नी तस्यां धीराणां ब्रह्मविचारतानाम् ॥ १३ ॥ ❀ ❀ पाठांतरे पार्थवमिति पाठे उपलक्षणं काकदधिरक्षणन्यायः । यथा तत्र न हि काकेभ्यो दधि रक्षित्वा वानरेभ्यो दीयते, किं तु काकपदेन सर्वेभ्यो रक्षणमुक्तं तथात्रापीत्यर्थः ॥ १४ ॥ ❀ ❀ इत्यर्थ इति । भगवदिच्छया भूरेव नौकाभूदिति भावः । विष्णुधर्मोत्तरे तु "मन्वन्तरे परिक्षीणे कीदृशी द्विज जायते" इत्यादिवज्रप्रश्नांते मार्कण्डेयोत्तरम् "उर्मिमाली महावेगः सर्वमावृत्य तिष्ठति । भूर्लोकमाश्रितं सर्वं तदा नश्यति यादव ॥ न विनश्यन्ति राजेन्द्र विश्रुताः कुलपर्वताः । नौर्भूत्वा तु मही देवी" इत्यादिः । एवमेव "मन्वन्तरे तु संहारः" इत्यादिप्रकरणमत एव भागवतामृते प्रतिमन्वन्तर एव प्रलय उक्तः । श्रीहरिवंशे तदीयटीकासु च तदप्यत्र चाक्षुष एवेत्युक्तिः । सत्यव्रतस्य मनोर्मत्स्यदेवपरमभक्तत्वाद्भक्तोत्कर्षादेव भगवत्प्रादुर्भावस्याप्युत्कर्षस्याप्युत्कर्षात् । "भक्तेच्छोपात्तदेहाय" इत्यादिभिर्युक्तिसिद्धात् । सर्वमन्वन्तराण्युपलक्षयति ॥ १५ ॥ ❀ ❀ अमृतोत्पादनार्थमिति शेषः, पातालं विशन्तं मन्दरगिरिम् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

ऋषभेति । द्वितीयस्कन्धीयसप्तमाध्यायस्य दशमश्लोके द्रष्टव्यः ॥ १३—१४ ॥ ❀ ❀ अकाण्डे इति असमये इत्यर्थः । एतद्विशेषश्च द्वादशस्कन्धे नवमाध्याये द्रष्टव्यः ॥ १५—१७ ॥

श्रीमद्वीरराघवव्याख्या

अष्टमेऽवतारे उरुक्रमो भगवान्नाभेः स्वायंभुवपौत्रस्य भार्यायां मेरुदेव्याम् । जातः स च ऋषभाख्यः धीराणां योगीश्वराणां वर्त्मानुष्ठेयं धर्ममार्गं दर्शयन् दर्शयितुं जात इत्यर्थः । वर्त्म विशिनष्टि सर्वैराश्रमैराश्रमस्थैर्नमस्कृतं पूजितम् आश्रमधर्मवर्त्मभ्य उत्कृष्टमिति भावः ॥ १३ ॥ ❀ ❀ ऋषिभिरिति हुंकारैर्वेनं हतवद्भिः ऋषिभिर्याचितः जगत्पालनार्थं याचितो भगवान्नवमं पार्थिवं पृथोः संबंधि वपुर्भेजे प्राप्तः । अंशेनानुप्रविष्टं पृथ्व्याख्यजीवानुप्रवेशेन पृथुरूपेणावतीर्ण इत्यर्थः । हे विप्राः शौनकादयः ! स इमां पृथ्वीं गोरूपं धृतवतीम् ओषधीर्दुग्धदुदोह, अडभाव आर्षः यतोऽदुग्ध तेन कारणेन स पृथुरुशत्तमः सर्वेषामिष्टतमो बभूवेत्यर्थः ॥ १४ ॥ ❀ ❀ रूपमिति चाक्षुषांतरं चाक्षुषमन्वंतरं तत्र यः संप्लवः प्रलयः तस्मिन्स भगवान् मात्स्यं दशमं रूपं जगृहे । अवतारप्रयोजनमाह नावीति । वैवस्वतं मनुं वैवस्वतमनुरूपेण जनिष्यमाणं सत्यव्रतं महीमय्यां पृथ्वीरूपायां नाव्यारोप्यापाद्रक्ष ॥ १५ ॥ ❀ ❀ एकादशे त्ववतारे विभुर्भगवान् सुरासुराणामुदधिममृतार्थं मथ्नतां सतां कमठरूपेण पृष्ठे मंदराख्यमचलं दध्रे धृतवान् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

य उरुक्रमः नाभेराग्नीध्रपुत्रात् मेरुदेव्यां पत्न्यां जातः सर्वाश्रमनमस्कृतं धीराणां विचारतानां वर्त्म पारमहंस्याश्रमं दर्शयन्नभूत्तस्य सोऽष्टमोऽवतारः। न शुक्रशोणितमिश्रतयास्य जननं किंतु द्वारमात्रमित्यस्मिन्नर्थे तुशब्दः॥ १३॥ ❀ ❀ ऋषिभिः प्रार्थितः पद्मनाभः नवमावतारं पार्थवं पृथुचक्रवर्तिशरीराविष्टरूपं भेजे, हे विप्राः ज्ञानिनः! गोरूपिण्याः भुवः ओषधीः क्षीरात्मिका दुग्धवान् इति येन तेन कर्मणाऽयं भगवानुशत्तमः सत्यकामेषु श्रेष्ठः उश इच्छायां 'च' शब्दो दोहनकर्मणोऽमानुषत्वं द्योतयति॥१४॥ ❀ ❀ स भगवान् चाक्षुषांतरसंप्लवे चाक्षुषमन्वंतरप्रलये मात्स्यं मत्स्यस्य विद्यमानं रूपं जगृहे, किं च महीमय्यां नावि तरीस्थानीयभूमौ वैवस्वतं मनुमारोप्यापादित्यन्वयः॥ १५॥ ❀ ❀ सुरासुराणामुदधिं समुद्रं प्रमथ्नतां यो भगवान् पातालमाविशंतं मंदरं पर्वतं कूर्मरूपेण पृष्ठे दध्रे बभारेत्येकान्वयः। तमवतारमेकादशं विदुरिति॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रूपमिति। चाक्षुषमन्वन्तरे तदन्ते य उदधिसंप्लवस्तस्मिन्। वैवस्वत इति भाविनी संज्ञा सत्यव्रतस्य। प्रतिमन्वन्तरावसानेऽपि प्रलयः श्रूयते विष्णुधर्म्मोत्तरे प्रथमकाण्डे "मन्वन्तरे परिक्षीणे कीदृशी द्विज जायते" इत्यादिश्रीवज्रप्रश्नस्य मन्वन्तरे परिक्षीणो इत्यादि श्रीमार्कण्डेयदत्तोत्तरे "ऊर्म्मिमाली महावेगः सर्व्वमावृत्य तिष्ठति। भूर्लोकमाश्रितं सर्व्वं तदा नश्यति यादव॥ न विनश्यन्ति राजेन्द्र विश्रुताः कुलपर्व्वताः। नौर्भूत्वा तु मही देवी"त्यादि। एवमेव मन्वन्तरेषु संहार इत्यादि प्रकरणं श्रीहरिवंशे तदीयटीकासु च स्पष्टमेव। अतश्चाक्षुषेत्युपलक्षणमेव ज्ञेयम्॥ १५-१६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतासारार्थदर्शिनी

नाभेराग्नीध्रपुत्रादृषभो जातः॥ १३॥ ❀ ❀ पार्थिवं वपुः राजदेहं पृथुरूपम्। पार्थवमिति पाठे पृथुसम्बन्धि। ओषधिरित्युपलक्षणम्। इमां पृथ्वीं सर्व्वाणि वस्तूनि दुग्ध अदुग्ध। अडागमाभाव आर्षः। तेन हेतुना सोऽयमवतार उशत्तमः कमनीयतमः। वशकान्तावित्येतस्मात्॥ १४॥ ❀ ❀ चाक्षुषे मन्वन्तरे य उदधिसंप्लवस्तस्मिन्। चाक्षुषान्तरसंप्लव इति च पाठः, महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः। अपात् रक्षितवान्। वैवस्वत इति भाविनी संज्ञा। यद्यपि मन्वन्तरावसाने प्रलयो नास्ति, तथापि केनचित् कौतुकेन सत्यव्रताय माया दर्शिता यथा मार्कण्डेयायेति श्रीधरस्वामिपादाः। विष्णुधर्म्मोत्तरे तु "मन्वन्तरे परीक्षीणे कीदृशी द्विज जायते" इत्यादिवज्रप्रश्नान्ते मार्कण्डेयोत्तरम् 'उर्म्मिमाली महावेगः सर्व्वमावृत्य तिष्ठति। भूर्लोकमाश्रितं सर्व्वं तदा नश्यति यादव॥ न विनश्यन्ति राजेन्द्र विश्रुताः कुलपर्व्वताः। नौर्भूत्वा तु मही देवी'त्यादिः। एवमेव मन्वन्तरे तु संहार इत्यादिप्रकरणम्। अत एव भागवतामृते प्रतिमन्वन्तरान्त एव प्रलय उक्तः श्रीहरिवंशे तदीयटीकासु च। तदप्यत्र चाक्षुष एवोक्तः, सत्यव्रतस्य मनोर्मत्स्यदेवपरमभक्तत्वाद्भक्तोत्कर्षादेव भगवत्प्रादुर्भावस्याप्युत्कर्षात् भक्तेच्छोपात्तदेहाये-त्यादिभिर्युक्तिसिद्धात् सर्व्वमन्वन्तराण्येवोपलक्षयति॥ १५॥ ❀ ❀ सुरासुराणाममृतोत्पादनार्थमिति शेषः। कमठरूपेण कच्छपरूपेण॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ऋषभावतारमाह अष्टम इति। सर्वाश्रमनमस्कृतं सर्वाश्रमेभ्यः उत्कृष्टं पारमहंस्यं वर्त्म॥ १३॥ ❀ ❀ पृथ्ववतारमाह-पार्थिवं वपुः राजशरीरं भेजे प्राप्तः इमां पृथिवीम् ओषधीः दुग्ध अडभाव आर्षः, तेन पृथिवीदोहनेन उशत्तमः कमनीयतमः॥ १४॥ ❀ ❀ स देवो मात्स्यं रूपं जगृहे एकीभूतत्त्वाच्चक्षुषा ग्राह्याः चाक्षुषा उदधयः, तैः संप्लवः प्रलयस्तस्मिन् "आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लय इति वक्ष्यमाणे वैवस्वतं तद्रूपेण जनिष्यमाणं सत्यव्रतम् अपात् रक्षितवान्॥ १५॥ ❀ ❀ कमठरूपेण दध्रे दधार॥ १६॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

स्वस्थे हि देशकाले सर्वाश्रमधर्मा इति यज्ञानंतरमृषभकथापूर्वोक्तक्रमस्योत्तरत्र विवक्षितत्वादष्टमादिपदप्रयोगः। मेरुदेवी मेरुदुहिता मातृपुत्रत्वं वारयितुं तुशब्दः प्रतिपक्षशंकाभावार्थं वा। अयं तु गुणावतारस्य विष्णोरवतारस्तदाह उरुक्रम इति। ऋषभनिरूपितसंन्यासधर्मे मुख्यं धैर्यसाध्यं साधनम्, अंत्याश्रमत्वाच्च सर्वाश्रमनमस्कृतम् एष हि परा काष्ठा निवृत्तिमार्गे नत्वन्याश्रमित्वेन पाखंडत्वसंभावनेति नमस्कृतम्, पृथुस्त्वावेशी पृथोः संबंधिवपुरिति वचनाच्च अयं पुमानेव स इति वचनात्, श्रेयः प्रजापालनमेव राज्ञामिति वचनात् सर्वात्मकत्वाच्च भगवतः सर्वहितकारी धर्मः ऋषभधर्मादप्युत्तम इति पृथोर्नवमत्वम्॥ १३॥ ❀ ❀ ननु कथं वेदनादवतारः तत्राह ऋषिभिर्याचित इति, तत्रापि न साक्षात् किंतु पृथुशरीरे दुग्धा अदुग्ध दोग्धा वा, अलौकिकत्वार्थं छांदसपदप्रयोगः, इमामोषधीरिति द्विकर्मत्वं कर्मद्वयस्याप्यभीष्टत्वात्, एवं सर्वेषु द्विकर्मकेषु बोद्धव्यं, विशेषेण पूरका इति संबोधने भवद्भिरेव

बहुदोहनेन सर्वं पूरितमिति ज्ञापितं दोहनमेवावतारकार्यं न जीवसाध्यमिति, तेनायं स तेन हेतुना पृथुर्नारायण इत्यर्थः, विशेषमाह उशत्तमः एवं सर्वोपकारः अवांतरेष्वपि दुर्लभ इति अतिकमनीय इत्यर्थः ॥ १४ ॥ ॐ ॐ एवं क्षत्रियभावेन त्रितयं निरूप्य वैश्यभावेन चतुष्टयमाह रूपमित्यादित्रिभिः। वचनेन कार्यसिद्धिर्वैश्यता 'सत्यानृतं तु वाणिज्यमि'ति वचनादेकं वंचकमपरं न विपरीतं च चाक्षुषमन्वंतरानंतरं प्रलयोपाधित इति मायिकत्वं केचिदाहुः। वस्तुतस्तु स्वायंभुवादीनां क्रमनियमेन न प्रतिकल्पं चतुर्दशत्वमधिकारिणां मुक्तिसंभवात् तस्माच्चाक्षुष एव कदाचिच्चतुर्दशो भवति। कल्पेषु सात्त्विकादिविभेदान् मुख्यस्य प्राथम्यं सात्त्विकानि चत्वारि इतरयोः पंच पंच अतो बहुवाक्यानुरोधात् उपपत्तिसंभवाच्च न प्रलयस्य मायिकत्वं, मार्कंडेयदृष्टस्य तु तत्रैव स्फुटं प्रतिपादितमित्यदोषः पृथिव्या देवरूपत्वात् नौकारूपतापि भवति। स च मन्वंतरांतरे विवस्वत उत्पन्न एव अस्मिन्मन्वंतरेऽधिकारी भवति। अतो न मायिकत्वं भक्तपरिपालनमवतारधर्मः, वैवस्वतमनुरिति भाविनी संज्ञा ॥ १५ ॥ ॐ ॐ कापट्येनैवामृतमथनार्थप्रवृत्तेः कूर्मस्यापि वंचकहितकारित्वादत्र प्रवेशः। पूर्वकल्पस्थत्वान्मत्स्यस्य न क्रमो बाधकः, वचनाधिक्यात् एकादशत्वम्। एवमुत्तरत्रापि उदधिं मथनतां सुरासुराणां संबंधिमथनसाधनं मन्दराचलं धृतवान् कमठः कच्छपः पृष्ठेन धारणमवतारसाध्यं जलं ह्यनाधारे, ननु पृष्ठस्यापि च्छलत्वात् कथं धारणं संभवति तत्राह विभुरिति ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अष्टम इत्यत्र। प्रतिपक्षशङ्कामिति। बुद्धावतारवद्वेदविरुद्धशङ्काम्। अन्त्याश्रमित्वाच्चेति। श्वेताश्वतरोपनिषदि अन्त्याश्रमः प्रसिद्धस्तद्वत्त्वाच्च। चकारेण धैर्यात्। सर्वाश्रमनमस्कृतत्वे बीजमाहुः एषा हीत्यादिना॥ १३ ॥ ॐ ॐ ऋषिभिरित्यत्र। कर्मद्वयस्येत्यादि। 'अकथितं चे'ति सूत्रेऽपादानादिविशेषैरविवक्षितस्य कर्मसंज्ञाविधानेप्युदासीनस्य कर्मत्वादर्शनादकथितेपीप्सितत्वमिष्यते एव, अन्यथा योग्यस्यापि कर्मत्वेन ग्रहणापत्तेरतस्तथेत्यर्थः। रूपं स इत्यत्र। एकमिति। रूपम्। अपरमिति। वचनम्। विपरीतमिति। वैश्याद्विपरीतम्। वैश्ये हि रूपमवञ्चकं वचनं वञ्चकम्। प्रकृतेषु तु रूपं वञ्चकम्, वचनं मात्स्यकौर्मायुर्वेदरूपमवञ्चकमतस्तथेत्यर्थः। बाधित इति। कल्पसमाप्तौ दैनन्दिनप्रलयात् कल्पस्य च चतुर्दशमन्वन्तरात्मकत्वात् तत्समाप्तिश्चतुर्दशमन्वन्तरोत्तरं भवति। चाक्षुषस्तु षष्ठ इत्यतो बाधित इत्यर्थः। केचिदिति श्रीधरादयः। क्रमनियमेनेति। वैवस्वतोत्तरं सावर्णिरौच्यभौत्यमेकसावर्णिऋतुऋतुधामविष्वक्सेना मात्स्ये। तथैव 'सावर्णाः पञ्च रौच्यश्च भौत्यस्त्वागामिनस्त्वमी'ति। मार्कण्डेये चान्येषां क्रमान्तरेण दर्शनात्। अधिकारिणामिति। भक्तत्वादिति शेषः। तथा चोक्तं मात्स्ये 'स्वकीर्तये सर्वमिदमुत्पाद्य सचराचरम्। कल्पक्षये विनिर्वृत्ते मुच्यन्ते ब्रह्मणा सहे'ति। तथापि चाक्षुषस्य चतुर्दशकत्वे का वा युक्तिरित्यत आहुः कल्पेष्वित्यादि। तथा च सात्त्विके सात्त्विकमन्वन्तरस्य राजसे राजसस्येत्येवं प्राथम्ये कदाचिद्राजसस्यापि प्राथम्यात् चाक्षुषस्यापि चतुर्दशत्वमविरुद्धमित्यर्थः। मन्वन्तरान्तरे उत्पन्न इति। उत्तमतामसवदित्यर्थः। भाविनी संज्ञेति। वाग्दानोत्तरं विवाहाभावेपि स्नुषेतिवदित्यर्थः ॥ १५ ॥ ॐ ॐ सुरासुराणामित्यत्र। ननु मत्स्यस्य वञ्चकहितकारित्वे मूले स्पष्टेन कूर्मस्येति कथमस्य वैश्यकोटौ निवेश इत्यत आहुः कापट्येनेत्यादि। कापट्येनेति। 'क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहा' इति बोधितेन। ननु मत्स्यावतारं चाक्षुषे प्रलय उक्त्वा कूर्म एकादश उक्तः, ततश्च दशमत्वं मत्स्य आयाति, नवमसङ्ख्यासंदंशाच्च। ततश्च क्रमविचारे चाक्षुषमन्वन्तरीयस्य कूर्मस्य पाश्चात्यत्वात् पूर्वप्रलयो मायिक एव सेत्स्यति न वास्तवः, क्रमेण बाधादित्यत आहुः पूर्वेत्यादि। तथा च कल्पान्तरे कूर्मावतार इति न प्रलयो मायिक इति भावः। वचनाधिक्यादिति। पूर्वमहिमुखग्रहणादिना तथात्वादित्यर्थः ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी।

ऋषभावतारमाह-अष्टम इति। अष्टमेऽवतारे तु धीराणां सर्वत्यागसमर्थानां परमविवेकिनां परमहंसानां सर्वाश्रमनमस्कृतं सर्वाश्रमस्थैर्जनैः स्तुत्यं वर्त्म मार्गं दर्शयन् उरुक्रमो भगवान् मेरुकन्यायां मेरुदेव्यां मातरि नाभेः पितुः सकाशाज्जात इत्यन्वयः॥१३॥ ॐ ॐ पृथोरवतारमाह-ऋषिभिरिति। ऋषिभिर्हुङ्कारेण वेनं हतवद्भिर्याचितः जगत्पालनार्थं प्रार्थितो भगवान् नवमं पार्थिवं राजदेहं पृथुरूपं- पार्थवमिति पाठान्तरे तु पृथोः सम्बन्धि वपुः-भेजे प्राप्तः। हे विप्रा इति सम्बोधनेन विशेषेण पूरकैर्भवद्भिरेव पृथोरुत्पादनेनेदं पूरितमिति सूचयति। येन स पृथुरिमां गोरूपं धृतवतीं पृथ्वीमोषधीर्दुग्ध सर्वाणि वस्तून्यदुग्ध। अडागमाभावस्त्वार्षः। तेन पृथ्वीदोहनेन हेतुना सोऽयमवतार उशत्तमः कमनीयतमः, अभीष्टतम इत्यर्थः ॥ १४ ॥ ॐ ॐ मत्स्यावतारमाह-रूपमिति। चाक्षुषमन्वन्तरे य उदधीनां सम्प्लवः संश्लेषस्तस्मिन् सति स भगवान् दशमं मात्स्यं रूपं जगृहे। तदवतारप्रयोजनमाह-नावीति। वैवस्वतमनुरूपेण जनिष्यमाणं सत्यव्रतनामकं राजानं महीमय्यां नावि नौकारूपेण जातायां मह्यामारोप्य अपात् ररक्षेत्यन्वयः ॥ १५ ॥ ॐ ॐ कूर्मावतारमाह-सुरासुराणामिति। एकादशे त्ववतारे सुरासुराणां अमृतार्थमुदधिं मथ्नतां सतां कमठरूपेण विभुः सर्वथाभवनसर्वकरणसमर्थो भगवान् स्वपृष्ठे मन्दरसञ्ज्ञकमचलं दध्रे दधारेत्यन्वयः ॥ १६ ॥

हिन्दी अनुवाद

राजा नाभिकी पत्नी मेरुदेवीके गर्भसे ऋषभदेवके रूपमें भगवान्ने आठवाँ अवतार ग्रहण किया। इस रूपमें उन्होंने परमहंसोंका वह मार्ग, जो सभी आश्रमियोंके लिए वन्दनीय है, दिखाया ॥ १३ ॥ ❀ ❀ ऋषियोंकी प्रार्थनासे नवीं बार वे राजा पृथुके रूपसे अवतीर्ण हुए। शौनकादि ऋषियों! इस अवतारमें उन्होंने पृथ्वीसे समस्त औषधियोंका दोहन किया था, इससे यह अवतार सबके लिये बड़ा ही कल्याणकारी हुआ ॥ १६ ॥ ❀ ❀ चाक्षुष मन्वन्तरके अन्तमें जब सारी त्रिलोकी समुद्रमें डूब रही थी, तब उन्होंने मत्स्यके रूपमें दसवाँ अवतार ग्रहण किया और पृथ्वीरूपी नौकापर बैठकर अगले मन्वन्तरके अधिपति वैवस्वत मनुकी रक्षा की ॥ १५ ॥ ❀ ❀ जिस समय देवता और दैत्य समुद्र-मन्थन कर रहे थे, उस समय ग्यारहवाँ अवतार धारण करके कच्छपरूपसे भगवान्ने मन्दराचलको अपनी पीठपर धारण किया ॥ १६ ॥

धान्वन्तरं द्वादशमं त्रयोदशममेव च। अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥ १७ ॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम्। ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥ १८ ॥
पञ्चदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥ १९ ॥
अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्। त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धन्वंतर्यवतारमाह। धान्वंतरं धन्वंतरिरूपम्। द्वादशमादिप्रयोगस्त्वार्षः। त्रयोदशतममेव रूपं तच्चरितेन सह दर्शयति। अपाययदित्यत्र सुधामित्यध्याहारः। मोहिन्या स्त्रिया तद्रूपेणान्यानसुरान्मोहयन् धन्वंतरिरूपेणामृतमानीय मोहिन्याऽपाययदित्यर्थः ॥ १७ ॥ ❀ ❀ नृसिंहावतारमाह। नारसिंहं रूपं बिभ्रत् एरकां निर्ग्रंथितृणम् ॥ १८ ॥ ❀ ❀ वामनावतारमाह। पंचदशमिति। दुष्टानां मर्दं वामनयतीति वामनकं रूपं ह्रस्वं वा, प्रत्यादित्सुस्तस्मादाच्छिद्य ग्रहीतुमिच्छुः ॥ १९ ॥ ❀ ❀ परशुरामावतारमाह। अवतार इति। त्रिस्त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारानेकविंशतिवारानित्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बिभ्रदिति शेषः। इत्यर्थ इति। अवतारद्वयकर्म चेत्थं ज्ञेयमिति भावः ॥ १७ ॥ ❀ ❀ निर्ग्रन्थिर्ग्रन्थिरहितोतिलंबायमानस्तृणविशेषः। कटस्तृणास्तरणम्। ऊर्जितमतिबलिनम् ॥ १८ ॥ ❀ ❀ अध्वरो यागः ॥ १९ ॥ ❀ ❀ त्रयो वारा इति त्रिः। सुच्प्रत्ययः। सप्तवारान् इति सप्तकृत्वः। इत्यर्थ इति। त्रिगुणिताः सप्तैकविंशतिर्भवन्तीति भावः ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

कटकृदिति। 'कटः पुंसि किलिञ्जक' इत्यमरः। तत्कृततृणविशेषेणास्तरणनिर्म्मातेत्यर्थः ॥ १८ ॥ ❀ ❀ पदत्रयमिति। अत्र पदशब्देन छलः पदं स्थानं पृथिव्यादिपादपरिमितभूमिश्च इति व्याख्यालेशः ॥ १९-२७ ॥

श्रीमद्वीरराघवव्याख्या

द्वादशमं वपुस्तु धान्वन्तरं धान्वन्तराख्यजीवानुप्रवेशरूपमित्यर्थः। त्रयोदशमं तु रूपं तु यन्मोहिन्याख्ययाऽन्यानसुरान् मोहयन्सुरानमृतमपाययत् तदेव मोहिनीरूपं त्रयोदशमित्यर्थः ॥ १७ ॥ ❀ ❀ नारसिंहं चतुर्दशं रूपं बिभ्रदूर्जितं बलिष्ठं दैत्येन्द्रं हिरण्यकशिपुं वक्षसि करजैर्नखैर्ददार यथा कटकृदास्तरणकृदेरकांस्तदर्थतृणविशेषान्विदारयति तद्वत् ॥ १८ ॥ ❀ ❀ वामनकं वामनाख्यं पंचदशं वपुः कृत्वा धृत्वा बलेरध्वरं यज्ञवाटमगाज्जगाम प्रयोजनमाह त्रिविष्टपं प्रत्यादित्सुराहृत्येन्द्राय दातुमिच्छुः पदत्रयं पदत्रयव्याजेन त्रिलोकीं याचमानः याचिष्यमाणोऽध्वरमगादित्यन्वयः ॥ १९ ॥ ❀ ❀ षोडशमेऽवतारे-भार्गवरामाख्यो नृपान् कार्तवीर्यादीन् ब्रह्मद्रुहः ब्रह्मकुलद्रोहकान् नृपान् कुपितः त्रिःसप्तकृत्वः एकविंशतिवारं महीं निःक्षत्रां क्षत्रबीजरहितामकरोत् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

द्वादशमवतारं धान्वन्तरं धन्वन्तर्याख्यरूपसम्बन्धिनं विदुः। स हरिर्यस्मिन् अवतारे मोहिन्या मोहकशक्तिमत्या स्त्रिया स्त्रीमूर्त्याऽन्यानसुरान् मोहयन् सुधामपाययत्तं त्रयोदशमेव विदुरित्येकान्वयः। चशब्दो मोहयन्नित्युक्त्या मायामयं तद्रूपमिति शंकानिरासार्थः ॥ १७ ॥ ❀ ❀ नरसिंहसम्बन्धिविग्रहं बिभ्रत्स भगवान् करजैर्नखैरूर्जितं हिरण्यकशिपुम् ऊरौ अंके

निपात्य तथा ददार यथा कटकृत्तृगास्तरणकर्ता एरकान् दीर्घाकारांस्तृणविशेषान् ददार दारयति तमवतारं चतुर्दशं विदुरित्येकान्वयः ॥ १८ ॥ ❀ ❀ त्रिविष्टपं त्रैलोक्यं प्रत्यादित्सुः बलेराच्छिद्य इन्द्रायेदं दातुकामः तदर्थं बलिं पदत्रयं याचमानः स पद्मनाभः पंचदशमवतारं वामनसम्बन्धिनं कृत्वा बलेरध्वरं यज्ञमगादित्यन्वयः ॥ १९ ॥ ❀ ❀ षोडशतमे अवतारे स भगवान् जमदग्निसुतो भूत्वा ब्रह्मद्रुहः ब्रह्मद्रोहिणो नृपान् यच्छन् घ्नन् त्रिः सप्तकृत्वः एकविंशतिवारं महीं निःक्षत्रियां क्षत्रियजातिरहिताम-करोदित्येकान्वयः । कुपिताकारं दर्शयन्न तु कुपितः । न हि ईश्वरस्य कोपः संभवत्यशक्तस्य सः 'कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदि'ति हेयत्वात्तस्येति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

धान्वन्तरमिति । बिभ्रदित्युत्तरेणान्वयः । द्वादशमं धान्वन्तरं रूपं बिभ्रत् । त्रयोदशञ्च मोहिनीरूपं बिभ्रत् सुरान-पाययत् सुधामिति शेषः, केन रूपेण मोहिन्या स्त्रिया तद्रूपेणेत्यर्थः । किं कुर्व्वम् अन्यानसुरान् मोहयन् धन्वन्तरिरूपेण सुधाञ्चोप-हरन्निति शेषः । अजितस्यावतारा एते त्रयः ॥ १७ ॥ १८ ॥ ❀ ❀ पञ्चदशमिति । कृत्वा प्रकटयन् ॥ १९ ॥ ❀ ❀ अवतार इति । अवतारे श्रीपरशुरामाभिधे ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धान्वन्तरं धन्वन्तर्यवतारस्वरूपं द्वादशमं भवतीत्यन्वयः । सुधाकलशानयनं चास्य कर्म्म ज्ञेयम् । द्वादशमादिः प्रयोगस्त्वार्षः । त्रयोदशमं रूपं बिभ्रत् सुरानपाययत् सुधामिति शेषः, केन रूपेण मोहिन्या स्त्रिया अन्यानसुरान् मोहयन् ॥ १७ ॥ ❀ ❀ एरका निर्ग्रन्थितृणविशेषः ॥ १८ ॥ ❀ ❀ प्रत्यादित्सुस्तस्मादाच्छिद्य ग्रहीतुमिच्छुः ॥ १९ ॥ ❀ ❀ सप्तकृत्वः सप्तवारान् कीदृशान् त्रिः त्रिगुणितान् । अत्र सप्तकृत्व इति कृत्वसुचाभिहिताया अभ्यावृत्तिक्रियायाः पुनरभ्यावृत्ति-गणनेन सुच् प्रत्ययः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नारसिंहरूपं बिभ्रत् दैत्येन्द्रं हिरण्यकशिपुम्, एरका निर्ग्रन्थिस्तृणजातिः ॥ १७–१८ ॥ ❀ ❀ वामना-वतारमाह वामनकं ह्रस्वं रूपं कृत्वा प्रत्यादित्सुः आदातुमिच्छुः ॥ १९ ॥ ❀ ❀ परशुरामावतारमाह अवतारे इति ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एकस्य द्विरूपमाह धान्वन्तरमिति । अत्र मादेशश्छान्दसः द्वादशे मातीति वा, धन्वन्तरिपदेनैव आयुर्वेदप्रवर्त्तनादेः स्पष्टत्वात् प्रकृते त्वन्यार्थकथनात् नावतारप्रयोजनमित्युक्तं धान्वन्तरमेव त्रयोदशमम् । एवं च सन्देहविरोधनिवारको धान्वन्तरं रूपं धन्वन्तरेः सम्बन्धिदेवकर्तृकपानकर्मत्वादमृतस्य न भगवत्कार्यमिति प्रयोजककर्त्तरि सुरा एव कर्तृत्वेनोक्ताः, अर्थादमृतमत्र त्रयोदशस्यैव चरित्रमुच्यते अपाययदिति अन्यानसुरान् स्त्रिया करणभूतया अमोहयदिति च । अयमभिप्रायः नहि भगवान्स्त्रीरूपेण सर्वैर्दृश्यते सुरैर्भगवद्रूपेणैव दृश्यते । राहुसूचनाच्च, अतो वस्तुतो धन्वन्तरिरूपमेव । आकृत्यन्तरबोधनं तु सामर्थ्यात् अमृतहस्तस्य निर्गतस्य विच्छेदेनास्य रूपस्य दर्शनात् त्रयोदशत्वम् ॥ १७ ॥ ❀ ❀ एवं चतुष्टयं निरूप्य पुनरन्येनोत्कृष्टप्रकारेण परम्परां निरूपयितुं नारायणवत् नृसिंहं निरूपयति पुष्टिमार्गोऽयमिति पूर्वस्माद्विशेषः, पूर्वस्य क्रमस्य विवक्षितत्वाच्चतुर्दशत्वं नरसिंहसम्बन्धि नारसिंहं रूपं द्विरूपत्वेनालौकिकत्वात् पुष्टित्वम् । अत्र हि भक्तिरेव मुख्या यतः स्वीयमपि हत्वा तदीयं पालितवान् दैत्येन्द्रं हत्वा दैत्यं च इन्द्रपदेनावध्यता सूचिता वधे हेतुरूर्जितमिति करजैर्नखैः ऊराविति ब्रह्मवाक्यसत्यकरणार्थम् एरका कटतृणविशेषः, नखैर्दारणे दृष्टान्तः कटकृद्यथेति लोकहितार्थं तद्वध इति सूचितम् ॥ १८ ॥ ❀ ❀ एवं भक्तिमार्गे नवावतारान् कथयन् प्रथमं प्रह्लादरक्षको नृसिंहो मुख्य इति मूलत्वेन कथितः ततो ब्रह्मभावेन त्रयः, त्रयश्च क्षत्रभावेन, एको वैश्यभावेन, पुनरग्रिमस्य मूलरूपमेकेनेति नवधा निरूपणं भक्तिरनवच्छिन्ना न निवर्त्तत इति सायुज्यसेवारम्भवत् कलेरग्रिमारम्भ इति हेतुः कश्यपाददित्यां जातो वामनेन रूपेण ब्रह्मचारी पञ्चदशः । अवामनोपि वामनकं रूपं कृत्वा बलेरध्वरमगादिति भक्तहितार्थं स्वस्य धर्मस्य चान्यथा करणं पूर्वस्माद्विशेषः । प्रत्यादानं दत्तस्य पुनर्ग्रहणम् इह परमात्मनः पदत्रयं गमने कामितोर्थ उत्तरार्द्धनिरूपितः चरित्रं तु गमनमेव ॥ १९ ॥ ❀ ❀ क्षत्रियायां जातं परशुरामरूपं षोडशम् । सप्तधा जननेति बीजत्वं जातं पुनर्ब्राह्मणादुत्पन्नाः समृद्धाः । पुनः सप्तधा एवमेकविंशतिधा, निःक्षत्रिया पृथिवी कृता पितृवधस्य निमित्तत्वेपि ब्रह्मरक्षैव हेतुः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

धान्वन्तरमित्यत्र। धन्वन्तर्यवतारस्य किं प्रयोजनममृतपानादेर्मोहिन्यवतारकार्यत्वेनाष्टमे कथितत्वादित्याशंकायामाहुः धन्वन्तरीत्यादि । तथा चायुर्वेदप्रवर्तनादिकमेव प्रयोजनमित्यर्थः । स्फुटं तर्हि प्रकृते कुतो नोक्तिमित्यत आहुः प्रकृत इत्यादि ।

आयुर्वेदस्य जीवार्थत्वेन तदवतारेऽनुपयोगान्न तत्त्वेन स्फुटमुक्तमित्यर्थः। ननु पानकर्मत्वेनामृते वक्तव्ये देवा एव किमित्युक्ता इत्यपेक्षायामाहुः देवेत्यादि। न भगवत्कार्यमिति। तत्पानमिति शेषः। प्रयोजककर्तरीति। पाययितरि मोहिनीरूपे। कर्मत्वेनेति। कर्तुरीप्सिततमत्वेनेति भावः। सर्वैर्न दृश्यत इत्यत्र मानमाहुः सुरैरित्यादि। मूले 'मोहिन्याऽन्यानमोहय' दित्युक्त्वा देवानां मोहाभावात् तथेत्यर्थः। ननु मोहस्य भावजनकत्वेनोक्तत्वात्तदभाव एव सुराणामस्तु, स्त्रीरूपादर्शने किं मानमत आहुः राहुसूचनादिति। यदि चन्द्रार्काभ्यां स्त्रीरूपं दृष्टं स्यात्, तदा तस्यां राहुदण्डसामर्थ्याभावात् तस्यै सूचनमसंगतं स्यात्, अतस्तदन्यथानुपपत्तिरेव तथेत्यर्थः। नन्वेवं सत्येकमेव रूपमिति संख्याविरोध इत्यत आहुः अमृतेत्यादि। विच्छेदेनेति। विभागेन। तथा च धन्वन्तरिविभक्तत्वेन दैत्यैर्दर्शनात्संख्याया अविरोध इत्यर्थः॥ १७॥ ❀ ❀ चतुर्दशमित्यत्र। नारायणवदिति। यथा नारायणः साक्षाद्भगवदवतारः, तथा नृसिंह इत्यर्थः। स्वीयमिति। द्वारपालम्। तदीयमिति पुत्रम्। ऊर्जितमिति। अवध्यत्वहर्षेण भिन्नमर्यादम्। ननु पुनर्मूलरूपनिरूपणेऽस्य किं प्रयोजनमित्याकांक्षायां तदाहुः भक्तिरित्यादि। मूलरूपे जातभक्तिर्मूलरूपानवच्छिन्ना अंशमात्रपर्यवसानेन निवर्तत इति ज्ञापनाय पुनस्तदुक्तिरित्यर्थः। कल्केर्मूलरूपत्वं कथमित्यत उपपत्तिमाहुः सायुज्य इत्यादि। भगवत्स्वरूपैक्ये सेव्यसेवकभावनिवृत्तावपि भगवत्सामर्थ्येनैव पुनर्भेदाद्यथा सेवारम्भः, तथात्र सकलसाधननिवृत्तावपि भगवदङ्गरागसुगन्धसंसर्गमात्रेण पुनः कृतारम्भ इति तादृशसाथर्थ्यमेव मूलत्वे हेतुरित्यर्थः॥१८॥ ❀ ❀ पञ्चदशमित्यत्र। धर्मस्येति। ऐश्वर्यस्येत्यर्थः। पूर्वस्मादिति। नृसिंहस्वरूपात्-पूर्वोक्तेभ्यश्चतुर्दशभ्यो वा। इह परात्मान इति। इहलोकपरलोकदेहाः॥ १९॥

श्रीगिरिधरकृता बालप्रबोधिनी

अवतारद्वयमाह-येन तु रूपेणामृतं प्रगृह्य समुद्राद्विनिस्सृतस्तत्तु धान्वन्तरं रूपं द्वादशमित्यन्वयः। येन तु मोहिन्या स्त्रिया मोहिनीस्त्रीरूपेण अन्यान् असुरान् मोहयन् सुरान् स्वभक्तान् अमृतमपाययत्तच्च त्रयोदशमेव रूपमित्यन्वयः। अत्रोभयत्र मट्प्रत्ययप्रयोगः आर्षः॥ १७॥ ❀ ❀ नरसिंहावतारमाह-चतुर्दशमिति। चतुर्दशं नारसिंहरूपं बिभ्रत् ऊर्जितं वृद्धमतिबलिष्ठं दैत्येन्द्रं हिरण्यकशिपुं वक्षसि करजैर्नखैर्ददारेत्यन्वयः। तत्रानायासेन विदारणे दृष्टान्तमाह-एरकामिति। एरकां निर्ग्रन्थितृणं यथा कटकृदास्तरनिर्माता विदारयति तथेत्यर्थः॥ १८॥ ❀ ❀ वामनावतारमाह-पञ्चदशमिति। पञ्चदशेऽवतारे वामनकं ह्रस्वं वपुः कृत्वा बलेरध्वरं यज्ञवाटमगात् जगामेत्यन्वयः। तत्प्रयोजनमाह-पदत्रयं याचमान इति। ईश्वरः स्वयं कथं पदत्रयं याचमानो जात इत्यपेक्षायामाह-प्रत्यादित्सुस्त्रिविष्टपमिति। तस्माद्धर्मात्मनः स्वभक्ताद्बलात्कारेण स्वर्गग्रहणस्यानुचितत्वात् पदत्रययाञ्चाव्याजेन त्रिविष्टपं स्वर्गमिन्द्राय दातुं प्रत्यादित्सुस्तस्मादाच्छिद्य गृहीतुमिच्छुः सन्नित्यर्थः॥ १९॥ ❀ ❀ परशुरामावतारमाह-अवतार इति। षोडशेऽवतारे भार्गवो रामस्तु नृपान् कार्तवीर्यार्जुनादीन् ब्रह्मद्रुहो ब्राह्मणकुलद्रोहकर्तॄन् पश्यन् कुपितः सन् त्रिस्सप्तकृत्वः त्रिस्सप्तवारान् एकविंशतिवारान् महीं निःक्षत्रां क्षत्रियबीजरहितामकरोदित्यन्वयः॥ २०॥

हिन्दी अनुवाद

बारहवीं बार धन्वन्तरिके रूपमें अमृत लेकर समुद्रसे प्रकट हुए और तेरहवीं बार मोहिनीरूप धारण करके दैत्योंको मोहित करते हुए देवताओंको अमृत पिलाया॥ १७॥ ❀ ❀ चौदहवें अवतारमें उन्होंने नरसिंहरूपधारण किया और अत्यन्त बलवान् दैत्यराज हिरण्यकशिपुकी छाती अपने नखोंसे अनायास इस प्रकार फाड़ डाली, जैसे चटाई बनानेवाला सींकको चीर डालता है॥ १८॥ ❀ ❀ पंद्रहवीं बार वामनका रूप धारण करके भगवान् दैत्यराज बलिके यज्ञमें गये। वे चाहते तो थे त्रिलोकीका राज्य, परन्तु माँगी उन्होंने केवल तीन पग पृथ्वी॥ १९॥ ❀ ❀ सोलहवें परशुराम अवतारमें जब उन्होंने देखा कि राजालोग ब्राह्मणोंके द्रोही हो गये हैं, तब क्रोधित होकर उन्होंने पृथ्वीको इक्कीस बार क्षत्रियोंसे शून्य कर दिया॥ २०॥

ततः सप्तदशे जातः सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः॥ २१॥
नरदेवत्वमापन्नः सुरकार्यचिकीर्षया। समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्॥ २२॥
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरम्॥ २३॥
ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाजनसुतः[1] कीकटेषु भविष्यति॥ २४॥

1. प्रा० पा०—जिनसुतः।

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यासावतारमाह । तत इति । अल्पमेधसोऽल्पप्रज्ञान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥ २१ ॥ ❀ ❀ रामावतारमाह नरेति । नरदेवत्वं राघवरूपेण प्राप्तः सन् । अतः परमष्टादशे ॥ २२ ॥ ❀ ❀ रामकृष्णावतारमाह । एकोनेति । विंशतितम इति वक्तव्ये तकारलोपश्छंदोनुरोधेन । रामकृष्णावित्येवं नामनी प्राप्य ॥ २३ ॥ ❀ ❀ बुद्धावतारमाह । तत इति । अजनस्य सुतः । जिनसुत इति पाठे । जिनोऽपि स एव । कीकटेषु मध्ये गयाप्रदेशे ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सर्वव्यापी ॥ २१ ॥ ❀ ❀ समुद्रनिग्रहस्याद्यापि सेतुबन्धरूपेण दृश्यमानत्वात्तत्रैव च महैश्वर्यस्याविष्काराच्च । तस्यैव प्राधान्येन निर्देशः समुद्रनिग्रहादीनीति ॥ २२ ॥ ❀ ❀ भगवानिति । साक्षाच्छ्रीभगवत एवाविर्भावोऽयं न तु पुरुषसंज्ञस्यानिरुद्धस्येति विशेषप्रतिपत्त्यर्थम् । तत्र तस्य साक्षाद्रूपत्वात्कृष्णरूपेण निजांशरूपत्वाद्रामरूपेणापि भारहारित्वं भगवत एवेत्युभयत्रापि भगवानहरद्भरमिति श्लिष्टमेव । अतो रामस्याप्यनिरुद्धावतारत्वं प्रत्याख्यातम् । श्रीकृष्णस्य वासुदेवत्वाच्छ्रीरामस्य संकर्षणत्वात् युक्तमेव च तदिति ॥ २३ ॥ ❀ ❀ सुरद्विषां त्रिपुरवासिनां दैत्यानामयोग्यानां वेदमार्गे प्रवर्त्तमानानां संमोहाय मोहनाय कीकटेषु मगधेषु "निन्द्ये नीवृति कीकट" इत्यभिधानात् । नीवृद्देशः स च "अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च । तीर्थयोगं विना गत्वा पुनः संस्करमर्हति" इत्यादिस्मृत्युक्तेः ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

ततः सप्तदशेऽवतारे पराशरात्सत्यवत्यां जातो बादराणाय इति प्रसिद्धः अल्पमेधसः कृत्स्नवेदतदर्थावगमोपयुक्तबुद्धिशून्यान्पुंसः पुरुषान् दृष्ट्वा वेद एव तरुस्तस्य शाखाश्चक्रे ऋग्यजुःसामादिभेदेन तदवांतरभेदेन च विभक्तवानित्यर्थः ॥ २१ ॥ ❀ ❀ नरदेवत्वमिति अतः । परमष्टादशेऽवतारे सुरकार्यं रावणवधरूपं कर्त्तुमिच्छया नरदेवत्वं क्षत्रियत्वं प्राप्तः श्रीरामरूपेणावतीर्ण इत्यर्थः । समुद्रविषयको निग्रहः आदिर्येषां तानि वीर्याणि कर्माणि चक्रे ॥ २२ ॥ ❀ ❀ एकोनविंशे विंशतिमे चावतारे भगवान् वृष्णिषु यादवेषु रामकृष्णाविति जन्मनी रामः बलरामः कृष्णश्चेति द्वे जन्मनी प्रादुर्भावरूपे प्राप्य भुवो भारमहरत् रामस्त्वेकोनविंशः कृष्णस्तु विंशतितमोवतार इत्यर्थः ॥ २३ ॥ ❀ ❀ ततः कलौ युगे संप्रवृत्ते सति सुरद्विषामार्हतानामसुराणां वा संमोहनार्थं भगवान् कीटकेषु जिनस्य सुतो भविष्यति नाम्ना बुद्ध इति प्रसिद्धः । अयमेव विंशोवतारः ॥२४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

ततः स हरिः सप्तदशेऽवतारे पराशरात्सत्यवत्यां जातोऽल्पमेधसः अल्पप्रज्ञान् पुरुषान् दृष्ट्वा वेदतरोः शाखाश्चक्रे कृतवान् । रामावतारात्पूर्वं व्यासावतारसत्त्वं ज्ञेयम् ॥ २१ ॥ ❀ ❀ अतः परं सप्तदशात्परं पश्चादष्टादशावतारे देवकार्यकरणेच्छया नरदेवत्वं राजत्वं प्राप्तः समुद्रनिग्रहादीनि सेतुबंधनपूर्वाणि वीरकर्माणि कृतवानित्येकान्वयः ॥ २२ ॥ ❀ ❀ स भगवानेकोनविंशतितमेऽवतारे वृष्णिषु नाम्ना रामकृष्णाविति जन्मनी प्राप्य भुवो भरमसुरप्रतनालक्षणमहरदित्येकान्वयः । जन्मनी इति द्विवचनाद् बलभद्रे विशेषावेशो ज्ञातव्यः ॥ २३ ॥ ❀ ❀ ततः कलौ युगे संप्रवृत्ते सति सुरद्विषां त्रिपुरवासिनां दैत्यानामयोग्यानां वेदमार्गे प्रवर्त्तमानानां मोहाय नाम्ना बुद्धः कीकटेषु मगधविषयेषु जिनसुतः जिनेन सुतत्वेन वृतः भविष्यतीत्यन्वयः ॥२४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततः सप्तदश इति स्पष्टम् ॥ २१ ॥ ❀ ❀ नरदेवत्वमिति । अस्य स्कान्दे श्रीरामगीतायां विश्वरूपं दर्शयतो ब्रह्मविष्णुरुद्रकृतस्तुतिः श्रूयते ॥ २२ ॥ ❀ ❀ एकोनविंशः इति भगवानिति साक्षात् श्रीभगवत एवाविर्भावोऽयं न तु पुरुषसंज्ञस्यानिरुद्धस्येति विशेषप्रतिपत्त्यर्थं तत्र तस्य साक्षाद्रूपत्वात् श्रीकृष्णरूपेण निजांशरूपत्वाद्रामरूपेणापि भारहारित्वं भगवत एवेत्युभयत्रापि भगवानहरद्भरमिति श्लिष्टमेव । अतो रामस्याप्यनिरुद्धावतारत्वं प्रत्याख्यातम् । श्रीकृष्णस्य वासुदेवत्वात् श्रीरामस्य च सङ्कर्षणरूपत्वात् युक्तमेव च तदिति ॥ २३-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या

अल्पमेधसोऽल्पज्ञान् । चक्रे व्यासः ॥ २१ ॥ ❀ ❀ नरदेवत्वं श्रीरामत्वं समुद्रनिग्रहादीनि समुद्रनिग्रहस्यैवाद्यापि सेतुबन्धरूपेण दृश्यमानत्वात् तत्रैव च महैश्वर्याविष्काराच्च तस्यैव प्राधान्येन निर्देशः ॥ २२ ॥ ❀ ❀ विंशतितम इति

वक्तव्ये तकारलोपश्छन्दोऽनुरोधेन। रामकृष्णाविति नामभ्यामित्यर्थः। जन्मनी प्रादुर्भावद्वयं प्राप्येत्यर्थः ॥ २३ ॥ ❀ ❀ अजनसुतोऽजिनसुतश्चेति पाठद्वयम्। कीकटेषु मध्ये गयाप्रदेशे ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीमद्वेदव्यासावतारमाह। तत इति ॥ २१ ॥ ❀ ❀ श्रीरामावतारमाह। नरदेवत्वमिति ॥ २२ ॥ ❀ ❀ एकोनविंशे विंशतितमे अवतारे रामकृष्णावित्येवं जन्मनी प्राप्य भुवो भरमहरत् रामः एकोनविंशः श्रीकृष्णः विंशतितमः अवतारः ॥ ❀ ❀ एकविंशः अवतारः कीकटेषु अजिनस्य सुतः नाम्ना बुद्धो भविष्यति ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ततः उपरिचरवसोः मत्स्यगर्भाज्जातायां दासीकन्यायां तथा पराशराज्जातो वेदव्यासः सप्तदशः प्रकृते तृतीयः वेदस्य तत्त्वं पूर्वं निरूपितं अनंतमूर्त्तेर्यज्ञस्य ब्रह्मशिरसः एका मूर्तिर्यावता वेदभागेन प्रतिपाद्यते सा एका शाखा स एवमन्याश्च यद्यपि ब्राह्मणेन सर्वो वेदः पठनीयस्तथापि प्रमेयबलमालंब्य एकैव मूर्तिः सर्वा मूर्त्तय इत्यल्पमेधसोपि पुरुषस्य वेदाध्ययनं भक्त्यर्थमपरश्च कालो यथावशिष्यते तदर्थं खंडशः कृतवानित्यर्थः ॥ २१ ॥ ❀ ❀ भिन्नप्रक्रमार्थे रघुनाथादिरूपत्रयं वक्तुं ततः परमित्युक्तम्। क्षत्रियभावोत्र विवक्षितः। यद्यपि सोमसूर्यभावेन द्विविधः तथापि सोमस्य वृद्धि क्षयरूपत्वेन द्विरूपत्वात् त्रेधा निरूपणं नरदेवत्वं राजत्वं सुरकार्यं रावणवधः अवतारचरित्रं समुद्रनिग्रहः तथा मरुस्थलीकरणं परशुरामजयः बालिवधश्चेत्यादिशब्दार्थः ॥ २२ ॥ ❀ ❀ अतः परमष्टादशे बलरामे आवेशः कृष्णावतारः। एकोनविंशे विंशतिमे। अत्र तकारलोपः छांदसः। वस्तुतः सोमस्यैकत्वादेकश्लोकेन निरूपणं वार्ष्णेय इति वक्तव्ये अव्यादयस्तद्राजा इति तद्राजसंज्ञायां 'तद्राजस्य बहुषु। २।४।६२।' इति प्रत्ययलोपे वृष्णिष्वित्युक्तम्। अत्र हि चतुर्णामवताराणां कृष्णरूपं स्थानं नारायणांशस्य केशस्य सुतपावृष्णिप्रसन्नस्य भगवतश्च तत्रैकमेव रूपं बहुवृष्णिषु प्राप्तिरूपत्वेन विवक्षितम्। बलरामस्त्वेक एव, एवं पंचावताराः जन्मद्वयं तदुक्तं वृष्णिषु प्राप्य जन्मनी इति। ततश्च लोके नामद्वयं प्रसिद्धमित्याह रामकृष्णाविति जन्मविशेषणं कार्यं तु भगवतैव कृतमित्याह भगवानहरद्भरमिति। भूभारहरणम् अवतारकार्यं सामान्यतो लोकप्रसिद्धम् ॥ २३ ॥ ❀ ❀ भिन्नप्रक्रमार्थं कलौ सम्यक् प्रवृत्ते तद्धर्मप्रचारे जाते सुरद्विषां दैत्यराक्षसानां वैदिकेषूत्पन्नानां वेदत्यजनार्थं कीकटदेशेषु जिनस्य अजिनस्य वा सतो बुद्धो जात इत्यर्थः ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ततः सप्तदश इत्यत्र। (प्रकृत इति। ब्रह्मभावेन निरूपणे तृतीय इत्यर्थः)। प्रमेयबलमालम्ब्येति। प्रमेयस्य यज्ञब्रह्मरूपस्य बलं भुक्तिमुक्तिदातृत्वरूपमालम्ब्य विचार्येत्यर्थः। भक्त्यर्थमित्यनेन प्रयोजनान्तरमुक्तम्। (अपरश्चेति। स्वशाखातिरिक्तो वेदभागः) ॥ २१ ॥ ❀ ❀ एकोनविंश इत्यत्र। अत्र तकारलोप इति विंशतिमशब्दे तमप्प्रत्ययतकारलोपः ॥ २३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

व्यासावतारमाह-तत इति। तदनन्तरमल्पमेधसः कृत्स्नवेदतदर्थावगमोपयुक्तबुद्धिशून्यान् पुंसः पुरुषान् दृष्ट्वा सप्तदशेऽवतारे पराशरात् पितुः सकाशात् सत्यवत्यां मातरि जातः सन् वेदरूपस्य तरोः शाखाश्चक्रे। यथाऽल्पबुद्धिभिरपि पाठतोऽर्थतश्च धारयितुं शक्यते तथा ऋगादिविभागान् कृतवानित्यर्थः ॥ २१ ॥ ❀ ❀ श्रीरामावतारमाह-नरदेवत्वमिति। अतःपरमष्टादशेऽवतारे सुराणां कार्यं रावणवधादिरूपं तस्य कर्तुमिच्छया भगवान्नरदेवत्वं राजत्वमापन्नः प्राप्तः सन् समुद्रस्य निग्रहः आदिर्येषां तानि वीर्याणि कर्माणि चक्रे इत्यन्वयः ॥ २२ ॥ ❀ ❀ श्रीरामकृष्णावतारमाह-एकोनविंशे विंशतितमे चावतारे भगवान् वृष्णिषु यादवेषु रामकृष्णावित्येवंनामनी जन्मनी प्राप्य भुवो भारमहरदित्यन्वयः। विंशतितमे इति वक्तव्ये तकारलोपश्छान्दसः ॥ २३ ॥ ❀ ❀ बुद्धावतारमाह-तत इति। तदनन्तरं कलौ सम्प्रवृत्ते सति सुरद्विषां दैत्यासुरादीनां सम्मोहाय कीकटेषु गयाप्रदेशेषु जिनस्य सुतो नाम्ना च बुद्धो भविष्यतीत्यन्वयः। अजनसुत इति पाठान्तरमर्थस्तु समान एव ॥ २४ ॥

हिन्दी अनुवाद

इसके बाद सत्रहवें अवतारमें सत्यवतीके गर्भसे पराशरजीके द्वारा वे व्यासके रूपमें अवतीर्ण हुए। उस समय लोगोंकी समझ और धारणाशक्ति कम देखकर आपने वेदरूप वृक्षकी कई शाखाएँ बना दीं ॥ २१ ॥ ❀ ❀ अठारहवीं बार देवताओंका कार्य सम्पन्न करनेकी इच्छासे उन्होंने राजा के रूपमें रामावतार ग्रहण किया और सेतु-बन्धन, रावण वध आदि वीरतापूर्ण बहुत-सी लीलाएँ कीं ॥ २२ ॥ ❀ ❀ उन्नीसवें और बीसवें अवतारमें उन्होंने यदुवंशमें बलराम और श्रीकृष्णके नामसे प्रकट होकर पृथ्वीका भार उतारा ॥ २३ ॥ ❀ ❀ इसके बाद कलियुग आ जानेपर मगधदेश (बिहार) में देवताओंके द्वेषी दैत्योंको मोहित करनेके लिये अजनके पुत्ररूपमें आपका बुद्धावतार होगा ॥ २४ ॥

अथासौ युगसंध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥
अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः। यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥
ऋषयो मनवो देवा मनुपुत्रा महौजसः। कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्। इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कल्क्यवतारमाह अथेति। युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्सकाशाज्जनिता जनिष्यते ॥ २५ ॥ ❀ ❀ अनुक्तसर्वसंग्रहार्थमाह। अवतारा इति। असंख्येयत्वे दृष्टांतः। यथेति। अविदासिन उपक्षयशून्यात् दसु उपक्षय इत्यस्मात् सरसः सकाशात्कुल्याः क्षुद्रप्रवाहाः ॥ २६ ॥ ❀ ❀ विभूतीराह। ऋषय इति ॥ २७ ॥ ❀ ❀ तत्र विशेषमाह। एते चेति। पुंसः परमेश्वरस्य केचिदंशाः केचित्कला विभूतयश्च। तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणम्। कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः, तत्र कुमारादिषु ज्ञानावेशः। कृष्णस्तु भगवान् नारायण एव, आविष्कृतसर्वशक्तित्वात् सर्वेषां प्रयोजनमाह इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिका प्रकाशः

युगादावंशः युंगाते संध्या च भवति। तच्च तृतीयस्कन्धे वक्ष्यति "संध्यांशयोरन्तरेण" इत्यादिना। कलिं युगं जनानां क्लेशं वा कृणोति हिनस्तीति कल्किः। कृ हिंसायामत औणादिकडिप्रत्यये कलेरिकारलोपे रूपसिद्धिः ॥ २५ ॥ ❀ ❀ अथ श्रीहयग्रीवहरिहंसपृश्निगर्भविभुसत्यसेनवैकुण्ठाजितसार्वभौमविष्वक्सेनधर्मसेतुसुधामयोगेश्वरबृहद्भान्वादीनां शुक्लादीनां चानुक्तानां संग्रहार्थमाह–अवतारा इति। असंख्याताः सहस्रशः संभवंति। हि प्रसिद्धौ। असंख्येयत्वे हेतुः सत्त्वनिधेः सत्त्वस्य स्वप्रादुर्भावशक्तेः शेवधिरूपस्य। तत्रैव दृष्टांतः यथेति। कुल्यास्तत्स्वभावकृता निर्वारा अविदासिनः सहस्रशः संभवन्तीत्यर्थः। अत्र येंशावतारास्तेषु चैव विशेषो ज्ञेयः। श्रीकुमारनारदादिष्वाधिकारिकेषु ज्ञानशक्त्यंशावेशः श्रीपृथ्वादिषु क्रियाशक्त्यंशावेशः। क्वचित्तु स्वयमेवावेशस्तेषां भगवानेवाहमिति वचनात्। अथ श्रीमत्स्यदेवादिषु साक्षादंशत्वमेव। तत्रांशत्वं नाम साक्षाद्भगवत्त्वेप्यव्यभिचारितादृशतदिच्छावशात्सर्वदैवैकदेशतया वानभिव्यक्तशक्त्यादिकत्वमिति ज्ञेयम्। तथैवोदाहरिष्यते। रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोदित्यादि। विश्वनाथस्तु सत्त्वानां शुद्धसत्त्वचिदंशानां निधेः। श्लेषेण तु पुरुषाद्या अवताराः ख्याता अन्ये तु न सम्यक्ख्याता वर्त्तंते एवेति ज्ञाप्यते। तदुक्तं प्रह्लादेन "इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्त्वम् ॥" इति। छन्नत्वादेवासंख्यात इत्यर्थः ॥ २६ ॥ ❀ ❀ अल्पशक्तेः प्रकाशत्वाद्विभूतित्वम् ॥ २७ ॥ ❀ ❀ तत्र तेषु अंशः शक्तिसमावेशः। कलाज्ञानं बोधनम्। "सर्वेश्वरोहमत्रैव राधिकाप्राणवल्लभः" इति नन्दिनीं सखीं प्रति श्रीकृष्णवाक्यमादिपुराणीयवृन्दावनमाहात्म्ये। अत्र संदर्भः। तदेवं परमात्मानं सांगमेव निर्द्धार्य प्रोक्तानुवादपूर्वकं श्रीभगवन्तमप्याकारेण निर्द्धारयति एत इति। एते पूर्वोक्ताः चादनुक्ताश्च प्रथममुद्दिष्टस्य पुंसः पुरुषस्यांशकलाः। केचित्स्वयमेवांशाः साक्षादंशत्वेनांशांशत्वेन द्विविधाः। केचिदंशाविष्टत्वादंशाः। केचित्तु कलाविभूतयोः इह यो वंशतितमावतारत्वेन कथितः कृष्णस्तु भगवान् एष पुरुषस्याप्यवतारी भगवानित्यर्थः। अत्र "अनुवादमनुक्त्वैव न विधेयमुदीरयेत्" इति दर्शनाच्छ्रीकृष्णस्यैव भगवत्त्वलक्षणो धर्मः साध्यते। न तु भगवतः श्रीकृष्णत्वमित्यायातम्। ततः श्रीकृष्णस्यैव भगवत्त्वलक्षणधर्मत्वे सिद्धे मूलत्वमेव सिध्यति न तु ततः प्रादुर्भूतत्वम्। एतदेव व्यनक्ति स्वयमिति। तत्र च स्वयमेव भगवान्न तु भगवतः प्रादुर्भूतत्वेन, न तु वा भगवत्त्वाध्यासेनेत्यर्थः। न चावतारप्रकरणे पठित इति संशयः। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायात्। यथा "अतिष्टोमे यद्युद्गाता विच्छिद्यादक्षिणेन यजते यदि प्रतिहर्त्ता सर्वस्वदक्षिणेन" इति श्रुतेः। तयोश्च कदाचिद् द्वयोरपि विच्छेदे प्राप्ते विरुद्धयोः प्रायश्चित्तयोः समुच्चयासंभवं च प्रायश्चित्तं सिद्धांतितं तद्वदिहापीति। अथवा "कृष्णस्तु भगवान्स्वयम्" इति श्रुत्या प्रकरणस्य बाधः। यथा शंकरशारीरिकभाष्ये "श्रुत्यादिबलीयस्त्वाच्च न बाधाः" इति सूत्रे "ते हैते विद्याचित एव" इति श्रुतिर्मनश्चिदादीनामग्नीनां प्रकरणप्राप्तं क्रियानुप्रवेशलक्षणमस्वातंत्र्यं स्थापयति तद्वदिहापि इति। अत एतत्प्रकरणमध्यत्र क्वचिदपि भगवच्छब्दमकृत्वा तत्रैव भगवानिति भगवानहरद्भरमिति कृतवान्। ततश्चास्यावतारेषु गणना तु स्वयं भगवानप्यसौ स्वरूपस्थ एव निजपरिजनवृन्दानन्दविशेषचमत्काराय किमपि माधुर्यं निजजन्मादिलीलया पुष्णन् कदाचित्सकललोकदृश्यो भवतीत्यपेक्षयैवेत्यागतम्। यथोक्तं ब्रह्मसंहितायां "रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद्भुवनेषु किन्तु। कृष्णः स्वयं समभवत्परमः पुमान्यो गोविंदमादिपुरुषं तमहं भजामि" इति।

अवतारश्च प्राकृतवैभवेऽवतरणमिति कृष्णसाहचर्याद्रामस्यापि पुरुषांशतात्पर्यो ज्ञेयः। अत्र तुशब्दोंशकलाभ्यः पुंसश्च सकाशाद्भगवतो वैलक्षण्यं बोधयति। यद्वानेन तुशब्देन सावधारणा श्रुतिरियं प्रतीयते। ततश्च सावधारणा श्रुतिर्बलवतीति न्यायेन श्रुत्यैव श्रुतमप्यन्येषां महानारायणादीनां स्वयं भगवत्त्वं गुणीभूतमापद्यते। एवं पुंस इति भगवानिति च प्रथममुपक्रमोद्दिष्टस्य तस्य शब्दद्वयस्य तत्सहोदरेण तेनैव चशब्देन प्रतिनिर्देशात्तावेव खल्वेताविति स्मारयति। उद्देशप्रतिनिर्देशयोरप्रतीतिः स्थगितता तन्निरसनाय विद्वद्भिरेक एव शब्दः प्रयुज्यते तत्समो वा। यथा ज्योतिष्टोमाधिकारे "वसन्ते ज्योतिषा यजेत" इत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवतीति। इन्द्रारीति पद्यार्द्धं तत्र नान्वेति। तुशब्देन वाक्यस्य भेदात्। तच्च तावतैवाकांक्षापरिपूर्तेः। एकवाक्यत्वे तु चशब्द एवाकरिष्यत। ततश्चेंद्रारीत्यत्रार्थत एव पूर्वोक्ता मृडयंतीत्यायाति। अत्र विशेषजिज्ञासायां कृष्णसंदर्भो द्रष्टव्यः। अत्र विश्वनाथः। नन्वेषां सर्वेषां तुल्यत्वमेवास्ति वा तारतम्यमित्यपेक्षायामाह—एते चेति। एते पूर्वोक्ताः चादनुक्ताश्च पुंसः प्रथमनिर्दिष्टस्य पुरुषस्यांशकलाः। केचिदंशा मत्स्यकूर्मवराहाद्याः केचित्कलाः कुमारनारदाद्याः आवेशाः। तदुक्तं भागवतामृते "ज्ञानशक्त्यादिकलया यत्राविष्टो जनार्दनः। त आवेशा निगद्यन्ते जीवा एव महत्तमाः॥ वैकुंठेऽपि यथा शेषो नारदः सनकादयः॥" तथा पाद्मे "आविष्टोभूत्कुमारेषु नारदे च हरिर्विभुः।" तथा तत्रैव "आविवेश पृथुं देवः शंखी चक्री चतुर्भुजः" इति। "एतत्ते कथितं देवि जामदग्नेर्महात्मनः। शक्त्यावेशावतारस्य चरितं शार्ङ्गिणः प्रभोः" इति। "कलेरन्ते च संप्राप्ते कल्किनं ब्रह्मवादिनम्। अनुप्रविश्य कुरुते वासुदेवो जगत्स्थितिम्" इति। अत्र कुमारनारदादिषु ज्ञानभक्तिशक्त्यंशावेशः। पृथ्वादिषु क्रियाशक्त्यंशावेशः। ते चावेशा महाशक्त्याऽल्पशक्त्या चेति द्विविधाः। प्रथमाः कुमारनारदाद्या अवतारशब्देनोच्यन्ते। द्वितीया मरीचिमन्वाद्या विभूतिशब्देनेति भेदो ज्ञेयः। इह यो विंशतितमावतारत्वेन कथितः स कृष्णस्तु भगवान्न त्वंशो न चांशी पुरुषः किं तु भगवान्। "जगृहे पौरुषं रूपं भगवान्महदादिभिः" इति पद्योक्तो यः पुरुषस्यावतारी भगवान्स एवेत्यर्थः। "अनुवादमनुक्त्वैव न विधेयमुदीरयेत्" इति दर्शनात्कृष्णस्यैव भगवल्लक्षणो धर्मः साध्यते। न तु भगवतः कृष्णत्वं तेन कृष्ण एव भगवान्मूलभूत इति तदेव पुनः स्पष्टीकुर्वन्नाह–स्वयमिति। तेन पुरुषावतारिणो भगवतो महानारायणादपि कृष्णस्योत्कर्षः साधितः। अत एव छान्दोग्ये पंचमप्रपाठके "ज्यायांश्च पुरुषः सर्वं खल्विदं ब्रह्म यत्प्राणा आदित्याः" इत्याद्युक्त्वा पश्चादुपसंहृतं "कृष्णाय देवकीपुत्राय" इत्यादिना। तेनात्र पुरुषादिभ्योपि श्रेष्ठो देवकीपुत्र एव ज्ञेयः। तदप्यवतारमध्ये तस्य गणनं तु भूर्लोकस्थमथुरादिधामविलासित्वान्नरलीलत्वात्प्रापंचिकलोकेषु करुणाधिक्यादाविर्भावतिरोभावाभ्याञ्च। तथा च गोपालतापनीश्रुतिः "सहोवाचाब्जयोनिरवताराणां मध्ये श्रेष्ठोऽवतारः को भविता येन लोकास्तुष्यंति देवास्तुष्टा भवंति यं स्मृत्वा मुक्ता अस्मात्संसाराद्भवन्ति" इति। ननु "तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः" इति। "दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवायनः" इति "ताविमौ वै भगवतो हरेरंशाविहागतौ" इत्यादिबहुवाक्यविरोधे "कृष्णस्तु भगवान्स्वयम्" इत्येकेनैव वाक्येन कृष्णस्य पूर्णत्वं कथं व्यवतिष्ठताम्? अत्रोच्यते। श्रीभागवतशास्त्रारंभे जन्मगुह्याध्यायोयं सर्वभगवदवतारवाक्यानां सूचकत्वात्सूत्रम्। तत्र च "एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्" इति परिभाषासूत्रम्। यत्र यत्रावताराः श्रूयन्ते तत्रान्यान्पुरुषांशत्वेन जानीयात्। कृष्णस्तु स्वयं भगवत्त्वेनेति प्रतिज्ञारूपमिदं सर्वत्रोपतिष्ठेत। परिभाषा ह्येकदेशस्था सकलं शास्त्रमभिप्रकाशयति यथा वेश्मप्रदीप इति प्राञ्चः। सा च शास्त्रे सकृदेव पठ्यते। न त्वाभ्यासेनेति वाक्यानां कोटिरप्यनेनैकेनापि महाराजचक्रवर्त्तिनेव शासनीया भवेदित्येतद्विरुद्धायमानानां तेषां वाक्यानामेतदनुगुणार्थतैव तत्र तत्र व्याख्येया। किं च तेषां वाक्यानां प्राकरणिकत्वेन दुर्बलत्वात् अस्य तु श्रुतिरूपत्वेन प्रबलत्वात् "श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति न्यायेन तान्येवर्थांतरतया संगमनीयानि। न तु तदनुरोधेनैतदित्यतः श्रीधरस्वामिपादैरपि तत्र तत्र तथैव समाहितमिति। ननु मत्स्यकूर्माद्यवताराणां कृष्णस्य च द्विभुजत्वचतुर्भुजत्वबालत्वकिशोरत्वाद्याकाराणां च सर्वेषां च नित्यश्रवणादनेकेश्वरत्वप्रसक्तिः। मैवम्, "बहुमूर्त्येकमूर्त्तिकम्" इति दशमात्। यथैकस्यैव जीवस्य कालभेदेनाल्पशक्तिकबहुशक्तिकत्वेन नश्वरस्वभिन्नविग्रहधारित्वं प्रतीयते। एवमेकस्यैवेश्वरस्य सर्वव्यापकस्याचिंत्याशक्त्या यौगपद्येनैवानन्तनित्यस्वभिन्नविग्रहधारित्वं जीवानामनन्तानामानन्त्यमीश्वरस्य चैकस्यैवानंत्यमिति जीवदृष्ट्यैव तद्विलक्षण ईश्वरस्य प्रत्येतव्य इति। नन्वानन्दमात्रस्य चिद्वस्तुनो व्यापकस्य परमेश्वरस्य किं नामांशित्वमंशत्वं वा? परिच्छिन्नस्यैव वस्तुनो भागविभागादिसंभवात्। तदुक्तं महावाराहे "सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्॥ परमानन्दसंदोहाज्ज्ञानमात्राश्च सर्वतः। सर्वे सर्वैर्गुणैः पूर्णाः सर्वे दोषविवर्जिताः" इति। सत्यम्, तदपि तस्य माधुर्यैश्वर्यकारुण्यादिशक्तिप्राकट्यतारतम्येनैवांशत्वपूर्णत्वव्यवस्था। आविर्भावितपूर्णसर्वशक्तित्वं पूर्णत्वम्। आविर्भावितयथाप्रयोजनाल्पशक्तित्वमंशत्वम्। तदुक्तं भागवतामृते "शक्तेर्व्यक्तिस्तथाव्यक्तिस्तारतम्यस्य कारणम्" इति। "शक्तिः समापि पुर्य्यादिदाहे दीपाग्निपुञ्जयोः। शीताद्यार्त्तिक्षये चाग्निपुंजादेव सुखं भवेत्" इति। एवं च पूर्णत्वांशत्वाभ्यामुत्कर्षापकर्षौ महानुभावमुनीनामप्यनुभवसिद्धौ ज्ञेयौ। यथा तृतीये "आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठधिष्ण्यम्। विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोन्वपृच्छन्॥ स्वयमेव धिष्ण्यं बहु मानयंतं यं वासुदेवाभिधमामनन्ति" इति। अतश्चिद्वस्तुनोंशांशित्वभेदो न विरुद्धः।

तदुक्तं वाराहे "स्वांशश्चायं विभिन्नांश इति द्वेधांश इष्यते" इत्यादि । तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्कारणं कुमारनारदादिष्वधिकारेषु यथोपयोगमंशकलावेश इति श्रीधरस्वामिपादाः । अत्र प्राचां कारिकाः "नृसिंहो जामदग्न्यश्च कल्की पुरुष एव च । भगवत्त्वे च तत्रादेरैश्वर्यस्य प्रकाशकाः ॥ नारदोथ तथा व्यासो वाराहो बुद्ध एव च । धर्माणामेव वैविध्यादमी धर्मप्रदर्शकाः ॥ रामो धन्वन्तरिर्यज्ञः पृथुः कीर्तिप्रदर्शिनः । बलरामो मोहिनी च वामनः श्रीप्रधानकाः ।" श्रीरत्र सौन्दर्यम् "दत्तात्रेयश्च मत्स्यश्च कुमारः कपिलस्तथा । ज्ञानप्रदर्शका एते विज्ञातव्या मनीषिभिः ॥ नारायणो नरश्चेति कूर्मश्च ऋषभस्तथा । वैराग्यदर्शिनो ज्ञेयास्तत्तत्कर्मानुसारतः ॥ कृष्णः पूर्णषडैश्वर्यमाधुर्याणां महोदधिः । अंतर्भूतसमस्तावतारो निखिलशक्तिमान् ॥" इति । गर्गसंहितायां तु "अंशांशोंशस्तथावेशः कला पूर्णः प्रकथ्यते । व्यासाद्यैश्च स्मृतः षष्ठः परिपूर्णतमः स्वयम् ॥ अंशांशस्तु मरीच्यादिरंशो ब्रह्मादयस्तथा । कला कपिलकूर्माद्या आवेशा भार्गवादयः ॥ पूर्णो नृसिंहो रामश्च श्वेतद्वीपाधिपो हरिः । वैकुंठोपि तथा यज्ञो नरनारायणः स्मृतः ॥ परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयम् ॥ असंख्यब्रह्मांडपतिर्गोलोके धाम्नि राजते । कार्याधिकारं कुर्वंतः सदांशास्ते प्रकीर्त्तिताः ॥ तत्कार्यभारं कुर्वंतस्तेंशांशा विदिताः प्रभोः । येषामंतर्गतो विष्णुः कार्यं कृत्वा विनिर्गतः । तानावेशावतारांश्च विद्धि राजन्महामते ॥ धर्मं विज्ञाप्य कृत्वा यः पुनरन्तरधीयत । युगे युगे वर्तमानं सोवतारः कला हरेः ॥ चतुर्व्यूहो भवेद्यत्र दृश्यंते च रसा नव । अतः परं च वीर्याणि स तु पूर्णः प्रकथ्यते ॥ यस्मिन्सर्वाणि तेजांसि विलीयन्ते स्वतेजसि । तं वदन्ति परं ज्ञानं परिपूर्णतमं स्वयम् ॥" इति । किञ्च "अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः । श्रीकृष्णचन्द्रो भगवान्" इति सम्मोहनतन्त्रे श्रीशङ्करोक्तेश्च । श्रीकृष्ण एव परिपूर्णतमः । सर्वेषां साधारणं प्रयोजनमाह–इंद्रारीति । यद्वा "इंद्रो मायाभिः पुरुरूप ईयते" इह श्रुताविंद्रपदमात्मपरं दृश्यते । तथा चेंद्र आत्मा तदरयः कामादयस्तज्ज्ञानप्रतिबन्धकत्वात्तैरुपद्रुतं लोकं विश्वं ज्ञानोपदेशेन मृडयन्ति स्वदत्तज्ञानेन संसारात्तारयन्तीत्यर्थः । एतच्च सर्वावतारैः कृतमित्यनुसंधेयं तत्तच्चरिते ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनीव्याख्या

एते चांशकला इति । तथा च ब्रह्मसंहितायाम्–'रामादिमूर्त्तिषु कलानियमेन तिष्ठन् नानावतारमकरोत् भुवनेषु किन्तु । कृष्णः स्वयं समभवत् परमः पुमान् यो गोविन्दमादिपुरुषं तमहं भजामि ।' इति व्याख्यालेशः ॥ २८ —३१ ॥

श्रीमद्वीरराघवव्याख्या

अथासौ जगत्पतिः भगवान् युगयोः कलिकृतयुगयोः संध्यायां संधौ राजसु दस्युप्रायेषु चौरप्रायेषु केवलमधर्मबहुलेषु सत्सु तद्वधार्थं विष्णुयशसो जनिता विष्णुयशसः पुत्ररूपेणावतरिष्यति । स च नाम्ना कल्किरिति प्रसेत्स्यति ॥ २५ ॥ ❀ ❀ दिङ्मात्रमेतद्दर्शितमित्यभिप्रायेणाह अवतारा इति । हे द्विजाः सत्त्वनिधेः शुद्धसत्त्वमूर्त्तेर्भगवतोऽनिरुद्धादेतेऽवतारा अन्येप्यसंख्येयाः स्युः प्रवर्त्तंते, यथा अविदासिनोऽशोष्यात् सरसः सहस्रशः कुल्याः स्युः स्पंदंते तद्वत् । कुल्याः क्षुद्रनद्यः ॥ २६ ॥ ❀ ❀ के त इत्यत आह ऋषयः इति । ऋषयो मंत्रद्रष्टारो वशिष्ठादयो मुनयः केवलस्वात्मपरमात्मयाथात्म्यमननशीलाः, शुकादयः देवा इंद्रादयः, मनुपुत्राः प्रियव्रतादयः महौजसः महाप्रभावाः सप्रजापतयः दक्षादिभिः सहिताः प्रजापतयश्चेत्यर्थः, त एते सर्वे हरेरेव कलाः स्मृताः भगवदंशेनैव संभूता इत्यर्थः । तथा चोक्तं भगवता "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवमि"ति ॥ २७ ॥ ❀ ❀ (श्रीकृष्णाय नमः) ॥ एतद्वचनार्थमेवाह एत इति । एते ऋषिप्रभृतयस्तु पुंसोऽनिरुद्धाख्यस्यांशकलाः अंशांशसंभूताः कृष्णस्तु भगवान्स्वयमिति श्रीकृष्णस्य पूर्णावतारत्वमुक्तम् । उदाहृतभगवद्वचनेन विभूत्यादिमतां जंतूनां ममत्वेन निर्दिष्टश्रीकृष्णस्य तेजोंशसंभवत्वं श्रीकृष्णस्य पूर्णत्वं स्थापितम् । अत्रापि भगवानित्यनेन पूर्णषाड्गुण्यत्वमवगतम् । यद्वा अत्रैतदित्यनेन पूर्वोक्तेषु हिरण्यगर्भसनकादिषु केषांचिद्वराहनारायणमत्स्यकूर्ममोहिनीनृसिंहवामनश्रीरामावताराणां पूर्णानां सत्त्वेपि द्वित्रिन्यायेन सर्वेप्यवताराः परामृश्यंते । तत्र पूर्णत्वं नाम षाड्गुण्यपूर्णत्वेन रूपेण साक्षादवतीर्णत्वम् । अंशांशसंभूतत्वं नाम तत्तज्जीवांतरात्मतयावस्थितस्य षाड्गुण्यपूर्णस्य भगवतः केनाप्यैश्वर्यवीर्यादिगुणलेशेन जीवद्वाराविभूतेन विशिष्टतया संजातत्वं, निरंशस्य ब्रह्मस्वरूपस्यैकदेशभेदेनाविर्भावासंभवात् । ननु धर्मिस्वरूपैकदेशवाचिनोंशशब्दस्य कथं गुणपरत्वमिति चेन्न, अपृथक्सिद्धविशेषणस्याप्यंशशब्दवाच्यत्वाद्विशिष्टवस्त्वेकदेशत्वस्यैवांशपदप्रवृत्तिनिमित्तत्वाद्विशिष्टवस्त्वेकदेशत्वस्यैवांशपदप्रवृत्तिनिमित्तत्वाद्विशिष्टवस्त्वेक - देशत्वं च विशेषणविशेष्ययोरेकदेशतया द्वयोरप्यविशिष्टं वाराहाद्यवताराणां पूर्णत्वं तु तत्तत्पुराणादिभ्य एवावगंतव्यं, सर्वावतारसाधारणं प्रयोजनमुपसंहरति इंद्रेति इंद्रारिभिरसुरादिभिर्व्याकुलमुपद्रुतं लोकं युगे युगे प्रतियुगं मृडयन्ति ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथ बुद्धावतारादनंतरमसौ जगत्पतिः पद्मनाभो युगसंध्यायां प्राप्तायां राजसु दस्युप्रायेषु बहुलं चोरेषु सत्सु नाम्ना कल्किनाम्ना विष्णुयशसो विप्राज्जनित उत्पत्स्यतीत्येकान्वयः ॥ २५ ॥ ❀ ❀ हरेरवताराणामनंतत्वादनंतपुरुषायुषापि समा-

पयितुं नास्माकं शक्तिरस्तीत्यभिप्रेत्याह अवतारा इति। हे द्विजाः सत्त्वनिधेर्बलज्ञानादिमहागुणनिधानस्य हरेरवतारा असंख्येया हि यस्मात्तस्मात्प्राधान्यतः संख्याताः, न साकल्येन समापयितुं शक्याः—तत्रोदाहरणमाह यथेति। यथाविदासिन उन्नतस्थलात् भिन्नाद्वा सरसः सहस्रशः कुल्याः क्षुद्रनद्यः स्युरिति। इदं मन्दमतीनपेक्ष्योक्तं न तु योगिनः। क्षुद्रनदीनां तैः संख्येयत्वेपि न हरेरवताराः संख्यातुं शक्यंत इत्यतो बुद्धयवतारार्थमिति ज्ञातव्यम्॥२६॥ ❀ ❀ इदानीं प्रतिबिंबांशानाह ऋषय इति। मनुपुत्राः प्रियव्रतादयः। प्रजापतिभिर्दक्षादिभिः सहिता एते ऋष्यादयः। हरेः कलाः भिन्नांशाः स्मृतिषु उक्ताः॥२७॥ ❀ ❀ तर्हि के स्वरूपांशा इति तत्राह एत इति। स एव प्रथममित्यारभ्याथासात्विंतेन प्रोक्ता एते शेषशायिनः परमपुरुषस्य स्वांशकलाः स्वरूपांशावताराः न तत्रांशांशिनां भेदः प्रतिबिंबांशवत् किमुक्तं भवति कृष्णो मेघश्यामः शेषशायी मूलरूपी पद्मनाभो भगवान् स्वयं तु स्वयमेव न शाखिशाखावत् भेदाभेदोपीति भाव इत्याह इन्द्रारिभिर्दैत्यैर्व्याकुलं जनं तत्स्थानं च युगे युगे अवतीर्य मृडयन्ति रक्षंतीत्यन्वयः॥२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ श्रीहयग्रीव-हरि-हंस-पृश्निगर्भ-विभु-सत्यसेन-वैकुण्ठाजित-सार्व्वभौम-विष्वक्सेन-धर्म्मसेतु-सुधाम-योगेश्वरबृहद्भान्वादीनां शुक्लादीनाञ्चानुक्तानां संग्रहार्थमाह अवतारा इति। हरेरवतारा असंख्येयाः सहस्रशः सम्भवन्ति। हि प्रसिद्धौ। असंख्येयत्वे हेतुः। सत्त्वनिधेः सत्त्वस्य स्वप्रादुर्भावशक्तेः शेवधिरूपस्य। तत्रैव दृष्टान्तः यथेति। अविदासिनः उपक्षयशून्यात् सरसः सकाशात् कुल्यास्तत्स्वभावकृता निर्बारा अविदासिन्यः सहस्रशः सम्भवन्तीत्यर्थः। अत्र ये अंशावतारास्तेषु चैष विशेषो ज्ञेयः। श्रीकुमारनारदादिष्वाधिकारिकेषु ज्ञानभक्तिशक्त्यंशावेशः श्रीपृथ्वादिषु क्रियाशक्त्यंशावेशः। क्वचित्तु स्वयमेवावेशः तेषां भगवानेवाहमिति वचनात्। अथ श्रीमत्स्यदेवादिषु साक्षादंशत्वमेव। तत्र चांशत्वं नाम साक्षाद्भगवत्त्वेऽप्यव्यभिचारितादृशतदिच्छावशात् सर्व्वदैवैकदेशतयैवाभिव्यक्तशक्त्यादिकत्वमिति ज्ञेयम्। तथैवोदाहरिष्यते। रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोदित्यादि॥२६॥ ❀ ❀ अथ विभूतीराह ऋषय इति। कलाः विभूतयः अल्पशक्तेः प्रकाशाद् विभूतित्वं महाशक्तेस्त्वावेशत्वमिति भेदः॥२७॥ ❀ ❀ तदेवं परमात्मानं साङ्गमेव निर्द्धार्य प्रोक्तानुवादपूर्व्वकं श्रीभगवन्तमप्याकारेण निर्द्धारयति एत इति। एते चांशकला इत्येव पाठः स्वामिसम्मतः। ऊननवतितमे तथा टीकायां दर्शनात्। ततश्च एते पूर्व्वोक्ताः चशब्दादनुक्ताश्च प्रथममुद्दिष्टस्य पुंसः पुरुषस्य अंशकलाः, केचित् अंशाः स्वयमेवांशाः साक्षादंशत्वेनांशांशत्वेन द्विविधाः। केचिदंशाविष्टत्वादंशाः, केचित्तु कला विभूतयः। इह यो विंशतितमावतारत्वेन कथितः स कृष्णस्तु भगवान् एष एव पुरुषस्याप्यवतारी भगवानित्यर्थः। अत्र "अनुवादमनुक्त्वैव न विधेयमुदीरयेदि"ति दर्शनात् श्रीकृष्णस्यैव भगवत्त्वलक्षणो धर्म्मः साध्यते, न तु भगवतः श्रीकृष्णत्वमित्यायातम्। ततश्च श्रीकृष्णस्यैव भगवत्त्वलक्षणधर्म्मित्वे सिद्धे मूलत्वमेव सिद्ध्यति न तु ततः प्रादुर्भूतत्वम्। एतदेव व्यनक्ति स्वयमिति। तत्र च स्वयमेव भगवान् न तु भगवतः प्रादुर्भूततया न तु वा भगवत्ताध्यासेनेत्यर्थः। न चावतारप्रकरणे पठित इति संशयः। पौर्व्वापर्ये पूर्व्वदौर्बल्यं प्रकृतिवदिति न्यायात्। यथा अग्निष्टोमे 'यद्युद्गाता विच्छिद्यादद्क्षिणेन यजेत यदि प्रतिहर्त्ता सर्व्वस्वदक्षिणेने'ति श्रुतेः। तयोश्च कदाचिद् द्वयोरपि विच्छेदे प्राप्ते विरुद्धयोः प्रायश्चित्तयोः समुच्चयासम्भवे च परमेव प्रायश्चित्तं सिद्धान्तितं तद्वदिहापीति। अथवा 'कृष्णस्तु भगवान् स्वयमि'ति श्रुत्या प्रकरणस्य बाधः। यथा शङ्करशारीरकभाष्ये। "श्रुत्यादिबलीयस्त्वाच्च न बाध"इति सूत्रे ते हैते विद्याचित एवेति श्रुतिर्मनश्चिदादीनामग्नीनां प्रकरणप्राप्तं क्रियानुप्रवेशलक्षणमस्वातन्त्र्यं बाधित्वा विद्यात्वेनैव स्वातन्त्र्यं स्थापयति तद्वदिहापीति। अत एतत्प्रकरणेऽप्यन्यत्र कचिदपि भगवच्छब्दमकृत्वा तत्रैव भगवानिति भगवानहरद्भरमिति कृतवान्। ततश्चास्यावतारेषु गणना तु स्वयं भगवानप्यसौ स्वरूपस्थ एव। निजपरिजनवृन्दानामानन्दविशेषचमत्काराय किमपि माधुर्य्यं निजजन्मादिलीलया पुष्णन् कदाचित् सकललोकदृश्यो भवतीत्यपेक्षयैवेत्यागतम्। यथोक्तं ब्रह्मसंहितायाम् 'रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद्भुवनेषु किन्तु। कृष्णः स्वयं समभवत् परमः पुमान् यो गोविन्दमादिपुरुषं तमहं भजामि॥"इति। अवतारश्च प्राकृतवैभवेऽवतरणमिति कृष्णसाहचर्य्येण रामस्यापि पुरुषांशत्वाद्यायो ज्ञेयः। अत्र तुशब्दोंऽशकलाभ्यः पुंसश्च सकाशात् भगवतो वैलक्षण्यं बोधयति। यद्वा अनेन तुशब्देन सावधारणा श्रुतिरियं प्रतीयते। ततश्च सावधारणा श्रुतिर्बलवतीति न्यायेन श्रुत्यैव श्रुतमप्यन्येषां महानारायणादीनां स्वयं भगवत्त्वं गुणीभूतमापद्यते। एवं पुंस इति भगवानिति च प्रथममुपक्रमोद्दिष्टस्य तस्य शब्दद्वयस्य तत्सहोदरेण तेनैव चशब्देन प्रतिनिर्देशात् तावेव खल्वेताविति स्मारयति। उद्देशप्रतिनिर्देशयोः प्रतीतिस्थगिततानिरसनाय विद्वद्भिरेक एव शब्दः प्रयुज्यते तत्समो वा। यथा ज्योतिष्टोमाधिकारे वसन्ते ज्योतिषा यजेतेत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवतीति। इन्द्रारीति पद्यार्द्धं त्वत्र नान्वेति। तुशब्देन वाक्यस्य भेदनात्। तच्च तावतैवाकांक्षापरिपूर्त्तेः एकवाक्यत्वे तु चशब्द एवाकरिष्यत। ततश्चेन्द्रारीत्यत्र अर्थात् त एव पूर्व्वोक्ता मृडयन्तीत्यायाति। अत्र विशेषजिज्ञासायां कृष्णसन्दर्भो दृश्यः। तत्तत्प्रसङ्गे दर्शयिष्यते॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

विष्णुयशसो ब्राह्मणात् सकाशात् ॥२५॥ ❀ ❀ हयग्रीवहंसाद्यनुक्तसर्व्वसंग्रहार्थमाह अवतारा इति। असंख्येयत्वे हेतुः सत्त्वानां शुद्धसत्त्वचिदानन्दानां निधेः शेवधिरूपस्य। तत्र दृष्टान्तः यथेति। अविदासिनः उपक्षयशून्यात्, दसु उपक्षय इत्यस्मात् सरसः सकाशात् कुल्यास्तत्स्वभावकृता निर्वाराः अविदासिन्यः सहस्रशः स्युः असंख्याता इति श्रैष्येणैते पुरुषाद्या एवावताराः ख्याताः, अन्ये तु न सम्यक् ख्याता वर्त्तन्ते एवेति ज्ञाप्यते। यदुक्तं प्रह्लादेन "इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतीपान्। धर्म्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्त्व"मिति छन्नत्वादेवासंख्यात इत्यर्थः॥ २३॥ ❀ ❀ अवतारानुक्त्वा विभूतीराह ऋषय इति॥ २७॥ ❀ ❀ नन्वेषां सर्व्वेषां तुल्यत्वमेव वा अस्ति वा तारतम्यमित्यपेक्षायामाह एते चेति। एते पूर्व्वोक्ताः चशब्दादनुक्ताश्च पुंसः प्रथमनिर्दिष्टस्य पुरुषस्य अंशकलाः। केचिदंशाः मत्स्यकूर्म्मवराहाद्याः। केचित् कलाः, कुमारनारदादयः आवेशाः। यदुक्तं भागवतामृते–"ज्ञानशक्त्यादिकलया यत्राविष्टो जनार्द्दनः। त आवेशा निगद्यन्ते जीवा एव महत्तमाः। वैकुण्ठेऽपि यथा शेषो नारदः सनकादय" इति। तथा पाद्मे–"अविष्टोऽभूत् कुमारेषु नारदे च हरिर्विभुः।' तथा तत्रैव आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुजः इति। 'एतत्ते कथितं देवि जामदग्नेर्महात्मनः। शक्त्यावेशावतारस्य चरितं शार्ङ्गिणः प्रभोरि'ति। 'कलेरन्ते च संप्राप्ते कल्किनं ब्रह्मवादिनम्। अनुप्रविश्य कुरुते वासुदेवो जगत्स्थितिमि'ति। तत्र कुमारनारदादिषु ज्ञानभक्तिशक्त्यंशावेशः। पृथ्वादिषु क्रियाशक्त्यंशावेशः। ते चावेशा महाशक्त्या अल्पशक्त्या चेति द्विविधाः। प्रथमाः कुमारनारदाद्याः अवतारशब्देनोच्यन्ते। द्वितीया मरीचिमन्वाद्याः विभूतिशब्देनेति भेदो ज्ञेयः। इह यो विंशतितमावतारत्वेन कथितः स कृष्णस्तु भगवान् न त्वंशः न चांशी पुरुषः, किन्तु भगवान्। 'जगृहे पौरुषं रूपं भगवान् महदादिभिरि'ति पद्योक्तो यः पुरुषस्यावतारी भगवान् स एवेत्यर्थः। 'अनुवादमनुक्त्वैव न विधेयमुदीरयेदि'ति दर्शनात् कृष्णस्यैव भगवत्त्वलक्षणो धर्म्मः साध्यते न तु भगवतः कृष्णत्वं तेन कृष्ण एव भगवान् मूलभूत इति। एतदेव पुनः स्पष्टीकुर्व्वन्नाह स्वयमिति। तेन पुरुषावतारिणो भगवतो महानारायणादपि कृष्णस्योत्कर्षः साधितः। अत एव छान्दोग्ये पञ्चमप्रपाठके "ज्यायांश्च पुरुषः सर्व्वं खल्विदं ब्रह्म यत् प्राणा आदित्य' इत्याद्युक्त्वा पश्चादुपसंहृतं कृष्णाय देवकीपुत्रायेत्यादिना। तेनात्र पुरुषादिभ्योऽपि श्रेष्ठो देवकीपुत्र एव ज्ञेयः। तदप्यवतारमध्ये तस्य गणनम्। भूर्लोकस्थमथुरादिधामविलासित्वान्नरलीलत्वात् प्रापञ्चिकलोकेषु करुणाधिक्यादाविर्भावतिरोभावाभ्याञ्च। तथा च गोपालतापिनी श्रुतिः–"स होवाचाजयोनिरवताराणां मध्ये श्रेष्ठोऽवतारः को भविता येन लोकास्तुष्यन्ति देवास्तुष्टा भवन्ति। यं स्मृत्वा मुक्ता अस्मात् संसारात् तरन्ती"ति। ननु "तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः" इति। "दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान् भवाय नः" इति। 'ताविमौ वै भगवतो हरेरंशाविहागतावि'त्यादि बहुवाक्यविरोधे कृष्णस्तु भगवान् स्वयमित्येकेनैव वाक्येन कृष्णस्य पूर्णत्वं कथं व्यवतिष्ठताम्? अत्रोच्यते श्रीभागवतशास्त्रारम्भे जन्मगुह्याध्यायोऽयं सर्व्वभगवदवतारवाक्यानां सूचकत्वात् सूत्रम्। तत्र चैते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति परिभाषासूत्रम्। तत्र यत्रावताराः श्रूयन्ते तत्रान्यान् पुरुषांशत्वेन जानीयात् कृष्णन्तु स्वयं भगवत्त्वेनेति। प्रतिज्ञारूपमिदं सर्व्वत्रोपतिष्ठते। परिभाषा ह्येकदेशस्था सकलं शास्त्रमभिप्रकाशयति यथा वेश्म प्रदीप इति प्राञ्चः। सा च शास्त्रे सकृदेव पठ्यते, नत्वभ्यासेनेति वाक्यानां कोटिरपि अनेनैकेनापि महाराजचक्रवर्तिनेव शासनीया भवेदित्येतद्विरुद्धायमानानां तेषां वाक्यानामेतदनुगुणार्थतैव तत्र तत्र व्याख्येया। किञ्च तेषां वाक्यानां प्राकरणिकत्वेन दुर्व्वलत्वात् अस्य तु श्रुतिरूपत्वेन प्राबल्यात्। 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि'ति न्यायेन तान्येवार्थान्तरतया संगमनीयानि। न तु तदनुरीत्येनैतदित्यतः श्रीधरस्वामिपादैरपि तत्र तत्र तथैव समाहितमिति। ननु मत्स्यकूर्म्माद्यवताराणां कृष्णस्य च द्विभुजत्वचतुर्भुजत्वबालत्वकिशोरत्वाद्याकाराणाञ्च सर्व्वेषां नित्यत्वश्रवणात् अनेकेश्वरत्वप्रसक्तिः। मैवम्। बहुमूर्त्त्येकमूर्त्तिकमिति दशमाद्यथा एकस्यैव जीवस्य कालभेदेनाल्पशक्तिकबहुशक्तिकानन्तनश्वरस्वभिन्नविग्रहधारित्वं प्रतीयते। एवमेकस्यैवेश्वरस्य सर्व्वव्यापकस्याचिन्त्यशक्त्या यौगपद्येनैवानन्तनित्यस्वाभिन्नविग्रहधारित्वम्। जीवानामनन्तानामानन्त्यम्। ईश्वरस्यैकस्यैवानन्त्यमिति जीवदृष्ट्यैव तद्विलक्षण ईश्वरश्च प्रत्येतव्य इति। नन्वानन्दमात्रस्य चिद्वस्तुनो व्यापकस्य परमेश्वरस्य किं नामांशित्वमंशत्वं वा? परिच्छिन्नस्यैव वस्तुनो भागविभागादिसम्भवात्। यदुक्तं महावाराहे "सर्व्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्॥ परमानन्दसन्दोहा ज्ञानमात्राश्च सर्व्वतः। सर्व्वे सर्व्वगुणैः पूर्णाः सर्व्वदोषविवर्जिता" इति। सत्यम्। तदपि तस्य माधुर्य्यैश्वर्य्यकारुण्यादिशक्तिप्राकट्यतारतम्येनैवांशत्वपूर्णत्वव्यवस्था आविर्भावितयथाप्रयोजनाल्पशक्तित्वमंशत्वम्। यदुक्तं भागवतामृते 'शक्तेर्व्यक्तिस्तथाऽव्यक्तिस्तारतम्यस्य कारणमि'ति। शक्तिः समापि पुर्य्यादिदाहे दीपाग्निपुञ्जयोः। शीताद्यार्त्तिक्षये चाग्निपुञ्जादेव सुखा भवेदिति। एवञ्च पूर्णत्वांशत्वाभ्यामुत्कर्षापकर्षौ महानुभावमुनीनामप्यनुभवसिद्धौ ज्ञेयौ। यथा तृतीये "आसीनमुर्व्यां भगवन्तमाद्यं सङ्कर्षणं देवमकुण्ठधिष्ण्यम्। विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन्॥ स्वमेव धिष्ण्यं बहु मानयन्तं यद्वासुदेवाभिधमामनन्ती"ति। अतश्चिद्वस्तुनः परमेश्वरस्यांशांशित्वभेदो न विरुद्धः। यदुक्तं वाराहे "स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते" इत्यादि। तत्र मत्स्यादीनामवतारत्वेन सर्व्वज्ञत्वसर्व्वशक्तित्वेऽपि यथोपयोगमेव

ज्ञानक्रियाशक्त्याविष्करणम् । कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः, इति श्रीवल्लभाचार्याः । अत्र प्राचां कारिकाः । "नृसिंहो जामदग्न्यश्च कल्की पुरुष एव च । भगवत्त्वे च तत्रादेरैश्वर्यस्य प्रकाशकाः ॥ नारदोऽथ तथा व्यासो वराहो बुद्ध एव च । धर्म्माणामेव वैविध्यादमी धर्म्मप्रदर्शकाः ॥ रामो धन्वन्तरिर्यज्ञः पृथुः कीर्तिप्रदर्शिनः । बलरामो मोहिनी च वामनः श्रीप्रधानकाः ॥ (श्रीरत्र सौन्दर्य्यम्) दत्तात्रेयश्च मत्स्यश्च कुमारः कपिलस्तथा । ज्ञानप्रदर्शका एते विज्ञातव्या मनीषिभिः ॥ नारायणो नरश्चेति कूर्म्मश्च ऋषभस्तथा । वैराग्यदर्शिनो ज्ञेयास्तत्तत्कर्म्मानुसारतः ॥ कृष्णः पूर्णषडैश्वर्य्यमाधुर्य्याणां महोदधिः । अन्तर्भूतसमस्तावतारोऽनिखिलशक्तिमान् ॥" इति । सर्व्वेषां साधारणप्रयोजनमाह । इन्द्रारयोऽसुरास्तैस्तन्मतैश्च व्याकुलमुपद्रुतं लोकं मृडयन्ति सुखिनं कुर्व्वन्ति । युगे युगे तत्तत्समये ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

कल्क्यवतारमाह अथेति । युगसंध्यायाम् । युगस्य कलेः युगस्य संध्यायामादौ शास्ता भविष्यति कलेर्भगवान् युगांते इति वक्ष्यमाणात् कलेरंते तथा च कलिकृतयोः संधावित्यर्थः, विष्णुयशसः ब्राह्मणात्सकाशात् जनिता जनिष्यते दस्युप्रायेषु बधार्हेषु सत्सु ॥ २५ ॥ ❀ ❀ विदासोऽपक्षयस्तद्रहितात्सरसः सकाशात् ॥ २६ ॥ ❀ ❀ विभूतीराह ऋषय इति ऋषयः भृगुवशिष्ठादयः मनवः स्वायंभुवप्रभृतयः देवा वासवादयः मनुपुत्राः प्रियव्रतेक्ष्वाकुप्रभृतयः महौजसः शिवादयः सप्रजापतयः ब्रह्मकश्यपदक्षादिभिः सहिताः एते सर्वे हरेरेव कलाः "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमि"ति श्रीमद्भगवद्वचनाच्च ॥ २७ ॥ ❀ ❀ एते पुंसः पुरुषावतारस्य अंशकलाः छत्रिणो यांतीति न्यायेन केचिदंशाः केचित्कलाः केचिद्विभूतयः केचित्स्वरूपावतारा इति बोध्यम् । कृष्णस्तु भगवान् स्वयमित्यन्वयः । जगृहे पौरुषं रूपं भगवानिति प्रागुक्तो यस्य पुरुषोऽप्यवतारः स भगवान् श्रीकृष्ण इत्यर्थः । महत्स्रष्टुरपि पुरुषस्य श्रीकृष्णावतारत्वं 'त्वत्तः पुमान्समधिगम्यस्य ययास्यवीर्यं धत्ते महांतमिव गर्भममोघवीर्यः । सोयं तयानुगत आत्मन आंडकोशं हैमं ससर्ज बहिरावरणैरुपेतमि'त्येकादशे प्रसिद्धमेव "शुद्धे महाविभूत्याख्ये परब्रह्मणि वर्त्तते । मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥" इत्येवं श्रीपराशरादिभिर्व्याख्यातः स्वयं भगवान् विनिखिलेभ्यः परः ब्रह्मनारायणवासुदेवादिशब्दाभिधेयः श्रीकृष्ण इति भावः । 'मत्तः परतरं नान्यदि'ति श्रीमुखोक्तेश्च । सर्वेषां प्रयोजनमाह मृडयंतीति सुखिनं कुर्वंति ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अथेति महान् भिन्नक्रमः, कूर्ममारभ्य बुद्धांतं न पुरुषस्यावताराः, कल्की तु पुरुषस्यावतार इत्याह असाविति, अत्र कूर्मः आदिकूर्मस्य धन्वंतरिर्विष्णोः नृसिंहः कालस्य वामनो विष्णोर्वैश्वानरस्य परशुरामः संकर्षणस्य बलरामः व्यासो विष्णोर्ज्ञानस्य वासुदेवस्य रामः चतुर्णां कृष्णः वासुदेवस्य बुद्ध इति युगसंध्यायां जातायां समाप्तायां न संत्येव राजानः भूमिश्च शून्यप्राया । तथापि विद्यमाना अपि राजानो दस्यवः प्रायोग्रहणं विष्णुभक्तिप्रतिपादकब्राह्मणसंगेन केषांचिदतथात्वमिति । अत एव विष्णुयशा नाम शंभलग्रामवैष्णवस्तस्य पत्न्यां भविष्यतीत्यर्थः । जगत्पतिरित्यवतारप्रयोजनं जगतः क्षीणत्वात् पुनरुद्भवकर्त्तेत्यर्थः ॥ २५ ॥ ❀ ❀ अवताराणामेतावत्त्वं निवारयति अवतार इति । सत्त्वनिधेरिति हेतुः पालनोद्भवादेरावश्यकं सत्त्वं, द्विजा इति संमत्यर्थं संबोधनं बहुकालर्षित्वात् । अवताराणां स्वरूपमाह यथाविदासिन इति । अविदासिनः अक्षयजलस्य कुल्याः क्षुद्रप्रवाहा दक्षिणदेशे प्रसिद्धाः ॥ २६ ॥ ❀ ❀ सर्वेषां सामान्यतः स्वरूपं प्रकृतिफलं चाह ऋषय इति द्वाभ्याम् । ऋषयः अर्यमादयः मनवः स्वायंभुवादयो देवाः वस्वादयः मनुपुत्राः प्रियव्रतादयः महौजसः अन्येष्वतिवीर्यवंतः एते सर्वे सत्त्वमूर्त्तेर्भगवतो विष्णो रिरक्षिषोः कलाधर्मावेशिन इति अर्थः । प्रजापतयो मरीच्यादयः चकारेणान्यसंबंधं वारयति स्मृता इति । प्रमाणं पूर्वोक्ताः कुमारादयस्तु केचन अंशाः केचन कलाः ते चावतारावेशभेदेन निरूपिताः, चकारादनुक्ता अपि पुंसो नारायणस्य ब्रह्मांडमूर्त्तेः अंशाः कलाश्च । कृष्णेति तथात्वं सामान्यतः प्राप्तं तुशब्देन व्यावर्त्तयति यस्यांशाः पुरुषादयः स भगवान् कृष्ण इत्यर्थः । सामान्यतः प्रयोजनमाह इन्द्रेति । इंद्रारयो दैत्याः तैर्व्याकुलं जगन्मृडयंति सुखयंति प्रतियुगं चैतेऽवताराः प्रतिकल्पं चतुर्दशमन्वंतराणीव असंख्यातानामुक्तत्वात् यथाप्रयोजनं सर्वत्रावतार इति बोद्धव्यम् ॥ २७-२८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

अथासावित्यत्र । आदिकूर्मस्येति । 'विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्यो वितथाभिसन्धिः । कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहारे'त्यष्टमे पुरुषोत्तमस्योक्तः, तथापि भक्तिदानाद्यभावादादिकूर्मस्येति, स तु पञ्चमेऽष्टादशे 'हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राण' इत्यादिना स्तुतोस्ति । विष्णोरिति । आयुर्वेदप्रणेतृत्वेन पालकत्वाद्विष्णोरित्यर्थः । एवमग्रेपि ॥ २५-२८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कल्क्यवतारमाह–अथेति । अथ तदनन्तरमसौ भगवान् युगयोः कलिकृतयुगयोः सन्ध्यायां सन्धौ राजसु दस्युप्रायेषु चौरप्रायेषु अधर्मेण प्रजाधनादिग्रहणपरेषु सत्सु तन्निग्रहार्थं विष्णुयशसः सकाशात् तत्पुत्ररूपेण नाम्ना कल्किर्जनिता प्रादुर्भविष्यतीत्यन्वयः । तत्र हेतुगर्भं विशेषणमाह–जगत्पतिरिति, जगत्पालकत्वाद्यदि सोऽवतीर्य दस्यून्न निराकुर्यात्तदा कः कुर्यादिति भावः ॥ २५ ॥ ❀ ❀ दिङ्मात्रमेतत्प्रदर्शितं सर्वावतारप्रदर्शने कः समर्थ इत्याशयेनाह–अवतारा इति हे द्विजाः ! हरेरवतारा असङ्ख्याता अनन्ताः सन्तीत्यन्वयः । तत्र हेतुमाह–सत्त्वनिधेरिति, विशुद्धसत्त्वमूर्तेरित्यर्थः । पालकस्य तस्य पालनार्थं तत्तदवसरेऽवतारावश्यकमिति भावः । शास्त्रेषु प्रसिद्धमेव तस्यावतारानन्तत्वमिति सूचयन्नाह–हीति । युष्माकमप्येतत्सम्मतमेवेति सम्बोधनेन सूचितम् । तत्र दृष्टान्तमाह यथेति । यथा अविदासिन उपक्षयशून्यात् सरसः सकाशात् सहस्रशः कुल्याः क्षुद्रप्रवाहाः स्युस्तथा सत्त्वमूर्तेरवतारा अनन्ता भवन्तीत्यर्थः ॥ २६ ॥ ❀ ❀ कलावतारानाह–ऋषय इति । ऋषयो मन्त्रद्रष्टारो वसिष्ठादयः । मनवः स्वायम्भुवादयः । मनुपुत्राः प्रियव्रतादयः । सप्रजापतयः प्रजापतिभिर्दक्षादिभिः सहिताः महौजसः महाप्रभावाः अन्येऽपि ये केचन ते सर्वे हरेरेव कलाः स्मृताः भगवदंशसम्भूतत्वेनैवोक्ता इत्यर्थः । तथाच स्मृतिः–'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्' इति ॥ २७ ॥ ❀ ❀ एवमवताराणां मध्ये सामान्यतो गणनात् श्रीकृष्णस्याप्यवतारान्तरतुल्यत्वं प्राप्तमतस्तत्र विशेषमाह–एत इति । एते पूर्वोक्ताः–चकारादनुक्ता अपि–पुंसो नारायणस्य केचिदंशाः केचिच्च कलाः । कृष्णस्तु भगवान् ऐश्वर्यादिषड्गुणपूर्णो नारायणः स्वयमेव । पूर्णत्वं नानाविर्भूतसर्वशक्तित्वम् । अंशकलात्वं च तत्तज्जीवप्रवेशेन तत्कार्यानुरूपाविर्भूतज्ञानक्रियाशक्तित्वम् । तत्रापि प्रविष्टस्य महाशक्त्याविर्भावेंऽशत्वव्यवहारः । अल्पशक्त्याविर्भावे तु कलाविभूतिरिति व्यवहारः । तथा चोक्तं पाद्मे–'आविष्टोऽभूत्कुमारेषु नारदे च हरिर्विभुः । आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुजः ॥ एतत्ते कथितं देवि जामदग्न्येर्महात्मनः । शक्त्यावेशावतारस्य चरितं शार्ङ्गिणः प्रभोः ॥ कलेरन्ते च सम्प्राप्ते कल्किनं ब्रह्मवादिनम् ॥ अनुप्रविश्य कुरुते वासुदेवो जगत्स्थितिम्' इति । अन्यथा विभागरूपांशत्वे तु अच्युतत्वाविकारित्वाकारित्वादिप्रतिपादकशास्त्रविरोधापत्तेः । सर्वावताराणां साधारणं प्रयोजनमाह–इन्द्रेति । इन्द्रारिभिर्दैत्यैर्व्याकुलमुपद्रुतं लोकं युगे युगे प्रतियुगं तत्तदवसरेऽवतारा मृडयन्ति सुखिनं कुर्वन्तीत्यर्थः ॥ २८ ॥

हिन्दी अनुवाद

इसके भी बहुत पीछे जब कलियुगका अन्त समीप होगा और राजालोग प्रायः लुटेरे हो जायँगे, तब जगत्के रक्षक भगवान् विष्णुयश नामक ब्राह्मणके घर कल्किरूपमें अवतीर्ण होंगे[1] ॥ २५ ॥ ❀ ❀ शौनकादि ऋषियो ! जैसे अगाध सरोवरसे हजारों छोटे-छोटे नाले निकलते हैं, वैसे ही सत्त्वनिधि भगवान् श्रीहरिके असंख्य अवतार हुआ करते हैं ॥ २६ ॥ ❀ ❀ ऋषि, मनु, देवता, प्रजापति, मनुपुत्र और जितने भी महान् शक्तिशाली हैं, वे सब-के-सब भगवान्के ही अंश हैं ॥ २७ ॥ ❀ ❀ ये सब अवतार तो भगवान्के अंशावतार अथवा कलावतार ही हैं, परन्तु भगवान् श्रीकृष्ण तो स्वयं भगवान् (अवतारी) ही हैं । जब लोग दैत्योंके अत्याचारसे व्याकुल हो उठते हैं तब युग-युगमें अनेक रूप धारण करके भगवान् उनकी रक्षा करते हैं ॥ २८ ॥

जन्म गुह्यं भगवतो य एतत्प्रयतो नरः । सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥
एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः । मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥
यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले । एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥
अतः परं यदव्यक्तमव्यूढगुणव्यूहितम् । अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

एतत्कीर्तनफलमाह जन्मेति । गुह्यमतिरहस्यं जन्म । प्रयतः शुचिः सन् दुःखग्रामात्संसारात् ॥ २९ ॥ ❀ ❀ विमुच्यत इति यदुक्तं तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिरित्याशंक्य देहद्वयसंबंधस्य भगवन्मायोत्थाविद्याविलसितत्वादेतच्छ्र-

---

१.यहाँ बाईस अवतारोंकी गणना की गयी है, परन्तु भगवान्के चौबीस अवतार प्रसिद्ध हैं, कुछ विद्वान् चौबीसकी संख्या यों पूर्ण करते हैं—राम कृष्णके अतिरिक्त बीस अवतार तो उपर्युक्त हैं ही, शेष चार अवतार श्रीकृष्णके ही अंश हैं । स्वयं श्रीकृष्ण तो पूर्ण परमेश्वर हैं, वे अवतार नहीं—अवतारी हैं । अतः श्रीकृष्णको अवतारोंकी गणनामें नहीं गिनते । उनके चार अंश ये हैं—एक तो केशका अवतार, दूसरा सुतपा तथा पृश्निपर कृपा करनेवाला अवतार, तीसरा संकर्षण-बलराम और चौथा परब्रह्म । इस प्रकार इन चार अवतारोंसे विशिष्ट पाँचवें साक्षात् भगवान् वासुदेव हैं । दूसरे विद्वान् ऐसा मानते हैं कि बाईस अवतार तो उपर्युक्त हैं ही, इनके अतिरिक्त दो और हैं—हंस और हयग्रीव ।

वणादिजनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह। एतदिति पञ्चभिः। अरूपस्य चिदेकरसस्यात्मनो जीवस्यैतत्स्थूलं रूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितम्। क आत्मनि आत्मस्थाने शरीरं कृतमित्यर्थः॥ ३०॥ ❀ ❀ कथमित्यपेक्षायां स्वरूपावरणेन तदध्यासत इति सदृष्टांतमाह यथेति। यथा वाय्वाश्रितो मेघौघो नभस्याकाशेऽबुद्धिभिरज्ञैरारोपितः। यथा वा पार्थिवो रेणुस्तद्वतं धूसरत्वाद्यनिले एवं द्रष्टर्यात्मनि दृश्यत्वं दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः॥ ३१॥ ❀ ❀ किंच। अतः स्थूलाद्रूपात्परमन्यदपि रूपमारोपितमित्यनुषंगः। कथंभूतं तत्? यदव्यक्तं सूक्ष्मम्। तत्र हेतुः अव्यूढगुणव्यूहितं व्यूहः करचरणादिपरिणामः, न तथा अव्यूढा अपरिणताः ये गुणास्तैर्व्यूहितं रचितम्। आकारविशेषरहितत्वादव्यक्तमित्यर्थः। एतदेव कुतस्तत्राह। अदृष्टाश्रुतवस्तुत्वाद् यन्नाकारविशेषवद्वस्तु तदस्मदादिवद् दृश्यते श्रूयते वा इंद्रादिवत्। इदं तु न तथा। तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह। सजीवः जीवोपाधिः। 'जीवो जीवेन निर्मुक्तो' 'जीवो जीवं विहाये'त्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् जीवोपाधितया कल्प्यत इत्यर्थः। ननु स्थूलमेव भोगायतनत्वाजीवस्योपाधिरस्तु किमन्यकल्पनयेत्यत आह। यद् यस्मात्सूक्ष्मात्पुनर्भवः पुनर्जन्म। उत्क्रांतिगत्यागतीनां तेन विनाऽसंभवादिति भावः॥ ३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

जन्मान्याविर्भावाः गुह्यान्यनधिकारिजनाद् गूहितुं योग्यानि यस्मिन्नध्याये स जन्मगुह्यस्तं "पवित्रः प्रयतः पूतः" इत्यमरः। गृणन्भवेदिति शेषः॥ २९॥ ❀ ❀ तत्रेति वाक्यालंकारे। तद्विमुक्तिर्दुःखग्रामाद्विमुक्तिः। "विद्याविद्ये मम तनू मायया मे विनिर्मिते" इत्युक्तेरविद्यापि भगवन्मायात एवोत्तिष्ठते। एतच्छ्रवणादिना जन्मगुह्याध्यायश्रवणादिना जनिता या विद्या तया तन्निवृत्तिः संसारनिवृत्तिः। आदिना पाठविचारादिग्रहः। इत्यर्थ इति। स्थूलरूपस्यारोपितत्वादवास्तवमेव। तदिति तन्निवृत्तिरपि संपत्स्यत इति भावः। अत्र विश्वनाथः—ननु "पातालमेतस्य हि पादमूलम्" इत्यादिना द्वितीयस्कंधे योयं विराट्रूपी भगवान्प्रथममुपास्यत्वेनोक्तः स कथमवतारमध्ये न गणितस्तत्राह—एतत्समष्टिव्यष्टिविराडात्मकं जगच्चिदात्मनश्चिन्मयविग्रहस्य अत एवारूपस्य प्राकृतरूपरहितस्य भगवतो रूपं स्थूलशरीरम्। किं तु मायागुणैर्महदादिभिः पृथिव्यंतैस्तत्त्वैर्विरचितमात्मनि स्वस्मिन्नंतर्यामिण्यधिष्ठाने स्थितमित्यर्थः। अतो विशुद्धसत्त्वरूपमत्स्यकूर्माद्यवतारमध्ये मायिकरूपी विराडेव न पठित इति भावः। संदर्भस्तु—तदेवमेतानि साक्षाद्रूपाण्याविष्टरूपाणि चोपदिश्योपासनार्थं शास्त्रेण भगवत्यारोपितं रूपमुपदिशति। एतद्रूपमिति। अरूपस्य प्राकृतरूपासंबद्धस्य मायागुणैर्विरचितमेवैतज्जगदाकारं रूपं तच्चात्मनि जीवे एव विरचितं तत्संबंधतयैव कल्पितं न तु परमेश्वरसंबंधतयेत्यर्थः। आसंगादनासंगाच्चेति भावः॥ ३०॥ ❀ ❀ इत्यर्थ इति। अज्ञानेनारोपितत्वादज्ञाननिवृत्तौ तन्निवृत्तिरपि संगच्छत एवेति भावः। विश्वनाथस्तु—कस्मिन्किमिवेत्यपेक्षायामाह यथेति। एतद्विराड्रूपमिति पूर्वेणान्वयः। तेन यथा मंचस्थः पुरुषो मंच उच्यते तथा भगवति स्थितो विराडपि भगवानुच्यते। एवमेवाधिष्ठितधर्मो दृश्यत्वमपि द्रष्टरि भगवत्यदृश्येप्यारोपितमित्यर्थः। अबुद्धिभिरल्पबुद्धिभिः यथाऽदृश्ययोरपि नभोनिलयोर्नीलं नभ इति धूसरोऽनिल इति मेघरेणुधर्मो नीलिमधूसरत्वलक्षणं दृश्यत्वमारोपितम्। ततश्च भगवानयं विराट् दृश्यः प्रथमदशास्थैर्योगिभिराराध्य इत्युपपन्नम्॥ ३१॥ ❀ ❀ अन्यदाह किं चेति। पूर्ववाक्यस्थपदानुवर्त्तनमनुषंगः। तत्र सूक्ष्मत्वे। इत्यर्थ इति। आकारवद्वस्त्वेव व्यक्तं भवति। तस्य तद्रहितत्वात्तथात्वमुचितमेवेति भावः। एतदेवाव्यक्तत्वमेव। इत्यर्थ इति। संभाव्यत एव न तु दृश्यत इति भावः। अत्राक्षिपति नन्विति। इति भाव इति। स्थूलदेहस्तु न कुत्रापि परलोकादौ गमनागमनं करोति। तस्यात्रैव स्थितिदर्शनात्। अतस्तदेव यातनादेहादौ प्रविश्य गमनागमनादिमदिति तात्पर्यम्। अत्र संदर्भः—तस्य यथा स्थूलं रूपं तथा सूक्ष्ममपीत्याह—अतः परमिति। अतः स्थूलात्। सूक्ष्मत्वे हेतुः अदृष्टेति। अदृष्टत्वादश्रुतमित्यन्तोऽप्यश्रुतत्वाच्चेत्यर्थः। तत्र हेतुः अव्यूढेति। अस्पष्टशब्दादिगुणमित्यर्थः। यद्यस्मादेकरूपाद्धेतोः यदंशावशेनैवेत्यर्थः। स जीवन् पुनर्भवो भवति पुनः पुनर्जन्मादिकं लभत इत्यर्थः। तदपि मायागुणैर्विरचितमिति पूर्वेणानुषंगः। पूर्ववदुपासनार्थमेवेदं रूपमारोपितमिति भावः। वक्ष्यते च "अमुनी भगवद्रूपे मया ते अनुवर्णिते। उभे अपि न गृह्णंति मायासृष्टेविपश्चितः" इति। विश्वनाथस्तु—यथा स्थूलं रूपं भगवद्रूपत्वेनोक्तमपि योगिभिरुपास्यमपि मायागुणैर्विरचितं तथैव सूक्ष्ममपि रूपम् "अमुनी भगवद्रूपे" इत्यनेन भगवद्रूपत्वेन प्रयुक्तमपि "कर्णौ दिशः श्रोत्रममुष्य शब्दः" इति। "सर्वात्मनोन्तःकरणं गिरित्रम्" इत्याद्युक्तेर्योगिभिरुपास्यमपि मायिकमेवेत्याह—अतः स्थूलादित्यादि सर्वं स्वामिवद्व्याख्यातम्। तेन च समष्टिव्यष्टिविराजां जीवत्वात्तत्स्थूलसूक्ष्मरूपयोर्मायिकत्वात्तत्र चेश्वरत्वमारोपितमेव न तु साहजिकमिति भावः। यदुक्तं "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः। ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्प्रचक्षते" इति। अत्रापि वक्ष्यते "अमुनी भगवद्रूपे" इत्यादिना॥ ३२॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

जीवो जीवेनेति एकादशस्कन्धीयपञ्चविंशाध्यायस्य षट्त्रिंशश्लोकः॥ उत्क्रान्तिगत्येति। उत्क्रान्तिगतिर्देहत्यागः तया गतीनां देहान्तराणाम् असम्भवात् स्थूलस्य ध्वस्तत्वात्। गम्यन्ते प्राप्यन्ते इति गतयः। इति व्याख्यालेशः॥ ३२-३३॥

श्रीमद्वीरराघवव्याख्या

अवतारकीर्त्तनादिफलमाह जन्मगुह्यमिति यः कश्चिन्नरो भगवतः एतज्जन्मगुह्यमवताररहस्यं सायं प्रातः समाहितचित्तो भक्त्या गृणन्कीर्त्तयन् दुःखजाताद्विमुच्यते संसारान् मुक्तो भवतीत्यर्थः । जन्मगुह्यमित्यनेन भगवज्जन्म न जीवजन्मवत्कर्ममूलमपितु स्वसंकल्पमूलमित्यभिप्रेतम् ॥ २९ ॥ ❀ ❀ तदेव दर्शयिष्यन् रूपप्रसंगान्न केवलमवतीर्णमेव रामकृष्णाद्याख्यं भगवतो रूपमपि तु परिदृश्यमानं प्रकृतिगुणवैषम्यमूलमहदादिकृतं जगदपि तद्रूपमित्याह एतद्रूपमिति । चिदात्मनः ज्ञानस्वरूपस्यात एवामूर्त्तस्वरूपस्य भगवतः मायागुणैर्गुणपरिणामरूपैर्महदादिभिरात्मन्याधारभूते स्वस्मिन्नेतत्परिदृश्यमानं जगदात्मकं रूपं चिदचित्त्वम्, आत्मनीत्यनेन रूपशब्देन च जगतो भगवद्रूपत्वमुपपादितं शरीरस्यात्मनो धार्यत्वनियमात् ॥ ३० ॥ ❀ ❀ एवं जगदन्तर्गतदेवमनुष्यादिशरीराणामपि भगवद्रूपत्वे सति जीवानां केवलं देवोहं मनुष्योहमित्यभिमानिनो भ्रम एवेत्याह यथेति । यथा मेघसमूहा नभस्याकाशेऽबुद्धिभिराकाशयाथात्म्याविद्भिरारोपिता यथा च पृथिव्याः सम्बन्धी रेणुर्धूलिरनिले तद्याथात्म्याविद्भिरारोपिता एवमबुद्धिभिः प्रत्यगात्मयाथात्म्याविद्भिर्द्रष्टरि जीवे दृश्यत्वमारोपितं देवादिशरीरजातमहं ममाभिमानविषयत्वेनारोपितमित्यर्थः अतो न देवादिशरीरजातं जीवस्वरूपमिति भावः । यद्यपि देवादिशरीरस्य तदभिमानिजीवेन धार्यत्वात्तं प्रतिरूपत्वमस्त्येव । तथापि "य आत्मनि तिष्ठन्यस्यात्मा शरीरमि"त्याद्युक्तरीत्या जीवस्यापि परमपुरुषधार्यत्वान्मुख्यधारकत्वं परमात्मनिष्ठमेवेति तं प्रत्येव देवाद्यचेतनजातं मुख्यं रूपं देहात्मनो रुभयोरपि परमपुरुषधार्यत्वज्ञानं भ्रमरूपं प्रकृतिपुरुषयोरब्रह्मात्मकत्वज्ञानं प्रकृत्यादौ चात्माभिमानः स्वातंत्र्याभिमानः प्रकृतेः प्रसंगादात्मैकधार्यत्वाभिमानश्चाबुद्धिकृत इत्यभिप्रायः ॥ ३१ ॥ ❀ ❀ ननु दृश्यधर्मस्तस्मिन्नारोपितश्चेत्स जीवः कीदृश इत्यत्राह अत इति । अतः अचिदात्मकदृश्यप्रपंचात्परं विलक्षणं तत्त्वं स जीवः । परत्वमेव दर्शयितुं विशिनष्टि अव्यक्तं बाह्येन्द्रियैर्द्रष्टुमशक्यं कुत इत्यपेक्षायां हेतुरदृष्टाश्रुतवस्तुत्वादिति तत्र हेतुमाह अव्यूढगुणबृंहितमिति व्यूढैर्गुणैर्बहुधा विभक्तैर्गुणैर्बृंहितं स्थूलीकृतं यन्न भवति तदव्यूढगुणबृंहितम्, अनेनाचिद्व्यावृत्तिः कारणदशायामस्थूलमचेतनं कार्यदशायां हि व्यूढैर्गुणैः सत्त्वादिभिश्चान्वितं स्थूलीभवति न तथेत्यर्थः । अत एवादृष्टाश्रुतवस्तुत्वात्तदन्यार्थत्वात् तत्र दृष्टं कार्यावस्थितमचिद् द्रव्यं श्रुतं तु कारणावस्थम् 'अचेतनापरार्था च नित्या सततविक्रिये'त्यादिशास्त्रैः श्रुतं तदुभयविलक्षणवस्तुत्वादव्यक्तम् 'अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते' इति हि भगवता गीयते, एवंभूतं यद्वस्तु स जीवः यः पुनर्भव प्रकृतिसंगात्पुनः पुनर्जन्मभागित्यर्थः । यत्पुनरिति पाठे यतो यत्सम्बन्धात्पुनर्भवस्ततः परमित्यन्वयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

फलमाह जन्मेति । प्रयतः प्रकर्षेण निर्जितेन्द्रियग्रामो यो नरो जन एवमुक्तप्रकारेण जन्मरहस्यं सायं प्रातर्भक्त्या गृणन् पठन्सांसारिकदुःखसमूहात् मुच्यत इत्यन्वयः ॥ २९ ॥ ❀ ❀ इदानीं प्रतिमारूपमाह एतदिति । मायागुणैः प्रकृतिविकारैः महदहंकारादिभिरुपादानकारणैः आत्मनि सर्वगते हरिणा विरचितमेतत् जडं ब्रह्मांडमरूपस्य प्रकृतिविकृतिरूपरहितस्य चिदात्मनः केवलज्ञानस्वरूपस्य भगवतो रूपं प्रतिमास्थानीयं हि हेतोर्यस्माज्जडं तस्मात्प्रतिमैव न साक्षात्स्वरूपं, चिदेकरूपस्य भगवतो मायाकल्पितसत्त्वादिगुणैर्महदाद्याकारेण परिणतैरेतत्प्रतीयमानं विराड्रूपमात्मनि चिद्रूपे कल्पितम् अत एव तन्मिथ्या अतस्मिंस्तद्बुद्धेरिति यैः कैश्चिदुच्यते तन्न युक्तं प्रमाणविरोधादित्यस्मिन्नर्थे वा हिः ॥ ३० ॥ ❀ ❀ प्रतिमात्वकल्पनामन्तरेण साक्षाद्रूपत्वं किं न स्यादित्याशंक्य सा भ्रान्तिरिति सोदाहरणमाह यथेति । यथा मेघौघा नभस्यारोपिता मेघौघान् दृष्ट्वाऽयमाकाश इति कल्पयन्ति विवेकशून्याः यथा अनिले वायौ पार्थिवो रेणुरारोपितः वायुनोद्धूयमानमूर्ध्वमुखं रेणुं दृष्ट्वाऽयं वायुरिति आकाशवाय्वोश्चाक्षुषत्वाभावाद् भ्रान्तिरेव सा एवं द्रष्टरि सर्वगे भगवति प्रतिमां दृष्ट्वा मनुष्यदृष्ट्यगोचरे अबुद्धिभिरज्ञैर्भ्रान्त्या दृश्यत्वं जडरूपत्वमारोपितं जल्पितं तस्मात्तद् भ्रान्तमतो न साक्षाद्रूपं प्रतिमैवेति भावः ॥ ३१ ॥ ❀ ❀ एवं हरेर्वासुदेवादिपरमं रूपं ब्रह्मांडाख्यं प्रतिमारूपं च निरूप्य जैवं रूपमाह अत इति । यज्जैवं रूपमत उक्तयोः जडेश्वररूपयोः परं यदव्यक्तं सूक्ष्ममव्यूढगुणबृंहितम् अनादिकालात् कदाचिदप्यनपगतसत्त्वरजस्तमोगुणपूर्णं पश्चाददृष्टाश्रुतवस्तुत्वादश्रुतामतानुपासितानपरोक्षितपरमात्मस्वरूपत्वात्पुनः पुनर्भवः उत्पत्तिर्यस्य स तथोक्तः पुनः पुनर्जायमानो म्रियमाणश्च स जीवः । तस्मान्निर्विवादमीश्वरवशं जैवं रूपमिति भावः । अतः कार्यरूपात् परं व्यतिरिक्तं यदव्यक्तं यदनभिव्यक्तं रूपादिव्यक्तिकारणसाधनैः शून्यमव्यूढमनभिव्यक्तं गुणानां बृंहितं कार्यं यस्मिन् तदव्यूढगुणबृंहितम् अत एव अदृष्टाश्रुतवस्तु तस्मादव्यक्तं स प्रसिद्धो जीवो यद्यस्मात्पुनर्भवतीति पुनर्भवः देहादिप्रपंचलक्षणः संसारो यस्माद्भवतीति च तत्कारणमिति यद्व्याख्यानं तददृष्टाश्रुतवस्तुत्वादिति हेत्वभिधानं विरुध्यते । तस्मिन् पक्षे यददृष्टादिविशेषणैर्विशिष्टं तद्वस्तु मूलकारणमिति वक्तव्यं प्रकृतानुपयुक्तं च । अत्र देवादिप्रपंचस्य मिथ्यात्ववाचिपदं प्रक्षेप्यमतो यत्किंचिदेतत् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः ।

जन्मेति । स्पष्टम् ॥ २९ ॥ ❀ ❀ तदेवमेतानि साक्षाद्रूपाण्याविष्टरूपाणि चोपदिश्य उपासनार्थं शास्त्रेण भगवत्यारोपितं रूपमुपदिशति एतद्रूपमिति । अरूपस्य प्राकृतरूपासम्बद्धस्य मायागुणैर्विरचितमेवैतज्जगदाकारं रूपम् । तच्चात्मनि

जीव एव विरचितं तत्सम्बन्धतयैव कल्पितं न तु परमेश्वरसम्बन्धतयेत्यर्थः । असङ्गादनासङ्गाच्चेति भावः ॥ ३० ॥ ❀ ❀ तर्हि कथं तस्यैतद्रूपमित्युक्तम् । पातालमेतस्य हि पादमूलमित्यादिना च तथा वर्णयितव्यम् । उच्यते अङ्गदृष्ट्यपेक्षया तदुपासनार्थं तदध्यासेनैवेत्याह यथेति ॥ ३१ ॥ ❀ ❀ तस्य यथा स्थूलं रूपं तथा सूक्ष्ममपीत्याह अतः परमिति । अतः स्थूलाद्रूपात् परम् अन्यदपि यदव्यक्तं सूक्ष्मं तस्य रूपम् । सूक्ष्मत्वे हेतुः अदृष्टेति । अदृष्टत्वाददृष्टमित्यन्यतोऽप्यश्रुतत्वाच्चेत्यर्थः । तत्र हेतुः अव्यूढेति । अस्पष्टशब्दादिगुणमित्यर्थः । यद् यस्मादेव रूपाद्धेतोः यदंशावेशेनेत्यर्थः । स जीवोऽपि पुनर्भवो भवति पुनः पुनर्ज्जन्मादिकं लभत इत्यर्थः । तदपि मायागुणैर्विरचितमिति पूर्व्वेणानुषङ्गः । पूर्व्ववदुपासनार्थमेवेदं रूपमारोपितमिति भावः । वक्ष्यते च "अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चित" इति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

एतत्कीर्त्तनफलमाह जन्मेति । गुह्यमतिरहस्यं यो गृणन् कीर्त्तयन् भवेत् ॥ २९ ॥ ❀ ❀ ननु पातालमेतस्य हि पादमूलमित्यादिना द्वितीयस्कन्धादौ योऽयं विराड्रूपी भगवान् प्रथममुपास्यत्वेनोक्तः स कथमवतारमध्ये न गणितस्तत्राह एतत् समष्टिव्यष्टिविराडात्मकं जगच्चिदात्मनश्चिन्मयविग्रहस्य अत एवारूपस्य प्राकृतरूपरहितस्य भगवतो रूपं स्थूलं शरीरं किन्तु मायागुणैर्महत्तत्त्वादिभिः पृथिव्यन्तैस्तत्त्वैर्विरचितम् । आत्मनि स्वस्मिन्नेतदन्तर्यामिन्यधिष्ठाने स्थितमित्यर्थः । अतो विशुद्धसत्त्वरूपमत्स्यकूर्म्माद्यवतारमध्ये मायिकरूपी विराडेव न पठित इति भावः ॥ ३० ॥ ❀ ❀ कस्मिन् किमिवेत्यत आह । यथा नभसि आकाशो मेघसमूहः । अनिले च पृथ्वीविकारो रेणुस्तथैव आत्मनि एतद्विराड् रूपमिति पूर्व्वेणैवान्वयः । तेन मञ्चस्थः पुरुषो यथा मञ्च उच्यते तथा भगवति स्थितो विराडपि भगवानुच्यते इत्यर्थः । एवमेवाधिष्ठितधर्म्मो दृश्यत्वमपि द्रष्टरि भगवत्यदृश्येऽपि आरोपितमित्यर्थः । अबुद्धिभिः अल्पबुद्धिभिः यथा अदृश्ययोरपि नभोऽनिलयोर्नीलं नभ इति धूसरोऽनिल इति मेघरेणुधर्म्मो नीलिमधूसरत्वलक्षणं दृश्यत्वमारोपितं ततश्च भगवानयं विराड् दृश्यः प्रथमदशास्थैर्योगिभिराराध्य इत्युपपन्नम् ॥ ३१ ॥ ❀ ❀ तथा स्थूलं रूपं भगवद्रूपत्वेनोक्तमपि योगिभिरुपास्यमपि मायागुणैर्विरचितं तथैव सूक्ष्ममपि रूपम् अमुनी भगवद्रूपे इत्यनेन भगवद्रूपत्वेन प्रयुक्तमपि कर्णौ दिशः श्रोत्रममुष्य शब्द इति । सर्व्वात्मनोऽन्तःकरणं गिरित्रमित्याद्युक्तेर्योगिभिरुपास्यमपि मायिकमेवेत्याह । अतः स्थूलादन्यत् अव्यक्तं सूक्ष्मम् । तत्र हेतुः—अव्यूढाः करचरणादित्वेनापरिणता ये गुणास्तैर्बृंहितं रचितम् आकारविशेषरहितमित्यर्थः । एतदेव अदृष्टाश्रुतवस्तुत्वात् । यच्चाकारविशेषवद्वस्तु तदसदादिवद् दृश्यते श्रूयते वा इन्द्रादिवत् इदन्तु न तथा । ननु तस्य सत्त्वे किं प्रमाणं तत्राह । स जीवः जीवोपाधिः । "जीवो जीवेन निर्मुक्तो जीवो जीवं विहाय चे"त्यादौ जीवोपाधौ लिङ्गदेहे जीवशब्दप्रयोगात् जीवोपाधितया कल्प्यत इत्यर्थः । ननु स्थूलमेव भोगायतनत्वात् जीवस्योपाधिरस्तु, किमन्यकल्पनया इत्यत आह । यद्यस्मात् सूक्ष्मात् पुनर्भवः पुनः पुनर्जन्म उत्क्रान्तिगत्यागतीनां तेन विना असम्भवादिति भावः । तेन च समष्टिव्यष्टिविराजां जीवत्वात्तत् स्थूलसूक्ष्मयोरूपयोर्मायिकत्वात् तत्र चेश्वरत्वमारोपितमेव, न तु साहजिकमिति भावः । यदुक्तम् । "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत् प्रचक्षत" इति । अत्रापि वक्ष्यते । "अमुनी भगवद्रूपं मया ते ह्यनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चित" इति ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

अवतारकीर्तनादिफलमाह जन्मेति । कर्मोपलक्षणम् उक्तप्रकारं जन्मकर्मरहस्यमित्यर्थः, गृणन्नित्युपलक्षणं जन्मकर्मगुह्यश्रवणमननादेः दुःखग्रामात्संसाराद्विमुच्यते मुक्तो भवति । उक्तं च श्रीमुखेनापि "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुने"ति ॥ २९ ॥ ❀ ❀ अथैवं दर्शितस्य भगवज्जन्मकर्मरहस्यस्य वेदगुह्यत्वं कविज्ञेयत्वं च वक्ष्यन् प्रसंगाज्जीवबन्धमोक्षप्रकारमाह पंचभिः श्लोकैः । ननु जन्मगुह्यं गृणन् यो दुःखग्रामाद्विमुच्यते तस्य तावत् बन्धः कथमस्तीत्यत आह एतद्रूपमिति चिदात्मनः जीवस्य एतद्रूपम् इदं स्थूलं शरीरं भगवतः प्रकृतिगुणैर्महदादिभिर्विरचितम् आत्मनि तत्स्थाने कृतम्, अनादिकर्मवश्येन जीवेन आत्मतया स्वीकृतमिति फलितोऽर्थः ॥ ३० ॥ ❀ ❀ नन्वनात्मात्मतया कथं स्वीकृत इत्यत आह यथेति । वाय्वाश्रितोपि मेघः यथा अबुद्धिभिर्नभसि आरोपितः यथा वा अनिले वायुस्थाने पार्थिवो रेणुः रेणुसंघः आरोपितः एवमज्ञानादेवाऽबुद्धिभिर्द्रष्टरि दृश्यविलक्षणे जीवे दृश्यत्वं शरीरत्वम् आरोपितम् ॥ ३१ ॥ ❀ ❀ अतः इति । अतः स्थूलशरीरात् परमुत्कृष्टम् अधिककालस्थायि अव्यक्तं सूक्ष्मम् अव्यूढैः सूक्ष्मैर्गुणैः गुणकार्यैः एकादशेन्द्रियपंचतन्मात्रैर्बृंहितं रचितं यत् येनानुवर्त्तमानेन पुनर्भवः पुनः पुनर्जन्म भवति तदपि स जीव इत्यबुद्धिभिः स्थूलदेहपरित्यागग्रहणान्तराले आत्मत्वेनारोपितमिति पूर्व्वेणैवान्वयः । तत्र हेतुमाह इतरेतरपृथक्कृतयाऽदृष्टाश्रुतानि वस्तूनि आत्मानात्मपरमात्मस्वरूपाणि यैस्ते अदृष्टाश्रुतवस्तवस्तेषां भावस्तत्त्वं तस्माददृष्टाश्रुतवस्तुत्वादित्यर्थः एतेन येषां देहदेहिज्ञानं नास्ति तेषां परमात्मज्ञानं नास्तीति किमु-

वक्तव्यम् । किंचानेनोभयशरीरमूलभूतायास्त्रिगुणायाः प्रकृतेः संगश्चोक्तः तत्त्वत्रयाविवेकादनादिमायापरियुक्तरूपत्वाज्जीवात्मनो बन्ध-इति फलितोऽर्थः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

कृष्णावतारप्रयोजनं नोक्तमिति स्वस्याज्ञानदोषं निवारयन्नवताराणां दुर्ज्ञेयत्वमाह जन्म गुह्यं भगवत इति । भगवतः कृष्णस्य जन्म गुह्यं गोप्यं न प्रकटतया वक्तव्यमित्यर्थः । तर्हि कथं निस्तार इत्याशंक्याह य एतदिति । एतदवताररूपं सामान्यतोऽस्मदुक्तं प्रयतः सावधानः शुचिः शुद्धः सायं प्रातर्भक्त्या स्तोत्रपाठं कुर्वन् दुःखग्रामात् दुःखसमूहाद्विशेषेण मुच्यते । जन्मरहस्यज्ञानाभावेपि केवलं जन्मकीर्तनमात्रेणापि सर्वदुःखनिवृत्तिरित्यर्थः । श्रद्धया गृणन् मुच्यत एव ॥ २९ ॥ ❀ ❀ एवं पुरुषावतारं स्वांशावतारैः सपरिकरं निरूप्य तस्य विचारमाह एतद्रूपमित्यादिपंचभिः । एतद्रूपं ब्रह्मांडात्मकं भगवतो रूपं पूर्णब्रह्मण एव सत्योपहितस्य सत्यरूपं शरीरव्यतिरेकेणात्मनोन्यत्र वृत्तिलाभाभावात् "अरूपवदेव हि तत् प्रधानत्वात् ३ । २ । १४ ।" इति न्यायेन ब्रह्मणि स्वतो रूपं नास्ति तत्र हेतुः चिदात्मन इति जडमेव हि रूपं भवति, चैतन्यमात्रस्यामूर्तत्वस्य हि रूपाभावादिति हिशब्दार्थः । तर्हि कथं ब्रह्मांडशरीरत्वमुक्तं मायागुणैर्विरचितमिति वैष्णवतन्त्रे आधिदैविकस्य शक्तिर्माया तस्या एव त्रयो गुणाः सत्त्वरजस्तमांसि तैरेव महदादयो जाताः, तैः स्वशरीर एव तच्छरीरं निष्पादितम् । इदं हि भगवच्छरीरमत्र भगवान् समाहितो भजनीयो भविष्यतीति । ततश्च महदादिक्रूपया भगवानत्र संहित आविर्भूतस्तप्तायोगोलके वह्निरिव तिष्ठतीति बोद्धव्यम् ॥ ३० ॥ ननु जडरूपे कथमस्मिन् ब्रह्मप्रतीतिः, तथा सति न चेतनत्वं प्रतीयते, ततश्च दृश्यत्वाज्जडत्वाच्च न भगवदावेशोत्रास्तीति कथमिदं शरीरं तत्राह यथा नभसीति । अयं हि द्रष्टा देवदत्तवद्भगवान् सर्वं पश्यति यद्यपि शरीरमपि दृश्यं तथापि द्रष्टृ व्याप्तमिति तद्व्यतिरिक्तस्यैव दृशयत्वप्रतीतिर्लोके । तत्र ये महांतस्ते सर्वत्र ब्रह्मांडेऽयोगोलके वह्निमिव भगवन्तं पश्यन्ति ये पुनर्मूढास्ते तस्मिन् द्रष्टरि दृश्यत्वमारोपयन्ति ॥ ३१ ॥ ❀ ❀ ननु कथमन्यस्मिन्नन्यधर्माध्यारोप इत्याशंक्याह दृष्टान्तं यथा नभसि मेघौघ इति । वस्तुतस्त्वाकाशोऽदृश्यः ततश्च तदाधारत्वेन कथं मेघा दृश्या भवेयुः । येषामपि मते दृश्यस्तेषामपि मतेनाकाशे मेघाः किन्तु वायावेव तत्र यथान्यत्र स्थितानामन्यत्र प्रतीतिः अत्र विशिष्टप्रतीतिरारोपितेन सह तथा नास्तीति दृष्टान्तान्तरमाह । रेणुर्वा पार्थिवोऽनिल इति यथा वात्यादौ तद्विशिष्टरेणुप्रतीतिः ततो भ्रान्ताः वात्या इति रेणुं मन्यन्ते वस्तुतस्तु पार्थिवो रेणुः ॥ ३१ ॥ ❀ ❀ एवं प्रपंचे जडबुद्धिर्भ्रान्ता भगवद्बुद्धिर्मुख्येति निरूप्य जीवेऽपि भगवद्बुद्धिरेव मुख्या न जीव बुद्धिरिति निरूपयति अतः परमिति । अतो ब्रह्माण्डविग्रहात् सूक्ष्मं सर्वेन्द्रियागोचरम् अव्यक्तापरपर्यायं करचरणाद्याकारेणापरिणतैर्गुणैः स्वाभाविकैर्व्याप्तम् अस्तीति सम्बन्धः । तत् किमित्याकांक्षायां स जीव एव जीवजडभगवद्व्यतिरेकेण चतुर्थपदार्थस्याभावात् । ननु तथापि जीवत्वं कुतः ? अत आह अदृष्टाश्रुतवस्तुत्वादिति । यदि तज्जडं स्यात् दृश्यं स्यात् यदि वा भगवद्रूपं स्यात् वेदादौ श्रुतं स्यात् । न वा निःस्वभावं शशशृङ्गवत् वस्तुत्वात् , तस्मात्पारिशेष्याज्जीव एव । केचन तं जीवोपाधि मन्यन्ते तथा प्राप्तविवेकेन भगवद्व्यतिरिक्तस्य जीवस्याभावात् कस्योपाधिः स्यात्तस्माज्जीव एव सः । किंच यस्मात् पुनर्भवः पुराणे लोके चैवं प्रतीयते पूर्वमयं देवः स्थितः, इदानीं मनुष्यत्वमापन्न इति, अतः पुनर्भवन्यथानुपपत्त्या भगवदुपाधिः सूक्ष्मो जीवः कश्चिदस्तीति मन्तव्यम् ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एतद्रूपमित्यत्र । विचारमाहेति । ऊहापोहेन विवक्षितसाधनं विचारः । तथा चोहापोहेन तस्य भगवत्त्वशासनप्रकारमाहेत्यर्थः । रूपमिति शरीरमित्यर्थः । तेनाधिदैवादिकवादो विशिष्टाद्वैतापरपर्यायोत्र ज्ञाप्यते, तदाहुः अरूपवदिति । अयं न्याय उत्तरतन्त्रे साधनाध्याये द्वितीयपाद उभयलिङ्गाधिकरणेऽस्ति, तदर्थस्तु—तद्ब्रह्म अरूपवदेव हि । रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तदुक्तं रूपवद्विश्वम् , ब्रह्म तु तद्विलक्षणमेव, कार्यादंशाच्च कारणस्यांशिनो वैलक्षण्यस्य युक्तत्वात् । ननु कारणत्वादवैलक्षण्यमपि युक्तमत आह—तत्प्रधानत्वात् । तस्य प्रकरणिनः प्रधानत्वात् मुख्यत्वात् । यत्र हि यत् प्रतिपाद्यते, तत्र तदेव हि मुख्यम् , अत्र ब्रह्म प्रतिपाद्यत इति ब्रह्मधर्माः प्रशासनादय एव, न तु जडजीवधर्मा इति । अत्र शरीरप्रकरणाद्रूपपदेन शरीरमुच्यते । इदं चैकदेशिमतं सूत्राधिकारानुसारेणोच्यते, सिद्धान्ते त्वहिकुण्डलन्यायः । स तु मुख्यसिद्धान्ते वक्ष्यते । तस्या एवेति । जाता इत्यर्थः । न तु सात्र गुणमयी । निष्पादितमिति । मन्दिरवन्निष्पादितम् । सन्निहित इत्यस्यैव व्याख्यानमाविर्भूत इत्यादि ॥ ३० ॥ ❀ ❀ यथा नभसीत्यत्र । तथा सतीति । ब्रह्मणो वह्निवदाविर्भूतत्वे सति । ततश्चेति । प्रतीतिविरोधात् । अयमिति । एतच्छरीरविशिष्टो भगवान् । तद्व्यतिरिक्तस्येति । द्रष्टृव्यतिरिक्तस्य । कथमिति—अदृश्येऽध्यारोपासम्भवात्कथमित्यर्थः । वस्तुत इत्यादि । तथा चादृश्य आकाशे यथा मेघा आरोपिताः, तथा ब्रह्मशरीरे ब्रह्माण्डे दृश्यत्वमप्यारोपितम् । ततश्च यथा मेघद्रष्टॄणामाकाशधर्मोऽवकाशो न प्रतीयते, तथा प्राकृतत्वेन द्रष्टॄणां चेतनत्वमपि न प्रतीयत इति तदप्रत्ययमात्रेण भगवदना-

विष्टत्वस्य न सिद्धिरित्यर्थः। ननु 'पराञ्चि खानी'ति श्रुतेर्भगवान् पराचामदृश्यः, आकाशस्तु केषाञ्चिन्मते पराचामपि दृश्य इति विरुद्धो दृष्टान्त इत्यत आहुः येषामित्यादि। तथा चाकाशेऽसम्भवदाधाराणां वायुस्थितानामाकाशस्थत्वप्रतीतिवत्स्वविषयस्थित-दृश्यत्वस्य ब्रह्मशरीरे प्रतीतिरित्यस्मिन्नंशे दृष्टान्त इत्यर्थः। तर्हि द्वितीयदृष्टान्तस्य किं प्रयोजनमत आहुः–अत्रेत्यादि। उक्तदृष्टान्ते। तथा नास्तीति दार्ष्टान्तिकसमानता नास्ति। दृष्टान्ते ह्यदृश्यधर्मो दृश्ये आरोप्यते, दार्ष्टान्तिके तु दृश्यधर्मस्यादृश्ये आरोपो विवक्षित इत्यसमानता, तेनास्वरसेन दृष्टान्तान्तरमुच्यत इत्यर्थः। यथा वाल्येत्यादि। वायुः सर्वमतेऽप्यदृश्यः, तत्र यथा पृथिव्या दृश्याया रेणुरारोपितस्तथेत्यर्थः। तथा च यदि वाचो धेनुत्ववत् भगवतो ब्रह्माण्डं भगवत्यारोपितमित्यभिप्रेयात्, तदा द्रष्टरि दृश्यमारोपितमिति ब्रूयात्। न तु दृश्यमिति। तेन दृश्यत्वादिधर्मकं शरीरमारोपितमिति व्याख्यानं न युक्तम्, दृश्यपदे लक्षणा-प्रसंगात्। जगृह इति भूतार्थवादस्य योगजधर्मीयदर्शनादेश्च बाधप्रसंगादित्यर्थः॥ ३१॥ ❀ ❀ अतः परमित्यत्र। इति निरूपयतीति। इति वक्तुं भगवदुपाध्यन्तरं जीवं निरूपयतीत्यर्थः। वस्तुत्वादिति। चेष्टाद्यनुमेयवस्तुत्वात्। केचनेत्यादि। श्रीधराद्याः। 'जीवो जीवेन निर्मुक्त' इत्यादौ जीवोपाधौ लिङ्गशरीरेपि जीवपदप्रयोगदर्शनाज्जीवपदेन लिङ्गशरीरं मन्यन्त इत्यर्थः। तत् दूषयन्ति तथेत्यादि। तथा सति प्राप्ताप्राप्तविवेकेन भगवानुपक्रान्तत्वात्प्राप्तः, जीवस्त्वनुपक्रान्तत्वादप्राप्त इति तद्विचारेण तथेति नात्र लिङ्गशरीरमुच्यत इत्यर्थः। तथा च ब्रह्मणोंशतो लिङ्गशरीरसम्बन्धोऽनुचितो जीवतुल्यतामतिश्चेति भावः। पुनर्भव इति। अस्तीति शेषः। तथा च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इत्यादिना श्रुतौ लिङ्गभूतानामनूत्क्रमः श्राव्यते, न तूत्क्रमः, अत उत्क्रमणलिङ्गेनापि न जीवोपाधिरत्रोच्यत इति तथेत्यर्थः। भगवदुपाधिरिति। भगवतान्तर्यामिरूपेणोप समीपे धीयते पोष्यत इति तथा॥ ३२॥

श्रीगिरिधरकृता बालप्रबोधिनी

एतदवतारकीर्तनादिफलमाह–जन्मेति। नात्र वर्णाश्रमादिनियमः किन्तु यः कश्चिदपि नरः प्रयतः समाहितचित्तो भूत्वा सायम्प्रातः एतद्भगवतो जन्मगुह्यमवताररहस्यं भक्त्या गृणन् कीर्त्तयन् दुःखग्रामात् दुःखानां ग्रामो निवासभूतो यः संसारस्तस्माद्वि-मुच्यते इत्यन्वयः॥ २९॥ ❀ ❀ ननु 'संसाराद्विमुच्यते' इति यदुक्तं तत्र देहद्वयसम्बन्धे सति कथं तद्विमुक्तिः सम्भवती-त्याशङ्क्य देहद्वयसम्बन्धस्य भगवन्मायोत्थाविद्याविलसितत्वात् एतच्छ्रवणकीर्त्तनादिजनितविद्याया अविद्यानिवृत्त्या देहाद्यध्यास-निवृत्तिस्ततो विमुक्तिरुपपद्यते इत्याह–एतदिति पञ्चभिः। अरूपस्य प्राकृतरूपरहितस्य। तत्र हेतुमाह–चिदात्मन इति। चिदात्मनो ज्ञानस्वरूपस्य जीवस्य एतत् दृश्यमानं स्थूलं रूपं शरीरं भगवतो या माया प्रकृत्याख्या तस्याः गुणैर्गुणपरिणामरूपैर्महदादिभिर्विर-चितम्। तत्रात्मनि आत्मस्थाने कृतमित्यर्थः। देवोऽहं मनुष्योऽहमित्यादिसमानाधिकरणतया प्रतीतेः॥ ३०॥ ❀ ❀ एतदेव दृष्टान्तेनोपपादयति–यथेति। यथा वाय्वाश्रितो मेघौघो नभसि आकाशे अबुद्धिभिराकाशयाथात्म्याविद्भिरारोपितः, वा अथवा पार्थिवो रेणुः तद्गतं धूसरत्वादिकमनिले तद्याथात्म्याविद्भिरारोपितः। एवं द्रष्टरि जीवे दृश्यत्वादिधर्मकं शरीरमबुद्धिभिः प्रत्यगात्म-याथात्म्याविद्भिर्देवोऽहं मनुष्योऽहमित्यारोपितमित्यर्थः॥ ३१॥ ❀ ❀ किञ्च अतः परमिति। अतः स्थूलरूपात् परमन्यदपि अन्तःकरणेन्द्रियादिसङ्घातरूपं आत्मन्यबुद्धिभिः आरोपितमित्यनुषङ्गः। सुख्यहं दुःख्यहं काणोऽहं बधिरोऽहमित्याद्यध्यासप्रतीतेः। तद्दर्शयति–यदव्यक्तं बाह्येन्द्रियाविषयः। तत्र हेतुमाह–अदृष्टाश्रुतवस्तुत्वादिति। अतिसूक्ष्मतया दुर्वितर्क्यत्वादित्यर्थः। तत्रापि हेतु-माह–अव्यूढगुणबृंहितमिति। व्यूढाः करचरणादिरूपेण परिणतास्तथा अपरिणता अव्यूढा ये गुणास्तैर्बृंहितं रचितमित्यर्थः। तर्हि तस्य सत्त्वे किं प्रमाणमित्यपेक्षायामाह–स जीव इति, जीवोपाधितया कल्पित इत्यर्थः। ननु स्थूलदेह एव भोगायतनत्वाज्जीवस्यो-पाधिरस्तु किमन्यकल्पनयेत्याशङ्क्याह–यदिति। यद्यस्मात् सूक्ष्माज्जीवस्य पुनर्भवः पुनर्जन्म भवति। स्थूलदेहस्यात्रैव पतितत्वेनो-त्क्रान्तिगत्या गतीनां तेन विना असम्भवादिति भावः। न च जीवोपाधौ कथं जीवशब्दप्रयोग इति शङ्क्यम् 'जीवो जीवेन निर्मुक्तो जीवं जीवो विहाय च। एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम्॥ एष चेतनया युक्तो जीव इत्यभिधीयते। अनेन पुरुषो देहानुपादत्ते विमुञ्चति' इत्यादौ जीवोपाधौ लिङ्गदेहेऽपि जीवशब्दप्रयोगदर्शनादिति॥ ३२॥

हिन्दी अनुवाद

भगवान्‌के दिव्य जन्मोंकी यह कथा अत्यन्त गोपनीय–रहस्यमयी है; जो मनुष्य एकाग्रचित्तसे नियमपूर्वक सायङ्काल और प्रातःकाल प्रेमसे इसका पाठ करता है, वह सब दुःखोंसे छूट जाता है॥ २९॥ ❀ ❀ प्राकृत रूपरहित चिन्मय भगवान्‌का जो वह स्थूल–जगदाकाररूप है, यह उनकी मायाके महत्तत्त्वादि गुणोंसे भगवान्‌में ही कल्पित है॥ ३०॥ ❀ ❀ जैसे बादल वायुके आश्रय रहते हैं और धूसरपना धूलमें होता है, परन्तु अल्पबुद्धि मनुष्य बादलोंका आकाशमें और धूसरपनेका वायुमें आरोप करते हैं–वैसे ही अविवेकी पुरुष सबके साक्षी आत्मामें स्थूल दृश्यरूप जगत्‌का आरोप करते हैं॥ ३१॥ ❀ ❀ इस स्थूल रूपसे परे भगवान्‌का एक सूक्ष्म अव्यक्त रूप है–जो न तो स्थूलकी तरह आकारादि गुणोंवाला है और न देखने-सुननेमें ही आ सकता है, वही सूक्ष्मशरीर है। आत्माका आरोप या प्रवेश होनेसे यही जीव कहलाता है और इसीका बार-बार जन्म होता है॥ ३२॥

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ ३३ ॥
यद्येषोपरता देवी माया वैशारदी मतिः । सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥
एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च । वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥
स वा इदं विश्वममोघलीलः सृज्यत्यवत्यत्ति न सज्जतेऽस्मिन् ।
भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह । यत्रेति यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा श्रवणमननादिभक्त्या स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः । ज्ञानेन प्रतिषेधार्हत्वे तमेव हेतुमाह । अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः । कथंभूतम् । दर्शनं ज्ञानैकस्वरूपम् ॥ ३३ ॥ ❀ ❀ तथापि भगवन्मायायाः संसृतिकारणभूताया विद्यमानत्वात्कथं ब्रह्मता तत्राह । यदीति । यदीत्यसंदेहे संदेहवचनम् । यदि वेदाः प्रमाणं स्युरितिवत् । वैशारदी विशारदः सर्वज्ञः ईश्वरस्तदीया देवी संसारचक्रेण क्रीडन्ती एषा माया यद्युपरता भवति । किमित्युपरता भवेत्तत्राह । मतिर्विद्या । अयं भावः-यावदेषाविद्यात्मन आवरणविक्षेपौ करोति तावन्नोपरमति यदा तु सैव विद्यारूपेण परिणता तदा सद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति तदा संपन्नो ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः । किमतः यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते । विराजत इत्यर्थः ॥ ३४ ॥ ❀ ❀ यथा जीवस्य जन्मादिमाया एवमीश्वरस्यापि जन्मादिमायेत्याह एवमिति । अकर्तुः कर्माणि अजनस्य जन्मानि हृत्पतेरंतर्यामिणः ॥ ३५ ॥ ❀ ❀ तर्हि जीवादीश्वरस्य को विशेषः ? स्वातंत्र्यमेव विशेष इत्याह । स वा इति षाड्वर्गिकमिंद्रियषड्वर्गविषयं जिघ्रति दूरादेव गंधवद् गृह्णाति न तु सज्जत इत्यर्थः । कुतः षड्गुणेशः षडिंद्रियनियंता ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमेव मायागुणैर्विरचितमेव । इत्यर्थ इति । उपाधिनिवृत्त्या निरुपाधि शुद्धं ब्रह्मैव जायत इति भावः । अत्र विश्वनाथः नन्वेवं चेदिदं सर्वं वस्तुतो मायादर्शनमेव ब्रह्मदर्शनं किमित्यपेक्षायामाह । यत्र भगवति मे सदसद्रूपे उक्तलक्षणे मायिके स्थूलसूक्ष्मरूपे प्रतिषिद्धे भवतः । तेनामायिकं रूपं तस्य न प्रतिषिद्धं भवतीति भावः । केन स्वेषां भक्तानां संविदाऽनुभवेन । ते कथं भगवति न स्त इत्यत आह । अविद्ययाऽऽत्मनि जीव एव कृतेऽध्यस्ते न त्वीश्वरे । तदुक्तं "देहाहंकरणाद्देहाध्यासो जीवे ह्यविद्यया । न तथा जगदध्यासः परमात्मनि युज्यते" इति । तत् ततश्च तस्य ब्रह्मणो दर्शनं साक्षात्कारः स्यात् । यद्येषा माया देवी उपरता स्यात् । तथा वैशारदी विशारदो भक्तानां हिते निपुणो भगवानेव । तदीया मतिर्मामयं पश्यत्विति कृपामयी तदिच्छा यदि प्रवृत्ता स्यात्तदैव, नान्यथा "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्" इति श्रुतेः । यद्वा वैशारदी भगवद्विषयिणी पुरुषस्य स्यादिति । संदर्भस्तु "यत्र स्वसंविदा" इत्युक्त्या जीवस्वरूपज्ञानमपि तदाश्रयमेव । भवतीति । तथा केवलस्वसंविदा ते न निषिद्धे भवत इति च ज्ञापितम् । ततश्च जीवत एवाविद्याकल्पितमायाकार्यसंबंधमिथ्यात्वज्ञापकजीवस्वरूपसाक्षात्करणतादात्म्यापन्नब्रह्मसाक्षात्कारो जीवन्मुक्तिविशेष इत्यर्थः । ईदृशमेव तन्मुक्तिलक्षणं कापिलेये "मुक्ताश्रयं यर्हि" इत्यादिचतुष्टये दर्शितम् । तस्मादस्य प्रारब्धकर्ममात्राणामनभिनिवेशेनैवोपभोगः । एवमेवोक्तं "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति । स्वामिचरणास्तु यद्यप्यविद्यानिवृत्तौ ब्रह्मत्वमुक्तं तथापीति । अत्राशयमाह-अयं भाव इति । यावन्मायाऽविद्यारूपेण । विश्वनाथस्तु संपन्न एव तन्मतिमानेव पुरुषः संपन्नोऽन्यस्तु दरिद्र इत्यर्थः । विदुस्तज्ज्ञाः स्वे महिम्नि स्वीये माहात्म्ये वर्तमानः स महीयते पूज्यतेऽन्यथा स्वमाहात्म्याद् भ्रष्टः स निन्द्यत इति भावः ॥ ३३ ॥ ❀ ❀ संदर्भस्तु-अथांतिमां ब्रह्मसाक्षात्कारलक्षणां मुक्तिमाह-यदीति । एषां जीवन्मुक्तिदशायां स्थिता विशारदेन परमेश्वरेण दत्ता देवी द्योतमाना मतिर्विद्या तद्रूपमायास्वरूपशक्तिवृत्तिभूतविद्याविर्भावद्वारलक्षणा सत्त्वमयी मायावृत्तिः सा यदि उपरता निवृत्ता भवति तदा व्यवधानाभासस्यापि राहित्यात् संपन्ना लब्धपरमानन्दसंपत्तिरेवेति विदुर्मुनयः । ततश्च तत्संपत्तिलाभात्स्वे महिम्नि स्वरूपसंपत्तावपि महीयते पूज्यते प्रकृष्टप्रकाशो भवतीत्यर्थः ॥ ३४ ॥ ❀ ❀ संदर्भः-एवं भगवत्त्वं दर्शयित्वा ब्रह्मत्वं दर्शितम् । ननु ब्रह्मानुभवेनैव यदि मुक्तिः स्यात्तर्हि कथं जन्मगुह्यमित्यादिना तत्कीर्त्तनमात्रेण संसारविमोक्ष उक्तस्तत्राह एवमिति । यथैवाव्यवहितपूर्वोक्ताविद्यामायोपरतावेव ब्रह्मानुभवसंपत्ती भवतः । एवं प्राकृतजन्मकर्मरहितस्य हृत्पतेः सर्वबुद्ध्यगोचरस्य जन्मानि कर्माणि च कवयो वर्णयन्ति । तत्तदुपरतावेव जन्मकर्मानुभवसंपत्ती साधकानां भवत इति मन्यन्त इत्यर्थः । संपत्तिरत्र साक्षाल्लब्धिः । अत एव वेदगुह्यानीति । तथोक्तं भगवता "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन" इति, तथैव तेषु श्रीशुकदेवादीनामपि ब्रह्मनिष्ठापरित्यागेनापि रागतः प्रवृत्तिर्वर्णयिष्यते द्वादशे "स्वसुखनिभृतचेताः" इत्यादौ ।

अतो ब्रह्मवत्तन्निदिध्यासनेनैव संसारदुःखोपक्षयः स्यात्तदनुभवसंपत्ती च भवत इत्यर्थः । पृथगर्थत्वेवमित्यस्य व्यवहितवाक्यार्थेनान्वयायोगात्कष्टाय संपद्यते च । विश्वनाथस्तु—एवमनेनोक्तलक्षणप्रकारेण मायिकशरीरद्वयप्रतिषेधेनेत्यर्थः । अजनस्य जन्मानि "अजायमानो बहुधा विजायते" इति श्रुतेः । अकर्त्तुः कर्माणि "न चास्य कार्यं करणं च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । ननु जीवस्यापि वस्तुतोऽजनस्यैवाकर्त्तुरेव जन्मानि कर्माणि च दृश्यन्ते । सत्यम् । तस्य तानि मायासंबंधेन, अस्य तु मायाप्रतिषेधेनेत्येष एव भेद इत्याह । वेदेषु वेदैर्वा गुह्यानि रहस्यत्वेन परमोपादेयत्वेन च संवृत्य स्थापितानि तात्त्विकानि । जीवस्य तु तानि मायिकत्वेन हेयान्येवावास्तवानीत्यर्थः । तदुक्तं श्रीगीतोपनिषदि "जन्म कर्म च मे दिव्यम्" इत्यादि । हृत्पतेरंतर्यामिणः विराड्रूपस्यैवंभूतत्वाभावादवतारमध्ये गणना तस्य न कृतेति प्रकरणार्थः ॥ ३५ ॥ ❀ ❀ अथ प्राकृतासंगरहितस्यानन्दैकलीलत्वमाह—स वा इति । षड्भिरैश्वर्यादिभिर्गुणैर्भगाख्यैरीष्टे यः स षड्गुणेशः षाड्वर्गिकं जिघ्रति । तेषु नानाभेदत्वाद्वर्गात्मकेषु चरति । यद्भक्तानां भक्तिसुखं यद्वा "तत्तेऽर्हत्तम नमःस्तुतिकर्मपूजाकर्मस्मृतिश्चरणयोः श्रवणं कथायाम् ॥ संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत" इति श्रीप्रह्लादसंमत्या षड्वर्गसंसेवातः संजातं यत्प्रेम भक्तिसुखं तदेव जिघ्रति अन्विष्यास्वादयतीत्यर्थः । ततश्च न चास्येति तादृशतल्लीलानभिज्ञानां कुमनीषत्वे स वेदेति तादृशतल्लीलातत्त्वस्य भक्त्येकानुभवनीयत्वे संगमनीयम् । अत एव "अथेह धन्या" इत्यादीनि सुष्ठु संगतानि स्युरिति संदर्भः । विश्वनाथः-भगवतस्त्वन्यानि ततो वैलक्षण्यानि बहूनि सन्ति, तत्र प्रथमं निरंकुशैश्वर्यमाह—स वा इति । षाड्वर्गिकमिन्द्रिय षड्वर्गविषयमित्यादि स्वामिवत् ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

किमिति किं रूपेणेत्यर्थः । विद्येति विद्यारूपा सतीत्यर्थः ॥ ३४-३५ ॥ ❀ ❀ इन्द्रियषड्वर्गः ज्ञानेन्द्रियपञ्चकं मनश्चेति ॥ ३६-४३ ॥

श्रीमद्वीरराघवव्याख्या

तर्हि केनोपायेन प्रकृतिमूलसंज्ञकपुनर्भवस्य निवृत्तिः ? कीदृशं वा निवृत्तपुनर्भवं जीवरूपमित्यत्राह यत्रेति द्वाभ्याम् । सदसच्छब्दौ कार्यकारणपरौ "असद्वा इदमग्र आसीत्ततो वै सदजायत" इति प्रयोगात्कारणावस्था च प्रलयदशा ततश्चायमर्थः-यत्रात्मनीमेऽचिद्गते सदसद्रूपे उत्पत्तिविनाशावित्यर्थः अविद्ययाऽज्ञानेनात्मनि कृते आरोपिते च तस्मिन्नात्मनि स्वसंविदा स्वशरीरकपरमात्मविषयसम्यग्ज्ञानेन प्रतिषिद्धे निवृत्ते भवतः अनेन स्वसंविदेव पुनर्भवनिवृत्तिहेतुरिति दर्शितम् इति शब्दः प्रकारवाची इत्येवंविधं स्वसंविन्निवृत्तोत्पत्तिविनाशमित्यर्थः । अत एव दर्शनं ज्ञानं प्रकृतिसंगवियुक्तकेवलपरिशुद्धात्मस्वरूपज्ञानं यत्तद् ब्रह्म गुणतो बृहत्वाद्ब्रह्मशब्दवाच्यं मुक्तात्मस्वरूपं "ब्रह्मभूयाय कल्पते । ब्रह्मणो हि प्रतिष्ठाहमि"ति मुक्तात्मन्यपि ब्रह्मशब्दप्रयोगो दृश्यते ॥ ३३ ॥ ❀ ❀ यदिति । यदि यदा एषा वैशारदी महदादिकार्यमुखेन विपुला एषा माया तन्मूला मतिरभिमतिः देहात्माभिमानादिरूपा चोपरता निवृत्ता भवति, उपरतिरत्र सम्बन्धविरहः "नित्या सततविक्रिया, गौरनाद्यन्तवतीति माया शब्दावाच्यायाः प्रकृतेर्नित्यत्वावगमेन विनाशायोगात् एवेत्यस्य तदेत्यादितदैव संपन्ने परमात्मप्राप्त्या अभिव्यक्ते स्वे स्वकाये महिम्नि गुणाष्टकरूपे मुक्तैश्वर्यात्मके महिम्नि महीयते, मह पूजायां महशब्दादाचारक्यजंतात्कर्मण्यात्मनेपदम् । स्वकीयमहिमलब्ध्या हेतुना परमव्योमवासिभिर्बहुमतो भवतीति विदुः मुक्तात्मस्वरूपयाथात्म्यविदः । यद्वा संपन्न इति प्रथमांततया छेदे स्वमहिम्नि मुक्तैश्वर्ये संपन्नः तल्लब्ध्या समृद्धः महीयत इति निरवशेषत्वेन प्रकृतिसम्बन्धतत्कार्यनिवृत्तावाविर्भूतगुणाष्टकयुक्तः परब्रह्मानुभवन्परमव्योमनिवासिभिर्बहुमतोऽवतिष्ठते इत्यर्थः । अपहतपाप्मत्वादिगुणाष्टकमहिम्नि "प्रकाश्यन्ते न जन्यन्त" इत्यादिशास्त्रेभ्यः स्वाभाविकत्वावगमात् स्वे महिम्नीत्युक्तं भवति ॥ ३४ ॥ ❀ ❀ तदेवं प्रसक्तानुप्रसक्ततया जीवस्वरूपं स्थितम् । अथ परमप्रस्तुतस्य भगवज्जन्मनो विलक्षणत्वमाह एवमिति । अजनस्य जीववत् कर्मायत्तजननरहितस्याकर्त्तुस्तद्वदेव पुण्यपापात्मककर्मरहितस्य हृत्पतेः हृदयकमलमध्यावस्थानेन पाति सर्वाणि भूतानि नियमयतीति हृत्पतिः, तस्य सर्वांतरात्मनो भगवतः एवमुक्तविधानि जन्मानि कर्माणि कवयो वेदगुह्यानि वर्णयन्ति कवयो ज्ञानाधिकाः "न मुह्यान्चिंतयन् कविरि"ति प्रयोगात् वेदगुह्यानि वेदरहस्यानि वर्णयन्ति "अजायमानो बहुधा विजायते तस्य धीराः परिजानन्ति योनिमि"त्यादि हि वेदतात्पर्यविषयविभागप्रदर्शनपूर्वकं यादृशानि भावयति तादृशानि वर्णयन्ति, तत्र ह्यजायमान इत्यनेन जीवस्य या कर्मायत्तोत्पत्तिः सेश्वरस्य प्रतिषिध्यते, बहुधा विजायत इत्यनेनाकर्मायत्ता स्वसंकल्पमूला चोत्पत्तिर्बोध्यते, न हिंस्याद्भूतानि, पशुमालभेतेत्यादिवद्विधिनिषेधयोर्भिन्नविषयत्वावश्यंभावात्तयोरेकविषयत्वे पूर्वोत्तरव्याघातापत्तेः । एवमुत्सर्गापवादसामान्यविशेषन्याया-दिभिर्निर्णेतव्यमिममर्थं कवय एव जानन्तीत्यभिप्रायेणोक्तं 'तस्य धीराः परिजानन्ति योनिमि'ति तस्य प्रस्तुतस्य भगवतो योनिमधिष्ठेयं शरीरं धीराः परिजानन्ति अकर्मायत्तत्वस्वेच्छोपात्तत्वाजहत्स्वभावत्वादिरूपेण धीरा एव जानन्तीत्यर्थः । अकर्त्तुः कर्माणि वेदगुह्यानि इत्यनेन कर्मविधिनिषेधवादिन्यो "निष्क्रियं निष्कलं, यस्य चैतत्कर्म स वै वेदितव्य" इत्यादिश्रुत्योरपि

कविभिर्निर्णेतव्यो विषयविभागो द्रष्टव्य इति सूचितम् । इदं सगुणनिर्गुणसशरीराशरीरसविकाराविकारजीवब्रह्मभेदाभेदश्रुतिविषयविभागस्याप्युपलक्षणम् । एवं च जन्मकर्मगुणशरीरविकारभेदप्रतिपादकानां वेदांतवाक्यानां तत्प्रतिषेधपरैर्वाक्यैर्बाध्यत्वं मृषावादिभिरुक्तमनादरणीयमिति भावः । तथा चोक्तं वात्स्यैर्वरदगुरुभिः "यद् ब्रह्मणो गुणशरीरविकारभेदकर्मादिगोचरधियः प्रतिषेधवाचः । अन्योन्यभिन्नविषया न विरोधगन्धमर्हंति तन्न विधयः प्रतिषेधबाध्याः ॥" इति । अकर्त्तुः कर्माणि वेदगुह्यानि इत्यनेन भगवच्चेष्टितानां जगद्व्यापाररूपाणां जीवचेष्टितसजातीयतया चिंतयितुमशक्यानि, किंतु तद्वैजात्येन वेदादेवावगन्तव्यानि । तथैव च कविभिरपि वर्ण्यंत इति चोक्तं कवयो वर्णयंतीत्यनेन कवीनां भगवज्जन्मकर्मयाथात्म्यवेदनमूलकतद्वर्णयितृत्वोक्त्या कुबुद्धीनां भगवज्जन्मकर्मादियाथात्म्यावेदित्वं च सूचितमिति ॥ ३५ ॥ ❀ ❀ तदेवोपपादयितुं तावद्भगवतस्तच्चेष्टितस्य जीवतच्चेष्टिताभ्यां वैजात्यं दर्शयति स वा इति । स वै भगवानमोघलीलः अमोघा वितथा लीला यस्य सः, इदं परिदृश्यमानं चिदचिदात्मकं जगत्सृजत्यवति रक्षति अत्ति संहरति न चास्मिन् जगति सज्जते च । लीलाशब्देन जगद्व्यापारस्य लीलात्वमुक्तम् । अनेन प्राचीनकर्मवासनानुगुणप्रवृत्तबुद्ध्यनुगुणकेवलसुखदुःखाद्यर्थजीवकर्मव्यावृत्तिः, अमोघपदेन निर्विघ्नसमाप्तिं वदताप्यनेकांतरायोपहतजीवकर्मवैजात्यमुक्तं, समुदायेन जीववैजात्यं विश्वं सृजत्यवत्यत्तीत्यनेन सर्गादिकर्मणः कृत्स्नजगद्विषयकत्वोक्त्यानल्पत्वमवगतम् । अनेनात्यल्पजीवव्यावृत्तिः, अस्मिन्न सज्जत इति संगनिषेधेन संगहेतुकरागद्वेषादिराहित्यं लब्धं, तेन वैषम्यनैर्घृण्याभावः । एवं च जीवव्यावृत्तिः, किंच भूतेषु चिदचिदात्मकेषु "न हिंस्याद्भूतानी" त्यादाविवात्र भूतशब्दोऽचेतनसंसृष्टचेतनवाची । अंतर्हितः अंतरात्मतयावस्थितोऽपि भूतैरविज्ञात इत्यर्थः । जीवस्त्वनुमापकैर्लक्षणैर्विज्ञायत इति ततो व्यावृत्तिः । आत्मतंत्रः स्वतंत्रः । जीवस्तु कालकर्मदैवादिपरतंत्रः । षड्गुणेशः ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां षण्णां गुणानामीशः अधिपतिराश्रय इति यावत् । जीवस्तु तद्विपरीतगुणाश्रयः षाड्वर्गिकं षडिंद्रियवेद्यं शब्दादिकं भुंक्ते तेन लीलारसमनुभवति, जीवस्तु सुख्यति दुःख्यति मुह्यति चेति भावः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जीवस्यैवं विधानादिबन्धनिवर्तकं ब्रह्मज्ञानमेव, न कर्मादिकमित्यभिप्रेत्याह यत्रेति । यत्र परमात्मनि सदसद्रूपे व्यक्ताव्यक्तमिति प्रकृतिप्राकृतरूपे स्वसंविदास्वरूपज्ञानेन प्रतिषिद्धे अनादित एव निवृत्ते अविद्यया अज्ञानेन आत्मनि जीवे कृते इति यद्दर्शनं ज्ञानं तद्ब्रह्मज्ञानं संसारनिवर्तकमिति शेष इत्येकान्वयः ॥ ३३ ॥ ❀ ❀ कंठोक्त्याऽऽह यदिति । यदि सम्यगपरोक्षज्ञानोदयसाध्योत्तमप्रसादरूपैषा विशारदस्य हरेर्विद्यमाना देवी द्योतमाना मतिर्ज्ञानरूपा मायेच्छा अपरोक्षज्ञानदानेन नैनं जीवं संसारयामीत्युपरता तस्मान्निवृत्ता तर्हि तं जीवं संपन्न एवेति परं ब्रह्म प्राप्त एवेति विदुः । किंच स्वस्वरूपे ज्ञानानंदाद्यात्मके महिम्नि स्थितः स्वावरमुक्तजनैर्महीयते पूज्यत इत्यन्वयः । महीयत इत्युक्त्या एषा कार्यकारणलक्षणप्रपंचविवर्तरूपा देवस्य विष्णोः सम्बन्धिनी माया वैशारदी विघटमानसंसाररूपा मतिर्बुद्धिर्यद्युपरता तदा स्वात्मरूपं ब्रह्मसम्पन्नं तदैक्यमापन्नं विदुरित्येतन्निरस्तं भेदनिष्ठत्वात्पूजकभावस्येति भावः ॥ ३४ ॥ ❀ ❀ हरेरेवंविधावतारकर्मभिराप्तकामत्वेन प्रयोजनाभावेपि जीवानां प्रयोजनमस्तीत्याह एवमिति । अनन्याधीनकर्तृत्वात्फलोद्देशाभावाद्वाऽकर्तुरजनस्य जनविलक्षणस्य वा हृत्पतेः मनःप्रेरकस्य विष्णोरेवंविधानि वेदगुह्यानि उपनिषत्प्रतिपाद्यानि जन्मानि कर्माणि च कवयः संसारमोक्षाय वर्णयंति स्म । हिशब्देन हरेः साकल्येन क्रियाराहित्यं प्रतिषेधति, अन्यथोत्तरश्लोकविरोधादित्येकान्वयः । तस्माज्जीवानां संसारमोक्ष एव भगवदवतारपराक्रमप्रयोजनमित्यर्थः ॥ ३५ ॥ ❀ ❀ फलाभिसंध्यभावादकर्तृत्वं न कर्तृत्वाभावादिति यत्तत्स्पष्टमाह स वा इति । अमोघलीलः सत्यकामलक्षणक्रीडः स पद्मनाभ एव इदं विश्वं सृजति अवति रक्षति अत्ति संहरति न रुद्रादिः, तथाप्यस्मिन् जगति न सज्जते लौकिककर्तृवत्फलासक्तो न भवति, अतोऽकर्ता नतु कर्तृत्वाभावात् । अभोक्तृत्वमपि दुःखाभोगादेव न तु भोगाभावात्, सुखभोक्तृत्वसंभवादित्याभिप्रेत्याह भूतेष्विति । पंचभूतैः संभूयोत्पन्नत्वात् भूतेषु शरीरेष्वंतर्हितमनःश्रोत्रादिषडिंद्रियवर्गग्राह्यशब्दादिविषयसारं जिघ्रति भुंक्ते, नतु दुःखादिकं कुतः ? आत्मतंत्रः नहि स्वतंत्रस्य दुःखादनं घटते । इतोपि नेत्याह षडिति । षड्गुणेशः षडिंद्रियविषयेशः अतश्च सारभुक् तस्मादभोक्तृत्वं नाम दुःखाभोग एव न तु भोक्तृत्वाभावादित्यर्थः । आत्मतंत्र इत्यनेन विशेषणेन ईश्वर एव देहप्रविष्टो जीवो भवति नान्य इत्यर्थः, स वा इदमित्यनेन समर्थ्यत इत्येतद् दूषितम् । न हि सुखमेव स्याद् दुःखमण्वपि न स्यादिति कर्तुं समर्थ ईश्वरः सुखदुःखपात्रीभूतं जीवत्वमभिकांक्षति, ईश्वरत्वविरोधात् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ जीवस्वरूपे भगवत्स्वरूपे च तत्सम्बन्धं वारयति पूर्वाध्यायोक्तं ब्रह्म च लक्षयति यत्रेति द्वाभ्याम् । यत्र यस्मिन् दर्शने स्थूलसूक्ष्मे रूपे शरीरे स्वसंविदा जीवात्मनः स्वरूपज्ञानेन प्रतिषिद्धे भवतः । केन प्रकारेण वस्तुत आत्मनि ते न स्त एव, किन्त्वविद्ययैवात्मनि कृते अध्यस्ते इति एतत्प्रकारेणेत्यर्थः । तद् ब्रह्मदर्शनमिति यत्तदोरन्वयः । ब्रह्मणो दर्शनं साक्षात्कारः । यत्र स्वसंविदेत्युक्त्या जीवस्वरूपज्ञानमपि तदाश्रयमेव भवतीति तथा केवलस्वसंविदा ते निषिद्धे न भवतः

इति च ज्ञापितम्। ततश्च जीवत एवाविद्याकल्पितमायाकार्य्यसम्बन्धमिथ्यात्वज्ञापकजीवस्वरूपसाक्षात्करणतादात्म्यापन्नब्रह्म-साक्षात्कारो जीवन्मुक्तिविशेष इत्यर्थः। ईदृशमेव तन्मुक्तिलक्षणं श्रीकापिलेये मुक्ताश्रयमित्यादिचतुष्टये दर्शितम्। तस्मादस्य प्रारब्धकर्म्ममात्राणामनभिनिवेशेनैव भोगः। एवमेवोक्तं "तत्र को मोहः कः शोकः एकत्वमनुपश्यत" इति॥ ३३॥ ❀ ❀ अथान्तिमां ब्रह्मसाक्षात्कारलक्षणां मुक्तिमाह यदीति। एषा जीवन्मुक्तिदशायां स्थिता। विशारदेन परमेश्वरेण दत्ता, देवी द्योतमाना मतिर्विद्या तद्रूपा माया स्वरूपशक्तिवृत्तिभूतविद्याविर्भावद्वारलक्षणा सत्त्वमयी मायावृत्तिः सा यदि उपरता निवृत्ता भवति तदा व्यवधानाभासस्यापि राहित्यात् सम्पन्नो लब्धब्रह्मानन्दसम्पत्तिरेवेति विदुर्मुनयः। ततश्च तत्सम्पत्तिलाभात् स्वे महिम्नि स्वरूपसम्पत्तावपि महीयते पूज्यते प्रकृष्टप्रकाशो भवतीत्यर्थः॥ ३४॥ ❀ ❀ एवं भगवत्त्वं दर्शयित्वा ब्रह्मत्वं दर्शितम्। ननु ब्रह्मानुभवेनैव यदि मुक्तिः स्यात्तर्हि कथं जन्मगुह्यमित्यादिना तत्कीर्तनमात्रेण संसारविमोक्ष उक्तस्तत्राह एवमिति। यथैवाव्यवहितपूर्व्वोक्ताविद्यामायोपरतावेव ब्रह्मानुभवसम्पत्ती भवतः, एवं प्राकृतजन्मकर्म्मरहितस्य हृत्पतेः सर्व्वबुद्ध्यगोचरस्य जन्मानि कर्माणि च कवयो वर्णयन्ति। तत्तदुपरतावेव तज्जन्मकर्म्मानुभवसम्पत्ती साधकानां भवतः इति मन्यन्त इत्यर्थः। सम्पत्तिरत्र साक्षाल्लब्धिः। अत एव वेदगुह्यानीति। तथोक्तं श्रीभगवता "जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्ज्जन्म नैति मामेति सोऽर्ज्जुने"ति। तथैव तेषु श्रीशुकदेवादीनामपि ब्रह्मनिष्ठापरित्यागेनापि रागतः प्रवृत्तिर्व्वर्णयिष्यते द्वादशे 'स्वसुखनिभृतचेता' इत्यादौ। अतो ब्रह्मवत्तन्निदिध्यासनेनैव संसार दुःखोपक्षयः स्यात्तदनुभव-सम्पत्ती च भवत इत्यर्थः। पृथगर्थस्त्वेवमित्यस्य व्यवहितवाक्यार्थेनान्वयायोगात् कष्टाय सम्पद्यते चेति॥ ३५॥ ❀ ❀ अथ प्राकृतासङ्गरहितस्यानन्दैकलीलत्वमाह स इति। षड्भिरैश्वर्य्यादिभिर्गुणैर्भगाख्यैरीष्टे यः स षड्गुणेशः षाड्वर्गिकं जिघ्रति तेषु नानाभेदत्वाद्वर्गात्मिकेषु चरति, यद्भक्तानां भक्तिसुखम्। यद्वा 'तत्तेऽर्हत्तम नमस्तुतिकर्म्म पूजाकर्म्मस्मृतिश्चरणयोः श्रवणं कथायाम्। संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेते'ति श्रीमत्प्रह्लादसम्मत्या षडङ्गवर्गसंसेवातः संजातं यत् प्रेमभक्तिसुखं तदेव जिघ्रति अन्विष्य आस्वादयतीत्यर्थः। ततश्च न चास्येति तादृशतल्लीलानभिज्ञानां कुमनीषित्वे स वेदेति तादृशतल्लीलातत्त्वस्य भक्त्येकानुभवनीयत्वे सङ्गमनीयम्। अत एव अथेह धन्या इत्यादीनि सुष्ठु सङ्गतानि स्युः॥ ३६-३९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

नन्वेवं चेदिदं सर्व्वं वस्तुतो मायादर्शनमेव ब्रह्मदर्शनं किं तदित्याकाङ्क्षायामाह। यत्र भगवति इमे सदसद्रूपे उपलक्षणे मायिके स्थूलसूक्ष्मरूपे प्रतिषिद्धे भवतः, तेनामायिकन्तु रूपं तस्य न प्रतिषिद्धमिति भावः, केन स्वेषां भक्तानां संविदा अनुभवेन। ते कथं भगवति न स्त इत्यत आह। अविद्यया आत्मनि जीवे एव कृते अध्यस्ते न त्वीश्वरे। यदुक्तम्—"देहाहङ्करणादेहाध्यासो जीवे ह्यविद्यया। न तथा जगदध्यासः परमात्मनि युज्यते" इति। तत् तत्तश्च तस्य ब्रह्मणो दर्शनं साक्षात्कारः स्यात्। यद्येषा माया देवी उपरता स्यात् तथा वैशारदो भक्तानां हिते निपुणो भगवानेव तदीया मतिर्मामयं पश्यत्विति कृपामयी तदिच्छा यदि प्रवृत्ता स्यात् तदैव नान्यथा। "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामि"ति श्रुतेः। यद्वा वैशारदी भगवद्विषयिणी मतिः पुरुषस्य स्यात्॥ ३३॥ ❀ ❀ सम्पन्न एव तन्मतिमानेव पुरुषः सम्पन्नोऽन्यस्तु दरिद्र इत्यर्थः। विदुस्तत्त्वज्ञाः। स्वे महिम्नि स्वीये माहात्म्ये वर्त्तमानः स महीयते पूज्यते। अन्यथा स्वमाहात्म्याद् भ्रष्टः स निन्द्यत इति भावः॥ ३४॥ ❀ ❀ एवमनेनोक्तलक्षणप्रकारेण मायिकशरीरद्वयप्रतिषेधेनेत्यर्थः। अजनस्य जन्मानि, "अजायमानो बहुधाभिजायत" इति श्रुतेः। अकर्त्तुः कर्म्माणि, "न चास्य कार्य्यं करणञ्च विद्यते" इत्यादौ 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतेः। ननु जीवस्यापि वस्तुतोऽ-जनस्यैवाकर्त्तुरेव जन्मानि कर्म्माणि दृश्यन्ते। सत्यम्। तस्य तानि मायासम्बन्धेन अस्य तु तानि मायाप्रतिषेधेनेत्येष एव भेद इत्याह। वेदेषु वेदैर्व्वा गुह्यानि रहस्यत्वेन परमोपादेयत्वेन च संवृत्य स्थापितानि तात्त्विकानि। जीवस्य तु तानि मायिकत्वेन हेयान्यवास्तवानीत्यर्थः। यदुक्तं गीतोपनिषदा "जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वत" इति। हृत्पतेरन्तर्यामिणः अतो विराड्रूपस्यैवम्भूतत्वाभावादवतारमध्ये तस्य न गणनेति प्रकरणार्थः॥ ३५॥ ❀ ❀ भगवतस्त्वन्यान्यपि ततो वैलक्षण्यानि बहूनि सन्ति तत्र प्रथमं निरङ्कुशमैश्वर्य्यमाह स वा इति। षाड्वर्गिकमिन्द्रियषड्वर्गविषयं जिघ्रति दूरादेव गन्धवद् गृह्णाति न तु सज्जत इत्यर्थः। कुतः षड्गुणेशः षडिन्द्रियनियन्ता। यद्वा षड्भिर्गुणैर्भगशब्दवाच्यैरैश्वर्य्यादैरीशः। अतः षडैश्वर्य्य-वर्गोत्थं सुखमनुभवति॥ ३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

मोक्षप्रकारमाह यत्रेति द्वाभ्याम्। यत्र यस्मिन् काले जन्मनि वा भगवज्जन्मकर्मकथनश्रवणविषये इत्यर्थः। यत्र भगवज्जन्म-कर्मकथनश्रवणमननादिना स्वस्योपास्यभूतस्य 'यद्विज्ञानेन सर्वं विज्ञानं भवती'त्येवं भूतस्य संविज्ञानं स्यात् तेन ज्ञानेन पूर्वमविद्यया अज्ञानेन आत्मनि कृते आत्मत्वेन स्वीकृते इमे सदसद्रूपे स्थूलसूक्ष्मरूपे प्रतिषिद्धे अनात्मत्वेन निवारिते भगवतः चिदचिच्छक्तिम-

दृग्ब्रह्मज्ञानेनैवात्मानात्मज्ञानोदयात्तदा इति इत्येवं प्रकारेण तद् ब्रह्मदर्शनं भवति तत्परब्रह्मज्ञानं भवति ॥ ३३ ॥ ❀ ❀ यदि यदैव एषा कार्यकारणात्मिका देवस्य शक्तिरूपा माया उपरता स्यात् तदैव वैशारदी मतिः विशारदः सर्वज्ञः परमपुरुषस्तद्विषयगा मतिः । ध्रुवा स्मृतिर्भवति तदनंतरं च प्रारब्धकर्मक्षये सति प्रकृतिसंबंधवियुक्तः अपहतपाप्मत्वादिगुणसंपन्न एव भवति । तदा स्वे महिम्नि भगवद्भावापत्तिलक्षणे महीयते पूज्यते । परमधामवासिभिः सत्कृतो भवतीत्यर्थः । मह पूजायामित्यस्य रूपम् । इति इत्येतत्सर्वं तत्त्वज्ञा विदुः । एवं बद्धस्य भगवज्जन्मकर्मरहस्यकथनश्रवणादिना मुक्तिर्भवतीति प्रासंगिकप्रकरणार्थः । तदुक्तं भगवता पूर्वाचार्येण "ज्ञानस्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम् । अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववंतं यदनंतमाहुः ॥ अनादिमायापरियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादादि"ति ॥ ३४ ॥ ❀ ❀ प्रासंगिकं समाप्य प्रकृतं समापयन् स्वमते बहुकविसंमतिं दर्शयति एवमिति । हृत्पतेरंतर्यामिवासुदेवस्य अजनस्य देहे जाते आत्मानं जातं मन्यते स जनः जीवः, तद्भिन्नस्य स्वात्मयाथात्म्यज्ञानपूर्वाणि स्वेच्छकानि जन्मानि अकर्त्तुः कर्मवश्यतया शुभाशुभकर्मकर्ता जीवस्तद्भिन्नस्य कर्माणि च वेदगुह्यानि । "अजायमानो बहुधा व्यजायत, यस्य चैतत्कर्म स वेदितव्य" इत्यादिवेदे गोप्यतया स्थितानि । 'जगृहे पौरुषं रूपमि'त्यादिना 'जन्मगुह्यं भगवतो य एतत्प्रयतो नरः । सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥' इत्यंततो जीवजन्मकर्मविसदृशानि मया वर्णितानि । यथा एवमन्येपि कवयः क्रांतदर्शिनो वर्णयंतीत्यन्वयः ॥ ३५ ॥ ❀ ❀ भगवतो जन्मकर्मरहस्यकथनश्रवणादिना जीवः संसाराद्विमुच्यते इति भगवदुत्कर्ष उक्तः । अथ निखिलजगज्जन्मादिहेतुत्वेनासंगत्वस्वतंत्रत्वादिना पुनरुत्कर्षः, को मुच्यते कश्चनेत्याकांक्षायां बद्धं मुमुक्षुं चेति जीवद्वैविध्यं चाह स वै इति त्रिभिः । षाड्वर्गिकमिंद्रियषट्कवेद्यम् । जिघ्रति भुंक्ते यतः षडिंद्रियेशः । यद्वा ज्ञानशक्तिबलैश्वर्यतेजओजसामीशः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

किमतो यद्येवं तत्राह यत्रेमे इति । वस्तुतस्तु सर्वो भगवानेव न जीवो नापि जडः, प्रतीतिस्त्वाविद्यकी । यदा पुनः स्वस्मिन्नेवाधिष्ठाने इमे स्थूलसूक्ष्मे ब्रह्मानुभवेन प्रतिषिद्धे भवतश्चेत्, प्रतिषेधे हेतुमाह अविद्ययात्मनि कृते इति । ब्रह्मानुभवव्यतिरेकेणात्मनि कृते, आत्मस्थाने तत् प्रतीयत इत्यर्थः । इतिशब्दो हेतौ । तत्तदैव ब्रह्मदर्शनं ब्रह्मानुभवो भवतीत्यर्थः । सर्वत्र ब्रह्मप्रतीतिस्तिष्ठति जडजीवप्रतीतिर्गच्छतीति भावः ॥ ३३ ॥ ❀ ❀ किं तावता कदा वा प्रतीतिरेषा गच्छतीति तद् द्वयं निरूपयति यद्येषेति । एषा माया भगवतो विशारदस्य संबंधिनी देवी देवतारूपा पूर्वावस्था चेदुपरता भवति तथापि तस्या नेति स्वभावत्वं भवेत् । किंतु सा मतिरूपा भवति यदा प्रकृतिरूपा भवति तदा मायानिवृत्तिरूपा मतिरिति विशेषः । तदाऽयं जीवः स्वे महिम्नि संपन्न एव स्वरूपं प्राप्त इव महीयते स्वाराज्यं करोतीत्यर्थः । एवं सर्वं हरिरित्येतदर्थं सपरिकरः पुरुषावतारो निरूपितः । एवमन्यत्रापि । कृष्णे पुरुषोत्तमे जन्मकर्मनिरूपणं तस्य भगवत्तत्त्वज्ञानार्थमेवेत्यर्थः ॥ ३४ ॥ ❀ ❀ एवमिति । ननु उपदेशातिदेशयोः को विशेष इत्यत आह अजनस्य जन्मानि अकर्त्तुः कर्माणीति विरुद्धधर्माश्रयत्वेन माहात्म्यं विशेषः, "एतावानस्य महिमे"ति वचनात् । एवमेव हि कवयो वर्णयंति विरुद्धधर्माश्रयत्वेन माहात्म्यं विशेषः । ननु कथं प्रतीतिरविरोधेन तत्राह वेदगुह्यानीति वेदेपि गोप्यानि भ्रांतानां विरुद्धवत् प्रतीत्यर्थं तथा वचनं, वस्तुतस्तु सर्वभवनसमर्थे ब्रह्मणि विरोध एव नास्ति । किंच हृत्पतेः सर्वेषां हृदयानां स एव प्रेरकः । तत्र यथा अनेकविधं प्रेरयति तथाऽनेकविधो भवतीत्यर्थः ॥ ३५ ॥ ❀ ❀ कथं वर्णयंति का वा तस्य लीला किं स्वरूपं कथं ज्ञायते इत्याकांक्षायामाह स वा इदमिति त्रिभिः । अथवा 'सूत जानासी'त्यस्य वा उत्तरं स पुरुषोत्तमः वै निश्चयेन कालादीनां तत्प्रेर्यत्वात् इदं विश्वमिति प्रपंचे भेदो निवारितः अक्षरकालकर्मस्वभावप्रकृतिपुरुषैः क्रियते जगदिति यत् बहुधा निरूपितं तद्वस्तुतो भगवानेव करोति तत्र हेतुः अमोघलील इति । केवलमक्षरादिभिः कृतस्वतंत्रस्य भगवत इच्छाभावे सति क्रिया व्यर्था स्यात् । कार्यैर्व्यावृत्तत्वेन सम्यक्स्फुरणाभावाच्च भगवतस्तु लीला सा जगतो भोग्यत्वात् व्रीहीणि वा सृजत्यवत्यत्तिलक्षणाकथनात् अन्येषां कर्मकरत्वेनाप्रयोजकत्वमुक्तं, जीवानामपि तथात्वेन वैलक्षण्यमाह न सज्जत इति । तत्कृतगुणदोषमाह षडिति । यः संगः तन्नास्ति तत्र प्रमाणमिव कथयन्नस्मिन्निति निर्दिशति तेषु स्वांशभूतेषु जीवेषु च न संगः, जीवजडयोरनासक्तिरुक्ता । ननु सर्वत्र कार्यकारणयोर्दर्शनात् भगवतश्चादर्शनात् कथं भगवान्करोति, दृष्टे भवति अदृष्टकल्पनाया अन्याय्यत्वाच्च तत्राह अंतर्हित आत्मतंत्र इति । अंतर्हितत्वाददर्शनम् आत्मतंत्रत्वान्न दृष्टसंभवः, दृष्टानां परतंत्रत्वात् ननु सर्वत्रांतर्हितः अनुप्रविष्टश्चेत्करोति तदा भोगे दोषः, जीवैः सह भोगात् प्रथमत एव वा भोगे भुज्यमानानामभावत्वापत्तिः, इत्याशंक्याह षाड्वार्गिकं जिघ्रति, भोगो हींद्रियसाध्यः, इंद्रियाणि तु धर्मानेव गृह्णंति न धर्मिणः । तत्र केवलानां ग्रहणं जीवैरशक्यमिंद्रियाणां च क्षणमात्रं धर्मैकदेशसंबंधः । तथा च विषयाणां भोगः भगवत्साध्य एव । जिघ्रतीति धर्माणामेव ग्रहणं लोके केवलधर्मग्रहणं घ्राण इत्युक्तम् । षण्णामिंद्रियाणां पंचपर्वाविद्याव्याप्तत्वेन प्रत्येकं पंचरूपत्वात् पंचविधत्वं वर्गत्वं, तथा च त्रिंशद्भेदा भवंति अष्टाविंशतिभेदो निःस्वयंभक्तिश्चेति तेषां रसान् स्वयमेवानुभवतीत्यर्थः । ज्ञानसहितानां रूपादीनां न जीवं प्रति सर्वभावेनात्मसमर्पणं किंत्वेकदेशेन कथंचिदेव । न तथा भगवद्भक्तिरित्याह षड्गुणेश इति । ईशत्वेन नियामकत्वं चोक्तम् । इत्यत्यंतसूक्ष्मेक्षिकया पदार्थो निरूपितः ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यद्येषेत्यत्र । न निस्स्वभावत्वमिति । नासत्त्वम् । तस्याः पूर्वावस्थामाहुः यदेति । मतिरिति, विद्या । स्वाराज्यं करोतीति । इति विदुस्तत्त्वज्ञा इति शेषः । तथा च मायाया विद्यारूपेण परिणामे जीवोऽयं जडोऽयमिति भेदबुद्धिर्गच्छति, तावता स्वरूपलाभोऽस्य भवतीत्यवतारकथायां शुभं फलमुक्तम् । सर्वं हरिरित्येतदर्थमिति । द्वितीयाध्याये 'सत्त्वं यद्ब्रह्मदर्शन'मित्यनेन सत्त्वस्यादूरत्वेन ब्रह्मानुभवरूपत्वं यदुक्तमासीत्, तस्यानुभवस्याकारः 'सर्वं हरि'रिति, तत्प्रदर्शनार्थमित्यर्थः ॥ ३४ ॥ ❀ ❀ एवं जन्मानीत्यत्र । अन्यत्रापीति । अवतारान्तरेऽपि । उपदेशातिदेशयोरित्यादि । उपदेशः प्राथमिकं कथनम्, अतिदेशस्तु अन्यत्र प्रसिद्धस्य धर्मस्यान्यत्र कार्यवशात्प्राप्तिः । प्रकृते तु पुरुषावतारजन्मादिकथनमुपदेशः, 'एवं जन्मानी'त्यनेनान्यत्र तदतिदेशस्तयोः को विशेष इति । अवतारकथाप्रश्नेन भगवत्त्वादेरपृष्टत्वात्तत्कथनस्य किं प्रयोजनमित्यर्थः । नास्तीति । 'न हि विरोध उभय'मिति वाक्यान्नास्तीत्यर्थः । अनेकविधो भवतीति । तेन मायिकरूपमायावादयोरप्येकदेशत्वेन संग्रहः, अथवा प्रेरणाविशेषरूपधर्मभेदादनेकविधो भवतीत्यर्थः ॥ ३५ ॥ ❀ ❀ स वा इत्यत्र । वर्णयन्तीति यदुक्तं तस्यैवाग्रिमश्लोकत्रयं प्रपञ्च इति बोधयन्ति कथं वर्णयन्तीत्यादि । तथा च जगत्कर्तृत्वादिना वर्णयन्ति । सृजतीति । सर्गादिलीलाः । अमोघलील इति । स्वरूपं सृष्टिद्वारा च ज्ञायत इति बोध्यम् । ननु द्वितीयाध्याये 'स एवेद'मित्यादिना लीलानामुक्तत्वात्पुनस्तत्कथने प्रयोजनं तथा न दृश्यत इति षट्प्रश्नपूरणं च न जातमिति चारुच्योर्निवृत्तये पक्षान्तरमाहुः अथवेत्यादि । अत्र तच्छब्दः प्रसिद्धार्थविषयः, नतु प्रक्रान्तविषय इत्याशयेनाहुः पुरुषोत्तम इति । 'अतोऽस्मि लोके वेदे चे'ति वाक्यात् । अत्रापि पूर्वं 'कृष्णस्तु भगवान् स्वय'मिति कथनात्, अवसरस्यापि सत्त्वाच्च इदमिति । परिदृश्यमाने विश्वत्वस्य । निवारित इति । समभिव्याहारेण भगवत्कृतपरिदृश्यमानयोर्विधेयत्वबोधनान्निवारितः । व्यर्था स्यादिति । फलासिद्ध्या तथा, नात्रानित्यत्वं जगतो भविष्यति, तत्कृता फलासिद्धिरपि तु भगवतीवाक्षरादिषु ह्यमोघलीलत्वं न भवतीति निष्फललीलया फलासिद्धिरिति भावः । हेतुमाहुः कार्येति । कालाक्षरपुरुषाणां स्यात् । लीला सेति । तेन सम्यक्स्फुरणमित्यर्थः । अन्येषामिति । अक्षरकालपुरुषाणां कार्यव्याप्रतत्वेनेत्यर्थः । तथात्वेनेति भोक्तृत्वेनेत्यर्थः । सज्जन्ते, 'भगवांस्त्वभिचाकशीति' अतो न सज्जत इति जीवेभ्यो वैलक्षण्यम् । प्रमाणमिवेति । सूतः स्वानुभवं कथयन्नित्यर्थः । उक्तेति । तथा च देहेषु जीवानामध्यासः सम्बन्धः । न दृष्टसम्भव इति । न दृष्टे निरंकुशकारणत्वसम्भव इत्यर्थः । तदा भोगे दोष इति । अत्तीत्यनेन भोगस्याप्युक्तत्वात्समये भोगे जीवतुल्यत्वम् । अभावत्वापत्तिरित्याशंक्याहेति । क्षयादसत्त्वापत्तिरित्याशंक्य तदुभयाभावप्रकारमाहेत्यर्थः । भोग इति जीवकर्तृकभोगः । तत्रेत्यादि जीवकर्तृके भोगे । केवलानां धर्मरहितानां धर्मिणां ग्रहणं जीवैरशक्यम्, तथा च धर्मरहिता धर्मिणो धर्मिरहिता धर्माश्च भगवद्भोग्याः, इतरेतरसंसृष्टा गन्धवत्पुष्परूपा धर्मधर्मिणस्तु जीवभोग्या इति भोग्यभेद इत्यर्थः । प्रकारभेदमाहुः इन्द्रियाणामित्यादि । भोग इति । सर्वांशेन भोगः । जिघ्रतीत्यादि । तथा च गन्धमुपाददातीत्यर्थात्केवलधर्ममात्रं गृह्णातीत्यर्थः । लक्षणां वारयितुमाहुः लोक इत्यादि । इत्युक्तमिति । इतिहेतोर्जिघ्रतीत्युक्तम् । तथा च केवलधर्मग्रहणस्यानुभवसंवादित्वाय धर्मग्रहणबोधकः शब्दोऽत्र प्रयुक्तोऽतो न लाक्षणिक इत्यर्थः । एवकारेण रसनादयो व्यवच्छिद्यन्ते, तत्र धर्मिणोपि ग्रहात् । षडिन्द्रियाणां वर्गत्वं साधयित्वा तद्विषयाणां तावत्त्वं बोधयन्ति अष्टाविंशतीत्यादि । अष्टाविंशतिभेदानीति पाठे तत्त्वानीति शेषः । तेषु भगवद्भोग्यमाहुः तेषां रसानिति । सारभूतानंशान् । तथा च प्रकारभेदान्न जीवतुल्यत्वम्, भोग्यभेदान्न क्षय इत्यर्थः । जीवानामेकदेशसम्बन्धे हेतुमाहुः ज्ञानसहितानामित्यादि । मुख्यतया मनोग्राह्यं ज्ञानमेवेत्यतो रूपादीनां तत्साहित्यमत्रोक्तम् । तदधीनत्वमिति । ईश एव रसाधीन इत्यर्थः । एवं चास्मिञ्छ्लोके प्रथमावतरणिकोक्तं वर्णनं लीला च प्रतिपादिता, द्वितीयपक्षे तु रसभोगात्मकमवतारप्रयोजनमुक्तं ज्ञेयम् ॥ ३६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदेवमुपाधिद्वयमुक्त्वा तद्विविक्तस्वरूपज्ञानेन ब्रह्मात्मैक्यज्ञानं भवतीत्याह–यत्रेति । यत्र यदा इमे सदसद्रूपे स्थूलसूक्ष्मे उपाधिभूते शरीरे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे स्वव्यतिरिक्ततया ज्ञाते भवतस्तदैव ब्रह्मदर्शनं ब्रह्मात्मैक्यसाक्षात्कारो भवतीत्यन्वयः । आत्मज्ञानेन तत्प्रतिषेधार्हत्वे हेतुमाह–अविद्ययेति । इतिशब्दो हेतौ । यस्मात् अविद्यया स्वरूपाज्ञानेन आत्मनि कृते देवोऽहं मनुष्योऽहं काणोऽहं बधिरोऽहमिति प्रतीतेः आत्मस्थाने कृते कल्पिते इत्यर्थः ॥ ३३ ॥ ❀ ❀ स्वरूपज्ञानमपि कदा भवतीत्यपेक्षायामाह–यदीति । एषा संसारचक्रेण क्रीडन्ती देवी देवस्य जगज्जन्मादिक्रीडानिरतस्य भगवतः शक्तिरूपा माया जीवानां स्वरूपावरणविक्षेपकर्त्री यद्युपरता भवति तदा सम्पन्न एव आवरणविक्षेपाभावात् स्वरूपं प्राप्त एवेति तत्त्वज्ञा विदुर्जानन्तीत्यन्वयः । सर्वेश्वरस्य शक्तिरूपा मायैव कथमुपरमेतेत्यपेक्षायामाह–वैशारदी मतिरिति । विशारदो भक्तानां बन्धविमोचने निपुणो भगवांस्तदीया एतस्मान्माया निवृत्ता भवत्वित्याकारा मतिरिच्छा यदा भवति तदा माया निवृत्ता भवति "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेरित्यर्थः । यद्वा पुरुषस्य वैशारदी भगवद्विषयिणी भगवदेकशरणतयैव संसारदुःखनिवृत्तिर्नान्यथेत्याकारा यदा मतिर्भवति तदा माया ततो निवृत्ता भवति । 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति भगवद्वचनादित्यर्थः ।

नन्वेवं ब्रह्मात्मैक्यसाक्षात्कारेऽपि किं भवतीत्याकाङ्क्षायामाह–महिम्नीति । भयहेतोर्जीवोऽयं जडोऽयमिति भेदबुद्धेर्निवृत्तत्वात् स्वे महिम्नि स्वीये माहात्म्ये परमानन्दस्वरूपे वर्तमानो महीयते, पूज्यते विराजते इत्यर्थः ॥ ३४ ॥ ❀ ❀ अवतारवर्णनं निगमयति–एवमिति । एवमुक्तप्रकारेण हृत्पतेः हृद्यवस्थानेन सर्वाणि भूतानि पाति संरक्षतीति तथा तस्य अजनस्य जन्मरहितस्य जन्मानि अकर्तुश्च कर्माणि कवयो विवेकिन एवं वर्णयन्ति स्म । अन्ये तु न जानन्त्येव, वर्णनं तु दूरत इत्यर्थः । तत्र हेतुमाह–वेदगुह्यानीति । हि यस्मात् परस्परविरुद्धतया "अजायमानो बहुधाऽभिजायते, न वाऽस्य कार्यं करणं च विद्यते स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिवेदेष्वपि गुह्यानि अप्रकटितरहस्यानीत्यर्थः ॥ ३५ ॥ ❀ ❀ ननु तथापि वेदेषु कथमेवं विरुद्धधर्माश्रयत्वं भगवत उक्तं, न ह्येकस्यैव जन्मादि तद्राहित्यं च सम्भवतीत्याशङ्क्य जीवानां देवोऽहं मनुष्योऽहं अहं करोमीत्यादिप्रतीतेर्देहादावाध्यासिकसम्बन्धस्य सत्त्वाज्जन्मकर्मादिव्यवहारः । तथोक्तमेकादशे भगवतैव–'जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद' इति । भगवतस्तु लोकदृष्ट्या जन्मकर्मादिसत्त्वेऽपि तत्राभिमानाभावान्न जन्मादिव्यवहार इत्याशयेनाह–स वा इति । स सर्वान्तर्यामी भगवानेवेदं दृश्यमानं विश्वं सृजति उत्पादयति अवति रक्षति अत्ति संहरति च, परन्तु अस्मिन् विश्वस्मिन् न सज्जते मया कृतं ममैवेदमित्यभिमानं न करोति, किन्तु सर्वेषु भूतेष्वन्तर्हितः सन् षाड्वर्गिकं मनइन्द्रियषड्वर्गविषयं जिघ्रति दूरादेव साक्षितया पश्यतीत्यर्थः । 'अन्यो निरन्नोऽपि बलेन भूयान्' इति वक्ष्यमाणत्वादिति । सर्वत्र प्रविष्टस्य सर्वं पश्यतोऽपि कथं तत्रासक्तिराहित्यमित्याकांक्षायामाह–आत्मतन्त्र इति, जीववत् कालकर्मस्वभावाद्यधीनतारहित इत्यर्थः । तत्र हेतुमाह–षड्गुणेश इति 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना' इत्युक्तानामैश्वर्यादिषण्णां भगशब्दवाच्यानां गुणानामीशो भगवानित्यर्थः । नन्वेवम्भूतश्चेत्तर्हि किमर्थं सृष्ट्यादि करोतीति शङ्कानिरासायाह–अमोघलील इति । अमोघा धर्मादिचतुर्विधपुरुषार्थहेतुभूता लीला यस्य स इत्यर्थः । तथा च प्राणिनां धर्मादिपुरुषार्थसिद्धये भगवान् सृष्ट्यादिलीलाः करोतीति भावः ॥ ३६ ॥

हिन्दी अनुवाद

उपर्युक्त सूक्ष्म और स्थूल शरीर अविद्यासे ही आत्मामें आरोपित हैं। जिस अवस्थामें आत्मस्वरूपके ज्ञानसे यह आरोप दूर हो जाता है, उसी समय ब्रह्मका साक्षात्कार होता है ॥ ३३ ॥ ❀ ❀ तत्वज्ञानी लोग जानते हैं कि जिस समय यह बुद्धिरूपा परमेश्वरकी माया निवृत्त हो जाती है, उस समय जीव परमानन्दमय हो जाता है और अपनी स्वरुप-महिमामें प्रतिष्ठित होता है ॥ ३४ ॥ ❀ ❀ वास्तवमें जिनके जन्म नहीं है और कर्म भी नहीं हैं, उन हृदयेश्वर भगवान्के अप्राकृत जन्म और कर्मोंका तत्त्वज्ञानी लोग इसी प्रकार वर्णन करते हैं; क्योंकि उनके जन्म और कर्म वेदोंके अत्यन्त गोपनीय रहस्य हैं ॥ ३५ ॥ ❀ ❀ भगवानकी लीला अमोघ है। वे लीलासे ही इस संसारका सृजन, पालन, और संहार करते हैं, किन्तु इसमें आसक्त नहीं होते। प्राणियोंके अन्तःकरणमें छिपे रहकर ज्ञानेन्द्रिय और मनके नियन्ताके रूपमें उनके विषयोंको ग्रहण भी करते हैं, परन्तु उनसे अलग रहते हैं। वे परम स्वतन्त्र हैं–ये विषय कभी उन्हें लिप्त नहीं कर सकते ॥ ३६ ॥

न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः ।
नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः ॥ ३७ ॥
स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ।
योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगन्धम् ॥ ३८ ॥
अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे[1] ।
कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥ ३९ ॥
इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगैर्वा तत्राह न चेति। धातुः जगद्विधातुरीश्वरस्य ऊतीर्लीलाः कुमनीषः कुबुद्धिः निपुणेन तर्कादिकौशलेन नावैति न जानाति। मनसा रूपाणि वचसा नामानि संतन्वतः सम्यग्विस्तारयतः। वचोभिरितिबहुत्वं श्रुत्यभिप्रायेण मनोवचोभिः सहेति वा ॥ ३७ ॥ ❀ ❀ भक्तस्तु कथंचिज्जानातीत्याह स वेदेति। अमाययाऽकुटिलभावेन संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजेत ॥ ३८ ॥ ❀ ❀ भक्तिमार्गे प्रवृत्तानृषीनभिनंदति अथेति। यतो भक्त एव भगवत्तत्त्वं जानाति। अथ अतो भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः। कुतः ? यद्यस्मादित्थं

---

१. प्रा० पा०—ऽखिलविश्वनाथे।

प्रश्नैर्वासुदेवे आत्मभावं मनोवृत्तिं कुर्वंति। सर्वात्मकमैकांतिकम्। यत्र यस्मिन्भावे सति भूयः उग्रो गर्भवासादिदुःखरूपः परिवर्तो जन्ममरणाद्यावर्तो न भवति॥ ३९॥ ❀ ❀ सूत किमेतच्छास्त्रमपूर्वं कथयसि? तत्राह। ब्रह्मसंमितं सर्ववेद-तुल्यम्। उत्तमश्लोकस्य चरितं यस्मिंस्तत्। ऋषिर्व्यासः॥ ४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राक्षिपति-नन्विति। "लीलावासनयोरूतीस्तंतूनां तननेपि च" इति निरुक्तिः। आदिना शास्त्रकौशलादिग्रहः। श्रुत्यभिप्रायेण "यतो वाचो निवर्त्तन्ते" इति श्रुत्यभिप्रायेण। क्वचिद्वृत्त्यभिप्रायेणेत्यपि पाठः। अत्र सहार्थस्य गम्यमानत्वात्तत्रैवेयं तृतीयेत्याह-मनोवचोभिः सहेति। स्वीयं मनोपि भक्ताभिलषितपूरणे वाचश्च विस्तारयत इति मनसा संचिन्त्य वाचापि वदतीत्यर्थः। विश्वनाथः ज्ञानागम्यत्वमाह-निपुणेन ज्ञानयोगादिनैपुण्येन ऊतीर्लीलानामानि रूपाणि च मनोवचोवृत्तिभिर्नावैति। मनोवचसोरगम्यत्वादिति भावः। "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुतेः। कुमनीष इति। जन्तुरिति यो हि भक्तिहीनो ज्ञानी नामरूपवद्वस्तुमात्रं मिथ्येत्याचष्टे तं प्रत्ययमाक्षेपः। संतन्वतः अवतीर्य्यावतीर्य कृपया तानि विस्तारयतः। अज्ञाने दृष्टांतः-नटस्य चर्यां पाण्यादिभिरभिनीयमानस्य गतिपदार्थस्य चंद्रकमलादेर्नामरूपादिप्रदर्शनां यथाऽज्ञो नावैति अतो नास्वादं लभते ततश्च रसममूलकं ब्रूते। विज्ञः सभ्यस्तु सकलसहृदयसाक्षिकं रसं साक्षादेवानुभवतीत्यर्थः। यद्वा नटपदेन वंशस्तंभबद्धरज्ज्वादिषु नर्त्तको ज्ञेयः। स यथा पादयोर्महिषशृंगे सित्वां ते च कांस्यस्थाल्यादिषु निधाय हस्ताभ्यामतिदीर्घवंशं गृहीत्वाकाशबद्धरज्जूपरि चलंस्तन्मार्गागतमन्यं नटं चाण्डालोहमिति मां मा स्पृशेति वदंस्तमस्पृश्यैव लंघते, तच्चर्यां यथा तद्विद्याऽनभिज्ञो न जानाति तद्वदित्यर्थः॥ ३७॥ ❀ ❀ ननु यदि कोपि न जानाति तर्ह्यनिर्मोक्षप्रसंगः स्यादित्यत आह-भक्तस्त्विति। धातुः सर्वपालकस्य पदवीं स्वरूपं "स्वरूपेऽध्वनि पादुके पदवी स्थानमात्रके" इति निरुक्तिः॥ ३८॥ ❀ ❀ उग्रो गर्भवासादिदुःखप्रदः। यद्वा उँ रुद्रमपि ग्रसतीत्युग्रः। ग्रसतेर्डप्रत्ययः॥ ३९॥ ❀ ❀ सर्ववेदतुल्यम्। अनेन "वेदाक्षराणि यावंति पठितानि द्विजोत्तमैः। तावंति हरिनामानि कीर्त्तितानि न संशयः॥" इति शौनकस्मृतेः प्रत्यक्षरं हरिनामोच्चारणफलदमिति ध्वनितम्। यद्वा नराकृतिपरब्रह्मणा श्रीकृष्णेन तुल्यमिति। "कृष्णे स्वधामोपगते" इत्याद्युक्तेः। धन्यं पुरुषार्थावहम्। अत एव स्वस्त्ययनं सर्वमंगलावहं महत् सर्वतः श्रेष्ठम्॥ ४०॥

श्रीमद्वीरराघवव्याख्या

नेति। यत एवमत एवास्य मनसा संकल्पेन वचोभिर्वेदात्मकैश्च नामानि देवमनुष्यादिनामानि रूपाणि देवादिरूपाणि च नटचर्यामिव वितन्वतः दधतो धातुरीश्वरस्योतीर्गतीः अवतेर्गतिश्चार्थः, पदवीः प्रकारानिति यावत्, निपुणेन भावप्रधानो निर्देशः-नैपुण्येनापि जन्तुः नावैति नावगच्छति। अनवगतौ हेतुं वदन् जन्तुं विशिनष्टि-कुत्सिता मनीषा बुद्धिर्यस्य शब्दादिविषयासक्तबुद्धिरज्ञः अहंममाभिमानाभ्यां स्वात्मपरमात्मयाथात्म्यानभिज्ञः मनोवचोभिर्नामानि रूपाणि च वितन्वत इत्यत्र मनसा संकल्पेन रूपसृष्टिर्वेदवचोभिर्नामकल्पनमिति विवेकः "नामरूपं च भूतानां कृत्यानां च प्रपंचनम्। वेदशब्देभ्य एवादौ देवादीनां चकार स" इति वचनात्, नटचर्यामिवेति चिदचिद्गतदोषराहित्यं विवक्षितम्। यद्वा नटचर्यामिव नटो यथा विचित्रवेषानुपादत्ते तद्वद्रूपाणि मत्स्यकूर्मादीनि तन्नामानि च संतन्वतः बिभ्रतोऽस्य धातुर्जगत्स्रष्टुरीश्वरस्योतीर्गतीर्जंतुर्मनसा वचोभिश्च निपुणेन तत्र नैपुण्येन च नावैतीत्यर्थः। अत्र पक्षे नटचर्यामिवेति दृष्टान्तेनेदं विवक्षितम्-नटस्यानेकवेषपरिग्रहेऽपि यथा स्वस्वभावात्यागः वेषाणां चेष्टामूलत्वं चर्यायाश्च लीलात्वं तद्वदस्यापीति। कुमनीषोऽज्ञो जंतुर्नावैतीत्यनेन शब्दादिषु विरक्तः स्वात्मपरमात्मयाथात्म्यमननशीलस्त्ववैत्येवेति सूचितम्॥ ३७॥ ❀ ❀ तदेवाह स इति। यः पुमानमायया मायागुणकामादिरहितया संततया अनुस्यूतया दुरन्तवीर्यस्यापारवीर्यस्य रथांगपाणेरनुवृत्त्या सेवया तस्य रथांगपाणेः पादसरोजगन्धं भजेतानुभवेत् स धातू रथांगपाणेः पदवीं वेद जानाति। तथा चोक्तं भगवता "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपे"ति॥ ३८॥ ❀ ❀ एवं मयोपपादितं भगवदवतारादिरहस्यम् अमायिकाविच्छिन्नभगवद्भक्तियोगनिष्ठावन्तो जानंत्येवात्र न विप्रतिपत्तिरिति सूचितम्। श्रोतृणां शौनकादीनां कृतार्थतां सहेतुकामाविष्करोति अथेति। भगवन्त इति सम्बोधनं यूयमित्यध्याहारः। यद्वा हे मुनयः भगवन्तः पूज्या भवन्तः धन्याः कृतार्थाः। कुतः? हि यस्मादिह लोकेऽखिललोकनाथे वासुदेवे सर्वात्मकं सर्वप्रकारकं करणत्रयेणापीत्यर्थः, सर्वात्मक इति पाठे सर्वस्यात्मनि सर्वशरीरके वेति वासुदेवविशेषणम्, आत्मभावं भावः योगः आत्मनो भावः आत्मकर्तृकः। सर्वात्मन इति पाठे आत्मना मनसा यो भावो भक्तिस्तं कुर्वन्ति ततो धन्या इत्यर्थः। कथं भक्तियोगमात्रकर्तृकत्वेन धन्यतेत्यपेक्षायामात्मभावं विशिनष्टि-यत्र यस्मिन्नात्मभावे उग्रः गर्भजन्मजरामरणादिदुःखहेतुत्वेन घोरः परिवर्त्तः संसारपरिवृत्तिर्भूयो न भवति॥ ३९॥ तदेवं पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसीत्यादिना शौनकादिप्रश्नानां संग्रहेणोत्तराण्यभिधायाथैतच्छुश्रावयिषितभागवताख्यपुराणमुखेन तान्येव विस्तरतः प्रतिपिपाद-

यिषुस्तावदेतत्पुराणनिर्माणप्रकारं निर्मातुर्बादरायणस्य निर्माणप्रवृत्तिनिमित्तं निर्मितस्य पुनः शुकं प्रत्यध्यापनं तेनाधीतस्य राज्ञे श्रावणं च सहेतुकं प्रष्टुमवसरप्रदानाय भगवान्बादरायणस्तदिदं पुराणं निर्माय पुत्रमध्याप्य तन्मुखेन प्रवर्त्तयामास । तदहं तत्तन्मुखेनाधिगतमिदं पुराणं वः श्रावयिष्यामीत्याह सूत इदमिति । इदं भागवतमिति प्रसिद्धं पुराणं ब्रह्मसंमितं ब्रह्म वेदस्तेन सम्मितं समीकृतं वेदतुल्यमित्यर्थः । यद्वा ब्रह्मपरं ब्रह्म तत्सम्यक् मीयतेऽनेनेति ब्रह्मसम्मितं बाहुलकात्करणे क्तः, परं ब्रह्मप्रमापकमित्यर्थः । यद्वा सम्यक् मीयते प्रमीयत इति कर्मण्येव क्तः, ब्रह्मसंमितं यस्मात्तद् ब्रह्मसम्मितं सम्पूर्वादिण् गतावित्यस्माद्वा कर्मणि क्तः "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति ङमुडागमः, ब्रह्म सम्यगितमवगतं येन यस्माद्वा तद् ब्रह्मसंमितं तत्र हेतुं गदन् विशिनष्टि उत्तमश्लोकस्य भगवतश्चरितं चरितप्रतिपादकं प्रतिपाद्यप्रतिपादकयोरभेदविवक्षयोत्तमश्लोकचरितमित्युक्तम् । एवंविधं पुराणं भगवानृषिर्निखिलनिगमद्रष्टा व्यासश्चकार ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवंविधमिथ्याज्ञानी तत्स्वरूपाज्ञानाद्भगवद्भजनादावनधिकारीत्याह न चेति । वचोभिः संकीर्तनयोग्यानि नामानि मनोभिः स्मरणयोग्यानि रूपाणि सम्यक्तन्वतः विस्तारयतः मनोवचोभिर्नामरूपात्मकं प्रपंचं सृजतो वा सतां निपुणं भद्रं विधातुः अस्य हरेः मतिमभिप्रायं गतिं वा कश्चिदपि नावैति न जानाति । कीदृशः कुमनीषः मिथ्याज्ञानी जन्तुः कृमिसदृशः, जन्तुरिति पुनर्जायमानो म्रियमाणः मिश्रबुद्धिः संसारी कुमनीष इति कुत्सितं प्रमाणविरुद्धं सर्वमिथ्यात्वं मनसा मन्यते न तु युक्त्या वक्तुं शक्नोतीत्यद्वैतवादी वा, कथमिव नटस्यांगुल्याद्यभिनयविशेषानभिज्ञो नटचर्यां भरतादिकथात्मिकां यथा न जानाति तथायमिति भावः ॥ ३७ ॥ ❀ ❀ तर्हि कीदृशो वेदेति तत्राह स इति । यो वेदप्रामाणिकः अमायया अव्याजेन इदमखिलं मायाकल्पितमनिर्वाच्यं न भवतीति भावेन वा संततया निरन्तरया प्रवाहरूपया अनुवृत्त्या सेवया हृत्कमलमध्यनिवासिनस्तस्य पादसरोजयोर्गंधं भजेत अत्रैवास्वाद्य मग्नमना भवेत् स पुरुषः दुरन्तवीर्यस्य असंख्यातपराक्रमस्य परस्य पूर्णस्य धातुः पोषणादिकर्तुः रथांगपाणेः श्रीनारायणस्य पदवीं मार्गं स्वरूपस्थितिं वेदेत्येकान्वयः । धातुरित्युक्ते चतुर्मुखोपि स्यादित्यतः परस्येति । चतुर्मुखपरत्वमप्यक्षरस्यास्ति, अतो रथांगपाणेरिति । तस्माद्भागवता एव भगवदपरोक्षं लभन्ते नेतर इति सिद्धम् ॥ ३८ ॥ ❀ ❀ भागवता अपि भवादृशा एवेत्याशयवानाह अथेति । हे भगवन्तः पूजावन्तः भाग्यवन्तो वा, यत्र यस्मिन् भगवत्यात्मभावे स्वामिभृत्यभावे क्रियमाणे सति भूयः पुनः उं रुद्रमपि ग्रसतीति उग्रः क्रूरः परिवर्तः संसारः मरणं वा न स्यात् , तस्मिन्नखिललोकनाथे सर्वात्मके सर्वांतर्यामिणि वासुदेवे इत्थमुक्तप्रकारेणात्मभावं कुर्वंतीति यत् यस्मात् अथ तस्मादिह चेतनराशौ यूयं धन्या निरपेक्षगुणपूर्णाः कृतकृत्या इत्येकान्वयः । यत्र यस्मिन्नात्मभावे क्रियमाणे परिवर्तो न स्यात् तमात्मभावमिति वा ॥ ३९ ॥ ❀ ❀ धर्मः कं शरणं गत इति प्रश्नं परिहरति इदमित्यादिना । ऋषिः सर्वज्ञो व्यासो भगवान् ब्रह्मणा वेदेन सम्मितं तुलितम् उत्तमश्लोकस्य हरेश्चरितानि यस्मिन् सन्ति तत्तथोक्तम् इदं बुद्धिस्थं भागवतं पुराणं चकार ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तल्लीलामयत्वादेवास्य पुराणस्य सर्व्वशास्त्रसारत्वमाह इदमिति सार्द्धकम् । ब्रह्मसम्मितमिति । नराकृतिपरब्रह्मणा श्रीकृष्णेन तुल्यमिति वा । कृष्णे स्वधामोपगते इत्यादिवक्ष्यमाणत्वात् । धन्यं सर्व्वपुरुषार्थावहम् । अत एव स्वस्त्ययनं सर्वमङ्गलावहं महत् सर्व्वतः श्रेष्ठञ्च ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ज्ञानाद्यगम्यत्वमाह न चेति । निपुणेन ज्ञानयोगादिनैपुण्येन ऊतीर्लीलाः नामानि रूपाणि मनोवचोवृत्तिभिर्नावैति, मनोवचसोरगम्यत्वादिति भावः । कुमनीष इति जन्तुरिति, यो हि भक्तिहीनो ज्ञानी नामरूपवद्वस्तुमात्रमेव मिथ्येत्याचष्टे तं प्रत्ययमाक्षेपः । सन्तन्वतः अवतीर्यावतीर्य कृपया तानि विस्तारयतः । अज्ञाने दृष्टान्तः—नटस्य चर्य्यां पाण्यादिभिरभिनीयमानस्य गीतपदार्थस्य चन्द्रकमलादेर्नामरूपादिप्रदर्शनां यथा अज्ञो नावैति । अतो नास्वादं लभते, ततश्च रसममूलकं ब्रूते । विज्ञः सभ्यस्तु सकलसहृदयसाक्षिकं रसं साक्षादेवानुभवतीत्यर्थः ॥ ३७ ॥ ❀ ❀ भक्तिगम्यत्वमाह स वेदेति ॥ ३८ ॥ ❀ ❀ भक्तिविहीना वयमेवाक्षेपविषयीभूता भवामेति विषीदतः शौनकादीनाह अथेहेति । भगवन्तः सर्व्वज्ञाः ! "वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानि"ति वैष्णवनिरुक्तेः । सर्व्वात्मकमैकान्तिकम् आत्मनो मनसो भावं यत्र सति परिवर्त्तो जन्ममरणाद्यावर्त्तः ॥ ३९ ॥ ❀ ❀ सूत किमिदमपूर्व्वमश्रुतचरं शास्त्रं कथयसीति तत्राह इदमिति । ब्रह्म श्रीकृष्णस्तत्तुल्यम् । ऋषिर्व्यासः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

नामानि रूपाणि मनोवचोभिः संतन्वतः मनसो संकल्पेन वचोभिर्वेदरूपैः । नामानि देवमनुष्यादिपदानि । रूपाणि पदार्थभूतानि देवमनुष्यादिशरीराणि विस्तारयतः ऊतीर्गतीः पदवीरित्यर्थः, कुत्सिता मनीषा विषयप्रवणा बुद्धिर्यस्य स निपुणेन

तर्कादिकौशलेनापि नावैति नावगच्छति नटचर्याम् अज्ञ इव । भगवत्पदव्यनभिज्ञानां नित्यबद्धानां जीवानां तज्जन्मादिरहस्यश्रवणाद्यसंभवात्संसाराद्विमुक्तिर्नास्तीति भावः ।। ३७ ।। ❀ ❀ मुमुक्षुस्तु कथंचिदवगच्छतीत्याह स इति । अमायया दंभादिदोषशून्यया संततया निरंतरया अनुवृत्त्या ।। ३८ ।। ❀ ❀ भवंतस्तु मुमुक्षव इति मुनीनभिनंदति अथेति । हे भगवंतः इह लोके भवन्तः धन्याः कृतार्थाः । तत्र हेतुमाह यदिति । यतः इत्थं प्रश्नशब्देन भगवदनन्यविषयेण वासुदेवे आत्मभावं चित्तैकाग्र्यं सर्वात्मकं संपूर्णं कुर्वंति, यत्र यस्मिन् भावे सति उग्रो दुःसहः भूयः विपुलः परिवर्तः जन्ममरणप्रवाहः न भवति ।। ३९ ।। ❀ ❀ अथ "ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि । स्वां काष्ठामधुनोपेते धर्मः कं शरणं गत" इति । षष्ठस्य प्रश्नस्य सर्वशास्त्रोत्तममिदं श्रीमद्भागवतं पुराणं 'धर्मः शरणं गत' इत्युत्तरं दर्शयन् षण्णां प्रश्नानां विस्तरतः प्रत्युत्तराणि प्रतिपिपादयिषुः श्रीमद्भागवतं श्रावयिष्यामीति च प्रतिजानन्संक्षेपतः प्रतिवचनार्थकाध्यायद्वयार्थमुपसंहरति इदमित्याद्यध्यायशेषेण । ब्रह्मसंमितं वेदतुल्यम् । यद्वा परं ब्रह्म सम्यक् मीयते यत्र तद् ब्रह्मसंमितम् , कर्मणि क्तः ।। ४०–४१ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

वस्तुतस्तु न सम्यक् ज्ञायत एवेत्याह न चास्येति । अयमभिप्रायः सर्वरसास्वादनं भगवत उक्तम् । ते च रसा उत्कृष्टाः अपकृष्टाः स्वतः आधारतः अधिकारिभेदेन च भवंति । ते च भगवता अनुभूयंते न वेति संदेहः सर्ववस्तुषु रसरूपेण भगवत एव प्रविष्टत्वात् न स्वात्मानं प्रति उत्कृष्टता अपकृष्टता वा सर्वरूपता च, द्वितीयापि कोटिः चकारात्प्रमाणांतरस्यापि निवृत्तिः । एवं निरूपणेन भक्त्या भगवदाविर्भावात् पश्यन्नाह यस्येति । कृष्णस्य कश्चिदिति ब्रह्मापि निपुणेनापि प्रमाणकरणेन, तत्र हेतुः धातुरिति उत्पादको हि भगवान् तदुपादानकोपलंभकः कस्मै प्रयोजनाय कथं सृष्टवानिति कथमन्यो विजानीयात् ? कृमितुल्यः ऊहापोहकौशल्यरहितः, भगवतोपि न स्वाभाविकाः क्रियाः, किंतु ऊतीः निपातप्रयोगश्चावांतरभेदापरिज्ञानाय सर्वथाज्ञानहेतुः मनोवचोभिः सह नामानि वेदानुरूपाणि सह विषयान् संतन्वतो विस्तारयतः "चतुर्भिश्च महारोगैर्व्याप्ता ऊतीर्न जानते" नटवच्चापि करणमन्यथा प्रतिभासनात् प्रमाणबलेन हि परिज्ञानं प्रमाणव्यामोहार्थमेव नटप्रवृत्तिरित्याह नटचर्यामिति सुतरामज्ञः पुष्टिमार्गानभिज्ञ इत्यर्थः ।। ३८ ।। ❀ ❀ तर्हि कथं निस्तार इत्याह स वेदेति । धातुरिति पूर्ववत् स तु न ज्ञात एव अज्ञायमानस्वरूपत्वात् , कार्यं तु लौकिकं तन्मार्गपरिज्ञाने समागमनं बुद्ध्वा सहभावात् कार्याणां तत्त्वं ज्ञायते इति तस्य गतिर्मार्गो ज्ञातव्यः । लौकिकवैदिकप्रमाणाज्ञानभावे हेतुमाह परस्येति सर्वप्रमाणात् दूरे वर्त्तमानस्येत्यर्थः । कदाचिदशक्तावल्पचलने तत्रत्यैर्ज्ञायेतेत्याशंक्याह दुरंतवीर्यस्येति । दुष्टः अन्तो यस्य वीर्यस्य पराक्रमो न समाप्यत एव कदाचिदपि समाप्तिश्चेत् प्रलय एवेति दुरंतता प्रलयानंतरं तु ज्ञातैव नास्तीति भावः । किंच कालस्यैव परिज्ञानं संभवति, तच्च कालचक्रं पाणौ यस्य कालमपि स्थिरीकृत्य तिष्ठति अथवा सर्वमेव जगत्त्रयः, तस्याप्यधश्चक्रं तत्पाणौ यस्येति हस्तचालनेन चलति हस्ताधारश्च स कथं शकटस्थैर्ज्ञातुं शक्यते ? अतो भगवदनुवृत्तिरेव ज्ञानहेतुरित्याह यो माययेति । दीर्घकालादरनैरंतर्यसेवायां मायाभावोप्यंगं सर्वो हि लौकिको वैदिकश्च मायया भगवंतं भजते । एवं हि कृते अयमस्मभ्यमिदमिह दास्यतीति बुद्ध्या भगवतः सकाशात् पदार्थान् ग्रहीतुं भगवद्वचनार्थप्रयत्नकरणात् भगवांस्तु ततोपि चतुरः, अतो माया त्याज्या, स्वमुक्तिविचारो मायेति पर्यायः संतता निरंतरा अनु पश्चाद्वृत्तिरिति गतिपश्चाद्भवोक्तिः दीर्घकालादरौ बोधितौ चरणपरिज्ञानं हि मार्गज्ञाने हेतुः तदेव पंकजं तस्य गन्धः भगवतः शयने पादसंवाहने ऊर्ध्वमुखस्य चरणस्य आघ्राणे गन्धोनुभूयते तथा येषां हृदये भगवान् स्वच्छन्दं शेते बहिरिंद्रियाणि च गन्धेनाकृष्टानि तत्रैव प्रविशन्ति स च भगवन्मार्गं जानातीति ज्ञानपक्षः । भक्तिपक्षे तु तस्य चरणो भक्तिमार्गः, स च शुद्धे विशदेऽतःकरणे आविर्भूतं सरोजं तत्र गन्धः सतः प्रेमवातस्य भजनं निरन्तरानुवृत्तिरिति ।। ३८ ।। ❀ ❀ एवं प्रासंगिकमुक्त्वा भिन्नोपक्रमेण प्रस्तुतमाह अथेति । प्रश्नेनैव ज्ञायते भवन्तो भगवन्निष्ठा इति । इह संसारे भगवन्तो भवन्तः 'यो यच्छब्दः स एव स' इति वचनात् धन्या इति धनं भगवद्भक्तिर्ज्ञानं वा अर्हंतीति धन्याः । इत्थमिति हीनमपि सम्बोध्य अनवसरमवसरीकृत्य तन्मुखादपि परमादरेण श्रवणेनैवं प्रकारः वासुदेव इति देवतांतराभजनं निरूपितम् । अखिललोकनाथ इति तस्य सर्वेश्वरत्वं च ज्ञात्वा वेदांतवेद्यतां च । एवं माहात्म्यज्ञानार्थं सुदृढस्नेहार्थं च विशेषणद्वयमुक्त्वा रुच्यर्थमात्मपदं प्रयुज्य भावं देवत्वेन रतिं कुर्वन्ति यतः अतो धन्या इति पूर्वेण सम्बन्धः । अस्य फलं पुनः कालसंसारचक्रे महावर्त्तरूपे पुनः पतनाभावः । एतद्देहावसानपर्यंतं यथा भवतु तथेति पुनः शब्दार्थः । अनादराभावायोग्र इति ।। ३९ ।। ❀ ❀ कुत इदमुद्धृतमित्याकांक्षायामाह इदं भागवतमिति भगवतः सर्वसम्बन्धि भागवतं नामेति प्रसिद्धं पुरातनं पुराणमिति जातिशब्दो वा, वेदेन सम्यङ्मितं मतांतरेष्विव नात्र वेदविप्रतिषेधः । वस्तुनिरूपणार्थं प्रासंगिककथापि पुरुषोत्तमकथैवेत्याह उत्तमश्लोकचरितमिति । उत्तमश्लोककस्य चरितं यत्र सर्वज्ञानेन भगवान् वेदव्यासः अनुभूय आह ।। ४० ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

न चास्येत्यत्र । वस्तुतस्त्विति । 'अविज्ञातं विजानता'मिति श्रुतेरित्यर्थः । स्वतः आम्रादयः कर्कटीविशेषप्रभृतयः अधिकरणतः श्वदतौ भृतं दुग्धादि, अधिकारिभेदेन कीटादिदूषितान्नादि । द्वितीयापि कोटिरिति नानुभूयन्त इति कोटिः । तथा

च साकारव्यापकत्वाद्रूपान्तरेणानुभूयन्ते, न तु स्वेनेत्यर्थः। प्रमाणान्तरस्येति 'यस्य ब्रह्म च क्षत्रं चे'ति शब्दादतिरिक्तस्य। तथा च कालरूपेण ब्रह्मक्षत्रादि भुनक्ति, न तु स्वयमिति भावः। कस्मै प्रयोजनायेत्यादि। 'अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूवे'ति श्रुतेरित्यर्थः। कौशल्येति ब्राह्मणादेराकृतिगणत्वात्ष्यञ्। कौशलेनेति वा पाठः। ऊतीरिति। उतयः कर्मवासनाः कर्माभिव्यंग्या दृष्टरूपा इत्यर्थः। निपातेत्यादि ऊतियूतीत्यादिना ऊतिशब्दो निपातितः, तत्र यथा उ शब्द इति धातोरुपूर्वस्य क्तिनि ऊतिरिति भवति ज्वरेत्यू अवते रूपम्, तथापि नितरां विचारात्पातनादज्ञानं तद्भेदानां प्रेमपरवशतां वा द्योतयत्ययं ग्रन्थः। अथवा लीलापदं स्वरूपपदं वा परित्यज्योतिपदं प्रयुक्तं कर्मवासनावान्तरभेदा न ज्ञायन्ते यथा, तथा भगवतोऽपीति बोधयति। अथवा सूत्रकृता स्वरप्रक्रियायामूतिरुदात्त इत्यनुक्तात्र पठिता, सूत्रकृदादिमते प्रकृतिप्रत्ययभेदाज्ञानं द्योतयति तद्वदित्यर्थः। विस्तारयत इति। तथा च वेदादीनामप्यर्वाचीनतया न तैरपि ज्ञायते इत्यज्ञाने हेतुरित्यर्थः। चतुर्भिरिति धातृपदसूचितार्वाचीनत्वजन्तुत्वकुमनीषित्वाज्ञत्वैः। अत्रापि यथायथं स्वरूपाज्ञानं कथं करोति, किमर्थं वा करोति, कथं किमर्थं वा जिघ्रतीति भोगादिप्रकाराज्ञानं चोक्तं ज्ञेयम्॥ ३७॥ ❀ ❀ स वेदेत्यत्र। ननु धातृत्वादज्ञानेऽपि कार्यलिङ्गकानुमानेन ज्ञातो भविष्यतीत्यत आहुः कार्यं तु लौकिकमिति। 'कर्मगुणप्रवाह' इति वाक्यात्कार्यं लोकान्तःपाति, अतो यथाकथञ्चिज्ज्ञापकम्, न तु वस्तुत इदमित्थं ज्ञानजनकमित्यर्थः। तर्हि कथं ज्ञानमित्याकांक्षायां तदुपायमाहुः तदित्यादि। तत्कार्यं मार्गपरिज्ञाने सति ज्ञापकं भवतीति शेषः। तन्मार्गेति। अनेन पदवीपदप्रयोगतात्पर्यमुक्तं भवति। मार्गो भक्तिः। कथमेवमित्यपेक्षायां तत्प्रकारमाहुः समेत्यादि। सहभावादिति गतिसहभावात्। तथा च गत्याधारभूतो मार्गः कार्यभूत इति गतिज्ञाने तदाधारभूतकार्यतत्त्वज्ञानं भवति, तेन ज्ञानेन धूमप्रमित्या वह्नेरिव भगवतो ज्ञानं भवतीति तदर्थं गतिः मार्गपदवीपदोक्तो ज्ञातुमावश्यकमित्यर्थः। मनआदौ भगवत आविर्भावस्तत्प्राप्तिरित्यर्थः। ननु विवर्ते मनआदौ आविर्भूतमपि तथेति किमनेनेत्यत आहुः बुद्ध्येति। बुद्ध्या सहभावं प्राप्य कार्याणां तत्त्वं परमार्थतत्त्वं ज्ञायेतेत्यर्थः। तस्येत्यादि। 'धातुः पदवीं वेदे'त्यस्य तात्पर्यम्। प्रमाणाज्ञानभाव इति। प्रमाणैरज्ञानसत्तायामित्यर्थः। ननु वैकुण्ठादिस्थैर्ज्ञातो भगवानुपदेष्टव्य इति वक्तुमाहुः कदाचिदिति। न समाप्यत इति। तथा चातिवेगवशान्मनोवत्साकारोऽपि न ज्ञायतेप्यधिकाराभावाच्च नोपदिश्यत इत्यर्थः। प्रलय एवेति। जगदनुकूलक्रियाभावात्प्रलय इत्यर्थः। ननु गतिज्ञानाय किमिति साधनोपदेशः, 'गतिर्वेद' इति वाक्यात्कालस्य गतित्वेन तस्यैव गत्यन्तरस्याप्यनुमानेन शक्यज्ञानत्वादित्यत आहुः किञ्चेत्यादि। तथा च कालोऽपि दुर्ज्ञेयश्चेत्तद्दृष्टान्तेन गत्यन्तरज्ञानं दुर्घटमिति साधनोपदेश आवश्यक एवेत्यर्थः। कालस्य दुर्ज्ञेयत्वं तु ब्रह्मपुराणोपान्त्ये मायानुकीर्तनाध्याये द्रष्टव्यम्। अथवा कालरूपदृष्टान्ताभावादेव न तद्वज्ज्ञानमित्यर्थः। कालशब्दाभिजप्यस्य सत्त्वात्पक्षान्तरमाहुः अथवेति। हस्तेत्यादि। लोके तथा प्रसिद्धिः। अवयवित्वेन हस्ताधारो विरुद्धधर्मवत्त्वज्ञापनायेदम्। शकटस्थैरिति। शकटं जगत्। गतीति। मायाज्ञानपश्चाद्भाव इत्यर्थः। बोधिताविति। सन्ततानुवृत्तिपदाभ्यां बोधितौ। चरणेति। यस्तत्पादसरोजगन्धं भजेत, स तत्पदवीं वेदेति तथा। लोकेऽप्येवम्। स चेति। 'स वेदे'त्यादेरर्थः। भक्तिपक्षे त्वित्यादि। अस्मिन्पक्षे परोक्षवाद इति लक्षणा न दोषायेति ज्ञेयम्। भक्तिमार्ग इति। 'भवत्पदाम्भोरुहनाव' मित्यत्र व्याख्यातः॥ ३८॥ ❀ ❀ अथेत्यत्र। हीनमपीति सूतम्। 'यानि वेदविदां श्रेष्ठ' इत्यत्र, 'कथायां सक्षणा हरे'रित्यत्र च सिध्यति। एवं प्रकार इति। धन्यत्वस्येत्यर्थात्। मूलस्थसर्वात्मकपदे ऐकान्तिकमित्यर्थः। श्रीधरीये व्याख्यातः, अत्र तु सर्वात्मक इति सप्तम्यन्तं वेदान्तवेद्यतां चेत्यनेन व्याख्यातम्। सर्वात्मक एव वेदान्तवेद्यता, आकाशादिपदानां श्रवणात्। तथा च सर्वात्मक आत्मभावमिति पाठः। सुदृढेति वेदान्तवेद्य एव सुदृढस्नेह इति बोधार्थम्। प्रयुज्येति। तथा चात्मनि भाव आत्मभाव इति समासे एकदेशान्वयः सप्तम्यन्तानाम्। पुनःशब्दार्थ इति। अर्थैक्यात्पुनःशब्दः॥ ३९॥ ❀ ❀ इदमित्यत्र। जातिशब्द इति। पुराणत्वं जातिरित्यर्थः॥ ४०॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु तर्हि सर्वेषां पुरुषार्थसिद्धौ कस्यापि दुःखं न स्यादनुभूयते च बहूनां दुःखमित्याशङ्क्य विषयासक्तानां तल्लीलावेदनाभावान्न तेषां पुरुषार्थसिद्धिरतो दुःखानुभवो युक्त एवेत्याशयेनाह–न चेति। कुत्सिता विषयाविष्टा मतिर्बुद्धिर्यस्य स जन्तुः कृमितुल्यो जीवः कश्चिदपि मनसा सङ्कल्पमात्रेण नानाविधानि रूपाणि वचोभिर्वेदैर्नामानि च सन्तन्वतो विस्तारयतोऽस्य धातुः सर्वकारणभूतस्य भगवत ऊतीर्लीलाः निपुणेन तर्कादिकौशलेन न चावैति नैव जानातीत्यन्वयः। कुमनीषत्वे हेतुमाह–अज्ञ इति, आत्मपरमात्मयाथात्म्यज्ञानशून्य इत्यर्थः। तथा च यदि जीवेश्वरतत्त्वं जानीयात्तदा विषयासक्तो न स्यादिति भावः। अज्ञाने दृष्टान्तमाह नटचर्यामिवाज्ञ इति। नटो यथा स्वरूपे स्थित एवात्मानं नानारूपं दर्शयति तच्चरितमज्ञो न जानाति तथा भगवानप्यप्रच्युतस्वरूप एवात्मानं नानाविधं दर्शयतीति तत्तत्त्वमप्यज्ञो न जानातीत्यर्थः॥ ३७॥ ❀ ❀ तर्हि कस्तस्य लीलां जानातीत्यपेक्षायां विषयाद्विरक्तो भगवद्भक्त एवेत्याह–स इति। अमायया भगवतः सकाशात् फलग्रहणाभिलाषो माया, कापट्यं तद्राहित्येन सन्ततया दीर्घकालादरनैरन्तर्यया अनुवृत्त्या सेवया हेतुभूतया यस्तस्य भगवतः पादसरोजगन्धं भजेत प्राप्नुयात् सेवावशाद्यस्य विशुद्धान्तः-

करणस्य हृदयकमले भगवान् शेते विषयोन्मुखानि च सर्वेन्द्रियाणि विषयेभ्यः परावृत्य भगवत्पादसरोजगन्धेनान्तराकृष्टानि भवन्ति स तस्य रथाङ्गपाणेः रथाङ्गं चक्रं पाणौ यस्य तस्य भगवतः पदवीं लीलामार्गं वेद जानातीत्यन्वयः । तस्य दुर्ज्ञेयत्वसूचनाय विशेषणानि–धातुरिति, सर्वकारणकारणस्येत्यर्थः । अत एव दुरन्तममितं वीर्यं प्रभावो यस्य तस्येत्यर्थः । अत एव परस्य सर्वप्रमाणागोचरस्येत्यर्थः । एवम्भूतस्य रहस्यं भक्तिं विना कथं जानीयादिति भावः । तथा चोक्तं भगवता–'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप' इति ॥ ३८ ॥ ❀ ❀ एवं प्रासङ्गिकमुक्त्वा भक्तिमार्गे प्रवृत्तानृषीनभिनन्दति–अथेति । यतो भक्त एव भगवत्तत्त्वं जानाति अथ अतो भगवतः 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' इति वाक्यात् सर्वज्ञा भगवन्तो धन्याः कृतार्था एव । कुतः ? यत् यस्मादित्थं हीनमपि मां सत्कृत्यानवसरमपि अवसरीकृत्य सादरप्रश्नैरखिललोकनाथे वासुदेवे सर्वात्मकमैकान्तिकमात्मनो मनसो भावं वृत्तिं कुर्वन्तीत्यन्वयः । तेन कथं कृतार्थतेत्यपेक्षायामाह–यत्रेति । यस्मिन् भावे सति उग्रो भयङ्करः परिवर्तः जन्ममरणाद्यावर्तो भूयो देहपातानन्तरं पुनर्न भवति ॥ ३९ ॥ ❀ ❀ एवं सङ्क्षेपत उक्तमर्थं पुनर्भागवतव्याख्यानेन विस्तरतो वक्तुं श्रीभागवतं स्तौति–इदमिति । इदं वक्ष्यमाणं भागवतं नाम पुराणं भगवान् भगवदवताररूपऋषिः सूक्ष्मतत्त्वज्ञो व्यासश्चकारेत्यन्वयः । किमर्थं चकारेत्यपेक्षायामाह–लोकस्य प्राणिसमूहस्य निःश्रेयसाय विमुक्तये इत्यर्थः । तत्र हेतुमाह–उत्तमेति, उत्तमश्लोकस्य अविद्यानिवर्त्तकयशसश्चरितं यस्मिंस्तदित्यर्थः । अत एव ब्रह्म सम्यक् मीयतेऽनेनेति ब्रह्मसम्मितम् । यद्वा तर्हीदानीन्तनत्वात् अन्यकाव्यवदप्रमाणं स्यादित्याशङ्क्याह–ब्रह्मेति, ब्रह्म वेदस्तेन सम्मितं समीकृतं वेदतुल्यमित्यर्थः । तर्हि धर्मादिहेतुत्वमस्य न स्यादित्याशङ्क्याह–धन्यं धनावहम्, स्वस्त्ययनं धर्मकामादिमङ्गलकरमित्यर्थः । यतो महत्सर्गादिदशविधलीलानिरूपकत्वेन महापुराणमित्यर्थः ॥ ४० ॥

हिन्दी अनुवाद

जैसे अनजान मनुष्य जादूगर अथवा नटके सङ्कल्प और वचनोंसे की हुई करामातको नहीं समझ पाता, वैसे ही अपने सङ्कल्प और वेदवाणीके द्वारा भगवान्‌के प्रकट किये हुए इन नाना नाम और रूपोंको तथा उनकी लीलाओंको कुबुद्धि जीव बहुत-सी तर्कयुक्तियोंके द्वारा नहीं पहचान सकता ॥ ३७ ॥ ❀ ❀ चक्रपाणि भगवान्‌की शक्ति और पराक्रम अनन्त हैं–उनकी कोई थाह नहीं पा सकता । वे सारे जगत्‌के निर्माता होनेपर भी उससे सर्वथा परे हैं । उनके स्वरूपको अथवा उनकी लीलाके रहस्यको वही जान सकता है, जो नित्य-निरन्तर निष्कपट भावसे उनके चरणकमलोंकी दिव्य गन्धका सेवन करता है—सेवा-भावसे उनके चरणोंका चिन्तन करता रहता है ॥ ३८ ॥ ❀ ❀ शौनकादि ऋषियों ! आपलोग बड़े ही सौभाग्यशाली तथा धन्य हैं जो इस जीवनमें और विघ्न-बाधाओंसे भरे इस संसारमें समस्त लोकोंके स्वामी भगवान् श्रीकृष्णसे वह सर्वात्मक आत्मभाव, वह अनिर्वचनीय अनन्य प्रेम करते हैं, जिससे फिर इस जन्म-मरणरूप संसारके भयंकर चक्रमें नहीं पड़ना होता ॥ ३९ ॥ ❀ ❀ भगवान् वेदव्यासने यह वेदोंके समान भागवच्चरित्रसे परिपूर्ण भागवत नामका पुराण बनाया है ॥ ४० ॥

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् । तदिदं ग्राहयामास[1] सुतमात्मवतां वरम् ॥ ४१ ॥
सर्ववेदेतिहासानां सारं सारं समुद्धृतम् । स तु संश्रावयामास महाराजं परीक्षितम् ॥ ४२ ॥
प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः । [2]कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ ४३ ॥
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः । तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ ४४ ॥
अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् । सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां [3]प्रथमस्कन्धे नैमिषीयोपाख्याने तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्संप्रदायप्रवृत्तिमाह । तदिदमिति । सुतं शुकम् ॥ ४१ ॥ ❀ ❀ प्रायेण मृत्युपर्यंतानशनेनोपविष्टमिति परमवैराग्योक्तिः ॥ ४२ ॥ ❀ ❀ हे विप्राः, विप्रर्षेः सकाशात् ॥ ४३ ॥ ❀ ❀ अध्यगमं ज्ञातवानस्मि तत्र कीर्तयतस्तत्र निविष्ट इति चान्वयभेदपदावृत्तिरदोषः । यथाधीतं न तु स्वमतिविलसितम् । तत्रापि यथामति स्वमत्यनुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ॥ ४४–४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥

---

१. प्रा० पा०—ततः संग्राहयामास । २. 'कृष्णे स्वधामोपगते' 'इत्यारभ्य' 'ऽधुनोदितः ।' पर्यन्तः पाठः प्राचीने पाठे न । ३. अत्र प्राचीने पाठे 'जन्मगुह्यं' इत्यधिकः पाठः ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदिदं तल्लीलामयं महापुराणं ब्रह्मानुभविगुरुणा श्रीशुकेनाप्युपादेयत्वेन गृहीतमित्येव जन्मानि कर्माणीत्यस्योदाहरणत्वेनाह–तदिदमिति । वक्ष्यते च परिनिष्ठितोपीत्यादि"हित्वा स्वशिष्यान्पैलादीन्" इत्यादि च । तस्मात्तज्जन्मकर्मलीलामयेनानेन दुःखग्रामाद्विमुच्यते । इत्येतावन्मात्रं किं वक्तव्यं किं तु तद्विधानामपि परमपुरुषार्थं इति भावः । अत एवाह सर्ववेदेतिहासानां समुद्धृतो यः सारस्तद्रूपमिति । किं च यद्द्रव्यमतीव गुह्यं तत्खलु पुत्राय सुवृत्ताय दीयते इति विमृश्य व्यासदेवेन वेदांस्तु पैलादीन्पाठयित्वापि ततोऽप्यस्यातीव रहस्यत्वात्तान्विहायैवात्मजायेदं श्रीभागवतं दत्तम् । तत्र हेतुः आत्मवतां सुबुद्धीनां मध्ये वरं मुख्यम् ॥ ४१ ॥ ❀ ❀ नवनीतवत्सारम् । तेनान्यच्छास्त्रं तक्रादिवच्छ्रीभागवतवन्न सरसमिति भावः ॥ ४२ ॥ ❀ ❀ "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" इति मेदिनी । तत्र गंगातटस्थपरमर्षिसभायाम् । हे विप्रा इति । यूयमेव विप्रत्वात्पुराणेतिहासश्रावणयोग्या नाहमिति भावः । यद्वा विशेषेण प्रांति सेवकमनोरथान्पूरयंतीति विप्राः "समीहितार्थार्पणकामधेनवो विपद्गणध्वान्तसहस्रभानवः । अपारसंसारसमुद्रसेतवः पुनंतु मा ब्राह्मणपादरेणवः" इत्यादिपुराणाद्विप्राणामतीव पूज्यतमत्वेन श्रीमत्सु कथाश्रावणायोग्योपि भवदाज्ञयैव श्रावयिष्यामि । "इदमेव परं श्रेयो यदाज्ञापालनं गुरोः" इत्युक्तेरिति भावः । विप्रर्षेः सर्वाभीष्टप्रदज्ञानवतः श्रीशुकदेवात् ॥ ४३ ॥ ❀ ❀ तत्र परीक्षिदर्थमिलितर्षिसमाजे । तदनुग्रहाच्छ्रीशुकानुग्रहात् । "एता वक्ष्यत्यसौ सूतः" इति द्वादशोक्तेः । यथामतीति सर्वमर्थजातं तु स श्रीशुकदेव एव वेत्तीति भावः ॥ ४४ ॥ ❀ ❀ तदिदं पुराणं न तु शास्त्रांतरतुल्यं किं तु श्रीकृष्णप्रतिनिधिरूपमेवेत्याह–कृष्ण इति । स्वस्य कृष्णस्य धाम नित्यलीलास्थानमुपगते सति श्रीकृष्णे तत्र च "धर्मः प्रोज्झितकैतवोऽत्र" इति "नैष्कर्म्यमप्यच्युतभाववर्जितम्" इति चानुसृत्य परमप्रकटतयाऽवगते भगवद्धर्मभगवज्ज्ञानादिभिरपि सह स्वधामोपगते सति कलौ नष्टदृशां तादृशधर्मज्ञानविवेकरहितानां कृते तदिदं पुराणमेवार्कः न तु शास्त्रांतरवद्दीपस्थानीयं यत्तथाविधोयं पुराणार्क उदितः । तादृशधर्मज्ञानप्रकाशनात्तत्प्रतिनिधिरूपेणाविर्बभूव । अर्कवत्तत्प्रेरिततयैवेति भावः । विश्वनाथस्तु किं बहुना यद्युष्माभिः पृष्टं "धर्मः कं शरणं गत" इति तदिदमेव बुद्ध्यध्वमित्याह–कृष्ण इति । स्वधाम्नो द्वारकातः सकाशात् उप समीपं प्रभासं गते धर्मज्ञानादिभिः षड्भिरैश्वर्यैः तत्रांतर्धाने सतीत्यर्थः । तल्लीलाया भक्तक्षोभकारित्वात्स्पष्टतयानुक्तिः । नष्टदृशां लुप्तज्ञानानाम् । अत्र दृक्पदेन तत्र चैकदेशांते "दृष्टिः प्रनष्टा तमसि प्रविष्टा" । इति प्रयुक्तेन कृष्णस्य सूर्यत्वं मथुराया उदयशैलत्वं प्रभासस्यास्ताचलत्वं शिष्टानां चक्रवाकत्वं दुष्टानां नीहारत्वं पापानां तमस्त्वं भक्तानां कमलवनत्वं च बोधितम् । अतस्तृतीये "कृष्णद्युमणिनिम्लोचे" इति स्पष्टतया सूर्योक्तिः । एष पुराणार्क इति । कृष्णसूर्येऽस्तमिते सति पुराणसूर्योयमुदित इति सूर्यस्य प्रतिमूर्त्तिस्सूर्य एव भवेदिति भावः ॥ ४५ ॥

इति श्रीमद्भागवते प्रथमस्कन्धे भावार्थदीपिकाप्रकाशे तृतीयोऽध्यायः ॥ ३ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

संक्षेपत इति । संक्षिप्तव्याख्यया सह कथितं मूलं बाहुल्यव्याख्यानेन सह श्रावयिष्यामीत्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-
दीपन्याख्यदीपिकाटिप्पण्यां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवव्याख्या

किमर्थं लोकस्य शृण्वतो जनस्य निःश्रेयसार्थं तदेव दर्शयितुं विशिनष्टि धन्यं सम्यग्ज्ञानजननद्वारा कृतार्थत्वाहं स्वस्त्ययनं मंगलास्पदम् । "पवित्राणां पवित्रं यो मंगलानां च मगलम्" इत्युक्तरीत्या निरतिशयमंगलावहं भगवत्स्वरूपरूपादिप्रतिपादकत्वेन मंगलास्पदमित्यर्थः । तदुक्तविधमिदं पुराणमात्मवतां ज्ञानिनां श्रेष्ठं सुतं श्रीशुकं ग्राहयामासाध्यापयामास ॥ ४१ ॥ ❀ ❀ पुराणमेव विशिनष्टि । सर्वेषां पूर्वोत्तरभागात्मकानां वेदानां इतिहासानां च सारं सारं समुद्धृतम् एतत्पुराणरूपेणेति शेषः । सारं सारांशः समीचीनन्यायैः परिष्कृतोऽर्थ इति यावत् । सारं सारं समुद्धृतमित्यनेन वेदेतिहासादिसिद्धस्यार्थशरीरस्य क्रमविशेषनिवेशनं वेदाद्यर्थपरिष्करणं च व्यासबुद्ध्यधीनमवगम्यते । स त्वधीतैतत्पुराणः । शुकस्तु परीक्षितं महाराजमिदं संश्रावयामास शृणोतेः शब्दकर्मणो ण्यंते कर्त्तुः परीक्षितः णौ 'गतिबुद्धी'ति कर्मसंज्ञायां द्वितीया, एवं ग्राहयामास सुतमित्यत्रापि, तत्र ग्रहेरपि शब्दकर्मकत्वात् ॥ ४२ ॥ ❀ ❀ परीक्षितं कथंभूतं गंगायां प्रायोपविष्टमनशनव्रतदीक्षितमृषिभिः परीतं परिवेष्टितं तत्र परीक्षितः संनिधौ भूरितेजसो विप्रर्षेः शुकस्य कीर्त्तयतः श्रावयतः सतः हे विप्राः ॥ ४३ ॥ ❀ ❀ अहमिति तत्र निविष्टोऽहं तदनुग्रहादध्यगममधिगतवानस्मि पुराणमिति शेषः । गमेर्लृदित्वादङि अध्यगममिति रूपं, स तदनुग्रहादधिगतैतत्पुराणोऽहं च यथाधीतं यद्वा अधितमिति भावे क्तः यथाध्ययनमध्ययनमनतिक्रम्याध्ययनानुसारेणेत्यर्थः, यथामति श्रावयिष्यामि । यथामतीत्यनेन पुराणस्य दुरवबोधत्वं सूच्यते ॥ ४४ ॥ ❀ ❀ पुराणं स्तौति कृष्ण इति । कृष्णे भगवति धर्मज्ञानादिभिः सह स्वधाम स्वलोकं गतवति सत्यत एव

कलौ युगे नष्टदृशां नष्टप्रज्ञानां जनानां दृष्टिप्रदानक्षम एव पुराणरूपोऽर्कः सूर्योऽधुनोदितः। यथा रात्रौ नष्टदृष्टीनामर्कोदये सति दृष्टिः स्वविषयग्रहणसमर्था भवत्येवं रात्रिरूपे कलौ नष्टप्रज्ञानां पुनरेतत्पुराणार्कोदयेन प्रज्ञा वर्त्तेत इत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किमर्थं लोकस्य निःश्रेयसाय मोक्षाय धन्यं पुष्टिकरं स्वस्त्ययनं सर्वमंगलानामालयम् अर्थतः शब्दतोऽपि महत् यदेवं-विधं तदिदं स व्यास आत्मवतां वरं वशीकृतमनसां वरं सुतं शुकं ग्राहयामास ॥ ४१ ॥ ❀ ❀ कुत एतदेवाग्राह-यदिति तत्राह सर्वेति। वेदादिसर्वशास्त्रोत्तमत्वादिदमेव ग्राहितमिति भावः। स तु शुकः परमऋषिभिः परीतं समन्वितं गंगायां प्रायोपविष्टमनशनव्रतमाचरंतं परीक्षितं नाम महाराजं चक्रवर्तिनं श्रावयामास ॥ ४२-४३ ॥ ❀ ❀ किं च अहं च हे विप्राः तदनुग्रहात्तत्र गंगायां तदंतिके निविष्टः योग्यस्थाने उपविष्टः भूरितेजसः क्षात्रसामर्थ्योपेतस्य ब्रह्मापरोक्षज्ञानवतो वा तस्य राजर्षेरर्थे कीर्तयतः शुकादध्यगमं पठितवानस्मि। योऽहं तत्राध्यगमं सोऽहं तत्रेत्यादिप्रश्नपरिहाराय सर्ववेदेतिहासादिसारत्वेन भगवता कृतं श्रीभागवतं युष्माकं श्रावयिष्यामि यथापठितं यथाप्रज्ञमित्येकान्वयः ॥ ४४ ॥ ❀ ❀ यत्पृष्टं धर्मः कं शरणं गत इति तत्रोत्तरं धर्मज्ञानादिभिः सह कृष्णे स्वधाम वैकुंठं प्राप्ते सति कलियुगे नष्टज्ञानानां पुंसां सर्व-सद्धर्मप्रकाशकश्रीभागवतपुराणार्कोऽमुना वेदव्यासेन उदितः उदयं प्रापितः। तस्मात्स धर्मः सच्छास्त्रैर्ज्ञानसद्धर्मप्रवर्तकं तमेव व्यास-रूपिणं कृष्णं शरणं गत इति भावः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदिदं तल्लीलामयं महापुराणं ब्रह्मानुभविगुरुणा श्रीशुकेनाप्युपादेयत्वेन गृहीतमित्येव जन्मानि कर्म्माणीत्यस्योदाहरण-त्वेनाह तदिदमिति। वक्ष्यते च परिनिष्ठितोऽपीत्यादि। हित्वा स्वशिष्यान् पैलादीनित्यादि च। तस्मात्तज्जन्मकर्म्मलीलामयं नानेन दुःखग्रामाद्विमुच्यत इत्येतावन्मात्रं किं वक्तव्यम्। किन्तु तद्विधानामपि परमपुरुषार्थ इति भावः। अत एवाह सर्ववेदे-तिहासानां समुद्धृतो यः सारः सारस्तद्रूपमिति ॥ ४१-४२ ॥ ❀ ❀ तदिदं पुराणं न तु शास्त्रान्तरतुल्यं किन्तु श्रीकृष्णप्रति-निधिरूपमेवेत्याह कृष्ण इति। स्वस्य कृष्णरूपस्य धाम नित्यलीलास्थानमुपगते सति श्रीकृष्णे तत्र च धर्मः प्रोज्झितकैतवोऽत्रेति नैष्कर्म्यमप्यच्युतभाववर्जितमिति चानुसृत्य परमप्रकृष्टतया अवगतैः भगवद्धर्म्मभगवज्ज्ञानादिभिरपि सह स्वधामोपगते सति कलौ नष्टदृशां तादृशधर्मज्ञानविवेकरहितानां कृते तदिदं पुराणमेवार्कः। न तु शास्त्रान्तरवद्दीपस्थानीयं यत्तथाविधोऽयं पुराणार्क-उदितः। तादृशधर्मज्ञानादिप्रकाशनात्तत्प्रतिनिधिरूपेणाविर्बभूव। अर्कवत्तत्प्रेरिततयैवेति भावः ॥ ४३-४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दधिमथनादुद्धृतं नवनीतमिव यद्वेदादीनां सारं सारं वस्तु तदेवेदं भागवताख्यं स्नेहेन सुतं शुकं ग्राहयामास वेदादि-दधिमथनश्रमं च सफलीचकारेति भावः। आत्मवतां वरमिति तादृशोऽपि सुतः स्वादाधिक्येनैवेदं लोभाद् गृह्णाति स्मेति भावः ॥ ४१ ॥ ❀ ❀ प्रायोपविष्टं प्रायो मृत्युपर्यन्तानशनं तं व्याप्य कृतोपवेशं गोदोहमास्त इतिवत्। "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोरि"ति मेदिनी ॥ ४२ ॥ ❀ ❀ किं बहुना यद्युष्माभिः पृष्टं 'धर्म्मः कं शरणं गत' इति तदिदमेव बुद्ध्यस्वेत्याह कृष्णे इति। स्वधाम्नो द्वारकातः सकाशात् उप समीपं प्रभासं गते धर्म्मज्ञानादिभिः षड्भिरैश्वर्यैः सह तत्रान्तर्दधाने सतीत्यर्थः। तल्लीलाया भक्तक्षोभकारित्वात् स्पष्टतयानुक्तिः। नष्टदृशां लुप्तज्ञानानां जनानाम्। अत्र दृक्पदेन तत्र चैकदेशान्ते 'दृष्टिः प्रनष्टा तमसि प्रविष्टे'ति प्रयुक्तेन कृष्णस्य सूर्यत्वं मथुराया उदयशैलत्वं प्रभासस्य अस्ताचलत्वं शिष्टानां चक्रवाकत्वं दुष्टानां नीहारत्वं पापानां तमस्त्वं भक्तानां कमलवनत्वञ्च बोधितम्। अतस्तृतीये 'कृष्णद्युमणिनिम्लोचे' इति सूर्यतया स्पष्टोक्तिः। एष पुराणार्क इति कृष्णसूर्येऽस्तमिते सति पुराणसूर्योऽयमुदित इति सूर्यस्य प्रतिमूर्त्तिः सूर्य एव भवेदिति भावः ॥ ४३ ॥ ❀ ❀ तत्र सभायां कीर्त्तयतो विप्रर्षेः शुकदेवात् सकाशात् अध्यगमम् इदं शास्त्रमधिगतवानस्मि। तस्यानुग्रहमवाप्य तत्र सभैकदेशे निविष्ट एतां वक्ष्यत्यसौ सूत इति द्वादशोक्तेः। यथाधीतं न तु स्वकपोलकल्पितं तत्रापि यथामति स्वबुद्ध्या यावदवधृतं तावदेव सर्व्व-मर्थजातं तु स एव शुकदेवो वेदेति भावः ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। तृतीयः प्रथमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुतं श्रीशुकम् ॥ ४२ ॥ ❀ ❀ प्रायोपविष्टं परमवैराग्यसूचकेन मृत्युपर्यंतानशनेनोपविष्टम् ॥ ४३-४४ ॥ ❀ ❀ पुराणार्कः इति । अन्येषु युगेषु हार्दतमोनिर्नाशकः वेदार्क आसीत् अधुनेदानीं कलौ तु तद्दोषबाहुल्येन नष्टदृशां नष्टप्रज्ञानां वेदार्थज्ञानाभावात् । तन्मुखार्थप्रकाशकः पुराणरूपोऽर्क उदितः ॥ ४५ ॥

इती श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ग्रंथप्रवृत्तिः सर्वमुक्तये धनप्राप्तिः कल्याणं च लक्ष्म्याः समागतायाः भक्तायाः श्रवणात् महदिति वस्तुतो गुणतोऽर्थतश्च स्वस्य ज्ञानार्थपरंपरामाह व्यासः शुकं वेदवत् पाठितवान् । गोप्यत्वाय सुतमिति । जितेंद्रियताज्ञानं चात्रांगं तस्योत्कर्षे भागवतं फलतीत्यर्थपरम्परामाह आत्मवतां वरमिति । प्रमाणांतरचिंता न कर्त्तव्येत्याह त्रैवर्णिकानामुद्धारार्थं वेदः स्त्रीशूद्राणामितिहासः उभयसारोद्धारत्वात्सर्वोद्धारकपरंपरामाह सर्वेति ॥ ४१ ॥ ❀ ❀ प्रायो मरणपर्यंतमन्ननिवृत्तिः, गंगायामिति देशोत्कर्षः, परमर्षिभिरिति सत्संगः ॥ ४२ ॥ ❀ ❀ स्वस्य प्राप्तिप्रकारमाह तत्रेति । विप्रा इति संबोधनेन सर्वपूरकत्वात् शुकः प्रथमं पूरितवान् । अधुना पुनः स्मरणेन भवंतः पूर्यंतीति लौकिकत्वाभावाय ऋषिरिति । असंदिग्धमर्थकथनायोत्तरत्र प्रकाशनाय च भूरितेजस इति भूरितेजोज्ञानप्रकाशो यस्य ब्रह्मवित्त्वेन तेजोविशेषो वा । सर्वज्ञत्वाय ततः सर्वतोमुखं भागवतं जातमित्याह अहं चेति । सर्वं एवाधीतवंतः अहं च । तत्र उपदेशसभायां प्रसंगान्न श्रुतं किंतु शुकानुग्रहात् तत्रोपविश्य अनुग्रहं प्राप्य तत्र निविष्टः सोऽहमुपदेशात्प्राप्तं भागवतं वो युष्मान् अध्ययनमनतिक्रम्य तन्मध्ये यथामति स्वबुद्ध्यनुसारेण, अनेन गर्वपरिहारः, उक्तादप्यधिकोऽर्थोऽस्यास्तीति ज्ञाप्यते ॥ ४३ ॥ ॥ ४४ ॥ ❀ ❀ 'धर्मः कं शरणं गत' इति षष्ठप्रश्नस्योत्तरमाह कृष्ण इति । धर्मस्तु भगवतैव सह गतः, स्थिते शरणचिन्ता । कलिरंधकारतुल्यस्तेन पिहितदृष्टीनां न त्वंधानां स्वतो दुष्टानां पुनर्धर्मादिज्ञापनार्थं पुराणरूपोर्कोऽधुनोदितः स्थित एव लोके प्रकटीभूत इत्यर्थः ॥ ४५ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे तृतीयाध्यायविवरणम् ॥ ३ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

निःश्रेयसायेत्यत्र । लक्ष्म्या इति । लक्ष्म्याः श्रवणात् । भागवते भगवतः श्रवणमाशंक्याहुः सर्वगताया इति । तथा च भगवच्छ्रवणेऽपि लक्ष्मीश्रवणमिति भावः । कथं कल्याणहेतुत्वं लक्ष्म्याः श्रवणस्येत्यत आहुः भक्ताया इति । तथा च भक्तायाः श्रवणाद्भक्त्या कल्याणमित्यर्थः । स्वत इति । 'सारं सारं समुद्धृत'मिति श्लोकात् । गुणत इति । वास्तववस्तुवेद्यत्वतः । अर्थत इति । अर्थो हि भगवान् ततः ॥ ४१ ॥ ❀ ❀ कृष्ण इत्यत्र । स्थित इति । धर्मे स्थिते धर्मस्य शरणचिन्ता ॥ ४३ ॥ ❀ ❀ तत्रेत्यत्र । पूरितवानिति । भगवद्रसेन शुकं पूरितवान् । अहं चेत्यत्र । यस्येति श्रीभागवतस्येत्यर्थः ॥ ४४ ॥

इति श्रीप्रथमस्कन्धे सुबोधिनीप्रकाशे तृतीयाध्यायविवरणम् ॥ ३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्सम्प्रदायप्रवृत्तिमाह-तदिति । तत्पूर्वोक्तमिदं सर्वेषां पूर्वोत्तरभागात्मकानां वेदानामितिहासानां च महाभारतादीनां सारं सारं साधनजातं समुद्धृतं दधिमथनादुद्भूतं नवनीतमिव पृथक्कृतं भागवताख्यं स्नेहेन सुतं शुकं व्यासो ग्राहयामासेत्यन्वयः । सर्वत उत्कृष्टं वस्तु स्वसुतस्य दीयते इति लोकप्रसिद्धेः सुताध्यापनेन व्यासदृष्ट्याऽपि श्रीभागवतस्य सर्वशास्त्रेभ्यः श्रेष्ठत्वमिति बोध्यम् । सर्ववेदादिसारोद्धारकथनेन श्रीभागवतलाभे सति न वेदादिप्रमाणान्तरापेक्षा, यतस्त्रैवर्णिकानामुद्धारार्थं वेदाः, स्त्रीशूद्राद्युद्धारार्थमितिहासाः, उभयसारोद्धारत्वात् सर्वोद्धारकमिदमिति सूचितम् । सर्वतो विरक्तेन जितेन्द्रियेण ज्ञानवता शुकेन ग्रहणादपि अस्य सर्वशास्त्रेभ्य उत्कृष्टत्वं ज्ञेयमिति सूचयन्नाह-आत्मवतां वरमिति, सर्वज्ञानिनां मध्ये श्रेष्ठमित्यर्थः ॥ ४१ ॥ ❀ ❀ स तु अधीतैतत्पुराणः शुकस्तु परीक्षितं सम्यक् प्रीतिपूर्वकं सकलमिदं श्रावयामासेत्यन्वयः । एतद्ग्रहणे वैराग्याद्यङ्गमिति सूचयन् श्रोतुर्वैराग्यादि दर्शयति-प्रायेति । प्रायेण मरणपर्यन्तानशनसङ्कल्पेनोपविष्टम् । कथमेवमुपवेशमात्रेण वैराग्यसिद्धिरित्याशङ्कानिरासायाह-महाराजमिति । चक्रवर्तिराज्यपरित्यागपूर्वकमेवमुपवेशाद्वैराग्यसिद्धिरिति भावः । गङ्गायां गङ्गातीरे इति स्थानस्य विशुद्धतोक्ता । सत्सङ्गंति विना श्रीभागवतं दुर्लभमिति सूचयंस्तां दर्शयति-परीतमिति, परमर्षिभिः परीतं परिवेष्टितमित्यर्थः ॥ ४२ ॥ ❀ ❀ किं बहुना ? यद्युष्माभिः पृष्टं 'धर्मः कं शरणं गतः' इति तद्धर्मशरणमिदमेवेत्याह-कृष्ण इति । 'कृष्णद्युमणिनिम्लोचे' तृतीये वक्ष्यमाणत्वाद्धर्मादिप्रकाशके श्रीकृष्णरूपे सूर्ये धर्मज्ञानादिभिः सह स्वधामोपगते प्राप्ते सति कलौ निमित्ते च सति नष्टदृशां लुप्तप्रज्ञानां अधुना कलियुगे प्रज्ञाप्रवर्त्तनेन धर्मादिप्रकाशक एष पुराणरूपोऽर्कः सूर्य उदित इत्यन्वयः । अत्र कृष्णस्य सूर्यत्वं मथुराया उदयशैलत्वं प्रभासस्यास्ताचलत्वं शिष्टानां चक्रवाकत्वं दुष्टानां नीहारत्वं पापानां तमस्त्वं धर्मादीनां प्रकाशत्वं

भक्तानां कमलत्वं पुराणस्य सूर्यत्वं कले रात्रित्वं च बोध्यम् । तथा च यथा रात्रिदोषेण लुप्तदृष्टीनामेव सूर्यः प्रकाशको भवति, न तु स्वतोन्धानां सूर्ये उदितेऽप्यन्धानामुलूकादीनां च प्रकाशाभावस्य प्रसिद्धत्वात् । तथा कलिदोषेण लुप्तप्रज्ञानामेवायं प्रकाशकः, न तु स्वतः प्रज्ञाशून्यानां विषयाविष्टानां दैत्यादीनाम्, अतः कथमस्य विद्यमानत्वे सर्वेषां न धर्मादिप्रकाश इति न शङ्कावकाश इति सूचितम् । उदित इत्यस्यानादित्वमपि सूचितम्, विद्यमानस्य प्रादुर्भावस्यैवोदयशब्दार्थत्वात् ॥ ४३ ॥ ❀ ❀ त्वया चेदं कथं प्राप्तमित्यपेक्षायामाह–तत्रेति । हे विप्रा इति सम्बोधनेन विप्रत्वात् विशेषेण सर्वपुरुषार्थपूरकत्वात् प्रथमं शुकः पूरितवान् , अधुना पुनर्भगवल्लीलास्मारणेन भवन्तः पूरयन्तीति सूचयति । तत्र परीक्षित्सन्निधौ विप्रर्षेः शुकस्य कीर्तयतः श्रावयतः सतस्तत्र सभायां निविष्टोऽहमप्येतदध्यगमं अधिगतवानस्मि । तदपि नान्यसाधारणं ममाध्ययनं किन्तु तस्य शुकस्योद्देशपूर्वकमित्याह–तदनुग्रहादिति । विप्रत्वेन परोपकारित्वं ऋषित्वेन यथार्थवक्तृत्वं भूरितेजस्त्वेन श्रोतृहृदयेऽर्थसञ्चारसामर्थ्यं च शुकस्य सूचितम् ॥ ४४ ॥ ❀ ❀ त्वयैवं श्रुतं तेनास्माकं किमित्याकाङ्क्षायामाह–स इति । सोऽधीतभागवतोऽहं यथाधीतं स्वाध्ययनानुसारेण न त्वत्र स्वकल्पितं किञ्चित्तथा यथामति स्वमत्यनुसारेण च वो युष्मान् श्रावयिष्यामीत्यन्वयः । यथामतीत्यनेन मत्कथनादप्यधिकोऽर्थोऽस्ति, तन्मयाऽपि वक्तुं न शक्यते, अनवबोधादिति सूचयति ॥ ४५ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्र हीनाधिकारवर्णने ॥ विवृतस्तृतीयः श्रोतृप्रेमादिविनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

उन्होंने इस श्लाघनीय, कल्याणकारी और महान् पुराणको लोगोंके परम कल्याणके लिये अपने आत्मज्ञानिशिरोमणि पुत्रको ग्रहण कराया ॥ ४१ ॥ ❀ ❀ इसमें सारे वेद और इतिहासोंका सार-सार संग्रह किया गया है । शुकदेवजीने राजा परीक्षित्को यह सुनाया ॥ ४२ ॥ ❀ ❀ उस समय वे परमर्षियोंसे घिरे हुए आमरण अनशनका व्रत लेकर गङ्गातटपर बैठे हुए थे । भगवान् श्रीकृष्ण जब धर्म, ज्ञान आदिके साथ अपने परमधामको पधार गये, तब इस कलियुगमें जो लोग अज्ञानरूपी अन्धकार से अन्धे हो रहे हैं उनके लिए यह पुराणरूपी सूर्य इस समय प्रकट हुआ है । शौनकादि ऋषियों ! जब महातेजस्वी श्रीशुकदेवजी महाराज वहाँ इस पुराणकी कथा कह रहे थे, तब मैं भी वहाँ बैठा था । वहीं मैंने उनकी कृपापूर्ण अनुमतिसे इसका अध्ययन किया । मेरा जैसा अध्ययन है और मेरी बुद्धिने जितना जिस प्रकार इसको ग्रहण किया है, उसीके अनुसार इसे मैं आपलोगोंको सुनाऊँगा ॥ ४३–४५ ॥

तीसरा अध्याय समाप्त

अथ चतुर्थोऽध्यायः

व्यास उवाच

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् । वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥

शौनक उवाच

सूत सूत महाभाग वद नो वदतां वर । कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ २ ॥
कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना । कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः ॥ ३ ॥
तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः । एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

तुर्ये भागवतारंभकारणत्वेन वर्ण्यते । व्यासस्यापरितोषस्तु तपःप्रवचनादिभिः ॥ १ ॥

इत्येवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणम् । मुनीनां बहूनां मध्ये एकेन वक्तव्ये यो वृद्धो वृद्धेष्वपि बहुषु यः कुलपतिर्गणमुख्यस्तेष्वपि बहुषु यो बह्वृचः ऋग्वेदी तेन वक्तव्यम् । अत एवंभूतत्वाच्छौनकोऽब्रवीत् ॥ १ ॥ ❀ ❀ यत् यां कथामाह ॥ २ ॥ ❀ ❀ कस्मिन्वा स्थाने केन हेतुनेति । महाभारतादिधर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे किं कारणमित्यर्थः । कुत इति सार्वविभक्तिकस्तसिः । केन प्रवर्तित इत्यर्थः । कृष्णो व्यासः ॥ ३ ॥ ❀ ❀ यदुक्तम् 'स तु तं श्रावयामास' इति तच्छुकस्य व्याख्यानादिकं कथं घटितमिति प्रष्टुं तस्यासंगोदासीनतामाह द्वाभ्याम् । तस्येति । समदृक् समं ब्रह्म पश्यति । अतो निर्विकल्पकः स्वार्थे कः । निरस्तभेदः । किं च एकस्मिन्नेवांतः समाप्तिर्यस्यास्तथाभूता मतिर्यस्य सः यत उन्निद्रो मायाशयनादुद्बुद्धः । "या निशा सर्वभूतानां तस्यां जागर्ति संयमी" इति स्मृतेः । अत एव गूढोऽप्रकटः मूढ इव प्रतीयते ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रवचनं वेदाभ्यासः । आदिना ग्रन्थनिर्माणादिग्रहः । तपआदिभिः श्रीव्यासदेवस्य चेतसि योऽपरितोषः स एव भागवतारंभे कारणमित्यर्थः । "एको दशसहस्राणि योऽन्नदानादिना भरेत् । स वै कुलपतिः प्रोक्तः" इति श्रीभारतटीकायां नीलकण्ठोक्तेः कुलपतिर्बहुपालकः ॥ १ ॥ ❀ ❀ सूत सूतेति । वीप्सादरे ज्ञेया । सुवति प्रेरयति शुभे कर्मणि व्यासशिक्षया लोकानिति सूत इत्यभिप्रेत्याह-महाभागेति । श्रीकृष्णकथावक्तृश्रोत्रनुमन्तार एव महाभागा भवन्ति "ते धन्यास्ते महाभागा येषां कृष्णकथारतिः" इत्याद्युक्तेः । वदतां कथयतां वर श्रेष्ठ । तथा च कृष्णकथावक्तैव श्रेष्ठवाग्भवति "सा वाग्यया तस्य गुणान्गृणीते" इत्युक्तेः । भगवान्सर्वज्ञः "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥" इत्युक्तलक्षणवान् शुकः । शोचयति हरिविमुखान्निजशास्त्रश्रावणेनेत्यन्वर्थनामा श्रीशुकदेवः । अत एवोक्तं "यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः । हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणाम्" इति संहितायाम् ॥ २ ॥ ❀ ❀ संहितां वेदरूपाम् । "सम्यग्हितं या वदति संहिता सा प्रकीर्त्तिता । हितं वेदानुगमनमहितं च तदन्यथा" इति वारतांतविः । इत्यर्थ इति । तृतीयार्थे तसिरत्रेति भावः ॥ ३ ॥ ❀ ❀ तस्य व्यासस्य "निर्दोषं हि समं ब्रह्म" इत्युक्तेर्मया लक्ष्म्या वा सह वर्तते इति सममिति निरुक्तेश्च समपदं ब्रह्मवाचकमस्तीति । अतः समदर्शित्वात् । न स केवलं निरस्तभेद एवापि तु भगवत्समर्पितधीश्चेत्याह-किं चेति । उद्बुद्धः ब्रह्मसाक्षात्कारवान् । सर्वभूतानामज्ञानां या निशेव निशा ब्रह्मविचारस्तस्यां ब्रह्मनिष्ठायां संयमी यमादिसाधनसंपन्नः । अत एव ब्रह्मनिष्ठत्वादेव प्रतीयते मूढैरेव न तु विज्ञैस्तल्लक्षणज्ञा अपि गूढवर्चसमिति वक्ष्यमाणत्वात् ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

कुलपतिरिति । ऋषीणां गणेषु मुख्यः कुलपतिरित्युच्यते । तल्लक्षणं यथा 'मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः' ॥ १-२ ॥ ❀ ❀ इयं संहिता । तत्र "संहिता श्रुतिजीविके"ति शब्दरत्नावलिः ॥ ३ ॥ ❀ ❀ स त्विति पूर्वाध्यायस्य ४२ श्लोकः ॥ ४ ॥

श्रीमद्वीरराघवव्याख्या

इत्थं लब्धावसरः शौनकः पृच्छतीत्याह व्यास इतीति। अत्र व्यास उवाचेति पठ्यते, युक्तं चैतत् कृत्स्नप्रबंधस्य व्यासोक्तिरूपत्वेऽपि परीक्षिच्छुकशौनकसूतप्रश्नोत्तररूपेण प्रणतित्वात्तत्र तत्र परीक्षिदादिप्रश्नोत्तरत्वज्ञापनाय राजोवाच-शुक-उवाचेत्यादीनां पाठेऽपि यत्र शौनकसूतकृतप्रश्नोत्तरप्रकारानुकाररूपाः श्लोका दृश्यंते, तेषां सर्वेषामादौ शौनकसूतप्रश्नोत्तरत्व-ज्ञापनाय तेषां व्यासोक्तित्वज्ञापनाय च तदादौ व्यास उवाचेत्यस्य पाठावश्यंभावात्कचित्तदभावेऽप्यर्थतस्तस्य विवक्षित-त्वाच्छौनकादेरर्वाचीनस्य नियतप्रष्टृतरादेरभावादेवामुक उवाचेति पाठायोगात्। एतेनात्रैव व्यास उवाचेति पठ्यते, न क्वाप्यन्य-त्रास्मिन्पुराणे, तत्र मूलं मृग्यमिति केषांचिदाशंका प्रत्युक्ता। इतीत्थं ब्रुवाणं सूतं संस्तूय दीर्घसत्रिणां ब्रह्मसत्रेण दीक्षितानां मुनीनां कुलस्य समूहस्य पतिः कुलशब्दस्य नित्यसापेक्षत्वादेवदत्तस्य गुरुकुलमित्यादाविव समासः। वृद्धः ज्ञानेन वयसा च वृद्धः बह्वृचः ऋग्वेदी शौनकोऽब्रवीत्॥ १॥ ❀ ❀ तदेवाह सूतसूतेत्यादिभिर्द्वादशभिः। हे सूत सूत आदरात्संभ्रमाद्वा द्विरुक्तिः। हे महा-भाग भाग्यवान् भाग्यमत्र निखिलतत्त्वज्ञानित्वरूपं हे वदतां वर भागवतीं श्रीमद्भागवतमहापुराणप्रतिपाद्यां कथां नोऽस्मभ्यं वद। भागवतं विशिनष्टि यद्भागवतं भगवान् शुक आह परीक्षित इति शेषः। वृत्तस्यापि भागवतस्य बुद्ध्या निष्कृष्टस्य यदित्यनेन परामर्शः॥ २॥ ❀ ❀ एवं सामान्यतः पृष्ट्वा विशेषतः पृच्छति कस्मिन्निति। इयं भागवती कथा कस्मिन्युगे प्रवृत्ता इत्येकः प्रश्नः, कस्मिन् स्थाने इत्यपरः, केन हेतुनेति तृतीयः, कुतः कस्माद्धेतोः केन पुंसा संचोदितः कृष्णो मुनिर्द्वैपायनः इमां संहितां भागवतरूपां कृतवानिति चतुर्थः॥ ३॥ ❀ ❀ यदुक्तं तासु संश्रावयामास महाराजं परीक्षितमिति तदघटमान इवाभि-प्रेत्य तद्धेतुभूतैर्विशेषणैः शुकं विशिनष्टि तस्येत्यादिभिः पंचभिः। तस्य कृष्णस्य मुनेः पुत्रः शुको महायोगिश्रेष्ठः। श्रेष्ठत्वमेवाह समदृक् सर्वदेवमनुष्यादिशरीरजातं प्रधानपरिणामरूपत्वेन पराक्त्वेन च जीववर्गं ज्ञानैकाकारत्वेन सर्वत्रानुस्यूतं परमात्मानं सत्य-ज्ञानादिकल्याणगुणाकरत्वेन चेत्येवं रूपं समं पश्यतीति समदृक्। एवं समविधमेव समदर्शित्वं "विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पंडिताः समदर्शिनः" इत्यादावप्यधीयते। निर्विकल्पकः भेदानुसंधानरहितः देहगतविकल्पानां देव-मनुष्यत्वादीनामात्मनि नारोपयिता। यद्वा अब्रह्मात्मकस्वतंत्रवस्तुरहितः एकांतमतिः एकांताऽव्यभिचारिणी निश्चितेति यावत् मतिर्भगवति यस्य तथाभूतः। उन्निद्रः जागरूकः "या निशा सर्वभूतानां तस्यां जागर्ति संयमी" त्युक्तविधजागरूक इत्यर्थः। गूढः स्वमाहात्म्यानाविष्कारशीलः मूढोऽज्ञ इवेयते दृश्यत इत्यर्थः॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सोऽहं वः श्रावयिष्यामीति सूतेनोक्तोऽपि शौनकः श्रीभागवतश्रवणे श्रद्धालुत्वदर्शनाय विशेषप्रश्नाय सूतमाह इतीति। दीर्घसत्रिणां दीर्घकालीनं सत्रमेषामस्तीति तेषां मध्ये ज्ञानवयोवृद्धः ऋषिकुलाचाररक्षकः बह्वृचः ऋग्वेदेषु निष्णातः शौनकः इति ब्रुवाणं सूतं संस्तूय सूतमब्रवीदित्यन्वयः॥ १॥ ❀ ❀ महाभाग भाग्ययुक्त सूतसूतेति तात्पर्ये द्विरुक्तिः। एकत्र पुण्यकर्म-वासनेति वा शुको भगवान् पूजावान् पुनातीति पुण्यां यां भागवतीं कथां आह परीक्षित इति शेषः, हे वदतां वर तां कथां नोस्माकं वदेत्यन्वयः॥ २॥ ❀ ❀ विशेषप्रश्नं दर्शयति कस्मिन्निति। चतुर्णां युगानां मध्ये कस्मिन्नियं प्रवृत्ता कस्मिन्वा स्थाने देशे केन वा कारणेन कस्माद्धेतोः संचोदितः कृष्णद्वैपायन इमां संहितां कृतवानित्यन्वयः॥ ३॥ ❀ ❀ शुकः परीक्षितं श्रावयामासेति त्वद्वचनमनुपपन्नमेव, केनापि श्रीशुकावगमनस्यासुलभत्वादित्याशयवानाह तस्येति। तस्य व्यासस्य पुत्रः शुकः महायोगी महाज्ञानी महाध्यानी वा। अत एव सर्वदेशकालवस्तुषु ज्ञानादिसर्वगुणैः सममेकप्रकारं ब्रह्म पश्यतीति समदृक् मया श्रिया सह वर्तत इति वा समम्। अत एव निर्विकल्पकः इदं मदीयं तत् तदीयमिति भेदबुद्धिमपहाय सर्वमीश्वराधीनमिति स्थितः। अत एव एक एवांतः एकांतः तस्मिन् हरौ मनसः संततगतिर्यस्य स तथा, अत एवोद्गता निद्रा अज्ञानादिदोषपरंपरा यस्मात्स तथा। भसनावगूढः मूढ इव अज्ञ इव ईयते दृश्यते अज्ञेनेति शेषः। तस्मात्तद्दर्शनमसुलभमिति मन्य इत्यन्वयः॥ ४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तुर्येऽस्य शास्त्रवर्यस्य वक्तुः श्रोतुश्च सर्व्वतः। श्रैष्ठ्यं व्यासप्रसादश्च कथ्यते यद्विनैव हि॥

वृद्धो वयसा कुलपतिरिति कुलेन च बह्वृच इति वेदाभ्यासोत्थेन ज्ञानेन चेति शौनक एव प्रश्नकर्तृत्वेन तैर्व्यवस्थापित इति भावः॥ १॥ ❀ ❀ सूत सूतेति हर्षेण द्विरुक्तिः। यन् याम्॥ २॥ ❀ ❀ कुत इति सार्व्वविभक्तिकस्तसिः केनेत्यर्थः। कृष्णो व्यासः॥ ३॥ ❀ ❀ निर्व्विकल्पकः निर्भेदज्ञानवान्। एकस्मिन्नेवान्तः समाप्तिर्यस्य सः। निद्रा अविद्या तस्याः सकाशादुद्गतः। "या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी"ति स्मृतेः। ईयते प्रतीयते॥ ४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वः श्रावयिष्यामीति ब्रुवाणम् । बह्वृचः ऋग्वेदी ॥ १ ॥ ❀ ❀ यत् याम्, शुक आह परीक्षिते इति शेषः, तां नो वदेत्यन्वयः ॥ २ ॥ ❀ ❀ कस्मिन् युगे संहिता प्रवृत्ता कस्मिन्स्थाने केन हेतुना कुतः ? केन संचोदितः कृष्णः श्रीव्यासः संहितां कृतवानित्यन्वयः । कुत इति सार्वविभक्तिकस्तसिः ॥ ३ ॥ ❀ ❀ स तु संश्रावयामास महाराजं परीक्षितमित्युक्तम् । तत्र शुकस्य व्याख्यानादिदमघटमानमिवाभिप्रेत्याह तस्येति । तस्य व्यासस्य पुत्रः शुकः चिदचिद्रूपमिदं विश्वमेकस्यैवानंतशक्तेः कार्यं नात्र किंचिदुपेक्षणीयमादरणीयं वेति समं पश्यतीति समदृक् अत एव कार्यस्य शरीरेण भिन्नत्वेपि कारणव्यतिरिक्तस्थिति-प्रवृत्त्याद्यभावाद्ब्रह्माभिन्नत्वे सति ब्रह्मैवेदं सर्वमिति विज्ञानान्निर्विकल्पको भेदानुसंधानरहितः स्वार्थे कः । एकांता भगवद्ध्यान-निष्ठा मतिर्यस्य सः एकांतमतिः, अत एव उन्निद्रः जागरूकः "या निशा सर्वभूतानां तस्यां जागर्ति संयमी"ति स्मृतेः । गूढः गुप्तविद्यः । अत एव मूढ इवेयते प्रतीयते ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तुर्ये भागवतारंभकारणत्वेन वर्ण्यते । व्यासस्यापरितोषस्तु तपःप्रवचनादिभिः ॥ १ ॥
एवं भागवतस्यार्थनिर्द्धारः स्वाधिकारतः । त्रिभिः कृतो द्वितीये तु त्रिभिस्त्याज्यसमन्वितः ॥ २ ॥
मध्याधिकारे यच्छास्त्रं तदत्र विनिरूप्यते । नारदस्याधिकारित्वाच्छ्रोतुश्चिताकुलत्वतः ॥ ३ ॥
तत्राध्याये चतुर्थे तु व्यासचिंता निरूप्यते । उत्तमप्रक्रिया पश्चाद्वक्तुर्हेतुनिरूपणात् ॥ ४ ॥

पूर्वप्रकरणे स्वाधिकारानुसारेण शास्त्रार्थो निरूपितः । तत्र मूलत्वेन भागवतमुक्तं यस्मिन् भागवते श्रुते सूतस्यायं शास्त्रार्थः प्रतिभातः । तदेवास्माभिरपि श्रोतव्यमित्यभिप्रायेण शौनकः सूतं पृच्छतीत्याह व्यास उवाच इति ब्रुवाणमिति । सर्वत्र हि वक्तुर्वाक्यसमाप्त्यनंतरं श्रोतुः प्रश्नः । अत्युत्कंठे त्विहासमाप्तावेव प्रश्न इत्याह ब्रुवाणमिति । संभवनामात्रेण पृष्टे अमले शास्त्रार्थे निरूपिते वक्तरि महत्या श्रद्धया सम्यक् स्तोत्रं कृतवंत इत्याह संस्तूयेति । संस्तवनं ग्रंथाद्बहिः पूर्वमाकांक्षायाः प्राबल्यात् सर्वैरेव पृष्टम्, अधुना किंचिदुत्कृष्टमध्यर्धसहस्रसंवत्सरे च भगवदवतार-निश्चयात्तदर्थमेव च सत्रारंभात्कोलाहले सम्यक् श्रवणं न भविष्यतीति सर्वेषु शृण्वत्सु तत्संबंधी देवतास्वरूपाभिज्ञः शौनकः पृच्छतीत्यर्थः । वृद्धो ज्ञानवृद्धः कुलस्य ऋषिकुलस्य पतिर्नियामकः बुद्धेर्निर्द्धारो ज्ञानवृद्धे भवति । उत्तरत्र प्रचारार्थं वचनविश्वासः कुलाचार्ये भवतीति वृद्धः कुलपतिरिति पदद्वयेन ज्ञापितम् ॥ १ ॥ ❀ ❀ चतुर्द्धा ह्यत्र प्रश्नः । भागवतविषयकः कर्तृविषयको वक्तृविषयकः श्रोतृविषयकश्चेति । तत्र प्रथममाह । सूत सूतेति आदरे वीप्सा । तव तु महाभाग्यं यद्भागवतं श्रुतवानसीति महाभागेति संबोधनम् । नः अस्मभ्यं न श्रोतृत्वमात्रमस्मासु किंतु अस्मभ्यं भागवतं देय-मिति चतुर्थीप्रयोगः । वदतां मध्ये श्रेष्ठ, निर्द्धारणान्न समासः । वदतां मध्ये त्वमेव श्रेष्ठः । यस्यां कथायां श्रुतायां त्वयैव शास्त्रार्थो निरूपितस्तामेव कथां वद । पुण्यां धर्मरूपां विहितत्वाद्यागवत् । श्रद्धाधिक्ये हेतुः यद्यस्मात् कारणात् भगवान् शुक आह । शुक इति मुक्तः । भगवानिति पूर्णगुणः ॥ २ ॥ ❀ ❀ द्वितीयं प्रश्नमाह । कस्मिन् युग इति । कर्तुः परिकरापेक्षत्वात् कर्तृप्रश्ने परिकराणामपि प्रश्नः । कालदेशहेतवो हि परिकराः प्रयोजककर्त्ता च त्रिषु प्रवृत्तेयमिति संबंधः । कस्मिन् युगे इयं प्रवृत्ता कस्मिन् वा स्थाने केन वा हेतुना ? यथाऽत्र चित्तवैयग्र्यं तदभावो हेतुः । केन वा प्रेरितो भवतु । कुतो वा हेतोः प्रेरितः, प्रवृत्तौ त्रयः प्रश्नाः, करणे चैकः । मुनिरिति मननप्रतिबंधिकायाः संहितायाः कथं करणम् ॥ ३ ॥ ❀ ❀ तृतीयमाह पंचभिः । तस्य पुत्र इति । वक्तृत्वेन पृष्टत्वात् नाध्येतृत्वनिमित्तसंदेहा इहोच्यंते ते चाग्रे वक्तव्याः । महायोगी समाधिस्थः प्रथमं योगो दुःखदोपि भवति । प्रवृद्धस्तु सुखदः । तादृशस्य कथाकथनमयुक्तमिति भावः । किंच समदृक् ब्रह्मविदित्यर्थः । उच्चावचबुद्धिसाध्यं च प्रवचनम् । किंच । निर्विकल्पकः । सांख्यप्रोक्तज्ञानसक्तिसिद्धः, निर्गता विकल्पाः प्राकृता यस्य । किंच एकांतमतिः विरक्तः एकांते मतिर्यस्य । किंच उन्निद्रः उद्गता निद्रा यस्येति स्वप्नदृष्टारिष्टनिवृत्त्यपेक्षारहितोऽपि । किंच गूढः संगात् भृशमुद्विजमानः । अत एव च लोके अप्रसिद्धः किंतु मूढ इव ईयते ज्ञायते ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

अथ चतुर्थाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वादग्रिमस्य प्रारप्स्यमाणत्वात्तयोः पूर्वापरीभावे हेतुं स्फुटीकर्तुं द्वयोरर्थमाहुः एवमित्यादि । स्वाधिकारत इति । ल्यब्लोपे पञ्चमी, स्वाधिकारमाश्रित्येत्यर्थः । त्रिभिरिति । अध्यायैः त्याज्यसमत्वत इति । अदृष्टद्वारेणोपकारी धर्मः । फलव्यभिचारत्वात्त्याज्यः, तस्यात्रापि तेन रूपेण तुल्यत्वात् । शास्त्रमिति । उपदेशः । त्याज्यसाम्यादत्र प्रथमत्वं वा अवतारादुत्तमत्वं वा वक्तव्यम्, न तु मध्यमत्वमित्याशङ्क्य मध्यमत्व उपपत्तिमाहुः नारदेत्यादि । नारं नरसम्बन्धिज्ञानं ददातीति नारद इति निरुक्त्या ज्ञानदाने नारदस्याधिकारो ज्ञेयः । स चाध्यायसमाप्तौ स्फुटिष्यति । तथा

चोत्तमत्वस्यौचित्येऽप्युक्तहेतुभ्यां मध्यमत्वमित्यर्थः। एतेन पूर्वापरीभावे हेतुरप्युक्त एव। तेन व्यासोक्तिविचारे प्रसङ्गः सङ्गतिः स्फुटति। अतः परं सूतोक्तौ सङ्गतिं वदिष्यन्तोध्यायार्थमाहुः तत्रेत्यादि। हेतुर्वैराग्यम्। 'तस्य पुत्रो' 'दृष्ट्वानुयान्तमि'त्यादिभिः शुकस्यापि विरक्तताबोधनात् स्वापेक्षयायासस्योत्कृष्टत्वाच्च तत्कथाया मध्यमत्वं तत्रापि स्फुटतीति तद्विचारेपि स एवार्थ इत्यर्थः। इतीत्यत्र। पृच्छन्तीत्याह। व्यास इति। एतेन प्रसङ्गः प्रश्नः सङ्गतिरित्युक्तम्। पृष्ट इति भावे क्तः॥ १॥ ❀ ❀ सूत सूतेत्यत्र। निर्धारणादित्यादि। 'न निर्धारणे'ति सूत्रेण समासनिषेधात्तथेत्यर्थः॥ २॥ ❀ ❀ कस्मिन् युग इत्यत्र। हेतुनेति। निमित्तेन प्रयोजकेन च। उदाहरणेन तं स्फुटीकुर्वन्ति यथेत्यादि। श्रीभागवतप्रवृत्तौ चित्तवैयग्र्यं निमित्तं तदभावः प्रयोजक इति। भवत्विति। प्रेरणं भवतु, तथापि प्रेरकः कुतः प्रेरितवानित्यर्थः। एक इति। प्रेरकप्रश्नः॥ ३॥ ❀ ❀ तस्य पुत्र इत्यत्र। स्वप्नदृष्टेत्यादि। इदं ब्रह्मवित्त्वपोषकम्। ब्रह्मविदः स्वप्नाभावस्य तृतीयस्कन्धनिबन्ध उपपादितत्वात् श्रुत्युक्तासु हिताख्यासु नाडीषु जीवस्येन्द्रियैः सह प्रवेशे 'तत्रैनं घ्नन्तीव जिघ्रन्तीवे'त्यादिश्रुत्युक्तानि यानि स्वप्नदृष्टान्यरिष्टानि तान्यपि 'मन एव मनुष्याणां पूर्वरूपाणि शंसति। भविष्याणि च भद्रं ते' इति वाक्याद्भूतभावीन्येव, तथा तेषां ज्ञाने तन्निवृत्त्यपेक्षा स्यात्, जाते ज्ञाने तु मूलाविद्यानाशात् तदाधिभौतिक्या निद्राया अपि निवृत्तेर्मनसा तेषामशंसने तन्निवृत्तिज्ञानात् तदपेक्षारहित इत्यर्थः॥ ४॥

श्रीगिरिधरकृता बालप्रबोधिनी

त्रिभिरेवं तु हीनानामधिकारो निरूपितः। मध्यमानां त्रयेणाथो अधिकारो निरूप्यते॥ १॥
तत्राध्याये चतुर्थे तु तपःप्रवचनादिभिः। चित्तस्यापरितोषेण व्यासचिन्ता निरूप्यते॥ २॥

सर्वत्र हि वक्तुर्वाक्योपरम एव श्रोतुः प्रश्नः प्रवर्त्तते। अत्र तु अत्युत्कण्ठावशान्मध्य एव प्रश्नः प्रवृत्त इत्याह–इतीति। अहं वः श्रावयिष्यामीत्येवं ब्रुवाणमेव सूतं संस्तूय शौनकोऽब्रवीत् पप्रच्छेत्यन्वयः। ननु पूर्वं त्वृषयः शौनकादयः पप्रच्छुरित्युक्तम्। अत्र तु शौनकोऽब्रवीदित्युच्यते तत्र किमन्येषां श्रवणोत्कण्ठा न जाता? येन स एवैकः पप्रच्छेत्याकाङ्क्षायामन्येषामपि श्रवणोत्कण्ठासत्त्वेऽपि एकदा सर्वप्रश्नप्रवृत्तौ सम्यक् श्रवणं न स्यादिति तैः स्वगणमुख्यः शौनक एव प्रश्नकर्तृत्वेन स्थापित इत्याशयेनाह–दीर्घं सहस्रसंवत्सरपर्यन्तं सत्रं येषां तेषां मुनीनां कुलपतिः, गणमुख्य इत्यर्थः। मुख्यत्वे हेतुमाह–वयसा वृद्ध इति। वृद्धोऽपि यदि बुद्धिहीनो भवेत्तदा कथं तस्य मुख्यत्वं कथं वा प्रश्नाधिकार इत्याशङ्क्याह–बह्वृच इति। ऋग्वेदित्वेन ज्ञानाधिकश्चेत्यर्थः॥ १॥ ❀ ❀ सूतसंस्तुतिपूर्वकान् शौनकप्रश्नानेव दर्शयति–सूत सूतेति–द्वादशभिः। आदराद्धर्षेण सम्भ्रमाद्वा द्विरुक्तिः। एतच्छ्रवणं अनेकजन्मोपार्जितभाग्यं विना न सम्भवति, त्वया तु श्रुतमित्यनुमीयते, तव तादृशं भाग्यमस्तीति सूचयन् सम्बोधयति–हे महाभागेति। अतः श्रुतभागवतत्वादेव हे वदतां वक्तॄणां मध्ये वर श्रेष्ठ! यत् यां पुण्यां श्रोतृवक्त्रोः पुण्यावहत्वेन पापनिवर्तकत्वेन संसारदुःखनिवर्तिकां भागवतीं कथां परीक्षितं प्रति भगवान् सर्वज्ञानिशिरोमणिः शुक आह तां त्वं नोऽस्मान् प्रति वदेत्यन्वयः॥ २॥ ❀ ❀ इयं भागवती कथा कस्मिन् युगे प्रवृत्ता प्रादुर्भूता कस्मिन् वा स्थाने प्रवृत्ता? महाभारतादिकृतवतो व्यासस्यैतत्संहिताकरणे किं कारणमित्यर्थः। कुत इति सार्वविभक्तिकस्तसिः। केन सञ्चोदितः प्रवर्तितो मुनिर्मननशीलः कृष्णो व्यास इमां भागवतीं संहितां कृतवानित्यन्वयः॥ ३॥ ❀ ❀ यदुक्तं 'स तु संश्रावयामास महाराजं परीक्षितम्' इति तदघटमानमिवाभिप्रेत्य तद्धेतुभूतैर्विशेषणैः शुकं विशिनष्टि–तस्येत्यादिपञ्चभिः। तस्य व्यासमुनेः पुत्रः शुको महायोगी सर्वदा असम्प्रज्ञातसमाधिस्थः एतदेव विवृणोति–एकान्तमतिरिति। एकस्मिन् भगवत्यन्तः पर्यवसानं स्थितिर्यस्याः सा तथाभूता मतिर्यस्य सः। ननु देवमनुष्यादिविविधाकारे प्रपञ्चे विद्यमाने तत्पश्यतः कथमेवमेकान्तमतित्वं सम्भवतीत्याशङ्क्याह–निर्विकल्पक इति, जीवजडान्तर्यामिदेवमनुष्यतिर्यगादिभेददर्शनरहित इत्यर्थः। तत्र हेतुमाह–समदृगिति। समं जीवजडान्तर्यामिषु सर्वत्रैकरूपं परं ब्रह्मैव पश्यतीति तथा सः। एवंविधमेव समदर्शित्वमुद्दिश्य भगवतोक्तम्–'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' इति। तत्रापि हेतुमाह–उन्निद्र इति। उद्गता निद्रा अविद्यारूपा यस्मात्स इत्यर्थः। अत एवोक्तम्–'या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः' इति। अतएव गूढः स्वमाहात्म्यानाविष्कारशीलतया लोके तथात्वेनाप्रसिद्ध इत्यर्थः। अतो मूढ इवेयते प्रतीयते इत्यर्थः॥ ४॥

हिन्दी अनुवाद

महर्षि व्यासका असंतोष

व्यासजी कहते हैं—उस दीर्घकालीन सत्रमें सम्मिलित हुए मुनियोंमें विद्या-वयोवृद्ध कुलपति ऋग्वेदी शौनकजीने सूतजी की पूर्वोक्त बात सुनकर उनकी प्रशंसा की और कहा॥ १॥ ❀ ❀ शौनकजी बोले—सूतजी! आप वक्ताओंमें श्रेष्ठ हैं तथा बड़े

भाग्यशाली हैं । जो कथा श्रीशुकदेवजीने कही थी वही भगवान्‌की पुण्यमयी कथा कृपा करके आप हमें सुनाइये ॥ २ ॥ ❀ ❀ वह कथा किस युग में, किस स्थानपर और किस कारणसे हुई थी ? मुनिवर श्रीकृष्णद्वैपायनने किसकी प्रेरणासे इस परमहंसोंकी संहिताका निर्माण किया था ? ॥ ३ ॥ ❀ ❀ उनके पुत्र शुकदेवजी बड़े योगी, समदर्शी, भेद-भाव रहित, संसार-निद्रासे जगे एवं निरन्तर एकमात्र परमात्मामें ही स्थित रहते हैं । वे छिपे रहनेके कारण मूढ़-से प्रतीत होते हैं ॥ ४ ॥

दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् ।
तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुम्भिदा न तु सुतस्य विविक्तदृष्टेः ॥ ५ ॥
कथमालक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान् । उन्मत्तमूकजडवद्विचरन् गजसाह्वये ॥ ६ ॥
कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह । संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥ ७ ॥
स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् । अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

निर्विकल्पकत्वं प्रपंचयति दृष्ट्वेति । आत्मजं शुकं प्रव्रजंतमनुगच्छंतमृषिं व्यासमनग्नमपि दृष्ट्वा जले क्रीडंत्यो देव्योऽप्सरसो ह्रिया लज्जया परिदधुर्वस्त्रपरिधानं कृतवत्यः । अनग्नमपीत्यनेनार्थात्तत्सुतो नग्न इत्युक्तम् । नग्नस्य पुरतो गच्छतः सुतस्य तु ह्रिया न परिदधुः तच्चित्रं वीक्ष्य । इयं स्त्री अयं पुमानिति भिदा भेदस्तवास्ति । विविक्ता पूता दृष्टिर्यस्य ॥ ५ ॥ ❀ ❀ एवंभूतोऽसौ कथमालक्षितो ज्ञातः । कुरवो जांगलाश्च देशविशेषास्तान्संप्राप्तः प्रथमम् । ततो गजसाह्वये विचरन् गजेन सहित आह्वयो नाम यस्य तस्मिन्हस्तिनापुरे । हस्ती नाम राजा तेन निर्मितत्वात् ॥ ६ ॥ ❀ ❀ सः एवंभूतेन मुनिना सह । यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता ॥ ७ ॥ ❀ ❀ एतद् व्याख्यानं बहुकालावस्थानापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह स इति । गोदोहनमात्रं कालं प्रतीक्षते तदपि न भिक्षार्थं किंतु तेषामाश्रमं गृहं तीर्थीकुर्वन्पवित्रीकुर्वंस्तस्मादेवंभूतोऽत्र वक्तेत्याश्चर्यम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्चित्रम् अहो युवानं तत्रापि नग्नं तत्रापि सर्वत्र स्पष्टं विलोकयन्तं मत्पुत्रं वीक्ष्यैता न लज्जिताः, मां तु वृद्धं सवसनम् । इतो युवतयः खेलन्तीति तद्दिशि दृशमप्यददानं विलोक्य लज्जंते स्म, तदिमा एवार्जवेन कारणं पृच्छामीति मुनौ पृच्छति सति जगदुः । पूता द्वैतमलरहिता कामादिमलरहिता वा दृष्टिर्यस्य स तथा । वयं युवतिजनाः कलाभिज्ञाः स्त्रीपुंसयोर्नयनदर्शनेनैव तदंतस्तत्त्वं सर्वं ज्ञातुं प्रभवाम इति भावः ॥ ५ ॥ ❀ ❀ जडः कार्यविवेकशून्यः । लोकविपरीतचेष्टावैशिष्ट्ये उन्मत्तवदिति दृष्टान्तः । लोकरञ्जकव्यापारराहित्ये मूकवदिति, सर्वथोद्यमराहित्ये जडवदिति भेदः ॥ ६ ॥ ❀ ❀ मुनिना श्रीशुकेन ॥ ७ ॥ ❀ ❀ पवित्रीकुर्वन् "येषां संस्मरणात्पुंसां सद्यः शुध्यन्ति वै गृहाः" इति वक्ष्यमाणत्वात् । गृहपदेनात्र गृहस्था ग्राह्याः मंचाः क्रोशन्तीतिवत् । यद्वा तत्रत्यजीवमात्रेभ्योपि सद्गतिं दातुमिति भावः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिनी व्याख्या

देव्यः अप्सरस इति । देवीशब्देन अप्सराजातेर्ग्रहणं कथमिति चेत् पश्यन्तु तावत्-"तस्यां क्रीडन्त्यभिरतास्ते चैवाप्सरसां गणा" इति महाभारतीयशान्तिपर्व्वणि ३५२ अध्यायवचनम् ॥ ५—७ ॥ ❀ ❀ गोदोहनकालो मुहूर्त्ताष्टमभागः पञ्चदशकलात्मकः स्मृत्यादौ प्रसिद्धः ॥ ८–९ ॥

श्रीमद्वीरराघवव्याख्या

तस्य ज्ञानाधिक्यमेव व्यंजयितुं कंचिदितिहासमाह दृष्ट्वेत्यनेन । कदाचित्क्वचिदेव स्त्रियः नग्ना जले विहरंत्यः पुरतो गच्छंतं शुकमालोक्य वासांसि न परिदधुस्ततः पृष्ठतः आयांतं व्यासमालोक्य तु ह्रिया परिदधुः । तदिदं चित्रमवलोक्य श्रीव्यासे पृच्छति 'शुकमवलोक्यापि वासांसि किं न परिधत्थ ? मां त्ववलोक्य परिधत्थे'ति तदा ता ऊचुः 'तव तु स्त्रीपुरुषविवेकोस्ति, तव सुतस्य तु परमात्मनिष्ठैकमनसस्तद्व्यतिरिक्तज्ञानाभावेन स्त्रीपुंविभागो नास्ति । अतस्त्वमवलोक्यापि लज्जारहिता न परिदधीमे'ति । सोऽयमत्रोच्यते-आत्मजमनुयांतमनग्नमपि ऋषिं व्यासं दृष्ट्वा देव्यो देवानां स्त्रियः ह्रिया लज्जया परिदधुः वासांसीति शेषः । सुतस्य

---

१. प्रा० पा०—मप्सु मग्नाः ।

नग्नस्यापि दर्शने न परिदधुः, तद्विचित्रं वीक्ष्य मुनौ व्यासे पृच्छति सति जगदुः देव्य इत्यनुषंगः, किमिति–तव स्त्रीपुंभेदोस्ति त्वत्सुतस्य तु नास्ति । तत्र हेतुः विविक्ते प्रकृतिपुरुषविलक्षणे परमात्मन्येव दृष्टिर्यस्य तथाभूतत्वात्तद्दर्शनेनापि नास्माकं लज्जा बभूवेति ।। ५ ।। ❀ ❀ एवंभूतः सदा कुरून् जांगलांश्च उन्मत्तवद् मूढवज्जडवच्च विचरन् कथं वा गजसाह्वये हास्तिनाख्ये पुरे संप्राप्तः कथं च पौरैर्जनैरालक्षितः ।। ६ ।। ❀ ❀ कथं वा पांडवेयस्य राजर्षेः परीक्षितो मुनिना शुकेन सह संवादः संबभूव ? संवादं विशिनष्टि–यत्र संवादे एषा सात्वती सातयति सुखयतीति, सात्परमात्मा सातेः सुखार्थात्सौत्राद्धातोर्हेतुमण्ण्यंताद्वासरूपविधिना "अनुपसर्गाल्लिंपविंद" इत्यादिना शप्रत्ययाभावपक्षे क्विपि सादिति व्युत्पत्तेः स प्रतिपाद्यतयास्तीति सात्वती, मतुप्युगित्वान्ङीप् । श्रुतिः श्रुतितुल्या प्रवृत्ता ।। ७ ।। ❀ ❀ संवादस्यासंभावनां व्यंजयन्नाह स इति । स महायोगी शुकः गृहमेधिनां गृहाश्रमिणां गृहेषु गोदोहनमात्रं यावता कालेन गौर्दुह्यते तावंतं कालमवेक्षते प्रतीक्षमाणस्तिष्ठति न त्वधिकमित्यर्थः, विरक्तत्वादिति भावः । कथमवेक्षते तेषां गृहमेधिनामाश्रमं तीर्थीकुर्वन्पवित्रीकर्तुमित्यर्थः ।। ८ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कुरुजांगलं कुरुविषयं प्राप्तः गजसाह्वये हस्तिनापुरे क्वचिदुन्मत्तवत्क्वचिन्मूकवत् क्वचिज्जडवद्विचरन् मुनिः पुरवासिभिः कथमालक्षितः शुकत्वेनेति शेषः, पौरैरपि यज्ज्ञानं दुःशकं किं पुनरंतःपुरनिवासिभिः ।। ५ ।। ❀ ❀ किंच परीक्षितः तद्दर्शनानंतरकालीनस्तेन सह संवादः सुतरामसुलभ इत्याशयवानाह कथं वेति । यत्र ययोः संवादे सात्वतो हरेस्तत्संबन्धिनी सात्वती श्रुतिर्वर्तते तादृशः संवादः पांडवेयस्य राजर्षेः परीक्षितः तेन मुनिना सह कथं वा समभूत् ? न कथमपि घटत इत्येकान्वय ।। ६ ।। ❀ ❀ इतोपि तस्य तेन सह संवादो दुर्घट इत्याशयवानाह स इति । तदाश्रमं तेषां गृहस्थानां सतां गृहं तीर्थीकुर्वन् स्वपादक्रमणेन पवित्रीकुर्वन् महाभागः गृहमेधिनां गृहं गत्वा पाणिभिक्षामाचरन् गोदोहनमात्रं सतो नाधिकम् अवाङ्मुखतयैकमनास्तिष्ठति, परमन्यतो याति । हि यस्मात्तद्दर्शनमसुलभमित्येकान्वयः ।। ७ ।। ❀ ❀ किंच हे सूत सुज्ञाः अभिमन्युसुतं परीक्षितं भागवतश्रेष्ठं प्राहुः । किमिति तत्राह तस्येति । तस्य परीक्षितः महाश्चर्यं श्रोतृणामिति शेषः, जन्मकलिबन्धनादीनि कर्माणि च अस्माकं गृणीहीत्यन्वयः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दृष्ट्वेत्यादौ मय्यनग्नत्वस्यापरिधाने हेतुत्वं, तेन मर्यादावत्त्वस्य लक्षितत्वान्निकटागमनदृष्टिक्षेपाद्यसम्भावनया तासां युक्तम् । सुते तु नग्नत्वस्य तद्वैपरीत्येन परिधाने हेतुत्वं युक्तमिति यद्यपि स्यात्तथापि यन्मद्दर्शने परिदधुर्न तु तद्दर्शने तच्चित्रम् । तस्मादमुं न ददृशुरिति निश्चित्याप्युत्कण्ठया कथञ्चिद्ददृशुरेवेति सम्भाव्य तासामपलापखण्डनार्थं दर्शनमेव भङ्ग्या निश्चित्य पृच्छति सतीत्यर्थः ।। ५-६ ।। ❀ ❀ श्रुतिर्व्वेदसारः ।। ७ ।। ❀ ❀ अवेक्षते प्रारब्धाभासेन न तु तत्राप्यावेशेनेति ज्ञेयम् । स्त्रीपुंभिदाज्ञानस्याप्यभावात् । अत एव तीर्थीकुर्व्वन्निति स्वभावत एव ।। ८-१२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निर्विकल्पकत्वं प्रमाणयति दृष्ट्वे ति । आत्मजं शुकं प्रव्रज्य यान्तम् अनुयान्तम् ऋषिं व्यासम् अनग्नमपि दृष्ट्वा देव्यो जलक्रीडनादुत्थिता लज्जया परिदधुः स्वस्ववस्त्राणीत्यर्थः । न तु सुतस्य शुकस्य दर्शने इत्यर्थः । तच्चित्रम् , अतो युवानं तत्रापि नग्नं तत्रापि सर्व्वत्र स्पष्टं विलोकयन्तं मत्पुत्रं वीक्ष्य एता न लज्जिताः, मां तु वृद्धं सवसनं 'इतो युवतयः खेलन्तीति' तद्दिशि दृशमप्यददानं विलोक्य लज्जन्ते स्म । तदिमा एव आर्जवेन कारणं पृच्छामीति मुनौ पृच्छति सति जगदुः–इयं स्त्री, अयं पुमानिति तव स्त्रीपुंभिदा अस्ति न तु तव सुतस्य । ननु कथमेतज्ज्ञानं तत्राहुः । विविक्ता पूता दृष्टिर्यस्य तस्येति । वयं युवतिजनाः कलाभिज्ञाः स्त्रीपुंसयोर्नयनदर्शनेनैव तदन्तस्तत्त्वं सर्व्वं ज्ञातुं प्रभवाम इति भावः ।। ५ ।। ❀ ❀ कुरुजाङ्गलान् देशविशेषान् । गजेन सह आह्वयो नाम यस्य तस्मिन् हस्तिनापुरे विचरन् ।। ६ ।। ❀ ❀ पाण्डवेयस्य परीक्षितः । मुनिना शुकेन । श्रुतिः संहिता ।। ७ ।। ❀ ❀ शुकस्य तेन सह बहुकालावस्थितिरेतद्व्याख्यानुरोधेनैव संभवेन्नान्यथेत्याह–स गोदोहनमात्रं कालं भिक्षामिषेण प्रतीक्षते, वस्तुतस्तु तेषामाश्रमं तीर्थीकुर्व्वन् । तत्रत्यजीवमात्रेभ्योऽपि सद्गतिं प्रदातुमिति भावः ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य समदर्शित्वेन निर्विकल्पत्वं दर्शयति दृष्ट्वे ति । "धर्मपुत्र निषेवस्व सुतीक्ष्णौ च हिमातपौ । क्षुत्पिपासे च वायुश्च जय नित्यं जितेंद्रिय ।।" इत्येवंविधैः श्रीमद्व्यासवाक्यैरेव प्रव्रजंतम् आत्मजं शुकम् अनुयांतम् अनुगच्छतम् ऋषिं व्यासं तु अनग्नमपि दृष्ट्वा नद्यां क्रीडंत्यो देव्यः ह्रिया परिदधुः, वासांसीति शेषः । न त्वात्मजं दृष्ट्वा परिदधुः, तदसंगत्वं चित्रमद्भुतं पुत्रस्य वीक्ष्य किमस्य स्त्रीपुंभिदास्ति न वेति मुनौ श्रीव्यासे पृच्छति सति विविक्ते दृष्टिः विविक्तजगद्विलक्षणे ब्रह्मणि दृष्टिर्यस्य तस्य तव सुतस्य स्त्रीपुंभिदा नास्तीति देव्यः जगदुरित्यन्वयः ।। ५ ।। ❀ ❀ एवंभूतः कुरुजांगलान्देशान्प्राप्तः गजसाह्वये हस्तिनापुरे

उन्मत्तमूकजडवत् विचरन् पौरैः कथमालक्षितः ज्ञातः ॥ ६ ॥ ❀ ❀ आसक्तस्य विरक्तेन संवादो दुर्घट इत्याह–कथमिति । राजर्षेः परीक्षितः एवंभूतेन मुनिना सह कथं संवादः संबभूव । यत्र संवादे श्रुतिः तत्तुल्या सातयति सुखयतीति सात् भगवान्सातेः सौत्रस्यण्यंतस्य क्विपि रूपम्, स विषयतयास्या अस्तीति सात्वती एषा संहिता प्रवृत्ता ॥ ७ ॥ ❀ ❀ स्थायिनो यायिना संवादो दुर्घट इत्यभिप्रायेणाह स इति । गोदोहनमात्रं यावता कालेन गौर्दुह्यते तावंतं कालं तीर्थीकुर्वन्पवित्रीकुर्वन् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

किञ्च सर्वदा असंप्रज्ञातसमाधिस्थः बहिः संवेदनरहित इति वक्तुमुपाख्यानमाह दृष्ट्वाऽनुयांतमिति । अत्र ह्येवं कथा– क्वचित्सरोवरे नग्नाप्सरसः स्नांति, तत्र नग्नं शुकं पुत्रमनुयांतं व्यासं दृष्ट्वा वस्त्राणि पर्यधुः । ततो व्यासस्य संदेहो जातः । कथं मां वृद्धमनग्नं दृष्ट्वा वस्त्राणि परिदधति, पुत्रं तरुणं नग्नं दृष्ट्वा नेति संदेहात्ताः पृष्टवान् । तासामुत्तरं 'तवास्ति स्त्रीपुंभिदा न तु सुतस्ये'ति । यद्यपि शाब्दं ज्ञानं वेदव्यासस्य निर्विचिकित्सं स्वरूपज्ञानं च, तथाऽपि बहिः संवेदनमस्ति, अधिकारित्वात् । पुत्रस्य तु नित्यारूढ-समाधित्वान्न बहिः संवेदनमस्ति । तदाह–विविक्तदृष्टेरिति । विविक्ता अनात्मस्पर्शरहिता दृष्टिर्यस्येति । एवमष्टगुणानां भगवत्कथा-बाधकानां विद्यमानत्वात् कथं कथाप्रवचनमिति । यद्यपि प्रव्राजकधर्मकरणात् "कीटवत्पर्यटेन्महीम् इति" वाक्यात् समाधेरुत्थितः कैश्चिद् दृष्टः प्रार्थितो निर्बंधेन कथां कथयतीति न मंतव्यम् ॥ ५ ॥ ❀ ❀ लोकानां ज्ञापकधर्मो महानयमिति नास्मिन्विद्यत इत्याह कथमालक्षित इति । कुरुजांगलान् हस्तिनापुरदेशं आसमंताच्छुकोऽयमिति । पौरैरिति पुरवासाद् बुद्धिर्वक्रा भवति । ज्ञानं हि त्रेधा भवति–बहिः स्थैर्यादिना वचनेन सदाचारेण च । तत्रितयं नास्तीत्याह–उन्मत्तमूकजडवदिति । गजेन समानः आह्वयो नाम यस्य तद्गजसाह्वयं नगरनामनिरुक्त्या तत्रत्या मत्ता इति लक्ष्यंते । अत एव ज्ञानभयाभावात्तीर्थविशेषत्वात् शुकस्य परिभ्रमणम् ॥ ६ ॥ ❀ ❀ अस्तु वा नगरे केषांचित् ज्ञानं तथाऽपि राज्ञा सह संवादः अनुचितः । राज्ञो राजर्षित्वात् अनाचारिषु श्रद्धाभावः । शुकस्य च मुनित्वात् सर्वज्ञत्वेन संवादसंभावनायां गमनाभावः । स च संबंधो बहुकालसाध्यः, तदाह–यत्रैषा सात्वती श्रुतिः वैष्णवो वेदः ॥ ७ ॥ ❀ ❀ अस्तु वा तथापि गोदोहनकालादधिककाले गृहस्थगृहे संन्यासिनो वासोऽनुचितः । सोऽपि वासो न रागात् । तथा सति रागपूर्त्यर्थं चिरकालमपि वासः संभाव्यते, किंतु गृहस्थानामाश्रमं तीर्थीकुर्वन् । गृहे मेधा बुद्धिः अतिप्रवृत्तिनिष्ठा तथा तेषामेव चाग्रे संन्यासः । तथा सति पूर्वदोषस्य विद्यमानत्वात् नाधिकारः संगदोषाच्च । अतः परमहंसैः गृहस्थाश्रमः अतीर्थोऽपि तीर्थीक्रियते । ततो दोषद्वयं गच्छतीत्याह । स गोदोहनमात्रमिति । यथा हि गौर्धर्मदोहार्थं तावत्कालं निर्बन्धं सहते तथा जगन्मि-त्रैरपि सोढव्यमिति हिंशब्दार्थः । इयमवस्था महाभाग्येन प्राप्यत इति महाभाग इति विशेषणम् ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कथमित्यस्याभासे । कथयतीति न मन्तव्यमिति । कथयतीति सम्भवति, तथापि न मन्तव्यमित्यर्थः । विवृतौ । बहिःस्थै-र्यादिनेति । बाह्यायां स्थिरचेष्टायाम् ॥ ६ ॥ ❀ ❀ कथं वेत्यस्याभासः । अस्तु वा नगर इत्यादि ॥ ७ ॥ ❀ ❀ स गोदोहनेत्यत्र । अस्तु वेति । संवाद इति शेषः । तीर्थीकरणप्रयोजनमाहुः तथेत्यादिना । तथेति । यथेदानीमतिप्रवृत्तिनिष्ठा, तथेत्यर्थः । सङ्गदोषादिति । 'गृहेष्वि' त्यनेन सूचितात् । धर्मदोहार्थमिति । अग्निहोत्रोपयोगिदोहार्थम् ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तस्य निर्विकल्पकत्वमेवेतिहासेन द्रढयति । आत्मजं शुकं प्रव्रजन्तं अनु पश्चात् यान्तं गच्छन्तं ऋषिं व्यासमनग्नमपि दृष्ट्वा देव्यो जले क्रीडन्त्योऽप्सरसः ह्रिया लज्जया वासांसि परिदधुः वस्त्रपरिधानं कृतवत्यः । अनग्नमपीत्यपिशब्देन सुतो नग्नो गत इत्युक्तम् । तस्य नग्नस्य पुरतो गच्छतः सुतस्य तु ह्रिया वासांसि न परिदधुः । तच्चित्रमाश्चर्यं वीक्ष्य मुनौ व्यासे पृच्छति युवानं नग्नं शुकं विलोक्य किं न वासांसि परिधत्थ ? अनग्नं वृद्धमपि मां विलोक्य किं वासांसि परिधत्थेति पृच्छति सति इयं स्त्री अयं पुमा-निति भिदा भेददर्शनं तवास्ति अतस्त्वां दृष्ट्वा वासांसि परिदधीम । तव सुतस्य तु स्त्रीपुम्भेददर्शनं नास्ति । तत्र हेतुः–विविक्तदृष्टे-रिति । विविक्ता स्त्रीपुंसादिभावरहिते सच्चिदानन्दविग्रहे भगवति सर्वात्मके दृष्टिर्यस्य तस्य, सर्वत्रैकरूपं भगवन्तमेव पश्यत इत्यर्थः । अतस्तं दृष्ट्वा वासांसि न परिदधीमेति ता देव्यो जगदुरुत्तरं ददुरित्यन्वयः । अत्र यद्यपि शाब्दं ज्ञानं निर्विचिकित्सं स्वरूपज्ञानं च वेदव्यासस्याप्यस्ति, तथाप्यधिकारित्वाद्बहिर्वेदनमप्यस्ति । अत एव तस्य मध्यमाधिकारित्वं, शुकस्य तु सदा समाधिनिष्ठ-तया बहिर्वेदनाभावादुत्तमाधिकारित्वमिति बोध्यम् ॥ ५ ॥ ❀ ❀ न च समाधेरुत्थितः सन् 'कीटवत्पर्यटेन्महीं' इति वाक्यात् प्रव्राजधर्मनिर्वाहार्थं महीं विचरन् कैश्चिद् दृष्टः प्रार्थितो निर्बन्धेन कथां कथितवानिति शङ्क्यं, अयं महांस्तत्त्वज्ञ इति ज्ञापकधर्माभावा-त्तज्ज्ञानं विना प्रार्थनाऽसम्भवादित्याशयेनाह–कथमिति । कुरवो जाङ्गलाश्च देशविशेषास्तान् प्रथमं सम्प्राप्तस्ततो गजसाह्वये गजेन सहित आह्वयो नाम यस्य तस्मिन्–हस्तिनामा राजा तन्निर्मितत्वात्–हस्तिनापुरे विचरन् पौरैः पुरवासिभिः कथमालक्षितः ज्ञाय्य-मिति कथं ज्ञात इत्यन्वयः । त्रेधा हि तथा ज्ञानं सम्भवति सुस्वरूपेण किञ्चिद्भाषणेन सदाचारेण वा, तत्र किमपि नास्ति तद्विरुद्धा-

ङ्गीकारादित्याह–उन्मत्तमूकजडवदिति । वस्तुतस्तु तथा नास्तीति सूचनाय वतिप्रयोगः ॥ ६ ॥ ❀ ❀ सूतं प्रोत्साहयन् सम्बोधयति–हे तातेति । एवम्भूतेन मुनिना शुकेन सह पाण्डवेयस्य राजर्षेः परीक्षितः संवादः कथं वा समभूत् ? यत्र यस्मिन् संवादे एषा सात्त्वती श्रुतिः भागवती संहिता प्रवृत्ता ॥ ७ ॥ ❀ ❀ श्रीभागवतव्याख्यानं च बहुकालमेकत्रावस्थानापेक्षं, शुकस्य त्वेकत्रावस्थानमेव दुर्लभमिति कथं तद्घटितमित्याशयेनाह–स इति । स सर्वतो विरक्तः शुकः गृहमेधिनां गृहे मेधा बुद्धिर्येषां तेषां गृहाश्रमिणां गृहेषु तेषामाश्रमं तीर्थीकुर्वन् पवित्रीकर्तुं यावता कालेन गौर्दुह्यते तावन्तं कालं भिक्षामिषेणावेक्षते प्रतीक्षमाणस्तिष्ठति, न त्वधिकम् । हि यस्मात् महाभागो जन्मत एव ज्ञानवैराग्यभक्त्यादिपरिपूर्ण इत्यर्थः ॥ ८ ॥

हिन्दी अनुवाद

व्यासजी जब संन्यासके लिये वनकी ओर जाते हुए अपने पुत्रका पीछा कर रहे थे, उस समय जलमें स्नान करनेवाली स्त्रियोंने नंगे शुकदेवको देखकर तो वस्त्र धारण नहीं किया, परन्तु वस्त्र पहने हुए व्यासजीको देखकर लज्जासे कपड़े पहन लिये थे । इस आश्चर्यको देखकर जब व्यासजीने उन स्त्रियोंसे इसका कारण पूछा, तब उन्होंने उत्तर दिया कि 'आपकी दृष्टिमें तो अभी स्त्री-पुरुषका भेद बना हुआ है, परन्तु आपके पुत्रकी शुद्ध दृष्टिमें यह भेद नहीं है' ॥ ५ ॥ ❀ ❀ कुरुजाङ्गल देशमें पहुँचकर हस्तिनापुरमें वे पागल, गूँगे तथा जडके समान विचरते होंगे । नगरवासियोंने उन्हें कैसे पहचाना ? ॥ ६ ॥ ❀ ❀ पाण्डवनन्दन राजर्षि परीक्षित्का इन मौनी शुकदेवजीके साथ संवाद कैसे हुआ, जिसमें यह भागवतसंहिता कही गयी ? ॥ ७ ॥ ❀ ❀ महाभाग श्रीशुकदेवजी तो गृहस्थोंके घरोंको तीर्थस्वरूप बना देनेके लिये उतनी ही देर उनके दरवाजेपर रहते हैं, जितनी देरमें एक गाय दुही जाती है ॥ ८ ॥

अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् । तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥

स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः । प्रायोपविष्टो गङ्गायामनादृत्याधिराट्श्रियम् ॥ १० ॥

नमन्ति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः ।
कथं स वीरः श्रियमङ्ग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥ ११ ॥
शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रोतुस्तु चरितमतीवाश्चर्यमतः कथयेत्याह अभिमन्युसुतमिति पंचभिः । गृणीहि कथय ॥ ९ ॥ ❀ ❀ सम्राट् चक्रवर्ती । वेति वितर्के । कस्य वा हेतोः कस्मात्कारणात् । अधिराट्श्रियम् अधिराजां श्रियं संपदमनादृत्य ॥ १० ॥ ❀ ❀ यस्य पादनिकेतं चरणपीठम् । ह स्फुटम् । धनानि आनीय शत्रवः नमंति । अंग हे सूत । युवा तरुण एव । ऐषत ऐच्छत् । अत्रार्षमात्मनेपदम् । असुभिः प्राणैः सह ॥ ११ ॥ ❀ ❀ विरक्तस्य किं धनादिभिरिति चेत्, तत्राह । शिवायेति । लोकस्य शिवाय सुखाय, भवाय समृद्ध्यै, भूतये ऐश्वर्याय च ते जीवंति न त्वात्मार्थम् । एवं सति असौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं कुतो हेतोः मुमोच । न हि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

अभिमन्युसुतं न भीर्येषां तेऽभयः, ह्रस्वस्त्वत्र पृषोदरादित्वात्, ते च द्रोणकर्णादयस्तैरपि मन्यते शूरत्वेन श्लाघ्यत इत्यभिमन्युस्तस्य सुतं परीक्षितम् ॥ ९ ॥ ❀ ❀ "येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडिति कथ्यते" इत्यभिधानात् ॥ १० ॥ ❀ ❀ ननु "परिश्रान्तो वयस्थश्च षष्टिवर्षो जरान्वितः । क्षुधितः स महारण्ये ददर्श मुनिसत्तमम्" इति महाभारतविरोधाद्युवेति कथमुक्तं तत्राह भारतवाक्यस्य त्वयमर्थः–"आचत्वारिंशद्यौवनमाषष्टि मध्यमं वयः" इत्युक्तेर्यद्यपि षष्टिवर्षो मध्यवया भवति, तथापि यौवनस्य तत्प्राग्वर्तित्वेन तत्संबद्धत्वात्तदपि यौवनमेव न स्थाविर्यं सशक्तिदेहत्वात् । "तथा च षष्टिवर्षोपि वयस्थस्तरुणो युवा" इत्युक्तेर्युवैव "वार्द्धक्यं षष्टितः परम्" इत्युक्तेः । अन्यथाऽत्र वयस्थपदमयुक्तं स्यादिति भावः । जराजीर्ण इत्यस्य त्वयमर्थः । जीर्य्यतेम्बुपानेनेति जरा तृषा, तदन्वितः क्षुधित इत्यग्रे दर्शनात् । एवं च "क्षुधितस्तृषितो भृशम्" इति वक्ष्यमाणेन "युवैषतोत्स्रष्टुमहो सहासुभिः" इत्यनेन च समानार्थकतया विरोधोत्र न सेत्स्यतीति ध्येयम् ॥ ११ ॥ ❀ ❀ इत्यर्थ इति । परोपकृतियुक्तदेहस्त्वकृत्येनापि रक्षणीय इति भावः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

प्रायोपविष्ट इति । प्रायेण मरणपर्यन्तानशनेनेति । परन्तु अयनम् आयः प्रकृष्टः आयः प्रायो मरणं भावे घञ्प्रत्ययः । मरणार्थमुपविष्ट इत्यर्थः-इति बुधरञ्जनी ॥ १०-१३ ॥

श्रीमद्वीरराघवव्याख्या

अन्यच्च पृच्छति अभिमन्युसुतमिति । हे सूत अभिमन्योः सुतं परीक्षितं महाभागवतं प्राहुः, अतस्तस्य महाश्चर्यं जन्मकर्माणि च नोस्माकं गृणीहि कथय ॥ ९ ॥ ❀ ❀ स इति पांडवानां पांडुवंशजानां मानं प्राशस्त्यं वर्द्धयतीति वर्द्धनः, नंदादित्वात्कर्तरि ल्युः, सम्राट् सार्वभौमः स परीक्षित्कस्य हेतोः कस्माद्धेतोरधिराट् श्रियमधिराज्यसंपदमनादृत्य गंगायां प्रायोपविष्टः ॥ १० ॥ ❀ ❀ नमंतीति शत्रवः आत्मनः स्वस्य शिवायात्मनां योगक्षेमाय धनान्यानीयादाय समर्प्येत्यर्थः यस्य परीक्षितः पादनिकेतं पादपीठं नमंति हेत्याश्चर्ये स वीरः परीक्षिद्युवा सन्नपि दुस्त्यजां श्रियमधिराट् श्रियमसुभिः प्राणैः सहोत्स्रष्टुं त्यक्तुमैषतैच्छत् ? अहो अत्याश्चर्यमेतत् ॥ ११ ॥ ❀ ❀ ननु महाभागवतं प्राहुरिति त्वयैवोक्तत्वाद्भागवतानां च देहतदनुबंधिषु विरक्तेः स्वाभाविकत्वाच्च नेदमाश्चर्यमित्यत आह । शिवायेति यद्यपि भागवता विरक्तास्तथापि उत्तमश्लोको भगवानेव परमयनं प्राप्यः प्रापक आधारश्च येषां ते जना भागवता नात्मार्थं जीवंति, किंतु लोकस्य शिवाय मंगलाय भूतये श्रियै भवाय तस्या उत्तरोत्तरोदयाय च जीवंति. एवं पराश्रयं परैर्लोकैः शिवाद्यर्थमाश्रयणीयं परोपकारकमित्यर्थः । कलेवरं कुतो हेतोर्निर्विद्य हेयं मत्वा मुमोच तत्याज ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तस्य वैराग्यहेतुं पृच्छति स सम्राडिति । पांडवानामभिमानवर्धनः स सम्राट् अप्रतिहताज्ञश्चक्रवर्ती कस्य वा हेतोरधिराट्-श्रियं चक्रवर्तिसंपदं लक्ष्मीमनादृत्य तृणवत्कृत्वा गंगायां प्रायोपविष्टोभूदित्यन्वयः ॥ १० ॥ ❀ ❀ एवंविधश्रीसंगत्यागे महत्कारणेन भवितव्यं तत्किमित्याशंक्याह नमंतीति । शत्रवः मंडलपतयः आत्मनः शिवाय स्वकल्याणाय धनानि चानीय यस्य परीक्षितः पदयोर्निकेतं पीठाख्यस्थानं नमन्तीत्यन्वयः । अंग सूत, स धीरः असुभिः सह दुस्त्यजां श्रियं अधिराजसंज्ञामुत्स्रष्टुं हातुं इयेष ऐच्छदहो आश्चर्यमेतदतो महता हेतुना भवितव्यं तत्किमिति भावः ॥ ११ ॥ ❀ ❀ पुनरपि तदेव पृच्छति शिवायेति ये उत्तमश्लोकपरायणा जनाः ते लोकस्य शिवादिप्राप्तये जीवंति न स्वार्थं जीवंतीत्यन्वयः । तस्मात्परार्थैकजीवनोऽसौ कस्मात्काराणात् परामुत्कृष्टां श्रियं निर्विद्य विरज्य कलेवरं देहं मुमोचेत्यन्वयः ॥ १२ ॥ ❀ ❀ इहास्यामवस्थायां प्रश्नराशौ यत्किंचित्प्रश्नरूपं पृष्टस्त्वं तत्सर्वं किंचनेत्यनुवर्तीकृत्य सम्यगाचक्ष्व । कुतः छांदसाद्वेदविषयादन्यत्र पुराणादौ वाचां विषये स्नातं निष्णातं मन्य इति यस्मात्तस्मादित्यन्वयः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गृणीहि कथय ॥ ९ ॥ ❀ ❀ अधिकृत्य राजन्तीत्यधिराजो युधिष्ठिराद्यास्तेषामपि श्रियं प्राप्तामनादृत्य ॥ १० ॥ ❀ ❀ पादनिकेतं पादपीठम् । ह स्फुटम् । युवा न तु वृद्धः । ऐषत ऐच्छत् । असुभिः प्राणैरपि सह ॥ ११ ॥ ❀ ❀ लोकस्य शिवाय मङ्गलाय । तदेव द्विधाभूतं विवृणोति । भवाय भवः संसारस्तन्निवृत्त्यै मशकाय धूम इतिवत् । यद्वा भवं संहर्तुं क्रियार्थोपपदस्येत्यादिना चतुर्थी । भूतये सम्पत्त्यै । पराश्रयं परेषामुपकारि । न हि परोपजीव्यं वस्तु निर्विद्यापि त्यक्तुमुचितमिति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नोस्माकं गृणीहि कथय ॥ ९ ॥ ❀ ❀ सम्राट् सार्वभौमः गंगायां कस्मात् प्रायोपविष्टः ॥ १० ॥ ❀ ❀ युवैव तरुण एव कथं कस्मात् असुभिः प्राणैः सह श्रियम् उत्स्रष्टुम् ऐषत ऐच्छत् ॥ ११ ॥ ❀ ❀ शिवाय कल्याणाय भूतये ऐश्वर्याय भवाय ऐश्वर्यस्योत्तरोत्तरोदयाय ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

श्रोतुः प्रश्नमाह चतुर्भिः । अभिमन्युसुतमिति । "पितृनाम्ना महत्त्वं हि मातृनाम्ना तु हीनता । इति सर्वत्र बोद्धव्यं श्रीमद्भागवतेऽपि च" अभितः परितो (सर्वतो) मन्युर्यस्य न त्वंतः क्षत्रियस्य चायं धर्मः । अंतः क्रोधाभावाच्च वैष्णवः । सूतेति संबोधनं वृत्तांतपरिज्ञानाय । लोकवृत्तपरित्यागेन भगवदेकपरायणो महाभागवतः-"विसृजति हृदयं न यस्येति" वा प्राहुरिति सर्वलोकप्रसिद्धः । पूर्वमेव तादृशस्य भागवतेन यो विशेषस्तत्परिज्ञानाय पूर्वं विशेषं पृच्छंति । तस्य जन्मेति महदाश्चर्यं यत्र मृतस्य गर्भात्पतितस्य पुनर्जीवनमिति भारतादिष्वेवमेव कथा । कलिनिग्रहादीनि कर्माणि ॥ ९ ॥ ❀ ❀ वैष्णवस्य प्रायोऽनुचित इत्यभिप्रायेणाह स इति । परीक्षिति लौकिकोऽप्युत्कर्षोऽस्ति । सम्राट् चक्रवर्त्ती । पांडूनामपि मानं वर्द्धयति । पांडवप्रतिष्ठया नास्य प्रतिष्ठा किंतु विपरीतेत्यर्थः । गंगयैव च सर्वपुरुषार्थसिद्धिः किं गंगायां प्रायोपवेशनेन । पराजयस्त्वसंभावित

एव, यतः अधिका राज्ञामपि श्रीर्गृहे यस्य वर्त्तते तामप्यनादृत्य। एवं लोकवैष्णवाभ्यां प्रायोऽनुचितः ॥ १० ॥ ❀ ❀ किंच लज्जा तु सर्वतो महती। विशेषतः स्वेषु तत्कथं राज्ञां मध्ये प्रायोपवेशनमित्यभिप्रायेणाह–नमन्तीति। पादयोर्निकेतं पादपीठं पादुके वा। सर्वत्र देशेष्वस्य सिंहासने गत्वा स्वापराधमार्जनार्थं धनानि आनीय हेत्याश्चर्ये शत्रवोऽपि नमंति। आत्मनः शिवायेति। देशस्तु पूर्वमेवापहृतः स्वयं च संकटे पतिताः पुनः स्वदेशप्राप्त्यर्थं धनानि प्रयच्छंतीत्यर्थः। असमर्थस्तस्य पुरुषार्थो न भवतीति न मंतव्यम्, यतो वीरः। वीररसस्य विद्यमानत्वात्। वीरस्य हि प्रायोपवेशेन मरणं लज्जाकरं भवति। किंच धनार्थं प्रायश्चित्तार्थं वा लोके प्रायोपवेशनं सिद्धं तत्सार्वभौमश्रियास्त्यागविषयत्वात् धनार्थं न भवति। तदर्थत्वे च कथं श्रियं त्यक्तवानिति। तत्रापि प्राणैः सह को वा मोक्ष्यति। लोके हि प्राणापेक्षयाऽपि धनं दुस्त्यजं तस्करादिषु निर्णयात्। तत्रापि यूनः इच्छामात्रमपि दुर्ल्लभं किं पुनः करणम्। सत्यवार्त्तायामहो इत्याश्चर्यम् ॥ ११ ॥ ❀ ❀ प्रायश्चित्तादिना तु परलोकसाधनार्थं वैष्णवस्य प्रायोपवेशनं न भवति, किंतु जीवनमेवेत्याह शिवायेति। प्रमादाद् महापातकसंबंधेऽपि वैष्णवस्य न देहत्याग उचितः। तेषां स्वतः सेवासामर्थ्याभावेऽपि तान् दृष्ट्वा लोकानां करणं संभवति, अतस्तेषां जीवनमेव सर्वेषां शिवाय भवति। शिवं शांतं सुखं भवः उद्भवः लोके पुत्रपौत्राद्यभिवृद्धिः "अमोघवीर्या हि नृपा" इति वाक्यात्। भूतये ऐश्वर्याय। अणिमाद्यष्टैश्वर्यं भगवत्सेवायां प्रासंगिकं "महापुरुषपूजाया" इति वचनात्। अतः सर्वेषां पुरुषार्थसाधकस्य देहस्य त्यागोऽनुचितः। निर्वेदेन देहादिपरित्यागो भूतहितार्थः, "अभयमभयं भूतेभ्य" इति वचनात्। तच्च वैष्णवानां विपरीतमित्यभिप्रायेणाह। पराश्रयं निर्विद्येति। निर्वेदहेतुरेव परित्यक्तव्यो न तु कलेवरम्। कस्यचिदेव हि धर्मस्य हेतुत्वं कले च अव्यक्तमधुरे वरमिति नामनिरुक्त्या अव्यक्तरसाविर्भावे हेतुरिति प्रतिभाति। स च भक्तिरसः अन्यस्य लोकवेदयोः प्रसिद्धत्वात्। अतो भक्तिरसाविर्भावकं शरीरं कथं त्यक्तवानित्यर्थः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

शिवाय लोकस्येत्यत्र। पराश्रयमिति। परेषां शरणभूतम्। निर्वेदहेतुरित्यादि। राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणां मन्यमानो दीर्घसत्रव्याजेन 'विससर्ज हे' तिवत् स त्यक्तव्य इत्यर्थः। ननु राजधर्मस्यापि द्विषद्भयजनकत्वादस्ति निर्वेदहेतुत्वमिति चेत्, तत्राहुः कस्येत्यादि। हेतुत्वमिति। निर्वेदहेतुत्वम्। तथा च तद्विचारेऽपि शस्त्रसंन्यास उचितः, न तु देहत्याग इत्यर्थः। देहस्यात्याज्यत्वे हेतुमाहुः कल इत्यादि ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यत्तु श्रोतुश्चरितं प्रायोपवेशनं तदप्यतीवाश्चर्यमतस्तच्चरितमपि जन्मत एव कथयेत्याह–अभिमन्युसुतमिति पञ्चभिः। हे सूत भगवद्भक्तानामेव चरितमस्माभिः श्रोतव्यं तं चाभिमन्योः सुतं परीक्षितं वृद्धा भागवतेषु भगवदीयेषूत्तमं प्राहुरतस्तस्य महाश्चर्यं जन्मकर्माणि च नोऽस्माकं गृणीहि कथयेत्यन्वयः। महाश्चर्यमित्यनेन भगवता गर्भे एव तस्य रक्षा कृतेति तु श्रुतमस्ति, तत्पुनस्त्वत्कथनेन स्पष्टं भविष्यतीति सूचयति ॥ ९ ॥ ❀ ❀ तस्य प्रायोपवेशनमपि न सम्भवतीत्याह–स इति। वेति वितर्के। स परीक्षित् कस्य वा हेतोः कस्मात्कारणात् अधिराट्श्रियं अधिकानामुत्कृष्टानां राज्ञां श्रियं सम्पदमनादृत्य प्रायोपविष्टः मरणपर्यन्तं अनशनसङ्कल्पेनोपविष्ट इत्यन्वयः। धनाभावात्तदर्थमुपविष्ट इति शङ्का तु अनादृत्येत्यनेनैव निरस्ता, सा श्रीः कथं प्राप्तेत्याकाङ्क्षानिरासायाह–सम्राडिति, चक्रवर्तीत्यर्थः। स्वजनापमानात्तथोपविष्ट इति तु न सम्भवतीत्याह पाण्डूनामिति, पाण्डूनां पण्डुकुलोत्पन्नानां मानं वर्द्धयतीति तथा सः। न च प्रायश्चित्तार्थं तथोपवेशनमित्याशयेनाह–गङ्गायामिति। गङ्गास्पर्शमात्रेणैव सर्वपापप्रायश्चित्तसम्भवान्मरणपर्यन्तम् अनशनसङ्कल्पस्य किं प्रयोजनमिति भावः ॥ १० ॥ ❀ ❀ न च शत्रुभयादेवमुपवेशनं सम्भवतीत्याह–नमन्तीति। त्वमस्मच्छरीरतुल्योऽसीति न तवाग्रे प्रश्नेऽस्माकं कश्चित्सङ्कोच इति तं प्रोत्साहयन् सम्बोधयति–हे अङ्गेति। शत्रवः अपहृतदेशा आत्मनः शिवाय तत्प्रसादेन स्वस्य सुखाय धनान्यानीय समर्प्य यस्य पादनिकेतं पादपीठं नमन्ति–हेति स्फुटमेतत्–स असुभिः प्राणैः सह दुस्त्यजां श्रियं कथमुत्स्रष्टुं त्यक्तुं ऐषत ऐच्छत्। आत्मनेपदमार्षम्। एवं त्यागेच्छाऽपि दुर्घटा, त्यागस्तु सुतरामसम्भावित एवेति भावः। न च पूर्वं शत्रुविजये जातेऽपीदानीं तथा पराक्रमाभावात् पराजयशङ्कयैतत्कृतवानिति सम्भवति, यतो वीर इदानीमपि पौरुषयुक्तः। तत्रापि हेतुमाह–युवेति। अत एव परित्याग आश्चर्यजनक एवेत्याह–अहो इति ॥ ११ ॥ ❀ ❀ ननु 'प्राहुर्भागवतोत्तमम्' इति त्वयैवोक्तत्वाद्भागवतानां च देहतदनुबन्धिषु विरक्तस्वभावत्वान्नेदमाश्चर्यमित्यत आह–शिवायेति। यद्यपि सर्वतो विरक्तास्तथापि ये उत्तमश्लोको भगवान् स एव परं सर्वत उत्कृष्टं अयनमाश्रयो येषां तथाभूताः भागवता जनास्ते आत्मार्थं स्वप्रयोजनार्थं न जीवन्ति, भगवदीयत्वेनैव करतलीकृतसर्वपुरुषार्थत्वात् किन्तु लोकस्यान्यजनस्य शिवाय भक्त्यादिमार्गोपदेशेन परमानन्दरूपमोक्षाय भूतये विभूतये ऐश्वर्याद्यर्थपदार्थलाभाय भवाय उद्भवाय कामरूपपुरुषार्थसिद्धये। 'धर्ममूलमिदं स्मृतम्' इति वचनात् ऐश्वर्यादिकारणधर्मलाभायेति त्वर्थादेव सिद्धम्। एवं चतुर्विधपुरुषार्थसिद्धये जीवन्ति। अतोऽसौ परीक्षिदपि भागवतः पराश्रयं पुरुषार्थलाभाय परैराश्रयणीयं स्वकलेवरं निर्विद्य हेयं मत्वा कुतो हेतोर्मुमोच तत्याजेत्यन्वयः। न हि परोपजीव्यवस्तुविनाकर्त्वं वैष्णवस्याप्युचितमिति भावः ॥ १२ ॥

हिन्दी अनुवाद

सूतजी! हमने सुना है कि अभिमन्युनन्दन परीक्षित् भगवान्के बड़े प्रेमी भक्त थे। उनके अत्यन्त आश्चर्यमय जन्म और कर्मोंका भी वर्णन कीजिये ॥ ९ ॥ ❀ ❀ वे तो पाण्डववंशके गौरव बढ़ानेवाले सम्राट् थे। वे भला, किस कारणसे साम्राज्यलक्ष्मी का परित्याग करके गङ्गातटपर मृत्युपर्यन्त अनशनका व्रत लेकर बैठे थे? ॥ १० ॥ ❀ ❀ शत्रुगण अपने भलेके लिये बहुत-सा धन लाकर उनके चरण रखनेकी चौकीको नमस्कार करते थे। वे एक वीर युवक थे। उन्होंने उसी दुस्त्यज लक्ष्मीको, अपने प्राणोंके साथ भला, क्यों त्याग देनेकी इच्छा की? ॥ ११ ॥ ❀ ❀ जिन लोगोंका जीवन भगवान्के आश्रित है, वे तो संसारके परम कल्याण, अभ्युदय और समृद्धिके लिये ही जीवन धारण करते हैं। उसमें उनका अपना कोई स्वार्थ नहीं होता। उनका शरीर तो दूसरोंके हितके लिये था, उन्होंने विरक्त होकर उसका परित्याग क्यों किया? ॥ १२ ॥

तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किञ्चन। मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥ १३ ॥

सूत उवाच

द्वापरे समनुप्राप्ते तृतीये युगपर्यये। जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥
स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचि। विविक्तदेश आसीन उदिते रविमण्डले ॥ १५ ॥
परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा। युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

यत्किंचन पृष्टोऽसि तत्सर्वं नः अस्मभ्यं समाचक्ष्व। यत् यस्माद्वाचां विषये गिरां गोचरेऽर्थे स्नातं पारंगतं त्वां मन्ये, छांदसादन्यत्र वैदिकव्यतिरेकेण। अत्रैवर्णिकत्वात् ॥ १३ ॥ ❀ ❀ कस्मिन्युगे इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह द्वापर इति। द्वापरे समनुप्राप्ते। कदेत्यपेक्षायामाह। तृतीये युगस्य पर्यये परिवर्ते। वासव्यामुपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥ १४ ॥ ❀ ❀ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः। आसीनः। बभूवेति शेषः। विविक्ते देशे इत्यादि। चित्तैकाग्र्यार्थमुक्तम्। अनेनैव बदरिकाश्रमस्थानं सूचितम् ॥ १५ ॥ ❀ ❀ तत्र च स ऋषिः युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां यत् हितं तत् दध्याविति तृतीयेनान्वयः। परावरज्ञः अतीतानागतवित्। अव्यक्तं रंहः वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य। तथा भुवि युगे युगे ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सूतजातेस्त्रैवर्णिकत्वाभावात्। अत्र क्रमसंदर्भः-वेदपुराणयोर्ब्राह्मणपरिव्राजकवद्भेदाभेदव्यवस्थयोक्तम्। माध्यंदिनश्रुतौ च वेदपुराणेतिहासानामपौरुषेयत्वेनाभेदनिर्देशः कृतः। यथा "एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः" इत्यादिना। ब्रह्मयज्ञाध्ययनेपि विनियोगो दृश्यतेऽमीषाम् "यद्ब्राह्मणानितिहासपुराणानि" इति। अनेन च प्रणवादिमयं छंदः सवर्णं यद्वाक्यमत्रास्ति तत्रापि तस्याधिकारित्वं दर्शितम्। किं त्वत्र कश्चिदुच्चारो भेदको गम्यः। यः खलु स्वरप्लुतादिवैशिष्ट्यमयो वैदिकस्तदभावात् तदज्ञानात्। तच्च सूतेन नावगतमित्यत उक्तं छान्दसादन्यत्रेति। हे छान्दस त्वामहमत्र जगति वाचां वाग्रूपाणां शास्त्राणां विषये स्नातं मन्ये किंभूतं स्नातमनि इति योज्यम्। "छन्दो वेदे च पद्यादाविच्छाह्लादनदीप्तिषु" इति निरुक्तिकोशाच्छन्दोभिर्वेदैः स्तुतश्छान्दसोऽग्निः "ॐमूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृतमाजातमग्निम्। कविं सम्राजमतिथिं जनानाम्" इत्याद्यानन्तश्रुतेः, तमतति सातत्येन गच्छति तदुद्भूतत्वेन प्राप्नोतीति छांदसात्। यद्वा छन्दसां मात्रावर्णभेदादिनार्यानुष्टुभादीनां समूहश्छान्दसं तमतति सामस्त्येन जानातीति छान्दसात्। क्विबत्र कर्त्तरि। गत्यर्थानां ज्ञानार्थतानियतत्वात्। "यानि वेदविदां श्रेष्ठो भगवान्बादरायणः। अन्ये च मुनयः सूत परावरविदो विदुः ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्" इत्यादेः। अ कोर्थ आदौ निकोर्थो नीत्यक्षरं यस्य तत् अनि स्नातशब्दतः पूर्वभागे नीति लिखिते निष्णातं स्यात्तथा च तत्पदं कौशलार्थकं जातम् "निनदीभ्यां स्नातेः सस्य षः कौशले" इति शाब्दिकोक्तेः। "अ आदावधिक्षेपवर्जनामन्त्रणेषु च" इति कोशात्। तर्हि "स्नातस्य मे न्यूनमलं विचक्ष्व" इति व्यासोक्तेः। का गतिरिति चेद्धातूनामनेकार्थत्वैवेत्यवेहि। सात्र कथं नाश्रिता पूर्वोक्तयोजनाया इह गतित्वात्तत्र त्वगतिकत्वादेव स्नातेः कुशलार्थतेति। यद्वाऽव्ययानां यथेष्टयोगित्वान्न्यूनमिह नि ऊनमित्यवग्रहेण निकारस्नातस्येत्यनेन युज्यते। तथा च निष्णातस्येति स्यात्तेन "निनदीभ्याम्" इति सूत्रसार्थक्यं च। यद्वाऽन्यान्संसृतितप्तांस्नाति हरिकथामृतपायनेन जीवयतीत्यन्यत्रस्तत्संबुद्धौ हे अन्यत्र! त्वामहं वाचां विषये स्नातं मन्ये। अत्र हेतुगर्भितसंबोधनमाह-हे छान्दसादिति। "तव कथामृतं तप्तजीवनम्" इत्यादिश्रीगोपीवाक्यमन्यरक्षकत्वे मानम्। स्वामिचरणैस्तु "वृद्धानुवृत्त्यापि विलोमजाता" इति "दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः" इति

यदुक्तं तेन तदाश्रित्यैवापाततोऽत्रैवर्णिकत्वादिति व्याख्यातम्। वस्तुतस्तु तत्रापि विगतानि लोमानि सलोम्नो दहनावसरे प्रथमं यस्मात्स विलोमाग्निः तदुद्भूतत्वाद्विलोमजाता इत्युक्तम्। किञ्च महतामभिधानं नामोच्चारणं तेनापि योगः संबंधो दौष्कुल्यमाधि विधुनोति। अहं दुष्कुलजो नास्मि यतो महन्नामोच्चरितम्। यद्वा मां महान्त आहूय पृच्छन्ति दौष्कुलजेन तेन संभाषणं कुर्वंति। सोपि तन्नामादि नो वक्ति। ततोयमाधिर्न कार्यं इति। तथा च पूज्यानां नामोच्चारणादियोगो यदि मानसीं व्यथामपाकरोति तर्हि किं महत्तराणां किंतरां महत्तमानाञ्च। स यदि तमपाकरोति। तदुक्तं "महान्तो जन्मना विप्रा विद्यावन्तो महत्तराः। महत्तमा विष्णुभक्तास्तत्संबन्धो महत्त्वकृत्" इति संहितोक्तेः। प्रकृतमनुसरति। किं चास्य पुराणस्य "स संहितां भागवतीम्" इत्यत्र "यत्रैषा सात्वती श्रुतिः" इत्यत्र च वेदवाचकसंहिताश्रुतिशब्दाभ्यामुपात्तत्वात्साक्षाद्वेदत्वमेव ध्वनितमतोऽत्रैवर्णिके सूते शौनकादिकृतानुयोगोपि न संगच्छेत। किं च तैरेवोक्तं श्रीबलदेवं प्रति सूतवधोत्तरं "यदेतद्ब्रह्महत्यायाः पावनं न करिष्यसि" इति, तदपि न संगच्छेत। तथा च यद्वा "श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा" इति शिष्टोक्तिरपि संगतैव। न चैवं सूताधिकारात्पुराणादीनां न्यूनत्वमाशंक्यम्, सकलनिगमवल्लीसत्फले श्रीभगवन्नाम्नि सर्वेषामधिकारात्सर्वयज्ञाद्यधिकश्रीभगवद्भक्त्यन्तरवत्। श्रीभागवते त्वात्मारामशिरोमणेः श्रीशुकस्यापि सर्वस्ववदावेशात्॥ १३॥ ❀ ❀ युगानां सत्यादीनां बहूनां पर्ययोऽतिक्रमो यत्र तस्मिन् "पर्ययोतिक्रमस्तस्मिन्नतिपात उपात्ययः" इत्यमरः। बहुयुगातिक्रमे। यद्वा परं तस्मिंस्तच्च कृष्णावतारसंबंध्येव ज्ञेयम्। तदवतारश्च वैवस्वतमन्वंतरीयाष्टाविंशतितमे द्वापरे व्याख्यास्यते। कीदृशे तृतीये संध्यारूपयुगरूपसंध्यांशरूपाणीति सर्वयुगानि त्रिरूपाणि भवन्त्यतस्तृतीये संध्यांशरूपे इति विश्वनाथः। तीर्थस्तु कृतयुगापेक्षया तृतीये द्वापरे समनुप्राप्ते किंभूते युगस्य पर्ययोऽवसानं यत्र तस्मिन् द्वापरान्त इत्यर्थमाह। अत्रेयं भारताद्युक्ता कथानुसंधेया–उपरिचरवसुनामा चेदिपो राजा शक्रसेवया विमानं लब्ध्वा तेनोपरितनलोकेषु गच्छति यतोऽतस्तन्नामोपरिचरवसुरिति जातः। स कदाचित्पित्राज्ञया मृगयां गतः स्वपत्नीं गिरिकाख्यामृतुस्नातां स्मृत्वा तद्रूपस्मरणेन रेतस्त्यक्त्वा वटपर्णपुटे क्षिप्त्वा श्येनाय दत्त्वा स्वपत्न्यै प्रेषितवान्। मार्गे यान्तं तं श्येनं तदन्यो मांसभ्रान्त्या तेन युयुधे। ततस्तद्रेतः कालिंद्यां पपात। तच्च जलेऽघमर्षणं जपता केनचिन्मुनिना पादग्रहणाच्छप्ताद्रिकाप्सरा मत्स्यीभूता जगार। सा च गर्भवती सती केनचिन्मत्स्यजीविना दाशेन गृहीत्वा तद्देशराज्ञे दत्ता। विदारितोदरायास्तस्या मिथुनं बहिर्गर्भात्पपात। यश्च पुत्रः स तु तेन राज्ञा गृहीतो मत्स्यनामा राजाभूत्। या च कन्या सा दाशेन गृहीता वासवी काली मत्स्योदरीति नामभिः प्रसिद्धाभूत्। मत्सी तु देहान्ते स्वर्गं ययौ। वासवीं दाशः पालितवान्। अथ कदाचित्तीर्थयात्राप्रसंगेन तत्रागतः पराशरमुनिस्तं दाशमाह–मां शीघ्रं पारं नयस्व। स च भोजनं कुर्वाणस्तां स्वपुत्रीभूतां वासवीं त्वमुडुपेनर्षिं पारं प्रापयेत्युवाच। सा च पितुराज्ञया तथा चकार। तामतीव सुन्दरीं वीक्ष्य कामार्त्तो मुनिर्मैथुनाय ययाचे। सा च नैतत्त्वादृशामृषीणामुचितं कर्मेति बहुशो बोधयामास तम्। किं च दुर्गंधाहं कन्याहं लोकः पिता देवाश्च पश्यन्तीत्याद्युवाच। स च प्रसह्य तां ययाभ। वरं च दत्तवान्। योजनगंधा भविष्यसि। पुत्रस्ते विष्णोरंशः पुराणाचार्यो भविष्यति चेत्युक्त्वा स्नात्वर्षिस्तु स्वाश्रमं गतः। सा च सद्यो गर्भं धृत्वा कर्णतो वीर्यग्रहणात्कर्णत एव पुत्रं प्रासूत। तं च द्वीपे स्थापयित्वा पालयामास कंचित्कालम्, अतो द्वैपायन इति नाम तस्य जातम्। स च मातरमामंत्र्य ततः स्वपितरमवधार्य कार्यकाले स्मरणादेव तव पार्श्वमागमिष्यामीत्युक्त्वा पित्राश्रमं जगामेति भारताद्युक्तेः॥ १४॥ ❀ ❀ इत्यर्थ इति। "उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि" इति मेदिन्युक्तेरयं भावः। अनेन विविक्तासीनत्वकथनेन सूचितमिति चिंत्यम्। तत्र सरस्वत्याः श्रवणात् शम्याप्राश इत्येव तस्य नाम वक्ष्यत इति संदर्भः। स्वामिचरणैर्हि न गंधमादनस्थबदरिकाश्रमोऽभिप्रेतः। किं तु सिंधुवनस्थोभिप्रेतस्तत्रैवादिबदरिकाश्रमप्रसिद्धेस्तत्र सरस्वतीबदरीखंडयोरपि सत्त्वादिति ज्ञेयं सुज्ञैः॥ १५॥ ❀ ❀ तत्र चाश्रमे आदिना शक्तिह्रासादिग्रहः॥ १६–१७॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

तृतीय इति। तृतीयत्वं कलिमादाय वैपरीत्येन गणनया त्रेतायुगावसाने इत्यर्थः–इति व्याख्यालेशः। परिवर्त्ते समाप्तिकाले सन्धावित्यर्थः–इति बुधरञ्जनी॥ १४–२१॥

श्रीमद्वीरराघवव्याख्या

प्रश्नमुपसंहरति तदिति। नोस्माभिः पृष्टस्त्वं तदेतत्पृष्टं सर्वं सम्यगाचक्ष्वाख्याहि यदपि किंच नापृष्टमस्ति तदपि समाचक्ष्व। यदसीति पाठे यद्यस्मात्पृष्टस्त्वं ततः पृष्टं तदेतत्सर्वमन्यदपि किंचित्समाचक्ष्व। त्वामन्यत्र छांदसाद्वेदवाक्यं विना वाचामितिहासपुराणादिरूपाणां विषये स्नातं पारंगतमधिकृतं वा मन्ये। वेदवाक्यव्यतिरिक्तेतिहासपुराणादिश्रवणे त्वामेवाधिकारिणं व्यासानुग्रहात् रोमहर्षणसुतं मन्य इत्यर्थः॥ १३॥ ❀ ❀ एवमापृष्टः सूतः कस्मिन्युगे प्रवृत्तेयमित्यादिप्रश्नान्प्रति विवक्षुस्तावत्तदुपोद्घातरूपं जन्मप्रभृत्येतत्पुराणोद्योगावधिकं श्रीव्यासचरित्रं तदनुप्रयुक्तं श्रीनारदवृत्तान्तं चाह द्वापर इत्यादिना यावत् षष्ठाध्यायसमाप्ति। द्वापरे युगे समनुप्राप्ते तत्रापि तृतीयेऽस्य युगस्य पर्यायेऽवसाने पराशरात्वर्षेर्वास-

व्यामुपरिचरवसुवीर्यजातायां सत्यवत्यां हरेः कलयांशेन योगी श्रीव्यासो जातः जज्ञे ॥ १४ ॥ ❀ ❀ स व्यासः कदाचित्सरस्वत्यां नद्यां शुचि पवित्रं जलमुपस्पृश्याचम्येदं नित्यकर्मोपलक्षणं रविमण्डले उदिते सति एकोऽसहायः विविक्ते निर्जने देशे आसीन उपविवेश ॥ १५ ॥ ❀ ❀ ऋषिर्निखिलनिगमद्रष्टा परावरज्ञः प्रकृतिपुरुषेश्वररूपोत्कृष्टापकृष्टतत्त्वयाथात्म्यदर्शी स व्यासः अव्यक्तं रंहः वेगो यस्य तेन दुर्निरीक्ष्यवेगेन कालेन हेतुना भुवि भूलोके प्रतियुगं प्राप्तं धर्मव्यतिकरं धर्मव्यत्यासं कृतादियुगक्रमेण प्राप्तं धर्मस्य वृद्धिह्रासादिकमित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कस्मिन्युगे इति प्रश्नं परिहरति द्वापर इति । कृतयुगापेक्षया तृतीये द्वापरे युते युगपर्यवसाने समनुप्राप्ते सति हरेः कलयांशेन पराशरात्पराकृतः शरो हिंसा येन स तथोक्तः, तस्माद्वासव्यां वसोरुपरिचरस्य पुत्र्यां सत्यवत्यां योगी नित्यज्ञानी नाम्ना व्यासो जातोऽवतीर्णोऽतो द्वापरे युगपर्यवसाने भागवतप्रवृत्तिरिति भावः ॥ १३ ॥ ❀ ❀ अवतारप्रयोजनमाह स कदाचिदिति । स व्यासो भगवान् शुचिः शुद्धः कदाचित्सरस्वत्या नद्या जलमुपस्पृश्य संध्याक्रियादिकं निर्वर्त्य पश्चाद्रविमंडले उदिते सति तत्तटे विविक्ते एकान्ते स्वाश्रम एवासीन एकाकी ॥ १४ ॥ ❀ ❀ परावरज्ञः कालत्रयज्ञानी सः सर्वतः सारः सर्वोत्तमः ऋषिकुलावतीर्णः परावरज्ञत्वे हेतुर्वा त्रिकालदर्शित्वाद्वा अव्यक्तरंहसा अनभिव्यक्तवेगेन भुवि युगे युगे प्राप्तं युगधर्मव्यतिकरं युगधर्मसांकर्यम् १५ ॥ ❀ ❀ तथा तत्कृतं कालकृतं भौतिकानां भूतकार्याणां भावानां पदार्थानां शक्तिह्रासं चात एव जनांश्चाश्रद्धानान् तात्पर्यशून्यान्निःसत्त्वान्निरुत्साहान् दुष्टा मेधा येषां ते दुर्मेधास्तान् धारणाशक्तिशून्यान्वा, एधशब्दवदयमप्यकारान्तः । ह्रसितायुषः अल्पायुषः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

छान्दसादिति । वेदपुराणयोर्ब्राह्मणपरिव्राजकवद्भेदाभेदव्यवस्थयोक्तम् । माध्यन्दिनश्रुतौ च वेदपुराणेतिहासानामपौरुषेयत्वेनाभेदनिर्देशः कृतः । यथा "एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषद" इत्यादिना । ब्रह्मयज्ञाध्ययनेऽपि विनियोगो दृश्यतेऽमीषाम्–यद्ब्राह्मणानीतिहासपुराणानीति । अनेन च प्रणवादिमयं छन्दः सवर्णं यद्वाक्यमत्रास्ति तत्रापि तस्याधिकारित्वं दर्शितम् । किन्त्वत्र कश्चिदुच्चारो भेदको गम्यः । यः खलु स्वरप्लुतादिवैशिष्ट्यमयो वैदिकस्तदभावात् । न चैवं सूताधिकारात् पुराणादीनां न्यूनत्वमाशङ्क्यम् । सकलनिगमवल्लीसत्फले श्रीभगवन्नाम्नि सर्व्वेषामधिकारात् सर्व्वयज्ञाद्यधिकश्रीभगवद्भक्त्यन्तरवत् । श्रीभागवते तु आत्मारामशिरोमणेः श्रीशुकस्यापि सर्व्वस्ववदावेशात् ॥ १३ ॥ ❀ ❀ युगस्य तस्य द्वापराख्यस्य तृतीये पर्यये युगत्रयमन्यदतिक्रम्यातिक्रम्य वैवस्वतमन्वतरादितस्तृतीय आगमने सतीत्यर्थः "पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्यय" इत्यमरः ॥ १४ ॥ ❀ ❀ स इत्यस्य टीकायां बदरिकाश्रमस्थानं सूचितमिति सरस्वत्यास्तत्र श्रवणात् । शम्याप्राश इत्येव तु तस्य नाम वक्ष्यते ॥ १५ ॥ ❀ ❀ परावरज्ञ इति त्रिकम् ॥ १६–१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्नातं पारगं वक्तुमतिसमर्थमित्यर्थः । छान्दसात् वैदिकाद्वाक्यादन्यत्र, तत्रानधिकारादित्यर्थः । न चैवं सूताधिकाराद्वेदेभ्योऽस्य शास्त्रस्य न्यूनत्वमाशङ्क्यं सकलनिगमवल्लीसत्फले श्रीभगवन्नाम्नि सर्व्वेषामधिकारात् । निगमकल्पतरोः फलमित्यखिलश्रुतिसारमित्यत्रैवोक्तेः ॥ १३ ॥ ❀ ❀ कस्मिन् युग इत्यादिप्रश्नानामुत्तरं वक्तुं व्यासजन्मकर्म्माण्यपि संक्षेपेणाह द्वापर इति । युगानां सत्यादीनां बहूनां पर्ययोऽतिक्रमो यत्र तस्मिन्, "पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्यय" इत्यमरः । बहुयुगादिक्रमे यद्द्वापरं तस्मिन् । तच्च कृष्णावतारसम्बन्ध्येव ज्ञेयम् । तदवतारश्च वैवस्वतमन्वन्तरीयाष्टाविंशतितमे द्वापरे व्याख्यास्यते । कीदृशे तृतीये सन्ध्यारूपयुगरूपसन्ध्यांशरूपाणीति सर्व्वयुगानि त्रिरूपाणि भवन्त्यतस्तृतीये सन्ध्यांशरूपे । वासव्याम् उपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्याम् ॥ १४ ॥ ❀ ❀ उपस्पृश्य आचम्य सर्व्ववर्णाश्रमाणां यद्धितं तद्ध्याविति चतुर्थेनान्वयः ॥ १५ ॥ ❀ ❀ परावरज्ञः अतीतानागतविज्ञः युगधर्म्माणां व्यतिकरं कालेन नाशम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नोस्माभिर्यत्किंचित्पृष्टोऽसि तत्सर्वं समाचक्ष्व सर्वमाख्याहि, यतः छान्दसात् वैदिकवाक्यात् अन्यत्र वाचाम् इतिहासादिरूपाणां विषये प्रतिपाद्यार्थे स्नातं कृतसमाधिं त्वां मन्ये ॥ १३ ॥ ❀ ❀ कस्मिन् युगे प्रवृत्तेयमित्यादिप्रश्नानामुत्तरं वक्तुं तावद्व्यासजन्मादिकमाह द्वापरे इति । द्वापरे "अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिषु" इति हरिवंशे सत्यवतीजन्मस्मरणात् तत्रैव अष्टावतारानुक्त्वा "नवमो द्वापरे विष्णुरष्टाविंशे पुराभवत् । वेदव्यासस्तथा जज्ञे जातुकर्ण्य-

पुरस्कृत'' इति श्रीवेदव्यासजन्मस्मरणाच्च, समनुप्राप्ते सम्यगनु पश्चाद्गते सति तृतीये युगपर्यये युगस्य द्वापरस्य त्रेतानन्तरः दिव्यसंवत्सरशतद्वयात्मकः प्रथमः पर्ययः। द्विसहस्रदिव्यसंवत्सरात्मको द्वितीयः पर्ययः। दिव्यसंवत्सरशतद्वयात्मकः चरमभागः तृतीयः पर्ययः। सन्ध्यांशलक्षणः सन्निहितः कालस्तस्मिन् "पुनस्तिष्ये च सम्प्राप्ते कुरवो नाम भारताः। भविष्यन्ति महात्मानो राजानः प्रथिता भुवि॥ तेषान्त्वत्तः प्रसूतानां कुलभेदो भविष्यति। परस्परविनाशार्थं त्वामृते द्विजसत्तम॥ तत्राप्यनेकधा वेदान् भेत्स्यसे तपसान्वितः। कृष्णे युगे च सम्प्राप्ते कृष्णवर्णो भविष्यसी''ति मोक्षधर्मोक्तेः। वासव्यां वसुकन्यायाम्॥ १४-१८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं प्रश्नचतुष्टयमुक्त्वोपसंहरति तत्सर्वमिति। उत्तरोत्तरप्रश्नेऽपि पूर्वस्य न दौर्बल्यम्। तदाह सर्वमिति। ननु भागवतार्थेऽस्माकं परिचयः नान्यत्रेति न वक्तव्यमित्याह। मन्य इति। अत्रैवर्णिकत्वाद्वेदे परं न परिचयः। तदाह-अन्यत्र छान्दसादिति॥ १३॥ ❀ ❀ प्रथमप्रश्नस्य स्कन्धान्तरेषूत्तरं तृतीयचतुर्थयोरुत्तमप्रकरणे, अतो हेतुभूतत्वात् द्वितीयप्रश्नस्योत्तरमाह द्वापर इति। भागवतनिर्माणार्थमेव मुख्यतया तस्यावतार इति प्रथमं जन्माह-ब्रह्मकल्पस्य प्रथममन्वन्तरस्य तृतीययुगपर्यावृत्तौ व्यासस्य जन्म। प्रथमं युगपर्यायो ज्ञानस्य संसाधनस्य कालः। द्वितीयः कर्मणः। तृतीयस्तु भक्तेः। तथापि धर्माणां बाधकत्वात् कृते त्रेतायां च न जन्म, किंतु धर्मस्य द्विपरतायां संदेहे सर्वेषामेव संदेहः संशब्दार्थः। पराशरस्य भक्तत्वं पुराणान्तरेष्वेवं सिद्धम्। मार्कण्डेयनमस्कारे वयोवृद्धवचनात्। उपरिचरवसोः पुत्री वासवी मत्स्यगर्भे जाताऽपि बीजधर्मयुक्तैव। अवतारप्रयोजनं योगीति योगः प्रवर्त्तनीयः। तत्रापि हरेः कलया सर्वदुःखदूरीकर्तुर्ज्ञानकलया। योगस्तु भक्तियोगः। ज्ञानस्य त्ववतारादेव तस्यापि फलं भक्तिः प्रयोजनं, एवं भक्तिप्रवर्त्तनार्थमेवावतार इत्युक्तं भवति॥ १४॥ ❀ ❀ तस्य प्रासंगिकमाह स कदाचिदिति। स भक्त्यर्थमवतीर्ण एव कदाचिन्मार्गत्रयनाशे सति स्वस्यापि ज्ञानविस्मरणे सरस्वत्याः शुचि जलमुपस्पृश्य तेन प्रबुद्धसार्वज्ञः पापपराजितमिव न भवतीत्याह शुचीति। अनेन ज्ञानकलायां धर्मांशा एवाभिव्यक्ताः, ततः स्वावतारप्रयोजनं विचारयन् सर्वेषां हितार्थे धर्ममपश्यदित्याह विविक्त इत्यारभ्य कृपया मुनिना कृतमित्यन्तम्। विविक्ते एकान्ते मनःस्थैर्यार्थमेतत्। तदा एकः आसीनः। भौतिकदैविकात्मीयदोषत्रयाभाव उक्तः। उदिते रविमंडल इति आवश्यककर्मकालाभाव उक्तः। पुण्यनक्षत्रस्य कालगुणानां च ज्ञापकं वा॥ १५॥ ❀ ❀ परे कालादयः अवरे अस्मदादयः करिष्यमाणेऽर्थे कालादीनां प्रतिबन्धकाभावं प्राणिनां तथाऽदृष्टं च ज्ञातवानित्यर्थः। एतदनन्तरं स ऋषिर्जातः। धर्मांशस्यैव प्रकटत्वात्। कालो हि महानधिकारी भगवतः सर्वकर्ता सर्वनियन्ता च। एवं सति व्यर्थः प्रयासोऽन्येषामिति कालनियन्तुर्भगवतोऽवतार इति ज्ञापयितुं कालकृतमुपद्रवं प्रथमत आह-कालेनाव्यक्तेनाक्षरेण रंहो वेगो यस्येति, अव्यक्ते प्रकृतौ वा रंहो वेगो यस्येति प्रकृतिप्रभृतीनां कालाधीनत्वमुक्तम् अक्षरसम्मतिर्वा। अव्यक्तो रंहो यस्येति वेति प्रतिक्रियाऽकरणार्थे हेतुरुक्तः। एतावता भगवद्व्यतिरिक्ताः तदधीनास्तदनुगुणा वेति निरूपितम्। फलितमाह युगधर्मेति। चतुर्युगानां धर्माः तपोयज्ञस्वाध्यायदानादयः, तेषां व्यतिकरो नाशः। अनधिकारिषु वा प्रवृत्तिः। स च व्यतिकरो नाकस्मिकः, किन्तु नियतः भुव्येव, न स्वर्गे। नाकस्मिकं किन्तु युगे युगे प्राप्तम्॥ १६॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

द्वापर इत्यत्र। कर्तृप्रश्ने सपरिकरः कर्ता वक्तव्यः, न तु तज्जन्मापीति शङ्कायां जन्मकथनप्रयोजनमाहुः भागवतेत्यादि। ब्रह्मकल्पस्येत्यादि। अत्रायमाशयः-मूले 'तृतीये युगपर्यये' इति कथनादष्टाविंशतिपर्यायद्वापरस्य निवृत्तौ तत्रोत्पन्नायाः सत्यवत्या एतन्मन्वन्तरीयतृतीयपर्यायद्वापरेऽभावात् तस्यापि निवृत्तौ तस्याः सोमवंशीयत्वेन तद्रहितमन्वन्तराणामपि निवृत्तावेतत्कल्पस्यैव निवृत्तेर्भूतस्य कल्पान्तरस्यावश्यं मृग्यत्वात् तस्मिन् विचार्यमाणे रजोगुणस्यैव प्रथमं क्षोभात् 'प्रथमः कल्पो राजस' इति ब्रह्मकल्पस्य राजसत्वे 'चाक्षुषो दधिसम्प्लव' इत्यत्रोक्तन्यायेन तत्र राजसमन्वन्तरप्राथम्ये प्राप्ते, तत्र सूर्याद्यपेक्षासत्त्वात् 'मृतेण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड' इति निरुक्त्या जगतोऽग्नीषोमात्मकत्वेन च सोमस्यापि तदा सत्त्वेन तद्वंशे जाते तृतीयपर्यायद्वापर एव सत्यवत्या उत्पत्तौ वक्ष्यमाणयुक्त्या पराशरस्यापि तदानीं सत्त्वात् तृतीयपर्यावृत्तौ व्यासजन्मेत्यर्थः। तृतीय इत्यादिकथनस्य प्रयोजनमाहुः प्रथममित्यादि। तथा च भक्तिप्रचारार्थत्वात्तृतीये पर्याये जन्मेति भावः। माध्वास्तु 'अधीतवान् द्वापरादा' वित्यस्य व्याख्याने 'व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजन' दिति वाक्यादस्मिन् कल्पे व्यासजन्माहुः। द्वापरस्य तात्पर्यमाहुः तथापीत्यादि। धर्माणां बाधकत्वादिति। कृतत्रेतयोर्धर्मसन्देहाभावेनासन्दिग्धतया क्रियमाणानां तेषां भक्तिबोधकत्वात्। द्विपरतायां सन्देह इति। 'द्वापरौ युगसंशया' विति कोशात् द्वापरशब्द उभयार्थः, प्रकृते शक्तिनियन्त्रणाभावादेकयोक्त्या पुष्पवच्छब्दवदुभयं वक्ति। द्विपरता तूक्ता मात्स्ये 'द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृता' वित्यादिना। एवञ्च द्वापरान्ते व्यासावतार आयाति, तदाहुः सर्वेषामिति।

ऋषीणाम्। एवं जन्मकालस्वरूपं निर्णीयाधिकरणस्वरूपमाहुः पराशरस्येत्यादि। पुराणान्तरेष्विति। विष्णुपुराणादिषु। मातुर्भक्तत्वायाहुः उपरीत्यादि। उपरिचरस्य वैष्णवत्वं मात्स्य एव प्रसिद्धम्। बीजधर्मयुक्तेति। वैष्णवत्वयुक्ता। तथा चैतयोरेतादृशत्वात्तत्र व्यासावतार इत्यर्थः। ज्ञानस्य त्विति। प्रवृत्तिरिति शेषः। प्रयोजनमिति। अवतारप्रयोजनम्॥ १४॥ ❀ ❀ स कदाचिदित्यत्र। प्रासङ्गिकमिति। अवतारकार्यम्। अनेनेति। पापपराजितसरस्वतीजलोपस्पर्शनेन। पुण्यनक्षत्रस्येत्यादि। 'यत्पुण्यं नक्षत्र' मित्यत्र श्रुतौ आदिमजघन्यपुण्यनक्षत्राङ्कितमार्गे इत्यत्र यावत्सूर्यगतिः, तावत्कालस्य पुण्याहरूपस्य ज्ञापकं कालगुणा आर्तवास्तेषां च ज्ञापकमित्यर्थः॥ १५॥ ❀ ❀ परावरे अवतार इति। व्यासावतारः। व्यतिकरशब्दस्य नाशे प्रसिद्ध्यभावात् पक्षान्तरमाहुः अनधीत्यादि। तथा चानधिकारसम्मिश्रणमित्यर्थेऽङ्गीकृतेऽर्थादेव नाशप्राप्तिरित्यर्थः॥ १६॥

श्रीगिरिधरकृता बालप्रबोधिनी

प्रश्नमुपसंहरति-तदिति। यत्किञ्चनार्थजाते नोऽस्माभिरिहेदानीं त्वं पृष्टोऽसि तत्सर्वं समाचक्ष्व सम्यगाख्याहि। न जानामीति न वक्तव्यं यतश्छान्दसादन्यत्र अत्रैवर्णिकत्वेन वेदेऽधिकाराभावाद्वैदिकव्यतिरेकेण वा विषये इतिहासपुराणादीनामर्थेऽहं त्वां स्नातं पारङ्गतं मन्ये इत्यन्वयः। न चैवं सूताधिकारादस्य शास्त्रस्य वेदेभ्यो न्यूनत्वमाशङ्क्यम् 'निगमकल्पतरोर्गलितं फलं' 'निखिलश्रुतिसारं' 'सर्ववेदेतिहासानां सारं सारं समुद्धृतम्' 'इतिहासपुराणं च पञ्चमो वेद उच्यते' इत्यादिपूत्कृष्टत्वेनोक्तत्वात्॥ १३॥ ❀ ❀ एवमापृष्टः सूतः 'कस्मिन् युगे प्रवृत्तेयं' इत्यादिप्रश्नान् प्रति विवक्षुस्तावत्तदुपोद्घातरूपं जन्मप्रभृति एतत्पुराणोद्योगावधिकं व्यासचरितं तदनुप्रयुक्तं श्रीनारदवृत्तान्तं चाह-द्वापर इत्यादिना यावदष्टाध्यायसमाप्ति। कृतादिचतुर्युगस्य पर्यये गणनायां तृतीये युगे द्वापरे समनुप्राप्ते सति वासव्यां उपरिचरस्य वसोर्बीजात् मत्स्यगर्भे जातायां सत्यवत्यां पराशरसकाशात् हरेर्ज्ञानस्य कलया अंशेन योगी भक्तिज्ञानादियोगयुक्तो व्यासो जात इत्यन्वयः॥ १४॥ ❀ ❀ स व्यासः कदाचित् कस्मिंश्चिद्दिवसे सरस्वत्याः शुचि पवित्रं जलमुपस्पृश्य आचम्य-उपलक्षणमिदम्-नित्यकर्माणि कृत्वा रविमण्डले उदिते सति चित्तैकाग्र्यार्थमेकः असहायः विविक्ते निर्जने देश आसीनः सन् सर्ववर्णाश्रमाणां यद्धितं तद्दध्यौ चिन्तयामासेति चतुर्थेनान्वयः॥ १५॥ ❀ ❀ किं वैगुण्यं तेन दृष्टं येन सर्वहितं दध्याविति अपेक्षायां व्यासस्य तद्दर्शनयोग्यताप्रदर्शनपूर्वकं तद्दृष्टं वर्णयति-परावरज्ञ इति सार्द्धद्वयेन। स व्यासः परावरज्ञः अतीतानागतवित् ऋषिर्निखिलनिगमार्थदर्शी अव्यक्तं रंहो वेगो यस्य तेन कालेन हेतुना भुवि लोके युगे युगे प्रतियुगं युगधर्माणां तपोयज्ञस्वाध्यायदानादीनां व्यतिकरं नाशमनधिकारिषु प्रवृत्तिरूपं सङ्करं वा वीक्ष्येति सर्वत्र द्वितीयान्तेनान्वयः। अव्यक्तरंहसेत्यनेन तत्प्रतिक्रियां कर्त्तुं केनापि न शक्यते इति सूचितम्॥ १६॥

हिन्दी अनुवाद

वेदवाणीको छोड़कर अन्य समस्त शास्त्रोंके आप पारदर्शी विद्वान् हैं। सूतजी! इसलिये इस समय जो कुछ हमने आपसे पूछा है, वह सब कृपा करके हमें कहिये॥ १३॥ ❀ ❀ सूतजीने कहा—इस वर्तमान चतुर्युगीके तीसरे युग द्वापरमें महर्षि पराशरके द्वारा वसुकन्या सत्यवतीके गर्भसे भगवान्‌के कलावतार योगिराज व्यासजीका जन्म हुआ॥ १४॥ ❀ ❀ एक दिन वे सूर्योदयके समय सरस्वतीके पवित्र जलमें स्नानादि करके एकान्त पवित्र स्थानपर बैठे हुए थे॥ १५॥ ❀ ❀ महर्षि भूत और भविष्यको जानते थे। उनकी दृष्टि अचूक थी। उन्होंने देखा कि जिसको लोग जान नहीं पाते, ऐसे समयके फेरसे प्रत्येक युगमें धर्मसङ्करता और उसके प्रभावसे भौतिक वस्तुओंकी भी शक्तिका ह्रास होता रहता है। संसारके लोग श्रद्धाहीन और शक्तिरहित हो जाते हैं। उनकी बुद्धि कर्तव्यका ठीक-ठीक निर्णय नहीं कर पाती और आयु भी कम हो जाती है। लोगोंकी इस भाग्यहीनताको देखकर उन मुनीश्वरने अपनी दिव्यदृष्टिसे समस्त वर्णों और आश्रमोंका हित कैसे हो, इस पर विचार किया॥ १६-१८॥

भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम्। अश्रद्दधानान्निःसत्त्वान्दुर्मेधान् ह्रसितायुषः॥ १७॥
दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा। सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक्॥ १८॥
चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम्। व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम्॥ १९॥
ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः। इतिहासपुराणं च पञ्चमो वेद उच्यते॥ २०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भौतिकानां शरीरादीनाम्। तत्कृतं कालकृतम्। निःसत्त्वान्धैर्यशून्यान्। दुर्मेधान् मंदमतीन्॥ १७-१८॥ ❀ ❀ ततश्च होत्रोपलक्षिताः चत्वार ऋत्विजः चतुर्होतारः तैः अनुष्ठेयं कर्म चातुर्होत्रम्। शुद्धं शुद्धिकरम्। यज्ञसंतत्यै यज्ञानामविच्छेदाय॥ १९॥ ❀ ❀ चातुर्विध्यमेवाह। ऋगिति। उद्धृताः पृथक्कृताः॥ १९-२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

दुर्भगान्मंदभाग्यान्। दिव्येन तपोजन्ययोगचक्षुषा ॥ १८ ॥ ❀ ❀ चत्वारो होत्रध्वर्यूद्गातृब्रह्माणो होतारो यत्र तस्मिन्यद्वा दर्शहोत्रादिचातुर्होत्रपर्यंतैर्मंत्रैः प्रकाश्यं वाऽग्निष्टोमादिकं प्रजानां वैदिकीनां यज्ञसंतत्यै यज्ञानामग्निष्टोमादीनां परंपराप्रवर्तनायैकमविभक्तं वेदमृगादिभेदेन चतुर्विधमकरोत् ॥ १९ ॥ ❀ ❀ मूलवेदसिंधोरुद्धृता न तु कृताः। तदर्थज्ञानाय कृतमितिहासपुराणं च वेदार्थविदकत्वात्पंचमो वेद इत्युच्यते। पञ्चमो वेद इत्युक्तेरितिहासादीनामर्थतो रचनाभाव एव सूचितः। वेदवत्तेषामप्याविर्भाव एव व्यासेन कृतो न तु रचना, तेषामपि नित्यत्वादिति भावः ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

तथा तत्कृतं धर्मकृतं भौतिकानामाकाशादिभूतपरिणामरूपाणां देवादिशरीराणां भूतानां तत्सृष्टानां जीवानां च शक्तिह्रासं शक्तिक्षयं च तथा जनानभिवीक्ष्य कथंभूतानश्रद्धधानान् श्रद्धामकुर्वाणान्स्वस्ववर्णाश्रमानुगुणधर्मानुष्ठानविषयकत्वरारहितान्निःसत्त्वान् दुर्बलान्सत्यामपि श्रद्धायां दुर्बलान्सत्यपि सत्त्वे दुर्मेधान् ह्रसितं संकुचितमायुर्येषांताननुष्ठानोपयुक्तज्ञानायूरहितान् ॥ १७ ॥ ❀ ❀ अत एव दुर्भगान्भाग्यहीनान्मुनिः परमात्मयाथात्म्यमननशीलः अत एवामोघदृगवितथसंकल्पः दिव्येन चक्षुषा योगपरिशुद्धेन मनसा सर्वेषां वर्णानामाश्रमाणां च हितं दध्यौ चिंतितवान् चिंतापूर्वकं चकारेत्यर्थः ॥ १८ ॥ ❀ ❀ तदेवाह प्रजानां त्रैवर्णिकानां संबंधितया श्रेयःसाधनतयाऽनुष्ठेयं वैदिकं वेदपूर्वभागबोध्यमत एव विशुद्धं भ्रमविप्रलंभादिपुरुषदोषास्पृष्टविधिबोधितं चातुर्होत्रं चातुर्होत्रशब्दवाच्यमंत्रप्रकाश्यं कर्म वीक्ष्य प्रजानामनुष्ठेयमालोच्य तावद्यज्ञानां संतत्यै कर्त्तव्ययज्ञकलापादिविषयकबोधार्थं तद्वेदं पूर्वमेकरूपेणावस्थितवेदमृग्यजुःसामाथर्वभेदेन चतुर्विधं विदधे व्यभांक्षीत् ॥ १९ ॥ ❀ ❀ चातुर्विध्येन विधानमेव दर्शयति ऋगिति। ऋगाद्याश्चत्वारो वेदादुद्धृताः मिश्रीभूतवेदराशेरुद्धृत्य संनिवेशविशेषेण योजिता इत्यर्थः। तथा इतिहासः पुराणानि च उद्धृतानीत्यनुषंगः। कालेन विप्लुतानि मत्स्यादिपुराणानीतिहासाश्चोद्धृता इत्यर्थः। इतिहासं पुराणानि च विशिनष्टि पंचमो वेद उच्यते पंचमवेदत्वेन प्रसिद्ध्यंत इत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दुष्टभाग्यान्वीक्ष्य मुनिर्मौनवान् दिव्येन चक्षुषा अपरोक्षज्ञानेन सर्वाश्रमाणां यद्धितं तच्चिरं दध्यौ चिंतितवानित्येकान्वयः। सर्वज्ञस्य चिरध्यानमज्ञदृष्ट्यपेक्षया दुष्टमोहनाय चेति ज्ञातव्यम्। अमोघदृक् अवन्ध्यज्ञानः ॥ १७ ॥ ❀ ❀ किं हितमपश्यदिति तत्राह चातुर्होत्रमिति। चत्वारो होतारो होत्रध्वर्यूद्गातृब्रह्माणो यस्मिंस्तत्तथोक्तं दशहोत्रादिचातुर्होत्रपर्यंतैर्मंत्रैः प्रकाश्यं वा अग्निष्टोमादिकं कर्म प्रजानां वैदिकीनां शुद्धं शुद्धिकरं रागादिवर्जितं वा वीक्ष्य यज्ञसंतत्यै अग्निष्टोमादियज्ञपरंपराप्रवर्तनाय एकमविभक्तं वेदमृगादिभेदेन चतुर्विधं व्यदधादित्येकान्वयः। आदिमध्यावसानेषु हरिस्मृत्या तत्पूज्यत्वेन क्रियमाणं कर्म प्रजानां ज्ञानद्वारा शुद्धिकरमपश्यदिति भावः ॥ १८ ॥ ❀ ❀ कथं विभक्ता इति तत्राह ऋगिति। वेदव्यासेन मूलवेदसमुद्रात् ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदा उद्धृताः, न तु कृताः। तदर्थज्ञानाय कृतम् इतिहासपुराणं च वेदार्थविदकत्वात्पंचमो वेद इत्युक्ते इतिहासादीनां शब्दतो रचनं न त्वर्थतः, तस्य नित्यत्वादिति ज्ञातव्यम् ॥ १९ ॥ ❀ ❀ तत्र तेषां वेदानां मध्ये ऋग्वेदप्रवर्तकः पैलोभूदिति प्रत्येकमन्वयः। जैमिनस्यापत्यं जैमिनिः साम गायति शिष्येषु गमयति प्रवर्तयतीति वा सामगः कविः सूक्ष्मज्ञानी। ततो जैमिनेरनंतरमेकः प्रधानः वैशंपायन एव यजुर्वेदानां निष्णातः प्रवर्तकतयेति शेषः, एवशब्देन सूर्यादन्यः प्रतिषिध्यते न तु सूर्यः, तथा सति वक्ष्यमाणविरोधात् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

इतिहासेति। तथा च साम्नि कौथुमीयशाखायां छान्दोग्योपनिषदि 'ऋग्वेदं भगवो अध्येमि यजुर्व्वेदं सामवेदमाथर्व्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदमि'त्यादि। अन्यत्र च 'वेदानध्यापयामास महाभारतपञ्चमानि'ति। अन्यथा पञ्चमत्वं नावकल्पेत, समजातीयत्वात्संख्यायाः। तृतीयस्कन्धे च वक्ष्यते "इतिहासपुराणानि पंचमं वेदमीश्वरः। सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शन" इति। पञ्चमत्वे कारणं वायुपुराणे सूतवाक्यम्—"एक आसीद् यजुर्व्वेदस्तं चतुर्द्धा व्यकल्पयत्। चातुर्होत्रमभूत्तस्मिन् तेन यज्ञमकल्पयत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च। उद्गात्रं सामभिश्चैव ब्रह्मत्वं चाप्यथर्व्वभिः ॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिर्द्विजसत्तमाः। पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ यच्छिष्टन्तु यजुर्वेद इति शास्त्रार्थनिर्णयः ॥" इति स्कान्दमाग्नेयमित्यादिसमाख्यास्तु प्रवचननिबन्धनाः काठकादिवत् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शनी

भौतिकानां भावानां शरीरादीनाम्। तत्कृतं कालकृतम्। निःसत्त्वान् रजस्तमोमयान्॥ १७-१८ ॥ ❀ ❀ ततश्च ज्ञानयोगभक्त्ययोग्यानां सर्व्वासां प्रजानां कर्म्मैव शुद्धं शुद्धिकरम्। कीदृशं होता उद्गाता अध्वर्युर्ब्रह्मेति चत्वारोऽपि होतारस्तन्निमित्तं चातुर्होत्रम्। यज्ञानां सन्तत्यै अविच्छेदाय॥ १९-२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

सर्ववर्णाश्रमाणां यद्धितं तद्दध्यौ इत्युक्तम्। तत्र त्रैवर्णिकहिताचरणमाह चातुर्होत्रमिति। प्रजानां त्रैवर्णिकानां संबंधि-वैदिकम्। चातुर्होत्रम्। चातुर्होत्रसंज्ञकाः 'चितिस्रुक्चितमाज्यमि'त्यादयो मंत्रास्तत्पूर्वकम् अग्निहोत्रादिसोमांतं प्रवृत्तं कर्म। वीक्ष्य आलोच्य यज्ञसंतत्यै यज्ञानामविच्छेदाय। "यो वै वेदांश्चप्रहिणोती"ति श्रुतेः। अनादिसिद्धा एव सर्वे वेदाः पूर्वं मिश्रिता आसन्। तमेकं सर्वसमुदायभूतं वेदं चतुर्विधं व्यदधात् व्यभांक्षीत्॥ १९॥ ❀ ❀ चातुर्विध्यमाह ऋगिति। त्रैवर्णिकानामन्येषां च हिताय। इतिहासः पुराणानि च उद्धृतानि। तेषां समुदायः पञ्चमो वेद इत्युच्यते। तत्रायं विवेकः महा-भारतः प्राचीन एव कालविलुप्तः "सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदि"तिवदुद्धृतः। एवं पुराणान्यपीति संक्षेपः॥ २०॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

कालेन धर्मनाशमुक्त्वा पदार्थनाशमप्याह भौतिकानामिति। भौतिकानामस्मदादीनां चकाराद्भूतानां शक्तिः। स्वाध्यायादीनां कृषिवृष्ट्यादीनां वा तत्कृतम्। कालकृतं कर्तृदोषानाह अश्रद्दधानानिति सर्वत्र श्रद्धारहितान्। सत्त्वं बलं विवेको वा। दुर्मेधान् बुद्धिरहितान्। चित्तमनोबुद्धिनाशा उक्ताः। अंतःकरणेष्वहंकार एव पुष्ट इत्यर्थः। अत एव आयुषोऽप्यपचय इत्याह॥ १७॥ ❀ ❀ कर्मणा हि भाग्यमुत्पद्यते तत्कालादीनां शुद्धितारतम्येन महाभाग्यजनकत्वं द्वापरादौ तु षण्णां दुष्टत्वात् दुर्भाग्यत्वम्। एतत्सर्वं न तर्कितम्, किंत्वार्षज्ञानेन प्रमितं तथा सत्युपायज्ञानं भवतीत्यर्थः। पाखंडधर्माः स्वत एवोत्पद्यंत इति तद्व्यावृ-त्त्यर्थमाह सर्ववर्णाश्रमाणामिति। चकारात् अवांतरदेशादिधर्माः। अनेन वर्णाश्रमदेशव्यतिरिक्ता धर्माः पाखंडा इति निरू-पितम्। तेषामपाखंडानामिदं दध्यौ। सत्यसंकल्पात् हितं स्फुरतीत्यत आह। अमोघदृगिति॥ १८॥ ❀ ❀ यज्ञ एव सर्ववर्णाश्रमहितकर इत्याह। आर्षज्ञानत्वान्न युक्तिरपेक्ष्यते। युक्तिस्तु आधिदैविकः कालो वा भौतिककालकृतदोषदूरीकरणसमर्थः। अथवा कालनियामको विष्णुः। तदुभयात्मकत्वाद्यज्ञस्य स च श्रौतो विष्णुः, प्रमाणांतराच्च वेदो बलिष्ठः सर्ववेदैकवाक्यतां वक्तुं तस्य स्वरूपमाह चत्वारो होतारो यत्रेति। ते गणनायका होतृशब्देनोच्यंते। अध्वर्युप्रभृतयः अथवा दश होता चतुर्होता पंचहोता षड्ढोता सप्तहोतेति चतुर्होतारः। ते अग्निहोत्रादीनां मूलमिति। चातुर्होत्रमग्निहोत्रादिपंचकं यत्कर्म कर्मेति नामधेयम्। तद्धि ससाधनं नित्यमिति कालास्पर्शाच्छुद्धम्। प्रकर्षेण जातानां तत्र वेदः प्रमाणमित्याह। वैदिकमिति। तेषां यज्ञानां विस्तारार्थं वेदं चतुर्धा कृतवानित्याह व्यदधादिति। अक्लेशतया निरूपणात् बुद्धिसौकर्येण यज्ञसंततिः अभिन्नेष्वंशभेदव्यवस्थया वा॥ १९॥ ❀ ❀ तान् भेदानाह ऋग्यजुःसामाथर्वाख्या इति। ऋग्वेदेन होता करोति यजुर्वेदेनाध्वर्युः सामवेदेनोद्गाता चतुर्थेन ब्रह्मा। तत्तत्कर्मप्रतिपादकानां मंत्राणां ब्राह्मणानां च खंडा उद्धृता वेदशब्दवाच्या जाताः। तेषामपेक्षितधर्मप्रतिपादकः पंचमो वेदः इतिहासपुराणाख्यः॥ २०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अश्रद्दधानानित्यत्र इत्याहेति। 'ह्रसितायुष' इति विशेषणमाहेत्यर्थः। चातुर्होत्रमित्यत्र। ननु कालकृते दोषे तदधीनस्य यज्ञस्य कथं सर्वहितकरत्वमित्यत आहुः आर्षेत्यादि। तथापि मन्दबोधनाय तामाहुः युक्तिरिति। तदुभयात्मकत्वादिति। 'स विष्णवा-ख्योधियज्ञोसौ कालः कलयतां वर' इति वाक्यादित्यर्थः। स चेति यज्ञश्च। 'यज्ञो वै विष्णु' रिति श्रुतेः। तथा च प्रमाणतः प्रमेयतश्च यज्ञस्य बलिष्ठत्वं युक्तिरित्यर्थः। सर्ववेदैकवाक्यतामित्यादि। यज्ञस्य सर्ववेदार्थतां वक्तुं यज्ञस्य स्वरूपमाहेत्यर्थः। त इति, अध्वर्यूद्गातृ-होतृब्रह्माणः। एवं व्याख्याने सोममात्रप्रतिपादकत्वं स्यात्, नत्वग्निहोत्रादिप्रतिपादकत्वमपीत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। 'चित्तिः स्रु गि'त्यादिः 'सामाध्वर्यु' रित्यन्तो दशहोतृमन्त्रः। 'पृथिवी होते' त्यादि 'रूपवक्ते' त्यन्तश्चतुर्होत्राख्यः। 'अग्निर्होते' त्या'द्युपवक्ते' त्यन्तः पञ्चहोत्राख्यः। 'सूर्यं ते चक्षु' रित्यादिः 'शरीरै' रित्यन्तः 'वाग्घोते' त्यादि 'जुहोमी' त्यन्तश्चेति द्वौ षड्ढोतृमन्त्रौ। 'महाहवि' रित्यादिरुद्गातान्तो मन्त्रः सप्तहोत्राख्यः। एतेषां मन्त्राणां यज्ञहेतुत्वं चातुर्होत्रशब्दवाच्यत्वं च ब्राह्मणे दर्शितम्। 'चतुर्होतृ-भ्योधियज्ञो निर्मित' इत्यादिना। 'त्वं वै मे हूतः प्रत्यश्रौषी' रित्यादि च तत्र हि। तदेतदभिसन्धायोक्तं ते अग्निहोत्रादीनां मूल-मिति। ननु कर्मणस्त्रिक्षणावस्थायित्वनियमदर्शनात् प्रत्यक्षविरोध इत्यत आहुः कर्मेति। नामधेयमित्यादि। तथा च स्वरूपस्य भेदान्न तस्य तथात्वम्। लौकिकक्रियायां तु तदभिव्यञ्जकत्वेन यागादिप्रयोगो भाक्त इत्यदोषः। अक्लेशतयेति तत्तद्यागप्रकरणभेदने-

नामिश्रतया एवं सति पञ्चविधत्वं स्यात् । ततश्च चतुर्विधपदं विरुध्येतेति पक्षान्तरमाहुः अभिव्येत्यादि ॥ १९ ॥ ❀ ❀ ऋग्यजु-रित्यत्र । वेदशब्देत्यादि । वेदानां लक्षणमेवं ज्ञेयम् । सच्छन्दस्कं वाक्यं ऋक् तद्भूयिष्ठो वेदः ऋग्वेदः । एवमग्रेपि । तद्रहितं यजुः । गानप्रयुक्तमुभयं साम । वेदत्रितयभिन्नो वेदोऽथर्व इति । तस्यैभ्य एव निर्गतत्वात् पृथग्लक्षणं प्रसिद्धं नास्ति ॥ २० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तथा भौतिकानां आकाशादिमहाभूतपरिणामरूपाणां भावानां देवमनुष्यादिशरीराणां शक्तिह्रासं च प्रतियुगं तत्कृतं धर्मव्यतिकरकृतं वा वीक्ष्य । तथा अश्रद्दधानान् सन्मार्गश्रद्धारहितान्, निस्सत्त्वान् सत्त्वगुणरहितान् रजस्तमोमयान्, यद्वा दुर्बलानित्यर्थः । दुर्मेधान् मन्दमतीन्, ह्रसितमल्पमायुर्येषां तान् ॥ १७ ॥ ❀ ❀ सर्वत्र हेतुमाह-दुर्भगानिति । पुण्यहीनान् पापयुक्तान् जनान् दिव्येन अलौकिकेन ज्ञानात्मकेन चक्षुषा वीक्ष्य दध्यावित्यन्वयः । तथा चक्षुष्टे हेतुमाह-मुनिरिति, परमात्मयाथात्म्यमननशील इत्यर्थः । तद्धितचिन्तनेऽपि किं स्यादित्याशङ्क्याह-अमोघदृगिति । सत्यसङ्कल्पः सर्वहितकारीत्यर्थः ॥ १८ ॥ ❀ ❀ ततश्च होत्रोपलक्षिताश्चत्वार ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं चातुर्होत्रं कर्म प्रजानां ज्ञानभक्तिहीनानां त्रैवर्णिकानां शुद्धं शुद्धिकरं ध्याने वीक्ष्य यज्ञानां सन्तत्यै अविच्छेदायैकं यज्ञादिकर्मबोधकं प्रथममेकरूपेणावस्थितं वेदं चतुर्विधं यथा स्यात्तथा व्यदधात् व्यभांक्षीत् । कर्मणः शुद्धिकरत्वे हेतुमाह-वैदिकमिति, अतो भ्रमप्रमादविप्रलम्भादि-पुरुषदोषास्पृष्टविधिबोधितमित्यर्थः ॥ १९ ॥ ❀ ❀ चातुर्विध्येन विधानमेव दर्शयति-ऋगिति । ऋगाद्याश्चत्वारो वेदा उद्धृताः, मिश्रीभूतवेदराशेः पृथक्कृत्य सन्निवेशविशेषेण योजिता इत्यर्थः । तत्र ऋग्वेदेन होता यजुर्वेदेनाध्वर्युः सामवेदेनोद्गाता अथर्ववेदेन च ब्रह्मा कर्म करोतीति विवेकः । नन्वत्रैवर्णिकानां स्त्रीणां च कथमुद्धार इत्यपेक्षायामाह-इतिहासेति । इतिहासादिकं च वेदराशेरेवोद्धृतमतस्तत्सर्वं पञ्चमो वेद उच्यते, तदुक्तमार्गेण तेषां निस्तार इति भावः । वेदत्वोक्त्या तेषां वेदादौर्बल्यं परिहृतम् ॥ २० ॥

हिन्दी अनुवाद

उन्होंने सोचा कि वेदोक्त चातुर्होत्र[1] कर्म लोगोंका हृदय शुद्ध करनेवाला है । इस दृष्टिसे यज्ञोंका विस्तार करनेके लिये उन्होंने एक ही वेदके चार विभाग कर दिये ॥ १९ ॥ ❀ ❀ व्यासजीके द्वारा ऋक्, यजुः, साम और अथर्व—इन चार वेदोंका उद्धार (पृथक्करण) हुआ । इतिहास और पुराणोंको पाँचवाँ वेद कहा जाता है ॥ २० ॥

तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशम्पायन एवैको निष्णातो यजुषामुत ॥ २१ ॥
अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः । इतिहासपुराणानां पिता मे रोमहर्षणः ॥ २२ ॥
त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा । शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥ २३ ॥
त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा । एवं चकार भगवान् व्यासः कृपणवत्सलः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दारुणः क्रूरः, अथर्वोक्ताभिचारादिप्रवृत्तेः ॥ २२ ॥ ❀ ❀ व्यस्यन् विभक्तवन्तः ॥ २३ ॥ ❀ ❀ वेदविभाग-प्रयोजनमाह । त एवेति । ये पूर्वमतिमेधाविभिर्धार्यंते स्म ते एव ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

तत्र तेषां वेदानां मध्ये ऋग्वेदप्रवर्त्तकः पैलस्तन्नामर्षिः साम गायति स्वशिष्येभ्यो गमयतीति सामगः । कविः सूक्ष्मदर्शी । एवकारेण मनुष्येषु तत्प्रवर्तकः स एव देवेषु सूर्य इवेत्युक्तम् । यजुषां यजुर्वेदानां निष्णातः कुशलः प्रवर्त्तकतयेति शेषः ॥ २१ ॥ अथर्वांगिरसामथर्ववेदानां निष्णात इति योज्यमत्र । एवमितिहासपुराणानां निष्णात इति "आर्षादिबहुधाख्यानं देवर्षिचरिता-श्रयम् । इतिहासमिति प्रोक्तं भविष्यद्भूतधर्मयुक् ॥" केचित्तु "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् । पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते ॥" किंच "वर्ण्यंते यत्र सर्गाद्याः पञ्च वा दश वा च तत् । पुराणं प्रोच्यते वेदाखिलार्थानां प्रपूरणात् ॥" इति विष्णुपुराण-टीकोक्तेः ॥ २२ ॥ ❀ ❀ शाखिनः शिष्यप्रशिष्यादिभिस्तत्तन्नामपूर्वशाखावंतोऽभवन्नित्यर्थः ॥ २३ ॥ ❀ ❀ व्यास-नामनिर्वचनमाह-दुर्मेधैरल्पमतिभिरपि धार्यते पठित्वाऽवधृतार्थाः क्रियंते । तथा शिष्यप्रशिष्यादिभिः शाखोपशाखाभेदेन चकार व्यसत्तस्माद्व्यास इति भगवान् "व्यासो नारायणः स्वयम्" इत्यादिपुराणात् ॥ २४ ॥

---

१. होता, अध्वर्यु, उद्गाता और ब्रह्मा-ये चार होता हैं । इनके द्वारा सम्पादित होनेवाले अग्निष्टोमादि यज्ञको चातुर्होत्र कहते हैं ।
२. प्रा० पा०—एकस्तु ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अथर्वाङ्गिरसामित्यस्यार्थः अथर्वणामिति । निष्णात इति पूर्वेणान्वयः । अथर्ववेदोक्तमन्त्रेषु निष्णात आसीदित्यर्थः । गङ्गाधरभूधर इत्यादिवदत्र कर्म्मणः शेषत्वविवक्षायां षष्ठीति विवेकः । दारुणः भयानक इत्यर्थः । इतिहासपुराणानामिति । अत्रापि पूर्ववत् निष्णात इत्यनुषञ्जनीयः । ननु 'अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विने'त्यादिपुराणवचनात् कथं सूतस्याध्यापनाधिकारः पाठकत्वेनाधिकारो वेति चेन्मैवं, तस्य भगवदवतारविशेषत्वात् । तथाहि कूर्म्मपुराणीयत्रयोदशाध्यायवचनानि—"वेणपुत्रस्य वितते पुरा पैतामहे मखे । सूतः पौराणिको जज्ञे मायारूपः स्वयं हरिः ॥ प्रवक्ता सर्व्वशास्त्राणां धर्म्मज्ञो गुणवत्सलः । तं मां वित्त मुनिश्रेष्ठाः पूर्वोद्भूतं सनातनम् । एतस्मिन्नन्तरे व्यासः कृष्णद्वैपायनः स्वयम् । श्रावयामास सम्प्रीत्या पुराणं पुरुषोत्तमः ॥ मदन्वये च ये सूताः सम्भूता वेदवर्जिताः । तेषां पुराणवक्तृत्वं वृत्तिरासीदजाज्ञया" इत्यादीनि ॥ २२-२३ ॥

श्रीराधारमाणदासगोस्वामिविरचिता प्रथमस्कन्धे चतुर्थाध्याये दीपनी व्याख्या समाप्ता ॥ ४ ॥

श्रीमद्वीरराघवव्याख्या

तत्र ऋगादीनां मध्ये ऋग्वेदधरः पैलः अध्ययनपूर्वकमृग्वेदं पैलो मुनिर्दधारेत्यर्थः । कविर्विद्वान् जैमिनिस्तु सामगः अध्ययनपूर्वकमृगाधाराणि सामानि जगावित्यर्थः । वैशंपायन एक एव ऋषिर्यजुषां निष्णातः पारंगतः मतः स्मृतः । अवांतरभेदाभिप्रायेण यजुषामित्युक्तम् ॥ २१ ॥ ❀ ❀ एवमथर्वांगिरसामित्यत्रापि तेषां निष्णातः दरुणोपत्यं दारुणः सुमंतुर्नाम मुनिरासीत् । अथर्वाख्यानां गिरांसि तेषामितिहासानां पुराणानां च निष्णातस्तु मे मम सूतस्य पिता लोमहर्षणः ॥ २२ ॥ ❀ ❀ सर्वं एवैते भगवतो व्यासस्यानुग्रहादेव निष्णाता बभूवुरित्यर्थतो द्रष्टव्यम् । ततस्त एते पैलादयः स्वं स्वं वेदं शिष्यैः प्रशिष्यैः शिष्याणामपि शिष्यैस्तेषामपि शिष्यैश्च शिष्यादिद्वारेत्यर्थः । अनेकधा व्यस्यन् व्यभांक्षुरित्यर्थः । ततस्ते वेदाः शाखिनोऽभवन् व्यस्तशाखा अभवंस्तत्र ऋग्वेद एकविंशतिशाखाभेदं प्राप्तः, यजुर्वेदस्तु एकशतधा सामवेदस्तु सहस्रधा आथर्वणस्तु नवधेति विवेकः ॥ २३ ॥ ❀ ❀ किमर्थमेवमात्मना शिष्यादिमुखेन च व्यभांक्षीदित्यपेक्षायां प्रयोजनं दर्शयन् व्यासनाम निर्वक्ति त इति । दुर्मेधैरल्पप्रज्ञैः पुरुषैस्त एते वेदा यथा धार्यंते यथा संनिवेशितेषु धार्यंते एवं तथा चकार भगवान् श्रीव्यासस्तत्र हेतुः कृपणेषु वत्सलः वात्सल्ययुक्तः । यतो वेदान् व्यस्यत् व्यभांक्षीदत एव व्यास इति प्रसिद्धो बभूवेति भावः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वारुणो वरुणपुत्रः सुमंतुर्नाम मुनिरथर्वांगिरसाम् अथर्ववेदानां प्रवर्तक आसीत् । मे पिता रोमहर्षण इतिहासपुराणानां प्रवर्तकः ॥२१॥ ❀ ❀ भगवदाज्ञाप्रवर्तकं चतुर्णां वेदानां शाखोपशाखाभेदेन ऋषिकृतविभागमाह त एवेति । त एव पैलादयः ऋषयः स्वं स्वं वेदमनेकधा व्यस्यन् व्यभजन्नित्यन्वयः । ते वेदाः शिष्यप्रशिष्यादिभिः शाखिनः तन्नामपूर्वशाखावंतोऽभवन्नित्यन्वयः ॥२२॥ ❀ ❀ व्यासनामनिर्वचनायाह त एवेति । दुर्मेधैः अल्पप्रज्ञैः पुरुषैः त एव वेदा यथा धार्यंते पठिताः अवधृतार्थाः क्रियंते एवं तथा शिष्यप्रशिष्यादिभिः शाखोपशाखाभेदेन व्यस्यत् चकार तस्मात् व्यास इति । किमर्थमिति तत्राह कृपणवत्सलः दीनजनस्निग्धः ॥ २३ ॥ ❀ ❀ एवं भगवद्भक्तानां त्रैवर्णिकानां वैदिककर्मानुष्ठानेन शुद्धांतःकरणानामधोक्षजोपासनाजनितज्ञानेन मुक्तिः स्यादिति व्यासेन स्थापितं तदनधिकारिणां स्त्रीशूद्रादीनां हरिभजनं कुत्रोक्तमुपायेनेत्याकांक्षायामाह स्त्रीशूद्रेति । वेदोक्तकर्माख्यश्रेयसि पुरुषार्थसाधने मूढानामत एवानधिकारिणां स्त्रीशूद्रद्विजाधमानां त्रयी त्रयो वेदाः श्रोतुं न योग्याः, इति तस्मादत एवं मया करिष्यमाणभारतादिशास्त्रोक्तविधिना इह जने श्रेयो भवेदिति कृपया मुनिना सर्वज्ञेन व्यासेन भारताख्यानं कृतमित्यन्वयः । अत्रैतत्प्रमेयमवगंतव्यम्—स्त्रीशूद्रादिकृपया भगवता भारताख्यानस्य कृतत्वात्तेषामेव तत्राधिकारो नान्येषामिति शंका मा भूत्, "इतिहासपुराणाभ्यां वेदं समुपबृंहयेदि"ति वचनात् ब्राह्मणादीनामपि वेदार्थपरिज्ञानाय भारताद्यभ्यासस्य आवश्यकत्वेनोक्तत्वादुभयत्राधिकारो युज्यते । तेषां स्त्रीशूद्रादीनां तु गत्यंतराभावात्तदुक्तानुष्ठानेन मुक्तिरिति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एक एवेति पैप्पलादिष्वप्यन्वितम् ॥ २१ ॥ ❀ ❀ अथर्वाङ्गिरसामाथर्वणानाम् ॥ २२-२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

दारुणः अभिचारादिप्रवृत्तेः ॥ २२ ॥ ❀ ❀ व्यस्यन् विभक्तवन्तः ॥ २३-२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यजुषामिति बहुवचनं स्वगतप्रकरणभेदाभिप्रायम्, अथर्वांगिरसामिति बहुवचनं पूर्ववत् । अथर्वसंज्ञकानि अंगिरसा दृष्टानि । आंगिरांसिकप्रकरणानि तेषाम् ॥ २१-२२ ॥ ❀ ❀ ते पैलादयः व्यस्यन् विभक्तवंतः । ते च वेदाः पैलप्रभृति-

शिष्याद्यैर्व्यस्ताः शाखिनोऽभवन्। तत्र ऋग्वेद एकविंशतिशाखाः, यजुर्वेद एकोत्तरशतसंख्याकाः, सामवेदे च सहस्रसंख्याकाः, अथर्वणे तु नवैव शाखा इति विवेकः॥ २३॥ ❀ ❀ दुर्मेधैर्मंदप्रज्ञैः॥ २४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भिन्नेष्वंशप्रतिष्ठापनार्थमाह तत्रेति। अत्र तु क्रमो मंत्राणामिति न विरोधः। पैलादयः ऋषयः॥ २१॥ ❀ ❀ सुमंतुर्दारुण इति आभिचारिकबाहुल्यादिति केचित्। वस्तुतस्तु स्वाभाविकदुष्टत्वात् अग्रे यज्ञेषु तस्याप्रवेश इति। तथाऽपि पाठने हेतुः मुनिरिति। इतिहासपुराणानां सर्वाधिकाराय रोमहर्षण उक्तः॥ २२॥ ❀ ❀ तैः पञ्चभिरपि स्वांशः खंडशो बहुधा व्यस्त इत्याह त एत इति। ऋषित्वात्खंडशो व्यासे न दोषः। शाखानां शाखित्वम्। बहुधा व्यस्ताऽप्येका शाखा धारणेऽशक्या जातेत्याह। त एवेति। दुर्मेधैः बुद्धिरहितैरपि यथा यथावत् अर्थज्ञानाभावेऽपि लक्षणैः समानादिभिः बहुकालाभ्यासेन कथंचिद्धार्यंत इत्यर्थः। अवांतरमुपसंहरति। एवमिति मूर्खसंधारणपर्यंतमेवं कृतवान्। तत्र हेतुः भगवानिति। भगवतः तथैवेच्छा यन्मूर्खपर्यवसानं भविष्यतीति। तर्हि न कर्त्तव्यं स्यात्, अज्ञतानर्थज्ञधारणे वेदानां निर्वीर्यत्वप्रसंग इत्यत आह व्यास इति। व्यासत्वात्कृतवानित्यर्थः। तथाऽपि महतोऽधिकारिणोऽपि नान्यथाकरणमुचितमित्यत आह कृपणवत्सल इति। अपहतपाप्मत्वात्स्वाध्यायस्य तावन्मात्रेणापि कृतार्थता भविष्यतीति प्रजासु दयया कृतवानित्यर्थः॥ २३-२४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तत्रेत्यत्र। ननु धर्मस्य चोदनालक्षणत्वात्तस्याश्च यजुर्वेदसिद्धत्वात् पूर्वं यजुर्वेदः कुतो नोक्तः, किञ्च विभागोक्तौ ऋग्यजुःसामेति क्रमः, अत्र तु 'ऋक्सामयजुषा' मिति विरोध इत्यत आहुः अत्र त्वित्यादि। तथा च 'आदित्यो वा एष एतन्मण्डल' मित्यत्र ऋक्सामयजुषामेव क्रम उक्त इति तं मन्त्रक्रममादायात्र तथोक्तमित्यर्थः॥ २१॥ ❀ ❀ त एत इत्यत्र। खण्डशो व्यास इति। खण्डशो विस्तारे। त एव वेदा इत्यत्र। लक्षणैः समानादिभिरिति। लक्षणैः प्रातिशाख्यग्रन्थैस्तत्रोक्तैः समानादिभिरित्यर्थः। व्यासत्वादिति। तदर्थमधिकारित्वात्॥ २४॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्र ऋगादीनां मध्ये ऋग्वेदधरः पैलः अध्ययनपूर्वकं ऋग्वेदं पैलो मुनिर्दधारेत्यर्थः। कविर्विवेकी जैमिनिस्तु सामगः अध्ययनपूर्वकमृगाधाराणि सामानि जगावित्यर्थः। उत अपि वैशम्पायन ऋषिरेक एव यजुषां निष्णातः पारङ्गत इत्यर्थः। अवान्तरभेदाभिप्रायेण यजुषामिति बहुवचनं, तेषां विस्तृतत्वादेकेन तद्धारणमाश्चर्यमित्येक एवेति विशेषणेन सूचितम्॥ २१॥ ❀ ❀ सुमन्तुनामको मुनिरथर्वाङ्गिरसां पारङ्गत आसीत्। अत्रापि बहुवचनमवान्तरभेदाभिप्रायेण। ननु तत्राभिचारकर्मबाहुल्यात् कथं तेन तदध्ययनं कृतमित्यपेक्षायामाह-दारुण इति, क्रूरस्वभावत्वेन तस्याप्यभिचारप्रियत्वादिति भावः। लोमहर्षणो मे मम पिता इतिहासपुराणानां पारङ्गत आसीदित्यन्वयः॥ २२॥ ❀ ❀ एते पैलादय ऋषयः स्वं स्वं वेदमनेकधा व्यस्यन् व्यभांक्षुस्तथा तेषामपि शिष्यैः प्रशिष्यैर्विभक्तास्त एव वेदाः शाखिनो बहुशाखावन्तोऽभवन्नित्यन्वयः॥ २३॥ ❀ ❀ एवं वेदविभागप्रयोजनमाह-त एवेति। ये तु पूर्वमतिमेधाविभिर्धृता आसंस्त एव वेदा इदानीं दुर्मेधैर्मन्दबुद्धिभिरपि पुरुषैर्यथा धार्यन्ते एवं तथा व्यासो विभागं चकारेत्यन्वयः। यतो वेदान् व्यस्यते इति तन्नामनिरुक्तिरपि सिद्धा। एवं करणे तस्य किं फलमित्यपेक्षायामाह-कृपणवत्सल इति, कृपणेषु दीनेषु वात्सल्ययुक्तः। कृपयैव तत्कृतवान्न फलमुद्दिश्येति भावः। एवं केवलकृपयैव तथाकरणे तत्र सामर्थ्यं च हेतुमाह-भगवानिति। यदि भगवानेवं न कुर्यात्तदा कः कुर्यात्कथं वा कृपणानां पुरुषार्थः सिद्ध्येदिति भावः॥ २४॥

हिन्दी अनुवाद

उनमेंसे ऋग्वेदके पैल, सामगानके विद्वान् जैमिनि एवं यजुर्वेदके एकमात्र स्नातक वैशम्पायन हुए॥ २१॥ ❀ ❀ अथर्ववेदमें प्रवीण हुए दरुणनन्दन सुमन्तु मुनि। इतिहास और पुराणोंके स्नातक मेरे पिता रोमहर्षण थे॥ २२॥ ❀ ❀ इन पूर्वोक्त ऋषियोंने अपनी-अपनी शाखाको और भी अनेक भागोंमें विभक्त कर दिया। इस प्रकार शिष्य, प्रशिष्य और उनके शिष्यों द्वारा वेदोंकी बहुत-सी शाखाएँ बन गयीं॥ २३॥ ❀ ❀ कम समझवाले पुरुषोंपर कृपा करके भगवान् वेदव्यासने इसलिये ऐसा विभाग कर दिया कि जिन लोगोंको स्मरणशक्ति नहीं है या कम है, वे भी वेदोंको धारण कर सकें॥ २४॥

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा। कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २५ ॥
एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः। सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥ २६ ॥
नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ। वितर्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित् ॥ २७ ॥
धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः। मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किंच। स्त्रीशूद्रेति। द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषाम्। कर्मरूपे श्रेयसि श्रेयःसाधने। एवं भवेत् अनेनैव प्रकारेण भवतु। इति अत एव। तेषां कृपया भारताख्यानं मुनिना कृतम् ॥ २५ ॥ ❀ ❀ एवम् अनेन प्रकारेण। भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा ॥ २६ ॥ ❀ ❀ न अतिप्रसीदद् हृदयं यस्य सः। चित्ताप्रसत्तौ हेतुं वितर्कयन् इदम् उवाच स्वगतम् ॥ २७ ॥ ❀ ❀ निर्व्यलीकेन निष्कपटबुद्ध्या। मानिताः पूजिताः ॥ २८–२९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं त्रैवर्णिकानां वैदिककर्मानुष्ठानेन शुद्धान्तःकरणानामधोक्षजोपासनाजनितज्ञानेन मुक्तिस्स्यादिति व्यासदेवेन स्थापितम्। तदनधिकारिणां स्त्रीशूद्रादीनां कथं सा स्यादित्याकांक्षायामाह–स्त्रीशूद्रेति। वेदोक्तकर्माख्यश्रेयसि पुरुषार्थसाधने मूढानामयोग्यानां त्रयी त्रयो वेदाः श्रोतुमप्ययोग्याः कुतोऽध्येतुमिति भावः। इति यस्मादत एवं मया करिष्यमाणभारतशास्त्रोक्तविधिना इह स्त्रीशूद्रजने श्रेयो भवेदिति कृपया मुनिना सर्वज्ञेन श्रीव्यासेन भारताख्यानं कृतमित्यन्वयः। अत्रायं भावः–स्त्रीशूद्रादिकृपया भगवता भारताख्यानस्य कृतत्वात्तेषामेव तत्राधिकारो नान्येषामिति न ध्येयम्। "इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" इति वचनाद् ब्राह्मणादीनामपि वेदार्थज्ञानायावश्यं भारताद्यभ्यासस्योक्तत्वादुभयत्राधिकारो युज्यते। तेषां स्त्रीशूद्रादीनां वेदाक्षरोच्चारणाच्च "शूद्रश्चांडालतां व्रजेत्" इति स्मृतेः। "सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्री शूद्रः स मृतोऽधो गच्छति। तस्मात्सर्वदा नाचष्टे। यद्याचष्टे स आचार्यस्तेनैव मृतोऽधो गच्छति" इति नृसिंहतापनीयोक्तेश्च। सर्वथा साक्षाद्वेदाध्ययनश्रवणादिनिषेधेन गत्यन्तराभावाद्भारताद्युक्तानुष्ठानेन मुक्तिरिति "मूढो योग्ये यथाजाते विचित्ते विकलेऽपि च" इति निरुक्तिः। त्रैवर्णिकेष्वधमाः कुण्डगोलव्रात्यादिरूपाः ॥ २५ ॥ ❀ ❀ साक्षाद्भगवदवतारस्यापि दुर्जनमोहनाय लोकानुकरणमाह–एवमिति हे द्विजा इति। यूयं तु द्विजत्वात्साक्षाद्वेदाधिकारिण एव, कथमस्माकं भद्रं स्यादिति भीर्भवतां नास्तीति भावः। ततः सर्वभूतहितप्रवृत्तेरपि यदा हृदयं नातुष्यत्तदेदं प्रोवाचेत्यग्रिमेणान्वयः। धर्मवित्सर्वधर्मज्ञो व्यासः ॥ २६–२७ ॥ ❀ ❀ धृतव्रतेन लौकिकाचारापेक्षया वेदव्रतधारणावता मया छंदांसि वेदाः गुरवोध्यापकाः त्रेताग्नयः मानिताः सत्कृता अनुशासनमाज्ञा। हिशब्देन विप्रादिभिर्वेदे व्रतादि वैदिकं कर्मावश्यं कर्त्तव्यमित्यसूचि ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

एवं कृतवतापि मुनिना व्यासेन स्त्रीणां शूद्राणां च द्विजबंधूनां त्रैवर्णिकाभासानां च श्रुतिगोचरा श्रवणविषयः त्रयी ऋगादिभिन्नो वेदः न भवति अध्ययनस्योपनयनांगकत्वादुपनयनस्य च त्रैवर्णिकादित्वात् स्त्रीशूद्रादीनां वेदाध्ययनयोग्यता नास्ति। अत एव कर्मश्रेयसि वैदिककर्मसाध्ये श्रेयसि मूढानां पुरुषार्थचतुष्टयतत्साधनविषयकज्ञानविधुराणामन्यथा श्रेयो न भवेदित्थं तु भवेदिति हेतुमालोचयता ॥ २५ ॥ ❀ ❀ कृपया भारतमाख्यानं कृतं हे द्विजाः, एवं सर्वात्मकत्वेन प्रकारेणापि भूतानां लोकानां श्रेयसि निमित्ते सदा प्रवृत्तस्यापि बादरायणस्य हृदयं मनो यदा नातुष्यन्न जहर्ष ततस्तदा नातीव प्रसीदत्प्रसन्नं हृदयं यस्य तथाभूतः शुचौ परिशुद्धे सरस्वत्यास्तटे विविक्ते निर्जने देशे स्थितः वितर्कयन्नसंतोषहेतुः को वेति विचारयन् धर्मविद्बादरायण इदं स्वगतं वक्ष्यमाणमुवाच च ॥ २६–२७ ॥ ❀ ❀ तदेवाह धृतव्रतेनेत्यादिचतुर्भिः। धृतं व्रतं छंदो गुर्वग्निसेवोपयुक्तं येन तेन मया छंदांसि छंदोधिदैवतानि गुरवोऽग्नयो निर्व्यलीकेन निष्कपटभावेन मानिता बहुमानिताः पूजिता इति यावत्, छंदआदीनामनुशासनं गृहीतं कृतं च ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

केन हेतुना कुतः संचोदित इति प्रश्नं परिहरिष्यन् प्रायः कृतावतारकार्यस्य दुर्जनान् मोहयतो व्यासस्य लोकानुकरणप्रकारमाह एवमित्यादिना। हे द्विजाः भूतानां सदा श्रेयसि नित्यमुक्तिसाधने एवं प्रवृत्तस्यापि यदा हृदयं सर्वात्मकेन नातुष्यत् मे मनोवतारप्रयोजनेन सर्वप्रकारेणालमित्यलंबुद्धिं नापत् तदा ॥ २५ ॥ ❀ ❀ धर्मज्ञानी नातिप्रसन्नहृदयः अवतारप्रयोजनानलंबुद्धिमान् सरस्वत्यास्तटे तत्रापि शुचौ देशे विवक्तस्थ एकांते तिष्ठन् लोकदृष्ट्याऽनलंबुद्धिकारणं किं चेति विविधं तर्कयन्

विचारयन्निदं वक्ष्यमाणमेवात्मानं प्रत्युवाचेत्यन्वयः ॥ २६ ॥ ❀ ❀ धृतव्रतेन लौकिकाचारोपेक्षया वेदव्रतधारणवता मया निर्व्यलीकेन निर्व्याजेन चेतसेति शेषः । छंदांसि वेदाः । गुरवोऽध्यापकाः त्रेताग्नयः मानिताः सत्कृताः । अनुशासनमाज्ञा च गृहीता, हिशब्देन विप्रादिभिर्वेदव्रतादि वैदिकं कर्मावश्यं कर्तव्यमिति दर्शयति ॥ २७ ॥ ❀ ❀ यत्र भारते स्त्रीशूद्रादिभिरपि त्रैवर्णिकैरुतानुष्ठेयो धर्मो दृश्यते, तस्य भारतस्य करणे नाम्नायार्थः वेदादिसंप्रत्ययार्थः प्रदर्शितो हि । तत्र किंचिदुर्वरितं नास्तीत्यर्थः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्विजबन्धवः त्रैवर्णिकेषु हीनाः कर्मरूपे श्रेयसि श्रेयःसाधने ॥ २५ ॥ ❀ ❀ सर्वात्मकेन सर्वात्मना, स्वार्थे कः ॥ २६ ॥ ❀ ❀ अतिशयेन न प्रसीदद्धृदयं यस्य सः । चित्ताप्रसत्तौ हेतुं वितर्कयन् स्वगतम् ॥ २७–२९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्त्रीशूद्रद्विजबंधूनां त्रयी श्रुतिगोचरा न भवति, अत एव कर्मश्रेयसि वेदोक्तकर्मके कल्याणे मूढानामिह लोके एवं महाभारतादिप्रतिपादितेन धर्मेण श्रेयो भवेदिति । कृपया मुनिना भारताख्यानं कृतम् । उपलक्षणं चैतत्पुराणानाम् ॥ २५ ॥ ❀ ❀ सर्वात्मकेनापि संपूर्णेनापि यत्नेन भूतानां श्रेयसि सदा प्रवृत्तस्य यदा हृदयं नातुष्यत् न जहर्ष, ततस्तदनंतरं नातिप्रसीदद्धृदयः इदमुवाचेत्युत्तरेणान्वयः ॥ २६ ॥ ❀ ❀ नातिप्रसीदद्धृदयः नातिप्रसीदत् प्रसन्नं हृदयं यस्य तथाभूतः सन् असंतोषहेतुं वितर्कयन् इदं वक्ष्यमाणमुवाच ॥ २७ ॥ ❀ ❀ निर्व्यलीकेन निष्कपटभावेन मानिताः पूजिताः ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

अन्येषामुपायमाह स्त्रीशूद्रद्विजबंधूनामिति । यज्ञद्वारा हि वेदे स्त्रीणामुपयोगः । अवीरवतीनां तु तदभावात् त्रैवर्णिकस्त्रीणामपि वेदश्रवणनिषेधः, शूद्राः स्वतंत्राः नतु सेवकाः, त्रैवर्णिकयाज्ञिकसेवकानां तदन्नभक्षणेन वेदार्थोपयोगिनामापाततो वेदश्रवणस्यावश्यकत्वात्, द्विजबंधवः कुंडगोलकाः संस्काररहिताश्च । तेषामपि श्रुतिश्रवणे नाधिकारः । गोचरशब्दस्तु नियतपुल्लिंगः । केचन गोचरेति छांदसत्वात् पठंति । कर्मश्रेयसि कर्मसाध्ये श्रेयसि पुत्रस्वर्गादौ मूढानां साधनज्ञानरहितानाम् । एवं मनसि विचारितेन प्रकारेण इह अस्मिन्नेवार्थे यद्यपि लौकिकप्रकारेण वेदसाध्यं फलमपि अलौकिकमिति नान्येन तत्सिद्धिः । अथाप्यर्द्धलौकिकन्यायेन भट्टेष्विव पुराणेऽप्यर्द्धलौकिकन्यायेन वा भारतादिना कार्यं सेत्स्यतीति भावः । एवमभिप्रेत्य यत्कृतवान् तदाह इति भारतमिति । भरतवंशोत्पन्नानां संबंधि भारतम् । आख्यानमिति वचनात् । न केवलं ग्रंथनाम किंत्वन्यार्थं तेन भारतश्रवणात् मायामोहाभावाद्धर्मादीनां तत्तत्त्वावगतिः सुगमेति मननादवगम्य परदुःखप्रहाणेच्छया कृतमित्यर्थः ॥ २५ ॥ ❀ ❀ एवं व्यासस्य परोपकारलक्षणो धर्मो महान् वेदव्यासे सिद्धः । धर्मस्य चान्तःकरणपरितोषः फलम् । तदभावे धर्मः श्रम इति पूर्वमुक्तम् । अत्र दुःखहेतुरिति वक्तुं पूर्वोक्तस्मारणार्थं द्विजा इति संबोधनम् । अधीतावधारणं हि द्विजधर्मः । किंच केवलं धर्मव्यभिचारेऽपि ज्ञानसहितस्य न तथात्वम् । इह तु तादृशोऽपि नांतःकरणसुखजनको जात इत्याह—सर्वात्मकेनापीति । सर्वत्र आत्मा येन तत्सर्वात्मकं ज्ञानं अथवा दयावत् अन्ये प्रकाराः सर्वे कृताः, सर्वप्रकारेणापि धर्मेणेत्यर्थः ॥ २६ ॥ ❀ ❀ अधिकारित्वात्फलाभावो जात इत्याह नातिप्रसीदद्धृदय इति । धर्मात्स्वस्यापि फलाभावे कथमन्यस्य भविष्यतीति सर्वनाशादप्रसादः । भगवदिच्छया काचिदन्यथा वर्तत इति ज्ञानावतारत्वेन ज्ञात्वा किंचित् प्रसीदद्धृदयो जातः । न त्वत्यंतं प्रसीदद्धृदय इति पूर्ववत् ज्ञानोदयो भविष्यतीति सरस्वत्यास्तट इत्युक्तम् । शुचाविति पापसंबंधाभाव उक्तः । एवं शुद्धदेशे स्वार्थचिंतायां तर्केण कश्चिन्निर्धार उत्पन्न इत्याह वितर्कयन्निति । विविक्तस्थः एकांतस्थो महाधिकारित्वात् । इदं वक्ष्यमाणं धर्मवित् धर्मस्याव्यभिचारसाधनत्वं जानातीत्यर्थः ॥ २७ ॥ ❀ ❀ तत्र प्रथमं धर्ममाह धृतव्रतेनेति द्वाभ्याम् । ब्रह्मचर्यव्रतानि वेदव्रतानि च धृतानि येन छंदांसि वेदाः तेषां सम्माननं तदुक्तार्थस्य ज्ञात्वाऽनुष्ठानं गुरवोऽपि प्रसादिताः । अग्नयः सुहुताः । एतदेव सम्माननं व्यलीकं कपटम् ईश्वरवल्लोकप्रवर्त्तनार्थं पाखंडिवद्वंचनार्थं वा । अनुशासनमध्यापनम् ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स्त्रीशूद्रेत्यत्र । अवीरवतीनामिति पतिपुत्रहीनानाम् । अस्मिन्नर्थ इति मनसि विचारित एवार्थ इत्यर्थः । ननु त्रयीसाध्यस्य फलस्य भारतेन कथं सिद्धिरित्याकाङ्क्षायामेवंपदोक्तं विचारितप्रकारमाहुः यद्यपीत्यादि । अर्धलौकिकन्यायेन भट्टेष्विति । भट्टमते यथा लौकिकक्रियारूपस्य यागस्यापूर्वरूपालौकिकव्यापारवत्तयार्धलौकिकत्वम्, तथा पुराणेषु भारते च सर्वाधिकारिकत्वाद्वेदव्याख्यानरूपत्वाच्च तथेति तेन न्यायेनेत्यर्थः । अन्यार्थमिति प्रकथनार्थम् । तथात्वावगतिरिति अलौकिकत्वावगतिः ॥ २५ ॥ ❀ ❀ एवं प्रवृत्तस्येत्यत्र । वेदव्यास इति भारतरूपे वेदव्याख्याने । श्रीधरोक्तं व्याख्यानं सङ्गृह्णते अथवेत्यादि । तथा च

सर्वप्रकारेण (दया) यथा कृता, तथा अत्रानुक्ता अपि धर्मस्य प्रकारास्तदर्थं कृता इति धर्मस्यैव सर्वात्मकत्वमिति भावः ॥ २६ ॥ ❀ ❀ नातिप्रसीददित्यत्र । अधिकारित्वादित्यादि । यो हि यत्राधिकृतः, तस्य पूर्णे स्वकार्ये निष्पन्ने तोष इति तदभावात्फलाभाव इत्यर्थः । महाधिकारित्वादिति । एकान्तस्थित्यभावे धर्मादिप्रश्नकर्तॄणां बहूनामागमनादिना वैयग्र्यापत्तेरिति भावः ॥ २७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

द्विजबन्धवो यथोचितकालसंस्कारादिरहितास्त्रैवर्णिकाभासाः । वेदत्रयी स्त्र्यादीनां श्रुतिगोचरा श्रवणयोग्या न भवति, अतो वेदोक्ते कर्मणि श्रेयसि तत्फले च मूढानामुभयज्ञानरहितानां तेषामिह जन्मनि संसारे वा श्रेयः फलं एवमितिहासादिश्रवणद्वारेण भवेन्नान्यथेति विचार्य मुनिना व्यासेन कृपया भारतमाख्यानं कृतमिति सार्द्धस्यान्वयः ॥ २५ ॥ ❀ ❀ स्वकर्त्तव्यस्य सम्पन्नत्वे चित्तसन्तोष आवश्यक इति तु द्विजत्वाद्भवतामपि विदितमेवेति सूचयन् सम्बोधयति–हे द्विजा इति । एवमुक्तप्रकारेण सर्वात्मना सर्वथाऽपि भूतानां श्रेयसि हिते उपकारे प्रवृत्तस्यापि व्यासस्य यदा ततस्तस्मात् स्वकृत्यकरणात् हृदयं मनो नातुष्यत् सन्तोषं प्रसन्नतां न प्राप ॥ २६ ॥ ❀ ❀ तदा नातिप्रसीदत् प्रसन्नं हृदयं यस्य स व्यासः चित्तैकाग्र्यार्थं शुचौ परिशुद्धे सरस्वत्यास्तटे विविक्ते निर्जने देशे स्थितो वितर्कयन् ममासन्तोषहेतुः को वेति विचारयन् इदं वक्ष्यमाणं स्वमनस्येव प्रोवाचेत्यन्वयः । एवं वितर्कणे हेतुमाह–धर्मविदिति । अधिकारित्वाद्यदि मत्कृतेन ममैव सन्तोषरूपफलं न जातं तर्हि ततोऽन्येषां किं भविष्यतीति धर्मरहस्यं वेत्तीति तथा ॥ २७ ॥ ❀ ❀ तद्वितर्कवाक्यान्येव दर्शयति–धृतव्रतेनेत्यादिभिश्चतुर्भिः । धृतं व्रतं छन्दोगुर्वग्निसेवोपयुक्तब्रह्मचर्यादि येन तथाभूतेन मया निर्व्यलीकेन व्यलीकं कपटं श्रद्धाविश्वासादिराहित्यं तद्राहित्येन श्रद्धादिपूर्वकं छन्दआदयो मानिताः पूजिताः । छन्दांसि वेदास्तेषां पूजा अध्ययनम् । गुरुपूजा प्रसिद्धा । अग्निपूजा होमः । तेषामनुशासनं च गृहीतम्, तदुक्तं च कृतमित्यर्थः । अत्र न सन्देह इति सूचयन्नाह–हीति ॥ २८ ॥

हिन्दी अनुवाद

स्त्री, शूद्र और पतित द्विजाति—तीनों ही वेद-श्रवणके अधिकारी नहीं हैं । इसलिये वे कल्याणकारी शास्त्रोक्त कर्मोंके आचरणमें भूल कर बैठते हैं । अब इसके द्वारा उनका भी कल्याण हो जाय, यह सोचकर महामुनि व्यासजीने बड़ी कृपा करके महाभारत इतिहासकी रचना की ॥ २५ ॥ ❀ ❀ शौनकादि ऋषियो ! यद्यपि व्यासजी इस प्रकार अपनी पूरी शक्तिसे सदा-सर्वदा प्राणियोंके कल्याणमें ही लगे रहे तथापि उनके हृदयको सन्तोष नहीं हुआ ॥ २६ ॥ ❀ ❀ उनका मन कुछ खिन्न-सा हो गया । सरस्वती नदीके पवित्र तटपर एकान्तमें बैठकर धर्मवेत्ता व्यासजी मन-ही-मन विचार करते हुए इस प्रकार कहने लगे–॥ २७ ॥ ❀ ❀ 'मैंने निष्कपट भावसे ब्रह्मचर्यादि व्रतोंका पालन करते हुए वेद, गुरुजन और अग्नियोंका सम्मान किया है और उनकी आज्ञाका पालन किया है ॥ २८ ॥

भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः । दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥ २९ ॥
तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः । असम्पन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ॥ ३० ॥
किं वा भागवता धर्मा न प्रायेण निरूपिताः । प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३१ ॥
तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः । कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥ ३२ ॥
तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः । पूजयामास विधिवन्नारदं सुरपूजितम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने [1]चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दैह्यः देहे भवः आत्मा जीवः, वस्तुतो विभुः परिपूर्ण एव आत्मना स्वेन रूपेणासंपन्नः तादात्म्यमप्राप्त इवाभाति । ब्रह्मवर्चसं वेदश्रवणाध्यापनोत्कर्षजं तेजः तत्र साधवः ब्रह्मवर्चस्याः तेषु सत्तमः अतिश्रेष्ठोऽपि । यद्वा न केवलमसंपन्न इव आभाति, प्रत्युत ब्रह्मवर्चसी ब्रह्मवर्चसवानपि असत्तम इव आभाति । पाठांतरे कमनीयतमोऽपीति ॥ ३० ॥ ❀ ❀ असंपत्तौ हेतुं स्वयमेवाशंकते किं वेति । प्रायेण भूयस्त्वेन हि यस्मात् ते एव धर्माः अच्युतस्य प्रियाः ॥ ३१ ॥ ❀ ❀ खिलं न्यूनम् । खिद्यतः खेदं प्राप्नुवतः । कृष्णस्य व्यासस्य । प्रागुदाहृतं सरस्वतीतीरस्थम् ॥ ३२ ॥ ❀ ❀ तं नारदम् आगतम् अभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास । सुरपूजितमिति । ब्रह्मलोकादागतमित्यर्थः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे भावार्थदीपिकायां टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

---

१. अत्र प्राचीने पाठे 'नारदागमनं' इत्यधिकः पाठः ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आम्नायतेऽभ्यस्यते त्रिवर्णैरित्याम्नायः । यद्वाम्नायते पुरुषार्थचतुष्टयमनेनेत्याम्नायो वेदः "श्रुतिः स्त्री वेद आम्नायः" इत्यमरः । यत्र भारते आदिनात्यजादिग्रहः । अपि नो । तेन च न केवलं स्त्रीशूद्रादिभिरेवापि तु ब्राह्मणादिभिरपीत्युच्यते ॥ २९ ॥ ❀ ❀ अथापि एवं सत्यपि भूतश्रेयसि प्रवृत्तस्यापीत्यर्थः । तादात्म्यं तादृप्यम् । वस्तुत इवेन प्राप्तिरेवोक्तेति 'स्वगुणाविष्क्रिया दोष' इत्युक्तेः स्वात्मश्लाघामयोग्यां मत्वाह-यद्वेति । पाठांतरे ब्रह्मवर्चस्युशत्तम इति पाठे ॥ ३० ॥ ❀ ❀ असंपत्तौ तादात्म्याप्राप्तौ । अत्र भागवतधर्मपदेन ज्ञानं व्याख्यातुं न शक्यते किन्तु भक्तिरेव "नामान्यनन्तस्य यशोंकितानि" इति "भवतानुदितप्रायो यशो भगवतोऽमलम्" इत्यादेः । ततश्च परमहंसपदेनाप्यत्र भक्ता एव ग्राह्याः । सारग्राहित्वात् "सारोत्र श्रीहरेर्भक्तिस्तदन्योऽसार एव हि" इत्युक्तेः । अतः पारमहंसी संहितेयं श्रीभागवतमिति ज्ञानिभिरेवात्र स्वत्वं नारोपणीयमिति ॥ ३१ ॥ ❀ ❀ "कृष्णः श्रीवासुदेवे च सत्यवत्याः सुतेऽर्जुने" इत्यभिधानात् । अत्र भगवदवतारत्वादसंभाविनाप्यसर्वज्ञताचित्ताप्रसादौ व्यासस्य स्वयं भगवता श्रीकृष्णेनैव स्वसदृशस्य सर्वशास्त्रशिरोमणेः श्रीभागवतस्य प्रादुर्भावार्थमेव बलादुपपादिताविव्यवसीयते । यथा ब्रह्ममोहनप्रस्तावे स्वलीलासौंदर्यार्थं श्रीबलदेवस्याप्यसर्वज्ञता कल्पिता । नारदोपदेशात्प्रादुर्भूते च यस्मिन् "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा" इति । "किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः" इति वाक्याभ्यां सर्वार्थमुख्यो मोक्षोपि भक्त्यैव लभ्यते, न तु साधनान्तरेणेति सर्वशास्त्रविलक्षणार्थः सर्वैरेव दृष्टो भवतीति ज्ञेयः ॥ ३२ ॥ ❀ ❀ विधिवत् विधिं ब्रह्माणमिव । "इव वद्वा च सादृश्ये" इत्यभिधानादत्र वच्छब्देन सह समासः । यथा विधातुः पूजा क्रियते तद्वन्नारदमपूजयदित्यर्थः । यद्वा यथा स्वाश्रमागतमहतां पूजा विहिता तथा पाद्यार्घ्यादिभिरर्चयामासेत्यर्थः ॥ ३३ ॥

इति श्रीमद्भागवते प्रथमस्कन्धे भावार्थदीपिकाप्रकाशे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवव्याख्या

किंच भारतव्यपदेशेन भारतव्याजेनाम्नायानां वेदानामर्थश्च दर्शितः । भारतं विशिनष्टि यत्र भारते स्त्रीशूद्रादिभिरपि धर्मो दृश्यते स्वसापेक्षितश्रेयःसाधनः स्वानुरूपो धर्मो दृश्यतेऽवगम्यते ॥ २९ ॥ ❀ ❀ अथाप्येवं सति बतेति खेदे, मे मम दैह्यः देहस्थो विभुः प्रभुरात्मा प्रत्यगात्मा आत्मनांतःकरणेन सह । यद्वा दैह्यो विभुरात्मांतःकरणमात्मना स्वयं ब्रह्मवर्चसि कृतस्वाध्यायनिमित्ते तेजसि, समासांतविधेरनित्यत्वात् 'ब्रह्महस्तिभ्यां वर्चसः" इत्यजभावः, उशत्तमः शुद्धतमोप्यसंपन्न इवासमृद्ध इवाभाति । असत्तम इति पाठे ब्रह्मवर्चस्यरहित इवाभाति यथाऽसत्तमः असज्जनतम इवाभाति तद्वत् ॥ ३० ॥ ❀ ❀ एवं वितर्क्य सूक्ष्मदर्शित्वादसंतोषहेतुमुत्प्रेक्षते किंवेति । यतो भागवता धर्माः प्रायशो मया न निरूपिताः, ततो वासौ किमसंतोषः पारिशेष्यादयमेव भागवतधर्मानिरूपणमेवासंतोषहेतुर्भवितुमर्हतीत्यभिप्रायेणानिरूपणस्यासंतोषहेतुत्वमुपपादयति प्रिया इति । सर्वांतरात्मनि भगवति प्रीते सति हि तन्नियाम्यस्य मनसस्तोषः । स च भगवान्भागवतेषु तुष्टेषु सत्सु स्वयं तुष्यति, तेषां च संतोषहेतवस्त एव भागवतधर्मा एव, तदनिरूपणादुचित एवासंतोष इति भावः । प्रायेणेत्यनेन कचित् कचिदेव भारते भागवतधर्मनिरूपणमिति सूचितम् ॥ ३१ ॥ ❀ ❀ एवमित्थमात्मानं खिलं न्यूनं मन्यमानस्यात एव खिद्यतस्तस्य कृष्णस्य व्यासस्य प्रागुदाहृतं पूर्वमुक्तसरस्वतीतीरस्थाश्रमं प्रति नारदोऽभ्यागादभ्यागच्छत् ॥ ३२ ॥ ❀ ❀ तमागतमभिज्ञाय चिह्नैर्नारदमुनिं ज्ञात्वा सहसा त्वरया विधिवत्पूजयामास । कथंभूतं सुरैः पूजितं पूज्यमानं "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथापि भारतकृत्या आम्नायार्थप्रदर्शनानंतरमपि दैह्यो देहरूप आत्मा आत्मना स्वत एव विभुर्व्याप्तो मे ममात्मा अवतारप्रयोजनासंपत्त्या असंपन्नोऽप्राप्तप्रयोजन इवाभाति । कीदृशः ब्रह्मवर्चस्विसत्तमः वृत्ताध्ययनसंपन्नानां मध्ये श्रेष्ठ इत्यन्वयः । ब्रह्मवर्चस्यसत्तम इति पाठेप्ययमेवार्थः ॥ २९ ॥ ❀ ❀ प्राय इदमेवानलंबुद्धौ कारणमाह किं वेति । भागवताधर्माः प्रायेण न निरूपिताः । किंच भारते निरूपिता अपि पुनः शास्त्रांतरेण निरूपणीया इत्यतः प्रायेणेत्युक्तम् । किंविशिष्टाः परमहंसानां प्रियाः । ततः किं ते परमहंसा एवाच्युतप्रियाः, हि यस्मादसंपन्न इवाभातीति भावः ॥ ३० ॥ ❀ ❀ केनचित्प्रेरित एव महापुरुषः स्वकार्ये प्रवर्तेत इति न्यायात् भागवतकृतिरेवालंबुद्धिहेतुरिति निश्चयवानपि नारदप्रेरितः भागवतमकार्षीदिति नारदस्य लोके महती कीर्तिः स्यादिति भक्तवत्सलत्वान्नारदागमनमाकांक्षमाणं व्यासं प्रति तदागमनमाह तस्येति । खिन्नम् अनलंबुद्धिमाप्तम् अतः खिद्यतः खिद्यमानस्य अनलंबुद्धिं गतस्य ॥ ३१ ॥ ❀ ❀ अभिज्ञाय संज्ञापूर्वकं विज्ञाय सहसा कालक्षेपमंतरेण सरस्वतीतीरवर्तिस्वाश्रमस्थितो भागवतधर्मज्ञापनहेतोर्नारदेन चोदितः श्रीकृष्णो भागवतसंहितामकरोदिति शौनकप्रश्नपरिहारः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विभुः स्वतः ज्ञानादिसम्पन्नोऽपि आत्मना भगवता असम्पन्न इव तद्धेतुकसम्पत्तिविशेषमप्राप्त इवाभाति । यो हि वक्ष्यते श्रीनारदेन इमं स्वनिगममित्यन्तेन ग्रन्थेन । उशत्तम इति पाठे ब्रह्मवर्चसीति ज्ञेयम् ॥ ३० ॥ ❀ ❀ स्वयमपि तथैवाह प्रिया इति ॥ ३१-३३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

दैह्यः देहस्थः आत्मना स्वरूपेण विभुस्तपोज्ञानादिभिः परिपूर्णोऽपि असम्पन्न इव अपूर्ण इव । न केवलमसम्पन्न इव किन्तु ब्रह्मवर्चसं वेदश्रवणाध्यापनोत्कर्षजं तेजस्तद्वानपि असत्तम इव । उशत्तम इति पाठे कमनीयतमोऽपि । तथा समासांताभावे मत्वर्थीयविन्प्रत्ययेन ब्रह्मवर्चस्वी असत्तम इति उशत्तम इत्याभ्यां वकारवत्संयोगेन पाठद्वयम् ॥ ३० ॥ ❀ ❀ असम्पत्तौ हेतुं स्वयमेवाशङ्कते किम्वेति । प्रायेण भूयस्त्वेन । त एव परमहंसा एव । अत्र भागवतधर्मपदेन ज्ञानं व्याख्यातुं न शक्यते, किन्तु भक्तिरेव 'नामान्यनन्तस्य यशोऽङ्कितानीति, भवतानुदितप्रायं यशो भगवतोऽमलमि'त्यादेः । ततश्च परमहंसपदेन भक्ता एवोच्यन्ते न तु ज्ञानिनः । अतः पारमहंसी संहितेयं श्रीभागवतमिति ज्ञानिभिरत्र स्वत्वं नारोपणीयम् ॥ ३१ ॥ ❀ ❀ खिलं न्यूनम् । कृष्णस्य व्यासस्य आश्रमं प्रागुदाहृतं सरस्वतीतटस्थम् । अत्र भगवदवतारत्वादसम्भाविनावप्यसर्वज्ञताचित्ताप्रसादौ व्यासस्य स्वयं भगवता श्रीकृष्णेनैव स्वसदृशस्य सर्वशास्त्रशिरोमणेः श्रीभागवतस्य प्रादुर्भावार्थमेव बलादुपपादिताविल्यवसीयते । यथा ब्रह्ममोहनप्रस्तावे स्वलीलासौन्दर्यार्थं बलदेवस्यापि असर्वज्ञता कल्पिता । नारदोपदेशात् प्रादुर्भूते च सति यस्मिन् 'सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'ति । 'किम्वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किम्वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः' इति वाक्याभ्यां सर्वपुरुषार्थमुख्यो मोक्षोऽपि भक्त्यैव लभ्यते, न तु साधनान्तरेणेति सर्वशास्त्रविलक्षणोऽर्थः सर्वैरेव दृष्टो भवतीति ज्ञेयम् ॥ ३२ ॥ ❀ ❀ विधिवत् विधिं ब्रह्माणमिव । 'इव वद् वा व सादृश्ये' इत्यभिधानम् । अत्र वत्शब्देन सह समासः ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुर्थः प्रथमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भारतव्यपदेशेन भारतव्याजेन यत्र भारते स्त्रीशूद्रादिभिः स्त्रीशूद्रद्विजबंधुभिरपि धर्मादि धर्मार्थकाममोक्षं दृश्यते ॥ २९ ॥ ❀ ❀ बतेति खेदे, अहो कष्टम्, दैह्यो देहस्थो विभुः ब्रह्मवर्चसि शब्दब्रह्मश्रवणाध्ययनोत्कर्षजे तेजसि उशत्तमः कमनीयतमोपि आत्मना स्वयम् असंपन्नः असमृद्ध इवाभाति 'ब्रह्महस्तिभ्यां वर्चस' इत्यजभावः, समासांतविधेरनित्यत्वात् ॥ ३० ॥ ❀ ❀ असंतोषहेतुं स्वयमेव शंकामुखेनाह किंवेति ॥ ३१ ॥ ❀ ❀ खिलम् न्यूनम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

भारतकरणं च धर्मार्थमेवेत्याह भारतव्यपदेशेनेति । वस्तुतः कल्पसूत्रवत् वेदार्थप्रतिपादक एव इतिहासवाचकशब्दकरणं तु व्याजमात्रम् । तदाह भारत इति व्यपदेशमात्रम् अन्यथा शूद्रादीनामधिकारो न स्यादिति हिशब्दार्थः । आम्नाये दृष्टांतार्थमुक्तो धर्मः लौकिकोऽत्र प्रयुक्तो न तु यज्ञादिः 'धन्वन्निव प्रपाऽसी'त्यादौ यथा । अत एव वेदे प्रतिपादितधर्मो न शूद्रादिभिर्ज्ञातुं शक्यः, अत्र तु शक्य इत्याह । दृश्यत इति उपदेशव्यतिरेकेणापि ज्ञायत इत्यर्थः ॥ २९ ॥ ❀ ❀ एवं धर्मान्निरूप्य तेषां फलव्यभिचारमाह अथापीति । धर्मकरणे प्रयासस्मरणात् । बतेति नित्यानामुपाधिभेदात् भेदं मन्यते ब्राह्मणदेह एव आत्मनो ब्राह्मणोऽहमिति बुद्धिः न देहांतरे । मानसश्च योगी भवति अन्नमयत्वात् । नैयायिकवद्वा मनसो भेदः । अध्यासेन वा भेदः अग्निवत्संक्रमणेन वा । तदाह दैह्यो ह्यात्मा तेनैव देहाभिमानिना न संतुष्यति । चकारान्मानसश्च । यथा देहाभिमानी दैहिकान् विषयान् प्राप्य तुष्यति तथांतःकरणाभिमानी तद्विषयान् । तत्र विषयाभावं निवारयति विभुरिति । सर्वसमर्थोऽयमात्मा । असंपन्न इव प्राप्यापि सर्वविषयानसंपन्नः । इवेति कदाचित् कदाचित्तथा स्फुरणात् । स्वस्मिन्विरुद्धधर्मावभासमाह ब्रह्मवर्चस्व्यसत्तम इति । वस्तुतो ब्रह्मवर्चस्वी, प्रतीतिरसत्तम इति । पाठांतरे तु ब्रह्मवर्चस्येन सत्तमः ब्राह्मणानां हि ब्रह्मवर्चस्यमेव फलम् । तत्संपत्तावप्यसंपन्न एवेति वा विरोधः ॥ ३० ॥ ❀ ❀ कार्ये सति कारणस्यावश्यकत्वात् कारणजिज्ञासायां योगजधर्मेण स्फुरितं कारणमाह किं वेति । भागवताः प्रमाणतः साधनतः फलतश्च भगवत्संबंधिनः । ते अनुष्ठिता अपि न निरूपिताः, अधिकारो हि निरूपणे । सर्वे धर्मा निरूपिताः सर्वेषां न परमहंसानाम् । यद्यपि तुर्याश्रमधर्मा निरूपिताः

अवधूतधर्माश्च, तथाऽपि ते न तेषां प्रियाः क्लेशभूयैल्पसारत्वात् । नन्वानुशासनिके तेऽपि निरूपिताः । तत आह प्रायेणेति । भागवता धर्मास्तु स्वतंत्राः, ते ह्यन्यशेषेण निरूपिता न निरूपिता एव । आनुशासनिके हि कालादिशेषत्वेन निरूपिताः । परमस्य हंसाः परमहंसाः परमाश्च ते हंसाश्चेत्यत्रापि परमत्वं भगवदीयत्वेनैव । परमहंसत्वसाधका एवान्ये धर्माः । सिद्धे पुनः परमहंसत्वे भगवद्धर्मा एव प्रियाः परमात्मत्वाद्भगवतः । गंगादर्शनानन्तरं यथा गंगादेवतादिदृक्षा तथात्मज्ञानानंतरं परमात्मदिदृक्षा सा धर्मैरेव संपद्यत इति । ननु तथापि कोऽयमत्याग्रहस्तत्राह त एव हि अच्युतप्रिया इति । त एव धर्मा एव हीति आत्मपर्यवसानात् । यदि ते परमहंसास्तदापारंपर्याद्गौणता भगवतो भगवदीयानां च प्रिया इत्यर्थः । पाखंडनिवृत्तये स्वाश्रमपदप्रयोगः मुख्ये संप्रत्यय इति च ॥ ३१ ॥ ❀ ❀ एतादृशे विषये नारदस्याधिकारात्कथमागत इत्याह तस्येति । खिलं न्यूनं स्वत एव भगवद्धर्मनिरूपणे तु पूर्वोक्तभारतादेरस्य च विरोधात् विरुद्धवक्तृत्वेनाप्रामाण्यं स्यात् । अतः खिद्यता नारदवचनात्तु तथा कथने न विरोधः । कृष्णस्येति वाच्यनाम्नोत्तमवक्तृत्वं बोधयति । अथवा कृष्णस्य नारद इति प्रागुदाहृतं सरस्वतीतटे ॥ ३२ ॥ ❀ ❀ साकांक्षस्य कृत्यमाह तमभिज्ञायेति । नारदेति स्वकार्यसाधक इति वा, सहसेति अनभ्युत्थानकालेपि मुनिः अकालाभ्युत्थानयोर्गुणदोषद्रष्टा विधिवद् गुरुजनपूजायां यो विधिः । अथवा विधिमिव नारदस्य ब्रह्मपूजेव शुद्धसात्त्विकानामपि किंचिज्ज्ञेयमस्ति अत एव देवैर्नारदपूजनम् , अत एव स्वस्यापीति नात्रालौकिकं किंचित् ॥ ३३ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भारतव्यपदेशेनेत्यत्र । कल्पसूत्रवन्मुख्यवेदार्थप्रतिपादकत्वे शूद्रादीनां द्रष्टृत्वं न स्यात् , अन्यप्रतिपादकत्वे आम्नायार्थदर्शकत्वं भारते न स्यादित्युभयसामञ्जस्यार्थं यादृशो धर्मो भारते प्रतिपादितस्तमाहुः आम्नाय इत्यादिना । तथा चात एवाधोलौकिकत्वं तदुक्तधर्मस्येति भावः ॥ २९ ॥ ❀ ❀ अथापीत्यत्र । फलव्यभिचारमुपपादयन्ति आत्मनामित्यादि । अयमर्थः सत्त्वशुद्धौ कैवल्यस्फूर्तेस्तदभावे भेदस्फुरणाद्देहाद्युपाधिभेदमादायात्मनां भेदं मन्यते । तथा च देह्य इत्यादिप्रयोगेण सर्वात्मभावतिरोभावो ज्ञाप्यते । तेन फलव्यभिचार उपपन्न इति भावः । देह्यत्व उपपत्तिमाहुः ब्राह्मणेत्यादि । नन्वात्मनो देह्यत्वं देहात्मस्फूर्तौ, व्यासस्य तु योगित्वात् तदभाव इति कथमियमुक्तिरित्यत आहुः मानसश्च योगीति । मनसि साधुर्मानसः । तथा च योगिनो मानसत्वेन योगिमतेपि पुरुषभेदाङ्गीकारात् ततोपि न सर्वात्मभाव इति भावः । तन्मतेपि पुरुषाणां व्यापकत्वाद्विवक्षितो भेदो नोपपन्न इत्यरुच्या पक्षान्तरमाहुः अन्नेत्यादि । श्रौतविचारे अन्नांशभेदान्नैयायिकविचारे द्रव्यान्तरत्वान्मनसो भेद इति तमुपाधीकृत्य वा आत्मभेद इत्यर्थः । एवमप्येकस्यात्मन एकस्यैव मनस उपाधित्वाद्–'मे देह्य' इति स्वस्य देह्याद्भेदो न सङ्गच्छत इत्यतः पक्षद्वयमन्यदाहुः-अध्यासेनेत्यादि । अग्निवत्सङ्क्रमणं नाम चिदात्मनस्तत्तद्वृत्त्युपारोहः । तथा सति तत्तद्वृत्तिभेदात्सङ्क्रान्तस्यापि भेद इति प्रयोगोपपत्तिरित्यर्थः । तत्रेति, देहे । तथा स्फुरणादिति असम्पन्नत्वस्फुरणात् । स्वस्मिन्निति । मे इत्यनेनोक्ते सङ्घातरूपात्मनि । ब्रह्मवर्चस्येनेति । 'ब्रह्मवर्चसादुपसङ्ख्यानमि'ति वार्तिकेन निमित्तार्थे यत् , निमित्तं चात्र संयोगः । तथा च वेदाध्ययनाध्यापनाद्युत्कर्षजन्या चेतनकान्तिर्ब्रह्मवर्चसं तत्संयोगेनेत्यर्थः ॥ ३० ॥ ❀ ❀ किं वेत्यत्र । त एवेत्यत्र त इत्यनेन धर्मा एवोच्यन्ते, न तु सन्निहिता अपि परमहंसा इत्याहुः यदीत्यादि । पारम्पर्यादक्षरनिष्ठत्वाद्गौणता, न तु मुख्यत्वम् । तथा च तेष्वच्युतप्रियत्वस्यासम्भवान्मूलविरोधः स्यादिति तच्छब्दस्य व्यवहितपरामर्शित्वमेव युक्तमित्यर्थः ॥ ३१ ॥ ❀ ❀ आश्रमपदप्रयोग इति परमहंसपदप्रयोगः । ननु भागवतधर्माणां सर्वाधिकारत्वात् कथं परमहंसपदप्रयोग इत्यतः आहुः मुख्येत्यादि । एतादृश इति योग्याज्ञानदानरूपे । तस्येत्यत्र । कथमिति किमर्थमित्यर्थः । न विरोध इति पश्चाज्ज्ञानेन कथनान्न विरोधः ॥ ३२ ॥ ❀ ❀ तमित्यत्र । साकाङ्क्षस्येति । खेदनिवृत्तिसाकाङ्क्षस्य । अभिज्ञायास्त्रिविधं स्वरूपमाहुः नारदेत्यादि । स्व इति आत्मीयः । अत्रेति उक्तविधे खेदे । अलौकिकमिति अदृष्टार्थम् ॥ ३३ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे चतुर्थाध्यायविवरणम् ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

किञ्च भारतव्यपदेशेन भारतनिरूपणव्याजेन आम्नायानां वेदानामर्थश्च दर्शितः । यत्र भारते तु स्त्रीशूद्रादिभिरप्यनुष्ठेयं धर्मादि दृश्यते । अन्यथा वैदिककर्मणि तेषामधिकाराभावात् पुरुषार्थो न सिद्ध्येदित्यनेन तेषामप्युपकारो जातः । अत्रापि सन्देहाभावज्ञापनाय हिशब्दप्रयोगः ॥ २९ ॥ ❀ ❀ एवं स्वाचरितान् धर्मान्निरूप्य तेषां फलव्यभिचारमाह–अथेति । अथ तस्मादेवं धर्माचरणात् मे मम देह्यो देहाभिमानी–चकारान्मनसो मनोभिमानी च–आत्मा जीवो ब्रह्मवर्चस्यसत्तमः ब्रह्मवर्चसं वेदाध्ययनाध्यापनोत्कर्षजं तेजस्तत्र साधवो ब्रह्मवर्चस्यास्तेषु सत्तमः । अपीति श्रेष्ठः । ब्रह्मवर्चस्व्युशत्तम इति पाठे ब्रह्मवर्चस्विषु कमनीयतमः । आत्मना स्वरूपेण विभुः पुनर्धर्माद्याचरणे सर्वथा समर्थोऽपि असम्पन्नः अप्राप्तमनोरथः असन्तुष्ट इवाभातीत्यन्वयः । एतत्सर्वं निश्चित-

मेवेति सूचयन्नाह–हीति। ज्ञानित्वेन वस्तुतो मनोरथाभावान्नोद्वेग इत्यभिप्रायेण इवशब्दप्रयोगः। स्वप्रयासनिष्फलत्वेन खेदं द्योतयति–बतेति ॥ ३० ॥ ❀ ❀ असन्तोषरूपकार्ये सति तत्कारणस्याऽवश्यम्भावात् सूक्ष्मदर्शित्वेन स्फुरितं कारणं स्वयमेवोत्प्रेक्षते–किं वेति। यतो भागवताः प्रमाणतः साधनतः फलतश्च भगवत्सम्बन्धिनो धर्माः प्रायेण मुख्यत्वेन मया न निरूपितास्ततो वाऽसौ किमसन्तोष इति शेषेणान्वयः। पारिशेष्यादयं भागवतधर्मानिरूपणमेवासन्तोषहेतुर्भवितुमर्हति। तत्र हेतुमाह–प्रिया इति, परमहंसानां परमविवेकिनां भगवद्भक्तानां ते धर्मा एव प्रियाः। तेषां प्रियनिरूपणेऽपि कथं सन्तोषः स्यादित्यपेक्षायामाह–त एव हीति। हि यस्मात् ते परमहंसा एव अच्युतस्य परिपूर्णगुणस्य भगवतः प्रियाः। तथा च सर्वान्तरात्मनि भगवति प्रीते सत्येव तन्नियम्यस्य मनसः सन्तोषः। स च भगवान् स्वभक्तेषु प्रीतेषु सत्सु स्वयं प्रीतो भवति। तेषां च प्रीतिहेतवो भागवतधर्मा एवातस्तन्निरूपणादेव सन्तोषो भवितुमर्हति नान्यथेति भावः। महाभारते आनुशासनिके हि कालादिशेषतया भागवतधर्माणां निरूपितत्वात्प्रायग्रहणम् ॥ ३१ ॥ ❀ ❀ एवमात्मानं खिलं न्यूनं मन्यमानस्य अत एव खिद्यतः खेदं कुर्वतस्तस्य कृष्णस्य व्यासस्य प्रागुदाहृतं कथितं सरस्वतीतीरस्थमाश्रमं प्रति नारदोऽभ्यागात् आगच्छदित्यन्वयः ॥ ३२ ॥ ❀ ❀ तं नारदमागतमभिज्ञाय सहसा झटिति प्रत्युत्थाय मुनिर्व्यासो विधिव गुरुजनपूजने यो विधिः प्रकारस्तथा पूजयामासेत्यन्वयः। ननु नारदवद्व्यासस्यापि भगवदवतारत्वात् कथं तेन तस्य गुरुवत्पूजनं सम्भवतीति शङ्कानिरासायाह–सुरपूजितमिति, उभयोर्भगवदवतारत्वसाम्येऽपि व्यासस्य ब्रह्मर्षित्वात् नारदस्य तु देवर्षित्वाद्व्यासापेक्षया तस्योत्कृष्टत्वेन पूज्यत्वे न सन्देह इति भावः ॥ ३३ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे मध्यमाधिकारनिरूपणे ॥ चतुर्थो विवृतोऽध्यायो व्यासचिन्तानिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

महाभारतकी रचनाके बहाने मैंने वेदके अर्थको खोल दिया है—जिससे स्त्री, शूद्र आदि भी अपने-अपने धर्मकर्मका ज्ञान प्राप्त कर लेते हैं ॥ २९ ॥ ❀ ❀ यद्यपि मैं ब्रह्मतेजसे सम्पन्न एवं समर्थ हूँ तथापि मेरा हृदय कुछ अपूर्णकाम-सा जान पड़ता है ॥ ३० ॥ ❀ ❀ अवश्य ही अबतक मैंने भगवान्‌को प्राप्त करानेवाले धर्मोंका प्रायः निरूपण नहीं किया है। वे ही धर्म परमहंसोंको प्रिय हैं और वे ही भगवान्‌को भी प्रिय हैं (हो-न-हो मेरी अपूर्णताका यही कारण है)' ॥ ३१ ॥ ❀ ❀ श्रीकृष्णद्वैपायन व्यास इस प्रकार अपनेको अपूर्ण-सा मानकर जब खिन्न हो रहे थे, उसी समय पूर्वोक्त आश्रमपर देवर्षि नारदजी आ पहुँचे ॥ ३२ ॥ ❀ ❀ उन्हें आया देख व्यासजी तुरंत खड़े हो गये। उन्होंने देवताओंके द्वारा सम्मानित देवर्षि नारदकी विधिपूर्वक पूजा की ॥ ३३ ॥

चौथा अध्याय समाप्त

अथ पञ्चमोऽध्यायः

सूत उवाच

अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः। देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १॥

नारद उवाच

पाराशर्य महाभाग भवतः कच्चिदात्मना। परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥
जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतम्। कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥ ३ ॥
जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातनम्। अथापि[1] शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवम्। व्यासचित्तप्रसादाय नारदेनोपदिश्यते ॥

उप समीप आसीनं विप्रर्षिं व्यासं बृहच्छ्रवाः महायशाः। स्मयन् ईषद्धसन्निवेत्यनेन मुखप्रसत्तिर्द्योत्यते। यद्वा इवेत्यनधिकारार्थम्। अहो महानपि मुह्यतीति स्मयमानः ॥ १ ॥ शारीरः शरीराभिमानी आत्मा, आत्मना तेन शरीरेण कच्चित् किं परितुष्यति मानसः आत्मा मनोभिमानी तेन मनसा परितुष्यति कच्चित् किं वा ॥ २ ॥ ❀ ❀ ते जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत् सुसम्पन्नं सम्यग्ज्ञातम्। अपिशब्दादनुष्ठितं चेत्यर्थः। अधीति पाठे सम्बोधनम्। सुसम्पन्नत्वे हेतुः महदद्भुतमित्यादि। सर्वैः अर्थैः धर्मादिभिः परिबृंहितं परिपूर्णम् ॥ ३ ॥ ❀ ❀ किं च यत्सनातनं नित्यं परं ब्रह्म च तच्च त्वया जिज्ञासितं विचारितमधीतमधिगतं प्राप्तं चेत्यर्थः। अथापि शोचसि। तत्किमर्थमिति शेषः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सर्वधर्मेभ्यो यज्ञदानादिभ्यः गौरवमाधिक्यम्। अथाश्रमप्राप्तेरनन्तरम्। उपासीनमातिथ्यार्थमासनार्घ्यपाद्यादिभिरुपासनां कुर्वन्तमेवाह। स्मयन्निवोष्ठाधराभ्यां स्मितं निष्क्रमयन्निव सर्वज्ञतया तं प्रत्यन्तः प्रसादं नानाप्रश्नकौतुकार्थमवहित्थया गोपयितुमशक्नुवन्नित्यर्थः। स्वामिचरणैस्तु न हि स्मितेन केवलं प्रसत्तिरेव द्योत्यते, किं त्वयोग्यतापीत्यभिप्रायेणोक्तं यद्वेति। अहो महानयं मुग्धीभवितुं नार्हतीति सूचनार्थं स्मयं चकारेत्यर्थः ॥१॥ ❀ ❀ मोहायोग्यतां सूचयन्नामन्त्रयति–महाभागेति। न हि महाभाग्यस्य तवायं विषादो युक्तः। अत्र हेतुत्वेन सम्बुद्ध्यन्तरमाह–पाराशर्य्येति। नहि सर्वज्ञमुन्यात्मजस्यापरं बोधयितुं समर्थस्य तव सर्वथा मोहो योग्य इति भावः ॥२॥ ❀ ❀ न च तव शास्त्रज्ञानं किंचिदपेक्षितव्यं तदलब्धिमूलकोयं विषाद इति वाच्यम्। यतो जिज्ञासितमिति कृतवान्भारतमित्यस्य यद्विरोधि मात्स्ये "अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। भारताख्यानमखिलं चक्रे तदुपबृंहितम्" इति। अत्र "स संहितां भागवतीं कृत्वा" इति सप्तमाध्यायवाक्येन समाधानं दृश्यते। प्रथमतः सामान्यतः कृत्वा पश्चान्नारदोपदेशतोनुक्रम्य तत्संमत्यानुक्रमेण विशेषतः कृत्वेत्यविरोधः। नारदेनापि "भवतानुदितप्रायम्" इत्युक्तेः सामान्यतस्तूक्तमेवेति सूचितम्। न केवलं भारतमेव कृतमपि तु सनातनं ब्रह्म वेदः परमात्मा च "शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू" इति श्रीमुखोक्तेरुभे एवाधिगते त्वयेति, अहो पुनरपि शोकः ॥ ३ ॥ ❀ ❀ इत्यर्थ इति। अनुभवगोचरीकृतमित्याशयः। अहो कृतावतारकार्योपि पुनः कथं त्वं शोचसीति हे प्रभो इति। भगवदवतारस्य तव शोकोनुचित इति भावः ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

महदद्भुतमित्यादि। महद्ग्रन्थतः अद्भुतमर्थतः ॥ ३–१० ॥

श्रीमद्वीरराघवव्याख्या

अथ यथावत्पूजानंतरं सुखमासीनः बृहच्छ्रवः कीर्त्तिर्यस्य वीणा पाणौ यस्य स देवर्षिर्नारदः स्मयन्निव स्वाज्ञया आसीनमुपविष्टं विप्रर्षिं व्यासं प्राह ॥ १ ॥ ❀ ❀ तदेवाह पाराशर्येति त्रिभिः। असंतोषमालक्ष्याह कच्चिदिति इष्टप्रश्ने, हे

---

१. प्रा० पा०—तथापि।

पाराशर्य हे महाभाग भवतः स्वात्मना स्वयं शारीर आत्मा क्षेत्रज्ञः मानसः मनःसंबंधी मनःकरणकः समनस्क इति यावत् परितुष्यत्येव हि कच्चित् ॥ २ ॥ ❀ ❀ ते त्वया जिज्ञासितं ज्ञातुमिष्टं सर्वं सुसंपन्नमपि ? अपिशब्दः प्रश्नद्योतकः ज्ञातमेव हीत्यर्थः । पद गतौ गत्यर्था बुद्ध्यर्थाः, उपबृंहितं येन तदिति वा अत एव महद्विपुलमत्यद्भुतं शब्दतोऽर्थतश्च चित्रं भारतं कृतवानतः सुसंपन्नं जिज्ञासितमिति भावः ॥ ३ ॥ ❀ ❀ किंच जिज्ञासितमिति यत् सनातनमनादिनिधनाविच्छिन्नसंप्रदायं ब्रह्म वेदरूपदधीतं जिज्ञासितं च, सनर्थस्त्वविवक्षितः, विचारितमिति वा । पूर्वोत्तरमीमांसयोः प्रणायनप्रणयनाभ्यामिति भावः । तथाप्येवं कृतकृत्योपि त्वमकृतार्थः अकृतकृत्य इव हे प्रभो शोचसि शोचन्निव लक्ष्यस इत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथार्घ्यपाद्यादिसमर्हणानंतरं सुखमुपविष्टो विस्तृतकीर्तिः वीणा महती नाम पाणौ यस्य स तथोक्तः, मंदस्मितं कुर्वन्निव प्रसन्नवदनो देवर्षिः समीप उपविष्टं तं विप्रर्षिं व्यासं प्राहेत्येकान्वयः ॥ १ ॥ ❀ ❀ विज्ञातभगवदभिप्रायः तदनुकारणानुगुणानुकारणवान्नारदो नित्यकुशलं तस्य संजानन्नपि तदनुवदन्निव कुशलं पृच्छतीत्याह पाराशर्येति । महाभाग ऐश्वर्याद्यनंतभाग्यनिधे पाराशर्य पराशरपुत्र ! भवतः शारीरः मानसो वा शरीररूपो वा भेदाभावादेवमुक्तिः आत्मावतारप्रयोजनं कृत्वा आत्मना स्वत एव परितुष्यति कच्चित्स्वतंत्रतया कृतावतारकार्यत्वात्परितुष्यतीत्येवकारार्थः ॥ २ ॥ ❀ ❀ कुत इति तत्राह जिज्ञासितमित्यादि । यस्त्वं धर्मादिसर्वपुरुषार्थबृंहितं पूर्णं भारतं कृतवांस्ते त्वया सुसंपन्नं सुखपूर्णमद्भुतं सर्वस्मादाश्चर्यतमं अत्ता रुद्रो यस्माद्भवति तदद्भुतं वा । महद्देशतः कालतो गुणतश्चापरिच्छिन्नं ब्रह्म जिज्ञासितं विचारितं अपिचशब्दौ वक्ष्यमाणसमुच्चये, शब्दतोर्थतोपि महत् अद्भुतं गहनं 'व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिष्वि'ति वचनात्तन्न्यायेनार्थशब्दस्य द्विरावृत्त्या सर्वशास्त्रार्थपरिबृंहितं कृतवानिति यस्मात्तस्मात्तेन लोकानां ज्ञातुमिष्टं सुष्ठु सुपूर्णमभूदिति वा ॥ ३ ॥ ❀ ❀ किंच यच्चोपाध्यायपरंपरया भवताधीतं सनातनं नित्यं वेदात्मकं शब्दब्रह्म तदपि जिज्ञासितं विचारितं तस्मात्कृतावतारकार्योपि तत एव नातुष्टिकारणं पश्यामीत्यर्थः, तथाप्येवमपि कृतावतारकार्योपि अकृतावतारप्रयोजन इवात्मानं शोचसि प्रकाशयसि हे प्रभो ! प्रभूतज्ञानेत्यन्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृतवान् भारतमित्यस्य यद्विरोधि मात्स्ये श्रूयते "अष्टादशपुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहितमि"ति । तत्र "स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् । शुकमध्यापयामास निवृत्तिनिरतं मुनिम्" इति सप्तमाध्यायवाक्येन समाधानं दृश्यते । प्रथमतः सामान्यतया कृत्वा नारदोपदेशानन्तरम् अनुक्रम्य तत्सम्मत्यानुक्रमेण विशेषतः कृत्वेति ह्यत्रार्थः । भवत इति । यशोवर्णनाभावमयेन ब्रह्मज्ञानेनापि खिलमिति भगवदाख्यपूर्णतत्त्वाविर्भावाभावात् ॥ ३-८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पञ्चमे ज्ञानकर्म्मादिवैयर्थ्यमुपपादयन् । भक्तिं कीर्त्तनमुख्याङ्गां नारदस्तमुपादिशत् ॥

उपासीनमातिथ्यार्थमासनार्घ्यपाद्यादिभिः उपासनां कुर्व्वन्तमेवाह । स्मयन्निव ओष्ठाधराभ्यां स्मितं निष्क्रमयन्निव सर्व्वज्ञतया तं प्रत्यन्तः प्रसादं नानाप्रश्नकौतुकार्थमवहित्थया गोपयितुमशक्नुवन्नित्यर्थः ॥ १ ॥ ❀ ❀ शारीरः शरीराभिमानी आत्मा आत्मना तेन शरीरेण किं तुष्यति । मानस आत्मा मनोऽभिमानी तेन मनसा कच्चिदिति प्रश्ने, किं परितुष्यति नो वा । पाराशर्येति महाभागेत्याभ्यां पैतृकस्वीयमहाप्रभाववतो भवतोऽपि कोऽयं विषाद इति विस्मयो व्यञ्जितः ॥ २ ॥ ❀ ❀ न च तव शास्त्रज्ञानं किञ्चिदपेक्षितव्यं तदलब्धिमूलकोऽयं विषाद इति वाच्यम् । यतो जिज्ञासितमित्यादि ॥ ३ ॥ ❀ ❀ न चानुभवज्ञानमपेक्षितव्यम् इत्यपि वाच्यम् । यतः सनातनं नित्यं ब्रह्म व्यापकं निर्विशेषस्वरूपं यत्तदपि जिज्ञासितं वेदान्तसूत्रकरणैर्विचारितम् । न केवलं जिज्ञासितमेव, अपि तु अधीतमवगतमनुभवगोचरीकृतमित्यर्थः । अत्र अधीतम् अधिगतं प्राप्तमित्यर्थ इति श्रीस्वामिचरणाः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथेति पूजानंतरम्, सुखमासीनः बृहच्छ्रवाः बृहत्कीर्तिः अहो परोपकाराय महांत एवं यततीति हर्षेण स्मयन्निव देवर्षिर्भगवान्नारदः उप समीपे आसीनं विप्रर्षिं श्रीव्यासं प्राह ॥ १ ॥ ❀ ❀ शारीरः शरीराधिष्ठाता मानसो मनोनियंताऽऽत्माऽऽत्मना स्वतः परितुष्यति कच्चिदितीष्टप्रश्ने ॥ २ ॥ ❀ ❀ ते जिज्ञासितं ज्ञातुमिष्टं सुसंपन्नं गत्यर्थस्य पद गतावित्यस्य ज्ञानार्थत्वात् सुष्ठु ज्ञातम् । यत् यतः महदद्भुतं शब्दार्थाभ्यां विचित्रम् । सर्वार्थपरिबृंहितम् 'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदि'ति तत्रैवोक्तेः, सर्वैः सांगोपांगैः धर्मादिभिरर्थैः परिबृंहितं पूर्णम् ॥ ३ ॥ ❀ ❀ यत्सनातनं ब्रह्म वेदरूपं तत्त्वया शब्दतोऽधीतमर्थतश्च जिज्ञासितम् ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

चतुर्थे सर्वधर्माणां संदेहो विनिरूपितः। निरूप्यते भक्तिमार्गे पंचमे तस्य निर्णयः॥ १॥
उट्टंकणं मध्यमत्वात् दृष्टांतस्य प्रदर्शनम्। आदावंते निर्णयार्थं हेतुत्वाद्दुस्तरस्य हि॥ २॥

पूर्वाध्यायांते नारदः पूजित इत्युक्तं तत्र प्रतिपूजनादिकमकृत्वा भिन्नक्रमेण पृच्छति अथेति। तं पूर्वोक्तधर्मवन्तमुत्तरपरिज्ञानात् निर्भयः सुखमासीनः उत्तरप्रश्नार्थमुपासीनं महतो न्यूनताप्रश्नः साधारणस्य न घटत इत्याह बृहच्छ्रवाः बृहत्कीर्त्तित्वादुक्तविश्वासार्थं वा देवऋषिः देवानामपि देवप्रतिपादकमंत्रद्रष्टा स ह्यलौकिको भवति विप्रर्षिं पश्चिमबुद्धीनामुपायवक्तारं सर्वपूरकाणां पूरकं वा भागवतधर्माणामुत्तमत्वं ख्यापयन्निति वीणापाणिः स्वावसरं प्राप्य ऊर्जितो विकसन्मुखः लोके हसन्निव॥ १॥ ❀ ❀ इष्टो महानपि मुह्यतीति इच्छतो मूलमपि नष्टमित्यभिप्रायेण स्वाभाविकं कुशलं पृच्छति पाराशर्य इति। पराशरस्त्वतिवैष्णवस्तत्पुत्रः कथं भगवन्मार्गे संदिग्ध इति पितृनाम्ना संबोधनेन तदुद्बोधितं समर्थस्याधिकारे भगवन्मार्गबोधनसंभवात् कृतार्थत्वमाह हे महाभागेति। कच्चिदिति कोमलप्रश्ने, शारीर आत्मा आत्मना भवतः स्वेन वा भवत इति तु समुदायः विषयप्राप्तौ तु स्वेनैवापरितोषः भगवता तु अनेन अलौकिककमलौकिकं वा निमित्तं पृष्टं भवति, एवं मानसः। एवशब्देन पूर्वरूपे गौणता सूचिता॥ २॥ ❀ ❀ उत्तरार्थं तत्कृतं पूर्वपक्षं नाभिनंदति जिज्ञासितमिति। विचारितं सर्वलोकहिताचरणं सुष्ठु संपन्नम्, एककृत्यैव आकल्पकरणसिद्धेः। अपीत्याश्चर्ये। भगवतोपि प्रत्येककृत्यपेक्षा, तव तु तदपि नास्तीत्याह इति ते महदद्भुतमिति। इतीति समाप्तौ, अद्भुतस्यैव महत्त्वसंपत्तिमेवाह कृतवानिति। एकं हि शास्त्रमेकपुरुषार्थप्रतिपादकं भारतं तु धर्मादिचतुष्टयप्रतिपादकमित्याह—सर्वैधर्मादिपुरुषार्थैः परितः साधनसहितैः बृंहितं संबद्धमित्यर्थः॥ ३॥ ❀ ❀ स्वाभाविकधर्मैर्विशेषमाह जिज्ञासितमिति। ब्रह्म परब्रह्म वेदश्च तत्रैकं जिज्ञासितमपरमधीतं चकाराद्ध्यापितम्। धर्मश्च जैमिनेरपि तदुक्तार्थपरिबंधनात्। अथवा प्रथमजिज्ञासा ब्रह्मविषयिणी द्वितीया वेदस्य यत्तदिति अतिप्रसिद्धं सनातनमविकृतं ब्रह्मशब्देन बृहत्त्वमेवोक्तं फलविपर्ययेण दूषयति तथापीति "तरति शोकमात्मविदि"ति 'श्रुतेः अनीहया शोचति मुह्यमान' इति च ज्ञानधर्मसंपत्तौ शोकाभावः श्रुतिसिद्धः। स चानुभवेन बाध्यते। न चायं शोको लौकिक इत्याह अकृतार्थ इवेति। यथा जिज्ञास्यद्वयाभावे असिद्धपुरुषार्थस्य शोकः तथा संपन्नदशायामपीति।अत्रोत्तरकथनसामर्थ्यं तवास्तीत्यत आह प्रभो—इति॥ ४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ पञ्चमाध्यायं विवरिषवः सङ्गतिं वक्तुं पूर्वाध्यायार्थानुवादपूर्वकं तामाहुः चतुर्थ इत्यादि। सन्देह इति। फलाजननाद्धर्मस्यापरत्वं यथोक्तरीत्या करणात्परत्वं चावगाहमानः स्वरूपविषयकः संशय इत्यर्थः। निर्णय इति। अपरत्वरूपः सः। तेन सूतोक्तौ शेषशेषिभावः, व्यासोक्तौ तु सामान्यविशेषभावः सङ्गतिरित्यर्थः। अवान्तरवाक्यसङ्गतिमाहुः उट्टङ्कणमित्यादि। मध्यमत्वमधिकारित्वं तस्मादुट्टङ्कणं न खेददूरीकरणाय तर्ककरणं 'पाराशर्ये' त्यादिभिस्त्रिभिरादौ दृष्टान्तस्य स्वदृष्टान्तस्य 'अहंपुरे' त्यादिभिरन्ते यन्निरूपणं तद्धि यतो हेतोः उत्तरस्य हेतुत्वान्निर्णयहेतुत्वादस्ति तेन हेतुना उपोद्घातश्च सङ्गतिरित्यर्थः॥ १॥ ❀ ❀ पाराशर्येत्यत्र। सन्दिग्ध इति तिङन्तमिदम्। संम्बोधनमात्रेण कथमुद्बोध इत्यत आहुः समर्थस्येत्यादि। अधिकार इति योग्यतायाम्। कृतार्थत्वमिति कृतकार्यत्वम्। समुदाय इति। व्यासचिन्तायां 'मे देह्य' इत्यत्र 'मे' इत्यनेन यथा सङ्घातः परामृश्यते तथाऽत्र 'भवत' इत्यनेन सङ्घातः परामृश्यत इत्यर्थः। स्वेनैवेत्यादि। सङ्घाताभिमानिनैवापरितोष इत्यर्थः। अस्मिन् पक्षे तुशब्दकथनेनाग्रिमे पक्षे विषयप्राप्तावपरितोषो बोध्यते। अनेनेति अर्थद्वयसङ्ग्राहकेणात्मनेति-पदेन। एवं मानस इति। उभयथा परितुष्यतीति शेषः। पूर्वरूप इति शारीररूपे॥ २॥ ❀ ❀ जिज्ञासितं सुसम्पन्नमित्यत्र। पाठान्तरमाहुः इति ते महदिति॥३॥ ❀ ❀ जिज्ञासितमधीतं चेत्यत्र। धर्माध्यापने गमकमाहुः जैमिनिरित्यादि। औत्पत्तिकसूत्रादौ व्यासोक्तानुवादादित्यर्थः। द्वितीया वेदस्येति। एतेन पूर्वमीमांससूत्राण्यपि प्रणीतानि बोध्यन्ते। सनातनपदवैयर्थ्यपरिहारायाहुः बृहत्त्वमेवोक्तमिति। अनीहयेति धर्माभिव्यञ्जकचेष्टाराहित्येन। इति चेति इति श्रुतेश्चेत्यर्थः॥ ४॥

श्रीगिरिधरकृता बालप्रबोधिनी

व्यासचित्तप्रसादाय हरिकीर्त्तनगौरवम्। पञ्चमे पूर्ववृत्तं स्वं नारदेन निरूप्यते॥

अथ यथावत्पूजानन्तरमुपासीनमात्मासन्तोषकारणं प्रष्टुं सङ्कुचन्तं तं समीप उपविष्टं विप्रर्षिं व्यासं देवर्षिर्नारदः स्वयमेव अहो महानपि मुह्यतीतीषदुपहसन्निव प्राह सङ्कोचत्यागेन प्रश्ने प्रवृत्त्यर्थं पप्रच्छेत्यन्वयः। इवशब्देन मुखप्रसत्त्या तथा द्योत्यते। न तु मुखेन तथोक्तवानिति सूचितम्। ननु प्रश्नप्रवृत्तौ तस्यैवोत्तरदाने क्लेशः स्यादिति कथं स्वयमेव तदुद्यमं कृतवानित्याशङ्क्य तस्य तदुत्तरदाने क्लेशो नास्तीति सूचयंस्तं विशिनष्टि—सुखमासीन इति, सुखं यथा भवति तथाऽनुद्विग्नतया आसीन उपविष्ट इत्यर्थः। तत्र हेतुमाह—बृहच्छ्रवा इति, बृहत् सर्वत्र प्रसृतं श्रवः सर्वज्ञतया कीर्तिर्यस्य सः। एवं तस्य सर्वज्ञता-

कीर्तिश्च कथमित्यपेक्षायां वीणावादनपूर्वकनिरन्तरभगवद्यशोगानादेवेति सूचयन्नाह—वीणापाणिरिति ॥ १ ॥ ❀ ❀ नारदप्रश्नमेव दर्शयति—पाराशर्येति त्रिभिः । हे पाराशर्य हे महाभागेति सम्बोधनद्वयेन पराशरस्य परमवैष्णवस्य पुत्रत्वात्त्वतोऽपि सर्वथा परोपकारनिष्ठत्वात्तवैवं विषादो न युक्त इति सूचयति । भवतः शारीरः शरीराभिमानी आत्मना शरीरेण मानसो मनोभिमानी आत्मना मनसा आत्मा कच्चित् किं परितुष्यति नो वेत्यन्वयः । एवकारः पक्षे निषेधार्थकः ॥ २ ॥ ❀ ❀ कथमेवं तवात्र सन्देह इत्यपेक्षायां धर्मद्वयस्फूर्तिर्हि संशयबीजं कृतकर्त्तव्यत्वाच्छोकदर्शनाच्च संशय इत्याह—जिज्ञासितमिति द्वयेन । ते त्वया यज्जिज्ञासितं ज्ञातुमिष्टं धर्मादि तत्सर्वं सुसम्पन्नं सुखेन सम्यग्ज्ञातम्, यद्वा "अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा, जीवस्य तत्त्वजिज्ञासा" इत्यादौ जिज्ञासापदस्य विचारेपि रूढत्वात् यज्जिज्ञासितं विचारितं सर्वलोकहिताचरणं तदपि सुतरां सम्पन्नं संसिद्धम् । कुत इत्यपेक्षायामाह—य इति । यस्त्वं अद्भुतं अत्याश्चर्यजनकं भारतं कृतवान् । तस्याद्भुतत्वमेव विवृणोति—सर्वेति, सर्वैरर्थैर्धर्मादिभिश्चतुर्विधपुरुषार्थैः परितः साधनसहितैर्बृंहितं सम्बद्धमित्यर्थः । अत एव महत् ग्रन्थतोऽपि विपुलम् ॥ ३ ॥ ❀ ❀ किञ्च यत्सनातनं अनादिनिधनाविच्छिन्नसम्प्रदायं ब्रह्म वेदस्तदधीतं जिज्ञासितं विचारितं च तथापि एवं कृतकृत्योऽपि त्वं हे प्रभो सर्वथा समर्थः अकृतार्थः अकृतकृत्य इव आत्मानं किमर्थं शोचसीति शेषेणान्वयः ॥ ४ ॥

हिन्दी अनुवाद

भगवान‌के यश-कीर्तनकी महिमा और देवर्षि नारदजीका पूर्वचरित्र

सूतजी कहते हैं—तदनन्तर सुखपूर्वक बैठे हुए वीणापाणि परम यशस्वी देवर्षि नारदने मुस्कराकर अपने पास ही बैठे ब्रह्मर्षि व्यासजीसे कहा ॥ १ ॥ ❀ ❀ नारदजीने प्रश्न किया—महाभाग व्यासजी ! आपके शरीर एवं मन—दोनों ही अपने कर्म एवं चिन्तनसे सन्तुष्ट हैं न ? ॥ २ ॥ ❀ ❀ अवश्य ही आपकी जिज्ञासा तो भलीभाँति पूर्ण हो गयी है; क्योंकि आपने जो यह महाभारतकी रचना की है, वह बड़ी ही अद्भुत है । वह धर्म आदि सभी पुरुषार्थोंसे परिपूर्ण है ॥ ३ ॥ ❀ ❀ सनातन ब्रह्मतत्त्वको भी आपने खूब विचारा है और जान भी लिया है । फिर भी प्रभु ! आप अकृतार्थ पुरुषके समान अपने विषयमें शोक क्यों कर रहे हैं ? ॥ ४ ॥

व्यास उवाच

अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥
स वै भवान् वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ।
परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः ॥ ६ ॥
त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी ।
परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥

श्रीनारद उवाच

भवतानुदितप्रायं यशो भगवतोऽमलम् । येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मा शारीरो मानसश्च । तन्मूलं तस्य अपरितोषस्य कारणमव्यक्तमस्फुटम्, हे नारद ! त्वा त्वां पृच्छामि आत्मभवो ब्रह्मा तस्य आत्मनः देहादुद्भूतः तम् अत एवागाधोऽतिगम्भीरो बोधो यस्य तम् ॥ ५ ॥ ❀ ❀ अगाधबोधतां प्रपंचयन्नाह स वा इति द्वाभ्याम् । सर्वगुह्यज्ञाने हेतुः—यद्यस्मात् पुराणः पुरुष उपासितस्त्वया । कथंभूतः परावरेशः कार्यकारणनियंता । मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ ❀ ❀ किं च त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन्नात्मसाक्षी बुद्धिवृत्तिज्ञः, अतः परे ब्रह्मणि धर्मतो योगेन निष्णातस्य तदुक्तं याज्ञवल्क्येन "इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" इति । अवरे च ब्रह्मणि वेदाख्ये । व्रतैः स्वाध्यायनियमैर्निष्णातस्य मेऽलमत्यर्थं यन्न्यूनं तद्विचक्ष्व वितर्कय ॥ ७ ॥ ❀ ❀ अनुदितप्रायमनुक्तप्रायम् । विमलं भगवद्यशो विना येनैव धर्मादिज्ञानेनासौ भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्येऽहम् ॥ ८ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे इति संबुद्ध्यर्थेऽव्ययम् । तेन हे नारदेति लब्धम् । अत एव ब्रह्मपुत्रत्वादेव ॥ ५ ॥ ❀ ❀ अत्राशयमाह–पराशरपुत्रत्वेन महाभागत्वेन चतुर्वेदज्ञत्वेन ब्रह्मानुभवित्वेन च त्वयाहमुक्तस्त्वं तु ब्रह्मपुत्रोऽगाधबोधः सर्वज्ञो भगवदुपासक इति मत्तः सर्वथैव विशिष्ट इति भावः । यः परावरेशः स त्वया यद्यत उपासितोऽतो भवान्समस्तगुह्यं वेदेत्यन्वयः । असंगः गुणसंगरहितः ॥ ६ ॥ ❀ ❀ न्यूनं नितरामुर्वरितम् ॥ ७ ॥ ❀ ❀ भगवतो यशः सर्वस्वरूपेभ्यो भगवत्स्वरूपोत्कर्षः सर्वोत्कर्षद्योतिनी तस्य लीला भक्तिश्च । ननु मया ब्रह्ममीमांसाशास्त्रं वेदान्तदर्शनं कृतं तत्राह–येनेति । तद्दर्शनं दर्शनशास्त्रमपि खिलं न्यूनमेव मन्ये तद्दर्शनकर्तुरेव तवापि चित्ताप्रसादश्चेत्तर्ह्यधीत्याधीत्य तद्दर्शनाभ्यासिनामपि कथं चित्तं प्रसीदत्वित्यत्र भवानेव प्रमाणमिति भावः । स्वामिचरणोक्तेरपि तदेव दर्शनं खिलं मन्ये भगवद्यशसोऽप्राधान्येन वर्णनकरशास्त्रवर्णनमेवेत्यर्थः ॥८॥

श्रीमद्वीरराघवव्याख्या

एवमापृष्ट आह व्यासः अस्तीत्यादिभिस्त्रिभिः । त्वयोक्तं सर्वमिदं जिज्ञासितं सुसंपन्नमित्यादिनोक्तं ममास्त्येव, तथापि ममात्मा न परितुष्यते तस्यासंतोषस्य मूलं निमित्तमव्यक्तं न मया ज्ञातमतस्त्वामेवागाधबोधमपारज्ञानं सर्वज्ञमिति यावत्, आत्मभवो ब्रह्मा तस्यात्मनः शरीरादुत्संगादुद्भूतं पृच्छामहे ॥ ५ ॥ ❀ ❀ नाहं जानामीति मा वोच इत्यभिप्रायेणाह स वा इति । स वै ज्ञानिनामग्रणीर्भवान्समस्तं गुह्यं देहिनामन्तर्गतं वेद जानाति, कुतः यद्यस्मात्त्वया पुराणः पुरुषः सर्वजगत्कारणभूतः सर्वज्ञः परमपुरुष उपासितः । कथं परमपुरुषोपासनमात्रेणाहं जानीयामित्यत्राह–परावरेशः परे ब्रह्मादयोऽवरे यस्मात्स चासावीशः सर्वनियन्ता भगवान् मनसैव संकल्पमात्रेणैव विश्वं सृजत्यवत्यत्ति संहरति च, अथापि गुणैः सत्त्वादिभिर्न सज्जते इत्यसंगः स्वसंकल्पकृतजगदुदयविभवलयलीलस्य सर्वनियन्तुः सर्वप्राण्यन्तर्गतवस्तुवेदित्वाद्यथा क्रतुरस्मिन् लोके पुरुषो भवतीति न्यायेनेश्वर-वत्सर्वमुक्तप्रायस्त्वमपि जानास्येवेति भावः ॥ ६ ॥ ❀ ❀ एतदेवोपपादयन्नसंतोषनिमित्तं वदेत्याह त्वमिति । त्वमर्कः सूर्य इव त्रिलोकीं पर्यटन् बहिष्ठवस्तुद्रष्टा वायुरिवान्तश्चरः ज्ञानव्याप्तया सर्वेषामन्तश्चरन्नात्मसाक्षी आत्मनोन्तःकरणस्य साक्षी द्रष्टा हृद्गतार्थवेदीत्यर्थः । अतः परं चावरं च तयोः समाहारस्तस्मिन्ब्रह्मणि परे ब्रह्मणि तदावेदके वेदाख्ये ब्रह्मणि च विषये धर्मतो निवृत्तिधर्मैः व्रतैः कांडव्रतादिभिश्च स्नातस्य पारंगतस्य समाप्तधर्मव्रतस्येत्यर्थः मम न्यूनमसंतोषरूपमलं विचक्ष्व न्यूनशब्दस्त-द्धेतावुपचाराद्वर्त्तते, न्यूनहेतुं विचक्ष्व चक्षि–दर्शनेपि वर्त्तते, पश्यालोचयेत्यर्थः । अलं द्रष्टुं समर्थस्त्वम् । यद्वा न्यूनमिति भावप्रधानो निर्देशः । अलमधिकं न्यूनं न्यूनत्वं विचक्ष्व । अथवा चक्षिर्भाषणार्थ एव, न्यूनताहेतुं विचक्ष्वेत्यर्थः । इत्थं प्रचोदित आह भगवान्नारदः यावदध्यायसमाप्ति ॥ ७ ॥ ❀ ❀ किंवा भागवता धर्मा न प्रायेण निरूपिता इति तदुत्प्रेक्षितमेव तावदसंतोष-हेतुमाह भवतेति द्वाभ्याम् । अमलं शृण्वतां वदतां चाखिलदुरितापहं भगवतो यशः भवतानुदितप्रायं प्रायेणावर्णितमित्यर्थः । प्रायग्रहणेन भारते प्रासंगिकतयाऽप्राधान्येन भगवद्यशः क्वचित्क्वचिदुदितं, न तु कृत्स्नप्रबन्धानुस्यूतत्वेन प्राधान्येन चोदितमिति सूच्यते । येन भगवद्यशोऽननुवर्णितेनैवासौ तवात्मा न तुष्येत, असौ तवात्मा भगवान्वा न तुष्येत, भगवदपरितोषेऽपि सति तन्नियम्यं त्वदीयमन्तःकरणमपि न तुष्यत्येवेति भावः । यद्वा येनैव कारणेन न तुष्येतासौ तवात्मा भगवान्वा तत्कारणं किमिति चेत् खिलं न्यूनं तद्दर्शनमेव भगवद्दर्शनमेव भगवत्स्वरूपगुणविभूतियाथात्म्यज्ञानपूर्वकं प्राधान्येन तद्वर्णनाभाव एवेति मन्य इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवं नारदेन पृष्टोऽपरिमितज्ञानस्वरूपोऽपि अज्ञवत् दुष्टजनमोहनाय तत्कारणं तमेव पृच्छतीत्याह अस्त्येवेति । हे नारद ! त्वयोक्तमिदं सर्वं मे अस्त्येव न किंचिदवशिष्टमस्ति, तथापि मे आत्मा मनः न परितुष्यते नालंबुद्धिं प्राप्नोति । तुष्यतीति वक्तव्ये 'तुष्यते' इति प्रयोगात् अज्ञजनमोहनार्थमेव हरिणा प्रश्नः क्रियते नाज्ञानादिति महान्विशेषो विज्ञायते । आत्मनो विष्णो-र्भवतीत्यात्मभवो ब्रह्मा, तस्यात्मनः शरीरादुद्भूत उत्पन्न आत्मभवात्मभूतः ब्रह्मपुत्र इत्यर्थः । आत्मनि भवतीति वा त्वेति त्वामव्यक्तं सूक्ष्मं तस्यापरितोषस्य मूलं कारणं पृच्छामहे । अल्पज्ञश्चेत्प्रश्नोत्तरं कथं ब्रूयादिति तत्राह अगाधेति । अपरिमितज्ञानं प्रश्नोत्तरवचन-समर्थमित्यर्थः । अत्रापि समित्युपसर्गमन्तरेण पृच्छतेरात्मनेपदप्रयोगेण नारदस्य ज्ञानं चुलुकजलपरिमितं व्यासज्ञानं प्रलय-समुद्रवदपरिमितमिति तात्पर्यं शब्दज्ञैरेव ज्ञायते । आत्मभुवात्मभूतमिति केचित्पठन्ति, तत्रोवङादेशश्छांदसः ॥ ५ ॥ ❀ ❀ नारदस्य स्वात्मानलम्बुद्धिहेतुवेदनकारणं वक्तीत्याह स वा इति । यो गुणैर्विरचितशरीरगतसुखदुःखफलसंगरहितो विश्वं मनसैव स्वतन्त्रसाधनान्तरनिरपेक्षतया सृजत्यवति संहरति स परावरेशो मुक्तामुक्तप्रपञ्चयोरीश इति परावरेशः । जगदुत्पत्तेः पुराप्यस्तीति पुराणः पुरमणतीति वा पुरूणि कर्मफलानि सनोति ददातीति पुरुषः, उपासित इति–अतः भवान् समस्तगुह्यं वेदेत्येकान्वयः । एतदुक्तं भवति चतुर्मुखप्रियपुत्रत्वात्तवैव सर्वजगत्सृष्ट्यादिकर्तृभगवदुपासकत्वेन सर्वज्ञत्वात्तत्प्रसादादस्मदनलम्बुद्धिहेतुवेदनमस्तीति

॥ ६ ॥ ❀ ❀ तत्र भगवत्प्रसादेन जनितापरोक्षज्ञानेन सर्वत्राव्याहतगतिकर्मणा च योगप्रभावेन सर्वप्राणिशरीरान्तश्चरणेन चानलम्बुद्धिहेतुविस्त्वमित्याह त्वमिति । त्रिलोकीं पर्यटन् अर्क इव त्रिलोक्यां अव्याहतगतिः सर्वप्राण्यन्तश्चरो वायुरिवात्मसाक्षी सर्वजीवबुद्धिवर्तिवृत्तज्ञः त्वं परे ब्रह्मणि तथा अवरे तत्प्रतिपादकवेदाख्यशब्दब्रह्मणि धर्मतो वेदोक्तभगवद्धर्मानुष्ठानेन तदधिकारोपपादकवेदव्रतादिभिश्चानुष्ठापितैः लोकमोहाय च मयानुष्ठितैः स्नातस्य कृतकृत्यस्य मे अवतारप्रयोजनं न्यूनं नितरामुर्वरितमलं यथा भवति तथा विचक्ष्व विशिष्टतया ब्रूहीत्येकान्वयः ॥ ७ ॥ ❀ ❀ नारदोपि सर्वज्ञस्य व्यासस्य हृदि स्थिताभिप्रायं विद्वान् तत्प्रसादमादित्सुरवतारप्रयोजनं वक्तीत्याह भवतेति । हे व्यास, भवता भगवतो हरेरमलं यशोऽनुदितप्रायं बहुत्वेन न प्रतिपादितं, येनानुदितेन यशःप्रतिपादकशास्त्रेणासौ भवत आत्मा नैव तुष्येत, अहं तस्य यशसः प्रतिपादकं शास्त्रं खिलमुर्वरितं मन्य इत्यन्वयः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्यापरितोषस्य मूलं कारणम् अव्यक्तमस्माभिर्दुर्ज्ञेयं त्वां वयं पृच्छाम । अत्र हे इति सम्बोधनेन न चाहमपि न जानामीति वाच्यम् , यत आत्मभवो ब्रह्मा तस्यात्मनो देहात् भूतं जातमिति पैतृकप्रभावः अगाधबोध इति स्वीयश्च प्रभावस्तज्ज्ञाने कारणमस्त्येवेति भावः ॥ ५ ॥ ❀ ❀ त्वया यत् पुराणः पुरुष उपासितः तेन पराशरपुत्रत्वेन महाभागत्वेन चतुर्वेदज्ञत्वेन ब्रह्मानुभवित्वेन च त्वयाहमुक्तः, त्वं तु ब्रह्मणः पुत्रोऽगाधबोधः सर्व्वज्ञो भगवदुपासक इति मत्तः सर्व्वथैवातितरामेव विशिष्ट इति भावः । परावरेश इत्यादिविशेषणकः स वै निश्चितं भवानेव, भगवदवतारत्वात् । अतो भवान् समस्तानां समस्तञ्च गुह्यं वेद ॥ ६ ॥ ❀ ❀ सर्व्वलोकहितार्थमेव पुराणपुरुषस्त्वद्रूपेणावतीर्णस्तन्ममाद्य हितं कुरुष्वेत्याह त्रिलोकीं पर्य्यटन् अर्क इव सर्व्वदर्शी । वायुरिवान्तश्चरः । आत्मेव साक्षी बुद्धिवृत्तिज्ञः । अतः परे ब्रह्मणि धर्म्मतः योगेन निष्णातस्य । तदुक्तं याज्ञवल्क्येन-'इज्याचारदमाहिंसादानस्वाध्यायकर्म्मणाम् । अयन्तु परमो धर्म्मो यद्योगेनात्मदर्शनमि'ति । अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैः निष्णातस्य अलमत्यर्थं यन्न्यूनं तद्विचक्ष्व वितर्कय ॥ ७ ॥ ❀ ❀ अनुदितप्रायम् अनुक्तप्रायम् । भगवतो यशः सर्व्वस्वरूपेभ्यो भगवत्स्वरूपस्योत्कर्षः सर्व्वोत्कर्षद्योतिनी तस्य लीला भक्तिश्च । ननु मया ब्रह्ममीमांसाशास्त्रं वेदान्तदर्शनं कृतं तत्राह येनेति । तद्दर्शनं दर्शनशास्त्रमपि खिलं न्यूनमेव मन्ये । तद्दर्शनकर्त्तुरेव तवापि चित्ताप्रसादश्चेत् तर्हि अधीत्याधीत्य तद्दर्शनाभ्यासिनामपि कथं चित्तं प्रसीददित्यत्र भवानेव प्रमाणमिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे इति । हे नारद तत्तस्यापरितोषस्य मूलहेतुं त्वा त्वाम् ॥ ५ ॥ ❀ ❀ यद्यस्मात् त्वया पुरुषः उपासितः मनसैव संकल्पेनैव ॥ ६ ॥ ❀ ❀ त्वमर्क इव त्रिलोकीं पर्यटन् आत्मसाक्षी शरीररूपात्मद्रष्टा बाह्येन्द्रियवृत्तिद्रष्टेत्यर्थः । वायुरिवान्तश्चरः सन् आत्मसाक्षी । अंतःकरणवृत्तिद्रष्टा परे ब्रह्मणि धर्मतः निवृत्तिधर्मतः अवरे शब्दब्रह्मणि व्रतैः तदध्ययनार्थकैर्नियमैः स्नातस्य कृतावगाहनस्य मे अलं अत्यर्थं न्यूनं विचक्ष्व मम तपो व्रतज्ञानप्रयत्नादिषु अपूर्णं यदस्ति तदालोचय ॥ ७ ॥ ❀ ❀ भवता भगवतः अमलं श्रावयितॄणां श्रोतॄणां च मलघ्नं यश अनुदितप्रायमवर्णितप्रायम् । येनैव भगवद्यशोवर्णनमन्तरेण दर्शनेन असौ तवात्मा न तुष्येत तत्ते दर्शनं ज्ञानं खिलमपूर्णं मन्ये ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

प्रमाणबलविचारकाणां नात्रोत्तरस्फूर्त्तिरित्याह अस्त्येवेति । साधनस्य फलव्यभिचारे यन्मूलं तदव्यक्तं न प्रकटो लोकवेदयोरसिद्धत्वात् अतः अगाधबोधं त्वां पृच्छामहे । अगाधं प्रमाणागम्यं तत्रापि प्रमेयबलाद्बोधः तदाह आत्मभवात्मभूतमिति । आत्मा नारायणः तद्भवो ब्रह्मा तस्यात्मनो देहाज्जातम् (आत्मेर्भवान्तसेवां धन वाहं भगवदवतार आत्मवित् "ब्रह्मविद् ब्रह्मैव भवती"ति श्रुतेः आत्मैव जातः?) असाधनसम्बन्धो वा सूचितः, भगवत्सेवकं वा 'भूतानि विष्णोः सुरपूजितानी'ति वाक्यात् ॥५॥ ❀ ❀ तस्य प्रमेयबलमाह स वै भवानिति । वेदानां समस्तं गुह्यं भवानिति वा उभयत्रापि हेतुः, उपासित इति पुराणत्वमुत्तमत्वाय तेन पुरुषोत्तमः सेवित इति कालादिनिरपेक्षः सेव्यसामर्थ्येन सेवकसामर्थ्यं वक्तुं भगवद्गुणानाह परेति । सर्वेश्वरत्वं सर्वकर्तृत्वं च चिंतनमात्रेण गुणाः ॥ ६ ॥ ❀ ❀ नारदस्य स्वतोऽपि सामर्थ्यहेतुमाह पर्यटन्निति । बहिरन्तः सर्वपरिज्ञानार्थं दृष्टान्तद्वयमपेक्षितरूपं च क्रियया सर्वलोकगमनं योगेनांतः प्रवेशः ज्ञानेन सर्वसाक्षित्वम् । एवं सार्द्धश्लोकेन भक्त्यादिभिः सर्वसामर्थ्यं प्रतिपाद्य स्वसंदेहं पृच्छति परावरे ब्रह्मणीति । परं वेदान्तप्रतिपाद्यम् अवरं वेदः तत्र क्रमेणैव धर्मतः यज्ञादिकरणात् ब्रह्मणि निष्णातः तदुभयनिष्णातस्य यन्मूलं तद्विचारय । आपाततो विचारितं न भविष्यतीत्याह अलमिति ॥ ७ ॥ ❀ ❀ नारदस्तु विचारितमेव वर्त्तत इति सिद्धवत्कारेणाह । अग्निहोत्रसुवर्णस्त्रीज्ञानसद्भावेऽपि यथा दीपसूर्यादिव्यतिरेकेण न बहिः प्रकाशः तथा भगवद्यशोव्यतिरेकेण नान्तः प्रकाशः, भगवदीयास्तु धर्मा न ज्ञानादिभिः प्रकाश्याः । ते च महान्तो बहवश्च यद्विषयं व्याप्य

तिष्ठति स च विषयो न ज्ञानादिभिः प्रकाश्यते। यद्यपि भारते भगवद्यशःप्रतिपादनं गीतायां च विशेषतः, तथापि इतरशेषत्वेन प्रतिपादनात् व्यामोहकलीलात्वेपि हृदये तथैवावेशात् पूर्वकांडशेषत्वेनोत्तरकाण्डनिरूपणेन वेदान्तैः स्वातन्त्र्येण ब्रह्मप्रतिपादनं तथा भगवद्यशोऽपि गीतादौ तदेवाह। अमलं यशस्तेनैवान्तःकरणदोषाभावः तद्व्यतिरेकेणापि सर्वं भविष्यतीति ज्ञाने खिलता ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अस्तीत्यत्र। तन्मूलपदं व्याकुर्वन्ति साधनेत्यादि। प्रमेयबलादिति। भगवन्नप्तृत्वेन भगवन्नैकट्यतस्तत्स्वरूपबलादित्यर्थः। असाधनफलसम्बन्ध इति। साधनाभावेपि भगवदैक्यप्राप्तिरित्यर्थः। श्रुतिविरोधमिवाशङ्क्य पक्षान्तरमाहुः भगवत्सेवकमिति ॥ ५ ॥ ❀ ❀ स वै भवानित्यत्र। कालादिनिरपेक्ष इति। इदं वेदगुह्यत्वज्ञापकमित्यर्थः ॥ ६ ॥ ❀ ❀ त्वमित्यत्र। स्वतोपीति। भगवदवतारत्वादित्यर्थः। अपेक्षितरूपमिति। व्यासस्य नारदे यादृशं ज्ञानं स्वखेदनिवृत्त्यर्थमपेक्षितम्, तादृग्रूपं ज्ञानं नारदे वर्तत इत्यर्थः ॥ ७ ॥ ❀ ❀ भवतेत्यत्र। सिद्धवत्कारेणाहेति। हेतुपूर्वकं तज्ज्ञानन्यूनत्वस्य कारणमाहेत्यर्थः। न्यूनत्वहेतुं व्याकर्तुमुपपादयन्ति अग्निहोत्रेत्यादि। तथा च यथाग्निहोत्रादिबाह्यविषयकज्ञानस्य सत्त्वेपि दीपादिव्यतिरेकेण तदलाभात् सतोपि ज्ञानस्य खिलता, तथान्तःप्रकाशकव्यतिरेकेणान्तरार्थालाभात्तज्ज्ञानस्यापि सेति यशःकथनाभावो न्यूनत्वहेतुरित्यर्थः। ननु तदकथनाभावेपि ज्ञानादिभिरान्तराणामहमादीनां प्रकाशान्न तस्य न्यूनत्वहेतुतेत्यत आहुः भगवदीयेत्यादि। कुत इत्याकाङ्क्षायामाहुः ते चेत्यादि। तथा च यथा स्वल्पेन दीपेन न महागृहादिप्रकाशः, तथा स्वल्पेन ज्ञानेन तेषामिति तथेत्यर्थः। ननु यशस्तु गीतम्, अतः कथमप्रकाशः, कथं वा दर्शनस्य खिलत्वमत आहुः यद्यपीत्यादि। व्यामोहकलीलात्वेपीति। सारथ्यादेरित्यर्थः। अत एव 'यच्चावहासार्थमि'त्याद्यर्जुनवाक्यम्। तथैवेति व्यामोहकत्वेनेत्यर्थः। दृष्टान्तमाहुः आहेति। अनुदितप्रायपदेनाह। खिलत्वस्वरूपमाहुः अमलमित्यादिना अमलमिति। मलमावरकं तद्रहितम्। तथा च भारते इतरशेषत्वाद्यावरकसत्त्वाद्यशसोऽमलत्वाभावः खिलत्वहेतुरिति तेन तथेत्यर्थः ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं पृष्टो व्यास आह—अस्तीत्यादिभिस्त्रिभिः। 'जिज्ञासितं सुसम्पन्नं' इत्यादिना यत्त्वयोक्तं तदिदं सर्वं मे ममास्त्येव, तथापि मे शारीरो मानसश्चात्मा न परितुष्यते तस्यासन्तोषस्य मूलं कारणमव्यक्तं ममाज्ञातमतस्त्वा त्वां पृच्छाम। हे इति सम्बोधनम्। हे नारद त्वयाऽहमपि न जानामीति न च वाच्यम्, यत आत्मा श्रीनारायणस्तद्भवो ब्रह्मा तस्यात्मनो देहादुत्सङ्गात् भूतो जातस्त्वमित्याह—आत्मभवात्मभूतमिति। न केवलं पैतृक एव तव प्रभावः, किन्तु स्वतोऽपि त्वं गुह्यज्ञानवानित्याह अगाधबोधमिति ॥ ५ ॥ ❀ ❀ वा इत्यवधारणे। स ज्ञानिश्रेष्ठत्वेन प्रसिद्धो भवान् समस्तं सर्वं गुह्यं वेद जानाति ममासन्तोषकारणज्ञाने कः सन्देहः। सर्वगुह्यज्ञाने हेतुमाह—यदिति। यत् यस्मात् पुराणः सर्वकारणभूतः पुरुषो भवतोपासितः सेवितोऽतस्तत्कृपया सर्वं जानातीत्यर्थः। तत्कृपयाऽपि कथं सर्वज्ञता तत्राह—परावरेश इति, यतः परे ब्रह्मादयः अवरेऽस्मदादयस्तेषामीशो नियन्ताऽन्तर्यामीत्यर्थः। कुत एवं तस्येशत्वमित्यपेक्षायामाह—मनसेति। यतो मनसा सङ्कल्पमात्रेणैव विश्वं सृजति अवति रक्षति अत्ति संहरति च। अथापि गुणैः सत्त्वादिभिस्तस्यासङ्गः, तत्र न सज्जते इत्यर्थः ॥ ६ ॥ ❀ ❀ गुह्यज्ञानवत्त्वमेव दृष्टान्तेनोपपादयन्ममासन्तोषहेतुं वदेत्याह—त्वमिति। त्वं हि त्रिलोकीं पर्यटन्नर्क इव बहिः सर्वदर्शी योगबलेन वा प्राणवायुरिव सर्वप्राणिनामन्तश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः। अतः परे ब्रह्मणि भगवति धर्मतो ध्यानात्मकयोगेन निष्णातस्य तत्परस्य। तदुक्तं याज्ञवल्क्येन—'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्। अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इति। तथा च अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैः निष्णातस्य पारङ्गतस्य मे यन्न्यूनं न्यूनत्वमसन्तोषकारणं तदलमतिशयेन सम्यग्विचक्ष्व वितर्कय। ततश्च तद्वदेत्यर्थः ॥ ७ ॥ ❀ ❀ एवं पृष्टो नारदो व्यासेन 'किं वा भागवता धर्मा न प्रायेण निरूपिताः' इति यदुत्प्रेक्षितमसन्तोषकारणं तदेवाह—भवतेति। अमलं शृण्वतां चाखिलदुरितनिवर्त्तकं भगवतो यशो भवताऽनुदितप्रायं प्रायेणानुदितम्। अत एव तव सन्तोषो न जात इति शेषः। ननु वेदविभागवेदान्तसूत्रमहाभारतादिकरणेन सर्वोपकारस्य जातत्वात्तेन कथं न सन्तोष इत्याशङ्क्य यद्व्यासेन 'प्रियाः परमहंसानाम्' इत्यादिकारणं तर्कितं तन्मनसि निधायोत्तरमाह—येनेति। असौ सन्तोषकर्ता सर्वान्तर्यामी भगवान् येन न तुष्येत तद्दर्शनं शास्त्रं खिलं न्यूनं निरर्थकमेवाहं मन्ये इत्यन्वयः ॥ ८ ॥

हिन्दी अनुवाद

व्यासजीने कहा—आपने मेरे विषयमें जो कुछ कहा है, व सब ठीक ही है। वैसा होनेपर भी मेरा हृदय सन्तुष्ट नहीं है। पता नहीं, इसका क्या कारण है ? आपका ज्ञान अगाध है। आप साक्षात् ब्रह्माजीके मानसपुत्र हैं। इसलिये मैं आपसे ही इसका कारण पूछता हूँ ॥ ५ ॥ ❀ ❀ नारदजी! आप समस्त गोपनीय रहस्योंको जानते हैं; क्योंकि आपने

उन पुराणपुरुषकी उपासना की है, जो प्रकृति-पुरुष दोनोंके स्वामी हैं और असङ्ग रहते हुए ही अपने सङ्कल्पमात्रसे गुणोंके द्वारा संसारकी सृष्टि, स्थिति और प्रलय करते रहते हैं ॥ ६ ॥ ❀ ❀ आप सूर्यकी भाँति तीनों लोकोंमें भ्रमण करते रहते हैं और योगबलसे प्राणवायुके समान सबके भीतर रहकर अन्तःकरणोंके साक्षी भी हैं। योगानुष्ठान और नियमोंके द्वारा परब्रह्म और शब्दब्रह्म दोनोंकी पूर्ण प्राप्ति कर लेनेपर भी मुझमें जो बड़ी कमी है, उसे आप कृपा करके बतलाइये ॥ ७ ॥ ❀ ❀ नारदजीने कहा—व्यासजी! आपने भगवान्‌के निर्मल यशका गान प्रायः नहीं किया। मेरी ऐसी मान्यता है कि जिससे भगवान् संतुष्ट नहीं होते, वह शास्त्र या ज्ञान अधूरा है ॥ ८ ॥

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः । न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥
न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥ १० ॥
तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोऽङ्कितानि यत् शृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ११ ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु भगवद्यश एव तत्र तत्रानुवर्णितं तत्राह यथेति । चशब्दाद्धर्मादिसाधनानि च । तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा न ह्युक्त इत्यर्थः ॥ ९ ॥ ❀ ❀ वासुदेवव्यतिरिक्तान्यविषयज्ञानवदेवान्यविषयं वाक्चातुर्यं च खिलमेवेत्याह नेति । चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानमुशन्ति मन्यन्ते । कुतः । मानसाः सत्त्वप्रधाने मनसि वर्तमाना हंसा यतयो यत्र न निरमन्ति कर्हिचिदपि नितरां न रमन्ते । उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते । यथा प्रसिद्धा हंसा मानसे सरसि चरंतः कमनीयपद्मखंडनिवासास्त्यक्तविचित्रान्नादियुक्तेऽप्युच्छिष्टगर्ते काकक्रीडास्थाने न निरमंत इति श्लेषः ॥ १० ॥ ❀ ❀ विनापि पदचातुर्यं भगवद्यशःप्रधानं वचः पवित्रमित्याह तदिति । तद्वाग्विसर्गः स चासौ वाग्विसर्गो वाचः प्रयोगः । जनानां समूहो जनता, तस्या अघं विप्लावयति नाशयतीति तथा सः । यस्मिन्वाग्विसर्गे अबद्धवत्यप्यपशब्दादियुक्तेऽपि प्रतिश्लोकमनन्तस्य यशसांऽकितानि नामानि भवन्ति । तत्र हेतुः । यद्यानि नामानि साधवो महांतो वक्तरि सति शृण्वंति श्रोतरि सति गृणन्ति अन्यदा तु स्वयमेव गायन्ति कीर्तयन्ति ॥ ११ ॥ ❀ ❀ भक्तिहीनं कर्म शून्यमेवेति कैमुत्यन्यायेन दर्शयति नैष्कर्म्यमिति । निष्कर्म ब्रह्म तदेकाकारत्वान्निष्कर्मतारूपं नैष्कर्म्यम् । अज्यतेऽनेनेत्यंजनमुपाधिस्तन्निवर्तकं निरंजनम् । एवंभूतमपि ज्ञानमच्युते भावो भक्तिस्तद्वर्जितं चेदलमत्यर्थं न शोभते । सम्यगपरोक्ष्याय न कल्पत इत्यर्थः । तदा शश्वत्साधनकाले फलकाले चाभद्रं दुःखरूपं यत्काम्यं कर्म यदप्यकारणमकाम्यं तच्चेति चकारस्यान्वयः । तदपि कर्म ईश्वरे नार्पितं चेत्कुतः पुनः शोभते ? बहिर्मुखत्वेन सत्त्वशोधकत्वाभावात् ॥ १२ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राक्षिपति नन्विति । तत्र तत्र पाद्मब्रह्माण्डादिपुराणेषु । इत्यर्थ इति । पुरुषार्थशिरोमणिरपि वासुदेवमहिमा पुरुषार्थत्वेनापि न वर्णितः । किं तु मोक्षसाधनत्वेन वर्णितोऽतोऽत्यादरणीयवस्तुन आदराभावश्चित्तस्याप्रसादमपि किं न करोत्विति भावः । ननु अन्यत्र पुण्यतीर्थेषु मुक्तिरेव महाफलम् । "मुक्तैः प्रार्थ्या हरेर्भक्तिर्मथुरायां च लभ्यते" इति । "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्यादिभिस्तत्र तत्र क्वचिन्मोक्षोपर्यपि भक्तिरुक्तेत्यत आह—अन्विति । अन्वनु पौनःपुन्येन न वर्णितः । "आनन्दमयोऽभ्यासात्" इत्यत्राभ्यासस्यैव शास्त्रतात्पर्यज्ञापकत्वेनोक्तत्वात् । अतो भगवन्महिम्न एव फलत्वेनोत्कर्षं पौनःपुन्येन यदा वर्णयिष्यसि तदैव ते चित्तप्रसादो भावीति भावः ॥ ९ ॥ ❀ ❀ चित्राणि गुणालंकारयुक्तानि पदानि यत्र श्लेषेण चित्रस्य विस्मयस्य स्थानमपि यथा मन्त्रशास्त्रादि झटिति फलप्रदर्शकतया विस्मयकारि । कीदृशं जगदपि पवित्रयति स्वश्रोतृवक्त्राद्यात्मकं सर्वं जगदपि पुनाति किं पुनः स्वमिति जीवतुल्येन तद्यशसा विना कविवचोऽलंकारादियुक्तमपि मृतशरीरमिवापवित्रं भवतीति भावः । वायसं वयसो देहावस्थाया निर्वाहकं जीवनोपयोगिगणितायुर्वेदादिरूपं वा । यद्वा वायसं वयो हन्तीति वायसं कर्मकारकादत्र हननेऽर्थेऽण्प्रत्ययः । "किमन्यैरसदालापैरायुषो यदसद्व्ययः" इत्युक्तेः । मानसा हरेर्मनसि स्थिता भक्ताः "स त्वं हरेरनुध्यातः" इत्युक्तन्यायेन यत्र न नितरां रमन्ते सर्वथैव

न रमन्ते इत्यर्थः। यद्वा "यमकश्लेषचित्रेषु शसयोर्बवयोर्न भित्" इत्यालंकारिकोक्तेः, वा निश्चयेन आयशमयशस्करं तीर्थं शास्त्रमित्यर्थः। न यशो यस्मात्तदयशम्, समासान्तो डः, पुनः स्वार्थिकाण्यायशमिति "निपानागमयोस्तीर्थम्" इति कोशः। तच्चानंगरंगादिकामशास्त्राणीति ध्येयम्। यद्वा मानसाः सनकादय इत्युशन्तीत्यस्य कर्तृपदं कमनीयं सरो ब्रह्म वा। वश कान्तावत औणादिकः किच्प्रत्ययः। किस्त्वात्संप्रसारणे प्रतिपदिकसंज्ञोत्तरं "चोः कुः" इति कुत्वे रूपमुशिगिति। यद्वा जगदेव पविर्वज्रं "कुलिशं भिदुरं पविः" इत्यमरोक्तेस्तस्मात्त्रायत इति। यद्वा जगत्पिबति संहरतीति जगत्पः कालस्तस्माद्त्रिायत इति तथा, "जगदघभिदलं स्याच्छ्रावयेद्वा मुरारेः" इति श्रीदशमोक्तेः। यद्वा जगत्पान्ति तत्त्वोपदेशादिनेति जगत्पाः शुकसनकादयस्तै-र्विशेषेण त्रायते बर्ध्यत इति जगत्पवित्रम्। अत्र वचःशब्देन वाक्येऽभिधीयमाने "नाभागा नभगापत्यं यतंतं भ्रातरः कविम्। यविष्ठं व्यभजन्दायं ब्रह्मचारिणमागतम्" इत्यादीनां श्रीभागवतीयानामपि पृथग्वाक्यानां वायसतीर्थत्वं प्रसज्येत, शास्त्रेभिधीयमाने व्यासादिकृतेषु पुराणादिषु न कुत्रापि हरियशःसामान्याभाव इति न कस्यापि वायसतीर्थत्वं स्यात्। तस्मात् "कलिमलसंहति-कालनोखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम्। इह तु पुनर्भगवानशेषमूर्त्तिः परिपठितोनुपदं कथाप्रसंगैः" इति द्वादशोक्तेरत्र वचःशब्देनोत्तरत्र वाग्विसर्गपदेन च कथाप्रसंग एवोच्यते। एवं च सन्त्यत्रत्यानि सर्वाण्येवोपाख्यानानि हरियशोलंकृतान्येवान्यत्र पुराणादौ बहून्येवोपाख्यानानि हरियशोरहितानि वायसतीर्थान्येवेति संगतिः॥ १०॥ ❀ ❀ व्यतिरेकेणोक्त्वाऽन्वयेनाह-विनापीत्यादिना। "अबद्धं स्यादनर्थकम्" इत्यमरः। प्रतिश्लोकं श्लोकमात्रे प्रतीतसांकेतादित्वादसम्यगर्थबोधकेपि यस्मिन्यश-उपाख्याने, यद्यशोपाख्यानं तत्र जनताघविप्लवत्वे हेतुरिति स्वामिचरणानाम्। शृण्वन्ति श्रुत्वापि गायंति गीत्वापि गृणन्ति न तृप्यंतीति भावः॥ ११॥ ❀ ❀ इत्यर्थ इति। "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति वाक्यात्। "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्" इति ब्रह्मवाक्याच्चायं भावः। यद्वा नैष्कर्म्यं ज्ञानमत्र वेदान्तशास्त्राभ्यासः। निष्कर्मतापादकं गीतोक्तम् "अभयं सत्त्वसंशुद्धिः" इत्यादिरूपं वा। अत्र विश्वनाथः–न केवलं वचोमात्रमेव भक्तिरहितं व्यर्थमपि तु श्रौतवचसापि प्रतिपाद्यमपरोक्षं ज्ञानमपि भक्तिरहितं व्यर्थं किमुत परोक्षं ज्ञानं किमुततरां निष्कामकर्म किमुततमां सकामकर्म व्यर्थमित्याह नैष्कर्म्यरूपम्। अच्युतभाव-श्चिदानंदविग्रहत्वभावनया या भक्तिस्तद्वर्जितं चेज्ज्ञानं न शोभते। तेन तस्मिन्मायाशबलतालक्षणापकर्षभावनया मोक्षसाधकं न भवतीत्यर्थः। अलमतिशयेन। निरञ्जनम् अंजनमविद्या तद्रहितमपरोक्षमपि, किं पुनः परोक्षमित्यर्थः। न च वाच्यमुपाध्यभावे मोक्षस्यासंभावना नास्तीति। भगवतोऽचिंत्यशक्त्या नष्टस्याप्युपाधेः पुनः पुनः प्ररोहात्। तथा हि वासनाभाष्यधृतं परिशिष्टवचनं "जीवन्मुक्ता अपि पुनर्बंधनं यान्ति कर्मभिः। यद्यचिंत्यमहाशक्तौ भगवत्यपराधिनः" इति। तत्रैवान्यत्र च "जीवन्मुक्ताः प्रपद्यन्ते क्वचित्संसारवासनाम्। योगेन न विलिप्यंते कर्मभिर्भगवत्पराः" इति। तथा "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति। ज्ञानकार्यं नैष्कर्म्यमपि न शोभते। तथाहि–रथयात्राप्रसंगे विष्णुभक्तिचन्द्रोदयधृतं पुराणान्तरवाक्यं "नानुव्रजति यो मोहाद् व्रजन्तं जगदीश्वरम्। ज्ञानाग्निदग्धकर्मापि स भवेद् ब्रह्मराक्षसः" इति। अत एवाग्रे वक्ष्यते "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः" इति। ज्ञानस्याप्यच्युतभाववर्जितत्वे तस्मिन्भगवति मायामयत्वभावनादिलक्षणोऽपराधो दुर्निवारण एव। एवं च यदि तादृशभक्तिहीनं ज्ञानमपि विफलं तदा कुतः पुनरिति स्वामिवत्॥ १२॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

जनतेति। 'तस्य समूहः' इत्यधिकारे 'ग्रामजनबन्धुभ्यस्तल्' इति सूत्रेण जनशब्दात् समूहार्थे तल्प्रत्ययो बोद्धव्यः॥११॥ ❀ ❀ नैष्कर्म्यमिति। निष्कर्मणो मोक्षस्य साधनं वा नैष्कर्म्यम्। अज्यत इति। अज्यते म्रक्ष्यते इत्यर्थः॥ १२–१४॥

श्रीमद्वीरराघवव्याख्या

प्रायशब्दाभिप्रेतं व्यनक्ति यथेति। हे मुनिवर्य! धर्मादयो धर्मार्थकामादयोऽर्थाः पुरुषार्थाः यथा ससाधनैरनुकीर्त्तिता भारते इति शेषः, तथा वासुदेवस्य महिमा ते त्वया नानुवर्णितः॥ ९॥ ❀ ❀ एवं तदुत्प्रेक्षितमेवासंतोषहेतुं दृढीकृत्याह प्रियाः परमहंसानां त एव ह्यच्युतप्रिया इति। तदुत्प्रेक्षितमेव दृढीकर्त्तुं भागवतधर्माप्रतिपादकस्य प्रबंधस्य परमहंसैरनादरणीयत्वमित्याह नेति। तच्चित्राणि पदानि यस्मिन् अथ वैचित्र्यस्याप्युपलक्षणमेतदेवंविधमपि यद्वचः वाक्यं प्रबंध इति यावत्, पवित्रं शृण्वतां वदतां च पवित्रत्वापादकं हरेर्यशः कचिदपि न प्रगृहीत नोपाददीत चेन्न प्रगृणीतेति पाठे न वदेत चेत्प्रबंधयितृगतं वदनं प्रबंधे आरोप्य न गृणीतेत्युक्तम्। यद्वा यच्चित्रपदमपि वचस्तत्र हरेर्यशो न प्रगृणीत चेत्प्रबंधकर्त्तेति शेषः, तद्वाचः प्रबंधं वायसं तीर्थमुशंति वायसतीर्थतुल्यमिच्छंति। तीर्थं विशिंषन्निच्छाफलमाह–यत्र वायसे तीर्थे मानसा हंसा उशिकक्षयाः कमनीयनिवासाः न निरमंति मानसाख्यसरोवरकमनीयनिवासस्थानविहारिणो मानसहंसा यथा वायसं तीर्थमुच्छिष्टयात्रादिषु रथ्योदकयुक्तं क्षेत्रं वायस-संचारयोग्यमुशंति मन्यंत इति यावत्, यत्र न निरमंति न नितरां रमंते क्षणमात्रमपि न तत्रावतिष्ठंत इत्यर्थः। तथोशिकमनीयं निरतिशयप्रियं ब्रह्मैव क्षयमाश्रयो येषां मानसाः मनस इमे मानसा ब्रह्मानंदानुभाविका हंसा विशुद्धांतःकरणाः परमहंसा इति

यावत्, तद्वचः वायसं तीर्थमुशंति वायसतुल्यानां कामुकानामनुभवयोग्यं मन्यंते । यत्र न निरमंति नाद्रियंते न तत्र कर्णं दत्वा शृण्वंतीत्यर्थः । (उशिक्षतयेति पाठे उशब्दोऽवेधावणपरप्रेरणयापीत्यर्थः) ॥ १० ॥ ❀ ❀ तदेवं भगवद्यशोऽनंकितप्रबंधस्य शब्दतोऽर्थतश्चित्रपदस्यापि भगवतानुपादेयत्वमुक्तम्, अथ तदंकितस्य वैचित्र्यरहितस्यापि प्रत्युत शब्दतोऽर्थतश्च दुष्टस्याप्यतीव तदुपादेयत्वमाह तदिति । प्रतिश्लोकमबद्धवत्यपि शब्दतोऽर्थतश्च दोषवत्यपि यस्मिन्प्रबंधेऽनंतस्य भगवतो यशसांकितानि चिह्नितानि भगवद्गुणप्रत्यायकानि नामानि नारायणवासुदेवकृष्णदिनामानि दृश्यंते इति शेषः, तद्वाग्विसर्गः स वाक्सृष्टिरूपः प्रबंधः जनता जनानां समूहः "ग्रामजनबंधुभ्यस्तल्" इति समूहार्थे तल्प्रत्ययः, तलंतं स्त्रियामिति स्त्रीत्वं, तस्या अघं पापं विप्लवयति नाशयतीति विप्लवः अंतर्भावितण्यर्थात् प्लवेः पचादित्वादच्, यद्वा भावे 'ऋदोरप्' इत्यप्, जनताया अघस्य विप्लवो नाशो यस्मात्स तथा । अत एव भागवता उपाददत इति वदन् विशिनष्टि यच्छृण्वंति इति यद्वाग्विसर्गं साधवः शृण्वंति श्रावयितृसद्भावे गृणंति कथयंति श्रोतृसद्भावे तदुभयाभावे केवलं स्वयं गायन्ति सामान्याभिप्रायेण यत्तदिति नपुंसकनिर्देशः, शब्ददोषो नामानुपस्थाप्यार्थाभिप्रायेण प्रयोगः, यथा स्व इत्यस्य ज्ञातिधनाभिप्रायेण प्रयोगः । अर्थदोषो नामानुपस्थापकशब्दोपस्थाप्यत्वं, यथात्मात्मीययोः स्वशब्दोपस्थाप्यत्वम् । तदेवं त्रिवर्गतत्साधनप्रतिपादकं प्रबंधं भागवतानुपादेयं निंदित्वा भगवद्यशःप्रतिपादकस्यैव तदुपादेयत्वमुक्तम् ॥ ११ ॥ ❀ ❀ ननु धर्मादितत्साधनानामपि पुरुषाभिलषितत्वेन हितत्वात्तन्निरूपणमप्यर्थवदेवेत्याशंकायां विषमिश्रपयःप्रशंसातुल्यं तन्निरूपणमित्यभिप्रायेणैश्वर्यकैवल्यतत्साधनानां पुरुषार्थत्वतत्साधनत्वं प्रतिक्षिपति नैष्कर्म्यमिति । निर्गतं कर्मणो निष्कर्म निष्कर्मैव नैष्कर्म्यं स्वार्थे ष्यञ्, कर्मणो बहिर्भूतं कर्मेतरदात्मयाथात्म्योपासनात्मकज्ञानमित्यर्थः, तन्निरंजनं रागद्वेषाद्यंजनरहितं रागादिभिरनुपप्लुतमप्यच्युतस्य भगवतो भावेन भक्तियोगेन वर्जितं चेद् ज्ञानानां मध्ये मलवद्धीनमत एव न शोभते । यद्वा नैष्कर्म्यं निरंजनं ज्ञानमप्यच्युतभाववर्जितं चेन्नालं शोभते नातीव शोभत इत्यर्थः । "सर्व्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि"ति केवलिनोऽपि पुनः च्यवनधर्मोक्तेस्तावत्कैवल्यस्य न पुरुषार्थत्वं नापि तत्साधनयोगस्य पुरुषार्थसाधनत्वमिति भावः । यतो नैष्कर्म्यं ज्ञानयोगमेव न शोभते, कुतः पुनः तत्कर्म शोभते-किं यत्तत्कर्म-ईश्वरे न चार्पितमनर्पितमभिसंहितार्थकामादिफलमच्युतभाववर्जितं चेत्यर्थः । अत एव शश्वत्सदा फलानुभवदशायामनुष्ठानदशायां चाभद्रं दुःखं यस्मिंस्तदनुष्ठानदशायामभद्रवत्त्वं कायक्लेशाद्यावहत्वेन दुष्टमेव । फलदशायामपि पुनः पतनभयशंकयाऽभद्रवत्त्वमवगंतव्यम् । यदप्यकारणं निष्कामकर्माप्यच्युतभाववर्जितं चेन्न शोभते । अयमर्थः ज्ञानयोगः कर्मयोगश्च भगवद्भक्तिवर्जितो न शोभते । काम्यं कर्म न शोभते इति कैमुत्यन्यायसिद्धमिति ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भारतादिशास्त्रेषु हरियशसो बहूदितत्वात् कथं खिलं मन्य इत्युच्यत इति तत्राह यथेति । हे मुनिवर्य सर्वज्ञतम मुनिभिः व्रियत इति वा मुनिवर्य ! धर्मादयः पुरुषार्थाः यथानुवर्णितास्तथा वासुदेवस्य महिमा नानुवर्णितः, हि यस्मात्तस्मादनुवर्णनीयः । धर्मादीनामल्पकथनेनापि पूर्तिः स्यान्न तथा वासुदेवस्य महिम्नो भारतादावतिकथितस्यापि सतां तत्र तात्पर्यातिशयात्फलाधिक्याच्च न हि सूर्योदयमाकांक्षमाणस्य खद्योतोदयेनेच्छा निवर्तत इत्येतदर्थं हिशब्देनाह, द्वितीयो हिशब्दो हेत्वर्थः ॥ ९ ॥ ❀ ❀ धर्मादीनामल्पकथनेन कथं पूर्तिः स्यादिति तत्राह नेति । यद्वचो जगत्पावनकरं हरेर्यशो न गृणीत कर्हिचिदपि न प्रतिपादयेत्तच्चित्रपदमपि चित्राणि पदानि यस्मिंस्तत्तथोक्तं तत् वचः शास्त्रं न भवतीत्यर्थः । कुतः ? तद्वायसं वयोमात्रानुजीवितार्थं शास्त्रमुशंति इच्छंति, यत्र काकोच्छिष्टतीर्थे मानसाः प्रेक्षावंतः मानसाख्यसरोविहारिणो वा हंसाः परमहंसाः धवलपक्षा वा जलपयोविवेककारिणः मिमंक्षया विचारलक्षणस्नानेच्छया न न्यपतन् न निपतंति न प्रविशंतीति यथा तथा यत्र यस्मिन् तीर्थे मानसाः ब्रह्मणो मनसो जाताः सनकादयः हंसाः निर्लेपा इति वा । तस्मात् सज्जनानादरणीयत्वेन धर्मादीनामल्पकथनेन पूर्तिरिति भावः । विरमंत्युशिक्क्षया उशिक्शुद्धं क्षयं स्थानं येषां ते तथोक्ताः । शुद्धं ब्रह्म तदेव क्षयो येषां ते तथोक्ता इति वेति पठित्वा केचिद्व्याचक्षते तच्चिंत्यम् ॥ १० ॥ ❀ ❀ वासुदेवमहिम्नोऽतिकथितस्यापि कथं न पूर्तिरिति तत्राह स वागिति । यस्मिन्निबंधे प्रतिश्लोकमपशब्दाद्यबद्धवत्यपि शाब्दिकैर्जुगुप्सिते देशकालगुणैरनंतस्य हरेः पारिजातहरणाद्यात्मकयशोलांछितानि नारायणादिनामानि संति साधवः परमभागवताः शुकादयो यच्च शृण्वंति गायंति गृणंति स जनतायाः जनसमूहस्याघं पापं विप्लावयति नाशयतीति जनताघविप्लवः वाचां विसर्गः विशिष्टरचनाविशेष इत्येकान्वयः । यस्मिन् सति प्रशस्तानि अनंतस्य नामानि साधवः शृण्वंतीति यत् यस्मात्तस्मात्स एव वाग्विसर्ग इति वा । जनतापापविनाशहेतुत्वात् सज्जनगृहीतत्वाच्च वासुदेवमाहात्म्यप्रतिपादकमेव शास्त्रं नान्यदतस्तदेव शास्त्रप्रणेतृभी रचनीयमिति भावः ॥ ११ ॥ ❀ ❀ न केवलं वासुदेवमहिमद्योतकयशोंकविधुरशास्त्ररचनमेव मोघं किंतु हरिभक्तिविरहितनिर्निमित्तज्ञानकर्मणी अपि निष्फले एवेति विज्ञापयतीत्याह नैष्कर्म्यमिति । नैष्कर्म्यं स्वतो निष्कर्मणो मुक्तेः साधनम् अलं निरंजनं विषयसंमार्जनमलरहितम् अत्यंतविरक्तिमद्वेदार्थविषयं परोक्षज्ञानमप्यच्युतभाववर्जितं भगवद्भक्तिरहितं हरावच्युततया निरंतरभावनया मनोयोजनेन रहितं वा न शोभते अधिकारिणोभीष्टफलं न प्रकाशयति, बंधकतया शश्वत्सर्वदा अभद्रमसंगलमीश्वरे हरौ न चार्पितं कर्म न शोभत इति कुतः पुनः किमु वक्तव्यं ? यदप्यकारणं फलकामनादिविधुरं

तथापीत्यर्थः। शश्वदभद्रमनुष्ठानकाले फलकाले वामंगलं यत्काम्यं कर्म न शोभत इति कुतः पुनः यदप्यकारणं नित्यं कर्म हरौ नार्पितं चेत्तन्न शोभत इति किं वक्तव्यमिति वा। अच्युतभाववर्जितमित्यनेनापरोक्षज्ञानस्य भक्तिसाध्यत्वात् परोक्षोपपदमेवात्र ज्ञानं विवक्षितमिति ज्ञायते ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथा तद्वदपि ॥ ९ ॥ ❀ ❀ तत्र तत्सम्बंधमात्रं नास्ति तत् पुनरतिनिन्दितमित्याह न यद्वच इति। कर्हिचित् कुत्रचिदपि न प्रकर्षेण केनाप्यंशेन गृणीत ॥ १० ॥ ❀ ❀ तदेवं व्यतिरेकेण तद्यशः स्तुत्वा अन्वयेनापि स्तौति। स वाचां प्रयोगो जनपरम्परया अपि अघविप्लवो यस्मात् तथाविधः। कीदृशोऽपि यस्मिन् श्लोकं श्लोकं वर्णनं वर्णनं प्रति अबद्धवत्यपि तत्तच्छ्लोकमात्रं यत्किंचित्प्रतीतिसंकेतादित्वादसम्यगर्थबोधकेऽपि तस्य यशोवर्णनलेशसंयोजितानि नाममात्राणि सन्ति, न तु वर्णनचातुर्य्याणि तादृशोऽपि। अहो तस्य नामाभासमात्रसिद्धजनताघविप्लवमात्रत्वं कियन्नाममाहात्म्यं यत्तादृशकनिष्ठवाग्विसर्गमयमपि यशः साधवः पूर्वोक्तप्रोज्झितकैतवा अपि भक्ताः परमानन्दावेशात् विविक्ततयानुशीलयन्तीत्याह यच्छृण्वन्तीति ॥ ११ ॥ ❀ ❀ तदेवं हरियशोवर्णनोपलक्षितभक्तितो ब्रह्मज्ञानस्यापि न्यूनत्वे सकामनिष्कामकर्म्मन्यूनत्वं किमुतेत्याह नैष्कर्म्यमिति तैः ॥ १२-१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु पुराणेषु पाद्मादिषु भगवद्यशो वर्णितमेवेति तत्राह यथेति। चकारोऽप्यर्थे। धर्म्मादयोऽपि वासुदेवमहिमतोऽतिनिकृष्टा अपि यथा अर्था अनुकीर्त्तिताः पुरुषार्थत्वेनोक्ताः तथा वासुदेवस्य महिमा न वर्णितः पुरुषार्थत्वेनापि न वर्णितः, वाणतोऽपि भूरिशस्तत्र तत्र तन्महिमा अन्ततो मोक्षसाधनत्वेनोक्तः। अतोऽत्यादरणीयस्य वस्तुनः आदराभावश्चित्तस्याप्रसादमपि किं न करोत्विति भावः। ननु अन्यत्र पुण्यतीर्थेषु मुक्तिरेव महाफलम् 'मुक्तैः प्रार्थ्या हरेर्भक्तिर्मथुरायाञ्च लभ्यते' इति 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति। समः सर्व्वेषु भूतेषु मद्भक्तिं लभते परामि'त्यादिभिस्तत्र तत्र कचिन्मोक्षोपर्य्यपि भक्तिरुक्तेत्यत आह अन्विति। अन्वनु पौनःपुन्येन न वर्णितः 'आनन्दमयोऽभ्यासादि'त्यत्र अभ्यासस्यैव शास्त्रतात्पर्य्यज्ञापकत्वेनोक्तत्वात्। अतो भगवन्महिम्न एव फलत्वेनोत्कर्षे पौनःपुन्येन स्पष्टतया यदा वर्णयिष्यसि तदैव ते चित्तप्रसादो भावीति भावः ॥ ९ ॥ ❀ ❀ वासुदेवमहिमवर्णनाभावे कविकृतिमात्रस्यैव जुगुप्सितत्वमेवाह न यदिति। यद्वचः कर्तृ चित्राणि गुणालंकारयुक्तानि पदानि यत्र तत् श्लेषेण चित्रस्य विस्मयस्य स्थानमपि हरेर्यशो न प्रगृणीत, कीदृशं ? जगदपि पवित्रयतीति तत् स्वश्रोतृवक्त्राद्यात्मकं सर्व्वं जगदपि पुनाति किं पुनः स्वमिति। जीवनतुल्येन तद्यशसा विना कविवचोऽलंकारादियुक्तं मृतशरीरमिवापवित्रं भवतीति भावः। तद्वायसं तीर्थम् उच्छिष्टविचित्रान्नादियुक्तं गर्तविशेषं काकतुल्यानां कामिनामभिलषणीयत्वात् उशन्ति मन्यन्ते। कुतः मानसा मानससरोवरस्था हंसाः पक्षे मानसा हरेर्मनसि स्थिता भक्ता यत्र न नितरां रमन्ते न सर्व्वथैव रमन्त इत्यर्थः। 'साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्' इति भगवदुक्तेः। यद्वा मानं तद्वचस आदरम् अरमणात् स्यन्ति नाशयन्ति। यद्वा मानसाः सनकादय इत्युशन्तीत्यस्य कर्तृपदम्। यतः उशिक् कमनीयं सरो भगवद्धाम च क्षयो निवासो येषां ते। अत्र वचःशब्देन वाक्ये अभिधीयमाने 'नाभागो नभगापत्यं यततं भ्रातरः कविम्। यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतमि'त्यादीनां श्रीभागवतीयानामपि पृथग्वाक्यानां वायसतीर्थत्वं प्रसज्जेत। शास्त्रेऽभिधीयमाने व्यासादिकृतेषु पुराणादिषु न कुत्रापि हरियशःसामान्याभाव इति न कस्यापि वायसतीर्थत्वं स्यात्। तस्मात् 'कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम्। इह तु पुनर्भगवानशेषमूर्त्तिः परिपठितोऽनुपदं कथाप्रसङ्गैरि'ति द्वादशोक्तेरत्र वचःशब्देनोत्तरत्र वाग्विसर्गपदेन च कथाप्रसङ्ग एवोच्यते। एवञ्च सति अत्रत्यानि सर्वाण्येवोपाख्यानानि हरियशोऽलंकृतान्येव। अन्यत्र पुराणादौ बहून्येवाख्यानानि हरियशोरहितानि वायसतीर्थान्येवेति सङ्गतिः ॥ १० ॥ ❀ ❀ व्यतिरेकेणोक्त्वा अन्वयेनाह तद्वागिति। स चासौ वाग्विसर्गो वाचः प्रयोगश्चेति स जनतायाः जनसमूहस्याघं विप्लावयति नाशयतीति स प्रतिश्लोकमबद्धवत्यपि बंधोऽपि गाढः शिथिलो वा क्वापि श्लोके यत्र नास्ति किं पुनरलंकारादिरित्यर्थः। अपशब्दवत्यपीति स्वामिचरणाः। तथाभूतेऽपि यत्र वाग्विसर्गे उपाख्याने नामानि सन्ति। किंच यद्यदेवोपाख्यानं शृण्वन्ति श्रुत्वापि पुनर्गायन्ति गीत्वापि पुनर्गृणन्ति न तु तृप्यन्तीति भावः। यद्वा वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति अन्यदा स्वयं गायन्ति ॥ ११ ॥ ❀ ❀ न केवलं वचोमात्रमेव भक्तिरहितं व्यर्थम्, अपि तु श्रौतवचसापि प्रतिपाद्यमपरोक्षं ज्ञानमपि भक्तिरहितं व्यर्थं, किमुत परोक्षं ज्ञानं किमुततरां निष्कामकर्म्म किमुततमां सकामकर्म्म व्यर्थमित्याह नैष्कर्म्यमिति। अच्युते भावश्चिदानन्दविग्रहत्वभावनया या भक्तिस्तद्वर्जितं चेज्ज्ञानं न शोभते। तेन तस्मिन् मायाशबलतालक्षणापकर्षभावनया भक्तिसत्त्वेऽपि मोक्षसाधकं न भवतीत्यर्थः। कीदृशम् ? अलम् अतिशयेन निरञ्जनम् अञ्जनमुपाधिरविद्या तद्रहितमपरोक्षमपि किं पुनः परोक्षमित्यर्थः। न च वाच्यमुपाध्यभावे मोक्षस्यासम्भावना नास्तीति। भगवतोऽचिन्त्यशक्त्या नष्टस्याप्युपाधेः पुनः पुनः प्ररोहात्। तथाहि वासनाभाष्यधृतं परिशिष्टवचनम्-'जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्म्मभिः। यद्यचिन्त्यमहाशक्तौ भगवत्य-

पराधिनः ॥" इति । तत्रैवान्यत्र च-'जीवन्मुक्ताः प्रपद्यन्ते क्वचित् संसारवासनाम् । योगिनो न विलिप्यन्ते कर्म्मभिर्भगवत्पराः ॥' इति । तथा 'ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुने'ति ज्ञानकार्य्यं नैष्कर्म्म्यमपि न शोभते । तथाहि रथयात्राप्रसङ्गे विष्णुभक्तिचन्द्रोदयधृतं पुराणान्तरवचनम्-'नानुव्रजति यो मोहाद् व्रजन्तं जगदीश्वरम् । ज्ञानाग्निदग्धकर्म्मापि स भवेद् ब्रह्मराक्षसः॥' इति । अत एवाग्रे वक्ष्यते-'आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोनादृतयुष्मदङ्घ्रयः ।' इति । ज्ञानस्याप्यच्युतभाववर्जितत्वे तस्मिन् भगवति मायामयत्वभावनादिलक्षणोऽपराधो दुर्निवार एव । एवञ्च यदि तादृशभक्तिहीनं ज्ञानमपि विफलं तदा कुतः पुनः शश्वत् फलकाले साधनकाले अभद्रं दुःखरूपं कर्म्म प्रवृत्तिपरं यदप्यकारणं निवृत्तिपरञ्च कर्म्म ईश्वरे अनर्पितं सत् न शोभते साफल्याय न भवतीति ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु 'भगवान्वासुदेवश्च वर्ण्यतेत्र सनातनः' इति प्रतिज्ञापूर्वकं भगवद्गुणस्वरूपादि वा महाभारते वर्णितमेव । कथं मम दर्शनमपूर्णमित्यत आह यथेति ॥ ९ ॥ ❀ ❀ वासुदेवेतरविषयं वचोपि खिलमेवेत्याह नेति । चित्राणि पदानि यस्मिन् तच्चित्रपदमपि यद्वचः जगतः पवित्रत्वापादकं हरेर्यशः न प्रगृणीत न वदेत् , तत् वायसं तीर्थं वायसगुणयुक्तानां कामिनां रतिस्थानं मानसा वासुदेवमननप्रवणे मनसि स्थिताः उशिक्क्षयाः उशिक् कमनीयं प्रसिद्धमानसाख्यसरोवरोपमं भगवद्यशःप्रतिपादकं शास्त्रं क्षयो रमणस्थानं येषां ते हंसा विवेकिन उशंति मन्यंते, अत एव यत्र रथ्यांबुगर्तोपमे काकोपमजनप्रिये भगवद्यशोऽप्रतिपादके वचसि कर्हिचिदपि न निरमंति नितरां न रमंते ॥ १० ॥ ❀ ❀ वासुदेवेतरप्रतिपादकं वचश्चित्रपदमपि विवेक्यनुपादेयमित्युक्तं वासुदेवप्रधानं तु पदचातुर्यवर्जितमपि महतादरेण तेषामुपादेयमित्याह तदिति । स वाचो विसर्गः जनताघविप्लवः जनताया जनसमूहस्य अघं पापं विप्लावयतीति तथा । जनताघविप्लवत्वे हेतुमाह । यस्मिन्निति यस्मिन् प्रतिश्लोकमबद्धवत्यपि दोषयुक्तमपि वाग्विसर्गे अनंतस्य नामानि संति अतो यत् यं वाग्विसर्गं साधवः गुर्वादिभ्यः शृण्वंति शिष्यादिभ्यो गृणंति कथयंति स्वयं गायंति च ॥ ११ ॥ ❀ ❀ 'यथा धर्मादयश्चार्था मुनिवर्य्यानुकीर्तिताः' इत्यनेन धर्मादिषु मुमुक्षुजनापेक्षया अरुचिरुक्ता, तत्र शतसाहस्र्यां संहितायां यो धर्मः प्रोक्तः काम्यो हिंस्रः स हि विशेषतोऽरुचिहेतुः स भागवतैर्मुमुक्षुभिरनुपादेयः, यश्च निष्कामोपि भगवद्भाववर्जितः सोप्यसम्यगेव, यच्च कपिलपतंजलिमतानुसारिभगवद्भाववर्जितं ज्ञानं मोक्षधर्मादौ दर्शितं तदप्यसंगतमेव । यच्च भागवतजनानुग्रहकामेन भगवद्गीतानुसारेणोक्तम् , मुद्गलोपाख्यानादिषु भृगुभारद्वाजादिसंवादेषु वार्ष्णेयाध्यात्मादिप्रकरणेषु कर्मज्ञानवैराग्यभक्तिरहस्यं तत् सर्वं परमादरेणोपादेयमित्याशयेनाह नैष्कर्म्यमिति । निर्गतानि कर्माणि यतस्तन्निष्कर्म तदेव नैष्कर्म्यं स्वार्थे ष्यञ् । निरंजनं रागद्वेषादिदोषशून्यमेवं अच्युतस्य भावेन योगेन वर्जितं चेत् अलमत्यंतं न शोभते तदा शश्वदभद्रं सदैवोपक्रमकाले अनुष्ठानकाले फलकाले च दुःखावहं न च सर्वकर्मवैगुण्यापह ईश्वरेर्पितं यत्कर्म काम्यं तत्कुतः पुनः शोभते ? यदप्यकारणमकाम्यं तदप्यच्युतभाववर्जितं चेन्न शोभते । भगवद्भाववर्जितो ज्ञानयोगो निष्कामकर्मयोगश्च यदा न शोभते तदा काम्यं कर्म भगवद्भाववर्जितं न शोभते इति किमु वक्तव्यम् ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

"सर्वेषामेव भूतानां पिता माता स माधवः । तमेव शरणं यात शरण्यं कौरवर्षभाः ॥ अच्युताच्युत मा मैवं व्याहरामित्रकर्शन । पांडवानां भवान्नाथो भवंतं चाश्रिता वयम् ॥" 'करिष्ये वचनं तवे'त्यादिश्लोकसहस्रैः स्वातंत्र्येण भगवद्यशसः प्रतिपादनात् कथमुच्यतेनुदितप्रायमिति तत्राह यथेति । सत्यं प्रतिपादितं, तथापि प्रकरणाभावात् 'प्रकरणेन विषयो बध्यंते' इति न्यायात् तत्रत्यानां तच्छेषत्वम् । आनुशासनिकेपि भगवद्धर्माणां धर्मत्वेन प्रतिपादनं न यशस्त्वेन तदाह धर्मार्थकाममोक्षा यथा प्रकरणभेदेन प्रतिपादिताः न तथा भगवन्महिमा प्रकरणभेदेन प्रतिपादित इत्यर्थः ॥ ९ ॥ ❀ ❀ ननु प्रतिपादकानां कथं न फलसाधकत्वं तत्राह न तद्वचश्चित्रपदमिति । कीदृशमत्र फलं मृग्यते अंतःकरणप्रसादः परमानंदश्चेति चेत् न तस्येदं तीर्थं किंतु काव्यवत् शृंगारादिरसाविष्टानां कामिनामाश्चर्यरसजनकत्वं काकानामिवोच्छिष्टगर्तः । प्रमाणबलं दुर्बलमिति वक्तुमाह चित्रपदमिति । अर्थमिति अर्थविशेषाभावे पदचित्रता 'हीनत्वबोधिका' 'शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतमि'ति वाक्यात् विषपत्रैर्भोजनवच्च तत्रत्यं प्रमेयं न हरिरूपं किन्तूत्कृष्टत्वेन प्रतिपादितं तदाह हरेर्यश इति । जगत्पवित्रमिति, साधारणानां हि भारतं पावित्र्यजनकं, न पतितानां न वा शुकादितुल्यानाम् । तेन न सर्वाकांक्षापूरकम् , इदं तु जगत एव पवित्रं वच इति शब्दमात्रं तेन सामरागादीनामपि निवृत्तिः, कर्हिचिदिति मुख्यगौणलक्षणाप्रकरणादिभेदेषु एकस्मिन्नप्यंशे भगवत्प्रतिपादने न दोष इति सूचितम् । तत्काकवत्पदार्थप्रतिपादकं वायसं तीर्थं काकतीर्थमिति यावत् , वायसा वृद्धाः काकाः लोके चतुराश्च तथा कामिनो राजपुत्रादयः न त्वन्येषां काकानां च न ततोधिकदोषनिवृत्तिः, न वा तादृशगर्त्तनिर्मातुः ततश्च न निवृत्तिः हंसत्वाच्च तस्य उशंति वदंति मानसा इति मनस्येव तिष्ठंति न देहादौ, देहहितकरं च भारतं च अहं च इति ब्रह्मात्मबुद्धिः तद्युक्ताः परोक्षेण हंसा इत्युच्यंते क्षीरनीरविवेकिनश्च सहजसिद्धमपि संश्लेषं त्याजयंति न

संश्लेषजनके रमंते। 'पुंसां किलैकांत.धियामि'ति वाक्यात् भगवच्चरित्रं तादृशं उशिक् कमनीयं क्षयो निवासस्थानं येषां यथा यथा कमनीयता स्वरूपतो ज्ञानतश्च तथा तथा हंसनिवासत्वं यतो युक्तितः दृष्टांताच्च नान्यथा करणं तथापि भगवद्विषयकत्वात्॥ १०॥ ❀ ❀ पूर्वोक्तविपरीतमस्मदादीनां वचनमित्याह तद्वागिति। स चासौ वाग्विसर्गश्च स इति प्रसिद्धः भक्तकृतः भाषागीतगोविंदादिरपि जनतायाः प्राणिमात्रस्य अघं विशेषेण प्लावयति। सर्वथात्र शब्दबलमप्रयोजकमित्याह यस्मिन्निति। यस्मिन्वाग्विसर्गे भाषाग्रंथश्लोकेषु व्याकरणदुष्टस्य प्रयोगः अबद्धस्नानार्थं वा अर्द्धप्रयोगः अभ्युपगमेन वा मूर्खहृदये। तत्र हेतुः नामान्यनंतस्येति एकस्मिन्नप्यर्थे बहूनि नामानि प्रयुज्यंते यथा त्रिभवनात्मभवनेत्यादि सर्वतोनंतस्य अनंतान्येव नामानि भवंति न केवलं संज्ञाप्रतिपादकानि। किन्तु यशसा अंकितानि श्रवणे हेतुः यस्मिन् यस्माद्वा वक्तरि सति शृण्वंति श्रोतरि सति गायंति अन्यथा च गृणंति एतच्च पूर्वोक्तहंसादिसतां कृत्यं भगवत्संबंधिनां धर्माणां भगवता सह अभेदात् यत्र कचिदवतीर्णो भगवान् यथा सेव्यते तथा कचिदपि स्थितानि नामानि श्रूयंते इत्यर्थबलम्॥ ११॥ ❀ ❀ एवं शब्देषु भगवच्छब्दा एवोत्तमाः नान्य इति निरूपितं, इदानीमर्थे विचारः क्रियते तत्र ज्ञानं स्वरूपतः फलतश्च महत् तथा यज्ञादि तथैवाचारः तथान्ये धर्मादयः एते भगवता भगवदीयैश्च सह स्वरूपतः फलसमाना आहोस्विन्नेति भवति विचारणा। तत्र प्रथमं ज्ञानं निंदति नैष्कर्म्यमिति। भक्तिसहितज्ञानादौ फलसिद्धेर्भवति संदेहः किं भक्तेः फलं ज्ञानस्येति वा, तदर्थं केवलनिर्णय उच्यते अच्युतभक्तिरहितं ज्ञानं सांख्यं वैदिकं वा भक्त्यानलंकृतत्वान्न शोभते, ज्ञानस्य शोभया तद्वत् शोभा भवति अज्ञाननिवृत्तिश्च दीपवत्सुवर्णपुत्तलिकाप्यनलंकृता न शोभते, यद्यपि निरीश्वरसांख्यमते ईश्वराभावादेव भक्तिर्नास्ति, निरूप्यर्थे श्रद्धामात्रं सेश्वरेपि गुण एवेश्वरः, वैदिकोपि यजमानादिदेवतावेशाभावे लौकिकत्वात् सर्वापेक्षायाश्चोक्तत्वात् अंतःकरणशुद्ध्यर्थं भक्तिरपेक्ष्यते। सा च भगवच्छास्त्रानुसारिण्येव निर्गतमंजनं यस्मादिति अविद्यानिवर्तकं निरुपाधिकं वा किं बहुना सर्वेषु शास्त्रेषु यत् ज्ञानमुक्तं तस्य स्वरूपोपकारिणी वा भक्तिरिति भक्त्यभावे स्वरूपं फलं वा न सिध्येदित्यर्थः। कर्मापि भक्तिसापेक्षमित्याह किं पुनरिति। तत्र कर्म विविधं कामनया क्रियमाणं ज्ञानांगेश्वराराधनलक्षणं च। तत्राद्ये भक्त्यपेक्षाऽनियता तदाह शश्वदभद्रमिति। साधनकाले फलकाले च क्लेशरूपत्वात् भक्त्यभावे न पुरुषार्थरूपं स्यात्। द्वितीये भगवति समर्पणव्यतिरेकेण ज्ञानांगतैव नास्ति, समर्पणमेव भक्तिः भक्तिसाध्यं वा। तदाह न चार्पितं कर्मेति। न च भगवति अर्पितं कर्म भवतीत्यर्थः, चकारादीश्वरार्थं वा क्रियमाणं यदपि अत्र करणं पंचरात्रोक्तं तस्य लौकिककर्मवत् संसारकारणत्वाभावात् तस्मात्सर्वकर्मसु भक्तिः सहकारिणी॥ १२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

न यदित्यत्र। प्रतिपादकानामिति। इतरशेषत्वेन यशःप्रतिपादकानाम्। प्रमाणेत्यादि। भारतस्याम्नायार्थत्वान्नैवमिति शङ्कायामिति शेषः। विषपत्रैर्भोजनवदिति। तैर्भोजने तृप्तिमात्रम्, परमग्रेऽनिष्टम्, तथात्र अन्यशेषत्वेन श्रवणे श्रवणाभिमानमात्रम्, परमग्रे न कृतार्थत्वादिकम्, किन्तु धर्मादय एवेत्यर्थः। कथमर्थविशेषाभावात् इत्यत आहुः—तत्रत्यमित्यादि हरेर्यश इति। हरेर्यशो न, किन्तु तत्त्वेन प्रतिपादितम्, वाचो धेनुवदित्यर्थः। प्रकारान्तरेणापि फलाभावं व्युत्पादयन्ति वच इत्यादि, तथा च साम्नो भगवत्प्रियत्वाद्रागादीनां च मोक्षमार्गत्वात्तदभावेनापि तथेत्यर्थः। मुख्येत्यादि। भारतानां प्रतिपादकमिति भारतवदिति च भारतपदव्युत्पत्त्या भगवत्प्रतिपादकत्वाभावेन भगवतः शास्त्रार्थत्वाभावान्न मुख्यतया प्रतिपादकत्वम्, तत्प्रमेयस्य भगवत्कार्यकर्तृत्वाभावाद्भगवज्जातीयत्वाभावात्तत्सारूप्याभावादेकत्र मुख्यतया प्रतिपादितस्य प्रशंसार्थत्वाभावात् 'छत्रिणो यान्ति, कुन्ताः प्रविशन्ती'तिवल्लिङ्गभूमभ्यामपि तदभावाच्च न गौण्यापि, शैत्यपावनत्वादिप्रतीत्यर्थं गङ्गापदेन तीरवन्न तत्पदैः कृतार्थताद्यर्थं भगवान् लक्ष्यत इति न लक्षणयापि। प्रकरणभेदाभावान्न तेनापि। आदिपदेन व्यञ्जनातात्पर्ये। न च 'मुनिर्विवक्षु' रिति वाक्यात्तात्पर्यं भगवतीति वाच्यम्, तत्रापि धर्मत्वेन विवक्षुरित्यर्थस्य विवक्षितत्वात्। यथाकथञ्चिदापादनेपि मोक्षधर्मे इत्यादिसमाख्यया फलव्यभिचारेण च तथा निर्णयात्। तदेतदभिसन्धायाहुः न दोष इति। अकृतार्थत्वादिदोषो नेत्यर्थः। वयस इमे वायसा इति योगं रूढिं च पुरस्कृत्याहुः वृद्धाः काका इति॥ १०॥ ❀ ❀ तद्वागित्यत्र। अभ्युपगमेन वेति। अबद्धत्वाभ्युपगमेनेत्यर्थः, प्रथमपक्षेऽबद्धत्वं कर्तृदोषात्। द्वितीये बुद्धिपूर्वकम्। तृतीये आरोपितमिति ज्ञेयम्। तत्रेति। अघविप्लावने अस्मिन् श्लोके सिद्धमर्थमाहुः भगवत्सम्बन्धिनामित्यारभ्य इतिनिरूपितमित्यन्तम्। भगवच्छब्दा इति। मुख्यतया भगवत्प्रतिपादकाः शब्दाः॥ ११॥ ❀ ❀ नैष्कर्म्यमित्यत्र। इदानीमिति। शब्दोत्तमत्वादेरर्थोत्तमत्वाद्यधीनत्वात्तन्निकर्षनिरूपणानन्तरमित्यर्थः। अत्र साङ्ख्यं वैदिकमिति द्वैविध्यं नैष्कर्म्यनिरञ्जनपदबोधितम्। भक्त्यनलङ्कृतस्य केवलस्य तस्योभयविधस्याशोभायां गमकमाहुः ज्ञानस्येत्यादि। तथा च गृहशोभया दीपस्येव ज्ञानवतो भवतो मनःप्रसादाभावेनाशोभया ज्ञानस्याशोभा गम्यत इत्यर्थः। अशोभा चात्राल्पप्रकाशकत्वरूपा विवक्षितफलाजनकत्वरूपा च ज्ञेया। ननु भक्त्यभावेपि भगवदवतारत्वात् व्यासस्य कथमशोभेत्यत आहुः सुवर्णेत्यादि। ननु साङ्ख्ये पञ्चविंशतितत्त्वज्ञानेन वेदे 'तमेव विदित्वे'त्यादिषु ब्रह्मज्ञानेनैव फलस्योक्तत्वात् तत एव तत्सिद्धेः कथमशोभेत्याकांक्षायां तां व्युत्पादयन्ति यद्यपीति। निरूप्यर्थे इति। कार्येश्वरे। तथा च तदभावादेव 'शैवान् पाशु-

पतान् दृष्ट्वा लोकायतिककापिलान्। विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेदि'ति पुराणेषु तस्याशोभेत्यर्थः। तर्हि सेश्वरे कथमशोभेत्यत आहुः सेश्वरेत्यादि। तथेत्यध्याहार्यम्। तथा सेश्वरेपि नास्तीत्यर्थः। तत्र हेतुः सगुण एवेति। तन्मते ईश्वरस्य सर्वदा सात्त्विकविग्रहाविनाभावाङ्गीकारात्तन्मतीयेश्वरस्य नाच्युतत्वमिति प्रणिधानरूपतद्भक्तेरपि नाच्युतभक्तित्वम्। अत एव तदशोभेत्यर्थः। तर्हि वैदिके कथमशोभेत्यत आहुः वैदिक इत्यादि। समन्वयाध्याये 'शब्द इति चे'दिति सूत्रे वैदिकयाः सृष्टेर्नित्यायाः सिद्धत्वात् पुरुषसूक्ते च तथासिद्धत्वाज्ज्ञानपूर्वकं यज्ञादिकरणे यजमानादिरूपदेवतानां यजमानादिष्वावेशेन यज्ञस्याधिदैविकत्वम्, तदभावे यज्ञस्य लौकिकत्वात्। 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि'ति तार्तीयीकेधिकरणे ज्ञानस्वरूपोपकारार्थं सर्वापेक्षायाश्चोक्तत्वात्सर्वपदे च भक्तेः सङ्ग्राह्यत्वेन सा तथेति तदभावे ज्ञानाभावादेवाशोभेत्यर्थः। ननु 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इत्यादावुपास्तिरूपाया भक्तेः श्रावितत्वात् तत्सत्त्वे कथं भक्त्यभाव इत्याकाङ्क्षायां भावपदतात्पर्यमाहुः सा चेत्यादि। तथा च स्नेहरूपत्वाभावान्न सा भक्तिरित्यर्थः। अपेक्षार्थकत्वेनानुक्तसमुच्चायकत्वमभिप्रेत्याहुः किं बहुनेत्यादि। इत्याहेति। इति कैमुतिकन्यायेनाहेत्यर्थः। कुतः पुनरिति। अत्रापि शोभत इत्यनुषज्यते। विशेषणत्रयतात्पर्यमाहुः तत्रेत्यादि। नेति। अग्रे संसारजननात्तथेत्यर्थः। नास्तीति। 'यत्करोषी'त्यादिगीतावाक्येऽर्पण एव कर्मबन्धनमोक्षकथनात्तथेत्यर्थः। तदाहेति। तस्मात्तदभावेऽशोभामाहेत्यर्थः। भवतीति। फलसाधकं भवतीत्यर्थः॥ १२॥

श्रीगिरिधरकृता बालप्रबोधिनी।

नन्वितिहासपुराणादिषु तत्र तत्र भगवद्यशो वर्णितमेव, कथमवर्णितमित्याशङ्क्य प्रायशब्दग्रहणाभिप्रायं व्यनक्ति–यथेति। तव तु भगवद्यशोव्यतिरिक्तवर्णनमयुक्तमेव मननशीलेषु श्रेष्ठत्वादिति सूचयन् सम्बोधयति–हे मुनिवर्येति। यथा च प्राधान्येन धर्मार्थकाममोक्षाख्याः पुरुषार्थास्तत्र तत्र त्वयाऽनुकीर्त्तिताः तथा प्राधान्येन वासुदेवस्य सर्वान्तर्यामिणो महिमा न हि नैवानुवर्णित इत्यन्वयः॥ ९॥ ❀ ❀ अतस्तद्वर्णनं विनाऽन्यविषयकवाक्यबन्धस्तु सद्भिरनुपादेयत्वाद्व्यर्थ एवेत्याह–नेति। चित्राणि गुणालङ्कारयुक्तत्वेन चित्तचमत्कारजनकानि पदानि यस्मिन् तथाभूतमपि यद्वचो वाक्यबन्धः जगत्पवित्रं जगतां शृण्वतां वदतां प्राणिनां पवित्रत्वापादकं हरेर्यशो न प्रगृणीत न प्रवदेत् तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशन्ति मन्यन्ते। अत एव यत्र च कर्हिचिदपि नितरां प्रीत्या न रमन्ति। के ते इत्यपेक्षायामाह–उशिक्क्षया इति, उशिक् अतिकमनीयं भगवच्चरणकमलं क्षयो निवासो येषां ते भगवद्भक्ताः। कथं तेषां सर्वत्यागेन तत्र निवास इत्याकाङ्क्षायामाह–हंसा इति। यथा क्षीरनीरविवेकिनो हंसास्तद्वत्तेऽपि विषयभोगस्य दुःखहेतुत्वं भगवच्चरणारविन्दसेवायाः परमानन्दजनकत्वं जानन्त्यतस्तत्सेवन्ते इत्यर्थः। कथमेवं तेषां विवेक इत्यपेक्षायामाह–मानसा इति "यमेवैष वृणुते तेन लभ्यः"। "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्। मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि" इत्यादिवाक्येभ्यः स्वकीयत्वेन भगवन्मनसि वर्त्तमाना इत्यर्थः। अत्रायं दृष्टान्तः सूचितः। यथा मानसे सरसि विचरन्तः कमनीयपद्मखण्डनिवासिनः प्रसिद्धाः हंसास्त्यक्तविचित्रान्नादियुक्तेऽप्युच्छिष्टगर्त्ते काकक्रीडास्थाने न निरमन्ते तथा भगवद्भक्ता अपि कामिजनरतिजनके विषयभोगे न निरमन्ते इति। अत्र कर्तृगतं वदनं शब्द आरोप्य यद्वचो न प्रगृणीतेति सामानाधिकरण्यम्॥ १०॥ ❀ ❀ विनाऽपि पदवैचित्र्यं भगवन्नामप्रधानो वाक्प्रबन्धस्तु सकलोद्धारकत्वात् सद्भिरादरणीयत्वाच्च सफल इत्याह–तद्वाग्विसर्ग इति। स चासौ वाग्विसर्गो वाचः प्रयोगः जनानां समूहो जनता तस्या अघं मोक्षप्रतिबन्धकीभूतं पापं विप्लावयति नाशयतीति तथा सः। स क इत्यपेक्षायामाह—यस्मिन् वाग्विसर्गे अबद्धवत्यपि काव्यालङ्कारादिकल्पितशब्ददोषादियुक्तेऽपि प्रतिश्लोकं अनन्तस्य यशोभिरङ्कितानि नामानि भवन्ति। ननु भगवन्नामाङ्कितस्यैव वाग्विसर्गस्य पापनिवर्त्तकत्वे किं प्रमाणमित्यपेक्षायामाह यदिति। साधवः परकार्यसाधनपरा विवेकिनो यत् यानि नामानि वक्तरि सति शृण्वन्ति, श्रोतरि सति गृणन्ति वर्णयन्ति, अन्यदा स्वयमेव गायन्ति, अतः सदाचार एव तत्र प्रमाणमिति भावः॥ ११॥ ❀ ❀ न केवलं भक्तिं विना वाक्यबन्धस्यैव वैयर्थ्यं किन्तु परमपुरुषार्थमोक्षसाधनस्य ज्ञानस्यापि तद्विना वैयर्थ्यमेव, कर्मणां तु तद्विना वैयर्थ्ये किं वक्तव्यमित्याह—नैष्कर्म्यमिति। निष्कर्म शुभाशुभकर्मलेपरहितं ब्रह्म तदेकाकारं नैष्कर्म्यम्, अत एव अज्यतेऽनेनेत्यञ्जनं अविद्याख्यं तन्निवर्त्तकं निरञ्जनम्, एवम्भूतमपि ज्ञानमच्युते भगवति यो भावो भक्तिस्तद्वर्जितमलमत्यर्थं न शोभते सम्यगपरोक्षाय न भवति। यद्येवं तदा शश्वत् साधनकाले फलकाले च अभद्रं दुःखप्रदं यत्काम्यकर्म यदकारणं कारणं फलाभिसन्धिस्तद्रहितं तदपि कर्म ईश्वरे नार्पितं असमर्पितं कुतः पुनः शोभेत कथं फलमुत्पादयेदित्यर्थः॥ १२॥

हिन्दी अनुवाद

आपने धर्म आदि पुरुषार्थोंका जैसा निरूपण किया है, भगवान् श्रीकृष्णकी महिमाका वैसा निरूपण नहीं किया॥ ९॥ ❀ ❀ जिस वाणीसे चाहे वह रस-भाव-अलङ्कारादिसे युक्त ही क्यों न हो—जगत्को पवित्र करनेवाले भगवान् श्रीकृष्णके यशका कभी गान नहीं होता वह तो कौओंके लिये उच्छिष्ट फेंकनेके स्थानके समान अपवित्र मानी जाती है। मानसरोवरके कमनीय कमलवनमें विहरनेवाले हंसोंकी भाँति ब्रह्मधाममें विहार करनेवाले भगवच्चरणारविन्दाश्रित परमहंस

भक्त कभी उसमें रमण नहीं करते ॥ १० ॥ ❀ ❀ इसके विपरीत, जिसमें सुन्दर रचना भी नहीं है और जो दूषित शब्दोंसे युक्त भी है, परंतु जिसका प्रत्येक श्लोक भगवान्के सुयशसूचक नामोंसे युक्त है, वह वाणी लोगोंके सारे पापोंका नाश कर देती है; क्योंकि सत्पुरुष ऐसी ही वाणीका श्रवण, गान और कीर्तन किया करते हैं ॥ ११ ॥ ❀ ❀ वह निर्मल ज्ञान भी, जो मोक्षकी प्राप्तिका साक्षात् साधन है, यदि भगवान्की भक्तिसे रहित हो तो उसकी उतनी शोभा नहीं होती । फिर जो साधन और सिद्धि दोनों ही दशाओंमें सदा ही अमङ्गलरूप है वह काम्य कर्म और जो भगवान्को अर्पण नहीं किया गया है, ऐसा अहैतुक (निष्काम) कर्म भी कैसे सुशोभित हो सकता है ? ॥ १२ ॥

अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥ १३ ॥
ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ।
न कुत्रचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदम् ॥ १४ ॥
जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं भक्तिशून्यानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव यतोऽतो हरेश्चरितमेवानुवर्णयेत्याह । अथो अतः कारणात् । अमोघा यथार्था दृक् धीर्यस्य शुचि शुद्धं श्रवो यशो यस्य सत्ये रतो धृतानि व्रतानि येन स भवानेवं महागुणस्तावत् । अत उरुक्रमस्य विविधं चेष्टितं लीलां समाधिना चित्तैकाग्र्येणाखिलस्य बंधमुक्तये त्वमनुस्मर स्मृत्वा वर्णयेत्यर्थः । एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगो नानुपपन्नः ॥ १३ ॥ ❀ ❀ विपक्षे दोषांतरमाह तत इति । तत उरुक्रमचेष्टितात्पृथग्दृशोऽत एवान्यथा प्रकारांतरेण यत्किंचिदर्थांतरं विवक्षतस्तया विवक्षया कृतैः स्फुरितैः रूपैर्नामभिश्च वक्तव्यत्वेनोपस्थितैर्दुःस्थितानवस्थिता सती मतिः कदाचित्क्वापि विषये आस्पदं स्थानं न लभेत वातेनाहता घूर्णिता नौरिव । तदुक्तं गीतासु "व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम्" इत्यादि ॥ १४ ॥ ❀ ❀ तदेवं हरियशो विना भारतादिषु कृतं धर्मादिवर्णनमकिंचित्करमित्युक्तं प्रत्युत विरुद्धमेव जातमित्याह जुगुप्सितमिति । जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य तत्र रागिणः पुरुषस्य धर्मकृते धर्मार्थमनुशासतस्तव महानयं व्यतिक्रमोऽन्यायः । कुत इत्यत आह । यस्य वाक्यतोऽयमेव मुख्यो धर्म इति स्थित इतरः प्राकृतो जनः तस्य काम्यकर्मादेरन्येन तत्त्वज्ञेन क्रियमाणं निवारणं स्वयमेव वा त्वया क्रियमाणं यद्वा "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इति श्रुत्या क्रियमाणं निवारणं यथार्थमेतदिति न मन्यते । किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति । तदुक्तं मतांतरोपन्यासे भट्टैः "तत्रैवं शक्यते वक्तुं येऽधपंग्वादयो नराः । गृहस्थत्वं न शक्ष्यंति कर्तुं तेषामयं विधिः ॥ नैष्ठिकब्रह्मचर्यं वा परिव्राजकतापि वा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते ॥" इत्यादि ॥ १५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति । स्मरणे प्रयोजकता मत्कर्तृका सा वर्णनायैवेति भावः । विश्वनाथस्तु—सत्यं तर्ह्यच्युतभाव एव सर्वोत्कृष्टत्वेन तवाभिमतः । स च तन्नामलीलाकीर्तनश्रवणादिभिरेव भवति । तत्र नाम रामकृष्णादि प्रसिद्धमेव । लीला कीदृशी तवाभिमता तामुपदिशेत्यपेक्षायामाह—अथो इति । अमोघदृक् अव्यर्थज्ञानः । लीला हि भक्तिमति शुद्धे चित्ते स्वयमेव स्फुरति । तस्याः स्वप्रकाशत्वादनन्तत्वादतिरहस्यत्वादन्यथा केनापि वक्तुं गृहीतुं चाशक्यत्वादिति भावः । स्मृत्वा च वर्णय तदेव शुद्धयशस्त्वममोघदृक्त्त्वमन्यथा नैवेति । यद्वाऽमोघे दृशौ नेत्रे यस्य शुचिनी श्रवसी कर्णौ यस्येति काचिल्लीला नेत्राभ्यां दृष्टा काचित्कर्णाभ्यां श्रुता च । तथा सत्यरत इति धृतव्रत इति आसक्तिनिश्चयसूचिताभ्यां मनोबुद्धिभ्यामदृष्टाऽश्रुताप्यवकलितैव सा । संप्रति चित्तैकाग्र्येण स्मर्यतां स्मृत्वा च वर्ण्यतामिति स्वामिचरणोक्तमेतच्चेतिपदम् । तदर्थस्तु एतदुरुक्रमस्येत्यादि । अथो महाभाग इत्यतः पृथग्वाक्यमिति । तत्र व्रतानि शरणागतपालनादीनीति ज्ञेयम् । महाभागेति । महस्यात्युत्सवरूपस्याप्रसिद्धो भागोंशो महाभागस्तदवतार इति यावत् । अत एवामोघदृगिति । तीर्थस्तु समाधिना दर्शनगुह्यसमाधिभेदेन त्रिधा भिन्नानां भाषाणां मध्ये यथास्थितवस्तुकथनलक्षणया समाधिभाषयाऽनुस्मर । श्रीभगवन्महिमप्रतिपादकश्रीभागवताख्यं ग्रन्थं कुरु । तेन न्यूनता नंक्ष्यतीत्याह ॥ १३ ॥ ❀ ❀ विपक्षे भगवद्यशो विहाय काम्यकर्मादिवर्णने तद्बुद्धेरनवस्थानमुक्तं भगवतेत्यर्थः । व्यवसायात्मिकात्मतत्त्वनिश्चयात्मिका बुद्धिरेकैव चतुर्णामाश्रमाणां साध्या विवक्षिता । सांख्यविषया योगविषया च बुद्धिरेकफलत्वादेका

व्यवसायात्मिका सर्वविपरीतबुद्धीनां बाधिका। निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसायात्मिका बुद्धयो बाध्या इति भगवत्पादाः। परमेश्वराराधनेनैव संसारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भवतीत्यन्ये। कर्मकांडे पुनर्बहुशाखा अनंतभेदाः कामानामानन्त्यादनन्ताश्च। तत उरुक्रमचेष्टितादन्यथा यत्किंचनापि किं पुनर्बहु विवक्षतो वक्तुमिच्छतोपि किं पुनर्वदतोपि किं पुनस्तन्मुखाच्छ्रुत्वा तदनुतिष्ठतः सर्वत्र हेतुः पृथग्दृशः तच्चेष्टितात्पृथग्वस्तुन्येव दृग्दृष्टिस्तात्पर्यं यस्य तस्य अतस्तत्कृते रूपैर्निरूपणीयैरर्थैर्नामभिस्तद्वाचकैः शब्दैश्चानवस्थिता मतिः कदाचिदपि काले क्वापि देशे वा तेन घूर्णयित्वा नानास्थानं नीत्वाऽऽहृता व्याहृता ततो निमज्जत एव यथा तथा तैर्ज्ञानकर्मकाव्यकौशलादिभिरपीति विश्वनाथः ॥ १४ ॥ ❀ ❀ प्रत्युत वाक्यालंकारे। तव तु का वार्त्ता ? साक्षाद्वेदेनोक्तमपि न मनुत इत्याह–यद्वेति। तत्प्रवृत्तिमार्गानधिकृतविषयत्वमेव। भट्टैर्मीमांसकैः। यत्रान्धपंग्वादयस्संन्ति तत्रेत्यर्थः। विश्वनाथस्तु–ननु मया भगवद्यश एव ग्राहयितुं भारतादिशास्त्रं कृतं किं तु कामिलोकानां भगवद्भक्तिमनिच्छूनां शास्त्रे प्रवर्त्तनार्थमेव प्रथमं ग्राम्यसुखप्रक्षेपो दत्तः। न तु मे तत्र तात्पर्यं "मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः। यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम्" इति विदुरोक्तिरेव प्रमाणमिति चेत्सत्यम्। उपकारे प्रवृत्तात्त्वत्त एव लोकानामपकार एवाभूदित्याह–जुगुप्सितमिति। धर्मकृते विदुरोक्तन्यायेन भगवद्धर्मग्रहणार्थमेव जुगुप्सितमनुशासतः काम्यधर्माद्युपदिशतस्त्वत्तः [सकाशादेव स्वभावरक्तस्य विषयेषूत्पत्तित एव रागिणो लोकस्य महान्व्यतिक्रम उपप्लवो जातः। कुत इत्यत आह–यद्वाक्यतो वेदव्यासवाक्यतो धर्म इति। इतरः प्राकृतो जनः "देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्" इत्यादिविधावेव स्थितस्तस्य धर्मस्य निवारणं "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इत्यादिवाक्येन क्रियमाणं न मन्यते, किं तु प्रवृत्तिमार्गानधिकृतविषयमेतद्वाक्यमिति कल्पयति। तदुक्तमित्यादि स्वामिवत्। अत्र संदर्भस्तु–तदेवं हरियशो गौणीकृत्य भारतादिषु कृतं जुगुप्सितकाम्यकर्मादिवर्णनप्राचुर्यं लोकानां तदेकनिष्ठत्वाय जातमित्याह–जुगुप्सितमिति। स्वभावरक्तस्यानादिविषयवासनया स्वभावत एव कामनापरस्य पुरुषस्य धर्मकृते भगवद्धर्मपर्यंतस्य निष्कामस्य धर्मस्य कृते भगवद्धर्ममेव तत्र पर्यवसाययितुमनु निरन्तरमेव निन्द्यं काम्यं कर्म शासत उपदिशतो न तु वेदे प्रवर्तनार्थं तत्प्ररोचनया यत्किंचिदनूद्य मुहुरपवदतः कस्यचिदन्यस्यापि महान्व्यतिक्रमो वेदतात्पर्यलंघनेनान्यायः स्यात्, भवतः स्यादिति तु कथं ब्रवाणीति भावः। ननु वेदेपि तादृक्काम्यकर्मकथनस्य निरंतरता दृश्यते तत्राह यद्वाक्यत इति। यस्य तद्विधस्य वाक्यतो दुरूहवेदार्थनिर्णायकाद्वाक्याद्वचनमात्रात्। किमुत ब्रह्मलोकप्रसिद्धशतकोटिविस्तरपुराणेतिहासतः स्वेच्छया येन संगृहीतात्तत्तद्वाक्यादितरो जनस्तदेव कर्त्तव्यमिति परामृशन्स्थितो यत्र निश्चलस्तस्य स्यात्तद्विधस्य निवारणमन्यथा वक्तृतया चिन्तनं तव स्वल्पतमवाक्येनान्यस्य प्रचुरतमवाक्येनापि न मन्यते, यस्मात्तव शिष्याणामपि जैमिन्यादीनां प्रतिपत्तिर्दृश्यते तस्मात्प्रवृत्तञ्च परित्यज्य "निवृत्ततर्षैरुपगीयमानात्" इत्यादिरीत्या सर्वेषां सर्वोपच्छमकं काम्यञ्च यद्भगवद्यशस्तदेव वर्ण्यतामिति भावः। अतो "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम्। जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥" इति श्रीगीतावाक्यं ज्ञानाद्युपदेष्टृविषयमेव न तु भगवद्धर्ममहिम त्वतादृशविषयम्। तदुक्तं श्रीमदजितेन "स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि। न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः" इति तादृशोपदेशे सर्वेषामेव परमविश्वासास्पदत्वादिति भावः ॥ १५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

न कर्म्मणेति। कैवल्योपनिषदि चतुर्थब्राह्मणम्। तत्र धनेनेत्यत्र पूर्वनकारस्यानुषङ्गः। एके महात्मानः आनशुः आनशिरे प्राप्ताः। इति श्रीमच्छंकरानंदस्वामी ॥ १५-१६ ॥

श्रीमद्वीरराघवव्याख्या

तदेवं लोकहितार्थं प्रवृत्तस्य तव केवलत्रिवर्गतत्साधननिरूपणमनुचितमित्युक्तं भवति। यतः त्रैवर्गिककर्मणोऽनर्थगर्भत्वमतस्त्वमखिलानिष्टपरिहारेण प्रायेण भगवद्भक्तियोगनिष्पादकतच्चेष्टितज्ञानजनकं प्रबंधं कुर्वित्याह अहो इति। हे महाभाग, भगमत्र भगवदंशभूतत्वमखिलनिगमद्रष्टृत्वं च। भवान्सत्यरतः सत्यं भूतहितं तस्मिन् रतः न केवलं सत्यरत एवापि त्वमोघदृक् सत्यमूलममोघमवितथं पश्यतीति तथाभूतहिताचरणाय बद्धदीक्ष इत्यर्थः, कथमेवमहोभाग्यं ज्ञायते इत्यतो विशिनष्टि–शुचिश्रवाः शुचि विशुद्धं श्रवः लोकहितार्थमवतीर्णो व्यासः इत्येवंविधा प्रथा यस्य सः हेतुगर्भाण्येतानि विशेषणानि, एवंविधस्यानर्थगर्भत्रैवर्गिकनिरूपणमनुचितमिति भावः। उक्तविधस्त्वमुरुक्रमस्य उरवः विपुलाः क्रमाः पादविन्यासाः त्रिलोके यस्य तस्य भगवतो यद्विचेष्टितं तदेव नृणामखिलानां बंधानां गर्भजन्ममरणादिरूपाणां मुक्तये बंधेभ्यो मुक्तये वा समाधिना अनुस्मर, सम्यगालोचनपूर्वकं प्रबधानेत्यर्थः ॥ १३ ॥ ❀ ❀ एवं चेत्त्वदात्मन्यसंतोषो निवर्त्तेत नान्यथेत्याह अत इति। अतोन्यथोरुक्रमचेष्टाकथनादन्यथा वैपरीत्येन तत्कृतरूपनामभिः पृथग्दृशः पृथग्भूतान्संबंधरहितानर्थान् विवक्षतः वर्णयतस्तवात एव दुःस्थिता मतिः कदाचिदपि क्वचिदपि यत्किंचिदप्यास्पदमव्याकुलतामिति यावन्न लभेत, प्रत्युत व्याकुलैव भवतीत्यर्थः। यद्वा ततोऽन्यथा यत्किंचन

विवक्षसे चेन्नानाविधार्थदर्शिनस्ते मतिः क्वापि तत्कृतरूपनामभिः-कृत इति भावे क्तः कर्मेत्यर्थः-तस्योरुक्रमस्य कर्मरूपनामभिः हेतुभिरास्पदं प्रतिष्ठां न लभते। बुद्धेरव्याकुलत्वं नाम भगवत्कर्मरूपनामगोचरत्वं तन्न सिध्यतीत्यर्थः, यथा वा तेन वायुना हतोत्पथं नीता नौरास्पदं न लभते तद्वत्, यद्वाऽतः उरुक्रमादन्यथा सत्त्वेन उरुक्रमानात्मकत्वेनाब्रह्मात्मकस्वतंत्रवस्तुत्वेनेति यावत् यत्किंचन वस्तु विवक्षतः वर्णयितुमिच्छतः अत एव तत्कृतैरुरुक्रमकृतैर्देवमनुष्यादिरूपनामभिर्हेतुभिः पृथग्दृशः पृथग्दृष्टेस्तवात एव दुःस्थिता मतिः क्वापि कर्हिचिदप्यास्पदं न लभेत। यत्किंचन विवक्षितं चेत्तदुरुक्रमात्मकतया तद्विभूतित्वेनैव वर्णयेश्चेत्तव मतिः सुस्था सत्यास्पदं लभेत। अतदात्मकतया स्वतंत्रवस्तुत्वेन वर्णयितुमुद्युक्तं चेत्तर्ह्यत एव पृथग्दृष्टेस्तव दुःस्थिता सती मतिरास्पदं न लभेत इत्यर्थः। प्राधान्येनोरुक्रमचेष्टितं वर्णनीयं तत्प्रसंगादपि यत्किंचिद्वस्तु वर्णयितुमिष्टं तदपि तद्विभूतितयैव वर्णनीयमेवं चेन्मतिरव्याकुलान्यथा तु व्याकुला भवतीति भावः॥ १४॥ ❋ ❋ भूतहिताचरणार्थे प्रवृत्तस्त्वमहितमेव कृतवानसीत्याह जुगुप्सितमिति। स्वभावरक्तस्येत्यर्थकामयोरित्यादिरर्थकामयोः स्वभावत एव रक्तस्य जनस्य धर्मकृतेर्थकामसाधनधर्मार्थमनुशासतः भारतनिर्माणद्वारा बोधयतस्तवायं महान् व्यतिक्रमः चिकीर्षितविपरीतानुष्ठानरूप आपतितः। भूतहितं चिकीर्षितमधुना तद्विपरीतमेव कृतमित्ययं महान् व्यतिक्रम इत्यर्थः। अत इदं जुगुप्सितं निंदितं कृतं स्वभावत एवार्थकामपारवश्यमूलकतापत्रयाभिहतं जनं प्रति पुनरर्थकामसाधनमेवानुतिष्ठेत्यनुशासनं निंदितमिति भावः। ननु मयैवमनुशासने कृतेपि स्वरुच्यनुसाराल्लोको निःश्रेयससाधन एव प्रवर्ततां भारतेपि क्वचिदर्थकामयोर्हेयत्वेनोक्तत्वान्न दोषश्चेत्यत आह यद्वाक्यत इति। परः कृत्स्नवेदीतरस्ततोर्वाचीनोऽकृत्स्नविज्जनः यस्य तव वाक्याद्र्थकामसाधनमेव धर्म इति स्थितः, अर्थकामावेव निरतिशयपुरुषार्थौ तत्साधनमेव निरतिशयधर्म इत्यध्यवसाययुक्तः तस्य त्रिवर्गस्य निवारणं न मन्यते। त्वया त्रिवर्गस्य विस्तरेण प्रतिपादितत्वात् त्रिवर्गस्य निवारणं त्वदभिप्रेतमिति जनो न जानातीत्यर्थः॥ १५॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

अधुनालंबुद्धिहेतुं विज्ञापयतीत्याह अत इति। हे महाभाग अपरिमितभाग्यनिधे, उक्तप्रकारेण कर्मज्ञानयोर्हरिभक्तिरहितयोर्निष्फलत्वाद्धर्मादीनामल्पकथनेनापि पूर्तिर्भगवन्महिम्नातिकथितेनाप्यपूर्तिरेवेति यतः साक्षाच्छुचिश्रवाः विष्णुरेवात एव सत्ये निर्दुःखानंदानुभवैरतः शरणागतपालनादिधृतं व्रतं येन स तथा अत एवामोघज्ञानोऽत एव भवान्पूज्यस्त्वं सकलसज्जनसंसारबंधनविध्वंसनाय उरुक्रमस्य बहुपराक्रमस्य तव यज्जगत्सृष्टिपालनादिविशिष्टचेष्टितं तत्समाधिना दर्शनगुह्यसमाधिभेदेन त्रिधा भिन्नानां भाषाणां मध्ये यथास्थितवस्तुकथनलक्षणया समाधिभाषयानुस्मर भगवन्महिमप्रतिपादकश्रीभागवताख्यग्रंथं कुरु। तेन कृतावतारप्रयोजनालंबुद्धिर्भविष्यतीति भावः। 'अखिलधर्मगुप्तये इति पाठे' समस्तभागवतधर्मरक्षणायेत्यर्थः॥ १३॥ ❋ ❋ केवलधर्मादिविषयशास्त्रकृत्यानर्थोपि भवतीति ज्ञापयतीत्याह अतोन्यथेति। अत एव भगवन्महिम्नोन्यथा विरुद्धतया यद्धर्मादिपुरुषार्थकथनाय विवक्षितं तत्किंचन यत्किंचिन्न पुरुषार्थोपयोगि कुतस्तत्कृतरूपनामभिस्तस्मिन् ग्रंथे धर्मादिफलत्वेन प्रतिपादितस्वर्गादिगतलावण्यादिरूपमदनकलिकेत्यादिनामवत्पदार्थैः पृथग्दृशस्ते मम सुखहेतव इति वस्त्वयथार्थज्ञानिनो रागादिदोषदुष्टत्वेन दुःस्थिता मतिः कर्हिचित्क्वापि कस्मिंश्चिद्विषयेपि समुद्रे वातेन वायुना आहता विघटिता नौस्तरीवास्पदमाश्रयं न लभेतेत्येकान्वयः। तस्मात्केवलधर्मादिविषयशास्त्रकृतिरनर्थकारीति भावः। अतोन्यथा श्रीभागवतकृतिमंतरेण यत्किंचन ग्रंथकरणं विवक्षितं तद्ग्रन्थतत्कल्पितरूपनामभिर्मुग्धस्येति वा। चशब्दान्नरकपातफलमेव स्यादिति सूचयति॥ १४॥ ❋ ❋ न केवलमनर्थकार्येव भवेदन्येषां निंदिताधर्मकारी चेति ज्ञापयति जुगुप्सितमिति। स्वत एव प्रवृत्तिधर्मादिषु रागिणोऽज्ञस्य प्रवृत्तिधर्मादिकृतेनुशासनं कुर्विति प्रेरणं जुगुप्सितं त्वादृशैरिति शेषः, न केवलं निंदितं किंतु महान्व्यतिक्रमः वृक्षादधः पतितस्य दंडेन ताडनवन्निःसीमोऽन्यायः। कुतः 'स यत्प्रमाणं कुरुत' इति न्यायाद्यद्वाक्यतो धर्म इति तस्य जनस्य इतरस्थितो जनो निवारणं न मन्यते इत्यन्वयः। यस्य भवादृशस्य वचनाद्धर्मोऽयमित्यनुतिष्ठतस्तस्य प्रवृत्तिमार्गस्थितस्य जनस्येतरस्मिन्निवृत्तिमार्गस्थितः जनः शुकादिर्नायं धर्मः न चरेति निवारणं न करोति तस्मात्तादृशग्रंथकृतिरनपेक्षितेति भावः। यद्वाक्यत इति। यस्य भवादृशस्य श्रेष्ठस्य वाक्यतो वचनात् प्रतीत एव धर्मः मुख्यपुरुषार्थहेतुरिति यदुत्तरो जनः अधिकारी स्थितः विश्वस्तस्तस्य जनस्य कुमार्गप्रवर्तमानस्य निवारणं सः न मन्यते चेत्तस्य श्रेष्ठस्य महान् व्यतिक्रमः अन्यायो यतः, अतो जुगुप्सितमिति संबंधः। कुमार्गसक्ताः स्वस्मिन् विश्वस्ताश्चेत्तस्मात्ते वारणीया एव, न पुनः प्रवर्तनीया इति कृपालोर्धर्म एवेति भावः॥ १५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं हरियशो गौणीकृत्य भारतादिषूक्तं जुगुप्सितकाम्यकर्मादिवर्णनप्राचुर्यं लोकानां तदेकनिष्ठत्वाय जातमित्याह जुगुप्सितमिति। स्वभावरक्तस्य अनादिविषयवासनया स्वभावत एव कामनापरस्य पुरुषस्य धर्मकृते भगवद्धर्मपर्यंतस्य निष्कामस्य धर्मस्य कृते भगवद्धर्ममेव तत्र पर्यवसाययितुमनु निरंतरमेव निन्द्यं काम्यं कर्म शासतः उपदिशतो न तु वेदे प्रवर्तनार्थं तत्प्ररोचनया किंचिदनूद्य मुहुरपवदतः कस्यचिदन्यस्यापि महान् व्यतिक्रमो वेदतात्पर्योल्लंघनेनान्यायः स्यात्, भवतः स्यादिति तु कथं ब्रवाणीति भावः। ननु वेदेपि तादृशकाम्यकर्मकथनस्य निरंतरता दृश्यते तत्राह यद्वाक्यत इति। यस्य त्वद्विधस्य वाक्यतो दुरूहवेदार्थ-

निर्णायकाद्वाक्याद्वचनमात्रात् किमुत ब्रह्मलोकप्रसिद्धशतकोटिविस्तरपुराणेतिहासतः स्वेच्छया येन संगृहीतान् तत्तद्वाक्यादितरो जनस्तदेव कर्तव्यमिति परामृशन् स्थितो यत्र निश्चलः स्यात् तस्य तद्विधस्य निवारणमन्यथा वक्तृतया चिंतनं तव स्वल्पतमवाक्ये-नान्यस्य प्रचुरतमवाक्येनापि न मन्येत यस्मात्तव शिष्याणामपि जैमिन्यादीनाम् अन्या प्रपत्तिः दृश्यते, तस्मात्प्रवृत्तं धर्मं परित्यज्य निवृत्ततरैरुपगीयमानादित्यादिरीत्या सर्वेषां सर्वापच्छमकं काम्यं च यद्भगवद्यशस्तदेव वर्ण्यतामिति भावः । 'अतो न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान् युक्तः समाचरन्नि'ति श्रीगीतावाक्यं तु ज्ञानाद्युपदेष्टृविषयमेव, न तु भगवद्धर्ममहिमज्ञत्वादृशविषयम् । तदुक्तं श्रीमदजितेन 'स्वयं निश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि । न राति रोगिणोऽपथ्यं वांछतोपि भिषक्तमः ॥' इति तादृशे उपदेशे सर्वेषामेव परविश्वासास्पदत्वादिति भावः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

सत्यं तर्ह्यच्युते भाव एव सर्व्वोत्कृष्टत्वेन तवाभिमतः, स च तन्नामलीलाकीर्त्तनश्रवणादिभिरेव भवति । तत्र नाम रामकृष्णेत्यादि प्रसिद्धमेव, लीला कीदृशी तवाभिमता तामुपदिशेत्यपेक्षायामाह अथो इति । अमोघदृक् अव्यर्थज्ञानः शुचि शुद्धं श्रवो यशो यस्य तथाभूतो भवान् भवति । अतः सत्ये रतो दृढव्रतश्च सन् अखिलानां जनानाम् अखिलस्य बंधस्य वा विमुक्तये तस्य विविधं चेष्टितं लीलां समाधिना चित्तैकाग्र्येण स्मर । लीला हि भक्तिमति शुद्धे चित्ते स्वयमेव स्फुरति, तस्याः स्वप्रकाशत्वादनंतत्वादतिरहस्यत्वादन्यथा केनापि वक्तुं ग्रहीतुं चाशक्यत्वादिति भावः । स्मृत्वा च वर्णय । तदैवामोघदृक्त्वं शुद्धयशस्त्वम्, अन्यथा नैवेति भावः । यद्वा अमोघे दृशौ नेत्रे यस्य शुचिनी श्रवसी कर्णौ यस्येति, काचित् लीला नेत्राभ्यां दृष्टा काचित् कर्णाभ्यां श्रुता च तथा सत्यरत इति धृतवत इति आसक्तिनिश्चयसूचिताभ्यां मनोबुद्धिभ्यामपि काचिदतिरहस्या अदृष्टश्रुताप्यवकलितैव, सा सा सम्प्रति चित्तैकाग्र्येण स्मर्य्यतां स्मृत्वा च वर्ण्यताम् । अत्रानुस्मरेति मध्यमपुरुषो वाक्यभेदात् ॥ १३ ॥ ❀ ❀ अन्वयेनोक्त्वा व्यतिरेकेणाह तत इति । तत उरुक्रमचेष्टितात् अन्यथा यत् किञ्चनापि किं पुनर्बहु विवक्षतः वक्तुमिच्छतोऽपि किं पुनर्व्वदतः वदतोऽपि किं पुनस्तन्मुखात् श्रुत्वा तदनुतिष्ठतः । सर्व्वत्र हेतुः पृथग्दृशः तच्चेष्टितात् पृथग्वस्तन्येव दृक् दृष्टिस्तात्पर्य्यं यस्य तस्य, अतस्तत्कृतै रूपैर्निरूपणीयैरर्थैर्नामभिस्तद्वाचकैः शब्दैश्च दुःस्थिता अनवस्थिता मतिः । कदाचिदपि काले क्वापि देशे । आस्पदं स्थानम् । वाताहतनौरिवेति । वातेन घूर्णयित्वा नानास्थानं नीत्वा आहता व्याहता अन्ततो निमज्जते एव यथा तथा तैर्ज्ञानकर्म्मकाव्यकौशलादिभिरिति ॥ १४ ॥ ❀ ❀ ननु मया भगवद्यश एव ग्राहयितुं भारतादिशास्त्रं कृतम् । किंतु कामिलोकानां भगवद्भक्तिमनिच्छूनां शास्त्रे प्रवर्त्तनार्थमेव प्रथमं ग्राम्यसुखप्रक्षेपो दत्तः । न तु मे तत्र तात्पर्य्यम् । 'मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः । यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायामि'ति विदुरोक्तिरेव प्रमाणमिति चेत्–सत्यम्, उपकारे प्रवृत्तात् त्वत्त एव लोकानामपकार एवाभूदित्याह जुगुप्सितमिति । धर्म्मकृते विदुरोक्तन्यायेन भगवद्धर्म्मग्रहणार्थमेव जुगुप्सितम् अनुशासतः काम्यधर्म्मानुपदिशतस्त्वत्तः सकाशादेव स्वभावरक्तस्य विषयेषूत्पत्तित एव रागिणो लोकस्य महान् व्यतिक्रमः उपप्लवो जातः । कुत इत्यत आह यद्वाक्यतो वेदव्यासवाक्यतो धर्म्म इति इतरः प्राकृतो जनः 'देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभागि'त्यादिविधावेव स्थितः, तस्य धर्म्मस्य निवारणं 'सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रजे'त्यादिवाक्येन क्रियमाणं न मन्यते, किंतु प्रवृत्तिमार्गानधिकृतविषयमेतद्वाक्यमिति कल्पयति । तदुक्तं मतान्तरोपन्यासे भट्टैः–'तत्रैवं शक्यते वक्तुं येऽन्ये पङ्ग्वादयो नराः । गृहस्थत्वं न शक्यन्ते कर्त्तुं तेषामयं विधिः ॥ नैष्ठिकं ब्रह्मचर्य्यं वा परिव्राजकताथ वा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते ॥' इत्यादि ॥ १५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

यतो भगवदीयानि ज्ञानकर्मवाक्चातुर्याणि मुमुक्षूपकारकाणि अथो अतः कारणात् उरुक्रमस्य उरवः बहुविस्तृताः क्रमाः चरणविन्यासा यस्य तस्य यद् विचेष्टितं चरित्रप्रतिपादकं पुराणमिति यावत्, अखिलानां मुमुक्षूणां बंधविमुक्तये तत् समाधिना त्वमनुस्मर तन्निर्माणार्थमिति शेषः । ननु तत्र मम का शक्तिरित्यत आह हे महाभाग, भवानमोघदृगस्ति अमोघदृक् शुचि शुद्धं श्रवो यस्य स शुचिश्रवाः सत्ये ब्रह्मणि रतः सत्यरतः धृतानि लोकहितावहानि व्रतानि येन स धृतव्रतः–एवंभूतस्य तव किमसाध्यमिति भावः ॥ १३ ॥ ❀ ❀ भगवद्विविधचेष्टितबोधकपुराणनिर्माणं तवात्माऽसंतोषापहं मयोपदिष्टम्, अन्यथा तु त्वदात्माऽसंतोषनिवृत्तिर्नास्तीत्याह अत इति । अत उरुक्रमचरित्रबोधकपुराणप्रकाशनात् पृथग्दृशः अन्यदृष्टेः अन्यथोक्तोपायाद्वैपरीत्येन आत्मासंतोषनिवर्तकं यत्किंचनार्थांतरं विवक्षतः वर्णयतस्तव तत्कृतरूपनामभिः तया विवक्षया कृतैः संकल्पितैः रूपैर्नामभिश्च दुःस्थिता अविषये प्रवृत्ता व्यामोहिता सती मतिः कर्हिचित्कदाचिदपि कचित्कस्मिंश्चिदपि विषये आस्पदं स्थानं न लभेत वाताहतनौरिव ॥ १४ ॥ ❀ ❀ तदेवम् 'ऊर्ध्वबाहुर्विरौम्येतन्न कश्चिन्मे शृणोति वै । धर्मादर्थश्च कामश्च स कस्मान्नैव सेव्यते ॥' इत्याद्याग्रहेण भारतादिषु धर्मादिप्रतिपादनमनुचितमेवेत्युक्तं, तन्मुमुक्षून्प्रत्यनुचितमस्तु, बुभुक्षुजनोपकारार्थं तु कथंचिदुचितं भवतु, "द्वौ मासौ तु भवेत्तृप्तिर्मत्स्यैः पितृगणस्य ह । त्रीन्मासानाविकेनैव चातुर्मास्यं शशेन तु ॥ अजेन मासान् प्रीयंते पंचैव पितरो नृप । वराहेण तु षण्मासा-

न्सप्त वै शाकुनेन तु ।। मासानष्टौ पार्षतेण रौरवेण नवैव तु । गवयस्य तु मांसेन तृप्तिर्मासान्दशैव तु ।। मांसेनैकादश प्रीतिः पितॄणां माहिषेण तु । गव्येन दत्ते श्राद्धे तु संवत्सरमिहोच्यते ।।" श्राद्धकल्पे जुगुप्सितं स्वभावरक्तस्य जीवस्य धर्मकृते पितृपोषणाख्यधर्मार्थम् अनुशासतो भवतः महान्व्यतिक्रमः । ननु मंदानां स्वाभाविकप्रवृत्तिनिवृत्त्योर्नियमार्थमिदमुक्तं पुनः सदुपदेशेन तन्निवारणं शक्यमत आह यदिति । यद्यस्य तव वाक्यतः इतरः लौकिको जनः धर्मोयमिति दृढविश्वासेन स्थितः तस्य हिंस्रस्य कर्मणः सद्भिः क्रियमाणं निवारणं न मन्यते ।। १५ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

यतो भक्तिव्यतिरेकेण ज्ञानं कर्म वा न फलसाधकम् अत आवश्यकत्वाल्लाघवाच्च मुख्यतया भक्तिरेवोपदेष्टव्या, सा च श्रवणरूपा प्रथमं श्रवणसापेक्षा वा । अतः श्रोतव्यविषयत्वेन भगवच्चरित्रं भक्तिमार्गानुसारियोगजधर्मेण स्मृत्वा कथयेत्याह अतो महाभाग इति । यद्यपि अस्माभिर्ज्ञायते तथाप्यधिकाराभावात् वक्तुं न शक्यते, तव त्वेतादृशाधिकार इति महाभागेति संबोधनम् । मनसा भावितोर्थः कदाचिदन्यथा भविष्यतीति न शंका कर्तव्या, यतो भवानमोघदृक् अमोघा दृष्टिर्यस्येति, नापि त्वदुक्तमन्यैर्नांगीकर्तव्यमिति शंकनीयमित्यभिप्रायेणाह शुचिश्रवा इति । शुचि पवित्रं श्रवः कीर्तिर्यस्येति लोके ह्यादरणीयरूपमेतदेव किंच तवाप्येतदेवाभीष्टमित्याह सत्यरत इति । सत्ये रतः भगवद्धर्मव्यतिरेकेण अन्येषामसत्यत्वात् । किंच यथा व्रताचरणं धर्महेतुः तथा भगवच्चरित्रश्रवणमपीत्यभिप्रायेणाह धृतव्रत इति । धृतानि व्रतानि स्वाध्यायादीनि येन भगवद्धर्मस्फुरणे वा हेतुः । न च तादृशधर्मा भगवति न संतीति मंतव्यं, यतोयमुरुक्रमः उरु अधिकः क्रमः पादविक्षेपो यस्य वामनस्य क्रमात् एकेन पदा सर्वलोकाक्रमणमित्यग्रे विस्तारयिष्यामः । स च कालनियामकभगवच्चरित्रावेशादेव भवतीत्याह–सर्वे हि जीवाः स्वभावतो बद्धाः कालपाशेन, तेषां बंधननिवृत्तिर्महानुपकारः । सा च कालनियामकभगवच्चरित्रावेशादेव भवतीत्याह अखिलबंधमुक्तय इति । लोकवेदयोरप्रसिद्धत्वात् उपायांतरमाह समाधिनेति । भगवानेव स्वयं सर्वोच्चारकः स्फुरिष्यति अनु पश्चात् त्वयापि स्मर्त्तव्यं विशेषचेष्टितभक्तिजनकं न तु व्यामोहकं, तस्यापि व्यामोहकत्वे जातिविशेषचेष्टितत्वमेव ।। १३ ।। ❀ ❀ विपरीते बाधकमाह ततोन्यथेति । अभिधेयापर्यवसानं हि सर्ववस्तुषु मरीचिकावन्नियतत्वाभावात् भगवतो गुणानामनंतत्वेपि नियतत्वम्, अतः कार्यसमाप्तिशंकया प्रथमत एव तन्नारंभणीयम् । किंच विचारदशायामपि दुःखात्मकत्वात् तद्विचारिका बुद्धिरपि दुःखिता भवति तदाह अन्यथेति । ततो भगवच्चरित्रात् यद्यपि सर्वमेव भगवच्चरित्रत्वेनानिरूपणात् तत्त्वेपि न तथात्वमित्याह अन्येति । किंचनेत्यव्ययसमुदायः यत्किंचिदित्यर्थः । अनादरणीयमिति वाक्यसमाप्तिः, तदनूद्य दूषयति यद्विवक्षत इति । वचनानंतरं ममैव दुःखं भविष्यतीति किं वक्तव्यं तद्वक्तुमिच्छत एव भवति, तत्र हेतुः पृथग्दृशः भगवत्त्वेन स्तोत्रेण तत्पर्यवसानाभावात् भिन्नतया निरूपणमावश्यकं, तथाच भगवद्धर्मास्फुरणादन्यत्रोत्कर्षाभावात् अविद्यमानविवक्षायां बुद्धिर्दुःस्था भवति । किंच तत्कृतानि पृथग्दर्शनकृतानि पदार्थांतरस्य रूपनामानि भगवत्कृतानि ततश्च सिद्धत्वाभावात् स्वयं कृत्वा स्वयं निरूपणे स्वयमेव पर्यवसानमिति कर्हिचिदपि कस्मिंश्चित् काले कस्मिंश्चिद्देशे च बुद्धिरास्पदं न लभेत । सर्वस्यापि बुद्धिकृतत्वात् अन्यदन्यस्यास्पदं भवति, अव्रज्ञात्वेन स्वाश्रयाभावाच्च दुःस्थिता दुष्टतयावस्थिता स दोषो वायुवत् सर्वतारिकां बुद्धिनौकामिव नाभीष्टदेशं प्रापयतीत्याह वाताहतेति । आहता घूर्णिता एवमपर्यवसानेन बुद्धिदुःखदातृत्वेन च अन्यत्र वक्तव्यमित्युक्तम् ।। १४ ।। ❀ ❀ इदानीं प्रतारकशास्त्रवत् अन्यकथनं पापहेतुरित्याह जुगुप्सितमिति । यथा अपेयपानादिकं धर्म इति बोधकस्य नरकपातस्तथा देहादिष्वात्माध्यासं कृत्वा तन्निर्वाहार्थं यतनीयमिति वक्तुर्नरकपातः । न तु दुष्टत्वात्स्वत एव लोको न प्रवर्त्तते किं कथनेनानिष्टं स्यादित्यत आह–स्वभावरक्तस्य 'अनुरक्तो गुणान् ब्रूते विरक्तो दूषणान्यपी'ति न्यायात् रागे विद्यमाने न दोषस्फूर्तिः, तस्य चास्वाभाविकत्वे ज्ञाते कदाचिन्न प्रवर्त्तेतापि धर्मत्वेपि ज्ञाते कदाचिदपि न निवर्त्तेतेति भगवदाज्ञोल्लंघनरूपो महान् व्यतिक्रमः कूपेंधपातनेनेव । नन्वन्यो निवारयतु, तथाच फलभावान्नातिक्रमो भविष्यतीत्यत आह यद्वाक्यत इति । इतरः स्वतो विचाराक्षमः पुरातनचक्रविश्वासात् धर्मोयमिति निश्चितबुद्धिः अन्येन अस्मदादिना क्रियमाणं निषेधं न मन्यते, यतो जननधर्मा जनन एवाभिरतः बहुधा श्रुत्वापि निषेध ऊर्ध्वरेतसां प्रशंसेति । तथा च भट्टाः 'अंधपंग्वादयो नरा गार्हस्थ्यानर्हाः ते संन्यासादावधिकारिण इति विकल्पो वा उभयं ब्राह्मणमि'तिवत् ।। १५ ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

अतो महाभागेत्यत्र । इत्याहेति । इतीदमनेन सन्दर्भेणाहेत्यर्थः । तादृशा इति सर्वमोचकाः । अप्रसिद्धत्वादिति । चरित्रयाथात्म्यज्ञापनहेतोस्तथात्वात् । ननु समाधौ भगवत्स्फुरणे व्यामोहकमपि स्फुरिष्यतीति चेत्, तत्राहुः तस्यापीत्यादि । तथा च तस्य तथात्वे ज्ञाते तदपि भक्तिमेव जनयिष्यतीति भावः । एवं पूर्वोक्तखेदनिवृत्त्यर्थः, भगवद्गुणस्मरणं साधनमुपदिष्टम् ।। १३ ।। ❀ ❀ ततोन्यथेत्यत्र । विपरीते बाधकमाहेति । अधिकारसार्थक्यनिष्पादकं भगवच्चेष्टितोपदेशरूपं साधनान्तरमुपदेष्टुं चरित्रातिरिक्तकथने बाधकमाहेत्यर्थः । बाधकमुपपादयन्ति अभिधेयेत्यादिना । नियतत्वाभावादिति । बुद्धिकल्पितत्वेन स्थिरत्वाभावात् । तथा चैकैकस्य धर्मादेर्बुद्धिकल्पितत्वेनानन्त्यादेकस्यापि स्वरूपं न सम्यङ्निरूपयितुं शक्यम्, 'कर्मण्यकर्म यः पश्ये'दितिवच्च

तथेत्यभिधेयापर्यवसानमतिरिक्तकथने बाधकमित्यर्थः । ननु भगवद्गुणेष्वप्यानन्त्यस्य भवद्भिरुक्तत्वादयं दोषस्तत्रापि तुल्य इति चेत्, तत्राहुः भगवत इत्यादि । तथा च बुद्धिकल्पितत्वाभावेन स्थिरत्वात्तेषां सम्यक्कथनं सम्पद्यत इति न तत्रायं दोष इत्यर्थः । अत इति । निरूपणीयविषयेयत्ताभावात् । दोषान्तरमाहुः किञ्चेत्यादि । दुःखात्मकत्वादिति । 'अतोऽन्यदार्त'मिति श्रुतेस्तथेत्यर्थः । एवं वैयासज्ञानस्य स्वरूपस्खिलत्वबोधकं दोषद्वयमुक्त्वा मूलव्याख्यानेन स्फुटीकुर्वन्ति तदाहेत्यादि । अन्यथेति । आनन्दरूपाचरित्रादन्यप्रकारकम् । ननु वास्तवविचारे तु न दोष इति शङ्कायां तदविचार एव दोष इत्याहुः यद्यपीत्यादि । नन्वस्त्वयं दोषः, परं तस्य कथं निवृत्तिरित्याकाङ्क्षायां किञ्चनेत्यस्य फलितार्थं वदन्तस्तन्निवृत्तिप्रकारमाहुः अनादरणीयमिति । अत्र ततोन्यथेत्युद्दिश्य किञ्चनेत्यनादरणीयत्वं विधीयत इत्यनादरणीयत्वकथनादेव वाक्यसमाप्तिरिति तद्दोषनिवृत्तिरित्यर्थः । तदनूद्येति अन्यथाकथितमनादरणीयत्वेनानूद्य । तत्पर्यवसानाभावादिति । भगवत्पर्यवसानाभावात् । दुःस्थेति दुःखिता । दुःस्थितपदस्यायमर्थ उक्तः । अनास्पदत्वे हेतुमाहुः किञ्चेत्यादि । पृथग्दर्शनकृतानीत्यादि । प्रवाहे पदशक्त्यादरणात्तन्नित्यत्वेऽभ्युपगते पदार्थानामनित्यत्वात्तथेत्यर्थः । स्वयंपदेनात्र बुद्धिर्ज्ञेया सर्वत्र । अन्यदित्यादि । तथा चान्यस्य कल्पितत्वेनाभिन्नत्वाद् बुद्धेरास्पदालाभ इत्यर्थः । एवं दृष्टिसृष्टिवाद इवापद्यत इत्यर्थान्तरमाहुः दुःस्थितेत्यादि ॥ १४ ॥ ❀ ❀ जुगुप्सितमित्यत्र । भट्टा इति–'तत्रैवं शक्यते वक्तुं येन्धपङ्ग्वादयो नराः । गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः ॥ नैष्ठिकब्रह्मचर्यं वा परिव्राजकताथवा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते' इति मतान्तरोपन्यासे आहुरित्यर्थः ॥ १५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यतो ज्ञानकर्मणोस्तत्र तत्रोक्तं फलं भक्तिसाहित्येनैव, न स्वातन्त्र्येणेति त्वद्वर्णितस्यापि भारतादेर्वैयर्थ्यमेव । अथो तस्मात् हे महाभाग, उरवः क्रमा लीला यस्य तस्य यद्विविधं चेष्टितं लीला तत्समाधिनाऽनुस्मर, स्मृत्वा चाखिलप्राणिनां बन्धमुक्तये वर्णयेति शेषेणान्वयः । तत्र च तव सामर्थ्यमस्ति यतो भवान् धृतव्रतः धृतानि व्रतानि ब्रह्मचर्यादीनि येन सः । तद्धारणमपि भगवत्प्रीत्यर्थमेवेति सूचयन्नाह–सत्यरत इति, सत्ये भगवति रतः प्रीतियुक्तः । अतो भगवत्प्रसादेन तव वर्णितं नान्यथा भविष्यतीत्यभिप्रायेणाह–अमोघदृगिति । अमोघा यथार्था दृक् दृष्टिर्यस्य सः । व्यवहारतोऽप्येतद्वर्णनं भवतो युक्तमित्याशयेनाह–शुचिश्रवा इति, शुचि शुद्धं श्रवः सर्वलोकहितार्थमवतीर्णो व्यास इति कीर्तिर्यस्य सः । यद्यस्माभिरपि तच्चेष्टितं ज्ञायते तथाप्यधिकाराभावान्न वर्णयितुं शक्यते । तव त्वत्राधिकारोऽस्तीति महाभागेति सम्बोधनेन सूचितम् ॥ १३ ॥ ❀ ❀ विपक्षे दोषमाह–तत उरुक्रमविचेष्टितात् पृथग्दृशः पृथग्वस्तुन्येव दृक् दृष्टिस्तात्पर्यं यस्य तस्य अत एवान्यथा मदुक्तात्प्रकारान्तरेण यत्किञ्चन यत्किञ्चिदप्यर्थान्तरं विवक्षतो वक्तुमिच्छतस्तव तया विवक्षया कृतैः स्फुरितैः रूपैः पदार्थैः नामभिस्तद्वाचकशब्दैश्च दुस्थिता अनवस्थिता सती मतिः कर्हिचित् कदाचिदपि काले कापि देशे विषये वा आस्पदं स्थानं न लभेत । तत्र दृष्टान्तमाह–वातेति, वातेन वायुना आहता घूर्णिता नौर्यथा इष्टं स्थानं न लभते तद्वदित्यर्थः । तदुक्तं गीतासु–'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्' इत्यादि ॥ १४ ॥ ❀ ❀ ननु कामिजनानां भगवद्यशश्श्रवणे प्रवृत्त्यर्थमेव प्रथमतो महाभारतेऽर्थकामादिवर्णनं कृतं, न तत्र तात्पर्यमिति चेत्, सत्यं तथापि तद्विरुद्धमेव जातमित्याह–जुगुप्सितमिति । स्वभावत एवार्थकामयोः रक्तस्य रागवतः पुरुषस्य धर्मकृते भागवतधर्मग्रहणार्थमेव जुगुप्सितं निन्द्यं काम्यकर्मादि अनुशासतः भारतादिनिर्माणद्वारा बोधयतस्तव महान् व्यतिक्रमः चिकीर्षितविपरीतानुष्ठानरूपोऽन्याय आपतितः । यतो भूतहितेच्छया कृतं तत्तेषामहितमेव जातम्, कथमेवमित्यपेक्षायामाह–यदिति । यस्य तव 'देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्' इत्यादिवाक्यतोऽर्थकामादिसाधनमेव मुख्यो धर्म इत्येवं स्थितः कृतनिश्चयः इतरो विवेकिव्यतिरिक्तः प्राकृतो जनस्तस्यार्थकामसाधनधर्मस्य निवारणं त्वयैवान्यत्र क्रियमाणं अन्येन वा तत्त्वज्ञेन क्रियमाणम् "न कर्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिश्रुत्या वा क्रियमाणं 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति भगवतापि क्रियमाणं न मन्यते 'अनुरक्तो गुणान् ब्रूते विरक्तो दूषणान्यथा' इति न्यायात् । तत्र रागस्य सत्त्वाद्यथार्थमिदं निवारणमिति न मन्यते, किन्तु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति । तदुक्तं मतान्तरोपन्यासे भट्टैः–'तत्रैवं शक्यते वक्तुं येऽन्धपंग्वादयो नराः । गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः ॥ नैष्ठिकं ब्रह्मचर्यं वा परिव्राजकतापि वा । तैरवश्यं गृहीतव्या तेनादावेतदुच्यते' इत्यादि ॥ १५ ॥

हिन्दी अनुवाद

महाभाग व्यासजी ! आपकी दृष्टि अमोघ है । आपकी कीर्ति पवित्र है । आप सत्यपरायण एवं दृढव्रत हैं । इसलिए अब आप सम्पूर्ण जीवोंको बन्धनसे मुक्त करनेके लिए समाधिके द्वारा अचिन्त्यशक्ति भगवान्के लीलाओंका स्मरण कीजिये ॥ १३ ॥ ❀ ❀ जो मनुष्य भगवान्की लीलाके अतिरिक्त और कुछ कहनेकी इच्छा करता है, वह उस इच्छासे ही निर्मित अनेक नाम और रूपोंके चक्करमें पड़ जाता है । उसकी बुद्धि भेदभावसे भर जाती है । जैसे हवाके झकोरोंसे डगमगाती

हुई डोंगीको कहीं भी ठहरनेका ठौर नहीं मिलता, वैसे ही उसकी चञ्चल बुद्धि कहीं भी स्थिर नहीं हो पाती ॥ १४ ॥ ❀ ❀ संसारी लोग स्वभावसे ही विषयोंमें फँसे हुए हैं। धर्मके नामपर आपने उन्हें निन्दित (पशुहिंसायुक्त) सकाम कर्म करनेकी भी आज्ञा दे दी है। यह बहुत ही उल्टी बात हुई; क्योंकि मूर्खलोग आपके वचनोंसे पूर्वोक्त निन्दित कर्मको ही धर्म मानकर 'यही मुख्य धर्म है' ऐसा निश्चय करके उसका निषेध करनेवाले वचनोंको ठीक नहीं मानते ॥ १५ ॥

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभोः ॥ १६ ॥
त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वा भद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥ १७ ॥
तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥ १८ ॥
न वै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥ १९ ॥
इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः ।
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु यद्येवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गे सर्वक्रियात्यागेनैव पारमेश्वरसुखस्वरूपानुभूतेः किं तद्यशःकथनेनापि तत्राह। विचक्षण इति। विचक्षणो निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्यास्य विभोः सुखं निर्विकल्पकसुखात्मकं स्वरूपं वेदितुं ज्ञातुमर्हति। न पुनरविचक्षणः प्रवृत्तिस्वभावः। विभुत्वे हेतुः अनंतः कालतो देशतश्च पारं न यस्य तस्य विभोश्चेष्टितम्। ततः कारणात् हे विभोऽनात्मनो देहाद्यभिमानिनोऽत एव गुणैः सत्त्वादिभिः प्रवर्तमानस्य जनस्य दर्शय। भवानिति त्वमित्यर्थः। पाठांतरे हे भवन्निति सम्बोधनम् ॥ १६ ॥ ❀ ❀ एवं तावत्काम्यधर्मादेरनर्थहेतुत्वात्तं विहाय हरेर्लीलैव वर्णनीयेत्युक्तमिदानीं तु नित्यनैमित्तिकस्वधर्मनिष्ठामप्यनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्येत्याशयेनाह त्यक्त्वेति। ननु स्वधर्मत्यागेन भजन् भक्तिपरिपाकेन यदि कृतार्थो भवेत्तदा न काचिच्चिंता, यदि पुनरपक्व एव म्रियेत ततो भ्रश्येद्वा तदा स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशंक्याह। ततो भजनात्कथंचित्पतेद्भ्रश्येन्म्रियेत वा यदि तदापि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशंका। अंगीकृत्याप्याह वाशब्दः कटाक्षे। यत्र क्व वा नीचयोनावप्यमुष्य भक्तिरसिकस्याभद्रमभूत्किं नाभूदेवेत्यर्थः। भक्तिवासनासद्भावादिति भावः। अभजद्भिस्तु केवलं स्वधर्मतः को वा अर्थ आप्तः। अभजतामिति षष्ठी तु सम्बन्धमात्रविवक्षया ॥ १७ ॥ ❀ ❀ ननु स्वधर्ममात्रादपि "कर्मणा पितृलोकः" इति श्रुतेः पितृलोकप्राप्तिः फलमस्त्येव तत्राह। तस्यैवेति। तस्यैव हेतोस्तदर्थं यत्नं कुर्यात्। यदुपरि ब्रह्मपर्यंतमधः स्थावरपर्यंतं च भ्रमद्भिर्जीवैर्न लभ्यते। षष्ठी तु पूर्ववत्। तत्तु विषयसुखमन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते दुःखवत् यथा दुःखं प्रयत्नं विनापि लभ्यते तद्वत्। तदुक्तम् "अप्रार्थितानि दुःखानि यथैवायांति देहिनाम्। सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते" इति ॥ १८ ॥ ❀ ❀ यदुक्तं यत्र क्व वाभद्रमभूदिति तदुपपादयति। न वा इति मुकुन्दसेवी जनो जातु कदाचित्कथंचन कुयोनिगतोऽपि संसृतिं नाव्रजेन्नाविशेत्। अंग अहो ! अन्यवत्केवलकर्मनिष्ठवदिति वैधर्म्ये दृष्टान्तः। कुत इत्यत आह। मुकुंदांघ्रेरुपगूहनमालिंगनं पुनः स्मरन्विहातुं नेच्छेत्। यतोऽयं जनो रसग्रहः रसेन रसनीयेन गृह्यते वशीक्रियते यद्वा रसे रसनीये ग्रह आग्रहो यस्य। तदुक्तं भगवता "यतते च ततो भूयः संसिद्धौ कुरुनन्दन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इति ॥१९॥ ❀ ❀ तदेवं भगवल्लीलां प्राधान्येन वर्णयेत्युक्तं तत्र को भगवान् काश्च तस्य लीला इत्यपेक्षामाह। इदं विश्वं भगवानेव। स त्वस्माद्विश्वस्मादितरः। ईश्वरात्प्रपंचो न पृथगीश्वरस्तु प्रपंचात्पृथगित्यर्थः। तत्र हेतुः। यतो भगवतो हेतोर्जगतः स्थित्यादयो भवंति। अनेनैव लीला अपि दर्शिताः। यद्वा इदं विश्वं भगवान्। इतर इव यः स जीवोऽपि भगवान्। चेतनाचेतनः प्रपंचस्तद्व्यतिरेकेण नास्ति, स एवैकस्तत्त्वमित्यर्थः। हिशब्देन "सर्वं खल्विदं ब्रह्म" इत्यादि प्रमाणं सूचितम्। तद्धि स्वयमेव भवान्वेद। प्रादेशमात्रमेकदेशमात्रमाचार्यवान्पुरुषो वेदेत्यादिश्रुत्यर्थसंपादनाय प्रदर्शितम् ॥ २० ॥

---

१. प्रा० पा०—ते प्रदेश०।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राक्षिपति–नन्विति । इत्यर्थ इति । भवच्छब्दयोगे मध्यमपुरुषप्रयोग आर्षः । पाठान्तरे भवन्निति पाठे हे भवन्निति सर्वदा विद्यमानत्वेन त्वं साक्षादीशत्वात्समर्थोसीति भावः । विश्वनाथस्तु–किञ्च तदपि धर्मान्तरं विनिंद्य भगवद्यश एव वर्णयेत्याह–विचक्षण इति । इतरः प्राकृतो विवेकशून्यो जनः स्थित इत्युक्तं विचक्षणो विवेकी जनस्तु अस्य विभोः सुखं निवृत्ति-तस्तदितरग्राम्यसुखनिवृत्त्या वेदितुमर्हति । तत्र हेतुः । अनन्तपारस्य । तेन साक्षादल्पप्रमाणाच्च विषयसुखान्निवृत्त्य अनन्तमपार-प्रमाणं च विभोः सुखं विदित्वा तदर्थं भक्तिमेव कर्तुमर्हतीति भावः । ततश्च विचक्षणजनस्य भक्तौ प्रवृत्तिमालोक्य "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायेनाविचक्षणोपि तत्रैव प्रवर्त्ततेत्यतस्तदर्थमपि भगवच्चरितं वर्णयेत्याह । गुणैः प्रवर्तमानस्यात एवानात्मनो बुद्धिविवेकशून्यस्य जनस्य बन्धमुक्तये चेष्टितं लीलां दर्शय । हे विभो तत्र समर्थ ! यतोऽसावपि सर्वतो निवृत्य शुद्धां भक्तिं कृत्वा तदीयं सुखं लभतामिति भावः । यद्वा एवमवतारणीयम् । ननु यदि निवारणं जनो न मन्यते तर्ह्यधुना त्वदुप-देशेनाप्यारब्धेन तत्तत्सर्वमतनिवर्त्तकभक्तिमात्रप्रवर्त्तकेन शास्त्रेणालम् । मैवम् , न ह्यस्मिञ्जगति सर्व एवाविवेकिनो विवेकिनोऽपि सन्तीत्याह–विचक्षण इति । विभोः कथंभूतस्यानन्तपारस्य । तत्र कालतोन्ताभावमाह । प्रकर्षेणाधुनापि वर्त्तमानस्य । तेन तस्य तच्चेष्टितस्य भूतपूर्वमात्रत्वं न ज्ञेयमिति भावः । प्रमाणतोन्ताभावमाह । गुणैः सत्त्वादिभिर्न भवत्यात्मा देहो यस्य चिदानन्द-मयविग्रहस्येत्यर्थः । न हि घनचिद्वस्तु केनापि प्रमातुं शक्यत इति भावः । सन्दर्भस्तु पूर्वमभिप्रेतं यशोवर्णनमेवोपदिशति । विचक्षणो भवानित्यन्वयः । हे विभो यतो विचक्षणो भवान् सर्वतो निवृत्तिपूर्वकमस्य विभोः श्रीभगवतः सम्बन्धि सुखं भक्तिरूपं वेदितुमर्हति योग्यो भवति ततो हेतोरनात्मनः पारमार्थिकबुद्धिहीनस्यात एव गुणैर्विषयैस्तत्सुखेन प्रवर्त्तमानस्यापि जनस्य कृते तस्य चेष्टितं लीलामेव त्वं वर्णय "निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात्" इति तस्याप्यनायासेन सुखप्राप्त्युपपत्तेः । ततो निवृत्तानां तु सुतरामेव तदुद्भूतं भवतीति भावः । ततश्च विचक्षणो यो भवति स एव सर्वविषयनिवृत्त्या भजनान्तरेण यदस्य भक्तिरूपं सुखं तद्वेदितुमर्हति । अतो यद्यपि "स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् । शुकमध्यापयामास निवृत्ति-निरतं मुनिम्" इति । तथा "हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः । मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ" इति तस्यैव मुख्याधिकारित्वमुक्तम् । तथापि "निवृत्ततर्षैः" इत्यादिन्यायेन गुणैः प्रवर्त्तमानस्यापि हितार्थं तस्य चेष्टितमेव वर्णयेत्यादि पूर्ववत् ॥ १९ ॥ ❀ ❀ अत्राक्षिपति–नन्विति । इत्यर्थ इति । तस्यां तस्यां स लभते पौर्वदैहिकम् इत्याशयः । अत्र विश्वनाथः–ननु "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्" इति श्रीगीतोपनिषद्वाक्येन कर्मत्याजनं निषिद्धम् । सत्यम् । तज्ज्ञानोपदेष्टृविषयमेव । ज्ञानस्यान्तःकरणशुद्ध्यधीनत्वात्तच्छुद्धेस्तु निष्कामकर्माधीनत्वात् । भक्तेस्तु स्वतः प्राबल्यादन्तःकरणशुद्धिपर्यन्तानपेक्षकत्वान्न भक्त्युपदेष्टृविषयम् । तदुक्तं श्रीमदजितेन "स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि । न राति रोगिणोऽपथ्यं वांछतोऽपि भिषक्तम" इति । तस्मात् "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति "धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः" इत्यादिभगवद्वाक्यबलान्नित्यनैमित्तिकस्वधर्मनिष्ठाया अपि त्याजनयैव केवलैव हरिभक्तिरुपदेष्टव्येत्याशयेनाह–त्यक्त्वेति । क्त्वाप्रत्ययेन भजनारम्भदशायामपि कर्मानुवृत्तिर्निषिद्धा । "स्वधर्मं त्यक्त्वा यो भजन्स्यादमुष्याभद्रं तावन्न भवेदेव देवर्षिभूताप्तनृणां पितॄणाम्" इत्यादेः । यदि पुनरपक्वो भगवत्प्राप्त्ययोग्यो म्रियेत जीवन्नेव कथंचिदन्यासक्तस्ततो भजनाद् दुराचारतया वा पतेत्तदपि कर्मत्यागनिमित्तमभद्रं सम्भवेदेव । भक्तिवासनाया अनुच्छित्ति-धर्मत्वात्सूक्ष्मरूपेण तदापि सत्त्वात् , कर्मानधिकारादित्याह–यत्र क्व वा जन्मनि किमभद्रमभून्नाभूदेव । वाशब्दस्य कटाक्षार्थक-त्वात् "तुष्यतु दुर्जनः" इति न्यायेनैव पाताद्युपगमः । न तु वस्तुतः पातस्तद्धेतुकं नीचयोनित्वं च । "न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि" इति श्रीभगवद्वाक्यादमोघभक्त्यंकुरस्यावश्यभाव्यपत्रपुष्पफलादित्वादिति भावः । तत्र भवेदित्यनुक्त्वा भूतनिर्देशस्तु वादिनं प्रत्याक्षेपं सूचयति । सन्दर्भस्तु यदि भगवत्प्राप्त्ययोग्यः स्यादायुःक्षयेण चित्रकेतुवदपराधेन वा देहान्तरं प्राप्नुयात् । भरतवत्तस्मिन्नेव देहेपि बाल्याद्याविष्टः स्यात्तदा तस्य भक्त्यभावसमयेपि यः स्वधर्मत्यागस्तेनापि नाभद्रं भवेद्भक्ति-वासनाया अनुच्छित्तिधर्मत्वात् । ततश्च यत्र काप्यवस्थायां तस्याभद्रं न स्यादेव । अभक्तानां तु को वाऽर्थः सततमव्यभिचारी स्यादपि तु सर्वोपि व्यभिचार्येव स्यादिति भावः ॥ १७ ॥ ❀ ❀ अत्राक्षिपति-नन्विति । "अपाम सोमममृता अभूम" इत्यादयोऽदृष्टस्वर्गादिसुखे तथा कृषिवाणिज्यादयो दृष्टसुखे च जनान्प्रवर्त्तयन्ते, तत्तत्सुखमनपेक्ष्य स्वधर्मं त्यक्त्वा कथं भक्तौ जनाः प्रवर्त्ततामिति चेत् सत्यम् । कोविदस्तु नैवं तैः प्रतारितः स्यात्कर्मणा यो योर्थ आभासते स पुनरर्थाभास एव नार्थ इति विमृश्येत्याह–तस्यैवेति । यत्स्वरूपसाक्षात्कारपूर्वकं परमानन्दसुखं भगवद्विग्रहध्यानादिभक्तिसुखं वा तस्यैवेत्यर्थः । पूर्ववत् अभजतामित्यत्र यथा तृतीयार्थे षष्ठी तथात्रापीत्यर्थः । नरकादौ इहादिना शूकरादिग्रहः । तत्प्रयत्नं विना दुःखादिप्रापणमुक्तं भारतादावित्यर्थः । अत्र यत्नकरणे दैन्यमात्राधिक्यमिति भावः । अत एव ग्रन्थान्तरेप्युक्तम् । "आयू रक्षति मर्माणि त्वायुरन्नं प्रयच्छति । अर्जुनस्य प्रतिज्ञे द्वे न दैन्यं न पलायनम्" इति । तस्माद्दैहिकार्थं सुतरां कर्म न कर्त्तव्यमिति भावः । कालोत्र प्राचीन-कर्मभोगावसरः ॥ १८ ॥ संसृतिं कर्मफलभोगमयीं नाव्रजेत् । तस्य भगवदुत्थशुभाशुभफलभोगवत्त्वात्तदुत्थशुभाशुभयोः कर्मजन्य-

स्वाभावादिति भावः। "त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान्" इति श्रुत्युक्तेः। "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति पाद्मोक्तेश्च। ततश्च पूर्वाभ्यासादेव मुकुन्दस्यांघ्रयोरुपगूहनं मनसा परिष्वंगं स्मरन्पुनस्त्यक्तुं नेच्छेत्। "अत्रांघ्री स्मरन्" इत्यनुक्त्वा "तदुपगूहनम्" इति पुनरिति पादाभ्यामेकद्वित्रिवारं स्वेच्छयैव दुरभिनिवेशवशाद्भजनं त्यक्त्वापि कियतः समयादनन्तरं स्वपूर्वापरदशयोस्तत्स्मरणसुखमस्मरणदुःखं च स्मृत्वा कृतानुतापो हन्त हन्त दुर्बुद्धिरहं किमकरवम्। भवतु नामातः परं तु न प्रभोर्भजनं हास्यामीति पुनरपि भजनमारभत एवेत्यर्थः। अत्र विजह्यादित्यनुक्त्वा विहातुं नेच्छेदित्यनेन तस्य गर्वराहित्यं सूचितम्। भजनं न हास्यामीतीच्छामात्रं मया क्रियते। तन्निर्वाहस्त्वीश्वरस्यैव पाणाविति तदाशयः। तत्र हेतुः-रसे ग्रहः आग्रहो यस्य रस एव ग्रह इव यं न हास्यतीति वा। अयमर्थः-भजनमेव निष्ठारुच्यशक्त्यंते रतिदशायां साक्षादेव रसो भवेदतो भजनस्य प्रथमारम्भदिनेऽपि प्रच्छन्नतया रसांशत्वमस्त्येव तदुक्तं "भक्तिः परेशानुभवो विरक्तिः" इत्यत्र "तुष्टिः पुष्टिः क्षुदपायोनुघासम्" इति। स च स्वादविशेषो भक्तेन दुस्त्यजस्तेन च भक्त इति। ततश्च भजनस्याविच्छेद उत्पद्यमाने भजनीयस्य मुकुन्दस्याचिरादेव प्राप्तिरित्यत्र कः सन्देह इति भावः। सन्दर्भस्तु तर्हि किं संसारध्वंस एव पुरुषार्थ इत्याशंक्य तत्राप्यस्ति वैशिष्ट्यमित्याह-स्मरन्निति। यस्तु तद्भक्तिरसग्रहः स पुनरित्यन्वयः। वक्ष्यते च "त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः" इति। "न पारमेष्ठ्यं न महेन्द्रधिष्ण्यम्" इत्यादि॥ १९॥ ❀ ❀ तत्र भगवल्लीलयोर्मध्ये। इत्यर्थ इति। कारणाद्धि कार्यं न पृथगस्ति मृदो घटवत्कारणं हि कार्यात्पृथगस्त्येव घटान्मृदिवेति भावः। तदेवाह-तत्रेति। तत्रः प्रपञ्चात्पृथक्त्वे अनेनैव विश्वस्थानादिकथनेन श्रीनारदेन श्रीव्यासदेवाय सर्गादिदशलक्षणवच्छ्रीमद्भागवतं सूत्ररूपेण सूचितं स्थानपदेन स्थानं तु प्रत्यक्षत एव दृश्यते। पोषणमन्वंतरवंशवंश्यानुचरितोक्तीनामपि स्थित्यन्तर्गतत्वमेव विमर्शत आयाति। संभवपदेन सर्गविसर्गावुक्तौ। निरोधपदेन मुक्तिराश्रयश्चोक्ताविति। आत्यंतिकलयेऽवधित्वेन हरिरेवाश्रय आत्यन्तिकलय एव हि मोक्षः। यद्वेदं हि विश्वमिति पूर्वार्द्धेन जीवन्मुक्तिरप्युक्ता। तस्याः सर्वत्रात्मदृष्टिभावनारूपत्वादित्यर्थः। पूर्वव्याख्याने विश्वपदेन केषांचिन्मते जडप्रपञ्च एव गृह्यते जीवस्य चेतनत्वात्। तेन तद्ग्रहणं न स्यादित्यस्वारस्यादाह-यद्वेति। श्रुतिव्याख्यातप्रायैवेति। अत्र विश्वनाथः-एवं भक्तिमुपदिश्य भजनीयेश्वरस्यैतावदेव ज्ञानं भक्तैः प्रथममपेक्षितव्यमिति तदुपदिशति-इदं दृश्यमानं विश्वं भगवानिव सदिव चेतनमिवानंदरूपमिव। न तु साक्षात्सच्चिदानंदरूपो भगवानेवेत्यर्थः। भगवतः सत्त्वादीनां सार्वकालिकत्वाद्विश्वस्य सत्त्वादीनां काचित्कत्वादिति भावः। यतोऽसौ भगवानितरः विश्वस्मादस्मादन्यः कथं विश्वं भगवानिव कथं भगवान्विश्वस्मादितरस्तत्राह-यत इति। यस्मान्मायाशक्तिमतो भगवतः सकाशाज्जगतः स्थाननिरोधसंभवा इति विश्वस्य कार्यरूपत्वात्केनचिदंशेनैव तद्रूपत्वं निरूप्यते। भगवतस्तत्कारणत्वात्तदितरत्वमित्यतः "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतिभिरपि ब्रह्मकार्यत्वादेव ब्रह्मत्वातिदेशो ज्ञाप्यते। तत्सर्वं भगवदवतारत्वात्त्वं वेद एव, तथापि "आचार्यवान्पुरुषो वेद" इति न्यायेन प्रादेशमात्रं दिङ्मात्रं कोटिपरार्द्धादप्यधिकप्रमाणस्य भगवतस्तद्भक्तेश्च तदैश्वर्यज्ञानस्य च प्रादेशमात्रं दशांगुलमात्रे प्रदर्शितम्। "प्रादेशतालगोकर्णास्तर्जन्यादियुते तते" इत्यमरः॥ २०॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अङ्ग अहो इति। 'अङ्ग सम्बोधने हर्षे सम्भ्रमासूययोरपी'ति मेदिनी॥ १९॥ ❀ ❀ भगवानेवेति। अत्रत्य एवशब्दः खलु मूलोक्त इवशब्दस्यार्थभूतः॥ २०-२१॥

श्रीमद्वीरराघवव्याख्या

नन्वकृत्स्नविज्जनो न जानातु नाम, कृत्स्नवित्तु ममाभिप्रायं जानात्येवेत्यत आह विचक्षण इति। यदप्यस्य विभोर्भगवतः अनंतपारस्य कर्मणि षष्ठीयं अपारं चेष्टितं विचक्षणः निपुणबुद्धिर्निवृत्तिधर्मरतः निवृत्तिधर्मनिष्ठतया सुखं यथा तथा वेदितुमर्हति निवृत्तिधर्मनिष्ठो भगवद्वैभवाभिज्ञो दुर्लभ इति भावः, तथापि गुणैः रजआदिगुणमूलकै रागादिभिः प्रवर्त्तमानस्यानात्मनः आत्मज्ञानरहितस्य जनस्य विभोश्चेष्टितं दर्शय प्रबंधनिर्माणेन वर्णयेत्यर्थः। शासनं नामाज्ञातज्ञापनरूपं, तत्रार्थकामयोः कचिदपि हेयत्वानुक्तावपि विचक्षणो जनो जानात्येव। अतस्तं प्रति कचिदप्यर्थकामयोर्हेयत्वज्ञापनं व्यर्थमेव, अविचक्षणं त्वदभिप्रायानभिज्ञं प्रत्यपि तद्व्यर्थमेवातो विचक्षणजनस्यापि सुखप्रतिपत्तये अर्थकामयोर्हेयत्वं भगवच्चेष्टितज्ञानस्य निरतिशयपुरुषार्थसाधनत्वं च विपुलप्रबंधनिर्माणेन दर्शयेति भावः॥ १६॥ ❀ ❀ यदुक्तं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्मेति कर्मणोऽभद्रगर्भत्वं भगवद्भक्तियोगस्य शश्वद्भद्रगर्भत्वं च तदुभयमुपपादयति त्यक्त्वेति। पतेदिति शरीरपातोक्तिः, ईश्वरे न चार्पितं स्वधर्मं स्वसमीहितं फलसाधनं धर्मं त्यक्त्वा हरेश्चरणांबुजं भजन्भजमानो यः सन्नपक्वः अपक्वकषायः पतेन्म्रियेत यदि अमुष्य यत्र क्वापि किमभद्रं भविष्यति न किंचिदपीत्यर्थः, 'न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति। प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते। अथवा योगिनामेव कुले भवति धीमताम्'इति भगवदुक्तेरिति भावः। अभजतामिति च्छेदः हरेश्चरणांबुजमभजतां यद्वा स्वधर्मत इति सार्वविभक्तिकस्तसिः स्वधर्मं भजतां स्वधर्म-

मनुतिष्ठतां कर्तरि षष्ठीयं को वार्थः आप्तः प्राप्तः न कोपीत्यर्थः । 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति' इति भगवदुक्तेरिति भावः । अंतवदेवास्य तद्भवति 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते प्लवा ह्येते अदृढा यज्ञरूपा' इत्यादिश्रुतेश्चेति भावः ॥ १७ ॥ ❋ ❋ एवं भगवद्भक्तिस्वधर्मयोः शश्वद्भद्रगर्भाभद्रगर्भत्वे प्रतिपादिते, अथ-तत्फलयोरुपायांतरालभ्यत्वलभ्यत्वे वदन् उपायांतरेभ्यस्तु सुखसाधनोपयुक्तमेव भूतहितं कार्यमित्याह तस्यैवेति । उपरि ब्रह्मलोका-दिष्वधःपातालादिषु भ्रमतां जीवानां परब्रह्मानुभवात्मकं न लभ्यते तस्यैव हेतोस्तत्सुखसाधनोपयुक्तोपायदर्शनार्थमेव कोवि-दो निपुणबुद्धिस्तादृशो यतेत एवं चेद् भूतहितकारित्वं, नान्यथेति भावः । तत्सुखं वैषयिकसुखं तु सर्वत्र उपर्यधश्च गभीररंहसा दुर्लक्ष्यवेगेन कर्मणोप्युलक्षणमिदं भ्रमतामित्यनुषंगः, कालेन तदुद्बोधेन प्राचीनेन कर्मणा च भ्रमतां जायमानानां जनानामित्यर्थः, अन्यतदुपायांतरादेव कालकर्मादिरूपाल्लभ्यते दुःखवद्यथा दुःखं तद्वत् अप्रार्थितमपि दुःखं कालकर्मादिहेत्वंतरेणैव भवति तद्वद्वै-षयिकसुखमपीत्यर्थः । यद्वा भक्तिसाध्यनैश्रेयससुखस्याभूतपूर्वत्वदुःखासंभिन्नत्वज्ञापनाय भक्तिव्यतिरिक्तोपायांतरसाध्यस्य सर्वस्यापि दुःखमिश्रत्वमाह तदिति । अन्यतः अनभिसंहितफलवर्णाश्रमधर्मोपकृतभगवद्भक्तिव्यतिरिक्तोपायाद्यत्सुखं महता कालेन सर्वत्र लभ्यते तद् दुःखवत् दुःखमिश्रमेव, दुःखासंभिन्नं तु प्रागुक्तोपायादेवेत्यर्थः ॥ १८ ॥ ❋ ❋ यत्र क्व वा भद्रमभूद-मुष्य किमिति काका सूचितमभिप्रायं सिंहावलोकनन्यायेन विवृणोति न वा इति । अंग हे बादरायण ! मुकुंदसेवी मुकुंदभक्तो जनः कदाचिदपि कथंचिदपि संसृतिं नाव्रजेत्किंतु ततो मुच्यतैवेत्यर्थः, इदं निष्पन्नभक्तियोगनिष्ठपुरुषाभिप्रायकं 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य' इति श्रुतेः । अनिष्पन्नभक्तियोगोपि जनः अन्यवत्केवलकाम्यकर्मिवन्न संसृतिं व्रजेत्, 'नहि कल्याण-कृत्कश्चिदि'त्याद्युक्तरीत्या कर्मिविलक्षणमेव प्राप्नोतीति भावः । तदेव विशदयति 'स्मरन्निति मुकुंदांघ्र्युपगूहनं, गुह-संवरण इति धातुः, मुकुंदांघ्र्योः संवरणं सम्यग्वरणं प्रपदनमिति यावत्, तत्स्मरन्पौर्वदेहिकं स्मरन्नित्यर्थः तत्पुनर्विहातुं त्यक्तुं नेच्छेत् । कुतः यतो मुकुंदसेवी जनः रसग्रहः 'रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवती'त्युक्तरीत्या निरतिशयानंदात्मकरसरूपपरमात्मानं गृहीतवा-नित्यर्थः । तथा चोक्तं भगवता 'तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः' इत्यादिना ॥ १९ ॥ ❋ ❋ ननु के ते भगवद्गुणा ये मया वर्णनीया इत्यपेक्षायां तेषामानंत्यान्न मयोपदेष्टुं साकल्येन त्वया वर्णयितुं वा शक्याः । किंतु संग्रहेण तान् दर्शयामीत्याह इदमिति । यतो यस्माज्जगत्स्थितिसंहारसर्गाः प्रवर्त्तंते स भगवानिदं विश्वं एवमितर इवेतर एव वा 'यथैवैवमि'ति वशब्दस्याप्येवशब्दपर्यायत्वानुशासनात्, विश्वाभिन्नोपि विश्वविलक्षण इत्यर्थः, यत इति जन्माद्यस्य यत इत्यत्रेव हेतौ पंचमी । भगवानिदमित्यनेन 'सर्वं खल्विदं ब्रह्म तज्जलानि'ति श्रुत्यर्थोभिप्रेतः । एवं जगदुपादानत्वजगन्निमित्तत्वतदुभयाक्षिप्तसर्वशक्तित्वं उपादानकारणाक्षिप्तसर्वान्तरात्मत्वचिदचिद्विशिष्टत्वतन्मूलकजगदभिन्नजग-द्विशेष्यत्वतन्मूलकतद्विलक्षणत्वकारणत्वाक्षिप्तोपास्यत्वमोक्षप्रदत्वादयो गुणाः सामर्थ्यादत्र फलिताः, एवमादयस्त्वया वर्णनीया इति भावः । तद्धि उक्तगुणादिजातं भवान्स्वयमात्मना वेद, तथापि मया भवतः प्रादेशमात्रं प्रदेश एव प्रादेशः स्वार्थेऽण्, प्रादेश-मात्रं गुणानामेकदेशमात्रमेव प्रदर्शितम् । यद्यपि जगदुपादानत्वादीन् भगवद्गुणानामानंत्यं भवान् जानात्येव, तथापि पृष्टेन मया दिङ्मात्रं प्रदर्शितमित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता प[illegible]नावली

समाधिभाषात्मकग्रंथेऽधिकार्यभावादुपरम्यत इति न वक्तव्यमिति विज्ञापयति विचक्षण इति । निवृत्तितो गुणैः प्रवर्त-मानस्यानात्मनोस्यानंतपारस्य विभोः सुखं विचक्षणो वेदितुमर्हति यस्मात्ततो भवान् पूज्यस्त्वं विभोश्चेष्टितं दर्शयेत्येकान्वयः । अनु-ष्ठितनिवृत्तिधर्मात्सत्त्वादिगुणैर्जगत्सृष्ट्यादौ प्रवर्तमानस्यानात्मनः अस्वामिकार्यस्य जीवस्य अपरिमितमूर्तेर्विभोर्भगवतः सका-शात् यद्भविष्यत्सुखं भवति तत्सुखं विचक्षणो विशिष्टाचार्यः सात्त्विकप्रकृतिर्ज्ञातुं योग्य इति यस्मात्तस्माद्विभोः सर्वगस्य हरे-श्चरितं समाधिभाषात्मकग्रंथकरणेन ज्ञापयेत्यतोधिकार्यभावान्नोपरंतव्यमिति भावः । अनात्मनो बुद्ध्यादेर्गुणैः सत्त्वादिभिः शब्दा-दिषु प्रवर्तमानस्य जनस्य सुखाय विभोश्चेष्टितं दर्शयेति वा ॥ १६ ॥ ❋ ❋ इतोपि प्रवृत्तिधर्मोपदेशो वरीयानित्याह त्यक्त्वेति । अथ स्वधर्मं त्यक्त्वा हरेश्चरणांबुजं भजंस्ततः यद्यपक्वः पतेत्तदा अमुष्य यत्र क्व वा भद्रमभूत्, स्वधर्मं भजतां को वा अर्थ आप्त एवेत्येकान्वयः । भगवदविषयस्वधर्मानुष्ठानात्मकप्रवृत्तिधर्मं त्यक्त्वा निवृत्तिधर्मविधायकशास्त्रोक्ताचारैः हरेः पाद-पद्मं सेवमानः पुरुषस्तस्मादनधिगतापरोक्षज्ञानादिस्तत्फलपरिपाके रागाद्यंतरायविहतः स्खलेत्तथाप्यमुष्य पुंसः 'क्षिप्रं भवति धर्मात्मे'त्यादिप्रमाणाद्यत्र क्व वा जन्मांतरे श्रीमदादिकुलोद्भूतस्य निवृत्तिधर्मात्मकं भद्रमेष्यतु निश्चितं यत्तदतीतत्वेन भण्यत इति वचनादभूद्भविष्यत्येव । केवलं प्रवृत्तिधर्मं भजतामनुतिष्ठतां अस्खलनेपि धर्मादिषु को वा पुरुषार्थ आप्तो न कोपीति भावः । तस्मान्निवृत्तिधर्मविधायकशास्त्रं भवान्करोत्विति प्रार्थये ॥ १७ ॥ ❋ ❋ तस्माद्विवेकिना प्रवृत्तिधर्मं विहाय निवृत्तिधर्म एवानुष्ठेय इत्याह तस्येति । कोविदस्तस्यैव हेतोः प्रयतेत उपर्यधो भ्रमतां यन्न लभ्यते गभीररंहसा कालेनान्यतः सर्वत्र दुःखवत् सुखं लभ्यत इत्येकान्वयः । अनंतपारस्येति हरेर्मुख्यप्रसादलभ्यं यत्सुखमुक्तं तस्यैव हेतोर्नान्यस्य तत्सुखहेतुनिवृत्तिधर्माख्यसाधनस्यार्थे

प्रयत्नं कुर्यात् । यत्सुखं भूस्वर्गादिषु प्रवर्तमानानां प्रवृत्तिधर्माणां पुरुषाणां न सुलभं निरंतरं निवृत्तिधर्मं सेवमानानामव्यक्तवेगेनानेकजन्मपरिमितेन कालेनान्यतः सर्वदेवेभ्योऽर्यंतभिन्नाद्धरेः सर्वदेशकालेषु निर्दुःखस्वरूपसुखमभिव्यज्यते तस्मान्निवृत्तिधर्म एव श्रेयानिति भावः । यथा पापिना प्रयत्नमतरेण दुःखं लभ्यते तथा निवृत्तिधर्माणामपि साधनसामग्रीं विना निरायासेन सुखं लभ्यत इत्यस्मिन्नर्थे दुःखवदिति दृष्टांतो वा । स्वर्गादौ भ्रमतां यत्सुखं न लभ्यते विवेकी तस्यैव सुखस्य हेतोः प्रयतेत । एवशब्दव्यावर्त्यमाह तदिति । अन्यतो विषयभोगात् यद् दुःखोपेतं सुखं तद् गभीररंहसा कालेन सर्वत्र लभ्यते । तस्मात्तादृशसुखार्थं न यतनीयं किंतु तद्व्यतिरिक्तस्य नित्यस्य केवलस्य स्वरूपसुखस्येति वा ॥ १८ ॥ ❀ ❀ इतोपि निवृत्तिधर्म एव श्रेयानित्याह न वा इति । अंग हे भगवन् मुकुंदसेवी जनोऽन्यवन् मुकुंदासेवमानवज्जातु कदाचिदपि कथंचन कस्मान्निमित्तात्संसृतिं न व्रजेत् । वैशब्देन 'न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति' इति वाक्यं प्रमाणयति कुत इति तत्राह स्मरन्निति । मुकुंदस्य मनसा चरणारविंदालिंगनसुखं स्मरन्ननुभवन् रसज्ञो जनः पुनर्विहातुं नेच्छेदित्यन्वयः ॥ १९ ॥ ❀ ❀ मुकुंदरूपमाह । इदमिति स भगवानिदं विश्वमिव न तु विश्वं किंतु इतरः विलक्षणलक्षणः कुतः जगत्स्थाननिरोधसंभवा इति यतः जगत्स्थापयति निरोधयति संहरति संभावयति उत्पादयतीति तथोक्तः जत्स्रष्टृत्वादिलक्षणलक्षितसार्वज्ञ्यसर्वस्वांतत्र्यसर्वशक्तिसर्वस्वामित्वादिगुणपूर्णत्वादसर्वज्ञत्वादिगुणविशिष्टाज्जगतो भेदोनुभवसिद्ध इति हिशब्दः । किं च भगवान्स्वयं तद्वैलक्षण्यं वेद जानाति । हि यस्मादैक्यकथनं प्रमाणविरुद्धमिति भावः । तथापि भवतः सर्वं सिद्धं न मया वक्तव्यांशोस्ति, तथाप्युपाध्यायपुरो बालवदव्याकृताकाशसदृशज्ञानवतः भवतः केवलप्रादेशाकाशपरिमितं ज्ञानं प्रदर्शितं मयेति शेष इत्यन्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पूर्व्वमभिप्रेतं यशोवर्णनमेव स्पष्टमुपदिशति विचक्षण इति । विचक्षणो भवान् इत्यन्वयः । हे विभो यतो विचक्षणो भवान् सर्व्वतो निवृत्तिपूर्व्वकमस्य विभोः श्रीभगवतः सम्बन्धि सुखं भक्तिरूपं वेदितुमर्हति योग्यो भवति ततो हेतोरनात्मनः पारमार्थिकबुद्धिहीनस्य अत एव गुणैर्विषयैस्तत् । सुखेन प्रवर्त्तमानस्यापि जनस्य कृते तस्य चेष्टितं लीलामेव त्वं वर्णय 'निवृत्ततर्षैरुपगीयमानाद् भवौषधाच्छ्रोत्रमनोऽभिरामादि'ति तस्याप्यनायासेन तत्सुखप्राप्त्युपपत्तेः । ततो निवृत्तानां तु सुखमेव तदुद्भूतं भवेदिति भावः । भवन्निति पाठे सम्बोधनम् । ततश्च विचक्षणो यो भवति स एव सर्व्वविषयनिवृत्त्या भजनांतरेण यदस्य भक्तिरूपं सुखं तद्वेदितुमर्हति । अतो यद्यपि 'स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् । शुकमध्यापयामास निवृत्तिनिरतं मुनिमि'ति तथा 'हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः । मह्यं पुत्राय शान्ताय परं शास्त्रमिदं जगावि'ति तस्यैव मुख्याधिकारित्वमुक्तं, तथापि निवृत्ततर्षैरित्यादिन्यायेन गुणैः प्रवर्त्तमानस्यापि हितार्थं तस्य चेष्टितमेव दर्शयेत्यादि पूर्ववत् ॥ १६ ॥ ❀ ❀ अधुना स्वधर्म्मपरित्यागेऽपि दोषं परिहरति त्यक्त्वेति–अयमर्थः । स्वधर्म्मं त्यक्त्वा यो भजन् स्यात् अमुष्याभद्रं तावन्न भवत्येव देवर्षिभूताप्तनृणामित्यादेः । तत्र यदि भगवत्प्राप्तियोग्यः स्यात् आयुःक्षयेण चित्रकेतुवत् अपराधेन वा देहान्तरं प्राप्नुयात्, भरतवत् तस्मिन्नेव देहेऽपि वा अन्याविष्टः स्यात्, तदा तद्भक्त्यभावसमयेऽपि यः स्वधर्म्मत्यागस्तेनापि नाभद्रं भवेत् । भक्तिवासनायास्त्वनुच्छित्तिधर्म्मकत्वात् ततश्च यत्र क्वाप्यवस्थायां तस्याभद्रं न स्यादेव । अभक्तानान्तु को वा अर्थः सततमव्यभिचारी स्यादिति ॥ १७ ॥ ❀ ❀ तस्यैव हेतोरिति । कर्म्मणा योऽर्थः आप्यते स पुनरर्थाभास एव नार्थ इति भावः । तल्लभ्यत इति । तस्मादैहिकार्थं सुतरां कर्म्म न कर्त्तव्यमिति भावः । कालोऽत्र प्राचीनकर्म्मभोगावसरः ॥ १८ ॥ ❀ ❀ तर्हि किं संसारध्वंस एव पुरुषार्थ इत्याशंक्य तत्राप्यस्ति वैशिष्ट्यमित्याह स्मरन्निति । यस्तु तद्भक्तिरसग्रहः स पुनरित्यन्वयः, वक्ष्यते च–'त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् । न चलति भगवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः ।।" इति । 'न पारमेष्ठ्यं न महेन्द्रधिष्ण्यमि'त्यादि ॥ १९ ॥ ❀ ❀ ननु सर्व्वं खल्विदं ब्रह्मेति श्रूयते । ब्रह्म च भगवदेकरूपमेव । ततः कथं भगवत एतादृशत्वं तत्राह इदं हीति । हि यस्मादिदं विश्वं भगवानिव नतु भगवानेव स्यात्, यतोऽसौ विश्वस्मादितरो विलक्षणः । कथं विश्वं भगवानिव कथं वा भगवान् विश्वस्मादितरस्तत्राह यत इति । विश्वस्य तत्कार्यरूपत्वात् केनचिदंशेनैव तद्रूपत्वं निरूप्यते । भगवतस्तु तत्कारणत्वात् परत्वम् । 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुत्यन्तरात् । तत्र सर्व्वज्ञस्यापि भवतः सम्प्रति अपरितोष एवायं प्रमाणमित्याह तद्धीति । मया तु यत्किंचिदेवोपदिश्यत इत्याह तथापीति । तदेवमपि परमात्मसन्दर्भे यदन्यथा व्याख्यातं तत्तु नातिहृद्यमिति मन्तव्यम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी व्याख्या

किञ्च तदपि त्वं धर्मान्तरं विनिन्द्य भगवद्यश एव वर्णयेत्याह विचक्षण इति । इतरः प्राकृतो विवेकशून्यो जनः स्थित इत्युक्तम्, विचक्षणः विवेकी जनस्तु अस्य विभोः सुखं निवृत्तितः तदितरग्राम्यसुखनिवृत्त्या वेदितुमर्हति । तत्र हेतुरनन्तपारस्य न अन्तः कालत एवमेव पारं च प्रमाणतो यस्य तस्य । तेन सान्तादल्पप्रमाणाच्च विषयसुखान्निवृत्य अनन्तमपार-

प्रमाणञ्च विभोः सुखं विदित्वा तदर्थं भक्तिं कर्तुमर्हतीति भावः । ततश्च विचक्षणजनस्य भक्तौ प्रवृत्तिमालोक्य 'यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायेनाविचक्षणोऽपि तत्रैव प्रवर्तते इत्यतस्तदर्थमपि भगवच्चरित्रं वर्णयेत्याह । गुणैः प्रवर्त्तमानस्य तत एवानात्मनो बुद्धिविवेकशून्यस्य जनस्य बन्धविमुक्तये चेष्टितं लीलां दर्शय । हे विभो तत्र समर्थ ! यतोऽसावपि सर्वतो निवृत्य शुद्धां भक्तिं कृत्वा तदीयं सुखं लभतामिति भावः । यद्वा एवमवतारणीयम्–ननु यदि निवारणं जनो न मन्यते तर्ह्यधुनापि त्वदुपदेशेनाप्यारब्धेन तत्तत्सर्वमतनिवर्तकभक्तिमात्रप्रवर्त्तकेन शास्त्रेणालम् । मैवम् , न ह्यस्मिन् जगति सर्वे एवाविवेकिनो विवेकिनोऽपि संतीत्याह विचक्षण इति । विभोः कथम्भूतस्य अनन्तपारस्य । तत्र कालतोऽन्ताभावमाह प्रकर्षेणाधुनापि वर्तमानस्य तेन तस्य तच्चेष्टितस्य भूतपूर्वमात्रत्वं न ज्ञेयमिति भावः । प्रमाणतोऽन्ताभावमाह–गुणैः सत्त्वादिभिर्न भवत्यात्मा देहो यस्य चिदानन्दमयविग्रहस्येत्यर्थः । न हि घनचिद्वस्तु केनापि प्रमातुं शक्यत इति भावः ॥ १६ ॥ ❀ ❀ ननु 'न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्नि'ति श्रीगीतोपनिषद्वाक्येन कर्मत्याजनं निषिद्धम् । सत्यम् । तच्च ज्ञानोपदेष्टृविषयमेव । ज्ञानस्यान्तःकरणशुद्ध्यधीनत्वात् तच्छुद्धेस्तु निष्कामकर्माधीनत्वात् भक्तेस्तु स्वतः प्राबल्यादन्तः-करणशुद्धिपर्यन्तानपेक्षकत्वात् न भक्त्युपदेष्टृविषयम् । यदुक्तं श्रीमदजितेन 'स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि । न राति रोगिणोऽपथ्यं वांछतोपि भिषक्तमः ॥' इति । तस्मात् 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजे'ति 'धर्मान् संत्यज्य यः सर्वान् मां भजेत् स च सत्तमः' इत्यादिभगवद्वाक्यबलान्नित्यनैमित्तिकस्वधर्मनिष्ठाया अपि त्याजनयैव केवलैव हरिभक्तिरुपदेष्टव्येत्याशयेनाह त्यक्त्वेति । त्वाप्रत्ययेन भजनारम्भदशायामपि कर्मानुवृत्तिर्निषिद्धा । स्वधर्मं त्यक्त्वा यो भजन् स्यादमुष्याभद्रं तावन्न भवेदेव 'देवर्षि-भूताप्तनृणां पितॄणामि'त्यादेः । यदि पुनरपक्को भगवत्प्राप्तियोग्यो म्रियेत जीवन्नेव वा कथञ्चिदन्यासक्तस्ततो भजनात् दुराचारतया वा पतेत् तदपि कर्मत्यागनिमित्तमभद्रं न भवेदेव, भक्तिवासनायास्त्वनुच्छित्तिधर्मकत्वात् सूक्ष्मरूपेण तदापि सत्त्वात् कर्मान-धिकारादित्याह–यत्र क्व वा जन्मनि किम् अभद्रम् अभून्नाभूदेव । वाशब्दस्य कटाक्षार्थकत्वात् 'तुष्यतु दुर्जन' इति न्यायेनैव पाताभ्युपगमः, न तु वस्तुतः पातस्तद्धेतुकं नीचयोनित्वञ्च । 'न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपी'ति श्रीभगवद्वाक्यादमोघ-भक्त्यंकुरस्यावश्यभाव्यपत्रपुष्पफलादित्वादिति भावः । अत्र भवेदित्यनुक्त्वा भूतनिर्देशो वादिनः प्रत्याक्षेपं सूचयति अभजताम् , अभजद्भिस्तु स्वधर्मतः को वा अर्थ आप्तो न कोऽपीत्यर्थः ॥ १७ ॥ ❀ ❀ ननु 'कर्म्मणा पितृलोक' इति 'अपाम सोमममृता अभूमे'त्यादयः श्रुतयोऽदृष्टस्वर्गादिसुखे तथा कापि वाणिज्यादयो दृष्टे च सुखे जनान् प्रवर्त्तयन्ते । तत्तत् सुखमनपेक्ष्य स्वधर्म्मं त्यक्त्वा कथं भक्तौ जनाः प्रवर्त्तन्तामिति चेत् ? सत्यम् । कोविदस्तु नैव तैः प्रतारितः स्यादित्यत आह तस्यैवेति । कोविदो विवेकी तस्यैव हेतोः प्रयतेत प्रयत्नं कुर्य्यात् यद्वस्तु उपरि ब्रह्मपर्य्यन्तम् अधः स्थावरपर्य्यन्तञ्च भ्रमतां भ्रमद्भिर्जीवैर्न लभ्यते । तत्तु विषयसुखम् अन्यतः प्राचीनकर्म्मत एव सर्व्वत्र नारकशूकरजन्मादावपि लभ्यते । तदुक्तम् 'अप्रार्थितानि दुःखानि यथैवायान्ति देहिनाम् । सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते' इति ॥ १८ ॥ ❀ ❀ यदुक्तं यत्र क्व वाऽभद्रमिति तदुपपादयति न वै इति । मुकुन्दसेवी जनः जातु कदाचिदपि कथञ्चन दुरभिनिवेशादिवशादपि अन्यवत् कर्म्मिजनादिवत् कर्म्मफलभोगमयीं संसृतिं नाव्रजेत् । किंतु भगवदुत्थशुभाशुभभोगमयीमेवेत्यर्थः । तस्य भगवदुत्थशुभाशुभफलभोगवत्त्वात् तदुत्थशुभाशुभयोः कर्म्मजन्यत्वा-भावादिति भावः । 'त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयानि'ति श्रुत्युक्तेः, 'न कर्म्मबन्धनं जन्म वैष्णवानाञ्च विद्यते' इति पाद्मोक्तेश्च । ततश्च पूर्वाभ्यासादेव मुकुन्दस्याङ्घ्र्योरुपगूहनं मनसा परिष्वङ्गं स्मरन् पुनस्त्यक्तुं न इच्छेत् । अत्राङ्घ्री स्मरन्नित्यनुक्त्वा तदुपगूहनमिति पुनरिति पदाभ्यां एकद्वित्रिवारं स्वेच्छयैव दुरभिनिवेशवशाद्भजनं त्यक्त्वापि कियतः समयाद-नन्तरं स्वपूर्व्वापरदशयोस्तत्स्मरणसुखमस्मरणदुःखञ्च स्मृत्वा कृतानुतापो 'हन्त हन्त दुर्बुद्धिरहं किमकरवं भवतु नाम, अतः परं तु न प्रभोर्भजनं हास्यामी'ति पुनरपि भजनमारभत एवेत्यर्थः । अत्र विजह्यादित्यनुक्त्वा विहातुं नेच्छेदित्यनेन तस्य गर्व्वराहित्यं सूचितं, 'भजनं न हास्यामी'तीच्छामात्रं मया क्रियते तन्निर्व्वाहस्त्वीश्वरस्यैव पाणाविति तदाशयः । तत्र हेतुः । रसे ग्रह आग्रहो यस्य रस एव ग्रह इव यं न त्यजतीति वा । अयमर्थः–भजनमेव निष्ठारूच्यासक्त्यन्ते रतिदशायां साक्षादेव रसो भवेत्तो भजनस्य प्रथमारंभदिनेऽपि प्रच्छन्नतया रसांशत्वमस्त्येव । यदुक्तं–'भक्तिः परेशानुभवो विरक्तिरि'त्यत्र 'तुष्टिः पुष्टिः क्षुदपायोऽ-नुघासमि'ति । स च स्वादविशेषो भक्तेन दुस्त्यजस्तेन च मुक्त इति । ततश्च भजनस्याविच्छेदे उत्पद्यमाने भजनीयस्य मुकुन्दस्या-चिरादेव प्राप्तिरित्यत्र कः सन्देह इति भावः ॥ १९ ॥ ❀ ❀ एवं भक्तिमुपदिश्य भजनीयेश्वरस्यैतावदेव ज्ञानं भक्तैः प्रथममपेक्षितव्यमिति तदुपदिशति–इदं दृश्यमानं विश्वं भगवानिव सदिव चेतनमिव आनन्दरूपमिव न तु साक्षात् सच्चिदानंदरूपो भगवानेवेत्यर्थः । भगवतः सत्त्वादीनां सार्व्वकालिकत्वात् विश्वस्य सत्त्वादीनाञ्च कैञ्चित्कालिकत्वादिति भावः । यतोऽसौ भगवानितरः अस्माद्विश्वस्मादन्यः । कथं विश्वं भगवानिव कथं विश्वस्मादितरस्तत्राह यत इति । यस्मान् मायाशक्तिमतो भगवतः सकाशाज्जगतः स्थाननिरोधसंभवा इति विश्वस्य तत्कार्य्यरूपत्वात् केनचिदंशेनैव तद्रूपत्वं निरूप्यते । भगवतस्तत्कारण-त्वात् तदितरत्वमित्यतः 'सर्व्वं खल्विदं ब्रह्मे'त्यादिश्रुतिभिरपि ब्रह्मकार्य्यत्वादेव अस्य ब्रह्मत्वातिदेशो ज्ञाप्यते । तत् सर्व्वं भवान् भगवतोऽवतारत्वात् स्वयं वेद । तदप्याचार्य्यवान् पुरुषो वेदेति न्यायेन प्रादेशमात्रं दिङ्मात्रं कोटिपरार्द्धादप्य-

धिकप्रमाणस्य भगवतस्तदीयाया भक्तेस्तदैश्वर्यज्ञानस्य च प्रादेशमात्रं दशांगुलमात्रं प्रदर्शितम् । 'प्रादेशतालगोकर्णास्तर्जन्यादियुते तते' इत्यमरः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

ननु 'वेदे रामायणे चैव भारते पंचरात्रके । आदावंते च मध्ये च हरिः सर्वत्र गीयते ॥' इति वचनात्सर्वत्र हरिचेष्टितं वेदितव्यम् ! न च वाच्यं कर्मादिषु प्रवृत्तेन हरिचेष्टितं तत्तद्ग्रन्थे स्थितमपि कुतो वेदितुं शक्यमतो निवृत्तिमार्गप्रदर्शनपूर्वकं हरिचेष्टितं पुराणं वक्तव्यमिति 'न कर्मणा न प्रजया न धनेन त्यागेनैकेनामृतत्वमानशुरि'त्यादिश्रुतेः, 'द्विविधा ब्राह्मणा राजन्धर्मश्च द्विविधः स्मृतः । प्रवृत्ताश्च निवृत्ताश्च निवृत्तोसि प्रतिग्रहादि'त्यादिस्मृतेश्च निवृत्तिमार्गावगमात् चेष्टितस्य तत्र तत्र द्रष्टव्यत्वाच्च तत्राह विचक्षण इति । अस्य विभोर्विचेष्टितमुक्तश्रुतिस्मृतिगम्यात् निवृत्तितो निवृत्तिमार्गात् सुखं यथा भवति तथा वेदितुं विचक्षणः कश्चिदधिकारी अर्हति, न त्वनात्मा । अतः अनात्मनः अकृतबुद्धेः त्वं चेष्टितं दर्शय । भगवच्चेष्टितबोधकं शास्त्रं दर्शयेति भावः ॥ १६ ॥ ❀ ❀ एवं तावद्भगवद्भक्तिवर्जितं कर्मादि सर्वमशोभनमतो भगवच्चेष्टितं दर्शयेत्युक्तं संप्रत्येतद्दार्ढ्याय कर्मनिरपेक्षहरिभजनस्यायथावदनुष्ठितस्यापि भद्रपदत्वं हरिभजननिरपेक्षस्य कर्मणो निरर्थकत्वं चाह श्रीमन्नारदः–त्यक्त्वेति–अभजतामभजद्भिः ॥ १७ ॥ ❀ ❀ ननु कर्मणा पितृलोक इति श्रुतिः कर्मफलमाह कथमुच्यते को वार्थ आप्तो भजतां स्वधर्मत इत्यत्र हरिभजनं निरतिशयनित्यप्राप्तब्रह्मानन्दफलकं, कर्मफलं तु स्वर्गादिसातिशयमनित्यं दैवात्सुलभं चेत्याशयेनाह तस्यैवेति, भ्रमतां भ्रमद्भिः तत्कर्मफलसुखम् अन्यतो दैवतः, कथंभूतं उत्सुखं दुःखवत् बहुदुःखयुक्तम् । तदुक्तं भगवता "ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः" इति ॥ १८ ॥ ❀ ❀ भजनफलमुपर्य्यधो भ्रमद्भिरपि यन्न लभ्यते तन्निरतिशयानन्तानन्दरूपं कर्मफलं तु दुःखोदर्कमित्युक्तं तदेव प्रपंचयति नेति । अन्यः कर्मनिष्ठः स हि कर्मफलभोगानन्तरं संसृतिं जन्ममरणप्रवाहरूपां पुनः प्राप्नोति, 'गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यती'ति वचनात् 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' इति भगवद्वचनाच्च तद्वत् मुकुन्दसेवी तु मुकुन्दं प्राप्य वै निश्चयेन जातु कदाचिदपि कथञ्चन केनापि प्रकारेण संसृतिं नाव्रजेत् 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति भगवद्वचनात् । मुकुन्दाङ्घ्रयुपगूहनमालिंगनं स्मरन् स्वयं विहातुं नेच्छेत् । यतः कारणात् पुनश्च रसेन रसमूर्तिना मुकुन्देनापि गृह्यते ॥ १९ ॥ ❀ ❀ ननु को मुकुन्दो यः सेव्यो यत्सेवी संसारं न व्रजति कश्च तेन स्वसेवकस्य संसारस्य च सम्बन्ध इत्यत आह इदमिति । यत उपादाननिमित्तरूपात् जगत्स्थाननिरोधसंभवाः स भगवान् मुकुन्दः सेव्यः, कारणं तु ध्येयमिति श्रुतेः, जगत्कारणव्यतिरिक्तमुपास्यं नास्तीति भावः । तेन सह चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य सम्बन्धमाह–इदं कार्यरूपं चिदचिदात्मकं विश्वं तदुपलक्षितं कालादिकं च भगवानेव छंदोनुरोधेनैकारस्थाने इकारः । ननु भगवतः परिणामित्वं प्रसज्येत इत्यत आह–स्वरूपतो विश्वेतः भिन्नः । तदेवं चेतनाचेतनयोर्ब्रह्मणा सह भेदाभेदः सम्बन्धः "अंशो नाना व्यपदेशात्, अन्यथा चापि दाशकितवादित्वमधीयत एके, उभयव्यपदेशादहिकुण्डलवत्" इत्यादिसूत्रेभ्यः । विस्तरस्तु वेदान्तकौस्तुभे द्रष्टव्यः । तदेतत्पूर्वोक्तं सर्वं भवानपि वेद तथापि प्रादेशमात्रमेकदेशमात्रं प्रदर्शितम् ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु तथापि मीमांसाद्वयेन मार्गद्वयस्य सिद्धत्वात् किमनेन तृतीयेनेत्यत आह विचक्षण इति । आत्मसुखं हि निवृत्तिमार्गे प्रकटीभवति । ब्रह्मसुखं च परं शुकवत् सर्वपरित्यागेन वैराग्यं च नेदानीं संभवति तदर्थं च नूतनप्रयत्नेन तद्धेतोरेवास्तु किं तेनेति न्यायेन स्वतंत्र एवायं मार्गोस्त्वित्यभिप्रायेणाह-विचक्षणः कश्चिदेव अस्य जगदनंतपारस्य देशकालापरिच्छिन्नस्य सर्वेहोपरतितनुसुखं वेदितुमर्हति तावतापि न कार्यसिद्धिरित्याह विभोरिति । अनात्मनो देहादेः गुणैर्विषयैः प्रवर्तमानस्य न तत्सुखमिति पूर्वेण संबंधः । नेत्यध्याहारः, अथवा तस्य निवृत्तितस्तत्संगाभावेन । ननु तेषामपि कृतार्थकरणे समर्थः । यद्वा प्रवर्तमानस्यार्थे तत्संबंधी वा भवान् तदर्थं यत्नकरणात् तदुद्धारार्थं भगवद्गुणा वक्तव्या इत्यर्थः । निर्वाहकमाह विभोरिति ॥ १६ ॥ ❀ ❀ एवं चतुर्भिः श्लोकैः उपक्रमोपसंहाराभ्यां चरित्रकथने विधिर्निरूपितः । तस्य मीमांसामाह द्वाभ्यां त्यक्त्वेति । ननु भगवत्कथा केन श्रोतव्या किं धर्मकर्तृभिर्लौकिकैः अधर्मकर्तृभिर्वा ? तत्राद्यस्यानवकाशः, द्वितीयस्य लौकिकव्यापारेऽनाविष्टस्य न प्रवृत्तिः, तृतीये दुष्टाधिकारित्वादसच्छास्त्रता स्यात्, सर्वाधिकारित्वान्न निवृत्तिमार्गनिष्ठत्वं तथा सति वा अवक्तव्यमिति तत्रोच्यते–धर्मकर्तृभिरेव श्रोतव्यं परं धर्मपरित्यागेन जन्मांतरसहस्रेष्विति वाक्यात् यथा निवृत्तिमार्गे धर्मपरित्यागः तथात्रापि 'तावत्कर्माणि कुर्वीते'ति भगवद्वाक्यात् बाधकानां वा चिरकालसाध्यानां वा परित्यागः । तथा च त्यक्त्वेति विधिः स्यात्तादृशेषु धर्मत्यागवचन इत्यत्रोक्तार्थोनुसंधेयः । तत्र हेतुः अस्वधर्ममिति देहादिधर्मं तदधिकारेण वा प्रभृतं स्वस्य तु जीवस्य दासत्वात् भगवत्सेवैव स्वधर्मः 'दाशकितवादिकमप्यधीयत' एके ब्रह्मदासा ब्रह्मकितवा इति । इदं विस्तृतमस्माभिः 'अंशो नाना व्यपदेशादि' त्यत्र । हरेर्भगवतः परब्रह्मणः भक्तिमार्गानुसारेण चरणसेवा जीवानां स्वाभाविको धर्मः । अंशत्वेपि अंशिनः सेवा मुख्या । येषामप्येतदवास्तवं तेषामपि देहधर्मापेक्षया अंतरंगम् अत्र मतांतरमनूद्य दूषयति यद्यपक इति । अथ यदि पतेदिति जीवस्य दासत्वेन स्वधर्मत्वात् पतनशंकैव नास्ति । भगवत्सायुज्यसाधन-

त्वाच्च अयमेव च तस्य पाकः । पर्यवसानात् यत्त्वौपाधिकं जीवत्वं तदा अस्वाभाविकाधिकारकृतत्वात् अपक्वता स्यात्, तथापि न पतनशंका परमोपाधित्वात् । अथ भिन्नप्रक्रमेण विचार्यते ब्रह्मभावं प्राप्तस्य नायं धर्म इति, तथा सति पतेत् पुनर्जीवभावं प्राप्नुयात् तत्रापि भजनात् नान्यत इत्याह तत इति । एवमपक्वपक्षं ब्रह्मभावाच्च भ्रंशपक्षमनूद्य दूषयति यत्र क्व वेति । साक्षाद्भगवत्सायुज्यहेतुभगवत्सेवायामपि यदि पातः तदा क्व साधनांतरे तस्य भद्रं भविष्यति । साधनं हि पूर्वावस्थासाध्यमेव वेत्यनादरे क्वापि साधने तस्य भद्रं न भविष्यतीत्यर्थः । यदा स्वाभाविकभजनज्ञानादीनां न पुरुषार्थपर्यवसायित्वं तदा दूरापास्तमन्यधर्माणामित्याह को वार्थ आप्तो भजतां स्वधर्मत इति । अभजतामसेवकानां केवलदेहाद्यध्यासेन प्रवृत्तानां लौकिकानां ब्राह्मणाद्यधिकारेण प्रवृत्तानां वैदिकानां च ये धर्मास्ते वस्तुतः सतां परधर्माः । ततश्चान्यधर्मैः को वार्थः प्राप्त इति स्वशब्देनोच्यते । अभजतां हि फलं ब्रह्मांडमध्यस्थानप्राप्तिः तद्गते ब्रह्मांडे गच्छति स्पर्द्धासूयादयश्च नियताः । 'विधर्मः परधर्मश्च आभास उपमा छलः । अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत्' । इति भगवद्विमुखानां धर्मः परधर्मत्वात् त्याज्य एव । अथ पतेदित्यत्रापि न साधनानुष्ठानेन कश्चित्पतति, स्थूणानिखननन्यायेन न केनापि विरोधः ॥ १७ ॥ ❀ ❀ किंच प्रमाणबलविचारेण साधनमुखत एतदुक्तं प्रमेयबलविचारेण फलमुखतोऽधुना निरूप्यते । 'तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।' पुरुषोत्तमः तदनु तस्यैव रूपांतरमक्षरं सर्वकार्यकर्तृ तस्यापि रूपांतरं सर्वाधिकारी कालः, कालस्यांशभूतौ कर्मस्वभावौ, पुनरक्षरस्य रूपांतरं यज्ञाः, पुनरक्षराद्रूपभेदे प्रकृतिपुरुषौ, ततस्तत्त्वानि ततो ब्रह्मांडं तत्र पुरुषांशा अस्मदादयः । तेषां प्रयत्नव्यतिरेकेणापि प्रलये पुरुषतामध्ये कालाधीनाः केवलं बुद्बुदवत् नानाभावं प्राप्नुवंति। तत्र विचारयतु देवानां प्रियः किं फलमिति ? तस्मात् अक्षरपर्यंतमनित्यत्वेन तुच्छत्वात् कालेनापि सिद्धेः न तदर्थं यत्नः कर्त्तव्यः। भगवद्भजनं तु न कालसाध्यम् । पुरुषोत्तमपर्यवसायित्वात् । न हि पुरुषोत्तमसेवा तदंतरंगैः क्रियमाणा बहिरधिकारिप्रेरिता भवति, कालगम्यत्वाभावात् सर्वत्र भगवन्मार्गे भगवत एव साधनत्वेन विधानाच्च । दृश्यते च लोके महाराजातंरंगसेवकानां नाधिकार्यधीनत्वम् । ननु देहेंद्रियाणां कालप्रवाहस्थानां परिग्रहात्कथं न कालाधीनत्वमिति-पुरुषोत्तमपरिग्रहादिति ब्रूमः । तस्मात् तस्यैव हेतोस्तदर्थमेव भगवत्परिग्रहार्थमेव कोविदो यतेत न मूर्खो दृष्टा यत्र कचित् । ननु कथमत्र विधिः ? अप्राप्तांशाभावात् लोकवेदयोरीश्वरभजनस्य सिद्धत्वात्तत्राह 'न लभ्यते यद्भ्रमतामुपर्यध' इति उपरिब्रह्मपर्यंतं स्थावरपर्यंतं भ्रमतां जीवानां तत्र शरीरेण तत्तच्छरीरधर्मेण वा यन्न लभ्यते तदर्थं यत्नः कर्त्तव्यः । तद् द्विविधं यत्नस्तु पूर्वोक्तचरणसेवा धर्मरूपा, सेवाया लोकवेदसिद्धत्वेऽपि न भक्तिसेवा तत्सिद्धा । यद्यपि ज्ञानार्थमपि प्रयत्न एतादृशो भवति, तथाप्यक्षरपर्यवसानात् न पुरुषोत्तमप्राप्तिः, अव्यक्तचेतसामिति वाक्यात् अव्यक्तस्वरूपाक्षयप्राप्तिरेव फलम् । नन्वदृष्टेन न कथं भक्तिसिद्धिः ? सर्वोत्पत्तिनिमित्तकारणत्वात् तत्रोच्यते-कालसाध्य एव कर्मस्वभावयोः प्रवृत्तिः नाकालसाध्ये । किंच अदृष्टं नाम पूर्वजन्मनि कृतकर्मणोवांतरव्यापाररूपधर्माधर्मलक्षणम् । तत् कस्य कर्मणः ? किं भगवत्प्रीतिहेतोरहेतोर्वा, आद्यस्तु नादृष्टं जनयति, दृष्टेनैव भगवत्प्रीतिजननात् फलविपर्ययस्त्वसंगतः । नापि प्रीतिहेतोः, अफलत्वेन तदर्थं न व्यापारजननं संभवति । किंच कर्मणां प्ररोहैकस्वभावत्वात् जन्मनो नांतिमत्वसाधकत्वम् । अंतिमे च जन्मनि भगवद्भक्तिः भगवत्प्रसादैकलभ्यत्वात् 'स एष साधो चरमो भवानामि'ति वाक्यात् । जातकेपि धर्मरूपसेवाया एव फलत्वेन शुभग्रहैर्ज्ञायमानत्वं तस्मादनन्यसिद्धत्वाद्भगवद्भक्तावेव यत्नः कर्तव्यः । न च लौकिकसुखदुःखाभावार्थे यतनीयं, कालेनैव तत्सिद्धेः, दुःखवत् । अतो देहप्राप्तावेव तद्भोगस्य सिद्धत्वात् स्वस्य पिष्टपेषणमित्याह तल्लभ्यत इति । अन्यतः पितृपुत्रभार्यादिभ्यः तेषामपि प्रेरकः कालः, स च कालकृतिसाध्यो न भवति, न च देशः स्वतंत्रतया साधनं तस्यापि कालाधीनत्वात् । तुल्यत्वेपि नियतसहभावात् तदाह-सर्वत्रेति प्रतीकाराकरणार्थमाह गभीररंहसेति । तस्माद्भजनार्थं प्रयत्नः कर्तव्यः ॥ १८ ॥ ❀ ❀ तत्र तर्कमाह न जनो जात्विति । ननु वैकुंठगतानामपि जयविजयादीनां पुनरागमनश्रवणात् नैकांततो भक्तिः फलसाधनं भगवतोप्यवतरणात् तत्संगेनावतारसंभवाच्च पराधीनत्वेनापराधसंभवाच्च तस्माद्भक्तिरपि नोत्कृष्टफलेति । तत्राह-न वै जनो जात्विति । अंगीकृत्यापि परिहारः । वस्तुतस्तु जयविजययोः धर्ममार्गानुसारेण कृत्रिमवैकुंठप्राप्तिः, अत एव तत्रैव वर्णनायां 'ये निमित्तनिमित्तेन धर्मेणाराधयन् हरिम् । वैकुंठः कल्पितो येने'ति च भगवता सह त्वागमनं परमानंदत्वात्फलमेव साधारणानामपि भागवतानां भगवत्सेवकसेवकानां दूषणमंगीकृत्यापि परिहार उच्यते, यथा भरतादिः यतो मुकुंदसेवी सर्वेभ्यो मोक्षदातुः सेवकः, अन्यवत् यथा सत्यवादी ब्राह्मणः तत्र हेतुः स्मरन्निति वाक्शरीरभक्त्यभावेपि कामुकस्य कामिनीस्मरणमिव परमानंदरूपचरणालिंगनं पूर्वजन्मनि जातमधुना स्मरन् यतो रसग्रहः रसेन ग्रहणं यस्य स तथोक्तः भगवत्कृपाभावेपि मार्गस्यैव बलिष्ठता तदाह यत इति ॥ १९ ॥ ❀ ❀ एवं सोपपत्तिकं भगवन्मार्गस्योत्कृष्टत्वं प्रतिपाद्य भगवतो दुर्लभत्वे तच्चरित्रस्य भूयस्त्वकथनं चानुपपन्नमिति को वा भगवानित्याकांक्षापूरणाय 'आचार्यवान् पुरुषो वेदे'ति च शास्त्रार्थस्वाय च भगवंतं निरूपयति इदं हि विश्वमिति । भगवत्स्वरूपं च निरूपणीयं तद्द्वयं भेदेन निरूपणीयं तथा सति चरित्रस्यानात्मत्वेन न तद्भावनायां संसारः स्यात् । अतो द्वयमभेदेन निरूपयति-इदं हि विश्वं भगवान् विश्वमनूद्य भगवत्त्वं विधीयते, तथा सति सर्वत्र भगवद्दृष्टिश्चेत् कृतार्थो भवतीति कार्यं भगवत्त्वेन निरूपितं 'सर्वं खल्विदं ब्रह्म तज्जलानि'ति श्रुतिर्हिशब्देन सूचिता । उत्तममध्यमाधमाधिकारभेदेन त्रिधात्र निरूपणं कर्तव्यं, तत्रोत्तमे निरूपितं, मध्यमे त्वेवम्-इदं विश्वं भगवानिव न तु भगवान् तेनात्र सम्माननादिकं कर्तव्यं, नासक्तिरिति । निकृष्टे तु इदं विश्वं भगवानितरः

अस्मादन्यः, अतः प्रपंचदर्शी बहिर्मुखो भ्रष्टो भवतीति । एवं सर्वत्र प्रकारत्रयेण निरूपणीयम् । नन्वेकस्य जगतः कथं त्रिरूपत्वं तत्राह यतो जगत्स्थाननिरोधसंभवा इति । तत्र जगतः स्थितिर्भगवत्येवेति भगवानेव जगतीति स्वाधारत्वाद्भगवतः भगवानेव जगत् । मध्यमे तु भगवतः सकाशाज्जगदुद्भवः, तेन कार्यकारणयोस्तादात्म्यात् कार्यात्मना भेदः कारणात्मनाऽभेद इति भेदसहिष्णुरभेदस्तादात्म्यमिति वचनात् जगत् भगवानिवेति । मूढे तु भगवतः प्रलयकर्तृत्वान्नाशप्रतियोगि जगत् भगवांश्च सदातन इतीतरः, किंच पूर्वं भगवच्चरित्रं निरूपितम् । इदं हि विश्वं भगवानिवेतर इति, इदानीं भगवंतं निरूपयति यतो जगत्स्थाननिरोधसंभवा इति, जन्माद्यस्य यत इति लक्षणं निरूपितं भवति । एवमर्थभेदमधिकारिभेदं च संक्षेपतो निरूप्य गुप्तस्यास्य विवरणं न कर्तव्यमित्याह तद्धि स्वयं वेद भवानिति तत् पूर्वोक्तं स्वयमेव भवान् वेद, न गुर्वपेक्षा अजगत्स्वयं भवानित्यर्थः । अत एव भवान् वेद तर्हि ब्रह्मण-उपदेशो निष्फल इत्यत आह, तथापि वै प्रादेशमात्रमिति तथापि ब्रह्मत्वेपि प्रमाणबलात् वै निश्चयेन गुरूपदेशः अपेक्ष्यते । तत्र लौकिकपरिमाणे यथा प्रादेश-प्रदर्शिते तद्द्विगुणादिरूपं हस्तादिकं जानाति तथा जगत्कर्तृत्वे ज्ञाते सर्वेश्वरत्वादयः ज्ञाता भवंति । अथवा प्रकर्षेण आदेशः तन्मात्रं गूढतया शास्त्रार्थनिरूपणं भवदर्थे प्रकर्षेण दर्शितं, अनेन गूढमेव स्पष्टमिव प्रदर्शनीयमित्युपदेशः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

विचक्षण इत्यत्र । इत्याहेति–इति शङ्कायां तृतीयस्य प्रयोजनमाहेत्यर्थः । निवृत्तिमार्ग इति निष्कामं कर्म कार्यमिति मार्गे । ब्रह्मसुखं चेति । ज्ञानमार्ग इत्यर्थः । निवृत्तिमार्ग इत्यनेनैव विधान्तरस्यापि सङ्ग्रहान्न तस्य पृथगुक्तिः । प्रयत्न इति । कर्तव्य इति शेषः । अस्त्विति । 'न निर्विण्णो नातिसक्त' इति पृथगुक्तित्वादस्त्वित्यर्थः । निवृत्तितः सुखमित्यस्यार्थः । 'सर्वेहोपरतिरुनुः सुख'-मिति । 'सुखमित्यात्मनो रूपं सर्वेहोपरतिस्तनु'रिति सप्तमस्कन्धे वाक्यात् सर्वेहोपरतिस्तनुः स्थापिका यस्येत्यर्थः । निवृत्तित इति सार्वविभक्तकस्तसिः प्रथमार्थे । तथा च सर्वेहोपरतिर्निष्क्रियत्वं तनुराकारो यस्य तादृशं सुखमित्यर्थः । वाक्यसिद्धत्वादेवंशब्द उक्तः । तावतापीति । तादृशसुखज्ञानेपीत्यर्थः । विभोरिति । विष्णुः प्रभुः स्वतन्त्रः, तथा च ज्ञातेपि सुखे तददित्सायां तत्प्राप्त्यभावान्न कार्यसिद्धिरित्यर्थः । उत्तरार्धं व्याचक्षते अनात्मन इत्यादि । पूर्वेणेति । पूर्वार्धे उक्तेन सुखपदेन । अध्याहारदोषाभावाय योजना-न्तरमाहुः अथवेत्यादि । अनात्मनो गुणैः प्रवर्तमानस्य निवृत्तितस्तत्सञ्ज्ञाभावेनानन्तपारस्य विभोः सुखं वेदितुं को विचक्षणोऽर्हतीति, न तु तेषामनात्मगुणानां तथा करणे समर्थः, ततस्तदर्थं भवान् दीप्तिमान् त्वं विभोश्चेष्टितं दर्शयेति योजना । अस्मिन् पक्षे दूरा-न्वयदोषात् पक्षान्तरमाहुः–यद्वेति । तथा चात्मनो निवृत्तिः सुखं पूर्वोक्तो वेदितुं योग्यः, न त्वेतादृशः । ततो हेतोः प्रवर्तमान-स्यार्थे दर्शयेत्यर्थः । एवमपि तादर्थ्यस्य सम्बन्धत्वेन विवक्षायां षष्ठीति क्लेशात् पक्षान्तरमाहुः तत्सम्बन्धी वेति । विधिनिरूपित इति । एतेनास्मिन्नपि सिद्धान्ते धर्मत्वमिति प्रतिभाति ॥ १६ ॥ ❀ ❀ त्यक्त्वेत्यत्र । तथा सतीति । सर्वाधिकारवत्त्वेन जघन्यत्वे सति । जन्मान्तरेत्यादि । अस्मिन् वाक्ये भक्त्युद्धवस्योक्तरीत्या पापक्षये उक्तत्वात् लौकिकाधर्मिणोश्च पापक्षयाभावादर्थ-बलेन कर्मकर्तुरधिकारलाभ इति विरोधात्तथेत्यर्थः । एवं लब्धेप्यधिकारे तुल्यबल (श्र) वणाशक्तिरिति तत्परिहारायाहुः–यथे-त्यादि । अत्रापीति । विहितभक्तिमार्गेपि । नन्वेवं सत्यारम्भदशायामुच्छृङ्खलतेवापततीत्यत आहुः बाधकानामित्यादि । बाधकानि काम्यानि, चिरकालसाध्यानि तीर्थसत्रादीनि ज्ञेयानि । तथा चेति । 'तावत्कर्माणी'ति वाक्ये कर्मकरणस्योत्तरावधेरुक्तत्वात् तद्वि-चारेणेत्यर्थः । ननु दासत्वाद्युक्तिः श्रुतावंशत्वसमर्थनार्था, न तु सेवकत्वार्था, ब्रह्मसूत्रे तथा निर्णयादित्यत आहुः अंशत्वेपीत्यादि । एतदिति अंशत्वम् । अन्तरङ्गमिति भजनं सगुणोपासनारूपत्वाद्धर्मान्तरापेक्षयोत्कृष्टमित्यर्थः । भजनपक्ष इति दूषयन्ति जीवस्येत्यादि । सायुज्यसाधनत्वादिति । 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति' इत्यादि वाक्यैस्तथेत्यर्थः । पाताभावेप्यपकता तु वर्तत इति शङ्कां निराकुर्वन्ति अयमेवेति । भजनधर्म एव सायुज्यसाधनत्वरूपोर्थो वा । परमोपाधित्वादिति । परं सगुणं ब्रह्म मीयतेऽनेनेति परमस्तादृशोपाधित्वादित्यर्थः । स्वशब्देनेति । अभजतां ततः फलाभावं ज्ञापयितुं लौकिकवैदिकधर्मस्य स्वधर्मत्वं स्वशब्देनोच्यत इत्यर्थः । तत्साध्यस्यार्थस्यानर्थत्वं बोधयन्ति अभजतामित्यादिना । देहाद्यधिकारेण प्रोक्तस्यापि धर्मस्य प्रमाणसिद्धत्वात्तत्त्यागे दोषोपि सम्भाव्यते इत्याशङ्कायां तयोरधिकारिभेदेन दोषाभावायाहुः विधर्म इत्यादि । तथाचान्तर्मुखत्वेनाधिकारभेदात्तैस्त्याज्य एवेत्यर्थः । इदं सप्तमस्कन्धे नारदवाक्यम् । एतेषां स्वरूपमपि तत्रैवोक्तं 'धर्मबुद्ध्या विधर्मः स्यात् परधर्मोन्यचोदितः । उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः ॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात् पृथ'गिति । श्रीधरीये विवृतश्च । धर्मबुद्ध्या यस्मिन् क्रियमाणे स्वधर्मबाधः स विधर्मः । अन्यस्य चोदितोऽन्यस्य परधर्मः । उपमा उपधर्मः । शब्दभिच्छब्दभेदोन्यथा व्याख्यानम् । यथा 'दशावरान् भोजये'दित्यत्र दशभ्योऽवरानिति । शब्दभृदिति पाठे शब्दमात्रं बिभर्ति, यथा 'गां दद्या'दित्युक्तेर्मेरिष्यन्त्या गोदान-मिति । ननु भजने यदि पाताभावः, तदाशङ्कानुत्थानादनुवाद एव बाधित इति वैतण्डिकशङ्कायां तत्तात्पर्यमाहुः–अथेत्यादि । तथा चोक्तन्यायेन तत्कथनमिति न शङ्कालेश इत्यर्थः । सिद्धमाहुः तस्मादित्यादि । अधिकारभेदान्न केनापि प्रमाणेन विरोध इत्यर्थः ॥ १७ ॥ ❀ ❀ तस्यैवेति श्लोकमवतारयन्ति किञ्चेत्यादि । साधनमुखत इति साधनस्वरूपद्वारा । तत्रेति प्रमेय-बलविचारे । तत्र विचारयस्विति फेनबुद्बुदरूपत्वे विचारयतु अक्षरपर्यन्तमिति अक्षरप्राप्तिपर्यन्तम् अक्षरावधीति वा ।

विधिरिति । प्रयतेतेत्युक्तो यत्नविधिः । तद्धि वैधमिति । तथा च फलस्यापूर्वत्वेन तत्साधनत्वस्याप्राप्तत्वात्तत्साधनत्वं वैधमित्यर्थः । पूर्वग्रन्थानुरोधेन धात्वर्थं सङ्कोच्य वैधस्वरूपमाहुः यत्न इत्यादि । 'तं भजे'दित्यादिश्रुत्यनुवादत्वनिरासायाहुः धर्मेत्यादि । भक्तिसेवेति । भक्त्यर्थं सेवा निरुपधिप्रेम्णा सेवा वा । ननु भगवत्प्रीतिहेतुना कर्मणा भक्तिजनकादृष्टाङ्गीकारे किं बाधकमित्यत आहुः फलेत्यादि । अकामितस्याप्यदृष्टस्य जन्मान्तरे फलसमर्पणार्थमङ्गीकारः । प्रकृते तु भगवत्यर्पितं कर्म भगवत्प्रीतिहेतुः । 'तत्कुरुष्व मदर्पणम्' 'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः' 'एतान्यपि तु कर्माणी'त्यादिषु तादृशस्य भगवतोक्तत्वात्तथा कृतेन भगवानेव प्रीयते, आज्ञाकरणात्, सा च तेनाविर्भूता नित्या, न तु जन्या, भगवद्धर्मत्वात् । अत एव चानश्वरा । एवं सति जन्मान्तरे तथैव फलसिद्धावदृष्टोपगमोऽप्रामाणिकत्वाद्गौरवग्रासाच्च फलविपर्ययरूपोऽसङ्गत इत्यर्थः । अफलत्वेनेत्यादि । भक्तेस्तत्फलत्वाभावेन भक्त्यर्थमदृष्टजननं न सम्भवतीत्यर्थः । नान्तिमस्वसाधकमिति अदृष्टमिति शेषः । ननु भक्तेः कालाद्यजन्यत्वं चेत्स्यात्, तदा ज्योतिर्ग्रन्थे जातके देवपूजारतिर्वैकुण्ठादागतिः पुनर्वैकुण्ठगतिश्च शुभग्रहफलतया न ज्ञायेतेत्यत आहुः जातकेपीत्यादि । तस्मादिति कालादृष्टाजन्यत्वात् । उत्तरार्धं व्याचक्षते न चेत्यादि । ननु सुखार्थं पित्रादयोनुकूलयितव्या इति कथं भक्त्यर्थमेव यत्नः सिध्यतीत्यत आहुः । तेषामित्यादि । तथा च कालप्रातिकूल्ये क्रियाया न सिद्धिरित्यर्थः । तर्हि काल एवानुकूलयितव्य इति चेत्, तत्राहुः स चेत्यादि । ननु सुखार्थं देशापेक्षासत्त्वान्न केवलं कालेन सुखसिद्धिरिति तत्सम्पादनाय तु यतनीयमेवेति कथमेकान्ततो भजनयत्नसिद्धिरित्यत आहुः न चेत्यादि । तथा चाकालाननुकूल्ये तदर्थोपि यत्नो व्यर्थ इत्यर्थः । ननु कालोपि न स्वतन्त्रः, देशं विना फलानुत्पादकत्वादित्याशङ्कायामाहुः तुल्यत्वे इत्यादि । तथा चैवमपि कालापेक्षानपायाद्व्यर्थ एव यत्न इत्यर्थः । ननु मास्तु सुखार्थो यत्नः, दुःखभावाय तु प्रतिविधातव्यमित्यत आहुः प्रतीत्यादि ॥ १८ ॥ ❀ ❀ न वै इत्यत्र । तर्कमिति बाधकनिवर्तकं तर्कम् । तं व्याख्यातुं बाधकं विशदयन्ति नन्वित्यादि । पराधीनत्वेनेति कालाद्यधीनत्वेन अङ्गीकृत्यापीति । 'तुष्यतु दुर्जन'इति न्यायेनेत्यर्थः । ननु यद्येवं तर्हि तुष्यतु दुर्जनन्यायकस्यापि परिहारस्य किं प्रयोजनमत आहुः साधारणेत्यादि । यथा भरतादिरिति । साधारणभक्तः । स यथा जन्म प्राप्तवान्, तद्दृष्टान्तेन पातः शंक्येतेति तादृशस्थलेपि तदभावाय परिहार इत्यर्थः । सत्यवादी ब्राह्मण इति । उद्योगपर्वणि कौशिकः कश्चित्सत्यवादी चौरैः पृष्टः सार्थं कश्चिन्निलीनं तेभ्य आचख्यौ, ततस्ते सर्वे चौरैर्लुण्ठिता मारिताश्च, ततस्तेन सत्यवादेन स नरके पपातेति भगवतार्जुनं प्रत्युक्तम्, स यथा सत्येन तथाभूत्, एवं भगवत्सेवकोपि भगवदपराधाद्भगवता तथा भविष्यति, भरतवत् । तथा च यदि भक्तिरेकान्ततः फलसाधिका स्यात्, भरतो न पतेत्, यतो नैवमतो नैवमिति बाधकतर्कमङ्गीकृत्यापीत्यर्थो भवति । परिहारतर्कस्तु, मुकुन्दसेवी यदि संसृतिमाव्रजेत्, यदि तथा स्यात्, तदा संसृतिं विहातुं नेच्छेत्, इतरसेवकवत् । यतः संसृतिं विहातुमिच्छति, तस्मादितरवन्न संसृतिं व्रजति, यतस्तथा न व्रजति, ततो भक्तिरेकान्ततः फलसाधिकेति । इच्छामपीति मात्रादीच्छाम् ॥ १९ ॥ ❀ ❀ इदं हीत्यत्र । दुर्लभत्व इति । भ्रमतां कालादिभिरलभ्यत्वे । भूयस्त्वकथनं चेति । चोप्यर्थे । इति शास्त्रार्थत्वायेति । इति श्रुतेर्भगवतः शास्त्रार्थरूपत्वायेत्यर्थः । निरूपणीयमिति । सुलभत्वाय भूयस्त्वकथनोपपत्तये च निरूपणीयम् । कार्यमिति भगवत्समवेतं कार्यम् । उत्तम इति उत्तमाधिकारिविषये । प्रकारत्रयेण निरूपणीयमिति । निरूपणीयोऽर्थः प्रकारत्रयेण निरूप्यत इत्यर्थः । तर्हीति स्वस्य सर्वस्य च भगवत्त्वे ॥ २० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु यदि मूर्खो मदभिप्रायमज्ञात्वा काम्यकर्मनिवारणं न मन्यते तर्हि मा मन्यतां, मया तदर्थे किं कर्तव्यं ? विवेकी तु मदभिप्रायं ज्ञात्वा भगवद्भजनेन कृतार्थः स्यादित्याशङ्क्य विवेकी तु त्वत्प्रयत्नं विनापि कृतार्थस्तवावतारस्तु मूर्खोद्धारार्थ एवातस्त्वया तदर्थः प्रयत्नः कर्त्तव्य इत्याह—विचक्षण इति । विचक्षणो निपुणः आत्मानात्मपरमात्मतत्त्वज्ञस्तु स्वयमपि निवृत्तितः सर्वविरुद्धक्रियात्यागपूर्वकभगवद्भजनेनास्य विभोर्महतः परमेश्वरस्य सुखं परमानन्दात्मकं स्वरूपं वेदितुं साक्षात्कर्तुमर्हति । ततस्तस्मात् हे विभो मूर्खजनोद्धारे समर्थ ! गुणैः सत्त्वादिभिः प्रवर्त्तमानस्य स्वर्गनरकादौ गच्छतः सुखदुःखाद्यनुभवत उद्धारार्थं भवान् त्वं विभोर्भगवतश्चेष्टितं दर्शय वर्णयेत्यन्वयः । विभुत्वमेव स्पष्टयति—अनन्तेति, न अन्तः कालतः पारं च देशतो यस्य तस्येत्यर्थः । गुणैः प्रवर्त्तमानत्वे हेतुमाह—अनात्मन इति, विवेकबुद्धिहीनस्येत्यर्थः ॥ १६ ॥ ❀ ❀ एवं तावत्काम्यकर्मादेरनर्थहेतुत्वात् तं विहाय भगवल्लीलैव वर्णनीयेत्युक्तम्, इदानीं तु नित्यनैमित्तिकमपि भक्तिबाधकं स्वकर्म विहाय केवलं भगवद्भजनमेव उपदेष्टव्यमित्याशयेन तत्र विचारमाह—त्यक्त्वेति त्रयेण । ननु स्वधर्मत्यागेन भगवन्तं भजन् भक्तिपरिपाकेण यदि कृतार्थो भवेत्तदा तु न काचिच्चिन्ता, यदि पुनरपक्व एव म्रियेत ततो भ्रश्येद्वा तदा स्वधर्मत्यागनिमित्तोऽनर्थः स्यादेवेत्याशङ्क्याह—स्ववर्णाश्रमाचारेण प्राप्तं स्वधर्मं भजनबाधकत्वेन त्यक्त्वा हरेर्भक्तदुःखहरणशीलस्य चरणाम्बुजं भजन् सेवमानः अपक्वोऽथ भगवत्प्राप्तियोग्योऽपि यदि ततो भजनात् पतेत् रोगादिना मरणेन विषयान्तरासक्त्या वा विमुखः स्यात्तदापि 'तावत् कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा यावत्प्रीतिर्न जायते ॥' 'देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन्' इत्यादिशास्त्रानुसारेण भक्तिरसिकस्य तस्य कर्मानधिकारान्नानर्थशङ्कालेशः । यद्यनर्थो भवत्येवेति निर्बन्धस्तदा । वाशब्दः कटाक्षे । यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्य अभद्रमभूत्किं नाभूदेवेत्यर्थः । 'न हि कल्याणकृत् कश्चिद्दुर्गतिं तात

गच्छति । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः' इत्यादिशास्त्रेण गजेन्द्रप्रह्लादादीनां नीचयोनावपि भक्त्या कृतार्थत्वश्रवणेन च भक्तिवासनासद्भावनिश्चयादिति भावः । अभजद्भिस्तु केवलं स्वधर्मतः को वाऽर्थः आप्तः ? न कोऽपीत्यर्थः । अभजतामिति षष्ठी तु सम्बन्धमात्रविवक्षया ॥ १७ ॥ ❀ ❀ ननु स्वर्गादितत्तत्सुखमुद्दिश्यैव शास्त्रेण तत्तत्कर्मविधानात् कथं तस्य फलं नास्तीत्याशङ्क्याह-तस्येति । उपरि ब्रह्मलोकपर्यन्तं अधः स्थावरपर्यन्तं च भ्रमद्भिर्जीवैर्यन्न लभ्यते कोविदः स्वार्थे निपुणो विवेकी चेत्तर्हि तस्य भगवदनुभवेन परमानन्दस्यैव हेतोस्तल्लाभार्थमेव प्रयतेत प्रयत्नं कुर्यात्, न स्वर्गादिविषयानुभवजनितसुखार्थम् । कुतः ? यतस्तद्विषयसुखं त्वन्यतः प्राचीनकर्मत एव सर्वत्र पश्वादियोनावपि कालेनैव लभ्यते । तत्र दृष्टान्तमाह—दुःखवदिति, दुःखं यथा प्रयत्नं विनाऽपि प्रारब्धकर्मणैव कालेन सहकारिणा कर्मपाकनिमित्तेन सर्वत्र लभ्यते तथेत्यर्थः । तदुक्तमन्यत्रापि—'अप्रार्थितानि दुःखानि यथैवायान्ति देहिनाम् । सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते' इति । तर्हि कुतो न लोको ज्ञायते इदं सुखादिकं कालेन प्राप्यते इति यदि जानीयात्तदा दुःखप्रतीकारं चिन्तयेत् सुखस्यापि निश्चितत्वात्तदर्थं यत्नं च न कुर्यादित्याशङ्क्याह-गभीररंहसेति, अलक्षितवेगेनेत्यर्थः । तथा च कालकर्त्तव्यं न कोऽपि जानातीति भावः । न च स्वर्गादिसुखस्य पूर्वकर्मजन्यप्रारब्धाधीनत्वाङ्गीकारेऽपि कर्मणां सफलत्वमागतमेव । कथं तर्हि निष्फलत्वमिति शङ्कनीयम् 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यादिभगवदुक्तेः क्षयिष्णुत्वेन स्वर्गादिसुखस्य फलत्वानङ्गीकारात्तत्साधनानां कर्मणां निष्फलत्वमिति ध्येयम् ॥ १८ ॥ ❀ ❀ 'यत्र क्व वा भद्रमभूदमुष्य किं' इति काका सूचितमभिप्रायं सिंहावलोकनन्यायेन विवृणोति—न वा इति । त्वमपि भगवदवतारत्वेन ममाङ्गभूतोऽस्यतो रहस्यं शृण्विति सूचयन् सम्बोधयति-अङ्गेति । मुकुन्दसेवी जनो जातु कदाचिदपि संसृतिं नैव आव्रजेत्, यदि कथञ्चन महदपराधशापादिवशादाव्रजेत्तदापि अन्यवत् केवलकर्मनिष्ठवन्नाव्रजेत् । तेषामिव तत्र दुराचारं न कुर्यात् तथा दुःखं च नानुभवेत् । कुत एवमिति चेत् यतः पूर्वं कदाचिद्ध्यानादौ प्रादुर्भूतस्य मुकुन्दस्य मुक्तिदातुर्भगवतोऽङ्घ्र्योरुपगूहनमालिङ्गनं स्मरन् विहातुं तद्विस्मर्तुं पुनर्नेच्छेत् । तत्र हेतुमाह—रसग्रहो यत इति । यतः रसेन परमानन्दस्वरूपेण ग्रहो ग्रहणं यस्य सः । तथा च निरन्तरभगवच्चरणारविन्दस्मरणस्यान्यवद्दुराचारो दुःखानुभवश्च न सम्भवति । मनसोऽन्यत्र लग्नत्वेन तत्रावकाशाभावादिति भावः । तथा चोक्तं भगवताऽपि 'तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन' इति ॥ १९ ॥ ❀ ❀ तदेवं भगवल्लीलां प्राधान्येन वर्णयेत्युक्तं तत्र को भगवान् काश्च तस्य लीला इत्यपेक्षायामाह-इदमिति । तत्रोत्तमाधिकारिणं प्रति इदं दृश्यमानं विश्वं भगवदुपादानकत्वाद्भगवानित्यन्वयः । मध्यमाधिकारिणं प्रति इदं विश्वं भगवानिव भगवद्रूपेणोपासनीयं न पृथक्त्वेनेत्यर्थः । हीनाधिकारिणं प्रति तु इदं दृश्यमानं विश्वं भगवांस्त्वितरः अस्माद्भिन्न इत्यन्वयः । एवमधिकारभेदेन भगवत्स्वरूपं निरूप्य तस्य लीलां दर्शयति-यत इति । यतो भगवतो हेतोर्जगतः स्थितिः पालनं भवति निरोधः संहारो भवति सम्भव उत्पत्तिश्च भवति । हिशब्देनात्र "सर्वं खल्विदं ब्रह्म, यतो वा इमानि भूतानि जायन्ते" इत्यादिप्रमाणं सूचितम् । तत्पूर्वोक्तं हि सर्वं यद्यपि भवान् स्वयमेव वेद जानाति तथापि "आचार्यवान् पुरुषो वेद" इत्यादिशास्त्रमर्यादासम्पादनाय मया प्रादेशमात्रमेकदेशमात्रं भवतः प्रदर्शितम् । अत्र जगज्जन्मादिहेतुत्वकथनेनैव भगवतो जगदुपादानत्वजगन्निमित्तत्वसर्वज्ञत्वसर्वशक्तिमत्त्वसर्वान्तर्यामित्वसर्वोपास्यत्वादयो गुणा अर्थादेव फलिता ज्ञेयाः ॥ २० ॥

हिन्दी अनुवाद

भगवान् अनन्त हैं । कोई विचारवान् ज्ञानी पुरुष ही संसारकी ओरसे निवृत्त होकर उनके स्वरूपभूत परमानन्दका अनुभव कर सकता है । अतः जो लोग पारमार्थिक बुद्धिसे रहित हैं और गुणोंके द्वारा नचाये जा रहे हैं, उनके कल्याणके लिये ही आप भगवान्की लीलाओंका सर्वसाधारणके हितकी दृष्टिसे वर्णन कीजिये ॥ १६ ॥ ❀ ❀ जो मनुष्य अपने धर्मका परित्याग करके भगवान्के चरणकमलोंका भजन-सेवन करता है-भजन परिपक्व हो जानेपर तो बात ही क्या है-यदि इससे पूर्व ही उसका भजन छूट जाय तो क्या कहीं भी उसका कोई अमङ्गल हो सकता है ? परंतु जो भगवान्का भजन नहीं करते और केवल स्वधर्मका पालन करते हैं, उन्हें कौन-सा लाभ मिलता है ? ॥ १७ ॥ ❀ ❀ बुद्धिमान् मनुष्यको चाहिये कि वह उसी वस्तुकी प्राप्तिके लिये प्रयत्न करे, जो तिनकेसे लेकर ब्रह्मापर्यन्त समस्त ऊँची-नीची योनियोंमें कर्मोंके फलस्वरूप आने-जानेपर भी स्वयं प्राप्त नहीं होती । संसारके विषय-सुख तो जैसे विना चेष्टाके दुःख मिलते हैं वैसे ही, कर्मके फलरूपमें अचिन्त्यगति समयके फेरसे सबको सर्वत्र स्वभावसे ही मिल जाते हैं ॥ १८ ॥ ❀ ❀ व्यासजी ! जो भगवान् श्रीकृष्णके चरणारविन्दका सेवक है, वह भजन न करनेवाले कर्मी मनुष्योंके समान दैवात् कभी बुरा भाव हो जानेपर भी जन्म-मृत्युमय संसारमें नहीं आता । वह भगवान्के चरणकमलोंके आलिङ्गनका स्मरण करके फिर उसे छोड़ना नहीं चाहता; उसे रसका चसका जो लग चुका है ॥ १९ ॥ ❀ ❀ जिनसे जगत्की उत्पत्ति, स्थिति और प्रलय होते हैं, वे भगवान् ही इस विश्वके रूपमें भी हैं । ऐसा होनेपर भी वे इससे विलक्षण हैं । इस बातको आप स्वयं जानते हैं, तथापि मैंने आपको संकेतमात्र कर दिया है ॥ २० ॥

त्वमात्मनाऽऽत्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगण्यताम् ॥ २१ ॥
इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।
अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ २२ ॥
अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ।
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥
ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ।
चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

न च तवाचार्यापेक्षा ईश्वरावतारत्वादित्याह त्वमिति । हे अमोघदृक् त्वमात्मना स्वयमात्मानमजमेव संतं जगतः शिवाय प्रजातमवेहि ? कुतः । परस्य पुंसः कलामंशभूतम् । तत्तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमः अधि अधिकं गण्यतां निरूप्यताम् ॥ २१ ॥ ❀ ❀ अनेनैव तपआदि सर्वं तव सफलं स्यादित्याह । इदं हीति । श्रुतादयो भावे निष्ठा । इदमेव हि तपःश्रवणादेरविच्युतो नित्योऽर्थः फलम् । किं तत् ? उत्तमश्लोकस्य गुणानुवर्णनमिति यत् ॥ २२ ॥ ❀ ❀ सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति । अहमिति । अहं पुरा पूर्वकल्पेऽतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादभवं जातोऽस्मि । निरूपितो नियुक्तः । क्व ? योगिनां शुश्रूषणे । प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां निर्वेशमेकत्र वासं कर्तुमिच्छताम् ॥ २३ ॥ ❀ ❀ अपेतानि गतान्यखिलानि चापलानि यस्मात्तस्मिन् । दांते नियतेंद्रिये । अधृतक्रीडनके त्यक्तक्रीडासाधने । अनुवर्तिन्यनुकूले ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वयं वेदेति यदुक्तं तदुपपादयति त्वमिति । अमोघा लोककल्याणकरा दृग्दृष्टिर्ज्ञानमिति यावत् । यस्य हि एतादृक् "सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक्" इत्युक्तेः । अत्र विश्वनाथः–तदेवं धर्मान्परित्यज्य भक्त्यैव कृतार्थीभवतीत्युक्तम् ॥ २१ ॥ ❀ ❀ इदानीं कस्यचिद्भक्तस्य केषुचित्कर्मसु यदि स्पृहा स्यात्तदा ते धर्मा अपि भक्त्यैव भवन्तीत्याह-अविच्युतोऽव्यभिचारी अर्थो हेतुः । "अर्थो विषयानर्थयोर्धनकारणवस्तुनि । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने" इति मेदिनी । "यत्कर्मभिर्यत्तपसा" इत्यादिभगवदुक्तेस्तपआदिफलानामपि सिद्धिर्भवेत्किं पुनस्तेषाम् । "स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः" इत्यादिवाक्यतः सर्वेषामपि धर्माणां किं पुनस्तपआदिमात्राणामिति । यद्वा तपस इति तपःश्रुतादिविधायकश्रुतिवाक्यानां भगवद्भक्तिविधान एव तात्पर्याद्धरिकीर्त्तनमेवाविच्युतोऽर्थोऽभिधेयः "धर्मो यस्यां मदात्मकः" इति भगवदुक्तेः । सर्वशास्त्रवाक्यानां श्रीभगवत्येव तात्पर्यमिति मधुसूदनसरस्वतीव्याख्यानाच्च । तपः कायक्लेशलक्षणं व्रतादि श्रुतं शास्त्रश्रवणं स्विष्टमुत्तमकल्पतया यजनं सूक्तमध्ययनं बुद्धिर्ज्ञानं दत्तं दानम् । बुद्धमिति पाठः प्रशस्तः । निष्ठेति क्तप्रत्ययसंज्ञा पाणिनीयनये ॥ २२ ॥ ❀ ❀ यादृच्छिकी भगवद्भक्तकृपैव शुद्धाया उक्तलक्षणाया भक्तेर्हेतुर्नान्यत्तपआदिकमिति वक्तुं स्वपूर्ववृत्तांतमाह-अहमिति । योगिनां "तत्रान्वहं कृष्णकथाः प्रगायताम्" इत्यग्रे वक्ष्यमाणत्वाद्भक्तियोगवतां निरूपितो नियुक्तोऽस्मि ॥ २३ ॥ ❀ ❀ त्यक्तक्रीडासाधने बाल्योचितं क्रीडनमप्यकुर्वति यद्यपि ते तुल्यदर्शनाः सुशीलेषु दुःशीलेषु च सत्कुर्वत्सु तिरस्कुर्वत्सु च सदाचारेषु दुराचारेषु च जगज्जनेषु यद्यपि समदृष्टयः को वा तेषामनुग्राह्यः को वा निग्राह्यस्तदपि मयि कृपां चक्रुः । सर्वत्र साम्येपि महत्सु भरतप्रह्लादादिषु कृपाया वैषम्यदर्शनादिति भावः । अत्र मत्सौशील्यानुवृत्त्यादिकमनपेक्ष्यैव प्रथमं कृपां चक्रुः । ततश्च तत्कृपाजन्यसौशील्यानुवृत्त्यादिकं पुनरपि तेषां कृपातिशयस्यैव कारणमभूदिति तेषां निरुपाधिककरुणत्वमप्यवश्यमेव व्याख्येयम् । ते यद्यपि तुल्यदर्शनास्तदपि अचापल्यादिगुणविशिष्टे मयि कृपां चक्रुरिति व्याख्याने गुणदोषदर्शनप्रसक्त्या तेषां तुल्यदर्शनत्वं व्याहन्येत । प्रथमकृपायाश्च निरुपाधित्वं न स्यादिति न तथा व्याख्येयम् । कृपा हि द्विविधा गुणमयी निर्गुणा च । तत्राद्या सर्वेषां सांसारिकाणामपि सर्वत्र गुणोपाधिका यथासंभवं भवेत् । गुणापाये तदपायश्च दोषे द्वेषादयश्च । द्वितीया तु निस्तीर्णसंसाराणां तादृशानां परमभक्तिमतां निरुपाधिकैव सर्वत्र साम्येन मायिकं कमपि गुणमनपेक्ष्य "गिरयो मुमुचुस्तोयं कचिन्न मुमुचुः शिवम् । यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा" इति शुकोक्तन्यायेन कदाचित्कमपि जनं विषयीकरोति । सा ह्यन्तःकरणस्य गुणकृतायाः कठोरताया भगवद्भक्त्यैव ध्वंसे सति तयैव द्रवीभावमापादिते तत्रैवान्तःकरणे आविर्भवेत् । तदुक्तं

१. प्रा० पा०—बुद्ध० २. प्रा० पा०—गुणानुकीर्तनम् । ३. प्रा० पा०—सुतो

"रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते" इति। एवं "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः" इति भूमिकाचतुष्टयं सूचितम् ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

स्विष्टस्य शोभनयज्ञस्येत्यर्थः। सूक्तस्य सामान्यतः शोभनोक्तेर्वेदाङ्गात्मकविशेषोक्तेर्व्वेति। बुद्धदत्तयोः ज्ञानदानयोरित्यर्थः ॥ २२-२४ ॥

श्रीमद्वीरराघवव्याख्या

नाहं जानामीति मा वोच इति वक्तुं त्वमात्मानं भगवदंशसंजातं जानीहीत्याह त्वमिति। अमोघदृक् अमोघं सत्यं सर्वं यथावत्पश्यतीत्यमोघदृक्त्वं परस्य पुंसः परमपुरुषस्य कलामंशमजं कर्माधीनोत्पत्तिरहितमथापि जगतः शिवाय हिताय स्वेच्छया जातमात्मानमात्मना स्वयमेवावेहि कलाशब्दस्य नित्यस्त्रीत्वात्स्त्रीपुंसयोरपि विशेषणविशेष्यभाव उपपत्तेः। यतोऽमोघदृग्भगवदंशसंभूतः तस्मादेवंभूतेन त्वया महानुभावस्य भगवतोभ्युदयः जन्मकर्मगुणादीनामप्युपलक्षणमिदं जन्मकर्मगुणादिरधिगण्यतां कथ्यतां प्रबध्यतामिति यावत्। एवं चेत्कृतकृत्यस्य तवात्मन्यसंतोषो निःशेषं निवर्त्तत इति भावः ॥ २१ ॥ ❀ ❀ ननु महानुभावाभ्युदयाधिगणनमात्रेण कथं कृतकृत्यत्वं कथंतरामसंतोषनिवृत्तिश्चेत्यत आह इदमिति। उत्तमश्लोकस्य गुणानामनुवर्णनमिति यत्तदिदमेव कृतार्थीभवितुमिच्छतः पुंसः संबंधिनां तपआदीनामविच्युतश्च्यवनरहितः प्रतिहतिरहितोर्थः प्रयोजनं विभिर्निरतिशयप्रयोजनयाथात्म्यविद्भिर्निरूपितः। अत्र तपोऽनशनादिर्मंत्रजपो वा श्रुतमध्ययनं स्विष्टं यागादिपूर्तं वापीकूपतडागखननादिबुद्धिः ज्ञानं दत्तं दानं भारतादेरतिविस्तृतत्वात्तत्र सारग्रहणं जलधिमथनात्सुधाकल्पमविचक्षणैर्दुष्करं तस्मात् मुमुक्षूणामतीव सेव्यं सारमर्थजातं संकल्प्य दर्शय एतावत् कर्तव्यमित्युक्तं भवति। उत्तमश्लोकगुणानुवर्णनश्रवणस्याप्युपलक्षणं, तपआदीननुतिष्ठतः पुंसो यद्युत्तमश्लोकगुणानुवर्णनश्रवणयो रुचिर्जायते तदैव तेषां साफल्यमन्यथा तु तपआदीनां वैयर्थ्यमेवेत्युक्तम् ॥ २२ ॥ ❀ ❀ ननु भगवद्गुणवर्णनादेरपि तपआदितत्तत्क्रियारूपत्वं न स्वतः पुरुषाराधनत्वादविच्युतार्थत्वमस्येति चेत्तत्प्रतिवक्तुं तत्र दृष्टांततया स्वस्य पौर्वदैहिकं वृत्तांतमाह अहमित्यादिना यावत्समाप्ति। हे मुने पुरा पूर्वस्मिन् कल्पेऽतीतभवे जन्मन्यहं कस्याश्चिद्वेदवादिनां दास्या अभवं पुत्र आसमित्यर्थः। वेदवादिनां गृहेषु प्रावृषि वर्षतौ निर्विविक्षतां नितरां वेष्टुं प्रवेष्टुमिच्छतां चातुर्मास्यदीक्षां प्रवेष्टुमिच्छतां योगिनां संन्यासिनां शुश्रूषणे निमित्ते शुश्रूषणार्थं बालक एव सन्नहं वेदवादिभिर्निरूपितः नियोजितोस्मीत्यर्थः ॥ २३ ॥ ❀ ❀ ततः किमत आह ते मयीति। यद्यपि ते योगिनस्तुल्यदर्शनाः समदर्शिनस्तथापि मयि कृपां चक्रुः। कृपाकरणे हेतुं वदन्नात्मानं विशिनष्टि–अर्भके बालेऽथाप्यपेतं त्यक्तमखिलं चापलं जैह्व्यादिकं येन अधृतक्रीडनके इति च्छेदः-अधृतान्यपरिगृहीतानि क्रीडनकानि बालक्रीडासाधनानि भावे वा ल्युट् क्रीडा वा येन अनुवर्तिनि अनुकूले शुश्रूषमाणे तदनुशासनशुश्रूषापूर्वकसेवां कुर्वत्यल्पभाषिणि मितभाषिणि ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

तद्धि स्वयं वेदेत्युक्तं विविच्य विज्ञापयति त्वमिति। हे अमोघदृक् त्वमजमात्मानं परमात्मनः परस्य पुंसः कलां जगतः शिवाय प्रजातमात्मनाऽवेहीत्यन्वयः। आदानादिकर्तुः परमपुरुषस्यांशमवतीर्णं स्वत एव परोपदेशमंतरेण जानासि। अत्र लोट् लडर्थे, अन्यथाऽमोघदृक्त्वमेवानुपपन्नं स्यात् तद्धि स्वयं वेदेति च विरुद्धं स्यात्तन्महानुभावाभ्युदयः तस्य तव महासामर्थ्यलक्षणचरितोदयस्त्रिलोकहिताय गण्यतां प्राधान्येन संख्याय कथ्यताम्। तेन जगतः शिवं भवतीत्यभिप्रायः ॥ २१ ॥ ❀ ❀ भगवन्महिमाभ्युदयवर्णनात्कथं जगतः शिवं स्यादिति तत्राह इदमिति। यदुत्तमश्लोकस्य हरेर्गुणानुवर्णनं इदं हि पुंसस्तपआदेरपरोक्षज्ञानद्वारा मोक्षसाधनत्वात्कविभिरविनष्टफलात्मकोर्थो निरूपितः। हिशब्दोवधारणे हेतौ वा। तपः कायक्लेशलक्षणं श्रुतं शास्त्रश्रवणं स्विष्टं उत्तमकल्पतया यजनं सूक्तमध्ययनं बुद्धं ज्ञातं दत्तं दानं एवं हरिमहिमानुवर्णनेन सर्वस्य शिवसंभवात्तदेव त्वया कर्तव्यमिति भावः ॥ २२ ॥ ❀ ❀ इदानीं हरिकथाश्रवणादि शिवकरमिति वक्तुं स्वातीतजन्मकथनपूर्वकं स्वस्य भागवतसंगतिप्रकारमाह अहमिति। पुराशब्दस्यातीतकालसामान्यवाचित्वेन निश्चयानुदयात्तदर्थमतीतेत्युक्तं अनंतरातीतजन्मनीत्यर्थः। तुशब्द इतरदासीजातिवैशिष्ट्यद्योतनार्थः, योगिनां संन्यासिनां कप्रत्ययः प्रशंसायां, लौल्यादिदोषरहितो बालः प्रावृषि वर्षाकाले निर्विविक्षतां एकत्र स्थितिमिच्छताम् ॥ २३ ॥ ❀ ❀ शिष्यगुणेन तेषां प्रवृत्तिमाह त इति। निरस्तसमस्तचंचलस्वभावे जिह्वादीन्द्रियनिग्रहवति अत एव निरस्तबालक्रीडासाधने अनुकूलवर्तिनि परिचरति अत्यल्पबालविग्रहधारिणि मयि ते योगिनोऽनुग्रहलक्षणां कृपां चक्रुरित्यन्वयः। किंविशिष्टास्तुल्यदर्शनाः यद्यपि तुल्यं गुणक्रियारूपैः समं ब्रह्म पश्यंतः यथास्थितवस्तुदर्शिनो वा तथापीति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेव विशिष्याह त्वमिति। हे अमोघदृक् त्वमात्मना स्वयमात्मानं स्वं परस्य पुंसः कलामंशभूतमवेहि अनुसंधेहि। पुनश्च जगतः शिवायाधुनैव श्रीकृष्णरूपेण यश्चाजोऽपि प्रजातस्तमवेहि। तदेतद्द्वयं ज्ञात्वा महानुभावस्य सर्वावतारावतारिवृन्देभ्योऽपि दर्शितप्रभावस्य तस्य श्रीकृष्णस्यैव अभ्युदयो लीला अधि अधिकं गण्यतां निरूप्यताम्। स्वमीश्वरोऽपि भवान् निजाज्ञानरूपां मायां न प्रकटयत्विति भावः॥ २१-२५॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

स्वयं वेदेति यदुक्तं तदुपपादयति त्वमिति। हे अमोघज्ञान! तत् तस्मात् महानुभावस्य हरेरभ्युदयः परममंगलं यशः अधि अधिकं गण्यतां निरूप्यताम्॥ २१॥ ❀ ❀ तदेवं धर्मान् परित्यज्य भक्त्यैव कृतार्थीभवतीत्युक्तम्। इदानीं कस्यचित् भक्तस्य केषुचिद्धर्मेषु यदि स्पृहा स्यात् तदा ते धर्मा अपि भक्त्यैव भवन्तीत्याह इदं हीति। पुंसस्तपआदीनाम् अविच्युतोऽव्यभिचारी अर्थो हेतुः इदं उत्तमश्लोकगुणानुवर्णनमेव निरूपितः। 'अर्थो विषयार्थनयोर्धनकारणवस्तुषु। अभिधेये च प्रयोजने' इति मेदिनी। यत् कर्मभिर्यत् तपसा इत्यादिभगवद्वाक्याद्भक्त्या तपःआदिफलानामपि सिद्धिर्भवेत् किं पुनस्तेषाम्। 'स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः॥' इत्यादिवाक्यतः सर्वेषामपि धर्माणां किं पुनस्तपआदिमात्राणामिति। यद्वा तपस इति। तपश्श्रुतादिविधायकश्रुतिवाक्यानां भगवद्भक्तिविधान एव तात्पर्यात् हरिकीर्तनमेवाविच्युतोऽभिप्रेयः। 'धर्मो यस्यां मदात्मक' इति भगवदुक्तेः सर्वशास्त्रवाक्यानां श्रीभगवत्येव तात्पर्य्यमिति श्रीमधुसूदनसरस्वतीव्याख्यानाच्च॥ २२॥ ❀ ❀ यादृच्छिकी भगवद्भक्तकृपैव शुद्धाया उक्तलक्षणाया भक्तेर्हेतुर्नान्यत्तपआदिकमिति वक्तुं स्वपूर्ववृत्तान्तमाह अहमिति। पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि वेदवादिनां कस्याश्चन दास्याः सकाशादभवं जातोऽस्मि। प्रावृषि वर्षाकाले निर्विविक्षतां निर्व्वेशं एकत्र वासं कर्त्तुमिच्छतां योगिनां तत्रान्वहं कृष्णकथाः प्रगायतामित्यग्रे वक्ष्यमाणत्वाद्भक्तियोगवतां शुश्रूषणे निरूपितः नियुक्तोऽस्मि॥ २३॥ ❀ ❀ दान्ते नियतेन्द्रिये। अधृतक्रीडनके बाल्योचितक्रीडनमप्यकुर्वति। यद्यपि ते तुल्यदर्शनाः सुशीलेषु दुःशीलेषु च सत्कुर्वत्सु तिरस्कुर्वत्सु च सदाचारेषु असदाचारेषु च जगज्जनेषु यद्यपि समदृष्टयः। को वा तेषामनुग्राह्यः को वा निग्राह्यस्तदपि मयि कृपां चक्रुः। सर्वत्र साम्येऽपि महत्सु भरतप्रह्लादादिषु कृपाया वैषम्यदर्शनादिति भावः। अत्र मत्सौशील्यानुवृत्त्यादिकमनपेक्ष्यैव प्रथमं कृपां चक्रुः ततश्च तत् कृपाजन्यसौशील्यानुवृत्त्यादिकं पुनरपि तेषां कृपातिशयस्यैव कारणमभूदिति तेषां निरुपाधिकरुणत्वमवश्यमेव व्याख्येयम्। ते यद्यपि तुल्यदर्शनास्तदपि अचापल्यादिगुणविशिष्टे मयि कृपां चक्रुरिति व्याख्याने गुणदोषदर्शनप्रसक्त्या तेषां तुल्यदर्शनत्वं व्याहन्येत, प्रथमकृपायाश्च निरुपाधित्वं न स्यादिति तथा व्याख्यायेम्। कृपा हि द्विधा गुणमयी निर्गुणा च। तत्राद्या सर्वेषां सांसारिकाणामपि सर्वत्र गुणोपाधिका यथासंभवं भवेत्, गुणापाये तदपायश्च, दोषे द्वेषादयश्च। द्वितीया तु निस्तीर्णसंसाराणां तादृशानां परमभक्तिमतां निरुपाधिकैव, सर्वत्र साम्येन मायिकं कमपि गुणमनपेक्ष्य। 'गिरयो मुमुचुस्तोयं कचिन्न मुमुचुः शिवम्। यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा॥' इति शुकोक्तन्यायेन कदाचित् कमपि जनं विषयीकरोति। सा ह्यन्तःकरणस्य गुणकृतायाः कठोरताया भगवद्भक्त्यैव ध्वंसे सति तयैव द्रवीभावमापादिते तत्रैवान्तःकरणे आविर्भवेत्। यदुक्तं 'रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते' इति। एवं 'सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः' इति भूमिकाचतुष्टयं सूचितम्॥ २४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

तद्धि स्वयं वेद भवानित्यत्र हेतुमाह त्वमिति। हे अमोघदृक् परमात्मनः कलामजमात्मानं जगतः शिवाय कल्याणाय प्रजातमवेहि। तत्तस्मै प्रयोजनाय जगतः कल्याणाय महानुभावाभ्युदयः परमात्मनः पराक्रमः अधिगण्यताम् अधिकं निरूप्यताम्॥ २१॥ ❀ ❀ हरिपराक्रमश्रवणेन जगतः कल्याणं भवतीति दर्शितं प्रत्युत तद्वर्णयितुरपि तपआदि सर्वं सफलं स्यादित्याह इदमिति। अविच्युतः अस्खलितः अर्थः फलम्॥ २२॥ ❀ ❀ तत्संगलब्धेन हरिकथाश्रवणादिनैव कल्याणं भवतीति स्ववृत्तान्तेन दर्शयति भगवान्नारदः-अहमिति। पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि दास्याः सकाशादभवम् तदा निर्विविक्षतां निर्वेशं कर्तुमिच्छतां योगिनां भक्तियोगादिनिष्ठानां मोक्षधर्मे 'आचार्या मोक्षशास्त्रस्येत्या'दिना प्रसिद्धानां छांदोग्यादौ सनत्कुमारकल्पादौ च नारदगुरुत्वेन प्रसिद्धानां स्वशिष्यं शापाक्रांतमुद्धर्तुमागतानां गृहस्वामिभिर्वेदवादिभिर्निरूपितोस्मि॥ २३-२४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

किंच स्वावतारप्रयोजनं जानीहि किमर्थमवतीर्णोऽसि। भगवान् स्वयमवतीर्य सर्वभक्तोद्धारार्थं स्वांशज्ञानकलारूपं भगवंतमवतारितवान्। अतश्चरित्राकथने तवावतारो निष्प्रयोजन इति भगवदिच्छया चांतःकरणविषादः। अतो भगवदाज्ञां परिपालय स्वजन्मसाफल्यं चेत्याह। त्वमात्मनात्मानमिति। त्वमात्मानं परस्य पुंसः कलामवेहि। जीवस्य ब्रह्मोपदेशवत् अयमुपदेश

इति निराकर्तुमाह । कलामिति साधनं च तव स्वरूपमेव ज्ञातं स्वरूपं तथा ज्ञापयिष्यतीत्यर्थः । तत्र सामर्थ्यमाह अमोघदृगिति । ननु सर्वे जीवाः भगवदंशकलाः कोऽयं मयि विशेषस्तत्राह परस्य पुंसः पुरुषोत्तमस्य अन्ये त्वक्षरस्य पुरुषस्य वा, नन्वक्षरपुरुषयोरपि भगवत्त्वात्को विशेषस्तत्राह परमात्मन इति । परमश्चासावात्मा चेति गंगाजलदेवतयोरिवात्मपरमात्मनोः स्वरूपमिति भावः । तर्हि कथं ममोत्पत्तिस्तत्राह अजं प्रजातमिति । अनुत्पन्न एव त्वं आनंदमात्रकरपादमुखोदरादिर्व्यासरूपेणावतीर्णः । अतः सर्वस्यापि जगतः शांतसुखाय महानुभावस्य भगवतः अभ्युदयः चरित्रं अधिकं गण्यताम् । उद्देशमात्रेणोच्यताम् । अस्य भगवतश्चरित्रं भक्तसंबंधिसंबंधिष्वपि परममनुभावं संभावयतीति महानुभावः । तस्याभ्युदयः परमोत्सवः तस्याधिक्यं ज्ञानादिभ्यः अवाङ्मनोगोचरत्वादिदमित्थन्तया निरूपणमशक्यम् । अतः उद्देशमात्रं कर्त्तव्यमिति ॥ २१ ॥ ❀ ❀ ननु धर्मसहितं चरित्रमुपदेष्टव्यं केवलं वेति शंकायामाह इदं हीति । इदं चरित्रश्रवणं तपआदिभिस्तुल्यं फलतः स्वरूपतः साधनतश्च भगवत्त्वात् । सर्वेस्यापि तानि भगवानिति तत्र धर्मविशेषो वर्णाश्रमेषु प्रतिष्ठितः, तत्र तपः वानप्रस्थेषु संन्यासिषु वा श्रुतं श्रवणं वेदांतानां तत्संन्यासिषु । स्विष्टं गृहस्थे सूक्तमध्ययनं ब्रह्मचारिषु, क्षत्रियवैश्ययोः बुद्धिदाने । एवं सर्वैर्द्धर्मैर्यमवति तानि च अविच्युतोऽर्थः न विच्युतः अर्थो येन । शास्त्रसिद्धावपि लोकसिद्धिर्न भविष्यतीत्यत आह कविभिरिति । नितरामिति युक्तिसहितम् उत्तमश्लोकगुणानुवर्णनमनूद्याविच्युतार्थत्वं विधीयते । अत एकेनैव सर्वसिद्धेर्न तेषां पृथक्करणं नाप्यकरणमिति सिद्धान्तः । निषिद्धं तु न कर्त्तव्यम् ॥ २२ ॥ ❀ ❀ एवं सामान्यत उपदेशमुक्त्वा आदिसाधनमारभ्य फलपर्यंतं पदार्थानां क्रमं वक्तुं निदर्शनेन स्वचरित्रमाह सप्तदशभिः अहमिति । अतिहीनस्याप्युत्कृष्टपदप्राप्तिरस्मिन्नेव मार्गे न मार्गांतर इति शापेन शूद्रत्वं प्राप्तस्य देवर्षित्वं निरूप्यते । अतीतभवे पूर्वजन्मनि नैकस्यभ्रमव्यावृत्त्यर्थं पुरेति । एतज्जन्मनोऽजरामरत्वख्यापनाय । मुन इत्युक्तविश्वासाय संवादात् । पितृनाम न गृहीतं तदानीमज्ञानात् पितुर्हीनत्वख्यापनाच्च, वस्तुतस्तु ब्राह्मणः । अन्यथा अनुमोदनादिकं न संभवति कस्याश्चिदप्रसिद्धायाः । अन्यथा आदरः संभवेत्ततो बंधः । अनेनास्मिन्मार्गे यथा यथा निरादरत्वं तथा तथा कार्यसिद्धिरिति । वेदवादिनः श्रोत्रियाः । अनेन भगवन्मार्गोपरिज्ञानमुक्तम् । आश्रमिणां संन्यासिनामयं धर्मः यन्मासाष्टकं कीटवत्पर्यटनं विधाय आषाढ्यां यत्र गच्छंति तत्र ब्राह्मणनिर्मितविविक्तस्थाने तिष्ठंतीति । तथा दैवयोगान्नारदस्थितिगृहे प्रार्थनया ब्राह्मणानुज्ञया भाविसनकादयश्चत्वारः परमहंसाः स्थिताः । अपृथग्धर्मशीलत्वाच्चतुर्णां संगः । योगनिष्ठश्च । अतः सेवापेक्षा । तेषां शुश्रूषणार्थं ब्राह्मणैरेवाहं निरूपितस्त्वमेतेषामेव सेवां कुरु नान्यत्किंचिदिति नियुक्तः सत्स्वरूपमज्ञात्वाऽपि बालक एव नियुक्तः योगिनां शुश्रूषार्थं "स्थास्यामश्चतुरो मासानिति" मासचतुष्टयमेकत्रैव नितरां वासमिच्छताम् । एवमेकेन सत्संबंध उक्तः । सेवार्थं सत्संग इति प्रथमं साधनम् ॥ २३ ॥ ❀ ❀ ततस्तेषां कृपामाह ते मयीति । सत्सेवकयोर्गुणदोषाभावा अत्र निरूप्यंते । सतां गुणत्रयं कृपालुत्वं ब्रह्मविद्या मननं चेति, धर्मो ज्ञानं साधनं चोक्तम् । अग्रे साधनकथनं ज्ञानानुवृत्तये । सेवकस्य दोषाभावास्त्रयः गुणाश्चत्वारः । चपलता दोषः । तद्देहेंद्रियांतःकरणानां प्रयत्नदार्ढ्याभावात् चपलता दोषः सहजः, स आदौ दृढप्रयत्नेन निवारणीयः । तदाह–अपेतानि अखिलानि चापलानि यस्मादिति । अर्भकत्वं दीनत्वबोधको गुणः । तदनु दोषाभावद्वयमाह । दांते अधृतक्रीडनके सति । इन्द्रियाणां विषयाकांक्षाराहित्यकरणं दमः । न धृतानि क्रीडनकानि येन इन्द्रियकालकृतौ नियतौ दोषौ विषयसंबंधः क्रीडासाधनपरिग्रहश्च । तदभावे सर्वदोषनिवृत्तिः । ततोंतरंगं गुणमाह अनुवर्तिनीति । एवं स्वतः पंचसु संपन्नेषु तेषां परदुःखप्रहाणेच्छा जाता । परदुःखं दृष्ट्वा दुःखितस्य कारुणिकस्य तन्निदानोच्छेदने तृष्णा भवतीति । नन्वेतद् ब्रह्मविदोऽनुचितं तत्राह यद्यपि तुल्यदर्शना इति । निर्दोषं हि समं ब्रह्म तुल्यशब्दवाच्यम् । ब्रह्मज्ञानकृतं वा । स्वपरयोः सुखदुःखसमत्वज्ञानं तुल्यं तस्य दर्शनं येषामिति परदुःखं दृष्ट्वा तत्प्रहाणेच्छैव जाता । न ज्ञानमन्यथा जातमित्यर्थः । दुर्बलत्वादिच्छामूलभूतज्ञानस्य । ननु कार्यक्षमा कृपा न भविष्यति, बाधकज्ञानस्य विद्यमानत्वादत आह शुश्रूषमाण इति । सेवायाः सेच्छायाः सेव्यवश्यत्वं सर्वजनीनम् । नन्वनपेक्षायाः कथं वश्यताहेतुत्वं तत्राह मुनय इति । मननबाधकनिवर्तिका सेवाऽपेक्ष्यत एव, सेवायां सांसर्गिको दोषो बहुभाषणमभाषणं वा । तदुभयनिवर्तको गुणः अल्पभाषणम् । अनेन निर्दुष्टा सेवा द्वितीयं साधनमिति ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स्वमात्मनात्मानमित्यत्र । साफल्यं चेति कुर्विति शेषः । साधनमिति ज्ञानसाधनम् । तथेति कलात्वम् । तत्रैति । कलात्वज्ञाने तथा च यथा धर्मादयोऽर्थाः स्वतः स्फुरिताः, तथेदमपि स्फुरिष्यतीत्यर्थः । अवतीर्ण इति । अत्र व्यापिवैकुण्ठादत्रागमनरूपोऽवतारपदार्थो ज्ञातव्यः । तत्पदस्यार्थः अत इति । शिवपदस्यार्थः शान्तसुखायेति । तन्महानुभावेति समस्तमभिप्रेत्याहुः अस्येत्यादि । अवाङ्मनोगोचरत्वादित्यत्र वाक्सहितं मन इत्येवं समासो बोध्यः ॥ २१ ॥ ❀ ❀ इदं हि पुंस इत्यत्र । तानीति स्वरूपसाधनफलानि । उक्तत्रिरूपतां विवृण्वन्ति एवं सर्वैरित्यादिना । अर्थशब्दस्य वस्तुनि प्रयोजने च रूढत्वात्तृतीयार्थे बहुव्रीहौ गूढोत्मेतिवद्वर्णविकृतावविच्युतोर्थ इति पदं साधनमपि बोधयतीति त्रितयलाभ इत्यर्थः । अविच्युतार्थ इति वा मूलपाठोभिप्रेत इति न कोपि शङ्कालेशः । निषिद्धमिति । 'कः क्षेमो निजपरयोः'

'कर्षयन्तः शरीरस्थं भूतग्राम' मित्यादिषु यन्निन्दितं तदित्यर्थः ॥ २२ ॥ ❀ ❀ अहं पुरेत्यत्र । उक्तविश्वासाय संवादात् । मननेन ज्ञातस्य मज्जन्मनो वाक्येन संवादादुक्तविश्वासायेत्यर्थः तदानीमिति । तस्मिन् जन्मनि वा । परमहंससेवातः प्राग्वा । न सम्भवतीति । शूद्रस्योच्छिष्टदाननिषेधात् । आश्रमिणामित्यादि । 'वर्षासु ध्रुवशीलोऽष्टमास्स्वेकाकी यतिश्चरे' दित्यारुणीश्रुतेः । 'चतुरो मासान् वार्षिकान् ग्रामे नगरेपि वा वसे'दिति कठश्रुतेश्चेत्यर्थः ॥ २२ ॥ ❀ ❀ ते मयीत्यत्र । स धनकथनमिति । गुणगानरूपसाधनकथनम् । तदाहेति । तस्य स्वत एव निवृत्तिमाहेत्यर्थः । बाधकज्ञानस्येति । तुल्यदर्शनरूपस्य । सेव्यवश्यत्वमिति । फलमिति शेषः । अनपेक्षाया इति । न विद्यते अपेक्षा यस्याः सानपेक्षा, तुल्यदर्शनत्वेनापेक्षितायाः सेवाया इत्यर्थः । द्वितीयमिति । निर्दुष्टानुवृत्तिः प्रथमं साधनम् , तदपेक्षयेदं द्वितीयमित्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

इतो विस्तरतो भगवद्यशोवर्णनेऽपि तवाचार्यापेक्षा नास्ति भगवदवतारत्वादित्याशयेनाह–त्वमिति त्वमात्मानम् अजं कर्माधीनजीववज्जन्मरहितमेव प्रजातं स्वेच्छयाऽवतीर्णं आत्मना स्वयमेव अवेहि जानीहीत्यन्वयः । अतः किमित्यपेक्षायामाह–अमोघदृगिति, अमोघा यथार्था दृक् दृष्टिर्यस्य स सर्वज्ञ इत्यर्थः । ननु कर्मानायत्तत्वेऽपि कथं सर्वज्ञतेत्याशङ्क्याह–परस्य पुंस इति, यतः पुंसः पुरुषोत्तमस्य कलां ज्ञानांशमित्यर्थः । कलाशब्दस्य नियतस्त्रीलिङ्गत्वादात्मशब्दसामानाधिकरण्येन विरोध इति ज्ञेयम् । कोऽसौ पुरुषोत्तम इत्यपेक्षायामाह–परमात्मन इति, सर्वज्ञः सर्वशक्तिः सर्वान्तर्यामी परमात्मा तस्येत्यर्थः । किमर्थमेवम्भूतस्यावतार इत्यपेक्षायामाह–जगतः शिवायेति, भगवद्यशःप्रदर्शनेन प्राणिनां परमानन्दलाभायेत्यर्थः । यस्मादेवं तत्तस्मात् महानुभावस्य भगवतोऽभ्युदयः परममङ्गलं यशः अधि अधिकं यथा स्यात्तथा गण्यतां निरूप्यतामित्यर्थः ॥ २१ ॥ ❀ ❀ सर्वत्र फलसिद्धावेव सन्तोषदर्शनाद्भगवद्गुणवर्णनस्य तपआदिफलत्वादनेनैव तव सन्तोषो भविष्यति नान्यथेत्याशयेनाह–इदं हीति । हिशब्दोऽवधारणे । यदुत्तमश्लोकस्य अविद्यानिवर्तकयशसो भगवतो गुणानामनुवर्णनम् । अनुवर्णनमिति श्रवणस्मरणयोरपि उपलक्षणम् । तदिदमेव सदाचारनिष्ठस्य पुंसः सम्बन्धिनां तपआदीनामविच्युतोऽविनाशो अर्थः प्रयोजनं फलं कविभिः निरतिशयप्रयोजनयाथात्म्यविद्भिः निरूपितः निश्चयेनोक्त इति । नात्र प्रमाणं वक्तव्यमिति भावः । तत्र तपः अनशनादि, श्रुतमध्ययनम्, स्विष्टं यागादि, सूक्तमध्यापनम्, बुद्धिः शास्त्राभ्यासजन्या व्युत्पत्तिः, दत्तं दानम् ॥ २२ ॥ ❀ ❀ ननु त्वं कथमेव सर्वं रहस्यं जानासीत्यपेक्षायां सर्वतो हीनस्यापि सर्वत उत्तमत्वे हेतुरयं भक्तिमार्ग एवेति सूचयन् आदिसाधनमारभ्य फलपर्यन्तं स्ववृत्तान्तमाह–अहमिति । मननपूर्वकं सावधानतया श्रोतव्यमिति सूचयन् सम्बोधयति–हे मुने ! पुरा पूर्वकल्पे अतीतभवे पूर्वकल्पे अतीतभवे पूर्वजन्मनि अहं वेदवादिनां ब्राह्मणानां कस्याश्चन दास्याः सकाशादभवं जातोऽस्मि । तदा प्रावृषि वर्षोपलक्षितचातुर्मास्ये तेषां ब्राह्मणानां गृहे निर्विविक्षतां निर्वेशमेकत्र वासं कर्तुमिच्छतां योगिनां भक्तियोगवतां शुश्रूषणे सेवायामहं बालक एव तैर्ब्राह्मणैर्निरूपितो नियोजितः ॥ २३ ॥ ❀ ❀ ते मुनयो यद्यपि तुल्यं सर्वसमं भगवन्तमेव पश्यन्तीति तुल्यदर्शनास्तथापि मयि कृपां चक्रुरित्यन्वयः । एवं कृपालुत्वं मननशीलत्वं समदर्शित्वं च गुरुगुणाः प्रदर्शिताः, तत्कृपाहेतुत्वेन शिष्यगुणान् दोषाभावांश्च दर्शयन्नात्मानं विशिनष्टि, तत्र दीनत्वमत्र गुणस्तद्दर्शयन्नाह–अर्भक इति । तथा च क्रीडासक्तिर्दोषस्तन्नास्तीत्याह–अधृतक्रीडनक इति, अधृतानि अपरिगृहीतानि क्रीडनकानि बालक्रीडासाधनानि येन तस्मिन् । तत्र हेतुत्वेन चाञ्चल्याभावमाह–अपेतेति, अपेतानि निवृत्तानि अखिलानि चापलानि यस्मात्तस्मिन् । तत्रापि हेतुत्वेन वशीकृतेन्द्रियत्वं गुणमाह–दान्त इति । तत्रापि बहुभाषणे तेषां मननविक्षेपः स्यात्तदपि नास्तीत्याह–अल्पभाषिणीति । सर्वसेव्यवशीकरणगुणमाह–शुश्रूषमाण इति, सेवां कुर्वतीत्यर्थः । तत्रापि कापट्यं चेत्कथं तयापि प्रसन्नता स्यात्तदपि नास्तीत्याह–अनुवर्तिनीति, अनुकूले इत्यर्थः ॥ २४ ॥

हिन्दी अनुवाद

व्यासजी ! आपकी दृष्टि अमोघ है; आप इस बातको जानिये कि आप पुरुषोत्तम भगवान्‌के कलावतार हैं । आपने अजन्मा होकर भी जगत्‌के कल्याणके लिये जन्म ग्रहण किया है । इसलिये आप विशेषरूपसे भगवान्‌की लीलाओंका कीर्तन कीजिये ॥ २१ ॥ ❀ ❀ विद्वानोंने इस बातका निरूपण किया है कि मनुष्यकी तपस्या, वेदाध्ययन, यज्ञानुष्ठान, स्वाध्याय, ज्ञान और दानका एकमात्र प्रयोजन यही है कि पुण्यकीर्ति श्रीकृष्णके गुणों और लीलाओंका वर्णन किया जाय ॥ २२ ॥ ❀ ❀ मुने ! पिछले कल्पमें अपने पूर्वजीवनमें मैं वेदवादी ब्राह्मणोंकी एक दासीका लड़का था । वे योगी वर्षा-ऋतुमें एक स्थानपर चातुर्मास्य कर रहे थे । बचपनमें ही मैं उनकी सेवामें नियुक्त कर दिया गया था ॥ २३ ॥ ❀ ❀ मैं यद्यपि बालक था, फिर भी किसी प्रकारकी चञ्चलता नहीं करता था, जितेन्द्रिय था, खेल-कूदसे दूर रहता था और आज्ञानुसार उनकी सेवा करता था । मैं बोलता भी बहुत कम था । मेरे इस शील-स्वभावको देखकर समदर्शी मुनियोंने मुझ सेवकपर अत्यन्त अनुग्रह किया ॥ २४ ॥

उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः ।
एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ।। २५ ।।
तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिः[1] ।। २६ ।।
तस्मिंस्तदा लब्धरुचेर्महामुने[2] प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ।। २७ ।।
इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलम् ।
संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा[3] ।। २८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

उच्छिष्टस्य लेपान्पात्रलग्नांस्तैर्द्विजैरनुज्ञातः सन् भुंजे स्म। तेन भोजनेनापास्तकिल्बिषो जातोऽस्मि। तेषां धर्मे परमेश्वरभजने एवात्मनो मनसो रुचिः प्रजायते स्मेत्यनुषंगः ।। २५ ।। ❀ ❀ अशृणवं श्रुतवानस्मि। मे श्रद्धया ममैव स्वतःसिद्धया न त्वन्येन बलाज्जनितया। अतो ममेत्यस्यापौनरुक्त्यम्। अनुपदं प्रतिपदम्। प्रियं श्रवो यशो यस्य तस्मिन् ।। २६ ।। ❀ ❀ प्रियं श्रवो यस्य तस्मिन्भगवति लब्धरुचेर्ममास्खलिताऽप्रतिहता मतिरभवदित्यनुषंगः। यया मत्या परे प्रपंचातीते ब्रह्मरूपे मयि सदसत्स्थूलं सूक्ष्मं चैतच्छरीरं स्वमायया स्वाविद्यया कल्पितं न तु वस्तुतोऽस्तीति तत्क्षणमेव पश्यामि ।। २७ ।। ❀ ❀ एवं शुद्धे त्वंपदार्थे ज्ञाते देहादिकृतविक्षेपनिवृत्तेस्तत्कारणभूतरजस्तमोनिवर्तिका दृढा भक्तिर्जातेत्याह। इत्थमिति। हरेर्यशः। अनुसवं त्रिकालम् ।। २८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु "न शूद्राय मतिं दद्यान्नोच्छिष्टं कदाचन" इति मनूक्तिस्तु गृहस्थशूद्रपरैव। तदुक्तं व्याघ्रमुनिना "उच्छिष्टमन्नं दातव्यं शूद्रायागृहमेधिने। गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने" इति। अतो मम तदा गृहस्थत्वाभावादुच्छिष्टभुजो न दोषः। किं च "शूद्रस्तु ब्राह्मणोच्छिष्टभोजनान्नाशुचिर्भवेत्" इति पुराणान्तरात्। ब्राह्मणेन तु कदाचिदपि कस्यचिदप्युच्छिष्टं नादनीयम्। तदुक्तं "ब्राह्मणो यश्च लोभेन स्वादेनाद्याच्च कस्यचित्। उच्छिष्टं तस्य सततं नरकाः क्रमशो नृप" इत्युक्तेः। स्वयमपि ब्राह्मणायोच्छिष्टं न दद्यात्। "आत्मोच्छिष्टं तु मिष्टान्नं पयो दधि घृतं मधु। ब्राह्मणाय न दातव्यं दत्त्वा निरयमाप्नुयात्" इति स्मृतेः। यच्च "गुरुमूर्तेः सदा ध्यानं गुरूच्छिष्टस्य भोजनम्" इत्युक्तं तद्भक्षितावशिष्टं भोजनपात्रस्थमन्नं न वक्ति, किन्तु पाकभांडस्थमेव गुरुभोजनतोवशिष्टमिति। अन्यथा "उच्छिष्टभोजिनश्श्वानः" इत्युक्तिर्विरुध्येत। यद्वा निषेधो हि विहितेतरपरो बोध्यः। विहितास्तु निर्णयसुधाकरे उक्ताः। "पितुर्ज्येष्ठस्य भ्रातुर्हि भोज्यमुच्छिष्टमेव हि। गुरुवद् गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् ।।" इत्यादिना। यद्वा प्राणाहुत्यनन्तरं भोजनस्य समाप्तत्वादतिप्रेमवते शिष्याय किंचिदन्नं देयमित्यभिप्रायिका चेयमुक्तिरिति "प्राणस्याहुतिपर्यन्तं भोजनं परिकीर्त्तितम्। पश्चाज्जठरपूर्त्यर्थमन्नं प्राशयते जनैः" इति। "गुरोरुच्छिष्टं वा भुञ्जीत" इति श्रुतिर्हि सामयिकं तदशनं वदति न सार्वकालिकमित्यलम्। यद्वा उच्छिष्टस्य लेपो मार्जनं पात्रपक्षे भस्मना भूमिपक्षे गोमयादिना। बहुत्वं द्विजापेक्षया उच्छिष्टमार्जनं प्रति द्विजैरनुमोदित आज्ञप्तः तैः सह सकृदेकवारं भुंजे स्म। यथा ते प्रत्यहं सकृदेव भुञ्जते तथाहमपीत्यर्थः। द्विजा अत्र सनकादयो ज्ञेयाः। तदुक्तं ब्रह्मवैवर्त्ते "एकस्मिन्नन्तरे विप्रा आययुर्विप्रमन्दिरे। शिशवः पंचवर्षीया महतां च महीयसः ।। फलमूलादिकं काले चत्वारो मुनिपुंगवाः। विप्रदत्तं बुभुजिरे तच्छेषं बुभुजे शिशुः ।।" इति। अत्रापि शेषभुजिरेवोक्ता, न तूच्छिष्टभुजिरिति तेनर्षिभोजनावशिष्टभोजनेन तदुच्छिष्टपात्रादिमार्जनेन वा निरस्तपाप्माहं जातोस्मि। एवं भजनेषु स्पृहा भक्तिरनर्थापगमस्तथा निष्ठा रुचिरिति पंच भूमिकाः अनेन श्लोकार्धेन सूचिताः। "लेपो लेपनवृद्धयोश्च शोधनाशनयोरपि" इति कोशात् ।। २५ ।। ❀ ❀ तत्र तदा विप्राश्रमे वा कृष्णकथा नन्दनन्दनस्य जन्मादिलीला अन्वहम्। श्रद्धयेति। श्रद्धापदेनासक्तिर्दशमी भूमिका सूचिता। प्रतिपदं प्रतिक्षणं प्रतिसुप्तिङन्तं वा। प्रियश्रवसि कृष्णे। कृष्णे रतिमित्येकादशी ।। २६ ।। ❀ ❀ लब्धरुचेर्लब्धास्वादविशेषस्य स्खलनशून्या मतिरभूत्। अत्र विश्वनाथः—स्वमायया हेतुना मयि वर्त्तमानं यदेतत्स्थूलं सूक्ष्मं च शरीरं तत् यया मत्या परे ब्रह्मणि श्रीकृष्णे विषये एव कल्पितं पश्ये पश्यामि कल्पितं क्लृप्तीकृतं स्थापितमिति यावत्। तथाहि स्थूलं शरीरं भगवज्जलकलशवहनदण्डवत्प्रणत्यादौ न तु स्वीये व्यावहारिके कापि कृत्ये सूक्ष्मं श्रवणनयनमनो-

---

१. प्रा० पा०—ममाभवद्रतिः। २. प्रा० पा०—महामते। ३. प्रा० पा०—तमोहरा।

बुद्ध्यादिकं तदीयगुणरूपमाधुर्यास्वादादावेव कल्पितं न तु वैषयिके क्वापि स्वभोग्ये वस्तुनीति पश्ये इति यत्पूर्वं बह्वायासेनापि भगवति क्लृप्तं नासीत् तदेव मनोनयनादिकं रतौ जातायां स्वं स्वं बहुकालाभ्यस्तमपि विषयं त्यक्त्वा तत्रैव क्लृप्तमिति साक्षादनुभवामीत्यर्थः ॥ २७ ॥ ❀ ❀ ऋतू ऋतुद्वयं व्याप्य "कालाध्वनोरत्यंतसंयोगे" द्वितीया । भक्तिः प्रेमा । आत्मनां जीवमात्राणामपि रजस्तमसी अपहंतीति सा तदा तां भगवद्भक्तिं पृष्टवतामन्येषामपि रजस्तमसोर्नाशोऽभूदित्यर्थः । भूमिकेयं द्वादशी । ततो दर्शनसाक्षान्माधुर्यानुभवावुत्तराध्याये वक्ष्येते ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

कृपाफलं वदन्नात्मानं विशिनष्टि उच्छिष्टेति । द्विजैर्योगिभिरनुमोदितः तैर्दत्तानुच्छिष्टलेपान्भुक्तावशिष्टानन्नादीन् सकृद् भुंजे स्म भुक्तवानस्मि । तेन भोजनेनापास्तानि किल्बिषाणि भागवतधर्मरुचिप्रतिबंधकानि यस्य तथाभूत आसम् । एवं भागवतशुश्रूषणे प्रवृत्तस्यात एव विशुद्धं भागवतधर्मरुचिप्रतिबंधरहितं चेतो यस्य तस्य मम तद्धर्मे एवात्मन्यंतःकरणे रुचिः प्रजायते प्राजायत ॥ २५ ॥ ❀ ❀ तत्रात्मरुचौ जातायां सत्यामन्वहमनुदिनं कृष्णस्य भगवतः कथाः प्रगायतां कथयतां योगिनामनुग्रहेण मनोहरा मनोज्ञाः कथाः अशृणवं श्रुतवानस्मि ताः कृष्णकथा अनुसवनं त्रिकालं श्रद्धया विशृण्वतो मम अंग हे व्यास ! प्रियं श्रोतॄणां प्रीत्यावहं श्रवः कीर्तिर्यस्य तस्मिन् भगवति रतिरनुरागो अभवद्बभूव ॥ २६ ॥ ❀ ❀ तदा तस्मिन्प्रियश्रवसि बद्धा रुचिर्येन तस्य मम हे महामते प्रियश्रवसि मतिरस्खलिता स्थिरा बभूव । अस्खलितां मतिं विशिनष्टि–यया मत्या परे ब्रह्मणि परब्रह्मधार्ये मयि वर्तमानमेतत्सदसत्कार्यकारणात्मकं जगत्स्वमायया स्वसंबंधिन्या प्रकृत्या कल्पितं निष्पादितं न तु स्वत इत्यर्थः । पश्ये दृष्टवानस्मि "तद्यथारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेर्पिताः" "जीवभूतां महाबाहो ययेदं धार्यते जगत्" इत्युक्तप्रकारेण प्रकृतिश्चेतनधार्या चेतनः परमात्मधार्य इति देहात्मभेदमात्मपरमात्मसंबंधं च ज्ञातवानस्मीत्यर्थः ॥ २७ ॥ ❀ ❀ इत्थं शरत्प्रावृषिकौ शरत्प्रावृषौ ऋतू अनुसवममलं महात्मभिर्मुनिभिः संकीर्त्यमानं हरेर्यशो विशृण्वतो ममात्मनि ये रजस्तमसी तयोरपहंत्री भक्तिः प्रवृत्ता बभूव ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किं तच्छुश्रूषा कर्मेति तत्राह उच्छिष्टेति । ब्रह्मकुलोद्भवानामेव चतुर्थाश्रम इति प्रकाशनाय द्विजैरिति कथितम् । उच्छिष्टपात्रोद्धरणं गोमयोदकेन मार्जनं वा तत्स्थले लेपनं तत्रानुज्ञातः न हि शूद्रस्य तदनुज्ञानाभावे उच्छिष्टस्पर्शनं सुतरां तद्भक्षणं वा शक्यं-लिप्यंते उपलिप्यंते सिध्यंते प्राणा एतैरिति लेपा ओदनास्तद्भुक्तोच्छिष्टानामोदनानामदनं प्रत्यनुज्ञात इति वा । अनेन स्वशरीरयात्रानिर्वाहमाह, तदनुवर्तित्वं स्पष्टमाह, सकृदिति चशब्द एवार्थे यतयः सकृदेव भुञ्जते तथाहमपि सकृदेव भुंजे तत्फलमाह । तदिति तेन कर्मणा सकृद्भोजनेन अपास्तं निरस्तं किल्बिषं पापं यस्य स तथा । ततः किमभूदिति तत्राह एवमिति । एवमुक्तप्रकारेण प्रवर्तमानस्य विशेषेण शुद्धांतःकरणस्य तेषां परमहंसानां धर्मे विषयवैराग्यलक्षणे भगवत्कथाश्रवणाद्यभ्यासलक्षणे वा अभिरुचिरुत्कंठा प्रजायते इत्यन्वयः । संततानुवृत्तिसूचनाय लट्प्रयोगः ॥२५॥ ❀ ❀ अभिरुच्या किं जातमिति तत्राह तत्रेति । तत्र तत्सकाशे मनोहराः कृष्णकथा अनुदिनं प्रातः सवनादनंतरं प्रगायतां कीर्तयतां परमहंसानां अनुज्ञालक्षणानुग्रहेण अशृणवमित्यन्वयः । अंग श्रीवेदव्यास तदा श्रद्धयानुसवं त्रिसंध्यमर्पिताः कथा विशृण्वतो मे मतिः ध्यानलक्षणोपासना प्रियश्रवसि परममंगलकीर्तौ हरावभवदित्यन्वयः ॥२६॥ ❀ ❀ अखंडस्मरणोपासनाफलमाह तस्मिन्निति । रागाद्यवद्यैरनुपहतत्वादस्खलिता निरंतरं स्थिरतयाऽखंडोपासनमभवदित्यन्वयः । अहं ययाऽखंडोपासनया एतत्सदसत्कार्यकारणात्मकं जगन्मयि स्थिते बिंबभूते ब्रह्मणि पूर्णे हरौ तत्सृष्टं तत्पालितं तत्संहृतं चेति पश्ये । कथंभूतं स्वमायया स्वेच्छया मदनुग्रहाभिमुख्या यत्र स्वीयतामिति कल्पितं संकल्पितमित्यन्वयः । ब्रह्मण्यध्यस्तं जगत्पश्य इत्यंगीकारे मिथ्याज्ञानित्वं प्रसज्जते, न हि शुक्त्यध्यस्तरजतं पश्यन् यथार्थज्ञानी भवति । किंतु नेदं रजतं शुक्तिरेवेति पश्यंस्तथा नेदं जगत्किंतु ब्रह्मैवेति न चात्र तथेत्यलमतिप्रसंगेन ॥ २७ ॥ ❀ ❀ भक्त्युपासनयोरन्योन्यनिमित्तकभावोस्तीत्यभिप्रेत्याह इत्थमिति । इत्थमुक्तप्रकारेण मुनिभिः सम्यक्कीर्त्यमानममलं हरेर्यश अनुसवनं शरत्प्रावृषिकावृतू विशेषेण शृण्वतो मम हरौ तदितरविरागवती आत्मनो मनसो रजोगुणतमोगुणनिमित्तरागाद्यन्यथाज्ञानादिदोषहरा महत्त्वज्ञानलक्षणा भक्तिः प्रवृत्ताभूदित्यन्वयः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्रेति । कृष्णकथाः श्रीनन्दनन्दनस्य जन्मादिलीलाः । 'यच्छृण्वतोऽपैत्यरतिर्वितृष्णे'त्यादेः प्रियं सर्व्वेषां प्रतिविषयं श्रवः कीर्त्तिर्यस्य ॥ २६ ॥ ❀ ❀ ततश्च स्वस्मिन् भगवति चापरमार्थारोपस्य मृषात्वदर्शकः परमपरमार्थतदीयस्वरूपरूपगुणचिन्तनावेशो जात इत्याह तस्मिन्निति द्वाभ्याम् । यया मत्याहमेतत् सदसद्व्यष्टिसमष्ट्यात्मकं यज्जगत् तद्व्यष्ट्यंशं मयि जीवरूपे स्वविषयकभगवन्मायया कल्पितं पश्ये । परब्रह्मणि तु समष्ट्यात्मकं तया कल्पितं पश्ये ज्ञातवानस्मि । तत्र तत्सम्बन्धः पुनर्मम नास्फुर-

देवेत्यर्थः ॥ २७ ॥ ❀ ❀ ततः किं वृत्तमित्याशंक्याह इत्थमिति । या पूर्वोक्ता रजस्तमोऽपहा मतिरूपा भक्तिः सैव प्रवृत्ता । नदीव प्रकर्षेण मुहुर्वर्त्तमानाऽभूदित्यर्थः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च उच्छिष्टस्य लेपान् तेषां भोजनपात्रलग्नान् ओदनान् सकृदेकवारं भुञ्जे स्म । कीदृशः द्विजैस्तैस्तदर्थं मया प्रार्थितैरनुमोदितः दत्तानुज्ञः तेनैव अपास्तानि विनष्टानि किल्बिषाणि भक्तिप्रतिबंधका अनर्था यस्य सः । ततश्च नित्यमेव भुक्ततदुच्छिष्टस्य मम श्रवणकीर्त्तनस्मरणात्मिका भक्तिरनायासेनैवाभवदित्याह । एवं प्रवृत्तस्यान्यस्यापि जनस्य भक्तानामुच्छिष्टं यो भुङ्क्ते तस्य तेषामेव धर्मे श्रवणकीर्त्तनादावात्मनो मनसो रुचिः प्रकर्षेणावश्यमेव जायते । एवं भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः निष्ठा रुचिरिति पञ्च भूमिका अनेन श्लोकार्धेन सूचिता ज्ञेयाः ॥ २५ ॥ ❀ ❀ ताः श्रद्धयेति । श्रद्धापदेनासक्तिर्दशमी भूमिका अनुपदं प्रतिक्षणं प्रतिसुप्तिङन्तं पदं वा । मे मम प्रियं श्रवो यशो यस्य तस्मिन् प्रियश्रवसि कृष्णे मम रतिरभूदित्यतो ममेत्यस्यापौनरुक्त्यम् । कृष्णे रतिरित्येकादशी ॥ २६ ॥ ❀ ❀ लब्धरुचेर्लब्धास्वादविशेषस्य स्खलनशून्या मतिरभूत् । स्वमायया हेतुना मयि वर्त्तमानं यदेतत् स्थूलं सूक्ष्मञ्च शरीरं तत् यया मत्या परे ब्रह्मणि श्रीकृष्णे विषये एव कल्पितं पश्ये पश्यामि। कल्पितं क्लृप्तीकृतं स्थापितमिति यावत् । तथाहि स्थूलं शरीरं भगवज्जलकलशवहनदण्डवत् प्रणत्यादौ न तु स्वीये व्यावहारिके क्वापि कृत्ये । सूक्ष्मं श्रवणनयनमनोबुद्ध्यादिकं तदीयगुणरूपमाधुर्यास्वादादावेव कल्पितं नतु वैषयिके क्वापि स्वभोग्ये वस्तुनि इति । पश्ये इति यत् पूर्वं बह्वायासेनापि भगवति क्लृप्तं नासीत् तदैव मनोनयनादिकं रतौ जातायां स्वं स्वं बहुकालाभ्यस्तमपि विषयं त्यक्त्वा तत्रैव क्लृप्तमिति साक्षादनुभवामीत्यर्थः ॥ २७ ॥ ❀ ❀ ऋतुद्वयं व्याप्य । अनुसवं प्रतिसमयम् । भक्तिः प्रेमा । आत्मनां जीवमात्राणामपि रजस्तमसी अपहंतीति सा । तदा तां भगवद्भक्तिं दृष्टवतामन्येषामपि रजस्तमसोर्नाशोऽभूदित्यर्थः । भूमिकेयं द्वादशी । ततो दर्शनसाक्षान्माधुर्यानुभवावुत्तराध्याये वक्ष्येते ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तेन उच्छिष्टलेपादिना तद्धर्मभक्तियोगादौ ॥ २५ ॥ ❀ ❀ अनुसवं त्रिकालं प्रियश्रवसि वासुदेवे ॥ २६ ॥ ❀ ❀ अस्खलिताऽविचला मम मतिर्बभूव यया मत्या मयि ध्यातरि विस्फुरमाणे परे ध्येये ब्रह्मणि जगत्कारणे भगवति एतत्सदसत्स्थूलसूक्ष्मात्मकं स्वमायया स्वकीयया प्रकृत्या भगवच्छक्त्या कल्पितं निष्पादितं पश्ये दृष्टवानस्मि ॥ २७-२८ ॥ ❀ ❀

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ततो यज्जातं तदाह उच्छिष्टेति । पापनाशस्तद्धर्मरुचिश्च ततोऽप्यंतरंगं साधनम् । उच्छिष्टं भोजनशेषः । लेपः पात्र्यां लग्नमन्नं चतुर्णां तानेकीकृत्य सकृद्भक्षणं पापक्षयसाधनम् । ननु "न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतमित्यादि" मनुवाक्यैर्निषिद्धमुच्छिष्टादिदानं कथं कृतवंतस्तत्राह अनुमोदित इति । तस्यैवेयमिच्छा उत्पन्ना शुद्धसत्त्वांधसा महापुरुषोच्छिष्टेनातिपवित्रेणात्मानं पावयिष्यामीति तत उच्छिष्टं दृष्ट्वा मोदो जातस्तत्र प्रार्थनायामनुमोदनमात्रं कृतं न तु स्वयमुद्यम्य दत्तमिति । न चायं सर्वथा शूद्रः ब्रह्मबीजत्वात् , गृहस्थानां चायं धर्मः, तत्रापि साधारणेषु सेवा च पुष्टिमार्गे सस्नेहा कृपाफलं चैतत् यथौषधेनाजीर्णनिवृत्तिस्तथाऽन्नमयस्य देहस्य उच्छिष्टान्नसाधितदेहेन दोषसंताननिवृत्तिरित्यर्थः । तदाह तदपास्तकिल्बिष इति । उच्छिष्टभोजनैकनियमेनापि दोषनिवृत्तिर्लोकसिद्धेति स्मेत्युक्तम् । रोचकद्रव्येणारुचिनिवृत्ताविव सद्धर्मरुचिप्रतिबंधकदोषनिवृत्तौ स्वत एव रुचिर्जातेत्याह । एवमिति । प्रवृत्तस्येति निरंतरकरणमुक्तम् । नियमेन चित्तं शुद्धं जातमित्याह । विशुद्धचेतस इति । तेषां धर्मः अपरिग्रहसंगनिवृत्तिभगवच्चिंतनादिः । तत्र प्रेरणाव्यतिरेकेण आत्मन एव रुचिरुत्पन्ना सा च वृद्धिं प्राप्तेत्यर्थः । अस्य न्यायसिद्धत्वकथनाय लट्प्रयोगः ॥ २५ ॥ ❀ ❀ एवमांतरं दोषाभावं गुणं चोक्त्वा बहिर्गुणमाह तत्रेति । अन्वहमित्यशृणवमित्यनेन संबध्यते । परमहंसानां वा नित्योऽयं धर्म इति ख्यापयितुम् । कृष्णपदात्परमहंसा अप्येते भक्ता इति ज्ञापितम् । गानं प्रेमाधिक्यात् । प्रकृष्टज्ञानं तद्भावेन । अनुग्रहेणेत्याज्ञया श्रवणं बोध्यते । न तु प्रासंगिकम् । कथामनोरमपदाभ्यां अर्थमभिप्रायं ते बोधयंतीति लक्ष्यते । निर्बंधेन श्रवणाभावायाह । मनोरमा इति मनसो रमणं यासु । एवमेका श्रवणभक्तिः सिद्धा । तस्या नारदत्वपर्यंतं फलम् । ततः कीर्त्तनमिति । सांप्रतं तु कीर्त्तनम् । एवमग्रे स्मरणादिवृद्धौ तावद्भिः कल्पैः नवविधसाधनभक्तौ सिद्धायां प्रेम्णा भगवत्सायुज्यं भवतीति शास्त्रार्थः । तत्र श्रवणफलमाह ताः श्रद्धयेति । श्रवणादीनां नादृष्टद्वारा फलसाधकत्वम् । किंतु स्वरूपेणैव । फलं च भगवद्याथार्थ्यज्ञानम् । तदैव हि कीर्त्तने अधिकारः । उत्तरस्यादिना हि पूर्वस्यावसानम् । अतः श्रवणस्य नैरंतर्यं कर्त्तव्यम् । तदाह ताः कथाः अत्यादरेण । अनुपदमिति पदार्थाक्षरार्थसहितेन वाक्येन हि श्रवणम् । ततो भगवति रुचिः परं श्रवणद्वारा । तदाह प्रियश्रवसीति । प्रियं श्रवः श्रवणं कीर्तिर्वा यस्य । अंगेति कोमलामंत्रणमप्रतारणाय । प्रमाणबलं परित्यज्य इन्द्रियाणां स्वाभाविकविषयग्रहणं रुचिः ॥ २६ ॥ ❀ ❀ ततः किमत आह । तस्मिन्निति । रुच्या हि

भगवदनुभवार्थं यत्नो लोकसिद्धः। स च यत्नो ज्ञानात्मक इति तदाह रुचेः फलस्य कालांतरत्वं व्यावर्त्तयति। तदेति। रुचेर्दृढत्वाय लब्धेति। महामुने इति संबोधनं रुचिमत्योर्नियमार्थं प्रोषितभर्तृकावदभिध्यानमत्र मतिः शास्त्रतो वा याथार्थ्यज्ञानम्। तत्र स्खलनं विषयांतरानुसंधानं संदेहो वा तदुभयं नास्तीत्यस्खलिता। तत्रापि श्रवणपुरःसरेणेति प्रियश्रवसीत्युक्तम्। "यो यच्छ्रद्धः स एव सः" इति वाक्यात् परमश्रद्धायामुत्पन्नायां सफलरुचिरूपायां तत्त्वमावश्यकमिति तदाह ययाऽहमिति। प्रथमाधिकारार्थमाह। यया मत्या अहमेव ब्रह्म मय्येव सकलं जातं परे मायया परिकल्पितम्। एतत्स्थूलसूक्ष्मं शरीरं जगद्वा मायया पूर्वोक्तया। अस्य जगतः प्रतीतिमात्रस्य अहं ब्रह्माधिकरणं मायाकरणमिति ज्ञातवानित्यर्थः। प्रपंचव्यतिरिक्ततया ब्रह्मात्मानुभवो जात इति यावत्॥ २७॥ ❀ ❀ एवं भगवद्भावमापन्नस्य निरन्तरमनुवर्त्तमानश्रवणेन ज्ञानभक्तिभ्यां परमस्नेहो जात इत्याह इत्थमिति। श्रवणस्य भेदांतराणि सन्तीति तन्निवृत्त्यर्थमित्थमिति शरत्प्रावृषिकावृतू मासचतुष्टयं पंचकं वा। देहादिक्लेशस्यास्फुरणमाह। हरेरिति विशेषेण शृण्वत इति श्रवणानुवृत्तिः, न यतः कुतश्चित् तथा सति निरंगत्वात् फलं न साधयेत्। अतो मुनिभिर्महात्मभिः संकीर्त्यमानमिति। मुनिभिरिति स्वफले श्रवणवत् मननं ज्ञानसाधनम्। कीर्त्तनानुवृत्त्यर्थं महात्मभिरिति। "महात्मानस्तु मां पार्थेति" श्लोकद्वयार्थोऽत्रानुसन्धेयः। सा भक्तिः स्पर्शमणिरूपा जातेत्याह। आत्मरजस्तमोपहेति अंतःकरणं वसुदेवरूपं जातमित्यर्थः॥ २८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

उच्छिष्टलेपेत्यत्र। अयं धर्म इति। शूद्रायामत्यदानादिरूपः। तत्रापि साधारणेष्विति। शूद्रेपि सेवकव्यतिरिक्तेषु। 'न शूद्राये'ति वाक्यस्य स्नातकप्रकरणस्थत्वेन शूद्रस्य चाविशिष्टत्वेन तथेत्यर्थः। मार्गभेदेनाप्यदोषमाहुः सेवा चेत्यादि। अस्य न्यायेत्यादि। 'यस्य येन गुणः, तस्य तत्र रुचि'रिति लोकन्यायसिद्धत्वकथनाय स्मेत्यनुषज्य प्रजायत इति लट्प्रयोगः कृतः। अन्यथा व्यजायतेत्येव प्रयुञ्ज्यादित्यर्थः॥ २५॥ ❀ ❀ तत्रान्वहमित्यत्र। ख्यापयितुमिति। अन्वहमित्यस्य प्रगायतामित्यनेन सम्बन्ध इति शेषः। तद्भावेनेति भगवति प्रेम्णेत्यर्थः। तया इत्यादि। तया श्रवणभक्त्या नारदत्वं सम्पादितमिति सान्यस्याप्येतावत्त्वसम्पादिकेत्यर्थः। श्रवणफलमिति। श्रवणस्य प्राथमिकं फलम्। अत इति। उत्तरारम्भाभावे पूर्वविच्छेदस्याप्रयोजकत्वात्। अनुपदमिति। पदं लक्षीकृत्येत्यर्थः। हिर्हेतौ॥ २६॥ ❀ ❀ तस्मिन्नित्यत्र। नियमार्थमिति। कार्यकारणभावाव्यभिचारार्थम्। तत्त्वमावश्यकमिति। तद्रूपतावश्यभाविनीत्यर्थः। पूर्वोक्तयेति 'स एवेदं ससर्जे'त्यत्रोक्तया। अस्येत्यारभ्य यावदित्यन्तेन। 'इदं हि विश्वमि'ति श्लोकोक्तत्रेधानिरूपणमध्ये 'इतरो भगवा'निति प्रथमाधिकारकज्ञानस्यात्र स्वस्मिन् प्रथमं भवनं विवृतम्॥ २७॥ ❀ ❀ इत्थमित्यत्र। मासचतुष्टयमित्यनुक्त्वा 'शरत्प्रावृषिकावृतू' इत्युक्त्या सूचितमर्थान्तरमाहुः पञ्चकं वेति। वैद्यके 'प्रावृण्मिथुनकर्कटौ' 'सिंहकन्ये स्मृता वर्षास्तुलावृश्चिककौ शरदिति' कथनात् शरदो वृश्चिकान्तत्वेन पञ्चर्तुपक्षे प्रावृषश्चतुर्मासात्मकत्वेन षण्मासप्राप्तावपि आषाढीमारभ्यैव संन्यासिनः स्थितेरुक्तत्वात् गते मिथुने मासपञ्चकमेव ऋतुद्वयं भवतीति तथेत्यर्थः। ज्ञानसाधनमिति। तेषामित्यर्थात्॥ २८॥

श्रीगिरिधरकृता बालप्रबोधिनी

कां कृपां कृतवन्त इत्यपेक्षायां तां दर्शयंस्तत्फलं चाह–उच्छिष्टेति। महापुरुषोच्छिष्टभोजनेनात्मानं पावयिष्यामीति भावेन प्रार्थितैस्तैर्द्विजैर्योगिभिरनुमोदितो दत्तानुज्ञोऽहं उच्छिष्टस्य भुक्तावशिष्टस्य लेपान् पात्रलग्नान् अन्नादीन् सकृदेकवारं भुञ्जे स्म भुक्तवानस्मि। तत्तेन सकृद्भोजनेनाऽपास्तानि किल्बिषाणि भागवतधर्मरुचिप्रतिबन्धकरूपाणि पापानि यस्य तथाभूत आसम्। एवं नित्यं तत्सेवापूर्वकं तदुच्छिष्टभोजने प्रवृत्तस्य अत एव विशुद्धं प्रतिबन्धकपापरहितं चेतो यस्य तस्य मम तेषां महात्मनां धर्मे श्रवणकीर्त्तनादिभगवद्भजन एवात्मनो मनसो रुचिः प्रजायते स्मेत्यनुषङ्गः॥ २५॥ ❀ ❀ तत्र समाजे अन्वहं प्रतिदिनं कृष्णस्य परमानन्दविग्रहस्य भगवतः कथाः लीलाः प्रकर्षेण परमप्रेम्णा गायतां तेषामनुग्रहेण प्रीतिपूर्वकमाज्ञया ता मनोहरा मनोज्ञाः कृष्णकथा अहमशृणवं श्रुतवानस्मि। ताः कृष्णकथा अनुपदं प्रतिक्षणं निरन्तरमनुशृण्वतो मे प्रियं श्रवो यशो यस्य तस्मिन् भगवति मम रुचिरभवदिति। अन्वयभेदात् मे ममेति पदद्वयेऽपि न पुनरुक्तिदोषः। अङ्गेति सम्बोधनेन त्वं मदीयोऽसि अतस्त्वैतत्स्वरहस्यं सुगोप्यमपि कथयामीति सूचयति॥ २६॥ ❀ ❀ मननेन त्वयाऽप्येतत्सर्वं ज्ञायत एवेति सूचयन् सम्बोधयति–हे महामुने तदा रुच्युत्पत्त्यनन्तरमेव तस्मिन् भगवति लब्धा रुचिः प्रमाणबलं विनैव विषयग्रहणात्मिका बुद्धिवृत्तिर्येन तस्य मम तस्मिन् प्रियश्रवसि अस्खलिता विषयान्तरानुसन्धानरहिता मतिर्बुद्धिवृत्तिर्बभूव। यया मत्या विद्यात्मिकया अहमेतत्सदसत् स्थूलसूक्ष्मशरीरद्वयं स्वमायया आत्मविद्यया ब्रह्मणि ब्रह्मांशत्वादंशांशिनोरभेदात् ब्रह्मस्वरूपे परे देहद्वयव्यतिरिक्ते मयि कल्पितं देवोऽहं मनुष्योऽहमित्यारोपितं पश्ये पश्यामीत्यन्वयः। भक्त्या ब्रह्मात्मैक्यसाक्षात्कारेण अविद्यानिवृत्त्या तन्मूलको देहान्तःकरणाद्यात्माध्यासोऽपि निवृत्त इत्यर्थः॥ २७॥ ❀ ❀ इत्थं शरत्प्रावृषिकावृतू मासचतुष्टयपर्यन्तं अनुसवं प्रतिसमयं तैर्महात्मभि-

भगवद्भक्तैर्मुनिभिः सङ्कीर्त्यमानं अमलं सर्वदोषनिवर्त्तकं हरेर्यशो विशृण्वतो मे मम आत्मन्यन्तःकरणे ये रजस्तमसी तयोरपहन्त्री भक्तिः प्रवृत्ता, भगवति सर्वतोऽधिको दृढः स्नेहो जात इत्यर्थः ॥ २८ ॥

हिन्दी अनुवाद

उनकी अनुमति प्राप्त करके बरतनोंमें लगा हुआ जूँठन मैं एक बार खा लिया करता था। इससे मेरे सारे पाप धुल गये। इस प्रकार उनकी सेवा करते-करते मेरा हृदय शुद्ध हो गया और वे लोग जैसा भजन-पूजन करते थे, उसीमें मेरी भी रुचि हो गयी॥ २५॥ ❀ ❀ प्यारे व्यासजी! उस सत्सङ्गमें उन लीलागानपरायण महात्माओंके अनुग्रहसे मैं प्रतिदिन श्रीकृष्ण की मनोहर कथाएँ सुना करता था। श्रद्धापूर्वक एक-एक पद श्रवण करते-करते प्रियकीर्ति भगवान्‌में मेरी रुचि हो गयी॥ २६॥ ❀ ❀ महामुने! जब भगवान् में मेरी प्रीति हो गयी, तब उन मनोहरकीर्ति प्रभुमें मेरी बुद्धि भी निश्चल हो गयी। उस बुद्धिसे मैं इस सम्पूर्ण सत् और असत् रूप जगतको अपने परब्रह्मस्वरूप आत्मामें मायासे कल्पित देखने लगा॥ २७॥ ❀ ❀ इस प्रकार शरद् और वर्षा—इन दो ऋतुओंमें तीनों समय उन महात्मा मुनियोंने श्रीहरिके निर्मल यशका सङ्कीर्तन किया और मैं प्रेमसे प्रत्येक बात सुनता रहा। अब चित्तके रजोगुण तमोगुणको नाश करनेवाली भक्ति का मेरे हृदयमें प्रादुर्भाव हो गया॥ २८॥

तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः। श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च॥ २९॥
ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम्। अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः॥ ३०॥
येनैवाहं भगवतो वासुदेवस्य वेधसः। मायानुभावमविदं येन गच्छन्ति तत्पदम्॥ ३१॥
एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्। यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्॥ ३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

यस्येति तस्य ज्ञानशुद्धत्वंपदार्थस्य दृढभक्तिमतो मे प्रश्रितस्य विनीतस्य॥ २९॥ ❀ ❀ गुह्यतममिति। साधनभूतधर्मतत्त्वज्ञानं गुह्यं तत्साध्यं विविक्तात्मज्ञानं गुह्यतरं तत्प्राप्येश्वरज्ञानं गुह्यतमम्। भगवतोदितं भागवतं शास्त्रमन्ववोचन्नुपदिष्टवन्तः॥ ३०॥ ❀ ❀ तदेव ज्ञानं पूर्वोक्तत्वंपदार्थज्ञानाद्विवेकेन दर्शयति। येनैवेति। अविदं ज्ञातवानहम्॥ ३१॥ ❀ ❀ तत्साधनधर्मरहस्यं च सूचितमित्याह। एतदिति। तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्तकं तत्त्वशोधकमिति यावत्। किं तत्। भगवति भावितं समर्पितं यत्कर्म तत्। कथंभूते भगवति ईश्वरे सर्वनियंतरि। एवमपि च ब्रह्मण्यप्रच्युतपूर्णरूपे॥ ३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु सद्गुरूपदेशमंतरेण केवलयशःश्रवणेनैव कथं ज्ञानोदय इति चेत्तत्राह—तस्येति युग्मेन। एवंभूतस्य मे ममोत्पन्नप्रेमभक्तेः साक्षाद्भगवता देवकीनन्दनेनोदितं ज्ञायतेऽनेनेति ज्ञानं ज्ञानशास्त्रम्। तच्च केवलज्ञानप्रधानात् भक्तिमिश्रज्ञानप्रधानं शास्त्रगुह्यं ततोपि ज्ञानमिश्रभक्तिप्रधानं गुह्यतरं ततोपि केवलभक्तिप्रधानं गुह्यतमं यदुद्धवं ब्रह्माणं च प्रति श्रीभागवतमर्जुनं प्रति श्रीगीताभिधं च गमिष्यन्तः श्वो वयं यास्याम इति विभाव्यान्ववोचन्। सन्दर्भस्तु ज्ञानं ज्ञानविज्ञानादिसारं चतुःश्लोकीरूपं तदर्थरूपं न तु साक्षाच्छ्लोकात्मकं तत्रानधिकारादित्यर्थः। तस्य रहस्याख्यभक्त्येकतात्पर्यादिति भावः। साक्षाद्भगवतोदितमिति "पुरा मया प्रोक्तमजाय" इत्यादिकं स्मारयति। गुह्यतमं ब्रह्मज्ञानादपि रहस्यतममित्याह॥ २९-३०॥ ❀ ❀ येनैव श्रीभागवतेन भगवतो मायायाश्चिच्छक्तेरैश्वर्यमाधुर्यज्ञानस्य कृपाशक्तेस्त्रिगुणमायाशक्तेश्चानुभावं कार्यं प्रभावं वाऽविदं ज्ञातवानस्मि "त्रिगुणात्मिकाथ ज्ञानं च विष्णुशक्तिस्तथैव च। मायाशब्देन भण्यन्ते कृपालीलार्थवेदिभिः॥" इति शब्दमहोदधिः। "माया च वयुनं ज्ञानम्" इति निघण्टुः। "माया स्याच्छाम्बरीबुद्ध्योः" इति त्रिकाण्डशेषः। "माया दम्भे कृपायां च" इति विश्वः। अत एव स्वरूपभूतया नित्यशक्त्या मायाख्यया युतम्। "अतो मायामयं विष्णुं प्रवदन्ति सनातनम्" इति माध्वभाष्यप्रमाणिता श्रुतिश्च। एवमग्रिमेषु ग्रन्थेष्वपि मायाशब्देन यथासम्भवं चिच्छक्तित्रिगुणशक्त्यादयो व्याख्येयाः। यद्वाऽविदं हेयत्वेन ज्ञातवानस्मि। स्वमते मायाशब्दस्य चिच्छक्तिवाचित्वे तूपादेयत्वेन तत्पदं तस्य चरणारविन्दं गच्छन्ति परमप्रीत्या साक्षात्कुर्वन्ति इमं स्वनिगममित्यादि श्रीनारदत्वप्राप्तौ तत्फलपराकाष्ठादर्शनाच्च॥ ३१॥ ❀ ❀ एवं च शुद्धां निर्गुणां भक्तिं मयि प्रेमपर्यंतां प्रवर्त्यानुभाव्य च भक्तेः साक्षाद्वाचकं श्रीभगवदुक्तं श्रीभागवतं चोपदिश्य ज्ञानकारणं ज्ञानं च मोक्षप्रयोजनकमजिज्ञासवेपि मह्यं सम्प्रति बालस्यास्य वयोवृद्धावायत्यां कदाचिज्जिज्ञासा जनिष्यते वेति विभाव्य नैरपेक्षार्थभंग्या ज्ञापितमित्याह—एतदिति। संसूचितं न तु साक्षादुक्तं मत्प्रयोजनाभावादिति भावः। किं तत् तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकम्। तदेव किं यत्स्वस्वभावानुसारेणेश्वरे परमात्मनि वा भगवति षडैश्वर्यवति वा ब्रह्मणि तदीयनिर्विशेषस्वरूपे वा कर्म भावितं समर्पितम्॥ ३२॥

श्रीमद्वीरराघवव्याख्या

तस्य प्रवृत्तभक्तेरनुरक्तस्य बालस्यापि प्रश्रितस्य विनीतस्य हतमेनः पापं यस्य श्रद्धायुक्तस्य दांतस्य जितेंद्रियस्यानुचरस्यानुवर्तिनो मे मह्यम् ॥ २९ ॥ ❀ ❀ यद्भगवता साक्षादुदितं ज्ञानं तद्गमिष्यंतः गंतुमुद्यता दीनवत्सलाः योगिनः कृपयाऽवोचन्नुपदिदिशुरित्यर्थः ॥ ३० ॥ ❀ ❀ ज्ञानं विशिनष्टि येन ज्ञानेनाहं भगवतो वेधसः विश्वविधातुर्वासुदेवस्य मायानुभावं त्रिगुणात्मिकप्रकृतिमहिमानमविदं ज्ञातवानस्मि । अनेन विरोधिस्वरूपज्ञानमुक्तं येन च ज्ञानेन तस्य वासुदेवस्य परं स्थानं गच्छंति । अनेन प्राप्यप्रापकविषयज्ञानमुक्तं अर्थपंचकज्ञानमुपदिदिशुरिति फलितम् ॥ ३१ ॥ ❀ ❀ तदेवं स्वपूर्वजन्मवृत्तांतदृष्टांतेन भगवद्गुणश्रवणादेस्तद्भक्तियोगसाधनत्वमुक्तं भक्तियोगस्य शश्वद्ब्रह्मगर्भत्वं पूर्वमेव प्रतिपादितं धर्मकृतेऽनुशासतः स्वभावरक्तस्येत्यनेन त्रैर्गिककर्ममूलकतापत्रयाभिहतजनोद्देशेन पुनस्त्रैवर्गिकधर्मानुशासनं तापत्रयनिमित्तधर्मार्थत्वेन निंदितमित्युक्तं तेनेश्वरे न चार्पितं कर्मेत्यनेन चानभिसंहितफलस्य कर्मणो भक्तियोगनिष्पादनद्वारा तापत्रयनिवृत्तिहेतुत्वं वदंस्त्रैवर्गिकस्य कर्मणः पुनः पुनः तापत्रयहेतुत्वमेव सदृष्टांतमुपपादयति एतदिति त्रिभिः । हे ब्रह्मंस्तापत्रयचिकित्सितं तापत्रयप्रतीकारमित्यर्थः, तदेतदेव संसूचितं श्रुतिस्मृत्यादिभिरिति शेषः । किं यत् ब्रह्मणि ईश्वरे भगवति भावितं समर्पितं कर्मैव तापत्रयचिकित्सितमिति सूचितमित्यर्थः । "धर्मेण पापमपनुदति, अविद्यया मृत्युं तीर्त्वे"त्यादिका श्रुतिः, स्मृतिश्च "यज्ञदानतपःकर्म पावनानि मनीषिणाम्" इत्यादिका । तापत्रयं हि पापमूलकं अनभिसंहितफलेन कर्मणा पापनिवृत्तिभक्तियोगनिष्पत्तिद्वारा तापत्रयं निवर्त्तत इति श्रुतिस्मृतिभिः सूच्यते ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु सद्गुरूपदेशमंतरेण केवलं यशःश्रवणेनैव कथं ज्ञानोदय इति चेत्तत्राह तस्येति ॥ २९ ॥ ❀ ❀ गमिष्यंतश्चातुर्मास्यानंतरम् ॥ ३०-३१ ॥ ❀ ❀ एतन्मयोक्तं ज्ञानं तापत्रयात्मकसंसारनिवर्तकौषधं समीचीनं सूचितं लोकस्येति शेषः । तस्मादेतादृशं ज्ञानमेवापाद्यमिति भावः । तर्हि कर्मकरणं व्यर्थमिति तत्राह यदीति । यायजूकैः क्रियमाणमग्निष्टोमादि तदपि यदि ब्रह्मणि अपरिच्छिन्नगुणे ईश्वरे ईशादपि परे हरौ भावितमर्पितं तर्हि ज्ञानमुत्पद्यते तेन तापत्रयचिकित्सितं एतदुक्तं भवति ब्रह्मार्पणबुद्ध्या क्रियमाणेन कर्मणा शुद्धांतःकरणस्य विषयविरक्तिद्वारा भगवति तीव्रया भक्त्या जनितापरोक्षज्ञानेन तापत्रयात्मकः संसारो निवर्तत इति यत् ब्रह्मणि भावितं यत्कर्म तदेतत्तापत्रयचिकित्सितं संसूचितमित्येकान्वयो वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्येति युग्मकम् । एतदनन्तरं परमरहस्यमन्यदप्युपदिदिशुरित्याह ज्ञानविज्ञानादिसम्वलितं चतुश्लोकीरूपमित्यर्थः । तस्य रहस्याख्यभक्त्येकतात्पर्य्यत्वादिति भावः । साक्षाद्भगवतोदितमिति पुरा मया प्रोक्तमजायेत्यादिकं स्मारयति । गुह्यतमं ब्रह्मज्ञानादपि रहस्यतमम् ॥ २९-३० ॥ ❀ ❀ अविदं हेयत्वेन ज्ञातवानस्मि । स्वमते मायाशब्दस्य चिच्छक्तिवाचित्वे तूपादेयत्वेन । तत्पदं तस्य चरणारविन्दं गच्छन्ति परमप्रीत्या साक्षात् कुर्व्वंति । इमं स्वनिगममित्यादिवक्ष्यमाणात् श्रीनारदत्वप्राप्तौ तत्फलपराकाष्ठादर्शनाच्च ॥ ३१ ॥ ❀ ❀ तदेवं स्वचरितद्वारा सर्व्वनिरपेक्षमहद्द्वारकश्रीभगवद्यशःश्रवणमेव परश्रेयस्त्वेनोक्तम् । तत्र यत् पूर्व्वम् इदं हि पुंसस्तपसः श्रुतस्येत्यादिना तपआदिजन्यमुत्तमश्लोकगुणानुवर्णनमुक्तं तत्तु तस्य तदासक्तानां तद्द्वाराविर्भावित्वमेवेति ज्ञापितम् । अथ तस्य तदप्युपपादयितुं सामान्यतस्तावत्त्रिविधपरमतत्त्वाविर्भावे समर्पितस्य कर्म्मणो माहात्म्यमाह एतदिति त्रिभिः । संसूचितं शास्त्रज्ञैः । ईश्वरः परमात्मा तस्मिन् वा भगवति वा ब्रह्मणि वेत्यर्थः ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तस्यैवम्भूतस्य मे मम उत्पन्नप्रेमभक्तेः । साक्षाद्भगवता देवकीनंदनेन उदितम् । ज्ञायतेऽनेनेति ज्ञानं ज्ञानशास्त्रम् । तच्च केवलज्ञानप्रधानात् भक्तिमिश्रज्ञानप्रधानं शास्त्रं गुह्यम् । ततोऽपि ज्ञानमिश्रभक्तिप्रधानं गुह्यतरम् । ततोऽपि केवलभक्तिप्रधानं गुह्यतमम् । यदुद्धवं ब्रह्माणञ्च प्रति श्रीभागवतम् अर्ज्जुनं प्रति श्रीगीताभिधञ्च । गमिष्यंतः श्वो वयं यास्याम इति विभाव्य अन्ववोचन् उपदिष्टवन्तः ॥ २९-३० ॥ ❀ ❀ येनैव श्रीभागवतेन भगवतो मायायाश्चिच्छक्तेरैश्वर्य्यमाधुर्य्यज्ञानस्य कृपाशक्तेस्त्रिगुणमायाशक्तेश्च अनुभावं कार्य्यं प्रभावं वा अविदं ज्ञातवानस्मि । 'त्रिगुणात्मिकाथ ज्ञानञ्च विष्णुशक्तिस्तथैव च । मायाशब्देन भण्यते शब्दतत्त्वार्थवेदिभिरि'ति शब्दमहोदधिः । 'माया च वयुनं ज्ञानमि'ति निघण्टुः । 'माया स्याच्छाम्बरीबुद्ध्योरि'ति त्रिकाण्डशेषः । 'माया दम्भे कृपायाञ्चे'ति विश्वः । अत एव 'स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः । अतो मायामयं विष्णुं प्रवदन्ति सनातनमि'ति माध्वभाष्यप्रमाणिता श्रुतिश्च । एवमग्रिमेष्वपि ग्रन्थेषु मायाशब्देन यथासम्भवं चिच्छक्तित्रिगुणशक्त्यादयो वाचनीयाः ॥३१॥ ❀ ❀ एवञ्च शुद्धां निर्गुणां भक्तिं मयि प्रेमपर्य्यंतां प्रवर्त्त्य अनुभाव्य च भक्तेः साक्षाद्वाचकं भगवदुक्तं श्रीभागवतशास्त्रञ्चोपदिश्य ज्ञानकारणं ज्ञानञ्च मोक्षप्रयोजनकमजिज्ञासवेऽपि मह्यं सम्प्रति बालस्यास्य वयोवृद्धावायत्यां कदाचित् जिज्ञासा जनिष्यते वेति विभाव्य नैरपेक्ष्यार्थं भङ्ग्या ज्ञापितमित्याह एतदिति । संसूचितं न तु साक्षादुक्तं मत्प्रयोजनाभावादिति भावः । किं तत् तापत्र-

यस्याध्यात्मिकादेः चिकित्सितं भेषजं निवर्त्तकम् । तदेव किं यत् स्वस्वभावानुसारेण ईश्वरे परमात्मनि वा भगवति षडैश्वर्य्यवति वा ब्रह्मणि तदीयनिर्विशेषस्वरूपे वा कर्म्म भावितं समर्पितम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

प्रश्रितस्य विनीतस्य ॥ २९ ॥ ❀ ❀ यत्साक्षाद्भगवतोदितं गुह्यं पुराणगुह्यं सूक्ष्मं श्रीभागवतं तेभ्यो योगिभ्यः उपदिष्टं ज्ञानं तदर्थज्ञानं तत् तदेव संप्रदायप्राप्तम् अन्ववोचन् उपदिदिशुः ॥ ३० ॥ ❀ ❀ येनैव अर्थतः स्वरूपतश्च मुनिभ्यः प्राप्तेन सूक्ष्मभागवतेन वेधसो निखिलविधातुर्वासुदेवस्य मायानुभावं मायया प्रकृत्या स्वशक्तिभूतया विश्वसृष्टिनाशादिकौशलात्मकमनुभावम् अविदम् ज्ञातवानस्मि । एवं देवर्षेर्भगवदवताराणां श्रीव्यासादीनामप्युपदेष्टुरस्योपदेष्टृन् सनकादीन् देवर्षिगुरून् वेदप्रसिद्धान् विहाय प्राकृता योगिनस्तदुपदेष्टारो न कल्पनीयाः, उपस्थितपरित्यागेऽनुपस्थितस्वीकारे च मानाभावात् ॥ ३१ ॥ ❀ ❀ किंच एतदपि संसूचितं तैर्योगिभिरिति शेषः, किं तत् यद्भगवति भावितं समर्पितं कर्म तत्तापत्रयचिकित्सितम् आध्यात्मिकादिदुःखप्रतिकारकमिति ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत्र हि भगवदावेशव्यतिरेकेणाविर्भावा न भविष्यंतीति तेषां कृपया तज्जातमित्याह तस्यैवमिति द्वाभ्याम् । पूर्वजातसाधनानां वासुदेवपर्यंतं अनुवृत्तिः कारणीयेति तान्यनुवदति । अनुरक्तस्येति । अनुवृत्तिपर्यंतानि गृहीतानि । शुश्रूषालक्षणो विनयः भिन्नप्रक्रमेणेति पृथगुक्तः तथा पापनिवृत्तिः अत्युपकारित्वादीनत्वस्य पृथगुक्तिः । अनुक्तसर्वसमुच्चयार्थं चकारः । अनुवादे क्रमापेक्षाऽभावाद्विपर्ययेण कथनं न दोषः ॥ २९ ॥ ❀ ❀ अस्ति किंचिज्ज्ञानं सर्ववेदांतप्रतिपाद्यं पंचरात्राद्यागमैश्च गुरूपदेशेन च यदभिव्यज्यते । यथा कं ब्रह्म खं ब्रह्मेत्युपाख्याने यस्मिन् जाते पुमान् ब्रह्मविद्भवति सर्वज्ञस्तेजस्वी च । ततोऽपि महोपनिषत्प्रतिपाद्यं देवगुह्यत्वाद्गुह्यतरं ततोऽपि पुरुषोत्तमप्रतिपाद्यं "भक्त्या मामभिजानातीति" रूपं यस्मिन्ननुसंहिते भगवदाविर्भावो भवत्येव तद्गुह्यतमम् । साक्षाद्भगवता कृष्णेनोक्तम् । यत्तदिति । विशेषतोऽवक्तव्यम् । तेषामपि हृदये भगवदिच्छया उपदेशार्थमागतम् । अनु पश्चादवोचन् । एतस्य परमकाष्ठात्वज्ञापनायाह । गमिष्यंत इति । एतत्कथने प्रश्नांतरं साधनांतरं च नास्तीत्याह । कृपयेति । तत्रापि हेतुः । दीनवत्सला इति । वत्सं लातीति वत्सलो ग्राहकः स्नेहः तद्वान् वा । पिता पुत्र इव दीनेषु त इत्यर्थः ॥ ३० ॥ ❀ ❀ ततस्तव किं जातं तद्वक्तव्यमित्याकांक्षायामाह । येनैवाहमिति । भगवतो वासुदेवस्येति हृदये विद्यमानस्यैव । अहो इत्याश्चर्यं विद्यमानः प्रकाशमान एव न स्फुरतीति मायानुभावः । लेखनदशाऽनुसंधेया । येन गच्छंति तत्पदमिति क्रममात्रेण हेतुना, न तु तत्र कश्चन व्यापारो मृग्य इति भावः ॥ ३१ ॥ ❀ ❀ एवं भगवत्पदप्राप्तिपर्यंतं पदार्था निरूपितास्तत्रैवं संदेहः "ते मय्यपेताखिलचापलेऽर्भके" इत्यादिसाधनानि कुतो भवंतीति कर्मकालादीनां प्रतिबंधकत्वात् । तत्र कालस्य प्रतिबंधकत्वाभावाय उपायमाह । एतदिति । कथारत्यभावे अशनादयः प्रतिबंधका दृष्टाः कर्म चादृष्टद्वारा तद्द्वारा हेतुः कालः तत्र प्रथमं दृष्टप्रतिबंधको दूरीकर्त्तव्यः स च तापत्रयात्मकः "एतैरुपद्रुत इति" वचनात् । तत्र यद्यपि तत्संगेन कथा साधनत्वेनोक्ता तथापि बहुसापेक्षत्वात्सैव न भविष्यति स्वतंत्रमेकं साधनमाह । एतत् वक्ष्यमाणम् । सम्यक् सूचितं न स्पष्टतयोक्तं नापि संदिग्धम् । तस्य परिज्ञानं तव भविष्यतीत्यभिप्रायेणाह । हे ब्रह्मन् ! तापत्रयनिराकरणार्थं चिकित्सितम् । यथा विषं सर्वनाशकमपि सर्वरोगनिवर्तकत्वेन द्रव्यांतरैर्भावनया चिकित्स्यते तथा कर्मापि सर्वनाशकं सर्वदोषनिवृत्तये भगवद्रूपेण चिकित्स्यमत इत्याह । यदीश्वर इति । प्रभुरूपेण षडैश्वर्यसंपन्ने उत्कृष्टैः पदार्थैः सुंदरे ब्रह्मणि अपाखंडे वेदांतवेद्ये कर्म भावितं योजितमित्यर्थः । भावनया प्रापितं वा ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्यैवमित्यत्र । पृथगुक्तिरिति । बालपदेन पृथक्कथनम् ॥ २९ ॥ ❀ ❀ ज्ञानं गुह्यतममिति श्लोकं व्याकुर्वन्ति अस्ति किञ्चिदित्यादिना । वत्सं लातीत्यादि । अत्र स्नेहपक्षे दीनेषु वत्सलो येषामिति व्यधिकरणपदो बहुव्रीहिः ॥ ३० ॥ ❀ ❀ येनैवेत्यत्र । अहो इति पाठान्तरं ज्ञेयम् । ननु प्रकाशमानस्य कथमस्फूर्तिरित्यत आहुः लेखनदशानुसन्धेयेति । यथा हृदि विद्यमानानां प्रकाशमानानामपि वाक्यानां लेखनवैयग्र्येण न स्फूर्तिः, तथात्रेति बोध्यमित्यर्थः । भगवदुक्तज्ञानस्य फलं वदन्तो येनेतिपदस्यार्थमाहुः क्रमेत्यादि । तथा च मायानुभावज्ञानक्रममात्रेण, न तु तद्व्यापारीकृत्येत्यर्थः ॥ ३१ ॥ ❀ ❀ एतदित्यत्र । एतैरुपद्रुत इति । 'तस्मिन् महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति । ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान्न स्पृशन्त्यशनतृड्भयशोकमोहाः' 'एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः । न करोति हरेर्नूनं कथामृतनिधौ रतिम्' इति वचनादित्यर्थः । योजितमिति 'यत्करोषि यदश्नासी'त्युक्तया रीत्या भगवत्यर्पितम् । तत्र 'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसी'ति कथनात् । भावनया प्रापितमिति । यथोक्तं राजधर्मे व्यासेन 'यथा हि पुरुषो वृक्षं छिन्द्यात्परशुना वने ।

कर्तुरेव भवत्येवं परशोर्न कथञ्चन ।। न चैतदिष्टं कौन्तेय यदन्येन कृतं फलम् । प्राप्नुयाद्यदि तस्माद्वापीश्वरे तन्निवेशये'ति । प्राप्नुयादिति । अन्यः प्राप्नुयात् । तथा च ईश्वरः कारयतीति भावनया ईश्वरे प्रापितमित्यर्थः । अत एवं प्रकारद्वयेन भगवत्सम्बद्धं कर्मैव तापत्रयचिकित्सितरूपमिति तात्पर्यम् ।। ३२ ।।

श्रीगिरिधरकृता बालप्रबोधिनी

तस्यैवं श्रवणादिना प्रवृत्तज्ञानभक्तेरपि मे गमिष्यन्तः चातुर्मास्यसमाप्त्यनन्तरं गन्तुमुद्यतास्ते महात्मानः कृपया अस्य ज्ञानादिशैथिल्यं मा भवत्विति इच्छया गुह्यतमं ज्ञानमन्ववोचन्निति द्वयोरन्वयः । साधनभूतधर्मतत्त्वज्ञानं गुह्यम्, तत्साध्यं विविक्तात्मज्ञानं गुह्यतरम्, तत्प्राप्यं पुरुषोत्तमज्ञानं गुह्यतममिति विवेकः । तज्ज्ञानं तर्हि कथं प्रवृत्तमित्यपेक्षायामाह–यदिति, यज्ज्ञानं भगवता ब्रह्माणं प्रति अर्जुनं प्रति उद्धवं प्रति साक्षादुदितमुक्तं तदित्यन्वयः । ननु तेषामेवं ज्ञानोपदेशे किं प्रयोजनमित्यपेक्षायामाह–दीनवत्सला इति । दीनेषु तेषां कृपा स्वाभाविक्येव न तु किञ्चित्प्रयोजनमुद्दिश्येति भावः । तथापि त्वयि कथं कृपां कृतवन्त इत्यपेक्षायां स्वस्य कृपापात्रत्वघटकीभूतान् दीनत्वादिशिष्यगुणानाह–बालस्येति, दीनस्येत्यर्थः । श्रद्दधानस्येति, शास्त्रगुरुवाक्येषु श्रद्धावत इत्यर्थः । बालस्य श्रद्धामात्रेण किं स्यात् इन्द्रियपारवश्येन चाञ्चल्यसम्भवादित्याशङ्क्य तदपि नास्तीत्याह–दान्तस्येति, जितेन्द्रियस्येत्यर्थः । अनुचरस्येति, स्वसेवकस्येत्यर्थः । सेवाऽपि परमप्रेम्णेत्याह–अनुरक्तस्येति, भगवति गुरौ च परमप्रेमवत इत्यर्थः । प्रश्रितस्येति, विनीतस्येत्यर्थः । सर्वत्र हेतुमाह–हतैनस इति, निष्पापस्येत्यर्थः ।। २९-३० ।। ❀ ❀ येनैव भगवदुक्तज्ञानेन भागवतशास्त्रेणाहं भगवतो वासुदेवस्य सर्वान्तर्यामिणः श्रीवसुदेवनन्दनस्य मायानुभावं लीलामाहात्म्यमविदं ज्ञातवानस्मि । तत्प्रभावस्य दुर्ज्ञेयत्वं सूचयन् भगवन्तं विशिनष्टि–वेधस इति, अनन्तकोटिब्रह्माण्डविधातुरित्यर्थः । तज्ज्ञानस्य फलमाह–येनेति, येन मायानुभावज्ञानेन भगवद्भक्तास्तस्य भगवतः पदं स्थानं गच्छन्तीत्यर्थः ।। ३१ ।। ❀ ❀ नन्वत्र प्रथमं महत्सेवा ततश्च तत्कृपा ततश्च तद्धर्मे श्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिः । तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिस्ततो भगवतो माहात्म्यज्ञानमिति क्रमो दर्शितः, तत्र तापत्रयाभितप्तस्य पूर्वोक्तप्रकारेण महत्सेवैव न सम्भवति, कुतस्तत्कृपादीत्याशङ्क्य पुनस्तापत्रयनिवर्त्तकोपायकथनपूर्वकं भगवत्तत्त्वज्ञानपर्यन्तं क्रममाह–एतदिति सप्तभिः । इदं रहस्यं तवापि विदितमेवेति सूचयन्सम्बोधयति–हे ब्रह्मन्निति । यदीश्वरे सर्वनियन्तरि ब्रह्मणि सर्वव्यापके भगवति ऐश्वर्यादिषड्गुणपूर्णे भावितं समर्पितं कर्म तदेतदाध्यात्मिकाधिदैविकाधिभौतिकतापत्रयस्य चिकित्सितं भेषजं तापजनकपापनिवर्तकत्वेन निवर्तकं संसूचितम् । "धर्मेण पापमपनुदति, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" 'यज्ञदानतपःकर्म पावनानि मनीषिणाम्' इत्यादिश्रुतिस्मृतिभ्यां सम्यक् प्रतिपादितमित्यर्थः ।। ३२ ।।

हिन्दी अनुवाद

मैं उनका बड़ा ही अनुरागी था, विनयी था; उन लोगोंकी सेवासे मेरे पाप नष्ट हो चुके थे। मेरे हृदयमें श्रद्धा थी, इन्द्रियोंमें संयम था एवं शरीर, वाणी और मनसे मैं उनका आज्ञाकारी था ।। २९ ।। ❀ ❀ उन दीनवत्सल महात्माओंने जाते समय कृपा करके मुझे उस गुह्यतम ज्ञानका उपदेश किया, जिसका उपदेश स्वयं भगवान्ने अपने श्रीमुखसे किया है ।। ३० ।। ❀ ❀ उस उपदेशसे ही जगत्के निर्माता भगवान् श्रीकृष्णकी मायाके प्रभावको मैं जान सका, जिसके जान लेनेपर उनके परमपदकी प्राप्ति हो जाती है ।। ३१ ।। ❀ ❀ सत्यसंकल्प व्यासजी! पुरुषोत्तम भगवान् श्रीकृष्णके प्रति समस्त कर्मोंको समर्पित कर देना ही संसारके तीनों तापोंकी एकमात्र औषधि है, यह बात मैंने आपको बतला दी ।। ३२ ।।

आमयो यश्च भूतानां जायते येन सुव्रत । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ।। ३३ ।।
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ।। ३४ ।।
यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ।। ३५ ।।
कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् । गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वम् । सामग्रीभेदेन घटत इति सदृष्टांतमाह द्वाभ्याम् । य आमयो रोगो येन घृतादिना जायते तदेव केवलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्तयतीत्यर्थः । किन्तु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्येव यथा ।। ३३ ।। ❀ ❀ तथात्मविनाशाय कर्मनिवृत्तये कल्पन्ते समर्था भवन्ति, परे ईश्वरे कल्पिता अर्पिताः सन्तः । अत्र च प्रथमं महत्सेवा ततश्च तत्कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिस्तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिस्ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भाव इति

क्रमो दर्शितः ॥ ३४ ॥ ❀ ❀ ननु च ज्ञानेनाज्ञानप्राप्तकर्मनाशस्तच्च ज्ञानं भक्तियोगाद्भवति कथं कर्मणा कर्मनाशः स्यात्तत्राह । यदत्रेति ॥ ३५ ॥ ❀ ❀ भगवदर्पणेन क्रियमाणं कर्म भक्तियोगं जनयतीति सदाचारेण दर्शयति । यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति तदा श्रीकृष्णस्य गुणनामानि गृणंत्यनुस्मरंति च कृष्णमित्यर्थः । इयं च भगवच्छिक्षा-"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इति ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राक्षिपति नन्विति । इत्यर्थ इति । पवनं पवित्रीकरणमिति पूङ्धातोरर्थः । तच्च मलापकर्षणमेव मलदूरीकरणमिति यावत् । अत उक्तं निवर्त्तयतीति ॥ ३३ ॥ ❀ ❀ सर्वे इत्युक्त्या शुभकर्मणामपि "सत्त्वं सुखे संजयति" इत्युक्तेस्संसृतिहेतुत्वेन बन्धकत्वमेव न हि सुवर्णशृङ्खला बन्धिका नायस्येव बन्धिकेति युक्तं सौवर्ण्यमौल्यमात्रमेवाधिकं बन्धकत्वं तुल्यमेवास्येति । तथा च शुभकर्मणोपि सुखासक्तिजनकत्वेन बन्धकत्वमेवेत्यर्थः । संसृतिहेतवो बन्धनहेतवः ॥ ३४ ॥ ❀ ❀ अत्राक्षिपति नन्विति । भक्तियोगसमन्वितं यज्ज्ञानं तत् हि निश्चितमत्र लोके भगवत्परितोषणं यत्कर्म पुरुषैः क्रियते तदधीनमित्यन्वयः । भगवदर्पितकर्मणा भगवद्भक्तियुक्तं ज्ञानमुत्पद्यते । तथा च कर्मनिवर्त्तकभक्तियुक्तज्ञानोत्पादनद्वारा कर्मणा कर्मनाशकत्वमिति भावः । चक्रवर्त्तिनापीत्थमेव व्याख्यातम् । तथा हि तदेवेश्वरार्पितं कर्म सत्त्वशोधकत्वाद् ज्ञानसाधनं भवतीत्याह । भगवदर्पितत्वाद्भगवत्परितोषणं निष्कामं यत्कर्म तदधीनं ज्ञानं तज्जन्यत्वादित्यर्थः । "कर्मणा ज्ञानमाप्नोति ज्ञानेनामृती भवति अथामृतानि कर्माणि" इति श्रुतेः । कर्मणा ज्ञानं जायते हि यतोऽतः कर्म ज्ञानद्वारा बन्धनिवर्त्तकमिति भावः । कीदृशं यत् भक्तियोगसमन्वितम् । अन्यस्य भक्तिरहितस्य ज्ञानस्य तु मोक्षसाधकत्वाशक्तेः "नैष्कर्म्यमप्यच्युतभाववर्जितम्" इत्यादिना तिरस्कार एव दृष्टः । भक्तियोगोऽत्र श्रवणकीर्त्तनादिरूपः ॥ ३५ ॥ ❀ ❀ एवं भक्तिमिश्रेण कर्मणा भक्तिमिश्रं ज्ञानं मोक्षसाधनं भवतीत्युक्तम् । इदानीं भक्तिमिश्रनिष्कामकर्मवतां तादृशभक्तसंगभाग्येन केषांचित्कदाचित्कर्ममिश्रा भक्तिरपि भवेदित्याह कुर्वाणा इति । यत्र भक्तिमिश्रकर्मणि स्थिता अकस्माद्भक्तसंगभाग्येन भगवच्छिक्षया कर्माणि कुर्वाणाः संतः केचित्कृष्णस्य गुणनामानि गृणंति स्मरंति च कीर्त्तनस्मरणाद्यात्मिकां भक्तिं कुर्वंतीत्यर्थः । भगवच्छिक्षाया यत्करोषीत्यादिकाया भक्तिप्रकरणपठितत्वान्न कर्मविषयतया व्याख्या युक्ता । कर्मिणो हि कर्मवैफल्याभावार्थं वैदिकमेव कर्मार्पयन्ति । भक्तास्तु भगवत्स्वामिकत्वेनैवात्मानं जानन्तः स्वकर्त्तव्यं वैदिकं लौकिकं दैहिकं च कर्म स्वप्रभुप्रवर्त्यमानं प्रतियंतः सर्वमेव तस्मिन्समर्पयन्तीति महान्भेदः । अत एवात्र 'यदश्नासी'त्युक्तम् ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

यदितीति । अत्र कर्म्मभूमौ भगवदर्पणेन भगवत्परितोषणं भगवत्प्रीतिकरं यत्कर्म्म क्रियते यद्भक्तियोगसमन्वितं ज्ञानं तत् तदधीनं तस्य कर्म्मणः अधीनं हीत्यर्थः ॥ ३५-३७ ॥

श्रीमद्वीरराघवव्याख्या

त्रैवर्गिककर्मणस्तापत्रयहेतुत्वं वक्तुं तावद् दृष्टांतमाह । आमय इति । यद्यप्युदाहृतश्रुतिस्मृतिवचोभिः पापस्यैव तापत्रयमूलत्वं सूचितं, तथापि त्रैवर्णिककर्मणोऽततोऽनिष्टावहत्वेन पापवदनिष्टसाधनत्वात्तदपि तापत्रयनिमित्तमेव । हे सुव्रत यथा येनापथ्यान्नादिना भूतानां य आमयो रोगो जायते तदामयकारणं द्रव्यं चिकित्सितमपि प्रतीकारत्वेन सेवितमप्यामयं न पुनाति न शोधयति । चिकित्सितोपि व्याधिरपथ्यादिना पुनर्वर्द्धत इत्यर्थः । चिकित्सितमित्यामयविशेषणं वा आमयकारणेन चिकित्सितं प्रतिकृतमप्यामयं व्याधिं तदामयकारणं द्रव्यं न पुनातीत्यर्थः ॥ ३३ ॥ ❀ ❀ दृष्टांतेनाभिमतमर्थं दार्ष्टांतिकेनुगमयति एवमिति । एवमपथ्यान्नादेरामयकारणवन्नृणां सर्वे क्रियायोगा अनभिसंहितफलकर्मव्यतिरिक्ताः सर्वे त्रैवर्गिकाः क्रियायोगाः संसृतेर्हेतवः । अत एव परस्मिन्नात्मन्यकल्पिताः असमर्पिता आत्मविनाशाय कल्पंते आत्मनः अंततः स्थावरत्वरूपविनाशाय कल्पंते संपन्ना भवंति ॥ ३४ ॥ ❀ ❀ तर्हि परस्मिन्कल्पिताः क्रियायोगाः किं वा साक्षान्निःश्रेयसहेतवः न भक्तियोगनिष्पादनद्वारेत्याह यदिति । भगवान्परितुष्यते भक्तियोगोत्पत्तिप्रतिबंधकनिरसनोपयुक्तपरितोषयुक्तो भवति, येन तदाराधनरूपेण कर्मणा तद्भगवत्परितोषणं यत्कर्मात्र लोके क्रियते अनुक्रियत इति पाठे अनुस्यूततयाऽऽशरीरपातं क्रियते तदधीनं तत्कर्माधीनं तन्निष्पाद्यमेव भक्तियोगसमन्वितं ज्ञानमत्र ध्यानसाध्यं दर्शनात्मकं विवक्षितं "भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपे"त्युक्तत्वात् ॥ ३५ ॥ ❀ ❀ न केवलभगवत्परितोषणात्मकं कर्मैव भक्तियोगानुग्राहकमपि तु भगवद्गुणश्रवणादिकमपीत्याह । कुर्वाणा इति भगवच्छिक्षया "यत्करोषि यदश्नासि यज्जुहोषि, मयि सर्वाणि कर्माणि संन्यस्ये"त्याद्युक्तभगवच्छिक्षया असकृत्कर्माणि वर्णाश्रमानुरूपाणि कुर्वाणाः कृष्णस्य भगवतः गुणा नामानि च कल्याणगुणप्रकाशकानि वा गायंति अनुस्मरंति नामानि गृणंति गुणाननुस्मरंति चेत्यर्थः । भक्तियोगनिष्पत्तिकामा इति कर्तृपदमध्याहर्त्तव्यं, यथा भगवच्छिक्षयाऽसकृत् कृतानि कर्माणि भक्तियोगानुग्राहकाणि तथा गुणनामानुस्मरणादिकमपीति भावः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु कर्मणां बंधस्वभावात् कथं तापत्रयभैषज्यमिति तत्राह आमय इति । सुखमेव व्रतं येन स तथा तस्य संबुद्धिः हे सुव्रत, सत्यसंकल्पादिव्रतोपेते वा येन द्रव्येण भूतानामामयं आमयः श्लेष्माद्यो जायते तदेवामयकारणं द्रव्यं चिकित्सितमौषधीकृतं तद्रोगलक्षणं पुनाति परिहरति । हि तदिदमनुभवसिद्धमिति हिशब्दार्थः । एवकारस्तु तस्य प्राधान्यद्योतनार्थः न तु द्रव्यांतरनिषेधार्थः । कुतः औषधीकरणाय द्रव्यान्तरसंयोगदर्शनाद्यशब्द उपमार्थः स यथा ॥ ३३ ॥ ❀ ❀ एवं तथा नृणां संसारिणां क्रियालक्षणा योगा उपायाः स्वतः संसारहेतवः त एव क्रियायोगाः परे पूर्णे ब्रह्मणि कल्पिताः आत्मविनाशाय अर्पिताः । अनेकजन्मसंचितदुष्कर्मस्वरूपनाशाय कल्पंते । तस्मात्केवलं कर्मबंधकं ब्रह्मार्पणेनौषधीकृतं भक्तिज्ञानद्वारा संसाराख्यरोगनिवर्तकमिति भावः ॥ ३४ ॥ ❀ ❀ ज्ञानद्वारा कर्मणो मोचकत्वमाह यदिति । अत्र कर्मभूमौ भगवदर्पणेन भगवत्परितोषणं यत्कर्म जीवैः क्रियते यद्भक्तियोगसमन्वितं परोक्षापरोक्षोपपदं ज्ञानं तज्ज्ञानं तस्य कर्मणोधीनं हि 'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणी'ति श्रुतेः कर्मणा ज्ञानं जायते हि यस्मात्तस्मात्कर्म ज्ञानद्वारा बंधनिवर्तकमिति भावः । अत्राग्निष्टोमादिकर्मसु यत्कर्म भगवत्परितोषणमिति वा ॥ ३५ ॥ ❀ ❀ कथंकारं कर्मणा ज्ञानमुत्पद्यत इति तत्राह कुर्वाणा इति । यत्र यस्य यजमानस्यार्थे यस्मिन्यज्ञे हवनादीनि कर्माणि कुर्वाणा वैदिका ऋत्विगादयः "स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचिदि"ति भगवच्छिक्षयाऽसकृन्निरंतरं आदिमध्यावसानेषु वा कृष्णस्य गुणान् स्मरंति नामानि गृणंति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवमिति । आत्मशब्दोऽत्र कर्मजातिपरः ॥ ३४ ॥ ❀ ❀ अथ भगवत्परितोषणात्मकस्य तस्य माहात्म्यं विशेषत आह यदत्रेति । भक्तियोगः कीर्त्तनस्मरणादिरूपः तत्समन्वितं तेन समवेतं यज्ज्ञानं भागवतं तदपि तदधीनं तदव्यभिचारिफलमित्यर्थः ॥ ३५ ॥ ❀ ❀ कथं तत्राह कुर्वाणा इति । भगवच्छिक्षया 'यत् करोषि यदश्नासी'त्यादिकथा यत्र भगवत्सन्तोषणे निमित्ते कर्माण्यपि कुर्वाणास्तादृशरुचिस्वाभाव्येनासकृत् गृणन्तीत्यादि । श्रीशौनकादिवदिति भावः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु संसारहेतोः कर्म्मणः कथं तापत्रयनिवर्तकत्वम् ? सत्यम्, सामग्रीभेदेन घटत इति सदृष्टान्तमाह द्वाभ्याम् । य आमयो रोगः येन घृतादिना जायते तदेव घृतादि द्रव्यं चिकित्सितमौषधान्तरवासितं सत् आमयं न पुनाति न रक्षति, नाशयतीति यावत् । पुनातिरत्र रक्षणार्थको ज्ञेयः ॥ ३३ ॥ ❀ ❀ क्रियायोगाः कर्मयोगाः सर्व्वे नित्याः काम्याः नैमित्तिकाश्च निष्कामाः परमेश्वरे कल्पिताः समर्पिताः सन्तः आत्मविनाशाय कर्म्मनिवृत्तये कल्पंते समर्था भवन्ति ॥ ३४ ॥ ❀ ❀ तदेवेश्वरार्पितं कर्म सत्त्वशोधकत्वात् ज्ञानसाधनं भवतीत्याह भगवदर्पितत्वात् भगवत्परितोषणं निष्कामं यत्कर्म्म तदधीनं ज्ञानं तज्जन्यत्वादित्यर्थः । कीदृशं यद्भक्तियोगसमन्वितम् अन्यस्य भक्तिरहितस्य ज्ञानस्य तु मोक्षसाधकत्वाशक्तेः 'नैष्कर्म्यमप्यच्युतभाववर्जितमि'त्यादिना तिरस्कार एव दृष्टः ॥ ३५ ॥ ❀ ❀ एवं भक्तिमिश्रेण कर्म्मणा भक्तिमिश्रं ज्ञानं मोक्षसाधनं भवतीति उक्तम् । इदानीं भक्तिमिश्रनिष्कामकर्मवतां तादृशभक्तसंगभाग्येन केषांचित् कदाचित् कर्म्ममिश्रा भक्तिरपि भवेदित्याह कुर्व्वाणा इति । यत्र भक्तिमिश्रकर्म्मणि स्थिता अकस्माद् भक्तसंगभाग्येन भगवच्छिक्षया कर्म्माणि कुर्वाणाः सन्तः केचित्कृष्णस्य गुणनामानि गृणन्ति स्मरन्ति च कीर्तनस्मरणाद्यात्मिकां भक्तिं कुर्वन्तीत्यर्थः, भगवच्छिक्षा चेयम् "यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमि"ति शिक्षायाश्चास्या भक्तिप्रकरणपठितत्वात् न कर्म्मिविषयतया व्याख्या युक्ता । कर्म्मिणो हि कर्म्मवैफल्याभावार्थं वैदिकमेव कर्म्मार्पयन्ति । भक्तास्तु भगवत्स्वामिकत्वेनैवात्मानं जानंतः स्वकर्त्तव्यं वैदिकं लौकिकं दैहिकञ्च कर्म्मस्वप्रभुप्रवर्त्त्यमानं प्रतियन्तः सर्वमेव तस्मिन् समर्पयन्तीति महान् भेदः । अत एवात्र यदश्नासीत्युपन्यस्तम् । एवमेव तत्र श्रीरामानुजाचार्य्यचरणैरपि व्याख्यातम् । अत्र कुर्वाणा इति वर्त्तमाननिर्देशात् भक्तिं कुर्वंतीत्याख्यातक्रियाया मुख्यत्वाच्चेयं कर्म्मयोगसहिता भक्तिरित्यतो भक्तेरस्याः कर्म्ममिश्रता ज्ञेया । कर्म्ममिश्रया भक्त्या साध्या ज्ञानमिश्रा तया च साध्या मुक्तिसहिता भगवद्रतिः शान्तभक्तिनाम्नी 'आत्मारामाश्च मुनय' इत्यादेर्ज्ञेया ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कर्मणैव संसारः । भगवति समर्पितं तु कर्म संसारनिवर्तकमिति सदृष्टांतमाह द्वाभ्याम् । तत्र दृष्टांतमाह आमय इति । येन द्रव्येण य आमयो जायते तद्द्रव्यं तमामयं न पुनाति न निवर्तयति । चिकित्सितं द्रव्यांतरेण मिश्रितं तु पुनात्येव ॥ ३३ ॥ ❀ ❀ तथा कर्मणैव संसारः भगवति समर्पितं तु कर्म संसारं निवर्तयत्येवेत्याह एवमिति । परे परमात्मनि कल्पिताः समर्पिताः आत्मविनाशाय अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते इत्येवंभूतस्यात्मनः कर्मप्रवाहस्याविद्यारूपस्य नाशाय हानये कल्पंते

समर्था भवंति ॥ ३४ ॥ ❀ ❀ उपादेयं साधनचतुष्कं संक्षिप्य दर्शयति । यदिति । अत्र साधनापेक्षायां यद्भगवत्परितोषणं भगवान् परितुष्यते येन तत् कर्म क्रियते स्वीक्रियते, न त्वैहिकामुष्मिकभोगसाधनम् । अनेन कर्मवैराग्यात्मकं साधनद्वयमुक्तम् , यत्तदधीनं भगवद्विषयकं तज्ज्ञानं भक्तियोगसमन्वितं क्रियते इति च साधनद्वयमुक्तम् ॥ ३५ ॥ ❀ ❀ एतदेव शिष्टाचारकथनेन दर्शयति कुर्वाणा इति । यत्र यस्मिन् काले शास्त्रप्रसिद्धाः शिष्टाः "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमि"ति भगवच्छिक्षया कर्माणि कुर्वाणाः कृष्णस्य गुणनामानि गृणंति गायंति कृष्णमनुस्मरंति ध्याने तत्साक्षात्कारं कुर्वंति ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत्रैव विशेषमाह । आमय इति । येनैव कर्मणा नाशः शंकनीयः तदेव भगवति भावनीयमिति । आमयः कफपित्तादिः येन माषादिना सुव्रतेति संबोधनात् तादृशं तु तव नास्तीति तव महद्भाग्यमिति प्रशंसा । तदेव चिकित्सितं आमयद्रव्यं न किं तु अन्यदपि द्रव्यांतरं पूर्वभक्षितं पुनाति । अतो येनैव कर्मणा बंधस्तदेव कर्म भगवति भावितं पुरुषं पुनातीत्यर्थः ॥ ३३ ॥ ❀ ❀ ननु पूर्वकृतकर्मणां बाधकानां विद्यमानत्वात्तैस्तापत्रयजननाच्च किमग्रिमेण भावितेनेति तत्राह एवं नृणामिति । यथा भगवति संबंधेन कर्मणा तापत्रयनाशः एवमेव पूर्वकर्मणामपि भगवति समर्पणात्पूर्वस्वरूपनाशे सति तापाद्यनुत्पादकत्वात् । नृणामिति कर्माधिकारो द्योतितः । सर्वे पुण्यजनका अपि संसृतिहेतवः जननमरणहेतवः । त एव सर्वे योगाः परे कल्पिताः समर्पिता आत्मविनाशाय कल्पंते यथा प्रज्वलितेऽग्नौ तृणादि । कुतस्तस्य तापजनकत्वमित्यर्थः । एवं स्वाभाविकानां लौकिकानां संसारहेतुभूतकर्मणां कृतानां क्रियमाणानां च विनियोग उक्तः ॥ ३४ ॥ ❀ ❀ अधुना विहितानां भगवत्प्रीत्यर्थं क्रियमाणानां किं फलमित्याकांक्षायामाह यदत्रेति "यन्नः स्वधीतं गुरवः प्रसादिता" इत्यत्र भगवत्प्रसादहेतुत्वेन प्रार्थनात् नियतफलत्वाच्च एकस्य तूभयत्वे संयोगपृथक्त्वन्यायेन दध्यादिवदुभयसाधकं स्यात्तथा सति संसारः । पूर्वोक्तानुभयरूपत्वात् । तत्रोच्यते–अत्र निर्णये यत्कर्म भगवत्परितोषणं क्रियते भगवत्परितोषार्थं क्रियते तेन कर्मणा भगवद्भक्तिज्ञाने उत्पद्येते । "ततो ज्ञानाग्निः सर्वकर्माणी"ति न्यायेन सर्वकर्मक्षयः इत्यभिप्रायेणाह । ज्ञानं यत्प्रसिद्धं भक्तियोगसमन्वितं तत् तदधीनं यादृशकर्माऽधीनं हीति "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति न्यायः सूचितः ॥ ३५ ॥ ❀ ❀ ननु पंचरात्रोक्तकर्मणां भगवदाज्ञया अर्जुनादिभिः कृतानां युद्धादीनां च का गतिस्तत्राह कुर्वाणा यत्रेति । यत्र कर्मनिर्णये विषये वा भगवच्छिक्षया कुर्वाणा भवंति तत्कर्म भक्तिजनकं भवतीत्याह । तदा पुरुषाः असकृद्वारं वारं कृष्णस्य गुणनामानि पांडवरक्षकद्रौपदीलज्जानिवारकगोवर्धनोद्धरणेत्यादीनि गृणंति । अनु पश्चात्स्मरंति च कृष्णम् । अतस्तेषां कीर्तनस्मरणभक्तिहेतुत्वात् सर्वोत्कृष्टमेव तत्कर्म । न तेन संसारशंकाऽपीत्यर्थः ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

आमय इत्यत्र । तत्रैवेति । भगवति भावनीये कर्मण्येव । योगा इति क्रियायोगाः । दध्यादिवदिति । यथा 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य जुहुयात्' 'खादिरे बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इत्यादिविहितदध्यादिवदित्यर्थः । सर्वापेक्षा चेति । अयं न्याय उत्तरतंत्रे तृतीयस्य तुरीयपादेऽस्ति । तत्र हि पूर्वं 'पुरुषार्थोतः शब्दा'दित्यादिभिर्ज्ञानस्य फलसाधने कर्मापेक्षा नास्तीति साधयित्वा, अथेदानीं चिन्त्यते, ज्ञानस्वरूपोपकारित्वं कर्मणोस्ति, न वेति । तत्र'आचार्यवान् पुरुषो वेदे'ति श्रुतेर्गुरूपसत्तितदुपदेशादिभिरेव तत्सम्भवान्न तदपेक्षेति पूर्वः पक्षः । सिद्धान्तस्तु, सर्वापेक्षा सर्वेषां कर्मज्ञानभक्तीनामस्ति पुरुषोत्तमज्ञानोत्पत्तौ अपेक्षा, कुतः, यज्ञादिश्रुतेः, वेदः सर्वोपि पुरुषार्थपर्यवसायी, पुरुषार्थश्च भगवत्प्राप्तिरेव, नान्यत् , सा चेज्ज्ञानादेव तदा यज्ञादीनां निरूपणमनर्थकं स्यात् , अतस्तत्परिहाराय मन्तव्ये कर्मणा पुरुषार्थसाधकत्वे ज्ञानस्वरूपोपकारकत्वेन तथात्वं मन्तव्यम् । तदपि निष्कामकर्मकर्तृत्वे । वाजसनेयिशाखायां 'यथाकारी यथाचारी तथा भवती'त्यादिना सकामस्य कर्तुः पुनरावृत्तिमुक्त्वा, 'अथाकामयमानो योऽकाम' इत्यादिना 'ब्रह्मैव सन् ब्रह्माप्येती'त्यन्तेन पूर्वोक्तकर्मकर्तुरेवाकामत्वे तत्फलकथनात् । 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इति स्मृतेश्च । तत्र दृष्टान्तः अश्ववदिति । स्वेष्टफलसाधकदेशव्यवधानात्मकदेशातिक्रम एवाश्वस्य यथा साधनत्वम् , न तु तत्फलसिद्धाविति, तथाधिकारित्रिविधप्रतिबन्धनिवृत्तावेव कर्मणां साधनत्वमुपकारकत्वम् , न तु भगवत्प्राप्तिरूपे ज्ञानफलेपीति । सूचित इति । व्यासस्य स्वोक्तिस्मारणाय सूचितः । तथा च पूर्वतन्त्रापेक्षयोत्तरतन्त्रस्य प्रबलत्वात्संयोगपृथक्त्वन्यायबाधेन ततो न पुनः संसार इत्यर्थः ॥ ३५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु संसारतापहेतूनां कर्मणां कथं तापत्रयनिवर्त्तकत्वमित्याशङ्क्य सहकारिभेदेन तत्सम्भवतीति सदृष्टान्तमाह–आमय इति द्वयेन । तव कर्मणां तापहेतुत्वं नास्तीति सूचयन् सम्बोधयति–हे सुव्रतेति । य आमयो रोगो येन घृतादिना भूतानां जायते

तदेवामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्तयति, किन्तु चिकित्सितं द्रव्यान्तरैर्भावितं सत्पुनात्येव यथा एवमित्युत्तरेणान्वयः। पुनाति-धातुरत्र रक्षार्थकः॥ ३३ ॥ ❀ ❀ एवं तथा नृणां कर्मण्यधिकृतानां सर्वे लौकिका अलौकिकाश्च क्रियायोगाः पुण्यपापद्वारा जन्ममरणादितापत्रयलक्षणसंसृतिहेतवोऽपि परे परमेश्वरे कल्पिताः समर्पिताः सन्तस्ते पूर्वसञ्चिततापत्रयहेतुकर्मसहितानामात्मनां स्वेषां विनाशाय कल्पन्ते समर्था भवन्त्येवेत्यन्वयः॥ ३४ ॥ ❀ ❀ ननु 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इत्यादौ ज्ञानस्य कर्मनाशकत्वं श्रुतं तत्कथं कर्मणां कर्मनाशकत्वमित्याशङ्क्य तत्तु ज्ञानं कर्मत एवोत्पद्यतेऽतस्तेषां तन्नाशकत्वमित्यभिप्रेत्य तदुत्पत्तिक्रममाह-यदिति। अत्र मर्यादामार्गे भगवत्परितोषकं भगवति समर्पितं कर्म पुरुषेण क्रियते भक्तियोगसमन्वितं यत् कर्मनिवर्त्तकत्वेन प्रसिद्धं ज्ञानं तत्तदधीनमेवेत्यन्वयः। भगवदर्पितं कर्म ततोऽन्तःकरणशुद्धिद्वारा भगवद्भक्तिस्ततो भक्तिसमन्वितं कर्मवासनानिवर्त्तकं ज्ञानमिति क्रमो बोध्यः। यथौषधं न केवलं रोगमेव निवर्त्तयति, किन्तु पुष्ट्यादिकमपि जनयति स्वयं च विनश्यति तथा भगवदर्पितं कर्मापि न केवलं तापमेव निवर्त्तयति किन्तु भक्त्यादिकमपि जनयति स्वयं च विनश्यतीति सूचयन्नाह-हीति॥ ३५ ॥ ❀ ❀ ननु भगवदर्पितं कर्म भक्तियोगं जनयतीत्यत्र किं प्रमाणमित्यपेक्षायां सदाचारं प्रमाणमाह-कुर्वाणा इति। यत्र यदा ये भगवच्छिक्षया असकृत् निरन्तरं कर्माणि कुर्वाणा भवन्ति तदा त एव श्रीकृष्णस्य भक्तवात्सल्यादिगुणप्रकाशकानि पाण्डवरक्षकद्रौपदीलज्जारक्षकगोवर्धनोद्धरणेत्यादीनि नामानि गृणन्ति उच्चारयन्ति तानि कृष्णं चानु पश्चात्स्मरन्ति च। इयं च भगवच्छिक्षा 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्' इति॥ ३६ ॥

हिन्दी अनुवाद

प्राणियोंको जिस पदार्थके सेवनसे जो रोग हो जाता है, वही पदार्थ चिकित्साविधिके अनुसार प्रयोग करनेपर क्या उस रोगको दूर नहीं करता ?॥ ३३ ॥ ❀ ❀ इसी प्रकार यद्यपि सभी कर्म मनुष्योंको जन्म-मृत्युरूप संसारके चक्रमें डालनेवाले हैं तथापि जब वे भगवान्को समर्पित कर दिये जाते हैं, तब उनका कर्मपना ही नष्ट हो जाता है॥ ३४ ॥ ❀ ❀ इस लोकमें जो शास्त्रविहित कर्म भगवान्की प्रसन्नताके लिये किये जाते हैं, उन्हींसे पराभक्तियुक्त ज्ञानकी प्राप्ति होती है॥ ३५ ॥ उस भगवदर्थ कर्मके मार्गमें भगवान्के आज्ञानुसार आचरण करते हुए लोग बार-बार भगवान् श्रीकृष्णके गुण और नामोंका कीर्तन तथा स्मरण करते हैं॥ ३६ ॥

नमो भगवते तुभ्यं वासुदेवाय धीमहि। प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च॥ ३७ ॥
इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम्। यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्॥ ३८ ॥
इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्। अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः॥ ३९ ॥
त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्।
आख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा॥ ४० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे व्यासनारदसंवादे पञ्चमोऽध्यायः॥ ५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह द्वाभ्यां नम इति। नमो धीमहि मनसा नमनं कुर्वीमहि॥ ३७॥ ❀ ❀ अमूर्तिकं मंत्रोक्तव्यतिरिक्तमूर्तिशून्यम्। यजते पूजयति स पुमान्सम्यग्दर्शनो भवति॥ ३८॥ ❀ ❀ एवं कृतवति मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह। इमं स्वनिगमं स्वोपदेशं मदनुष्ठितं मयानुष्ठितमवेत्य ज्ञात्वा। भावं च प्रीतिं च॥ ३९॥ ❀ ❀ अतस्त्वमप्येवं कुर्वित्याह। त्वमिति अदभ्रमनल्पं श्रुतं यस्य, हे अदभ्रश्रुत विभोर्विश्रुतं यशः प्रख्याहि कथय। येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते, यद्यतो दुःखैः पीडितानां क्लेशशांति प्रकारांतरेण न मन्यंते॥ ४०॥

इति प्रथमे टीकायां पंचमोऽध्यायः॥ ५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

तदेवं भक्तिरहितानां ज्ञानकर्मादीनां नैष्कर्म्यमित्यादिना विनिंद्य सर्वथा हेयत्वमुक्त्वा 'त्यक्त्वा स्वधर्मम्' इत्यादिश्लोकत्रय्या परमोपादेयां शुद्धां निर्गुणां भक्तिं स्तुत्वा "अहं पुरातीतभवे" इत्यादिश्लोकषट्केन तस्या एव भक्तेराविर्भावप्रकारं प्रेमपर्यंतां वृद्धिं चोक्त्वाऽधिकारिविशेषे पुनरुपादेयं भक्तिमिश्रज्ञानं ततोऽधिकां कर्ममिश्रां भक्तिं चोक्त्वेदानीं "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इत्युक्तेः श्रीगुरोः प्राप्तं स्वमंत्रमपि तमुपदिदिक्षुस्तत्र श्रद्धामुत्पादयन्नाह द्वाभ्याम् ॐ नम इति।

त्रयस्त्रिंशदक्षरात्मको मंत्रः, चतुर्व्यूहात्मको भगवानत्र देवता, संकर्षणादिक्रमविपर्ययेणात्र निर्देशस्तु श्रीकृष्णचतुर्व्यूहत्वं बोधयितुं तत्पुत्रपौत्रत्वेन प्रद्युम्नानिरुद्धयोस्तन्निकटपाठात् । यद्वा प्रद्युम्नानिरुद्धसंकर्षणानां क्रमेण सृष्टिस्थितिसंहारकारणत्वात्तथोक्तिः । नमो धीमहि नमस्कारं ध्यायेम । मनसा नमनं कुर्वीमहीत्यर्थः । भगवते षडैश्वर्यपूर्णाय । सर्वत्र वसति दीव्यति चेति वासुदेवः । सर्वान्तर्यामी सर्वप्रकाशकस्तस्मै प्रकृष्टं द्युम्नं वित्तं हिरण्यं तद्रूपाय । "हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णः" इति श्रुतेः । यद्वा प्रकृष्टं द्युम्नं बलं यस्य कामदेवरूपत्वात् "कामो हि बलवत्तमः" इत्याद्युक्तेः स तथा । "द्युम्नं वित्ते बलेपि च" इति मेदिनी । न केनापि स्वेच्छां विना निरुद्धोऽनिरुद्धः । अनो मुख्यप्राणः सोऽस्ति जितत्वेनास्येत्यनी तेन मुख्यप्राणजयवता रुद्धो वशीकृत इति वा । न निरुद्ध्यंते विषयैर्नाव्रियंते इत्यनिरुधो विवेकिनस्तान्दधाति पोषयति धारयति वेत्यनिरुद्धस्तस्मै । अनिरस्तमुदाख्यं नाम धत्त इति वा "तस्योदिति नाम" इति श्रुतेः । सम्यक्पापकर्षणशीलत्वात्संकर्षणः । सम्यक्करं हस्तं ददाति निजप्रियगोपेभ्य इति वा "हास्यहस्तग्रहादिभिः" इत्युक्तेः । करशब्दाकारलोपस्तु पृषोदरादित्वाद्बोध्येयः । मंत्रश्चायं पञ्चरात्रवक्तुः श्रीनारायणादेव लब्धो ब्रह्मपुत्रजन्मन्येव, न तु पूर्वजन्मनीति संदर्भः ॥ ३७ ॥ ❀ ❀ इति मूर्त्तीनां वासुदेवादीनामभिधानेन नामचतुष्टयेन यजते पञ्चरात्रोक्तविधिना वासुदेवाय नमः प्रद्युम्नाय नम इत्येवं षोडशोपचारैर्यः पूजयेन्मत्रध्यानोक्तमूर्त्तिं मंत्रेणैव जपितेनाविर्भवति मूर्त्तिः शरीरं यस्येति वा । यद्वा "मंत्रेण चत्वारि शृङ्गा त्रयो अस्य पादा" इत्यादिमंत्रेण प्रतिपादिताकारं यज्ञ-पुरुषम् "यज्ञो वै विष्णुः" इति श्रुतेः, यज्ञ एव पुरुषोऽन्तर्यामी तन्मूर्त्तिकं प्राकृतमूर्त्तिरहितं कठिनं कृपार्द्रमिति वा । "मूर्त्तिः काठिन्यकाययोः" इत्यमरः । स सम्यग्दर्शनः तं दृष्ट्वाऽन्योपि कृतार्थीभवतीत्यर्थः । यद्वा दर्शनं ज्ञानं यद्वा दृश्यतेऽनेनेति दर्शनं शास्त्रं भक्तिप्रतिपादकं पञ्चरात्रादि सम्यग्धन्यमात्मप्रसादकत्वात् । न तु "येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम्" इत्युक्तलक्षणं भक्तिरहितं शास्त्रमेव खिलमित्यर्थः । ततश्च कृते वेदान्तदर्शनस्यापि तवायमात्मा न वै परितुष्टः, मम तु कृतपंचरात्रशास्त्रस्यात्मा सदा प्रसन्न एवेति भावः ॥ ३८ ॥ ❀ ❀ स्वनिगमं निजांतरंगवेदोक्तं ज्ञानं प्रथमतः स्वानुभवं तत ऐश्वर्यं स्वाणिमादिरूपं ततस्तत्र ममानासक्तिमभिप्रेत्य भावं स्वमहाप्रमाणं चादात् ततश्च मह्यमपीमं मंत्रं कृपयोपदिशेति प्रार्थितेन श्रीनारदेन व्यासस्तमेव मंत्रमुपदिष्ट इति सुधीभिर्बोद्धव्यम् ॥ ३९ ॥ ❀ ❀ अदभ्रश्रुत सर्वज्ञेत्यर्थः । "दभ्रो दम्भवदल्पयोः" इति निरुक्तिः । येन विश्रुतेन यशसा समाप्यते तद्यशोमृतास्वादनिमग्नानां सदा तदेकभक्तिगतानां ज्ञानाय स्पृहैव न भवेदित्यर्थः ॥ ४० ॥

इति श्रीभागवते श्रीभावार्थदीपिकाप्रकाशे प्रथमस्कंधे पंचमोऽध्यायः ॥ ५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मूर्त्यभिधानेनेति मूर्त्तिवाचकेन मंत्रेणेत्यर्थः ॥ ३८–४० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-दीपन्याख्यदीपिकाटिप्पण्यां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवव्याख्या

इति इत्थममूर्तिकं कर्मवश्यप्राकृतमूर्तिरहितं मंत्रमूर्तिमोमित्याद्युक्तमंत्रप्रकाश्या मूर्तिरप्राकृता अकर्ममूला स्वेच्छोपात्ता च यस्य तं मंत्रशरीरकं वाभिध्यायन् ओमादिनामान्यनुगृणंश्च यज्ञाराध्यं परमपुरुषं यो यजते स्वधर्मेणाराधयति स एव पुमान् सम्यग्दर्शनः "ज्ञानी त्वात्मैव मे मतमि" त्युक्तविधोधिकारीत्यर्थः ॥ ३८ ॥ ❀ ❀ एवं यजतामाशु भक्तियोगो निष्पद्यते इत्यभि-प्रायेणात्मानं दृष्टांतयति इममिति । हे ब्रह्मन्मदनुष्ठितमिमं स्वस्य भगवतो निगममनुशासनमवेत्य दृष्ट्वा केशवः स्वस्मिन्भवं भक्तिं तत्साध्यं दर्शनात्मकं ज्ञानमैश्वर्यं च देवर्षित्वोचितमदाद्दादावित्यर्थः ॥ ३९ ॥ ❀ ❀ उत्तरमुपसंहरति त्वमिति । हे अदभ्रश्रुतान-ल्पकीर्ते त्वं विभोर्भगवतो विश्रुतं यशः प्रख्याहि प्रबध्नीहि येन विश्रुतप्रख्यानेन विदां बोद्धृणां बुभुत्सितं बोद्धुमिष्टं समाप्यते आपूर्यते न निरवशिष्यत इति यावत् । यच्छ्रुतस्य तस्य जिज्ञासितव्यं नावशिष्यते तथाविधमाख्यानं कुर्वित्यर्थः । किंच दुःखैस्त्रिभिस्ता-पैर्मुहुर्मुहुरर्दितः पीडितः आत्मा मनो येषां क्लेशनिर्वाणं क्लेशा आध्यात्मिकादयस्ते निर्वाप्यंतेऽपनोद्यंते येन अन्यथोपायांतरेण तु न निर्वाप्यंते तथाविधं यथोशंति अतीवाद्रियंते तादृशं प्रख्याहीत्यन्वयः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे प्रथस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यो यजमानः स्वयं च नियमो नमो भगवत इत्यादिमूर्त्यभिधानेन मूर्तिवाचकेन मंत्रेण मंत्रप्रतिपाद्यमूर्तिम् अमूर्तिकं प्रकृतिवैकृतिविग्रहविधुरं वासुदेवादिरूपं यज्ञपुरुषं "चत्वारि शृङ्गा त्रयो अस्य पादा" इत्यादिऋक्प्रतिपाद्याकारं भगवन्तं उद्दिश्य यजते स पुमान् यजमानः परोक्षापरोक्षज्ञानवान् भवति । ते च ऋत्विगादयः सम्यग्दर्शनाः समीचीनशास्त्रविज्ञानाः सर्वज्ञाश्च सम्यग्भगवंतं दर्शयंति ज्ञापयंतीति सम्यग्दर्शनाः । सर्वेषां हरिपरायणत्वात् ॐसर्वगुणपूर्णसर्वजनरंजकेति वा ओमित्येवंरूप

भगवते षड्गुणपूर्णाय तुभ्यं नमः। सर्वत्र वसति दीव्यतीति वासुदेवः, बलज्ञानरूपत्वाद्दैत्यनिरसनशीलत्वात् क्रीडाशीलत्वाद्वा तस्मै धीमहि स्मरेम। प्रकृष्टं द्युम्नं हिरण्यमेव रूपं यस्य सः प्रद्युम्नः "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण" इति श्रुतेः, तस्मै। न केनापि निरुद्ध इत्यनिरुद्धः, अनो मुख्यप्राणः सोऽस्यास्तीत्यनी तेनानिना मुख्यप्राणप्रसादवता पुरुषेण रुद्धः वशीकृत इति वा। अनिरुधः संसारमुक्तास्तान् दधाति धारयति पोषयतीति वा। अनिरस्तमुदाख्यं नाम धत्त इति वा "तस्योदिति नामे"ति श्रुतेः, तस्मै। सम्यक् पापकर्षणशीलत्वात्संकर्षणः समीचीनं करं सनोति ददाति इति वा तस्मै। चशब्दः प्रत्येकं पृथङ्मंत्रत्वद्योतनार्थः, इतिशब्दः प्रभृतिवचनः, तस्मादृत्विगादिभिर्वैष्णवैर्यजमाना भगवंतमीजाना ज्ञानवन्तो भवंतीति भावः ॥ ३७-३८ ॥ ❀ ❀ स्वानुभवसिद्धमेतदिति विज्ञापयति इममिति। केशवः मदनुष्ठितमिमं स्वधर्मनियममवेत्य ऐश्वर्यमीश्वरविषयं ज्ञानं स्वस्मिन् भावं भक्तिं च मे मह्यम् अदादित्यन्वयः ॥ ३९ ॥ ❀ ❀ इदानीमवतारप्रयोजनालंबुद्धिकारणविज्ञापनमुपसंहरति त्वमिति। हे अदभ्रश्रुत "श्रोतामंते"त्यादेः संपूर्णश्रोतृत्वादिगुणसंपन्न त्वमीश्वरोपि ऐश्वर्यादिगुणसंपन्नत्वेनाप्तव्यार्थविधुरोपि सज्जनवात्सल्यादेव येन तत्कीर्तिगर्भग्रंथकरणेन विदुषां विदंतीति विदो ज्ञानलाभकामाः, तेषां वा विचारकाणां वा बुभुत्सितं ज्ञातुमिष्टं समाप्यते संपूर्णं भवति तादृशं श्रीभागवतलक्षणं विभोः समर्थस्य तव विश्रुतं यशः प्रख्याहि प्रख्यापयेत्यन्वयः। तस्मादन्येषां भागवतकरणशक्त्यभावात्तत्कृतिरेवालंबुद्धिकारणमिति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ पञ्चरात्रवक्तुः श्रीनारायणादेतज्जन्मनि लब्धं सप्रणवं मंत्रञ्चोपदिशति ॐ नम इति। चतुर्व्यूहात्मको भगवानेवात्र देवता। तत्र श्रीवासुदेवसङ्कर्षणौ वामदक्षिणयोर्मध्यतो ज्ञेयौ। प्रद्युम्नः सङ्कर्षणस्य दक्षिणे। अनिरुद्धो वासुदेवस्य वामे। सङ्कर्षणादिक्रमविपर्य्ययेण निर्देशस्तु श्रीकृष्णचतुर्व्यूहत्वं बोधयति तत्पुत्रपौत्रत्वेन प्रद्युम्नानिरुद्धयोस्तन्निकटपाठात् ॥ ३७ ॥ ❀ ❀ मंत्रमूर्त्तिं तदुक्तमूर्त्तिं तथाप्यमूर्त्तिकं प्राकृतमूर्त्तिरहितम्। यज्ञपुरुषं पूजायां ध्येयाकारमित्यर्थः। दर्शनस्य सम्यक्त्वं श्रीभगवदाविर्भावात्, न तु ब्रह्मदर्शनवत् खिलत्वमिति ॥ ३८ ॥ ❀ ❀ स्वनिगमं निजांतरंगपरमवेदरूपम्। प्रथमतो ज्ञानं स्वानुभवं ततः ऐश्वर्य्यं स्वाणिमादिरूपं ततस्तत्रानासक्तौ भवं स्वमहाप्रेमाणञ्च ॥ ३९ ॥ ❀ ❀ यस्मादेवं मम तदेतत्पर्य्यंतं सर्व्वं तद्गुणश्रवणनिदानकं तच्छ्रवणमेव तपआदीनां परमं फलं तस्मात्त्वमपीति ॥ ४० ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तदेवं भक्तिरहितानां ज्ञानकर्म्मादीनां 'नैष्कर्म्म्ये'त्यादिना निन्दया सर्व्वथा हेयत्वमुक्त्वा 'त्यक्त्वा स्वधर्म्ममि'त्यादिश्लोकत्रय्या परमोपादेयां शुद्धां निर्गुणां भक्तिं स्तुत्वा 'अहं पुरातीतभवे' इत्यादिश्लोकषट्केन तस्या एव भक्तेराविर्भावप्रकारं प्रेमपर्य्यन्तां वृद्धिञ्चोक्त्वा अधिकारिविशेषे पुनरुपादेयं भक्तिमिश्रं ज्ञानं ततोऽधिकां कर्म्ममिश्रां भक्तिञ्चोक्त्वा इदानीं 'ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत' इत्युक्तेः श्रीगुरुभ्यः प्राप्तं स्वमंत्रमपि तमुपदिदिक्षुस्तत्र श्रद्धामुत्पादयन्नाह द्वाभ्याम् ॐ नम इति। त्रयस्त्रिंशदक्षरात्मको मंत्रः। चतुर्व्यूहात्मको भगवानत्र देवता। सङ्कर्षणादिक्रमविपर्य्ययेण निर्देशस्तु श्रीकृष्णचतुर्व्यूहत्वं बोधयति तत्पुत्रपौत्रत्वेन प्रद्युम्नानिरुद्धयोस्तन्निकटपाठात्। यद्वा प्रद्युम्नानिरुद्धसङ्कर्षणानां क्रमेण सृष्टिस्थितिसंहारकारणत्वात् तथोक्तिः। नमो धीमहि नमस्कारं ध्यायेम मनसा नमनं कुर्व्वीमहीत्यर्थः ॥ ३७ ॥ ❀ ❀ इति मूर्त्तीनां वासुदेवादीनाम् अभिधानेन नामचतुष्टयेन यजते पञ्चरात्रोक्तविधिना वासुदेवाय नमः प्रद्युम्नाय नम इत्येवं षोडशोपचारैः पूजयते। मंत्रमूर्त्तिं मंत्रध्यानोक्तमूर्त्तिमंत्रेणैव जपितेनाविर्भवति मूर्त्तिः शरीरं यस्येति वा। अमूर्त्तिकं प्राकृतमूर्त्तिरहितम् अकठिनं कृपार्द्रमिति वा, 'मूर्त्तिः काठिन्यकाययोरि'त्यमरः। यज्ञपुरुषं यजनीयं पुरुषम्। सम्यग्दर्शनः तं दृष्ट्वा अन्येऽपि कृतार्था भवन्तीत्यर्थः। यद्वा दर्शनं ज्ञानं यद्वा दृश्यते अनेनेति दर्शनं शास्त्रं तदेव शास्त्रं भक्तिप्रतिपादकं पञ्चरात्रादिसम्यग्धन्यमात्मप्रसादकत्वात्, न तु 'येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलमि'त्युक्तलक्षणं भक्तिरहितं शास्त्रमिव खिलमित्यर्थः। ततश्च कृतवेदान्तदर्शनस्यापि तवायमात्मा नैव परितुष्टः, मम तु कृतपञ्चरात्रशास्त्रस्यात्मा सदा प्रसन्न एवेति भावः ॥ ३८ ॥ ❀ ❀ स्वनिगमं निजान्तरंगवेदोक्तं ज्ञानं प्रथमतः स्वानुभवं तत ऐश्वर्यं स्वाणिमादिरूपं ततस्तत्र ममानासक्तिमभिप्रेत्य भावं स्वमहाप्रेमाणञ्च अदात्। ततश्च मह्यमपीमं मन्त्रं कृपयोपदिशेति प्रार्थितेन श्रीनारदेन व्यासस्तमेव मन्त्रमुपदिष्ट इति सुधीभिर्बोद्धव्यम् ॥ ३९ ॥ ❀ ❀ हे अदभ्रश्रुत अनल्पवेदशास्त्र! हे सर्वज्ञेत्यर्थः, विभोर्विश्रुतं यशः प्रख्याहि कथय, येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते। तद्यशोऽमृतास्वादनिमग्नानां सदा तदेकभक्तिमतां ज्ञानाय स्पृहैव न भवेदित्यर्थः। अन्यथा प्रकारान्तरेण दुःखैः पीडितानां जीवानां क्लेशशान्तिं न उशन्ति न मन्यन्ते विवेकिनः ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। प्रथमे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नतिपूर्वकं मुख्यं भगवत्प्राप्त्युपायं ध्यानं यजनं च दर्शनं च उत्तमाधिकारिणं स्तौति द्वाभ्याम्। वासुदेवाय भगवते नमः प्रद्युम्नाय अनिरुद्धाय संकर्षणाय च नमः, भगवन् तुभ्यं त्वदर्थं त्वां धीमहि ध्यायेम॥ ३७॥ ❀ ❀ इतीति इत्थं मूर्त्यभिधानेन अमूर्तिकं प्राकृतमूर्तिशून्यं मंत्रमूर्तिकम्, मंत्रः वाच्यवाचकयोरभेदात् वासुदेवादिनाममंत्रवाच्या मूर्तिर्यस्य स मंत्रमूर्तिकोऽप्राकृतमूर्तिः, तं यज्ञपुरुषं यो यजते स सम्यग्दर्शनः॥ ३८॥ ❀ ❀ एवं नतिपूर्वकध्यानयजनपराणां भगवतो दर्शनं भक्तिश्च प्राकृतदेहवियोगपूर्वकाप्राकृतदेहप्राप्तिश्च भवतीति स्ववृत्तांतकथनेन सूचयति-हे ब्रह्मन् स्वनिगमं स्वोपदेशं मयानुष्ठितमवेत्यावधार्य केशवः ब्रह्मशिवजनकः, ज्ञानं स्वस्मिन् भावं भक्तिम् ऐश्वर्यम् अप्राकृतदेहादिकमग्रिमाध्याये वक्ष्यमाणमदात्॥ ३९॥ ❀ ❀ हे अदभ्रश्रुत हे विपुलकीर्ते! त्वमपि विभोः विश्रुतं यशः प्रख्याहि श्रीभागवतनिबंधेन कथय, येन विश्रुतप्रबंधेन विदां बुभुत्सितं बोद्धुमिच्छा समाप्यते यद्यतः अन्यथा दुःखैर्मुहुरर्दितात्मनां क्लेशनिर्वाणं न उशंति न मन्यंते॥ ४०॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चमोऽध्यायः॥ ५॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

यानि तु पुनः पंचरात्रे मंत्राराधनप्रकारेण पुरश्चरणादीनि कर्माणि तेषां निर्णयमाह द्वाभ्यां नमो भगवत इति। इयं हि भगवद्गायत्री नारदोपास्या, अत्र चतुर्मूर्तीनामभिधानं धीमहीत्यर्थाच्चतुर्मूर्तीर्ध्यायेम। तस्य फलं चतुर्मूर्तिः तदपि न भोगार्थं किंतु नमनार्थं तदपि न परोक्षतया किंतु प्रत्यक्षतया चतूरूपस्यापि चतूरूपमपि भगवानित्यर्थः। चकारादन्यान्यपि रूपाणि संगृहीतानि हयग्रीवादीनि॥ ३७॥ ❀ ❀ अस्या गायत्र्या विनियोगमाह-एवंरूपेण मूर्त्यभिधानेन मूर्तिवाचकेन मंत्रेण करणेन मंत्रे मूर्तिः शरीरं यस्य मंत्रार्थरूपममूर्तिकं मंत्रोक्तव्यतिरिक्तप्राकृतमूर्तिरहितं यज्ञपुरुषं यज्ञरूपं पुरुषं वा यो यजते जपहोमादिना सम्यग्दर्शनो भवति, भगवंतं साक्षात्करोतीत्यर्थः॥ ३८॥ ❀ ❀ अत्र फलं मयानुभूतमिति संदेहाभावायाह इमं स्वनिगममिति। स्वस्य निगमो वेदः, आज्ञेति यावत्, सा आज्ञा मया कृता यथोक्तः पंचरात्रमार्गेणनुष्ठितः पूर्वकल्प एव तद् मह्यं ज्ञानं दत्तवान् ऐश्वर्यं च भक्तिं च यथा ब्रह्मशिवयोः, तदाह केशव इति केशयोर्वं सुखं यस्मादिति॥ ३९॥ ❀ ❀ एवं सर्वेषां कर्मणां निर्णय उक्त इति सर्वमुपपाद्य उपसंहरन् निर्धारितमुपदेशमाह त्वमपीति। यथा मया तस्याज्ञा परिपालिता तथा त्वमपि परिपालय, आज्ञापरिपालनसामर्थ्यं सिद्धवत्कारेणाह अदभ्रश्रुत इति। अनल्पं वेदादीनां श्रवणं यस्येति विभोः विश्रुतं कीर्तिः चरित्रमिति यावत् मध्ये चरित्रस्य माहात्म्यमाह येन विश्रुतेन वेदान्तज्ञानिनां बुभुत्सितं भगवत्स्वरूपज्ञानेच्छा समाप्यते "यावद् यश्चास्मि यादृश" इति बुभुत्सा वा परमभक्तिं जनयित्वा न जानाति तस्मात्तदाख्याहि। किंच निस्तारार्थं सर्वैर्यत्नः कर्त्तव्यः संक्लेशाभिभूतैः कर्त्तुमशक्य इति क्लेशनिवृत्त्यर्थं चाख्याहि। आख्यानेनैव दुःखैर्मुहुरर्दितानां संक्लेशनिवारणमुशंति सर्वे प्रमाणविदः। अत्र उपायांतरं नास्ति क्लिष्टानां क्लेशनाशकं तदाह नान्यथेति॥ ४०॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे पंचमोऽध्यायः॥ ५॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नमो भगवत इत्यत्र। तस्य फलमिति। ध्यानस्य फलम्॥ ३७॥

इति प्रथमस्कन्धसुबोधिनीप्रकाशे पञ्चमाध्यायविवरणम्॥ ५॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं भगवत्समर्पितकर्मणां श्रवणादिभक्तिहेतुत्वमुक्तं तत्र कथं कीर्तयन्ति किञ्च तस्य फलमित्यपेक्षायां स्वोक्तनारदपञ्चरात्रतन्त्रप्रकारेण कीर्तनं प्रदर्शयंस्तत्फलं तत्त्वज्ञानमित्याह-नम इति द्वयेन। तुभ्यं चतुर्मूर्त्तये भगवते निरतिशयैश्वर्यादिमते नमो धीमहि मनसा नमनं कुर्वीमहीत्यन्वयः। वासुदेवाय चित्ते उपास्याय मूलभूताय। प्रद्युम्नाय बुद्धावुपास्याय सृष्टिकर्त्रे। अनिरुद्धाय मनस्युपास्याय सर्वपालकाय। सङ्कर्षणाय अहङ्कारे उपास्याय संहारकर्त्रे। चकारादन्यासामपि भगवन्मूर्तीनां ग्रहणम्॥ ३७॥ ❀ ❀ इत्येवं मूर्त्यभिधानेन मूर्तिवाचकमन्त्रेण यो मन्त्रमूर्तिं मन्त्रैः प्रतिपादिताः सच्चिदानन्दात्मिका मूर्तयो यस्य तम्, अमूर्तिकं कर्माधीनप्राकृतमूर्तिरहितं यज्ञपुरुषं यज्ञादिकर्मफलदातारं यजते जपहोमनमस्कारादिना पूजयति स एव पुमान् सम्यग्दर्शनो भवति। लीलाविशिष्टं भगवन्तं साक्षात्करोतीत्यर्थः॥ ३८॥ ❀ ❀ अत्र सन्देहो न कर्त्तव्यो मयाऽनुभूतत्वादित्याशयेनाह-इममिति। अस्मिन्नुक्तेऽर्थे विश्वासयोग्यस्त्वमिति सूचयन् सम्बोधयति-हे ब्रह्मन्निति। इमं क्रमेण पूर्वोक्तं स्वनिगमं स्वाज्ञारूपवेदप्रतिपादितं साधनजातं मदनुष्ठितमवेत्य ज्ञात्वा केशवः ब्रह्मरुद्रयोरपि सुखदाता भगवान्मे मह्यं स्वतत्त्वज्ञानं अणिमाद्यैश्वर्यं स्वस्मिन् भावं भक्तिं चादादित्यन्वयः॥ ३९॥ ❀ ❀ निर्धारितमुत्तरमुपसंहरति-त्वमिति। हे अदभ्रश्रुत इति सम्बोधनेन अदभ्रमनल्पं बहु वेदादीनां श्रुतं श्रवणं यस्य तस्य तवैतदशक्यं नास्तीति सूचयति। विभोर्विविधरूपेण विक्रीडतो भगवतो विश्रुतं कीर्तिं चरित्रं त्वमपि प्रख्याहि

प्रकर्षेण प्राधान्येनाख्याहि वर्णयेत्यन्वयः। एतेन सिद्धानां साधकानां तव च महानुपकारो भविष्यति, तत्र सिद्धानामपि भगवच्चरित्रबुभुत्सा भवति साऽपि येन वर्णितेन विश्रुतेन समाप्यते निवर्त्तते, साधकानां तु परमं साधनमिदमित्याह–दुःखैरिति। आध्यात्मिकादिभिस्त्रिविधैस्तापैर्मुहुः पुनः पुनरर्दितः पीडित आत्माऽन्तःकरणं येषां तेषां संक्लेशानां निर्वाणं निवृत्तिमन्यथा भगवद्यशश्रवणकीर्त्तनादि विना प्रकारान्तरेण न उशन्ति सर्वे प्रमाणविदो न मन्यन्त इत्यर्थः। सर्वोपकारार्थं अवतीर्णस्य तवाप्यवतारसाफल्यं आत्मसन्तोषश्चानेनैव भविष्यति नान्यथेति भावः॥ ४०॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता प्रथमे मध्यमाधिकारनिरूपणे॥ विवृतः पञ्चमोऽध्यायो व्यासोत्तरनिरूपकः॥ ३॥

हिन्दी अनुवाद

प्रभो! आप भगवान् श्रीवासुदेवको नमस्कार है। हम आपका ध्यान करते हैं। 'प्रद्युम्न, अनिरुद्ध और संकर्षणको भी नमस्कार है'॥ ३७॥ ❀ ❀ इस प्रकार जो पुरुष चतुर्व्यूहरूपी भगवन्मूर्तियोंके नाम द्वारा प्राकृत-मूर्तिरहित अप्राकृत मन्त्रमूर्ति भगवान् यज्ञपुरुषका पूजन करता है, उसीका ज्ञान पूर्ण एवं यथार्थ है॥ ३८॥ ❀ ❀ ब्रह्मन्! जब मैंने भगवान् की आज्ञाका इस प्रकार पालन किया, तब इस बातको जानकर भगवान् श्रीकृष्णने मुझे आत्मज्ञान, ऐश्वर्य और अपनी भावरूपा प्रेमाभक्तिका दान किया॥ ३९॥ ❀ ❀ व्यासजी! आपका ज्ञान पूर्ण है; आप भगवान्‌की ही कीर्ति का उनकी प्रेममयी लीलाका वर्णन कीजिए। उसीसे बड़े-बड़े ज्ञानियोंकी भी जिज्ञासा पूर्ण होती है। जो लोग दुःखोंके द्वारा बार-बार रौंदे जा रहे हैं, उनके दुःखकी शान्ति इसी से हो सकती है, और कोई उपाय नहीं है॥ ४०॥

पाँचवाँ अध्याय समाप्त

अथ षष्ठोऽध्यायः

सूत उवाच

एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च। भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः ॥ १ ॥

व्यास उवाच

भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव। वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥ २ ॥

स्वायम्भुव कया वृत्त्या वर्तितं ते परं वयः। कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ॥ ३ ॥

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम। न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यासस्य प्रत्ययार्थं च षष्ठे प्राग्जन्मसम्भवम्। स्वभाग्यं नारदः प्राह कृष्णसंकथनोद्भवम् ॥

स्वयमपि तथा चिकीर्षुर्गुरूपदेशानन्तरभावि तच्चरितं पृच्छति भिक्षुभिरिति। विप्रवसिते दूरदेशगमने कृते सति विज्ञानस्यादेष्टृभिरुपदेशकर्तृभिः ॥ २ ॥ ❀ ❀ परं वय उत्तरमायुस्ते त्वया वर्तितं नीतम्। इदमिति दासीपुत्रभूतं कलेवरमुदस्राक्षीरुत्सृष्टवानसि ॥ ३ ॥ ❀ ❀ एष कल्पांतलक्षणः कालस्ते स्मृतिं कथं न व्यवधान्न खंडितवान्। अडागमाभावस्त्वार्षः। हि यत एष सर्वस्य निराकृतिरपलापो यस्मात्सः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

प्रत्ययार्थं विश्वासार्थं कृष्णसंकथनेन कृष्णकीर्त्तनेनोद्भवो यस्य तत्स्वभाग्यम्। इदं व्यासनारदसंवादोपाख्यानं सूतः शौनकादिभ्योऽब्रवीदिति विज्ञापयितुमाह–एवमिति। हे ब्रह्मन्निति। त्वं तु सर्वं जानास्येव परं तु ब्राह्मणानां परोपकृतिस्वभावत्वादयमपि हरियशोवर्णनेन शुद्धो भवत्विति कृपया मां पृच्छसीति भावः। अत्र ब्रह्मशब्दो ब्राह्मणजातिपरो ज्ञेयः। "व्यासः सत्यवतीसुतः" इत्यनेनाहो ब्रह्मवीर्यमहत्त्वं दाशावितमत्स्युदरजातकन्योद्भूतोपि वेदविभाजकत्वाद्व्यास इति नाम विप्रर्षिरभूदिति ध्वनितम्। तथा चिकीर्षुरहमपि नारदशिष्यत्वान्नारदाचरितमेव ग्रहीष्यामीतीच्छावान्। विप्रवसित–इह संप्रसारणाभाव आर्षः ॥ १ ॥ ❀ ❀ ततः भिक्षुप्रवासानंतरं तेषां गृहस्थेतरत्वाद्भिक्षुत्वम्। गृहस्थेतरके। "भिक्षुराश्रमे ब्राह्मणेऽपि च" इति निरुक्तिः ॥ २ ॥ ❀ ❀ स्वयंभुवो ब्रह्मणः सकाशाद्योनिव्यवधानं विना भवतीति स्वायंभुवस्तत्संबुद्धौ तथा। अत्रोवङादेशस्त्वार्षः। ब्रह्मपुत्रत्वात्तव त्रिकालज्ञत्वमस्तीयत एतद्वृत्तं वदेति भावः। उत्तरं बाल्यावस्थापश्चिमम् ॥ ३ ॥ ❀ ❀ अपलापो नाशः ॥ ४ ॥

अस्मिन्पर्याये दीपनी न।

श्रीमद्वीरराघवव्याख्या

'अन्ववोचन् गमिष्यंतः कृपया दीनवत्सलाः' इत्युक्तं तत उपरितनं देवर्षिवृत्तांतं जिज्ञासुः पृच्छति व्यास इत्याह सूत एवमिति। इत्थं वर्णितं देवर्षेर्जन्म कर्म च पौर्वदैहिकं निशम्य स सत्यवत्याः सुतो भगवान् श्रीव्यासः तं देवर्षिं हे ब्रह्मन् शौनक भूयः पुनः पप्रच्छ ॥ १ ॥ ❀ ❀ प्रश्नमेवाह भिक्षुभिरिति त्रिभिः। ते तव विज्ञानादेष्टृभिर्विज्ञानोपदेष्टृभिः भिक्षुभिः संन्यासिभिर्विप्रवसिते चातुर्मास्यांतेऽन्यत्र गते सति ततः पश्चाद्भवानाद्ये वयसि वर्त्तमानः किं कृतवान् ॥ २ ॥ ❀ ❀ हे स्वायंभुव ते त्वया परं वयः भिक्षुविप्रवासप्रभृतिवयः कया वृत्त्या वर्त्तितं नीतं कथं वा प्राप्तकाले इदं कलेवरमुदस्राक्षीरुत्सृष्टवानसि ? प्राक्कालीयमपि कलेवरं वृत्तांतकथनमुखेन प्रस्तुतत्वादिदमिति सन्निहिततया परामृश्यते ॥ ३ ॥ ❀ ❀ हे मुनिसत्तम प्राक्कल्पविषयां पूर्वकल्पीयामेतां भिक्षूपदेशप्राप्तां भगवत्स्मृतिमेष कालो न व्यवधान्न तिरोहितवान्। अडभाव आर्षः, आगमशास्त्रस्यानित्यत्वाद्वा न व्यवधात् किमिति प्रश्नो विवक्षितः। व्यवधायकत्वसूचनाय कालं विशिनष्टि–एष कालः सर्वनिराकृतिः सर्वविनाशकः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदं व्यासनारदसंवादोपाख्यानं सूतः शौनकादिभ्योऽब्रवीदिति विज्ञापयितुमाह एवमिति। हे ब्रह्मन् सत्यवतीसुतो व्यासः देवर्षेर्जन्म कर्म च एवं श्रुत्वा पुनरपि तं नारदं पप्रच्छेत्येकान्वयः ॥ १ ॥ ❀ ❀ नारद स्नेहपाशात्तद्यशःख्यापनाय च

सर्वज्ञोपि व्यासस्तद्वयःशेषवृत्तिं पृच्छति भिक्षुभिरिति। तत्र विशिष्टज्ञानोपदेष्टृभिर्भिक्षुभिर्ज्ञानभिक्षादानशीलैर्विप्रवसिते देशांतरं गते आद्ये बाल्ये वयसि वर्तमानो भवान् तदनंतरं किमकरोदित्येकान्वयः ॥ २ ॥ ❀ ❀ तदेव विविच्य पृच्छति स्वायंभुवेति। स्वयंभुवो ब्रह्मणः पुत्र ते तव परं ज्ञानोपदेशोत्तरकालीनं वयः कया वृत्त्या वर्तितं मरणकाले प्राप्ते इदं शरीरं वा उदस्राक्षीरुत्सृष्टवानसीत्येकान्वयः ॥ ३ ॥ ❀ ❀ सर्वेषां पूर्वजन्मसंज्ञादीनां निराकृतिर्निराकरणं यस्मात्सर्वनिराकृतिरेष कालः सुरसत्तम ज्ञानिश्रेष्ठ ! तवातीतब्रह्मकल्पविषयामेतां स्मरणशक्तिं नैव व्यवधात् तिरोहितां नैवाकरोत् आश्चर्यमेतदित्यस्मिन्नर्थे हिशब्दः, एवकारस्त्ववधारणार्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विशेषज्ञानार्थं भूयः पप्रच्छ ॥ १ ॥ ❀ ❀ भिक्षुभिर्विप्रवसिते भिक्षूणां विशेषेण प्रवासे जाते सतीत्यर्थः ॥ २ ॥ ❀ ❀ इदं सम्प्रति वर्ण्यमानम् ॥ ३-१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षष्ठे गत्वा वनं कृष्णदर्शनं तद्वचःश्रुतिः। तद्दत्तचिन्मयतनोर्नारदेनाप्तिरुच्यते ॥ १ ॥ ❀ ❀ विप्रवसिते तस्मात् प्रवासतो विच्युते, संप्रसारणाभाव आर्षः। किमकरोदिति त्वच्छिष्योऽहमपि तथा चिकीर्षामीति भावः ॥ २ ॥ ❀ ❀ इदं दासीपुत्रभूतं कलेवरं कथम् उत्सृष्टवानसि ॥ ३ ॥ ❀ ❀ न व्यवधात् व्यवधाय न खण्डितवान्, अडागमाभाव आर्षः। निराकृतिर्विनाशः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विप्रवसिते चातुर्मास्यांतेऽन्यत्र गमने कृते ॥ १ ॥ ❀ ❀ परं वयः गुरुवियोगोत्तरवर्ति वयः उदस्राक्षीरुत्सृष्टवानसि ॥ ३ ॥ ❀ ❀ न व्यवधात् न तिरोहितवान्, अडभाव आर्षः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

मध्यमेनाधिकारेण पदार्था विनिरूपिताः। श्रवणस्य फलं चांतर्ज्ञानरूपं प्रदर्शितम् ॥
षष्ठे तु बाह्यं तस्यैव कीर्त्तनावधि वर्ण्यते। बाह्याभावे त्वांतरस्य व्यर्थतेति निरूप्यते ॥

पूर्वाध्यायांते अदान्मे ज्ञानमैश्वर्यमित्युक्तं तत्र संदेहः श्रवणमेव निरूपितमवांतरज्ञानं च। किं तदानीमेव भगवता ऐश्वर्यं दत्तं कालांतरे वेति श्रोतव्यविषयनिरूपकस्य फलकथनार्थं भवति विचारणा। अतः पृच्छतीत्याह एवमिति। नारदोक्तौ यथार्थत्वमित्यवगतौ हेतुमाह भगवानिति। असंभावितत्वं निराकरोति देवर्षेरिति। हे ब्रह्मन् शौनक भूयः प्रश्नस्तूष्णींभावात् आदराधिक्ये ज्ञात एव विशेषकथनात् भगवत्कृपया एतावज्जातमिति कथितोपि पुनः प्रश्नः। अनतिप्रयोजनं पृच्छतीति च सत्यवतीसुत इत्युक्तम् ॥ १ ॥ ❀ ❀ प्रश्नमाह त्रिभिः, भिक्षुभिरिति। प्रकृतशरीरत्यागज्ञाननाशाभावः ब्रह्मविदो न किंचित् कर्त्तव्यमिति योगेनैव शरीरत्यागो मोक्ष इति कालस्त्वनतिक्रमणीय इति प्रष्टः ॥ २ ॥ ❀ ❀ स्वायंभुवेतीदानींतनसंबोधनं वृत्तिर्जीविका शरीरनिर्वाहिका कथमिति योगादिप्रकाराः वार्थविशेषे पुनरित्यर्थः। काले प्राप्ते अप्राप्ते वेति प्रश्नः। इदमिति बुद्ध्या पुरः स्थितं वेति पाठेऽत्यनादरः। कालजन्यं कालो गृह्णातीति वा आह काल इति ॥ ३ ॥ ❀ ❀ एतां स्मृतिं संस्कारनाशेन पूर्वकल्पविषयेभ्यः व्यवहितां कथं न क्षयं कृतवान्, तदा इयं स्मृतिः शब्दमूला स्यात् इदानीं तु प्रत्यक्षमूलेति देवानां भक्तानामपि सतां स्मृतिं कालो नाशयति तव तु नेत्याश्चर्येण संबोधनम्। अल्पस्याप्येतदभावाभाव एवकारः। कार्यदर्शनायुक्तता हिशब्दार्थः कालमाहात्म्यं च प्रत्यक्षसिद्धं भगवत्त्वात् कालं साक्षात् कृत्वाह एष इति ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ षष्ठाध्यायं विवरिषवः सङ्गतिं वक्तुं द्वयोरर्थमाहुः मध्यमेनेत्यादि। तस्यैवेति श्रवणस्यैव। वर्ण्यत इति। फलमित्यनुषज्यते। बाह्याभाव इति। कीर्तनाभावे। इति निरूप्यत इति। इतो हेतोर्व्यासपादैरूपनिबध्यते। तथा च फलोपोद्घातः सङ्गतिरित्यर्थः। श्रोतव्यविषयनिरूपकस्येति श्रोतव्यो यो विषय ऐश्वर्यदानरूपस्तन्निरूपयितुर्नारदस्येत्यर्थः। भवतीति श्रोतुर्भवतीत्यर्थः। एवं निशम्येत्यत्र। तूष्णीम्भावे हेतुमाहुः आदरेत्यादि। तथा च मदुक्तौ व्यासस्यादरोऽस्ति न वेति ज्ञातुं नारदस्य तूष्णींभाव इत्यर्थः ॥ १ ॥ ❀ ❀ भिक्षुभिरित्यत्र। तदेति। कालेन संस्कारनाशे ॥ २ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कृष्णभक्तिप्रभूतं च व्यासचिन्तानिवृत्तये। अद्भुतं स्वफलं षष्ठे नारदेन निरूप्यते ॥

'इमं स्वनिगमं ब्रह्मन्' इति सङ्क्षेपत उक्तं श्रीनारदचरितं स्वयं विस्तरेण तच्छ्रोतुकामो व्यासस्तं पुनः पृष्टवानित्याह—एवमिति। भगवद्भक्तानां भगवद्भक्तचरितश्रवणे सङ्क्षेपतः सन्तोषो न भवतीति तु स्वदृष्टान्तेन ज्ञेयमिति सूचयन् सम्बोधयति—हे

ब्रह्मन्निति । एवं देवर्षेर्जन्म कर्म च निशम्य श्रुत्वा सत्यवतीसुतो भगवान् सर्वज्ञो व्यासस्तं नारदं भूयः पुनः पप्रच्छेत्यन्वयः ॥ १ ॥ ❀ ❀ प्रश्नमेव दर्शयति–भिक्षुभिरिति त्रिभिः । तव विज्ञानादेष्टृभिर्भिक्षुभिः संन्यासिभिर्विप्रवसिते चातुर्मास्यान्तेऽन्यत्र गमने कृते सति ततस्तदनन्तरं भवान् किमकरोदित्यन्वयः । एवं तत्त्वोपदेशे जातेऽपि बालस्य तवान्यत्रासक्तिस्तत्त्वविस्मृतिश्च सम्भवत्यतः कथमुपदेशसाफल्यं फलं च दृश्यते इत्याश्चर्येणाह–आद्ये वयसि वर्त्तमान इति ॥ २ ॥ ❀ ❀ तव वचने मम महान् विश्वासोऽस्तीति सूचयन् ब्रह्मपुत्रत्वेन सम्बोधयति–हे स्वायम्भुवेति । ते त्वया परं वयस्तदुत्तरमायुः कया वृत्त्या जीविकया वर्तितं नीतम् । मृत्युकाले प्राप्ते इदं वृत्तान्तकथनमुखेन प्रस्तुतं दासीपुत्ररूपं कलेवरं कथमुदस्राक्षीः उत्सृष्टवानसि ॥ ३ ॥ ❀ ❀ सुराणामपि प्राक्स्मृतिविनाशो दृश्यते, तव तन्नास्तीत्यतो ज्ञायते त्वं तेभ्योऽपि श्रेष्ठोऽसीति । सूचयन् सम्बोधयति–हे सुरसत्तमेति । प्राक्कल्पविषयां प्राक्कल्पीयामेतां भिक्षूपदेशादिविषयां ते तव स्मृतिमेष कालः कथं न व्यवधात् कथं न तिरोहितां चकारेत्यन्वयः । अडागमाभाव आर्षः । हि यस्मादेष कालः सर्वनिराकृतिः सर्वस्य निराकृतिः निराकरणं विनाशो यस्मात्तथाभूतः ॥ ४ ॥

हिन्दी अनुवाद

नारदजीके पूर्वचरित्र का शेष भाग

श्रीसूतजी कहते हैं—शौनकजी ! देवर्षि नारदके जन्म और साधनाकी बात सुनकर सत्यवतीनन्दन भगवान् श्रीव्यासजीने उनसे फिर यह प्रश्न किया ॥ १ ॥ ❀ ❀ श्रीव्यासजीने पूछा—नारदजी ! जब आपको ज्ञानोपदेश करनेवाले महात्मागण चले गये, तब आपने क्या किया ? उस समय तो आपकी अवस्था बहुत छोटी थी ॥ २ ॥ ❀ ❀ स्वायम्भुव ! आपकी शेष आयु किस प्रकार व्यतीत हुई और मृत्युके समय आपने किस विधिसे अपने शरीरका परित्याग किया ? ॥ ३ ॥ ❀ ❀ देवर्षे ! काल तो सभी वस्तुओंको नष्ट कर देता है, उससे आपकी इस पूर्वकल्पकी स्मृतिका कैसे नाश नहीं किया ? ॥ ४ ॥

नारद उवाच

भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम । वर्तमानो वयस्याद्ये तत एतद् कारषम्[1] ॥ ५ ॥
एकात्मजा मे जननी योषिन्मूढा च किंकरी । मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ॥ ६ ॥
सास्वतन्त्रा न कल्पाऽऽसीद्योगक्षेमं ममेच्छती । ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥
अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया । दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

अकारषं कृतवानहम् । रेफषकारयोर्विश्लेषश्छंदोऽनुरोधेन ॥ ५ ॥ ❀ ❀ तत्र तावत्कंचित्कालं तत्रैव मातृस्नेहयंत्रितो न्यवसमित्याह त्रिभिः । एक एव अहमात्मजः यस्याः सा । योषिदिति मूढेति च स्नेहानुबंधे हेतुः ॥ ६ ॥ ❀ ❀ किंकरीत्यस्यार्थं प्रपंचयति । सेति । अस्वतंत्रा सा अतो न कल्पा न समर्था आसीत् । दारुमयी योषेत्यतिपारवश्ये दृष्टांतः ॥ ७ ॥ ❀ ❀ तदेवं सा स्नेहं चक्रेऽहं च दिगादिष्वनभिज्ञोऽतस्तत्रैव न्यवसमित्याह । अहं च तस्मिन्ब्रह्मकुले तस्याः मातुः स्नेहानुबन्धस्यापेक्षया कदा विरमेदिति प्रतीक्षयेत्यर्थः । ऊषिवान्वासं कृतवान् । पंचहायनः पंचवर्षः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतद्वक्ष्यमाणम् । छन्दोनुरोधेन छंन्दोभंगभयात् । तदुक्तम् "मूर्द्धरेफा विकल्प्यंते छन्दोभंगभयादिह" इति विश्वनाथेन ॥ ५ ॥ ❀ ❀ तत्र तावदिति वाक्यालंकारे । तत्रैव विप्राश्रम एव । योषितां मूढानां च पुत्रादिषु स्नेहाधिक्यात् । योषितां मध्ये मूढेति वाऽत एव किंकरी दास्यमापन्ना । नान्या गतिराश्रयो यस्य तस्मिन्मयि स्नेहस्यानुबन्धनं चक्रे । "अनुबन्धस्तु बन्धे स्यात्" इत्यभिधानात् । अत्रानूपसर्गो धात्वर्थानुगाम्येवातः स्नेहबन्धनं चक्र इत्यर्थः ॥ ६ ॥ ❀ ❀ अतोऽस्वतंत्रत्वात् अलब्धलाभो योगः, लब्धस्य परिरक्षणं क्षेमः । मत्पुत्रस्य सुखमुद्वाहादि भवतु, यदधुनास्य सुखाद्यस्ति तदन्वहमेधतामित्येवं सदैवेयेषेत्यर्थः । ईशस्य स्वामिनो वशे लोकः सेवकजन इति वा । दारुमयी योषा काष्ठपुत्तलिका यथा प्रनर्त्तकपुरुषाधीना तथेत्यर्थः ॥ ७ ॥ ❀ ❀ अतो दिगाद्यनभिज्ञत्वात् । ब्रह्मकुले ब्राह्मणगृहे । "कुलं वंशे गृहे सार्थे जातिसांकर्ययोरपि" इत्यभिधानात् । इत्यर्थ इति । कदेयं मां त्यक्ष्यति मरिष्यतीति प्रतीक्षां कुर्वाणस्तत्रैवावसमिति भावः । पञ्च हायनाः परिच्छेदका यस्य स तथा, "हायनोऽस्त्री शरत्समाः" इत्यमरः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

योगक्षेमम् अलब्धलाभलब्धपरिरक्षणरूपमित्यर्थः ॥ ७-११ ॥

---

१. प्रा० पा०—कारिषम् ।

अस्मिन्पद्यार्थे दीपनी न

श्रीमद्वीरराघवव्याख्या

एवमापृष्टः यथावत्स्ववृत्तान्तं वक्तुमारेभे नारदः । भिक्षुभिरिति । तत इत्यन्तस्य पूर्ववदेवार्थः । एतद्वक्ष्यमाणमकारषमकार्षं कृतवानिति ॥ ५ ॥ ❀ ❀ तदेवाह एकात्मेत्यादिना कल्पांत इत्यतः प्राक्तनेन ग्रन्थेन । एकोहमात्मजः पुत्रो यस्याः सा मम जननी माता योषेति स्वभावोक्तिः जननीत्यनेनैव स्त्रीत्वोक्तेः । अत एव मूढा किंकरी, अनेन पराधीनत्वमुक्तम् । अनन्यगतौ गतिः पोषणोपाय अनन्यपोषके मय्यात्मजे स्नेहानुबन्धनं स्नेहपारवश्यं चक्रे ॥ ६ ॥ ❀ ❀ सा मम जननी अस्वतन्त्रा किंकरीत्वादत एव मम योगक्षेममिच्छत्यपि न कल्पनसमर्था बभूव । योगश्च क्षेमश्च तयोः समाहारः, योगोऽलब्धलाभः, लब्धपरिरक्षणं रक्षितविवर्द्धनं तस्य पात्रे प्रतिपादनं च क्षेमः ॥ ७ ॥ ❀ ❀ अहं च तदा पंचहायनः पंचवर्षवयस्को बालकः । अत एव दिग्देशकालाव्युत्पन्नः दिग्देशकालस्वभावानभिज्ञः तदपेक्षया मात्रपेक्षया तद्देहावसानप्रतीक्षणेन हेतुत्वेनेत्यर्थः, तस्मिन्ब्रह्मकुले ब्राह्मणगृहे उषितवानस्मि ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विज्ञातस्वकीर्तिवितरणव्यासाभिप्रायो नारदस्तत्प्रश्नं परिहरति भिक्षुभिरिति । उक्तार्थश्लोकोयम् ॥ ५ ॥ ❀ ❀ स्वस्य संन्यासिनामनुगमने कारणमाह एकात्मजेति । अहमेक एव आत्मजोपत्यं यस्याः सा, तथा योषितां मध्ये मूढा विवेकज्ञानशून्या किंकरी दासी च एवंविधा मम जननी न अन्या गतिराश्रयो यस्य सोऽनन्यगतिः तस्मिन्नात्मजे मयि स्नेहानुबन्धनं चक्र इत्येकान्वयः ॥ ६ ॥ ❀ ❀ केवलं स्नेहमेव बद्धवती न त्वशनवसनादिदानपूर्वकमित्याह सेति । मम योगक्षेममप्राप्तस्य प्राप्त्युपायं योगं प्राप्तस्य प्रतिपालनं क्षेममिच्छती अस्वतन्त्रा पराधीना कल्पा समर्था नासीदित्येकान्वयः, कुतो लोकः सेवको जनः ईशस्य स्वामिनो वशे हि यस्मात्तस्मादित्यर्थः । ईशावास्यमिति श्रुतेरीशस्य परमेश्वरस्येति वा कथमिव दारुमयी काष्ठनिर्मिता योषा यथा जडप्रवर्तकयन्त्रपुरुषाधीना तथेत्यन्वयः ॥ ७ ॥ ❀ ❀ तर्हि किमिति तत्र वास इति तत्राह अहमिति । चशब्द एवार्थः पूर्वेण समुच्चयार्थो वा । अहं तस्याः मातुरपेक्षया तस्मिन् ब्रह्मकुल एव ब्राह्मणगृह एव ऊषिवानित्यन्वयः । 'कुलं वंशे गृहे नार्थे जातिसाङ्कर्ययोरपी'त्यभिधानात् तत्र वासे हेत्वन्तरमाह दिगिति । दिगाद्यनभिज्ञाने कारणमाह बालक इति-पंच हायनाः संवत्सराः यस्य स तथोक्तः योहं दिगाद्यनभिज्ञः पंचहायनो बालकः सोहमित्येकान्वयः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अकारषमिति रेफषकारविश्लेषः छन्दोऽनुरोधेन । यदुक्तम् 'ऊर्द्ध्वरेफा विकल्प्यन्ते छन्दोभंगभयादि'हेति ॥ ५ ॥ ❀ ❀ एकोऽहमेवात्मजो यस्याः सा ॥ ६ ॥ ❀ ❀ अस्वतन्त्रा अतो न कल्पा न समर्था ॥ ७ ॥ ❀ ❀ तदपेक्षया तत्कर्त्रीका या अपेक्षा तया सा मां न त्यजतीत्यहमप्यवसमित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अकार्षम् कृतवानहम् ॥ ५-७ ॥ ❀ ❀ ऊषिवान् वासं कृतवान् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

शास्त्रार्थदार्ढ्याद्वा प्रथमप्रश्ने उत्तरमाह भिक्षुभिरित्यादिना एवं कृष्णमतेरित्यन्तेन । ब्रह्मविदोपि भगवदर्थं यत्नः कर्तव्यः दृष्टे च भगवति तदाज्ञा कर्त्तव्येति अनुवादतः प्रतीयते । पूर्वावधारणात् एतदपि वक्ष्यमाणं त्रिभिः प्रतिबंधकतामेकेनाभावं चाह भगवाननुगुणश्चेदग्रिमावस्था संपादनीयेति नान्यथा ॥ ५ ॥ ❀ ❀ नारदस्तु भगवत्प्रतीक्षया स्थित इत्याह त्रिभिः एकात्मजेति । एक एव आत्मजो यस्याः सा आसक्त्याधिक्ये हेतुः, मे जननीति पूर्वावस्थां स्मृत्वा जनयित्री योषितामपि मध्ये मूढा उपदेशाभावायोक्तं किंकरीति । उपदेशावसराभावः सूचितः । आत्मजे अनन्यगताविति स्वभाविकौपाधिकहेतू स्नेहस्य निरूपितौ ॥६॥ ❀ ❀ स्नेहेन अनु पश्चादात्मनो बंधनं तत्र स्नेहानुबंधनमेव जातं न कार्यं अन्यथा विषयेण ममापि बंधः स्यादित्यभिप्रायेणाह-सा माता अस्वतन्त्रा स्वाम्यधीना वा अत एव न कल्पा मम योगक्षेमादौ न समर्था । कुंडलादौ योगः, प्राप्तस्य परिपालनं क्षेमः, ब्रह्मविदः सर्वदेवतासन्निधानेन कथं न योगक्षेमप्राप्तिः, तत्राह-ईशस्य वशे लोक इति मत्त एव पृथग्विधा इति प्रमाणं हिशब्देन सूचितम् ईशस्य भगवतः कालस्य वा यथा स्त्रीप्रतिमा कुहकेच्छया नृत्यति एवं सर्वोऽपि लोकश्चेष्टते इति भगवज्ज्ञानवतो बुद्धिः कालपक्षेपि तथा कर्मभूतभौतिकपक्षे त्वन्यथा तदग्रे वक्ष्यामः, यथा योषितपुत्तलिकां कुहकोपि न स्वातन्त्र्यादिधर्मयुक्तां करोति तथा भगवानपि जीवान् तदाह योषेति ॥ ७ ॥ ❀ ❀ अहं चेति । चकारात् यथा माता ईश्वराधीना तथाहमपि, भिन्नतया ग्रहणं विशेषतस्तदधीनत्वात् तद्ब्रह्मकुले स्वामिब्राह्मणानां कुले अनेनान्नदोषो निवारितः । तदपेक्षया मातृकृतप्रतिबन्धकाभावापेक्षया दिशः पूर्वादयः, देशः स्वदेशादयः कालाः, दिनरात्रिप्रभृतयः, तेन क स्थातव्यमिति विवेकरहितः । अनेन लौकिकापरिज्ञानं अतस्तेनापि न बंधात्मविस्मरणे बालक इति विषयसंबंधाभावः पंचहायन इति पराधीनता च ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

उत्तरग्रन्थे भिक्षुभिरित्यत्र । प्रथमप्रश्न इति कृतिप्रश्ने । एतेषां त्रयोविंशतिश्लोकानां तात्पर्यमाहुः ब्रह्मविद इत्यादि । 'एकात्मजे'त्यादिश्लोकचतुष्टयोक्तितात्पर्यमाहुः भगवानित्यादि । अग्रिमावस्था भगवत्साक्षात्कारार्थकयत्नकरणावस्था । आनुगुण्यसन्देहे यत्कार्यं तदाहुः अन्यासक्तिरित्यादि । तादृशमिति आनुगुण्यजनकम् ॥ ५ ॥ ❀ ❀ एकात्मजेत्यत्र । आत्मन इति ममेत्यर्थः । तत्रेति मातृकर्तव्यपदार्थमध्ये । योग इति अलब्धस्य सम्पादनम् ॥ ६–८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमापृष्ट उत्तरमाह–भिक्षुभिरित्यादिना । तत इत्यन्तस्यार्थ उक्त एव । एतद्वक्ष्यमाणकार्यं कृतवानहम् ॥ ५ ॥ ❀ ❀ तत्र प्रथमं स्वमातुर्वृत्तान्तमाह–एकात्मजेति । मे मम जननी माता मयि स्नेहस्यानुबन्धनं चक्रे इत्यन्वयः । तत्र हेतुमाह–आत्मजे इति । पुत्रे स्वभावत एव स्नेहो भवतीति तु सर्वजनप्रसिद्धमेव, तत्रापि पुत्रान्तरे सति स्नेहो विभक्तो भवति तदपि नासीदित्याह–एकात्मजेति । एकोऽहमेवात्मजो यस्याः सा । एवमपि पित्रादिरक्षकान्तरे सति मातुर्मनसः स्वास्थ्यं भवति तदपि नासीदित्याह–अनन्यगताविति, नास्ति अन्या गतिः मातुः सकाशाद्रक्षकान्तरं यस्य तस्मिन् । ननु विवेके सति कथमेवं मोह इत्याशङ्क्याह–मूढेति । तत्र हेतुमाह–योषिदिति । स्वभावतो योषितां मूढता प्रसिद्धैव । ननु काचिच्छ्रवणादिना विवेकवत्यपि भवतीत्याशङ्क्य तस्याः श्रवणादिसावकाश एव नासीदित्याशयेनाह–किङ्करीति ॥ ६ ॥ ❀ ❀ सा मम जननी मम योगक्षेममिच्छत्यपि कल्पा तत्तत्सम्पादने समर्था नासीदित्यन्वयः । कुतः ? यतोऽस्वतन्त्रा । तत्र लौकिकदृष्ट्या तु पारतन्त्र्यं किङ्करीत्यनेनैव सूचितम् । परमार्थदृष्ट्या सर्वोऽपि लोक ईश्वराधीनः सर्वोऽपि स्वयोगक्षेममिच्छति सति तत्सिद्धिस्तु ईश्वराधीनैवातस्तस्याः पारतन्त्र्ये तु किं वक्तव्यमित्याशयेनाह–ईशस्येति । तत्र "ईशावास्यमिदं सर्वं" इत्यादिशास्त्रप्रसिद्धिं सूचयति–हीति । तत्र दृष्टान्तमाह–योषेति, दारुमयी योषापुत्तलिका यथा नर्त्तकवशेन नृत्यति तथेत्यर्थः । तत्रालब्धलाभो योगः, लब्धपरिरक्षणं रक्षितस्य वर्द्धनं पात्रे प्रतिपादनं च क्षेमस्तयोः समाहारो योगक्षेममिति ॥ ७ ॥ ❀ ❀ इदानीं स्ववृत्तं दर्शयन् मातृस्नेहयन्त्रितोऽहं कञ्चित्कालं तत्रैव न्यवसमित्याह–अहमिति । अहं च तदा पञ्चहायनः पञ्चवर्षवयस्को बालकः । अत एव दिग्देशकालाव्युत्पन्नः दिशः पूर्वादयः, देशाः प्रयागादयः, काला दिनरात्रिप्रभृतयस्तदनभिज्ञः तदपेक्षया मातृकृतस्नेहरूपप्रतिबन्धनिवृत्त्यपेक्षया तद्ब्रह्मकुले मातृसेवितब्राह्मणानां गृहे ऊषिवान् न्यवसमित्यन्वयः ॥ ८ ॥

हिन्दी अनुवाद

श्रीनारदजीने कहा—मुझे ज्ञानोपदेश करनेवाले महात्मागण जब चले गये, तब मैंने इस प्रकार अपना जीवन व्यतीत किया—यद्यपि उस समय मेरी अवस्था बहुत छोटी थी ॥ ५ ॥ ❀ ❀ मैं अपनी माका इकलौता लड़का था । एक तो वह स्त्री थी, दूसरे मूढ़ और तीसरे दासी थी । मुझे भी उसके सिवा और कोई सहारा नहीं था । उसने अपनेको मेरे स्नेहपाशसे जकड़ रक्खा था ॥ ६ ॥ ❀ ❀ वह मेरे योगक्षेमकी चिन्ता तो बहुत करती थी, परन्तु पराधीन होनेके कारण कुछ कर नहीं पाती थी । जैसे कठपुतली नचानेवालेकी इच्छाके अनुसार ही नाचती है, वैसे ही यह सारा संसार ईश्वरके अधीन है ॥ ७ ॥ ❀ ❀ मैं भी अपनी माके स्नेहबन्धनमें बँधकर उस ब्राह्मण-बस्तीमें ही रहा । मेरी अवस्था केवल पाँच वर्ष की थी; मुझे दिशा, देश और कालके सम्बन्धमें कुछ भी ज्ञान नहीं था ॥ ८ ॥

एकदा निर्गतां गेहाद् दुहन्तीं निशि गां पथि । सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥
तदा तदहमीशस्य भक्तानां शमभीप्सतः । अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ॥ १० ॥
स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान् । खेट¹खर्वटवाटीश्च वनान्युपवनानि च ॥ ११ ॥
चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् । जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गेहान्निर्गतां गां दुहंतीम् । हेतौ शतृप्रत्ययः । दोग्धुं निर्गतामित्यर्थः । पदा पादेनास्पृष्टः ईषदाक्रांतोऽदशदखादत् ॥ ९ ॥ ❀ ❀ तन्मातुर्मरणं भक्तानां शं कल्याणमभीप्सतः ईशस्यानुग्रहं मन्यमानः प्रातिष्ठं प्रस्थितोऽस्मि ॥ १० ॥ ❀ ❀ स्फीतान् जनपदादीनतियातः सन्महद्विपिनमद्राक्षमिति चतुर्थेनान्वयः । जनपदादिषु नानागुणदोषयुक्तेषु समदृष्टिः सन्गतोऽहमिति तात्पर्यार्थः । स्फीतान्समृद्धान् जनपदान्देशान् । तत्र तस्यां दिशि । पुरग्रामव्रजाकरान् । तत्र पुराणि राजधान्यः । ग्रामाः

१. प्रा० पा—खेटान् ।

भृगुप्रोक्ताः "विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति ते। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च" इति। व्रजाः गोकुलानि। आकराः रत्नाद्युत्पत्तिस्थानानि तान्। खेटाः कर्षकग्रामाः। खर्वटाः गिरितटग्रामाः भृगुप्रोक्ता वा "एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्। मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम्" इति। वाट्यः पूगपुष्पादीनां वाटिकास्ताः। वनानि स्वतःसिद्धवृक्षाणां समूहाः। उपवनानि रोपितवृक्षाणां समूहास्तानि च ॥ ११ ॥ ❀ ❀ चित्रैर्धातुभिः स्वर्णरजताद्यैर्विचित्रानद्रींश्च। इभैर्भग्नाः भुजाः शाखाः येषां ते द्रुमाः येषु तान्। शिवानि भद्राणि जलानि येषां तान्। नलिनीः सरसीः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति। "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्यये दोहनार्थं गृहाद्गोशालां गच्छंतीं मार्गे कृपणामनाथामदशदिति भावः ॥ ९ ॥ ❀ ❀ तदा मातृमरणोत्तरावसरे मातैव मम बन्धनमासीत्तन्मरणान्मम बंधननिवृत्त्येशानुग्रहो जात इति भावः ॥ १० ॥ ❀ ❀ "नीवृज्जनपदो देश" इत्यमरः। "अटव्यरण्यं विपिनम्" च। तत्र तेषां मध्ये अग्रे स्पष्टम् ॥ ११ ॥ ❀ ❀ "इभः स्तंबेरमः पद्मी" इत्यमरः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

नलिनीः पद्मयुक्तदेशाः, 'कुमुदिन्यां नलिन्यान्तु बिसिनी पद्मिनीमुखाः' इत्यमरकोषाभिधानात् तानित्यर्थः। अत एव तस्यार्थः सरसीति स्वामी, तत्र सरसीः सरोवरान् बृहज्जलाशयानिति यावत् ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

एवं स्थिते कदाचिन्निशि गेहान्निर्गतां गां दुहंतीं दोग्धुं प्रवृत्तां कृपणां मम मातरं पथि मार्गे पदा पादेन स्पृष्टः कालचोदितः कालशरीरकेण दैवेन चोदितः सर्पः अदशददंशत साऽम्रियतेत्यर्थतो द्रष्टव्यम् ॥ ९ ॥ ❀ ❀ तदाहं तन्मरणं भक्तानां शं सुखमभीप्सतः कामयमानस्येशस्य भगवतोनुग्रहरूपं मन्यमान उत्तरां दिशं प्रति प्रातिष्ठं प्रस्थितवानस्मि ॥ १० ॥ ❀ ❀ तत्र प्रस्थाने स्फीतान्समृद्धान् जनपदान् देशान् द्वितीयांतानामतियात इत्युपरिष्टादन्वयः। पुराणि पट्टणानि ग्रामान् हट्टरहितान् व्रजान् गोपालनिवासान् आकरान् रत्नाद्युत्पत्तिस्थानानि खेटान् कृषीवलग्रामान् खर्वटान् निषादादिग्रामान् वाटीः पुष्पवाटिकाः वनान्यरण्यरूपाणि उपवनानि कृत्रिमवनानि च ॥ ११ ॥ ❀ ❀ तथा चित्रैर्नानाविधैर्धातुभिर्गैरिकादिभिर्विचित्रान् नदीपर्वतान् इभैर्गजैर्भग्नाः विच्छिन्ना भुजाः शाखा येषां तान् द्रुमान् शिवानि विशुद्धानि जलानि येषु तान् जलाशयान्सरांसि तथा सुरैः सेविताः क्रीडिताः नलिनीयाकरान् कथंभूताः चित्रा नानाविधाः स्वना येषां तैः पत्ररथैः पत्राणि तद्रूपात्मकाः पक्षा रथा रथवत् गमनसाधनानि येषां तैरित्यर्थः। पक्षिभिः संकुल इति शेषः, भ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कियंतं कालमवात्सीदिति प्रश्नस्य मातृमरणपर्यंतमवात्समिति परिहारमभिप्रेत्याह एकदेति। स्पृश उपताप इति धातोः, आक्रमणेन तप्तः गां गोमतल्लिकाम् अदशत् अभक्षयत् कालेन मृत्युना चोदितः प्रेरितः ॥ ९ ॥ ❀ ❀ सोहं तदा मातुरंत्यं कर्म कृत्वा तन्मरणं भक्तानामभीष्टमीशस्यानुग्रहं मन्यमान उत्तरां दिशं प्रातिष्ठमित्यन्वयः ॥ १० ॥ ❀ ❀ एक एव सहायरहितः अहं तत्रोत्तरस्यां दिशि देशान् समेतानतीत्य यात इति चतुर्थश्लोकेनान्वयः। व्यालाश्च दुष्टगजाश्च उलूकाश्च शिवाः शृगाल्यश्च व्यालोलूकशिवाः तासामजिरं क्रीडास्थानं प्रतिभयाकारं मृत्युमाह्वयदिव स्थितमत एव घोरमहदपारं विपिनमद्राक्षमित्येकान्वयः। सर्वर्तुसंपत्त्या स्फीतान् समृद्धान् पुराणि ग्रामाश्च व्रजाश्च आकराश्च पुरग्रामव्रजाकराः। पुरं राजाश्रयः ग्रामो बहुजनाकीर्णः गोपालानां गवां च निवासस्थानं व्रजः रत्नाद्युत्पत्तिस्थानमाकरः खेटान् मृगयोपजीवनप्रदेशान् पट्टनानि वाट्यश्च तास्तथोक्तास्ताः पट्टनवाटीः जलस्थलायतिस्थिता राजधानीपट्टनं पुष्पोपजीविनां निवासस्थानं वाटी, वृक्षसमुदाय उपवनम् ॥११॥ ❀ ❀ इभैर्गजैर्भग्ना भुजद्रुमा भूर्जवृक्षा येषु ते तथोक्ताः "भूर्जपत्रे भुजो भूर्जे मृदुत्वक् चर्ममल्लिकावि"ति यादवः। इभभग्नाः भुजाः शाखा येषां ते तथोक्ताः इभभग्नभुजद्रुमाः येषु ते तथोक्ता इति वा तान्, विचित्रधातुभिः नानाविधगैरिकहरितालादिभिः चित्रा आश्चर्यरूपा अद्रयः गिरयः तान् शिवजलान् गुरुत्वादिदोषरहितान् जलाशयान् सरोवरादिजलाधारान्, देवनिषेविता नलिनीः पुष्करिणीः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दुहन्तीं दोग्धुम् ॥ ९ ॥ ❀ ❀ तन्मातुर्मरणम् ईशस्य मय्यनुग्रहं मन्यमानः प्रातिष्ठम् अकृततत्साम्परायिकविधिरेव गतवान्। परस्मैपदमार्षम् ॥ १० ॥ ❀ ❀ जनपदादीनतियातः सन् महद्विपिनमद्राक्षमिति चतुर्थेनान्वयः। तत्र पुराणि राजधान्यः, ग्रामा भृगुप्रोक्ताः 'विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव चे'ति, व्रजा गोकुलानि। आकरा रत्नाद्युत्पत्तिस्थानानि। खेटाः कर्षकग्रामाः। खर्वटा गिरितटग्रामा भृगुप्रोक्ता वा 'एकतो यत्र तु ग्रामो नगरञ्चैकतः

स्थितम्। मिश्रन्तु खर्वटं नाम नदीगिरिसमाश्रयमि'ति। वाट्यः पूगपुष्पवाटिकाः। वनानि स्वतःसिद्धवृक्षसमूहाः, उपवनानि रोपितवृक्षसंघाः॥ ११॥ ❀ ❀ चित्रैर्धातुभिः सुवर्णरजताद्यैर्विचित्रान् अद्रीन्। इभैर्भग्ना भुजाः शाखा येषां ते द्रुमा येषु तान्। नलिनीः सरसीः॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

गां दुहंतीं हेतौ शता, गेहान्निशि गां दोग्धुं निर्गताम् पदा स्पृष्टः पादेनास्पृष्टः॥ ९॥ ❀ ❀ शं सुखमभीप्सतः कामयमानस्य तन्मातृमरणम् अहमनुग्रहं मन्यमानः प्रातिष्ठम्॥ १०॥ ❀ ❀ स्फीतान्समृद्धान् जनपदान् देशान् तत्र तेषु जनपदेषु पुरग्रामव्रजाकरान् पुराणि पट्टणानि ग्रामान् हट्टशून्यान् विप्रादिनिवासान् व्रजान् गोपनिवासान् आकरान् रत्नाद्यालयान् खेटान् कर्षकनिवासान् खर्वटान् निषादादिनिवासान् वाटीः पुष्पाढ्याः वनानि अरण्यरूपाणि उपवनानि कृत्रिमाणि वृक्षस्थानानि॥ ११॥ ❀ ❀ नलिनीः सरसीः॥ १२॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भगवतापि किंचित् विवेकार्थं प्रतिबंधः स्थापितः, जाते तु विवेके तत् दूरीकृतवानित्याह एकदेति। यदा सर्वेपि गृहस्थाः स्वस्वकार्ये व्यावृत्ता गेहान्निर्गतामिति गृहान्निर्हरणक्लेशोपि निवारितः। शुद्धिश्च गोस्पर्शे दुहंतीमिति सर्वसत्क्रियाव्यावृत्तत्वं पथि स्थितः सर्पः भगवत्प्रेरणया समागतः भगवत्कृतत्वज्ञापनाय पदा स्पृष्टः इति तस्या अपराध उक्तः। वस्तुतस्तस्या अपि न दोषः न वा तस्येत्याह कालचोदित इति कालादयो भगवदिच्छानुसारेण कार्यकर्त्तारः॥ ९॥ ❀ ❀ मयापि स भगवदुपकार इति ज्ञात्वा तथैव कृतमित्याह तदा तदहमीशस्येति सर्वदा हि भगवान् भक्तानामेव कल्याणमीष्टे तथापि, कदाचित् प्रतिबंधकानामप्यात्मत्वात् न दूरीकरोति। यदि तदपि कुर्यात्तदा महाननुग्रहोऽयमिति ज्ञात्वा चिकीर्षिते न विलम्बः कर्त्तव्य इत्यभिप्रायेणाह अनुग्रहं मन्यमान इति उत्तरामिति "एषा वै देवमनुष्याणां शांता दिगि"ति श्रुतेः॥ १०॥ ❀ ❀ भगवत्कृतेन प्रतिबंधं ज्ञापयितुं भूजलद्रुमातिक्रममाह स्फीतानिति सार्धद्वाभ्याम्। तत्रैकेन भूमिविशेषानाह स्फीतान् सस्यादियुक्तान् जनपदान् मालवादीन् पुरान् नगरान् स्थूलान् ग्रामाः सूक्ष्मावासाः व्रजा गवां स्थानानि आकरा लवणादीनां खेटाः कृषीवलग्रामाः खर्वटा अग्निहोतॄणाम् एकतो नदी अपरतः तादृशाः वाटीः पुष्पादिवाट्यः वनानि मध्यस्थानानि सहजानि उपवनानि आरोपितवृक्षाणां चकारात् खलादीनि॥ ११॥ ❀ ❀ वृक्षसहितपर्वतानामतिक्रममाह। चित्रधात्विति। चित्रैर्धातुभिः विचित्रानद्रीन् तेषामेव विशेषणम् इभैर्भग्ना भुजा येषां तादृशा द्रुमा येषामिति रागभयनिमित्ते उक्ते, विश्रामनिमित्तानि जलान्याह जलाशयान् महापुष्करिणीः, तासामेव विशेषणं शिवजलान् शीतलं रोगाद्यनुत्पादकजलं शिवं नलिनीः कमलादियुक्तदेवखाताः सुरसेविताः देवालयादिसहिताः॥ १२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एकदेत्यत्र। भगवानिति। दूरीकृतवानित्यनेन सम्बध्यते। स्थापित इति। य इति शेषः॥ ९॥ ❀ ❀ तदा तदहमित्यत्र। ईशस्य भक्तानामिति समभिव्याहारसूचितमर्थमाहुः भक्तानामित्यादि। भक्तानामेव कल्याणमभीप्सन्निष्ट इत्यर्थः॥ १०॥ ❀ ❀ चित्रधात्वित्यत्र। देवखाता इति। पुष्करिणीरिति शेषः॥ १२॥

श्रीगिरिधरकृता बालप्रबोधिनी

सोऽपि प्रतिबन्धो भगवत्कृपया निवृत्त इत्याह—एकदेति द्वयेन। एवं स्थित एकदा कदाचित् निशि रात्रौ गां दुहन्तीं—हेतौ शतृप्रत्ययः—दोग्धुं गेहान्निर्गतां कृपणां मम योगक्षेमे प्रसक्तां मातरं पथि मार्गे पदा तत्पादेन स्पृष्ट आक्रान्तः कालेन भगवत्प्रेरितेन सर्वमारकेण चोदितः प्रेरितः सर्पोऽदशत् ददंश। तेन च सा मृतेत्यर्थाज्ज्ञेयम्॥ ९॥ ❀ ❀ तदाऽहं तन्मातृमरणं भगवद्भजनानन्दप्रतिबन्धकनिवृत्तिरूपत्वात् भक्तानां शं परमानन्दं अभीप्सतः कामयमानस्येशस्य भगवतोऽनुग्रहरूपं मन्यमान उत्तरां "एषा वै देवमनुष्याणां शान्ता दिक्" इति विघ्नराहित्येन श्रुतिप्रतिपादितां दिशं प्रति प्रातिष्ठं प्रस्थितवानस्मीत्यन्वयः। प्रातिष्ठमिति परस्मैपदमार्षम्॥ १०॥ ❀ ❀ तत्र तस्यां दिशि स्फीतान् समृद्धान् जनपदादीनतियातः अतिक्रम्य यातः सन् महद्विपिनमद्राक्षमिति चतुर्थेनान्वयः। जनपदातिषु नानागुणदोषयुक्तेषु समदृष्टिः सन् गतोऽहमिति तात्पर्यार्थः। तत्र जनपदा मालवादयो देशाः, पुराणि राजधान्यः, ग्रामाः 'विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च' इति भृगुप्रोक्ताः हट्टरहिताः, व्रजा गोगोपालनिवासाः, आकराः रत्नाद्युत्पत्तिस्थानानि, खेटाः कर्षकग्रामाः, खर्वटाः गिरितटग्रामा निषादादिस्थानानि भृगुप्रोक्ता वा 'एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्। मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम्' इति। इत्युक्तलक्षणाः, वाट्यः पूगपुष्पादीनां वाटिकाः, वनानि स्वतस्सिद्धवृक्षाणां समूहाः, उपवनानि आरोपितवृक्षाणां समूहाः

॥ ११ ॥ ❀ ❀ चित्रैर्नानाविधैर्धातुभिः स्वर्णरजतगैरिकादिभिर्विचित्रानद्रीन् । इभैर्गजैर्भग्नाश्छिन्नाः भुजाः शाखा येषां तान् द्रुमान् । शिवानि निर्मलानि जलानि येषु तान् जलाशयान् सरांसि । तथा सुरैः सेविताः विक्रीडिताः नलिनीः पद्माकरान् ॥ १२ ॥

हिन्दी अनुवाद

एक दिन की बात है, मेरी मा गौ दुहनेके लिये रातके समय घरसे बाहर निकली। रास्तेमें उसके पैरसे साँप छू गया, उसने उस बेचारी को डस लिया। उस साँपका क्या दोष, कालकी ऐसी ही प्रेरणा थी ॥ ९ ॥ ❀ ❀ मैंने समझा, भक्तोंका मंगल चाहनेवाले भगवान्‌का यह भी एक अनुग्रह ही है। इसके बाद मैं उत्तर दिशा की ओर चल पड़ा ॥ १० ॥ ❀ ❀ उस ओर मार्गमें मुझे अनेको धनधान्यसे सम्पन्न देश, नगर, गाँव, अहीरोंकी चलती-फिरती बस्तियाँ, खानें, खेड़े, नदी और पर्वतोंके तटवर्ती पड़ाव, वाटिकाएँ, वन-उपवन और रंग-बिरंगी धातुओंसे युक्त विचित्र पर्वत दिखायी पड़े। कहीं-कहीं जंगली वृक्ष थे, जिनकी बड़ी-बड़ी शाखाएँ हाथियोंने तोड़ डाली थीं। शीतल जलसे भरे हुए जलाशय थे, जिनमें देवताओंके काममें आनेवाले कमल थे; उनपर पक्षी तरह-तरहकी बोली बोल रहे थे और भौंरे मँडरा रहे थे। यह सब देखता हुआ मैं आगे बढ़ा। मैं अकेला ही था। इतना लंबा मार्ग तै करनेपर मैंने एक घोर गहन जंगल देखा। उसमें नरकट, बाँस, सेंठा, कुश, कीचक आदि खड़े थे। उसकी लंबाई-चौड़ाई भी बहुत थी और वह साँप, उल्लू, स्यार आदि भयंकर जीवोंका घर हो रहा था। देखनेमें बड़ा भयावना लगता था ॥ ११-१४ ॥

चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः । [1]नलवेणुशरस्तम्ब[2]कुशकीचकगह्वरम् ॥ १३ ॥
एक एवाति[3]यातोऽहमद्राक्षं विपिनं महत् । घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरम् ॥ १४ ॥
परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः । स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ १५ ॥
तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रि[4]तः । [5]आत्मनाऽऽत्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

चित्राः स्वनाः येषां तैः पत्ररथैः पक्षिभिस्तन्नादप्रबुद्धैरित्यर्थः । विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीरतियातोतिक्रम्य गतः सन्महद्विपिनं वनमद्राक्षम् । कीदृशम् ? नलवेणुशराणां स्तंबैः कुशैः कीचकैश्च गह्वरं दुर्गमम् । तत्र वेणुजातय एव विपुलांतरालगर्भाः कीचकाः ॥ १३ ॥ ❀ ❀ घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालादीनामजिरं क्रीडास्थानम् ॥ १४ ॥ ❀ ❀ परिश्रांतानींद्रियाण्यात्मा देहश्च यस्य तृषा परीतो व्याप्तः उपस्पृष्टः आचांतः ॥ १५ ॥ ❀ ❀ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविष्टः । आत्मना बुद्ध्या मनसा वात्मस्थं हृदिस्थमात्मानं परमात्मानम् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"पत्री पत्ररथः पक्षी" इत्यभिधानात् । इत्यर्थ इति पक्षिशब्दं श्रुत्वा जागरमितैर्द्विरेफैरिति भावः । नलाः पोटगला वेणवोऽसुषिरवंशाः शरास्तेजनकास्तेषां स्तंबास्तृणसंघाः कुशा दर्भाः कीचकाः शुष्कवंशाः वायुनोद्धतस्वना वेणवो वा तैर्गह्वरं निबिडम् । "नलः पोटगले राज्ञि पितृदेवे कपीश्वरे । कमलेपि कुनद्यां च क्रमेण क्लीबयोषितोः" इति मेदिनी । "वेणुर्नृपांतरे त्वक्सारेपि" इति च । "शरस्तेजनके बाणे दध्यग्रे ना शरं जले" इति "ना दर्भेऽस्त्री कुशं जले" इति । "स्तंबो गुच्छे समूहे च" इति धरणिः । "कीचका वेणवस्ते स्युर्ये स्वनंत्यनिलोद्धताः" इत्यमरः । "कीचको दैत्यभेदे च शुष्कवंशे नृपान्तरे" इति विश्वः । "गह्वरो गुहागहनदंभेषु निकुंजे तु पुमानयम्" इति मेदिनी ॥ १३ ॥ ❀ ❀ व्याला दुष्टगजा उलूका घूकाः शिवाः शृगाल्यः "व्यालो दुष्टगजे सर्पे श्वापदे नान्यवत्सले" इति मेदिनी "शिवा गौर्यभवा फेरुभार्या चामलकी तथा" इति च "अजिरं प्रांगणे वाते" इति च । तेषु तेषु बहुविस्मयास्पदेषु भीत्यास्पदेषु च दृष्टेष्वपि न मे विस्मयो नापि भीतिरभून् । तदा मन्मनसो भगवन्माधुर्यास्वादमात्राविष्टत्वादिति भावः ॥ १४ ॥ ❀ ❀ "ह्रदो घट्टेऽगाधजले" इति धरणिः । नद्या घट्टे उपस्पृष्टः पादप्रक्षालनादिपूर्वकमाचांतः स्नात्वा पीत्वा च गतश्रमो भूत्वा तस्मिन्नरण्ये आत्मानं परमात्मानमचिंतयमित्यग्रिमेणान्वयः ॥ १५ ॥ ❀ ❀ निर्मनुजे मनुष्यसंचाररहिते यथाश्रुतं भिक्षुद्विजैर्यथोपदिष्टं "पिप्पलं सलिले क्लीबमश्वत्थे ना पतत्रिणि । निरंशुके वस्त्रभेदे कणायां पिप्पली मता" इति कोशात् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

कीचकाः सच्छिद्रवंशाः । तथाच रघौ "सकीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यमि'ति ॥ १३-१४ ॥

---

१. प्रा० पा०—रत्नरेणु. । २. प्रा० पा०—कीचकमस्करी । ३. प्रा० पा०—एवाभि. । ४. प्रा० पा०—आश्रितः । ५. प्रा० पा—आत्मनाऽऽत्मस्थमात्मानम् ।

श्रीमद्वीरराघवव्याख्या

अतियातोऽतिक्रांतः एकोऽसहाय एवाहं नलादिभिर्गह्वरं महद्विपिनं वनमद्राक्षं दृष्टवानस्मि। तत्र नलो ग्रंथिपर्णी वेणवः स्थूलवंशाः सशब्दाः कीचकाः सूक्ष्माः सच्छिद्राः शरस्तंबाः अश्ववालाः कुशाः प्रसिद्धाः। विपिनमेव विशिनष्टि घोरमुग्रं दुष्प्रवेशमत एव व्यालानां दुष्टगजानामजगराख्यसर्पाणां वा उलूकानां शृगालविशेषाणां चत्वरं क्रीडास्थानम्। अतीव प्रतिभयाकारं प्रतिमुखं गच्छतां भयापादकम्॥ १३-१४॥ ❀ ❀ तत्राहं परिश्रांतानींद्रियाण्यात्मा देहश्च यस्य तृषा पिपासया परीतः व्याप्तः बुभुक्षितः क्षुधितश्च नद्यां ह्रदे स्नात्वोपस्पृष्टः कर्त्तरि क्तः, आचांतः पीत्वा जलमिति शेषः, गतः श्रमो यस्य तथाभूतः॥ १५॥ ❀ ❀ तस्मिन्निर्मनुष्येऽरण्ये विपुलस्याश्वत्थस्योपस्थे मूले आश्रित उपविष्टः आत्मस्थं जीवात्मनि स्थितं हृदयकमलस्थं वा आत्मानं परमात्मानमात्मना मनसाऽचिंतयं ध्यातवानस्मि॥ १६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

चित्रस्वनैर्नानाविधस्वरमधुरैः पत्ररथैः पक्षिभिः सह विभ्रमंतः इतस्ततश्चलंतः भ्रमरा भृंगाः विभ्रमद्भ्रमराः विभ्रमद्भ्रमराणां श्रीः शोभा समृद्धिर्वा यासु तास्तथोक्तास्ताः शराणां स्तंबा शरस्तंबाः नलानि च वेणवश्च शरस्तंबाश्च कुशाश्च ते तथोक्ताः तैर्गह्वरः निबिडोऽरण्यविशेषः वायुना उद्भूतस्वतःस्वनाः वेणवः कीचका उच्यंते॥ १३-१४॥ ❀ ❀ तृषा परीतः पानीयपानेच्छुः बुभुक्षितो अन्नकामः अत एव परिश्रांतेंद्रियदेहोहं तत्र महारण्ये नद्यां ह्रदे उपस्पृष्टः कृतपादप्रक्षालनादिकः-स्नात्वा तर्पणादिसकलाः क्रियाः विधाय स्वादूदकं पीत्वा तेन हेतुना गतश्रमोऽपगतालस्यो भूत्वा॥ १५॥ ❀ ❀ मनुष्यसंचाररहितेऽरण्ये पिप्पलोपस्थे अश्वत्थमूले आश्रितः स्वस्तिकासन उपविष्टः समाहितचित्तो भूत्वा आत्मना विषयेभ्यः आहृतेन मनसा हृदि संस्थितमात्मानं प्रत्यगात्मानं यथा परमहंसेभ्यः श्रुतं तथा अचिंतयमित्येकान्वयः॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः।

परिश्रान्तेति युग्मकम्॥ १५-१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कीदृशीः पत्ररथैः? पक्षिभिर्हेतुभूतैर्विभ्रमद्भिः प्रबुद्ध्य इतस्ततश्चलद्भिर्भ्रमरैः श्रीः शोभा यासां ताः, अतियातः अतिक्रम्य यातः सन्नलादिभिर्गह्वरं विपिनमद्राक्षमित्यन्वयः। 'स्तम्बो गुच्छस्तृणादिनः' 'वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धताः' इत्यमरः। घोरं दुष्प्रेक्ष्यम्। यतः प्रतिभयाकारं भयंकररूपम्। व्यालादीनाम् अजिरं क्रीडास्थानं तेषु बहुविस्मयास्पदेषु च दृष्टेष्वपि न मे विस्मयो नापि भीतिरभूत्, मन्मनसस्तदा भगवन्माधुर्यमात्राविष्टत्वादिति भावः॥ १३-१४-१५॥ ❀ ❀ पिप्पलोपस्थे अश्वत्थमूले आश्रितः आविष्टः। आत्मा बुद्ध्या आत्मस्थम् उत्पन्नप्रेमत्वान्मनस्यविच्छेदेनैव कृतवासमात्मानं परमात्मानम्। तथापि यथाश्रुतं मन्त्रोपदिष्टध्यानमनतिक्रम्य अचिन्तयम्॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कथंभूता नलिनीः? पत्ररथैः पक्षिभिरुपलक्षिताः, विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः, स्फीतान् जनपदादीन् नलिन्यंतान् भावान् अतियातः सन् विपिनमद्राक्षमित्यनेनान्वयः। कथंभूतं विपिनं नलादिभिर्गह्वरं दुर्गमम्। तत्र विपुलांतरालगर्भः वेणुभेदः कीचकः॥ १३॥ ❀ ❀ प्रतिभयाकारं भयंकररूपम्, व्यालादीनामजिरं क्रीडास्थानम्, व्यालो दुष्टगजः सर्पो वा 'व्यालो दुष्टगजे सर्पे' इति मेदिनीकारकोशात्॥ १४॥ ❀ ❀ नद्यास्तद्विपिनगतायाः॥ १५॥ ❀ ❀ आत्मानं परमात्मानम्। आत्मनि हृदि आत्मना चेतसा अचिंतयं ध्यातवान्॥ १६॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

आश्चर्यरसायाह-चित्रः स्वनो येषां तादृशैः पक्षिभिः सह विशेषभ्रमणयुक्तानां भ्रमराणां श्रियो यासु एवमनूद्य तेषामतिक्रमणमाह नलवेणुशराणां स्तंबाः कुशाः कीचकाः सरन्ध्राः स्थूला वेणवस्तैर्गह्वरं महद्वनम्॥ १३॥ ❀ ❀ एक एवातियातोहं कियद्देशातिक्रमोऽत्र विवक्षितः, अथवा पूर्वोक्तानामेवातिक्रमः पूर्वोक्तान् अतियातोहं पूर्वपथिका अन्ये स्थिताः। तत्र तत्र घोरं महद्विपिनं तु एक एव अद्राक्षम् तस्य भयजनकत्वेपि न मम भयं जातमित्याशयेनाह-घोरं व्याघ्रविदारितमांसादिभिः भयस्यापि प्रतिभयजनकः आकारो यस्य व्याघ्रादयोपि ततो भीता भवन्तीत्यर्थः। मध्ये अवृक्षदेशोपि भयानक इत्याह-व्यालोलूकशिवाजिरं, व्यालाः सर्पाः उलूकाः दिवाभीताः शिवाः शृगालाः तेषामंगणत्वेन तद्भक्षितमांसादियुक्तं पूर्वं भगवच्चिंतनेन गतस्याप्यतिभयानकदर्शनात्॥ १४॥ ❀ ❀ बहिर्मुखत्वे जाते परिश्रान्तेन्द्रियात्मा परितः श्रान्तानि इन्द्रियाणि आत्मा देहश्च यस्य तथा तृट्परीतः बुभुक्षितश्च जातः। कस्याश्चिन्नद्याः पार्वत्याः कुण्डभूतो ह्रदः स वृक्षादिना शीतलो भवति तत्र स्नात्वा च पीत्वा च पुनरात्मचिन्तनार्थमुपस्पृष्टः आचम्य चिन्तनमात्रेणैवान्तःकरणक्लेशनिवृत्तिः देहेन्द्रियाणां च स्नानपानादिना॥ १५॥ ❀ ❀

एवं सावधानो भूत्वा मनुष्यसंबंधाभावमात्रेण कोलाहलपापादिसंबंधाभावात् उत्तमदेशारण्ये तत्रापि पिप्पलोपस्थे आस्थितः आश्रितः पश्चाद्भागेन वृक्षस्पर्शात् आत्मानमचिंतयम् 'कोहमिति' तथा च तस्मिन्नात्मत्वेन ज्ञाते केनाहमेतादृशो भास इत्याकांक्षायां स्वेनैव स्वप्रकाशेनैव आत्मना एवं स्वप्रकाशात्मज्ञानानन्तरं पुनर्गूढोपदेशस्मरणेन यस्याहमात्मा पीठभूतः स कोयमिति जिज्ञासायां आत्मन्येव प्रकाशमानं भगवद्रूपं दृष्टवान् । सा तु चिंतनीया मानसी मूर्त्तिः यथाश्रुतमिति वचनात् तल्लब्ध्वा चिन्तायामारब्धायां भक्तिरुत्पन्ना तस्यामुत्पन्नायां चरणांभोजध्यानमारब्धम् ।। १६ ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

परिश्रान्तेत्यत्र । परिश्रमे हेतुमाहुः बहिर्मुखत्वे जात इति । भगवदनुसन्धानविच्युतौ जातायामित्यर्थः ।। १४ ।। तस्मिन्निति श्लोकं व्याकुर्वन्ति । एवं सावधान इत्यादि ।। १५ ।। ❀ ❀ ध्यायत इति श्लोकं व्याचक्षते तस्मिन्नित्यादि । रूपमिति श्लोकं व्याचक्षते । ततो भगवदित्यादि । भर्तृत्वेनेति । कान्तपदस्यार्थः ।। १६ ।।

श्रीगिरिधरकृता बालप्रबोधिनी

तानेव विशिनष्टि—चित्रा नानाविधाः स्वना येषां तैः पत्ररथैः पक्षिभिः सङ्कुला इति शेषः । विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः । वनं वर्णयति—नलवेणुशराणां स्तम्बैः कुशैः कीचकैश्च गह्वरं दुर्गमम् । तत्र वेणुजातय एव विपुलान्तरालगर्भाः सच्छिद्राः सशब्दाश्च कीचकाः "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरवाक्यात् ।। १३ ।। ❀ ❀ घोरं दुस्सहं यतः प्रतिभयाकारं भयङ्करस्वरूपम् । यद्वा घोरमतिकठिनहृदयत्वेन क्रूरं प्रत्यपि भयङ्करम् । तत्र हेतुमाह—व्यालेति । व्यालाः अजगरशब्द-वाच्याः सर्पाः उलूका घूकाः शिवाः शृगालास्तेषामजिरं क्रीडास्थानमित्यर्थः । तैर्भक्षितमांसास्थ्यादिप्रदर्शनेन भयजनकमिति भावः । तत्रापि तत्र मम भयं न जातमित्यभिप्रायेणाह—एक एवेति ।। १४ ।। ❀ ❀ दूरदेशागमनेन परिश्रान्तानीन्द्रियाणि आत्मा देहश्च यस्य सः, अत एव तृषा पिपासया परीतो व्याप्तः बुभुक्षितः क्षुधितश्चाहं नद्या ह्रदे कुण्डे स्नात्वा जलं च पीत्वा उपस्पृष्ट आचान्तश्च अतो गतः श्रमो यस्य तथाभूतः ।। १५ ।। ❀ ❀ तस्मिन्नरण्ये पिप्पलस्य अश्वत्थस्य उपस्थे मूले आश्रितः उपविष्टः सन् गुरुमुखात् यथा सच्चिदानन्दविग्रहं श्रुतं तथैवात्मस्थं स्वहृदयकमलस्थमात्मानं परमात्मानमात्मना मनसा अचिन्तयं ध्यातवानस्मीत्यर्थः । स्थानं च ध्यानयोग्यमेव लब्धमित्याशयेनाह—निर्मनुज इति, मनुष्यमात्रवर्जित एकान्त इत्यर्थः ।। १६ ।।

हिन्दी अनुवाद

चलते-चलते मेरा शरीर और इन्द्रियाँ शिथिल हो गयीं । मुझे बड़े जोरकी प्यास लगी, भूखा तो था ही । वहाँ एक नदी मिली । उसके कुण्डमें मैंने स्नान, जलपान और आचमन किया । इससे मेरी थकावट मिट गयी ।। १५ ।। ❀ ❀ उस विजन वनमें एक पीपलके नीचे आसन लगाकर मैं बैठ गया । उन महात्माओंसे जैसा मैंने सुना था, हृदयमें रहनेवाले परमात्माके उसी स्वरूपका मैं मन-ही-मन ध्यान करने लगा ।। १६ ।।

ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा । औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ।। १७ ।।
प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः । आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ।। १८ ।।
रूपं भगवतो यत्तन्मनःकान्तं शुचापहम् । अपश्यन्[1] सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ।। १९ ।।
दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि । वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ।। २० ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

भावेन भक्त्या निर्जितं वशीकृतं यच्चेतस्तेन । औत्कंठ्येनाश्रुकलायुक्ते अक्षिणी यस्य । प्रेम्णोऽतिभरेण निर्भिन्नपुलका-न्यंगानि यस्य । आनंदानां संप्लवे महापूरे परमानंदे । उभयात्मानं परं च ।। १८ ।। ❀ ❀ मनसः कांतमभीष्टम् । शुचा शोकस्तामपहंतीति तथा तत् उत्तस्थे व्युत्थितोस्मि ।। १९ ।। ❀ ❀ हृदि मनः प्रणिधाय स्थिरीकृत्याविवृप्तोहमातुर इव अभव-मिति शेषः ।। २० ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हृदि मनस्येव ध्यायतो मम हरिः क्रमेणासीदागत्याग्रे बभूव । यद्वा शनैः प्रथमं हृद्याविर्बभूव ततो हृद्वृत्तिषु तिसृषु नासिकाश्रोत्रचक्षुःष्वपि स्वांगसौरभान् पुरु सौस्वर्यमुखसौन्दर्यग्राहणार्थमाविर्बभूव । किंभूतस्य ? औत्कंठ्येनाश्रूणि कलयतो धार-यतोऽक्षिणी यस्य तस्य ।। १७ ।। ❀ ❀ निर्भिन्नानि अतिभिन्नानि पुलकानि रोमांचा यस्य च तथा । "पुलकः कृमिप्रभेदे

१. प्राचीन पाठे 'अपश्यन् सहसोत्तस्थे······' इत्यारभ्य '······दुर्दर्शोऽहं कुयोगिनाम्' इति सार्धत्रयः श्लोका न सन्ति ।

प्रस्तरभेदे च मणिदोषे। रोमांचे हरिताले गजान्नपिंडे च गंधर्वे"इति मेदिनी। हे मुने इति। मुनित्वाद्भगवद्ध्यानानंदं त्वं जानास्येवेति भावः ॥ १८ ॥ ❀ ❀ ततः किं वृत्तं तत्राह-रूपमिति। शुचेति। भागुरिमतेन हलंताट्टाबन्तः। वैक्लव्याद्वैकल्यात्। यथा प्राप्तच्युतनिधिर्जनो दुर्मना भवति तथैवेत्यर्थः ॥ १९ ॥ ❀ ❀ रोगीवासंतुष्टोऽभवमित्यर्थः ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

महापूरे महाप्रवाहे इत्यर्थः ॥ १८–२१ ॥

श्रीमद्वीरराघवव्याख्या

भावनिर्जितेनाभ्यासवशीकृतेन चेतसा चरणांभोजं ध्यायतः चिन्तयतः औत्कण्ठ्यात् प्रेमपूर्वकानुध्यानाद्धेतोरश्रूणामानन्दजनेत्रजलानां कलाबिन्दवो ययोस्ते अक्षिणी यस्य तस्य मे मम हृदि शनैः हरिरासीदाविरासीत् ॥ १७ ॥ ❀ ❀ तदा प्रेमाधिक्येन हेतुना निर्भिन्ना अभिव्यक्ताः पुलका रोमांचा यस्मिंस्तदंगं शरीरं तस्य स अतीव निर्वृतः सुखितः आनन्दसम्प्लवे आनन्दप्रवाहे लीनो मग्नः हे मुने उभयं देहमात्मानं च नापश्यं न दृष्टवानस्मि ॥ १८ ॥ ❀ ❀ यदाविर्भूतं मनःकान्तं मनसोतीव प्रियमत एव शुचापहं शुचायाः शोकस्यापहंतृ भगवतो रूपं तत्पुनरपश्यन्वैक्लव्यात्तद्दर्शनकृतादधाष्टर्याद्दुःखितमनाः सहसा आशूत्तस्थावुत्थितवानस्मि। कैवल्यादिति पाठांतरम् ॥ १९ ॥ ❀ ❀ तदाऽसहायत्वात्तद्रूपं भूयः पुनः द्रष्टुमिच्छुरहं हृदि मनः प्रणिधाय स्थिरीकृत्य वीक्षमाणश्चिंतयन्नपि नापश्यमत एवातुर इव विषयातुर इवावितृप्तोऽभवमिति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यथाश्रुतमचिंतयमित्येतद्दर्शयितुं जाग्रदाद्यवस्थास्वरूपं निरूपयति स्वप्न इति। स्वप्नाद्यवस्था आत्मनः परमात्मनः सकाशादात्मनो जीवस्योत्पद्यंते इत्यन्वयः। तंत्रेणोपात्तत्वादात्मशब्दस्य द्विरावृत्तिः कर्तव्या। जीवमनःस्थितमायाख्यदृष्टश्रुतवस्तुसंस्कारोपादानको जाग्रत्पदार्थसदृशकरितुरगाद्यनेकपदार्थदृष्टिरूपः स्वप्नः, सर्वेन्द्रियोपरतिरूपत्वात्स्वप्नजागरितविषयग्रहणरहिता शय्यापरपर्याया सुषुप्तिः, नामरूपक्रियासु वृत्तिर्यस्य स तथोक्त आभासः प्रत्ययः, नामरूपक्रियाविषयप्रत्ययो जाग्रत्, एतदवस्थात्रयकारणं ब्रह्म न मृदादिवत् कार्यानुस्यूतं किं तु ततो विलक्षणं तदित्यभिप्रेत्याह संविदिति। समीचीना प्रकृतिप्राकृतमिश्ररहिता विज्ञानं यस्य तत्तथोक्तं सम्यक् निर्दोषमात्मानं वेत्तीति संवित् "तदात्मानमेव वेदाहं ब्रह्मास्मी"ति श्रुतेः, शास्त्रं सर्वनियंतृ, पद्यत इति पदं परममुत्तमं प्राप्तव्योत्तमम् एवं जाग्रदाद्यवस्थाकर्तृत्वेनात्मादिभ्योत्यंतोपकारकं विशिष्टज्ञानघनं सर्वांतर्यामिप्राप्तव्योत्तमं तुर्यं ब्रह्मस्वरूपं श्रुतं तदेवाचिंतयमिति भावः ॥ १७ ॥ ❀ ❀ एतदेव विविच्य दर्शयति नेति। चित्रमाश्चर्यरूपं चित्रमविमिश्रमज्ञानात्मकं वा चित्तं चेतनं जीवं त्रायत इति वा चिद् ज्ञानं तनोति राति ज्ञानिनां बहुलीकरोति तदन्येषां ददाति गुरुमुखेनेति वा चित्तरतं वा "स हि सर्वमनोवृत्तिप्रेरकः समुदाहृत" इति स्मृतेः, चिनोतीति चित् चेता स्रष्टा ब्रह्मा तं तरति अतीत्य वर्तते, चिनोति सृजति रमयति वा तस्मादुत्तममिति वा भगवदैश्वर्यादिगुणसामग्रीमत्पदं रूपं हरेरिति शेषः, तत्ततं व्याप्तं भगवतः हरेः पदं वा एवंविधं तत्प्रकृत्यादिसंबंधविधुरत्वादिंद्रियार्थं जाग्रदवस्थां नानुगच्छेन्न स्वप्नावस्थानं न सुषुप्त्यवस्थां 'चिंतितोर्थो मनोरथ' इत्यभिधानात् न मनोरथमत एव न निरोधं मरणमनुगच्छेदित्यस्य प्रत्येकमन्वयः। चशब्दो मिथः समुच्चयार्थे ॥ १८ ॥ ❀ ❀ ननु कालतोपि स्वप्नाद्युत्पत्तिदर्शनात्तत्कर्तृत्वं हरेः कथमित्याशंक्य सकलप्रपंचकर्तृत्वेन मुख्यकर्तृत्वात्तदंतःपातिस्वप्नाद्यवस्थाकर्तृत्वं किं वक्तव्यमित्यभिप्रेत्य प्रपंचसृष्ट्यादिकर्तृत्वमाह स इति। सृष्ट्यग्रे स एको भगवानासीदित्यवांतरान्वयः। स पुनः सिसृक्षुः अंतर्यामितया अवतारैश्च क्रीडिष्यन् क्रीडितुमिच्छन्नात्मनः स्वस्मात्स्वोदरात् ब्रह्मादिपरमाणुपर्यंतमिदं जगत्सृष्ट्वा अंतर्यामितया प्रविश्य प्रादुर्भावैश्च विहृत्य पुनश्च तज्जग्ध्वा संहृत्य प्रलये केवल एकाकी उदास्ते जीवप्रवृत्तिं प्रत्युदासीनो वर्तत इत्यन्वयः। जग्ध्वा उदास्त इति संध्यभावः। प्रकृत्यादिसाधनांतरमंतरेणापि स्रष्टुं शक्त इति माहात्म्यं द्योतयितुं सृष्टिस्थितिसंहारकर्तृत्वमेव न ज्ञानादिकर्तृत्वं चास्तीति ॥ १९ ॥ ❀ ❀ इदानीमुपास्तिफलमाह ध्यायत इति। भावेन भक्त्या निर्वृतं परमानंदमाप्तं चेतो यस्य स तथा तस्या उत्कंठायाः जातानामश्रूणां बाष्पाणां कलाभिर्बिंदुभिर्युक्ते अक्षिणी यस्य स तथा तस्य शनैरव्यग्रेण स्वचरणकमलं ध्यायतो मे हृदि हरिरासीत् प्रत्यक्षोभूदित्येकान्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

ध्यायत इति शनैः सौरभ्यादिक्रमेण हृद्यासीत्स्वयमेवाविर्भूतवान् ॥ १७–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

भावनिर्जितेन प्रेमवशीकृतेन चेतसा मनसा हृदि मनस्येव ध्यायतो मम हरिः शनैः क्रमेणासीत् आगत्याग्रे बभूव। यद्वा शनैरिति प्रथमं हृद्याविर्बभूव ततो हृद्वृत्तिषु तिसृषु नासिकाश्रोत्रचक्षुःष्वपि स्वांगसौरभ्यनूपुरसौस्वर्यश्रीमुखसौन्दर्यग्राहणार्थमाविर्बभूव। कीदृशस्य मम औत्कंठ्येन अश्रूणि कलयतो धारयतोऽक्षिणी यस्य तस्य ॥ १७ ॥ प्रेम्णोऽतिभरेण अत्या-

धिक्येन निर्भिन्नानि अभिन्नानि पुलकयुक्तानि च अंगानि यस्य सः । प्रेमरूपाण्येव सर्वाण्यंगानि तदानीमभूवन्नित्यर्थः । यद्वा निःशेषेणाभिन्नानि विदीर्णानीव वोढुमसामर्थ्यादेवेति भावः । आनन्दसंप्लवे लीनो लब्धानन्दी मुमूर्च्छे इत्यर्थः । उभयम् आत्मानं परञ्च नापश्यम् ॥ १८ ॥ ❀ ❀ पुनश्च सहसैव तद्रूपम् अपश्यन् उत्तस्थे व्युत्थितोऽस्मि । यथा प्राप्तच्युतनिधिर्जनो दुर्मना भवति तथैवेत्यर्थः ॥ १९ ॥ ❀ ❀ प्रणिधाय स्थिरीकृत्य ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भावेन हरिभक्तियोगेन निर्जितं यतस्ततो निवार्य चरणांभोजे स्थापितं यच्चेतस्तेन ॥ १७ ॥ ❀ ❀ ततः किं वृत्तमित्यत्राह प्रेम्णोऽतिभरेणाधिक्येन निर्भिन्नाः पुलका येषु तानि अंगानि यस्य सः निर्वृतः अत्यंतसुखसंपन्नः आनंदसंप्लवे लीनः उत्तरोत्तरशतसंख्यानंदवल्यां पठितानामानंदानां प्लवोऽवधिभूतपूरः तस्मिन् लीनः सन्नुभयं ध्यातृध्येययुग्मं नापश्यम् न दृष्टवानस्मि ॥ १८ ॥ ❀ ❀ तदनंतरं किं वृत्तमित्यत्राह–यत्पूर्वं दृष्टं भगवतोऽसाधारणं रूपं हिरण्यश्मश्रुहिरण्यकेश इत्यादिश्रुतिप्रोक्तं मनसोऽतीव दृष्टं शुचं शोकमपहंतीति शुकापहं तदपश्यन् वैक्लव्यादधाष्टर्यात् दुर्मना इवोत्तस्थावुत्थितोस्मि ॥ १९ ॥ ❀ ❀ ततः किं वृत्तमित्यत्राह स्तन्यामृतपानतः अवितृप्त इव यथा बालः तथा रूपदर्शनादवितृप्तोऽत एवातुरः सन् भूयः दिदृक्षुः द्रष्टुमिच्छुः मनो हृदि प्रणिधाय स्थिरीकृत्य वीक्षमाणोपि नापश्यं न दृष्टवानस्मि ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ततश्चरणांभोजं भक्त्या निर्जितचेतसा ध्यायतो भक्त्यानंदः पूर्णो जातः, तेन प्रेमौत्कंठ्यात् आनंदाश्रुप्रभृतयो जाताः । तत अत्युत्कंठाश्रुकलाक्षस्य हृदये सर्वथा बहिर्दर्शनाभावे चिंतनानुवृत्त्यर्थं भगवान् शनैराविरासीत् ॥ १७ ॥ ❀ ❀ मानसकल्पितमूर्त्तौ अभ्यंतराद्भगवदाविर्भावे मानसाविर्भूतयोरैक्यं यज्जातं तदाह । प्रेमातिभरेति । भयं हि भगवत्साक्षात्कारः एवमेव ब्रह्मसाक्षात्करोमि यथा गंगाजले देवतारूपाया गंगाया ध्याने क्रियमाणे साक्षाद्भगवत्पद्याविर्भवति तथा सर्वेषामात्मनामात्मभूते आत्मस्थे भगवति ध्यायमाने साक्षाद्भगवत आविर्भावश्चेत् स्वतः तत्र स्थिरीभूते प्रवेशः सायुज्यं यथा जलस्य देवतायां प्रवेशे नदी शुष्यति यथा जीवो ब्रह्म संपद्यते एवमाविर्भूते भगवति सांनिध्यात् परमप्रेम्णः अतितरां महापूरः सांनिध्यलक्षणानामुत्तरे अत्युत्कृष्टत्वात् तेन पूरेण निर्भिन्नाः पुलकाः रोमांचाः तस्य रोमकूपद्वारा बहिर्निर्गत इत्यर्थः । एवं सर्वांगे आनंदे पूर्णे परमा निर्वृतिर्जाता, शांतानंदमयो जात इत्यर्थः । स च पुनरानंदसंप्लवे गंगात एवोद्धृतकलशजलं पुनर्गंगायां प्रक्षिप्तं सत् गंगैव भवति तथा आनंदसंप्लवे लीनः तदा आत्मानं भगवंतं च उभयं नापश्यं हे मुने इति संबोधनसंवादार्थं कदाचिन्मुनीनामेवं भावः आनंदे चैतन्यभावः प्रविष्टः न चित्त्वेन स्फुरित इत्यर्थः ॥ १८ ॥ ❀ ❀ ततो भगवदिच्छया भगवति तिरोभूते स्वस्याप्यानंदांशे तिरोभूते मानस्यपि मूर्तिस्तिरोभूता बलवत्या ह्यभिभवात् तदा भगवतो रूपं मनसो भर्तृत्वेन प्रकाशमानं सर्वदुःखनाशकमपश्यन् क्वचिदितो गत इति बुद्ध्या सहसोत्तस्थौ उत्थितवानस्मि । नन्वंतः पदार्थस्य कुतो बहिर्गमनसंभावना तत्राह वैक्लव्यात् विक्लवतया न स्फुरितमित्यर्थः । विकलता हि सर्वविस्मारिका । किंच दुर्मना इव जातः दुर्गतं मनो यस्य यथा सर्वस्वनाशे सर्वस्वाविष्टं चित्तं नष्टमिव भवति तथा भगवन्मूर्त्तौ तस्य चित्तं जातमिति दृष्टत्वम् । पुनः कियत्कालसमाधाने ज्ञातवान् भगवानाविर्भूतः इति तेन चैतत् सर्वं जातमिति ॥ १९ ॥ ❀ ❀ ततः सावधानो भूत्वा पुनर्भगवद्दर्शनार्थं ध्यानमारब्धवानित्याह दिदृक्षुस्तदहं भूय इति । तद्भगवत्स्वरूपमाविर्भूतं दिदृक्षुः तत्र भगवद्ध्यानमेव साधनमिति ज्ञात्वा पुनर्मनो हृदि भगवन्मूर्त्तिव्याप्ते स्थिरीकृतवान् । ततो मानसीं मूर्तिं पश्यन्नपि न भगवंतं दृष्टवान् तदाह । वीक्षमाणोपि नापश्यमिति तदा संताप उत्पन्न इत्याह अवितृप्त इवातुर इति । यथा त्वातुरः ज्वरादिरोगवान् कदाचिद् द्राक्षादिके दत्ते अवितृप्तः सन् पुनः प्रार्थनायां न प्राप्नोति ततश्च रसाभिविष्टो महद्दुःखं प्राप्नोति, न हि ज्वरितस्य बह्वी द्राक्षा तु पथ्याय किंतु रोचिका मार्गस्य संवादेन सत्यत्वज्ञानात् भगवदाविर्भावाच्च काचित् तृप्तिर्जातैव भुक्त्वांतवत् तथापि न विशेषेण तृप्तः ॥ २० ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न ।

श्रीगिरिधरकृता बालप्रबोधिनी

भावेन भक्त्या निर्जितं स्ववशीकृतं विषयचिन्तातः परावर्तितं यच्चेतस्तेन चरणाम्भोजं ध्यायतो दर्शनौत्कण्ठ्येन अश्रुकलायुक्ते अक्षिणी यस्य तस्य मे मम हृदि हरिः शनैराविरासीदित्यन्वयः ॥ १७ ॥ ❀ ❀ तदा प्रेम्णोऽतिभरेण आधिक्येन हेतुना निर्भिन्नाः अभिव्यक्ताः पुलकाः रोमाञ्चा यस्मिन् तदङ्गं शरीरं यस्य सः, अत एव अतिनिर्वृतः सुखितः ततश्चानन्दानां सम्प्लवे महापूरे लीनो निमग्नः सन् हे मुने उभयमात्मानं परमात्मानं च नापश्यं न दृष्टवानस्मि । मुनीनामेवं कदाचिद्भवतीति तु तवापि सम्मतमिति सूचयन् सम्बोधयति–हे मुने इति ॥ १८ ॥ ❀ ❀ यदाविर्भूतं भगवतो रूपं पुनश्च तदिच्छया तिरोधानात् सहसा झटित्येव तदपश्यन् वैक्लव्यात् व्याकुलत्वात् दुर्मना इव उत्तस्थे ध्यानाद्व्युत्थितवानस्मि । व्याकुलतायां हेतुमाह–शुचापहमिति । शुचां शोकमपहन्तीति तथा तत् । तत्रापि हेतुमाह–मनःकान्तमिति, मनोहरमित्यर्थः । एवम्भूतमपश्यतो व्याकुलता भवत्येवेति भावः ॥ १९ ॥ ❀ ❀ तद्भगवद्रूपं दिदृक्षुः द्रष्टुमिच्छुरहं भूयः पुनर्हृदि मनो निधाय स्थिरीकृत्य वीक्षमाणो ध्यायन्नपि यदा

नापश्यं तदा आतुरो व्याकुल इवाभवम्, यतो दर्शनेन अवितृप्त इति । भजनान्दमनुभवतो भगवद्भक्तस्य लौकिकप्राणिवद् दुर्मनस्त्वं व्याकुलत्वं न भवतीति सूचयितुमुभयत्रेवशब्दप्रयोगः ॥ २० ॥

हिन्दी अनुवाद

भक्तिभावसे वशीकृत चित्तद्वारा भगवान्के चरणकमलोंका ध्यान करते ही भगवत्-प्राप्तिकी उत्कट लालसासे मेरे नेत्रोंमें आँसू छलछला आये और हृदयमें धीरे-धीरे भगवान् प्रकट हो गये ॥ १७ ॥ ❀ ❀ व्यासजी ! उस समय प्रेमभावके अत्यन्त उद्रेक से मेरा रोम-रोम पुलकित हो उठा । हृदय अत्यन्त शान्त और शीतल हो गया । उस आनन्दकी बाढ़में मैं ऐसा डूब गया कि मुझे अपना और ध्येय वस्तुका तनिक भी भान न रहा ॥ १८ ॥ ❀ ❀ भगवानका वह अनिर्वचनीय रूप समस्त शोकोंका नाश करनेवाला और मनके लिए अत्यन्त लुभावना था । सहसा उसे न देख मैं बहुत ही विकल हो गया और अनमना-सा होकर आसनसे उठ खड़ा हुआ ॥ १९ ॥ ❀ ❀ मैंने उस स्वरूपका दर्शन फिर करना चाहा, किंतु मनको हृदयमें समाहित करके बार-बार दर्शनकी चेष्टा करनेपर भी मैं उसे नहीं देख सका । मैं अतृप्तके समान आतुर हो उठा ॥ २० ॥

एवं यतन्तं विजने मामाहागोचरो गिराम् । गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २१ ॥
हन्तास्मिञ्जन्मनि भवान्मा मां द्रष्टुमिहार्हति । अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ २२ ॥
सकृद् यद् दर्शितं रूपमेतत्कामाय तेऽनघ । मत्कामः शनकैः साधुः सर्वान्मुञ्चति हृच्छयान् ॥ २३ ॥
सत्सेवया दीर्घया ते जाता मयि दृढा मतिः । हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि ॥ २४ ॥
मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् । प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥ २५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गिरामगोचरः संवेदनस्याविषयभूत ईश्वरः ॥ २१ ॥ ❀ ❀ हन्तेति सानुकंपसंबोधने । मेति । मां द्रष्टुं नार्हति । यतो न विपक्काः दग्धाः कषायाः मलाः कामादयो येषां तेषां कुयोगिनामनिष्पन्नयोगानाम् ॥ २२ ॥ ❀ ❀ कुतस्तर्हि दृष्टोसि तत्राह । सकृद्दर्शितं मयेति यदेतत्कामाय मय्यनुरागाय । त्वत्कामेन किमित्यत आह । मत्कामः पुमान् । हृच्छयान्कामान् ॥ २३ ॥ ❀ ❀ अदीर्घयाऽपि सतां सेवयावद्यं निंद्यमिमं लोकं देहं, मज्जनतां मत्पार्षदतां गंतासि ॥ २४ ॥ ❀ ❀ प्रजानां सर्गे सृष्टौ निरोधे संहारेऽपि । प्रजासर्गस्य निरोध इति वा ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

विजने जनसंचाररहिते वन इत्यर्थः । गिरामगोचरः "यतो वाचो निवर्त्तन्ते" इति श्रुतेः । सर्वैरेव वचनगोचरीकर्त्तुमशक्योपि भगवान्मामाह स्वीयवचनसौस्वर्यं श्रवणाभ्यामनुभावयामास । एवं नारदस्य वैधभक्तिमत्त्वाद् भगवत्सौरभ्यसौस्वर्यसौन्दर्याणां त्रयाणामेव माधुर्याणामनुभवः साधकदेहे अन्येषां सर्वेषां सिद्धदेह एव तन्माधुर्याणामनुभवो भावीति ज्ञेयम् । शुचस्तदर्शनोद्भूतदुःखशोकान्प्रशमयन्नपाकुर्वन् । अत्र वियोगौत्कंठ्यवतः प्रेम्णा सर्वथा तृप्त्यभावधर्मत्वादिवशब्दः ॥ २१ ॥ ❀ ❀ किमाहत्येत आह-हन्तेति । अस्मिञ्जन्मनि साधकदेहे तुभ्यं तु दर्शनं दत्तमेवेति त्वं तु कुयोगी न भवसीति भावः । संदर्भस्तु "भक्तिः प्रवृत्तात्मरजस्तमोपहा" इत्युक्तेः कषायोत्र सात्त्विको वनवासाद्याग्रहः "वनं तु सात्त्विको वासः" इत्याद्युक्तेः । उत्कंठावर्द्धनार्थमेतत् ॥ २२ ॥ ❀ ❀ तर्हि हाहा पुनरप्येकवारं दर्शनं देहीत्यत आह-सकृदिति । एतदेकवारदर्शनं ते कामाय त्वन्मनोरथं साधयितुं योग्यमित्यर्थः । न तु मुहुर्दर्शनम् औत्कंठ्यस्यानतिवृद्ध्या प्रेम्णोऽप्यनतिवृद्धेस्तस्य तारुण्यं न स्यादिति भावः । अत एव जातप्रेम्णे भक्ताय साधकदेहे एकवारमेव दर्शनं ददामीति मम नियमः यथा बालभूतः साधकदेहे प्रेमा वियोगौत्कंठ्येन लब्धातिवृद्धिः सिद्धदेहे तरुणः सन्स्वाधारं भक्तं मुहुरपि मां दर्शयति साक्षात्सेवयति च, स्वभक्तमनोरथपूर्त्तिप्रकारमहमेव जानामि न तु मे स्वभक्त इति भावः । मत्कामः यो हि मां कामयते मात्रं मद्दर्शनालाभेपीत्यर्थः । हृच्छयान् विषयवासनाः तत्रापि "सर्वान्मोक्ष्यसि हृच्छयान्" इत्युक्तेर्नारदं प्रति नेदं वाक्यं, किन्तु स्वभक्तेः स्वभावं तं ज्ञापयामासेत्येवात्र तत्त्वं, सर्वमिदं दैन्यवर्द्धनार्थमित्येके ॥ २३ ॥ ❀ ❀ देहं दासीपुत्रकलेवरम् । यद्वा निन्द्यं लोकं सांसारिकजनावासं त्रिभुवनमेव त्यक्त्वेत्यर्थः ॥ २४ ॥ ❀ ❀ ननु यद्यंतरेव सा नश्येत्तदा किं कार्यं तत्राह-मतिरिति । स्मृतिश्चैतज्जन्मविषया । सर्गे हि मतेर्नाशो न सर्वथेति चेत्त त्राह-प्रजासर्गस्येति । यतो मयि निबद्धा स्थापिता प्रेम्णाऽतो न विपद्येत न नश्येत् । मम नित्यत्वान्मतिरपि नित्यैव स्यादिति-

भावः ॥ २५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

कुयोगिनामिति कुशब्दोऽयम् ईषदर्थे, न तु कुत्सायाम् । ईषद्योगयुक्तानां तत्कालयोगप्रवृत्तानामित्यर्थः । योगमार्गप्रवृत्तस्य कुत्साया अभावादिति व्याख्यालेशः ।। २२-२५ ।।

श्रीमद्वीरराघवव्याख्या

एवं द्रष्टुं पुनः पुनः यतंतं यत्नं कुर्वंतं मामुद्दिश्य गिरामगोचरः 'यतो वाचो निवर्त्तंते' इत्युक्तरीत्या वागविषयः अपरिच्छेद्यत्वादिति भावः । अदृश्यः सन्निति तात्पर्यं, भगवानिति विशेष्यमध्याहर्त्तव्यं, गगने गंभीरया वाचा शुचः शोकन्प्रशमयन्निवाह ।। २१ ।। ❀ ❀ उक्तमेवाह हंतेति चतुर्भिः इह लोकेऽस्मिन् जन्मनि भवान्मां द्रष्टुं मार्हति नार्हतीति माशब्दोयं नञ् पर्यायः, अतो 'माङि लुङि'ति लुङभावः । दर्शनानर्हत्वे हेतुं वदन्नात्मानं विशिनष्टि अविपक्वोऽविनष्टः दर्शनप्रतिबंधकः पुण्यपापात्मकः कषायः कषायवद्दुरपनेयः कर्मोपाधिर्येषां तेषां कुयोगिनामहं दुर्दर्शः दुःखेनापि द्रष्टुमशक्यः ।। २२ ।। ❀ ❀ तर्हि सकृत्कथं दृष्टोऽसीत्यत्राह सकृदिति । हे अनघ सकृद्रूपं मदीयं दर्शितमिति यत्तत्तव मत्कामाय मद्विषयकदिदृक्षायै । 'एतत्कामाय ते' इति पाठांतरं, तत्र ते तुभ्यं सकृद्दर्शितं रूपमेतत्कामाय द्रष्टुमिति शेषः । निवृत्तप्रेरणात्स्वार्थणिजंतात्कर्महेतुमण्णिचि 'णिचश्चे'ति वैकल्पिकं परस्मैपदं, किं काममात्रेणेत्यत आह मत्कामः मां द्रष्टुं कामयमानः साधुचरितः पुमान् शनैः सर्वान् हृच्छयान् हृद्गतान् रागादिदोषान्मुंचति निरस्यति ।। २३ ।। ❀ ❀ यतस्ते तवादीर्घयाऽल्पकालिकयैव सतां सेवया मयि दृढा मतिः जाता, तस्मादिममवद्यं लोक्यत इति लोको देहस्तं शूद्रदेहमित्यर्थः, हित्वा त्यक्त्वा मज्जनतां मद्भृत्यतां गंता गमिष्यसि कल्पांतर इति शेषः ।। २४ ।। ❀ ❀ यदनुग्रहाद्धेतोः कर्हिचित्प्रजासर्गनिरोधे प्रलयकालेपि मयि निबद्धा निश्चितेयं मतिः स्मृतिश्च न विपद्येत न नश्येत कर्हिचिन्मयि निबद्धा मतिः प्रजासर्गनिरोधेपि स्मृतिश्च न विपद्येतेति वान्वयः ।। २५ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रेम्णातिशयितभारेण निर्भिन्नः समुल्लसन् जातः पुलकः रोमांचः प्रेमातिभरनिर्भिन्नपुलकोंऽगे यस्य स तथा आनंदसम्प्लवे सुखप्रलयोदके मग्नोहं तमेवापश्यमुभयं द्वितीयं समाधिकं वा नापश्यं सर्वोत्तमत्वादित्यन्वयः ।। २१ ।। ❀ ❀ ततः परं किमभूदिति तत्राह रूपमिति मनःकांतं मनोहरं हरेर्यद्रूपमद्राक्षं तत्सहसा अपश्यन्नचक्षाणो दुर्मनाः दुःखितांतःकरणः मुक्तिं प्राप्तः कैवल्यान्मोक्षादिवोत्तस्थावुदतिष्ठमित्यन्वयः ।। २२ ।। ❀ ❀ पुनः हरेरूपं दिदृक्षुः हृदि मनः प्रणिधाय स्थितः आतुरो रोगीवावितृप्तः असंतुष्टो वीक्षमाणोऽप्यहं नापश्यमित्यन्वयः ।। २३ ।। ❀ ❀ हरेर्भक्तिवात्सल्यमाश्चर्यमिति दर्शयति एवमिति । गिरां वाचामगोचरोऽविषयोऽदृश्यो गंभीरया अगाधया श्लक्ष्णया मधुरया वाचा मानसीः शुचः प्रशमयन्निव नष्टाः कुर्वन्निव स्थितो हरिरेवं विजने जनसंचाररहिते द्रष्टुं यतमानमाहेत्येकान्वयः ।।२४।। ❀ ❀ किमाह हरिरिति तत्राह-हंतेति हंत विस्मये । भवानिह भूलोके अस्मिन् जन्मनि शूद्रयोनौ मां द्रष्टुं नार्हति, कुतः कषेण भोगेनायते गच्छतीति कषायः पापम्, अभुक्तपापफलानां कुयोगिनां जन्मनाऽनभिज्ञानेन वा कुत्सितः योगो ध्यानादिक एषामस्तीति कुयोगिनः । तेषां पुंसां दुर्दर्शः द्रष्टुमशक्यः ।। २५ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हन्तेति । भक्तिः प्रवृत्तात्मरजस्तमोऽपहा इत्युक्तत्वात् कषायेऽत्र सात्त्विको वनवासाद्याग्रहः । 'वनं तु सात्त्विको वासो ग्रामो राजस उच्यते । तामसं द्यूतसदनं मन्निकेतन्तु निर्गुणमि'त्युक्तेः । उत्कण्ठावर्धनार्थञ्चेदम् ।। २२ ।। ❀ ❀ तथैवाह सकृदिति । येन कषाया अपि नश्यन्तीत्याह मत्काम इति । हृच्छयान् अन्यवासनाः ।। २३ ।। ❀ ❀ मतिरिति अस्खलिता मतिरिति स्वयमुक्ता या सैव । मतेः फलमाह हित्वेति ।। २४ ।। ❀ ❀ ननु पद्यन्तरा एव सा नश्येत् तर्हि किं कर्त्तव्यं तत्राह मतिर्मयीति । मतिरिति किं वक्तव्यं स्मृतिश्चैतज्जन्मविषया ।। २५-२६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गिराम् अगोचरः "यतो वाचो निवर्त्तंते" इति श्रुतेः, सर्व्वैरेव वचनगोचरीकर्त्तुमशक्योऽपि भगवान् माम् आह । स्वीयवचनसौस्वर्य्यं श्रवणाभ्यामनुभावयामास । एवं नारदस्य वैधभक्तिमत्त्वाद् भगवत्सौरभ्यसौन्दर्य्यसौस्वर्य्याणां त्रयाणामेव माधुर्य्याणामनुभवः साधकदेहे अन्येषां सर्व्वेषां तु तन्माधुर्य्याणां सिद्धदेहे एव भावी ज्ञेयः । शुचस्तददर्शनोद्भूतदुःखशोकान् प्रशमयन् दूरीकुर्वन् । अत्र वियोगौत्कण्ठ्यवतः प्रेम्णः सर्व्वथा तृप्त्यनुभवधर्म्मत्वात् इवशब्दः ।। २१ ।। ❀ ❀ किमाहेत्यत आह । हन्तेति सानुकम्पं सम्बोधनम् । अस्मिन्जन्मनि साधकदेहे मा इति मां द्रष्टुं नार्हति । न विपक्वाः न दग्धाः कषाया मलाः कामादयो येषां तेषां कुयोगिनाम् अहं दुर्दर्शः अदृश्यः, तुभ्यं तु दर्शनं दत्तमेवेति त्वं तु कुयोगी न भवसीति भावः ।। २२ ।। ❀ ❀ तर्हि हाहा !! पुनरप्येकवारं दर्शनं देहि इत्यत आह सकृदिति । एतदेकवारदर्शनं ते कामाय त्वन्मनोरथं साधयितुं

योग्यमित्यर्थः। न तु मुहुर्दर्शनम् औत्कण्ठ्यस्यानतिवृद्ध्या प्रेम्णोऽप्यनतिवृद्धेस्तस्य तारुण्यं न स्यादिति भावः। अत एव जातप्रेम्णे भक्ताय साधकदेहे एकवारमेव दर्शनं ददामीति मम नियमः। यथा साधकदेहे बालभूतः प्रेमा वियोगौत्कण्ठ्येन लब्धातिवृद्धिः सिद्धदेहे तरुणः सन् स्वाधारं भक्तं मुहुरपि मां दर्शयति साक्षात् सेवयति चेति स्वभक्तमनोरथपूर्तिप्रकारमहमेव जानामि, न तु मे स्वभक्त इति भावः। मत्कामः यो हि मां कामयते मात्रं मद्दर्शनालाभेऽपीत्यर्थः, हृच्छयान् विषयवासनाः। अत्रापि सर्वान् मोक्ष्यसि हृच्छयानित्यनुक्तेर्नारदं प्रति नेदं वाक्यं किन्तु स्वभक्तेः स्वभावं तं ज्ञापयामासेत्येवात्र तत्त्वम्। सर्वमिदं दैन्यवर्द्धनार्थमित्येके ॥ २३ ॥ ❀ ❀ अदीर्घया अल्पयापि। अवद्यं निन्द्यलोकं सांसारिकजनावासं त्रिभुवनमेव त्यक्त्वा मज्जनतां मत्पार्षदत्वं गन्तासि ॥ २४ ॥ ❀ ❀ न विपद्येत यतो मयि निबद्धा मयि बद्ध्वा स्थापिता प्रेम्णैवेत्यर्थः। मम नित्यत्वात् मतिरपि नित्यैवेत्यर्थः ॥ २५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अगोचरो गिरामिति "सर्वे वेदा यत्पदमामनंति, वेदैश्च सर्वैरहमेव वेद्य" इत्यादिश्रुतिस्मृतिभ्यां वेदविषय एव इयत्तानवच्छिन्नत्वाद्वाचामविषयो हरिः एवं भूयो भूयो यतंतं मां गंभीरया श्लक्ष्णया वाचा शुचः शोकान्शमयन्निवाह ॥ २१ ॥ ❀ ❀ तदेव दर्शयति हंतेति चतुर्भिः। हंतेति वात्सल्यसूचके संबोधने मार्हसि नार्हसि अविपक्वकषायाणामदग्धदर्शनप्रतिबंधककर्मणाम्, कुयोगिनामपक्वयोगानाम् दुर्दर्शः दुर्घटदर्शनः ॥ २२ ॥ ❀ ❀ कथं तर्हि सकृद्भवता रूपं दर्शितमत्राह सकृदिति। मे मया सकृद्यद् रूपं दर्शितं तदेतत्कामाय एतस्मिन्नेव रूपे रुच्युत्पादनाय ॥ २३ ॥ ❀ ❀ सदिति "याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः। तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्" इति विश्वसृक्शापरूपमवद्यम् इमं पांचभौतिकं देहं च हित्वा अप्राकृतदेहभावरूपां मज्जनतां मत्पार्षदतां लोकमभीष्टं च गंतासि। तदनींतनो देहस्त्ववद्यो न भवति तदापि सत्सेवायां वासुदेवे दृढायां मतौ सर्वपरित्यागपूर्वकभगवद्ध्याने भगवद्दर्शने च हेतुत्वेन भगवतोऽतिप्रियत्वात्। अन्यथा "अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्, अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज" इत्यादिवक्ष्यमाणस्य सर्वस्य ग्रंथस्य वैयर्थ्यं स्यात् "अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" इति स्ववचनविरोधश्च स्यात् ॥ २४ ॥ ❀ ❀ न विपद्येत न विनश्येत् ॥ २५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तथापि यत्नं न त्यक्तवान् इत्याह एवं यतंतमिति। मनुष्यांतरवाक्यसंभावनाभावः कोयं स इत्याकांक्षायामाह–अगोचरो गिरामिति। "यतो वाचो निवर्त्तंत" इति श्रुतेः तत् स्थावरं ब्रह्म भगवच्छास्त्रसिद्धमिति तस्य वाक्यमाह–गंभीरश्लक्ष्णया वाचा गंभीरत्वेन न प्रतिध्वनिः, श्लक्ष्णत्वान्नाकाशपुरुषस्य वाणी, तस्य शोकोयं किं मया भ्रमात् किंचिदनुभूतं आहोस्वित् स्वप्न इति, तथा सति न शास्त्रं प्रमाणमिति महद्दुःखं दिदृक्षाकृतं च एवं नानाविधाः शुचः ताः प्रशमयन्निव अस्तित्वेन शमनम् अग्रे एव संभविष्यति। इदानीं नास्तीति च तस्मादाह शमयन्निवेति ॥ २१ ॥ ❀ ❀ भगवद्वाक्यमाह हंतास्मिन्निति। हंतेति स्नेहेन दुःखितस्य संबोधनम्। अस्मिन् जन्मनि मां द्रष्टुं भवान्नार्हति नवा इहेति, अन्यथा मरणपर्यंतमत्रैव तिष्ठेत्, अतो वैकुंठेन्यत्र वा जन्मान्तरे भविष्यति। इहादर्शने हेतुः अविपक्वकषायाणां न विशेषेण पक्वा रागादयो येषाम्। इदानीं भक्तिज्ञानादेरुद्गमात् अभिभूतास्तिरोहितास्तिष्ठंति, पुनः कालांतरे निमित्तांतरमासाद्य प्रबुद्धा भविष्यंति। अतस्तेषां पाको मृग्यत इति "कषायपक्तिः कर्माणी"ति श्रुतेः पाचककर्माणि कर्त्तव्यानीत्यर्थः। अपक्वेऽपि कषाये साधनेष्वतिनिर्बंधश्चेत् कदाचित् दुःखेन द्रष्टुं शक्येतापि। तदाह दुर्दर्श इति कुयोगिनामिति अंतरायैर्विहतानां तस्मान्न कषायपाकपूर्वसिद्धिः ॥२२॥ ❀ ❀ सकृद्दर्शनं तु प्रमेयबलादित्याह। सकृद्यद्दर्शितं रूपमिति यदिदं रूपं सकृद्दर्शितं तत्ते कामोत्पत्त्यर्थं तद्गतेच्छाविशेषार्थं येन कामेन नात्र स्थातुं न शक्नुयात्। कामनायां किं स्यात्तदाह मत्काम इति। मयि कामः शनकैरिति कामद्वारा यथा यथाहं प्रविष्टः तथा तथा कामान् मुंचतीति। किंच प्रथमतः साधुर्भवति साधुभिरेव प्राप्यत्वात् रागादिभिश्च साधुत्वापगमात्। ततः सर्वानेव हृच्छयान् रागादीन् मुञ्चति ॥२३॥ ❀ ❀ तर्हि किं साधनं कर्त्तव्यमित्याकांक्षायामाह सत्सेवयेति। साधनं तु तव निष्पन्नं यतः अदीर्घयापि सत्सेवया मयि दृढा मतिर्जाता। तर्हि कानुपपत्तिस्तत्राह हित्वावद्यमिति, देहस्तु दुष्टः तस्मिन्नपगते भविष्यति। नन्वेतत्प्ररोहत्वादग्रिमोपि देहस्तादृशो भविष्यतीति। तत्राह मज्जनता मम जनः सेवकः तत्ता मज्जनता असेवकोऽपि सेवकशरीरं प्राप्स्यसि ॥२४॥ ❀ ❀ ननु तदा शरीरांतरे ज्ञानादिसाधनाभावात् कथं तव दर्शनं तत्राह मतिर्मयि निबद्धेयमिति। इदमेव ज्ञानं तदाप्यनुवर्तिष्यते नाशशंका नास्त्येव मयि नितरां संबद्धत्वात् यथा मत्सायुज्ये जीवानामविद्यया न तिरोभावः तथा ज्ञानादीनामपि मदज्ञानमिव तदपि भविष्यतीत्यनुग्रहस्तदाह कर्हिचिदिति। बाधककालद्वयमनूद्य निषेधति प्रजासर्गनिरोधेपीति। अपरं च वरमाह स्मृतिश्चेति सर्वपदार्थानां पूर्वानुभूतानां स्मरणं च न विपद्येतेत्यर्थः। अनेन सर्वदा सावधानो भवति। एतावदत्र सिद्धं कषायपाकः कर्त्तव्यः, अंतरायैरनुपहतश्च भवेत् अन्यत्तु मयैव कृतं मयि कामः विषयेष्वकामः एतद्देहावसान एव मत्पार्षदशरीरप्राप्तिः ज्ञानानाशः सर्वपदार्थस्मरणं च, तत्र निर्विघ्नेन कषायपाकोपायस्त्वया शीघ्रमेव कर्त्तव्य इति सिद्धम् ॥ २५ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

हन्तेत्यत्र । अन्यथेति । देशानुक्तौ ॥ २१ ॥ ❀ ❀ मतिर्मयीत्यत्र । अनेनेति भगवदनुग्रहजन्येन पूर्वजन्मादिस्मरणेन । तत्रेति भगवद्वाक्ये ॥ २४ ॥ ❀ ❀ एतावदित्यत्र । जातमिति भूतपदस्यार्थः । तथाकथन इति अदृश्येन रूपेण कथने । आत्मातिरिक्तरूपस्याप्यनुमानगम्यत्वं नास्तीत्याहुः अतिरिक्तेत्यादि । सर्वत्रेति अस्मदादिकृतेषु साधनेषु । उक्तमिति । नमनमुक्तम् ॥ २५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

विजने एकान्ते एवं भगवद्दर्शनार्थं यतन्तं प्रयत्नं कुर्वन्तं मां गिरामगोचरो "यतो वाचो निवर्तन्ते" इति श्रुतेर्वागविषयो भगवान् गम्भीरया सुस्वरया श्लक्ष्णया मधुरया वाचा मम शुचः स्वादर्शनजन्यशोकान् प्रशमयन्निवाहेत्यन्वयः । सर्वथा शोकप्रशमस्तु मनोर्थितेन दर्शनेनैव स्यादिति ज्ञापनायेवशब्दप्रयोगः ॥ २१ ॥ ❀ ❀ तदुक्तिमेवाह–हन्तेति चतुर्भिः । हन्तेति कोमलसम्बोधने । हे तात इह स्थाने अस्मिन् जन्मनि च भवान् मां द्रष्टुं नार्हति, यतोऽहं कुयोगिनां दुर्दर्शः दुःखेनापि द्रष्टुमशक्यः । के ते कुयोगिन इत्यपेक्षायां तान् विशिनष्टि–अविपक्वेति, अविपक्वः अविनष्टः कषायः कषायवद्दूरपनेयो दर्शनप्रतिबन्धको विषयरागलोभादिरूपो येषां तेषामित्यर्थः ॥ २२ ॥ ❀ ❀ तर्हि सकृत्कथं दृष्टोऽसीत्यत आह–सकृदिति । अन्यवत्तव दुर्निवार्यो दोषो नास्तीति सूचयन् सम्बोधयति–हे अनघेति । सकृदेकदा यन्मया स्वरूपं दर्शितं तत् ते तव एतत्कामाय तवाप्यनुरागदार्ढ्यायेत्यर्थः । न ह्यदृष्टेऽनुरागदार्ढ्यं भवतीति भावः । त्वदनुरागेण किं फलं भवतीत्यपेक्षायामाह–मत्कामः पुरुषः शनकैः साधुः सर्वतो विरक्तः सन् सर्वान् हृच्छयान् हृदि स्थितान् कामक्रोधलोभमोहादीन् दोषान् विमुञ्चति ॥ २३ ॥ ❀ ❀ साधनं तव निष्पन्नमेव, प्रारब्धमात्रं तु प्रतिबन्धकं, तस्मिन्भोगेन क्षीणे सति देहपातानन्तरं त्वं मत्सेवको भविष्यसि तदा तव मद्दर्शनं सुलभमित्याह–सत्सेवयेति । अदीर्घया अल्पकालिकयाऽपि सतां सेवया ते तव मयि दृढा मतिर्जातैव वर्त्तते । अथेमं दृश्यमानमवद्यं मांसादिचयरूपत्वात् कर्मकालादिवश्यत्वाच्च निन्द्यं लोकयत इति लोकं देहं हित्वा मज्जनतां मद्भृत्यतां गन्तासि गमिष्यसीत्यर्थः । अवद्यं हित्वेत्यनेन भगवत्पार्षददेहानामप्राकृतत्वं कर्माद्यनधीनत्वं च सूचितम् ॥ २४ ॥ ❀ ❀ तर्हि देहपातानन्तरं ममेदं भक्त्यादिसाधनं विनश्येदिति शोचन्तं प्रत्याह–मतिरिति । मदनुग्रहाद्धेतोः कर्हिचिदपि प्रजासर्गस्य निरोधे प्रलये सत्यपि मयि निबद्धा तवेयं मतिः पूर्वपूर्वानुभूतविषया स्मृतिश्च न विपद्येत न विनश्येतेत्यन्वयः । अनेनैव प्राक्कालविषयां ते स्मृतिं कालः कथं न खण्डितवानिति प्रश्नस्योत्तरं दत्तमिति ज्ञेयम् ॥ २५ ॥

हिन्दी अनुवाद

इस प्रकार निर्जन वनमें मुझे प्रयत्न करते देख स्वयं भगवानने, जो वाणीके विषय नहीं हैं, बड़ी गम्भीर और मधुर वाणीसे मेरे शोकको शान्त करते हुए-से कहा ॥ २१ ॥ ❀ ❀ 'खेद है कि इस जन्ममें तुम मेरा दर्शन नहीं करोगे । जिनकी वासनाएँ पूर्णतया शान्त नहीं हो गयी हैं, उन अधकचरे योगियोंको मेरा दर्शन अत्यन्त दुर्लभ है ॥ २२ ॥ ❀ ❀ निष्पाप बालक ! तुम्हारे हृदयमें मुझे प्राप्त करनेकी लालसा जाग्रत् करनेके लिये ही मैंने एक बार तुम्हें अपने रूपकी झलक दिखायी है । मुझे प्राप्त करनेकी आकांक्षासे युक्त साधक धीरे-धीरे हृदयकी सम्पूर्ण वासनाओंका भली-भाँति त्याग कर देता है ॥ २३ ॥ ❀ ❀ अल्पकालीन सन्तसेवासे ही तुम्हारी चित्तवृत्ति मुझमें स्थिर हो गयी है । अब तुम इस प्राकृतमलिन शरीर छोड़कर मेरे पार्षद हो जाओगे ॥ २४ ॥ ❀ ❀ मुझे प्राप्त करनेका तुम्हारा यह दृढ़ निश्चय कभी किसी प्रकार नहीं टूटेगा । समस्त सृष्टिका प्रलय होनेपर भी मेरी कृपासे तुम्हें मेरी स्मृति बनी रहेगी' ॥ २५ ॥

एतावदुक्त्वोपरराम तन्महद् भूतं नभोलिङ्गमलिङ्गमीश्वरम् ।
अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेऽनुकम्पितः ॥ २६ ॥
नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् ।
गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् वि¹मदो विमत्सरः ॥ २७ ॥
एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः । कालः प्रादुरभूत्काले त²डित्सौदामनी यथा ॥ २८ ॥
प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् । आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः ॥ २९ ॥

---

१. प्रा० पा० प्रतीक्षन्नमदो । २. प्रा० पा० विद्युत् ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्प्रसिद्धं महद्भूतम्। "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः" इत्यादिश्रुतेः। कीदृशम्। ईश्वरं सर्वनियंतृ नभसि लिंगं मूर्तिर्यस्य तन्नभोलिंगं संनिहितमपि न लिंग्यते इत्यलिंगं तस्मै अदृष्टायावनामं प्रमाणं विदधे कृतवानहं तेनानुकंपितः सन् ॥ २६ ॥ ❀ ❀ अनंतस्य नामानि पठन्ननवरतं गृणन् हतत्रपस्त्यक्तलज्जो विमत्सरो जात इति शेषः ॥ २७ ❀ ❀ काले स्वावसरे कालो मृत्युः प्रादुरभूदाविर्बभूव। अकस्मात्प्रादुर्भावे दृष्टांतः तडिदिति। सौदामनीति। विशेषणं स्फुटत्वप्रदर्शनार्थम्। तथा हि सुदामा माला तत्र भवा सौदामनी मालाकारेत्यर्थः। यद्वा सुदामा नाम कश्चित्स्फटिकपर्वतः। ततः "तेनैकदिक्" इति सूत्रेणाण्। स्फटिकादिमयपर्वतप्रांतभवा हि विद्युदतिस्फुटा भवति तद्वदित्यर्थः। यद्वा तडिदित्यंतिके इत्यर्थः। "तडिदित्यंतिकवंधयोः" इति नैरुक्तस्मरणात् ॥ २८ ॥ ❀ ❀ प्रयुज्यमाने मयि तामिति। अयमर्थः 'हित्वावद्यमिमं लोकं गंता मज्जनतामसि' इति या भागवती भगवत्पार्षदरूपा शुद्धा सत्त्वमयी तनुः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य। आरब्धकर्मणो निर्वाणमेव निर्वाणं यस्येति वा स पंचभूतात्मको देहो न्यपतत्। अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवति ॥ २९ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

महद्भूतमिति। भगवतो नामैवात एवं क्लीबत्वम्। यस्य निःश्वसितमेव चत्वारो वेदास्तस्य वचनं तु ततोप्यतिप्रमाणमिति भावः। ईश्वरम् अतिनिकृष्टाय दासीपुत्रायापि मह्यं तथा वरप्रदानं यदिदमपि तस्यैकमीश्वरत्वमिति भावः। नभसि हार्दाकाशे लिंग्यते ज्ञायते इति वा। यद्वा नभो लिंगं दृष्टान्तत्वेन गमकं यस्य तत्तथा "आकाशवत्सर्वगतश्च नित्यः" इति। नभोलिंगं शरीरं यस्येति वा तथा "आकाशशरीरं ब्रह्म" इति श्रुतेः ॥ २६ ॥ ❀ ❀ स्मरन्नेव न तु प्रकाशयन्। तत एव तुष्टमनाः स्पृहाशून्यश्च सन् पूर्वत एव विमदो विमत्सरश्च सन् केवलं कालं तत्कृपावसरं प्रतीक्षमाणोहं बभूवेति संदर्भः। कालं प्रतीक्षन्स कालो मे कदा भविष्यति यत्र तत्पार्षदतां यास्यामीति भगवत्पार्षदो भविष्यामि। कोन्यो वराको मत्सम इत्येवं मदमत्सरौ मम नाभूताम् ॥ २७ ॥ ❀ ❀ कालस्तत्कृपावसरः प्रादुरभूत्। यथाभ्रक्षये तडित्सौदामनीति गोबलीवर्दन्यायेन चेयमुक्तिरिति संदर्भः। स्वामिचरणास्तु भवार्थप्रत्ययस्यैवार्थाप्रसिद्धेराहुः। यद्वेति सुदाम्नाऽद्रिणा एका दिक् सौदामनी सर्वव्यापिन्यास्तस्या नियतमेकदिक्त्वं न संभवतीति पुनराह-यद्वेति। इत्यर्थ इति। तडिदित्यव्ययमपीति भावः। नैरुक्तस्मरणान्निरुक्तिकारवचनात्। विश्वनाथस्तु-काले मम स्थूलदेहभंगसमये कालः प्रादुरभूत्। यं कालं प्रतीक्षमाणः पूर्वं चिरादभूवं स इत्यर्थः। राज्ञो गमनसमये तस्य गमनसमयमितिवत्। बुद्धिर्हि भगवति अभेदेपि भेदं जनयतीत्यनुपन्यासः। कालयोस्तयोरकस्माद्युगपदेवाधाराधेयभावेन प्रादुर्भावे दृष्टांतः। तडिति विद्युति सौदामनी यथा एकस्यां सौदामन्यां तथैवान्या सौदामनी कदाचिद्यथा भवति तथैव मम पांचभौतिकदेहभंगकाले एव पार्षददेहप्राप्तिकालोभूदित्यर्थः ॥ २८ ॥ ❀ ❀ नीयमाने सति न्यपतदिति गोषु दुह्यमानासु गत इतिवत्। यथा गोदोहनगमनयोस्तुल्यकालत्वं तथा मम भौतिकदेहत्यागचिन्मयदेहप्राप्त्योरपीति भावः। "हित्वावद्यमिमं लोकम्" इति भगवदुक्तौ क्त्वाप्रत्ययस्तुल्यकाल एव। तदुक्तं "क्वचित्तुल्यकालेपि। उपविश्य भुंक्ते, झणत्कृत्वा पतति, चक्षुः संमील्य हसति, मुखं व्यादाय स्वपितीत्यादिकमुपसंख्येयम्" इति भाष्यवृत्तौ। अनेन वृत्तेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवतीति स्वामिचरणाः। अत्रारब्धानां कर्मणां नायकत्वादग्नितुल्यानां निर्वाणो नाशो यत्र स इति बहुव्रीहिणा न केवलं तदानीमेव प्रारब्धनाश इति लभ्यते। देहपातात्पूर्वकालेपि तन्नाशे तत्प्रयोगसिद्धेः। न च जातप्रेम्णो भक्तस्यापि प्रारब्धं तिष्ठतीति शुद्धभक्तानां मतं साधनदशायामेव तन्नाशात्। यद्वक्ष्यते प्रियव्रतकथायां "नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम्। चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति तन्वम्" इति। अस्यार्थः-एवंविधं पौरुषं न चित्रम्। चित्रं खल्वेतदेव किं तदित्यत आह-विदूरविगतोंत्यजोपि यन्नामधेयं सकृदाददीत यः स अधुना नामग्रहणकाल एव तन्वं तनूं जहाति। अत्र नामग्रहणसमकाले तनुत्यागादर्शनात्। तन्वारंभकं प्रारब्धकर्मैव तनूशब्देन लभ्यते इत्येके प्राहुरपरे तु भक्तिसंपर्कात्स्पर्शमणिन्यायेन त्रिगुणमयतनूरेष त्रिगुणातीतो भवति। ध्रुवादौ तथा दर्शनात्। अत्र तस्यास्त्रैगुण्यत्याग एव तनुत्याग उच्यते। एतच्च रासारंभे "जहुर्गुणमयं देहम्" इत्यत्र प्रपंचयिष्यते चक्रवर्त्तिना। क्वचित्तु स्वभक्तानां देहत्यागोपि भगवता दर्श्यते इत्याहुः। यथा जातप्रेम्णोपि नारदस्य देहत्यागस्तदपि प्रारब्धकर्मनाशो भक्त्यारंभ एव व्याख्येयस्तदुक्तं श्रीरूपगोस्वामिचरणैः-"यद्ब्रह्म साक्षात्कृतिनिष्ठयापि विनाशमायाति विना न भोगैः। अपैति नामस्मरणेन तत्ते प्रारब्धकर्मेति विरौति वेदः" इति। प्रारब्धनाश एव देहपातमित्यभिप्रायेण "प्रारब्धकर्मनिर्वाणे न्यपतत्पांचभौतिके" इति सप्तम्यंतमेव पदं प्रयुज्यत इत्यवधेयम्। तदप्रयुज्य बहुव्रीहिप्रयोगेण भक्तानां प्रारब्धकर्मनिर्वाणाधिकरणीभूत एव देहः पतेन्न तु ततोन्य इति ज्ञापितम् ॥ २९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

महद्भूतमिति भगवन्नामप्रथमैकवचनम्। तत्र प्रमाणम् 'अस्य महतो भूतस्ये'त्यादिश्रुतिः। अस्येत्यादिकर्तरि षष्ठी। महतोऽनवच्छिन्नस्य परमात्मनः प्रकृतस्य भूतस्य ईश्वरस्येति यावत्। निश्वसितं निश्वासवदप्रयत्नेनैव जातमित्यर्थः ॥ २६-२७ ॥

❀ ❀ 'तेनैकदिक्' इति सूत्रं पाणिनीयव्याकरणस्य चतुर्थाध्यायीयतृतीयपादे द्वादशाधिकशततमम् । सुदाम्ना अद्रिणा एकदिक् सौदामनी इति तस्य भट्टोजिदीक्षितकृता वृत्तिः । यद्वेति । अस्मिन् पक्षे तडित्सौदामनीत्यत्र सप्तमीतत्पुरुषसमासो ज्ञेयः । नैरुक्तेति वैदिकमन्त्राणामर्थज्ञापको भगवद्यास्कमुनिविरचितो वेदांगशास्त्रविशेषो निरुक्तस्तत्रत्यं वचनं नैरुक्तमिति तस्य स्मरणादित्यर्थः ॥ २८-२९ ॥

श्रीमद्वीरराघवव्याख्या

अलिंगं कर्म देहरहितं नभोलिंगमाकाशशरीरकमीश्वरं सर्वनियंतृ ऐश्वरमिति पाठे ईश्वरशब्दवाच्यं तन्महत्सर्वव्यापकं भूतं स्वाधीनसमाधिकरहितं महद्ब्रह्म "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमि"ति श्रुतेः । एतावदुक्त्वा विरराम तूष्णीमास ततो महसां तेजस्विनामपि महीयसे तस्मै महते भूताय तेनानुकंपितोहमवनामं प्रणामं विदधे कृतवानस्मि ॥ २६ ॥ ❀ ❀ ततोऽनंतस्य भगवतो नामान्यहं गतलज्जः पठन् भद्राणि लोकानां मंगलावहानि गुह्यानि वेदगुह्यानि जन्मानि कर्माणि च स्मरन् गां भूमिं पर्यटन् तुष्टं मनो यस्य, गता स्पृहा शब्दादिविषया यस्य, विगतो मत्सरो भूतविषयको यस्य, विगतः मदो देहपारवश्यरूपो यस्य सः । अपद इति पाठेऽनिकेतः कालं देहावसानकालं प्रतीक्षन्नासमिति क्रियापदमध्याहार्यं यावत्कल्पावसानं जीवितवानस्मीत्यर्थः ॥ २७ ॥ ❀ ❀ हे ब्रह्मन् ! कृष्णे भगवत्येव मतिर्यस्मात एवामलो विशुद्धः आत्मा मनो यस्मात एव शब्दादिविषयेष्वसक्तस्य मम काले देहारंभकप्रारब्धावसानकाले कालः मृत्युकालः प्रादुरभूदुपस्थितो बभूव । मृत्युकालस्य क्षणिकत्वद्योतनाय दृष्टांतमाह सौदामिनी सुदाम्नः पर्वतस्यादूरभवा सौदामिनी चातुरर्थिकोऽण् अन्नितिप्रकृतिभावे नांतत्वात् ङीप् सौदामनीत्यपि पाठः ॥ २८ ॥ ❀ ❀ तदा तां प्रसिद्धां सर्वजीवलयाधारभूतामित्यर्थः शुद्धामप्राकृतां भागवतीमनिरुद्धाख्यां तनुं प्रति मयि प्रयुज्यमाने संश्लिष्यमाणे लयं प्राप्तुमुद्युक्ते सतीत्यर्थः, आरब्धकर्मनिर्वाणः तद्देहावस्थितिनिमित्तस्य प्रारब्धकर्मणः निर्वाणमवसानं यस्य स पांचभौतिको देहो न्यपतत् ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तर्हि किमिति दर्शितमिति तत्राह सकृदिति । अनघ सांसारिकदुःखरहित ते तव कामाय अथ कदानु पश्येयमित्युत्कंठायै । तया किं फलमभूदिति तत्राह मत्काम इति मद्भक्तः पुरुषः क्रमेण सर्वान् हृच्छयान् प्राकृतान्कामान् साधु मुञ्चतीत्यन्वयः ॥ २६ ॥ ❀ ❀ परमहंससेवाफलमाह सदिति । दीर्घया बहुकालीनया सतां परमहंसानां सेवया परिचर्यया मयि दृढा मतिः मननलक्षणा भक्तिर्जाता, वै यस्मादतः अवद्यं दोषरूपशूद्रजातित्वादिमं लोकं देहं हित्वा पश्चात्ब्रह्मपुत्रत्वेन जातस्त्वं मज्जनतां मम जनतां परमभागवतत्वं गंतासीत्यन्वयः ॥ २७ ॥ ❀ ❀ मयि निबद्धा इयं मतिः कदाचिदपि न विपद्येत न नश्येत्, प्रजानां सर्गः सृष्टिः निरोधः संहार एतयोः स्मृतिनाशकयोः स्मृतिर्जातिस्मरणशक्तिश्च न विपद्येत कस्मान्मदनुग्रहात् । अनेन भगवद्भक्तसंगोभिमतफल इत्युक्तं भवति ॥ २८ ॥ ❀ ❀ ईश्वरम् ईशनशीलं सकलजनप्रवर्तनशक्तिमत् अलिंगं जडशरीररहितं रुद्रादन्यद्वा ईश्वरमित्युक्त्या भूतविग्रहवान् हर इति शंकानिरासार्थं वा अलिंगमित्युक्तं नभः लिंगं गमकं दृष्टांतत्वेन यस्य तत्तथोक्तम् आकाशवत्सर्वगमित्यर्थः, तन्महद्भूतं ब्रह्म एतावदुक्त्वा विरराम, तेनानुकंपितः कृपापात्रीकृतः अहं च महतां महीयसे तस्मै महाभूताय शीर्ष्णा शिरसा अवनामं नमस्कारं विदधे कृतवानित्यन्वयः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गुह्यानि गोप्यानि यानि भद्राणि सर्वोत्तमानि कृतानि प्रेयस्यादिभिः सह प्रेमपरिपाटीमयलीलास्तानि तु यथाधिकारं स्मरन्नेव न तु प्रकाशयन् । तत एव तुष्टमनाः स्पृहान्तरशून्यश्च सन् पूर्ववत एव तु विमदो विमत्सरश्च सन् केवलं कालं तत्कृपावसरं प्रतीक्षमाणोऽहं बभूवेति शेषः ॥ २७ ॥ ❀ ❀ कालस्तत्कृपावसरः प्रादुरभूत् यथा वृष्टिप्रतिबन्धकावग्रहक्षये तडित् सौदामिनीति । गोबलीवर्दन्यायेन चानधिकार्थमिदम् ॥ २८ ॥ ❀ ❀ भागवतीं भगवदंगज्योतिरंशरूपाम् । शुद्धां प्रकृतिस्पर्शशून्याम् । न्यपतदिति प्राक्तनलिंगशरीरभंगोऽपि लक्षितः, तादृशभगवन्निष्ठे प्रारब्धकर्मपर्यंतमेव तत्स्थितेः । इत्थमेव टीका च अनेन पार्षदतनूनामित्यादि ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

महद्भूतमिति क्लीबलिंगं भगवन्नाम "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद" इत्यादिश्रुतेः । तेन यस्य निश्वसितमेव चत्वारो वेदास्तस्य वचनं ततोऽप्यतिप्रमाणमिति भावः । ईश्वरम् अतिनिकृष्टाय दासीपुत्रायापि मह्यं तथा वरप्रदानं यत् इदमपि तस्यैकमीश्वरत्वमिति भावः । नभसि आकाशे एव लिंगं चिह्नं श्रीमुखवचनरूपं यस्य तत् । यतो न लिंग्यते न लक्ष्यते चक्षुर्भ्यामदृष्टत्वादलिंगम् ॥ २६ ॥ ❀ ❀ कृतानि चरित्राणि । कालं प्रतीक्षन् स कालो मे कदा भविष्यति यत्र तत्पार्षदतां

यास्यामीति । भगवत्पार्षदो भविष्यामि कोऽन्यवराको मत्सम इत्येवं मदमत्सरौ मम नाभूताम् ॥ २७ ॥ ❀ ❀ काले मम स्थूलदेहभंगसमये कालः प्रादुरभूत्। यं कालं प्रतीक्षमाणः पूर्वं चिरादभूवं स इत्यर्थः। राज्ञो गमनसमये तस्यागमनसमय इतिवत्, बुद्धिर्हि भागवती अभेदेऽपि भेदं जनयतीत्यनुपन्यासः। कालयोस्तयोरकस्माद् युगपदेवाधाराधेयत्वेन प्रादुर्भावे दृष्टान्तः तडिदिति। विद्युति सौदामिनी यथा। एकस्यां सौदामिन्यां तदैवान्या सौदामिनी कदाचिद् यथा भवति तथैव मम पाञ्चभौतिकदेहभंगकाले एव शुद्धपार्षददेहप्राप्तिकालोऽभूदित्यर्थः ॥ २८ ॥ ❀ ❀ तां पूर्वोक्तां 'हित्वावद्यमिमं लोकं गन्ता मज्जनतामसी'ति भगवता प्रतिश्रुतां शुद्धां शुद्धसत्त्वमयीं यतो भागवतीं न तु मायिकीं तनुं प्रति मयि प्रयुज्यमाने भगवतैव नीयमाने सति मम पाञ्चभौतिको देहो न्यपतत्। गोपु दुह्यमानासु गत इति दोहनगमनयोरिव मम भौतिकदेहत्यागचिन्मयदेहप्राप्त्योस्तुल्यकालत्वमेवाभूदित्यर्थः। हित्वावद्यमिमं लोकमिति भगवदुक्तो क्त्वाप्रत्ययस्तुल्यकाले एव। यदुक्तं क्वचित्तुल्यकालेऽपि 'उपविश्य भुंक्ते झणत्कृत्य पतति चक्षुः संमील्य हसति मुखं व्यादाय स्वपितीत्यादिकमुपसंख्येयमि'ति भाषावृत्तौ। अनेन पार्षदतनूनामकर्म्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितमिति श्रीधरस्वामिचरणाः। अत्रारब्धानां कर्म्मणां तापकत्वादग्नितुल्यानां निर्वाणो नाशो यत्र स इति बहुव्रीहिणा न केवलं तदानीमेव प्रारब्धनाश इति लभ्यते देहपातात् पूर्व्वकालेऽपि तत्रांशे तत्प्रयोगसिद्धेः। न च जातप्रेम्णो भक्तस्यापि प्रारब्धं तिष्ठतीति शुद्धभक्तानां मतं साधनदशायामेव तन्नाशात्। यद्वक्ष्यते प्रियव्रतकथायां—"नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम्। चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति तन्वमि"ति। अस्यार्थः एवंविधं पौरुषं न चित्रं चित्रं खल्वेतदेव। किं तदित्यत आह। विदूरविगतोऽन्त्यजोऽपि यन्नामधेयं सकृदाददीत यः सः अधुना नामग्रहणसमकाले एव तन्वं तनुं जहाति। अत्र नामग्रहणसमकाले तनुत्यागादर्शनात् तन्वारम्भकं प्रारब्धकर्मैव तनुशब्देन लभ्यते इत्येके प्राहुः। अपरे तु भक्तिसम्पर्कात् स्पर्शमणिन्यायेन त्रिगुणमयी तनुरेव त्रिगुणातीता भवति ध्रुवादौ तथा दर्शनात् अत्र तस्यास्त्रैगुण्यत्याग एव तनुत्याग उच्यते। एतच्च रासारम्भे 'जहुर्गुणमयं देहमि'त्यत्र प्रपञ्चयिष्यते। कचित्तु मतान्तरोत्खाताभावार्थं स्वभक्तानां देहत्यागोऽपि भगवता दर्श्यत इत्याहुः। यथा जातप्रेम्णोऽपि नारदस्य देहत्यागस्तदपि प्रारब्धकर्मनाशो भक्त्यारम्भे एव व्याख्येयः। यदुक्तं श्रीरूपगोस्वामिचरणैः "यद्ब्रह्मसाक्षात्कृतिनिष्ठयापि विनाशमायाति विना न भोगैः। अपैति नामस्मरणेन तत्ते प्रारब्धकर्मेति विरौति वेदः॥" इति। प्रारब्धनाशे एव देहपात इत्यभिप्राये प्रारब्धकर्मनिर्माणे न्यपतत् पांचभौतिक इति सप्तम्यन्तमेव पदं प्रयुज्यते इत्यवधेयम्। तदप्रयुज्य बहुव्रीहिप्रयोगेण भक्तानां प्रारब्धकर्मनिर्वाणाधिकरणीभूत एष देहः पतेन्न तु ततोऽन्य इति ज्ञापितम् ॥ २९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

"अस्य महतो भूतस्य निश्वसितमेतदृग्वेद" इति श्रुतिप्रसिद्धं यत्तन्महद्भूतं ब्रह्म नभोलिङ्गं नभसि हृद्याकाशे "अंगुष्ठमात्रं पुरुषं मध्ये आत्मनि तिष्ठती" ति श्रुतेः नभोगते सूर्ये वा "स एष आदित्ये हिरण्मयः पुरुषो दृश्यते" इति श्रुतेः लिंगं मूर्त्तिर्यस्य तत् अलिंगं प्राकृतमूर्तिवर्जितम् ईश्वरं सर्वनियंतृ एतावदुक्त्वा विरराम तूष्णीं बभूव। अहं च तेनानुकंपितोऽनुगृहीतोऽवनामं तस्मै प्रणामं विदधे कृतवान् ॥ २६ ॥ ❀ ❀ ततः किं वृत्तमित्यपेक्षायामाह नामानीति। गंता मज्जनतामसीति भगवत्प्रोक्तं कालं प्रतीक्षन्नामादेः पाठादि कुर्वन् विमत्सर आसम् ॥ २७ ॥ ❀ ❀ कृष्णमतेस्तद्भक्तस्य असक्तस्य संसाराद्विरक्तस्य काले प्रारब्धकर्मावसानसमये कालो मृत्युः प्रादुरभूत् आविर्बभूव, अकस्मान्मृत्यूपस्थितौ दृष्टांतमाह सौदामिनी तडित् यथा सुदाम्नो गिरेः प्रान्ते भवा विद्युदिव ॥ २८ ॥ ❀ ❀ शुद्धां सर्वदोषवर्जितां भागवतीं भगवत्पार्षदरूपामप्राकृतां नित्यां तनुमाविष्कर्तुं भगवता मयि प्रयुज्यमाने प्रारब्धकर्मणो निर्वाणमवसानं यस्य स पांचभौतिको न्यपतत्। अयमर्थः नित्यशरीरवान् सात्त्वततन्त्रकर्त्ता श्रीनारदः। केनापि कौतुकेन गन्धर्वशरीरं बिभ्रद् द्विजशापवशात्तद्धित्वा दासीपुत्रत्वं प्राप्तस्तद्धित्वा स्वकीयां तनुमाविश्चकार ॥ २९ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

एतावत् अग्रे उपायमनुक्त्वैव स्वतः स्फुरिष्यतीति पूर्वोक्तमात्रमुक्त्वा विरराम। प्रामाण्यार्थं वक्तारं विशिनष्टि विशेषतः अज्ञानान्नपुंसकपदप्रयोगः, तदित्यनुवादः महद्भूतमिति "अस्य महतो भूतस्य निःश्वसितमि" ति वेदोद्गममूलभूतं प्रामाण्यार्थमेव महद् जातमिति आकाशपुरुषं व्यावर्त्तयति नभोलिंगमिति। आकाशं तु भगवत अनुमापकं प्रथमकार्यत्वात् तथा कथने वा हेतुः यतस्तत्कार्यमपि तथा कथयतीति आलिंगनं न हि भगवाननुमानगम्यः आत्मत्वेन प्रत्यक्षत्वात् अतिरिक्तरूपे पुनर्व्याप्त्यादीनां भगवन्नियामकत्वं तदाह ईश्वरमिति। अन्यथाकरणसामर्थ्यात् न हेतुवह्न्यादिरिव भगवान् सिद्ध्यतीत्यर्थः। एवं सर्वप्रमाणातीतः सर्वत्र प्रमाणमित्युक्तं मयापि तदुक्तं कृतमित्याह अहं चेति। तत्र निर्विघ्नार्थं भगवन्तं नमस्करोति तस्मै पूर्वपरिचयात् ईश्वरफलदानपक्षेपि यथा फलं प्रयच्छेत् तदर्थमुक्तम्। ननु नमस्कारमात्रेण तत् कथं कुर्यात्तत्राह। महतां महीयस इति अतिमहति तावदेव कर्त्तव्यमिति बहिःशब्दश्रवणात् बहिः स्थितो भगवानिति बहिः शीर्ष्णावनामं साष्टांगनमस्कारं कृतवान्। युक्तं चैतत् यतो भगवान्

महतीं कृपां कृतवान् तदाह अनुकम्पित इति ॥ २६ ॥ ❀ ❀ कषायपाकसाधनं कौमरीत्याह नामानीति । कषायास्त्रिविधाः साक्षाद्रागादयस्तामसाः, तेषामपि वासनारूपा राजसाः अविद्यारूपाः । ते च क्रमात् कर्मणा भक्त्या ज्ञानेन च नाश्यन्ते । तत्र चाधिकाराः पृथक् पृथक् , अतो नैकेन नैकदा कर्त्तुं शक्याः । तस्मादेषां त्रयाणामेकोनुकल्पः कर्त्तव्यः तद्भगवत्कृपया सत् स्फुरितं तत् कृतवान् "चक्रांकितस्य नामानि सदा सर्वत्र कीर्त्तयेदि" ति वाक्यात् नामसु न देशकालयोरपेक्षा । एकवचनमनावर्त्तनीयं, ब्रह्मविदः सर्वैरेव रूपैर्भगवत्सेवनस्य श्रुतिसिद्धत्वात् एकनाम्न आवृत्तौ रूपविशेषस्येति न, सर्वैः सर्वत्र रक्षा स्यात् । श्रोतुर्वक्तुश्च परिच्छेदबुद्धिः पाखंडताशंकापि स्यात् । तत्र हेतुमाह-अनन्तस्येति । अनन्तरूपस्य तथा सत्यनन्ता एव भगवद्धर्माः नामसु स्मृता भवन्ति । अलौकिकं हि लोकमध्ये कुर्वन् गुप्तं करोति लोकोपहासभिया देहकुलांतःकरणधर्म्मैश्च लज्जा भवति विहितत्वेपि लोकोपहासात् तथा सति लोकबुद्ध्या न भगवति शुद्धो भावो भवेत् । अतस्तान् त्याजयति, हतत्रप इति हत्वा न पुनर्जीवनं क्रियाकर्ममध्ये अधिकारिपदात् नामोच्चारण एव हतत्रपत्वं स्वाधीतानामर्थानुष्ठानपूर्वकमुच्चैरुच्चारणं पठनं, शतृप्रत्ययेन निरंतरता चोक्ता । चित्तस्य चंचलत्वात्तस्य भिन्नमवलंबनमाह गुह्यानीति । यानि चरित्राणि गुह्यानि लोकस्पष्टतया वक्तुं युक्तानि पुष्टयाकृतानि द्रौपद्यर्ज्जुनादिषु शयनस्थानादिषु शयनस्थानादीनि भद्राणि मनोहरादीनि स्वस्याबंधकानि कृतानि चेति स्पष्टतया कृतानि । अथवा कृतानि करिष्यमाणानि च भगवत्कृपया तत्स्फुरणं, शरीरकृत्यमाह गां पर्यटन्निति । अत्यंतसंयोगे द्वितीया, गोशब्दाद् गोसेवावद्धर्मजनकत्वं परितः अटनम् । अनेन ऋजुतया एकमार्गेण देशातिक्रमो निवारितः । एकमंगं साधनसाधनत्वेनोक्त्वा पंचांगानि फलसाधनत्वेनाह । तुष्टमना इत्यादि-भूमिपर्यटनं यद्यन्यार्थं स्यात् तदा मनसो न तावन्मात्रेण परितोषः स्यात् । अतस्तुष्टमना भवेत् , पर्यटनमेव फलत्वेन जानीयात् , यद्यपि तथा पर्यटनेन लौकिकालौकिकानि फलानि भवंति, तथापि तेषु स्पृहा न कर्त्तव्या । तदाह नन्वपरिच्छिन्नानि कर्माणि कर्त्तुमशक्यानि, अत एव द्वितीयाध्याये कर्मभेदो निरूपितः । तत्र परिच्छेदकः देशः कालो वा भवति । ततश्चापरिच्छेदकदेशकालसंबंधे किं कुर्यादित्यत आह कालं प्रतीक्षन्निति । शतृप्रत्ययेन आदित आरभ्य कालप्रतीक्षा कर्त्तव्या । ततः शरीररक्षादिसाधनाभावे बाधके वा नांतःकरणे क्लेशो भवति, दैवगत्या सन्मानने प्राप्तेपि गर्वो न कर्त्तव्यः । न हि पूजनेन तस्य महत्त्वं प्रत्युत तद्बाधकं "जनेनाभिमतो योगी योगसिद्धिं न विंदती" ति वाक्यात् , विषयाप्राप्तौ न वा मत्सरः कर्त्तव्यः । प्रत्युत कालसाधकत्वेन तेषामुपकारो मंतव्यः, न वा विपरीतो मत्सरः कर्त्तव्यः । अबाधकविषयप्रापकेषु भगवदाज्ञानिर्वाहकत्वात् निषिद्धप्रापकेषु तु बाधकवत्सहनम् ॥ २७ ॥ ❀ ❀ एवं षडंगसहितं नामोच्चारणपूर्वकं भूपर्यटनं कषायपाके हेतुः, तस्य किं दृष्टद्वारा अदृष्टद्वारा वा कषायपाकहेतुत्वमित्याकांक्षायामाह एवं कृष्णमतेरिति । एवं पर्यटने कृष्णे मतिर्भवति । तदैव विषयेष्वसंगः, यदा कृष्णो रोचते तदैव विषया न रोचंते, ब्रह्मन्निति संबोधनमपि संवादाय कृष्णस्य मत्या विषयासंगे जाते तदैवांतःकरणं शुद्धं जातं तदैव कषायाः पक्का इत्यर्थः । पाकार्थमेव शरीरस्य रक्षितत्वात् पक्वे च कषाये शरीरस्य प्रयोजनांतराभावात्तद्ग्रहणाय कालः प्रादुरभूत् । काले शरीरप्रारम्भकादृष्टसमाप्तौ शापसमाप्तौ वा उत्तरत्र वा संबंधः । काले वर्षाकाले तडिदिति शीघ्रमिति । केचित् सौदामिनी वसुदामा पर्वतस्तज्जाता तडित् सौदामिनीत्येकं वा पदं तडिदिव पीत इत्यादावेकदेशप्रयोगः, यथा प्रथमत एव स्तनयित्नुदृष्टेर्विद्युत् तथा शरीरनाशकरोगाद्यपेक्षया कालो जीवप्रणेता प्रथमत एव प्रादुर्भूत इत्यर्थः ॥ २८ ॥ ❀ ❀ ततः किं वृत्तं तदाह प्रयुज्यमान इति । देहवियोगक्लेशो न ज्ञातोऽत एव प्रथमत एव भगवत्संबंधी शुद्धसत्त्वपरिणामरूपो देह उपस्थितः । कालेन चाहं तत्र शीघ्रमेव नीतः, तस्मिन् मयि नीयमाने कियद्दूरं शरीरमप्युद्गतं विमानसंमुखतया परं भौतिकत्वाद् गुरुत्वेन पंचभूतानि क्रमेण वैकुंठगमाद्वा न्यपतत् । ननु योगे ब्रह्मसंपत्तावपि शरीरं तिष्ठति कथमिदं पतितं तत्राह आरब्धकर्मनिर्वाण इति । येन कर्मणा इदं शरीरमारब्धं तस्य निर्वाणः समाप्तिस्तस्य निर्वाणशब्देन कर्मापि मुक्तं परंपराजनकत्वाभावात् वरादिकं तु आरंभककर्मरूपं भवति । तस्य च समाप्तिर्देहग्रहणमात्रेणैव, देहस्तु ब्रह्मांडपर्यवसाने तद्व्यावृत्त्यर्थं भौतिक इति ॥ २९ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नामानीत्यत्र । अविद्यारूपा इति । योगदर्शने 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठ'मिति विपर्ययं लक्षयित्वा 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा' इति विपर्ययस्य भेदा उक्ताः । तेषामेव भाष्ये व्यासपादैः 'तमो मोहो महामोहस्तामिस्रोन्धतामिस्र' इति पर्वत्वेन व्याख्यातत्वात्तत्पर्वरूपा इत्यर्थः । तत्र चेति । कर्मादिषु च । पृथगिति । 'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम् । न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिद' इत्येकादशे वाक्यादित्यर्थः । यदिति । अनुकल्परूपम् । श्रुतिसिद्धत्वादिति । मण्डलब्राह्मणे 'तमेतमग्निरित्युपासतेऽध्वर्यव' इत्युपक्रम्य यजुःसामादिरूपाण्युक्त्वा, 'तस्मादेवंवित्सर्वैरेवैतैरुपासीते'ति श्रावणादित्यर्थः । न सर्वैरित्यादि । 'तद्वैतान् भूत्वावती'ति श्रुतावुपास्यरूपेणैव रक्षोक्तेः सर्वरूपानुपासने तद्रूपेणाभवनात् सर्वत्र त्रिविधरागनिवृत्तिः प्रतिबन्धान्तरनिवृत्तिश्च न स्यादित्यर्थः । दूषणान्तरमाहुः श्रोतुरित्यादि । सर्वत्रायं ब्रह्म न जानातीति श्रोतुर्बुद्धिः स्यात् , सर्वत्राज्ञानेऽस्य श्रुतिविरुद्धत्वात्पाषण्डताशङ्का स्वस्यापि स्यादित्यर्थः । तत्रेति । नाम्नामानन्त्ये । तानिति लोकान् । नामोच्चारण एवेति । ननु वस्त्रादित्यागेपीत्यर्थः । स्वस्याबाधकानीति चित्ताविक्षेपकाणि । कृतपदं करिष्यमाणानामप्युपलक्षकमित्याशयेनाहुः अथवेत्यादि । चरित्रस्मरणरूपमङ्गं नामोच्चारणसाधनत्वेनोक्तवेत्यर्थः । लौकिकालौकिकानीति । सन्माननननानाश्चर्यावलोकनादीनि पुण्यदेशानुभवा-

ज्ञादीनि चेत्यर्थः। तदाहेति गतस्पृहपदेनाहेत्यर्थः। अपरिच्छिन्नानीति। देशकालकृतनियमरहितानि। अत एव यावज्जीवाधिकारकस्यानिर्वाहादेव। द्वितीयाध्याये जैमिनिसूत्रीये कर्मभेदः नित्यकाम्याग्निहोत्रादेः प्रयोगभेदः। परिच्छेदकदेशकालसम्बन्धे 'प्रयागे वपनं कुर्यात्' 'तुलामकरमेषेषु प्रातःस्नायी भवेन्नर' इत्यादिवाक्योक्तदेशकालसम्बन्धे, किं कुर्यात्, परिच्छिन्नापरिच्छिन्नयोर्वपनादिपर्यटनयोर्मध्ये कतरत्कुर्यादित्यर्थः। तत इत्यादि। तथा च कृतिसाध्यत्वासाध्यत्वविचारो हि शरीररक्षाविचारमूलकस्तस्याविचार्यत्वेन तदप्यविचार्य पर्यटेदेवेत्यर्थः॥ २६ ॥ ❀ ❀ एवं कृष्णमतेरित्यत्र भोगसमाप्ताविति। चरमक्षणे। शापसमाप्ताविति। ब्रह्मवैवर्ते ब्रह्मणा नारदं प्रति 'गृहस्थाश्रमं कुरु त्वमि'त्याज्ञप्ते नारदो न कृतवानित्यतः शापो दत्तः, 'त्वं स्त्रीकामो दासीसुतश्च भविते'ति कथितम्, तेनाहं पूर्वमुपबर्हणगन्धर्वो भूत्वा, ततो दास्यामुत्पन्नः, तस्य शापस्य समाप्तावित्यर्थः। केचिदिति। विजयध्वजादयः। अस्मिन् पक्षे तडित्पदं क्रियाविशेषणम्। एतस्याः शैङ्ये प्रसिद्ध्यभावाच्छ्रीधरोक्तपक्षान्तरमाहुः सौदामिनी वेति। सपर्वते स्फटिकमये इति तत्प्रान्तसम्भवात्तडिदतिस्फुटा भवतीति कालस्य तद्वदतिस्फुटत्वाय दृष्टान्तः। श्रीधरीयेऽन्यदपि पक्षद्वयमुक्तम्। सुदाममाला तत्र भवेति मालाकारेत्यर्थ इति। 'तडिदित्यन्तकवधयो'रिति नैरुक्तिकस्मरणात् तडिदन्तिक इत्यर्थ इति च। एतेषु सर्वेषु पक्षेष्वपुष्टार्थत्वं सौदामिनीपदे इकारदौर्लभ्यं चेति दूषणसत्त्वात्पक्षान्तरमाहुः एकं वा पदमिति। तथा प्रसिद्ध्यभावाद्विकल्पवाचकपदोक्तिः। अत्रापि दोषमाशङ्क्य परिहरन्ति तडिदिवेत्यादि। आदिपदेन 'तडितोऽधि वरुणः सम्बन्धा'-दित्यादिप्रयोगः सङ्गृह्यते॥ २७ ॥ ❀ ❀ प्रयुज्यमान इत्यत्र। नन्वारब्धकर्मनिवृत्तौ 'गन्ता मज्जनतामसी'ति वरादेरपि निवृत्तेरग्रे शरीरं कथमभूदित्यत आहुः वरादिकमिति। तथा चारब्धत्वाभावान्न पूर्वं निवृत्तिः, किन्तु देहग्रहणोत्तरं तस्याप्यरब्धत्वे जाते निवृत्तिरित्यर्थः। ब्रह्माण्डपर्यवसायीति। ब्रह्माण्डात्मा। तर्हीति। ब्रह्माण्डात्मकत्वे॥ २८ ॥ ❀ ❀ कल्पान्त इत्यत्र। ब्रह्मापि नाभिद्वारेत्यादि। एतदुक्तं कौर्मे 'ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः। अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुने'ति॥ २९ ॥

इति श्रीप्रथमस्कन्धे सुबोधिनीप्रकाशे षष्ठाध्यायविवरणम्॥ ६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी।

एतावत् पूर्वोक्तमात्रमुक्त्वा तत् "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद–"इत्यादिश्रुतिप्रसिद्धं महद्व्यापकं ब्रह्मोपरराम तूष्णीमासेत्यन्वयः। तद्वचनप्रामाण्ये मम विपरीतभावना न जातेत्याशयेन तद्विशिनष्टि–भूतं सत्तात्मकम्। नभोलिङ्गमिति, सर्वत्र व्यापकत्वेऽपि नभोवन्निर्लेपमदृश्यं च लिङ्गं मूर्तिर्यस्य तत्। अलिङ्गं प्राकृतमूर्त्तिरहितम्। ईश्वरं सर्वनियन्तृरूपम्। अहं च स्वरूपप्रदर्शनेन वचसा आश्वासनेन च तेनानुकम्पितः कृपाविषयीकृतः संस्तस्मै महतां ब्रह्मादीनामपि महीयसे महत्तमाय पूज्यतमाय शीर्ष्णा मस्तकेन अवनामं प्रणामं विदधे कृतवानित्यर्थः॥ २६ ॥ ❀ ❀ ततश्च कषायनिवर्त्तकं साधनं कृतमित्याह–नामानीति। तत्र भगवन्नामोच्चारणमेव मुख्यं साधनं तत्र तस्यालौकिकत्वात् सर्वदा सर्वत्र तदुच्चारणे लोकोपहासेन लज्जां प्रतिबन्धिकां तां त्यक्तवानित्याह–हतत्रप इति। त्यक्तलज्जोऽहमनन्तस्य नामानि पठन्। अनन्तरूपस्य भगवत एकनामावृत्तौ रूपान्तरेण कृते कार्येऽन्यकृतत्वशङ्कया स्वभजनीये परिच्छिन्नत्वबुद्धिर्न्यूनत्वबुद्धिश्च स्यात्तदा सर्वत्र सर्वरूपैश्च स्वरक्षा न स्यादतः सर्वाणि नामानि यथासम्भवमावर्त्तितानि, तथा सति परिपूर्णता अनन्ता गुणाश्च स्मृता भवन्ति सदा सर्वत्र सर्वैरेव रूपैश्च रक्षा भवतीति सूचयति–अनन्तस्येति। ननु मनश्चञ्चलत्वात् कदाचिन्नामोच्चारणात्तस्मिन् प्रचलति सति त्वं किं कृतवानित्याकाङ्क्षायामाह–गुह्यानीत्यादि। वेदनिरूपितत्वेन लोके अप्रसिद्धानि भद्राणि कामादिकषायमूलपापवासनानिवर्त्तकानि मङ्गलरूपाणि कृतानि भगवच्चरित्राणि च स्मरन्। कुत्राप्यासक्तिर्योगभ्रंशिकाऽतस्तद्भिया गां पृथिवीं पर्यटन्। तथाप्युच्चनीचवस्तुदर्शनेन तेषु स्पृहा सम्भवति, साऽपि भगवत्कृपातो निवृत्तेत्याह–गतस्पृह इति। तत्र हेतुमाह–तुष्टमना इति। न च परविभवासहनात्मको मत्सर आसीदित्याह–विमत्सर इति। अहमेवंविधसाधनसम्पन्न इत्यहङ्कारात्मको मदोऽपि तत्कृपया न जात इत्याह–विमद इति। विषयासक्त्याद्यनर्थकारणं वैराग्यतिरस्कर्त्री मृत्युकालविस्मृतिरेव, साऽपि तत्कृपया मम न जातेत्याह–कालमिति। 'हित्वाऽवद्यमिमं लोकम्' इति यः कालो भगवतोक्तः स कदा स्यादिति कालं प्रतीक्षन् प्रतीक्षमाण आसमिति शेषः॥ २७ ॥ ❀ ❀ हे ब्रह्मन्निति सम्बोधनेन तवाप्येतत्सम्मतमेवेति सूचयति एवमुक्तप्रकारेण आसक्तस्य शब्दादिविषयेष्वासक्तिरहितस्य मम कालो मरणसमयः प्रादुरभूदित्यन्वयः। विषयेष्वनासक्तौ हेतुमाह–अमलात्मन इति, अमलो रागादिरहितः आत्माऽन्तःकरणं यस्य तस्येत्यर्थः। तत्रापि हेतुमाह–कृष्णमतेरिति, श्रीकृष्णे एव मतिर्यस्य तस्येत्यर्थः। अकस्मात्प्रादुर्भावे दृष्टान्तमाह–काले इति। काले वर्षाकाले तडिद्विद्युद्यथा प्रादुर्भवति तथेत्यर्थः। तस्या अतिस्फुटत्वार्थं तां विशिनष्टि–सौदामनीति। सुदामा नाम पर्वतः, 'तेनैकदिक् इति' सूत्रेणाण्। तथाच यथा स्फटिकादिमयपर्वतप्रान्ते प्रादुर्भूता विद्युदपि स्फुटा भवति तथा कालोऽपि स्फुरित इत्यर्थः॥ २८ ॥ ❀ ❀ ततः किं वृत्तमित्यपेक्षायां देहवियोगे महान् क्लेशो भवति स भगवत्कृपया मम नाभूदिति सूचयन्नाह–प्रयुज्यमान इति। तामिति 'हित्वाऽवद्यमिमं लोकं गन्ता मज्जनतामसि' इति भगवता प्रतिश्रुतां शुद्धां शुद्धसत्त्वात्मिकां भागवतीं भगवत्सेवानुरूपां तनुं प्रति भगवता मयि प्रयुज्यमाने नीयमाने सति आरब्धं यत्कर्म तन्निर्वाणं

समाप्तं यस्य सः पाञ्चभौतिकः पञ्चमहाभूतकार्यभूतो देहो न्यपतदित्यन्वयः । अनेन भगवत्पार्षदतनूनामकर्मारब्धत्वं नित्यत्वमप्राकृतत्वं च सूचितम् ॥ २९ ॥

हिन्दी अनुवाद

आकाशके समान अव्यक्त सर्वशक्तिमान् महान् परमात्मा इतना कहकर चुप हो रहे । उनकी इस कृपाका अनुभव करके मैंने उन श्रेष्ठोंसे भी श्रेष्ठतर भगवान्को सिर झुकाकर प्रणाम किया ॥ २६ ॥ ❀ ❀ तभी से मैं लज्जा-संकोच छोड़कर भगवान्के अत्यन्त रहस्यमय और मङ्गलमय मधुर नामों और लीलाओंका कीर्तन और स्मरण करने लगा । स्पृहा और मद-मत्सर मेरे हृदयसे पहले ही निवृत्त हो चुके थे, अब मैं आनन्दसे कालकी प्रतीक्षा करता हुआ पृथ्वीपर विचरने लगा ॥ २७ ॥ ❀ ❀ व्यासजी ! इस प्रकार भगवान्की कृपासे मेरा हृदय शुद्ध हो गया, आसक्ति मिट गयी और मैं श्रीकृष्णपरायण हो गया । कुछ समय बाद, जैसे एकाएक बिजली कौंध जाती है, वैसे ही अपने समयपर मेरी मृत्यु आ गयी ॥ २८ ॥ ❀ ❀ मुझे शुद्ध भगवत्पार्षद-शरीर प्राप्त होनेका अवसर आनेपर प्रारब्धकर्म समाप्त हो जानेके कारण पाञ्चभौतिक शरीर नष्ट हो गया ॥ २९ ॥

कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः । शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः ॥ ३० ॥
सहस्रयुगपर्यन्ते उत्थायेदं सिसृक्षतः । मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे ॥ ३१ ॥
अन्तर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कन्दितव्रतः । अनुग्रहान्महा¹विष्णोरविघातगतिः क्वचित् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

इदं त्रैलोक्यमादायोपसंहृत्योदन्वत एकार्णवस्यांभसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्मणोऽतर्मध्यमनुप्राणं निःश्वासेन सह विविशे प्रविष्टोऽहम् । "ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः । अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुना" इति कौर्मोक्तेः । स्वायनेंभसीति पाठे स्वायने स्वस्यायने आश्रयेंभसि शिशयिषोर्ब्रह्मण इति श्रीनारायणेनाभेदविवक्षयोक्तमित्यवगंतव्यम् ॥ ३० ॥ ❀ ❀ प्राणेभ्य इंद्रियेभ्योऽहं मरीचिमिश्रास्तन्मुख्याः ऋषयश्च जज्ञिरे ॥ ३१ ॥ ❀ ❀ ये कर्मिणस्ते बहिर्न यांति । ये तपआदिभिर्ब्रह्मलोकं गतास्तेंतर्न यांति । अहं तु महाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च पर्येमि पर्यटामि । क्वचिदप्यविघातप्रतिहता गतिर्यस्य सः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

ननु तव नित्यतनुत्वे कथमस्मिन्कल्पे स्वायंभुवे मन्वन्तरे । "उत्संगान्नारदो जज्ञे" इति ब्रह्मणः सकाशात्तव जन्मप्रसिद्धिः । सत्यं, नित्यतनोरेव भगवतो लीलाविशेषार्थं देवक्यादिगर्भे प्रवेश इव ममापि ब्रह्मपुत्रत्वलीलार्थं पूर्वकल्पांत एव ब्रह्मणोभूदित्याह—कल्पान्त इति ॥ ३० ॥ ❀ ❀ सहस्रयुगेति । युगशब्दोत्र चतुर्युगपरः । जज्ञिमह इति वक्तव्ये जज्ञिर इत्यार्षम् । मरीचिमिश्रा इत्यस्यायं भावः, यथा मरीच्यादीनां ब्रह्मकल्पादनुवृत्तानां संप्रति सुप्तप्रबुद्धवैव जन्मोच्यते तथेति ज्ञेयम् । अत्रेदं विवेचनीयम् । सर्वेषु वैकुण्ठेषु सर्वेषु कालेषु च श्रीनारदस्य नित्यता श्रूयते । यद्यप्येतन्न घटते, तथापि नित्यश्रीनारदस्य रूपादिकं प्राप्तं महाभागधेयं जीवविशेषमवलंब्य घटेतेति ॥ ३१ ॥ ❀ ❀ न च मरीच्यादयः प्राकृताः स्वस्वकर्मपतिता इवाहं क्वापि कर्मणि । नापि सनकाद्या इव ज्ञानेपि नियुक्तः । किं त्वहं प्रवृत्तिनिवृत्तिधर्मातीतो हरिं भजन्नेव स्वच्छंदेन वर्ते इत्याह—अंतरिति । ये कर्मिणस्ते त्रिलोक्या बहिर्न यान्ति । "अंतस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रत" इत्युक्तेः । ये तपआदिभिर्ब्रह्मलोकं गतास्ते त्रिलोक्या अंतर्न यांति, कर्मबंधभीतेः । अहं त्वखंडितस्वभक्तिनिष्ठः सन्नंतर्बहिश्च पर्येमि पर्यटामि । यद्वा बहिर्ब्रह्मांडान्महावैकुंठेपि । अत एवोक्तं नारसिंहेपि "सनकाद्या निवृत्त्याख्ये ते च धर्मे नियोजिताः । प्रवृत्त्याख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्" इति ॥ ३२ ॥

अस्मिन्पर्याये दीपनी न ।

श्रीमद्वीरराघवव्याख्या

एवं प्राकृतीयशरीरपातावधिवृत्तांतः कथितः । अथ तदुपरितनवृत्तांतमाह कल्पांत इत्यादिना । तदा कल्पांते इदं जगदादाय स्वस्मिन्प्रविलाप्य उदन्वतः प्रलयार्णवस्यांभसि शयानेऽनिरुद्धाख्ये भगवति शिशयिषोस्तन्नाभिपद्मे शिशयिषोर्विभोश्चतुर्मुखस्यांतः प्राणमनुविविशेऽनुप्रविष्टवानस्मि । सनर्थस्त्वविवक्षितः ॥ ३० ॥ ❀ ❀ सहस्रयुगावसान उत्थाय नाभिकमलादिति शेषः, इदं व्यष्ट्यात्मकं जगत्सिसृक्षोश्चतुर्मुखस्य प्राणेभ्यः प्राणादिभ्यः मरीचिमिश्रा ऋषयो वशिष्ठादयः अहं नारदश्च जज्ञिरे उद्बभूवुः । अहं च जज्ञ इति पुरुषविपरिणामेनान्वयः ॥ ३१ ॥ ❀ ❀ ततो महाविष्णोरनुग्रहात्क्वचिदप्यविघाताऽप्रतिहता गतिर्यस्यास्कंदितमखंडितं व्रतं ब्रह्मचर्यं यस्य सोऽहं त्रिलोकानंतर्बहिश्च पर्येमि परितः संचरामि ॥ ३२ ॥

---

१. प्रा. पा. अनुग्रहादहं विष्णोः ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गतत्रपः लज्जारहितः अनन्तस्य हरेः कृतानि कर्माणि विक्रमलक्षणानि गां भूमिं तुष्टमनाः यदृच्छालाभेनालं बुद्धिमान् गतस्पृहः परवस्तुस्पृहारहितः। पटगताविति धातोः पटो गतिः न विद्यते गतिरीश्वरादन्यो यस्य सोऽपटः अनन्यगतिरित्यर्थः, असंगतो विरक्त इति वा, कंथादिप्रावरणरहितो वा। अ आ अं अः पुराणर्षिरिति वाक्यात् 'अ इति संबोधनं वा' हे व्यास पटः समर्थः। अपटो निकेतरहित इति केचित्तच्चिंत्यं, विमत्सरः विगतमात्सर्यः। एवंविधोहं मरणकालं प्रतीक्षमाणोऽभवमिति शेषः ॥ ३० ॥ ❀ ❀ कृष्णे परमानंदबलात्मके हरौ मतिर्यस्य स तथा तस्य कालः मरणाख्यः प्रावृट्काले प्राप्ते सौदामिन्याख्या विद्युद्यथा सहसा पद्यते तथेत्यर्थः 'तडिद्दीप्तशतह्रदा सौदामिन्यैरावती च तद्भेदेष्यभिमंत्रणमि'ति वचनात् कुरुपांडववत्पृथगुक्तिर्युज्यत इति भावः ॥ ३१ ॥ ❀ ❀ मयि शुद्धां निर्दोषां भागवतीं तनुं हरिमूर्तिमेवं प्रयुंजाने ध्यायति सति फलदानाय प्रारब्धकर्मविनाशवान् पञ्चभिर्भूतैर्निर्मितो देहो न्यपतदित्यन्वयः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विविशे इत्यादि लीलयैवेति ज्ञेयम् ॥ ३० ॥ ❀ ❀ सहस्रयुगेति। युगशब्दोऽत्र चतुर्युगपरः। जज्ञिमहे इति वक्तव्ये जज्ञिरे इति आर्षम्। मरीचिमिश्रा इत्यस्यायं भावः—यथा मरीच्यादीनां ब्राह्मकल्पादनुवृत्तानां सम्प्रति सुप्तप्रबुद्धवत्तैव जन्मोच्यते तथेति ज्ञेयम्। अत्रेदं विवेचनीयं-सर्वेषु वैकुण्ठेषु सर्व्वेषु कालेषु च श्रीनारदस्य नित्यता श्रूयते इति यद्यपि तन्न घटते, तथापि नित्यश्रीनारदसारूप्यादिकं प्राप्तं महाभागधेयं जीवविशेषमवलम्ब्य घटत इति ॥ ३१ ॥ ❀ ❀ अस्कन्दितव्रतः निश्चलभगवद्भक्तिनियमः। क्वचित् वैकुण्ठादावपि ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तव नित्यतनुत्वे कथमस्मिन् कल्पे स्वायम्भुवे "उत्सङ्गान्नारदो जज्ञे" इति ब्रह्मणः सकाशात् तव जन्मप्रसिद्धिः। सत्यम्। नित्यतनोरेव भगवतो लीलाविशेषार्थं देवक्यादिगर्भे प्रवेश इव ममापि ब्रह्मपुत्रत्वलीलार्थं पूर्वकल्पान्त एव ब्रह्मशरीरे प्रवेशोऽभूदित्याह—कल्पान्त इति। इदं त्रैलोक्यमादाय उपसंहृत्य उदन्वतः एकार्णवस्याम्भसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्मणः अन्तर्मध्यम् अनुप्राणं विविशे प्रविष्टोऽहम्। "ततोऽवतीर्य्य विश्वात्मा देहमाविश्य चक्रिणः। अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुने" ति कूर्म्मोक्तेः। स्वायनेऽम्भसीति पाठे स्वस्याधिकरणेऽम्भसीति नारायणेनाभेदविवक्षयेति मन्तव्यम् ॥ ३० ॥ ❀ ❀ सहस्रयुगस्य पर्य्यन्ते परिसमाप्तौ पूर्व्वकल्पान्ते एतत्कल्पादावित्यर्थः। मरीचिमिश्रा मरीच्याद्याः। प्राणेभ्यः इन्द्रियेभ्यः। जज्ञिमहे इति वक्तव्ये जज्ञिरे इत्यार्षम् ॥ ३१ ॥ ❀ ❀ न च मरीच्यादयः प्राकृताः स्वस्वकर्म्मप्रतिता इवाहं क्वापि कर्म्मणि नापि सनकाद्या इव ज्ञानेऽपि नियुक्तः। किन्त्वहं प्रवृत्तिनिवृत्तिधर्म्मातीतो हरिं भजन्नेव स्वच्छन्देन वर्त्ते इत्याह—अन्तरिति। ये कर्म्मिणस्ते बहिर्न यान्ति अशक्तेः, तपआदिभिर्ब्रह्मलोकं गता अन्तर्न यान्ति कर्म्मबन्धभीतेः। अहन्तु अखण्डितस्वभक्तिनिष्ठः सन्नन्तर्बहिश्च पर्य्येमि पर्य्यटामि। यद्वा बहिर्ब्रह्माण्डात् महावैकुण्ठादपि। अत एवोक्तं नारसिंहे "सनकाद्या निवृत्ताख्ये ते च धर्म्मे नियोजिताः। प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिमि"ति ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कल्पान्ते चतुर्मुखाहरन्ते उदन्वत एकार्णवस्याम्भसि इदं त्रैलोक्यमादाय स्वस्मिन् प्रविलाप्य शयाने पुरुषावतारे शिशयिषोर्विभोः शयनं कर्तुमिच्छोर्ब्रह्मणोऽन्तर्मध्यम् अनुप्राणं प्राणमनु अहमपि विविशे प्रविष्टवान्। विभुत्वं तस्य समष्टिशरीराभिप्रायम्। कल्पान्ते ब्रह्मणो हरौ प्रवेश उक्तो हरिवंशे "ब्रह्माणमग्रतः कृत्वा प्रभवं विश्वतो मुखम्। सर्वे देवगणाश्चैव त्रयस्त्रिंशच्च छंदजाः। प्रविशन्ति महायोगिं हरिं नारायणं प्रभुमि"ति ॥ ३० ॥ ❀ ❀ सहस्रयुगपर्यन्ते सहस्रयुगसंख्यक राज्यावसाने उत्थायेदं त्रैलोक्यं सिसृक्षतः पद्मजस्य प्राणेभ्यः इन्द्रियेभ्योऽहं मरीचिमुख्याः ऋषयश्च जज्ञिरे उद्बभूवुः ॥ ३१ ॥ ❀ ❀ अस्कंदितमस्खलितं ब्रह्मचर्यं यस्य सः पर्येमि पर्यटामि ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तर्हि ब्रह्मणः सकाशात् कथमुत्पत्तिस्तदाह कल्पांत इति द्वाभ्याम्। यदा कल्पांतो भवति तदा सर्वं स्वकृतमुररीकृत्य नारायणः शेते ब्रह्माऽपि नाभिद्वारा उदरं प्रविशति ततो नारायणेन सहैक्यं प्राप्य शेते सहस्रयुगपर्यंतं तदा नित्यत्वादस्मच्छरीरस्य शयनार्थमहमपि ब्रह्मणो नासापुटवायुना सह अन्तः प्रविष्टः। वायोरेव गमनाऽऽगमने अहं तु तत्रैव स्थितः। प्रविष्टधारणसामर्थ्यमाह विभोरिति ॥ ३० ॥ ❀ ❀ अन्तःस्थितस्य कालः सहस्रयुगपर्यंतम्। तदा राजसकल्पे भगवान् तिरोहितः ब्रह्मा तु निर्गतः निर्गत्य शयनादुत्थाय इदं जगत् पूर्ववत् स्रष्टुमियेष, तदा सिसृक्षतस्तस्य अवयवेभ्यः मरीचिमुख्या ऋषयः अहं

च जज्ञिरे तत्र "उत्संगान्नारदो जज्ञे" इति वचनात् भगवतो भक्तत्वादयमुत्संगे स्थापितः। ततः प्रजापतावन्तःप्रविष्टत्वात् ब्रह्मणः प्राणरूपेभ्यो भगवदंशेभ्यस्तत्तत्स्थाने स्थितेभ्यो जाता इत्यर्थः ॥ ३० ॥ ❀ ❀ सा कृपा जातेऽपि तथैवानुवर्त्तत इत्याह– अन्तर्बहिरिति। यथा बालकः पुत्रः गृहमध्ये बहिरपि परिभ्रमति तथा ब्रह्मांडांतर्बहिश्च त्रिलोक्या वांतर्बहिश्च साधारणन्यायेन बहिः परिभ्रमणे वा सम्भवत्यंतरित्युक्तम्। द्वितीया त्वत्यंतसंयोगे। ननु किमेतावता अचेतनानां वाय्वादीनामपि तथात्वात् अस्कंदितव्रत इति न स्कंदितं भगवद्दर्शनलक्षणं व्रतं यस्येति। भगवतः सर्वत्र विद्यमानत्वाद्देशविशेषाविवक्षायां भक्तैः सर्वत्र दर्शनं कर्त्तव्यम्। ततश्च यत्रैव भगवन्तं न पश्येत् तत एव व्रतहानिर्भवेत् अतो मम सर्वत्र परिभ्रमणेन भगवद्दर्शनान्न व्रतहानिरित्यर्थः। ननु मशकादिहृदयेऽपि भगवतो विद्यमानत्वात् कथं तादृशेषु तव गतिरिति तत्राह। अनुग्रहान्महाविष्णोरिति। व्यापकस्तु देशकालपरिच्छिन्नः महाविष्णुस्तु वस्त्वपरिच्छिन्नोऽपि तस्यानुग्रहोऽपि तादृश एव, अतः न विद्यते विघातो यस्याः तादृशी गतिर्यस्येति। क्वचिदपीत्यर्थे क्वचित् ॥ ३२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं प्राक्कल्पीयो वृत्तान्तः कथितः, अथ तत उपरितनं वृत्तान्तमाह–कल्पान्त इत्यादिना। कल्पस्यान्ते प्रलये इदं त्रैलोक्यमादाय स्वस्मिन् प्रविलाप्य उदन्वतः एकार्णवस्याम्भसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोः विभोः ब्रह्मणः अन्तः मध्यं अनुप्राणं निश्श्वासेन सहाहं विविशे प्रविष्टः। आत्मनेपदमार्षम्। 'ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः। अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुना' इति कौर्मोक्तेः। स्वायनेऽम्भसीति पाठे तु स्वस्यायनेऽम्भसि शिशयिषोर्ब्रह्मण इति श्रीनारायणेनाऽभेदविवक्षयैवमुक्तमिति ज्ञेयम् ॥ ३० ॥ ❀ ❀ सहस्रयुगपर्यन्ते चतुर्युगसहस्रस्य परिसमाप्तौ एतत्कल्पादौ उत्थायेदं विश्वं सिसृक्षतो ब्रह्मणः प्राणेभ्य इन्द्रियेभ्योऽहं मरीचिमिश्राः ऋषयश्च जज्ञिरे जाता इत्यन्वयः ॥ ३१ ॥ ❀ ❀ अस्मिन् जन्मनि तु मयि भगवतः पूर्ण एवानुग्रहोऽस्तीत्याह–अन्तरिति त्रिभिः। ये कर्मिणस्ते त्रिलोक्या बहिर्न यान्ति, ये तु ज्ञानतपआदिभिर्ब्रह्मलोकं गतास्ते तदन्तर्न आयान्ति, अहं तु भगवतो महाविष्णोरनुग्रहान्न कर्मण्यधिकृतो न वा ज्ञानादावधिकृतः, किन्तु भगवद्भजने एव। तदुक्तं नारसिंहे–"सनकादयो निवृत्ताख्ये ते च धर्मे नियोजिताः। प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्" इति। अतः अस्कन्दितं ब्रह्मचर्यादिपूर्वकं भगवद्भजनरूपं व्रतं यस्य सः क्वचिदपि अन्तःपुरादिषु स्त्र्यादिनिवासत्वेन अतिदुःखप्रवेशस्थानेष्वपि न विघातो न प्रतिरोधो यस्यास्तथाविधा गतिर्यस्य तथाविधश्च सन् अन्तर्बहिश्च त्रीन् लोकान् पर्यटामीत्यन्वयः ॥ ३२ ॥

हिन्दी अनुवाद

कल्पके अन्तमें जिस समय भगवान् नारायण एकार्णव (प्रलयकालीन समुद्र) के जलमें शयन करते हैं, उस समय उनके हृदयमें शयन करनेकी इच्छासे इस सारी सृष्टिको समेटकर ब्रह्माजी जब प्रवेश करने लगे, तब उनके श्वासके साथ मैं भी उनके हृदयमें प्रवेश कर गया ॥ ३० ॥ ❀ ❀ एक सहस्र चतुर्युगी बीत जानेपर जब ब्रह्मा जगे और उन्होंने सृष्टि करनेकी इच्छा की, तब उनकी इन्द्रियोंसे मरीचि आदि ऋषियोंके साथ मैं भी प्रकट हो गया ॥ ३१ ॥ ❀ ❀ तभीसे मैं भगवान्‌की कृपासे वैकुण्ठादिमें और तीनों लोकोंमें बाहर और भीतर बिना रोक-टोक विचरण किया करता हूँ। मेरे जीवनका व्रत भगवद्भजन अखण्डरूपसे चलता रहता है ॥ ३२ ॥

देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम्। मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥ ३३ ॥
प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३४ ॥
एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः। भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥ ३५ ॥
यमादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुन्दसेवया यद्वत्तथाऽऽत्माद्धा न शाम्यति ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

किमिति पर्यटसि ईश्वराज्ञया लोकमंगलार्थमित्याह चतुर्भिः–देवेन ईश्वरेण दत्ताम्। स्वराः "निषादर्षभगांधारषड्जमध्यमधैवतपंचमाः" इति सप्त। त एव ब्रह्म। ब्रह्माभिव्यंजकत्वात् तेन विभूषिताम्। स्वतःसिद्धसप्तस्वरामित्यर्थः, मूर्छयित्वा मूर्च्छनालापवतीं कृत्वा ॥ ३३ ॥ ❀ ❀ स्वप्रयोजनमाह प्रगायत इति ॥ ३४ ॥ ❀ ❀ परप्रयोजनमाह–एतद्धीति। मात्रा विषयाः तेषां स्पर्शाः भोगाः तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यद् एतदेव भवसिंधौ प्लवः पोतः। न केवलं श्रुतिप्रामाण्येन, किं त्वन्वयव्यतिरेकाभ्यां दृष्ट एवेत्यर्थः ॥ ३५ ॥ ❀ ❀ एतदेवेत्युक्तमवधारणानुभवेन

द्रढयति–यमादिभिरिति । यमादिभिः तथा न शाम्यति, यद्वत् मुकुंदसेवया अद्धा साक्षादात्मा मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेण शाम्यति, किं पुनस्तद्गुणवर्णनेनेति भावः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

स्वर्गापवर्गविलक्षणा सर्वैरन्यैर्दुर्लभा मम भोगसामग्री तु सदा सर्वत्रेत्याह । देवेन श्रीकृष्णेन दत्ताम् । तथोक्तं लिंगपुराणे उपरिभागे तेनैव तस्य वीणाग्रहणं प्रसिद्धं "श्रीकृष्णदेवो भगवान्स्वरब्रह्मविभूषिताम् । कल्पादौ दत्तवान्वीणामृषये नारदाय वै" इति । स्कांदीयकेदारखण्डे तु "रागज्ञानं तथा वीणां नारदाय महेश्वरः । प्रादात्तत्तपसा प्रीतः पार्वतीपतिशंकरः" इत्युक्तं तत्कल्पांतरापेक्षमिति ध्येयम् । "स्वरब्रह्मणि निर्भातहृषीकेशपदांबुज" इत्युक्तेः । स्वराणां निषादादीनां साक्षाद्ब्रह्मानंद इव श्रवणेनानन्दजनकत्वाद्ब्रह्मत्वमित्युक्तम् । स्वराणामारोहणक्रमो मूर्च्छा तद्वतीं वीणां कृत्वेति भावः । अथ स्वरादिकथनं संगीतार्णवात् "सामवेदात्स्वरा जाताः स्वरेभ्यो ग्रामसंभवः । ग्रामेभ्यो जातयो जाता जातिभ्यो रागसंभवः ॥ सप्तस्वरास्त्रयो ग्रामा मूर्च्छनाश्चेकविंशतिः । द्वाविंशतिश्च श्रुतय एतेभ्यो रागसंभवः ॥ षड्जर्षभकगांधारमध्यपञ्चमधैवताः । निषादश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः ॥ षड्जादयः स्वराः सप्त ग्रामौ च षड्जमध्यमौ । केचिद्गांधारमप्याहुः स तु नेहास्ति भूतले ॥ चतुर्दशैव श्रुतयस्तावन्मानाश्च मूर्च्छनाः । गीयंते मानवैर्भूमावन्यास्तु त्रिदशालये ॥ स्वयं यो राजते नादः स स्वरः परिकीर्त्तितः । स्वरैश्च निखिलं व्याप्तं तद्विज्ञेयं पृथक्पृथक् ॥ उच्चैर्निषादगांधारौ नीचैर्ऋषभवदैवतौ । शेषास्तु स्वरिता ज्ञेयाः षड्जपञ्चममध्यमाः ॥ षड्जं वदेन्मयूरो हि ऋषभं चातको वदेत् । अजा वदति गांधारं क्रौञ्चो वदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलः पंचमं वदेत् । दर्दुरो धैवतं चैव निषादं च वदेद्गजः ॥ हास्यश्रृंगारयोः कार्यौ स्वरौ पञ्चममध्यमौ । षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे ॥ गांधारश्च निषादश्च कर्त्तव्यौ करुणारसे । धैवतश्चैव कर्त्तव्यो बीभत्से च भयानके ॥ चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः । चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्चेतिभेदकाः ॥" श्रुतिश्च स्वरारंभकः शब्दविशेषः । लक्षणं चास्या आद्यपद्यव्याख्याशतकांतर्गतनारदपक्षव्याख्याने उक्तम् । अथ प्रसंगाद्रागनामानि "भैरवः पंचमो नाटो मल्लारो गौडमालवः । देशाखश्चेति षड्भागाः प्रोच्यंते लोकविश्रुताः ॥ बंगपालो गुणकरी मध्यमादिर्वसंतकः । धन्या श्रीश्चेति पंचैते रागा भैरवसंश्रयाः ॥ ललिता गूर्जरी देशी वराठी रामकृत्तथा । मता रागार्णवे रागाः पंचैते पञ्चमाश्रयाः ॥ नटो नारायणः पूर्वं गांधारः सालगस्तथा । ततः केदारकर्णाटौ पंचैते नाटसंश्रयाः ॥ मेघमल्लारिका मालकौशिकः प्रतिमंजरी । आसावरी च पंचैते रागा मल्लारसंश्रयाः ॥ हिंदोलस्त्रिगुणाधालीगौडीकोलाहलास्तथा । पंचैते गौडनामानं रागमाश्रित्य संस्थिताः ॥ भौपाली हरिपालश्च कामोदी धोरणी तथा । वेलावली च पंचैते रागा देशाखसंश्रयाः । अन्येऽपि बहवो रागा जाता देशविशेषतः । मारुप्रभृतयो लोके ते च भद्रेशिकाः स्मृताः ॥ न रागाणां न तालानामंतः कुत्रापि विद्यते । संतोषाय शिवस्यैते ज्ञेया बुधजनैः सदा ॥ तथा नयति कैलासं न गंगा न सरस्वती । यथा नयंति रागास्ते नरं गायनकोविदम् ॥ अपि ब्रह्मपरानंदादिदमप्यधिकं ध्रुवम् । जहार नारदादीनां चित्तानि कथमन्यथा ॥" इह तालतानध्रुवकादि बहु वक्तव्यमस्ति । तच्च संगीतार्णवादिभ्योऽवसेयम् । रागाणामन्यथा गुणप्रधानभावेन क्वचित्कथनं तु वक्तुरिच्छयैवेति ध्येयम् ॥ ३३ ॥ ❀ ❀ पोतः "यानपात्रं तु पोतः" इत्यमरः । "प्लवो भेकेर्भके पोते मृगपक्षिविशेषयोः" इति निरुक्तिः । इत्यर्थ इति । साक्षात्प्रत्यक्षीकृतो नात्र प्रमाणापेक्षेति भावः । तीर्थवच्छोधकौ पादौ तीर्थं गंगाख्यं पादे वा यस्य स तथा ॥ ३४ ॥ ❀ ❀ यत्र हरिचर्यानुवर्णनं ध्रुवप्रह्लादादिषु तत्र संसारतरणमपि दृष्टं यत्र वेनादौ तदभावस्तत्र संसारतरणस्याप्यभाव इत्यन्वयव्यतिरेकावत्र ज्ञेयौ ॥ ३५ ॥ ❀ ❀ भक्तिसद्भाव एव निस्तार इति निर्द्धारेपि यथा केवलया भक्त्यात्मा साक्षाच्छाम्यति न तथा भक्तिमिश्रैर्योगज्ञानादिभिरित्याह–यमादिभिस्तथा न शाम्यति यद्वन्मुकुंदसेवयाऽद्धा साक्षादेव । अत्र पुरेह भूमन्नित्यादिना नैष्कर्म्यमित्यादिना च योगादीनां भक्तिराहित्ये वैयर्थ्याद्भक्तिमिश्रैरेव यमादिभिरिति लभ्यते । अतस्तैरात्मा यद्यपि शाम्यति तदपि यद्वन्मुकुंदसेवया यमादिविनाभूतत्वात्केवलयेत्यर्थः । अत्र भवतानुदितप्रायमित्यादिना तथात्माद्धा न शाम्यतीत्यंतेन ग्रंथेन भक्तेरेव निस्तारोपायत्वेनोक्तेपि तस्यास्त्रैविध्यं दृश्यते । केवलत्वं प्राधान्यं गुणभावश्च "त्यक्त्वा स्वधर्मम्" इत्यादिषु "अहं पुरातीतभवे" इत्यादिषु केवलत्वं "कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत् । गृणंति गुणनामानि कृष्णस्यानुस्मरंति च" इत्यादिषु प्राधान्यं "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्" इत्यत्र गुणभावः । तत्र केवलत्वे निष्कामाधिकारिणो भक्तिरनन्या शुद्धा निर्गुणोत्तमाऽकिंचनेत्यादिनाम्नी प्रेमफला भवति । प्राधान्ये कर्ममिश्रा ज्ञानमिश्रा योगमिश्रेत्यादिनाम्नी भक्तिः शांताधिकारिणो रतिफला कस्यचिन्मोक्षफलापि भवति । दास्यादिभाववत्साधुसंगवशात्कस्यचिद्दास्याद्यभिलाषिणो भक्तेरतिप्राधान्ये सत्यैश्वर्यप्रधानदास्यादिभावप्रदा प्रेमफलापि भवति । गुणभावे तु स्वीयं नाम फलं च प्रकाशयति । कर्मज्ञानयोगादीनां तया विना प्रतिस्वफलं सम्यक्साधयितुमसमर्थानां तत्र साहाय्यमात्रं कुर्वती स्वयं तटस्थैव भवति । ततश्च भक्तिमिश्रं कर्म ज्ञानं योगश्च मोक्षं साधयतीत्यतोत्र शास्त्रे भक्तिर्द्विविधैव । केवला प्रधानीभूता चेत्येतत्सर्वं नारदेनोपदिष्टो व्यासो द्वादशसु स्कंधेषु प्रपंचयिष्यतीति ज्ञेयम् ॥ ३६ ॥

अस्मिन्पद्यार्थे दीपनी न

श्रीमद्वीरराघवव्याख्या

देवेन भगवता ब्रह्मणा वा दत्तां स्वरा निषादर्षभगांधारषड्जमध्यमधैवतपंचमाख्याः सप्त एव ब्रह्म तेन विभूषितां स्वरैः सन्निधापितेन ब्रह्मणा भगवता विभूषितामिमां पाणिस्थां वीणां मूर्च्छयित्वा वादयित्वा मूर्च्छा वीणादिवादनं "वादने मूर्च्छना मते"ति वैजयंतीकोशात् हरिकथां गायमानोऽहमेवं चरामि ॥ ३३ ॥ ❀ ❀ प्रियं भक्तानां प्रीत्यावहं श्रवः यशो यस्य, तीर्थौ पवित्रौ गंगादितीर्थाश्रयौ वा पादौ यस्य तीर्थं पादे यस्येति वा, स भगवान्स्ववीर्याणि यशांसि प्रगायतो मम चेतस्याहूत इव शीघ्रं दर्शनं याति दृष्टो भवतीत्यर्थः ॥ ३४ ॥ ❀ ❀ तदेवमापृष्टं यथावदनुवर्ण्याथ सर्वथा त्वं हरिचरित्राण्येवानुवर्णयेत्यभिप्रायेण तापत्रयातुरजनानां भगवद्गुणवर्णनानुश्रवणमंतरेण तापत्रयविघातकं नोपायांतरमस्तीत्याह एतदिति द्वाभ्याम्। असकृन्मात्रास्पर्शेच्छया मात्राः शब्दादिविषयास्तासां स्पर्शेच्छयानुभवतृष्णया आतुरं पीडितं चित्तं येषां जनानां भवसिंधोः प्लवः पूरः स हि यस्मात् कारणाददृष्टो दृष्टो भवति तदेव किं हरिचर्याया अनुवर्णनमिति ॥ ३५ ॥ ❀ ❀ मुहुः कामलोभाभ्यां हत आत्मा मनः यद्वद्यथा मुकुंदसेवया गुणानुश्रवणादिरूपयाऽद्धा स्फुटं शाम्यति कामादिरहितो भवति यथा तथा यमादिभिर्योगमार्गैर्न शाम्यति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हरिं ध्यायन् मुक्तस्त्वं कं लोकं गत इति तत्राह कल्पांत इति। अहं कल्पावसाने स्वसृष्टमिदं विश्वमादाय स्वोदरे निवेश्य उदन्वतोंऽभसि शेषपर्यंके शयाने हरौ शिशयिषोः शयितुमिच्छोर्विरिंचस्य अंतरनुप्राणमंतर्गच्छच्छ्वासमनुविवेश प्रविष्टवानस्मीत्यन्वयः ॥ ३३ ॥ ❀ ❀ सहस्रयुगपर्यंते चतुर्युगसहस्रपरिमितस्वनिशावसाने विष्णोरुत्थायोत्पाद्यमिदं सिसृक्षतो विरिंचस्यांकादहं जज्ञे मरीच्यत्रिमुख्या ऋषयश्च तस्य प्राणेभ्यो जज्ञिर इत्येकान्वयः ॥ ३४ ॥ ❀ ❀ विष्णुनाम्नो यजमानादपि महतो विष्णोरनुग्रहादप्रतिहतगमनोऽस्खलितब्रह्मचर्यादिव्रतोहं त्रीन् लोकानंतर्बहिश्च पर्येमि पर्यटामीत्येकान्वयः ॥ ३५ ॥ ❀ ❀ तदेवाह। देवेति स्वरब्रह्मविभूषितां सप्तस्वरलक्षणां वेदेनालंकृतां नाम्ना देवदत्तामिमां वीणां मूर्च्छयित्वा स्वराणामारोहणावरोहणक्रमो मूर्च्छा, मूर्च्छनां गतिं कारयित्वा हरिकथां गायमानोऽहं चरामीत्यन्वयः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवः श्रीकृष्ण एव। लिंगपुराणे उपरिभागे तेनैव तस्य स्वयं वीणाग्राहणं हि प्रसिद्धम्। स्वराणां ब्रह्मत्वमत्र तस्यां वीणायां विन्यस्तानां तेषां सहसा श्रीकृष्णस्फोरकताशक्तेः। सा च स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजमिति तद्विधानुभावात्। देवदत्तामिति कृतोपकारितायाः स्मर्य्यमाणत्वेन तमनुसन्धायैव तदुक्तेः ॥ ३३ ॥ ❀ ❀ श्रीभगवतः प्रियश्रवस्त्वं नाम 'अतः सर्वेषां सुखमेव भवतात् नेतरदि'ति दयामात्रापेक्षया न तु स्वप्रतिष्ठेच्छयेति विवेचनीयम्। अत्र यद्रूपेण वीणा ग्राहिता तद्रूपेणैव चेतसि दर्शनं स्वारस्यलब्धम् ॥ ३४–३९ ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वर्गापवर्गाविलक्षणात्सर्व्वैरन्यैर्दुर्ल्लभा मम भोगसामग्री तु सदा सर्व्वत्रेत्याह द्वाभ्याम्। देवेन श्रीकृष्णेन दत्तां लिंगपुराणे तेनैव स्वयं तस्य वीणाग्राहणं हि प्रसिद्धम्। स्वराः षड्जादय एव ब्रह्मस्फोरकत्वाद् ब्रह्म। मूर्च्छयित्वा मूर्च्छनां बलवतीं कृत्वा ॥ ३३ ॥ ❀ ❀ प्रियश्रवा इति स्वयशःप्रियत्वाद् यत्र यत्र यशोगानं तत्रायाति तीर्थपाद इति यत्रायाति तत्तीर्थं भवति। आहूत इव आह्वानं विनापीति भगवतो भक्तिवश्यत्वमुक्तम् ॥ ३४ ॥ ❀ ❀ प्रकरणार्थमुपसंहरति एतदिति। मात्रा विषयास्तेषां स्पर्शा भोगास्तदिच्छया व्याकुलचित्तानां यो भवसिन्धुस्तस्य प्लवः पोतः दृष्टः मया साक्षात् प्रत्यक्षीकृतः। नात्र प्रमाणापेक्षेति भावः। एतदेव किं हरिचरितस्यानुवर्णनम् अत्र सर्वत्रैव बह्वंगाया अपि भक्तेः कीर्त्तनस्य मुख्यत्वात् कीर्तनोपलक्षिता सर्वैव भक्तिर्ज्ञेया ॥ ३५ ॥ ❀ ❀ भक्तिसद्भाव एव निस्तार इति निर्द्धारेऽपि यथा केवलया भक्त्या आत्मा साक्षात् शाम्यति न तथा भक्तिमिश्रैर्योगज्ञानादिभिरित्याह–यमादिभिस्तथा न शाम्यति यद्वन्मुकुन्दसेवया अद्धा साक्षादेव। अत्र पुरेह भूमन्नित्यादिना नैष्कर्म्यमित्यादिना च यमादीनां भक्तिराहित्ये वैयर्थ्याद्भक्तिमिश्रैरेव यमादिभिरिति लभ्यते। ततस्तैरात्मा यद्यपि शाम्यति तदपि यद्वन्मुकुन्दसेवया यमादिविनाभूतत्वात् केवलयेत्यर्थः। अत्र भवतानुदितप्रायमित्यादिना तथात्माद्धा न शाम्यतीत्यन्तेन ग्रन्थेन भक्तेरेव निस्तारोपायत्वेनोक्तत्वेऽपि तस्यास्त्रैविध्यं दृश्यते केवलत्वं प्राधान्यं गुणभावश्च, 'त्यक्त्वा स्वधर्म्ममि'त्यादिषु। 'अहं पुरातीतभव' इत्यादिषु च केवलत्वम्। 'कुर्व्वाणा यत्र कर्म्माणि भगवच्छिक्षयाऽसकृत्। गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति चे'त्यादिषु प्राधान्यम्। 'यदत्र क्रियते कर्म्म भगव-

त्परितोषणम्। ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितमि'त्यत्र गुणभावः। तत्र केवलत्वे निष्कामाधिकारिणां भक्तिरनन्या शुद्धा निर्गुणा उत्तमा अकिञ्चनेत्यादिनाम्नी प्रेमफला भवति। प्राधान्ये कर्म्ममिश्रा ज्ञानमिश्रा योगमिश्रेत्यादिनाम्नी भक्तिः शान्ताधिकारिणां रतिफला कस्यचिन्मोक्षफलापि भवति। दास्यादिभाववत् साधुसङ्गवशात् कस्यचित् दास्याद्यभिलाषिणो भक्तेरतिप्राधान्ये सत्यैश्वर्य्यप्रधानदास्यादिभावप्रदा प्रेमफलापि भवति। गुणभावे तु स्वीयं नाम फलं चाप्रकाशयन्ती कर्म्मज्ञानयोगादीनां तया विना प्रति स्वफलं सम्यक् साधयितुमसमर्थानां तत्र साहाय्यमात्रं कुर्व्वती स्वयं तटस्थेव भवति। ततश्च भक्तिमिश्रं कर्म्म ज्ञानं योगश्च मोक्षं साधयतीत्यतोऽत्र शास्त्रे भक्तिर्द्विविधैव। केवला प्रधानीभूता चेत्येतत् सर्व्वं नारदेनोपदिष्टो व्यासो द्वादशसु स्कन्धेषु प्रपञ्चयिष्यतीति ज्ञेयम्॥ ३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वरब्रह्मविभूषिताम् "स्वतो रंजयति श्रोतुश्चित्तं स स्वर उच्यत" इति स्वरः निषादर्षभगांधारषड्जमध्यमधैवतपंचमभेदः स एव ब्रह्म तेन विभूषिताम् 'स्वतः स्वराभिव्यंजनवादने मूर्च्छना' चेति वैजयंतीकोशात् वादयित्वा॥ ३३-३७॥

सुबोधिनी

एवं सत्संगेन श्रवणमारभ्य सर्वत्र भगवद्दर्शनपर्यंतमेका श्रवणभक्तिरुक्ता। द्वितीया भगवत्कृपया समारब्धेत्याह देवदत्तामिति। भक्तिमार्गे देवकृतोऽपि विघ्नः कदाचित्संभाव्येतेति शंकानिवृत्त्यर्थं कीर्तनांगभूतां वीणां दत्तवंत इति देवदत्ता। श्रुतिपूरिका हि सा तत्रांगुल्यादिचालनप्रयासोऽपि निवारितः। स्वरब्रह्मेति स्वराः षड्जादयः नादब्रह्मात्मकत्वात् तदेव ब्रह्म तेन विशेषेण भूषितां तादृशी मूर्च्छना संगीतशास्त्रसिद्धा तां प्रापयित्वा तथा सति रसाऽऽविर्भावात् अश्रांतं संकीर्तनं भवतीति तथा कृत्वा हरिकथां गायमानश्चरामि। परिभ्रमणं तु कीर्त्तनेऽप्यंगम्॥ ३३॥ ❀ ❀ ननु पूर्वस्मात् कोऽत्र विशेषो जातस्तत्राह— प्रगायत इति, पूर्वं यद्दर्शनार्थं भूयान् यत्नः कृतः, स इदानीं स्वत एव भवति। तत्र हेतुः प्रगायत इति। यस्तु स्ववीर्याणि प्रकर्षेण गायति तस्याग्रे वीर्यास्फुरणं मा भवत्विति स्वयमेव तत्स्फुरणार्थं विषयांतरसंचाराभावाय शीघ्रं चित्ते समायाति। ननु श्रोतुरभावात् अनंगं कीर्त्तनं कथं फलायेति तत्राह। तीर्थपाद इति। तीर्थानि संतः पादे यस्य, सर्वे हि संतः सायुज्यं प्राप्ता भगवत्पादे वर्तंते अन्येऽपि भक्तिवशात्। तादृशो हि भक्तिगुणः। पादं च हृदि स्थापयित्वा गायतीति सतां श्रोतॄणां विद्यमानत्वात् कीर्त्तनं नांगविकलम्। ननु कथमेवं भगवान् सर्वां सामग्रीं संपादयतीति तत्राह प्रियश्रवा इति। प्रियं श्रवः कीर्तिर्यस्य तत्संपादनार्थं सर्वं संपादयतीति भावः। अग्रे वीर्यास्फुरणे भगवतः स्मरणमाह्वानमिव संजातं प्रियत्वादाह्वाने च समागमनम्॥ ३४॥ ❀ ❀ एवं कीर्तनं सपरिकरं निरूप्य सर्वत्र लोके तत्सिद्ध्यर्थं तद्विषयवर्णनं त्वया कर्तव्यमित्यभिप्रायेण कीर्त्तनमनुवादेन स्थिरीकरोति एतद्धीति। मात्रास्पर्शेच्छया आतुरचित्तानां हरिचर्यानुवर्णनमेव भवसिंधुप्लवः दृष्टः। एतदिति स्वक्रियमाणसमानं हीति पूर्वोक्ता हेतव उक्ताः। मां मायां त्रायंत इति मात्रा विषयाः तेषामपि स्पर्शमात्रम्। शब्दव्यंग्येन च महापातकत्वं सूचितम्। हरिचर्यानुवर्णने तेषां श्रवणं भविष्यति। अन्यथा महारोगस्य संजातत्वात् कापि परलोकसाधने न प्रवृत्तिः। प्रवृत्तावपि तस्य रोगजनकत्वं ज्वरमध्ये भक्षितपथ्यादेरिव। श्रवणस्य तु न मात्रासाधकत्वं प्राप्तेऽपि विषये इच्छाया निवृत्तत्वात् मुहुरित्युक्तम्। अयं च सुखेनैव संसारतारको मयैव दृष्टः। साधनतामनूद्य रूपमाह हरिचर्यानुवर्णनमिति॥ ३५॥ ❀ ❀ तस्य दृष्टोपायत्वं वदन् साधनानामतथात्वमाह यमादिभिरिति। चित्तसाधनार्थमेव योगः प्रवृत्तः "योगश्चित्तवृत्तिनिरोधः" योगसूत्रात् इति। तथापि स्वस्थे चित्ते तत्संभवः, प्राणिनां त्वंतःकरणं मृतमस्ति कामेन ज्वलितो लोभेन प्लावितः। तस्य हि मृतसंजीविकया विद्यया जीवनं भवति। यमादयश्च योगमार्गास्तत्र यश्चलितुं शक्तस्तस्येष्टसिद्धिः। मुहुश्चायं हत इति कामलोभपरवशत्वम्। उभयोर्बीजमंतः क्रोधादेर्बहिरिति तयोर्ग्रहणम्। संसारमग्नानां मोक्षदातृत्वात् मृतसंजीवकत्वं मुकुंदत्वम्। सेवा तु रोगनिवर्तिका। श्रवणेन च अंतः प्रविशति भगवान् तत्र चित्ते सेवां भावयति। अतः श्रवणप्रकरणेऽपि सेवोक्ता। यद्यपि भगवदाश्रितो योगोऽपि क्रमेण तथा करोति सेवा त्वद्धा साक्षात्। योगसेवापेक्षयाऽपि योगेशसेवाया उत्तमत्वात्। आत्मेति सजातीयस्य शीघ्रशामकत्वमिति अंतःकरणस्यात्मपदप्रयोगः॥ ३६॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं च स्वर्गापवर्गविलक्षणा भगवत्कृपां विना दुर्लभा मम गतिरित्युक्तम्, एवं पर्यटने किं प्रयोजनं सिद्ध्यतीत्यपेक्षायां सर्वलोकमङ्गलमेवेत्यभिप्रेत्याह—देवदत्तामिति। देवेन भगवता दत्तां—इत्यनेन भगवदाज्ञयैव लोकमङ्गलार्थं पर्यटामीति सूचितम्—निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमाख्याः सप्त, ते एव ब्रह्मानन्दाभिव्यञ्जकत्वाद् ब्रह्म, तेन विभूषितामिमां मत्पाणिस्थां वीणां मूर्च्छयित्वा स्वराणां मूर्च्छना सङ्गीतशास्त्रप्रसिद्धा तां प्रापय्य हरिकथां गायमानोऽहं चरामीत्यन्वयः॥ ३३॥ ❀ ❀ एवं

सामान्यतः प्रयोजनं निरूप्य विशेषतस्तन्निरूपयन् स्वप्रयोजनमाह–प्रगायत इति, स्ववीर्याणि स्वयशांसि प्रकर्षेण प्रेमपूर्वकं गायतो मे चेतसि भगवान् आहूत इव शीघ्रं दर्शनं याति, दृष्टो भवतीत्यर्थः। प्रगायने हेतुमाह–प्रियश्रवा इति, प्रियं भक्तानां प्रीत्यावहं श्रवो यशो यस्य सः। तस्य दर्शनं दुर्लभमिति सूचयन्नाह–तीर्थपाद इति, गङ्गादीनि तीर्थानि पादे यस्य सः। वस्तुत आह्वानं तु मया न क्रियते, किन्तु कृपया स्वयमेव प्रादुर्भवतीति सूचनायेवशब्दप्रयोगः। यद्वा दर्शनदाने हेतुमाह–प्रियश्रवा इति, प्रियं श्रवः स्वकीर्तिर्यस्य स तथा। तथा चानाहूतोऽपि स्वयशश्श्रवणार्थमेवं दीनस्वभक्तजनानुग्रहेण दर्शनप्रदानेन स्वयशस्सम्पादनार्थं वा प्रादुर्भवतीति सूचनायेवशब्दप्रयोगः॥ ३४॥ ❀ ❀ परप्रयोजनमाह–एतद्धीति। हीत्यवधारणे। मां मायामविद्यां त्रायन्त इति मात्राः शब्दादयो विषयास्तेषां स्पर्शाः भोगास्तेषामिच्छया आतुराणि चित्तानि येषां तेषां भवसिन्धोः दुस्तरत्वेन जन्ममरणादिलक्षणसमुद्रस्य प्लवः पोतः अन्वयव्यतिरेकाभ्यां तत्त्वज्ञैरेतदेव दृष्टमित्यन्वयः। किं तदित्यपेक्षायामाह–हरिचर्येति। हरेर्भक्तजनदुःखहरणशीलस्य चर्याणां लीलानामनुवर्णनं महद्भिः कृतं यत्तदित्यन्वयः। वर्णितं भगवच्चरितमेव वक्तृश्रोतृस्मर्तॄणां सर्वतृष्णानिवर्त्तकत्वेन संसारोद्धारकमिति भावः। 'ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।' 'यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान्। तावन्तो निखनन्त्येव हृदये शोकशङ्कवः॥ यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः॥' 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' इत्यादिवाक्यान्यत्रानुसन्धेयानि। विषयभोगे जातेऽपि तदिच्छायाः पुनः पुनरुद्भवस्य प्रसिद्धत्वान्मुहुरित्युक्तम्॥ ३५॥ ❀ ❀ एतदेव दृष्ट इति यदुक्तं तदेव द्रढयति–यमादिभिरिति। मुहुः कामलोभाभ्यां हतो मलिनीकृत आत्माऽन्तःकरणं यद्वत् यथा मुकुन्दसेवया शाम्यति कामक्रोधादिसन्तापरहितो भवति तथा योगमार्गैर्यमादिभिर्न शाम्यतीत्यन्वयः। श्रवणादि विना सेवाया असम्भवात् श्रवणकीर्त्तनस्मरणान्यर्थादायान्ति तानि सेवापर्यन्तमावर्त्तनीयानीति ज्ञापयितुं श्रवणादिप्रकरणेऽपि सेवोक्ता। ननु 'चित्तवृत्तिनिरोधो हि योगः' तदङ्गैर्यमादिभिः कथं तथा न शाम्यतीत्यपेक्षायामाह–अद्धेति। यमादिभिरप्यात्मा शाम्यति परन्तु अत्यायासेन भक्तिद्वारैव, भक्त्या त्वनायासेन साक्षादेवेति महान् विशेष इत्यर्थः॥३६॥

हिन्दी अनुवाद

भगवान्‌की दी हुई इस स्वरब्रह्मसे विभूषित वीणापर तान छेड़कर मैं उनकी लीलाओं का गान करता हुआ सारे संसारमें विचरता हूँ॥ ३३॥ ❀ ❀ जब मैं उनकी लीलाओंका गान करने लगता हूँ, तब वे प्रभु, जिनके चरणकमल समस्त तीर्थोंके उद्गमस्थान हैं और जिनका यशोगान मुझे बहुत ही प्रिय लगता है, बुलाये हुएकी भाँति तुरंत मेरे हृदयमें आकर दर्शन दे देते हैं॥ ३४॥ ❀ ❀ जिन लोगोंका चित्त निरन्तर विषय-भोगोंकी कामनासे आतुर हो रहा है, उनके लिये भगवान्‌की लीलाओंका कीतन संसार-सागरसे पार जानेका जहाज है, यह मेरा अपना अनुभव है॥ ३५॥ ❀ ❀ काम और लोभकी चोटसे बार-बार घायल हुआ हृदय श्रीकृष्णसेवासे जैसी प्रत्यक्ष शान्ति का अनुभव करता है, यम-नियम आदि योगमार्गोंसे वैसी शान्ति नहीं मिल सकती॥ ३६॥

सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयानघ। जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम्॥ ३७॥

सूत उवाच

एवं सम्भाष्य भगवान्नारदो वासवीसुतम्। आमन्त्र्य वीणां रणयन् ययौ यादृच्छिको मुनिः॥ ३८॥

अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः। गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत्॥ ३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे व्यासनारदसम्वादे षष्ठोऽध्यायः॥ ६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भवतो मनःपरितोषकं मम जन्मकर्मरहस्यं च आख्यातम्॥ ३७॥ ❀ ❀ आमंत्र्यानुज्ञाप्य। यादृच्छिकः स्वप्रयोजनसंकल्पशून्यः॥ ३८॥ ❀ ❀ हरिकथागायकनारदभाग्यं श्लाघते–अहो इति। माद्यन् हृष्यन्। तंत्र्या वीणया॥ ३९॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे भावार्थदीपिकायां टीकायां षष्ठोऽध्यायः॥ ६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

सर्वभक्तेराविर्भावप्रकारो वृद्धिः फलं तद्वतो जनस्य चेष्टाप्रारब्धकर्मनाशः साधकदेहत्यागप्रकारोऽकर्मारब्धचिन्मयदेहप्राप्तिश्च। रहस्यं वेदांतदर्शिभिरप्यगम्यम्॥ ३७॥ ❀ ❀ यदृच्छया चरतीति यादृच्छिकः। हेतुशून्यगमनादिक्रियः,

१. प्रा० पा० यः कीर्तिं।

तेन च भक्तिर्यादृच्छिकी भक्तोऽपि यादृच्छिकस्तत्संगोपि व्यासस्य यादृच्छिक इति भक्तिमतां यादृच्छिकत्रयी जीवतु ॥ ३८ ॥ नरे परमेश्वरे सदा तिष्ठतीति नारं ज्ञानं तद्ददाति व्यासादिभ्य इति नारदः । यद्वा नरेषु जीविषु तिष्ठतीति नारमज्ञानं द्यति खण्डयतीति नारदः । अरदो दोषदो न भवतीति वा । यद्वाऽऽरः शस्त्रभेदस्तद्वदायुःखण्डको न भवतीति । यद्वा नारं नरसमूहं दयते पालयति ज्ञानदानेनेति नारदः । छन्दोभंगस्त्वार्षः "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्" इत्युक्तिविरोधात् । यस्तंत्र्याऽऽतुरं संसारक्लेशाक्रांतं जगद्रमयत्यानंदयति अयं देवर्षिर्धन्य इत्यन्वयः ॥ ३९ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवव्याख्या

प्रश्नस्योत्तरमुपसंहरति सर्वमिति । हे अनघ त्वयाहं यत्प्रति पृष्टस्तदेतत्सर्वमाख्यातमित्यन्वयः ॥ ३७ ॥ ❀ ❀ व्यासनारदसंवादमुपसंहरति सूत एवमिति । एवमित्थं संभाष्य भगवान्नारदो मुनिः वासवीसुतमुपरिचरवसुवीर्यजायाः सत्यवत्याः सुतं व्यासमामंत्र्यापृच्छ्य वीणां रणयन्यादृच्छिकः स्वेच्छानुचारी ययौ ॥ ३८ ॥ ❀ ❀ देवर्षिं स्तौति अहो इति, धन्यत्वं स्वस्य परस्य च सुखापादकत्वं तदेवाह यो देवर्षिः शार्ङ्गधन्वनो भगवतः कीर्तिं गायंस्तंत्र्या वीणया माद्यन्मदं प्राप्नुवन्स्वयं वीणास्वनजहर्षमग्नः सन्नित्यर्थः, आतुरं तापत्रयातुरं जगदपि रमयति सुखयति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तीर्थं गंगाख्यं पादे यस्य स तीर्थपात्तस्य वीर्याणि चरितलक्षणानि प्रकृष्टं गायतः चशब्द एवार्थे, एवमुपासकस्यैव मम चेतसि प्रियश्रवाः भगवान् आहूत इव शीघ्रमविलंबितं दर्शनं याति अपरोक्षो भवतीत्यन्वयः ॥ ३७ ॥ ❀ ❀ हरिचर्यानुवर्णनं समाधिभाषया भगवच्चरितवर्णनं यत्तदेतत् मुहुर्मात्रास्पर्शेच्छया तत्प्राप्तिनिमित्तमातुरचित्तानां क्लिष्टमनसां पुंसां भवसिंधुप्लवः संसारसागरतरीविशेषः दृष्टः साक्ष्यादिप्रमाणैरिति शेषः, इति यस्मात्तस्मात्सात्त्विकहिताय सैव वर्णनीयेति भावः ॥ ३८ ॥ ❀ ❀ तर्हि यमादियोगानुष्ठानविधानं व्यर्थमिति तत्राह यमादिभिरिति मुकुंदकथासेवया यथात्मा जीवोऽजसा शाम्यति भगवन्निष्ठबुद्धिमान् भवति तथा कामलोभाभ्यां वैरिभ्यां हतः पीडितोनुष्ठितैर्योगमार्गैर्यमादिभिरद्धा न शाम्यति । तस्माद्धरिकथासेवैव संसारतरीत्येकान्वयः ॥ ३९ ॥ ❀ ❀ उपसंहरति सर्वमिति । अतीतजन्मविषयत्वाद्रहस्यं मम जन्म कर्म प्रत्यहं त्वया पृष्टः तदिदं सर्वमाख्यातं तुभ्यमिति शेषः । कीदृशं नित्यसंतुष्टस्य तवापि भवतः आत्मनो मनस्तोषणं तुष्टिजनकं भवत आख्यातमिति वा चशब्दः जन्मकर्मणोः समुच्चये, श्रोतृणामात्मनां जीवानां तृप्तिजनकमिति वा ॥ ४० ॥ ❀ ❀ सूतः व्यासनारदसंवादं शौनकादीन् ब्रूत इत्याह एवमिति । वासवीसुतं सत्यवत्याः पुत्रं व्यासं एवं पूर्वोक्तप्रकारेण संभाष्य उक्त्वा गच्छामीति आमंत्र्य आज्ञां गृहीत्वा वीणां रणयन् ध्वनयन् ययौ यादृच्छिकः अतर्कितगमनागमनः यतिर्निर्जितेंद्रियग्रामः ॥ ४१ ॥ ❀ ❀ शार्ङ्गधन्वनो हरेः कीर्तिं माध्व्या मधुरया गिरा तंत्र्या वीणया गायन् आतुरं क्लिष्टं जगद्रमयति यः सोयं देवर्षिर्नारदः धन्यः कृतकृत्यः, अहो आश्चर्यमेतत् शूद्रयोनेरप्येतादृशमाहात्म्यमभूदिति नारं ज्ञानं ददातीति नारदः, अरदो दोषदो न भवतीति वा, आरवदंगारकवदायुःखण्डको न भवतीति वा । दो अवखंडने ॥ ४२ ॥

इति श्रीभागवते प्रथमस्कंधे विजयध्वजटीकायां षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वं भक्तेराविर्भावप्रकारो वृद्धिः फलं तद्वतो जनस्य चेष्टा प्रारब्धकर्म्मनाशः साधकदेहत्यागप्रकारोऽकर्म्मारब्धचिन्मयदेहप्राप्तिश्च । रहस्यं वेदान्तदर्शिभिरप्यगम्यम् ॥ ३७ ॥ ❀ ❀ आमन्त्र्य अनुज्ञाप्य । यदृच्छया चरतीति यादृच्छिकः हेतुशून्यगमनादिक्रिय इत्यर्थः । तेन च भक्तिर्यादृच्छिकी भक्तोऽपि यादृच्छिकस्तत्सङ्गोऽपि व्यासस्य यादृच्छिक इति भक्तिमतस्य यादृच्छिकत्रयी जीवातुः ॥ ३८ ॥ ❀ ❀ अतो विस्मयं प्रकाशयन्नाह अहो इति तन्त्र्या वीणया ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षष्ठोऽयं प्रथमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यादृच्छिकः कृष्णेतरवस्त्वनासक्त्या यदृच्छाचारी ॥ ३८ ॥ माद्यन् कृष्णावेशेन हृष्यन् ॥ ३९ ॥

इति श्रीसनत्कुमारसंततिप्रवर्त्तकभगवन्निबार्कचरणचिंतकशुकसुधीप्रणीते श्रीमद्भागवतसिद्धांतप्रदीपे प्रथमस्कंधीये षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इतोऽपि किंचिद्रहस्यं भविष्यतीत्याशंक्योपसंहरति सर्वं तदिति । स्वत एव नारदो महानिति लोके प्रसिद्धिः, मया त्वेतावान् क्लेशोऽनुभूत इति रहस्यम्, तवापि चित्तोद्वेगे हेतुरुक्तः । सर्वत्र भगवान् हेतुरिति कथने हेतुः आत्मतोषणमिति । भगवत्प्रीतिहेतुरतःसुखजनकं वा ।। ३७ ।। ❀ ❀ नारदस्याऽद्यापि साधनपरत्वमिति ख्यापयितुमाह एवमिति । भगवानिति प्रत्युपकारानपेक्षा । वासवीसुतमिति अनुगमनाद्यभावात् पूर्वोक्तं संभाषणशेषत्वेनानूद्य आमंत्र्य गच्छामीत्युक्त्वा भक्तिमार्ग एव इति ख्यापयितुं वीणां रणयन् ययौ । यादृच्छिक इति पुनरागमनसंभावनाऽभावः । मुनित्वात् कार्यं सर्वं कृत्वा गतः ।। ३८ ।। ❀ ❀ गते तु तस्मिन् अस्यापि हृदये भक्तिमार्गः समागत इत्यभिप्रायेण नारदवर्णनमाह अहो इति । देवर्षिरिति दृष्टफलसिद्धिः । गायन्माद्यन्निति स्वतंत्रभक्तिः । अयमेव परोपकार इति ज्ञातवान् तदाह रमयतीति ।। ३९ ।।

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे षष्ठोऽध्यायः ।। ६ ।।

श्रीगिरिधरकृता बालप्रबोधिनी

प्रश्नस्योत्तरमुपसंहरति–सर्वमिति । यतस्त्वं योग्योऽसीति सूचयन् सम्बोधयति–हे अनघेति । मे मम जन्मकर्मणोः रहस्यं भवतः आत्माऽन्तःकरणं तुष्येत येन तच्च यत्त्वयाऽहं पृष्टस्तदिदं सर्वं मयाऽऽख्यातमित्यन्वयः ।। ३७ ।। ❀ ❀ व्यासनारदसंवादं उपसंहरति–एवमिति । नारदो मुनिर्वासव्या उपरिचरवसुवीर्यजातायाः सत्यवत्याः सुतं व्यासं एवं पूर्वोक्तं सर्वं सम्भाष्य कथयित्वा आमन्त्र्य गच्छामीति पृष्ट्वा वीणां रणयन् वादयन् ययावित्यन्वयः । उपदेशे सामर्थ्यमाह–भगवानिति, सर्वज्ञ इत्यर्थः । गमने हेतुमाह–यादृच्छिक इति, स्वप्रयोजनसङ्कल्परहित इत्यर्थः ।। ३८ ।। ❀ ❀ सर्वोऽपि जनः स्वसुखमेवेच्छति नारदस्तु प्राणिमात्रं सुखयतीत्याश्चर्येण तं स्तौति–अहो इति । अयं देवर्षिर्धन्यः कृतार्थ एव । कुतः ? यत् यतः शार्ङ्गधन्वनो भगवतः कीर्तिं गायन् माद्यन् स्वयं हृष्यन् तापत्रयेण आतुरं व्याकुलं सर्वं जगदपि तन्त्र्या वीणया रमयति सुखयतीत्यन्वयः ।। ३९ ।।

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ।। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ।। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ।। २ ।।
रचिता प्रथमे मध्यमाधिकारनिरूपणे ।। षष्ठो वृत्तिं गतो देवर्षिफलस्य निरूपकः ।।

हिन्दी अनुवाद

व्यासजी ! आप निष्पाप हैं । आपने मुझसे जो कुछ पूछा था, वह सब अपने जन्म और साधनका रहस्य तथा आपकी आत्मतुष्टि का उपाय मैंने बतला दिया ।। ३७ ।। ❀ ❀ सूतजी कहते हैं—शौनकादि ऋषियों ! देवर्षि नारदने व्याससे इस प्रकार कहकर जानेकी अनुमति ली और वीणा बजाते हुए स्वच्छन्द विचरण करनेके लिए वे चल पड़े ।। ३८ ।। ❀ ❀ अहा ! ये देवर्षि नारद धन्य हैं, क्योंकि ये शार्ङ्गपाणि भगवान्‌की कीर्ति को अपनी वीणापर गा-गाकर स्वयं तो आनन्दमग्न होते ही हैं, साथ-साथ इस त्रितापतप्त जगत्‌को भी आनन्दित करते रहते हैं ।। ३९ ।।

छठवाँ अध्याय समाप्त

अथ सप्तमोऽध्यायः

शौनक उवाच

निर्गते नारदे सूत भगवान् बादरायणः । श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥

सूत उवाच

ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे । शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः ॥ २ ॥

तस्मिन् स्व आश्रमे व्यासो बदरीषण्डमण्डिते । आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयम् ॥ ३ ॥

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले । अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयाम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ भागवतश्रोतुर्जन्म वक्तुं परीक्षितः । सुप्तबालकवधाद् द्रौणेर्दंडः सप्तम उच्यते ॥

तस्य नारदस्य अभिप्रेतं श्रुतवान्सन् ॥ १ ॥ ❀ ❀ ब्रह्मनद्यां ब्रह्मदैवत्यायां ब्राह्मणैराश्रितायां च । सत्रं कर्म वर्धयतीति तथा ॥ २ ॥ ❀ ❀ बदरीणां षंडेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरीचकार "समाधिनाऽनुस्मर तद्वि-चेष्टितम्" इति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः ॥ ३ ॥ ❀ ❀ प्रणिहिते निश्चले । अत्र हेतुः–भक्तियोगेन अमले । पूर्वं प्रथमं पुरुषम् । ईश्वरम् अपश्यत् । पूर्णमिति वा पाठः । तदुपाश्रयाम् ईश्वराश्रयां तदधीनां मायां च अपश्यत् ॥ ४ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ नारदजन्मादिवर्णनानंतरं द्रौणेरश्वत्थाम्नः (१) ततो नारदाभिप्रायश्रवणानन्तरम् । विशेषेण भाति वेदविभागादिषु इति विभुः ॥ १ ॥ ❀ ❀ ब्रह्मनद्यां वेदानां विप्राणां तपतां परमेश्वरस्य वा संबन्धिन्यां नद्यां "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः । सतस्त्रातिं सदाचारपरान्रक्षतीति सत्रो हरिस्तेन वर्द्ध्यते स्वस्थित्या जगति ख्याप्यत इति सत्रवर्द्धनः । शम्या युगकीलाः प्रास्यंते प्रक्षिप्यंते परिध्यर्थेऽस्मिन्निति शम्याप्रासः, लकुटीकृतशम्या नाम यज्ञियतरुशाखापतितस्थले कृतशालांतर्यज्ञकरणाच्छम्याप्रास इति तीर्थः । यद्वा शम उपशमोऽस्त्येषा-मिति शमिनः । शम इत्युपलक्षणं दमोपरत्यादेः । तेन शमादियुक्ता आसमन्तात्प्रकर्षेणासते तिष्ठन्त्यत्रेति शम्याप्रासः ॥ २ ॥ ❀ ❀ इत्यर्थ इति । अयं चाश्रमः सिन्धुवनांतर्गत एव न गंधमादनग इति शिष्टाः, तत्रैवादिबदरिकाश्रमोयमिति प्रसिद्धेः । सरस्वत्यपि तत्रास्त इति । इत्यर्थ इति । ध्यानस्यैव प्रणिधिपदार्थत्वादिति भावः । उपस्पृश्य स्नानादि कृत्वा ॥ ३ ॥ ❀ ❀ अत्र निश्चलत्वे । अत्र संदर्भः–भक्तियोगेन प्रेम्णा "अस्त्येवमंग भजतां भगवान्मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इत्यादौ "भक्त्या संजातया भक्त्या" इत्यादौ च प्रसिद्धेः । प्रणिहिते समाहिते "समाधिनानुस्मर तद्विचेष्टितम्" इति तं प्रति नारदोपदेशात् । पूर्णपदस्य मुक्तप्रग्रहया वृत्त्या"भगवानिति शब्दोयं तथा पुरुष इत्यपि । निरुपाधिश्च वर्तन्ते वासुदेवेखिलात्मनि" इति पाद्मोत्तरखंडवचनावष्टम्भेन तथा "कामकामो यजेत्सोममकामः पुरुषं परम् । अकामः सर्वकामो वा" इत्यादौ "यजेत पुरुषं परम्" इत्यस्य वाक्यद्वयस्य पूर्ववाक्ये पुरुषं परं प्रकृत्यैकोपाधिमुत्तरवाक्ये पुरुषं पूर्णं निरुपाधिमिति टीकानुसारेण पूर्णः पुरुषोत्र स्वयं भगवानेवोच्यते । पूर्वमिति पाठे पूर्वमेवाहमिहासमिति "तत्पुरुषस्य पुरुषत्वम्" इति श्रौतनिर्वचनविशेषपुरस्कारेण स एवोच्यते । तमपश्यच्छ्रीवेदव्यास इति स्वरूपशक्तिमंतमेवेत्येतत्स्वयमेव लब्धम् । पूर्णचंद्रम-पश्यदित्युक्तेः कांतिमंतमपश्यदिति हि लभ्यत एव । वक्ष्यते च "त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः । मायां व्युदस्य चिच्छक्त्या कैवल्ये पर आत्मनि" इति, अत एव "मायाञ्च तदपाश्रयाम्" इत्यनेन तस्मिन् अप अपकृष्ट आश्रयो यस्याः निलीय स्थितत्वा-दिति मायाया न स्वरूपभूतत्वमित्यपि लभ्यते । वक्ष्यते च "माया परैत्यभिमुखे च विलज्जमाना" इति । स्वरूपशक्तिरियमत्रैव व्यक्तीभविष्यति । "अनर्थोपशमं साक्षात्" इत्यनेन "आत्मारामाश्च मुनयः" इत्येनेन च । पूर्वत्र हि भक्तियोगप्रभावः खल्वसौ मायाभिभावकतया स्वरूपशक्तिवृत्तित्वेनैव गम्यते । परत्र ते च गुणाः ब्रह्मानंदस्याप्युपरिचरतया स्वरूपशक्तेः परमवृत्तिताया-मेवार्हंति । मायाधिष्ठातृपुरुषस्तु तदंशत्वेन ब्रह्म च तदीयनिर्विशेषाविर्भावरूपत्वेन तदंतर्भावेणापृथग्दृष्टत्वात् पृथङ् नोक्त इति ज्ञेयम् । तदेतच्च द्वितीयतृतीयसंदर्भयोः प्रतिपादितमस्ति । अत्र विश्वनाथः–पुरुषं पुरुषाकारं श्रीकृष्णमित्यर्थः । "कृष्णे

परमपूरुषे'' इत्यग्रिमोक्तेः। पूर्णमिति पदेन तस्य स्वरूपभूतं चिच्छक्तिमंशकलावतारान् पूर्तिलिंगेन ब्रह्म चापश्यदिति गम्यते। पूर्णं चंद्रमपश्यदित्युक्ते चंद्रस्य कांतेरंशककलानां च पूर्त्तंच दर्शनं स्वत एव भवेदित्यर्थः। किं तु तस्य बहिरंगायाः शक्तेर्मायाया-स्तद्विपरीतधर्मवत्यास्तद्दर्शनेन दर्शनं न भवतीति तां पृथग्लिखति मायां चेति। तस्यायम् अपरः पश्चिमभाग एवाश्रयो यस्यास्ताम् "विलज्जमानया यस्य स्थातुमीक्षापथेमुया" इत्यनेन तस्या भगवत्पृष्ठदेशाश्रयत्वेनोक्तेः॥ ४॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

शम्याप्राश इति पाठे शमीभिः आ सर्व्वतः प्राश्यते व्याप्यते वेष्ट्यते वा असौ शम्याप्राशः। इति व्याख्यालेशः ॥ २॥ ❀ ❀ समाधिनेति पञ्चमाध्यायस्य त्रयोदशश्लोकः॥ १-५॥

श्रीमद्वीरराघवव्याख्या

वासवीसुतमामंत्र्य नारदो ययाविरयुक्तं तत उपरितनं व्यासवृत्तांतं पृच्छति शौनकः-निर्गत इति। हे सूत तदभिप्रेतं 'किं वा भागवता धर्मा न प्रायेण निरुपिताः' इत्युत्प्रेक्षितमेव नारदस्याभिप्रेतं श्रुतवान्भगवान्मुनिर्बादरायणो नारदे निर्गते सति किमकरोत्॥ १॥ ❀ ❀ इत्थमापृष्ट आह सूतः ब्रह्मनद्यादिभिः सप्तभिः। ब्रह्मनद्यां ब्रह्मर्षिभिः सेवितायां नद्यां सरस्वत्या-ख्यायां पश्चिमे तटे शम्याप्रास इति प्रसिद्धो व्यासस्याश्रमः सर्वर्षीणां सत्रवर्द्धनः सत्राणि वर्द्धंतेऽस्मिन्निति तथा॥ २॥ ❀ ❀ तस्मिन् बदरीणां वृक्षाणां खंडैर्मंडिते आश्रमे शम्याप्रासे व्यासोऽप उपस्पृश्याचम्य स्वयमात्मना मनः प्रणिदध्यौ विषयांतरेभ्यः प्रत्याहृत्यात्मस्थमकरोदित्यर्थः॥ ३॥ ❀ ❀ भगवद्भक्तियोगेनामले मनसि सम्यक् प्रणिहिते समाहिते पूर्वं तावत् पुरुषं परमपुरुषमपश्यत् ततस्तदपाश्रयां पुरुषापाश्रयां तदाधेयां तच्छरीरभूतामिति यावत् मायामपश्यत्॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भागवतकरणापदेशेन भगवति भक्तिस्तन्माहात्म्यं च प्रतिपाद्यतेऽस्मिन्नध्याये निर्गत इति। तदभिप्रेतं भागवतकरणं तस्य नारदस्य वा, ततो नारदनिर्गमनानंतरम्॥ १॥ ❀ ❀ लकुटीकृतशम्यानामयज्ञियतरुशाखापतितस्थले कृतशालांतर्यज्ञकरणात् शम्याप्रास इति लोके रूढिः, सत्रं वर्धयति अधिकफलं करोतीति सत्रवर्धनः॥ २॥ ❀ ❀ ऋष्युपयोगयोग्यफलबदरीवृक्ष-समूहालंकृते ऋषिसामान्याश्रमे अतीतानागतवर्तमानानंतकोटिब्रह्मांडबाह्याभ्यंतरवर्त्यपरिमितपदार्थानशेषविशेषैः सह करतला-मलकवत्सततमपरोक्षीकुर्वतश्चिरं मनः प्रणिधानमसुरजनमोहनायेति बोद्धव्यम्॥ ३॥ ❀ ❀ ध्यानेन किं लब्धमभूदिति तत्राह भक्तीति। भक्तियोगेन सम्यगेकाग्रतया हरौ प्रणिहिते सम्यक् स्थापिते अमले रागादिदोषरहिते सतां पुरुषाणां मनसि प्रत्यक्षीभवंतं पूर्णं देशतः कालतो गुणतश्चापरिच्छिन्नं पुरुषं परमात्मानं जीवानां संसारकरीं मायां बंधकशक्तिं च तदपाश्रयां तस्य हरेरधीनामपश्यदित्येकान्वयः। प्रकृतिपुरुषौ विविक्ततया द्रष्टुं लोकानां मनसि सम्यक् प्रणिहिते सति शक्याविल्यपश्यदिति वा। एतदभिप्रायेण तदपाश्रयामित्युक्तं ततोपगत्याश्रित्य स्थितां 'स्थातुमीक्षापथेमुये'ति वक्ष्यति॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भक्तियोगेन प्रेम्णा 'अस्त्येवमंग भजतां भगवान्मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमि'त्यादौ 'भक्त्या संजातया भक्त्ये'त्यादौ च प्रसिद्धेः। प्रणिहिते समाहिते। 'समाधिनानुस्मर तद्विचेष्टितमि'ति तं प्रति नारदोपदेशात्। पूर्णपदस्य मुक्त-प्रग्रहया वृत्त्या 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि। निरुपाधिश्च वर्त्तते वासुदेवेऽखिलात्मनी'ति पाद्मोत्तरखण्डवचनावष्टम्भेन। तथा 'कामकामो यजेत् सोममकामः पुरुषं परम्। अकामः सर्वकामो वे'त्यादौ 'यजेत पुरुषं परमि'त्यस्य पूर्ववाक्ये पुरुषं परम्। प्रकृत्येकोपाधिमुत्तरवाक्ये पुरुषं पूर्णं निरुपाधिमिति टीकानुसारेण पूर्णपुरुषोऽत्र स्वयं भगवानेवोच्यते। पूर्वमिति पाठे पूर्व-मेवाहमिहासमिति तत्पुरुषत्वमिति श्रौतनिर्वचनविशेषपुरस्कारेण स एवोच्यते। तमपश्यच्छ्रीवेदव्यास इति स्वरूपशक्तिमन्त-मेवेत्येतत् स्वयमेव लब्धम्। पूर्णचन्द्रमपश्यदित्युक्ते कान्तिमन्तमपश्यदिति हि लभ्यत एव। वक्ष्यते च 'त्वमाद्यः पुरुषः साक्षा-दीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनी'ति। अत एव 'मायाञ्च तदपाश्रयामि'त्यनेन तस्मिन् अप अपकृष्ट आश्रयो यस्याः निलीय स्थितत्वादिति मायाया न स्वरूपभूतत्वमित्यपि लभ्यते। वक्ष्यते च 'माया परैत्यभिमुखे च विलज्ज-माने'ति स्वरूपशक्तिरियमत्रैव व्यक्तीभविष्यति-अनर्थो यं समं साक्षादित्यनेन, आत्मारामाश्च मुनय इत्यनेन च। पूर्वत्र हि भक्तिः योगप्रभावः खल्वसौ मायाभिभावकतया स्वरूपशक्तिवृत्तित्वेनैव गम्यते। परत्र ते च गुणा ब्रह्मानंदस्याप्युपरिचरतया स्वरूपं शक्तेः परमवृत्तितामेवार्हन्ति। मायाधिष्ठातृपुरुषस्तु तदंशत्वेन ब्रह्म च तदीयनिर्विशेषाविर्भावरूपत्वेन तदन्तर्भावेणापृथग्दृष्टत्वात्पृथङ्-नोक्त इति ज्ञेयम्। तदेतच्च तृतीयद्वितीयसंदर्भयोः प्रतिपादितमस्ति। अतोऽत्र पूर्ववदेव सम्बन्धित्वं निर्द्धारितम्॥ १-७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्तमे सर्व्वशास्त्रार्थं समाधौ व्यास ऐक्षत। ब्रह्मास्त्रस्योपसंहारो द्रौणेर्दण्डश्च कथ्यते ॥

ब्रह्मनद्यां वेदानां विप्राणां तपसां परमेश्वरस्य वा सम्बन्धिन्यां नद्याम्। "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः ॥ २ ॥ ❀ ❀ मनः मनसा प्रणिदध्याविति "समाधिनानुस्मर तद्विचेष्टितमि"ति नारदोपदेशात् ॥ ३ ॥ ❀ ❀ प्रणिहिते निश्चले। अत्र हेतुः भक्तियोगेनामले। पुरुषं पुरुषाकारम्। पूर्णं श्रीकृष्णमित्यर्थः, कृष्णे परमपुरुषे इत्यग्रिमोक्तेः। पूर्व्वमिति पाठे "पूर्व्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमि"ति प्रौढनिर्व्वचनविशेषपुरस्कारेण च स एवोच्यते। पूर्णमिति पदेन तस्य स्वरूपभूतां चिच्छक्तिम् अंशकलावतारान् पूर्त्तिलिंगेन ब्रह्म च अपश्यदिति गम्यते। पूर्णं चन्द्रमपश्यदित्युक्ते चन्द्रस्य कान्तेरंशकलानाञ्च पूर्त्तेश्च दर्शनं स्वत एव भवेदित्यर्थः। किन्तु तस्य बहिरंगायाः शक्तेर्मायायास्तद्विपरीतधर्म्मवत्यास्तद्दर्शने दर्शनं न भवतीति तां पृथगुल्लिखति मायां चेति। तस्य अप अपरः पश्चिमभाग एव आश्रयो यस्यास्तां "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुये" त्यनेन तस्या भगवत्पृष्ठदेशाश्रयत्वेनोक्तेः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततः किं वृत्तमिति पृच्छति शौनकः निर्गते इति ॥ १ ॥ ❀ ❀ ब्रह्मनद्यां ब्राह्मणसेवितायां सत्रं कर्म वर्द्धतेऽस्मिन् स तथा ॥ १ ॥ ❀ ❀ बदरीणां षंडेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरीकृतवान् ॥ ३ ॥ ❀ ❀ हरिभक्तियोगेनामलेऽत एव सम्यक् समाहिते मनसि पूर्णं पुरुषं परमात्मानमपश्यत् परमात्मनो लक्षणमुक्तं पूर्वाचार्येण "स्वभावतोपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम्। व्यूहांगिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिमि"ति, तदुपाश्रयां तच्छक्तिभूतां मायां चापश्यत्। सा चाप्युक्ता पूर्वाचार्येण 'मायाप्रधानादिपदप्रवाच्यं शुक्लादिभेदैश्च समर्पितं वे'ति ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं त्रिभिर्मध्यमस्य स्वातंत्र्येणानिरूपणात्। नारदव्याससंवादः निरूप्याथोत्तमाभिधा ॥ १ ॥
त्रयोदशभिरध्यायैः साधकोयं प्रजापतिः। स्वतंत्र उत्तमस्यैव साधकोयं निरूप्यते ॥ २ ॥
द्वादशांतश्च सहितो ह्यधिकारो निरूप्यते। हेतुः षड्भिर्विरक्तिश्च तथा स्वातम् असंतिके ॥ ३ ॥

हेतुस्तु द्विविधः प्रोक्तः सन्निधामतः विशेषः पंचधा प्रोक्तः सप्तमे त्रितयं जगौ। अत्र ह्यन्यतमोधिकारो निरूपणाय स्वतंत्रतया श्रवणकीर्त्तनरूपः। स च हेतुवैराग्याभ्यां सहित उत्तमो भवति। हेतुर्भगवान् महता क्लेशेन भागवतश्रोतारं पालितवान् , यस्तु सर्वोत्तमः सर्वमृग्यः सर्वेषां मुक्तिदाता सर्वेषां ज्ञानदः सर्वेषां सर्वदुःखनिवृत्तिपूर्वकभक्तिप्रदः भक्तमनोरथपूरकश्च स स्वयमुद्यम्य महता यत्नेन पालयति समूलतः भागवतश्रवणेऽधिकारी, एवं षड्भिरध्यायैर्निरूप्यते यस्याधिकारो निरूपणीयः। प्रथमं स निरूपणीयः तद्वक्ता च। अतः सप्तमे अध्याये भागवतोत्पत्तिप्रवृत्ती भक्तानां मनोरथपूरणं च निरूप्यते। तत्र प्रथमं शौनकः भागवतोत्पत्तिप्रश्नमाह भगवानिति। सहजशक्तिः बादरायण इति आगंतुकतपःशक्तिः बदरफलेन वर्त्तमानः बादरायणः तदभिप्रायं भगवद्गुणानां याथात्म्यप्रतिपादकग्रंथकरणम् ॥ १ ॥ ❀ ❀ नारदवचनानंतरं भगवदिच्छानिर्द्धारार्थं समाधिं कृतवान् तत्र शुद्धे देशे भगवदाविर्भावः, शुद्धश्च देवयजनमिति व्यासनिवासस्थानस्य देवयजनत्वमाह ब्रह्मनद्यामिति। सामीप्ये सप्तमी, ब्रह्मदैवत्यायां सरस्वत्यामिति तत्रैव वेदादिविद्यास्फूर्त्तिः सहसा पश्चिमे तटे इति पुरतो नदी देवयजने भवति पुरो ह विश्वतद्देवयजनम्। किंच शम्या प्रास्यते अस्मिन्निति शम्याप्रासः "तदग्नेः प्रियं धाम भवति तदैवाग्निः स्वस्थानात् आशाम्यायताशादपक्षायति यदि परस्तरामपक्षायेदि"ति वा शम्याः प्रास्यंते अस्मादिति वा तस्य स्थानस्य बलमाह ऋषीणां सत्रं वर्द्धयतीति ॥ २ ॥ ❀ ❀ देवयजनत्वं निरूप्य तत्र व्यासस्य समाधिमाह तस्मिन्निति। स्वाश्रम इति। अपराधीनत्वेन निर्भयचित्तप्रसादहेतौ व्यास इत्यधिकारी बदरीखंडमिति पाठः, बदरी अमृतदरी परमानंददायिनी तस्य षंडः समूहः खंडो वा तेन च मंडिते अनेन तपःस्थानं मोक्षस्थानं च तदिति सूचितं भवति, तस्मिन्नासीनः सर्वदेवताप्रसादाय चाचमनं "यन्निराचामति तेन ऋचः प्रीणाती"ति श्रुतेः योगेन साधितं मनः तदुक्तमार्गव्यतिरेकेण स्वतंत्रतया यदत्र भगवताऽभीष्टं तत्स्फुरिष्यतीति बुद्ध्या स्वयं मनः स्थिरीकृतवान् ॥ ३ ॥ ❀ ❀ तदा समाधिभाषाविषयाः पदार्थाः स्फुरिता इति तान् वर्णयितुं प्रथमं तदाधारं वर्णयितुं प्रथमं तदाधारं वर्णयति भक्तियोगेनेति। वायुवशात् स्थिरीभूतश्चेन् नारदवत् स्फूर्त्तिरिति तदाह। भक्तियोगेनेति निष्कामत्वादमले तत्र यद् दृष्टवान् तदाह अपश्यदिति द्वयेन। साकारं ब्रह्म शुद्धं हि माया तच्छक्तिरुत्तमा 'तया सर्वत्र संमोहः साक्षाद्भक्तिश्च मोचिके'ति पूर्णं पुरुषं पुरुषोत्तमं जीवराशिभिराकीर्णं ब्रह्मांडकोटिभिर्वा मायां चापश्यत् भगवदेकशरणाम् ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ सप्तमाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वादुत्तरस्य चारप्स्यमाणत्वात्तयोः सङ्गतिं वक्तुमाहुः एवमित्यादि। एवं शौनकप्रश्नमुखेन त्रिभिर्नारदव्याससम्वादं निरूप्य, मध्यमस्याधिकारस्य स्वातन्त्र्येण निरूपणात् निरूपणं विधाय, अथैतदनन्तरमुत्तमाभिधा उत्तमाधिकाराभिधानं त्रयोदशभिरध्यायैर्व्यासचरणैः क्रियत इति शेषः। तथा च व्यासपादोक्तावबसरः प्रसङ्गो वा, सूतोक्तौ तु प्रश्नोत्तरभाव एव सङ्गतिरित्यर्थः। नन्वस्य कथमुत्तमत्वमित्याकांक्षायामाहुः साधक इत्यादि। अयं वर्ण्यमानो भगवानत्र प्रजानां दीनतया साधारणरूपाणां पतिः समन्ततो रक्षकः सन् साधकः। अधिकारश्च स्वतन्त्रः, अत उत्तमत्त्वम्। मध्यमे भगवतः साधकत्वेपि नारदस्य प्रजारूपत्वाभावान्न प्रजापतित्वेन साधकत्वम्। प्रथमे चाधिकारस्य न स्वातन्त्र्यम्। प्रकृते तूभयसत्त्वादुत्तमत्वमित्यर्थः। कुत एतदवगम्यत इत्यत आहुः साधकोयमित्यादि। निरूप्यत इति। सप्तमे सप्तमादिषडध्याय्यां वा निरूप्यत इत्यर्थः। अस्तूत्तमत्वम्, परमध्यायाः किमित्यधिका इत्यत आहुः द्वादशेत्यादि। निरूप्यत इति पूर्वेण सम्बन्धः। चावधारणे। अवान्तरप्रकरणानि विभजन्ति निरूप्यते षड्भिरित्यादि। तथेति षड्भिरित्यर्थः। हेतुषडध्यायीं विभजन्तः प्रस्तुताध्यायस्यार्थमाहुः हेतुरित्यादि। द्विविध इति। सामान्यविशेषभेदेन द्विविधः। नन्वेवमष्टविधत्वेऽष्टाध्याया अपेक्षिता इत्यत आहुः सप्तम इत्यादि। एतदेव प्रपञ्चयन्ति अत्र हीत्यादिना। निरूप्यत इति। उक्तक्रमप्रातिलोम्येन निरूप्यते। सामान्यहेतुत्रयं स्फुटीकुर्वन्ति यस्येत्यादि। श्रीभागवतव्यासयोरपि भगवद्रूपत्वान्नोक्तविरोधः। भक्तमनोरथपूरणमिति। तेन प्रकारेणाश्वत्थाममोचनाद्वीमद्रौपद्यादिमनोरथपूरणम्। एवञ्चात्र सामान्यहेतुत्वं भगवतो भक्तमनोरथपूरकत्वेन विशेषरूपत्वेपि देहरक्षकत्वेन ज्ञेयम्। ब्रह्मनद्यामित्यत्र। पुरो हविश्चेति। 'पुरोहविषि देवयजने याजये'दिति विधाय 'एतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुब्रुवन्नग्निमप अप आदित्यमभिविपश्यती'ति। तल्लक्षणं तैत्तरीये षष्ठाष्टके श्रावितं तादृशमित्यर्थः। शम्या प्रास्यतेऽस्मिन्निति। शम्या गदाकारकाष्ठविशेषो यज्ञायुधम्, प्रास्यते प्रविध्यते बलेन प्रक्षिप्यत इति यावत्। यस्मिन् देशे स इत्यर्थः। नाम निरूप्य तत्तात्पर्यमाहुः तदग्नेरित्यादि। तदुपपादयन्ति तदैवेत्यादि। यदा तत्प्रियं धाम भवति, तदैवाग्निः गार्हपत्यादिः स्वस्थानात्कुण्डादाशम्याप्रासात् शम्याप्रवेधदेशमभिव्याप्यापक्षायति अङ्गाररूपेण बहिः पततीत्यर्थः। इदमेव कल्पकारेणोक्तम्। 'यस्याहिताग्नेरग्निरपक्षायेदाशम्याप्रासा'दिति। अत्रैव प्रकारान्तरेणाहुः यदीत्यादि। यदि परस्तरां शम्यापतनदेशादन्यदेशे अपक्षायेत्, अङ्गारोऽपगम्य पतेदित्यर्थः। इयं श्रुतिर्ब्राह्मणेऽच्छिद्रेऽस्ति कल्पसूत्रे च॥ २॥ ❀ ❀ भक्तियोगेनेत्यत्र। तदाधारमिति। स्फुरितपदार्थाधारं मन इत्यर्थः। अपश्यदित्यत्र। पुरा आसेति व्युत्पत्त्या पुरुषपदेनैव पुरुषोत्तमप्राप्तेः पूर्णपदमनतिप्रयोजनमित्यरुच्या पूर्णपदस्य प्रयोजनान्तरमाहुः जीवेत्यादि॥ ४॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं त्रिभिर्मध्यमस्याप्यधिकारो निरूपितः। त्रयोदशभिरध्यायैरुत्तमस्य निरूप्यते॥ १॥
श्रीमद्भागवतस्यात्र सप्तमे करणं ततः। शुकस्याध्यापनं द्रौणेर्दण्डश्च विनिरूप्यते॥ २॥

व्यासं पृष्ट्वा नारदो ययावित्युक्तं तत उपरितनं व्यासवृत्तान्तं पृच्छति–निर्गत इति। अनुद्वेगादयः स्वप्रेम सूचयन् सम्बोधयति–हे सूतेति। स्वाश्रमान्नारदे निर्गते सति तस्याभिप्रेतं भगवल्लीलाप्रतिपादकग्रन्थकरणं श्रुतवान् सन् बादरायणः बदरफलेन च वर्त्तमानः तपोनिष्ठो व्यासस्ततस्तदनन्तरं किमकरोदित्यन्वयः। तत्करणे तु तस्य सामर्थ्यमस्तीत्याह–विभुरिति, समर्थ इत्यर्थः। तत्र हेतुमाह–भगवानिति, भगवदवतार इत्यर्थः॥ १॥ ❀ ❀ शुभस्थाने एव भगवत्प्रादुर्भावो भवतीति तत्स्थानस्योत्तमत्वं दर्शयति–ब्रह्मनद्यामिति। ब्रह्मदैवत्यायां सरस्वत्यां–सप्तमी षष्ठ्यर्था, तस्याः पश्चिमे तटे ऋषीणां सत्राणि कर्माणि वर्द्धयतीति तथाभूतः शम्याप्रास इति प्रोक्तः प्रसिद्धो व्यासस्याश्रमोऽस्तीति शेषेणान्वयः॥ २॥ ❀ ❀ बदरीणां खण्डेन समूहेन मण्डिते शोभमाने अत एव रम्ये मनोहरे तस्मिन् स्वे स्वकीये आश्रमे अप उपस्पृश्य "यत्त्रिराचामति तेन ऋचः प्रीणाति" इति श्रुतिविहिताचमनं कृत्वाऽऽसीनः स्वयमधिकारित्वात् परप्रेरणां विनैव व्यासो मनः प्रणिदध्यौ स्थिरीकृतवान्। 'समाधिनाऽनुस्मर तद्विचेष्टितम्' इति नारदोक्तसमाधिं कृतवानित्यर्थः॥ ३॥ ❀ ❀ समाधौ यदपश्यत्तद्दर्शयति–भक्तियोगेनेति सार्द्धद्वयेन। भक्तियोगेन अमले विषयवासनाशून्ये अत एव सम्यक् प्रणिहिते निश्चले मनसि पूर्णं पुरुषं पुरुषोत्तममपश्यदित्यन्वयः। पूर्वमिति पाठे तु प्रथममित्यर्थः। तदुपाश्रयां तदधीनां मायां चापश्यदित्यन्वयः॥ ४॥

हिन्दी अनुवाद

अश्वत्थामाद्वारा द्रौपदीके पुत्रोंका मारा जाना और अर्जुनके द्वारा अश्वत्थामाका मानमर्दन

श्रीशौनकजीने पूछा–सूतजी! सर्वज्ञ एवं सर्वशक्तिमान् व्यासभगवान्ने नारदजीका अभिप्राय सुन लिया। फिर उनके चले जानेपर उन्होंने क्या किया?॥ १॥ ❀ ❀ श्रीसूतजीने कहा–ब्रह्मनदी सरस्वतीके पश्चिम तटपर शम्याप्रास नामका एक आश्रम है। वहाँ ऋषियोंके यज्ञ चलते ही रहते हैं॥ २॥ ❀ ❀ वहीं व्यासजीका अपना आश्रम है। उसके चारों

और बेरका सुन्दर वन है। उस आश्रममें बैठकर उन्होंने आचमन किया और स्वयं अपने मनको समाहित किया ॥ ३ ॥ ❀ ❀ उन्होंने भक्तियोगके द्वारा अपने मनको पूर्णतया एकाग्र और निर्मल करके आदिपुरुष परमात्मा और उनके आश्रयसे रहनेवाली मायाको देखा ॥ ४ ॥

यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्। परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ ५ ॥
अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे। लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ ६ ॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे। भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥ ७ ॥
स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम्। शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह यथेति। यया संमोहितः स्वरूपावरणेन विक्षिप्तः परोऽपि गुणत्रयाद्व्यतिरिक्तोऽपि तत्कृतं त्रिगुणत्वाभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति ॥ ५ ॥ ❀ ❀ अनर्थम् उपशमयति यः अधोक्षजे साक्षाद्भक्तियोगः तं च अपश्यत्। एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्य अर्थे सात्वतसंहितां श्रीभागवताख्यां चक्रे। तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः। एतदुक्तं भवति–विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया संमोहितः तिरोभूतस्वरूपः तद्विपरीतधर्मा जीवः तस्य च ईश्वरभक्त्या लब्धज्ञानेन मोक्ष इति। तदुक्तं विष्णुस्वामिना–"ह्लादिन्यासंविदाश्लिष्टः सच्चिदानंद ईश्वरः। स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः" तथा–"स ईशो यद्वशे माया स जीवो यस्तयार्दितः। स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः॥ स्वादृगुत्थविपर्यासभवभेदजभीशुचः। यन्मायया जुषन्नास्ते तमिमं नृहरिं नुमः" इत्यादि ॥ ६ ॥ ❀ ❀ संहितायाः अनर्थोपशामकत्वं दर्शयति–यस्यामिति। यस्यां वै श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः ॥ ७ ॥ ❀ ❀ अनुक्रम्य शोधयित्वा ॥ ८ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभिधेयस्य प्रयोजनस्य च स्थापकं जीवस्य स्वरूपत एव परमेश्वराद्वैलक्षण्यमपश्यदित्याह-ययेति। यया मायया संमोहितो जीवः स्वयं चिद्रूपत्वेन त्रिगुणात्मकाज्जडात्परोऽपि आत्मानं त्रिगुणात्मकं जडं देहादिसंघातं मनुते तन्मननकृतमनर्थं संसारव्यसनं चाभिपद्यते। तदेवं जीवस्य चिद्रूपत्वेपि यया संमोहित इति मनुते इति स्वरूपभूतज्ञानशालित्वं व्यनक्ति। प्रकाशैकरूपस्य तेजसः स्वपरप्रकाशनशक्तिवत्। "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति गीतादिभ्यः तदेवमुपाधेरेव जीवत्वं तन्नाशस्यैव च मोक्षत्वमिति मतांतरं परिहृतवान्। अत्र यया संमोहित इत्यनेन तस्या एव तत्र कर्तृत्वं भगवतस्तु तत्रोदासीनत्वं मतम्। वक्ष्यते च"विलज्जमानया यस्य स्थातुमीक्षापथेमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्धियः" इति। अत्र विलज्जमानयेत्यनेनेदमायाति। तस्या जीवसंमोहनं कर्म श्रीभगवते न रोचते इति। यद्यपि सा स्वयं जानाति तथापि "भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययस्मृतिः" इत्यादिदिशा जीवानामनादिभगवदज्ञानमयवैमुख्यमसहमाना स्वरूपास्फुरणमस्वरूपावेशं च करोति। श्रीभगवांश्चानादित एव भक्तायां प्रपंचाधिकारिण्यां तस्यां दाक्षिण्यं लंघितुं न शक्नोति। तथा तद्भयेनापि जीवानां स्वसांमुख्यं वांछन्नुपदिशति"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति। "सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति" इति च। लीलया श्रीमद्व्यासरूपेण तु विशिष्टतया तदुपदिष्टवानित्यनंतरमेवायास्यति। अनर्थोपशमं साक्षाद्भक्तियोग इति तस्माद्द्वयोरपि तत्तत्समंजसं ज्ञेयम्। ननु माया खलु शक्तिः शक्तेश्च कार्यक्षमत्वं तच्च धर्मविशेषः तस्य कथं लज्जादिकम्। उच्यते, एवं सत्यपि भगवति तासां शक्तीनामधिष्ठातृदेव्यः श्रूयन्ते। यथा केनोपनिषदि महेन्द्रमाययोः संवादः। तदास्ताम्। प्रस्तुतं प्रस्तूयते। तत्र जीवस्य तादृशचिद्रूपत्वेपि परमेश्वरतो वैलक्षण्यं तदपाश्रयामिति यया संमोहित इति च दर्शयति। यद्यैव यदेकं चिद्रूपं ब्रह्म मायाश्रयतावलितं विद्यामयं तद्यैव तन्मायाविषयतापन्नमविद्यापरिभूतं चेत्ययुक्तमिति जीवेश्वरविभागोऽवगतः। ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद्द्वितयं मिथो विलक्षणस्वरूपमेवेत्यागतम्। न चोपाधितारतम्यमयपरिच्छेदप्रतिबिंबत्वादिव्यवस्थया तयोर्विभागः स्यात्। तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य परिच्छेदविषयत्वासंभवः। निर्धर्मकस्य व्यापकस्य निरवयवस्य च प्रतिबिंबत्वायोगोऽप्युपाधिसम्बन्धाभावाद्बिम्बप्रतिबिम्बभेदाभावाद् दृश्यत्वाभावाच्च। उपाधिपरिच्छिन्नाकाशस्थज्योतिरंशस्यैव प्रतिबिंबो दृश्यते नत्वाकाशस्य दृश्यत्वाभावादेव तथा वास्तवपरिच्छेदादौ सति समानाधिकरणज्ञानमात्रेण न तत्त्यागश्च भवेत्। तत्पदार्थप्रभावस्तत्र कारणमिति चेदस्माकमेव संमतम्। उपाधेराविद्यकत्वे तत्र न तत्परिच्छिन्नत्वादेरप्यघट-

मानत्वादाविद्यकत्वमेवेति । घटाकाशादिषु वास्तवोपाधिमयतद्दर्शनया न तेषामवास्तवस्वप्रदृष्टांतोपजीविनां सिद्धांतः सिद्धयति । घटमानाघटमानयोः संगतेः कर्तुमशक्यत्वात् । ततश्च तेषां सर्वमविद्याविलास एवेति स्वरूपमप्राप्तेन तेन तत्तद्व्यवस्थापयितुमशक्यमिति ब्रह्माविद्ययोः पर्यवसाने सति यदेव ब्रह्म चिन्मात्रत्वेनाविद्यायोगस्यात्यंताभावास्पदत्वाच्छुद्धं तदेव तद्योगादशुद्धया जीवः पुनस्तदेवाविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येति तथा विद्यावत्त्वेपि मायित्वमित्यसमंजसा च कल्पना स्यादित्याद्यनुसंधेयम् । किं च यद्यत्राभेदवाद एव तात्पर्यमभविष्यत्तर्ह्येकमेव ब्रह्माऽज्ञानेन भिन्नं ज्ञानेन तु तस्य भेदमयदुःखं विलीयते इत्यपश्यदित्येवावक्ष्यत् । तथा भगवल्लीलादीनां वास्तवत्वाभावे सति शुकहृदयविरोधश्च जायते । तस्मात्परिच्छेदप्रतिबिम्बत्वादिप्रतिपादकशास्त्राण्यपि कथंचित्सादृश्येन गौण्यैव वृत्त्या प्रवर्त्तेरन् । 'अंबुवदग्रहणान्न तथात्वं वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमि'ति पूर्वोत्तरपक्षमयन्यायाभ्यां तत एवाभेदशास्त्राण्युभयोश्चिद्रूपत्वेन जीवसमूहस्य दुर्घटघटनापटीयस्याः स्वाभाविकतदचिंत्यशक्त्याः स्वभावत एव तद्रश्मिपरमाणुगणस्थानीयत्वात्तद्व्यतिरेकेऽव्यतिरेकेण च विरोधं परिहृत्यैवाग्रे मुहुरपि तदेतद्व्यासमाधिलब्धसिद्धांतयोजनाय योजनीयानि । तदेवं मायाश्रितत्वमायामोहितत्वाभ्यां स्थिते तयोर्भेदे तद्भजनस्याभिधेयत्वमायातम् । अतः श्रीभगवत एव सर्वहितोपदेष्टृत्वात्सर्वदुःखहरत्वाद्रश्मीनां सूर्यवत्सर्वेषां परमस्वरूपत्वात्सर्वाधिक्यगुणशालित्वात्परमप्रेमयोग्यत्वमिति प्रयोजनं च स्थापितमिति संदर्भः । विश्वनाथस्तु–ननु भगवद्रूपगुणलीलामाधुर्यवर्णनार्थं भगवद्दर्शनमपेक्षणीयमेव व्यासस्य मायादर्शनं किमर्थं तत्राह यया संमोहित इति । अयमर्थः–यदर्थं श्रीभागवतं प्रारिप्सितं स जीवो मायारोगग्रस्तः कथं स्वयं स्वादयतु तन्माधुर्यम् , अतस्तस्य रोगदर्शनं विना चिकित्सा न भवति । तया च विना रोगिणस्तस्य कथमौषधपथ्ययोर्व्यवस्थेति मायाजीवावपि द्रष्टुमवश्यमेवापेक्षणीयाविति यया संमोहितः स्वरूपावरणविक्षेपाभ्यां भ्रमितः परोपि तस्या मायाया गुणत्रयातिरिक्तोपि तत्कृतं गुणकृतमनर्थं तदभिमानेन प्राप्नोति ॥ ५ ॥ ❀ ❀ श्लोकत्रयेण भक्तियोगेनेत्यादिवृत्तत्रयेण । अत्राशयं द्योतयति-एतदुक्तं भवतीति । तज्जीवेश्वरस्वरूपम् । ह्लादिन्या तदाख्यया संविदा ज्ञानशक्त्या य आश्लिष्टः सर्वदा युक्तः स सच्चिदानंद ईश्वर इत्यर्थः । यस्तु स्वाविद्यया स्वरूपाज्ञानेनाच्छादितः स जीवः क्लेशसमूहखनिः अर्दितः स्वाधीनीकृतः स्वस्मिन्नाविर्भूतः परानंदो यस्य स तथेतीशविशेषणम् । स्वस्मिन्नाविर्भूतानि यानि सुदुःखान्यात्यंतिकदुःखानि तेषां भूः क्षेत्रमिति जीवविशेषणम् । स्वस्यादृशाऽऽदर्शनेनोत्थो यो विपर्यासो देहाद्यात्मधीस्तस्माद्भवत्युद्भवंतीति स्वादृगुत्थविपर्यासभवाः ताश्च भेदजभीशुचश्चेति स्वादृगुत्थविपर्यासभवभेदजभीशुचस्ता जुषन्यन्मायया तिष्ठति भेदाद्भयं शोकश्च भवत्येव "द्वितीयाद्वै भयं भवति" "अनीशया शोचति मुह्यमानः" इत्यादिश्रुतिभ्यामिति । अत्र संदर्भः–तत्राभिधेयं च तादृशत्वे दृष्टवानपि यतस्तत्प्रवृत्त्यर्थं श्रीभागवताख्यामिमां संहितां प्रवर्त्तितवानित्याह–अनर्थोपशममिति । भक्तियोगोत्र कीर्त्तनश्रवणादिलक्षणः । साधनभक्तिर्न तु प्रेमलक्षणः । अनुष्ठानं ह्युपदेशापेक्षं प्रेम तु तत्प्रसादापेक्षमिति । तथापि तस्य तत्प्रसादहेतोस्तत्प्रेमफलगर्भत्वात्साक्षादेवानर्थोपशमनत्वं नत्वन्यसापेक्षत्वेन "यत्कर्मभिर्यत्तपसा"इत्यादेः । ज्ञानादेस्तु भक्तिसापेक्षत्वमेव "श्रेयःसृतिं भक्तिमुदस्य" इत्यादेः । अथवाऽनर्थस्य संसारव्यसनस्य तावत्साक्षादव्यवधानेनोपशमनमिति । विश्वनाथस्तु–तस्य यदौषधं तदपि दृष्टमित्याह । अनर्थमुपशमयति यस्तं भक्तियोगमपश्यत् । अत्र दर्शनेऽयं क्रमः । प्रथमं भगवन्तमपश्यत् । पूर्णेतिपदप्रयोगादंशान्विना कथं पूर्णत्वमिति तदंशान्पुरुषावतारगुणावतारादीनपश्यत् । पूर्त्तिमत्वं पूर्णत्वमिति पूर्त्तिरूपं ब्रह्मापश्यत् । तत्कांतिभूतां विमलोत्कर्षिण्याद्यनेकप्रभेदवर्तीं चिच्छक्तिमपश्यत् । पृष्ठे बहिरंगां मायां शक्तिमपश्यत् । तया मोहितां जीवशक्तिं तदनंतरमपश्यत् । तस्यास्तन्मोहनिवर्त्तिकां सर्वतोपि महतीं चिच्छक्तिमुख्यां भक्तिरूपां शक्तिमनुग्रहशक्तिविलासभूतां भगवतो वशयित्रीं भगवत्येवापश्यत् । तदेतत्सर्वं स्वयं दृष्ट्वाऽजानतो लोकस्यार्थे सात्वतसंहितामेतत्सर्वतत्त्वप्रकाशिकां श्रीभागवताख्यां चक्रे । "ईशः स्वतंत्रश्चित्सिंधुः सर्वव्याप्येक एव हि । जीवोधीनश्चित्कणोपि स्वोपाधिव्यापिशक्तिकः ॥ अनेकोऽविद्ययोपात्तस्त्यक्ताविद्योपि कर्हिचित् । माया त्वचित्प्रधानं चाविद्या विद्येति सा द्विधा ॥" ईश्वरजीवजगतां स्वरूपशक्तेर्भक्तेश्च स्वरूपलक्षणप्रमाणादिकं वेदस्तुतिव्याख्यायां व्यक्तीभविष्यति ॥ ६ ॥ ❀ ❀ इत्यर्थ इति । श्रोतुमुद्यतस्य चेद्भक्तिरुत्पद्येत । श्रुतायां तस्यां चेद्भक्तिः स्यात्तर्हि किमु वक्तव्यमिति भावः । संदर्भः–अथ प्रयोजनं स्पष्टयितुं पूर्वोक्तस्य पूर्णपुरुषस्य च श्रीकृष्णरूपत्वं व्यञ्जयितुं ग्रंथफलनिर्देशद्वारा तत्र तदनुभावांतरं प्रतिपादयन्नाह–यस्यामिति । भक्तिः प्रेमा श्रवणरूपया साधनभक्त्या साध्यत्वात् उत्पद्यत आविर्भवति । तस्यानुषंगिकं गुणमाह–शोकेति । अत्रैषां संस्कारोपि नश्यतीति भावः । "प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत्" इति ऋषभदेवोक्तेः । परमपुरुषे पूर्वोक्ते पूर्णपुरुषे किमाकारे इत्याकांक्षायामाह-कृष्ण इति । "कृष्णस्तु भगवान्स्वयम्" इत्यादिशास्त्रसहस्रसंभावितांतःकरणानां परंपरया तत्प्रसिद्धमध्यपातिनां चासंख्यलोकानां तन्नामश्रवणमात्रेण यः प्रथमप्रतीतिविषयः स्यात्तथा तन्नाम्नः प्रथमाक्षरमात्रं मंत्राय कल्पमानं यस्याभिमुख्याय स्यात्तदाकारामित्यर्थः । आहुश्च नामकौमुदीकाराः–'कृष्णशब्दस्य तमालश्यामलत्विषि श्रीयशोदास्तनंधये परब्रह्मणि रूढिरि'ति । विश्वनाथस्तु संहितायाः श्रेयःसाधनत्वमाह । यस्यां श्रूयमाणायां किं पुनः श्रुतायां किंतरां कीर्त्यमानायां किंतमां कीर्त्तितायां भक्तिः प्रेमा ईश्वरः सद्यो हृद्यवरुध्यते । अत्र कृतिभिरित्युक्तेरीश्वरावरोधस्य फलस्य प्रेम्ण एव लिंगात् भक्तानामननुसंहितं फलं संसारनिवृत्तिः । सा च भक्तानामेव भवतीत्याह–शोकेत्यादि ॥ ७ ॥ ❀ ❀ अथ तस्यैव प्रयोजनस्य प्रेम्णो ब्रह्म-

नंदानुभवादपि परमत्वमनुभूतवानेव यतस्तादृशं शुकमपि प्रेमानंदस्य वैशिष्ट्योपलंभनाय तामध्यापयामास। लोके हि स्वादिता-पूर्वमिष्टवस्तुकः पित्रादिरवश्यमेव पुत्रादिकं तत्तदास्वादयितुं प्रयतते इत्याह—स संहितामिति। कृत्वानुक्रम्य चेति प्रथमतः स्वयं संक्षिप्तभक्तिकं कृत्वा पश्चान्नारदोपदेशादनुक्रमेण श्रीभगवदुक्त्यैकप्रधानतयाऽनुक्रम्य संशोध्येत्यर्थः। स च नारदोपदेशः श्रीकृष्णां-तर्द्धानानंतरं परीक्षित्कर्तृककलिनिग्रहात्पूर्वं ज्ञेयस्तदैव कलिना स्वाधिकारारंभे स्वप्राबल्यप्रकटनाद्धार्मिकाणामपि शास्त्रदर्शिनाम-प्यधर्मे प्रवृत्तेः। यत एव व्यासस्य चित्ताप्रसादः। तदुक्तं "जुगुप्सितं धर्मकृतेनुशासतः" इत्यत्र "न मन्यते तस्य निवारणं जनः" इति कलियुगात्पूर्वमेव चित्ताप्रसादे न भंस्यत इति प्रयुज्येत। अतस्तदैव पूर्वनिर्मितस्यैव श्रीभागवतस्यानुक्रमणम्। तदुक्तं "कृष्णे स्वधामोपगते" इत्यत्र "पुराणार्कोधुनोदितः" इति। अत एवेदं श्रीमद्भागवतं भागवतानंतरं यदत्र श्रूयते यच्चान्यत्राष्टादशपुराणानंतरं भागवतमिति तद् द्वयमपि संगतं स्यात्। निवृत्तिनिरतं ब्रह्मानुभविनमपि ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

तच्च अपश्यदिति भक्तियोगेनेत्यादिपूर्व्वश्लोकोक्तक्रियायामन्वयः। ह्लादिन्येति। ह्लादिनी परमानन्दमयी शक्तिः तया संविदा ज्ञानेन। स्वाविद्या स्वाज्ञानम्। श्लोकान्तरञ्च। "अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः। साविद्या तत्कृतो बन्ध-स्तन्नाशो मोक्ष उच्यते" इति। श्रुतिश्च 'कार्य्योपाधिरयं जीवः करणोपाधिरीश्वर' इति। ततः अधोक्षजे भक्तियोगं च अपश्यत्। एतत् सर्व्वं दृष्ट्वा एवम् अजानतो लोकस्य हिताय भागवतीं संहितां चक्रे ॥ ६-९ ॥

श्रीमद्वीरराघवव्याख्या

मायां विशिनष्टि ययेति। परोऽपि मायाख्यप्रकृतेर्विलक्षणोऽपि जीवो यया मायया मोहितः त्रिगुणात्मकं गुणत्रय-परिणामात्मकं शरीरमेवात्मानं मनुते मन्यते तत्कृतं देहात्मभ्रमकृतमनर्थं च तापत्रयस्वरूपं प्रतिपद्यते ॥ ५ ॥ ❀ ❀ किंच अनर्थोपशमं तापत्रयरूपानर्थोपशमनात्मकमुपायमजानतो लोकस्याधोक्षजे भक्तियोगमेवानर्थोपशमं विद्वान्सर्वज्ञानवान् व्यासोऽ-पश्यदित्यनुषंगः। भगवद्भक्तियोगमेवानर्थोपशमनोपायत्वेन निश्चितवानित्यर्थः। ततः सात्वतसंहितां श्रीभागवतरूपां संहितां, संहिता-संदर्भविशेषः सात्वतशब्दस्तु पुरस्तादेव निरुक्तः ॥ ६ ॥ ❀ ❀ तामेव विशिनष्टि यस्यामिति। यस्यां सात्वतसंहितायां श्रूयमाणायां शोकाद्यपहर्तरि परमपुरुषे कृष्णे भक्तिरुत्पद्यते, ततो मोहो नाम "अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिरि"त्युक्तविधः शोको बाह्यक्लेशः दुःखमान्तरः भयमागामिदुःखदर्शनजं प्रतिकूलं ज्ञानं पूरुष इति दीर्घश्छांदसः ॥ ७ ॥ ❀ ❀ स व्यासोऽनुक्रम्य विवक्षितार्थान् क्रमविशेषेण विन्यस्य तदनुक्रमेणैवेमां संहितां कृत्वा सुतं शुकमध्यापयामास। प्रश्नावसरदानाय शुकं विशिनष्टि निवृत्तिनिरतं सांसारिकधर्मवैमुख्यद्वारा केवलचित्तैकाग्र्यावहशमदमादिभिर्निवृत्तिः, तत्र निरतं मुनिं परब्रह्म-याथात्म्यमननशीलम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

अनिर्वाच्याविद्या माया नाम अतः कथं बंधकशक्तिरियमित्याशंक्य अनिर्वाच्यायाः अर्थक्रियायोगादस्यास्तद्दर्शनादत्र बंधक-शक्तिरेवोच्यत इत्यभिप्रेत्याह ययेति। परोऽपि त्रिगुणात्मकप्रकृतेरन्योपि यया संमोहितो जीव आत्मानं त्रिगुणात्मकं त्रिगुणोपादानक-देहरूपं मनुते तत्कृतं मायाकृतं तादृशमानकृतं वा जननमरणाद्यनर्थमहं कर्तेत्यनर्थं चाभिपद्यत इत्यन्वयः। तस्मादेवंविधमायाबंधनि-वर्तकमपरोक्षज्ञानद्वारा भक्तियोगमद्राक्षीदिति भावः ॥ ५ ॥ ❀ ❀ ततः किमकरोदिति तत्राह अनर्थेति। तन्निवृत्तिसाधनमाहेति वा अनर्थेति। साक्षादाहेतीष्टानिष्टप्राप्तिपरिहारोपायमजानतो लोकस्य सात्त्विकप्रकृतेर्बन्धकशक्तिनिमित्तमनर्थमुपशमयति नाशयति इत्यनर्थोपशममधोक्षजे भक्तियोगं विद्वान् महत्त्वज्ञानपूर्वकप्रेमलक्षणभक्तियोगप्रदर्शनाय सात्वतसंहितां चक्र इत्येकान्वयः ॥ ६ ॥ ❀ ❀ अनया कथं भक्तिरुत्पद्यत इति तत्राह यस्यामिति ॥ ७ ॥ ❀ ❀ अनुक्रम्य संशोध्य न त्ववद्यबुद्ध्या निवृत्तिनिरतमित्यस्य फलाभिसंधिरहितमित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ अभिधेयस्य प्रयोजनस्य च स्थापकं जीवस्य स्वरूपत एव परमेश्वराद्वैलक्षण्यमपश्यदित्याह ययेति। यया मायया संमोहितो जीवः स्वयं चिद्रूपत्वेन त्रिगुणात्मकाज्जडात् परोऽपि आत्मानं त्रिगुणात्मकं जडं देहादिसंघातं मनुते। तन्मननकृतमनर्थं संसारव्यसनञ्चाभिपद्यते। तदेवं जीवस्य चिद्रूपत्वेऽपि यया संमोहित इति मनुत इति स्वरूपभूतज्ञानशालित्वं व्यनक्ति। प्रकाशैकरूपस्य तेजसः स्वपरप्रकाशनशक्तिवत्। "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव" इति श्रीगीतादिभ्यः। तदेवमुपाधेरेव जीवत्वं तन्नाशस्यैव च मोक्षत्वमिति मतान्तरं परिहृतवान्। अत्र यया संमोहित इत्यनेन तस्या एव तत्र कर्त्तृत्वम्। भगवतस्तु तत्रोदासीनत्वं मतम्। वक्ष्यते च "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्धियः" इति। अत्र विलज्जमानयेत्यनेनेदमायाति। तस्या जीवसंमोहनं कर्म श्रीभगवते न रोचते इति यद्यपि सा स्वयं जानाति तथापि "भयं

द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृति''रित्यादिदिशा जीवानामनादिभगवदज्ञानमयवैमुख्यमसहमाना स्वरूपास्फुरणमस्वरूपावेशं च करोति। श्रीभगवांश्चानादित एव भक्तायां प्रपञ्चाधिकारिण्यां तस्यां दाक्षिण्यं लंघितुं न शक्नोति तथा तद्वयेनापि जीवानां स्वसांमुख्यं वांछन्नुपदिशति ''दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरंति ते'' इति। ''सतां प्रसंगान्मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यती''ति च। लीलया श्रीमद्व्यासरूपेण तु विशिष्टतया तदुपदिष्टवानित्यनन्तरमेवायास्यति। 'अनर्थोपशमं साक्षाद्भक्तियोगम्' इति तस्माद् द्वयोरपि तत्तत् समंजसं ज्ञेयम्। ननु माया खलु शक्तिः। शक्तिश्च कार्यक्षमत्वं तच्च धर्मविशेषः, तस्य कथं लज्जादिकम्? उच्यते, एवं सत्यपि भगवति तासां शक्तीनामधिष्ठातृदेव्यः श्रूयन्ते। यथा केनोपनिषदि महेन्द्रमाययोः संवादः। तदास्तां प्रस्तुतं प्रस्तूयते। तत्र जीवस्य तादृशचिद्रूपत्वेपि परमेश्वरतो वैलक्षण्यम्। तदपाश्रयामिति। यया संमोहित इति च दर्शयति यद्वैव यदेकं चिद्रूपब्रह्ममायाश्रयतावलितं विद्यामयं तद्वैव तन्मायाविषयतापन्नमविद्यापरिभूतं चेत्ययुक्तमिति जीवेश्वरविभागोऽवगतः। ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद् द्वितयं मिथो विलक्षणस्वरूपमेवेत्यागतं, न चोपाधितारतम्यमयपरिच्छेदप्रतिबिम्बत्वादिव्यवस्थया तयोर्विभागः स्यात्। तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य परिच्छेदविषयत्वासम्भवः। निर्द्धर्मकस्य व्यापकस्य निरवयवस्य च प्रतिबिम्बत्वायोगोऽपि उपाधिसम्बन्धाभावात् बिम्बप्रतिबिम्बभेदाभावात् दृश्यत्वाभावाच्च उपाधिपरिच्छिन्नाकाशस्य-ज्योतिरंशस्यैव प्रतिबिम्बो दृश्यते नत्वाकाशस्य दृश्यत्वाभावादेव। तथा वास्तवपरिच्छेदादौ सति सामानाधिकरण्यज्ञानमात्रेण न तत्त्यागश्च भवेत्। तत्पदार्थप्रभावस्तत्र कारणमिति चेदस्माकमेव मतं सन्मतं, उपाधेराविद्यकत्वे तु तत्र तत्परिच्छिन्नत्वादेरप्यघटमानत्वादाविद्यकत्वमेवेति घटाकाशादिषु वास्तवोपाधिमयतद्दर्शनया न तेषामवास्तवस्वप्नदृष्टान्तोपजीविनां सिद्धान्तः सिध्यति, घटमानाघटमानयोः संगतेः कर्तुमशक्यत्वात्। ततश्च तेषां तत्तत्सर्वमविद्याविलास एवेति स्वरूपमप्राप्तेन तेन तेन तत्तद्व्यवस्थापयितुमशक्यमिति ब्रह्माविद्ययोः पर्यवसाने सति यदेव ब्रह्मचिन्मात्रत्वेनाविद्यायोगस्यात्यन्ताभावास्पदत्वाच्छुद्धं तदेव तद्योगादशुद्ध्या जीवः पुनस्तदेव जीवाविद्याकल्पितमायाश्रयत्वादीश्वरस्तदेव च तन्मायाविषयत्वाज्जीव इति विरोधस्तदवस्थ एव स्यात्। तत्र च शुद्धायां चित्यविद्या तदविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येति तथा विद्यावत्त्वेऽपि मायिकत्वमित्यसमञ्जसा च कल्पना स्यादित्याद्यनुसन्धेयम्। किञ्च यद्यत्राभेदवाद एव तात्पर्यमभविष्यत्तर्ह्येकमेव ब्रह्म अज्ञानेन भिन्नं ज्ञानेन तु तस्य भेदमयदुःखं विलीयत इत्यपश्यदित्येवावक्ष्यत्। तथा श्रीभगवल्लीलादीनां वास्तवत्वाभावे सति श्रीशुकहृदयविरोधश्च जायते। तस्मात् परिच्छेदप्रतिबिम्बत्वादिप्रतिपादकशास्त्राण्यपि कथञ्चित्तत्तत्सादृश्येन गौण्यैव प्रवृत्त्या प्रवर्तेरन् ''अम्बुवदग्रहणात् न तथात्वं वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमि''ति पूर्वोत्तरपक्षमयन्यायाभ्यां तत एवाभेदशास्त्राण्युभयोश्चिद्रूपत्वेन जीवसमूहस्य दुर्घटघटनापटीयस्याः स्वाभाविकतदचिन्त्यशक्त्याः स्वभावत एव तद्रश्मिपरमाणुगणस्थानीयत्वात् तद्व्यतिरेकेऽव्यतिरेकेण च विरोधं परिहृत्यैवाग्रे मुहुरपि तदेतद्व्याससमाधिलब्धसिद्धान्तयोजनाय योजनीयानि। तदेवं मायाश्रितत्वमायामोहितत्वाभ्यां स्थिते तयोर्भेदे तद्भजनस्यैवाभिधेयत्वमायातम्। अतः श्रीभगवत एव सर्वहितोपदेष्टृत्वात् सर्वदुःखहरत्वात् रश्मीनां सूर्यवत् सर्वेषां परमस्वरूपत्वात् सर्वाधिकगुणशालित्वात् परमप्रेमयोग्यत्वमिति प्रयोजनञ्च स्थापितम्॥ ५॥ ❀ ❀ तत्राभिधेयञ्च तादृशत्वेन दृष्टवानपि। यतस्तत्प्रवृत्त्यर्थं श्रीभागवताख्यामिमां सात्वतसंहितां प्रवर्त्तितवानित्याह, अनर्थेति। भक्तियोगोऽत्र श्रवणकीर्त्तनादिलक्षणः साधनभक्तिः नतु प्रेमलक्षणः। अनुष्ठानं ह्युपदेशापेक्षं प्रेम तु तत्प्रसादापेक्षमिति। तथापि तस्य तत्प्रसादहेतोस्तत्प्रेमफलगर्भत्वात् साक्षादेवानर्थोपशमनत्वं न त्वन्यसापेक्षत्वेन। ''यत् कर्म्मभिर्यत्तपसे''त्यादेः। ज्ञानादेस्तु भक्तिसापेक्षत्वमेव ''श्रेयःसृतिं भक्तिमुदस्ये''त्यादेः। अथवा अनर्थस्य संसारव्यसनस्य तावत् साक्षात् अव्यवधानेनोपशमनम्। सम्मोहादिद्वयस्य तु प्रेमाख्यस्वीयफलद्वारेत्यर्थः। अन्यत् तैः। तत्र स्वादृगुत्थेति। स्वादृक् स्वाज्ञानं तेनोत्थितो यो विपर्य्यासः स्वरूपान्यथा ज्ञानं तद्भवो यो भेदः भिन्ने देहादावहंममतारूपः तस्मात् जाता या भीः शुचश्च ता जुषमाण आस्ते इत्यर्थः॥ ६॥ ❀ ❀ अथ प्रयोजनञ्च स्पष्टयितुं पूर्वोक्तस्य पूर्णपुरुषस्य च श्रीकृष्णरूपत्वं व्यञ्जयितुं ग्रन्थफलनिर्देशद्वारा तत्र तदनुभवान्तरं प्रतिपादयन्नाह यस्यामिति। भक्तिः प्रेमा, श्रवणरूपया साधनभक्त्या साध्यत्वात्। उत्पद्यते आविर्भवति। तस्यानुषङ्गिकं गुणमाह शोकेति। अत्रैषां संस्कारोऽपि नश्यतीति भावः। ''प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावदि''ति श्रीऋषभदेववाक्यात् परमपुरुषे पूर्वोक्ते पूर्णपुरुषे। किमाकारे इत्यपेक्षायामाह कृष्णे ''कृष्णस्तु भगवान् स्वयमि''त्यादिशास्त्रसहस्रभावितान्तःकरणानां परम्परया तत्प्रसिद्धमध्यपातिनां चासंख्यलोकानां तन्नामश्रवणमात्रेण यः प्रथमप्रतीतिविषयः स्यात् तथा तन्नाम्नः प्रथमाक्षरमात्रं मन्त्राय कल्पमानं यस्याभिमुख्याय स्यात्तदाकार इत्यर्थः। आहुश्च नामकौमुदीकाराः—'कृष्णशब्दस्य तमालश्यामलत्विषि श्रीयशोदास्तनन्धये परब्रह्मणि रूढिरि'ति॥ ७॥ ❀ ❀ अथ तस्यैव प्रयोजनस्य ब्रह्मानन्दानुभवादपि परमत्वमनुभूतवान्। यतस्तादृशं शुकमपि तदानन्दवैशिष्ट्यलम्भनाय तामध्यापयामासेत्याह संहितामिति। कृत्वानुक्रम्य चेति विवृतमस्ति। ब्रह्मानन्दानुभवनिमग्नत्वान्निवृत्तिनिरतं, सर्वतो निवृत्तौ निरतं तत्राव्यभिचारिणमपीत्यर्थः॥ ८-९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

ननु भगवद्रूपगुणलीलामाधुर्य्यवर्णनार्थं भगवद्दर्शनमपेक्षणीयमेव व्यासस्य मायादर्शनं किमर्थं तत्राह यया सम्मोहित इति । अयमर्थः यदर्थं श्रीभागवतमारिप्सितं स जीवो मायारोगग्रस्तः कथं स्वयं स्वादयतु तन्माधुर्य्यम् । अतस्तस्य रोगदर्शनं विना विचिकित्सा न भवति तथा च विना रोगिणस्तस्य कथमौषधिपथ्ययोर्व्यवस्थेति मायाजीवावपि द्रष्टुमवश्यमेवापेक्षणीयाविति । यया सम्मोहितः स्वरूपावरणविक्षेपाभ्यां भ्रमितः परोऽपि तस्या मायाया गुणत्रयातिरिक्तोऽपि तत्कृतं गुणकृतमनर्थं तदभिमानेन प्राप्नोति ॥ ५ ॥ ❀ ❀ तस्य यदौषधं तदपि दृष्टमित्याह अनर्थमुपशमयति यस्तं भक्तियोगञ्चापश्यत् । अत्र दर्शनेऽयं क्रमो ज्ञेयः । प्रथमं भगवन्तमपश्यत् । पूर्णेति पदप्रयोगादंशान् विना कथं पूर्णत्वमिति तदंशान् पुरुषावतारगुणावतारादीन् अपश्यत् । पूर्त्तिमत्त्वं पूर्णत्वमिति पूर्त्तिरूपं ब्रह्म अपश्यत् । तत्कांतिभूतां विमलोत्कर्षिण्याद्यनेकप्रभेदवतीं चिच्छक्तिमपश्यत् । पृष्ठे बहिरंगां मायाशक्तिमपश्यत् । तया मोहितां जीवशक्तिं तदनन्तरमपश्यत् । तस्यास्तन्मोहनिवर्तिकां सर्वतोऽति महतीं चिच्छक्तिमुख्यां भक्तिरूपां शक्तिमनुग्रहशक्तिविलासभूतां भगवतोऽपि वशयित्रीं भगवत्येवापश्यत् । तदेतत् सर्वं स्वयं दृष्ट्वा अजानतो लोकस्यार्थे सात्वतसंहिताम् एतत् सर्वतत्त्वप्रकाशिकां श्रीभागवताख्यां चक्रे । "ईशः स्वतंत्रश्चित्सिन्धुः सर्वव्याप्येक एव हि । जीवाऽधीनश्चित्कणोऽपि स्वोपाधिव्यापिशक्तिकः । अनेकोऽविद्ययोपात्तस्त्यक्ताविद्योऽपि कर्हिचित् । माया त्वचित् प्रधानञ्चाविद्याविद्येति सा त्रिधा ॥" ईश्वरजीवमायाजगतां स्वरूपशक्तेर्भक्तेश्च लक्षणप्रमाणादिकं वेदस्तुतिव्याख्यायां व्यक्तीभविष्यति ॥ ६ ॥ ❀ ❀ संहितायाः प्रेमसाधनत्वमाह । यस्यां श्रूयमाणायामेव किं पुनः श्रुतायां किन्तरां कीर्त्यमानायां किन्तमां कीर्त्तितायां भक्तिः प्रेमा ईश्वरः सद्यो हृद्यवरुद्ध्यतेऽत्र कृतिभिरित्युक्तेरीश्वरावरोधस्य फलस्य प्रेम्णः एव लिङ्गत्वात् भक्तानामनुसंहितं फलं संसारनिवृत्तिः, साच भक्तानामेव भवतीत्याह शोकेत्यादि ॥ ७ ॥ ❀ ❀ अथ तस्यैव प्रयोजनस्य प्रेम्णो ब्रह्मानन्दानुभवादपि परमत्वमनुभूतवानेव यतस्तादृशं शुकमपि प्रेमानन्दस्य वैशिष्ट्योपलम्भनाय तामध्यापयामास । लोके हि स्वादितापूर्वमिष्टवस्तुकः पित्रादिः स्वयमेव पुत्रादिकं तत्तदास्वादयितुं प्रयतते इत्याह स संहितामिति, कृत्वानुक्रम्य चेति । प्रथमतः स्वयं संक्षिप्तभक्तिकं कृत्वा पश्चान्नारदोपदेशादनुक्रमेण श्रीभगवद्भक्त्येकप्रधानतया अनुक्रम्य संशोध्येत्यर्थः । स च नारदोपदेशः श्रीकृष्णान्तर्द्धानानन्तरं परीक्षित्कर्त्तृककलिनिग्रहात् पूर्वं ज्ञेयः, तदैव कलिना स्वाधिकारारम्भे स्वप्राबल्यप्रकटनात् धार्मिकाणामपि शास्त्रदर्शिनामप्यधर्मे प्रवृत्तेः, यत एव व्यासस्य चित्ताप्रसादः । यदुक्तं–'जुगुप्सितं धर्मकृतेऽनुशासत' इत्यत्र 'न मन्यते तस्य निवारणं जन' इति । कलियुगात् पूर्वमेव चित्ताप्रसादे न संस्यत इति प्रयुज्येत । अतस्तदैव पूर्वनिर्मितस्यैव श्रीभागवतस्यानुक्रमणम् । यदुक्तम् 'कृष्णे स्वधामोपगते' इत्यत्र 'पुराणार्कोऽधुनोदित' इति । अत एवेदं श्रीमद्भागवतं भागवतानन्तरं यदत्र श्रूयते यच्चान्यत्र अष्टादशपुराणानन्तरं भागवतमिति तद्द्वयमपि संगतं स्यात् । निवृत्तिनिरतं ब्रह्मानुभविनमपि ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

जीवः परमात्मनोंऽशभूतः परोऽपि देहादिविलक्षणोपि यया मोहित आत्मानं त्रिगुणात्मकं देहं मनुते मन्यते जीवलक्षणमुक्तं पूर्वाचार्येण "ज्ञानस्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम् । अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववंतं यदनंतमाहुः ॥ अनादिमायापरियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादादि"ति । विस्तरस्तु सूत्रभाष्ये वेदांतकौस्तुभे द्रष्टव्यः । तत्कथं देहात्माभिमानकृतमनर्थमभिपद्यते प्राप्नोति ॥ ५ ॥ ❀ ❀ अनर्थम् । जन्ममरणादिसंतापमुपशमयतीत्यनर्थोपशमं भक्तियोगं चापश्यत् "मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते" इति श्रीभगवदुक्तं तद्भावापत्तिरूपं फलमप्यपश्यत्साधनस्य साध्यलक्षकत्वात् । तथा चोपास्यपुरुषं तदुपासकं जीवं मायां तत्प्राप्तौ विरोधिनीं भक्तिरसं फलं चेत्यर्थपंचकमपश्यत् । अन्येपि साधनादौ विरोधिनो मायोपलक्षिता ज्ञेयाः, ते चाग्रे स्फुटीभविष्यन्ति । इत्येवमर्थपंचकमजानतो लोकस्यार्थे । सद्भगवानुपास्यतयास्ति येषां ते सत्वंतः सत्वंत एव सात्वताः, राक्षसवायसादिवत्स्वार्थे अण् , तेषां संहिता भागवतरूपा तामर्थपंचकबोधिनीं सात्वतसंहितां चक्रे । वक्ष्यति च– "श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनमि"ति ॥ ६–८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तस्याः कार्यं चापश्यत् यया संमोहित इति । यद्यपि प्रपंचोऽपि तस्याः कार्यं तथापि तत्र कारणत्वेन तस्या अन्वयः, संमोहने तु कर्तृत्वेन स्वातंत्र्यात् । एतदेवाह ययेति । वस्तुतो जीवोपि ब्रह्मैवेति परोपि प्रकृतेर्नियामकोपि त्रिगुणात्मकं गुणत्रयभावापन्नं जडरूपं मन्यते तत्कृतं च अनर्थं जन्ममरणादि प्राप्नोति ॥ ५ ॥ ❀ ❀ तत्र निस्तारोपायं चापश्यदित्याह अनर्थोपशममिति । ज्ञानकाशया मायया मोह इति न ज्ञाने विश्वासः कर्तुं शक्यः । ननु साधनैरुत्पन्नं ज्ञानं अकस्मादुत्पन्ना मायेति संदेहो न भविष्यतीति चेत् साधनानामपि द्विरूपत्वात् कार्त्स्न्येनानभिव्यक्तत्वादिभिः तन्निर्णयेपि न साक्षात्तस्यानर्थनिवर्त्तकत्वं यथा दर्पणे मुखं नास्तीति प्रतीतिदार्ढ्येऽपि दर्पणरूपदोषस्य विद्यमानत्वात् कदापि न मुखाभावप्रतीतिः । दर्पणाभावश्च न ज्ञानसाध्यः, तथा मूलभूताया

विद्यमानत्वान्न कदाप्यनर्थनिवृत्तिः शास्त्राप्रामाण्येन समाधिना ज्ञानेऽपि जाते पुनर्मायया मोहः "ज्ञानिनामपि चेतांसी"ति वाक्यात्। शास्त्रं तु भक्तिद्वारा साधकं वदति साक्षाद्भक्त्यात्रानर्थनिवृत्तौ ज्ञानमिति "मामेव ये प्रपद्यंते मायामेतां तरंति ते" एवकारेण सर्वेषामनुपायत्वमाह-हि अतः साक्षादनर्थनिवृत्तिहेतुर्भक्तिरेव दृष्टं सा लौकिकी कर्म वेति तद्व्यावृत्त्यर्थमधोक्षज इति इंद्रियातीते भक्तिः शास्त्रीय इव। अनेन वस्तुत एव पदार्थाः नान्यथेति बोधितम्, अन्यथा पदार्थनिरूपणं तु ऋषीणां बुद्धिदोषात् योगोपि राजसादिभिस्तद्भावापन्न इति न वस्तुयाथात्म्यं बोधयति। अन्यथा विवादो न स्यात्। तस्माद्भगवद्वाक्येन वेदेन वा संवादी योगजधर्मः पदार्थयाथात्म्यं बोधयति नान्यस्तस्मान्नारदवाक्येन फलसंवादिना भगवद्वाक्येन संवादिना भगवद्वाक्येन संवादियोगप्रमाणमिति ज्ञात्वा अजानतो लोकस्यार्थे युक्तिसहितं ज्ञात्वा सात्वतसंहितां भगवत्प्रोक्तपदार्थप्रतिपादिकां वेदत्वाय संहितां चक्रे॥ ६॥ ❀ ❀ ननु किमनया संहितया पदार्थज्ञानैर्वा किं साधनकथनेपि प्राणिनां तथाधिकाराभावात् व्यर्था संहितेत्याशंक्य तस्याः फलमाह यस्यां वै श्रूयमाणायामिति। भक्त्युत्पत्तिपर्यंतमियं श्रोतव्या, इयं च दृष्टद्वारा भक्तिजनिका, दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात् यथा चास्य दृष्टोपयोगः तदुपपादितं प्रथमश्लोके कृष्णे आविर्भूते भगवति परमपूरुषे सर्वप्रमाणसमन्वये कालादिनियंतरि वा भक्तिरुत्पद्यते स्वतंत्रस्य शोकमोहभयानि रजस्तमःतत्त्वकार्याणि तान्यपहंतीति तथा अनर्थनिवृत्तिर्दूरं गुणकार्यमात्रं एव निवर्त्तत इत्यर्थः॥ ७॥ ❀ ❀ एवं भागवतस्योत्पत्तिमुक्त्वा प्रचारमाह स संहितामिति। संहितां भागवतीमित्यनुवादः बहुसंहिताकरणादन्यव्यावृत्त्यर्थः, अनुक्रमेण शोधयित्वा आनुपूर्व्येण वा इदमन्येन न प्रसृतं भविष्यतीति स्वसदृशं पुत्रमध्यापयामास। इदं दोषवता न प्रसृतं भविष्यतीति मननादवगत्य मुक्तं शुकमध्यापयामास। मुक्तोपि लीलया लोकानुवर्त्ती ईश्वरवत् तेनापि नास्य प्रचारो भविष्यतीति तदर्थमाह निवृत्तिनिरतमिति॥ ८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अनर्थोपशममित्यत्र। ननु मोहस्याज्ञानकार्यत्वाज्ज्ञानेनैव तन्निवृत्तिसम्भवेन मोहनिवर्तकतया ज्ञानस्यैव दर्शनं युक्तमिति कुतो भक्तेस्तथात्वेन दर्शनमित्याकाङ्क्षायां ज्ञानस्यातथात्वं भक्तेस्तथात्वं च व्युत्पादयन्ति ज्ञानकाशयेत्यादि। इतीति। अतो ज्ञानस्वरूपस्य सन्दिग्धत्वादित्यर्थः। द्विरूपत्वादिति। 'आगमोर्थः प्रजा देशः कालः कर्म च जन्म च। ध्यानं मन्त्रोथ संस्कारो दशैते गुणहेतवः। तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते। निन्दन्ति तामसं तत्तद्राजसं तदुपेक्षितमि'ति वाक्ये। वृद्धवाक्यैः सात्त्विकत्वज्ञानोक्त्या वृद्धानामपि बहुविधत्वेन तथात्वादित्यर्थः। ननु मायाज्ञानोपायः सन्ध्याधिकरणे व्यासपादैरुक्त इति तदनुसारेण ज्ञातायां तद्विलक्षणतया ज्ञानस्वरूपमपि ज्ञास्यत इत्यत आहुः कार्त्स्न्येनेत्यादि। आदिपदेन बाधाभावः शास्त्रसम्वादः फलसम्वादश्च सङ्गृह्यते। अनर्थनिवर्तकत्वमिति जन्मादिनिवर्तकत्वमिति। जन्मादिनिवर्तकत्वं कुतो नेत्याकांक्षायामाहुः यथेत्यादि। नन्वनर्थप्राप्तिजनको मोहश्चेज्ज्ञानेन निवृत्तः, तदा मायाया विद्यमानत्वेप्यकिञ्चित्करत्वम्, अन्यथा ज्ञानेनानर्थनिवृत्तिबोधकानां शास्त्राणामप्रामाण्यप्रसङ्गेन महानुपप्लवः स्यादित्यत आहुः शास्त्रेत्यादि। तथा चातो मायानिवृत्तिरावश्यकैवेत्यर्थः। तर्हि शास्त्रस्य का गतिरित्यत आहुः शास्त्रं त्वित्यादि। साधकमिति ज्ञानसाधकम्। ज्ञानमिति। उत्पद्यत इति शेषः। अत्र प्रमाणमाहुः मामेवेत्यादि। शास्त्रीय इवेति। शास्त्रीये धर्मे यथा श्रद्धा, तथेत्यर्थः। ननु यद्येवमेव पदार्थाः, तदान्येषामपि ऋषीणां योगिनां तथा भासेरन्, यदि भासेरन्, तदा तथोच्येरन्, यतो नैवम्, अतो नैवमिति शङ्कायामाहुः अन्यथेत्यादि। राजसादिभिरिति। कर्तृभिः साधनैश्च क्रियमाण इति शेषः॥ ६॥ ❀ ❀ अस्यामित्यत्र। तदुपपादितं प्रथमश्लोके इति। 'जन्माद्यस्ये'ति श्लोके 'यथा हि वेदे यज्ञीया' इत्यारभ्य 'भागवतसंहिते'त्यन्तेनोपपादितमित्यर्थः। इतः प्रथमश्लोके वा। कृष्ण इत्यादिपदद्वयव्याख्यानेनोत्तममध्यमप्रथमाधिकारिणां भक्तिविषय उक्तो ज्ञेयः। स्वतन्त्रस्येति। इदं 'पुंस' इत्यस्य व्याख्यानम्। स्वातन्त्र्यं चात्र देवतान्तरे साधनान्तरे च निश्चाराहित्यं बोध्यम्॥ ७॥ ❀ ❀ स संहितामित्यत्र। अन्यव्यावृत्त्यर्थ इति। संहितान्तरपाठनादिव्यावृत्त्यर्थः। अनुक्रमेण शोधयित्वेति। यथाक्रममुक्तानुक्तदुरुक्तचिन्तां कृत्वा। अयं पक्षः श्रीधरोक्तः। अस्मिन् पक्षे समाधेः सदोषत्वमायातीत्यरुच्या पक्षान्तरमाहुः आनुपूर्व्येण वेति। समाधौ क्रियमाणे सर्वा लीला युगपदेव भाता इति पूर्वं भानानुसारेणोक्त्वापि पश्चाद्यथास्थानं तन्निबन्धनं आनुपूर्व्यं तत्कृत्वेत्यर्थः। पाठनं तु द्वादशानामपि स्कन्धानां भाति। आरम्भे एव 'शुकमुखादमृतद्रवे'ति कथनात् समाप्तौ सूतेनापि 'कस्मै येने'ति श्लोके 'योगीन्द्राय तदात्मना च भगवद्राताये'ति कथनाच्च। लोकानुवर्तीति। चेदिति शेषः॥ ८॥

श्रीगिरिधरकृता बालप्रबोधिनी

नन्वनर्थनिवृत्त्युपायप्रदर्शनार्थं प्रवृत्तेन व्यासेन तदुपायदर्शनस्यैवोचितत्वात् मायादर्शनं किमर्थमित्याशङ्क्य यथा रोगकारणज्ञानं विना तदौषधविधानमशक्यं तथा सर्वानर्थमूलमायाज्ञानं विना तन्निवृत्त्युपायविधानमप्यशक्यमिति मायादर्शनं युक्तमेवेति सूचयन्नाह-ययेति। यया मायया सम्मोहितः स्वरूपावरणेन विक्षिप्तो जीवः परोऽपि वस्तुनो मायागुणत्रयात् व्यतिरिक्तोऽपि आत्मानं त्रिगुणात्मकं गुणत्रयकार्यभूतं देहेन्द्रियादिरूपं मनुते देवोऽहं मनुष्योऽहं पश्याम्यहं काणोऽहं सुख्यहं

बुभुक्षितोऽहमित्यादिव्यवहारस्य प्रसिद्धत्वात् । तत्कृतं देहाद्यात्माभिमानकृतमनर्थं पुण्यपापजन्ममरणादिद्वारा आध्यात्मिकादितापत्रयं चाभिपद्यते प्राप्नोति ॥ ५ ॥ ❀ ❀ अनर्थोपशमं अनर्थनिवर्त्तकं च अधोक्षजे लौकिकेन्द्रियजन्यज्ञानागोचरे भगवति साक्षाद्भक्तियोगमपश्यदित्यनुषङ्गेणान्वयः । तत्तत्फलाभिसन्धिना कृतस्य भक्तियोगस्य तत्तत्फलहेतुत्वेन अनर्थोपशामकत्वाभावात् साक्षादित्युक्तम्, फलापेक्षारहितमित्यर्थः । एतत्सर्वं स्वयं दृष्ट्वाऽतः स्वयं विद्वान् जानन् । एतदजानतो लोकस्योपकाराय सात्त्वतसंहितां श्रीभागवताख्यां चक्रे इत्यन्वयः । अनेन श्लोकत्रयेण विद्याशक्त्या मायानियन्ता नित्याविर्भूतपरमानन्दस्वरूपः सर्वज्ञः सर्वशक्तिः परमेश्वरः तन्मायया सम्मोहितस्तिरोभूतस्वरूपानन्दस्तद्विपरीताज्ञत्वादिधर्मो जीवः, तस्य च भगवद्भक्त्या मायानिवृत्त्या मोक्ष इति संक्षेपतो भागवतार्थो दर्शितः । क्वचिदेतद्विरुद्धवाक्यं तु मतान्तरेणाऽनुवादमात्रमित्यनुसन्धेयम् ॥ ६ ॥ ❀ ❀ भक्तेरेवानर्थनिवर्तकत्वात् संहिताकरणेन किमित्यत आह–यस्यामिति । वा इत्यवधारणे । यस्यां भागवतसंहितायां श्रूयमाणायामेव पुंसां वर्णाश्रमादिहीनानामपि कृष्णे भक्तिरुत्पद्यते इत्यन्वयः । भक्तेः प्रभावमाह–शोकेत्यादि । कथमेवं तत्प्रभाव इत्यपेक्षायां श्रीकृष्णस्य सर्वोत्कृष्टत्वादित्यभिप्रेत्य कृष्णं विशिनष्टि–परमपूरुषे इति । शोकमोहभयापहेत्यनेन ज्ञानवैराग्यसाहित्यं भक्तेर्लक्ष्यते । 'वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ ज्ञानं यत्तदधीनं वै भक्तियोगसमन्वितम् ।' भक्तिः परेशानुभवो विरक्तिरेष त्रिक एककालं भवति । 'तरति शोकमात्मवित्' । 'भयं द्वितीयाभिनिवेशतः स्यात्' इत्यादिवाक्येभ्यस्तथा निश्चयात् । अत्र श्रूयमाणायामेव यदि भक्तिरुत्पद्येत तदा किं पुनः श्रुतायां किन्तरां कीर्त्यमानायां किन्तमां कीर्तितायामित्याद्युत्तरोत्तरं कैमुत्यन्यायो दर्शितः ॥ ७ ॥ ❀ ❀ एवं श्रीभागवतोत्पत्तिमुक्त्वा तत्प्रचारमाह–स इति । स व्यासो भागवतीं संहितां कृत्वा समाधौ तावद् दृष्ट्वा लीलादर्शनानुसारेण लिखित्वा ततोऽनुक्रम्य च आनुपूर्व्येण यथाख्यानक्रमेण विन्यस्य च शुकमध्यापयामासेत्यन्वयः । लोके हि सर्वत उत्तमं वस्तु पित्रा पुत्राय दीयते । पुत्राध्यापनाच्चास्य पुराणादिशास्त्रान्तरादुत्तमत्वमिति सूचयन्नाह–आत्मजमिति । ननु शुकस्याऽऽत्मजत्वेऽपि यदि तस्यानधिकारित्वं तदा तदध्यापनमनुचितमेव स्यादित्याशङ्क्य निवृत्तिनिरतत्वात् स एव मुख्योऽधिकारीत्याशयेनाह–निवृत्तिनिरतमिति । एतत्संहिताकरणेऽधिकारिपरीक्षणे च तस्य सामर्थ्यमस्ति मननशीलत्वादित्याशयेनाह–मुनिरिति ॥ ८ ॥

हिन्दी अनुवाद

इसी मायासे मोहित होकर यह जीव तीनों गुणोंसे अतीत होनेपर भी अपनेको त्रिगुणात्मक मान लेता है और इस मान्यताके कारण होनेवाले अनर्थोंको भोगता है ॥ ❀ ❀ इन अनर्थोंकी शान्तिका साक्षात् साधन है–केवल भगवान्का भक्तियोग । परंतु संसारके लोग इस बातको नहीं जानते । यही समझकर उन्होंने इस परमहंसोंकी संहिता श्रीमद्भागवतकी रचना की ॥ ६ ॥ ❀ ❀ इसके श्रवणमात्रसे पुरुषोत्तम भगवान् श्रीकृष्णके प्रति परम प्रेममयी भक्ति हो जाती है, जिससे जीवके शोक, मोह और भय नष्ट हो जाते हैं ॥ ७ ॥ ❀ ❀ उन्होंने इस भागवत-संहिताका निर्माण और पुनरावृत्ति करके इसे अपने निवृत्तिपरायण पुत्र श्रीशुकदेवजीको पढ़ाया ॥ ८ ॥

शौनक उवाच

स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः । कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥

सूत उवाच

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥ १० ॥
हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः । अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ११ ॥
परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम् । संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कस्य वा हेतोः । बृहतीं वितताम् ॥ ९ ॥ ❀ ❀ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः । तदुक्तं गीतासु–"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इति यद्वा ग्रंथिरेव ग्रंथः, निवृत्तहृदयग्रंथय इत्यर्थः । ननु मुक्तानां किं भक्त्येत्यादिसर्वाक्षेपपरिहारार्थमाह–इत्थंभूतगुण इति ॥ १० ॥ ❀ ❀ ननु भक्तिं कुर्वंतु नाम, एतच्छास्त्राभ्यासे शुकस्य किं कारणमिति । अत आह–हरेरिति । अध्यगात् अधीतवान् । विष्णुजनाः प्रियाः यस्येत्यर्थः । व्याख्यानादिप्रसंगेन तत्संगतिकाम इति भावः । एतेन "तस्य पुत्रो महायोगी" इत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तम् ॥ ११ ॥ ❀ ❀ यदन्यत्पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति "तस्य जन्म महाश्चर्यम्"

इत्यादिना तस्योत्तरं वक्तुमाह–परीक्षित इति । विलायनं मुक्तिं मृत्युं वा । संस्थां महाप्रस्थानम् । श्रीकृष्णकथानाम् उदयो यथा भवति तथा ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स शुकः उपेक्षत औदासीन्येन वर्त्तत इत्युपेक्षकः । ग्रंथेभ्य इत्युक्ते ॥ ९ ॥ ❀ ❀ श्रीभागवतस्यापि हेयत्वं प्रसक्तमित्यत आह–यद्वेति । इत्यर्थ इति । "भिद्यते हृदयग्रंथिः" इत्युक्तेरयं भावः । अत्राक्षिपति–नन्विति । यद्वा निर्ग्रंथा विधिनिषेधग्रंथातीता इति । तदुक्तं "चरेदविधिगोचरः" इति । ननु मुक्तानां किं भक्त्या, निर्ग्रंथानां किं भक्तिग्रंथेन श्रीभागवतेन, निरभिमानानां किं पुनः सेव्यसेवकलक्षणाभिमानेन, विधिनिषेधातीतानां किं पुनः श्रीभागवतोक्तेन भक्तेर्विधिनेत्यादि–सर्वाक्षेपपरिहारार्थमाह–इत्थंभूता आत्मारामाणामप्याकर्षणशीला गुणा यस्य सः । तेन मूलत एव भक्तिप्राधान्याभ्यासेन वा मद्गुणानुभव एषामस्त्विति सनकादिषु भगवत्कृपयैव श्रीकृष्णगुणानुभवो मत्सुतस्यास्त्विति श्रीशुके व्यासस्येव भगवतो भक्तानां वा कृपया यैरात्मारामैस्तद्गुणानुभवयोग्यता लब्धा त एवाहैतुकीं भक्तिं कुर्वंति । अन्ये त्वात्मारामाः सायुज्यार्थां भक्तिं कुर्वंतीत्यहैतुकीपदव्यावृत्तिरनुसंधेया । तदुक्तं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति ॥ १० ॥ ❀ ❀ अत्राशंकते–नन्विति । इति भाव इति । "संसारेऽस्मिन्क्षणार्द्धोऽपि सत्संगः शेवधिर्नृणाम्" इत्येकादशोक्तेः । सत्समाजो हि विना शास्त्रश्रवणाद्यर्थं न भवतीत्याशयः । श्रीभगवदाज्ञया वै तच्छास्त्रमधीतवांस्तदुक्तं नारदपुराणे सनत्कुमारेण नारदाय सुमेरुपर्वते "आकल्पांतं तपःसंस्थौ नरनारायणावृषी । तयोर्निदेशतो व्यासो जनकस्तव सुव्रत ॥ कर्त्ता भागवतं शास्त्रं तदधीष्व भुवं व्रज । स तप्यति तपस्तव्र पर्वते गंधमादने । त्वद्वियोगेन खिन्नात्मा तं प्रसादय मत्प्रियम् ॥ एवमुक्तः शुको विप्रं नमस्कृत्य चतुर्भुजम् । यथागतो निवृत्तोऽसौ पितुरंतिकमागतम् ॥ पुत्रं प्राप्य प्रहृष्टात्मा नारायणनियोगतः । चकार संहितां दिव्यां नानाख्यानसमन्विताम् ॥ वेदतुल्यां भागवतीं हरिभक्तिविवर्द्धिनीम् । निवृत्तिनिरतं पुत्रं शुकमध्यापयच्च ताम् ॥ त्वन्मुखेन समावाप्तामष्टादशसहस्रिकाम् ॥" इति । अत्र विश्वनाथः–नारदकृपया व्यासस्येव व्यासकृपया शुकस्यापि तद्गुणमाधुर्यानुभवो विशेषत एवाभूदित्याह-हरेरिति । हरेर्गुणेनाक्षिप्ता आक्षेपविषयीकृता मतिर्ब्रह्मानंदो येन सः 'धिङ् मे मतिर्यत ईदृशे भगवद्गुणमाधुर्ये सत्यपि एतावान्कालो ब्रह्मानुभवेन मया वृथैव यापित' इति । ततश्च तत्कथासौहार्देन विष्णुजना एव । न तु केवला आत्मारामाः प्रिया यस्य सः षष्ठीसमासो वा । अत्र व्यास एव भगवद्गुणाभिव्यंजकाञ्छ्रीभागवतीयान्कांश्चन श्लोकाँल्लोकद्वारा विविक्तारण्ये सदा समाधिस्थमपि शुकं श्रावयामास । ततस्तच्छ्रुत्यैव भग्नसमाधिस्तन्माधुर्याकृष्टचित्तस्तादृशं समाधिमप्याक्षिप्य सर्वज्ञतया ताञ्छ्लोकाञ्छ्रीभागवतीयाञ्ज्ञात्वा तत्प्रकाशकं च स्वपितरं ज्ञात्वा तदंतिकमागत्य श्रीभागवतमध्यैष्टेति ब्रह्मवैवर्त्तानुसारेण कथा ज्ञेया । तदेवं व्यासशुकौ पितापुत्रौ ब्रह्मानुभविचूडामणी अपि विजित्य भक्तिरेकच्छत्रामिव सर्वजगतीं चक्रे । तदपि ये तां तथा न मन्यंते कुपथगामिनश्चौरास्ते यमेनैव दंड्या इति । संदर्भस्तु–तमेवार्थं श्रीशुकस्याप्यनुभवेन संवादयति हरेरिति । श्रीव्यासादेव श्रुतेन यत्किंचिद्गुणेनाक्षिप्ता मतिर्ब्रह्मानंदानुभवो यस्य स पश्चादध्यगात् । महद्विस्तीर्णमपि । ततश्च तत्सत्कथासौहार्देन नित्यं विष्णुजनाः प्रिया यस्य तथाभूता वा तेषां प्रियो वा स्वयमभवमित्यर्थः । अयं भावः–ब्रह्मवैवर्त्तानुसारेण पूर्वं तावदयं गर्भमारभ्य श्रीकृष्णस्य स्वैरितया मायानिवारकत्वं ज्ञातवान् । ततः स्वनियोजनया श्रीव्यासदेवेनानीतस्य तस्य दर्शनात्तन्निवारणे सति कृतार्थमन्यतया स्वयमेकान्तमेव गतवांस्तत्र श्रीव्यासदेवस्तं वशीकर्त्तुं तदनन्यसाधनं श्रीभागवतमेव ज्ञात्वा तद्गुणातिशयप्रकाशमयांस्तदीयपद्यविशेषान्कथंचिच्छ्रावयित्वा तेनाक्षिप्तमतिं कृत्वा तदेव पूर्णमध्यापयामासेति श्रीभागवतमहिमातिशयः प्रोक्तः ॥ ११ ॥ ❀ ❀ विलापनं विपूर्वाल्लिपेर्ण्यंताल्ल्युट् । श्रीभागवतकथावाचनमित्यर्थः । कृष्णकथोदयमित्यनेन श्रीभागवतस्य तत्रैव तात्पर्यात् । किञ्चानेन मुख्यतया तेन पृष्टानां कृष्णकथानामारंभोऽपि सूचितः ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

तत्र लब्धावसरः पृच्छति शौनकः स इति । वा इत्यवधारणे, निवृत्तिनिरतः मुनिरत एव सर्वत्र श्रोतव्येष्वध्येतव्येषु चोपेक्षकः आदररहितः आत्मारामः परमात्मैकपरः एवंविधः कस्य वा हेतोरिति शेषः । कस्माद्धेतोर्बृहतीं विपुलामेतां संहितामभ्यसदधीतवान् कथमेकाग्रचित्तो भगवन्मननपरस्तद्विरोधिनीमेतां बृहतीं संहितामभ्यसदिति प्रश्नाशयः ॥ ९ ॥ ❀ ❀ नेयं संहिता भगवन्मननविरोधिनी प्रत्युत तदुपयुक्तभगवत्स्वरूपगुणविवरणरूपत्वादतोऽधीतवानित्युत्तरं वक्तुं तद्भक्तेः स्वरूपगुणविषयकतामाह सूत आत्माराम इति । यद्यपि मुनय आत्मारामाः परमात्मैकनिष्ठा अत एव निर्ग्रंथाः लौकिकार्थप्रबंधधारणरहिताः । अनिर्ग्राह्या इति पाठे अशिक्षणीया अपरप्रेक्षा इत्यर्थः । तथापि ते उरुक्रमे भगवत्यहैतुकीमनन्यप्रयोजनां भक्तिं कुर्वंति । सविषयाया भक्तेः स्वरूपमाह इत्थमिति । इत्थंभूता एवंविधा गुणाः यस्यां तथाविधो हरिरिति एवंविधां भक्तिं कुर्वंतीत्यन्वयः–हरिरेवं विविध-

गुणकचित्स्वरूपक इति समनुध्यानात्मकत्वाद्भक्तेस्तत्र भजनीयस्वरूपगुणविषयकज्ञानस्यापेक्षितत्वात्तद्विवरणरूपामिमां संहिताम-धीतवानिति भावः ॥ १० ॥ ❀ ❀ तदेवाह। हरेरिति हरेर्गुणैर्वेदांतेभ्योऽवगतैरनुभूयमानैर्गुणैराक्षिप्ता आकृष्टा मतिर्यस्य स भगवान् बादरायणिः शुकः 'नित्यं विष्णुजनप्रियः' अहर्दिवमाख्यानमध्यगादधीतवान् हरेरिति हरेर्गुणाक्षिप्तमतिः विष्णुजनप्रिय इतीदं विशेषणद्वयं हेतुगर्भं विष्णोर्जना भक्ताः प्रिया यस्येति बहुव्रीहिः। अयं भावः-यद्यपिभगवद्गुणा वेदान्तेभ्योऽवगता-स्तथापि "स्वाध्यायाद्योगमासीत योगात्स्वाध्यायवान् भवेदि"त्युक्तरीत्या भगवद्गुणप्रतिपादकप्रबंधसंशीलनस्यावश्यापेक्षितत्वा-त्कार्त्स्न्येनास्य प्रबंधस्य भगवद्गुणप्रतिपादकत्वात्सावतारतद्गुणकसविभूतिकसभक्तिकतद्गुणभगवतोऽस्यैवानुभाव्यत्वादवतारतद्गु-णानां विशिष्य वेदान्तेभ्योऽवगतानां वेदांतावगतगुणेभ्योप्यतिशयितानामस्मादाख्यानादवगमादिदमध्यगादिति। अनेन प्रबंधप्राशस्त्यं सूचितम् ॥ ११ ॥ ❀ ❀ तदेवं कस्मिन्युगे प्रवृत्तेयमित्यादिप्रश्नानामुत्तरमुक्तम् अथ तस्य पुत्रो महायोगीत्यादिप्रश्नस्योत्तरं विवक्षि-ष्यंस्ताव "दभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम्। तस्य जन्ममहाश्चर्यं कर्माणि च गृणीहि न"इत्यादिप्रश्नानामुत्तरं सोपोद्घातं वक्तुं प्रतिजानीते परीक्षित इति। परीक्षितो राजर्षेर्जन्मकर्माणि विलायनं विलयं च तेषां समाहारः तदुपोद्घातरूपपांडुपुत्राणां संस्थानं स्थितिवृत्तांतमिति यावत् तदेतत्सर्वं कृष्णस्य भगवतः कथाया उदय अनुप्रसक्तिरस्मिंस्तद्वक्ष्ये। संस्थां च कृष्णकथोदयामिति च पाठांतरं, तदा कृष्णकथोदयामिति संस्थाविशेषणं संस्थाशब्दस्य यथोक्त एवार्थः। तत्र पांडुपुत्राणां संस्थां परीक्षिज्जन्मकर्माद्युपोद्घात-रूपां परीक्षिज्जन्मकर्मादिकं त्वितः प्रभृतिप्रधानप्रतिपाद्यं, तदुभयानुप्रसक्ता कृष्णकथा। सर्वोऽयं स्कंधः कृष्णप्रबंधोपोद्घातरूप इति विवेकः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

अविद्वानिव शौनकश्चोदयति स वा इति। आत्मनि रमत इत्यात्मारामो मुनिः सर्वज्ञो मौनी वा अत एव सर्वत्र शिष्य-संग्रहणादावुपेक्षक उदासीनबुद्धिर्निवृत्तिनिरतः शुकः कस्य फलस्यार्थे बृहतीं महतीमेतां समभ्यसद्वा इत्यन्वयः। चतुर्षु पुरुषार्थेषु कस्य पुरुषार्थस्येति विकल्पार्थो वाशब्दः, शुक-गताविति धातोः परब्रह्मण्यव्याहतबुद्धिगतित्वाच्छुकः ॥ ९ ॥ ❀ ❀ परि-हरतीत्याह आत्मारामा इति। चशब्दोऽप्यर्थे। आत्मारामाः स्वरूपसुख एव रममाणा अप्यत एव निर्ग्रन्था निरुपादेयाः मुनयः उत्तमाधिकारिणः उरुक्रमे उरवः क्रमाः पादविक्षेपाः यस्य स तथा, तस्मिन् अहैतुकीं प्रयोजनविधुरामानंदरूपां भक्तिं कुर्वंतीति किं वर्णनीयमित्येकान्वयः। इत्थंभूतगुणः निरपेक्षमुक्तमनोवशीकरणक्षमः किमुतामुक्तमनोवशीकरणक्षमगुण इति वाच्यमिति भावः ॥ १० ॥ ❀ ❀ अतः शुकेन भागवताभ्यसनं कृतमित्याह हरेरिति। हरेरतिशयज्ञानानंदादिगुणैराक्षिप्ता आकृष्टा मतिर्यस्य स तथोक्तः। बादरायणसुतो भगवान् नित्यं भागवतजनहृदयंगमं महदाख्यानं आख्यायते भगवन्महिमाऽनेनेत्याख्यानं भागवत-पुराणमध्यगादन्यांश्चाख्यापयामास चेत्येकान्वयः ॥ ११ ॥ ❀ ❀ कस्मिन् युग इत्यादिशौनकप्रश्नं परिहरतीत्याह परीक्षित इति। अथ परीक्षितो राजर्षेर्जन्म कर्म विलापनं मरणं वक्ष्ये। तदर्थे प्रथमतः पांडुपुत्राणां संस्थां स्वर्गारोहणं युद्धादुपरितनमहा-भिषेकादिमहाप्रस्थानांतां संस्थां स्थितिं च वक्ष्ये, कीदृशीं संस्थां कृष्णकथाया उदयो यस्यां सा तथोक्ता ताम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तमेतं श्रीवेदव्यासस्य समाधिजातानुभवं श्रीशौनकप्रश्नोत्तरत्वेन विशदयन् सर्वात्मानुभावेन सहेतुकं संवादयति आत्मा-रामाश्चेति। निर्ग्रन्था: विधिनिषेधातीताः। निर्गताऽहंकारग्रन्थयो वा अहैतुकीं फलाभिसन्धिरहिताम्। इत्थमिति आत्मारामाणा-मप्याकर्षणस्वभावो गुणो यस्य स इत्यर्थः ॥ १० ॥ ❀ ❀ तमेवार्थं श्रीशुकस्याप्यनुभवेन संवादयति हरेरिति। श्रीव्यासादेव यत्किञ्चित् श्रुतेन गुणेन पूर्वमाक्षिप्ता मतिर्ब्रह्मानन्दानुभवो यस्य सः पश्चादध्यगात्। महद्विस्तीर्णमपि ततश्च तत् सत्कथासौहार्देन नित्यं विष्णुजनाः प्रिया यस्य तथाभूतो वा तेषां प्रियो वा स्वयमेवाभवदित्यर्थः। अयम्भावः-ब्रह्मवैवर्त्तानुसारेण पूर्वं तावदयं गर्भमारभ्य श्रीकृष्णस्य स्वैरितया मायानिवारकत्वं ज्ञातवान्। ततः स्वनियोजनया श्रीव्यासदेवेनानीतस्य तस्य दर्शनात् तन्निवारणे सति कृतार्थम्मन्यतया स्वयमेकांतमेव गतवान्। तत्र श्रीव्यासदेवस्तु तं वशीकर्त्तुं तदन्यसाधनं श्रीभागवतमेव ज्ञात्वा तद्गुणा-तिशयप्रकाशमयांस्तदीयपद्यविशेषान् कथञ्चिच्छ्रावयित्वा तेनाक्षिप्तमतिं कृत्वा तदेव पूर्णमध्यापयामासेति श्रीभागवतमहिमातिशयः प्रोक्तः ॥ ११ ॥ ❀ ❀ कृष्णकथानामुदयो यत्र तद्यथा भवतीति मुख्यतया तेन पृष्टानां कृष्णकथनारम्भोऽपि सूचितः ॥ १२-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कस्य वा हेतोः ॥ ९ ॥ ❀ ❀ निर्ग्रन्था जिज्ञासितग्रन्थेभ्यो निर्गताः। यदुक्तं "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इति। यद्वा ग्रन्थिरेव ग्रन्थः, निर्गताहंकारग्रन्थयः, यदुक्तं "भिद्यते हृदयग्रन्थि-

रिति" । यद्वा विधिनिषेधग्रन्थातीताः । यदुक्तं 'चरेदविधिगोचरः' इति तथाभूतामपि अहैतुकीं फलाभिसन्धिरहितां भक्तिं कुर्वंति । भक्त्या ज्ञानं ज्ञानान्मुक्तिः ततोपि भक्तिरित्युरुः श्रेष्ठः एव क्रमो यस्मिन् तस्मिन् । ननु मुक्तानां किं भक्त्या निर्ग्रन्थानां किं भक्तिग्रन्थेन श्रीभागवतेन निरभिमानानां किं पुनः सेव्यसेवकलक्षणेनाभिमानेन विधिनिषेधातीतानां किं पुनः श्रीभागवतोक्तेन भक्तेर्विधिनेत्यादिसर्वाक्षेपपरिहारार्थमाह । इत्थंभूतः आत्मारामाणामप्याकर्षणशीलो गुणो यस्य सः । तेन मूलत एव भक्तिप्राधान्याभ्यासेन वा भगवद्गुणानुभव एषामस्त्विति सनकादिषु भगवत्कृपैव श्रीकृष्णगुणानुभवो मत्सुतस्यास्त्विति श्रीशुके व्यासस्येव भगवतो भक्तानां वा कृपया यैरात्मारामैस्तद्गुणानुभवयोग्यता लब्धा त एवाहैतुकीं भक्तिं कुर्वंति । अन्ये त्वात्मारामाः सायुज्यार्थं भक्तिं कुर्वंतीत्यर्थः, अहैतुकीपदव्यावृत्तिरनुसंधेया-यदुक्तं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमि"ति ॥ १० ॥ ❀ ❀ नारदकृपया व्यासस्येव व्यासकृपया शुकस्यापि तद्गुणमाधुर्यानुभवो विशेषत एवाभूदित्याह हरेरिति । हरेर्गुणेन आक्षिप्ता आक्षेपविषयीकृता मतिर्ब्रह्मानुभवो येन सः, 'धिङ् मे मतिं यत ईदृशे भगवद्गुणमाधुर्ये सत्यपि एतावान् कालो ब्रह्मानुभवेन मया वृथैव यापितः' इति । ततश्च तत्कथासौहार्देन विष्णुजना एव न तु केवला आत्मारामाः प्रिया यस्य सः षष्ठीसमासो वा । अत्र व्यास एव भगवद्गुणाभिव्यञ्जकान् श्रीभागवतीयान् कांश्चन श्लोकान् श्लोकद्वारा विविक्तारण्ये सदा समाधिस्थमपि शुकं श्रावयामास । तत्स्थतच्छक्त्यैव भग्नसमाधिस्तन्माधुर्याकृष्टचित्तस्तादृशं समाधिमप्याक्षिप्य सर्व्वज्ञतया तान् श्लोकान् श्रीभागवतीयान् ज्ञात्वा तत्प्रकाशकञ्च स्वपितरं ज्ञात्वा तदन्तिकमागत्य श्रीभागवतमध्यैष्टेति ब्रह्मवैवर्त्तानुसारेण कथा ज्ञेया । तदेवं व्यासशुकौ पितापुत्रौ ब्रह्मानुभविचूडामणी अपि विजित्य भक्तिरेकच्छत्रामिव सर्व्वजगतीं चक्रे । तदपि ये तां तथा ते मन्यन्ते कुपथगमिनश्चौरा यमेनैव दण्ड्या इति ॥ ११ ॥ ❀ ❀ एतेन तस्य पुत्रो महायोगीत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं यदन्यत् पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति तस्य जन्ममहाश्चर्यमित्यादिना तस्योत्तरमाह परीक्षित इति । विलापनं मृत्युं यद्वा लपेर्ण्यन्ताल्ल्युट् श्रीभागवतकथावाचनमित्यर्थः । संस्था महाप्रस्थानं कृष्णकथानामुदयो यत्र तद्यथा स्यादिति श्रीभागवतस्य तत्रैव तात्पर्यात् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वत्रोपेक्षक; सर्वाध्ययनाध्यापनशून्यः कस्य हेतोः ॥ ९ ॥ ❀ ❀ आत्मारामाः परमात्मध्याननिष्ठाः ध्यानविरुद्धेभ्यो ग्रन्थेभ्यो निर्गता अपि उरुक्रमे तु भक्तिं ध्यानादिरूपां कुर्वन्त्येव । भक्तिस्वरूपयाथात्म्यबोधार्थं भक्तिबोधिनी संहिता निवृत्तिनिरतैरवश्यमुपादेयेति भावः । 'यस्यां वै श्रूयमाणायां कृष्णे परमपुरुषे । भक्तिरुत्पद्यते' इति प्रागुक्तेः इत्येकः संहिताध्ययने हेतुरुक्तः । अथैवंभूतभगवत्प्रतिपादकं ग्रन्थं निवृत्तो वा कः शरणं व्रजेदिति हेत्वन्तरमाह । इत्थंभूतगुणो हरिरिति ॥ १० ॥ ❀ ❀ द्वितीयं हेतुं विवृणोति । हरेर्गुणाक्षिप्तमतिर्महदाख्यानमध्यगादधीतवानिति । हेत्वन्तरगर्भं विशेषणमाह-नित्यं विष्णुजनप्रिय इति । विष्णुजनसंगतिसिद्धयेपि महदाख्यानमध्यगात् ॥ ११ ॥ ❀ ❀ तदित्थं "कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुने"त्यादिप्रश्नानामुत्तराण्युक्तानि । संप्रति तस्य पुत्रो महायोगीत्यादिप्रश्नोत्तरं वक्ष्यन् ताव'दभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् । तस्य जन्ममहाश्चर्यं कर्माणि च गृणीहि नः ॥' इति यत्पृष्टं तदुत्तरं वक्तुमाह परीक्षित इति । जन्मकर्माणि च विलायनं भगवत्प्राप्तिश्च तेषां समाहारस्तत् कथंभूतं कृष्णकथोदयम् । कृष्णकथानां भक्तपरित्राणादिरूपाणामुदयो यस्मात्तत् भगवदावेशेन सर्वपरित्यागपूर्वकशरीरविसर्ज्जनरूपां संस्थां चकारेण भगवत्प्राप्तिं वक्ष्ये । लिंगव्यत्ययेन कृष्णकथोदयां संस्थामित्येवं योज्यम् ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

कदाचिदपि प्रवृत्तिस्वभावत्वे तद्दोषेण संबंधात् न भक्तिजनिका स्यात्, विषयावेशविष्ण्वावेशयोर्विरोधात् एवञ्च मननादवगतमिति विचारेण ततः प्रतिपन्नं तदाह । मुनिरिति ॥ ८ ॥ ❀ ❀ ननु भागवतस्य विषयपरत्वे सति नाधिकार इति निवृत्तिनिरतो योजितः स च न भागवतार्थं तथाविधः, किंतु ज्ञानार्थमिति तथा सति ज्ञाने प्रवृत्तिमात्रस्यैव बाधकत्वात् यथा लौकिकी प्रवृत्तिस्त्याज्या तथा भक्तिमार्गानुसारिणी भागवतप्रवृत्तिरपि । तथा च व्यासः स्वकार्यानुरोधेन यद्यपि शुकं योजयति तथापि स कथं स्वकार्यविरोधे प्रवर्तेतेति पृच्छति स वै निवृत्तिनिरत इति । भागवतस्य पाठः प्रवृत्तिरूपः येनोपनयनवेदाध्ययनं नित्यमपि परित्यक्तं निवृत्तावेव नियतत्वात् । न च पितुर्भगवतो वानुरोधात् पठतीति वाच्यं, फलतो वा स्वरूपतो वा तदुपकारानपेक्षणात् । यद्यपि ईश्वरगुरूपकाररूपं ज्ञानमपेक्षते तथापि ज्ञानबाधकप्रवृत्तिरूपोपकारं नापेक्षते । तदाह-सर्वत्रोपेक्षक इति न च भ्रमाद् ज्ञानसाधनत्वेन भागवतपाठ इति तत्राह मुनिरिति । मननमेव हि साक्षात्कारे एकवाक्यतयोक्तम् । अतः संभावितहेतूनामभावात् कस्य वा हेतोः बृहतीं स्वरूपतोऽर्थतश्च भावसहितार्थावबोधपूर्वकस्वाधीनोच्चारणपर्यंतं कथमभ्यसत् ? न च कौतुकाविष्टचित्तः, आत्मारामत्वात् ॥ ९ ॥ ❀ ❀ यत्रोत्तरमाह आत्मारामाश्चेति । कौतुकसाधनाविद्यानिवर्त्तकत्वेन अन्यथासिद्धिर्नास्तीति

विशेषणत्रयम् । चकारादन्यैर्न क्रियत इति न, किंतु तेपि कुर्वंतीत्यलौकिकत्वम् । अपिशब्दात् भक्तिमार्गेस्थिताः मार्गांतरस्थस्तु वैक्लव्याभावात् प्रचारणसमर्थ इति स योजितः न तु मार्गस्थाभावात् निवृत्तितात्पर्याच्च उरुक्रम इति अलौकिकीं भक्तिं कुर्वंतीत्यनुवादः । तत्रोपपत्तिः-इत्थम्भूतगुणो हरिरिति, भगवद्गुणाः प्रवृत्तिरूपा निवृत्तिस्वभावाः परमानंदरूपाश्च ज्ञानरूपाश्च तस्माद्यः कश्चित् यत्र कुत्रचित् आसक्तो भगवद्गुणेषु रमत एव सर्वप्रतिकृतिरूपत्वात् गुणानां ज्ञानवशीकरणस्वभावाच्च ॥ १० ॥ ❀ ❀ नन्वस्तु भगवद्गुणानां तादृशत्वं ग्रंथे किमागतमित्यत आह हरेर्गुणाक्षिप्तमतिरिति । गुणानामनुपनिबद्धानां स्वबुद्ध्या स्मरणकल्पनया क्लेशः । उपनिबंधने तु सिद्धत्वात् सुलभं स्मरणमिति भगवद्गुणैर्वशीकृतमतिः सन् आक्षेपान्नान्यत्र वृत्तिः मतिरिति फलं गृहीतं तेनान्यत्र विषयेंद्रियसंयोगेऽपि न व्युत्पत्तिरिति भावः । एतज्जीवविचारेणोक्तं, वस्तुतस्तु शुको महादेवः तदाह भगवानिति । कृतिप्रवृत्त्यर्थं विष्णुर्महादेवश्चावतीर्णाविति तदाह बादरायणिरिति, अतो महदप्याख्यानमधीतवान् । नन्वनाहूतः स्वयं गत्वा कथं प्रचारितवान् तत्राह नित्यं विष्णुजनप्रिय इति । नित्यं विष्णुजनप्रिया यस्य कामः कामिनीमिव भगवद्गुणाः स्वप्रतिष्ठार्थं भक्तं प्रापयंति, अतः सर्वदा ये भगवद्भक्ताः अकृत्रिमनित्यवैष्णवास्ते प्रिया यस्येति न हि स्नेहः संगे हेत्वंतरमपेक्षते ॥ ११ ॥ ❀ ❀ एवं भागवतस्योत्पत्तिप्रवृत्ती निरूप्य श्रोतुः सर्वथा भगवदीयत्वाभावे न प्रतिष्ठितं भवेदिति गर्भसंस्कारमारभ्य भगवतैव स्वतेजः परिपालितमिति वक्तुं पूर्वरूपस्य ब्रह्मास्त्रेण दाहं निरूपयितुं तादर्थ्यमपि वैष्णव एवेति तेषां पांडवानां संतत्यन्तरस्य दाहं निरूपयन् प्रजा तस्य दाहहेतुमाह परीक्षितोऽथेत्यारभ्य यावदध्यायसमाप्ति । अश्वत्थाम्नो महदपमानं हेतुः पुत्रांतरदाहस्तूभयत्र संरक्षायामपमानेन अपृष्टं नोच्यत इति पृष्टमनूद्य प्रतिजानीते परीक्षित इति । अथ भागवतनिरूपणानंतरं तच्छ्रोतुः परीक्षितः बीजसंस्कारार्थं जन्मकर्मधर्मरक्षा भगवत्कार्यकरणात् विलायनं भागवतश्रवणार्थं पुरुषत्रयशुद्ध्यर्थं अप्रतिबंधार्थं च संस्थां पांडुपुत्राणां प्रथमत एव चकारात् धृतराष्ट्रस्यापि मुक्तत्वान्न सहोक्तिः, प्रतिबंधकत्वं भ्रातॄणामेकजातानामित्यभिप्रायेण मुक्तावप्यतिदेशाच्चकारेण ग्रहणम् । अत एव पांडुपुत्राणामित्युक्ते पांडवानां कृष्णकथाप्रतिपादकत्वादेतेषां वचनम् । अन्यथा त्वसंगतिः तदाह कृष्णकथेति । कृष्णकथाया उदयो यत्रेति । न हीयं भगवतः स्वतश्चरितरूपा किंतु नैमित्तिकी, अतो हेतुनिमित्तं स्वरूपोपकारिहेतुरिति तन्निरूप्यत इति भावः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

स वा इत्यत्र । उक्तमिति । मन्तव्य इति श्रुतौ हेतुत्वेनोक्तमित्यर्थः ॥ ९ ॥ ❀ ❀ आत्मरामा इत्यत्र । नन्वेषा भक्तिजनिका संहितेति भक्तिमार्गीयाणां तत्रादरात् ते किं न स्थिता इत्तान् विहाय व्यासचरणा मुक्तं शुकं तत्प्रचाराय योजितवन्त इत्यत आहुः मार्गान्तरेत्यादि ॥ १० ॥ ❀ ❀ हरेर्गुणेत्यत्र । फलं गृहीतमिति । विषयेन्द्रियसंयोगफलं ज्ञानं तद्गुणैर्गृहीतमित्यर्थः । शुको महादेव इति । "द्वैपायनाच्छुको जज्ञे भगवानेव शङ्करः । अंशांशेनावतीर्योर्व्यां स्वं प्राप परमं पद"मिति कूर्मपुराणात्तथेत्यर्थः । स्वप्रतिष्ठार्थमिति स्वस्य प्रकर्षेण स्थित्यर्थमित्यर्थः ॥ ११ ॥ ❀ ❀ परीक्षित इत्यत्र । परिपालितमिति । भावेक्तः परिपालनमित्यर्थः । परिपालित इति वा पाठः । तावदर्थ्यमिति । तावदर्थस्य भावस्तावदर्थ्यम्, एवं प्रकारकं परिपालनमित्यर्थः । पृष्टमित्यादि । पृष्टं परीक्षितमनूद्य तद्दाहतज्जन्मादिहेतुकथनं प्रतिजानीत इत्यर्थः । एतेनाधिकारोक्तिं प्रति हेतुतागर्भः प्रसङ्गसङ्गतिरुक्ता ज्ञेया । ननु पाण्डवसंस्थादेरपृष्टत्वात्तदुक्तेः किं प्रयोजनमत आहुः पुरुषेत्यादि । संस्थामिति । सम्यक्स्थितिः प्रकारम्, देहत्यागप्रकारं चेत्यर्थः । अप्रतिबन्धार्थमित्युक्ते कथं प्रतिबन्धसंभावनेति शङ्कोदेति, तन्निवृत्त्यर्थं प्रतिबन्धकत्वं स्फुटीकुर्वन्ति प्रतिबन्धकत्वेत्यादि । यद्यप्यत्र नैकजातत्वम्, तथाप्येकस्वामिकक्षेत्रजातत्वात्तथेति भावः । ग्रहणमिति । मुक्तेर्ग्रहणम् । अत एवेति पाण्डुमोचनादेव । अन्यथेति सर्वथापृष्टत्वे । प्रथमाध्याये 'को वा भगवतस्तस्ये'त्यनेन भगवद्यशःश्रवणादरस्य सूचितत्वान्नासङ्गतिरित्यर्थः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु व्यासस्याधिकारित्वात् स्वकृतग्रन्थप्रचारार्थं तदध्यापनसम्भवेऽपि शुकस्यैतदध्ययनं कथं सम्भवतीति पृच्छति-स इति । वा इत्यवधारणे । स शुकः सर्वत्र अध्ययनाध्यापनादावप्युपेक्षक एवेत्यन्वयः । तत्र हेतुमाह-निवृत्तावेव नितरां रतः न कदापि प्रवृत्तिमार्गे । तत्रापि हेतुमाह-आत्माराम इति । एवम्भूतः कस्य वा हेतोरेतां संहितां समभ्यसन् अल्पाभ्यासेनाधीतवान् एतदभ्यासस्यात्मारामत्वविरोधित्वमेव बहुकालसाध्यत्वादित्यभिप्रेत्याह-महतीमिति, ग्रन्थतोऽर्थतश्च बृहतीमित्यर्थः ॥ ९ ॥ ❀ ❀ उत्तरमाह-आत्मारामेति । आत्मारामत्वेन निर्ग्रन्था ग्रन्थेभ्यो निर्गताः 'यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च' इति भगवदुक्तरीत्याऽध्ययनाध्यापनादितो विरक्ता अपि मुनयो मननशीला उरुक्रमे अनन्तलीलाविशिष्टे भगवति भक्तिं कुर्वन्तीत्यन्वयः । 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । ब्रह्मभूतः प्रसन्नात्मा न शोचति

न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्' इत्यादौ परमप्रेमलक्षणाया भक्तेर्ज्ञानोत्तरत्वप्रतीतेः । तेषां भक्तेः किं प्रयोजनमित्यपेक्षायामाह–अहैतुकीमिति, प्रयोजनानुसन्धानरहितामित्यर्थः । प्रयोजनमनुद्दिश्य कथं तद्भजने प्रवृत्तिरित्यपेक्षायामाह–इत्थम्भूतगुणो हरिरिति, इत्थम्भूता आत्मारामाणामपि आकर्षणशीला गुणा यस्य स तथाभूतो हरिरित्यर्थः ॥ १० ॥ ❀ ❀ भक्तिं कुर्वन्तु नाम, तथापि शुकस्यैतच्छास्त्राभ्यासे किं कारणमित्यपेक्षायामाह–हरेरिति । भगवान् श्रीमहादेवावतारत्वेन सर्वतो विरक्तः सर्वज्ञोऽपि बादरायणिः शुकः यतो हरेर्गुणैराक्षिप्ता आकृष्टा मतिर्यस्य स तथाभूतः । अत एतस्य समग्रस्य भगवद्गुणप्रतिपादकत्वात् महदप्येतदाख्यानमध्यगात् अधीतवानित्यन्वयः । ननु तथापि परीक्षितं प्रति एतदाख्याने तस्य प्रवृत्तिः कथमिति यत् 'तस्य पुत्रो महायोगी' इत्यादिना पृष्टं तस्य किमुत्तरमित्याशङ्कयाह–नित्यमिति । न केवलमात्माराम एव सः, किन्तु नित्यं सर्वदा विष्णुजनाः प्रियाः यस्येति । राज्ञो भगवद्भक्तत्वात्तत्प्रीत्यर्थमेतद्व्याख्यानं घटते इति भावः ॥ ११ ॥ ❀ ❀ तदेवं कस्मिन् युगे प्रवृत्तेयमित्यादेरुत्तरमुक्त्वा 'तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः' इति प्रश्नस्योत्तरं सोपोद्धतं वक्तुं प्रतिजानीते–परीक्षित इति । अथ भागवतोत्पत्त्यादिनिरूपणानन्तरं तच्छ्रोतुः परीक्षितो जन्म कर्माणि च विलायनं मोक्षश्च तेषां समाहारः तथा तदुपोद्घातरूपपाण्डुपुत्राणां युधिष्ठिरादीनां संस्थां वृत्तान्तं च कृष्णस्य भगवतः कथाया उदयः अनुप्रसक्तिर्यथा स्यात्तथा वक्ष्ये इत्यन्वयः । निरूपणीयं प्रधानमर्थं मनसि निधाय तत्प्रसङ्गेनार्थान्तरनिरूपणलक्षणपरीक्षिज्जन्मादिकथनं ममाप्यभीष्टं तस्य भगवद्भक्तित्वेन तद्गुणादिकथनेन वाण्याः साफल्यादिति सूचयन् विशिनष्टि–राजर्षेरिति, राजत्वेऽप्यृषिवद्वर्तमानस्येत्यर्थः ॥ १२ ॥

हिन्दी अनुवाद

श्रीशौनकजीने पूछा–श्रीशुकदेवजी तो अत्यन्त निवृत्तिपरायण हैं, उन्हें किसी भी वस्तुकी अपेक्षा नहीं है । वे सदा आत्मामें ही रमण करते हैं । फिर उन्होंने किसलिये इस विशाल ग्रन्थका अध्ययन किया ? ॥ ९ ॥ ❀ ❀ श्रीसूतजीने कहा–जो लोग ज्ञानी हैं, जिनकी अविद्याकी गाँठ खुल गयी है और जो सदा आत्मामें ही रमण करनेवाले हैं, वे भी भगवान्‌की हेतुरहित भक्ति किया करते हैं, क्योंकि भगवान्‌के गुण ही ऐसे मधुर हैं, जो सबको अपनी ओर खींच लेते हैं ॥ १० ॥ ❀ ❀ फिर श्रीशुकदेवजी तो भगवान्‌के भक्तोंके अत्यन्त प्रिय और स्वयं भगवान् वेदव्यासके पुत्र हैं । भगवान्‌के गुणोंने उनके हृदयको अपनी ओर खींच लिया और उन्होंने उससे विवश होकर ही इस विशाल ग्रन्थका अध्ययन किया ॥ ११ ॥ ❀ ❀ शौनकजी ! अब मैं राजर्षि परीक्षित्‌के जन्म, कर्म और मोक्षकी तथा पाण्डवोंके स्वर्गारोहणकी कथा कहता हूँ ; क्योंकि इन्हींसे भगवान् श्रीकृष्णकी अनेकों कथाओंका उदय होता है ॥ १२ ॥

यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु ।
वृकोदराविद्धगदाभिमर्शभग्नोरुदण्डे धृतराष्ट्रपुत्रे ॥ १३ ॥
भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि ।
उपाहरद् विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयन्ति ॥ १४ ॥
माता शिशूनां[1] निधनं सुतानां निशम्य घोरं परितप्यमाना ।
तदारुदद् बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥ १५ ॥
तदा शुचस्ते प्रमृजामि[2] भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः ।
गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाऽऽक्रम्य[3] यत्स्नास्यसि दग्धपुत्रा ॥ १६ ॥
इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाच्युतमित्रसूतः ।
अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र परीक्षितो जन्म निरूपयिष्यन् आदौ तावद्गर्भस्थ एव अश्वत्थाम्नो ब्रह्मास्त्रात् कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति–यदेत्यादिना । यदा द्रौणिः अश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांसि उपाहरत्–तदा तन्माता अरुदत् । तां च सांत्वयन्किरीटमाली अर्जुन आहेति तृतीयेनान्वयः । किमिति बालानां शिरांस्यानीतवानित्यपेक्षायामाह । मृधे युद्धे । यद्यपि

---

१. प्रा० पा०— माता सुतानां निधनं शिशूनां । २. प्रा० पा०—विमृजामि । ३. प्रा० पा०—आक्रम्य ।

पांडवा अपि कौरवा एव । तथापि सृंजयवंशजः धृष्टद्युम्नः पांडवानां सेनापतिरिति सृंजयानामित्युक्तम् । वीरगतिं स्वर्गम् । अथो अनंतरम् । वृकोदरेण आविद्धायाः क्षिप्तायाः गदायाः । अभिमर्शेन अभिघातेन भग्नौ ऊरुदंडौ यस्य तथाभूते धृतराष्ट्रपुत्रे दुर्योधने सति ॥ १३ ॥ ❀ ❀ भर्तुः दुर्योधनस्य । स्मेति वितर्के । इति एवं प्रियं स्यादिति पश्यन् । तस्य तद्विप्रियमेवेति वाक्यांतरम् । विप्रियत्वे हेतुः । जुगुप्सितमिति ॥ १४ ॥ ❀ ❀ घोरं दुःसहं यथा भवति । बाष्पस्य कलाभिः बिंदुभिः आकुले अक्षिणी यस्याः । किरीटस्यैकत्वेऽपि तदग्राणां बहुत्वात् किरीटमालीत्युक्तम् ॥ १५ ॥ ❀ ❀ शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामि यद् यदा ब्रह्मबंधोः ब्राह्मणाधमस्य । आततायिन इति । "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः" इति स्मरणादत्र आततायी शस्त्रपाणिः । तेन च पुत्रहंतृत्वं लक्ष्यते, गांडीवात् धनुषः मुक्तैः विशिखैः बाणैः उपाहरे त्वत्समीपम् आनयामि । यत् शिरः आक्रम्य आसनं विधाय दग्धपुत्रा सती ॥ १६ ॥ ❀ ❀ वल्गवः रम्याः विचित्राः जल्पाः भाषणानि तैः स अर्जुनः । अच्युत एव मित्रं सूतश्च यस्य । दंशितो बद्धकवचः । उग्रं धनुश्चापं यस्य । कपिः हनुमान् ध्वजे यस्य सः । गुरोः पुत्रं रथेन अन्वाद्रवद् अन्वधावत् ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वीरगतिम्मुक्तिं "यमिह निरीक्ष्य हता गताः सरूपम्" इति भीष्मोक्तेः ॥ १३ ॥ ❀ ❀ तस्य दुर्योधनस्य तद्बालहननं । विप्रियमप्रियमेव । वस्तुतः प्रथमं शत्रुवधश्रवणेन हर्षोदयात्पश्चात्स्पर्शेन भीमादीनां स्वशत्रूणामवधश्रवणाद्बालवधाच्च कुरुवंशलोपश्रवणाच्च विषादोत्पत्तेर्हर्षविषादाभ्यां च तन्मृत्युप्राप्तेरिति भावः ॥ १४ ॥ ❀ ❀ किरीटे माला पुष्पस्रगस्येति वा किरीटमाली ॥ १५ ॥ ❀ ❀ "शुक्छोकेश्रुणि शुद्धौ च" इति निरुक्तिः । भद्र इति । मां तद्वधप्रवृत्तमपि त्वं भद्रस्वभावत्वाद्वारयिष्यसीति भावः ॥ १६ ॥ ❀ ❀ "वल्गु स्याच्छगले पुंसि सुंदरे त्वभिधेयवत्" इति मेदिनी । "दंशितमपि जातदंशितेऽपि स्यात्कवचान्विते" इति च । उग्रो महादेवस्तत्प्रसादलब्धं धनुरस्यैत्युग्रधन्वा । यद्वा उं रुद्रं ग्रसतीत्युग्रं तद्धनुरस्येति । एतच्च भारते किरातीयोपाख्याने वनपर्वणि सर्वशरक्षयेऽर्जुनेन किरातरूपरुद्रकंठे धनुः क्षिप्त्वा पुनरस्य आकृष्ट इति । यद्वोग्रं भयंकरं धनुरस्येति स तथा ॥ १७ ॥

श्रीमद्वीरराघवव्याख्या

तावत्परीक्षितो जन्मकर्मादिकं वक्तुं पाण्डुपुत्राणां संस्थानमाह यदेत्यादिना । यावत्पंचदशाध्यायसमाप्ति तत्र परीक्षितो जन्म उपोद्घात एवांतर्भाव्योच्यते कर्मादिकं तु तत उपरितनग्रन्थेनेति विवेकः । यदेत्यस्य तदा तृतीयेनान्वयः । मृधे युद्धे कौरवाणां सृंजयानां च वीरगतिं वीराणां गतिं गतेषु प्राप्तेषु सत्सु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेनापविद्धायाः प्रयुक्ताया गदाया अभिमर्षेणाघातेन भग्नावूरू एव दण्डौ यस्य तथाभूते सति ॥ १३ ॥ ❀ ❀ द्रौणिरश्वत्थामा स्वचिकीर्षितं भर्तुर्धृतराष्ट्रस्याप्रियमपि पश्यन्मन्यमानः स्वपतां शयानानां कृष्णायाः द्रौपद्याः सुतानां शिरांसि अपाहरत् छित्वा नीतवान् , इदं कर्म तस्य धृतराष्ट्रस्य विप्रियमेव । यद्वा तस्याश्वत्थाम्नः कर्म विप्रियमेव सर्वलोकस्यापीति शेषः । अत एव जुगुप्सितं विगर्हयन्ते अधुनापि विनिन्दयन्ति ॥ १४ ॥ ❀ ❀ यदैवं तदा माता द्रौपदी शिशूनां सुतानां घोरं निधनं मरणं निशम्य दृष्ट्वा परितप्यमाना बाष्पैराकुले अक्षिणी यस्याः तथाभूता बभूवेति तदा तां द्रौपदीं सांत्वयन्नुपच्छंदयन् किरीटमाली किरीटानां राजान्तरकिरीटानामाज्ञा एव माला अस्यास्तीति किरीटमाली अर्जुनः, व्रीह्यादेराकृतिगणत्वाद् व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः, इदं वक्ष्यमाणमाह ॥ १५ ॥ ❀ ❀ तदेवाह । हे भद्रे ! ब्रह्मबंधोर्ब्राह्मणाधमस्याततायिनः "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते आततायिनः" इति शस्त्रपाणेराततायित्वस्मरणादाततायिन इत्युक्तं, शस्त्रपाणिर्नाम शस्त्रधारणेन निरपराधप्राणिघातुकः । तस्य शिरो गाण्डीवेन मुक्तैर्विशिखैर्बाणैर्यद्यदा आहरेयं यद्यदा वाहृतं शिरः पादेनाक्रम्य दग्धपुत्रा त्वं स्नास्यसि तदा ते तव शुचः विमृजामि मार्जयामि ॥ १६ ॥ ❀ ❀ इतीत्थं वल्गुभिः सुन्दरैः विचित्रैश्च जल्पैर्भाषणैः प्रियां द्रौपदीं सांत्वयित्वा अच्युतः कृष्णो मित्रं सूतः सारथिश्च यस्य सारथीकृताच्युत इत्यर्थः, दंशितः कवचितः उग्रं धनुर्गाण्डीवं यस्य कपिध्वजः हनुमच्चिह्नितः ध्वजो यस्य सोऽर्जुनः रथेन साधनेन गुरोर्द्रोणाचार्यस्य पुत्रमश्वत्थामानमन्वाद्रवदन्वधावत् ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथो कथांतरं निरूप्यते यदेति । कौरवपांडवानां मृधे युद्धे भीष्मादिषु वीरेषु वीरगतिं स्वर्गं गतेषु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेणाविद्धाया भ्रांताया गदाया अभिमर्षेण सम्यक्ताडनेन भग्न ऊरुदंडो यस्य स तथोक्तः तस्मिन् सति दुर्योधनपातमारभ्य ॥ १३ ॥ ❀ ❀ भर्तुः स्वस्वामिनो दुर्योधनस्य मया प्रियं कार्यमिति स पश्यन्निरूपयन् द्रौणिर्यदा स्वपतां निद्रां कुर्वतां कृष्णासुतानां द्रौपदीपुत्राणां शिरांस्यपाहरत्तदा ॥ १४ ॥ ❀ ❀ सुतानां माता द्रौपदी शिशूनां सुतानां निधनं निशम्य घोरं यथा भवति तथा परितप्यमाना निधनं विश्रंभणं वा तस्य द्रौणेर्जुगुप्सितं निन्दितं एतच्छिशुनिधनाख्यं कर्म विगर्हयन्ती अरुददित्येकान्वयः । कीदृशं कर्म द्रौणेरेव विप्रियं न तु दुर्योधनस्य भारते पांस्वभिषेकादिनाऽप्रियत्वोक्तेः । इदानीं द्रौणिना शिश्वादिवधात्

पूर्वदृष्टं स्वप्नमाह तामिति । किरीटमाली अर्जुनः सांत्वयन् दुःखं शमयन् तां द्रौपदीमाह ॥ १५ ॥ ❀ ❀ गांडीवनिःसृतैर्विशिखैः विविधशिखैः शरीरं खनित्वा विशन्तीति वा शरैराततायिनः हनिष्यन्मरिष्यामीति क्रूरक्रियाकारिणः ब्रह्मबन्धोर्ब्राह्मणाधमस्य द्रौणेः पुरतः स्थितं पदाक्रम्य पुत्रवधदुःखनिमित्तनयनजातैर्जलैः स्नास्यसि स्नानं करिष्यसीति यस्मात्तस्मात् हे भद्रे मा शुचः शोचनं मा कुरु, अश्रु पाणिना निरुजन् हे भद्रे मारुदेत्यसांत्वयदित्यन्वयः । शुचोऽनेनेति वा । "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते ह्याततायिनः" इति "आततायिनमायांतं हन्यादेवाविचारयन्" इति स्मृतेः ॥ १६ ॥ ❀ ❀ स कपिध्वज इति वल्गवो मनोहराः विचित्रा विविधाश्चर्यभूता जल्पा वाग्विशेषा ये ते तथोक्ताः तैः प्रियां भार्यां सांत्वयित्वा रथेन गुरुपुत्रमभ्यद्रवदित्यन्वयः । अच्युत एव मित्रमनिमित्तबन्धुः सूतो यंता यस्य स तथोक्तः, दंशितः कवचितः, उग्रं भयंकरं धनुः यस्य स तथोक्तः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

कृष्णकथानामुदयो यत्र तद्यथा भवतीति मुख्यतया तेन पृष्टानां कृष्णकथानामारम्भोऽपि सूचितः ॥ १२-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र गर्भस्थ एव परीक्षित् श्रीकृष्णदर्शनं प्रापेति वक्तुं कथां प्रस्तौति । यदा द्रौणिरश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांस्युपाहरत् तदा तन्माता अरुददिति तृतीयेनान्वयः । कौरवाः दुर्योधनाद्याः सृंजयवंशोद्भवस्य धृष्टद्युम्नस्य पांडवसेनापतित्वात् सृञ्जयपदेन पाण्डवा लक्ष्यन्ते । वीरगतिं भीष्मोक्तयुक्त्या मोक्षं स्वर्गञ्च । वृकोदरेण आविद्धायाः क्षिप्तायाः गदायाः अभिमर्षेण घातेन भर्त्तुर्दुर्योधनस्य एवं प्रियं स्यादिति पश्यन् वस्तुतस्तु तस्य दुर्योधनस्य विप्रियमेव तत् प्रथमं शत्रुवधश्रवणेन हर्षोदयात् स्पर्शेन भीमादीनां स्वशत्रूणामवधज्ञानात् बालवधाच्च कुरुवंशलोपश्रवणाच्च विषादोत्पत्तेर्हर्षविषादाभ्याञ्च तन्मृत्युप्राप्तेरिति भावः । अत एवाह जुगुप्सितमिति । किरीटाग्राणां बहुत्वात् किरीटस्था माला वा यस्यास्ति स किरीटमाली अर्ज्जुनः ॥ १३-१५ ॥ ❀ ❀ शुचः शोकान् यत् यदा ब्रह्मबन्धोर्ब्राह्मणाधमस्याततायिनः शस्त्रपाणेः "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः" इति स्मरणात् ॥ १६ ॥ ❀ ❀ अच्युत एव मित्रं सूतश्च यस्य सः दंशितो बद्धकवचः ॥ १७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

तत्र परीक्षितो जन्म वक्ष्यन् तत्पितामहादीनां कथामाह यदेति । यदेत्यस्य तदा किरीटमाली आहेति तृतीयेनान्वयः । कुरुसृंजयानां कुरूणां भीष्मादीनां सुयोधनपक्षीयाणां धृष्टद्युम्नादीनां युधिष्ठिरपक्षीयाणां मृधे युद्धे उभयपक्षीयेषु वीरगतिं गतेषु सत्सु सुयोधनमहारथेष्ववशिष्टेषु कृपकृतवर्मद्रौणिष्वन्यत्र विद्रुतेषु सत्सु अवशिष्टेन सैन्येन सह कृष्णेषु पांडवेष्ववस्थितेषु सत्सु भीमसुयोधनयोर्गदायुद्धे अथानंतरं श्रीकृष्णप्रेरितेन वृकोदरेणाविद्धायाः क्षिप्तायाः गदाया अभिमर्शेन घातेन भग्नौ ऊरू एव दंडौ यस्य तथाभूते धृतराष्ट्रपुत्रे सुयोधने सति ॥ १३ ॥ ❀ ❀ तदनंतरं जितकाशिषु पांडवेषु कृष्णाज्ञया शिबिरं विहायान्यत्र नक्तं विश्राम्यमाणेषु कृपकृतवर्मभ्यां सहागत्य द्रौणिः सुयोधनेन सुप्तवधार्थमाज्ञप्तः भर्तुः सुयोधनस्य प्रियं स्यादिति पश्यन् शिबिरे सुप्तानां कृष्णासुतानां द्रौपदीसुतानां शिरांसि छित्त्वापाहरत्, तत् द्रौणिकर्म तस्य सुयोधनस्य विप्रियं जातं तस्यैवाकार्यकारयितृत्वात्, यतः शिष्टाः जुगुप्सितं कर्म गर्हयंति ॥ १४ ॥ ❀ ❀ बाष्पकलाभिराकुले अक्षिणी यस्याः सा कृष्णाऽरुदत् तदा किरीटमाली इंद्रदत्तस्य किरीटस्याग्राणां बाहुल्यमाश्रित्येदमुच्यते किरीटानां माला एव माला अस्यास्तीति स तथा अर्जुन इदं वक्ष्यमाणमाह ॥ १५ ॥ ❀ ❀ यद्यदाऽऽततायिनः शस्त्रपाणेः "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिन" इति स्मृतेः, ब्रह्मबंधोर्ब्राह्मणाधमस्य शिरः आहरे आनयामि यदाहृतं शिरः आक्रम्य आसनं विधाय दग्धपुत्रा स्नास्यसि तदा शुचः शोकाश्रूणि प्रमृजामि मार्जयामि, अच्युतो मित्रं सूतश्च यस्य सः, दंशितः धृतकवचः ॥ १६-१७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत्र पुत्रांतराणां मारणं वक्तुं हेतुमाह यदा मृध इति । सृंजयवंशोत्पन्नो धृष्टद्युम्नः पांडवानां चमूपतिरिति स्वतः पांडवानां कौरवत्वेपि विरोधनिमित्तं द्रौपदीति पांडवानां धृष्टद्युम्नप्रवेशात् अयुक्तपरिहाराय च सृंजयानामित्युक्तं तेषां संबंधिनां च मुक्तिरिति निरूपयति वीरगतिमिति "द्वौ संमताविह मृत्यू" इति वाक्यात् । अनेन पुत्राणामेव अन्यायमरणमिति शोकहेतुः सूचितः । अथो इति, मध्ये भिन्नप्रक्रमवचनात् "पार्थास्त्रपूताः पदमापुरस्ये"ति च निरूपितं दुर्योधनस्यायुक्तमरणमाह वृकोदरेति । वृको दशविधः प्राण उदरे यस्य तिष्ठति स वृकोदर इत्युक्तो भगवत्कार्यसाधक इति वाक्यात् भीमसेनप्रक्षिप्तगदाया अभिमर्षणेन भग्ने उरू एव दंडौ यस्य दंड इति ताडनहेतुः द्रौपद्याः प्रदर्शने दुःखजनकत्वात् धृतराष्ट्रपुत्र इति अंधपुत्रत्वादविवेकित्वमुक्तम् ॥ १३ ॥ ❀ ❀ अत एव तत्सेवकोप्यविवेकी जात इत्याह भर्तुरिति । द्रौणिरिति वैरानुबंधे मूलहेतुः मातृपुत्रत्वात् स्वाधः, अनेनैकपुत्रत्वान्मातुर्ग्रहणं, अत एव भगवान् वंशार्थं तेन रक्षितः । कृष्णा द्रौपदी प्रसवमात्रं तस्याः नोद्धार इति सुतानामिति कृष्णेति

पदं "यो यच्छ्रद्धः स एव सः" इति वाक्यात् तद्भावापत्तिं सूचयति। प्रदर्शनार्थं शिरसामुपाहरणं तेनार्द्धदाहाददतिदुःखं दुर्योधनस्यापि तन्मारणमभीष्टं लोकवाच्यता न दुर्योधने स्थिता, इदं तु लोका विगर्हयंतीति तदाह विप्रियमिति॥ १४॥ ❀ ❀ माता द्रौपदी रोदने मातृत्वमेव हेतुः, शिशूनामिति स्नेहाधिक्यं श्रवणादधिकक्लेशः घोरमिति रात्रौ सौषुप्तिकपर्वकथा सूचिता, यदा अरुदत् तां सांत्वयन्निति संबंधः। किरीटमाली अर्जुनः एकस्मिन्नपि किरीटे किरीटबाहुल्यप्रतीतिः बहुपुरुषवत् युद्धकरणाद्वा स्त्रीवशा अपि भक्ता भगवता परिपाल्यन्ते इति अर्जुनस्य प्रतिज्ञानमाह। अथवा तां सांत्वयन्निति वचनान्न यथार्थत्वं प्रतिज्ञायाः॥ १५॥ ❀ ❀ शोकापनोदनं स्त्रियाः भर्त्रा करणीयं तत्र तूष्णीं प्रोंछनमशक्तविषयं अप्रतीकार्ये च तत्र मृतानां जीवनमशक्यं मारकवधस्तु शक्य इति तत्कृत्वा तत्राश्रुप्रोंछनं कर्त्तव्यमित्याह तदेति। क्रूरे हि क्रूरमश्रु प्रोंछयते शुच इति शोकाश्रूणि पुनरुद्गमाय हेतुशब्दवाच्यता। ननु विपरीतौ किमुत्तरं तत्राह भद्रे इति। तव वैधव्यलक्षणाभावात् न तथा भविष्यतीति भावः। ब्रह्मबंधो इति ब्रह्म ब्राह्मणजातिः बंधुरेव कदाचिदागच्छति कदाचिन्नेति न सदा तस्य ब्राह्मण्यं तिष्ठति देवविरोधित्वादसुरावेशाच्च "दैव्यौ वै वर्णब्राह्मणः असुर्यः शूद्र" इति श्रुतेः। किंच आततायिनः "अग्निदो गरदश्चे"ति वाक्यात् "आततायिनमायांतमपि वेदांतपरगम्। जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेदि"ति स्मृतेश्च न तद्वधे दोषः। बाणैरेव छित्वा समानयनं स्पर्शः, दुष्टत्वात् तथा करणे सामर्थ्यमाह गांडीवमुक्तैरिति। शिरस आक्रम्य स्नानं क्षत्रियधर्मत्वेन वैरनिर्यातने उक्तं दग्धपुत्रेति सौप्तिक एव दाहः संस्कारदाहो वा प्रथमतः शोकाधिक्यहेतुः द्वितीयः स्नानहेतुः यदा स्नास्यसि तदा शुचः प्रमृजामीति संबंधः। क्षत्रियत्वान्नान्यत्स्वभावतः शोकः कामपराणामेव तन्न क्रोधपराणाम्॥ १६॥ ❀ ❀ एवं कथने हेतुः प्रियामिति वल्गु मनोहरं आक्रम्य स्नास्यसीति विचित्रं विशिखैरुपाहर इति। जल्पैरिति स्त्रैणवाक्यं तत् तस्या अपि क्षत्रियत्वात् सम्यक् सांत्वनम्। एतादृशकार्यसिद्धौ हेतुः अच्युतमित्रसूत इति अच्युतत्वेन स्वरक्षा सूतत्वात् कार्यसिद्धिः अनुपश्चादाद्रवणं पलायनं शंकया पश्चादेव कवचपरिधानं धनुषश्च ग्रहणं धनुष उग्रत्वं वधपर्यवसायित्वात् कपिध्वज इत्यतिसामर्थ्यं सूचितम्। अथवा दंशित इति स्वरक्षा उग्रत्वाद्धनुषः कपिध्वजत्वादप्यस्या गुरुपुत्रमित्यनर्थपर्यवसायित्वं रथेनेति न स्वाशक्तिः॥ १७॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

इति प्रियामित्यत्र। स्वरक्षेति। रक्षापदं धनुषि च रथे च सम्बध्यते॥ १७॥

श्रीगिरिधरकृता बालप्रबोधिनी।

तल्लक्षणमुपोद्घातमाह–यदेति। यदेत्यस्य तदेति तृतीयेनान्वयः। कौरवाणां सृञ्जयानां च मृधे युद्धे वीरेषु वीराणां गतिं 'द्वौ सम्मताविह मृत्यू दुरापौ' इति वाक्यान्मुक्तिं गतेषु सत्सु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेन आविद्धायाः आक्षिप्ताया गदाया अभिमर्शेन आघातेन भग्नावूरू एव दण्डो यस्य तथाभूते सति। सृंजयवंशजस्य धृष्टद्युम्नस्य पाण्डवसेनापतित्वात् सृञ्जयानामिति लक्षणया पाण्डवानामित्येवार्थो बोद्धव्यः, तेषामेव कौरवप्रतियोगिकयुद्धकर्तृत्वस्य प्रसिद्धत्वात्। अथो तदनन्तरमित्युत्तरेणान्वयः॥ १३॥ ❀ ❀ मम भर्त्तुर्दुर्योधनस्य प्रियमित्येवं स्यादिति स्म पश्यन् आलोचयन् द्रौणिर्द्रोणपुत्रोऽश्वत्थामा स्वपतां कृष्णाया द्रौपद्याः सुतानां शिरांसि उपाहरच्छित्वाऽऽनीतवान्। तत्तस्य कर्म दुर्योधनस्य सर्वलोकस्य च विप्रियमेव जातम्। यतो जुगुप्सितं दुर्योधनस्यापि कुलक्षयेण श्राद्धतर्पणादिविलोपात् सुप्तबालवधेऽस्य लोकघृणावहत्वाच्च निन्द्यमित्यर्थः। अत एवाधुनाऽपि सर्वे विगर्हयन्ति निन्दन्ति। कथमेवं तस्य विपरीता बुद्धिर्जातेति वितर्कं सूचयति–स्मेति॥ १४॥ ❀ ❀ तदा माता द्रौपदी सुतानां तत्रापि शिशूनां बालानामतिस्नेहविषयाणां घोरं दुस्सहं निधनं मरणं निशाम्य दृष्ट्वा परितप्यमाना अत एव बाष्पकलाभिः अश्रुबिन्दुभिराकुले अक्षिणी यस्यास्तथाभूता सती अरुदत्, तां सान्त्वयन् किरीटमाली अर्जुनः प्राहेत्यन्वयः। किरीटस्यैकत्वेऽपि तदग्राणां बहुत्वात्किरीटमालीत्युक्तम्। यद्वा राजान्तरकिरीटानां माला समूहः प्रणमन्त्यस्यास्तीति तथा। यद्वा किरीटस्य मालाऽस्यास्तीति तथा॥ १५॥ ❀ ❀ तद्वाक्यमेवाह–तदेति। हे भद्रे यत् यदा गाण्डीवमुक्तैर्विशिखैर्बाणैर्ब्रह्मबन्धोर्ब्राह्मणाधमस्य अश्वत्थाम्नः शिरस्त्वा त्वां प्रत्युपाहरे त्वत्समीपमानयामि, यच्च शिर आक्रम्य आसनं विधाय दग्धपुत्रा मृतपुत्रा त्वं स्नास्यसि तदा ते तव शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामीत्यन्वयः। ब्रह्मबन्धुपदेन तद्वधे दोषाभावः सूचितः। तत्कथमस्य ब्रह्मबन्धुत्वमित्यपेक्षायां 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते ह्याततायिनः। नाततायिवधे दोषो हन्तुर्भवति कश्चन' इत्यादिस्मृत्यनुरोधेन तस्य शस्त्रग्रहणपूर्वकबालघातित्वेन आततायित्वादित्याह–आततायिन इति। तच्छिरःप्रच्छेदनसाधनं तु ममालौकिकमस्तीति गाण्डीवनामकेन धनुषा मुक्तैरित्यनेन सूचितम्। सम्बोधनेन तु तव सौभाग्यबलात्ततो मम मरणं तु नैव भविष्यतीति सूचितम्। प्रमृजामीति वर्त्तमानत्वनिर्देशेनात्र विलम्बो नास्तीति सूचितम्॥ १६॥ ❀ ❀ सोऽर्जुन इत्येवं वल्गुभिर्मनोहरैर्विचित्रैश्च जल्पैर्भाषणैः प्रियां द्रौपदीं सांत्वयित्वा दंशितो बद्धकवचश्च सन् रथेन साधनेन गुरोर्द्रोणस्य पुत्रमश्वत्थामानमन्वाद्रवत् अन्वधावदित्यन्वयः। सहायसाधनसम्पत्तिसद्भावात्तस्य भयं नास्तीति सूचयंस्तं विशिनष्टि–अच्युतः स्वरूपतो गुणतश्च च्युतिरहितः, यद्वा न च्यवन्ति भक्ताः यस्य सः। स श्रीकृष्ण एव मित्रं सूतः सारथिश्च यस्य सः। उग्रं शत्रुभिरप्रधृष्यं धनुर्यस्य सः। कपिर्हनुमान् ध्वजे यस्य सः॥ १७॥

हिन्दी अनुवाद

जिस समय महाभारत-युद्धमें कौरव और पाण्डव दोनों पक्षोंके बहुत-से वीर वीरगतिको प्राप्त हो चुके थे और भीमसेनकी गदाके प्रहारसे दुर्योधनकी जाँघ टूट चुकी थी, तब अश्वत्थामाने अपने स्वामी दुर्योधनका प्रिय कार्य समझकर द्रौपदीके सोते हुए पुत्रोंके सिर काटकर उसे भेंट किये, यह घटना दुर्योधनको भी अप्रिय ही लगी; क्योंकि ऐसे नीच कर्मकी सभी निन्दा करते हैं ॥ १३-१४ ॥ ❀ ❀ उन बालकोंकी माता द्रौपदी अपने पुत्रोंका निधन सुनकर अत्यन्त दुःखी हो गयी। उसकी आँखोंमें आँसू छलछला आये—वह रोने लगी। अर्जुनने उसे सान्त्वना देते हुए कहा—॥ १५ ॥ ❀ ❀ 'कल्याणी ! मैं तुम्हारे आँसू तब पोछूँगा, जब उस आततायी ब्राह्मणाधमका सिर गाण्डीव-धनुषके बाणोंसे काटकर तुम्हें भेंट करूँगा और पुत्रोंकी अन्त्येष्टि क्रियाके बाद तुम उसपर पैर रखकर स्नान करोगी ॥ १६ ॥ ❀ ❀ अर्जुनने इन मीठी और विचित्र बातोंसे द्रौपदीको सान्त्वना दी और अपने मित्र भगवान् श्रीकृष्णकी सलाहसे उन्हें सारथि बनाकर, कवच धारणकर और अपने भयानक गाण्डीव धनुषको लेकर वे रथपर सवार हुए तथा गुरुपुत्र अश्वत्थामाके पीछे दौड़ पड़े ॥ १७ ॥

तमापतन्तं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन ।
पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः ॥ १८ ॥

यदाशरणमात्मानमैक्षत श्रान्तवाजिनम् । अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥ १९ ॥
अथोपस्पृश्य सलिलं संदधे तत्समाहितः । अजानन्नुपसंहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥
ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतो दिशम् । प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥

अर्जुन[1] उवाच

कृष्ण कृष्ण महाभाग[2] भक्तानामभयंकर । त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

आपतंतम् आधावंतं सः द्रौणिः । कुमारहा बालघाती । उद्विग्नमनाः कंपितहृदयः । प्राणपरीप्सुः प्राणान् लब्धुमिच्छुः न तु कीर्तिम् । यावद्गमं यावद् गंतुं शक्यं तावद् उर्व्यां पराद्रवत्पलायत । को ब्रह्मा मृगो भूत्वा सुतां यब्धुमुद्यतः सन् रुद्रस्य भयाद्यथा पलायते स्म । अर्क इति पाठे वामनपुराणकथा सूचिता । तथा हि विद्युन्माली नाम कश्चिद्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तम् । ततोऽसौ अर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् । ततोऽर्केण निजतेजोभिः द्रावयित्वा तद्विमानं पातितम् । तत् श्रुत्वा कुपिते रुद्रे भयादर्कः पराद्रवत् । ततो रुद्रस्य क्रूरदृष्ट्या दंदह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यात इति ॥ १८ ॥ ❀ ❀ अशरणं रक्षकरहितम् । ननु पलायनमेव रक्षकमस्ति न तस्यापि कुंठितत्वादित्याह—श्रांताः वाजिनो यस्य तम् । ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रम् । द्विजात्मज इति अदीर्घदर्शितामाह ॥ १९ ॥ ❀ ❀ तद् ब्रह्मास्त्रम् । समाहितः कृतध्यानः । उपसंहारमजानतोऽपि संधाने हेतुः—प्राणकृच्छ्र इति ॥ २० ॥ ❀ ❀ ततः अस्त्रात् सर्वतोदिशं प्रादुष्कृतं प्रकटीभूतं तेजः अभिप्रेक्ष्य समंताद्विलोक्य ततः प्राणापदं च अभिप्रेक्ष्य अर्जुनः कृष्णमुवाच ॥ २१ ॥ ❀ ❀ प्रस्तुतं विज्ञापयितुं प्रथमं स्तौति । कृष्णेति चतुर्भिः । संसृतेर्हेतोः दह्यमानानां तस्याः अपवर्गः अपवर्जयिता नाशक इत्यर्थः ॥ २२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमर्जुनम् । केचित्तु रुद्रभयाद्यथार्किरिति समागतं शनैश्चरं दृष्ट्वा कुपितेन रुद्रेण तृतीयनेत्राद्वह्निरुद्रावितः । तं दृष्ट्वा यथा शनैश्चरः पलायतेति पुराणांतरे ॥ १८ ॥ ❀ ❀ ब्रह्मेति पदं शिरस्यग्रभागे यस्यास्त्रस्य तद्ब्रह्मशिरो ब्रह्मास्त्रमित्यर्थः । यदपि स्वामिचरणैर्व्याख्यातमित्थं तथापि ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रात्पृथगप्यस्तीत्युक्तं स्कान्दे । अथ प्रसंगादन्यान्यप्यस्त्राणि कथ्यंते "अथास्त्राणि प्रवक्ष्यामि सावधानोऽवधारय । ब्रह्मास्त्रं प्रथमं प्रोक्तं द्वितीयं ब्रह्मदंडकम् ॥ १ ॥ ब्रह्मशिरस्तृतीयं च तुर्यं पाशुपतं मतम् । वायव्यं पञ्चमं ज्ञेयमाग्नेयं षष्ठकं स्मृतम् ॥ २ ॥ नारसिंहं सप्तमं च तेषां भेदा ह्यनंतकाः । ससंहारं सविक्षेपं शृणु द्रोण यथातथम् ॥ ३ ॥ वेदमाता सर्वशस्त्रं गृह्यते क्षिप्यतेऽथ वा । तत्प्रयोगं शृणु प्राज्ञ ब्रह्मास्त्रं प्रथमं शृणु ॥ ४ ॥ दादिदंताश्च सावित्रीं विपरीतां जपेत्सुधीः । जप्त्वा पूर्वं निखर्वं चाभिमंत्र्य विधिवच्छरम् ॥ ५ ॥ क्षिपेच्छत्रुषु सहसा नश्यंति सर्वजातयः । बाला वृद्धाश्च गर्भस्था ये च योद्धुं समागताः ॥ ६ ॥ सर्वे ते नाशमायांति मम चैव प्रसादतः । यथाक्रमं दादिदंतं जपेत्संहारसिद्धये ॥ ७ ॥ ब्रह्मदण्डं

१. प्राचीनपाठे 'अर्जुन उवाच' इति पदं न । २. प्रा० पा०—महाबाहो ।

प्रवक्ष्यामि प्रणवं पूर्वमुच्चरेत् । ततः प्रचोदयाज्ज्ञेयं ततो नो यो धियः क्रमात् ॥ ८ ॥ ततो धीमहि देवस्य ततो भर्गोवरेणियम् । सवितुस्तच्च योक्तव्यममुकशत्रूंस्तथैव च ॥ ९ ॥ ततो हनहनहुंफट् जप्त्वा पूर्वं द्विलक्षकम् । अभिमंत्र्य शरं तद्वत्प्रक्षिपेच्छत्रुषु द्रुतम् ॥ १० ॥ नश्यंति शत्रवः सर्वे यमतुल्या अपि ध्रुवम् । एतदेव विपर्यस्तं जपेत्संहारसिद्धये ॥ ११ ॥ ब्रह्मशिरः प्रवक्ष्यामि प्रवणं पूर्वमुच्चरेत् । धियो यो नः प्रचोदयाद्भर्गो देवस्य धीमहि ॥ १२ ॥ तत्सवितुर्वरेणियं शत्रून्मे हनहनेति च । हुं फट् चैव प्रयोक्तव्यं क्षिपेद् ब्रह्मशिरस्ततः ॥ १३ ॥ पुरश्चर्यां पुरः कृत्वा त्रिलक्षं नियतः शुचिः । नश्यंति सर्वे रिपवः सर्वे देवासुरा अपि ॥ १४ ॥ इदमेव विपर्यस्तं प्रयोक्तव्यं विकर्षणे । अतः परं प्रवक्ष्यामि शस्त्रं पाशुपतं मम ॥ १५ ॥ यस्य विज्ञानमात्रेण नश्यंति सर्वशत्रवः । दादिदंतां च सावित्रीं प्रोच्य प्रणवमेव च ॥ १६ ॥ श्रींपशु हुंफट् अमुकशत्रून्हनहनहुंफट् । जप्त्वा पूर्वं द्विलक्षं च ततः पाशुपतं क्षिपेत् ॥ १७ ॥ पुनस्तदेव व्यस्तं स्यात्संहारे तां न योजयेत् । एतत्पाशुपतं शस्त्रं सर्वशत्रुनिवारणम् ॥ १८ ॥ वच्मि वायव्यमस्त्रं ते येन नश्यंति शत्रवः । ॐ वायव्ययावायव्ययाण्यौर्वाययावा तथा ॥ १९ ॥ अमुकशत्रुं हनहनहुंफट् चैव प्रकीर्त्तयेत् । पूर्वमेव तथा जप्त्वा नियुतद्वितयं तथा ॥ २० ॥ पुनः संहाररूपेण संहारं च प्रकल्पयेत् ॥ अस्त्रं वायव्यकं नाम देवानामपि वारणम् ॥ २१ ॥ आग्नेयं संप्रवक्ष्यामि यतः परभयं ददेत् । ॐ अग्निस्त्यता हृदुभूं च शिवं वनाश्वाविणि च हृगादुतिदशरूपनः सदवेति ततः क्रमात् ॥ हादतितोयतिरामतथामसोहिवावानसुसेदवेदया च वदेदमुकादींस्ततो वदेत् ॥ २२ ॥ पूर्वोक्तां च पुरश्चर्यां कृत्वा शस्त्रेभियोजयेत् । इमं मंत्रं पुनर्व्यस्तं संहारे चैव योजयेत् ॥ २३ ॥ ॐ वन्जनस्वन्जद्दंष्ट्रायुधाय महासिंहाय हुंफट् । पूर्वं जप्त्वा च लक्षं हि नारसंहं च योजयेत् ॥ २४ ॥ सिंहरूपास्तथा बाणाः पतंति शात्रवे वने । पूर्वोक्तेन प्रकारेण संहारं च प्रकल्पयेत् ॥ २५ ॥ संक्षेपतो महाभाग तवोक्तानि महामते । भेदास्त्वेषां धनुर्वेदे ह्यनंताः परिकीर्तिताः ॥ २६ ॥" इति केदारखंडे द्रोणं प्रति श्रीशिवेनोक्तम् ॥ १९ ॥ ❀ ❀ अथेक्षणानंतरम् । उपस्पृश्याचम्य ॥ २० ॥ ❀ ❀ ततस्तेजसः । जिष्णुरर्जुनः । "अर्जुनः फाल्गुनो जिष्णुः सव्यसाची धनंजयः । बीभत्सुर्विजयः कृष्णः किरीटी श्वेतवाहनः । कपिध्वजश्च गांडीवी शिवशिष्यश्च कर्णहा ।" इत्यभिधानात् । सर्वत इति द्वितीयार्थे तसिः । सर्वां दिशमित्यर्थः । "उभसर्वतसोः" इत्याद्युक्तेर्द्वितीया । एकत्वं जात्यभिप्रायम् । सर्वत्र दिक्ष्वित्यर्थः ॥ २१ ॥ ❀ ❀ अत्र संभ्रमे वीप्सा कृष्ण कृष्णेति । यद्वा प्रवृत्तिनिमित्तभेदाभिप्रायेण द्विरुक्तिः । एकत्र सदानंदत्वमपरत्र प्रपन्नापन्नाशकत्वमिति विवेकः । न हि सदानंदस्वरूपस्य निजक्लेशकर्षकस्य च तव पार्श्वे ममैतद् दुःखमुचितमिति भावः । ननु त्वमपि कृष्णोसि कथं मामेव कृष्णकृष्णेति ब्रूषे इति चेत्तत्राह–हे महाभागेति । मह्यंते पूज्यंते सर्वैरिति महा इंद्रदायो देवास्तैरासमंताद्भज्यते सेव्यते इति महाभागस्तत्संबुद्धौ तथा । तथा च नाममात्रेणैवाहं कृष्णो न तु महाभागोस्मीति भावः । त्वमपि पांडुराजपुत्रत्वान्महाभाग एवेति चेत्तत्राह–हे भक्तानामभयंकरेति । मया तु स्वभयमपि नापाकर्त्तुं शक्यते, किमुतान्यस्यातस्त्वमेव संबुद्धिचतुष्टयो नाहमिति भावः । इति । "वृजी वर्जने" इत्यतो घञि रूपमेतदिति अतस्त्वमपवर्गरूपोसि, तेनास्माकं संसृतेर्मोक्षमपि दास्यसि किमुतास्मादग्नेस्त्राणमात्रमिति भावः ॥ २२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

सूतः सारथिरित्यर्थः ॥ १८–२१ ॥ ❀ ❀ तस्याः संसृतेः संसरणस्येत्यर्थः ॥ २२–४७ ॥

श्रीमद्वीरराघवव्याख्या

आपतंतं तमर्जुनं दूरादेव विलक्ष्य प्रत्यभिज्ञाय कुमारहा कुमारघाती सोश्वत्थामा उद्विग्नं भीतं मनो यस्य तथाभूतः प्राणपरीप्सुः प्राणानाप्तुमिच्छुर्जिजीविषुरित्यर्थः, उर्व्यां भूमौ यावद्गमं यावद्गंतुं शक्यं तावद्रथेन साधनेन पराद्रवत्पलायितवान् को दक्षः यथा रुद्रभयात्तद्वत् ॥ १८ ॥ ❀ ❀ यदाऽशरणं रक्षकरहितं श्रांता वाजिनो यस्य तमैक्षत पर्यालोचितवान् तदा स द्विजात्मजो द्रौणिरात्मा त्रायतेऽनेनेत्यात्मत्राणं स्वरक्षणोपायं ब्रह्मशिरोनामकमस्त्रं मेनेऽवबुध्यते, ब्रह्मशिरोऽस्त्रेणार्जुनं हत्वात्मानं रक्षिष्यामि इत्यध्यवसितवानित्यर्थः ॥ १९ ॥ ❀ ❀ अथ सलिलमुपस्पृश्याचम्य समाहितः अस्त्रप्रयोगोपयुक्तमनःप्रणिधानयुक्तः संहारमस्त्रोपसंहारमजानन् प्राणकृच्छ्रे प्राणापद्युपस्थितायां तद् ब्रह्मशिरोस्त्रं संदधे प्रयुयोज ॥ २० ॥ ❀ ❀ ततः सर्वतोदिशं सर्वदिक्षु प्रादुःकृतं प्रादुर्भूतं प्रचंडमुग्रं तेजः प्राणापदमभिप्रेक्ष्य प्राणविपत्तिकारित्वेन उत्प्रेक्ष्य जिष्णुरर्ज्जुनो विष्णुं श्रीकृष्णमुवाच ॥ २१ ॥ ❀ ❀ तदेवाह कृष्णकृष्णेत्यादिपंचभिः । प्रादुःकृतं तेजो याथात्म्यात्तदुपसंहाराणामज्ञस्तदुपज्ञापनाय भगवंतं कृष्णं प्रष्टुकामो नाहमपि वेद्मीति मा बोच इत्यभिप्रायेण तावद्भगवंतं स्वाभाविकैर्धर्मैः स्तौति चतुर्भिः–हे कृष्ण "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक" इत्युक्तकृष्णशब्दोपस्थापितसर्वलोकसुखावहत्वरूपगुणानुसंधानकृतसंभ्रमाद् द्विरुक्तिः, हे महाबाहो "बाहूराजन्यः कृत" इत्युक्तरीत्या राजन्यकुलप्रभवबाहो, भक्तानाभयं करोतीति तथाभूतस्तस्य संबोधनं, दह्यमानानां संसृतेरपवर्गः पारभूतः संसाराद्विमोचक इति यावत् , त्वमेक एव कृत्स्नजगत्सुखावहस्य तत्रापि भक्तानामभयंकरस्य संसृतिरूपमहाभयक्षपणक्षमस्य तव कियानेतदुपस्थितभयापनयने प्रयास इति भावः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कुमारहा कुमारान् हतवान् द्रौणिरुर्व्यां भूमौ यावद्गमं गंतुं शक्यं तावद्रथेन पराद्रवदित्यन्वयः । किं कृत्वा आपतंतं तमर्जुनं दूराद्विलोक्य उद्विग्नमनाः संभ्रांतचेताः प्राणपरीप्सुर्जीवनलाभेप्सुः क इव रुद्रस्य भयात् आर्किरर्कपुत्रः शनैश्चरः, पुरा यथा रुद्रस्य तृतीयनेत्रस्य तेजसो भयादार्किः परिधावति तथेति वायुपुराणांतरप्रसिद्धमिदं, यथा क इति केचित् पठंति, ब्रह्मपंचमशिरश्छेदनाय प्रवृत्तं रुद्रं दृष्ट्वा ब्रह्मा परिधावतीत्येतदसुरजनमोहायेति ज्ञातव्यम् ॥ १८ ॥ ❀ ❀ अशरणं पालकरहितम् आत्मत्राणं आत्मानं त्रायत इति ब्रह्मशिरो नामास्त्रम् ॥ १९ ॥ ❀ ❀ ब्रह्मास्त्रप्रयोग इतिकर्तव्यतामाह अथेति । अथ ईक्षणानंतरमुपस्पृश्य आचम्य संहारमुपसंहारम्, अपिशब्देन विद्याया असंकल्पं दर्शयति तर्हि किमर्थं संदध इति तत्राह प्राणेति ॥ २० ॥ ❀ ❀ ततस्तस्मादस्त्रादुत्पन्नं सर्वतोदिशं प्राप तद्व्याप्नुवत्प्रचंडमभिप्रेक्ष्य दृष्ट्वा जिष्णुः अर्जुनः हेत्यनेन मनस्याश्चर्यं कृत्वेति दर्शयति ॥ २१ ॥ ❀ ❀ कृष्ण सदानंदात्मक कृष्ण दुःखकर्षणशील संसृतेर्जातेन तापाग्निना दह्यमानानां पुंसां त्वमेक एव संसृतेरपवर्गोऽसि दुःखनाशकरोऽसीत्यन्वयः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वतोदिशमिति सर्वत इत्यस्य योगे द्वितीया, दिशमिति जात्येकत्वं दिशां सर्वत्रेत्यर्थः, सार्वविभक्तिकस्तसिल् वा सर्वां दिशमित्यर्थः ॥ २१-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कः ब्रह्मा मृगो भूत्वा सुतां यभितुमुद्यतः सन् रुद्रस्य भयात् यथा पलायते स्म, अर्क इति पाठे वामनपुराणकथा ज्ञेया-तथाहि विद्युन्माली राक्षसः शैवः शिवदत्तेन सौवर्णेन विमानेन अर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् । ततः कुपितोऽर्को निजतेजोभिर्द्रावयित्वा तद्विमानं पातयन् तदैवायातस्य रुद्रस्य भयात् ततः पलायमानः पतन् वाराणस्यां लोलार्को बभूवेति ॥ १८ ॥ ❀ ❀ अशरणं रक्षकरहितम् आत्मत्राणम् आत्मरक्षोपायं, द्विजात्मज इत्यदीर्घदर्शित्वं सूचितम् ॥ १९ ॥ ❀ ❀ समाहितः कृतध्यानः ॥ २०-२१ ॥ ❀ ❀ अपवर्गो मोक्षरूपोऽसि तेनास्माकं संसृतेर्मोक्षमपि दास्यसि, किमुतास्मात् अग्नेस्त्राणमात्रमिति भावः ॥ २२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

विलक्ष्य प्रत्यभिज्ञाय प्राणपरीप्सुः प्राणान्प्राप्तुमिच्छुः यावद्गमं यावद् गंतुं शक्यं तावद् भूमौ पराद्रवत् पलायितवान् यथा रुद्रभयादर्कः । एवं हि वामनपुराणे कथास्ति विद्युन्माली राक्षसः शिवभक्तः स हि प्रसन्नाच्छिवात्सौवर्णं विमानं प्राप्यार्कवन्मेरोः परितः भ्रमन् रात्रिं विलोपितवान् । लोकहितचिकीर्षुरर्कस्तद्विमानं पातयामास, ततो भक्तपक्षपातिनि रुद्रे कुपितेऽर्कः पराद्रवदित्यादि ॥ १८ ॥ ❀ ❀ ऐक्षत पर्यालोचितवान् । आत्मा त्रायतेऽनेन तदात्मत्राणम् ॥ १९ ॥ ❀ ❀ तदस्त्रम् ॥ २० ॥ ❀ ❀ ततोऽस्त्रात् प्रादुःकृतं प्रादुर्भूतम् ॥ २१ ॥ ❀ ❀ किमिदमिति विज्ञापयितुं तावत्कृष्णेति चतुर्भिर्भगवंतं स्तौति संभ्रमे द्विरुक्तिः, हे कृष्ण "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः" इत्युद्योगोक्तनिरुक्तेः, हे मपरमसदानंद पुनर्हे कृष्ण कर्षति स्वानन्यभक्तं स्वसाधर्म्यं प्रापयतीति हे स्वसाधर्म्यप्रद ! एकः निःसमानातिशयः, दह्यमानानां संसारिणां संसृतेः संसारस्य अपवर्गो नाशकः ॥ २२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

दृष्टेऽपि न गतिर्मंदा जाता ततो वधपर्यवसायित्वं ज्ञातं तदाह आपतंतमिति । सापराधत्वात् दूरादेव दर्शनं क्षत्रियधर्माश्रितस्य युद्धोपस्थितौ प्रोत्साहो भवति बालवधात्तस्य पापेन मनस उद्वेगः, युद्धसाधनं रथः पलायनसाधनं जातमिति रथेनेत्युक्तं पलायने हेतुः प्राणपरीप्सुरिति, येषां रक्षणार्थे नीचसेवा पितृवधः अन्याय्यकरणं चांगीकृतं तेषां रक्षार्थं पलायनं किमाश्चर्यमिति । उर्व्यां यावद्गन्तुं शक्यते यावन्नद्यादिकं न व्यवधायियोगमंत्रादिना लोकांतरगमनेऽपि निस्तारो न भविष्यतीति दृष्टांतमाह-रुद्रभयाद्यथार्क इति । यथार्कः विद्युन्मालिनिराकरणे कृते स्वभक्तत्वाद्रुद्रस्य क्रोधो जातः, ततः शूलमुद्यम्य अर्कवधार्थं प्रवृत्तः । ततोऽर्कः पलायन् भूमौ पतितः काश्यां लोलार्कसंज्ञो जातः ॥ १८ ॥ ❀ ❀ तथायमपि लोकांतरेऽपि परिभ्रमन् पतेत्, अतः भूमावेव यावद्गन्तुं शक्यते तावत्पलायितवानित्यर्थः । तदा भयात् शरणान्वेषणे भगवद्वैमुख्येन गच्छतीति कोऽपि महादेवादिर्न शरणमभूत् पलायनं च कर्तुमशक्तः अश्वानां श्रांतत्वात् तदा ब्रह्मशिरः ब्रह्मास्त्रं आत्मनः शरणं भविष्यतीति ज्ञातवान् । न विद्यते शरणं यस्य स अशरणः श्रांता वाजिनो यस्य "आध्यात्मिकं चाधिदैवं ब्रह्मास्त्रं द्विविधं स्मृतम् । निवर्त्यमनिवर्त्यं च मंत्रयोः सुप्रतिष्ठितम् ॥" द्रोणाचार्येणास्मै ब्रह्मास्त्रद्वयं दत्तम्, उपसंहारस्तु न शिक्षितः, शरीरे विद्यमान एव मृग्योः (त्योः) पालयिष्यतीति इदानीमस्य उपसंहारज्ञानाभावेऽपि प्रयोगेच्छा द्विजात्मजत्वेनादीर्घदर्शनाज्जाता ॥ १९ ॥ ❀ ❀ ततः पलायनं त्यक्त्वा भिन्नप्रक्रमेण

आचमनं विधाय समाहितः सन् देवतासान्निध्यार्थं उपसंहाराज्ञाने संधाने लोकक्षयान्महत्पापं च भविष्यतीति ज्ञात्वापि प्राणकृच्छ्र उपस्थिते अयुक्तमप्यापदि कर्त्तव्यमिति बुद्ध्या तत् संदधे ॥ २० ॥ ❀ ❀ ततो यज्जातं तदाह ततः प्रादुरभूत्तेज इति । प्रचंडमप्रतिक्रियं प्रचंडमित्यादि भिन्नं वाक्यं, सर्वतोदिशं अर्जुनस्य अत एव प्राणापहम् ॥२१॥ ❀ ❀ द्रौणेरिदमस्त्रमित्यज्ञात्वा किंचिदन्यदेव दैवयोगान्नाशकमुपस्थितमिति तदपनोदनार्थं तत्स्वरूपज्ञानार्थं च भगवंतं प्रष्टुं प्रथमं स्तौतीति–चतुर्विधपुरुषार्थसिद्धयर्थं चतुर्भिः श्लोकैः स्तौति कृष्णकृष्णेत्यादिभिः । आदरे वीप्सा भयाद्वा द्विरुक्तिः, महांतो बाहवो यस्य इंद्रादयो बाहवो यस्य अनेन क्रियाशक्तेराधिक्यमुक्तं पालकत्वं वा सामान्यतः सर्वेषां पालकत्वमुक्तं भक्तान् प्रति विशेषेण पालकत्वमाह भक्तानामभयंकरेति, अन्येषामुपस्थिते भये परिपालनं करोति भक्तानां तु अभयमेवोपस्थापयति न भयं, किंच त्वत्तो दूरे स्थिता दह्यमाना भवंति, दाहेष्वपि महान् संसारदाहः जन्ममरणरूपः तस्य त्वमपवर्गः संसृतेर्हेतोर्दह्यमानानामेकस्त्वमेवापवर्गः "आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते" इति ॥ २२ ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न ।

श्रीगिरिधरकृता बालप्रबोधिनी

तमर्जुनमापतन्तं अनुधावन्तं दूरादालक्ष्य दृष्ट्वा उद्विग्नं भयेन कम्पितं मनो यस्य सः प्राणपरीप्सुः प्राणान् प्राप्तुमिच्छुर्जिजीविषुः सोऽश्वत्थामा यावद्गमं यावद्गन्तुं शक्यं तावदुर्व्यां रथेन साधनेन पराद्रवत् पलायतेत्यन्वयः । ननु महाशूरतया प्रसिद्धस्य कथं भयं जातमिति वीक्षायां बालहत्यावशादित्यभिप्रायेणाह–कुमारहेति, बालघातीत्यर्थः । पलायने दृष्टान्तमाह–रुद्रभयाद्यथा क इति । को ब्रह्मा मृगो भूत्वा सुतां यब्धुमुद्यतः सन् रुद्रस्य भयाद्यथा पलायते स्म तथेत्यर्थः । अर्क इति पाठे तु वामनपुराणकथा सूचिता । तथाहि–विद्युन्माली नाम कश्चिद्राक्षसो रुद्रभक्तस्तस्मै तेन सौवर्णं विमानं दत्तं ततोऽसावर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् । ततोऽर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितं, तच्छ्रुत्वा कुपिते रुद्रे भयादर्कः पर्यद्रवत् । ततो रुद्रस्य क्रूरदृष्ट्या दह्यमानः पतन्वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जात इति ॥ १८ ॥ ❀ ❀ द्विजात्मज इति तस्यादीर्घदर्शिता सूचिता, उपसंहारज्ञानाभावेन तत्प्रयोगस्यानुचितत्वात् । यदात्मानमशरणं भगवद्विमुखत्वाद्रक्षकहीनमैक्षत पर्यालोचितवांस्तदा आत्मा त्रायतेऽनेनेत्यात्मत्राणं स्वरक्षणोपायं ब्रह्मशिरोनामकमस्त्रं मेने अबाबुद्ध्यत । ब्रह्मशिरोऽस्त्रेणार्जुनं हत्वाऽऽत्मानं रक्षिष्यामीत्यध्यवसितवानित्यर्थः । अन्यशरणाभावेऽपि पलायनं तु रक्षकमस्त्येवेति चेन्न, तस्यापि कुण्ठितत्वादित्याह–श्रान्तवाजिनमिति । श्रान्ता वाजिनो यस्य तम् ॥ १९ ॥ ❀ ❀ अथ तथा निश्चयानन्तरं सलिलमुपस्पृश्य आचम्य समाहितः एकाग्रमनाः उपसंहारमजानन्नपि तद्ब्रह्मास्त्रं सन्दधे प्रयुयोज । यद्युपसंहारं न ज्ञातवांस्तदा कथं तत्प्रयोगं कृतवानित्यपेक्षायामाह–प्राणानां कृच्छ्रे कष्टे उपस्थिते प्राप्ते सतीत्यर्थः ॥ २० ॥ ❀ ❀ ततो ब्रह्मास्त्रात् सर्वतोदिशं सर्वदिक्षु प्रादुष्कृतं प्रादुर्भूतम् अत एव प्रचण्डमुग्रं भयङ्करम् अत एव प्राणापहं प्राणवियोजकं तेजोऽभिप्रेक्ष्य दृष्ट्वा तन्निदानम् अजानन् जिष्णुरर्जुनो विष्णुं स्वसारथ्ये वर्तमानं श्रीकृष्णमुवाचेत्यन्वयः । हेत्यनेन भगवतोऽद्भुतकर्मत्वं सूचयति । यत्सारथ्यमङ्गीकृत्यापि तन्मायावरणं न दूरीकृतवानिति ॥ २१ ॥ ❀ ❀ प्रवृत्तं तेजस्तत्त्वं पृष्टं धर्मादिचतुर्विधपुरुषार्थदातृत्वात् प्रथमं चतुर्भिः श्लोकैर्भगवन्तं स्तौति–कृष्णकृष्णेति भयाद् द्विरुक्तिः । संसृतेर्जन्ममरणादिरूपाया हेतोर्दह्यमानानां प्राणिनामपवर्गो मोक्षस्वरूपस्त्वमेक एवासीत्यन्वयः । कथमेवमित्यपेक्षायां परमानन्दस्वरूपत्वादित्याशयेन सम्बोधनं कृष्ण कृष्णेति 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति वाक्यात् । न केवलं मोक्षस्वरूप एव त्वं किन्तु मोक्षदाताऽपि त्वमेवेत्याशयेन सम्बोधयति–हे भक्तानामभयङ्करेति । तत्र समर्थत्वे "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुत्युक्तानन्ताचिन्त्यशक्तिमत्त्वं हेतुं सूचयन् पुनः सम्बोधयति–हे महाबाहो इति ॥ २२ ॥

हिन्दी अनुवाद

बच्चोंकी हत्यासे अश्वत्थामाका भी मन उद्विग्न हो गया था । जब उसने दूरसे ही देखा कि अर्जुन मेरी ओर झपटे हुए आ रहे हैं, तब वह अपने प्राणोंकी रक्षाके लिये पृथ्वीपर जहाँ तक भाग सकता था, रुद्रसे भयभीत सूर्यकी-भाँति भागता रहा ॥ १८ ॥ ❀ ❀ जबसे उसने देखा कि मेरे रथके घोड़े थक गये हैं और मैं बिलकुल अकेला हूँ, तब उसने अपनेको बचानेका एकमात्र साधन ब्रह्मास्त्र ही समझा ॥ १९ ॥ ❀ ❀ यद्यपि उसे ब्रह्मास्त्रको लौटानेकी विधि मालूम न थी, फिर भी प्राणसङ्कट देखकर उसने आचमन किया और ध्यानस्थ होकर ब्रह्मास्त्रका सन्धान किया ॥ २० ॥ ❀ ❀ उस अस्त्रसे सब दिशाओंमें एक बड़ा प्रचण्ड तेज फैल गया । अर्जुनने देखा कि अब तो मेरे प्राणोंपर ही आ बनी है; तब उन्होंने श्रीकृष्णसे प्रार्थना की ॥ २१ ॥ ❀ ❀ अर्जुनने कहा—श्रीकृष्ण ! तुम सच्चिदानन्दस्वरूप परमात्मा हो, तुम्हारी शक्ति अनन्त है । तुम्हीं भक्तोंको अभय देनेवाले हो । जो संसारकी धधकती हुई आगमें जल रहे हैं, उन जीवोंको उससे उबारने वाले एकमात्र तुम्हीं हो ॥ २२ ॥

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥
स एव जीवलोकस्य मायामोहितचेतसः। विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ २४ ॥
तथायं चावतारस्ते भुवो भारजिहीर्षया। स्वानां चानन्य[1]भावानामनुध्यानाय चासकृत् ॥ २५ ॥
किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहम्। सर्वतोमुखमायाति तेजः परमदारुणम् ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यतः त्वमीश्वरः साक्षात्। कुतः यतः प्रकृतेः परः पुरुषः। तत्कुतः यतः आद्यः कारणम्। कारणत्वेप्यविकारितामाह। मायां व्युदस्य अभिभूय कैवल्यरूपः आत्मन्येव स्थितः ॥ २३ ॥ ❀ ❀ त्रिवर्गदातापि त्वमेवेत्याह स इति। यस्त्वं मायामभिभूय स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से। वीर्येण प्रभावेण ॥ २४ ॥ ❀ ❀ तथा चानेनावतारेण तव साधुपक्षपातो लक्ष्यत इत्याह। तथेति। किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह। स्वानां ज्ञातीनाम् अनुध्यानाय च तथा अनन्यभावानाम् एकांतभक्तानां च ॥ २५ ॥ ❀ ❀ एवं स्तुत्वा प्रस्तुतं विज्ञापयति-किमिति। किमात्मकमिदं कुतो वा आयातीति। स्विद्वितर्के ॥ २६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्प्रकृतिपरत्वम्। अत्र सन्दर्भः-मायाहेतुकायाः संसृतेर्नाशकत्वेन मायातो विलक्षणां शक्तिं दर्शयति। त्वं साक्षात्पुरुषो भगवान् तथा य ईश्वरो अन्तर्याम्याख्यः पुरुषः सोपि त्वमेव। तदेवमुभयस्मिन्नपि प्रकारे प्रकृतेः परस्तदसंगी। ननु कथं केवलानुभवानन्दस्यापि तदनुभवित्वं यतो भगवत्त्वमपि लक्ष्यते। कथं चेश्वरत्वात्प्रकृत्यधिष्ठातृत्वेपि तदसंगित्वं तत्राह-मायां व्युदस्येति। अव्यभिचारिण्या स्वरूपशक्त्या तामाभासशक्तिं दूरे विधाय तयैव स्वरूपशक्त्या कैवल्ये "परावराणां परम आस्ते कैवल्यसंज्ञितः। केवलानुभवानन्दसन्दोहो निरुपाधिकः" इत्येकादशोक्तरीत्या कैवल्याख्ये केवलानुभवानन्दे आत्मनि स्वरूपे स्थितः अनुभूतस्वरूपसुख इत्यर्थः। तदुक्तं षष्ठे देवैरपि "स्वयमुपलब्धनिजसुखानुभवो भवान्" इति। संदोहशब्देन चैकादशे वैचित्री दर्शिता। सा च शक्तिवैचित्र्यादेव भवतीति। अत एव सत्येव स्वरूपशक्तिः प्रकृतिर्नामात्र मायायास्त्रैगुण्यम्। एवमेव शक्तित्रयविवृत्तिः श्रीस्वामिभिरेव दर्शिता। "परं प्रधानं पुरुषम्" इत्यादिदेवहूतिवाक्ये तत्र पुरुषस्यापि मायांतःपातित्वं तदधिष्ठातृतयोपचर्यते। एवं वस्तुतः तस्य तु तस्याः परत्वं यथा श्रीकपिलवाक्ये "अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः। प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥' इति। त्रिशक्तिनिरूपणे विशेषजिज्ञासा चेद्भगवत्सन्दर्भो द्रष्टव्यः। अथवा श्रीवैकुंठे मायां निषेधन्नपि साक्षात्स्वरूपशक्तिमेवाह-त्वमिति। कैवल्ये मोक्षाख्ये श्रीवैकुंठलक्षणे आत्मनि स्वांश एव स्थितः। किं कृत्वा तत्रातिविराजमानया चिच्छक्त्या मायां दूरस्थितामपि तिरस्कृत्यैव। मतं चैतन्मायादिकं निषेधता श्रीशुकदेवेन "प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः" इति। "मोक्षं परं पदं लिंगममृतं विष्णुमंदिरम्" इति पाद्मोत्तरखंडे वैकुण्ठपर्यायाः। विश्वनाथः-ननु त्वन्मातुलेयोहं त्वत्सम एव। मैवं वादीरित्याह-त्वमिति। ननु त्वं प्रकृतेः पर इति। किं प्रकृतिशब्देनाविद्यां मायां वा ब्रूषे तत्राह-चिच्छक्त्या स्वरूपभूतया शक्त्या सुभगया पट्टमहिष्येव मायां विद्याविद्येति वृत्तिद्वयवतीं दुर्भगामिव स्वशक्तित्वात्प्राप्तां व्युदस्य दूरीकृत्य तया शक्त्या सहित एव त्वमात्मनि चिन्मये स्वरूपे स्थितः। ननु चिच्छक्त्येत्यस्याः कारणत्वेन मत्तो भिन्नतया स्थितत्वं कथं ममात्मनि स्थितत्वमित्यत आह-कैवल्य इति। केवलस्य भावः कैवल्यं तस्मिन्निति तया सहितत्वेपि तव कैवल्यमेव, तस्याः स्वरूपशक्तित्वात्। तस्मिंश्च सति त्वमात्मनि स्थितो वस्तुत एवेति भावः। अतः स्वरूपभूता चिच्छक्तिः या त्वत्तः सदाऽभिन्नैव त्वद्देहेंद्रियपरिकरादिरूपेण तिष्ठति "परास्य शक्तिर्बहुधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः। माया तु छायेव त्वदस्वरूपत्वात् ज्ञानाज्ञानगुणमयजगद्रूपेण वर्त्तत इति त्वत्तो भेद एव तस्या मायायास्त्वच्छक्तित्वात्कचिदभेदोपीति, भिन्नाभिन्नरूपा सा शक्तिरित्यर्थः। मायैव शक्तिरेका नान्येति मतं परास्तम्। पुरुषपदं तीर्थेन प्रकारांतरेण व्याख्यातम्। पापान्यौषददहदिति पुरुषः "सर्वान्पाप्मन औषत्तस्मात्पुरुषः" इति श्रुतेः। पुरु बहु सरतीति वा पुरुषः। "स भगवान्कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतिर्हि कैवल्ये स्थित इह प्रमाणम् ॥ २३ ॥ ❀ ❀ आदिनार्थकामग्रहः ॥ २४ ॥ ❀ ❀ यथा भगवतस्तवान्येवताराः पुंसामनुध्यानादिना मोक्षहेतवस्तथायमप्यवतारः प्राकट्यं परमभक्ताया भुवो भारजिहीर्षया जातोऽप्यन्येषां स्वानां भक्तानामसकृदनुध्यानाय स्यादित्यतो मोक्षं साधयतस्तव भक्तैहिकदुःखनिवारकत्वं किं वर्णनीयमिति भावः ॥ २५ ॥ ❀ ❀ यत्तेजः परमदारुणं सर्वतोमुखं सर्वदिङ्मुखं तदिह किं स्वित्कुतो

---

१. प्रा० पा०—स्वानामनन्य०।

वेति पृष्टे भगवानुवाच । कंचिद्देवं पृच्छ किमिदमिति चेत्तत्राह–हे देवदेवेति । त्वं तु देवानामपि देवः । न हि त्वत्तः परः कश्चिद्देवोस्तीति भावः ॥ २६ ॥

श्रीमद्वीरराघवव्याख्या

नन्वेवंविधस्त्वीश्वरो नाहमित्यत आह त्वमिति । त्वमेव साक्षादीश्वरः यत्किंचिदीशितव्यत्वापेक्षया सर्वोपि लोक ईश्वर एवेतीतरसाधारणैरभिप्रेतमीश्वरमितरस्माद्व्यावर्त्तयति–आद्य आदौ भवः निखिलजगत्कारणत्वेनावस्थितः पुरुषः सर्वांतरात्मतया सर्वप्रशासितृत्वेन सर्वहृदयांतर्वर्तीत्यर्थः, अथापि प्रकृतेः परः "भूमिरापो नलो वायुः खं मनो बुद्धिरेव च । अपरेयमितस्त्वन्यामि'त्यादिश्लोकद्वयोक्तप्रकृतिद्वयाद्विलक्षणः पुरुषशब्देन "पूःसंज्ञे वै शरीरेऽस्मिन् शयनात्पुरुषो हरिरि"ति निरुक्तेन सर्वांतरात्मत्वं सर्वाधारत्वं च फलितम् । प्रकृतेः पर इत्यनेन प्रकृतिगतधर्मास्पर्शश्च । नन्वीश्वरश्च सर्वाधारकश्चेत्तस्य किं धारकं देहाद्विलक्षणस्यापि जीवस्य देवोऽहं मनुष्योऽहमिति देहधर्मस्पर्शदर्शनात्कथं तस्य प्रकृतिधर्मास्पर्शश्चेत्यतो विशिनष्टि चिच्छक्त्या । शक्तिशब्दः सर्वत्र कार्योपयोगापृथक्सिद्धविशेषणत्वाच्चिच्छक्त्या ज्ञानशक्त्या नित्याविर्भूतापरिच्छिन्नधर्मभूतज्ञानशक्त्या मायां प्रकृतिं चेतनाचेतनात्मिकां व्युदस्य मायाशब्दोत्रोपचारान्मायाधर्मपरः, मायाधर्मान् व्युदस्य मायाधर्मैरस्पृष्ट इत्यर्थः । केवल एव कैवल्यः स्वार्थे ष्यञ्, केवले आत्मनि स्थितः स्वे महिम्नि प्रतिष्ठितः इत्युक्तरीत्या आधारांतरानपेक्ष इत्यर्थः । जीवस्तु कर्मणा संकुचितज्ञानत्वाद्देहात्मभ्रमे देहधर्मानात्मन्यध्यस्यति ईश्वरस्तु चिच्छक्त्या तान् व्युदस्य तत्र जीवांतरात्मतया तत्तज्जीवकर्मानुरूपं फलं प्रयच्छति तदाधार्येवतिष्ठतीति भावः ॥ २३ ॥ ❀ ❀ तदेवाह य इति उक्तविध ईश्वर एव त्वं मायया देहात्मभ्रमस्वतंत्रात्मभ्रमादिरूपमायाकार्येण मोहितं चेतो यस्य तस्य जीवलोकस्य धर्मादिलक्षणं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयरूपं श्रेयस्तद्विपर्ययरूपमश्रेयश्च तत्तत्कर्मानुगुण्येन स्वेन स्वेन वीर्येण स्वाभाविकानामच्युतेन माहात्म्येनोपलक्षितः विधत्से प्रयच्छसि ॥ २४ ॥ ❀ ❀ न केवलमंतरात्मतयैवं विधत्सेऽपि त्ववतारमुखेनापीत्यभिप्रेत्याह तथेति । भुवो भारभूतानां दुष्कृतजिहीर्षया संहारेच्छयाऽनन्यभावानामनन्यप्रयोजनभक्तियोगनिष्ठानां स्वकीयानामसकृदनुध्यानाय चायं तवावतारः ॥ २५ ॥ ❀ ❀ एवं संस्तुत्य प्रकृतं पृच्छति किमिति, इदं तेजः किंस्विदिति याथात्म्यप्रश्नः कुतो वेति हेतुप्रश्नः कुतो वा आगच्छति कुतश्च शमिष्यति इत्यर्थः । स्वस्य त्वेतदज्ञानमावेदयति न वेद्म्यहमिति, तर्हि किं जानासीत्यत्राह सर्वतोमुखं परमदारुणं तेज आयात्येतावदेव वेद्मीत्यर्थः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनिष्टपरिहारसामर्थ्यं तवास्तीत्याह त्वमिति । पापानि औषददहदिति पुरुषः "सर्वान् पाप्मन औषत् तस्मात्पुरुष" इति श्रुतेः, पुरुषः पुरु बहु सरतीति वा, सर्वेषामादौ भवनादाद्यः साक्षादीश्वरः निरुपचरितैश्वर्योपेतः । तत्कथमिति तत्राह । प्रकृतेरिति चित्प्रकृतेरप्युत्तमः एवंविधस्त्वं चिच्छक्त्या स्वरूपज्ञानशक्त्या मायां बंधकशक्तिं निरस्य कैवल्ये प्रकृतिप्राकृतबंधरहिते आत्मनि स्वरूपे स्थितो यतोऽत इत्यन्वयः । "स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतेः ॥ २३ ॥ ❀ ❀ स प्रकृतिप्राकृतसंबंधरहित एव बंधकशक्त्या मोहितबुद्धेर्जीवलोकस्य स्वरूपवीर्येण धर्मादिलक्षणं श्रेयो विधित्सुरवतरतीत्यन्वयः ॥ २४ ॥ भगवदवतारास्ते यथा पुंसामनुध्यानादिना मोक्षहेतवस्तथा भुवो भारजिहीर्षया कृतोऽयं चावतारश्चानन्यभक्तानां स्वानामसकृदनुध्यानाय स्यादित्यतो मोक्षं साधयतस्तव भक्तैहिकदुःखनिवारकत्वं किं वर्णनीयमिति भावः । भूभारानुध्यानयोः समुच्चये चशब्दः ॥ २५ ॥ ❀ ❀ यत्तेजः परमं दारुणं सर्वतोमुखमायाति हे देव तदिदं किंस्वित्कुतो वेति अहं न वेद्मीत्यन्वयः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मायाहेतुकायाः संसृतेः नाशकत्वेन मायातो विलक्षणां शक्तिं दर्शयति त्वमिति । त्वं साक्षात् पुरुषो भगवान् तथा य ईश्वरः अन्तर्याम्याख्यः पुरुषः सोऽपि त्वमेव तदेवमुभयस्मिन्नपि प्रकाशे प्रकृतेः परस्तदसंगः । ननु कथं केवलानुभवानन्दस्यापि तदनुभवित्वं यतो भगवत्त्वमपि लक्ष्येत कथमीश्वरत्वात् प्रकृत्यधिष्ठातृत्वेपि तदसंगित्वं तत्राह–मायां व्युदस्येति, अव्यभिचारिण्या स्वरूपशक्त्या तामाभासशक्तिं दूरे विधाय तस्यैव स्वरूपशक्त्या कैवल्ये 'परावराणां परम आस्ते कैवल्यसंज्ञितः । केवलानुभवानन्दसंदोहो निरुपाधिकः ॥' इत्येकादशोक्तरीत्या कैवल्याख्ये केवलानुभवानन्दे आत्मनि स्वरूपे स्थितः, अनुभूतस्वरूपसुख इत्यर्थः । तदुक्तं षष्ठे देवैरपि 'स्वयमुपलब्धनिजसुखानुभवो भवानि'ति । संदोहशब्देन चैकादशे वैचित्री दर्शिता, सा च शक्तिवैचित्र्यादेव भवतीति अत एवमस्यैव स्वरूपशक्तिः प्रकृतिर्नामात्र मायायास्त्रैगुण्यम्, एवमेव शक्तित्रयविवृतिः श्रीस्वामिभिरेव दर्शिता । परं प्रधानपुरुषमित्यादिदेवहूतिवाक्ये अत्र पुरुषस्यापि मायान्तःपातित्वं तदधिष्ठानात् तथोपचर्यते एव । वस्तुतः तस्य तु तस्याः परत्वं यथा श्रीकपिलवाक्ये–'अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितमि'ति । त्रिशक्तिनिरूपणे विशेषजिज्ञासा चेत् भगवत्संदर्भो द्रष्टव्यः । अथवा त्वमाद्य इत्यादि मूलपद्यमेवमवतार्यम्–श्रीवैकुण्ठे मायां निषेधन्नपि साक्षात् स्वरूपशक्तिमेवाह त्वमिति, कैवल्ये मोक्षाख्ये श्रीवैकुण्ठलक्षणे आत्मनि स्वांशे एव स्थितः, किं कृत्वा तत्रातिविराजमानया

चिच्छक्त्या मायां दूरस्थितामपि तिरस्कृत्यैव मतं चैतन्मयाधिकं निषेधता श्रीशुकदेवेन 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' इति, 'मोक्षं परं पदं लिङ्गममृतं विष्णुमन्दिरमि'ति पाद्मोत्तरखंडे वैकुण्ठपर्य्यायशब्दः ॥ २३-२४ ॥ ❀ ❀ यथान्ये पुरुषादयोऽवतारास्तथायमवतारः साक्षाद्भगवतः कृष्णाख्यस्य तवैव प्राकट्यम्, परमभक्ताया भुवो भारजिहीर्षया जातोऽपि अन्येषां स्वानां भक्तानामसकृच्च मुहुरनुध्यानाय निजभजनसौख्याय भवति ॥ २५-३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु त्वन्मातुलेयोऽहं त्वत्सम एव, मैवं वादीरित्याह त्वमिति। ननु त्वं प्रकृतेः पर इति किं प्रकृतिशब्देनाविद्यां मायां वा ब्रूषे तत्राह। चिच्छक्त्या स्वरूपभूतया शक्त्या सुभगया पट्टमहिष्येव मायां विद्याविद्येति वृत्तिद्वयवतीं दुर्भगामिव स्वशक्तित्वात् प्राप्तां व्युदस्य दूरीकृत्य तया शक्त्या सहित एव त्वम् आत्मनि स्वचिन्मयस्वरूपे स्थितः। ननु चिच्छक्त्येत्यस्याः कारणत्वेन मत्तो भिन्नतया स्थितत्वं कथं ममात्मनि स्थितत्वमित्यत आह कैवल्य इति। केवलस्य भावः कैवल्यं तस्मिन् इति तया सहितत्वेऽपि तव कैवल्यमेव तस्य स्वरूपभूता चिच्छक्तिः, सा त्वत्तः सदा अभिन्नैव, त्वद्देहेन्द्रियपरिकरादिरूपेण तिष्ठति "परास्य शक्तिर्बहुधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" श्रुतेः। माया तु छायेव त्वदस्वरूपत्वात् ज्ञानाज्ञानगुणमयजगद्रूपेण वर्त्तते इति त्वत्तो भेद एव तस्या माययास्त्वच्छक्तित्वात् क्वचिदभेदोऽपीति भिन्नाभिन्नरूपा सा शक्तिरित्यर्थः। मायैव शक्तिरेका नान्येति मतं परास्तमेव ॥ २३ ॥ ❀ ❀ स एव कैवल्ये स्थित एव ॥ २४ ॥ ❀ ❀ तथा तेनैव प्रकारेण व्युदस्तमायस्वचिन्मयस्वरूपेण अयमवतारः प्रापंचिकलोके प्राकट्यम् ॥ २५ ॥ ❀ ❀ एवं स्तुत्वा प्रस्तुतं विज्ञापयति किमिदमिति ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आद्यो विश्वहेतुत्वेन सर्वेभ्यः पूर्वः पुरुषः सर्वांतरात्मा साक्षादीश्वरः स्वयं प्रभुः प्रकृतेः, "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगदि"ति भगवदुक्तायाः अपरायाः परायाश्च परप्रकृतिमत्त्वयोत्कृष्टः। एतदेवाह मायामपरां प्रकृतिं चिच्छक्त्या धर्मभूतज्ञानरूपया व्युदस्याभिभूय स्थितः। पराप्रकृतितः परमोत्कृष्टत्वं दर्शयति कैवल्ये-स्वार्थे ष्यञ्-आत्मनि स्वस्मिन्नेव स्वयं स्थितः "प्रधानक्षेत्रज्ञपतिर्गुणेशः, अणोरणीयान्महतो महीयानि"त्यादिश्रुतिभ्यः ॥ २३ ॥ ❀ ❀ एतदुपपादनाय पुरुषार्थप्रदत्वं दर्शयति स एवेति। स एवं त्रिगुणप्रकृतिमोहितचेतसः पराप्रकृतेर्जीवस्य धर्मार्थकाममोक्षाख्यं श्रेयो विधत्से प्रयच्छसि। ननु मायामये लोके मायामोहितेषु जीवेषु मध्ये त्वदुक्तलक्षणस्य ममावतरणं किमर्थमित्यत आह तथेति ॥ २४-२५ ॥ अथ प्रस्तुतं विज्ञापयति किमिति ॥ २६-२७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत्रोपपत्तिं श्लोकद्वयेनाह। स वै पतिः स्यादिति न्यायेन प्रथमतः स्वस्य दोषाभावः, तदनु परस्य दोषदूरीकरणमिति। तत्र दोषाः पंचविधाः कर्मजाः कालजाः स्वभावजाः पापाद्भवाः देशोद्भवाश्चेति। ते क्रमेण निवार्यंते कर्मापेक्षयाप्याद्यत्वात् स्वतंत्रत्वेन तदधीनत्वाभावाच्च न तस्मिन् कर्मजाः। किंच सर्वेषामयं नियामकः भगवान् साक्षादात्मनामपि, अतः कालस्यापि नियामक इत्युक्तं भवति, तेन न कालजाः। प्रकृतिनियामकत्वाच्च न प्राकृताः। भगवतस्तु बह्व्यः शक्तयः संति अन्योन्यविरुद्धाः तत्तत्कार्यार्थं निर्मिताः। तत्र यस्यामेव आसक्त्या क्रीडायां क्रियमाणायां तद्दोषप्रादुर्भावः संभाव्यते तदैव तद्विरुद्धशक्तिप्रादुर्भावनेन पूर्वान् दूरीकरोति तथा चिच्छक्त्या मायां व्युदस्य तिष्ठतीति न मायिकदोषसंबंधः। देशदोषस्तु न संभाव्य एव, सर्वधर्मास्पृष्टे केवल एवात्मनि विद्यमानत्वात् अतः स्वतः पंचविधदोषरहितः ॥ २३ ॥ ❀ ❀ अन्येषां दोषदूरीकरणं कैमुत्यन्यायेनाह स एवेति। पूर्वोक्तगुणयुक्त एव मायामोहितचेतसो जीवस्य भ्रांतस्य भ्रांत्या यदेव प्रार्थयते तस्मै प्रयच्छसीति सर्वाभीष्टदातृत्वमुक्तं, अन्यथा सर्वेषामभजनीयः स्यात् ॥ २४ ॥ ❀ ❀ किंच सामान्यत एतत्तव स्वरूपमुक्तं विशेषतस्तव स्वरूपविचारे अस्मदादीनां न किंचित् कर्तव्यमित्यभिप्रायेणाह तथायमिति। तथा चायमवतारस्ते यथा भवान् सर्वदोषरहितः सर्वाभीष्टदः तथा अवतारोऽप्ययम्। येषां मते भगवानेव साकारः आनन्दमात्रकरपादमुखोदरादिः मायाजवनिकादूरीकरणेन प्रादुर्भूत इति तेषां न किंचित् वक्तव्यम्, येषामपि मते स्वेच्छामये शरीरविशेषे भगवतोऽनंतसूर्यप्रकाशस्य अयोगोलके वह्नेरिव आगमनमवतार इति तन्मतेनैवं कथनं, तस्यावतारस्य प्रयोजनद्वयं सर्वजनीनं भुवो भारदूरीकरणं वैष्णवशास्त्रे तु स्वानामनन्यभावानां निरंतरानुध्यानार्थम्। उभयम् अर्जुनस्याभिप्रेतमिति उभयथाप्यस्माकं हितकरणं भूभारहरणसहायात् भक्तत्वाच्च ॥ २५ ॥ ❀ ❀ एवं स्थिते किमिदमकस्मादाविर्भूतमिति तत्कथयेत्याह सर्वदिशत्वात् कुतो वेति न ज्ञायते कुत्र वा मूलमिति। अवतारेपि तव न किंचिदज्ञातं देवकार्यसाधनत्वात् तदाह देवदेवेति। तथात्वमपीत्याशंक्य अब्रह्मत्वान्नाहं वेद कीर्त्युपपत्तिः अत्र न संभवति यतः, सर्वतो मुखस्वरूपशक्तित्वात् तस्मिंश्च सति त्वमात्मनि स्थितं वस्तु त एवेति भावः ॥ २६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

त्वमाद्य इत्यत्र । न प्राकृता इति । न स्वभावजाः । अत्र प्रकृतिमाययोर्भिन्नतया निर्देशात् प्रकृतिपदस्य स्वभावपरत्वं बोध्यम् । पूर्वानिति दोषतया सम्भावितान् धर्मान् ॥ २३-२६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

निखिलजगत्कारणमपि त्वमेवेत्याह–त्वमाद्य इति । सकलप्राणिनियन्ताऽपि त्वमेवेत्याह–साक्षादीश्वर इति । परम्परया कालकर्मादयोऽपि नियन्तारो भवन्तीति तन्निरासाय साक्षादित्युक्तम् । तथा च विकारित्वं स्यादिति शङ्कानिरासायाह–प्रकृतेः परः पुरुष इति । कथं सकलकारणस्य सर्वनियन्तुश्च प्रकृतिपरत्वं सम्भवतीति वीक्षायां जीववदहन्ताममतारहितत्वादित्याह–चिच्छक्त्याऽहन्ताममताकारणभूतां मायामविद्यां व्युदस्य तिरस्कृत्य कैवल्यरूपे आत्मनि स्वरूपे एव स्थित इति ॥ २३ ॥ ❀ ❀ पुरुषार्थदानेन सर्वपालकत्वमाह–स एवेति । उक्तविध ईश्वर एव त्वं मायया अविद्यया मोहितं देहेन्द्रियाद्यात्माभिमानवच्चेतो यस्य तस्य जीवलोकस्य प्राणिजातस्य स्वेन वीर्येणाचिन्त्यप्रभावेण तत्तत्कर्मानुगुण्येन धर्मादिलक्षणं धर्मार्थकाममोक्षःश्रेयः पुरुषार्थं विधत्से प्रयच्छसीत्यन्वयः ॥ २४ ॥ ❀ ❀ यथा रूपान्तरेण धर्मादि विधत्से तथा भुवो भारभूतानां दुराचाराणां जिहीर्षया संहारेच्छया स्वानां स्वकीयानाम् अनन्यभावानामनन्यप्रयोजनभक्तियोगनिष्ठानाम् असकृन्निरन्तरम् अनुध्यानाय च ते त्वयाऽयं चावतारः कृत इति शेषेणान्वयः ॥ २५ ॥ ❀ ❀ एवं संस्तुत्य प्रकृतं पृच्छति–किमिदमिति । यत्परमदारुणमतिभयङ्करं तेजः सर्वतोमुखमायाति तदिदं किंस्वित् परमार्थतः किंरूपं कुतो वा हेतोरायातीत्यहं न वेद्मि न जानामीति त्वं वदेति शेषेणान्वयः । अहमपि न जानामीति त्वया न वक्तव्यं सर्वदेवाराधितचरणत्वेन सर्वज्ञत्वादित्याशयेन सम्बोधयति–हे देवदेवेति ॥ २६ ॥

हिन्दी अनुवाद

तुम प्रकृतिसे परे रहनेवाले आदि पुरुष साक्षात् परमेश्वर हो । अपनी चित्-शक्ति (स्वरूपशक्ति) से बहिरङ्ग एवं त्रिगुणमयी मायाको दूर भगाकर अपने अद्वितीय स्वरूपमें स्थित हो ॥ २३ ॥ ❀ ❀ वही तुम अपने प्रभाव से माया-मोहित जीवोंके लिये धर्मादिरूप कल्याणका विधान करते हो ॥ २४ ॥ ❀ ❀ तुम्हारा यह अवतार पृथ्वीका भार हरण करनेके लिये और तुम्हारे अनन्य प्रेमी भक्तजनोंके निरन्तर स्मरण-ध्यान करनेके लिये है ॥ २५ ॥ ❀ ❀ स्वयम्प्रकाशस्वरूप श्रीकृष्ण ! यह भयङ्कर तेज सब ओरसे मेरी ओर आ रहा है । यह क्या है, कहाँसे, क्यों आ रहा है ? इसका मुझे बिल्कुल पता नहीं है ! ॥ २६ ॥

श्रीभगवानुवाच

वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् । नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥ २७ ॥
न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्शनम् । जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ॥ २८ ॥

सूत उवाच

श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा । स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय सन्दधे ॥ २९ ॥
संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते । आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तत्प्रयोगे कुशल इत्यर्थः । यतः असौ उपसंहारं न वेद । एतच्च त्वं तु वेत्थ जानासि ॥ २७ ॥ ❀ ❀ प्रत्यवकर्शनं कृशत्वकरं निवर्तकमित्यर्थः । अतः तदस्त्रतेजः उन्नद्धमुत्कटं ब्रह्मास्त्रतेजसैव जहि घातय । त्वत्प्रयुक्तं च शस्त्रं तदुपसंहृत्य स्वयमुपशाम्येत–यतः त्वमस्त्रज्ञोऽसि ॥ २८ ॥ ❀ ❀ परे शत्रवः त एव वीराः तान् हंतीति तथाविधः फाल्गुनः अर्जुनः अपः स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रं निवर्तयितुम् ॥ २९ ॥ ❀ ❀ ततश्च उभयोर्ब्रह्मास्त्रयोः तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृधाते अवर्धेताम् । किं कृत्वा रोदसी द्यावापृथिव्यौ खमंतरिक्षं च आवृत्य । यथा प्रलये संकर्षणमुखाग्निः उपरि स्थितोऽर्कश्च संहत्य वर्धेते तद्वत् ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

द्रोणपुत्रस्याश्वत्थाम्नः । इत्यर्थ इति । प्राणसंकटे कार्याकार्यज्ञानं नश्यतीति भावः ॥ २७ ॥ ❀ ❀ इत्यर्थ इति । कृशो भूत्वा स्वयमेव नश्यतीति भावः । यतोऽस्यास्त्रस्यान्यदस्त्रं निवर्त्तकं नास्त्यतो हेतोः ॥ २८ ॥ ❀ ❀ फाल्गुनः फाल्गुनी-नक्षत्रजातोऽर्जुनः, ततश्चार्जुनकृतब्रह्मास्त्रप्रयोगोत्तरञ्च ॥ २९-३० ॥

श्रीमद्वीरराघवव्याख्या

इत्थं संस्तुतो विज्ञापितश्च भगवान्सर्वज्ञ आह वेत्थेति द्वाभ्याम् । प्राणबाध उपस्थिते सति द्रोणपुत्रस्येति कर्तरि षष्ठी, तेन प्रदर्शितं प्रयुक्तं ब्रह्मास्त्रमिदं तेजो वेत्थ जानीहि । असौ द्रोणपुत्रः संहारं प्रयुक्तब्रह्मास्त्रोपसंहारं न वेद न जानाति ॥२७॥ ❀ ❀ तर्हि कथमिदमुपसंहर्तव्यमित्यत्राह नेति । अस्य द्रोणपुत्रप्रदर्शितस्य ब्रह्मास्त्रस्य प्रत्यवकर्षकं प्रतिभटमस्त्रं ततोऽन्यतमं किंचिदपि न विद्यतेऽतोऽस्त्रज्ञः ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञस्त्वमस्त्रतेजसा ब्रह्मास्त्रतेजसैवोन्नद्धमुद्रिक्तमस्त्रतेजः ब्रह्मास्त्रतेजो जहि त्वमपि ब्रह्मास्त्रेणैव तदभिभावयेत्यर्थः ॥ २८ ॥ ❀ ❀ इत्थं भगवता प्रोक्तमस्त्रसंहारोपायं श्रुत्वा परवीरहा फाल्गुनोऽर्जुनः अप आचम्य तं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्रह्मास्त्राय प्रतिभटं ब्राह्ममेवास्त्रं संदधे प्रयुयोज ॥ २९ ॥ ❀ ❀ ततस्तयोरुभयोरस्त्रयोस्तेजसी शरैर्व्याप्ते अन्योन्यं संहत्य संगत्य रोदसी द्यावापृथिव्यौ खमाकाशं चावृत्यावेष्ट्यार्कवह्नी इव ववृधाते वृद्धिं गते ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यत्तेजः तदिदं द्रोणपुत्रस्य ब्राह्ममस्त्रं वेत्थेत्यन्वयः । कीदृशं प्राणबाधे जीवाधिष्ठितदेहनाशे उपस्थिते आसन्ने सति प्रदर्शितं, प्राणबाध इत्येतत्कुतो वाऽवगतमिति तत्राह नेति । असौ द्रौणिः अस्य अस्त्रस्य संहारं न वेद यस्मादतो ज्ञायते प्राणबाधे मुक्तमिति ॥ २७ ॥ ❀ ❀ अस्त्राणामन्यतमं किंचिदस्त्रमस्य प्रत्यवकर्षणं प्रतीकारसमर्थं निवर्तकं न हि । अतोऽस्त्रज्ञः विसर्गोपसंहार-पूर्वकमस्त्रज्ञस्त्वमस्त्रतेजसा उन्नद्धमुद्धतमस्त्रतेजो जहीत्यन्वयः । हिशब्दो हेतौ ॥ २८ ॥ ❀ ❀ परेषां शत्रूणां संबंधिनो वीरान् हंतीति परवीरहा शत्रुवीरानिति वा, तं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य ॥ २९ ॥ ❀ ❀ उभयोः शरसंवृते तेजसी अन्योन्यं संहत्य संघट्टनं कृत्वा रोदसी द्यावापृथिव्यौ खमाकाशं चावृत्यार्कवह्निवत् ववृधाते इत्यन्वयः ॥ ३० ॥

अस्मिन्पर्याये क्रमसंदर्भो न ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रदर्शितमिति दृष्टचैव किं न परिचिनोषि किं मां पृच्छसीति भावः । संहारमस्योपसंहारं न वेद तर्हि कथमेतत् प्रयुक्त-वानित्यत आह प्राणबाध इति ॥ २७ ॥ ❀ ❀ तर्हि वारुणास्त्रादिना वह्निमुपशमयामीति चेत्तत्राह न ह्यस्येति प्रत्यवकर्षणं निवर्त्तकं तस्मात्त्वम् अस्त्रतेजसा स्वप्रयुक्तब्रह्मास्त्रतेजसैव ब्रह्मास्त्रतेजो जहि यतोऽस्त्रज्ञोऽसि ॥ २८ ॥ ❀ ❀ तं श्रीकृष्णं ब्राह्माय ब्रह्मास्त्रं निवर्त्तयितुम् ॥ २९ ॥ ❀ ❀ उभयोः ब्रह्मास्त्रयोस्तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृधाते रोदसी द्यावापृथिव्यौ यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितोऽर्कश्च ताविव ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

अस्य ब्रह्मास्त्रस्य अन्यतमतोऽन्यतमं प्रत्यवकर्षणं निवारकं नहि अतोऽस्त्रतेजसा ब्रह्मास्त्रतेजसैव ॥ २८ ॥ ❀ ❀ तं श्रीकृष्णम् ॥ २९ ॥ ❀ ❀ उभयोरस्त्रयोः शरसंवृते तेजोमयशरसंयुक्ते तेजसी अन्योन्यं संहत्य रोदसी द्यावापृथिव्यौ खमाकाशं चावृत्य प्रलयेऽर्कवह्निवत् ववृधाते अवर्धेतामित्यन्वयः ॥ ३० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भगवानाह वेत्थेति । गुरुपुत्रत्वाद् गुरुणा ब्रह्मास्त्रमस्मै दत्तं तदस्त्रं मत्तस्त्वं वेद तदेवेदमिति तु जानीहि । ननु ब्रह्मा-स्त्राण्यपि बहूनि दृष्टानि प्रयुक्तानि च, कदाचिदपि नैवं दृष्टमिति च तत्राह नैवासौ वेद संहारमिति । अतः अनभिज्ञेन प्रयुक्तत्वात् सर्वतोमुखमायाति । तर्हि कथं प्रयुक्तवान् तत्राह प्राणकृच्छ्रे उपस्थित इति यावद् । द्वयमपि भिन्नं भिन्नं वाक्यम् ॥२७॥ ❀ ❀ तर्हि किं कर्तव्यं तत्राह नह्यस्येति, ब्रह्मास्त्रे ब्रह्मास्त्रमेव प्रयोक्तव्यं नान्यत्तत्प्रतीकारमर्हति । अतः अस्त्रज्ञो भवान् उन्नद्धं ब्रह्मास्त्रतेजसैव जहि, त्वयापि प्रयुक्तमेतादृशमेव तेजो भविष्यति, येनास्य प्रतीकारः स्यादिति ॥ २९ ॥ ❀ ❀ एवं भगवतोक्ते यदासीत्तदाह श्रुत्वेति, परवीरहेति सामर्थ्यं तं परिक्रम्येति कार्यसिद्धिः । अस्य ब्रह्मास्त्रस्य पूर्वब्रह्मास्त्रनिवर्त्तकत्वमेव, नतु प्रयोक्तृघातकत्वं तदुक्तं ब्राह्मायेति ॥ ३० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

श्रुत्वा भगवतेत्यत्र। प्रयोक्तृघातकत्वमिति। प्रथमब्रह्मास्त्रप्रयोक्तृद्रौणिघातकत्वम्॥ २९॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं संस्तुतः पृष्टश्च भगवानुत्तरमाह–वेत्थेति द्वाभ्याम्। इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे उपस्थिते प्राप्ते सति प्रदर्शितं प्रयुक्तं केवलं, न तु तत्प्रयोगे कुशलः। यतोऽसावुपसंहारं न वेद न जानाति, त्वं तु वेत्थ जानासि॥ २७॥ ❀ ❀ तर्हि मया किं कर्त्तव्यमित्यापेक्षायामाह–नहीति। हि यस्मादस्य ब्रह्मास्त्रस्य प्रत्यवकर्शनं कुशलत्वापादकं प्रतिभटमस्त्रं ततोऽन्यतमं किञ्चिदपि वास्त्यत उन्नद्धमुद्रिक्तमपि ब्रह्मास्त्रतेजः स्वप्रयुक्तब्रह्मास्त्रतेजसा जहि उपसंहर, हि यस्मात्त्वमस्त्रज्ञो ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञोऽसीत्यन्वयः॥ २८॥ ❀ ❀ भगवता प्रोक्तमस्त्रोपसंहारोपायं श्रुत्वा फाल्गुनः अर्जुनः अपः स्पृष्ट्वाऽऽचमनं कृत्वा कार्यसिद्ध्यर्थं सर्वदेवदेवं मङ्गलरूपं तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रोपसंहाराय ब्राह्ममस्त्रं सन्दधे प्रयुयोजेत्यन्वयः। तस्य ततो भयं नासीद्युद्धेनैकदानुभूतत्वादिति सूचयन्नाह–परवीरहेति। परेषां शत्रूणां वीरान् योधान् हन्तीति तथा॥ २९॥ ❀ ❀ ततस्तयोरुभयोरस्त्रयोस्तेजसी शरैर्व्याप्ते अन्योन्यं संहत्य सङ्गत्य रोदसी द्यावापृथिव्यौ खमन्तरिक्षं चावृत्य आवेष्ट्य ववृधाते इत्यन्वयः। तत्र दृष्टान्तमाह–अर्कवह्निवदिति, प्रलये यथा सङ्कर्षणमुखाग्निरुपरि श्रितोऽर्कश्च संहत्य वर्द्धते तथेत्यर्थः॥ ३०॥

हिन्दी अनुवाद

भगवान्‌ने कहा—अर्जुन! यह अश्वत्थामाका चलाया हुआ ब्रह्मास्त्र है। यह बात समझ लो कि प्राण-संकट उपस्थित होनेसे उसने इसका प्रयोग तो कर दिया है, परन्तु वह इस अस्त्रको लौटाना नहीं जानता॥ २७॥ ❀ ❀ किसी भी दूसरे अस्त्रमें इसको दबा देनेकी शक्ति नहीं है। तुम शस्त्रास्त्र-विद्याको भलीभाँति जानते ही हो, ब्रह्मास्त्रके तेजसे ही इस ब्रह्मास्त्रकी प्रचण्ड आगको बुझा दो॥ २८॥ ❀ ❀ सूतजी कहते हैं—अर्जुन विपक्षी वीरोंको मारनेमें बड़े प्रवीण थे। भगवान् की बात सुनकर उन्होंने आचमन किया और भगवान्‌की परिक्रमा करके ब्रह्मास्त्रके निवारणके लिये ब्रह्मास्त्रका ही सन्धान किया॥ २९॥ ❀ ❀ बाणोंसे वेष्टित उन दोनों ब्रह्मास्त्रोंके तेज प्रलयकालीन सूर्य एवं अग्निके समान आपसमें टकराकर सारे आकाश और दिशाओंमें फैल गये और बढ़ने लगे॥ ३०॥

दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान् प्रदहन्महत्। दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत॥ ३१॥
प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम्। मतं च वासुदेवस्य संजहारार्जुनो द्वयम्॥ ३२॥
तत आसाद्य तरसा दारुणं गौतमीसुतम्। बबन्धामर्षताम्राक्षः पशुं रशनया यथा॥ ३३॥
शिबिराय निनीषन्तं दाम्ना[1] बद्ध्वा रिपुं बलात्। प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः॥ ३४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तयोः द्रौणिफाल्गुनयोः। तेन दह्यमानाः सांवर्तकं प्रलयाग्निम् अमंसत मेनिरे॥ ३१॥ ❀ ❀ लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः। वासुदेवस्य मतं च आलक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान्॥ ३२॥ ❀ ❀ गौतमवंशजा गौतमी कृपी तस्याः सुतम्। अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः, निष्कृपत्वे दृष्टांतः–पशुं यथेति। तस्य बंधनं धर्म इत्यत्र दृष्टांतः–यथा याज्ञिकः पशुमिति। रशनया रज्ज्वा बध्नाति॥ ३३॥ ❀ ❀ शोकरोषादियुक्तस्यापि अर्जुनस्य धर्मनिष्ठाख्यापनाय श्रीकृष्णवाक्यं तदाह षड्भिः–शिबिराय राजनिवेशाय नेतुमिच्छंतमर्जुनं प्रकुपित इवेति॥ ३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दृष्ट्वेति। प्रदहन् प्रदग्धुमारभमाणम्। दह्यमाना दग्धुमारभ्यमाणाः, "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति लट्॥ ३१॥ इत्यर्थ इति "अथ व्यतिकरः पुंसि व्यसनव्यतिषंगयोः। समूहनाशयोर्देशे योगराजकरे क्रुधि" इति कोशाद्व्यतिकरेण नाशो ग्राह्य इति भावः। मतं चेति। प्रथमं भगवतास्त्रप्रतिघातनमात्रं समादिष्टं न तु संहरणम्। तत्र नूनं परास्त्रं न संहर्तुं शक्यमिति स्वशत्रैणैक्यं विधाय संहरणाभिप्रायेण। तत्तु तदाज्ञामात्रेण कृत्वापि पश्चात्प्रत्युत ताभ्यां वृद्धाभ्यामुपद्रवे सति स्थगितायमानमर्जुनं प्रति संहारोनुमत इति भावः॥ ३२॥ ❀ ❀ ततोऽस्त्रद्वयसंहारोत्तरम्। "रज्ज्वां वै रशना क्षुद्रघण्टिकाजिह्वयोरपि" इति कोशात्॥ ३३॥ ❀ ❀ "स्कंधावारे तु शिबिरम्" इत्यभिधानात्सेनानिवेशस्थानं स्कंधावारः। अरुणेक्षण इत्यनुक्त्वांबुजेक्षण इत्युक्ते बहिरेव प्रकुपित इत्यभिप्रायेण स्वामिचरणैः प्रकुपित इवेत्युक्तम्॥ ३४॥

---

१. प्रा० पा०—रज्ज्वा।

श्रीमद्वीरराघवव्याख्या

किंच ततस्त्रींल्लोकान्प्रदहत्तयोर्द्रौण्यर्जुनयोरस्त्रतेजसोः तत्प्रयुक्तास्त्रतेजो दृष्ट्वा तेन दह्यमानाः सर्वाः प्रजाः सांवर्तकं प्रलयाग्निममंसतामन्यंत ॥ ३१ ॥ ❀ ❀ लोकव्यतिकरं लोकोपमर्दनरूपं प्रजोपद्रवं वासुदेवस्य मतमभिप्रायं चालक्ष्यार्जुनः द्वयं ब्रह्मास्त्रद्वयं संजहार उपसंहृतवान् ॥ ३२ ॥ ❀ ❀ तत आसाद्य समीपमेत्य दारुणमुग्रं गौतम्या द्रोणपत्न्याः कृप्याः सुतं द्रौणिममर्षेण क्रोधेन ताम्रे अक्षिणी यस्य सोऽर्जुनस्तरसा बलेन बबंध यथा रज्ज्वा पशुं तद्वत् ॥ ३३ ॥ ❀ ❀ रिपुं द्रौणिं बलाद्रज्ज्वा बद्ध्वा शिबिराय राजनिवेशमयं शिबिरं प्रति निनीषंतं नेतुमिच्छंतमर्जुनं भगवानंबुजेक्षणः कृष्णः प्रकुपित आह धर्मपरीक्षार्थमिति भावः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सांवर्तकं प्रलयकालीनदाहम् अमंसत न्यरूपयन् ॥ ३१ ॥ ❀ ❀ व्यतिकरो नाशः, अस्त्रोपसंहारलक्षणं वासुदेवमतम् ॥ ३२ ॥ ❀ ❀ गौतमीसुतं कृपीपुत्रं रशनया रज्ज्वा ॥ ३३ ॥ ❀ ❀ शिबिराय स्कंधावाराय सेनानिवेशनस्थानायेति यावत्, निनीषंतं नेतुमिच्छंतम् ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दृष्ट्वेति प्रदहत् दग्धुमारभमाणम् । दह्यमानाः दग्धुमारभ्यमाणाः । 'वर्त्तमानसामीप्ये वर्त्तमानवद्वे'ति पाणिनिसूत्रम् ॥ ३१ ॥ ❀ ❀ मतं चेति । प्रथमं श्रीभगवतास्त्रप्रतिघातनमात्रं समादिष्टं न तु संहरणम् । तच्च नूनं परास्त्रं न संहर्त्तुं शक्यमिति स्वशस्त्रेणैक्यं विधाय संहरणाभिप्रायेण । तत्तु तदाज्ञामात्रेण कृत्वापि पश्चात् प्रत्युत ताभ्यां वृद्धाभ्यामुपद्रवे सति स्थगितायमानमर्ज्जुनं प्रतिसंहारोऽनुमत इति भावः ॥ ३२-३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तयोर्द्रौण्यर्ज्जुनयोः सांवर्त्तकं प्रलयाग्निम् ॥ ३१ ॥ ❀ ❀ लोकानां भूरादीनां व्यतिकरं नाशम् ॥ ३२ ॥ ❀ ❀ गौतमवंशजा गौतमी कृपी तस्याः सुतम् ॥ ३३ ॥ ❀ ❀ शोकरोषादियुक्तस्याप्यर्ज्जुनस्य लोके धर्म्मनिष्ठाख्यापनाय प्रकर्षेणाह पञ्चश्लोकीम्-अरुणेक्षण इत्यनुक्त्वा अम्बुजेक्षण इत्युक्ते बहिरेव प्रकुपित इति गम्यते ॥ ३४-३५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तयोर्द्रौण्यर्जुनयोः अमंसत मेनिरे ॥ ३१ ॥ ❀ ❀ प्रजाया उपप्लवमुपद्रवं लोकानां व्यतिकरं संहारं वासुदेवस्य मतमभिप्रायं चालक्ष्यास्त्रद्वयं संजहार उपसंहृतवान् ॥ ३२ ॥ ❀ ❀ गौतमवंशात् शरद्वतो जाता गौतमी कृपी तस्याः सुतम् तरसा बलेन ॥ ३३ ॥ ❀ ❀ शोकाद्याविष्टस्याप्यर्ज्जुनस्य धर्मपरीक्षार्थं भक्तप्रियो भगवान् शिबिराय सेनानिवेशस्थानाय रिपुं निनीषंतं नेतुमिच्छंतमाह ॥ ३४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तयोर्यज्जातं तदाह संहृत्येति उभयोस्तेजसी अन्योन्यं संहृत्य मूलदार्ढ्याय शरयोः संवेष्टिते भूत्वा द्यावापृथिव्यौ अंतरिक्षं चावेष्ट्य सांवर्तकं सूर्यसंकर्षणमुखानलवत् सर्वनाशार्थं ववृधाते ॥ ३१ ॥ ❀ ❀ एतयोर्निवृत्तौ हेतुमाह दृष्ट्वास्त्रतेज इति । मिलितत्वादेकवचनं प्रजा दक्षादयः, अन्येऽपि भगवत्सांनिध्यात् । अतः परमनुपसंहारे प्रलयो भविष्यतीति भगवदभिप्रायं च ज्ञात्वा लोकानां नाशं भूरादीनां च सर्वोपकारार्थं एकगुरुत्वात् द्वयमात्मन्येवोपसंहृतमित्याह संजहारेति संजहार उभयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवदिति पूर्वोक्तदाहलक्षणं, चकारात् स्वस्यापि तेजोलाभात् भगवतः संबंधादप्येतन्मतमित्याह वासुदेवेति ॥ ३२ ॥ ❀ ❀ ततः स्वस्मिन् तेजोद्वयसंक्रमणानंतरं आसाद्य निकटे गत्वा दूराद्दारुणपाशादिभिर्बंधनेन महान् क्लेशो भवतीति तरसा शीघ्रं प्रतिक्रियामवसराय दारुणमिति बंधने हेतुः, मरणशापं मारणं वा ईश्वरभजनादिना वा कुर्यादिति । ननु गुरुपुत्रं कथं बबंध तत्राह गौतमीसुतमिति । नायं गुरोः सम्मतः पुत्रः, गौतमी तस्य माता गौतमवंशोत्पन्नत्वात् । अनेन पुत्रस्नेहसंबद्धभार्याप्रार्थनया राजसंबंधो मरणं सूचितं अमर्षताम्राक्ष इति अनेन ब्रह्मण्यादयो न स्फुरिताः, अवश्यं बंधनीय इति दृष्टांतमाह पशुमिति ॥ ३३ ॥ ❀ ❀ नहि पराजितः शत्रुः अबध्वा त्यक्तुं शक्यते । रशनया बन्धनं ध्वजस्तम्भे चेति नीत्वा च परोक्षमारणं च तदभिप्रेतं तस्य शिबिरे नयनमनुचितमिति भगवान्निषेधयति शिबिरायेति । सर्प इवायं न स्पृष्टव्यः स्पृष्टश्चेन्मारणीय एव अपकृतस्तु सर्वथा मारणीयः । तत्र गते च मरणं भविष्यति भगवान्निषेधयति शिबिरायेति । अतोऽत्रैव मारणीय इत्यभिप्रायेणाह नीतिकार्यविचारे मारणीयः धर्मविचारे बन्धनीयोपि न, रिपुश्च गृहे न नेयः बलाच्च न नेयः, तत्र असावधाने किंचिदपकुर्यादिति शिबिरं कटकोत्तरणस्थानं, भगवानिति सर्वमारकत्वं सूचितम्, अम्बुजेक्षण इति भक्तरक्षकत्वं सूचितं, तस्मादेतद्वधे सर्वं सुस्थमिति नो चेद्बहु कर्तव्यमित्यभिप्रायः ॥ ३४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

प्रजोपप्लवमिति श्लोकं व्याकुर्वन्ति अतः परमित्यादि । उपसंहृतमिति । अर्जुनेनेति शेषः । स्वस्यापीति । दाहलक्षणमिति शेषः ॥ ३२ ॥ ❀ ❀ तत आसाद्येति श्लोकं व्याकुर्वते तत इत्यादि ॥ ३३ ॥ ❀ ❀ शिबिरायेत्यत्र सूचितमिति । कालरूपत्वात्सूचितम् ॥ ३४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ततस्त्रींल्लोकान् प्रदहन्महत् तयोर्द्रौण्यर्जुनयोरस्त्रतेजो दृष्ट्वा तेन च दह्यमानाः सर्वाः प्रजाः सांवर्त्तकं प्रलयाग्निममंसता-मन्यन्त ॥ ३१ ॥ ❀ ❀ लोकव्यतिकरं भूरादिलोकोपमर्दनं तमेव प्रजोपप्लवं प्रजानामुपद्रवं च वासुदेवस्य कृष्णस्य मतम्, अतः परमनुपसंहारे प्रलयो भविष्यत्यत उपसंहरेत्यभिप्रायं चालक्ष्य अर्जुनो ब्रह्मास्त्रद्वयं सञ्जहार उपसंहृतवानित्यन्वयः ॥ ३२ ॥ ❀ ❀ ततस्तेन उपसंहारानन्तरं अमर्षेण पुत्रवधादितत्कर्मासहनेन ताम्रे रक्ते अक्षिणी यस्य सोऽर्जुनः तरसा वेगेन गौतमीसुतं गौतमवंशजातायाः कृप्याः पुत्रम् अश्वत्थामानमासाद्य समीपं गत्वा बबन्धेत्यन्वयः । एवं बन्धने बालवधात्तस्य क्रौर्यं हेतुं सूचयन् विशिनष्टि–दारुणमिति । ननु गुरुपुत्रस्य तस्य बन्धनमधर्म एव, तत्कथं कृतवानित्याशङ्क्याततायित्वात्तस्य बन्धनं धर्म एवेत्यभिप्रेत्य दृष्टान्तमाह–पशुमिति, याज्ञिकः पुरुषो रशनया रज्ज्वा यथा पशुं बध्नाति तथेत्यर्थः ॥ ३३ ॥ ❀ ❀ दाम्ना रज्ज्वा रिपुं बलाद्बद्ध्वा शिबिराय कटकोत्तरणस्थानाय निनीषन्तं नेतुमिच्छन्तम् अर्जुनं प्रति प्रकुपितो भगवान् प्राहेत्यन्वयः । प्रकोपस्तूपर्येव, अन्तस्तु कृपापूर्ण इति सूचयन् अरुणेक्षण इति विहायाह–अम्बुजेक्षण इति ॥ ३४ ॥

हिन्दी अनुवाद

तीनों लोकोंको जलानेवाली उन दोनों अस्त्रोंकी बढ़ी हुई लपटोंसे प्रजा जलने लगी और उसे देखकर सबने यही समझा कि यह प्रलयकालकी सांवर्तक अग्नि है ॥ ३१ ॥ ❀ ❀ उस आगसे प्रजाका और लोकोंका नाश होते देखकर भगवान्की अनुमतिसे अर्जुनने उन दोनोंको ही लौटा लिया ॥ ३२ ॥ ❀ ❀ अर्जुनकी आँखें क्रोधसे लाल-लाल हो रही थीं । उन्होंने झपटकर उस क्रूर अश्वत्थामाको पकड़ लिया और जैसे कोई रस्सीसे पशुको बाँध ले, वैसे ही बाँध लिया ॥ ३३ ॥ ❀ ❀ अश्वत्थामाको बलपूर्वक बाँधकर अर्जुनने जब शिबिरकी ओर ले जाना चाहा, तब उनसे कमलनयन भगवान् श्रीकृष्णने कुपित होकर कहा–॥ ३४ ॥

मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि । योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥ ३५ ॥
मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् । प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ॥ ३६ ॥
स्वप्राणान् यः परप्राणैः प्रपुष्णात्यघृणः खलः । तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥
प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम । आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनागसो निरपराधान् ॥ ३५ ॥ ❀ ❀ रिपोरपि सुप्तस्य बालस्य च वधो न धर्म इत्यन्यार्थैर्दर्शयति–मत्तमिति । मत्तं मद्यादिना । प्रमत्तम् अनवहितम् । उन्मत्तं ग्रहवातादिना । जडम् अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भग्नरथम् ॥ ३६ ॥ तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः । यद्यतः दंडप्रायश्चित्तरहितात् दोषात् स पुमानधो यातीति । तथा च स्मरंति–"राजभि-र्धृतदंडास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथा ॥" इति ॥ ३७–३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पार्थेति । पृथाया मत्पितृभगिन्याः पुत्रत्वात्तव ममापि तव दुःखेन दुःखमत इमं मा रक्षेति भावः । यद्वा पृथाया अस्मद्वंशजायाः पुत्रेण त्वया ब्रह्महत्या कर्तुं नोचितेति गूढोभिप्रायः । शयाना भुंजते यवना इतिवत्सुप्तानीति । न हि शयानैर्निद्रा-ग्रस्तैर्भोक्तुं शक्यते किं तु शयनोद्यता एव भुंजत इत्यर्थः । तथा सुप्तान् स्वप्तुमुद्यतान् सुप्तमस्ति कर्त्तव्यत्वेन येषामिति मत्वर्थीया-च्चायमर्थो लभ्यः । अन्यथा महाभारतश्रुततत्कर्तृकयुद्धश्रुतिविरोधः स्यात् । बालकानिति । शिष्यपुत्रत्वेन बालकवत्पालनीयान्न वधार्हानित्यर्थः, न तु ते बालका महाभारते तेषामतिशौर्येत्वश्रवणात् । यद्वा बलमेव बालं तेन कायन्ति युद्धे गर्जंतीति बालकाः । यद्वा बलानां सेनानां समूहो बालं, तत्किरंति विक्षिपंति कुर्वंति हिंसंतीति वा बालकाः । "कृ विक्षेपे, कृ हिंसायां" चेत्युभयोर्डप्रत्यये रूपम् । तेन महारथा इत्यर्थः । अत्र तीर्थेन "अनागसं प्रसुप्तं च बालकं हन्ति यो नरः । स खंडशो विधातव्य इत्येवं मनुरब्रवीत्"

इति श्लोकोपि प्रमाणितः ॥ ३५ ॥ ❀ ❀ मद्यादिना धत्तूरकादिग्रहः । अनवहितमसावधानम् । ग्रहः पिशाचादिर्वातो रोगः । आदिनेष्टवियोगादिग्रहः । बालं दिग्देशादिज्ञानशून्यम् । जडं विवेकशून्यं वा भीतं युद्धमार्गादपसृतम् ॥ ३६ ॥ ❀ ❀ खल इंद्रियारामः । अघृणो निर्दयः । दंडस्य श्रेयस्त्वे प्रमाणमाह-तथा चेति । स्मरंति भृग्वादय इति शेषः । स्पष्टार्था स्मृतिः ॥ ३७ ॥ प्रतिज्ञा च रक्षणीयेत्याह-प्रतिश्रुतं चेति । प्रतिश्रुतं प्रतिज्ञातम् । पांचाल्यै द्रौपद्यै । हे मानिनीति यथा त्वं प्रसन्ना स्यास्तथा ते मानं करिष्यामीति भावः ॥ ३८ ॥

श्रीमद्वीरराघवव्याख्या

तदेवाह नैनमिति पंचभिः । हे पार्थ इमं ब्रह्मबंधुं त्रातुं जीवयितुं नैवार्हसि, किंतु जहि "आततायिनमायांतं हन्यादेवाविचारयन्नि"ति स्मृतेरिति भावः । तदेवाह योसौ ब्रह्मबन्धुर्निशि बालकांस्तत्रापि सुप्तानवधीत् ॥ ३५ ॥ ❀ ❀ धर्मवित्पुमान्मत्तादिरूपं रिपुं न हन्ति, एवं तु धर्मस्थितिरित्यर्थः । तत्र मत्तं मधुना प्रमत्तमनवहितम् उन्मत्तं पित्तादिना जडं केवलमज्ञम् ॥ ३६ ॥ ❀ ❀ योऽघृणः निष्कृपावानत एव खलो दुरात्मा यः पुमान्परेषां प्राणैः स्वप्राणान्प्रपुष्णाति तस्य वधस्तस्यैव श्रेयस्करः । अन्यथामनस्कादकृतप्रायश्चित्ताद्दोषात्पुमानधः नरके पतति ॥ ३७ ॥ ❀ ❀ किंच मम शृण्वतः सतो भवता पांचाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञातं किमिति हे मानिनि यस्तव पुत्रहन्ता तस्य शिर आहरिष्यामीति ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे पार्थ ब्रह्मबन्धुं ब्राह्मणाधममेनमश्वत्थामानं त्रातुं नार्हसि, किन्तु योसौ निशि रात्रौ सुप्तान् बालकान् अवधीदितीमं जहि हनेत्यन्वयः । अनागसः अकृतापराधान् तत्राश्वत्थाम्नो वध्यत्वे अनागस्त्वं सुप्तत्वं बालकत्वमिति हेतुत्रयमनादृत्य तद्धननं कारणमिति ज्ञातव्यम् "अनागसं प्रसुप्तं च बालकं हन्ति यो नरः । स खंडशो विधातव्य इत्येवं मनुरब्रवीदि"ति स्मृतेः ॥ ३५ ॥ ❀ ❀ रिपुणा नैते हन्तव्या इत्याह मत्तमिति । मत्तं मद्यादिपानेन मदांधं प्रमत्तं विस्मृतिमन्तम् उन्मत्तं ग्रहग्रस्तं जडं स्वतो विवेकज्ञानशून्यं सुप्तं निद्रितं बालं विशेषानभिज्ञं स्त्रियं बाल्ये तारुण्ये वार्धके च पराधीनवृत्तिं प्रपन्नं शरणागतं विरथं रथादिसाधनरहितम् । विपथं युद्धमार्गादपक्रांतमिति केचित् पठित्वा व्याचक्षते तद्वयचलनयोरिति धातोः भीतं चलितं युद्धमार्गादपसृतमित्यनेन पुनरुक्तं नच कम्पितार्थत्वं पाठविरोधादतोनुपासितगुरुचरणैरुत्प्रेक्षितमित्युपेक्षणीयम् ॥ ३६ ॥ ❀ ❀ खल इन्द्रियारामः अघृणः दयारहितः तद्वधः तस्य हिंसकस्य हननं श्रेयः साधु, कुतः येषां हिंसादिदोषादधो नरकं यातीति यस्मात्तस्मादिति ॥ ३७ ॥ ❀ ❀ प्रतिज्ञा च रक्षणीयेत्याह प्रतिश्रुतमिति हे मानिनि मानार्हे ! यस्ते तव पुत्रान् हतवान् तस्य शिर आहरिष्य इति मम शृण्वतः सतः पांचाल्यै द्रौपद्यै प्रतिज्ञातं च यस्मात्तस्मादित्यन्वयः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मत्तं मद्यादिना । प्रमत्तमनवहितम् । उन्मत्तं ग्रहवातादिना ॥ ३६ ॥ ❀ ❀ तद्वधो दंडरूपस्तस्यैव श्रेयः । तथा च स्मरन्ति-"राजभिर्धृतदण्डाश्च कृत्वा पापानि मानवाः । विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथे"ति । अन्यथा यद्यतो दोषात् ॥ ३७-३९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मत्तं मद्यादिना । प्रमत्तं धनादिना । उन्मत्तं ग्रहादिना । जडं पूर्वबुद्धिकापराधवर्जितम् । तत्र द्रौणिः सुप्तघ्नः ॥ ३५-३६ ॥ तद्वधस्तस्यैव श्रेयः । तथा च स्मृतिः "राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथे"ति । यद्यतः राजदण्डादिप्रायश्चित्तरहिताद्दोषादधो नरकम् ॥ ३७ ॥ ❀ ❀ पांचाल्यै द्रौपद्यै ॥ ३८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तदेवाह नैनमिति । पृथासम्बन्धिनी भक्ता चेति तथा वचनं मारणेऽपि दोषाभावे हेतुद्वयमाह ब्रह्मबन्धुरिति अवधीदिति पित्रादिभिरपकृते अनपराधिनः पुत्रस्य बद्ध्वा नयनमुचितं न मारणं सुप्तस्य कस्यापि मारणमनुचितं निशि चौर एव मारयति न साधुः । बालकास्तु सर्वेषामेव अवध्याः ॥ ३५ ॥ ❀ ❀ विचारेणास्य वध्यतां वक्तुं वध्यावध्यनिर्णयमाह मत्तमिति । शत्रवोपि दशविधा अवध्याः, मत्तो मदिरादिना प्रमत्तः असावधान उन्मत्तः पिशाचादिभिः जडः स्वभावतः । अयं तु दशानां नान्यतमः तस्माद्वध्यः, किंच सुप्तबालयोर्वधात् अधर्मयोद्धा ॥ ३६ ॥ ❀ ❀ नन्वस्य भवत्वधर्मः, अयं कथं वध्यः ? ब्राह्मणशरीरस्य पुरुषार्थसाधकत्वात् तस्मादस्य सर्वपुरुषार्थवधे स्वस्याधर्म इति तत्राह स्वप्राणानिति । यदयं न वध्यते तत्र को हेतुः प्रमाणनिषेधस्तु नास्ति "जिघांसन्तं जिघांसीयादि"ति । ब्राह्मणे धर्मः प्रतिष्ठित इति यद्यवध्यः तदास्मिन् धर्मो नास्ति, दयया चेदवध्यः तदैतद्वधे बहूनां प्राणिनां जीवनं भवति । अवधे त्वस्यैव कश्चन देहादिना उपकारो भविष्यतीति तदपि नास्ति तदाह

तद्वधस्तस्य हि श्रेय इति प्राणापानैर्जीवनं यस्य तत्र प्राणैः प्राणजीवनमुक्तं धर्मे तु युक्तम् उभयतारकत्वात् अवश्यमेकस्य ब्राह्मणस्य संक्षये स्वस्यैव युक्तः धर्म्यात् तत्रापि प्रकर्षेण पोषणमयुक्तं बालानपि यो हन्ति स अघृणः घृणा कृपा तद्रहितः, खलः सूचकः पिशुन इति यावत्, तस्मात् दुष्टवधः स्वधर्मः, तस्यापि दुष्टशरीरे गते शरीरांतरेण धर्मो भवतीति पूर्वजीवनस्याधर्मैकसाधनत्वात् ॥ ३७ ॥ किंच महतां प्रतिज्ञापालनं महान् धर्मः, त्वया च प्रतिज्ञातमित्याह प्रतिश्रुतमिति अर्थतोयमनुवादः 'आहरिष्य' इति ॥ ३८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स्वप्राणानित्यत्र। प्राणाप्राणैर्जीवनमित्यत्र प्राणापानैरिति पाठो भाति। यस्य तत्रेत्यादि। यस्य पुंसस्तत्र तयोः प्राणापानयोः जीवनहेत्वोर्मध्ये प्राणैः प्राणजीवनं तदयुक्तमित्यर्थः। ननु नेदमयुक्तं यागे व्यभिचारादित्यत आहुः धर्मे त्वित्यादि। उभयतारकत्वादिति। 'सगृहः सपशुः सुवर्गं लोकमेती' ति तैत्तरीये श्रवणेन तस्या हिंसायाः कर्तृपशुतारकत्वादित्यर्थः। युक्त इति। प्राणसङ्क्षय इति शेषः। धर्म्यादिति धर्मजनकायुद्धात्, तथा च युद्धेन मारणीय इत्यर्थः ॥ ३७-३८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

भगवद्वाक्यान्येव दर्शयति-मैनमिति पञ्चभिः। तव हितमेव वदामि पैतृष्वस्रेयत्वादिति सूचयन्सम्बोधयति-हे पार्थेति। एनं त्रातुं जीवयितुं मैवार्हसि किन्त्विमं जहि। ब्राह्मणः कथं हन्तव्य इत्याशङ्क्याह-ब्रह्मबन्धुमिति, ब्राह्मणत्वेप्याततायिनमित्यर्थः। तथा चैतद्वधस्य 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति विहितत्वान्न दोष इति भावः। आततायित्वमेव दर्शयति-य इति। योऽसावनागसो निरपराधान्निशि सुप्तान् बालकानवधीदित्यन्वयः ॥ ३५ ॥ ❀ ❀ नन्वहं धर्मज्ञ एनं कृतापराधं रिपुमपि कथं हन्यामित्याशङ्क्य धर्मवित् मत्तादिदशविधान् रिपून्न हन्ति, अस्य तु तद्व्यतिरिक्तत्वान्नास्य वधे कश्चिद्दोष इत्याह-मत्तमिति। यद्वा नन्वेवमेकदापराधे ज्ञातेऽपि धर्मज्ञत्वादस्य वधे धर्महानिप्रसङ्गेन तद्दोषो मम स्यादित्याशङ्क्य धर्मविन्मत्तादिदशविधान् रिपून्न हन्ति, अयं तु बालान् हतवानतो न धर्मवित्। अतो नास्य वधे दोषः कश्चिदित्याशयेनाह-मत्तमिति। तत्र मत्तं मद्यादिना विवशम्, प्रमत्तं कार्यान्तरासक्त्याऽनवहितम्, उन्मत्तं पिशाचादिभिरुपद्रुतम्, जडं स्वभावतो मूर्खम्, प्रपन्नं शरणागतं तवास्मीति वादिनम्, विरथं भग्नरथम्, भीतं भयेन पलायमानं विलीनं च ॥ ३६ ॥ ❀ ❀ तथापि ब्राह्मणशरीरस्य पुरुषार्थसाधकत्वात् तद्वधे सर्वपुरुषार्थनाशान्ममाधर्मः स्यादित्याशङ्क्याह-स्वप्राणानिति। यः खलस्तस्य वधो दण्डरूपत्वात्तस्यैव श्रेयः पुषार्थसाधकः। यत् यस्माद्दोषाद्दण्डप्रायश्चित्तादिरहितात् परपीडाजनितात् पापात् स पापी पुमानधो नरकं यातीत्यन्वयः। तथा च स्मृतिः-'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः। विधूतकल्मषा यान्ति स्वर्गं सुकृतिनो यथा' इति। कोऽसौ खल इत्यपेक्षायामाह-यः परेषां प्राणैः प्राणसङ्कटैः हिंसाभिः स्वप्राणान् पुष्णातीति। कथमेवं परपीडायां प्रवृत्तिर्दयारूपप्रतिबन्धकसद्भावादित्याशङ्क्याह-अघृण इति, घृणा दया तद्रहित इत्यर्थः। यद्वा तद्वधस्तस्य खलस्य वधस्तस्य हन्तू राज्ञः श्रेयः। कथं? यद्दोषाद्यस्य खलस्य दोषात्पापात्पुमान् राजा अधो नरकं याति 'स्तेनो राजनि किल्बिषम्' इत्यादिवचनात्। शेषं समानम् ॥ ३७ ॥ ❀ ❀ स्वप्रतिज्ञापालनार्थमप्यस्य वध उचितोऽन्यथा तव प्रतिज्ञाहानिलक्षणो दोषः स्यादित्याशयेनाह-प्रतिश्रुतमिति। हे मानिनि यस्ते पुत्रान् हतवांस्तस्य शिरस्ते तुभ्यमहमाहरिष्ये आनेष्यामीति मम शृण्वत एव सतो भवता पाञ्चाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञातं तदपि तद्वधं विना कथं सिद्ध्येदिति शेषेणान्वयः ॥ ३८ ॥

हिन्दी अनुवाद

'अर्जुन! इस ब्राह्मणाधमको छोड़ना ठीक नहीं है, इसको तो मार ही डालो। इसने रातमें सोये हुए निरपराध बालकोंकी हत्या की है ॥ ३५ ॥ ❀ ❀ धर्मवेत्ता पुरुष असावधान, मतवाले, पागल, सोये हुए, बालक, स्त्री, विवेकज्ञानशून्य, शरणागत, रथहीन और भयभीत शत्रुको कभी नहीं मारते ॥ ३६ ॥ ❀ ❀ परन्तु जो दुष्ट और क्रूर पुरुष दूसरोंको मारकर अपने प्राणोंका पोषण करता है, उसका तो वध ही उसके लिये कल्याणकारी है; क्योंकि वैसी आदतको लेकर यदि वह जीता है तो और भी पाप करता है और उन पापोंके कारण नरकगामी होता है ॥ ३७ ॥ ❀ ❀ फिर मेरे सामने ही तुमने द्रौपदीसे प्रतिज्ञा की थी कि 'मानवती! जिसने तुम्हारे पुत्रोंका वध किया है उसका सिर मैं उतार लाऊँगा' ॥ ३८ ॥

तदसौ वध्यतां पाप आततायात्मबन्धुहा। भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः ॥ ३९ ॥

एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः। नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥

अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः। न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान् हतान् ॥ ४१ ॥

तथाऽऽहृतं पशुवत् पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन।
निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्यपि चोदितः। तथापि हंतुं नैच्छत्। आत्महनं पुत्रहंतारमपि। यतः महान् ॥ ४० ॥ ❀ ❀ गोविंदः प्रियः सारथिः यस्य सः। आत्मजान् शोचंत्यै ॥ ४१ ॥ ❀ ❀ तथा परिभवेन आहृतमानीतम्। कर्मणः जुगुप्सितेन दोषेण अवाङ्मुखम्। अपकृतम् अपकारिणम्। कृपया निरीक्ष्य। वामः शोभनः स्वभावः यस्याः सा ॥ ४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

यद्यतोसौ पापस्तत्तस्माद्वध्यतामित्यन्वयः। आत्मबंधुहा पुत्रहा "आत्मबंधुः सुतस्तोको राजीवोंगज आत्मजः" इत्यभिधानात्। वीरेति। न हि वीरैर्ब्राह्मणो हन्यत इति गूढोभिप्रायः। यद्वा वीरेणैव वैरनिर्यातनं कर्त्तुं शक्यं नान्येनेति भावः। कुलपांसनः कुलनिन्दाहेतुः ॥ ३९ ॥ ❀ ❀ धर्मं परीक्षमाणेन यद्यपि चोदितस्तदपि हंतुं नैच्छत्। आत्महनं पुत्रहन्तारमपि। "आत्मा वै पुत्रनामासि" इति श्रुतेः। यतो महान् कृष्णस्य स्वभावाभिज्ञः। तस्य चायं स्वभावः स्वयं सर्वज्ञोपि धर्मादिनिष्ठाख्यापनाय तद्वतो भक्तान्परीक्षत इति। तत्र "मैनं पार्थार्हसि त्रातुम्" इत्यादिना वीररौद्ररसं प्रदर्श्य धर्मवन्तमर्जुनं यथा परीक्षते स्म तथा "भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्मः" इत्यादिना "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इत्यादिना "अहं हि सर्वभूतानामादिरन्तोन्तरं बहिः" इत्यादिना च कर्मज्ञानयोगौ प्रदर्श्य प्रेमवतीर्गोपीः "वरं च मत्कंचन मानवेन्द्र वृणीष्व" इत्यादिना "वरं वृणीष्व भद्रं ते कामपूरोऽस्म्यहम्" इत्यादिना च भोगैश्वर्यादीन्प्रदर्श्य भक्तिमतः पृथुप्रह्लादादीन् "दीयमानं न गृह्णन्ति" इत्यादिनाऽन्यानपि भक्तान्परीक्षाञ्चकारैवेति। तदीयसिद्धभक्ता अपि तथा परीक्षन्ते। तथा हि शुक एव षष्ठस्कन्धे पापनिस्तारार्थं पृष्टः प्रायश्चित्तमात्रमुक्त्वा परीक्षितः सिद्धान्ताभिज्ञतां नवमे श्रीकृष्णलीलां संक्षेपेणोक्त्वा लीलौत्सुक्यं द्वादशे ब्रह्मज्ञानमुपक्षिप्य भक्तिनिष्ठां परीक्षाञ्चक्रे इति न तत्र तत्र स्पष्टेर्थे तात्पर्यम् ॥ ४० ॥ ❀ ❀ अथ कृष्णवाक्यश्रवणोत्तरं तमश्वत्थामानं न्यवेदयत्प्रादर्शयत् ॥ ४१ ॥ ❀ ❀ कृष्णा द्रौपदी ॥ ४२ ॥

श्रीमद्वीरराघवव्याख्या

तत्र यस्मादसौ पापात्मा आततायात्मनस्तव बंधुहा कुमारघाती हे वीर भर्तुर्धृतराष्ट्रस्य विप्रियमिदं कर्म कृतवान् कुलपांसनः कुलदूषकश्चातो वध्यताम् ॥ ३९ ॥ ❀ ❀ इत्थं धर्मं परीक्षता धर्मपरीक्षार्थमेवं कृतवता कृष्णेन चोदितोऽपि पार्थोऽर्जुन आत्मजहनमपि सुतहनमपि तं गुरुसुतं द्रौणिं हंतुं नैच्छत्। यतोऽर्जुनो महान् गुरुकृतोपकाराभिज्ञः ॥ ४० ॥ ❀ ❀ ततो गोविंदः प्रियः सारथिश्च यस्य सोऽर्जुनः स्वशिबिरमागत्य हतानात्मजान्प्रति शोचंत्यै द्रौपद्यै तं द्रौणिं न्यवेदयत् ॥ ४१ ॥ ❀ ❀ तथाहृतमानीतं पशुना तुल्यं पशुवत्पाशेन बद्धं पशुर्यथा पाशेन बध्यते तद्वद्बद्धं कर्मणः स्वकृतस्य जुगुप्सितेन जुगुप्साशब्दात्स्वार्थसन्नंताद्भावे क्तः, निंदया हेतुना अवाङ्मुखमपकृतमपकारिणमर्जुनेनापकृतं वा गुरोः सुतमश्वत्थामानं निरीक्ष्य दृष्ट्वा द्रौपदी वामस्वभावा हेतुगर्भमिदं सुस्वभावत्वान्ननाम ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

"आत्मबंधुः सुतस्तोकः पुत्रोंगज उदाहृतः" इत्यभिधानादात्मबंधून् सुतान् हतवानित्यन्वयः। तस्मादसौ पापः विप्रियं तु लोकदृष्टश्चेति ज्ञातव्यम् ॥ ३९ ॥ ❀ ❀ ❀ हरिणाऽर्जुनं प्रति द्रौणिवधप्रतिपादनमर्जुनस्य धर्मपरीक्षणाभिप्रायमेव, न तु वधाभिप्रायमिति कथनपूर्वकमर्जुनस्य भक्त्यतिशयं कथयति एवमिति। पार्थः गुरुसुतं हंतुं नैच्छदित्यन्वयः। कथंभूतः यद्यप्येवं धर्मं परीक्षता कृष्णेन चोदितः तथापि नैच्छत् कथंभूतम् आत्मानं हतवंतम् अयमपि कश्चिद्धेतुः पुनरपि कथंभूतः महान् महापुरुषः महत्त्वाद् नैच्छदिति भावः ॥ ४० ॥ ❀ ❀ अथ गोविंदः प्रियश्च सारथिश्च यस्य स तथोक्तः स पार्थः स्वशिबिरमुपेत्य द्रौणिना हतानात्मजान् पुत्रान् प्रति शोचंत्यै प्रियायै द्रौपद्यै तं न्यवेदयदित्येकान्वयः ॥ ४१ ॥ ❀ ❀ वामस्वभावा मृदुस्वभावा चारुतरशीलेति यावत्, कृष्णा तथाहृतं तदेवाह पशुत्वात्पाशेन बद्धं कर्म जुगुप्सितेन कर्मणा लज्जयावाङ्मुखं अपकृतं पुत्रहत्ययाऽपकर्तारमपि गुरोः सुतं निरीक्ष्य कृपया ननामेत्येकान्वयः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अपकृतमिति क्विबन्तम् ॥ ४०–४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धर्म्मं परीक्षमाणेन यद्यपि चोदितः तदपि हंतुं नैच्छत्। आत्महनं पुत्रहंतारमपि। यतो महान् कृष्णस्य स्वभावाभिज्ञः। तस्य चायं स्वभावः स्वयं सर्व्वज्ञोऽपि धर्म्मादिनिष्ठाख्यापनाय तद्वतो भक्तान् परीक्षते इति। तत्र 'नैनं पार्थार्हसि त्रातु-

मि'त्यादिना रौद्ररसं प्रदर्श्य धर्म्मवन्तमर्ज्जुनं यथा परीक्षते स्म तथा 'भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्म' इत्यादिना 'भवतीनां वियोगो मे न हि सर्व्वात्मना' इत्यादिना 'अहं हि सर्व्वभूतानामादिरन्तोऽन्तरं बहिरि'त्यादिना च कर्म्मज्ञानयोगौ प्रदर्श्य प्रेमवतीर्गोपीः । 'वरञ्च मत् कञ्चन मानवेन्द्र वृणीष्वे'त्यादिना 'वरं वृणीष्व भद्रं ते कामपूरोऽस्म्यहं'मित्यादिना च भोगैश्वर्य्यादीन् प्रदर्श्य भक्तिमतः पृथुप्रह्लादादीन् 'दीयमानं न गृह्णन्ती'त्यादिना अन्यानपि भक्तान् परीक्षाञ्चकारैवेति । तदीयसिद्धभक्ता अपि तथा परीक्षन्ते । तथाहि शुक एव षष्ठस्कन्धे पापनिस्ताराथं पृष्टः प्रायश्चित्तमात्रमुक्त्वा परीक्षितः सिद्धांताभिज्ञतां नवमे श्रीकृष्णलीलां संक्षेपेणोक्त्वा लीलौत्सुक्यं द्वादशे ब्रह्मज्ञानमुपक्षिप्य भक्तिनिष्ठां परीक्षाञ्चक्रे इति न तत्र तत्र स्पष्टेऽर्थे तात्पर्यम् ॥ ४० ॥ ❁ ❁ न्यवेदयत् अयं ते पुत्रहन्ता आनीत इत्युक्तवान् ॥ ४१ ॥ ❁ ❁ तथा तेन प्रकारेण आहृतम् , आनीतं कर्म्मजुगुप्सितेन कर्म्मणा जुगुप्सया । अपकृतमिति किवन्तम् , अपकारिणम् । कृपया निरीक्ष्य । वामः शोभनः । ननाम च उवाच चेति चकाराभ्यां संभ्रमः सूचितः । सती तद्बन्धनासहत्वादियं भगवता धार्मिकत्वे परीक्षितादर्ज्जुनादपि साधुत्ववतीत्यर्थः ॥ ४२-४३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भर्तुः सुयोधनस्य रात्र्यां सुप्तान्हत्वा तच्छिरश्शतशः पातनेनाप्रियं कृतवान् आत्मनस्तव बंधुहा ॥ ३९ ॥ ❁ ❁ आत्महनं पुत्रघ्नम् ॥ ४०-४१ ॥ ❁ ❁ तथावज्ञापूर्वकमाहृतमानीतं सुप्तवधरूपकर्मजनितदोषेणावाङ्मुखमपकृतमर्जुनेनावमानितम् । वामः सुशोभनः स्वभावो यस्याः सा ॥ ४२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तस्मात् सर्वथा अयं वध्य इत्युपसंहरति तदसाविति । आत्मनः पुत्रान् तद्बंधूंश्च हंतीति स्वामिहिताचरणमपि न जातमित्याह भर्तुश्चेति । वंशे विद्यमाने तस्याप्युपकारो भवेत् कुलद्वयकलंकजननाच्च तस्मादस्य वधे कस्यापि नापकारः ॥ ३९ ॥ ❁ ❁ तत्रैतानि वचनानि धर्मपरीक्षकाणीति सूतज्ञानात् सूत आह एवमिति । वस्तुतस्तु बंधनमेवायुक्तं धर्मं परित ईक्षिता वा ईश्वरवचनोल्लंघनाभावाय वा अर्जुनेन तथा ज्ञातमिति तदुक्तं "कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इति तु धर्मः, त्रयो ह्यत्र संति भगवानर्जुन अश्वत्थामा चेति, त्रिष्वप्येकैकोऽवध्यहेतुरस्ति, परीक्षा भगवति महत्त्वमर्जुने शिष्टे गुरुपुत्रत्वमिति ॥ ४० ॥ ❁ ❁ प्रकारांतरेण शनैर्गृहे समागमनमाह अथेति कार्यसिद्धौ हेतुपदं गोविंदेति उपसंहारेप्युक्तम् । अयं तु शत्रुहस्ते पतितो मृत एव देहस्तु बाणस्थानीयः प्रतिज्ञातं तु शिरः समानीतमिति न्यवेदयत् । शोकमध्य एतस्याः धर्मज्ञानमिति शोचन्त्या इत्युक्तं भार्याहितार्थं तु मारणं तत्तयानुक्तत्वात् संदेहादत्रैव समानीतः, आज्ञायां मारणीय इति निवेदनाभिप्रायः ॥ ४१ ॥ ❁ ❁ तस्यास्तु तथा हरणमेव अनभिप्रेतं दूरे मारणमित्याह तथा हृतमिति कर्मणि जुगुप्सितं युद्धे बालकमारणं तेन मुखाप्रदर्शनादवाङ्मुखत्वं कृष्णा द्रौपदी वामो मनोहरः स्वभावो यस्याः सर्वहितभावनात् महत्त्वबुद्ध्या नमनाभावेऽपि अहो कष्टं ब्राह्मण्यमेतादृशे स्थाने पतितमिति कृपया ननाम । तस्यापि तद्दुःखदूरीकरणेच्छा कृपा आश्वासनहेतुत्वान् मनस्यतथात्वम् ॥ ४२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तदसावित्यत्र । आत्मन इत्यस्यार्थः पुत्रानिति । भर्तुश्चेति चकारसूचितमर्थमाहुः कुलेत्यादि । द्रोणकुले दुर्योधनकुले चेत्यर्थः । अवध्यत्वहेतुरिति । द्रौणेरवध्यत्वप्रयोजको हेतुः । तथा चैतत्त्रयं ज्ञात्वा कामतो वधोऽर्जुनेन न कृत इत्यर्थः ॥ ३९-४० ॥ अथोपेत्येत्यत्र । हेतुपदमिति । हेतुभूतं पदम् । नन्वेतदानयने 'विशिखैः शिर उपाहरे' इति प्रतिज्ञायाः कथं पूर्तिरित्याकाङ्क्षायामाहुः अयं त्विति । देहस्त्विति । प्रतिज्ञातं त्विति च ॥ ४१ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यस्मादाततायी शस्त्रधारी आत्मनस्तव बन्धुहा कुमारघाती स्वभर्त्तुर्दुर्योधनस्यापि सन्तत्युच्छेदेन श्राद्धतर्पणादिक्रियालोपेन विप्रियमेव कृतवान् । दुष्कृतकरणेन कुलपांसनः स्वकुलस्यापि दूषकः । न केवलमिदमेव दुष्कृतं कृतं किन्त्वेवं सर्वदैव तत्करोतीति सूचयन्नाह-पाप इति, पापात्मेत्यर्थः । तत्तस्मादसौ वध्यताम् । नैतद्वधे तव कश्चिदपि दोषो भविष्यति तस्य क्षात्रधर्मत्वादिति सूचयन् सम्बोधयति-हे वीरेति ॥ ३९ ॥ यद्यप्येवं कृष्णेन चोदितस्तथापि पार्थः अर्जुनः आत्महनं स्वपुत्रहन्तारमपि अश्वत्थामानं हन्तुं नैच्छदित्यन्वयः । तत्र हेतुमाह-गुरुसुतमिति । ननु तथापि 'ब्राह्मणं बालं वृद्धं वा अपि वेदान्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्' इति स्मृतेस्तद्वधे दोषाभावात् कथं न तदैच्छदित्याशङ्क्याह-महामनाः, धर्मज्ञ इत्यर्थः । 'जिघांसन्तं जिघांसीयात्' इत्यर्थशास्त्रं, न तु धर्मशास्त्रं, तेनार्थसिद्धावपि धर्मोत्पत्त्यभावात् 'न हिंस्यात् सर्वा भूतानि, ब्राह्मणो न हन्तव्यः' इत्यादि तु धर्मशास्त्रं हिंसानर्थमूलं क्षमया धर्मोत्पत्तिरिति च बोधयतीति धर्मपक्षमेव स्वीकृतवानिति भावः । तर्हि भगवांस्तु सर्वज्ञः स कथं तत्र चोदितवानित्यपेक्षायामाह-धर्मं परीक्षतेति । तथाच स्वभक्तस्यार्जुनस्य धर्मज्ञत्वधैर्यादिगुणख्यापनार्थं तत्र स प्रचोदितः, न तु तत्र तात्पर्यम् । अन्यथा 'आज्ञोल्लङ्घी मम द्वेषी मद्भक्तोऽपि न वैष्णवः' इति वाक्यादाज्ञोल्लङ्घनेऽर्जुनस्यापि दोषः

स्यादिति भावः ॥ ४० ॥ ❋ ❋ अथानन्तरं गोविन्दः प्रियः सारथिश्च यस्य सोऽर्जुनः स्वस्य शिबिरं सेनोत्तरणस्थानमेत्य आगत्य हतानात्मजान् शोचन्त्यै प्रियायै द्रौपद्यै तं द्रौणिं न्यवेदयत् अयं ते पुत्रहन्ताऽऽनीत इत्युक्तवान् ॥ ४१ ॥ ❋ ❋ तस्यास्तथा तदानयनमेवानभिप्रेतं मारणं तु दूरत इत्याह–तथेति । तथाऽपमानेन आहृतमानीतं पशुवत्पाशेन बद्धं कर्मजुगुप्सितेन जुगुप्सितेन निन्दितेन बालवधरूपेण कर्मणाऽवाङ्मुखं अधोमुखं लज्जया मुखमप्रदर्शयन्तं अपकृतं कृतापकारमपि गुरोः सुतमश्वत्थामानं कृष्णा द्रौपदी कृपया निरीक्ष्य ननाम चेत्यन्वयः । मृतपुत्राया अपि तस्मिन् कृपाद्दृष्ट्यादौ हेतुमाह–वामस्वभावेति । वामो मनोहरः ऋजुः स्वभावो यस्याः सा । ननाम चेति चकारेण तस्याः सम्भ्रमः सूचितः ॥ ४२ ॥

हिन्दी अनुवाद

इस पापी कुलाङ्गार आततायीने तुम्हारे पुत्रोंका वध किया है और अपने स्वामी दुर्योधनको भी दुःख पहुँचाया है। इसलिये अर्जुन ! इसे मार ही डालो ॥ ३९ ॥ ❋ ❋ भगवान् श्रीकृष्णने अर्जुनके धर्मकी परीक्षा लेनेके लिए इस प्रकार प्रेरणा की, परन्तु अर्जुनका हृदय महान् था । यद्यपि अश्वत्थामाने उनके पुत्रोंकी हत्या की थी, फिर भी अर्जुनके मनमें गुरुपुत्रको मारनेकी इच्छा नहीं हुई ॥ ४० ॥ ❋ ❋ इसके बाद अपने मित्र और सारथि श्रीकृष्णके साथ वे अपने युद्ध-शिविरमें पहुँचे । वहाँ अपने मृत पुत्रोंके लिये शोक करती हुई द्रौपदीको उसे सौंप दिया ॥ ४१ ॥ ❋ ❋ द्रौपदीने देखा कि अश्वत्थामा पशुकी तरह बाँधकर लाया गया है । निन्दित कर्म करनेके कारण उसका मुख नीचेकी ओर झुका हुआ है । अपना अनिष्ट करनेवाले गुरु-पुत्र अश्वत्थामाको इस प्रकार अपमानित देखकर द्रौपदीका कोमल हृदय कृपासे भर आया और उसने अश्वत्थामाको नमस्कार किया ॥ ४२ ॥

उवाच चासहन्त्यस्य बन्धनानयनं सती । मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥
सरहस्यो धनुर्वेदः सविसर्गोपसंयमः । अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥
स एष भगवान् द्रोणः प्रजारूपेण वर्तते । तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥ ४५ ॥
तद् धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलम् । वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ॥ ४६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननाम चोवाच चेति चकाराभ्यां संभ्रमः सूचितः । बन्धनेनानयनमसहमाना ॥ ४३ ॥ ❋ ❋ सरहस्यः गोप्यमन्त्रसहितः । विसर्गः अस्त्रप्रयोगः उपसंयमः उपसंहारः ताभ्यां सहितः अस्त्रसमूहश्च ॥ ४४ ॥ ❋ ❋ किं च तस्य द्रोणस्य आत्मा देहः तस्य अर्धं कृपी आस्ते । अर्धत्वे हेतुः–पत्नी । 'अर्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः 'जायापती अग्निमादधीयाताम्' इति श्रुतेरुभयोरेकाकारत्वावगमाच्च । ननु भर्तरि मृते सा कथं जीवति तत्राह–नान्वगात् भर्तारं–यतः वीरसूः पुत्रवती ॥ ४५ ॥ ❋ ❋ तत् तस्माद्गौरवं गुरोः कुलं भवद्भिः कर्तृभिः वृजिनं दुःखं प्राप्तुं नार्हति, किं तु पूज्यं वंद्यं च ॥ ४६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

अस्याश्वत्थाम्नः । सती तद्बन्धनासहत्वादियं भगवता परीक्षितादर्जुनादपि धार्मिकत्वे साधुत्ववती । एष यतः सर्वेषां वर्णाश्रमाणां गुरुरस्माकं तु नितरामतिशयेन गुरुः । अहो गुरोर्बन्धनमतीवानुचितं कृतवानस्यातो मुच्यतामिति संभ्रमे वीप्सा ॥ ४३ ॥ ❋ ❋ यदनुग्रहाद्यत्कृपातः ॥ ४४ ॥ ❋ ❋ प्रजारूपेण "आत्मा वै जायते पुत्रः" इति श्रुतेः । भगवान् तद्वत्पूज्यः । स्वसाध्वीत्वमुद्भावयति–किं चेति । श्रुतिः स्पष्टार्था । आदधीयातामाधानं कुर्वीयाताम् । एककारकत्वमत्राग्न्याधाने कर्तृत्वं तस्यावगमादर्शनात् । अत्राक्षिपति–नन्विति । पुत्रहीना तु भर्तारं विना स्वयोगक्षेममपश्यंत्यनुगमनं कुर्यात्समर्थपुत्राया-स्तन्नोचितमित्याह–वीरसूरिति । ब्राह्मण्या अनुगमनं वैकल्पिकमिति भरतोपाख्याने पञ्चमस्कन्धे व्याख्यास्यामः ॥ ४५ ॥ ❋ ❋ यतोऽयं गुरुपुत्रस्ततो हेतोः । हे धर्मज्ञेति । त्वं तु धर्मं गुरुसेवातदपराधसहनादिलक्षणं जानास्येवेति भावः । पुनरैहिकामुष्मिक-भयं द्योतयन्नाह–हे महाभागेति । एतादृशकर्मणा महाभागत्वं न स्यादतीति भावः । "वृजिनं कल्मषे दुःखे केशे ना कुटिले त्रिषु" इत्यभिधानात् । अभीक्ष्णशः मुहुर्मुहुः पूज्यम् ॥ ४६ ॥

अस्मिन्पर्याये दीपनी न

श्रीमद्वीरराघवव्याख्या

अस्य गुरुसुतस्य बंधनेनानयनं बंधनपूर्वकमानयनं बंधनमानयनं च वा अस्यार्जुनस्यार्जुनकर्तृबंधनायनमिति वा असहंती सती द्रौपदी उवाच उक्तिमेवाह मुच्यतामित्यादिभिः सार्द्धैः पंचभिः । एष द्रौणिर्मुच्यतां मुच्यतां त्वरया द्विरुक्तिः,

मोचनीयत्वे हेतुं दर्शयंती विशिनष्टि ब्राह्मणस्तत्रापि गुरुः ॥ ४३ ॥ ❀ ❀ न ह्येष गुरुरपि त्वस्यायं पितेत्यत आह सरहस्य इति । भवता यस्यानुग्रहाद्रहस्येन सहितो धनुर्वेदः सविसर्गोपसंयमः प्रयोगोपसंहारसहितोऽस्त्रग्रामः अस्त्रसमुदायश्च शिक्षितः ॥ ४४ ॥ ❀ ❀ स भगवान् द्रोण एवैष प्रजारूपेण वर्त्तते । एतच्छब्दो द्रोणस्यैवाकारांतरेणावस्थितिपरामर्शकः "आत्मा वै पुत्र" इति श्रुतेरिति भावः, पुत्रविषयापकारेण पितैवापक्रियते इति भावः, ननु स स्वर्गतः इत्यत्राह तस्येति–तस्य द्रोणस्यात्मनः शरीरस्यार्द्धमर्द्धांशरूपा तत्पत्नी कृपी वीरसूः पुत्रवत्यास्तेनान्वगान्नानु सा मरणं कृतवती । अर्द्धमिति समांशाभिप्रायेण नपुंसकनिर्देशः "अर्द्धो वा एष आत्मनो यत्पत्नी"ति श्रुत्यभिप्रायेणार्द्धमित्युक्तं, द्रोणस्य स्वर्गतत्वेऽपि तदर्द्धशरीरभूता तत्पत्न्यपक्रियेतैवेति भावः ॥ ४५ ॥ ❀ ❀ तत्तस्मात् हे धर्मज्ञ मदुक्तधर्माभिज्ञ हे महाभाग गुर्वपमानराहित्यरूपमहाभाग्ययुक्त भवद्भिर्गुरूणां बहुमंतृभिर्गौरवं कुलं गुरोः संबंधि कुलं वृजिनं दुःखं प्राप्तुं प्रापयितुं भवद्भिर्हेतुभिर्वृजिनं प्राप्तुमिति वा नार्हति, किंत्वभीक्ष्णशः पौनःपुन्येन पूज्यं वंदनीयं च, भवद्भिरित्यनुषंगः ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

न केवलं नत्वा तूष्णीमभूत्किंतु वचनं चोवाचेत्याह उवाचेति–अस्य द्रौणेर्बंधनेनानयनमसहमाना सती प्रशस्तसौशील्यादिगुणवती ब्राह्मण एव वर्णानां गुरुः अयं च नितरां युष्माकं गुरुः ॥ ४३ ॥ ❀ ❀ अतिशयितगुरुत्वमाह सरहस्येति, सरहस्यः सकीलकः धनुर्वेदः सविसर्गोपसंयमः प्रयोगोपसंहारसहितः अस्त्रग्रामः ब्रह्माद्यस्त्रसमूहः यस्य द्रोणस्यानुग्रहात् भवता शिक्षितः अभ्यस्तः ॥ ४४ ॥ ❀ ❀ स एष द्रोणो भगवान् प्रजारूपेण "आत्मा वै पुत्रनामासी"ति श्रुतेः पुत्ररूपेण वर्त्तते, यतो गुरुपुत्रस्य गुरुत्वपूजार्हत्वादिति भावः । किंतु अन्योपि हेतुरस्तीत्याह तस्येति तस्य द्रोणस्यात्मनः शरीरस्यार्द्धम् अर्धांगी सती वीरसूः वीरपुत्रवती कृपी संप्रत्यास्ते पतिं नान्वगात् अनुगमनं न कृतवती, यतोऽतो गुरुपत्नी भक्त्या च मुच्यतामिति भावः ॥ ४५ ॥ ❀ ❀ न केवलं गुरुभक्तिरेवात्र हेतुः, अन्योप्यस्तीत्याह तदिति । गुरौ गुरुपुत्रेषु वाचारनमनलक्षणो यो धर्मः तं जानातीति धर्मज्ञः हे धर्मज्ञ ! भगानां भाग्यानां समुदायो भागः महान्भागो यस्य स तथा तस्य संबुद्धिर्महाभाग, अश्वत्थाम्नो दुःखे सति तन्मातुरपि दुःखं स्यात्तेन तत्कोपे मास्मत्कुलस्यापि पापं भवेदिति यस्मात्तस्मादभीक्ष्णशः सर्वदा सर्वैः पूज्यं वंद्यं गौरवं कुलं भवद्भिर्वृजिनं पापं तन्निमित्तं दुःखं वा प्राप्तुं नार्हति योग्यं न भवति ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सरहस्यः गोप्यमंत्रसहितः विसर्गोपसंहाराभ्यां सहित इति यदि ब्रह्मास्त्रस्य विसर्गोपसंयमावेतत्पितुः सकाशान्नाज्ञास्यस्तदा कथमिमं बद्ध्वा त्वमानेष्य इत्यकृतज्ञता ध्वनिता ॥ ४४ ॥ ❀ ❀ प्रजारूपेण 'आत्मा वै जायते पुत्र' इति न्यायेन । आत्मनो देहस्यार्द्धं कृपी पत्नी "अर्द्धो वा एष आत्मा यत् पत्नी"ति श्रुतेः । अत एव भर्त्तारं नान्वगात् यतो वीरसूः ॥ ४५ ॥ ❀ ❀ गौरवं गुरोः सम्बन्धि कुलं कर्त्तृ भवद्भिः करणैः वृजिनं दुःखं प्राप्तुं नार्हति यतः पूज्यमिति ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बंधनपूर्वकमानयनमसहंती ॥ ४३ ॥ ❀ ❀ सरहस्यः सगुह्यमंत्रः सविसर्गोपसंयमः सप्रयोगोपसंहारः ॥ ४४ ॥ ❀ ❀ स भगवान्द्रोणः एष प्रजारूपेण वर्तते "आत्मा वै पुत्रनामासी"ति श्रुतेः । तस्य द्रोणस्य आत्मनोर्द्धं, शरीरस्यार्द्धं पत्नी कृपी आस्ते । "एष आत्मनो यत्पत्नी"ति श्रुतेः नान्वगाद्भर्तारम् । यतो वीरसूः पुत्रवती ॥ ४५–४७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

बहिर्दुःखदूरीकरणार्थमुवाच च असहंती परदुःखं दृष्ट्वा स्वयमपि दुःखिता देहधर्माद्धर्मो महानिति तस्याः कृपाधिक्यमुक्तं सतीति धर्मस्वभावत्वं भर्तारमपि धर्मप्रमादे बोधयेदिति षडंगसहितं धर्मवाक्यमाह–मुच्यतामिति द्विरुक्तिः संदेहाभावाय विलंबाभावाय च तत्र हेतुः एष ब्राह्मण इति । एकस्मिन् धर्मिणि बहूनां धर्माणां स्थितावपि यो महान् धर्मः स आदरणीयः धर्मांगं च देहो गौणः । धर्मश्च मुख्यः देहविचारेण च शत्रुत्वं धर्ममूलं च ब्राह्मणः । तस्मात्तद्बलिष्ठमिति, किंच धर्मो हि गुरुमूलं स च भगवान् तन्मुखत्वाद्ब्राह्मणो गुरुः लौकिकोपदेशकगुर्वपेक्षया भगवन्मुखस्यात्यंतगुरुत्वान्नितरां गुरुः ॥ ४३ ॥ ❀ ❀ न्यायविरोधे धर्मो दुर्बल इति तदविरोधं वदन्ती लौकिकन्यायेनापि गुरुत्वमाह सरहस्य इति । रहसि भवो रहस्यो मंत्रविसर्गः अस्त्राणां मोचनप्रकारः उपसंयमः उपसंहारः पुत्रादिष्वपि तथा अवचनात् अस्त्रग्रामश्च ब्रह्मास्त्रादयः । न ह्येतत् पाठमात्रेण स्फुरति, किंतु कृपयेति तदाह यदनुग्रहादिति ॥ ४४ ॥ ❀ ❀ स द्रोणो नायमित्यत आह स एष इति । तस्यैतद्रूपत्वे हेत्वंतरमाह भगवानिति । ब्रह्मविदो हि स्वेच्छया देहत्यागः तत्र भवतामुपकाराय देहत्यागदशायां हतं पुत्रं श्रुत्वा तन्माभूदिति तद्रूपेणैवाहं जीविष्यामीति पितृशरीरं त्यक्तवान् , अतः स एवायं द्रोणः "आत्मा वै पुत्रनामासी"ति श्रुतेः प्रजारूपेण । वः निवृत्तिधर्मविरोधी च धर्मो न युक्त इति । करुणामाह तस्यात्मनोर्द्धमिति । मूलरूपेण्यात्मनोर्द्धं पत्न्यास्ते पुत्ररूपेण भर्त्ता जीवतीति पुत्र-

वतीनां न हि गमनं, ततः पुत्रवधे तस्या अतः तस्याः कृपीति नाम व्यलीकं कापट्यं तदपि धर्मे बाधकं तस्मादस्य मोचनं निर्व्यलीकमिति ॥ ४५ ॥ ❀ ❀ तदाह तद्धर्मज्ञेति यदि केनापि प्रकारेण गुरुकुले दुःखप्रापणं तदा कृतो गुरुसेवालक्षणो धर्मः सकपटो भवति तथा धर्मे कापट्यं जानन्नपि यस्तथा करोति स न धर्मज्ञः त्वं तु तद्धर्मज्ञः अतो हे धर्मज्ञ, किंच महाभाग्येन गुरूणां सेवाकरणसामर्थ्यं भवति, तज्जातोपि सामर्थ्ये यदि सेवां न कुर्यात्तदा महदभाग्यं त्वं तु तद्विपरीत इति महाभागः। किंच अन्यैर्गुरुकुले वृजिने प्राप्ते भवद्भिस्तत् दूरीकर्त्तव्यं तत्र तद्विपरीतं दृश्यते भवद्भिरेव गौरवं कुलं वृजिनं प्राप्नोति तन्न युक्तं तत्तथा नार्हति तत्र हेतुः पूज्यं वंद्यमिति सर्वथा महद्भिर्गौरवं कुलं पूजामेवार्हति तत्प्रसादादेव महत्त्वस्य जातत्वात्। किंच अनम्रतया पूजामपि नार्हति किंतु सर्वदा नमनमप्यर्हतीत्यर्थः। किंच धर्मे ज्ञानाभावोपि बाधकः "यदेव विद्यया करोति" इति श्रुतेः। ततः स्वस्मिन्निवासिन्नपि यः सुखदुःखे समे पश्यति तत्कृतो धर्मः, अन्यस्तु 'विषमधिया रचितो य' इति वाक्यात् अधर्मप्रायः ॥ ४६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

उवाचेत्यत्र। षडङ्गसहितमिति। 'धर्म्यं न्याय्य'मित्येतद्विवरिष्यमाणषडङ्गसहितम्। बलिष्ठमिति ब्राह्मण्यमिति शेषः। नितरां गुरुरिति। एतेन भगवन्मुखत्वरूपो धर्मो महत्त्वादादरणीय इत्युक्तम्। स एष इत्यत्र। नान्वगादिति। द्रोणानुगमनं न कृतवतीत्यर्थः ॥ ४५ ॥ ❀ ❀ तद्धर्मज्ञेत्यत्र। वृजिने प्राप्ते इति अन्तर्भावितण्यर्थः। अधर्मप्राय इति। 'विषमधिया रचितो य' इति वाक्यं चित्रकेतुस्तुतौ षष्ठस्कन्धे। अत्र पूर्वश्लोके भागवतधर्मस्यानवद्यतामुक्त्वा 'विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र। विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः' इति वाक्यकथनादत्रापि धर्म एव परामृश्यत इति तथेत्यर्थः ॥ ४६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

न केवलं ननाम किन्तु अस्य गुरुपुत्रस्य बन्धनेन आनयनमसहन्ती सती अर्जुनं प्रत्युवाच चेत्यन्वयः। किमुवाचेत्यपेक्षायां तदुक्तिमेवाह–मुच्यतामित्यादिभिः सार्द्धैः पञ्चभिः। एष मुच्यतां मुच्यतामिति द्विरुक्तिर्मोचने सन्देहाभावाय विलम्बाभावाय च। मोचनीयत्वे हेतुं दर्शयन्ती विशिनष्टि–गुरुरिति। इदानीं तस्य गुरुत्वं नास्तीत्याशङ्क्याह–नितरामिति। तत्रापि हेतुमाह–ब्राह्मण इति ॥ ४३ ॥ ❀ ❀ अस्यापमाने तव कृतघ्नतारूपो दोषः स्यादिति सूचयन्ती गुरुत्वमेव स्पष्टयति–सरहस्य इति। रहसि भवो रहस्यो मन्त्रस्तत्सहितो धनुर्वेदः विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारस्ताभ्यां सहितः अस्त्रग्रामोऽस्त्रसमूहश्च भवता यस्यानुग्रहाच्छिक्षितः ॥ ४४ ॥ ❀ ❀ स भगवांस्त्वयि मन्त्रास्त्रादिसञ्चारसमर्थो द्रोण एवैष प्रजारूपेण वर्तते "आत्मा वै पुत्रनामासि" इति श्रुतेरेतदपकारो द्रोणापकार एवेति भावः। किञ्च तस्यात्मा देहस्तस्यार्द्धं कृपी आस्ते। अर्द्धत्वे हेतुमाह–पत्नीति "अर्द्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः। भर्त्तरि मृते सा कथं जीवतीत्यपेक्षायामाह–वीरसूरिति। यतः पुत्रवती अतो भर्त्तारं नान्वगात् अनुमरणं न कृतवती, पुत्रवतीनां तन्निषेधात् ॥ ४५ ॥ ❀ ❀ तथा च पुत्रवधे तस्या महद् दुःखं स्यादतस्त्वयाऽयं न हन्तव्य इत्याह–तदिति। अज्ञः कश्चिदधर्मं कुर्यात्तदा नाश्चर्यं धर्मज्ञस्य भवतस्त्वधर्माचरणमयुक्तमेवेत्याशयेन सम्बोधयति–हे धर्मज्ञ इति। धर्मिष्ठत्वादेव भवतो महद्भाग्योदय इत्याशयेन पुनः सम्बोधयति–हे महाभागेति। तत्तस्मादनुचितत्वादेव गौरवं गुरोः सम्बन्धि कुलं–कर्तृ भवद्भिर्हेतुभिर्वृजिनं दुःखं प्राप्तुं नार्हति, किन्तु अभीक्ष्णशः पुनः पुनः पूज्यं वन्द्यं चेति ॥ ४६ ॥

हिन्दी अनुवाद

गुरुपुत्रका इस प्रकार बाँध-कर लाया जाना सती द्रौपदीको सहन नहीं हुआ। उसने कहा–'छोड़ दो इन्हें छोड़ दो। ये ब्राह्मण हैं। हमलोगोंके अत्यन्त पूजनीय हैं ॥ ४३ ॥ ❀ ❀ जिनकी कृपासे आपने रहस्यके साथ सारे धनुर्वेद और प्रयोग तथा उपसंहारके साथ सम्पूर्ण शस्त्रास्त्रोंका ज्ञान प्राप्त किया है, वे आपके आचार्य द्रोण ही पुत्रके रूपमें आपके सामने खड़े हैं। उनकी अर्धाङ्गिनी कृपी अपने वीर पुत्रकी ममतासे ही अपने पतिका अनुगमन नहीं कर सकीं, वे अभी जीवित हैं ॥ ४४–४५ ॥ ❀ ❀ महाभाग्यवान् आर्यपुत्र! आप तो बड़े धर्मज्ञ हैं। जिस गुरुवंशकी नित्य पूजा और वन्दना करनी चाहिए, उसीको व्यथा पहुँचाना आपके योग्य कार्य नहीं है ॥ ४६ ॥

मा रोदीदस्य जननी गौतमी पतिदेवता। यथाहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः ॥ ४७ ॥
यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः। तत् कुलं प्रदहत्याशु सानुबन्धं शुचा[१]र्पितम् ॥ ४८ ॥

---

१. प्रा० पा०—शुचार्दितम्।

सूत उवाच

धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् । राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दद्वचो द्विजाः ॥ ४९ ॥
नकुलः सहदेवश्च युयुधानो धनंजयः । भगवान् देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

मृतवत्सा मृतपुत्रा ॥ ४७ ॥ ❋ ❋ विपक्षे, दोषमाह–यैरिति । तेषां राजन्यानां कुलं कर्म, कथंभूतं ? सानुबन्धं सपरिवारम् । शुचा शोकेन अर्पितं व्याप्तं च ब्रह्मकुलं कर्तृ प्रदहति ॥ ४८ ॥ ❋ ❋ धर्म्यमित्यादयो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः । तत्र धर्म्यं धर्मादनपेतं, मुच्यतां मुच्यतामिति । न्याय्यं न्यायादनपेतं, सरहस्य इत्यादि । सकरुणं तस्यात्मनोऽर्धमिति । निर्व्यलीकं तद्धर्मज्ञेति । समं मा रोदीदिति दुःखसाम्योक्तेः । महद्यैः कोपितमिति निष्ठुरोक्त्या हितोपदेशात् । एवंभूतं राज्ञ्याः वचो हे द्विजाः, प्रत्यनन्ददनुमोदितवान् ॥ ४९ ॥ ❋ ❋ नकुलादयश्च प्रत्यनन्दन् । युयुधानः सात्यकिः ॥ ५० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"वत्सः पुत्रे प्रिये चाल्पे वक्षस्तर्णकयोरपि" इति धरणिः ॥ ४७ ॥ ❋ ❋ विपक्षे पूर्वोक्ताकरणे । अकृतात्मभिरशिक्षितबुद्धिभिः ॥ ४८ ॥ ❋ ❋ हे द्विजाः शौनकादयः ! भवन्तो हि द्वितीयजन्मवत्त्वादुपनयनोत्तरं शास्त्राभ्यासबलेनैतज्ज्ञानंत्येवेति भावः ॥ ४९–५० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

कुलं कर्म्मेति । कुलमिति परार्द्धश्लोकोक्तपदं कर्म्म द्वितीयैकवचनं कर्म्मपदमित्यर्थः ॥ ४८ ॥ ❋ ❋ 'धर्म्मपथ्यर्थन्यायादनपेते' इति सूत्रेण धर्म्मशब्दात् अनपेतमित्यर्थे यत्प्रत्ययोऽवगन्तव्यः ॥ ४९ ॥ ❋ ❋ भगवान् देवकीपुत्र इति । सर्व्वेषां सत्त्वपरीक्षार्थं प्रथमं किञ्चिन्नोक्त्वा पश्चादनुमोदितवान् । भगवान् दुर्ज्ञेयाभिप्रायः प्रथममर्ज्जुनस्य तद्वधाय प्रवर्त्तनात् पश्चाद् द्रौपदीवचनानुमोदनाच्च । इति व्याख्यालेशः ॥ ५०–५६ ॥

श्रीमद्वीरराघवव्याख्या

एतद्विषयात् कृत्यात्कृपी नितरामहमिव दुःखिता स्यात्तत्तवानुचितमित्यभिप्रायेणाह मृता वत्सा पुत्रा यस्याः साऽत एवार्ताहं मुहुर्मुहुरश्रुमुखी यथा रोदिमि तथास्य ब्राह्मणस्य जननी पतिरेव देवता यस्याः सा गौतमी गौतमस्य दुहिता कृपी मा रोदीत् ॥ ४७ ॥ ❋ ❋ किंचेदं कर्मास्मत्कुलस्याप्यनर्थकारीत्याह यैरिति । अजितात्मभिरजितः क्रोधपरवश आत्मा मनो येषां तैर्यै राजन्यैर्ब्रह्मकुलं विप्रकुलं कोपितं कोपविषयीकृतमत एव शुचा शोकेनार्पितं प्रापितं दुःखितं सदित्यर्थः तेषां राजन्यानां कुलं सानुबंधमनुबंधसहितमादहति । अत्र प्रदहनक्रियाकर्तृ ब्रह्मकुलं कर्म तु राजन्यकुलम् ॥ ४८ ॥ ❋ ❋ हे द्विजाः ! इत्थं धर्म्यं धर्मादनपेतं न्याय्यं न्यायान्नीतेरनपेतं सकरुणं करुणायुक्तं निर्व्यलीकमनृताप्रियरहितं सममविषममनुरूपं महदाशयगंभीरं च राज्ञ्या द्रौपद्या वचो निशम्य धर्मसुतो युधिष्ठिरः प्रत्यनंदत् ॥ ४९ ॥ ❋ ❋ तथा नकुलादयः ये चान्ये तद्व्यतिरिक्ताः पुरुषा याश्च स्त्रियः सर्वे ते प्रत्यनंदन्निति वचनविपरिणामेन पूर्वेणान्वयः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यथा अश्रुमुखी मृतवत्सा मृतपुत्रा अत एवार्त्ताहं मुहुरनिशं रोदिमि तथा पतिरेव देवता यस्याः सा तथा गौतमी कृपी अस्याश्वत्थाम्नो जननी माता मा रोदीदित्येकान्वयः । तस्मादस्मत्कुलहिताय वा मुच्यताम् अयं गुरुपुत्र इत्यर्थः ॥ ४७ ॥ ❋ ❋ विपक्षे बाधकमाह यैरिति अकृतात्मभिरशिक्षितबुद्धिभिर्यै राजन्यैर्ब्राह्मणकुलं कोपितं तत्कुपितं शुचार्पितं प्राप्तशोकं सानुबंधं समूलभूतं तेषां राज्ञां कुलं तत्क्षणमेव प्रदहतीत्यन्वयः ॥ ४८ ॥ ❋ ❋ धर्म्यं धर्मादनपेतं न्याय्यं न्यायादनपेतं दयासहितं निर्व्यलीकं समं शत्रुमित्रभावशून्यं सर्वशास्त्रानुसृतं वा अर्थतो महत् ॥ ४९ ॥ ❋ ❋ एते नकुलादयश्च प्रत्यनंदन् इत्याद्याहत्यान्वयः । युयुधानः सात्यकिः ये चान्येऽनुजीविनः ते च याश्च स्त्रियः ताश्च ननंदुरिति भावः ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यैरिति । शुचा शोकेन अर्पितं स्वस्मिन् प्रापितं व्याप्तमित्यर्थः । यद्वा शुचा शुक् तस्यामर्पितं निमज्जितं तया व्याप्तमित्यर्थः ॥ ४८–५१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मा रोदीत् मा रोदितु ॥ ४७ ॥ ❀ ❀ सानुबन्धं सपरिवारं शुचायामर्पितं शोकव्याप्तं तत्कुलं कर्म्म प्रदहति ब्रह्मकुलमेव कर्तृ ॥ ४८ ॥ ❀ ❀ धर्म्यमित्यादयो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः । तत्र धर्म्यं धर्म्मादनपेतं, मुच्यतां मुच्यतामिति । न्याय्यं न्यायादनपेतं, सरहस्य इत्यादि । सकरुणं तस्यात्मनोऽर्द्धमिति । निर्व्यलीकं तद्धर्म्मज्ञेति । समं मा रोदीदिति दुःखसाम्योक्तेः । महत् यैः कोपितमिति निष्ठुरोक्त्या हितोपदेशात् ॥ ४९ ॥ ❀ ❀ नकुलादयश्च प्रत्यनन्दन् । युयुधानः सात्यकिः ॥ ५०–५१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्मकुलं कर्तृ तत्कुलं राजन्यकुलं दहति ॥ ४८ ॥ ❀ ❀ हे द्विजाः ! राज्ञ्याः स्वभार्य्यायाः, राजा युधिष्ठिरः प्रत्यनंदत् । अनुमोदितवान् ॥ ४९ ॥ ❀ ❀ नकुलाद्याः प्रत्यनंदन् युयुधानः सात्यकिः ॥ ५० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत एकपुत्रमरणेन रुदतां प्राणिनां यथान्यो विनश्येत् तद्विदिदमित्याह मा रोदीदिति । तद्दुःखेनाहमतिदुःखिता अत एव मा रोदीदिति प्रार्थना । गौतमीति ऋषिवंशोद्भवत्वात्तद्रोदने महाननर्थ इति सूचितं स्वरूपतोपि सा महती तदाह पतिदेवतेति । पतिव्रताया नयनजलं भूमौ पतेच्चेत् तदा निर्वीर्या भूमिर्भवतीति प्रथा । ननु पतिव्रता सर्वतत्त्वज्ञा अतो न रोदनं करिष्यतीति तत्राह यथाहमिति । विषय एतादृशो न तत्त्वज्ञानेन निवर्त्तत इत्यर्थः ॥ ४७ ॥ ❀ ❀ यथा वह्नेर्दाहकत्वे ज्ञातेपि दाहे वेदना भवत्येवेति भावः । धर्मस्तु ईश्वराविरोधी भवति तत्र धर्मप्रवर्तकत्वात् । ब्राह्मणा ईश्वरा एव, तच्चेदन्यैः क्षत्रियादिभिः कोपयुक्तं क्रियेत तदा अन्येषां कुलं सानुबंधं विनश्यतीति महतामुपदेशात् महद्वाक्याविरोधेन च धर्मः कर्त्तव्य इति तस्माच्छ्रीघ्रं मुच्यतामिति सिद्धम् ॥ ४८ ॥ ❀ ❀ सूतस्तु द्रौपदीवाक्यमनूद्य सर्वसंमत्या तथेति स्थापयति धर्म्यमिति द्वाभ्याम् । धर्मादनपेतं धर्म्यम् एवं न्याय्यं निर्व्यलीकं निष्कपटं समं समबुद्ध्योक्तं महद्राजवदुक्तम् । एवं वाक्ये षड्गुणाः तत्र तत्रैव नियताः । प्रथमतो राज्ञोऽभिनंदने हेतुः धर्मपुत्र इति इयमपि तद्भार्येति तदाह अत्र संमत्यर्थं द्विजा इति संबोधनम् ॥ ४९ ॥ ❀ ❀ नकुलः सहदेवश्चेति चकाराद्यथा युयुधानः सात्यकिः अर्जुनशिष्यः अर्जुनश्च गुरुशिष्ययोरेकत्र संमतिकथनं तथैव धर्मनिर्णय इति ख्यापनार्थं भगवतोत्राभिनंदनं भक्तकृपया तदाह देवकीनंदन इति । देवकीनंदनपदं भक्तवश्यताज्ञापनार्थं सर्वजनीनोयं धर्म इति ख्यापयितुं सर्वस्त्रीपुरुषाणां संमतमित्याह ये चान्य इति । योषित्पदमपि मूढत्वज्ञापनार्थम्, अतो न पुनरुक्तिः । धर्मो द्विविधः तत्त्वसहितः प्रमाणसहितश्चेति । तत्र प्रामाणिका व्यवहारे तत्त्वसहितं धर्मं न मन्यंते, तत्र प्रमाणे मूलमासन्यः, सूत्रात्मकत्वात् अतः सूत्रभूतवाय्ववतारो भीमः ॥ ५० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

यैः कोपितमिति । श्लोकं व्याकुर्वन्ति धर्मस्त्वित्यादि । तच्चेदिति ब्रह्मकुलं चेदित्यर्थः ॥ ४८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

किञ्च मृता वत्साः पुत्राः यस्याः सा, अत एवार्ता दुःखिताऽश्रुमुखी चाहं यथा मुहुर्मुहुः रोदिमि तथाऽस्याश्वत्थाम्नो जननी गौतमी गौतमकुलोत्पन्ना कृपी मा रोदीदित्यन्वयः । अस्या रोदने तव महाननर्थः स्यादिति सूचयन्त्याह–पतिदेवतेति ॥ ४७ ॥ ❀ ❀ किञ्चेदं कर्म असत्कुलस्याप्यनर्थकारीत्याह–यैरिति । अजितः कामक्रोधादिपरवश आत्मा मनो येषां तैर्यैः राजन्यैर्ब्रह्मकुलं कोपितं तत्–कर्तृ शुचा शोकेनार्पितं व्याप्तं सत्तेषां राजन्यानां कर्मभूतं–कुलमाशु शीघ्रमेव प्रदहतीत्यन्वयः । प्रसिद्धोऽग्निस्तु कदाचिदाश्रसम्बन्धिनं त्यजत्यपि, कोपितब्राह्मणकुलाग्निस्तु सानुबन्धं भृत्यामात्यादिसहितं राजन्यकुलं दहति ॥ ४८ ॥ ❀ ❀ हे द्विजा इति सम्बोधनेन धर्मज्ञत्वात् युष्माकमप्येवम्भूतं वचनं सम्मतमिति सूचयति । धर्म्यमित्यादयो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः । तत्र धर्म्यं धर्मादनपेतं, मुच्यतां मुच्यतामिति, न्याय्यं न्यायान्नीतेरनपेतं, सरहस्य इत्यादि, सकरुणं तस्यात्मनोऽर्द्धमिति, निर्व्यलीकं अनृताप्रियरहितं तद्धर्मज्ञेति, समं पक्षपातशून्यं मा रोदीदस्य जननीति दुःखसाम्योक्तेः, महत् हितं यैः कोपितमिति निष्ठुरोक्त्या हितोपदेशात् । एवम्भूतं राज्ञ्या द्रौपद्या वचो राजा युधिष्ठिरः प्रत्यनन्ददित्यन्वयः । तत्प्रतिनन्दनेपि किमित्यत आह–धर्मसुत इति । धर्मपुत्रत्वेन परमाप्तत्वात्प्रतिनन्दनेन वचसः प्रामाण्यं सिद्ध्यतीति भावः ॥ ४९ ॥ ❀ ❀ तथा नकुलादयो ये चान्ये पुरुषा याश्च योषितः स्त्रियस्ते च सर्वे प्रत्यनन्दन्निति विपरिणामेन पूर्वेणान्वयः । युयुधानः सात्यकिः । धनञ्जयः अर्जुनः ॥ ५० ॥

हिन्दी अनुवाद

जैसे अपने बच्चोंके मर जानेसे मैं दुःखी होकर रो रही हूँ और मेरी आँखोंसे बार-बार आँसू निकल रहे हैं, वैसे ही इनकी माता पतिव्रता गौतमी न रोयें ॥ ४७ ॥ ❀ ❀ जो उच्छृङ्खल राजा अपने कुकृत्योंसे ब्राह्मणकुलको कुपित कर देते हैं, वह कुपित ब्राह्मणकुल उन राजाओंको सपरिवार शोकाग्निमें डालकर शीघ्र ही भस्म कर देता है' ॥ ४८ ॥ ❀ ❀ सूतजीने कहा—शौनकादि ऋषियों ! द्रौपदीकी बात धर्म और न्यायके अनुकूल थी। उसमें कपट नहीं था, करुणा और समता थी। अतएव राजा युधिष्ठिरने रानीके इन हितभरे श्रेय वचनोंका अभिनन्दन किया ॥ ४९ ॥ ❀ ❀ साथ ही नकुल, सहदेव, सात्यकि, अर्जुन, स्वयं भगवान् श्रीकृष्ण और वहाँपर उपस्थित सभी नर-नारियोंने द्रौपदीकी बातका समर्थन किया ॥ ५० ॥

तत्राहामर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः। न भर्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् [1]वृथा ॥ ५१ ॥
निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः। आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥

श्रीकृष्ण[2] उवाच

ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः[3]। मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ ५३ ॥
कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियाम्। प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ॥ ५४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य तथाविधस्य द्रौणेः वध एव श्रेष्ठः। अन्यथास्य नरकपातप्रसंगात्। तदाह—न भर्तुरिति। अहन् जघान ॥ ५१ ॥ चतुर्भुजोक्तेरयं भावः—भीमे तं हन्तुं प्रवृत्ते द्रौपद्यां च सहसा तन्निवारणे प्रवृत्तायाम् उभयोः संवरणाय आविष्कृतचतुर्भुज इति। संदिहानस्य सख्युरर्जुनस्य ॥ ५२ ॥ ❀ ❀ वधार्हणः वधार्हः। मयैव शास्त्रकृता "ब्राह्मणो न हन्तव्यः" तथा—"आततायिनमायांतमपि वेदांतपारगम्। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्" इति च वदता। तदुभयमपि अनुशासनं परिपालय ॥ ५३ ॥ ❀ ❀ तव च प्रतिज्ञां पूरयेत्याह—कुर्विति। प्रियां सांत्वयता त्वया यत् प्रतिश्रुतं हननं तच्च सत्यं कुरु, प्रियं च कुरु। मह्यं मम। तत्र वधे भीमस्य प्रियं भवति, अवधे द्रौपद्याः, द्वये श्रीकृष्णस्य ॥ ५४ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तदाऽमर्षितो जातक्रोधः। तथाविधस्य बालहन्तुस्तत्तथाविधत्वम्। भर्तुर्दुर्योधनस्य आत्मनः स्वस्य च श्यन्ति तनूकुर्वन्ति शत्रुबलानीति शिशवस्तान्। "श्यतेः कुः सन्वच्च" इति सूत्रेण रूपसिद्धेः। महाबलानित्यर्थः। यद्वा शिशूनिति। पित्रपेक्षयाऽशीतिवर्षोपि शिशुरेवेति भावः। "शिशुर्वर्षत्रयो बाल" इति यथाश्रुतार्थांगीकारे महाभारतश्रुततत्पुरुषार्थविरोधः स्यात् ॥ ५१ ॥ ❀ ❀ हसन्निवेति। 'अद्य सखे ते बुद्धेः सौक्ष्म्यमहं परीक्षिष्ये' इत्येतद्व्यंजकं स्मितमात्रमाविष्कुर्वन्न तु हास्यमिति भावः ॥ ५२ ॥ ❀ ❀ जिघांसाऽस्यास्तीति जिघांसी जिघांसन्तमियाद्धन्याच्छेदित्यर्थः। आयांतमुद्यतम्। अत एवोद्यतस्य द्रोणस्य वधोऽनुमतो न तु बद्धस्यास्येत्यर्थः। ब्रह्मबन्धुत्वमप्याततायित्वादेवास्य विवक्षितं न वस्तुतः ॥ ५३–५४ ॥

श्रीमद्वीरराघवव्याख्या

तत्र भीमस्त्वमर्षित आह किमिति तस्य ब्रह्मबंधोर्द्रौणेर्वध एव श्रेयान् स्मृतः। कुतः ? यतोऽयं भर्तुर्धृतराष्ट्रस्यात्मनः स्वस्य चार्थे प्रयोजनाय न सुप्तान् शिशून् हतवान्, किंतु वृथैव हतवानिति ॥ ५१ ॥ ❀ ❀ भीमस्य द्रौपद्याश्च गदितं वाक्यं श्रुत्वा चतुर्भुजो भगवान् श्रीकृष्णः सख्युरर्जुनस्य वदनमालोक्य ईषद्धसन्निवेदं वक्ष्यमाणमाह ॥ ५२ ॥ ❀ ❀ तदेवाह ब्रह्मबंधुरिति द्वाभ्याम्। ब्रह्मबंधुरिति हेतुगर्भं ब्रह्मबंधुत्वादयं न हंतव्यः, आततायीत्यपि हेतुगर्भं, आततायित्वादयं वधार्हणः वधमर्हतीति वधार्हणः नंद्यादित्वात्कर्त्तरि ल्युः, मयैवमुभयमाम्नातं तथार्हत्वमनर्हत्वं चेत्युभयमपि सहेतुकमिति अनुशासनं मदनुशासनं 'न ब्राह्मणं हन्यात्' 'आततायिनमायांतं हन्यादेवाविचारयन्नि'त्यादिशास्त्रानुमतमिदमुभयं पाहि पालय नातिक्रमस्व। यथैतदुभयं पालितं

१–२. प्राचीने पाठे 'वृथा' शब्दादारभ्य 'श्रीकृष्ण उवाच' इत्यस्य 'श्री' शब्दपर्यन्तो भागः खण्डितः, तथा तत्र 'कृष्ण उवाच' स्थाने 'भगवानुवाच' इति पाठः। ३. प्रा० पा०—वधार्हकः।

स्यात्तथा कुर्वित्यर्थः ॥ ५३ ॥ ❀ ❀ तत्रान्यतरकरणेऽन्यदकृतं स्यात्तत्तवानुचितमित्यभिप्रायेणाह कुर्विति । प्रियां द्रौपदीं सांत्वयता त्वया यत्प्रतिश्रुतं प्रतिज्ञातं शिरश्छिद्यामिति तदपि सत्यं यथार्थं कुरु भीमादीनां प्रियं च कुरु ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र तस्यामवस्थायाममर्षितो भीम आहेत्यन्वयः । यो भर्तुर्दुर्योधनस्यात्मनः स्वस्य च नार्थे सुप्तान् शिशून् वृथाऽहन् हतवान् । वृथाशब्दो वध्यविषयः वध्यानामर्थे च न भवति तस्य वधस्तस्यैव श्रेयान्स्मृतः, नास्माकं पापमिति भावः ॥ ५१ ॥ ❀ ❀ चतुर्भुजः भीमगदितं श्रुत्वा द्रौपद्याश्च वचनमिति शेषः सख्युरर्जुनस्य वदनमवलोक्य मंदस्मितं कुर्वन्निदमाहेत्येकान्वयः ॥ ५२ ॥ हन न हनेत्युभयं मयैवाम्नातम् अभिहितं यस्मात्तस्मादनुशासनमात्मवचनं परिपाहीत्यन्वयः ॥ ५३–५४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

चतुर्भुज इति तैः । यद्वा मयैवोभयमाम्नातमिति स्वादेशमाननाय दर्शितैश्वर्य्य इति भावः ॥ ५२–५३ ॥ ❀ ❀ टीकायां तव च प्रतिज्ञामित्यत्र चशब्दाद् भीमादीनामिच्छाश्चेति ज्ञेयम् ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुर्भुज इति भीमे तं हंतुं प्रवृत्ते द्रौपद्याश्च तन्निवारणे प्रवृत्तायामुभयोर्वारणार्थं भुजचतुष्टयं प्रकटयामासेति भावः । हसन्निवेति सखे त्वद्बुद्धेरद्य सूक्ष्मत्वं परीक्षिष्ये इत्येतद्व्यञ्जकं स्मितमात्रमाविष्कुर्व्वन् नतु हास्यमित्यर्थः ॥ ५२ ॥ ❀ ❀ 'ब्राह्मणो न हन्तव्य' इति "आततायिनमायान्तमपि वेदान्तपारगम्। जिघांसन्तं जिघांसीयान्न दोषो मनुरब्रवीत्" इति उभयमेवाम्नातम् आम्नायकृता मयैवानुज्ञातं शासनं परिपालय । तेन ब्राह्मणत्वं वर्त्तते एव, इदानीं शस्त्रपाणित्वाभावात् आततायित्वं न वर्त्तते, इत्यश्वत्थामा न हन्तव्य इति मम मतम् । यत्तु ब्रह्मबन्धुमिमं जहीति पूर्व्वमुक्तं तत् तव धर्म्मपरीक्षार्थमेव । तत्रापि ब्रह्मबन्धुमिमं मा जहि त्रातुमर्हसि तथा विरथं भीतं रिपुं धर्म्मविन्न हन्तीति तथा तद्वधस्तस्य हि श्रेय इति न तु वधकर्त्तुरिति तथा तदसौ वध्यतां बन्धनविषयीभूतः क्रियतामिति तत्र तत्र वास्तवोऽर्थोऽपि मयार्पित इति ॥ ५३ ॥ ❀ ❀ त्वया यत् प्रतिश्रुतं प्रतिज्ञातम् आहरिष्ये शिरस्तस्येति तदस्य शिरश्छेदं वधं कुरु । तमेव भीमसेनस्य प्रियं कुरु । पाञ्चाल्याः प्रियमवधं च मह्यं मम च मदादीनां मत्प्रियत्वादुभयमपि प्रियं कुरु ॥ ५४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अहन् जघान ॥ ५१ ॥ ❀ ❀ द्रौपद्याः मुच्यतां मुच्यतामिति । भीमसेनस्य वधः श्रेयानिति गदितं निशम्य सख्युरर्जुनस्य वदनमालोक्याह ॥ ५२ ॥ ❀ ❀ 'ब्रह्मबंधुर्न हंतव्य' इति 'आततायी वधार्हण' इति च मयैवोभयमाम्नातं तदनुकूलं 'ब्राह्मणो नैव हंतव्य' इति "आततायिनमायांतं हन्यादेवाविचारयन्नि" ति । अनुशासनं शास्त्रं च परिपाहि पालय ॥ ५३–५४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

द्रौपद्युक्ततत्त्वसहितं धर्ममनंगीकृत्य स्वयं स्वतंत्रधर्मनिरूपणेन तद्वधार्थं प्रवृत्त इत्याह तत्रेति । अधर्मप्रतिपक्षत्वात् क्रोधः, दर्शनेनैव दैत्यभयं जनयतीति भीमः । तस्य रक्षणापेक्षया वध एव श्रेयान् यतोऽयं निशि वृथैव सुप्तान् शिशून् अहनत् , एवमन्यदप्यविचरितं करिष्यतीति वधः श्रेयानित्यर्थः । भगवांस्तूभयरूपं धर्ममुक्तवानिति ॥ ५१ ॥ ❀ ❀ द्रौपदीभीमयोः परस्परविरोध उभयसमाधानार्थं क्रियाशक्तिद्वयाविर्भावाय भुजचतुष्टयाविर्भावं कृतवानित्याह निशम्येति । चतुर्भुजो जात इति भिन्नं वाक्यम् । परस्परविरोधे हि न प्रकारांतरस्थितिर्नैकतापि विरुद्धानामुक्तिमात्रविरोध इति परस्परकार्यजननाय स्वयं तावेव स्तंभितवान् अर्जुनस्तु सख्यपर्यंतमागत इति । तन्न हापयितुं तन्मुखं विलोक्याभिप्रायमाह अर्जुनोऽपि संमोहित इव जातः ॥ ५२ ॥ ❀ ❀ इति हसन्निवोक्तम् , अन्यथा द्रौपदीवाक्यस्याभिनंदितत्वात् सन्मानं कृत्वैव तं विसृजेत् , भीमवाक्यं वा श्रुत्वा मारयेत् । तथापि नानर्थो भवेत् , अत उभयाकरणात् भगवान् मोहयन्निवाह एकं चेन्न करोषि तर्हि उभयात्मकं कुरु । ननु विरुद्धं कथमुभयं कर्तुं शक्यमिति चेत्तत्राह मयैवोभयमाम्नातमिति । भगवता ह्युभयात्मकं वस्तु दृष्ट्वा उभयमाम्नातम् , अन्यथा अनाप्तत्वप्रसंगात् । तच्च ज्ञात्वा मया समाम्नातं तत् ज्ञात्वा मत्सखित्वात् त्वयापि कर्तव्यम् । अन्यथा सखित्वं न स्यादित्यभिप्रायेणाह परिपाह्यनुशासनमिति परिपालय मदाज्ञाम् ॥ ५३ ॥ ❀ ❀ एतावता सर्वेषां संमतं भविष्यतीत्याह कुरु प्रतिश्रुतमिति । स्वप्रतिश्रुतं शिरसः समाहरणे तच्छिरोमणिहरणेन पालितं भविष्यति, भीमसेनस्य प्रियं वधेन तद्वपनादिना पालितं भवति, द्रौपद्याश्च प्रियं मोचनेन तदपि तेनैव पालितं भवति, मह्यं च प्रियमुभयात्मककरणेन ॥ ५४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तत्राहेत्यत्र । तत्त्वसहित इति । तत्त्वमनारोपितं रूपं तेन युक्तः । प्रामाणिका इति प्रमाणपर्यवसितमतयः । सूत्रात्मकत्वे क्रोधो न युक्त इत्यत आहुः अधर्मेत्यादि । भीमवचनस्यार्थमाहुः तस्येत्यादि ॥ ५१ ॥ ❀ ❀ निशम्येत्यत्र । उक्तवानिति । पूर्ववाक्यप्रतिनन्दनसूचितवाक्याभ्यां कथितवान् । भिन्नं वाक्यमिति । भगवत्कृतप्रतिनन्दनकथनोत्तरं चतुर्भुजपदप्रयोगादेवावगन्तव्यमिति शेषः । नैकतापि विरुद्धानामिति । विरुद्धानां वाक्यानां एकतापि एकवाक्यतापि नेत्यर्थः । परस्परेत्यादि । ताभ्यां वाक्याभ्यां सम्भूयैककार्यजननाय तावेव तदुभयवाक्यार्थावेव स्तंभितवान् स्थापितवानित्यर्थः । आहेति । भगवानाहेत्यर्थः ॥ ५२ ॥ ❀ ❀ मयैवोभयमित्यत्र । ज्ञात्वा मया समाम्नातमिति । द्रौपदीभीमहार्दं ज्ञात्वा समाम्नातम्, न तु शास्त्रत्वेनेत्यर्थः ॥ ५३–५८ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे सप्तमाध्यायविवरणम् ॥ ७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्रैवं द्रौपदीवचने सर्वैः प्रतिनन्दिते सति अमर्षितस्तत्प्रतिनन्दनमसहमानो भीम आहेत्यन्वयः । तद्वाक्यमेव दर्शयति–तस्याश्वत्थाम्नो वध एव श्रेयान् स्मृतः । तथा च स्मृतिः–'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यान्ति स्वर्गं सुकृतिनो यथा' इति । अन्यथाऽस्य नरकपातः स्यादिति सूचयंस्तदपराधमाह–नेति । योऽयं सुप्तान्छिशून् वृथैवाहन् जघान । वैयर्थ्यमेव स्फुटयति–न भर्तुर्दुर्योधनस्य, नच आत्मनः स्वस्यार्थे इति ॥ ५१ ॥ ❀ ❀ भीमस्य द्रौपद्याश्च गदितं वचनं निशम्य श्रुत्वा चतुर्भुजो भगवान् श्रीकृष्णः सख्युरर्जुनस्य वदनमालोक्य हसन्निवेदं वक्ष्यमाणमाहेत्यन्वयः । हे सखे ! त्वद्बुद्धेः सूक्ष्मत्वमद्य परीक्षिष्ये इत्येतद्व्यञ्जकं स्मितमात्रमाविष्कुर्वन्न तु हास्यमिति भावेनेवशब्दप्रयोगः ॥ ५२ ॥ ❀ ❀ भगवद्वाक्यमेव दर्शयति–ब्रह्मबन्धुरिति । 'ब्राह्मणो न हन्तव्यः' 'आततायिनमायान्तमपि वेदान्तपारगम् । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्' इति वदता शास्त्रकृता मयैवोभयमाम्नातं कथितं तदुभयमप्यनुशासनं परिपालय ॥ ५३ ॥ ❀ ❀ प्रियां द्रौपदीं सान्त्वयता त्वया यत् 'आहरिष्ये शिरस्तस्य' इति शिरश्छेदनं प्रतिज्ञातं तदपि सत्यं यथार्थं कुरु । तथा भीमसेनस्य द्रौपद्याः पाञ्चाल्या मह्यं मम च प्रियमेव कुर्वित्यन्वयः ॥ ५४ ॥

हिन्दी अनुवाद

उस समय क्रोधित होकर भीमसेनने कहा, 'जिसने सोते हुए बच्चोंको न अपने लिये और न अपने स्वामी के लिये, बल्कि व्यर्थ ही मार डाला, उसका तो वध ही उत्तम है' ॥ ५१ ॥ ❀ ❀ भगवान् श्रीकृष्णने द्रौपदी और भीमसेनकी बात सुनकर और अर्जुनकी ओर देखकर कुछ हँसते हुए-से कहा ॥ ५२ ॥ ❀ ❀ भगवान् श्रीकृष्ण बोले—'पतित ब्राह्मणका भी वध नहीं करना चाहिये और आततायीको मार ही डालना चाहिये'–शास्त्रोंमें मैंने ही ये दोनों बातें कही हैं । इसलिये मेरी दोनों आज्ञाओंका पालन करो ॥ ५३ ॥ ❀ ❀ तुमने द्रौपदीको सान्त्वना देते समय जो प्रतिज्ञा की थी, उसे भी सत्य करो; साथ ही भीमसेन, द्रौपदी और मुझे जो प्रिय हो, वह भी करो ॥ ५४ ॥

सूत उवाच

अर्जुनः सहसाऽऽज्ञाय[1] हरेर्हार्दमथासिना । मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥ ५५ ॥
विमुच्य रशनाबद्धं बालहत्याहतप्रभम् । तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥
वपनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ ५७ ॥
पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया । स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे द्रौणिनिग्रहो[2] नाम सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हार्दमभिप्रायमाज्ञाय ज्ञात्वा न ह्यशक्यमुभयं विदध्यादतोऽस्यायमभिप्राय इति ज्ञात्वेत्यर्थः । असिना खड्गेन । मूर्धन्यं मूर्धनि जातम् । सहमूर्धजं सकेशम् ॥ ५५ ॥ ❀ ❀ मणिना च हीनं निरयापयन्निःसारितवान् ॥ ५६ ॥ ❀ ❀ अनेन श्रीकृष्णोक्तं सर्वं सम्पादितमित्याह । वपनमिति ॥ ५७ ॥ ❀ ❀ निर्हरणं दाहार्थं नयनम् ॥ ५८ ॥

इति श्रीमद्भागवते प्रथमस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥

---

१. प्रा० पा०—सहसा ज्ञात्वा । २. प्राचीने 'द्रौणिनिग्रहो' स्थाने 'पारीक्षिते' इत्यस्ति ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उभयं वधावधं विदध्यादयं कुर्यात् । एतदशक्यं न हि । अतो हेतोरस्य भगवतोऽयमभिप्रायः । इत्यर्थ इति । "आहरिष्ये शिरस्तस्य" इति मया प्रतिज्ञातोऽस्य शिरश्छेद एव "कुरु प्रतिश्रुतं सत्यम्" इति वदता भगवताप्यभिप्रेतः । पुनश्च पांचाल्याः प्रियं कुर्विति वदता शिरसो न च्छेदश्च विहितोऽतो मयेत्थमुभयमेव कर्त्तव्यमिति निश्चित्येति भावः । तेन शिरस्थमपि वस्तु लक्षणया शिरःशब्देनोच्यते इति शिरश्छेद एव, अभिधया तु न शिरश्छेदः, इत्यश्वत्थाम्नो वधोऽवधश्च कृत इत्याशयः । यत्तु भारते सौप्तिकपर्वणि व्यासेनोक्तमश्वत्थाम्ने "मणिं चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति । एतदादाय ते प्राणान्प्रतिदास्यन्ति पांडवाः ॥" इत्याकर्ण्याश्वत्थाम्ना बहूनि वाक्यान्युक्त्वा "प्रदायाथ मणिं द्रौणिः पांडवानां महात्मनाम्" इत्यत्राप्ययमेवार्थो लभ्यते । न ह्यत्र स्वहस्तेन तेन मणिर्दत्त इत्युक्तं किं तु प्रदायेति । तथा च तेनोक्तं मम शिरसो मणिर्गृह्यतामित्युक्तेऽर्जुनेन सहजो मणिरसिनोद्धृतस्सकेश इति । यद्वाऽसिना सह मणिं सकेशं जहार स्वीकृतवान् । तेन शिरस उत्पाट्य सकेशो मणिरसिश्च दत्तः । अत एव द्रौपद्यै भीमेनोक्तं तत्रैव "वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि" इति । द्विजस्येत्युक्त्यायमेव ब्राह्मणवध इति ध्वनितम् ॥ ५५ ॥ ❀ ❀ तेजसा तेजोवता मणिना । यद्वा तेजसा शरीरकांत्या मणिना च ॥ ५६ ॥ ❀ ❀ अनेन मणिग्रहणादिना वपनं मुंडनं द्रविणस्य हिरण्यादेरादानं ग्रहणं स्थानान्निर्यापणं देशान्निष्कासनम् । दैहिकः शिरश्छेदशूलारोपणकर्णनासादिकर्त्तनरूपो वधो ब्राह्मणस्य नास्तीत्यर्थः । सहमूर्द्धजमित्युक्त्या वपनं, मण्यादानेन द्रविणादानं, शिबिरान्निर्यापणेन स्थानान्निर्यापणं चेति त्रयमेवात्र सम्पादितमिति । महाभारते हि भीमसेन एव तद्वधार्थं गतः । "मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने" इत्यश्वत्थामोक्तेः, "तमभ्यधावत्कौंतेयः प्रगृह्य सशरं धनुः । भीमसेनो महाबाहुः" इत्यतः पूर्वमुक्तेश्च । यद्यपीत्थं तथापि श्रीकृष्णाज्ञयाऽर्जुनोपि गतस्तेनैवास्त्रं प्रतिसंहृतमिति ज्ञेयम् । "अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते । द्रोणोपदिष्टं तस्यायं कालः संप्रति पांडव ॥" इति श्रीकृष्णोक्तिमाकर्ण्यास्त्रवारणार्थमस्त्रमर्जुन एव युयुज इति सर्वं सौप्तिकपर्वणि विस्तृतमस्तीत्युपरम्यते ॥ ५७ ॥ ❀ ❀ कृष्णया द्रौपद्या । आदिना जलपिंडदानादिग्रहः ॥ ५८ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे सप्तमोऽध्यायः ॥ ७ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वपनमिति सर्व्वमुण्डनमित्यर्थः । द्रविणस्य धनस्य आदानं ग्रहणं द्रविणादानमिति ॥ ५५–५८ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-

दीपन्याख्यदीपिकाटिप्पण्यां सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवव्याख्या

तत एव मुक्तोऽर्जुनो भावज्ञो हरेर्हार्दं हृद्गतमभिप्रायमाज्ञायासिना खड्गेन साधनेन द्विजस्य द्रौणेर्मूर्द्धन्यं मूर्ध्नि धारितं मणिं मूर्द्धजैः केशैः सहितं यथा तथा जहार हृतवान् ॥ ५५ ॥ ❀ ❀ ततो रशनां विमुच्य पूर्वमेव बालानां हत्यया हता प्रभा यस्य तं तेजसा तेजःपदेन मणिना च हीनं रहितं सुतरां हतप्रभं शिबिरान्निरयापयद्बहिर्निःसारयामास ॥ ५६ ॥ ❀ ❀ नन्वेवमपि स्वप्रतिश्रुतं भीमगदितं च न कृतमेवेत्याशंकमानं शौनकं प्रत्याह सूतः वपनमिति । वपनं मुंडनं द्रविणादानं धनापहरणं स्थानान्निर्यापणं चेत्येष एव हि ब्रह्मबंधूनां वधः, अन्यो दैहिकः शिरःपाण्यादिच्छेदरूपो नास्ति हि, तत्रैतत्त्रयमपि कृतमेव तेनैव वधोपि कृतप्राय एवेति भावः ॥ ५७ ॥ ❀ ❀ ततः सर्वे पांडवा युधिष्ठिरादयः कृष्णया द्रौपद्या सह शोकपीडिताः संतो मृतानां स्वानां पुत्रबंधूनां यत्कर्त्तव्यं निर्हरणादिकं तच्चक्रुः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिकायां सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अर्जुनः सहसा झटिति हरेः हृदि स्थितम् आज्ञाय सम्यक् ज्ञात्वा क्षुरधारेण असिना द्विजस्य सहमूर्धजं केशैः सहितं मूर्ध्ना सहोत्पन्नं मणिं जहारेत्यन्वयः ॥ ५५ ॥ ❀ ❀ तेजसा सामर्थ्येन शरीरकांत्या वा रत्नेन च रहितं शिशूनां वधेन हतप्रभम् अलक्ष्मीनिधानं रज्ज्वा बद्धं विमुच्य शिबिरान्निरयापयत् शवनिर्गमनवन्निष्कासयामासेत्येकान्वयः ॥ ५६ ॥ ❀ ❀ ब्रह्मबंधूनां प्राणत्यागलक्षणमरणप्रतिनिधिरयं वध इत्याह बंधनमिति ब्रह्मबंधूनामेष एव वधः वधप्रतिनिधिः, अन्यो दैहिको नेत्रोत्पाटनादिको नास्तीत्यन्वयः । शास्त्रविहितो नास्तीति भावः । कोऽसाविति तदाह बंधनमिति । पाशेन करौ पृष्ठे कृत्वा बंधनं द्रविणा-

दानं हिरण्याहरणं स्थानान्निर्यापणं स्वदेशान्निर्यापणं तथाशब्दः प्रत्येकमभिसंबंधयितव्यः। सांत्वयन्नित्यारभ्य नान्योस्ति- दैहिक इत्यंतं यदुक्तं तदिदं द्रौणिना स्वप्ने दृष्टं संकथितम्। अन्यथा ग्रंथांतरविरोधः, तत्र भीमेन कृतमित्युक्तत्वादिति ज्ञातव्यम् ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः।

अर्ज्जुनः सहसाऽऽज्ञायेत्यस्यायं भावः–श्रीकृष्णेनानेन ब्राह्मणो न हन्तव्य इत्येषा श्रुतिर्ब्रह्मबन्धुर्न हन्तव्य इत्यनेन स्पष्टीकृता। तत्र बन्धुरपीति हि तस्यास्तात्पर्य्यम्, ब्रह्मबन्धुत्वं चास्याततायित्वेनैव विवक्षितम्। वधार्हणत्वं त्वाततायिमात्रेण विहितम्। यत्रायान्तं जिघांसन्तमिति विशेषणं तत्परीक्षार्थं गोपितम्। तत्र हि तत्र तत्रोद्यतस्यैव हननमायाति विशेषणवैय- र्थ्यात्। अत एव प्रतिज्ञातत्वेन तुल्यत्वेऽपि द्रोणस्योद्यतस्य वधोऽनुमतो बद्धस्य तु नास्य। आततायित्वं न्याये युद्धेऽपि मतम्, 'आततायिनो मे' इति श्रीभीष्मवचनात्। यत्तु परिपाह्यनुशासनमित्युक्तं तच्च ब्रह्मबन्धुमिमं जहीति पूर्वोक्तानुसारेणैव। तदेव- मस्यानुशासनत्रयस्य द्रौपदीभीमयोर्मिथो विरुद्धवाक्यद्वयस्य स्वप्रतिज्ञायाश्च युगपत् समाधायकं मणिहरणादिकमेव करि- ष्यामीति ॥ ५५–५८ ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हार्दमभिप्रायम् आज्ञाय ज्ञात्वेति आहरिष्ये शिरस्तस्येति मया प्रतिज्ञातोऽस्य शिरश्छेद एव। कुरु प्रतिश्रुतं सत्यमिति वदता भगवताप्यभिप्रेतः, पुनश्च पाञ्चाल्याः प्रियं कुर्विति वदता शिरसो न छेदश्च विहितः। न ह्यशक्यमुभयं विदध्यात्। अत एव मया कर्त्तव्यमिति निश्चित्येत्यर्थः। मूर्द्धन्यं मूर्ध्नि भवम्, मूर्द्धजाः केशास्तैः सहितं चिच्छेद। तेन शिरस्थमपि वस्तु लक्षणया शिरःशब्देनोच्यते इति शिरश्छेद एव अभिधेयस्तेन शिरश्छेद इत्यश्वत्थाम्नो वधोऽवधश्च कृत इत्यर्थः ॥ ५५–५६ ॥ ❀ ❀ शास्त्रोक्तं धर्म्ममेव कृतवानित्याह वपनं शिरोमुण्डनम् ॥ ५७ ॥ ❀ ❀ निर्हरणं दाहार्थं नयनम् ॥ ५८ ॥

इतिसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। प्रथमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मूर्द्धन्यं मूर्द्धनि जातम्। जहार हृतवान् ॥ ५५ ॥ ❀ ❀ शिविरान्निरयापयत् निःसारयामास ॥ ५६–५७ ॥ ❀ ❀ निर्हरणादिकं मृतानां यत्कृत्यं दाहार्थं निःसारणादिकं तच्चक्रुः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

भगवत्कृपया अर्जुनः सर्वरूपमेकं ज्ञात्वा तथा कृतवानित्याह द्वाभ्याम् अर्जुन इति। कृत्वा हेतुत्वात् सहसेति अथ तदनंतरमेव विमोचनात् पूर्वमसिना खड्गेन शिरसश्चूडामणिं शिखासहितं द्विजस्य हृतवान्। इदं ह्युभयात्मकं तदग्रे वक्ष्यते त्रिसंगत्वादुभयात्मकस्य ॥ ५५ ॥ ❀ ❀ तृतीयमाह विमुच्येति। पूर्वं रशनाबद्धं तस्य तूष्णींभावे हेतुः बालहत्याहतप्रभमिति तेजसा मणिना हीनमिति तृतीयसमीपे द्वयोरनुवादः। शिबिरात् स्वकटकात् निरयापयदिति सतां स्थानान्निर्यापणं न सर्वत्रैव सत्- सुतस्य प्रवेशो न भविष्यतीति ज्ञापितम् ॥ ५६ ॥ ❀ ❀ कृतस्य सर्वरूपस्य तथात्वं विवृणोति वपनमिति। हीति पूर्वोक्त- प्रमाणादयोऽनुसंधेयाः, ब्रह्मबंधूनां दैत्यांशब्राह्मणानां दैहिको देहच्छेदनात्मकः ॥ ५७ ॥ ❀ ❀ प्रासंगिके गते प्रस्तुतमुप- संहरति पुत्रेति ॥ ५८ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे सप्तमोऽध्यायः ॥ ७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्र वधे भीमसेनस्य प्रियं भवति, अवधे द्रौपद्याः, द्वये च श्रीकृष्णस्य, एतच्चाशक्यं, न ह्यशक्यमुभयं विदध्यादतोऽ- यमेवाभिप्राय इति हरेर्हार्दं अभिप्रायं अर्जुन आज्ञाय ज्ञात्वा अथ अनन्तरमेव असिना खड्गेन मूर्द्धन्यं मूर्द्धनि भवं सहमूर्द्धजं केशैः सहितं द्विजस्य तस्य मणिं जहार छित्वा हृतवानित्यन्वयः ॥ ५५ ॥ ❀ ❀ ततो रशनया बद्धं तं विमुच्य शिबिरात् स्वकटकस्थानान्निरयापयत् बहिर्निस्सारयामासेत्यन्वयः। तथापि ब्राह्मणत्वात्तदपमानेन अनिष्टं स्यादित्याशङ्कानिरासाय तं विशिनष्टि–बालेति, बालानां हत्यया हता प्रभा बहिश्शोभा यस्य तम्। तेजसा अध्ययनाध्यापनमन्त्रजपादिजनितेन मणिना च

हीनम् ॥ ५६ ॥ ❀ ❀ नन्वेवमपि स्वप्रतिज्ञातं भीमगदितं च तद्धननं कृतमेवेत्याशङ्कयाह–वपनमिति । वपनं मुण्डनम्, द्रविणादानं धनापहरणम्, तथा निवासस्थानान्निर्यापणं निस्सारणं चेत्येष एव ब्रह्मबन्धूनां ब्राह्मणाधमानां वधः । इतोऽन्यो दैहिकः शिरश्छेदादिरूपो वधो नास्ति, शास्त्रे 'ब्राह्मणो न हन्तव्यः' इति निषेधात् । न च 'आततायिनं' इत्यादिना दैहिकवधस्यापि विधानमस्त्येवेति शङ्क्यं, तस्यार्थशास्त्रत्वेन 'ब्राह्मणो न हन्तव्यः' इति धर्मशास्त्रतो दुर्बलत्वादित्याशयः । तथा च वपनादित्रयेणैव वधोऽपि जातप्राय एवेति भावः ॥ ५७ ॥ ❀ ❀ कृष्णया द्रौपद्या सह पुत्रशोकेनातुराः पीडिताः सर्वे पाण्डवाः मृतानां स्वानां बन्धूनां यन्निर्हरणादिकं दाहार्थनयनादिकं कृत्यं कर्त्तव्यं तच्चक्रुरित्यन्वयः ॥ ५८ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोक्तमाधिकारवर्णने ॥ सप्तमो विवृतोऽध्यायो द्रौणिदण्डनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

सूतजी कहते हैं–अर्जुन भगवान्‌के हृदयकी बात तुरंत ताड़ गये और उन्होंने अपनी तलवारसे अश्वत्थामाके सिरकी मणि उसके बालोंके साथ उतार ली ॥ ५५ ॥ ❀ ❀ बालकों की हत्या करनेसे वह श्रीहीन तो पहले ही हो गया था, अब मणि और ब्रह्मतेजसे भी रहित हो गया । इसके बाद उन्होंने रस्सीका बन्धन खोलकर उसे शिविरसे निकाल दिया ॥ ५६ ॥ ❀ ❀ मूँड़ देना, धन छीन लेना और स्थानसे बाहर निकाल देना–यही ब्राह्मणाधमोंका वध है । उनके लिये इससे भिन्न शारीरिक वधका विधान नहीं है ॥ ५७ ॥ ❀ ❀ पुत्रोंकी मृत्युसे द्रौपदी और पाण्डव सभी शोकातुर हो रहे थे । अब उन्होंने अपने मरे हुए भाई बन्धुओंकी दाहादि अन्त्येष्टि क्रिया की ॥ ५८ ॥

सातवाँ अध्याय समाप्त

अथाष्टमोऽध्यायः

सूत उवाच

अथ ते[1] सम्परेतानां स्वानामुदकमिच्छताम्। दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः ॥ १ ॥
ते निनीयोदकं सर्वे विलप्य च भृशं पुनः। आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥ २ ॥
तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम्। गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥ ३ ॥
सान्त्वयामास मुनिभिर्हतबन्धून् शुचार्पितान्[2]। भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

अष्टमे कुपितद्रौणेरस्त्राद्रक्षा परीक्षितः। श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥

ते पांडवाः संपरेतानां मृतानां गंगायामुदकं दातुं सकृष्णा श्रीकृष्णेन सहिताः स्त्रियः स्त्रीः पुरस्कृत्याग्रतः कृत्वा। तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात् ॥ १ ॥ ❀ ❀ निनीय दत्त्वा। हरिपादाब्जरजोभिः पूता या सरिद्गङ्गा तस्या जले। पुनर्ग्रहणादादावपि स्नाता इति गम्यते ॥ २ ॥ ❀ ❀ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितम्। पुत्रशोकार्तामिति तिसृणां विशेषणम् ॥ ३ ॥ ❀ ❀ मुनिभिः सहितः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीकृष्णेन परीक्षितो रक्षेत्यन्वयः (१) अथ निर्हरणाद्यनन्तरम् ॥१-२॥ ❀ ❀ तत्र गंगातटे। पुत्रशोकार्त्तामिति तिसृणां विशेषणम्। गांधार्या दुर्योधनादयः, पृथायाः कर्णः, कृष्णाया द्रौपद्याः प्रतिविंध्यादयः। कृष्णापदेन सुभद्रापि गृह्यते, तस्या अभिमन्युरितिनामानः पुत्रास्तेषां तस्य तस्य च शोकेनार्ताम् ॥ ३ ॥ ❀ ❀ मुनिभिर्द्वारभूतैः। यद्वा तैः सह सांत्वयामास तत्तच्छास्त्रादिवाक्यैर्बोधयामास। हता बन्धवो येषां तान्युधिष्ठिरादीन्। अप्रतिक्रियां दुर्निवार्याम्। "नांतकस्य क्रिया कापि नापराधो न च त्रपा। न गौरवं भयं प्रीतिर्भूतसंघातमश्नुते ॥" इत्यादिवाक्यात्। "समुद्रा यद्रथाघातजाताः सोपि प्रियव्रतः। अदर्शनं गतो भागीरथ्या नेता भगीरथः ॥ येन ग्रामादिरचना कृता सोपि पृथुर्नृपः। कालेनादर्शनं यातः का कथान्यनृणामिह ॥" इत्यादिबहुविधवाक्यैः सांत्वनं चकारेत्यर्थः ॥ ४ ॥

अस्मिन्पर्याये दीपनी न

श्रीमद्वीरराघवव्याख्या

अथ ते पांडवाः संपरेतानां स्वानामुदकं तिलोदकम् एतच्छ्राद्धादीनामप्युपलक्षणम् इच्छतां प्रेतरूपेण कामयमानानां दातुमुदकं दातुं स्त्रियः द्रौपद्यादिस्त्रीः पुरस्कृत्य कृष्णेन सहिता गंगां ययुः ॥ १ ॥ ❀ ❀ तत्र ते सर्वे पांडवादयो भृशं पुनः विलप्य संपरेतानामुदकं निनीय प्रदाय हरेः कृष्णस्य पादाब्जयो रजसा पूते सरितः गंगाया जले आप्लुताः स्नात्वा विशुद्धा बभूवुरित्यर्थः ॥ २ ॥ ❀ ❀ तत्र गंगातीरे आसीनमुपविष्टं सहानुजं कुरूणां पतिं धृतराष्ट्रं पुत्रशोकार्त्तामिति गांधारीकृष्णयोर्विशेषणं, तत्र गांधारी धृतराष्ट्रभार्या पृथा कुंती कृष्णा द्रौपदी माधवः कृष्णः सांत्वयामासेत्युत्तरेणान्वयः। सहानुजमित्यत्रानुजशब्दः पांडुसुतधर्मराजादीनामुपलक्षकः, तेषामप्यत्र शोकार्त्तत्वेन सांत्वनीयत्वान्न तु विदुरपरः, तस्य पूर्वमेव धृतराष्ट्रेण निर्यापितत्वाद्यादवक्षयानंतरमागामिनस्तदावस्थानासंभवात्। एतच्चास्मिन् तृतीये स्कन्धे स्फुटीभविष्यति ॥ ३ ॥ ❀ ❀ हता बंधवो येषां तानत एव शुचा शोकेनार्पितानर्दितान् धृतराष्ट्रादीन् बंधून् भूतेषु लोकेषु न विद्यते प्रतिक्रिया प्रत्युपायो यस्यास्तां कालस्य गतिं जन्ममरणाद्युत्पादनरूपां दर्शयन् मुनिभिः सह सांत्वयामास। माधव इति कर्तृपदमनुषंगेण योजनीयम्, एवमुत्तरत्रापि ज्ञेयम् ॥ ४ ॥

---

१. प्रा० पा०—तेषां परेतानां। २. प्रा० पा०—शुचार्दितान्।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

'स्त्रियः पुरस्कृत्य संपरेता युद्धे मृताः सकृष्णा द्रौपद्या सहिताः कृष्णेन यादवेंद्रेण सहिता वा ॥ १ ॥ ❀ ❀ ते पांडवास्तिलोदकं निनीय दत्त्वा भृशं विलप्य परिवेदनलक्षणं रोदनं कृत्वा पश्चाद्धरेः पादपद्मपरागेण पूते शुद्धे सरितो गंगायाः जले आप्लुताः स्नाता अभूवन्नित्यन्वयः ॥ २ ॥ ❀ ❀ अनुजेन संजयेन सह वर्तमानम् ॥ ३ ॥ ❀ ❀ मुनिभिः सह हताः पुत्रा येषां ते तथा तान् भूतेषु प्राणिषु कालरूपस्य हरेः गतिं विक्रममप्रतिक्रियामपरिहार्यां दर्शयन् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मुनिभिर्द्वारभूतैः ॥ ४-६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुनर्ब्रह्मास्त्रतोऽरक्षत् तान् गर्भे च परीक्षितम्। कृष्णः स्तुतश्च पृथया राज्ञः शोकस्तथाष्टमे ॥

स्त्रियः पुरस्कृत्येति तस्मिन् कार्य्ये स्त्रीपुरःसरत्वविधानात् ॥१॥ ❀ ❀ निनीय दत्त्वा ॥२॥ ❀ ❀ कुरुपतिं युधिष्ठिरम्। सहानुजं भीमादिसहितम् ॥ ३ ॥ ❀ ❀ मुनिभिः सहितः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

अथेति। गंगायाम् उदकं दातुं सकृष्णाः श्रीकृष्णसहिताः ययुः ॥ १ ॥ ❀ ❀ निनीय दत्त्वा ॥ २ ॥ ❀ ❀ कुरुपतिं युधिष्ठिरम् ॥ ३-४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं हि सर्वभक्तानां भगवद्वाक्यनिष्ठता। सर्वहेतुकथायै च सप्तमे विनिरूपिता ॥ १ ॥
अष्टमे यस्य वाक्यस्य करणाद्बुद्धि जायते। दोषश्चेत्तत्समाधानं गुणत्वे दाहपोषणम् ॥ २ ॥

पूर्वाध्यायांते अश्वत्थाम्नोऽपमाननं निरूपितम्। अनिवर्त्यब्रह्मास्त्रप्रक्षेपहेतुत्वेन। अष्टमे तु पदार्थचतुष्टयं निरूप्यते भगवतोऽद्भुतकर्मनि- रूपणाय ब्रह्मास्त्रदाहः तस्य रक्षा ततोद्भुतकर्मनिर्णयस्तोत्रं ततोऽद्भुतकर्म। तत्र प्रथमं ब्रह्मास्त्रप्रसंग- माह अथेति। शुद्ध्यनंतरं हि संस्कारः कर्त्तव्यः। सा च शुद्धिर्बाह्याभ्यंतरभेदेन द्विधेति प्रथमं बाह्यशौचमाह द्वयेन। मृतानां प्रेतत्वविमोके हि जीवतां शौचं ततस्तेषां प्रथमं तद्विमोकहेतुक्रियामाह दाहं कुरुक्षेत्र एव कृत्वा हस्तिनापुरे जलदानार्थं सर्वे गताः। ब्रह्मदंडहता अपि यज्जलस्पर्शमात्रेण विमुच्यंते तत्र धर्मयुद्धे हताः मुच्यंत इति किं वक्तव्यं "प्रत्तं जलं त्र्यंजलमात्मजेन प्रेतस्य तापं प्रशमं करोती" ति तापापनोदार्थं जलमपेक्ष्यते। तथा च मूलभूततापत्रयनिराकरणार्थमपि एकहेलया जलं देयमिति निश्चित्य गंगायां गता इति। निरूप्यते अथेत्यवैरभावेन संपरेतानामिति सामान्यतः सर्वेषां तत्रापि स्वानां बहुपुरुषसंबद्धानामपि तत्रापि उदकदायिनां सप्तपुरुषसंबद्धानां तेषां मुक्तिदानार्थं भगवता सहेति सकृष्णा इत्युक्तं, स्त्रियः पुरस्कृत्येति लोकाचारः ॥ १ ॥ ❀ ❀ उदकं निनीय प्रेतेभ्यो जलं दत्वा "रोदनप्रियाः पितर" इति विलप्यते, येष्वपि येषां न खेदः तेपि विहितत्वात् सर्वेपि विलापनं कृतवंतः। भृशमिति पुनर्विलापाभावाय चकरादन्यदपि कर्त्तव्यं कृत्वा पूर्वं जलदानार्थं कृतस्नाना अपि पुनः सर्वशुद्ध्यर्थं भक्त्यर्थं ज्ञानाधिकारार्थं गंगायां स्नातवंत इत्याह आप्लुता इति। यद्यपि पूर्वमेव तच्चरणपंकजावनेजनारुणकिं- जल्कोपरंजितेति वचनात् धातुः कमंडलुजलमिति वचनाच्च सर्वमेव गंगाजलं तादृशं भवति, तथापि नदीत्वेन जलांतरस्पर्शसंभाव- नया पूर्वस्नातजलं तादृशं भवति न वेति संदिह्य उपरिभागे भगवंतं स्थापयित्वा तच्चरणोदकेन स्नातवंत इत्यर्थः। अनेन ते तदीया इति सर्वथा ज्ञापितम् ॥ २ ॥ ❀ ❀ एवं सर्वकर्त्तव्ये कृते तादृशेषु भगवता यत्कर्त्तव्यं तदाह तत्रासीनमिति द्वाभ्याम्।

---

१. सूतउवाच ॥ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ॥ १ ॥
अथो निशामयामास कृष्णायै भगवान्पुरा ॥ पतितायाः पादमूले रुदंत्या यत् प्रतिश्रुतम् ॥ २ ॥
पश्य राज्ञ्यरिदारांस्ते रुदतो मुक्तमूर्द्धजान् ॥ आलिंग्य स्वपतीन्भीमगदाभग्नोरुवक्षसः ॥ ३ ॥

इति विजयध्वजीयेऽधिकपाठः।

भक्तिविधानार्थं भक्तवात्सल्याद्यचिंत्यमाहात्म्यं मुरारेर्निरूप्यतेऽस्मिन्नध्याये। तदर्थं मृतानां यत्कर्तव्यं लौकिकं तत् उच्यते पुत्रशोकेति। सर्वे पांडवाः मृतानां प्राणवियोगं प्राप्तानां स्वानां बंधूनां यत्कृत्यं निर्हरणादिकं तच्चक्रुरित्यन्वयः ॥ १ ॥ भीमहतान् दर्शय इति पुरा यत्प्रतिश्रुतं तदस्यै द्रौपद्यै निशामयामास दर्शयाञ्चकारेत्यन्वयः ॥ २ ॥ हे राज्ञि ते तव अरिदारान् शत्रुभार्याः मुक्तमूर्धजान् मुक्तकेशीः भीमस्य गदया भग्ना ऊरवः उत्संगाश्च वक्षांसि च येषां ते तथोक्ताः, ऊरूणि विस्तीर्णानि वक्षांसीति वा ॥ ३ ॥

आसीनमित्यन्वयप्रत्वाय कुरुपतिं युधिष्ठिरं सहानुजं विदुरसहितं भीमादिसहितं वा तीर्थाटनकथा कल्पांतरीया। स्त्रियः सर्वा एव पुत्रशोकार्ताः, अतः पुत्रशोकार्तमिति विशेषः। सर्वत्र कृष्णा द्रौपदी, चकारात् सुभद्रादयः। स्त्रीणां सान्त्वनहेतुः माधव इति माया धवः, सर्वासामेव लक्ष्म्यंशत्वात्॥ ३॥ ❀ ❀ सांत्वनं वस्तुयाथात्म्यज्ञापनेन मुनिभिरिति संवादार्थं हता बांधवा येषां शोकापनोदनं तत्त्वज्ञानाद्भवति। नन्वीश्वरेण सांत्वनमनुचितं सर्वकर्तृत्वादित्याशंक्य स्थापितकालरूपाधिकारिणस्तद्गृहे जातेषु दंडादिकमीश्वरस्याप्यप्रतीकार्यं, नहि स्त्रीपुत्रादिताडने राजदंडो भवति कालस्यापि भक्तत्वात्, कदाचिदपि भक्तानप्युपेक्षते इमां सिद्धांततामाह भूतेष्विति। काले जातेषु कलयतीति कालः गतिं प्रवृत्तिं न विद्यते प्रतिक्रिया यस्याः॥ ४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथाष्टमाध्यायं विवरिषवः सङ्गतिं वक्तुं द्वयोरर्थमाहुः एवमित्यादिद्वाभ्याम्। एवमुक्तप्रकारेण या निरूपिता, सा सर्वहेतुकथायै सर्वेषां मनोरथपूरणे यो हेतुः भक्तिरूपस्तत्कथनार्थं निरूपिता, चकारेण सूतोक्तावपि हेतुनिरूपणेन तत्रापि श्रीभागवतप्रतिष्ठाहेतुभूतं यत्परीक्षितो भगवदीयत्वं तत्रापि हेतुस्तत्पूर्वजानां वैष्णवत्वं तत्कथनार्थं निरूपिता। अष्टमे वाक्यकरणफलं सूतोक्तौ वैष्णवत्वदार्ढ्याय निरूप्यत इति शेषः। अत्रेदं बोध्यम्-चतुर्थाध्याये शौनकादिभिः श्रीभागवतविषयकः तत्कर्तृविषयको वक्तृविषयकः श्रोतृविषयकश्चेति चत्वारः प्रश्नाः कृताः। तन्मध्ये प्रथमस्योत्तरमग्रिमस्कन्धैर्वक्तव्यम्। द्वितीयस्योत्तरं 'द्वापरे समनुप्राप्त' इत्यारभ्य 'शुकमध्यापयामास निवृत्तिनिरतं मुनि'रित्यन्तैः साधिकैस्त्रिभिरध्यायैरुक्तम्। तदवान्तरप्रश्नोत्तरं चोक्तम्। ततस्तृतीयस्य तु कथनाध्ययनभेदेन वारद्वयं प्रश्नेपि सप्तमाध्याये अध्ययनविषयकस्योत्तर एव 'नित्यं विष्णुजनप्रिय' इत्यनेन कथनविषयकस्याप्युत्तरं सूचितम्। अतः परं चतुर्थोऽवशिष्यते, स तु जन्मकर्मप्रायोपवेशहेतुप्राणत्यागत्रिषयत्वेन चतुर्धा। तत्र जन्मनो महाश्चर्यत्वस्य तैर्ज्ञातत्वात् तत्र हेतुर्वक्तव्यः। अन्यथा विशेषणस्यापार्थत्वप्रसक्तेः। एवञ्च तद्धेतुर्महाश्चर्यत्वहेतुर्भगवदीयत्वम्, तत्रापि हेतुः पूर्वजानां वैष्णवत्वम्, तत्रापि प्राथमिकस्तद्धेतुः सर्वेषां भगवद्वाक्यनिष्ठत्वरूप एव सप्तमे सिद्ध इति सोत्रानूदितः। तेनात्र सूतोक्तौ हेतुहेतुमद्भाव एवंप्रकारक इति बोधितम्। पूर्वं तु व्यासोक्तसङ्गतिप्रदर्शनाय भक्तमनोरथपूरकत्वमर्थ उक्त इति न पूर्वोत्तरविरोधः। अत एवात्र 'कथायै चे'ति चकारो भक्तमनोरथपूरकत्वेपि भगवद्वाक्यनिष्ठत्वस्य हेतुतासूचनायोक्त इति। एवमष्टमाध्यायार्थेपि द्रष्टव्यम्। आहेति। यत्तदोर्नित्यसम्बन्धात्तदाहेत्यर्थः। अत्रैकं षोडशश्लोकैः सेत्स्यति, तदनन्तरं तु द्वितीयं पृथास्तोत्रान्तैः सेत्स्यति, शेषानुतापकथा त्वेतदुपोद्घातत्वेनेति सूतोक्तौ प्रासङ्गिकी भगवत्कथा। व्यासोक्तौ तु सर्वदुःखनिवृत्तिपूर्वकभक्तिप्रदत्वमिति बोद्धव्यम्। एवमग्रिमाध्यायेपि॥

श्रीगिरिधरकृता बालप्रबोधिनी

रक्षा परीक्षितः श्रोतुः कृष्णेनाद्भुतकर्मणा। स्तुतिः कुन्त्याष्टमे राज्ञः शोकश्च विनिरूप्यते॥

पूर्वाध्यायान्ते 'स्वानां मृतानां यत्कृत्यं चक्रुः' इति संक्षेपत उक्तमेव स्पष्टयति-अथेति। अत्र द्रौणिदण्डानन्तरं सम्परेतानां मृतानाम् अत एवोदकं तिलोदकं श्राद्धादिकमिच्छतां प्रेतरूपेण कामयमानानां तद्गङ्गायां दातुं सकृष्णाः कृष्णेन सहितास्ते पाण्डवाः स्त्रियः स्त्रीः पुरस्कृत्य अग्रतः कृत्वा गङ्गायां गङ्गां ययुरित्यन्वयः॥ १॥ ❀ ❀ ते सर्वे पाण्डवादयो हरेः कृष्णस्य पादाब्जयोः रजसा पूते सरितः गङ्गायाः जले आप्लुताः स्नाताः सन्त उदकं निनीय दत्त्वा भृशमत्यन्तं विलप्य-चकारादन्यदपि कर्तव्यं कृत्वा-पुनरपि गङ्गायामाप्लुता इत्यन्वयः॥ २॥ ❀ ❀ तत्र गङ्गातीरे आसीनान् युधिष्ठिरादीन् मुनिभिः सह माधवः मधुवंशजः श्रीकृष्णः सान्त्वयामासेति द्वयोरन्वयः। सहानुजमनुजैर्भीमादिभिः सहितं कुरुपतिं युधिष्ठिरम्। धृतराष्ट्रं तद्भार्यां गान्धारीं च। पुत्रशोकेनार्त्तामिति गान्धारीकृष्णयोर्विशेषणं, द्वयोरपि पुत्राणां मरणात्। पृथां कुन्तीम्। कृष्णां द्रौपदीम्॥ ३॥ ❀ ❀ सान्त्वने हेतुमाह-शुचा शोकेनार्पितान् व्याप्तान्। तत्रापि हेतुमाह-हताः बन्धवः पुत्रादयो येषां तानिति। कथं सान्त्वयामासेत्यपेक्षायामाह-भूतेषु भूतकार्येषु देहादिषु अप्रतिक्रियां निवर्त्तकोपायरहितां कालस्य गतिमुत्पत्तिविनाशनिमित्तभूतानां प्रवृत्तिं दर्शयन्निति॥ ४॥

हिन्दी अनुवाद

गर्भमें परीक्षित्‌की रक्षा, कुन्तीके द्वारा भगवान्‌की स्तुति और युधिष्ठिरका शोक

सूतजी कहते हैं—इसके बाद पाण्डव श्रीकृष्णके साथ जलाञ्जलिके इच्छुक मरे हुए स्वजनोंका तर्पण करनेके लिये स्त्रियोंको आगे करके गङ्गातटपर गये॥ १॥ ❀ ❀ वहाँ उन सबने मृत बन्धुओंको जलदान दिया और उनके गुणोंका स्मरण करके बहुत विलाप किया। तदनन्तर भगवान्‌के चरण-कमलोंकी धूलिसे पवित्र गङ्गाजलमें पुनः स्नान किया॥ २॥ ❀ ❀ वहाँ अपने भाइयोंके साथ कुरुपति महाराज युधिष्ठिर, धृतराष्ट्र, पुत्रशोकसे व्याकुल गान्धारी, कुन्ती और द्रौपदी-

सब बैठकर मरे हुए स्वजनोंके लिये शोक करने लगे। भगवान् श्रीकृष्णने धौम्यादि मुनियोंके साथ उनको सान्त्वना दी और समझाया कि संसारके सभी प्राणी कालके अधीन हैं, मौतसे किसीको कोई बचा नहीं सकता ॥ ३-४ ॥

साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतम्। घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ॥ ५ ॥
याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः। तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ६ ॥
आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः। द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥ ७ ॥
गन्तुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः। उपलेभेऽभिधावन्तीमुत्तरां भयविह्वलाम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कितवैर्धूर्तैर्दुर्योधनादिभिः। द्रौपद्याः कचग्रहणादिना क्षतं नष्टमायुर्येषां तान् ॥ ५ ॥ ❀ ❀ याजयित्वेत्यादि भाविकथासंक्षेपः। शतमन्योः शतक्रतोरिव ॥ ६ ॥ ❀ ❀ शैनेयः शिनेर्नप्ता सात्यकिस्तेन चोद्धवेन च संयुतः ॥ ७ ॥ ❀ ❀ रथमास्थितः सन्नुत्तरां परीक्षिन्मातरं भयेन विह्वलां व्याकुलाम् अभिमुखं धावंतीमुपलेभे ददर्श ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कचानां द्रौपदीकेशानां स्पर्शेन हतमायुर्येषां दुःशासनदुर्योधनादीनां तान्। अत्र तीर्थेन सुयोधनादीनामजातसंज्ञावत्त्वे "सुयोधनादयः सर्वे त्वजाता जज्ञिरे घटात्। व्यासेनानन्तवीर्येण मार्त्तण्डाधिकतेजसा" इति ग्रन्थांतरीयश्लोकः प्रमाणत्वेन न्यस्तः। तथा चाजाता दुर्योधनदुःशासनाद्याः शत्रवो यस्य स तथा। तस्य युधिष्ठिरस्य स्वं पितृपितामहक्रमात्प्राप्तम् ॥ ५ ॥ ❀ ❀ उत्तमाः कल्पकाः सामग्र्यो यद्वोत्तमा व्यासादयः कल्पकाः कारयितारो येषु तैरश्वमेधैः त्रिभिरिति एकस्मिन्नेव यागे त्रिगुणदक्षिणादानादेकस्यैव यागस्य त्रियागत्वं जातमिति महाभारतेऽश्वमेधपर्वणि विवृतम्। वाक्यानि चेह विस्तृतिभयान्नोदाहृतानि। तस्य युधिष्ठिरस्य यशः शतं मन्यवो यज्ञा यस्य स तथा तस्य। "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यभिधानात्। यथा वामन इन्द्रयशो विस्तृतवांस्तथा श्रीकृष्णोपि युधिष्ठिरस्येत्यर्थः ॥ ६ ॥ ❀ ❀ आदिना धौम्यादिग्रहः ॥ ७ ॥ ❀ ❀ हे ब्रह्मन्निति मत्कथनात्पूर्वमपि त्वं तपोबलेनैतज्ज्ञानासीति भावः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

उत्तमेति। उत्तमः कल्पो येषु यद्वा मुख्यः कल्पो येषु तैः। कल्पो विधानं कल्प्यतेऽनेन कल्पोऽङ्गं स उत्तमो येषु। यद्वा कल्पयन्तीति कल्पकाः अनुष्ठातारः ते उत्तमा येषु तैरिति व्याख्यालेशः ॥ ६-११ ॥

श्रीमद्वीरराघवव्याख्या

कितवैरक्षद्यूताद्युपायेन वंचकैर्दुर्योधनादिभिर्हृतमजातशत्रोर्युधिष्ठिरस्य स्वं राज्यं साधयित्वा राज्या द्रौपद्याः कचस्पर्शेन केशपाशग्रहणेनैव क्षतं क्षीणमायुर्येषां तानसतो दुष्टान् दुःशासनादीन् घातयित्वा अर्जुनादिभिरिति शेषः ॥ ५ ॥ ❀ ❀ उत्तमकल्पकैर्मुख्यकल्पैरन्यूनमन्त्रदक्षिणैः त्रिभिरश्वमेधैः युधिष्ठिरं याजयित्वा पावनं पवित्रं तस्य युधिष्ठिरस्य यशः शतमन्योः शक्रस्य यश इव व्यतनोद्विस्तारयामास ॥ ६ ॥ ❀ ❀ ततः पांडुपुत्रान् चशब्दादन्यांश्च आमन्त्र्यापृच्छ्य शैनेयः शिनेर्नप्ता सात्यकिः शैनेयोद्धवाभ्यां सात्यक्युद्धवाभ्यां सहितः। आत्मना पूजितैः द्वैपायन आदिर्मुख्यो येषां तैर्विप्रैः प्रतिपूजितैर्द्वारकां प्रति गंतुं कृतमतिर्निश्चितमतिर्हे ब्रह्मन् रथमास्थितः अधिष्ठितः ॥ ७ ॥ ❀ ❀ तदाभिधावंतीं भयेन विह्वलामुत्तरामभिमन्युपत्नीमित्थं विज्ञापयंतीमिति शेषः, उपलेभे पथि ददर्शेत्यर्थः, यद्वाऽभिधावंतीं विज्ञापनपूर्वकमनुवर्तमानाम् उपलेभ इत्यन्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

घातयित्वा वधं कारयित्वा पांडवैरिति शेषः, कचानां केशानां स्पर्शेन हतानि नष्टानि आयूंषि येषां ते तथा तान्, अजातः सुयोधनः शत्रुर्यस्य सः तथोक्तः, तथा चोक्तं "सुयोधनादयः सर्वे त्वजाता जज्ञिरे घटात्। व्यासेनानंतवीर्येण मार्तंडाधिकतेजसा" इति प्रयोगात् न जातः शत्रुर्यस्य स तथोक्त इति केचित्। कितवैश्चोरप्रायैर्दुर्योधनादिभिः ॥ ५ ॥ ❀ ❀ मध्यमाधमकल्पयोरुत्तमकल्पकः शतं मन्यवः क्रतवो यस्य स तथा तस्येंद्रस्य यशो वामनावतारे हरिर्यथा ततान तथाऽतनोत्, तनु विस्तारे ॥ ६-७ ॥ ❀ ❀ भगवान् यदा द्वारकां गंतुं कृतमतिः रथमास्थितः तदा पाहिपाहीत्यादिवादिनीं भयेन विवशामात्मानमुद्दिश्यागच्छन्ती-

मुत्तरामुपलेभे ददर्शेत्यन्वयः । यत्र मर्त्यलोके परस्परं मृत्युः तत्र त्वदन्यमभयप्रदं च न पश्ये । स्वस्याभिमतप्रकाशनायात्मनेपदप्रयोगः ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ संक्षेपेणोक्त्वा पुनः प्रस्तुतमाह आमन्त्र्येत्यादिना ॥ ७-९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

द्रौपद्याः कचग्रहणादिना क्षतमायुर्येषां तान् ॥ ५ ॥ ❀ ❀ याजयित्वेत्यादि भाविकथासंक्षेपः ॥ ६ ॥ ❀ ❀ शैनेयः शिनेर्नप्ता सात्यकिः ॥ ७-८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच कितवैर्दुर्द्यूतदेविभिः शकुनिसुयोधनादिभिः असतः सुयोधनदुःशासनजयद्रथप्रभृतीन् कचस्पर्शक्षतायुषः दुःशासनकृतेन द्रौपदीकेशग्रहणेन विनष्टजीवितान् ॥ ५-६ ॥ ❀ ❀ शैनेयः शिनेः पौत्रः युयुधानः ॥ ७ ॥ ❀ ❀ उत्तराम-भिमन्युभार्यां ददर्श ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवमपि तदानीमक्रियमाणमपि भक्तानां हितमेव करोतीति ज्ञापयितुं लौकिकप्रतीत्यापि यद्धितं तत्करिष्यमाणमपि भगवदिच्छायां जातायां कृतमेव लोकेनाभिव्यक्तमिति सिद्धांतज्ञापनार्थं तन्निरूपयति साधयित्वेति द्वाभ्याम् । न जाताः शत्रवो यस्येति भक्तावुत्तमाधिकारो द्योतितः । दाने हेतुः स्वराज्यमिति तत्रापि हेतुः कितवैर्हृतमिति कपटद्यूते दुर्योधनादिभिर्हृतं हस्तिनापुरमपि तदा पांडोरेव राजत्वात् अत एव कितवैरिति बहुवचनम् । ननु कालस्याप्रतिक्रियत्वे तेषामायुषो विद्यमानत्वात् कथं तद्घातनं तत्राह घातयित्वेति । सर्वे ह्यसंतो राजानः दुःशासनेन सह ऐक्यभावात् कचस्पर्शो द्रौपद्याः तेनैव क्षतमायुः सर्वेषां निरपराधाया भक्तायाः प्राणानामुत्तमादायुषः शिरसि विद्यमानत्वात् बलिष्ठप्राणेन दुर्बलानां क्षतकरणं युक्तमेव ॥ ५ ॥ ❀ ❀ "तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यामि"ति श्रुतेराहारपृथक्त्वपक्षे नाश्वमेधत्रयकरणम्, उत्तमल्पकैः उत्कृष्टसाधनसहितैः उत्तमं वा कल्पयंतीति प्रायश्चित्तरूपैः स्वसांनिध्यात् त्रिभिरेव शताश्वमेधसमानयशोजनकत्वं त्रैलोक्येपि तस्य यशः अनेनैकोपक्रमेण अश्वमेधत्रयं कृतमिति ज्ञातव्यम् ॥ ६ ॥ ❀ ❀ एवं भगवतोऽत्रत्यलौकिकसर्वधर्मसमाप्तिसूचनायाभ्यनुज्ञामाह सार्द्धेन आमंत्र्येति । बांधवा ऋषयश्च अभ्यनुज्ञाकर्त्तारः पृथगुक्ताः, चकारादन्ये सर्वे । शैनेयः सात्यकिः, द्वैपायनादीनां स्वस्थत्वात् अभ्यनुज्ञातुल्येपि पूजनमधिकम् ॥ ७ ॥ ❀ ❀ ब्रह्मन्निति । ब्राह्मणस्य महाक्रोध इति सूचितम् । रथारोहणपर्यंतं स्वक्रिया । अग्रे यंतुरश्वानां च भक्तस्य कार्ये उपस्थिते प्रारब्धमपि स्वकार्यं त्यजतीति ज्ञापयितुं तस्मिन् समये उत्तरां दृष्टवान् इत्याह उपलेभ इति । सा हि भक्तावुत्तरा उत्कृष्टेत्यर्थः । अत एव ब्रह्मास्त्रदर्शनं तस्याः प्रथमं मुख्यमेवास्त्रम् । आयसशरेण संबद्धमुत्तरां प्रति गच्छति, तदनु तस्मादुद्गताः पंचशराः पांडवान् प्रति गच्छंति, मूलोच्छेदेऽधिकव्यापारात् अकौरववदपांडवमपि करिष्यामीति तस्याभीष्टत्वात् आभिमुख्येन धावंतीं भयविह्वलां वस्त्रादिष्वसावधानां प्रावृत्याद्यभावात् आगच्छन्त्या एव पाहीति वचनात् आहेत्याद्यनुक्तिः ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

घातयित्वेत्यत्र । कचस्पर्शमात्रेण कथमायुषः क्षय इत्याकाङ्क्षायामाहुः निरपराधेत्यादि । प्राणानामुत्तमादिति । आयतनादिति शेषः । 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपमि'ति श्रुतिव्याख्याने 'शिरो वै अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः प्राणा वै यश' इति श्रावणात् प्राणानामुत्तमायतनं शिरस्तत्प्राप्य आयुषः प्राणाधीनस्य तत्र तथात्वात्तथेत्यर्थः ॥ ५ ॥ ❀ ❀ याजयित्वेति श्लोकं व्याचक्षते तरतीत्यादिना । रात्रिसत्राधिकरणेनार्थवादिकफलस्यात्रोपादेयत्वे सिद्धे आहारपृथक्त्वपक्षेण आहार आहरणं प्रयोगस्तत्पृथक्त्वपक्षस्य 'तत्र सर्वेऽविशेषादि'त्यधिकरणे सिद्धत्वात्तेनेत्यर्थः । इदं पूर्वतन्त्रे चतुर्थस्य तृतीयपादे चिन्तितम् । तथाहि 'सार्वकाम्यमङ्गकामैः प्रकरणादि'त्यस्मिन्नधिकरणे दर्शपूर्णमासज्योतिष्टोमादेः सर्वकामार्थत्वं सिद्धम् । तत्र कामा नैमित्तिकाः, ज्योतिष्टोमादिस्वरूपं निमित्तम् । तच्च सर्वेषु कामेष्वविशिष्टमिति सकृज्ज्योतिष्टोमाद्यनुष्ठानेप्येकमिवा(न्यो?)न्यान्यपि फलानि बाधकाभावाद्भवन्तीति युगपत्सर्वफलसिद्धिरिति प्राप्ते ब्रूमः । नात्र ज्योतिष्टोमं निमित्तीकृत्य कामा विधीयन्ते, कामानामननुष्ठेयत्वात्, किन्तु पुरुषस्य स्वत एव प्राप्तान् कामानुद्दिश्य ज्योतिष्टोमादिर्विधीयते । अतस्तेषां स्वर्गपश्वादीनां परस्परनिरपेक्षाणामेव फलत्वात् तत्तत्साधनत्वेन चोद्यमानो ज्योतिष्टोमादिरपि तत्तदर्थं पृथक् प्रयोगमर्हतीति वाक्यविचारादवसीयत इति

॥ ६ ॥ ❀ ❀ उपलेभ इत्यत्र । प्रारम्भाद्यभावादिति । अत्र पाठः प्रावृत्याद्यभावादिति भाति ॥ ७ ॥ ❀ ❀ पाहि पाहीत्यत्र । आगच्छन्नेवेति । अत आगच्छन्त्या एवेति, प्रदर्शयन्नित्यत्र प्रदर्शयन्त्या इति, बोधयन्नित्यत्र बोधयन्तीवेति पाठो भाति । इत्युक्तं भवतीति । यथा पिधेहीत्यादौ द्वारादिपदार्थस्याभिनयेन प्रतीतिः तथात्रापीत्यर्थः ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

माधव इत्यस्य सर्वत्रानुषङ्गः । अजातशत्रोर्युधिष्ठिरस्य कितवैरक्षद्यूताद्युपायेन वञ्चकैर्दुर्योधनादिभिर्हृतं स्वराज्यं साधयित्वा तद्वशे कृत्वा, राज्ञ्याः द्रौपद्याः कचस्पर्शेन केशाकर्षणेनैव क्षतं क्षीणमायुर्येषां तानसतो दुष्टान् दुश्शासनादीन् भीमार्जुनादिभिर्घातयित्वा ॥ ५ ॥ ❀ ❀ उत्तमकल्पकैः मुख्यकल्पैः अन्यूनमन्त्रदक्षिणैस्त्रिभिरश्वमेधैस्तं युधिष्ठिरं याजयित्वा तस्य यशो दशसु दिक्षु आतनोत् विस्तारयामासेत्यन्वयः । तत्र दृष्टान्तमाह–शतमन्योरिवेति, इन्द्रस्य यश इवेत्यर्थः । लोके लोकस्य केचिन्मित्राणि सुयशः कीर्त्तयन्ति, केचिच्छत्रवस्त्वपयशः कीर्त्तयन्ति, तस्य तु भगवत्कृपयाऽजातशत्रुत्वादपयशो नैवाभूत् किन्तु यश एवेत्याशयेनाह–पावनमिति ॥ ६ ॥ ❀ ❀ ततश्च पाण्डुपुत्रान् चशब्दादन्यांश्च आमन्त्र्य पृष्ट्वा शिनेर्नप्ता शैनेयः सात्यकिस्तेनोद्धवेन च संयुतः सहितः आत्मना पूजितैर्द्वैपायनादिभिर्विप्रैः प्रतिपूजितः ॥ ७ ॥ ❀ ❀ भगवान् स्वसङ्कल्पं विहायापि भक्तमनोरथं पूरयतीति सूचयन् सम्बोधयति–हे ब्रह्मन्निति । द्वारकां प्रति गन्तुं कृता मतिर्येन स रथमास्थितः अधिष्ठितः सन् भयेन विह्वलां व्याकुलामभिधावन्तीं स्तुवन्तीं साम्मुखमागच्छन्तीम् उत्तरामुपलेभे ददर्शेत्यन्वयः ॥ ८ ॥

हिन्दी अनुवाद

इस प्रकार भगवान् श्रीकृष्णने अजातशत्रु महाराज युधिष्ठिरको उनका वह राज्य, जो धूर्तोंने छलसे छीन लिया था, वापस दिलाया तथा द्रौपदीके केशोंका स्पर्श करनेसे जिनकी आयु क्षीण हो गयी थी, उन दुष्ट राजाओंका वध कराया ॥ ५ ॥ ❀ ❀ साथ ही युधिष्ठिरके द्वारा उत्तम सामग्रियोंसे तथा पुरोहितोंसे तीन अश्वमेध यज्ञ कराये । इस प्रकार युधिष्ठिरके पवित्र यशको सौ यज्ञ करनेवाले इन्द्रके यशकी तरह सब ओर फैला दिया ॥ ६ ॥ ❀ ❀ इसके बाद भगवान् श्रीकृष्णने वहाँसे जानेका विचार किया । उन्होंने इसके लिये पाण्डवोंसे विदा ली और व्यास आदि ब्राह्मणोंका सत्कार किया । उन लोगोंने भी भगवान्का बड़ा ही सम्मान किया । तदनन्तर सात्यकि और उद्धवके साथ जानेके लिये वे रथपर सवार हुए । उसी समय उन्होंने देखा कि उत्तरा भयसे विह्वल होकर सामनेसे दौड़ी चली आ रही है ॥ ७-८ ॥

उत्तरोवाच

पाहि पाहि महायोगिन्देवदेव जगत्पते । नान्यं[1] त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥ ९ ॥
अभिद्रवति मामीश शरस्तप्तायसो विभो । कामं दहतु[2] मां नाथ मा मे गर्भो निपात्यताम् ॥ १० ॥

सूत[3] उवाच

उपधार्य[4] वचस्तस्या भगवान् भक्तवत्सलः । अपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ ११ ॥
तर्ह्येवाथ मुनिश्रेष्ठ[4] पाण्डवाः पञ्च सायकान् । आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उत्तरा श्रीकृष्णं प्रार्थयते पाहि पाहीति द्वाभ्याम् । अन्यस्तु प्रार्थनायोग्यो नास्तीत्याह । त्वत् त्वत्तोऽन्यमभयं भयरहितं न पश्यामि यत्र लोके । परस्परमन्योऽन्यं मृत्युर्भवति ॥ ९ ॥ ❀ ❀ तत्र प्रस्तुतं भयमावेदयति । अभिद्रवत्यभिमुखमायाति । तप्तमायसं लोहमयं शल्यं यस्य सः । अतिकार्पण्येनाह । काममिति । कामं यथेच्छम् ॥ १० ॥ ❀ ❀ पराभवेनातिकुपितस्य द्रौणेरपांडवं पांडवशून्यमिदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत ॥ ११ ॥ ❀ ❀ अत एव बहुमुखं तदागतमित्याह । तर्ह्येवेति । तर्ह्येव तदानीमेव ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

वीप्सात्र संभ्रमे । किं यामीति चेत्तत्राह–हे महायोगिन्निति । योगिनः "अनागतमतीतं च वर्त्तमानमतींद्रियम् । विप्रकृष्टं व्यवहितं सम्यक्पश्यन्ति योगिनः" इति वाक्यात्सर्वज्ञाः सन्ति । त्वं तु महायोग्यतो जानास्येवेति भावः । तर्हि रक्षास-

१. प्रा० पा०—नान्यत्र त्वभयं । २. प्रा० पा०—दहति । ३. प्राचीन पाठे 'सूत उवाच' नास्ति । ४. प्रा० पा०—भृगुश्रेष्ठ ।

मर्थास्तु देवाः सन्तीति चेत्तत्राह–हे देवदेवेति । त्वं तु देवानामपि देव इति भावः । ननु देवदेव इन्द्रो महादेवो वास्ति नाहमिति चेत्तत्राह–हे जगत्पते इति । आस्तां तौ देवदेवौ, जगत्पाता त्वमेवासि । तथा च सर्वजगत्पातुस्ते मद्गर्भरक्षणं त्वल्पतरमेवेति भावः । यत्र जगति परस्परमेकस्य मृत्युरन्यस्तस्यापरस्तस्याप्यन्य इत्येवं मृत्युरस्ति । तत्र त्वत्त्वत्तोऽन्यमभयं भयनिवर्त्तकं न पश्यामीत्यर्थः । "यद्बिभेति भयं स्वयम्" इत्यादेः ॥ ९ ॥ ❀ ❀ तत्र तदा तद्वारणे सर्वथा भगवतस्सामर्थ्यं द्योतयंत्याह–हे ईशेति । त्वमीशत्वान्ममाभिलषितपूरणे समर्थोसीति भावः । अभिलषितदानेऽन्येपि देवाः समर्थाः सन्तीति चेत्तदाह–विभो इति । ते तु परिच्छिन्नत्वान्न त्वादृशास्त्वमेव विभुरसीति भावः । अभिद्रवतीति । यान्प्रति शरः प्रयुक्तस्त एव तं पश्यन्ति नान्य इति सूचयति । नन्वभिमन्युना तेन पत्या विनापि जीवितं प्रार्थयन्ती न लज्जसे ? तत्राह–कामं यथेच्छम् । हे नाथेति । सर्वविधैश्वर्ययुक्तस्य तव मद्वननेऽपि मद्गर्भरक्षणसामर्थ्यमस्तीति भावः ॥ १० ॥ ❀ ❀ तस्या उत्तरायाः । उपधार्य श्रुत्वा । यतो भगवानतोऽबुध्यत ॥ ११ ॥ ❀ ❀ अत एव अपांडवजगत्करणाद्धेतोरेव । पांडवा इति । यो यो हि पांडुवंशजः स एव पश्यति नान्य इति ज्ञेयम् । तर्ह्येव तदानीमेव सायत्यर्यंतं कारयन्तीति सायकाः । यद्वा स्यन्त्यन्तं कुर्वंतीति सायकाः । षोंतकर्मणि ण्वुल् ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

एकस्यैव ब्रह्मास्त्रस्य बहुमुखत्वात् पञ्च सायकान् इति ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

विज्ञापनमेवाह पाहीति द्वाभ्याम्–हे देवानामपि देव हे जगत्पते निखिलजगत्त्रातः हे महायोगिन्सूक्ष्मार्थदर्शिन्पाहि पाहि, न विद्यते भयं यस्मात्तथाभूतं त्वत्त्वत्तोऽन्यं न पश्ये । अदर्शनहेतुं वदंस्त्वन्यान् विशिनष्टि यत्र त्वद्व्यतिरिक्तेषु परस्परं मृत्युः, मृत्युग्रस्ता इत्यर्थः, नहि स्वयं मृत्युवश्योऽन्यं मृत्योस्त्रातुं प्रभुरिति भावः ॥ ९ ॥ ❀ ❀ ननु किं तव भयमुपस्थितं यस्मात्त्वं मया रक्षणीयेत्यत्राह अभिद्रवतीति । हे ईश विभो तप्तश्चासावायसोऽयसो विकारः शरः मामभिद्रवति अभिमुखमागच्छति । हे नाथ, स शरो मां कामं यथेच्छं दहतु, मम गर्भश्च यथा मा निपात्यतां तथानुगृहाणेत्यर्थः ॥ १० ॥ ❀ ❀ तस्या उत्तराया वचोऽवधार्याकर्ण्य भक्तवत्सलो भगवानबुध्यताध्यवस्यत् किमिति अपांडवं पांडवाभावं कर्त्तुमिदं शररूपेण द्रवत् द्रौणेरस्त्रं द्रौणिप्रयुक्तं ब्रह्मास्त्रमिति ॥ ११ ॥ ❀ ❀ यथा भगवानेवमबुध्यत तर्हि तथैव हे भृगुश्रेष्ठ शौनक ! पांडवा अपि आत्मनोभिमुखमागच्छतः दीप्तान्पंच सायकान् शरानालक्ष्यास्त्राणि उपाददुः जगृहुः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अयसो विकार आयसः तप्तश्चासावायसश्चेति तथोक्तः शरः हननशीलो बाणः शरीरविनाशनशक्तिप्रकाशनाय आयसेति, अपरिच्छन्नस्य तव गर्भरक्षणं शक्यसाधनमिति द्योतनाय विभो इति, नाथ ऐश्वर्यशक्तियुक्त मां यथेष्टं दहतु, किं तर्हि मम गर्भो मा निपात्यतामिति ॥ ९–१० ॥ ❀ ❀ भगवानस्या उत्तराया वच उपधार्य श्रुत्वा निश्चित्य इदमवनिमण्डलमपांडवं पांडुपुत्ररहितं कर्तुं मुक्तं द्रौणेरस्त्रमबुध्यतेत्यन्वयः ॥ ११ ॥ ❀ ❀ हे भृगुश्रेष्ठ अथ तर्ह्येव तदानीमेव पंच पांडवाः आत्मनोऽभिमुखान् ज्वलितान् पंचसायकानंतकरान् बाणानालक्ष्यानंतरमेवास्त्राण्युपाददुरित्येकान्वयः। षोंऽतकर्मणीति धातोः समंतं कुर्वंतीति सायकाः, ण्वुल् आयादेशश्च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

अभिद्रवतीत्यादौ यान् प्रति प्रयुक्तः शरस्त एव तं पश्यन्तीति ज्ञेयम् ॥ १० ॥ ❀ ❀ उपधार्य्य सावधानं श्रुत्वा । तत्र हेतुर्भक्तवत्सल इति ॥ ११–१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

त्वत्तोऽन्यम् अभयं न पश्यामि । परस्परम् एकस्य मृत्युरन्यस्तस्य मृत्युरपरस्तस्याप्यन्य इत्येवम् ॥ ९ ॥ ❀ ❀ नन्वभिमन्युना तेन पत्या विनापि जीवितं प्रार्थयसे न लज्जसे ? तत्राह काममिति ॥ १० ॥ ❀ ❀ इदं विश्वमपाण्डवं कर्तुं प्रवृत्तस्य द्रौणेः ॥ ११ ॥ ❀ ❀ पाण्डवा इति । यो यो हि पाण्डुवंशजः स एव पश्यति नान्य इति ज्ञेयम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्वत्त्वत्तोऽन्यमभयं न पश्ये, यत्र त्वदन्ये ब्रह्मादिस्तम्बपर्यंतजने परस्परं मृत्युर्भवति स त्वदन्यो जनः मां पातुं कथं शक्नुयादिति भावः ॥ ९ ॥ ❀ ❀ तप्तमायसं शल्यं यस्य सः मामभिद्रवति मामभिमुखमागच्छति, कामं यथेच्छम् ॥ १० ॥ अस्त्रं ब्रह्मास्त्रम् , ननु गर्भमात्रविनाशेन विश्वं पांडवशून्यं कथं भवेदित्यत्रास्त्रस्य बहुमुखत्वं सूचयति तर्ह्येवेति ॥ ११–१२ ॥ ❀ ❀

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

तस्या भयोद्विग्नाया वाक्यमाह पाहि पाहीति । कायवाग्भ्यामेकार्थप्रतिपादनाय न कर्मनिरूपणं शब्दतः, किंतु आत्मानं प्रदर्शयन्ती पाहीति वचनात् आत्मानं पाहीत्युक्तं भवति । महायोगिन्निति सामर्थ्यं प्रकारं च बोधयंतीव संबोधयति । सर्वात्मकत्वेन शरपक्षपातेपि सांप्रतं देवहितकर्तृत्वेन तन्निराकरणं युक्तमित्याह देवदेवेति । रक्षकाभावाच्चाराजकराज्ये सर्वरक्षार्थं च गर्भो रक्षणीय इति संबोधयति जगत्पत इति । कथं श्वशुरादिषु विद्यमानेषु मामेव प्रार्थयसे इत्यत आह नान्यमिति । जगति त्वत्तः अन्यमभयं भयरहितमेव न पश्ये मृत्युव्याप्तत्वात् । अभीतो हि शरणयोग्यः, किंच समानशीलव्यसनानां सख्यमपेक्ष्यते, तत्र परस्परघातकत्वमत्याश्चर्यं ततो ज्ञायते कश्चित् सर्वत्राविष्टो मारयतीति न तेषां शरणगमनं प्रयोजनापेक्षेत्याह यत्र मृत्युरिति । अतस्त्वमेव शरणार्ह इति भावः ॥ ९ ॥ ❀ ❀ प्रस्तुतमाह अभिद्रवतीति । ईशेति प्रतिक्रियायां मूलज्ञाने च विभोरिति संबोधनद्वयं मृत्योरप्रतीकार्यपक्षे स मृत्युर्मां दहतु मे गर्भो मा निपात्यतां योगबलाद्गर्भं पालय । अनेन भक्तरक्षा गर्भरक्षैव मुख्या न मद्रक्षेति ज्ञापितम् ॥ १० ॥ ❀ ❀ तप्तायसः शरः सत्यमागत इति तस्या वच उपधार्य निश्चित्य उपधारणे हेतुर्भगवानिति प्रतिक्रियायां हेतुर्भक्तवत्सल इति । अपमानितोऽश्वत्थामा तथा कृतवानित्याह अपांडवमिति । इदं जगदपांडवं कर्तुं द्रोणाज्जातस्य अस्त्रमबुध्यतेत्यर्थः, अथवा एतस्य ब्रह्मशिरसो यदस्त्रत्वं क्षेपणधर्मत्वम् अपांडवं कर्तुमिति उभयथापि पांडवनाशार्थमस्त्रं प्रयुक्तमिति ज्ञातवानित्यर्थः ॥ ११ ॥ ❀ ❀ तस्मिन्नेव समये व्यसनांतरमप्यागतमित्याह तर्ह्येवेति । तर्ह्येवेत्यव्ययसमुदायः परमाश्चर्यबोधकः । मुनिश्रेष्ठेति संबोधनं विश्वासात् संवादहेतुः, पंचेत्युभयत्र संबद्धं तथा सत्येकैकः सायकः एकैकस्थाने समागत इत्युक्तं भवति । आलक्ष्य दृष्ट्वा द्रौणेरिति बुद्ध्वा वा अस्त्राण्युपाददुरिति परलोकशुद्ध्यर्थं प्रतिक्रियार्थं वा अस्त्राणि ब्रह्मास्त्रादीनि ॥१२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अभिद्रवतीत्यत्र । अप्रतिकार्यपक्ष इति अप्रतिकार्यत्वपक्षे ॥ ९ ॥ ❀ ❀ तर्ह्येवेत्यत्र । उभयत्रेति । पाण्डवेषु सायकेषु च ॥ ११ ॥ ❀ ❀ व्यसनमित्यत्र । दूरापास्तमिति । प्रतिकारकरणमिति शेषः । तद्धैनानित्यादि । तथाच विषयरूपेण विषयार्थं रक्षिता इत्यर्थः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

मम रक्षायां सर्वथा त्वं समर्थोऽसीति सूचयन्ती सम्बोधयति–हे महायोगिन्निति । अत एव सत्कृत्य देवाराधितचरणकमलस्त्वमित्याशयेन पुनः सम्बोधयति–हे देवदेवेति । जगत्पालकस्य तव स्वभक्तरक्षाऽऽवश्यकीति सूचयन्ती सम्बोधयति–हे जगत्पते इति । त्वं मां पाहि पाहि रक्ष रक्षेति व्याकुलत्वाद् द्विरुक्तिः । नन्वन्यान् देवान् विहाय मामेव किं प्रार्थयसे इत्याशङ्क्याह–नान्यमिति । त्वत् त्वत्तोऽन्यं न विद्यते भयं यस्मात्तं भयनिवर्त्तकं न पश्ये । कुत इत्यपेक्षायामाह–यत्रेति, यत्र लोके परस्परमपि मृत्युर्भवति, सर्वे मृत्युग्रस्ता इत्यर्थः । नहि स्वयं मृत्युग्रस्तोऽन्यं मृत्योस्त्रातुं समर्थ इति भावः ॥ ९ ॥ ❀ ❀ ननु किं तव भयमुपस्थितं यस्मात्त्वं मया रक्षणीयाऽसीत्यपेक्षायामाह–अभिद्रवतीति । सर्वान्तर्यामिणस्तव किमस्माभिर्विज्ञापनीयमित्याशयेन सम्बोधयति–हे ईशेति । समर्थस्य तव किमशक्यमिति सूचयन्ती सम्बोधयति–हे विभो इति । स्वामित्वात् स्वभक्तरक्षां करिष्यस्येव किं बहुप्रार्थनयेति भावेन सम्बोधयति–हे नाथेति । तप्तश्चासावायसः अयसो विकारश्च तथाभूतः शरो मामभिद्रवति मदभिमुखमागच्छति । स कामं यथेष्टं मां दहतु, मम स्वमरणभयं नास्ति, परन्तु तेन मम गर्भस्तु यथा मा निपात्यतां तथाऽनुगृहाणेति शेषेणान्वयः ॥ १० ॥ ❀ ❀ भगवान् सर्वज्ञः श्रीकृष्णः तस्या उत्तरायाः वचोऽवधार्य श्रुत्वा इदं विश्वमपाण्डवं पाण्डवरहितं कर्तुं शररूपेण द्रवत् द्रौणेरस्त्रं द्रौणिप्रयुक्तं ब्रह्मास्त्रमबुद्ध्यत ज्ञातवानित्यन्वयः । ननु सर्वतः परिपूर्णस्य भगवतः किं तद्वचनश्रवणेनेत्याशङ्क्याह–भक्तवत्सल इति । कृपापारवश्येन तच्छ्रवणं तत्प्रतिकारे प्रवृत्तिश्चेति भावः ॥ ११ ॥ ❀ ❀ तस्मिन्नेव समये व्यसनान्तरमप्यागतमित्याह–तर्हीति । अथशब्द आश्चर्यसूचकः । हे मुनिश्रेष्ठ इति सम्बोधनं विश्वासार्थम् । पञ्च पाण्डवा आत्मनोऽभिमुखान् सम्मुखमागच्छतो दीप्तान् पञ्च सायकानालक्ष्य दृष्ट्वा स्वयमप्यस्त्राण्युपाददुर्जगृहुः ॥ १२ ॥

हिन्दी अनुवाद

उत्तराने कहा—देवाधिदेव ! जगदीश्वर ! आप महायोगी हैं । आप मेरी रक्षा कीजिये, रक्षा कीजिये । आपके अतिरिक्त इस लोकमें मुझे अभय देनेवाला और कोई नहीं है; क्योंकि यहाँ सभी परस्पर एक दूसरेकी मृत्युके निमित्त बन रहे हैं ॥ ९ ॥ ❀ ❀ प्रभो ! आप सर्वशक्तिमान् हैं । यह दहकते हुए लोहेका बाण मेरी ओर दौड़ा आ रहा है । स्वामिन् ! यह मुझे भले ही जला डाले, परन्तु मेरे गर्भको नष्ट न करे–ऐसी कृपा कीजिये ॥ १० ॥ ❀ ❀ सूतजी कहते हैं—भक्तवत्सल भगवान्

श्रीकृष्ण उसकी बात सुनते ही जान गये कि अश्वत्थामाने पाण्डवोंके वंशको निर्बीज करनेके लिए ब्रह्मास्त्रका प्रयोग किया है ॥ ११ ॥ ❀ ❀ शौनकजी ! उसी समय पाण्डवोंने भी देखा कि जलते हुए पाँच बाण हमारी ओर आ रहे हैं । इसलिये उन्होंने भी अपने-अपने अस्त्र उठा लिये ॥ १२ ॥

व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम् । सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥ १३ ॥
अन्तःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः । स्वमाययाऽऽवृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥ १४ ॥
यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् । वैष्णवं तेज आसाद्य समशाम्यद् भृगूद्वह ॥ १५ ॥
मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते । य इदं मायया देव्या सृजत्यवति हन्त्यजः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात्तद् दुष्परिहरं व्यसनं वीक्ष्य । अनन्यविषयः आत्मा येषां स्वैकनिष्ठानामित्यर्थः ॥ १३ ॥ ❀ ❀ वैराट्या उत्तराया अन्तस्थः सन् गर्भमावृतवान् । तत्र हेतुः । यत आत्मांतर्यामी । योगेश्वर इति बहिष्ठस्यापि प्रवेशघटनार्थमुक्तम् । कुरूणां तंतवे सन्तानाय । पांडवानामपि कुरुवंशजत्वादेवमुक्तम् ॥ १४ ॥ ❀ ❀ अमोघमप्रतिक्रियं च समशाम्यत् संशांतमासीत् ॥ १५ ॥ ❀ ❀ एतद्ब्रह्मास्त्रशमनमाश्चर्यं मा मंस्था न मन्यस्व । इदं जगत् ॥ १६ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकेन ब्रह्मास्त्रेण पूर्ववदर्जुनप्रयुक्तेनापि प्रतिजनाभिमुखमागतस्य पृथक्पृथक् ब्रह्मास्त्रस्य दुर्निवारत्वात्तत्प्रयोगादिकालविलम्बासहत्वाच्च दुष्परिहरं वीक्ष्य विचार्य न्यस्तशस्त्रोपि सुदर्शनेनेत्यादि । तेन स्वप्रतिज्ञाभंगेनापि भक्तवात्सल्यनामानं स्वधर्ममसाधारणं ररक्षेति भावः । अस्त्राणि शस्त्राणि । "व्यसनं विपदि भ्रंशे" इति कोशात् । विपदं भ्रंशं वा । इत्यर्थ इति । श्रीभगवन्तं विना स्वरक्षकमन्यममन्यमानानामिति भावः ॥ १३ ॥ ❀ ❀ अन्तस्थः सन्नन्तर्यामितया स्थितोऽपि योगेश्वरः योगबलेन हरिरिति कृष्णरूपेण गर्भमावृणोत् आवृत्य स्थितो ररक्षेत्यर्थः । स्वमायया योगमाययेति । वैराट्या तु तथाभूतत्वेनाज्ञात इत्यर्थः । तीर्थस्तु स्वमायया स्वसामर्थ्येन तथावृणोद्यथा ब्रह्मास्त्रं न दहेदात्मना गूहितमकरोदित्याह । ब्रह्मास्त्रप्रभावं क्षयं नीतवानिति भावः । "माया तु ज्ञानसामर्थ्यकृपेच्छावञ्चनास्वपि" इत्यभिधानात् ॥ १४ ॥ ❀ ❀ भगवत्सामर्थ्यं सर्वतः प्रबलतममित्याह–यद्यपीति । हे भृगूद्वहेति । सम्बुद्धिर्दृष्टान्तगर्भेति ज्ञेयम् । भृगुं तद्गोत्रमुद्वहति धारयतीति भृगूद्वह इति । यथा सर्वविधविप्रेषु भृगुस्तपसातीव समर्थोभूद्येन भगवानपि पदा ताडितस्तथा सर्वदेवेषु भगवानेवातीव समर्थो नान्य इति प्रदर्शनार्थमुक्तं हे भृगूद्वहेति । "प्रधाने च परिणये उद्वाहो धारकेऽपि च" इति धरणिः । भृगुकुलमुख्यत्वादेव त्वामिदं ब्रवीमीति वाभिप्रायः ॥ १५ ॥ ❀ ❀ सर्वाश्चर्याणि स्वरूपं यस्येति । स्वरूपेप्यमृतमय इतिवन्मयट्प्रत्ययो भवतीत्यर्थः । तदेवाह–यदेदमिति । माययेच्छया देव्या देदीप्यमानया । अच्युते विनाशशून्ये ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

सुदर्शनेनेति युधिष्ठिरादीनामेव ज्ञेयम् । परीक्षितस्तु गदया–अस्त्रतेजः स्वगदया विधमन्तमिति भ्रामयन्तं गदां मुहुरित्युत्तरत्र वक्ष्यमाणेन वाक्येनैकवाक्यत्वात् । यद्वा स्वास्त्रपदेन गदा वाच्येति व्याख्यालेशः ॥ १३–१४ ॥ ❀ ❀ भृगुवंश्यानाम् उद्वहः श्रेष्ठः । भृगूद्वहः शौनक इत्यर्थः ॥ १५–१६ ॥

श्रीमद्वीरराघवव्याख्या

तदाऽनन्यविषय आत्मा मनो येषां तेषामत्र च रक्षकाणां पांडवानां तद्व्यसनं दुःखमवलोक्य विभुः कृष्णः स्वासाधारणेन सुदर्शनेनास्त्रेण स्वानां पांडवानां रक्षां व्यधादकरोत् । सुदर्शनेन तान्सायकान्निरस्य पांडवान् ररक्षेत्यर्थः ॥ १३ ॥ ❀ ❀ ततः सर्वान्तरात्मतयाऽवस्थितः आत्मांतःप्रविश्य धारकश्च भगवानत एव योगेश्वरः निरतिशयसूक्ष्मार्थदर्शी उत्तरागर्भप्रविष्टपांडवास्त्रदर्शीत्यर्थः, हरिः कृष्णः कुरुतंतवे कुरुवंशविस्तारार्थं वैराट्या विराटपुत्र्या उत्तराया गर्भं स्वयमात्मनैवावृणोद्वैराट्या उदरं स्वयं प्रविश्य तद्गर्भो यथा ब्रह्मास्त्रेण न ह्रसेत्तथावृणोद्गर्भमासाद्य सुदर्शनेनास्त्रं चिच्छेदेत्यर्थः ॥ १४ ॥ ❀ ❀ कथं न प्रतिभटं ब्रह्मास्त्रं सुदर्शनेनापि निरस्तमिति शौनकाभिप्रेतं दोषमनूद्य तं प्रतिक्षिपति यद्यपीति । ब्रह्मशिरोनामास्त्रमप्रतिक्रियं केनाप्यनिवार्यमत एवामोघमप्रतिहतम्, तथापि हे भृगूद्वह ! वैष्णवं विष्णोः संबंधि तेजः तेजोरूपं सुदर्शनमासाद्य समगात् । सुदर्शनेतराप्रतिक्रियं ब्रह्मास्त्रं,

सुदर्शनमेव सर्वाप्रतिक्रियमिति भावः ॥१५॥ ❀ ❀ तत्र न विस्मयः कार्य इत्याह मेति । सर्वेभ्योप्याश्चर्येभ्योऽप्याश्चर्यमये आश्चर्यशक्तिप्रचुरेऽच्युते स्वाश्रितान्भूषणगुणविभूत्यादीन्न च्यावयति न पृथक् करोतीत्यच्युतः तथाभूते भगवत्येतत्सुदर्शनेन ब्रह्मास्त्रं निरस्तमित्येतदाश्चर्यं मा मंस्था न मन्यस्व। सर्वाश्चर्यमयत्वमेव व्यंजयितुं विशिनष्टि यो भगवानच्युतः अजः स्वयं कर्मायत्तोत्पत्त्यादिषड्भावविकाररहितः इदं चिदचिदात्मकं कृत्स्नं जगन्मायया देव्या देवस्य स्वस्य संबंधिन्या माययाऽऽश्चर्यशक्त्या सृजत्यवति हन्ति च । कृत्स्नजगत्सृष्टिस्थितिलयलीलस्य कियदेतत्सुदर्शननिरस्तब्रह्मास्त्रमिति, अतो नाश्चर्यं कार्यमित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

न अन्य विषय आत्मा येषां तेऽनन्यविषयात्मानः तेषाम् अन्येषु भगवद्वार्तारहितेषु विषयेषु शब्दादिषु आत्मा मनो न गच्छति येषां ते तथोक्तास्तेषामिति वा पांडवानां तद्व्यसनं वीक्ष्य विभुः सुदर्शनाख्यस्वास्त्रेण स्वानां पांडवानां रक्षां व्यधादित्येकान्वयः ॥ १३ ॥ ❀ ❀ सर्वप्राणिनामंतर्हृदि संस्थितः आत्मा आदानादिकर्ता योगैश्वर्यवान् सहजाणिमादियोगैश्वर्यवान् सर्वोपायानामीश्वरो वा हरिः संसारदुःखहरणशीलः कुरूणां संतत्यविच्छेदाय वैराट्याः विराटपुत्र्याः उत्तरायाः गर्भं स्वमायया स्वयोगसामर्थ्येन यथा ब्रह्मास्त्रं न दहेत्तथावृणोत्, आत्मना गूहितमकरोदित्येकान्वयः ॥ १४ ॥ ❀ ❀ यद्यपि ब्रह्मशिरोऽस्त्रं त्वमोघमव्यर्थमप्रतिक्रियं प्रतिकाररहितं च, तथापि वैष्णवं तेज आसाद्य सम्यगशाम्यदित्येकान्वयः ॥ १५ ॥ ❀ ❀ यो मायया देव्या दीप्यमानया इच्छया ब्रह्मादि जगत्सृजति रक्षति संहरति स्वयं जन्मादिरहितस्तस्मिन् सर्वाश्चर्यस्वरूपे अच्युते विनाशरहिते हरौ एतद् ब्रह्मास्त्रोपशमनलक्षणमाश्चर्यं मा मंस्था न चिंतयेत्येकान्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत् झटित्यशक्यसमाधानं व्यसनं विपदम् ॥ १३ ॥ ❀ ❀ सर्व्वभूतानामात्मा परमात्मेत्यन्तःस्थः । तर्हि कथं बहिष्ठः ? तत्राह योगेश्वर इति । स्वेषु पाण्डवेषु या माया कृपा तया । तामेव दर्शयति कुरुतन्तवे इति तैः ॥ १४–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ब्रह्मास्त्रस्यास्त्रान्तरैरनिवार्यत्वात् तथा एकेन ब्रह्मास्त्रेण पूर्व्ववदर्ज्जुनप्रयुक्तेनापि प्रतिजनाभिमुखमागतस्य पृथक् पृथक् ब्रह्मास्त्रस्य दुर्निवारत्वात् तत्प्रयोगादिकालं विलम्बासहत्वाच्च व्यसनं दुष्परिहरं वीक्ष्य विचार्य्य न्यस्तशस्त्रोऽपि सुदर्शनेनेत्यादि । तेन स्वप्रतिज्ञाभङ्गेनापि भक्तवात्सल्यनामानमसाधारणं स्वधर्म्मं ररक्षेति भावः ॥ १३ ॥ ❀ ❀ अन्तःस्थ इति वैराट्या अपि अन्तर्यामिरूपेण स्थितोऽपि योगेश्वरः योगबलेन हरिरिति कृष्णरूपेण प्रविश्य गर्ब्भमावृणोत् आवृत्य स्थितो ररक्षेत्यर्थः । स्वमायया योगमाययेति वैराट्या तु तथाभूतत्वेनाविज्ञात इत्यर्थः । कुरूणां तन्तवे सन्तानाय । पाण्डवा अपि कुरुवंशजा एवेत्येवमुक्तम् ॥ १४–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कथंचिदर्जुनः स्वात्मानं पूर्ववद्रक्षितुं शक्नुयादपि नान्ये शक्नुयुरित्यतस्तेषां श्रीमत्सुदर्शनेन रक्षां व्यधादकरोत् ॥ १३ ॥ ❀ ❀ हरिः स्वानन्यजनदुःखहरणस्वभावः योगेश्वरः । दूरस्थभक्तमनोरथसंपादनदक्षोपि सर्वभूतानामात्मांतर्यामी । सर्वत्र नित्यं प्राप्तः, अत एव भक्तवात्सल्येन गृहीतः । सूक्ष्ममंगलमूर्तिः प्रतिगृहीतचक्राद्यायुधः वैराट्याः विराटपुत्र्याः । अतःस्थ एव कुरुतंतवे तत्संतानाय स्वयं गर्भमावृणोदावृतवान् ॥ १४ ॥ ❀ ❀ अमोघमनिष्फलम् । अप्रतिक्रियमप्रतिभटम् । वैष्णवं तेजः सुदर्शनादिरूपमासाद्य समशाम्यत् सम्यक् शांतमासीत् ॥ १५ ॥ ❀ ❀ सर्वमाश्चर्यमयं यस्मिन् स तथा तस्मिन् । एतदुदरे आविर्भूय गर्भरक्षणं बहुमुखब्रह्मास्त्रशमनमाश्चर्यमिति मा मंस्था मन्यस्व । इदं विचित्रं विश्वं मायया स्वशक्तिभूतया ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत्र भगवतोपि क्रियासामर्थ्यात् दूरापास्तं पांडवानामिति वक्तुं भगवान् स्वभक्तानां रक्षामेव कृतवान् नास्त्रस्य प्रतिक्रियामित्याह । न अन्यो विषयः आत्मनि येषां स्वभावेन सर्वे विषया भवंतु नाम, चित्ते तु भगवल्लक्षण एव विषयस्तेषामस्ति अतः "तद्वैतान् भूत्वाऽवती"ति विषयार्थमेव ते रक्षिताः । तत्र सुदर्शनचक्रकमलातचक्रवत् शरपांडवानां मध्ये परिभ्रमति । अतस्तेन तेषां रक्षां कृतवान् । स्वानामिति तेषां रक्षायां हेतुः, विभुरिति सामर्थ्ये, स्वास्त्रपदेन बुद्धिपूर्वकरक्षाकरणत्वं सुदर्शनस्य सूचितम् ॥१३॥ ❀ ❀ प्रधान उत्तरागर्भे प्रकारांतरेण रक्षामाह अंतस्थ इति । गर्भं प्रविष्टस्यार्थस्य गर्भरक्षार्थम् 'ओषधे त्रायस्वैनमि'तिवत् मायया गर्भशरीरमावृतवान् । तत्र बहिः स्थितस्य आवरणं न संभवतीति तदर्थं चत्वारि विशेषणानि चतुर्विधमायाव्याप्तिप्रतिपादकानि । तत्र

मध्य एव भगवान् स्थितः सुवर्णतेजोवत् तं पालयतीत्याह अंतस्थ इति । सर्वभूतानां मध्ये स्थितः किंच अन्यस्यान्यपालनं सर्वथा न संभवतीति गर्भरूपो भूत्वा पालितवानित्याह, किंच बहिरपि तच्छरीररक्षार्थमाह योगेश्वर इति । योगबलेन स्वयं तत्र शरीरास्त्रयोर्मध्ये स्थित्वा पालयतीत्यर्थः । अन्यथा ब्रह्मास्त्रशरीरसंबंधेदोषो वा संक्रमेदिति । ननु किमित्येवंप्रकारैः पालयतीति चेत्तत्राह हरिरिति । सर्वेषां दुःखहरणस्वभावत्वात् समुदायरक्षात्वे तत्साध्या स्वमायया स्वाधीनमायया ब्रह्मांडकोटिभ्रमनिवर्त्तकज्ञानाग्न्यावरकरूपत्वान्मायायास्तस्यावरणं युक्तं वैराट्या इति संबंधात्तस्योदरदाहोपि यथा न भवति तथा कृतवानिति लक्ष्यते । उभयवंशयोर्भक्तत्वात् एषा रक्षितेत्याह वैराट्याः कुरुतंतवे इति । तंतुः परंपरापालको वा ॥ १४ ॥ ❀ ❀ न ब्रह्मास्त्रं गर्भे प्रयुक्तं दाहकैकस्वभावत्वात् । तत्रासमर्थमन्यत् कुतो न दहति तत्राह यद्यप्यस्त्रमिति । सत्यमुक्तं सर्वदाहकमेतत् महादेवस्यापि पिशाचत्वं यतो जातं तत् ब्रह्मशिरः ब्रह्मणः पंचमं शिरः तस्य गुणद्वयं सहजममोघं सर्वदा कार्यं करोतीत्यर्थः अप्रतिक्रियं च, न विद्यते प्रतिक्रिया प्रतिकूलक्रिया व्यावर्त्तकक्रिया वा यस्येति, तथापि किंचिदद्भुतं जातमित्याह । वैष्णवं तेज आसाद्येति यथा व्याघ्रो मंत्रबलेन गौर्भवति तथा परमसात्त्विकं वैष्णवं तेज आसाद्य प्राप्य सम्यगशाम्यत् शांतमभूत् । प्राकृतं देहं प्रज्वाल्य भगवद्भावापन्नं वैष्णवं देहं ज्वालयितुं प्रवृत्तं सन्मध्ये वैष्णवं तेज आसाद्य तद्रूपं सत् तदैक्यं प्राप्तवदित्यर्थः । तत्र विश्वासार्थमाह हे भृगूद्वहेति भृगूणां हि पूर्वं वैष्णवनिर्णयः कृतः । अन्यथा राजसास्तामसाश्च भक्त्या भगवत्संबंधं प्राप्य सात्त्विका भूत्वा कथं सायुज्यं प्राप्नुयुः ॥ १५ ॥ ❀ ❀ नन्वस्त्वजीवानां मुक्तियोग्यानां शास्त्रसिद्धत्वात्तथात्वं ब्रह्मतेजस्त्वचेतनं देवताधिष्ठितं मंत्राधिकारिरूपं कथमन्यथा भवेत् ? तथा सति भगवता युद्धे प्रयोज्यमानानां ब्रह्मास्त्रादीनां तथात्वं न स्यात् । अत्र च परीक्षितः पांडवानां च रक्षणात् महदाश्चर्यमिदं वृत्तमित्याशंक्याह मा मंस्था इति । तदाश्चर्यं मा मंस्थाः एतदाश्चर्यं मा मंस्थाः कर्तुमकर्तुमन्यथा कर्तुं समर्थत्वात् । न हि दृष्टांतव्याप्त्यादिना भगवति पदार्थनिर्णयः कर्तुं शक्यते "अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदि" ति वाक्यात् । किंच सर्वाश्चर्यमये विरुद्धसर्वधर्माणामाश्रये भगवति अलौकिकसर्वपदार्थमये किमाश्चर्यं न ह्येतदन्यस्योच्यते । किंच च्युतिरहितः स्वयमात्मन एवात्मानं सर्वं च्युतं करोति तत्र किमेतदाश्चर्यमिति । किंच माया नाम काचिच्छक्तिः पूर्वं निरूपिता, सा च देवतामायास्वरूपभूता तया किल विश्वं सृजति अवति हंति च । एकं वस्तु असहाय एकस्यैव अनेकभावं संपादयतीत्यर्थः । किंच अत एव जायते विरुद्धधर्मसंबंधेऽपि न पूर्वधर्मनिवृत्तिः ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अन्तःस्थ इत्यत्र । ओषधे त्रायस्वैनमितिवदिति । दीक्षणीयायां दीक्षाङ्गत्वे विहिते केशश्मश्रुवपने क्षुरस्य नतिर्यग्विधानमनया श्रुत्या कल्पे विहितं 'ओषधे त्रायस्वैनमिति स्वधितिं नर्यञ्चं निदधाती'ति । तथा चौषधे दाहनिधान एनं यजमानं त्रायस्व त्वक्छेदनाकरणाद्रक्षेत्यर्थात् यथा स्वधितिना रक्षा, तथा मायासंबंधिदोषाजननात्तया आवरणमित्यर्थः । बहिः स्थितस्येति । बहिःस्थितकर्तृकमित्यर्थः । सुवर्णतेजोवदिति । तस्य तैजसत्वात् तेजो यथा कारणत्वेनान्तःस्थितं तथेत्यर्थः । दोष इति । ब्रह्मास्त्रस्य ब्रह्मशिरोरूपत्वात्तत्सम्बन्धे शिवस्येव पिशाचत्वदोष इत्यर्थः ॥ १३ ॥ ❀ ❀ यद्यपीत्यत्र । प्रतिकूलक्रियेति । नाशिका क्रिया । व्यावर्तकक्रियेति स्तम्भिका क्रिया अन्यथेति वैष्णवनिर्णयाभावे ॥ १४ ॥ ❀ ❀ मा मंस्था इत्यत्र । तथात्वमिति सात्त्विकत्वम् । तथात्वं न स्यादिति स्वकार्यकरणसमर्थत्वं न स्यात् । एवं भगवद्वाक्यकरणजनितदोषस्य भगवत्कृतं समाधानमुक्तम् । अतः परं गुणपोषणमुच्यते, तत्र रक्षणं गुणस्तस्य पोषणं भक्त्यर्थत्वम्, तदत्र पृथास्तुत्या उच्यत इत्याशयेनाहुः एवं भगवतेत्यादि । स्तुत्यर्थबोधककारिकायां कृतहेलाज्ञेति एकं पदम् । कृतहेलाज्ञानवतीत्यर्थः । अग्रिमस्वारस्यात्पदद्वयं वा ॥१५-१६॥

श्रीगिरिधरकृता बालप्रबोधिनी

विभुः सर्वथा समर्थः श्रीकृष्णस्तेषां पाण्डवानां तद्ब्रह्मास्त्रजन्यं व्यसनं दुःखं वीक्ष्य स्वास्त्रेण सुदर्शनेन रक्षां व्यधात् अकरोत्, सायकान्निरस्य पाण्डवान् ररक्षेत्यर्थः । तत्र हेतुमाह–स्वानामिति, स्वभक्तानामित्यर्थः । स्वभक्तत्वमेव स्पष्टयति–अनन्येति, नान्यविषयः आत्माऽन्तःकरणं येषां तेषामित्यर्थः ॥ १३ ॥ ❀ ❀ ततश्च हरिर्भक्तदुःखहर्त्ता श्रीकृष्णः कुरूणां तन्तवे वंशविस्तारार्थं स्वमायया स्वशक्त्या सूक्ष्मरूपेण वैराट्या उत्तरायाः कुक्षिं प्रविष्टो गर्भं बालमावृणोत्, सर्वतः परिभ्रमन् ब्रह्मास्त्रतो ररक्षेत्यर्थः । तस्य तत्र प्रवेशो नानुपपन्नः, यतो योगेश्वर इति । योगिनोऽपि तद्दत्तसामर्थ्येन परकायं प्रविशन्ति तर्हि तस्य तत्र प्रवेशे काऽनुपपत्तिरिति भावः । तदुपपत्तौ हेत्वन्तरमाह–सर्वभूतानामन्तस्थ आत्मा, अन्तर्यामीत्यर्थः । पाण्डवा अपि कौरवा एवातः कुरुतन्तवे इत्युक्तम् ॥ १४ ॥ ❀ ❀ कथमप्रतिभटं ब्रह्मास्त्रं सुदर्शनेनापि निरस्तमिति शौनकाभिप्रेतं चोद्यमनूद्य प्रतिवक्ति–यद्यपीति । यद्यपि ब्रह्मशिरोनामकमस्त्रमप्रतिक्रियं केनाप्यनिवार्य्यम् अत एवामोघमप्रतिहतं च, तथापि हे भृगूद्वह वैष्णवं विष्णोः सम्बन्धि तेजः तेजोरूपं सुदर्शनमासाद्य प्राप्य सम्यगशाम्यत् शान्तमासीदिति सम्बन्धः । सुदर्शनेतरास्त्राप्रतिक्रियं ब्रह्मास्त्रं सुदर्शनमेव तु सर्वास्त्राप्रतिक्रियमिति भावः । अग्रे भृगुणा वैष्णवप्रभावो निर्द्धारित इति सम्बोधनेन सूचितम् ॥ १५ ॥ ❀ ❀ वस्तुतस्तु नायं प्रभावः सुदर्शनस्य, किन्तु भगवत एवातोऽत्र त्वया विस्मयो न कार्य इत्याह–मेति । अच्युते स्वरूपतः शक्तितश्च च्युतिरहिते

श्रीकृष्णे एतत् सुदर्शनेन ब्रह्मास्त्रशमनमाश्चर्यं मा मंस्थाः न मन्यस्वेत्यन्वयः। तत्र हेतुमाह–सर्वाश्चर्यमये इति, आश्चर्यजनकानन्तशक्तिप्रचुरे इत्यर्थः। हिशब्देन "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "यतो वा इमानि भूतानि जायन्ते" इत्यादिशास्त्रेष्वेतस्यार्थस्य प्रसिद्धिं सूचयति। सर्वाश्चर्यमयत्वमेव व्यञ्जयितुं तं विशिनष्टि–य इति। यः स्वयमजः कर्माधीनजन्मादिषड्विकाररहित एव देव्या देवस्य स्वस्य सम्बन्धिन्या मायया अचिन्त्यशक्त्या इदं विश्वं सृजति उत्पादयति अवति रक्षति हन्ति उपसंहरति चेत्यन्वयः। सकलजगत्सृष्टिस्थितिलीलस्य कियदेतत् सुदर्शनेन ब्रह्मास्त्रनिवारणं येनाश्चर्यं कार्यमिति भावः॥ १६॥

हिन्दी अनुवाद

सर्वशक्तिमान् भगवान् श्रीकृष्ण ने अपने अनन्य प्रेमियों पर—शरणागत भक्तोंपर बहुत बड़ी विपत्ति आयी जानकर अपने निज अस्त्र सुदर्शन चक्र से उन निजजनों की रक्षा की॥ १३॥ ❀ ❀ योगेश्वर श्रीकृष्ण समस्त प्राणियोंके हृदयमें विराजमान आत्मा है। उन्होंने उत्तराके गर्भको पाण्डवों की वंश-परम्परा चलानेके लिए अपनी मायाके कवचसे ढक दिया॥ १४॥ ❀ ❀ शौनकजी! यद्यपि ब्रह्मास्त्र अमोघ है और उसके निवारण का कोई उपाय भी नहीं है, फिर भी भगवान् श्रीकृष्णके तेजके सामने आकर वह शान्त हो गया॥ १५॥ ❀ ❀ यह कोई आश्चर्यकी बात नहीं समझनी चाहिए; क्योंकि भगवान् तो सर्वाश्चर्यमय हैं, वे ही अपनी निज शक्ति मायासे स्वयं अजन्मा होकर भी इस संसार की सृष्टि, रक्षा और संहार करते हैं॥ १६॥

ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया। प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती॥ १७॥

कुन्त्युवाच

नमस्ये पुरुषं त्वाऽऽद्यमीश्वरं प्रकृतेः परम्। अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम्॥ १८॥
मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम्। न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा॥ १९॥
तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः॥ २०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णया सह॥ १७॥ ❀ त्वा त्वां नमस्ये नमस्करोमि। ननु कनिष्ठं मां कथं नमस्करोषि तत्राह। आद्यं पुरुषं कुतः प्रकृतेः परम्। तत्कुतः। ईश्वरं प्रकृतेरपि नियन्तारम्। अत एव सर्वभूतानामन्तर्बहिश्च पूर्णत्वेनावस्थितं तथाप्यलक्ष्यम्॥ १८॥ ❀ ❀ तत्र हेतुः। मायैव जवनिका तिरस्करिणी तयाच्छन्नं प्रतिच्छन्नम्। अतोऽहमज्ञा भक्तियोगानभिज्ञा केवलं नमस्यामि। अधोक्षजमिंद्रियजं ज्ञानं यस्मात्तम्। अव्ययमपरिच्छिन्नम्। तत्प्रपंचः। मूढदृशा देहाभिमानिना पुंसा न त्वं लक्ष्यसे॥ १९॥ ❀ ❀ किं च परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततश्चामलात्मनां निवृत्तरागादीनामपि तथा तेन निजमहिम्ना न लक्ष्यसेऽतो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं हि पश्येम। यद्वा परमहंसादीनामपि भक्तियोगविधानार्थं त्वाम् आत्मारामाणामप्यचिंत्यनिजगुणैराकृष्य भक्तियोगं विधातुं कारयितुमवतीर्णमित्यर्थः॥ २०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्रह्मपदमत्र ब्रह्मास्त्रपरमेकदेशन्यायेन। तथा च ब्रह्मास्त्रादभिनिर्मुक्तैरित्यर्थः॥ १७॥ ❀ ❀ अत्राक्षिपति नन्विति। तत्प्रकृतिपरत्वम्। अत एव प्रकृतिनियंतृत्वादेव। तथाप्यंतर्बहिष्ठेपि। अत्र विश्वनाथः–ज्ञाततात्कालिकश्रीकृष्णसर्वकृत्या कुन्ती हृद्युदितस्य तन्महैश्वर्यस्य वेगं सोढुमपारयन्ती स्तौति–नमस्य इति। किं भ्रात्रेयं मां नमस्यसि। तत्राह–पुरुषं न तु पुरुष एवास्मि कोत्र सन्देहस्तत्राह–आद्यम्। ननु देहानामेवागमापायित्वं पुरुषो जीवस्त्वाद्य एव सर्वस्तत्राह–ईश्वरम्। ननु स्वर्गे इन्द्रचन्द्राद्या भूमौ राजानोऽपीश्वरा उच्यन्ते, तत्राह–प्रकृतेः परम्। किमहमन्तर्यामी पुरुषः न। अलक्ष्यम्। अन्तर्यामी बुद्ध्यादिप्रकाशलक्ष्य एव किं ब्रह्म न। अन्तर्बहिश्चावस्थितम्। यस्मादन्तरुत्तरागर्भस्थो बालकं च रक्षितवानसि बहिश्चास्मांश्च रक्षन्समीपे तिष्ठसीति॥ १८॥ ❀ ❀ किं त्वं परिच्छिन्नोसि व्यापको वेति त्वामहं ज्ञातुं न शक्नोमीत्याह–मायैव जवनिका तिरस्करिणी

---

१. प्रा० पा०—बहिरपि ध्रुवम्।

तया च्छन्नं पश्यामीत्यर्थः। किं माया मामावृणोति तत्राह-अज्ञा मेघाच्छन्नं सूर्यमहं न पश्यामीतिवन्मायया मद्दृष्टयाच्छादनात्वा त्वामप्याच्छन्नं पश्यामीत्यर्थः। यतोधोक्षजमधःस्थितमक्षजमिन्द्रियजं ज्ञानं यस्य तम्। इन्द्रियजं ज्ञानं यत्र स्प्रष्टुं प्रभवतीत्यहमैन्द्रियिकज्ञानवत्यज्ञैव। न च मादृशनिकृष्टजनाज्ञेयत्वे तव कापि क्षतिरित्याह-अव्ययमिति। ननु मां साक्षात्पश्यसि स्तौषि प्रकृतेः परत्वेन जानासि तदप्यज्ञास्मीत्यात्मानं किमिति निन्दसीत्यत आह-न लक्ष्यस इति। नाट्यधरः गीयमानगीतपदार्थाभिनयरसानुरूपनृत्यतालादिविशिष्टो नटो मूढदृशा संगीतशास्त्रानभिज्ञेन नटोयं नटतीत्येवं दृष्टोपि यथा न लक्ष्यते न ज्ञाततत्त्वो भवति तथैव त्वं मया दृष्टोपि न लक्ष्यसे इति तथेत्यस्य पूर्वेणैवान्वयः। पांडवान्पालयन्नपि सर्वांतर्याम्यपि मुहुरश्वत्थामादीन्पांडववधार्थं मन्त्रं ग्राहयसि। स्वयं न्यस्तशस्त्रोप्यस्त्रं गृह्णासि, शिष्टपालनप्रवृत्तोपि भीष्मादीन्संहारयसि। द्रौपदीसुभद्रयोः रतिस्निह्यन्नपि तत्पुत्रान्घातयसीत्येवमादिका लीला तव किन्तत्त्वेत्यहं न जानामीति भावः॥ १९॥ ❀ ❀ स्त्रीजातेर्मम का वार्ता, सर्वज्ञा मुनयः परमहंसा अपि न जानन्तीत्याह-किं चेति। तेन दुर्ज्ञेयेन यतो न लक्ष्यसेऽतो हेतोः तव भक्तिं कर्त्तुं वयं त्वां कथं पश्येमेत्यर्थः। त्वां भजन्तोऽपि लीलामाधुर्याकृष्टचित्तास्तव तत्त्वं न जानन्ति यतोऽतस्तेषां भक्तियोगे प्रवर्त्तयितुं स्वीकृतविग्रहं वयं कथं जानीम इत्याह यद्वेति। इत्यर्थ इति। अमलात्मनां गुणमयमालिन्यान्निष्क्रांतानां जीवन्मुक्तानामित्यर्थः। तेषामपि भक्तियोगविधानमेवार्थः प्रयोजनं यस्य तम्। "आत्मारामाश्च मुनयः" इत्याद्युक्तेरयं भावः॥ २०॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अथ इत्यादि स्वतःसिद्धज्ञानमित्यर्थः॥ १९-२१॥

श्रीमद्वीरराघवव्याख्या

ततो ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैर्युधिष्ठिरादिभिः कृष्णया द्रौपद्या च सह सती पृथा कुंती प्रयाणाभिमुखं कृष्णम् इदं वक्ष्यमाणमाह॥ १७॥ ❀ ❀ तदेवाह नमस्य इति षड्विंशत्या। प्रयाणाभिमुखं कृष्णमवलोक्य तद्विश्लेषमसहमाना तं ततो निवर्त्तयितुं लौकिकोऽपि कश्चिद् गुणाढ्यः पुमानाश्रितान्न हातुमुत्सहते परमकारणस्य सर्वांतरात्मनोऽचिंत्यविविधविचित्रशक्तेः स्वेच्छोपात्ताप्राकृताश्चर्यदिव्यतनोराश्रितवात्सल्यजलधेराश्रितार्तिहरस्य निरतिशयसुखदस्य योगपरिशुद्धमनसैव गोचरस्याविज्ञातचिकीर्षितस्य सर्वशरीरकस्य सर्वसुहृदोऽचिंत्यविविधविचित्रचेष्टितस्यावितर्क्यावतारस्य तव पदांबुजमंतरेण नास्माकं शरणमस्त्यतः कथमनन्यात्मनोस्मान्विहाय गंतुमुद्युंक्षे इति विज्ञापयति। तत्र तावल्लौकिकपुरुषवैजात्यज्ञापनायानितरसाधारणैर्द्धर्मैर्विशिष्टं नमस्करोति नमस्य इति। आद्यं सर्वजगत्कारणं प्रकृतेः परं पुरुषमीश्वरं त्वां नमस्करोमि नमस्कारेण पूजयामीत्यर्थः। नमःशब्दात् "शब्दवैरकलहाभ्रकण्वमेघेभ्यःकरणे" इत्यतः करण इत्यनुवर्तमाने "नमो वरिवश्चित्रङःक्यच्" इति करोत्यर्थे क्यच्यार्षत्वादात्मनेपदम्। सांख्याभिमतपुरुषव्यावृत्त्यर्थमीश्वरमित्युक्तं सापेक्षमीश्वरत्वं ब्रह्मादिसाधारणमिति तद्व्यावृत्त्यर्थं सर्वभूतानामंतर्बहिश्चावस्थितमित्युक्तम्। अनेन "यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इति श्रुतिरुपबृंहिता भवति। अनेन देवताविशेषत्वं च फलितं सर्वभूतानां ब्रह्मादिस्थावरांतानामन्तर्बहिश्च व्याप्य नियंतृतयावस्थितमित्यर्थः। प्रकृतेः परत्वे हेतुरलक्ष्य इति प्रकृतिवन्न लक्ष्यते न दृश्यते इत्यलक्ष्यं यद्वा अंतर्बहिश्चावस्थितमप्यलक्ष्यमदृश्यम्॥ १८॥ ❀ ❀ तत्रहेतुः-मायाजवनिकाच्छन्नं मायैव जवनिका नेपथ्यं तद्वत्तिरोधायकत्वात् तया जीवाज्ञानरूपया हेतुभूतया छन्नं तिरोहितमिंद्रियाविषयमिति यावत्। किं सर्वेषामप्यतींद्रियं नेत्याह अज्ञेति। अक्षजा इंद्रियवृत्तय अधोऽक्षजा यस्मात्सोऽधोक्षजः, इंद्रियवृत्त्य विषयः। अज्ञानामनुपासकानामधोक्षजमज्ञाधोऽक्षजं तत्र हेतुरव्ययमिति न व्येति विविधं विकारं गच्छतीत्यव्ययं विविधविकारभाज एवाज्ञाक्षजविषयत्वादज्ञाधोक्षज इत्यर्थः। अनेनैतत्सूच्यते योगविशुद्धमनसानुग्राह्य इति। तथा च श्रूयते "न चक्षुषा पश्यति कश्चनैनं न मांसचक्षुरभिवीक्षते तम्। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥ हृदा मनीषा मनसाभिक्लृप्तय एनं विदुः" इत्यादि तदेवाह न लक्ष्यसे मूढदृशेति। योगापरिशुद्धधिया न लक्ष्यसे न दृश्यसे। ननु सर्वैरपि दृश्य एवासौ इत्यत्राह नटो नाट्यधरो यथा नटो यथा दृश्यते तथा दृश्यस इत्यर्थः। यद्वा मूढदृशा जानता पुंसा नाट्यधरो नटो यथा न लक्ष्यते अयमेवंविध इति न ज्ञायते किंतु नाट्योपयुक्तवेषविशिष्टतयैव दृश्यते तद्वत्। अनेनाज्ञाधोक्षज इत्यनेन च योगपरिशुद्धमनोग्राह्योऽपरिशुद्धमनसा त्वग्राह्य इति तत्र न लक्ष्यसे इत्यनेनाग्राह्यत्वमुपपादितम्॥ १९॥ ❀ ❀ अथ परिशुद्धमनोग्राह्यत्वं वदंती योगानधिकारिण्योऽपरिशुद्धमनसः स्त्रियो वयं कथं जानीम इत्याह तथेति। तथा तथापीत्यर्थः, मुनीनां सदा त्वत्स्वरूपमननशीलानाममलात्मनां विशुद्धमनसां परमहंसानां भक्तियोगविधानार्थम् अर्थशब्दोऽत्र विषयीभूतपदार्थवाची भक्तियोगप्रपंचस्यार्थं विषयभूतं भक्तियोगदृश्यं त्वां स्त्रियो वयं कथं पश्येमहि जानीमहि। तर्हि किं जानासीत्यपेक्षया नटं नाट्यधरं नाट्योपयुक्तनामरूपादिविशिष्टतयैव जानते न तु तत्त्वतोऽयमेतजातिनामरूपगुणक इति तद्वदस्मिन्नवतारे यानि कृष्णवासुदेवदेवकीनंदनादिनामानि यच्च पंकजनाभाद्यवयवोपेतं तान्येव सर्वेषामेव समानानि केवलं जानीम इत्यभिप्रायेण उक्तनामरूपविशिष्टं नमस्करोति कृष्णायेति श्लोकद्वयं निगदेनैव व्याख्यातम्॥ २०-२२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ब्रह्मास्त्रतेजोमुक्तैरात्मजैर्युधिष्ठिरादिभिः पुत्रैः सह सती साध्वी ॥ १७ ॥ ❀ ❀ संसारव्यावृत्तये आद्यं पुरुषमिति हिरण्यगर्भव्यावृत्तये ईश्वरमिति जगत्सृष्ट्याद्यैश्वर्यवत्त्वं न ततो व्यावृत्तमित्यतः प्रकृतेः परमिति एतत्सर्वं कुत इत्युक्तमलक्ष्यमिति लक्षणया वृत्त्यापि ज्ञातुमशक्यं तर्हि शून्यप्रायमित्यत उक्तं सर्वभावानाम् "अंतर्बहिश्च तत्सर्वमि" ति श्रुतेः । आद्यस्य कथमंतर्बहिश्च व्याप्य स्थितत्वमित्यत उक्तं भूतप्रलयेऽपि ध्रुवं नित्यमविनाशिनम् ॥ १८ ॥ ❀ ❀ त्वां नमस्ये इत्यपरोक्षतयोक्तस्य कथमलक्ष्यत्वमिति तत्राह मायेति । हे अधोक्षज वशीकृतेन्द्रिय जीवस्वगुणाच्छादकपरमाच्छादकोभयविधमायाख्यतिरस्करिण्या छन्नस्त्वं मूढदृशा विपरीतज्ञानया मर्त्यया मया लक्ष्यमाणोऽपि न लक्ष्यसे यथा नाट्यधरो नटो दृश्यमानोपि तदंगुल्याद्यभिनयलक्षितकथाविशेषाज्ञेन नरेण न लक्ष्यते तथा तस्मादलक्ष्यस्त्वमित्यर्थः ॥ १९ ॥ ❀ ❀ इतोऽपि मादृशीनां त्वद्दर्शनमसुशकमित्याह तथेति अमलात्मनाम् अविद्याकामकर्मादिमलरहितमनसां मुनीनां सर्वज्ञानां परमहंसानां सनकादीनां भक्तियोगविधानार्थं भक्तियोगकरणविषयं त्वां तेऽपि पश्यंति तथा रागादिमत्यः स्त्रियो वयं कथं त्वां पश्येमहीत्येकान्वयः । स्त्रीषु तारतम्यविशेषद्योतनार्थमात्मनेपदप्रयोगः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नमस्ये इति सार्द्धकम् ॥ १८ ॥ ❀ ❀ अलक्ष्यत्वे हेतुर्मायेत्यादि पदद्वयम् । तत्र प्रथममनधिकारिणः प्रति प्राकट्यावसरेऽपि द्वितीयमन्यदा स्वरूपत एवेन्द्रियज्ञानातीतत्वात् सर्वत्र स्थितत्वेऽपि । अव्ययं तेन सह न व्येतीति । मायेत्येतत् प्रपंचयति न लक्ष्यसे इति सार्द्धकम् ॥ १९ ॥ ❀ ❀ तथेति तथाच सतीत्यर्थः । अमलात्मनां मुनीनां मध्ये ये परमहंसा आत्मारामास्तेषां स्वप्रेमसंपादनप्रयोजनकं त्वाम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णया द्रौपद्या सह । सती वैष्णवी ॥ १७ ॥ ❀ ❀ ज्ञाततात्कालिकश्रीकृष्णसर्वकृत्या कुंती हृद्युदितस्य तन्महैश्वर्यस्य वेगं सोढुमपारयंती स्तौति नमस्ये इति । किं भ्रात्रेयं मां नमस्यसि तत्राह पुरुषम् । ननु पुरुष एवास्मि कोऽत्र संदेहस्तत्राह आद्यम् । ननु देहानामेवागमापायित्वं पुरुषो जीवस्त्वाद्य एव सर्वस्तत्राह ईश्वरम् । ननु स्वर्गे इन्द्रचन्द्राद्या भूमौ राजानोऽपि ईश्वरा उच्यन्ते तत्राह प्रकृतेः परम् । किमहम् अन्तर्यामिपुरुषः । न । अलक्ष्यम् । अंतर्यामिबुद्ध्यादिप्रकाशलक्ष्य एव । किं ब्रह्म न । अन्तर्बहिश्च अवस्थितम् ॥ १८ ॥ ❀ ❀ यस्मादन्तरुत्तरागर्भस्थो बालकं च रक्षितवानसि बहिश्चास्मांश्च रक्षन् समीपे च तिष्ठसीति किं त्वं परिच्छिन्नोऽसि व्यापको वेति त्वामहं ज्ञातुं न शक्नोमीत्याह । मायैव जवनिका तिरस्करिणी तया आच्छन्नम् । ननु किं माया मामावृणोति तत्राह अज्ञा मेघाच्छन्नं सूर्यमहं न पश्यामीतिवन्मायया मद्दृष्ट्याच्छादनात् त्वामप्याच्छन्नं पश्यामीत्यर्थः । यतोऽधोक्षजं अधः स्थितमक्षजं ज्ञानं यस्येति ऐंद्रियकं ज्ञानं यस्याधः स्थितमेवन्न स्प्रष्टुं प्रभवतीत्याहमैन्द्रियकज्ञानवती अज्ञैव, न च मादृशनिकृष्टजननाज्ञेयत्वे तव कापि क्षतिरित्याह अव्ययमिति । ननु मांसाक्षात् पश्यसि स्तौषि प्रकृतेः परत्वेन जानासि तदप्यज्ञासीत्यात्मानं किमिति निंदसि इत्यत आह न लक्ष्यसे इति । नाट्यधरः गीयमानगीतपदार्थाभिनयरसानुरूपनृत्यतालादिविशिष्टो नटो मूढदृशा संगीतशास्त्रानभिज्ञेन नटोऽयं नटतीत्येवं दृष्टोऽपि यथा न लक्ष्यते न ज्ञाततत्त्वो भवति तथैव त्वं मया दृष्टोऽपि न लक्ष्यसे इति तथेत्यस्य पूर्वेणैवान्वयः । पाण्डवान् स्वभक्तान् पालयन्नपि सर्वान्तर्याम्यपि मुहुरप्यश्वत्थामादि पाण्डववधार्थमस्त्रं ग्राहयसि स्वयं न्यस्तशस्त्रोऽपि अस्त्रं गृह्णासि शिष्टपालनप्रवृत्तोऽपि भीष्मादीन् संहारयसि द्रौपदीसुभद्रयोरतिस्निह्यन्नपि तत्पुत्रान् घातयसीत्येवमादिका तव लीला कितत्त्वेत्यहं न जानामीति भावः ॥ १९ ॥ ❀ ❀ स्त्रीजातेर्मम का वार्ता सर्वज्ञा मुनयः परमहंसा अपि यल्लीलामाधुर्येण कृष्टा भजंत्येव तद्भजनतत्त्वमप्यविद्वांसो लीलालास्यं किं ज्ञास्यन्तीत्याह परमेति । अमलात्मनां गुणमयमालिन्यान्निष्क्रांतानां जीवन्मुक्तानामित्यर्थः । तेषामपि भक्तियोगविधानमर्थः प्रयोजनं यस्य तं यदुक्तम्-आत्मारामाश्चेत्यादौ कुर्वंत्यहैतुकीं भक्तिमिति ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पृथा कुंती इदं वक्ष्यमाणमाह ॥ १७ ॥ ❀ ❀ त्वा त्वां नमस्येऽहं नमस्करोमि । ननु भ्रातृपुत्रं युधिष्ठिरभीमाभ्यां स्वपुत्राभ्यामपि कनिष्ठं कस्मान्नमस्करोषि तत्राह आद्यमिति । किं प्रधानं नेत्याह । प्रकृतेः परं पुरुषमिति । किं कमपि जीवविशेषं नेत्याह । ईश्वरमिति । ननु जीवेषु केचिदीश्वरा अपि संति तं नमस्करोषि किं नेत्याह सर्वभूतानामंतर्बहिरवस्थितमिति "अंतः प्रविष्टः शास्ता जनानां, यच्च किंचित् जगत्यस्मिन् दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे"त्यादिश्रुतिस्मृतिप्रतिपाद्यं परं तत्त्वमित्यर्थः । तर्हि सर्वत्र कुतो मां जना न पश्यंति तत्राह । अलक्ष्यमिति साधारणैश्चक्षुरादिभिरग्राह्यमित्यर्थः "न चक्षुषा पश्यति कश्चिदेन" मित्यादिश्रुतेः । योगशुद्धैः करणैस्तु भवदनुग्रहभाजनो भवंतं पश्यत्येवेति भावः, "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् । दृश्यते त्वग्र्यया बुद्ध्यासूक्ष्मया सूक्ष्मदर्शिभिः"

इत्यादिश्रुतिभ्यः ॥ १८ ॥ ❀ ❀ मायावृतत्वेनाल्पज्ञत्वेनात्मनो दैन्यं निवेदयंती अनावृततया भगवंतं विशिनष्टि। माया त्रिगुणा सैव जवनिका "प्रतिसीरा जवनिका स्यात्स्यात्तिरस्करिणी च से"ति कोशाज्जवनिका व्यवधानपटी तया अच्छन्नमनावृतम् 'एतदीशनमीशस्य प्रकृतिस्थोपि तद्गुणैः। न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रये'ति। 'विलज्जमानया यस्य स्थातुमीक्षापथेमुये'ति च वक्ष्यमाणात्, अधोक्षजम्। अधोऽक्षजमिंद्रियजन्यं ज्ञानं यस्मात्तं सर्वज्ञम्। अव्ययं निर्विकारम्, अहमज्ञा अल्पज्ञा जीवस्य मायावृतस्याज्ञो जंतुरित्यादिवाक्यैरज्ञत्वावगमात्। नमस्ये इति पूर्वेणान्वयः। ननु धृतराष्ट्रादिभिस्त्वत्पूज्यैः पांडवकृते पंचग्रामयाचनाय सभायां प्रविष्टं तदप्रदानेनासत्कृतं मां किमेवं नमस्करोषीत्यत्राह नेति। नाट्यधरः मूढदृग्धनादानाय स्वज्ञातिचेष्टावान् नटः स्वरूपेणैवावस्थितः मूढदृशा न लक्ष्यते यथा तथा त्वमपि तस्य दुर्वृत्तस्यैश्वर्यं जिहीर्षुः स्वरूपेणैवावस्थितः सर्वेश्वरोयमिति मूढदृशा न लक्ष्यसे स्म ॥ १९ ॥ ❀ ❀ किं चैतावत्त्वेन तु कोपि त्वां न जानातीत्याह तथेति यथानंताचिंत्यस्वरूपगुणशक्त्याद्याश्रयस्तथा परमहंसानाम् आत्मानात्मविवेकवतां मुनीनामात्मादिमननशीलानाम् अमलात्मनामात्मादिजिज्ञासार्हाणाम् न लक्ष्यसे तृतीयार्थे षष्ठी। तैः साकल्येन न लक्ष्यसे इत्यर्थः "कोद्धा वेद न यद्वागभ्युत्पद्यते न मनो नविद्मो यथैतदनुशिष्यादि" श्रुतेः, 'न मे विदुः सुरगणाः प्रभवं न महर्षयः' इति श्रीमुखोक्तेश्च। अतः स्त्रियो वयं भक्तियोगविधानार्थं भक्तियोगं विधातुं त्वां कथं पश्येम। अत्र यदि परमहंसैर्लब्धात्मादिविवेकैर्न लक्ष्यसे तर्हि विवेकार्थं मननपरैर्न लक्ष्यसे इति किमु वक्तव्यमित्येवमुत्तरोत्तरं कैमुत्यन्यायो ज्ञेयः ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं भगवता सर्वे रक्षिताः, तत्र कुंत्यादीनामेवं भ्रम उत्पन्नः, वयं सर्वे विषयार्थं रक्षिता इति तथा सति व्यर्थं रक्षणमिति मत्वा भक्त्युपयोगार्थमेतद्भवत्विति प्रार्थयितुं भगवंतं स्तोतुमुपक्रमते इत्याह ब्रह्मतेजोविनिर्मुक्तैरिति। स्वभगिनीं तु स्वयमेव कृतार्थीकरिष्यति उत्तरां च। अतो द्रौपद्या सह पुत्रैश्च सह प्रयाणाभिमुखम् अर्द्धं कार्यं कृत्वा गच्छंतं वक्ष्यमाणमाह तत्र हेतुः सतामिति। सतामयं धर्मः यद्भक्तयर्थमेव सर्वं जीवनादि ॥ १७ ॥ ❀ ❀ स्वरूपगुणलीलादिदुष्टदुर्ज्ञेयत्वलक्षणैः जन्मकारणनिर्द्धारफलदैन्यनिजार्थनैः हृषीकेशं पृथास्तौषीन्नमस्कारपुरःसरम् 'संबंधात् कृतहेलाज्ञा स्वरूपाप्त्यै भवच्छिदम्।' तत्र स्वरूपमाह त्रिभिः नमस्य इति। त्वा त्वां भ्रात्रेयं नमस्कारस्यानुचितत्वमाशंक्य स्वरूपमाह पुरुषमिति नवभिर्विशेषणैः, एतादृशस्य सर्वात्मत्वाद्भेदबोधकनमस्कारानौचित्यमाशंक्याह आद्येति। एवमज्ञात्वा आत्मत्वेन ज्ञातुमेव नमामीत्यर्थः। दृश्यमानापेक्षयानुचितत्वे शंकते परमार्थकथनानुपपत्तिमाशंक्य दृश्यमानं परमानंदरूपं च वदन् नमस्यतीति भावः। आद्यं मूलभूतं बिंबमिति यावत्, जडव्युदासार्थं पुरुषमिति जीवव्युदासार्थमाद्यमिति, एतादृशस्य सर्वकारणत्वात् पितृरूपत्वमुक्तं, स्वाभीष्टसिद्ध्यर्थं रूपद्वयमाह-ईश्वरं प्रकृतेः परमिति। ईश्वरमिति बहिः फलदातृत्वं प्रकृतेः परमित्यंतः फलदातृत्वम्, एतादृशस्य सर्वजनीनत्वे सर्वमुक्तिप्रसंगः वेदानां वैयर्थ्यं च स्यादिति तदर्थमाह अलक्ष्यः सर्वभूतानामिति। प्रत्यक्षतो न दृश्यत एव कार्यद्वारापि लक्षितुं न शक्यते, कार्यकारणयोरेकत्र काप्यनुपलंभात्। अत एव सर्वभूतानां ब्रह्मादीनामपि आकृष्टस्तेन वा लक्ष्यत इति स्वप्रकाशं गुरुणा वा लक्ष्यत इति "आचार्यवान् पुरुषो वेदे"ति श्रुतेः। ततश्च न वेदवैयर्थ्यं न वा सर्वमुक्तिरित्यर्थः, वस्तुत एवायं दुर्ज्ञेयः। न साधनांतराभावादिति "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानतामि"ति श्रुतेः "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनंक इत्था वेद यत्र स ॥" इति तस्मात् दुर्ज्ञेय एव भगवान् किं तत्प्रार्थनयेति तत्राह सर्वभूतानामंतर्बहिः स्थितमिति भगवान् सर्वत्र वर्त्तते ज्ञानं च तस्य सुलभं ज्ञापक एव दुर्लभः। सर्ववस्तुनि वस्तुस्वरूपत्वात् सर्वज्ञकथनं तु विरुद्धधर्मबोधाय। तस्मात् सर्वत्र विद्यमानत्वात् भगवज्ज्ञानं सुलभमिति ॥ १८ ॥ ❀ ❀ ननु तथा सति कथं न सर्वैः प्रत्यक्षीक्रियते घटादिवत् तत्राह-मायाजवनिकाच्छन्नमिति, मायैव जवनिका तिरस्करणी अंतःपट इत्यर्थः, तया आच्छन्नं सर्ववस्तुनि वस्तुस्वरूपत्वेपि माययान्यथा भासमानत्वात् न प्रत्यक्षीक्रियत इत्यर्थः। अत एव ममापि बहिर्मुखत्वात् न ज्ञानमित्यज्ञा, ननु न सर्वे सर्वत्र भ्रांताः किंतु कचिदेव कश्चिद् दोषसहकृतेंद्रियजन्यत्वाद् भ्रमस्य, अतः कदाचिन्निर्दुष्टैरिंद्रियैर्घटवद् गृह्येतेति चेत्तत्राह अधोक्षजमिति अधः अक्षजं ज्ञानं यस्मात् इन्द्रियजन्यज्ञानं भगवंतं न विषयीकरोति "परांचि खानि व्यतृणत् स्वयंभूः। तस्मात् पराङ्पश्यति नांतरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नि"ति श्रुतेः। अतो वस्तुस्वरूपत्वेपि नेन्द्रियप्रत्यक्षत्वं भगवतः। ननु सर्ववस्तुनि वस्तुस्वरूपत्वमनुपपन्नं सर्ववस्तूनां नाशप्रतियोगित्वात् कारणत्वेपि कारणत्वं गच्छेत् आधारत्वम् आधेयत्वेप्याधेयत्वमिति अतोऽधर्मरूपेण धर्मरूपेण वाव्ययसंबंधसंभवात् कथं ब्रह्मत्वमत आह अव्ययमिति। सर्वरूपत्वेपि व्ययं तं विनाशित्वं विरुद्धधर्मत्वेनोक्तत्वात् तस्मान्निर्दुष्टं पूर्णगुणविग्रहं त्वां नमस्य इति। ननु तादृश एव स एवाहं चेदवतीर्णः तदा सर्वप्रत्यक्षं मां कथं न जानीयुः धर्माणामपि स्वप्रकाशत्वात् तत्राह न लक्ष्यस इति। मूढदृशा न लक्ष्यसे। ननु प्रत्यक्षः कथं न लक्ष्यते तत्राह नटो नाट्यधरो यथेति यथा नटः स्त्रीरूपं प्रकटयन् बहिर्मुखैर्न ज्ञायते पुरुष इति, तथा नटभावं प्रकटयन् आविर्भूतो भगवत्त्वेन न ज्ञायत इत्यर्थः ॥ १९ ॥ ❀ ❀ ननु आविर्भावान्यथानुपपत्त्या सर्वेषां ज्ञापनार्थमेवाविर्भूत इति कथमुच्यते न ज्ञायस इति। नहि भगवान् वंचनार्थ-

माविर्भूतो रसजननायैवेत्याशंक्याह तथा परमहंसानामिति। भगवान् भक्तियोगार्थमाविर्भूतः वेदान् ऋषींश्चावतारयित्वा तैः ससाधने ज्ञाने उत्पन्ने यदग्रिमं कार्यं तदर्थमवतीर्णः। तद्ज्ञाने संन्यासोऽगं यतः करणबोधकत्वात् "संन्यासयोगात् यतयः शुद्धसत्त्वा" इति श्रुतेः, अन्नादेर्दोषाजननाच्च तदनुमननमंगं, श्रवणस्य पूर्वमेव निष्पन्नत्वात् तदनु निदिध्यासनयुक्तानां च। निदिध्यासनं हि चित्तैकाग्र्यं तत्र भगवन्निर्धारो वा तत्रांतरंगमंगं श्रद्धांतःकरणे तेषां ज्ञानाधिकारिणां जाताज्ञानानां वा भक्तियोगव्यतिरेकेण भगवज्ज्ञानं सायुज्यं वा न भवतीति तथा अवतीर्णमित्यर्थः। हंसास्तु विविक्तज्ञा ज्ञानवंतः केवलमात्मानमेव ये पश्यंति ते परमहंसाः यद्यपि सर्वे नित्यं पश्यंति, तथापि रसिकानामेव रसोत्पत्तिः, नहि नपुंसकानां स्त्रीणां वा स्त्रीरूपेण नृत्ये क्रियमाणे शृंगाररस उत्पद्यते, प्रत्युत स्वसमानधर्माविष्कारं कृत्वा विडंबयतीति खेद उत्पद्यते तथा साधारणस्त्रीपुरुषाणां दैत्यांशानां च रसो न ज्ञानं न वा भक्तिरिति तद्वचनार्थं नटलीलां करोतीति स्त्रियो वयं कथं जानीमः। प्रत्युत लज्जाकार्यायस्मद्दोषहेतुरूपप्राकट्यात् दोषयुक्ताः परं भविष्याम इत्यर्थः॥ २०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नमस्य इत्यत्र। एवमज्ञेति। एतादृशं भवन्तं शब्दादिना जानन्त्यप्यात्मत्वेनाजानन्तीत्यर्थः। दृश्यमानापेक्षयेति। दृश्यमानं मनुष्यत्वक्षत्रियत्वादि तदपेक्षया। जडव्युदासार्थमिति। आद्यत्वं प्रकृत्याकाशादीनामपि तत्तन्मते वर्तते इति तद्व्युदासार्थमित्यर्थः। तर्ह्याद्यपदमनतिप्रयोजनमित्याशङ्कायामाहुः जीवेत्यादि। पितृरूपत्वमिति। 'पिताहमस्य जगत' इति वाक्योक्तं तद्रूपत्वम्। न दृश्यत इति। 'पराञ्चि खानी'ति श्रुतेस्तथेत्यर्थः। कार्येत्यादि। सर्वानुमानापेक्षया कार्यलिङ्गकानुमानस्य सर्वथानुमापकत्वेपि भगवतोऽदृश्यत्वेन कार्यस्य तत्सहचारादर्शनेन व्याप्तिनिश्चया(भावा)त्तथेत्यर्थः। अत एवेति। उक्तस्वभावत्वादेव अपीति। अलक्ष्यमिति शेषः। तेनालक्ष्यपदस्यावृत्तिर्बोध्या। गुरुणा वेति। अपदस्य गुरुवाचकत्वात्तथेत्यर्थः। अज्ञत्वकथनमिति। 'न वेद स' इति श्रुतावज्ञत्वकथनमित्यर्थः। कारणत्वं गच्छेदित्यादि। कारणत्वादीनां स्वरूपसम्बन्धविशेषत्वेन स्वरूपद्वयात्मकत्वादेकतरनाशेपि तथात्वादित्यर्थः॥ १७-१८॥ ❀ ❀ तथा परमेत्यत्र। आविर्भावान्यथानुपपत्त्येति अज्ञापनार्थत्वे तदनुपपत्त्येत्यर्थः। रसजननायेति नवरसोत्पादनायेत्यर्थः। दोषहेतुरूपेति। दोषप्राकट्यहेतुरूपेत्यर्थः॥ १९॥ ❀ ❀ कृष्णायेत्यत्र। स्वोद्धारार्थमिति। स्वकीयोद्धारार्थम्। अज्ञानदशायामनमस्कार्यत्वे दृष्टान्तः यथेत्यादि। अस्मिन् पक्षे वासुदेवपदं मूलरूपपरम्। इदं च सूतेनानूद्यते इति सत्त्वोपहितमेव मूलरूपं स्यादित्यरुच्या पक्षान्तरमाहुः कृष्णायेति वेति। पालकपुत्र इति। पालकस्य पुत्र इत्यर्थः। ननु कुमारपदेन कथमेतदुपलभ्यत इत्यत आहुः स्कन्द इत्यादि। वसतीवरीवदिति। यथायं शब्दो यज्ञियजलविशेषवाचको निगमसिद्धस्तथेत्यर्थः। सम्बन्धमोचकत्वमिति सम्बन्धेन मोचकत्वम्॥ २०॥

श्रीगिरिधरकृता बालप्रबोधिनी

ततश्च ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैर्युधिष्ठिरादिभिः कृष्णया द्रौपद्या च सह पृथा कुन्ती प्रयाणाभिमुखं कृष्णमिदं वक्ष्यमाणमाहेत्यन्वयः। यतः सती भगवद्भक्तेत्यर्थः॥ १६॥ ❀ ❀ कुन्तीवाक्यान्येव दर्शयति—नमस्य इति षड्विंशत्या। त्वा त्वां नमस्ये नमस्करोमीत्यन्वयः। भ्रातृव्यनमस्कारस्यानौचित्यमाशङ्क्येश्वरत्वमुपपादयति—पुरुषमिति नवभिर्विशेषणैः। पुरुषं सर्वान्तर्यामिणम्। आद्यं सर्वोपादानम्। ईश्वरं सर्वपालनोपसंहारादिकर्त्तारम्। तर्हि सर्वत्रासक्तिः स्यादित्याशङ्क्याह—प्रकृतेः परमिति, प्रकृतिकार्येष्वहम्ममेत्यभिमानरहितमित्यर्थः। एवम्भूतः स कास्तीत्यपेक्षायामाह—सर्वभूतानां सर्वप्राणिनामन्तर्बहिश्चावस्थितमिति। तथापि सर्वेषामलक्ष्यमिति॥ १८॥ ❀ ❀ तत्र हेतुमाह—मायेति, मायैव जवनिका तिरस्करणी तया आच्छन्नं तिरोहितस्वरूपमित्यर्थः। अत एव अज्ञाधोक्षजमिति। अज्ञानां अविवेकिनां अनुपासकानां अधः अक्षजं अक्षाणि इन्द्रियाणि तज्जं ज्ञानं यस्मात्स तथा तम्, अज्ञेन्द्रियजन्यज्ञानाविषयमित्यर्थः। अव्ययं न व्येति न विविधं जन्मादिविकारं गच्छतीति तथा तमित्यर्थः। अज्ञाधोक्षजत्वमेव सदृष्टान्तमुपपादयति—नेति। यथा नाट्यधरो नटो मूढदृशा तद्याथात्म्यमजानता पुंसा नाट्योपयुक्तवेषविशिष्टतया दृश्यमानोऽपि परमार्थस्वरूपेण न दृश्यते तथा मूढदृशा देहाद्यात्माभिमानिना अज्ञेन त्वद्भक्तिहीनेन पुंसां त्वं मनुष्यनाट्यधरस्तेन रूपेण दृश्यमानोऽपि सच्चिदानन्देश्वरस्वरूपेण न लक्ष्यसे न दृश्यसे इत्यर्थः॥ १९॥ ❀ ❀ तदेवं "न चक्षुषा पश्यति कश्चिदेनम्। न मांसचक्षुरधिवीक्षते तम्। यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादिशास्त्रसिद्धम् अशुद्धेन्द्रियमनसा अग्राह्यत्वमुक्तम्, तर्हि कैः परमार्थस्वरूपेण दृश्यते इत्यपेक्षायां 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः। मनसैवानुद्रष्टव्यः' इत्यादिशास्त्रसिद्धं योगपरिशुद्धमनोग्राह्यत्वं दर्शयन्ती तत्र स्वस्यानधिकारमाह—तथेति। अमलात्मनां शुद्धान्तःकरणानां भक्तियोगविधानार्थम् अवतीर्णं त्वां वयं स्त्रियः योगादिसाधनहीना अज्ञास्तथा सच्चिदानन्दविग्रहत्वेन कथं पश्येमहीत्यन्वयः। कथं तेषाममलात्मत्वमित्यपेक्षायामाह—परमहंसानामिति। सारासारविवेकित्वेन परमसारभगवद्भजनैकनिष्ठानामित्यर्थः। भगवद्भजनादेवामलात्मत्वमिति भावः। कथं तेषामेवं विवेक इत्यपेक्षायामाह—मुनीनामिति, मननशीलानामित्यर्थः। शास्त्रतात्पर्यविचारादेव तथा विवेक इति भावः॥ २०॥

हिन्दी अनुवाद

जब भगवान् श्रीकृष्ण जाने लगे, तब ब्रह्मास्त्रकी ज्वालासे मुक्त अपने पुत्रोंके और द्रौपदीके साथ सती कुन्तीने भगवान् श्रीकृष्णकी इस प्रकार स्तुति की ॥ १७ ॥ ❀ ❀ कुन्तीने कहा—आप समस्त जीवोंके बाहर और भीतर एकरस स्थित हैं, फिर भी इन्द्रियों और वृत्तियों से देखे नहीं जाते; क्योंकि आप प्रकृतिसे परे आदि पुरुष परमेश्वर हैं। मैं आपको नमस्कार करती हूँ ॥ १८ ॥ ❀ ❀ इन्द्रियोंसे जो कुछ जाना जाता है, उसकी तहमें आप विद्यमान रहते हैं और अपनी ही मायाके परदेसे अपनेको ढके रहते हैं। मैं अबोध नारी आप अविनाशी पुरुषोत्तमको भला कैसे जान सकती हूँ ? जैसे मूढ़ लोग दूसरा भेष धारण किये हुए नटको प्रत्यक्ष देखकर भी नहीं पहचान सकते, वैसे ही आप दीखते हुए भी नहीं दीखते ॥ १९ ॥ ❀ ❀ आप शुद्ध हृदयवाले विचारशील जीवन्मुक्त परमहंसोंके हृदयमें अपनी प्रेममयी भक्तिका सर्जन करनेके लिये अवतीर्ण हुए हैं, फिर हम अल्पबुद्धि स्त्रियाँ आपको कैसे पहचान सकती हैं ? ॥ २० ॥

कृष्णाय वासुदेवाय देवकीनन्दनाय च । नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ २१ ॥
नमः पङ्कजनाभाय नमः पङ्कजमालिने । नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २२ ॥

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ २३ ॥
विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ज्ञानभक्त्योरशक्यत्वमुक्त्वा पुनः केवलं नमस्करोति कृष्णायेति द्वाभ्याम् ॥ २१ ॥ ❀ ❀ पंकजं नाभौ यस्य पंकजानां माला अस्ति यस्य पंकजवत्प्रसन्ने नेत्रे यस्य पंकजांकितावंघ्री यस्य तस्मै ॥ २२ ॥ ❀ ❀ तत्कृतोपकाराननुस्मरति यथेति द्वाभ्याम् । अयमर्थः—मातृतोऽपि मय्यधिका तव प्रीतिः । तथाहि हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमोचिता अहं च तथैव किं विमोचितेति काका महान्विशेष उक्तः । तं दर्शयति साऽतिचिरं रुद्धा सती तस्मादेव सकृद्विमोचिता । तथा शुचार्पिता च सती । न च तस्याः पुत्राः रक्षिताः । अस्ति चान्यो नाथस्तस्याः । अहं तु विपद्गणात्तत्रापि मुहुः शीघ्रं च सात्मजा च त्वयैव च नाथेनेति ॥ २३ ॥ ❀ ❀ विपद्गणमेव दर्शयति । विषाद्भीमस्य विषमोदकदानात् । महाग्नेर्जतुगृहदाहात् । पुरुषादाः हिडिंबादयो राक्षसास्तेषां दर्शनात् । असत्सभायाः द्यूतस्थानात् । अभितो रक्षिता आस्म अभवाम ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवं भूतस्त्वमहो अस्माकमित्थं सुखदस्तापहारी च संवृत्तोसीति तत्तत्स्मृत्वा नमस्करोति । सर्वावतारेष्वयमेव तवावतारो धन्योऽतोहं कृष्णाय नमस्करोमीति । तत्रापि यांस्त्वं स्वीकरोषि तेष्वपि प्रेमवत्सु धन्येषु मध्ये मद्भ्रातापि धन्यो यस्ते पितेत्याह—वासुदेवायेति । ततोप्यधिकप्रेमवती देवकी धन्या या ते मातेत्याह—देवकीं नन्दयसि तदीयगर्भे स्थित्वा तां सर्वतोपि समृद्धिमतीं करोषीत्यर्थः । ततोप्यधिकप्रेमवान्नंदो धन्य इत्याह—नन्दगोपस्य कुमाराय । कौमारलीलामाधुर्यं स एवास्वादितवानिति भावः । ततोपि प्रेमवती धन्या यशोदेत्यग्रिमपद्ये वक्ष्यते । कौमारलीलातोपि व्रजस्थस्य नवकैशोरलीलामाधुर्यमधिकमित्याह गोविन्दायेति । कैशोरारम्भ एव अभिषेकानन्तरं गोविन्दनामख्यातेः । तदैव गाः सर्वेषां सर्वेन्द्रियाणि विन्दत्याकृष्य प्राप्नोषीत्यर्थः । ॥ २१ ॥ ❀ ❀ तदेवमेव सुखदत्वतापहारित्वरूपं निजस्वभावं प्रकटयन्निव पंकजाभैर्निजांगैर्विराजस इत्याह—नम इति । पंकजाकारं भगवल्लक्षणं नाभौ यस्य तस्मै इति सन्दर्भः । तव नाभिमालानेत्रादिषु पतिता मे दृष्टिः शीतलीभवतीति भावः ॥ २२ ॥ तत्कृतोपकारैः स्वतापहारित्वं दर्शयन्ती दीनाहं त्वया स्वमातृवत्पालितेत्याह—हे हृषीकेशेति । मदन्तःकरणं त्वमेव जानासीति भावः । अहं तु तथा न मोचिता किं तु सहात्मजेति मयि विशेषेण तव दया । तत्र हेतुः शुचार्पिता । शुचायां शोक एव मत्कर्मणाऽहमर्पितेति तस्याः सकाशादप्यहमतिदुःखिनीत्यर्थः । किं च त्वयैव नाथेनेति । तस्यास्तु नाथो विद्यत इत्यपत्यांतरोत्पत्तिसम्भावनाया विद्यमानत्वात् । त्वं चापत्यचूडामणिरभूरेव किमन्यैरपालितैर्निकृष्टैः षड्गर्भैरिति भावः । किञ्चाहं मुहुः पुनः पुनरपि यो विपदां गणस्तस्मान्मोचिता । सा तु सकृदेव कंसहेतुको यो विपद्बन्ध एव तस्मान्मोचिता । तत्रापि मद्गर्भे परमेश्वरो जनिष्यत इति मनोनुलाप सुखाभिमानवत्याः कुतो विपद्बन्धोपि । तदनन्तरं विपत्कापि तस्या नाभूदेवेति । अहमेव सर्वतोप्यतिदीनेति मयि तव दीनबन्धुत्वादेव दया । न त्वहं देवकीव त्वयि प्रेमवती भाग्यवती चेति भावः । स्वामिचरणैरयमेवार्थः स्फोटितः अयमर्थ इत्यादिना । त्वयैवेत्येवकारेण बलदेवस्याप्यन्यत्र पक्षपातदर्शनमसूचीति ॥ २३ ॥ ❀ ❀ आदिना बककिर्मीरादिग्रहः । अनेके द्रोणभीष्मकर्णशल्याद्या ये महारथास्तेषामस्त्रेभ्यः ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

जगत्कारणतामाह । नमः पंकजनाभायेति । पंकजं लोकात्मकं पद्मं नाभौ यस्य अपरिच्छेद्यतामाह पंकजमालिने इति । एवंभूतानां पंकजानां माला श्रेणी यस्यास्ति अशेषब्रह्माण्डाधार इति व्याख्यालेशः ॥ २२–३६ ॥

श्रीमद्वीरराघवव्याख्या

नन्ववतारदशायामयोगपरिशुद्धमनोभिरपि सर्वैर्दृश्यमानस्य भगवतः कथमलक्ष्यमज्ञाधोक्षजं न लक्ष्यसे मूढदृशेत्युक्तम् "न मांसचक्षुरभिवीक्षते तं न चक्षुषा पश्यति कश्चनैनमि"त्यादिभिः श्रुतं चादृश्यत्वमिति चेन्न, सर्वैर्देवमनुष्यादिसाजात्येन दृश्यमानत्वेऽपि त्वद्विलक्षणत्वेनादृश्यत्वाद्विलक्षणदर्शनमेव ह्यलक्ष्यमित्यादिभिः प्रतिषिध्यते । नटदृष्टांतेनापि तदेवावगंतव्यं जानंत्या अपि कथं पश्येमहि स्त्रिय इत्युक्तिर्लोकपरिपाट्यभिप्रायिका । यतस्त्वं साक्षात्प्रकृतेः परः, परमपुरुष ईश्वरस्तत एवास्यामवतारदशायामपि स्वभावमजहत्स्वासाधारणान् धर्मान् दर्शयसीत्यभिप्रायेणाह यथेति । हे हृषीकेश खलेन दुरात्मना कंसेन चिरं शुचा शोकेनार्पिता नित्यार्पिता शोकं प्रापितेति यावत्, या च देवकी यथा विमोचिता तथाऽहमपि सपुत्रा हे विभो सर्वशक्ते त्वयैव नाथेन विपदां गणान्मुहुर्विमोचिता, किं किमेतस्य नेत्यादि विमोचितैवेत्यर्थः । अनेन स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षारूपं कृपालुत्वम् आश्रितानिष्टपरिहर्तृत्वं निम्नोन्नतानादरेणाश्रितमात्रपक्षपातित्वं च प्रदर्शितमिति फलितम् ॥ २३ ॥ ❁ ❁ कोऽसौ विपद्गणः यस्मात्त्वं विमोचितेत्यत्राह विषादिति । महाग्नेर्लाक्षागृहाग्नेः पुरुषादानां राक्षसानां दर्शनाद्भयात् वनवासकृच्छ्रतः वनवासक्लेशात् मृधे मृधे प्रतियुद्धं महारथानामस्त्रेभ्यः द्रौण्यस्त्रतः ब्रह्मास्त्राद्धे हरे रक्षिताः स्म अभवाम । विषादिभ्यो रक्षणप्रकारो महाभारतादवगंतव्यः, विस्तरभयान्नात्र लिख्यते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तर्हि स्त्रीणां भगवदुपासनाभावेन तज्ज्ञानाभावान्मोक्षाभाव इत्याशंक्य तत्स्तुतिरेव अपरोक्षज्ञानजनकतया मोक्षसाधिकेत्यभिप्रेत्य कृष्णं स्तौति कृष्णेति । कृषति विलिखति दारयति मोहपटलमिति कृष्णः तस्मै नमो नमः । नीलोत्पलदलश्यामलाय वा । वसुना दीव्यतीति वसुदेवः आनकदुंदुभिः, तस्य पुत्रो वासुदेवः तस्मै इति । वस आच्छादन इति धातोः इदं जगदाच्छाद्य दीव्यतीति वासुदेवः तस्मै इति वा । बलात् दैत्यनिरसनशीलक्रीडादिगुणसंपन्नाय वासुदेवाय इति वा । देवकी लक्ष्मीः तां नंदयितुं शीलमस्येति देवकीनंदनः तस्मै । नंदगोपनाम्नो राज्ञः कुत्सितं कुष्ठं मारयति नाशयतीति नंदगोपकुमारः, तस्मै । पुराणांतरसिद्धार्थमवलंब्य कथितोयमर्थः । अन्यः प्रसिद्धः गवां विदो लाभो यस्य स तथा तस्मै गवा वेदेन लभ्यत इति गोविन्द इति वा ॥ २१ ॥ पंकजं नाभौ यस्य स तथा तस्मै, पंकाज्जनं जननं यस्य तत्पंकजनं पद्मं तत् आभवति अभिभवति आभातीति वा पंकजनाभः, तस्मै । पंकजै रचिता मालाऽस्यास्तीति पंकजमाली तस्मै । पंकजदलवन्नेत्रे यस्य स तथा तस्मै । पंकजै रचिता रेखा तद्युक्तोऽङ्घ्रिर्यस्य स तथोक्तस्तस्मै ॥ २२ ॥ ❁ ❁ हृषीकेश इंद्रियगणनाथ 'कसि हिंसायामि'ति धातोः कंसेन हिंसाशीलेन इन्द्रियारामेणाचिरकारागृहे रुद्धा शुचार्पिता देवकी त्वया यथा विमोचिता हे विभो सहात्मजा पुत्रैः सहिताऽहं त्वयैव नाथेन विपद्गणात् मुहुर्विमोचितेत्येकान्वयः ॥ २३ ॥ ❁ ❁ विपद्गणं विविच्याह विषादित्यादिना । हे हरे वयं भीमाय दत्तात् कालकूटविषात् जतुगृहदाहप्रयुक्तमहाग्नेः पुरुषादानां हिडिंबबककिर्मीरादीनां दंशनाद्भक्षणादसतां दुर्योधनादीनां द्रौपदीकेशग्रहणादिनिंदितकर्मणां सभायाः वनवाससंकटान्मृधे मृधे रणे रणे अनेकेषां महारथानां नागाद्यस्त्रतः तथाश्वत्थाम्नो ब्रह्मास्त्राच्च त्वयाऽभिरक्षिता आस्म इत्येकान्वयः । तस्मादहमद्य त्वां शरणं गताऽस्मीति वाक्यशेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवंभूतोऽपि त्वमहो अस्माकमित्थं सुखदस्तापहारी च संवृत्तोऽसीति तत् तत्स्मृत्वा नमस्करोति कृष्णायेति ॥ २१ ॥ तदेवमेव सुखदत्वतापहारित्वरूपं निजस्वभावं प्रकटयन्निव पंकजनाभैर्निजांगैर्विराजसे इत्याह नम इति । पंकजाकारं भगवल्लक्षणं नाभौ यस्य । पंकजे इव अंघ्री यस्य ॥ २२ ॥ ❁ ❁ स्वतापहारित्वमेव दर्शयति यथेति । त्वयैवेति बलदेवस्याप्यन्यत्र पक्षपातदर्शनेन स्वपुत्रादिसाहाय्यमपि त्वदनुग्रहेणेति भावः ॥ २३ ॥ ❁ ❁ असत्सभाया द्रौपदीवस्त्रवर्धनादि ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतः सर्वावतारेषु मध्ये त्वमेवातिश्रेष्ठ इत्याह कृष्णायेति । तत्रापि यांस्त्वं स्वीकरोषि तेष्वपि प्रेमवत्सु धन्येषु मध्ये मद्भ्राता अतिधन्यो यस्ते पितेत्याह वासुदेवायेति । ततोऽपि अधिकप्रेमवती देवकी धन्या या ते मातेत्याह । देवकीं नन्दयसि तदीयगर्भे स्थित्वा तां सर्वतोऽपि समृद्धिमतीं करोषीत्यर्थः । ततोऽप्यधिकप्रेमवान् नन्दो धन्य इत्याह । नन्दगोपस्य कुमाराय कौमारलीलामाधुर्यं स एवास्वादयामासेति भावः । ततोऽपि प्रेमवती धन्या यशोदेत्यग्रिमश्लोके वक्ष्यते । कौमारलीलातोऽपि

व्रजस्थस्य तव कैशोरलीलामाधुर्य्यमधिकमित्याह गोविंदायेति । कैशोरारंभे एवाभिषेकानन्तरं गोविंदनामख्यातेः तदैव गाः सर्वेषां सर्वेन्द्रियाणि विंदसे आकृष्य प्राप्नोषीत्यर्थः । असाधारण्येन तदास्वादकजनास्तु रहस्यत्वेन स्वीयरसास्वादनानौचित्येन च नोट्टंकिताः ॥ २१ ॥ ❀ ❀ अहं तु तेषां मध्ये न गणनीया, तदपि मन्नेत्रसुखदोऽसीत्याह नमः पंकजेति । तव नाभिमाला नेत्रादिषु पतिता मे दृष्टिः सुखशीतला भवतीति भावः ॥ २२ ॥ ❀ ❀ किञ्चाहमतिदीना त्वया मातेव पालितेत्याह यथेति । हे हृषीकेशेति मदन्तःकरणं त्वमेव जानासीति भावः । अहञ्च तथा मोचिता किन्तु सहात्मजेति मयि विशेषेण तव दया । तत्र हेतुः शुचार्पिता शुचायां शोके एव मत्कर्म्मणा अहमर्पिता इति तस्याः सकाशादप्यहमतिदुःखिनीत्यर्थः । किञ्च त्वयैव नाथेनेति तस्यास्तु नाथो वसुदेवो विद्यते इत्यपत्यान्तरोत्पत्तिसंभावनाया विद्यमानत्वात् त्वञ्चापत्यचूडामणिरभूरेव किमन्यैरपालितैर्निकृष्टैः षड्गर्भैरिति भावः । किञ्चाहं मुहुः पुनः पुनरपि यो विपदां गणस्तस्मान्मोचिता । सा तु सकृदेव कंसहेतुको यो विपद्गन्ध एव तस्मादेव मोचिता तत्रापि मद्गर्भे परमेश्वरो जनिष्यते इति मनोऽनुलापसुखाभिमानवत्याः कुतो विपद्गन्धोऽपि तदनन्तरं विपत् क्वापि तस्या नाभूदेवेति अहमेव सर्व्वतोऽप्यतिदीनेति मयि तव दीनबन्धुत्वादेव दया न त्वहं देवकीवत्त्वयि प्रेमवती भाग्यवती वेति भावः ॥ २३ ॥ ❀ ❀ विपद्गणमेव दर्शयति । विषाद् भीमस्य विषमोदकदानात् । महाग्नेर्जतुगृहदाहात् । पुरुषादा हिडिम्बादयो राक्षसाः । असत्सभाया द्यूतस्थानात् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतो "ब्रह्मविदाप्नोति परम् । ज्ञात्वा मां शान्तिमृच्छती"त्यादिश्रुतिस्मृत्यनुसारेण भगवन्तं ज्ञात्वा प्रेम्णा नमस्करोति कृष्णायेति द्वाभ्याम् ॥ २१-२२ ॥ ❀ ❀ अथ यथेति द्वाभ्यां भगवत्कृतोपकारान्स्मरति । यथा त्वया देवकी विमोचिता तथाहं च विमोचितेति सामान्योक्तिः । तत्र विशेषं दर्शयति सा तु शुचार्पिता कंसहतपुत्रशोकव्याप्ता सुचिरं खलेन दुरात्मना कंसेन रुद्धा सती सकृद्विमोचिता । अहं तु विपद्गणात्सहात्मजा मुहुः । शीघ्रं च विमोचितेति मातृतस्तव मयि कृपातिशय इति भावः ॥ २३ ॥ ❀ ❀ तदेवाह । विषात्कामकोष्ठ्याख्ये गंगायां स्थाने दुर्योधनेन भीमाय दत्तात् । महाग्नेर्वारणावते ग्रामे जतुगृहदाहात् । पुरुषाददर्शनात्पुरुषादानां हिडिंबबकजटासुरादीनां दर्शनात् । असत्सभाया द्यूतस्थानात् । वनवासकृच्छ्रतः वनवासे प्राप्तात् बहुविधात्क्लेशात् । मृधे मृधेऽनेकमहारथास्त्रतः । प्रतियुद्धमनेकानां महारथानां भगदत्तादीनां विष्णवस्त्रादिभ्यः । द्रौण्यस्त्रतः । छद्मना पितरं हतं दृष्ट्वा प्रकुपितेन द्रौणिना सर्वेषां नाशाय प्रादुष्कृतान्नारायणास्त्रात् ब्रह्मास्त्राच्च । हे हरे त्वयाभितः परितो रक्षिताः । आस्म भवामः ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं स्वरूपमुक्त्वा गुणान् वदन्ती सर्वसंबंधेन नमस्यति कृष्णायेति । नाम्ना भ्रातृपुत्रत्वं यान्येव नमस्करणीयानि रूपाणि तान्येव भगवान् स्वोद्धारार्थं स्वस्य सर्वसंबंधान् पुरस्कृत्यावतीर्ण इति ज्ञातेन नमस्करणीयानि । भवंति यथा महतः प्रक्षीणदशायां सेवकत्वे लज्जया नमस्कारं करोति लोकः । ननु केवलं मन्यते कृष्णायेति वा मूलरूपस्यानुवादः मूलमनूद्य हि संबंध-निरूपणेन नमस्करणीयो भवति वासुदेवायेति भ्रातृपुत्रत्वं भ्रातृनिरूपणेन भ्रातरं मोचयन् तद्भगिनीमपि मोचयेदिति तथा देवकी-नंदनायेति देवकीं मोचयन् तन्ननन्दामपि मोचयेदिति चकारात् पितृभ्रामकं मोचयन् तत्पत्नीमपि मोचयेदिति पांडवप्रियायेति नमस्करणीयं रूपं तथा दूरसंबंधेऽपि मोचयेदिति वसुदेवमित्रसंबंधमाह नंदगोपकुमारायेति । कुमारः पालकपुत्रः स्कांदे तथोपलब्धेः, गोपसंबंधेनापि मोचयेदिति गोपपदं सन्मार्गवर्त्तिनां सर्वेषामेव सर्वाभीष्टप्रद इति । गवामिन्द्राय 'इन्द्रं नस्त्वाभिषेक्ष्याम' इति वचनात् गोविंदायेति निगमादस्य सिद्धिः निगमनिरुक्तव्याकरणैस्त्रेधा पदसिद्धिः गोविन्द इति । चाभ्यधादिति निगमस्थानीयं वसतीवरीवत् निगमनाद् द्विरुक्तिरादरात् । अनेन संबंधमोचकत्वं गुणोऽप्युक्तः ॥ २१ ॥ ❀ ❀ गुणांतरानाह-नमः पंकजनाभायेति जगत्कारणत्वभूषितत्वकृपाश्रयत्वसुखसेव्यत्वगुणैर्नमस्यति । नमनं हि स्वरूपे गुणे वा न लीलादौ रसावेशात् पंकजं नाभौ यस्येति ब्रह्मपितृत्वं पंकजमालिने इति । लक्ष्मीपतित्वं सा हि विवाहे नवपंकजमालां प्रक्षिप्तवती पंकजनेत्रायेति । सर्वपतित्वं वश्यतासंपा-दकत्वेनामृतवर्षणाद्वा पंकजांघ्रय इति । भक्तिप्रवर्तकाय सर्वजनकत्वेन सर्वमुत्पाद्यापि प्रयच्छेत् ऐहिकामुष्मिकं प्रयच्छति भक्तिं चेति गुणाः ॥ २२ ॥ ❀ ❀ लीलामाह त्रिभिः यथेति । मुख्यलीला हृषीकेशेति । सर्वेषामिन्द्रियाणां नियामकत्वेन भर्तृवद्रमणात् त्वत्तः सर्वेन्द्रियप्रीतिमनुभूय तद्रसाभिनिविष्टाः के वा न नमेयुरित्यर्थः । किंच तवैषा महती लीला मातरं पितरं च खलेन बंधनं कारयित्वा बहुकालं च दुःखानुभवं च कारयित्वा पश्चान्मोचयसीति अतस्तदपेक्षया वयमेव कृतार्था इति । तवैषा लीला वक्तुमप्यशक्या भक्तमोचकस्य गुणत्वेऽपि लीला गुह्या, गुण एव तथात्वेन कर्त्तव्यः यथा खलेन कंसेन देवकी च रुद्धा सती त्वया विमोचिता अतिचिरं शुचार्पितापि विमोचिता शोकमपि दूरीकृतवान् तथाहं च चकरात् यशोदानंदयोरपि मयि पुनर्विशेषोऽप्यस्तीत्याह सहात्मजा अनेन ममात्मजा अपि मोचिताः तस्यास्तु भवानेवात्मज इति । नात्मजांतरापेक्षा अथवा तस्या बहवः पुत्रा मारिताः, ममत्वेक एवेति तद्विपरीतत्वं मयि कथमेवं करणं तत्राह विभो इति । हे सर्वकरणसमर्थ, किंच

त्वयैव नाथेन त्वमेव नाथो भूत्वा मोचयसे अथवा नाथेन सह सा मोचिता। अत्र तु तदभावात् त्वमेव नाथ इत्यर्थः। तव नाथभवननाथमोचनयोराश्र एव श्रेयानित्यहमुत्तमा लीलायां विपरीतकथनमप्युक्तमम्। किंच विपद्गणात् मुहुः सा न मोचिता किंतु वारद्वयमेव, अहं तु बाल्यादारभ्य वारं वारं विमोचितेति। किंच विपद्गणात् विपदां समूहात् एकस्यामापदि गणशोऽप्यन्या आपदः समायांति ता भारते प्रसिद्धाः॥ २३॥ ❀ ❀ ता आपदो गणयति विषादित्यादि। भगवत्त्वेन सर्वकर्तृत्वात् विषादावपि मोचकत्वमुक्तं विषात् विषमोदकात् सर्पविषाच्च महाग्निर्लाक्षागृहे हिडिंबादयः पुरुषादाः तेषां दर्शने जातेऽपि रक्षिताः, असत्सभाया द्रौपदीनिग्रहे कबरे केशाकर्षणादौ वनवासकृच्छ्रतः द्रौपदीहरणदुर्वासः-प्रभृतीनां वनवासकृच्छ्रत इति वनेऽपि राज्यैश्वर्यदानात् तदनु युद्धं मृधे गोग्रहणमारभ्य अद्यावधि यावंतः संग्रामा जाताः। अनेके महारथा भीष्मादयः, तेषां ब्रह्मास्त्रादिभिः भगदत्तकर्णादीनां त्वप्रतीकार्यता भवद्रक्षा च तत्रैव सिद्धा। सा रक्षा न प्रार्थनया, बाधकस्वरूपाज्ञानात्, अत आह हरे इति हे हरे अभितो रक्षिताः स्मः॥ २४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नम इत्यत्र। पङ्कजनेत्रायेति सर्वपतित्वमिति। 'को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवे'दित्यादिषु पुराणवाक्येषु पुण्डरीकाक्षपदस्य विष्णौ रूढत्वाद्विष्णोश्च लौगाक्षिगृहे 'विष्णवे सर्वाधिपतये स्वाहे'ति वाक्येन सर्वाधिपतित्वस्योक्तत्वात्पङ्कजनेत्रत्वात्तथात्वं कल्पनाक्लेशेनायातीति तद्विहाय प्रकारान्तरेण सर्वपतित्वमाहुः वक्ष्यतेत्यादि। प्रयच्छेदिति। भक्तिं प्रयच्छेत्॥ २१॥ ❀ ❀ यथेत्यादि। महतीति। कौतुकजनकत्वेन दुर्ज्ञेयेत्यर्थः। तर्ह्येतल्लीलानुसन्धाने किं वक्तव्यमित्यपेक्षयामाहुः भक्तेत्यादि। गुणत्वेपीत्यत्र गुणत्वेनेति पाठो भाति॥ २२॥ ❀ ❀ विषादित्यत्र। आस्मेति श्रीधरीये पाठः, अत्र तु स्मेत्येव पाठः॥ २३॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं ज्ञानस्य दुर्लभत्वमुक्त्वा भक्तेस्तु सुकरत्वं मत्वा तस्य भक्तवात्सल्यं सूचयन्ती पुनः केवलं नमस्करोति–कृष्णायेति द्वयेन॥ २१॥ ❀ ❀ पङ्कजं त्रिलोकात्मकं नाभौ यस्य तस्मै नमः। पङ्कजानां माला लक्ष्मीसमर्पिताऽस्त्यस्येति तथा तस्मै लक्ष्मीपतये नमः। पङ्कजवन्मनोहरे तापनिवर्त्तके नेत्रे यस्य तस्मै नमः। पङ्कजाङ्कितौ पङ्कजवत्कोमलौ चाङ्घ्री यस्य तस्मै ते तुभ्यं नमः॥ २२॥ ❀ ❀ त्वया तु मातृतोऽपि मय्यधिका प्रीतिः कृतेति सूचयन्ती तत्कृतोपकारान्निवेदयति–यथेति द्वयेन। हृषीकाणीन्द्रियाणि तेषामीशस्य नियामकस्य तव किमविदितं यन्मया विज्ञापनीयमिति सूचयन्ती सम्बोधयति–हे हृषीकेशेति। समर्थस्य दीनरक्षणमुचितमेवेति सूचयन्ती सम्बोधयति–हे विभो इति। खलेन दुर्जनेन कंसेन रुद्धा देवकी त्वया यथा विमोचिता तथाऽहमपि त्वयैव विमोचितेत्यन्वयः। चशब्देन विशेषः सूचितः। साऽतिचिरं रुद्धा सती तस्मादेव सकृदेव विमोचिता तथा शुचार्पिता। पुत्रशोकेन व्याप्तैव विमोचिता न तु तस्याः पुत्रा अपि रक्षिता इति। अहं तु शीघ्रं मुहुर्वारं वारं विपद्गणात् सहात्मजा त्वयैव नाथेन रक्षिताऽस्मि। एवकारेण तस्यास्तु रक्षकान्तरमप्यस्ति मम तु त्वमेवेति दर्शितम्॥ २३॥ ❀ ❀ कोऽसौ विपद्गणो यस्मात्त्वं विमोचिताऽसीत्यपेक्षायां तं दर्शयति–विषादिति। भीमस्य विषमोदकदानात्। महाग्नेर्लाक्षागृहदाहात्। पुरुषा हिडिम्बादयो राक्षसास्तेषां दर्शनात् तज्जन्यभयात्। असत्सभायाः द्यूतस्थानात्। वनवासकृच्छ्रतः वनवासे यो दुर्वासःप्रभृतिजनितः क्लेशस्तस्मात्। मृधे मृधे प्रतियुद्धं येऽनेके महारथा भीष्मादयस्तेषामस्त्रेभ्यः। द्रौणेर्ब्रह्मास्त्रतश्च। हे हरे भक्तदुःखहरणस्वभावत्वादेव सर्वतो रक्षिता आस्म अभवाम। पुत्रादिसाहित्याभिप्रायेण बहुवचनम्॥ २४॥

हिन्दी अनुवाद

आप श्रीकृष्ण, वासुदेव, देवकीनन्दन, नन्दगोपके लाड़ले लाल गोविन्दको हमारा बारम्बार प्रणाम है॥ २१॥ ❀ ❀ जिनकी नाभि से ब्रह्मा का जन्मस्थान कमल प्रकट हुआ है, जो सुन्दर कमलोंकी माला धारण करते हैं, जिनके नेत्र कमल के समान विशाल और कोमल हैं, जिनके चरण-कमलोंमें कमलका चिन्ह है–श्रीकृष्ण! ऐसे आपको मेरा बार-बार नमस्कार है॥ २२॥ ❀ ❀ हृषीकेश! जैसे आपने दुष्ट कंसके द्वारा कैद की हुई और चिरकालसे शोकग्रस्त देवकीकी रक्षा की थी; वैसे ही पुत्रोंके साथ मेरी भी आपने बारबार विपत्तियोंसे रक्षा की है। आप ही हमारे स्वामी हैं। आप सर्वशक्तिमान हैं। श्रीकृष्ण! कहाँतक गिनाऊँ–विषसे, लाक्षागृहकी भयानक आगसे, हिडिम्ब आदि राक्षसोंकी दृष्टिसे, दुष्टोंकी द्यूत-सभासे, वनवासकी विपत्तियोंसे और अनेक बारके युद्धोंमें अनेक महारथियोंके शस्त्रास्त्रोंसे और अभी-अभी इस अश्वत्थामाके ब्रह्मास्त्रसे भी आपने ही हमारी रक्षा की है॥ २३-२४॥

विपदः सन्तु नः[1] शश्वत्तत्र तत्र जगद्गुरो। भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २५ ॥
जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्। नैवार्हत्यभिधातुं वै त्वामकिञ्चनगोचरम् ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यत् यासु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं यस्मात् ॥ २५ ॥ ❀ ❀ सम्पदस्तु श्रेयःपरिपंथिन्य इत्याह। जन्म सत्कुले जन्मादिभिरेधमानो मदो यस्य सः। अभिधातुं श्रीकृष्ण गोविंदेति वक्तुमपि अकिंचनानां गोचरं विषयभूतम् ॥ २६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भगवत्स्मरणविरोधिसम्पत्परम्परातो भगवद्दर्शनकारिविपत्परम्परैव श्रेयसीत्याह। विपदः तत्र तत्र सांसारिकव्यापारेषु अपुनर्भवो मोक्षस्तस्य दर्शनं यस्मात्। हे जगत्पते इति विपदंजनप्रदानेन सम्पन्मदान्धजगतां हितकारी त्वमसीति भावः ॥ २५ ॥ ❀ ❀ परिपंथी विरोधी प्रतिपक्षीति पर्यायाः। ऐश्वर्यं प्रभुत्वं श्रुतं शास्त्रं श्रीर्धनं श्रीकृष्णादन्यन्न किंचनोपादेयं येषां तेऽकिञ्चना भक्ताः ॥ २६ ॥

श्रीमद्वीरराघवव्याख्या

यदेतद्विपद्गणनिवारकत्वन्तदेतत्तव कियदर्थादेव तन्निवृत्तेरित्यभिप्रायेणाह विपद इति। हे जगद्गुरो तत्र शश्वत् सदा तास्त्वया निरसनीया आश्रितानां विपदः संतु असतां न तन्निरसनाय यत्नस्त्वया कार्य इति भावः। यद्यद्यपुनर्भवदर्शनं भवतो दर्शनं स्यात् न विद्यते पुनर्भवस्य संसृतेर्दर्शनं यस्मात्तथाभूतं भवद्दर्शनं यदि स्यात् संभावनायां लिङ् सकलापन्मूलसंसृतिपरिहारक्षमं तद्यदि स्यात् विपदः संतु नाम अर्थादेव तन्निवृत्तेरिति भावः ॥ २५ ॥ ❀ ❀ नन्वहमीश्वरश्चेत्तर्हि त्वमिव सर्वेऽपि मामेवंविधं किं न वदन्तीत्यत आह जन्मेति। ऐश्वर्यशब्दो धनपरः, श्रुतशब्दो विद्यापरः, जन्मैश्वर्यश्रुतानां सत्कुलप्रसवधनविद्यानां श्रीभिः समृद्धिभिरेधमानः मदो यस्य स पुमांस्त्वामभिधातुं न चार्हति। त्रिमदोन्मत्तत्वेनेश्वरपरयाथात्म्यविवेकाभावादिति भावः। अनर्हतामेव सूचयितुं विशिनष्टि-अकिंचनगोचरं नास्ति किंचन येषां ते अकिंचनाः निःकामास्तेषां गोचरम् ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवत्स्मरणविरोधिसंपत्परंपरायाः भगवद्दर्शनकरविपत्परम्परैव श्रेयसी भगवद्दर्शनहेतुत्वादतः संपद्भ्यो भगवद्दर्शनकरविपद एवास्माकं संत्विति विज्ञापयति विपद इति। हे जगत्पते नोऽस्माकं तत्र तत्र सांसारिकव्यापारेषु निरन्तरं विपदः संतु, यासु यासु विपत्सु अपुनर्भवं मोक्षं दर्शयतीत्यपुनर्भवदर्शनं स्यादिति यद्यस्मात्तस्मात्ताः स्युरिति वाक्यशेषः ॥ २५ ॥ ❀ ❀ संपद्भ्यो विपदां श्रेयस्त्वं कुत इति तत्राह जन्मेति। अभिजनैश्वर्यशास्त्रश्रवणजनितविद्याधनश्रीमदैर्वर्धमानमदः पुमान् अकिंचनानां परमहंसानां विषयं ज्ञातुं योग्यं त्वामितीत्थं त्वामभिधातुं वक्तुमुपलक्षणमेतत् स्मर्तुं वा नार्हः। वै यस्मात्तस्मात्स्मरणहेतुविपद एव श्रेयस्यः संपद्भ्य इति भावः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

विपद इति। दर्शनमवलोकनम् यत् यासु। अपुनर्भवम् अन्यत्र कुत्रापि ईदृशमाधुर्याभावात् पुनर्न जातं दर्शनं सम्यक् प्रतीतिर्यस्य तत् अपूर्वमित्यर्थः ॥ २५ ॥ ❀ ❀ मद्विधसम्पदस्तु त्वत्सम्बन्धमात्रपरिपन्थिन्य इत्याह जन्मेति ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

किञ्च ता विपद एव मे सम्पद एवेत्याह विपद इति। हे जगतां गुरो हितकारित्वेन स्वकृपोत्थविपदञ्जनप्रदानेन सम्पत्प्रमादघूर्णाध्वंसिन् यत् यासु विपत्सु भवतो दर्शनम्। कीदृशं नास्ति पुनरपि भवस्य संसारदुःखस्य दर्शनम् यतः ॥ २५ ॥ ❀ ❀ लोके सम्पद एव विपद इत्याह जन्मेति। अभिधातुं कृष्ण गोविन्देत्यभिधानमपि वक्तुम् ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यासु भगवत्स्मरणदर्शनादिकं स्यात्ता विपदोऽपि युक्ताः यासु तन्न स्यात्ताः संपदोऽप्ययुक्ता इत्याह विपद इति द्वाभ्याम्। हे जगद्गुरो ता विपदोऽपि तत्र तत्र जन्मनि जन्मनि नः स्युः। काः ? यत् यासु भवतो दर्शनं स्यात् कीदृक् दर्शनं

१. प्रा० पा०—ताः।

तत्राह अपुनर्भवदर्शनमिति । नास्ति पुनरपि भवस्य जगतो दर्शनं यस्मात् ॥ २५ ॥ ❀ ❀ जन्मैश्वर्यश्रुतश्रीभिः सत्कुलजन्मधनविद्याश्रीभिरेधमानो मदो यस्य सः, नास्ति किंचन येषां तेषां निःकामानां गोचरं विषयमाराध्यं त्वामभिधातुम् हे कृष्णेति वक्तुमपि नार्हति ॥ २६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं नानाविधलीलया भगवत्कृतां रक्षां प्रतिपाद्य लीलाया अद्भुतकर्म वक्तुं रक्षापेक्षया आपद एव समीचीना इति क्षुधितस्यान्नभोजनसुखवत् विपत्पीडितानां भगवद्दर्शनानंदो दुर्लभ इति । लोकानां विपदामनिष्टत्वेऽपि भक्तानामिष्टसाधनत्वात् ताः प्रार्थयते विपद इति । एषा भगवतो विपरीतलीला आपत्सु परमानन्दं प्रयच्छति तदभावे परमानन्दतिरोभावं करोतीति । तत्र यत्रैव स्थीयते गम्यते च, ननु कथमेवं निर्द्धारः क्रियते विपद एव संत्विति कुतः । शिक्षितमेतत्तत्राह जगद्गुरो ! एतत् शिक्षितं यद्विपदः समीचीना इति अंतर्यामितया प्रेरणाद्बहिरप्युपपत्तिदर्शनाच्च यथा सर्वप्राणिनां शिक्षितप्रकारमाह भवतो दर्शनं यत् स्यादिति याभ्यो विपद्भ्यः । दर्शनं यस्य स्यात् तवैव फलरूपदर्शनान्वयव्यतिरेकाभ्यामिदमवगतम् । न विद्यते पुनर्भवस्य दर्शनं यस्मात् पुनः शरीरं न पश्येदित्यर्थः । अथवा अपुनर्भवानां जीवन्मुक्तानां दर्शनं यस्मात् ॥ १५ ॥ ❀ ❀ एवमद्भुतलीलामुपपाद्य दुष्टदुर्ज्ञेयत्वमाह चतुर्भिः जन्मैश्वर्येति । भगवतो हि नव प्रकारा धर्मा ज्ञेयाः नवविधभक्तिहेतवः स्वरूपगुणादिप्रकारेण भिन्नाः । तत्र स्वरूपे ज्ञाते श्रवणं भवति गुणेषु ज्ञातेषु कीर्तनं भवति लीलायां स्मरणम् एवमेकः खंडः । द्वितीयखंडे समीपगमनपूजनवंदनदास्यानि । तृतीये सख्यात्मनिवेदने । तत्र दुष्टदुर्ज्ञेयत्वादीनां तत्र तत्र कारणतामुपपादयिष्यामः । तत्र प्रथमं तावत् दुष्टदुर्ज्ञेयत्वं निरूप्यते । तत्र जन्म सत्कुले ऐश्वर्यं राज्यादौ श्रीपतेर्न ज्ञायते तावत् दुष्टानां बाधककायवाङ्मनोव्यापाराणां दर्शनात् भगवत्समीपं न गच्छेत् ज्ञाते तु पुनः । अंधो न पश्यतीति चक्षुष्मताऽपि न द्रष्टव्यमितिवत् असद्बुद्धीनां बाधप्रतीतिरिति द्वितीये खंडे प्रवर्त्तते । अतः पदसेवनार्थं दुष्टदुर्ज्ञेयत्वं निरूप्यते । तत्र जन्म सत्कुले ऐश्वर्यं राज्यादौ श्रुतं शास्त्रादौ श्रीः संपत् एताभिरेधमानो मदो यस्य अयमर्थः–यथा तंडुलादेस्तुन्दनद्वारा पितृदेवमनुष्यादीनां तृप्तिजनकत्वेनामृतत्वेऽपि मदापेक्षिणां स्वमलत्वेन पर्यवसानात् मादकत्वं तथा सति सत्कुलोत्पन्न इति न तस्य संग्रहः कर्तव्यः । एवमुत्तरत्रापि इममेवान्तं "विद्यामदो धनमद" इति वाक्यं प्रवृत्तं पुमानिति । स्वातन्त्र्येण गुरुभिरनियम्य इत्युक्तम् । अत एव त्वामभिधातुं नार्हति यथा पूर्वं ब्राह्मणोऽपि जात्यन्तरमापन्नो मदिरामत्तो वेदं पठितुं नार्हति पठनेप्युन्मत्तप्रलपितमेव तन्न श्रोतव्यम् । यद्यपि भक्तौ सर्वेऽधिकारिणस्तथापि कृत्रिममदिरादिसम्बन्धे वेदाधिकाराभाववत् मादकस्य न भगवच्छब्दोच्चारणाधिकारः । अतस्तदाचारान्न काचिद्व्यवस्था । ननु "जन्मकर्मावदातानामि"ति वेदाधिकारोक्तेस्तादृशस्य वेदानधिकारो भवतु नाम, भगवतः पुनः सर्वात्मकत्वात् "चक्रांकितस्य नामानि सदा सर्वत्र कीर्तयेदि"ति स्मृतेश्च "पतितः स्खलित" इति वाक्यात् महापातकिनोऽपि प्रायश्चित्तत्वेनोक्तत्वाच्च कथं मत्तस्य नाधिकार इति चेत्तत्राह । अकिंचनगोचरमिति अकिंचनाः पूर्वोक्तरहिताः । तेषां गोचरो गम्यः । अयमर्थः–न तादृशस्याधिकार इति न स्वरूपतोऽधिकारो निवार्यते किन्तु फलतः । भगवानेव हृदये नायाति । भगवद्गुणाश्च मुखे आगच्छन्तो व्यवहारत्वेनागच्छन्ति शौचे गंगाजलवत् अकिंचनगोचरस्वभावत्वात् अद्यापि लोके सर्वे संभाष्यन्ते न मत्ताः । अतस्तेषु कदाचिदपि भगवत्सान्निध्याभावादनधिकार इत्युक्तम् ॥ २६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

जन्मैश्वर्येत्यत्र नवप्रकारा इति स्वरूपगुणेति कारिकया पूर्वमुक्ताः । तदाहुः स्वरूपेत्यादि । तदुपपादयन्ति तत्रेत्यादि । ज्ञात इति । उक्तश्लोकत्रयोक्तप्रकारेण ज्ञाते । एवमग्रेपि । समीपगमन इत्यादि । समीपगमनपदेन पादसेवनम् । तस्मिन् सति तानि भवन्तीति समीपगमनादिर्द्वितीयः खण्ड इत्यर्थः । सख्यात्मनिवेदने इति । एतयोर्दैन्यनिवारकत्वात्तृतीयत्वं बोध्यम् । अप्यग्रेति श्लोके तद्व्युत्पादयिष्यते । तत्रेति तेषु षट्सु । तत्र तत्रेति तत्तच्छ्लोकव्याख्याने । दुष्टदुर्ज्ञेयत्वस्य पादसेवनं प्रति कारणतामुपपादयन्ति तत्र प्रथममित्यादिना । दुष्टानामित्यादि । दुष्टसम्बन्धिनो ये तादृशव्यापारास्तेषाम् । पेयमिति सुरारूपमन्नमलमितिशेषः । तत्कुलस्येति तस्य कुलस्येत्यर्थः । जात्यन्तरमापन्न इति म्लेच्छादिभावं प्राप्तः । मादकस्येति मादकसम्बन्धिन इत्यर्थः । पूर्वोक्तरहिता इति । उक्तचतुर्विधमदरहिताः । इतीति । इदं बोधयतानेन वाक्येनेत्यर्थः ॥ २५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एषा हि भगवतो लोकविपरीता लीला यदापत्सु भक्तानां सन्निधाने स्थित्वा यत्परमानन्दं प्रयच्छति सम्पत्सु तु वियोगेन परमानन्दतिरोभावं करोतीति लौकिकानां विपदामनिष्टत्वेऽपि भक्तानां त्विष्टसाधनत्वात्ता एव प्रार्थयते–विपद इति । 'तं भ्रंशयामि सम्पद्भ्यो यस्य चेच्छाम्यनुग्रहम्' इत्यादित्वद्वचनादेवैवं निश्चितमिति सूचयन्ती सम्बोधयति–हे जगद्गुरो इति । यत्

यस्मिन् देशे यस्मिन् काले च यत् यासु विपत्सु भवतो दर्शनं स्यात्तत्र तत्र ता विपद एव शश्वत्सर्वदा नोऽस्माकं सन्त्वित्यन्वयः। मम दर्शनमात्रेण किं स्यादित्यपेक्षायां परमानन्दावाप्तिपूर्वकसंसारदुःखोच्छेद एवेत्यभिप्रेत्य तद्विशिनष्टि-अपुनर्भवदर्शनमिति, नास्ति पुनर्भवस्य जन्मादिलक्षणसंसारस्य दर्शनं यस्मात्तदित्यर्थः ॥ २५ ॥ ❀ ❀ ननु सम्पदो विहाय विपदः किमिति प्रार्थयसे इत्याशङ्क्य सम्पदां श्रेयःपरिपन्थित्वमाह-जन्मेति । जन्म सत्कुले प्रादुर्भावः, ऐश्वर्यं धनादिसम्पत्, श्रुतं विद्या । जन्मैश्वर्यश्रुतानां श्रीभिः समृद्धिभिरेधमानो वर्धमानो मदो यस्य सः पुमान् त्वामभिधातुं रामकृष्णगोविन्देति तव नामोच्चारयितुं नैवार्हतीत्यन्वयः । शास्त्रेषु-विद्यामदो धनमदस्तथैवाभिजनो मदः । एते मदा मदान्धानां त एव हि सतां दमाः' इति मदान्धत्वस्मरणेन तेषां याथात्म्यविवेकाभावं सूचयति-वा इति । विवेकिन एव सर्वं त्यक्त्वा त्वां भजन्ते इत्याह-अकिञ्चनगोचरमिति । नास्ति त्वद्व्यतिरिक्तं परमार्थतयाऽभिप्रेतं किञ्चनापि वस्तु येषां ते अकिञ्चनास्तेषां गोचरं भजनविषयमित्यर्थः ॥ २६ ॥

हिन्दी अनुवाद

जगद्गुरो ! हमारे जीवनमें सर्वदा पद-पदपर विपत्तियाँ आती रहें; क्योंकि विपत्तियोंमें ही निश्चितरूपसे आपके दर्शन हुआ करते हैं और आपके दर्शन हो जानेपर फिर जन्म-मृत्युके चक्करमें नहीं आना पड़ता ॥ २५ ॥ ❀ ❀ ऊँचे कुलमें जन्म, ऐश्वर्य, विद्या और सम्पत्तिके कारण जिसका घमंड बढ़ रहा है, वह मनुष्य तो आपका नाम भी नहीं ले सकता; क्योंकि आप तो उन लोगोंको दर्शन देते हैं, जो अकिञ्चन हैं ॥ २६ ॥

नमोऽकिंचनवित्ताय निवृत्तगुणवृत्तये । आत्मारामाय शान्ताय कैवल्यपतये नमः ॥ २७ ॥
मन्ये त्वां कालमीशानमनादिनिधनं विभुम् । समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रस्तुतमनोरथपूरणाय पुनः प्रणमति । अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै । ततः किम् । निवृत्ताः गुणवृत्तयो धर्मार्थकामविषया यस्मात्तस्मै । तत्कुतः आत्मारामाय । तत्कुतः शांताय रागादिरहिताय किं च कैवल्यपतये कैवल्यं दातुं समर्थाय ॥ २७ ॥ ❀ ❀ ननु देवकीपुत्रं मां कथमेवं स्तौषि तत्राह । मन्ये त्वां कालं न तु देवकीपुत्रम् । तत्र हेतवः ईशानं नियंतारम् । अनादिनिधनम् आद्यंतशून्यम् । विभुं प्रभुम् । समं यथा भवति तथा सर्वत्र चरन्तम् । ननु पार्थसारथेः कथं मम साम्यं तत्राह । यद्यतस्त्वत्तो निमित्तभूताद्भूतानामेव मिथः कलिः कलहो भवति न तु स्वतस्त्वयि वैषम्यम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न विद्यते किंचिन्मात्रं प्राकृतं वस्तु, अपि तु त्वल्लक्षणं पूर्णचिदानन्दस्वरूपं वस्त्वस्ति येषां त एकांतभक्ता एव वित्तानि धनानीवातिप्रेमास्पदानि सर्वतः संगोपनीयाश्च यस्य तस्मै तेषां वित्तायेति वा । नन्वकिञ्चना दरिद्रा उच्यन्ते । सत्यम् , भगवद्भक्तानां मायागुणवृत्त्याख्याः सम्पदो न सन्तीत्याह-निवृत्ता गुणवृत्तयो विषयभोगा यस्मात्तस्मै । यद्वा निवृत्ता गुणागुणकार्यभूता रागद्वेषादयो येषां ते निवृत्तगुणा जीवन्मुक्तास्तेषु वृत्तिर्वर्त्तनं यस्य । यद्वा तेषां वृत्तिर्यस्मिन् स निवृत्तगुणवृत्तिस्तस्मै । यद्वा गुणैर्वृत्तिर्येषां ते गुणवृत्तयो लम्पटाः, निवृत्ता गुणवृत्तयो यस्मात्तस्मै । अकिंचनेष्वासक्तोऽप्यन्यत्रोदासीन एवेत्याह-आत्मारामाय स्वानन्दमग्नाय । तदात्मारामत्वम् । यद्वा भक्तानामपराधे सत्यपि न त्वं कुप्यसीत्याह-शांताय स्वभक्तेष्वनुग्रहाय । मुमुक्षुभक्तेषूपकारकत्वमाह-कैवल्येति ॥ २७ ॥ ❀ ❀ अत्राक्षिपति नन्विति । तत्र कालत्वे पुनराक्षिपति । न चासक्त्यौदासीन्योपकारापकारकत्वैरपि त्वयि वैषम्यमित्याह-सममिति । यद्यत्र मिथः कलिः कलहः ईश्वरो दुःखदः सुखदः समो विषमो निर्घृणः सघृण इत्यादि । यद्वा येषु भावेषु भूतानां मिथः कलिर्भवति तेषु समं चरन्तमित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

अन्यैश्च चिदचिद्व्यावर्त्तकैरीश्वरासाधारणधर्मैर्विशिंषन्ती नमस्करोति नम इति । अकिंचनानां वित्ताय विद्ल लाभे इति धातुः । विद्यते लभ्यते इति वित्तः तस्मै, निवृत्ता गुणानां रजआदीनां वृत्तयः कामक्रोधादयो यस्य तस्मै, अनेनाचिद्व्यावृत्तिः । शान्तायोर्मिषट्करहिताय । अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मयः । अनेन बद्धजीवव्यावृत्तिः । तत्र हेतुरात्मारामाय स्वानुभवैकपराय कैवल्यं प्रकृतिसम्बन्धराहित्यं मोक्ष इति यावत् तस्य पतिस्तस्मै मोक्षप्रदायानेन मुक्तनित्यजीवव्यावृत्तिः ॥ २७ ॥ ❀ ❀ ननु ब्रह्मरुद्रेन्द्राद्यन्यतमः । कश्चिदुक्तविधो न त्वहमित्यत्राह मन्य इति । ईशानं ब्रह्मादीनपि च वशीकुर्वाणं कालं त्वां मन्ये कालशरीरकं त्वां मन्य इत्यर्थः । अत एव कालकृतजन्ममरणादिरहितम् । नन्वहमपि प्राकृतवद्वैषम्यादिमानेव ततः कालं विशिनष्टि । सर्वत्र समं चरंतं कालयन्तं यद्यस्मात्कालनिमित्ताद् भूतानां मिथः कलिः । कलहो भवति समं चरन्तमित्यनेन कालशरीरकस्य तव

न वैषम्यनैर्घृण्यादिकमस्तीति सूचितं यन्मिथः कलिरित्यनेन । अथापि तत्तज्जीवकर्मानुसारेण सुखदुःखादीन्प्रति भिन्नतया निमित्तमिति सूचितम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रीकृष्णादन्यत्किंचनोपादेयं न विद्यते येषां ते अकिंचनास्त एव वित्तं यस्य स तथा तस्मै । निवृत्ताः सत्त्वादिगुणानां वृत्तयो जाग्रदाद्यवस्था यस्मात्स तथोक्तः, तस्मै । अकिंचनैर्ज्ञातायेति वा । निरन्तरं वृत्ताज्ञानादिगुणानां वृत्तिः स्थितिर्यस्मिन् स तथोक्तः तस्मै वा । अत एवात्मन्यारमत इत्यात्मारामः, तस्मै । आत्मनां चेतनानां आरामाय क्रीडाकृत्रिमभवनाय अत एव शान्ताय सुखपूर्णायात एव कैवल्यपतये मुक्तिनाथाय नम इत्यन्वयः ॥ २७ ॥ ❀ ❀ न विद्येते आदिनिधने यस्य स तथा तमनादिनिधनम् , अनस्य प्राणस्य जन्मलयकर्तारमिति वा । ईशं शिवमानयति चेष्टयतीति ईशानः, तं सर्वेश्वरं वा । जगच्चेष्टाशक्तिमन्तं वा । परं सर्वस्मादन्यं सर्वत्र स्वपरेषु समं यथायोग्यं चरन्तं त्वां कालं संहर्त्तारं मन्ये । कुरुपांडवादिभूतानां यद्यस्मात्त्वं मिथोऽन्योऽन्यं कलिः कलहस्तं त्वामिति वाक्यशेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु अकिञ्चनवित्तत्वेन कियन्माहात्म्यं जातं तत्राह निवृत्तेति । गुणवृत्तिरहितस्य तव यद्भक्तवित्तत्वं तत् परममहदेवेति भावः । तद्धि भक्तानां निर्गुणत्वं सर्वगुणमयादुत्कृष्टत्वञ्च व्यनक्ति आत्मारामायेत्यनेन । ततोऽप्याधिक्यम् आत्मारामस्यापि तद्वित्तत्वात् । एवं शान्तायेत्यादि ॥ २७ ॥ ❀ ❀ स तु तव सुस्वभावस्तर्कागोचर एवेत्याह मन्ये इति चतुर्भिः । कालमन्तर्यामिणम् ईशानं बहिश्च सर्व्वनियन्तारम् । यद्यत्र येषु भावेषु भूतानां मिथः कलिर्भवति तेषु समं चरन्तम् । अत्र प्रथमे समत्वं, द्वितीये समत्वेऽपि भक्ततद्द्वेषिणोरनुग्रहनिग्रहरूपचरितत्वम् , तृतीये तदर्थतल्लीलावतारे परम आवेशः, चतुर्थे तु तत्रापि परम इति ॥ २८-३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अकिञ्चना न विद्यते किंचिन्मात्रं प्राकृतं वस्तु अपि तु त्वल्लक्षणं पूर्णचिदानन्दस्वरूपं वस्तु अस्ति येषां ते एकान्तभक्ता एव वित्तानि धनानीवातिप्रेमास्पदानि सर्व्वतः संगोपनीयाश्च यस्य तस्मै येषां वित्तायेति वा । नन्वकिंचना दरिद्रा उच्यन्ते । सत्यम् , भगवद्भक्तानां मायागुणवृत्त्युत्थाः सम्पदो न भवन्तीत्याह । निवृत्ता गुणवृत्तयो विषयभोगा यस्मात् तस्मै अकिंचनभक्तेष्वेवासक्तिमुक्त्वा अन्यत्र त्वौदासीन्यमाह आत्मारामायेति । भक्तानाम् अपराधे सत्यपि न त्वं कुप्यसीत्याह शान्ताय । स्वभक्तेष्वनुग्रहाय मुमुक्षुभक्तेषु उपकारकत्वमाह कैवल्येति ॥ २७ ॥ ❀ ❀ भक्तापराधिषु संहारकत्वमाह कालमिति । तथा तथा सामर्थ्ये कारणमाह ईशानमिति तथा रूपत्वेन सर्व्वकालदेशस्थितिमाह अनादीति विभुमिति । न त्वासक्त्यौदासीन्योपकारकत्वापकारकत्वैरपि त्वयि वैषम्यमित्याह सममिति । यत् तत्र मिथः कलिः कलहः ईश्वरो दुःखदः सुखदः समो विषमो निर्घृणः सघृण इत्यादि ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुनः भगवद्गुणान्वक्तुं तावत्प्रणमति । निवृत्ताः रजआदिवृत्तयो यस्मात्तस्मै, कैवल्यं कार्यकारणरूपप्रकृतिसम्बन्धराहित्यं तत्पतये तद्दातुं समर्थाय ॥ २७ ॥ ❀ ❀ ननु निवृत्तगुणवृत्तित्वादात्मारामत्वं शान्तत्वं त्वत्पुत्रसारथ्यादिकर्म च कथं घटते तत्राह मन्ये इति । त्वां कालं "यः कालकाल" इति श्रुतिप्रसिद्धं कालशक्तिं जगत्कालयन्तं मन्ये इत्यर्थः । ईशानं सर्वचिदचिदात्मकं विश्वं स्ववशीकुर्वाणम् । आदिश्च निधनं चादिनिधने न विद्येते आदिनिधने यस्य स तथा तं विभुं सर्वत्र व्यापकम् । समं यथा स्यात्तथा सर्वत्र चरन्तम् । ननु धृतराष्ट्रपुत्रपौत्रादिनाशहेतोर्भवत्याः पुत्राणां प्राणादेदातुः कथं साम्यं तत्राह यन्मिथः कलिरिति, यस्मात्तत्तत्कर्मफलदातुः सर्वोपकर्तुर्मिथोऽन्योऽन्यदोषेणैव कलिर्भवति ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु शिष्टैरपि न ज्ञायते । भगवतोऽचिन्त्यमहिमत्वात् । सत्यं तथापि न ज्ञायत इति । ज्ञायते तदाह नमोऽकिञ्चनवित्तायेति । अकिञ्चना वित्तं यस्य अकिञ्चनानां वा वित्तं, वित्तं हृद्यपि तिष्ठति बहिरपीति । वित्तवतां तथा तेषु भगवान् भगवति च ते, अतस्ते एव जानन्ति नान्य इत्यर्थः । तत्र हेतुमाह निवृत्तगुणवृत्तय इति, निवृत्ता गुणा येषां ते निवृत्तगुणाः । तैर्वर्त्तनं यस्य तेषु वृत्तिर्यस्येति वा । "हरिर्हि निर्गुणः । मन्निष्ठं निर्गुणं स्मृतमि" ति च भगवद्वाक्यात् । अतो निर्गुणगम्ये न सगुणगम्यत्वं यथा चक्षुर्गम्ये न रसगम्यत्वं तत्रापि हेतुः—आत्मारामायेति आत्मन्येवारामो यस्य । अनेन स्वापेक्षाभाव उक्तः । परापेक्षायामपि

शान्ताय शान्तरूपत्वान्न क्रूरैरपेक्ष्यत इत्यर्थः । किञ्च यैरपेक्ष्यते तैर्मोक्षार्थमपेक्ष्यते, नियतफलत्वात् तस्य । अन्यत्तु काकतालीयं कदाचिद्भवति । अतो मोक्षपतित्वान् मुक्त्यधिकारिभिरेव सेव्यो नान्यैरित्यर्थः ॥ २७ ॥ ❀ ❀ एवं प्रसंगात् स्वरूपं कथयन्ती तन्मनस्का पुनः प्रकृतं दुष्टदुर्ज्ञेयत्वं प्रकारान्तरेणाऽऽह मन्य इति । दुष्टा द्विविधाः विषयपराः पूर्वोक्ताश्च । तत्र पूर्वोक्तानामगम्यता निरूपिता । विषयपराणां चागम्यतामाह संभावनया । एवं हि संभाव्यते यदि विषयपरा भगवन्तं जानीयुस्तदा कालग्रस्ता न भवेयुरिति भगवत एव कालत्वात् ज्ञाते पुनर्ज्ञानी प्रियतमो मत इति वाक्यात् स्वप्रियं न भक्षयेत्कालः । अतः कालव्याप्तेः न भगवन्तं जानन्तीति मन्ये । ननु कालस्य कथं भगवत्त्वं तत्राह ईशानमिति । सर्वत्र तस्यैश्वर्यात् न ह्येतत् अभगवत्त्वे संभवति । किञ्च "सदेव सौम्येदमग्र आसीदि"त्यत्र "नासदासीन्नो सदासीत्तदानीमि"त्यत्र च अग्रे तदानींपदवाच्यः कालः तस्याभगवत्त्वे वाक्यार्थो बाध्येत । अत एव अनादिनिधनत्वात् कालो भगवान् । किञ्च कालवशात् सर्वं भवति अन्यथा, शीतादिषु किं निमित्तं स्यात् । अतः सर्वभवनसमर्थत्वात् कालो भगवान् । किंच 'निर्दोषं हि समं ब्रह्मे'ति वचनात् समत्वं भगवद्धर्मः । स च काले वर्तत इति भगवानित्याह । समं चरन्तं सर्वत्रेति सर्वत्र कालः । समानेनैव ब्रह्मरूपेण प्रविशति तत्रोत्पत्तिः । यत् यस्मात् कालात् मिथः परस्परं भूतानामपि कलहः पूर्वमेकप्राणभूता अपि कालमेव निमित्तमासाद्य कलहेन म्रियन्त इत्यर्थः । एवं त्वमेव काल इति कालप्रसादवगम्यते, न कोऽपि त्वां जानातीति ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

न वेदेत्यत्र । चिकीर्षितावेदने हेतुमाहुः सामान्यत इत्यादि । कचिदिति कस्मिन्नपि काले । स्वाभाविकधर्मस्य भ्रमहेतुत्वे भगवद्धर्माणामेव मित्रादिभावं प्रति हेतुतायातीत्याशङ्कां वारयितुमाहुः स्वाभाविकस्येत्यादि । सर्वभावित इति इतजन्तम्, सञ्जातसर्वभाव इत्यर्थः ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

भगवतो भक्तवात्सल्यं स्मरन्ती नमस्करोति–नम इति । अकिञ्चना उक्तलक्षणा भक्ता एव वित्तं धनवत् अतिप्रेमास्पदत्वेन सङ्गोपनीयं यस्य तस्मै नमः । ननु समृद्धानां संरक्षणे तेभ्यः पूजादिलाभसम्भवेऽपि तान् विहाय किञ्चनसंरक्षणे भगवतः किं फलमित्याशङ्क्य केवलं भक्तवात्सल्यमेव तत्र हेतुः, न पूजादि, भगवतः पूजाद्यपेक्षाभावादित्यभिप्रेत्य तत्र हेतुमाह–शान्तायेति, अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मयस्तद्रहितायेत्यर्थः । तत्र हेतुमाह–निवृत्तगुणवृत्तये इति । निवृत्ता गुणानां रजस्तमःसत्त्वानां वृत्तिर्वर्तनं यस्मात्तस्मै नमः । तत्रापि हेतुमाह–आत्मारामायेति । आत्मनि अगणितानन्दस्वरूपे एव आरामः रमणं यस्य तस्मै नमः । एवं सर्वत उदासीनस्य भजने भक्तानां किं फलं भवतीत्यपेक्षायां आध्यात्मिकादितापत्रयनिवृत्तिपूर्वककैवल्यशब्दवाच्यस्वरूपानन्दलाभ एवेति सूचयन्त्याह–कैवल्यपतये नम इति ॥ २७ ॥ ❀ ❀ ननु देवकीपुत्रं मां कथमेवं स्तौषीत्याशङ्क्याह–मन्ये इति । ईशानं सर्वनियन्तारं अनादिनिधनं जन्ममरणादिरहितं विभुं व्यापकं सर्वत्र समं चरन्तं कालयन्तं कालं त्वामहं मन्ये इत्यन्वयः । सममिति तत्तत्प्राणिकर्मानुसारेण दुःखसुखादिफलदातृत्वमेव समत्वमभिप्रेतमित्युपलक्षणविधयाऽऽह–भूतानामिति । यत् यस्मात् कालरूपात्त्वत्तो भूतानां मिथः परस्परं कलिः कलहो भवति । कलिरिति मित्रत्वादीनामप्युपलक्षणम् ॥ २८ ॥

हिन्दी अनुवाद

आप निर्धनोंके परम धन हैं । मायाका प्रपञ्च आपका स्पर्श भी नहीं कर सकता । आप अपने आपमें ही विहार करनेवाले, परम शान्तस्वरूप हैं । आप ही कैवल्य मोक्षके अधिपति हैं । आपको मैं बार-बार नमस्कार करती हूँ ॥ २७ ॥ ❀ ❀ आपको अनादि, अनन्त, सर्वव्यापक, सबके नियन्ता कालरूप परमेश्वर समझती हूँ । संसारके समस्त पदार्थ और प्राणी आपसमें टकराकर विषमताके कारण परस्पर विरुद्ध हो रहे हैं, परंतु आप सबमें समानरूपसे विचर रहे हैं ॥ २८ ॥

न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद् द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥ २९ ॥
जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः । तिर्यङ्नृ[1]षिषु यादःसु तदत्यन्तविडम्बनम् ॥ ३० ॥
गोप्याददे त्वयि कृतागसि दाम तावद् या ते [2]दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥ ३१ ॥

१. प्रा० पा०—नृष्वपि यादस्सु । २. प्रा० पा०—मृषा० ।

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

ननु निग्रहानुग्रहरूपं मयि प्रसिद्धं वैषम्यमत आह न वेदेति । नृणां विडम्बनमनुकरणमीहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्रहरूपा भवति ॥ २९ ॥ ❀ ❀ तेऽजस्य जन्म । अकर्तुः कर्म । तिर्यक्षु वराहादिरूपेण । नृषु रामादिरूपेण । ऋषिषु वामनादिरूपेण । यादस्सु मत्स्यादिरूपेण । ॥ ३० ॥ ❀ ❀ नरविडम्बनमत्याश्चर्यमित्याह गोपीति । गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुमाददे जग्राह तावत्तत्तत्क्षणमेव या ते दशाऽवस्था सा मां विमोहयति । किंभूतस्य । अश्रुभिः कलिलं व्यामिश्रमंजनं ययोस्ते च ते संभ्रमे व्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनीयाधः कृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य । यद्यतस्त्वत्तो भीरपि स्वयं बिभेति तस्य ते दशा ॥ ३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

पुनराक्षिपति-नन्विति । अत्र विश्वनाथः-ननु तत्र कलहे तत्त्वनिश्चायकः को भवेत्तत्र न कोपीत्याह-न वेदेति द्वाभ्याम् । नृणां शास्त्रविवादिनां तेषां विडम्बनं ज्ञानवैफल्यमीहमानस्येच्छतः । यद्वा रामकृष्णाद्यवतारे स्वीयेन नरत्वेन नृणां नरमात्राणामेव विडम्बनमीहमानस्य तादृशसौन्दर्यसाद्गुण्यचरित्राद्यदर्शनादन्ये नरा विडम्बिता एव भवन्तीति भावः । नृणां नरमात्राणां विषमा मतिरिति । यथा सूर्यस्य सूर्यकांतशिलायां स्वतुल्यधर्मत्वप्रदानेनासक्तौ अन्धेष्वौदासीन्ये चक्रवाकेषूपकारित्वे घूकतस्करांधकारादिष्वपकारित्वे लक्ष्यमाणेपि न तस्य वैषम्यम् । किं तु तत्र तत्र वस्तुसाद्गुण्यवैगुण्याद्येव कारणमिति ज्ञेयम् ॥ २९ ॥ ❀ ❀ किं च तदपि तव साम्यवैषम्यकर्तृत्वाकर्तृत्वजन्मवत्त्वाजत्वादिषु सिद्धान्ताग्निर्विद्य लीलैवास्वादनीयेत्याह-जन्मेति द्वाभ्याम् । अजस्य जन्माकर्तुः कर्म तत्रापि तिर्यगादिषु तत्र तत्र तव सर्वोत्कृष्टस्येश्वरस्यात्यंतविडम्बनं तत्तज्जातीयार्थेनात्मना न्यूनत्वांगीकारात् । तथाहि वाराहजन्मनि "घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्" इत्यादिना सर्वज्ञत्वेपीश्वरत्वेऽपि वास्तवशूकर एवाभूर्यमवलोक्य "जहास चाहो वनगोचरो मृगः" इत्येव । न तत्त्वज्ञास्त्वां कर्माधीनं जीवमेव मन्यन्त इति भावः । अत्राजत्वकर्तृत्वयोरेव सत्यत्वे जन्मकर्मलक्षणयोर्लीलयोर्मिथ्यात्वं तथात्वे च तया शुकदेवाद्यात्मारामगणचित्ताकर्षणत्वासंगतिः । "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः" इति भगवदुक्तेश्च । जन्मकर्मणां सत्यत्वेऽजत्वाकर्तृत्वयोरसंगतिरिति । तस्मादचिंत्यानंतशक्तिमतो भगवतः को वेद तत्त्वमिति भावः । "अतर्क्येन कृतौ दीर्घलम्बने च विडम्बनम् । हासास्पदे निविष्टे च" इति धरणिः ॥ ३० ॥ ❀ ❀ तस्मात्तव लीलामेवास्वादयामीत्याह-गोपीति । एतेन नन्दगोपादप्यतिप्रेमवती श्रीयशोदा धन्या यया तवैतादृशो वशीकार इति सूचितम् । तत्र "भीरपि यद्बिभेति" इत्युक्त्यैव कुन्त्या ऐश्वर्यज्ञानं व्यक्तीकृतं भयभावनया स्थितस्येत्यन्तभयस्य च तया सत्यत्वमेवाभिमतम् । अनुकरणमात्रत्वे ज्ञाते तस्य मोहो न सम्भवेदिति ज्ञेयम् । अत एवेहमानस्य नृणां विडम्बनमित्यादौ विडम्बनमनुकरणमिति व्याख्यान्तरं पराहतम् ॥ ३१ ॥

श्रीमद्वीरराघवव्याख्या

नन्वहमपि कांश्चिदनुगृह्णन्कांश्चिन्निगृह्णन् कथं वैषम्यादिरहित इत्यत आह नेति । हे भगवन्नृणां विडंबनमनुकारमीहमानस्य कुर्वाणस्य तव चिकीर्षितं न कोऽपि वेद । क्वचिन्निग्रहोऽप्यंततोऽनुग्रहरूपतया फलतीति न वैषम्यादिकमस्ति पूतनाशकटयमलार्जुनधेनुककेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसादिविषयनिग्रहस्यांततस्तेषां निरतिशयपुरुषार्थरूपमुक्तिहेतुत्वदर्शनादिति भावः । यत एवमत एव त्वयि वैषम्यादिरहिते तदापादयतां नृणां मतिरेव विषमेत्याह न यस्येति । कर्हिचिदपि दयितः प्रियो द्वेष्यश्च नास्ति यस्मिन्नृणां मतिर्विषमा रजस्तमोन्वयादयथार्था भवति । नृणां विडंबनमीहमानस्येत्यनेन नरचेष्टानुकारमात्रमेव न तु सर्वथा तत्सजातीयचेष्टितम् "जन्म कर्म च मे दिव्यमिति" भगवतैवोक्तत्वात् इति सूचितम् ॥ २९ ॥ ❀ ❀ विडंबनत्वमेवान्यथानुपपत्त्या दृढयति जन्मेति । अजस्य जन्मरहितस्य कर्मायत्तोत्पत्तिरहितस्याकर्तुः प्राचीनकर्मानुरूपप्रवृत्तबुद्ध्यधीनकर्मरहितस्यात्मनः सर्वांतरात्मनस्तव तिर्यगादिषु जन्म तत्सजातीयं कर्म चेति यत्तदत्यंतविडंबनमेव, अन्यथाऽजस्याकर्तुरात्मनश्च तन्न घटत इति भावः । तत्र तिर्यक्षु वराहादिषु ऋषिषु भार्गवदत्तात्रेयकार्दमादिषु नृषु राघवयादवादिषु यादस्सु मत्स्यकूर्मादिषु जलौकःसु विडंबनमात्रम् ॥ ३० ॥ ❀ ❀ न चेदं घटत इत्यभिप्रायेणाऽह गोपीति । तावद्यथा त्वयि कृतमगोऽपराधो येन तथाभूते सति गोपी यशोदा दाम रज्जुमाददे त्वद्बन्धनार्थं परिजगृहे तदाश्रुभिः कलिलं कलुषितमंजनं ययोस्ते संभ्रमे भयसूचकाटोपयुक्ते अक्षिणी यस्य तद्वक्त्रं निनीय उन्नीय उत्तम्य अश्रुकलिलेत्यादिक्रियाविशेषणं वा, अश्रुकलांजनसंभ्रमाक्षं यथा तथा वक्त्रं निनीय प्रापय्येत्यर्थः यस्माद्यतो भीरपि बिभेति तस्य तव भयभावनया भयाभिनयेन स्थितस्य या दशा सा मां विमोहयति । अत्र भीशब्देन सर्वेषां भयहेतुर्मृत्युर्लक्ष्यते "भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम" इत्युक्तविधस्याभयस्य तवेत्यर्थः । तावद्विमोहयति मूढां करोति पश्चात्तु नरचेष्टानुकारमात्रमिदमिति ज्ञापयतीति तावच्छब्दाशयः ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सम चरंतमित्येतद्विवेचयति न वेदेति । यस्य तव योग्यतातिरेकेण कर्हिचित्कश्चिद्दयितो नास्ति, कश्चिद्द्वेष्यो नास्तीति शेषः, एवमपि यस्मिंस्त्वयि नृणामासुरप्रकृतीनां मतिर्विषमा अर्जुनोऽनुग्राह्योऽयं दुर्योधनो द्वेष्य इति ताभ्यामुभाभ्यां बहूपचितपुण्यद्वेषनिचयाववगणय्य हे भगवन् नृणां विडंबनमनुकरणमीहमानस्य चेष्टमानस्य द्विषंतं नैव भोजयेदित्यादिवचनात्तस्य तव कश्चित् पुरुषः चिकीर्षितं कर्तुमिष्टं न वेद न जानातीत्येकान्वयः । अथवा लोके यस्मिन्पुंसि योग्यतातिरेकेण स्नेहद्वेषकारिणि नृणां मतिर्विषमा अस्य दयितोऽयमस्य द्वेषीति न भवांस्तादृश इत्यतः समचारीति वैदिका इति ॥ २९ ॥ ❀ ❀ अधुनाऽनादिनिधनत्वं समर्थयते जन्मेति–हे विश्वात्मन् सर्वांतर्यामिन् अजस्याजातस्यानायासेन फलानपेक्षया अकर्तुरात्मनः स्वामिनस्तव तिर्यङ्नृपशुषु यादःसु जलजंतुषु यज्जन्म तज्जात्यनुकारि कर्म च तदतिशयेन विडंबनमतोऽनादिनिधनोऽसीति भावः, अजस्यात्मनस्तिर्यगादिषु यज्जन्माकर्तुरात्मनस्तज्जात्यनुसारि यत्कर्म तदुभयमत्यंतविडंबनमिति वा योजना ॥ ३० ॥ ❀ ❀ इदं चातिविडंबनं विदुषामपि मोहकमित्यभिप्रेत्याह गोपीति । त्वयि कृतागसि दधिभांडं भित्त्वा नवनीतापहारिणि सति यदा गोपी नाम्ना यशोदा नित्यमुक्तं त्वां बद्धुं दाम आददे तावत्तदा यं त्वां प्रति भीः सर्वजनस्य भयकारिणी दुर्गापि बिभेति यस्य भयभावनया अश्रुभिः कलिलं कलुषं अंजनं यस्य तत्तथोक्तं अश्रुकलिलांजनं च तत्संभ्रमयुक्तं अक्षि यस्य तत्तथोक्तं वक्त्रं विनम्यावाचीनतया कृत्वा स्थितस्य ते तव या दशाऽवस्था सा मां विमोहयतीत्येकान्वयः । तस्मात्तदनुकरणं विदुषामपि मोहकमिति भावः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोपीति । अत्र भीरपि यद्बिभेतीत्युक्त्या तस्य ऐश्वर्यज्ञानं व्यक्तम् । ततो यदि सा भीः सत्या न भवति तदा तस्य मोहोऽपि न संभवेदिति गम्यते । स्फुटमेव चान्तर्भयमुक्तं भयभावनया स्थितस्येति ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तत्र कलहे तत्त्वनिश्चायकः को भवेत् तत्र न कोऽपीत्याह न वेदेति द्वाभ्याम् । नृणां शास्त्रविवादिनां तेषां विडम्बनं ज्ञानवैफल्यम् ईहमानस्य इच्छतः । यद्वा रामकृष्णाद्यवतारे स्वीयेन नरत्वेन नृणां नरमात्राणामेव विडम्बनम् ईहमानस्य तादृशसौन्दर्य्यसाद्गुण्यचरित्राद्यदर्शनात् अन्ये नरा विडम्बिता एव भवन्तीति भावः । नृणाम् अज्ञजनानाम् । विषमा मतिरिति यथा सूर्यस्य सूर्यकान्तशिलायां स्वतुल्यधर्म्मत्वप्रदानेनासक्तौ अन्येषु औदासीन्ये चक्रवाकेषूपकारित्वे घूकतस्करान्धकारादिष्वपकारित्वे लक्ष्यमाणेऽपि न तस्य वैषम्यं, किंतु तत्र तत्र वस्तुसाद्गुण्याद्येव कारणमिति बोध्यम् ॥ २९ ॥ ❀ ❀ किञ्च यदपि तव साम्यकर्तृत्वाकर्तृत्वजन्मवत्त्वाजत्वादिषु सिद्धांतान्निर्विद्य लीलैवास्वादनीयेत्याह । अजस्य जन्म अकर्त्तुः कर्म । तत्रापि तिर्य्यगादिषु तत्र तत्र तव सर्वोत्कृष्टस्यैश्वरस्यात्यन्तविडम्बनम् । तत्तज्जातियाथार्थ्येन आत्मनो न्यूनत्वांगीकारात् । तथाहि वाराहे जन्मनि "घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्" इत्यादिना सर्व्वज्ञत्वेऽपि वास्तवशूकर एवाभूय्येमवलोक्य 'जहास चाहो वनगोचरो मृगः' इत्येवमतत्त्वज्ञास्त्वां कर्म्माधीनं जीवमेव मन्यन्ते इति भावः । अत्राजत्वाकर्तृत्वयोरेव सत्यत्वे जन्मकर्म्मलक्षणयोर्लीलयोर्म्मिथ्यात्वम् । तथात्वे च तया शुकदेवाद्यात्मारामगणचित्ताकर्षणस्यासंगतिः । "जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः" इति भगवदुक्तिश्च जन्मकर्म्मणोः सत्यत्वे अजत्वाकर्तृत्वयोरसङ्गतिरिति तस्मादचिंत्यानन्तशक्तिमतो भगवतः को वेद तत्त्वमिति ॥ ३० ॥ ❀ ❀ तस्मात् तव लीलामेवास्वादयामीत्याह । गोपी यशोदा त्वयि कृतागसि दधिमन्थनीस्फोटनं कृतवति सति यावद्दाम रज्जुम् आददे जग्राह तावत् तत्क्षणमेव ते तव या दशा अवस्था सा मां विमोहयति । किंतु तस्य अश्रुभिः कलिलं व्यामिश्रम् अंजनं संभ्रम आवेगश्चाक्ष्णोर्यत्र तद्वक्त्रं निनीय अधः कृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य यद् यतस्त्वत्तः भीरपि स्वयं बिभेति तस्य ते दशा । तेन पूर्व्वोक्तान्नंदगोपादप्यतिप्रेमवती यशोदा धन्या यया तवैव तादृशो वशीकार इति सूचितम् । अत्र भीरपि यद्बिभेति इत्युक्त्यैव कुंत्या ऐश्वर्य्यज्ञानं व्यक्तीभूतं भयभावनया स्थितस्येत्यन्तर्भयस्य च तया सत्यत्वमेवाभिमतम् । अनुकरणमात्रत्वे ज्ञाते तस्या मोहो न संभवेदिति ज्ञेयम् । अत एव तवेहमानस्य नृणां विडम्बनमित्यादौ विडम्बनमनुकरणमिति व्याख्यान्तरं परास्तम् ॥ ३१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु देवराजः स व्रजो मां हंतुं यत्नं कृतवान्, नृपतयो जरासंधचैद्यप्रभृतयो बहुशो ममावज्ञां कृतवंतस्तदिदं समं चरंतं सर्वत्रेत्यादि भवत्या वचनं कथमर्थवत्स्यादत्राह न वेदेति । हे भगवन् षडैश्वर्यसंपन्न नृणां विडंबनमनुकरणमीहमानस्य तत्तद्भक्तानुरूपं चरितं कुर्वाणस्य तव चिकीर्षितं तत्तत्कर्मानुसारेण कर्तुरभीष्टं कश्चिदपि न वेद । एवं स्वतो यस्मिन् प्रियाप्रियरहिते त्वयि विषमा मतिर्नृणामज्ञानाद्भवति ॥ २९ ॥ ❀ ❀ अजस्य कर्मजन्मोत्पत्तिशून्यस्य स्वेच्छया जन्म अकर्तुः सत्त्वादिगुणहेतुककर्तृत्व-

शून्यस्य स्वेच्छकं कर्म चात्यंतं विडंबनमनुकरणम् । तत्र तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु भार्गवादिरूपेण यादःसु मत्स्यादिरूपेण ॥ ३० ॥ ❀ ❀ साक्षादवतारिणस्तव प्रादुर्भावे यच्चेष्टितं तदत्यंतं मां विमोहयतीत्याह एकदेशकथनेन गोपीति । त्वयि कृतागसि दधिभांडस्फोटनं कृतवति गोपी श्रीयशोदा यावद्दामाददे रज्जुं जग्राह तावत्कालमेव ते तव या दशाऽवस्था सा मां विमोहयति देहगेहस्मृतितिरश्चालयति । कीदृशस्य अश्रुकलिलांजनसंभ्रमाक्षं अश्रुव्यामिश्रांजने संभ्रमे भयसूचकवैक्लव्ययुक्ते अक्षिणी यस्य तद्वक्त्रं भयभावनया निनीय स्थितस्य यतो भीरपि बिभेति तस्य ॥ ३१ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

इदानीमवतीर्णं तु सुतरां भक्ता अपि न जानंतीत्याह न वेद कश्चिदिति । किं कर्तुं भगवान् विचारयतीति न कोऽपि वेद । ननु कार्यदर्शनेन ज्योतिःशास्त्रेण वा यदेव ज्ञायते तदेव भगवच्चिकीर्षितमिति कुतो न वेद तत्राह तवेहमानस्येति, नृणां विडंबनमनुकरणमीहमानस्य चिकीर्षितं न वेदेत्यर्थः । सामान्यव्यापारेणैव कार्यस्य सिद्धत्वात् विशेषरूपमनुकरणं किंकार्यायेति भवति संदेहः । नन्वस्यानुकरणस्य कार्यं स्पष्टमेव पांडवरक्षा कौरववधश्चेति भूभारहरणम् अर्जुनादीनां यशोदानं च, तदपि नेत्याह न यस्य कश्चिदिति पांडवरक्षादिकं च तदा विशेषकार्यं स्यात् यदि भगवते मित्रोदासीनविद्विषो भवेयुः । तथा सति भगवत्त्वमेव न स्यात् । कश्चिदपि दयितो न एवं द्वेष्यश्च, कचिदपि चकरादुदासीनः, तर्हि कथं कार्यं दृश्यते पांडवरक्षादि न च कालादिति वक्तव्यं, कदाचिदपि कौरवरक्षाश्रवणात् तत्राह यस्मिन् विषमा मतिर्नृणामिति । यस्मिन् त्वयि नृणां वा दीना विषमा मतिर्भवति अयमस्माकं मित्रम्, अयं शत्रुरिति न हि कलशादिषु वस्तुषु गृहे नीयमानेषु दर्शनाच्छकुनादिसंपत्तौ न तेषां स्वरूपं भिद्यते, शुक्तिकायां वा रजतादिप्रतीतौ तस्य स्वाभाविकधर्मव्यतिरेकेण कश्चिदस्ति भ्रमहेतुः, स्वाभाविकस्यैव भ्रमहेतुत्वे सर्वेषामेव भ्रमः स्यात् । तस्मात् स्वगतदोषेणैव रागादिना त्वयि मित्रत्वादिप्रतीतिः, नतु त्वयि तादृशो धर्मः कश्चिदस्तीत्यर्थः । ननु तदनुसरणं धर्मो भगवत्यस्ति यतः सर्वभावित इव भवति तदपि नास्तीत्याह चकारेण मित्रत्ववत् अनुसारित्वमपि भ्रांतमित्यर्थः ॥ २९ ॥ ❀ ❀ एवं दुष्टदुर्ज्ञेयत्वं निरूप्य लक्षणं निरूपयति द्वाभ्यां जन्मकर्म चेति । भगवतः सर्वानुकरणरूपो धर्मः लक्षणमसाधारणो धर्मः नटादिरपि किंचिद्द्रव्यांतरसंबंधेन तथा स्वात्मानं प्रकाशयति भगवांस्तु केवलं अविक्रियमाण एवायमानंदरूप एव नरदेहेंद्रियरूपेण दृश्यरूपेण स्वात्मानं ख्यापयति–एतद्भगवतोऽसाधारणं लक्षणम् । एतदज्ञाने कोपि भगवंतं न पूजयेत् । नवाऽस्य मोहकत्वं लक्षणत्वात्, अन्यथा सर्वेषामपि मोहो भवेत्, तस्मादनुकरणं भगवल्लक्षणमिति ज्ञेयम् । तत्र चेद् भ्रमः पूर्ववत् स्वदोषेणैव दुष्यति न भगवतः कश्चिद्दोष इत्यर्थः । ननु युक्तिबाधितं न वेदोऽपि बोधयतीति कथं भगवतोऽनुकरणं संभवति तत्राह विश्वात्मन्निति, यथा भगवानविक्रियमाण एव विश्वरूपो जातस्तस्यानुकरणे कः प्रयास इति भावः । अजस्य जन्म अकर्तुः कर्म पुरुषोत्तमस्य आत्मनो व्यापकस्य तिर्यक्षु वराहादौ ऋषिषु वामनादौ यादःसु मत्स्यादौ तत्तद्रूपेण स्फुरणमत्यंतमनुकरणं पुरुषोत्तमत्वमपि ज्ञापयन् मनुष्यत्वादिकमपि ज्ञापयति । विश्वस्मिंस्तु ज्ञाते जगत्त्वेन न ज्ञायते तस्मादनुकरणलक्षणं असाधारणो भगवद्धर्मः । अतो नानेनापि भगवति संदेहो युक्त इति सिद्धम् ॥ ३० ॥ ❀ ❀ ननु विशेषदर्शनात् संदेहो गमिष्यति, किं तद्धर्मवत्त्वेन ज्ञापनेन तत्राह गोप्याददे इति । एतादृशमनुकरणं भगवतः यद्विशेषदर्शनेऽपि जाते भ्रममुत्पादयति तत्राहमेव दृष्टांतः, कदाचिदहं गता गोकुले त्वां द्रष्टुं तस्मिन् समये गोपी यशोदा शिलापुत्रेण भांडभेदने कृते कृतागसि त्वयि दाम आददे तदा तावत्तदानीमेव या ते दशा जाता ननु सा स्वभावत एव दशा भवति तत्राह–अश्रुकलिलांजनसंभ्रमाक्षमिति । अश्रुभिः कलिलं यदंजनं तेन सम्यग्भ्रमयुते अक्षिणी यस्येति तादृशं मुखं नीचतया स्थापयित्वा स्थितस्य तवेति पूर्वेण सम्बन्धः । एवं सर्वैर्ज्ञातं सर्वथा भीत इति । नन्वेवमेवास्तु को दोष इति चेत्तत्राह भीरपि यद्बिभेतीति, यद्भयं यतो भगवतो भवति भीतत्वं भयहेतोर्बाधको धर्मः, न हि तस्मिन् विद्यमाने कस्यचिद्भयं संभवति ॥ ३१ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

जन्म कर्म चेत्यत्र । न पूजयेति । मनुष्यादिरूपतयैव ज्ञानात्तथेति लक्षणज्ञानस्यैव तद्रूपपूजनहेतुत्वमित्यर्थः । अस्यानुकरणस्यात्यन्ततां स्फुटीकर्तुमाहुः विश्वस्मिन्नित्यादि । तथा चास्मिन्ननुकरणे उभयथा ज्ञायस इति हेतोरस्यात्यन्तत्वमित्यर्थः । अत्यन्तत्वमत्राश्चर्यजनकत्वरूपं ज्ञेयम् ॥ २९ ॥ ❀ ❀ गोपीत्यत्र । सा कुतो न स्वाभाविकीत्याकाङ्क्षायामाहुः तत्राहेति । तदुपपादयतीत्यर्थः ॥ ३० ॥ ❀ ❀ केचिदाहुरित्यत्र । भगवदिच्छाज्ञानादिति इच्छाया अज्ञानादित्यर्थः । यशःस्वरूपं तद्बीजकथनमुखेनाहुः तद्दृश्येत्यादि । यथा चन्दनसन्निहितवृक्षान्तराणां तथेत्यर्थः ॥ ३१ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

नन्वेवम्भूतस्य सर्वनियामकस्य मम किमर्थं जन्मेत्याशङ्क्याह–न वेदेति । अचिन्त्यैश्वर्यादिगुणपूर्णत्वादिर्हेतुं सूचयन्ती सम्बोधयति–हे भगवन्निति । नृणां मनुष्याणां विडम्बनमनुकरणमीहमानस्य कुर्वतस्तव चिकीर्षितं कर्तुमिष्टं कश्चिदपि न वेदेत्यन्वयः । नन्वस्यानुकरणस्य कार्यं पाण्डवरक्षाकौरववधादिकं स्पष्टमेव, तत्कथं न वेदेत्याशङ्क्य शत्रुत्वमित्रत्वादिवैषम्यरहितस्य

सर्वत्र समस्यैतदपि न घटते इत्याशयेनाह–न यस्येति । यस्य तव कर्हिचित् कदाचिदपि कश्चिदपि दयितः प्रेयान्नास्ति द्वेष्यः शत्रुश्च नास्तीत्यन्वयः । तर्हि कथमित्यर्जुनमित्रत्वादिव्यवहार इत्यपेक्षायां भ्रमादेवेत्याह–यस्मिन्निति, यस्मिंस्त्वयि नृणां विषमेयं पाण्डवमित्रं कौरवशत्रुरित्याद्याकारा मतिर्भ्रान्तिर्भवतीत्यर्थः ॥ २९ ॥ ❀ ❀ आस्तां तावन्मनुष्यविडम्बनस्य वार्ता, तिर्यगादिषु तव जन्मादिविडम्बनमत्याश्चर्यजनकमित्याह–जन्मेति । हे विश्वात्मन्निति सम्बोधनेन न मम तिर्यगादिषु जन्मादि किन्त्वन्यस्यैवेति चोद्यं वारयति, त्वदन्यस्यैवाभावादिति भावः । तिर्यगादिषु यत् अकर्तुः कर्मेवत्तदत्यन्तं विडम्बनमनुकरणमात्रमित्यन्वयः । कुत इत्यपेक्षायामाह–आत्मन इति । परमात्मनः पुण्यपापाद्यसम्भवेन तिर्यगादिषु जन्माद्यसम्भवादिति भावः । तिर्यक्षु वराहादिः । नृषु रामादिः । ऋषिषु वामनादिः । यादस्सु मत्स्यादिः ॥ ३० ॥ ❀ ❀ नरावतारेष्वपि बालविडम्बनमत्याश्चर्यमिति सूचयन्ती स्वमोहं दर्शयति–गोपीति । गोपी यशोदा यदा त्वयि कृतागसि दधिभाण्डस्फोटनरूपापराधं कृतवति सति त्वद्बन्धनार्थं दाम रज्जुमाददे जग्राह तावत्तदा अश्रुभिः कलिलं व्यामिश्रमञ्जनं ययोस्ते च ते सम्भ्रमे व्याकुले च अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधः कृत्वा मां ताडयिष्यतीति भयस्य भावनया स्थितस्य ते तव या दशा अवस्था सा मां विमोहयतीत्यन्वयः । कुत एवं विमोह इत्यपेक्षायामाह–भीरिति, यद्यस्मात्त्वत्तो भीरपि स्वयं बिभेतीति । भयाभिमानिदेवस्यापि भयजनकस्य तव भयासम्भवादिति भावः ॥ ३१ ॥

हिन्दी अनुवाद

भगवन् ! आप जब मनुष्योंकी-सी लीला करते हैं, तब आप क्या करना चाहते हैं–यह कोई नहीं जानता । आपका कभी कोई न प्रिय है और अप्रिय । आपके सम्बन्धमें लोगोंकी बुद्धि ही विषम हुआ करती है ॥ २९ ॥ ❀ ❀ आप विश्वके आत्मा हैं, विश्वरूप हैं । न आप जन्म लेते हैं और न कर्म ही करते हैं । फिर भी पशु-पक्षी, मनुष्य, ऋषि, जलचर आदिमें आप जन्म लेते हैं और उन योनियोंके अनुरूप दिव्य कर्म भी करते हैं । यह आपकी लीला ही तो है ॥ ३० ॥ ❀ ❀ जब बचपनमें आपने दहीकी मटकी फोड़कर यशोदा मैयाको खिझा दिया था और उन्होंने आपको बाँधनेके लिये हाथमें रस्सी ली थी, तब आपकी आँखोंमें आँसू छलक आये थे, काजल कपोलोंपर बह चला था, नेत्र चञ्चल हो रहे थे और भयकी भावनासे आपने अपने मुखको नीचेकी ओर झुका लिया था ! आप की उस दशाका–लीला-छविका ध्यान करके मैं मोहित हो जाती हूँ, भला, जिससे भय भी भय मानता है, उसकी यह दशा ? ॥ ३१ ॥

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये। यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥ ३२ ॥
अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात्। अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ ३३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत एव जगन्मोहनतया दुर्ज्ञेयत्वात्तव जन्मादि बहुधा वर्णयन्तीत्याह। केचिदिति चतुर्भिः । पुण्यश्लोकस्य युधिष्ठिरस्य कीर्तये यदोरेव कीर्तये इति वा मलयस्य कीर्तये वंशे वा चन्दनं यथा ॥ ३२ ॥ ❀ ❀ तथा वसुदेवस्य भार्यायां देवक्यामज एव त्वमभ्यगात्। पुत्रत्वमिति शेषः । प्रथमपुरुषत्वार्षः, अर्भत्वमिति पाठः सुगमः । ताभ्यामेव पूर्वं सुतपःपृश्निरूपाभ्यां याचितः सन्। अस्य जगतः क्षेमाय ॥ ३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्तव कर्मातर्क्यमत एवेत्यर्थः। एवं त्वं च न चेन्नटवत्प्रादुरभविष्यस्तदा जगन्मोहनीयं लीला केन वास्वादयिष्यतेति प्रादुर्भावकारणमेव मतभेदेन बहुधाह–केचिदिति । पुण्यश्लोकस्य युधिष्ठिरस्य "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः" इति पुण्यश्लोकत्वेन तदानीं तस्यैव प्रसिद्धेः ॥ ३२ ॥ ❀ ❀ अर्भत्वं बालत्वम् ॥ ३३ ॥

श्रीमद्वीरराघवव्याख्या

यतो विडंबनमात्रं न तु तात्त्विकमत एव त्वदवतारप्रयोजननिमित्तं चेदमेवेति निश्चेतुमशक्नुवत्या तत्र नाना तर्कयंतीत्याह केचिदिति पंचभिः । केचित्तदवतारप्रयोजननिर्णयप्रवृत्तानां मध्ये अजमपि त्वां प्रियस्य भक्तस्य पुण्यश्लोकस्य यदोः कीर्त्त्यै तद्वंशे जातमाहुः । यदुवंशकीर्त्तिजननाय तत्र त्वां जातमाहुरित्यर्थः । यथा मलयस्य पर्वतस्य कीर्त्तये चंदनं जातं वदंति तद्वत् ॥ ३२ ॥ ❀ ❀ अपरे त्वत्र साधुलोकस्य क्षेमाय सुरद्विषां वधाय च जातस्त्वं वसुदेवस्य देवक्यां ताभ्यां पूर्वजन्मनि याचितः अभ्यगात् पुत्रत्वं प्राप्त इत्याहुः । वसुदेवस्येत्यपादानस्यैव शेषत्वविवक्षया षष्ठी ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदानीमेवंविधस्य तव देवक्यां जन्मानुकरणे निमित्तं विद्वांसोऽनेकधा वदंतीति विज्ञापयति केचिदित्यादिना । केचिद्विद्वांसः पुण्यकीर्त्तेर्भगवद्भक्तस्य यदोः राज्ञोऽन्ववाये तस्य कीर्त्तये जातं त्वामाहुरित्यन्वयः । नाम्ना मलयस्य पर्वतस्य कीर्त्तये चंदनमिव ॥ ३२ ॥ ❀ ❀ अपरे बुधाः देवैर्याचितोऽजस्त्वमस्य सज्जनस्य क्षेमाय सुरद्विषां वधाय च वसुदेवस्य सकाशाद्देवक्यामभ्यगादाविर्भूत इति ब्रुवते ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

केचिदिति चतुष्कम् ॥ ३२-३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं च त्वं न चेत् प्रादुरभविष्यस्तदा जगन्मोहिनी इयं लीला केन वाऽऽस्वादयिष्यतेति प्रादुर्भावकारणमेव मतभेदेन बहुप्रकारमाह केचिदिति । पुण्यश्लोकस्य युधिष्ठिरस्य "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिर" इति पुण्यश्लोकत्वेन तदानीं तस्यैव प्रसिद्धेः, यदोरन्ववाये वंशे यदोरेव कीर्त्तये वंशे वा चन्दनं यथा ॥ ३२ ॥ ❀ ❀ अज एव त्वमभ्यगात् पुत्रत्वमिति शेषः । प्रथमपुरुषस्त्वार्षः । अभेत्वमिति पाठः सुगमः, ताभ्यामेव पूर्वं सुतपःपृश्निरूपाभ्यां याचितः सन् । अस्य जगतः क्षेमाय ॥ ३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवतः स्वरूपगुणादेर्दुर्ज्ञेयत्वमुक्तं तत्प्रादुर्भावप्रयोजनमपि दुर्ज्ञेयमित्याह केचिदिति चतुर्भिः । अन्ववाये वंशे ॥ ३२ ॥ वसुदेवस्य पत्न्यां देवक्या गर्भं त्वमभ्यगात्प्राप्तः याचितः ताभ्यां प्रार्थितः ॥ ३३ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं भगवति विरुद्धधर्मत्वं तत्संबंधादन्यत्रापि विरुद्धधर्मत्वमिति लक्षणमुक्तं जन्मकारणनिर्द्धारमाह केचिदाहुरिति चतुर्भिः । नमनार्थं जन्मनिर्द्धारः कर्त्तव्यः देहांतःकरणात्मनामुत्तरमुत्तरं श्रेयः । ततो देहत्वेनानमनीयत्वेऽपि भगवदवतारत्वे ज्ञाते नमनीयत्वं सिद्ध्यति । तत्र तादृशस्य कथमनमनीयदेह इति शंका । तत्र ऋषिभेदेन स्वयोगजधर्मभेदात् परमार्थतो भगवदिच्छाज्ञानाच्च । चतुर्विधा ऋषयः स्वस्वबुद्ध्यनुसारेण देहसंबंधप्रयोजनं कथयंति "वंशकर्त्ता पिता चैव मुख्यौ देहनिरूपकौ । दुखाभावश्च मोक्षश्च द्वावर्थाविह संमतौ" अर्थद्रव्यविरोधे अर्थो बलीयानिति तदयं मतभेदः । अर्थस्य गुणभावदेहे मुख्यतया द्वयम् । अर्थप्राधान्ये च मतद्वयमस्ति तत्र वंशकर्त्तुर्मुख्यत्वात् । महत्त्वाच्च दीपत्वख्यापनेन तस्य कीर्त्तिर्भवतीति धर्मप्राधान्येन यदुवंशेऽवतीर्ण इत्याह केचिदाहुरिति अजं जातमिति । पूर्ववद्विरुद्धधर्माश्रयत्वम् । पुण्यश्लोकस्य यदोः । अत एव तथैव शास्त्रार्थो निर्धारित इति । तत्रांशेनावतीर्णस्येत्युक्तं प्रियस्येति पुष्टिमार्गभक्तत्वात् मलयस्येव चन्दनमिति । यथा वन्दामहे मलयमेवेत्यादिमलयस्य यशः एवं यदोरपि तद्वंश्यानां भगवत्संनिधानेन भगवत्सारूप्यात् ॥ ३२ ॥ ❀ ❀ अपरे पुनर्दूरसम्बन्धमसहमानाः प्रसंगादपि कीर्त्तिसंभवात् कृतप्रयत्नत्वाच्च वसुदेवस्य निर्दुष्टत्वाच्च अर्थपुरःसरं प्रवर्त्तमाना ऋषयः वसुदेवस्य सम्बन्धिन्यां देवक्यां पुत्रत्वेन याचितः सन्नज एव जात इत्याहुस्तदाह अपर इति । सोऽजस्त्वमेवेति पृथग्योजना । "पित्रोः संपश्यतोः सद्य" इति प्राकृतरूपप्रदर्शनाद्भिन्नशंका स्यात्, साऽप्यनेन निवारिता तत्र हेतुः अस्य क्षेमायेति । जगतः युधिष्ठिरस्य वा । अत एव "जातः कंसवधार्थाय" इत्यादिवाक्यानि । अनेन द्वयं प्रयोजनं भिन्नमिति ज्ञापितं देवानां भिन्नतया हितकरणात् । चकारात्तेषामपि कृतार्थत्वाय सुरद्वेषित्वेन स्वतो मुक्त्यभावात् । अनेन भगवतो दोषाभावो निरूपितः, अत एवोभयोः कार्यता । अन्यथा वैषम्यं स्यात् ॥ ३३ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अपर इत्यत्र । देहमुख्यत्वेपि तुल्ये कथं द्वितीयमतमित्यपेक्षायां मतान्तरे बीजमाहुः अपर इत्यादि । कृतप्रयत्नत्वादित्यपि वसुदेवविशेषणम् । कृततपस्त्वादित्यर्थः । अनेनेति । अजस्यैव जातत्वकथनाद्विरुद्धधर्माश्रयत्वबोधनेनेत्यर्थः । तत्रेति । अनेनेति । दैत्यमुक्तिदातृत्वसूचनेन । अत एवेत्यादि । दैत्यमुक्तिदातृत्वादेव उभयोः एतत्क्षेमासुरवधयोः भगवत्कार्यत्वमित्यर्थः । अन्यथेति । मुक्तिदानं विना । असुरवधस्य कार्यत्वाङ्गीकारे ॥ ३२ ॥ ❀ ❀ भारावतारेत्यत्र । कालान्तरीयत्वादिति । पूर्वजन्मद्वयसम्बन्धेन तथात्वात् तथा च तदर्थमाविर्भावे पूर्ववदंशेन प्रादुर्भवेत्, न तु पूर्णस्तथा भवेत्, अतो नेदं प्रयोजनमिति तेषामाशयः । कामप्रधाना इति । त्रिवर्गप्रधानाः । स्वतन्त्रफलतेति । भारावतरणस्येति शेषः । तथा च सुखसाधनस्य स्वतन्त्रफलतेति विरुद्धमापद्येतेति भावः । दैहिक इव भवतीति । दैहिक इव भासते । ननु विस्मरणे कथमुत्तारणमिवेत्यत आहुः बुद्ध्या हीत्यादि । तथा चारोपका-

भावादधः पात इत्युत्तारणमित्यर्थः । अनेनेति उदधिनौदृष्टान्तेन । अनभिप्रेतत्वमिति । भारावतरणार्थं स्वावतारस्य तथात्वमित्यर्थः । एवं कृतमिति । अनेन प्रकारेण भारावतरणं कृतम् । ननु देवहितकरणादीनामपि प्रयोजनानां दृश्यमानत्वात् कथमेकमेव प्रयोजनत्वेनोच्यते इत्यत आहुः—एकपक्ष इत्यादि । सर्वेषां मुख्यप्रयोजनत्वाङ्गीकारे को दोष इत्याकांक्षायामाहुः अन्यथेत्यादि । एकस्मिन् देहे प्रयोजनभेदेन नानारूपस्थितेः श्रुतिसिद्धत्वेन निबन्धे दर्शितत्वादत्रापि तद्भेदे तथा स्यादित्यर्थः ॥ ३३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

जन्मप्रयोजनस्यानिश्चयादेव तद्बहुधा वर्णयन्तीत्याशयेनाह—केचिदिति । पुण्यश्लोकस्य 'पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः' इति वाक्येन पुण्यश्लोकत्वेन प्रसिद्धत्वाद्युधिष्ठिरस्य कीर्त्त्यै यदोरन्ववाये वंशे अजं कर्माद्यधीनजन्मशून्यमेव त्वां जातं प्रादुर्भूतं केचिदाहुरित्यन्वयः । युधिष्ठिरकीर्तिवर्द्धने को वा हेतुरित्यपेक्षायामाह—प्रियस्येति । तत्र दृष्टान्तमाह—मलयस्येति, यथा मलयाचलस्य कीर्त्त्यै चन्दनं जातमित्यर्थः ॥ ३२ ॥ ❀ ❀ अपरे तु वसुदेवस्य भार्यायां देवक्यां ताभ्यामेव पूर्वं सुतपःप्रश्निरूपाभ्यां याचितः सन् अस्य विश्वस्य क्षेमाय स्वस्त्यर्थं सुरद्विषां दैत्यानां वधाय च अजः कालकर्माद्यधीनजन्मरहित एव त्वं पुत्रत्वं अभ्यगात् स्वीकृतवानसीत्याहुरित्यन्वयः । प्रथमपुरुषस्त्वार्षः । अर्भत्वमिति पाठस्तु सुगमः ॥ ३३ ॥

हिन्दी अनुवाद

आपने अजन्मा होकर भी जन्म क्यों लिया है ? इसका कारण बतलाते हुए कोई-कोई महापुरुष यों कहते हैं कि जैसे मलयाचलकी कीर्तिका विस्तार करनेके लिये उसमें चन्दन प्रकट होता है, वैसे ही अपने प्रिय भक्त पुण्यश्लोक राजा यदुकी कीर्तिका विस्तार करनेके लिये ही आपने उनके वंशमें अवतार ग्रहण किया है ॥ ३२ ॥ ❀ ❀ दूसरे लोग यों कहते हैं कि वसुदेव और देवकीने पूर्वजन्ममें (सुतपा और पृश्निके रूपमें) आपसे यही वरदान प्राप्त किया था, इसीलिए आप अजन्मा होते हुए भी जगत्के कल्याण और दैत्योंके नाशके लिए उनके पुत्र बने हैं ॥ ३३ ॥

भारावतारणायान्ये भुवो नाव इवोदधौ । सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ ३४ ॥
भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि करिष्य[1]न्निति केचन ॥ ३५ ॥
शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्यविवक्षया ॥ ३४ ॥ ❀ ❀ मतांतरम् । परमानन्दस्वरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामस्ततः कर्माणि तैः क्लिश्यमानानां तन्निवृत्तये श्रवणाद्यर्हाणि कर्माणि करिष्यन् ॥ ३५ ॥ ❀ ❀ अस्य पक्षस्य सिद्धान्ततामभिप्रेत्य श्रवणादिफलमाह । शृण्वंतीति । नन्दंत्यन्यैः कीर्त्यमानमभिनन्दन्ति ये जना ईहितं चरितं तावकं त्वदीयं पदाम्बुजं त एव पश्यंत्येवाचिरेणैवेति च सर्वत्रावधारणम् । कीदृशम् । भवप्रवाहस्य जन्मपरम्पराया उपरमो यस्मिंस्तत् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्ये इत्याहुः—सीदंत्या आसन्नमज्जनायाः ॥ ३४ ॥ ❀ ❀ ततोऽविद्यातः ततः कामात् क्लिश्यमानानां सांसारिकाणामपि प्रेमभक्तिसिद्ध्यर्थमेव कर्माणि करिष्यन् । "जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः । लीलावतारैः स्वयशःप्रदीपकं प्राज्वालयत्त्वां तमहं प्रपद्ये ॥" इति दशमे श्रीनारदोक्तेः । "ततः स कीर्तिं सुश्लोक्यां वितत्य ह्यंजसा नु कौ । तमोनया तरिष्यन्तीत्यगात्स्वं पदमीश्वरः" इति चैकादशोक्तेश्च । क्लेशनिवृत्तिस्त्वानुषंगिकी । इतरश्लोके पदांबुजदर्शनस्यैव श्रवणादिफलत्वोक्तेः । तद्दर्शनं तु प्रेमलभ्यमेव ॥ ३५ ॥ ❀ ❀ शृण्वंतीति । भवेस्मिन्नित्यस्य पूर्वपद्यस्यैवोपोद्बलकत्वेनोक्तं न तु तस्यैव स्वमतत्वेन श्रीयुधिष्ठिरादीनां परमभक्तानां सम्बन्धेनैव तत्तल्लीलाश्रवणादिकमन्येषां भवतीति प्रत्युत तत्र तत्रैव मुख्यत्वमवसीयते । तदेवं तत्तन्मतसमाहारेण समुदायस्य कारणत्वेऽप्यवांतरतारतम्यं विवेचनीयम् । मम तु "गोप्याददे" इति वर्णिता यशोदैव सर्वोत्तमतया भातीति कुन्तीदेव्यभिप्रायः । चक्रवर्तिनात्रार्थसौन्दर्याय षडवधारणानि सूचितानि । त एव न त्वन्ये, पश्यंत्येव न तु न पश्यन्ति, अचिरेणैव न तु चिरेण, तावकमेव न तु त्वदंशस्य कस्यचित्, भवप्रवाहोपरममेव न तु संसारानिवर्त्तकं, पदाम्बुजमेव न तु तव निर्विशेषं स्वरूपमिति ॥ ३६ ॥

---

१. प्रा० पा०—करिष्य इति । २. प्रा० पा०—वदन्त्य० ।

श्रीमद्वीरराघवव्याख्या

अन्ये तूदधौ अर्णवे नाव इव भूरिभारेण सीदन्त्याः क्लिश्यन्त्या भुवो भारापहारायात्मभुवा च चतुर्मुखेनार्थितो भगवान् जात इत्याहुः ॥ ३४ ॥ ❀ ❀ केचन अस्मिन् लोके अविद्यादिभिः। क्लिश्यमानानां जनानां श्रवणस्मरणाद्यर्हाणि चेष्टितानि करिष्यन्कर्तुं जात इत्याहुरित्यर्थः। अविद्या देहात्मभ्रमादेर्निमित्तमज्ञानं कामस्तन्मूलकशब्दादिविषयाभिलाषः। कर्माणि तदनुकूलव्यापारात्मकानि ॥ ३५ ॥ ❀ ❀ अविद्यादिभिः क्लिश्यमानानां जनानां श्रवणाद्यर्हाणि इत्यनेन भगवच्चेष्टितानां क्लेशापहर्तृत्वं सूचितम्। तच्च न साक्षात्किन्तु संसृतिनिवर्त्तकभगवच्चरणारविंदसाक्षात्कारावहभक्तियोगनिष्पादनद्वारेत्यभिप्रायेण भगवच्चेष्टितश्रवणादिपराणामेतच्चरणाम्बुजसाक्षात्कारो नान्येषामित्याह शृण्वन्तीति। ये जनास्तवेहितं चेष्टितं शृण्वन्ति वक्तृसान्निध्ये गृणन्ति श्रोतृसान्निध्ये, तदुभयासन्निधौ च स्वयं गायन्ति स्मरन्ति नन्दन्ति, त एव भवप्रवाहस्य संसारप्रवाहस्योपरमो यस्मात्तत्तावकं त्वदीयं पदाम्बुजमचिरेण पश्यन्ति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अन्ये प्राज्ञा उदधौ हिरण्याक्षादिभूरिभारेण सीदन्त्या आसन्नमज्जनाया नाव इव दुःसहासुरजनभारेण परिखिन्नाया भुवः आत्मभुवा प्रार्थितः भारावतारणाय जातोऽसीत्याचक्षते ॥ ३४ ॥ ❀ ❀ केचन पंडिता अस्मिन् भये संसारे अविद्याकामकर्मभिः। क्लिश्यमानानां दुःखेन परिभूयमानानां श्रवणार्हाणि नामानि स्मरणार्हाणि रूपाणि करिष्यन्नवातरदिति वदन्ति ॥ ३५ ॥ ❀ ❀ कर्मणां श्रवणस्मरणैः किं फलमिति तत्राह शृण्वन्तीति। ये जनास्तवेहितं चेष्टितमभीक्ष्णशः शृण्वन्ति गायन्ति गृणन्ति स्मरन्ति नन्दन्ति त एवाचिरेण क्षिप्रं भवप्रवाहोपरमं संसारप्रवाहस्य उपरमो निवृत्तिः विनाशो यस्मिन् तत्तावकं पदाम्बुजं पश्यन्तीत्येकान्वयः। तस्मात् त्वत्कर्मश्रवणादिफलं मुक्तिरेवेति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शृण्वन्तीति भवेऽस्मिन्नित्यस्य पूर्वपद्यस्यैवोपोद्बलकत्वेनोक्तम्। ननु अस्यैव स्वमतत्वेन श्रीयुधिष्ठिरादीनां परमभक्तानां सम्बन्धेनैव तत्तल्लीलाश्रवणादिकम् अन्येषां भवतीति प्रत्युत तत्र तत्रैव मुख्यत्वमवसीयते। तदेवं तत्तन्मतसमाहारेण समुदायस्य कारणत्वेऽप्यवान्तरतारतम्यं विवेचनीयम्। मम तु गोप्याददे इति वर्णिता श्रीयशोदैव सर्व्वोत्तमतया भातीति श्रीकुन्तीदेव्यभिप्रायः ॥ ३६–३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्यविवक्षयेति सर्व्वं मतान्तरम् ॥ ३४ ॥ ❀ ❀ स्वमतमाह। अविद्या अज्ञानं ततः कामः ततः कर्म्माणि तैः क्लिश्यमानानां सांसारिकाणामपि प्रेमभक्तिसिद्ध्यर्थमेव कर्म्माणि करिष्यन् क्लेशनिवृत्तिस्त्वानुषङ्गिकी उत्तरश्लोके पदाम्बुजदर्शनस्यैव श्रवणादिफलत्वोक्तेः। तद्दर्शनन्तु प्रेमलभ्यमेव ॥ ३५ ॥ ❀ ❀ अस्य पक्षस्य सिद्धान्तत्वमभिप्रेत्याह शृण्वन्तीति। ते एव न त्वन्ये पश्यन्त्येव न तु न पश्यन्ति अचिरेणैव न तु चिरेण तावकमेव न तु त्वदंशस्य कस्यचित् भवप्रवाहोपरममेव न तु संसारानिवर्त्तकं पदाम्बुजमेव न तु तव निर्विशेषं स्वरूपमिति। अर्थसौन्दर्य्यलाभाय षडवधारणानि द्रष्टव्यानि ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मभुवा ब्रह्मणा ॥ ३४ ॥ ❀ ❀ अविद्याऽऽत्मानात्मज्ञानाभावस्ततः। कामो विषयाभिलाषस्तन्निमित्तैः कर्मभिः। क्लिश्यमानानां जनानां क्लेशनिवृत्तये श्रवणस्मरणाद्यर्हाणि चेष्टितानि करिष्यन् जात इति केचन मन्यन्ते ॥ ३५ ॥ ❀ ❀ चरमपक्षस्य सिद्धान्तत्वं सूचयन् श्रवणादिफलं दर्शयति। शृण्वन्तीति। तवेहितं चेष्टितं गुरोः सकाशात् शृण्वन्ति शिष्यादीन्। प्रति गृणन्ति कचिच्च गायन्ति स्मरन्ति नन्दन्ति च ते एव भवप्रवाहोपरमं संसारनिवर्त्तकं पदाम्बुजमचिरेण पश्यन्ति ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अन्ये पुनः कालान्तरीयत्वात् वसुदेवस्यापि "अर्थो बलीयान्" इति न्यायं पुरस्कृत्य कामप्रधाना भूमिभारहरणार्थं भगवानागत इत्याहुः। तदाह भारेति। ननु भगवति सपरिकरे समागते परमधिको भारो भवति न तु भारावतरणम्। भारकर्तृषु भूमौ वा बलत्वेन प्रविष्टे भारनाश एव न तु भारोत्तरणम्। भारकर्तॄणामधःपातेन वैषम्यं मुक्तिदाने पूर्वोक्तपक्षाविशेषः स्वतन्त्रफलता च स्यादिति चेन्न। अयं भारो न दैहिकः किं तूद्धतचेष्टाहेतुको मानसः, सोऽप्यतिभावनया दैहिक इव भवति। तत्र भूमौ भगवति समागते तत्र चित्ते जाते उद्वेजकविस्मरणाद्भारोत्तारणम्। बुद्ध्या हि भार आरोपितः। शीघ्रं प्रतीकारकरणायाह

नाव इवोदधाविति । अनेन वैषम्यात्कालस्यापि मज्जनहेतुत्वं सूचितम् । यथा तरंगादिराधारदोषस्तथा धर्मक्षयादिरपि कालदोषः । तस्मात्कालधारायाः पृथिव्या आधाराधेयोभयदोषसंभवाच्छीघ्रं प्रतीकारः कर्त्तव्य इत्यर्थः । अन्यथा पुनर्भूमेरुद्धारः कर्तव्यः पतति सृष्टिश्च अत एव ब्रह्मणः प्रार्थनेत्याह । आत्मभुवाऽर्थित इति । आत्मभुवेति स्वस्यापि ब्रह्मजननं पततीति भावः । स्त्रीपुत्रार्थनया कृतमिति कामत्वाद्भगवतोऽनभिप्रेतत्वं सूचितम् । अवसादनेन विशीर्णतायां पुनर्निर्माणं कर्तव्यं स्यात् । तथा चैकदेशनिर्माणासंभवात् नूतनब्रह्माण्डनिर्माणमप्यापतेत्, अतो भगवतैवं कृतमिति एकपक्षे इतरप्रयोजनं प्रासंगिकमिति द्रष्टव्यम् । अन्यथा अर्थभेदादवतारभेदो भवेत् ॥ ३४ ॥ ❀ ❀ एतेषां पक्षाणां पूर्वपक्षत्वान्न पर्यवसानकथनम् । केचन पुनर्भगवद्विचारेण त्रैवर्गिकार्थस्य हीनत्वं विचार्य भगवत्क्रियमाणेनैव हेतुना सर्वमुक्त्यर्थं भगवदवतार इत्याहुः । तदाह भवेऽस्मिन्निति । स्वाभिप्रेतत्वं तु स्वरूपनिरूपण एवोक्तम् । मुक्तिप्रकरणे श्रवणादीनां धर्मत्वेन भक्तित्वमिति विशेषः । भव इति । निरन्तरोत्पत्तिमार्गात् गमनेन अस्मिन्निति अनेकदुःखदर्शनात् स्थित्यापि क्लेशस्यासह्यता निरूपिता । अविद्या स्वरूपाज्ञानं ततः कामः विषयेच्छा । न हि परमानन्दे स्फुरति विषयेच्छा भवति, ततस्तदर्थं त्रिविधानि कर्माणि, श्रवणादेः कर्मणः अविद्याकामकर्मनिवर्त्तकत्वं पंचमाध्याये निरूपितम् । श्रवणस्मरणयोर्भगवद्धर्मपरत्वे प्राकृतबाह्याभ्यन्तरसंगाभावात् न जन्मक्लेशः, अर्थविवक्षया च स्थितौ सर्वस्य भगवत्त्वेन ज्ञानात् न दुःखदर्शनक्लेशोऽपि । अन्यथा परमकारुणिको भगवान् कूपेन्धपातनन्यायेन लोकानां त्रैवर्गिकसिद्धये नावतरेत् दृढमूलत्वज्ञापनाय त्रिविधतापपदं परित्यज्य अविद्यादिपदप्रयोगः कृतः । अहेतुकक्लेशप्रदर्शने तु निर्मूलकत्वात् स्वत एव दुःखनाशो भवेदिति । श्रवणादीनां वैयर्थ्यं स्यात् । अतो भगवान् मुक्त्यर्थमेवावतीर्ण इति सिद्धम् । अवतीर्ण एव भगवत्यर्हता भवति श्रवणादिविषयस्य ॥ ३५ ॥ ❀ ❀ एवं जन्मकारणनिर्द्धारमुक्त्वा फलनिर्द्धारमाह । शृण्वन्तीति दास्ये हि फलनिर्णयः कर्त्तव्यः । धर्मादिवद्व्यभिचारिफलत्वे परम्पराफलत्वे अन्यफलत्वे वा स्वतः सेवां कः कुर्यात्, यद्यपि स्वरूपनिरूपणेनैतत् सिद्ध्यति । परब्रह्मत्वे भगवतः । स्वस्य च जीवत्वे दासत्वाद्दास्यसिद्धिरिति तथापि, योग्यतामात्रं सिद्ध्येत् न फलमुखतया । अतः श्रवणादिभिर्यदि पदं पश्येत् तदैव दास्यं कुर्यादिति युक्तं फलनिरूपणम् । ईहितं चेष्टितं भगवत्प्रयत्नमात्रनिष्पन्नमित्यर्थः । तवेत्यवतीर्णस्य यथा सर्वे पदार्था जगति तत्र तत्र सिद्धाः तथा संतो भगवत्कथा च गंगावद्देशविशेषे नियताः । तथा च गंगायां स्नायादित्यत्र न गंगायामागतायां स्नायादिति । किन्तु स्वयमुद्यम्य तीर्थमुद्धृत्य महता प्रयत्नेनान्तःप्रविश्य स्नायादिति । एवमत्रापि वक्तरि सति शृण्वन्तीति न किंतु सतां स्थाने गत्वा यथा वदन्ति तथोपायं विधाय समनस्केन्द्रियैः सम्यक् शक्तितात्पर्यनिर्णयः कर्तव्य इत्यर्थः । कृते च निर्णये तदानन्दे हृद्याविर्भूते रसेन गायन्ति ततो रसपरवशाः संतः अन्यान् पुरस्कृत्य गृणन्ति उपदिशन्ति । एतेषां हेतुहेतुमद्भावोऽग्रे वक्तव्यः । ततः सर्वेषां पदार्थानां भगवत्सम्बन्धित्वेन श्रुतत्वात् । यं कंचन पदार्थं दृष्ट्वा ईहितमेव स्मरन्ति ततः स्वतन्त्रफलत्वात् आनन्दहेतुत्वाच्च स्वत एव नन्दन्ति अन्तरानन्दयुक्ता भवन्तीत्यर्थः । एवं श्रवणकीर्त्तनानि सावान्तरफलानि निरूपितानि । अतो महाफलनिरूपणाय अवान्तरफलवतामेव महाफलमिति निरूपयति । त एव पश्यन्तीति । अचिरेणेति पदादेव अयोगो व्यवच्छिन्नः । कालस्याहेतुत्वादेव न कालविलंबो बाधकः यथा कश्चित् समुद्रे मज्जन् तत्तीरं पश्येत् तथा भवप्रवाहस्य उपरमो यत्र तादृशतीरभूतं पदांबुजं पश्येत् ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भवेस्मिन्नित्यत्र । स्वरूपनिरूपण इति । 'तथापरमहंसानामि'ति श्लोके इत्यर्थः । ननु तत्रापि भक्तियोगपदेन श्रवणादिरेव विवक्षित इति तस्मादस्य को विशेषो येनास्य पूर्वपक्षकोटिपात इत्यत आहुः मुक्तीत्यादि । निरन्तरोत्पत्तिमार्गाद्गमनेनेति । 'जायस्व म्रियस्वे' ति श्रावितो निरन्तरोत्पत्तिमार्गः । ल्यब्लोपे पञ्चमी । तं प्राप्य कालिकप्रलयादिति विचारेण यद्गमनं पूर्वावस्थानिवृत्तिस्तेन भवे उत्पत्तिरित्यर्थः । स्थित्येति वर्तमानार्थकशानज्बोधितया स्थित्या । निरूपितमिति । 'एवं नृणां क्रियायोगा' इत्यादिना निरूपितम् । भगवद्धर्मपरत्व इति । तद्विषयत्वे ॥ ३४ ॥ ❀ ❀ शृण्वन्तीत्यत्र । स्वतः सेवामिति स्वतः पुरुषार्थरूपां सेवाम् । एतदिति स्वतः सेवनरूपं दास्यम् । तर्हि किमिति फलनिरूपणमित्यत आहुः तथापीत्यादि । एवमत्रापीति स्वयमुद्यम्येत्यर्थः । एतेषामिति । श्रवणगानोपदेशानां स्मरणनन्दनसहितानां वा । श्रवणकीर्तनानीति बहुवचनं गानस्याप्युपलक्षकम् । अवान्तरफलं स्मरणानन्दौ । अत इति श्रवणादिभ्यः ॥ ३५ ॥ ❀ ❀ अप्यद्येत्यत्र । दैन्यं निरूपयतीति । दैन्यमनोजस्त्वं तद् दृष्ट्वा हि भगवान् भक्तेषु सख्यं प्रकटयति, यथा पुरञ्जनोपाख्यानेऽन्तर्यामिणा प्रकटितम्, अतः सख्यं प्रति तस्य कारणत्वबोधनाय तन्निरूपयतीत्यर्थः । विषयाभाव इति । दुःखाभावे । त्यागसम्भावनायां बीजमाहुः अन्यदेत्यादि ॥ ३६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अन्ये तु आत्मभुवा ब्रह्मणा प्रार्थितः सन् उदधौ नाव इव दैत्यानां भूरिभारेण सीदन्त्याः क्लिश्यन्त्या भुवो भारावतारणाय जात इत्याहुरित्यन्वयः । अस्य पक्षस्य प्रसिद्धत्वं द्योतयति-हीति ॥ ३४ ॥ ❀ ❀ केचन त्वस्मिन् भवे संसारे अविद्याकामकर्मभिः क्लिश्यमानानां जनानां क्लेशनिवृत्त्यर्थं श्रवणस्मरणार्हाणि कर्माणि करिष्यन् जात इत्याहुरित्यन्वयः । तत्र अविद्या

स्वरूपाज्ञानम्, ततो देहाद्यभिमानात्कामो विषयभोगाभिलाषः, ततस्तदुपयुक्तानि कर्माणि ॥ ३५ ॥ ❁ ❁ फलस्य दृश्यमानत्वादस्यैव पक्षस्य सिद्धान्तत्वेत्याशयेनाह-शृण्वन्तीति । ये जनाः अभीक्ष्णशः निरन्तरं तव ईहितं चरितं वक्तरि सति शृण्वन्ति, श्रोतरि सति गृणन्ति कीर्त्तयन्ति, अन्यदा रसाविर्भावैः स्वयमेव गायन्ति स्मरन्ति च, अन्यैः कीर्त्यमानमभिनन्दन्ति, ते एव अचिरेण शीघ्रमेव भवप्रवाहं जन्ममरणादिपरम्परारूपमुपरमयति निवर्त्तयतीति तथाभूतं तावकं त्वदीयं पदाम्बुजं पश्यन्ति, नान्ये इत्यन्वयः ॥ ३६ ॥

हिन्दी अनुवाद

कुछ और लोग यों कहते हैं कि यह पृथ्वी दैत्योंके अत्यन्त भारसे समुद्रमें डूबते हुए जहाजकी तरह डगमगा रही थी-पीड़ित हो रही थी, तब ब्रह्माकी प्रार्थनासे उसका भार उतारनेके लिए ही आप प्रकट हुए ॥ ३४ ॥ ❁ ❁ कोई महापुरुष यों कहते हैं कि जो लोग इस संसारमें अज्ञान, कामना और कर्मोंके बन्धनमें जकड़े हुए पीड़ित हो रहे हैं, उन लोगोंके लिये श्रवण और स्मरण करनेयोग्य लीला करनेके विचारसे ही आपने अवतार ग्रहण किया है ॥ ३५ ॥ ❁ ❁ भक्तजन बार-बार आपके चरित्रका श्रवण, गान, कीर्तन एवं स्मरण करके आनन्दित होते रहते हैं; वे ही अविलम्ब आपके उस चरण-कमलका दर्शन कर पाते हैं जो जन्म-मृत्युके प्रवाहको सदाके लिये रोक देता है ॥ ३६ ॥

अप्यद्य नस्त्वं स्वकृतेहित[1] प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः ।
येषां न चान्यद्भवतः पदाम्बुजात् परायणं राजसु योजितांहसाम् ॥ ३७ ॥
के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः । भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥
नेयं शोभिष्यते तत्र यथेदानीं गदाधर । त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥ ३९ ॥
इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः । वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः[2] ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इदानीं तवास्मत्परित्यागोऽनुचित इत्याशयेनाह अपीति चतुर्भिः । हे प्रभो सुहृदोऽतिस्निग्धाननुजीविनश्च नोऽद्यापि स्वित्किंचित्त्वं जिहाससि येषामस्माकमन्यत्परायणं नैवास्ति । तत्कुतः । राजसु योजितमंहो दुःखं यैस्तेषां स्वानां कृतमीहितमपेक्षितं येन तस्य सम्बोधनम् । विसर्गांतपाठे त्वंपदविशेषणम् ॥ ३७ ॥ ❁ ❁ ननु तव बन्धवो यदवः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्पण्यं भाषसेऽत आह । के वयमिति । यर्हि भवतो दर्शनं यदा त्वमस्मान्न पश्यसि तदा नामरूपाभ्यां नाम्ना विख्यात्या रूपेण समृद्ध्या च यदुभिः सहिताः पांडवा नाम के वयं न केऽपि । अतितुच्छा इत्यर्थः । हृषीकाणामिंद्रियाणामीशितुर्जीवस्यादर्शने यथा न किंचिन्नाम च रूपं च तद्वत् ॥ ३८ ॥ ❁ ❁ किं च यथेदानीमियमस्मत्पाल्या भूमिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकिता सती भाति तत्र तदा त्वयि निर्गते सति न शोभिष्यते ॥ ३९ ॥ ❁ ❁ अपि चेमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः सन्तः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्माकं सुखदुःखे तु त्वद्दर्शनादर्शने एव नान्ये । तत्र सुखसमयो गतः सम्प्रति दुःखसमयोऽयमायादित्याह-अप्यद्येति । अद्य त्वं नोऽस्मानपि स्विज्जिहाससि ? यतोऽद्य द्वारकां यातुमिति भावः । ननु बहुदिनमत्रावसं संप्रति द्वारकां याम्येव तत्रावश्यं मम किंचित्कृत्यमस्तीत्यनुज्ञां देहीत्यत आह-स्वकृते हितः स्वेनैव कृतं निष्पादितमीहितं चिकीर्षितं यस्य सः त्वं कृतकर्त्तव्योसीति भावः । यद्वा हे प्रभो इति त्वमत्रत्योपि तत्रत्यकृत्यकरणसमर्थोस्यतो मास्मांस्त्यजेति भावः । निर्विसर्गपाठे सम्बुद्धिरियम् । तस्य चायमभिप्रायः । त्वदनुजीविनो मत्पुत्रानधुनापि रक्षन्नत्रैव तिष्ठेत्यर्थः ॥ ३७ ॥ ❁ ❁ अत्राक्षिपति नन्विति । इत्यर्थ इति । त्वद्वियोगोस्माकं मरणकल्प इति भावः ॥ ३८ ॥ ❁ ❁ अन्यदाह-किञ्च हे गदाधरेति । त्वया शरणागतरक्षणार्थमेवास्त्राणि धृतानीति भावः । गदेत्युपलक्षणम् । यद्वा सर्वजगत्पितृतोषणं द्वारीकृत्य जगद्वृद्धिकरो गदाधररूपेण यो गयाक्षेत्रेऽतिदयावांस्तिष्ठति स एव मद्वंशवृद्धयेप्यत्रैव तिष्ठेति भावः । आदिना यवध्वजादिग्रहः ॥ ३९ ॥ ❁ ❁ त्वमेव स्थिरचरसुखहेतुरित्याह-इम इति ॥ ४० ॥

---

१. प्रा॰ पा॰—स्वकृतेहितः । २. प्रा॰ पा॰—वीक्षिताः ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

योजितमिति । राजानो ह्यस्माभिर्दुःखं प्रापिताः, अतस्त्वत्तो ह्यन्य आश्रयो नास्त्येवेत्यर्थः ॥ ३७–३९ ॥ ❀ ❀ सुपक्वा ओषधयो व्रीह्याद्या वीरुधो लताश्च येषु ते एधन्ते वर्द्धन्ते ॥ ४०–४१ ॥

श्रीमद्वीरराघवव्याख्या

तदेवं संस्तुत्याधुना प्रयाणमुपसंहरेति सूचयितुं त्वत्पदांभोजैकशरणानस्मान् हातुम् उत्सहसे किमिति काकाऽऽह अपीति षड्भिः । स्वकृते स्वार्थे त्वमपीहितः किं प्रवृत्तः किमित्यर्थः । यद्यस्माद्धे प्रभो सुहृदोऽनुजीविनो भृत्यांश्च नोऽस्मानधुना जिहाससि जिहातुमिच्छसि हि । त्यागानर्हतां सूचयितुं आत्मनो विशिनष्टि–येषां भगवतः पदांबुजादन्यत्परायणं श्रेयःप्रापकं प्राप्यं च नास्ति अत एव राजसु राज्ञां मध्ये योजितांहसां योजितदुःखानां येषामन्यत्परायणं नास्ति तानस्मानित्यन्वयः ॥ ३७ ॥ ❀ ❀ सर्वमिदं निर्हेतुकया त्वत्कृपयैव संपन्नं न त्वस्मद्गतगुणनिरीक्षणेनेत्यभिप्रायेणाह क इति । नामरूपाभ्यामुपलक्षितस्येति शेषः । मनुष्यसजातीयनामरूपाभ्यामुपलक्षितस्य तव दर्शनं हृषीकाणामिंद्रियाणामीशितुः करणाधिपस्य क्षेत्रज्ञस्य दर्शनमिव यर्हि यदा येषां जातं ते पांडवा वयं यदुभिः सह के न केऽपि । न केनापि त्वद्दर्शनहेतुना गुणेन युक्ताः, किंतु त्वत्कृपयैवेत्थं जातमिति भावः, ते वयं नामरूपाभ्यां क इति वान्वयः । किं त्वदर्शना ऋष्यादिनाम्ना तापसादिरूपेण वान्विता इत्यर्थः ॥ ३८ ॥ ❀ ❀ हे गदाधराधुना इयं भूमिः स्वैः स्वासाधारणैः लक्षणैश्चिह्नैः ध्वजवज्रांकुशादिरेखारूपैर्विलक्षिताभिज्ञैस्त्वत्पदैरंकिता सती तथा तत्र त्वद्गमनानंतरकाले नाशोभिष्यत ॥ ३९ ॥ ❀ ❀ तव वीक्षितैरेव ये जनपदा देशा अधुना स्वृद्धाः सुसमृद्धाः, स्वृद्धत्वमेवाह सुपक्वौषध्यो वीरुधः गुल्मानि च येषु तथा वनानि चाद्रयश्च नद्यश्चोदन्वंतः कमलाकराश्च तद्वद्वर्द्धंते हि ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वात्मादिभ्योऽत्यंतहितकरत्वात्त्वद्विरहोऽस्माकमतिदुःसह इत्यभिप्रेत्याह अप्यद्येति । प्रभो राजसु योजितांहसां कृतापराधानां येषामस्माकं भवतः पदांबुजादन्यत्परायणं नास्ति, त्वं तान् सुहृदोऽनुजीविनः किंकरान् त्वद्भुक्तभोजनसिक्थसेविनो नोऽस्मान् जिहाससि अपिस्वित् द्वारकागमनव्याजेन त्यक्तुमिच्छसि किंस्वित् ? कीदृशस्त्वं स्वकृतेहितः स्वतंत्रचेष्टितः स्वार्थे भृत्यार्थे हितो वा भृत्यप्रयोजनाय कृतचेष्टो वा । चशब्द एवार्थे ॥ ३७ ॥ ❀ ❀ तत्कुत इति तत्राह त इति । यदा ईशितुरिंद्रियस्वामिनो दर्शनं तदैव हृषीकाणामिंद्रियाणां दर्शनादिशक्तिरन्यदा नास्तीति यथा तथा यदूनामस्माकं यर्हि यदा भवतो दर्शनं तदा ते तव सकाशाद्यदुभिः सह पांडवाः कथं नामरूपाभ्यां युधिष्ठिरादिनाम्ना शुक्लादिरूपेण च युक्ता इति शेष इत्यन्वयः । यदा येषां यदूनामस्माकं च भवतो दर्शनं तदा ते यादवाः वयं पांडवाश्च ते वयं नामरूपवंत इति वा, के वयमिति केचित्पठंति, यर्हि भवतोऽदर्शनं तदा नाम्ना यशसा बलेन रूपेण बलकोशाद्यात्मना यदुभिः सह वयं के असत्कल्पा एवेति तस्मात्त्वद्विरहोऽस्माकं मरणकल्पः इत्यर्थः ॥ ३८ ॥ ❀ ❀ भो गदाधर इयं राजधानी इदानीं ध्वजादिलक्षणैर्विशेषेण चिह्नितैस्त्वत्पदैरंकिता यथा भाति त्वयि द्वारकां गते तथा न शोभिष्यत इत्येकान्वयः । अथवा इयं भूः त्वत्पदैरङ्किता यथा भाति त्वयि वैकुण्ठं गते यथा शोभिष्यत इति वा न केवलमस्माकमेव त्वद्गमनं दुःखकरमेषां जनपदादीनामपीत्याह इम इति । इमे जनपदादयः तव सन्निधानात्सुष्ठु ऋद्धाः त्वत्कारुण्यामृतदृष्ट्या वीक्षिताः एधंते, हि यस्मादित्येकान्वयः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पांडवाः पांडुसम्बन्धिनः ॥ ३८–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्माकं सुखदुःखे त्वद्दर्शनादर्शने एव नान्ये । तत्र सुखसमयो गतः संप्रति दुःखसमयोऽयमायातीत्याह अप्यद्येति । अद्य नोऽस्मान् अपिस्वित् त्वं जिहाससि यतोऽद्य त्वं द्वारकां यातुमिच्छसीति भावः । ननु बहुदिनमत्रावसं संप्रति द्वारकां याम्येव । तत्र ममावश्यं किंचित् कृत्यमस्ति अनुज्ञां देहीत्यत आह-स्वकृतेहितः स्वेनैव कृतं निष्पादितम् ईहितं चिकीर्षितं यस्य सः त्वं कृतकर्त्तव्योऽसीति भावः । निर्विसर्गपाठे संबोधनान्तरं, राजसु योजितम् अंहस्तत्पित्रादिवधेन वैरं यैस्तेषाम् । अनुजीविनो मत्पुत्रान् अधुनापि रक्षन्नेव तिष्ठेति भावः ॥ ३७ ॥ ❀ ❀ ननु भीमार्ज्जुनादयस्ते पुत्रा महाबलिष्ठा एव, राजा तु साक्षाद्धर्म्म एव, यादवाश्च बान्धवा इति न ते कापि चिंतेत्यत आह के वयमिति । नाम्ना ख्यात्या रूपेण सामर्थ्येन च । ईशितुर्जीवस्यादर्शने हृषीकाणां यथा न किंचिन्नाम रूपञ्च तद्वत् ॥ ३८ ॥ ❀ ❀ यदि त्वमितो यास्यसि तत्र तदा इयं भूमिः स्वलक्षणैर्ध्वजवज्रादिभिर्विलक्षितैर्वैलक्षण्यं प्राप्तैः ॥ ३९–४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वकीयानां स्वकृतमवेक्षितं येन तस्य संबोधने हे स्वकृतेहित हे प्रभो त्वं राजसु योजितांहसां योजितदुःखानामत एव येषामस्माकं भवतः पदाम्बुजादन्यत्परायणं श्रेयःप्रापकं नैवास्ति तान्सुहृदो दृढस्नेहाननुजीविनो निजभृत्यान्नोऽस्मानद्य जिहासस्यपिस्वित् हातुमिच्छसि किम् ? ॥ ३७ ॥ ❀ ❀ नन्वत्रागमने यादवानां तत्र गमने युष्माकं दुःखोदयस्तत्र किं कारणमत्राह के इति । हृषीकाणामिंद्रियाणामीशितुर्मुख्यस्य प्राणस्यादर्शनमिव भवतो यर्हि अदर्शनं तदा यदुभिः सह पांडवाः नामरूपाभ्यामुपलक्षिताः न केऽपि, अतिदीना एवेत्यर्थः ॥ ३८ ॥ ❀ ❀ इयमस्मत्परिरक्षिता भूमिः स्वैस्तदसाधारणैर्लक्षणैर्ध्वजादिचिह्नैर्विलक्षितैर्भूम्यां चिह्नितैर्यथेदानीं शोभते तथा तत्र त्वयि निर्गते सति न शोभिष्यते ॥ ३९ ॥ ❀ ❀ किंचेदानीं स्वृद्धाः सुसमृद्धाः सुपकाः ओषध्यो वीरुधश्च येषु ते इमे जनपदाः देशाः वनादयश्च तव वीक्षितैरेधंते वर्द्धंते, त्वयि निर्गते तु नेति पूर्वेणान्वयः ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं फलं निरूप्य दैन्यं निरूपयति अप्यद्येति चतुर्भिः, सख्ये हि दैन्यनिवृत्तिः, दैन्यं ह्यंतःकरणधर्मः स यदा स्फुरति स दीनः स च त्वयि सति विषयाभावे न स्फुरितः । इदानीं पुनः प्राप्ते विषये त्वद्गमनं भावयन्नेव स्फुरितस्तस्मादस्मान् दीनान् मा त्यजेति प्रार्थयते । अन्यदा हि भगवान् कार्यं सशेषं कृत्वा गच्छति । इदानीं कार्यस्य निःशेषत्वात् पुनर्नागमिष्यतीति अभिप्रायेणास्मान् त्यक्त्वा गच्छति । हे स्वकृतेहित ! स्वानामेव कृतं कार्यं तस्मिन्नेव ईहितं यस्य भक्तकार्यैककर्त्त इत्यर्थः । त्वदपरित्याग एवास्मत्कार्यं तत्रैव तवेहितं भवत्विति भावः । अपीति संभावनायाम् । अद्येति किमसत्त्यागदिनमित्यर्थः । नोऽस्मानथवा नस्त्वमिति । परित्यागः सर्वथा भाव्य इति न वक्तव्यमन्यथाऽपि त्वया कर्तुं शक्यत इति प्रभो ! जिहाससि स्वित् ? स्विदिति किमर्थे । एतावता कालेन वयं शुद्धहृदया जाताः परिग्रहदशायां च कथं त्यागः । किंच दासाश्च जाताः । अनु पश्चाज्जीवोऽस्यास्तीत्यनुजीवी दूरे गते जीवनमेव न भविष्यतीत्यर्थः । किंच येषामस्माकं तव पदांबुजव्यतिरेकेण नान्यत्परायणमस्ति । तत्र हेतुः–राजसु सर्वेषु योजितांहसां योजितापराधानाम् इदानीं वयं सर्वविरोधिनो जाताः । अतस्त्वद्रक्षाव्यतिरेकेण न जीवाम इत्यर्थः ॥ ३७ ॥ ❀ ❀ न च वयं स्वभावत एव महांत इति शंकनीयं त्वद्दर्शनेनैव महत्त्वं नान्यथा के वयं नाम्ना रूपेण च विख्याताः यदुभिः सह पांडवाः ? यर्हि भवतः अदर्शनं नाम च रूपं च गमिष्यतीत्यर्थः । यदुत्वं पांडवत्वं च तत्र हेतुभूतं दृष्टांतमाह । हृषीकाणामिंद्रियाणामीशितुः प्राणस्यादर्शने । एकैकेंद्रियव्यतिरेकेणांधबधिरा इव जीवंति । प्राणे तु गते सर्वमेव गच्छेदित्यर्थः ॥ ३८ ॥ ❀ ❀ किं च अयं देशोऽपि न सुखदो भविष्यति । यथेदानीं त्वत्पदैरंकिताऽतिशोभा युक्ता भाति इयमेवाग्रे न शोभिष्यते । स्वानि असाधारणानि लक्षणानि ध्वजादीनि तैर्विशेषेण लक्षितैः । शोभा हि सर्वा त्वत्संबंधाधीना । गदाधरेति । भूमेः पादस्पर्शे सात्त्विकभावस्वेदोद्गमे कर्दमत्वं भवति । कर्दमे च क्षेत्रे सर्वो हि साधारो गच्छतीति गदाधरत्वमुक्तमिदमलौकिकं मया दृश्यत इति तथा संबोधनम् ॥ ३९ ॥ ❀ ❀ किं च सर्वेऽपि शत्रुजयेन प्राप्ता देशा नास्माकं सुखकरा भविष्यंति, अग्रे सस्याद्यभावादिदानीं तु सस्यादिसंपत्तिर्भगवद्दर्शनाधीनेत्याह । इमे जनपदा देशाः सुष्ठु ऋद्धाः सुष्ठु पक्वाः ओषधयो व्रीह्यादयो वीरुधो द्राक्षादयश्च येषाम् । वनानि अद्रयो नद्य उदन्वंतश्च तवैव वीक्षितैरेधंते तस्मात्त्वत्परित्यागे न किंचिद्भविष्यतीत्यर्थः ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

के वयमिति श्लोकं व्याकुर्वते न च वयमित्यादि ॥ ३७ ॥ ❀ ❀ नेयं शोभिष्यते इति श्लोकं व्याकुर्वते किञ्चायं देश इत्यादि ॥ ३८ ॥ ❀ ❀ अथेत्यत्र । द्वयमेव हि साध्यमिति । आत्मनिवेदने वक्ष्यमाणयोर्द्वयोरेव यतो हेतुत्वमतो द्वयमेव साध्यमित्यर्थः । नास्तीत्यादि । तथा चात्मव्यतिरिक्ताभावपक्षे प्रार्थनवैयर्थ्यमित्यर्थः । प्रतीतेनेति । आत्मानात्मोदासीनतया प्रतीतेन । न कर्तव्यः स्यादिति । तथा च शास्त्रेषु ज्ञानिनां विरागत्वोक्तिर्विरुद्ध्येतेत्यर्थः । उक्तत्वादिति । 'इदं सर्वं यदयमात्मे' त्यादावुक्तत्वात् । स्फुरणादिति । तत्परित्याग आवश्यक इति शेषः । नन्वेवं ज्ञायते चेत्परित्यागः कर्तव्य इत्यतस्तस्य दुष्करत्वमाहुः त्वदित्यादि । तथा च न तत्रास्मत्सामर्थ्यमिति भावः । विधेयदशायामित्यादि । विधेयत्वस्फूर्तौ सत्यां शास्त्रेण हेतुना स्नेहः पुत्रादिषु मया क्रियते, तत्स्नेहकारणं विरुद्धशास्त्रैः पुत्रत्वादिधर्मबोधकैर्नाश्यते, तथा च तौ स्नेहतदभावावदृढत्वादप्रयोजकावित्यर्थः । अविमोक इति । तथा चातः प्रार्थ्यत इति भावः ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं सफलम् अवतारप्रयोजनं निरूप्य इदानीं तवास्मत्परित्यागोऽनुचित इत्याशयेन स्वदैन्यमाह–अपीति चतुर्भिः । द्वारकाकार्यं त्वत्र स्थित्वाऽपि त्वं कर्तुं समर्थ इत्याशयेन सम्बोधयति–हे प्रभो इति । भक्तवत्सलत्वाद्भक्तकार्यसाधने निरपेक्षतया त्वमेव तत्परो नान्य इति सूचयन्ती पुनः सम्बोधयति–हे स्वकृतेहितेति, स्वानां भक्तानां कृतं कार्यमीहितमपेक्षितं यस्य तत्सम्बो-

धनम् । विसर्गान्तपाठे तु त्वम्पदविशेषणम् । अपिस्वित् किंस्वित् नोऽस्मानद्य त्वं जिहाससि त्यक्तुमिच्छसि, यतो द्वारकां गन्तुमिच्छसि । स्विदित्यनेन तदनुचितमिति सूचितम् । कुतोऽनुचितत्वमित्यपेक्षायां अनुजीवित्वादिति हेतुमाह–अनुजीविन इति । तदपि कुत इत्यपेक्षायामाह–सुहृद इति, भक्तानित्यर्थः । भक्तत्वमेव स्पष्टयति–येषामिति । येषामस्माकं भवतः पदाम्बुजादन्यत् परायणं आश्रयो नैवास्तीत्यन्वयः । चकारोऽवधारणार्थः । बहुवचनं पुत्राद्यभिप्रायेण । कुतस्तव भयमागतं येनैवं व्याकुलतया प्रार्थयसे इत्यपेक्षायां विनिर्जितराजेभ्य इत्यभिप्रेत्याह–राजस्विति । पुत्रादिवधपूर्वकं राज्याद्यपहरणेन राजसु योजितमंहो दुःखं यैस्तेषामित्यर्थः ॥ ३७ ॥ ❀ ❀ ननु तव बान्धवा यादवाः पुत्राश्च पाण्डवाः शूरा अतिसमर्थाश्चेति न ते काऽपि चिन्ता । किमिति कार्पण्यं भाषसे इत्याशङ्क्याह–के वयमिति । यर्हि भवतोऽदर्शनं यदा त्वमस्मान्न द्रक्ष्यसि तदा नाम्ना विख्यातया रूपेण समृद्ध्या च यदुभिः सह सहिताः पाण्डवाः के नाम वयं ? न केपि, अतितुच्छा इत्यर्थः । तत्र दृष्टान्तमाह–हृषीकाणामिति, हृषीकाणीन्द्रियाणि तेषां मध्ये एकैकस्याभावेऽन्धत्वादिकं भवति तेषामीशितुः प्राणस्यादर्शने तु यथा न तेषां नाम च रूपं च किञ्चित्तथा पाण्डवादीनामपि कस्यचिदभावे किञ्चिद्वैगुण्यमात्रं तवादर्शने तु न नामरूपादि किञ्चिदपीत्यर्थः ॥ ३८ ॥ ❀ ❀ आस्तामस्मद्वार्त्ता, हे गदाधर इयमस्मत्पाल्या भूमिरपि यथेदानीं स्वैरसाधारणैर्वज्राङ्कुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरङ्किता सती भाति शोभते तथा तत्र तदा त्वन्निर्गमनानन्तरं न शोभिष्यते इत्यन्वयः । साक्षाद्भगवद्विष्णववतारत्वादिति सम्बोधनेन सूचितम् ॥ ३९ ॥ ❀ ❀ किं बहूक्त्या ? सर्वेषां समृद्धिर्वृद्धिश्च तव कृपाकटाक्षैरेवेत्याह–इमे इति, तव वीक्षितैरेवेमे जनपदा देशाः स्वृद्धाः समृद्धाः । समृद्धिमेव स्पष्टयति–सुष्ठु पक्का ओषधयो व्रीह्यादयो वीरुधो द्राक्षादयश्च येषु ते तथेत्यर्थः । तथा तव वीक्षितैरेव वनादयोऽप्येधन्ते वर्द्धन्ते । हिशब्दोऽवधारणे । त्वदुपेक्षितास्तु शुष्का भविष्यन्तीति भावः ॥ ४० ॥

हिन्दी अनुवाद

भक्तवाञ्छाकल्पतरु प्रभो ! क्या अब आप अपने आश्रित और सम्बन्धी हमलोगोंको छोड़कर जाना चाहते हैं ? आप जानते हैं कि आपके चरण-कमलोंके अतिरिक्त हमें और किसीका सहारा नहीं है । पृथ्वीके राजाओंके तो हम यों ही विरोधी हो गये हैं ॥ ३७ ॥ ❀ ❀ जैसे जीवके बिना इन्द्रियाँ शक्तिहीन हो जाती हैं, वैसे ही आपके दर्शन बिना यदुवंशियोंके और हमारे पुत्र पाण्डवोंके नाम तथा रूपका अस्तित्व ही क्या रह जाता है ? ॥ ३८ ॥ ❀ ❀ गदाधर ! आपके विलक्षण चरण-चिह्नोंसे चिह्नित यह कुरुजाङ्गल-देशकी भूमि आज जैसी शोभायमान हो रही है, वैसी आपके चले जानेके बाद न रहेगी ॥ ३९ ॥ आपकी दृष्टिके प्रभावसे ही यह देश पकी हुई फसल तथा लता-वृक्षोंसे समृद्ध हो रहा है । ये वन, पर्वत, नदी और समुद्र भी आपकी दृष्टिसे ही वृद्धिको प्राप्त हो रहे हैं ॥ ४० ॥

अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे । स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु ॥ ४१ ॥
त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् । रतिमुद्वहता[1] दद्धा गङ्गेवौघमुदन्वति ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गमने पांडवानामकुशलमगमने च यादवानामित्युभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते । अथेति । विश्वेशेत्यादिसम्बोधनानि स्नेहपाशच्छेदे सामर्थ्यख्यापनाय । दृढं संततम् ॥ ४१ ॥ ❀ ❀ ततः किमत आह । त्वयीति । अनन्यविषया सती मे मती रतिमुद्वहतात् । अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः । ओघं पूरम् । यथा गंगा प्रतिबन्धं न गणयत्येवं मतिरपि विघ्नान्मा गणयत्विति भावः ॥ ४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विश्वेशेति । सम्बुद्धित्रयस्य त्वमेव विश्वरूपेण तदन्तर्यामिरूपेण तन्नियन्तृरूपेण विदुषां भासीत्यतस्तव सर्वविश्वहितं कर्त्तुं समर्थस्य विश्वांतर्गताया एकस्या ममाभिलषितपूरणं चात्यल्पतरमेवेति भावः । दृढं गाढम् । अत्रायं भावः–यस्त्वं सर्वेषामेव विश्वेषामीशश्चेतयिता तद्रूपोपि स स्वानुवर्त्तिनां वृष्णिपांडूनां कल्याणाय कृपासिन्धुस्त्वमेव सावधानस्सदैवासि । अहं किं तत्कुशलचिंतया वृथैव म्रिय इति भावः ॥ ४१ ॥ ❀ ❀ तर्हि किं ब्रह्मज्ञाने स्पृहावती भवसि वृष्णिषु स्नेहच्छेदे मय्यपि स्नेहच्छेदात्तत्र नेत्याह–त्वयि मतिर्मे धीः । इत्यर्थ इति । किं त्वनन्यविषयास्त्वद्भक्तास्त्वदभिन्ना एव तेषु प्रीतिं विना त्वय्यपि प्रीतिर्न सिध्येत् । त्वं प्रसीदसीत्यपि नेत्यहं जानाम्येवातस्त्वद्भक्तेभ्योऽन्यत्र ममत्वशून्या तदपि पांडवेषु यादवेषु त्वद्भक्तेष्वपि यत्स्नेहस्य छेदं प्रार्थये तत्त्वदवतारात्पूर्व एव देहसम्बन्धेन यो व्यवहारमयः स्नेहः प्रवृत्तस्तस्यैव, न तु त्वत्प्रियत्वनिबन्धनस्य ।

---

१. प्रा॰ पा॰—रतिमुद्वहतां तद्वत् ।

अत एव बन्धकत्वेन मया स पाशरूपकेण प्रयुक्त इति भावः । अत एव गंगा यथोदन्वत्यखिलनदनदीनामाश्रये ओघं पूरं वहति तथा मतिरपि सर्वभक्ताश्रयणीये त्वयि रतिम् । अपरं स्वामिवत् ॥ ४२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

पूरः प्रवाहस्तमित्यर्थः ॥ ४२ ॥

श्रीमद्वीरराघवव्याख्या

मदभिप्रायं जानास्येत्येवेत्यभिप्रायेण संबोधयतीत्याह–अथशब्दः प्रश्नद्योतकः, हे विश्वेश सर्वांतःकरणनियंतः हे विश्वात्मन्सर्वांतरात्मन् विश्वशरीरकस्वेषु पांडवेषु मे मयि विभक्तिव्यत्यय आर्षः, वृष्णिषु यादवेषु चेमं दृढं स्नेह एव पाशः तं छिन्धि । यद्वा वृष्णिषु पांडवेषु च त्वत्स्नेहपाशः–इत्यभिप्रायेण मे इत्युक्तम् ॥ ४१ ॥ ❀ ❀ तदेवं व्यंजयंती प्रार्थयते त्वयीति । हे मधुपते ! यादवानामेव माधव इति नामांतरं तच्च नवमे स्फुटीभविष्यति, त्वय्यनन्ये विषयादितरा अविषया मम मतिरसकृद्वा उदन्वति समुद्रे गंगाजलौघमिव उद्वहतात् । यथा गंगासमुद्रमप्राप्यैव स्वजलौघं वरोद्धुमक्षमा समुद्रं प्राप्यैव स्वजलौघं वहति एवं त्वामप्राप्य रंतुमक्षमा मे मतिस्त्वय्येव रतिमुद्वहतादित्यर्थः ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पांडवयादवेषु भागवतत्वेन स्नेह आवश्यक इति जानंत्यपि पुत्रमित्रादिस्नेहः संसारहेतुत्वाद्धेय इति ज्ञापयितुमाह अथेति । अथानंतरमेतदनुगृहाण किं तदिति हे विश्वेश विश्वात्मन् विश्वव्यापिन् विश्वमूर्त्ते अनंतविग्रहस्वकेषु स्वीयत्वेनाभिमतेषु पांडवेषु पांडवसंबंधिषु यादवेषु च मम गाढं पुत्रमित्रादिस्नेहपाशं छिंधीत्यन्वयः । पुत्रादिस्नेह एव च्छेद्यो न तु भागवतस्नेहः, तस्य शास्त्रे कर्त्तव्यत्वेन विहितत्वादित्यभिप्रेत्योक्तमिममिति ॥ ४१ ॥ ❀ ❀ न केवलं विषयविरक्त्याऽलं किंतु त्वय्यनपायिनीं रतिं त्वं वितरेत्याह त्वयीति । हे मधुपते आनन्दनाथ ! नान्यविषया रुद्रादिविषया अनन्यविषया ओघं जलप्रवाहवेगं उदन्वति समुद्रे ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथेति तैरवतारितम् । एवमप्युभयेषां तादृशतदेकालम्बनतादर्शनेन तेष्वधिकभगवत्प्रीत्याधारत्वं स्वस्याधिकस्नेहहेतुरिति तेषु स्नेहच्छेदव्याजेनोभयेषामपि त्वदविच्छेद एव क्रियतामिति च व्यज्यते । ततश्चोत्तरत्र सूतवाक्ये तां बाढमित्युपामन्त्र्येत्यत्र श्रीभगवदभ्युपगमोऽपि सर्व्वत्रैव सङ्गच्छते ॥ ४१ ॥ ❀ ❀ सम्बन्धवशादन्यविषया त्वयि या मतिः सैवासकृदनवच्छेदेन रतिमुद्वहतात् । जातया रत्या प्रतिबन्धं निराकरोत्वित्यर्थः । तदेतद् दृष्टान्तेन स्पष्टयति गंगेवौघमिति । सा यथा महाप्रवाहद्वारा तथैवेत्यर्थः । उभयोरपि प्रतिबन्धे सत्यधिकोच्छलनकृतिसाम्यात् ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गमने पांडवानामकुशलम् अगमने च यादवानामित्युभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति । यस्त्वं सर्वेषामेव विश्वेषाम् ईशो भवसि । आत्मा चेतयिता । तद्रूपोऽपि स्वस्वानुवर्त्तिनां वृष्णिपांडूनां कल्याणाय कृपासिन्धुस्त्वमेव सावधानः सदैवासि । अहं किन्तत्कुशलचिंतया वृथैव म्रिये इति भावः ॥ ४१ ॥ ❀ ❀ तर्हि किं ब्रह्मज्ञाने स्पृहावती भवसि ? वृष्णिषु स्नेहच्छेदे मय्यपि स्नेहच्छेदात् तत्र नेत्याह–त्वयि मतिः रतिं प्रीतिम् उत्कर्षेण वहतात् अनवच्छिन्नतया दधातु । किन्त्वनन्यविषया त्वद्भक्तास्त्वदभिन्ना एव तेषु प्रीतिं विना त्वय्यपि प्रीतिर्न सिद्ध्येत्, त्वं प्रसीदसीत्यपि नेत्यहं जानाम्येव । अतस्त्वत्तस्त्वद्भक्तेभ्यश्चान्यत्र ममत्वशून्या । तदपि पांडवेषु यादवेषु त्वद्भक्तेष्वपि यत् स्नेहस्य छेदं प्रार्थये तत् त्वदवतारात् पूर्वत एव देहसम्बन्धेन यो व्यवहारमयः स्नेहः प्रवृत्तस्तस्यैव, न तु त्वत्प्रियत्वनिबन्धनस्य । अत एव बंधकत्वेन स मया पाशरूपकेण प्रयुक्त इति भावः । अत एव गंगा यथा उदन्वत्यखिलनदनदीनामाश्रये ओघं पूरं वहति तथा मतिरपि सर्वभक्ताश्रयणीये त्वयि रतिम् । यथा च गंगा प्रतिबन्धं न गणयति एवं मतिरपि विघ्नान् न गणयत्विति भावः ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उभयकुलबंधूपलक्षितात्प्रपंचाद्वैराग्यं प्रार्थयते अथेति ॥ ४१ ॥ ❀ ❀ भगवति भक्तिं प्रार्थयति त्वयीति । हे मधुपते उदन्वति समुद्रे ओघं पूरं गंगेव मे मतिः त्वयि अनन्यविषयाऽव्यभिचारिणी सती रतिमनुरक्तिमसकृत्प्रतिक्षणमद्धा साक्षादुद्वहतात् ॥ ४२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं बहिर्मुखतमा दैन्यं प्रतिपाद्य अंतर्मुखतया भिन्नप्रक्रमेण द्वयं प्रार्थयते अथेति द्वाभ्याम्। द्वयमेव हि साध्यम् असंग आत्मव्यतिरिक्ते, भगवति रतिश्च। तत्र आत्मव्यतिरिक्तेऽसंगो विचार्यते किमात्मव्यतिरिक्तं किंचिदस्ति न वेति। अस्तित्वे भगवतः सर्वात्मत्वं भज्येत, नास्ति चेत् केन सहासंगः। ननु प्रतीतेर्नेति चेत्तत् प्रतीतं भगवानन्यो वा ? उभयथाऽपि पूर्वोक्त एव दोषः। अन्यथात्वेन प्रतीतेर्नेति चेत् यद्यपि तत्रापि पूर्ववद्विकल्पः संभवति, तथापि ज्ञानिनोऽसंगो न कर्तव्यः स्यात्। तस्मात् एवमेकं रूपं वक्तव्यं यथा शास्त्रार्थपरित्यागौ संगतौ भवतः। तदाह विश्वेशविश्वात्मन्निति। विश्वं कार्यं स्वयं सर्वकारणमत ईशः, अनेन स्वार्थं सर्वं सृजतीति मुख्यसिद्धांतो ज्ञापितो भवति। ततो भगवदर्थे कृते जगति स्वस्याहंताममतायां भगवद्विरोधेन बंधः स्यात् "क्रीडार्थमात्मन" इति वाक्यात्। अतो यथा अक्ष्णोरिंद्रेंद्राण्योर्लक्ष्मीनारायणयो रमणार्थं निद्रा सृष्टा तथैव परित्यागः सृष्ट इत्यर्थः। इदानीं सर्वात्मत्वं साधयति विश्वात्मन्निति। विश्वस्यात्मा स्वरूपं यदैव आत्मत्वेन यदेव न स्फुरति तस्यैव परित्यागः। ननु वस्तुतः आत्मत्वे किं स्फुरणेनेति चेत् न यतोऽयमात्मा। उद्देश्यविधेयभावस्योक्तत्वात् उद्देश्यस्फुरणे त्यागः। बोधतारतम्य एव सर्वसाधनानामुपयोगात्। न च विश्वात्मत्वमौपचारिकं 'भद्रसेनो ममात्मे'तिवत्तत्राह विश्वमूर्त्त इति। विश्वं मूर्तौ यस्य विश्वस्मिन् वा मूर्त्तिर्यस्य विश्वं मूर्त्तिर्यस्य त्रेधाऽपि नोपचरितं सर्वात्मत्वमत उद्देश्यत्वेन पुत्रादेः स्फुरणात् त्वद्भक्त्या च स्नेह उत्पादितः विधेयदशायां स्नेहः क्रियते तद्विरुद्धशास्त्रैर्नाश्यते मायाकृतस्तु स्नेहो न भगवद्व्यतिरेकेण अन्यस्मादपगच्छति "मामेव ये प्रपद्यंत" इति वाक्यात् छेदने पुनर्योजनाभावः। दृढमिति। दृढग्रंथित्वादविमोकः ॥ ४१ ॥ ❀ ❀ एवमुद्देश्ये वैराग्यमुक्त्वा विधेये भगवति साक्षादवतीर्णे स्नेहं प्रार्थयते त्वयि मेऽनन्यविषयेति। यद्यपि भ्रातृपुत्रत्वेन रक्षकत्वेन च स्नेहोऽस्त्येव तथापि स देहसंबंधेनान्यविषयकः। आत्मसंबंधी हि त्वनन्यविषयः। परमात्माऽयमात्माऽधिष्ठात्री देवतेति मतिः परमां प्रीतिमुद्वहतात्। ज्ञानेन भक्तिर्भवत्वित्यर्थः। प्रतिबंधकागणनायां रतेर्भगवदभेदे च दृष्टांतः परम्परासम्बन्धाभावे च ओघं प्रवाहमुदन्वति समुद्रे ॥ ४२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

त्वयीत्यत्र। स्नेहं प्रार्थयत इति। आत्मनिवेदनहेतुत्वेन स्नेहं प्रार्थयत इत्यर्थः। ज्ञानेनेति भगवति ह्यात्माधिष्ठातृत्वज्ञानेन। प्रतिबन्धकागणनायामिति। तत्तिरस्कृत्या प्रतिबध्यते ॥ ४१ ॥ ❀ ❀ श्रीकृष्णेत्यत्र। सम्बोधयदिति। क्रियाविशेषणमिदम्। स्वरूपमिति। 'नमस्य' इत्यादिश्लोकत्रये गीतोक्तस्य पुरुषोत्तमस्वरूपस्य सिद्धत्वात्तस्य श्रौतत्वं बोधयितुं मूलनाम्ना स्वरूपमेवं बोध्यते इत्यर्थः। गाम्भीर्यादय इति। तेन वैष्णवतन्त्रोक्तरूपतापि सूचितेति भावः। हविस्त्याग इति। यागात्मा धर्म इति शेषः। अन्येषामिति। फलानामित्यर्थः। यद्योगेनेत्यादि। योगो हि चित्तवृत्तिनिरोधात्मकः, तेन करणे मनसो रुद्धत्वान्न प्रसाद इत्यतोतिदैन्यम्, तथा च तदीश्वरत्वेन तन्नियामकत्वाद्वृत्त्यनिरोधे चित्तप्रसादाद्दैन्यनिवृत्तिरिति भावः ॥ ४२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं बहिर्मुखतया दैन्यं निरूप्य भगवतो गमने पाण्डवानां अकुशलं अगमने च यादवानां अकुशलमिति विचार्य उभयथापि व्याकुलता भवति तत्र तेषु स्नेह एव हेतुः, स च परमपुरुषार्थभगवत्प्रीतिप्रवाहस्य प्रतिबन्धक इत्यन्तर्मुखतया भिन्नप्रक्रमेण तेषु स्नेहनिवृत्तिं प्रार्थयते-अथेति भिन्नप्रक्रमे। त्वद्रचितस्य स्नेहपाशस्य विच्छेदस्तव नाशक्य इति सूचयन्ती जीवजडान्तर्यामिरूपेण भगवन्तं त्रेधा सम्बोधयति-हे विश्वस्य चराचरात्मकस्य जगतः ईश नियन्तः, हे विश्वात्मन् जीव, विश्वमूर्त्ते विश्वं मूर्त्तिर्यस्य तत्सम्बोधनं, विश्वस्वरूपेत्यर्थः। स्वकेषु पाण्डुषु वृष्णिषु च दृढं त्वद्व्यतिरिक्तेन छेत्तुमशक्यमिमं मे मम स्नेहरूपं पाशं त्वं छिन्धीत्यन्वयः ॥ ४१ ॥ ❀ ❀ एवं प्रतिबन्धकनिवृत्तावपि परमपुरुषार्थरूपा प्रेमलक्षणा भक्तिस्तु "यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुतेर्भगवत्कृपां विना दुर्लभेति तां प्रार्थयते-त्वयीति। हे मधुपते इति सम्बोधनेन मधूपलक्षितसर्वयादवपतित्वात् तत्पालनार्थं द्वारकागमनस्याप्यावश्यकत्वं चेत्तदा मत्प्रार्थितं दत्त्वा यथेच्छसि तथा कुर्विति सूचयति। मे मम मतिस्त्वयि असकृत् निरन्तरं रतिं प्रीतिमुद्वहतादुत्कर्षेण प्रतिक्षणं वर्द्धमानां करोत्वित्यन्वयः। ननु प्रयोजनमुद्दिश्यैवं प्रीत्याऽपि कामितमात्रमेव सिद्ध्येन्न परमपुरुषार्थ इत्याशङ्क्याह-अद्धेति, साक्षादित्यर्थः। एतदेव स्पष्टयति-अनन्यविषयेति, विषयान्तरसङ्कल्परहितेत्यर्थः। विघ्नमगणयित्वा प्रवहणे दृष्टान्तमाह-गङ्गेति, उदन्वति समुद्रे यथा गङ्गा ओघं जलपूरं प्रवहति तथेत्यर्थः ॥ ४२ ॥

हिन्दी अनुवाद

आप विश्वके स्वामी हैं, विश्वके आत्मा हैं और विश्वरूप हैं। यदुवंशियों और पाण्डवोंमें मेरी बड़ी ममता हो गयी है। आप कृपा करके स्वजनोंके साथ जोड़े हुए इस स्नेहकी दृढ़ फाँसीको काट दीजिये ॥ ४१ ॥ ❀ ❀ श्रीकृष्ण ! जैसे गङ्गाकी अखण्ड धारा समुद्रमें गिरती रहती है, वैसे ही मेरी बुद्धि किसी दूसरी ओर न जाकर आपसे ही निरन्तर प्रेम करती रहे ॥ ४२ ॥

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ॥ ४३ ॥

सूत उवाच

पृथयेत्थं कलपदैः परिणूताखिलोदयः । मन्दं जहास वैकुण्ठो मोहयन्निव मायया ॥ ४४ ॥
तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् । स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः ॥ ४५ ॥
व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा । प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचा[१]र्पितः ॥ ४६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमभ्यर्थ्य पुनः प्रणमति । हे श्रीकृष्ण ते नमः । उपकाराननुस्मरन्ती बहुधा सम्बोधयति । कृष्णसखार्जुनस्य सखे । वृष्णीनामृषभ श्रेष्ठ । अवन्यै भूम्यै द्रुह्यन्ति ये राजन्यास्तेषां वंशस्य दहन । एवमप्यनपवर्गवीर्याक्षीणप्रभाव । गोविन्द प्राप्तकामधेन्वैश्वर्य । गोद्विजसुराणामार्तिहरोऽवतारो यस्येति ॥ ४३ ॥ ❀ ❀ कलानि मधुराणि पदानि येषु तैर्वाक्यैः परिणूतः स्तुतोऽखिल उदयो महिमा यस्य सः । णुस्तुतावित्यस्मात् । परिणुतेति वक्तव्ये दीर्घश्छन्दोऽनुरोधेन । मंदमीषत् । तस्य हास एव माया । वक्ष्यति हि 'हासो जनोन्मादकरी च माया' इति ॥ ४४ ॥ ❀ ❀ त्वयि मेऽनन्यविषया मतिरिति यत्प्रार्थितं तद्बाढमित्यंगीकृत्य रथस्थानाद्गजसाह्वयमागत्य पश्चात्तां चान्याश्च सुभद्राप्रमुखाः स्त्रियः उपामंत्र्यानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णात्रैव कंचित्कालं निवसेति संप्रार्थ्य निवारितः ॥ ४५ ॥ ❀ ❀ अथ भीष्मनिर्याणोत्सवं वक्तुमुपोद्घातकथां प्रस्तौति । व्यासाद्यैः प्रबोधितोऽपि शुचा व्याप्तः सन्नाबुद्ध्यत विवेकं न प्राप । कुतः ? ईश्वरेहाया अज्ञैः स्वभक्तभीष्मनिर्याणमहोत्सवाय राज्ञा सह कुरुक्षेत्रं गन्तव्यं तत्र तन्मुखेनैवायं प्रबोधनीय इतीश्वराभिप्रायः कार्यद्वयविधायकस्तमजानद्भिरित्यर्थः । श्रीकृष्णेनापि प्रबोधितो नाबुध्यत । अत्र हेतुः । अद्भुतकर्मणेति । यथा कुरुपांडवसंधानार्थं गतेऽपि यथोचितमेव वदन्नपि विग्रहमेव दृढीकृतवानेवमत्रापि प्रबोधयन्नबोधमेव दृढीचकारेत्यर्थः ॥ ४६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे श्रियाऽतसीकुसुमकान्त्या कृष्ण नीलवर्णेति वा । "अतसीकुसुमोपमेयकान्तिः" इत्याद्युक्तेः । यद्वा श्रिया स्वरूपसंपत्त्या कर्षत्याकर्षति गोपीजनप्रेमभक्तान्स्वसमीपमिति श्रीकृष्णः । श्रीप्रदः कृष्णः श्रीकृष्णः । देवब्राह्मणवत्समासः । यद्वा वृष्णिवद्वर्षन्मेघवदृषभ श्रेष्ठ सर्वोपकारकेत्यर्थः । "वृष्णिः कुलविशेषे च वर्षन्मेघेऽपि कथ्यते" इति तीर्थः । "वृष्णिः पांडवचन्द्रयोः । त्रिषु ना यादवे मेषे" इति मेदिन्युक्तेः । वृष्णयः पांडवा ऋषभाः प्रिया यस्य स तथा । "प्रिये श्रेष्ठे वृषेर्षभः" इत्यभिधानात् । भूमिद्रोहोत्र तदुपरि पापाचरणमेव तद्वन्तो राजानः कंसाद्यास्तेषां वंशस्य दहनो नाशकः । एवमपि दुष्टराजवंशदाहकत्वेपि अक्षीणप्रभावोऽप्राप्तश्रमः । प्राप्तं कामधेनुहेतुकं गवामिंद्रत्वरूपमैश्वर्यं येन । वस्तुतस्तु गोभिर्वेदांतवाक्यैर्विंद्यते उपलभ्यत इति गोविंदः । तथा च तदनभिज्ञाहं न त्वां ज्ञातुं समर्थास्मीति भावः । त्वं भक्तजनक्लेशकर्षकोपि सामान्यतः मत्पुत्रस्यार्जुनस्य तु विशेषत इत्याह-कृष्णसखेति । न केवलमर्जुन एव तव प्रियोपि तु यदवोऽपीत्याह-वृष्ण्यृषभेति । तत्प्रियत्वं हि तद्विरोधिनृपनाशेनैवाकृतेत्याह-अवनिध्रुग्राजन्यवंशदहनेति । तैरेकीभूयापि त्वं जेतुं न शक्य इत्याह-अनपवर्गवीर्येति । भक्तानुग्रहार्थमकर्तव्यमपि त्वं करोष्येवेत्याह-गोविंदेति । गोचारणरूपमतिनिकृष्टमपि कर्म त्वयांगीकृतं श्रीनन्दयशोदानुग्रहायेति भावः । वस्तुतस्तवावतारो गोब्राह्मणामरदुःखनिवृत्त्यर्थमेव नापि तु सर्वजनदुःखहरणार्थमेव । गवादित्रिभी रक्षितैः सर्वे रक्षिताः स्युस्तथाहि-गवां ब्राह्मणानाञ्च हविर्मंत्राधारत्वेन तद्रक्षया यज्ञसिद्धेर्देवा अपि रक्षितास्स्युस्ते च सम्यग्वृष्ट्यादिना विश्वमखिलमेव रक्षन्तीति "देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥" इति श्रीगीतोक्तेः । एतेऽधुना दुःखिन इति ज्ञाने तवान्यापेक्षैव नेत्याह-योगेश्वरेति । ननु योगेश्वराणामन्यक्लेशापहरणावकाश एव नास्ति "मौनं चरन्ति मुनयो न परार्थनिष्ठाः" इति प्रह्लादोक्तेस्तत्राह-अखिलगुरो इति । सर्वहितकर्तुस्तव न ह्यन्ययोगेश्वरसाम्यमिति । नन्वखिलहितोपदेष्टुरपि सामर्थ्याभावे न किञ्चित्तेन कर्तुं शक्यत इति चेत्तत्राह-हे भगवन्निति । परमैश्वर्ययुक्तस्य सर्वेश्वरस्य तव न किमप्यशक्यमिति भावः । अहं तु सर्वथा तव तत्त्वमजानाना केवलं नमस्करोम्येवेत्याह-नमस्त इति ॥ ४३ ॥ ❀ ❀ "णू स्तवने" इति तौदादिकस्य नुवतेर्दीर्घांतत्वात्तस्यैवायं प्रयोग इति ध्येयम् । स्वामिचरणानामार्षत्वव्याख्यानं प्रयास एव । हासो जनोन्मादकरीत्यस्य विराड्गतत्वमेवातो मायया कृपया मोहयन् । इवशब्दो वाक्यालंकारे । "माया दम्भे कृपायां च" इत्यभिधानात् । विश्वनाथस्तु माययेव

१. प्रा० पा०—शुचार्दितः ।

मोहयन्न तु मायया किं तु प्रेम्णैवेत्यर्थमाह ॥ ४४ ॥ ❀ ❀ अत्र राज्ञः प्रेम्णेति विवशकरत्वं व्यंजितम् ॥ ४५ ॥ ❀ ❀ उपोद्घातकथां प्रस्तावावेशकारिणीं कथाम्। वर्णनीयमर्थं मनसि निधाय तदर्थमर्थांतरकल्पनमुपोद्घातः। तत्र कुरुक्षेत्रे तन्मुखेन भीष्मास्येन। इत्यर्थ इति। "न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम्। यद्विजिज्ञासया युक्ता मुह्यंते कवयोऽपि हि॥" इत्युक्तेः। तत्राबोधे। इत्यर्थ इति। तस्य विचित्रानन्तशक्तित्वात्तत्कथनाभिप्रायो दुर्ज्ञेय इति भावः। अत्र विश्वनाथः—यद्यहमिदानीमिहैव स्थितोऽभूवं तर्ह्यासन्नमृत्युकालं मद्दर्शनं विना मर्तुमनिच्छन्तं भीष्मं स्वभक्तमात्मानं सपरिकरमेव संदर्श्य सुखयामि। लोके तदुत्कर्षं ख्यापयितुं तन्मुखेनैव राजानं च प्रबोधयामीति भगवदभिप्रायं व्यंजयन्नाह। ईश्वरस्य श्रीकृष्णस्येहाया उक्तलक्षणाभिप्रायस्याज्ञैर्विज्ञैर्वा। अद्भुतकर्मणेति। इदमस्याद्भुतं कर्म यत्स्वयमेवास्य हृदि प्रविश्याविवेकमुत्थापितवान्। बहिश्च स्वकर्तृकेण व्यासादिकर्तृकेणापि प्रबोधेनाबोधमेव दृढीचकार। तेन च भीष्ममुखोदितेन तत्त्वेन तं प्रबोध्य व्यासादिभ्योऽपि मत्तोपि मदेकांतभक्तो भीष्म एवातिशयेन धर्मज्ञानतत्त्वज्ञ इति लोके विख्यापयामास। किञ्च युधिष्ठिरस्य तु ततोपि प्रेमाधिक्यादाधिक्यं यत्तदनुरोधेनैव द्वारकामगच्छंस्तत्र स्थितः। तत एव तन्निकटं गत्वा तथा चक्रे इति विवेचनीयम् ॥ ४६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वंशस्येति। यथा वायुररण्ये वंशेषु परस्परसङ्घर्षेण वह्निमुत्पाद्य तेन तान् नाशयति एवं राजन्यवंशेषु परस्परकलहवशाद् वैरमुत्पाद्य तेन तन्नाशकरत्वमिति वंशदहनपदेन सूचितम् ॥ ४३ ॥ ❀ ❀ हास इति द्वितीयस्कंधस्य प्रथमाध्यायीयैकत्रिंशश्लोकः ॥ ४४-४५ ॥ ❀ ❀ उपोद्घातेति वक्ष्यमाणमर्थं मनसि निधाय तदर्थम् अर्थान्तरवर्णनम् उपोद्घातः। "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा" इति तल्लक्षणात् ॥ ४६-४७ ॥

श्रीमद्वीरराघवव्याख्या

स्वाभिप्रेतज्ञत्वमनुमतौ "अंजलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" त्युक्तविधांजलिरेवोपायो न ततोऽन्योऽस्तीत्यभिप्रायेण केवलमितरासाधारणगुणविशिष्टं संबोध्यं नमस्करोति श्रीकृष्णेति। हे श्रीकृष्ण सर्वलोकसुखकर, कृष्णोऽर्जुनस्तस्य सखा कृष्णसखः तत्संबोधनम्, वृष्णीनामृषभ श्रेष्ठ, अवनिद्रुहामवन्युपलक्षितलोकोपद्रवकारिणां राजन्यानां वंशस्य दहनो यथा वेणूनां दहनोऽग्निर्नाशकः तद्वद्राजन्यकुलनाशक! अनपवर्गमनंतं वीर्यं यस्य हे गोविंद गवां द्विजानां सुराणां चार्त्तिहरोऽवतारो यस्य योगेश्वर सूक्ष्मदर्शिन्नखिलगुरो हितोपदेष्टः! ॥ ४३ ॥ ❀ ❀ इत्थं कलानि मधुराणि पदानि वचांसि तैः पृथया कुंत्या कर्त्र्या परिणूतः परिगीतोऽखिल उदयो महिमा यस्य स वैकुण्ठः श्रीकृष्णः मायया हासात्मिकयाऽऽश्चर्यशक्त्या लोकं मोहयन्निव मंदमीषज्जहास हसितवान्। मंदमिति क्रियाविशेषणम् ॥ ४४ ॥ ❀ ❀ तावत्स्वपुरं यातुमुद्युक्तो भगवांस्तां पृथामन्याः स्त्रीश्च बाढमोमित्युपामंत्र्यांगीकारपूर्वकमनुज्ञाप्य प्रेम्णा राज्ञा युधिष्ठिरेण च निवारितः गजाह्वयं हास्तिनपुरमेव पुनः प्राविशत्। प्रविश्येति पाठे प्रविश्य तत्रैव कंचित्कालमुवासेति शेषः ॥ ४५ ॥ ❀ ❀ तदा ईश्वरेहाज्ञैरीश्वरचेष्टाभिज्ञैर्व्यासाद्यैरद्भुतं कर्म चेष्टितं यस्य तेन श्रीकृष्णेन भगवता च इतिहासैः प्रतिबोधितोऽपि धर्मसुतः अत एव शुचार्पितः नाबुध्यत कालस्य गतिरीदृशीति न विजज्ञे ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

स्तुतिमुपसंहरति श्रीकृष्णेति। श्रिया अतसिकाकुसुमसदृशया कृष्ण नीलवर्ण कृष्णसख अर्जुनसख वृष्णिवृषभ वृष्णिकुलश्रेष्ठ वृष्णिवत् मेघवद्भक्ताभिमतवर्षण "वृष्णिः कुलविशेषे तु वर्षन्मेघेऽपि कथ्यत" इत्यभिधानम्। अवनिद्रुहां भूकंटकानां राज्ञां वंशमन्वयं दहतीत्यवनिध्रुग् राजन्यवंशदहन अवनिध्रुग्राजन्याख्यवेणुदाहक इति वा तस्य संबुद्धिरवनिध्रुग्राजन्यवंशदहन असमवंद्यवीर्य देवस्तुत्यपराक्रम गोविन्द वेदवाणीलब्धविभव गवां द्विजानां सुराणामार्त्तिहरोऽवतारो यस्य स तथोक्तः, संबुद्धिः गोद्विजसुरार्त्तिहरावतार योगैश्वर्ययुक्ताखिलगुरो यथायोग्यं ज्ञानोपदेशकर्तः ते तुभ्यं नम इत्यन्वयः ॥ ४३ ॥ ❀ ❀ विकुंठा नाम काचिदृषिपत्नी तत्पुत्रत्वेन जातः वैकुण्ठपुरनाथोऽपि वैकुंठ इति वा। पृथया कुंत्या कलपदैः स्तीत्वाव्यक्तवर्णमधुरपदैः योगमायया स्वरूपशक्त्या ॥ ४४ ॥ ❀ ❀ यत्त्वदभीष्टं तथास्त्विति बाढमिति तामुक्त्वा द्रौपदीपूर्वाः स्त्रियश्च द्वारकां गमिष्यामीत्युपामंत्र्य गंगातीराद्गजसाह्वयं प्रविश्य स्वपुरं द्वारकां यास्यन् गमिष्यन् प्रेम्णा संप्रति न गंतव्यमिति राज्ञा निवारितः पांडववात्सल्यात्तत्रैवावात्सीदित्येकान्वयः ॥ ४५ ॥ ❀ ❀ माध्वसंप्रदायपाठे इतो नवमाध्यायारंभः। अतस्तत्र एषोपोद्घातपंक्तिः—स्वानंदानुभवलक्षणो मोक्षः सकलपुरुषार्थोत्तमः, स च भगवदपरोक्षज्ञानलब्धिविष्णुप्रसादलभ्य इत्ययमर्थः प्रतिपाद्यतेऽस्मिन्नध्याये। तद् ज्ञापयितुमुपोद्घातं रचयति व्यासाद्यैरित्यादिना—स्वराज्येऽभिषिक्तोऽपि ज्ञातितदनुबंधिवधात्पापबुद्ध्या राज्यानिच्छुर्युधिष्ठिरो राजा नाबुध्यत अयं धर्म इति ज्ञानं नावैदित्यन्वयः। कथंभूतः ईश्वरस्य ईहां सृष्ट्यादिलक्षणां चेष्टां जानातीतीश्वरेण तत्कथाविशेषैः प्रकर्षेण बोधितोऽपि ज्ञात्यादिमरणनिमित्तशुचा विद्धः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोविन्देति नित्यप्राप्तपरमगोलोकाधिपत्येत्यर्थः । यद्वा अथ विश्वेशेत्यादिपद्यत्रयस्यैवं योजना—तत्प्रियवर्गे स्वसम्बन्धहेतुकां प्रीतिं निषिध्य श्रीभगवत्येव तामभ्यर्थ्य पुनस्तत्प्रियवर्गे तदाधारत्वेनैव प्रीतिमङ्गीकरोति अथेति त्रिभिः । तत्र निषेधः प्रथमेन । अभ्यर्थना द्वितीयेन । अङ्गीकारस्तृतीयेन । अत्र श्रीकृष्णसखेत्यादिसम्बोधनैस्तत्प्रीत्याधारत्वेनार्ज्जुनादिष्वपि प्रीतिरङ्गीकृता ॥ ४३ ॥ ❀ ❀ परिणूतेति तौदादिकणू शिस्तवन इत्यस्य रूपत्वेन दीर्घत्वम् । माययेव मोहयन्निति मोहनमात्रांशे दृष्टान्तः "हासो जनोन्मादकरी च माये"ति तु विराड्गतमेव । यदि वाक्यालंकार इवशब्दस्तदा मायाशब्दोऽपि कृपावाचक एवेति । "माया दम्भे कृपायाञ्च"इति कोषकाराः ॥ ४४–४५ ॥ ❀ ❀ व्यासाद्यैरिति । नाबुद्ध्यत प्रत्युत शुचा व्याप्त एवासीदित्यर्थः । ईश्वरस्य तादृगिच्छयैव तेषां युक्तिः प्रतिहतशक्तिका कृतेति स्वाम्यभिप्रायः । वस्तुतस्त्वेवं व्याख्येयम्—यद्यपि व्यासाद्याः राजाऽयं स्वोपदेशं न मंस्यत इति जानन्त्येव तथाप्यद्भुतकर्म्ममय्या ईश्वरेहाया विज्ञैरपि सद्भिः सम्बोधित इति ॥ ४६–४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्तवान्ते सर्वसुखदत्वेन स्मरन्ती प्रणमति । कृष्णस्य अर्ज्जुनस्य सखा । अवन्यै द्रुह्यन्ति ये राजन्यास्तेषां वंशा एव वंशास्तेषां दहन अनपवर्गवीर्य हे अक्षीणपराक्रम । हे गोविन्द प्राप्तकामधेन्वैश्वर्य्य ॥ ४३ ॥ ❀ ❀ परिणूतेति तौदादिकणूशि स्तवन इत्ययं दीर्घान्त एव, माययेव मोहयन् न तु मायया, किन्तु प्रेम्णैवेत्यर्थः ॥ ४४ ॥ ❀ ❀ त्वयि मे अनन्यविषया मतिरिति यत् प्रार्थितं तत् बाढमित्यङ्गीकृत्य रथस्थानात् गजसाह्वयं प्रत्यागत्य पश्चात् ताश्च अन्याश्च सुभद्राप्रमुखाः स्त्रियः उपामन्त्र्य अनुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा अत्रैव कञ्चित् कालं निवसेति सम्प्रार्थ्य निवारितः । तेन च राज्ञो प्रेम्णः सर्वतोऽपि वशीकरणत्वातिशयो व्यञ्जितः ॥ ४५ ॥ ❀ ❀ यर्ह्यहमिदानीमिहैव स्थितोऽभूवं तर्ह्यासन्नमृत्युकालं मद्दर्शनं विना मर्त्तुमनिच्छन्तं भीष्मं स्वभक्तमात्मानं सपरिकरमेव सन्दर्श्य सुखयामि, लोके तदुत्कर्षं ख्यापयितुं तन्मुखेनैव राजानं च प्रबोधयामीति भगवदभिप्रायं व्यञ्जयन्नाह ईश्वरस्य कृष्णस्य ईहाया उक्तलक्षणस्य अभिप्रायस्य अज्ञैर्विज्ञैर्वा । अद्भुतकर्मणेति इदमस्याद्भुतं कर्म्म-यत् स्वयमेवास्य हृदि प्रविश्य अविवेकम् उत्थापितवान् । बहिश्च स्वकर्तृकेण व्यासादिकर्तृकेणापि प्रबोधनाबोधमेव दृढीचकार । तेन च भीष्ममुखोदितेन तत्त्वेन तं प्रबोध्य व्यासादिभ्योऽपि मत्तोऽपि मदेकान्तभक्तो भीष्मोऽतिशयेन धर्म्मज्ञानतत्त्वज्ञ इति लोके विख्यापयामास । किंच युधिष्ठिरस्य तु ततोऽपि प्रेमाधिक्यादाधिक्यं यत् तदनुरोधेनैव द्वारकामगच्छंस्तत्र स्थितः, तत एव तन्निकटं गत्वा तथा चक्रे इति विवेचनीयम् ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संसारे विरक्तिं ब्रह्मण्यनुरक्तिमभ्यर्थ्य तद्दार्ढ्यार्थं पुनः प्रणमति श्रीकृष्णेति । हे श्रीकृष्ण हे श्रीयुक्तसदानन्दस्वरूप ते नमः अनपवर्गमपगमनानर्हं स्वाभाविकं वीर्यं यस्य स तथा तत्सम्बोधने अनपवर्गवीर्य ॥ ४३ ॥ ❀ ❀ कलपदैर्मधुरपदैर्वाक्यैः पृथया परिणूतः परिगीतोऽखिलोदयो निखिलमहिमा यस्य सः । दीर्घोकारश्छांदसः । मन्दं यथा स्यात्तथा मायया कृपया जहास हसितवान् ॥ ४४ ॥ ❀ ❀ स्नेहपाशं छिंधीति त्वयि मे मतिमुद्वहतादिति च यत्प्रार्थितं तद्बाढमित्यङ्गीकृत्य रथस्थानाद्गजसाह्वयं प्रविश्य तां पृथामन्याः सुभद्राद्याः स्त्रियश्चोपामन्त्र्यानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण निवारितः ॥ ४५ ॥ ❀ ❀ शुचार्पितः सुहृद्वधशोकव्याप्तः । कृष्णेन प्रबोधितोऽपि नाबुध्यतेत्यत्र हेतुं सूचयन्विशिनष्टि । अद्भुतकर्मणेति । स्वभक्तकार्यसिद्धये स्वयं कालयवनमविजित्य स्वभक्ततेजसैव तं घातयितुं तत्र तमनयत् । एवं धर्मसुतप्रबोधनार्थं प्रवृत्तेनापि श्रीकृष्णेन स्वभक्तस्य भीष्मस्य समीपे सर्वैर्युधिष्ठिरादिभिः सहैव गन्तुकामेन स्वेच्छयैव न प्रबोधितः सः—एवंविधानि अद्भुतानि कर्माणि यस्य स तथा तेनेत्यर्थः ॥ ४६–४७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं नवधा भगवंतं स्तुत्वा शास्त्रार्थत्वेन नवविधभक्त्यनंतरे स्नेहे जाते माहात्म्ये च ज्ञाते पुनः पुनर्भगवदाविर्भावे किं कर्त्तव्यमित्याकांक्षायां माहात्म्यस्मरणपूर्वकं नमनं कर्त्तव्यमिति सिद्धांतः । तदत्र सर्वं स्तुत्वा उपसंहारे माहात्म्यस्मरणाय बहुधा संबोधयन्ती नमस्यति श्रीकृष्णेति । नव विशेषणानि भगवन्निति विशेष्यं तत्र श्रीकृष्णेति स्वरूपं "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते । साकारत्वात्तु सौंदर्यं श्रीशब्देनाभिधीयते" कृष्णसखेति गुणाः कृष्णोऽर्जुनस्तस्य सखा, समानशीलत्वे व्यसनकथनात् गांभीर्यादयो गुणाः सूचिताः । लीलामाह वृष्ण्यृषभेति कपटमानुषलीला सूचिता । दुष्टदुर्ज्ञेयत्वमाह अवनिध्रुग्राजन्यवंशदहनेति । न हि भगवज्ज्ञाने इयमवस्था भवेत् । असाधारणं धर्म्ममाह अनपवर्गवीर्येति । न विद्यते अपवर्गो यस्य तादृशं वीर्यं यस्य, इदं हि पुरुषोत्तमस्यासाधारणं चिह्नम् । जन्मकारणनिर्द्धारमाह

गोविंदेति सद्रक्षाऽवतारप्रयोजनम् । फलमाह गोद्विजसुरार्त्तिहरावतारेति । गावो द्विजाः सुराश्च तेषामार्त्तिहरोऽवतारो यस्य । अनेन धर्मग्लानिनिवृत्तिरुक्ता भवति । देवतोद्देशेन मंत्रकरणको हविस्त्याग इति त्रयाणां निरूपणं धर्म्म-मूलकत्वादन्येषां न पृथक् निरूपणम् । दैन्यनिवृत्त्यर्थमाह योगेश्वरेति । एतदतिदैन्यं यद्योगेन सर्वं क्रियते न स्वत इति निजप्रार्थनामाह अखिलगुरो ! इति । प्रमाणसिद्धं मह्यं देयमिति पूर्वोक्तधर्मैवात्र सगुणः किं तु भगवानिति भगवन्निति । "नमो नम एतावत्सदुपशिक्षितमिति" नमस्कारः ॥ ४३ ॥ ❀ ❀ एवं स्तुते भगवत्कर्त्तव्यमाह । विषयभोगार्थमेव ह्येतावत्कृतं न तु वैराग्यभक्त्यर्थमन्यथाऽरण्यादेव तथा कुर्यात् । तस्माद्यः कश्चित् यत्किंचित् प्रार्थयतां नाम, भगवांस्तु प्रक्रान्तं स्वविचारितमेव प्रयच्छति । अतोऽद्भुतकर्म्मनिरूपणे मोहं दत्तवानित्युच्यते । कलपदैर्गद्गदकंठेनोच्चारितैः अव्यक्तमधुरैः पदैः परिणूताः परितः स्फुरिताः सर्वे उदया यस्य गुणानामन्योऽन्यमिश्रणान्नवधा तदभाव एकधेति "एकधा दशधा चैव दृश्यते जलचन्द्रवदि"ति श्रुतिरप्येवमभिप्राया तथा लीलाश्च । णू स्तुताविति धातुरूकारान्तः कविकल्पद्रुमे निरूपितः, अतो न दीर्घश्छादसः । मन्दं जहास मोहनस्याप्यज्ञानार्थं वैकुण्ठ इति साम्प्रतं रक्षायां स्थितः जयविजयपातनाद्वा मोहयन्निवेति । अद्भुतकर्मत्वादिति "स्वरूपेण कृतार्थत्वं मायया च विमोहनम्" ॥ ४४ ॥ ❀ ❀ अन्तःकृतिमुक्त्वा बहिःकृतिमाह तां बाढमिति । तां कुन्तीं प्रार्थितां वा बाढमित्यङ्गीकारे वचनम् । यत्त्वया कर्त्तव्यं वक्तव्यं वा तन्ममापि सम्मतं न तु मया अपूर्वं किञ्चित्कर्त्तव्यमिति ज्ञापितम् । इत्येवंप्रकारेणोपामन्त्र्य पूर्वगमने शकुनाभावमिव लक्षयित्वा पुनर्हस्तिनापुरं प्रविश्य तत्रत्याः स्त्रियः आमन्त्र्य चकारादन्यान् द्वारकां यास्यन् भगवदिच्छया प्राकृतप्रेमोद्गमात् विस्मृत्य माहात्म्यं सम्बन्धस्नेहाद्युधिष्ठिरेण गमनान्निवारितः ॥ ४५ ॥ ❀ ❀ इयं ह्यद्भुतलीला भगवतो मुक्तस्य बन्धो बद्धस्य मोक्ष इति । अतो युधिष्ठिरस्य मोहं प्रपञ्चयति सप्तभिः व्यसनानां तथात्वात् "स्वस्मिन्यदैव करणमुत्तमस्याधमस्य वा । तदैव मोहः कृष्णे तु ज्ञानमित्येष निश्चयः ॥" व्यासाद्यै-रिति । ननु मोहोऽधिकारिणः प्रमाणान्निवर्त्तते तत्र युधिष्ठिरोऽधिकारी अन्यथा अग्रे विज्ञानानुदयः स्यात् । प्रमाणं वेदाः तत्कर्त्तारो व्यासनारदादयः । तैर्बोध्यमानस्यापि ज्ञानं नोदेति भीष्ममुखादेवायं बोधनीय इति भगवदिच्छातः योगजधर्मेण ज्ञानशक्त्या वा न भगवदिच्छा ज्ञायते इच्छा जिज्ञासायां तु चित्तस्य भगवत्परत्वे विषयविस्मरणात् निमित्ताभावे जिज्ञासा नश्येत् , अतः सर्वज्ञा अपि सत्त्वव्यवधानभगवदवताराश्च भगवदिच्छां न जानन्तीत्याह ईश्वरेहाज्ञैरिति । भगवताऽपि बोधितो नाबुध्यत तत्र हेतुः अद्भुतकर्मणेति यथा सन्ध्यर्थं गतः सर्वसमर्थो विग्रहं कृत्वा आगतः । एवं बोधनार्थं वाक्यानि वदन् अबोधं संपादित-वानित्यर्थः । इतिहासैः पुरावृत्तकथनैः नच तेषां वाक्यानामबोधकत्वं तत्राह प्रबोधितोऽपीति प्रबोधो दूरे प्रत्युत शोकेनार्पितः समर्पितो भक्षित इत्यर्थः ॥ ४६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

पृथयेति श्लोकं व्याचक्षते एवं स्तुतेत्यादि । आहेति पृथयेतिश्लोकम् आह । नन्वत्र मोहनं किमित्युच्यत इत्याकाङ्क्षायां तत्तात्पर्यमाहुः विषयेत्यादि । भगवद्गुणेष्वियत्ताभावादखिलोदयस्तुतेरशक्यत्वेनाखिलपदवैयर्थ्यमाशङ्क्य खिलं न्यूनमखिला अन्यूना इति यौगिकार्थं पुरस्कृत्य भगवद्गुणेषु स्वतो न्यूनत्वाभावात् स्फुरणाभावस्फुरणप्रयुक्तौ खिलत्वतदभावावित्याशयेनाहुः परितः स्फुरिताः सर्वे इति । यावन्तः स्फुरितास्ते सर्वे इत्यर्थः । नन्वस्त्वेवम् , तथापि कुन्तीबुद्ध्या तेषां कथमखिलत्वमित्याकाङ्क्षा-यामाहुः गुणानामित्यादि । तथा चैवं कुन्तीबुद्ध्या अखिलत्वमित्यर्थः । एवमखिलत्वसाधने उपपत्तिमाहुः एकधेत्यादि । एकस्य नाना-त्वमेव श्रुतावभिप्रेतम् , निबन्धे तथोपपादनादित्यत उपपत्त्यन्तरमाहुः तथा लीलाश्चेति । श्रीधरमतं दूषयन्ति णु स्तुतावित्यादि । जय-विजयपातनाद्वेति यथा तत्र स्वविचारितमेव कृतवान् , तथात्रापीति बोधनायेत्यर्थः ॥ ४३ ॥ ❀ ❀ तामित्यत्र । प्रार्थितामिति रतिमित्यर्थः । एवं स्तोत्रप्रार्थनाङ्गीकारमुखेन गुणपोषणमुक्तम् । अतः परं युधिष्ठिरानुतापग्रन्थः किमर्थ इत्याकाङ्क्षायामाहुः इयं हीत्यादि । तथा च दोषसमाधाने गुणपोषणे च भगवतोऽद्भुतकर्मत्वं व्युत्पादयितुमेष ग्रन्थ उपोद्घातरूप इत्यर्थः । अत इति । मुक्तत्वात् । तथात्वादिति 'द्यूतं च मांसं च सुरा च वेश्या पापर्द्धिचौर्यं परदारसेवे'त्येवं सप्तत्वात् । तथा च द्यूतादिव्यसना-न्मुक्तस्यापि शोकात्मा बन्ध इत्यद्भुतमित्यर्थः । नन्वस्त्वेवम् , तथापि द्यूतव्यसनविमोकस्य बहुकालमारभ्य जातत्वादिदानीमेव किमिति बन्ध इत्यत आहुः स्वस्मिन्नित्यादि । 'कृष्णे त्वि'त्यनेनापि 'यदैवे'त्यादिकमनुषज्यते । तथा च 'यक्ष्यमाणोऽश्वमेधेन ज्ञाति-द्रोहजिहासये'त्यादिवाक्यात्स्वार्थं यदा वाजिमेधाः कृताः, तदा मोहोऽभवदित्यर्थः ॥ ४५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमभ्यर्च्य भगवतः स्वरूपं तत्प्रभावं तत्कृतानुपकारांश्चानुस्मरन्ती बहुधा सम्बोधयन्ती पुनः प्रणमति–श्रीकृष्णेति । हे श्रीकृष्ण सदानन्दस्वरूप, हे कृष्णसख अर्जुनसख, हे वृष्णीनामृषभ श्रेष्ठ पालक, हे अवन्यै भूम्यै द्रुह्यन्ति ये राजन्यास्तेषां वंशस्य दहन, हे अनपवर्गवीर्य अक्षीणप्रभाव, हे गोविन्द प्राप्तकामधेनो, गोद्विजसुराणामार्त्तिहरोऽवतारो यस्य तत्सम्बोधनम्, हे योगेश्वर योगफलप्रद, हे अखिलगुरो ब्रह्मरुद्रादिसेवितचरणकमल, हे भगवन् ज्ञानवैराग्यादिषड्गुणपूर्ण ते तुभ्यं नमः ॥ ४३ ॥ ❀ ❀ एवं

संस्तुतः सम्प्रार्थितश्च भगवान् यत्कृतवांस्तदाह–पृथयेति द्वयेन । कलानि मधुराणि पदानि येषु तैर्वाक्यैः पृथया इत्थं पूर्वोक्तप्रकारेण परिणूतः संस्तुतोऽखिल उदयो महिमा यस्य स वैकुण्ठो भगवांस्तां मायया मोहयन्निव मन्दं जहासेत्यन्वयः । 'हासो जनोन्मादकरी च माया' इति वक्ष्यमाणत्वात् तस्य हास एव मायेति मन्दहासकरणान्मायया मोहयन्निवेत्युक्तम् । न तु वस्तुतो मोहनमेव तस्या भक्तत्वेन मोहनस्यानुचितत्वात्तत्प्रार्थितभक्तिवरदानाङ्गीकारस्य वक्ष्यमाणत्वाच्चेत्यभिप्रायेणेवशब्दप्रयोगः ॥ ४४ ॥ ❀ ❀ तां कञ्चित्कालमत्र निवासं कुरुपाण्डवादिषु मम स्नेहपाशं छिन्धि त्वयि च प्रीतिप्रवाहं सम्पादयेति कुन्तीप्रार्थनां बाढमित्यङ्गीकृत्य ततः स्थानाद्गजाह्वयं हस्तिनापुरं प्रविश्य आगत्य तत्पश्चात् पुनस्तामन्याश्च सुभद्राप्रमुखाः स्त्रिय उपामन्त्र्यानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा अत्रैव कञ्चित्कालं निवसेति सम्प्रार्थ्य गमनान्निवारित इत्यन्वयः । एतेन राज्ञः प्रेम्णः सर्वप्रेमत आधिक्यं सूचितम् ॥ ४५ ॥ ❀ ❀ अथ भीष्मनिर्याणोत्सवं वक्तुं तन्मनसि निधाय तत्प्रसङ्गार्थं अर्थान्तरवर्णनरूपोपोद्घातकथां प्रस्तौति–व्यासाद्यैरित्यादिना । व्यासाद्यैर्मुनिभिः कृष्णेन चेतिहासैः पूर्ववृत्तकथनैः प्रबोधितोऽपि राजा युधिष्ठिरो नाबुद्ध्यत विवेकं नैव प्रापेत्यन्वयः । तत्र हेतुमाह–शुचार्पित इति, शोकेन व्याप्त इत्यर्थः । ननु व्यासादीनां परमाप्तत्वात् प्रबोधनेऽपि समर्थत्वाच्च तैः प्रबोधितः कथं नाबुद्ध्यतेत्यत आह–ईश्वरेहाज्ञैरिति । ईश्वरस्य श्रीकृष्णस्येहा स्वभक्तभीष्मनिर्याणमहोत्सवाय राज्ञा सह कुरुक्षेत्रं गन्तव्यं तत्र च तन्मुखेनैवायं प्रबोधनीयस्तेन च भीष्मस्य तत्त्वज्ञत्वं लोके विख्यापनीयमित्यभिप्रायस्तमजानद्भिरित्यर्थः । तथा च व्यासादीनां प्रबोधनसामर्थ्ये सत्यपीश्वरेच्छायाः प्रबलत्वान्न प्रबोधो जात इति भावः । तर्हि कृष्णेनापि कथं तत्प्रबोधः कृतस्तस्य तदनभिप्रेतत्वात् तत्प्रबोधने कृतेऽपि कथं न प्रबोधो जातस्तस्य सर्वान्तर्यामित्वादित्यपेक्षायामाह–अद्भुतकर्मणेति । तथा कुरुपाण्डवसन्धानार्थं गतोऽपि यथोचितमेव वदन्नपि भूभारहरणपाण्डवविजयस्थापनार्थं विग्रहमेव दृढीकृतवांस्तथात्राप्युपरितः प्रबोधयन्नप्यन्तरबोधमेव दृढीकृतवानंतर्यामित्वादित्यर्थः ॥ ४६ ॥

हिन्दी अनुवाद

श्रीकृष्ण ! अर्जुनके प्यारे सखा यदुवंशशिरोमणे ! आप पृथ्वीके भाररूप राजवेषधारी दैत्योंको जलानेके लिए अग्निस्वरूप हैं । आपकी शक्ति अनन्त है । गोविन्द ! आपका यह अवतार गौ, ब्राह्मण और देवताओंका दुःख मिटाने लिए ही है । योगेश्वर ! चराचरके गुरु भगवन् ! मैं आपको नमस्कार करती हूँ ॥ ४३ ॥ ❀ ❀ सूतजी कहते हैं—इस प्रकार कुन्तीने बड़े मधुर शब्दोंमें भगवान्‌की अधिकांश लीलाओंका वर्णन किया । यह सब सुनकर भगवान् श्रीकृष्ण अपनी मायासे उसे मोहित करते हुए-से मन्द-मन्द मुसकराने लगे ॥ ४४ ॥ ❀ ❀ उन्होंने कुन्तीसे कह दिया–'अच्छा ठीक है' और रथके स्थानसे वे हस्तिनापुर लौट आये । वहाँ कुन्ती और सुभद्रा आदि देवियोंसे विदा लेकर जब वे जाने लगे, तब राजा युधिष्ठिरने बड़े प्रेमसे उन्हें रोक लिया ॥ ४५ ॥ ❀ ❀ राजा युधिष्ठिरको अपने भाई-बन्धुओंके मारे जानेका बड़ा शोक हो रहा था । भगवान्‌की लीलाका मर्म जाननेवाले व्यास आदि महर्षियोंने और स्वयं अद्भुत चरित्र करनेवाले भगवान् श्रीकृष्णने भी अनेकों इतिहास कहकर उन्हें समझानेकी बहुत चेष्टा की; परंतु उन्हें सान्त्वना न मिली, उनका शोक न मिटा ॥ ४६ ॥

आह राजा धर्मसुतश्चिन्तयन् सुहृदां वधम् । प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः ॥ ४७ ॥
अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः । पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ॥ ४८ ॥
बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः । न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥ ४९ ॥
नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम् । इति मे न तु बोधाय कल्पते 'शासनं वचः ॥ ५० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अवबोधमेव प्रपंचयति आहेति षड्भिः । प्राकृतेनाविवेकव्याप्तेनात्मना चित्तेन हे विप्राः ॥ ४७ ॥ ❀ ❀ पारक्यस्य श्वशृगालाद्याहारस्य देहस्यार्थे । मे मया । अक्षौहिणीरक्षौहिण्यः । अक्षौहिणीप्रमाणं तु व्यासेनोक्तम् "अक्षौहिणी प्रसंख्याता रथानां द्विजसत्तमाः । संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः । गजानां च प्रसंख्यानमेतदेव प्रकीर्तितम् ॥ ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पंचाशच्छतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः । एतामक्षौहिणीं प्राहुर्यथावदिह संख्यया" इति ॥ ४८ ॥ ❀ ❀ सुहृदः सम्बन्धिनः । मित्राणि सखायः । पितरः पितृव्याः ॥ ४९ ॥ ❀ ❀ स्मृत्याद्यनुशासनाद्धर्मयुद्धे न दोष इति चेत्तत्राह । नैनो राज्ञ इति । द्विषां वध एनः पाप न भवतीति यच्छासनं शिक्षारूपं वचः कुतो न कल्पते यतस्तद्वचः

१. प्रा० पा०—कल्पते शाश्वतं ।

प्रजाभर्तुरेव। अयं भावः-स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधोऽनुज्ञातः। दुर्योधनेन तु प्रजायां पाल्यमानायां मया केवलं राज्यलोभेन हतत्वात्पापमेवेदमिति ॥ ५० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

वस्तुतस्तु तस्यात्मा ह्यप्राकृत एवेति। तदपि प्राकृतत्वारोपो भगवदिच्छयोक्तप्रयोजनायैवेति ज्ञेयम्। हे विप्रा इति यथा विप्रा अपि कर्म कृत्वातिसाहसेन पश्चाच्छोचन्त्यहो किमस्माभिः कृतं पुरैवैतन्न विचारितं तथा राजापि शोकवानभूदिति भावः ॥ ४७ ॥ ❀ ❀ व्यासेनोक्तं महाभारते-२१८७० रथाः २१८७० गजाः ६५६१० अश्वाः १०९३५० पदातयः सर्वमेकीकृत्य २१८७०० अक्षौहिणी भवति इति विवेकः ॥ ४८ ॥ ❀ ❀ बाला अभिमन्युलक्ष्मणादयः। द्विजा द्रोणादयः। सुहृदो धृष्टद्युम्नादयः। मित्राणि विराटप्रभृतीनि। पितरो भूरिश्रवःप्रभृतयः। भ्रातरो दुर्योधनादयः। गुरवो द्रुपदादयः। एतान्द्रोहितवानिति बालद्विजसुहृन्मित्रभ्रातृगुरुध्रुक् तस्य तथा निरयान्नरकात् अयुतायुतैः कोटिभिरित्यर्थः ॥ ४९ ॥ ❀ ❀ अत्राशयमाह-अयम्भाव इति ॥ ५० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

एतां गजरथनराश्वानां साकल्येन २,१८,७०० परिमिताम्। तत्र २१,८७० रथाः, २१,८७० गजाः, १,०९,३४० नराः, ६५,६१० अश्वाः ४८-५२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीराधारमणदासगोस्वामिविरचितायां दीपनीव्याख्याटिप्पण्याम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

किंतु हे विप्राः बंधुषु स्नेहमोहयोर्वशः प्राप्तः। अत एव प्राकृतेन देहेन तदनुबंध्यादिश्रवणेन मनसा सुहृदां वधमेव चिंतयन् धर्मसुतो राजा युधिष्ठिरः अब्रवीत् ॥ ४७ ॥ ❀ ❀ तदेवाह यावत्समाप्ति। अहो दुरात्मनो मम हृदि रूढमज्ञानं पश्यत। तदेव दर्शयति पारक्यस्य श्वशृगालादिभक्ष्यस्य देहस्यैव देहसुखार्थमेव मे मया बह्व्यः अक्षौहिणीरक्षौहिण्यो हताः ॥ ४८ ॥ बालादिद्रुहः बालादिहंतुर्मम वर्षायुतानामयुतैरपि निरयान्मोक्षो न हि भवेत् ॥ ४९ ॥ ❀ ❀ ननु "शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। धर्म्याद्धि युद्धाच्छ्रेयोन्यत् क्षत्रियस्य न विद्यत" इत्यादिशास्त्रैर्धर्म्ययुद्धस्य धर्मत्वावबोधनात्त्वं हतान्प्रति किं शोचस इत्यत आह नेति। प्रजाभर्त्तुः पोषणाधिकृतस्य राज्ञो युद्धे द्विषां वधो धर्मादनपेतः नैनः न पापं किंतु धर्म एवेति यदनुशासनात्मकं वचो भगवद्वचः तन्मम बोधाय विवेकाय न कल्पते विवेकं जनयितु समर्थमित्यर्थः। धर्मयुद्धस्य धर्मत्वेऽपि तदनुबंधितया महतः पापस्यैव प्राप्तत्वादिति भावः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इत्थं बोधितोऽपि धर्मे अधर्मबुद्धिं किं चकारेति तत्राह आहेति। हे विप्राः शृणुतेति शेषः, प्राकृतेनात्मना धर्माधर्मविवेकविधुरेण मनसा तत्कारणमाह स्नेहाज्जातो मोहो भ्रमः स्नेहमोहस्तस्य वशं गतः तस्मात् तन्निमित्तमाह सुहृदां ज्ञातितदनुबंधिनां वधमहर्निशं चिंतयन् धर्मसुत इत्थमाहेत्येकान्वयः। स्नेहमोहवशं गत इत्यनेन धर्मात्मनो धर्मसुतस्य कथं धर्मे हरिविमुखदुष्टतदनुबंधिवधलक्षणे त्वधर्मत्वशंकाऽभूदित्येतद् दूरतोपास्तम् ॥ ४७ ॥ ❀ ❀ किमाहेति तत्राह अहो इति। मे हृदि रूढमंकुरितमज्ञानं तत्तु पश्यत अहो आश्चर्यं कथं मे पारक्यस्य परकीयस्य श्वशृगालभोग्यस्य मे देहस्यार्थे बह्व्योऽक्षौहिणीरक्षौहिण्यो हता एव यस्मात्तस्मादिति शेषः ॥ ४७ ❀ ❀ तत्फलमाह न म इति। मे निरयान्मोक्षो वर्षाणामयुतायुतैः न स्याद्धि कथंभूतस्य मे बालान् सौभद्रादीन् द्विजान् द्रोणादीन् सुहृदो द्रुपदादीन् मित्राणि धनदानि नष्टान् भटविशेषान् पितॄन् भूरिश्रवःप्रभृतीन् भ्रातॄन् दुर्योधनादीन् गुरून् भीष्मादीन् द्रोहितवान् हिंसितवान् इति बालद्विजसुहृन्मित्रपितृभ्रातृगुरुध्रुक् तस्य ॥ ४९ ॥ ❀ ❀ प्रजाभर्त्तुः प्रजापालकस्य राज्ञो हरिद्विषां वधो नैनः पापं न भवति प्रत्युत युद्धे वैरिणां राज्ञां वधो धर्मो धर्मसाधनमिति यत् "यः पदातिं हंति स भवति चातुर्मास्ययाजी" इत्यादिशाश्वतं नित्यं वेदवचो मे बोधाय भ्रमं निरस्य यथार्थज्ञानाय न कल्पत इत्यन्वयः। तुशब्द एवार्थे ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

नैन इति। राज्ञो धर्मयुद्धे द्विषां वधः एनः पापं न भवतीति यत् शासनं वचः तत्तु न मे बोधाय कल्पते। यतः तद्वचः प्रजाः पालयंतमेव राजानं प्रति न तु लुब्धं प्रतीति वाक्यार्थः। भावार्थस्तु टीकावदेव ॥ ५०-५२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भेऽष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अबोधमेव प्रपञ्चयति । प्राकृतेनात्मना चित्तेन वस्तुतस्तु तस्यात्मा ह्यप्राकृत एवेति । तदपि प्राकृतत्वारोपो भगवदिच्छयैवोक्तप्रयोजनायेति ज्ञेयम् ॥ ४७ ॥ ❀ ❀ पारक्यस्य श्वश्रृगालाद्याहारस्य देहस्यार्थे अक्षौहिणीरक्षौहिण्यो हताः । अक्षौहिणीप्रमाणं व्यासेनोक्तम्—"अक्षौहिणी प्रसंख्याता रथानां द्विजसत्तमाः । संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः । शतान्युपरि चाष्टौ च तथा भूयश्च सप्ततिः । गजानाञ्च प्रसंख्यानमेतदेव प्रकीर्त्तितम् । ज्ञेयं शतसहस्रन्तु सहस्राणि नवैव तु ॥ नराणामपि पञ्चाशत् शतानि त्रीणि चैव च । पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः ॥ एतामक्षौहिणीं प्राहुर्यथावदिह संख्यये"ति ॥ ४८ ॥ ❀ ❀ सुहृदः सम्बन्धिनः । मित्राणि सखायः । पितरः पितृव्याः ॥ ४९ ॥ ❀ ❀ द्विषां वधः, एनः पापं न भवतीति यत् शासनं शिक्षारूपं वचः कुतो न कल्पते यतस्तद्वचः प्रजाभर्त्तुरेव । अयं भावः—स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधोऽनुज्ञातः, दुर्योधनेन तु प्रजायां पाल्यमानायां मया केवलं राज्यलोभेन हतत्वात् पापमेवेदं मम जातमिति ॥ ५० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पारक्यस्य शृगालादिभक्ष्यस्यार्थे मे मया ॥ ४८-४९ ॥ ❀ ❀ धर्मयुद्धो द्विषां वधः राज्ञः एनः पापं नेति शासनं शिक्षाभूतं वचो मे बोधाय न कल्पते, यतस्तादृशं वचः प्रजाभर्तुरेव प्रजापालकस्याधर्मयुद्धे द्विषद्वध एनो न भवति, धृतराष्ट्रे प्रजाभर्तरि विद्यमाने मम प्रजाभर्तृत्वाभावात् द्विषद्वध एन एवेत्याशयः ॥ ५० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अत एव शोकव्याप्तस्य वाक्यमाह आहेति । राजा रजोगुणव्याप्तः धर्मसुतः प्रार्थनया धर्माज्जातः बहिर्मुखं धर्ममुररीकृतवान् अत एव सुहृदां वधं चिंतयन् पूर्वकृतं शोचति अंतःकरणमपि समीचीनं भगवता कृतमित्यभिप्रायेणाह देहादिबुद्धया विप्रा इति । संबोधनं भगवतोऽद्भुतकर्मत्वभावनार्थं स्नेहो मृतेषु मोहो जीवत्सु ॥ ४७ ॥ ❀ ❀ विपरीतबुद्धिं विस्तारयति अहो इति । देहोपभोगार्थं महतोऽन्यायस्य करणमज्ञानजन्यं हृदि प्ररूढं नास्य प्रतीघातः शक्यो जातः । तत्र हेतुः—अंतःकरणाशुद्धिः । तदेवाज्ञानमाह पारक्यस्येति । श्वश्रृगालादिभक्ष्यस्य । अक्षौहिणीः अक्षौहिण्यः मे मदीया हता इत्यज्ञानम् । वस्तुतस्तु भगवता भूभारहरणार्थं लीलया वा हताः ॥ ४८ ॥ ❀ ❀ अनेन इह लोको गत इत्युक्तं परलोकोऽपि नास्तीत्याह बालेति । बाला अभिमन्युप्रभृतयः द्विजाः द्रोणादयः सुहृदः शल्यादयः मित्राणि कर्णादयः पितरो भीष्मादयः भ्रातरो दुर्योधनादयः एत एव वा गुरव अन्ये च । एकस्यापि महापातकस्य बुद्धिपूर्वकं कृतस्य न प्रायश्चित्तं तस्मान्नरके वासो यावदाभूतसंप्लवमित्यर्थः ॥ ४९ ॥ ❀ ❀ ननु युध्यमानानां वधः को वा दोषाय सत्यं "श्रेयः प्रजापालनमेव राज्ञामि"ति प्रजारक्षार्थं शत्रुवधश्चेत्तदा न दोषः, प्रकृते तु दुर्योधने प्रजापालने क्रियमाण एव मया स्वलोभार्थमेव सर्वे हताः । अतो राज्ञो धर्मयुद्धे द्विषां वधः प्रजाभर्त्तुर्नैनः न दोष इति नीतिवचनं मां बोधयितुं न शक्नोतीत्यर्थः ॥ ५० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नैनो राज्ञ इति श्लोकं व्याचक्षते नन्वित्यादि ॥ ४९ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अबोधमेव प्रपञ्चयति—आहेति षड्भिः । प्राकृतेन अविवेकव्याप्तेन आत्मना मनसा सुहृदां मित्रबान्धवादीनां वधं चिन्तयंस्तेषु यः स्नेहस्तत्प्रयुक्तो यो मोहः कर्त्तव्याकर्तव्याननुसन्धानं तस्य वशं गतः सन् राजा आहेत्यन्वयः । तस्यैवं मोहेन भगवदाज्ञोल्लघनम् अनुचितमेव धर्मपुत्रत्वादित्याशयेनाह—धर्मसुत इति । युष्माकमप्येतत् सम्मतमिति सूचयन् सम्बोधयति—हे विप्रा इति ॥ ४७ ॥ ❀ ❀ तद्वचनान्येव दर्शयति—अहो इति पञ्चभिः । अहो अनुचितं एतद् दुरात्मनः दुष्टचित्तस्य मे हृदि रूढमज्ञानं पश्यतेत्यन्वयः । कथं तज्ज्ञेयमित्यपेक्षायामाह—पारक्यस्येति । यतः पारक्यस्य श्वश्रृगालाद्याहारस्य देहस्यार्थे मे मया बह्व्यः अक्षौहिण्यो हताः । अक्षौहिण्याः प्रमाणं तु व्यासेनोक्तम्—"अक्षौहिणी प्रसङ्ख्याता रथानां द्विजसत्तमाः । सङ्ख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः २१८७० ॥ गजानां च प्रसङ्ख्यानमेतदेव प्रकीर्तितम् २१८७० । ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पञ्चाशच्छतानि त्रीणि चैव हि १०९३५० ॥ पञ्चषष्टिसहस्राणि तथाऽश्वानां शतानि च । दशोत्तराणि षट् प्राहुः सङ्ख्यातत्त्वविदो जनाः ६५६१० ॥ एतामक्षौहिणीं प्राहुर्यथावदिह सङ्ख्यया" इति ॥ ४८ ॥ ❀ ❀ आस्तां तावदक्षौहिणीवधवार्त्ता येषां एकैकस्यापि वधे महापातकस्मरणं तेषामपि वधो जातः । अतस्तत्पापफलान्निस्तारो न दृश्यते इत्याह—बालेति । बालाः अभिमन्युप्रभृतयः, द्विजाः द्रोणादयः, सुहृत्सम्बन्धिनः शल्यादयः, मित्राणि सखायः कर्णादयः, पितृव्याः, भ्रातरो दुर्योधनादयः, गुरवः, अन्येऽपि पूज्याः, तेषां द्रोहकर्तुर्घातकस्य मे वर्षाणां अयुतायुतैरपि निरयान्नरकात् मोक्षो निस्तारो नैव स्यादित्यन्वयः । हिशब्दोऽवधारणार्थकः ॥ ४९ ॥ ❀ ❀ धर्मयुद्धे द्विषां वधो राज्ञ एनः पापं न भवतीति यच्छासनं शिक्षा-

रूपं वचस्तन्मे बोधाय सन्तोषाय न तु कल्पते समर्थं नैव भवतीत्यन्वयः । कुतो न कल्पते ? यतस्तद्वचो धर्मयुद्धे प्रजाभर्तुरेव । स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधो नीतिशास्त्रेऽनुज्ञातः, दुर्योधनेन तु प्रजायां रक्ष्यमाणायामेव मया केवलं राज्यलोभेनैव हतत्वात्ततो मम पापमेव जातमिति भावः ॥ ५० ॥

हिन्दी अनुवाद

शौनकादि ऋषियो ! धर्मपुत्र राजा युधिष्ठिरको अपने स्वजनोंके वध से बड़ी चिन्ता हुई । वे अविवेकयुक्त चित्तसे स्नेह और मोहके वशमें होकर कहने लगे—भला, मुझ दुरात्माके हृदयमें बद्धमूल हुए इस अज्ञानको तो देखो; मैंने सियार-कुत्तोंके आहार इस अनात्मा शरीरके लिये अनेक अक्षौहिणी सेनाका नाश कर डाला ॥ ४७-४८ ॥ ❀ ❀ मैंने बालक, ब्राह्मण, सम्बन्धी, मित्र, चाचा-ताऊ, भाई-बन्धु और गुरुजनोंसे द्रोह किया है । करोड़ों बरसोंमें भी नरकसे मेरा छुटकारा नहीं हो सकता ॥ ४९ ॥ ❀ ❀ यद्यपि शास्त्रका वचन है कि राजा यदि प्रजाका पालन करनेके लिये धर्मयुद्धमें शत्रुओंको मारे तो उसे पाप नहीं लगता, फिर भी इससे मुझे सन्तोष नहीं होता ॥ ५० ॥

स्त्रीणां मद्धतबन्धूनां द्रोहो योऽसाविहोत्थितः[1] । कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम् ॥ ५१ ॥
यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् । भूतहत्यां तथैवैकां[2] न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे [3]कुन्तीस्तुतिर्युधिष्ठिरानुतापो नामाष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च युद्धे पुंसां वधो भवतु नाम धर्मः । स्त्रीणां तु मया हता बन्धवो यासां तासां योऽसौ द्रोहोऽनुद्दिष्टोऽप्युत्थितस्तं व्यपोहितुमपाकर्तुं कल्पः समर्थो नाहं गृहमेधीयैर्गृहाश्रमविहितैः ॥ ५१ ॥ ❀ ❀ ननु "सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद" इति श्रुतेः पापमश्वमेधेन नश्येदेवेत्याशंक्याविवेकविजृम्भितं हेतुवादमाश्रित्य निराकरोति । यथेति । यथा घनपंकेन पंकांभो न मृज्यते यथा वा सुरालेशकृतमपावित्र्यं बह्व्या सुरया न मृज्यते तथैव भूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥ ५२ ॥

इति श्रीभा० म० प्रथमस्कन्धे टीकायामष्टमोऽध्यायः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्पापस्य प्रायश्चित्ताभावमाह-स्त्रीणामिति । अनुद्दिष्टः शास्त्रेणानुदितोपि ॥ ५१ ॥ ❀ ❀ अत्राक्षिपति-नन्विति । यः पुरुषः । उचेति निपातौ । उ वितर्के च । पुनरेनमात्मानं वेद सोपि सर्वपाप्मानं तरतीति श्रुतिभागार्थः । हेतुवादं नास्तिकताम् "नास्तिक्ये कारणोक्तौ च हेतुवादः प्रकीर्त्तितः" इति निरुक्तिः । यद्वा ज्ञानपक्षमाश्रित्यैव युधिष्ठिरेण यज्ञो निंदितो न त्वकर्त्तव्यबुद्ध्या, "ब्रह्मार्पणं ब्रह्महविः" इत्यादौ ब्रह्मार्पणबुद्ध्या कर्तव्यत्वेन विहितत्वात् । "कर्मणा ज्ञानमाप्नोति" इति श्रुतेः ॥ ५२ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

ननु धर्मार्थं यतमानस्यावर्जनीयतया प्रसक्तमपि पापं वर्णाश्रमधर्मैरपोहितुं शक्यमेव "धर्मेण पापमपनुदती"ति शास्त्रादित्यत आह-स्त्रीणामिति मया हता बंधवः पतयो यासां तासां स्त्रीणां योसौ द्रोहः पापात्मक इह धर्मयुद्धे प्रवृत्ते मय्युत्थितः तमहं गृहमेधीयैर्गृहाश्रमिणः कर्त्तव्यैर्द्धर्मैर्व्यपोहितुं न कल्पः न प्रभुः । बहुकालानुभाव्यफलो विपुलो द्रोहोऽल्पकालनिवर्त्यैर्गृहमेधीयैः कर्मभिर्नापोहितुं कल्पः । कर्मणा कर्मनिर्हारश्चायुक्त इति भावः ॥ ५१ ॥ ❀ ❀ एतदेव सदृष्टांतमुपपादयति यथेति । पंकांगं सपंकमंगं पंकेनैव यथा मार्ष्टुं शोधयितुं नार्हति लोकः यथा च सुराकृतं सुराकृतदोषदूषितं भांडं यतः सुरयैव मार्ष्टुं नार्हति तथा यज्ञैरेकामपि भूतहत्यां न मार्ष्टुमर्हति पंकांक इति पाठे पंकांकितपादाद्यवयवः पुमान् पंकेनैवात्मानं मार्ष्टुं नार्हति तद्वदित्यर्थः । पंकांकमिति द्वितीयांतपाठे पंकस्यांको यस्मिंस्तदंगं पंकेन मार्ष्टुं नार्हति तद्वत् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टमोऽध्यायः ॥ ८ ॥

---

१. प्रा० पा०—पङ्कोत्थं । २. प्रा० पा०—तथैकां तु । ३. प्रा० पा०—प्रथमस्कन्धे पारीक्षिते युधिष्ठिरानुतापेऽष्टमो ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कुतो न कल्पत इति तत्राह स्त्रीणामिति । मद्धतबंधूनां मया हता बंधवो यासां तास्तथा तासां मन्निमित्तहता बंधवो यासामिति वा स्त्रीणां योऽसौ द्रोहो हिंसालक्षणो वैधव्यप्राप्त्या मय्यन्वितः संपृक्तः तमहं हयमेधीयैरश्वमेधसम्बन्धिभिः कर्मभिर्व्यपोहितुं न कल्पो न समर्थ इत्येकान्वयः ॥ ५१ ॥ ❀ ❀ तत्र दृष्टांतमाह यथेति । पंकांभः कर्दमजलं पंकेन कर्दमेन युक्तं द्रव्यं शोधयितुं यथा न शक्नोति यथा सुरा सुरया मिश्रीकृतं दोषं व्यपोह्य शुद्धं कर्त्तुं न शक्ता स्वयमशुद्धत्वात् तथैव यज्ञो हिंसारूपत्वादेतां भूतहत्यां मार्ष्टुं मार्जयितुं नार्हतीत्येकान्वयः । ज्ञानपक्षमाश्रित्य युधिष्ठिरेण यज्ञो निंदितो न त्वकर्तृत्वबुद्धया । ब्रह्मार्पणं ब्रह्महविरित्यादौ ब्रह्मार्पणबुद्धया कर्तव्यत्वेन विहितत्वात् 'कर्मणा ज्ञानमातनोती'त्यादेश्च ॥ ५२ ॥

इति श्रीभागवते प्रथमस्कंधे विजयध्वजटीकायामष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मया हता बन्धवो यासां तासाम् । कल्पः समर्थः ॥ ५१ ॥ ❀ ❀ ननु च "सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति श्रुतेः पापमश्वमेधेन नश्येदिति चेत् तत्राह–यथा घनपङ्केन पंकाम्भो न मृज्यते यथा वा सुरालेशकृतमपावित्र्यं बह्व्या सुरया न मृज्यते । यज्ञैः बुद्धिपूर्वकहिंसाप्रायैर्बहुभिर्यज्ञैः ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टमः प्रथमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच धर्मयुद्धे द्विषद्वधः पापं मास्तु इदं पापं तु "धर्मेण पापमपनुदती"ति श्रुत्याज्ञया गृहाश्रमोचितेन कर्मणाऽपि निराकर्तुमशक्यमित्याह स्त्रीणामिति । मया हता बंधवः पतिपुत्रादयो यासां तासां योऽसौ द्रोह उत्थितस्तं गृहमेधीयैर्गृहाश्रमिसाध्यैर्व्यपोहितुमपाकर्त्तुमहं कल्पः समर्थो नास्मि ॥ ५१ ॥ ❀ ❀ किं च "सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदे" ति श्रुत्युक्तमपि कर्म ज्ञानपूर्वकगुर्वादिवधरूपातिघोरतरपापभयाविष्टो धर्मराजो मम त्राणाय नेत्याशयेनाह यथेति । यथा पंकेन पंकांभः यथा वा सुरया सुराकृतमपावित्र्यं न मृज्यते तथा भूतहत्यां द्रोणादिरूपप्राणिवधजन्यामतिघोरामेकामपि बहुभिर्यज्ञैर्मद्विधो मार्ष्टुं नार्हति "आचार्यदेवो भवे" त्यादिवेदोक्तधर्ममतिलंघ्यातितुच्छदैहिकसुखसिद्ध्यर्थं गुर्वादिघातिनं वेदोक्तमपि कर्म कथं पवित्रीकुर्यादिति भावः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु प्रायश्चित्तं क्रियतां किं शोकेन तत्राह स्त्रीणामिति । पापस्य हि रोगवत्प्रतीकारः स च प्रत्यग्रोत्पन्नस्य प्रथमं कर्त्तव्यः पश्चात्पुरातनानाम् । प्रत्यहं च सहस्रं स्त्रियः मद्धतान् भर्तॄन् गृहीत्वा शोचंत्यो म्रियंते स द्रोह इहैव महानुपस्थितः । नन्वस्यैव तर्हि प्रायश्चित्तं क्रियतां तत्राह कर्मभिरिति । अस्त्यत्र प्रायश्चित्तं सर्वपरित्यागः शरीरपरित्यागो वा, न तु गृहमेधीयैः कर्मभिः द्रव्यमयैर्भूतहिंसात्मकैः यद्यपि प्रायश्चित्तत्वेन वेदेन बोध्यते तथापि मम नाधिकारः तथाविधसाधनाभावात् ॥ ५१ ॥ ❀ ❀ अयथाविधसाधनैस्तु अजीर्णे भोजनवत् सर्वनाशक इति न तादृशयज्ञेन निस्तार इति सदृष्टांतमाह यथेति । कर्दमजलक्षालनार्थं यथा पंकलेपः भित्त्यादिलेपनवत् अधिकमृत्संपादको भवति । अस्य दृष्टांतस्य न परलोकनाशकत्वमित्याशंक्य दृष्टांतांतरमाह सुरया वेति । यथा सुराबिंदुस्पर्शे महत्या सुरया प्रक्षालनं परलोकनाशकं भवति । एवमेवैकामपि ब्रह्महत्यां बहुभिरपि यज्ञैः पशुमारकैः दूरीकर्त्तुं कोऽपि नार्हतीत्यर्थः । वस्तुतः पूर्वकांडविचारकैर्निर्मथितं ज्ञानं मोहज्ञानमिति निरूपितम् । एवं भगवतोऽद्भुतकर्मत्वं सिद्धम् ॥ ५२ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधविवरणे अष्टमाध्यायविवरणम् ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यथा पङ्केनेत्यत्र । अयथाविधसाधनैरिति । सम्पादितो यज्ञ इति शेषः ॥ ५१ ॥

इति प्रथमस्कन्धसुबोधिनीप्रकाशेऽष्टमाध्यायविवरणम् ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

किञ्चानुज्ञातत्वाद्युद्धे द्विषां वधो पापं मा भवतु परन्तु मया हता बन्धवो यासां तासां स्त्रीणां योऽसौ इहेदानीं द्रोहो दुःखमननुज्ञात एवोत्थितः तज्जं पापं तु गृहमेधीयैः गृहाश्रमविहितैः हिंसाप्रायैः कर्मभिर्व्यपोहितुं दूरीकर्त्तुमहं न कल्पो न समर्थः ॥५१॥ ननु "सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति श्रुतेरश्वमेधेन सर्वं पापं विनश्येदेवेत्याशङ्क्यां दृष्टान्तेन निराकरोति यथेति। पटादिलग्नं पङ्काम्भो यथा घनपङ्केन न मृज्यते। अस्य दृष्टान्तस्य लौकिकत्वात्परलोके नाशकप्रसङ्गे युक्तत्वमाशङ्क्य दृष्टान्तान्तरमाह–सुरयेति। यथा वा सुराकृतमपावित्र्यं बह्व्या सुरया न मृज्यते तथैवैकां प्रमादतो जातां भूतहत्यां बुद्धिपूर्वकहिंसाप्रायैः यज्ञैः मार्ष्टुं शोधयितुं दूरीकर्तुं कोऽपि नार्हतीत्यन्वयः ॥ ५२ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ अष्टमो विवृतः श्रोतृ रक्षादिविनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

स्त्रियोंके पति और भाई-बन्धुओंको मारनेसे उनका मेरे द्वारा यहाँ जो अपराध हुआ है, उसका मैं गृहस्थोचित यज्ञ-यागादिकोंके द्वारा मार्जन करनेमें समर्थ नहीं हूँ ॥ ५१ ॥ ❀ ❀ जैसे कीचड़से गँदला जल स्वच्छ नहीं किया जा सकता, मदिरासे मदिराकी अपवित्रता नहीं मिटायी जा सकती, वैसे ही बहुत-से हिंसाबहुल यज्ञोंके द्वारा एक भी प्राणीकी हत्याका प्रायश्चित्त नहीं किया जा सकता ॥ ५२ ॥

आठवाँ अध्याय समाप्त

अथ नवमोऽध्यायः

सूत उवाच

इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया । ततो विनशनं प्रागाद् यत्र देवव्रतोऽपतत् ॥ १ ॥
तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः । अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा ॥ २ ॥
भगवानपि विप्रर्षे रथेन सधनञ्जयः । स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥ ३ ॥
दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम् । प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणम् । कृष्णस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते ॥ १ ॥

यदर्थं तस्याविवेकः श्रीकृष्णेन संवर्धितस्तद्दर्शयति । इतीति । सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया । विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः ॥ १ ॥ ❀ ❀ संतः श्रेष्ठा अश्वा येषु तै रथैः ॥ २–३ ॥ ❀ ❀ सानुगाः परिवारसहिताः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य भीष्मस्य (१) इत्युक्तरीत्या ततो हस्तिनापुरतः । विशेषेण नश्यंति पापान्यत्रेति विनशनम् । देवानामिव व्रतं सत्यसंभाषणादिनियमो देवस्य श्रीकृष्णस्येव व्रतं ब्रह्मचर्यं यस्येति देवव्रतः । "आत्मन्यवरुद्धसौरतः" इति श्रीदशमे वक्ष्यमाणत्वात् । "यद्यहं ब्रह्मचर्येण न भग्नो भूतले सदा । तेनैव सत्यमानेन पार्थस्यायातु वै शिरः" इति जैमिनीयाश्वमेधोक्तेश्च । कृष्णब्रह्मचर्यस्य प्रसिद्धत्वमस्तीति । यत्र विनशने । अयं जीवः । यद्ययं तवाविवेको नापयाति तदा सर्वधर्मतत्त्वज्ञं भीष्ममेव पृच्छेति युक्तिश्श्रीकृष्णोक्ता सर्वसंमताभूत्तदा राजा तत्रैव ययाविति ॥ १ ॥ ❀ ❀ आदिना कश्यपांगिरसादिग्रहः ॥ २ ॥ ❀ ❀ हे विप्रर्षे इति । यथा भवान्सर्वतत्त्वज्ञोऽपि व्यासं विहाय मद्यशोवृद्धये मां पृच्छति तथा राजापि श्रीकृष्णं विहाय भीष्मं प्रष्टुं श्रीकृष्णेच्छया ययाविति भावः । स युधिष्ठिरः । गुह्यकैर्यक्षैः ॥ ३ ॥ ❀ ❀ अमरमिव द्योतमानम् । चक्रिणा कृष्णेन इत्यर्थ इति । अत्रासतेर्गत्यर्थस्य रूपमिदम् । " असगतिदीप्त्यादानेषु" इति धातुपाठात् ॥ ४ ॥

दीपनी आद्वादशश्लोकं न

श्रीमद्वीरराघवव्याख्या

तत इतीत्थं प्रजाद्रोहाद्भीतो युधिष्ठिरः स्वाज्ञातधर्मान् बोद्धुमिच्छया विशसनं विशसिता हिंसिता यत्र बंधवः तद्विशसनं कुरुक्षेत्रं प्रायात्प्रतस्थे । विशसनं विशिनष्टि यत्र देवव्रतो भीष्मोऽपतत् भीष्माद्धर्मान् बोद्धुं प्रययावित्यर्थः ॥ १ ॥ ❀ ❀ तदा तस्य युधिष्ठिरस्य भ्रातरो भीमादयः सर्वे संतोऽश्वा येषां तैः स्वर्णभूषितैरथैरन्वगच्छन् तथा हे विप्राः व्यासधौम्यादयश्चान्वगच्छन् ॥ २ ॥ ❀ ❀ हे विप्रर्षे स धनंजयः सार्जुनो भगवान् श्रीकृष्णोऽपि रथेनान्वगच्छत्तदा स नृपो युधिष्ठिरो व्यरोचत यथा गुह्यकैर्यक्षैः कुबेरस्तद्वत् ॥ ३ ॥ ❀ ❀ दिवः स्वर्गाच्च्युतममरमिव स्थितं भूमौ निपतितं भीष्मं दृष्ट्वा सानुगाः सभृत्याः पांडवाश्चक्रिणा श्रीकृष्णेन सह प्रणेमुः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रजाद्रोहादिति भीतः युधिष्ठिरः सर्वधर्मज्ञानेच्छया ततो हस्तिनपुरात् विशसनं युद्धस्थानं कुरुक्षेत्रं प्रायात्तत्रापि यत्र देवव्रतो भीष्मोऽपतदित्येकान्वयः ॥ १ ॥ ❀ ❀ तस्य युधिष्ठिरस्य भ्रातरः भीमादयः संतः प्रशस्ता अश्वा येषां ते तथा तैः तथा व्यासादयो द्विजा अन्वगच्छन्नित्यन्वयः ॥ २ ॥ ❀ ❀ स धनंजयः सार्जुनः गुह्यकैर्यक्षैः कुबेरो वैश्रवणः । व्यरोचत अराजत रुच दीप्तौ ॥ ३ ॥ ❀ ❀ सह चक्रिणा कृष्णेन सहिताः दिवः स्वर्गात् च्युतं समागतं देवमिव द्योतमानम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीभीष्ममहिमदर्शनार्थं भगवदिच्छयैव तत्तत्प्रभावावरणमपि जातमित्याह इति भीत इति चतुर्भिः ॥ १–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नवमे स्वप्रभुं भीष्मो ददर्शाथ तदाज्ञया। धर्म्मानुक्त्वा बहु स्तुत्वा तमेव प्राप भक्तितः ॥

यद्यपि तवाविवेको नापयाति तदा सर्व्वधर्म्मतत्त्वज्ञं भीष्ममपि पृच्छेति युक्तिर्यदा सर्व्वसम्मताऽभूत् तदा राजा तत्रैव ययावित्याह इतीति। विवित्सया विचारेच्छया। विनशनम् कुरुक्षेत्रम्। देवव्रतो भीष्मः ॥ १–२ ॥ ❀ ❀ भगवानप्यन्वगच्छत् ॥ ३–५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रबोधयितुं प्रवृत्तेनापि श्रीकृष्णेन यदर्थं न प्रबोधितस्तद्दर्शयितुं नवमाध्याय आरभ्यते। स्त्रीणां मद्धतबंधूनां द्रोह उत्थित इतीत्थं प्रजाद्रोहाद्भीतः ततस्तदनंतरं सर्वधर्मविवित्सया सर्वान्धर्मान्बोद्धुमिच्छया यत्र देवव्रतो भीष्मः रथादपतद्विनशनं सरस्वत्यंतर्द्धिकौतुकस्थानं कुरुक्षेत्रांतर्गतं स्थानं प्रागात् ॥ १ ॥ ❀ ❀ संतो विशिष्टाः अश्वा येषु तै रथैः ॥ २ ॥ ❀ ❀ भगवान् श्रीकृष्णोऽपि रथेनान्वगच्छत् स युधिष्ठिरः तै भ्रात्रादिभिः ॥ ३ ॥ ❀ ❀ दिवः स्वर्गाद्भ्रमिच्युतममरमिव स्थितं चक्रिणा धर्मसंस्थापनकामेन सह प्रणेमुः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

लोकप्रतीत्या कृष्णस्य यदा कार्यसमापनम्। तदा भागवतश्रोतुर्देहरक्षा निरूप्यते ॥ १ ॥
ऐहिकामुष्मिकफलभक्तानां स्थानभार्ययोः। सर्वेष्टाऽऽपूरणं चैव भगवत्कार्यसंग्रहः ॥ २ ॥
श्रीमद्भागवतश्रोतू रक्षा पूर्वक्रियाऽखिला। निरूपिता ततो मध्ये भगवत्कार्यवर्णनम् ॥ ३ ॥

एवं परीक्षितः शरीररक्षाप्रस्तावे रक्षापूर्वकार्यं मायावेष्टनमुक्त्वा इतरकार्यानिरूपण ऐकाग्र्येण रक्षाऽसंभवान्मध्ये भगवत्कार्यं निरूपणीयं तच्च कार्यं चतुर्विधं सर्वभक्तानामैहिकसर्वफलदानपूर्वकभक्तिदानमैहिकामुष्मिकयोरेकसंबंधाय निर्वेदश्च प्रथमम्। ज्ञानसंदेशपूर्वकपरमभक्तिप्रादुर्भावेन मुक्तिर्द्वितीयम्। सर्वभक्तचित्तसमाधानपूर्वकस्वस्थानप्राप्तिस्तृतीयम्। तत्रत्यानां सर्वसुखदानोपसंहारश्चतुर्थम्। तत्र मुक्तिदानमेवोत्तमतत्कार्यमैहिकफलदानादि तत्पूर्वांगमिति निश्चित्य रक्षापूर्वांगेन सहैकस्मिन्नध्यायेऽष्टमे निरूपितम्। नवमे द्वितीयं कार्यं निरूप्यते। "नवमे स्वस्य भिन्नत्वं प्राप्तस्याभावसंशये। स्वच्छंदमृत्योस्तच्छांत्यै मुक्तिर्भीष्मस्य वर्ण्यते ॥ १ ॥ पुरस्कृतोऽघमुत्सृज्य जह्याद्देहमितीरितः। राज्ञो मोहप्रसंगाय निवृत्तिश्चोपदेशतः ॥ २ ॥ भक्तोऽपि भगवद्द्रोहमाचरन्नरकं व्रजेत्। इति दर्शयितुं भीष्मशरपंजरसंस्थितिः ॥ ३ ॥ तस्याप्युद्धारकः कृष्णो निजदत्तधिया स्तुतः। इति स्तुतिस्तथाप्यस्य तादृग्रूपेण वर्ण्यते ॥ ४ ॥" संगतिमाह इति भीत इति। जातेऽपि प्रजाद्रोहे किमस्मत्कृतं न वा अधर्मजनकत्वमस्ति नवेति संदेहात् प्रजाद्रोहस्य भयहेतुत्वमत एव सर्वज्ञस्यैव सर्वसंदेहनिवृत्तिरिति सर्वतत्त्वज्ञानार्थं सर्वेषां धर्म्माणां वेदितुमिच्छया ततो हस्तिनापुरात् विनशनं कुरुक्षेत्रं प्रागात्, तत्रापि यत्र देवव्रतोऽपतत्। देववद्व्रतं यस्य भगवतो यथा प्रतिज्ञा ब्रह्मचर्यादि सोऽपि भगवतोऽद्भुतचरित्रत्वादपतत् ॥ १ ॥ ❀ ❀ तदा भीष्मपुरस्कारार्थं सर्वे गता इत्याह तदा त इति। ये भ्रातरः प्रजाद्रोहादि कृतवंत इति सर्वेऽन्येऽपि। विप्रा अपि गतास्ते वेदव्यासपांडवकृतपुरोहितधौम्यादयः ॥ २ ॥ ❀ ❀ भगवानपि मुक्तिदानार्थमवश्यगमनेऽपि युधिष्ठिरप्रियार्थं सहैव गत इत्याह भगवानपीति। विप्रर्षे! इति सम्बोधनं भगवतोऽनुवृत्तिर्लीलात्वात् न दोषायेति ज्ञापनार्थं रथेन सधनंजय इति। गरुडध्वजमारुह्यार्जुनेन सारथिनाऽन्वगच्छदिति लक्ष्यते। तेषां भ्रात्रादीनां गमनेऽपि राज्ञो बहिरेव सुखं नांतरमित्याह स तैरिति। नृपत्वात् परं तैः रोचनं वस्तुतस्तु अंतररोचनं सदृष्टांतमाह। यथा गुह्यकैः सह कुवेरः कुत्सितं बेरं अक्षि यस्य अनेन बहिःप्रकाशो महान् अंतस्त्वंधतुल्यस्तथाऽयमपि शोकग्रस्त इत्यर्थः ॥ ३ ॥ ❀ ❀ एवं सर्वैः सह गमनमुपपाद्य संभाषणव्यतिरेकेणैव दर्शनमात्रेणैव नमस्कारं कृतवन्त इत्याह दृष्ट्वेति। पतितस्यापि महती कांतिरिति सदृष्टांतमाह। भूमौ तस्य स्पर्श एवायुक्तः किं पुनः पातस्तथा भीष्मस्य पराजय एवाशक्यः किं पुनरेवंभावः। यादृशोऽपि देवो मनुष्याणां नमस्करणीयस्तथा भीष्मोऽपि भगवद्विरोधाचरणेऽपि नमस्करणीयः, यथा देवः स्वर्गाच्च्युतोऽपि अन्येषां भजनीयः बुध्यादीनां विद्यमानत्वात् तथा भीष्मोऽपगतदेहोऽपि ज्ञानपूर्णत्वात् नमस्करणीय इत्यर्थः। पांडवा इति। भ्रात्रेयपुत्रत्वान्नमस्कारयोग्यता सूचिता। भीष्मोपदिश्यमानधर्मस्य सर्वेषां ग्रहणसिद्ध्यै समागतानां सर्वेषां नमनमिति सानुगा इति। "आगत्य नमनं यत्तु लोकाद्भक्तस्तथा न चेत्। विपरीतत्वमापन्नः कथमेवं भवेदिति। सर्वैः सह नमस्कारस्ततो भगवता कृतः।" चक्रिणेति पदं घातकरूपज्ञानार्थमद्भुतकर्मत्वाय ॥ ४ ॥

श्रीमद्गोस्वामिपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ नवमाध्यायं विवरिषवः सङ्गतिं वक्तुमष्टमादिचतुर्षु परीक्षिद्रक्षाया अनिरूपणे हेतुं सपरिकरं त्रिभिर्वदन्तोऽग्रे तन्निरूपणे हेतुमाहुः लोक इत्यादि । कार्यं स्फुटीकुर्वन्ति ऐहिकेत्यादि । कथमेवमत आहुः श्रीत्यादि । निरूपितेति । अष्टमे निरूपिता । मध्ये इति । नवमादित्रये । तथा च व्यासोक्तौ सूतोक्तौ चाङ्गाङ्गिभावो निर्वाहकत्वं चेति समानैव सङ्गतिरित्यर्थः । ऐहिकेत्यादि । कारिकोक्तमर्थं व्याकुर्वन्ति एवमित्यादि । तेनैककार्यत्वं सङ्गतिः फलिष्यति । रक्षापूर्वाङ्गेनेति । मायावरणेन । नन्वैहिकामुष्मिकयोरेकसम्बन्धाय पाण्डवमुक्तिरेव निरूप्या, भीष्ममुक्तिकथनस्य कः प्रसङ्ग इत्यत आहुः नवम इत्यादि । स्वस्येति । स्वकीयस्य भिन्नत्वं 'यस्तान् द्वेष्टि स मां द्वेष्टि' त्युद्योगे भगवद्वाक्यात्पाण्डवद्वेषेण अभगवदीयत्वं प्राप्तस्य मुक्त्यभावसंशये तच्छान्त्यै संशयशान्त्यै वर्ण्यत इत्यर्थः । ननु तथापि तत्र भगवद्गमनादिरूपस्य भीष्मपुरस्कारस्य कथनं कुत इत्याकाङ्क्षायामाहुः पुरस्कृत इत्यादि । पुरस्कृतो भीष्मः । अघं द्रोहरूपं भगवदपराधमुत्सृज्य देहं जह्यादिति हेतोः पुरस्कार ईरितः । तथा च भक्तेन कृतेपि द्रोहे भगवान् तन्निवर्तनार्थं स्वयमेव प्रतिबन्धं दूरीकरोतीति ज्ञापयितुं तदुक्तिरिति भावः । प्रासङ्गिकं प्रयोजनान्तरमाहुः राज्ञ इत्यादि । राज्ञो युधिष्ठिरस्य यो मोहस्तस्याप्यनुपेक्षणीयत्वापदेशतो निवृत्तिरपि वक्तव्या, अन्यथा क्लेशे विद्यमाने 'अन्ते या मतिः सा गति'रितिन्यायाद्राज्ञोपि मुक्तिप्रतिबन्धः स्यात्, अतस्तदर्थमपि पुरस्कारोक्तिरित्यर्थः । शेषं स्फुटम् । तथापीति । उद्धार्यत्वेपि । तादृग्रूपेणेति । आततायुद्धारकरूपेण ॥ १ ॥ ❋ ❋ भगवानित्यत्र । भगवतोनुवृत्तिरिति भगवत्कर्तृकानुवृत्तिः ॥ ३ ॥ ❋ ❋ दृष्ट्वेत्यत्र । यादृश इति । यादृशस्तादृश इत्यर्थः । आगत्येत्यादि । आगत्य यद्गमनं तत्तु लोकात् लोकमाश्रित्य लोकसङ्ग्रहार्थमित्यर्थः । लोकसङ्ग्रहस्वरूपमाहुः । भक्तस्तथा नम्यः, न चेत्, यदि भक्तो न स्यात् । विपरीतत्वं दोग्धृभावमापन्नः प्राप्तः कथमेवं नम्यो भवेदिति अयं यादृशतादृशभक्तस्य नम्यत्वबोधनरूपो लोकसङ्ग्रह इत्यर्थः ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

राज्ञा पृष्टेन भीष्मेण सर्वधर्मनिरूपणम् । कृष्णस्तुतिश्च तन्मुक्तिर्नवमे विनिरूप्यते ॥ १ ॥

यथा भगवता सङ्कल्पितं तथैव जातमित्याह—इतीति । इत्येवं पूर्वोक्तप्रकारेण प्रजानां द्रोहात् विनाशजनितात् पापाद्भीतो युधिष्ठिरः सर्वेषां धर्माणां विवित्सया भीष्ममुखाद्वेदितुमिच्छया ततो हस्तिनापुरात् यत्र देवव्रतं ब्रह्मचर्यादिलक्षणं यस्य स भीष्मः अपतत् तद्विनशनं कुरुक्षेत्रं प्रकर्षेण महतोद्योगेन अगादित्यन्वयः ॥ १ ॥ ❋ ❋ तदा ते प्रसिद्धा भीमादयो भ्रातरोऽपि सर्वे सन्तः श्रेष्ठा अश्वा येषु तैः स्वर्णेन भूषितैः रथैस्तमन्वगच्छन्नित्यन्वयः । तथा व्यासधौम्यादयो विप्रा अपि रथैस्तमन्वगच्छन्नित्यन्वयः ॥ २ ॥ ❋ ❋ भगवतोऽद्भुतकर्मत्वमनुसन्धेयमित्याशयेन सम्बोधयति—हे विप्रर्षे इति । सधनञ्जयः अर्जुनेन सहितो भगवानपि रथैस्तमन्वगच्छदित्यन्वयः । स नृपो युधिष्ठिरस्तैर्भ्रात्रादिभिर्व्यरोचत । तत्र दृष्टान्तमाह—कुबेर इवेति, गुह्यकैर्यथा कुबेरो विरोचते तथेत्यर्थः ॥ ३ ॥ ❋ ❋ भूमौ निपतितं भीष्मं दृष्ट्वा सानुगाः भृत्यादिसहिताः सहचक्रिणा कृष्णेन सहिताश्च पाण्डवास्तं प्रणेमुः । पतितस्यापि कान्त्यतिशयं सूचयन् दृष्टान्तमाह—दिवः स्वर्गाच्च्युतं पतितममरमिवेत्यर्थः ॥ ४ ॥

हिन्दी अनुवाद

युधिष्ठिरादिका भीष्मके पास जाना और भगवान् श्रीकृष्णकी स्तुति करते हुए भीष्मजीका प्राणत्याग करना

सूतजी कहते हैं—इस प्रकार राजा युधिष्ठिर प्रजाद्रोहसे भयभीत हो गये । फिर सब धर्मोंका ज्ञान प्राप्त करनेकी इच्छासे उन्होंने कुरुक्षेत्रकी यात्रा की, जहाँ भीष्मपितामह शरशय्यापर पड़े हुए थे ॥ १ ॥ ❋ ❋ शौनकादि ऋषियो ! उस समय उन सब भाइयोंने स्वर्णजटित रथोंपर, जिनमें अच्छे-अच्छे घोड़े जुते हुए थे, सवार होकर अपने भाई युधिष्ठिरका अनुगमन किया । उनके साथ व्यास, धौम्य आदि ब्राह्मण भी थे ॥ २ ॥ ❋ ❋ शौनकजी ! अर्जुनके साथ भगवान् श्रीकृष्ण भी रथपर चढ़कर चले । उन सब भाइयोंके साथ महाराज युधिष्ठिरकी ऐसी शोभा हुई, मानो यक्षोंसे घिरे हुए स्वयं कुबेर ही जा रहे हों ॥ ३ ॥ ❋ ❋ अपने अनुचरों और भगवान् श्रीकृष्णके साथ वहाँ जाकर पाण्डवोंने देखा कि भीष्मपितामह स्वर्गसे गिरे हुए देवताके समान पृथ्वीपर पड़े हुए हैं । उन लोगोंने उन्हें प्रणाम किया ॥ ४ ॥

तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम । राजर्षयश्च तत्रासन् द्रष्टुं भरतपुङ्गवम् ॥ ५ ॥
पर्वतो नारदो धौम्यो भगवान् बादरायणः । बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥
वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः । कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७ ॥
अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोऽमलाः । शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र तदा तत्रासन्। तत्क्षणमेवागता इत्यर्थः। भरतपुंगवं भीष्मम् ॥ ५ ॥ ❀ ❀ रेणुकासुतः परशुरामः ॥ ६-७ ॥ ❀ ❀ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

तत्र तदा कर्मज्ञानोभयप्रधाना ब्राह्मणा ब्रह्मर्षयः कर्मगौणज्ञानप्रधानास्तु देवर्षयः तपश्चर्यापुरस्सरं यथाशास्त्रं प्रजावितारो राजर्षय इति विवेकः। "कर्मज्ञानोभयपरा विप्रा ब्रह्मर्षयः स्मृताः। कर्मगौणा ज्ञानपरा विप्रा देवर्षयः स्मृताः ॥ तपश्चर्यां पुरस्कृत्य यथाशास्त्रं प्रजावनम्। ये क्षत्रियाः प्रकुर्वंति ते तु राजर्षयः स्मृताः" इति संहितोक्तेः, पुंसि परमेश्वरे गौर्दृष्टिर्यस्य स पुंगवः। इदं समासांतटचि रूपम्। "पुमाञ्जीवे परेशे च ब्राह्मणे पालकेपि च" इति निरुक्तिः। भरतेषु पुंगवो हरिभक्त इत्यर्थः। "दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणिवारिषु। भूमौ पशौ च गोशब्दो विद्वद्भिः परिकीर्तितः" इत्यनेकार्थमञ्जरी ॥ ५ ॥ ❀ ❀ भगवान् "व्यासो नारायणः स्वयम्" इत्युक्तेः ॥ ६ ॥ ❀ ❀ कौशिको विश्वामित्रः ॥ ७ ॥ हे ब्रह्मन्निति। त्वमपि त्रिकालज्ञत्वाज्जानास्येवेति भावः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

तत्र भरतपुंगवं भरतवंश्यश्रेष्ठं देवर्षिप्रभृतय आसन्नागत्य स्थितवंतः ॥ ५ ॥ ❀ ❀ तानेव कांश्चिदाह पर्वत इति द्वाभ्याम्। रेणुकासुतो भार्गवो रामः कौशिको विश्वामित्रः ॥ ६-७ ॥ ❀ ❀ हे ब्रह्मन्नन्ये च ब्रह्मरातः आदिर्येषांते अमला मुनयः शिष्यैरुपेताः कश्यपादयश्चाजग्मुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र तदा सर्वे देवर्षयः नारदादयः ब्रह्मर्षयो व्यासादयः राजर्षयः विश्वामित्रादयः भरतपुंगवं भीष्मं द्रष्टुमायाता आसन्नित्यन्वयः ॥ ५ ॥ ❀ ❀ तेषां नामान्याह पर्वत इत्यादिना, रेणुकासुतः श्रीपरशुरामः ॥ ६ ॥ ❀ ❀ कौशिको विश्वामित्रः ॥ ७ ॥ ❀ ❀ ब्रह्मरातः शुकः, पर्वताद्या आंगिरसांता मुनयः आजग्मुरित्यन्वयः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रेणुकासुतः परशुरामः ॥ ६-७ ॥ ❀ ❀ ब्रह्मरातः शुकः। आङ्गिरसो बृहस्पतिः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

तत्र तस्मिन्विनशने तत्र युधिष्ठिरभीष्मसमागमकाले भरतसत्तमं भीष्मं द्रष्टुं ब्रह्मर्ष्यादय आसन्प्रादुर्बभूवुः ॥ ५ ॥ ❀ ❀ पर्वतो भागिनेयस्तन्मातुलो भगवदवतारान्नैष्ठिकादन्यो नारदः गृहस्थो महाभारते प्रसिद्धः ॥ ६-७ ॥ ❀ ❀ ब्रह्मरातः शुकः। आदिना श्रीकपिलाद्याः, आंगिरसो बृहस्पतिः, आदिना श्रीनारदप्रभृतयः ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सर्वज्ञा ऋषयो भीष्मो गूढं तत्त्वं वक्ष्यतीति समागता इत्याह तत्रेति। ब्रह्मर्षयो भृग्वादयो देवर्षयो नारदादयो राजर्षयो मन्वादयस्ते हि त्रिविधधर्ममंत्रद्रष्टारः सर्वथा देहेंद्रियादिस्वास्थ्ये शुद्धो धर्मादिः स्फुरति नान्यथेति धर्मतत्त्वं ज्ञात्वा भीष्मे धर्मः परिनिष्ठितो न वेति द्रष्टुमागताः। "दौष्यंतिरत्यगान्मायामिति" भरतस्य मायापगमनाद्देहदृष्ट्या धर्मं न वक्ष्यति, तद्वंशोद्भवश्रेष्ठत्वात् स्वार्थदर्शनाच्च भवति संदेहोऽत एव ऋषीणां मतेषु बाधकविषयत्वम् ॥ ५ ॥ ❀ ❀ राजसादिविभेदेन एते भेदास्तान् गणयति त्रिभिः। 'सात्त्विकाः प्रथमं प्रोक्ता राजसास्तदनंतरम्। तामसा दोषनिर्हाराच्चुलयास्ते राजभिर्मताः।' (१) पर्वत इति। न देवर्षित्वमात्रं भगवानित्युक्तम्। रेणुकासुतः परशुरामः, सोऽपि सशिष्यः, एते सप्त सात्त्विका देवर्षयः। वसिष्ठादयो दश राजसा ब्रह्मर्षयो वस्तुतस्तु नवैव। अथेति भिन्नप्रक्रमेण सुदर्शनस्याग्रे कथनात् सुदर्शनः अन्ये च राजर्षिभेदाः ब्राह्मणा अपि तत्त्वेन निर्दिष्टाः। ब्रह्मरातः शुकः। तेषां तामसादिदोषाभावमाह अमला इति। बहिरेव ते तामसाः, अंतस्तु निर्गुणा इति तन्मध्ये ब्रह्मरातादयः श्रेष्ठाः कश्यपादयो मध्यमाः, आंगिरसः बृहस्पतिः ॥ ६-८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तत्रेत्यत्र। स्वार्थदर्शनादिति। काले मनःसङ्गः स्वार्थस्तद्दर्शनादित्यर्थः। बाधकविषयत्वमिति। बाधकस्य तद्धर्ममुख्यत्वसाधकयुक्त्यादेर्विषयत्वमित्यर्थः। पर्वत इत्यत्र। न देवर्षित्वमात्रमिति। अत इति शेषः॥ ६॥

श्रीगिरिधरकृता बालप्रबोधिनी

सावधानतया श्रोतव्यमित्याशयेन सम्बोधयति–हे सत्तमेति। तत्र तदा तत्र भरतकुले पुङ्गवं श्रेष्ठं भीष्मं द्रष्टुं ब्रह्मर्षयो भृग्वादयः सर्वे देवर्षयश्च नारदादयः राजर्षयो राजानश्च आसन् समागता इत्यर्थः॥ ५॥ ❀ ❀ तानागतानृषीनेव दर्शयति पर्वत इति त्रिभिः। रेणुकासुतः परशुरामः॥ ६॥ ❀ ❀ कौशिको विश्वामित्रः॥ ७॥ ❀ ❀ ब्रह्मरातः शुकः। आङ्गिरसो बृहस्पतिः॥ ८॥

हिन्दी अनुवाद

शौनकजी! उसी समय भरतवंशियों के गौरवरूप भीष्मपितामहको देखनेके लिये सभी ब्रह्मर्षि, देवर्षि और राजर्षि वहाँ आये॥ ५॥ ❀ ❀ पर्वत, नारद, धौम्य, भगवान् व्यास, बृहदश्व, भरद्वाज, शिष्योंके साथ परशुरामजी, वशिष्ठ, इन्द्रप्रमद, त्रित, गृत्समद, असित, कक्षीवान्, गौतम, अत्रि, विश्वामित्र, सुदर्शन तथा और भी शुकदेव आदि शुद्धहृदय महात्मागण एवं शिष्योंके सहित कश्यप, अङ्गिरा-पुत्र बृहस्पति आदि मुनिगण भी वहाँ पधारे॥ ६–८॥

तान् समेतान् महाभागानुपलभ्य वसूत्तमः। पूजयामास धर्मज्ञो देशकालविभागवित्॥ ९॥
कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम्। हृदिस्थं पूजयामास माययोपात्तविग्रहम्॥ १०॥
पाण्डुपुत्रानुपासीनान् प्रश्रयप्रेमसङ्गतान्[1]। अभ्याचष्टानुरागास्रैरन्धीभूतेन चक्षुषा॥ ११॥
अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दनाः। जीवितुं नार्हथ क्लिष्टं[2] विप्रधर्माच्युताश्रयाः॥ १२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

वसूत्तमो भीष्मः देशकालविभागविदित्युत्थातुमशक्यत्वाच्छयान एव मनसा वाचा च पूजयामासेत्यभिप्रायः॥ ९॥ हृदिस्थं संतं पुरतश्चासीनं पूजयामास॥ १०॥ ❀ ❀ उपासीनान् समीप उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहस्ताभ्यां संगतानुपसन्नान्। पाठांतरे ताभ्यामवनतान् अभ्याचष्टाभ्यभाषत। अनुरागास्रैः स्नेहाश्रुभिरंधीभूतेन चक्षुषोपलक्षितो ददर्शेति वा॥ ११॥ ❀ ❀ अभिभाषणमाह अहो इत्येकादशभिः। हे धर्मनंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ यूयमिति यदेतदहो कष्टं जुगुप्सितम्। अहो अन्याय्यं चैतत्। यतो यूयं विप्रा धर्मोऽच्युतश्चाश्रयो येषां ते॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महाभागान्महानुभावान्। उपलभ्य दृष्ट्वा। मनसा प्रतिगम्य वा देशकालयोर्विभागमौचित्यं वेत्तीति तथा। प्रत्युत्थानाभिवंदनादिपूजायामशक्तत्वान्मानसीं वाचकीमांजलिकीं वा पूजां कृतवानित्यर्थः। आपत्संपद्धर्मौ जानातीति धर्मज्ञः। यद्वा "धर्मो धर्मविदुत्तमः" इति सहस्रनामसु धर्मोपि विष्णुवाचकस्तं सर्वदेहेषु स्थितं वा जानातीति धर्मज्ञः। भीष्मस्य वसूत्तमत्वं कथमिति चेत्तत्रेयं कथानुसंधेया श्रीमन्महाभारतीया–कदाचिन्महाभिषाख्यो राजा तपोयज्ञादिप्रभावेण ब्रह्मलोकं गतस्तत्र ब्रह्मसेवार्थमागतां स्त्रीरूपां गंगां दृष्ट्वा कामवशोऽभूत्। सापि तं दृष्ट्वा तथाविधैव जाता। तौ तादृशौ दृष्ट्वा ब्रह्मा त्वं मनुष्यो नृपो भव। त्वमपि मानुषी भूत्वास्य भार्या भविष्यसीति शशाप। स च शप्तः प्रतीपं पितृत्वेन संचिन्त्य तस्थौ। तदवसरेऽष्टवसवो वसिष्ठाश्रमं जग्मुस्तेषु द्यौर्नामा च पत्न्या पृष्टो धेनुं दृष्ट्वा कस्येयमिति तत् श्रुत्वा स च तामाह। नंदिनीयं वसिष्ठस्य धेनुरस्या दुग्धपानेनायुतायुः स्थिरयौवनो भवेदिति। सा चेदं श्रुत्वाह। उशीनरनृपपुत्री मत्प्रियसखी तदर्थं धेनुमाहरेति। स चान्यैर्वसुभिः संभूय तां गां जहार। ततो वनादागत्य वसिष्ठेन गोहरणाद्वसवो मनुष्या भवतेति शप्ताः येन हृता स चिरमन्येऽल्पकालमिति। स्त्रीहीनश्च स्त्र्याज्ञया हरणात् प्रसादितो मुनिराह। ते च मार्गे गंगां ब्रह्मलोकादागतां तद् वृत्तं श्रुत्वा त्वं मानुषी भूत्वाऽस्माञ्जनय मातरिति जाताञ्जातान्स्वप्रवाहे क्षिपास्मानिति चोचुः। किञ्च स महाभिषः प्रतीपाद्राज्ञः शंतनुनाम्ना जातोऽभूत्। स च पित्रेत्थमुक्तः। पुत्र! पुराहं गंगातीरं गत्वा

---

१. प्रा० पा०—सन्नतान्। २. प्रा० पा—कृच्छ्रं।

सूर्यं सेवितवानस्मि । तदा काचित्सुंदरी जलान्निःसृत्य मद्दक्षिण ऊरावुपविष्टा सा मयोक्ता किमर्थमागता । तयोक्तं पत्यर्थमिति त्वं मे पतिर्भवेति । तत् श्रुत्वा मयोक्तं नाहं परस्त्रीगामी । किं च मद्दक्षिणांगसेवनात्त्वं मदपत्यपत्नी भविष्यसीत्यतो हे पुत्र तत्र गत्वा तां भज । सा का त्वमिति न प्रष्टव्येत्युक्त्वा पुत्राय राज्यं दत्त्वा प्रतीपो वनं जगामेति । अथ कदाचिच्छंतनुर्मृगयां चरन्गंगातटस्थामतीव सुंदरीं कांचिन्नारीं ददर्श । सा च तं महाभिषं मत्वा स्मितादिभिर्मोहयामास । स च राजा तां न जानाति गंगेयमिति सा च तमाह । प्रतीपतनयं त्वामहं जानामि मत्कृतं शुभमशुभं वा यदि नो वारयिष्यसि तदा त्वां वरिष्यामीति । स च तथेत्याह । सा च काले नृपाद्गर्भं दधार । ततः सा जातमात्रं बालं गंगांभसि चिक्षेप । एवं सप्त चिक्षेप । शंतनुर्विचारयामास । यद्येनां वारयिष्ये तदा मां त्यक्त्वा गमिष्यतीयम् । अधुना त्वष्टमो गर्भो जातस्तं कथं जीवयामीति विचार्योवाचाहं तव दासोस्मि । सप्त सुतास्तु त्वया हता एकं वंशरक्षार्थं देहि । इत्युक्तापि यदा तं तत्रैव क्षेप्तुमियेष तदा स उवाच पापिष्ठे! नरकान्न बिभेषि ? मत्पुत्रं दत्वा गच्छ वा तिष्ठ यथेच्छम् । सोवाच समयलंघनादहं तु गच्छामि । तव पुत्रं वने पालयिष्येऽहं तु गंगा देवकार्यार्थं मनुष्ययोनिं प्राप्तास्मि । येंभसि क्षिप्ता मया ते वसिष्ठशप्ता वसव एव । तत्प्रार्थनया मानुषीभावं गतास्मीति । मातरं विना पुत्रजीवनं दुर्घटमत एनं प्राप्तयौवनं तत्रैवागतं त्वां दास्यामि, यत्राहं त्वया वृता इत्युक्त्वा सा गता । राजा तच्चिंतया दुःखं लेभे । कदाचिन्मृगयां गतस्तत्र सरित्तटे धनुरादाय क्रीडन्तं तमेव बालं शंतनुर्नृपः पप्रच्छ—कस्यात्मजोसि ? स न किंचिदुवाच । तदा राजा स्वपुत्रोयमिति निश्चित्य स्थितः । गंगा च तस्मै दर्शनं दत्वोवाच । वसिष्ठाश्रमस्थेनानेन त्वदात्मजेन धनुर्वेदो जामदग्न्यादधीतस्तदधुनेमं गृहीत्वा पुरं गच्छेति । ततः स गजाह्वयं गत्वा दैवज्ञानाहूय तं यौवराज्ये स्थापयामासेतीत्थं भीष्मो वसूत्तमो ज्ञेयः ।। ९ ।। ❀ ❀ कृष्णमिति । सदा स्वेषां भक्तानां हृदिस्थं हृदयस्थमपि मायया कृपया उप नेत्रसमीपे आत्त आनीतो विग्रहो येन तम् । यद्वा माययोपात्तो युधिष्ठिरेण साकं प्रबोधाप्रबोधहेतुको विग्रहो विवादो येन तम् । "विग्रहः कायविस्तारे विभागे ना रणेऽस्त्रियाम् । विवादे च विरोधे च हलेऽपि परिकीर्तितः" इत्यभिधानात् । तीर्थस्तु मायया स्वेच्छयोपात्तः पितृत्वेन गृहीतो वसुदेवदेहो येन तमित्याह ।। १० ।। ❀ ❀ पाठांतरे प्रश्रयप्रेमसन्नतानिति पाठे । चक्षिङो दर्शनार्थतामाश्रित्याह-ददर्शेति वेति ।। ११ ।। ❀ ❀ हे धर्मनंदना इति बहुत्वं प्रधानापेक्षम् । यद्वा छत्रिणो यांतीतिवत् । अहो यो धर्ममाचरणेन नंदयति समर्द्धयति तस्यापि चेत्कष्टं तर्ह्यन्याय्यमेवेति भावः । विप्रादिष्वेकोपि सुखजीवनायालं "विप्राणां सेवनं लोके विपद्ध्वान्तसहस्रपात्" । "धर्मो रक्षति कान्तारे यत्र कोऽपि न रक्षिता" । "हरिस्मृतिः सर्वविपद्विमोक्षणम्" इत्यादिवाक्येभ्यः । किमुत संहिता एतेऽत उक्तमहो कष्टमहोऽन्यायमित्याश्चर्यादप्याश्चर्यमिति द्योतनाय कष्टान्यायोभयोपादानम् । अत्र प्रगृह्यसंज्ञाभावस्त्वार्ष एव । वस्तुतस्तु भूभारावतरायावतीर्णानां पांडवानामासुरजननिधनेन वनवासादिष्वपि नित्यसुखित्वान्नास्ति दुःखमिति ज्ञेयम् ।। १२ ।।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

धर्म्मेण नन्दयन्ति ये ते तथा । 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति कर्तरि ल्युः ।। १२-३१ ।।

श्रीमद्वीरराघवव्याख्या

तान् ब्रह्मर्षिप्रभृतीन्समेतान् समुदितानुपलभ्याभिज्ञाय धर्मज्ञो देशकालविभागज्ञश्च वसूत्तमो भीष्मः यथार्हं पूजयामास पूर्वजन्मनि वसुत्वाद्वसूपम इत्युक्तम् ।। ९ ।। ❀ ❀ तथा कृष्णं च तत्प्रभावाभिज्ञो ह्यभिसंपूजयामास ध्यानेन हृदिस्थं कृत्वा मानसैरुपचारैः पूजयामासेत्यर्थः । कथंभूतमासीनमग्रत उपविष्टं जगदीश्वरं मायया संकल्परूपज्ञानेनोपात्तो विग्रहो यस्य तम् ।। १० ।। ❀ ❀ तत्र उपासीनानुपविष्टाननुवर्त्तमानान् प्रश्रयेण विनयेन प्रेम्णा च संगतान्पांडुपुत्राननुरागास्रैरनुरागजैरश्रुबिंदुभिरंधीभूतेन चक्षुषा अभ्याचष्ट ददर्श उवाच च । चक्षेरुभयार्थकत्वात् अत्र तंत्रेणोभयमपि विवक्षितम् ।। ११ ।। ❀ ❀ तत्रोक्तिमाह अहो इति द्वादशभिः । हे धर्मनन्दन अहो इदं कष्टं जीवनमन्याय्यमिति च्छेदः संधिरार्षः 'ओदि'ति प्रकृतिभावत्वात् , यद्यस्माद्विप्रा धर्मोऽच्युतो भगवांश्चाश्रयो येषां ते विप्राद्यनुवर्तिनो यूयं क्लिष्टं कृच्छ्रं यथा तथा जीवितुं नार्हथ ।।१२।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

महाभागो वसूत्तमो भीष्मः समेतान्संगतान् नृपादीनुपलक्ष्य दृष्ट्वा मनसा प्रतिगम्य वा पूजयामास । कथंभूतः देशकालविभागवित् देशः कुरुक्षेत्रं कालः शरतल्पशयनलक्षणः तयोर्विभागमौचित्यं वेत्तीति प्रत्युत्थानादिवंदनादिपूजायामशक्तत्वान्मानसीं वाचिकीं आंजलिकीं वा पूजां कृतवानित्यर्थः । अन्यत्र तद्देशतत्कालविभागं जानातीति धर्मज्ञः, आपत्संपद्धर्मौ जानातीति धर्मज्ञः, धर्मशब्दवाच्यं भगवन्तं जानातीति वा धर्मज्ञः ।। ९ ।। ❀ ❀ कृष्णं च पूजयामासेत्येकान्वयः । कथंभूतः तस्य कृष्णस्य प्रभावं सामर्थ्यं जानातीति तत्प्रभावज्ञः । कथंभूतं तत्रासीनं जगत ईश्वरं मायया स्वेच्छया पितृत्वेनांगीकृतवसुदेवशरीरं हृदि मनसि स्थितं ध्यानलक्षणोपासनया शरीरमध्ये पुंडरीककर्णिकायां दीपवद्दीप्यमानं वा ।। १० ।। ❀ ❀ प्रश्रयगुणेन प्रेमगुणेन

सम्यक् तान् समीपे निषण्णान् पांडोः पुत्रान् तेषु अनुरागयुक्तैरस्रैर्बाष्पैरंधीभूतेन चक्षुषा युक्तः 'इत्थंभूतलक्षणे तृतीये'ति सूत्रात् अभ्याचष्ट आह आभिमुख्येनापश्यदित्यन्वयः ॥ ११ ॥ ❀ ❀ भो धर्मनन्दन युधिष्ठिर यूयं क्लिष्टं क्लेशयुक्ततया जीवितुं नार्हथ, विप्रादिष्वेकोऽपि सुखजीवनायालं किमु बहुत्वमित्यभिप्रायेणोक्तं विप्रधर्माच्युताश्रया इति। यत् क्लिष्टं जीवथ तत्कष्टमन्याय्यमहो आश्चर्यादप्याश्चर्यमहो अन्याय्यमिति प्रगृह्यसंज्ञाभंगो लोकदृष्टिमपेक्ष्यैवोक्तो न तु पांडवानां दुःखमस्तीति तेषां भूभारावतारणायावतीर्णानामसुरजननिधनेन वनवासादिष्वपि नित्यसुखित्वादिति विशेषद्योतनार्थः। धर्मस्य नंदनः धर्मं नंदयतीति वा धर्म एव नंदनो यस्य स तथेति वा धर्मेण सुखक्रीडा यस्य स तथेति वा तस्मान्नन्दनं सुखनंदनं यस्य स तथेति वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णमिति। सदा स्वेषां हृदिस्थं हृदयस्थमपि मायया कृपया उप नेत्रसमीपेऽपि आत्त आनीतो विग्रहो येन तम् ॥ १० ॥ ❀ ❀ यया भीष्मादीनां स्वापराधमननशङ्कया मुनीनां स्वस्यापि शिक्षणेन युधिष्ठिरो न शाम्यति स्म तामेव शङ्कां तस्मिंस्तस्य स्निग्धतादर्शनया तद्द्वारा द्रोणादीनामपि तथाभावव्यंजनया दूरीकर्तुं तत्सन्निधावानीतवान् सोऽयं श्रीभगवानिति पूर्वाभिप्रायमेव व्यक्तीकर्तुमाह पांडुपुत्रानिति ॥ ११ ॥ ❀ ❀ अहो कष्टमिति तैः। तत्र इति यदिति तदेतद् यद्भवद्विचारितमित्यर्थः। ततो विप्रादीनां हिंसाभ्रांत्या मा क्लेशं मन्यस्वेति भावः। विप्रधर्मेति षष्ठीतत्पुरुषो वा। यद्वा धर्म्मनन्दना अपि यद् यूयं जीवितुं नार्हथ जीवितुं योग्या न भवामेति मन्यध्वे तदहो कष्टमन्याय्यं च। तत्रापि विप्रधर्म्माच्युतानामाश्रया अपि यूयं यत् तथा मन्यध्वे ततश्च क्लिष्टमिति पूर्ववदेवान्याय्यं कष्टञ्चेत्यर्थः। यूयमिति श्रीयुधिष्ठिरं प्रत्येव गौरवतः सम्बोधनम् ॥ १२-१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वसूत्तमो भीष्मः ॥ ९ ॥ ❀ ❀ माययैवोपात्तो गृहीतो विग्रहो युधिष्ठिरेण सार्द्धं प्रबोधाप्रबोधहेतुको विवादो येन तम्। यद्वा मायया कृपया उप नेत्रसमीपे आनीतो निजदेहो येन तम् ॥ १० ॥ ❀ ❀ अभ्याचष्ट अभ्यभाषत ॥ ११ ॥ ❀ ❀ अहो कष्टमहोऽन्याय्यमिति राजन्यतिदेश एवान्यायकष्टे खलु न सम्भवतस्तत् किमत्रार्थे सर्व्वविश्वस्थितिकर्त्तरि विष्णावेवान्यायः समभूदिति भावः। क्लिष्टं यथा स्यात्तथा यूयं जीवितुं नार्हथ, अन्ये तथा जीवन्ति चेत् जीवन्त्विति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वसुपूत्तमो मुख्यो वसुर्वसिष्ठशापाद्भीष्मत्वेन स्थितः ॥ ९ ॥ ❀ ❀ श्रीकृष्णपूजने विशेषमाह कृष्णं च हृदिस्थं पूजयामास। ननु बहिश्चरो हृदि कथं स्थितो भवेत्तेन च स कुतो ज्ञातस्तत्राह मायया कृपया हृदि उपात्त आविष्कृतो विग्रहो येन तं स च तदनुभावं सर्वत्र व्यापकतया भक्तेच्छयाऽऽविर्भवनसामर्थ्यं वेत्तीति तथा ॥ १० ॥ ❀ ❀ उपासीनान्समीपस्थान्प्रश्रयप्रेमसंनतान्विनयस्नेहाभ्यामवनतान्पांडुपुत्रान् अनुरागास्रैः स्नेहाश्रुभिः अन्धीभूतेन चक्षुषोपलक्षितः अभ्याचष्ट ददर्श अभ्यभाषत च। स्नेहाश्रुभिः चक्षेरुभयार्थस्य रूपं तन्त्रादिनार्थद्वयस्य विवक्षितत्वात् ॥ ११ ॥ ❀ ❀ अभ्यभाषतेत्युक्तं तदेवाह अहो इत्येकादशभिः। हे धर्मनन्दन विप्रादय आश्रया येषां ते तथा एवंभूता यूयं क्लिष्टं यथा स्यात्तथा जीवितुं नार्हथ। यदिदं साश्रयमपि क्लिष्टं जीवनं तदहो कष्टं गहनमहो अन्याय्यं न्याय्यविपरीतम्। अहो इत्योदंतनिपातस्य 'ओदि'ति प्रगृह्यसंज्ञायां प्रकृतिभावप्राप्तौ संधिरार्षः ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनीव्याख्या

अत्रोत्तमाधिकारे धर्मनिर्णये तदुक्तेषु तरतमभावज्ञानार्थं गणना। एवं त्रयः समागताः पांडवा भगवानृषयश्चेति। तत्र ऋषिषु कृतमाह तान् समेतानिति। महान् भागो यस्येति धर्मज्ञानादिसमूहः भागः। वसूत्तमो भीष्मः, भूमौ हि वसवो मोच्यन्ते तथाऽन्येऽन्यत्र तद्गृहे पुष्टिभक्तत्वव्यावृत्त्यर्थमाह। देशकालयोर्विभागः देशकालविभागो वा प्राकृतत्वादृषीणामनुत्तमस्याप्यपूर्वस्य प्रथमं पूजनमित्यादि। विधानविदिति पाठेऽपि स एवार्थः ॥ ९ ॥ ❀ ❀ एवं मुनीन् मनसा वचसा धर्मोपयोगित्वेन पूजयित्वा भगवन्तमपि तथैव पूजितवानित्याह कृष्णं चेति। ननु भगवन्तं कथं पूजितवानित्याकांक्षायामाह तत्प्रभावज्ञ इति पूर्वोक्तानुत्थितानेव दर्शनमात्रेण पूजितवान्, भगवन्तं तु आसीनं पूजायां भावनया सर्वोत्तमत्वप्रकारं ज्ञापयितुं जगदीश्वरमित्युक्तं, हृदिस्थमित्यन्तर्यामिणं तस्य बहिर्भाने हेतुः माययोपात्तविग्रहमिति मायया शक्त्या स्वीकृतो विग्रहो येन प्राकृतगणेनेन्द्रियादिना अहंकारेण च जीवानां देहग्रहणं भगवतस्तु स्वशक्त्यैव देहनिर्माणमपि मायात्वादन्यथा भासयति जीवसम्बन्धित्वेन पुत्रत्वादिना केचिद्बीजमेव मायया गृहीतमाहुः। एवं लोकानुसारेण भीष्मबुद्ध्यनुसारेण भगवान् निरूपितः। वस्तुतस्तु यथा भगवान् तदुत्तरत्र निरूपयिष्यते ॥ १० ॥ ❀ ❀ एवमुभयोः पूजनमुक्त्वा प्रथमोक्तान् पांडवान् अपूजयित्वैव स्वोक्तार्थग्रहणसिद्धये शोकाप-

नोदनपूर्वकस्वशोकाभावकथनेन सह भगवन्तं निरूप्य फलं प्रार्थयते पांडुपुत्रानित्यादिचतुर्दशभिः। भ्रातृपुत्रत्वेन स्नेहशिक्षायोग्यता उपासीनानिति धर्मयुक्तान् प्रश्रयप्रेमसंगतानिति ज्ञानोपदेशहेतुः, विनीतेषु स्निग्धेषु हि ज्ञानमुपदिश्यते। भगवद्दर्शनात् क्रूरभावेऽपगते स्निग्धभावेन वदतीत्याह अनुरागास्रैरिति। अन्धीभूतेन चक्षुषा सहितः लक्षितो वा स्निग्ध इति स्वक्लेशेन सहितं परदुःखं रोदने हेतुः सर्वे हि भगवता व्यामोहिताः। एतेऽपि क्लेशं प्राप्तवन्तो वयमपीति भावः॥ ११॥ ❀ ❀ तेषां क्लेशमनुवदति द्वयेन अहो कष्टमिति, अहो इत्याश्चर्ये, तेषां वनवासक्लेशं स्मृत्वा निरन्वयमेतत् प्राप्तमित्यहो कष्टं हेलनकचग्रहणादिकं स्मृत्वा अहो अन्याय्यमिति पूर्ववत् "बीजस्वभावक्षेत्राणां धर्माधर्मैस्तथा पुमान्। सुखं दुःखं च लभते कर्ममार्गेण नान्यथा" तत्र यद्भवद्भिः प्राप्तं दुःखं क्लेशाच्छारीरम् अन्यायान्मानसं तत्कर्मजन्यं न भवति यस्मात् यूयं धर्मनन्दनाः। यद्यपि युधिष्ठिर एव धर्मपुत्रः, तथापि तत्प्राधान्येन स्थिता इति सर्वे तत्त्वेन व्यपदिश्यन्ते। अतो बीजदोषाभावात् अतो दुःखं न युज्यते। किंच विप्रधर्माच्युताश्रयाः भवत्सु स्वाभाविको दोषो नास्ति स्वभावदुष्टा हि त्रेधा धर्मं नाशयन्ते। धर्मो हि त्रिविधः नीत्यविरुद्धः स्वभावशुद्धः ईश्वरसम्बन्धी च। तत्र विप्राश्रितानां सर्वनीतिज्ञानात् नीतिविरोधाभावः। धर्मश्च स्वाश्रितं युद्धे स्थापयति अच्युताश्रयत्वाच्च ईश्वरसम्बन्धी धर्मः स्फुरति। एकैकाश्रितोऽपि न क्लेशं प्राप्नोति किमुत त्रितयाश्रितः त्रयाणामेकभावात् धर्ममार्गे चेयं व्यवस्था कालमार्गेण भिन्नतया वक्ष्यति भगवन्मार्गेण च॥ १२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कृष्णं चेत्यत्र। कथं पूजितवानिति। सम्बन्धित्वेन वा ज्ञातित्वेन वेश्वरत्वादिना वेत्यर्थः। मायया देहग्रहणोक्तौ मायावादिवत्काल्पनिको देह इति शङ्का स्यात्तन्निवृत्त्यर्थमाहुः प्राकृतेत्यादि। निरूपित इति। सूतेन निरूपितः। उत्तरत्रेति। दशमाध्याये कौरवेन्द्रपुरस्त्रीवाक्येषु, तस्य वास्तवत्वं तु 'यस्यामतं तस्य मतं' 'अविज्ञातं विजानतां विज्ञातमविजानताम्'इत्यादिश्रुत्या ज्ञेयम्॥ १०॥ ❀ ❀ अहो कष्टमित्यत्र। निरन्वयमिति प्रसिद्धहेतुरहितम्॥ १२॥

श्रीगिरिधरकृता बालप्रबोधिनी

अत्र त्रयः समागताः पाण्डवाः भगवान् ऋषयश्चेति, तत्र ऋषिषु कृतमाह-तानिति। तानृषीन् समेतान् समागतान् वसूत्तमो भीष्म उपलभ्य दृष्ट्वा पूजयामासेत्यन्वयः। तेषां पूज्यत्वे हेतुमाह-महाभागानिति, भगवदुपासकानित्यर्थः तस्य पूजकत्वे हेतुमाह-धर्मज्ञ इति। तथापि तस्यां युद्धभूमौ पूजासामग्रीलाभासम्भवात्कथं पूजनं सम्भवतीत्याशङ्क्याह-देशकालविभागविदिति। यस्मिन् देशे यस्मिन् काले च यदुचितं कर्त्तव्यं तद्विभागेन जानातीति तथा। तथाच तत्र तदा स्तुतिनमस्कारादिनैव सत्कारं कृतवान्, नतु चन्दनादिनेति भावः॥ ९॥ ❀ ❀ भगवन्तमपि तथैव पूजयामासेत्याह-कृष्णं चेति। स्वसम्मुखमासीनं कृष्णं च पूजयामासेत्यन्वयः। ननु कृष्णस्य क्षत्रियत्वात् कनिष्ठत्वाच्च कथं तत्पूजनमित्याशङ्क्याह-तत्प्रभावज्ञ इति। कथम्भूतः प्रभावस्त्वस्य तेन ज्ञात इत्यपेक्षायामाह-हृदिस्थं जगत ईश्वरं नियन्तारमिति। तर्हि कथं तस्य सर्वान्तर्यामिणो बहिरवस्थानमित्यपेक्षायामाह-माययेति। मायया स्वेच्छयैवोपात्तः स्वीकृतो विग्रहो मनुष्यदेहो येन तम्॥१०॥ ❀ ❀ अनुरागास्रैः स्नेहाश्रुभिरन्धीभूतेन चक्षुषोपलक्षितो भीष्मः उपासीनान् स्वसमीपे उपविष्टान् पाण्डुपुत्रान् अभ्याचष्ट अभ्यभाषतेत्यन्वयः। अनुरागे हितोपदेशे च हेतुभूतांस्तद्गुणान् सूचयंस्तान् विशिनष्टि-प्रश्रयेति। प्रश्रयो विनयः प्रेमा स्नेहस्ताभ्यां सङ्गतान् उपसन्नानित्यर्थः। सन्नतानिति पाठान्तरम्॥ ११॥ ❀ ❀ तदभिभाषणमेव दर्शयति-अहो इत्येकादशभिः। 'बीजस्वभावक्षेत्राणां धर्माधर्मैस्तथा पुमान्। सुखं दुःखं च लभते कर्ममार्गेण नान्यथा' इति हि शास्त्रवचनं, तत्र युष्माकं बीजदोषस्तु नास्त्येवेति सूचयन् सम्बोधयति-हे धर्मनन्दना इति। यद्यपि युधिष्ठिर एव धर्मपुत्रस्तथापि तत्प्राधान्येन स्थिता इति ते सर्वे त एव यथात्वेन व्यपदिश्यन्ते। अहो इत्याश्चर्ये। वनवासक्लेशं स्मृत्वाऽऽह-अहो कष्टमिति। कचग्रहणादिहेलनं स्मृत्वाऽऽह-अहो अन्याय्यमिति। सन्धिरार्षः। क्लिष्टं दुःखं यथा भवति तथा यूयं जीवितुं नार्हथ। कुत इत्यपेक्षायामाह-यदिति। यस्मात् विप्रा धर्मः अच्युतश्च श्रीकृष्णः आश्रयो येषां तथाभूता यूयमित्यर्थः। विप्राद्येकैकाश्रितोऽपि यदि क्लेशं न प्राप्नोति तदा किं पुनस्त्रितयाश्रितानां क्लेशायोग्यतेति वक्तव्यमिति भावः। एतेन स्वभावदोषोऽपि निराकृतः॥ १२॥

हिन्दी अनुवाद

भीष्मपितामह धर्मको और देश-कालके विभागको-कहाँ किस समय क्या करना चाहिये, इस बातको जानते थे। उन्होंने उन बड़भागी ऋषियोंको सम्मिलित हुआ देखकर उनका यथायोग्य सत्कार किया॥ ९॥ ❀ ❀ वे भगवान् श्रीकृष्णका प्रभाव भी जानते थे। अतः उन्होंने अपनी लीलासे मनुष्यका वेष धारण करके वहाँ बैठे हुए तथा जगदीश्वरके रूपमें हृदयमें विराजमान भगवान् श्रीकृष्णकी बाहर तथा भीतर दोनों जगह पूजा की॥ १०॥ ❀ ❀ पाण्डव बड़े विनय और

प्रेमके साथ भीष्मपितामहके पास बैठ गये। उन्हें देखकर भीष्मपितामहकी आँखें प्रेमके आँसुओंसे भर गयीं। उन्होंने उनसे कहा ॥ ११ ॥ ❀ ❀ 'धर्मपुत्रो ! हाय ! हाय ! यह बड़े कष्ट और अन्यायकी बात है कि तुमलोगोंको ब्राह्मण, धर्म और भगवान्के आश्रित रहनेपर भी इतने कष्टके साथ जीना पड़ा, जिसके तुम कदापि योग्य नहीं थे ॥ १२ ॥

संस्थितेऽतिरथे[1] पाण्डौ पृथा बालप्रजा वधूः । युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः ॥ १३ ॥
सर्वं कालकृतं मन्ये भवतां च यदप्रियम् । सपालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥
यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः । कृष्णोऽस्त्री गाण्डिवं चापं सुहृत्कृष्णस्ततो विपत् ॥ १५ ॥
न ह्यस्य कर्हिचिद्राजन् पुमान् वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

किं च पाण्डौ संस्थिते मृते बालाः प्रजाः पुत्रा यस्याः सा । वधूश्चेति दैन्यं दर्शितम् । लोकान्यपत्यानि तद्वती । अपत्यैः सह क्लेशान् प्राप्तेत्यर्थः ॥ १३ ॥ ❀ ❀ कालकृतत्वेन शोकं वारयति सर्वमिति द्वाभ्याम् । भवतामपि । यद्वशे यस्य वशवर्ती ॥ १४ ॥ ❀ ❀ अहो दुर्घटघटनापटुः काल इत्याह । यत्रेति । कृष्णोऽर्जुनः । अस्त्री धन्वी । ततस्तत्रापि विपत् । पुण्यशारीरबलास्त्रनैपुणशस्त्रदेवसंपत्तावपि दुर्वारा विपदित्यर्थः ॥ १५ ॥ ❀ ❀ ननु कृष्णं कथं कालोऽतिक्रमेदित्यपेक्षायामाह । न ह्यस्य श्रीकृष्णस्येत्यंगुल्या निर्दिशति । विधित्सितं कर्तुमिष्टम् । यत् यस्य विधित्सितस्य जिज्ञासया ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतिरथे महारथसहस्रजेतरि संस्थिते स्वर्गं गतवति सत्यतोकवती पुत्ररहिता यथा बहुक्लेशवती भवति तथा बालप्रजा युष्मन्माता पृथा पुत्रवत्यपि युष्मत्कृते युष्मत्पोषणपालनार्थाय बहून्क्लेशान्प्राप्तेति तीर्थः । स्वामिचरणास्तु तन्मातृक्लेशं स्मृत्वाह-किंचेति । इत्यर्थ इति । बालप्रजत्वदशायामेकाकिन्येव क्लेशान्प्राप्ता युष्माकं प्रौढवयस्त्वे तु तोकवती पुत्रैर्युष्माभिस्सहितापि कष्टान्प्राप्तेति भावः ॥ १३ ॥ ❀ ❀ ननु तर्हि कथमस्माकं क्लेशस्तत्र तत्कारणं प्राचीनार्वाचीनं किमपि पापमपश्यन्वक्तुमसमर्थ एव लोकोक्तिरीत्यैवाह-सर्वमिति । ननु कालो हि प्रारब्धसुखदुःखभोगयोरेवाधिकरणमेवेति सहकारित्वादुपचारेणैव कालकृतं मन्ये इति ब्रूषे । प्रारब्धपापकृतमिति स्पष्टं कथं न वदसीत्यत आह-भवतां चेति । युधिष्ठिरो हि साक्षाद्धर्मावतार इति प्रसिद्ध एव । धर्मस्यापि प्रारब्धं पापमस्त्यस्तीति चेन्मन्तव्यं तर्हि कथं धर्मस्याधर्मत्वमतोऽतिप्रबलोऽतिदुर्निवारो दुस्तर्कः । काल एव कारणमित्याह-सपाल इति । क्वचित्सकाल इत्यपि पाठः । लोक इन्द्रादिसहितश्चतुर्दशभुवनात्मकः ॥ १४ ॥ ❀ ❀ ननु "न कर्हिचिन्मत्पराः शान्तरूपे नंक्ष्यन्ति नो निमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥" इति श्रीकपिलदेवोक्तेः । कृष्णे दास्यसख्यवात्सल्यवतः पाण्डवान्कथं कालोऽतिक्रमेद्वेत्यतोऽतिविस्मयान्वितः कारणं विनैव कर्मोत्पत्तिरूपं विभावनालंकारं भावयन्नाह-यत्रेति । राजा रंजकः सर्वेषां धर्मसुतत्वात् । यत्र च तस्य राज्ञः कनिष्ठः क्षितिभारायितदितिसुतशोणितदिग्धां गदां पाणौ बिभ्रत् भक्तिवशीकृतपरब्रह्मा वृकोदरः । वृकानतिक्रूरानप्युदृणाति विदारयति यः स भीमसेनः । वृकशब्दः उपलक्षणं, येन विराटनगरे सिंहोपि युद्धे विदीर्ण इत्यर्थः । तथा यत्रेन्द्रावतारः कृष्णोर्जुनोऽस्त्री स्वीकृतद्रोणाखिलास्त्रविद्यः । तस्य च करे रिपुपूयशोणितवमनकारिगांडीवाख्यं धनुर्येन शंकरोपि तोषितः सर्वसुपर्वाधिराजोऽनन्तबलवीर्यादिगुणार्णवः श्रीमान्कृष्णो वासुदेवः सुहृदनिमित्तबन्धुस्ततस्तत्रापि । इत्यर्थ इति । सर्वापेक्षितबलसत्त्वे पुनर्विपदहो कालमाहात्म्यं वर्णितुं न शक्यत इति भावः । "विना कारणमुत्पत्तिः कार्यस्येति विभावना । अनध्ययनविद्वांसो निर्द्रव्याः परमेश्वराः" इति वाग्भटः ॥ १२ ॥ ❀ ❀ ननु "योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुः" इत्युक्तेः कालस्य तच्चेष्टारूपत्वात्स कथं तमतिक्रमेतेत्याक्षिपति-नन्विति । तर्ह्यत्र किं निर्द्धारयामि । सामान्यतस्तावदयं सिद्धान्तः सर्ववादिसंमतो यत्कृष्णस्य चिकीर्षितमन्यथा कर्तुं समर्थस्तच्चिकीर्षितं किमित्यथापि कोपि न वेत्तीत्याह-नह्यस्येति । कर्हिचिदपि काले कोपि पुमान् ब्रह्मभवादिः कोपि न वेद । अहं को वराक इति भावः । ननु कोपि मा जानातु जिज्ञासा त्ववश्यमेव जायते । तत्रास्मासु दुःखदानमेव किं चिकीर्षितं सुखदानमेव वा उभयदानमेव वा । तत्राद्यं न, भक्तवात्सल्यगुणस्य लोपादनौचित्यात् । द्वितीयमपि न, अदृष्टत्वादेव । तृतीयमपि न, सौहार्दलोपापत्तेः । तर्हि जिज्ञासापि नैव कर्तुमुचितेति विनिर्णयन्नाह-यद्विजिज्ञासयेति । युक्ता विवेकिनोपि कवयः सर्वशास्त्रज्ञा अपि मोहमेव प्राप्नुवन्ति सिद्धान्तालाभादिति भावः । अत्र भीष्मस्य महाविज्ञस्योक्तौ

---

१. प्रा॰ पा॰—संस्थिते विरथे ।

कवय इति मुह्यन्तीति पदाभ्यां युधिष्ठिरादयोऽपि भगवद्भक्ताः प्रारब्धं भुंजत इति मतं परास्तम् । हे राजन्निति । यत्र ब्रह्मादीनां मोहस्तत्र राज्ञस्तव का वार्त्तेति भावः । संदर्भस्तु तेषामार्त्तिद्वारेण स्वस्मिन्नावेशार्थं तत्खण्डनजनितहर्षद्वारेण च स्वस्मिन्प्रेमवर्द्धनार्थं तथा विधित्सितमिति गूढोऽभिप्रायः ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

अतिरथे पांडौ संस्थिते प्रेते सति बालाः प्रजाः पुत्रा यस्याः सा वधूश्च पृथा कुंती तोकवत्यपत्यवती सत्यपि युष्मदर्थे बहून् मुहुर्मुहुः क्लेशान्प्राप्ता हि ॥ १३ ॥ ❀ ❀ भवतां यदप्रियं दुःखमभूदेतत्सर्वं कालकृतं कालोद्बुद्धदैवकृतं मन्ये । कोऽसौ कालः यत्कृतं मदप्रियं तत्राह वायोर्वशमेघपंक्तिरिव यस्य वशे सर्वो लोको वर्तते स एव कालः ॥ १४ ॥ ❀ ❀ अत्यंतासंभावितमिदमभवदिति विस्मयते यत्रेति । यत्र धर्मसुतादयः तत्र विपदिति चित्रमित्यर्थः । आद्यः कृष्णशब्दोऽर्जुनपरः द्वितीयस्तु भगवत्परः तद्विशेषणं सुहृदिति धर्मसुतादीनां सुहृत् स्त्रीशब्देन कृष्णा स्त्री द्रौपदी विवक्षिता । धर्मसुतादीनामन्यतम एव सर्वविपक्षक्षपणक्षमे सति संभूय सर्वेषामवस्थानेऽपि विपदभवदिति एतदतिचित्रमिति इदं सर्वं कालकृतमेवेति भावः । सुहृत् कृष्ण इत्यनेन सुहृदपि कृष्णः कालमेवान्ववर्त्ततेति सूचितम् "द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः संति न संति यदुपेक्षये"त्युक्तविधस्य तत्रापि भवतामतीव सुहृदः कृष्णस्य विपन्निमित्तकर्मोद्बोधककालानुवर्तित्वादेवोपेक्षा संगता, नान्यथेत्याशयः ॥ १५ ॥ ❀ ❀ ननु यद्वशे लोकः स कालोऽपि श्रीकृष्णो यत्र सत्रादिमांश्चेत्तर्हि कालानुवृत्त्या किमस्य चिकीर्षितमित्यत्राह नेति । हे राजन्नस्य कृष्णस्य विधित्सितं ज्ञातुं प्रवृत्ताः कवयो ब्रह्मादयोऽपि मुह्यंति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अतिरथे पांडौ संस्थिते स्वर्गं गतवति सत्यतोकवती पुत्ररहिता यथा बहुक्लेशवती भवति तथा बालप्रजा युष्मन्मतुप्प्रत्ययः । पुत्रवती पुत्रपोषणादावतिक्लेशं प्राप्नोति यथा तथेत्यन्वयदृष्टांतो वेत्येकान्वयः ॥ १३ ॥ ❀ ❀ एवंविधयुष्मदप्रिये भवदारब्धकर्मनियामको हरिरेव हेतुरित्यभिप्रेत्याह सर्वमिति भवतां यदप्रियं दुःखादि तत्सर्वं युष्मत्प्रारब्धकर्मनियामककालाख्यहरिकृतं मन्ये वायोर्वशं गता घनावलिरिव जडाजडलोको यस्य भगवतो वशे वर्तते स नारायणः सर्वगुणपूर्णत्वात्काल इत्युच्यत इत्येकान्वयः ॥ १४ ॥ ❀ ❀ अन्यथानुपपत्तितोऽप्ययं हेतुः सिध्यतीत्याह यत्रेति । यत्र राजा रंजकः धर्मस्य सुतः यत्र च तस्य राज्ञः कनिष्ठः क्षितिभारायितदितिसुतशोणितदिग्धां गदां पाणौ बिभ्रत् भक्त्या वशीकृतपरब्रह्मा वृकोदरः तथा यत्र चैंद्रावतारः कृष्णोऽर्जुनोऽस्त्री द्रोणादुपात्तास्त्रग्रामः तस्य च करे रिपूणां पूयशोणितवमनकारि गांडीवाख्यं धनुः यत्र चैषां सर्वसुपर्वाधिराजो राजपक्षोऽनंतबलवीर्याद्यनंतगुणार्णवः श्रीमान्वासुदेवः वसुदेवपुत्रः कृष्णः सुहृदनिमित्तबंधुस्ततस्तत्र विपत्तेषां प्रारब्धकर्माभावे विपत्कुतः स्यादस्ति च तस्मादित्येकान्वयः ॥ १५ ॥ ❀ ❀ सुहृदस्तस्य विपत्करत्वं कथमिति तत्राह नहीति अपरिच्छिन्नत्वादस्य स्वरूपजिज्ञासया युक्ताः कवयोऽपि मुह्यंति अयमित्थंभूत इति निर्देष्टुं न जानंति हे राजंस्तस्यास्य विधित्सितं कर्तुमिष्टं कश्चिदपि पुमान् कदाचिन्न वेद । हि यस्मात्तस्मात्सर्वेषां स्वकृतादृष्टानुसारिफलदातुरस्य भवत्सुहृत्त्वेऽपि प्रारब्धकर्मानुकूल्येन विपत्करत्वं युक्तमित्येकान्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्यस्माकं विपत्तिं कालकृतामत्वा स्वकृतामेव तु मत्वा दुःखं लभसे तर्हि कथं भवतां सा जातेत्यभिप्रेत्याह यत्रेति ॥ १५ ॥ ❀ ❀ न हीति । अत्र तेषामार्त्तिद्वारेण स्वस्मिन्नावेशार्थं तत्खंडनजनितहर्षद्वारेण च स्वस्मिन् प्रेमवर्द्धनार्थं तथा विधित्सितमिति गूढोऽभिप्रायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु किं क्लिष्टं तत्राह । संस्थिते मृते । बालप्रजा इति बालप्रजत्वदशायामेकाकिन्येव क्लेशान् प्राप्ता । युष्माकं प्रौढवयस्त्वे सति तु तोकवती पुत्रैर्युष्माभिः सहितापि कष्टान् प्राप्तेत्यर्थः ॥ १३ ॥ ❀ ❀ ननु तर्हि कथमस्माकं क्लेशस्तत्र तत्कारणं प्राचीनार्व्वाचीनं किमपि पापमपश्यन् वक्तुमसमर्थ एव लोकोक्तिरीत्यैवाह सर्व्वमिति । ननु कालो हि प्रारब्धसुखदुःखभोगयोरेवाधिकरणमेवेति सहकारित्वादुपचारेणैव कालकृतं मन्ये इति ब्रूषे प्रारब्धपापकृतमिति स्पष्टं कथं न वदसीत्यत आह भवताञ्चेति । युधिष्ठिरो हि साक्षाद्धर्म्मावतार इति प्रसिद्ध एव । धर्मस्यापि प्रारब्धं पापमस्तीति चेन्मन्तव्यं तर्हि कथं धर्म्मस्य धर्मत्वम्, अतोऽतिप्रबलोऽतिदुर्निवारो दुस्तर्कः काल एव कारणमित्याह सपाल इति ॥ १४ ॥ ❀ ❀ ननु-"न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टमि"ति कपिलदेवोक्तेः । कृष्णे

दास्यसख्यवात्सल्यवतः पांडवान् कथं कालोऽतिक्रमेत इत्यतोऽतिविस्मयान्वितः कारणं विनैव कर्म्मोत्पत्तिरूपं विभावनालंकारं भावयन्नाह यत्रेति। कृष्णोऽर्जुनः अस्त्री धन्वी। ततस्तत्रापि विपत् पुण्यबलशरीरबलनैपुण्यबलशस्त्रबलसुहृद्बलसम्पत्तावपीत्यर्थः॥ १५॥ ❀ ❀ तह्यत्र किं निर्द्धारयामि सामान्यतस्तावदयं सिद्धांतः सर्व्ववादिसम्मतो यत् कृष्णस्य चिकीर्षितमन्यथाकर्त्तुं न कोऽपि समर्थस्तच्चिकीर्षितं किमिति अद्यापि कोऽपि न वेत्तीत्याह न ह्यस्येति। कर्हिचिदपि काले कोऽपि पुमान् ब्रह्मभवादिः कोऽपि न वेद अहं को वराक इति भावः। ननु कोऽपि मा जानातु, जिज्ञासा तु अवश्यमेव जायते। तत्रास्मासु दुःखदानमेव किं चिकीर्षितं सुखदानमेव वा उभयदानमेव वा, तत्राद्यं न भक्तवात्सल्यगुणस्य लोपानौचित्यात्। द्वितीयमपि न अदृष्टत्वादेव। तृतीयमपि न तत्सौहार्द्दलोपापत्तेः। तर्हि जिज्ञासा नैव कर्त्तुमुचितेति विनिर्णयन्नाह यद्विजिज्ञासयेति। युक्ता विवेकिनोऽपि कवयः सर्व्वशास्त्रज्ञा अपि मोहमेव प्राप्नुवन्ति सिद्धांतालाभादिति भावः। अत्र भीष्मस्य महाविज्ञत्वोक्तौ कवय इति मुह्यन्ति इति पदाभ्यां युधिष्ठिरादयोऽपि भगवद्भक्ताः प्रारब्धं भुञ्जते इति मतं परास्तम्॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच संस्थिते मृते बालाः प्रजाः पुत्रा यस्याः सा तोकवती सपुत्रा मुहुः क्लेशान्प्राप्ता॥ १३॥ ❀ ❀ कर्मफलप्रदानं परमेश्वरप्रवृत्तौ निमित्तभूतेन कालेन कृतं मन्ये॥ १४॥ ❀ ❀ धर्मदैहिकबलास्त्रनैपुण्यदिव्यास्त्रादियोगः किं बहुना परमेश्वरश्च तत्तत्काले शुभाशुभप्रद इत्याशयेनाह यत्रेति। यत्र धर्मसुतादयस्तत्रस्तत्रापि विपदित्यन्वयः॥ १५॥ ❀ ❀ कालप्रभावमुक्त्वा तन्नियंतुः परमेश्वरस्य प्रभावमाह न हीति। अस्य श्रीकृष्णस्य चिकीर्षितं कर्तुमिष्टम्॥ १६॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं स्वभावबीजदोषौ परिहृत्य क्षेत्रदोषाभावायाह। संस्थितिः स्वधर्मपरिपालनं सूचितम्। अत एव युष्मत्कृते धर्ममार्गेण भवद्रक्षार्थं बहून् क्लेशान् प्राप्तवती माद्रीपुत्रौ तोकौ। यमलजातावतिबालकौ पदचलनेप्यशक्तौ। अत एव मुहुः तस्मात्सर्वथा स्वधर्मपरिपालनात् न क्षेत्रदोषः, दृष्टं त्वदृष्टसापेक्षमिति अदृष्टाभावे दृष्टमप्यस्मदादिरूपं न हेतुरिति ज्ञापितम्॥ १३॥ ❀ ❀ अकारणकार्योत्पत्त्यभावात्। किं कारणमित्याकांक्षायामाह। सर्वं कालकृतमिति सर्वमाध्यात्मिकादि अस्मत्कृतं वा सर्वं कालकर्तृकं न तु निमित्तमात्रत्वं तत्राह मन्ये इति। ममैवं प्रतिभाति 'प्रमाणमंतःकरणप्रवृत्तयः' इति वाक्यात् स्वमनसि निश्चितं वदति काल एव दुःखहेतुर्ज्योतिःशास्त्रसंवादात् लोककर्मणो निराकरणाच्च ज्ञानिनोऽक्लेशात् स्वभावात्तत्प्राप्तिर्न पापादिहेतुः। ईश्वरस्य च सह वृत्त्या भक्तत्वान्नेश्वरकृतं दुःखम्, अतः पारिशेष्यात् कालकृतमेव मन्ये यद्यदिति प्रसिद्धं नैतादृशं कर्म भवतां जन्मांतरेऽपीति सूचितम्। प्रकृतोपयुक्तकालस्यसामर्थ्यमाह सपाल इति। स्वाधारवश्यत्वाल्लोकानां वयसा व्याप्तत्वात् कालमित्या भोगाच्च ब्रह्मांडस्थितिरपि कालमिता सपालो लोकः इंद्रादिसहितो लोकः। न केवलमत्यन्तकालवशत्वं स्थितिकार्यकारणनाशेऽपीति दृष्टांतमाह वायोरिति। यथा वायोर्वशे घनपंक्तिः सर्वमासेषु समागच्छंतो मेघाः वायुनैव भवंति न भवंति॥ १४॥ ❀ ❀ कालकृते पूर्वोक्तकर्मादिनिराकरणे च तर्कमाह यत्रेति। सर्वा दृष्टसामग्री वर्त्तते दुःखाभावहेतुः। पुत्रं पालयति स च राजा स्वयं पालितो अन्यान् पालयेत्, वृको दशविधः प्राण उदरे यस्य स च बलाधिष्ठात्री देवता गदापाणिः ससाधनः। कृष्णोऽर्जुनः नाम्ना समानधर्मत्वं प्राप्तः अस्त्री गांडीवधनुषा ब्रह्मास्त्रादिप्रयोगसमर्थः चापस्याक्षयत्व नाम्ना सूचयति अन्यत्तु नाशयोग्यं भगवांश्च सुहृत् हितान्वेषी। एत एव विचार्यमाणे दुःखहेतवो जाताः। तथाहि पांडुना पूर्वमेव पुत्रं पार्श्वे स्थापयित्वा राजत्यागः कृतश्चेत् तदा न दुःखशंका, भीमस्य वा महाबलत्वाभावे न दुःखं भवेत्, अर्जुनस्य वा राधावेधाद्यकरणे आशयाभावान्न दुःखं भवेत्। अग्निना वा साधनानि न दत्तानि चेत् इंद्रेण सह कलहाभावात् भगवता साहाय्यं न कृतं स्यात् तदा दीनदयया दुःखदातृभिर्दुःखं न दत्तं स्यात्। तस्मात् सुखसाधनत्वेन ये गृहीताः तैश्चेद् दुःखं तदा कालकृतमित्येव निश्चयः॥ १५॥ ❀ ❀ नन्वेवं सति कालस्य बलिष्ठता सूचिता तथा कथं भगवन्तं कालोऽतिक्रामेत्तत्राह न ह्यस्येति। अस्य विधित्सितं कोऽपि न वेद, यद्यपि कालो भगवदाज्ञाकारित्वात् भगवदिच्छायां सत्यां न प्रवर्त्तते, परं भगवदिच्छैव ज्ञातुमशक्या भगवान्न सुखदुःखहेतुः तथा सति सर्वत्र सर्वस्य स्यात्। किंतु भगवदिच्छा सा कार्यैकोन्नेया न कार्यात् पूर्वमवगंतुं शक्या। नन्वेवं सति भगवान् कथं विश्वसनीयः तत्राह। यद्विजिज्ञासयेति भगवान् पांडवेभ्यः किं दुःखं दत्तवान् निर्वेदार्थं वा सुखं दत्तवान् भगवत्परिपालितत्वज्ञानेन भक्तिं वा दत्तवान् कौरवाणां वा हितं कृतवान् इति विचारे क्रियमाणे सर्वत्र युक्तिसंभवात् अत एव कवयोऽपि मुह्यन्ति अवाङ्मनसगोचरे युक्तिर्न वर्त्तत इति शब्दार्थः॥ १६॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

सर्वं कालकृतमित्यत्र। बहूनामित्यादि। 'ईश्वरो वा भवेत् कर्ता पुरुषो वापि भारत। हठो वा विद्यते लोके कर्मजं वा फलं स्मृत'मिति राजधर्मेऽन्यत्र लोकादीनां कर्तृत्वप्रतिपादनादित्यर्थः। निराकरणादिति। धर्मनन्दनपदेन कर्मणः धर्माश्रयपदेन

लोकस्य च निराकरणादित्यर्थः। सहवृत्त्येति। वक्ष्यमाणया सहवृत्त्या। वश्यत्वे हेतुः। वयसेत्यादि। कालमित्येति। कालमानेनेत्यर्थः॥ १४॥

श्रीगिरिधरकृता बालप्रबोधिनी

क्षेत्रदोषाभावं सूचयन्नाह-संस्थित इति। पाण्डौ संस्थिते मृते सति पृथा मुहुर्वारं वारं बहून् क्लेशान् प्राप्तेत्यन्वयः। प्रथमतस्तन्मरणे एव महान् क्लेशो जात इति सूचयन्नाह-अतिरथे इति, अनन्तैः सह युद्धकर्त्तरि महावीरे इत्यर्थः। तर्हि कथं न तदनुमरणं कृतवतीत्यपेक्षायामाह-बालप्रजेति, बालाः प्रजाः पुत्रा यस्याः सेत्यर्थः। तथाभूताया अनुमरणनिषेधादिति भावः। एवं मुहुः क्लेशप्राप्तौ हेतुमाह-तोकवतीति, पुत्रवतीत्यर्थः, तथापि पुरुषश्रेष्ठत्तथा क्लेशो न स्यादित्यत आह-वधूरिति। इदानीं युष्मच्छोकेनापि तस्या महान् क्लेशः स्यात्तद्युष्माकमनुचितमित्याशयेनाह-युष्मत्कृत इति॥ १३॥ ❀ ❀ ननु कार्यस्य क्लेशस्य दृश्यमानत्वात् कारणं किञ्चिदवश्यं वक्तव्यं तद्विना कार्यासम्भवादित्याशङ्क्याह-सर्वमिति। चकारोऽप्यर्थे। भवतां धर्मात्मनामपि यदप्रियं तत्सर्वं कालकृतं मन्ये इत्यन्वयः। कुत इत्यत आह-सपालः इन्द्रादिदिक्पालसहितः सर्वोऽपि चतुर्दशभुवनात्मको लोको यस्य कालस्य वशे वर्त्तते। वशवर्त्तित्वे दृष्टान्तमाह-वायोरिति, मेघपङ्क्तिर्यथा वायोर्वशे वर्त्तते तथेत्यर्थः॥ १४॥ ❀ ❀ कालोऽपि कथं धर्माधर्मादिसम्पत्तिमुपेक्ष्य सुख-दुःखादिकं कुर्यादन्यथा सर्वेषां सुखदुःखादौ समानता स्यादिति कालतत्त्वेऽपि स्वस्यापरितोषं सूचयन्नाश्चर्यं करोति-यत्रेति। यत्र यस्मिन् पाण्डवपक्षे धर्मसुतो युधिष्ठिरो राजा, इति पुण्यसम्पत्तिः पापाभावश्च दर्शितः। गदा पाणौ यस्य स वृकोदरः भीमसेनः, इति शारीरं बलं प्रदर्शितम्। कृष्णोऽर्जुनः अस्त्री धन्वी, इति युद्धनैपुण्यं दर्शितम्। गाण्डिवं चापं धनुः, इति शस्त्रसम्पत्तिर्दर्शिता। कृष्णः सुहृत् मित्रम्, इति परमेश्वरसहायता दर्शिता। ततस्तत्रापि विपत्। तत्र विपन्नैव सम्भवति परन्तु दृश्यते इत्याश्चर्यं दर्शितम्॥ १५॥ ❀ ❀ तर्हि को वा मुख्यो हेतुरित्यपेक्षायां भगवदिच्छैव सर्वतो बलवती तयैव सर्वं दुर्घटितमपि सम्पद्यते इति निश्चयः। ननु कृष्णविधित्सितं चेत्तर्ह्यस्माभिर्ज्ञातमेव स्यात् स्वजनत्वान्मित्रत्वान्निकटवर्त्तित्वाच्चेति चेत् न, तस्य दुर्ज्ञेयत्वादित्याह--नहीति। सावधानतया विचारय राज्ञामपि विधित्सितं तावद् दुर्ज्ञेयं किं पुनः परमेश्वरस्येति सूचयन् सम्बोधयति--हे राजन्निति। हिद्वयमवधारणे। अङ्गुल्या प्रदर्शयति--अस्येति। अस्य श्रीकृष्णस्य परमेश्वरस्य विधित्सितं कर्तुमिष्टं कार्योन्नेयत्वात्ततः पूर्वं कर्हिचित्कोऽपि पुमान्नैव वेदेत्यन्वयः। तदवेद्यत्वमेव स्पष्टयति-यदिति यस्य विधित्सितस्य विजिज्ञासया युक्ताः विज्ञातुं प्रवृत्ताः कवयो ब्रह्मरुद्रादयोऽपि मुह्यन्ते एवेत्यन्वयः॥ १६॥

हिन्दी अनुवाद

अतिरथी पाण्डुकी मृत्युके समय तुम्हारी अवस्था बहुत छोटी थी। उन दिनों तुम लोगोंके लिये कुन्तीरानीको और साथ-साथ तुम्हें भी बार-बार बहुत-से कष्ट झेलने पड़े॥ १३॥ ❀ ❀ जिस प्रकार बादल वायुके वशमें रहते हैं, वैसे ही लोकपालोंके सहित सारा संसार काल भगवान् के अधीन है। मैं समझता हूँ कि तुमलोगोंके जीवनमें ये जो अप्रिय घटनाएँ घटित हुई हैं, वे सब उन्हींकी लीला हैं॥ १४॥ ❀ ❀ नहीं तो जहाँ साक्षात् धर्मपुत्र राजा युधिष्ठिर हों, गदाधारी भीमसेन और धनुर्धारी अर्जुन रक्षाका काम कर रहे हों, गाण्डीव धनुष हो और स्वयं श्रीकृष्ण सुहृत् हों-भला, वहाँ भी विपत्तिकी सम्भावना है?॥ १५॥ ❀ ❀ ये कालरूप श्रीकृष्ण कब क्या करना चाहते हैं, इस बातको कभी कोई नहीं जानता। बड़े-बड़े ज्ञानी भी इसे जाननेकी इच्छा करके मोहित हो जाते हैं॥ १६॥

तस्मादिदं दैवतन्त्रं व्यवस्य भरतर्षभ। तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो[1]॥ १७॥
एष वै भगवान् साक्षादाद्यो नारायणः पुमान्। मोहयन्मायया लोकं गूढश्चरति वृष्णिषु॥ १८॥
अस्यानुभावं भगवान् वेद गुह्यतमं शिवः। देवर्षिर्नारदः साक्षाद्भगवान् कपिलो नृप[2]॥ १९॥
यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम्। अकरोः सचिवं दूतं सौहृदादथ सारथिम्॥ २०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इदं सुखादि। दैवतन्त्रमीश्वराधीनं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितोऽनुवर्ती सन्। कर्तरि क्तः। हे नाथ कुलपरम्परागत स्वामिन् प्रभो अनाथा असमर्थाः प्रजाः पाहि॥ १७॥ ❀ ❀ अनुविधेयः परमेश्वरश्च श्रीकृष्ण एवेत्याह। एष एव भगवान्सर्वेश्वरः। यत आद्यः पुमान्। तच्च कुतः। यतो नारायणः साक्षात्॥ १८॥ ❀ ❀ तदुपपादयति।

---

१. प्रा० पा०—विभो। २. प्रा० पा०—मुनिः।

अस्येति । अनुभावं प्रभावम् ॥ १९ ॥ ❀ ❀ त्वमज्ञानाद्यमेवं मन्यसे । मातुलेयं देवक्याः सुतम् । प्रियं प्रीतिविषयम् । मित्रं प्रीतिकर्तारम् । सुहृत्तममुपकारानपेक्ष्योपकारकं च । सौहृदाद्विश्वासात् । अकरोः कृतवानसि । सचिवं मन्त्रिणम् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मादुक्तदुर्ज्ञेयत्वहेतोः । किञ्च स्वभक्ताय तत्प्रदानादिकं दुर्ज्ञेयप्रयोजनकमित्यपि निश्चित्य हे नाथेति हे भरतर्षभेति हे प्रभो इति संबुद्धित्रयस्य स्वामित्वं कुलपरम्परागतं तव तत्कर्तुं समर्थे न त्याज्यमिति भावः ॥ १७ ॥ ❀ ❀ नन्वीश्वराधीनमिति तद्विधित्सितं तद्विधित्सितं तु न वेदेत्यादि कथं ब्रूषे । ईश्वरः संप्रति तव साक्षाद्वर्त्येवेत्यत इमं कृष्णमेव दृष्ट्वा कथं सर्वं तत्त्वं न वेत्सीत्यत आह–एष इति । मायया मोहयन्निति पृष्टो हि भीष्मादपि किमहमतितत्त्वज्ञ इत्यादिवाचा वंचयन्वक्ष्यति । कथंचिद्वदन्नपि मोहयिष्यत्येवेत्यसावनुवर्त्तनीय एव । न तु जिज्ञासनीय इति भावः । संदर्भस्तु–न च नरलीलादृष्ट्या साधारणदृष्टिरत्र कर्त्तव्येत्याह–एष इति । साक्षादेव स्वयं भगवान् यः खल्वाद्यः पुमान्महत्स्रष्टा सोप्ययमेव । यश्चाद्यो नारायणः परमव्योमाधिपतिः सोप्ययमेवेति । स्वामी तु–अनुविधेयोऽनुवर्त्तनीयः । तच्चादिपुंस्त्वं चेत्याह ॥ १८ ॥ ❀ ❀ तदादिनारायणत्वम् । विश्वनाथस्तु–अनुभावं भावबोधकं चेष्टाविशेषं शिवो वेद न तु विधित्सितं स्वरूपं प्रभावं चेत्यर्थः । तथाहि रसशास्त्रज्ञः प्रथममनुभावं स्तम्भस्वेदरोमाञ्चादिकं वेद च तेन स्थायिभावं च अनुभावस्य वैशिष्ट्यतारतम्याभ्यां स्थायिभावस्यापि वैशिष्ट्यतारतम्यं च । तथैव यशोदादिगोपीष्वस्य दामबन्धनादिरूपमर्जुनयुधिष्ठिरोग्रसेनादिषु सारथ्यदास्यादिरूपं च पारवश्यमनुभावं वेद तेन च तस्य सर्वेश्वरस्य सर्वनियन्तुः सर्वेश्वरस्यापि वशीकारकः कोऽपि पदार्थविशेषस्तत्र तत्र वर्त्तमानोऽस्यापि चित्तमभीक्ष्णं विद्रुतीकुर्वन्नध्यास्ते इत्यनुमिमीते च । स च नानाविशेषवान्स्वविषयाश्रययोश्चेतोविद्रावकः परस्परवशीकारकश्च प्रेमाभिधान एव परमपुरुषार्थचूडामणिः भक्तिस्नेहानुरागादिशब्दैरुच्यमानो भवति । किञ्च तत्तज्जनकत्वेन प्रतिसमयदृष्टेनास्य वशीकाराधिक्यमेव दृष्टान्ते च प्रेमाधिक्यमनुमाय सिद्धसाधकभक्तेष्वेतत्कर्तृकमेव कष्टप्रदानं भक्तिवृद्ध्यर्थमेवेति सिद्धान्तं निश्चिनोति । शिवनारद एव कपिलदेव एवेति । अत एव द्रौपद्यादिषु कष्टाधिक्यात्प्रेमाधिक्यं च दृष्टं तथा "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम्" इत्यादिश्रीमुखवाक्येन च भक्तकष्टस्य हितैषिणा भगवतैव दीयमानत्वान्न कर्मबद्धत्वम् । किंचैतदपि न सार्वत्रिकं कचित्कचिदकष्टेनापि स्वभक्तभक्तिं वर्द्धयतीति विधित्सितं तु न कोपि वेदेत्युक्तम् । अनुभावं तु शिवनारदादिरेव वेद । अन्ये पुनर्मंदा दामबन्धनादिकमप्यनुकरणत्वेन व्याचक्षाणा अनुभावमपि न विदुरिति ॥ १९ ॥ ❀ ❀ अस्यानुभावज्ञानसद्भाववतामपि भवतां संबन्धविशेषमयसर्वोच्छादकमाधुर्यैज्ञानात्मकप्रेमविशेषेण वशीकारित्वं तु तैरपि दुर्लभमित्याह–यमिति । मातुलेयमिति । स्त्रीभ्यो ढक्सिद्ध्यर्थं देवक्याः सुतमिति व्याख्यातमन्यथा मातुलस्यापत्यं मातुलायनिरित्येव स्यात् । सर्वेश्वरस्यापि युष्मत्सचिवदूत्यादिकं प्रेमवश्यत्वानुभाव इत्यर्थः । अत्र यमित्यस्यानुभावमित्यनेन पूर्वेणैवान्वयः ।

श्रीमद्वीरराघवव्याख्या

अस्त्वेवं प्रकृते किमित्यत्राह तस्मात्सर्वलोकस्य कालायत्तसुखादिमत्त्वात्कर्मादेश्च कृष्णायत्तत्वात्कृष्णस्य कालाद्यनुवर्तितत्वाच्च हे भरतर्षभ इदं सुखदुःखादिकं सर्वं दैवतंत्रं दैवायत्तं व्यवस्य निश्चित्य दैवमत्र कालकर्माद्युद्बोधयिता तदनुवर्ती चेश्वरः कृष्णो विवक्षितः । तस्य दैवस्यानुविहितः तस्येति कर्तरि षष्ठी, तेन वर्तितस्त्वं हे प्रभो नाथ अनाथाः प्रजाः पाहि पालय ॥ १७ ॥ ❀ ❀ एवं तमनुशास्य लोकानुग्रहकाम्यया श्रीकृष्णयाथात्म्यमावेदयति एष इति । एष श्रीकृष्णः साक्षाद्भगवान् षाड्गुण्यपरिपूर्णः आद्यो जगत्कारणभूतः परमपुरुषो नारायण एव । सन्मायया लोकं मोहयन् गूढः तिरोधापितस्वकीयवेषः वृष्णिषु यादवेषु चरति कश्चिद्यादव इवानुकरोति ॥ १८ ॥ ❀ ❀ त्वमेव इममित्थं जानासि तथापि तस्य तत्कृतं न वैषम्यमस्तीत्याह यमिति द्वाभ्याम् । यं कृष्णं मातुलेयं मातुलपुत्रं प्रियं प्रीतिविषयं च मित्रं स्वतुल्यं च सुहृत्तमं महोपकारकं च मन्यसे यं च त्वं सचिवं मंत्रिणं च कदाचित् दूतं कदाचिद् सौहृदातिशयात्सारथिं चाकरोः कृतवानसि ॥ १९ ॥ ❀ ❀ तस्यानुभावं भगवान् शिवो वेदेति पूर्वेणान्वयः, देवर्ष्यादयो विदुरिति च हे नृप युधिष्ठिर ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विवक्षितकथनं निगमयति तस्मादिति । तस्मादुक्तहेतुभ्यो देवस्य हरेस्तंत्रमधीनं जगन्निश्चित्य तस्य हरेरनुकूलया श्रुतिस्मृतिलक्षणया आज्ञया भगवद्द्विट्तदनुबंधिनिग्रहशिष्टजनपरिपालनाख्यं स्वकर्मविहितं विधिमनुवर्तमानः तत्राधर्मबुद्धिमपहाय हे भरतकुलश्रेष्ठ प्रभो समर्थ नाथ अनाथास्त्वदन्यनाथरहिताः प्रजाः पाहीत्येकान्वयः ॥ १७ ॥ ❀ ❀ एतावत्काल-

मीश्वरं परोक्षतयाऽभिधायेदानीमपरोक्षतया हस्तग्राहेण निर्दिशन्निव निर्दिशति एष वा इति । यः साक्षादाद्यो नारायणो भगवान्स एष पुमांल्लोकमज्ञजनं यथार्थज्ञानाच्छादिकया मायया मनुष्य इति मोहयन् गूढोऽविज्ञातो वृष्णिषु चरति वै यस्मात्तस्मादयमेव कालाख्य इत्येकान्वयः ॥ १८ ॥ ❀ ❀ तर्हि क एनं यथावद्वेदेति तत्राह अस्येति । हे नृप सदाशिवो भगवानस्य हरेर्गुह्यतममनुभावं वेद तथा देवर्षिर्नारदः साक्षात्कपिलो भगवानपि जानातीत्येकान्वयः ॥ १९ ॥ ❀ ❀ त्वं यं कृष्णं मातुलस्य वसुदेवस्यापत्यं प्रियं बंधुं मित्रं संकटेषु मित्वा ज्ञात्वा रक्षितारं सुहृत्तमम् अतिशयेन सुहृदं मन्यसे यं च त्वं सौहार्दात् सचिवं मंत्रिणं दूतं संदेशहरं सारथिं यंतारमकरोस्तस्यास्येति पूर्वेण संबंधः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्मादस्याज्ञानुसारात् ॥ १७ ॥ ❀ ❀ न च नरलीलादृष्टया साधारणदृष्टिरत्र कर्त्तव्येत्याह एष इति । साक्षादेव स्वयं भगवान् । यः खल्वाद्यः पुमान् महत्स्रष्टा सोऽप्ययमेव यश्चाद्यो नारायणः परमव्योमाधिपतिः सोऽपीति ॥ १८-१९ ॥ ❀ ❀ अस्यानुभावाज्ञानसद्भाववतामपि भवतां सम्बन्धविशेषमयसर्व्वाच्छादकमाधुर्य्यज्ञानात्मकप्रेमविशेषेण वशीकारित्वं तु तैरपि दुर्लभमित्याह यमिति त्रयेण । सौहृदात्तादृशप्रेम्ण एव हेतोः यं मातुलेयं मन्यसे अथ सारथिं सारथिमपीत्यर्थः स एव साक्षाद्भगवानित्यादि पूर्व्वेणान्वयः । टीकायां मातुल्या इत्यादिकं स्त्रीभ्यो ढक्-सिद्ध्यर्थमित्थं व्याख्यातम् । मातुलस्यापत्यं मातुलायनिरित्येव स्यात् वृद्धादपत्ये फिञ एव सम्भवात् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इदं सुखदुःखादिकं दैवतन्त्रम् ईश्वराधीनमेव व्यवस्य निश्चित्य किंतु तद्विधित्सितस्य दुर्ज्ञेयतोक्तेः स्वभक्ताय तत्प्रदानादिकं दुर्ज्ञेयप्रयोजनकमित्यपि निश्चित्य तस्य कृष्णस्य अनुविहितोऽनुगतः हि गतौ अनाथाः प्रजाः पाहि ॥ १७ ॥ ❀ ❀ नन्वीश्वराधीनमिति तद्विधित्सितन्तु न वेदेत्यादि कथं ब्रूषे ईश्वरः सम्प्रति तव साक्षाद्भवत्येव इत्यत इमं कृष्णमेव पृष्ट्वा कथं सर्व्वं तत्त्वं न वेत्सीत्यत आह एष इति । मायया मोहयन्निति पृष्टो हि भीष्मादपि किमहमतितत्त्वज्ञ इत्यादिवाचा वञ्चयन् न वक्ष्यति । कथंचिद्वदन्नपि मोहयिष्यत्येव इत्यसावनुवर्त्तनीय एव न तु जिज्ञासनीय इति भावः ॥ १८ ॥ ❀ ❀ किञ्च अस्यानुभावं भावबोधकं चेष्टाविशेषं शिवो वेद, न तु विधित्सितं स्वरूपं प्रभावं वेत्यर्थः । तथाहि रसशास्त्रज्ञः प्रथममनुभावं स्तम्भस्वेदरोमाञ्चादिकं वेद । तेन च स्थायिभावञ्च अनुभावस्य वैशिष्ट्यतारतम्याभ्यां स्थायिभावस्यापि वैशिष्ट्यतारतम्यञ्च । तथैव यशोदादिगोपीषु अस्य दामबन्धनादिरूपम् अर्ज्जुनयुधिष्ठिरोग्रसेनादिसारथ्यदास्यादिरूपञ्च पारवश्यम् अनुभावं वेद । तेन च अस्य सर्वेश्वरस्य सर्व्वनियन्तुः महास्वतन्त्रस्यापि वशीकारकः कोऽपि पदार्थविशेषस्तत्र तत्र वर्त्तमानोऽस्यापि चित्तमभीक्ष्णं विद्रुतीकुर्व्वन्नध्यास्ते इत्यनुमिमीते च । स च नानाविशेषवान् स्वविषयाश्रययोश्चेतोविद्रावकः परस्परवशीकारकश्च प्रेमाभिधान एव परमपुरुषार्थचूडामणिः भक्तिस्नेहानुरागादिशब्दैरुच्यमानो भवति । किंच तत्तज्जनकेनेष्टेन प्रतिसमयदृष्टेन अस्य वशीकाराधिक्यमेव दृष्ट्वा तेन च प्रेमाधिक्यमनुमाय सिद्धसाधकभक्तेषु एतत्कर्तृकमेव कष्टप्रदानं भक्तिवृद्ध्यर्थमेवेति सिद्धांतं निश्चिनोति च शिव एव नारद एव कपिलदेव एवेति । अत एव द्रौपद्यादिषु कष्टाधिक्यात् प्रेमाधिक्यञ्च दृष्टम् । तथा-'यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखितमि'त्यादिश्रीमुखवाक्येन च भक्तकष्टस्य हितैषिणा भगवतैव दीयमानत्वात् न कर्म्मारब्धत्वम् । किं चैतदपि न सार्व्वत्रिकं क्वचित् क्वचिदकष्टेनापि स्वभक्तभक्तिं वर्द्धयतीति विधित्सितन्तु न कोऽपि वेदेत्युक्तम् । अनुभावन्तु शिवनारदादिरेव वेद । अन्ये पुनर्मंदा दामबन्धनादिकमप्यनुकरणत्वेन व्याचक्षाणा अनुभावमपि न विदुरिति ॥ १९ ॥ ❀ ❀ अनुभावमेव दर्शयति यमिति । सर्व्वेश्वरस्यापि युष्मत्सचिवत्वदौत्यादिकं प्रेमवश्यत्वानुभाव इत्यर्थः । अत्र यमित्यस्य अस्यानुभावमित्यनेन पूर्व्वेणैवान्वयः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्मात्कीदृशं कर्मफलं कस्मिन्काले कृष्णो दास्यतीति ज्ञानाभावाद्धेतोरिदं सर्वं दैवतंत्रं कृष्णायत्तं व्यवस्य निश्चित्य तस्य कृतस्यानुविहितोऽनुवर्त्ती सन् हे नाथ प्रजाः पाहि पालय ॥ १७ ॥ ❀ ❀ आद्यो नारायणः सर्वेषामवताराणां मूलभूतस्य नारायणस्यापि मूलभूतः विश्वहेतुः साक्षाद्भगवानेव श्रीकृष्ण एव मायया संकल्परूपेण वयुनेन ॥ १८-१९ ॥ ❀ ❀ अकरोः कृतवान् ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तर्हि अतः परं कः प्रतीकार इत्यत आह तस्मादिति । यस्मात् सर्वं कालाधीनं स च कालो भगवान् । तदेव च दैवशब्दवाच्यं कालातिक्रमश्च प्रकारांतरेण संभावनीयः । तस्मादेतदनुविहित एतदाज्ञाकारी सन् अनाथाः प्रजाः पाहि ।

आज्ञाकरणेन स्वधर्मेण च भगवान् परितुष्यतीति मर्यादा । यद्यपि विशेषतः प्रमेयबलविचारेण भगवान् केन तुष्यतीति न ज्ञायते, तथापि प्रमाणवद्विचारेणैव तदुक्तम् । पूर्वं दुर्योधनादयो नाथाः स्थिताः । इदानीमनाथाः प्रजा अथवा त्वयि नाथेऽपि नाथत्वाभिमानाभावात् दयया । केवलं ताः प्रजाः पालनीयाः समर्थत्वात् ॥ १७ ॥ ❀ ❀ ननु तस्यानुविहित इति पूर्वपरामर्शात् पूर्वं कालस्य निरूपितत्वात् दैवतंत्रमित्यनेन ततोऽपि पूर्वं कृष्णस्य निरूपितत्वात् कस्यानुविहितो भवेदिति संदेहे कालस्य सर्वाधीनत्वकथनात्तदधीनत्वमनूद्य प्रजापालनं विधीयत इत्यायाति न स्वस्थेति वाक्ये च पूर्वं कृष्णनिरूपणात् कालाधीनत्वे निरूपिते तन्निवारणार्थं तद्विधित्सितसंदेहो निरूपितः । तत्र किं कृष्णः कालाधीनो न भवतीति निरूप्यते कालकारणत्वं वा निवार्यते कालकृष्णयोर्वा सहभावेन दुःखकारणत्वं निरूप्यते त्रिष्वपि पक्षेषु कालात् कृष्णस्य भेदः समायाति । ततश्च कालपक्षः पूर्वापरविरुद्ध इत्याशंका । तन्निराकारणार्थं काल एव कृष्णः स च भगवानिति कृष्णस्य भगवत्त्वं निरूपयति एष वै भगवानिति । एष कालरूपः कृष्णः वै निश्चयेन उपचाराभावेन ज्ञानद्वारा भावेन च साक्षाद्भगवान् । ननु किमस्य कृष्णस्य कालरूपस्य भगवत्त्वे तत्राह आद्यो नारायणः पुमानिति । य आद्यः पुरुषोत्तमः स एव नारायणः ब्रह्माण्डविग्रहः स पुमान् स्वराट् । अनेन कालस्य कृष्णत्वं तस्य भगवत्त्वं भगवतः पुरुषोत्तमत्वं पुरुषोत्तमस्य नारायणत्वं नारायणस्य स्वराट्पुरुषत्वमिति स्वशरीरे भारप्रतिभाने तन्निवारणार्थं समागतः यदुषु प्रविष्टो वर्त्तते । यथाऽऽत्मानं कोऽपि न जानाति तथा मायया नरचेष्टाभिर्लोकं व्यामोहयन् सर्वथा भगवत्त्वं संगोप्य सर्वान् भक्षयितुं चरतीत्यर्थः ॥ १८ ॥ ❀ ❀ ननु कथमयमेवं कथं वा कोऽपि न जानातीत्यत आह अस्यानुभावमिति द्वाभ्याम् । अयमेव च तस्यैवंविधस्य एवमनुभावः सर्वमारणः सर्वागोप्यः, तं शिव एव जानाति यः तं स्मरन् भक्षयन्नपि शिवः कल्याणरूपो भवति । तथाच देवऋषिर्नारदः सर्वत्र प्रविश्य सर्वान् मारयन् सर्वहितत्वेन प्रतिभाति तथा साक्षात् भगवान् कपिलः प्रकृतेरेव कारणत्वं निरूप्य पुरुषकारणत्वं निवार्य सर्वहेतुः सन् सर्वहेतुत्वं निवारयति । अतः सात्त्विकेषु राजसेषु तामसेषु गुणातीतत्वेनोक्तास्त्रय एव जानंति ॥ १९ ॥ ❀ ❀ अन्ये तु बहुधा श्रुत्वाऽपि न जानंति यथा भगवान् इत्याह । यं मन्यस इति । वसुदेवगृहे अवतारात् मातुलपुत्रं मन्यसे किंच प्रियं प्रीतिविषयं मन्यसे सम्बन्धेनात्मीयत्वेन मित्रम् उपकारित्वेन गुह्यं निरंतरोपकारित्वेन द्रौपद्यादिदानात् सुहृत्तमं च सुहृत् सद्भावयुक्तः कदाप्यकपटः परोक्षे प्रत्यक्षे च साक्षात्परंपरया च तद्धितमेव विचारयति न केवलं ज्ञानमात्रं, किंत्वयुक्तानि बहून्येव कृतवान् । तदाह अकरोः सचिवं सचिवो मंत्री दूतो हीनतया कार्यसाधकः व्यवहारे समस्यापि हीनत्वकरणं सौहार्दात् अत एव सारथिं कृतवान् रथस्य रक्षकः सारथिर्नियतः केवलसारथ्यव्यावृत्त्यर्थः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्मादित्यत्र । दैवतन्त्रमित्यनेन कालस्य निरूपितत्वादिति सम्बन्धः । सर्वाधीनकथनादिति । अत्र बहुव्रीहिर्बोध्यः ॥ १७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ताह मयेदानीं किं कर्त्तव्यमित्यपेक्षायां भगवदाज्ञैव पालनीयेत्याह–तस्मादिति । श्रेष्ठस्य भगवदनुवर्त्तित्वं भवति भवतोऽपि कुलश्रेष्ठत्वात्तदेव युक्तमिति सूचयन् सम्बोधयति–हे भरतर्षभेति । तस्मात् भगवदिच्छायाः सर्वतः सुखदुःखादिकं सर्वं दैवतन्त्रं परमेश्वराधीनं व्यवस्य विनिश्चित्य तस्येश्वरस्यानुविहितः तदाज्ञानुवर्त्ती सन् अनाथाः त्वद्व्यतिरिक्तरक्षकरहिताः प्रजाः पाहीत्यन्वयः । कुलपरम्परागतस्वामित्वेनापि तत्पालनं तवोचितमेवेत्याशयेन सम्बोधयति–हे नाथेति । भगवत्कृपया तत्पालनसामर्थ्यं तु तवास्त्येवेत्याशयेन सम्बोधनान्तरं हे प्रभो इति ॥ १७ ॥ ❀ ❀ ननु परमेश्वरत्वं तु नारायणस्यैव शास्त्रसिद्धं सर्वकारणत्वात्, तत्कृष्णस्य कथं परमेश्वरत्वमनुविधेयत्वं वेत्याशङ्क्य स तु श्रीकृष्ण एवेत्याह–एष इति त्रिभिः । आद्यः सर्वकारणभूतः पुमान् पुरुषोत्तमः नारायणः 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति स्मृत्युक्तजलशायी भगवान् ऐश्वर्यादिषड्गुणपूर्णः साक्षादेव श्रीकृष्ण एवेत्यन्वयः । वा इत्यवधारणे । साक्षादित्यनेनांशत्वं निराकृतम् । तर्हि कथं न परमेश्वरतया प्रतीयते इत्यपेक्षायामाह–मोहयन्निति । स्वमायया लोकं जनं मोहयन् गूढ आच्छादितपरमैश्वर्यो वृष्णिषु यादवेषु चरति विहरतीत्यन्वयः ॥ १८ ॥ ❀ ❀ अयं भगवानित्यत्र किं प्रमाणमित्यपेक्षायां महतामनुभावमेवेत्याशयेनाह–अस्येति । त्वयाऽपि विश्वसनीयमित्याशयेन सम्बोधयति–हे नृपेति । अस्य श्रीकृष्णस्यानुभावं प्रभावं तु शिवो देवर्षिर्नारदः कपिलश्च वेद, नान्यः, यतो वेदेष्वपि गुह्यतममिति । तर्हि शिवादयः कथं जानन्तीत्यपेक्षायामाह–साक्षाद्भगवानिति त्रयाणां विशेषणं भगवदवतारत्वादित्यर्थः ॥ १९ ॥ ❀ ❀ त्वं त्वज्ञानात् यं मातुलेयं वसुदेवपुत्रं प्रियं प्रीतिविषयं मित्रप्रीतिकर्त्तारं सुहृत्तममुपकारानपेक्षोपकारकं च मन्यसे सौहृदात् विश्वासात् सचिवं मन्त्रिणं दूतं सारथिं वा अकरोः कृतवानसि । अथशब्दश्चकारार्थकः ॥ २० ॥

हिन्दी अनुवाद

युधिष्ठिर ! संसारकी ये सब घटनाएँ ईश्वरेच्छाके अधीन हैं। उसीका अनुसरण करके तुम इस अनाथ प्रजाका पालन करो; क्योंकि अब तुम्हीं इसके स्वामी और इसे पालन करनेमें समर्थ हो ॥ १७ ॥ ❀ ❀ ये श्रीकृष्ण साक्षात् भगवान् हैं। ये सबके आदि कारण और परम पुरुष नारायण हैं। अपनी मायासे लोगोंको मोहित करते हुए ये यदुवंशियोंमें छिपकर लीला कर रहे हैं ॥ १८ ॥ ❀ ❀ इनका प्रभाव अत्यन्त गूढ़ एवं रहस्यमय है। युधिष्ठिर ! उसे भगवान् शङ्कर, देवर्षि नारद और और स्वयं भगवान् कपिल ही जानते हैं ॥ १९ ॥ ❀ ❀ जिन्हें तुम अपना ममेरा भाई, प्रिय मित्र और सबसे बड़ा हितू मानते हो तथा जिन्हें तुमने प्रेमवश अपना मन्त्री, दूत और सारथितक बनानेमें संकोच नहीं किया है, वे स्वयं परमात्मा हैं ॥ २० ॥

सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥
तथाप्येकान्तभक्तेषु पश्य भूप[1]ानुकम्पितम्। यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥
भक्त्याऽऽवेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन्। त्यजन् कलेवरं योगी मुच्यते का[2]मकर्मभिः ॥ २३ ॥
स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम्।
प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वीश्वरश्चेत्कथं नीचे सारथ्यादौ प्रवृत्तस्तत्राह सर्वेति। तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतेर्वैषम्यं क्वचिदपि नास्ति। कुतः निरवद्यस्य रागादिशून्यस्य। तत्कुतोऽनहंकृतेः। तच्च कुतोऽद्वयस्य। तदपि कुतः समदृशः। तत्रापि हेतुः सर्वस्यात्मनः। यथेष्टं वा हेतुहेतुमद्भावः ॥ २१ ॥ ❀ ❀ तथापि समत्वेऽपि। हे भूप। अनुकम्पितमनुकंपाम् ॥ २२ ॥ ❀ ❀ इदानीं स्वदेहत्यागपर्यन्तं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्याम् ॥ २३ ॥ ❀ ❀ यावदिति विलम्बं द्योतयति। अहं हिनोमि त्यजामीति स्वातन्त्र्यम्। इदमित्यनात्मत्वेन ज्ञातम्। प्रसन्नहासेनारुणलोचनाभ्यां चोल्लसद्रुचिरं मुखाम्बुजं यस्य। ध्यानस्य पन्था विषयः। योऽन्यैश्चिन्त्यते केवलं सोऽग्रतः स्थितः सन्मां प्रतीक्षतामित्यर्थः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

अत्राक्षिपति–नन्विति। तद्रागादिशून्यत्वं तच्चानहंकृतित्वं च तदपि अद्वयत्वमपि। तत्रापि समदृक्त्वेपि। संभवत्वाद्यथेष्टं वेत्याह। अत्र विश्वनाथः–ननु परमेश्वरस्य भक्तिवशीकृतत्वे दूत्यसारथ्यादिरपकर्ष एव तस्मिंश्च सति कथं प्रेमा परमेश्वरस्य सुखप्रद इत्यत आह–सर्वात्मन इति। निरवद्यस्य निर्दोषप्रेमवतोऽस्य कृष्णस्य तत्कृतं दूत्यादिकृतं मतिवैषम्यं न। अत्र हेतुः। सार्वकालिकं स्वतः सिद्धं महैश्वर्यमेवेत्याह–सर्वस्यात्मन इति। अर्जुनस्याप्यात्मा स एवेति स्वयमेव सारथी रथी चेत्यत एव समदृशः समं तुल्यमात्मानमेव सर्वत्र पश्यतः सर्वात्मत्वादेवाद्वयस्य द्वितीयाभावादेवानहंकृतेर्गर्वरहितस्य। किं च महैश्वर्यहीनोप्यन्यः प्रेमी प्रेमत एव हेतोरात्मनो नीचकर्मोत्थमपकर्षं क्लेशञ्च दुःखत्वेन न मन्यते। अस्य तु महैश्वर्यादेवानन्दमात्रस्य कुतः प्रेमवतो दुःखं तस्माद्युष्माकमेवोत्कर्षो यत एतादृशोपि परमेश्वरो भवतां दूत्यादिकं करोतीत्यहो वशीकारकत्वं प्रेम्ण इति भावः ॥ २१ ॥ ❀ ❀ यद्यपि युष्मत्तुल्यो भवितुं न शक्नोमीति भावः। अनुकम्पां पश्य ययाऽयमानन्दमयसाक्षाद् ब्रह्मस्वरूपोप्येतादृशं बीभत्सितं मत्समीपस्थानं प्रस्थापित इत्ययमप्येकोऽनुभावोनुभूयतामिति भावः। हे भूपेति। अहो भूपे त्वयि त्वस्यानुकम्पोचितैव। यतो मयि भूपत्वाभावेपि समदृक्त्वादेव सा कृतेति भावः ॥ २२ ॥ ❀ ❀ योगी समाहितान्तःकरणः कामकर्मभिः कामनया कृतैः संसारबन्धहेतुभूतैः कर्मभिः ॥ २३ ॥ ❀ ❀ इत्यर्थ इति। प्रसन्नहासेत्यादिना तद्दर्शनबहुकालतार्थमेव शरीरत्यागे विलम्बः कृत इति लभ्यते। तच्च शरीरान्तरप्राप्तौ मे कदा दर्शनं स्यादित्युत्कंठाविष्टत्वादिति गम्यत इति भावः। यद्वा प्रतीक्षतां क्षणमत्रैव तिष्ठतु। यावदहं किंचिद्विलम्ब्य चक्षुर्भ्यामाभ्यामेव सौन्दर्यामृतं पिबन्स्वस्य मनोनुलापं प्रकाशयन्त्सौमीति भावः। ममत्वाद्ध्यानस्य पंथा विषयभूतो यः सर्वकालमेव भवेत् प्रसन्नहासेत्यादिरूपोऽस्मिन्नंतकाले साक्षान्नयनगोचर एव तिष्ठत्विति भावः। चतुर्भुज इति। भीष्मोपास्यमन्त्रध्यानस्य तथात्वमवगम्यते ॥ २४–२५ ॥

---

१. प्रा० पा०—भूतानु०। २. प्रा० पा०—सर्व०।

श्रीमद्वीरराघवव्याख्या

यद्यप्येवं मन्यसेऽकरोश्च तत्कृतं दौत्यसारथ्यादिक्रियाकृतं मतिवैषम्यं कदाचिदप्यस्य न विद्यते। मतिवैषम्याभावे हेतुं वदन् विशिनष्टि सर्वात्मन इति। सर्वात्मनः मातुलेयादीन्मन्वानस्य दूतं सारथिं च कुर्वतस्तवाप्यंतरात्मतया यद्दूतत्वादिकारणाय त्वामप्यचोदयत् इति भावः, अथाप्यनवद्यस्य नियाम्यगतावद्यासंस्पृष्टस्य तत्र हेतुरनहंकृतेर्देहात्मभ्रांतिरहितस्य किंचाद्वयस्य द्वितीयवस्तुरहितस्य व्याप्यस्वतंत्रवस्तुरहितस्येत्यर्थः, अत एव समदृशः सर्वमपि प्रकृतिपुरुषाद्यात्मकम् उच्चावचं स्वशरीरतया स्वनियाम्यतया चैकरूपं पश्यतः। उक्तगुणविपरीतस्यैव हि पुंसो मतिवैषम्यमिति भावः॥ २१॥ ❀ ❀ सर्वात्मन इत्यनेन सर्वस्य तत्प्रीतिविषयत्वमवगतं शरीरं ह्यात्मनः प्रीतिविषयं यद्यपि सर्वं चिदचिदात्मकं जगच्छरीरभूतं प्रियं कृपाविषयं च, तथापि क्षेत्रज्ञानुजिघृक्षया जगद्व्यापारे प्रवृत्तस्य स्वस्य वैषम्यनैर्घृण्यादिपरिहाराय कर्ममात्रापेक्षिणः स्वानुवर्तिनो नितरां प्रियाः कृपाविषयाश्चेति तदेव दर्शयितुं भक्तस्य मुमूर्षोर्मम चक्षुर्विषयतां गत इत्याह तथापीति। यद्यपि सर्वात्मा समदर्शी च, तथापि हे भूप एकांतभक्तेष्वनन्यप्रयोजनेष्वनुकंपितम् अनुकंपास्य संजातेत्यनुकंपितः तारकादित्वादितच् अनुकंपायुक्तं पश्यावेहि, तत्र लिंगमाह यद्यस्मात्कृष्णोऽसून्प्राणांस्त्यजतस्त्यक्तुमुद्युक्तस्य मम साक्षाद्दर्शनं प्राप्तः॥ २२॥ ❀ ❀ किं तत् यद्दर्शनजं फलमाह भक्त्येति। यस्मिन् भक्त्या मनो निवेश्य वाचा यस्य भगवतो नाममात्रमेव कीर्त्तयन् कलेवरं त्यजन्योगी कामकर्मभिः काम्यंत इति कामाः शब्दादिविषयास्तेषां निमित्तभूतैः कर्मभिः पुण्यपापात्मकैः कर्मभिश्चेति वा मुच्यते संसृतिबंधान्मुच्यते इत्यर्थः। यच्छब्दस्य स कृष्ण इत्यध्याहृततच्छब्दवता पूर्वेणान्वयः स देव इत्युत्तरेण वा। नामकीर्तनमेव कामकर्मविमोचनद्वारा निःश्रेयसफलकं किमु साक्षाद्दर्शनमिति भावः॥ २३॥ ❀ ❀ यत एवमतो यावन्मत्प्रयाणं तावद्भगवान्प्रतीक्षतामिति प्रार्थयते स इति। यावदिदं कलेवरं शरीरं हिनोमि त्यजामि विमुक्तो भवामीति भावः तावत्प्रसन्नेन प्रहासेनारुणलोचनाभ्यामुल्लसन्मुखांबुजं यस्य स चतुर्भुजो भगवान् श्रीकृष्णः देवानामपि देवो ध्यानपथः ध्यानविषयभूतः सन् प्रतीक्षतां चक्षुःपथत्वं प्राप्त एव ध्यानपथोऽपि भवत्वित्यभिप्रायेण ध्यानपथ इत्युक्तम्, यद्वा द्विभुजत्वेन ध्यानपथो भवत्वित्यभिप्रायेण तदुक्तिः तत्रत्यानां द्विभुजत्वेन चक्षुःपथोऽपि स्वस्य चतुर्भुजत्वेन चक्षुःपथस्तेनैव रूपेण ध्यानपथोस्त्वित्यभिप्रायेण वा ध्यानपथश्चतुर्भुज इत्युक्तम्॥ २४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

बन्धुरित्यादिवाक्याद् बन्ध्वादिषु स्थित्वा बंध्वादीनां बंध्वादित्वापादकत्वेन मुख्यबंध्वादित्वात् बंध्वादिसर्वरूपत्वात् सर्वात्मनो वा समदृशः यथा वस्तु तथा सर्वपदार्थान् जानतः अद्वयस्य समाधिकरहितस्य अनहंकृतेः प्राकृतवैकृतशरीररहितत्वादेहाद्यहंबुद्धिरहितस्यात एव निरवद्यस्य रागादिदोषरहितस्येत्येतैर्हेतुभिरस्य कृष्णस्य तत्कृतं सारथित्वादिकृतिनिमित्तं त्वयि मतिवैषम्यं कचिदपि नास्ति अनेकविधानां जीवानां हि तदित्येकान्वयः॥ २१॥ ❀ ❀ तथाप्यस्याहो सर्वोत्तमोऽहमनेन सारथित्वादिषु विहित इति विषमा बुद्धिर्नास्तीत्याह सर्वात्मन इति। सर्वांतर्यामिणः पिता माता सुहृत् एवंविधविषममतिष्वस्मास्वस्य संसर्गकारणं किमित्याशंक्य युष्मद्विधभक्तभक्त्या द्रवीकृतमनोऽनुकंपैव कारणमित्याह तथापीति। हे भूप, तथापि एवमुक्तप्रकारेण कृतकृत्यस्याप्यस्य एकांतभक्तेषु अव्यभिचीर्णभक्तिमत्सु युष्मासु अन्येषु मयि चानुकंपितम् अनुकम्पां कृपां पश्य। कुत इति तत्राह यदिति। प्राणत्यागकाले प्रायः स्वेन पुष्टाः पुत्रादयोऽपि पूर्वमेव विमुखा गच्छन्त्यहो असून् प्राणांस्त्यजतो मे मम स्वामी श्रीकृष्णः साक्षाद्दर्शनं दृष्टिविषयमागत इति यद्यस्मात्तद्भक्तानुकम्पैव संसर्गकारणमित्येकान्वयः॥ २२॥ ❀ ❀ प्राणत्यागकाले हरिदर्शनफलमाह भक्त्येति। भक्त्या हरौ मन आवेश्य वाचा यस्य हरेर्नारायणादिनाम कीर्त्तयन् कलेवरं शरीरं त्यजन् योगी कामकर्मभिर्मुच्यते मुक्तः स्यात्तं प्रत्यक्षतो दृष्ट्वा म्रियमाणस्य मे मुक्तिः किं वर्णनीयेति वाक्यशेषः। तस्मात्तत्प्रीतिकृद्धर्मोऽतस्तदुक्तप्रकारेण स्वधर्मे धर्मबुद्धिं हित्वा त्वं राज्यं कुर्विति परमतात्पर्यार्थः॥ २३॥ ❀ ❀ युधिष्ठिरं प्रत्यभिधायेदानीं स्वच्छन्दमृत्युर्भीष्म उत्तरायणसमयपर्यंतं भगवतोऽवस्थानं प्रार्थयते स इति। अहं यावदिदं पंचभूतरचितं कलेवरं हिनोमि त्यजामि तावदुत्तरायणपर्यंतं स देवो भगवान्प्रतीक्षतां मयि कृपया अनुग्रहं कुर्यादिति प्रार्थय इत्यन्वयः। कथंभूतः प्रसन्नहासैश्चारुणे लोचने नेत्रे प्रसन्नहासारुणलोचनानि तैरुल्लसन्मुखमेवांबुजं यस्य स तथा ध्यानपथः उपासनाविषयः द्रष्टुं ध्यानमेव पंथा मार्गो यस्य स तथा चत्वारो भुजा यस्य स यथा इदमेव ध्यानविषयं वपुः परतः स्थितस्य द्विभुजत्वादयमेव स इति परोक्षतया निर्देशः॥ २४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु भवतु प्रीतिविशेषेणास्माकं तस्मिंस्तथा मतिः, तस्य सर्व्वेषां परमात्मनस्तस्मादेव समदृशः परमात्मत्वादेव सर्व्वेषां तच्छक्तिवैभवरूपाणामात्मनां तदनन्यत्वादद्वयस्य तस्मादेव मातुलेयमित्याद्यभिमानशून्यस्य तथा निर्दोषस्य च कथमहमस्य मातुलेयो न त्वमुष्येत्यादिरूपं मातुलेयत्वादिकृतं मतिवैषम्यं स्यादिति पूर्व्वपक्षोट्टङ्कनपूर्व्वकं सिद्धान्तयति सर्वात्मन इति। टीकायां समदृश इत्यत्र समः सर्वत्राऽव्यभिचारी च सः दृक् ज्ञानरूपश्चेति। बहुव्रीहौ हेतुत्वं न घटते॥ २१॥ ❀ ❀

यदपि तादृशस्य तन्न सम्भवति तथापि हे भूप एकांतभक्तेषु युष्मासु अनुकंपां पश्य, येषां भक्तिविशेषेण परवशः सन्नसावपि तथा तथाऽऽत्मानं बाढमेवाभिमन्यते इत्यर्थः। यः खलु शरीरस्यापि सम्बन्धे हेतुः सोऽभिमान एव हि सम्बन्धहेतुर्मुख्यः न शरीरम्। सति त्वाविर्भावादिना शरीरसम्बन्धेऽपि तस्य मातुलेयत्वादिकं सुतरामेव सिद्ध्यतीति तात्पर्य्यम्। तत्र हेतुः यन्मेऽसूनिति। यद् यस्मात् युष्मत्संबंधादेव हेतोः। तदेवं परमोपादेयत्वज्ञानादेव तत्संबंधात्मक एव श्रीभगवानुत्क्रांतावपि मुहुरेव निजालंबनीकरिष्यते–विजयसखे रतिरस्तु मेऽनवद्येति पार्थसखे रतिर्ममास्त्विति विजयरथकुटुम्ब इत्यारभ्य भगवति रतिरस्तु मे मुमूर्षोरिति च ॥ २२ ॥ ❀ ❀ भक्त्येति युग्मकम्। योगी समाहितान्तःकरणः सन् यस्मिन् भक्त्या मन आवेश्य वा वाचा नाममात्रं कीर्त्तयन् वा कलेवरं त्यजन्मुच्यते ॥ २३ ॥ ❀ ❀ प्रसन्नहासेत्यादिना तद्दर्शनबहुकालतार्थमेव शरीरत्यागे विलम्बः कृत इति लभ्यते। ततश्च शरीरांतरप्राप्तौ सत्यां कदा वा दर्शनं स्यादित्युत्कण्ठाविष्टत्वादिति गम्यते। यावन्न मे नवदशा दशमी कुतोऽपीत्यादिकं हि श्रीलीलाशुकस्यापि प्रार्थनं श्रूयते ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु परमेश्वरस्य भक्तिवशीकृतत्वे दौत्यसारथ्यादिरपकर्ष एव, तस्मिंश्च सति कथं प्रेमा परमेश्वरस्य सुखप्रद इत्यत आह सर्व्वात्मन इति। निरवद्यस्य निर्दोषप्रेमवतोऽस्य कृष्णस्य तत्कृतं दौत्यादिकृतं मतिवैषम्यं न। अत्र हेतुः सार्व्वकालिकं स्वतः सिद्धं महैश्वर्य्यमेवेत्याह सर्व्वात्मन इति। अर्ज्जुनस्याप्यात्मा स एवेति स्वयमेव सारथी रथी चेति। अत एव समदृशः समं तुल्यमात्मानमेव सर्वत्र पश्यतः। सर्वात्मत्वादेवाद्वयस्य। द्वितीयाभावादेव अनहंकृतेर्गर्वशून्यस्य। किंच महैश्वर्य्यहीनोऽप्यन्यः प्रेमी प्रेमत एव हेतोरात्मनो नीचकर्मोत्थमपकर्षं क्लेशं च दुःखत्वेन न मन्यते। अस्य तु महैश्वर्यादेरानन्दमात्रस्य कुतः प्रेमतो दुःखम्? तस्माद् युष्माकमेवोत्कर्षो यत एतादृशोऽपि परमेश्वरो भवतां दूत्यादिकं करोतीत्याहो वशीकारकत्वं प्रेम्ण इति भावः ॥ २१ ॥ ❀ ❀ अथापीति। यद्यपि युष्मत्तुल्यो न भवितुं शक्नोमीति भावः। अनुकम्पितम् अस्य मय्यनुकम्पां पश्य, ययाऽयमानन्दमयसाक्षाद्ब्रह्मस्वरूपोऽप्येतादृशं बीभत्सितं मत्समीपस्थानं प्रस्थापित इत्ययमप्येकोऽनुभावोऽनुभूयतामिति भावः। युष्माकं त्वयमेवानुकम्प्य इति भावः ॥ २२–२३ ॥ ❀ ❀ प्रतीक्षतां क्षणमत्रैव तिष्ठतु, यावदहं किंचिद्विलम्ब्य चक्षुर्भ्यामेव सौन्दर्य्यामृतम् पिबन् स्वस्य मनोऽनुलापं प्रकाशयन् स्तौमीति भावः। मम उपास्यत्वाद्ध्यानस्य पन्था विषयीभूतो यः सर्वकालमेव भवेत् स प्रसन्नहासेत्यादिरूपोऽस्मिन्नन्तकाले साक्षान्नयनगोचर एव तिष्ठत्विति भावः। चतुर्भुज इति भीष्मस्योपास्यमन्त्रध्यानस्य तथात्वमवगमयति ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वात्मनः चिदचिच्छक्तिमतः अत एवाद्वयस्यैकस्य तादृशपदांतराभावात् अत एव समदृशः परकीयपदार्थाभावाद्विषमदृष्टिशून्यस्य तत्कृतं दौत्यादिकमेकृतं मतिवैषम्यं क्वचिदपि न विद्यते ॥ २१ ॥ ❀ ❀ तथापि सर्वस्य तदीयत्वेऽपि हे भूप एकांतभक्तेषु अनुकंपितं जातानुकंपं पश्यालोचय, यद्यस्मादसून् त्यजतो मे मम कृष्णो दर्शनं दृक्पथमागतः प्राप्तः ॥ २२ ॥ ❀ ❀ अधुना स्ववांछितं प्रार्थयते भक्त्येति द्वाभ्याम्। यस्मिन्मनः समावेश्य योगी कामकर्मभिः संसारप्रदैः कर्मभिर्मुच्यते ॥२३॥ ❀ ❀ प्रसन्नेन हासेन अरुणलोचनाभ्यां चोल्लसन्मुखांबुजं यस्य सः ध्यानस्य पंथा आश्रयः अन्यैश्रियते केवलं स चतुर्भुजः पुरः स्थितः सन् यावत्कलेवरं हिनोमि त्यजामि तावन्मां प्रतीक्षताम् ॥ २४–२५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

नन्वन्ये भगवंतं मा जानंतु, भगवान् स्वात्मानं जानन् कथं हीने कर्मणि प्रवर्त्तते तत्राह सर्वात्मन इति। सर्वस्मिन्नात्मा यस्य, अनेन स्वार्थमेव करोति कथं वैषम्यं स्यात्? वेदादिप्रमाणवत्वाच्च शत्रुमित्रोदासीनेषु समबुद्धिः, अतोऽपि न वैषम्यं, किंच भेददर्शने सत्येवं भवति तस्य तु सर्वमात्मैव भासते। अतो न विद्यते द्वैतं यस्य तादृशस्य कथं वैषम्यं स्वरूपेण प्रमाणेन प्रमेयेण निराकृतं वैषम्यमवतारे तु निरहंक्रियया तनौ न विद्यते अहंकृतिर्यस्य तत्कृतमुच्चनीचकर्मकृतं सर्वमेवाकिंचित्कर्त्तव्यमिति करोति तत्तूत्कृष्टमिति। ननु हीनकर्मणा कथं न दोषः स्यादत आह निरवद्यस्येति। अपहतपाप्मन इत्यर्थः। अपहतपाप्मत्वं न देशकालावच्छिन्नमित्याह न क्वचिदिति। तस्मादयमेव सर्वभक्षकः प्रज्ञानादुपचरितः ॥ २१ ॥ ❀ ❀ एवं कृतवानित्युक्ते भयमसेव्यता च प्रतिभाता, तन्निराकरणार्थमाह तथापीति। यद्यप्येवमेव तथाप्येकस्तस्मिन्नसाधारणो गुणोऽस्ति यद्भक्तकृपा भजनीयत्वे हेतुरभये कारणं च स चाव्यभिचारी नित्यफलश्च। भूपेति संबोधनं राज्ञामप्येवं कदाचिद्भवतीति संवादार्थं, कृपाया अव्यभिचारित्वं स्वदृष्टान्तेनाह यन्मेऽसूनिति। न हि मम सदृशोऽपराधी कश्चिदस्ति अवहेलनकर्त्ता भक्तद्रोही द्विष्टपक्षपाती च, तथापि कदाचिन्नामग्रहात् भक्ताभासं पुरस्कृत्य प्राणत्यागसमये भक्तो भवेत् दुष्ट इति शंकया स्वयमागत्य आत्मसाक्षात्कारं कारयित्वा कृतार्थं कृतवा-

नित्यर्थः। तस्मादन्ये भक्ताः कृतार्था भविष्यन्तीति किं वक्तव्यमिति भावः ॥२२॥ ❀ ❀ ननु दूरे भगवत्साक्षात्कारान्मुक्तिरिति भगवदाविर्भावव्यतिरेकेणापि भगवदंगैर्मानसरूपनामभिर्मुक्तिर्भवतीत्याह भक्त्यावेश्येति भक्त्येति। विहितभक्त्यधिकारिणः प्रत्युक्तं वस्तुतस्तु यथाकथंचिन्मनोनिवेशनमेव मुक्तिहेतुः इन्द्रियव्यापारमपि भगवन्नाम्ना कुर्वन् पूर्वं योगाभ्यासरतोऽपि इदानीं भक्तिमार्गेण शरीरं त्यजन् कायवाङ्मनोभिः तामसराजससात्त्विकमपि कर्म कुर्वन् पूर्वं कामकर्मकः कृतैर्मुच्यते। एभिः कर्मभिः तानि कर्माणि स्वभावं प्रापितानि मुक्तिहेतवो भवंतीत्यर्थः॥ २३॥ ❀ ❀ एवं भजनीयभगवद्गुणानुक्त्वा स्वस्य मनसा मूर्तिकल्पनाशक्तेः अंतिमोच्छ्वासपर्यंतं भगवत्स्थितिमेव प्रार्थयते स देवदेव इति। अस्मत्कृपाया अन्योऽपि हेतुरस्ति न केवलमिदानींतनी भक्तिः, यतो देवानां वस्वादीनां देवः सर्वदा पूज्यः, किंच स्वतश्च पूर्णः भगवानिति स यावदिदं शरीरं मया त्याज्यं तावत्तिष्ठतु न मध्ये शरीरं गृह्णातु मारयतु, इदमिति जीर्णम् अहमिति सामर्थ्यं "ये यथा मां प्रपद्यंते" इति वाक्यानुसारेण मा तिष्ठतु, किंतु प्रसन्नहासः अरुणे च लोचने ताभ्यामुल्लसन्मुखांभोजं यस्य हासस्य प्रसन्नत्वान्न माया मोहः लोचनयोररुणत्वान् मत्पापदूरीकरणं तयोरपि प्रसादे विशेषणे मयि सर्वगुणनिधानं मुखांबुजस्य तादृशत्वेन स्वपदप्राप्तिः ध्यानपथत्वेनाणिमादयः चतुर्भुजत्वेन पुरुषार्थचतुष्टयसिद्धिः॥ २४॥

१८ श्लोकतः ३१ श्लोकावधि सुबोधिनीप्रकाशो न।

श्रीगिरिधरकृता बालप्रबोधिनी

नन्वयं परमेश्वरश्चेत्कथं तस्य नीचे सारथ्यादौ कर्मणि प्रवृत्तिस्तत्राह–सर्वेति। अस्य तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतेर्वैषम्यं कचित् कदाचिदपि मास्तीत्यन्वयः। तत्र हेतुमाह–अनवद्यस्येति, रागादिदोषरहितस्येत्यर्थः। तत्रापि हेतुमाह–अनहङ्कृतेरिति, अहमुत्कृष्ट इत्यभिमानरहितस्येत्यर्थः। तत्र हेतुमाह–समदृश इति, सर्वत्र सममात्मानं पश्यत इत्यर्थः। तत्र हेतुमाह– सर्वात्मन इति। तत्रापि हेतुमाह–अद्वयस्येति। उक्तार्थे न कश्चित्सन्देहः शास्त्रसिद्धत्वादिति सूचयति–हीति॥ २१॥ ❀ ❀ भगवद्भक्तिस्तु न कदापि विफलेत्याह–तथापीति। यद्यपि सर्वात्मा समदर्शी च, तथापि हे भूप एकान्तभक्तेषु अनन्यप्रयोजनभक्तेषु तस्यानुकम्पितं कृपां पश्य कृपानुमानं कुरु। केन लिङ्गेन साऽनुमेयेत्यपेक्षायामाह–यदिति। नहि मत्सदृशोऽपराधी कश्चिदस्ति, यतोऽहमवहेलनकर्त्ता भक्तद्रोही दुष्टपक्षपाती च। तस्यापि कदाचिन्नामग्रहणादिना भक्त्याभ्यासं पुरस्कृत्य दुष्टोऽपि मम भक्तो विमुच्यतामिति मनसि कृत्वा यत् यस्मात् असून् प्राणांस्त्यजतो मे मम कृष्णः साक्षाद्दर्शनमागतः। मरणसमये भगवद्दर्शने तु विमुक्तौ न सन्देहः 'अन्ते या मतिः' इति सिद्धान्तादिति सूचयितुमसूंस्त्यजत इति विशेषणम्॥ २२॥ ❀ ❀ ननु कृष्णदर्शनमात्रेण कथं विमुक्तिरित्यपेक्षायां मरणसमये यच्चिन्तनादिमात्रेणापि विमुक्तिर्भवति किं पुनस्तस्य साक्षाद्दर्शनेनेति सूचयन् स्वदेहत्यागपर्यन्तं भगवतोऽवस्थानं प्रार्थयते–भक्त्येति द्वयेन। यस्मिन् श्रीकृष्णे भक्त्या मनो निवेश्य वाचा च यस्य नाम कीर्त्तयन् कलेवरं त्यजन् योगी भक्तियोगवान् पुरुषः कामकर्मभिः नानाविधकामभयकृतैर्लौकिकवैदिकैः संसारबन्धरूपैः कर्मभिः पुण्यपापात्मकैर्विमुच्यते स भगवान् यावदहमिदं कलेवरं हिनोमि त्यजामि तावत्प्रतीक्षतां मम दृष्टिगोचरः सन्नेव तिष्ठत्वित्युत्तरेणान्वयः॥ २३॥ ❀ ❀ न केवलमिदानीन्तनी भक्तिरेव तदनुग्रहे हेतुः किन्त्वहं वसुः स देवानां वस्वादीनामपि देवः पूज्यो रक्षकश्च ततोऽपि मय्यनुग्रह एवोचित इति सूचयन्नाह–देवदेव इति। यावदिति विलम्बं द्योतयति। अहं हिनोमीति स्वातन्त्र्यं सूचयति। इदमित्यनात्मत्वेन ज्ञातम्। तत्रापि 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इयि वाक्यानुसारेण ममापराधं क्रौर्यं च स्मृत्वा भयङ्कररूपेण मा तिष्ठतु, किन्तु योगिध्येयेन सौम्यरूपेणैवेत्याह–ध्यानपथ इति। तद्रूपमेव दर्शयति–प्रसन्नेति, प्रसन्नहासेन अरुणलोचनाभ्यां च उल्लसत् रुचिरं मुखाम्बुजं यस्य सः। धर्मादिचतुर्विधपुरुषार्थप्रदत्वेन चत्वारो भुजा यस्य सः॥ २४॥

हिन्दी अनुवाद

इन सर्वात्मा, समदर्शी, अद्वितीय, अहङ्काररहित और निष्पाप परमात्मामें उन ऊँचे-नीचे कार्योंके कारण कभी किसी प्रकारकी विषमता नहीं होती॥ २१॥ ❀ ❀ युधिष्ठिर! इस प्रकार सर्वत्र सम होनेपर भी, देखो तो सही, वे अपने अनन्यप्रेमी भक्तोंपर कितनी कृपा करते हैं! यही कारण है कि ऐसे समयमें, जब कि मैं अपने प्राणोंका त्याग करने जा रहा हूँ, इन भगवान् श्रीकृष्णने मुझे साक्षात् दर्शन दिया है॥ २२॥ ❀ ❀ भगवत्परायण योगी पुरुष भक्तिभावसे इनमें अपना मन लगाकर और वाणीसे इनके नामका कीर्तन करते हुए शरीरका त्याग करते हैं और कामनाओंसे तथा कर्मके बन्धनसे छूट जाते हैं॥ २३॥ ❀ ❀ वे ही देवदेव भगवान् अपने प्रसन्न हास्य और रक्तकमलके समान अरुण नेत्रोंसे उल्लसित मुखवाले चतुर्भुजरूपसे, जिसका और लोगोंको केवल ध्यानमें दर्शन होता है, तबतक यहीं स्थित रहकर प्रतीक्षा करें, जबतक मैं इस शरीरका त्याग न कर दूँ॥ २४॥

सूत उवाच

युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे। अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वताम् ॥ २५ ॥
पुरुषस्वभावविहितान् यथावर्णं यथाश्रमम्। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥
दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः। स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥ २७ ॥
धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने[1]। नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्सानुकम्पं वाक्यमाकर्ण्य ॥ २५ ॥ ❀ ❀ पुरुषस्वभावेन विहितान्नरजातिसाधारणान्वर्णयामासेति तृतीयेनान्वयः। यथावर्णं वर्णधर्मान्। यथाश्रममाश्रमधर्मांश्च। वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातमुभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् ॥ २६ ॥ ❀ ❀ पुनस्तत्रैव विशेषमाह दानेति। मोक्षधर्मान् शमदमादीन्। भगवद्धर्मान्हरितोषणान्द्वादशादिनियमरूपान्। समासव्यासौ संक्षेपविस्तारौ तावेव योगावुपायौ ततस्ताभ्याम् ॥ २७ ॥ ❀ ❀ धर्मादींश्च यथाधिकारं प्रतिनियतोपायसहितान्। यथा यथावत्। नानाख्यानेषु य इतिहासास्तेषु यथा सन्ति तथा वर्णयामासेति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथावर्णं वर्णयोग्यधर्मान्। योग्यतायामव्ययीभावः। अयं भावः—न हि ब्रह्मचर्यादय आश्रमधर्माः सर्वे क्रमेणानुष्ठेया इति नियमः। किं तु वैराग्यं चेत्तदैव भिक्षवो भवेयुः "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुतेः। रागश्चेत्तदा गृहस्था एव भवेयुः "अविपक्वकषायोस्मादमुष्माच्च विहीयते" इत्युक्तेः। कर्मणा कषायपाकार्थं गार्हस्थ्यमेव सेवेतेति भावः। ततश्च तत्रैव दानधर्मानित्यादि सर्वान्ते च भगवद्धर्मान् भक्त्यंगानीति मोक्षधर्मेभ्योऽप्यस्य पार्थक्यं श्रैष्ठ्यं च व्यञ्जितम्। समासः संक्षेपो व्यासो विस्तरस्तयोर्योगेन युक्ततया धर्मार्थकामेत्यादि। एवञ्चोक्तास्सर्वे धर्माश्चतुर्षु वर्णेष्वेव पर्यवस्यन्तीत्युक्तपोषन्यायेन तानेवाह—धर्मेति। उपाया धर्मादिसाधनानि। यथा यथावदेव नानाख्यानादिषु ये ये इतिहासास्तेषु प्रदर्श्य प्रमाणीकृतानित्यर्थः ॥ २६–२८ ॥

श्रीमद्वीरराघवव्याख्या

तद्भीष्मवचो निशम्य युधिष्ठिरः शरपंजरे शयानं भीष्ममृषीणां शृण्वतां सतां नानाविधान् धर्मानपृच्छत् ॥ २५ ॥ ❀ ❀ धर्मान्विशिनष्टि पुरुषस्वभावः ज्ञत्वाज्ञत्वशक्तत्वादिरूपेण विहितान् कर्त्तव्यतया विधिबोधितान्यथावर्णं यथाश्रमं ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च योग्यार्थकयथाशब्दस्याव्ययीभावः वैराग्यरागावकामकामौ तावेवोपायौ ताभ्यामाम्नातानुभयविधान् प्रवृत्तिनिवृत्तिभेदभिन्नान् यथैकस्यैवाग्निहोत्रादिकर्मणः 'अग्निहोत्रं जुहोति, जुहुयात्स्वर्गकामः, यावज्जीवमग्निहोत्रं जुहुयादि'ति स्वर्गाधिकारजीवनाधिकाररूपाभ्यामुपाधिभ्यामेव भेदः, एवं वैराग्यरागोपाधिभ्यां प्रवृत्तिधर्मत्वेन निवृत्तिधर्मत्वेन चाम्नातान्वस्तुत एकरूपान् वर्णाश्रमादिधर्मानित्यर्थः ॥ २६ ॥ ❀ ❀ आम्नातानित्यनेन वैदिकधर्मानपृच्छदिति सूचितम् तथा स्मार्त्तधर्मानपृच्छदित्यभिप्रायेणाह दानधर्मानिति। राजधर्मानिति शास्त्रोक्ताः मोक्षधर्मा पंचरात्रादितंत्रोक्ताः तत्राप्यवांतरभेदाभिप्रायेण पुरुषस्वभावभेदाभिप्रायेण विभागप्राय इत्युक्तं भगवद्धर्मास्तच्छ्रवणकीर्त्तनादयः समासव्यासयोगतः संक्षेपविस्ताराभ्यां युक्ताः शास्त्रेषु प्रतिपाद्यतयेति समासव्यासयोगाः सार्वविभक्तिकस्तसिः समासव्यासयोगात् यद्वा समासव्यासयोगात् संक्षेपयोगाद्विस्तरयोगाच्चापृच्छत् संक्षिप्तत्वेन विस्तृतत्वेन चापृच्छदित्यर्थः ॥२७॥ ❀ ❀ द्वितीयांतानां वर्णयामासेत्युत्तरत्रान्वयः। हे मुने सहोपायान् ससाधनान् धर्मार्थकाममोक्षानपि यथावन्नानाविधेष्वाख्यानेष्वितिहासेषु च यत्तत्त्वं तद्भीष्मो वर्णयामास ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथ युधिष्ठिरो भीष्मोक्तमाकर्ण्य शरतल्पे शयानं भीष्मं विविधान् धर्मानपृच्छदित्यन्वयः। पृच्छतेर्द्विकर्मकत्वाद्भीष्मं धर्मानिति युज्यते ॥ २५ ॥ ❀ ❀ धर्माणां तत्त्वविद्भीष्मः एतान् धर्मान्नानाख्यानात्मकेष्वितिहासेषु वर्णयामासेत्यन्वयः।

---

१. प्रा० पा०—मुनिः।

तान् कथंभूतान् वर्ण्यपुरुषस्यैते निजत्वेन विहिता धर्मास्तदाश्रमिपुरुषस्यैते विहिता इति विविच्य यथावर्णं यथाश्रमं वर्णिनामाश्रमिणां पुरुषाणां स्वभावविहितान्निजत्वेन विहितान् धर्मान् वैराग्योपाधिना रागोपाधिना च एते निवृत्तिधर्मा एते प्रवृत्तिधर्मा इति निष्काममज्ञानपूर्वमित्यादिवचनैः प्रतिपादितोभयविधलक्षणान् ॥ २६ ॥ ❀ ❀ विभागशः पृथक् पृथक् भगवतः सर्वजगत्स्रष्टृत्वादिधर्मान् ॥ २७ ॥ ❀ ❀ तथा धर्मार्थकाममोक्षांश्च तत्तत्साधनसहितान् समासव्यासयोगतः संक्षेपविस्तराभ्यां यथा यथावत् तात्त्विकदेवोत्तमयुधिष्ठिरादिबोधने भीष्मस्यासामर्थ्यात् भीष्मस्य कीर्त्त्यर्थं तस्मिंस्तत्काले विशेषाविष्टश्रीकृष्णश्च पांडवप्रश्नान् व्याचख्याविल्यस्यार्थे यथेति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत् निजचिरस्थितिप्रकाशकं श्रीभीष्मस्य वचनमाकर्ण्य ॥ २५-२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

युधिष्ठिरस्तदाकर्ण्येति तर्हि मां कः प्रबोधयिष्यतीति व्यग्रोऽपृच्छत् शयानं शरेति । यद्यपि तद्दशायां प्रश्नानौचित्यं तदपि गत्यंतराभावादिति भावः ॥ २५ ॥ ❀ ❀ पुरुषस्वभावेन विहितान् प्रथमं नरजातिसाधारणान् धर्म्मान् वर्णयामासेति तृतीयेनान्वयः । ततो यथावर्णं वर्णयोग्यधर्म्मान् योग्यतायामव्ययीभावः । ततो यथाश्रमं ततो वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातमुभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् । अयमर्थः—न हि ब्रह्मचर्यादय आश्रमधर्माः सर्व्वैरेव द्विजैः सर्वे क्रमेणैवानुष्ठेया इति नियमः । किन्तु वैराग्यं चेत् सदैव भिक्षवो भवेयुस्तदा रागश्चेद् गृहस्था एव सदेति ॥ २६ ॥ ❀ ❀ ततश्च तत्रैव विशेषतो दानधर्मानित्यादि सर्वान्ते च भगवद्धर्मान् भक्त्यंगानिति मोक्षधर्मेभ्योऽप्यस्य पार्थक्यं श्रेष्ठ्यञ्च व्यंजितम् । समासः संक्षेपो व्यासो विस्तरश्च तद्द्वयोर्योगेन युक्ततया ॥ २७ ॥ ❀ ❀ एवञ्चोक्ताः सर्व्वे धर्म्माश्चतुर्षु वर्गेषु एव पर्यवस्यन्तीत्युक्तपोषन्यायेन तानेवाह धर्म्मेति । उपाया धर्म्मादिसाधनानि । यथा यथावदेव । नानाऽऽख्यानादिषु ये ये इतिहासास्तेषु प्रदर्श्य प्रमाणीकृतानित्यर्थः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

पुरुषाणां स्वभावैः सात्त्विकराजसतामसैर्विहितान्वर्णयामासेति तृतीयेनान्वयः । यथावर्णं वर्णानां योग्यान् वैराग्यरागाभ्यामुपाधिभ्यां क्रमेण आम्नातोभयलक्षणान् प्रतिपादितप्रवृत्तिनिवृत्तिस्वरूपान् ॥ २६-२९ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं सर्वपुरुषार्थदानाय सर्वाभिव्यक्तिं कुर्वन् विषयांतरसंचाराभावाय प्रकटस्तिष्ठत्विति प्रार्थना । मध्ये सावकाशं ज्ञात्वा युधिष्ठिरः स्वसंदेहं वारयितुं पृष्टवानित्याह युधिष्ठिर इति । ननु युधिष्ठिरः पूर्वोक्तं सर्वं भगवता कृतमित्यवगत्य स्वस्य कारणत्वाभावात् वधादिदोषाभावं विनिश्चित्यापि कथं पृच्छतीत्यत आह तदाकर्ण्यापि शरपंजरे शयानमिति । यदि भगवानेव करोति किमिति भीष्मः शरपंजरे पतितस्तिष्ठति, न ह्यकृतं भोजयति भगवान् । तथा सति अतिप्रसंगः स्यात् दुःखस्य च सर्वजनीनत्वात् भगवतः सर्वकर्तृत्वस्य च श्रौतत्वात् सर्वेषामेव ऋषीणां संदेहः । अतस्तेषामपि संदेहनिवृत्त्यर्थमृषीणामनुशृण्वतां पृष्टवानित्यर्थः । धर्माणामेव नानाविधत्वात् प्रबलदुर्बलताभावोऽस्ति राजसेवकवन्न वेति संदेहादपि प्रश्नस्तदाह विविधानिति ॥ २५ ॥ ❀ ❀❀ धर्मास्त्रिविधाः श्रौताः पौराणिकाः पुरुषार्थसाध्यत्वेनान्वयव्यतिरेकसिद्धा लौकिकाश्च, तान् सर्वान् भीष्मः क्रमेणाहेत्याह पुरुषस्वभावेति त्रिभिः । तत्र वैदिकास्त्रिविधाः शरीराधिकारेण प्रवृत्ताः वर्णाश्रमरूपेण बाह्यधर्मेण च प्रवृत्ताः वैराग्याद्यांतरधर्मेण च । तत्र पुरुषस्वभावविहिताः स्वतंत्रा रक्षादयः वर्णधर्मज्ञानादयः, आश्रमधर्माः अध्ययनादयः, रागोपाधयः पूर्वकांडोक्ताः, वैराग्योपाधय उत्तरकाण्डोक्ताः ॥२६॥ ❀ ❀ दानधर्मादयः पौराणिकाः गोदानादयः तुलापुरुषादयो वा राजधर्माः कार्त्तिकव्रतादयः 'समासव्यासकथनात् बुद्धिर्भवति वै स्थिरा ।' अतः संक्षेपविस्तराभ्यामाह समासेति ॥ २७ ॥ ❀ ❀ पुरुषार्थचतुष्टयसाधनीभूतधर्मानाह धर्मेति । पुरुषार्थानां स्वरूपं साधनानि प्रकाराश्च यथा यथावत् मुन इति संबोधनात् न विस्तरेणोच्यते मननविघ्नत्वादिति आख्यानं शब्दप्रधानं तैरेवमुक्तमित्यादि इतिहासः पुरावृत्तं तैरेवं कृतमेवं जातमिति तथा निःशंककथने हेतुः । एतावता सर्वे संदेहा निवारिता इत्युक्तं भवति । सगुणकर्मणा बंधः निर्गुणकर्मणा मोक्षः । लोके फलसाधकत्वं ज्ञानं भवत्विति 'यमधः उपरि वा निनीषति तमसाधु साधु वा कर्म कारयती'ति ईश्वरस्य सर्वकर्तृत्वं जीवस्य दुःखाद्यनुभवश्चोक्तो भवति, धर्मप्रवचनादिकं काल-विलंबादेव न त्वनेन पुरुषार्थसिद्धिरिति ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी।

यद्यपि तस्यां दशायां प्रश्नो नोचितस्तथापि तत् प्राणत्यागविषयकं भीष्मवचनमाकर्ण्य श्रुत्वा भीष्मे मृते मां कः प्रबोधयिष्यतीति गत्यन्तराभावात् व्यग्रचित्तो युधिष्ठिरस्तं शरपञ्जरे शयानं भीष्मं विविधान् धर्मान् अपृच्छदित्यन्वयः। भीष्मवाक्यस्य प्रामाण्यं द्योतयन्नाह–ऋषीणामनुशृण्वतामिति, ऋषयोऽपि तयोः संवादश्रवणपरा जाता इत्यर्थः॥ २५॥ ❋ ❋ तदा च तत्पृष्टो भीष्मो धर्मानुपदिष्टवानित्याह–पुरुषेति त्रिभिः। नानाख्यानेषु ये इतिहासाः पुरावृत्तान्तास्तेषु धर्मादयो यथा सन्ति तथा तांस्तत्त्वविद्भीष्मो वर्णयामासेति तृतीयेनान्वयः। तान्दर्शयति–पुरुषस्वभावेन विहितान्नरजातिसाधारणान्। यथावर्णं ब्राह्मणादिवर्णयोग्यान् धर्मान्। यथाश्रमं ब्रह्मचर्याद्याश्रमयोग्यान् धर्मान्। वैराग्यरागावेवोपाधी ताभ्यां क्रमेणाम्नातमुभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान्॥ २६॥ ❋ ❋ पुनस्तत्रैव विशेषमाह–दानधर्मानिति, तुलापुरुषादीन् राजधर्मान् मोक्षधर्मान् शमदममौनानीहादीन्। विभागशः तत्राप्यवान्तरभेदभिन्नान्। स्त्रीधर्मान् पातिव्रत्यादीन्। भगवद्धर्मान् हरितोषकान् एकादश्यादिव्रतनियमान् श्रवणकीर्त्तनादींश्च। तत्रापि समासव्यासौ सङ्क्षेपविस्तरौ तावेव योगावुपायौ ततस्ताभ्याम्॥ २७॥ ❋ ❋ सहोपायान् साधनसहितान् धर्मादीन्, ससाधनानां स्वरूपमित्यर्थः सङ्क्षेपतो निरूपितोऽर्थो भवता विस्तरेण विभावनीयो मननशीलत्वादित्याशयेन सम्बोधयति–हे मुने इति॥ २८॥

हिन्दी अनुवाद

सूतजी कहते हैं—युधिष्ठिरने उनकी यह बात सुनकर शरशय्यापर सोये हुए भीष्मपितामहसे बहुत-से ऋषियोंके सामने ही नाना प्रकारके धर्मोंके सम्बन्धमें अनेकों रहस्य पूछे॥ २५॥ ❋ ❋ तब तत्त्ववेत्ता भीष्मपितामहने वर्ण और आश्रमके अनुसार पुरुषके स्वाभाविक धर्म और वैराग्य तथा रागके कारण विभिन्नरूपसे बतलाये हुए निवृत्ति और प्रवृत्तिरूप द्विविध-धर्म, दानधर्म, राजधर्म, मोक्षधर्म, स्त्रीधर्म और भगवद्धर्म इन सबका अलग-अलग संक्षेप और विस्तारसे वर्णन किया। शौनकजी! इनके साथ ही धर्म, अर्थ, काम और मोक्ष–इन चारों पुरुषार्थोंका तथा इनकी प्राप्तिके साधनोंका अनेकों उपाख्यान और इतिहास सुनाते हुए विभागशः वर्णन किया॥ २६–२८॥

धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः॥ २९॥
तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं[1] मन आदिपूरुषे।
कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत्॥ ३०॥
विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम्॥ ३१॥

श्रीभीष्म उवाच

इति मतिरुपकल्पिता वितृष्णा भगवति सात्त्वतपुङ्गवे विभूम्नि।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः॥ ३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

छंदेनेच्छया मृत्युर्यस्य॥ २९॥ ❋ ❋ सहस्रणीर्युद्धे समीपस्थान्सहस्रं रथिनो नयति पालयतीति सहस्रणीर्भीष्मः। सहस्रिणीरिति पाठे सहस्रार्थवतीर्गिरः। लसंतौ पीतौ पटौ यस्य तस्मिन्। अमीलितदृगेव मनो व्यधारयत्॥ ३०॥ ❋ ❋ अनयैव विशुद्धया धारणया हतमशुभं यस्य सः। तस्य श्रीकृष्णस्येक्षया कृपादृष्ट्यैव गत आयुधश्रमो यस्य सः। अत एव निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमो विविधं भ्रमणं यस्मात्सः। जन्यं देहम्॥ ३१॥ ❋ ❋ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति। इति नानाधर्माद्युपायैर्मनोधारणलक्षणोपकल्पिता समर्पिता। क? सात्वतानां पुंगवे श्रेष्ठे भगवति। वितृष्णा निष्कामा। अवितृष्णेति वा छेदः अवितृप्तेत्यर्थः। विगतो भूमा यस्मात्तस्मिन् यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः। तदेव परमैश्वर्यमाह। स्वसुखं स्वस्वरूपभूतं परमानंदमुपगते प्राप्तवत्येव। क्वचित्कदाचिद्विहर्तुं क्रीडितुं प्रकृतिं योगमायामुपेयुषि स्वीकृतवति। न तु स्वरूपतिरोधानेन जीववत्पारतंत्र्यमित्यर्थः। विहर्तुमिति यदुक्तं तत्प्रपंचयति। यद्यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति॥ ३२॥

---

१. प्रा० पा०—विमुक्तसङ्गो। २. प्रा० पा०—हृता०।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"छंदो वशेप्यभिप्राये पद्यैषणरतिष्वपि" इति कोशात्। एतेनोत्तरायणमरणमेव श्रेष्ठमिति न ध्येयम्। 'देशे च काले च मनो न सज्जयेत्" इति वक्ष्यमाणत्वात् किं तु स्वच्छन्दमृत्युतैवात्रासूचीति ॥ २९ ॥ ❀ ❀ तदोत्तरायणे प्राप्ते सति उपसंहृत्यान्यतः प्रत्याहृत्य अमीलितदृगेव चक्षुषी स्पष्टमुन्मील्यैव व्यधारयदानखशिखं प्रवेशयामास। काले च नेत्रसंमीलनपूर्वकमंतर्ध्येयस्य संमुखस्थत्वात्तन्मीलने प्रयोजनाभावादिति भावः ॥ ३० ॥ ❀ ❀ इति मदायुःसमाप्तौ मतिर्भगवति उपकल्पिता, मत्प्रभौ मदंतकाले कृपावशतयैव मत्समीपमागते किञ्चिदुपायनं दातुमुचितम्। तत्र संप्रति ममाहंतास्पदममतास्पदयोर्मध्ये समीचीनं किमप्यन्यन्नास्तीति हेतोरेषा मतिरेवोपायनत्वेन कल्पिता ॥ ३१ ॥ ❀ ❀ ननु उपायनदायिनो लोके किञ्चिज्जिघृक्षवो दृश्यंते तत्राह—वितृष्णा निष्कामा भगवति षडैश्वर्यपूर्णे किन्नारायणत्वेन प्रसिद्धे ? न, सात्त्वतपुंगवे यदुकुलान्तः सत्त्वेन प्रसिद्धे। ननु नारायणस्यैव भगवत्त्वेन महती प्रसिद्धिश्च सार्वकालिकी तत्राह–विभूम्नीति। इत्यर्थ इति। सर्वेश्वर इति भावः। तदेव भूमत्वसमर्पकं "यो वा भूमा तत्सुखं नाल्पे सुखमस्ति" इति श्रुतेः। यद्वा स्वैर्यादवपांडवैरेव सह सुखं परमानंदमुपाधिक्येन प्राप्ते इत्यर्थः। स्वरूपलक्षणमुक्त्वा तटस्थलक्षणमाह–इत्यर्थ इति। प्रकृतिं मायामीक्षणेन महत्तत्त्वाद्युत्पादकतया उपेयसीति भावः। भवप्रवाह इति वदता पुरुषादयोप्यस्यैवावतारा उक्तास्तेषामेव भवप्रवाहकत्वादिति भावः। यद्वा यतः प्रकृतेरिति। "विलीनो हि प्रकृतौ संसारमेति" इति श्रुतेः। प्रकृतिरेव जीवानां संसारहेतुः ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अवितृप्तेति दर्शने अलंबुद्धिराहित्यादिति भावः ॥ ३२–३५ ॥

श्रीमद्वीरराघवव्याख्या

एवं पृष्टान् धर्मान्प्रवदतः योगिनः छंदमृत्योः स्वच्छंदानुसारी मृत्युर्यस्य तस्य भीष्मस्य यो वांछित उत्तरायणः स कालः प्रत्युपस्थितः। यद्वा तस्य स कालः प्रत्युपस्थितः यश्छंदमृत्योर्योगिनः वांछितः स चापि क उत्तरायण इत्यन्वयः ॥ २९ ॥ ❀ ❀ तदेति। यदा स कालः प्रत्युपस्थितः तदा सहस्रणीः सहस्राणां कुरुपांडवादिरूपाणां नायकः सहस्रं स्ववश्यानां नयति सद्गतिं प्रापयतीति वा स भीष्मः गिर उपसंहृत्य विरम्य मुक्तः संगो देहतदनुबन्ध्यादिसंगो यस्य तन्मनः पुरः स्थिते लसंतौ विलसंतौ पीतौ पटौ यस्य तस्मिन् कृष्णे व्यधारयत्। कथंभूतः निमीलिते दृशौ दृष्टी येन सः निमेषणमप्यकुर्वन् कृष्णमेव पश्यन् तद्विग्रहध्यानैकप्रवणं चित्तमकरोदित्यर्थः ॥ ३० ॥ ❀ ❀ विशुद्धया धारणया भगवद्विग्रहानुध्यानात्मिकया हतं निरस्तमशुभं भगवत्प्राप्तिविलम्बावहं प्रारब्धं यस्य तदीक्षयैव भगवद्दर्शनेनैवाशु गता निरस्ता आयुधप्रहारजा व्यथा यस्य, निवृत्ताः सर्वेषामिंद्रियाणां वृत्तयो विभ्रमः देहात्मादिभ्रमश्च यस्य स भीष्मः जन्यं जननयोग्यं देहं विसृजन् त्यक्ष्यन् जनार्दनं सर्वजनदुःखहरं श्रीकृष्णं तुष्टाव ॥ ३१ ॥ ❀ ❀ स्तुतिमेवाह इतीत्यादिभिरेकादशभिः तावत्परमव्योमस्थं वेदान्तवेद्यं दिव्यात्मस्वरूपं प्रकृतावताररूपं तत्प्रयोजनं चानुसन्धाय तस्मिन्स्वमतिदार्ढ्यं प्रार्थयते इति। वक्ष्यमाणप्रकारेण मम मतिर्भगवति वितृष्णाऽलंबुद्धिरहिता सती उपकल्पिता प्रतिष्ठिता भवतु। यद्वा इति हेतौ मतिर्वितृष्णा इति। यस्मात्तस्माद्भगवत्युपकल्पिता भवत्वित्यर्थः। कथंभूते सात्वतपुंगवे सात्वतानां यादवानां पुंगवे श्रेष्ठे भागवतानां नायके वा विभूम्नि विलक्षणे भूम्नि वागादिभ्यः प्राणशब्दवाच्याज्जीवाच्च विलक्षणेऽपरिच्छिन्ने भूमशब्दवाच्य इत्यर्थः "भूमा त्वेव विजिज्ञासितव्यः यो वै भूमा तत्सुखं नाल्पे सुखमस्ती" ति हि श्रूयते। तदाह स्वसुखमुपगत इति। स्वं स्वाभाविकसुखमुपगतवत्यपरिच्छिन्नस्वाभाविकानंदशालिनीत्यर्थः, कचिद्देशे विहर्तुं प्रकृतिं विग्रहमुपेयुषि यद्भवप्रवाहः संसारप्रवाहो भवति यत्संकल्पमूला क्षेत्रज्ञानां संसारप्रवृत्तिस्तस्मिन्नित्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वच्छन्दमृत्योः स्वेच्छया मरणं कुर्वतो योगिनो वांछित उत्तरायणाख्यः कालो यः स भीष्मस्य प्रत्युपस्थित इत्यन्वयः। उत्क्रमिष्यतो ज्ञानिनः कालेऽनुगुणे किंचित्सुखाधिक्यं भवति, नान्यथा मुक्त्यभाव इत्येतमर्थं तुशब्दो वक्ति ॥ २९ ॥ ❀ ❀ तदोत्तरायणे प्राप्ते सति सहस्रणीः स्वमुक्तिसमये स्वोपदिष्टानेकजननेता। एकादशाक्षौहिणीनायकस्य बलवतां सहस्रसंख्यावतां नायकत्वकथनमनित्यत्वादुपेक्षणीयं, अमीलितदृक् प्रफुल्ललोचनः। विशेषत उच्छ्वसितज्ञानो वा। भीष्मो गिरं विषयसंबंधिनीमुपसंहृत्य विमुक्तो विषयसंगो येन तत्तथोक्तं तन्मनः पुरः स्थिते प्रत्यक्षे चतुर्भुजे उपलब्धे शोभमानपिशंगवस्त्रे आदिपुरुषे नारायणावतारे श्रीकृष्णे व्यधारयत् विशेषेणाचलतयाऽधारयदित्येकान्वयः। मीलितदृक् अर्धमुकुलितचक्षुर्वा ॥ ३० ॥ ❀ ❀ विशुद्धया फलरागादिदोषरहितया हरौ निरंतरमनोधारणया हताशुभः निरस्तपापः तस्य कृष्णस्येक्षया निरीक्षणेनैव नान्येनाशु तत्क्षणं विनष्टा युधि निमित्तव्यथाऽत एव तदितरः निवृत्तः निरस्तः सर्वेषामिंद्रियाणां वृत्तीनां व्यापाराणां विभ्रमो विलासो यस्य स तथोक्तः, निवृत्तसर्वेंद्रियवृत्तिश्चायं विगतभ्रमश्चायमिति वा, पद्यमयं जल्पं वचनं विसृजन् रचयन् व्यर्थवचनं मुंचन्वा जनं

जननमर्दयति विनाशयतीत्युपलक्षणमेतत् मरणं च जननमरणनाशकत्वेन नित्यमुक्तिदातृत्वाज्जनार्दनस्तं तुष्टावेत्येकान्वयः ॥ ३१ ॥ ❀ ❀ ननु किमियं स्तुतिर्मानसी वाचिकी वा इति मतिरिति। इतिशब्दो हेत्वर्थः प्रकरणार्थो वा समाप्तिवचनो वा यत एवं भगवान् सकलप्रवर्त्तकः तस्मात्तस्मिन्मतिर्मननशीलबुद्धिरुपकल्पिता तद्विषयीकृता सकलशास्त्रप्रकरणे वक्ष्यमाणप्रकरणे वा समाप्तौ मरणकाले। किंविशिष्टे विभूम्नि परिपूर्णे अपरिच्छेदलक्षणपूर्णत्वं देशकालयोरप्यस्तीति अत उक्तं भगवतीति। निरवधिकैश्वर्यादिगुणवति यः कश्चिदृषिसत्तमो निर्दिश्यते इति शंका मा भूदित्याह-सात्वतपुंगवे यादवेश्वरे स्वसुखे स्वरूपानंदे उपगते आगते अतिनिकटवर्तिनीति वा "निलीनोऽहं प्रकृतौ संसारमेतीति" श्रुतेः यस्याः सकाशाज्जीवानां संसारप्रवाहो भवति। कचित् सृष्टिकाले नानावताररूपैर्विहर्तुं महदहंकारादिजगत्स्रष्टुकामां तां प्रकृतिं श्रियं जडात्मिकां च उपेयुषि प्राप्तवति, कीदृशी मतिः वितृष्णा विषयतृष्णारहिता वौ हरौ तृष्णा यस्याः सा तथा वा "विः पक्षिपरमात्मनोरि"त्यभिधानम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

यो योगिन इति। तेषां तथैव व्यवसायमात्रं श्रीभीष्मस्य तु श्रीभगवद्दर्शनदीर्घत्वाय व्याजमय एव स इति ज्ञेयम्। वक्ष्यते च श्रीस्वामिभिरपि द्वितीये-स्थिरं सुखं चासनमित्यादौ 'देशे च काले च मनो न सज्जयेदि'त्यत्र देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनो न सज्जयेत् न सङ्गं प्रापयेत्। न देशकालौ योगिनः सिद्धिहेतू किन्तु योग एवेति ॥ २९-३० ॥ ❀ ❀ तदीक्षयैवेति तत्कर्मकेक्षया तदागमनसमयादेव लब्धयेति प्रथमवृत्तमुक्तम् ॥ ३१ ॥ ❀ ❀ सात्वतपुंगवे इति धारणाविषयस्य तस्य विशेषणं न तूपलक्षणमिति ज्ञेयम्। विभूम्नि विशेषेण भूमातिशयो यस्मिन् तत्र भूमवाक्यवद्भूमशब्देनात्र परमातिशयेव चोच्यते। विशब्दस्तु तद्व्यक्त्यर्थ एव, कचिदित्यादिना पुरुषावतारकर्तृत्वमुक्तम् ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

धर्म्मं प्रवदत इत्यादि। छन्देन इच्छयैव मृत्युर्यस्य तस्य ॥ २९ ॥ ❀ ❀ युद्धे समीपस्थान् सहस्रं रथिनो नयति परिपालयतीति सहस्रणीर्भीष्मः। सहस्रिणीरिति पाठे सहस्रार्थवतीर्गिरः उपसंहृत्य अन्यतः प्रत्याहृत्य अमीलितदृगेव चक्षुषी स्पष्टम् उन्मील्यैव व्यधारयत् आनखशिखं प्रवेशयामास ॥ ३० ॥ ❀ ❀ तदीक्षया श्रीकृष्णकर्तृकेण कृपावलोकेन। विभ्रमो विविधभ्रमणमस्थैर्य्यमित्यर्थः। जन्यं स्थूलदेहं मायिकप्रपञ्चं च ॥ ३१ ॥ ❀ ❀ इति मतीत्यादि। इति ममायुःसमाप्तौ मतिर्भगवति उपकल्पिता मत्प्रभौ मदन्तकाले कृपापरवशतयैव मत्समीपमागते किञ्चिदुपायनं दातुमुचितं तत्र सम्प्रति ममाहंतास्पदममतास्पदयोर्मध्ये समीचीनं किमप्यन्यन्नास्तीति हेतोरेषां मतिरेवोपायनत्वेन कल्पिता। ननु उपायनदायिनो लोके किञ्चिज्जिघृक्षवो दृश्यन्ते तत्राह वितृष्णा निष्कामा। भगवति षडैश्वर्य्यपूर्णे। किं नारायणत्वेन प्रसिद्धे न सात्वतपुंगवे यदुकुलोत्तंसत्वेन प्रसिद्धे। ननु नारायणस्यैव भगवत्त्वेन महती प्रसिद्धिश्च सार्व्वकालिकी तत्राह विभूम्नीति। विगतो भूमा यस्मात् तस्मिन् यमपेक्ष्यान्यत्र महत्त्वं नास्तीति नारायणस्याप्यवतारिणीत्यर्थः। तदपि स्वैर्यादवपांडवैरेव सह सुखं परमानंदम्। उप आधिक्येन प्राप्त इति स्वरूपलक्षणमुक्तम्। तटस्थलक्षणमाह प्रकृतिं मायामीक्षणेन महत्तत्त्वाद्युत्पादकतया उपेयुषि। यतः प्रकृतेर्भवप्रवाहः सृष्टिपरम्परा तेन पुरुषादयोऽप्यस्यैवावतारा इति भावः ॥ ३२ ॥

श्रीमच्छुकवदेवकृतः सिद्धान्तप्रदीपः

यदोत्तरायणः कालः प्रत्युपस्थितस्तदा सहस्रं जनान्नयति भगवल्लोकं तद्धर्मोपदेशेन प्रापयतीति सहस्रणीर्भीष्मः गिर उपसंहृत्य विरम्य पुरः स्थिते स चतुर्भुजे आदिपुरुषे जगत्कारणे श्रीकृष्णे अमीलितदृगेव सौंदर्यदर्शनविच्छेदभयेन निमेषणमप्यकुर्वन् मनो व्यधारयत् ॥ ३० ॥ ❀ ❀ विशुद्धया पुरःस्थितभगवद्विषयकधारणया हतमशुभं भगद्भावप्राप्तिप्रतिबंधकीभूतं प्रारब्धं कर्म यस्य स तथा तदीक्षया पुरःस्थितभगवत्कृपादृष्ट्या गता आयुधव्यथा यस्य स तथा, निवृत्ताः कृष्णेतरविषयेभ्यः सर्वेन्द्रियाणां बाह्याभ्यंतराणां वृत्तयो विभ्रमो विविधो भ्रमश्च यस्य स तथा तत्रात्मज्ञाने विरोधीभूतो भ्रमः स्वपरयोः केवलभेदभ्रमः केवलाभेदभ्रमः उभयोर्जडरूपत्वभ्रमः स्वरूपेण जीवात्मनि व्यापकत्वभ्रमः। भगवन्मूर्त्यादौ मायिकत्वादिभ्रमः भगवति देवतांतरसाम्यभ्रमः-इत्यादिप्रकारो विविधो भ्रमस्तस्य निवृत्त इति दिक्, एवंभूतः सन् जन्यं देहं विसृजन् जनार्दनं श्रीकृष्णं तुष्टाव ॥ ३१ ॥ ❀ ❀ स्तुतिमेवाह इतीत्येकादशभिः। तत्रादौ श्रीकृष्णे निष्कामभक्तिं प्रार्थयितुं ज्ञानस्थैर्य्यं प्रार्थयते इति। इयं भगवद्गुणस्वरूपादिविषयमतिर्ज्ञानात्मिका वितृष्णा निष्कामा भगवति श्रीकृष्णे कल्पिता प्रतिष्ठिता भवतु। तत्स्वरूपगुणादियाथात्म्यं दर्शयितुं विशिनष्टि-सात्त्वतपुंगवे सात्त्वतानां श्रीनारदादीनामुपास्ये तदेवाह विभूम्नीति विगतो भूमा यस्मात्ततो भूमा नास्ति तस्मिन् "भूमा त्वेव विजिज्ञासितव्यो यो वै भूमा तत्सुखमि"ति श्रुतिप्रसिद्धेः। तदेवाह स्वसुखमुपगते इति। स्वं स्वधारणं सुखमपि गतवति "यतो वा इमानि भूतानि जायंते" इति श्रुतिमुपबृंहयति कचिद्विहर्तुं प्रकृतिमुपेयुषि इति यद्भवप्रवाह इति च

कचित्सृष्ट्युपक्रमसमये विहर्तुं नानाभवनलीलां कर्तुं प्रकृतिं निजामचेतनशक्तिं "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि" त्यादिश्रुतिप्रसिद्धामुपेयुषि अधिष्ठाय स्थितवति यत् यतो हेतोर्भवप्रवाहस्तस्मिन् ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

समागते काले सर्वमुपसंहृतवानित्याह धर्मं प्रवदत इति द्वाभ्याम् । उत्तरायणकालस्योत्तमत्वेऽपि पूर्वकालस्य निकृष्टत्वात् तद्दोषसंबंधे निर्दुष्टता न भवेदिति तद्व्यावृत्त्यर्थं धर्मं प्रवदत इत्युक्तं योगिनामुत्तरगतेर्नियतत्वात् सूर्यमंडलमध्यस्थमार्गत्वात् उत्तरायण एव सूर्ये गंतुं शक्यते । छंदमृत्योरिति योगजधर्मेण कालस्य वशीकृतत्वात् स्वच्छंदमृत्युत्वम् ॥ २९ ॥ ❀ ❀ तस्मिन् काले यत् कर्त्तव्यं तदाह तदोपसंहृत्येति सर्वपरित्यागेन भगवच्चिंतनं कर्त्तव्यं तन्मौनेन मनसश्चांचल्यपरिहारेण अक्रियया च भवति । तत्र शरीरक्रियाभावः पूर्वमेव सिद्धः वाङ्नियमनमाह गिर उपसंहृत्येति । सहस्रणीः सहस्रं योद्धा वा युद्धेन वचनेन वा नयति स्वाधीनान् करोतीति स्वधर्मोत्कर्ष उक्तः । मनसो विनियोगमाह विमुक्तसंग इति । विशेषेण मुक्ता अंतर्बहिः संगा येन, आदिपुरुषे व्यधारयदित्युक्ते मानस्यां प्रतिमायां व्यवधारणमुक्तं भवति । तन्निराकरणाय अलौकिकप्रकारमाह कृष्णे पुरःस्थित इति "कश्चिद्धीरः प्रत्यगात्मानमैक्षदि"ति चक्षुरंतर्नीत्वा तेन द्रष्टव्यं पश्यति, इह तु विपरीतं मनश्चतुर्द्वा बहिरानीय तेन भगवंतं पश्यतीति कृष्णः आविर्भूतो भगवान् । बहिःस्थितत्वज्ञापनार्थं वस्त्रादिपरिकरमाकारं चाह लसत्पीतपटे चतुर्भुज इति । लसत्पीत- तदाहोत्तीर्णरूपतादेवकीप्रार्थनया यत् प्राकृतं रूपं कृतं तत्परित्यागेन सहजमेव रूपं प्रदर्शितवानित्यर्थः, पुरः स्थित इति कल्पना- क्लेशाभावः, अमीलितदृगिति निमेषादिना व्यवधानं निराकृतम् ॥३०॥ ❀ ❀ मनसो धारणा सर्वावयवस्थिता, अत एव विशुद्धा अपहतपाप्मविषयत्वात् तेनैव सर्वपापक्षयः भगवदपराधजनकमपि पापमपराधेन जनितं प्रतीकाराकरणेनोपेक्षाजनितं च तत्सर्वं शुद्धसेवकभावेन निवारितं भगवति च शुद्धभावे भगवानपि कृपया वेदनां च दूरीकृतवानित्याह तदीक्षयेति । तस्य भगवतः दोषनिवर्त्तकदृष्ट्यैव गता आयुधव्यथा यस्य, निवृत्ताः सर्वेन्द्रियवृत्तिषु विभ्रमा यस्य, अनेनांतर्बहिर्दोषाभाव उक्तः । जनप्रकृतिसमूहं जनां प्रकृतिमर्दयतीति जनार्दनः ॥३१॥ ❀ ❀ यावत् प्रकृतिर्न पीडिता स्यात् तावत् स्वकार्यं न निवर्तयेदिति मर्यादानुसारेण अंते भगवति यत् कर्त्तव्यं तदत्र विनिरूप्यते । तत्र प्रथमं सर्वसमर्पणं ततो माहात्म्यज्ञानपूर्विका भगवति रतिः, तत आत्मसमर्पणमिति आद्यंतयोरेकैकमध्ये माहात्म्यभक्तौ नव तत्र प्रथमं सर्वसमर्पणं निरूपयति इतीति । इतिशब्दः समाप्तिवाचकः तत्परमेश्वराद्विभक्तस्य अनंतकोटिजन्मभिः यत् कृतं यदस्ति वा तद्विचार्य मे मतिरेवास्मदीयतावद्विषयिणी मया कृतं मदीयमिति पदार्थास्तु भगवदीयाः सर्वे, अतोऽस्मदीया बुद्धिरेव भगवति समर्पणीया तदाह इति । मतिरिति अंतिमोच्छ्वासपर्यंतं मदीयमिति पदार्थस्तु यास्माभिः संपादिता बुद्धिः सा च भगवति उपकल्पिता । फलार्थत्वं निवारयति वितृष्णेति । यद्यप्येवं भगवति समर्पणेन किंचित् फलं शास्त्रसिद्धं तथाप्यहमेतत् समर्पयामि ममैतत्फलं भविष्यतीति स्वयमेव वितृष्णा भवति, अतस्तामेव निषेधति भगवति ब्रह्मणि सात्वतपुंगवे यादवश्रेष्ठत्वेनाविर्भूते विगता भूमा यस्मात् अक्षरात्परस्मिन् पुरुषोत्तमस्य भगवतः कथं सात्वतपुंगवत्वं तत्राह स्वसुखमुपगते स्वपरमानंदं प्राप्त एव कचित् कदाचित् स्थानविशेषे"लोकवत्तु लीलाकैवल्यम् २।१।३३॥" इति न्यायेन विहर्तुं स्वस्यैव स्वभावरूपां प्रकृतिं सांख्यादिन्यायेन विश्वजननीं स्वयं पिता उपगच्छति तादृशे । ननु तदपि कुतस्तत्राह यद्भवप्रवाह इति, यस्माद्भगवतः प्रकृतिसंबंधात् भवस्य विश्वस्य प्रवाहः बीजांकुरवत्परंपरा न घटत उद्भव इत्यस्य विवरणं यथा सृष्ट्यर्थं तथा करोति तथा अस्मन्मुक्त्यर्थमप्येवं कृतवान् इत्यर्थः ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

इति मतिरित्यत्र । अभेदेपि शक्तिरूपत्वेन भिन्नाभिन्नतया प्रकृतिस्वरूपे विवृते तस्या उद्भवो नायाति तत्संयोगादन्यस्यैव त्वायातीत्याशयेनाहुः-न घटत इत्यादि ॥ ३२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

धर्मं प्रवदतस्तस्य भीष्मस्य स कालः प्रत्युपस्थितः सम्प्राप्तः । स इति क इत्यपेक्षायामाह-य इति । छन्देन स्वेच्छया मृत्युर्यस्य तस्य योगिनो यस्तु वाञ्छित इत्यन्वयः । सोऽपि क इत्यपेक्षायामाह-उत्तरायण इति ॥ २९ ॥ ❀ ❀ यदा स कालः प्रत्युपस्थितस्तदा सहस्रणीः युद्धे स्वसमीपस्थान् सहस्रं रथिनो नयति पालयति । यद्वा प्रतिपक्षस्थान् सहस्रं स्ववशं नयतीति तथा स भीष्मः । सहस्रिणीरिति पाठे तु सहस्रार्थवतीर्गिर उपसंहृत्य विरम्य कृष्णे मनो व्यधारयत् । तद्दर्शनैकप्रवणमकरोदित्यन्वयः । अन्ययोगिनो मीलितदृश एव मनसा भगवन्मूर्तिं प्रकल्प्य पश्यन्ति, तस्य तु कल्पनाक्लेशोऽपि नाभूदित्याशयेनाह-अमीलितदृगिति । तत्र हेतुमाह-पुरःस्थिते इति । तेन येन स्वरूपेण तत्र स्थितिः प्रार्थिता भगवताऽपि तत्स्वरूपमेव प्रकटितं इत्याह-लसदिति । लसन्तौ पीतौ पटौ यस्य तस्मिन् । चत्वारो भुजा यस्य तस्मिन् । मनोधारणेन तत्कृतार्थतायां तु न सन्देह इति सूचयन्नाह-आदि- पुरुषे इति, सर्गादिकर्त्तरीत्यर्थः । ननु मनसश्चञ्चलत्वाद्विषयान्तराकृष्टस्य तस्य कथं तत्र धारणं सम्भवतीत्याशङ्क्याह-विमुक्तसङ्गमिति

विषयान्तरतो विरक्तमित्यर्थः ।। ३० ।। ❀ ❀ विशुद्धया अपहतपाप्मभगवद्विषयत्वात् सर्वदोषनिवर्तिकया धारणया हतमशुभं भगवत्प्राप्तिप्रतिबन्धकं पापं यस्य सः । तथा तस्य भगवत ईक्षया कृपादृष्ट्यैव आशु गता निवृत्ता आयुधप्रहारजन्या व्यथा पीडा यस्य सः । निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमः विषयान्तरेषु भ्रमणं यस्य सः, भीष्मो जन्यं देहं विसृजन् त्यक्ष्यन् जनार्दनं जना माया तामर्दयति निवर्त्तयतीति तथा तं श्रीकृष्णं तुष्टावेत्यन्वयः ।। ३१ ।। ❀ ❀ स्तुतिमेव दर्शयत्येकादशभिः श्लोकैः, तत्र यत्पूर्वं कृष्णे मनो व्यधारयदिति धारणोक्ता तस्या एव प्रथमं दार्ढ्यं प्रार्थयते–इतीति । इत्येवम्भूता नानासाधनैः विशुद्धा मम मतिः सात्त्वतपुङ्गवे सर्वयादवश्रेष्ठे श्रीकृष्णे उपकल्पिता प्रतिष्ठिता भवत्विति शेषेणान्वयः । किं किञ्चित्फलजिघृक्षयैवं प्रार्थयसे इत्यपेक्षायामाह वितृष्णेति फलसङ्कल्परहितेत्यर्थः, यादवश्रेष्ठत्वेऽपि तस्मिन् मतिप्रतिष्ठायां कथं तवोद्धार इत्यपेक्षायामाह–विभूम्नीति, विगतो भूमा यस्मात्तस्मिन्, यमपेक्ष्यान्यत्र महत्त्वं नास्ति तस्मिन्नित्यर्थः । तत्र हेतुमाह–भगवतीति, ऐश्वर्यादिषड्गुणपूर्ण इत्यर्थः । तर्हि सोऽपि किं सेवकेभ्यः किञ्चिदपेक्ष्य फलं ददातीत्यपेक्षायामाह–स्वसुखमुपगते इति, स्वरूपभूतं परमानन्दं प्राप्तवति । तथाच न तस्य काचिदपेक्षेति भावः । परमानन्दस्वरूपश्चेत्तर्हि कथमस्मदादितुल्यतया प्रतीयते इत्यपेक्षायामाह–क्वचिदिति । क्वचित् वृन्दावनादिषु विहर्तुं प्रकृतिं स्वामचिन्त्यां शक्तिमुपेयुषि स्वीकृतवति । अस्मत्तुल्यतया प्रतीतावपि स्वतन्त्रत्वान्न स्वरूपतिरोधानेन अस्मदादिवत्पारतन्त्र्यमिति भावः । का सा प्रकृतिरित्यपेक्षायामाह–यदिति, यतः प्रकृतेः सकाशाद्भवप्रवाहः सृष्टिपरम्परा भवतीत्यर्थः ।। ३२ ।।

हिन्दी अनुवाद

भीष्मपितामह इस प्रकार धर्मका प्रवचन कर ही रहे थे कि वह उत्तरायणका समय आ पहुँचा, जिसे मृत्युको अपने अधीन रखनेवाले भगवत्परायण योगीलोग चाहा करते हैं ।। २९ ।। ❀ ❀ उस समय हजारों रथियोंके नेता भीष्मपितामहने वाणीका संयम करके मनको सब ओरसे हटाकर अपने सामने स्थित आदिपुरुष भगवान् श्रीकृष्णमें लगा दिया । भगवान् श्रीकृष्णके सुन्दर चतुर्भुज विग्रह पर उस समय पीताम्बर फहरा रहा था । भीष्मजीकी आँखें उसीपर एकटक लग गयीं ।। ३० ।। ❀ ❀ उनको शस्त्रोंकी चोटसे जो पीड़ा हो रही थी, वह तो भगवान्‌के दर्शनमात्रसे ही तुरंत दूर हो गयी तथा भगवान्‌की विशुद्ध धारणासे उनके जो कुछ अशुभ शेष थे, वे सभी नष्ट हो गये । अब शरीर छोड़नेके समय उन्होंने अपनी समस्त इन्द्रियोंके वृत्ति-विलासको रोक दिया और बड़े प्रेमसे भगवान्‌की स्तुति की ।। ३१ ।। ❀ ❀ भीष्मजीने कहा—अब मृत्युके समय मैं अपनी यह बुद्धि, जो अनेक प्रकारके साधनोंका अनुष्ठान करनेसे अत्यन्त शुद्ध एवं कामनारहित हो गयी है, यदुवंशशिरोमणि अनन्त भगवान् श्रीकृष्णके चरणोंमें समर्पित करता हूँ, जो सदा-सर्वदा अपने आनन्दमय स्वरूपमें स्थित रहते हुए ही कभी विहार करनेकी–लीला करनेकी इच्छासे प्रकृतिको स्वीकार कर लेते हैं, जिससे यह सृष्टिपरम्परा चलती है ।। ३२ ।।

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ।। ३३ ।।
युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ।। ३४ ।।
सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य[2] ।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु[3] ।। ३५ ।।
व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य[4] दोषबुद्ध्या[5] ।
कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य[6] मेऽस्तु ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

इदानीं श्रीकृष्णमूर्तिं वर्णयन् रतिं प्रार्थयते । त्रिभुवनकमनं त्रिलोक्यामेकमेव कमनीयं यत्तद्वपुर्दधाने रतिर्मेऽस्तु । कथंभूतं वपुः । तमालवन्नीलो वर्णो यस्य तत् । प्रातःकालिका रवेः करा इव स्वत एव गौरे पीते वरे निर्मले चांबरे यस्मिंस्तत् । अलककुलैरुपर्यावृतमाननाब्जं यस्मिंस्तत् । विजयसखे पार्थसारथौ । अनवद्याऽहैतुकी फलाभिसंधिरहिता रतिरस्तु ।। ३३ ।। ❀ ❀ विजयसखित्वमेवानुवर्णयन् रतिं प्रार्थयते । युधि युद्धे तुरगाणां खुररजस्तुरगरजस्तेन विधूम्रा धूसरास्ते च ते विष्वक्च इतस्ततश्चलंतः कचाः कुंतलास्तैर्लुलितं विकीर्णं श्रमवारि स्वेदबिंदुरूपं तेन भक्तवात्सल्यद्योतकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे ममात्मा

१. प्रा० पा०–मति० । २. प्रा० पा०–प्रवेश्य । ३. प्रा० पा०–नति० । ४. प्रा० पा०–व्यवसित० । ५. प्रा० पा०–धर्मबुद्ध्या । ६. प्रा० पा०–मेऽस्तु तस्य ।

मनोऽस्तु रमतामित्यर्थः । पुनः किंभूते । मदीयैर्निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वग्यस्य तस्मिन् । शरैरेव विलसत् त्रुट्यत्कवचं यस्य तस्मिन् ॥ ३४ ॥ ❀ ❀ किं च सपदीति । "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्" इति सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्वपरयोर्बलयोः सैन्ययोर्मध्ये रथं निवेश्य स्थिते पार्थसखे मम रतिरस्तु । तत्र स्थित्वा कृतं सख्यं दर्शयति । परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति । असौ द्रोणोऽसौ भीष्मोऽसौ कर्ण इति तत्तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवति ॥ ३५ ॥ ❀ ❀ न केवलमर्जुनस्य सपत्नायुर्हरणेनैव जयमावहत्किंत्वविद्याहरणेनापीत्याह । व्यवहिता दूरे स्थिता या पृतना तस्या मुखमिव मुखमग्रे स्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः स्वजनवधाद्विमुखस्य निवृत्तस्य । तदुक्तं गीतासु "एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥" इति कुमतिमहं हंतेत्यादिकुबुद्धिम् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

नन्विति । मतिरित्युक्ता मतिः किमाकारा तत्राह–त्रिभुवनेति । रतिः प्रेमा त्रिभुवनस्य ऊर्ध्वाधोमध्यलोकस्थजनसमुदायस्य कमनमभिलाषो यत्र तद्वपुर्दधाने । रवेः करैर्गौरवरे अतिगौरीकृते अम्बरे यत्र । तत् अर्जुनरथोपरि स्थितस्य कृष्णस्य पीतांबरद्वयं सूर्यकिरणसंपर्कादतिचाकचक्यवत्त्वेन तदानीमतिपीतं मया दृष्टं तेन पार्थसारथित्वेनोपलब्धमहासौंदर्ये कृष्णे रतिः प्रार्थनामयी मतिर्मया तस्मिन्नेवोपकल्पितेति भावः । अत्र चाग्रिमेष्वपि पद्येषु साक्षाद्वर्तिन्यपि भगवति प्रार्थनायां युष्मत्प्रयोगाभाव आस्वादितचरे सांग्रामिकवीररसावेशमये तन्माधुर्ये एव चित्तस्यासक्तिं बोधयति ॥ ३३ ॥ ❀ ❀ इत्यर्थ इति । धातूनामनेकार्थत्वादस्ते रमणार्थतापीति भावः । विभिद्यमानविलसत्पदयोर्विप्रिय इतिद्व्युपसर्गौ गतार्थ एव ध्येयः । अत्र संदर्भः–अथ प्राक्तनस्वापराधं तस्मिन्दैन्येन विज्ञापयन्नपि रतिमेव प्रार्थयते युधीति । मम निशितेत्यादिकं मायिकलीलावर्णनमेव । "एवं वदन्ति राजर्षे ऋषयः केचनान्विताः" इत्यादिविरोधात् । तथाहि स्कांदे "असंगश्चाव्ययोऽभेद्योऽनिग्राह्योऽशोष्य एव च । विद्धोऽसृगाचितो बद्ध इति विष्णुः प्रदृश्यते ॥ असुरान्मोहयन्देवः क्रीडत्येष सुरेष्वपि । मानुषान्मध्यथा दृष्ट्या न मुक्तेषु कथंचन" इति । श्रीभीष्मस्य युद्धसमये दैत्याविष्टत्वात्तथा भानं युक्तमेव । किं त्वधुना दुःस्वप्नदुःखस्येव निवेदनं कृतमिति ज्ञेयम् । किञ्च 'युधि तुरंग' इत्यादि 'मम निशित' इत्यतैर्विशेषणैस्तथाप्यर्जुनसाहाय्यापरित्यागात्तस्य भक्तवात्सल्यं दर्शितम् । स्वस्यापराधित्वेऽपि सांप्रतं तदनुगृहीतत्वञ्च । विश्वनाथस्तु–अलककुलेत्यादि यदुक्तं तन्माधुर्यमेव त्यक्तुमसमर्थः । पुनरपि विशिष्यास्वादयति । युधीति तुरगरज इति । "सुंदरे किमसुंदरम्" इति न्यायेन विष्वंच इत्यावेगसूचकं श्रमवारीति भक्तवात्सल्यद्योतकं निशितेत्यादि कंदर्परसाविष्टस्य पुंसः प्रगल्भकांतादंताघातैः सुखमेवेतिवद्युद्धरसाविष्टस्य महावीरस्य कृष्णस्य मद्बलसूचकशराघातैः सुखमेवेति नात्र मम युद्धरसोन्मत्तस्यापि प्रेमशून्यत्वं मंतव्यम् । न हि स्वप्राणकोट्याधिकप्रेयसि सुरतसमरौद्धत्यकृतनिर्भरनखरदशनाघाता वनिता प्रेमशून्या कथ्यते इति भावः । अत्र तु विभिद्यमानत्वचि न तु विभिन्नत्वचि यतो विलसद्विराजमानं कवचं यस्मिन् तस्मिन्नितीषद्भेदमात्रमुक्तम् ॥ ३४ ॥ ❀ ❀ आयुर्हरणं तु तेषां मोक्षार्थमेव "यमिह निरीक्ष्य हता गताः सरूपम्" इत्युक्तेः ॥ ३५ ॥ ❀ ❀ इत्यर्थ इति । तेषामेवाग्रे स्थितत्वादिति भावः । कुमतिं सांप्रतिकीं युधिष्ठिरस्येव तदानींतनीमर्जुनस्यापि स्वयं भगवतैवोत्थापितां तस्य नित्यपार्षदत्वान्नरावतारत्वाच्च कुमतेरसंभवाच्च जगदुद्धारकस्वतत्त्वज्ञापकश्रीगीताशास्त्रमाविर्भावयितुमिति भावः । आत्मविद्यया स्वतत्त्वज्ञानेन ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

पृतना (स्त्री) सेना यत्र । २४३ गजाः । २४३ रथाः । ७२९ अश्वाः । १२१५ पदातिकाः । एषामेकीकृतसंख्याः २४३० । इत्यमरभरती ॥ ३६–३७ ॥

श्रीमद्वीरराघवव्याख्या

प्रकृतं रूपमनुभूय मतिदार्ढ्यं प्रार्थयते–त्रिभुवनकमनं त्रिभुवनकमनीयं त्रिभुवनसुन्दरमिति यावत् तद्वपुर्दधाने विजयसखेऽर्जुनसखे श्रीकृष्णेऽनवद्या निर्दुष्टाऽनन्यप्रयोजनेति यावत् मम रतिरनुरागोऽस्तु । कथंभूतं वपुस्तमालस्येव वर्णो नीलो यस्य रवेः करः किरणसमुदाय इव गौरं वरं चांबरं यस्मिन् अलककुलैः कुन्तलजालैरावृतमाननाब्जं यस्य तथाभूतम् ॥ ३३ ॥ ❀ ❀ युद्धदशावस्थितमनुसन्धाय प्रार्थयते युधीति । कृष्णे भगवति ममात्मा मनः अस्तु दृढं भवतु तिष्ठतु । कथंभूते युधि युद्धे तुरगरजोभिरश्वशफोत्थितरजोभिर्विधूम्रैर्विधूसरैः विष्वग्विलम्बमानैः कचैरलकैः सुललितैः स्रवद्भिः श्रमवारिभिः श्रमस्वेदबिंदुभिश्चालंकृतमास्यं यस्य निशितैः शरैर्विभिद्यमाना त्वग्यस्यात एव विलसत्क्षतजेन विलसत्कवचो यस्मिंस्तत् ॥ ३४ ॥ ❀ ❀ युद्धप्रारम्भदशावस्थं रूपमनुसन्धाय प्रार्थयते–सपदि युद्धप्रारम्भसमये सख्युरर्जुनस्य वचः "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्" इत्यादिरूपं वचो निशम्य निजपरयोः पांडवकौरवयोर्बलयोर्मध्ये रथं निवेश्य स्थापयित्वा

स्थितवति अक्ष्णैव दृष्टिमात्रेणैव परसैनिकानां दुर्योधनादीनामायुर्हृतवति पार्थस्यार्जुनस्य सखा तस्मिन्मम रतिरस्तु ॥ ३५ ॥ ❀ ❀ गीतोपनिषदुपदेशावस्थं रूपमनुसंधाय प्रार्थयते व्यवहितेति। व्यवहिताया नातिदूरस्थायाः पृतनायाः शत्रुसेनायाः मुखं पुरोभागमवलोक्य दोषवशात् स्वजनवधाद्विमुखस्यार्जुनस्येति विशेष्यमध्याहर्त्तव्यं कुमतिं 'दृष्ट्वेमं स्वजनं कृष्णे'त्यादिना तेनैवाविःकृतां बन्धुहत्यया पापमाशंकमानां कुमतिमात्मविद्यया गीतोपदेशेन योऽपहृतवान् तस्य परमस्य परा मा यस्मात् स परमः सर्वाभ्यधिकस्य भगवतश्चरणयो रतिर्ममास्तु ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विजयोऽर्जुनः सखा यस्य स तथा तस्मिन्कृष्णे मम अनवद्या रागाद्यवद्यविधुरा रतिरस्तु रतिरनवद्या निर्दुष्टास्त्विति वान्वयः। कथंभूते त्रिभुवनेषु कमनं कमनीयं त्रिभुवनानां कमनमिच्छा यस्मिंस्तत्तथोक्तमिति वा, तमालपुष्पवद्वर्णो यस्य तत्तथा तमालवर्णं, वरं च तत् अम्बरं च वरांबरं नवस्य रवेरादित्यस्य करः किरण इव गौरमरुणं वरांबरं यस्य वपुषस्तत्तथोक्तं "गौरोऽरुणेऽसिते पीते स्वच्छे च परिकीर्त्यते" इत्यभिधानम्। अलककुलैः कुन्तलकुलैः आवृतमाच्छन्नमाननाब्जं यस्य तत्तथा एवंविधं वपुर्दधाने ॥ ३३ ॥ ❀ ❀ ममात्मा मनः कृष्णे अस्त्वित्यन्वयः। कथंभूते विलसच्छोभमानं कवचं यस्य स तस्मिन् विलसन्सर्पोऽनन्तः कवचं शय्यास्थानीयं यस्य स तथा तस्मिन् इति वा, अच्छेद्यत्वाभेद्यत्वेऽप्यसुरमोहनाय मम निशितैः शरैर्विभिद्यमानेव त्वग्यस्य स तथोक्तस्तस्मिन्, वीत्युपसर्गाद्भिद्यमानत्वगप्यभिद्यमानैवेति ज्ञातव्यम्। निशितशरैरप्यविभिद्यमानत्वमिति तात्पर्यार्थः विप्रिय इतिवद्, युद्धे तुरगाणां खुरनिपातोत्थितै रजोभिर्विशेषेण धूम्रवर्णैश्च तैर्विध्यद्भिः परस्परमाघ्नद्भिः कचैः केशैर्लुलितैः कलुषितैः श्रमवारिभिः श्रमनिमित्तस्वेदोदबिन्दुभिरलंकृतमास्यं मुखं यस्य स तथोक्तस्तस्मिन् ॥ ३४ ॥ ❀ ❀ पार्थसखे कृष्णे मम रतिरस्त्वित्यन्वयः। "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युते"ति सख्युरर्जुनस्य वचो निशम्य सपदि वचःश्रवणानन्तरं निजपरयोः पांडवकौरवसम्बन्धिबलयोः सैन्ययोर्मध्येरथं प्रवेश्य स्थितवति अक्ष्णा निरीक्षणेन परसैन्यानामायुर्जीवनलक्षणं हृतवति ॥ ३५ ॥ ❀ ❀ यः परमः वीरः स्वर्गं प्राप्तुं युद्धाय व्यवस्थितयोः पृतनयोः सेनयोः मुखं भीष्मादिकं निरीक्ष्य 'हत्वार्थकामांस्तु गुरूनिहैवे'ति दोषबुद्ध्या 'न योत्स्य' इत्युक्त्वा स्वजनहननाद्विमुखस्यार्जुनस्य कुमतिं दुष्टनिग्रहशिष्टपरिपालनलक्षणव्यापारबुद्धेर्विपरीतबुद्धिमशोच्यानन्वशोचस्त्वमित्यादिरूपयात्मविद्ययाऽहरत्, 'करिष्ये वचनं तवे'ति दुष्टनिर्हरणे धर्मे बुद्धिं कारितवान् मे तस्य परमस्य चरणयोः स्मरणेन ज्ञानसाधनयोरवयवविशेषयोः रतिरस्त्वित्यन्वयः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ प्राक्तनं स्वापराधं तस्मिन् दैन्येन विज्ञापयन्नपि रतिमेव प्रार्थयते युधीति। मम निशितेत्यादिकं तु मायिकलीलावर्णनमेव—'एवं वदन्ति राजर्षे ऋषयः केचनान्विताः' इत्यादिन्यायेन वास्तवत्वविरोधात्। तथाहि स्कन्दे—'असङ्गश्चाव्ययोऽभेद्योऽनिग्राह्योऽशोऽष्य एव च। विद्धोऽसृगाचितो बद्ध इति विष्णुः प्रदृश्यते॥ असुरान् मोहयन् देवः क्रीडत्येष सुरेष्वपि। मानुषान् मध्यया दृष्ट्या न मुक्तेषु कथंचने'ति। श्रीभीष्मस्य युद्धसमये दैत्याविष्टत्वात् तथा भानं युक्तमेव। किन्त्वधुना दुःखप्रदुःखस्येव तस्य निवेदनं कृतमिति ज्ञेयम्। किंच तुरगेत्यादि मम निशितेत्यन्तैर्विशेषणैस्तथाप्यर्जुनसाहाय्यापरित्यागात् तस्य भक्तवात्सल्यं दर्शितम्, स्वस्यापराधित्वेऽपि साम्प्रतं तदनुगृहीतत्वं ज्ञापितम् ॥ ३४ ॥ ❀ ❀ 'सपदीति। तत्राक्ष्णा आयुर्हरणेन प्रारब्धहरत्वमपि दर्शितम् ॥ ३५–३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु इति मतिरुपकल्पितेत्युक्ता या सा किमाकारा मतिस्तत्राह त्रिभुवनेति। विजयस्य अर्जुनस्य सख्यौ ममानवद्या फलाभिसंधानरहिता रतिः प्रेमास्तु। कीदृशे त्रिभुवनस्य ऊर्ध्वाधोमध्यलोकस्थजनसमुदायस्य कमनमभिलाषो यत्र तद्वपुर्दधाने। रवेः करैर्गौरवरे अतिगौरीकृते अम्बरे यत्र। तत् अर्जुनरथोपरिस्थितस्य कृष्णस्य पीतांबरद्वयं सूर्यकिरणसम्पर्कादतिचाकचिक्यवत्त्वेन तदानीमतिपीतं मया दृष्टं तेन पार्थसारथित्वेनोपलब्धमहासौन्दर्ये कृष्णे रतिः प्रार्थनामयी मतिर्मया तस्मिन्नेवोपकल्पितेति भावः। अत्र चाग्रिमेष्वपि श्लोकेषु साक्षाद्वर्त्तिन्यपि भगवति प्रार्थनायां युष्मत्पदप्रयोगाभावः आस्वादितचरे च सांग्रामिकवीररसावेशमये तन्माधुर्ये एव चित्तस्यासक्तिं बोधयति ॥ ३३ ॥ ❀ ❀ अलककुलैरावृतमाननाब्जं यदुक्तं तन्माधुर्यमेव त्यक्तुमसमर्थः पुनरपि विशिष्यास्वादयति युधीति। तुरगरज इति 'सुन्दरे किमसुन्दरमि'ति न्यायेन। विष्वक्च इतस्ततश्चलन्तः कचा इति आवेगसूचकम्। श्रमवारीति भक्तवात्सल्यद्योतकम्, निशितैस्तीक्ष्णैर्विभिद्यमानत्वचीति कन्दर्परसाविष्टस्य पुंसः प्रगल्भकान्तादन्ताघातैः सुखमेवेतिवद्युद्धरसाविष्टस्य महावीरस्य कृष्णस्य मद्बलसूचकशराघातैः सुखमेवेति। नात्र मम युद्धरसोन्मत्तस्यापि प्रेमशून्यत्वं मन्तव्यम्। न हि स्वप्राणकोट्यधिके प्रेयसि सुरतसमरौद्धत्यकृतनिर्भरनखरदशनाघाता वनिता प्रेमशून्या कथ्यत इति भावः। अत्र तु विभिद्यमानत्वचि नतु त्रिभिन्नत्वचि यतो विलसद्विराजमानं कवचं यस्य तस्मिन्निति ईषद्भेदमात्रमुक्तम्।

आत्मा मनः ॥ ३४ ॥ ❀ ❀ किञ्च सपदीति । 'सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितानि'ति सख्युरर्जुनस्य वचः । परस्य दुर्योधनस्य सैनिकानां आयुरक्ष्णा असौ भीष्मः असौ द्रोणः असौ कर्ण इति तत्तत्प्रदर्शनव्याजेन दृष्ट्या एव हृतवति तेन च प्रारब्धहरत्वमपि दर्शितम् । 'यमिह निरीक्ष्य गता गताः सरूपमि'ति तेषां मोक्षोक्तेः ॥ ३५ ॥ ❀ ❀ ततश्च व्यवहिता दूरे स्थिता या पृतना सेना तस्या मुखमिव मुखम् अग्रे स्थितान् भीष्मादीन्निरीक्ष्येत्यर्थः, स्वजनवधाद्विमुखस्येति यदुक्तम् "एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः" इति कुमतिं सांप्रतिकीं युधिष्ठिरस्येव तदानीन्तनीमर्जुनस्यापि स्वयं भगवतैवोत्थापितां तस्य नित्यपार्षदत्वान्नरावतारत्वाच्च कुमतेरसम्भवात् जगदुद्धारकस्वतत्त्वज्ञापकश्रीगीताशास्त्रमाविर्भावयितुमिति ज्ञेयम् । आत्मविद्यया स्वनिष्ठज्ञानेन ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अधुना श्रीमूर्तिं वर्णयन् भक्तिं प्रार्थयते । विजयसखेऽर्जुनसखे श्रीकृष्णे अनवद्या श्रीकृष्णेतरविषयप्रयोजनरूपदोषशून्या मे रतिरनुरक्तिरस्तु । कथंभूते त्रिभुवनकमनं त्रिभुवनेषु ऊर्ध्वाधोमध्यलोकेषु कमनं कमनीयमतिसुंदरं तमालवर्णं तमालस्येव नीलो वर्णो यस्य तत्, रवेः कराः किरणा इव गौरे श्रेष्ठे चांबरे यस्मिन्, अलककुलैः कुंतलकलापैरावृतमाननाब्जं यस्य तदप्राकृतं वपुर्दधाने ॥ ३३ ॥ ❀ ❀ युधि संग्रामे तुरगशफोत्थितरजोभिर्विधूम्रा विधूसराः रथगतिवशाद्विष्वंचः सर्वतश्चलंतः कचाः कुंतलास्तैर्ललितानि विकीर्णानि श्रमजातानि बिंदुभूतानि भक्तवात्सल्यसूचकानि वारीणि तैरलंकृतमास्यं यस्य तस्मिन् गिरीनपि भेत्तुं शक्तानां महारथानां निशितैः शरैः विभिदि विगतभेदे तत्र हेतुगर्भं विशेषणम् अमानत्वचि वेदेतरप्रमाणाविषयविग्रहे, त्वक्शब्दस्य विग्रहोपलक्षणत्वात् शरवैयर्थ्यं कैमुतिकन्यायेन दर्शयति विलसत्कवचे इति, अखंडतया विलसत् कवचं यस्य तस्मिन् श्रीकृष्णे मम आत्मा समर्पितोऽस्तु ॥ ३४ ॥ ❀ ❀ "सेनयोरुभयोर्मध्ये रथं स्थापय मेच्युते"ति सखिवचो निशम्य सपदि तत्क्षणमेव पांडवकौरवसैन्ययोर्मध्ये रथं निवेश्य स्थितवति, कौरवसैनिकानामायुः आयुषोपलक्षणेन पुण्यकीर्त्यादिकं सर्वमक्ष्णैव हृतवान् अर्जुनसखे मम रतिरस्तु ॥ ३५ ॥ ❀ ❀ व्यवहितायाः किंचिद्व्यवधानेन स्थितायाः पृतनाया मुखं सेनापतित्वेनाचार्यत्वादिनाऽग्रभागं भीष्मद्रोणादिसमूहं निरीक्ष्य स्वजनवधाद्विमुखस्य न योत्स्ये स्वजनं कृष्णेत्यायुक्त्वा निवृत्तस्यार्जुनस्य कुमतिं स्वधर्मत्यागस्वतंत्रकर्तृत्वदेहात्मबुद्धित्वादिविषयामात्मविद्यया श्रीमुखगीतोपदेशेनाहरत् यस्तस्य चरणयोर्मे रतिरस्तु ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इदानीं रतिं प्रार्थयते त्रिभुवनकमनमिति । कदाचिदभेदादंतर्यामिणि स्वरूपे वा रतिं प्रार्थयेदित्याशंक्याह वपुर्दधान इति । तत्र प्राकृतानामपि प्रतीतिः शरीरीति तादृश एव मम रतिरस्तु प्रमाणबलमपेक्ष्य केवलं प्रमेयबलेनैव मम यत् कार्यं भवति तदेव भवत्विति केवलं प्रतीत्या यन्मतं तदेवानुवदति वपुर्दधान इति । विषयसौंदर्येणैव चित्तं प्रविशत्विति रूपवर्णनम् । त्रिभुवने त्रैलोक्ये तदेव कमनं लोकदृष्ट्यैव सुन्दरं न तु शास्त्रसंस्कारेण प्रीत्या तथाविधं तथा सति बुद्ध्या फलं तदल्पं लौकिके तु वस्तुनः शक्त्या फलं तमालवर्णमिति तमालवद्वर्णो यस्यौत्पत्तिको निरतिशयः सदैकविधः तमालः वृक्षेषु नीलवर्णः, अनेन वर्णेनैतज्ज्ञापितं सर्वथा परहितजनकमिति रविकरगौरवरांबरमिति । रविकरवत् यद्गौरं वरमंबरं यस्य भगवतः सर्वमुक्त्यर्थं प्रादुर्भूतस्य पीताम्बरमाच्छादकमिति दुष्टत्वमाशंक्य तन्निवृत्त्यर्थमाह रविकरेति । सूर्यरश्मयो घटादौ पतिताः प्रकाशयंत्येव न तदाच्छादका भवन्ति तथा पीताम्बरं परमानन्दं प्रकाशयति यथा वेदार्थं प्रकाशयत्येव गौरमीषद्रक्तपीतं नीलो वर्णो वर्णान्तरेण प्रकाश्यत इति । वेदानां प्रार्थनयाऽस्मदावेष्टितो भवान् तिष्ठतु इति अस्त्वित्युक्ते पीतांबरत्वमापन्नाः भगवंतमाच्छाद्य तिष्ठन्तीति वररूपमम्बरे । अनेन व्यापकताप्युक्ता अप्राकृतत्वं च, रविकरैर्वा गौरवरमाकाशः वपुरिति आकाशशरीरं ब्रह्मेत्युक्तं भवति । पूर्वविशेषणद्वयमाकाशपक्षेऽपि स्पष्टमेव-अलककुलावृताननाब्जमिति । अलकाः चूर्णकुंतलाः तेषां कुलैः आवृतमाननाब्जं मुखकमलं यस्य अलमत्यर्थं ककुलैरानंदसमूहैः आवृतमासमंताद्वेष्टितं करचरणादिरूपेण स्थितमाननमासमंतात् ननं सद्रूपम् अब्जसूर्यचन्द्रनक्षत्रलक्ष्मीविद्युन्मेघादिरूपमानंदावयवे आकाशशरीरे ब्रह्मणि दंतनेत्रभावापन्नानि सूर्यादीनि अस्येत्युक्तं भवति । वममृतं पुष्णाति सर्वेभ्यः प्रयच्छतीति वपुः परमानंदस्वरूपम् अलमत्यर्थं कं येषां ते ब्रह्मविदः, तेषां कुलैर्वात एव वाते तैरावृतमग्निब्राह्मणरूपमाननमब्जमाननकमलं यस्य सः सनकादिभिर्ब्राह्मणैर्देवैर्ज्ञानादिभिश्च पत्रेषु स्थितैः आवृतं कर्णिकारूपमासनमित्युक्तं भवति, अब्जपदेन च सूर्यादिवेष्टनसहितत्वं लक्ष्यते, एतादृशं वपुः दधाने तादृशोऽपि भक्तवत्सल इति । विजयसखे सख्यपर्यंतं दत्तवानिति विजयोऽर्जुनः विशिष्टो जयो येषामंतःकरणादिजेतारः ते सखायो यस्य तेषां वा सखा तत्र रतिः प्रीतिः अनवद्या अलौकिकी परमा प्रीतिरलौकिकी सर्वदुर्लभा भगवदेकनिष्ठा तत्त्व एव भवतीति नोत्तरत्र विरोधः ॥ ३३ ॥ ❀ ❀ एवं सत्त्वमिश्रसत्त्वावस्था उक्ता, रजोमिश्ररजोवस्थामाह युधीति । सर्वावस्थासु रतिः प्रार्थ्यते, युद्धे तुरगाणामश्वानां खुराग्रविक्षतरजोभिः विशेषेण धूम्राः धूसरवर्णाः विष्वक-

परितो ये कचाः तैः लुलितं यच्छ्रमवारि तेनालंकृतमास्यं यस्य नीलमुखाब्जे मुक्ताफलसदृशबिन्दवः शोभातिशयं कुर्वंति सा भीष्मस्य त्वक् चर्मादिकं युद्धविशेषणं वा, राजसराजसावस्थायाः शोभैव सा, अथवा युद्धार्थमिंद्रियादिभिः सह तुरगाणां वेदसूर्यादीनां वा यद्रजः कामः रजोगुणो वा विधूम्रा विशेषेण धूसराः ये सकामाः कालवशाद्वा सकामाः कालपरिच्छेदका ह्यग्न्यादयः अग्निर्वाद्वैत्यादिश्रुतिभिः तेषां तुरगत्वं वेदानां चक्रिपुत्रदाहादौ ते विष्वक्कचाश्च ब्रह्मविदः सूर्यादिमार्गगामिनः भिन्ना वा तदा तेषां च समुच्चयः इतरेतरयोगो वा तेन लुलिताः मिलिताः ऐक्यभावं वा प्राप्ताः ते च ते श्रमवार्यलंकृताश्च गंगाजलपूताः ब्रह्मशिवादयः तेऽपि आनने यस्येति आसमन्ताद्रूपे वा अनेन महासामर्थ्यं सूचितं कालरूपत्वं च, किंच मे मम अहंकारविशेषेण या निशा तामिताः अहंकारेणाज्ञानं प्राप्ता इति यावत् ते च ते शराश्च परभेदकाः तैर्विशेषेण भिद्यमाना त्वचः छंदांसि यस्येति यस्माद्वा, पाषंडप्रवृत्तौ कलौ वा संजाते गत्यंतराभावात् भगवतश्च तद्दोषाभावे हेतुः विशेषेण लसत्कवचं धर्मादित्रयं यस्य एतादृशे कृष्णे आत्मा अंतःकरणं मेऽस्तु। भक्तिर्हि अंतःकरणसाध्या आत्मसाध्या वा तदुभयं भगवति चेत्तदा भक्तिस्तत्र भवति। अतः पूर्वश्लोकार्थे अयं हेतुः ॥ ३४ ॥ ❀ ❀ तृतीयावस्थामाह सपदीति। सपदि तत्क्षणमेव सखिवचोऽर्जुनस्य वचः "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युते"ति निजपरयोः सेनयोर्मध्ये पक्षपातोऽन्यार्थेऽन्यघातनं च तृतीयो गुणः परसैनिकानामायुश्च अक्ष्णा कालदृष्ट्या पृथायाः पुत्रस्य च सख्यौ पूर्ववन्मतिरस्तु ॥ ३५ ॥ ❀ ❀ सत्त्वमिश्ररजोवस्थामाह व्यवहितेति। व्यवहिते दूरे स्थिते ये पृतने विशेषेण अवहिताश्चेति वा मुखमग्रिमभागः तत्र बांधवा एव तिष्ठंति तद्वधव्यतिरेकेण न साधारणवधोऽपि संभवति, अतः स्वजनवधमकृत्वा निवृत्तः परहिंसादोष इति। नापितेन क्षौरवदत्र समाधानम् भारायमाणाः क्षत्रियाः श्मश्र्वादिरूपाः अर्जुनश्च नापितरूपः, आत्मविद्या स्वस्य विद्या ममैव ह्रियते मम च हितं ते मयि जडांश एव दूरीक्रियते मुक्तिदानार्थमिति तस्मादेवंविधे न दोषः। अत एव गुरुत्वाच्चरणरतिं प्रार्थयते परो मीयतेऽनेनेति परमः, तस्येति स एव परः तदवस्थां प्राप्तस्येति वा ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

त्रिभुवनेत्यत्र। स्वरूप इति। जीवात्मरूपे। तथा सतीति। शास्त्रसंस्कारेण सौन्दर्ये सति। औत्पत्तिक इत्यादि। एतेन 'श्यामाच्छबलं प्रपद्ये' इति श्रुत्युक्तरूपता निबन्धोक्तरीत्या स्मारिता। अनेनेति। वृक्षसम्बन्धिना। पीताम्बरस्य मायारूपत्वे प्रकाशकत्वासम्भवाद्विशेषणबलाद्विवक्षितं स्वरूपमाहुः तथा वेद इत्यादि। सूर्यो हि त्रय्यात्मरूपात्मना घटादीन् प्रकाशयति तथेत्यर्थः। पीताम्बरस्य वेदत्वं तु 'वासश्छन्दोमयं पीत' मिति द्वादशस्कन्धवाक्याद्बोध्यम्। स्वरूपाच्छादकत्वेन। उक्त इति। वरे उक्ते। अनेनेति। भगवदावरकत्वकथनेन स्पष्टमिति। अवकाशदानेन प्रतीत्या च स्पष्टमित्यर्थः। ननमिति। न विद्यते नः निषेधो यस्येति ननम्। त एव वा त इति। ते ब्रह्मविद एव वा ते। कुलाः कुं संस्कृतपृथिव्यात्मकं शरीरं लान्ति गृह्णन्तीत्यर्थः। अग्निब्राह्मणरूपमिति। अग्निरूपं ब्राह्मणरूपं चेत्यर्थः। अग्नेरासनत्वं च। 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः। वह्निमध्ये स्थितं सत्त्वं सत्त्वस्यान्तः स्थितोऽच्युत' इति मैत्रायणीयश्रुतौ 'वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलमि'त्येकादशस्कन्धे सिद्धम्। नन्वनवद्यरतिप्रार्थनस्योत्तमाधिकारे सम्भवात्तथात्वे 'मम निशिते' त्याद्युत्तरग्रन्थविरोध इत्यत आहुः भगवदित्यादि। तरव इति। अन्तःकरणादिजेतृत्वे। तथा च तदानीं तदभावान्न विरोध इत्यर्थः। ननु तदानीं तदभावे इदानीं कथमीदृशो भाव इत्यत आहुः एवमित्यादि। तथा च भगवदवस्थाभेदादेवैवं भाव इत्यर्थः। एतस्याः सात्त्विकसात्त्विकीत्वं तु सर्वकमनीयतया सुखजनकत्वेन प्रकाशकत्वेन च सत्त्वकार्यकरणाज्ज्ञेयम् ॥ ३३ ॥ ❀ ❀ युधीत्यत्र। भक्तश्रवणकटुकत्वाद् दूरान्वयेन प्रकारान्तरमाहुः युद्ध इत्यादि। ननु रजोधूसरत्वादिकं शोभाजनकत्वाभावान्न रतिजनकमिति कुतस्तद्वर्णनमत्रेत्याकाङ्क्षायामाहुः राजसेत्यादि। परोक्षवादेन कालरूपत्वबोधनाय च पक्षान्तरमाहुः अथवेत्यादि। सूर्यादीनां तुरगत्वे मानमाहुः अग्निरित्यादि। श्रुतिस्तु 'अग्निर्वा अश्वो वायुः सप्तिः आदित्यो वाजी एताभिरेवास्मै देवताभिर्देवरथं युनक्ति' इति ब्राह्मणप्रथमकाण्डीयतृतीयप्रपाठकषष्ठानुवाके वाजपेयप्रकरणेऽस्ति। ते च त इत्यादि। 'यदि प्रयास्य' न्नित्यादिनोक्ताः क्रममुक्त्यधिकारिण इत्यर्थः। भिन्ना वेति। सकामाः ब्रह्मविदश्चेत्यर्थः। च समुच्चय इति। चोत्र न निपातरूपः समुच्चयेऽव्ययत्वस्य वैकल्पिकत्वात्। 'चश्चन्द्रदस्युशोभासु पुंसि पक्षे समुच्चये। अथार्थे वाक्यविस्तारे प्रसङ्गे पादपूरणे ॥ अन्योन्यार्थे समाहारे मर्यादायामनुक्रमे। पुनरर्थेऽव्ययं पक्षादुत्तरेषु व्यवस्थित' इत्येकाक्षरकोशे तथोक्तत्वात्। इतरयोगार्थत्वपक्षे यद्यप्यव्ययत्वं कोश उक्तम्, तथापि तुना अपिनेत्यादिवदत्र नामत्वमेव चस्य विवक्षणीयम्। आनने यस्येति। भक्ष्यभूता यस्येत्यर्थः। सद्रूप इति। अस्मिन् पक्षे बाहुलकात्ककारस्य यकार अकारात् पूर्वभावश्च बोध्य इत्यर्थः। महासामर्थ्यमिति। 'यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती' ति कम्पनाधिकरणविषयवाक्यश्रावितं तदित्यर्थः। पूर्वश्लोकार्थ इति। अनवद्यभक्तिप्राप्तिरूपेण ॥ ३४ ॥ ❀ ❀ सपदीत्यत्र। तृतीयो गुण इति। तमो गुणः। पूर्ववदिति। तादृशत्वेपि भक्तवत्सल इत्यर्थः ॥ ३५ ॥ ❀ ❀ व्यवहितेत्यत्र। विहिता इति। विशेषेण हिताः। आत्मविद्यास्वरूपमाहुः ममैव क्रियेत्यादि। 'मत्तः सर्वं प्रवर्तते' 'यदा यदा हि धर्मस्य' 'वासांसि जीर्णानि' इत्यादिवाक्यान्यत्रोदाहरणत्वेन बोध्यानि। अस्य परमत्वे परः को वेत्यत आहुः स एव पर इत्यादि। तथा च परत्वेपि परमत्वं प्राप्तस्येत्यर्थः। अत्रापि 'मत्तः परतरं

नान्यत्' 'मत्तः स्मृतिर्ज्ञानमपोहनं च' त्यादि द्रष्टव्यम् । एवं रूपभेद इवायातीत्यरुच्या पक्षान्तरमाहुः तदवस्थां प्राप्तस्येति । आत्मविद्योपदेशेन युद्धकारणेन चास्या अवस्थायाः सात्त्विकराजसत्वं ज्ञेयम् ॥ ३६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

इदानीं परमपुरुषार्थरूपां तस्मिन् रतिं प्रार्थयते–त्रिभुवनेति । विजयोऽर्जुनः । यद्वा विशिष्टो जयो येषां ते विजया विनिर्जितान्तःकरणाः सखायो यस्य तस्मिन् श्रीकृष्णे मे ममाऽनवद्या फलाभिसन्धिरूपकापट्यरहिता रतिरनुरागोऽस्त्वित्यन्वयः । तस्यैव भयङ्करं नरसिंहादिरूपान्तरमप्यस्ति तद्व्यावृत्त्यर्थमाह–त्रिभुवनेति । त्रिभुवनकमनं त्रिलोक्यामेकमेव कमनं कमनीयमतिसुन्दरं वपुर्दधाने इत्यन्वयः । सुन्दरत्वमेव स्पष्टयति–तमालवन्नीलो वर्णो यस्य तत् । प्रातःकालीना रवेः करा इव स्वत एव गौरेऽपीते वरे निर्मले अम्बरे वस्त्रे यस्मिंस्तत् । पीताम्बरस्य परमानन्दस्वरूपाच्छादकत्वमाशङ्क्याह–रविकरेति । यथा रविकरा घटादौ पतितास्तत्प्रकाशका एव, न त्वाच्छादकास्तथा पीताम्बरमपि स्वरूपसौन्दर्यप्रकाशकमेव न त्वाच्छादकमिति भावः । अलककुलैः कुन्तलसमूहैरुपर्यावृतमाननाब्जं यस्मिंस्तत् ॥ ३३ ॥ ❀ ❀ विजयसखित्वमेवानुवर्णयन् पुना रतिं प्रार्थयते–युधीति, युधि युद्धे यत्तुरङ्गाणां खुररजस्तेन विधूम्रा धूसरास्ते च विष्वञ्चः इतस्ततश्चलन्तः कचाः कुन्तलास्तैर्लुलितं विकीर्णं श्रमवारि स्वेदबिन्दुरूपं तेन भक्तवात्सल्यद्योतकेन अलंकृतमास्यं यस्य तस्मिन् । मम निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वग् यस्य तस्मिन् । अत एव क्षतजेन विलसच्छोभमानं कवचं यस्य तस्मिन् श्रीकृष्णे ममात्मा मनोऽस्तु रमतामित्यर्थः ॥ ३४ ॥ ❀ ❀ तस्य भक्तवात्सल्यं स्मरन् पुनस्तस्मिन् रतिं प्रार्थयते–सपदीति । सख्युरर्जुनस्य 'सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतान्निरीऽक्षेहं योद्धुकामानवस्थितान्' इति वचो निशम्य श्रुत्वा सपदि शीघ्रमेव स्वपरबलयोः पाण्डवकौरवसेनयोर्मध्ये रथं निवेश्य स्थापयित्वा स्थितवति पार्थसखे अर्जुनसारथौ मम रतिरस्त्वित्यन्वयः । तत्र स्थित्वा कृतं सख्यं दर्शयति–परेति । परस्य दुर्योधनस्य सैनिकानामायुः अक्ष्णा असौ भीष्मः असौ द्रोणः असौ कर्ण इति तत्तत्प्रदर्शनव्याजेन कालदृष्ट्यैव हृतवति, आहृत्यार्जुनस्य विजयं कृतवतीत्यर्थः ॥ ३५ ॥ ❀ ❀ न केवलमर्जुनस्य सपत्नायुर्हरणेन विजयमेव सम्पादितवान् किन्तु गीतोपदेशेनापि तस्यान्येषामिदानीन्तनानां चाविद्यापहरणेन संसारविजयमपि सम्पादितवानिति भगवतः परमोपकारं स्मरंस्तच्चरणरतिं प्रार्थयते–व्यवहितेति । व्यवहिता किञ्चिद्दूरे स्थिता या पृतना कौरवसेना तस्या मुखमिव मुखमग्रे स्थितान् भीष्मद्रोणादीन्निरीक्ष्य दोषबुद्ध्या पापभयेन स्वजनवधाद्विमुखस्य अर्जुनस्य कुमतिं अहं हन्ता एते मदीया इति देहादौ अहम्ममाभिमानरूपाम् अविद्यां य आत्मविद्यया गीताशास्त्रोपदेशेन अहरत्तस्य परमस्य पुरुषोत्तमस्य चरणरतिर्मे ममास्त्वित्यन्वयः ॥ ३६ ॥

हिन्दी अनुवाद

जिनका शरीर त्रिभुवनसुन्दर एवं श्याम तमालके समान साँवला है, जिसपर सूर्यरश्मियोंके समान श्रेष्ठ पीताम्बर लहराता रहता है और कमल-सदृश मुखपर घुँघराली अलकें लटकती रहती हैं, उन अर्जुनसखा श्रीकृष्णमें मेरी निष्कपट प्रीति हो ॥ ३३ ॥ मुझे युद्धके समयकी उनकी वह विलक्षण छबि याद आती है । उनके मुखपर लहराते हुए घुँघराले बाल घोड़ोंकी टापकी धूलसे मटमैले हो गये थे और पसीनेकी छोटी-छोटी बूँदें शोभायमान हो रही थीं । मैं अपने तीखे बाणोंसे उनकी त्वचाको बींध रहा था । उन सुन्दर कवचमण्डित भगवान् श्रीकृष्णके प्रति मेरा शरीर, अन्तःकरण और आत्मा समर्पित हो जाय ॥ ३४ ॥ ❀ ❀ अपने मित्र अर्जुनकी बात सुनकर, जो तुरंत ही पाण्डव-सेना और कौरव-सेनाके बीचमें अपना रथ ले आये और वहाँ स्थित होकर जिन्होंने अपनी दृष्टिसे ही शत्रुपक्षके सैनिकोंकी आयु छीन ली, उन पार्थसखा भगवान् श्रीकृष्णमें मेरी परम प्रीति हो ॥ ३५ ॥ ❀ ❀ अर्जुनने जब दूसरे कौरवोंकी सेनाके मुखिया हम लोगोंको देखा, तब पाप समझकर वह अपने स्वजनों के बधसे विमुख हो गया । उस समय जिन्होंने गीताके रूपमें आत्मविद्याका उपदेश करके उसके सामयिक अज्ञानका नाश कर दिया, उन परमपुरुष भगवान् श्रीकृष्णके चरणोंमें मेरी प्रीति बनी रहे ॥ ३६ ॥

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ३७ ॥
शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः ॥ ३८ ॥
विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ।
भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः सरूपम् ॥ ३९ ॥
ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य गोपवध्वः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मम तु महांतमनुग्रहं कृतवानित्याह द्वाभ्याम्। स्वनिगममशस्त्र एवाहं साहाय्यमात्रं करिष्यामीत्येवंभूतां स्वप्रतिज्ञां हित्वा श्रीकृष्णं शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञामृतं सत्यं यथा भवति तथा अधि अधिकां कर्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः सन् योऽभ्ययादभिमुखमधावत् इभं हंतुं हरिः सिंह इव किंभूतः धृतो रथचरणश्चक्रं येन सः, तदा च संरंभेण मानुष्यनाट्यविस्मृतेरुदरस्थसर्वभूतभुवनभारेण प्रतिपदं चलद्गुश्चलंती गौः पृथ्वी यस्मात्सः। तेनैव संरंभेण पथि गतं पतितमुत्तरीयं वस्त्रं यस्य स मुकुंदो मे गतिर्भवत्वित्युत्तरेणान्वयः॥ ३७॥ ❀ ❀ एवं यदाभ्ययात्तदा स्मयमानस्याततायिनो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्हतोऽतो विशीर्णदंशो विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतो व्याप्तः सन्प्रसभं बलाद्वारयंतमर्जुनमप्यतिक्रम्य मद्वधार्थमभिससाराभिमुखं जगाम। एवं यो लोकप्रतीत्यार्जुनपक्षपातीव लक्षितो वस्तुतस्तु ममैवानुग्रहं कृतवान्यन्मद्भक्तेनोक्तं वचो मा मृषास्त्विति स भगवान्मे गतिर्भवत्वित्यर्थः॥ ३८॥ ❀ ❀ तदेवमन्यायैरपि भृत्यरक्षाव्यग्रे कृष्णे रतिमाशास्ते। विजयोर्जुनस्तस्य रथ एव कुटुंबमकृत्यशतैरपि रक्षणीयो यस्य तस्मिन्। आत्तं तोत्रं प्रतोदो येन तस्मिन्। धृताश्च ते हयानां रश्मयः प्रग्रहास्ते संति यस्य तस्मिन् "व्रीह्यादिभ्यश्च" इत्यनकारांतादपि रश्मिशब्दादिनिः। तच्छ्रिया तया सारथ्यश्रियेक्षणीये शोभमाने। मुमूर्षोर्मर्तुमिच्छोः। नन्वन्यायवर्तिनि किमिति रतिः प्रार्थ्यतेऽत आह भगवत्यचिंत्यैश्वर्ये तदाह। इह युद्धे हताः सर्वे यं निरीक्ष्य सरूपं तत्समानं रूपं गताः प्राप्ता इति दिव्यदृष्ट्या पश्यन्नाह॥ ३९॥ ❀ ❀ क्षत्रधर्मेण युध्यमानास्तत्सरूपं प्रापुरित्येतन्न चित्रं यतो मदांधा अपि प्रापुरित्याह। ललितगतिश्च विलासश्च वल्गुहासादिश्च मंजुगत्यादिभिरात्मीयैस्तदीयैर्वा कल्पित उरुर्मानः पूजा यासां ताः। अत उत्कटेन मदेनांधा विवशा अत एव तदेकचित्तत्वेन तस्य कृतं कर्म गोवर्धनोद्धरणादिकमनुकृतवत्यो गोपवध्वो यस्य प्रकृतिं स्वरूपमगन्नगमन्। मकारलोपस्त्वार्षः। किल प्रसिद्धम्। तस्मिन्मे रतिरस्त्विति पूर्वेणैवान्वयः॥ ४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वस्मादपि स्वभक्तमुत्कर्षयतीति यत् श्रुतं तन्मया स्वस्मिन्नेवानुभूतमित्याह—द्वाभ्याम्। स्वनिगमेति। यद्वा ऋतमित्यजहल्लिंगम् "ऋतं च सूनृता वाणी" इति भगवदुक्तेः। रथस्थः सन्नेवावप्लुत इत्यतिलाघवेनावप्लुतिमतस्तस्य रथाद्विश्लेषः केनापि न लक्षित इति भावः। अलक्षितप्रकाशेनैकेन रथरक्षार्थं स्थित एवेति वा। ऋतमिति। सा लीला तव स्वाभाविक्येव, न तु मदनुरोधेनैव कृतेति भावः। अत्र कृष्णेन स्वभक्तवात्सल्यगुणस्य दुस्त्यजत्वादर्जुनस्य युद्धासामर्थ्ये सति स्वप्रतिज्ञामपि त्यक्त्वा स्वयमेवार्जुनस्य रक्षार्थं शस्त्रेण योत्स्यत एव। तच्चार्जुनस्यासामर्थ्यप्रापणमन्यैर्दुःशक्यमित्यतः क्षणमर्जुनं पराभूयास्य युद्धं भक्तवात्सल्यद्योतकं द्रक्ष्यामीति भीष्मस्य मनोरथसिद्ध्यर्थमेव प्रतिज्ञेत्यतः स्वप्रतिज्ञाभंगेनार्जुने स्वप्रेमाणं तं दर्शयित्वा भीष्मं प्रमोद्य तस्योत्कर्षं च लोके विख्यापयामासेति तत्त्वम्। यच्चोक्तं विस्मृतमनुष्यनाट्यत्वमिति तच्च भगवतो विस्मृतेरसंभवादित्थं समाधेयम्। भगवतः प्रतिज्ञाहानिं निरीक्ष्याहो अयं मद्भारहरणप्रतिज्ञामपि हास्यतीति भूः कंपिता। तदाश्वासनाय भगवता स्वोत्तरीयं तत्र पातितं त्वं मा भैरिति शिरसि हस्तनिधानमिव वस्त्रं तदुपरि न्यस्तमिति ध्येयम्। अत्र "निगमो वाणिजे पुर्यां कटे वेदे प्रतिश्रुतौ" इत्यभिधानात्॥ ३७॥ ❀ ❀ किञ्च यदैव रथाद्भूमाववप्लुतस्तदैव क्षतजै रुधिरैः परिप्लुतः सांग्रामिकरुधिरनद्या बिंदुव्याप्तः। ननु कवचस्य विद्यमानत्वात्कथं तथात्वं तत्राह—मम शितविशिखैस्तीक्ष्णशरैर्हतस्य संरंभसुखवर्द्धनार्थं तदपि मया हन्यते स्मैवेति भावः। यतो विशीर्णकवचः प्लवनात्प्रागेवाभवदित्यर्थः। प्रसभमद्य स्वहस्तेनैव भीष्मं वधिष्यामीत्यभिप्रायेणेत्यर्थः। अभिससारेत्यत्राभिशब्देनाभिसरंतं नायकमालोकितवत्या नायिकाया इव तदानीं मम सुखमपारमेवाभूदिति द्योत्यते। सोऽन्येषां मुकुन्दो मुक्तिप्रदोऽपि मम तु गतिस्तथाभूतत्वेनैव प्राप्यो भवतीत्यर्थ इति। हे कृष्ण त्वामहमेतदेव प्रार्थये इति भावः॥ ३८॥ ❀ ❀ ईक्षणीये वामहस्तेऽश्वधारणरज्जुर्दक्षिणहस्ते प्रतोदः मुखारविंदे हुंहुमिति तन्नोदनशब्द इति शोभया यन्माधुर्यमीक्षणीयं तन्मयैव तदा स्वचक्षुर्भ्यामीक्षितम्, न त्वर्जुनेनापीति भावः। मुमूर्षोरिति। अत एवाहं संप्रति मर्त्तुमिच्छामि। यन्मृत्वा तदेव माधुर्यं मुहुः द्रक्ष्यामि। जीवंस्तु कथं तद्द्रष्टुं प्राप्स्यामि प्रकटप्रकाशे तस्या लीलाया भगवता समाप्तीकृतत्वादिति भावः। अत्र म्रियमाणस्येत्यनुक्त्वा सन्प्रत्ययेनेच्छाधीनमृत्योर्भीष्मस्य भगवतः सकाशादपि तल्लीलायामतिलोभो व्यज्यते। तेन च सा युद्धलीलापि नित्येत्यन्यस्या लीलाया नित्यत्वे कैमुत्यमानीतम्। सत्यं तस्यामेव मे सारथ्यलीलायां त्वमत्यासक्तो यत्प्रतिपद्यमेव तामास्वादयंस्तामेवोद्दिदृक्षुस्तल्लीलाविशिष्ट एव मयि रतिं प्रार्थयसे। किं तु संप्रति मृत्वैवं तल्लीलाप्राप्तौ तव किं प्रमाणमित्यत्र "मरणे या मतिः सा गतिः" इति प्रसिद्धात्प्रमाणादपि तव दर्शनमेव परं प्रमाणमित्याह—यमिति। यं निरीक्ष्य हता युद्धेऽन्येनापि हताः संतः आसुरस्वभावा अपि तादृशज्ञानहीना अपि स्वरूपं सायुज्यमुक्तिं प्राप्ताः। अहं तु भक्तस्तत्रापि मरणकाले तादृशमतिमांस्त्वां साक्षाद् दृष्ट्वा मृत्वा कथं न तां लीलां प्राप्स्यामीति। अत्र नरसारथ्यमनधिकारिभ्योपि सायुज्यदायित्वमिति युगपदेवानैश्वर्यमहैश्वर्यस्वीकारलक्षणं महामाधुर्यं सर्वभगवत्स्वरूपासाधारणमेव तदानीमुदितमिति ज्ञेयम्। संदर्भस्तु—मर्यादातिक्रमेप्यदोषाय सामर्थ्य-

माह भगवतीति । "यथा रुद्रोऽधिजं विषम्" इति न्यायात् तदतिक्रमे च स्वाभाविकं कारुण्यमेव कारणमिति दर्शयति । रथे कुटुम्बत्वारोपस्तु सर्वथा रक्षणतात्पर्यक एव । "वृद्धौ च मातापितरौ भार्या साध्वी शिशुः सुतः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥" इति स्मृत्युक्तन्यायेनेत्यर्थः ॥ ३९ ॥ ❀ ❀ अतः प्राप्तोरुमानत्वात् । अत एवोन्मदांधत्वादेव । अत्र विश्वनाथः-ननु मत्सारथ्यसंबंधिन्यै लीलायै सर्वतत्त्वज्ञोपि त्वं स्पृहयसे सोर्जुन एव तर्हि मम सर्वेषु प्रेमवत्परिकरवृंदेष्वेको मुख्य इति निर्द्धार्य्यते । मैवम्, ततोर्जुनादप्यतिमुख्यतमाः सर्वतोपि प्रेमोत्कर्षवंतो ये तव प्रियजना वर्त्तंते न तेषां पदवीं प्रार्थयितुमपि कोपि साहसं धत्ते । भवतु, तदपि तदुद्देशेनाप्यस्मिन्नंतकाले कृतार्थीभवामीत्याह-ललितगतिश्च रासनृत्यादिवैदग्धी कायिकी विलासश्च धीरलालित्यादिवैदग्धी मनसवल्गुहासश्च परिहासवैदग्धी वाचिकी प्रणयनिरीक्षणं च प्रेममयसर्वभावव्यंजककटाक्षवैदग्धी चाक्षुषी च तैरुपकल्पितो दत्त उरुमान आदरः पूजा याभ्यस्ताः । तेन स्वस्मिंस्ताः प्रसादयितुं स्वीयानसाधारणान्सर्वानेव साद्गुण्यं भवांस्तास्तु विनियुक्तवान् । अतस्तासां निरुपाधिकस्य प्रेमातिशयस्य फलं यत्स्वसाद्गुण्यसर्वस्वार्पणपूर्वकत्वत्कर्तृकानुरंजनप्राप्तिः सा ह्ययंत्रणैवोभयतः सुखमयमहावशीकारव्यंजिका । अर्जुनस्य तु प्रेम्णः फलं वशीकारव्यंजिका सारथ्यदूत्यादिमात्रप्राप्तिर्या सा तूभयतो यंत्रणामयीति न तत्समकक्षतां प्राप्तुमर्हत्यर्जुन इति भावः । अत्रैव तृतीयान्यपदार्थे बहुव्रीहौ । ताभिरपि स्वीयसाद्गुण्यसर्वस्वार्पणेन सोऽनुरंजित इति परम्परानुरंजनसुखमयं सख्यं व्यंजितम् । तत एवासाधारणसौभाग्यप्रदानमाह-कृतं रासे नृत्यं गीतं वादनानि च यथा तथैव ता अप्यनुकृतवत्यः तत्साहित्येनैव रासे तासां तथा नृत्याद्युक्तेः । न च तासां तत्तच्छिक्षणाभ्यासकोऽप्यासीदित्याह-उन्मदेन महाप्रेमोत्थेनान्धा व्यवहारमात्रमदृष्टवत्यः । अतः किलेत्याश्चर्ये । यस्य प्रकृतिं स्वभावमेवागच्छन् । भगवतो नृत्यगीतादिवैदग्ध्यादयः स्वाभाविका असाधारणा अनंता एव ये गुणास्तान्सर्वानपि तेन दत्तान्प्रापुरित्यर्थः । अर्जुनाय तु स्वमसाधारणं तदपेक्षितं बलिष्ठत्वमपि भगवता न दत्तमिति । यद्वा कृतं गोवर्द्धनधारणादि उन्मद उन्माद इति विरहश्च दर्शितः । एवं चातिमदास्तावत्सायुज्यं प्रापुः । अत्युत्कृष्टप्रेम्णः परां काष्ठाम् । अहं तूभयमध्यवर्त्ती स्वाभीप्सितां तव सारथ्यलीलां कथं न प्राप्स्यामीति भावः । अत्र संदर्भः-यत एतावतोऽपि प्रेम्णो जनकत्वं दृश्यते इत्याह-ललितेति । अत्र कृतानुकरणं नाम लीलाख्ये नायिकानुभावः । तदुक्तं "प्रियानुकरणं लीला" इति "प्रकृतिं स्वामवष्टभ्य" इति न्यायात् "प्रकृतिश्च स्वभावश्च रूपं च" इत्याद्यमरकोशाच्च प्रकृतिं स्वभावं तादृशः प्रेमावेशो जातो येन तत्स्वभावनिजस्वभावयोरैक्यमेव तासु जातमित्यर्थः । यथोज्ज्वलनीलमणौ महाभावोदाहरणम्-"राधाया भवतश्च चित्तजतुनी स्वेदैर्विलाप्य क्रमाद्युञ्जन्नद्रिनिकुञ्जकुञ्जरपते निर्धूतभेदभ्रमम् । चित्राय स्वयमन्वरञ्जयदिह ब्रह्मांडहर्म्योदरे भूयोभिर्नवरागहिंगुलभरैः शृंगारकारुः कृती" इति ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अनुग्रहं मद्वचःसत्यत्वापादनलक्षणम् ॥ ३८ ॥ ❀ ❀ व्रीह्यादिभ्यश्चेति सूत्रं पाणिनीयव्याकरणस्य पंचमाध्यायीयद्वितीयपादे षोडशाधिकशततमम् । व्रीह्यादिगणो यथा—व्रीहि । माया । शाला । शिखा । माला । मेखला । केका । अष्टका । पताका । चर्मन् । कर्मन् । वर्मन् । दंष्ट्रा । संज्ञा । वडवा । कुमारी । नौ । वीणा । बलाका । यवखद । नौ । कुमारी । शीर्षान्नञ इति । यद्यप्यत्र रश्मिशब्दो न दृश्यते, तथाप्याकृतिगणं मत्वा ऊहनीयः । यद्वा लेखकप्रमादात् रश्मिशब्दस्यादर्शनमनुमेयं सकलकोविदगणश्रद्धास्पदाचार्यश्रीमच्छ्रीधरस्वामिना व्रीह्यादिगणे तत्पाठस्याङ्गीकारादिति ॥ ३९-४९ ॥

श्रीमद्वीरराघवव्याख्या

जिघांसया स्वस्योपर्याधावनदशायामवस्थितं रूपमनुसन्दधानस्तमेव तत्प्राप्त्युपायमध्यवस्यति स्वनिगममित्यादिश्लोकद्वयमेकान्वयम् । आततायिनः प्रहरतो मे मम तावच्छितैर्विशिखैर्बाणैर्हतस्ताडितोऽत एव विशीर्णः शिथिलो दंशः कवचो यस्य सः क्षतजेन रुधिरेण परिप्लुतः व्याप्तगात्रः सन् स्वनिगममायुधं न गृह्णामीति स्वप्रतिज्ञामपहायायुधं ग्राहयामीत्येवंविधां मत्प्रतिज्ञामृतं सत्यां कर्त्तुं स्वप्रतिज्ञामुपेक्ष्य भक्तप्रतिज्ञामेव यथार्थां कर्त्तुमित्यर्थः रथस्थस्ततोऽवप्लुतः धृतः रथचरणः सुदर्शनाख्यं चक्रं येन चलन्ती गौर्भूमिर्यस्माद् भूमिं चालयन् गतं गच्छदुत्तरीयं यस्य स इभं गजं हन्तुं हरिः सिंह इव बलान्मद्वधार्थमभिससार मदभिमुखमागतवान्स मुकुन्दो भगवान्मम गतिः स्वप्राप्त्युपायो भवतु ॥ ३७-३८ ॥ ❀ ❀ सारथ्यदशावस्थितं रूपमनुसन्धायास्मिन रतिदार्ढ्यं प्रार्थयते विजयेति-विजयस्यार्जुनस्य रथः कुटुम्बः कुटुम्बवद्रक्षणयोग्यो यस्य, आत्तं तोत्रं वेत्रं येन, धृता हयानामश्वानां रश्मयः प्रग्रहा येन तस्मिन् तच्छ्रिया तोत्रहयरश्मिग्रहणजशोभया ईक्षणीयेऽतीवेक्षितुमर्हे च भगवति मुमूर्षोर्मेऽमुष्यतस्य मम रतिरस्तु । इह युद्धे यं निरीक्ष्य ये हतास्ते च स्वरूपं स्वाभाविकं रूपमपहतपाप्मत्वादिगुणाष्टकविशिष्टं रूपं मुक्तिमिति यावत्, गताः प्राप्ताः, तस्मिन्भगवतीत्यन्वयः । सरूपमिति पाठे समानरूपं साधर्म्यमिति यावत् ॥ ३९ ॥ ❀ ❀ न केवलं तन्निरीक्ष्य युद्धे हता एव स्वरूपं गता अपि तु तत्कामेन तमनुवर्त्तमाना अपीत्याशयेनाह ललितेति । ललितया सुन्दरया गत्या विलासेन वल्गुहासेन

सुन्दरतरहासेन मन्दस्मितेन प्रणयनिरीक्षणेन च कल्पितमुर्वधिकं मानं बहुमानं यासां ता गोपवध्वः उन्मदेनोद्रिक्तकामेनांधाः स्वपरविवेकरहिताः कृष्णमात्मानं मन्यमाना इत्यर्थः, अत एव भगवत्कृतं भगवतश्चेष्टितं पूतनानिरासादिकमिति यावत् अनुकृतवत्यः अनुकुर्वत्यः सत्यः, एतच्च स्फुटीभविष्यति, यस्य प्रकृतिं स्वभावं साधर्म्यमगमन्किलेति प्रसिद्धिर्द्योत्यते तस्मिन् भगवति रतिरस्त्विति पूर्वेणान्वयः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथ युद्धे आयुधं न ग्रहीष्यामीति स्वनियमं प्रतिज्ञालक्षणं विहाय यो भक्तानुकम्पी आयुधं ग्राहयिष्यामीति मत्प्रतिज्ञामृतमधि सत्ये स्थितां कर्तुं धृतरथचरणः उद्धृतसुदर्शनचक्रः रथस्थो रथादवप्लुतोऽवतीर्णः गतोत्तरीयवासाः श्लथितोत्तरीयवासाः हरिः सिंह इभं गजमिव बलाग्रे उभयोः सेनयोः पुरतो मां हन्तुमभ्ययात् ॥ ३७ ॥ ❀ ❀ यश्चाततायिनो मे निशितैस्तेजितैर्विशिखैर्बाणैर्हतो विद्धो विशीर्णदंशः खंडितकवचः क्षतजेन रुधिरेण परिप्लुतः स्नात इव प्रसभं रथान्नावतर भीष्मं न प्रतिहरेत्यर्जुनवाक्यमनादृत्य बलात्कारात् मम बधार्थमभिससार स मुकुन्दो भगवान् मम मुदे भवत्विति श्लोकान्वयः ॥ ३८ ॥ ❀ ❀ इह युद्धे यं निरीक्ष्य हताः सरूपं वैष्णवं धाम गताः मुमूर्षोर्म्रियमाणस्य मे तस्मिन् भगवति रतिरस्त्वित्यन्वयः। कथंभूते विजयस्य अर्जुनस्य रथ एव कुटुम्बं रक्षणीयवर्गो यस्य स तथा तस्मिन् आत्ततोत्रे गृहीतप्रतोदे धृता हयरश्मयः कविकामुखरज्जवो येन स तथा जितश्रम इति भावप्रधानो निर्देशः जितश्रम इति कृष्णविशेषणं वा स्वरूपं मूलरूपं वा ॥ ३९ ॥ ❀ ❀ यस्य ललितानि गतिविलासादीनि तथोक्तानि ललितगतिश्च विलासश्च वल्गुहासः मन्दस्मितं च प्रणयेन निरीक्षणं च तथोक्तानि तैः कल्पितमुरु पृथु मानं यासां ताः तथोक्ताः ललितगत्यादिभिः कृष्णे कल्पितं समर्पितमुरुमानं महापूजा याभिस्तास्तथोक्ता इति वा, अत एव उत्कृष्टेन मदेनांधाः कृतं पूतनाबकादिपराक्रममनुकृतवत्यः कृष्णायमानत्वेनानुकुर्वाणाः गोपवध्वः गोपस्त्रियः यस्य प्रकृतिं जडशरीरं विहाय स्वभावाविर्भावलक्षणं मोक्षमगुः किल तस्मिन्कृष्णे रतिरस्त्विति पूर्वेणान्वयः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वनिगमेति युग्मकम्। ऋतमिति ऋतरूपामित्यर्थः। 'ऋतञ्च सूनृता वाणी'ति भगवदुक्तावजहल्लिंगत्वश्रवणात्। चलद्गुत्वं संरम्भेण किंचिद्भावाविष्कारात् (किंचिद्भाराविष्कारात्) ॥ ३७-३८ ॥ ❀ ❀ विजयेति युग्मकम्। मर्यादातिक्रमेऽप्यदोषाय सामर्थ्यमाह भगवतीति। 'यथा रुद्रोऽब्धिजं विषमि'ति न्यायात् तदतिक्रमे च स्वाभाविकं कारुण्यमेव कारणमिति दर्शयति यमिहेति। अतोऽस्मिन्नेव रतिर्ममास्तु ॥ ३९ ॥ ❀ ❀ तत् स्वभावमहिम्नः सारूप्यप्रापणत्वं नाम कियानुत्कर्षः, यत एतावतोऽपि प्रेम्णो जनकत्वं दृश्यते इत्याह ललितेति। अत्र कृतानुकरणं नाम लीलाख्यो नायिकानुभावः। तदुक्तम् 'प्रियानुकरणं लीले'ति। 'प्रकृतिं स्वामवष्टभ्ये'ति न्यायात् 'संसिद्धिप्रकृती त्विमे, स्वरूपञ्च स्वभावश्चे'त्यादमरकोषाच्च प्रकृतिं स्वभावम्। तादृशः प्रेमावेशो जातः येन तत्स्वभावनिजस्वभावयोरैक्यमेव तासु जातमित्यर्थः। यथोज्ज्वलनीलमणौ महाभावोदाहरणम्–'राधाया भवतश्च चित्तजतुनी स्वेदैर्विलाप्य क्रमात् युञ्जन्नद्रिनिकुञ्जकुञ्जरपते निर्धूतभेदभ्रमम्। चित्राय स्वयमन्वरञ्जयदिह ब्रह्मांडहर्म्योदरे भूयोभिर्नवरागहिंगुलभरैः शृङ्गारकारुः कृती'ति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वस्मादपि स्वभक्तमुत्कर्षयतीति यत् श्रुतं तन्मया स्वस्मिन्नेव साक्षाद् दृष्टमित्याह द्वाभ्याम्। स्वनिगमम् अशस्त्र एवाहं साहाय्यमात्रं करिष्यामीति स्वप्रतिज्ञां हित्वा श्रीकृष्णं शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञाम् ऋतं सत्यं यथा भवति तथा अधि अधिकां कर्त्तुं रथस्थः सन्नेवावप्लुत इत्यतिलाघवेनावप्लुतिमतस्तस्य रथाद्विश्लेषः केनापि न लक्षित इति भावः, अलक्षितप्रकाशेनैकेन रथरक्षार्थं स्थित एवेति वा। ऋतमिति सा लीला एव स्वाभाविक्येव ननु मदनुरोधेनैव कृतेति भावः। धृतो रथचरणश्चक्रं येन सः। अभ्ययात् अभिमुखमधावत्। धावनेनातिसंरम्भेणाविष्कृतनिजमहाबलत्वाच्चलन्ती गौः पृथ्वी यस्मात् सः। गतं पतितमुत्तरीयं यस्य सः। अतिसंरम्भेणोत्तरीयं गात्रात् पतितम् अस्ति नास्ति वेत्यपि नानुसन्दधान इत्यर्थः। अत्र कृष्णेन स्वभक्तवात्सल्यगुणस्य दुस्त्यजत्वात् अर्जुनस्य युद्धासामर्थ्ये सति स्वप्रतिज्ञामपि त्यक्त्वा स्वयमेवार्जुनस्य रक्षार्थं शस्त्रेण योत्स्यते एव तच्चार्जुनस्यासामर्थ्यप्रापणमन्यैर्दुःशकमित्यतः क्षणमर्जुनं पराभूयास्य युद्धं भक्तवात्सल्यद्योतकं द्रक्ष्यामीति भीष्मस्य स्वमनोरथसिद्ध्यर्थैव प्रतिज्ञेत्यतः स्वप्रतिज्ञाभङ्गेनार्जुने स्वप्रेमाणं तं दर्शयित्वा भीष्मं प्रमोद्य तस्योत्कर्षं च लोके विख्यापयामासेति तत्त्वम् ॥ ३७ ॥ ❀ ❀ किंच यदैव रथाद् भूमाववप्लुतस्तदैव क्षतजैः रुधिरैः परिप्लुतः सांग्रामिकरुधिरनद्या बिन्दुव्याप्तः। ननु कवचस्य विद्यमानत्वात् कथं तथात्वं तत्राह–मम शितैर्विशिखैर्हतस्तस्य संरम्भसुखवर्द्धनार्थं तदपि मया हन्यते स्मैवेति भावः। यतो विशीर्णकवचः प्रथनात् प्रागेवाभवदित्यर्थः। प्रसभं बलात् वारयन्तमर्जुनमप्यतिक्रम्य मद्वधार्थम् अद्य स्वहस्तेनैव भीष्मं वधिष्यामीत्यभिप्रायेणेत्यर्थः। अभिससारेत्यत्राभिशब्देनाभिसरतं

नायकमालोकितवत्या नायिकाया इव तदानीं मम सुखमपारमेवाभूदिति द्योत्यते। न अन्येषां मुकुन्दो मुक्तिप्रदोऽपि मम तु गतिस्तथाभूतत्वेनैव प्राप्यो भवत्विति हे कृष्ण त्वामहमेतदेव प्रार्थये इति भावः ॥ ३८ ॥ ❀ ❀ तदेवमन्यायैरपि भक्तरक्षाव्यग्रे कृष्णे रतिमाशास्ते। विजयस्य अर्जुनस्य रथ एव कुटुम्बोऽकृत्यैरपि रक्षणीयो यस्य तस्मिन्। तोत्रं प्रतोदः। रश्मयः प्रग्रहाः धृता हयरश्मयो यस्य सन्तीति व्रीह्यादित्वात् इनिः। ईक्षणीयेति वामहस्ते अश्वधारणरज्जुः दक्षिणहस्ते प्रतोदः मुखारविंदे हुंहुमिति तन्नोदनशब्द इति शोभया यन्माधुर्यमीक्षणीयं तन्मयैव तदा स्वचक्षुर्भ्यामीक्षितं न त्वर्जुनेनापि इति भावः। तस्मिन् भगवति मम रतिरस्तु मुमूर्षोरिति। अत एवाहं संप्रति मर्तुमिच्छामि यन्मृत्वा तदेव माधुर्यं मुहुर्द्रक्ष्यामि, संजीवंस्तु तत् कथं द्रष्टुं प्राप्स्यामि प्रकटप्रकाशे तस्या लीलाया भगवता समाप्तीकृतत्वादिति भावः। अत्र म्रियमाणस्येत्यनुक्त्वा सन्प्रत्ययेन इच्छाधीनमृत्योर्भीष्मस्य भगवतः सकाशादपि तल्लीलायां अतिलोभो व्यज्यते। तेन च सा युद्धलीलापि नित्येत्यन्यस्या लीलाया नित्यत्वे कैमुत्यमानीतम्। ननु सत्यं तस्यामेव मे सारथ्यलीलायां त्वमत्यासक्तो यत् प्रतिश्लोकमेव तामास्वदयंस्तामेवोद्गिरंस्तल्लीलाविशिष्टे एव मयि रतिं प्रार्थयसे, किन्तु संप्रति मृत्वैव तल्लीलाप्राप्तौ तव किं प्रमाणमित्यत्र 'मरणे या मतिः सा गतिरि'ति प्रसिद्धात् प्रमाणादपि तव दर्शनमेव परं प्रमाणमित्याह यमिहेति। यं निरीक्ष्य हता युद्धे अन्येनापि हताः सन्तः असुरस्वभावा अपि तादृशज्ञानिनाम् अपि सरूपं सायुज्यमुक्तिं प्राप्ताः। अहं तु भक्तस्तत्रापि मरणकाले तादृशमतिमांस्तं त्वां साक्षाद् दृष्ट्वा मृत्वा कथं न तां लीलां प्राप्स्यामीति भावः। अत्र नरसारथ्यमनधिकारिभ्योऽपि सायुज्यदायित्वमिति युगपदेवानैश्वर्यमहैश्वर्यस्वीकारलक्षणं महामाधुर्यं सर्वभगवत्स्वरूपासाधारणमेव तदानीमुदितमिति ज्ञेयम् ॥ ३९ ॥ ❀ ❀ ननु यत्सारथ्यसम्बधिन्यै लीलायै सर्व्वतत्त्वज्ञोऽपि त्वं स्पृहयसि सोऽर्जुन एव तर्हि मम सर्व्वेषु प्रेमवत्परिकरवृन्देष्वेको मुख्य इति निर्द्धार्य्यते। मैवम्। ततोऽप्यर्ज्जुनादप्यतिमुख्यतमाः सर्व्वतोऽपि प्रेमोत्कर्षवन्तो ये तव प्रियजना वर्त्तन्ते न तेषां पदवीं प्रार्थयितुमपि कोऽपि साहसं धत्ते। भवतु, तदपि तदुद्देशेनाप्यस्मिन्नन्तकाले कृतार्थीभवामीत्याह ललितेति। ललितगतिश्च राजनृत्यादिवैदग्धी कायिकी विलासश्च धीरलालित्यादिवैदग्धी मानसी वल्गुहासश्च परिहासवैदग्धी वाचिकी प्रणयनिरीक्षणञ्च प्रेममयसर्व्वभावव्यंजककटाक्षवैदग्धी चाक्षुषी च तैरुपकल्पितो दत्तः उरुर्मान आदरः पूजा वा याभ्यस्ताः। तेन स्वस्मिंस्ताः प्रसादयितुं स्वीयानसाधारणान् सर्व्वानेव साद्गुण्यभावांस्तासु विनियुक्तवान्। अतस्तासां निरुपाधिकस्य प्रेमातिशयस्य फलं यत् स्वसाद्गुण्यसर्व्वस्वार्पणपूर्व्वकत्वत्कर्तृकानुरंजनप्राप्तिः सा ह्ययन्त्रणैवोभयतः सुखमयमहावशीकारव्यंजिका। अर्ज्जुनस्य तु प्रेम्णः फलं वशीकारव्यंजिका सारथ्यदूत्यादिमात्रप्राप्तिर्या सा तूभयतो यन्त्रणामयीति न तत्समकक्षतां प्राप्तुमर्हत्यर्ज्जुन इति भावः। अत्रैव तृतीयान्यपदार्थे बहुव्रीहौ, ताभिरपि स्वीयसाद्गुण्यसर्व्वस्वार्पणेन सोऽनुरंजित इति परस्परानुरंजनसुखमयं सख्यं व्यंजितम्। तत एवासाधारणसौभाग्यप्रदानमाह। कृतं रासे नृत्यं गीतं वा वादनानि च यथा तथैव ता अप्यनुकृतवत्यः तत्साहित्येनैव रासे तासां तथा नृत्याद्युक्तेः। न च तासां तत्तच्छिक्षणाभ्यासः कोऽप्यासीदित्याह। उन्मदेन महाप्रेमोत्थेनान्धाः व्यवहारमात्रमदृष्टवत्यः। अतः किलेत्याश्चर्ये, यस्य प्रकृतिं स्वभावमेवागच्छन् भगवतो नृत्यगीतादिवैदग्ध्यादयः स्वाभाविकाः असाधारणा अनन्ता एव ये गुणास्तान् सर्व्वानपि तेन दत्तान् प्रापुरित्यर्थः। अर्ज्जुनाय तु स्वमसाधारणं तदपेक्षितं बलिष्ठत्वमपि भगवता न दत्तमिति। यद्वा कृतं गोवर्द्धनधारणादिकम्। उन्मद उन्माद इति विरहश्च दर्शितः। एवं चातिमन्दास्तावत् सायुज्यं प्रापुः। अत्युत्कृष्टाः प्रेम्णः परां काष्ठाम्। अहं तु तयोर्मध्यवर्त्ती स्वाभीप्सितां तव सारथ्यलीलां कथं न प्राप्स्यामीति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीकृष्णे गतिर्भवत्विति प्रार्थयितुं तत्कृतमनुग्रहं वदति स्वनिगममिति। सहायमात्रं करिष्यामि न शस्त्रयुद्धमित्युद्योगे कृतप्रतिज्ञः पुनर्युद्धकाले मया प्रतिदिनं दशसहस्रपुरुषघातिना पांडवसैन्ये विमथिते सति धनंजयं प्रति जातक्रोधः स्वयमस्मत्पराजयाय प्रवृत्तस्तां स्वप्रतिज्ञामपहाय श्रीकृष्णमायुधं ग्राहयिष्यामीति मत्प्रतिज्ञामृतं यथा स्यात्तथाध्यधिकं कर्तुं रथस्थस्ततोऽवप्लुतोऽवतीर्णस्स धृतरथचरणः गृहीतसुदर्शनः हरिः सिंह इभं गजं हंतुमिव अभ्ययात् अभिमुखमधावत्। कथंभूतः चलद्गुः चलंती कुपिताद्भीता गौर्धरणी यस्मात्सः, पुनः कथंभूतः गतोत्तरीयः गतं पतितं धरणीमाश्वासयद् इवोत्तरीयं क्रोधाविष्टस्य युधिष्ठिरपक्षपातिनः स गतिर्भवत्वित्युत्तरेण संबंधः ॥ ३७ ॥ ❀ ❀ कथंभूतः मे शितैस्तैलधौतैरतितीक्ष्णैर्विशिखैर्बाणैर्हतोऽप्यविशीर्णदंशः क्षतजपरिप्लुते देशे अर्जुनेन स्वप्रतिज्ञां पालय भगवन् इत्येवं वादिना प्रणयपूर्वकं कक्ष्या लंबमानेन संप्रार्थ्यमानोऽपि प्रसभं बलान्मद्वधार्थमभिससार स मुकुंदः मुक्तिप्रदः मे आततायिनो गतिः स्वात्मप्रदो भवतु ॥ ३८ ॥ ❀ ❀ विजयरथकुटुम्बे अर्जुनरथः कुटुंबः कुटुंब इव रक्षणीयो यस्य तस्मिन् आत्ततोत्रे गृहीतप्रतोदे गृहीताश्वप्रग्रहे ईक्षणीये इह युद्धे यं निरीक्ष्य ये भूरिश्रवःप्रभृतयस्ते स्वरूपं भगवत्सारूप्यं गताः प्राप्ताः। तदुक्तं द्रोणपर्वणि भूरिश्रवसं प्रति भगवता "ये लोका मम विमलाः सकृद्विभांति ब्रह्माद्यैः सुरवृषभैरपीष्यमाणाः। तान्क्षिप्रं व्रजताग्निहोत्रयाजिन्मम तुल्यो भव गरुडोत्तमांगयान" इति। एवंभूते भगवति मे रतिरस्तु ॥ ३९ ॥ ❀ ❀ किंच ललितया सुंदरया गत्या विलासेन रासादिना वल्गुना सुंदरेण हासेन निरीक्षणेन प्रणयविनयपूर्वकेणावलोकनेन च कलितः बहुमानो

यासां ताः अत एवोन्मदांधाः अत एव भगवतः कृतं चेष्टितमनुकृतवत्यः किल गोपवध्वः यस्य प्रकृतिं स्वभावमगन्नगमन् तस्मिन्भगवति मे रतिरस्त्विति पूर्वेणान्वयः ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तमोमिश्ररजोवस्थामाह स्वनिगममपहायेति । स्वस्य निगमः प्रतिज्ञा शस्त्रसंन्यासः दंतवक्रे सभ्रातरि हते भगवता शस्त्रसंन्यासः कृतः, तत् पुनस्तृतीयदिनयुद्धे नवमे च भीष्मवधार्थं चक्रं गृहीतं, युद्धागमनसमये च प्रतिज्ञा कृता-अयुद्धचमानोऽहमेकत इति, मया च प्रतिज्ञातं सर्वथा शस्त्रं ग्राहयिष्यमीति तत्र मत्प्रतिज्ञामृतं कर्तुं रथस्थ एव सन्नवप्लुतः अधिका च प्रतिज्ञा कृता शस्त्रमेव गृहीतं न तु मारितवानित्यर्थः, रथस्यैव चक्रे सुदर्शनावेशः भगवतः प्रतिज्ञात्यागे भूमेः कम्पो जातः, तदाह चलद्गुरिति चलन्ती गौर्भूमिर्यस्य दृष्टांतेन दोषाभावमाह यथा हरिः सिंह इभमिव "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन" इति श्रुतेः सायुज्यदानार्थं भीष्ममन्तः प्रवेशयितुं भगवान् प्रवृत्तः, तावता उत्तरीयं पतितम् उपरि आच्छादनार्थमर्जुनो रक्षितः स भूमावागत्य पतितः । अतो वधो न जात इति उत्तरीयाभावे च भोजनं निषिद्धं तदा हि भीष्मोऽहंकारयुक्तः, अतस्तस्य ज्ञानस्फूर्त्यभावात् तदा न मारित इति भावः । अत्र रतिप्रार्थनाभावो भगवत एव रतिकार्यैकर्तृत्वात् ॥ ३७ ॥ ❀ ❀ रजोमिश्रतमोऽवस्थामाह शितेति । नवमदिनस्येदं रूपं पूर्वश्लोके तु तृतीयदिनस्येति न पुनरुक्तिः । शितास्तीक्ष्णाः विगतशिखाः पार्षडिनो येन विशीर्णदंशः क्षतजपरिप्लुतः विशीर्णा दंशा यस्मिन् काले वर्षाव्यतिरिक्तकाले मासाष्टकं तत्र क्षता जाता येषां ते क्षतजाताः परिव्राजिनः क्षत्रियोत्तमा वा तैः परिव्याप्तः । अधर्मनिवारको धर्मक इत्युक्तं भवति । अत एव आततायिनं पापिष्ठं मां हन्तुं प्रसभमभिससार अयुध्यमानयुद्धात् पापिनमपि यो मोचयितुं प्रवृत्तः, किन्तु मुक्तिदानार्थमित्याह मुकुन्द इति ॥ ३८ ॥ ❀ ❀ सत्त्वमिश्रतमोऽवस्थामाह विजयरथकुटुम्ब इति । अर्जुनस्य रथः सर्वथा परिपाल्यः, अत एव तस्य रथः कुटुम्बं यस्य विविधो जयो विगतो वा जयो यस्येति विजयः, अर्जुनः जयद्रथवधे हि युद्धे अशक्त इव जातः तदा स्वयं तोत्रं गृहीत्वा अश्वानां रश्मींश्च गृहीत्वा उत्थितः सन् कर्णादीनामस्त्राणि रथचालनेनैव दूरीकुर्वन् तदानींतनश्रिया ईक्षणीयः अतिसुन्दरः तादृशे मुमूर्षोरेव मतिरस्तु न तु पूर्वं विस्मरणानन्तरं तैः किमुत न्यायेन फलमाह-यमिह निरीक्ष्येति । इह अस्मिन्नवसरे अन्तकाले यं दृष्ट्वैव मुक्ताः तत्रांतकाले स्नेहे सति किं वक्तव्यमित्यर्थः ॥३९॥ ❀ ❀ तमोमिश्रसत्त्वावस्थामाह ललितेति । ललिता या गतिः तत्र यो विलासः हंसगजगतिवत् पदचालनं मनोहरश्च हासः स्नेहपूर्वकं च निरीक्षणं तमोरजःसत्त्वभावकार्याणि तैः कल्पितः उरु अधिकः भगवन्माहात्म्यमध्यविचार्यप्रवृत्तो मानो यासां किंचन केवलमन्तः स्थित एव दोषः, किन्तु त्रिदोषकार्यमपि बहिर्बहिः कुर्वन्तीत्याह कृतमनुकृतवत्य इति, कृतं भगवच्चरित्रं पूतनापयःपानादि तदनुकुर्वन्तीति एवमपि सति लौकिकमपि ज्ञानं निवृत्तमित्याह उन्मदांधा इति, उद्गतेन मदेन भगवदारोहणार्थमपि यतन्त इत्यंधाः, सर्वथा अचिकित्स्यत्रिदोषाः तत्रापि गोपवध्वः जात्या स्वभावेन च दुष्टाः, ता अपि यस्य सम्बन्धात् प्रकृतिस्वरूपमगमन् नात्र सन्देहः कर्त्तव्यः किलेति प्रसिद्धे ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

स्वनिगमेत्यत्र । अधिका चेत्यादि । 'अहं भक्तपराधीन' इत्येवमधिका कृतेत्यर्थः । रथस्यैव चक्रे इति । तेन भारते क्षुरान्ततीक्ष्णाग्रत्वकथनमपि सुदर्शनावेशादिति बोधितम् दोषाभावमिति । प्रतिज्ञात्यागेपि दोषाभावम् । भक्षणाय प्रवृत्तत्वेन फलावदारणवन्मारणार्थत्वाभावादिति । उपर्याच्छदनार्थमिति । भारते 'व्यालम्बी पीतान्तपट' इति विशेषणेनोत्तरीयस्य पीतान्तत्वकथनाद्रविकरगौरवत्वाभावेन न वेदरूपतेति मायारूपत्वात्तदर्थमित्यर्थः । आच्छादनस्वरूपमाहुः अर्जुनो रक्षित इति । मुक्त्यर्थतामाच्छाद्यार्जुनरक्षार्थता प्रकटीकृतेत्यर्थः । द्वितीयमाहुः स इत्यादि । स इति उत्तरीयपटः । रतिकार्यकर्तृत्वादिति । मुक्तिदानकर्तृत्वात् । अत्र स्वप्रतिज्ञात्यागस्तामसोऽभियानं राजसमिति तामसराजसत्वमवस्थाया ज्ञेयम् ॥ ३७ ॥ ❀ ❀ शितेत्यत्र । अत्राततायिनो म इति सम्बन्धषष्ठी, तेन मत्सम्बन्धी सन् मद्वधार्थमभिससारेत्यर्थो भवति, तथा सति शितविशिखहतत्वादिकं राजसं वधार्थमभिसरणमित्यवस्थाया राजसतामसत्वम् ॥ ३८ ॥ ❀ ❀ विजयेत्यत्र । ईक्षणीयतया सुखजननं सात्त्विकं हतानां स्वरूपप्रापकत्वं तामसमित्यवस्थाया राजसतामसत्वमित्यवस्थायास्तथात्वम् ॥ ३९ ॥ ❀ ❀ ललितेत्यत्र । उन्मदान्धपदोक्तमोहजनकत्वं तामसं निरीक्षणं च सात्विकं तदेवोक्तकार्यजनकत्वान्मुख्यमित्यवस्थायाः सात्त्विकतामसत्वम् ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमर्जुने कृतमनुग्रहं निरूप्य स्वस्मिन् कृतमनुग्रहं स्मरन् पुनः प्रार्थयते-स्वेति द्वयेन । स्वनिगमं अशस्त्र एवाहं साहाय्यमात्रमेव करिष्यामीत्येवम्भूतां स्वप्रतिज्ञां अपहाय त्यक्त्वा श्रीकृष्णं शस्त्रमहं ग्राहयिष्यामि-इत्येवंरूपां मत्प्रतिज्ञां ऋतं सत्यं यथा भवति तथा अधि अधिकां कर्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः सन् मद्वधार्थम् अभ्ययात् अभिमुखमधावत् स मुकुन्दो मे मम गतिर्भवत्वित्युत्तरेणान्वयः । तदवस्थं स्वस्यापि प्राबल्यं सूचयन् दृष्टान्तमाह-इभं हन्तुं हरिः सिंह इवेति । तदवस्थं भगवन्तं विशिनष्टि-धृतो रथचरणः चक्रं सुदर्शनं येन सः । तदा च संरम्भेण मनुष्यनाट्यविस्मरणात् उदरस्थसर्वभुवनभारेण प्रतिपदं चलन्ती गौः

पृथ्वी यस्मात् स चलद्गुः । तेनैव संरम्भेण पथि गतं पतितमुत्तरीयं वस्त्रं यस्य सः ॥ ३७ ॥ ❀ ❀ एवं यदाऽभ्ययात्तदा स्मयमानस्य आततायिनो धन्विनो मे शितैस्तीक्ष्णैः विशिखैर्बाणैर्हतः अतो विशीर्णदंशः विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतः व्याप्तः सन् प्रसभं बलात् वारयन्तमर्जुनमप्यतिक्रम्य मद्वधार्थमभिससार अभिमुखमाजगाम । य एवं लोकप्रतीत्या अर्जुनपक्षपातीव लक्षितः, वस्तुतस्तु ममैवानुग्रहं कृतवान् यन्मद्भक्तेन शस्त्रं ग्राहयिष्यामीति प्रतिज्ञातं तद्वचनं मा मिथ्या भवत्विति स भगवान्मुकुन्दो मे गतिर्भवत्वित्यन्वयः ॥ ३८ ॥ ❀ ❀ अन्यायेनापि भक्तरक्षाव्यग्रत्वं स्मृत्वा तस्मिन् रतिं प्रार्थयते–विजयेति । विजयोऽर्जुनस्तस्य रथ एव कुटुम्बः 'अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्' इति स्मृतेः कुटुम्बवदकृत्यैरपि रक्षणीयो यस्य तस्मिन् । आत्तं गृहीतं दक्षिणहस्तेन तोत्रं प्रतोदो येन तस्मिन् । धृताश्च ते हयानां रश्मयः प्रग्रहाश्च ते सन्ति वामे हस्ते यस्य तस्मिन् । "व्रीह्यादिभ्यश्च" इत्यनकारान्तादपि रश्मिशब्दादिनिप्रत्ययः । तच्छ्रिया सारथ्यशोभया ईक्षणीये अतीवेक्षितुमर्हे भगवति श्रीकृष्णे मुमूर्षोर्मर्त्तुमुद्यतस्य मम रतिरस्तु । केषामेवं तद्रत्या विमुक्तिर्जातेत्यपेक्षायामाह–यमिति सपादेन । यमिह युद्धे निरीक्ष्य निरीक्षमाणाः हताः स्वरूपं गतास्तत्सायुज्यं प्राप्ताः । सरूपमिति पाठे तु तत्समानरूपं गता इत्यर्थः ॥ ३९ ॥ ❀ ❀ दिव्यदृष्ट्या पश्यन् क्षत्रधर्मेण युद्धयमानास्तत्स्वरूपं प्रापुरित्येतन्न चित्रं यतः कामान्धा अपि तं प्रापुरित्याह–ललितेति । ललितगतिश्च विलासश्च रासादिः वल्गुर्मनोहरो हासश्च प्रणयः स्नेहस्तत्पूर्वकं निरीक्षणं च तैरात्मीयैर्वा कल्पित उरुर्मानः सत्कारो यासां ताः अत उत्कटेन मदेनान्धाः स्वपरविवेकरहिताः अत एव तदेकचित्तत्वेन तस्य कृतं कर्म पूतनापयःपानादिकं अनुकृतवत्यः गोपवध्वोऽपि यस्य प्रकृतिं स्वरूपमगन् अगमन् । मकारलोपस्त्वार्षः । किलेत्यस्य प्रसिद्धिं सूचयति । तस्मिन् मे रतिरस्त्विति पूर्वेणैवान्वयः ॥ ४० ॥

हिन्दी अनुवाद

मैंने प्रतिज्ञा कर ली थी कि मैं श्रीकृष्णको शस्त्र ग्रहण कराकर छोड़ूँगा; उसे सत्य एवं ऊँची करनेके लिए उन्होंने अपनी शस्त्र ग्रहण न करनेकी प्रतिज्ञा तोड़ दी । उस समय वे रथसे नीचे कूद पड़े और सिंह जैसे हाथीको मारनेके लिगे उसपर टूट पड़ता है, वैसे ही रथका पहिया लेकर मुझपर झपट पड़े । उस समय वे इतने वेगसे दौड़े कि उनके कंधेका दुपट्टा गिर गया और पृथ्वी काँपने लगी ॥ ३७ ॥ ❀ ❀ मुझ आततायीने तीखे बाण मार-मारकर उनके शरीरका कवच तोड़ डाला था, जिससे सारा शरीर लहूलुहान हो रहा था । अर्जुनके रोकनेपर भी वे बलपूर्वक मुझे मारनेके लिए मेरी ओर दौड़े आ रहे थे । वे ही भगवान् श्रीकृष्ण, जो ऐसा करते हुए भी मेरे प्रति अनुग्रह और भक्तवत्सलतासे परिपूर्ण थे, मेरी एकमात्र गति हों–आश्रय हों ॥ ३८ ॥ ❀ ❀ अर्जुनके रथकी रक्षामें सावधान जिन श्रीकृष्णके बायें हाथमें घोड़ोंकी रास थी और दाहिने हाथमें चाबुक, इन दोनोंकी शोभासे उस समय जिनकी अपूर्व छबि बन गयी थी तथा महाभारत-युद्धमें मरनेवाले वीर जिनकी इस छबिका दर्शन करते रहनेके कारण सारूप्य मोक्षको प्राप्त हो गये, उन्हीं पार्थसारथि भगवान् श्रीकृष्णमें मुझ मरणासन्नकी परम प्रीति हो ॥ ३९ ॥ ❀ ❀ जिनकी लटकीली सुन्दर चाल, हाव-भावयुक्त चेष्टाएँ, मधुर मुसकान और प्रेमभरी चितवनसे अत्यन्त सम्मानित गोपियाँ रासलीलामें उनके अन्तर्धान हो जानेपर प्रेमोन्मादसे मतवाली होकर जिनकी लीलाओंका अनुकरण करके तन्मय हो गयी थीं उन्हीं भगवान् श्रीकृष्णमें मेरा परम प्रेम हो ॥ ४० ॥

मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४१ ॥
तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम्[१] ।
प्रति दृशमिव[२] नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥ ४२ ॥

सूत उवाच

कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः[३] । आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ॥ ४३ ॥
सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले । सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये[४] ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जगत्पूज्यतामनुस्मरन्नाह । मुनिगणैर्नृपवर्यैश्च संकुले व्याप्तेऽतःसदसि सभामध्ये युधिष्ठिरस्य राजसूये एषां मुनिगणादीनामीक्षणीयोऽहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन्नर्हणमुपपेदे प्राप । एष जगतामात्मा मम दृशि गोचरो दृष्टिविषयः

---

१. प्रा० पा०–विदधे स्थितमात्म० । २. प्रा० पा०–प्रतिदिशमिव । ३. प्रा० पा०–मनोवाग्वृत्तिदृष्टिभिः । ४. प्रा० पा०–दिवात्यये ।

सन्नाविः प्रकटो वर्तते। अहो मे भाग्यमिति भावः॥ ४१॥ ❀ ❀ सोऽहं कृतार्थोऽस्मीत्याह। तमिममजं सम्यगधिगतः प्राप्तोऽस्मि। सम्यक्त्वमाह विधूतभेदमोहः। तदर्थं भेदस्यौपाधिकत्वमाह। आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितमधिष्ठितमधिष्ठाय स्थितमिति यावत्। अकारलोपस्त्वार्षः। नैकधानेकधा। अधिष्ठानभेदादनेकधा भांतमित्यर्थः। अत्र दृष्टांतः सर्वप्राणिनां दृशं दृशं प्रत्येकमेवार्कमनेकधा प्रतीतमिवेति॥ ४२॥ ❀ ❀ मनोवाग्दृष्टीनां वृत्तिभिः। परमात्मनि श्रीकृष्णे। अंतरेव विलीनः श्वासो यस्य सः॥ ४३॥ ❀ ❀ निष्कले निरुपाधौ। संपद्यमानं मिलितमाज्ञायालक्ष्य। वयांसि पक्षिण इव॥ ४४॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

इति भाव इति। अहो भाग्यवशात्सर्वथाऽदृश्यरूपोप्यात्मा मे दृश्यतां गत इति तात्पर्यम्॥ ४१॥ इत्यर्थ इति। उपाधेरनेकत्वे एकोपि जलचंद्रादिन्यायेन बहुधा प्रतीयत इति भावः। तत्रैकस्यानेकधा भाने चक्षुरभिमानित्वेन प्रतिदृशं दृशं दृशं प्रति नैकधा चक्षुरिन्द्रियनियामकतयाऽनेकरूपं स्थितमर्कं यथैकमेव समधिगच्छति। ज्ञानी तथाहमपीति भावः। अत्र विश्वनाथः– ननु कथं तर्हि त्वयि मे रतिरस्त्वित्येकवारमपि युष्मत्प्रयोगेण न ब्रूषे ? किं तु प्रतिपद्यमेव विजयसखे विजयरथकुटुंबे मे रतिरस्तु। "चरणरतिः परमस्य तस्य मेस्तु स भवतु मे भगवान् गतिः" इति तच्छब्दप्रयोगेणैवेति तत्राह–तमिति। तं पार्थसारथिं प्रग्रहतोदालंकृतवामदक्षिणकरं मम हृदि स्फुरन्तमेवेममधिगतोस्मि। न त्विममेव तं तस्यैव हृदि प्रविष्टत्वादभ्यासेन तदीयस्फूर्तिव्याप्ते हृदि अयं प्रवेष्टुं न शक्नोतीति भावः। तं कीदृशमजं न जायत इत्यजस्तम्। न केवलं तदानीं युद्धकाल एव तादृशस्वरूपो मच्चक्षुषोरग्रे स जातोऽपि युद्धात्पूर्वमपि तु स्वाभाविकेन मनोरथेन मम हृदि तथा भात आसीदेवेति भावः। तेनात्र न मम दोषः किं तु हृदिस्थः परमेश्वरो यथा यथा यं यं स्फोरयति स तथा तथैवाशास्त इत्याह–शरीरभाजां जीवानां हृदि हृदि धिष्ठितम्। अकारलोपश्छांदसः। आत्मना स्वयमेव कल्पितानाम्। "यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति" इति श्रुतेः। न चाहं हृदिस्थं तत्पदवाच्यं पार्थसारथिमन्यं तथा पुरस्थमिदंपदवाच्यं चतुर्भुजमन्यं जानामीत्याह–प्रतीति। आकाशस्थमेकमर्कमपि जनानां प्रतिदृशमवलोकनं प्रति नैकधाऽनेकधाऽयं मन्मूर्ध्नोपरि अर्क इति प्रतिमूर्ध्नोपरिस्थमर्कं तत्तद्दृष्टिभेदादनेकधा भातमिवेति। विधूतो दूरीकृतो भेदरूपो मोहो येन सः। अयमर्थः–मम हृदि तथा युधिष्ठिरादीनां वसुदेवादीनामुद्धवादीनां नंदादीनां गोपिकानां च हृदि भावभेदेन प्रेमतारतम्येन च पृथक्पृथग्लीलतयैव यद्यपि स्फुरति, तदप्येक एव कृष्ण इति जानामि। तथा तेषां तत्तत्प्रेम्णां तत्तद्भावानां चोत्कर्षतारतम्यं सर्वमहं जानाम्येव। तदपि पार्थसारथावेव स्वाभाविक्यासक्तिस्तां त्यक्तुं नैव शक्नोमि। पुरःस्थितेऽस्मिंश्चतुर्भुजे रूपे धारणापि कृता। साप्यकिंचित्करैवाभूदिति। संदर्भस्तु–परमात्मत्वस्थापनाय तत्र विभुत्वं दर्शयन्स्वमत्युपकल्पनमेवोपसंहरति–तमिति। तमिममग्र एवोपविष्टं श्रीकृष्णं व्यष्टिअंतर्यामिरूपेण निजांशेन शरीरभाजां हृदि हृदि धिष्ठितं केचित्स्वदेहांतर्हृदयावकाशे "प्रादेशमात्रं पुरुषं वसंतम्" इत्युक्तदिशा भिन्नमूर्तिमस्तु वसंतमप्येकमभिन्नमूर्त्तिमेव समधिगतोस्मि। अयं परमानंदविग्रह एव व्यापकः स्वांतर्भूतेन निजाकारविशेषेणान्तर्यामितया तत्र तत्र स्फुरतीति विज्ञातवानस्मि। यतोहं विधूतभेदमोहः अस्यैव कृपया विधूतः दूरीकृतः भेदमोहो भगवद्विग्रहस्य व्यापकत्वासंभावनाजनितनानात्वज्ञानलक्षणो मोहो यस्य तथाभूतोहम्। तेषु व्यापकत्वे हेतुः। आत्मकल्पितानामात्मन्येव परमाश्रये प्रादुष्कृतानाम्। अत्र दृष्टान्तः–प्रतिदृशमिति। प्राणिनां नानादेशस्थितानामवलोकनं प्रति यथैक एवार्को वृक्षकूटाद्युपरिगतत्वेन तत्रापि कुत्रचिदव्यवधानसंपूर्णत्वेन सव्यवधानं त्वसंपूर्णत्वेनानेकधा दृश्यते तथेत्यर्थः। दृष्टांतोयमेकस्यैव तत्र तत्रोदय इत्येतन्मात्रांशे। वस्तुतस्तु भगवद्विग्रहोऽचिंत्यशक्त्या तथा तथा भासते। सूर्यस्तु दूरस्थविस्तीर्णात्मना स्वभावेनेति शेषः। अथवा तं पूर्ववर्णितस्वरूपमिममग्रत एवोपविष्टं समधिगतोस्मि। यद्यप्यंतर्यामिरूपं तस्माद्रूपादन्याकारं तथाप्येतद्रूपमेवाधुना तत्र तत्र पश्यामि। सर्वतो महाप्रभावस्यैव तस्य रूपस्याग्रतोऽन्यस्य रूपस्य स्फुरणाशक्तेरिति भावः। अत्र दृष्टांतो देशभेदेप्यभेदबोधनाय न तु पूर्णत्वविवक्षायै। अमीलितदृगव्यधारयदिति। 'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिरि'त्युपक्रमोपसंहारादिभिरत्र श्रीविग्रह एव प्रस्तूयते। अतो नेदं पद्यं ब्रह्मपरतयाव्याख्येयमिति॥ ४२॥ ❀ ❀ अंतरेव लीनः श्वासो यस्य "न तस्य प्राणा उत्क्रामंति ह्यत्रैव समलीयंते" इति श्रुतेः। अत्र विश्वनाथः–एवमात्मनि हृदि स्थिते पार्थसारथावित्यर्थः॥ ४३॥ ❀ ❀ एवं भीष्मः स्वाभिलषितं पार्थसारथिं प्राप। लोकास्तु तदविद्वांसो भीष्मो ब्रह्मणि लीनो बभूवेति जानंति स्मेत्याह–संपद्येति। अज्ञाने दृष्टांतः–वयांसि पक्षिणः दिनस्यात्ययेऽवसाने सति दिनं नष्टमिति दिनस्य स्वरूपध्वंसमेव ज्ञात्वा यथा तूष्णीं भवंति न शब्दायंत इत्यर्थः। न तु वस्तुतो दिनं नश्यति तत्क्षणेपि वर्षांतरे तस्य स्थितेरवगमात्। यामचतुष्टयानंतरं तत्रापि पुनरागमात्। एवं भीष्मस्याप्यत्यये भीष्मो मुक्त इत्यज्ञा विदंति। विज्ञास्तु तदैवाप्रकटप्रकाशे–रथचरणपाणिना कृष्णेन भूमौ धावता सह भीष्मो युद्ध्यत एवेति पुनरागामिकृष्णावतारे तेन सह भीष्म आविर्भविष्यत्येवेति जानंति। यद्वा निष्कं पदकं लातीति तस्मिन्ब्रह्मणि इत्यर्थः। ब्रह्मसायुज्यप्राप्तिस्तु न व्याख्येया। नित्यपार्षदभीष्मेण फलाभिसंधिरहिताया रतेर्वांछितत्वात्। मोक्षस्याकामितत्वात्। भगवतोपि बलादकामितफलदानानौचित्यात्। संदर्भस्तु–निष्कलब्रह्मशब्देन मायातीतो नराकृतिपरब्रह्मरूपः श्रीकृष्ण एवोच्यते। तस्मिन्संपद्यमानता च तत्संगतिरेव। तथोक्तं सप्तमे "अधोक्षजालंभमिहा-

शुभात्मनः शरीरिणः संसृतिचक्रशातनम्। तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम्" इति। अत्र भीष्मस्य वसुत्वात् "यावदधिकारमवस्थितिराधिकारिकाणाम्" इत्यधिकरणविरोधः स्यादिति चेन्न। लीलया स्वांशेन तत्राप्यवस्थितेः संभवात्। "भवद्भिरंशैर्यदुषूपजन्यताम्" इति ब्रह्मप्रोक्तेरंशेनैव सर्वे देवा अवतेरुर्न तु सार्वात्म्येनेति "तस्य सर्वेषु लोकेषु कामचारो भवति" इति श्रुतेर्ज्ञानियोगिवद्देवानामपि सर्वसमर्थत्वमस्तीत्यवधेयम्॥ ४४॥

श्रीमद्वीरराघवव्याख्या

युधिष्ठिरराजसूयसभास्थं रूपमनुसंधाय तस्य स्वचक्षुर्विषयतां प्रार्थयते मुनीति। युधिष्ठिरराजसूये मुनीनां गणैर्नृपश्रेष्ठैश्च संकुलेऽतःसदसि सभामध्ये य एषां युधिष्ठिरकृतं मुनिगणाद्यभिमतं चार्हणमग्रपूजादिकमुपपेदे प्राप्तः एष ईक्षणीयो मदंतरात्मा श्रीकृष्णः मम दृशि गोचरो दृष्टिविषयः सन्नाविर्भवतु यावत्तनुत्यागमवतिष्ठत्विति भावः। यद्वा आविरात्मा प्रकाशस्वरूपः दृशिगोचरोऽस्त्वित्यन्वयः॥ ४१॥ ❀ ❀ अथ सर्वांतरात्मानमनुसंधाय उक्तविधं भगवंतं प्राप्तोऽस्मीत्याह तमिति। तमुक्तविधमात्मना भगवता स्वेनैव तत्तत्कर्मानुरूपं कल्पितानां देहभाजां हृदि हृदि प्रतिहृदयं वस्तुत एकमेव प्रतिदृशं नैकधावस्थितमर्कं सूर्यमिव धिष्ठितमधिष्ठितं समधिगतोऽस्मि। कथंभूतः विधूतः भेदमोहः अब्रह्मात्मकस्वतंत्रवस्तुभेदज्ञानात्मको मोह एकरूपे आत्मनि देवमनुष्यादिभेदमोहश्च यस्य तथाभूतः, यथा दिविष्ठः सूर्यः एक एव सन्प्रतिदृशं दृशा दृशा वारिगतेनापि नयनेनाभिमुखं तत्त्वादौ भासमानः जलादिगतवृद्धिह्रासादिदोषागोचरः व्याप्यवस्तुगतदोषसंगरहितोऽर्कस्तमिव हृदि हृदि धिष्ठितमिति दृष्टांतार्थः। अन्यथाऽर्कदृष्टांतो न घटतेऽतोयं निर्दोषत्वे दृष्टांतः "वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं दर्शनाच्च" इति हि सूत्रितं, तत्र हि "न स्थानतोऽपि परस्योभयलिंगम्" इत्यनेन पृथिव्यादिष्वंतरात्मतयावस्थितस्यापि परमात्मनो निखिलनिरस्तदोषत्वसमस्तकल्याणगुणाकरत्वरूपोभयलिंगश्रवणात्पृथिव्यादिगतदोषसंस्पर्शाभावमभिधाय "अत एव तूपमा सूर्यकादिवत्" इत्यनेन यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वमपि तत एव जलदर्पणादिप्रबिंबितसूर्यादिवत्परमात्मा तत्र तत्रावस्थितोऽपि निर्दोष इति शास्त्रेषूपमा क्रियते "आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्। एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इत्यादिष्वित्यभिधाय पुनः "अंबुवदग्रहणात्तु न तथात्वम्" इत्यनेन सूत्रेणांबुदर्पणादिषु यथा सूर्यमुखादयो गृह्यंते न तथा पृथिव्यादिषु स्थानेषु परमात्मा गृह्यते, अम्ब्वादिषु हि सूर्यादयो भ्रांत्या तत्रस्था इव गृह्यंते न परमार्थतस्तत्रस्थाः। इह तु "यः पृथिव्यां तिष्ठन्य आत्मनि तिष्ठन्" इत्येवमादिना परमार्थत एव परमात्मा पृथिव्यादिषु स्थितो गृह्यते। अतः सूर्यादेरंबुदर्पणादिप्रयुक्तदोषानतुषंगस्तत्र तत्र स्थित्यभावादेवातो न तथात्वं दार्ष्टान्तिकस्य न दृष्टांततुल्यत्वमिति परिचोद्य वृद्धिह्रासभाक्त्वमित्यादिसूत्रेण पृथिव्यादिस्थानांतर्भावात्स्थानिनः परब्रह्मणः स्वरूपतो गुणतश्च पृथिव्यादिस्थानगतवृद्धिह्रासादिदोषभाक्त्वमात्रं सूर्यादिदृष्टांतेन निरस्यते। कथमित्यवगम्यते उभयदृष्टांतसामंजस्यादेवमिति निश्चीयते 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। जलाधारेष्विवांशुमानि'ति दोषवत्स्वनेकेष्ववस्थितेस्तस्याकाशस्य वस्तुतोऽनवस्थितस्यांशुमतश्च दृष्टांतस्योपादानं हि परमात्मनः पृथिव्यादिगतदोषभाक्त्वनिवर्त्तनमात्रे प्रतिपाद्ये समंजसं भवति। घटकरकादिषु वृद्धिह्रासभाक्षु पृथग्युज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्न स्पृश्यते यथा च जलाधारेषु विषमेषु दृश्यमानोप्यंशुमांस्तद्गतवृद्धिह्रासादिभिर्न स्पृश्यते तथायं परमात्मा पृथिव्यादिषु नानाकारेष्वचेतनेषु चेतनेषु च स्थितः तद्गतवृद्धिह्रासादिदोषैरसंस्पृष्टः सर्वत्र वर्त्तमानोऽप्येक एवास्पृष्टदोषगंधकल्याणगुणक एव यथा जलादिषु वस्तुतोऽनवस्थितस्याप्यंशुमतो हेत्वभावाज्जलादिदोषानभिष्वंगस्तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोषप्रत्यनीकाकारतया दोषहेत्वभावाच्च न दोषगंध इति भाषितम्॥ ४२॥ ❀ ❀ इत्थं भगवति कृष्णे परमात्मनि मनोवाग्दृष्टीनां वृत्तिभिर्व्यापारैरात्मानं प्रत्यगात्मानमावेश्य तेन संयुक्तमनुसंधायेत्यर्थः, स भीष्मोंऽतर्लीनः प्राणवायुर्यस्य तथाभूत उपारमच्छरीरं विहायार्चिरादिगत्या परमपुरुषं प्राप्त इत्यर्थः॥ ४३॥ ❀ ❀ तदा भीष्मं निष्कले निर्दोषे ब्रह्मणि संपद्यमानं सर्वोपाधिविधूननपूर्वकं ब्रह्म प्राप्तवंतमभिज्ञाय सर्वे तत्रत्यास्तूष्णीं बभूवुर्यथा दिनात्यये रात्रौ वयांसि पक्षिणस्तद्वत्॥ ४४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मुनीनां गणैः नृपाणां वर्यैश्च संकुले निबिडे युधिष्ठिरराजसूये यज्ञे अंतःसदसि येषामृष्यादीनां मध्ये योऽर्हणमग्रपूजामभिपेदे प्राप्तवान् युधिष्ठिरपृष्टभीष्ममुखेनायमेवाग्रपूज्य इति शाश्वत उपपाद्यादत्तेति वा स एष आत्मा मत्कारुण्यान्मरणसमये मम दृशिगोचरः दृष्टिविषय आविरभूदहो मम भाग्यमिति शेषः। आविरात्मा प्रकाशरूप इति वा॥ ४१॥ ❀ ❀ आत्मत्वविवरणपूर्वकं स्तौति तमिममिति। चक्षुरभिमानित्वेन प्रतिदृशं दृशं दृशं प्रति नैकधा चक्षुरिंद्रियनियामकतया अनेकरूपं स्थितमर्कं यथैकमेव समधिगच्छति ज्ञानी तथा अहमप्यात्मना कल्पितानां सृष्टानां शरीरभाजां जीवानां हृदि हृदि धिष्ठितं विविधं बहुरूपं स्थितं तमिममजं कृष्णम् एकत्वसंख्याविशिष्टं न द्वित्वोपेतं समधिगतोऽस्मि ज्ञातवानस्मि। कीदृशोऽहं विधूतभेदमोहः अतत्तार-

गुणादिषु निरस्तभेदभ्रमबुद्धिः यथास्थितवस्तुविज्ञानी वा अधिगंत्रधिगमनाधिगम्यानां भेदस्याबाधितानुभवसिद्धत्वादन्योऽहं कृष्णोऽन्य इति भेदमोहनिरासवचनं निजदर्शनदुराग्रहविजृंभितैरविद्याकल्पितमात्मपदप्रयोगेण निरस्तम्। अन्यथा तस्य वैयर्थ्यं स्यात्। शरीरभाजामित्यनेन चेतनबहुत्वसिद्धेश्च "नित्यो नित्यानां चेतनश्चेतनानामि"ति श्रुतेः ॥ ४२ ॥ ❀ ❀ स्तुतिमुपसंहरति क्षितिभरमिति। श्वसन इव वायुर्यथा वंशेषु वेणुषु मिथः संघर्षणाद्वह्निं सृजति तथाऽयं श्रीकृष्णः क्षितिभरं भूभारम् असुरबललक्षणमवरोपितुमवतारयितुं कुरूणामक्षवंशे वह्निं द्यूताख्यदहनमसृजत् तमिममनुव्रतानां भक्तानामार्तिं हतवानार्तिहा अंघ्रिर्यस्य स तथोक्तस्तमजं श्रीकृष्णं हृदि परिरभ्य मर्त्यनीडं मरणधर्मशरीरं जहामि स कृष्णोऽत्रानुग्रहं करोत्विति वाक्यशेषः (एतत्पद्यं माध्वसंप्रदायपाठस्थम्) ॥ ४३ ॥ ❀ ❀ कथंकारं शरीरमत्याक्षीदिति तत्राह कृष्ण इति एवमुक्तप्रकारेण मनसो वाचो दृष्टेर्वृत्तिभिर्हृदि परिरभ्येत्युक्तत्वादात्मनि हृदि स्थिते बहिः स्थिते च श्रीकृष्णे भगवति आत्मानं स्वजीवचैतन्यलक्षणमंतःकरणं नाहं स्वतंत्रस्तदधीन एवेत्यावेश्य निधाय स भीष्मः अंतःश्वासः रेचकपूरकैः कृत्वा श्वासोच्छ्वासरूपप्राणापानौ कुंभके कृत्वा मूलाधारब्रह्मनाड्या नाभिचक्रकादिक्रमेण उदानवायुमूर्ध्वं नीत्वोपारमत् शरीरमजहादित्येकान्वयः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं सर्वशुभस्वभावत्वमुक्त्वा सर्वपूज्यत्वसर्वमनोहरत्वसर्वदुर्लभदर्शनत्वान्याह मुनिगणेति। आत्मा परमात्मा ॥ ४१ ॥ ❀ ❀ परमात्मत्वस्थापनाय तत्र विभूमत्वं दर्शयन् स्वमत्युपकल्पनमेवोपसंहरति तमिति। तमिममग्रत एवोपविष्टं श्रीकृष्णं व्यष्ट्यन्तर्यामिरूपेण निजांशेन शरीरभाजां हृदि हृदि धिष्ठितं–केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तमित्युक्तदिशा तत्तद्रूपेण भिन्नमूर्त्तिवद्वसन्तमपि एकमभिन्नमूर्त्तिमेव समधिगतोऽस्मि। अयं परमानन्दविग्रह एव व्यापकः स्वान्तर्भूतेन निजाकारविशेषेणान्तर्यामितया तत्र तत्र स्फुरतीति विज्ञातवानस्मि। यतोऽहं विधूतभेदमोहः अस्यैव कृपया दूरीकृतो भेदमोहः भगवद्विग्रहस्य व्यापकत्वासम्भावनाजनिततन्नानात्वज्ञानलक्षणो मोहो यस्य तथाभूतोऽहम्। तेषु व्यापकत्वे हेतुः। आत्मकल्पितानाम् आत्मन्येव परमाश्रये प्रादुष्कृतानाम्। अत्र दृष्टान्तः प्रतिदिशमिति। प्राणिनां नानादेशस्थितानामवलोकनमवलोकनं प्रति यथैक एवार्को वृक्षकुड्याद्युपरिगतत्वेन तत्रापि कुत्रचिदव्यवधानः संपूर्णत्वेन सव्यवधानस्त्वसंपूर्णत्वेनानेकधा दृश्यते तथेत्यर्थः। दृष्टान्तोऽयमेकस्यैव तत्र तत्रोदय इत्येतन्मात्रांशे। वस्तुतस्तु श्रीभगवद्विग्रहोऽचिन्त्यशक्त्या तथा तथा भासते सूर्यस्तु दूरस्थ-विस्तीर्णात्मतास्वभावेनेति विशेषः। अथवा तं सूर्यवर्णितस्वरूपम् इममग्रत एवोपविष्टं शरीरभाजां हृदि हृदि सन्तमपि समधिगतोऽस्मि। यद्यप्यन्तर्यामिरूपं तस्माद्रूपादन्याकारं तथाप्येतद्रूपमेवाधुना तत्र तत्र पश्यामि। सर्वतो महाप्रभावस्यैतस्य रूपस्याग्रतोऽन्यस्य रूपस्य स्फुरणाशक्तेरिति भावः। अत्र दृष्टान्तो देशभेदेऽप्यभेदबोधनाय ज्ञेयः, न तु पूर्णापूर्णत्वविवक्षायै। अमीलितदृग्व्यधारयदिति कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिरित्युपक्रमोपसंहारादत्र श्रीविग्रह एव प्रस्तूयते। ततो नेदं पद्यं ब्रह्मपरं व्याख्येयमिति ॥ ४२-४३ ॥ ❀ ❀ सम्पद्यमानमिति। निष्कलब्रह्मशब्देन मायातीतो नराकृतिपरब्रह्मरूपः श्रीकृष्ण एवोच्यते। तस्मिन् सम्पद्यमानता च तत्संगतिरेव तथोक्तं सप्तमे–'अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्र-शातनम्। तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदयं हृदीश्वरमि'ति। अत्र भीष्मस्य वसुत्वात् "यावदधिकारमवस्थिति-राधिकारिकाणाम्" इत्यधिकरणविरोधः स्यादिति चेत् न, लीलया स्वांशेन तत्राप्यवस्थितिसम्भवात्। "तस्य सर्वेषु लोकेषु कामचारो भवती"ति मुक्तिविशेषप्रतिपादकश्रुतेः। एवमेव महाभारताविरोधोऽपि स्यात् ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

किञ्च सम्प्रति प्रत्यक्षीकृतं मद्भाग्यमेव तत्प्राप्तेरावश्यकत्वं कथयतीत्याह मुनीति। अन्तःसदसि सभामध्ये युधिष्ठिरस्य राजसूय एषां मुनिगणादीनामीक्षणीयः अहो रूपम् अहो महिमेत्येवमाश्चर्येण विलोकनीयः सन् उपपेदे प्राप। यः स एष ममात्मा मत्प्राणनाथः सम्प्रति मम दृशिगोचर एव मत्प्रार्थितं ददान एवास्ते इति ॥ ४१ ॥ ❀ ❀ ननु कथं तर्हि त्वयि मे रतिरस्त्वित्येकवारमपि युष्मत्प्रयोगेण न ब्रूषे, किन्तु प्रतिश्लोकमेव 'विजयसखे विजयरथकुटुम्बे मे रतिरस्तु, चरणरतिः परमस्य तस्य मेऽस्तु। स भवतु मे भगवान् गतिरि'ति तच्छब्दप्रयोगेणैवेति तत्राह तमिति। तं पार्थसारथिं प्रग्रहप्रतोदालङ्कृतवामदक्षिणकरं मम हृदि स्फुरन्तमेव इमम् अधिगतोऽस्मि न त्विममेव तम्। तस्यैव हृदि प्रथमप्रविष्टत्वादभ्यासेन तदीयस्फूर्तिव्याप्ते हृदि अयं प्रवेष्टुं न शक्नोतीति भावः। तं कीदृशम् अजं न जायत इत्यजस्तम् न केवलं तदानीं युद्धकाल एव तादृशस्वरूपो मच्चक्षुषोरग्रे संजातः। अपि तु युद्धात् पूर्वमपि स्वाभाविकेन मनोरथेन मम हृदि तथा भात आसीदेवेति भावः। तेनात्र न मम दोषः, किन्तु हृदिस्थः परमेश्वरो यं यं यथा स्फोरयति भद्रमभद्रं वा स तथैवाशास्ते इत्याह–शरीरभाजां जीवानां हृदि हृदि धिष्ठितम् अकारलोपश्छान्दसः। आत्मनां स्वयमेव कल्पितानां–"यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्ती"ति श्रुतेः। न चाहं हृदिस्थं तत्पदवाच्यं पार्थसारथिमन्यं तथा पुरःस्थम् इदंपदवाच्यं चतुर्भुजमन्यं जानामीत्याह प्रतीति। आकाशस्थमेकमर्कमपि जनानां प्रतिदृशम् अवलोकनमवलोकनं प्रति नैकधा अनेकधा अयं मन्मूर्द्धोपरि अर्क इति प्रतिमूर्द्धोपरिस्थमर्कं तत्तद्दृष्टिभेदादनेकधा भातमिवेति।

विधूतो दूरीकृतो भेदरूपो मोहो येन सः। अयमर्थः—मम हृदि तथा युधिष्ठिरादीनां वसुदेवादीनां उद्धवादीनां नन्दादीनां गोपिकानां च हृदि भावभेदेन प्रेमतारतम्येन च पृथक् पृथक् लीलयैव यद्यपि रतिः, तदप्येक एव कृष्ण इति जानामि तथा तेषां तत्तत्प्रेम्णां तत्तद्भावानां चोत्कर्षतारतम्यं सर्वमहं जानाम्येव। तदपि मे पार्थसारथावेव स्वाभाविक्यासक्तिस्तां त्यक्तुं नैव शक्नोमि। पुरःस्थितेऽस्मिंश्चतुर्भुजरूपे धारणापि कृता साप्यकिंचित्करैवाभूदिति ॥ ४२ ॥ ❀ ❀ एवमात्मनि हृदि स्थिते कृष्णे पार्थसारथावित्यर्थः। आत्मानं स्वम् आवेश्य आवेशयुक्तं कृत्वा। अन्तरेव लीनः श्वासो यस्य सः। बहिर्वृत्तेरुपरराम ॥ ४३ ॥ ❀ ❀ एवं भीष्मः स्वाभिलषितं पार्थसारथिं प्राप। लोकास्तु तदविद्वांसो भीष्मो ब्रह्मणि लीनो बभूवेति जानन्ति स्मेत्याह सम्पद्यति। अज्ञाने दृष्टान्तः वयांसि पक्षिणः दिनस्यात्यये अवसाने सति दिनं न दृष्टमिति दिनस्य स्वरूपध्वंसमेव ज्ञात्वा यथा तूष्णीं भवन्ति न शब्दायंते इत्यर्थः। न तु वस्तुतो दिनं नश्यति तत्क्षणेऽपि वर्षान्तरे तस्य स्थितेरवगमात् यामचतुष्टयानंतरं तत्रापि पुनरागमात्। एवं भीष्मस्याप्यत्यये भीष्मो मुक्त इत्यज्ञा विदन्ति। विज्ञास्तु तदैव प्रकटप्रकाशे रथचरणपाणिना कृष्णेन भूमौ धावता सह भीष्मो युद्धयत एवेति पुनरागामिकृष्णावतारे तेन सह भीष्म आविर्भविष्यत्येवेति जानन्ति। यद्वा निष्कं पदकं लातीति तस्मिन् ब्रह्मणि श्रीकृष्णे इत्यर्थः। ब्रह्मसायुज्यप्राप्तिस्तु न व्याख्येया, नित्यपार्षदभीष्मेण फलाभिसन्धिरहिताया रतेर्वाञ्छितत्वात् मोक्षस्याकामितत्वात् भगवतापि बलादकामितफलदानानौचित्यात् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्मर्ष्यादिपूज्यत्वं भगवतो दर्शयन्स्वभाग्यातिशयं सूचयति युधिष्ठिरराजसूये मुनिगणैर्नृपवर्यैश्च संकुलेंऽतःसदसि सभामध्ये एषां मुनिगणनृपवर्यादीनामीक्षणीयोऽर्हणमग्रपूजादिकं य उपपेदे प्राप स एष विश्वात्मा मम दृशिगोचरो दृष्टिविषयः सन् आविः प्रकटोऽस्ति भाग्यवानस्मीत्याशयः ॥ ४१ ॥ ❀ ❀ तमिमिति। तमिममुक्तविधमजं कर्माधीनजन्मशून्यं श्रीकृष्णम् आत्मकल्पितानां तत्तत्कर्मानुसारिणाम् आत्मा श्रीकृष्णेनैवदेमनुष्यादिशरीरेषु स्थापितानां शरीरभाजां हृदि हृदि प्रतिहृदयम् एकमेव प्रतिदृशं तत्तद्दृक् प्रकाशकतयानेकधाऽर्कमिव धिष्ठितं समधिगतोऽस्मि। दृष्टांते प्रभाव्याप्त्या तत्तद्दृक्प्रकाशकतया धिष्ठितत्वं दार्ष्टांतिके तु स्वरूपव्याप्त्या तत्तच्छरीरप्रेरकतयाधिष्ठितत्वमिति विवेकः। नन्वस्तु भगवत एकस्यैव तदंतर्यामित्वं भगवान्केन संबंधेन तं समधिगत इत्यत्राह विधूतभेदमोह इति। विधूतो भेदविषयको मोहो यस्य सः। अयमर्थः—किं जीवपरयोरत्यंतभेदः किं वोपाधिकृतोऽभेदो वस्तुतो भेदः अथवा स्वाभाविको भेदाभेदस्तयोः संबंधः ? नाद्यः पक्षः "तत्त्वमस्या" दिवाक्यविरोधात् "क्षेत्रज्ञं चापि मां विद्धी"ति श्रीमुखवाक्यविरोधाच्च। न द्वितीयः "ज्ञाज्ञौ द्वावजावीशानीशा"वित्यादिवाक्यप्रतिपादितयोरज्ञसर्वज्ञयोर्जीवपरयोरत्यंततोऽभेदासंभवात्। न तृतीयः, उपाधेर्मिथ्यात्वे सत्यवस्तुभेदकत्वासंभवात् सत्यत्वे उपाधिना स्वसामर्थ्याज्जीवपरयोर्भेदः कृत उत परेच्छया ? आद्ये समर्थमुपाधिं कोऽपि निराकर्तुं न क्षमः स्यात्। द्वितीये स्वेच्छया तत्कृतभेदं प्राप्य पुनरभेदमिच्छन्मुग्धवदनाप्तः स्यात्। तस्मादंशांशिनोर्जीवपरयोर्गुणगुणिवत्कार्यकारणवत् स्वाभाविकः सर्वशास्त्रसम्मतो भेदाभेदः संबंध इति तथाह भगवान्सूत्रकारः "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" इत्यादि। अत एव विश्वस्य चिदचिद्रूपत्वेन स्वरूपतो ब्रह्मभिन्नत्वेऽपि तज्जत्वादिना तदभिन्नत्वमाम्नातं छांदोग्ये शांडिल्यब्राह्मणे "सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीते"ति शांत उपासीतेत्येवंविधायामुपासनायां कंटकभूतवैषम्यवारणाय सर्वस्य ब्रह्मत्वमुक्तं, तस्य स्वरूपेण ब्रह्मत्वासंभवात्तज्जत्वादिना ब्रह्मत्वे हेतुमाह तत एव जायते तत्रैव लीयते तेनैवाऽनति चेष्टते इति तज्जलान् इतिशब्दः हेतौ, इति हेतोरिति श्रुत्यर्थः। विस्तरस्तु वेदान्तकौस्तुभादौ द्रष्टव्यः। एवं सत्यंशत्वावच्छिन्नेन रूपेणाभिन्नत्वेप्यंशिनिरपेक्षस्थितिप्रवृत्त्याद्यभावात्तादात्म्यसंबंधेनाहं तं सम्यगधिगतोऽस्मीत्यर्थः ॥ ४२ ॥ ❀ ❀ एवमुक्तलक्षणेन संबंधेन स भीष्मः आत्मनि अंशिनि भगवति श्रीकृष्णे मनोवाग्दृष्टिवृत्तिभिर्भजनप्रकारैः "ममैवांशो जीवलोके जीवभूतः सनातन" इति भगवदुक्तं तदंशभूतमात्मानम् आवेश्य तदंशतया तदंतर्गतमनुसंधाय अंतःश्वासः अत एव लीनः श्वासो यस्य स एवंभूत उपारमदेहं हित्वा श्रीकृष्णं प्राप्त इत्यर्थः ॥ ४३ ॥ ❀ ❀ निष्कले प्राकृतकलारहिते श्रीकृष्णे उक्तप्रकारेण संपद्यमानमाज्ञाय ज्ञात्वा ॥ ४४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

रजोमिश्रसत्त्वावस्थामाह मुनिगणेति। मुनीनां गणाः नृपश्रेष्ठाश्च सात्त्विका राजसाः न तु तामसाः। अंतःसदसि सभामध्ये सर्वतो मध्यस्थाने आभिषेचनिके अहनि सदस्यपूजायां यः सर्वोत्तमः स पूजनीय इत्यस्मदादिभिरुक्ते कृष्णं पुरुषोत्तमं मत्वा येषां सर्वेषामेव संभावितत्वात् अतः सर्वेषां पूजां स्वयमेव गृहीतवान्, तदा च सर्वेषामेव ईक्षणीयो जातः। स इदानीं मम दृशिगोचरः तत्सौंदर्यं सांप्रतं पश्यामि। तस्य प्रकटात्मत्वमाह आविरात्मेति सोप्ययमेव न त्वेतस्मिन् ॥ ४१ ॥ ❀ ❀ एवं स्वदृष्ट्या सर्वावस्था अनुवर्ण्य गुणातीतायामवस्थायां विद्यमाने भगवति स्वात्मसमर्पणमाह तमिममिति। पूर्वं यः सर्वोत्कृष्टधर्मत्वेनोक्तः स चायं हृदयमारभ्य बहिः पर्यंतमनुस्यूततया स्थितः। स च न देहादिरूपः तदाह अजमिति। यथा ममायमंतर्बहि-

स्तिष्ठति तथैव सर्वप्राणिष्वित्याह शरीरभाजां हृदि हृदि धिष्ठितमिति। शरीरभाजो जीवाः स्वस्य समानाकृतिशरीरं पुरुषरूपं संपाद्य स्वसेवां त्याजयित्वा तत्सेवायां नियुक्ताः। तत्र चान्यभजनं मा भवत्विति स्वयमेव हृदि हृदि प्रत्येकपर्यवसायित्वेन धिष्ठितमधिष्ठाय स्थितं अधिष्ठानदेवतात्वेन न तु जीववत्। ननु के ते जीवास्तत्राह आत्मकल्पितानामिति आत्मनैव कल्पिताः "अवस्थितेरिति काशकृत्स्नः"। भगवतोऽवस्थाविशेषो जीवः, प्राकृतभोगार्थं तामवस्थां संपादितवानित्यर्थः। नन्वेक एव कथमनेकस्थानेषु अननुस्यूततया दृश्यते तत्राह प्रतिदृशं तिष्ठति अथवा बहिःस्थित एवायं सूर्यः सर्वेषां दृष्टौ अस्मदर्थ एवायं उदित इति प्रतिभाति "तस्मात्सर्व एव मन्यते मां प्रत्युदगादि"ति श्रुतेः, तस्मात् महतामचिंत्यसामर्थ्यात् नात्र संदेहः कर्तव्यः। तस्मादेवंविधं परमात्मानं सम्यगधिष्ठितोऽस्मि प्राप्तोऽस्मि। योगेनात्मानं तत्र योजितवानित्यर्थः। सर्वोऽपि भगवन्निकटे तिष्ठति। तथापि मायायाः स्वतःकार्यौच द्वौ धर्मावुद्गतौ मोहभेदौ तयोः प्रतिबंधकत्वात् न भगवता सह मेलनमिति मया तौ निवारिताविलाह विधूतभेदमोह इति। इदानीं वा समधिगमनानंतरं भेदमोहावपगतौ॥ ४२॥ ❀ ❀ एवं स्वमनसि स्फुरितं प्रमेयमनूद्य अन्ते स्वकृतमात्मसमर्पणं चानूद्य शरीरं त्यक्तवानित्याह इति। कृष्णे भगवति मूलाविर्भावरूपे एवं कायवाङ्मनोवृत्तयः योजिताः। तैः सह आत्माऽपि योजितः तेषां तु भेदेन योजनं आत्मनस्तु आत्मन्येव योजनम् "इहैव समवलीयंते प्राणा" इत्यर्थः। उक्तो भवति अंतःश्वासः अंतरेव श्वासो यस्य स उपारमत् देहं त्यक्तवान्॥ ४३॥ ❀ ❀ तथाच सर्वेषामपि तथा प्रतीतिर्जातेत्याह संपद्यमानमिति। अंतःस्थितो भगवान् प्रकटीभूतः तत्तस्य सायुज्यवृत्तं महती काचित् प्रभा निर्गता, तया सर्वैर्ज्ञातं भीष्मो ब्रह्मणि संगत इति। तदा परमपुरुषार्थे विघ्नो माभूदिति सर्वे तूष्णीं भूताः। श्रोत्रेन्द्रियस्यानावृतत्वात् विषयैरिन्द्रियद्वारा मनसः आकर्षणसंभवात् तद्द्वारा च जीवस्य यथा सुषुप्तौ वयांसीवेति यथा संध्यापगमे तत्तत्स्थाने स्थिताः पक्षिणः अश्वस्तनत्वाद्विचारशून्याः पूर्वानुसन्धानरहिताश्च निद्राभावे तूष्णीं भवन्ति तथा सर्वसंदेहाभावं श्रुत्वा दृष्टान्तं च दृष्ट्वा वक्तव्याभावात् ब्रह्मभूता एवं तूष्णीं जाता इत्यर्थः॥ ४४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

मुनीत्यादि। न त्वेतस्मिन्निति। न त्वेतच्छरीरान्तर्वर्तीत्यर्थः। अत्र राजसूयस्य राजकर्तृकत्वे राजसत्वात्तत्सम्बन्धितया- र्हणीयत्वस्य राजसत्वम्। ज्ञानोत्तरं निश्चयात्सान्त्विकत्वम्। सावस्था तादृशी ज्ञेया॥ ४१॥ ❀ ❀ तमिममित्यत्र। न तु जीववदिति। न त्वभिमानितयेत्यर्थः। क इति। भिन्ना अभिन्ना वा॥ ४२॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे नवमाध्यायविवरणम्॥ ९॥

श्रीगिरिधरकृता बालप्रबोधिनी

भगवतः सर्वोत्कृष्टत्वं अनुस्मरन् देहत्यागसमये तद्दर्शनेन स्वभाग्यमभिनन्दति-मुनीति। युधिष्ठिरस्य राजसूये मुनिगणैर्नृपवर्यैश्च सङ्कुले व्याप्तेऽन्तस्सदसि सभामध्ये एषां मुनिगणादीनां ईक्षणीयः अहो रूपं अहो महिमेत्येवं आश्चर्येण विलोकनीयः सन् यः अर्हणमग्र्यपूजां उपपेदे प्राप स एष जगतामात्माऽन्तर्यामी मम दृशिगोचरो दृष्टिविषयः सन्नाविः प्रकटो वर्त्तते, अहो मम भाग्यमिति शेषेणान्वयः॥ ४१॥ ❀ ❀ तत्प्राप्त्यात्मनः कृतार्थतां सूचयन्नाह-तमिति। तमात्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितमधिष्ठितं अन्तर्यामिणमत एवाजं जन्मादिविकारशून्यम् इमं श्रीकृष्णमहं सम्यगधिगतः प्राप्तोऽस्मीत्यन्वयः। अकारलोप आर्षः। ननु प्रतिशरीरं प्रवृत्तिभेददर्शनात् अन्तर्यामिभेदोऽनुमीयते, कथं तदैक्यमित्याशङ्क्य तद्दृष्टान्तेन साधयति-प्रतिदृशमिति। यथा सर्वप्राणिनां दृशं दृशं प्रति नैकधा अनेकधा प्रतीतस्यापि अर्कस्य वस्तुत एकत्वमेव तथा प्राणिभेदाद्भेदेन प्रतीतस्यापि अन्तर्यामिणो वस्तुत एकत्वमेवेत्यर्थः। नन्वेवं चेत्तर्ह्यन्येऽपि सर्वे तत्रत्याः कृष्णं पश्यन्तस्तं प्राप्ता एव, त्वयि को विशेष इत्याशङ्क्य सम्यक्त्वमेव स्पष्टयति-विधूतभेदमोह इति, विधूतो भगवत्कृपया निवृत्तो भेदो जीवजडान्तर्यामिभेददर्शनं तत्प्रयुक्तो मोहो देहादौ अहम्ममाभिमानश्च यस्य स इत्यर्थः। अन्येषां भेदमोहयोर्विद्यमानत्वात् न सम्यक्प्राप्तिरिति भावः॥ ४२॥ ❀ ❀ एवमात्मनि सर्वात्मके भगवति श्रीकृष्णे मनोवाग्दृष्टीनां वृत्तिभिः सह आत्मानं प्रत्यगात्मानं आवेश्यैकीकृत्य अन्तरेव लीनः श्वासो यस्य स भीष्मः उपारमत् प्राकृतं देहादिकं तत्याजेत्यन्वयः॥ ४३॥ ❀ ❀ एवं 'अन्ते या मतिः सा गतिः' इति न्यायेन तस्य भगवत्सायुज्यं सूचितम्। ननु तत्र महाजनकोलाहले कथं तस्य श्रीकृष्णे स्थिरा मतिर्जातेत्याशङ्क्याह-सम्पद्यमाने इति। निष्कले प्राकृतदेहरहिते शुद्धे ब्रह्मणि श्रीकृष्णे भीष्मं सम्पद्यमानम् ऐक्यं प्राप्तम् आज्ञाय ते तत्रत्याः सर्वे जना अस्य विघ्नो मा भवत्वित्याशयेन तूष्णीं बभूवुरित्यन्वयः। तत्र दृष्टान्तमाह-दिनात्यये रात्रौ वयांसि पक्षिणो यथा तूष्णीं भवन्ति तथेत्यर्थः॥ ४४॥

हिन्दी अनुवाद

जिस समय युधिष्ठिरका राजसूय यज्ञ हो रहा था, मुनियों और बड़े-बड़े राजाओंसे भरी हुई सभामें सबसे पहले सबकी ओरसे इन्हीं सबके दर्शनीय भगवान् श्रीकृष्णकी मेरी आँखोंके सामने पूजा हुई थी; वे ही सबके आत्मा प्रभु आज इस

मृत्युके समय मेरे सामने खड़े हैं ॥ ४१ ॥ ❀ ❀ जैसे एक ही सूर्य अनेक आँखोंसे अनेक रूपोंमें दीखते हैं, वैसे ही अजन्मा भगवान् श्रीकृष्ण अपने ही द्वारा रचित अनेक शरीरधारियोंके हृदयमें अनेक रूप-से जान पड़ते हैं; वास्तवमें तो वे एक और सबके हृदयमें विराजमान हैं ही। उन्हीं इन भगवान् श्रीकृष्णको मैं भेद-भ्रमसे रहित होकर प्राप्त हो गया हूँ ॥ ४२ ॥ ❀ ❀ सूतजी कहते हैं—इस प्रकार भीष्मपितामहने मन, वाणी और दृष्टिकी वृत्तियोंसे आत्मस्वरूप भगवान् श्रीकृष्णमें अपने आपको लीन कर दिया। उनके प्राण वहीं विलीन हो गये और शान्त हो गये ॥ ४३ ॥ ❀ ❀ उन्हें अनन्त ब्रह्ममें लीन जानकर सब लोग वैसे ही चुप हो गये, जैसे दिनके बीत जानेपर पक्षियोंका कलरव शान्त हो जाता है ॥ ४४ ॥

तत्र दुन्दुभयो नेदुर्देवमानव[1]वादिताः। शशंसुः साधवो राज्ञां[2] खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥
तस्य निर्हरणादीनि सम्परेतस्य भार्गव। युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥ ४६ ॥
तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः। ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः ॥ ४७ ॥
ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम्। पितरं सान्त्वयामास गान्धारीं च तपस्विनीम् ॥ ४८ ॥
पित्रा चानुमतो राजा वासुदेवानुमोदितः। चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे युधिष्ठिरराज्यप्रलम्भो नाम नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवोऽनसूयवः ॥ ४५ ॥ ❀ ❀ निर्हरणादीनि दाहसंस्कारादीनि सम्यक्परेतस्य मुक्तस्यापीत्यर्थः ॥ ४६ ॥ ❀ ❀ तस्य गुह्यनामभिर्वेदोक्तैः कृष्ण एव हृदयं येषां ते कृष्णहृदयाः ॥ ४७ ॥ ❀ ❀ पितरं धृतराष्ट्रम्। तपस्विनीं संतापवतीम् ॥ ४८ ॥ ❀ ❀ राजा युधिष्ठिरः अनुमतोऽनुज्ञातः ॥ ४९ ॥

इति श्रीमद्भागवते प्रथमस्कंधे टीकायां नवमोऽध्यायः ॥ ९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र भीष्मनिर्याणसमये पुष्पवृष्टयो भीष्ममूर्ध्नि पेतुः ॥ ४५ ॥ ❀ ❀ तस्य भीष्मस्य। इत्यर्थ इति। सम्यक् परं परमात्मानं श्रीकृष्णमितस्य प्राप्तस्येति भावः। यद्यपि सांपरायिकं परलोकहितार्थं क्रियते श्रीभीष्मस्य भगवत्पार्षदत्वेनाधिकारि-वसुत्वेन च तन्न संगच्छते। तथापि युधिष्ठिरस्य साक्षाद्धर्मावतारत्वेन धर्मप्रवर्तकत्वात् "श्रुत्युक्तं न त्यजेत्कचित्" इति स्मृतेः, "कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः" इति प्रह्लादं प्रति श्रीनृसिंहवाक्याच्च जीवन्मुक्तविदेहमुक्तानामपि सांपरायिकमवश्यं कार्यमिति वर्णयिष्यामो विशेषतः सप्तमस्कंधे। दुःखित इति लोकदृष्टयोक्तम् ॥ ४६ ॥ ❀ ❀ गुह्यनामभिर्दुस्तर्क्यमहिम-कृष्णगोविंदेत्यादिभिः। हे कृष्ण भक्तवत्सल प्रेमाधीन नमस्त्वच्चातुर्यायेति तुष्टुवुः। ततो भीष्मनिर्याणोत्तरम् ॥ ४७ ॥ ❀ ❀ ततः मुनिजनगमनोत्तरम् ॥ ४८ ॥ ❀ ❀ पित्रा धृतराष्ट्रेण। पितृपितामहादागतं पितृपैतामहम्। अत्र परपदवृद्धिरार्षः ॥ ४९ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवव्याख्या

तत्र तदा देवैर्मानवैश्च वादिता दुंदुभयो नेदुः दध्वनुः साधवो भागवताः शशंसुरहो भीष्मस्य भाग्यं माहात्म्यं चानि-तरसाधारणमिति तुष्टुवुः राज्ञां पुष्पवृष्टयः खादुपरिदेशात्पेतुः पतिता इत्यर्थः ॥ ४५ ॥ ❀ ❀ हे भार्गव संपरेतस्य परलोकं प्राप्तस्य भीष्मस्य निर्हरणादीनि दाहादिकर्माणि कारयित्वा युधिष्ठिरो मुहूर्तं दुःखितो बभूव ॥४६॥ ❀ ❀ तथा मुनयो हृष्टाः कृष्णं तस्य कृष्णस्य गुह्यं स्वरूपयाथात्म्यं वेदांतवेद्यं तत्प्रकाशकैर्नामभिस्तुष्टुवुः। ततस्ते मुनयः कृष्ण एव हृदयं येषां तथाभूताः पुनराश्रमात्प्रययुः ॥ ४७ ॥ ❀ ❀ ततः कृष्णेन सहितो युधिष्ठिरो हस्तिनापुरं गत्वा पितरं धृतराष्ट्रं तपस्विनीं पतिव्रतां गांधारीं च सांत्वयामास ॥ ४८ ॥ ❀ ❀ ततः पित्रा धृतराष्ट्रेणानुज्ञातो वासुदेवेन भगवतानुमोदितश्च विभुर्युधिष्ठिरः पित्रादिक्रमप्राप्तं राज्यं धर्मेण चकार शशास ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां नवमोऽध्यायः ॥ ९ ॥

---

१. प्रा० पा०—दानव०। २. प्रा० पा०—राजन्।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

*समागतास्ते निष्कले षोडशकलावर्जिते ब्रह्मणि हरौ संपद्यमानं प्राप्तवंतं भीष्ममाज्ञाय तूष्णीं बभूवुः कथमिव । दिनात्यये संध्यासमये वयांसि पक्षिण इवेत्यन्वयः ॥ ४५ ॥ ❀ ❀ तत्र भीष्मस्य निर्याणसमये खादाकाशात् भीष्ममूर्ध्नीति शेषः ॥ ४६ ॥ ❀ ❀ संपरेतस्य मृतस्य निर्हरणादीनि शवसंस्कारपुरःसराणि कर्माणि कृत्वा भीमादिभिश्च कारयित्वा ॥ ४७ ॥ ❀ ❀ भगवन्महिम्ना हृष्टरोमांचितसर्वांगास्तस्य कृष्णस्य गुह्यनामभिः वेदशिरोगतात्यंतरहस्यनामभिः कृष्णहृदयाः कृष्णो हृदये येषां ते तथा कृष्णे हृदयं मनो येषामिति वा ॥ ४८ ॥ गजाह्वयं गजसमाननामानं हस्तिनपुरं पितरं धृतराष्ट्रम् ॥ ४९ ॥ ❀ ❀ अनुमोदितोऽनुज्ञातः पित्रा धृतराष्ट्रेण च पितृपैतामहं पितृपितामहागतं धर्मशास्त्रोक्तवर्त्मना विभू राज्यकरणशक्तिमान् ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां नवमोध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

तत्रेति राज्ञां सभायामिति शेषः । साधवो मुन्यादयः ॥ ४५-४६ ॥ ❀ ❀ गुह्यनामभिर्दुस्तर्क्यमहिमव्यञ्जकनामभिः कृष्णगोविन्देत्यादिभिः ॥ ४७-४९ ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राज्ञां मध्ये साधवोऽनसूयवः ॥ ४५ ॥ ❀ ❀ निर्हरणादीनि संस्कारान् । सम्परेतस्येति नित्यपार्षदे भीष्मे वसोः प्रवेशात् तस्यैव देहत्यागो भगवता दर्शितः । 'यावदधिकारमवस्थितिराधिकारिकाणाम्' इति न्यायेन तस्यैवांशेन वसुत्वे च स्थितिर्भगवल्लोके प्राप्तिश्च । अतः सम्यक् परं परमेश्वरम् इतस्य प्राप्तस्येति व्याख्येयम् । "तस्य सर्वेषु लोकेषु कामचारो भवती"ति मुक्तिविशेषप्रतिपादकश्रुतेः । नित्यपार्षदभूतस्य भीष्मस्य त्वप्रकटलीलायां पार्थसारथिप्राप्तिरुक्तैव । अत एव तत्र सोऽन्तः श्वासः प्राणो यस्य तथाभूतः सन्नुपारमत् प्रकटप्रकाशादुपरतोऽभूदिति तत्रार्थः सम्मतः देहं तत्याज प्राणांस्तत्याजेत्याद्यनुक्तेरिति । मुहूर्त्तं दुःखित इति लोकव्यवहाररक्षार्थम् ॥ ४६ ॥ ❀ ❀ तद्गुह्यनामभिः हे भक्तवत्सल कृष्ण प्रेमाधीन नमस्त्वच्चातुर्यायैवेति ॥ ४७ ॥ ❀ ❀ पितरं धृतराष्ट्रम् ॥ ४८-४९ ॥

इतिसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र तस्मिन् महोत्सवे राज्ञां दुन्दुभयः देवैर्मानवैश्च ऋष्यादिभिर्वादिताः शंखादयो नेदुः, साधवो भागवताः शशंसुः, खादन्तरिक्षाद्देवादिविमुक्ताः पुष्पवृष्टयः पेतुः ॥ ४५ ॥ ❀ ❀ हे भार्गव संपरेतस्य सम्यग्भगवन्तं प्राप्तस्य निर्हरणादीनि दाहादिकर्माणि ॥ ४६ ॥ ❀ ❀ तस्य कृष्णस्य गुह्यैर्हेतुवादिभिर्दुर्ज्ञेयैरन्यार्थपरतया प्रतीयमानैर्नामभिः ॥ ४७ ॥ ❀ ❀ पितरं धृतराष्ट्रम् ॥ ४८-४९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

देवानां सर्वज्ञत्वात् अस्मदीयो वसुर्मुक्त इति । वाद्यवादनं चक्रुरित्याह वादनप्रशंसापुष्पवृष्टयः तामससात्त्विकराजसरूपा उत्तमाः, राज्ञां मध्ये ये साधवः, अनेन तत्रापि दुष्टाः संतीति ज्ञापितम् ॥ ४५ ॥ ❀ ❀ "भस्मांतं शरीर"मिति श्रुतेः शरीरप्रपत्तिं चक्रुरित्याह तस्येति निर्हरणं ज्वलनं संपरेतस्य शरीरस्य भीष्मात्मानं गृहीत्वा भगवति तिरोहिते भारतो युधिष्ठिरः मोहाभावाय कारयित्वेति पदाभिषिक्तस्य स्वतः करणमनुचितं, मुहूर्त्तखेदो वैधः ॥ ४६ ॥ ❀ ❀ भीष्मोक्तं कृतं च सर्वेषां हृदये समागतमित्यभिप्रायेणाह तुष्टुवुरिति तद्गुह्यनामभिः अद्भुतकर्मत्वादिभिः कृष्णं हृदये निवेश्य सर्वे गता इत्याह ततस्ते इति । पुनरिति केचन भगवद्दर्शनार्थं स्वाश्रमे गत्वापि समागत्य कृष्णं दृष्ट्वा पुनर्गता इत्यर्थः ॥ ४७ ॥ ❀ ❀ युधिष्ठिरस्य तु ज्ञानं वृत्तिमाह स्वयं विशोकः शोकमन्येषां दूरीकरोति पितरं धृतराष्ट्रं तपस्विनीं संतप्तां चकारादन्यांश्च ॥ ४८ ॥ ❀ ❀ ततो भगवत्कृपया तस्य राज्यप्राप्तिरित्याह पित्रा चेति अधिकृतैर्मंत्रिभिः पित्रा च अनुमतः स्वभावत एव राजा मुख्यतया वासुदेवानुमोदितः पितृपैतामहमावश्यकं विभुः समर्थः अनेन सर्वे गुणाः सर्वदोषाभावश्चोक्तः ॥ ४९ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे नवमोऽध्यायः ॥ ९ ॥

* एतदीयपाठे 'सम्पद्यमानम्' इति श्लोकः ४५ तम इति सम्भाव्यते । मातृकापुस्तकमुपजीवद्भिः अस्माभिः यथास्थितमेवात्र दीयते ।

श्रीगिरिधरकृता बालप्रबोधिनी

तत्र तदा भीष्ममुक्त्यनन्तरं तस्य मुक्तिं ज्ञात्वा देवैर्मानवैश्च वादिता दुन्दुभयो नेदुः। ये राज्ञां मध्ये साधवः अनसूयवस्ते तं शशंसुः तुष्टुवुः। अस्मदीयो वसुर्विमुक्त इति हर्षेण देवैः कृताः पुष्पवृष्टयः खात् आकाशात्पेतुः॥ ४५॥ ❀ ❀ लौकिकवैदिकव्यवहारस्य प्राबल्यं सूचयन्नाह–तस्येति। हे भार्गव सम्परेतस्य सम्यक् परं परमेश्वरं इतस्य प्राप्तस्य विमुक्तस्यापि तस्य भीष्मस्य निर्हरणादीनि दाहादीनि कर्माणि युधिष्ठिरस्य राज्याभिषिक्तस्य स्वतः करणस्यानुचितत्वात् अन्यतः कारयित्वा मुहूर्त्तपर्यन्तं दुःखितोऽभवत्॥ ४६॥ ❀ ❀ ततश्च हृष्टा मुनयस्तस्य गुह्यनामभिरद्भुतकर्मत्वादिभिः कृष्णं तुष्टुवुः पुनः कृष्णो हृदये येषां ते मुनयः स्वाश्रमान् प्रययुरित्यन्वयः॥ ४७॥ ❀ ❀ भगवतोऽद्भुतकर्मत्वं सूचयन् भीष्मोक्तं युधिष्ठिर-मनस्यागतं यतस्तथैव कृतवानित्याशयेनाह–तत इति। तदनन्तरं कृष्णेन सहितो युधिष्ठिरो गजाह्वयं हस्तिनापुरं गत्वा पितरं धृतराष्ट्रं तपस्विनीं पुत्रमरणेन सन्तापवतीं गन्धारीं च सान्त्वयामास, विनयोक्तिभिस्तयोः सन्तापं दूरीकृतवानित्यर्थः॥ ४८॥ ❀ ❀ अन्तर्यामिप्रेरितेन पित्रा धृतराष्ट्रेणानुमतोऽनुज्ञातो वासुदेवेन कृष्णेनानुमोदितश्च राजा युधिष्ठिरः पितृपैतामहं पित्रादि-परम्पराप्राप्तं राज्यं धर्मेण चकारेत्यन्वयः। भगवदनुग्रहात्तदा तस्मिन् राज्यनिर्वाहकाः सर्वे गुणाः सर्वे दोषाभावाश्च प्रादुर्भूता इति सूचयन्नाह–विभुरिति, समर्थ इत्यर्थः॥ ४९॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने॥ विवृतौ नवमोऽध्यायो धर्मादिविनिरूपकः॥ ३॥

हिन्दी अनुवाद

उस समय देवता और मनुष्य नगारे बजाने लगे। साधुस्वभावके राजा उनकी प्रशंसा करने लगे और आकाशसे पुष्पोंकी वर्षा होने लगी॥ ४५॥ ❀ ❀ शौनकजी! युधिष्ठिरने उनके मृत शरीरकी अन्त्येष्टि क्रिया करायी और कुछ समयके लिये वे शोकमग्न हो गये॥ ४६॥ ❀ ❀ उस समय मुनियोंने बड़े आनन्दसे भगवान् श्रीकृष्णकी उनके रहस्यमय नाम ले-लेकर स्तुति की। इसके पश्चात् अपने हृदयोंको श्रीकृष्णमय बनाकर वे अपने-अपने आश्रमोंको लौट गये॥ ४७॥ तदनन्तर भगवान् श्रीकृष्णके साथ युधिष्ठिर हस्तिनापुर चले आये और उन्होंने वहाँ अपने चाचा धृतराष्ट्र और तपस्विनी गान्धारीको ढाँढस बँधाया॥ ४८॥ ❀ ❀ फिर धृतराष्ट्रकी आज्ञा और भगवान् श्रीकृष्णकी अनुमतिसे समर्थ राजा युधिष्ठिर अपने वंशपरम्परागत साम्राज्यका धर्मपूर्वक शासन करने लगे॥ ४९॥

नवाँ अध्याय समाप्त

अथ दशमोऽध्यायः

शौनक उवाच

हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ।
सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥ १ ॥

सूत उवाच

वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ।
निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥ २ ॥
निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ।
शशास गामिन्द्र इवाजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥ ३ ॥
कामं ववर्ष पर्जन्यः सर्वकामदुघा मही । सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दशमे कृतकार्यस्य हस्तिनापुरतो हरेः । स्त्रीभिः संस्तूयमानस्य वर्ण्यते द्वारकागमः ॥ १ ॥

राज्यं चकारेत्युक्तं तत्र पृच्छति । हत्वेति । स्वस्य रिक्थे धने स्पर्धंते स्म ये ते तथा । यद्वा स्वरिक्थाय स्पृत्संग्रामो येषामत एव धनादिहरणादाततायिनस्तान्हत्वा । प्रत्यवरुद्धभोजनो बंधुवधदुःखेन संकुचितभोगो राज्यलाभेन प्राप्तभोगो वा । कथं राज्ये प्रवृत्तः प्रवृत्तो वा ततः किमकार्षीत् ॥ १ ॥ ❀ ❀ राज्यप्रवृत्तौ श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह । वंशं कुरोः संरोहयित्वा परीक्षिद्रक्षणेन संरोह्यांकुरितं कृत्वा । कथंभूतम् । वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोग्निस्तेन निर्हृतं दग्धम् । निजराज्ये निवेश्य च ॥ २ ॥ ❀ ❀ प्रवृत्तौ हेतुमुक्त्वा किमकार्षीदित्यस्योत्तरमाह । प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतन्त्रमित्येवंभूतं तेन विधूतो विभ्रमोऽहंकर्तेत्येवंभूतो मोहो यस्य सः । अनुजैरनुवर्तितः सेवितः सन् । अजितः श्रीकृष्ण एवाश्रयो यस्य सः । परिधिः समुद्रस्तत्पर्यन्तां गां पृथ्वीं पालयामास ॥ ३ ॥ ❀ ❀ तस्य राज्यमनुवर्णयति । काममिति त्रिभिः मही सर्वकामदोग्ध्री बभूव । व्रजान् गोष्ठानि । ऊधस्वतीरूधस्वत्यः ऊधः क्षीराशयस्तद्वत्यः । स्थूलोधस इत्यर्थः । सिषिचुराभ्यषिंचन् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृतं कार्यं युधिष्ठिराय राज्यदानरूपं येन तस्य (१) स्वस्य युधिष्ठिरस्य स्पर्द्धकानां प्रायो हननं नोचितमित्यत आह–यद्वेति । अत एव स्वरिक्थस्पृड्हत्वादेव भोगानामाधिक्यदर्शनात्संकोचो न संभवतीति पक्षांतरमाह राज्यलाभेनेत्यादि ॥ १ ॥ ❀ ❀ भक्तानां भवमुदयं भावयत्युत्पादयतीति भवभावनः । यद्वा भवं रुद्रमपि भावयति स्वलीलां ध्याययतीति भवभावनः ॥ २ ॥ ❀ ❀ उपेंद्रवज्रावंशस्थयोरुपजातिः । गां पृथ्वीं स्वर्गं च अजितः कृष्ण उपेंद्रश्च परिधिः समुद्र ऊर्ध्वगदिङ्मंडलं च । अनुजेनोपेंद्रेणानुवृत्तिं प्रापितः पुनरिंद्रपदं प्रापितः । विजयध्वजस्तु प्रणिध्युपात्तामिति पपाठ । तत्र "अमात्या मंत्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चैव सप्त प्रणिधयः स्मृताः" इत्युक्तेः । प्रणिधिभिः सहोपात्तामित्यर्थः ॥ ३ ॥ ❀ ❀ कामं यथेष्टं पर्जन्यो मेघाभिमानी देवः । इत्यर्थ इति । अत्र भूमार्थे मतुप्प्रत्यय इति भावः ॥ ४ ॥

---

१. प्रा० पा०—निर्हृतं ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

परिधिरिति । परिधिभूत इत्यर्थः ॥ १-३ ॥ ❀ ❀ काममिति इच्छानुसारमित्यर्थः ॥ ४ ॥

श्रीमद्वीरराघवव्याख्या

धर्मेण राज्यं चकारेत्युक्तं तदेव विस्तरतो बुभुत्सुरुक्तानुवादपूर्वकं पृच्छति शौनकः हत्वेति । स्वरिक्थस्पृधः स्वदायलिप्सून् स्पृह इति पाठेऽपि स एवार्थः । हकारस्य धकार आर्षः, अत एवाततायिनो दुर्योधनादीन् हत्वा प्रत्यवरुद्धं प्रत्यधिगतं प्रतिप्राप्त भोजनं राज्यं येन स धर्मभृतां वरिष्ठो युधिष्ठिरः गविष्ठिर इति पाठे गवि वचसि स्थिरो युधिष्ठिरः अनुजैर्भीमादिभिः सह कथं प्रवृत्तः राज्यशासन इति शेषः । ततो राजशासनानंतरं किमकार्षीदिति प्रश्नद्वयं, रेफविश्लेष आर्षः ॥ १ ॥ ❀ ❀ तत्र तावत्कथं प्रवृत्त इति प्रश्नस्योत्तरं विवक्षुरुपोद्घाततया भगवतः कृतकृत्यत्वमाह वंशमिति । वंशदवाग्निना वेणुवनसंघर्षणजदवाग्नितुल्येन कुलकलहेन दग्धं विनष्टं कुरोर्वंशं संरोहयित्वा परीक्षिद्रूपेण उत्पादयित्वा भवभावनः भवो जगत्तं भावयति वर्द्धयति भवभावनो हेतुगर्भमिदं भवभावनत्वात्संरोहयित्वा हरिरीश्वरः श्रीकृष्णो युधिष्ठिरं निजराज्ये निवेशयित्वा प्रीतमना बभूव, कृतकृत्यत्वादिति भावः ॥ २ ॥ ❀ ❀ प्रश्नस्योत्तरमाह निशम्येति चतुर्भिः । भीष्मोक्तमच्युतोक्तं च निशम्य प्रवृत्तेन सुप्रतिष्ठितेन विज्ञानेन देहात्मविवेकादिरूपेण विधूतः विभ्रमो देहात्मादिभ्रमो यस्य अनुजैर्भीमादिभिरनुवर्त्तितो युधिष्ठिरः इंद्र इवाच्युत एवाश्रयो यस्य अच्युतमाश्रयते सेवते भजत इति वा तथाभूतः परिध्युपान्तां दिगन्तावधिं चतुःसमुद्रां तां पृथिवीं शशास ॥ ३ ॥ ❀ ❀ अजातशत्रौ राज्ञीत्येतत्काममित्यादिपूर्वश्लोकद्वयेऽप्यपकर्षणीयम् । अजातशत्रौ युधिष्ठिरे राज्ञि सति पर्जन्यः कामं यथेष्टं ववर्ष । सर्वान्कामान्दोग्धि प्रपूरयतीति तथा मह्यभूत् । ।ावः पयसा क्षीरेण ऊधस्वतीरुधस्वत्यः, भूम्न्यत्र मतुप्पृथूधस इत्यर्थः, मुदा व्रजान् व्रजस्थान्प्रति सिषिचुः क्षीरं दुदुहुः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हास्तिनपुराद् द्वारकायात्राकथनपूर्वकं भगवत्प्रसादलब्धयुधिष्ठिरराज्यसमृद्धिकथनेन हरेर्महिमैव वर्ण्यतेऽस्मिन्नध्याये । तत्र हरितद्भक्तकथायामवितृप्तमनाः शौनकः पुनरपि पृच्छतीत्याह हत्वेति । स्वरिक्थं स्वराज्याख्यद्रव्यमस्माकमिति स्पर्धंत इति स्वरिक्थस्पृधस्तान् आततायिनः प्रतिवारं हत्वा मर्त्तुकामान् दुर्योधनादीन् हत्वा अनुजैः सह प्रत्यवरुद्धभोजनः संक्षिप्तभोगः धर्मभृतां धर्मप्रवर्त्तकानां व्यासादीनां गवि वाचि स्थिरो निश्चलः युधिष्ठिरः कथं केन प्रकारेण राज्यपालने प्रवृत्तः किं कर्माकार्षीदथ कृष्णश्च तेन सह हस्तिनपुरमागतः किमकृत तदस्माकं ब्रूहीत्येकान्वयः ॥ १ ॥ ❀ ❀ पांडवानां निरतिशयहरिकृपयैव राज्यादिलाभ इति ज्ञापयन् पांडवस्थापनादिकृष्णमहिमानं तावदाह वंशमिति । ईश्वरः जगच्चेष्टायां समर्थः हरिवंशलक्षणदवाद्वनादुत्पन्नाग्निना नितरां हृतं कुरो राज्ञो वंशं संरोहयित्वा परीक्षिदंकुरेण जनयित्वा युधिष्ठिरं निजराज्ये निवेशयित्वा प्रीतमना बभूवेत्येकान्वयः । नित्यप्रीतस्य कादाचित्कप्रीत्युक्तिर्लौकिकापेक्षयेत्येतमर्थं हशब्देन प्रसिद्धिद्योतनेनाह–भवभावन इति पाठे सृष्टिवर्द्धनं अनेन संरोहणशक्तिरदर्शि, ईश्वर इत्यनेन राज्यस्थापनमाहात्म्यमसूचि, भवतापन इत्यनेन संसारोन्मूलनकर्त्तुः हरेः पांडवरिपुनिबर्हणं किमु वक्तव्यमिति न्यायो दर्शितः ॥ २ ॥ ❀ ❀ याजयित्वेत्येवमुक्तार्थः ॥ ३ ॥ ❀ ❀ किमकार्षीदिति प्रश्नं परिहरति निशम्येति । अथ युधिष्ठिरः भीष्मोक्तं धर्मसर्वस्वं तथा अच्युतस्य कृष्णस्योदितं वाक्यं च निशम्य तदुभयं श्रुत्वा प्रवृत्तमुत्पन्नं यद्विज्ञानं तेन विशेषेण धूतः निरस्तः विविधः भ्रमः तत्त्वे नानासंशयो यस्य स तथोक्तः श्रीकृष्णाश्रयः अनुजैः भीमादिभिरनुवर्त्तितः अमात्यादिसप्तप्रणिधिभिरुपात्तां प्राप्तां गामवनिं स्वर्गं इन्द्रो यथा शशासेत्येकान्वयः । भूमिं स्वर्गसमानामपालयदिति द्योतनाय गामित्युक्तम् । 'अमात्या मंत्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चेति सप्त प्रणिधयः स्मृताः' इति वचनात् । परिधिः समुद्रः स एव उपान्ते अवसाने यस्याः सा, परिध्युपांतामिति पाठो बादरायणमतापरिज्ञानादुच्छ्वसित इति ज्ञातव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वंशमित्यस्य टीकायां राज्यप्रवृत्तेरुत्तरमाहेत्यन्वयः ॥ २-१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न्यस्य निष्कण्टके राज्ये पाण्डवं स्वपुरीं हरेः । गच्छतः कुरुनारीभिः स्तुतिर्दशम उच्यते ॥ १ ॥

वासुदेवानुमोदेनैव राज्यप्रवृत्तिप्रजापालनादिकं सामान्यतो ज्ञात्वाऽपि विशेषजिज्ञासुः पृच्छति हत्वेति । स्वस्य रिक्थे धने स्पर्द्धन्ते स्म ये तान् शत्रुभिरवरुद्धं यदासीत् तत् तेभ्यः सकाशात् प्रत्यवरुद्धं पुनश्च स्ववशीकृतं भोजनं भोगो येन सः ॥ १ ॥ ❀ ❀ श्रीकृष्णस्य प्रीतिं पर्य्यालोच्यैव प्रवृत्त इत्याशयेनोत्तरमाह । कुरोर्वंशं वंशदवाग्निनेव निर्हृतं निर्दग्धं संरोहयित्वा परीक्षिद्रक्षणेन संरोह्य दवो वनं वंशानां वनं यथा स्वसंघर्षोत्थेनाग्निना दह्यते तथैव कुरोर्वंशमपि परस्परक्रोधोत्थयुद्धेन हतमित्यर्थः । भवं महादेवमपि भावयति स्वलीलां ध्यापयतीति सः ॥ २ ॥ ❀ ❀ निशम्येति । प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न

स्वतन्त्रमित्येवम्भूतं तेन विधूतो विभ्रमः अहं कर्त्तेत्येवम्भूतो मोहो यस्य सः । गां पृथ्वीं स्वर्गञ्च । अजितः श्रीकृष्णः उपेन्द्रश्च । परिधयः समुद्रा ऊर्ध्वगं दिङ्मण्डलञ्च । अनुजानाम् अनुवर्त्तिता अनुवृत्तिर्यस्मिन् । पक्षे अनुजेनोपेन्द्रेणानुवृत्तिं प्रापिताः ॥ ३ ॥ ❀ ❀ ऊधस्वतीः स्थूलापीनवत्यः ॥ ४-६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वासुदेवानुमोदितो धर्मेण राज्यं चकारेत्युक्तं तद्विस्तरतो बुभुत्सुः पृच्छति हत्वेति । स्वस्य युधिष्ठिरस्य रिक्थाय धनाय स्पृत्संग्रामो येषां तानाततायिनः स्वधनादिलिप्सून्हत्वा प्रत्यवरुद्धं राज्यलाभेन प्रत्यधिगतं भोजनं येन सः अनुजैः सह राज्ये कथं प्रवृत्तः प्रवृत्त्यनंतरं च किमकारषीत् । अकार्षीदिति वक्तव्ये रेफविश्लेषश्छंदोऽनुरोधेन ॥ १ ॥ ❀ ❀ वंशरूपादवाद्वनाज्जातेन क्रोधरूपेणाग्निना निर्हृतं निर्दग्धं कुरोर्वंशं परीक्षित्त्राणेन संरोहयित्वा ॥ २ ॥ ❀ ❀ अनुजैरनुवर्त्तितः सेवितः प्रवृत्तेन विज्ञानेन विधूतो विविधो भ्रमो यस्य सः विज्ञातात्मानात्मपरमात्मयाथात्म्यः परिध्युपांतां समुद्रपर्यंताम् ॥ ३ ॥ ❀ ❀ कामं यथेष्टं पर्जन्यो वृष्टेरधिपतिर्देवो ववर्ष सर्वान्कामान्दोग्धि पूरयतीति तथा । व्रजान् गोष्ठानि ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नैश्चिन्त्यसिद्धये विष्णौ भीष्ममुक्तिर्निरूपिता । ऐहिके सर्वसौख्यं तु दत्तवानिति रूप्यते (१)
पाण्डवानां यदूनां च तदध्यायद्वयेन हि । निरूप्यं प्रथमं तत्र पाण्डवानां तदुच्यते (२)
कृष्णाधीनं सुखं यस्य स सुखीति निगद्यते । यतः कृष्णपरं चित्तं सर्वेषामत्र वर्ण्यते (३)

पूर्वाध्यायांते युधिष्ठिरस्य राज्यप्राप्तिरुक्ता, तत्र राज्यकरणं ज्ञानाज्ञानाभ्यां न घटत इति राज्यस्थितिं पृच्छति शौनकः हत्वेति । स्वरिक्थं स्पर्द्धंते इति तथा रिक्थं धनम् अत एव आततायिनः धनापहान् अवध्ये वधहेतुराततायित्वं, अस्वरिक्थे वा स्पर्द्धा येषाम् , अनेन धनार्थिनो हत्वा धनं गृहीत्वा तेन राज्यकरणमनुचितमिति ज्ञापितं, नन्वेवमेव प्राकृताः कुर्वन्ति तत्राह धर्मभृतां वरिष्ठ इति । न धर्मज्ञानमात्रं कृतमात्रं वा किन्तु ये धर्ममेव गृहीत्वा तिष्ठन्ति तेषां मध्ये श्रेष्ठः, अनुजैः सहेति सर्वत्र शत्रुवधे धर्मज्ञाने राज्यप्राप्तौ च किंचित् भ्रातृणामैकमत्यमस्ति न वेति सम्बन्धः । प्रत्यवरुद्धं भोजनं यस्य भोजनं पालनमभ्यवहरणं वा पूर्वमाततायिभिः प्रत्यवरुद्धं भोजनं इदानीं वा अवरोधस्य प्रतिकूलत्वे प्राप्तभोजनत्वं सिद्ध्यति । अस्तु स्वे राज्ये सर्वज्ञस्य कथं प्रवृत्तिः, संतोषेण च राज्ञः राज्ये स्थातुमशक्तत्वात् ततो राज्यं प्राप्य पुनःकलहादि अन्यद्वा कृतमिति प्रश्नः ॥ १ ॥ ❀ ❀ ततः स्वेच्छया युधिष्ठिरेण न किंचित् कृतं किन्तु भगवदिच्छयेति तस्य न राज्ये दोषो गुणो वा, किन्तु भक्तत्वात् भगवदिच्छया राज्यं कृतवानिति वक्तुं भगवांस्तस्मै राज्यं दत्त्वा तुष्टो जात इत्याह वंशमिति । द्वयं कृत्वा भगवान् प्रीतो जातः वंशांकुरं परीक्षिद्रक्षणं युधिष्ठिराय राज्यदानं च । ततस्तत्र भगवतस्तादृशेन कार्येण किमित्याशंक्य स्वभक्तानां वंशरक्षा सर्वथा कर्त्तव्या तदभावे प्रवृत्तिमार्गनिष्ठता अयुक्ता ऋणित्वात् वैषयिकसुखाभावाच्च । दैत्यांशैर्हि भगवदीयानां द्वयं दूरीक्रियते तत्र भगवतैव प्रतिविधातव्यं, स्वतः प्रतीकाराभावायाह वंशदवाग्निनिर्हृतमिति । वंशे दवाग्निः वंशाद्वा उत्पन्नः अन्योऽन्यसंघर्षणेन संरोहयित्वेति नूतनमंकुरमुपपाद्य तथाकरणे हेतुः, अभवो मोक्षः तं भावयतीति "ऋणत्रयमपाकृत्य मनो मोक्षे निवेशयेत् । नापुत्रस्य लोकोऽस्ति सर्वे ते पशवो विदुः" इत्यादिश्रुतिस्मृतिवाक्यैः वंशाभावे पितृणामाक्रोशात् मुक्तिर्न स्यात् । किंच हरिः सर्वदुःखहर्त्ता अपुत्रकृतक्लेशमपि दूरीकृतवेत्यर्थः । भवभावन इति वा, उद्भवमेव भावयति अभिवृद्धिभावनकर्त्तेत्यर्थः । राज्यं तु पूर्वमेव सिद्धं अन्यथा सर्वेभ्यो भक्तेभ्यः राज्यदानं प्रसज्येत । ततो निवेशनमेव कृतवान् तत्र हेतुः–ईश्वर इति, स्वयमीश्वरः अन्यानपीश्वरान् कृत्वा सुखी भवति । अथवा ईश्वरः समर्थः असमर्थो हि प्रमाणमुखनिरीक्षकः सर्वं त्याजयित्वा मुक्तिं प्रयच्छति । अयं तु न तथेत्यर्थः । हेति निश्चये ॥ २ ॥ ❀ ❀ ईश्वरधर्माविर्भावाभावे तुच्छत्वं स्वस्मिन् स्फुरति राज्याद्भयं तत् युधिष्ठिरस्य ज्ञानादपगतमित्याह निशम्येति । आवश्यकं तु कर्त्तव्यमेव न तेन किंचिन्नश्यतीति भीष्मवाक्यश्रवणादेव राज्यभयं निवृत्तं, अथ भिन्नप्रक्रमेण ईश्वरविचारेण 'नारायणपराः सर्वे न कुतश्चन बिभ्यती'ति न्यायेन नारायणपरस्य भगवद्वाक्यमेव कर्त्तव्यं न तु विषयजन्यं भयमपि सम्भावनीयमित्यच्युतोक्तम् । एवमुक्तिभ्यां सर्वोऽपि शास्त्रार्थोऽवगतः। ततः प्रवृद्धविज्ञानेन विधूता दूरीकृता विशिष्टा भ्रमा यस्य, गां पृथिवीमाज्ञापूर्वकं पालितवान् । अन्योऽपि राजा दैवाद् वृष्टौ संजातायां सस्ये सम्पन्ने चौरादिभिः फलं पालयति, अयं तु वृष्टिमपि निष्पाद्य स्वधर्मेण पुष्टान् कृत्वा पालयतीत्याह इन्द्र इवेति । मनुष्यस्यैवं पालनसामर्थ्ये हेतुः अजिताश्रय इति, न केनापि जितो भगवानाश्रयो यस्य परिधिः समुद्रः उपांते यस्याः, यद्यप्यन्ये राजानः सन्ति तथाप्येतदाज्ञाकारिण इति तथोक्तं अनुजैरनुवर्त्तितः प्रथमतो भ्रातर एव कुर्वन्ति पश्चात् तत् स्वयं करोति, भ्रातृभिः सेवितो वा ॥ ३ ॥ ❀ ❀ तस्य धर्मेण पोषितस्य राज्यस्य गुणानाह त्रिभिः कामं ववर्षेति । 'आधिदैविकसौख्यं हि तथा चैवाधिभौतिकम् । आध्यात्मिकं च तद्राज्ये कृष्णेच्छातः क्रमोदिताः ॥' काममिच्छानुसारेण क्षेत्रविशेषं सस्यापेक्षं पृथोरिव पृथिवी सर्वतः कामदुघा जाता, गाव ऊधस्वतीः स्थूलक्षीराशयाः धर्मात्मा अयं राजा अस्मत्परिपालको जात इति मुदा पयसा व्रजानेव सिषिचुः । यावद्दोग्धा भांडं वशमानयति तावत् क्षीराधिक्यात् भूमिमेव सिषिचुः । पर्जन्यः पृथ्वी गावो देवताः नद्यः

समुद्रा जलमिथुनं, वृक्षा लताश्चापरं स्थलमिथुनम् एतद्द्वयमन्नातिरिक्तसर्वहेतुः ओषधयो व्रीह्यादयः सर्वेषां सजीवत्वात् भूतत्वं काममिच्छानुसारेण इच्छायामपि सत्यां अकालफलने दोषनिमित्तत्वेन कदाचित् भयं भवेत्तन्निवृत्त्यर्थमाह अन्वृतु ऋतुमनतिक्रम्य ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ दशमाध्यायं विवरिषवः पूर्वाध्यायार्थमनुवदन्तः प्रस्तुतस्यार्थमाहुः नैश्चिन्त्येत्यादि । निरूप्यत इति । नैश्चिन्त्यसिद्धये निरूप्यते, एतेन सर्वभक्तसमाधानपूर्वकस्वस्थानप्राप्तिरूपं तृतीयकार्यं यत्प्रागुक्तं तेनास्यार्थसङ्गतिर्बोधिता । तत्प्रकारमाहुः पाण्डवेत्यादि । ननु पाण्डवसुखदानं त्वादावेव षड्भिरुच्यते, शेषे त्वध्याये सर्वेषां भगवत्परत्वमिति तस्य कथमध्यायार्थेन संगतिरित्यत आहुः कृष्णेत्यादि । तथा च शेषं हेतुतयोच्यते इति सैव सङ्गतिरित्यर्थः । एतेन पूर्वमध्यायार्थत्वेनोक्तं सर्वमुक्तिदातृत्वमपि समर्थितम् । एवं सर्वमर्थं सङ्गृह्य व्याख्यातुं कथासङ्गतिं वदन्तः श्लोकमवतारयन्ति पूर्वाध्यायेत्यादि । राज्यस्थितिमिति । राज्ये युधिष्ठिरस्य स्थितिप्रकारम् । कौरववधस्तु घटत इति बोधयितुमाहुः अवध्येत्यादि । प्रकारान्तरेणापि तेषामधर्मित्वबोधनायाहुः अस्वेत्यादि । नन्वेवं वधे दोषाभावे राज्यकरणस्य कथं दुष्टतेत्यत आहुः अनेनेति । रिक्थस्पृधपदेन । इति सम्बन्ध इति । एवं सन्देहबोधनाय सर्वत्र शत्रुवधादौ सम्बन्ध इत्यर्थः । सन्देह इति तु पाठः प्रतिभाति । तदासव ?? । इदानीं वेति । वाशब्द एवकारार्थो वाक्यालङ्कारे । प्रतिकूलत्वे इति । पूर्वावरोधप्रतिकूलत्वे ॥ १ ॥ ❀ ❀ वंशमित्यत्र । अन्योन्येत्यादि । तथा च स्वयंकृतत्वात्स्वयं प्रतीकाराभाव इत्यर्थः । अभिवृद्धीत्यादि । तथा च वंशवृद्ध्यर्थं संरोहितवानिति भावः । ननु मोक्षदानार्थमुद्यतस्तद्विरुद्धे राज्ये कथं निवेशितवानित्याकाङ्क्षायमाहुः अथवेत्यादि ॥ २ ॥ ❀ ❀ काममित्यत्र । क्रमोदिता इति । त्रिविधसौख्यरूपा गुणा इति शेषः ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

राज्ञो राज्यप्रकारश्च स्त्रीभिश्च हरिसंस्तुतिः । कृष्णस्य गमनं तस्माद्दशमे विनिरूप्यते ॥ १ ॥

धर्मेण युधिष्ठिरो राज्यं चकारेत्युक्तं तदेव विस्तरतो बुभुत्सुरुक्तानुवादपूर्वकं शौनकः पृच्छति–हत्वेति । स्वरिक्थस्पृहः स्वदायलिप्सून्–स्वरिक्थस्पृध इति पाठे तु रिक्थं धनं स्वरिक्थार्थं स्पृत् संग्रामो येषां तान्–अत एवाततायिनो दुर्योधनादीन् हत्वा युधिष्ठिरो राज्ये कथं प्रवृत्त इत्यन्वयः । ननु लोके राज्ञां तथा प्रवृत्तिदर्शनात् आततायिवधे दोषाभावस्मरणाच्च तस्य तथा तत्र प्रवृत्तौ किमाश्चर्यमित्याशङ्क्याह–धर्मभृतां वरिष्ठ इति । आततायिवधानुज्ञाशास्त्रस्यार्थशास्त्रत्वेन 'न हिंस्यात्सर्वभूतानि' इति धर्मशास्त्रतो दुर्बलत्वात् सर्वथा धर्मपक्षाङ्गीकारे च राज्यनिर्वाहस्याशक्यत्वात् तस्य धर्मात्मश्रेष्ठत्वात्प्राणिवधपूर्वकं राज्यप्रवृत्तिर्न सम्भवतीति भावः । अत एव प्रत्यवरुद्धभोजनः स्वजनवधशोकेन सङ्कुचितभोगः । न केवलं स एवैवंविधो येन भ्रातृनिर्बन्धेनापि तत्र प्रवृत्तिः सम्भवेत्, किन्त्वन्येऽपि तद्भ्रातरस्तथाविधा ऐवेत्याह–सहेति । सहानुजैः अनुजैः सहितो धर्मभृतां वरिष्ठ इत्यन्वयः । राज्ये प्रवृत्तस्यापि तस्य धर्मनिर्वाहो जातो न वेत्याशयेन पृच्छति–ततः राज्ये प्रवृत्त्यनन्तरं किमकार्षीदिति । रकारस्याकारान्तत्वमार्षम् ॥ १ ॥ ❀ ❀ युधिष्ठिरो न स्वतो राज्ये प्रवृत्तः किन्तु भगवदिच्छयैव । अतो न तस्य राज्यप्रयुक्तधर्माधर्मादिकमित्याशयेन तदुपोद्घातरूपं भगवतः कृतकृत्यत्वमाह–वंशमिति । यथा वेणुवनसङ्घर्षणजाग्निना वनं दग्धं भवति तथा कुरुवंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निस्तेन निर्हृतं दग्धमुपसंहृतं कुरोर्वंशं संरोहयित्वा परीक्षिद्रक्षणेनाङ्कुरितं कृत्वा युधिष्ठिरं च निजे तदीये राज्ये निवेशयित्वा कृतकृत्यत्वात् हरिः श्रीकृष्णः प्रीतमनाः प्रसन्नचित्तो बभूवेत्यन्वयः । तत्र हेतुमाह–भवभावन इति, भक्तानां भवमुद्भवं भावयति चिन्तयतीति तथा । तत्सम्पादने सामर्थ्यमाह–ईश्वर इति । भगवतोऽद्भुतकर्मत्वं स्मरन्नाश्चर्यं सूचयति–हेति ॥ २ ॥ ❀ ❀ प्रश्नस्योत्तरमाह–निशम्येति । भीष्मोक्तं अच्युतोक्तं च निशम्य प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतन्त्रमित्येवम्भूतं तेन विधूतो निवृत्तो विभ्रमः अहं कर्त्तेते मदीया इति यस्य स युधिष्ठिरः परिधिः समुद्रस्तत्पर्यन्तां गां पृथ्वीं शशास पालयामासेत्यन्वयः । यत्पृष्टं धर्मात्मनः कथं राज्ये प्रवृत्तिः प्रवृत्तस्य वा बन्धुवधशोकेन सङ्कुचितभोगस्य तस्य कथं राज्यनिर्वाहोऽभूत् कथं वा धर्मनिर्वाहोऽभूदिति तत्राह–अजिताश्रय इति, अजितः श्रीकृष्ण एवाश्रयो यस्य सः । राज्यप्रवृत्तौ तस्य प्रीतिं पर्यालोच्य तत्र प्रवृत्तस्य तस्य तत्कृपया राज्यनिर्वाहो धर्मनिर्वाहश्च सुखेनैव जात इति भावः । भगवत्कृपया तद्भ्रातरोऽपि तदनुवर्तिन एव जाता इत्याह–अनुजानुवर्त्तित इति, अनुजैरनुसेवितः सन्नित्यर्थः । तत्र दृष्टान्तमाह–इन्द्र इवेति, इन्द्रो यथा अजितं श्रीवामनमाश्रित्य अनुजैः सेवितः संस्त्रिलोकीराज्यं करोति तथेत्यर्थः ॥ ३ ॥ ❀ ❀ भगवदनुग्रहेण तस्य राज्ये जातान् गुणानाह–काममिति त्रिभिः । अजातशत्रौ युधिष्ठिरे राज्ञि सति पर्जन्यः कामं यथेष्टं ववर्ष, सर्वान् कामान् दोग्धि प्रपूरयतीति तथाभूता मह्यभूत्, गावो मुदा हर्षेण युक्ताः पयसा दुग्धेन व्रजान् गोष्ठानि सिषिचुः । तत्र हेतुमाह–ऊधस्वतीरिति, ऊधः क्षीराशयः, स्थूलोधस्त्वत्य इत्यर्थः । तथा च गवां सञ्चलनात् स्थूलस्याधसः सञ्चलनेन क्षीरं स्वयमेव भूमौ क्षरति स्मेति क्षीराधिक्यं सूचितम् ॥ ४ ॥

हिन्दी अनुवाद

श्रीकृष्ण का द्वारकागमन

शौनकजीने पूछा—धार्मिकशिरोमणि महाराज युधिष्ठिरने अपनी पैतृक सम्पत्तिको हड़प जानेके इच्छुक आततायियोंका नाश करके अपने भाइयोंके साथ किस प्रकारसे राज्य-शासन किया और कौन-कौनसे काम किये ? क्योंकि भोगोंमे तो उनकी प्रवृत्ति थी ही नहीं ॥ १ ॥ ❀ ❀ सूतजी कहते हैं—सम्पूर्ण सृष्टिको उज्जीवित करनेवाले भगवान् श्रीहरि परस्परकी कलहाग्निसे दग्ध कुरुवंशको पुनः अंकुरितकर और युधिष्ठिरको उनके राज्यसिंहासनपर बैठाकर बहुत प्रसन्न हुए ॥ २ ॥ ❀ ❀ भीष्मपितामह और भगवान् श्रीकृष्णके उपदेशोंके श्रवणसे उनके अन्तःकरणमें विज्ञानका उदय हुआ और भ्रान्ति मिट गयी। भगवान्के आश्रयमें रहकर वे समुद्रपर्यन्त सारी पृथ्वीका इन्द्रके समान शासन करने लगे। भीमसेन आदि उनके भाई पूर्णरूपसे उनकी आज्ञाओंका पालन करते थे ॥ ३ ॥ ❀ ❀ युधिष्ठिरके राज्यमें आवश्यकतानुसार यथेष्ट वर्षा होती थी, पृथ्वीमें समस्त अभीष्ट वस्तुएँ पैदा होती थीं, बड़े-बड़े थनोंवाली बहुत-सी गौएँ प्रसन्न रहकर गो-शालाओंको दूधसे सींचती रहती थीं ॥ ४ ॥

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः । फलन्त्योषधयः सर्वाः कामम्[1] अन्वृतु तस्य वै ॥ ५ ॥
नाधयो व्याधयः क्लेशा दैवभूतात्म[2]हेतवः । अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥ ६ ॥
उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः । सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ७ ॥
आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम्[3] । आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

अन्वृतु ऋतावृतौ ॥ ५ ॥ ❀ ❀ आधयो मनोव्यथाः । व्याधयो रोगाः । क्लेशाः शीतोष्णादिकृताः । दैवं च भूतानि चात्मा च हेतुर्येषामाधिदैविकादीनां ते जंतूनां नाभवन् ॥ ६ ॥ ❀ ❀ इदानीं द्वारकागमनं निरूपयितुमाह । उषित्वेति । स्वसुः सुभद्रायाः ॥ ७ ॥ ❀ ❀ तं युधिष्ठिरम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नदीनां फलं देशस्य नदीमातृत्वसंपादनेन व्रीह्यादिसमृद्धिः । समुद्राणां रत्नादिसंपत्तिः । गिरिवनस्पतिवीरुधां धातुफलपुष्पादिसमृद्धिः । ओषधीनां यवगोधूमादिसमृद्धिः । तस्य युधिष्ठिरस्य काममिच्छानुसारेण सर्वा इत्युक्त्या न कस्याश्चिदपि वंध्यत्वं भवतीत्यसूचि ॥ ५ ॥ ❀ ❀ अधिदैवहेतुरनावृष्ट्यादिः । अधिभूतहेतुरुन्मादादिरध्यात्महेतुः लोभादिरिति ॥ ६–७ ॥ ❀ ❀ आमंत्र्य द्वारकां गमिष्यामीति युधिष्ठिरायोक्त्वा शिष्टाचाररक्षणाय तं परिष्वज्यालिंग्याभिवाद्य वाचा नमस्कृत्य च ॥ ८–९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

काममिति । कामं तस्य युधिष्ठिरस्य इच्छानुसारं नद्यः समुद्राश्च स्थिता अनुकूला इत्यर्थः । सवनस्पतिवीरुधः वृक्षलतासहिता गिरयश्च अन्वृतु ऋतौ सर्वकालमित्यर्थः फलन्ति । ओषधयो व्रीह्यादयः ॥ ५–१६ ॥

श्रीमद्वीरराघवव्याख्या

तस्य युधिष्ठिरस्य संबंधिन्यः नद्यादयः स्वधर्मान्न तत्यजुरिति शेषः । वनस्पतिभिः वीरुद्भिश्च सहिताः सर्वा ओषधय अन्वृतु ऋत्वनुकूलं फलानि फेलुः ॥ ५ ॥ ❀ ❀ अजातशत्रौ राज्ञि सति जंतूनां प्राणिनां कदाचिदप्याधयो मानसिका व्याधयो दैहिकाश्च क्लेशाः-तानेवाह दैवभूतात्महेतवः आधिदैविका आधिभौतिका आध्यात्मिका नाभवन् ॥ ६ ॥ ❀ ❀ किमकार्षीत्तत इत्यस्योत्तरं विवक्षिष्यन्पूर्वं प्रस्तुतस्य निवृत्तप्रयाणस्य भगवतो वृत्तान्तमाह उषित्वेत्यादिना यावदेकादशाध्यायसमाप्ति। सुहृदां युधिष्ठिरादीनां विशोकाय शोकाभावाय स्वसुश्च स्वभगिन्याः सुभद्रायाः प्रियकाम्यया च हास्तिनपुरे कतिपयान्मासानुषित्वाऽवस्थाय ॥ ७ ॥ ❀ ❀ तं युधिष्ठिरमामन्त्र्य पृष्ट्वा तेनाभ्यनुज्ञातस्तं परिष्वज्याभिवाद्य च कैश्चिन्न्यूनवयस्कैः परिष्वक्तः आलिंगितोऽभिवादितश्च हरिः श्रीकृष्णो रथमारुरोह ॥ ८ ॥

---

१. प्रा॰ पा॰—कामता मृत्युरत्र वै । २. प्रा॰ पा॰—भूता इहेतवः । ३. प्रा॰ पा॰—तान् ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृष्णाश्रयफलमाह काममिति। पर्जन्यो मेघाभिमानी देवः सर्वेषामभीष्टं दोग्धीति, सर्वकामदुघा गावः सौरभेय्यः पयसा क्षीरेण गोष्ठं सिषिचुः सिक्तवत्यः, अतिस्थूलं ऊधः क्षीरपात्रं यासां ताः अत्यूधसः ॥ ५ ॥ ❀ ❀ नद्यादयः रत्नानि फलंति वनस्पतयः वीरुधो मातुलिंगादयः ओषधयो व्रीह्यादयः पर्जन्यादयः तस्य युधिष्ठिरस्य काममिच्छानुसारेण अन्वृतु ऋतावृतौ वृष्ट्यादिमंतोऽभूवन्नित्यन्वयः ॥ ६ ॥ ❀ ❀ न केवलमिष्टप्राप्तिरनिष्टनिवृत्तिश्च सुतरामित्याह नाधय इति। अजातशत्रौ युधिष्ठिरे जंतूनां राज्ञि रंजके सति कदाचिदप्याधिदैविकादिहेतवः क्लेशा नासुरित्येकान्वयः। आधिः मानसी पीडा व्याधिः भगंदरादिः। कथंभूताः दैवानि भूतानि च आत्मा च हेतुर्निमित्तं येषां ते तथोक्ताः, अधिदैवहेतुः अनावृष्ट्यादिः अधिभूतहेतुः उन्मादादिः अध्यात्महेतुः कुष्ठादिः ॥ ७ ॥ ❀ ❀ इदानीं कुरुपुरं प्रविष्टः कृष्णः किमकार्षीदित्यभिप्रायिकं प्रश्नं परिहरति उषित्वेति। सुहृदां पांडवानां विशोकाय स्वसुः सुभद्रायाश्च प्रियकाम्यया कतिचिन्मासान् हस्तिनापुरे उषित्वा ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वसुः सुभद्रायाः ॥ ७ ॥ ❀ ❀ तं युधिष्ठिरम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य युधिष्ठिरस्य राज्ञः प्रजाभूताः नद्यादयः सर्वसुखदा बभूवुरिति शेषः। ओषधयो वनस्पतिभिः वीरुद्भिश्च सहिताः अनुऋतु ऋतौ फलन्ति फेलुः ॥ ५ ॥ ❀ ❀ अजातशत्रौ युधिष्ठिरे राज्ञि सति दैवभूतात्महेतवः दैवं भूतानि आत्मा च हेतुर्येषां ते आधिदैविकाधिभौतिकाध्यात्मिकाः आधयो मानसिका व्याधयः शारीराः क्लेशाः जंतूनां कर्हिचिदपि नाभवन् ॥ ६ ॥ ❀ ❀ पूर्वं गन्तुं प्रवृत्तोऽपि सुहृदां युधिष्ठिरादीनां विशोकाय स्वसुः सुभद्रायाः प्रियकाम्यया हास्तिनपुरे उषित्वाऽवस्थाय रथमारुरोहेति द्वितीयेनान्वयः ॥ ७ ॥ ❀ ❀ येन पूर्वं राज्ञा प्रेम्णा निवारितस्तं युधिष्ठिरम् अभिवाद्य कैश्चित्स्वसमानवयस्कैरर्ज्जुनादिभिः परिष्वक्त आलिंगितः कैश्चिन्न्यूनवयस्कैर्नकुलादिभिरभिवादितः रथमारुरोह द्वारकां गन्तुमिति शेषः ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नद्यः समुद्रा जलमिथुनं वृक्षा लताश्चापरं स्थलमिथुनं एतद्द्वयमन्नातिरिक्तसर्वहेतुः। ओषधयो व्रीह्यादयः सर्वेषां सजीवत्वात् भूतत्वं काममिच्छानुसारेण इच्छायामपि सत्याम् अकालफलने दोषनिमित्तत्वेन कदाचित् भयं भवेत्, तन्निवृत्त्यर्थमाह अन्वृतु ऋतुमनतिक्रम्य ॥ ५ ॥ ❀ ❀ अध्यात्मनिर्गुणानां स्वतः सिद्धत्वात् दोषाभावाय रोगाद्यभावमाह आधिर्मानसी व्यथा व्याधिः शरीरस्य क्लेशा अविद्यादयः इन्द्रियस्रावो गर्भपातव्यभिचारादयोऽपि दैवभूतात्महेतवः क्लेशा न भवन्ति राजधर्मेणैव सर्वसमाधानात् आदिमध्यावसानेषु राज्यमेकविधमित्याह कर्हिचिदिति ॥ ६ ॥ ❀ ❀ एवं सामान्यतः सर्वसौख्यमुक्त्वा प्रेमसौख्यनिरूपणार्थं भगवतो निर्याणोत्सवमाह उषित्वेत्यादि यावदध्यायसमाप्ति। 'वृथैव जीवनं लोके भक्तिज्ञानोत्सवैर्विना। कृष्णैकतानचित्तत्वं मुक्तेरप्यधिकं मतम् ॥' हस्तिनापुरमिति अलुक्तृतीयासमासः हस्तिना निर्मितं पुरमिति मध्यपदलोपात्, हस्ती राजा हस्तिनः सम्बन्धीति हास्तिनम् अण्प्रत्ययः, 'हस्तिनिर्मिते पुरे वासस्तद्वंश्यानां विमुक्तये। निरन्तरस्थितिर्या तु भुक्तिमुक्तिप्रदेति च ॥ कालस्याकारणत्वाय तदंशाः परिकीर्त्तिताः। बहुत्वगणनाभावात् तेषां चाहेतुता मता ॥ स्थित्वा शोकापनोदे तु गमने स्मरणाद्भवेत्। स्नेहस्ततः कृतार्थत्वमिति भावो हरेर्मतः ॥' सुहृदां च विशोकाय चकारात् राज्ञः प्रियार्थं स्वस्वसुः सुभद्रायाः शोकापनोदः पौत्रोत्पत्त्येति भगवत्स्थितिः प्रीतिवर्द्धिका ॥ ७ ॥ ❀ ❀ आमंत्र्येति लौकिकं चकाराद्वरदानादि आलिंगनं सर्वदोषनिवृत्तये अभिवादनं बहिर्मुखत्वेऽपि दोषाभावाय चकारादुचितं दानादि कैश्चिदिति सख्यपर्यंतमागतैः प्रेम्णा स्निग्धैर्वा कैश्चिदिति तादृशा दुर्लभा इति द्योतितम् ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

उषित्वेत्यादीनां तात्पर्यं आहुः कारिकया। वृथैवेत्यादि। भक्तिश्च ज्ञानं च तत्कृता उत्सवाश्चेति समासः। नन्वन्ते मुक्तिं विनापि वैयर्थ्यमेवेति तन्निवृत्तये आहुः कृष्णेत्यादि। 'विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण' इत्यादिवाक्यात् तथेत्यर्थः। हस्तिनापुरे भगवतो या स्थितिः सा मथुरादिस्थितेर्विलक्षणेति बोधनाय तत्तात्पर्यमाहुः हस्तीत्यादि। वास इति। भगवतः स्थितिः निरन्तरस्थितिर्मथुरादिसम्बन्धिनी। कालवशादेव स्थितवान्, न स्वेच्छयेति वारयितुमाहुः कालस्येत्यादि। स्थितेः कथं मुक्तिहेतुत्वमित्याकाङ्क्षायां तत्प्रकारमाहुः स्थित्वेत्यादि। भाव आशयः। गान्धार्या विराटतनयातिदेशस्य तात्पर्यमाहुः यथेत्यादि। उत्तराया भर्ता मारितः, पुत्रो रक्षितः, गान्धार्याः पुत्रो मारितः, भर्ता रक्षित इत्येकैकमारणरक्षणसाम्यात्तथेत्यतिदेशोक्तिरित्यर्थः। विरहासहनोत्त्यवसरे राजार्जुनौ कुतो नोक्तावित्यत आहुः राजेत्यादि। एकशेषादिति। 'पुमान् स्त्रिये' ति सूत्रोक्तादेकशेषात् ॥ ७-१० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तस्य युधिष्ठिरस्य सम्बन्धिनो नद्यादयः स्वस्वगुणान् प्रकटितवन्त इति शेषः। वनस्पतिभिर्वटोदुम्बरादिभिर्वीरुद्भिर्द्राक्षादिभिश्च सहिताः सर्वा ओषधयो यवव्रीह्यादयः अन्वृतु ऋतौ ऋतौ कामं यथेष्टं फलन्ति स्मेत्यन्वयः। अत्र सन्देहो न कर्त्तव्य इत्याह–वा इति ॥ ५ ॥ ❀ ❀ दैवं च भूतानि च आत्मा देहश्च हेतुर्येषां आधिदैविकादीनां ते आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाश्च शीतोष्णादिकृताः जन्तूनां प्राणिनां कर्हिचित् कदाचिदपि नाभवन्नित्यन्वयः ॥ ६ ॥ ❀ ❀ 'वृथैव जीवनं लोके भक्तिज्ञानोत्सवैर्विना। कृष्णैकतानचित्तत्वं मुक्तेरप्यधिकं मतम्' इति सूचयन् कृतकार्यस्य भगवतो द्वारकानिर्गमनोत्सवमाह–उषित्वेत्यादिना यावदध्यायसमाप्ति। सुहृदां निजप्रेमवतां युधिष्ठिरादीनां विशोकाय विनोदनाय स्वसुः स्वभगिन्याः सुभद्रायाः प्रियकाम्यया च हास्तिनपुरे कतिपयान् मासानुषित्वा अवस्थाय तं युधिष्ठिरमामन्त्र्य पृष्ट्वा तेनाभ्यनुज्ञातस्तं परिष्वज्याभिवाद्य कैश्चिदधिकवयस्कैः परिष्वक्त आलिङ्गितो न्यूनवयस्कैरभिवादितश्च हरिः कृष्णो रथमारुरोहेति द्वयोरन्वयः ॥ ७–८ ॥

हिन्दी अनुवाद

नदियाँ, समुद्र, पर्वत, वनस्पति, लताएँ और ओषधियाँ प्रत्येक ऋतुमें यथेष्टरूपसे अपनी-अपनी वस्तुएँ राजाको देती थीं ॥ ५ ॥ ❀ ❀ अजातशत्रु महाराज युधिष्ठिरके राज्यमें किसी प्राणीको कभी भी आधि-व्याधि अथवा दैविक, भौतिक और आत्मिक क्लेश नहीं होते थे ॥ ६ ॥ ❀ ❀ अपने बन्धुओंका शोक मिटानेके लिये और अपनी बहिन सुभद्राकी प्रसन्नताके लिये भगवान् श्रीकृष्ण कई महीनोंतक हस्तिनापुरमें ही रहे ॥ ७ ॥ ❀ ❀ फिर जब उन्होंने राजा युधिष्ठिरसे द्वारका जानेकी अनुमति माँगी, तब राजाने उन्हें अपने हृदयसे लगाकर स्वीकृति दे दी। भगवान् उनको प्रणाम करके रथपर सवार हुए। कुछ लोगों (समान उम्रवालों) ने उनका आलिङ्गन किया और कुछ (छोटी उम्रवालों) ने प्रणाम ॥ ८ ॥

सुभद्रा द्रौपदी कुन्ती विराटतनया तथा। गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥
वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः। न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥ १० ॥
सत्सङ्गान्मुक्तदुःसङ्गो[1] हातुं नोत्सहते बुधः। कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥ ११ ॥
तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथम्। दर्शनस्पर्शसंलापशयनासनभोजनैः[2] ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः। गौतमः कृपः। यमौ नकुलसहदेवौ ॥ ९ ॥ ❀ ❀ अन्याश्च स्त्रियः। मत्स्यसुतोत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षककृष्णविरहे मोहाधिक्यात्। यद्वा मत्स्यसुता सत्यवती ॥ १० ॥ ❀ ❀ तेषां कृष्णविरहासहनं कैमुत्यन्यायेनाह सत्संगादिति द्वाभ्याम्। सतां संगाद्धेतोर्मुक्तः पुत्रादिविषयो दुःसंगो येन सः। सद्भिः कीर्त्यमानं रुचिकरं यस्य यशः सकृदप्याकर्ण्य सत्संगं त्यक्तुं न शक्नोति ॥ ११ ॥ ❀ ❀ दर्शनादिभिस्तस्मिन् श्रीकृष्णे न्यस्ता अध्यस्ता धीर्येषां ते ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनरुक्तिर्यद्यपि पुराणादौ न दुष्टा, तथाप्यृजुमार्गेण सिद्ध्यतोऽर्थस्य तन्त्रेण दर्शनायोगादाह–यद्वेति। मत्सीभूताद्रिकाप्सरस उद्भूतत्वान्मत्स्यसुतेति ॥ १० ॥ ❀ ❀ तेषां पूर्वोक्तानां युधिष्ठिरादीनां किमुत साक्षादेतत्संगमिति भावः ॥ ११ ॥ ❀ ❀ सत्संगं विना दुःसंगो मदमत्सरादिहेतुर्नापयाति। तदपगमेन विना भगवद्यशो रोचकं न भवतीत्युक्तं सत्सङ्गान्मुक्तदुःसंग इति विशेषणेन ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

तदा सुभद्राप्रभृतयः विमुह्यन्तो मोहिताः शार्ङ्गधन्वनः श्रीकृष्णस्य विरहं विश्लेषं न सेहिरे नासहंत। मत्स्यसुता सत्यवती ॥ ९-१० ॥ ❀ ❀ युक्तं चैतदित्यभिप्रायेणाह सत्संगादिति द्वाभ्यां, सतां साधूनां संगाद्धेतोर्मुक्तः दुःसंगो दुरात्मसंयोगो येन स बुधः। पुमानस्य रोचनं रुचिकरं कीर्त्यमानं यश एव सकृदाकर्ण्य हातुं नोत्सहते ॥ ११ ॥ ❀ ❀ तस्मिन्भगवति कृष्णे दर्शनादिभिर्निहिता धीर्येषां ते पार्थाः तस्य विरहं कथं सहेरन्न सहेरन्नेवेत्यर्थः ॥ १२ ॥

---

१. प्रा० पा०—तत्संगा०। २. प्रा० पा०—स्पर्शनालाप०।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आमन्त्र्य द्वारकां गमिष्यामीति युधिष्ठिरायोक्त्वा शिष्टाचाररक्षणाय युधिष्ठिरं परिष्वज्याभिवाद्य कैश्चिदर्जुनादिभिः आलिंगितो वंदितश्च रथमारुरोहेत्यन्वयः ॥ ९ ॥ ❀ ❀ सुभद्रादयः शार्ङ्गधन्वनो हरेर्विरहं न सेहिरे इत्यन्वयः । युयुत्सुः धृतराष्ट्राद्वैश्यायां जातो दुर्योधनानुजः, गौतमः कृपाचार्यः, यमौ नकुलसहदेवौ, मत्स्यसुतादयः उत्तराप्रभृतयः विमुह्यन्तः कर्तव्यतामजानन्तः ॥ १०-११ ॥ ❀ ❀ पार्था मुकुन्दविरहं न सेहिर इत्येतदाश्चर्यं न भवतीत्याह । तत्संगादिति तस्य हरेः संगात्सेवालक्षणान्मुक्तः दुःसंगः अन्यत्र पुत्रदारादिषु संगः येन स मुक्तदुःसंगः बुधो विवेकी जनः तं हातुं नोत्सहते तस्मादित्यन्वयः । तत्र कैमुत्यन्यायमाह कीर्त्यमानमिति । भागवतैः कीर्त्यमानं यस्य कृष्णस्य यशः सकृदाकर्ण्य पुंसां रोचनं रुचिजनकम् । दर्शनस्पर्शनादिभिरभ्यस्तधियः पार्थास्तस्य विरहं कथं सहेरन्नैव सहेरन्निति किमु वक्तव्यमिति भावः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः । गौतमः कृपः ॥ ९ ॥ ❀ ❀ मत्स्यसुता उत्तरा, तस्याः पुनर्ग्रहणं गर्भरक्षणकृतमोहाधिक्यात् । यद्वा मत्स्यसुता सत्यवती ॥ १० ॥ ❀ ❀ यस्य यशोऽपि हातुं बुधो नोत्सहते तस्य विरहं पार्थाः कथं सहेरन्नित्यन्वयः । रोचनं रोचकम् । बुधः कीदृशः सत्सङ्गान्मुक्तो दुःसङ्गो येन सः । तेन सत्सङ्गं विना दुःसङ्गो मदमत्सरादिहेतुर्नापयाति तदपगमेन विना भगवद्यशो रोचकं दुस्त्यजञ्च न भवतीति सिद्धान्तो ध्वनितः ॥ ११ ॥ ❀ ❀ पार्थाः कीदृशाः दर्शनादिभिस्तस्मिन् कृष्णे एव न्यस्तधियः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुभद्राप्रभृतयो विरहं न सेहिरे इति द्वितीयेनान्वयः । युयुत्सुः शतसंख्याकान् भ्रातॄन् गांधारीपुत्रान्युद्धप्रारम्भे विहाय युधिष्ठिरं शरणं गतो धृतराष्ट्राद्वैश्यायां जातः, गौतमः कृपः ॥ ९ ॥ ❀ ❀ मत्स्यसुतादयः मत्स्योदरीप्रभृतयः ॥ १० ॥ ❀ ❀ शार्ङ्गधन्वनो विरहं न सेहिरे इत्युक्तं तदेव कैमुत्यन्यायेनाह सत्संगादिति द्वाभ्याम् । सतां साधूनाम् । तद्यशःश्रावयितॄणां संगात् यस्य यशः सकृदाकर्ण्य अत एव मुक्तो दुष्टानां तद्यशःश्रवणविरोधिनां संयोगो येन सः, अत एव च बुधः हेयोपादेयज्ञानवान् पुनः सद्भिः कीर्त्यमानं यशो हातुं नोत्सहते ॥ ११ ॥ ❀ ❀ दर्शनादिभिस्तस्मिन् कृष्णे न्यस्तधियस्तस्य विरहं कथं सहेरन् ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सुभद्रादयो न सेहिरे विरहमिति सम्बन्धः । देहसम्बन्धपुरःसरः स्नेहः स्त्रीणामधिक इति आद्ये तयोर्ग्रहणं विराटतनया उत्तरा यथा भर्त्ता तथा पुत्रः मारणे रक्षणेऽपि च गांधार्या उत्तरायाश्च तथेति समता । राजार्जुनयोरुत्सवासक्त्या न विरहस्फूर्तिः धृतराष्ट्रश्चेति चकारेण वा ग्रहणम् । अन्यथा चकारो धृतराष्ट्रस्य भक्तिबोधकः । तस्य भक्तिर्दुर्लभेति युयुत्सुर्धृतराष्ट्रस्य भोगस्त्रीपुत्रः गौतमः कृपः गोतमवंशोत्पन्नत्वात् यमौ नकुलसहदेवौ ॥ ९ ॥ ❀ ❀ वृकोदरश्चेति चकारादनुक्तसर्वक्षत्रियग्रहणं धौम्यश्चेति पुरोहितग्रहणादनुक्तब्राह्मणग्रहणं स्त्रियस्तेषां मत्स्यसुता सत्यवती पूर्वोक्ता या वा उत्तरायाः कार्यार्थमनुवादः । विमुह्यंत इति एकशेषात् पुलिंगनिर्देशः । शार्ङ्गधन्वन इति कालरूपं धनुर्हस्ते स्थापयतीति तद्विरहे कालग्रासः शंकितः ॥ १० ॥ ❀ ❀ विरहासहनं लौकिकं सर्वथा न भवतीत्यलौकिकज्ञाने सति भगवतोऽन्तर्यामित्वविरहाभावात् अयुक्तं विरहवर्णनमित्याशंक्य ज्ञानसत्त्वेऽपि प्रकारविशेषेण परमसुखदानात् विरहो युक्त इत्याह सत्संगादिति सार्धेन । भगवद्विरहकथा दूरे भगवत्सेवकानामपि विरहो दुस्त्यजः । उपदिष्टेपि ज्ञाने अन्तर्यामितया । भगवत्स्फूर्तावपि यो रसः सत्संगादुत्पद्यते बहिर्भगवत्सम्बन्धेन वासनाज्ञानादिभिर्भवति । मानसदैहिकस्त्रीसम्बन्धयोर्वैलक्षण्यात् स्त्रियाश्च स्वतः सुखं स्यात् सर्ववस्तुनिष्ठरसस्य स्वनिष्ठदोषस्फूर्त्यैव । अभिव्यक्तिदर्शनात् । सायुज्यज्ञानादावपि यदात्मसुखमभिव्यक्तं भवति तत्रापि भिन्नतया स्थितं ज्ञानप्रवेशेच्छा दोषः । अन्यथा फलोत्तरं तदपगमो न स्यात् । ननु तयोर्गुणत्वमिति चेत् सत्यं लोके बुभुक्षादीनामपि गुणत्वकथनात् । अन्यथा तदर्थमुद्यमो न स्यात् । तस्मात् भिन्नतया बहिःस्थित एव विषयः रसजनकः । अत एव योगिनोऽपि कृष्णाख्ये वस्तुनि प्रकटीभूते समाधि परित्यज्य तदेव पश्यन्ति । अन्यदा तु समाधिः किंच देहादीनां दोषत्वश्रवणात् प्रलये तदभावात् मुक्तियोग्यान् जीवान् भगवान् देहसम्बन्धान् कुर्यात् किंच परमकृपालुत्वात् सृष्टिमेव न कुर्यात् । अतो दोषोऽपि क्वचिद् गुणः क्वचिद्दोषः गुणोऽपि तथेति बहिर्व्यवहारपुरःसरमेव सर्वे वेदाः सर्वाणि शास्त्राणि प्रवृत्तानि । शक्यव्यवहारस्य मुख्यत्वात् ज्ञानेऽपि सति भगवद्विरहासहनं युक्तं समुत्पश्यामः । सतां संगात् एकस्मिन् संगे विद्यमानेऽपि संगान्तरमपि त्यक्तुं न शक्यत इति बहुवचनं सतामपि बहुत्वम् । एकस्मिन्नपि बहुधा रसजननात् तेषामेव कृपया मुक्तो दुष्टैः सह संयोगेन तदनन्तरं तत्कृपयैव बुधः ज्ञानसम्पन्नोऽपि

स्यात् तथा सति पूर्वसिद्धान् सत्संगान्। चिंतामणिवत् त्यक्तुमिच्छामपि न करोतीत्यर्थः। कीर्त्यमानमिति उभयार्थमित्येके-यस्य भगवतः कीर्त्तिं सद्भिः कीर्त्यमानां सकृदाकर्ण्य सत्संगात् त्यक्तुं नोत्सहत इति सम्बन्धः। कीर्त्ते रुचिजनकत्वात्सत्संगस्य च तद्धेतुत्वात् यशःश्रवणाद्वा तस्मिन् न्यस्तधियः। यथा समीचीनां पेटिकां दृष्ट्वा स्वस्योत्कृष्टं वस्तु सर्वं स्थापयन्ति तथा भगवतः कीर्त्तिं श्रुत्वा बुद्धिरत्नं भगवति स्थापयन्तीत्यर्थः। सामान्यग्रहणं वैदिकलौकिकसर्वबुद्धिग्रहणार्थम्। किञ्च पार्थाः पृथायाः पूर्वमुक्तत्वात् तद्वचनेनापि भगवति न्यस्तधियः कथं विरहं सहेरन्। असहमानास्तत्र गच्छेयुः प्रतिबन्धकं शरीरं वा त्यजेयुरिति भगवत्प्रवचनमयुक्तमिति भावः॥ ११॥ ❀ ❀ तर्हि चलिते भगवति किं जातं तत्राह दर्शनस्पर्शेति। दर्शनादयः षट्क्रिया भगवद्योग्याः ते च भगवत्सहभावेन पांडवनिष्ठाः, आलापादयस्तु सहजदर्शनस्पर्शनयोस्तु विषयत्वमपि सहभावाभावे विषयत्वासंभवात् एवं सहभावेनाभ्यस्तैरेतैः वशीकृताः॥ १२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

सत्सङ्गानित्यत्र। लौकिकमित्यादि। भगवत्प्रभावादिना भगवत्यलौकिकत्वस्य ज्ञातत्वात्सर्वप्रकारेण लौकिकं न भवतीत्यर्थः। विरहस्य दुःसहत्वं समर्थयितुं विरहानुभवं व्युत्पादयन्ति उपदिष्टेत्यादि। उपदिष्टेपीत्याद्युक्तदशाद्वये सत्सङ्गादित्यादिकं यथायथं रसोत्पत्तौ हेतुद्वयम्। सत्सङ्गादिजन्यस्य रसस्य ज्ञानादिनाऽभवने हेतुमाहुः मानसेत्यादि। तथा च तद्वैलक्षण्येन तयोः सकाशाज्जायमानस्य सुखस्यापि वैलक्षण्ये हेतुभेदाद्यथा तत्र रसवैजात्यम्, तथात्रापि रसवैजात्यमिति ज्ञानादिना सत्सङ्गादिजन्यरसाभवने सिद्धेऽन्तर्यामित्वेन सत्ताज्ञानदशायामपि बहिस्तदभावाद्विरहो युक्त एवेत्यर्थः। ननु सुखाद्युपादानमात्मा वा, मनो वा अतस्तयोर्विद्यमानत्वेन तत्र सत्ताज्ञाने विद्यमाने निमित्तमात्रवैजात्येन कार्यवैजात्यं न युक्तमिति ज्ञानादिनापि तादृशरसः सम्भवदुक्तिक इति विरहोनुपपन्न इति शङ्कायामाहुः स्त्रिया इत्यादि। चात्पुंसः। दोषस्फूर्त्येति। दोषपूर्विकया स्फूर्त्या। तथा च स्रक्चन्दनवनितादिषु पर्यायेण द्वेषेच्छादिदर्शनात्तत्तन्निष्ठरसस्य स्वनिष्ठकामादिदोषकृतया प्रियत्वादिस्फूर्त्या अभिव्यक्तिर्दृश्यते इति तस्याः उत्कटकामतया तस्यां कामस्य सार्वदिकत्वात् तस्याः स्वतः सुखं सदा स्यात्, तथा सति विरहदुःखं न तस्याः स्यात्, तच्च दृश्यते, अतो निमित्तवैजात्ये कार्यवैजात्यमवश्यमङ्गीकार्यम्। तथा सति बहिः सम्बन्धजन्यस्य रसस्य कामादिदोषेणैवाभिव्यक्तेर्ज्ञानादिनाऽभवनाद्विरहो युक्त एवेत्यर्थः। ननु रसस्य सुखविशेषरूपत्वात् तदभिव्यक्तिं प्रति स्वनिष्ठदोषस्फूर्तेः कारणता न युक्ता, सायुज्यादावभिव्यक्तस्यात्मसुखस्य दोषं विनैवाभिव्यक्तेर्व्यतिरेकव्यभिचारात्। अतो यथा तत्र, तथा भगवद्रसाभिव्यक्तावपीति ज्ञानादिना रसाभिव्यक्तेर्विरहो न युक्त इत्यत आहुः सायुज्येत्यादि। भिन्नतया स्थितज्ञानमिति। भिन्नतया स्थित इत्याकारकं ज्ञानम्। तथा च कामाद्यभावेपि दोषान्तरस्य तत्र सत्त्वात् न व्यभिचार इतीहापि तेनैवाभिव्यक्तिरिति ज्ञानेन रसाभावाद्विरहो युक्त एवेत्यर्थः। भिन्नज्ञानादेर्दोषत्वे युक्तिमाहुः अन्यथेत्यादि। भिन्नत्वज्ञानादेर्दोषत्वं शङ्कते नन्वित्यादि। कार्यदुष्टत्वस्य कारणे दोषताप्रयोजकत्वात् प्रकृते च कार्यस्य भक्तिप्राचुर्यादिबोधकतयाऽदुष्टत्वाद्विरहकारणस्य भिन्नत्वज्ञानादेर्गुणत्वमेवाङ्गीकार्यम्, न दोषत्वमित्यर्थः। तदुक्तमुपगम्य परिहरन्ति सत्यमित्यादि। तथा च यद्यपि त्वदुक्तयुक्त्या गुणत्वमुचितम्, तथापि यथा 'क्षुत्खलु वै मनुष्यस्य भ्रातृव्यः अशनाया मृत्युरेवे' त्यादिश्रुत्या बुभुक्षादीनां दोषत्वकथनादप्रयोजकम्, तथा 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुत' इत्यादिश्रुत्या भिन्नत्वज्ञानादेर्दोषत्वकथनादेतयोरपि गुणत्वमप्रयोजकमित्यर्थः। ननु बुभुक्षादीनां लोकेपि दोषत्वात्तद्दृष्टान्तेनात्र गुणत्वत्यागो नोचित इति शङ्कायां लोके तेषां दोषत्वं परिहरन्ति अन्यथेत्यादि। तथा च यथा लोके तेषां गुणत्वं शास्त्रे दोषत्वम्, एवमेतयोरपि भक्तौ गुणत्वं शास्त्रे दोषत्वमित्यर्थः। सिद्धमाहुः तस्मादित्यादि। रसस्य दोषाभिव्यङ्ग्यत्वनियमात् तथेत्यर्थः। एतादृशस्य रसजनकत्वे शास्त्रीयदशापेक्षयैतादृशदशाया उत्तमत्वे च मानमाहुः अत एवेत्यादि। तथा चास्य दर्शनस्य दोषजन्यत्वेपीदमेवाधिकं 'गोविन्दभुजगुप्तायां द्वारकायां कुरूद्वह। अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालस' इत्यादिवाक्यादतोनेन ज्ञानोपमर्दाद्विरहो युक्त इत्यर्थः। आधिक्ये मानान्तरमाहुः किञ्चेत्यादि। तथा चास्मादेव विशेषान्मुक्तेषु देहसम्बन्धं मुक्तानां सृष्टिं च करोतीत्यतो ज्ञानादिदशापेक्षयेयमेवाधिकेत्यर्थः। तेन सिद्धमाहुः अत इत्यादि। यतो भगवान् 'कचिद् गुणोपि दोषः स्याद्दोषोपि विधिना गुण' इतिवत्तत्तत्कार्यार्थं तत्तत्तथा तथा व्यवस्थापयतीति तथेत्यर्थः। श्लोकव्याख्याने सत्सङ्गपदं पञ्चम्यन्तमपि सम्भवतीत्याशयेनाहुः तदनन्तरमिति। ननु भगवद्विरहासहनप्रस्तावे सत्सङ्गत्यागाशक्तिनिरूपणं कुत्रोपयुज्यत इत्याकाङ्क्षायामाहुः यदर्थमित्यादि। तथा च भगवत्संबन्धादेव तत्त्यागानिच्छेति तद्विरहासहनप्रस्तावे तदुक्तिरुचितैवेत्यर्थः। प्रकारान्तरेणाप्युपयोगमाहुः अत्याग इत्यादि। सिद्धमाहुः कीर्तेरित्यादि। पूर्वमुक्तत्वादिति। स्तुतिप्रस्तावे पूर्वाध्याये उक्तत्वात्॥ ११॥ ❀ ❀ वीक्षन्त इत्यत्र। न विरोध इति। सम्बन्धस्य न विरोध इत्यर्थः॥ १२॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदा सुभद्राप्रभृतयो विमुह्यन्तो मोहं गताः शार्ङ्गधन्वनः कृष्णस्य विरहं विश्लेषं न सेहिरे नासहन्तेति द्वयोरन्वयः। विराटतनया उत्तरा। युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः, गौतमो गौतमवंशजः कृपः। यमौ नकुलसहदेवौ। वृकोदरो भीमः।

मत्स्यसुता सत्यवती, तदादयोऽन्याश्च स्त्रियः ॥ ९-१० ॥ ❀ ❀ तेषां विरहासहनं युक्तमेवेति कैमुत्यन्यायेनाह–सत्सङ्गादिति द्वयेन । सतां भगवद्भक्तानां सङ्गाद्धेतोर्मुक्तस्त्यक्तः दुस्सङ्गो धनपुत्राद्यासक्तिरूपो येन स सद्भिः कीर्त्यमानं रोचनं रुचिकरं यस्य यशः सकृदेकवारमप्याकर्ण्य सत्सङ्गं हातुं त्यक्तुं नोत्सहते न शक्नोति तस्मिन् श्रीकृष्णे दर्शनादिभिर्न्यस्ता धीर्येषां ते पार्थाः पृथापुत्रास्तस्य विरहं कथं सहेरन्निति द्वयोरन्वयः ॥ ११-१२ ॥

हिन्दी अनुवाद

उस समय सुभद्रा, द्रौपदी, कुन्ती, उत्तरा, गान्धारी, धृतराष्ट्र, युयुत्सु, कृपाचार्य, नकुल, सहदेव, भीमसेन, धौम्य और सत्यवती आदि सब मूर्च्छित-से हो गये । वे शार्ङ्गपाणि श्रीकृष्णका विरह नहीं सह सके ॥ ९-१० ॥ ❀ ❀ भगवद्भक्त सत्पुरुषोंके सङ्गसे जिसका दुःसङ्ग छूट गया है, वह विचारशील पुरुष भगवान् के मधुरमनोहर सुयशको एक बार भी सुन लेनेपर फिर उसे छोड़नेकी कल्पना भी नहीं करता । उन्हीं भगवान्के दर्शन तथा स्पर्शसे, उनके साथ आलाप करनेसे तथा साथ-ही-साथ सोने, उठने-बैठने और भोजन करने से जिनका सम्पूर्ण हृदय उन्हें समर्पित हो चुका था, वे पाण्डव भला, उनका विरह कैसे सह सकते थे ॥ ११-१२ ॥

सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः । वीक्षन्तः स्नेहसम्बद्धा विचेलुस्तत्र तत्र ह ॥ १३ ॥
न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते । निर्यात्यगारान्नोऽभद्रमिति स्याद्बान्धवस्त्रियः ॥ १४ ॥
मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः । धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा ॥ १५ ॥
प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया । ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत एवानिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्र तत्रार्हणानयनाद्यर्थं चलंति स्म । यतः स्नेहेन सम्यग्बद्धाः । अत एव तमनुद्रुतानि गतानि चेतांसि येषां ते ॥ १३ ॥ ❀ ❀ अगारान्निर्याति निर्गच्छति सति । औत्कंठ्यादासक्त्यतिशयाद्धेतोरुद्गलत्स्रवद्बाष्पमश्रु न्यरुंधन्नेत्रेष्वेव स्तंभितवत्यः । तत्र हेतुः । अभद्रं नो स्यादमंगलं मा भूदित्येतदर्थम् ॥ १४ ॥ ❀ ❀ मृदंगादयो दश वाद्यभेदाः ॥ १५ ॥ ❀ ❀ प्रेमव्रीडास्मितपूर्वकमीक्षणं यासां ताः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

अत एव तत्रार्पितबुद्धित्वादेवानिमिषैः पक्ष्मव्यापाररहितैः । "अक्षो ज्ञानार्थशकटव्यवहारेषु पाशके । रुद्राक्षेंद्राक्षयोः सर्पे विभीतकतरौ दृशि । चक्रे कर्षे पुमान्क्लीबं तुत्थे सौवर्चलेंद्रिये" इति मेदिनी । तमनुद्रुतेति । यावद्यावद्दूरं गतस्तावत्तावदुत्तुंगं भूपृष्ठमारुह्य वीक्षमाणास्तस्थुरदर्शनं याते तस्मिंश्चेतसा तमनुदुद्रुवुरिति भावः ॥ १३ ॥ ❀ ❀ अगारात् न गारो निगरणं यस्य सोगारः । अगा वृक्षा एवाराणीव वंशवंशस्थूणादिलक्षणानि यस्येति वा । अगमगमनमारस्य पित्तलस्य यस्मादिति । आरपदमुपलक्षणं कांस्यादेरपि । अगानां स्वर्णाद्यात्मकपर्वतानामारः प्रवेशो यस्मिन्निति वा । तत्रारुस्तंभने । इत्यर्थ इति । गमनागमने रोदनं त्वमंगलमेवेति शाकुनिकाः ॥ १४ ॥ ❀ ❀ भेरी नाम चर्मपिहितो दीर्घमहदाकृतो वाद्यविशेषः । दुंदुभिस्तिरश्चीनवाद्यविशेषः ॥ १५ ॥ ❀ ❀ "प्रासादो देवभूभुजाम्" इत्यमरः ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

ते पार्थादयः सर्वे स्नेहश्च संबन्धश्च तयोः समाहारस्तस्मात्स्नेहाच्छरीरसम्बन्धाच्चानुद्रुतमनुसृतं चेतो येषां तथाभूताः संतोऽनिमिषैर्निमेषरहितैरनन्यपरैरक्षैरक्षिभिः-अक्षशब्द इंद्रियवाच्यप्यौचित्याच्चक्षुःपरः-तमेव वीक्षंतः तत्र तत्र चेलुः परिबभ्रमुः ॥ १३ ॥ ❀ ❀ तदा बांधवाः कुन्तीप्रभृतयः स्त्रियः अगाराद् गृहाद्देवकीसुते निर्याति निर्याते सत्यभद्रं न स्यादिति बुद्ध्या प्रेमपूर्वकानुध्यानादुद्गलदपि बाष्पं न्यरुंधन् ॥ १४ ॥ ❀ ❀ मृदंगादयः समं युगपन्नेदुर्दध्वनुः ॥ १५ ॥ ❀ ❀ कुरूणां नार्यः कृष्णं द्रष्टुमिच्छवः प्रासादशिखरारूढाः प्रेमादीन्यासां संतीति तथा द्वंद्वान्मत्वर्थीयोऽर्शआद्यच् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विरहमसहमानानां तेषां भक्तिप्रसरसंप्लवातिरेकमाह सर्व इति । अनिमिषैः पक्ष्मव्यापाररहितैः अक्षैर्नेत्रैस्तं वीक्षमाणाः कृष्णानुगतहृदयाः ते सर्वे स्नेहात् तत्र तत्र विचेरुरित्यन्वयः । यावद्यावद् दूरं गतः तावत्तावदुत्तुंगं भूपृष्ठमारुह्य वीक्षमाणास्तस्थुरदर्शनं याते तस्मिंश्चेतसा तमनुदुद्रुवुरित्यर्थं हशब्दः सूचयति ॥ १३ ॥ ❀ ❀ पांडवस्त्रियः देवकीसुते अगारात्

१. प्रा० पा०—त्यागारतो । २. प्रा० पा०—बान्धवाः स्त्रियः । ३. प्रा० पा०—ववर्षुः ।

न गारो निगिरणं नाशलक्षणं यस्मात्सोऽगारः, अगा वृक्षा एवाराणि वंशवंद्यलक्षणानि यस्येति वा, अगमगमनं कांत्यतिशयादेररमलं यस्मादिति वा, अगानां स्वर्णात्मकानां पर्वतानामारः प्रवेशलक्षणं गमनं यस्मिन्निति वा, तस्मात्पुरान्निर्याति सत्यभद्रममंगलं न स्यादिति भावेनौत्कंठ्यादुद्गतं बाष्पं नेत्रजलं न्यरुन्धन् स्तंभितवत्य इत्येकान्वयः॥ १४॥ ❋ ❋ मार्दंगिकादिभिराहता मृदंगादयो नेदुरित्यन्वयः। भेरी नाम चर्मपिहिता दीर्घमहद्दारुकृतो वाद्यविशेषः, धुंधुरिकाख्यात्मकं वाद्यं दुंदुभिः तिरश्चीनवाद्यविशेषः, आनकः पटहः, पणवो ढक्काविशेषः॥ १५॥ ❋ ❋ प्रेम्णा व्रीडेन स्मितेन च सहितमीक्षणं दर्शनं यासां तास्तथोक्ताः व्रीडाशब्द उभयलिंगः प्रेमव्रीडाभ्यां यत् स्नेहपूर्वमीक्षणं यासामिति वा कुसुमैः कुसुमानि, व्यत्ययो भक्त्यतिशयद्योतनार्थं पुष्पैः करणैरिति वा॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निर्यातीत्यश्रुशोषकेण भयेनेत्यर्थः॥ १४-१५॥ ❋ ❋ प्रेमयुक्ताभ्यां व्रीडास्मिताभ्यामीक्षणं यासां क्रमेण शृंगारमयशान्तमयस्त्रीणां ताः। वियोगारम्भे पूर्वासां स्मितासम्भवात् विच्छिद्य व्याख्यातम्॥ १६-१८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अत एव अनिमिषैरक्षैस्तमेव वीक्षमाणाः। अनु वीक्षणानन्तरं विक्लिन्नचेतसः ततः स्नेहेन सम्यग्बद्धा अत एव तत्र तत्र विचेलुः यत्र यत्र स चलति स्मेत्यर्थः॥ १३॥ ❋ ❋ अगारान्निर्याति निर्गच्छति सति औत्कंठ्याद्धेतोरुद्गलतं स्रवन्तं बाष्पम् अश्रूण्यरुन्धन् स्तम्भितवत्यः। तत्र हेतुः अभद्रं नो स्यादमंगलं माभूदित्येतदर्थम्। अत्रोद्गलदिति शतृप्रत्ययेन उदुपसर्गेण च यत्नतो निरुद्धान्यप्यश्रूणि सस्रुरेव, केवलममंगलनिवारणार्थं पटांचलेन गोपयांचक्रुरिति लभ्यते॥ १४॥ ❋ ❋ मृदंगादयो वाद्यभेदाः॥ १५॥ ❋ ❋ कुसुमैः कुसुमानि। प्रेमव्रीडास्मितानि ईक्षणेषु व्यंजितानि यासां ताः॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

अत एव ते सर्वे तमेव श्रीकृष्णमनिमिषैर्नेत्रैर्वीक्षंतः देहगेहव्यवहारपरित्यागपूर्वकं तं प्रत्येवानुद्रुतं चेतो येषां ते तत्र तत्रार्हणाद्यानयनार्थं विचेलुः परिबभ्रमुः॥ १३॥ ❋ ❋ तदाऽगाराद्देवकीसुते निर्याति निर्गच्छति सति अभद्रं मा भूदिति हेतोः औत्कंठ्यात् स्नेहातिशयादुद्गलद्बाष्पं बांधवस्त्रियो न्यरुन्धन्॥ १४॥ ❋ ❋ समं युगपत्॥ १५॥ ❋ ❋ प्रेमादिपूर्वकमीक्षणं यासां ताः॥ १६॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सर्वे स्वचित्तं भगवति दत्तवंतः शयनादिभिर्वा तस्मिन्ननिमिषा दृष्टयो जाताः दृष्ट्या तु भगवंतमनुद्रुतं चित्तम् एवं कायवाङ्मनोवृत्तयः भगवत्युक्ताः विवेकधैर्यादिकं नोत्पन्नमित्यर्थः। ततः किं जातं तदाह वीक्षंत इति। विरहो गमनस्मरणादुत्पन्नोऽपि भगवद्दर्शनाद्विस्मृतः यदा विरहस्तदा तथा भविष्यति व्यर्थमिदानीं परमानंदानुभवं परित्यज्योद्वेग इति विचारयंत इव देहेंद्रियांतःकरणवृत्तीः भगवति योजितवंतः। तत्रेक्षणमिंद्रियवृत्त्युपलक्षणं, स्नेहेन संबद्धा इत्यंतःकरणस्य स्नेहो हि भगवंतमुपस्थापयति हृदये बहिः स्थिते वा भगवति जीवमानयति, उभयथाप्यत्र न विरोधः विचेरुरिति। शरीरक्रिया भगवद्गमनोपयोगिकार्यार्थं तत्र तत्र शरीरं चालितवंत इत्यर्थः। अतः परंपरया शरीरस्थितिः साद्भुतकमलीलया भगवतः॥ १३॥ ❋ ❋ अत एव महदतिरोदने कर्त्तव्ये भगवदिच्छया अल्पमपि रोदनं न कृतवंत इत्याह न्यरुन्धन्निति। पूर्वस्थित्या उद्गलदपि बाष्पं देवकीसुते गृहान्निर्गच्छति सति अभद्रममंगलसूचकं माभूदिति नेत्रेष्वेव स्तंभितवत्यः। एवं हि भगवदिच्छा प्रबला स्वयं कुतः शरीरादिकं त्यक्ष्यंति यतः प्रेमौत्कंठ्यादुद्गतबाष्पमपि निवारयंति। देवकीसुत इति। युक्तमेव भगवद्गमनं यतो महत्तपस्यया देवक्या पुत्रत्वेन प्रार्थितः पुत्रो जातः, कथं तां द्रष्टुं न गच्छेत्। अत एवास्माभिरपशकुनं न विधेयमिति भावः। अगारादिति अस्मद्गृहे भगवान् समागतः कृतश्चोपकारः तादृशस्य स्वगृहगमने अपशकुनकरणमयुक्तं स्यात् इति हेतोः बांधवस्त्रियः न्यरुन्धन्निति संबंधः। बंधुत्वमपि स्फुरितमिति भावः॥ १४॥ ❋ ❋ भगवतो निर्याणोत्सवे दशविधवाद्यानि वादितवंत इत्याह मृदंगेति। तत्र मृदंगभेरीपणवानकदुंदुभयः पंचनद्धभेदाः शंखगोमुखौ शुषिरभेदौ वीणैकाततरूपा घंटाधुंधुर्यौ घनभेदौ। एवं चतुर्विधवाद्यमुक्तम्। एतेषां लक्षणानि वाद्याध्यायप्रसिद्धानि॥ १५॥ ❋ ❋ उत्सवे स्त्रीणां दर्शनं वर्णनीयमिति पुष्पवृष्टिसहितं तदाह प्रासादेति। शिखरमंतिमगृहं कुरुनार्य इति। कुलस्त्रीणां बहिर्गमनाभावः पुष्पवृष्टौ सत्यां भगवानात्मानं पश्येदिति कुसुमैर्ववृषुः। प्रेमव्रीडास्मितानि गुणकार्याणि ईक्षणसहकारीणि प्रेमादिपूर्वकमीक्षणं यासां भक्तिधर्मज्ञानप्रकारैः बहुविधैर्भगवान् दृष्ट इत्यर्थः॥ १६॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

मृदङ्गेत्यत्र। भेर्या आनद्धभेदे गणना, 'ताड्यमानसु भेरीष्वि' ति भारते प्रयोगाज्ज्ञेया॥ १४॥ ❋ ❋ प्रासादेत्यत्र। 'भक्तिधर्मज्ञाने' त्यत्र धर्मपदेन स्त्रीस्वभावरूपो धर्मो गृह्यते॥ १५॥

श्रीगिरिधरकृता बालप्रबोधिनी

अतो यतस्ते सर्वे स्नेहेन सम्यग्बद्धा अत एव यतश्च तमेवानुद्रुतानि अनुगतानि चेतांसि येषां तथाभूताः ततोऽनिमिषैर्निमेषरहितैरक्षैर्नेत्रैः तमेव वीक्षन्तो वीक्षमाणास्तदर्थोपायनाद्यानयनार्थं तत्र तत्र विचेलुरित्यन्वयः । एवं प्रेमवतोऽपि त्यक्त्वा गमनेन भगवतो लीलाया अद्भुतत्वं सूचयन्नाह–हेति ॥ १३ ॥ ❀ ❀ तदा च बान्धवानां स्त्रियः कुन्तीप्रभृतयः अगारात् स्वगृहाद् देवकीसुते निर्याति निर्गच्छति सति अभद्रमपशकुनं नो स्यात् मा भूदिति बुद्ध्या औत्कण्ठ्यात्प्रेमपूर्वकानुध्यानात् उद्गलत् स्रवदपि बाष्पमश्रु न्यरुन्धन् नेत्रेष्वेव स्तम्भितवत्य इत्यन्वयः ॥ १४ ॥ ❀ ❀ तदा मृदङ्गादयो दश वाद्यविशेषा नेदुरित्यन्वयः ॥ १५ ॥ ❀ ❀ प्रेमादिपूर्वकमीक्षणं यासां ताः कुरूणां नार्यः कृष्णस्य दिदृक्षया प्रासादशिखरारूढाः सत्यः कृष्णं कुसुमैः कुसुमानि ववृषुरित्यन्वयः ॥ १६ ॥

हिन्दी अनुवाद

उनका चित्त द्रवित हो रहा था, वे सब निर्निमेष नेत्रोंसे भगवान्‌को देखते हुए स्नेह-बन्धनसे बँधकर जहाँ-तहाँ दौड़ रहे थे ॥ १३ ॥ ❀ ❀ भगवान् श्रीकृष्णके घरसे चलते समय उनके बन्धुओंकी स्त्रियोंके नेत्र उत्कण्ठावश उमड़ते हुए आँसुओंसे भर आये; परन्तु इस भयसे कि कहीं यात्रा के समय अशकुन न हो जाय, उन्होंने बड़ी कठिनाईसे उन्हें रोक लिया ॥ १४ ॥ ❀ ❀ भगवान्‌के प्रस्थानके समय मृदङ्ग, शङ्ख, भेरी, वीणा, ढोल, नरसिंगे, धुन्धुरी, नगारे, घण्टे और दुन्दुभियाँ आदि बाजे बजने लगे ॥ १५ ॥ ❀ ❀ भगवान्‌के दर्शनकी लालसासे कुरुवंशकी स्त्रियाँ अटारियोंपर चढ़ गयीं और प्रेम, लज्जा एवं मुसकानसे युक्त चितवनसे भगवान्‌को देखती हुई उनपर पुष्पोंकी वर्षा करने लगीं ॥ १६ ॥

सितातपत्रं जग्राह मुक्तादामविभूषितम् । रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १७ ॥
उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते । विकीर्यमाणः[1] कुसुमै रेजे मधुपतिः पथि ॥ १८ ॥
अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः । नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥ १९ ॥
अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् । कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः ॥ १७ ॥ ❀ ❀ व्यजने चामरे जगृहतुः । मधुपतिः श्रीकृष्णः ॥ १८ ॥ ❀ ❀ सत्याः श्रीकृष्णे तासामव्यभिचारात्किं तु नानुरूपाश्चानुरूपाश्च । निर्गुणस्य परमानंदस्य सुखी भवेत्यादयो नानुरूपा गुणात्मनो मानुष्यनाट्यावतारेनुरूपाश्चेत्यर्थः । संधिरार्षः ॥ १९ ॥ ❀ ❀ सर्वासां श्रुतीनां मनोहरः । उपनिषदोपि मूर्तिमत्यः सत्यस्तं संजल्पमभ्यनंदन्नित्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"निद्रा गुडाका संप्रोक्ता प्रमीला मृत्युतंद्रिका" इत्यभिधानात् । यदेंद्रकीले विनिद्रेण तपस्तप्तं तदा पशुपतिना गुडाकेशोयमित्युक्तमिति पुराणांतरे । गुडा कुटिला गुडवद्रक्ता वा केशा यस्य स इति वा । दीर्घश्छांदसः । "गुडः कौटिल्यगुडयोः" इति च ॥ १७–१८ ॥ ❀ ❀ ब्रह्मण्यत्वप्रेमवश्यत्वाद्यप्राकृतगुणमयस्य तस्यानुरूपाश्च युष्माकमाशीर्भिरेव मम सदा सुखमिति प्रतिवचनस्य मिथ्यात्वानर्हत्वात् । तस्य दास्यसख्यवात्सल्यादिरसविषयाश्रयाश्रयत्वे सति तत्तद्भक्तजनसंयोगविरहाद्यलौकिकसुखदुःखादिमयत्वाच्च । यद्वा निर्गता गुणेभ्यो गुणा यस्य तस्य प्राकृतगुणातीतस्य नित्यगुणस्य नानुरूपाः नित्यं तत्परिपूर्णत्वेन लाभान्तरायोगादित्यर्थ इत्थं व्याख्येयमिति भावः । यद्वा दुष्टान् जहि साधून्पालयास्माननुगृहाणेत्येवंरूपा आशिषो वाक्यप्रबंधा अश्रूयंतेति ॥ १९ ॥ ❀ ❀ श्लेषेणाह–सर्वेषां श्रुतीः श्रवणानि मनांसि च हरत्याकर्षतीति सर्वश्रुतिमनोहरः । इत्यर्थ इति । श्रुत्यभिमानिदेवता अपि तच्छ्रुत्वा सविस्मया बभूवुरहो असक्तोऽपीमा विशेषतो भगवत्स्वरूपज्ञा इति भावः ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मुक्तादामेति । मुक्तादामभिर्मुक्तालम्बैर्विभूषितम् , रत्नघटितो दण्डो यस्य तत् । एवंभूतं श्वेतच्छत्रमित्यर्थः ॥ १७–३५ ॥

श्रीमद्वीरराघवव्याख्या

सितातपत्रं कथंभूतं मुक्तानां दामभिः सरैर्विभूषितं रत्नमयो दंडो यस्य तत् ॥ १७ ॥ ❀ ❀ उद्धवः सात्यकिश्चोभौ परमे श्रेष्ठे अद्भुते च व्यजने जगृहतुः । पथि कुसुमैर्विकीर्यमाणो मधुपतिर्यदुपतिर्यदूनामेव मधव इति नामांतरं तच्च नवमे स्फुटीभविष्यति,

1. प्रा० पा०—अवकीर्यमाणः ।

रेजे रराज ॥ १८ ॥ ❀ ❀ निर्गुणस्य सत्त्वादिप्राकृतगुणरहितस्य गुणात्मनः ज्ञानादिषाड्गुण्यस्वभावस्य "सत्त्वादयो न संतीशे" इति बलैश्वर्येत्यादिवचनात् नानुरूपाः अवाप्तसमस्तकामत्वात् अनुरूपाः भक्तिस्नेहकारितत्वात् तत्र तत्र द्विजेरिताः अत एव सत्या आशिषः अश्रूयंत ॥ १९ ॥ ❀ ❀ उत्तमश्लोके कृष्णे एव चेतांसि यासां तासां कौरवेंद्रपुरस्त्रीणामन्योन्यं सर्वेषां श्रुतिमनोहरः सुखकरः श्रोत्राणि मनांसि च वशीकरोतीति तथा वा संजल्पः संवाद आसीत् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गुडाका निद्रा "निद्रा गुडाका संप्रोक्ता प्रमीला मृत्युरुच्यत" इत्यभिधानम्, तस्या ईशः गुडाकेशः जितनिद्रोऽर्जुनः इंद्रकीलके विनिद्रो भूत्वा तप्ततपाः पशुपतेरेतन्नाम लब्धवान् गुडवद्रक्तकेशो वा दीर्घस्तु च्छांदसः, मुक्तादामविभूषितं मौक्तिकमालालंकृतप्रांतमंडलं रत्नखचितदंडं सितातपत्रं श्वेतच्छत्रं जग्राहेत्यन्वयः । हरेरात्मादेरतिशयेन प्रियत्वं "तदेतत्प्रेय"इत्यादिश्रुतिप्रसिद्धं हशब्देनाह अर्जुनस्य कैंकर्यातिशयदर्शी वा स्वसारथ्यकरणलक्षणापराधपरिहारार्थो वा ॥ १७ ॥ ❀ ❀ उद्धवसात्यकी च व्यजने जगृहतुरिति पूर्वेण संबंधः । एवशब्दः स्वहस्ताभ्यामेव जगृहतुर्न त्वन्याभ्यां स्वदासाभ्यामित्यस्मिन्नर्थे मधूनां यादवगोत्रविशेषाणां पतिः मुक्ताधीशो वा कुसुमैः कुरुपुरंध्रिकरकमलमुक्तैरिति शेषः, पथि राजमार्गे ॥ १८ ॥ ❀ ❀ कुरुपुरे तत्र तत्र तत्तन्मार्गे द्विजवरमुखनिःसृताः 'दुष्टान् जहि साधून् पालय पालयास्माननुगृहाणे'त्यादिकाशिषः शुभवाक्यप्रबंधाः अश्रूयंतेत्यन्वयः । कीदृश्यः सत्याः यथार्थविषयाः निर्गुणस्य सत्त्वादिगुणप्रवृत्त्युदासीनकार्यांडे स्थित्वा सत्त्वादिगुणानातयति सततं प्रवर्तयतीति गुणात्मा अत-सातत्यगमन इति धातोः उणादिप्रत्ययनिमित्तमेतद्रूपं, तस्य पालनादिकर्तुरनुरूपाः पालनानुग्रहादिगुणात्मनो वा । चशब्दः समुच्चये इवार्थो वा ॥ १९ ॥ ❀ ❀ न केवलं कुरुपुरस्त्रियो हरौ पुष्पावकीर्णमकुर्वन्, किंतु स्तुतिमपीति भावेनाह । अन्योन्यमिति उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतीनां वेदाभिमानिनां देवतानां मनोहरः सर्वेषां जंतूनां श्रुतीः श्रवणानि मनांसि च हरतीति वा परस्परं संजल्पः स्तुतिलक्षणः संलाप आसीदित्येकान्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्यपि श्रीभगवति स्वरूपभूतानां गुणानां नित्यत्वमेव तथापि तत्तल्लीलासिद्ध्यर्थं तेषां कचित् कस्यचित् प्रकाशः कस्यचित् अप्रकाशश्च भवति । अत एवाह अश्रूयन्तेति । निर्गुणस्य मध्यपदलोपेन निर्गता गुणेभ्यो गुणा यस्य तस्य प्राकृतगुणातीतनित्यगुणस्य नानुरूपाः नित्यतत्परिपूर्णत्वेन लाभान्तरायोगात् । गुणात्मनः तदाशीर्वादांगीकारद्वारा तद्गुणविशेषप्रवर्त्तकनिवर्त्तकस्यानुरूपाश्च । तदंगीकारे हेतुः सत्या इति । तदेवं प्रकाशनाप्रकाशनहेतोरेव श्रीभगवतश्चन्द्रपरपरार्द्धोज्ज्वलतादिके सत्यपि तत्तल्लीलामाधुर्यविस्तारकस्तस्मिन्नादिव्यवहारः सिद्ध्यति ॥ १९-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः ॥ १७-१८ ॥ ❀ ❀ सत्याः कृष्णे तासामव्यभिचारात् । किन्तु ता नानुरूपा अनुरूपाश्च । सन्धिरार्षः । ऐश्वर्य्यदृष्ट्या निर्गुणस्य परमानन्दस्य सुखी भवेत्यादयो नानुरूपा माधुर्य्यदृष्ट्या गुणात्मनो ब्रह्मण्यत्वप्रेमवश्यत्वाद्यप्राकृतगुणमयस्य तस्य अनुरूपाश्च 'युष्माकमाशीर्भिरेव मम सदा सुखमि'ति तत्प्रतिवचनस्य मिथ्यात्वानर्हत्वात् तस्य दास्यसख्यवात्सल्यादिरसविषयाश्रयत्वे सति तत्तद्भक्तजनसंयोगविरहाद्यलौकिकसुखदुःखादिमयत्वाच्च ॥ १९ ॥ ❀ ❀ सर्व्वेषामेव श्रुतिमनसी हरतीति सः । शेषे सर्व्वासां श्रुतीनामपि मनोहरः । उपनिषदोऽपि मूर्त्तिमत्यः तं संजल्पम् अभ्यनन्दन्नित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गुडाकेशो निद्रेशोऽर्जुनः ॥ १७ ॥ ❀ ❀ व्यजने जगृहतुः, रेजे रराज ॥ १८ ॥ ❀ ❀ निर्गुणस्य प्राकृतगुणरहितस्य "य आत्माऽपहतपाप्मा विराजो विमृत्युर्विशोको विजिघत्सोऽपिपास" इति श्रुतेः गुणात्मनः कल्याणगुणयुक्तस्य "अनन्तकल्याणगुणात्मकोसाविति" स्मृतेः नानुरूपाः पूर्णकामत्वात् अनुरूपाश्च । भक्तकृतप्रियत्वात् संधिरार्षः ॥ १९ ॥ ❀ ❀ सर्वश्रुतीनां वेदवाक्यानां मनांसि हरतीति स तथा संजल्पः ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

पुरुषाणां कृत्यमाह त्रिभिः सितातपत्रमिति । आरक्तो दंडः श्वेतं छत्रं मुक्तादामानि परितो लंबंति, गुडाका निद्रा तस्या ईशः गतभ्रमोर्जुनः उपचारेषु सर्वेषु महाराजत्वमुत्तमं तस्य चिह्नं हि तच्छत्रमर्जुनस्तेन बुद्धिमान् प्रियः प्रीतिविषयः, अनेन भगवता बहु कृतमिति सूचितम्, प्रियतमस्य भगवतो युधिष्ठिराद्यपेक्षयापि अर्जुनस्य भगवान् प्रियतमः, अतो महाराजयोग्यं स्वस्य हीनत्वमपि बोधयित्वा धृतवानित्यर्थः । हेत्वाश्चर्यं लौकिकत्यागात् ॥१७॥ ❀ ❀ व्यजने चामरव्यजने परमाद्भुते स्वत एव शीतल-

सुगन्धवायुजनके पथि पुष्पैर्विकीर्यमाणः हृदि स्थितैः रेजे परमशोभां प्राप्तवान्। सर्वाण्येव पुष्पाणि पुष्पवृष्टौ समागतानीव वसंत एवायं भगवानाविर्भूत इति मधुपतिरित्युक्तं, विष्णुपूजा वा तैः सर्वैः कृता, माल्यार्थे पुष्पाणि विनियुक्तानीति मधुपतिरित्युक्तं "विष्णोः पदे परमे मध्वः" इति श्रुतेः सिंहासनोपवेशनापेक्षयापि पथि परमा शोभा जाता॥ १८॥ ❀ ❀ एवमन्यवर्णानां कृत्यमुक्त्वा ब्राह्मणानामाह अश्रूयंताशिष इति। ब्राह्मणानामयं जातिधर्मः यदीश्वरे आशीर्दानम् अविद्यमानार्थस्याशंसनरूपं सदैव तेषां वाक्यं प्रमाणं स्यात् अनधिगतार्थगंतृत्वात् प्रकृते तु तदभावः, आशिषां सिद्धत्वेनानुवादात् तथा दृष्टार्थत्वपर्यवसानात् सत्या एवाशिषः, अत एव श्रुता एव न गृहीताः। अनुवादांशे अनुरूपाः आशंसायामननुरूपाः उभयोः समासः, चकारात् प्रत्येकरूपाश्च न प्रत्येकरूपत्वे हेतुः निर्गुणस्य अननुरूपाः, गुणात्मनोनुरूपाः अन्ये च तद्विपरीताः सर्वभवनसमर्थत्वाद्भगवतः सर्वा एवाशिषः सत्याः, अतः शुभा इत्यर्थः, द्विजेति वारद्वयं जन्मना, व्यग्राः संतः निर्धार्य वचने अशक्ता इति सूचितम्॥ १९॥ ❀ ❀ एवं सर्वेषां कृत्यमुक्त्वा विरहादिसहनमेव क्रिया च भगवत्सांनिध्ये बहिर्मुखत्वं च भगवदिच्छयैव नाज्ञानादिति वक्तुं तासां ज्ञानमाविःकरोति अन्योन्यमासीदिति। यत्र स्त्रीणामेव ज्ञानं तत्र किं वक्तव्यमन्येषामिति भावः, सम्यक् जल्पः स्वपक्षस्थापनपूर्वकपरदूषणवाक्संदर्भो जल्पः। यद्यपि कथारूपजल्पस्य मध्यस्थाद्यपेक्षा तथापि विचाररूपजल्पस्य नान्यसापेक्षत्वमिति सुष्ठुत्वम् अपि चक्रुः प्रवचनमेकमिति न्यायो नात्र, किंतु अन्योन्यं सर्वे श्रोतारः सर्वे वक्तारश्चेति एतादृशकथने हेतवः उत्तमश्लोकचेतसामिति। यथा लौकिके स्त्रीणां निपुणता भवति तच्चित्तानां तथा भगवत्यपि इदमित्थतया ज्ञानं युक्तमिति। किंच कुरोर्महापुरुषस्य धर्मत्वेन परिणतस्य वंश्या अपि धर्मत्वेन ज्ञानवंतः तत्राप्ययं युधिष्ठिरः परमैश्वर्यं प्राप्तः पूर्णज्ञानादिमान्। तस्य पुरस्त्रीणां भगवत्परत्वं युक्तमेव, ननु 'अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते' इति न्यायेन तासां ज्ञानमस्तु, न तु संजल्पस्तत्राह सर्वश्रुतिमनोहर इति। सर्वासां श्रुतीनां मनस्तात्पर्यं हरतीति सर्वेषां वा श्रुतिमनसी स्ववशे करोतीति तथा। न ह्येतादृशः संजल्पः यथा कथंचिद्भवति किं च भगवच्चेतसामेव भवति॥ २०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

उद्धव इत्यत्र। विष्णोः पद इत्यादि। अस्यां श्रुतौ मधुन आनन्दादेर्भगवत्पदाधिकरणकत्वकथनात् तेषां तादृशज्ञानवत्ताज्ञापनाय मधुपदमुक्तमित्यर्थः॥ १७॥ ❀ ❀ अश्रूयन्तेत्यत्र। तथापीति। अनुवादत्वेनाप्रामाण्यत्वेपीत्यर्थः। गृहीता इति। प्रमाणत्वेन गृहीताः॥ १८॥ ❀ ❀ स वै किलेत्यत्र। प्रमाणे नेति। अत्र प्रमाण इति सप्तम्यन्तम्। नेति भिन्नं पदं बोध्यम्। प्रतिपाद्यत इति शेषः। तत्र गमकमाहुः आत्मेत्यादि। 'पूर्वमेवे' त्यादिश्रुतिस्तु आरुणकेतुकब्राह्मणस्था। तथा च स पुरुषः पुराणो भविष्यति, नायमित्यर्थः। अत्रेति, उक्तश्रुतिषु। इदानीन्तनैरिति ब्रह्मविष्णुमहेशादिभिः। नन्वस्मदाद्यपेक्षया पुरातनत्वं तेषामस्तीत्यतिव्याप्तिर्दुर्वारेत्यत आहुः यत्किञ्चिदित्यादि। कयाचिदिति। 'पूर्वमेवे' ति श्रुतेः कूर्मवाक्यत्वेन कूर्मस्यावतारत्वरूपया मायाभर्तृत्वरूपा वेत्यर्थः। एतदिति। एकस्य सत्त्वम्। अग्रे तदानीमिति। 'सदेव सौम्येदमग्रे' 'नासदासीन्नो सदासीत्तदानीमि'त्यादिश्रौतशब्दोक्तिः। प्रमाणाभावादित्यादि। विशेष्यान्वितैवकारेण सदसन्निषेधेन च तदभावात्। पश्चादिति। 'रेतोधा आस' न्नित्यादिश्रुत्युक्तवक्त्राद्युत्पत्त्यनन्तरम्। तदानीन्तनेत्यादि। पाश्चात्यव्यवहारमाश्रित्य ततः पूर्वस्थितिबोधनार्थं तथोक्तमित्यर्थः। अत्र गमकमाहुः उभयेत्यादि। तथा च 'सदासीदग्र आसी' दित्येवमुभयसत्ताप्रतिपादने तथेत्यर्थः। ननु तत्र कालसत्तानूद्यत एव, न तु प्रतिपाद्यत इति न वाक्यभेद इत्यत आहुः ततः पूर्वमित्यादि। 'सदेवे' त्यादिश्रुतिः सर्वतः पूर्ववृत्तान्तं वदन्ती एवकारेण चेतरं व्यवच्छिन्दन्ती प्रमाणान्तरस्याप्यसत्तां पूर्वं बोधयतीति तदभावान्नानुवादः शक्यवचन इति कालप्रतिपादकत्वमेवादरणीयम्, तथा सति दोषस्तदवस्थ इत्यर्थः। कालप्रतिपादकत्वे दूषणान्तरमाहुः एकमित्यादि। पूर्वं कालसत्ताप्राप्तौ तद्भ्रमनिरासायात्र वाक्यशेषे एकपदमन्ययोगव्यवच्छेदपूर्वकमुक्त्वा एकपदस्य वाचकत्वान्मुख्येतरव्यवच्छेद एव वाक्यार्थ इति भ्रमनिरासायाद्वितीयपदस्यात्र श्रावणात्तद्विरोध इत्यर्थः। एतद्व्याकुर्वन्ति कथमित्यादि। निराकुर्वन्निति। अद्वितीयपदेन निराकुर्वन्। बोधनसमयानुसारेणेति बोधनमर्यादानुसारेण। ननु मास्तु कालः, तथापि आसनक्रियाया विद्यमानत्वात् कथमेकसत्तासिद्धिरित्यत आहुः आसनेत्यादि। पूर्ववद्धेति सिद्धान्तानुसारेणेति। 'पूर्ववद्धे' त्यधिकरणे यः सिद्धान्तस्तदनुसारेण जगदात्मनीति। अनारोपितानागन्तुकं रूपमात्मपदेनोच्यते, तथा च जगतोऽनारोपितानागन्तुकरूपे इत्यर्थः। कालेत्यादि। कालस्यापि कचिदुपादानत्वकथनात्तादृशः कालो भविष्यतीति कथमेतदेकसत्तासिद्धिरित्याशङ्कायां तन्निराकरणार्थमित्यर्थः। ईश्वर इति। 'प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत् त्रितयं त्वहम्॥' इति वाक्यात्सर्वेषामपि मूलरूपः स्वयमेवेत्यर्थः जीवेत्यादि। ननु तथापि 'नित्यो नित्यानामि'त्यादिश्रुतौ जीवानां नित्यत्वनिरूपणात्तत्सत्तायां कथमेतदेकसत्तेति शङ्कायां जीवनिराकरणार्थमित्यर्थः। नितरामित्यादि। 'सर्व एवात्मानो व्युच्चरन्ती'ति श्रुत्या व्युच्चरणोत्तरमेवांशानां जीवरूपेण प्राकट्यात् ततः पूर्वमप्राकट्येन तत्सिद्धिरित्यर्थः (सुबोधिनी-सुबोधिनी प्रकाशयोः श्लोकसंख्यावैषम्यात्पूर्वापरीकारो दृश्यतेऽत्र।)॥ २०॥

श्रीगिरिधरकृता बालप्रबोधिनी

गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः सितातपत्रं श्वेतच्छत्रं राजासाधारणं चिह्नं जग्राहेत्यन्वयः। छत्रस्य श्रेष्ठत्वमभिप्रेत्य विशिनष्टि–मुक्तानां दामभिर्विभूषितम्, रत्नमयो दण्डो यस्य तत्। ननु परस्य छत्रग्रहणं स्वस्य

न्यूनत्वापादकं तत्कथं कृतवानित्याशङ्क्य परस्परप्रीतिविषयत्वाद्यथाऽर्जुनप्रीतये भगवान् सारथ्यमङ्गीकृतवान् तथा भगवत्प्रीतयेऽर्जुनोऽपि दास्यमङ्गीकृतवानिति सूचयन् द्वयोर्विशेषणमाह–प्रियः प्रियतमस्येति । अहो स्नेहस्य वेगौत्कण्ठ्यं येन लोकवेदयोर्मर्यादोल्लङ्घनमिति सूचयति–हेति ॥ १७ ॥ ❀ ❀ उद्धवः सात्यकिश्चोभौ परमाद्भुते स्वत एव शीतलसुगन्धवायुजनके व्यजने जगृहतुरित्यन्वयः । पथि मार्गे कुसुमैर्विकीर्यमाण आच्छाद्यमानो मधुपतिः श्रीकृष्णो रेजे ॥ १८ ॥ ❀ ❀ तत्र तत्र मार्गे द्विजैरीरिताः प्रयुक्ता आशिषः अश्रूयन्तेत्यन्वयः । ता विशिनष्टि–सत्या इति, सुखादीनां श्रीकृष्णे व्यभिचाराभावात् । किन्तु निर्गुणस्य परमानन्दस्य सुखी भवेत्यादयो नानुरूपाः, गुणात्मनोऽङ्गीकृतमानुष्यनाट्यस्यानुरूपाश्च । सन्धिरार्षः ॥ १९ ॥ ❀ ❀ कौरवेन्द्रो युधिष्ठिरस्तत्पुरस्य स्त्रीणामन्योन्यं सञ्जल्पः संवाद आसीदित्यन्वयः । संवादं विशिनष्टि–सर्वेति । सर्वासां श्रुतीनामुपनिषदां मनस्तात्पर्यं हरति सङ्गृह्णातीति तथा । ननु संवादस्य ज्ञानाधीनत्वात् स्त्रीणामुपनिषदर्थज्ञानमेव कथं सम्भवतीत्यपेक्षायां भगवदुपासकानामेव यथार्थवेदार्थज्ञानं भवति नान्येषामिति सूचयंस्तासां भगवदुपासकत्वात्तज्ज्ञानमित्याह–उत्तमश्लोकचेतसामिति । उद्गच्छति तमोऽज्ञानं यस्मात्तथाभूतः श्लोको यशो यस्य तस्मिन् श्रीकृष्णे चेतो यासां तासामित्यर्थः । अनेन ज्ञानप्रतिबन्धकं हि अज्ञानं तत्र यदि यस्य भगवद्यशःश्रवणमात्रेणाप्यज्ञाननिवृत्त्या यथार्थज्ञानं सम्भवति तर्ह्यहर्निशं तच्चिन्तनपराणां तज्ज्ञाने कः सन्देह इत्यपि दर्शितम् ॥ २० ॥

हिन्दी अनुवाद

उस समय भगवान्‌के प्रिय सखा घुँघराले बालोंवाले अर्जुनने अपने प्रियतम श्रीकृष्णका वह श्वेत छत्र, जिसमें मोतियोंकी झालर लटक रही थी और जिसका डंडा रत्नोंका बना हुआ था, अपने हाथमें ले लिया ॥ १७ ॥ ❀ ❀ उद्धव और सात्यकि बड़े विचित्र चँवर डुलाने लगे । मार्गमें भगवान् श्रीकृष्णपर चारों ओरसे पुष्पोंकी वर्षा हो रही थी । बड़ी ही मधुर झाँकी थी ॥ १८ ॥ ❀ ❀ जहाँ-तहाँ ब्राह्मणोंके दिये हुए सत्य आशीर्वाद सुनायी पड़ रहे थे । वे सगुण भगवान्‌के तो अनुरूप ही थे; क्योंकि उनमें सब कुछ है परन्तु निर्गुणके अनुरूप नहीं थे, क्योंकि उनमें कोई प्राकृत गुण नहीं है ॥ १९ ॥ ❀ ❀ हस्तिनापुरकी कुलीन रमणियाँ जिनका चित्त भगवान् श्रीकृष्णमें रम गया था, आपसमें ऐसी बातें कर रही थीं, जो सबके कान और मनको आकृष्ट कर रही थीं ॥ २० ॥

स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥ २१ ॥
स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् ॥ २२ ॥
स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ २३ ॥
स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ।
य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र तेजःसौंदर्याद्यतिशयेन विस्मिताभ्यः सखीभ्योऽन्याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति । स वा इति चतुर्भिः । वै स्मरणे । किलेति प्रसिद्ध्या प्रमाणद्योतकम् । य एक एवाद्वितीयः पुरुषः आसीत्स एवायं श्रीकृष्णः । कुत्रासीत् । अविशेषे आत्मनि निष्प्रपंचे निजस्वरूपे । कदा । अग्रे गुणेभ्यो गुणक्षोभात्पूर्वम् । तथा निशि प्रलये च तस्य लक्षणं जगतामात्मनि जीवे निमीलितात्मनि निमीलितात्मन्निति लुप्तसप्तम्यंतं पदम् । जातावेकवचनम् । ईश्वरे लीनरूपेषु जीवेषु सत्स्वित्यर्थः । ननु जीवानां ब्रह्मत्वात्कथं लयस्तत्राह । सुप्तासु शक्तिषु सतीषु जीवोपाधिभूतसत्त्वादिशक्तिलय एव जीवलय इत्यर्थः ॥ २१ ॥ ❀ ❀ तदेवं सृष्टेरादौ प्रलयानंतरं च निष्प्रपंचावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये सप्रपंचावस्थानमाहुः । स एवाप्रच्युतस्वरूपस्थितिरेव प्रकृतिमनुससाराधिष्ठितवान् । भूयः पुनः सृष्टिप्रवाहस्यानादित्वात् । कीदृशीम् । निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायां मोहिनीम् । अत एव सिसृक्षतीं स्रष्टुमिच्छंतीम् । किमर्थमनुससार । अनामरूप आत्मनि जीवे रूपनामनी विधातुमिच्छन् । उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः । कर्माणि च विधातुं वेदान्कृतवानित्याहुः । शास्त्रकृदिति ॥ २२ ॥ ❀ ❀ अस्य दर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः । स वै अयम् । अस्य पदं स्वरूपमत्र

वा । निर्जितो मातरिश्वा प्राणो यैः । ह्रस्वत्वमार्षम् । ते सूरय एव पश्यंति । केन । भक्त्योत्कलित उत्कंठितोऽमलो य आत्मा बुद्धिस्तेन । 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः । बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याहुः । ननु हे सखि एष एव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति । न तु योगादय इत्यर्थः । यद्वा । नु अहो एष सत्त्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेनाप्रत्यक्षीभवितुं नार्हति । किं त्वनेन सहैव गंतव्यमित्यर्थः ॥ २३ ॥ ❀ ❀ पुण्यश्लोकतामाहुः । हे सखि यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैरनुगीतसत्कथः अनुगीताः सत्यः कथा यस्य स एवायम् । गानप्रकारमाहुः । य एक ईश इत्यादि ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तदा प्रथमं शांतिरतिमत्यस्सविस्मयमूचुः । यद्वा न विद्यते विशेषो वैशिष्ट्यमुत्कर्षो वा यस्मात्तथाभूत एक एवासीत् । व्यासादिमुखादस्माभिः श्रुतोभूदित्यर्थः स वै निश्चितमयमेवेति तर्जनीभिर्दर्शयामासुः । इत्यर्थ इति । न हि जीवानां स्वरूपतो नाशोऽस्ति प्रलय इति भावः । अत्राक्षिपति–नन्विति । इत्यर्थ इति । कृपणधननाशे कृपणो यथा लोकैर्नष्टो मन्यते तथोपाधिलये जीवोपीति भावः । एकोऽयमेव न तु ब्रह्मादिरित्यर्थः ॥ २१ ॥ ❀ ❀ अत एव मोहिनीत्वादेव । इत्यर्थ इति । स्थूलसूक्ष्मोपाधिसृष्ट्येत्यर्थः । ननु प्रकृत्यनुगतत्वं नाम प्रकृत्यधीनत्वम् । स च दोष एव । मैवम् । निजबलेन प्रेरितां स्ववशीकृत्य कस्मिंश्चन कृत्ये नियुक्तामित्यर्थः । कर्मज्ञानयोगभक्तिसाधनसिद्ध्यर्थं तु प्रकृत्यनुगमनात्पूर्वमेव वेदशास्त्राणि कृतवानेवेति शास्त्रकृत् ॥ २२ ॥ ❀ ❀ योगादीनां भक्तिसापेक्षत्वान्न ते स्वतंत्रा इति भावः । सत्त्वस्यार्थांतरमाश्रित्याह–यद्वेति । इत्यर्थ इति । अस्य त्यागेन नास्माकं गतिरिति भावः । अत्र विश्वनाथः–ननु सृष्ट्यारंभे पुरुषादयोऽवतारा लक्ष्यंते न त्वेष ईदृशप्रकारः । किं तु वैवस्वतमन्वन्तरीयाष्टाविंशतिचतुर्युगस्थद्वापरे संप्रत्येवैष उपलभ्यते । सत्यमसौ भक्तिगम्यो नित्यस्वरूपो नित्यलीलोऽस्मिन्द्वापरेऽवतीर्णोऽप्यस्य भक्तिमद्भिः सदैवायमुपलभ्यते इत्याह–स वा इति । निर्जितान्मातरिश्वनः प्राणाद्धेतोर्निर्जितेंद्रियाः सर्वेन्द्रियाणां प्राणाधीनवृत्तित्वात् । प्राणजयादेव निर्जितेंद्रिया इत्यर्थः । तथाभूता अपि भक्त्या उत्कलितोऽमलो य आत्मा बुद्धिस्तेनैव यस्य पदं स्वरूपं चरणारविन्दं वा पश्यंति । अत्र सूरित्वं जितेन्द्रियत्वं जितप्राणत्वं च तेषां भक्त्यैव न तु प्राणापानादिभिरिति भावः । अत्र सूरयो भक्त्युत्कंठत्वे सत्येव पश्यंतीति वर्तमाननिर्देशेन सार्वकालिकदृष्टिगोचरत्वात्तस्य सार्वकालिकलीलत्वम् । अतः "परार्द्धांते सोवबुध्यत गोपवेषो मे पुरुषः पुरस्तदाविर्बभूव" इति गोपालतापनीश्रुतौ ब्रह्मवाक्यम् । तथा ब्रह्मसंहितायां सृष्ट्यारंभे गोपवेषः कृष्ण एव दृष्टः स्तुतश्च ॥ २३ ॥ ❀ ❀ किञ्चास्य लीलाकथातिरहस्या रहस्यलोकैरेव वेद्येत्याह–अयमर्जुनसखो नराकृतिः गुह्येषूपनिषत्सु च आगमेषु पंचरात्रादिषु यः खलु एक एवेशः ईश्वरः सन्न तु साक्षादेतद्रूप इत्यर्थः । तत्र जगति न सज्जते आप्तकामत्वात् । हे सखीति । सख्यभावेनास्य सेवनं त्वतिदुर्लभम् । सख्यपालनस्य दुःशकत्वादिति भावः । रहस्यनिरूपकैरुपनिषद्विचारकुशलैः ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

संजल्पमेवाह स वै किलेत्यादिभिर्दशभिः । तावत् प्रलयदशायां कृत्स्नजगदुपादानत्वेन निमित्तत्वेन च य एकोऽवस्थितः यश्च ततो "बहु स्यां प्रजायेय नामरूपे व्याकरवाणि" इति संकल्पपूर्वकं नामरूपव्याकर्ता यश्च "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति वेदादिभिः कर्तृत्वेन तत्प्रवर्तकत्वेन च प्रसिद्धः यश्च मुमुक्षुभिर्ध्येयो दृश्यश्च वेदांतवेद्यस्वरूपस्वभावः यश्च जगत्सर्गस्थितिलयलीलः स एवायं कृष्ण इति जल्पन्ति चतुर्भिः । निशि प्रलयदशायां गुणेभ्यः सत्त्वादिगुणोन्मेषादग्रे पूर्वं सुप्तशक्तिषु सतीषु कर्मरूपशक्तिषु सुप्तासु फलप्रदानायाप्रवृत्तास्वित्यर्थः । आत्मनि स्वस्मिन् जगदात्मनि सूक्ष्मचिदचिद्रूपजगच्छरीरके कार्य्यदशायां जगदंतरात्मनीति वा ईश्वरे नियंतरि निमीलितवान् आत्मा मतिः निवृत्तसर्गादिसंकल्पे स्वस्मिन्नविशेषे सति विशेषाः पृथिव्यादिभूतानि "महदाद्या विशेषांता" इति प्रयोगात् तत्र प्रदर्शनार्थं कार्यवर्गरहिते सति नामरूपविभागरहिते सतीति वा एकोऽद्वितीयः एक अविभक्तचिदचिच्छरीरकतयैकः उपादानभूतः । अविभक्तनामरूपता हि ह्युपादानता अद्वितीयः निमित्तांतररहित एक इत्यनेनोपादानत्वोक्त्या निमित्तस्यैव धीस्थत्वादद्वितीयः इत्यनेन निमित्तांतरनिषेधः एवंविधो य आसीत्स एवायं किल श्रीकृष्ण इत्यनेनान्वयः ॥ २१ ॥ ❀ ❀ स एव भूय इति । य एकोऽद्वितीयो भूत्वा भूयः निजवीर्यचोदितां बहुस्यामित्यादिस्वसंकल्पप्रेरितां स्वजीवमायां स्वशेषभूतजीवतिरोधायिकां प्रकृतिं प्रति सिसृक्षतीं स्रष्टुमुन्मुखीमनुससार अन्तरात्मतया प्रविश्य नामरूपे व्याकरोदित्यर्थः । कथंभूतः अनामरूपात्मनि न विद्येते नामरूपे यस्य तस्मिन्नात्मनि जीवे रूपनामनी नामरूपे विधित्समानश्चिकीर्षुः शास्त्रकृद्वेदप्रवर्त्तको यः स एवायं श्रीकृष्णो वर्त्तत इत्यर्थः ॥ २२ ॥ ❀ ❀ स वा इति । निर्जितानींद्रियाण्यंतर्बाह्यानि यैः निर्जितः मातरिश्वा प्राणो यैस्ते सूरयः भक्त्योत्कलितं संयुक्तमत एवामलं चेतस्तेन यस्य पदं स्वरूपं पश्यन्ति योऽयं च सत्त्वमन्तःकरणं परिमार्ष्टुं शोधयितुमर्हति स एवायं कृष्णः ॥ २३ ॥ ❀ ❀ स इति । हे सखि ! गुह्येषु वेदेषु वेदांतेषु गुह्येष्विति विशेषणाद्वेदवादिभिर्वेदांतगुह्यरूपस्वरूपगुणयाथात्म्योपदेष्टृभिश्चानुगीयमाना सती

विशुद्धा कथा यस्य यश्चैक एव सन्नात्मनः स्वस्य लीलार्थं जगत्सृजत्यवति रक्षत्यत्ति संहरते तत्र जगति न सज्जते जगदंतरात्मतया स्थितस्तद्गतदोषैर्न सज्जते च न पक्षपातीति वा स एवायं कृष्णः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कोऽसाविति तत्राह स वा इति। हर्यपेक्षयाऽप्रधानत्वात् गुणशब्दवाच्येभ्यो महदादितत्त्वेभ्योऽग्रे निशि महाप्रलये सुप्तशक्तिषु शक्यत्वात्तदधीनत्वाच्छक्तिशब्दवाच्यासु सत्त्वादिगुणाभिमानिनीषु श्रीभूदुर्गासु सुप्तासु जगद्व्यापारान्विहाय हरौ रममाणासु सतीषु एकः प्रधानो जगदात्मनि जगदादानकर्तरि जगत्संहर्तरि न विशेषोऽधिको यस्मात्सोऽविशेषः तस्मिन्नीश्वर ईशानादिशक्तिमति "स भगवः कस्मिन् प्रतिष्ठित" इति श्रुतेः स्वरूपाधरे स्थितः निमीलितात्मा "तुच्छयेनाभ्यपि हितं यदासीदि" ति श्रुतेर्गुणतोऽल्पतया तमआदिरूपया प्रकृत्या निगूहित आसीत्स पुरातनः पुरुषो विष्णुरयं कृष्णः किल परमार्थः सत्यं नैवानयोः कश्चिद्विशेष इत्यन्वयः ॥ २१ ॥ ❀ ❀ स परमपुरुष एव भूयः पुनः सृष्टिदशायां स्वजीवमायां प्रकृतिं स्वभार्यां महालक्ष्मीमनुससार तस्यां वीर्यमधादित्यन्वयः। कथंभूतां निजवीर्यचोदितां स्वसामर्थ्येन प्रेरितां सिसृक्षतीं सृष्टीच्छावतीं कथंभूतः सः अप्रसिद्धगुणत्वादप्राकृतरूपत्वाच्च अनामरूपात्मरूपात्मनि स्वस्मिन्नाधारे रूपनामनी विधित्समानः रूपनामात्मकं प्रपंचं स्रष्टुमिच्छन् शास्त्रकृत्सकलनियमनकर्ता य एवंविधः स हरिरयं किलेत्यन्वयशेषः ॥ २२ ॥ ❀ ❀ अत्र कर्मभूमौ जितेंद्रियाः प्राणायामेन निर्जितमातरिश्वनः वशीकृतप्राणाः सूरयः भक्त्या उत्कलितेन विकसितेन उत्कण्ठितेन वा अमलेन रागादिमलरहितेनात्मना स्वरूपांतःकरणेन यत्पदं यस्य स्वरूपं पश्यंति स वा अयं कृष्णः किलेत्यन्वयः। एष कृष्णः सात्त्विकानामनुग्राहकः अस्माकं सत्त्वं स्वविषयकं ज्ञानं परिमार्ष्टुं नाशयितुं नार्हति, परिपूर्वो मार्ष्टिर्वर्जनार्थः, नन्वित्यनेन अपपरी वर्जन इति सूत्रं प्रमाणयति नन्विति पाठः सुगमः, कर्मणांऽतःकरणशुद्धिः किं न स्यादिति तत्राह नन्विति। एष कर्मणा सत्त्वमंतःकरणं परितः सर्वतः मार्ष्टुं शोधयितुं नार्हति, किंतु भक्त्या श्रवणाद्युपायसंस्कृतया यावदंतःकरणं शुध्यति तावन्न कर्मणेति भावः ॥ २३ ॥ ❀ ❀ यो वेदवादिभिरनंतवेदेषु गुह्येषु उपनिषत्सु च अनुगीतसत्कथः निरंतरोदितसच्चरितः यश्चैक एव ईशः यश्चात्मलीलया जगत्सृजति सृष्टमवति तत्तद्योग्यकर्मफलभुक्तये अत्ति संहरति यश्च जगति न सज्जते आप्तकामत्वात्फलं नादित्सति हे सखि! स वा अयं कृष्ण इत्येकान्वयः। गुह्यवादिभिरिति पाठे उपनिषद्विचारकुशलैरित्यर्थः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र प्रथमं शान्तिरतिमत्यः सविस्मयं परस्परमाहुः। यः पुरातनः पुरुषः अविशेषो निष्प्रपञ्चः, यद्वा न विद्यते विशेषो वैशिष्ट्यमुत्कर्षो यस्मात् तथाभूत एक एवासीत् व्यासादिमुखादस्माभिः श्रुतोऽभूदित्यर्थः, स वै निश्चितम् अयमेवेति तर्जनीभिर्दर्शयामासुः। कदा गुणेभ्योऽग्रे गुणक्षोभात् पूर्वं तथा निशि प्रलये महाप्रलये च आत्मनि प्रकृत्यन्तर्यामिणि ईश्वरेऽधिकरणे जगदात्मनि सर्वजगज्जीवे निमीलितात्मनि लीनस्वरूपे सति, जात्या एकवचनम्। सर्वजीवेष्वीश्वरे लीनेषु सत्स्वित्यर्थः। ननु प्राकृतिकप्रलये जीवानामविद्यालयाभावात् लयोऽप्रसिद्धस्तत्राह। सुप्तासु शक्तिषु सतीषु जीवोपाधीनामध्यात्मादीनां लय एव जीवलयोपचारः। यद्वा स एव पुरातनः पुरुषोऽयं यो गुणेभ्योऽग्रे निशि प्रलये च आत्मनि स्वस्वरूपे अविशेष एवासीत् यथा अधुना सपरिकरत्वेन विविधाद्भुतलीलस्तथैव तदापीत्यर्थः। एकः अयमेव न त्वन्यो ब्रह्मादिरपीत्यर्थः। अन्यत् समानम् ॥ २१ ॥ ❀ ❀ एवं सृष्टेः पूर्वं प्रलयानन्तरं चाप्रच्युतरूपगुणलीलत्वेनैवावस्थानमुक्त्वा तन्मध्येऽपि तथैव नित्यावस्थितं वक्तुं सृष्ट्यारम्भे स्वांशांतरेण लीलान्तरमप्याहुः स एवेति। शास्त्रकृत् श्वासनिष्क्रमप्रथमक्षण एव वेदादिशास्त्राविर्भावकारी महाविष्णुः सन् प्रकृतिम् अनुससार। ननु प्रकृत्यनुगतत्वं नाम प्रकृत्यधीनत्वं तच्च दोष एव। मैवम्। निजवीर्येण निजबलेन प्रेरितां स्ववशीकृत्य कस्मिंश्चन कृत्ये नियुक्तां स्वशक्तिरूपाणां जीवानां मायां मोहिनीं वशयित्रीम्। किमर्थमनुससार अनामरूपे आत्मनि जीवे रूपनामनी देवतिर्यङ्मनुष्यादिलक्षणे विधित्समानः विधातुमिच्छन् स्थूलसूक्ष्मोपाधिसृष्ट्या जीवानां तदध्यासेनेत्यर्थः। कर्मज्ञानयोगभक्तिसाधनसिद्ध्यर्थं तु प्रकृत्यनुगमनात् पूर्वमेव वेदशास्त्राणि कृतवानेवेति शास्त्रकृत् ॥२२ ॥ ❀ ❀ ननु सृष्ट्यारम्भे पुरुषादयोऽवतारा लक्ष्यन्ते न त्वेष ईदृशप्रकारः, किन्तु वैवस्वतमन्वन्तरीयाष्टाविंशचतुर्युगस्थद्वापरे संप्रत्येवैष उपलभ्यते। सत्यम्। असौ भक्तिगम्यो नित्यस्वरूपो नित्यलीलोऽस्मिन् द्वापर एवावतीर्णोऽप्यस्य भक्तिमद्भिः सदैवायमुपलभ्यते इत्याह स वा इति। निर्जितो मातरिश्वा प्राणो यैः। ह्रस्वत्वमार्षम्। यद्वा निर्जितात् मातरिश्वनः प्राणाद्धेतोर्निर्जितेन्द्रियाः सर्व्वेन्द्रियाणां प्राणाधीनवृत्तित्वात् प्राणजयादेव निर्जितेन्द्रिया इत्यर्थः। तथाभूता अपि भक्त्या उत्कण्ठितोऽमलो य आत्मा बुद्धिस्तेनैव यस्य पदं स्वरूपं चरणारविन्दं वा पश्यन्ति "दृश्यते त्वग्र्यया बुद्ध्ये"ति श्रुतेः। बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याहुः। नन्विति। ननु निश्चितम् एष एव सत्त्वं बुद्धिं परमार्ष्टुं सम्यक् शोधयितुम् अर्हति न तु योगादयस्तेन सूरित्वं जितेन्द्रियत्वं जितप्राणत्वं च तेषां भक्त्यैव न तु प्राणायामादिभिरिति भावः। अत्र सूरयो भक्त्युत्कण्ठत्वे सत्येव पश्यन्तीति वर्त्तमाननिर्देशेन सार्व्वकालिकदृष्टिगोचरत्वात् तस्य सार्व्वदिकलीलत्वम्। अतः–"परार्द्धान्ते सोऽबुध्यते गोपवेशो मे पुरुषः

पुरस्तादाविर्बभूवे''ति गोपालतापनीश्रुतौ ब्रह्मवाक्यम्। तथा ब्रह्मसंहितायां सृष्ट्यारम्भेऽपि गोपवेशः कृष्ण एव दृष्टः स्तुतश्च ॥ २३ ॥ ❀ ❀ किञ्चास्य लीलाकथातिरहस्या रहस्यलोकैरेव वेद्येत्याह स वा इति। अयमर्ज्जुनस्य सखा नराकृतिः वेदेषु गुह्येषु शास्त्रेषु च गुह्यवादिभिरतिरहस्यनिरूपकैरस्यैव कैरपि लोकैरनुगीताः सत्यः कथा यस्य सः। यः खलु एक एव ईशः ईश्वरः सन् न तु साक्षादेतद्रूप इत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संजल्पं दर्शयति स इति दशभिः। परमाद्भुतालौकिकशांतिकान्तिगुणमंदिरं भगवन्तं दृष्ट्वान्योऽन्यं जल्पन्ति। निशि प्रलये जगदात्मनि चिदचिच्छक्तिमति जगत्कारणे ईश्वरे कूर्मोंगानीव सर्वं संहर्त्तुं समर्थे सुप्तासु शक्तिषु अचेतनरूपासु सतीषु निमीलितात्मन्निति लुप्तसप्रन्दंतं पदं निमीलितेषु आत्मसु जीवेषु सत्सु अत एव गुणेभ्योऽग्रे सत्त्वादिक्षोभात्पूर्वत्र अविशेषे आत्मनि विशेषो लीलाविभूतिरूपश्चिदात्मकः संसारस्तस्य लीनत्वात् कारणमात्रे स्वात्मनि सति य एकः अनन्यः वै निश्चये किल प्रसिद्धौ सः पुरातनः पुरुषोऽयं श्रीकृष्ण इत्यन्वयः। अनामरूपात्मनि नामवाचकं वेदादिपदं रूपं वाच्यं देवादिशरीरं न विद्यते नामरूपे यस्य तस्मिन्नात्मनि जीवे रूपनामनी विधित्समानः विधातुमिच्छन् शास्त्रकृत् ब्रह्मादिद्वारा वेदप्रवर्त्तकः स्वजीवमायां स्वांशभूतानां तिरोधायिकां निजवीर्येण 'एकोऽहं बहु स्यामि'त्यादिना स्वाध्यवसायेन प्रथमपुरुषावतारद्वारा चोदितां प्रेरिताम् अत एव सिसृक्षतीं महदादिरूपाणि स्रष्टुमिच्छतीं प्रकृतिं निजशक्तिं भूयः सृष्टिप्रवाहस्यानादित्वात्पुनरप्यनुससाराधिष्ठितवान्यः सोऽयं श्रीकृष्णः ॥ २१-२२ ॥ ❀ ❀ "आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतिसिद्धस्य यस्य पदं स्वरूपं भक्त्योत्कलितेनोत्कण्ठितेनामलेनात्मनांतःकरणेन "मनसैवानुद्रष्टव्यः, दृश्यते त्वग्र्यया बुद्ध्ये"त्यादिश्रुतिप्रोक्तेन जितान्यंतर्बाह्यानींद्रियाणि यैस्तैर्निर्जितो मातरिश्वा प्राणो यैस्ते ह्रस्वत्वं छांदसं, पश्यन्ति सोऽयं श्रीकृष्णः। ननु अहो एष सत्त्वमंतःकरणं परिमार्ष्टुं परितः शोधयितुमर्हति ॥२३॥ ❀ ❀ गुह्येषु च वेदार्थबोधकेषु शास्त्रेषु अनुगीता सती शुद्धा कथा यस्य हे सखि! सोऽयं श्रीकृष्णः ॥२४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

तं संजल्पमाह दशभिः स वै किलायमिति। "यस्मिन् विदिते सर्वमिदं विदितं भवती''ति श्रुत्या मूलं भगवान् ज्ञातव्यः। तत्र को भगवानित्यपेक्षायां यत्सान्निध्यमात्रेणैव उपासनोपदेशविचारव्यतिरेकेण अस्माकं सर्वज्ञता स भगवान् अतः अयमेव भगवान्, किंच न केवलमस्मदुत्पत्तिः अपि तु सर्वलोकवेदप्रसिद्धिः वै निश्चयेन तत्र स्वानुभवेन युक्तिरुक्ता। ननु तथापि वेदादिप्रमाणेन "आत्मैवेदमग्र आसीत् पुरुषविधः पूर्वमेवाहमिहासमिति, तत्पुरुषस्य पुरुषत्वं पुरुषो ह वै नारायणोऽकामयत" इत्यादिश्रुतिभिः पुरुषात् सृष्टिरुक्ता "जन्माद्यस्य यतः" इति न्याये च यो जगत्कर्त्ता स आत्मा स भगवान् तद्ब्रह्मेति न चात्र पुरुषशब्द आकृतिवाची येनेदानींतनैरतिव्याप्तिर्भवति, किन्तु पुरातनत्वेन यत्किंचिन्मनसा वचसा निरूप्यं तस्मात् सर्वस्मादपि पुरातनत्वेन तथा च व्याससमाधौ "अपश्यत् पुरुषं पूर्णमिति। तस्माद्यः सदातनः पुरुषः स भगवान्नान्यो भवितुमर्हतीत्याशंक्याह अयं पुरुषः पुरातन इति यो भवतीभिरुक्तः सोऽयमेव "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इत्ययमेवाह। नन्वस्य वैकुंठवासिनो मायाद्यनेकसचिवस्य कथंचिदुपपत्त्या पुरुषत्वं भवतु नाम, न तु भगवत्त्वमित्याशंक्याह य एक आसीदिति। य इति प्रसिद्धौ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि''ति यः श्रुत्या सजातीयविजातीयस्वगतभेदराहित्येन निरूपितः सोप्ययमेव एक आसीत्। ननु कथमेतत् घटते अधिकरणकालस्थितिक्रियादिसापेक्षत्वात् अत आह—अविशेष आत्मनीति न ह्ययं क्वचिदन्यत्र स्थितः किं। त्वात्मन्येव। ननु तथाप्याधारत्वादिधर्मपुरःसर आत्मनि स्थितो वक्तव्यः, ततश्च पूर्वोक्तदोष इति तत्राह अविशेषे सर्वाधारादिधर्मविशेषरहिते। अनेन कालादीनामपि सत्त्वं तदानीं निवारितम्। नन्वग्रे तदानीमित्यादिशब्दाः कालवाचका एव। सत्यं, तदानीं प्रमाणाभावात् वक्त्राद्यभावाच्च केवलं रूपं निरूपयितुं न शक्यते, पश्चात् कालादिनिरूपणपुरःसरं तज्जातमिति तदानींतनव्यापारमाश्रित्य तदानीमित्युक्तं, न तु कालसत्त्वं प्रतिपाद्यते। उभयप्रतिपादने वाक्यभेदप्रसंगात् ततः पूर्वं प्रमाणांतरेणासिद्धत्वान्नानुवादः, एकमेवाद्वितीयमिति विरोधश्च। कथं वा स्वयं स्वगतादिभेदं निराकुर्वन् कालमनुवदेत्? तस्मादिदानीं बोधसमयानुसारेण वाग्व्यवहारात् लोकप्रतीत्यर्थं सर्वाधारतया प्रतीयमानकालोपरंजनतया निरूपणं तदानीमिति, आसनक्रियापि स्वरूपमेव। तस्मात् सुष्ठूक्तमविशेषे आत्मनि एक एवासीदिति। एवं श्रौतप्रकारेण निरूप्य पुराणादिप्रकारेण निरूपयति अग्रे गुणेभ्य इति। गुणेभ्यः सत्त्वरजस्तमोरूपेभ्यः अग्रे प्रथमं तदा गुणरूपेण स्वयं नाविर्भूत इत्यर्थः। अथवा "पूर्ववद्वा ॥ ३।२।२९ ॥" इति सिद्धान्तानुसारेण भगवान् स्वधर्मरूपः प्रथमं भवति पश्चात् शक्तिरूपः कार्यरूपश्च तदाह अग्रे गुणेभ्य इति—स्वधर्मनिर्माणात् पूर्वमित्यर्थः। स च सतः सत्ताया अनंगीकारात् जगतः पूर्वं सत्त्वमंगीकर्त्तव्यमत आह जगदात्मनीति। कालनिराकरणार्थमाह ईश्वर इति। जीवनिराकरणार्थमाह निमीलितात्मन्निति। नितरां मीलिता जीवरूपेण न प्रकटाः आत्मानो यस्मिन् लुप्तसप्रन्यंतं पदम्। स्वशक्तिव्यावृत्त्यर्थमाह सुप्तशक्तिषु सत्स्वित्यर्थः। अनादिरयं संसारप्रवाहः, न च महाप्रलय एक एव, ब्रह्माण्डभेदानां सृष्टिभेदानां श्रुत्यादिसिद्धत्वात्। अतो यस्यां चित्सृष्टौ वक्तव्यापि पूर्वावस्था वक्तव्या ततोऽपि पूर्वं सृष्टिरासीदिति ज्ञापयति

सुप्तासु शक्तिष्विति। पूर्वसृष्टिः शक्तिभिरुपसंहृता, ततः ब्राह्मणोंऽतिमदिवसस्य समाप्तौ रात्रिकाले चापगते ब्रह्माण्डभंगात् तत्त्वानामपि लयात् दिवसोद्गमाभावेन रात्र्यपगमाभावात् स कालो रात्रित्वेन व्यपदिष्टः। शक्तयश्च सुप्तप्रतिबुद्धन्यायेन भगवत्युद्गच्छन्ति सुप्तानां च भगवत्त्वमेव। अतः शक्तिशयनमारभ्य गुणोत्पत्तेः प्राक् भगवानेक एवासीदित्युक्तं भवति ॥ २१ ॥ ❀ ❀ एवं पूर्वावस्थां निरूप्य भक्तिसहितामिदानींतनसृष्ट्यवस्थां वक्तुमादितः प्रकारमाह स एव भूय इति। स एव पूर्वोक्त एव भूय इति पूर्वमप्येवं सृष्टिं कृतवान्, तत्र प्रथमं स्ववीर्यरूपं कालं सृष्टवान्, तेन कालेन चोदितां सुप्तां मुख्यां मायाशक्तिं कालः प्रेरितवान्, सा च माया द्विविधा स्वप्रतिकृत्या सम्बद्धं भगवन्तं जगद्रूपेण करोति स्वेच्छया प्रादुर्भूतान् जीवांश्च व्यामोहयति, तदेयं सृष्टिर्जीवार्था भवति। अतो मायाया इदानींतनाया जीवमायेति नाम, तया सृष्टिप्रकारमापादित इति प्रकृतिं सिसृक्षतीमित्युक्तं, तादृशीं मायां भगवाननुससार तद्व्यापारानन्तरं स्वयं तदनुकूलतया पितेव मिलितवानित्यर्थः। अस्यां सृष्टौ विशेषप्रयोजनमाह–अनामरूपात्मनि रूपनामनी विधित्समान इति। पूर्वसृष्टौ न भगवतोऽवतारः न नामानि न रूपाणि च, इदानीं सृष्टेर्भक्तिप्रधानत्वात् भगवतोऽवताररूपनामान्यपेक्षन्ते। अतः पूर्वमनामरूपात्मनि स्वस्मिन् इदानीं रूपनामनी विधित्समान इति अतो जीवार्थमेव स्वस्यापि रूपनामनी अकरोदित्यर्थः। किंच शास्त्रकृत् वेदकर्त्ता केवलनामरूपकरणे युगपदेव सर्वमुक्तिप्रसंगात् सृष्टिकालह्रासः प्रसज्येत। उत्पादिते तु वेदे स्वभावगुणभेदेन भिन्ने तेन व्यामोहितेषु कश्चिदेव मुच्यत इति क्रमेण सर्वमुक्तौ सृष्टिकालस्य न ह्रासो भवेदित्यर्थः ॥ २२ ॥ ❀ ❀ एवं पूर्वावस्थां सृष्टिं चोपपाद्य यदर्थमियं सृष्टिः तत्प्रयोजनपरम्परां क्रमेण निरूपयति स वा अयमिति। ननु केषांचिन्मते सगुणादपि सृष्टिः सम्भवति, ब्रह्मविदामुपास्यः स न भवति, तस्मात् ब्रह्मविदुपास्यत्वेनैव ब्रह्मत्वनिश्चयः, स च समाधिना उपास्यः, अन्तर आत्मा न तु बाह्य इत्याशंक्य स एवायमित्याह–स च वै निश्चयेन अयं बाह्याभ्यंतरदोषाभावः पूर्वमिव निरूपितः, बहुकालं समाधौ स्थित्वा तत्र भगवन्तमनुपलभ्य कुत्रायमात्मा भगवान् प्रकट इति विचार्य योगजधर्मेणावगत्य भगवान् सांप्रतं कृष्णरूपेणैव प्रकटो नान्यत्रेति निश्चित्य समाधिफलं भगवच्चरणारविंदम् अत्रैवागत्य पश्यन्ति, अतस्तद्वाक्यादवगम्यते अयमेव भगवानिति। ननु तेषां पूर्णसाधनाभावात् समाधौ न साक्षात्कार इति चेत्तत्राह–सूरयो जितेन्द्रिया निर्जितमातरिश्वन इति, ते ह्युपनिषदर्थं विचारपूर्वकं गुरुमुखात् सम्यगवगत्य सूरयो भूत्वा पश्चात् ब्रह्मचर्यादिना जितेन्द्रिया भूत्वा अपहतपाप्मानः यमादिक्रमेण निर्जितः मातरिश्वा यैस्तादृशाः। तस्मान्न तेषां साधनाभावः। ननु चक्षुर्ग्राह्यः कथं भगवान्? तत्राह भक्त्युत्कलितामलात्मनेति। न हि ते चक्षुषा भगवंतं पश्यंति किन्तु अन्तःकरणेन। यथा आत्मसाक्षात्कारे "परांचि खानि व्यतृणत् स्वयंभूः तस्मात् पराक्पश्यति नांतरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नि"ति श्रुतौ प्रत्याहारेणांतर्नीतेन चक्षुषा हृदयं प्रविष्टेन स्वात्मानं पश्यंति तथा बहिः स्थिते भगवति भक्त्या उत्कलितेनांतःकरणेन ऊर्ध्वं कल्पितेन बहिरागतेन चक्षुःप्रविष्टेन भगवंतं पश्यंतीत्यर्थः। ननु तथापि तत्त्वमस्यादिवाक्यैरनुपदिश्यमानः कथमात्मा भवेत्तत्राह नन्वेष सत्त्वमिति। नन्वतिकोमलसंबोधने, एष एव सः आत्मत्वेनोपदिष्ट इत्यर्थः। कुत एतत्तत्राह सत्त्वमिति स एव सत्त्वमित्यर्थः। नन्वेवं जीवात्मत्वेन भगवति उपदिष्टे किं प्रयोजनं तत्राह परिमार्ष्टुमर्हतीति। आत्मनि प्रकृतिसंबंधेन योऽयमनात्मवर्गः उल्लिखितः तं परितः सर्वतः सवासनं मार्ष्टुं दूरीकर्त्तुमर्हति, आत्मत्वेनोपदिष्टो भगवान् सवासनः प्रकृतिकार्यं नाशयतीत्यर्थः ॥ २३ ॥ ❀ ❀ एवं सर्वप्रकारेण साक्षाद्भगवानेवायमित्युक्ते प्रपंचकर्तृत्वेन भोक्तृत्वादिभावापत्तौ जीवतुल्यता स्यादित्याशंक्याह स वा अयमिति। कर्तृत्वसमानाधिकरणं भोक्तृत्वं क्वचिदेव यत्र स्वार्थः क्रियते, भगवांस्तु जीवार्थं करोतीति न भोक्तृत्वं तेन रूपेण दोषसंबंधेन दोषः। न हि दंतकेशादीनां शुभ्रत्वादिसंबंधे अंशिनो देहस्य काचित्क्षतिर्भवति, अंशेषु तु स गुण एव न दोषः तदर्थमेव तथा निष्पत्तेः, अंशानां न तु स्वतो जगन्निर्माणसामर्थ्यं पालकानामिव। ननु 'प्रयोजनमनुद्दिश्य मंदोपि न प्रवर्त्तत' इति। स्वप्रयोजनाभावे केवलपरार्थं कथं कुर्यात्तत्राह सख्यनुगीतसत्कथ इति। हे सखि! अनुपश्चात् करणानंतरं गीतरागपुरःसरमग्रेभिव्यक्ता सद्भिः कथा यस्य भगवतः प्रयोजनं तथाकृते संतः कीर्त्तयंतीति सखिभिर्वा सख्यपर्यंतं प्राप्तैः अनुगीता भगवन्निरूपणानंतरं रागपूर्वकमुक्ता सद्रूपा भगवद्रूपा कथा यस्य जीवानां मुक्तिदानाय तथा करोतीत्यर्थः। अस्मिन् पक्षे कृपया परदुःखदूरीकरणार्थं प्रवृत्तिरित्युक्तम्। नन्वत्र किं प्रमाणं न हि भगवान् स्वयमागत्य कथयति किंतु कविनिबद्धवक्तृत्वमेवेत्याशंक्याह वेदेषु गुह्यवादिभिरिति। गुह्येषु वेदेषु परमोपनिषत्सु "विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इति। 'अंभस्यपार' इत्यारभ्य सर्वान् तत्प्रकरणे स्थितान् भगवद्गुणाननूद्य 'य एवं विदुरमृतास्ते भवन्ती'त्यंतेन भगवत्स्वरूपगुणज्ञानानंतरं भगवत्स्वरूपं प्रतिपादितं तथा "भक्त्या मामभिजानाति, शृण्वंति गायंति सभाजयंते मम पौरुषाणि" इत्यादिवाक्यैश्चैनमेव कथयंतीति विशकलिततया निरूपितम्। ननु नानाप्रकरणेषु निरूपितो भगवान् प्रकरणभेदाद्भिन्नो भवेत् शब्दांतराभ्यासवत्प्रक्रियाया अपि भेदकत्वात्तत्राह य एक इति। सर्वप्रकरणेषूक्तो भगवानेक एव "सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ ३।३।१ ॥" इत्यत्र निरूपितं "सर्वत्र प्रसिद्धोपदेशात् ॥ १।२।१ ॥" इत्यत्र एकस्य सर्वत्रोपदेशे हेतुमाह ईश इति। ईशो हि सर्वैरनुवर्त्तिभिर्निरूप्यते, जगतो निर्माणे क्लेशाभावमाह–आत्मलीलयेति। अन्येषां दुष्करत्वेऽपि भगवतस्तु सा लीला, अत्ति संहरति आत्मनि स्थापयति वा यद्यपि गुणानुकथनद्वारा सज्जते तथापि तत्र न सज्जते ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स एवेत्यत्र। तत्रेति। सृष्टिकरणे। कालं सृष्टवानिति। तृतीयस्कन्धे कालनिरूपणे 'पुरुषस्तदुपादानमात्मानं लीलयाऽसृजदि'ति वाक्यादित्यर्थः। द्विविधेति वक्ष्यमाणकार्यकरणाद् द्विविधा। प्रतिकृत्येति पूरितपात्रसङ्ख्यायकतुल्यरूपया। स्वेच्छयेति अविद्याकामकर्मभिर्भ्रमणात् स्वकामेन। तदेति एवं कार्यद्वयकरणे। जीवार्थेति जीवपुरुषार्थसिद्ध्यर्थाः। केवलया तया सृष्टिकरणे मोक्षप्रतिबन्धादिति। इदानीन्तनाया इति जीवसृष्टिकालसम्बन्धिन्याः। जगद्रूपेण भवनार्थं भगवतस्तत्सम्बन्धप्रकारमाहुः तद्व्यापारेत्यादि। 'सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिते'ति वाक्यादित्यर्थः। वेदकरणप्रयोजनमाहुः केवलेत्यादि। तेन व्यामोहितेष्विति। 'यन्नामभिध्यायति धीरपार्थै' रिति वाक्यात्तथेत्यर्थः॥ २१॥ ❀ ❀ स वा अयं यत्पदमित्यत्र। ननु ब्रह्मविद्भिः समाधिनान्तरात्मोपास्यते इति बहिर्विद्यमानस्यास्य कथं तथात्वमित्याकाङ्क्षायामाहुः बाह्येत्यादि। पूर्वमिति। 'स वै किलाय'मिति श्लोके 'य एक आसी' दित्यनेनेत्यर्थः। तद्वाक्यादिति 'आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा। असितो देवलो व्यास' इति तेषां वाक्यात्। त्वमिति त्वम्पदवाच्यत्वेनोपदिष्ट इत्यर्थः॥ २२॥ ❀ ❀ स वा अयं सखीत्यत्र। जीवतुल्यता स्यादिति अहन्ताममताभ्यां संसारासक्तिः स्यादित्यर्थः। दोषसम्बन्ध इति सप्तमी। नेति भिन्नं पदम्। क्षतिरिति सौन्दर्यहानिः। एतेन 'अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदि'त्यादिश्रुत्युक्तोवयवावयविभावो जीवब्रह्मणोर्बोधितः। स इति श्वैत्यश्यामत्वादिसम्बन्धवद्भोक्तृत्वसम्बन्धः। गुणत्वे हेतुमाहुः तदर्थमित्यादि। जीवार्थमेव प्रपञ्चस्य भोग्यत्वेन निष्पन्नतया भोग्यत्वरूपतत्स्वभावाभिव्यञ्जकत्वादित्यर्थः। ननु कर्तृत्वभोक्तृत्वयोः साहचर्यस्य लोके दृष्टत्वात्तर्हि कर्तृत्वमप्यस्त्विति चेत्, तत्राहुः अंशानामित्यादि। तथा च व्याप्त्यभावे साहचर्यमात्रमप्रयोजकमिति न तत्सिद्धिरित्यर्थः। त्रिपदबहुव्रीहेः क्वाचित्कत्वाद्व्याख्यानान्तरमाहुः सखिभिर्वेत्यादि। अत्रेति अनुगीतत्वे। वक्तृत्वमिति कविनिबद्धायाः कथायाः सखीनां वक्तृत्वम्। विशकलिततयेति भिन्नतया। प्रक्रियाया इति प्रकरणस्य। सर्ववेदान्तप्रत्ययाधिकरणं साधनाध्यायतृतीयपादारम्भे। सर्वत्र प्रसिद्धोपदेशाधिकरणं प्रथमस्य द्वितीयपादारम्भे। तत्रेति सर्गादिषु॥ २३॥ ❀ ❀ यदा हीत्यत्र। सामान्यविशेषभेदेनेति लोकस्थितिलौकिकस्थितिभेदेन। तत्रेति स्थितिसर्गसंहारेषु। इत्यादीति वाक्यादिति शेषः। तत्र यदेति। उपमर्देन प्रादुर्भावे विशेषस्थितिकाले स्थिताविति। लौकिकस्थितौ। निवेद्येति स्वदौर्बल्यं निवेद्य। नैमित्तिकमुक्तम् यदापदेन कालविशेषबोधनाद्भगवदागमनं नैमित्तिकमुक्तमित्यर्थः। वर्तुलमिति लोष्टवन्निबिडं निमित्तमिति। अवतरणे निमित्तम्। यदा यदेत्यादि। तथा चास्मिन् वाक्येऽहमितिपदादस्यैव तत्कार्यम्, न सगुणस्य विष्णोरित्यर्थः॥ २४॥

श्रीगिरिधरकृता बालप्रबोधिनी

तासां सञ्जल्पमेव दर्शयति दशभिः, तत्र भगवतस्तेजस्सौन्दर्याद्यतिशयदर्शनेन विस्मिताभ्यः स्वसखीभ्यो नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येत्यन्याः कथयन्ति–स वा इति चतुर्भिः। वा इत्यवधारणे। किलेत्यनेन "आत्मैवेदमग्रआसीत्पुरुषविधः पुरुषो ह वै नारायणोऽकामयत" इत्यादिश्रुतिरत्र प्रमाणमिति द्योतयति। य एकः अद्वितीयः पुरातनः सर्वकारणकारणभूतः पुरुष आसीत्स एवायं श्रीकृष्ण इत्यन्वयः। ननु यत्रासीत्तस्याधारस्य विद्यमानत्वात् कथमद्वितीयत्वमित्यपेक्षायां तदा साधारोऽपि स्वयमेवेत्याहुः–आत्मनीति। तथापि सत्त्वादिगुणविशेषस्य सत्त्वात् सद्वितीयत्वं स्यादित्याशङ्क्याह–अविशेष इति, सत्त्वादिगुणविशेषरहित इत्यर्थः। एवं निर्विशेषत्वं कदा भवतीत्यपेक्षायामाहुः– अग्रे गुणेभ्य इति, गुणक्षोभात् सृष्ट्युत्पत्तेः पूर्वमित्यर्थः। निशि प्रलये च। प्रलय एव कथं भवतीत्यपेक्षायामाहुः–जगदात्मनीश्वरेति। निमीलितात्मन्निति लुप्तसप्तम्यन्तं पदम्। जगतामात्माऽन्तर्यामी तस्मिन्नीश्वरे निमीलितात्मनि प्रसुप्ते सति प्रलयो भवतीत्यर्थः। नन्वीश्वरस्य तमोवशवर्तित्वाभावात् कथं तमोवृत्तिरूपा सुषुप्तिः सम्भवतीत्याशङ्क्याहुः– सुप्तशक्तिष्विति, सत्त्वादिशक्तीनां लय एवेश्वरस्य शयनं न तमोवृत्तिनिद्रानुभव इत्यर्थः॥ २१॥ ❀ ❀ तदेवं सृष्टेरादौ प्रलयानन्तरं च निष्प्रपञ्चावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये सप्रपञ्चावस्थानमाहुः–स एवेति। स निर्विशेषे परमानन्दस्वरूपे स्थित एव निजवीर्येण स्वशक्तिरूपेण कालेन चोदितां प्रेरितां क्षुभितगुणाम् अत एव सिसृक्षतीं स्रष्टुमिच्छतीं विश्वसर्जनोन्मुखीं प्रकृतिमनुससार तदनुकूलतया अधिष्ठितवानित्यन्वयः। पुनरित्यनेन सृष्टिप्रवाहस्यानादित्वं दर्शयति। किमर्थं तामनुससारेत्यपेक्षायामाहुः–अनामरूपात्मनि नामरूपरहिते जीवे रूपनामनी विधित्समानो विधातुमिच्छन्, देहाद्युपाधिसृष्ट्या जीवानां भोगार्थमित्यर्थः। एवं नामरूपविधानेऽपि तेषां भोगसम्पत्तिः कथं स्यादित्यपेक्षायां मायया स्वरूपावरणपूर्वकदेहाद्यात्माभिमानेनेत्याशयेनाहुः–स्वजीवमायामिति, स्वांशभूतानां जीवानां मोहिनीमित्यर्थः। तथा भोगः सम्पद्यते इत्यपेक्षायां यतो मर्यादारूपं शास्त्रं कृतवान् तथा च देहाद्यभिमानेन यः तथा कर्माणि कुरुते स तथा तत्फलं सुखदुःखादिकं भुङ्क्ते इत्याशयेनाहुः–शास्त्रकृदिति॥ २२॥ ❀ ❀ अहो अस्मद्भाग्यं यतोऽतिदुर्लभमप्यस्य दर्शनमस्माभिर्लब्धमित्याशयेनाहुः–स वा इति। वा इत्यवधारणे। यस्य पदं स्वरूपं चरणं वा अत्र संसारे भक्त्या उत्कलित उत्कण्ठितः अत एव अमलः रागादिवासनारूपमलशून्यो य आत्मा बुद्धिस्तेन सूरयो विवेकिन एव पश्यन्ति स एव पुरुषोत्तमोऽयं श्रीकृष्ण इत्यन्वयः। नन्विन्द्रियैर्विषयान्

प्रत्याकर्षणात् कथं रागादिवासनामलशून्यत्वमित्याशङ्कयाहुः-जितेन्द्रिया इति। इन्द्रियजयोऽपि कथमित्यपेक्षायाम् इन्द्रियाणां प्राणाधीनप्रवृत्तित्वात् प्राणनिलयादिन्द्रियजय इत्याहुः-निर्जितेति, निर्जितात् मातरिश्वनः प्राणाद्धेतोरित्यर्थः। ननु मायामोहितानां प्राणेन्द्रियादिपराधीनानां विषयाविष्टचित्तानां प्रथमतः प्राणादिविनिर्जयपूर्वकं भगवद्भक्त्यादि कथं सङ्गच्छते येन तद्दर्शनं स्यादित्यपेक्षायां "यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुतेस्तस्यान्तर्यामिणः कृपात एवैतत्सम्पद्यते, न केवलस्य प्रयत्नमात्रेणेत्याह-नन्विति, ननु निश्चयेन एष एव सत्त्वमन्तःकरणं मार्ष्टुं शोधयितुमर्हतीत्यर्थः॥ २३॥ ❀ ❀ अस्य कथाश्रवणमप्यस्माकं दुर्लभं वेदगुह्यत्वाद्वेदे चास्माकम् अधिकाराभावादेतद्दर्शनं तु केवलमेतत्कृपयैव जातं नास्मत्साधनसम्पत्त्येत्याशयेनाहुः-स वा इति। सखित्वादेव युष्माकमेतद्रहस्यमपि कथ्यते इति सूचयन्त्यः सम्बोधयन्ति-हे सखि वेदेषु गुह्येषु वेदानुसारिरहस्यागमेषु च गुह्यवादिभी रहस्यनिरूपकैर्ऋष्यादिभिरनुगीताः सत्यः यथार्थाश्चतुर्विधपुरुषार्थहेतुभूताः कथा यस्य, यश्चेश्वर एक एव सन् आत्मनः स्वस्य मायया लीलया अनायासेन सङ्कल्पमात्रेण जगत् सृजति उत्पादयति अवति रक्षति अत्ति संहरति च परन्तु तत्र न सज्जते अहम्ममेत्यभिमानं न करोति स एवायं श्रीकृष्ण इत्यन्वयः॥ २४॥

हिन्दी अनुवाद

वे आपसमें कह रही थीं-'सखियों! ये वे ही सनातन परम पुरुष हैं, जो प्रलयके समय भी अपने अद्वितीय निर्विशेष स्वरूपमें स्थित रहते हैं। उस समय सृष्टिके मूल तीनों गुण भी नहीं रहते। जगदात्मा ईश्वरमें जीव भी लीन हो जाते हैं और महत्तत्त्वादि समस्त शक्तियाँ अपने कारण अव्यक्तमें सो जाती हैं॥ २१॥ ❀ ❀ उन्होंने ही फिर अपने नाम-रूपरहित स्वरूपमें नाम रूपके निर्माणकी इच्छा की तथा अपनी काल-शक्तिसे प्रेरित प्रकृतिका, जो कि उनके अंशभूत जीवोंको मोहित कर लेती है और सृष्टिकी रचनामें प्रवृत्त रहती है, अनुसरण किया और व्यवहारके लिए वेदादि शास्त्रोंकी रचना की॥ २२॥ ❀ ❀ इस जगत्‌में जिसके स्वरूपका साक्षात्कार जितेन्द्रिय योगी अपने प्राणोंको वशमें करके भक्तिसे प्रफुल्लित निर्मल हृदय में किया करते हैं, ये श्रीकृष्ण वही साक्षात् परब्रह्म हैं। वास्तवमें इन्हींकी भक्तिसे अन्तःकरणकी पूर्ण शुद्धि हो सकती है, योगादिके द्वारा नहीं॥ २३॥ ❀ ❀ सखी! वास्तवमें ये वही हैं, जिनकी सुन्दर लीलाओंका गायन वेदोंमें और दूसरे गोपनीय शास्त्रोंमें व्यासादि रहस्यवादी ऋषियोंने किया है-जो एक अद्वितीय ईश्वर हैं और अपनी लीलासे जगत्‌की सृष्टि, पालन तथा संहार करते हैं परन्तु उनमें आसक्त नहीं होते॥ २४॥

यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि स[1]त्त्वतः किल।
धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे॥ २५॥
अहो अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनम्।
यदेष पुंसामृषभः श्रियः पतिः स्व[2]जन्मना चङ्क्रमणेन चाञ्चति॥ २६॥
अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः।
पश्यन्ति नित्यं यद[3]नुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः॥ २७॥
नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः।
पिबन्ति याः सख्यध[4]रामृतं मुहुर्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः॥ २८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवंभूतस्य नानावतारे कारणमाहुः। यदा हीति। तमोऽव्याप्ता धीर्येषां ते नृपा यदा धर्मेण जीवंति केवलं प्राणान्पुष्णंति तत्र तदैष एव भवाय स्थित्यै सत्त्वतो विशुद्धसत्त्वेन रूपाणि दधद्भगादीनि धत्ते प्रकटयति। युगे युगे तत्तदवसरे। भगमैश्वर्यम्। सत्यं सत्यप्रतिज्ञत्वम्। ऋतं यथार्थोपदेशकत्वम्। दयां भक्तकृपाम्। यशोऽद्भुतकर्मत्वम्॥ २५॥ ❀ ❀ विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयंति अहो इति पंचभिः। यद्यस्मादेष पुरुषोत्तमः श्रियः पतिः स्वजन्मना यदोः कुलमंचति पूजयति सत्करोति अतः श्लाघ्यतमं तत्। चंक्रमणेन च मधोर्वनं मथुरां सत्करोत्यतस्तत्पुण्यतममिति। तमबर्थस्याप्यत्यंतातिशयेऽलमिति। तत्राप्याश्चर्ये अहो इत्युक्तम्॥ २६॥ ❀ ❀ द्वारकां श्लाघंते अहो बतात्याश्चर्यम्। किं तत्। कुशस्थली द्वारका। स्वर्ग उत्कृष्ट इति यद्यशस्तस्य तिरस्करी परिभवकर्त्री। भुवश्च पुण्ययशःकर्त्री भवति। यद्यतो यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेणेषितं प्रेषितम्। स्मितपूर्वकोऽवलोको यस्य तम्। यद्वानुग्रहार्थमिषितमिष्टम्। अनुग्रहोषितमिति पाठे स्वानुग्रहार्थमुषितं कृतनिवासम्।

---

१. प्रा० पा०—सात्वतः। २. प्रा० पा०—सुजन्मना। ३. प्रा० पा०—यदनुग्रहोषितं स्मिता०। ४. प्रा० पा०—सख्यमृताधरं।

एकपद्यपाठे त्वनुग्रहेणेषितं प्रेषितं यस्मिंस्तं तत्पूर्वकोऽवलोको यस्य तम् । स्वस्यात्मनः पतिं श्रीकृष्णं न तु पित्रादिवद्देहमात्रपतिं नित्यं पश्यंति स्म । नैतत्स्वर्गेस्तीत्यर्थः ॥ २७ ॥ ॐ ॐ हे सखि अस्य गृहीतपाणिभिः पत्नीभिरीश्वरोऽयमेव नूनं जन्मांतरेषु समर्चितः । यस्मिन्नधरामृत आशयश्चित्तं यासां ताः । संमोहं प्राप्ता इति मनोहरत्वमुक्तम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

साक्षादस्यावतारस्य कालदेशपात्रेषु जिज्ञास्येषु प्रथमं कालमाहुर्यदेति । नृपाः कंसादयः युगे युगे कल्पे कल्पे वैवस्वतीयाष्टाविंशचतुर्युगीये द्वापरे द्वापरे वा ॥ २५ ॥ ॐ ॐ पात्रदेशावाहुः-अहो इति । यदोः कुलं श्लाघ्यतमं मधोर्वनं मथुरामंडलं पुण्यतमम् । तत्र श्लाघ्यतममित्यनेनैव द्वयोरुत्कर्षे सिद्धे पुण्यतममिति पृथगुक्तिर्देशस्य पुण्यदेशत्वेनैवोत्कर्षस्य प्रसिद्धेः । तत्र तस्यैवार्थस्याप्यत्यंतातिशयेलमिति तत्राप्यतिशयाश्चर्ये अहो इति । यत्स्वजन्मना चंक्रमणेन गमनेन चकारादन्यैरपि विविधाद्भुतकर्मभिरञ्चति सत्करोति । अत्रानञ्चेत्यनुक्त्वांचतीति वर्तमाननिर्देशेन जन्मादिलीलानां नित्यत्वं बोधयामासुः । उपक्रमतः य एक आसीदिति भूतनिर्देशेन तृतीयपद्ये पश्यंति भक्त्येति वर्तमाननिर्देशेन तासां तथाभिप्रायस्यावगमात् । ननु कथं जन्मकर्मणोर्नित्यत्वम् । ते हि क्रिये । क्रियात्वञ्च प्रतिनिजांशमप्यारंभपरिसमाप्तिभ्यामेव सिद्ध्यति । आरंभसमाप्ती ते विना स्वरूपहान्यापत्तिः । नैष दोषः । श्रीभगवति सदैवाकारानंत्यात् प्रकाशानन्त्यात्, जन्मकर्मलक्षणलीलानन्त्यात् अनंतप्रपंचानंतवैकुंठगततत्तल्लीलास्थानतत्तल्लीलापरिकाराणां व्यक्तिप्रकाशयोरानंत्याच्च । यत एव सत्योरपि तत्तदाकारप्रकाशगतयोस्तदारंभपरिसमाप्त्योरेकत्रैव ते जन्मकर्मणोरंशा यावत्परिसमाप्यंते न परिसमाप्यंते वा तावदेवान्यत्राप्यारब्धा भवंतीत्येवं भगवति विच्छेदाभावान्नित्ये एव जन्मकर्मणी वर्तेते । क्वचित्किंचिद्विलक्षणत्वेनारभ्येते क्वचिदैकरूप्येणेति ज्ञेयम् । विशेषणभेदाद्विशेषणैक्याच्च एक एवाकारः प्रकाशभेदेन पृथक्क्रियास्पदं भवतीति "चित्रं बतैतदेकेन वपुषा" इत्यादौ प्रतिपादयिष्यते । ततः क्रियाभेदात्तत्क्रियावत्सु प्रकाशभेदेष्वभिमानभेदश्च गम्यते । तथा सत्येकत्रैकत्र लीलाक्रमजनितरसोद्बोधश्च जायते । ननु कथं ते एव जन्मकर्मणी वर्तेते इत्युक्तं पृथगारब्धत्वादन्ये एव ते आस्ताम् । उच्यते । कालभेदेनोदितानामपि समानक्रियाणामेकत्वं यथा शंकरशारीरके "द्विर्गोशब्दोयमुच्चरितो न तु द्वौ गोशब्दाविति प्रतीतिनिर्णीतं शब्दैकत्वं तथैव द्विः पाकः कृतोनेन न तु द्वौ पाकौ" इति । ततो जन्मकर्मणोरपि नित्यता युक्तैव । अत एवागमादावपि भूतपूर्वलीलोपासनविधानं युक्तम् । तथा चोक्तं माध्वभाष्ये 'परमात्मसंबंधित्वेन नित्यत्वात् । त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यत' इति । अनुमतं चैतत् श्रुत्या "यद्भूतं भवच्च भविष्यच्च" इत्यनयैव । उपसंहार्यत्वमप्युपासनायामुपादेयत्वमित्यर्थः । तत्र तस्य जन्मनः प्राकृतादस्माद्विलक्षणत्वं प्रकृतजन्मानुकरणेनाविर्भावमात्रत्वम् । क्वचित्तदनुकरणेनेति भगवत्संदर्भः । क्वचित्तु "तद्भक्तधामादीनामिवानंतप्रपञ्चनित्यधामसु जन्मकर्मणोरपि प्रकाशबाहुल्यान्नित्यत्वसिद्धेः" इत्याहुः ॥ २६ ॥ ॐ ॐ मधुवनं स्तुत्वा द्वारकां स्मरन्त्य आहुः । स्वानुग्रहेण कर्तृभूतेन संभवादर्थांतरमाह-यद्वेति । इष्टमभिमतम् । इत्यर्थ इति । स्वर्गे यद्यप्युपेन्द्रोस्त्येव तथापि श्रीकृष्णमूर्तेस्तत्रादर्शनादित्थमुक्तमिति भावः ॥ २७ ॥ ॐ ॐ तत्तोज्ज्वलरसौत्सुक्यवत्य आहुः । वयं त्वकृततादृशव्रताः संप्रत्येव सौंदर्यामृतमेव किञ्चिदेव पिबाम इति भावः । किञ्चास्मत्तः कोटिगुणतोऽप्यधिका अपि व्रजसुंदरीभ्यः सकाशादतिन्यूना इत्याहुः । संमुमुहुः रात्रौ पीततरस्याप्यधरामृतस्य प्रातःस्मरणेप्यानंदमूर्च्छां प्रापुः । न जाने पानकाले ताः कीदृशीं दशां प्रापुरिति तासां प्रेमाधिक्यादानंदाधिक्यं द्योतितम् ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

नन्वेवंविधश्चेत्किमर्थं यादवान्यतमरूपेणावतिष्ठत इत्याशंकायां दुष्कृद्विनाशाय साधुपरित्राणाय च प्रतियुगमवतीर्यावतीर्याधुनैवं रूपेणावतीर्ण इत्यभिप्रायेण जल्पंति यदेति । यदा तमोधियो नृपाः-तमोजुष इति च पाठः-तत्र तामसा अत एवाधर्मेण जीवंति तदैष उक्तविधो भगवान् भवाय दुष्कृद्विनाशपूर्वकं साधूनामभ्युदयाय सत्त्वतः शुद्धसत्त्वमयानि रूपाणि युगे युगे दधद्बिभ्राणः भगमैश्वर्यं सत्यं वाचिकम् ऋतं पुण्यं कर्म दयां यशश्च धत्ते स्वाभाविकैर्धर्मैरनपेत एवावतिष्ठत एवेत्यर्थः । ऋतशब्दः पुण्यशब्दवाची "एवं पुण्यस्य कर्मणो दूराद् गंधो वाती"त्यत्र 'एवमनृतादात्मानं जुगुप्सेदि'ति पुण्यप्रतियोगित्वेनानृतशब्दप्रयोगात् भगवत्कर्मणां पुण्यं तन्नाम वदतां श्रोतॄणां च पुण्यावहत्वम् ॥ २५ ॥ ॐ ॐ यतो भगवानुक्तविधः श्रीमन्नारायण एव श्रीकृष्णरूपेण यदुकुलेऽवतीर्य मधुवने विहृत्य द्वारकायामधिवसन्प्रजाः पालयन्नष्टभिर्महिषीभिरन्याभिश्च विहरत्यतो यदुकुलमधुवनद्वारकामहिष्यादीनां भाग्यं तपश्चैतावदिति वाचा मनसा वाऽवगंतुमशक्यमित्यभिप्रायेण जल्पंति अहो इत्यादिभिः षड्भिः । मधोर्वनमलं नितरां पुण्यतमं कुतः यद्यस्मात्पुंसां सात्वतामृषभो नायकः श्रियो लक्ष्म्याः पतिः एष भगवान् श्रीकृष्णः स्वजन्मना यदुकुलं चंक्रमणेन पुनः पुनः संचारेण मधुवनं चांचति प्रशस्तं करोतीत्यर्थः ॥ २६ ॥ ॐ ॐ अहो बतेति । कुशस्थली द्वारका स्वर्यशसः कर्मणि षष्ठी, स्वर्लोकयशसस्तिरस्करी, भुवो भूमेः पुण्यं यशश्च करोत्यावहतीति तथा, तदेव

व्यंजयितुं विशिंषंति यत्प्रजाः यद्यस्यां कुशस्थल्यां प्रजा यद्यस्मादनुग्रहेणोषितमधिवसंतं स्मितयुक्तोऽवलोको यस्य तं स्वपतिमात्मनायकं नित्यं पश्यंति स्म यदनुग्रहार्थं यत्प्रजाविषयकानुग्रहार्थमुषितमिति वान्वयः ॥ २७ ॥ ❀ ❀ नूनमिति । अस्य कर्त्तरि षष्ठी, अनेन कृष्णेन गृहीताः पाणयो यासां ताभिः कर्त्रीभिर्व्रतैरुपवासादिभिः स्नानैः पुण्यजलस्नानहोमैरादिशब्देन दानादिभिश्च व्रतादीनां समाहारद्वंद्वेनैकत्वम् एभिः साधनैर्नूनमीश्वरः समर्चितः पूर्व्वजन्मनीति शेषः । कुत एतदनुमीयते इत्यतो विशिंषंति या अस्य गृहीतपाणयः स्त्रियः हे सखि ! अधरामृतं मुहुर्मुहुः पिबंति । अनाराधितेश्वराणामेतद्दुर्लभमिति भावः । कस्याधरामृतं यस्मिन्नाशयो मनो यासां ता व्रजस्त्रियः संमुमुहुः तस्य श्रीकृष्णस्याधरामृतमित्यन्वयः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तमोऽधिकारस्तामसा असुरप्रकृतयो नृपा अधर्मेण धर्मविरुद्धेन श्रुतिस्मृत्यविहितप्राणिहिंसादिकर्मणा यदा जीवंति स्वशरीरयात्रां कुर्वंति तत्र तदैष हरिः सात्वतः सात्विकान् देवादीन् अनुगृह्णन् धर्मादिनामवंति रूपाणि युगे युगे दधत् दधानो वर्त्तत इति शेषः । वराहमत्स्यादिरूपस्य भूम्युद्धरणकर्मणा धर्माख्या, कपिलादेरणिमाद्यष्टैश्वर्ययोगात्षड्गुणपूर्णत्वाद्भगाख्या, कल्क्यादेस्तमोविनाश्यसत्त्वगुणमभिसंबध्यानंतगुणाभिव्यंजकतया विशेषानंदरूपत्वात्सत्याख्या, व्यासादेर्ज्ञानप्रवर्तकत्वेन ज्ञानविशिष्टत्वादृताख्या, किमर्थं भवाय चरणप्रणतजनाभिवृद्धये । तस्मादिदानीमधर्मप्रवर्त्तकान् जरासुतादीन्निगृह्णन् देवावतारान् युधिष्ठिरादीननुगृह्णन् कृष्णात्मनाऽवतीर्णः किलेत्यर्थः ॥ २५ ॥ ❀ ❀ प्रियश्रवाः मनोहरकीर्त्तिः पुंसामृषभः पुरुषोत्तम एष कृष्णः यदोः श्लाघ्यं स्तुत्यं मधुवनं चालमत्यर्थमतिशयेन पुण्यमहो अहो आश्चर्यादप्याश्चर्यं चशब्दः समुच्चये ॥ २६ ॥ ❀ ❀ अनुग्रहत इति तादर्थ्ये सप्तमी । भक्तानुग्रहार्थेक्षितमुषितं मुखे स्थितं यत्स्मितं तेन युक्तोऽवलोको यस्य स तथोक्तः तं, क्षि-निवासगत्योरिति धातुः, भक्तेष्वनुग्रहेण यदीक्षितं गोपवधूरुद्दिश्य स्मितयुक्तावलोकश्च यस्य स तथोक्तः तं वा स्वपतिं स्वस्वामिनं श्रीकृष्णं यत्प्रजाः यत्रत्याः प्रजा नित्यं पश्यंतीति यद्यस्मात्तस्मात्कुशस्थली द्वारवती स्वर्यशसस्तिरस्करी स्वर्गकीर्तिनिरासिनी भुवः यशस्करी चेत्यन्वयः । तदैक्षतेतीक्षणव्यपदेशादीक्षितमिच्छा भक्तानुग्रहेच्छया सहितौ स्मितावलोकौ यस्य स तथा तमिति वा ॥ २७ ॥ ❀ ❀ अस्य श्रीकृष्णस्य पाणिना गृहीताः पाणयो यासां ताः तथा ताभिरस्य भार्याभिर्नूनं निश्चयेन व्रतस्नानादिनेश्वरः पूर्वं सम्यगर्चितः सत्कृतः । याः व्रजस्त्रियः यदाशया यस्याधरामृतमाधुर्यस्यास्वादनेच्छया सम्यक् मुमुहुः हे सखि ! तदधरामृतं मुहुः पिबंतीति यत्तस्मादित्येकान्वयः । हे सखि ! याः स्त्रियोऽस्याधरामृतं पिबंति अनेन गृहीतपाणिभिस्ताभिर्नूनं व्रतादिनेश्वरः समर्चितः यदाशया व्रजस्त्रियो मुमुहुरिति वान्वयः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अहो इति । पुंसामृषभः सर्वावतारावतारिणां मध्ये श्रेष्ठः ॥ २६ ॥ ❀ ❀ स्वपतिं पश्यन्ति । तत्र च स्मितावलोकं पश्यन्तीत्यर्थः ॥ २७ ॥ ❀ ❀ नूनमिति । अत्र पट्टमहिषीणां भाग्यश्लाघयापि श्रीव्रजदेवीनामेव हि परमोत्कृष्टत्वमास्वादाभिज्ञतरत्वमायातम् । यस्यामृतस्य माधुर्यस्मरणे देवा अपि मुह्यन्ति तन्मनुष्येणाप्यनेनास्वाद्यत इतिवत् । तस्मात्तासामेव सर्वोत्तमभावता । अत्र विशेषजिज्ञासायां प्रीतिसन्दर्भो द्रष्टव्यः । 'स वै किलायमित्यादौ, पिबन्ति या सख्यधरामृतमि'त्यन्ते ज्ञानविवेकादिप्रकाशेन हि शान्तरस एवोपक्रान्तः, उपसंहृतश्च शृङ्गारः । तेन चास्य वत्सलेनेव मिलने संकोच एवेति परस्परमयोग्यसंगत्या भासते । अत्र समाधीयते चान्यैः स वै किलायमित्यादिकमन्यासां वाक्यं नूनमित्यादिकन्त्वन्यासाम् । एवंविधा वदन्तीनामित्यादि सूतवाक्यं च सर्वानंदनपरमेवेति ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

साक्षादस्यावतारस्य कालदेशपात्रेषु जिज्ञास्येषु प्रथमं कालमाहुर्यदेति, नृपाः कंसादयः । सत्त्वतः सत्त्वेनोत्तमत्त्वेन विशिष्टं भगादिकं धत्ते इत्यन्वयः । भगं षडैश्वर्यम् ऋतं सूनृतवाक्यम् । रूपाणि व्रजमथुराद्वारकोचितानि सौन्दर्याणि । भवाय भूत्यै । युगे युगे कल्पे कल्पे वैवस्वताष्टाविंशचतुर्युगीये द्वापरे द्वापरे वा ॥ २५ ॥ ❀ ❀ पात्रदेशावाहुः अहो इति । यदोः कुलं श्लाघ्यतमं मधोर्वनं मथुरामण्डलं पुण्यतमम् । अत्र श्लाघ्यतममित्यनेनैव द्वयोरुत्कर्षे सिद्धे पुण्यतममिति पृथगुक्तिः देशस्य पुण्यदत्वेनैवोत्कर्षस्य प्रसिद्धेः । तत्र तमप्प्रत्ययार्थस्याप्यत्यन्तातिशये अलमिति तत्राप्यतिशयाश्चर्ये अहो इति । यत् स्वजन्मना चंक्रमणेन गमनेन चकारादन्यैरपि विविधाद्भुतकर्मभिरंचति पूजयति सत्करोतीति यावत् । अत्रानंचेत्यनुक्त्वा अञ्चतीति वर्त्तमानिर्देशेन जन्मादिलीलानां नित्यत्वं बोधयामासुः । उपक्रमत एव य एक आसीदिति भूतनिर्देशेन तृतीयश्लोके पश्यन्ति भक्त्येति वर्त्तमाननिर्देशेन तासां तथाभिप्रायस्यावगतत्वात् । ननु कथं जन्मकर्मणोर्नित्यत्वं ते हि क्रिये, क्रियात्वञ्च प्रतिनिजांशमप्यारम्भपरिसमाप्तिभ्यामेव सिद्ध्यतीति ते विना स्वरूपहान्यापत्तिः । नैष दोषः । श्रीभगवति सदैवाकारानन्त्यात् प्रकाशानंत्याज्जन्मकर्मलक्षणलीलानन्त्यात् अनन्तप्रपञ्चानंतवैकुण्ठगततत्तल्लीलापरिकराणां व्यक्तिप्रकाशयोरानन्त्याच्च । यत एव सत्योरपि तत्तदाकारप्रकाशगतयो-

स्तदारम्भसमाप्त्योरेकत्रैकत्र ते जन्मकर्मणोरंशा यावत् समाप्यन्ते न समाप्यन्ते वा तावदेवान्यत्राप्यारब्धा भवन्तीत्येवं श्रीभगवति विच्छेदाभावान्नित्ये एव तत्र ते जन्मकर्मणी वर्त्तेते। तत्र ते क्वचित् किञ्चिद्विलक्षणत्वेनारभ्येते क्वचिदैकरूप्येण चेति ज्ञेयं विशेषण-भेदाद्विशेषणैक्याच्च। एक एवाकारः प्रकाशभेदेन पृथक्क्रियास्पदं भवतीति 'चित्रं बतैतदेकेन वपुषे'त्यादौ प्रतिपादयिष्यते। ततः क्रियाभेदात् तत्तत्क्रियात्मकेषु प्रकाशभेदेष्वभिमानभेदश्च गम्यते। तथा सत्येकत्रैकत्र लीलाक्रमजनितरसोद्बोधश्च जायते। ननु कथं ते एव जन्मकर्मणी वर्त्तेते इत्युक्तम्, पृथगारब्धत्वादन्ये एव ते स्ताम्। उच्यते-कालभेदेनोदितानामपि समानरूपाणां क्रियाणामेकत्वम्। यथा शंकरशारीरके-'द्विर्गोशब्दोऽयमुच्चरितो नतु द्वौ गोशब्दाविति प्रतीतिनिर्णीतं शब्दैकत्वम्। तथैव द्विः पाकः कृतोऽनेन नतु द्वौ पाकावि'ति। ततो जन्मकर्मणोरपि नित्यता युक्तैव। अत एवागमादावपि भूतपूर्वलीलोपासनविधानं युक्तम्। तथा चोक्तं माध्वभाष्ये-परमात्मसंबंधित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यते इति। अनुमतं चैतत् श्रुत्या "यद्भूतं भवच्च भविष्यच्चे" त्यनयैव। उपसंहार्यत्वमुपासनायामुपादेयत्वमित्यर्थः। तत्र तस्य जन्मनः प्राकृतात्तस्माद्विलक्षणत्वं प्राकृतजन्मानुकरणेनाविर्भावमात्रत्वं क्वचित्तदनुकरणेन वेति भगवत्सन्दर्भः। केचित्तु तदुक्तधामादीनामिवानन्तप्रपंचनित्यधामसु जन्मककर्मणोरपि प्रकाशबाहुल्यान्नित्यत्वसिद्धिरित्याहुः॥ २६॥ ❀ ❀ मधुवनं स्तुत्वा द्वारकां स्मरन्त्य आहुः। अहो कुशस्थली द्वारका स्वर्यशस इति लोकरीत्यैवोक्तिः नतु सिद्धान्तरीत्या स्वःशब्देन वैकुंठाभिधानं वा। यद्यतः यत्प्रजा यत्रत्याः प्रजाः। स्वपतिं कृष्णम् अनुग्रहेणैव ईषितं प्रेषितं सर्वसुखदानार्थं अन्तःपुरात् हस्तिनापुरादिस्थलाद्वा प्रस्थापितमित्यर्थः। यद्वा अनुग्रह एव इषित इष्टो यत्र तम् अनुग्रहमात्रप्राप्त्यर्थमित्यर्थः। अनुग्रहोषितमिति पाठे स्वानुग्रहार्थमुषितं कृतनिवासं नैतत् स्वर्गेऽस्तीत्यर्थः॥२७॥ तत्रोज्ज्वलरसौत्सुक्यवत्य आहुः। नूनमस्य गृहीतपाणिभिः पत्नीभिः। या अधरामृतं मुहुर्मुहुः पिबन्ति वयं त्वकृततादृशव्रताः सम्प्रत्येव सौन्दर्यामृतमेव किञ्चिदेव पिबाम इति भावः। किंचास्मत्तः कोटिगुणतोऽप्यधिका अपि व्रजसुन्दरीभ्यः सकाशादतिन्यूना इत्याहुः। यदाशयाः यस्मिन्नधरामृते आशयश्चित्तं यासां तथाभूता एव सत्यः संमुमुहुः। रात्रौ पीतचरस्याधरामृतस्य प्रातःस्मरणेऽपि आनन्दमूर्च्छां प्रापुः। न जाने पानकाले ताः कीदृशीं दशां प्रापुरिति तासां प्रेमाधिक्यादानंदाधिक्यं द्योतितम्॥ २८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदा किल केवलधर्मेण नृपा असुरमनुष्यादिरूपाः जीवंत्येव तदा एष एव श्रीकृष्णः भवाय स्थित्यै सत्त्वतो विशुद्धसत्त्वतः नियंतृरूपाण्यवताराख्यानि तत्तद्देशकालानुरूपाणि युगे युगे दधद्बिभ्राणो भगमैश्वर्यम् सत्यं यथार्थभाषणम् ऋतं सूनृतं प्रियं वाक्यं दयां यशश्चाधत्ते॥ २५॥ ❀ ❀ यः पुरुषावतारेण प्रकृतिप्रेरणादिना जगद्धेतुः नारायणरूपेण ब्रह्मोत्पादनवेदोपदेशादिना ब्रह्मांडांतर्गतसृष्टिहेतुः मत्स्याद्यवतारैः धर्मत्राणादिहेतुः स परमपुरुषपदवाच्यः सर्वावताराणां निर्गमप्रवेशस्थानभूतस्य नारायणस्याप्यवतारी स्वयं पदार्थो भगवान् यदुकुले मथुरायामवतीर्णः, तत्सम्बन्धिकुलादिमाहात्म्यमाहुः अहो अलमिति। जन्मना यदोः कुलं चंक्रमणेन मधोर्वनं मथुरामण्डलम् अंचति पूजयति॥ २६॥ ❀ ❀ किंच अहो बतेति महदाश्चर्यम् कुशस्थली द्वारका ॥ २७॥ ❀ ❀ किं च हे सखि! अस्य गृहीतपाणिभिरीश्वरः व्रतादिभिर्नूनं सम्यगाराधितः, व्रतादीनां समाहारद्वंद्वे एकत्वम्, आदिना दानादेर्ग्रहणम्, याः अस्याधरामृतं मुहुः पिबन्ति यदाशयाः तस्मिन्नधरामृते आशयश्चित्तं यासां ता व्रजस्त्रियः संमुमुहुः॥ २८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं सर्वप्रकारेण भगवत्त्वे निरूपिते तादृशस्यात्रागमने को हेतुरित्यत्राह यदेति। स्थितिर्हि भगवत्कार्यासामान्यविशेषभेदेन द्विविधा, तत्र सत्त्वादयो गुणा अपि कृताः, ते च "रजस्तमश्चाभिभूय सत्त्वं भवती"त्यादि अन्योन्योपमर्देनैव प्रादुर्भूताः। तत्र यदा सत्त्वं तिरस्कृत्य रजस्तमसी प्रादुर्भवतः तदा स्थितावधिकृतं सत्त्वं स्वतो दुर्बलं सद् भगवंतं निवेद्य समानयति। रजस्तमसोः सकार्ययोरुपमर्द्दनार्थं तदा सत्त्वेन रूपाणि धत्ते सत्त्वस्य शरीरसमवायित्वं वा शरीरशोधकत्वं वा शरीरत्वं वा प्रादुर्भावनिमित्तत्वं वा भवति, तदा सत्त्वस्यावयवा अपि पृथक् रूपाणि बिभ्रति। सर्वयुगेष्वेवं व्यवस्था, अतस्सत्त्वसहायार्थं भगवदागमनमित्यर्थः। यदेति नैमित्तिकमुक्तम्। निमित्ते संजाते नैमित्तिकस्यावश्यकत्वमिति हिशब्दार्थः धर्मस्य प्रतिच्छायारूपोऽधर्मः सघृतकज्जलवत् प्रत्यहमुपनीयमानः सर्वासां प्रजानां राजनि वर्त्तुलं भवति, ततश्चाधर्मेण बुद्ध्या विवेकेन भ्राम्यमाणचक्षुषा परिदृश्यमानघटादिवत् पापव्याप्तदृष्ट्या वस्तूनां याथात्म्यं न प्रकाशते, तदा ह्यंधा इव पदार्थान् गृह्णंति केवलं जीवनार्थम्। राजानो हि पालने भगवदंशास्तेषामंधत्वेन जीवनं निमित्तं नूनं पांतीति पालितानामपि अधर्मनिष्ठता सूचिता। एवं सर्वतोऽप्यधर्म उत्थितः। तत्र तन्निराकरणार्थमेष एव परमात्मा सगुणस्य तत्र सामर्थ्याभावात् किलेति "यदा यदा हि धर्मस्ये"ति वाक्यानि प्रमाणानि रूपाणि दधद्वा सत्त्वेन भगानि धत्ते तदा उत्पन्नो भगः ईश्वरो भावः अधर्मेण गृहीतो विपरीतफलः स्यात्, यदा वा भगं गृहीत्वा रूपाणि न गृह्णीयात् तदा राज्ञां वधो न स्यात्। मूलभूतत्वाच्च तेषाम् अधर्मनिराकरणार्थे भगादीनां ग्रहणं राजनिराकरणार्थं च रूपाणाम्। भगस्तु भगवदैश्वरो भावः ईश्वरधर्मः प्रमेयबलपोषकः ऋतमनुष्ठीयमानो धर्मः

पूर्वकांडार्थः । एते हि पंचांशा विद्यायाः भगवदिच्छा धर्मो ज्ञानं दया भक्तिरिति पूर्वोक्तानामुद्भवाय ॥ २५ ॥ ❀ ❀ एवं भगवदवतारप्रयोजनमुक्त्वा प्रासंगिकानां फलमाह–अहो इत्यादिपंचभिः । अवतीर्णो हि कचिद्देशे भवति, कचिद्देशे तिष्ठति, कैश्चित्सह व्यवहरति, तथापि न तेषु तात्पर्यं तेषां तु भगवत्संबंधमात्रेणैव कृतार्थता । तत्र प्रथमं जन्माधिकरणयोर्वंशदेशयोराह अहो इत्याश्चर्ये, कुत्र यदुः शप्तः लोकैर्निन्दितः कुत्रायमुत्कर्षः भगवत्यवतीर्णे तद्वंशीयं स्मृत्वा लोको नमस्यति । अलं पूर्णमेतस्मादुत्कर्षादन्योत्कर्षो न वक्तव्यः, अधिकशौर्यादिहेतुकः । श्लाघ्यतममिति । अन्येषां हि वंशानां धर्माद्यर्थं कदाचिन्निरूपणमायाति, भगवतस्तु सर्वेषामपेक्षितत्वात् तन्निरूपणार्थं यदुवंशः सर्वदा स्तुतो भवतीति एवं मधोरपि वनं सतां निवासाभावात् न मथुरा निर्दिष्टा मधोर्दैत्यस्य वनं पश्चात् पुत्रादिभ्यो विभागः । अतो वृंदावनादिकमपि मधुवनमेव, तस्य देशस्य पुण्यतमत्वेऽपि दैत्याक्रांतत्वादधर्मत्वं वनत्वाद्भयानकत्वं दैत्यभयाक्रांते भगवत्स्मरणमपि दूरे कुतो भगवान्, कुलमिति न ह्येतस्मादन्य उत्कर्षः संभवति । देवऋष्यधिष्ठाने हि देशस्य पुण्यतमत्वं भवति, तत्र सर्वत्र देवऋषीणां भर्त्तरि भगवति किं वक्तव्यं तत्र वंशस्य सर्वोत्कर्षे हेतुः यद्यस्मात् कारणात् पुंसामृषभः स्वजन्मना अंचति पूजयति गच्छति वा । अन्ये हि स्त्रीणां भर्त्तारः पुरुषोत्तमस्तु पुंसां तथा च जगति सर्वे स्त्रीसहिताः पुरुषाः एतस्य भवन्ति । अतस्तस्य पूजने सर्वैः पूजितं भवति तद्गमने वा सर्वैर्गतं भवति मधुवनस्योत्कर्षहेतुः यस्मादेष श्रियः पतिः चंक्रमणेनांचति चकाराजन्मना च । वनं हि सुन्दरसुवर्णाद्यभावात् न श्लाघिष्ठं भवति, भगवति तु समागते लक्ष्म्यपि समागतेति लौकिकीमलौकिकीं च शोभां प्राप्नोतीत्यर्थः । चंक्रमणं बालगतिः, श्रीपतित्वेन गोपिकाक्रीडाऽपि सूचिता ॥ २६ ॥ ❀ ❀ इदं त्वत्याश्चर्यं यत् कुशस्थल्या उत्कर्षः तदाह अहो बतेति । अहो इति पूर्ववत् अधिकोऽत्र विशेषो बतेति देशप्रान्तभूमिः दोषाक्रान्ता सिकतामयी च सा स्वर्येशसस्तिरस्करी जाता तिरस्करणशीला । स्वर्गे हि देवास्तिष्ठन्ति द्वारकायां तु देवाधिदेवः, स्वर्गे त्वप्सरसः अत्र लक्ष्मीः, तत्रत्याः पतन्ति अत्रत्या मुच्यन्ते, सभापारिजातादयस्तु तत एव आनीताः । अपकृष्टादुत्कृष्टे हि समानीयंते इत्याद्यनंतोत्कर्षः, किंच भुवोऽपि पुण्ययशस्तिरस्करी यथा देहे चक्षुः एकदेशोऽपि सर्वस्यैहिकामुष्मिकं फलं प्रयच्छति द्वारकया सम्बद्धा सर्वापि भूः धन्या पृथिवी यस्यां द्वारका वर्त्तत इति तिष्ठतु दूरेऽयमुत्कर्षः, समाधिहृदयापेक्षया इयमुत्कृष्टा तदाह पश्यन्तीति । समाधौ कश्चिदेव कदाचिदात्मानं पश्यति । अतः सर्वदा सर्वोऽपि समाधौ स्थितिरतिकठिना वायुमनसोश्चंचलत्वात् प्रयासाधिक्यात् द्वारकायां तु भगवदनुग्रहेण स्थितिः अनुग्रहश्च सुखात्मा स्थिरः तद्दर्शनार्थमेव भगवांस्तत्र स्थितः । स्मितावलोक इति भक्तिज्ञानप्रदत्वं सर्वेंद्रियाह्लादकत्वं च स्वपतित्वेन निःशंकता दोषाभावश्च प्रजापतिना च पाल्यता पतिपदेन च तदेकगतित्वम् ॥ २७ ॥ ❀ ❀ एवमचेतनानामुत्कर्षमुक्त्वा चेतनानां मध्ये भगवत्पत्नीनामप्युत्कर्षमाह त्रिभिः नूनमिति । स्त्रियो हि द्विविधाः मर्यादया पुष्ट्या च तदीया जाताः । तासामुभयासां यत् सर्वपुरुषार्थनाशकमसाधनं च तदेव सर्वपुरुषार्थसाधकं जातम्, एवं स्वरूपभेदद्वयं साधने चैकमिति अस्य गृहीतपाणिभिः नूनं हरिरर्चितः गार्हस्थ्यफलं धर्मसाध्यं भगवत्फलं साध्यं तदुभयमेकीभूतं तत्र प्राधान्यं गार्हस्थ्यस्य गोपिकावांछितार्थभोगात्। अतो धर्महेतून् प्राधान्येन निर्दिशति व्रतं तामसं स्नानं राजसं होमः सात्त्विकः, आदिशब्देन त्रयाणां भेदाः, एभिः कृत्वा पूर्वजन्मनि अयमेव भगवानीश्वरः सम्यगर्चितः । अहो इति युक्तोऽयमर्थः । फलेन कारणानुमानं युक्तं, कारणेन कार्यानुमानं व्यभिचरत्यपि, यद्यप्येतैर्भगवान् प्रीणाति, तथापि महापुरुषपूजायाः सिद्धिः कार्य्यानुषंगिकी पूजैवोक्ता ।अथवा व्रतादौ पूजा विहिता तत्र व्रतमंगत्वेन कृत्वा पूजामेव मुख्यत्वेन कृतवत्यः । तत्र पूजाव्रतयोर्धर्मभक्तित्वात् भगवतः पतित्वेन सम्बन्धः । ननु कथमेवं गम्यते अयमेव ईश्वरः पूजित इति तत्राह याः हे सख्यः ! अधरामृतं पिबन्ति । अमृतपानं हि ईश्वराराधनपूर्वकधर्मकार्यम् अधरामृतं तु ततोऽपि तदग्रे वर्णयिष्यामः । हे सखीति स्पृहया तुल्यदुःखत्वमस्माकमपीति बोधितम्, अधरामृतमग्रे वर्णयिष्यामः । ननु धर्मभक्तिफलमेवैतदस्तु किमेतदाराधनेनेतीत्याशंक्य प्रकारांतरे व्यभिचारमाह व्रजस्त्रिय इति । गोप्योऽपि कात्यायनीव्रते भक्त्या गानपूर्वकं व्रतस्नानपूजादिकं कृतवत्यः, परमर्चनं कात्यायन्याः कृतं तेन तासामिच्छा न पूर्णा । यतः यस्मिन्नधरामृते आशयो यासां ताः केवलमोहमेव प्राप्तवत्यः ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अहो अलमित्यत्र । सतामिति । भगवदीयानां यादवानाम् । तस्य पूजन इति तत्कृते पूजने । सर्वैरिति देवैर्ऋषिभिश्च ॥ २५ ॥ ❀ ❀ अहो बतेत्यत्र । स्थितिरिति भगवत्स्थितिः । तत्रत्यानां वा ॥ २६ ॥ नूनमित्यत्र । एवमिति । मर्यादापुष्टिभेदेन स्त्रीणां स्वरूपे भेदद्वयम् । एकमिति गृहीतपाणित्वम् । भगवत्फलमिति भगवत्सम्बन्धिफलम् । 'सुपां सुलु' गिति लुप्तविभक्तिकं सखिपदमित्याशयेनाहुः हे सख्य इति ॥ २७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवम्भूत ईश्वरश्चेदयं तर्हि तस्यावतारे किं प्रयोजनमित्यपेक्षायामाहुः–यदा हीति । तमोव्याप्ता धीर्येषां ते नृपा यदा त्वधर्मेण जीवन्ति केवलं स्वप्राणान् पुष्णन्ति तत्र तदा एष हि उक्तविधो भगवान् एव भवाय असाधुविनाशपूर्वकसाधूनामुद्भवाय सत्त्वतो विशुद्धेन सत्त्वगुणेन नानाविधानि तत्तत्कार्यानुरूपाणि रूपाणि दधत् युगे युगे प्रतियुगं तत्तदवसरे स्वभगादीनि धत्ते

भगादिगुणपूर्ण आविर्भवतीत्यन्वयः । भगमैश्वर्यम्, सत्यं सत्यप्रतिज्ञत्वम्, ऋतं यथार्थोपदेशकत्वम्, दयां भक्तकृपाम्, यशोऽद्भुतकर्मत्वम् । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे' इत्यादिशास्त्रं स्मरन्त्य आहुः—किलेति ॥ २५ ॥ ❀ ❀ एवं सामान्यतो भगवदवतारप्रयोजनमुक्त्वा विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयन्ति—अहो इति पञ्चभिः । यत् यस्मादेष पुंसामृषभः यस्तु पुरुषोत्तमः श्रियः प्रियः पतिः स्वजन्मना यदोः कुलमञ्चति पूजयति सत्करोति, अतः श्लाघ्यतमं तत् । चङ्क्रमणेन बालक्रीडार्थपरिभ्रमणेन—चकाराज्जन्मना च-मधोर्वनं मथुरामण्डलं सत्करोति अतस्तत् पुण्यतमम् । तमबर्थस्याप्यत्यन्तातिशयसूचनार्थमाहुः—अलमिति, पूर्णं आभ्यां देशकुलयोरुत्कर्षो नास्तीत्यर्थः । तत्रापि यदुकुलस्य ययातिशप्तत्वान्मथुरायाश्च मधुदैत्यनिवासत्वात् कथं तत्र भगवतः कृपेत्याश्चर्यसूचनायोभयत्राहो इत्युक्तम् ॥ २६ ॥ ❀ ❀ एवं भगवतः क्रीडास्थानानां वृन्दावनादीनां मथुरामण्डलवर्तित्वान्मथुरामण्डलस्तुत्या क्रीडास्थानानि स्तुत्वा निवासस्थानं द्वारकां स्तुवन्ति—अहो बतेति । अहो बत अत्याश्चर्यमेतत् यत् कुशस्थली द्वारका स्वर्गं उत्कृष्ट इति यत्स्वर्गस्य यशस्तस्य तिरस्करी परिभवकर्त्री भुवश्च पुण्ययशस्करी धन्येयं भूमिर्यत्रेदृशी द्वारका वर्त्तते इति सत्कीर्तिकर्त्री भवति । कुत एवमित्यपेक्षायां स्वर्गे हि देवा निवसन्ति तच्च महता प्रयासेन प्राप्यते । तत्र गत्वाऽपि भोगेन पुण्यक्षये निपतन्ति द्वारकायां तु सर्वदेवाधिदेवः साक्षाद्भगवानेव निवसति, तद्दर्शनात् अनायासेनैव परमानन्दनिमग्नास्तत्रत्याः सर्वे कृतार्था एवेत्यत्युत्कृष्टत्वादित्याह—पश्यन्तीति । यत् यस्मात् यत्प्रजाः यत्रत्याः सर्वाः प्रजाः स्वनुग्रहेण इषितं प्रेषितं यद्वा अनुग्रहार्थमिषितमिष्टं यस्मिंस्तं तत्पूर्वकोऽवलोको यस्य तम् - अनुग्रहोषितमिति पाठे तु स्वानुग्रहार्थमुषितं कृतनिवासं-स्वपतिं श्रीकृष्णं पश्यन्ति स्मेत्यन्वयः ॥ २७ ॥ ❀ ❀ भगवत्पत्नीनां सौभाग्यं तु किं वर्णयाम इत्याहुः—नूनमिति । नूनं निश्चितमेतत् । अस्येति कर्त्तरि षष्ठी । अनेन श्रीकृष्णेन गृहीताः पाणयो यासां ताभिः-कर्त्रीभिः स्त्रीभिर्व्रतादिनाऽयमेवेश्वरः समर्चितः जन्मान्तरेष्वाराधितः । कुत एतदनुमीयते इत्यपेक्षायां तदधरामृतपानादित्याशयेन ता विशिंषन्ति—पिबन्तीति । अयं हेतुस्तु युष्माकमप्यव्यभिचारित्वेन सम्मत इत्याशयेन सम्बोधयन्ति—हे सखीति । याः स्त्रियोऽस्याधरामृतं मुहुर्मुहुः पिबन्ति । अनाराधितेश्वराणामेतद्दुर्लभमेवेति सूचनार्थो हिशब्दः । कथमेतस्य दुर्लभत्वमित्यपेक्षायां यतः परमप्रेमवत्योऽपि व्रजस्त्रियः यस्मिन्नधरामृते आशयो मनो यासां तथाभूताः सत्यो व्रजाद्भगवत आगमनानन्तरं केवलं सम्मुमुहुरेव न तत्प्रापुरित्यन्वयः । व्रतानि कृच्छ्रचान्द्रायणादीनि । स्नानं तीर्थस्नानम् । हुतं होमः, आदिपदेन जपदानादीनि । व्रतादीनां समाहारद्वन्द्वेनैकत्वं, तेन साधनजातेनेत्यर्थः ॥ २८ ॥

हिन्दी अनुवाद

जब तामसी बुद्धिवाले राजा अधर्मसे अपना पेट पालने लगते हैं तब ये ही सत्त्वगुणको स्वीकार कर ऐश्वर्य, सत्य, ऋत, दया और यश प्रकट करते और संसारके कल्याणके लिये युग-युगमें अनेकों अवतार धारण करते हैं ॥ २५ ॥ ❀ ❀ अहो ! यह यदुवंश परम प्रशंसनीय है; क्योंकि लक्ष्मीपति पुरुषोत्तम श्रीकृष्णने जन्म ग्रहण करके इस वंशको सम्मानित किया है । वह पवित्र मधुवन (व्रजमण्डल) भी अत्यन्त धन्य है, जिसे इन्होंने अपने शैशव एवं किशोरावस्थामें घूम-फिरकर सुशोभित किया है ॥ २६ ॥ ❀ ❀ बड़े हर्षकी बात है कि द्वारकाने स्वर्गके यशका तिरस्कार करके पृथ्वीके पवित्र यशको बढ़ाया है । क्यों न हो, वहाँकी प्रजा अपने स्वामी भगवान् श्रीकृष्णको, जो बड़े प्रेमसे मन्द-मन्द मुसकराते हुए उन्हें कृपादृष्टिसे देखते हैं, निरन्तर निहारती रहती है ॥ २७ ॥ ❀ ❀ सखी ! जिनका इन्होंने पाणिग्रहण किया है, उन स्त्रियोंने अवश्य ही व्रत, स्नान, हवन आदिके द्वारा इन परमात्माकी आराधना की होगी; क्योंकि वे बार-बार इनकी उस अधर-सुधाका पान करती हैं, जिसके स्मरणमात्रसे ही व्रजबालाएँ आनन्दसे मूर्छित हो जाया करती थीं ॥ २८ ॥

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि[1] शुष्मिणः ।
प्रद्युम्नसा[2]म्बाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः ॥ २९ ॥
एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ।
यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥ ३० ॥
एवंविधा गदन्तीनां स गिरः पुरयोषिताम् । निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः ॥ ३१ ॥
अजातशत्रुः पृतनां गोपीथाय मधुद्विषः । परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३२ ॥

---

१. प्रा० पा०—विशुष्मिणः । २. प्रा० पा०—साम्बप्रसवादयोऽपराः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतत्प्रपंचयंति या इति द्वाभ्याम्। वीर्यं प्रभाव एव शुल्कं मूल्यं तेन शुष्मिणो बलिष्ठान्। प्रद्युम्नश्च सांबश्चांबश्च सुता यासां रुक्मिणीजांबवतीनाग्निजितीनां ता आदिर्यासां सत्यभामादीनां ताः। याश्चापराः। अस्य श्लोकस्योत्तरश्लोकेनान्वयः ॥ २९ ॥ ❀ ❀ एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते। किंभूतम्। अपास्तं गतं पेशलं भद्रं स्वातंत्र्यं यस्मात्तत्। निरस्तं शौचं शुचित्वं यस्मात्तथाभूतमपि जातु कदाचिदपि। नापैति न निर्गच्छति। आहृतिभिर्व्याहारैः। यद्वा पारिजातादिप्रिय-वस्त्वाहरणैः। हृदि स्पृशन्नानन्दयन् ॥ ३० ॥ ❀ ❀ एवंविधा विचित्रा गिरः सस्मितेन निरीक्षणेनाभिनंदन् स हरिर्ययौ ॥ ३१ ॥ ❀ ❀ मधुद्विषोपि गोपीथाय स्नेहात्परेभ्यः शत्रुभ्यः शंकितः सन् प्रायुंक्त। "हस्त्यश्वरथपादातं सेनांगं स्याच्चतुर्विधम्" इत्येवं चतुरंगिणीम्। पृतनां सेनाम् ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" इति मेदिनी "शुष्मी गोपतिमत्तयोः" इति च ॥ २९ ॥ ❀ ❀ स्त्रीत्वं स्त्रीजातिः सा च रुक्मिण्याद्यवरतज्जातिभेदत्वेनैवात्र गृहीता। अपास्तपेशलत्वादिकं हि तज्जात्यन्तराश्रयं न तु रुक्मिण्याद्याश्रयं ताभिस्तासामपि साधुत्वकरणात्। ततश्चान्यां तत्तद्दोषयुक्तां स्त्रीजातिमपि या निजकीर्त्यादिना शुद्धां कुर्वंतीत्यर्थः। तासां तत्तद्दोषरहितसर्वगुणालंकृतत्वे तदवराणां साधुत्वविधाने च हेतुमाह–यासामिति। स्वयं तथाविधोऽप्याहृतिभिः प्रेयसीजनोचित-गुणसमाहारैर्या एव हृदि स्पृशन्मनस्यासज्जयन्यासां गृहादपि न त्वपैतीति "पिता रक्षति कौमारे भर्ता रक्षति यौवने। सुता रक्षंति वार्द्धक्ये न स्वातंत्र्यं हि योषिताम्" इति चाणक्योक्तेः स्त्रीणां स्वातंत्र्याभावोस्तीति। "स्त्रियोऽमेध्यास्तु सर्वतः" इति वाक्यं तु स्त्रीणामल्पशौचपरमन्यथा तासां 'स्त्रीशूद्राणां तदर्द्धतः' इत्यादिस्मृतिविहितशौचोक्तिरनर्थिका स्यादिति ज्ञेयम् ॥ ३०–३१ ॥ ❀ ❀ अथ राज्ञः प्रेममहिमानमाह–मधुद्विषोपि गोपीथाय "गोपीथो रक्षणे प्रोक्तो गवां पेये च गोकुले" इति निरुक्तिः। तत्र हेतुः। स्नेहादिति। अनेन भगवदैश्वर्यज्ञानस्य दुर्ज्ञेयत्वमुक्तम् ॥ ३२ ॥

श्रीमद्वीरराघवव्याख्या

या इति। या इत्यस्यैता इत्युत्तरेणान्वयः। शुष्मिणो मत्तान् चैद्यप्रमुखान् शिशुपालप्रभृतीन्स्वयंवरे प्रमथ्य मथनपूर्वकं विजित्य वीर्यमेव शुल्कमुपायनत्वेन देयं तेन या आहृताः प्रद्युम्नसांबप्रसवादयः स्त्रियः, तत्र प्रद्युम्नप्रसवा रुक्मिणी सांबप्रसवा जांबवती आदिशब्देन सत्यभामादिसंग्रहः तथा परा अन्याश्च याः स्त्रियो भौमवधे नरकासुरवधे सहस्रशः षोडशसहस्रसंख्याका आहृताः ॥ २९ ॥ ❀ ❀ एताः सर्वा निरस्तं शौचं पवित्रता येन अवाप्तं पेशलं मार्दवं येन तथाभूतमपि स्त्रीत्वं परं केवलं साधु यथा कुर्वते कुर्वंति बत इत्याश्चर्ये। तदेव दर्शयितुं विशिंषंति–यासां स्त्रीणां गृहात्पतिर्जन्ममरणक्लेशाद्रक्षणकर्त्ता पुष्करलोचनः कमलनयनः श्रीकृष्णः कदाचिदपि नापैति न त्यजति। कथंभूतः सन् आहृतिभिः हे रुक्मिणि! एहीत्यादिभिराहृतैः हृदि स्पृशन् हृदयंगमः सन् सोऽयं श्रीकृष्णो यातीत्यर्थः ॥ ३० ॥ ❀ ❀ वदंतीनां जल्पंतीनां पुरयोषितामेवंविधा गिरः उक्तीः सस्मितेन निरीक्षणेनैवाभिनन्दन्स हरिर्ययौ ॥ ३१ ॥ ❀ ❀ तदाऽजातशत्रुः परेभ्यः शत्रुभ्यः शंकितः स्नेहान्मधुद्विषः श्रीकृष्णस्य गोपीथाय रक्षणाय चतुरंगिणीं हस्त्यश्वरथपदातिरूपाण्यंगान्यस्याः संतीति तथा तां सेनां प्रायुङ्क्त समयुङ्क्त ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ताः का इति तत्राहुः या इति। विशुष्मिणः विशिष्टबलान् चैद्यप्रमुखान् शिशुपालादीन् प्रमथ्य विलोड्य पराजित्य स्वयंवरे वीर्यमेव शुल्कं उत्कोचं तेन याः स्त्रियो हृताः आनीतास्ताः प्रद्युम्नश्च सांबश्च तौ प्रमुखौ येषां ते तथा प्रद्युम्नसांबप्रमुखाः ते आत्मजा यासां तास्तथोक्ताः रुक्मिण्याद्याः याश्चापराः सहस्रशः कशेर्वादिशतोत्तरषोडशसहस्रसंख्या भौमवधे आहृताः ॥ २९ ॥ ❀ ❀ एताः पुराग्निपुत्रत्वे कृष्णभार्यात्वाय स्त्रीत्वमवाप्तये आप्तुं समं संभूय साधु शोभनं तपआख्यं कुर्वते अकुर्वत बत हर्षे। निरस्तशोकमिति क्रियाविशेषणं वा (३० श्लोकस्य पूर्वालिभिन्नेत्युन्नीयते टीकया।) कुतः पुष्करलोचनः पुण्डरीकाक्षः पतिराकृति-भिराकारैश्रेष्टाविशेषैर्हृदि स्पृशन्यासां गृहाज्जातु कदाचिदपि नापैति यस्मात्तस्मादित्यन्वयः ॥ ३०–३१ ॥ ❀ ❀ परेभ्यः गोपी-थाय रक्षणाय चतुरंगिणीं हस्त्यश्वरथपदातिमतीं पृतनां सेनां स्नेहात् स्नेहमात्रात्तदानीं माहात्म्यज्ञानं नास्तीति भावः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

या इति युग्मकम्। तत्र एता इति एता एव नान्या इत्यर्थः। स्त्रीत्वं स्त्रीजातिः। सा च श्रीरुक्मिण्याद्यवरतज्जातिभेद-त्वेनैवात्र गृहीताः। अपास्तपेशलत्वादिकं हि तज्जात्यन्तराश्रयं नतु श्रीरुक्मिण्याद्याश्रयं ताभिस्तासामपि साधुत्वकरणात्। ततश्चान्यां तत्तद्दोषयुक्तां स्त्रीजातिमपि या निजकीर्त्यादिना शुद्धां कुर्वन्तीत्यर्थः। तासां तत्तद्दोषरहितसर्वगुणालंकृतत्वं तदवरासां साधुत्व-

विधाने च हेतुमाह यासामिति । स्वयं तथाविधोऽपि आहृतिभिः प्रेयसीजनोचितगुणसमाहारैर्या एव हृदि स्पृशन् मनस्यासज्जन् यासां गृहादपि न जात्वपैतीति । तस्मादत्रापि बीभत्ससङ्गतिः पूर्ववद्व्याख्येया ॥ २९-३१ ॥ ❀ ❀ तत्र राज्ञः प्रेममहिमानमाह । अजातशत्रुरपि परेभ्यः शङ्कितः । मधुद्विषोऽपि गोपीथाय । तत्र हेतुः स्नेहादिति । एवमैश्वर्यज्ञानस्य दुर्बलत्वं बोधितम् । एवं श्रीबलदेवादिषु तथा दर्शनात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उक्तमेवार्थं प्रपञ्चयति द्वाभ्याम् । वीर्यं प्रभाव एव शुल्कं मूल्यं तेन । शुष्मिणः बलिष्ठान् । प्रद्युम्नः साम्बः आम्बश्च सुता यासां ता रुक्मिणीजाम्बवतीनाग्नजित्यः ता एव आदयो यासां सत्यभामादीनां ताः ॥ २९ ॥ ❀ ❀ अपास्तं पेशलं भद्रं स्वातन्त्र्यं यस्मात् निरस्तं शौचं शुचित्वं यस्मात् तथाभूतमपि । जातु कदाचिदपि नापैति न निर्गच्छति । आहृतिभिः पारिजातादिप्रियवस्त्वाहरणैः हृदि स्पृशन् आनन्दयन् ॥ ३० ॥ ❀ ❀ निरीक्षणेन शान्तिरतिमतीः सस्मितेन उज्ज्वलरसभाववतीरभिनन्दन् ॥ ३१ ॥ ❀ ❀ गोपीथाय रक्षणाय ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गृहीतपाणिभिरिति पदेन भगवत्पत्न्यो निर्दिष्टास्ताः का इत्याकांक्षायामाहुः या इत्येकेन । वीर्यमेव शुल्कं मूल्यं धनं तेन शुष्मिणः प्रबलंमन्यान् ॥ २९ ॥ ❀ ❀ भगवत्पत्नीनां सौभाग्यं कैमुत्यन्यायेनाहुरेता इत्येकेन । अहो एताः अंगुलिनिर्दिष्टाः दर्शनार्थं समास्थिताः अपास्तं पेशलं भद्रं स्वातन्त्र्यं यस्मात्तत् निरस्तं शौचं पवित्रता यस्मात्तदपि स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते, अहो भाग्यमासामिति भावः । अथ खलु आहृतिभिस्तत्तत्प्रियपदार्थाहरणैर्हृदि स्पृशन् सुखयन् यासां गृहाज्जातु कदाचिदपि नापैति नापयाति तासां भाग्यं किं वर्ण्यते इत्यर्थः ॥ ३० ॥ ❀ ❀ स्मितेन स्वाभाविकमन्दहसितसहितेन निरीक्षणेन गदन्तीनां जल्पन्तीनां पुरयोषितां गिरोऽभिनन्दन् हरिः संसारहरः स श्रीकृष्णो ययौ । एवंविधा गिर इत्युक्तिः ग्रन्थविस्तरभयात्तासां स्तुतिः साकल्येनेह नोक्तेति सूचयति ॥ ३१ ॥ ❀ ❀ परेभ्यः शत्रुभ्यः शंकितोऽजातशत्रुर्युधिष्ठिरः मधुद्विषोऽपि गोपीथाय रक्षणाय स्नेहात् चतुरंगिणीं हस्त्यश्वरथपत्तिरूपाण्यंगानि यस्यास्तां पृतनां प्रायुंक्त ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अस्त्वासां भाग्यमितोऽपि रुक्मिण्यादीनां महद्भाग्यं यदि कालवशात् प्रवाहे पतिता अन्यत्र नीयमाना अपि बलाद्भगवान् स्वयमुद्धृत्य आत्मसात् कृत्वा अमृतं पाययति स्वसदृशान् पुत्रांश्च प्रयच्छति तासामीश्वरपूजनं महदित्याहुः-या वीर्यशुल्केनेति । वीर्यमेव शुल्कं कार्यनिर्वाहकं द्रव्यं तेन हृताः, तेन राक्षसो विवाह उक्तः, स्वयंवर इति गांधर्वः "गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ" इति मुख्यविवाहेन परिगृहीताः । नन्वन्यस्मै दीयमानाः कथं हृताः तत्राह प्रमथ्येति चैद्यः शिशुपालः तत्प्रमुखान् जरासंधादीन् शुष्मिणः कामुकान् । अयमर्थः-क्षत्रियाणां युद्धजयेनापि सत्त्वमुत्पद्यते, तेन धर्मादिकमपि सिध्यति, स्त्रियो धर्मभक्तियोग्याः । स्वयं च शिशुपालादयो दुरात्मानः कामुका ब्राह्मणवत् प्रतिग्रहेण प्राप्तुमिच्छन्ति । अतो युक्तं भगवता हृता इति । प्रद्युम्नः सांबः अंबश्च सुता यासां रुक्मिणीजांबवतीमित्रविंदानां महांस एव अंबः महानंसो यस्येति यौगिक एव शब्दोऽत्र गृहीतः । याश्च षोडशसहस्रं भौमवधे जाते आहृताः तासां गणना ऋषिभिरेव ज्ञायते नान्यैरिति सहस्रमित्युक्तम् ॥ २९ ॥ ❀ ❀ तासां भगवदाराधने साधनं स्त्रीत्वमेव, तदपि न भगवतो भोगभोग्यं भगवत्सौंदर्यापेक्षया तासामपेशलत्वात् शापेन वंध्या अन्यदपि ग्रहेण च निरस्तशौचं शुद्धिरहितं बतेति खेदे अस्मदादीनां तदभावेऽपि न भगवत्प्राप्तिः । अतो यथा भगवतः सामर्थ्यमतिनिकृष्टमपि अत्युत्कृष्टं कुर्वते । तत्र हेतुः यासां गृहादिति सन्तो हि भगवद्गृहे समागत्य कदाचिदेव पश्यन्ति, आसां तु विपरीतं भगवानासां गृहात् कदाचिदपि नापगच्छति, प्रत्युत पारिजाताद्याहरणैः मानापनोदनमपि करोति । ननु तर्हि दोषमेव सम्पादयति न गुणं ततः किं तासां भाग्यमित्याशंक्याह हृदि स्पृशन्निति तासां हृदि भगवान् स्थित्वा ताः स्पृशन् तासां हृदि भगवानस्तीति न तासां दोषः ॥ ३० ॥ ❀ ❀ एवं भगवद्रूपं प्रासंगिकं च फलं भगवान् श्रुत्वा समस्ता सत्यवादित्वं स्थिरीकृत्य मन्दहासेन च ता वशीकृत्य भक्तिप्रदत्वात्तासां वचनं सत्यं कुर्वन् द्वारकागमनमदित्याह-एवंविधा इति । अयमेकः प्रकारः, एवमन्येऽपि प्रकाराः सन्ति स्त्रीसमूहानां बहुत्वात् सर्वा एव गिरो भगवता श्रुताः, उच्चैः कथने हेतुः पुरयोषितामिति अभिनन्दनं सत्यमुक्तमिति ॥ ३१ ॥ राज्ञो हि ज्ञानाद्भक्तिरधिकेति ज्ञापयितुमाह अजातशत्रुरिति । नामविपरीतं कार्य्यं भगवदिच्छया ज्ञानवत्स्वभावोऽपि तथा गोपीथाय रक्षणार्थे मधुद्विष इति शंकाभावः परेभ्यः हतबन्धुभ्यश्चतुरंगिणीं हस्त्यश्वरथपदातिरूपाम् ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एवंविधा इत्यत्र । पुरयोषितामित्यनेन तासां धाष्टर्यबोधनमुच्चैः कथने हेतुर्बोध्यः । अभिनन्दने हेतुः सत्यकथनं बोध्यम् ॥ ३० ॥ ❀ ❀ अथेत्यत्र । उभयत्रेति । मिलने भिन्नतया गमने चेत्यर्थः ॥ ३२ ॥

इति प्रथमस्कन्धे सुबोधिनीप्रकाशे दशमाध्यायविवरणम् ॥ १० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अन्यत्र पुंस्त्वापेक्षयाऽपकृष्टमपि स्त्रीत्वम् , आसां तु तदपेक्षयाऽत्युत्कृष्टं जातं भगवदङ्गीकारसाधनत्वादित्याहुः—या इति द्वाभ्याम् । या इत्यस्यैता इत्युत्तरेणान्वयः । प्रद्युम्नश्च साम्बश्च आम्बश्च सुता यासां रुक्मिणीजाम्बवतीनाग्नजितीनां ता आदिर्यासां सत्यभामादीनां ता याः स्त्रियः वीर्यप्रभाव एव शुल्कं विवाहे उपायनतया देयं द्रव्यं तेन स्वयंवरे शुष्मिणो मत्तान् बलिष्ठान् चैद्यप्रमुखान् शिशुपालप्रभृतीन् राज्ञः प्रमथ्य विनिर्जित्य हृताः । तथा अपरा अन्याश्च याः स्त्रियो भौमस्य नरकासुरस्य वधे जाते सति सहस्रशः एकशताधिकषोडशसहस्रसङ्ख्याका आहृताः ॥ २९ ॥ ❀ ❀ ता एता एव परं केवलमपास्तं निर्गतं पेशलं भद्रं स्वातन्त्र्यं यस्मात्तत् निरस्तं शौचं शुचित्वं यस्मात्तथाभूतमपि स्त्रीत्वं साधु शोभनमत्युत्कृष्टं कुर्वते कुर्वन्तीत्यन्वयः । कुत इत्यपेक्षायां ता विशिंषन्ति—यासामिति । आहृतिभिः पारिजातादिप्रियवस्त्वाहरणैर्हृदि स्पृशन् आनन्दयन् पुष्करलोचनः कमलनयनः पतिः कृष्णो यासां गृहात् जातु कदाचिदपि नापैति न निर्गच्छति, सदैव तत्र निवसतीत्यर्थः ॥ ३० ॥ ❀ ❀ गदन्तीनां जल्पन्तीनां पुरयोषितां एवंविधाः गिरः उक्तीः सस्मितेन निरीक्षणेनाभिनन्दन् सत्यमुक्तमिति सूचयन् स हरिः स्वपुरं ययावित्यन्वयः ॥ ३१ ॥ ❀ ❀ तदा अजातशत्रुः युधिष्ठिरः परेभ्यो हतबन्धुभ्यः शङ्कितः सन् मधुद्विषः श्रीकृष्णस्य गोपीथाय संरक्षणाय चतुरङ्गिणीं 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम्' इत्युक्तहस्त्यादिचतुरङ्गयुक्तां पृतनां सेनां प्रायुङ्क्त प्रस्थापयामासेत्यन्वयः । ननु तस्याजातशत्रुत्वेन भगवतश्च मधुसूदनत्वेन कथं शत्रुशङ्का सम्भवेदिति नहि मधुदैत्यात् कश्चिच्छत्रुर्बलवान्येन ततः शङ्का स्यादित्याशङ्क्याह—स्नेहादिति, स्नेहस्यायं महिमा प्रसिद्ध एव यद्विवेकं तिरस्करोतीति भावः ॥ ३२ ॥

हिन्दी अनुवाद

ये स्वयंवरमें शिशुपाल आदि मतवाले राजाओंका मान मर्दन करके जिनको अपने बाहुबलसे हर लाये थे तथा जिनके पुत्र प्रद्युम्न, साम्ब, आम्ब आदि हैं, ये रुक्मिणी आदि आठों पटरानियाँ और भौमासुरको मारकर लायी हुई जो इनकी हजारों अन्य पत्नियाँ हैं, वे वास्तवमें धन्य हैं। क्योंकि इन सभीने स्वतन्त्रता और पवित्रतासे रहित स्त्रीजीवनको पवित्र और उज्ज्वल बना दिया है। इनकी महिमाका वर्णन कोई क्या करे। इनके स्वामी साक्षात् कमलनयन भगवान् श्रीकृष्ण हैं, जो नाना प्रकारकी प्रिय चेष्टाओं तथा पारिजातादि प्रिय वस्तुओंकी भेंटसे इनके हृदयमें प्रेम एवं आनन्दकी अभिवृद्धि करते हुए कभी एक क्षणके लिये भी इन्हें छोड़कर दूसरी जगह नहीं जाते ॥ २९-३० ॥ ❀ ❀ हस्तिनापुरकी स्त्रियाँ इस प्रकार बातचीत कर ही रही थीं कि भगवान् श्रीकृष्ण मन्द मुसकान और प्रेमपूर्ण चितवनसे उनका अभिनन्दन करते हुए वहाँसे बिदा हो गये ॥ ३१ ॥ ❀ ❀ अजातशत्रु युधिष्ठिरने भगवान् श्रीकृष्णकी रक्षाके लिये हाथी, घोड़े, रथ और पैदल सेना उनके साथ कर दी; उन्हें स्नेहवश यह शङ्का हो आयी थी कि कहीं रास्तेमें शत्रु इनपर आक्रमण न कर दें ॥ ३२ ॥

अथ दूरागतान् शौरिः कौरवान् विरहातुरान्[1] । संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥ ३३ ॥
कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान् । ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥ ३४ ॥
मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् । आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥ ३५ ॥
तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः । सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ३६ ॥

इ[2]ति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने श्रीकृष्णद्वारकागमनं नाम दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पाण्डोः कुरुवंशजत्वात्पांडवा अपि कौरवा एव तान् । प्रियैरुद्धवादिभिः सह ॥ ३३ ॥ ❀ ❀ कुरुक्षेत्रं कुरुदेशान्तर्गतमेव । क्रमोऽत्र न विवक्षितः ॥ ३४ ॥ ❀ ❀ मरुर्निरुदको देशः । धन्वोऽल्पोदकः । आनर्ताख्यो द्वारकादेशः । स विभुरुपागात्प्राप्तः । हे भार्गव । मनागीषच्छ्रान्ता वाहा यस्य सः ॥ ३५ ॥ ❀ ❀ तत्र तत्र देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितान्यर्हणान्युपायनानि यस्मै सः । सायमपराह्णे । पश्चाद्दिशं पश्चिमां दिशं भेजे प्राप्तः । तदा च गविष्ठः स्वर्गस्थः सूर्यो गामुदकं गतः प्रविष्टोऽस्तं गत इत्यर्थः । 'अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति' इति श्रुतेः । यद्वा तदा सायंकाले जाते रथादवतीर्य गविष्ठो भूमौ स्थितस्ततो गां जलाशयं गतः सन्पश्चाद्दिशं संध्यां भेज उपासितवानित्यर्थः ॥ ३६ ॥

इति प्रथमस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥

---

१. प्रा० पा०—विदुरान्वितान् । २. प्राचीने पाठे "इतित'''''आरभ्य''''''सूत उवाच" इत्यवधि पाठो न ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र पंथानमतिक्रम्य गमनं तत्तन्निजजनमेलनार्थं शूरसेनागमनं तु श्रीवृन्दावनादिदिदृक्षयैव ॥ ३४ ॥ ❀ ❀ हे भार्गवेति । सर्वज्ञभृगुवंशजातत्वात्त्वमपि योगबलेन भगवन्माहात्म्यं जानास्येवेति भावः । "वाजिवाहार्वगंधर्वहयसैन्धवसप्तयः" इत्यमरः ॥ ३५ ॥ ❀ ❀ इत्यर्थ इति । समुद्रतीरवासिभिर्जलाद्दुद्गमो जले प्रवेशश्चोदयास्तमये दृश्यत इति भावः । संभवत्वाच्छ्लेषेणार्थान्तरमाह-यद्वेति । इत्यर्थ इति । "उत्तमा सूर्यसहिता मध्यमा लुप्ततारका । अधमा तारकोपेता सायं सन्ध्या त्रिधा मता" इति स्मृतेः । सूर्यास्तात्प्रागेव संध्यां चक्र इति । पुनर्निजजनसंगतः । संध्याकालातिक्रमे प्रायश्चित्तापत्तेरिति भावः । प्रायश्चित्तं च शतकृत्वो गायत्र्याभिमन्त्र्य जलं पीत्वा पुनः संध्यामुपासीतेति विशेषाद्वर्णितमस्माभिर्निर्णयसुधाकरे । अत्र संदर्भः-पश्चात्तदनन्तरं सायं यस्मिन्दिने चलितस्तस्यैव दिवसस्यान्ते । दिशं द्वारकागन्तव्यकाष्ठाम् । तेन रथस्य शैघ्र्यमुक्तम् । ननु हस्तिनापुरतो द्वारकामार्गे नैते देशाः संतीत्यत आह । तत्रत्यैस्तत्तद्देशभवैर्भक्तैस्तत्र तत्र द्वारकामार्गे आगत्य प्रत्युद्यतानि निवेदितान्यर्हणान्युपायनानि स्वस्वदेशनयनार्थं यस्मै सः । तेन तत्तद्भक्तमनोरथपूरणार्थं तत्तद्देशं गत्वा गत्वैव तत्र तत्रैकैकानि दिनानि स्थित्वा पुनर्वर्त्मानुससारेति भावः । संदर्भस्तु-प्रकटेन स्वप्रकाशेन । प्रकटतत्प्रकाशविशेषदर्शनं कौतुकार्थमेव । तदा तत्र गमनमित्याह ॥ ३६ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे दशमोऽध्यायः ॥ १० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

'अद्भ्यो वा एष प्रातरुदेती'ति श्रुतेरयमर्थः-सागरतीरस्थजनैः प्रातः सूर्यः सागरादुदेतीति लक्ष्यते अस्तसमये तस्मिन्नेव प्रविशतीति लक्ष्यते । यद्वेति नायं पक्षः पूर्वपक्षस्यास्वरसत्वेनोक्तः । अपितु श्लेषेणार्थद्वयमपि प्रकृतमुक्तमिति भावः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-
दीपन्याख्यदीपिकाटिप्पण्यां दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवव्याख्या

अथ विरहेण विश्लेषेणातुरान् दुःखितानत एव दूरमागतान् कौरवान् युधिष्ठिरादीन् दृढं स्निग्धमनुरागो येषां तान्सम्यक् सांत्वनेन निवर्त्य प्रियैः सह स्वनगरीं द्वारकां प्रायात्प्रययौ ॥ ३३ ॥ ❀ ❀ कुर्वादिमरुधन्वांतान् देशानतिक्रम्य ततः सौवीराभीरयोः परान् पश्चादवस्थितानानर्त्तान् द्वारकाक्षेत्रजनपदान् विभुर्हरिः श्रीकृष्ण उपागात् । कथंभूतः हे भार्गव ! मनागीषच्छ्रांता वाहा अश्वा यस्य ॥ ३४-३५ ॥ ❀ ❀ तत्रत्यैस्तदा देशस्थैस्तत्र तत्र प्रत्युद्यतं शिरस्याधायाभिमुखमानीतमर्हणं पूजासाधनं यस्य तथाभूतः यावदानर्तानुपागात्तदा गविष्ठः सूर्यः गोभिः किरणैस्तिष्ठतीति व्युत्पत्तेः पश्चाद्दिशम्प्रति सायं भेजे प्राप्तः गां भूमिं गतश्च उदकं गतश्च 'सायमप्सु प्रविशती'ति श्रुतेः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वनगरीं द्वारवतीं प्रियैः पुरुषैः सह ॥ ३३-३४ ॥ ❀ ❀ हे भार्गव ! शौनक कुरुजांगलप्रभृत्येकादश देशानतिक्रम्यागात् श्रांताश्वो विभुरानर्तान् स्वाधिकृतान् देशानुपागादित्यन्वयः ॥ ३५ ॥ ❀ ❀ यदा हरिः सायं संध्यासमये पश्चाद्दिशं भेजे, कथंभूतः तत्र तत्र च स्वराष्ट्रे प्रतिपदं तत्रत्यैर्जनैः प्रत्युद्यतार्हणः प्रदत्तप्राज्यधनः तदा गविष्ठः दिवि स्थितः आदित्यः गां समुद्रोदकं गतः अस्तं गत इत्यर्थः "असौ वा गविष्ठोऽप्सूदेत्यप्स्वस्तमेती"ति श्रुतेः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कुरुजाङ्गलेति युग्मकम् । अत्र पन्थानमतिक्रम्य गमनं तत्तन्निजजनमिलनार्थम् । शूरसेनागमनं श्रीवृन्दावनादिदिदृक्षयैव ॥ ३४-३५ ॥ ❀ ❀ सायमिति । पश्चात्तदनंतरं सायं यस्मिन् दिने चलितस्तस्यैव दिवसस्यान्ते दिशं द्वारकागन्तव्यकाष्ठां भेजे इत्यर्थः । एवं रथस्य शैघ्र्यं दर्शितम् । अत एव भार्गवेत्याश्चर्येण सम्बोधनं, मनाक् श्रान्तवाह इति चोक्तम् , तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हण इत्यत्राशङ्कते-ननु शूरसेनयामुनान्तर्गतवृन्दावनस्थानां श्रीमन्नन्दादीनां मिलनादिकं विशिष्य कथं न वर्णितं तत्राह । स एव गविष्ठो गोपाललीलः सन् दन्तवक्रवधानन्तरं गां गोकुलमेव गतः । तदप्रकटप्रकाशे तैः सार्द्धमप्रकटं स्थित एवेत्यर्थः । प्रकटेन स्वप्रकाशेन प्रकटतत्प्रकाशविशेषदर्शनकौतुकार्थमेव तदा तत्र गमनमिति भावः । तदिदं श्रीकृष्णसन्दर्भे विवृतमस्ति ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

कौरवान् पांडवान् ॥ ३३ ॥ ❀ ❀ कुरुजाङ्गलादौ क्रमो न विवक्षितः ॥ ३४ ॥ ❀ ❀ मरुर्निरुदको देशः। धन्व अल्पोदकः। आनर्त्तान् द्वारकाप्रदेशान्। हे भार्गव ! मनाक् ईषत् श्रान्ता वाहा यस्य सः ॥ ३५ ॥ ❀ ❀ ननु हस्तिनापुरात् द्वारकामार्गेणैव ते देशाः सम्भवन्तीत्यत आह। तत्रत्यैस्तत्तद्देशभवैर्भक्तैस्तत्र तत्र द्वारकामार्गे आगत्य प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि स्वस्वदेशनयनार्थं यस्मै सः। तेन तत्तद्भक्तमनोरथपूरणार्थं तत्तद्देशं गत्वा गत्वैव तत्र तत्रैकैकानि दिनानि स्थित्वा पुनर्वर्त्मानुससारेति भावः। सायमपराह्णे पश्चाद्दिशं द्वारकाप्रदेशं भेजे प्राप्तः। तदा गविष्ठः सूर्योऽपि गां गतः पश्चिमसमुद्रजलं प्रविष्टः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। प्रथमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रियैरुद्धवादिभिः सह ॥ ३३ ॥ ❀ ❀ कुर्वादिदेशानतिक्रम्य आनर्तानुपागादिति द्वितीयेनान्वयः। क्रमोऽत्र न विवक्षितः ॥ ३४ ॥ ❀ ❀ हे भार्गव ! सौवीराभीरयोः परान् परतः स्थितान् आनर्तान् मनागीषत् श्रांता वाहा यस्य स विभुः श्रीकृष्णः उपागात्प्राप्तः ॥ ३५ ॥ ❀ ❀ तत्र तत्र तस्मिन् तस्मिन्देशे तत्रत्यैर्भक्तैः प्रत्युद्यतानि अर्हणानि यस्य स हरिस्तत्रत्यानां क्लेशहरः श्रीकृष्णः सायं काले यदा तस्मिन्क्षणे पश्चात्पश्चिमां दिशं भेजे। तस्यां दिशीप्सितं देशं प्राप्तस्तदा तस्मिन्नेव क्षणे गोभिः स्वाश्रयैः किरणैस्तिष्ठतीति गविष्ठो भानुमान् गामुदकं गतः "अद्भ्यो वा एष प्रातरुदेति अपःसायंप्रविशती"ति श्रुतेः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे दशमाध्यायार्थप्रकाशः ॥ १० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एतावत्कालं कौरवयादवा मिलिताः स्थिताः। अथोभये पश्चाद् भिन्नतया गता इत्याह अथेति। उभयत्रापि भगवानेव हेतुः दूरपर्यंतमागतान् शौरिरिति लोकव्यवहारार्थं दार्ढ्यं सूचितं, शूरः पाण्डवानां मातामहो भागवतः पितामहः, अत उभये एक एव न दूरागमनेन आतुराः, किंतु विरहेण तथापि ह्यातुरैः सहगमनमनुचितम्। अत आतुरान्निवर्त्य प्रियैः सह अगमत्। कौरवाः स्वमनस्येव वयं सह गमिष्याम इति विरहातुरा अतो भगवता निवर्त्तिताः। नन्वत्यंतमातुरा गृहेऽपि न गच्छेयुः इति नाशंकनीयं यतस्ते दृढं स्निग्धाः, न हि दृढं स्निग्धः शीघ्रं नश्यति ॥ ३३ ॥ ❀ ❀ मार्गस्थदेशान् श्लोकद्वयेन निर्दिशति कुरुजांगलेति। कुरुजांगले शूरसेनान् वटेश्वरदेशान् अन्यांश्च यमुनातीरदेशान् परपारस्थान् ततः कुरुक्षेत्रदेशः सरस्वतीदृषद्वतीमध्यदेशः अम्बिकावरादिः मरुरल्पोदकदेशः धन्वोऽनुदकदेशः भूमिसिकताभेदनिरूपणाय अथशब्दः, सौवीरदेशः सुराष्ट्रदेशः आभीरदेशः कुंतीपुरदेशः ततोऽपि परानानर्त्तान्द्वारकादेशान् मध्ये देशानां नामभिरुद्विग्नं संबोधयति हे भार्गव ! इति युक्तमेव भृगुवंशस्य तथात्वं, किन्तु भगवानेव तान् देशानुपागात्। एकेनैव दिवसेन तावद्दूरगमनेऽपि मनागेव श्रांतवाहो जातः, न तु सर्वथा किमित्येकेनैव दिवसेन तावत् इत्यत्र हेतुः विभुरिति॥ ३४-३५ ॥ ❀ ❀ मध्ये तत्र पूजामाह तत्र तत्रेति। ह इति निश्चये, कोऽपि देशो भगवत्पूजारहितो न जात इत्यर्थः, एवं पूजितो भगवान् सायंकाले पश्चाद्दिशं पश्चिमतीरं भेजे तत्र विश्रामं कृतवान् गोधूलिकायां नगरप्रवेशः कर्त्तव्य इति। भगवान् यदा संध्याप्रतीक्षया स्थितः तदा सूर्येण न विलंबः कृत इत्याह-गविष्ठो गां गतस्तदेति गवि किरणे अवस्थिते बिंबमात्रं दृश्यत इत्यर्थः, तादृशः सूर्यो गां गतः जलं प्रविष्टः "अद्भ्यः प्रातरुदेत्य यः सायं प्रविशती"ति श्रुतेः, सुमुहूर्त्तं जातमित्यर्थः ॥ ३६ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधविवरणे दशमोऽध्यायः ॥ १० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अथ भिन्नप्रक्रमे। शौरिः श्रीकृष्णः दूरागतान् कौरवान्-पाण्डोरपि कुरुवंशजत्वात्पाण्डवा अपि कौरवा एव। तान् सम्यक् सान्त्वनेन निवर्त्त्य प्रियैरुद्धवादिभिः सह स्वनगरीं द्वारकां प्रायात् प्रययावित्यन्वयः। दूरागमने हेतुमाह-विरहेण विश्लेषेणातुरान् दुःखितानिति। तत्रापि हेतुमाह-दृढं स्निग्धमनुरागो येषां तानिति ॥ ३३ ॥ ❀ ❀ मार्गस्थान् देशान्निर्दिशति-कुरुजाङ्गलेति द्वयेन। कुर्वादिधन्वान्तान् देशानतिक्रम्य ततः सौवीराभीरयोः परान् पश्चादवस्थितान् आनर्त्तान् द्वारकाप्रदेशान् मनाक् ईषत् श्रान्ता वाहा अश्वा यस्य स विभुः सर्वथा समर्थः श्रीकृष्ण उपागादित्यन्वयः। यामुनान् यमुनातीरस्थान्। मरुरल्पोदको देशः। धन्वा निरुदको देशः। भूमिसिकताभेदप्रदर्शनायाथशब्दः। सौवीरः सुराष्ट्रदेशः। आभीरः कुन्तीपुरदेशः। भगवतो माहात्म्यं भृगुणा पूर्वं परीक्षितमेवातस्तद्वंशेन त्वयाऽपि तत्र विश्वास एव कार्य इति सूचयन् सम्बोधयति-हे भार्गवेति ॥ ३४-३५ ॥ ❀ ❀ ननु हस्तिनापुराद्द्वारकामार्गे नैते देशाः सन्तीति कथं तदतिक्रमणं सम्भवतीत्याशङ्क्याह-तत्र तत्रेति। हीति निश्चये, नात्र

सन्देहः कर्त्तव्यः । तत्रत्यैस्तत्तद्देशभवैर्भक्तैस्तत्र तत्तद्द्वारकामार्गे आगताः स्वदेशानयनार्थं प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्मै सः । तथा च तत्तद्भक्तमनोरथपूणार्थं तत्तद्देशं गत्वैव पुनर्वर्त्मानुससारेति भावः । ततश्च सायमपराह्णे पश्चाद्दिशं द्वारकाप्रदेशं भेजे प्राप्तस्तदा च गवि किरणे तिष्ठतीति गविष्ठः सूर्यो गां गतः "अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति" इति श्रुतेः पश्चिमसमुद्रजलं प्रविष्टः, अस्तं गत इत्यर्थः ॥ ३६ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ दशमो विवृतो राज्ञो राज्यादिविनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

सुहृद् प्रेमके कारण कुरुवंशी पाण्डव भगवान्के साथ बहुत दूरतक चले गये। वे लोग उस समय भावी विरहसे व्याकुल हो रहे थे। भगवान् श्रीकृष्णने उन्हें बहुत आग्रह करके विदा किया और सात्यकि, उद्धव आदि प्रेमी मित्रोंके साथ द्वारकाकी यात्रा की ॥ ३३ ॥ ❀ ❀ शौनकजी ! वे कुरुजाङ्गल, पाञ्चाल, शूरसेन, यमुनाके तटवर्ती प्रदेश, ब्रह्मावर्त, कुरुक्षेत्र, मत्स्य, सारस्वत और मरुधन्व देशको पार करके सौवीर और आभीर देशके पश्चिम आनर्त्त देशमें आये। उस समय अधिक चलनेके कारण भगवान्के रथके घोड़े कुछ थकसे गये थे ॥ ३४-३५ ॥ मार्गमें स्थान-स्थानपर लोग उपहारादिके द्वारा भगवान्का सम्मान करते थे, सायङ्काल होनेपर वे रथपरसे भूमिपर उतर आते थे और जलाशयपर जाकर सन्ध्या-वन्दन करते थे। यह उनकी नित्यचर्या थी ॥ ३६ ॥

दशवाँ अध्याय समाप्त

अथैकादशोऽध्यायः

सूत उवाच

आनर्तान् स उपव्रज्य स्वृद्धाञ्जनपदान् स्वकान् । दध्मौ दरवरं[1] तेषां विषादं शमयन्निव ॥ १ ॥

स[2] उच्चकाशे धवलोदरो दरोऽप्युरुक्रमस्याधरशोणशोणिमा ।

दाध्मायमानः करकञ्जसम्पुटे यथाब्जखण्डे कलहंस उत्स्वनः ॥ २ ॥

तमुपश्रुत्य निनदं जगद्भयभयावहम् । प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥ ३ ॥

तत्रोपनीतबलयो रवेर्दीपमिवादृताः । आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आनर्तैः स्तूयमानस्य पुरीं निर्विश्य बंधुभिः । एकादशे रतिः सम्यग्यादवेन्द्रस्य वर्ण्यते ॥ १ ॥

उत्सवैरुज्ज्वलत्पौरमुदञ्चद्ध्वजतोरणम् । उल्लसद्रत्नदीपालि स्वपुरं प्रभुराविशत् ॥ २ ॥

स्वृद्धान्समृद्धान् । दरवरं पांचजन्यं शंखम् । दध्मौ वादितवान् ॥ १ ॥ ❀ ❀ स इति । दरः शंखो दाध्मायमानो भगवता आपूर्यमाण उच्चकाशेऽतिशयेन शुशुभ इत्यन्वयः । कथंभूतो दरः धवलमुदरं यस्य सः । तथाप्युरुक्रमस्य कृष्णस्याधरस्य यः शोणगुणस्तेन शोणिमा यस्य सः । करकंजे करकमले तयोः संपुटे मध्ये वर्तमानः कथमुच्चकाशे अब्जखंडे रक्तकमलसमूहे कलहंसो राजहंस उत्स्वन उच्चशब्दो यथा तद्वत् ॥ २ ॥ ❀ ❀ जगतो तद्भयं तस्य भयावहम् । प्रत्युद्ययुः प्रत्युज्जग्मुः भर्तुर्दर्शने लालसौत्सुक्यं यासां ताः ॥ ३ ॥ ❀ ❀ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिता बलय उपायनानि याभिस्ताः । निरपेक्षेऽपि तस्मिन्नादरेण समर्पणे दृष्टान्तः—रवेर्दीपमिवेति । पितरमर्भका इव तं सर्वसुहृदमवितारं प्रोचुरित्युत्तरेणान्वयः । सुहृत्त्वेनैवावितारं न तु कामेन । अत्र हेतुः—आत्मारामम् । तत्रापि हेतुः—परमानंदनिजस्वरूपलाभेनैव पूर्णकामम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बन्धुभिः सह (१) उज्ज्वलन्तः पौरा यस्मिंस्तत्स्वपुरम् । उदञ्चन्तश्चलन्तो देदीप्यमाना वा ध्वजास्तैर्युतं तोरणं द्वारबाह्यभागो यत्र तत्तथा । "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः । उल्लसन्ती रत्नदीपानामालिर्यत्र तत्तथा (२) इवेति । साक्षाद्दर्शनं विना विषादशान्त्यनुपपत्तेः ॥ १ ॥ ❀ ❀ स दरः ॥ २ ॥ ❀ ❀ तं शंखोद्भूतं निनदं शब्दम् । "शब्दे निनादनिनदध्वनिध्वानरवस्वनाः" इत्यमरः । जगतो भयं यस्मात्कालात् येभ्यो दैत्येभ्यो वा तस्य तेषां च भयमावहति समन्तात्प्रापयतीति तम् । भर्तुः श्रीकृष्णस्य ॥ ३ ॥ ❀ ❀ उपायनान्युपढौकितानि अत्र कामाभावे अत्रात्मारामत्वे तेजोरूपत्वेन निरपेक्षस्यापि रवेरग्रे यथा दीपं समर्पयन्ति तथा निरपेक्षस्य श्रीकृष्णस्याग्रे बलिसमर्पणं स्वाभ्युदयार्थमेवेति भावः ॥ ४–५ ॥

अस्मिन्पद्यार्थे दीपनी न

श्रीमद्वीरराघवव्याख्या

स भगवान्स्वृद्धान्समृद्धान्स्वकानानर्त्तान् जनपदानुपव्रज्य तत्रत्यानां विषादं स्वविश्लेषजं शमयन्निव दरवरं शंखश्रेष्ठं पांचजन्यं दध्मौ ध्वनयामास ॥ १ ॥ ❀ ❀ तदा स दाध्मायमानो दरवरः स्वतो धवलमुदरं यस्य तथाभूतोऽपि दामोदरस्य भगवतोऽधरशोणेन शोणिमा यस्य सः, स भगवत्करकमलयोः संपुट उच्चकाशे यथाऽब्जखण्डे रक्तकमलसमूहे उत्स्वन उच्चैः स्वनो यस्य स हंसस्तद्वत् ॥ २ ॥ ❀ ❀ जगतो भयं येभ्यः तेषां भयमावहतीति तथा तं निनदमुपश्रुत्य सर्वाः प्रजा भर्तुर्भगवतो दर्शने लालसाः आसक्तचित्ताः प्रत्युद्ययुः प्रत्याजग्मुः ॥ ३ ॥ ❀ ❀ तत्रादृता आदरयुक्ताः रवेर्दीपमिवात्मानं जगच्च प्रकाशयतः प्रकाशांतरानपेक्षस्य सूर्यस्य दीपमिव उपनीतः बलिः पूजार्थं द्रव्यं याभिस्ताः ॥ ४ ॥

---

१. प्रा० पा० शङ्खवरं । २. प्राचीने पाठे श्लोकोऽयं नास्ति ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स कृष्णः स्वृद्धान्सुष्ठु संपन्नान् स्वकान् स्वीयान्नाम्ना आनर्तान् जनपदानुपगम्य इति दरवरं शंखश्रेष्ठं दध्मौ पूरयामास तेषां विषादं राजकं भयं शमयन्परिहरन्निवेत्यन्वयः ॥ १ ॥ ❋ ❋ स दरः पांचजन्याख्यः उच्चकाशे धवलं शुक्लमुदरं यस्य स धवलोदरः अतिधवलोदरोऽपि उरुक्रमस्य श्रीकृष्णस्याधरोष्ठस्य शोणेन रागेण शोणिमा रक्तभावो यस्य स तथोक्तः दाध्मायमानः पुनः पुनः पूर्यमाणः करावेव कंजे हस्तकमले तयोः संपुटे मध्ये वर्तमान इति शेषः करकंजसंपुटे निधाय दाध्मायमान इति वा। तत्र दृष्टांतः अब्जखंडे करकमले स्थितः उत्स्वनः उच्चध्वनिः कलहंस राजहंसः यथा तथेत्यन्वयः ॥ २ ॥ ❋ ❋ भर्तृदर्शन-लालसाः श्रीकृष्णस्य दर्शनोत्सुकाः सर्वाः प्रजा जगतः भवः संसारः तस्माद्भयं हंतीति जगद्भवभयापहः तं, जगद्भयभयापहमिति पाठे जगद्भयानां दैत्यानां सकाशाद्भयं तस्य नाशनः तं निनदं शंखध्वनिं श्रुत्वा तं कृष्णं प्रत्युद्ययुरित्यन्वयः ॥ ३ ॥ ❋ ❋ नित्यदा निजलाभेन स्वतो लब्धेन पूर्णकामम् अत एवात्मारामं आसमंतात् रममाणं कृष्णं नत्वा हर्षेण गद्गदया स्खलंत्या गिरा ताः प्रजाः प्रोचुरित्यन्वयः। कीदृश्यः प्रीत्युत्फुल्लं विकसितं मुखं यासां ताः तथोक्ताः उपनीतः समर्पितः बलिः भागधेयः याभिस्तास्तथा। बलिः पूजासाधनं वा, कथमिव तेजःपुंजस्य रवेर्दीपमिव आत्मारामस्य बलिं दत्त्वेति शेषः, आदृताः परमादरयुक्ताः अर्भकाः बालाः पितरमिव कथंभूतं हरिम् अन्नादिदानेन पातृत्वात्पितरं सर्वस्मादात्मादेः सुहृदमनिमित्तबंधुं ज्ञानादिदानेनावनकर्तृत्वा-दवितारम् ॥ ४-५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स उच्चकाशे इति पद्यं चित्सुखेन व्याख्यातमस्ति ॥ २-३ ॥ ❋ ❋ तत्र श्रीद्वारकायाम्। रवेरुपहाररूपं दीपमा-दृतवन्तो जना इवेत्यर्थः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकादशे स्तुतः कृष्ण आनर्तैः स्वपुरं गतः। बन्धुभिर्मिलितः कान्ता अधिनोदिति वर्ण्यते ॥

दरवरं पांचजन्यं शङ्खम्। इवेति साक्षाद्दर्शनं विना सम्यग्विषादस्य शान्त्यनुपपत्तेः ॥ १ ॥ ❋ ❋ स दरः शङ्खः उच्चकाशे शोभते स्म। अधरस्य शोणेन गुणेन शोणिमा यस्य सः। दाध्मायमानः अतिशयेन वाद्यमानः। अब्जषण्डे कमलसमूहे इति चतुर्भिः करैर्धृतत्वात् ॥ २ ॥ ❋ ❋ जगतो यद्भयं तस्य भयमावहति तम् ॥ ३ ॥ ❋ ❋ उपनीताः समर्पिता बलय उपायनानि याभिस्तथाभूताः सत्यः। निरपेक्षेऽपि तस्मिन्नादरेण समर्पणे दृष्टांतः रवेर्दीपमिव (रवौ दीपनीयरविपूजका इवेत्यर्थः) पितरमर्भका इव तम् अवितारं रक्षितारमूचुः। उपायनानपेक्षत्वमाह आत्माराममिति ॥ ४-५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ द्वारावतीस्थभगवदीयजनानां भगवति स्नेहाधिक्यं वक्तुं प्रथमं भगच्चेष्टितमाह आनर्तानिति। स्वृद्धान्सुसमृद्धान् दरवरं पांचजन्याख्यं शंखश्रेष्ठं स्ववियोगजं विषादं शमयन्निव दध्मौ वादितवान्। सर्वथा विश्लेषजन्मविषादनिवृत्तिस्तु तत्तत्सं-योगादेव भवतीत्यतः इवशब्दः ॥ १ ॥ ❋ ❋ सदा स पांचजन्याख्यः दरः शंखःस्वतो धवलोदरोऽपि उरुक्रमस्य अधरशो-णितरागेण शोणिमा यस्य करकंजसंपुटे दाध्मायमानो भगवताऽऽपूर्यमाण उच्चकाशे नितरां शुशुभे यथाऽब्जषण्डेऽरुणपद्मसमूहे उत्स्वन उच्चशब्दः कलहंसो राजहंसः ॥ २ ॥ ❋ ❋ जगद्भयस्य कालादेरपि भयमावहतीति तथा तम् ॥ ३ ॥ ❋ ❋ तत्र पूर्णकामे श्रीकृष्णे रवेर्दीपमिवोपनीता बलयो याभिस्तास्तेन चादृता नित्यदा निजलाभेन पूर्णकाममात्मारामं श्रीकृष्णं प्रोचुरित्युत्तरेणान्वयः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं कौरवभक्तानां सर्वसौख्यं निरूपितम्। द्वारकास्थितभक्तानामेकादश उदीर्यते ॥ १ ॥
प्रवेशे च प्रविष्टस्य स्थितस्याप्युत्सवस्त्रिधा। प्राप्तानामिव च स्नेहशास्त्रार्थं जानतामपि ॥ २ ॥

कृष्णेच्छातस्तदित्युक्त्वा प्रत्यापत्तिर्निरूप्यते। पूर्वाध्यायांते भगवतो द्वारकाप्रवेशार्थं सुमुहूर्तं निरूपितम्। अत्र प्रथमं प्रवेशे मंगलमाह। "शंखनादस्तथा स्निग्धदर्शनं स्तोत्रमेव च। दूरान्मंगलमेतद्धि कलशादिस्तथांतिके ॥ दुःखिते नगरे कृष्णो न प्रवेशमिहार्हति। अतः शंखनिनादेन सुखिनस्तान् करोति हि ॥ द्वारकाजलदुर्गं हि तदंते नगरं महत्। आनर्त्ताख्यं तत्प्रवेशः पूर्वं पश्चात् पुरस्य हि ॥" अतो भगवनानर्त्तपुरनिकटे गत्वा पांचजन्यध्वनिं कृतवानित्याह आनर्त्तानिति बहुवचनमवांतरग्रामाभिप्रायं स्वृद्धान् सुष्ठु ऋद्धान् सस्यधनादिभिः स्वकान् स्वकीयान् द्वारिकानिवेशानंतरं वासितान् ॥ १ ॥ ❋ ❋ यस्य ध्वनिर्दानवदर्पहंता अमंगलरूपदैत्यानां निराकरणार्थं दरवरं शंखश्रेष्ठं वादितवान्। भगवता वाद्यमानः शंखः केनचिद्वर्णितः सोऽप्युपनिबद्धः स च उच्चकाश इति। ऊर्ध्वूर्वमत्यन्तं चकाशे धवलमुदरं यस्य

एतादृशो दरः उरुक्रमस्याधरशोणेन रूपेण शोणिमा शोणयुक्तः करकमलद्वयस्य मध्ये संपुटे यथा कमलसमूहे ऊर्ध्वं शब्दायमानो हंसो भवति ॥ २ ॥ ❀ ❀ पांचजन्यध्वनिं श्रुत्वा सर्वे देशनगरवासिनः निश्चयेन भगवंतमागतं ज्ञात्वा परमानन्दनिर्वृता अपि दर्शनार्थमग्रे गता इत्याह तमुपश्रुत्येति। यस्मिन् श्रुते मृत्युभयमपि गच्छति किमन्यद् भयमित्याह जगद्भयभयावहमिति। पांचजन्यं हि आयुधं शत्रुवधार्थं निष्पादितं घातकस्वभावं तदत्र मंगले कथमुपयुज्यत इत्याशंक्य अत्रापि घातकरूपेणैव मंगलत्वमिति जगतो यद्भयं तस्य भयं आवहतीति उक्तम्। प्रत्युद्ययुः अन्योऽन्यं प्रतिकूलतया उद् ऊर्ध्वं अग्रे ययुः अयगतौ, अन्योऽन्योपमर्देन अहमहमिकया अग्रे गता इत्यर्थः, सर्वा इति नात्रावांतरजातिर्नियामिका भर्तृत्वस्य तुल्यत्वात्। शास्त्रार्थपरिपालनाय सर्वे उपायनपाणयः समागताः। तत्रोपायवचत्वसिद्धये दरिद्रा अपि सम्भवन्ति ॥ ३ ॥ ❀ ❀ तेषामुपायनं भगवतः कोपयोगायेत्याशंक्याह रवेर्दीपमिति। बलिः पूजा साधनद्रव्यं कयाचित् क्रियया हि भिन्नो भगवति संबध्यते तदैव हि परमानंदः, तत्र दृष्ट्या इंद्रियसंबंधेऽपि देहसंबंधसिध्यर्थमुपायनानयनं सूर्योद्देशेन दीपदानं विहितं, न हि दीपेन सूर्यस्य किंचित् कार्यं सिध्यति तथापि त्वत्परोक्षे वयमनेन जीवाम इति दैन्यख्यापनेन दयोत्पत्तौ हेतुर्भवति तथा भगवत्यपि स्वविद्यमानद्रव्येणोपढौकनं तदा भगवता ताः सर्वा आदराः आदरेण सुखिताः कृताः तेषां पूर्णमनोरथानां यत् कार्यं तदाह आत्माराममिति। अथवा पूर्वमेताः आत्मारामं प्रत्युद्ययुरिति संबंधः। स्तोत्रोपक्रमस्तु प्रीत्युत्फुल्लेति। उत्कृष्टैरप्युपनीते उपायने भगवतोऽपेक्षा नास्तीति वक्तुं तं विशिनष्टि आत्मारामं पूर्णकाममिति। उभये हि विषयान्नापेक्षन्ते येषां विषयापेक्षैव नास्ति ये वा पूर्णविषयाः। तत्र विषयापेक्षाभावः 'परं दृष्ट्वा निवर्त्तते' इति वाक्यात्। भगवति पेक्षाप्राप्ते भवति भगवांस्तु प्राप्तं भगवानात्मारामः। अत एव पूर्णकामः 'आत्मकाम आप्तकामः' इति श्रुतेः। अथवा कामस्तु पूर्वं भगवति उत्पन्नः स सर्वसृष्टपदार्थान् व्याप्य स्थितः पूर्ण इत्युच्यते। स जीवेषु कदाचिन्न पूर्णो भवति सर्वजीवार्थत्वात् विषयाणां भगवतस्तु सर्वं भगवतः प्राप्तमिति पूर्णत्वम्। उभयत्रापि हेतुः निजलाभेति निजं स्वरूपं निजा वा सर्वे प्रापंचिकाः पदार्थाः सर्वे नित्यदेति तिरोभावानुपपत्तिदशायामपि अव्यक्तादिनिधनत्वात् अव्यक्तस्य च भगवत्त्वात् विषयपक्षे सदेत्युक्तं अवतीर्णदशायामपि स्वरूप एव स्थितत्वात् नित्यदेति ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

अथैकादशाध्यायं विवरिषवोऽवसररूपां सङ्गतिं बोधयितुं पूर्वाध्यायार्थमनुवदन्तः प्रस्तुतार्थमाहुः एवं कौरवेत्यादि। कथमुदीर्येत इत्याकाङ्क्षायां तद्धेतूनवान्तरार्थानाहुः प्रवेशे चेत्यादि। एवं त्रिधोत्सवकथनेन कथं सर्वभक्तसौख्यमत आहुः प्राकृतेत्यादि। तथा च तेषां सात्त्विकादिभेदेन त्रैविध्यात्तेन तथेत्यर्थः। शास्त्रार्थं जानतां कथमेवमत आहुः कृष्णेच्छातस्तदिति। प्रत्यापत्तिः पूर्वसजातीयसुखस्य पुनः प्राप्तिः। तथा चैवं सर्वसौख्यं निरूप्यत इत्यर्थः। प्रवेशे उत्सवो मङ्गलात्मेति तानि गणयन्ति शङ्खनाद इत्यादि। स्निग्धदर्शनं स्निग्धविषयकं भगवत्कृतं दर्शनम्। तदन्त इति तत्पुरोभागे। तत्रोपनीतेत्यत्र तत्रेति मूलस्थपदस्य भगवन्निकट इत्यर्थः। सूर्योद्देशेनेत्यादिना उपढौकनमित्यन्तेन व्याख्यानेन इदानीन्तनैरप्येवं भावेनोपढौकनं कार्यमिति शिक्षा बोधिता। कार्यमिति भगवता कार्यम्। तथा च निजलाभेन भगवल्लाभेन आत्मारामं पूर्णकामं यथा स्यात्तथा आदृता इति योजना बोध्येत्यर्थः। एवं श्लोकद्वयस्य प्रत्येकवाक्यत्वपक्षं द्वितीयश्लोके तिङन्तक्रियाविरहेण क्लिष्टमिव मन्वाना युग्मवाक्यत्वमङ्गीकृत्य पक्षान्तरमाहुः अथवेत्यादि। नन्वादृता इत्यन्तमेकं वाक्यम्, आत्मेत्याद्यर्भका इत्यन्तमपरमित्येवमादरणीयं दूरान्वयदोषाभावादित्याशङ्कायामाहुः स्तोत्रेत्यादि। तथा चैवमन्वयाङ्गीकारे कर्माकाङ्क्षायाः पूर्वार्धेन पूरणात्पितरमित्याद्यर्धस्यासङ्गतिः पुनरादाने समाप्तपुनरात्तत्वं दूरान्वयश्चेत्यतो नायं पक्षो युक्तः, किन्तु पूर्वोक्त एव युक्त इत्यर्थः। अस्मिन् पक्षे प्रतिर्लक्षणे कर्मप्रवचनीयस्तद्योग इयं द्वितीयेत्याशयेन द्वितीयान्तानामर्थमाहुः उत्कृष्टैरित्यादि। अवान्तरप्रकरणविचारे उक्तश्रुतेर्जीवप्रकरणस्थत्वेनानुपष्टंभकत्वमित्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। तिरोभावानुपपत्तिदशायामिति द्वन्द्वान्ते श्रूयमाणस्य दशाशब्दस्य प्रत्येकमभिसम्बन्धः। अव्यक्तादिनिधनत्वादिति। अव्यक्तमादिनिधनयोर्येषां पदार्थानां तादृशत्वादिति व्यधिकरणपदो बहुव्रीहिः। उक्तमिति व्याख्यातमित्यर्थः। निजपदस्य स्वरूपवाचकत्वपक्षेऽर्थमाहुः अवतीर्णेत्यादि। अन्यैरादृतत्वादुत्तरार्धे दृष्टान्तवाक्यत्वाङ्गीकारेण दोषाभावाच्च तृतीयामपि योजनामङ्गीकृत्य तस्मिन् पक्षेऽर्थमाहुः स्तोत्रेत्यादि ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एकादशे तु कृष्णस्य पुरीं निविश्य बन्धुभिः। कान्ताभी रममाणस्यापीश्वरत्वं निरूप्यते ॥ १ ॥

आनर्त्तानागत्य भगवान् किं कृतवानित्यपेक्षायां स्वविरहेण दुःखितान् जनान् सर्वभयनिवर्त्तकेन स्वागमनसूचकेन च शङ्खनादेन सुखितान् कृत्वा नगरं प्रविवेशेत्याह—आनर्त्तानिति दशभिः। इवशब्द एवकारार्थकः। स भगवान् स्वृद्धान् समृद्धान् स्वकानानर्त्तान् जनपदान् देशानुपव्रज्य तेषां तत्रत्यानां जनानां विषादं स्वविश्लेषजं शमयन्निवर्त्तयन्नेव दरवरं शङ्खश्रेष्ठं पाञ्चजन्यनामकं दध्मौ वादितवानित्यन्वयः ॥ १ ॥ ❀ ❀ तदा स दाध्मायमानो दरवरः स्वतो धवलमुदरं यस्य तथाभूतोऽपि दामोदरस्य भगवतो भक्तवत्सलस्य कृष्णस्याधरशोणेन अधरस्थरक्तगुणेन शोणिमा रक्तगुणो यस्य तथाभूतः सन् भगवत्करकमलयोः

सम्पुट उच्चकाशेऽतिशयेन शुशुभे । तत्र दृष्टान्तमाह–यथेति । अब्जखण्डे कमलसमूहे उत्स्वनः उच्चैः स्वनो यस्य सः कलहंसो यथा शोभते तथेत्यर्थः ॥ २ ॥ ❁ ❁ जगतो यद्भयं भयाभिमानी देवः 'सैनिका भयनाम्नो ये' इत्यत्र चतुर्थे निरूपणीयस्तस्यापि भयमावहतीति तथा तं निनदं शङ्खनादमुपश्रुत्य सर्वाः प्रजाः तं प्रत्युद्ययुः उत्कर्षेण अग्रतो जग्मुः । तत्र हेतुमाह–भर्तुः स्वपालकस्य भगवतो दर्शने लालसा औत्सुक्यं यासां ताः ॥ ३ ॥ ❁ ❁ तत्र गत्वा किं कृतवत्य इत्यपेक्षायामाह–तत्रेति । तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिता बलय उपायनानि याभिस्ताः तथा प्रीत्या उत्फुल्लानि विकसितानि मुखाम्बुजानि यासां ताः हर्षेण आनन्दोद्गमेन गद्गदया सुललितया गिरा तं प्रोचुरित्युत्तरेणान्वयः । ननु भगवतोऽपि किमुपायनस्तुत्याद्यपेक्षाऽस्ति तथा सति पूर्णकामत्वमेव न स्यादित्याशङ्क्याह–निजेति । परमानन्दनिजस्वरूपलाभेनैव पूर्णकामं तदपि न जीववत् कदाचित्स्फूर्तिमात्रमेव लाभः, किन्तु नित्यदा सर्वदैव तल्लाभेन पूर्णकामत्वम् । अत एवात्मनि स्वरूपानन्दे एव आरामो रमणमासक्तिर्यस्य, न विषयसुखे, स तथा तमात्मारामम् । ननु यदि भगवतस्तदपेक्षा नास्ति तर्हि किमिति तस्मै तन्निवेदितवन्त इत्याशङ्क्याह–आदृता इति, आदरो भक्तिस्तद्युक्ता इत्यर्थः । भक्तिमार्गे इयमेव रीतिर्यदपेक्षाभावे समर्प्यते इति भावः । तत्र दृष्टान्तमाह–रवेर्दीपमिवेति । यथा सर्वप्रकाशमयस्य रवेः स्वार्थं दीपापेक्षाभावेऽपि तत्पूजायां दीपं समर्पयन्ति तथेत्यर्थः ॥ ४ ॥

हिन्दी अनुवाद

द्वारकामें श्रीकृष्णका राजोचित स्वागत

सूतजी कहते हैं—श्रीकृष्णने अपने समृद्ध आनर्त्त देशमें पहुँचकर वहाँके लोगोंकी विरह-वेदना बहुत कुछ शान्त करते हुए अपना श्रेष्ठ पाञ्चजन्य नामक शङ्ख बजाया ॥ १ ॥ ❁ ❁ भगवान्‌के होठोंकी लालीसे लाल हुआ वह श्वेत वर्णका शङ्ख बजते समय उनके कर-कमलोंमें ऐसा शोभायमान हुआ, जैसे लाल रंगके कमलोंपर बैठकर कोई राजहंस उच्चस्वर गान कर रहा हो ॥ २ ॥ ❁ ❁ भगवान्‌के शङ्खकी वह ध्वनि संसारके भयको भयभीत करनेवाली है । उसे सुनकर सारी प्रजा अपने स्वामी श्रीकृष्णके दर्शनकी लालसासे नगरके बाहर निकल आयी ॥ ३ ॥ ❁ ❁ भगवान् श्रीकृष्ण आत्माराम हैं, वे अपने आत्मलाभसे ही सदा-सर्वदा पूर्णकाम हैं, फिर भी जैसे लोग बड़े आदरसे भगवान् सूर्यको भी दीपदान करते हैं, वैसे ही अनेक प्रकारकी भेंटोंसे प्रजाने श्रीकृष्णका स्वागत किया ॥ ४ ॥

प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा । पितरं सर्वसुहृदमवितारमिवार्भकाः ॥ ५ ॥

नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम् ।
परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परः प्रभुः ॥ ६ ॥
भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता ।
त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥ ७ ॥
अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किमूचुरिति तदाह । नताः स्मेति । विरिंचो ब्रह्मा । वैरिंच्याः सनकादयः । इह संसारे परं क्षेममिच्छतां परायणं परमं शरणम् । कुतः । परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र प्रभुर्न भवेत् ॥ ६ ॥ ❁ ❁ अतो भवायोद्भवाय नोऽस्माकं त्वं भव । हे विश्वभावन कृतिनः कृतार्था बभूविम जाता वयम् ॥ ७ ॥ ❁ ❁ कृतार्थत्वमेवाहुः–अहो भवता वयं सनाथाः स्म । यद्यस्मात्तव रूपं पश्येम । त्रैविष्टपानामपि दूरे दर्शनं यस्य तत् । देवानामपि दुर्लभदर्शनमित्यर्थः । प्रेम्णा यत्स्मितं तद्युक्तं स्निग्धं निरीक्षणं यस्मिंस्तदाननं यस्मिंस्तद्रूपम् । सर्वेषु चांगेषु सौभगं यस्मिंस्तत् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

हे नाथेति । त्वमस्माकं सर्वाभीष्टदानसमर्थोसीति भावः ॥ ६ ॥ ❁ ❁ यतस्त्वमेव सर्वप्रभुरतो हेतोः ते विश्वभावनेति सर्वविश्वपालकस्यास्मद्रक्षणे तव न कश्चित्परिश्रमोऽस्तीति भावः ॥ ७ ॥ ❁ ❁ इत्यर्थ इति । तत्कार्यार्थमवतीर्णत्वाद्दर्शनाभावो न व्याख्येय इति भावः ॥ ८ ॥

---

१. प्रा० पा०—सुहृदं सवितार. । २. प्रा० पा०—परः प्रभो । ३. प्रा० पा०—मातातमसुहृत्पिता पतिः ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

उद्भवाय उत्तमस्थिताय यद्वा सन्ततं निजदर्शनसमृद्धये इत्यर्थः ॥ ७-८ ॥

श्रीमद्वीरराघवव्याख्या

प्रीत्या उत्फुल्लानि विकसितानि मुखांबुजानि यासां तथाभूताः प्रजा हर्षेण गद्गदया कुंठितया गिरा तं प्रोचुः। रविदृष्टांताभिप्रेतं व्यंजयन् विशिनष्टि–निजलाभेन नित्यनिरवधिकस्वानन्दानुभवलाभेन पूर्णकाममवाप्तसमस्तकाममात्मारामं स्वानुभवैकनिष्ठं बल्यनपेक्षमिति भावः। के कमिवोचुः सर्वेषु पुत्रेषु सुहृदं सौहार्दयुक्तमवितारं रक्षितारं पितरमर्भकाः शिशवः पुत्रा इव ॥ ५ ॥ ❀ ❀ उक्तमेवाहुः नता इति चतुर्भिः। हे नाथ! तवांघ्रिपंकजं प्रति नताः स्म। कथंभूतं विरंचिना ब्रह्मणा वैरिंच्यैः सनकादिभिः सुरेन्द्रैरिंद्रादिभिश्च वंदितं नमस्कृतम् इह क्षेमं निःश्रेयसमिच्छतां परमुत्कृष्टं परायणं क्षेमसाधनभूतं, परमिति क्षेमविशेषणं वा, यत्र पदारविंदे परेषां ब्रह्मादीनामपि प्रभुस्तानपि वशीकुर्वन् कालोऽपि न प्रभवेन्न समर्थो भवेत् यत्र त्वयि विषये परः प्रभुः कालोऽपि न प्रभवेत्तस्य तव पदाम्बुजमिति वान्वयः। "सर्वस्य वशी सर्वस्येशानः तस्येशानः न तस्येशे कश्चने"त्यादिश्रुत्यर्थोऽत्रानुसंधेयः ॥ ६ ॥ ❀ ❀ हे विश्वभावन! विश्वं जगत् भावयति सत्तास्थितिप्रवृत्तिमत्करोतीति तथाभूतस्त्वं नोऽस्माकं भवायाभ्युदयाय भव "माता पिता भ्राता निवासः शरणं सुहृद् गतिर्नारायणः तं दैवतानां परमं च दैवतं पतिं पतीनां परमं परस्तात्। न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगम्। यो वै वेदांश्च प्रहिणोति" इत्यादिश्रुत्यर्थमनुसन्धायोचुः त्वमेव मातेत्यादि। लौकिकस्तु बन्धुरेक एव, त्वं तु सर्वविधबंधुरिति भावः। यस्य तवानुवृत्त्या सेवया वयं कृतिनः कृतकृत्या बभूविम। स त्वं नो भवाय भवेत्यन्वयः ॥ ७ ॥ ❀ ❀ अहो इति। भवता त्वया वयमहो सनाथाः स्म इति यत्सुखप्रदनाथवंतो बभूविम। कुतः यद्यस्मात्तव रूपं पश्येम कथंभूतं त्रैविष्टपानां देवानामपि दूरदर्शनं दुर्दर्शनं प्रेमपूर्वकस्मितस्निग्धे सानुरागे ईक्षणे च यस्मिंस्तदाननं यस्य तत्सौभगं सुन्दरम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे नाथ! तवांघ्रिपंकजं सदा नताः स्मेत्यन्वयः, कीदृशं विरिंचिवैरिंचसुरेंद्रैश्चतुर्मुखशंकरदेवेन्द्रैर्वंदितम्, इह चेतनराशिमध्ये परं क्षेमं मोक्षमिच्छतां भक्तानां परायणम् उत्तमाश्रयं परस्य हिरण्यगर्भस्य प्रभुः समर्थो जननमरणधर्मोपादकोऽपि कालः यत्र पदारविन्दे भक्तानां न प्रभवेज्जरादिधर्मोपादको न भवति। परेषां भक्तानां प्रभुः कालः यत्र भक्तानां न प्रभवेद्तस्त्वाघ्रिपंकजस्थे न समर्थ इति किं वाच्यमिति वा ॥ ६ ॥ ❀ ❀ हे विश्वभावन! जगतः सत्तादिप्रद त्वं नोऽस्माकं भवाय ज्ञानभक्त्यादिकल्याणाय भव, यस्य तवानुवृत्त्या सेवालक्षणेनानुवर्तनेन कृतिनः सुकृतिनो बभूविम। स त्वं नः परमं दैवतम् इष्टदेवता नः सद्गुरुर्निर्दोषगुरुस्थानीयश्च त्वमेव माताऽभीष्टदानेनात्मना त्वयैव नास्मत्प्रयत्नेन सुहृत् पिता पतिः स्वामी ॥ ७ ॥ ❀ ❀ हे नाथ! तव रूपं पश्येमेति यद्यस्माद्वयं भवता सनाथाः स्म नाथवंतो भवाम अहो अस्मद्भाग्यमित्यन्वयः। कथंभूतं त्रैविष्टपानामिंद्रादिदेवानामपि दूरतः चिरकालतः चीर्णतपःसंपत्त्या दृश्यत इति दूरदर्शनम्। अनेन दर्शनसाधनसामग्र्येवाभिप्रेता न तु दर्शनाभावः। तैः प्रार्थितत्वेन तत्कार्यार्थमवतीर्णत्वाद्दर्शनतारतम्याभिप्रायो वा, प्रेम्णा स्मितं स्निग्धं निरीक्षणं मधुरावलोकनं ताभ्यां युक्तमाननं यस्मिंस्तत्तथोक्तं सर्वं पूर्णं सौभगं सौंदर्यं यस्मिंस्तत्तथोक्तम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं स्तुत्यादिकमपि तत्प्रीणनतामर्हतीत्याह प्रीत्येति। पितरमर्भका इवेति दृष्टांतः। तस्य प्रीतावसाधारणं गुणविशेषमप्याह सर्वसुहृदमिति सर्वसुहृत्त्वे लिङ्गम् अवितारमिति। तथाहि तादृशस्य राज्ञः स्वसम्बन्धाभिमानिप्रीतिमत्पुत्रादिषु प्रीतिविशेषादयो यथा दृश्यंते तथा तेषु तं प्रीतिमन्तमित्यर्थः। एवं कल्पतरुदृष्टान्तेऽपि भगवतो भक्तविषयिका कृपा यथार्थमेवोपपद्यते ये खलु सहजतत्प्रीतिमेवात्मनि प्रार्थयमाना भजन्ते तेभ्यस्तद्दानयाथार्थ्यस्यावश्यकत्वात्। तस्मादस्त्येवानन्दस्वरूपस्यापि भक्तावानन्दोल्लास इति ॥ ५-६ ॥ ❀ ❀ भवाय सन्ततनिजदर्शनसमृद्धये ॥ ७-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वैरिंच्याः सनकादयः। परं परायणं परमाश्रयम्। यत्र अंघ्रिपंकजे परेषां ब्रह्मादीनां प्रभुरपि कालो न प्रभवेत् ॥ ६ ॥ ❀ ❀ भवाय क्षेमाय। "भवः क्षेमे च संसारे" इति मेदिनी ॥ ७ ॥ ❀ ❀ त्रैविष्टपानां देवानाम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

पितरमर्भका बाला इव सर्वसुहृदमवितारं रक्षकं श्रीकृष्णमूचुः प्रजा इति प्रंकरणादन्वेति ॥ ५ ॥ ❀ ❀ तदेवाह नताः स्मेति पंचभिः। इह परं क्षेममिच्छतां परायणं सर्वोत्कृष्टं शरणं ते पदारविन्दं नताः स्मः, यत्र यस्मिन् शरणे कृते सति शरणा-

पन्नेषु परेषामशरणापन्नानां प्रभुरपि कालो न प्रभवेत् । कथमनुवर्ततां 'भवभयं तव यद्भ्रूकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयमि'ति वक्ष्यमाणात् ॥ ६ ॥ ❀ ❀ हे विश्वभावन ! जगदुत्पादकस्यावृत्त्योपासनया कृतिनः कृतार्था बभूविम जाता वयं स त्वं नो भवायोद्भवाय भव ॥ ७ ॥ ❀ ❀ कृतित्वं वर्णयंति अहो इति । वयं भवता सनाथाः स्म, यतः अहो त्रैविष्टपानामपि दूरे दर्शनं यस्य तस्य तव रूपं पश्येम, कथंभूतं रूपं प्रेमपूर्वस्मितमन्दहसितं स्निग्धं सरसं निरीक्षणं च यस्मिन् तदाननं यस्मिन् तत् सर्वं संपूर्णं सौभगं यस्मिन् तत् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

स्तोत्रपक्षे समागतस्य क्लिष्टत्वमाशंक्य तथात्वे स्तोत्रासंभवात् तन्निवृत्त्यर्थमुक्तमात्मारामादिस्नेहमुद्रिरंत्यः स्तोत्रं कुर्वन्तीति तासां स्वरूपमनुवदति भगवत्प्रीत्यर्थं प्रीत्युत्फुल्लमुखा इति । प्रीत्याहि उत्फुल्लमुखत्वं हि लोकसिद्धं येषां यद्विरहेण मुकुलता मुखस्य तेषां तद्दर्शनेन उत्फुल्लता तदाहि मुखे स्थितं माधुर्यं प्रकटीभवति ततस्तत्सहितानि वाक्यानि मिष्टानि भवंति । किं च हर्षगद्गदया गिरेति । स्तोत्रं हि गानात्मकं वेदे प्रसिद्धं स्थिरमनसां कर्मोपयोगि न तु भक्तानां प्रेम्णा ससंभ्रमचित्तानाम् । अतो गिरेत्युक्तं तत्रापि यो हर्षः आनंदोद्गमः तेन गद्गदया गद्गदशब्दोऽनुकरणशब्दः शब्दे तथा ध्वनियुक्तत्वं वदति गद-व्यक्तायां वाचीति गद-धातुर्निरुक्तः । आदरं बोधयति धाष्टर्यदोषं वारयति पितरमिति, यथा प्रोषिते पितरि समागते महाराजाधिराजेति तत्पुत्रा उद्गच्छंति अत्र तथा विकलत्वं नास्तीति दृष्टांतांतरमाह सर्वसुहृदमिति । सर्वसुहृद्गौः "गौर्वाव सर्वस्य मित्रमि"ति श्रुतेः, तां यथा तद्वत्सः संध्यापर्यंतं क्षुधितः स्वजातिशब्दं कुर्वन्नुपधावति । अत्रापि दीनतमत्वाभावात् दृष्टांतांतरमाह अवितारमिति । यथा अरण्यादौ भयस्थाने चोरादिभिर्मार्यमाणा अर्भकाः पूर्वपरिचितं रक्षणसमर्थं दृष्ट्वोद्गच्छंति वदंति च स्वखेदं तद्वदित्यर्थः ॥ ५ ॥ ❀ ❀ सर्वाः प्रजाश्चतुर्विधाः स्त्रीपुंभेदेन । प्रथमं द्विविधाः पुरुषास्त्रिविधाः ज्ञानवैषयिकभक्तभेदेन तत्राद्यानां ज्ञानिनां वचनमाह । नताः स्मेति-ते अंघ्रिपंकजं नताः स्म 'नमो नम इत्येतावत्सदुपशिक्षितमि'ति सिद्धांतात् भगवति दृष्टे नमनमेव कर्त्तव्यं सर्वज्ञत्वेऽपि भिन्न-तया स्थापितत्वात् "किमासनं ते गरुडासनाये"ति वाक्यात् । ननु किं फलार्थं नमनं तत्राह हे नाथ ! हे पालक भर्त्तः ! स्वत एव सर्वकामानां पूरकत्वात् नित्य एवायं नमस्कारः न काम्य इति ज्ञापयति सदेति । प्रवेशोऽपि नापेक्ष्यत इत्यभिप्रायः । ननु कथं ब्रह्मलोकादिगमनफलपरित्यागेन सदा नमनेनैवं स्थितिः प्रार्थ्यते तत्राह–विरिंचिवैरंच्येति विरिंचिर्ब्रह्मा वैरंच्यो महादेवः सुरा देवाः अन्ये इंद्रश्च एभिश्चतुर्भिरुत्कृष्टैरपि वंदितं तत्र गतानामप्येतदेव कार्यं ततो दूरापेक्षया निकट एव स्थित्वा वरम् । ननु यद्यपि ज्ञानिनामैहिकामुष्मिकफलविरागो भवति भगवत्सायुज्यं च भक्तिरसान्नापेक्षते, तथापि भगवता सहगमनसामर्थ्यं स्थानच्युति-हेतुप्रतिबंधाभावः स्थितज्ञानादिसंरक्षणं च अपेक्ष्यत एव । ततस्तदर्थं कथं न नमनमित्याशंक्याह परायणमिति । इह संसारप्रवाहे परं क्षेममिच्छतां यत्परायणमाश्रयभूतं रक्षकमिति यावत्, चरणारविंदमेव सर्वसाधकं क्षेममिहेच्छतामिति पदत्रयेणोक्तं तत्र क्षेम-पदेन न ज्ञानादिरक्षा इहेति स्थानादिप्रच्युतिः, इच्छतामिति सह गमनेच्छायां तत्सामर्थ्यदानं च यद्यपि वाक्यार्थो न भवति तथापि पदार्थमनुदेहस्य कालप्रवाहजातत्वान्नमनसिद्ध्यर्थमपि देहस्थितिः काम्येति चेत्तत्राह न यत्र काल इति । यत्र नमने स्थितो भगवति नम्रत्वात् भगवत्सेवकस्य न कालस्य प्रभवः परः वासुदेवः प्रभुर्यस्य ॥ ६ ॥ ❀ ❀ विषयपरा आहुः भवाय नस्त्वमिति । हे विश्वभावन ! सर्वानेव विषयसंबंधेन भावयसि अधिकान् करोषि अतोऽस्माकमपि उद्भवाय भव नस्त्वमिति वा हेतुः । यतोऽ-स्माकं त्वं स्वामी सर्वप्रार्थनायामनुचितत्वाभावाय भगवति षट्कर्मत्वं प्रतिपादयति मातेत्यादि त्वमेव । नो माता त्वद्गर्भादेव निर्गतत्वात् उदरस्थानां जीवानामेव बहिः सृष्टेः ब्रह्मांडाख्ये चोदरे सांप्रतमपि स्थितिः लोकप्रतीत्या तासां जरायु-वत्पोषकवद्वा । अतस्त्वमेव माता अतो रोदनेन बलाद्वा त्वमेव प्रार्थनीयः । किंच अथ सुहृत् । अविवेकदशायां यथा त्वं प्रार्थनीयः । अथ तदनंतरं विवेकदशायामपि त्वमेव प्रार्थ्यः । यतस्त्वं सुहृन्मित्रं "द्वा सुपर्णा सयुजा सखायावि"ति श्रुतेः सुष्ठुहृदयः सुहृन् एकस्मिन्नेव हृदये उभयोः स्थितत्वात् सुष्ठु हरतीति वा सर्वफलभोक्तृत्वात् । अत एवं युक्त्यापि भगवानेव प्रार्थनीयः सर्वफलदातृत्वात् । किंच असेवाद्यपरावेन दण्डनेऽपि भगवानेव प्रार्थनीय इत्याह पतिरिति । न ह्यन्या गतिरस्माकमस्ति यथा स्वयमनलंकृतोऽपि भार्यामलंकरोति बहुभिराभरणैः, अलंकृते तु संदेह एव नास्ति, अतस्त्वं महानस्मानलंकुर्वित्यर्थः । किंच त्वमस्माकं पिता अतो जन्ममात्रेणैव वयं ते दायभागिनः । जगत्कर्तृत्वेनैव भगवतः श्रवणात् एवमैहिकसर्वफलदानार्थं भगवद्रूप-मुक्त्वा पारलौकिकसर्वदानार्थमाह त्वं गुरुर्नः । परमं च दैवतमिति प्रक्रियान्तरत्वात् । पुनस्त्वमिति ग्रहणं परलोकस्तु तदर्थ-विहितकर्मज्ञानभक्तिभिर्भवति । तत्र अज्ञानादन्यथा ज्ञानान्मोहनार्थं वा पाखंडादिबहवो मार्गा जाताः । तत्र सन्मार्गवक्ता दुर्लभः । संदेहेन विश्वासाभावाच्च त्वं त्वव्ययं ज्ञानमिति वचनात् त्वमेव गुरुः । जीवास्त्वसद्गुरवः । त्वमेव सद्गुरुरिति अतो गुरुशुश्रूषयेति वाक्यात् । स्वसेवामेव शिक्षयेत्यर्थः । एवं कर्मणां फलमिति पक्षे गुरुसेवयैव कृतार्थता देवताफलदानपक्षे "फलमत उपपत्तेः ॥ ३।२।३७ ॥" इति ब्रह्मदानपक्षेऽपि त्वमेव फलदातेत्यर्थः । परमं च दैवतमिति देवतादानपक्षेऽपि नांगदेवताः फलं प्रयच्छन्ति । किंतु सहकारिणो भवन्ति । अतः परममित्युक्तं मध्ये चकारात् ब्रह्मपक्षेऽपि परमात्मा देवता भवानेव देवानां त्वदंशत्वात् ब्रह्मरूपत्वाच्च । अतस्त्वाराधनमेवास्माकं कर्त्तव्यम् अन्यत्तु स्वत एव भविष्यतीत्याह । यस्यानुवृत्त्येति कृतमस्यास्तीति

कृती भगवदनुवृत्तिव्यतिरेकेण कृतेनान्येन धर्मादिना न कृतित्वं भवति "धर्मः क्षरति कीर्त्तनात्, कृतघ्ने नास्ति निष्कृति"रिति। अतस्त्वानुवृत्त्यर्थं तथा संपादय यथा कृतिनो बभूविमेत्यर्थः॥ ७॥ ❀ ❀ भक्ता आहुः अहो इति। अहो इत्याश्चर्य्ये, वयं त्वद्भक्त्यैव पूर्णमनोरथाः। इदानीं त्वमपि मिलित इत्याश्चर्यं, अथवा अल्पा या भक्तिः कृतास्माभिः फलं महज्जातमित्याश्चर्यं भवता वयं सनाथाः। 'नारायणपराः सर्वे न कुतश्चन बिभ्यती'ति न्यायेन अपेक्षाभावात्। नियन्ता नापेक्ष्यते भगवतस्तु भक्तिविषयत्वेनैव ग्रहणम्। एवमपि भगवानेव स्वयमुद्यम्य फलदानादिकं करोति चेत् तदा ते सनाथा भवन्ति। तत्त्वाश्चर्यकरं भवति। इह तु भवता वयं सनाथाः। स्वयमागत्य सर्वकार्यं निर्वाहयसीत्यर्थः। किंच इदं पुनः सर्वजनीनगुप्ततया भक्तानां भगवान् स्वयं किंचित् करोतीति श्रूयते। अत्र तु साक्षात् सर्वजनीनं सर्वं करोतीति स्मेत्युक्तम्। किञ्च यद्वयं सर्वदा पश्येम न हि सर्वदा भगवान् सर्वैः साक्षात् क्रियते सात्त्विकैः। क्रियत इति यदि तदाह त्रैविष्टपानामपि दूरदर्शनमिति। त्रिविष्टपे स्वर्गे भवास्तिष्ठंतीति वा तत्र भूमिस्थानां दर्शनशंकैव नास्ति। किञ्च कदाचिद्देवानामापदायां कृपया भगवत्साक्षात्कारो भवति तथापि नैवंरूपं पश्यन्तीत्यभिप्रायेणाह प्रेमस्मितस्निग्धनिरीक्षणमिति। प्रेमस्मितेन च स्निग्धं यन्निरीक्षणं तत्सहितमाननं यस्येति "ये यथा मां प्रपद्यन्ते" इति प्रेमभक्तेषु भगवतोऽपि प्रेमज्ञानेन मुक्ताः कालान्तरे स्वसेवार्थं भक्ताः क्रियन्ते तेन मोहिता इव एत इति स्मितम्। अथवा भगवद्भक्तेषु मोहनमल्पं भगवद्गुणरूपयोरेव मोहो नान्यत्रेति मायारूपहासस्य मन्दत्वं अनेन दया निरूपिता भवति। प्रेमदयाभ्यां हि सर्वं वस्तु स्निग्धं भवति, मूर्त्तानां तैलादिः स्नेहहेतुः अमूर्त्तानां स्नेहः। हृदये आत्मसम्बद्धानां तेन भगवद्दृष्टिः। उभाभ्यामतिस्निग्धा प्रथमतो भगवद्दर्शनमेव दुर्लभं तत्रापि सम्मुखतया तत्रापि भगवद्दृष्टिः स्वस्मिन् पतति। तदा हि भगवद्दृष्ट्या गृहीतः भगवति प्रविष्ट एव तत्रापि स्निग्धया दृष्ट्या गृहीतः। कदापि न विश्लेषमेति तत्र हेतुपूर्वकं स्निग्धया हेतुष्वपि दया सापि स्नेहेन सम्बद्धा नास्मादन्यः। कश्चिदुत्कर्षोऽस्ति भगवदीयानां भगवति। किंच एतादृशमपि रूपं सर्वसौभाग्ययुक्तं भवति स्वापेक्षितसर्वविषयभूतम्। एतावता नात्र विषयत्यागोऽप्यपेक्षितः॥ ८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नताः स्मेत्यत्र। तत्रार्थानामिति। पुरुषेष्वाद्यानाम्। वाक्यार्थो न भवतीति समभिव्याहारलभ्यो न भवतीत्यर्थः। अत्र नमनमात्रवाक्यं स्त्रीणाम्। तत्पूर्वकं सर्वं ज्ञानिनामिति बोध्यम्॥ ६॥ ❀ ❀ भवायेत्यत्र। उद्भवायेति। तथा च 'भवाय भवे' ति प्रार्थनमेव वक्तॄणां विषयित्वगमकं ज्ञेयमित्यर्थः। जरायुवदित्यादि। तथा च त्वन्निष्ठमातृतानिर्वाहकत्वात् गौण्या वा तस्या मातृत्वमिति न तया तव मातृत्वहानिरित्यर्थः। तदर्थविहितेति भगवदर्थविहितेत्यर्थः। तत्रेति कर्मज्ञानभक्तिषु। मोहनार्थं वेति वाशब्द एवकारार्थः 'छागो वा प्रायदर्शना' दित्यादिवत्। तत्रेति। तेषु पाषण्डादिमार्गेषु जातेषु तर्हि भगवति कथं तद्गुरुत्वमित्यत आहुः त्वमित्यादि। इदमष्टमस्कन्धसमाप्तौ मत्स्यावतारस्तुतौ सत्यव्रतवाक्यम्—'जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः। त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पद'मिति। तस्मात्तथेत्यर्थः। गुरुशुश्रूषयेति वाक्यादिति। 'नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा। तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथे'ति वाक्ये साधनान्तरापेक्षया तस्या एव स्वतोषसाधनत्वकथनात्तथेत्यर्थः। अङ्गदेवता इति। अङ्गकर्मदेवता आवरणदेवताश्च। कृतीति अनष्टसत्कर्मा। 'धर्मः क्षरती' त्यादि। ययातिवत् कथञ्चित् कथनेपि नाशसम्भवात्। तत्र प्रायश्चित्ताभावबोधनेन पुनः कर्मान्तरेण पुनस्तत्सम्पादनाशक्तेश्चेत्यर्थः। द्वितीयवाक्यस्थस्य कृतशब्दस्योपकारवाचकत्वपक्षेपि 'न ते मामङ्ग जानन्ती'ति वाक्येन भगवत्कृतोपकाराज्ञाने तद्धननात्तथेति बोध्यम्। बभूविमेति। प्रार्थनायां लिट् छान्दसः॥ ७॥ ❀ ❀ अहो सनाथा इत्यत्र। अपेक्षाभावान्नियन्ता नापेक्ष्यते इति। सापेक्षो ह्यधिकं गृह्णातीति तादृशवारणार्थं नियन्त्रपेक्षा, भगवत्पराणां त्वपेक्षाया एवाभावात् ग्रहणं दूरापेतमतो नापेक्ष्यते। तथा च तदभावादेव तेषां सर्वतो भयाभाव इति भावः। त इति भगवत्पराः। वयमिति अल्पभक्तियुक्ताः। इदं पुनरिति आश्चर्यान्तरमित्यर्थः। पुनस्ततोन्यदाश्चर्यान्तरमाहुः किञ्चेत्यादि। अनेनेति स्मितपदेन। उभाभ्यामिति उक्तव्यञ्जिताभ्यां स्नेहदयाभ्याम्॥ ८॥

श्रीगिरिधरकृता बालप्रबोधिनी

तासां स्तुतौ दृष्टान्तमाह—पितरमागतमर्भका बाला इवेति। ननु बालानां पितृस्तुतौ रक्षकत्वं हेतुरस्ति, अत्र को वा हेतुरिति चेदत्रापि स एव हेतुरित्याशयेनाह—अवितारमिति। ननु भगवत आत्मारामत्वात् कथं रक्षकत्वं सम्भवतीत्याशङ्क्याह—सर्वसुहृदमिति। आत्मारामत्वेऽपि सर्वेषु दयायुक्तत्वेन रक्षकत्वं सम्भवतीति भावः॥ ५॥ ❀ ❀ किमूचुरित्यपेक्षायां तदुक्तमेव दर्शयति—नताः स्मेति चतुर्भिः। हे नाथ जगद्रक्षक ते तवाङ्घ्रिपङ्कजं चरणकमलं वयं नताः स्म। तन्नमस्कारे हेतुमाहुः—परमिति, सर्वत उत्कृष्टमित्यर्थः। कथं तस्य सर्वोत्कृष्टत्वमित्यपेक्षायामाहुः—विरिञ्चो ब्रह्मा वैरिञ्च्याः सनकादयः सुरा देवास्तेषामिन्द्रश्च

तैर्वन्दितं नमस्कृतमिति। तन्नमस्कारे किं फलमित्यपेक्षायां संसारदुःखनिवृत्तिपूर्वकं परमानन्दावाप्तिरेवेत्याशयेनाहुः– परायणमिति, इह संसारे क्षेमं अविनाशिसुखं इच्छतां परायणं सर्वत उत्कृष्टमाश्रयमित्यर्थः। कुतः ? यतो यत्र यस्मिन्नाश्रिते सति परेषां ब्रह्मादीनामपि प्रभुर्नियन्ता कालो न प्रभवेन्न समर्थो भवेदित्यर्थः॥ ६॥ ❀ ❀ एवं नमस्कृत्य स्वाभ्युदयादि प्रार्थयन्ते–भवायेति। हे विश्वभावनेति सम्बोधनेन विश्वपालकस्य तवास्मत्प्रार्थितसम्पादनं सुकरमुचितं चैवेति सूचयन्ति। नोऽस्माकं भवाय चतुर्विधपुरुषार्थसम्पादनाय त्वं भव। ननु तत्तु यथायथं पित्रादयः प्रयच्छन्तीत्याशङ्क्याहुः–अथेति। अस्माकं मात्रादिरूपस्त्वमेव। सुहृत् मित्रम्। तथापि तत्तत्साधनं विना तत्फलं कथं स्यादित्याशङ्क्याहुः–यस्येति, यस्य तवानुवृत्त्या सेवयैव वयं कृतिनः स्वनुष्ठितसर्वसाधना बभूविम जाताः स्म इत्यर्थः॥ ७॥ ❀ ❀ एवं सकामाः प्रार्थितवन्तो निष्कामाः परमप्रेमवन्तस्तु भवद्दर्शनेनैव वयं कृतार्था इत्याहुः– अहो इति द्वयेन। भवता त्वया वयमहो सनाथाः स्म अतिशयेन पूर्णमनोरथा बभूविम। कुत इत्यपेक्षायामाहुः–यदिति, यत् यस्मात् तव रूपं पश्येम। दर्शनमात्रेण कथं सर्वमनोरथपूर्णतेत्याशङ्क्य त्वां पश्यतां प्रेमवतां मनोरथान्तरासम्भवादित्याशयेन रूपस्य दुर्लभत्वं दर्शयति–त्रैविष्टपानां देवानामपि दूरे दर्शनं यस्य तथाभूतम्। ननु देवा अपि भगवद्रूपं पश्यन्त्येव, कथं तस्य तद्दुर्दर्शनत्वमित्याशङ्क्य सत्यं पश्यन्ति परन्तु नेदृग्रूपमित्याशयेन पुना रूपं विशिषन्ति–प्रेमपूर्वकं स्मितं स्निग्धे सानुरागे निरीक्षणे नेत्रे च यस्मिंस्तथाभूतमाननं यस्मिंस्तत्। सर्वेषु चाङ्गेषु सौभगं सौन्दर्यं यस्मिंस्तत्॥ ८॥

हिन्दी अनुवाद

सबके मुख-कमल प्रेमसे खिल उठे। वे हर्षगद्गद वाणीसे सबके सुहृद् और संरक्षक भगवान् श्रीकृष्णकी ठीक वैसे ही स्तुति करने लगे, जैसे बालक अपने पितासे अपनी तोतली बोलीमें बातें करते हैं॥ ५॥ ❀ ❀ 'स्वामिन्! हम आपके उन चरण-कमलोंको सदा-सर्वदा प्रणाम करते हैं, जिनकी वन्दना ब्रह्मा, शङ्कर और इन्द्रतक करते हैं, जो इस संसारमें परम कल्याण चाहनेवालोंके लिए सर्वोत्तम आश्रय हैं, जिनकी शरण ले लेनेपर परम समर्थ काल भी एक बालतक बाँका नहीं कर सकता॥ ६॥ ❀ ❀ विश्वभावन! आप ही हमारे माता, सुहृद्, स्वामी और पिता हैं; आप ही हमारे सद्गुरु और परम आराध्यदेव हैं। आपके चरणोंकी सेवासे हम कृतार्थ हो रहे हैं। आप ही हमारा कल्याण करें॥ ७॥ ❀ ❀ अहा! हम आपको पाकर सनाथ हो गये। क्योंकि आपके सर्वसौन्दर्यसार अनुपम रूपका हम दर्शन करते रहते हैं। कितना सुन्दर मुख है! प्रेमपूर्ण मुसकानसे स्निग्ध चितवन! यह दर्शन तो देवताओंके लिये भी दुर्लभ है॥ ८॥

यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया।
तत्राब्दकोटिप्रतिमः क्षणो भवेद् रविं विनाक्ष्णोरिव नस्तवाच्युत[१]॥ ९॥
इति चोदीरिता वाचः प्रजानां भक्तवत्सलः। शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीम्[२]॥ १०॥
मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः। आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव॥ ११॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

अर्भका इव सकरुणमाहुः। यर्हि यदा। भो अम्बुजाक्ष। नो भवानिति पाठे न इत्यनादरे षष्ठी। अस्माननादृत्यापससारापहाय जगाम। कुरून्हस्तिनापुरम्। मधून्मथुराम् वा तत्र तदा रविं विना आंध्यादक्ष्णोर्यथैकोऽपि क्षणोऽब्दकोटिप्रतिमो भवेदेवं तव नस्त्वदीयानामस्माकमपीत्यर्थः॥ ९॥ ❀ ❀ इति चैवंविधा अन्याश्चोच्चारिता वाचः शृण्वन् दृष्ट्या साभिनन्दनावलोकेनानुग्रहं कुर्वन् पुरीं द्वारकां प्राविशत्॥ १०॥ ❀ ❀ तां द्वारकां स्तौति पंचभिः। स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षिताम्॥ ११॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे अम्बुजाक्षेति। तव दर्शनमस्माकं शान्तिजनकं संसारतापहारकत्वादिति भावः। मथुराशब्देन तन्मण्डलं ग्राह्यं नन्दव्रजमित्यर्थः। न तु मथुरायां तदानीं तस्य सुहृदः सन्ति। तत्र योगप्रभावेण नीत्वा सर्वजनं हरिरिह सर्वशब्दात् तेन आयास्ये इति दौत्यकैरिति। "ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति यद्भगवता प्रतिश्रुतं व्रजं प्रत्यागमनं तत्पाद्मादिषु पुराणेषु स्पष्टं सदपि श्रीभागवते त्वस्मिन्नत्रैव ज्ञापितमिति ध्येयम्॥ ९–१०॥ ❀ ❀ मध्वादयः सप्त यदूनामवांतरभेदाः। भोगवती नागानां पुरी॥ ११॥

---

१. प्राचीने पाठे नवमश्लोकानन्तरमेकः श्लोकोऽधिकः, सोऽयम्—'कथं वयं नाथ चिरोषिते त्वयि प्रसन्नदृष्ट्याखिलतापशोषणम्। जीवाम ते सुन्दरहासशोभितमपश्यमाना वदनं मनोहरम्॥' २. प्रा० पा०—पुरम्।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मधूनित्यस्यार्थः मथुरामण्डलमिति। अनेन सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैरिति (१० स्कंध ३९ अ ३५ श्लो०) यदक्रूरयाने वक्ष्यति तस्य सङ्गतिरूह्या इति बुधरञ्जनी ॥ ९-१८ ॥

श्रीमद्वीरराघवव्याख्या

भो अम्बुजाक्ष! भवान् सुहृद्दिदृक्षया यदा कुरून्मधून्वा जनपदानपससार जगाम तत्र तदा हे अच्युत! नोऽस्माकं त्वामपश्यतां रवेर्विना रविं विनाक्ष्णोः क्षणकालोऽब्दकोटिप्रतिमः संवत्सरकोटिकालतुल्यो भवेत् ॥ ९-१० ॥ ❀ ❀ इतीत्थं प्रजानामुदीरिता वाचः शृण्वानो भक्तवत्सलो भगवानवलोकनेनानुग्रहं वितन्वन्पुरं प्राविशत्पूःशब्दोऽयं न तु पुरशब्दः ॥ ११ ॥ कथंभूतां पुरं मध्वादयो यादवान्तरविशेषाः तैरात्मतुल्यबलैः कृष्णतुल्यबलैर्नागैः काद्रवेयादिभिर्भोगवतीमिव गुप्तां रक्षितां, भोगवतीं नाम नागानां पुरी ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे अंबुजाक्ष! अथ यर्हि यदा माधवः श्रीवल्लभो भवान् मधुविषयेभ्यः सुहृदां पांडवानां दिदृक्षया दर्शनेच्छया कुरून् कुरुविषयान् कुरुविषयेभ्यो मधून्वांचति गच्छति हे अच्युत! तत्र तस्यामवस्थायां तवेति षष्ठी द्वितीयार्थे, त्वां विना कुरूणां मधूनां च नोऽस्माकं यथा रविं विनाक्ष्णां तथैकः क्षणः कालः अब्दकोटिप्रतिमः वर्षकोटिसमानः स्यादित्येकान्वयः ॥ ९ ॥ ❀ ❀ दृष्ट्या दर्शनेन शृण्वानः शृण्वन् चशब्दाद्वंदिमागधादीनां गिरः ॥ १० ॥ ❀ ❀ गुप्तां रक्षितां, भोगवती नाम नागानां पुरी, आत्मतुल्यबलैः परस्परमात्मना तुल्यवीर्यैरधिकदृष्टांतन्यायो वा ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

यर्हीति। यदा यदेत्यर्थः, तत्र तदा तदा क्षणोऽपि अब्दकोटिप्रतिमो भवति। तथा रविं विना अक्ष्णोर्या दृश्यान्ध्यावस्था तादृश्यपि भवतीत्यर्थः। नो भवानिति पाठे-नोऽस्माकं स्वामी यो भवान् स त्वमित्यर्थः। तत्र मधून् मथुरां वेति व्याख्याय तदानीं तन्मण्डले सुहृदो व्रजस्था एव प्रकटा इति तैरप्यभिमतम्। तत्र योगप्रभावेण नीत्वा सर्वजनं हरिरित्यत्र सर्वशब्दप्रयोगात्। 'बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः। सुहृद्दिदृक्षुरुत्कंठः प्रययौ नन्दगोकुलमि'त्यत्र प्रसिद्धत्वात् ॥ ९-२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

भो अम्बुजाक्ष। नो भवानिति पाठे नोऽस्मान् अनादृत्य। कुरून् हस्तिनापुरम्। मधून् मथुरामण्डलं नन्दव्रजमित्यर्थः, न तु मथुरापुरीं तदानीं तस्यां सुहृदामभावात्। तत्र योगप्रभावेण नीत्वा सर्वजनं हरिरित्यत्र सर्वशब्दात्। तेन आयास्य इति दौत्यकैरिति ज्ञातीन् वो द्रष्टुमेष्याम इत्यादि यद्भगवता उक्तं व्रजं प्रत्यागमनं तत् पाद्मादिपुराणेषु स्पष्टं सदपि (तदपि) श्री भागवते त्वस्मिन्नेव ज्ञापितम्। तदा नस्तव त्वदीयानामस्माकम् ॥ ९-१० ॥ ❀ ❀ दृष्ट्या तान् प्रति दृष्टिक्षेपेण ॥ ११ ॥ ❀ ❀ तां द्वारकां वर्णयति पञ्चभिः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कुरून्मधून्वा देशान् अपससार जगाम तव तावकानां नोऽस्माकम् ॥ ९ ॥ ❀ ❀ किंच ते वदनमपश्यमानाः कथं जीवेम ॥ १०-११ ॥ ❀ ❀ पुरीं वर्णयति मध्विति पंचभिः। गुप्तां पालिताम् ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

विषयरूपोऽपि स्वयमेव जात इति। तस्मादेतन्महदाश्चर्यमिति स्त्रियः स्त्रीप्रधानाश्चाहुः। एतान् भगवंतं न वा गुणान् जानंति अपि तु स्वानुभवं तज्ज्ञवस्तुसामर्थ्यात् प्रजायते तदनुवदंति यर्ह्यंबुजाक्षेति। हे कमलनयन! दृष्ट्यैवामृतं पाययतीति तथा सम्बोधनं, नः अस्माननादृत्य किमेताः मत्स्वरूपाविदः अतस्तत्र गमिष्यामि यत्र मां जानंतीति इत्यपससार भवानिति गमनसमयाय वयं संमुखतया न दृष्टाः कुरून् हस्तिनापुरदेशान् अथ तत एव प्रक्रियांतरेण भीष्मादिदर्शनार्थं कुरुक्षेत्रं तत्र तस्मिन् समये एकः क्षणः अब्दकोटिप्रतिमो भवेत्। यातनास्वेवं श्रूयते क्षणमध्ये वर्षसहस्रं कृत्वा भोजयंतीति तथैवास्माकमनुभवः। ननु सुखेऽपि श्रूयते क्षणमात्रे कल्पभोगान् भुंक्त इति। तत्राह रवेर्विनाक्ष्णामिव विषयसंस्कारकत्वेन अधिष्ठातृत्वेन च यदा रविः प्रविशति तदा विषयग्रहणसमर्थं चक्षुर्भवति तथास्माकमंतर्बहिश्चेत् भगवान् तिष्ठति तदा सर्वकार्यक्षमत्वम्, अयमर्थः-यथा योगिनः समाधौ प्रत्याहारेण चक्षुर्निमीलनं कृत्वा देवतां स्ववशे स्थापयित्वा तिष्ठंति, क्षणे क्षणे मूर्छिता भवाम इति। जीवनं त्वच्युत इति संबोधनात् यथा त्वमच्युतः तथा वयमप्यस्मिन्नंशे जाता इति द्योतितम् ॥ ९-१० ॥ ❀ ❀ एवं चतुर्विधानां वाक्यं भगवान् सत्यत्वेन समर्थयित्वा सत्यवाक्यश्रवणमङ्गलमनुभूय पुरं प्राविशदित्याह इतीति। चकारादन्यान्यपि बहुविधानि प्रजानामिति

नात्र वचने दोषग्रहणं तदा भगवतो महती कृपा उद्गतेति बोधयति भक्तवत्सल इति । यथा गौर्वत्सं दृष्ट्वा व्याकुला भवति तथा भगवान् जात इत्यर्थः, दृष्ट्यानुग्रहं वितन्वन् तथा तासु दृष्टिः पतिता भगवान् ज्ञानादिसंपन्नः यथावत्तासां हृदये प्रविष्टः येन सुखिता न किंचिदुक्तवत्यः । ततः पुरीं द्वारकां प्रकर्षेण महता संभ्रमेण अविशत् ॥ ११ ॥ ❀ ❀ प्रविष्टां तां पुरीं वर्णयति पंचभिः मधुभोजेति । विद्या यथा तथा पुरीति विज्ञापयितुम् "अधिष्ठाने बहिश्चोर्ध्वमंतश्चांतर्विभेदतः । सुंदरं भगवद्योग्यस्थानं नान्यत्कथंचन" तत्राधिष्ठातृन् वर्णयति मधुभोजेति । षड्विधा यादवाः-मधवो भोजाः दशार्हैर्ष्वर्हा कुकुरा अंधका वृष्णयश्च तैर्गुप्तां सत्त्वरूपमंतःकरणं यदा षडिंद्रियैः संरक्ष्यते तदा भगवत्प्रवेशयोग्यं भवति, इंद्रियैर्विषयाकृष्टैरिति वाक्यात् तैरेव नाश-श्रवणात् पुरी च गृहभेदे नश्यति आत्मतुल्यबलैः यथा आत्मदेहः तत्तुल्यं बलं येषाम् आत्मा वायुर्वा "अहं मनुरभवं सूर्यश्च"ति सूक्ते अहंदेवताया वायुभेदत्वात् मंडलमध्यत्वादस्य सूत्रस्य बलं सेना वा भगवत्तुल्यसेना सर्वप्रवेशेन दृष्टांतः नागैरिति-शरीरमिव वा नागैः प्राणैः भोगवती तनुः प्राणायामैः संरक्षितां योगितनुं यथा भगवान् प्रविशति भोगवती गंगाप्रवाहो वा । रक्षा भावे देवैरपि सा ह्रियेत ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

मधुभोजेत्यत्र । पञ्चसु श्लोकेषु वर्णनीयानर्थान् संगृह्णन्ति अधिष्ठानेत्यादि । एतेषां सुन्दरमित्यादिनान्वयः । अङ्गविभेदत इति । अङ्गानां द्वारादीनां विभेदतः अलङ्कारकृतवैशेष्यादित्यर्थः । अधिष्ठातृन् वर्णयतीति । विद्यातुल्यत्वं व्युत्पादयितुं सा यथाधिष्ठातृशुद्धौ स्थिरा भवति, तथेयमिति बोधनाय तान् वर्णयतीत्यर्थः । षड्विधैर्गुप्तत्वकथने कथं स्थैर्ये तौल्यमित्यतो व्युत्पादयन्ति सत्त्वेत्यादि । पुरी चेत्यादि । तथा चेन्द्रियैर्गोपने यथा सत्त्वरूपान्तःकरणस्यानाशः, तथा तैर्गोपने पुर्या इति तथेत्यर्थः । ननु देहं विनेन्द्रियैर्न सत्त्वरक्षेत्यतस्तत्कार्यकारित्वं विशेषणेन बोधयन्ति यथात्मा देह इत्यादि । नन्वत्र गुणतो रक्षा विवक्षिता, सा तु नैवं सिद्ध्यतीति पक्षान्तरमाहुः वायुर्वेति । आत्मपदेन कथं वायुलाभ इत्यत उपपादयन्ति अहं मनुरित्यादि । तथा च यद्यपि बृहदारण्यकेऽस्याः श्रुतेर्वायुपरत्वं न सिद्ध्यति, तथापि बह्वृचसंहितायां सिद्ध्यतीत्यर्थः । ननु वायुरत्र कौष्ठ्यो विवक्षितः, स त्वेवमपि नायातीत्यत आहुः मण्डलेत्यादि । तथा च मण्डलानां दशत्वेन 'दश वै पशुषु प्राणा' इति श्रुत्युक्तप्राणसमानसङ्ख्याकत्वात्तया तल्लाभादर्थोपपत्तिरित्यर्थः । अत्र व्याख्यानक्लेशादात्मपदस्य भगवत्परत्वमङ्गीकृत्य पक्षान्तरमाहुः बलं सेना वेत्यादि । तथा च यथान्तर्यामिणा सन्मार्गप्रेरणेनान्तःकरणसत्त्वं रक्ष्यते, तथैतैर्गृहरक्षणेन पुरीति तथेत्यर्थः । सर्वप्रवेशेन इति । सर्वेषां यादवानां पुर्यां प्रविश्य स्थितौ । तथा च यथा वासुकिप्रभृतिभिः प्रविश्य स्वपुरी भोगवत्याख्या रक्ष्यते, तथेत्यर्थः । अस्मिन् दृष्टान्ते प्राणा नायान्तीति पक्षान्तरमाहुः शरीरमित्यादि । तेषां पुर्या भोगवतीति नाम तथा न प्रसिद्धमिति पक्षान्तरमाहुः गङ्गाप्रवाहो वेति ॥ ११ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कृपादृष्ट्यैव संसारतापहारकत्वं सूचयन्तः सम्बोधयन्ति-भो अम्बुजाक्षेति । न च्यवन्ति भक्ता यस्येति व्युत्पत्तिमङ्गीकृत्य भक्तवात्सल्यं सूचयन्तः सम्बोधयन्ति-हे अच्युतेति । भो इत्यत्र नो इति पाठे अनादरे षष्ठी । अस्माननादृत्येत्यर्थः । यर्हि भवान् सुहृदां युधिष्ठिरादीनां नन्दादीनां च दिदृक्षया कुरून् हस्तिनापुरादीन् अथवा मधून् मथुरामण्डलस्थान् व्रजादीन् अपससार जगाम, तत्र तदा त्वामपश्यतां तव नस्त्वदीयानामस्माकं क्षणः क्षणकालोऽपि अब्दकोटिप्रतिमः संवत्सरकोटिकालतुल्योऽभवदित्यन्वयः । तत्र दृष्टान्तमाह-रविमिति । यथा रविं विनाऽऽन्ध्यादक्ष्णोः क्षणमपि अब्दकोटितुल्यो भवति तथेत्यर्थः ॥ ९ ॥ ❀ ❀ एवं जनानां स्तुतिं निरूप्य भगवतः पुरीप्रवेशमाह-इति चेति । इत्येवम्भूताः-चकारादन्याश्च प्रजानां वाचो भक्तवत्सलः श्रीकृष्णः शृण्वानः शृण्वन् दृष्ट्या साभिनन्दनावलोकनेन तेष्वनुग्रहं वितन्वन् प्रकुर्वन् पुरीं द्वारकां प्राविशदित्यन्वयः ॥ १० ॥ ❀ ❀ द्वारकां वर्णयति पञ्चभिः । मध्वादयो यादवावान्तरविशेषास्तैरात्मनः श्रीकृष्णस्य तुल्यं बलं सेना येषां तैर्गुप्तां सुरक्षिताम् । तत्र दृष्टान्तमाह-नागैरिति, भोगवती नागानां पुरी यथा नागैः काद्रवेयादिभिः सुरक्षिताऽस्ति तथेत्यर्थः ॥ ११ ॥

हिन्दी अनुवाद

कमलनयन श्रीकृष्ण ! जब आप अपने बन्धु-बान्धवोंसे मिलनेके लिये हस्तिनापुर अथवा मथुरा (व्रजमण्डल) चले जाते हैं, तब आपके बिना हमारा एक-एक क्षण कोटि-कोटि वर्षोंके समान लंबा हो जाता है । आपके बिना हमारी दशा वैसी हो जाती है, जैसी सूर्यके बिना आँखोंकी ॥ ९ ॥ ❀ ❀ भक्तवत्सल भगवान् श्रीकृष्ण प्रजाके मुखसे ऐसे वचन सुनते हुए और अपनी कृपामयी दृष्टिसे उनपर अनुग्रहकी वृष्टि करते हुए द्वारकामें प्रविष्ट हुए ॥ १० ॥ ❀ ❀ जैसे नाग अपनी नगरी भोगवती (पातालपुरी) की रक्षा करते हैं, वैसे ही भगवान् की वह द्वारकापुरी भी मधु, भोज, दशार्ह, अर्ह, कुकुर, अन्धक और वृष्णिवंशी यादवोंसे, जिनके पराक्रमकी तुलना और किसीसे भी नहीं की जा सकती, सुरक्षित थी ॥ ११ ॥

सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः । उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥ १२ ॥
गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् । चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् ॥ १३ ॥
सम्मार्जितमहामार्गरथ्यापणकचत्वराम् । सिक्तां गंधजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १४ ॥
द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः । अलंकृतां पूर्णकुम्भैर्बलिभिर्धूप[1]दीपकैः ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सर्वेष्वृतुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षा लताश्रमा लतामंडपाश्च येषु तैरुद्यानादिभिर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां ताम् । उद्यानं फलप्रधानम् । उपवनं पुष्पप्रधानम् । आरामः क्रीडार्थं वनम् ॥ १२ ॥ ❀ ❀ गोपुरं पुरद्वारम् । द्वारं गृहद्वारम् । कृतानि कौतुकेनोत्सवेन तोरणानि यस्यां ताम् । गरुडादिचिह्नांकिता ध्वजाः जयप्रदयंत्रांकिताः पताकाः । चित्राणां ध्वजपताकानामग्रैरन्तः प्रतिहत आतपो यस्यां ताम् ॥ १३ ॥ ❀ ❀ संमार्जितानि निःसारितरजस्कानि महामार्गादीनि यस्यां ताम् । महामार्गाः राजमार्गाः । रथ्या इतरमार्गाः । आपणकाः पण्यवीथयः । चत्वराण्यंगणानि । फलादिभिरुप्तामवकीर्णान् ॥ १४-१५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ऋतुषु वसन्तादिषु पुण्यवृक्षा अश्वत्थाम्रादयः । पुण्यलता विष्णुक्रान्ताद्यास्तासामाश्रमैर्निवासैः ॥ १२ ॥ ❀ ❀ "तोरणोऽस्त्री बहिर्द्वारं तथा वन्दनमालिका" इति कोशात् ॥ १३-१४ ॥ ❀ ❀ बलिभिः पूजासाधनैर्धूपाद्यैः ॥ १५-१७ ॥

श्रीमद्वीरराघवव्याख्या

सर्वर्तुषु । युगपन्निर्वृत्तेषु यः सर्वो विभवः फलपुष्पादिसमृद्धिर्येषां ते पुण्या वृक्षाश्च मन्दारपारिजातादयः लतास्तदधस्तना आश्रमाश्च येषु तैरुद्यानोपवनारामैः वृतानां पद्माकराणां श्रीः शोभा यस्याम्, तत्रोद्यानं राज्ञां क्रीडास्थानम्, उपवनं वनसमीपस्थम्, आरामः कृतकः ॥ १३ ॥ ❀ ❀ गोपुराकाराणां मार्गेषु कृतानि कौतुकानि मंगलार्थानि तोरणानि जम्ब्वाम्रपल्लवादिनिर्मितानि यस्यां चित्राणां ध्वजानां पताकानां चाग्रैरन्तः प्रतिहतो निरस्त आतपो यस्याम् ॥ १४ ॥ ❀ ❀ संमार्जिता महामार्गादयो यस्यां, महामार्गा राजवीथयः रथ्या उपवीथयः आपणकानि वणिजां क्रयविक्रयादिगृहाणि चत्वराणि गजाश्वादिशालाः । गन्धोदकैः सिक्तां फलादिभिरुप्तां विकीर्णाम् ॥ १५ ॥ ❀ ❀ प्रतिद्वारं दध्यादिभिर्जलपूर्णकुम्भैः पूजाद्रव्यैः धूपैर्दीपैश्चालंकृताम् एवंभूतां पुरमिति पूर्वेणान्वयः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वसंतादिसर्वर्तूनां सर्वविभवैः पूर्णपुष्पसंपत्तिभिः पुण्यैर्वृक्षैरश्वत्थादिभिर्न्यग्रोधरुहाभिः कल्पवल्लीभिर्वा । आश्रमैरुपवेश्यस्थानैः । उद्यानैः प्रमदाभिः सह राज्ञां क्रीडाभूमिभिः उपवनैर्नगरान्नातिदूरे आरोपितवृक्षसमुदायैरारामैः पुराद्बहिः रथ्योभयपार्श्वे रोपितवृक्षसमुदायैरेतैः सर्वर्तुसर्वविभवादिभिः धृता पद्माकराणां श्रीः शोभा यया सा तथोक्ता ताम् ॥ १३ ॥ ❀ ❀ गोपुरेषु पुरद्वारेषु अन्यद्वारेषु मार्गेषु कृतानि कौतुकतोरणानि उत्सवतोरणानि यस्यां सा तथा ताम् । अन्तः प्रतिहतः निवारितः आतपः यस्यां सा तथा ताम् ॥ १४ ॥ ❀ ❀ संमार्जितानि विधूतोपस्कराणि महामार्गरथ्यापणकचत्वराणि यस्यां सा तथा तां, महामार्गो राजमार्गः, रथ्या रथमार्गः । आपणकानि पण्यविक्रयस्थानानि, चत्वरं चतुष्पथं, गंधजलैश्चंदनादितोयैः सिक्तां प्रोक्षितां क्रमुकफलपुष्पाक्षतांकुरैरुप्ताम् ॥ १५ ॥ ❀ ❀ गृहाणां द्वारि दध्यक्षतफलेक्षुभिः पूर्णकुंभैर्बलिभिः पूजासाधनैर्धूपदीपादिकैरलंकृताम् एवंविधां पुरीं प्राविशदिति पूर्वेणान्वयः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वेषु ऋतुषु सर्वविभवाः पुष्पादिसम्पदो येषां ते पुण्यरूपा वृक्षाश्च लताश्च आश्रमाश्च तैः । उद्यानं फलप्रधानम् उपवनं पुष्पप्रधानम् आरामः क्रीडार्थं वनं तैर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां ताम् ॥ १३ ॥ ❀ ❀ गोपुरं पुरद्वारम् । द्वारं गृहद्वारम् । अन्तर्मध्ये मध्ये प्रतिहत आतपः सूर्यज्वाला यस्याम् ॥ १४ ॥ ❀ ❀ महामार्गा राजमार्गाः । रथ्या इतरमार्गाः । आपणकाः पण्यवीथयः । चत्वराणि अङ्गणानि । उप्ताम् अवकीर्णाम् ॥ १५-१६ ॥

---

१. प्रा० पा०—दीपधूपकैः ।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वर्तुसर्वविभवाः पुण्यवृक्षलताश्रमाः येषु तैः उद्यानोपवनारामैः वृताः ये पद्माकरास्तैः श्रीः शोभा यस्यास्ताम् । तत्रोद्यानं सर्वसाधारणम् उपवनं पृथक्पृथक् संगृहीतम् आरामः क्रीडावनम् ॥ १३ ॥ ❀ ❀ गोपुराणि पुरद्वाराणि द्वाराणि वेश्मद्वाराणि मार्गाः प्रसिद्धाः तेषु यथायोग्यं कृतानि कौतुकेन हर्षेण पुष्पपल्लववस्त्रमौक्तिकादिमयानि तोरणानि यस्यां ताम्, चित्राणां त्रिकोणाद्याकाराणां गरुडादिचिह्नांकितानां ध्वजानां दीर्घाकाराणां पताकानां चाग्रैरंतः प्रतिहत आतपो यस्यां ताम् ॥ १४ ॥ ❀ ❀ सम्यङ्मार्जितानि महामार्गादीनि यस्यां ताम् । तत्र महामार्गाः राजवीथयः रथ्या उपवीथयः आपणकाः पण्यवीथयः चत्वराण्यंगणानि । गन्धजलैः सिक्तां फलादिभिरुप्तां विकीर्णाम् ॥ १५ ॥ ❀ ❀ बलिभिः पूजार्थैर्वस्तुभिः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवमधिष्ठातृभिः सुरक्षितत्वमुक्त्वा बहिः शोभातिशयमाह सर्वर्त्विति । सर्वेषु ऋतुषु सर्वे भावाः पुष्पादिसंपत्तयो येषाम् एतादृशाश्च धर्मजनकाश्च ते च ते वृक्षाः लताश्च तेषामाश्रयो येषु ते उद्यानादयः । उद्यानं पुष्पप्रधानवाटिका उपवनं फलप्रधानम् आरामाः क्रीडास्थानानि, उद्यानानि उपवनानि आरामाश्च तैः सर्वतः आवृतां पद्माकराणां श्रियो यस्यां सा पद्माकरश्रीः ॥ १३ ॥ ❀ ❀ उपरि शोभातिशयमाह गोपुरेति । पुरबहिर्द्वारं गोपुरम् अन्यानि द्वाराणि मार्गा हट्टमध्योपरिभागाः, तेषु कृतानि कौतुकतोरणानि यस्यां विचित्राः ध्वजाः पताकाश्च गरुडादिचिह्निता ध्वजाः जययंत्रांकिताः पताकाः तेषामग्रैर्लंबायमानविचित्रपटैः अन्तः प्रतिहत आतपो यस्यां मध्याह्ने ध्वजादेः छायाजनकत्वात् अग्रैरित्युक्तं, यद्यप्यंतस्तापो निवार्यते तथापि शोभा बहिरेव फलांशेन तूत्तरांगम् ॥ १४ ॥ ❀ ❀ अन्तः शोभामाह संमार्जितेति । महामार्गो राजमार्गः रथ्यान्या आपणः पण्यवीथी चत्वरमङ्गणम् एतानि संमार्जितानि यस्यां गंधजलैः सिक्तां संनिधानात् पूर्वोक्तस्थानेषु अविशेषेण सर्वत्र वा मंगलार्थं फलानि पुष्पाणि अक्षताः यवांकुराश्च तैरुप्ता आम्रफलसहितशाखा भूमौ निखाता तथा पुष्पगुच्छानि तथा अक्षताः ऊर्ध्वं निखाताः तथैवांकुराश्च तत उप्तामित्युक्तम् ॥ १५ ॥ ❀ ❀ अंगालंकारमाह द्वारि द्वारीति । चकारात् सभाहट्टनगरद्वारेष्वपि गृहग्रहणं मार्गस्थादृष्टतया अलंकाराभावात् शंकानिवृत्त्यर्थं दधिपात्रस्थाः अक्षता राशीभूताः फलानि च अतो न पुनरुक्तिः । इक्षवश्च उभयतः स्थापिताः तैः पूर्णकुंभादिभिश्च अलंकृताम् । द्वारि द्वारि अलंकृतामिति बोधितम् । उत्सवार्थमेवं करणं सूर्यवत् सर्वत्र भगवत्तेजसो व्याप्तत्वाद्वा अंतरस्थैरपि भगवानंतर्नीत इति ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

गोपुरेत्यत्र । उत्तराङ्गमिति उत्तरश्लोके वक्ष्यमाणा यान्तःशोभा तदङ्गमिदं विशेषणमित्यर्थः ॥ १३ ॥ ❀ ❀ द्वारि द्वारीत्यत्र । अन्तर्नीत इति । स्वहृदये गृहे नीत इत्यर्थः ॥ १५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

सर्वेषु ऋतुषु सर्वे विभवाः पुष्पफलादिसम्पदो येषां ते पुण्याः पुण्यजनका वृक्षाः आम्राम्लकादयो लताश्रमा लतामण्डपाश्च येषु तैः । उद्यानादिभिर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां ताम् । तत्र उद्यानं फलप्रधानं, उपवनं पुष्पप्रधानम्, आरामः क्रीडास्थानम् ॥ १२ ॥ ❀ ❀ गोपुरं पुरद्वारं गृहद्वारं मार्गाः प्रसिद्धाः तेषु कृतानि निर्मितानि कौतुकेनोत्सवेन मङ्गलार्थं तोरणानि आम्रपल्लवमयानि यस्यां ताम् । गरुडादिचिह्नाङ्किताः ध्वजाः, जयप्रदयन्त्राङ्किताः पताकाः, चित्राणां ध्वजपताकानामग्रैरन्तः प्रतिहतः आतपो यस्यां ताम् ॥ १३ ॥ ❀ ❀ सम्मार्जितानि निस्सारितरजस्कानि महामार्गादीनि यस्यां ताम् । महामार्गाः राजमार्गाः, रथ्या इतरमार्गाः, आपणकाः पण्यवीथयः, चत्वराणि अङ्गणानि । पुष्पादिसुगन्धजलैर्मार्गादिषु सिक्ताम् । मङ्गलार्थं फलादिभिरुप्तामवकीर्णां व्याप्ताम् ॥ १४ ॥ ❀ ❀ प्रतिद्वारं दध्यादिभिः जलपूर्णकुम्भैर्बलिभिः नैवेद्यद्रव्यैर्धूपदीपैश्चालङ्कृताम् । एवम्भूतां पुरीं प्राविशदिति पूर्वत्रैवान्वयः ॥ १५ ॥

हिन्दी अनुवाद

वह पुरी समस्त ऋतुओंके सम्पूर्ण वैभवसे सम्पन्न एवं पवित्र वृक्षों एवं लताओंके कुञ्जोंसे युक्त थी । स्थान-स्थानपर फलोंसे पूर्ण उद्यान, पुष्पवाटिकाएँ एवं क्रीडावन थे । बीच-बीचमें कमलयुक्त सरोवर नगरीकी शोभा बढ़ा रहे थे ॥ १२ ॥ ❀ ❀ नगरके फाटकों, महलके दरवाजों और सड़कोंपर भगवान्के स्वागतार्थ बंदनवारें लगायी गयी थीं, चारों ओर चित्र-विचित्र ध्वजा-पताकाएँ फहरा रही थीं, जिनसे उन स्थानोंपर घामका कोई प्रभाव नहीं पड़ता था ॥ १३ ॥ ❀ ❀ उसके राजमार्ग, अन्यान्य सड़कें, बाजार और चौक झाड़-बुहारकर सुगन्धित जलसे सींच दिये गये थे और भगवान्के स्वागतके लिये बरसाये हुए फल-फूल, अक्षत-अङ्कुर चारों ओर बिखरे हुए थे ॥ १४ ॥ ❀ ❀ घरोंकेप्रत्येक द्वारपर दही, अक्षत, फल, ईख, जलसे भरे हुए कलश, उपहारकी वस्तुएँ और धूप-दीप आदि सजा दिये गये थे ॥ १५ ॥

निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः। अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ १६ ॥
प्रद्युम्नश्चारुदेष्णश्च साम्बो¹ जाम्बवतीसुतः। प्रहर्षवेगोच्छशितशयनासनभोजनाः ॥ १७ ॥
वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः² ससुमङ्गलैः। शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः।
प्रत्युज्जग्मू³ रथैर्हृष्टा⁴: प्रणयागतसाध्वसाः ॥ १८ ॥
वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः। लसत्कुंडलनि⁵र्भातकपोलवदनश्रियः ॥ १९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रेष्ठमन्तरात्मानमायान्तं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥ १६ ॥ ❁ ❁ प्रहर्षवेगेनोच्छशितान्युल्लंघितानि शयनादीनि यैस्ते। शश प्लुतगतौ ॥ १७ ॥ ❁ ❁ वारणेन्द्रं मंगलार्थं पुरतः कृत्वा। ससुमंगलैः सुमंगलं पुष्पादि तद्युक्तपाणिभिः। ब्रह्मघोषो मन्त्रपाठः ॥ १८ ॥ ❁ ❁ प्रणयेन स्नेहेनागतं साध्वसं संभ्रमो येषां ते। वारमुख्या नटादयश्च प्रत्युज्जग्मुः। लसत्कुंडलैर्निर्भातानि यानि कपोलानि तैर्वदनेषु श्रीः शोभा यासां ताः। वारमुख्या नर्तक्यो वेश्या इति यावत् ॥ १९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वारणेन्द्रं करधृतमुक्तापूर्णघटमिति शेषः। "मुक्तापूर्णघटो यस्य शुण्डादण्डे धृतः करी। स कार्योऽग्रे मंगलार्थं वेदज्ञैर्ब्राह्मणैः सह ॥" इति शकुनशास्त्रात् ॥ १८ ॥ ❁ ❁ वारे द्वारे मुखं यासां कृतसंकेतनरागमनविलोकनार्थं ता वारमुख्याः। पृषोदरादित्वान्मुखस्य मुख्यादेशः। तस्य श्रीकृष्णस्य दर्शने उत्सुकाः सोत्कंठाः तत्पराः। "तत्परे प्रसितोत्सुकौ" इत्यमरः ॥ १९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

संभ्रमस्त्वरा इत्यर्थः ॥ १९-२० ॥

श्रीमद्वीरराघवव्याख्या

प्रेष्ठं निरतिशयप्रियतमं भगवंतमायांतं निशम्याकर्ण्य महामना वसुदेवः अक्रूरादयश्च ॥ १७ ॥ ❁ ❁ प्रकृष्टो हर्षस्तस्य वेगेन औत्कण्ठ्येन उच्छ्वसितानि व्युदस्तानि त्यक्तानि इति यावत् शयनादीनि यैस्तथाभूताः संतः ॥ १८ ॥ ❁ ❁ वारणेन्द्रं गजेन्द्रं पुरस्कृत्य पुरोवस्थाप्य ससुमंगलैः स्वस्तिवाचनसहितैः ब्राह्मणानां शंखानां तूर्याणां च निनादेन ब्रह्मघोषेण च सहादृताः आदरयुक्ताः ॥ १९ ॥ ❁ ❁ हे ब्रह्मन्! प्रणयेन हेतुना आगतं साध्वसम्भयं येषां तथाभूताः संतो रथैर्गमनसाधनैः प्रत्युज्जग्मुरभिमुखं ययुः तथा वारमुख्याः गणिकाश्रेष्ठाश्च लसद्भ्यां कुण्डलाभ्यां निर्भातौ कपोलौ येषु तेषां वदनानां श्रीः शोभा यासां तास्तद्दिदृक्षया यानैर्गमनसाधनैः प्रत्युज्जग्मुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली।

वसुदेवाक्रूरादय आयांतं कृष्णं निशम्य श्रुत्वा करधृतमौक्तिकपूर्णघटं वारणेंद्रं पुरस्कृत्य पुरस्कृतैर्ब्राह्मणैश्च सार्धं रथैः साधनैः प्रत्युज्जग्मुरित्यन्वयः। किंविशिष्टाः प्रहर्षवेगेन उच्छशितानि सहसा परित्यक्तानि शयनासनभोजनानि यैस्ते तथा तूर्यं काहलं ब्रह्मघोषः वेदघोषः सत्यासन्नेऽपि मां नाभिजग्मुरिति हार्दो भावः साध्वसं प्रणयेनागतं साध्वसं येषां ते पौरा वारमुख्याः नर्तकीषु गणिकासु श्रेष्ठाः तस्य कृष्णस्य दर्शनोत्कंठावत्यः चलद्भिः कुंडलैर्निर्भातानि कपोलानि येषां तानि तथोक्तानि चलत्कुंडलनिर्भातकपोलानि च तानि वदनानि चलत्कुंडलनिर्भातकपोलवदनानि तेषां श्रीः यासां तास्तथोक्ताः ॥ १७-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रेष्ठमायान्तं निशम्येति बन्दिपर्यन्तमनुवर्त्तनीयम्। अतः प्रेष्ठपदं कचिद् योगार्थेन कचन रूढ्या च सङ्गमनीयम् ॥ १७ ॥ प्रहर्षवेगेन उच्छशितानि उल्लङ्घितानि शयनादीनि यैः। शश प्लुतगतौ ॥ १८ ॥ ❁ ❁ साध्वसं सम्भ्रमः ॥ १९-२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बंधूनां पौराणां च भगवति स्नेहाधिक्यमाह निशम्येति सार्धैः पंचभिः ॥ १७ ॥ ❁ ❁ प्रहर्षवेगेनोच्छशितान्युल्लंघितानि शयनादीनि यैस्ते। शश प्लुतगतौ धातुः ॥ १८ ॥ ❁ ❁ वारणेंद्रं गजराजम् ॥ १९ ॥ ❁ ❁ प्रणयागतसाध्वसाः स्नेहागतसंभ्रमाः लसद्भिः शोभितैः कुंडलैर्निर्भातानि कपोलानि तैर्वदनेषु श्रीः शोभा यासां ताः ॥ २०-२१ ॥

---

१. प्रा० पा०—चारुसाम्बगदादयः। २. प्रा० पा०—ब्राह्मणैस्तु सुमङ्गलैः। ३. प्रा० पा०—प्रतिजग्मू। ४. प्रा० पा०—रथैर्ब्रह्मन्।
५. प्रा० पा०—निर्भिन्न०।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

येषां दर्शनार्थं स्वयं गच्छेत् ते पित्रादयः स्वयमागता इति संबंधज्ञानापेक्षया भगवद्ध्यानमेव तेषां बलिष्ठमिति प्रदर्शयन्नाह निशम्येति सार्धैस्त्रिभिः । अत एव संबंधिशब्दमनुक्त्वा प्रेष्ठमित्युक्तं मनसो महत्त्वं देहादिविस्मरणपूर्वकभगवद्ग्रहणात् उग्रसेनो राजा भक्तेर्मुख्यत्वान्न लौकिकमहत्त्वं क्रमनियामकं सर्वत्र चकारः सद्वर्गग्राहकः । ननु रामस्य कथमुद्गमनं जामात्रादिवधं कृत्वा भगवतः समागतत्वात् इत्याशंक्य नायं रामः प्राकृतः, भगवत इव अस्याप्यद्भुत एव पराक्रमः, कौरवेषु स्नेहं ख्यापयन् गदायुद्धादिकमपि शिक्षयन् तदिष्टमिव वदन् दुर्योधनादीन् स्वयमेव मारितवानिति युद्धबोधनात् प्रतीकारादवगम्यते । लोकप्रतीतिस्त्वन्यथा तद्युक्तमेवेत्याह अद्भुतविक्रम इति ॥ १७ ॥ ❀ ❀ जांबवतीसुत इति स्त्रीणामिवालंकरणमस्य प्रियमिति तत्र तादृशालंकारेण गच्छति तत्र व्यासस्तं तथा विशिनष्टि "पिता संबंधिनश्चैव पुत्राश्च परिकीर्तिताः ।" भगवदागमनं श्रुत्वा यो हर्षो जातः तस्य वेगेन जातेन महाप्रयत्नेन उच्छ्वसिताः श्वासवत् त्यक्ताः गमनव्यतिरिक्ता अन्योत्सवस्थाः शयनासनभोजनादयः तमःसत्त्वरजोरूपा यैः ॥ १८ ॥ ❀ ❀ मङ्गलार्थं वारणेंद्रं हस्तिश्रेष्ठं पुरस्कृत्य सुमंगलसहितैर्ब्राह्मणैरिति यथैतेषां तदेकमनस्त्वं तथा ब्राह्मणानामपि विज्ञापितं भगवता सह सर्ववाद्यानां समागमनेऽपि तूरीशंखयोर्मंगलार्थं सम्मुखतया नयनं न तु स्वमहत्त्वख्यापकं, मंगलघोषो वेदपाठः चकारात् मङ्गलाष्टकादि, आदृताः पूर्वमेव सम्मुखतया गताः ॥ १९ ॥ ❀ ❀ रथयानैर्गमने हेतुः प्रणयेन आगतसाध्वसाः प्रणयेन आगतं साध्वसं भयादि येषां लौकिकपदार्थसहितभगवत्स्मरणे हर्षः पश्चात्केवलस्मरणे साध्वसमिति विवेकः । केवलवैषयिकसुखजनका अंतर्बहिर्भेदेन ये जीवाः ते तु भगवंतं प्रत्युज्जग्मुरित्याह वारमुख्याश्चेति । वराणां समूहो वारं तदेव मुख्यं यासामिति वेश्याः, चकारादन्या अपि प्रागुक्ताः । तास्ववांतरभेदोऽस्तीति ख्यापनाय शतश इत्युक्तं, तासामपि यानानि, यानानां प्रयोजनमाह तद्दर्शनोत्सुका इति बाहुल्येन नगरयानानि स्वस्थानस्थितावपि दर्शनं संभवति तथाप्युत्सुकतया गमनं पुरस्कारार्थं मंगलत्वख्यापनाय तासामलंकारवर्णनं लसत्कुण्डलेति, लसत्कुण्डलैः नितरां भाताः कपोलयुक्तवदनानां श्रियो यासाम् ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

प्रणयागतसाध्वसा इत्यत्र । लौकिकपदार्थपदेन सम्बन्ध उच्यते ॥ १८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

प्रेष्ठं प्रियतमं श्रीकृष्णमायान्तं निशम्य श्रुत्वा हृष्टा वसुदेवादयो रथैः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः । महामनाः हर्षितमना इति सर्वेषां विशेषणम् । उग्रसेनोऽपि भक्तिप्रधानत्वाद्राजाभिमानं त्यक्त्वाऽग्रे गतः ॥ १६ ॥ ❀ ❀ तेषां हर्षाधिक्यं दर्शयति–प्रहर्षवेगोच्छ्वसितानि उल्लङ्घितानि त्यक्तानि शयनादीनि यैस्ते ॥ १७ ॥ ❀ ❀ मङ्गलार्थं वारणेन्द्रं हस्तिश्रेष्ठं पुरस्कृत्य पुरतः कृत्वा । ससुमङ्गलैः सुमङ्गलपुष्पादियुक्तपाणिभिर्ब्राह्मणैः शङ्खादिनादेन ब्रह्मघोषेण मन्त्रपाठेन च सह । एवं करणे हेतुमाह–आदृताः सादराः । प्रणयेन स्नेहेनागतं साध्वसं भ्रमो येषां ते तथा ॥ १८ ॥ ❀ ❀ वारमुख्या नटादयश्च प्रत्युज्जग्मुरिति द्वयोरपि पूर्वेणैवान्वयः । लसत्कुण्डलैर्निर्भातानि यानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः । वारमुख्याः वराणां समूहो वारं तदेव मुख्यं प्रधानं यासां ता नर्तक्यो वेश्याः । तासामग्रतो गमने हेतुमाह–तस्य भगवतो दर्शने उत्सुकमुत्साहो यासां ताः । शतशोऽनन्ताः ॥ १९ ॥

हिन्दी अनुवाद

उदारशिरोमणि वसुदेव, अक्रूर, उग्रसेन, अद्भुत पराक्रम बलराम, प्रद्युम्न, चारुदेष्ण और जाम्बवतीनन्दन साम्बने जब यह सुना कि हमारे प्रियतम भगवान् श्रीकृष्ण आ रहे हैं, तब उनके मनमें इतना आनन्द उमड़ा कि उन लोगोंने अपने सभी आवश्यक कार्य–सोना, बैठना और भोजन आदि छोड़ दिये । प्रेमके आवेगसे उनका हृदय उछलने लगा । वे मङ्गल शकुनके लिये एक गजराजको आगे करके स्वस्त्ययन-पाठ करते हुए और माङ्गलिक सामग्रियोंसे सुसज्जित ब्राह्मणोंको साथ लेकर चले । शङ्ख और तुरही आदि बाजे बजने लगे और वेदध्वनि होने लगी । वे सब हर्षित होकर रथोंपर सवार हुए और बड़ी आदरबुद्धिसे भगवान्‌की अगवानी करने चले ॥ १६-१८ ॥ ❀ ❀ साथ ही भगवान् श्रीकृष्णके दर्शनके लिये उत्सुक सैकड़ों श्रेष्ठ वाराङ्गनाएँ, जिनके मुख कपोलोंपर चमचमाते हुए कुण्डलोंकी कान्ति पड़नेसे बड़े सुन्दर दीखते थे, पालकियोंपर चढ़कर भगवान्‌की अगवानीके लिये चलीं ॥ १९ ॥

नटनर्तकगन्धर्वाः सूतमागधवन्दिनः । गायन्ति[1] चोत्तमश्लोकचरितान्यद्भुतानि च ॥ २० ॥
भगवांस्तत्र बंधूनां पौराणामनुवर्तिनाम् । यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥ २१ ॥

---

१. प्रा० पा०—गायन्त उत्तमश्लोक० ।

प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः । आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥ २२ ॥
स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि । आशीर्भिर्युज्यमानोऽन्यैर्बन्दिभिश्चाविशत्पुरम् ॥ २३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अद्भुतानि चेति चकारस्य बन्दिनश्चेत्यन्वयः । नटा नवरसाभिनयचतुराः । तालाद्यनुसारेण नृत्यन्तो नर्तकाः । गंधर्वा गायकाः । "सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥" ते सर्वे गायन्ति चेत्यन्वयः । उत्तमश्लोकस्याद्भुतानि चरित्राणि भक्तवात्सल्यादीनि ॥ २० ॥ ❀ ❀ यथाविधि यैः सह यथोचितं तैस्तथा समागमं कृत्वा सर्वेषां मानमादधे कृतवानित्यर्थः ॥ २१ ॥ ❀ ❀ तदाह प्रह्वेति । प्रह्वं प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः । आश्वास्याभयं दत्त्वा । श्वपाकानभिव्याप्य वरैरभीष्टदानैश्च मानं कृतवान् ॥ २२ ॥ ❀ ❀ अन्यैश्च बन्दिभिश्च ॥ २३ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

नवरसाः शृङ्गारवीरादयस्तेषामभिनयेऽनुकरणे चतुराः । पौराणिकाः पुराणोक्तार्थानुसारेण स्तावकाः । वंशशंसकाः पराक्रमांकितस्तुतिकर्त्तारः । अमलप्रज्ञा मंगलपाठकाः "प्राचीनातीतराज्ञां च स्तोतारः सूतसंज्ञकाः । भविष्यन्नृपस्तोतारो मागधाः परिकीर्त्तिताः ॥ वर्त्तमाननृपाणाञ्च स्तोतारो बन्दिनः स्मृताः" इत्यपि केचित् ॥ २० ॥ ❀ ❀ तत्र तदा । इत्यर्थ इति । सर्वेषां सत्कृतिं चकारेति भावः ॥ २१ ॥ ❀ ❀ तन्मानम् ॥ २२ ॥ ❀ ❀ स्वयं च श्रीकृष्णश्च ॥ २३ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

लसत्कुण्डलैरित्यर्थः ॥२१॥ ❀ ❀ 'शृङ्गारवीरबीभत्सरौद्रहास्यभयानकाः । करुणाद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः' इति रत्नकोषः ॥ २२-३२ ॥

श्रीमद्वीरराघवव्याख्या

नटादयोऽद्भुतानि उत्तमश्लोकस्य भगवतश्चरितानि विरागुः । तत्र नटा अभिनेतारः नर्तकाः स्त्रीणां नृत्यशिक्षकाः गंधर्वा गायकाः सूताः पौराणिकाः मागधा वंशावलिपाठकाः बंदिनः मंगलवादिनः स्तोत्रपाठकाश्च ॥ २१ ॥ ❀ ❀ तत्र भगवान्यथाविधि नमस्कारालिंगनस्पर्शस्मितावलोकनादिभिर्यथायोग्यं वसुदेवादिभिरुपसंगम्य सर्वेषां पौराणामनुवर्तिनां भृत्यानां च मानमादधे सन्मानं चकार, विभुर्भगवान् श्वपाकपर्यन्तेभ्यः चतुर्थ्यन्तमिदम् आश्वास्योपच्छंद्याभिमतैर्वरैर्मानमादधे इत्यन्वयः ॥ २२-२३ ॥ ❀ ❀ स्वयं च सदारैर्गुरुभिः स्थविरैर्वृद्धैर्विप्रैरन्यैर्बंदिभिश्च कृताभिराशीर्भिश्च युज्यमानः पुरमाविशत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अभिनयेन शृंगाराद्यनुकरणकर्ता नटः गीतवाद्यानुसारेण नृत्यकर्ता नर्तकः षड्जादिकुशलाः गंधर्वाः पुराणाद्यर्थानुसारेण स्तावकाः सूताः पराक्रमांकितस्तुतिकर्तारो मागधाः मंगलपाठका बंदिनः ॥ २१ ॥ ❀ ❀ तत्र तेषु वसुदेवादिष्वागतेषु सत्सु श्रीकृष्णो भगवान् सर्वेषां बंध्वादीनां यथाविध्युपसंगम्य मानमादधे चकारेत्यन्वयः ॥ २२ ॥ ❀ ❀ कैः प्रह्वादिभिः ॥ २३-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नटा रसाभिनयनचतुराः । नर्त्तकाः संगीतोक्तविविधतालोद्घाटनेन नृत्यन्तः । गन्धर्वाः गायकाः 'सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः' ॥ २१ ॥ ❀ ❀ यथाविधि यथोचितम् ॥ २२ ॥ ❀ ❀ तदेवाह । प्रह्वत्वं शिरसा नतिः पित्रादिषु गर्गादिषु च । अभिवादनं वाचा नतिः यदुवंश्येषु स्थविरेषु । आश्वपाकेभ्यः श्वपाकपर्यंतानपि जनान् आश्वास्य अभयं दत्त्वा । वरैरभीष्टदानैश्च ॥ २३ ॥ ❀ ❀ गुरुभिः पितामहादिभिः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र भगवच्चेष्टितमाह भगवानिति त्रिभिः । अत्र यथाविधीति पदं सर्वत्र योजनीयम् । भगवान्प्रभुः तत्र तस्मिन्समागमे बंधूनां वसुदेवादीनाम् आश्वपाकेभ्यः सर्वेषां पौराणां च यथाविधि संगम्य येन यथोचितं तेन तथा समागमं कृत्वा यथाविधि-आश्वास्य यथाविधि प्रह्वादिभिरभिमतैर्वरैश्च मानमादधे सन्मानं चकार इति द्वयोरन्वयः ॥ २१ ॥ ❀ ❀ प्रह्वं शिरसाऽभिवादनं वाचा च नमनम् आश्लेषः आलिंगनम् ॥ २२-२३ ॥ ❀ ❀ अन्यैरुक्तैश्च ॥ २४ ॥

१. प्रा० पा०—बान्धवानथ आश्लिष्य । २. प्रा० पा०—पुरीम् ।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नटाः शास्त्रानुसारनर्त्तकाः गंधर्वा गायकाः सूताः पौराणिकाः मागधा वंशशंसकाः परिहारा वंदिनो वैतालिकाः प्रस्तावसदृशोक्तयः, सर्वेऽपि गायंतः चकारात् स्मरंतश्च अद्भुतानां कथनं स्पष्टतया लोके वक्तुमयुक्तं तदपि गायंत इति चकारार्थः ।। २१ ।। ❀ ❀ लौकिकप्रभुवत् कृष्णे गतानां न पाक्षिकफलत्वमपि तु सर्वफलमित्याह भगवानिति । सर्वे हि समुदायेन त्रिविधा बांधवाः पुरवासिनः सेवकाश्चेति पुरवासित्वमविशिष्टमिति मध्ये वचनं तेषां सम्मुखतया ।। २२ ।। ❀ ❀ यथा गमनमुचितं तथा कृतवान् तदाह प्रह्वेति । प्रह्वो नम्रीभावः । पित्रादिषु अभिवादनं ब्राह्मणेषु आश्लेषो मित्रेषु करस्पर्शो मुख्यसेवकेषु स्मितेक्षणानि सर्वत्र आश्वासनं स्वविरहखेदनिराकरणेन श्वपाकाश्चांडालावराः साधनेनाप्राप्यविषयाः चकारादन्ये विषयाः । सर्वदाने हेतुः विभुरिति ।। २३ ।। ❀ ❀ ननु जीवेभ्यः कथं भगवान् विषयान् प्रयच्छति तत्राह स्वयमिति । स्वयं च तैर्मानितः स्वयं संमाननार्थमेव तेभ्यः प्रयच्छतीति भावः । गुरवो विप्रा अन्ये च सदारैरिति सर्वत्र विशेषणं स्थविरैरन्यैरपि वृद्धैः आशीर्भिर्युज्यमानः कर्तृकरणयोस्तृतीया, सन्तोषादभिनंदनस्वरूपा आशीरन्यैरपि बन्धुभिः कृतेत्याह अथवा नूतनपाशबद्धैः पुत्रश्वशुरादिभिः पूज्यमानः पुरमाविशत् । अत्र क्रियैव सर्वोत्कृष्टेति न व्यावर्त्तकत्वेन निरूप्यते केवलं भक्तिप्रधानत्वाच्च स्तोत्रतत्त्वादिनिरूपणम् ।। २४ ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भगवानित्यत्र । न पाक्षिकफलत्वमिति न कादाचित्कसत्कारविषयत्वम् ।। २१ ।। ❀ ❀ प्रह्वेत्यत्र । कृतवानिति । 'ये यथा मां प्रपद्यन्ते' इति प्रतिज्ञानादुचितं कृतवानित्यर्थः । करस्पर्शः शिरसि हस्तस्थापनम् ।। २२ ।। ❀ ❀ स्वयं चेत्यत्र । प्रयच्छतीति विषयान् प्रयच्छति । तथा च विषयाणां बन्धकत्वाभावेन तद्दाने दोषाभाव इति भावः । अन्यशब्दस्यार्थान्तरमाहुः नूतनेत्यादि । ननु पुरि प्रवेशस्य पूर्वमुक्तत्वात्पुनः तत्प्रवेशो व्यावर्तकत्वेन वक्तव्यः, पुरमाविशन्नाशीर्भिर्बन्धुभिश्च युज्यमानो जात इति, तत्कुतः पुनस्तत्प्रवेशकथनमित्यत आहुः अत्रेत्यादि । तथा चात्रानर्तपुर्यां द्वारकायाश्च सत्त्वेन पूर्वमानर्तप्रवेशस्योक्तत्वेप्यत्र द्वारकाप्रवेशक्रियाया एव सर्वोत्कृष्टत्वात्तथोच्यत इत्यर्थः । ननु तावता सर्वोत्कृष्टत्वे स्तोत्रादिनिरूपणवैयर्थ्यं स्यादित्यत आहुः केवलमित्यादि । आदिपदेन स्वप्रार्थनम् ।। २३ ।।

श्रीगिरिधरकृता बालप्रबोधिनी

अद्भुतानि चेति चकारस्य बन्दिनश्चेत्यन्वयः । नटा नवरसाभिनयचतुराः । तालाद्यनुसारेण नृत्यन्तो नर्त्तकाः । गन्धर्वा गायकाः । 'सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ।।' ते सर्वे न केवलमग्रतो जग्मुः किन्तु उत्तमश्लोकस्याविद्यानिवर्त्तकयशसोऽद्भुतानि चरितानि गायन्ति चेति चकारस्यान्वयः ।। २० ।। ❀ ❀ भगवद्विमुखानामेव संसारदुःखं, तत्सम्मुखानां त्वत्यपकृष्टजातीनामपि मनोरथाः सफला भवन्ति, किं पुनरुत्कृष्टानामिति सूचयन् भगवत्कृतं सम्मानमाह–भगवानिति द्वयेन । भगवांस्तत्र तत्र यथाविधि यैः सह यथोचितं तैस्तथोपसङ्गम्य समागमं कृत्वा बन्धूनां यादवानां पौराणां पुरवासिनामनुवर्त्तिनां सेवकानां च सर्वेषां मानं सत्कारमादधे कृतवानित्यन्वयः ।। २१ ।। ❀ ❀ यथाविधित्वमेव दर्शयति–प्रह्वेति । प्रह्वत्वं शिरसा नतिः, अभिवादनं वाचा नतिः, आश्लेषः आलिङ्गनम्, करस्पर्शः, स्मितपूर्वकमीक्षणं च, तैराश्वास्य अभयं कृत्वा आश्वपाकेभ्यः श्वपाकं चाण्डालमभिव्याप्य वरैरभीष्टपदार्थदानैश्च मानं कृतवानित्यन्वयः । तथा करणे सामर्थ्यमाह–प्रभुरिति ।। २२ ।। ❀ ❀ स्वयं च सदारैः स्त्रीभिः सहितैरिति सर्वत्रान्वेति । गुरुभिः पुत्रादिभिः विप्रैः ब्राह्मणैः स्थविरैर्वृद्धैः अन्यैश्च पौरैर्बन्दिभिश्चाशीर्भिर्युज्यमानः पुरं द्वारकामविशदित्यन्वयः ।। २३ ।।

हिन्दी अनुवाद

बहुत-से नट, नाचनेवाले, गानेवाले, विरद बखाननेवाले सूत, मागध और बंदीजन भगवान् श्रीकृष्णके अद्भुत चरित्रोंका गायन करते हुए चले ।। २० ।। ❀ ❀ भगवान् श्रीकृष्णने बन्धु-बान्धवों, नागरिकों और सेवकोंसे उनकी योग्यताके अनुसार अलग-अलग मिलकर सबका सम्मान किया ।। २१ ।। ❀ ❀ किसीको सिर झुकाकर प्रणाम किया, किसीको वाणीसे अभिवादन किया, किसीको हृदयसे लगाया, किसीसे हाथ मिलाया, किसीकी ओर देखकर मुसकरा भर दिया और किसीको केवल प्रेमभरी दृष्टिसे देख लिया । जिसकी जो इच्छा थी उसे वही वरदान दिया । इस प्रकार चाण्डालपर्यन्त सबको संतुष्ट करके गुरुजन, सपत्नीक ब्राह्मण और वृद्धोंका तथा दूसरे लोगोंका भी आशीर्वाद ग्रहण करते एवं बंदीजनोंसे विरुदावली सुनते हुए सबके साथ भगवान् श्रीकृष्णने नगरमें प्रवेश किया ।। २२-२३ ।।

राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः। हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥
नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम्। न वितृप्यंति हि दृशः श्रियोधामाङ्गमच्युतम् ॥ २५ ॥
श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम्। बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

हे विप्र शौनक! तस्येक्षणेन महानुत्सवो यासां ताः॥ २४॥ ❀ ❀ यद्यस्मान्नित्यं सदाच्युतं निरीक्षमाणानामपि दृशो नैव तृप्यन्त्यत आरुरुहुः। कथंभूतम्। श्रियः शोभाया धाम स्थानमंगं यस्य तम् ॥ २५॥ ❀ ❀ एतदेवाभिनयेनाह। श्रियो लक्ष्म्या यस्योरो वक्षो निवासः। यस्य मुखं सर्वप्राणिनां दृशां सौन्दर्यामृतपानाय पात्रम्। यस्य बाहवो लोकपालानां निवासः। सारं श्रीकृष्णं गायन्तीति सारंगा भक्तास्तेषां यस्य पदाम्बुजं निवासः। तं निरीक्षमाणानां दृश इति पूर्वेणान्वयः॥ २६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"यस्मिन्मार्गे प्रगच्छन्ति पुरुषाः सचतुष्पदाः। अवारिता अहोरात्रं राजमार्गः स उच्यते॥" इति कात्यायनः। हे विप्रेति। यथा युष्माकं विप्राणां भगवद्दर्शनोत्साहस्सदा भवति तथा तासामपीति भावः॥ २४–२५॥ ❀ ❀ एतदेव श्रियो धामाङ्गत्वमेव अभिनयेन व्यञ्जकवाक्येन॥ २६॥

श्रीमद्वीरराघवव्याख्या

द्वारकाया राजमार्गं कृष्णे गते सति तत्र तत्र स्त्रियः तस्य कृष्णस्येक्षणे महानुत्सवो हर्षो यासां ता हे विप्र! हर्म्याणि सौधान्यारुरुहुः॥ २५॥ ❀ ❀ नित्यं निरीक्षमाणानां द्वारकौकसां द्वारका ओकः स्थानं यासां तासां स्त्रीणां दृशो न वितृप्यंति तस्मात्तदीक्षणमहोत्सवा हर्म्याणि आरुरुहुरित्यर्थः। हिशब्देनातृप्तेः प्रसिद्धिर्द्योत्यते॥ २६॥ ❀ ❀ उचिता चैषा व्युत्पत्तिरित्यभिप्रायेणाह श्रिय इति। यस्येत्यस्य उरोमुखबाहुपदाम्बुजैः प्रत्येकमन्वयः यस्योरः श्रियो निवासः स्थानम् उरोलावण्यानुभवाय तत्रैव वासमाश्रितवती श्रीरित्यभिप्रायः। यस्य मुखं दृशां पश्यज्जनचक्षुषां पानपात्रं तल्लावण्यरसपानपात्रं यस्य च हि बाहवो लोकपालानां पानपात्रं तल्लावण्यरसपानपात्रं यस्य च पदाम्बुजं सारंगाणां सारं गच्छतां सारग्राहिणां मुनीनां तल्लावण्यपानपात्रं सारं गायन्तीति सारंगाः सारतमार्थवक्तार इति च तमच्युतं नित्यं निरीक्षमाणानामपि दृशो न वितृप्यंतीति युक्तमेवेत्यर्थः॥ २७॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हर्म्याणि सौधानि तदीक्षणं तस्य श्रीकृष्णस्य दर्शनमेव महानुत्सवो यासां ताः तथोक्ताः॥ २५॥ ❀ ❀ दृष्टचरस्यादृष्टपूर्वदर्शनवद्दर्शने किमित्युत्कंठातिशय इति तत्राह नित्यमिति। श्रियो धाम स्थानमंगं वपुर्यस्य स तथा तम् अच्युतं नित्यं निरीक्षमाणानां द्वारकानिवासिनामपि दृशो न वितृप्यंति पुनः पुनर्दृष्ट्वाप्यलं दर्शनेनेति भावं न प्राप्नुवंति, यस्मात्तस्माद्युक्त उत्कंठातिशयो हीत्यन्वयः॥ २६॥ ❀ ❀ नैतदाश्चर्यमित्याह श्रिय इति। यस्य हरेः उरः वक्षस्थलं श्रियो लक्ष्म्या निवासः स्थानं यस्य मुखं द्रष्टॄणां लावण्यं पातुं पानपात्रं यस्य बाहवो लोकपालानां बलस्थानं यस्य पदाम्बुजं सारंगाणां सारग्राहिणां ब्रह्मादीनां परायणम्॥ २७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रियः प्रेयस्याः। याः सर्वेषामेव तत्प्रियवर्गाणां दृशश्चक्षूंषि तासाम्। लोकपालानां पाल्यानाम्। सारंगाणां सर्वेषामेव भक्तानां निवास आश्रयः, यथास्वं भावोद्दीपनत्वात्॥ २७–३२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे विप्राः!॥ २५॥ ❀ ❀ यद्यस्मान्नित्यं निरीक्षमाणानामपि दृशो नैव तृप्यन्ति अत आरुरुहुः। अच्युतं कीदृशं श्रियः शोभाया धाम स्थानम् अङ्गं यस्य तम्॥ २६॥ ❀ ❀ यस्य मुखं पानपात्रं सौन्दर्यामृतपूर्णं दृशां निवासः। इन्द्रादीनां लोकपालानां यस्य बाहवो निवासः तद्बलमाश्रित्यैव असुरेभ्यो निर्भयास्ते सुखं वसन्तीति भावः। सारं तद्यशो गायंतीति सारङ्गा भक्तास्तेषां श्लेषेण भ्रमराणां पदाम्बुजं निवासः। तं निरीक्षमाणानां दृश इति पूर्वेणान्वयः॥ २७॥

---

१. प्रा० पा०—द्वारकायां।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य कृष्णस्येक्षणे महानुत्सवो विनोदो यासां ताः ॥ २५ ॥ ❋ ❋ कुलस्त्रियोऽपि हर्म्याण्यारुरुहुरित्युक्तं तत्र हेतुमाह नित्यमिति द्वाभ्याम्। श्रियो रमायाः धाम वासस्थानमंगं यस्य तम् ॥ २६ ॥ ❋ ❋ यस्योरः श्रियः, बाहवो लोकपालानां सारं गच्छतां सिद्धांतगानां पदांबुजं वासो मुखं च सर्वदृशां पानपात्रं तमच्युतमिति पूर्वेणान्वयः ॥ २७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

मर्यादास्थितस्त्रीणां कृत्यमाह राजमार्गमिति। स्त्रियोऽपि मार्गस्थाः भगवानपि मार्गस्थ इति दर्शनमुचितमिति भावः। विप्राः! इति सम्बोधनम्। भगवता द्वारकायामपि सर्वे मार्गा रक्षिता इति ज्ञापयितुं तदीक्षणमेव महानुत्सवो यासाम्, अनेन सर्वाभरण-भूषितत्वम् अन्यदर्शनकृतदोषाभावश्च निवारितः ॥२५॥ ❋ ❋ ननु दर्शनस्य कथमुत्सवत्वं नित्यत्वादित्याशंक्याह नित्यमिति। नित्योत्सवत्वाद्भगवतः न भगवद्दर्शनस्य धारावाहिकज्ञानत्वम् अलौकिकार्थबोधात् पूर्वपूर्वदर्शनस्य तु व्युत्पादकत्वमेव न विषयत्वं भगवतो विषयत्वाभावात् रुचिस्तु विषयसामर्थ्यादौषधवत्। अत एव तदापि तृप्तिर्भगवद्दर्शने दोषात्परमग्रहणं यथा महादोषे औषधमपि ग्रहीतुं न शक्यते तत्र दृष्टं तेजस्त्वात् विषयदोषेणैव दुष्टता। परमार्थनिर्णये धर्ममार्गे तु कर्तृधर्मसम्बन्धेऽपि स च विषयदोषो द्वारिकावासिनां नास्तीत्याह द्वारकौकसामिति। अनेनैव सर्वे दोषा निवारिताः "परांचि खानि व्यतृणोदि" त्यौत्पत्तिक-दोषो भगवद्दर्शनेन निवार्यते अनन्यशक्यत्वात्। अन्ये तु द्वारकादिभिरिति निर्णयः। ननु भगवतो रसात्मकत्वात् अमृतौषधवत् कथं नोभयसाधकत्वं तत्राह न वितृप्यंतीति विशेषेण न तृप्यन्ति। हि युक्तोयमर्थः यदा हि दृश्यते भगवान् तदा तृप्ता भवन्ति द्वितीयक्षणे पूर्वनष्टदर्शनेन रुचेरुत्पादितत्वात् यद्यपि विषयः रुचिमुत्पादयति तथापि ज्ञानद्वारेति ज्ञानन्तु विषयद्वारा तृप्तिं जनयतीति तृप्तौ विषयप्राधान्यम्, अतो विषयात् ज्ञानं प्रबलमिति न विशेषेण तृप्यन्तीत्यर्थः। दृश इति। स्त्रीबहुत्वनिर्देशादपि एकस्माद् भगवद्रूपादवितृप्तिः सूचिता, किंच यद्यप्येकं रूपमनुभवयोग्यं तदपि श्रियो धामांगं लक्ष्म्याः स्थानरूपांगम्, अतस्तया सहितः मान्यस्त्रीणां तृप्तिजनको भवति। किंच यस्मिन् प्रविष्टे हि तृप्यन्ति स्त्रियः तदत्र प्रकृते नास्तीत्याह–अच्युतं यस्य अतो विषयविचारेणापि दृष्टीनां न तृप्तिसंभावना ॥ २६ ॥ ❋ ❋ नन्वंगांतरदर्शनेन तृप्यन्ताम् उरः स्थानमात्रं हि लक्ष्म्याः तत्राह श्रियो निवास इति। कोऽपि भागस्तादृशो भगवति नास्ति यो लक्ष्म्यादिभिर्न परिगृहीतः। तत्रोपरि भागो लक्ष्म्यैव गृहीतः स्थानदर्शनाभ्यां तदाह श्रियो निवासः यस्य उरः वक्षस्थलं तस्या एव दृशां भगवन्मुखं पानपात्रं लक्ष्म्याः स्वरूपे निविष्टत्वात् भिन्नतया स्थित्यभावात् भोक्तृत्वाभावात् लक्ष्मीनयनाभ्यां निर्गता दृष्टय एव भोक्तृतया जाताः। तासां करणापेक्षायां यत्रैव लावण्यामृतं तिष्ठति तदेव करणं तत्र मुखस्य पानपात्रत्वं श्रुतिसिद्धम् "अर्वाग्बिलश्चमस ऊर्ध्वबुध्न" मिति श्रुतेः। पात्रपदप्रयोगाद्विहितत्वं बहूनामेकपात्रत्वात्तासामेव तृप्तिर्दुर्लभा कुतोऽन्यासामिति श्रुतेर्भावः। तर्हि अंगांतरे दृष्टिर्निवेश्यतामित्याशंक्याह संति बाहवः आलिंगनयोग्याः परमन्यैः पुरुषैराक्रान्ताः नच ते दूरीकर्त्तुं शक्या बहुत्वात् पुरुषत्वाच्च। एका स्त्री यत्र निवारयितुमशक्या स्थानद्वये तिष्ठति तत्र लोकपालाः कथं शक्याः आवश्यकाश्च ते लोकपालत्वात्। तर्हि ततोप्यर्वागवयवेषु दृष्टिः पातनीयेत्याशंक्याह–सारंगाणामिति। मध्ये ये ऽवयवास्ते वस्त्रादिभिरेव वेष्टिताः दर्शनयोग्या एव न भवन्ति, अतः परमवशिष्यते चरणद्वयं तत्राप्येकश्चरण उपरिगतो ब्रह्मादिभिरेव गृहीतः लोकस्थित्यर्थं तत्रैवा स्थिते गंगया च गृहीतः ब्रह्मांडबिले तिष्ठति, अन्यथा जलेन ब्रह्मांडपूरणेन सर्वनाशः स्यात्। अथावशिष्यत एकश्चरणः स च बहुभिराक्रान्तः सारंगाः सदाचाराः कर्मनिष्ठाः पुनश्च सरतीति सरः तस्य समूहः सारं रससमूह इति यावत्। अक्षरव्यत्यासेन वा ते कर्मफलार्थिनः विषयिणो योगिनो वा पुनः सारं गच्छन्ति जानन्तीति सारंगाः ज्ञानिनः, पुनः सारं गायंतीति सारंगा भक्ताः, पुनः अरसहितं सुदर्शनसहितं सारं भगवन्तं सुदर्शनं वा कालेन भीताः सन्तः गच्छन्ति गायन्ति वा ते सारंगाः सात्वताः। सर्वेषामेकशेषः समानरूपत्वात्, सर्व एव रसार्थिनः तस्मात् दृष्टीनां स्वतंत्रस्थानाभावात् अतृप्तिर्युक्तेत्यर्थः ॥ २७ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

राजमार्गमित्यत्र। मर्यादास्थितस्त्रीणामिति आवरणे तिष्ठन्तीनामित्यर्थः ॥ २४ ॥ ❋ ❋ नित्यमित्यत्र। कथमुत्सवत्व-मिति। अतिशयितानन्दजनकत्वं ह्युत्सवत्वम्। तच्च दर्शनस्य नित्यत्वादतिशयाजनकत्वेन कथं केन प्रकारेणेत्याशङ्क्याह तदुपपादनाय नेत्रतृप्त्यभावं तद्धेतुत्वेनाहेत्यर्थः। अत्र मूले उत्सवहेतुत्वेन दृगवितृप्तिरुच्यते, तस्या अपि हेतुत्वेन भगवदङ्गानां स्वाधीन-त्वाभाव उच्यते। यद्यपि निरीक्षमाणानां द्वारकौकसां नित्यमर्थाद्दर्शनम्, तथापि तेषां दृशो न वितृप्यन्ति, हि यतो हेतोः अङ्गं श्रियो धामेत्यादिर्न स्वाधीनं त्वस्मादिति वचनव्यक्तेः। तामुपपादयन्ति नित्योत्सवत्वादित्यादि। प्रतिक्षणमन्यान्यविधरूप-प्रदर्शनेनान्यान्यानन्दजनकत्वात्तथेत्यर्थः। तृतीयस्कन्धे 'तया विश्रंशितज्ञाना' इत्यत्र ज्ञानस्य चिरकालस्थायिताया व्यवस्थाप्यत्वेनात्र धारावाहिकत्वकथनं मतान्तरीयप्रसिद्ध्यभिप्रायेण। तथा चोत्तरोत्तरज्ञानेन पूर्वपूर्वज्ञानतिरोभावाद्धारावाहिकतुल्यैकज्ञानत्वं नेत्यर्थो बोध्यः। ननु मास्तु ज्ञानस्य धारावाहिकत्वम्, तथापि तत्तद्रूपदर्शनजनितानन्देन दृशां तृप्तेः सम्भवादवितृप्तिः कुत

इत्याकाङ्क्षायामाहुः अलौकिकेत्यादि। नन्वस्तु रुचिः, तथापि भगवतो विषयत्वात्तदंशे तु तृप्तिः स्यादेवेति कथं विशेषतस्तदभाव इत्यत आहुः न विषयत्वमित्यादि। तथा च 'पराञ्चि खानी'ति श्रुतेः भगवद्दर्शने प्रमाणानामसामर्थ्यात्तत्र भगवत्सामर्थ्येन दर्शने 'अहं पश्यामी'त्यभिमानमात्रम्। तथा सत्युचितैवावृप्तिरित्यर्थः। ननु तथापि तटस्थस्य रुच्युत्पादकत्वादर्शनाद्रुच्यनुरोधेन भगवत्सामर्थ्याद्भगवतो ज्ञानविषयत्वमत्रोपेयम्, तथा सति नावितृप्तिरित्यत आहुः रुचिरित्यादि। सकृत्पूर्वं दृष्टविषयस्यासामर्थ्यादित्यर्थः। अत एवेति सकृद्दर्शनादेव। नन्वेवं रुच्युत्पादकत्वे सर्वैर्भक्त्या भगवान् कुतो न गृह्यते, भक्त्या दर्शनप्रकाशस्य पूर्वाध्याये स्थापितत्वादित्यत आहुः दोषादित्यादि। भगवत्पराङ्मुखत्वेन भक्त्यभावरूपदोषात्तथेत्यर्थः। तद्वक्ष्यते तमिमं मन्यते लोक इत्यत्र। स दोषः किन्निष्ठो येनाग्रहणमित्याकाङ्क्षायां तदधिकरणमाहुः तत्रेत्यादि। अग्रहणप्रयोजके दोषे विचारणीये दृष्टेस्तेजस्त्वात् 'सूर्यश्चक्षुस्तथा रूपं ज्योतिषो न पृथग् भवे'दित्यादिवाक्यैस्तेजोरूपत्वात्तस्य च 'तत्तेजो विद्धि मामक'मिति वाक्येन भगवदीयत्वात्तत्र तदभावे विषयदोषेण तद्ग्राह्यविषयस्य प्राकृतत्वात्तत्सम्बन्धेनैव चण्डालाग्निवद् दुष्टता। तथा च तद्ग्रहणस्वाभाव्याद्भगवद्ग्रहणासामर्थ्यम्। मार्गणं मार्गः, धर्ममार्गे धर्मविचारे तु कर्तृधर्मसम्बन्धेपि कर्ता जीवोन्तःकरणं वा तद्धर्मः साधारणत्वेन यो भगवत्यध्यासस्तत्सम्बन्धेपि दुष्टतेति तेनाग्रहणमित्यर्थः। एवं दोषं निश्चित्य द्रष्टृषु तदभावं स्फुटीकुर्वन्ति स चेत्यादि। द्वारकौकसामिति। द्वारं कायति वदतीति द्वारका। तथा च तत्रैव वासेन भक्तिरूपदर्शनसाधनोपदेशात्प्राकृतत्वरूपविषयदोषस्य अध्यासरूपकर्तृदोषस्य च सम्बन्धाभावात् स नास्तीत्यर्थः। सर्वे इति, मोक्षादिफलप्रतिबन्धकाः। ननु द्वारकावासमात्रेण सर्वदोषनिरीक्षणस्यावितृप्तिहेतुता नोच्येतेत्यत आहुः पराञ्चीत्यादि। उभयसाधकत्वमिति दोषनिवृत्तिः तृप्तिश्चेत्युभयोः साधकत्वम्। दृश्यत इति द्वितीयक्षणे दृश्यते। तथा च द्वितीयक्षणे पूर्वक्षणस्थदर्शनेन रुचिः, द्वितीयक्षणस्थेन त्वलौकिकबोधः, पुनरग्रिमे तत्र रुचिरित्येवं रुचिप्राचुर्ये युक्तैवावितृप्तिरित्यर्थः। ननूक्तं तटस्थस्य रुच्यनुत्पादकत्वम्, अतस्तदापि विषयसम्बन्ध उपेयः, तथा सति तृप्तिरवर्जनीयेत्यत आहुः यद्यपीत्यादि। एवमतृप्तौ हेतुं समर्थयित्वात्यन्तातृप्तौ हेत्वन्तराणि स्फुटीकुर्वन्ति दृश इत्यादिना॥ २५॥ ❀ ❀ सारङ्गाणामित्यत्र। सारङ्गपदेऽतिपरोक्षवृत्त्या वर्णागमो बोध्यः, हंस इतिवत्। पुनश्चेति। निर्वचनान्तरविचारे। सर इति द्रवद्द्रव्यमित्यर्थः। व इति रससमूहप्रापारः। एतेषां पदाम्बुजसम्बन्धे 'तपस्विनो दानपरा' इति वाक्यं प्रमाणत्वेन बोध्यम्। एवमन्यत्रापि। समुदायशक्त्येति कोशान्तरे सारङ्गशब्दस्य भ्रमरे शक्त्या॥ २६॥

श्रीगिरिधरकृता बालप्रबोधिनी

विप्राणां भगवद्भजनेनैव सर्वत उत्कर्षः, स च द्वारकायां स्त्रीशूद्रादीनामपि न दुर्लभ इति सूचयन् सम्बोधयति–हे विप्रा इति। द्वारकायाः राजमार्गं कृष्णे गते सति कुलस्त्रियः भार्यादिकजनस्त्रियो हर्म्याणि सौधान्यारुरुहुरित्यन्वयः। किमर्थमित्याकाङ्क्षायामाह–तदिति, तस्येक्षणे महान् उत्सव उत्साहो यासां ताः। तद्दर्शनार्थमित्याशयः॥ २४॥ ❀ ❀ ननु नित्यं निरीक्षमाणानां तासां किमित्येवं तद्दर्शनोत्साह इत्याशङ्क्याह–नित्यमिति। यत् यस्मात् द्वारका ओकः स्थानं येषां तेषां जनानामच्युतं स्वरूपतो गुणतश्च च्युतिरहितं श्रीकृष्णं नित्यं सर्वदैव निरीक्षमाणानामपि दृशो नेत्राणि न वितृप्यन्ति अलम्प्रत्ययं न गच्छन्ति। हि तस्मात्तद्दर्शनार्थं हर्म्याण्यारुरुहुरित्यन्वयः। तस्य भावे हेतुमाह–श्रिय इति, श्रियः शोभायाः धाम स्थानमङ्गं यस्य तम्॥ २५॥ ❀ ❀ न चैतदाश्चर्यमित्याशयेनाह–श्रिय इति। श्रियः अतिचञ्चलाया अपि लक्ष्म्याः यस्योरो वक्षो निवासः स्थानं, यस्य मुखं सर्वप्राणिनां दृशां सौन्दर्यामृतपानाय पात्रं, यस्य बाहवो लोकपालानां निवासः, सारं भगवन्तं गच्छन्तीति सारङ्गाः भ्रमरवत्परमविवेकिनो भक्तास्तेषां यस्य पदाम्बुजं निवासः, तं निरीक्षमाणानामपि दृशो न वितृप्यन्तीति पूर्वेणान्वयः॥ २६॥

हिन्दी अनुवाद

शौनकजी! जिस समय भगवान् राजमार्गसे जा रहे थे, उस समय द्वारकाकी कुल-कामिनियाँ भगवान्के दर्शनको ही परमानन्द मानकर अपनी-अपनी अटारियोंपर चढ़ गयीं॥ २४॥ ❀ ❀ भगवान्का वक्षःस्थल मूर्तिमान् सौन्दर्यलक्ष्मीका निवासस्थान है। उनका मुखारविन्द नेत्रोंके द्वारा पान करनेके लिये सौन्दर्य-सुधासे भरा हुआ पात्र है। उनकी भुजाएँ लोकपालोंको भी शक्ति देनेवाली हैं। उनके चरणकमल भक्त परमहंसोंका आश्रय हैं। उनके अङ्ग-अङ्ग शोभाके धाम हैं। भगवान्की इस छविको द्वारकावासी नित्य-निरन्तर निहारते हैं, फिर भी उनकी आँखें एक क्षणके लिए भी तृप्त नहीं होतीं॥ २५-२६॥

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि।
पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः॥ २७॥
प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः[2] स्वमातृभिः। ववंदे शिरसा सप्त देवकीप्रमुखा मुदा॥ २८॥

---

१. प्रा० पा०—कृष्णः। २. प्रा० पा०—परिष्वक्तश्च मातृभिः।

ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥
अथाविशत् स्वभवनं सर्वकाममनुत्तमम्। प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सितैरातपत्रव्यजनैरुपस्कृतो मण्डितः। अर्कश्चोडुपो नक्षत्रसहितश्चन्द्रश्च चापमिन्द्रधनुश्च वैद्युतं विद्युत्तेजश्च तैः। अर्कश्छत्रस्योपमानम्। नक्षत्राणि पुष्पवृष्टेः। चन्द्रः परिश्रमकृतमंडलाकारयोश्चामरव्यजनयोः। चापं वनमालायाः। विद्युत्तेजः पिशंगवाससोः। अभूतोपमेयम्। यदि घनस्योऽपरि सूर्यबिम्बमुभयतश्चन्द्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च भवेत्तर्हि स घनो यथा भाति तथा हरिर्बभावित्यर्थः ॥ २७ ॥ ❀ ❀ देवकीप्रमुखाः सप्त ववंद इति मातृसोदर्यादादरविशेषज्ञापनार्थमुक्तम्। अष्टादशापि वसुदेवभार्या मातृतुल्यत्वान्नमस्कृता एव ॥ २८ ॥ ❀ ❀ नेत्रजैर्जलैर्हर्षाश्रुभिः ॥ २९ ॥ ❀ ❀ स्वगृहप्रवेशमाह अथेति। सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयम् ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

घनः कृष्णस्योपमानम्। इत्यर्थ इति। इयमभूतोपमा वर्ण्यत एव कविभिर्न तु सा दृश्यते श्रीकृष्णं विनेति। अतोतीव चमत्कृतिविशिष्टः श्रीकृष्णस्तदा बभाविति भावः ॥ २७ ॥ ❀ ❀ प्रवासादागत्य प्रथमं मातापितृगृहे एव गन्तव्यं जीवतोस्तयोरन्यथा तद्गृहं नमस्कृत्य पुनः स्वपत्नीगृहे गन्तव्यमित्युक्तमनेन श्लोकेन ॥ २८ ॥ ❀ ❀ ता मातरः ॥ २९ ॥ ❀ ❀ अथ मातापितृवन्दनोत्तरम्। सर्वे कामा अभिलषितपदार्था यस्मिंस्तत्। न विद्यते उत्तमं यस्मात्तत्सर्वोत्तममित्यर्थः। यत्र भवने ॥ ३० ॥

श्रीमद्वीरराघवव्याख्या

सितेति। पथि सितातपत्रं च व्यजने च तैरुपस्कृतः सितातपत्रेणावृतः व्यजनाभ्यां च वीज्यमान इत्यर्थः, पिशंगे वाससी यस्य स भगवान् वनमालया बभौ। कथं यथार्कादिभिः युगपत्समुदितैः घनो नीलांबुदस्तद्वत्। अभूतोपमैषा, न ह्यर्कोडुपयोः सहावस्थानमस्ति। तत्रार्कादिस्थानीया मुकुटवनमाला वस्त्रभूषणादयः विद्युदेव वैद्युतमुडुपश्चन्द्रः। यद्वा उडुपग्रहणं गुरुशुक्रयोरन्येषां नक्षत्राणामप्युपलक्षणं तत्रोडुपस्थानीयं सितातपत्रं गुरुशुक्रस्थानीये व्यजने नक्षत्रस्थानीयानि प्रसूनानि इन्द्रमणिस्थानीया वनमाला विद्युत्स्थानीयं पिशंगवस्त्रम् अर्कस्थानीयम् तु मुकुटमिति सितातपत्राद्युपस्कृतत्वादिविशेषेण सामर्थ्यात् ॥ २८ ॥ ❀ ❀ ततस्तु पित्रोर्देवकीवसुदेवयोर्गृहं प्रविष्टो भगवान् मातृभिर्देवकीरोहिण्यादिभिः परिष्वक्त आलिंगितः देवकीप्रमुखा मातॄर्मूर्ध्ना शिरसा मनसा ववन्दे ॥ २९ ॥ ❀ ❀ ता देवक्यादयः पुत्रं कृष्णमंकमारोप्य स्नेहेन स्नुतौ पयोधरौ स्तनौ यासां हर्षेण विह्वलित आत्मा मनो यासां तथाभूता नेत्रजलैरानंदबाष्पैः सिषिचुः ॥ ३० ॥ ❀ ❀ स्वभवनं स्वगृहं प्राविशत्कथंभूतं सर्वे कामाः काम्यमाना भोग्यभोगोपकरणस्थानादयो यस्मिन्नास्त्युत्तमं यस्मात् यत्र पत्नीनां षोडशसहस्राणि प्रासादास्तथाभूतम् ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सितातपत्रव्यजनादिभिरलंकृतो भगवांस्तथा बभौ यथार्कादिभिरन्वितो मेघो भातीत्यन्वयः। अत्रायं विभागः मध्याह्नार्कस्थानीयं श्वेतच्छत्रं उडुपस्थानीयं व्यजनम् इन्द्रचापस्थानीया माला पीतवस्त्रं विद्युत्स्थानीयं मेघस्थानीयो भगवान् अर्कस्थानीयं किरीटम् उडुपस्थानीयं श्वेतच्छत्रं मंदारादिप्रसूनमाला इन्द्रचापस्थानीयं विद्युत्स्थानीयं व्यजनमिति वा ॥ २८ ॥ ❀ ❀ पित्रोः मातापित्रोः स्वमातृभिः देवक्यादिभिः परिष्वक्तः आश्लिष्टः ॥ २९ ॥ ❀ ❀ ता मातरः पुन्नाम्नो नरकात्त्रायत इति पुत्रः तं कृष्णं सिषुचुः अभ्यषिंचन्, हर्षेण विह्वलीकृतः विवशीकृतः आत्मांतःकरणं यासां तास्तथोक्ताः ॥ ३० ॥ ❀ ❀ यत्र यस्मिन् भवने वज्रवैदूर्यमणिमंडिताः षोडशसहस्राणि पुनरष्टोत्तरशतं पत्नीनां प्रासादाः सन्ति तदनुत्तमं सर्वकामं स्वभवनमाविशदित्येकान्वयः। काम्यन्त इति कामा इच्छाविषयास्ते सर्वे यत्र सन्ति तत्तथोक्तम् ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वैद्युतं विद्युत्तेजः। घनः कृष्णस्योपमानम्। अर्कश्छत्रस्य उडुपौ परिभ्रमकृतमंडलाकारयोश्चामरव्यजनयोः। उडवः पुष्पवृष्टेः। चापौ वनमालायाः विद्युत्तेजः पिशङ्गवाससोः। अद्भुतोपमेयम्—यदि घनस्योपरि सूर्यबिम्बं उभयतश्चन्द्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजो भवेत् तर्हि स घनो यथा भाति तथा हरिर्बभाविति भावः ॥ २८ ॥ ❀ ❀ सप्त ववन्द इति मातृसोदर्यादादरविशेषज्ञापनार्थमुक्तम्। अष्टादशापि पितुर्वसुदेवस्य भार्या मातृतुल्यत्वान्नमस्कृता एव ॥ २९-३० ॥ ❀ ❀ स्वभवनं स्वपुरम्। सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयम् ॥ ३१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथाभूतोपमानेन ध्यानविशेषार्थं भगवंतं वर्णयति सितातपत्रेति । यथा श्यामवर्णो घनो यद्यर्कोडुपचापवैद्युतैः शोभितः स्यात् उडुपशब्देन सतारागणं चंद्रद्वयं गृह्यते । वैद्युत इत्यत्र स्वार्थेऽण् , तथा सितातपत्रेणार्कोपमेन व्यजनाभ्यां चंद्रोपमाभ्यां चोपस्कृतो मंडितः तारागणोपमानां प्रसूनानां वर्षैरभिवर्षितः पिशंगे वैद्युतोपमे वाससी यस्य भगवान् घन इव श्यामः इंद्रचापोपमया वनमालया च बभौ इत्यन्वयः ॥ २८ ॥ ❀ ❀ सप्तेत्यन्यासामुपलक्षणम् ॥ २९-३० ॥ ❀ ❀ अष्टोत्तरशतसंख्याका अन्ये प्रासादाश्च कारेण ग्राह्याः ॥ ३१ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं सामान्यतः पुरीं तत्स्थान् भक्तांश्च निरूप्य भगवान् कथं विशेषतया न वर्णित इत्याकांक्षायाम् उपमानाभावादित्युक्ते भक्तानां बुद्ध्या अभूतोपमाया वर्णनाय इति सिद्धांतं वक्तुमाह सितातपत्रेति । सितातपत्रं च व्यजने च सितातपत्रव्यजनानि प्रसूनवर्षैः सर्वतः प्रवृत्तैः प्रसूनभेदात्पुरुषभेदाद्वा बहुवचनं, पीताम्बरं नित्यमपि रूपवद्वर्णनीयानां हेतुत्वेन निरूप्यते वनमालया उपलक्षितः सहितो वा एवं सर्वसामग्र्यां सत्यां वनमालयैव बभाविति वा । यथा मध्ये नीलो मेघो भवति उपरि सूर्यः परितो द्वौ चंद्रौ लोलौ स्थिरा विद्युत् कटितटे इंद्रधनुर्द्वयमुभयतो मिलितं तदा भगवानिव भवेदित्यद्भुतोपमा ॥ २८ ॥ ❀ ❀ एवं समाप्य संबंधिनां स्नेहातिशयमाह प्रविष्ट इति । तुशब्दः पूर्णवर्णनां व्यावर्त्तयति पित्रोरिति । मातृत्वेन सर्वा मातर एव अपृथग्धर्मशीलत्वात् सर्वासां पितुश्चैकं गृहं भेदे कारणाभावाच्च प्रवेशमात्रेणैव भगवत्क्रियातः पूर्वं ता एव परिष्वंगादिकं कृतवत्य इत्याह परिष्वक्त इति । "ये यथा मां प्रपद्यंत" इति वाक्यात् मातुः प्रति बालक एव प्रतिभाति । भगवद्धर्मापेक्षया लौकिकधर्मस्य बहिरंगत्वात् नमस्कारापेक्षया परिष्वंगः प्रथमः स्वमातृभिरिति पितुरपि मातरः संति, अतः स्वमातृभिरित्युक्तं, सप्त देवकीभगिन्यः । एकादशापराः, एकजातासु कन्यासु एकस्मै वराय बहूनां दानम् अपृथग्धर्मशीलत्वेनैव वरस्य कन्यानां च तदैव पत्नीत्वम् , अन्यथा नार्थत्वं 'यास्ते शीलमनुव्रता' इति वाक्यात् अयमेव हेतुः । पतिबहुत्वेऽपि अत एव देवकीप्रमुखाः सप्त एकस्वभावान्मातर इत्युच्यंते । एकदा सर्वा ववंदे शिरसेति भगवद्धर्मत्वं शब्देन सर्वासां सकृत् वंदनं संभवति न तु कायिकम् , अतः शिरसा तदेति ॥ २९ ॥ ❀ ❀ भगवद्धर्मप्राकट्याय नमस्कारानंतरं भगवति बालत्वमेव प्रकटमिति बालकपुत्रे यत्कर्त्तव्यं तच्चकुरित्याह ता इति । सर्वा एव पुत्रमंकमारोप्य बालकस्नेहस्नुतपयोधरा जाताः, न तु तस्य पयसः कश्चन विनियोगो जातः । भगवतो महत्त्वं प्रौढत्वं जा[illegible]पि हर्षेण विह्वलितात्मानः पूर्वसंस्कारसदृशत्वात् नेत्रजैर्जलैः शिखाः सिषिचुः ॥ ३० ॥ ❀ ❀ भार्याणामवस्थामाह अथेति । एकस्मिन्नेव भवने विश्वकर्मणा षोडशसहस्रं प्रासादाः कृताः स्वचातुरीख्यापनार्थम् । अत एव अनुत्तमं न विद्यते उत्तमं यस्मात् सर्वकामा यस्मिन् सर्वकामनापूरकपदार्थसद्भावो यस्मिन् वा ॥ ३१ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

प्रविष्टस्त्वित्यत्र । भेदे कारणाभावादिति । स्त्रीणां पृथग्धर्मशीलत्वं हि गृहान्तरस्थितौ कारणं तदभावात् ॥ २८-३० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं पुरवासिजनोत्साहं निरूप्य मार्गस्थभगवच्छोभां निरूपयति-सितेति । सितमातपत्रं छत्रं व्यजने च तैर्वनमालया च उपस्कृतो मण्डितः प्रसूनवर्षैश्चाभिवर्षितः पिशङ्गे पीते वाससी यस्य स भगवान् अर्कश्च उडुपो नक्षत्रसहितश्चन्द्रश्च चापमिन्द्रधनुश्च वैद्युतं विद्युत्तेजश्च तैर्युगपत्समुदितैः यथा घनो मेघः शोभते तथा पथि मार्गे बभौ शुशुभे इत्यन्वयः । अर्कश्छत्रस्योपमानम् । नक्षत्राणि पुष्पवृष्टेः । चन्द्रः परिभ्रमकृतमण्डलाकारयोः चामरव्यजनयोः । चापं वनमालायाः । विद्युत्तेजः पिशङ्गवाससोः । अभूतोपमेयम् । यदि घनस्योपरि सूर्यबिम्बमुभयतश्चन्द्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च भवेत्तर्हि स घनो यथा भाति तथा हरिर्बभाविति ॥ २७ ॥ ततस्तु पित्रोर्देवकीवसुदेवयोर्गृहं प्रविष्टो भगवान् स मातृभिर्देवकीरोहिण्यादिभिः परिष्वक्त आलिङ्गितः सन् देवकीप्रमुखा मातॄर्मुदा हर्षेण शिरसा ववन्दे इत्यन्वयः । सप्तेति तु मातृसोदर्यादादरविशेषविज्ञापनार्थमुक्तम् । अष्टादशापि वसुदेवस्य भार्या मातृतुल्यत्वान्नमस्कृता एवेति ज्ञेयम् ॥ २८ ॥ ❀ ❀ स्नेहेन स्नुतौ प्रस्नवन्तौ पयोधरौ स्तनौ यासां ताः हर्षेण विह्वलित आत्मा मनो यासां ताः देवक्यादयः पुत्रं श्रीकृष्णमङ्कमारोप्य नेत्रजैर्जलैरानन्दबाष्पैः सिषिचुरित्यन्वयः ॥ २९ ॥ ❀ ❀ अथानन्तरं स्वभवनमविशत् । भवनमेव विशिनष्टि-सर्वे कामाः काम्यमाना भोग्यभोगोपकरणस्थानादयो यस्मिंस्तत् , यत्र च भवने षोडश सहस्राणि पत्नीनां तत्प्रासादाः सन्ति, अत एवानुत्तमं नास्त्यन्यदुत्तमं यस्मात्तथाभूतम् ॥ ३० ॥

हिन्दी अनुवाद

द्वारकाके राजपथपर भगवान् श्रीकृष्णके ऊपर श्वेत वर्णका छत्र तना हुआ था, श्वेत चँवर डुलाये जा रहे थे, चारों ओरसे पुष्पोंकी वर्षा हो रही थी, वे पीताम्बर और वनमाला धारण किये हुए थे । इस समय वे ऐसे शोभायमान हुए, मानो

श्याममेघ एक ही साथ सूर्य, चन्द्रमा, इन्द्रधनुष और बिजलीसे शोभायमान हो ॥ २७ ॥ ❁ ❁ भगवान् सबसे पहले माता-पिताके महलमें गये। वहाँ उन्होंने बड़े आनन्दसे देवकी आदि सातों माताओंको चरणोंपर सिर रखकर प्रणाम किया और माताओंने उन्हें अपने हृदयसे लगाकर गोदमें बैठा लिया। स्नेहके कारण उनके स्तनोंसे दूधकी धारा बहने लगी, उनका हृदय हर्षसे विह्वल हो गया और वे आनन्दके आँसुओंसे उनका अभिषेक करने लगीं ॥ २८-२९ ॥ ❁ ❁ माताओंसे आज्ञा लेकर वे अपने समस्त भोग-सामग्रियोंसे सम्पन्न सर्वश्रेष्ठ भवनमें गये। उसमें सोलह हजार पत्नियोंके अलग-अलग महल थे ॥ ३० ॥

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः।
उत्तस्थुरारात् सहसाऽऽसनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥
तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरे पतिम्।
निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥ ३२ ॥
यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवम्।
पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥ ३३ ॥
एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम्।
विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

प्रोष्य देशान्तरे उषित्वा। आराद् दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः। आसनादाशयाच्च। आसनाद्देहेनोत्तस्थुः। आशयोऽन्तःकरणं तस्मादप्यात्मनोत्तस्थुः। श्रीकृष्णेनात्मनः संश्लेषेऽन्तःकरणव्यवधानमपि ता नासहन्तेत्यर्थः। व्रीडितानि लोचनान्याननानि च यासां ताः। अपांगैरेव वीक्षणाद्व्रीडितलोचनाः अवनतमुखत्वाद्व्रीडिताननाः साकं व्रतैरिति हास्यक्रीडावर्जनादिनियमा अपि ताभ्य उत्तस्थुरित्यर्थः। धृतव्रता एवोत्तस्थुरिति वा। व्रतानि च याज्ञवल्क्येनोक्तानि "क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥" इति ॥३१॥ ❁ ❁ आयान्तं तं पतिं दर्शनात्पूर्वमात्मना इव बुद्ध्यान्तर्हृदये परिरेभिरे ततो दृष्टिभिस्ततः समीपमागतमात्मजैः पुत्रैर्गृहीतकंठमालिङ्गयन्त्य इव स्वयमालिङ्गितवत्य इत्यर्थः। अत्र हेतुः—दुरन्तभावा गंभीराभिप्रायाः। तदा च तासां नेत्रयोर्निरुद्धमप्यम्बु बाष्पं वैक्लव्याद्वैवश्यादास्रवदीषत्सुस्राव। अत एव धैर्यहान्या विलज्जतीनाम्। हे भृगुवर्य चित्रं शृण्विति ॥ ३२ ॥ ❁ ❁ पार्श्वगतः समीपस्थस्तत्रापि रहोगत एकान्ते प्रवर्तते स्म। पदे पदे प्रतिक्षणं नवं नवमेव। अत्र कैमुत्यन्यायः का विरमेतेति। चला चंचलस्वभावापि ॥ ३३ ॥ ❁ ❁ उक्तं श्रीकृष्णचरितं संक्षिप्याह एवमिति द्वाभ्याम्। क्षितेर्भाराय जन्म येषाम्। अक्षौहिणीभिः कृत्वा परिवृतं सर्वतः प्रसृतं तेजः प्रभावो येषाम्। श्वसनो वायुर्वेणूनामन्योन्यसंघर्षेणानलं विधाय मिथो दाहेन यथोपशाम्यति तद्वत् ॥ ३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यावत्यो महिष्यस्तावद्भिरेव प्रकाशैर्युगपदेव पृथक्पृथक् तत्तन्मन्दिरं प्रविष्टमालोकमानानां मामेवायं प्रथमं प्राप्त इत्यभिमन्यमानानां तासां तात्कालिकीं चेष्टामाह—संजातो मनसो महोत्सवः परिरम्भस्पृहा यासां ताः। इत्यर्थ इति। अंतःकरणमपि-तदाकारं चक्रुरिति भावः। ततश्च व्रीडितलोचनानना अपांगैरेव वीक्षणाद् व्रीडितलोचना अवनतमुखत्वाद्व्रीडिताननाः। अयमर्थः—आसनं परित्यज्य प्रथमं देहेनैव परिरब्धुमुत्थिताः। मध्ये लज्जया कृतं विघ्नमालक्ष्य लज्जोत्पत्तिस्थानमन्तःकरणं च त्यक्त्वा केवलमात्मनैव परिरेभिरे इति केवलमुत्प्रेक्षैव। कान्तमालोक्य सहसैव स्पर्शौत्सुक्यपूर्णप्रेमानन्दमूर्च्छितास्ता बभूवुरिति तत्त्वम्। मूर्च्छायां सत्यामेव सुषुप्तिप्रलययोरिवांतःकरणव्यवधानाभावसिद्धेः। व्रतैः सहिता एवोत्तस्थुरिति तेषां व्रतानां पतिं दर्शयितुमनुचितानामपि सहसा त्यक्तुं शक्यत्वात्तैः साकमेवोत्तस्थुः। ततश्च तेन दृष्टानां तासामसंस्कृतशरीरपरिच्छदता स्नेहवर्द्धनायैवाभूदिति ॥ ३१ ॥ ❁ ❁ इत्यर्थ इति। अत्र सहार्थस्य गम्यमानत्वादात्मजैः सहालिंगनं चक्रुरिति भावः। यद्वात्मजैर्देहजै रोमाञ्चादिभिः सहेत्यर्थः। अत्र पुत्रैः सहालिंगने दुरन्तभावा इति वेलातीतस्नेहाः स्नेहपारवश्यात्पुत्रादिलज्जामपि जहुरिति भावः। यद्वा दुर्ज्ञेयाभिप्रायाः अस्मदालिंगनेनैवैते जाता यदि विशेषपुत्रेच्छा तर्ह्येतान्विहायास्मानेवालिंगस्वेति तासामभिप्रायः। अत एव वैवश्यादेव। श्रीकृष्णलीलामृतपानयोग्यविप्रकुलोद्भूतत्वात्तुभ्यमहमेतद्रहस्यकथां ब्रवीमीत्यभिप्रायेणाह—भृगुवर्येति।

१. प्रा० पा०—सहसासनाश्रयात्सकञ्चुका व्रीडित। २. प्रा० पा०—विलज्जितानां। ३. प्रा० पा०—रहोगतस्तासां तथाप्यङ्घ्रियुगं। ४. प्रा० पा०—परिवृद्ध०। ५. प्रा० पा०—वधायोपरतो।

तपश्चर्यादिपरायणेभ्यो भार्गवकुलजेभ्यस्त्वमेव वर्योसि । श्रीकृष्णलीलाश्रुतिनिहितचेतस्त्वादिति भावः । "सर्वेभ्यश्चैव धर्मेभ्यः परो धर्मोयमीरितः । सर्वशास्त्रार्थतत्त्वज्ञश्रीपराशरसूनुना ।। श्रीकृष्णलीलाश्रवणं सर्वं त्यक्त्वा व्रतादिकम् ।" इत्यादिपुराणात् । अत्र विश्वनाथः-लज्जया कृतविघ्नानामपि तासां तत्परिरम्भे प्रकारमाह-तमिति । आत्मजैर्मनोभवैस्तद्दर्शनोद्दीपितैः कामैर्हेतुभिरित्यर्थः । "मकरध्वज आत्मभूः" इत्यमरः । बहुत्वं परमबलिष्ठत्वेन पूज्यत्वात् । दृष्टिभिः परिरेभिर इति प्रथमं चाक्षुषः संभोग उक्तः । ततो दृष्टिभिरेव नेत्ररन्ध्रैरेवान्तःप्रवेश्यात्मनान्तर्देहेनापि यतो दुरन्तभावा दुर्ज्ञेयाभिप्रायाः । अत एव वक्ष्यते चायमेव प्रकारो भाववतीनां "तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च । पुलकांग्युपगुह्यास्ते योगीवानन्दसंप्लुता" इति । तदपि सूक्ष्मधिया प्रेयसा स्वाभिप्रायं ज्ञातमालक्ष्य विलज्जमानानां तासां नेत्रयोरम्बु निरुद्धमपीति स्वामिवत् ।। ३२ ।। ❀ ❀ चिरविरहानंतरमेतादृशानुरागोदययोग्यतायां तासामेव स्थलांतरं कैमुत्येन दृष्टांतयति । यदीति । असौ श्रीकृष्णः तासां श्रीपट्टमहिषीणां नवं नवमिति । तासां स्वाभाविकानुरागवतीनां नाश्चर्यं, यतः का वान्यापि तत्पदाद्भिरमेत्तदास्वादेन तृप्ता भवेत् । तत्कैमुत्येनोदाहरणम्-चलापीति ।। ३३ ।। ❀ ❀ ताभिः सह रमणं निष्प्रत्यूहं वक्तुं तस्य कार्यांतरव्यग्रत्वाभावमाह-केवलं पापाचरणेन भारायैव जन्म येषाम् ।। ३४ ।।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

पत्न्यः पतिमिति । एतेन यावत्यः पत्न्यस्तावन्मूर्तिः श्रीकृष्णो युगपदेव तासां गृहान् प्राविशदिति ज्ञायते, सर्वासां तुल्यभावत्वादिति व्याख्यालेशः ।। ३२-३७ ।।

श्रीमद्वीरराघवव्याख्या

तदा प्रोष्य प्रवासं कृत्वा गृहानुपागतं प्रियं दूराद्विलोक्य पत्न्यो रुक्मिण्यादयः संजातो मनसि महानुत्सवो हर्षो यासां व्रीडिते लोचने येषु तान्याननानि यासां तथाभूता व्रतैः सहासनाशयात्सहसा आशु उत्तस्थुः । तत्र व्रतेभ्यः उत्थानं नाम भर्त्रागमनार्थं व्रतत्यागः, आसनादुत्थानं प्रसिद्धम् । आशयादभिप्रायादुत्थानं दिदृक्षौत्कंठ्यत्यागः दर्शनस्य जातत्वात् ।। ३२ ।। ❀ ❀ तमिति दुरंतोऽगाधो भावः स्नेहो यासां ताः पत्न्यः समागतं तं पतिमात्मजैर्दृष्टिभिरंतरात्मना च परिरेभिरे आलिंगितवत्यः शरीरपरिरंभस्य रहःकालिकत्वात्तं न साक्षाच्चक्रुरपि तु पुत्रैः प्रद्युम्नादिपुत्रद्वारेणेत्यभिप्रायेण पुत्रैरित्युक्तं, मनसा चक्षुषा च समं साक्षादेव चक्रुरित्यभिप्रायेणांतरात्मना दृष्टिभिश्चेत्युक्तं हे भृगुवर्य ! विलज्जतीनां तासामत एव नेत्रयोरंबुनि रुद्धमपि विक्लवाद्धाष्ट्र्याद्स्रवत् ।। ३३ ।। ❀ ❀ व्रतैः साकमासनाशयादुत्तस्थुः तस्यात्मजैरित्यादिना च तासां तद्विरहासहिष्णुत्वं सूचितं तदेवोपपादयति यद्यपीति । यद्यप्यसौ भगवान्कृष्णस्तासां पार्श्वगतः रहोगतश्च तथापि तस्यांघ्रियुगं तासां नवं नवमेवाभूत् यतस्तत्पदात्तस्य पदारविंदात्का विरमेत विश्लिष्यावस्थातुमुत्सहेत न कापीत्यर्थः, तदेव दर्शयितुं विशिनष्टि चंचला श्रीर्लक्ष्मीरपि कदापि यत् यदंघ्रिं न जहाति तत्पदात्का विरमेतेत्यन्वयः । तदापीति पाठांतरं तत्र यद्यपि यदापि पार्श्वगतो रहोगतश्च तदापि तस्यांघ्रियुगं नवं किं पुनः कदाचिदंतरितं नवं नवमिति कैमुत्यन्यायसिद्धमिति भावः । उत्तरार्द्धं तु यथोक्तार्थमेव ।। ३४ ।। ❀ ❀ अथोपरितनं वृत्तांतं संगृह्य विवक्षुरुक्तवृत्तांतं समासतोऽनुवदति एवमिति । क्षितेर्भूमेर्भारस्य जन्मोदयो येभ्यः अक्षौहिणीभिः परिवृत्तं परितो व्याप्तं तेजः शौर्यं येषां तेषां नृपाणां कौरवाणां पाण्डवानां च मिथः वैरं श्वसनो वायुरनलमग्निमिव विधाय वर्द्धयित्वा स्वयं निरायुध एव तेषां मिथो वधेन वधाय उपरतः उपरराम उपसंहृतवान् स एष इत्युत्तरेणान्वयः । स्वयं निरायुध एव सन् तेषां मिथो वधं कारयन् यः स्वयं तूष्णीमवस्थित इत्यर्थः ।। ३५ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पत्न्यः आराद् दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां तास्तथोक्ताः सहसा झटिति उत्तस्थुरित्यन्वयः । कथंभूतं प्रोष्य प्रवासं कृत्वा गृहानुपागतं कीदृश्यः पत्न्यः साकंपिताश्च व्रीडितलोचनाननाश्च साकंपितव्रीडितलोचनाननाः सहितमाकंपितं याभिस्तास्तथा व्रीडितानि लोचनानि आननानि च यासां तास्तथा ।। ३२ ।। ❀ ❀ दुरंतभावाः वेलातीतस्नेहाः अनंतशृङ्गारा वा अन्यैरज्ञाताभिप्राया वा दृष्टिभिरात्मजैरंतरात्मना मनसा च तं पतिं परिरेभिरे वैक्लव्यात्पारवश्याद्विलज्जितानां तासां नेत्रयोर्निरुद्धमप्यंबु अस्रवदित्यन्वयः ।। ३३ ।। ❀ ❀ नैतत्तासां स्नेहकार्यं किमित्याह यदीति । यद्यप्यसौ कृष्णः रहोगतः एकांतगतः सदा तासां पार्श्वगतः समीपस्थः तथाप्यनुपदं तासां तस्यांघ्रियुगं नवं नवं नूतनान्नूतनं, तथाहि का स्त्री तस्य पादकमलादलमिति विरमेत विरामं कुर्यात् । अन्यत्र चंचलविभवप्रदायिनी श्रीः भगवंतं कर्हिचिन्न जहातीत्येकान्वयः ।। ३४ ।। ❀ ❀ वायुर्यथा वनदहनाय वेणूनां मिथः संघट्टनेनाग्निमुत्पादयति तथा अक्षौहिणीभिः क्षितिभारजन्मनां भूमेर्भारभूतं जन्म येषां ते तथोक्ताः तेषां परिवृत्तं परिवृद्धं तेजो येषां ते तथोक्तास्तेषामसुराणां विनाशाय कुरुपांडवपक्षपातिनां नृपाणां मिथो वैरं विधाय स्वयं निरायुधः परस्परवधेन विनाशं विधाय चोपरत उदास्त इत्यन्वयः ।। ३५ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पत्न्य इति। विलोक्यैव आसनात् तदावेशेनैकचेष्टतावस्थानात् आशयात् तत्समाधिलक्षणाच्च उत्तस्थुः (तौ) तत्युजुरित्यर्थः। अतएव व्रीडितेति ॥ ३२ ॥ ❀ ❀ तमिति तैः। तत्र स्वयमालिंगितवत्य इवेति योज्यम्। दुरन्तभावा उद्भटभावाः। अत एव निरुद्धमप्यास्रवत्। अत्रात्मजद्वारालिंगनेन कान्तभाव आभास्यते। तद्द्वारा तत्सम्भोगायोग्यत्वात् समाधानं च-प्रीतिसामान्यपरिपोषायैव तथाचरितं नतु कांतभावपोषाय। तत्पोषस्तु दृष्ट्यादिद्वारैव। तस्मान्न दोष इति ॥ ३३ ॥ ❀ ❀ चिरविरहानंतरमेतादृशानुरागोदययोग्यतायां तासामेवावस्थान्तरं कैमुत्येन दृष्टान्तयति यदीति। असौ श्रीकृष्णः। तासां श्रीपट्टमहिषीणाम्। नवं नवमिति। तच्च तासां स्वाभाविकानुरागवतीनां नाश्चर्यम्, यतः का वान्यापि तत्पदाद् विरमेत तदास्वादेन तृप्ता भवेत्। तत्कैमुत्येनोदाहरणं चलापीति। जगति चञ्चलस्वभावत्वेन दृष्टापि ॥ ३४ ॥ ❀ ❀ अथ तथागतस्य तस्य तादृशगार्हस्थ्यलीलासुखोत्कर्षदर्शनार्थं निश्चिन्ततापूर्वकं ताभी रमणमेवाह-एवमिति द्वाभ्याम् ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

यावत्यो महिष्यस्तावद्भिरेव प्रकाशैर्युगपदेव पृथक् तत्तन्मन्दिरप्रविष्टं कृष्णमालोकमानानां मामेव प्रथममयं प्राप्त इत्यभिमन्यमानानां तासां तात्कालिकीं चेष्टामाह–सञ्जातो मनसो महोत्सवः परिरम्भस्पृहा यासां ताः। अत एव आसनात् अन्तःकरणाच्च उत्तस्थुः ततश्च व्रीडितलोचनाननाः अपाङ्गैरेव वीक्षणात् व्रीडितलोचनाः अवनतमुखत्वात् व्रीडिताननाः। अयमर्थः–आसनं परित्यज्य प्रथमं देहेनैव परिरब्धुमुत्थिताः मध्ये लज्जया कृतं विघ्नमालक्ष्य लज्जोत्पत्तिस्थानमन्तःकरणञ्च त्यक्त्वा केवलमात्मनैव परिरेभिरे इति केवलमुत्प्रेक्षैव। कान्तमालोक्य सहसैव स्पर्शौत्सुक्यपूर्णप्रेमानन्दमूर्च्छितास्ता बभूवुरिति तत्त्वम्। मूर्च्छायां सत्यामेव सुषुप्तिप्रलययोरिवान्तःकरणव्यवधानाभावसिद्धेः। साकं व्रतैरिति व्रतानि याज्ञवल्क्येनोक्तानि–'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृके'ति। व्रतैः सहिता एव उत्तस्थुरिति तेषां व्रतानां पतिं दर्शयितुमनुचितानामपि सहसा त्यक्तुमशक्यत्वात् तैः साकमेवोत्तस्थुः। ततश्च तेन दृष्टाः, तासामसंस्कृतशारीरपरिच्छदता स्नेहवर्द्धनायैवाभूदिति ॥ ३२ ॥ ❀ ❀ लज्जया कृतविघ्नानामपि तासां तत्परिरम्भे प्रकारमाह तमिति। आत्मजैर्मनोभवैस्तद्दर्शनेनोद्दीपितैः कामैर्हेतुभिरित्यर्थः। "मकरध्वज आत्मभूः" इत्यमरः। दृष्टिभिः परिरेभिरे इति प्रथमं चाक्षुषः सम्भोग उक्तः। ततो दृष्टिभिरेव नेत्ररन्ध्रैरेवान्तः प्रवेश्य आत्मना अन्तर्देहेनापि। यतो दुरंतभावा दुर्ज्ञेयाभिप्रायाः। अत एव वक्ष्यते चायमेव प्रकारो भाववतीनाम्–'तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च। पुलकांग्युपगुह्यास्ते योगीवानन्दसंप्लुते'ति तदपि सूक्ष्मधिया प्रेयसा स्वाभिप्रायं ज्ञातमालक्ष्य विलज्जमानानां तासां नेत्रयोरम्बु निरुद्धमपि वैक्लव्यात् वैवश्यात् आ ईषत् अस्रवत् सुस्राव। हे भृगुवर्य ! ॥ ३३ ॥ ❀ ❀ पदे पदे क्षणे क्षणे तासां नवं नवमेव भवति। अत्र कैमुत्यं का विरमेतेति। चला चंचलस्वभावा श्रीः सम्पत्तिरूपेति नित्यनूतनत्वं तस्योक्तम् ॥ ३४ ॥ ❀ ❀ ताभिः सह रमणं निष्प्रत्यूहं वक्तुं तस्य कार्यान्तरव्यग्रत्वाभावमाह–एवमिति। अक्षौहिणीभिः सह परिवृत्तं विस्तीर्णं तेजो येषाम्। श्वसनो वायुर्वेणूनाम् अन्योन्यसंघर्षेण अनलं विधाय मिथो दाहेन यथोपशाम्यति तद्वत् ॥ ३५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रोष्य प्रवासं कृत्वा गृहानुपागतं पतिमाराद् दूरादेव विलोक्य सहसैवात एव व्रतैः साकं धृतव्रता एवासनात् आशयादंतःकरणाच्च देहगेहस्मृतिरूपादंतःकरणधर्मादप्युत्तस्थुः। व्रतानि याज्ञवल्क्येनोक्तानि "क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृके"ति ॥ ३२ ॥ ❀ ❀ हे भृगुवर्य ! दुरंतभावाः अगाधस्नेहाः पत्न्यः तमागतं पतिमात्मजैस्तद्द्वारेण दृष्टिभिरंतरात्मना च परिरेभिरे आलिंगितवत्यः। विलज्जतीनां स्त्रीणां गुणविशेषरूपां लज्जां कुर्वन्तीनाम् निरुद्धमपि विक्लवाद्वैक्लव्यान्नेत्रयोरंबु बाष्पमास्रवदीषत्सुस्राव ॥ ३३ ॥ ❀ ❀ तासां भगवति स्नेहातिशयमाह यद्यपीति। यद्यप्यसौ श्रीकृष्णः पार्श्वगतः रहोगतश्च तथापि तस्योभयत्र संश्लिष्टस्यापि पदे पदे प्रतिक्षणमंघ्रियुगं नवं नवं तासामभूत् यच्च श्रीकृष्णं चलापि चंचलापि श्रीः कर्हिचिन्न विजहाति "देवत्वे च भवेद्देवी मनुष्यत्वे च मानुषी। विष्णोरेवानुरूपां वै करोत्येषात्मनस्तनुमि"ति स्मृतेः। तत्तस्य पदात् का विरमेत विश्लिष्टतया स्थातुमुत्सहेत ॥ ३४ ॥ ❀ ❀ भगवद्गुणविशेषविवक्षुरुक्तं भगवच्चेष्टितं संक्षिप्यानुवदति एवमिति, श्वसनो वायुर्वेणुनाशहेतुमग्निं विधाय यथोपरतो भवति तथा क्षितिभाराय जन्म येषां तेषाम् अक्षौहिणीभिः परिवृत्तं परितो व्याप्तं तेजः प्रभावो येषां तेषां मिथो वैरं विधायोपरतः तेषां कर्मानुसारेण तान् हत्वोपरराम यः स रेमे इत्युत्तरेणान्वयः ॥ ३५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

यथा मातृषु पुत्रत्वेन स्वयं प्रविष्टः तथापि पत्नीष्वपि प्रविष्टः पतित्वेन प्रभुत्वेन न अतस्तासां साधारणपतित्वेन कृत्यं युक्तं दूरादागच्छंतं पतिं विलोक्य सम्यग् जातो मनसि महानुत्सवो यासाम् आराद् दूरादेव दृष्ट्वा उत्तस्थुः सहसेति न सावधानभूताः

यथैव स्थितास्तथैव उत्तस्थुः, देह आत्मा च आसने चिंतायां निमग्नः स्थितः, तदिदानीं द्विरूपाः आसनादाशयादप्युत्तस्थुः, परं व्रतानि स्थितान्येव विशेषालंकाररहितत्वादिति भावः । अत एव व्रीडया मुकुलितानि लोचनानानि यासाम् ॥ ३२ ॥ ❀ ❀ ताभिः कृतां भगवत्पूजामाह तमात्मजैरिति । तमागच्छन्तमेव ताः सर्वाः युगपदेव कायेन मनसा चालिंगनं कृतवत्यः । तत्र प्रकारभेदमाह आत्मजैः दृष्टिभिरंतरात्मनेति, पुत्रान् हस्ते प्रयच्छंत्य इव निकटसंबद्धाः कायेन परिरेभिरे तथा दृष्टिभिः दृष्टिं दृष्ट्या योजयंत्यः परिरम्भणाभावाद् गिरणेन अलसवलितादिभिः परिरेभिरे अन्तरात्मना भगवति प्रविष्टेन मनसा च परिरेभिरे, तासां परिरंभण एव मनोरथः समाप्तः न बाह्यकृत्यं कृतवत्यः, तत्र हेतुः दुरंतभावा इति दुष्टः अन्तो भावो यस्य भावस्त्वांतरः, तस्मिन् हि समाप्ते बहिः क्रिया भवति सच मानापनोदनावधिः, अतो वैक्लव्यात् मानापनोदनात् सर्वमेवाश्रु समागतं तन्मानवतीभिर्निरुद्धमप्यास्रवत् ईषत् सुस्राव । ननु मानवतीनामेतदनुचितं तत्राह हे भृगुवर्य ! भगवन्माहात्म्यादित्युक्तं भवति प्रत्युत तासामेव वैक्लव्यं जातम् ॥ ३३ ॥ ❀ ❀ एवं तासामतिभावं भगवति निरूप्य आश्चर्यमिति शंकायां हेतुमाह यद्यप्यसाविति । यद्यपि रोदनमनुचितं वस्तुनः अलाभे तद्भवति स च पार्श्वगतः तत्रापि एकांते भावनानुसारेण भगवतैव कृतत्वात् तथापि तस्यांघ्रियुगं नूतनं तासां हि मनोरथश्चरणद्वयं स्थाप्यमिति स च अत्यन्तं रसाविर्भावे सम्बन्धादिभिर्जाते कर्तुं शक्यः । प्रथमं च भक्त्या धर्मेण वा लोकतो वा चरणक्षालने कृते संवाहने च कृते पूर्वोक्तो भवति । ततश्च भगवतश्चरणारविंदस्य नित्यनूतनत्वात् प्रथमक्रिययैव जन्मसमाप्तिः । अतो रोदनमनुचितमित्याह पदे पदे क्षणे प्रतिपदं वा नूतनादपि नूतनमेव । अतः का वा स्त्री मनोरथपूर्त्यभावात् सकृदपि विरता भवेत् अथवा तद्भक्तिविषयात् प्रथमसेवातो विरता भवेत् तदा ह्यग्रिममनोरथारम्भः, अतो रोदनमनुचितमिति भावः । अत्रार्थे निदर्शनमाह चलापीति वस्तुतः श्रीश्चला, तथाप्येकस्मिन् कार्ये समाप्ते अन्यत्र गच्छेत् तद्भगवत्येकमपि कार्यं न समाप्नोति नित्यनूतनत्वात् । अतो भगवन्तं कदाचिदपि न जहाति यथा एवं प्रकारेण लक्ष्मीम् अन्याश्च भार्या अपरिसमाप्तकार्या एव स्थापयति, ताश्च न जानन्ति ॥ ३४ ॥ ❀ ❀ एवमेव भूभारहरणार्थं प्रवृत्तो भगवान् एकक्रिययैव मध्ये असमाप्तया कार्यं समापितवानित्याह एवं नृपाणामिति । यथा स्त्रियः स्वयमेव तिष्ठन्ति क्षणांतरकार्यार्थं न प्रार्थ्यंते एवं भूभारहरणे प्रथमकार्ये समारब्धे अन्तिमपर्यंतं तदेवानुवर्त्तते यथा प्रथममग्निसम्बन्धे सर्वदाहपर्यंतं स्वयमेवानुवर्त्तते एवमयमद्भुतकर्मा न लोकसदृशः भूभारार्थं जन्म येषां, तत्र भगवत्कार्यमाह विधाय वैरं मिथः वैरं विधाय तस्य वैरस्य सामर्थ्यमाह श्वसनो यथाऽनलमिति वायुर्निमित्तम् अग्निरेव दाहकः स तु वंशवर्षणेन जातः सर्वं दहति तथाऽयमपि मिथो बलेन संपन्न न उपरतः मिथो वधं कृत्वा उपरत इत्यर्थः । जीवत्सु तेषु नोपरमेदिति भावः । निरायुध इति । निर्गतानि आयुधानि यस्य तस्य हि अन्योऽन्यमेवायुधम् अग्निरिंधनमिव । एवं सर्वसंहर्त्ता भगवान् महानयमद्भुतकर्मा तस्य सर्वं समाप्तम् ॥ ३५ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तमात्मजैरित्यत्र । भृगुणा भगवन्माहात्म्यस्यानुभूतत्वात्तद्वंशे प्रधानस्य तवाप्येतन्माहात्म्यज्ञानं भविष्यतीत्याशयेनाहुः भगवन्माहात्म्येत्यादि । यद्यपीत्यत्र । कृतत्वादिति पार्श्वगतेः कृतत्वात् । स चात्यन्तमिति । स मनोरथोत्यन्तमित्यर्थः । स पूर्वोक्त इति । मनोरथः । श्रीरिति । इयं देवीरूपा ज्ञेया, चिच्छक्तेर्बलवद्भगवन्निष्ठत्वात् ॥ ३३ ॥ ❀ ❀ एवं नृपाणामित्यत्र । न लोकसदृश इति । अतः स्वयमेवानुवर्तत इति शेषः, तत्रापीत्यादि । तथा चेदं तेषामागन्तुकं कार्यमित्यर्थः । तत्रेति । तेषां तादृशे कार्यद्वये तैर्जाते निमित्तमिति सहकारि ॥ ३४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

भगवत्पत्नीनां महोत्सवं दर्शयति–पत्न्य इति त्रिभिः । प्रोष्य देशान्तरे उषित्वा गृहानुपागतं पतिमारात् दूरादेव विलोक्य पत्न्यो रुक्मिण्यादयः आसनादाशयाच्च सहसा झटित्येवोत्तस्थुरित्यन्वयः । आसनादुत्थानं देहेन प्रसिद्धमेव, आशयादन्तःकरणादुत्थानं दिदृक्षौत्कण्ठ्यत्यागरूपं, दर्शने जाते तत्त्यागस्यावश्यम्भावात् । तथोत्थाने हेतुमाह–सञ्जातो मनसि महानुत्सवो हर्षो यासां ता इति । आरब्धुमिवोत्थितानामपि लज्जया प्रतिबन्धो जात इत्याशयेनाह–व्रीडितेति । व्रीडितानि लोचनानि आननानि च यासां ताः । अपाङ्गैरेव वीक्षणाद्व्रीडितलोचनाः । अवनतमुखत्वाद् व्रीडिताननाः साकं व्रतैरिति, हास्यक्रीडावर्जनादिनियमा अपि ताभ्य उत्तस्थुरित्यर्थः । यद्वा धृतव्रता एवोत्तस्थुरित्यर्थः । व्रतानि तु याज्ञवल्क्येनोक्तानि–'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका' इति ॥ ३१ ॥ ❀ ❀ तथापि प्रकारान्तरैः परिरेभिरे इत्याह–तमिति । यद्यपि त्वमपि भगवत्स्नेहवांस्तथापि तासां स्नेहाश्चर्यं शृण्वित्याशयेन सम्बोधयति–हे भृगुवर्येति । तमायान्तं पतिं दर्शनात्पूर्वं आत्मना मनसा तदनन्तरं दृष्टिभिः ततः समीपमागतमात्मजैः पुत्रद्वारा च परिरेभिरे आलिङ्गितवत्य इत्यन्वयः । तदा च विलज्जतीनां तासामपशकुनभिया नेत्रयोर्निरुद्धमप्यम्बु बाष्पं वैक्लवादवैवश्यादास्रवत् ईषत् सुस्राव । व्याकुलतायां हेतुमाह–दुरन्तभावा इति, दुरन्तः अन्तो भावः स्नेहो यासां तास्तथा ॥ ३२ ॥ ❀ ❀ नन्वलब्धलाभे ह्येवं स्नेहो न व्याकुलता सम्भवति, भगवांस्तु तासां सदा प्राप्त एव, अतः कथं व्याकुलतेत्याशङ्क्य भगवच्चरणसेवारसिकानां केषाञ्चिदपि ततो विरक्तिर्नास्ति, किं पुनस्तत्पत्नीनामिति कैमुत्यन्यायं प्रदर्श-

यति-यद्यपीति । यद्यप्यसौ श्रीकृष्णः पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकान्ते वर्त्तते स्म, तथापि तस्याप्यङ्घ्रियुगं पदे पदे प्रतिक्षणं नवं नवमेव भवति । अतस्तस्य पदाचरणारविन्दात्का विरमेत विश्लिष्यावस्थातुमुत्सहेत ? यच्चरणकमलं चला चञ्चलस्वभावाऽपि श्रीर्लक्ष्मीः कर्हिचिदपि न जहातीत्यन्वयः ॥ ३३ ॥ ❁ ❁ एवमुक्तं भगवच्चरितं सङ्क्षिप्यानुवदति-एवमिति द्वाभ्याम् । क्षितेर्भाराय जन्म येषां तेषाम् । अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां तेषां नृपाणां कौरवपाण्डवादीनां एवं मिथो वैरं विधाय निरायुधस्त्यक्तायुधः सन् स्वयं तेषां वधेन वधादुपरतो निवृत्तो जातः । तत्र दृष्टान्तमाह-श्वसनो यथाऽनलमिति, श्वसनो वायुर्यथा वेणूनामन्योन्यसङ्घर्षेणानलं संविधाय मिथस्तद्दाहेन स्वयं निवृत्तव्यापारो भवति तथेत्यर्थः ॥ ३४ ॥

हिन्दी अनुवाद

अपने प्राणनाथ भगवान् श्रीकृष्णको बहुत दिन बाहर रहनेके बाद घर आया देखकर रानियोंके हृदयमें बड़ा आनन्द हुआ । उन्हें अपने निकट देखकर वे एकाएक ध्यान छोड़कर उठ खड़ी हुईं; उन्होंने केवल आसनको ही नहीं, बल्कि उन नियमों[1] को भी त्याग दिया, जिन्हें उन्होंने पतिके प्रवासी होनेपर ग्रहण किया था । उस समय उनके मुख और नेत्रोंमें लज्जा छा गयी ॥ ३१ ॥ ❁ ❁ भगवानके प्रति उनका भाव बड़ा ही गम्भीर था । उन्होंने पहले मन-ही-मन, फिर नेत्रोंके द्वारा और तत्पश्चात् पुत्रोंके बहाने शरीरसे उनका आलिङ्गन किया । शौनकजी ! उस समय उनके नेत्रोंमें जो प्रेमके आँसू छलक आये थे, उन्हें सङ्कोचवश उन्होंने बहुत रोका । फिर भी विवशताके कारण वे ढलक ही गये ॥ ३२ ॥ ❁ ❁ यद्यपि भगवान् श्रीकृष्ण एकान्तमें सवदा ही उनके पास रहते थे तथापि उनके चरण-कमल उन्हें पद-पदपर नये-नये जान पड़ते । भला, स्वभावसे ही चञ्चल लक्ष्मी जिन्हें एक क्षणके लिये भी कभी नहीं छोड़तीं, उनकी सन्निधिसे किस स्त्रीको तृप्ति हो सकती है ॥ ३३ ॥ ❁ ❁ जैसे वायु बाँसोंके संघर्षसे दावानल पैदा करके उन्हें जला देता है, वैसे ही पृथ्वीके भारभूत और शक्तिशाली राजाओंमें परस्पर फूट डालकर बिना शस्त्रग्रहण किये ही भगवान् श्रीकृष्णने उन्हें कई अक्षौहिणी सेनासहित एक दूसरेसे मरवा डाला और उसके बाद आप भी उपराम हो गये ॥ ३४ ॥

स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया । रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा ॥ ३५ ॥
उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासाम् ।
सम्मुह्य चापमजहात्प्रमदोत्तमास्ता यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥
तमयं[2] मन्यते लोको ह्यसङ्गमपि सङ्गिनम् । आत्मौपम्येन मनुजं व्यापृण्वानं[3] यतोऽबुधः ॥ ३७ ॥
एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदाऽऽत्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥
तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः । अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने श्रीकृष्णद्वारकाप्रवेशो नामैकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्त्रीरत्नकूटस्थ उत्तमस्त्रीकदंबस्थः ॥ ३५ ॥ ❁ ❁ नन्वेवं स्त्रीसंगादिभिः संसारप्रतीतेः कथं भगवानवतीर्ण इत्युच्यते तत्राह उद्दामेति द्वाभ्याम् । यासामुद्दामो गंभीरो यो भावोऽभिप्रायस्तस्य पिशुनः सूचकोऽमलो वल्गुः सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतोऽमदनः श्रीमहादेवोपि संमुह्य लज्जया चापं पिनाकमजहात् । एवंप्रभावा याः स्त्रियः इत्येतावद्विवक्षितम् । यद्वा भगवतो मोहिनीरूपेण महेशोऽपि मोहित एवमेताश्च तादृग्विलासा एवेति तथोक्तम् । ताः कुहकैः कपटैर्विभ्रमैर्यस्येन्द्रियं मनो विमथितुं क्षोभयितुं न शेकुर्न शक्ताः । अथ वा निहतस्ताडितो मदनोऽपि जगद्विजयी संमुह्य तत्तत्कर्तव्यतामूढः संधापं धनुर्लज्जयाजहाज्जहौ ताश्च प्रमदोत्तमाः कामविजयिन्योऽपीत्यादि पूर्ववत् ॥ ३६ ॥ ❁ ❁ तं श्रीकृष्णमयं प्राकृतो लोक आत्मौपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते । अत्र हेतुः-व्यापृण्वानं व्याप्रियमाणम् । यतोऽयमबुधोऽतत्त्वज्ञः ॥ ३७ ॥ ❁ ❁ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह । एतदिति ईशस्येशनमैश्वर्यं नामैतदेव । किं तत् प्रकृतिस्थोऽपि तस्या गुणैः सुखदुःखादिभिः सदा

---

१. जिस स्त्रीका पति विदेश गया हो, उसे इन नियमोंका पालन करना चाहिए-'क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥' जिसका पति परदेश गया हो, उस स्त्रीको खेल-कूद, शृङ्गार, सामाजिक उत्सवोंमें भाग लेना, हँसी-मजाक करना और पराये घर जाना-इन पाँच कामोंको त्याग देना चाहिये । २. प्रा० पा०-मन्यते तमयं लोको । ३. प्रा० पा०-व्यापृण्वानमतोऽबुधः ।

न युज्यत इति यत् । यथात्मस्थैरानन्दादिभिरात्माश्रयापि बुद्धिर्न युज्यते तद्वत् । वैधर्म्ये दृष्टान्तो वा । आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यत इति एवं वा । असदात्मा देहस्तत्रस्थैर्गुणैस्तदाश्रया बुद्धिस्तदुपाधिर्जीवो यथा युज्यत एवं प्रकृतिस्थोऽपि तद्गुणैर्न युज्यत इति यदेतदीशनमीशस्येति ॥ ३८ ॥ ❀ ❀ तत्पत्न्योऽपि तस्य तत्त्वं न जानन्तीत्याह । तं स्त्रैणमात्मवश्यं रह एकान्तेऽनुव्रतमनुसृतं च मेनिरे । भर्तुरप्रमाणविदः प्रमाणमियत्तां महिमानमजानन्त्य इत्यर्थः । ईश्वरं क्षेत्रज्ञं मतयोऽहंवृत्तयो यथा स्वाधीनं स्वधर्मयोगिनं मन्यन्ते तद्वत् । यद्वा यथा तासां मतयः कल्पनास्तथा तथा तमीश्वरं स्त्रैणादिरूपं मेनिर इत्यर्थः ॥ ३९ ॥

इति श्रीमद्भागवते प्रथमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

य एवमुपरतः स एव रेमे इति योज्यम् । स्वेषु निजेषु या माया तत्सुखचिकीर्षामयप्रेमा तया लोकेऽवतीर्ण इति तस्या एव सर्वावतारप्रयोजननिमित्तत्वात्स्त्रीरत्नकूटस्थोपि तादृशरमणावेशकारिप्रेमविशेषरूपयानयैव रेमे न तु प्रसिद्धकामेनेत्यर्थः । तत्र रत्नपदेन तासामपि तद्योग्यत्वं बोधयित्वा तादृशप्रेमविशेषमयत्वं बोधितम् । एवं भाववैलक्षण्येऽपि क्रियया साम्यमित्याह–प्राकृतो यथेति । अत्र श्रीभगवतोप्यप्राकृतत्वं दर्शयित्वा तद्वत्कामविषयत्वं निराकृतम् । अत्र विश्वनाथः–स्वमाया योगमायैव स्त्रीरत्नसमूहे प्रकाशबाहुल्येन प्रत्येकमेव तिष्ठतीति सः प्राकृतो यथेत्यनेन तस्य तथा रमणकारणस्य कामस्य रमणस्य चाप्राकृतत्वान्निर्गुणत्वमुक्तमित्याह ॥ ३५ ॥ ❀ ❀ अमदनो मदनदाहकत्वेन तदनधीनः । एवंप्रभावा महादेवमोहनसमर्थाः याः यथहं स्त्रीकटाक्षैर्जितस्तर्हि किं तच्छेदासमर्थेनानेन धनुषेति तत्त्यक्तवानिति भावः । एतद्वृत्तमदृष्टचरं मत्वाह–यद्वेति । एता भगवत्पत्न्यश्च तादृग्विलासा भगवत्तुल्यप्रभावा एवेति हेतोस्तथोक्तममदनोपीत्युक्तम् । अत्र संदर्भः–पुनरपि कामानधीनत्वमाह–मदनः प्राकृतः काम उद्भटभावसूचकनिर्मलमनोहराभ्यां हासव्रीडावलोकनाभ्यां निहतस्तन्महिमदर्शनेन स्वयमेवोत्कार्थीकृतस्वास्त्रादिबलोभूत् । अत एव संमुह्य चापमजहात् । "भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण । अस्त्राणि निर्जितजगन्ति किमर्पितानि" इतिवत् । तत्र निजास्त्रप्रयोगं न कुरुत एवेत्यर्थः । तथाभूता अपि प्रमदोत्तमाः प्रमदेन प्रकृष्टप्रेमानन्दविशेषेण परमोत्कृष्टास्ताः स्ववृंद एव याः स्वतोऽपि प्रेमवत्यस्तासां साम्येच्छया कुहकैस्तादृशप्रेमाभावेन कपटांशप्रयुक्तैः सद्भिः कटाक्षादिभिर्यस्येन्द्रियं विमथितुं तद्विशेषेण मथितुं न शेकुः । किं तु स्वप्रेमानुरूपमेव शेकुरिति । तस्मात्प्रेममात्रोत्थायिविकारित्वात्तस्य कामुकवैलक्षण्यमिति भावः । विश्वनाथस्तु–नन्विन्द्रियैर्विषयान्भुंजानस्य तस्य कथमप्राकृतत्वं तत्राह । यासाम् उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकाभ्यां कृष्णविषयकाभ्यां स्वरूपकंदर्पपीडोत्थाभ्यां निहतः अहो एता मच्छराघातं विनैव सस्पृहं कान्तमालोकयन्ते इति विचारयन्नेव तदतिमाधुर्यावलोकोत्थविस्मयवशीकृतः सन्मदनः प्राकृतकंदर्पस्तन्मोहनार्थं प्राप्तोऽपि स्वयं संमुह्य चापमजहात् । आसां भ्रूचापाकृष्टानां व्रीडावलोकशराणामग्रे किं मे चापेन सशरेणेति तं तत्याज । ते मदोत्तमा अपि यस्येन्द्रियं कुहकैः कपटप्रयुक्तैर्वल्गुहासादिभिर्न शेकुः । किं तु प्रेमप्रयुक्तैः शेकुरिति तासां समंजसरतिमत्त्वात्प्रेम काममया अपि कटाक्षादयः सम्भवन्ति । तत्राद्या भावपिशुनशब्देनोच्यन्ते । द्वितीयाः कुहकशब्देन । तत्राद्यैर्वशीकृतेन्द्रियत्वेऽपि भगवतोऽप्राकृतत्वलक्षणं नैर्गुण्यमेव तस्य प्रेमवश्यत्वात् । प्रेम्णश्च चिच्छक्तिविलासत्वात्तन्मयानां कटाक्षादीनाञ्च तदुत्थितस्य कामस्य च तत्कारणस्य च रमणस्य च चिन्मयत्वाद्विषयभोगशब्देन वक्तुमशक्यत्वान्मायिकानामेव शब्दस्पर्शादीनां विषयशब्देनाभिधानादिति । द्वितीयैः प्रेमरहितैर्वशीकारासंभवात् "यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः" इत्युक्तम् । सर्वथैव तदिन्द्रियविमथनाभावे व्याख्याते "रमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा" इत्यनेन व्यंजिता रमणासक्तिश्च नोपपद्यते । किञ्चात्र कादाचित्कैस्तदीयकाममयकटाक्षादिभिर्वशीकाराभावेपि तेषां प्राकृतत्वं न वाच्यम् । पट्टमहिषीणां सर्वासां चिच्छक्तित्वात्तदीयेषु कटाक्षादिषु प्राकृतत्वप्रवेशाशक्तेः । न च स्वरूपभूतत्वेपि चिच्छक्तिसामान्यस्यैव वशो भगवान्, किं तु चिच्छक्तिविशेषस्य प्रेम्ण एवेति सिद्धान्तादिति सर्वमनवद्यम् ॥ ३६ ॥ ❀ ❀ अत्र संगिमनने लोको बहिर्दर्शी व्याप्रुण्वानं व्याप्रियमाणं सत्यभामायामासक्तेरेव पारिजातार्थं बहुव्यापारदर्शनादित्यर्थः । अतोऽबुधः सदसद्विवेचनशून्यः नीलमणिं काचमिव प्रेमाणमेव विषयासक्तिं निश्चिनोतीत्यर्थः ॥ ३७ ॥ ❀ ❀ अत्रासंगित्वे हेतुमाशंकते । कुत इति । आनन्दादीनां कदाचिद्बुद्धौ दर्शनादाह–वैधर्म्येति । अकारप्रश्लेषेणार्थान्तरमाह–एवं वेति । अत्र वेति । अत्र विश्वनाथः–ननु भवतु नाम तासां चिच्छक्तित्वात्तद्रमणादेर्निर्गुणत्वं तदपि प्राकृतप्रपंचमध्ये प्राकृत एव यदुवंशेवतीर्णस्य प्राकृतानामेव जरासंधादीनामसुराणां रूपशब्दादीन्वषयान्स्वचक्षुःश्रोत्रादीन्द्रियैराददानस्य गुणसंगः खलु दुर्वार एवेत्यत आह–एतदिति । ईशस्येश्वरस्येशनमैश्वर्यं नामैतदिति यत्प्रकृतौ स्थितोपि तस्या गुणैर्न युज्यते । गुणैः कीदृशैरात्मस्थैः । अयमर्थः–स्वयं गुणेषु तिष्ठति गुणा अपि तस्मिंस्तिष्ठंति तदपि तस्य गुणैरसंपर्क इति । वस्तुतो भगवत एव सर्वप्रपंचाधिष्ठानत्वेधिष्ठातृत्वे चापि निर्गुणत्वमेवोक्तं "साक्षी चेता केवलो निर्गुणश्च" इति । "सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः" इति । "हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः" इत्यादिभिः श्रुतिस्मृति-

भिर्यथा तदाश्रया-स एवाश्रयो विषयो यस्याः सा तत्स्मरणवती परमभागवतीनां बुद्धिः प्रकृतिस्थापि संतुष्टिस्तुतिनिंदादिषु तृप्तिक्षुत्पिपासापीडादिषु जागरस्वप्नसुषुप्तिषु सत्त्वादिगुणेषु स्थितापि तेष्वौदासीन्यान्न तैर्युज्यते। तथैव प्राकृतान्विषयानाददानस्यापि तस्य तेष्वासक्तिशून्यत्वान्न तैर्योग इति । अत्र संदर्भः-प्राकृतगुणेष्वसक्तत्वे हेतुः-एतदिति । अत एवादौ प्रकृतिगुणमये प्रपंचे तिष्ठन्नपि सदैव तद्गुणैर्न युज्यत इति यत् एतदीशस्यैवमैश्वर्यम् । तत्र व्यतिरेके दृष्टांतः-यथेति । तदाश्रया प्रकृत्याश्रया बुद्धिर्जीवज्ञानं यथा युज्यते तथा नेति । अन्वये वा तदाश्रया भगवदाश्रया परमभागवतानां बुद्धिर्यथा प्रकृतिस्था कथंचित्तत्र पतितापि न युज्यते तद्वत् । एवमेवोक्तं तृतीये "भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान्सिषेवे द्वार्वत्यामसक्तः सांख्यमाश्रितः ।।" इति ।। ३८ ।। ❀ ❀ ननु तर्हि यासु तस्य सदैवासक्तिस्ताः पट्टमहिष्य एवाभिज्ञास्तस्य तत्त्वं सामस्त्येन जानंति, नैवमित्याह-तत्पत्न्योपीति । रसपुष्टिसिद्ध्यर्थं तासां स्वरूपभूतानामपि योगमायया भगवतैव स्वसंपूर्णज्ञानावरणात्ता अपि तं न जानंतीत्याह-तमिति । तं स्वभर्त्तारं रहोनुव्रतं स्वप्रेमवश्यमपि स्त्रैणं स्त्रीमात्रभाववश्यं मेनिरे। यतो मूढाः भगवतैवादिरसपुष्ट्यर्थं मूढीकृताः । इत्यर्थ इति । यथा समुद्रे विहरंतोपि समुद्रस्येयत्तां न जानंति तथा भर्तुः प्रमाणं न विदंतीति भावः । मतीनां जडत्वात्तथा मननं न संगच्छत इति चेत्तत्राह-यद्वेति । इत्यर्थ इति । यथा यथा तासां मतयः प्रेमवासनास्तथा तथैव स प्रतीयत इति भावः । "ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्" इति स्वेच्छामयस्य न तु भूतमयस्येत्यादेश्च । यद्वा मतयः शास्त्रकृतां वैशेषिकादीनां बुद्धय ईश्वरनिरूपणे प्रवृत्ताः जगदुपादानत्वमीश्वरत्वं जगन्नियंतृत्वं तथा जगन्निमित्तत्वमीश्वरत्वमिति मतवैविध्यात् । किञ्चित्किञ्चिज्जानंत्योपि वस्तुतो मूढा एवेति "याः संपर्यचरन्प्रेम्णा" इत्याद्युक्तेस्तासां प्रेमवत्त्वाद्भगवतश्च प्रेमवश्यत्वात्तासां प्राकृतत्वं न व्याख्येयम् ।। ३९ ।।

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे एकादशोऽध्यायः ॥ ११ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अजहात् त्यक्तवानिति काचित् पुराणप्रसिद्धाख्यायिकेति प्राञ्चः ।। ३७ ।। ❀ ❀ व्याप्रियमाणं व्यापारविशिष्टमित्यर्थः ।। ३८-४० ।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीराधारमणदासगोस्वामिविरचितायां दीपनीव्याख्याटिप्पण्यामेकादशोऽध्यायः ।। ११ ।।

श्रीमद्वीरराघवव्याख्या

स एष इति । स एषः, स्वमायया आत्मीयसंकल्पेन अस्मिन्नरलोकेऽवतीर्णो भगवान्स्त्रिय एव रत्नानि तेषां कूटस्थः समुद्‌ ...थितः रेमे चिक्रीडे यथा प्राकृतः स्त्रीवश्यस्तद्वत् , प्राकृतो यथेत्यनेन स्त्रीवश्यत्वानुकारमात्रमेव, न तु परमार्थतस्तदस्तीति सूचितम् ।। ३६ ।। ❀ ❀ तदेव व्यञ्जयितुं विशिनष्टि उद्दामेति । ताः प्रमदोत्तमाः कुहकैर्वचनोपायैर्यस्येंद्रियं प्रमथितुं न शेकुः न प्राभवन् तमपीत्युत्तरेणान्वयः । सुतरां पारवश्यत्वाभावसूचनायास्य प्रमदोत्तमा विशिनष्टि-यासामुद्दामभावादिभिर्निहतः सन्मदनोऽपि संमुह्य मोहं प्राप्य स्वयं धनुरजहात्तत्याज ताः प्रमदोत्तमा इत्यन्वयः । उद्दाम उदारोऽगाध इति यावत् भावोऽभिप्रायस्तेन पिशुनः सूचिताकर्षसूचकः अमलः सुन्दरश्च हासस्तेन च व्रीडापूर्वकावलोकनेन च निहतः अभिभूतः ।। ३७ ।। ❀ ❀ एवंविधं तं यः स्त्रीवश्यं मन्यते सोऽज्ञ इत्याह तमिति । मनुजं व्याप्रृण्वानं मनुजवच्चेष्टमानं मनुष्यभावेन स्वयाथात्म्यमाच्छादयंतमित्यर्थः वस्तुतो निःसंगमपि संगिनमिव भासमानं तमिमं भगवंतं यो लोको जन आत्मौपम्येन स्वतुल्यत्वेन मन्यते सोऽयं लोकः । अतो हेतोरबुधः नितरामज्ञः ।। ३८ ।। ❀ ❀ अथ विषयैरनाकृष्टत्वमीश्वरस्य नाश्चर्यमित्यभिप्रायेणेश्वरत्वं निर्वक्ति एतदिति । प्रकृतिस्थोऽपि मूलप्रकृतिव्यापकोऽपि तद्गुणैः सत्त्वादिभिरात्मस्थैर्जीवगतैरविद्यास्मितारागद्वेषादिभिश्च गुणैः सदा न युज्यते इति यदेतदेवेश्वरस्येशनमित्यन्वयः, सदेत्यनेन मुक्तव्यावृत्तिः स हि पूर्वं तैर्युक्तः । हेयगुणास्पर्शोदाहरणमाह यथेति । तदाश्रया ईशाश्रया बुद्धिस्तज्ज्ञानं यथा सत्त्वादिभिर्न युज्यते । न हि "स्वाभाविकी ज्ञानबलक्रिया चे"त्युक्तविधं स्वतः सर्वगतस्य ज्ञानं सत्त्वरजस्तमोऽन्वयाधीनसम्यक्त्वासम्यक्त्वयुक्तं स एवं सर्वप्रकारेण चिदचिद्गतहेयरहित इति यत्तदेव हि ईश्वरस्येश्वरत्वमित्यर्थः ।। ३९ ।। ❀ ❀ यथैवमज्ञो लोकस्तमुक्तविधिमीश्वरमात्मतुल्यं मन्यते तथा स्त्रियोऽप्यज्ञानादात्मवश्यममन्यंतेत्याह तमिति । संसारिणामिंद्रियप्रसूता मतयो यथेश्वरं न जानंति किंतु मौढ्यादन्यथा मेनिरे एवंभूतास्ता अबलाः स्त्रियोऽपि तं भगवंतं रहः स्त्रैणं स्त्रीसमूहमनुव्रतं स्त्रीसमूहानुवर्त्तिनं मेनिरे । तत्र हेतुः भर्तुरप्रमाणविदः प्रसीयत इति प्रमाणं स्वरूपं तत्स्वरूपमजानंत्यः ।। ४० ।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायामेकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वमायया स्वेच्छया प्राकृतः स्त्रीजितः स्त्रीरत्नकूटस्थः स्त्रीश्रेष्ठसमूहस्थः ।। ३६ ।। ❀ ❀ स्त्रीश्रेष्ठसमूहगतः स्त्रीजितान्अनुकरोत्येव परं न स्वयं स्त्रीजित इत्याह उद्दामेति । यासामुद्दामभावस्य उत्कृष्टशृंगारचेष्टितस्य पिशुनः सूचकः अमलः निर्व्यलीकः

वल्गुः कोमलः हासः स्मितं व्रीडया अवलोकः कटाक्षवीक्षणम् उद्दामभावपिशुनामलवल्गुहासेन व्रीडावलोकनेन च विहतः ताडितः मदनोऽपि संमुह्य पुष्पाख्यं चापमजहात् मुक्तवांस्ताः प्रमदोत्तमाः कुहकैरुद्दामभावादिभिर्यस्य श्रीकृष्णस्येन्द्रियं प्रमथितुं वशीकर्तुं न शेकुः तस्य कुतः स्त्रीजितत्वमित्यन्वयः ॥ ३७ ॥ ❀ ❀ तस्य स्त्रीजितत्वपरिवादोऽज्ञसंमत्येत्याह मन्यत इति । अज्ञलोकः स्वसुखानुभवेनैवाप्तकामतया स्त्रीष्वसक्तमपि आत्मौपम्येनात्मानं दृष्टांतीकृत्य स्त्रीसंगिनं तन्मयं स्त्रीमयं मन्यते हि यस्मात्तस्मादयं जनोऽबुधः अज्ञः । कथंभूतं मनुजं प्रावृण्वानम् आच्छादयंतम् ॥ ३८ ॥ ❀ ❀ तर्हि ज्ञानिप्रवादः कीदृश इति तत्राह यत्तदिति । प्रकृतिस्थोऽपि सदात्मस्थैः स्वसाधारणैस्तद्गुणैः प्रकृतिगुणैः सत्त्वादिभिः शब्दादिभिश्च न युज्यते न संबध्यत इति यत्तदीशस्येशनमीश्वरत्वं तत्र व्यत्यासदृष्टांतमाह यथेति । यथा प्रकृतिस्थानां ज्ञानिनां तदाश्रया तस्य कृष्णस्याश्रया बुद्धिः प्रकृतिगुणैः न बध्यते किमु तस्य प्रकृतिगुणसंबंधेनेत्यतोऽबुधजनप्रवाद इति भावः ॥ ३९ ॥ ❀ ❀ तथाविदोऽसुरा इति सोदाहरणमाह तमिति । खला इंद्रियारामा मूढाः शास्त्रार्थाविदः तामसराजसप्रकृतयः, अत एवाप्रमाणविदोऽनंतगुणत्वादिप्रमाणाविदस्तं कृष्णमनुव्रतं भृत्यवदनुगतं स्त्रैणं स्त्रीजितं मेनिरे, वैशेषिकादिवादिनां मतयो यथेश्वरं यथामति मेनिरे तथा तस्मान्न तस्याप्तकामस्य स्त्रीजितत्वमिति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायामेकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

य एवमुपरतः स एव रेमे इति योज्यम् । स्वेषु निजजनेषु या माया कृपा तत्सुखचिकीर्षामयप्रेमा तया लोकेऽवतीर्ण इति तस्या एव सर्वावतारप्रयोजननिमित्तत्वात् स्त्रीरत्नकूटस्थोऽपि तादृशरमणावेशकारिप्रेमविशेषरूपया तयैव रेमे न तु प्रसिद्धकामेनेत्यर्थः । अत्र रत्नपदेन तासामपि तद्योग्यत्वं बोधयित्वा तादृशप्रेमविशेषमयत्वं बोधितम् । एवं भाववैलक्षण्येऽपि क्रियया साम्यमित्याह प्राकृतो यथेति । अत्र श्रीभगवतोऽप्यप्राकृतत्वं दर्शयित्वा तद्वत् कामविषयत्वं (कामविशेषमयत्वं) निराकृतम् ॥ ३६ ॥ ❀ ❀ पुनरपि तदेव स्थापयति उद्दामेति । मदनश्च प्राकृतः कामः उद्भटभावसूचकनिर्मलमनोहराभ्यां हासव्रीडावलोकाभ्यां निहतस्तन्महिमदर्शनेन स्वयमेवोक्तार्थीकृतस्वास्त्रादिबलोऽभूत् । अत एव संमुह्य चापमजहात् "भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि बाणा गुणः श्रवणपालिरिति स्मरेण । अस्त्राणि निर्जितजगन्ति किमर्पितानी" तिवत् । तत्र निजास्त्रप्रयोगं न कुरुते एवेत्यर्थः । तथाभूता अपि प्रमदोत्तमाः प्रमदेन प्रकृष्टप्रेमानन्दविशेषेण परमोत्कृष्टास्ताः स्ववृन्द एव याः स्वतोऽप्युत्कृष्टप्रेमवत्यस्तासां साम्येच्छया कुहकैस्तादृशप्रेमाभावेन कपटांशप्रयुक्तैः सद्भिः कटाक्षादिभिर्यस्येन्द्रियं विमथितुं न शेकुः । किन्तु स्वप्रेमानुरूपमेव शेकुरिति । तस्मात् प्रेममात्रोत्थायिविकारत्वात्तस्य कामुकवैलक्षण्यमिति भावः ॥ ३७ ॥ ❀ ❀ तस्मादेतत्तत्त्वमविज्ञायैव अयं साधारणो लोकः असक्तमपि यतः आत्मौपम्येन मनुजं व्यापृण्वानं कामादिव्यापारयुक्तम् च मन्यते यथात्मनः प्राकृतमनुष्यत्वादि तथैव मन्यत इत्यर्थः । अत एवाबुध एवासौ लोक इति ॥ ३८ ॥ ❀ ❀ प्राकृतगुणेष्वसक्तत्वे हेतुः एतदिति । अवतारादौ त्रिगुणमये प्रपञ्चे तिष्ठन्नपि सदैव तद्गुणैर्न युज्यते इति यत् एतदीशस्येशनमैश्वर्यम् । तत्र व्यतिरेके दृष्टान्तः-यथेति-तदाश्रा प्रकृत्याश्रया बुद्धिर्जीवज्ञानं यथा युज्यते तथा नेति । अन्वये वा तदाश्रया श्रीभगवदाश्रया परमभागवतानां बुद्धिर्यथा प्रकृतिस्था कथंचित्तत्र पतितापि न युज्यते तद्वत् । एवमेवोक्तं तृतीये-'भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमाश्रितः' इति ॥ ३९ ॥ ❀ ❀ ननु तादृशमैश्वर्यं तस्य ताः किं न जानन्ति तदा रहोलीलायां बुद्ध्येत्येव तादृशप्रेमेत्याशंक्याह तमिति । ईश्वरमपि तं रह एकान्तलीलायां मौढ्यात् तादृशप्रेममोहात् भर्तुरप्रमाणविदः तादृशैश्वर्यज्ञानरहिताः स्त्रैणम् आत्मवश्यम् अनुव्रतम् अनुसृतं च मेनिरे । तच्च नायुक्तमित्याह-यथा तासां मतयः प्रेमवासना तथैव स इति । 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमि'त्यादेः स्वेच्छामयस्येत्यादेश्च प्रामाण्यादिति भावः ॥ ४० ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वमायया योगमाययैव । स्त्रीरत्नसमूहे प्रकाशबाहुल्येन प्रत्येकमेव तिष्ठतीति सः । प्राकृतो यथेत्यनेन तस्य तथा रमणकारणस्य कामस्य रमणस्य च अप्राकृतत्वात् निर्गुणत्वमुक्तम् ॥ ३६ ॥ ❀ ❀ नन्विन्द्रियैर्विषयान् भुञ्जानस्य तस्य कथमप्राकृतत्वं तत्राह । यासाम् उद्दामः गम्भीरो यो भावः प्रेमा तस्य पिशुनः सूचकोऽमलो वल्गुः सुन्दरो हासो व्रीडासहितोऽवलोकश्च ताभ्यां कृष्णविषयकाभ्यां स्वरूपभूतकन्दर्पपीडोत्थाभ्यां निहतः 'अहो एता मच्छराघातं विनैव सस्पृहं कान्तमालोकयन्ते' इति विचारयन्नेव तदतिमाधुर्यावलोकोत्थविस्मयविवशीकृतः सन् मदनः प्राकृतकन्दर्पस्तन्मोहनार्थमागतोऽपि स्वयं संमुह्य चापम् अजहात् । आसां भ्रूचापाकृष्टानां व्रीडावलोकशराणामग्रे किं मे चापेन सशरेणेति तं तत्याज । ताः प्रमदोत्तमा अपि यस्येन्द्रियं मथितुं स्ववशीकर्तुं कुहकैः कपटप्रयुक्तैर्वल्गुहासादिभिर्न शेकुः, किन्तु प्रेमप्रयुक्तैः शेकुरिति तासां समञ्जसरतित्वात् प्रेममयाः

काममया अपि कटाक्षादयः सम्भवन्ति । तत्राद्या भावपिशुनशब्देनोच्यन्ते । द्वितीयाः कुहकशब्देन । तत्राद्यैर्वशीकृतेन्द्रियत्वेऽपि भगवतोऽप्राकृतत्वलक्षणं नैर्गुण्यमेव तस्य प्रेमवश्यत्वात् प्रेम्णश्च चिच्छक्तिविलासविशेषत्वात्तन्मयानां कटाक्षादीनाञ्च तदुत्थितस्य कामस्य तत्कारणकस्य रमणस्य च चिन्मयत्वाद्विषयभोगशब्देन वक्तुमशक्यत्वान्मायिकानामेव शब्दस्पर्शादीनां विषयशब्देनाभिधानादिति । द्वितीयैः प्रेमरहितैर्वशीकारासम्भवात् यस्येन्द्रियं विमथितुं कुहकैर्न शेकुरित्युक्तम् । सर्व्वथैव तदिन्द्रियविमथनाभावे व्याख्याते 'रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथे'त्यनेन व्यञ्जिता रमणासक्तिश्च नोपपद्यते । किञ्चात्र कादाचित्कैस्तदीयकाममयकटाक्षादिभिर्वशीकाराभावेऽपि तेषां प्राकृतत्वं न वाच्यं, पट्टमहिषीणां सर्वासां चिच्छक्तित्वात् तदीयेषु कटाक्षादिषु प्राकृतत्वप्रवेशाशक्तेः । न च स्वरूपभूतत्वेऽपि चिच्छक्तिसामान्यस्यैव वशो भगवान् किन्तु चिच्छक्तिविशेषस्य प्रेम्ण एवेति सिद्धान्तादिति सर्व्वमनवद्यम् ॥ ३७ ॥ ❀ ❀ एवं वस्तुतो विषयसङ्गरहितमपि तम् अनभिज्ञो बहिर्दर्शी लोको विषयसङ्गिनमेव मन्यते इत्याह तमयमिति । आत्मौपम्येन स्वसादृश्येन । तत्र हेतुर्व्यापृण्वानं व्याप्रियमाणं सत्यभामायामासक्तेरेव पारिजातार्थबहुव्यापारदर्शनादित्यर्थः । अतोऽबुधः सदसद्विवेचनशून्यः नीलमणिं काचमिव प्रेमाणमेव विषयासक्तिं निश्चिनोतीत्यर्थः ॥ ३८ ॥ ❀ ❀ ननु भवतु नाम तासां चिच्छक्तित्वात् तद्रमणादेर्निर्गुणत्वम् । तदपि प्राकृतप्रपञ्चमध्ये प्राकृते एव यदुवंशे अवतीर्णस्य प्राकृतानामेव जरासन्धादीनामसुराणां रूपशब्दादीन् विषयान् स्वचक्षुःश्रोत्रादीन्द्रियैराददानस्य गुणसंगः खलु दुर्वार एव इत्यत आह एतदिति । ईशस्य ईशनमैश्वर्यं नामैतदिति यत् प्रकृतौ स्थितोऽपि तस्या गुणैः न युज्यते । गुणैः कीदृशैः आत्मस्थैः । अयमर्थः–स्वयं गुणेषु तिष्ठति गुणा अपि तस्मिंस्तिष्ठन्ति तदपि तस्य गुणैरसम्पर्क इति वस्तुतो भगवत एव सर्वप्रपंचस्याधिष्ठानत्वे चाधिष्ठातृत्वे चापि निर्गुणत्वमेवोक्तम् । "साक्षी चेता केवलो निर्गुणश्चे" ति "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः पर" इत्यादिश्रुतिस्मृतिभिः । यथा तदाश्रया स एवाश्रयो विषयो यस्याः सा तत्सरणवती परमभागवतानां बुद्धिः प्रकृतिस्थापि संतुष्टिस्तुतिनिन्दादिषु तृप्तिक्षुत्पिपासापीडादिषु जागरस्वप्नसुषुप्तिषु सत्त्वादिगुणेषु स्थितापि तेष्वौदासीन्यात् न तैर्युज्यते इति । तथैव प्राकृतान् विषयान् आददानस्यापि तस्य तेष्वासक्तिशून्यत्वात् न तैर्योगः ॥ ३९ ॥ ❀ ❀ ननु तर्हि यासु तस्य सदैवासक्तिस्ताः पट्टमहिष्य एवाभिज्ञास्तस्य तत्त्वं सामस्त्येन जानन्ति । मैवम् । रसपुष्टिसिद्ध्यर्थं तासां स्वरूपभूतानामपि योगमायया भगवतैव स्वसम्पूर्णज्ञानावरणात् ता अपि तं न जानन्तीत्याह तमिति । तं स्वभर्त्तारं रहोऽनुव्रतं स्वप्रेमवश्यमपि स्त्रैणं स्त्रीमात्रभाववश्यं मेनिरे । यतो मूढा भगवतैवादिरसपुष्ट्यर्थं मूढीकृताः । अतः समुद्रे विहरन्तोऽपि यथा समुद्रस्येयत्तां न जानन्ति तथा भर्त्तुः प्रमाणं न विदन्ति । मतयः शास्त्रकृतां बुद्धिवृत्तयः ईश्वरनिरूपणे प्रवृत्ताः जगदुपादानत्वमीश्वरत्वं जगन्नियन्तृत्वं तथा जगन्निमित्तत्वमीश्वरत्वमिति मतवैविध्यात् किंचित्किंचिज्जानंत्योऽपि वस्तुतो मूढा एवेति । याश्च संपर्यचरन् प्रेम्णेत्यायुक्तेस्तासां प्रेमवत्त्वाद्भगवतश्च प्रेमवश्यत्वात् तासां प्राकृतत्वं न व्याख्येयम् ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकादशोऽपि प्रथमे सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स एवोक्तलीलः स्वमायया स्वकीयेषु नरलोकस्थभक्तेषु माया तया अस्मिन्प्राकृते नरलोकेऽवतीर्णः, अत एव स्त्रिय एव रत्नानि तेषां कूटः समूहस्तत्रस्थः स्वयमप्राकृत एव प्राकृतवत् रेमे चिक्रीडे । प्राकृतजनस्य यथार्हस्त्र्यादिवश्यस्तथायं कृष्ण इति प्रतीतिविषयोऽभूदिति फलितोऽर्थः ॥ ३६ ॥ ❀ ❀ भगवतोऽसंगस्य प्राकृतजनप्रतीत्या संगित्वमाह उद्दामेति चतुर्भिः । यासामुद्दामभावस्यागाधाभिप्रायस्य सूचकेन अमलेन वल्गुना सुंदरेण हासेन लीलावलोकेन च अमदनो भवोऽपि निहतोऽभिभूतः संमुह्य मोहं प्राप्य चापमजहात् पिनाकं तत्याज, ताः प्रमदोत्तमाः कुहकैर्वंचनाप्रकारैर्यस्येंद्रियं विमथितुं न शेकुस्तमित्युत्तरेणान्वयः ॥ ३७ ॥ ❀ ❀ अयं प्राकृतलोकः यतोऽबुधः कृष्णमनभिज्ञोऽतस्तमसंगिनमपि श्रीकृष्णं व्यापृण्वानं व्याप्रियमाणं संगिनं मनुजं मनुष्यं चात्मौपम्येन मन्यते ॥ ३८ ॥ ❀ ❀ प्रकृतिस्थोऽपि प्रकृतौ स्थितोऽपि व्याप्तोऽपि प्राकृतैर्गुणैर्न युज्यते न स्पृष्टो भवति तत्कार्य्यभूतैः रागद्वेषादिभिर्न युज्यते इति किमु वक्तव्यम् एतदीशस्येशनमीशत्वम् । तत्र दृष्टान्तः–यथात्मस्थैः परमात्मस्थैः कर्तृत्त्वादिभिर्बुद्धिर्न युज्यते अन्यथा बुद्धेः करणस्यैव कर्तृत्वभोक्तृत्वे बंधत्वे बंधमोक्षार्हता स्यात् ॥ ३९ ॥ ❀ ❀ अबलास्तु यासां यथा मते या बुद्धयस्तदनुसारेण तास्ताः मेनिरे इत्यन्वयः । तत्र श्रीरुक्मिण्याद्या ईश्वरं काश्चिद्रहोऽनुव्रतमेकांतेनुसृतं स्वपत्नीगामिनं धार्मिकं काश्चित्तु मूढा भर्तुः प्रमाणमजानंत्यः स्त्रैणमित्येवं दशमे स्कंधे स्फुटीभविष्यति ॥ ४० ॥

इती श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अतः परं भक्तोद्धारकभागवताधिकारिदेहनिष्पादनमवशिष्यते तदुत्तरत्र वक्ष्यते । मध्ये तस्य विरुद्धधर्माश्रयत्वं वक्तुं शृंगारक्रीडामाह स एष इति । स एष नरलोकेऽस्मिन्नवतीर्णः यथा कोऽपि न जानाति तथा स्वमायया रमणनिमित्ते स्त्रीरत्नकूटे

स्त्रीसमूहे स्वयमेव विद्यमानो भगवान् तद्दशमनापन्नः प्राकृतवद्रीतिं कृतवान् यावद्रसेन प्रविष्टः तावत्तस्य रसं न जानातीति कामशास्त्रं स्ववशे स्थितस्य न रस इति ॥ ३६ ॥ ❀ ❀ एवं भगवत्कृत्या अंगीकृता ग्लानिर्न दोषायेति न्यायेन भगवद्रमणं न तु विषयधर्मेण तथात्वमिति प्रतिपादयितुमाह उद्दामेति । यद्यपि स्त्रियो रतिसमर्थाः तथापि भगवन्मनो जेतुं न शक्ताः तासां सामर्थ्यमाह उद्दामस्त्यक्तशृं खलो यो भावः, अज्ञापनीये ज्ञापयतीति पिशुनः असमये अस्थाने च एव सन्नमलः स्वाभाविकत्वान्निर्दुष्टः स्वच्छो वा सूचितस्य हितकरणात् तत्रासामर्थ्यं वल्गुर्मनोहरः पुरुषस्य मनो हरतीति एतादृशो हासः प्रथमं प्रवृत्तः ततः कार्यानन्तरं व्रीडास्वतः प्रवृत्तत्वात् ततः स्ववंचितत्वसूचकदर्शनं तेनापि निहतः मदनः कन्दर्पः सर्वव्यामोहनार्थं प्रवृत्तः दृष्टिबलं ज्ञात्वा स्वयं चापमजहात् मत्कार्यमेता एव करिष्यन्तीति किं चापेनेति,यत्र मामपि मोहयंति तत्र कथमन्यो न मुग्धो भवेदिति एवं कामादप्यधिका कामपृतना ता एवैता भगवत्स्त्रियः, अथापि यस्य भगवतः इन्द्रियं मनः विमथितुं वशीकर्त्तुं कुहकैः कपटैः न शेकुः न समर्था जाताः । दृष्टिमोहितत्वात् युक्तमिति भावः ॥ ३७ ॥ ❀ ❀ एवमपि स्वयं पराजिताः अशक्ता अपि अज्ञानात् स्वधर्मं भगवति आरोपयन्तीत्याह तमयमिति । लोको भ्रांतः असंगमपि भगवन्तं संगिनं मन्यते । भगवान् संगी विषयसहचरितात्मत्वात् देवदत्तवत् इत्यनुमानेन उपाधिग्रहणसहितेन भगवंतमपि संगिरन्ते । तत्र विचारकाणामपि उपाध्यग्रहे हेतुः मनुजं व्यापृण्वानमिति आत्मानं मनुजं यथा लोको मन्यते तथाविशेषचेष्टाकर्त्तारम् अतस्तात्पर्यापरिज्ञानात् अज्ञत्वादिबोधने विद्यमान उपाधौ जीवत्वरूपे तदज्ञानाच्च तथा मन्ता अबुध इत्यर्थः ॥ ३८ ॥ ❀ ❀ ननु बोधनाक्रियायाः यथाज्ञानजनकत्वं तथा स्वाश्रयस्य निकृष्टत्वसम्पादकत्वमपि लोके तथैव व्याप्तेः अज्ञानादिकं जीवत्वसमानाधिकरणं दोषजन्यत्वात् मूर्च्छादिवदिति निष्प्रत्यूहानुमानेन जीवत्वमपि ज्ञापयति भ्रमजनकत्वेन प्रतारकत्वाच्च जीवत्वेन च जीवत्वं प्रतारणम् अर्थमिति वाच्यं, मुक्तजीवानामपि तथाकरणदर्शनात् स्वबन्धभयादेव तत्र तथाकरणं दृश्यते नान्यथेति एवमाशंक्य जीववैलक्षण्यं वदन् विषयसंबंधस्य न जीवत्वबोधकत्वमित्याह एतदीशनमीशस्येति । विपरीतमेतदुच्यते विषयसंबंधेन जीवत्वमिति भ्रमादेव विषयसंबंधे तथात्वमयं त्वीश्वरत्वबोधकः नियतकार्य्यजनकस्य तत्र कार्य्याजननात् जीवधर्माणामप्रतिबन्धकत्वात् मणिमंत्रादेरप्यलौकिकत्वात् भगवच्छक्तिमत्त्वमतः प्रकृतिस्थोऽपि विषयेषु रममाणोऽपि तद्गुणैः कर्तृवश्यत्वापादकत्वस्वरूपप्रच्युतिदोषाजनकत्वादिभिर्युज्यते । नन्वापाततोऽग्निस्पर्शदाहो न जात इति नियतसम्बन्धेऽपि न जायते तथा भगवत्यपि भविष्यतीत्याशंक्याह सदात्मस्थैरिति । सर्वाश्रयत्वाद्भगवतः संयुक्तः समवायेन वा सदा आत्मन्येव ते धर्म्माः प्रवर्तंते, ते बहिः स्वाश्रये स्वकार्य्यं सम्पादयेयुः भगवदाश्रिता न भवेयुः भगवतो वा सर्वाश्रयत्वं धर्मो न भवेत् तथाच यमेवाश्रित्यैव भ्रमात्तदीयत्वेन ज्ञाता भवंति तस्यैव संगित्वं वा जीवत्वं वा बोधयन्ति न नियताश्रयाः अन्याश्रयैरेव अन्यत्र दोषजनकत्वं चोरादिषु च लोके सिद्धम् । अत्र दृष्टांतमाह यथा बुद्धिस्तदाश्रयेति । महाराजसमीपे शस्त्रपाशादिकं न स्वाश्रये किंचित् करोति अन्यार्थत्वेनैव तस्य संग्रहात् "श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाविद्यया शक्त्या मायया च निषेवितमि"ति 'विद्याविद्ये मम तनू' इति वाक्ये भगवदाश्रयत्वेन अमतिरविद्या निरूपिता, मतिर्विद्या तत्प्रतिस्पर्द्धिनी सपत्नी । अमतिरविद्या यथा अविद्या भगवति स्वकार्यं न करोति तथा एतेऽपि विषया इत्यर्थः "एकस्यैव ममांशस्य जीवस्यैव महामते । बंधोऽस्याविद्ययानादिर्विद्यया च तथेतरः" इति वाक्यात् स्वाश्रयदुष्टत्वं संपादकत्वम् इदानीं रमणस्य ईश्वरत्वबोधकत्वम् अविद्यावदज्ञानादीनामपि देवव्यामोहकत्वं दोषनिराकरणार्थं तु सद्धर्म एव । अतो दुष्टानां प्रतारणं सद्धर्म एव, तस्मान्निर्दोषपूर्णगुणो हरिः ॥ ३९ ॥ ❀ ❀ किंच लोका भ्रांता भवंत्येव नियतसम्बद्धा अपि भ्रमन्त इत्याह तं मेनिरे इति । अबलाः ज्ञानजनकक्रियाकरणे असमर्था अत एव मूढाः ज्ञानरहिताः अन्यार्थं मन्यंते तदाह स्त्रैणमिति स्त्रीलम्पटं चकारात्तद्वशमपि तत्र हेतुः रहः अनुव्रतमिति एकान्ते । अनुव्रतं यस्य यदैवैकान्तस्थानं तत्रैव भगवान् संनिहितः अतो निरंतरमेकांतशीलत्वात् स्त्रैणं मेनिरे । नन्वेवमेव स्यादित्यत आह अप्रमाणविदो भर्त्तुरिति । भर्त्तुर्भगवतः प्रमाणं न जानंतीति यथांधा हस्तिनं स्पर्शेन । स हि चक्षुषैव ज्ञेयः तथा भगवच्छास्त्रेणैव भगवान् विज्ञेयः । नन्ववस्थाविशेषेण क्रियामात्रेण तथा करणमपि भर्तृत्वात् अप्रमत्ता चक्षततंतुमेनमिति श्रुतेः भगवानेव श्रुत्यर्थप्रतिपादकः । अतो भर्तृत्वादेकांतशीलत्वं स्त्रीरक्षार्थं तु भगवांस्तथा करोति स्त्रीणां तु तदज्ञानं तत्र दृष्टांतमाह ईश्वरं मतयो यथेति । यथा मतयो दर्शनज्ञानानि भगवतैव प्रवर्तितानि स्वयुक्त्या तमेवान्यथा मन्यंते–ईश्वर एव नास्तीति केचित् अन्येऽपि यज्ञादय एव ईश्वर इत्यपरे कर्त्ता केवलमित्यन्ये जीवविशेष एवेति केचित् । सर्वेषामेतेषां मूलप्रमाणाज्ञानात् स्वोत्प्रेक्षया तथात्वं तथैवासामपीत्यर्थः ॥ ४० ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तमयमित्यत्र । आत्मानमिति । स्वस्वरूपं भगवत्स्वरूपमिति यावत् । तात्पर्यापरिज्ञानादित्यादि । भगवता स्वस्मिन्नज्ञत्वादिबोधनेऽन्येषां कृते तत्तात्पर्यापरिज्ञानादित्यर्थः । तथामन्तेति सङ्गित्वमन्ता ॥ ३७ ॥ ❀ ❀ एतदीशनमित्यत्र । बोधनक्रियाया इत्यादि ।

स्वस्मिन्नज्ञत्वादिबोधनरूपायां भगवत्क्रियायां यथा जीवज्ञानजनकत्वमित्यर्थः । ज्ञापयतीति अज्ञानादिकं भगवति जीवत्वं ज्ञापयतीत्यर्थः । विमतं अज्ञानादिकं न दोषजन्यम्, अयोग्यप्रतारणार्थत्वात्, भरतीयजडत्वादिवदित्यनुमानेन पूर्वोक्तहेतोः साध्यसमत्वशङ्कायां हेत्वन्तरमाहुः भ्रमेत्यादि । तथा च विमतो जीवः, भ्रमजनकत्वेन प्रतारकत्वात्, जडभरतादिवदित्यनुमानेन जीवत्वमित्यर्थः । एवमाशङ्क्येति । ईदृशानुमानेन ज्ञानिजीवत्वमाशङ्क्य । भ्रमादिति विषयेष्वानन्दजनकत्वोत्कृष्टत्वभ्रमात् । तथा च विमतो विषयसम्बन्धः न जीवधर्मः, दोषाजन्यत्वात्, दत्तादिकृतसुरापानादिवदिति प्रत्यनुमानेन बाधितत्वादित्यर्थः । ईश्वरत्वबोधक इति । विमतः सम्बन्धः ईशधर्मः, नियतकार्यजनककार्यप्रतिबन्धकत्वात्, दत्तीयसुरापानादिवदिति प्रयोगात्तथेत्यर्थः । अत्र च नियतविषयासक्तिरूपकार्यजनकं मनः तत्कार्यासक्तिप्रतिबन्धकत्वं सङ्गस्येतीश्वरधर्मत्वम्, एवं योगिस्वैराचरणस्यापीशधर्मत्वमेव योगजत्वादतो न हेतौ दोषः । ननु विमतो नेशधर्मः नियतकार्यजनककार्यप्रतिबन्धकत्वान्मणिमन्त्रादिनिष्ठदाहप्रतिबन्धकधर्मवदिति दृष्टान्तान्तरेण हेतोः साधारणत्वमिति चेत्, तत्राहुः मणीत्यादि । तथा चैवं हेतोः साधारणत्वेपि तत्तज्जीवधर्मे व्यभिचाराभावेनोक्तहेतौ चेतनधर्मत्वे सतीत्येवं विशेषिते साधारण्यपरिहारात्तस्येश्वरधर्मत्वे सिद्धे ईश्वरत्वबोधकता निःप्रत्यूहेत्यर्थः । तदेतद्धृदि कृत्वाहुः अत इत्यादि । सर्वाश्रयत्वादिति । तच्च ब्रह्मवादे स्वरूपेण तादात्म्येन वा । मतान्तरे तु संयोगादिनापीति बोध्यम् । तस्माद्धेतोस्ते सदा भगवति वर्तन्त इत्यर्थः । संयुक्तेत्यादि । जीवात्मसंयुक्तं मनस्तत्र समवायः सङ्गादीनाम्, तेन संबन्धेन ते सदा परमात्मन्येव वर्तन्त इत्यर्थः । ते इति प्रकृतिगुणाः । न भवेयुरिति । कार्यसम्पादने भगवत्त्वभङ्गाज्जीवाश्रिता एव भवेयुः, तथा च सर्वस्य भगवदाश्रितत्वानुरोधात्स्वकार्यासम्पादकानामेवाश्रितत्वमङ्गीकार्यमित्यर्थः । ननु कार्यासम्पादने तत्सत्तायां प्रमाणाभावान्मास्तु तदाश्रितत्वमित्यत आहुः भगवत इत्यादि । सिद्धमाहुः तथा चेत्यादि । अनाश्रित्येति नियमतोनाश्रित्य । अन्याश्रितानां व्यधिकरणत्वात्कथमन्यत्र दोषजनकत्वमित्यत आहुः अन्याश्रयैरित्यादि । चौरादिषु रोगेषु चेति । यथान्याश्रितधनस्य स्त्र्यादेश्चान्यत्र जिघृक्षादिकार्यजनने तच्चौर्यलाम्पट्यदोषजनकत्वम्, यथा चान्यत्र विद्यमानस्य कुष्ठादिरोगस्य 'कुष्ठी यावत्प्रपश्यती' ति वाक्यात् दर्शनविषयदोषजनकत्वं तथेत्यर्थः । अत्रेति नियताश्रितस्य दोषाजनकत्वे । एवमुपपाद्य सर्वमर्थं संगृह्णन्ति एकस्यैवेत्यादि । अविद्यावदिति अविद्या यथा जीवव्यामोहिका तथेत्यर्थः । दोषनिराकरणार्थमिति । 'अज्ञानिनः सुरवरेशमधिक्षिपन्त' इति न्यायेन भगवदस्मरणरूपदोषनिराकरणार्थम् ॥ ३८ ॥ ❀ ❀ तं मेनिर इत्यत्र । दर्शनज्ञानानीति न्यायादिदर्शनसिद्धानि ज्ञानानि । केचिदिति निरीश्वरकापिलाः । अन्य इति बाह्याः । अपर इति जैमिनीयाः । अन्य इति वैशेषिकाद्याः । केचिदिति साङ्ख्यैकदेशिनः । मूलप्रमाणाज्ञानादिति ब्रह्मणि मूलप्रमाणं वेदस्तदर्थाज्ञानादित्यर्थः । मूलकारणेति पाठे ब्रह्मज्ञाने मूलकारणं वेद इति स एवार्थः ॥ ३९ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे एकादशाध्यायविवरणम् ॥ ११ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

स एष भगवान् स्वमायया आत्मसङ्कल्पेन अस्मिन्नरलोकेऽवतीर्णः सन् स्त्रिय एव रत्नानि तेषां कूटे समुदाये स्थितो यथा प्राकृतस्त्रीवश्यस्तथा रेमे चिक्रीडेत्यन्वयः । प्राकृतो यथेत्यनेन स्त्रीवश्यत्वमनुकारमात्रमेव, न तु परमार्थतस्तदस्तीति सूचितम् ॥ ३५ ॥ ❀ ❀ नन्वेवं स्त्रीसङ्गादिभिरस्मदादिवत्संसारित्वप्रतीतेः कथं भगवानवतीर्ण इत्युच्यते तत्राह–उद्दामेति द्वाभ्याम् । यासामुद्दामस्त्यक्तभयादिबन्धनो यो भावो भगवता सह रमणाभिप्रायस्तस्य पिशुनः सूचकः अमलः भोग्यपदार्थप्रार्थनादिसूचनदोषरहितः वल्गुः मनोहरो हासो व्रीडापूर्वकावलोकश्च ताभ्यां निहतः विस्मितो मदनः जगद्विमोहनार्थं प्रवृत्तः कामः सम्मुह्य मत्कर्तव्यमेता एव करिष्यन्तीति सम्भाव्य स्वचापमजहात् तत्याज । अन्यविमोहे किमाश्चर्यमिति अपिशब्देन सूचितम् । ता एवम्प्रभावाः प्रमदोत्तमाः यस्य भगवतः श्रीकृष्णस्येन्द्रियं मनः कुहकैः पुरुषवञ्चनोपायैः स्वहासकटाक्षादिभिर्विमथितुं क्षोभयितुं न शेकुः समर्था न जाताः ॥ ३६ ॥ ❀ ❀ तं श्रीकृष्णं व्यापृण्वानं मनुष्यचेष्टां प्रकुर्वन्तं वस्तुतोऽसङ्गं स्त्रीपुत्रादिविषयेषु अनासक्तमपि प्राकृतो लोकः आत्मौपम्येन स्वदृष्टान्तेन सङ्गिनं स्त्र्यादिविषयेष्वासक्तं मनुजं मन्यते । यतोऽबुधः आत्मपरमात्मतत्त्वानभिज्ञः । उक्तेऽर्थे न सन्देह इति द्योतनार्थो हिशब्दः ॥ ३७ ॥ ❀ ❀ नन्वेवमसङ्गित्वेऽपि कथं तस्येश्वरत्वमित्याकाङ्क्षावन्तं प्रति असङ्गित्वमेवेश्वरलक्षणमित्याह–एतदिति । ईश्वरत्वं नामैतदेव । किं तदित्यपेक्षायामाह–प्रकृतिस्थोऽपि प्रकृतिकार्येषु स्त्रीपुत्रादिषु स्थितोऽपि तस्याः गुणैः सत्त्वादिगुणैः सत्त्वादिगुणकार्यभूतैः रागलोभमोहादिभिः सुखदुःखादिभिश्च सदैव कदाचिदपि नैव युज्यते इति यत् । तद्वैधर्म्ये दृष्टान्तमाह–आत्मस्थैरिति । आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यते तथा परमात्मा प्रकृतिस्थोऽपि तस्या गुणैर्न युज्यते इत्यन्वयः ॥ ३८ ॥ ❀ ❀ अन्यो जनः श्रीकृष्णस्य तत्त्वं न जानातीति किं वक्तव्यं तत्पत्न्योऽपि तस्य तत्त्वं न जानन्तीत्याशयेनाह–तमिति । तं श्रीकृष्णमबलास्तत्पत्न्यः स्त्रैणं स्त्रीषु आसक्तं मेनिरे । तत्र हेतुद्वयम्–यतो मूढा अज्ञा इत्यर्थः । तदेव स्पष्टयति–भर्तुः श्रीकृष्णस्य प्रतीयते इति प्रमाणं स्वरूपं न विदन्तीति तथेति । यतश्च भगवानपि तथाऽनुकरोति रमेत्याह–रहः

एकान्ते अनुव्रतं स्ववशवर्तिनं चेति । तत्र दृष्टान्तमाह–ईश्वरमिति । मतयः शास्त्रिणां बुद्धिवृत्तयः ईश्वरं यथा जगदुपादानं निमित्तमात्रं सगुणं निर्गुणं कर्त्तारमकर्त्तारं च यथारुचि मन्यन्ते तथेत्यर्थः ॥ ३९ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ एकादशो गतो वृत्ति कृष्णेशत्वनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

साक्षात् परमेश्वर ही अपनी लीलासे इस मनुष्य-लोकमें अवतीर्ण हुए थे और सहस्रों रमणी-रत्नोंमें रहकर उन्होंने साधारण मनुष्यकी तरह क्रीड़ा की ॥ ३५ ॥ ❀ ❀ जिनकी निर्मल और मधुर हँसी उनके हृदयके उन्मुक्त भावोंको सूचित करनेवाली थी, जिनकी लजीली चितवनकी चोटसे बेसुध होकर विश्वविजयी कामदेवने भी अपने धनुषका परित्याग कर दिया था—वे कमनीय कामिनियाँ अपने भोग-विलासोंसे जिनके मनमें तनिक भी क्षोभ नहीं पैदा कर सकीं, उन असङ्ग भगवान् श्रीकृष्णको संसारके लोग अपने ही समान कर्म करते देखकर आसक्त मनुष्य समझते हैं–यह उनकी मूर्खता है ॥ ३६-३७ ॥ ❀ ❀ यही तो भगवान्की भगवत्ता है कि वे प्रकृतिमें स्थित होकर भी उसके गुणोंसे कभी लिप्त नहीं होते, जैसे भगवान्की शरणागत बुद्धि अपनेमें रहनेवाले प्राकृत गुणोंसे लिप्त नहीं होती ॥ ३८ ॥ ❀ ❀ वे मूढ़ स्त्रियाँ भी श्रीकृष्णको अपना एकान्तसेवी, स्त्रीपरायण भक्त ही समझ बैठी थीं; क्योंकि वे अपने स्वामीके ऐश्वर्यको नहीं जानती थीं–ठीक वैसे ही जैसे अहंकार की वृत्तियाँ ईश्वरको अपने धर्मसे युक्त मानती हैं ॥ ३९ ॥

ग्यारहवाँ अध्याय समाप्त

अथ द्वादशोऽध्यायः

शौनक उवाच

अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा। उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥ १ ॥
तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः। निधनं च यथैवासीत्स प्रेत्य गतवान् यथा ॥ २ ॥
तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे। ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥

सूत उवाच

[3]अपीपलद्धर्मराजः पितृवद् रञ्जयन् प्रजाः। निःस्पृहः सर्वकामेभ्यः कृष्णपादा[4]ब्जसेवया ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुरोक्तं यत्प्रसंगाय द्रौणिदंडादि विस्तरात्। द्वादशे तु तदेवाथ परीक्षिज्जन्म वर्ण्यते ॥ १ ॥

"परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम्। संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयम्" इति प्रतिज्ञाय पांडवानां राज्यस्थितिरुपोद्घातरूपा सप्रसंगं सप्तमाध्यायमारभ्य निरूपिता। इदानीमौपोद्घातिकमुक्तानुवादपूर्वकं पृच्छति अश्वत्थाम्नेति। उपसृष्टेन विसृष्टेन। तस्य जन्मादि ब्रूहीत्युत्तरेणान्वयः ॥ १ ॥ ❀ ❀ स परीक्षित्। प्रेत्य देहं त्यक्त्वा ॥ २ ॥ ❀ ❀ प्रार्थये न त्वाज्ञापयामीत्याह गदितुं यदि मन्यसेऽनुग्रहेण तर्हि ब्रूहीति। 'यस्य ज्ञानमदाच्छुकः' इति श्रवणेच्छायां कारणम् ॥ ३ ॥ ❀ ❀ निस्पृहस्यापि राज्ञः श्रीकृष्णानुग्रहात्तादृक्पौत्रः समजनीति वक्तुं तस्य श्रीकृष्णे भक्त्युद्रेकमाह अपीपलदिति त्रिभिः। पितृवदपीपलत्पालयामास ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

यत्प्रसंगाय यस्य परीक्षिज्जन्मनः प्रस्तावाय। तदेवेत्यन्वयः (१) "चिंतां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इत्यभिधानात्। द्रौण्यस्त्रक्षेपगर्भरक्षाकुंतीस्तवभीष्मनिर्याणभगवद्द्वारकायात्राद्वारकाप्रवेशपट्टमहिषीरमणादिकथामाधुर्येषु तत्प्रसंगोत्थितेषु मज्जंतं सूतं तदेव परीक्षिज्जन्म शुश्रूषुः शौनकः पुनर्विशेषतः पृच्छति–अश्वत्थाम्नेति। ईशेन कर्तुमकर्तुमन्यथा कर्तुं समर्थेन श्रीकृष्णेन हतो नाशितोपि पुनराजीवित इत्युक्त्या महाभारतसमानार्थतासूचि। तत्र हि मृतो जातः परीक्षित्पुनः सुभद्रादिप्रार्थनया श्रीकृष्णेन संजीवनमापित इत्युक्तम्। सर्वथा श्रीकृष्णदत्ततज्जीवने तात्पर्यमिति साम्यमत्र। यद्वा कल्पांतरीया श्रीभारतकथेति बोध्यम् ॥ १ ॥ ❀ ❀ तस्य परीक्षितः। गतवान् वैकुंठमिति शेषः, "भेजे खगेन्द्रध्वजपादमूलं ज्ञानेन वैयासकिशब्दितेन" इति वक्ष्यमाणत्वात् ॥ २ ॥ ❀ ❀ तदिदं परीक्षिद्वृत्तांतं मामधिकारिणं विज्ञाय यदि वक्तुं मन्यसे श्रीशुकस्य श्रीकृष्णलीलामृतपानमग्नस्य सर्वतोनपेक्षस्यापि यदुपदेशे प्रवृत्तिरित्यद्भुततमं तद्वृत्तमिति कृपया ब्रूह्येवेति भावः ॥ ३ ॥ ❀ ❀ धर्मेणैव राजत इति। न तु राजपरिच्छद्भिरित्यन्वर्थनामा युधिष्ठिरः। धर्मावतारत्वात्स चासौ राजा चेति "राजाहःसखिभ्यष्टच्" इति टच्। अत्र च सर्वकामसेवातः कृष्णपादसेवायाः स्वादुत्वं ध्वनितम् ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

परीक्षितोऽथेति एतत्स्कन्धीयसप्तमाध्यायस्य द्वादशश्लोकः ॥ १–२० ॥

श्रीमद्वीरराघवव्याख्या

यद्यपि परीक्षिज्जन्मकर्मादिकं पुरस्तादेव पृष्टं यद्यपि च तद्वक्तुमेव तदुपोद्घातरूपोऽयं वचःक्रमः किमकार्षीत्तत इति। प्रकृतप्रश्नस्योत्तरं चाश्रुतं एवं चांतरा पुनस्तत्प्रश्नानुपपत्तिः, तथापि किमकार्षीत्तत इति पृष्टस्य राज्यशासनानंतरभाविनो युधिष्ठिर-

१. प्रा० पा०–अश्वत्थाम्ना विसृष्टेन। २. प्रा० पा०–स त्वं वा। ३. प्रा० पा०–अपालयद्। ४. प्रा० पा०–पादानुसेवया।

वृत्तांतस्य परीक्षिज्जन्मानंतरमेव तच्छुश्रूषुस्तावत् 'स्वयमेवावृणोद्‌भर्भं वैराट्याः कुरुतंतवे' इति प्रक्रान्तापरिसमापितं सावशेषं पृच्छति शौनकः । अश्वत्थाम्नेति । अश्वत्थाम्नोपयुक्तेन प्रयुक्तेन उर्वधिकं दुस्सहं प्रभूतं च तेजो यस्य तेन ब्रह्मशीर्ष्णा ब्रह्मशिरोनामकेनास्त्रेण तावदुत्तराया गर्भो हतः, ततः पुनरीशेन कृष्णेनाजीवितः इत्युक्तानुवादः ॥ १ ॥ ❀ ❀ तत उपरितनं तस्योत्तरातनयस्य महात्मनः यज्जन्मादि तदिदं हे महाबुद्धे ! श्रोतुमिच्छामि निधनं मरणं यथैवासीत्प्रेत्य मृत्वा यथा गतवान्यां गतिं प्राप्तवान् तदिदमित्यन्वयः ॥ २ ॥ ❀ ❀ यदि गदितुं मन्यसे वक्तुमिष्टं योग्यं च मन्यसे चेत्तर्हि श्रद्दधानानां नोऽस्माकं ब्रूहि । कुतो वस्तज्जन्मादिशुश्रूषाश्रद्धा बभूवेत्यतस्तं विशिनष्टि-यस्य परीक्षितः शुको ज्ञानं परमात्मयाथात्म्यज्ञानमदादुपदिष्टवान् । महाभागवतत्वात्तज्जन्मादिशुश्रूषा नः समभवदिति भावः । अत्र जन्मैव प्राधान्येन पृच्छयते तस्य कर्मादिकं तु युधिष्ठिरादिवृत्तांतानंतरकालिकत्वात्तच्छ्रवणानंतरमेव विशेषतः प्रष्टव्यमपि जन्मकालिकजातकद्वारा सामान्यतो बुभुत्सुना जन्मना सहोपात्तम् । अत एवोत्तरेऽपि जातद्वारैव तत्कर्मादिकं प्रदर्श्यत इत्यवगंतव्यम् ॥ ३ ॥ ❀ ❀ परीक्षितो जन्मप्रकारं वक्तुं तावत्तादात्मिकयुधिष्ठिरावस्थानप्रकारमाह अपीपलदिति त्रिभिः । अपीपलदपालयत् कथंभूतः कृष्णस्य पादयोरनुसेवयाऽनुध्यानेन हेतुना सर्वेभ्यः निर्गता स्पृहा यस्य तथाभूतः । कृष्णपादानुसेवकत्वान्निस्पृहः सन्नित्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वैराग्यप्रकारो हरेर्भक्तानुकंपित्वं चास्मिन्नध्याये प्रतिपाद्यते । उपलेभेऽभिधावंतीमुत्तरामित्यादि श्रुतानुवादपूर्वकं परीक्षिज्जन्मादिप्रवृत्तिं पृच्छति शौनक इत्याह अश्वत्थाम्नेत्यादिना । उरुतेजसाश्वत्थाम्ना विसृष्टेन ब्रह्मास्त्रेण उत्तराया हतो गर्भः पुनरीशेनोज्जीवित इत्येकान्वयः ॥ १ ॥ ❀ ❀ मरणं निधनं यथा कथं प्रेत्य मृत्वा गतवान् कं लोकमिति शेषः ॥ २ ॥ ❀ ❀ वक्तुं वा यदि मन्यस इत्यनेन वक्तव्यस्यातिगोप्यत्वं सूचयति ॥ ३ ॥ ❀ ❀ अपीपलत् अरक्षत् निस्पृहः सर्वकामेभ्य इत्यनेन कृष्णपादसेवाया अतिस्वादुत्वं दर्शितं कामानां तिक्तत्वं च ॥ ४ ॥

आनवमश्लोकं क्रमसन्दर्भो न

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृत्वा जन्मोत्सवं राजा पौत्रस्य श्रीपरीक्षितः । द्वादशे भावि तद्वृत्तं विप्रैरुक्तमुपाशृणोत् ॥
नैव श्रुतचरो भक्तो राजा वा तावदीदृशः । कृष्णं ददर्श यो गर्भे यश्च कालमदण्डयत् ॥

परीक्षितो जन्म वक्ष्ये इति प्रतिज्ञाय द्रौण्यस्त्रक्षेपगर्भरक्षाकुन्तीस्तवभीष्मनिर्याणभगवद्यात्राद्वारकाप्रवेशपट्टमहिषीरमणादिकथामाधुर्य्येषु तत्प्रसङ्गोत्थितेषु मज्जन्तं सूतं तदेव परीक्षिज्जन्म शुश्रूषुः शौनकः पुनर्विशेषतः पृच्छति अश्वत्थाम्नेति । उपसृष्टेन निक्षिप्तेन ॥ १-३ ॥ ❀ ❀ तादृशपौत्रप्राप्तौ राज्ञः कृष्णानुराग एव कारणमित्यभ्यूहयन् तमेवाह त्रिभिः । अपीपलत् पालयामास ॥ ४-५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

'अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् । तस्य जन्ममहाश्चर्य्यं कर्म्माणि च गृणीहि नः ॥' इति प्रश्नप्रतिवचनार्थं 'परीक्षितोथ राजर्षेर्जन्मकर्मविलापनम् । संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयमि'ति सूतेन प्रतिज्ञातं तदुपोद्घातरूपां तत्पितामहराज्यस्थितिं श्रुत्वोक्तानुवादपूर्वकं तदेव पृच्छति अश्वत्थाम्नेति । ब्रह्मशिरोनामकेनास्त्रेण उपसृष्टेन श्रीकृष्णेन ॥ १ ॥ ❀ ❀ महती बुद्धिर्यस्य स तथा तस्य महात्मनो जन्मेत्यादेः ब्रूहीत्युत्तरेणान्वयः । स परीक्षित् प्रेत्य शरीरं विहाय यथा गतवान् ॥ २ ॥ ❀ ❀ तदिदं पूर्वोक्तम् ॥ ३ ॥ ❀ ❀ श्रीकृष्णे भक्त्यैव कृतार्थानां पाण्डवानां सर्वत्र निरपेक्षाणां कृष्णेच्छया भागवतः पौत्रो जात इति वक्ष्यन् पूर्वं श्रीकृष्णे राजर्षेः पाण्डवश्रेष्ठस्य भक्त्युद्रेकमाह अपीपलदिति त्रिभिः । कृष्णपादानुसेवया कृष्णपादयोरनुवृत्त्या सर्वेभ्यः ऐहिकामुष्मिकेभ्यः कामेभ्यो निःस्पृहां गतस्य । पितृवदपत्यस्थानीयाः प्रजा अपीपलदपालयत् ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवमेकाग्रसिद्ध्यर्थं सर्वं कार्यं निरूपितम् । अधुना श्रोतृदेहस्य रक्षणं विनिरूप्यते ॥ १ ॥
सर्वलक्षणसंपन्नः सर्वदोषविवर्जितः । बीजसंस्कारसहितः श्रोता भागवते मतः ॥ २ ॥

व्यवहितत्वाच्छौनकः पूर्वकथां स्मारयति अश्वत्थाम्नोपसृष्टेनेति । त्वद्वाक्यानां समभिव्यवहारात् अस्माभिरेव नावगतम् । अश्वत्थाम्नो ब्राह्मणोत्तमत्वात् तेन निरूपितस्य च ब्रह्मास्त्रस्य च अमोघत्वात् उत्तराया गर्भो हतः पश्चादीशेन आजीवितः स्वसामर्थ्यात् पूर्वमपि दुर्विभाव्याभिः स्वशक्तिभिः बीजे प्रवेश्य आजीवितवान् इदानीमपि दग्धं बीजं पुनस्तं प्रवेश्य

आजीवयतीति पुनःशब्दार्थः ॥ १ ॥ ❀ ❀ अनुवादांशमुक्त्वा श्रोतव्यांशमाह तस्य जन्मेति । महाबुद्धेरिति पूर्वमेव तस्य ज्ञानं सिद्धं महात्मन इति शुभानि कर्माणि जन्मकर्माणि जन्मकर्मावदातस्य मृत्युसंभावनाभावात् गर्भ एव च मृत्योर्निवर्त्तितत्वात् केन प्रकारेण निधनमिति प्रश्नः, किंच यथा पूर्वजन्मनि ज्ञानादिषु सिद्धेष्वपि एतद्देहसंबंधो जातः, एवमुत्तरत्रापि भविष्यतीत्याशंक्य पृच्छति स प्रेत्य गतवान् यथेति । प्रेत्य शरीरं त्यक्त्वा यथेति प्रष्टव्यार्थः ॥ २ ॥ ❀ ❀ तत्पूर्वोक्तं त्रयमुत्पत्तिस्थितिप्रलयाख्यमिदं च लोकगमनं शास्त्रसंदेहात् श्रोतुमिच्छामि बहुकालनिर्बंधात् क्लेशेऽपि यदि सर्वथैतद्वक्तव्यमिति मन्यसे तदा श्रद्धायुक्ता वयं श्रोतुमिच्छामः । इच्छया कथने भगवच्चरित्रमत्रास्तीति अवगम्यते । अत एवमाह गदितुं यदि मन्यस इति । अन्यथा कथात्वेऽपि भगवदीयत्वाच्च अन्यथा शुकस्य ज्ञानदानं न संभवेत् , अतस्तस्य चरित्रं कथमित्यर्थः ॥ ३ ॥ ❀ ❀ जन्मनिरूपणार्थं वंशकालदेशानामुत्तमत्वमाह त्रिभिः अपीपलदिति । अपालयदित्यर्थः, 'स्वधर्मविष्णुभक्तिभ्यां महान् सर्वो न चान्यथा । विषयेषु च वैतृष्ण्यं सेवार्थं भक्तिसूचकम् ॥' तत्र राज्ञः प्रजापालनं धर्मः पितृवद्रंजयन् प्रजा इति । ज्ञानसहितत्वमुक्तम् अन्यथा भगवद्दृष्टत्वभावे रंजनं न स्यात् , निःस्पृह इति । नैरपेक्ष्यं कृष्णपादानुसेवा शास्त्रानुसारेण फलजननात् सम्यक्कृतेति ज्ञायते । अन्येन राज्ञ उत्तमत्वात् तद्राज्यकालः वंशश्चोत्तम इति । राजधर्म एव प्रजाः कुर्वंतीति तद्राज्ये सर्वत्र वैष्णवसेवैव प्रसृता । अतो देश उत्तमः ज्ञानभक्तिकर्मणां धर्माणां तस्मिन् काले विद्यमानत्वात् कालोत्कर्षः ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

अथ द्वादशाध्यायं विवरिषवः पूर्वसङ्गतिनिरूपणपूर्वकं तस्यार्थमाहुः एवमित्यादि । एवमिति पञ्चाध्याययुक्तप्रकारेण । अधुनेति द्वादशाध्याये । नन्वेवं दाहाद्यनन्तरं किमिति रक्षा कृता, पूर्वमपि करणे भगवतः सामर्थ्यादित्यत आहुः यथेत्यादिद्वयम् । तथा चैतदर्थमेवं रक्षेत्यर्थः । अतः परं व्याख्यातुकामाः शौनकप्रश्नतात्पर्यमाहुः व्यवहितेत्यादि । अपीपलदित्यत्र । शास्त्रानुसारेण फलजननं कृष्णसेवायाः सम्यक्कृतत्वज्ञाने हेतुः ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी ।

एवं पञ्चभिरध्यायैर्यत्प्रसङ्गो निरूपितः । राज्ञो जन्म तदेवात्र द्वादशे विनिरूप्यते ॥ १ ॥

यद्यपि 'परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम् । संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम्' इति परीक्षितो जन्मादिकथनं पूर्वमेव प्रतिज्ञातं द्रौणिदण्डादिकथा च तदुपोद्घातरूपा वर्णिता । अत एवं वर्णयतां मध्ये पुनस्तत्प्रश्नानुपपत्तिस्तथापि मध्ये भगवतो द्वारकाप्रयाणादिकथान्तरव्यवधानाद्विशेषतः परीक्षिज्जन्मादि शुश्रूषुः शौनकः पृच्छति-अश्वत्थाम्नेति । अश्वत्थाम्ना उपसृष्टेन निक्षिप्तेन उर्वधिकं दुस्सहं तेजो यस्य तेन ब्रह्मशीर्ष्णा ब्रह्मशिरोनामकेनास्त्रेण उत्तराया गर्भो हतः पुनरीशेन श्रीकृष्णेन आजीवित इति तु त्वत्तः श्रुतमिति शेषेणान्वयः ॥ १ ॥ ❀ ❀ तस्योत्तरातनयस्य जन्म यथाऽऽसीत् कर्माणि च निधनं मरणं च यथैवासीत् स प्रेत्य मृत्वा यथा गतवान् यां गतिं प्राप्तवांस्तदिदं सर्वं श्रोतुमिच्छामि, अतस्त्वां प्रार्थये न त्वाज्ञापयामि, गदितुं कथितुं युक्तं यदि त्वं मन्यसे तर्हि नोऽस्माकं कृपया ब्रूहीति द्वयोरन्वयः । 'श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः' इति शास्त्रानुसारेण श्रवणे स्वाधिकारं सूचयन्नाह-श्रद्दधानानामिति, श्रवणादिश्रद्धावतामित्यर्थः । न केवलं ममैव श्रवणे श्रद्धा किन्तु अत्रत्यानां सर्वेषामित्याशयेन बहुवचनम् । जन्मादिश्रवणश्रद्धायां हेतून् सूचयंस्तं विशिनष्टि-महाबुद्धेरिति, परमविवेकिन इत्यर्थः । तत्रापि हेतुमाह-महात्मन इति, महति श्रीकृष्णे आत्मा मनो यस्य तस्य । अतस्तस्य संसारविमुक्तौ तु न सन्देह इत्याशयेनाह-यस्य शुको ज्ञानमदादुपदिष्टवानित्यर्थः ॥ २-३ ॥ ❀ ❀ एवं पृष्टः सूतो विषयेभ्यो निःस्पृहस्य भगवद्भक्तस्य तदनुग्रहात्तादृक् पौत्रो जात इत्याशयेन प्रथमतो राज्ञो भगवद्भक्त्युद्रेकमाह-अपीपलदिति त्रिभिः । धर्मराजः युधिष्ठिरः प्रजाः रञ्जयन् सन्तोषयन् पितृवदपीपलत् पालयामासेत्यन्वयः । ननु विषयासक्तस्य कथं पितृवत्प्रजापालनं सम्भवतीत्याशङ्क्याह-निस्स्पृहः सर्वकामेभ्य इति । कथमेवं तस्य निस्स्पृहत्वमित्यपेक्षायामाह-कृष्णपादाब्जसेवयेति ॥ ४ ॥

हिन्दी अनुवाद

शौनकजीने कहा-अश्वत्थामाने जो अत्यन्त तेजस्वी ब्रह्मास्त्र चलाया था, उससे उत्तराका गर्भ नष्ट हो गया था; परन्तु भगवान्ने उसे पुनः जीवित कर दिया ॥ १ ॥ ❀ ❀ उस गर्भसे पैदा हुए महाज्ञानी महात्मा परीक्षित्के, जिन्हें शुकदेवजीने ज्ञानोपदेश दिया था, जन्म, कर्म, मृत्यु और उसके बाद जो गति उन्हें प्राप्त हुई, वह सब, यदि आप ठीक समझें तो कहें; हम लोग बड़ी श्रद्धाके साथ सुनना चाहते हैं ॥ २-३ ॥ ❀ ❀ सूतजीने कहा—धर्मराज युधिष्ठिर अपनी प्रजाको प्रसन्न रखते हुए पिताके समान उसका पालन करने लगे। भगवान् श्रीकृष्णके चरण-कमलोंके सेवनसे वे समस्त भोगोंसे निःस्पृह हो गये थे ॥ ४ ॥

सम्पदः क्रतवो लोका महिषी भ्रातरो मही । जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥ ५ ॥
किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः[1] । अधिजह्रुर्मुदं[2] राज्ञः क्षुधितस्य यथेतरे ॥ ६ ॥
मातुर्गर्भगतो वीरः स तदा भृगुनन्दन । ददर्श पुरुषं कश्चिद्दह्यमानो[3]ऽस्त्रतेजसा ॥ ७ ॥
अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम्[4] । अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

क्रतवस्तदुपार्जिता लोकाश्च ॥ ५ ॥ ❀ ❀ सुरस्पार्हाः सुराणां स्पृहणीयास्ते संपदादयः कामा विषया राज्ञः किं मुदं प्रीतिमधिजह्रुः कृतवंतो न कृतवंत इत्यर्थः । अत्र हेतुः-मुकुन्द एव मनो यस्येति । क्षुधितस्यान्नैकमनसो यथेतरे स्रक्चंदनादयो न कुर्वंति तद्वत् ॥ ६ ॥ ❀ ❀ प्रस्तुतमाह । मातुरिति । स परीक्षित् ॥ ७ ॥ ❀ ❀ पुरटं सुवर्णं स्फुरन् पुरटमौलिर्यस्यास्ति तम् । व्रीह्यादिभ्यश्चेति इनिप्रत्ययः । अपीच्यमतिसुंदरं दृश्यत इति दर्शनं रूपं यस्य तम् । तडिद्वद्वाससी यस्येति श्याममिति च पदाभ्यां विद्युद्युक्तमेघोपमा सूचिता । अच्युतमविकारम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निस्स्पृहत्वमेवाह संपद इति । संपदो धनधान्यादिसमृद्धयः, महिषी द्रौपदी । यद्रूपदर्शनक्षुभितराजन्यचक्रेण स्वयंवरेऽप्युपद्रवः कृतो यदर्थं जयद्रथोपि वने भीमसेनेनार्दितः सापि पट्टराज्ञीत्यर्थः । मही परिच्छिन्नापि जंबूद्वीपस्य पुण्यक्षेत्रभारतखंडवत्वात्प्राधान्येन तदुक्तिस्तस्य "शास्ति सप्तार्णवां महीम्" इति पुराणान्तरोक्तेः सार्वभौमत्वात् यथा सर्वजगदीशोपि श्रीरामचंद्रोऽयोध्याधीश इति कथ्यते तद्वदियमुक्तिः प्रतीयते यथाश्रुतं वास्त्विति ॥ ५ ॥ ❀ ❀ स्पृहा विद्यते येषु ते स्पार्हाः । अत्र मत्वर्थेऽण् तद्धितप्रत्ययानां सर्वार्थविधानात् । इत्यर्थ इति । सर्वकामनिःस्पृहत्वादिति भावः । अत्र मुदनधिककरणे । मुकुन्दसेवापेक्षया तेषां तुच्छत्वादिति भावः "मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः" इति पंचमे भरताख्यानोक्तेरिति । अत्र दृष्टांतः-क्षुधितस्येति । आदिना वीणावाद्यादिग्रहः ॥ ६ ॥ ❀ ❀ वीर इति । स्वाभाविकवीरत्वेनैवास्त्रतेजसस्तस्मादबिभ्यदिति भगवद्रूप एव स्वविषयग्रहणारंभः प्रथमतः कृत इति । हे भृगुनन्दनेति । कुलनन्दनता हि भगवद्ध्यानयशःश्रवणादिभिर्भवतीति यथा त्वमाबाल्यतो भगवत्कथाश्रवणनिष्ठत्वाद् भृगुकुलनन्दनतां प्राप्त इति भावः ॥ ७ ॥ ❀ ❀ अंगुष्ठमात्रमिति । आत्मनः सर्वतो दिक्षु गर्भे तावन्मात्रस्यैव विकारस्य स्थितत्वात् । तत्प्रमाणमेव भगवत्युपचरितम् । वस्तुतस्तु तावत्यपि देशेऽचिंत्यशक्त्या यथावत्प्रमाणमेव भगवंतं ददर्श, न त्वन्यथा "गर्भे दृष्टमनुध्यायन्परीक्षेत नरेष्विह" इत्युपरिष्टादुक्तेर्नरलोके तस्य परीक्षणान्यथानुपपत्तेः । अत एवापीच्यमन्यूनानतिरिक्तत्वात्सुंदरं दृश्यत इति दर्शनं रूपं यस्य तम् । "अपीच्यं त्वतिसुंदरे" इत्यभिधानात् । पुरटस्य हेम्नो मौलिर्यस्य तम् "दुर्वर्णं पुरटं जांबूनदकार्तस्वरे वसु । सुरूपं पीतलोहं च मुख्यद्रव्यं तथाग्निभूः" इति विचित्रकोशात् । व्रीह्यादित्वादिनिः । श्यामं तडिद्वाससमिति पदाभ्यां विद्युद्भूषितमेघो ब्रह्मास्त्रदावानलदह्यमानपरीक्षित्कलभत्राणाय सहसैवोत्तराकुक्षिनभसि प्रादुरभूदिति द्योतितम् ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

तत्सेवया स्पृहाभावहेतुत्वमेव सदृष्टांतमाह संपद इति द्वाभ्याम् । यथा क्षुधितस्य अशनया युक्तस्य पुंस इतरे स्रक्चंदनादयो न मुदमावहंति, किं त्वशनमेव तथा हे द्विज ! ये संपदादयः ते ते कामाः सुरस्पार्हाः सुराणामपि स्पृहणीया अपि मुकुंद एव मनो यस्य तस्य राज्ञो युधिष्ठिरस्य मुदमधिजह्रुः किं संपादितवंतः ? न संपादितवंत एवेत्यर्थः । तत्र संपदो भोग्यभोगोपकरणादिसमृद्धयः सर्वादिसुखसाधनान्यश्वमेधादीनि लोकाः करप्रदा जनाः महिष्यः पत्न्यः भ्रातरो दिग्विजयिनो भीमादयः महानिष्कंटका पृथ्वी त्रिदिवं गतं त्रिदिवपर्यंतव्याप्तं यशश्च ॥५-६॥ ❀ ❀ अथ परीक्षितो जन्म वक्तुं तावत्तस्य मातुरुदरावस्थानदशामाहमातुरिति सार्द्धैः पंचभिः । हे भृगुनन्दन ! वीरः उत्तरातनयः मातुर्गर्भगतः उदरगतः ब्रह्मास्त्रतेसा दह्यमानः कंचित्पुरुषं ददर्श ॥ ७ ॥ ❀ ❀ कथंभूतमंगुष्ठपरमिता मात्रा उन्नाहो यस्य न विद्यते मलं देहजं यस्य स्फुरत् पुरटो हिरण्मयो मौलिः किरीटं यस्य, अपीच्यं हृष्टपुष्टांगतया स्पृहणीयं दर्शनं यस्य अग्नितापनिर्मलीकृतकांचनमये कुंडले यस्य क्षतजे रक्ते अक्षिणी यस्य गदा पाणौ यस्य तम् उल्कस्यांगारस्येवाभा यस्यास्तां गदां मुहुर्मुहुः परितः सर्वतः दिशो भ्रामयंतम् आत्मानं धारकम् ॥ ८-९ ॥

---

१. प्रा० पा०-द्विज । २. प्रा० पा०-तथा । ३. प्रा० पा०-दह्यमानस्तु तेजसा । ४. प्रा० पा-मौलिकम् ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एतदेव स्पष्टमाह संपद इति ॥ ५ ॥ ❀ ❀ कामातुरस्यार्थाः विषयाः विरक्तस्य मुकुंदमनसो युधिष्ठिरस्यार्थाः किं पुरुषार्थत्वेन नार्थाः । कुत इति तत्राह नेति यथा क्षुधितस्येतरे वीणादयो न तृप्तिं कुर्वंति तथाऽते दुःखहेतुत्वात्ते मुदं नाकुर्वन्नित्यर्थः । अनेन वैराग्यातिशयो मोक्षे सुखातिशयो दर्शितः ॥ ६ ॥ ❀ ❀ कंचिल्लोकविलक्षणम् ॥ ७ ॥ ❀ ❀ स्फुरत्पुरटमौलिनं देदीप्यमानस्वर्णमुकुटम् अपीच्यदर्शनं षोडशवर्षवद् दृश्यमानं मेघश्यामम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

सम्पदादयस्तथा सुराणामपि स्पृहैव स्पार्हः स्वार्थे अण् स येषु ते सुरस्पार्हाः कामाः भोगाः राज्ञः किं मुदम् अधिजह्रुर्नैव कृतवन्त इत्यर्थः । तत्र हेतुर्मुकुन्दमनस इति । इतरे रुक्कन्दनादयः ॥ ६ ॥ ❀ ❀ प्रस्तुतमाह मातुर्गर्भगतोऽपि वीर इति स्वाभाविकवीरत्वेनैवास्त्रतेजसस्तस्मात् (न) अबिभ्यदित्यर्थः । ददर्शेति तन्मनोनयनाभ्यां भगवद्रूपे एव स्वविषयग्रहणारम्भः प्रथमतः कृत इति भावः ॥ ७ ॥ ❀ ❀ अङ्गुष्ठमात्रमिति । आत्मनः सर्वतो दिक्षु गर्भे तावन्मात्रस्यैवावकाशस्य स्थितत्वात् तत्प्रमाणमेव भगवत्युपचरितम् । वस्तुतस्तु तावत्यपि देशेऽचिन्त्यशक्त्या यथावत्प्रमाणमेव भगवन्तं ददर्श न त्वन्यथा । 'गर्भे दृष्टमनुध्यायन् परीक्षेत नरेष्विह' इत्युपरिष्टादुक्तेर्नरलोके तत्परीक्षणान्यथानुपपत्तेः, अत एव अपीच्यमन्यूनातिरिक्तत्वादतिसुन्दरं दृश्यत इति दर्शनं रूपं यस्य तम् । पुरटमौलिनमिति व्रीह्यादित्वादिनिः । श्यामं तडिद्वाससमिति पदाभ्यां विद्युद्भूषितमेघो ब्रह्मास्त्रदावानलदह्यमानपरीक्षित्कलभत्राणाय सहसैवोत्तराकुक्षिनभसि प्रादुरभूदिति द्योतितम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते सम्पदादयो मुदमधिजह्रुः सम्पादितवन्तः किं नैव क्षुधितस्येतरे रुक्कन्दनादयो यथा ॥ ६ ॥ ❀ ❀ अथ भगवद्दर्शनपूर्वकं परीक्षिज्जन्माह मातुरिति सार्द्धैः षड्भिः । स परीक्षित् ॥ ७ ॥ ❀ ❀ "अङ्गुष्ठमात्रं पुरुषं मध्ये आत्मनि संस्थितम् । तं ज्ञात्वा मृत्युमत्येति नान्यः पंथा विमुक्तये" इति श्रुत्युक्तमप्राकृतं मंगलविग्रहं श्रीकृष्णम् । एतेन विग्रहस्यैव सर्वत्र व्याप्तिर्गम्यते, दर्शनं तु तदनन्यभक्तानामेवेति ज्ञेयम् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु वैराग्यं कुत्रोपयुज्यते तस्य च राज्यस्य च विरुद्धत्वात् इत्याशंक्य न साधनत्वेनात्र वैराग्यं किंतु भक्तेरानुषंगिकमिति तन्निरूपयति । संपद इति राज्यधनाश्वादीनां सम्पत्तयः आधिक्यं क्रतवो राजसूयादयः । विप्रा इति सम्बोधनम्, अस्मिन्नर्थे संवादार्थे महिषी द्रौपदी भ्रातरो भीमादयः मही सर्वापि राजत्वाच्छास्त्रतो मही पौरुषेणाधिपत्यमिति भेदः, अर्ज्जुनेनेंद्रोऽपि जित इति त्रिदिवं गतं यशः, एते भगवत्कृपया स्वतः सिद्धाः ॥ ५ ॥ ❀ ❀ अत एव अकामाः हृदये नागता इति । त इत्युक्तं वस्तुत एते विषया देवयोग्याः मनुष्यस्य काम्या भवंति न तु विष्णुभक्तस्य, यस्तु बहु कामयते बहु व्याप्तं भवति तस्य न क्षुद्रेषु कामना प्राप्तेष्वपि मुकुन्दे मनो यस्य मोक्ष एव यस्य मनः तस्याप्येतद्भवति 'किमु तद्दातरि द्विजा' इति पूर्ववत् सम्बोधनम् । किं मुदमधिजह्रुः अपि तु न कृतवंत एवेत्यर्थः–विषयाणां स्वधर्मोजनेन दृष्टान्तमाह । क्षुधितस्येति इतरे स्त्र्यादयः ॥ ६ ॥ ❀ ❀ एवं राज्ञो माहात्म्यमुक्त्वा तद्वंशे स्वभावत एवायमेतादृश इति । विषयमाहात्म्येनाह मातुर्गर्भगत इति । मातुरित्यसमासात् गृह इव भिन्नतया स्तुतिरुच्यते, अतो गर्भगतक्लेशो निवारितः, पूर्वमेव ज्ञानादिसहितं केवलं गर्भं प्राप्तः । वीर इति । दाम्ना न बद्धः पराक्रमसहित एव तिष्ठति, भगवतः साक्षात्परब्रह्मणः दृष्ट्या देवैर्दाम्ना बंधनस्याकृतत्वात् अत्र 'देवा वै राजन्या' इति श्रुत्यर्थोऽनुसंधेयः, वीरः स इति सम्बन्धः । अत्र विश्वासार्थं सम्बोधनम् तदा दह्यमान एव ब्रह्मास्त्रतेजसा वीरत्वात्तदवगणय्य कंचित् पुरुषं ददर्श । भगवान् सर्वं कार्यं निष्पाद्य सर्वदैत्याप्रवेशाय सर्वतत्त्वसहितः तद्रक्षार्थमुदरे प्रविष्टः परिभ्रमति स्वोपकारज्ञापनाय तत्प्रत्यात्मानं प्रदर्शितवान् वेदे प्रसिद्धानि यानि रूपाणि तत्र यत्प्रथमं भावयितुमप्यशक्यं तेन रूपेण प्रकट इति तपःस्वधर्मसहितो ददर्श "अतप्ततनुर्न तदाप्नोती"ति श्रुतेः । कंचिदिति विशेषाकारेण न निर्वचनीयम् ॥ ७ ॥ ❀ ❀ तद्रूपमनुवर्णयति अंगुष्ठमात्रमिति "अंगुष्ठमात्रः पुरुषोऽगुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगि"ति श्रुतेः, ब्रह्मत्वादेव । अमलमतिस्वच्छं गर्भे हि विद्यमानस्य तन्मलसम्बन्धः सम्भवति । तद्व्यावृत्त्यर्थमुक्तं स्फुरत्पुरटमौलिनमिति दाहोत्तीर्णसुवर्णमुकुटयुक्तम् । अनेनैश्वर्यं ज्ञापितम्, अपीच्यदर्शनम् अपीच्यरूपं दर्शनं यस्य 'प्रियः स्त्रीणामपीच्य' इति श्रुतेः सौंदर्यदर्शनस्य निकषत्वात् अपीच्यवत् दर्शनं यस्येति सर्वसुन्दरः । अनेन लक्ष्म्याश्रयत्वं प्रतिपादितं, श्याममिति वैष्णवसिद्धान्तसिद्धम् । अनेन भक्ताश्रयत्वं निरूपितं तडिद्वाससं स्थिरविद्युन्निभवस्त्रम् । अनेन पूर्वविशेषणसहितेन सर्वकामवर्षत्वं सूचितम् । अच्युतं परिभ्रमणेऽपि सर्वदेशसंबन्धसहितं शंखचक्रादिसहितं वा । अनेन रक्षायां सामर्थ्यं ज्ञापितम् ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

किं तेऽकामा इत्यत्र। अकामा इति अकामिता इत्यर्थः। पूर्ववदिति। संवादार्थमित्यर्थः॥ ६॥ ❀ ❀ मातुरित्यत्र। ननु देवैर्बन्धनस्य कचित्सिद्धावत्र तदकरणं युज्यते, तत्त्वप्रसिद्धमिति शङ्कायामाहुः अत्रेत्यादि। 'देवा वै राजन्याज्जायमानाद-बिभयु'रिति तैत्तिरीयसंहिताश्रुतौ भयस्योक्तत्वात् तेन बन्धनमपि युज्येतेति नाप्रसिद्धिरित्यर्थः। तपःस्वधर्मसहित इति। अस्त्रदह्यमानत्वमेव तपः कृच्छ्रादिवत्। सन्तापात्मकत्वात्। स्वधर्मो वीरत्वं ताभ्यां सहित इत्यर्थः॥ ७॥ ❀ ❀ अङ्गुष्ठमात्र इति। अर्थस्त्वेतावत्परिमाणकोप्यङ्गुष्ठं पादावयवं चकारादालोमनखाग्रं च सम्यग्व्याप्याश्रितः, आसमन्तात्तत्र तत्र कार्यं कुर्वन् स्थित इति। शेषं स्फुटम्। श्रुतिस्तु तैत्तिरीये बृहन्नारायणोपनिषदि॥ ८॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत् निस्स्पृहत्वमेव सहेतुकं स्पष्टयति–सम्पद इति द्वाभ्याम्। सम्पदो भोग्यभोगोपकरणादिसमृद्धयः। क्रतवः स्वर्गादि-सुखसाधनान्यश्वमेधादीनि। लोकाः प्राप्यतया सम्मताः स्वर्गादयः, करप्रदा जना वा। महिषी द्रौपदी। भ्रातरो दिग्विजयिनोऽर्जु-नादयः। मही निष्कण्टका पृथ्वी। जम्बूद्वीपस्याधिपत्यं राज्यं च। त्रिदिवं गतं स्वर्गपर्यन्तव्याप्तं यशश्च॥ ५॥ ❀ ❀ युष्मा-कमप्येतत्सम्मतं भगवद्भक्तत्वादिति सूचयन् सम्बोधयति–हे द्विजा इति। सुरस्पार्हाः सुराणामपि स्पृहणीयास्ते सम्पदादयः कामा विषयाः राज्ञो युधिष्ठिरस्य किं मुदं प्रीतिमधिजह्रुः, कृतवन्त इत्यर्थः। तत्र हेतुमाह–मुकुन्दे श्रीकृष्णे एव मनो यस्य तस्येति। मनस्सोऽणुत्वात्तस्य च कृष्णे संलग्नत्वेन विषयैः सह सम्बन्धाभावात् कथं ते मुदमुत्पादयेयुरिति भावः। एतदेव दृष्टान्तेन स्पष्ट-यति–क्षुधितस्येति, अन्नैकमनसो यथा तदितरे स्रक्चन्दनवनितादयो मुदं नैव कुर्वन्ति तथेत्यर्थः॥६॥ ❀ ❀ अथ परीक्षितो जन्म वक्तुं तावत्तस्य मातृउदरावस्थानावस्थामाह–मातुरिति सार्धैः पञ्चभिः। हे भृगुनन्दन शौनक यदा स वीरः परीक्षित् मातुर्गर्भगतस्तदा ब्रह्मास्त्रतेजसा दह्यमानः कञ्चित् अलौकिकं पुरुषं ददर्शेत्यन्वयः॥ ७॥ ❀ ❀ तमेवानुवर्णयति–अङ्गुष्ठेति। अङ्गुष्ठपरिमिता मात्रा उन्नाहो यस्य तम्। अमलं कुक्षिप्रवेशेऽपि तद्गतमलसम्बन्धरहितम्। स्फुरत्पुटो दाहोत्तीर्णसुवर्णमयो मौलिः किरीटमस्यास्तीति तथा तम्। अतिसुन्दरं दृश्यते इति दर्शनं रूपं यस्य तम्। तडिद्वद्वाससी यस्य तमिति श्याममिति च पदाभ्य विद्युद्भूषितघनो-पमा सूचिता। अच्युतं न च्यवन्ति भक्ता यस्येति तथाभूतं, भक्तवत्सलमित्यर्थः॥ ८॥

हिन्दी अनुवाद

शौनकादि ऋषियो! उनके पास अतुल सम्पत्ति थी, उन्होंने बड़े-बड़े यज्ञ किये थे तथा उनके फलस्वरूप श्रेष्ठ लोकोंका अधिकार प्राप्त किया था। उनकी रानियाँ और भाई अनुकूल थे, सारी पृथ्वी उनकी थी, वे जम्बूद्वीपके स्वामी थे और उनकी कीर्ति स्वर्गतक फैली हुई थी॥ ५॥ उनके पास भोगकी ऐसी सामग्री थी, जिसके लिये देवतालोग भी लालायित रहते हैं। परन्तु जैसे भूखे मनुष्यको भोजनके अतिरिक्त दूसरे पदार्थ नहीं सुहाते, वैसे ही उन्हें भगवान‌के सिवा दूसरी कोई वस्तु सुख नहीं देती थी॥ ६॥ ❀ ❀ शौनकजी! उत्तराके गर्भमें स्थित वह वीर शिशु परीक्षित् जब अश्वत्थामाके ब्रह्मास्त्रके तेजसे जलने लगा तब उसने देखा कि उसकी आँखोंके सामने एक ज्योतिर्मय पुरुष है॥ ७॥ ❀ ❀ वह देखनेमें तो अंगूठे भरका है, परन्तु उसका स्वरूप बहुत ही निर्मल है। अत्यन्त सुन्दर श्याम शरीर है, बिजलीके समान चमकता हुआ पीताम्बर धारण किये हुए हैं, सिरपर सोनेका मुकुट झिलमिला रहा है। उस निर्विकार पुरुषके बड़ी ही सुन्दर लम्बी-लम्बी चार भुजाएँ हैं। कानोंमें तपाये हुए स्वर्णके सुन्दर कुण्डल हैं, आँखोंमें लालिमा है, हाथमें लूकेके समान जलती हुई गदा लेकर उसे बार-बार घुमाता जा रहा है और स्वयं शिशुके चारों ओर घूम रहा है॥ ८-९॥

श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम्।
[1]क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम्। परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः॥ ९॥
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ॥ १०॥
विधूय तदमेयात्मा भगवान्धर्मगुब् विभुः। मिषतो दशमासस्य तत्रैवान्तर्दधे हरिः॥ ११॥
ततः सर्वगुणोदर्के सानुकूलग्रहोदये। जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा॥ १२॥

---

१. प्रा० पा०–शङ्खचक्रगदा०।

श्रीधरस्वामिविरचिता भावार्थदीपिका।

तप्तं दाहोत्तीर्णं यत्कांचनं तन्मये कुंडले यस्य। क्षतजाक्षं संरंभादत्यारक्तनेत्रम् ॥ ९॥ ❀ ❀ अस्त्रतेजो विधमंतं विनाशयंतम्। नीहारं हिमं गोपतिः सूर्य इव। सन्निकर्षे समीपे ददर्श। दृष्ट्वा चासौ क इति पर्यैक्षत वितर्कितवान् ॥ १०॥ ❀ ❀ अमेयात्मा कथं तद्विधूतवानित्यवितर्क्यरूपः। धर्मं गोपायतीति धर्मगुप्। यद्वा धर्मं गोपायंतीति धर्मगुपो राजानस्तत्प्रभुस्तेषामपि पालकत्वात्। दशमासपरिच्छेद्यस्य तस्य मिषतः पश्यतो यत्र दृष्टस्तत्रैवांतर्हितो न त्वन्यत्र गतः। यतो विभुः सर्वगतः ॥ ११॥ ❀ ❀ उदर्कं उत्तरफलम्। सर्वगुणानामुत्तरोत्तराधिक्यसूचके लग्ने। तत्र हेतुः-अनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् ॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः।

क्षतजाक्षं ब्रह्मास्त्रं प्रति क्रोधादहो मद्भक्तस्यापि पीडने प्रवृत्तमिदमिति कोपात् ॥ ९॥ ❀ ❀ वितर्कितवान् कोऽसौ वीरासनेन मामनियुक्तोपि रक्षतीति विमृष्टवानित्यर्थः ॥ १०॥ ❀ ❀ पदाविभागेनार्थान्तरमाह-धर्मं गोपायन्तीति धर्मगुपो राजानस्तेषां प्रभू राज्ञामपि धर्मपालकत्वात्। यद्वा धर्मं भक्तवात्सल्यरूपं स्वधर्मं गोपायतीति तथा। हरिरिति। तस्य मनोऽपहृत्य तस्मिन्नवधाने सत्यन्तर्दधे। चौरस्य लक्षणमिदमेव यद्धनवत्यवधानेन्तर्द्धत्त इति। कूटयामिकवत्तन्मनो हर्तुमेव तत्र प्रविष्ट आसीदित्युत्प्रेक्षात्र द्योतिता ॥ ११॥ ❀ ❀ ततो हरेर्दर्शनानन्तरम्। सर्वे गुणा उत्तरफलानि यस्मिन्निति। समासे फलितमाह-सर्वगुणानामिति। ग्रहाणामनुकूलत्वं स्ववर्गमित्रवर्गस्वोच्चादिस्थितत्वम्। वर्गास्तु "ग्रहं होरा च द्रेष्काणसप्तांशकनवांशकाः। द्वादशांशकत्रिंशांशौ वर्ग इत्युच्यते बुधैः" इति मित्रत्वं च "रवीन्दुभौमगुरवो ज्ञशुक्रशनिराहवः। स्वस्मिन्मित्राणि चत्वारि परस्मिञ्छत्रवः स्मृताः ॥" इति। "अजवृषमृगांगनाकर्कमीनवणिजस्त्विनादुच्चाः। उच्चात्सप्तमगो नीचो राशौ वा यदि वांशके ॥ मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाभृतोः। बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चंद्रमाः। सिंहस्याधिपतिः सूर्यः शनिर्मकरकुम्भयोः ॥ स्यान्मीनधन्विनोर्जीवोऽधिपतिः समुदाहृतः। कन्या राहुगृहं प्रोक्तं राहूच्चं मिथुनं स्मृतम्। वर्गोत्तमनवांशाश्चरादिषु प्रथममध्यांताः। होरे विषमेऽर्केन्द्वोः समराशौ चंद्रसूर्ययोः क्रमशः ॥ द्रेष्काणपाः स्वभाज्ज्ञेयाः प्रथमेषु नवाधिपाः। ओजे सप्तांशकः स्वर्क्षात्समे सप्तमराशितः। क्रियमृगास्य तौलिकेंदुभतो नवांशविधिरुच्यते। शुक्रज्ञजीवशनिभूतनयस्य बाणशैलाष्टपंचविशिखास्समराशिमध्ये। त्रिंशांशको विषमभे विपरीतमस्मात्स्याद् द्वादशांशनिजराशित एव ज्ञेयः ॥ यस्मिन्राशौ भवेत्खेटस्तद्गृहं परिकीर्तितम्। तदेव लग्नमुद्दिष्टं लवत्रिंशकसंमितम्। होरापञ्चेन्दुभि (१५) र्भागैर्द्रेष्काणो दशभिर्लवैः। वेदैः (४) सप्तेन्दु (१७) भिश्चैव लवाद्यैः सप्तमांशकाः। नवांशश्च त्रिभिर्भागैस्तृतीयांशेन (२०) संयुतैः। सार्द्धद्वयांशकैः (१३०) भागैर्द्वादशांशक उच्यते। त्रिंशांशविधिरुद्दिष्टः शुक्रज्ञेत्यादिना बुधैः। विषमे ग्रहस्य विषमो राशिः समभे त्रिंशांशके समः" इत्यलमतिप्रसंगेन। ओजसा प्रभावेण तत्राधिक्यसूचकत्वे ॥ १२॥

श्रीमद्वीरराघवव्याख्या

गोपतिः सूर्यः नीहारमिव स्वगदया ब्रह्मास्त्रतेजो विधमंतं नाशयंतं संनिकर्षे स्थितमेवंविधं पुरुषं कोऽसाविति पर्यैक्षत पर्यालोचितवान्। यतः पर्यैक्षत अत एव प्रवृत्तिनिमित्तापरीक्षिच्छब्दवाच्यश्च सर्वभूतैरिति भावः ॥ १०॥ ❀ ❀ तद्ब्रह्मशस्त्रतेजो विधूय निरस्यापरिमेयात्माऽपरिच्छिन्नस्वरूपस्वभावः धर्मगोप्ता विभुर्भगवान्हरिर्दशमे मासि तस्य गर्भस्य शिशोर्मिषतः पश्यतः स तत्रैवांतर्हितवान् ॥ ११॥ ❀ ❀ ततः सर्वगुणोदर्के सर्वगुणाधिके तदेवाह सानुकूलग्रहोदये आनुकूल्येन सहितानां ग्रहाणां भृग्वंगिरादीनामुदयो यस्मिन् लग्न इति विशेष्यमध्याहर्त्तव्यं, सानुकूला ग्रहा यस्मिन्नुदये लग्ने वा पांडोर्वंशधरः वंशवर्द्धनः पुनरोजसा पाण्डुरिव पाण्डुसदृशो जज्ञे ॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

क्षतजवदरुणे अक्षिणी यस्य स तथा तम् आत्मनः स्वस्य सर्वतो दिशं पूर्वादिदिक्षु विदिक्षु परिभ्रमंतं परितो वर्तमानम् उल्काभां गगनात्पतत्तारकाविशेषसदृशीं गोपतिः सूर्यः नीहारं हिमं विधमंतं शमयंतं पुनः सन्निकर्षे समीपे दृष्ट्वा च कोऽयं पुरुष इति पर्यैक्षत आलोचनमकरोत् ॥ ९-१०॥ ❀ ❀ धर्मं गोपायति निरीक्षतीति धर्मगुप् अमेय आत्मा अनंतरूपः, दशमास्यस्य दशमासारंभस्य कुमारस्य पश्यतः स इति शेषः, विभुः समर्थो हरिः सर्वपापकर्षणशीलः भगवान् षड्गुणोपेतः ॥ ११॥ ❀ ❀ ततो हरेर्दर्शनानंतरं सर्वगुणोदर्के सकलगुणोत्तरफले सानुकूला ये ग्रहास्तेषामुदयो यस्मिन्स तथोक्तः तस्मिन्काले पांडोर्वंशधरः संतानानुच्छेदकर्ता ओजसा भूयः पुनरुत्पन्नः पांडुरिव स्थितः ॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

नीहारं विधमन् सूर्य इवासौ क इति पर्यैक्षतेत्यन्वयः, विभक्तिविपरिणामात् ॥ १०-१७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्षतजाक्षं ब्रह्मास्त्रं प्रति क्रोधादत्यारक्तनेत्रम् ॥ ९ ॥ ❀ ❀ नीहारं हिमं गोपतिः सूर्य इव सूर्यो यथा विधमति तथास्त्रतेजो विधमन्तं विनाशयन्तं पर्यैक्षत कोऽसौ वीरासनेन मामयुक्तोऽपि रक्षतीति वितर्कितवान् ॥ १० ॥ ❀ ❀ धर्मं भक्तवात्सल्यरूपं स्वधर्मं गोपायति धर्मगुप् (दशमास्यस्य) दशमासपरिच्छेद्यस्य तस्य मिषतः पश्यतः (यत्र दृष्टः) तत्रैवान्तर्दधे न त्वन्यत्र गतः, यतो विभुः । हरिरिति तस्य मनोऽपहृत्य तस्मिन्नवदधाने सत्यन्तर्दधे । चौरस्य लक्षणमिदमेव यद्धनवत्यवदधानेऽन्तर्धत्ते इति कूटयामिकवत् तन्मनो हर्तुमेव तत्र प्रविष्ट आसीदित्युत्प्रेक्षा च द्योतिता ॥ ११ ॥ ❀ ❀ सर्वगुणा एव उदर्कः उत्तरकालभवं फलं यत्र तस्मिन् । अनुकूलैर्ग्रहैः सह वर्त्तमाने उदये लग्ने ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

क्षतजाक्षमित्यनेन भक्तक्लेशासहिष्णुत्वं सूचितम् ॥ ९ ॥ ❀ ❀ विधमन्तं नाशयंतम् असौ क इति पर्यैक्षत आलोचितवान् ॥ १० ॥ ❀ ❀ भगवान् श्रीकृष्णस्तदस्त्रतेजो विधूय निरस्य तत्रैव गर्भे एव दशमास्यस्य परीक्षितः पश्यत एवांतर्दधेंऽतर्हितवान् । एतेन भगवतस्तदीयानां चायुधादीनां विग्रहस्यापि स्वेच्छयैवाविर्भावतिरोभावसामर्थ्यं कालसम्बन्धवर्जितत्वं च प्रतिपादितम् । अप्रमेयः गर्भे कुत आगतः, पुनर्गतः किमात्मक इत्येवमनुमातुमशक्यः किंतु वेदैकवेद्यः, वेदैकवेद्यत्वं तु वेदान्तकौस्तुभे प्राणाधिकरणे पूर्वैः प्रपंचितम् ॥ ११ ॥ ❀ ❀ ततः कृष्णान्तर्द्धानानंतरं सर्वगुणोदर्के सर्वगुणानामुत्तरोत्तराधिक्ये लग्ने अनुकूलैरन्यैर्ग्रहैः सहिताः सानुकूलास्तेषां शुभग्रहसमुदायो यस्मिंस्तस्मिन् वंशधरः वंशकर्ता पाण्डुरिव तत्तुल्यो जज्ञे ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

श्रीमद्दीर्घचतुर्बाहुं श्रीमन्तो दीर्घाश्चत्वारो बाहवो यस्य सूक्ष्मरूपे आकारः सम्यगभिव्यक्तो न भवेदिति शंकया एवमुक्तम् । आजानबाहुत्वमुक्तं भवति पुरुषार्थचतुष्टयदानाय चतुर्णां प्रदर्शनं गतिपर्यंतं क्रियेति दीर्घत्वमुभयतो लक्ष्मीसहितयोरेव कार्यनिर्वाहात् श्रीमत्त्वम् अनेनैहिकामुष्मिकफलदानं सूचितं, तप्तकांचनकुण्डलं तप्तकांचनवर्णे कुण्डले यस्येति सांख्ययोगयोः कुण्डलत्वात् सर्वविद्याप्रदत्वं सूचितं, तप्तकांचनपदात् संतप्तदशायामेव ज्ञानप्राप्तिरिति सूचितं, क्षतजाक्षं क्षतजवल्लोहितवत् अक्षिणी यस्य बाधकदूरीकरणाय प्रकटितक्रोधलेशयुक्तम् अनेन भक्तरक्षायामासक्तिः सूचिता, उग्रत्वाद्वा सावधानत्वं सूचितं, गदापाणिम् 'ओजः सहो बलयुतं मुख्यरुक्मं गदां दधती'ति वाक्यात् आसन्ययुक्तं अनेन तस्य प्राणगमनभयाभावः सूचितः । किंच तेजोग्रासे वायुतत्त्वमेव समर्थम्, अत एव तेजोग्रासार्थे वायुमेव गदां हस्ते गृहीत्वा तिष्ठति आधिक्ये निर्वापयिष्यामीति आत्मनः सर्वतोदिशं परिभ्रमंतं जीवस्य सर्वत्राहमिति ज्ञापयितुं रक्षा च । प्रकृते विशेषमाह उल्काभां गदां भ्रामयंतमिति यस्य तेजोहेतुत्वं ज्ञापयंती गदा स्वांतस्थं तेजः प्राकटयत्, अत उल्काभा वा दृश्यते दैत्यनिवारणार्थं मुहुः गदां भ्रामयंतम् ॥ ९ ॥ ❀ ❀ किंच अस्त्रतेजः स्वगदयेति जननपर्यंतं ब्रह्मास्त्रं चेत्तिष्ठेत् तदा निर्गमनसमये दैत्याद्युपोद्बलनात् कदाचिद्दहेत् अत इदानीमेव स्वरूपतो नाशयति अग्निवन्नाशनेऽपि तदंशभूतं भस्म तिष्ठेत्, अतो निरंशनाशनार्थं नीहारमिव गोपतिरित्युक्तं कुहरं सूर्य इवादर्शनसमय एवैतत् कुर्वाणं, संनिकर्ष इति । तस्मिन् स्नेहः प्रदर्शितः, तदा जिज्ञासाभूतस्य कोऽयमिति ततो ज्ञानार्थं परीक्षां कृतवान् । तत्र परीक्षायां विषयमाह क इति । निश्चयमाह असाविति योऽसि सोऽसीति ॥ १० ॥ ❀ ❀ एवं सर्वं कार्यं कृत्वा स्वाभिप्रेतार्थसिद्धौ मध्ये भोगार्थमंतर्धानं प्राप्तवानित्याह विधूयेति । तर्हि परीक्षित् कथं न रक्षित इत्याह अप्राकृतत्वाय अंतर्द्धाने धर्मरक्षा हेतुः । नन्वेतावतैव कथं सर्वकार्यं सेत्स्यतीत्याशंक्याह विभुरिति सर्वसमर्थः यथैवेच्छति तथैव करोतीत्यर्थः । दशमासपर्यंतं स्थित्वा पश्चादंतर्हितः दशमासस्य दशमास्यस्येति वा पाठः, मिषत इति । अन्यत्र गमनशंका वारिता अन्यतो भगवान्नागतः किंतु तत्रैव प्रकट इति ज्ञापयितुं तत्रैवांतरधीयत पूर्णज्ञानोत्पत्तौ बंधूनां दुःखं स्यादिति शुकतुल्य एवायं प्राकृत इव कृत इत्याह हरिरिति ॥ ११ ॥ ❀ ❀ एवं भगवत्कृपां प्राप्य मुख्यं नाधिकारिदेहेन महापुरुषत्वज्ञापनार्थं मुख्ये काले प्रादुर्भूत इत्याह तत इति । सर्वे गुणा उदर्के उत्तरफले यस्य तादृशे काले कालस्य हि बहवो गुणाः ते कदाचिदुपकुर्वंति अस्य त्वग्रे उपकरिष्यंतीत्यर्थः, सानुकूले ग्रहोदये अनुकूललग्नसहितानां ग्रहाणामुदयो यत्र अनेन ग्रहफलादपि भावि तस्य सर्वफलं ज्ञातुं शक्यमित्युक्तं, वंशधरः एतस्याग्रे पुत्रा भविष्यंतीति ज्ञापितपाण्डोर्वंशोगत एव स्थितः अनेन धृत इति । नित्यसापेक्षत्वादसमर्थसमासः, यथा पांडुः राजकामनायामेवावतीर्णः अंधस्य ज्येष्ठस्य राज्यानर्हत्वात् पांडवानां भगवता सह वैकुण्ठगमनावश्यकत्वात् राजत्वायायमवतीर्ण इत्यर्थः । ओजसाप्ययं पांडुतुल्यः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

गदापाणिमित्यत्र । तेजोग्रास इत्यादि । तेजसो वायुकार्यत्वेन तस्य वायावेव लयात्तथेत्यर्थः । प्राकटयदिति । प्रकटं करोतीत्यस्मिन्नर्थे तत्करोति तदाचष्ट इत्येनेन णिच् ॥ ९-१२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

श्रीमन्तः शोभावन्तो दीर्घा आजानुलम्बिताश्चत्वारो बाहवो यस्य तम् । तप्तं तापेन निर्मलीकृतं यत्काञ्चनं तन्मये कुण्डले यस्य तम् । क्षतजाक्षं ब्रह्मास्त्रं प्रति क्रोधात् क्षतजवद्रक्ते नेत्रे यस्य तम् । गदा पाणौ यस्य तम् । उल्कस्याङ्गारस्येवाभा यस्यास्तां गदां मुहुर्मुहुर्भ्रामयन्तम् । आत्मनः स्वरक्षार्थं सर्वतोदिशं परिभ्रमन्तम् ॥ ९ ॥ ❀ ❀ स्वगदया ब्रह्मास्त्रतेजो विधमन्तं नाशयन्तम् । तत्र दृष्टान्तमाह–गोपतिः सूर्यो यथा नीहारं कुहरं नाशयति तथेति । एवम्भूतं पुरुषं सन्निकर्षे स्वसमीपे ददर्शेति पूर्वेणान्वयः । दृष्ट्वा चासौ क इति पर्यैक्षत पर्यालोचितवान् ॥ १० ॥ ❀ ❀ तद्ब्रह्मास्त्रतेजो विधूय निरस्य दशमास्यस्य दशमासपरिच्छेद्यस्य तस्य बालस्य मिषतः पश्यत एव यत्र दृष्टस्तत्रैव हरिरन्तर्दधे, न त्वन्यत्र गतः, यतो विभुर्व्यापकः । कथमेवं पश्यत एवान्तर्धानं सम्भवतीत्यपेक्षायामाह– अमेयात्मेति, अचिन्त्यरूप इत्यर्थः । तत्र हेतुमाह– भगवानिति, ऐश्वर्यादिषड्गुणपूर्ण इत्यर्थः । एवम्भूतस्य तत्र प्रादुर्भावे किं प्रयोजनमित्यपेक्षायामाह–धर्मगुबिति, परीक्षिद्रक्षाद्वारा भक्त्यादिधर्ममार्गसंरक्षणार्थं प्रादुर्भूत इति भावः ॥११॥ ❀ ❀ ततस्तदनन्तरम् । उदर्कमुत्तरं फलम् । सर्वे गुणा एवोदर्का उत्तरफलानि यत्र तस्मिन् लग्ने । तत्र हेतुमाह–अनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिंस्तस्मिन् पाण्डोर्वंशधरः वंशप्रवर्त्तकः परीक्षिज्जज्ञे जातः । तमुत्प्रेक्षते–ओजसा सामर्थ्येन तु भूयो जातः पाण्डुरिवेति ॥ १२ ॥

हिन्दी अनुवाद

जैसे सूर्य अपनी किरणोंसे कुहरेको भगा देते हैं, वैसे ही वह उस गदाके द्वारा ब्रह्मास्त्रके तेजको शान्त करता जा रहा था। उस पुरुषको अपने समीप देखकर वह गर्भस्थ शिशु सोचने लगा कि 'यह कौन है ?' ॥ १० ॥ ❀ ❀ इस प्रकार उस दस मासके गर्भस्थ शिशुके सामने ही धर्मरक्षक अप्रमेय भगवान् श्रीकृष्ण ब्रह्मास्त्रके तेजको शान्त करके वहीं अन्तर्धान हो गये ॥ ११ ॥ ❀ ❀ तदनन्तर अनुकूल ग्रहोंके उदयसे युक्त समस्त सद्गुणोंको विकसित करनेवाले शुभ समयमें पाण्डुके वंशधर परीक्षित्‌का जन्म हुआ। जन्मके समय ही वह बालक इतना तेजस्वी दीख पड़ता था, मानो स्वयं पाण्डुने ही फिरसे जन्म लिया हो ॥ १२ ॥

तस्य प्रीतमना राजा विप्रैर्धौम्य[1]कृपादिभिः । जातकं कारयामास वाचयित्वा च मङ्गलम् ॥१३॥
हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्[2] नृपतिर्वरान् । प्रादात्स्व[3]न्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥१४॥
तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितम् । एष ह्यस्मिन् प्रजातन्तौ पुरूणां पौरवर्षभ[4] ॥१५॥
दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि । रातो वो[5]ऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जातकं जातकर्म । मंगलं पुण्याहम् ॥ १३ ॥ ❀ ❀ वरान् श्रेष्ठान् । स्वन्नं शोभनमन्नं च तीर्थविज्ञानकालज्ञः । "यावन्न च्छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते" इति वचनात्ततः पूर्वं प्रादात् । आमान्नं वा । प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले । "पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्" इति स्मृतेः "देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् । आयांति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्" इति च ॥ १४ ॥ ❀ ❀ हे पौरवर्षभ पुरूणां पुरुवंश्यानां शुक्ले शुद्धेऽस्मिन्प्रजातन्तौ दैवेन कथंभूतेनाऽप्रतिघातेन दुर्वारेण संस्थां नाशमुपेयुषि गते सति वोऽनुग्रहार्थाय प्रभवनशीलेन श्रीविष्णुना रातो दत्तस्तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतश्च गुणैश्च महान् भविष्यति नात्र संदेह इति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः ॥ १५–१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य बालस्य । मंगलं पुण्यहवाचनम् । त्रिकाण्डमण्डने तद्विधिरुक्तः, तथा हि "गर्भाधानादिसंस्कारेष्विष्टापूर्त्तक्रतुष्वपि । वृद्धिश्राद्धं नरैः कार्यं कर्मादौ स्वस्तिवाचनम् ॥" व्यासः "संपूज्य गंधपुष्पाद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् । धर्मकर्मणि मांगल्ये संग्रामेऽद्भुतदर्शने ॥" इति । गृह्यपरिशिष्टेपि "स्वस्तिवाचनमृद्धिपूर्तेषु तत्कर्मणाद्यावंतयोः कुर्यात् ।" आश्वलायनः "वैदिके तांत्रिके चादौ तत्तत्पुण्याहमिष्यते ।" तच्च रूपनारायणीये इत्थम् "त्रीनधिकान्वा ब्राह्मणान्भोजयित्वोदङ्मुखानुपवेश्य वस्त्रादिभिः परितोष्य "पुण्याहं भवन्तो ब्रुवन्तु" इति ब्राह्मणान्यजमानस्त्रिः श्रावयेत् । ततो ब्राह्मणाः "पुण्याहं पुण्याहं पुण्याहम्" इति

---

१. प्रा० पा०–विप्रैर्जातक्रियादिभिः । २. प्रा० पा०—हयांश्च नृपति० । ३. प्रा० पा०—प्रादात्स्वयं च । ४. प्रा० पा०—पौरवर्षभः । ५. प्रा० पा०—यो ।

त्रिर्ब्रू युः। ततः 'स्वस्ति भवंतो ब्रुवंत्वि'ति त्रिः श्रावयेत्। 'ॐ स्वस्ति' इति त्रिर्ब्रू युः। तत 'ऋद्धिं भवन्तो ब्रुवन्तु' इति त्रिः श्रावयेत्। 'ऋद्धयतामि'ति त्रिः प्रतिवचनम्। एतच्च ब्राह्मणानन्नेन परितोष्य पुण्याहं स्वस्ति ऋद्धिरित्योंकारपूर्वं त्रिस्त्रिरेकैका आशिषो वाचयित्वेत्यादिना बौधायनेनोक्तम्। यमः "पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते। एतदेव निरोंकारं कुर्य्यात्क्षत्रियवैश्ययोः॥" इति, बह्वृचगृह्यपरिशिष्टे तु "अवनिकृतजानुमण्डलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा "दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु। शिवा आपः सन्तु। सौमनस्यमस्तु। अक्षतं चारिष्टमस्तु। गंधाः पांतु सुमंगल्यं चास्तु। पुष्पाणि पांतु सौश्रियमस्तु। अक्षताः पांतु आयुष्यमस्तु। तांबूलानि पांतु ऐश्वर्यमस्तु। दक्षिणाः पान्तु बहुधनमस्तु। दीर्घमायुः शांतिः पुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रश्चायुष्यं चास्तु। यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्त्तंते, तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। वाच्यताम्। द्रविणोदा द्रविणसस्तुरस्य० सविता पश्चातात्० नवोनवो भवति जायमान० उच्चा दिवि दक्षिणावन्तो अस्थुः०" इत्येता ऋचः पुण्याहे ब्रूयात्। "व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्। समाहितमनसः स्मः। प्रसीदन्तु भवन्तः। प्रसन्नाः स्मः। शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आरोग्यमस्तु आयुष्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु पुत्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसमृद्धिरस्तु। अनिष्टनिरसनमस्तु यत्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। उत्तरे कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरोत्तराः क्रियाः शुभाः शोभनाः प्रवर्त्तंताम्। तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु। तिथिकरणमुहूर्त्तग्रहलग्नाधिदेवताः प्रीयंताम्। तिथिकरणे मुहूर्त्तनक्षत्रे सग्रहे सदैव ते प्रीयेताम्। अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्। इंद्रपुरोगा मरुद्गणाः प्रीयंताम्। वसिष्ठपुरोगा ऋषिगणाः प्रीयंताम्। माहेश्वरीपुरोगा उमामातरः प्रीयंताम्। अरुंधतीपुरोगा एकपत्न्यः प्रीयंताम्। विष्णुपुरोगाः सर्वे देवाः प्रीयंताम्। ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंताम्। ब्रह्म च ब्राह्मणाश्च प्रीयंताम्। श्रद्धामेधे प्रीयेताम्। भगवती कात्यायनी प्रीयताम्। भगवती माहेश्वरी प्रीयताम्। भगवती ऋद्धिकरी प्रीयताम्। भगवती वृद्धिकरी प्रीयताम्। भगवन्तौ विघ्नविनायकौ प्रीयेताम्। सर्वा ग्रामदेवताः प्रीयन्ताम्। सर्वाः कुलदेवताः प्रीयन्ताम्। ब्रह्महता ब्रह्मद्विषः। हताः परिपन्थिनः। हताश्च विघ्नकर्त्तारः। शत्रवः पराभवं यान्तु। शाम्यन्तु घोराणि। शाम्यन्तु पापानि। शाम्यन्त्वीतयः। शुभानि वर्द्धन्ताम्। शिवा आपः सन्तु। शिवा अग्नयः सन्तु। शिवा आहुतयः सन्तु। शिवा वनस्पतयः सन्तु। शिवा अतिथयः सन्तु। अहोरात्रे शिवे स्याताम्। निकामे निकामे नः, पर्जन्यो वर्षतु। फलिन्यो न ओषधयः सन्तु। योगक्षेमो नः कल्पताम्। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। भगवान्नारायणः प्रीयताम्। भगवान्पर्जन्यः प्रीयताम्। प्रीयतां भगवान्स्वामी महासेनः। पुण्याहकालं वाचयिष्ये। वाच्यताम्। 'उद्गातेव शकुने साम गायसि। याज्यया यजति। यत्पुण्यं नक्षत्रं तद्बद् कुर्वीतोपव्युषम्। यदा वै सूर्य उदेति। अथ नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्येत्तावति कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते। तानि वा एतानि यमनक्षत्राणि। यान्येव देवनक्षत्राणि। तेषु कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते। पुण्याहं भवन्तो ब्रुवन्तु। ॐ पुण्याहम्। स्वस्तये वायुमुपब्रवामहै आदित्य उदयनीयः० स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। अष्टौ देवा वसवः सोम्यासः। चतस्रो देवीरजराश्रविष्ठाः। ते यज्ञं पान्तु रजसः परस्तात्। संवत्सरीणममृतँ स्वस्ति॥' स्वस्ति भवन्तो ब्रुवन्तु। आयुष्मते स्वस्ति। ऋध्यामस्तोमं० सर्वामृद्धिमृध्नुयामिति० ऋद्धया स्म हव्यैर्नमसोपसद्या। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान्हविषावर्द्धयन्तः। शतं जीवेम शरदः सवीराः। त्रीणि त्रीणि वै देवानामृद्धानि। त्रीणि च्छन्दाँसि। त्रीणि सवनानि। त्रय इमे लोकाः। ऋद्ध्यामेव तद्वीर्यं एषु लोकेषु प्रतितिष्ठति। ऋद्धिं भवन्तो ब्रुवन्तु। कर्म ऋद्धयताम्। ऋद्धिः समृद्धिः। श्रियै जातः श्रिय एवैनं० यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्। अमुं च लोकमिदमूच सर्वम्। तन्नो नक्षत्रमभिजिद्विजित्य। श्रियं दधात्वहृणीयमानम्। अहेर्बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रयीविदो विदुः। ऋचः सामानि यजूँषि। सा हि श्रीरमृता सताम्। श्रीरस्त्विति भवन्तो ब्रुवन्तु। अस्तु श्रीः। पुण्याहवाचनसमृद्धिरस्तु। भगवान्प्रजापतिः प्रीयताम्। इति पुण्याहवाचनम्। जातकशब्देन पितृदेवार्चनमपि गृहीतं भवति "जातकं कारयामास पितृदेवार्चनं तथा" इति श्रीदशमे नन्दराजोत्सवोक्तेः। तत्र पित्रर्चनं वृद्धिश्राद्धम्। तच्च तदा पिंडहीनमेव कार्यम्। "पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते। स्वधावाचनलोपोत्र विकिरस्तु न लुप्यते॥ अक्षय्यदक्षिणा स्वस्ति सौमनस्यं यथास्थितम्॥" तत्र संक्षिप्य प्रयोगः—सत्यवसुसंज्ञका विश्वेदेवाः ॐभूर्भुवः स्वरिदं वः पाद्यम्। एवं सर्वत्र पाद्यम्। मातृपितामहीप्रपितामह्यो नन्दीमुख्यो भूर्भुवः स्वरिदं वः पाद्यम्। पितृपितामहप्रपितामहा नान्दीमुखा भूर्भुवः स्वरिदं वः पाद्यम्। मातामहप्रमातामहवृद्धप्रमातामहाः नान्दीमुखाः सपत्नीका भूर्भुवः स्वरिदं वः पाद्यम्। आचमनम्। सत्यवसुसंज्ञकानां विश्वेषां देवानां भूर्भुवः स्वरिदमासनं सुखासनम्। नान्दीश्राद्धे क्षणौ क्रियेताम्। ॐतथा। प्राप्नुवन्तु भवन्तः। प्राप्नवामः। मातृपितामहीप्रपितामहीनां नान्दीमुखीनां भूर्भुवः स्वरिदमासनम्। सुखासनम्। नान्दीश्राद्धे क्षणौ क्रियेताम्। ॐ तथा। प्राप्नुवन्तु भवन्तः प्राप्नवामः। पितृपितामहप्रपितामहानां नान्दीमुखानां भूर्भुवः स्वरिदमासनम्। नान्दीश्राद्धे क्षणौ क्रियेताम्। ॐ तथा। प्राप्नुवन्तु भवन्तः प्राप्न-

वामः। मातामहप्रमातामहवृद्धप्रमातामहानां नान्दीमुखानां सपत्नीकानां भूर्भुवः स्वरिदमासनम्। सुखासनम्। नान्दीश्राद्धे क्षणौ क्रियेतां भवद्भिः। ॐतथा। प्राप्नुवन्तु भवन्तः। प्राप्नुवामः। ततो गंधादिदानम्। सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः। मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्य इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः। पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः। मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नान्दीमुखेभ्यः सपत्नीकेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः। ततः परिवेषणं कृत्वा गायत्र्या प्रोक्ष्य पृथिवी ते पात्रमिति पात्रमालभ्य सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः। मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः। पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः। मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः। स्वस्ति न इन्द्रो वृद्धश्रवा इत्यादिपाठः। अनेन नान्दीश्राद्धेन कर्मांगदेवताः प्रीयन्ताम् वृद्धिः संपद्यताम्। ततः पुरुषसूक्तादिजपः। नान्दीश्राद्धं संपन्नं सुसंपन्नं सुप्रोक्षितमस्तु। शिवा आपस्सन्तु। सौमनस्यमस्तु। अक्षतं चारिष्टमस्तु। नान्दीमुख्यो मातरः प्रीयन्ताम्। नान्दीमुखाः पितरः पितामहाः प्रपितामहाः प्रीयन्ताम्। नान्दीमुखा मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः प्रीयन्ताम्। ततो गोत्रन्नो वर्द्धताम्। वर्द्धतामिति प्रयुक्ते। "दातारो नोभिवर्द्धंतां वेदाः सन्ततिरेव नः। श्रद्धा च नो मा व्यगमद्बहुदेयञ्च नोऽस्तु॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिध्वं कंचन" इति संप्रार्थ्य। विप्रैः "दातारो वोभिवर्द्धंतां वेदाः संततिरेव वः। श्रद्धा च वो मा व्यगमद्बहुदेयं च वोऽस्तु॥ अन्नं च वो बहु भवेदतिथींश्च लभध्वम्। याचितारश्च वः सन्तु मा च याचिढ्वं कञ्चन" इति प्रत्युक्ते द्राक्षामलकादितन्निष्क्रयं वा दक्षिणां दत्त्वा "विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजेवाज इति मानपूर्वं मात्रादीन्विसृज्यामावाजस्येत्यनुजोदिति संक्षिप्तवृद्धिश्राद्धञ्च।" नृपो विप्रैः कारयामास। यद्वा "हैमेन श्राद्धं कुर्वीत ग्रहणे पुत्रजन्मनि" इति स्मृतेः। हेम्नैवाद्यपुत्रोत्पत्तिसमये नान्दीश्राद्धकरणं जन्यफलसमफलप्राप्तये इदं स्वर्णमग्निदेवताकं विभज्याविभज्य वाऽमुकामुकगोत्रामुकामुकशर्मभ्यो विप्रेभ्योऽमुकशर्मणे वाहं दास्य इति संकल्पश्राद्धमेव कुर्यात्तेन पित्रादितृप्तिर्बालश्च चिरायुः स्यादिति पुण्याहवाचनात्पश्चात्कार्यम्॥ १३॥ ❀ ❀ शोभनमन्नं पायसादि। ननु लोकविरुद्धत्वात्तदा न कोपि भुंक्त इति चेदाह–आमान्नं वेति। किं च "अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः। संस्कारेषु च पुत्रस्य तदक्षय्यं प्रकीर्तितम्॥" इति विष्णुधर्मे "प्रमीते गोत्रपुरुषे सूतके वा समागते। दशरात्रमनर्हः स्यात्कर्तुं दानप्रतिग्रहौ॥ पिंडोदकादि मृतके दातुं प्रेताय युज्यते। अच्छिन्नायां तथा नाड्यां दानार्हः सुतसूतके॥" इति वाराहोक्तेः। सत्यपि सूतकादौ तदुपयोगि कर्मावश्यं कार्यमेवेति न तत्र दोषः। "वरो वै दक्षिणा" इति श्रुतेर्वरान्दक्षिणा वा॥ १४॥ ❀ ❀ हे पौरवर्षभेति। पुरुनृपस्य पितृभक्तत्वेन "तन्तुं तन्वन्पितॄन्यजेत्" इत्याद्युक्तेः पितृभक्तवंशानुच्छेदादपि तद्वंशर्षभस्य तव वंशोऽनुच्छेदार्ह एवेति भावः॥ १३-१६॥

श्रीमद्वीरराघवव्याख्या

ततः प्रीतं हृष्टं मनो यस्य स राजा युधिष्ठिरः धौम्यकृपादिभिर्विप्रैः सुमङ्गलं स्वाशिषं वाचयित्वा जातकं जातकर्म कारयामास॥ १३॥ ❀ ❀ ततो नृपतिर्युधिष्ठिरो हिरण्याश्ववरान्कामान्यथायोग्यं यथाभिलाषं च कामं प्रादादर्थिभ्यः प्रायच्छत्स तीर्थविद्दानपात्रविद्राजा प्रजातीर्थे पौत्रोत्पत्तिनिमित्तदानकाले स्वन्नं सुमृष्टमन्नं च विप्रेभ्यः प्रादात्॥ १४॥ ❀ ❀ हिरण्यादिभिस्तुष्टा ब्राह्मणास्तं प्रश्रयेण विनयेनावनतं नम्रं राजानमूचुः॥ १५॥ ❀ ❀ तदेवाह एष हीति सार्द्धद्वयेन। पुरूणां भवतां प्रजातंतौ प्रजासंताने निमित्ते शुक्ले गर्भपिंडे संस्थामुपेयुषि सति हि यस्मादेष जातः अप्रतिघातेन प्रतिहतिरहितेन दैवेन प्रभविष्णुना समर्थीभवनशीलेन विष्णुना वोऽनुग्रहार्थोऽयं रातो रक्षितः॥ १६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जातकं जातकर्म मंगलं पुण्याहम्॥ १३॥ ❀ ❀ तीर्थं शास्त्रं पात्रं वा वेत्तीति तीर्थवित् प्रजातीर्थे पुत्राख्यशुद्धजले पुत्रजन्मकाले वा सतीर्थविदित्येकं वा पदं सतीर्थे इत्यर्थः॥ १४॥ ❀ ❀ प्रश्रयानतं प्रावण्यगुणावनतं कुरूणां कुरुवंशजातानाम् अस्मिन्कुले प्रजातंतौ पुत्राख्यसंतानसंस्थां विनाशमुपेयुषि गच्छति सति वो युष्माकमनुग्रहाख्यप्रयोजनाय प्रभविष्णुना रातो दत्त इति यस्मात्तस्मात् लोके नाम्ना विष्णुरात इति बृहच्छ्रवा विख्यातयशा भविष्यति॥ १५-१७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जातकं जातकर्म॥ १३॥ ❀ ❀ प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले–'पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयमि'ति स्मृतेः॥ १४॥ ❀ ❀ पुरूणां पुरुवंश्यानां प्रजातन्तौ संस्थां नाशम् उपेयुषि प्राप्ते सति। शुक्ले शुद्धे रातो दत्तः॥ १५-१६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुमङ्गलपुण्याहं वाचयित्वा जातकं जातकर्म कारयामास ॥ १३ ॥ ❀ ❀ स युधिष्ठिरः प्रजातीर्थे पुत्रपौत्राद्युत्पत्तिकाले तीर्थवित् दानक्रियाविषये तीर्थानि देशकालपात्रदेयवस्त्वादीनि जानातीति स तथा ॥ १४ ॥ ❀ ❀ प्रश्रयानतं विनयेन नम्रं तं राजानमूचुः हे कौरवर्षभ ! कुरूणां वंश्यानां भवतां प्रजातंतौ विषये एषः रात इति द्वितीयेनान्वयः ॥ १५ ॥ शुक्ले निर्दोषे गर्भे संस्थां नाशमुपेयुषि सति अप्रतिघातेन स्वेप्सितकर्मसु प्रतिभटरहितेन दैवेन प्रभविष्णुना भक्तकार्यार्थं सर्वत्र प्रभवनशीलेन विष्णुना श्रीकृष्णेन वोऽनुग्रहार्थाय रातो दत्तः ॥ १६-१७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तस्य प्रासंगिकं कृत्यमाह तस्येति। यद्यपि गार्भिकवैजिकमेनो नास्ति तथापि अपूर्वपक्षमाश्रित्य अष्टाचत्वारिंशत् संस्कारान् वदन् जातकर्माह-मूर्द्धाभिषिक्तस्य स्वतः करणायोगात् विप्रैरित्युक्तं धौम्यः पांडवपुरोहितः कृपः परंपरागतः, जातकं कर्मनामधेयं मंगलं पुण्याहवाचनम् ॥ १३ ॥ ❀ ❀ जन्मोत्सवमाह हिरण्यमिति। महीं वृत्तिकरीं भूमिं वरान् अभिमतार्थान् स्वन्नं आमं गोधूमादि प्रजातीर्थे "देवाश्च पितरश्चे"ति वाक्यात् पुत्रजन्मनि सर्वदेवतासांनिध्यात् प्रजातीर्थ इत्युक्तम्, वैदिके कर्मणि ज्ञानादेव फलमिति अस्य तीर्थत्वेनाप्रसिद्धत्वात् फलं न भवेदित्याशंक्याह सर्वतीर्थविदिति। तीर्थविद्भिः सहितः अतस्तदुपदेशात् ज्ञात्वा कृतवानित्यर्थः ॥ १४ ॥ ❀ ❀ अस्मिन् बालके द्वेधाप्युत्कर्षोऽस्ति भगवत्कृतः कालकृतश्च तत्र भगवत्कृतं ये वसिष्ठादयो ब्राह्मणाः सर्वज्ञाः अतिदानेन संतुष्टाः विनयेन नम्रं गुह्यमूचुः एष इति प्रथमं निर्दिशति। यस्य गुणा अग्रे वक्तव्याः स एषेति निर्दिश्यते यथा सोमविक्रय एष इति इममर्थं ज्ञापयंति हीति अस्मिन्निति राजानं बालकवंश्यांश्च निर्दिश्य प्रजातंतौ पुत्रपौत्रादिरूपे वंशे कुरूणामिति कुरोर्भगवदीयत्वेन तद्वंशसंस्थाया अनुचितत्वात् प्रधानसंस्थायामेव संख्याव्यपदेशाच्च पौरवर्षभेति पितृभक्तत्वाच्च पूरोः ॥ १५ ॥ ❀ ❀ तस्यापि वंशसंस्थानुचितेति उपघातहेतुमाह दैवेनेति। वंशजनकानामदृष्टं समाप्तमिति विच्छेदकादृष्टेन वा प्रसवजनकादृष्टस्य विच्छेदकप्रतिबन्धकस्य चाभावात् संस्था अवश्यं भाव्या, अदृष्टं च नास्ति भगवांश्च वर्तते किमत्र भविष्यतीत्याशंकायां यथाकथंचित् वंशेन उभयं समाहितं भविष्यतीति आशंक्य तन्निषेधार्थं शुक्ल इत्युक्त्वा दैवबलं बलमिति वाक्यात् संस्थामुपेयुषि सति अदृष्टकालादीनामनुकूलत्वात् केवलं भगवान् पुष्टिमार्गमाश्रित्य भवतामनुग्रहार्थाय पूर्वं यो भवत्स्वनुग्रहः कृतः तस्यार्थः प्रयोजनमिदमिति 'नापुत्रस्य लोकोऽस्ती'ति श्रुतेः अमृतत्वसम्पादकत्वाच्च भगवतः सामान्यभूतत्वाद्वंशस्य 'प्रजामनुप्रजायन्ते तदुतमर्त्यामि'ति श्रुतेः भगवता अयं रक्षितः। किंच स्वार्थमप्ययं रक्षितः, भागवतादिरूपेण प्रकर्षेण उरुभविष्णुना सर्वेषु भागवततद्भक्तेषु भगवद्द्वारा आविर्भावैकरसेन अतोऽर्थप्रतिपादकं नाम भगवतीति संज्ञाशब्दापेक्षया यौगिकशब्दस्य अजहत्स्वार्थेन मुख्यत्वात् ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्य प्रीतेत्यत्र। अपूर्वपक्षमिति। नैमित्तिकमात्मसंस्कारपक्षम् ॥ १३-१६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ततश्च प्रीतं हृष्टं मनो यस्य स राजा युधिष्ठिरः स्वस्य राज्याभिषिक्तस्य करणेऽधिकाराभावात् धौम्यकृपादिभिर्विप्रैः सुमङ्गलं पुण्याहं वाचयित्वा तस्य जातस्य जातकं जातकर्म कारयामासेत्यन्वयः ॥ १३ ॥ ❀ ❀ तदा च प्रजातीर्थे 'पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्। देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ॥ आयान्ति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्। यावन्न च्छिद्यते नालं तावन्नाप्नोति सूतकम् ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते' इत्यादिवचनेभ्यः पुत्रोत्पत्तिपुण्यकालं नालच्छेदात् पूर्वं स तीर्थवित् दानकालज्ञो नृपतिर्हिरण्यादीन् वरानन्यांश्चाभिलषितपदार्थान् स्वन्नं च विप्रेभ्यः प्रादादित्यन्वयः ॥ १४ ॥ ❀ ❀ हिरण्यादिभिस्तुष्टाः ब्राह्मणास्तं प्रश्रयेण विनयेन आनतं नम्रं राजानमूचुरित्यन्वयः। किमूचुरित्यपेक्षायां तद्वचनं दर्शयति-एष इति सार्धद्वयेन। हे पौरवर्षभ पूरूणां पूरुवंश्यानामस्मिन् शुक्ले शुद्धे प्रजासन्तानेऽप्रतिघातेन प्रतिहतिरहितेन दैवेन दुरदृष्टेन संस्थामुपेयुषि नाशं प्राप्ते सति हि यस्माद्वो युष्माकमनुग्रहार्थाय विष्णुना एष शिशू रातो दत्तस्तस्मान्नाम्ना वाचकेन शब्देन विष्णुरात इति प्रसिद्धो भविष्यति। बृहच्छ्रवा विपुलकीर्तिश्च भविष्यति। तत्र हेतुमाह-यतो गुणैर्महान् भविष्यति। तत्रापि हेतुमाह-यतो महाभागवतः परमवैष्णवो भविष्यति। अत्र सन्देहो न कर्त्तव्यः ॥ १५-१७ ॥

हिन्दी अनुवाद

पौत्रके जन्मकी बात सुनकर राजा युधिष्ठिर मनमें बहुत प्रसन्न हुए। उन्होंने धौम्य, कृपाचार्य आदि ब्राह्मणोंसे मङ्गलवाचन और जातकर्म-संस्कार करवाये ॥ १३ ॥ ❀ ❀ महाराज युधिष्ठिर दानके योग्य समयको जानते थे। उन्होंने

प्रजातीर्थ[1] नामक कालमें अर्थात् नाल काटनेके पहले ही ब्राह्मणोंको सुवर्ण, गौएँ, पृथ्वी, गाँव, उत्तम जातिके हाथी-घोड़े और उत्तम अन्नका दान दिया ॥ १४ ॥ ❁ ❁ ब्राह्मणोंने सन्तुष्ट होकर अत्यन्त विनयी युधिष्ठिरसे कहा—'पुरुवंश-शिरोमणे ! कालकी दुर्निवार गतिसे यह पवित्र पुरुवंश मिटना ही चाहता था, परन्तु तुमलोगोंपर कृपा करनेके लिये भगवान् विष्णुने यह बालक देकर इसकी रक्षा कर दी ॥ १५-१६ ॥

तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः । भविष्यति न संदेहो महाभागवतो महान् ॥१७॥

युधिष्ठिर उवाच[2]

अप्येष वंश्यान् राजर्षीन्[3] पुण्यश्लोकान् महात्मनः । अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥

ब्राह्मणा ऊचुः

पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः । ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥१९॥
एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः । यशो[4] वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति । अपि स्विस्किंस्वित् । साधुवादेन यशसा तत्कीर्त्या चानुवर्तिता भविष्यतीति पूर्वस्यैवातः परमप्यनुषंगः ॥ १८ ॥ ❁ ❁ प्रजानामविता रक्षकः । मानवो मनोः पुत्रः । ब्राह्मणेषु हितः सत्यप्रतिज्ञश्च श्रीरामो यथा ॥ १९ ॥ ❁ ❁ उशीनरदेशाधिपतिः शिबिर्येन स्वमांसं श्येनाय दत्त्वा शरणागतः कपोतो रक्षितः । स्वानां ज्ञातीनां यज्वनां च यशोविस्तारको दौष्यंतिर्भरत इव ॥ ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बालस्य तादृशयोग्यतायामश्रद्दधानं राजानं प्रत्याहुर्न संदेह इति ॥ १७ ॥ ❁ ❁ साधुषु वादः कथनं यस्य तेन । यशसेति । अनेन धूर्तव्यसनिवंचकमूर्खगोष्ठीश्लाघ्यता निरस्ता । तत्र तादृशां श्लाघ्यत्वे प्रत्युत निन्दैव जायत इति । हे सत्तमा इति । भवन्तो हि यथार्थशास्त्रसंपन्नत्वेन सर्वकथनसमर्थास्तपस्वित्वेन त्रिकालज्ञाश्चेति भावः ॥ १८ ॥ ❁ ❁ तेषां सुदृशो यशसेति । किं पृच्छ्यते । यैरेवैकैकैर्गुणैस्ते सर्वे एव गुणास्तस्मिन्नधुनैव सन्ति । यथावसरमाविर्भविष्यन्ति तस्मादेतत्तुल्यास्ते न बभूवुरिति प्रतीयतामित्याशयेनाहुः पार्थेति । पृथापुत्रत्वेन तव भगवत्पैतृष्वस्रीयत्वान्न त्वां वयं प्रतारणवचो वच्म इति भावः ॥ १९ ॥ ❁ ❁ दौष्यन्तिर्दुष्यन्तपुत्रः ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

तस्माद्विष्णुना रातत्वरूपप्रवृत्तिनिमित्तनाम्ना वाचकेन शब्देन लोके विष्णुरात इति प्रसिद्धो बृहच्छ्रवा विपुलकीर्तिर्गुणैर्महान्महाभागवतश्च भविष्यति नात्र संदेहः ॥ १७ ॥ ❁ ❁ विप्रैरेवमुक्तो युधिष्ठिरः तस्य भाविनो गुणान् बुभुत्सुः पृच्छति अपिस्विदित्येतद्द्वयं समुदितं प्रश्नद्योतकं हे सत्तमाः ! एष जातः शिशुः साधुवादेन साधूनामुपदेशेन हेतुना महात्मनः पुण्यश्लोकान् वंश्यान् राजर्षीन् पांडवादीन् अनुवर्तितास्विदनुवर्तिष्यति किं पांडवादिवद्यशस्वी भविष्यति इति प्रश्नः । साधूनां वादो यस्मिन् विषयभूते तेन यशसानुवर्त्तिता स्विदिति वान्वयः ॥ १८ ॥ ❁ ❁ एवमापृष्टा जातकोविदा ब्राह्मणास्तस्य भाविनो गुणान्वर्णयंति पार्थेत्यादिदशभिः । न केवलमितरसाधारणैकगुणमेवानुवर्त्तिता अपि तु तत्तदसाधारणगुणान् सर्वानपीत्याहुः—हे पार्थ ! मानवः मनोर्वैवस्वतस्य सुत इक्ष्वाकुरिव साक्षात्प्रजाविता प्रजानामविता रक्षिता यथा दाशरथिर्दशरथपुत्रः श्रीरामस्तद्वद्ब्रह्मण्यः ब्रह्मकुले साधुः सत्ये याचके संधा दृढाभिरुचिर्यस्तथाभूतस्य एष दाता आत्मपर्यंतदाता शरण्यः शरणं रक्षणोपायमर्हतीति ॥ १९ ॥ ❁ ❁ यथौशीनरः उशीनरसुतः शिबिश्चक्रवर्ती तद्वद्दाता शरण्यश्च दौष्यंतिरिव भरत इव यज्वनां यष्टॄणां यशोवितनिता यशसो विस्तारयिता ॥ २० ॥

---

१. नालच्छेदनसे पहले सूतक नहीं होता, जैसे कहा है—'यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते ॥' इसी समयको 'प्रजातीर्थ' काल कहते हैं । इस समय जो दान दिया जाता है, वह अक्षय होता है । स्मृति कहती है—'पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् ।' अर्थात् 'पुत्रोत्पत्ति और व्यतीपातके समय दिया हुआ दान अक्षय होता है ।' २. प्रा० पा०—राजोवाच । ३. प्रा० पा०—राजर्षिः । ४. प्रा० पा०—यथोचितविधाता च दौष्यन्ति० ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ब्राह्मणवचनानंतरं युधिष्ठिरस्तानप्राक्षीदित्याह अपीति । हे सत्तमाः ! अपिशब्दस्य स्विदित्यनेनान्वयः । साधुषु वादो यस्य स तथा साधुरितिवादेन वा ।। १८ ।। ❀ ❀ हे पार्थ ! पृथायाः सुत युधिष्ठिर मानवो मनुपुत्रः प्रजानामविता दाशरथिः दशरथपुत्रः सत्यसंधः सत्यप्रतिज्ञः ।। १९ ।। ❀ ❀ औशीनरः उशीनरपुत्रः दौष्यंतिः दुष्यंतपुत्र इव यज्वनां यथा विस्तारकर्ता तथायमपि स्वानां स्ववंशजन्यानां यशोवितनिता ।। २० ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

अप्येष वंश्यानित्यत्र हृष्ट इति टीकायां हर्षेणैव पुनः प्रश्नोऽयं न त्वपूर्त्येति भावः । वस्तुतस्तु तथात्वेऽपि राजश्रेष्ठता-ज्ञानार्थं पुनः प्रश्नः ।। १८–२३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बालस्य तादृशयोग्यतायामश्रद्दधानं राजानं प्रत्याह न सन्देह इति ।। १७ ।। ❀ ❀ महाभागवतो भविष्यतीत्युक्ते राजैव सान्तश्चमत्कारं सगाम्भीर्यं पृच्छति अपिस्विन् प्रश्ने । अनु लक्ष्यीकृत्य वर्तिता । तेषां सदृशो भविष्यति न वेत्यर्थः ।। १८ ।। ❀ ❀ तेषां सदृशो यशसेति किं पृच्छ्यते यैरेव एकैकैर्गुणैस्ते सर्वे यशस्विनः आसन् ते सर्वे एव गुणा अस्मिन् बालकेऽधुनैव सन्ति यथावसरमाविर्भविष्यन्ति तस्मादेतत्तुल्यास्ते न बभूवुरिति प्रतीयतामित्याशयेनाहुः पार्थेति । प्रजानाम् अविता रक्षकः । सत्यसन्धः सत्यप्रतिज्ञः ।। १९ ।। ❀ ❀ उशीनरदेशाधिपतिः शिबिः येन स्वमांसं श्येनाय दत्त्वा शरणागतः कपोतो रक्षितः । दुष्यन्तपुत्रो भरतः ।। २० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे सत्तमाः ! एष विष्णुरातः साधूनां वादः प्रशंसाशब्दो यस्मिन् तेन यशसा राजर्षीन् अनुवर्तिता अनुवर्तिष्यतिस्वित् ।। १८ ।। ❀ ❀ मानवः मनोः श्राद्धदेवस्य पुत्रः प्रजाया अविता रक्षिता ब्रह्मण्यः ब्रह्मशब्दवाच्यानां ब्रह्मब्राह्मणवेदानां हितकृत् । सत्ये संधाभिसंधिर्यस्य स तथा ।। १९ ।। ❀ ❀ उशीनरस्यापत्यमौशीनरः स्वानां ज्ञातीनां यज्वनां यष्टॄणां यशोवितनिता यशसो विस्तारयिता दौष्यन्तिर्दुष्यंतपुत्रो भरत इति ।। २० ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नाम्ना विष्णुरात इति । लोके प्रसिद्धो भविष्यतीत्यर्थः । कारणोत्कर्षमाह बृहच्छ्रवा इति । भवदाद्यपेक्षयापि अधिक-कीर्तिमाहुः–नहि भवंत एवं रक्षिताः न कालो निगृहीतः न वा भागवतं प्राप्तमिति संस्थाप्रापककालादेः प्रतिबंधकत्वात् कथमेवं भविष्यतीत्याशंकायामाह न संदेह इति । तत्र हेतुः महाभागवत इति । भागवतस्य महत्त्वं भगवत्प्रियत्वे हेतुः, तदस्मिन् लक्षणादिना अवगम्यते, अत एव कालादीनां नात्रोपकारजनकत्वं तदुत्तरत्र प्रश्नोत्तराभ्यां निरूपयिष्यते । किंच यथा कालादिभ्यो भगवता बलं दत्तं ततोऽप्यस्मै बहुदत्तमिह नास्मिन् शंकाविषय इत्याह महानिति ।। १७ ।। ❀ ❀ एवं महद्भिरर्थैर्निरूपिते कालाद्भयं मन्यमानः सर्वं कालकृतं मन्ये इत्युक्तत्वात् कालज्ञानं पृच्छति अप्येष इति । भगवत्कृपाव्यतिरेकेणापि यथा कालेनास्मद्वंशा रक्षिता यशस्विनश्च कृताः तथायं किं भविष्यतीति प्रश्नः । वंशेष्वपि ये पुण्यश्लोकाः पुरूरवःप्रभृतयः तत्रापि ये महात्मानः कुरुसदृशाः यशः सर्वजनीनं साधुवादः सद्भिरेव क्रियमाणः चरित्रस्य भावोत्कर्षो वा वेदार्थसर्वज्ञाः सत्तमाः ।। १८ ।। ❀ ❀ तत्र सर्वमेव कालोत्कर्षमाह पार्थेति । यद्यपि भगवता एवं रक्षितुं देहोऽनुचितः, तथापि हे पार्थ ! अयं साक्षात्प्रजाविता न मंत्रिद्वारा स्वयमेवेष्टादिकरणात् यद्यपि मनोर्बहवः पुत्रा जाताः, अथाप्यंतवंशकृत् इक्ष्वाकुरेव जातः । तस्य यथा प्रजापालनमविच्छिन्नमेवम-स्यापि शत्रुमित्रादिषु समो वा शत्त्यनात् सर्वज्ञत्वाद्वा तथा वदंति मानवः वैवस्वतमनोः पुत्रः ब्रह्मण्यो ब्राह्मणभक्तः सर्वस्वदानात् सत्यसंधः सत्यप्रतिज्ञः वनवासगमनात् दाशरथी रघुनाथः कालस्यापकारजनकत्वं स्वेच्छया भगवत्यपीति भगवद्दृष्टांतः ।। १९ ।। ❀ ❀ शरण्यः शरणागतरक्षकः चकारात् प्रत्येकसमुदायाभ्यां कीर्तिमान् उशीनरवंशोत्पन्नः शिबिः तस्य समुदायकीर्तिरेवं प्रसिद्धा इन्द्राग्निसंवादे दौष्यंतिर्भरतः सर्वस्यापि सोमवंशस्य यशःप्रदः यज्विनां च शताश्वमेधकरणात् सर्वत्र चकारेण पूर्वोक्त-संबंधः दृष्टान्तके दार्ष्टांतिके चावगन्तव्यः ।। २० ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अप्येष इत्यत्र । चरित्रस्वभावोत्कर्षाविति । चरित्रोत्कर्षः स्वभावोत्कर्षश्चेत्यर्थः ।। १८ ।। ❀ ❀ दौष्यन्तिरिव यज्वना-मित्यत्र । नन्वत्र चकाराभावाद्यज्वनां भिन्नः सम्बन्धो न युक्त इत्यत आहुः सर्वत्रेत्यादि । सर्वत्रानुक्तचकारे वाक्येपि चकारः पूर्वोक्तसम्बन्धः प्रत्येकसमुदायाभ्यां कीर्तिसम्बन्धो दृष्टान्ते दार्ष्टान्तिके च प्रमाणसिद्धो दृष्टान्तीयगुणवशेनार्थादेव बोध्य इत्यर्थः ।। २० ।।

श्रीगिरिधरकृता बालप्रबोधिनी

विप्रैरेवमुक्तो युधिष्ठिरस्तस्य भाविनो गुणान् बुभुत्सुः पृच्छति-अपीति । अपिस्विदित्येतद् द्वयं समुदितं प्रश्नद्योतकम् । भवतां न किञ्चिदविदितं त्रिकालज्ञत्वादिति सूचयन् सम्बोधयति, हे सत्तमा इति । एष जातः शिशुः साधुभिर्वादो गुणकीर्त्तनं यस्मिंस्तेन यशसा सत्कीर्त्या महात्मनो भगवद्भक्तान् पुण्यश्लोकान् पवित्रयशसो वंश्यान् राजर्षीन् पाण्ड्वादीन् किमनुवर्त्तिता भविष्यतीति पूर्वस्यैव क्रियापदस्यानुषङ्गेण त्रयाणामन्वयः । अतः परमप्यस्यैवानुषङ्गः ॥ १८ ॥ ❀ ❀ राज्ञैवम् आपृष्टा जातककोविदा ब्राह्मणाः स्वयशसैव पूर्वेषां सदृशो भविष्यति किमिति किं पृच्छ्यते यत्र एकैकेन गुणेनैव ते यशस्विन आसन् , अस्य तु ते सर्वे एव गुणा भविष्यन्तीति तदपेक्षयाऽप्ययमेव महानित्याशयेन तस्य भाविनो गुणान् वर्णयति-पार्थेत्यादिदशभिः । हे पार्थ मानवः मनोर्वैवस्वतस्य पुत्रः इक्ष्वाकुरिव साक्षात् न तु मन्त्रिद्वारा प्रजानामविता रक्षको भविष्यति । ब्रह्मण्यो ब्राह्मणभक्तः सत्यसन्धः सत्यप्रतिज्ञश्च यथा दाशरथिः दशरथपुत्रः श्रीरामस्तथा भविष्यति ॥ १९ ॥ ❀ ❀ एष दाता स्वदेहपर्यन्तसमर्पकः शरण्यं रक्षणोपायमर्हतीति शरण्यश्च यथा हि औशीनरः उशीनरदेशाधिपतिः शिबिस्तथा भविष्यति । स्वानां स्वकीयानां यज्वनां यष्टॄणां च यशो वितनिता यशसो विस्तारयिता दौष्यन्तिर्भरत इव भविष्यति ॥ २० ॥

हिन्दी अनुवाद

इसीलिये इसका नाम विष्णुरात होगा। निस्सन्देह यह बालक संसारमें बड़ा यशस्वी, भगवान्का परम भक्त और महापुरुष होगा' ॥ १७ ॥ ❀ ❀ युधिष्ठिर ने पूछा-महात्माओं ! यह बालक क्या अपने उज्ज्वल यशसे हमारे वंशके पवित्रकीर्ति महात्मा राजर्षियोंका अनुसरण करेगा ? ॥ १८ ॥ ❀ ❀ ब्राह्मणोंने कहा-धर्मराज ! यह मनुपुत्र इक्ष्वाकुके समान अपनी प्रजाका पालन करेगा तथा दशरथनन्दन भगवान् श्रीरामके समान ब्राह्मणभक्त और सत्यप्रतिज्ञ होगा ॥ १९ ॥ ❀ ❀ यह उशीनर-नरेश शिबिके समान दाता और शरणागतवत्सल होगा तथा याज्ञिकोंमें दुष्यन्तके पुत्र भरतके समान अपने वंशका यश फैलायेगा ॥ २० ॥

धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः । हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ २१ ॥
मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव । तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥ २२ ॥
पितामहसमः साम्ये प्रसादे गिरिशोपमः । आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ २३ ॥
सर्वसद्गुणमाहात्म्ये[1] एष कृष्णमनुव्रतः । रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अर्जुनयोः पार्थकार्तवीर्ययोः ॥ २१ ॥ ❀ ❀ हिमवानिव सतां निषेव्योऽनन्यगतिकत्वेन । वसुधेव तितिक्षुः क्षंता । प्रीत्या मातापितराविव सहिष्णुः ॥ २२ ॥ ❀ ❀ पितामहो ब्रह्मा तेन समः । साम्ये समत्वे रमाश्रयो हरिः ॥ २३ ॥ ❀ ❀ सर्वैः सद्गुणैर्माहात्म्यं यस्तस्मिन् श्रीकृष्णतुल्यः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दुर्द्धर्षः दुःसहः । दुस्तरः तर्तुमशक्यः ॥ २१ ॥ ❀ ❀ विक्रान्तः शूरः । सर्वंसहापि वसुधा परेषां वाक्छरज्वालां नानुभवति । अयं तु तामनुभवन्नपि न प्रतिकरिष्यतीति । अत्र दृष्टान्तः-पितराविवेति चक्रवर्ती ॥ २२ ॥ ❀ ❀ पितामहो ब्रह्मा युधिष्ठिरो वा । साम्ये सर्वत्र द्वेषाभावे ॥ २३ ॥ ❀ ❀ उदार औदार्यविशिष्टस्तेन कारुण्यं लक्ष्यते। येनाष्टचत्वारिंशद्दिनपर्यन्तमनश्नतापि सर्वमन्नमतिथिभ्यो दत्त्वा पानीयमपि तृट्परीताय दत्तमिति नवमे प्रथयिष्यते। ननु ययातेः प्रतिलोमोद्वाहवत्त्वात्कथं धार्मिकत्वमिति न शंक्यम् । धर्मस्य सूक्ष्मगतित्वेन दुर्ज्ञेयत्वात् । तदुक्तमपि-"कानीनस्य मुनेः स्वबांधववधूवैधव्यविध्वंसिनो नप्तारः किल गोलकस्य तनयाः कुंडाः स्वयं पाण्डवाः । तेऽमी पंच समानयोनिनिरताः ख्यातास्त्रिलोकीतले तेषां कीर्तनमेव पापशमकं धर्मस्य सूक्ष्मा गतिः ॥" इति "अमृते जारजः कुंडो मृते भर्तरि गोलकः" इत्यमरः । पापशमकत्वं तु "धर्मो विवर्द्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन । शत्रुर्विनश्यति धनंजयकीर्त्तनेन माद्रीसुतौ कथयतां न भवन्ति रोगाः" इति शिष्टगीतोक्तेः ॥ २४-२५ ॥

श्रीमद्वीरराघवव्याख्या

धन्विनां धनुष्मतामग्रणीः श्रेष्ठः तत्र द्वयोरप्यर्जुनयोः कीर्त्तवीर्यपार्थयोस्तुल्य इत्यर्थः । हुताशोऽग्निरिव दुर्द्धर्षः प्रसोढुमशक्यः समुद्र इव दुस्तरः अगाधाशयः ॥ २१ ॥ ❀ ❀ सिंह इव विक्रांतः कर्त्तरि क्तः पराक्रमी पादविक्षेपवान्वा हिमवानिव

१. प्रा० पा०—माहात्म्यमेष कृष्ण० ।

निषेव्यः भूतानामुपजीव्यः असौ शिशुर्वसुधेव भूमिरिव तितिक्षुः प्रसहिष्णुः पितराविव मातापितराविव सहिष्णुः परापराधसहिष्णुः ॥ २२ ॥ ❀ ❀ साम्ये सर्वभूतसमत्वे पितामहेन ब्रह्मणा समस्तुल्यः प्रसादे ज्ञानप्रसादे अनुग्रहे वा गिरिशोपमो रुद्रतुल्यः सर्वभूतानां पुरुषार्थलिप्सूनामाश्रय आश्रयितुं योग्यः यथा रमाश्रयः श्रीनिवासो देवस्तद्वत् ॥ २३ ॥ ❀ ❀ सर्वे सद्गुणा निर्दिष्टा गुणास्तत्कृतं माहात्म्यं यस्मिन् कृष्णं भगवंतमनुव्रतः अनुवर्त्तिता कृष्णतुल्यसद्गुणमाहात्म्ययुक्त इत्यर्थः । रंतिदेव इवोदारस्त्यागी ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

द्वयोरर्जुनयोः कीर्तवीर्यपाण्डवयोः तुल्यः, दुर्धर्षः दुःसहः ॥ २१ ॥ ❀ ❀ तितिक्षुः क्षमावान् पितरौ इव सहिष्णुः सहनशीलः ॥ २२ ॥ ❀ ❀ साम्ये सामंजस्ये पितामहस्य विरिञ्चस्य समः प्रसन्नतायां शिवसमः रमाया आश्रयः पतिः ॥ २३ ॥ ❀ ❀ सर्वैः सतां गुणैः माहात्म्यं महात्मत्वं यस्य तथोक्तः अथवा सर्वसद्गुणमाहात्म्यविषये कृष्णं यादवेंद्रमनुगतः तथाभूतः कृष्णमर्जुनं वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथापि साधारणजनचमत्कारार्थं पूर्ववदन्यदपि किंचिद् ब्रूम इत्याहुः रन्तीति । किं वा बहुभिर्यथा स्वज्ञानमुक्तत्वात् पाठक्रमो नात्र विवक्षितः । औदार्यमत्र दातृत्वं तेन कारुण्यं लक्ष्यते ॥ २४–२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अर्जुनयोः पार्थकार्त्तवीर्ययोः ॥ २१ ॥ ❀ ❀ सर्वंसहापि वसुधा परेषां वाक्शरज्वालां नानुभवति अयन्तु तामनुभवन्नपि न प्रतिकरिष्यतीति अत्र दृष्टान्तः पितराविवेति ॥ २२ ॥ ❀ ❀ पितामहो युधिष्ठिरः । साम्ये सर्वत्र द्वेषाभावे । रमाश्रयो नारायणः ॥ २३ ॥ ❀ ❀ एकस्यैवोपमेयस्यास्य सर्व्वैर्गुणैरेकमेवोपमानीकुर्व्वन्नाह–सर्व्वैः सद्गुणैर्यन्माहात्म्यं तस्मिन् एष कृष्णमनुव्रतः श्रीकृष्णतुल्यः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्वयोः पार्थकार्तवीर्ययोः ॥ २१–२२ ॥ ❀ ❀ रमाश्रयः श्रीपतिः ॥ २३ ॥ ❀ ❀ सर्वैः पूर्वोक्तैः सद्गुणैर्यन् माहात्म्यं तस्मिन् कृष्णं भगवन्तमनुव्रतोऽनुवर्तिता ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

धन्विनां धनुर्धराणामर्जुनः पितामहः । कीर्त्तवीर्योऽर्जुनश्च चकारादधिकश्च । कालनिग्रहात् हुताशोऽग्निः धर्षणमतिक्रमम् आज्ञोल्लङ्घनमिति यावत् , दुस्तरः युद्धे सेनायाः स्वस्य पराजयाभावः, तरणं तद्धानिरित्यर्थः, विक्रान्तः पराक्रमवान् देहापेक्षया अधिककौशलवान् ॥ २१ ॥ ❀ ❀ मृगेन्द्रः सिंहः निषेव्यो देवादीनामप्याश्रयः । यथा हिमवान् महादेवादेर्निर्दोषस्थानम् । अत एव ऋषिवासस्तत्रैव गुणेष्वेव दृष्टान्ताः सर्वत्र तितिक्षुः अतिक्रमणसहनवान् वसुधा सर्वंसहा तद्वद्दोषसहनशीलः स्वस्मिन्नपराधसहनं पृथ्वीवत् तस्यैवान्यत्र सहनं पितृवत् ॥ २२ ॥ ❀ ❀ पितामहो ब्रह्मा साम्यं देवदैत्यनरेषु तुल्यता प्रसादे अविचारितदाने गिरिशो महादेवः आश्रयः आधारः अवलम्बनमिति यावत् , सर्वथा यथा लक्ष्म्या भगवान् । निदर्शनं स्पष्टार्थं तत्साम्यमित्यर्थः। धर्मादीनामपि रक्षकत्वात् । सर्व्वे यावन्तः सद्गुणाः सत्यशौचादयः तेषां माहात्म्यं परमोत्कर्षः तदर्थं कृष्णं भगवंतमनुव्रतः यस्य उपासनया कृपा तत्तुल्य इत्यर्थः । रन्तिदेवः नवमस्कन्धे वक्ष्यते, यस्तु पुल्कसाय जलं दत्वा संतुष्टः । उदारोऽत्यंतदातृस्वभावः यथा ययातिर्देवयान्यां शुक्रदुहितरि अनुक्तायामपि मनस्तु तद्गतं बुध्वा धर्मोऽयमित्यंगीकृतवान् ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

जयाभाव इति । परेण जेतुमयोग्यत्वम् । मूले सर्व सद्गुणमाहात्म्यपदं सप्तम्यन्तमित्याशयेनाहुः तदर्थमिति । 'चर्मणि द्वीपिनं हन्ती'तिवदत्र तादर्थ्ये सप्तमीत्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एष द्वयोः कार्त्तवीर्यपार्थयोरर्जुनयोस्ताभ्यां तुल्यो धन्विनां धनुष्मतामग्रणीः श्रेष्ठश्च भविष्यति । हुताशोऽग्निस्तद्वद्दुर्धर्षः धर्षितुमभिभवितुमशक्यो भविष्यति । समुद्र इव दुस्तरोऽनुल्लङ्घितशासनो भविष्यति ॥ २१ ॥ ❀ ❀ असौ शिशुः मृगेन्द्रः सिंह इव विक्रान्तः पराक्रमी भविष्यति । हिमवानिव निषेव्यो देवादीनामप्युपजीव्यो भविष्यति । वसुधा भूमिरिव तितिक्षुः अपराधसहिष्णुर्भविष्यति । सर्वंसहाऽपि वसुधा परेषां वाक्शरज्वालां नानुभवति, अयं तु तामप्यनुभवन् न प्रतिकरिष्यतीत्यभि-

प्रेत्य दृष्टान्तान्तरमाह–सहिष्णुः पितराविवेति ॥ २२ ॥ ❀ ❀ साम्ये सर्वभूतसमत्वे पितामहेन ब्रह्मणा समस्तुल्यो भविष्यति । प्रसादेऽनुग्रहे गिरिशोपमः महादेवतुल्यो भविष्यति । रमाश्रयः श्रीनिवासो देवो भगवान् विष्णुः पालकत्वाद्यथा सर्वभूतानामाश्रयः आश्रयितुं योग्यस्तथाऽयमपि सर्वभूतानामाश्रयो भविष्यति ॥ २३ ॥ सर्वैः सद्गुणैर्यन्माहात्म्यं तस्मिन् एष कृष्णमनुव्रतः कृष्णतुल्यो भविष्यति । रन्तिदेवो यस्तु पुल्कसाय जलं दत्त्वा सन्तुष्टो जातस्तद्विदोदारो योग्यायोग्यविचारमन्तरेण परोपजीवनत्यागो भविष्यति । ययातिरिव धार्मिको भविष्यति ॥ २४ ॥

हिन्दी अनुवाद

धनुर्धरोंमें यह सहस्रबाहु अर्जुन और अपने दादा पार्थके समान अग्रगण्य होगा । यह अग्निके समान दुर्धर्ष और समुद्रके समान दुस्तर होगा ॥ २१ ॥ ❀ ❀ यह सिंहके समान पराक्रमी हिमाचलकी तरह आश्रय लेनेयोग्य, पृथ्वीके सदृश तितिक्षु और माता-पिताके समान सहनशील होगा ॥ २२ ॥ ❀ ❀ इसमें पितामह ब्रह्माके समान समता रहेगी, भगवान् शंकरकी तरह यह कृपालु होगा और सम्पूर्ण प्राणियोंको आश्रय देनेमें यह लक्ष्मीपति भगवान् विष्णुके समान होगा ॥ २३ ॥ ❀ ❀ यह समस्त सद्गुणोंकी महिमा धारण करनेमें श्रीकृष्णका अनुयायी होगा, रन्तिदेवके समान उदार होगा और ययातिके समान धार्मिक होगा ॥ २४ ॥

धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः । आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥ २५ ॥
राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् । निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥ २६ ॥
तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् । प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥ २७ ॥
जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ । हित्वेदं नृप गङ्गायां यास्यत्यद्धाकुतोभयम् ॥ २८ ॥
इति राज्ञ उपादिश्य विप्रा जातककोविदाः । लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥ २९ ॥
स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः । गर्भे दृष्टमनुध्यायन् परीक्षेत नरेष्विह ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धृत्या धैर्येण । सद्ग्रहः सन्भद्रो ग्रहोऽभिनिवेशो यस्य सः । आहर्ता कर्ता ॥ २५ ॥ ❀ ❀ राजर्षीणां जनमेजयादीनाम् ॥ २६ ॥ ❀ ❀ द्विजपुत्रेण प्रेरितात्तक्षकादात्मनो मृत्युमुपश्रुत्य विरक्तः सन्हरेः पदं प्रपत्स्यते भजिष्यति ॥ २७ ॥ ❀ ❀ ततश्च जिज्ञासितमात्मनो याथात्म्यं येन सः । इदं शरीरं गंगायां हित्वाऽकुतोभयं पदं यास्यति । अद्धा निश्चयेन ॥ २८ ॥ ❀ ❀ लब्धापचितिः पूजा यैस्ते ॥ २९ ॥ ❀ ❀ परीक्षिदिति नाम निर्वक्ति । स एष इति । यद्यस्मात्प्रभुः समर्थः सन्गर्भे दृष्टं पुरुषमनुध्यायन्निह दृश्यमानेषु नरेषु मध्ये सर्वमपि नरं परीक्षेतायमसौ भवेन्नो वेति विचारयेदतः परीक्षिदिति विख्यातः । पूर्वदृष्टमिति वा पाठः । तदा मातृगर्भे पूर्वं दृष्टमित्यर्थः ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

उत्पथगामिनामशास्त्रविहितमार्गवर्तिनाम् । भुवः पृथिव्याः धर्मस्य च कारणाद्धेतोः ॥ २६ ॥ ❀ ❀ द्विजपुत्रेण शमीकात्मजेन शृंगिनाम्ना हरेः पदं चरणारविंदं ज्ञानेन वैयासकिशब्दितेन "भेजे खगेंद्रध्वजपादमूलम्" इत्युक्तेः ॥ २७ ॥ ❀ ❀ प्रकृतत्वादत्रात्मा हरिस्तस्य याथात्म्यम् अकुतोभयमपि तत्पदारविंदमेव । तद्वक्ष्यति श्रीदेवकी देवी "मर्त्यो मृत्युव्यालभीतः पलायँल्लोकान्सर्वान्निर्भयं नाध्यगच्छत् । त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥" इति श्रीदशमे ॥ २८ ॥ ❀ ❀ इतीत्थं जातको होराशास्त्रं तत्र कोविदाः । "भवेदपचितिः पूजा व्ययनिष्कृतिहानिषु" इति मेदिनी ॥ २९ ॥ ❀ ❀ पुरुषेषु परीक्षणं हि श्रीकृष्णदर्शनात्प्रागेवातिबाल्यावस्थायामेव ज्ञेयम् ॥ ३० ॥

श्रीमद्वीरराघवव्याख्या

धृत्या धैर्येण बलिसमः वैरोचनितुल्यः प्रह्लाद इव कृष्णे भगवति भक्त इति शेषः, सद्ग्रहः सतां ग्राहकश्चैष शिशुरश्वमेधानामाहर्त्ताऽनुष्ठाता वृद्धानां ज्ञानेन च वृद्धानां पर्युपासकः यथोचितसेवकः ॥ २५ ॥ ❀ ❀ राजर्षीणां जनमेजयादीनां जनयिता उत्पथगामिनां धर्ममार्गातिवर्तिनां शास्ता भुवः पृथ्व्या हेतोर्द्धर्मस्य च कारणान्निमित्ताद्धर्मार्थं चेत्यर्थः एष कलेर्निग्र-

---

१. प्रा० पा०–निर्भरः । २. प्रा० पा०—पूर्वदृष्ट० ।

हीता निग्रहीष्यति ॥ २६ ॥ ❀ ❀ द्विजपुत्रेणोपसर्पिताच्छापद्वारा नियोजितात्तक्षकादात्मनः स्वस्य मृत्युं मरणमुपश्रुत्याकर्ण्य मुक्तो देहतदनुबंधिषु संगो येन तथाभूतो हरेः पदं स्थानं प्रपत्स्यते प्राप्स्यति ॥ २७ ॥ ❀ ❀ एतदेवोपपादयति व्याससुतान्मुनेः शुकाज्जिज्ञासितं विचारितं निर्णीतमिति यावत् आत्मयाथात्म्यं प्रत्यगात्मपरमात्मस्वभावतत्त्वं देहतदनुबध्यसंगहेतुभूतं येन सोऽसौ परीक्षित् हे नृप ! इदं शरीरं गंगायां त्यक्त्वा नास्ति कुतश्चिदयं यस्मात्तद्धरेः पदं धाम स्फुटं यास्यति ॥ २८ ॥ इत्थं राज्ञे युधिष्ठिराय तद्गुणकर्मादिकमुपादिश्यावेद्य जातकमधिकृत्य प्रवृत्ते ज्योतिःशास्त्रे कोविदा अतिनिपुणा विप्राः सर्वे लब्धाऽपचितिर्बहुमतियैस्तथाभूताः स्वकान् गृहान्प्रतिजग्मुः ॥ २९ ॥ ❀ ❀ स जातककोविदैरनुवर्णितैर्भाविगुण एष उत्तरासुतः परीक्षिदिति लोके विख्यातः, कुतः यद्यस्मात्प्रभुरयमुत्तरासुतो गर्भे मातुरुदरे दृष्टं पुरुषं ध्यायन्निह लोके नरेषु तं पुरुषं परीक्षितवानिति यावत्, परीक्ष्य श्रीकृष्णमध्यवस्यदित्यर्थः । ततः प्रवृत्तिनिमित्तात्परीक्षिच्छब्दवाच्यो विख्यात इत्यर्थः । पूर्वं पर्यैक्षत क इत्यसाविति गर्भावस्थायामपि परीक्षणमपि तच्छब्दप्रवृत्तिनिमित्तमिति सूचितं, परिपूर्वादीक्षतेः शतरि परीक्षिदिति रूपं, परीक्षिदिति च प्रायिकः पाठो दृश्यते । 'हृसृरुहियुषिभ्यः' इत्यौणादिकसूत्रे ईक्षतेर्ग्रहणाभावेऽपि बाहुलकादिति प्रत्यये हरित्सरिदादिशब्दवत्साध्यः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

धृत्यां धैर्ये गृह्णातीति ग्रहो भक्तिः सती भक्तिर्यस्य स तथोक्तः "अंबुवदग्रहणात्तु न तथात्वम् ॥ ३ । २ । १८ ॥" इति सूत्रात् ॥ २५ ॥ ❀ ❀ राजर्षीणां कुमाराणां जनयिता उत्पादकः उत्पथगामिनाम् अशास्त्रविहितमार्गवर्तिनां शास्ता धर्मस्य भगवतः दुःखापादनकारणात् कालेर्निगृहीता निगृह्य शिक्षाकर्ता ॥ २६ ॥ ❀ ❀ द्विजपुत्रोपसर्जितात् द्विजकुमारप्रेरितात्तक्षकात् मुक्तसंगः पुत्रादिसंगरहितः ॥ २७ ॥ ❀ ❀ व्याससुताच्छ्रीशुकात् मुनेर्जिज्ञासितं विचारितम् आत्मनः परमात्मनः यथास्वरूपसंबंधिगुणाधिक्यं येन स तथोक्तः इदं शरीरम् अद्धा समीचीनम् अकुतोभयस्वरूपानंदाविर्भावलक्षणं मोक्षं यास्यतीत्यन्वयः ॥ २८ ॥ ❀ ❀ लब्धा प्राप्ताऽपचितिः पूजा यैस्ते तथोक्ताः ॥ २९ ॥ ❀ ❀ यः प्रभुः सर्पदृष्टिं तक्षकाख्यसर्पदर्शनम् अनुध्यायन् निरंतरं चिंतयन् इह नरेषु समीप आगच्छत्सु परीक्षेतेति यस्मात्तस्मात्स एष लोके परीक्षिदिति विख्यात इति परीक्षिन्नामनिरुक्तिरित्यन्वयः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हरेः श्रीकृष्णस्य पदं चरणारविन्दम्-'ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्' इत्युक्तेः । तदेव खल्वकुतोभयम्-'मर्त्यो मृत्युव्यालभीतः पलायन् सर्वांल्लोकान्निर्भयं नाध्यगच्छन् । त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैती'त्यादेः ॥ २७ ॥ ❀ ❀ ततो जिज्ञासित इत्यत्र आत्मा हरिरेव ॥ २८-२९ ॥ ❀ ❀ स एष इति । श्रीकृष्णदर्शनात् पूर्वमतिबाल्यावस्थायामेव ज्ञेयम् ॥ ३०-३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सद्ग्रहः सन् उत्कृष्ट एव ग्रहो यस्य सः । गुणानुक्त्वा कर्म्माण्याह आहर्त्तेति ॥ २५-२६ ॥ ❀ ❀ उपसर्जितात् प्रेरितात् ॥ २७ ॥ ❀ ❀ जिज्ञासितं विचारितम् आत्मनो याथार्थ्यं वास्तवं तत्त्वं येन सः । इदं शरीरम् ॥ २८ ॥ ❀ ❀ लब्धा अपचितिः पूजा यैः ॥ २९ ॥ ❀ ❀ परीक्षिदिति नाम निर्व्वक्ति स एष इति । इह दृश्यमानेषु नरेषु मध्ये गर्भे दृष्टं पुरुषम् अनुस्मरन् अयं स भवेन्न वेति विचारयेत् अतः परीक्षिदिति विख्यातः । पूर्व्वं दृष्टमिति च पाठः ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

सन्समीचीनः ग्रहोऽभिनिवेशो यस्य सः ॥ २५-२६ ॥ ❀ ❀ द्विजपुत्रेण शापद्वारा प्रेरितात्तक्षकान्मृत्युं शुकोपदेशद्वारा हरेः पदं प्रपत्स्यते प्राप्स्यति ॥ २७ ॥ ❀ ❀ एतदेवाहुः जिज्ञासितात्मयाथात्म्य इति । जिज्ञासितमात्मनः सर्वात्मनः कृष्णस्य याथात्म्यं येन सः ॥ २८ ॥ ❀ ❀ इत्येवमुपादिश्य निर्दिश्य निवेद्य लब्धोपचितयः लब्धा उपचितिः पूजा दक्षिणा यैस्ते ॥ २९ ॥ ❀ ❀ यद्यतो गर्भे दृष्टं भगवंतमनुध्यायन्नरेषु परीक्षेत अतः स एष प्रभुः प्रजापालः लोके परीक्षिदिति विख्यातः ॥ ३० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

धैर्ये बलिसमः स चाष्टमे वक्ष्यते । सद्ग्रहो भक्तिः समीचीनाग्रहो वा । यज्विनामित्यत्र यागांतरैरपि तथात्वसंभवात् अश्वमेधाहरणं पृथगुक्तं स्वस्य सर्वापेक्षयाप्यधिकगुणवत्त्वेऽपि न गर्व इत्याह वृद्धानामिति पुत्रद्वाराप्युत्कर्षः ॥ २५ ॥ ❀ ❀ राजर्षीणां जनमेजयादीनां जनयिता पुत्रमपि दंडयति तदनन्तरं शासनमुक्तम् असकृन्मर्यादोल्लंघने दंडः शासनं शिक्षापूर्वकं

दंडः निगृहीता निग्रहं करिष्यति भुवो धर्मस्य च कारणात् चरित्रे स्पष्टं भविष्यति ॥ २६ ॥ ❀ ❀ वैराग्यमंते निकटे फलपर्यवसायि भविष्यतीत्याह तक्षकादिति । आत्मनो देहस्य मृत्युं नाशं द्विजपुत्रः शृङ्गी, उपसर्जितात् प्रेषितात् उपश्रुत्य मुक्तसंगः कृतन्यासः हरेः पदं गंगातीरसत्सभां तत्र हि भगवत्पदमभिव्यक्तम् ॥ २७ ॥ ❀ ❀ व्याससुतान्मुनेः शुकात् जिज्ञासितः सम्यग्विचारपूर्वकं ज्ञात आत्मनो भगवतः स्वस्य च याथात्म्यम् इदमित्थतया निर्णयः असावित्यंते प्रतिनिर्देशः प्रत्यापत्त्यर्थः, एतावत्कालं मध्ये कार्यार्थं भगवता रक्षितः पुनरंते ब्रह्मास्त्रेणैव ब्राह्मणप्रेषिततक्षकरूपेण उपसंहृत इति इदं शरीरं नृपेति सम्बोधनं राज्ञां युद्धनिष्ठानाममोहत्वज्ञापनाय अद्धा निश्चयेन अकुतोभयं भगवच्चरणारविंदमुपादेशनम् ॥ २८ ॥ ❀ ❀ एकांते राजमंत्रज्ञाने हेतुः जातककोविदा इति जातकं ज्योतिःशास्त्रैकदेशः प्रकृतोपयोगित्वादेतदुक्तं वस्तुतः सर्वांशेन लब्धा उपचितिः प्रत्युपकारः धनादिर्यैस्ते सर्वे पूर्वोक्ता एते च पूर्णमनोरथत्वात् स्वगृहानेव गताः नान्यत्र, भगवत्परितुष्टे पुरुषे कालादिना भगवत्सेवकेन एतावत् क्रियत इत्युक्तम् ॥ २९ ॥ ❀ ❀ क्रमात्तदुक्तस्य संवादमाह स एष इति । यो भगवता रक्षितः स इदानीमग्रिमकथार्थमनूद्यते एष इति परीक्षिदिति विख्यातः । ननु विष्णुरात इति विख्यातो भविष्यतीति सर्वज्ञानां वचनं तत् कथं परीक्षिदिति लोके विख्यात इति तत्राह यत्प्रभुरिति । यस्मात् कारणादयं प्रभुः भगवता स्वसामर्थ्यदानात् भगवद्रूपो जात इति पूर्वं भगवत्करणापेक्षयापि इदानींतनभगवत्कृत्यं संनिहितत्वादादरणीयं पूर्वस्य च फलमिति विष्णुरातनाम्ना मतस्य क्रियोद्बोधकं परीक्षितमात्मानं श्रुत्वा परितो भगवंतमीक्षते परित ईक्षामितः परीक्षितः । अथवा इत इति इवार्थे अव्ययं सरइन्मुखमित्यत्र प्रसिद्धं परित ईक्षदर्शनम् अविभक्तिकधातुनिर्देशः परितो दर्शनमिति तकारांतः, तेन एतत्संगे अन्यस्यापि परितो दर्शनं भवतीति ज्ञापितं नरेष्विति आविस्तरां प्रपञ्चयंतीति वाक्यात् भगवद्दर्शनाधिकारः सूचितः । अथवा परीक्षिदिति विख्यातः, तत्र हेतुः यस्मात् प्रभुर्भगवान् एवं ज्ञातवान् अयं बालकः अग्रे नरेषु पूर्वदृष्टं रूपमनुध्यायन् परीक्षेत परीक्षां कुर्यादिति "अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादि"ति जीवोऽप्यंगुष्ठमात्रो भवति परमितरसामग्रीरहितः । अनेन वैलक्षण्येन जीवस्वरूपात् भिन्नं भगवत्स्वरूपं जानात्वित्येतदर्थं नामेत्यर्थः । इह संसारे अत्रागतस्य बुद्धिभ्रंशः प्रायेण भवतीति ॥ ३० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

जिज्ञासितात्मयाथात्म्य इत्यत्र । प्रत्यापत्त्यर्थ इति ब्रह्मास्त्रस्य पुनः प्राप्त्यर्थः । तदेव विवृण्वन्ति एतावदित्यादि ॥ २८ ॥ ❀ ❀ इति राज्ञ इत्यत्र । इत्युक्तमिति । अनेन सन्दर्भेणायमर्थ उक्त इत्यर्थः ॥ २८ ॥ ❀ ❀ स एषेत्यत्र । पूर्वस्य च फलमिति रक्षणस्य फलमित्यर्थः । परित ईक्षामित इति । अत्र पृषोदरादित्वेनाकारनाशः । तृजन्तस्यार्थकथनं वेति ज्ञेयम् इतरसामग्रीरहित इति । 'शब्दादेव प्रमित' इत्येतत्सूत्रविषयवाक्योक्तधर्मरहित इत्यर्थः ॥ ३० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

धृत्या धैर्येण बलिसमो भविष्यति । प्रह्लाद इव कृष्णे सन् ग्रहः अभिनिवेशो यस्य तथाभूतो भविष्यति । एषोऽश्वमेधानामाहर्त्तानुष्ठाता भविष्यति । वृद्धानां ज्ञानवृद्धानां पर्युपासकः सेवको भविष्यति । पुत्रादिद्वाराऽपि अस्योत्कर्षमाहुः-राजर्षीणां जनमेजयादीनां जनयिता भविष्यति उत्पथगामिनां वर्णाश्रमादिधर्ममार्गत्यागेन पाखण्डमार्गानुवर्तिनां शास्ता दण्डकर्त्ता भविष्यति । भुवः पृथिव्याः धर्मस्य कारणान्निमित्तादेष कलेर्निग्रहीता भविष्यति ॥२६॥ ❀ ❀ द्विजपुत्रेणोपसर्जितात् शापद्वारा नियोजितात् तक्षकादात्मनः स्वस्य मृत्युं मरणं उपश्रुत्याकर्ण्य मुक्तो देहतदनुबन्धिषु सङ्गो येन तथाभूतो हरेः पदं चरणारविन्दं प्रपत्स्यते, गङ्गातीरे स्थितः सन्भजिष्यतीत्यर्थः ॥ २७ ॥ ❀ ❀ तव भक्तिप्रभावेण भगवत्कृपयेदृशः पौत्रो जात इति सूचयन्तः सम्बोधयन्ति-हे नृपेति । ततश्च श्रीशुकात् जिज्ञासितं विचारितं निर्णीतं आत्मयाथात्म्यं प्रत्यगात्मपरमात्मस्वरूपस्वभावतत्त्वं येन स तथाभूतः सन्नसौ शिशुः इदं व्याससुतात् शरीरं गङ्गायां हित्वा त्यक्त्वा अद्धा साक्षात् दिव्यस्वरूपेण अकुतोभयं नास्ति कालादिभ्योऽपि भयं यत्र तं भगवन्तं प्रतियास्यतीत्यन्वयः । कथं शुकोपदिष्टस्य ज्ञानस्यायं प्रभाव इत्यपेक्षायामाह-मुनेरिति ॥२८॥ ❀ ❀ लब्धा अपचितिः पूजा यैस्ते जातके जातकमधिकृत्य प्रवृत्ते ज्योतिश्शास्त्रे कोविदा निपुणा विप्रा इत्येवं राज्ञे युधिष्ठिराय उपदिश्य परीक्षिद्गुणकर्मादिकमाश्राव्य स्वकीयान् गृहान् प्रतिजग्मुरित्यन्वयः ॥ २९ ॥ ❀ ❀ पूर्वं 'पर्यैक्षत इत्यसौ' इति गर्भावस्थायां परीक्षिच्छब्दप्रवृत्तिनिमित्तमिति सूचितम्, इदानीं बहिरपि परीक्षणात् परीक्षिच्छब्दवाच्योऽसावित्याह-स इति । स भगवता रक्षित एष प्रभू राजा यत् यस्मात् पूर्वदृष्टं गर्भेऽनुभूतं पुरुषमनुध्यायन्निह लोके नरेषु सोऽयं भवेन्नो वेति परीक्षितवान् तस्मात् लोके परीक्षिदिति विख्यातो जात इत्यन्वयः । 'गर्भदृष्टम्' इति पाठान्तरम् । विष्णुरात इति तु व्युत्पत्त्यन्तरान्नामान्तरमिति ज्ञेयम् ॥ ३० ॥

हिन्दी अनुवाद

धैर्यमें बलिके समान और भगवान् श्रीकृष्णके प्रति दृढ़ निष्ठामें यह प्रह्लादके समान होगा। यह बहुत-से अश्वमेध यज्ञोंको करनेवाला और वृद्धोंका सेवक होगा ॥ २५ ॥ ❀ ❀ इसके पुत्र राजर्षि होंगे। मर्यादाका उल्लङ्घन करनेवालोंको

यह दण्ड देगा। यह पृथ्वीमाता और धर्मकी रक्षाके लिये कलियुगका भी दमन करेगा ॥ २६ ॥ ❀ ❀ ब्राह्मणकुमारके शापसे तक्षकके द्वारा अपनी मृत्यु सुनकर यह सबकी आसक्ति छोड़ देगा और भगवान्‌के चरणोंकी शरण लेगा ॥ २७ ॥ ❀ ❀ व्यासनन्दन शुकदेवजीसे यह आत्माके यथार्थ स्वरूपका ज्ञान प्राप्त करेगा और अन्तमें गङ्गातटपर अपने शरीरको त्याग कर निश्चय ही अभयपद प्राप्त करेगा ॥ २८ ॥ ❀ ❀ ज्योतिषशास्त्रके विशेषज्ञ ब्राह्मण राजा युधिष्ठिरको इस प्रकार बालकके जन्मलग्नका फल बतलाकर और भेंट-पूजा लेकर अपने-अपने घर चले गये ॥ २९ ॥ ❀ ❀ वही यह बालक संसारमें परीक्षित्‌के नामसे प्रसिद्ध हुआ; क्योंकि वह समर्थ बालक गर्भमें जिस पुरुषका दर्शन पा चुका था, उसका स्मरण करता हुआ लोगोंमें उसकी परीक्षा करता रहता था कि देखें इनमेंसे कौन-सा वह है ॥ ३० ॥

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः । आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥ ३१ ॥
यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया । राजा लब्धधनो द[१]ध्यावन्यत्र करदण्डयोः ॥ ३२ ॥
तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः । धनं प्रहीणमाजह्रुरुदीच्यां दि[३]शि भूरिशः ॥ ३३ ॥
तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः । वाजिमेधैस्त्रिभि[४]र्भीतो यज्ञैः समयजद्धरिम् ॥ ३४ ॥
आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् । उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ॥ ३५ ॥
ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः । ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः[५] ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने परीक्षिज्जन्माद्युत्कर्षो नाम द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शुक्ले शुक्लपक्षे स प्रसिद्ध उडुपोऽन्वहं यथा काष्ठाभिः पंचदशकलाभिरापूर्यमाणो वर्धते एवं पितृभिर्युधिष्ठिरादिभिः कामैश्चतुःषष्टिकलाभिश्चापूर्यमाणो ववृधे ॥ ३१ ॥ ❀ ❀ पूर्वमपकृष्योक्तानश्वमेधान्स्वावसरे सप्रकारं कथयति । ज्ञातिद्रोहस्य हानेच्छया यक्ष्यमाणः करदंडयोरन्यत्र ताभ्यां विना लब्धधनो दध्यौ चिंतयामास । करदंडजस्य परिजनभरणमात्रोपक्षीणत्वात् ॥ ३२ ॥ ❀ ❀ प्रहीणं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः ॥ ३३ ॥ ❀ ❀ संभृतसंभारः संपादितयज्ञोपकरणः । भीतो ज्ञातिद्रोहात् ॥ ३४-३६ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे भावार्थदीपिकायां टीकायां द्वादशोऽध्यायः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र द्वाविवशब्दौ क्रमेण यथातथार्थे वर्तेते । "यथातथैववावैवं शब्दा एकार्थवाचकाः" इति कोशात् । अत एव स्वामिचरणैरेवं पितृभिरिति व्याख्यातम् ॥ ३१ ॥ ❀ ❀ करः षष्ठांशग्रहणं दंडो दुष्टनिग्रहजनितो धनलाभः । ज्ञातीनां भीष्मादीनाम् । द्रोहो हिंसनं तस्य जिहासया ॥ ३२ ॥ ❀ ❀ तस्य राज्ञोभिप्रेतं कुतश्चिद्धनप्राप्तिः कथं भवेदित्यभिप्रायं विचार्य अच्युतेन श्रीकृष्णेन व्यासदेवेन च प्रेरिताः ॥ ३३ ॥ ❀ ❀ तेन मरुत्तयज्ञविप्रत्यक्तस्वर्णपात्रादिरूपधनेन । "संभारः संभृतौ संघे" इति मेदिनी । "सामग्री संभृतिः समे" इति कोशांतरात् । त्रिभिस्त्रिगुणदक्षिणात एकस्य वाश्वमेधस्य त्रित्वं जातमिति महाभारतीयाश्वमेधपर्वणि विवृतम् ॥ ३४ ॥ ❀ ❀ अत्राहूत इत्यादिपद्यद्वयमपि केनचित्प्रक्षिप्तमस्ति । तच्च न स्वामिचरणसंमतम् ॥ ३५-३६ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

---

१. प्रा० पा०—राजा लब्ध० । २. प्रा० पा०—दध्यौ नान्यत्र । ३. प्रा० पा०—भूरिशो दिशि । ४. प्रा० पा०—त्रिभी राजा यज्ञैः । ५. प्राचीने पाठे 'यदुभिर्वृतः ॥ ३६ ॥' तः पश्चाद् 'यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवेशतः' इत्यधिकः पाठः, केचित् टीकाकाराः ३५-३६ श्लोकौ प्रक्षिप्ताविति मन्यन्ते । प्राचीने पाठे "**बाल एव स धर्मात्मा कृष्णभक्तो निसर्गतः । प्रीतिदः सर्वलोकस्य महाभागवतः सुधीः" ॥ ३२ ॥** इति श्लोकस्याधिक्याद्दीपन्यादिटीकासु श्लोकसंख्या सप्तत्रिंशदिति ज्ञेयम् ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

कामैः विषयभोगैरित्यर्थः। चतुःषष्टिकलाभिः नृत्यगीतादिचतुःषष्टिविद्याभिरित्यर्थः॥ ३१-३२॥ ॐ ॐ अपकृत्य संक्षिप्योक्तानित्यर्थः॥ ३३-३७॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-दीपन्याख्यदीपिकाटिप्पण्यां द्वादशोऽध्यायः॥ १२॥

श्रीमद्वीरराघवव्याख्या

परीक्षिदिति प्रसिद्धो राजपुत्रः एकस्तच्छब्दः प्रसिद्धिद्योतकः, अपरस्तु प्रकृतपरामर्शक इत्यतो न पौनरुक्त्यं पितृभिर्वर्द्धयितृभिर्हेतुभूतैरन्वहं हिमांशुरिव ववृधे यथा शुक्ले पक्षे आपूर्यमाणाभिर्वृद्धिं गताभिः काष्ठाभिरुडुपश्चंद्रो वर्द्धते तद्वदित्यर्थः॥ ३१-३२॥ ॐ ॐ अथ किमकार्षीत् इति प्रश्नस्योत्तरं सोपोद्घातमाह यक्ष्यमाण इत्यादिना यावत्पंचदशाध्यायसमाप्ति। ज्ञातिद्रोहजिहासया ज्ञातिवधप्रयुक्तदोषपरिजिहीर्षयाऽश्वमेधेन"तरति ब्रह्महत्यां योऽश्वमेधेन यजत"इति ब्रह्महत्यादीनामपि परिहारकतया श्रुतेन "ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोरि"ति निरतिशयपुण्यत्वेन च प्रसिद्धेनाश्वमेधेन यक्ष्यमाणो भगवंतमाराधयितुकामो राजा युधिष्ठिरः अन्यत्र करदण्डयोः करः स्वामिग्राह्यो दण्डः प्रसिद्धः तयोरन्यत्र ताभ्यां विनेत्यर्थः, अलब्धधनः उपायांतरेणाप्राप्तधनः मनो दध्यौ चिंतितवान् करदण्डाभ्यां लब्धं धनं न यागार्हमुपायांतरेण तु न प्राप्तं धनमतः कथं यक्ष्यामीति चिन्ताव्याकुलो बभूवेत्यर्थः॥ ३३॥ ॐ ॐ तस्य युधिष्ठिरस्याभिप्रेतमालक्ष्याच्युतेनाहूतेन श्रीकृष्णेन चोदिता आदिष्टाः आहूतो भगवानिति वक्ष्यमाणत्वात् भ्रातरो भीमादय उदीच्यां दिशि प्रहीणं पराजितै राजभिस्त्यक्तं धनं भूरिश आजह्रुः॥ ३४॥ ॐ ॐ तेन धनेन संभृताः संचिताभाराः योगसाधनानि यस्य सोऽत एव लब्धकामो युधिष्ठिरः त्रिभिर्वाजिमेधैर्भीतो मंत्रतंत्रद्रव्यलोपादिभ्यो भीतः निरिछद्रं यथा तथेति भावः, हरिं सम्यगाराधितवान्॥ ३५॥ ॐ ॐ भगवान् कृष्णोऽपि राज्ञाहूतः द्विजैर्नृपं युधिष्ठिरं याजयित्वा सुहृदां प्रीतिं कर्तुमिच्छया कतिचिन्मासानुवास॥ ३६॥ ॐ ॐ ततो बंधुभिः सह राज्ञा युधिष्ठिरेण कृष्णया द्रौपद्या चानुज्ञातोऽर्जुनेन सहितो यदुभिश्च परिवृतो हे ब्रह्मन्! द्वारवतीं ययौ॥ ३७॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वादशोऽध्यायः॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उडुपश्चंद्रः शुक्लपक्षे काष्ठाभिर्दिग्देवतासरस्वतीगोभिरन्वहं यथा तथा स राजपुत्रोऽपि पितृभिर्युधिष्ठिरादिभिरन्वहम् अन्नपानादिभिः पूर्यमाण एधतेत्यर्थः॥ ३१-३२॥ ॐ ॐ ज्ञातिद्रोहजिहासया भीष्मादिवधनिमित्तपापहननेच्छया अश्वमेधयज्ञे भगवंतं यष्टुकामो राजा करदण्डयोरन्यत्र करं दंडं च वर्जयित्वा न लब्धं धनं येन सोऽलब्धधनः दध्यावित्यन्वयः॥ ३३॥ ॐ ॐ उदीच्या उत्तरस्याः दिशः भूरिशः बहुलं प्रहीणं यज्ञशिष्टं मरुत्तेन पूर्वजेन स्थापितं धनम्॥ ३४॥ ॐ ॐ तेन द्रव्येण संभृतः संपन्नः संभारो यज्ञसाधनं येन स तथोक्तः॥ ३५॥ ॐ ॐ सुहृदः युधिष्ठिरस्य प्रियेच्छया॥ ३६॥ ॐ ॐ बंधुभिः सह कृष्णया द्रौपद्या चाभ्यनुज्ञातः सार्जुनः अर्जुनेन सहितः यदुभिश्च परिवृतः कृष्णो द्वारवतीं ययावित्यन्वयः॥ ३७॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां द्वादशोऽध्यायः॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बाल एवेति पद्यमिदं चित्सुखसम्मतम्॥ ३२॥ ॐ ॐ यक्ष्यमाण इति तत्परितोषार्थं श्रीभीष्मोपदेशेनैवेति ज्ञेयम्। अन्यथा भीष्मेऽप्यनास्था स्यात्॥ ३३-३५॥ ॐ ॐ अत्र-"आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम्। उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया॥ ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः। ययौ द्वारवतीं कृष्णः सार्ज्जुनो यदुभिर्वृतः॥" इति काचित्कं पद्यद्वयं सम्बन्धोक्तिकारेण व्याख्यातमस्ति॥ ३६-३७॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वादशोऽध्यायः॥ १२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शुक्ले शुक्लपक्षे उडुपश्चन्द्र इव ववृधे। आपूर्यमाण इति कलाभिः लालनैश्चेति ज्ञेयम्। काष्ठाभिर्दिग्भिरिव पितृभिर्युधिष्ठिरादिभिरावृत इति शेषः॥ ३१-३२॥ ॐ ॐ करदण्डयोरन्यत्र ताभ्यां विना धनालाभात् धनप्राचुर्य्यस्यापेक्षणीयत्वात् दध्यौ

चिन्तयामास ॥ ३३ ॥ ❀ ❀ प्रहीणं मरुत्तस्य यज्ञे त्यक्तस्वर्णपात्रादिकमानीतवन्तः ॥ ३४ ॥ ❀ ❀ सम्भृतसम्भारः सम्पादितयज्ञोपकरणः भीतो ज्ञातिद्रोहात् ॥ ३५-३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्वहं काष्ठाभिः उडुप इव पितृभिर्युधिष्ठिरादिभिरापूर्यमाणो ववृधे ॥ ३१-३२ ॥ ❀ ❀ करदण्डयोरन्यत्र विनाऽलब्धधनो धनार्थं दध्यौ करदण्डाभ्यामायस्य व्ययपर्याप्तत्वात् ॥ ३३ ॥ ❀ ❀ आश्वमेधिके पर्वणि प्रसिद्धेन संवर्तमुनिकृपालब्धेन मरुत्तो नाम राजा यज्ञं कृतवान् उर्वरितं बहुधनं तेनोदीच्यां प्रहीणं त्यक्तं ततो बहुभिर्गजादिभिराजह्रुरानीतवंतः ॥ ३४ ॥ ❀ ❀ ज्ञातिद्रोहाद्भीतः तेन धनेन संभृतः संपादितः यज्ञोपकरणरूपः संभारो येन सः ॥ ३५-३७ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

दग्धशरीरत्वात् तीक्ष्णतामाशंक्याह शुक्ले शुक्लपक्षे च उडुप इति । क्षीवलिष्ठत्वमुक्तं ता एव हि पोषणाभिज्ञाः पितृभिरापूर्यमाणः सर्वाभीष्टपदार्थदानात् काष्ठाभिः कलाभिः प्रत्यहं वैलक्षण्यदर्शनार्थं दृष्टान्तः ॥ ३१-३२ ॥ ❀ ❀ एवं तस्य चरित्रं सर्वमुक्त्वा पूर्वं भगवन्मानसकृतमश्वमेधं पुनःकाले केवलं भगवतैव सम्पादितमिति वक्तुं प्रकारमाह यक्ष्यमाण इति । करदण्डादिकं त्वकर्त्तव्यं द्रोहपरिहारार्थत्वादश्वमेधस्य उचितकरादेस्तु राज्यनिर्वाहकत्वम् । अतः राजा अलब्धधनः कथं धनं प्राप्स्यामीति दध्यौ करदण्डयोरुक्तो विनियोगः राजत्वादेव न प्रतिग्रहः देवताधिष्ठानान्न मेर्वादेः समानयनं पूर्वं राज्यवर्णने य उत्कर्ष उक्तः स प्रजानामर्थे राज्ञस्तु कुतोऽपि याचनमयुक्तमतश्चिंता भगवानपि न याचितः, अन्यथा नूतनमेव दद्यात् ॥ ३३ ॥ ❀ ❀ किंतु तदभिप्रेतमालक्ष्य भ्रातर एव समानीतवंतः तेऽपि चिंताकुलिताः भगवतैव प्रेरिताः । अनेन भक्तानामल्पचिंतामपि भगवान्न सहत इति सूचितं, प्रहीणं बहु अतिनिंदितं वा ब्राह्मणानां तदिति आनयनं भगवत्प्रेरणात् द्रोहस्तेषां पीडा ब्राह्मणादीनां दुःखदूरीकरणार्थं प्रवृत्तोऽश्वमेधः ब्राह्मणानामेव द्रव्यैरुचितः । उदीच्यां दिशि मरुत्तयज्ञे दक्षिणात्वेन प्राप्तं द्रव्यं भारान्नेतुमशक्यम् उत्तरदेशे बहु परित्यक्तमस्ति तदानींतनमित्यर्थः ॥ ३४ ॥ ❀ ❀ तेन सम्भृताः साज्यपशवः पुरोडाशीयादयः सम्भारा येन तस्यायुक्तत्वं निराकरोति धर्मपुत्र इति त्यक्तं भूमौ राजकीयमिति युधिष्ठिरत्वादश्वमेधसिद्धिः । अश्वमेधैरेव यज्ञैः 'यज्ञेन यज्ञमयजंते'ति श्रुत्यर्थख्यापनार्थमेवमुक्तं हरिमिति ब्राह्मणानामपि दुःखदूरीकर्त्तारमतो न पूर्वोक्तविरोधः । आहूत इति श्लोकद्वयं प्रक्षिप्तम् ॥ ३५-३७ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधविवरणे द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यक्ष्यमाण इत्यत्र । देवताधिष्ठानादिति । भावप्रधानो निर्देशः । हेतुनिर्देशो वा । पूर्वमिति दशमाध्यायारम्भे ॥ ३२ ॥ तदभिप्रेतेत्यत्र । तद्द्रोहस्तेषां पीडेति । पूर्वश्लोके व्याख्यातत्वादत्र तदर्थकथनम् ॥ ३३-३७ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे द्वादशाध्यायविवरणम् ॥

श्रीगिरिधरकृता बालप्रबोधिनी

स पूर्वोक्तो राजपुत्रः पितृभिर्युधिष्ठिरादिभिः भोगैरापूर्यमाणः अन्वहं प्रतिदिनमाशु ववृधे इत्यन्वयः । तत्र दृष्टान्तमाह– शुक्ले शुक्लपक्षे काष्ठाभिः कलाभिः आपूर्यमाणः स प्रसिद्ध उडुपश्चन्द्रो यथाऽन्वहं वर्धते तथेत्यन्वयः ॥ ३१ ॥ ❀ ❀ एवं परीक्षिज्जन्म निरूप्य किमकार्षीत्तत इति युधिष्ठिरचरितप्रश्नोत्तरेऽवशिष्टं यत्तच्चरितं वर्णयति–यक्ष्यमाण इत्यादिना यावत्पञ्चदशाध्यायसमाप्ति । ज्ञातिद्रोहस्य ज्ञातिवधप्रयुक्तपापस्य जिहासया जिहीर्षया "अश्वमेधेन तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति ब्रह्महत्यादीनामपि निवर्त्तकत्वेन 'ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः' इति निरतिशयपुण्यत्वेन च शास्त्रप्रसिद्धेन यक्ष्यमाणो भगवन्तं आराधयितुकामो राजा युधिष्ठिरः अन्यत्र करदण्डयोः उचितकरदण्डाभ्यां प्राप्तस्वधनस्य परिजनपोषण उपक्षीणत्वात् प्रकारान्तरेण करदण्डलोपत्तेन धनग्रहणस्यानुचितत्वात् ताभ्यां विना न लब्धं धनं येन स धनं विना कथं यज्ञानुष्ठानं स्यादिति दध्यौ चिन्तयामासेत्यन्वयः ॥ ३२ ॥ ❀ ❀ तस्य युधिष्ठिरस्य अभिप्रेतं यज्ञानुष्ठानसङ्कल्पं आलक्ष्य ज्ञात्वा अच्युतेन ऐश्वर्यादिपरिपूर्णेनापि पूर्वमेवम्भूता अपि श्रीमन्तो यज्ञादिकर्तारो जाता इति परिज्ञानेन अहमेवंविधाश्वमेधयाजीत्येव यस्याभिमानो मा भूदित्यभिप्रायवता श्रीकृष्णेन चोदिता भ्रातरो भीमादय उदीच्यां दिशि भूरिशः प्रहीणं मरुत्तस्य राज्ञो यज्ञे दक्षिणादिभिः परिपूर्णैर्विप्रैर्भोजनं कृत्वा परित्यक्तं धनं सुवर्णपात्रादिकं आजह्रुरानीतवन्त इत्यन्वयः ॥ ३३ ॥ ❀ ❀ तेना-

नीतेन धनेन सम्भृताः सम्पादिताः सम्भारा यागसाधनानि येन स युधिष्ठिरो वाजिमेधैस्त्रिभिर्यज्ञैर्हरिं सम्यक् मन्त्रतन्त्रद्रव्यलोपादिराहित्येन भक्तिपूर्वकमयजत् पूजितवानित्यन्वयः । तत्र हेतुमाह–भीत इति, यतो ज्ञात्यादिवधनिमित्तात् पापाद्भीत इत्यर्थः । ननु प्रजाभ्यो धनं कुतो न गृहीतवान् परयज्ञोच्छिष्टेन धनेन किमिति यज्ञानुष्ठानं कृतवानित्याशङ्कानिरासायाह–धर्मपुत्र इति । बलात् प्रजाभ्यो धनग्रहणे दोषात् निस्स्वामिकं भूमौ प्रक्षिप्तं तु धनं राज्ञ एव अतः तद्ग्रहणे दोषाभावाच्च धर्मपुत्रत्वेन धर्मज्ञत्वाद्वेतद्विचार्य तथा कृतवानिति भावः । 'लब्धकामः' इति तु पाठान्तरम् ॥ ३४ ॥ ❀ ❀ भगवान् श्रीकृष्णोऽपि राज्ञा आहूतो द्विजैर्नृपं युधिष्ठिरं याजयित्वा सुहृदां प्रेमवतां युधिष्ठिरादीनां प्रियकाम्यया प्रीतिं कर्तुमिच्छया कतिचिन्मासान् तत्रोवासेत्यन्वयः ॥ ३५ ॥ ❀ ❀ ततश्च हे ब्रह्मन् बन्धुभिः सह राज्ञा युधिष्ठिरेण कृष्णया द्रौपद्या वाऽनुज्ञातः अर्जुनेन सहितो यदुभिश्च परिवृतो द्वारवतीं ययावित्यन्वयः । 'याजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः' इति प्रसङ्गात्पूर्वोक्ता एव यज्ञा अत्र स्ववसरे पुनरुक्ता इति ज्ञेयम् । आहूत इत्यादिश्लोकद्वयं प्रक्षिप्तमित्याहुराचार्याः ॥ ३६ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ द्वादशो विवृतो राज्ञो जन्मादिविनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

जैसे शुक्लपक्षमें दिन-प्रतिदिन चन्द्रमा अपनी कलाओंसे पूर्ण होता हुआ बढ़ता है, वैसे ही वह राजकुमार भी अपने गुरुजनोंके लालन-पालनसे क्रमशः अनुदिन बढ़ता हुआ शीघ्र ही सयाना हो गया ॥ ३१ ॥ ❀ ❀ इसी समय स्वजनोंके बधका प्रायश्चित्त करनेके लिये राजा युधिष्ठिरने अश्वमेध-यज्ञके द्वारा भगवान्‌की आराधना करनेका विचार किया, परन्तु प्रजासे वसूल किये हुए कर और दण्ड (जुर्माने) की रकमके अतिरिक्त और धन न होनेके कारण वे बड़ी चिन्तामें पड़ गये ॥ ३२ ॥ ❀ ❀ उनका अभिप्राय समझकर भगवान् श्रीकृष्णकी प्रेरणासे उनके भाई उत्तरदिशामें राजा मरुत्त और ब्राह्मणोंद्वारा छोड़ा हुआ[1] बहुत-सा धन ले आये ॥ ३३ ॥ ❀ ❀ उससे यज्ञकी सामग्री एकत्र करके धर्मभीरु महाराज युधिष्ठिरने तीन अश्वमेध यज्ञोंके द्वारा भगवान्‌की पूजा की ॥ ३४ ॥ ❀ ❀ युधिष्ठिरके निमन्त्रणसे पधारे हुए भगवान् ब्राह्मणोंद्वारा उनका यज्ञ सम्पन्न कराकर अपने सुहृद् पाण्डवोंकी प्रसन्नताके लिये कई महीनोंतक वहाँ रहे ॥ ३५ ॥ ❀ ❀ शौनकजी ! इसके बाद भाइयोंसहित राजा युधिष्ठिर और द्रौपदीसे अनुमति लेकर अर्जुनके साथ यदुवंशियोंसे घिरे हुए भगवान् श्रीकृष्णने द्वारकाके लिये प्रस्थान किया ॥ ३६ ॥

द्वादश अध्याय समाप्त

---

१ पूर्वकालमें महाराज मरुत्तने ऐसा यज्ञ किया था, जिसमें सभी पात्र सुवर्णके थे । यज्ञ समाप्त हो जानेपर उन्होंने वे पात्र उत्तर दिशामें फिंकवा दिये थे । उन्होंने ब्राह्मणोंको भी इतना धन दिया कि वे उसे ले जा न सके; वे भी उसे उत्तर दिशामें ही छोड़कर चले आये । परित्यक्त धनपर राजाका अधिकार होता है, इसलिये उस धनको मँगवाकर भगवान्‌ने युधिष्ठिरका यज्ञ कराया ।

अथ त्रयोदशोऽध्यायः

सूत उवाच

विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् । ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥ १ ॥
यावतः[1] कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः । जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥ २ ॥
तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः[2] । धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥
गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी । अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निर्गमो धृतराष्ट्रस्य विदुरोक्त्या त्रयोदशे । उक्तः पौत्राभिषेकेन वक्तुं राज्ञो महापथम् ॥ १ ॥

इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन्विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोऽर्जुनागमनं ततः श्रीकृष्णांतर्धानं निशम्य पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः । गतिं हरिं तयात्मगत्यावाप्तं विवित्सितं ज्ञातुमिष्टं सर्वं येन ॥ १ ॥ ❀ ❀ तदेवाह । यावतः कर्मयोगव्रतादिविषयान् प्रश्नान्प्रथमं कृतवान् । कौषारवस्य मैत्रेयस्य पुरतः पश्चात्रिचतुःप्रश्नार्थज्ञानमात्रेण गोविन्दे जातैकभक्तिः कृतार्थः संस्तेभ्यः प्रश्नेभ्य उपरराम । ततः परं न विजिज्ञासितवान् ॥ २ ॥ ❀ ❀ सूतः संजयः । शारद्वतः कृपः । पृथा कुन्ती ॥ ३ ॥ ❀ ❀ कृपी द्रोणभार्या । जामयो ज्ञातिभार्याः । अन्याश्च स्त्रियः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महापथमिति पाठो युक्तः । उत्तरत्रावतरणे पांडवप्रस्थानं चेति कथनात् । महोदयमिति पाठो हि न स्वामिसंमतः प्रतिभाति । तत्स्वीकारे तु महस्य स्वप्राक्तनाधिकारप्राप्त्युत्सवस्योदयो यस्मान्महापथगमनात्स महोदयस्तमित्यर्थः कार्यः (१) आत्मनो जीवस्य गतिं गम्यम् "गतिर्गम्ये दशायात्राज्ञानोपायेषु कीर्तिता" इति निरुक्तिः । सा च गतिर्हरिरेव । "सोयमद्य महायोगिन्भवता करुणात्मना । दर्शितस्तमसः पारो यत्राकिञ्चनगो हरिः" इति चतुर्थस्कन्धान्ते मैत्रेयं प्रति विदुरोक्तेः । आत्मगत्या श्रीकृष्णतत्त्वज्ञानेन । यद्वात्मगतिर्हरिभक्तिस्तयावाप्तविवित्सित इति तद्वानेनैव सर्वं ज्ञातवानित्यर्थः, हस्तिपदन्यायेन तस्याः सर्वाश्रयत्वात् । तदुक्तं "भक्त्या सिद्ध्यन्ति धर्माद्या भक्तिः सिद्धा स्वयं हरेः" इति संहितायाम् । एतच्च तृतीयस्कन्धानुरोधेन युद्धात्पूर्वं दुर्योधनाद्विच्छिद्य गत इति ध्येयम् ॥ १ ॥ ❀ ❀ तदेवाप्तविवित्सितत्वमेव ततः परस्य जिज्ञासितस्याभावात् । "आत्मनि ज्ञाते सर्वं ज्ञातं भवति" इति श्रुतेः । यद्वा तेभ्यः प्रश्नेभ्य उपरराम ह । तदुत्तरं श्रोतुं नैच्छद्भक्तौ जातायामन्यस्य जिज्ञास्यस्य वैयर्थ्यादिति भावः ॥ २ ॥ ❀ ❀ तं विदुरम् ॥ ३ ॥ ❀ ❀ जामिशब्दश्चवर्गादिरंतस्थादिश्च द्विधैव कोशेषु दृष्टः । "यामिः कुलस्त्रीस्वस्रोः स्त्री" इति मेदिनी । "भार्यास्तु भ्रातृवर्गस्य जामयः स्युः परस्परम्" इत्यमरश्च । क्वचित् "यातरस्तु परस्परम्" इति पाठः । अन्याश्चाप्रसिद्धनामवत्यः ॥ ४ ॥

अष्टश्लोकावधि दीपनी न

श्रीमद्वीरराघवव्याख्या

कुरुपाण्डवयुद्धात्प्रागेव मंत्राय धृतराष्ट्रेणाहूतस्तत्पुत्रेण पराभूतो विदुरः तीर्थयात्रायां निमित्तभूतायां सत्यां गतः तत्रात्मनः परमात्मनो गतिं मैत्रेयादुपेत्य ज्ञात्वा तया आत्मगत्या ज्ञानविषयभूतया अवाप्तविवित्सितः कृतकृत्यविवित्सितः इति पाठे विदितवेद्यः "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमात्मनि खल्वरे दृष्टे श्रुते मते विदिते इदं सर्वं विज्ञातं भवती" ति श्रुतेः पुनर्हास्तिनपुरं प्रागात्प्राप्तः ॥ १ ॥ ❀ ❀ तयावाप्तविवित्सित इत्येतदेवोपपादयति यावतः क्षत्ता विदुरः कौषारवो मैत्रेयः कुषारवगोत्रप्रसूतत्वात्तस्याग्रतः यावतः प्रश्नान् कृतवान् तत्र कतिपयानामेव प्रश्नानामुत्तरैर्गोविंदे जाता एकाऽव्यभिचारिण्यनन्यप्रयोजना भक्तिर्यस्य तथाभूतः तेभ्योऽवशिष्टप्रश्नेभ्य उपरराम अवशिष्टप्रश्नानामुत्तराणि न शुश्रावेत्यर्थः । जातैकभक्तिरित्यनेन कृतकृत्यत्व-

---

१. प्राचीनपुस्तकेषु, 'यावतः...' प्रभृति 'कौषारवाग्रतः' एतत्पर्यन्तः पाठो न विद्यते । २. प्रा० पा०—सहानुगः ।

मुक्तम् ॥ २ ॥ ❀ ❀ तमागतं बंधुं ज्ञात्वा सहानुजो धर्मपुत्रो युधिष्ठिरः धृतराष्ट्रादयः सूतः संजयः शारद्वतः कृपः ॥ ३ ॥ ❀ ❀ अन्याश्च जामयः अंतःपुरस्त्रियः ससुताः पांडोर्ज्ञातयश्च हे ब्रह्मन् ! ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विषयरागः संसाराय तदभावो विमुक्तये इत्यतो मुमुक्षुणा स्वतो वैराग्यं परतो वा संपादनीयमित्ययमर्थः प्रतिपाद्यतेऽस्मिन्नध्याये । तत्र शुद्धांतःकरणस्यैव विषयविरागः सुदृढ इति स च कर्मणा तीर्थसेवया वा स्यादित्यभिप्रेत्य विदुरस्य तीर्थसेवां कृत्वा युधिष्ठिरादिबंधुदिदृक्षया हास्तिनपुरागतिमाह विदुर इति । विदुरो हास्तिनपुरमगादित्यन्वयः । किं कृत्वा तीर्थयात्रायां कृष्णादिष्टान्मैत्रेयादात्मनः परमात्मनो गतिं ज्ञानं जीवस्य गतिं स्वर्गनरकादिविषयामिति वा तथा परमात्मविद्यया अवाप्तं विविस्तितं ज्ञातुमिष्टं येन स तथोक्तः ॥ १ ॥ ❀ ❀ 'नापृष्टः कस्यचित् ब्रूयादि'ति वचनात् प्रश्नप्रतिवचनाभ्यां तत्त्वमवगम्यालं बुद्धिरभूदित्याह यावत इति । क्षत्ता विदुरः कुषारवस्यापत्यस्य मैत्रेयस्याग्रतो यावतः प्रश्नान्कृतवान् तेभ्यः प्रश्नेभ्यो मैत्रेयेण परिहृतेभ्य उपरराम ज्ञातत्वादलं बुद्धिमानभूत् । हशब्दः तृप्तिसूचकः चशब्द एवार्थे । तत्त्वज्ञानेन फलमाह जातेति । ततो ज्ञानातिशयेन जाता एका प्रधाना भक्तिर्यस्य स तथोक्तः कुत्र गोविन्दे श्रीकृष्णे अनेन भक्तिज्ञानयोरन्योऽन्यहेतुत्वमसूचि ॥ २ ॥ ❀ ❀ सूतः संजयः शारद्वतः कृपः ॥ ३ ॥ ❀ ❀ अन्याः पांडोर्जामयः पुत्रभार्याः अन्या वा प्रसिद्धनामानः जामयः स्वसारो वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विदुर इति । सोऽयं तृतीयस्कन्धानुसारेण युद्धात् पूर्व्वं दुर्य्योधनाद् विच्छिद्य गत आसीदिति ज्ञेयम् । आत्मनो गतिर्हरेर्भक्तिः तयावाप्तविविस्तित इति तज्ज्ञानेनैव सर्व्वं ज्ञातवानित्यर्थः सर्व्वाश्रयत्वात्तस्य ॥ १-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परीक्षितो जन्म वक्तुं द्रौण्यस्त्रादिकथा यथा । अभिषेकं तथा वक्तुं विदुरागमनाद्यभूत् ॥
विदुरस्योपदेशेन धृतराष्ट्रस्य निर्गमः । राज्ञो विषादः शान्तिश्च नारदोक्त्या त्रयोदशे ॥

परीक्षितो जन्म उक्त्वा कलिनिग्रहादिकर्माणि कथयिष्यन् प्रथमं राज्याभिषेकं वक्तुं विदुरस्यागमनं ततो वैराग्योपदेशेन धृतराष्ट्रनिष्क्रमः ततोऽर्जुनागमनं ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः । गतिं कृष्णम् । तया आत्मगत्या अवाप्तम् आत्मनो विविस्तितं प्राप्तुमिष्टं येन सः । विदॢ लाभे ॥ १ ॥ ❀ ❀ तेभ्यः प्रश्नेभ्य उपरराम तदुत्तरं श्रोतुं नैच्छत् भक्तौ जातायामन्यस्य जिज्ञास्यस्य वैयर्थ्यादिति भावः ॥ २ ॥ ❀ ❀ सूतः संजयः । शारद्वतः कृपः । कृपी द्रोणभार्य्या । जामयो ज्ञातिभार्य्याः । जामिशब्दश्च वर्ग्यादिरन्तःस्थादिश्च कोषेषु दृष्टः । प्राणं मूर्च्छादिदोषेण गतप्रायं पुनरागतं संलक्ष्य तन्वः करचरणादिकाः यथा प्रत्युद्गच्छन्ति धृतस्वस्वचेष्टा भवन्ति ॥ ३-६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

परीक्षितः कलिनिग्रहादीनि कर्माणि कथयिष्यन्धृतराष्ट्रप्रस्थानकथनपूर्वकं 'संस्थां च पांडुपुत्राणां वक्ष्ये' इति प्रतिज्ञातं पांडवप्रस्थानं निरूपयति विदुर इत्यादित्रिभिरध्यायैः । आत्मनो गतिं परमात्मविद्यां ज्ञात्वा तयावाप्तं विविस्तितं वेत्तुमिष्टं सर्वं येन सः 'यद्विज्ञानेन सर्वं विज्ञातं भवती'ति श्रुतेः ॥ १ ॥ ❀ ❀ तयावाप्तविविस्तित इति यदुक्तं तद्विवृणोति–क्षत्ता विदुरः कौषारवाग्रतो मैत्रेयपुरतः प्रश्नान्कृतवान् तेषु कतिपयप्रश्नप्रत्युत्तरैर्गोविन्दे जातैकभक्तिः गोविंदस्वरूपगुणशक्त्यादियाथात्म्यबोधेन जाता एकाऽव्यभिचारिणी भक्तिर्यस्य सः तेभ्योऽवशिष्टेभ्यः प्रश्नेभ्यः उपरराम ॥ २ ॥ ❀ ❀ सूतः संजयः ॥ ३ ॥ ❀ ❀ पाण्डोः ज्ञातयः स्वसुताः स्त्रियः अन्याश्च जामयोंऽतःपुरस्त्रियः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

एवं भागवतश्रोतुर्देहोत्पत्तिर्निरूपिता । पुरुषत्रयमुक्तिर्हि तन्मुक्त्यर्थं निरूप्यते ॥ १ ॥
पिता पितामहश्चैको धृतराष्ट्रस्ततः परः । प्रपितामहमुक्तिर्हि पूर्वं तत उदीर्यते ॥ २ ॥
ततोऽध्यायद्वयेनैव द्विरूपत्वात्पितामहे । सनिमित्तां मुक्तिमाह हेतुकार्यविभेदनाम् ॥३ ॥
अमुक्तपितृका मुक्तिं नाप्नुवन्तीति वार्यते । अतो निश्चिन्ततासिद्ध्यै चित्तशुद्धिरिहोच्यते ॥४॥
ततो द्वयेनेन्द्रियाणां राज्यशौर्यादिवर्णनैः । ततो वैराग्यसत्संगावधिकारः फलोन्मुखः ॥ ५ ॥

ततो भवति पुष्टोऽपि नान्यथेत्यग्रिमा कथा तत्र प्रथमं धृतराष्ट्रमुक्तिरुच्यते सा ज्ञानसाध्येति ज्ञानसिद्ध्यर्थं विदुरप्रसंग उच्यते । विदुरोऽवांतरव्यापारः धर्मराजत्वेन गुरुर्वा भगवता स्मृत इति तस्य दोषनिवृत्तिः । विदुरमैत्रेयकथा स्कन्धद्वये वक्ष्यते ।

तदग्रिमकथात्र प्रयोजनार्थं निरूप्यते विदुर इति। तीर्थयात्रायां समागतायां चित्तशुद्धौ उद्धवोपदेशात् मैत्रेयं प्राप्य आत्मनो भगवतो गतिं चेष्टां लीलामिति यावत् तां ज्ञात्वा ज्ञानसंपन्नः हस्तिनापुरमगमत् भगवत्क्रिययैव तस्यात्मयाथात्म्यं स्फुरितं तदाह तयावाप्त-विविदिषत इति तया गत्या विविदिषितो विशेषेण ज्ञातः अयमर्थः मैत्रेयसमीपे गत्वा स्वस्य सर्वज्ञतासिद्ध्यै बहु पृष्टवान् तत्र 'तस्मिन् विदिते सर्वमिदं विदितं भवती'ति न्यायेन भगवच्चरित्रे ज्ञाते सर्वं ज्ञातं भवतीति तच्चरित्रं स्कन्धद्वयेनावगतं तत्रैवमर्थः संपन्नः। सर्वं भगवदधीनं स यथा करिष्यति तथा भविष्यतीति केवलं तदाश्रयतया स्वातन्त्र्यं यथा प्रेरयति तथा स करोतीति कर्तव्यं तत्र मध्ये भगवदिच्छया धृतराष्ट्रमुक्त्यर्थं प्रेरितः अग्रिमचरित्रमज्ञात्वापि फलदानात् शीघ्रं नगरे पुनः समागत इति॥ १॥ ❀ ❀ अत एव पूर्वं ये बहवः पदार्थाः पृष्टाः तानश्रुत्वैव समागत इत्याह यावत इति। क्षत्ता अन्तःपुराध्यक्षः अनेनातिनिपुणत्वं बोधितं कौषारवः कुषारोः पुत्रः मैत्रेयः उत्तमाधिकारित्वात् चरित्रैकदेशश्रवणेऽपि भक्तिर्जाता अतः फलस्य जातत्वात् तेभ्यः प्रश्नेभ्यः उत्तरमश्रुत्वापि उपरराम॥ २॥ ❀ ❀ एवं तस्य ज्ञानवत्त्वात् पूर्वकथामनूद्य समागतस्याग्रिमकृत्यं वदन् समय-प्रतीक्षार्थं स्थितिसिद्धये तस्य सत्कारमाह तं बन्धुमित्येकादशभिः सर्वेन्द्रियप्रीतिनिमित्तं बध्यते अनेनेति बन्धुः सुखदुःखज्ञानमोक्षैः यथाधिकारं निर्णयः आगतं दृष्ट्वा अन्यार्थमागतत्वात् न दूरात् ज्ञा[ ]नं येनोद्गच्छेयुः। सूतः जायन्तेयः शारद्वतः कृपः शरस्तंबे जातत्वात् ब्रह्मन्निति सम्बोधनम्॥ ३॥ ❀ ❀ स्त्रीणां गणनायां विकाराभावाय कृपी द्रोणपत्नी जामयः कुलस्त्रियः देवलज्ञा भावार्थं पाण्डोरिति ज्ञातयः पुरुषाः सुतैः आसर्वतः स्त्रीभिश्च सहिताः सकुटुम्बा ज्ञातय इत्यर्थः॥ ४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ त्रयोदशाध्यायं विवरिषवः पूर्वप्रकरणसमाप्तिं बोधयन्ति एवमित्यादि। सपरिकरहेतुनिरूपणपूर्वकं निरूपितेत्यर्थः। अग्रिमायां वैराग्यषडध्याय्यां तावतां प्रयोजनं सार्धैश्चतुर्भिर्वदन्तः पूर्वं त्रयाणामाहुः पुरुषत्रयेत्यादि द्विरूपत्वादिति। मुक्तेर्हेतुकार्यवि-भेदतो द्विरूपत्वात्। हेतुर्भगवत्प्रयाणं कार्यं नियामकलयभावनादिकं तद्भेदतो द्विरूपत्वात्। सनिमित्ताम्। प्रयाणसूचकोत्पातदर्शना-दिरूपनिमित्तसहिताम्। तामध्यायद्वयेनाहेत्यर्थः। ननु पुरुषत्रयमुक्तेः कथमेतन्मुक्त्यर्थतेत्यत आहुः अमुक्तपितृकेत्यादि। वार्यत इति। अमुक्तिस्तेषां वार्यते, अतस्तन्मुक्तेः सकाशाद्राज्ञो निश्चिन्ततासिद्ध्यै इहास्मिन्नध्यायत्रये राज्ञश्चित्तशुद्धिरुच्यते, सा मुक्तावुपका-रिणीति तत्प्रयोजकतया पुरुषत्रयमुक्तेस्तन्मुक्त्यर्थतेत्यर्थः। शेषाणां चतुर्णामर्थमाहुः तत इत्यादि। नान्यथेति सत्सङ्गं विना। तथा च सत्सङ्गस्यावश्यकत्वबोधनार्थमग्रिमा सपरिकरवैराग्यानन्तरभाविनी ऊनविंशाध्यायस्य कथेत्यर्थः। अवान्तरव्यापार इति। पूर्वं सनत्सुजातादिकृतोपदेशस्य निर्वेदोत्पादनादिना स्मारणात्तथेत्यर्थः। बहुकालव्यवहितस्य सनत्सुजातीयस्य पुनः कथनाभावे स्मरणा-योगात्कथने च गुरुत्वस्यैव सिद्धिरित्यरुच्या पक्षान्तरमाहुः धर्मराजत्वेन। गुरुत्वेति। अयं पक्ष 'एवं राजे'ति श्लोकस्थात् बोधितप-दात्सिद्ध्यति। प्रथमस्तु ततः पूर्वग्रन्थात्। ननु धर्मराजत्वस्य प्रागपि सत्त्वात्तदानीमुपदेशकर्तृत्वप्राप्तावपि स्वस्यानधिकारकथनपूर्वकं तदकरणमिति तस्येदानीमपि सत्त्वात् कथं गुरुत्वं युज्यते इत्यत आहुः भगवत्तेत्यादि। स्मरणं 'यस्य ज्ञानोपदेशाये'ति वाक्ये स्फुटिष्यति। अतो द्वितीयः पक्षोऽपि युक्त एवेत्यर्थः। तर्हि तदर्थं तत्कथैव पूर्वं कुतो नोक्तेत्यत आहुः विदुरेत्यादि। तथा च तस्याः पुराणलक्षणग्रन्थे प्रविष्टत्वाद्बहुत्वाच्च नेदानीं सोक्ता, किन्तु गुरुत्वरूपप्रयोजनसिद्ध्यर्थं तदुत्तरैव कथोक्तेति नोक्तार्थे सन्देह इत्यर्थः। एवं मुक्त्युपोद्घातत्वेन प्रसङ्गमुपपाद्य व्याकुर्वन्ति विदुर इत्यादि। मूले आत्मविविदिषित इत्यत्र बहुव्रीहौ आहिताग्न्यादिषु इति आत्मपदस्य पूर्वनिपातः। विविदिषितपदं च विशेषज्ञाने रूढमित्यवगन्तव्यम्। विशेषेण ज्ञानस्याकारं फलोक्तिमुखेन विवृण्वन्ति अयमर्थ इत्यादि। तथा च तया लीलया साङ्ख्यसिद्ध एव साक्षीति न ज्ञातः, किन्तु भगवद्दासत्वादिवैशिष्ट्येनोपनिषत्सिद्धरूपेण ज्ञात इत्यर्थः। अग्रिमचरित्रमिति। पञ्चमादिस्कन्धान्तरोक्तम्। फलज्ञानादिति। फलमनुपदोक्तरीतिकस्वस्वरूपावस्थानरूपं तस्य ज्ञानात्। इदमेव विशेषतो ज्ञानम्। एतन्निगमनायाग्रिमश्लोकं विवृण्वन्ति अत एवेत्यादि। यथाधिकारं निर्णय इति। बन्धुत्वनिर्णयः। ज्ञानमोक्षाभ्यां बन्धनं सत्त्वगुणवज्ज्ञेयम्। ताभ्यामपि गुरुत्वेनासक्तिजननादिति॥ २-४॥

श्रीगिरिधरकृता बालप्रबोधिनी

विदुरागमनं पूर्वं धृतराष्ट्रस्य निर्गमः। योगमार्गेण तन्मुक्तिस्त्रयोदशे निरूप्यते॥ १॥

एवं परीक्षितो जन्मोक्त्वा कलिनिग्रहादिकर्माणि कथयिष्यन् तत्प्रसङ्गार्थं प्रथमं विदुरस्यागमनं, ततो वैराग्योपदेशेन धृत-राष्ट्रनिष्क्रमः, ततो द्वारकातोऽर्जुनस्यागमनं, ततः श्रीकृष्णान्तर्द्धानं श्रुत्वा परीक्षितो राज्याभिषेकं च कृत्वा पाण्डवप्रस्थानं च त्रिभिर-ध्यायैर्निरूपयति-विदुर इति। कुरुपाण्डवयुद्धात् प्रागेव मन्त्राय धृतराष्ट्रेणाहूतस्तत्पुत्रेण पराभूतो विदुरस्तीर्थयात्रार्थं निर्गतस्तत्र मैत्रेयाद्दैपरात्मनो भगवतो गतिं तत्त्वं ज्ञात्वा "येनाश्रुतं श्रुतं भवत्यविज्ञातं विज्ञातम्। आत्मनि खल्वरे दृष्टे श्रुते मते वीक्षिते इदं सर्वं विज्ञातं भवति" इत्यादिश्रुतेस्तया गत्या तत्त्वज्ञानेनावाप्तं ज्ञातं विविदिषितं ज्ञातुमिष्टं येन स पुनर्हास्तिनपुरं प्रत्यगादित्य-न्वयः॥ १॥ ❀ ❀ 'तयाऽवाप्तविविदिषितः' इति यदुक्तं तदेवोपपादयति-यावत इति। कुषारोः पुत्रः कौषारवो मैत्रेयस्तस्मा-द्भतः क्षत्ता विदुरो यावतः कर्मयोगव्रतादिविषयान् प्रश्नान् कृतवांस्तेषु कतिपयप्रश्नानामुत्तरैरेव गोविन्दे जाता एका अव्यभिचारिणी

अनन्यप्रयोजना च भक्तिर्यस्य तथाभूतः सन् तेभ्योऽवशिष्टप्रश्नेभ्य उपरराम अवशिष्टप्रश्नानामुत्तराणि न शुश्रावेत्यर्थः । एकान्तभक्तस्य कृतार्थत्वादर्थान्तरश्रवणादुपरतिर्युक्तैवेति सूचयति-हेति ॥ २ ॥ ❀ ❀ तमागतं बन्धुं विदुरं दृष्ट्वा सहानुजः भीमार्जुनादिभिः सहितो धर्मपुत्रो युधिष्ठिरः धृतराष्ट्रादयश्च प्रहर्षेण प्रत्युज्जग्मुः अभिमुखं ययुरिति तृतीयेनान्वयः । युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः । सूतः सञ्जयः । शारद्वतः कृपः । कृपी द्रोणभार्या । पाण्डोर्जामयः ज्ञातिभार्याः । समुताः ज्ञातयः पुरुषाः अन्याश्च स्त्रियः । प्रत्युद्गमे दृष्टान्तमाह-प्राणमिति । यथा कुतश्चिन्मूर्च्छादिदोषतः प्राणे सन्ने सति तन्वः कराङ्घ्र्यादयो निश्चेष्टा भवन्ति पुनश्च तस्मिन्नाविर्भूते चेष्टन्ते तद्वदित्यर्थः । परिष्वङ्गाभिवादनैर्विधिवत् यथोचितं तमभिसङ्गम्य मिलित्वा ॥ ३-५ ॥

हिन्दी अनुवाद

विदुरजी के उपदेशसे धृतराष्ट्र और गान्धारीका वनमें जाना

सूतजी कहते हैं-विदुरजी तीर्थयात्रामें महर्षि मैत्रेयसे आत्माका ज्ञान प्राप्त करके हस्तिनापुर लौट आये । उन्हें जो कुछ जाननेकी इच्छा थी, वह पूर्ण हो गयी थी ॥ १ ॥ ❀ ❀ विदुरजीने मैत्रेय ऋषिसे जितने प्रश्न किये थे, उनका उत्तर सुनने के पहले ही श्रीकृष्णमें अनन्य भक्ति हो जानेके कारण सुननेसे उपराम हो गये ॥ २ ॥ शौनकजी ! अपने चाचा विदुरजीको आया देख धर्मराज युधिष्ठिर, उनके चारों भाई, धृतराष्ट्र, युयुत्सु, संजय, कृपाचार्य, कुन्ती, गान्धारी, द्रौपदी, सुभद्रा, उत्तरा, कृपी तथा पाण्डव-परिवारके अन्य सभी नर-नारी और अपने पुत्रोंसहित दूसरी स्त्रियाँ सब-के-सब बड़ी प्रसन्नतासे मानो मृत शरीरमें प्राण आ गया हो-ऐसा अनुभव करते हुए उनकी अगवानीके लिये सामने गये । यथायोग्य आलिङ्गन और प्रणामादिके द्वारा सब उनसे मिले और विरहजनित उत्कण्ठासे कातर होकर सबने प्रेमके आँसू बहाये । युधिष्ठिरने आसनपर बैठाकर उनका यथोचित सत्कार किया ॥ ३-६ ॥

प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् । अभिसंगम्य विधिवत् परिष्वङ्गाभिवादनैः ॥ ५ ॥
मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः । राजा तमर्हयाञ्चक्रे कृतासनपरिग्रहम् ॥ ६ ॥
तं[1] भुक्तवन्तं विश्रान्तमासीनं सुखमासने । प्रश्रयावनतो राजा प्राह तेषां[2] च शृण्वताम् ॥ ७ ॥

युधिष्ठिर[3] उवाच

अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् । विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्राणं तन्व इवेति कुतश्चिन्मूर्च्छादिदोषतः प्राणेऽवसन्ने सति तन्वः कराङ्घ्र्यादयो निश्चेष्टा भवन्ति पुनस्तस्मिन्नाविर्भूते यथोत्तिष्ठन्ति तद्वत् ॥ ५ ॥ ❀ ❀ विरहेण यदौत्कण्ठ्यं तेन कातरा विवशाः ॥ ६ ॥ ❀ ❀ तं विदुरम् ॥ ७ ॥ ❀ ❀ पक्षिणो ह्यपत्यानि यथातिस्नेहेन पक्षच्छायया वर्धयन्ति तद्वद्युष्मत्पक्षपातच्छायया समेधितान्वर्धितान्नोऽस्मान् किं स्मरथ । समेधितत्वमेवाह-विपद्गणाद्यस्मान्मोचिताः स्मः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"तत्प्राणे प्रपन्ने उदतिष्ठत्" इति श्रुतेः ॥ ५ ॥ ❀ ❀ राजा युधिष्ठिरः ॥ ६ ॥ ❀ ❀ तेषां पूर्वोक्तानाम् ॥ ७ ॥ ❀ ❀ विषाद् दुर्योधनदत्तान्महाग्नेर्जतुगृहात् । आदिना नदीतरणादिग्रहः ॥ ८-९ ॥

श्रीमद्वीरराघवव्याख्या

विरहप्रयुक्तौत्कंठ्येन कातराः प्रेमबाष्पौघमानंदाश्रुसमूहं, कृतः आसनपरिग्रहो येन तं विदुरं राजा युधिष्ठिरोऽर्हयामास पूजयामास ॥ ६ ॥ ❀ ❀ ततो भुक्तवंतं विश्रांतमासने सुखमासीनं तं विदुरं स्वानां शृण्वतां सतां प्रश्रयेणावनतः प्राह ॥ ७ ॥ ❀ ❀ तदेवाह अपीत्यादिभिश्चतुर्भिः । युष्मत्तव पक्षयोः परिग्रहरूपयोः छायायां समेधितान्नोऽस्मानपि स्मरणार्थकम् आत्मनां तत्पक्षच्छायासमेधितत्वं स्मारयति समातृकाः मात्रा सहिता वयं विषाग्न्यादिरूपाद्विपद्गणात्त्वया विमोचिताः ॥ ८ ॥

---

१. प्राचीनपुस्तक एवं पाठः—'तं सत्कृतं तु विश्रान्तमासीनं सुखमासने ।' २. प्रा० पा०—स्वानां विशृण्वताम् । ३. प्राचीने पुस्तके 'युधिष्ठिर उवाच' इति नास्ति ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आगतान्प्राणान्दृष्ट्वा तन्वः भोगायतनानि शरीराणीव तत्प्राणे प्रपन्न उदतिष्ठदिति श्रुतेः ॥ ५ ॥ ❀ ❀ मिथः प्रेमबाष्पौघं प्रेमनिमित्तनेत्रजलप्रवाहम् अर्हयांचक्रे पूजयामास औत्कंठ्यकातराः औत्कंठ्येन परवशाः, कृत आसनस्य पीठस्य परिग्रहः स्वीकारो येन स तथोक्तस्तम् ॥ ६ ॥ ❀ ❀ स्वकीयानां च शृण्वतां सताम् ॥ ७ ॥ ❀ ❀ नोऽस्मान्स्मरथ यूयमिति शेषः, मात्रा सह वर्तमानाः समातृकाः विषाग्न्यादेर्विपद्गणान्मोचिताः यद्येन तस्मादिति शेषः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

पक्षिणो ह्यपत्यानि यथा अतिस्नेहेन पक्षच्छायया वर्द्धयन्ति तद्वत् । पक्षे पक्षच्छाया पक्षपातः । यद्यस्मान्मोचिता वयं त्वयेत्यर्थः ॥ ७-८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

केनापि निमित्तेन प्राणावरोधे तन्वः शरीराणि निश्चेष्टानि भवंति तं पुनरागतं तानि यथोत्तिष्ठंति तद्वत् ॥ ५ ॥ ❀ ❀ विरहजातौत्कंठ्येन कातरा व्याकुलाः प्रेमबाष्पौघं स्नेहजन्याश्रुसमूहं मुमुचुः राजा युधिष्ठिरः कृतः आसनपरिग्रहो येन तम् अर्हयांचक्रे अर्हयामास पूजयामास ॥ ६ ॥ ❀ ❀ प्रश्रयावनतः विनयेन नम्रः तेषां धृतराष्ट्रादीनां शृण्वतां तं विदुरं प्राह ॥ ७ ॥ ❀ ❀ तदेवाहापीति चतुर्भिः । युष्मत्पक्षपातच्छायया समेधितान्संवर्द्धितानंडजोपमान्नोऽस्मानपि किं स्मरथ यद्यतः समातृका विमोचितास्तान् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

प्रत्युज्जग्मुः संमुखतया गताः, तन्व इव करचरणादय इव अभिसंगम्य विधिवत् शास्त्रानुसारेण यथायोग्यं कैश्चिदभिवादनम् ॥ ५ ॥ ❀ ❀ प्रेम्णा बाष्पसमूहं विरहे यदौत्कंठ्यं प्रेमातिभरत्वं तेन कातरा दीनाः पूर्वं तस्मिन् गते यत्प्रेमजातं भगवतः प्रेम एव आनन्दरूपं न भवतीति तेन प्रेम्णा दीनाः विषयालाभात् एवं सर्वेषु स्थितेषु मुख्यस्य पूजाधिकारात् राजानं पूजयामास दत्ते आसने स्वीकृतमासनं येन अनेन पूजायां निषेधाभावः सूचितः ॥ ६ ॥ ❀ ❀ गतश्रमं पृच्छेदिति धर्मशास्त्रात् श्रमापनोदनमाह तं भुक्तवंतमिति प्रत्येकप्रश्नव्यावृत्त्यर्थं तेषां च शृण्वतामित्युक्तं चकारान्मध्ये आगताः पूजानंतरमागताश्च परिगृह्यंते ॥ ७ ॥ ❀ ❀ प्रथमतो दयामुत्पादयति अपि स्मरथेति । युष्मत्पक्षच्छायासमेधितान्नः अस्मान् अपीति सम्भावनायां स्मरथ पूर्वं वयं भवद्भिरेव परिपालिताः पक्षः पक्षपातः तस्य च्छाया हिताचरणं पक्षिणामेषा व्यवस्था मातरं पितरं पुत्रं कालांतरे तेन परिचिन्वंति तदर्थं पक्षादिपदप्रयोगः स्मरणार्थं पालनविशेषं ज्ञापयति विपद्गणान्मोचिता इति । आपदां समूहात् तमेव गणयति विषाग्न्यादेरिति विषं मोदकदानं लाक्षागृहदाहश्च प्रत्येकं समुदायनाशकौ समातृका इति । स्त्रीणामपि वधे शत्रूणां न विचिकित्सा सरक्षका मोचिता इति वा ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

मुमुचुरित्यत्र । भगवतः प्रेम एवेत्यत्र प्रेम इवेति पाठः प्रतिभाति । निषेधाभाव इति । पूजा न मया ग्राह्येति निषेधस्याभावः । कुलक्षयप्रयोजकत्वान्निषेधः सम्भाव्यते अग्रिमवाक्यकथनानुसारात्, तदभावायैतदुक्तम् । तदर्थमिति । लोके हि नानादेशयात्रां कुर्वाणाः स्वस्य पक्षित्वं वदन्ति वयं पक्षिण इति, तदा स्मरणं न सम्भवतीति तन्निवृत्तय इत्यर्थः । अर्थपदमत्र निवृत्तौ मशकार्थो धूम इतिवत् । विचिकित्सेति । अयं शब्दो ग्लानौ रूढो जुगुप्सावत्प्रयोगवशाज्ज्ञेयः । क्लेशजनितमिति । पूर्वानुभूतक्लेशजनितम् । षष्ठ्यन्तपदं तृतीयया कथं व्याख्यायते इति शङ्कानिवृत्तय आहुः जीवनेत्यादि । परित्यागभावनामिति । जीवनस्येति शेषः ॥ ६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

विरहप्रयुक्तौत्कंठ्येन कातरा विवशाः प्रेम्णा बाष्पौघमानन्दाश्रुसमूहं मुमुचुरिति पूर्वेणान्वयः । कृतः आसनस्य परिग्रहः स्वीकारो येन तं विदुरं राजा युधिष्ठिरोऽर्हयामास ॥ ६ ॥ ❀ ❀ ततश्च भुक्तवन्तं विश्रान्तं गतमार्गश्रमं आसने सुखमासीनमुपविष्टं तं विदुरं तेषां स्वकीयानां शृण्वतां सतां प्रश्रयेण विनयेनावनतः सन् राजा प्राहेत्यन्वयः ॥ ७ ॥ ❀ ❀ प्रश्नमेव दर्शयति-अपीत्यादिभिश्चतुर्भिः । पक्षिणो हि यथा पक्षच्छाययाऽतिस्नेहेन वर्द्धयन्ति तद्वत् युष्मत्पक्षपातच्छायया समेधितान्नोऽस्मान् अपि किं स्मरथेत्यन्वयः । पक्षसमेधितत्वमेव स्पष्टयति-यत् यस्माद्विषाग्न्यादेर्विपद्गणात् समातृका वयं युष्माभिर्मोचिताः स्म ॥ ८ ॥

हिन्दी अनुवाद

जब वे भोजन एवं विश्राम करके सुखपूर्वक आसनपर बैठे थे तब युधिष्ठिरने विनयसे झुककर सबके सामने ही उनसे कहा ॥ ७ ॥ ❁ ❁ युधिष्ठिरने कहा—चाचाजी! जैसे पक्षी अपने अंडोंको पंखोंकी छायाके नीचे रखकर उन्हें सेते और बढ़ाते हैं, वैसे ही आपने अत्यन्त वात्सल्यसे अपने कर कमलोंकी छत्रछायामें हम लोगोंको पाला-पोसा है। बार-बार आपने हमें और हमारी माताको विषदान और लाक्षागृहके दाह आदि विपत्तियोंसे बचाया है। क्या आप कभी हम लोगोंकी भी याद करते रहे हैं ॥ ८ ॥

कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम्। तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥ ९ ॥
भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो[1]। तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन[2] गदाभृता ॥ १० ॥
अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः। दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥ ११ ॥
इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत्। यथानुभूतं क्रमशो[3] विना यदुकुलक्षयम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वो युष्माभिः कया वृत्त्या वर्तितं देहवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति ॥ ९ ॥ ❁ ❁ भवतां च तीर्थाटनं न स्वार्थं किन्तु तीर्थानुग्रहार्थमित्याह। भवद्विधा इति। मलिनजनसंपर्केण मलिनानि तीर्थानि संतः पुनः स्वयं तीर्थीकुर्वन्ति। स्वान्तं मनस्तत्रस्थेन स्वस्यान्तः स्थितेनेति वा ॥ १० ॥ ❁ ❁ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा ॥ ११-१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे प्रभो इति। पितृभ्रातृत्वेन गौरवमालक्ष्य प्रभवत्स्वावनकर्तृत्वं चालक्ष्य वेयं सम्बुद्धिरिति भावः। क्वचिद्विभो इत्यपि पाठः। सोप्येतदभिप्रायक एव। भगवतोखिलमानसस्थत्वात्सर्वे एव तादृशा भवेयुरिति चेदाह—स्वस्यान्तस्थेनेति ॥ १० ॥ ❁ ❁ तातेति। पाण्डौ मृतेऽस्माकं तातवद्रक्षकत्वात्त्वमेव तातोऽसीति भावः ॥ ११ ॥ ❁ ❁ तीर्थयात्रायां यमुनायां भगवदाज्ञया बदरीं गच्छन्तमुद्धवं दृष्ट्वा तस्माद्विप्रशापाद्धेतोः षड्विंशाद्वर्षादुपरि नाशमेष्यद्यदुकुलं श्रुत्वा तन्नावर्णयदिति भावः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

स्वस्यान्तःस्थितेन वेति। एतेनात्र स्वान्तःस्थेनेति विसर्गमध्यपाठोऽपि प्रामाणिकः स्वस्यानुमतश्चेति ध्वनितम्, अन्यथा ईदृशविग्रहानुपपत्तेरिति ॥ १०-२४ ॥

श्रीमद्वीरराघवव्याख्या

क्षितिमंडलं चरद्भिः कया वृत्त्या वर्तितमिह भूतले कानि तीर्थानि भगवत्क्षेत्रमुख्यानि च भवद्भिः सेवितानि ॥ ९ ॥ ❁ ❁ कृतकृत्यानां भवतां न तीर्थयात्रया स्वप्रयोजनमस्तीत्यभिप्रायेणाह भवद्विधा इति। हे विभो! भवादृशाः भागवताः स्वयमेव तीर्थभूताः पवित्रभूताः अतस्तीर्थयात्राकृतं पवित्रत्वं नापेक्षितमिति भावः, तर्हि कमर्थं तीर्थान्यटंति तत्राह तीर्थीकुर्वंतीति स्वांतःस्थेन गदाभृता भगवता तीर्थान्यपि तीर्थीकुर्वंति इति तीर्थान्यपि तीर्थीकर्तुं तानि पर्यटंतीति भावः। वस्तुतः परिशुद्धान्येव गंगादितीर्थानि तथापि पापिभिः तेषु परिहृतानि पापान्यादाय तान्यपि पवित्रीकुर्वंति स्वगतानि तु स्वांतरात्मतयावस्थितो गदाभृत् क्षपयति, तस्य त्वघप्रतिभटत्वान्न तस्मिन्पापसमावेशप्रसक्तिरिति भावः। एतदभिप्रायेणैव गदाभृतेत्युक्तं तथा च नवमे 'किं चाहं न भुवं यास्ये नरा मय्यामृजंत्यघम्। मृजामि तदघं क्वाहं राजंस्तत्र विचिंत्यतामि'ति गंगयोक्तो भगीरथ आह 'साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः। हरंत्यघं तेंऽगसंगात्तेष्वास्ते ह्यघभिद्धरिरि'ति ॥ १० ॥ ❁ ❁ अपीति। हे तात! कृष्ण एव देवता येषां ते नोऽस्माकं सुहृदो बान्धवाश्च यदवः दृष्टाः अथवा स्वपुर्यां द्वारकायां सुखमासत इति श्रुताः किम् ॥ ११ ॥ ❁ ❁ इतीत्थं धर्मराजेनोक्तः विदुरो यदुकुलक्षयं विनाऽन्यत्सर्वं यथानुभूतं दृष्टं श्रुतं चानुक्रमशः समवर्णयत् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एकभुक्तादिव्रतेन किमिति शेषः, इह भूतले क्षेत्रप्रधानानि तीर्थानि यानि तानि सर्वाणि च सेवितानीत्यन्वयः ॥ ९ ॥ हे प्रभो! स्वात्मस्थेन गदाभृता हरिणा तीर्थभूताः भवादृशाः भागवताः गंगादितीर्थानि तीर्थीकुर्वंति न स्वयमात्मशुद्ध्यपेक्षया

---

१. प्रा० पा०—प्रभो। २. प्रा० पा०—आत्मस्थेन। ३. प्रा०—भ्रमतो।

तीर्थानि गच्छंतीति शेषः ॥ १० ॥ ❀ ❀ कृष्णो दैवतं येषां ते तथोक्ताः ॥ ११ ॥ ❀ ❀ भ्रमता परिवर्तमानेन क्षितितलमिति शेषः स्वेन यथानुभूतं तथा तत्सर्वमवर्णयत्, किंतु यदुकुलक्षयं विना तीर्थयात्रायां यमुनायां भगवदाज्ञया बदरीं गच्छंतमुद्धवं दृष्ट्वा तस्मात् विप्रशापाद्धेतोः षट्त्रिंशद्वर्षादुपरि नाशमेष्यद्यदुकुलं श्रुत्वा तन्नावर्णयदिति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तीर्थेषु भक्तिमतां भवतां तीर्थाटनं च तीर्थानामेव मङ्गलाय सम्पद्यते इत्याह भवद्विधा इति ॥ १०–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृत्त्या जीविकया । वो युष्माभिः ॥ ९ ॥ ❀ ❀ भवताञ्च तीर्थाटनं तीर्थानामेव भाग्येनेत्याह भवद्विधा इति । तीर्थीकुर्व्वन्ति महातीर्थीकुर्वन्ति पावनं पावनानामितिवत् ॥ १०–१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्षितिमंडलं चरद्भिर्वो युष्माभिः कया वृत्त्या वर्त्तितं केनोपायेन देहनिर्हारः कृतः, इहास्मिन् भूतले तीर्थानि पुण्यजलप्रधानानि क्षेत्रमुख्यानि भूमिप्रदेशमुख्यानि सेवितानि किम् ॥ ९ ॥ ❀ ❀ भवद्विधा निष्पापत्वात्तावत् स्वयं तीर्थभूताः विशेषतस्तु भागवताः स्वांतस्थेन स्वहृदि ध्येयभूतेन गदाभृता तीर्थाटनेऽपि प्रयोजनेऽपि प्रयोजनमाह–संसारिसंसर्गेण तीर्थान्यपि मलिनानि पुनस्तीर्थीकुर्वन्ति ॥ १० ॥ ❀ ❀ नोऽस्माकं सुहृदो बांधवाः कृष्णो देवता येषां ते भवद्भिर्यादवा दृष्टाः कुतश्चिच्छ्रुता वा द्वारकां सुखमासते किम् ॥ ११ ॥ ❀ ❀ यदुकुलक्षयं तु जानन्नपि न वर्णयामास ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं दयामुत्पाद्य क्लेशजनितं दुःखमनुवादेन गच्छतीति वृत्तिप्रश्नः । वृत्तिर्जीविका वर्णाश्रमविभागविहितया यादृच्छिकया चेति वः युष्माभिः जीवनस्यानभिप्रेतत्वात् तं प्रति स्वातंत्र्याभावात् न कर्त्तरि तृतीया, अपि तु सम्बन्धमात्रे षष्ठी, भूपर्यटने तु विवक्षितत्वात् कर्तृत्वमतश्चरद्भिरित्युक्तम् क्षितिमण्डलमिति अत्यन्तसंयोगे द्वितीया, तेन सर्वत्रैकविधानाज्ञानाभावात् परित्यागभावनां वा कृत्वा जीवितमिति प्रश्नार्थः । द्वितीयपक्षे अतः परमत्र स्थास्यंतीति मनोरथः । क्षेत्राणि मुख्यानि यत्र जलप्रधानं तीर्थं स्थलप्रधानं क्षेत्रं क्वचिदुभयमेकीभवत् प्रयागवेणीवदिति तानि इह भूतले सेवितानि । मुख्यानां सेवितत्वादतः परं न गंतव्यमिति भावः ॥ ९ ॥ ❀ ❀ ननु फलस्यासिद्धत्वात् सम्यक्चित्तशुद्धिपर्यंतं तीर्थाटनं कर्त्तव्यमिति चेत्तत्राह भवद्विधा इति । न हि भवतां तीर्थाटने न कश्चिद् गुणो भवति तत्राधिकारिणस्त्वन्ये । नन्वस्मद्विधा अपि तीर्थेषु पर्यटंतीत्याशंक्याह भवद्विधा इति । सत्यं पर्यटंतीति न तु स्वार्थं किंतु तीर्थकृपया "हरंत्यघन्तेऽगसंगात्तेष्वास्ते ह्यघभिद्धरि"रिति वाक्यात् स्वयमेव ते तीर्थभूताः पापिनां स्पर्शदोषात् दुष्टानि तीर्थानि तेषां दोषं स्वयं गृहीत्वा संगग्रहणात् पूर्वमतीर्थानि तीर्थीकुर्वंति तर्हि तेषां का गतिरित्यत आह–स्वांतःस्थेन गदाभृतेति तेषां हृदये भगवान् गदां गृहीत्वा प्रकटस्तिष्ठति । अतो गदया आसन्यरूपत्वात् भगवान् साधनं च अपहतपाप्मरूपं "ते ह आसन्यं प्राणमूचु"रित्यत्र यथा सति पाप्मनाशः तथा प्रकृतेऽपीति तीर्थानामपि पापं भगवत्समीपं प्राप्य गच्छतीत्यर्थः । अनेन भगवदाज्ञायामेव तीर्थाटनं कर्त्तव्यमन्यथा भगवतः प्रयासजननात् न कर्त्तव्यमिति भावः । अतोऽत्रैव स्थातव्यमिति फलति ॥ १० ॥ ❀ ❀ एवमागतं कुशलं पृष्ट्वा भगवद्भक्तत्वादयं भगवद्वृत्तांतं ज्ञास्यतीति पृच्छति अपि न इति । विदुरेण सह तथासम्बन्धभावेऽपि अस्माभिः सह संबंध इति न इत्युक्तं भवति विदुरमप्यात्मत्वेन स्वीकृत्य वा सुहृदो मित्राणि तातेतिस्नेहेन संबोधनं तेष्वपि स्नेहबोधनाय कृष्णदेवता इति । सुखवासे हेतुः, अत एव त्वया दृष्टाः बंधुत्वेन लज्जया चेन्न दृष्टास्तर्हि भगवदीयत्वात् श्रुताः स्वपुर्यां द्वारकायां स्वधाम्नि अल्पेनापि विषयेण सुखं भवतीति यदव इति भक्तवंशत्वादपि सुखं सम्भावितम् । अनेन त्रिधापि दुःखं निवारितम् कृष्णदेवतात्वान्नाध्यात्मिकं स्वपुर्यामिति नाधिभौतिकम् एवं संभावितकुशलाः भगवन्मुखान्निश्रिताश्चेत्तदास्माकं सुखमिति प्रश्नाभिप्रायः ॥ ११ ॥ ❀ ❀ एवं स्मरणादिकुशलान्तैः प्रश्नैः पृष्टः सर्वमेव यथाभूतमनुवर्णयति परं मौशलव्यतिरेकेण ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भवद्विधा इत्यत्र । प्रयासजननादिति । तीर्थपापनाशप्रयासजननात् । इदमेव सूचितं विवेकधैर्याश्रयग्रन्थे 'विशेषतश्चेदाज्ञा स्या'दिति पद्येन ॥ १० ॥ ❀ ❀ अपि न इत्यत्र । ज्ञास्यतीति सम्भावनायां लट् । लज्जयेति । अवधूतवेषकृतलज्जया ॥ ११–१२॥

श्रीगिरिधरकृता बालप्रबोधिनी

क्षितिमण्डलं चरद्भिर्वो युष्माभिः कया वृत्त्या वर्तितं कया जीविकया देहनिर्वाहः कृतः ? इह भूतले कानि तीर्थानि जलप्रधानानि क्षेत्रमुख्यानि भगवद्धामानि च युष्माभिः सेवितानि ॥ ९ ॥ ❀ ❀ भवतां च तीर्थपर्यटनं न स्वार्थं किन्तु तीर्थानुग्रहणार्थमेवेत्याह–भवद्विधा इति । विभो हे सर्वथा सर्वसमर्थ भवद्विधाः स्वयमेव तीर्थभूताः, अतस्तीर्थयात्राकृतं पवित्रत्वं नापेक्षितम् । तत्र हेतुमाह–भागवता इति, भगवद्भजनेनैव निवृत्तसर्वदोषा अन्यदोषनिवर्त्तने समर्थाश्च । तर्हि किमर्थं तीर्थपर्यटनं कुर्वन्तीत्यपेक्षायां तीर्थविशुद्ध्यर्थमित्याह–स्वान्तस्थेन गदाभृता भगवता तीर्थान्यपि तीर्थीकुर्वन्ति । वस्तुतः परिशुद्धान्यपि गङ्गादीनि तीर्थानि मलिनजनसम्पर्कान्मलिनानि तानि पुनर्भवद्भक्तसम्बन्धेन विशुद्धानि भवन्ति । यथाच वक्ष्यति नवमे–'किञ्चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम् । मृजामि तदघं क्वाहं राजंस्तत्र विचिन्त्यताम्' इति गङ्गयोक्तो भगीरथ आह–'साधवो न्यासिनः शान्ता धर्मिष्ठा लोकपावनाः । हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद्धरिः' इति ॥ १० ॥ ❀ ❀ अपीति प्रश्ने । हे तात नोऽस्माकं सुहृदो हितचिन्तकाः बान्धवा यदवश्च दृष्टा अथवा स्वपुर्यां द्वारकायां सुखमासते इति श्रुताः किमित्यन्वयः । एवं यदूनां प्रश्ने हेतुमाह–कृष्ण एव देवता येषां ते इति ॥ ११ ॥ ❀ ❀ इत्येवं धर्मराजेनोक्तो विदुरो यदुकुलक्षयं विनाऽनुभूतं दृष्टं श्रुतं च तत्सर्वं क्रमशः समवर्णयदित्यन्वयः ॥ १२ ॥

हिन्दी अनुवाद

आपने पृथ्वीपर विचरण करते समय किस वृत्तिसे जीवन-निर्वाह किया ? आपने पृथ्वीतलपर किन-किन तीर्थों और मुख्य क्षेत्रोंका सेवन किया ? ॥ ९ ॥ ❀ ❀ प्रभो ! आप-जैसे भगवान्के प्यारे भक्त स्वयं ही तीर्थस्वरूप होते हैं, आप लोग अपने हृदयमें विराजमान भगवानके द्वारा तीर्थोंको भी महातीर्थ बनाते हुए विचरण करते हैं ॥ १० ॥ ❀ ❀ चाचाजी ! आप तीर्थयात्रा करते हुए द्वारका भी अवश्य ही गये होंगे । वहाँ हमारे सुहृद् एवं भाई-बन्धु यादवलोग, जिनके एकमात्र आराध्यदेव श्रीकृष्ण हैं, अपनी नगरी में सुखसे तो हैं न ? आपने यदि जाकर देखा नहीं होगा तो सुना तो अवश्य ही होगा ॥ ११ ॥ ❀ ❀ युधिष्ठिरके इस प्रकार पूछनेपर विदुरजीने तीर्थों और यदुवंशियोंके सम्बन्धमें जो कुछ देखा, सुना और अनुभव किया था, सब क्रमसे बतला दिया, केवल यदुवंशके विनाशकी बात नहीं कही ॥ १२ ॥

[1]नन्वप्रियं दुर्विषहं[2] नृणां स्वयमुपस्थितम् । ना[3]वेदयत् सकरुणो दुःखितान् द्रष्टुमक्षमः ॥ १३ ॥
कञ्चित्कालमथावात्सीत्सत्कृतो देववत्सुखम्[4] । भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥
अबिभ्रदर्यमा दण्डं यथावदघकारिषु । यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥
युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम्[5] । भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदुकुलक्षयावर्णने कारणमाह नन्विति ॥ १३ ॥ ❀ ❀ श्रेयस्कृत्तत्त्वमुपदिशन् ॥ १४ ॥ ❀ ❀ ननु शूद्रोऽसौ कथमुपदिशेत् । न ह्यसौ शूद्रः किं तु यमस्तद्रूपेणासीत् । किं तत्र कारणं यमे चात्रागतेऽमुत्र को दंडधर इत्यपेक्षायामाह । अबिभ्रदिति । धृतवानित्यर्थः । माण्डव्यस्य शापात् । तथा हि कचिचोराननुधावन्तो राजभटा माण्डव्यस्य ऋषेस्तपश्चरतः समीपे तान् संप्राप्य तेन सह निबद्ध्यानीय राज्ञे निवेद्य तदाज्ञया सर्वान् शूलमारोपयामासुः । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास । ततो मुनिर्यमं गत्वा कुपित उवाच कस्मादहं शूलमारोपित इति । तेनोक्तं त्वं बाल्ये शलभं कुशाग्रेणाविद्ध्य क्रीडितवानिति । तच्छ्रुत्वा मांडव्यस्तं शशाप बाल्येऽजानतो मे महांतं दंडं यतस्त्वं कारितवानतः शूद्रो भवेति ॥ १५ ॥ ❀ ❀ इदानीं राज्यस्यापकर्षं निगमयति । युधिष्ठिर इति । कुलंधरं वंशधरम् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु निश्चये ॥ १३-१४ ॥ ❀ ❀ अत्राक्षिपति–नन्विति । इत्यर्थ इति । आर्षोऽयं प्रयोग इति भावः । उपदेशश्चायं वैराग्योत्पादनार्थमनौपनिषद एवेति ज्ञेयमन्यथा धृतराष्ट्रस्य तत्त्वज्ञानार्थं तदानीन्तनसनत्सुजातकृतौपनिषदतत्त्वोपदेशो न संगंस्यते । तच्च महाभारतोद्योगपर्वत एवावसेयम् । तथाहि–"धृतराष्ट्र उवाच । त्वं किं न वेद तद्ब्रूयो यन्मे ब्रूयात्सनातनः त्वमेव विदुर ब्रूहि प्रज्ञाशेषोस्ति चेत्तव । विदुर उवाच । शूद्रयोनावहं जातो जातोऽन्यद्वक्तुमुत्सहे । कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम् ॥ ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् ॥ न तेन गर्ह्यो देवानां तस्मादेतद् ब्रवीमि ते ।" इति । ब्राह्मणो ब्राह्मणस्येयं ब्राह्मी तां ब्राह्मणजातिं देवानां गर्ह्यो न । किंतु तन्मध्ये स्वर्गं गतः स्तुत्यो भवति । अन्यथा नरकं गच्छतीति भावः ।

---

१. तत्त्वप्रियम्–इति विजय० । २. प्रा० पा०–दुर्विषह्यं । ३. प्रा० पा०–न्यवेदयत् । ४. प्रा० पा०–स्वकैः । ५. प्रा० पा०–कुलोद्वहम् ।

एतत्सनातनमुन्यानयनम् । वर्षशतं वर्षाणां शते शतानि वा यस्मिन्काले तं, नैरन्तर्ये द्वितीया । यथाश्रुते तु पञ्चवर्षाधिकशतवर्षमवनिस्थितश्रीकृष्णज्येष्ठयुधिष्ठिरपितृव्यस्य तस्य श्रीकृष्णांतर्द्धानानंतरं देहत्यागोक्तिर्वक्ष्यमाणा न संगच्छते । यद्वा शतपदमत्रानियतार्थकं "शताद्या नियतानन्तवाचका अर्थसंगतेः" इत्यभिधानात् । किंचिदधिकानि वर्षाणि शतं चेति संदर्भः । किं च "शतं शतसहस्रं च सर्वमक्षय्यवाचकम् । परिमाणं शतं त्वेतन्नैतदक्षय्यवाचकम्" इति पञ्चाप्सरउपाख्याने श्रीमहाभारतादिपर्वणि । शलभस्तत्कालपूर्वकगतिमान् जीवविशेषः । यतो विना विचारं शूद्रजन्मां दर्दडातस्त्वं शूद्रो भवेति । "अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च" इति मेदिनी । अघकारिणः पापिनस्तेषु ॥ १५ ॥ ❀ ❀ लोकपालाभैरिन्द्रादिलोकपालसमानैः । श्रिया राज्यसंपत्त्या ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

यदुकुलक्षयं कुतो नावर्णयदित्यत्राह नन्विति । ननु हे शौनक ! दुर्विषहं सोढुमशक्यं स्वयमुपस्थितं स्वयमेवोपस्थास्यदप्रियं यदुकुलक्षयात्मकं नावेदयत् कुतः यतः सकरुणः दयावानत एव दुःखितान् दुःखिष्यमाणान्द्रष्टुमक्षमः असहिष्यमाणः ॥ १३ ॥ ❀ ❀ अथ देववदीश्वरवत्सत्कृतो बहुमतः कंचित्कालं ज्येष्ठस्य भ्रातुः धृतराष्ट्रस्य श्रेयस्कृत्सर्वेषां धर्मराजादीनां प्रीतिमावहन्सुखमवात्सीदुवास श्रेयः कुर्वन् प्रीतिं वोढुं चावात्सीदित्यर्थः । भ्रातुः श्रेयस्करणमत्र तस्य मरणज्ञापनपूर्वकं मुक्त्युपायप्रवर्त्तनरूपं विवक्षितम् ॥ १४ ॥ ❀ ❀ कथं तस्य तद्भावनसामर्थ्यमिति शंकाव्युदासाय सर्वप्राणिमृत्युकालज्ञस्तद्दंडधरश्च यो यमः स एवायं विदुर इति वदन् शंकांतरं च निराह अबिभ्रदिति । शापान्मांडव्यशापाद्धेतोर्यमो यावच्छूद्रत्वं विदुररूपं शूद्रभावं दधार तावद्वर्षशतमर्यमा सूर्योऽधिकारिषु पापिषु यथाघं तत्पापानुरूपं दंडमबिभ्रत्कारयामास ॥ १५ ॥ ❀ ❀ युधिष्ठिर इति द्वाभ्यां लब्धं राज्यं येन स युधिष्ठिरः कुलंधरं कुलनिर्वाहकं पौत्रं परीक्षितं दृष्ट्वा इंद्रादिलोकपालसदृशैर्भ्रातृभिः परया श्रिया च मुमुदे ॥१६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्किमिति नावर्णयदिति तत्राह नन्विति ॥ १३ ॥ ❀ ❀ विदुरः किमकार्षीदिति तत्राह कंचिदिति सुखलक्षणं श्रेयः ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य ॥ १४ ॥ ❀ ❀ एवं भगवद्भक्तिज्ञानादिमानयं विदुरो देवेषु कस्यावतार इति तत्राह अबिभ्रदिति । योऽर्यमा वैवस्वतोऽघकारिषु पापकृत्सु यथाघं पापमनतिक्रम्य दण्डमबिभ्रत् शिक्षामकरोत्पापफलमभोजयदित्यर्थः, स यमो मांडव्यशापाद्यावद्वर्षशतं तावच्छूद्रत्वं बभारेत्यन्वयः । मांडव्यो नाम कश्चिदृषिः कस्मिंश्चिन्नदीतीरे तपश्चरंस्तत्र कस्माच्चिन्नगराच्चौर्यं गृहीत्वागतैश्चोरैः सहानुधावद्भिर्नगरपालैरज्ञानाद्गृहीत्वा राज्ञे निवेद्य तदनुज्ञया शूले समारोपितोऽभूत् । तत्रापि शूलैः तपः कुर्वंतमपि जाज्वल्यमानं दृष्ट्वा जनैर्निवेदितो राजा ससंभ्रममुपागम्य शूलादवरोप्य प्रसाद्य प्रस्थापयामास । कोपेन जाज्वल्यमानेन यमसमीपं गतेन मुनिना कस्मादहं शूलमारोपित इति पृष्टो यमः तस्मात् शापमादातुकामो बाल्यावस्थायां काचिन्मक्षिका शूले समारोपिता तेन दोषेण अयमवस्थाविशेषः प्राप्त इति प्राह । तस्मै क्रुद्धो मुनिः शूद्रो भवेति शशाप तमिति मांडव्यशापः ॥ १५ ॥ ❀ ❀ अथ युधिष्ठिरः किं चकारेति तत्राह युधिष्ठिर इति । इंद्रादिलोकपालसमानैर्भीमादिभ्रातृभिर्लब्धराज्यो युधिष्ठिरः कुलंधरं पौत्रं दृष्ट्वा परमसम्पदा मुमुद इत्येकान्वयः । कुलं धारयतीति कुलंधरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्विति । अत्रान्योऽपि दुःखशङ्कया नाकथयत् इति ज्ञेयम् ॥ १३ ॥ ❀ ❀ श्रेयस्कृत् हितोपदेष्टा ॥ १४ ॥ ❀ ❀ नन्वसौ यम एव विदुरत्वेन जातस्य चास्य लोकेऽस्मिन् श्रेयस्कृत्त्वमेव श्रूयते न तु यमलोके यमरूपेण दण्डकृत्त्वमपि । तर्हि तत्र दण्डः कथमसैत्सीत् तत्राह अबिभ्रदिति । वर्षाणि कतिचिदधिकानि शतञ्च वर्षशतम् ॥ १५-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

श्रेयस्कृत् श्रेयः कर्त्तुम् ॥ १३ ॥ ❀ ❀ न च धृतराष्ट्रादयं कनिष्ठत्वान्न्यूनो मन्तव्यः, साक्षाद्धर्म्मराजस्यैव माण्डव्यशापेन शूद्रतयावतीर्णत्वात् । ननु तावदमुत्र को दण्डधरस्तत्राह । अबिभ्रत् आर्षप्रयोगः, धृतवानित्यर्थः । तथाहि कांश्चिच्चौराननुधावन्तो राजभटा माण्डव्यस्य तपश्चरतः समीपे तान् संप्राप्य तेन सह निबध्यानीय राज्ञे निवेद्य तदाज्ञया सर्व्वानेव शूलमारोपयामासुः । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य्य प्रसादयामास । ततो मुनिर्यमं गत्वा कुपित उवाच । कस्मादहं शूलमारोपित इति । तेनोक्तं त्वं बाल्ये कुशाग्रेण शलभमाविध्य क्रीडितवानिति । तत् श्रुत्वा माण्डव्यस्तं शशाप । बाल्ये अजानतो मे महान्तं दण्डं कारितवान् अतस्त्वं शूद्रो भवेति ॥ १५-१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र कारणमाह नन्विति ॥ १३ ॥ ❀ ❀ भ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् कल्याणं विवक्षुः ॥ १४ ॥ ❀ ❀ तादृशसामर्थ्यं तस्य सूर्यपुत्रत्वादस्त्येवेति सूचयति अबिभ्रदिति । मांडव्यशापाद्यावद्यमः शूद्रत्वं दधार तावद्वर्षशतमर्यमा सूर्योऽघकारिषु दंडं दधार ॥ १५-१६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

"अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी"ति सभारूपे समाजे धर्मराजेन पृष्टः कथं नोक्तवानित्याशंक्याह नन्वप्रियमिति । सर्वं पृष्टमेव वक्तव्यं न त्वप्रियं "सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः" इति वाक्यात् पृष्टोऽपि सत्यमपि अप्रियं न वक्तव्यं तत्रापि दुर्विषहं यस्मिन् श्रुते श्रोतापि म्रियेत अतो धर्मिनाशकं श्रवणं न कारणीयमिति । तर्हि कथमग्रिमकार्यसम्पत्तिरत आह–नृणां स्वयमुपस्थितमिति स्वत एव जनमुखादेव ज्ञास्यन्ति किं स्ववचनेनेति, किंच करुणावान् सर्वथा न वदेत् दुःखितान् द्रष्टुमक्षमः स्वकार्यं ते मा जानंत्विति गुप्तभावः ॥ १३ ॥ ❀ ❀ स्वावसरप्रतीक्षया तत्रैव स्थित इत्याह कंचित्कालमिति । अथ प्रश्नसमाप्त्यनंतरं देववत् यथैव वदन्ति कुर्वन्ति तदेव मन्यते विश्वासार्थं स्वसुखं ज्ञापयन् पूजितस्तिष्ठतीत्यर्थः स्थितौ हेतुमाह । भ्रातुर्ज्येष्ठस्य धृतराष्ट्रस्य श्रेयस्कृत् । वैराग्यादिसंसाधनेन मोक्षसाधकः सर्वेषां प्रीतिमावहन्निति विश्वासार्थं सम्भावितदुःखदूरीकरणार्थं वा ॥ १४ ॥ ❀ ❀ नन्वस्य कनिष्ठस्य अयथाजातस्य कथं मोक्षसाधकत्वमनधिकारात्तत्राह–अबिभ्रदिति । उत्तरोत्तराज्ञानात् पूर्वं बलिष्ठितेति देहेंद्रियप्राणान्तःकराणानां व्यवस्था, यथात्मना ज्ञायन्ते अयमहमिति तदा मन्ये धर्मो दुर्बलाः, अत एव मुकुंटादेरप्युपदेष्टृत्वं पूर्णज्ञानवानपि सर्वत्राविचारितान्नभक्षणात् काकत्वं प्राप्तः देहत्यागसमये काकचर्यया च । तस्मान्नायं कनिष्ठभ्राता न वा शूद्रः, किंतु यमः "माण्डव्यशापात् भगवान् प्रजासंयमनो यमः । भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतादि"ति वक्ष्यति । तर्हि क इदानीं यमलोके अधिकारीत्याशंक्याह अबिभ्रदिति "विवस्वानर्यमा पूषे" त्यादिद्वादशादित्याः, तत्र द्वितीयोऽर्यमा स यावच्छूद्रत्वं दधार मांडव्यशापाद्वर्षशतं तावदर्यमा अधिकारं कृतवान् यथावत् पापकारिषु । शतवर्षानंतरं शूद्रत्वमत उपदेशेऽपि न दोषः ॥ १५ ॥ ❀ ❀ युधिष्ठिरस्य विदुरविस्मरणार्थं किंचिद्राज्यभोगमाह युधिष्ठिर इति । युधिष्ठिरोराज्यं लब्ध्वा पौत्रं च राज्ययोग्यं दृष्ट्वा भ्रातृभिः इंद्रादितुल्यैः सहितः श्रिया परया इंद्रदुर्लभया वा मुमुदे "राज्यं वंशो भ्रातरश्च धनं चाज्ञानहेतवः" ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

नन्वप्रियमित्यत्र । स्वकार्यमिति विदुराभिप्रेतं कार्यम् ॥ १३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यदुकुलक्षयं कुतो नावर्णयदित्यपेक्षायां 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः' इति वाक्यात् सत्यमप्यप्रियं न वक्तव्यमित्याह–नन्विति । निश्चयेन नृणां स्वयं प्रारब्धवशादुपस्थितं दुर्विषहं सोढुमशक्यमप्रियं स्वयं दुःखितान् द्रष्टुमक्षमोऽसमर्थश्चेन्नावेदयेदित्यन्वयः । तत्रासामर्थ्येहेतुमाह–सकरुण इति, दयावानित्यर्थः ॥ १३ ॥ ❀ ❀ अथानन्तरं स्वकैर्देववदीश्वरवत् सत्कृतो बहुमतः सर्वेषां युधिष्ठिरादीनां प्रीतिमावहन् ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् ज्ञानवैराग्योपदेशेन श्रेयस्कर्त्तुं कञ्चित्कालं तत्रैवावात्सीदित्यन्वयः । 'देववत्सुखम्' इति तु पाठान्तरम् ॥ १४ ॥ ❀ ❀ ननु शूद्रोऽसौ कनिष्ठश्च कथं धृतराष्ट्रमुपदिशेदित्याशङ्कायां नासौ शूद्रः किन्तु धर्माधर्मनिर्णेता साक्षाद्यम एव विदुररूपेणावतीर्णः । किं तत्र कारणं तस्मिंश्चात्रागतेऽमुत्र को वा दण्डधर इत्यपेक्षायामाह–अबिभ्रदिति । शापात् माण्डव्यस्यर्षेः शापाद्धेतोर्यमो यावद्वर्षशतपर्यंतं शूद्रत्वं विदुररूपं दधार तावदघकारिषु पापिषु अर्यमा पितृराजो यथावद्यथोचितं दण्डमबिभ्रत् कारयामासेत्यन्वयः । अत्रेयमाख्यायिका–कश्चिच्चौराननुधावन्तो राजभटा माण्डव्यस्य तपश्चरतः समीपे तान्सम्प्राप्य तेन सह निबध्याऽऽनीय राज्ञे निवेद्य तदाज्ञया सर्वानेव शूलमारोपयामासुः, ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास, ततो मुनिर्यमं प्रति गत्वा कुपित उवाच कस्मादहं शूलमारोपित इति, तेनोक्तं त्वं बाल्ये कुशाग्रेण शलभमाविध्य क्रीडितवानिति, तत् श्रुत्वा माण्डव्यस्तं शशाप बाल्येऽजानतो मे यतो महादण्डं कारितवान् अतस्त्वं शूद्रो भवेति ॥ १५ ॥ ❀ ❀ यद्यपि 'निस्स्पृहः सर्वकामेभ्यः कृष्णपादाब्जसेवया' इत्यादिना युधिष्ठिरस्य विषयेष्वनासक्तिर्दर्शिता तथापि भगवदिच्छायाः प्रबलत्वात् तस्यापि विषयासक्तिर्जाता । तां दर्शयति–युधिष्ठिर इति । लब्धं राज्यं येन स युधिष्ठिरः कुलन्धरं कुलनिर्वाहकं वंशप्रवर्त्तकं वा पौत्रं परीक्षितं दृष्ट्वा इन्द्रादिलोकपालसदृशैर्भ्रातृभिः परया श्रिया च मुमुदे इत्यन्वयः ॥ १६ ॥

हिन्दी अनुवाद

करुणहृदय विदुरजी पाण्डवोंको दुःखी नहीं देख सकते थे । इसलिये उन्होंने यह अप्रिय एवं असह्य घटना पाण्डवोंको नहीं सुनायी; क्योंकि वह तो स्वयं ही प्रकट होनेवाली थी ॥ १३ ॥ ❀ ❀ पाण्डव विदुरजीका देवताके समान सेवा-सत्कार करते थे । वे कुछ दिनोंतक अपने बड़े भाई धृतराष्ट्रकी कल्याण-कामनासे सब लोगोंको प्रसन्न करते हुए सुखपूर्वक

हस्तिनापुरमें ही रहे ॥ १४ ॥ विदुरजी तो साक्षात् धर्मराज थे, माण्डव्य ऋषिके शापसे ये सौ वर्षके लिये शूद्र बन गये थे।[1] इतने दिनोंतक यमराजके पदपर अर्यमा थे और वही पापियोंको उचित दण्ड देते थे ॥ १५ ॥ ❀ ❀ राज्य प्राप्त हो जानेपर अपने लोकपालों-सरीखे भाईयों के साथ राजा युधिष्ठिर वंशधर परीक्षित् को देखकर अपनी अतुल सम्पत्ति से आनंदित रहने लगे ॥ १६ ॥

> एवं गृहेषु सक्तानां प्रमत्तानां तदीहया। अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १७ ॥
> विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत। राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥ १८ ॥
> प्रतिक्रिया[2] न यस्येह कुतश्चित्कर्हिचित्प्रभो। स एव भगवान् कालः सर्वेषां नः[3] समागतः ॥ १९ ॥
> येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि। जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदीहया गृहव्यापारेण प्रमत्तानाम्। अत्यक्रामदायुष्कालोऽतिक्रांतः। यद्वा तानभ्यभवदित्यर्थः ॥ १७ ॥ ❀ ❀ अभिप्रेत्य ज्ञात्वा ॥ १८ ॥ ❀ ❀ ननु तत्प्रतीकारः क्रियतां किं निर्गमनेन तत्राह प्रतिक्रियेति। सर्वेषामिति। यैः प्रतिकर्तव्यं तेषामपीत्यर्थः ॥ १९ ॥ ❀ ❀ कथं धनादिवियोगः सोढुं शक्योऽत आह येन चेति। अभिपन्नोऽभिग्रस्तः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं युधिष्ठिरपालनलब्धसुखप्रकारेण गृहेषु सक्तानां जनानां न तु पांडवानाम्। "किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः। अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे" इत्युक्तेः। "येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इति वक्ष्यमाणत्वाच्च। अतो विदुरोऽपि धृतराष्ट्रं प्रत्येव तथोपदिदेश न तान्प्रतीति। परमदुस्तरः यौवनादिरूपस्तत्र कामाद्यैराकुलीक्रियत इति भावः। "कालो न यातो वयमेव याताः" इति भर्तृहर्युक्तेः कालस्यातिक्रमणं न संगच्छते इति चेदाह-यद्वेति। इत्यर्थ इति। उपसर्गवशादत्र क्रम्यतेरभिभवोर्थ इति भावः ॥ १७ ॥ ❀ ❀ राजन्निति। त्वत्तः पूर्वतनराज्ञामयमेवांते धर्मोऽतस्त्वमपि तं गृहाणेति भावः। तत्कालातिक्रमणम् ॥ १८ ॥ ❀ ❀ प्रतीकारो निवृत्त्युपायः। इत्यर्थ इति। यदि कश्चिदवशिष्येत्तदा तु सोऽपि भवेदेवेति भावः। कालस्याप्रतिक्रियत्वं तु "बलेन सचिवैर्बुद्ध्या मंत्रैरोषधिभिस्तथा। सामादिभिरुपायैश्च कालं नात्येति वै जनः" इत्यष्टमस्कन्धोक्तेः। "नांतकस्य क्रिया कापि" इति गारुडोक्तेश्च। हे प्रभो इति। प्रगता भा प्रतिभा यस्येति प्रभुः। पृषोदरादित्वमाश्रित्य भाशब्दस्य भुरादेशः। तव तु बुद्धिर्न स्थिरा यतोऽप्रतिक्रियस्यापि प्रतिक्रियामीहस इति भावः ॥ १९ ॥ ❀ ❀ येन कालेन प्रिया धनादयः प्रियतराः स्त्र्यादयः प्रियतमाः प्राणाः। यतोऽग्निप्रदीप्तगृहांतगर्तधनस्त्र्याद्यादानाय तत्र प्रवेशं न कश्चित्करोतीत्यतः प्राणानां प्रियतमत्वमिति ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

एवं गृहेष्वासक्तानां तदीहया गार्हीयचेष्टया प्रमत्तानामविदितमृत्युकालानां कर्त्तरि षष्ठी, तैरविज्ञातः परमः सर्वं वशीकुर्वन्नत एव दुस्तरः कस्याप्यवश्यः कालोऽत्यक्रामत् अतिक्रांतवान् तदीहया अविज्ञात इति वान्वयः। युधिष्ठिरादीनां विषयानुभवकालो व्यतिक्रांतो बभूवेत्यर्थः ॥ १७ ॥ ❀ ❀ भ्रातुः श्रेयस्क्रियाप्रकारं प्रपंचयति विदुर इत्यादिभिर्दशभिः। तं कालातिक्रममभिप्रेत्य विदुरो धृतराष्ट्रमभाषत तदेवाह राजन्नित्यादिसार्द्धैर्नवभिः। हे राजन्नितः शीघ्रं निर्गम्यतां त्वयेति शेषः, आगतमुपस्थितमिदं भयं पश्यालोचय ॥ १८ ॥ ❀ ❀ किं तत्तत्राह प्रतिक्रियेति। कुतश्चिदपि हेतोः कदाचिदपि यस्य भयस्य प्रतीकारः निवारणं नास्ति स एष भगवान् भगवन्नियाम्यः सर्वेषां नोऽस्माकं कालो मृत्युकालः समागतः ॥ १९ ॥ ❀ ❀ ग्रहासक्तिं त्याजयितुं कालं विशिंषन्नाह येनेति। अयं परिदृश्यमानो जनः येन कालेनाभिपन्नः अभिपद्यमानः प्रियतमैर्निरतिशयप्रियैः प्राणैरपि सद्यो विमुच्येत त्यज्येत, अन्यैः प्राणानुबंधिभिर्धनादिभिर्मुच्येतेति किमु वक्तव्यं स कालः समागत इत्यन्वयः ॥ २० ॥

---

१. एक समय किसी राजाके अनुचरोंने कुछ चोरोंको माण्डव्य ऋषिके आश्रमपर पकड़ा। उन्होंने समझा कि ऋषि भी चोरीमें शामिल होंगे। अतः वे भी पकड़ लिये गये और राजाज्ञासे सबके साथ उनको भी सूलीपर चढ़ा दिया गया। राजाको यह पता लगते ही कि ये महात्मा हैं–ऋषिको सूलीसे उतरवा दिया और हाथ जोड़कर उनसे अपना अपराध क्षमा कराया। माण्डव्यजीने यमराजके पास जाकर पूछा–'मुझे किस पापके फलस्वरूप यह दण्ड मिला?' यमराजने बताया कि 'आपने लड़कपनमें एक टिड्डीको कुशकी नोकसे छेद दिया था, इसलिए ऐसा हुआ।' इसपर मुनिने कहा—'मैंने अज्ञानवश ऐसा किया होगा' उस छोटेसे अपराधके लिये तुमने मुझे बड़ा कठोर दण्ड दिया। इसलिये तुम सौ वर्षतक शूद्रयोनिमें रहोगे!' माण्डव्यजीके इस शापसे ही यमराजने विदुरके रूपमें अवतार लिया था। २. प्रा० पा०–प्रतिक्रियां न पश्येऽहं कुतश्चित्। ३. प्रा० पा०–वः।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ययौ द्वारवतीमित्युक्तं श्रीकृष्णप्रयाणशेषमाह अथेति । अथ विभुर्व्याप्तोऽच्युत आगमिष्यामीत्यामंत्र्य संभाष्य यांतम् अनुगतान् बंधून्निवर्त्यार्जुनादियुक्तो हयैर्युक्तेन रथेन द्वारवतीं ययावित्येकान्वयः ॥ १६ ॥ ❀ ❀ अधुना धृतराष्ट्रस्य स्वर्गप्राप्तिप्रकारं वक्तुमुपक्रमते एवमिति । एवमुक्तप्रकारेण हरिपरायणानां पांडवादिवत् यः काल एकमपि क्षणमवंध्यतां नेतुं शक्यः स कालो हरिविमुखानां गृहेषु पुत्रमित्रादिलक्षणेषु केवलं शिश्नोदरंभरतया सक्तानां गृहपोषणधनान्वेषणप्रयत्नैः प्रमत्तानां विस्मृतपरमात्मतत्त्वानामत एवाविज्ञातोऽत्यक्रामदतिक्रांतोऽभूदित्येकान्वयः ॥ १७ ॥ ❀ ❀ तत्कालस्यातिक्रमणं विदुर इति नाम सार्थं साधयन् निर्गम्यतां गृहादिति शेषः, प्राप्तमिदं मरणभयं पश्येत्यन्वयः ॥ १८ ॥ ❀ ❀ यस्य कालस्य कुतश्चित्कारणात्कर्हिचिदपि प्रतिक्रिया निवर्तनक्रिया नास्ति स एष भगवान् कालरूपो नः सर्वेषां समागतः शरीरवियोगकरणाय प्राप्त इत्यन्वयः ॥ १९ ॥ ❀ ❀ इतोऽपि निर्गमनमुचितमित्याह येनेति । इह जीवलोकेन कालरूपिणा हरिणा अभिपन्नो ग्रस्तः अयं जनोतिशयेन हृदयंगमैः प्राणैरपि वियुज्येतान्यैर्धनादिभिर्वियुज्येत इति किमुतेत्यन्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं युधिष्ठिरस्य पालनलब्धसुखप्रकारेण गृहेषु सक्तानां प्रमत्तानां जनानां न तु पांडवानाम्–'किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विज । अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥' इत्यादेः–'येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः' इत्यादेश्च । अत एव विदुरोऽपि धृतराष्ट्रम् प्रत्येव तथोपदिदेश न तु तान् प्रतीति ॥ १७-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गृहेषु सक्तानामिति युधिष्ठिरादिभ्योऽन्येषामेव निन्देयं तात्कालिकजनानां ज्ञेया । तेषां 'क्षुधितस्य यथेतरे' इति दृष्टान्तेन तादृशसम्पदादिष्वपि अनासक्तिः प्रपञ्चिता ॥ १७-१८ ॥ ❀ ❀ सर्व्वेषामिति यैः प्रतिकर्त्तव्यं तेषामपीत्यर्थः ॥ १९ ॥ ❀ ❀ येन मृत्युरूपेण कालेनाभिपन्नो ग्रस्तः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं गृहेषु सक्तानां धृतराष्ट्रादीनां तदीहया गृहेहया प्रमत्तानां कालः अत्यक्रामत् जीवनसमयः समाप्तप्रयोजनो जात इत्यर्थः । कथंभूतः अविज्ञातः दुर्लक्ष्यः परमदुस्तरः परमैर्ब्रह्मादिभिरपि दुस्तरः ॥ १७ ॥ ❀ ❀ अभिप्रेत्यालक्ष्य ॥ १८ ॥ ❀ ❀ भगवान् भगवच्छक्तित्वाद्भगवच्छब्दवाच्यः ॥ १९ ॥ ❀ ❀ अभिपन्नः अभिपद्यमानः ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

ततः किमत आह एवं गृहेष्विति । ते हि भगवति विद्यमान एव पौत्रे प्रौढे जाते भगवंतं पृष्ट्वा पौत्रं राज्ये प्रतिष्ठाप्य निरंतरं भगवच्चिंतकाः भगवत्सत्रदीक्षिता भवितुं युक्ताः । तत्तु तेषां न राज्यदोषात् वृत्तमित्याह–एवं गृहेषु सक्तानामिति षट्त्रिंशद्वर्षपर्यंतं राज्यं कृतं, षोडशवर्षानंतरमेव राज्ययोग्यः पुत्रः, तथापि एवं पूर्वोक्तप्रकारेण गृहेषु आसक्तानां गृहेतिकर्त्तव्यतया च प्रमत्तानां स्वकार्ये असावधानानामज्ञात एव कालो गतः । तैर्ज्ञातमपैव राज्ये उपविष्टमिति ॥ १७ ॥ ❀ ❀ एतत् स्वरूपं कियत्कालवासेन विदुरो ज्ञातवान्–एते स्वार्थे प्रमत्ताः कालग्रस्ता भविष्यंतीति अन्ये चेदेते भक्ता भवेयुः तदा अयोध्यावत् सर्वमेव नगरं वैकुंठं गच्छेत् तदा धृतराष्ट्रस्य कर्त्तव्यं नावशिष्येत, तत्तु नास्तीति निश्चित्य कलिप्रवेशे बुद्धिभ्रंशे अन्योऽन्यमारणेन धृतराष्ट्रस्य च भीमसेनमहद्भयं भविष्यतीत्याशंक्य धृतराष्ट्रबोधार्थं प्रवृत्त इत्याह विदुर इति । कालस्य परमदुस्तरत्वकथनात् तादृशानामपि कालांशानां बहूनामतिक्रमात् सर्वनाशककालमध्ये पतितो धृतराष्ट्र इत्यभिप्रेत्य तं प्रत्याह राजन्निर्गम्यतामिति । राजानो हि कालस्य शीघ्रं भक्ष्याः राज्येनाधर्मबाहुल्यात् शीघ्रनिर्गमने हेतुः पश्येदं भयमागतमिति, यथा कालस्य भयनामा कश्चित् चतुर्थस्कंधे वक्तव्यः । स इदानीं भगवति निर्गते तदीयानां स्वतोऽनिर्गमने अयमधिकारी सर्वान् भक्षयति पत्नीरिव । अथवा ये पूर्वं भक्ष्यत्वेनैव स्थिताः भगवद्दृष्ट्या च भक्षितास्तानिदानीं भक्षयितुमागतः । अग्नेर्वैधदीक्षान्यायेन ज्ञानसंचारसामर्थ्यं बोधयितुं स्वसामर्थ्यं बलेन तं प्रदर्शयन्नाह आगतमिति ॥ १८ ॥ ❀ ❀ तर्हि पूर्ववदिदानीमपि प्रतीकारः कर्त्तव्य इत्याशंक्याह भगवति गते अन्यस्मात् कुतश्चिदपि यस्य प्रतिक्रिया नास्ति पूर्वमप्येवं व्यवस्था तदाह कर्हिचिदिति । प्रभो ! इति संबोधनेन अन्यत्र प्रभुत्वं चलति नात्रेत्युपहासः । तर्हि किमस्मानेव भक्षयितुमागतः उत सर्वान्, आद्ये यथा सर्वे न प्रतीकारं कुर्वंति तथास्माभिरपि न कर्त्तव्यः । कथं न प्रतीकार इत्याशंक्याह स एवेति । यः पूर्वं कृष्णाख्यः त्वत्पुत्रादीनुपसंहृतवान् स एवेदानीं त्वामुपसंहर्त्तुमागतः, न च स गत इति । मंतव्यं भगवत्त्वात् पूर्वमन्येन रूपेण स्थितः सांप्रतमन्येन नामस्वरूपत एव आकृतिमात्रं भिद्यत इत्याह काल इति । कलयति सर्वानाकलयतीति । ननु पूर्वं यथा पाण्डवा उर्वरिता भविष्यंति ततश्च तदाश्रयेण वयमपि जीविष्याम इत्याशंक्याह सर्वेषां नः समागत इति पूर्वस्माद्वैलक्षण्यम् ॥ १९ ॥ ❀ ❀ इदानीं मामपि ग्रहीष्यति तर्हि किं विधेयमित्याशंक्य येन

दोषेण स ग्रसति स दोषः परिहार्य इति वक्तुमहंतां ममतां त्यजेदित्याभिप्रायेणाह येन चैवाभिपन्नोऽयमिति, कालस्त्वात्मानं वस्तुतो न ग्रसति आत्मत्वात् परं स्वनिष्पादितैर्यदि प्रविशति तदा पेशकीटवत् तमपि भक्षयति । ततश्च देहेंद्रियादौ अहंतादिस्त्याज्यः, नन्वेते रक्षकाः कथं त्याज्या इत्याशंक्याह प्राणैरिति । यावत्स नागतः तावदेवं व्यवस्था । तस्मिन्नागते तु सर्वदा रक्षकाः प्रियाः प्राणा अपि त्यज्यंते चैवेति रोगादिसामग्री अवश्यादिगमनं चोक्तम्, अत्यंतं प्रियाः प्राणा अपि त्यज्यंते, यन्मूलकाः सर्वे तेषां त्यागे को विचार इत्याह–किमुतेति तस्मिन्नागते पूर्वं महता प्रयासेन पोषिता अप्येते त्यक्त्वा गच्छंतीत्यर्थः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एवं गृहेष्वित्यत्र । भगवन्तं दृष्ट्वेति । द्वारकायां गत्वा तत्र दृष्ट्वा । अन्यथा चेदिति । यदि स्वार्थे प्रमत्ता न भवेयुरित्यर्थः ॥ १७ ॥ ❀ ❀ विदुर इत्यत्र । कालस्येति कलियुगरूपस्य । तत्र लिङ्गं परमदुस्तरत्वं बोध्यम् ॥ १८ ॥ ❀ ❀ राजन्नित्यत्र । पत्नीरिवेति । अष्टावक्रशप्ता भौमाहृताः कुशपत्नीरिव । तासां तथात्वं पाद्मोत्तरखण्डे प्रसिद्धम् । पूर्वमिति । विश्वरूपप्रदर्शनावसरे 'अमी च त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ती'ति भयलिङ्गात् । वैधदीक्षान्यायेनेति । यथा वैधदीक्षायां गुरुणा स्वनिष्ठं ज्ञानं शिष्ये सञ्चार्यते, यथोपकोसलविद्यायां 'ब्रह्मविद इव सौम्य ते मुखं भाति, को नु त्वानुशशासे'त्यादि । यथा च तान्त्रिकदीक्षायां गुरुणा देवता स्वस्मिन् सन्निधाप्य शिष्ये सञ्चार्यते, तेन न्यायेनेत्यर्थः । अन्यत्रेति पाण्डववञ्चनादौ । द्वितीय इति । आद्ये ॥ १९ ॥ ❀ ❀ येन चैवेत्यत्र । स्वनिष्पादित इति । कालनिष्पादितः ॥ २० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमुक्तप्रकारेण गृहेण सक्तानां तदीहया गार्हीयचेष्टया प्रमत्तानां विस्मृतकर्त्तव्यानां परमदुस्तरो ब्रह्मादिभिरप्यप्रतिहतवेगः कालः साधनानुष्ठानकालस्तद्विना व्यर्थो यातीत्यज्ञात एव अत्यक्रामत् अतिक्रान्तवानित्यन्वयः ॥ १७ ॥ ❀ ❀ भ्रातुः श्रेयस्कृदिति यदुक्तं तत्प्रकारं प्रपञ्चयति–विदुर इत्यादिभिर्दशभिः । तं कालातिक्रममभिप्रेत्य ज्ञात्वा विदुरो धृतराष्ट्रमभाषत । तद्भाषणमेव दर्शयति–राजन्नित्यादिभिः सार्द्धैर्नवभिः । हे राजन् इतः शीघ्रं त्वया निर्गम्यताम् । कुत इत्यत आह–आगतमुपस्थितमिदं भयं पश्य आलोचय ॥ १८ ॥ ❀ ❀ तर्हि तत्प्रतिकारः क्रियतां किं निर्गमनेनेत्यत आह–प्रतिक्रियेति । अन्यत्र प्रभुत्वं चलति नात्रेति सूचयन् सम्बोधयति–हे प्रभो इति । इह संसारे कुतश्चिद्ब्रह्मादिभ्योऽपि कर्हिचिदपि यस्य प्रतिक्रिया निरासो नास्ति स एष विनाशकालो नोऽस्माकं सर्वेषां समागत इत्यन्वयः । कुत एवम्प्रभावोऽयमित्यपेक्षायामाह–भगवानिति, भगवदवतारतया द्वितीयस्कन्धे वक्ष्यमाणत्वात् ॥ १९ ॥ ❀ ❀ नन्वागच्छतु स तथापि तद्भयेन कथं धनादिवियोगः सोढव्य इत्याशङ्क्य तत्परवशतया धनादिवियोगसहनमावश्यकमित्याह–येनेति । येन कालेन अभिपन्नो ग्रस्तोऽयं परिदृश्यमानो जनः प्रियतमैरपि प्राणैः सद्यो वियुज्येत, अन्यैः प्राणानुबन्धिभिर्धनादिभिर्वियुज्येतेति किमुत वक्तव्यमित्यन्वयः ॥ २० ॥

हिन्दी अनुवाद

इस प्रकार पाण्डव गृहस्थके काम-धंधोंमें रम गये और उन्हींके पीछे एक प्रकारसे यह बात भूल गये कि अनजानमें ही हमारा जीवन मृत्युकी ओर जा रहा है; अब देखते-देखते उनके सामने वह समय आ पहुँचा जिसे कोई टाल नहीं सकता ॥ १७ ॥ ❀ ❀ परन्तु विदुरजीने कालकी गति जानकर अपने बड़े भाई धृतराष्ट्रसे कहा–'महाराज! देखिये, अब बड़ा भयंकर समय आ गया है, झटपट यहाँ से निकल चलिये ॥ १८ ॥ ❀ ❀ हम सब लोगोंके सिरपर वह सर्वसमर्थ काल मँडराने लगा है, जिसके टालनेका कहीं भी कोई उपाय नहीं है ॥ १९ ॥ ❀ ❀ कालके वशीभूत होकर जीवनका अपने प्रियतम प्राणोंसे भी बात-की-बातमें वियोग हो जाता है; फिर धन, जन आदि दूसरी वस्तुओं की तो बात ही क्या है ॥ २० ॥

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः । आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥ २१ ॥
अहो महीयसी जन्तोर्जीविताशा यया भवान् । भीमापवर्जितं पिण्डमादत्ते गृहपालवत् ॥ २२ ॥
अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः । हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥ २३ ॥
तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः । परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्रावस्था न मतिदैन्यमिति दर्शयन् वैराग्यमुत्पादयति । पितृभ्रात्रिति सप्तभिः । आत्मा च देहः ॥ २१ ॥ ❀ ❀ येन पुत्रा हतास्तेन भीमेन दत्तं पिण्डं गृहपाल इव । गृहपालः श्वा ॥ २२ ॥ ❀ ❀ निसृष्टः प्रक्षिप्तः । गरो विषम् । दूषिताः अवमताः । तद्दत्तैरन्नादिभिर्लब्धैरसुभिः कियत्प्रयोजनम् । न किंचिदित्यर्थः ॥ २३ ॥ ❀ ❀ तस्यापि तवैवं दैन्यमनुभवतोऽपि परैति क्षीयतेऽत एव धीरो भवेति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपाससे । शवत्रार्षः । न श्रेयस्साधनायेहसे मृतस्यापि तव परलोकसुखाप्तिर्न भविष्यतीति भावः ॥ २१ ॥ ❀ ❀ परलोके सुखं नेति चेत्तर्हीहैव दीर्घजीवनमस्त्वित्यभिप्रायश्चेत्तर्हि त्वं निरपत्रप इत्याह–अहो इति । जीविताशा बहुकालं जीवामीतीच्छा महीयसी बृहत्तमाऽहो अज्ञानातिरेकः । यया जीविताशया भीमेनावर्जितं तिरश्चीनहस्तेन दत्तं पिण्डमन्नमादत्से ॥ २२ ॥ ननु भीमस्य कनिष्ठपुत्रत्वेन मत्पुत्रत्वात्तद्दत्तान्नेन शरीरपोषणं नानुचितमिति चेत् । सत्यम् । विषदानादिना त्वयापराद्धत्वात्तद्दत्तमन्नं विषोपममित्यभिप्रेत्याह–अग्निरिति । इत्यर्थ इति । तद्दत्तान्नपुष्टेर्लज्जाकरत्वान्मृतिरेव गरीयस्यतो निर्गम्यतामिति सम्बन्धः ॥ २३ ॥ ❀ ❀ ननु युधिष्ठिरादीनां मयि तात्पर्यान्न निर्जिगमिषामीति चेत्तत्राह–तस्येति । कृपणस्य परान्नादननिरतस्य वाससी इव "ईदूदेद्द्विवचनं प्रगृह्यम्" इति प्रगृह्यत्वादसन्धिः । वाससी अन्तरीयोत्तरीये इति दृष्टान्तश्च द्विवचनदृष्ट्या दार्ष्टान्तिकस्य देहस्यापि स्थूलसूक्ष्मभेदेन द्वितयात्मकस्य जीर्णत्वं वलिपलितत्वादिकं स्थूलदेहस्यान्ध्यबाधिर्यादिकं च सूक्ष्मदेहस्य जीर्णत्वमिति ज्ञेयम् ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

विरक्तिमुत्पदयितुं तस्यावस्थां वर्णयति पित्रित्यादिभिश्चतुर्भिः । तत्र पित्रादयो हताः मृताः वयो यौवनं चापगतमात्मा देहो जरया च ग्रस्तः, तथापि परेषां शत्रूणां गेहमुपाससे जीवनार्थमिति शेषः ॥ २१ ॥ ❀ ❀ जीविताशां त्याजयितुं विस्मयमान आह–अहो जंतोर्जीविताशा महीयसी बलीयसी यया जीविताशया भवान् भीमेनावर्जितं परिभूय दत्तं पिंडं कवलमादत्ते स्वीकरोतीति यावत् । गृहपालः श्वा तद्वत् ॥ २२ ॥ ❀ ❀ पिंडस्य भीमापवर्जितत्वख्यापनाय भीमादीनां शत्रुत्वं प्रख्यापयंस्तदपवर्जितपिंडेन प्राणधारणमतिहीनमित्याह अग्निरिति । येषामित्यस्याग्न्यादिभिः प्रत्येकमन्वयः । येषामग्निर्निसृष्टः लाक्षागृहेष्विति शेषः, येषां गरो विषं दत्तं येषां च दाराः द्रौपदी दूषिताः कचग्रहणवस्त्रापहरणादिभिर्दूषिताः येषां च धनं क्षेत्रं राज्यं चापहृतं सर्वं त्वयेति बोध्यं तत्र त्वत्पुत्रैरिति कर्तृपदं बोध्यं, तद्दत्तैस्तदपवर्जितैः पिंडदानायितत्वात्तद्दत्तैरित्युक्तम् असुभिः प्राणैः कियन्न किंचिदतिहीनमिदं जीवनमित्यर्थः ॥ २३ ॥ ❀ ❀ विधिविधेयं प्रारब्धमनुभूयमेवेति, तत्र जीविताशां त्याजयितुमेव विशिंषन्नाह तस्येति । तस्य तद्दत्तासोः कृपया जीवितुमिच्छोरप्यनिच्छतः देहत्यागमनिच्छतोऽपि तव हृद इति शेषः, जीर्णे वाससी इव जरया देहः परैत्यपगमिष्यत्येव ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अस्तु ममापि मरणं ततः किमिति तत्राह पित्रिति । तव पित्रादयो हताः वयश्च विगतमात्मा देहश्च जरया ग्रस्त इति यत्तथापि त्वं परगेहमुपाससे न श्रेयःसाधनायेहसे मृतस्य तवातः परलोके न सुखावाप्तिरित्यर्थः ॥ २१ ॥ ❀ ❀ परलोके सुखं नेति चेदिहैव दीर्घजीवितमस्त्वित्यभिप्रायश्चेत्तर्हि त्वं निरपत्रप इत्यभिप्रेत्याह अहो इति । जंतोर्जीविताशा बहुकालं जीवामीत्याशा इच्छा महीयसी महत्तरा अहो अज्ञानातिरेकः, यया जीविताशया भवान् भीमापवर्जितं भीमेन तिरश्चीनहस्तेन दत्तं पिंडमादत्ते क इव गृहपालवत् सारमेय इव ॥ २२ ॥ ❀ ❀ ननु विषम उपन्यासः, कनिष्ठपुत्रत्वेन मत्पुत्रत्वात्तद्दत्तान्नेन शरीरपोषणमुचितमिति चेत्सत्यं विषदानादिना त्वयाऽपराद्धत्वात्तद्दत्तं विषोपममित्यभिप्रेत्याह अग्निरिति । अग्निदाहाद्यपराधाः त्वया येषां कृताः तेषामन्नैः पुष्टैरसुभिः कियत्प्रयोजनं लज्जाकरत्वान्मृतिरेव गरीयस्यतो निर्गम्यतामित्यन्वयः ॥ २३ ॥ ❀ ❀ युधिष्ठिरादीनां मयि तात्पर्यान्न निर्जिगमिषामीति चेत्तत्राह तस्येति । जरया ग्रस्ते वाससी इव वस्त्रे इव यथा तथा अनिच्छतो जिजीविषोर्जीवितुमिच्छोः कृपणस्य परान्नादननिरतस्यापि तवायं जीर्णो देहः परैति निरस्तासुः स्यादतो देहस्यानित्यत्वान्निर्गच्छ त्वमिति वदामीति भावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वैराग्यमुत्पादयति पित्रिति सप्तभिः ॥ २१ ॥ ❀ ❀ अपवर्जितं दत्तम् । गृहपालः श्वा ॥ २२ ॥ ❀ ❀ तद्दत्तैरन्नादिभिर्लब्धैरसुभिः कियत् किं प्रयोजनमित्यर्थः ॥ २३ ॥ ❀ ❀ परैति क्षीयते । वाससी अन्तरीयोत्तरीये इति दृष्टान्तस्य द्विवचनदृष्ट्या दार्ष्टान्तिकस्य देहस्यापि सूक्ष्मस्थूलभेदेन द्वितयात्मकस्य जीर्णत्वम् । आन्ध्यबाधिर्यादिकं सूक्ष्मदेहस्य जीर्णत्वं लक्षणं वलीपालितादिकं स्थूलदेहस्य च ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वैराग्योत्पादनायाह पित्रिति सप्तभिः । आत्मा देहः ॥ २१ ॥ ❀ ❀ भीमेन भवत्पुत्रघ्नेन आवर्जितम् अवज्ञापूर्वकं दत्तं गृहपालवत् ग्रामसिंहवदादत्ते स्वीकरोति ॥ २२ ॥ ❀ ❀ येषां विनाशाय अग्निर्निसृष्टः प्रक्षिप्तः दारा दूषिताः कचग्रहणा-

दिभिरवज्ञातः तद्दत्तैरन्नादिद्वारा रक्षितैरसुभिः कियन्न कियदपीत्यर्थः ॥ २३ ॥ ❀ ❀ अस्यापि एवं दैन्येन वर्त्तमानस्यापि तव देहः परैति अपगमिष्यति ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु तदैव त्यक्तव्यं किमंतरा गमनेन 'विमुंचेन्मुच्यमानेष्विति'न्यायात् तत्राह पितृभ्रात्रिति । एवं स वदेत् यस्य समीचीना विषया भवेयुः, तव तु जीवनान्मरणमुत्तमं 'चिरप्रवासी रोगी परान्नभोजी परावसथशायी। यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥' इति वाक्यात् तवेदानीमेव त्याग उचितः । कथं तदुपपादयति–पिता भीष्मः भ्रातरः भूरिश्रवादयः शल्यादयः सुहृदः पुत्रा दुर्योधनादयः एकोऽपि यत्र हन्यते तत्र सलज्जो न तिष्ठति किमुत सर्वे । वयः आयुः आत्मा देहः जरा कालकन्या एवमपि परेषां शत्रूणां गेहं गृहपालवदुपाससे इति ग्लानिप्रदर्शनम् ॥ २१ ॥ ❀ ❀ सामान्यकथनेन विशेषमाह अहो इति । येन पुत्रस्य रुधिरं पीतमर्थात् स्वस्यैव तेन अवज्ञया दत्तं बहिर्बलिदानपिंडवत् तत्राप्यन्यः समायास्यतीति भयात् तद्गृहपालः श्वा शीघ्रं भक्षयति तद्वदादत्से ॥ २२ ॥ ❀ ❀ ननु निरभिमानस्यैतदुचितं तत्राह–अग्निर्निसृष्टो दत्तश्चेति । स्यादेवं यदि भवद्भिरपकारः कृतो न स्यात् अतः भवद्भिरेव शत्रुत्वस्य स्थिरीकृतत्वात् युक्तं भीमकृतं "न द्विषतोऽन्नमश्नीयात् द्विषंतं नैव भोजयेत् । द्विषतां हि हविर्भुक्तं नेह नामुत्र तद्भवेदि"ति श्रुतेः अग्निर्निसृष्टो लाक्षागृहे विपरीतकथनं सामान्यविशेषभावात् दाराः द्रौपदी चकारात्तेऽपि वल्कलादिपरिधानात् क्षेत्रमिति स्थितिस्थानमपि अत एवमपकृतैर्जीवरक्षणं योगशास्त्रविरुद्धं कियदिति न तज्जीवनेन किंचित् प्रयोजनं सेत्स्यतीति भावः ॥ २३ ॥ ❀ ❀ एवमपि सर्वविरोधेन पोषितो देहः स्वयमेव न तिष्ठतीत्याह तस्यापीति । एवं ग्लानिमनुभवतोऽपि कृपणस्य दीनस्य "कृपणः स तु विज्ञेयो योऽनालोचितपाचक" इति भीमपाचकस्य वा जिजीविषोः जीवितुमिच्छोः परैति अपगच्छति । तत्र हेतुः जरया जीर्ण इति अव्यवह्रियमाणे अपरिधानोत्तरीये वाससी स्पर्शमात्रेणैव जीर्णे गच्छतः । प्रक्षालनेनापि नश्यतीत्यर्थः ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अग्निरित्यत्र । सामान्यविशेषभावादिति । लाक्षागृहे समातृकाणां पञ्चानामपकारात्तत्समानम्, विषमोदके तु भीमस्यैवापकाराद्विशेष इति पश्चात्तद्ग्रहणमित्यर्थः । तेपीति । दूषिता इति शेषः ॥ २३ ॥ ❀ ❀ तस्यापीत्यत्र । अनालोचितयाचक इति । अनालोचितं यथा स्यात्तथा याचकः, वस्तु-याञ्चा-स्व-दातॄणां चतुर्णामन्यतमस्य वा स्वरूपादिकमविचार्य यो याचते, तादृश इत्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तवात्रावस्थानमतिदैन्यमिति दर्शयन् वैराग्यमुत्पादयति–पितृभ्रात्रिति सप्तभिः । तव पित्रादयो हताः, वयो यौवनं च विगतमात्मा देहश्च जरया ग्रस्तः, यद्यप्येवं तथापि परेषां शत्रूणां गेहं जीवनार्थमुपाससे ॥ २१ ॥ ❀ ❀ नन्वेतद्गृहोपासनां विना जीवनमेव कथं स्यादित्याशङ्क्याह–अहो इति । जन्तोर्जीवस्य जीविताशा अहो महीयसी अतिशयेन महती, यया जीविताशया भवान् भीमेन शत्रुणाऽऽवर्जितं परिभूय दत्तं पिण्डं कवलमादत्ते स्वीकरोति, अत्तीति यावत् । तत्र दृष्टान्तमाह–गृहपालः श्वा तद्वत् ॥ २२ ॥ ❀ ❀ भीमादीनां शत्रुत्वहेतुत्वेन तत्कृतानपकारान् दर्शयंस्तद्दत्तान्नेन जीवनमतिदैन्यमित्याह–अग्निरिति । येषामित्यस्याग्न्यादिभिः प्रत्येकमन्वयः । येषां भीमादीनां प्रदहनार्थं लाक्षागृहे अग्निर्निसृष्टः । येषां गरो विषं दत्तम् । येषां दाराः पत्नी द्रौपदी दूषिताः कचग्रहणवस्त्रापकर्षणादिभिरवमताः । येषां धनं क्षेत्रं भूमी राज्यं च हृतं, त्वयेति शेषः, तैर्भीमादिभिर्दत्तैरन्नादिभिः संरक्षितैरसुभिः प्राणैर्जीवनेन कियत् किं फलं ? न किञ्चिदित्यर्थः ॥ २३ ॥ नन्वन्यत्फलं भवतु मा वा, जीवनं तु तावद्भवेदेवेत्याशङ्क्याह–तस्येति । तस्यैवं दैन्यमनुभवतः कृपणस्य मोहेन देहासक्तस्य अत एव जिजीविषोः जीवितुमिच्छतो देहत्यागमनिच्छतोऽपि तवायं देहो जरया जीर्णः सन् वाससी इव अन्तरीयोत्तरीयवस्त्रे इव परैति क्षीयते इत्यन्वयः ॥ २४ ॥

हिन्दी अनुवाद

आपके चाचा, ताऊ, भाई, सगे-सम्बन्धी और पुत्र-सभी मारे गये, आपकी उम्र भी ढल चुकी, शरीर बुढ़ापेका शिकार हो गया, आप पराये घरमें पड़े हुए हैं ॥ २१ ॥ ❀ ❀ ओह ! इस प्राणीको जीवित रहनेकी कितनी प्रबल इच्छा होती है ! इसीके कारण तो आप भीमका दिया हुआ टुकड़ा खाकर कुत्तेका-सा जीवन बिता रहे हैं ॥ २२ ॥ ❀ ❀ जिनको आपने आगमें जलानेकी चेष्टा की, विष देकर मार डालना चाहा, भरी सभामें जिनकी विवाहिता पत्नीको अपमानित किया, जिनकी भूमि और धन छीन लिये, उन्हींके अन्नसे पले हुए प्राणोंको रखनेमें क्या गौरव है ॥ २३ ॥ ❀ ❀ आपके अज्ञानकी हद हो गयी कि अब भी आप जीना चाहते हैं ! परन्तु आपके चाहनेसे क्या होगा; पुराने वस्त्रकी तरह बुढ़ापेसे गला हुआ आपका शरीर आपके न चाहनेपर भी क्षीण हुआ जा रहा है ॥ २४ ॥

गतस्वार्थमिमं देहं विरक्तो मुक्तबन्धनः । अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः ॥ २५ ॥
यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् । हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥ २६ ॥
अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् । इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥ २७ ॥
एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः ।
छित्त्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किंलक्षणो धीर इत्यपेक्षायामाह । गतस्वार्थं यशोधर्मादिशून्यं मुक्तबंधनस्त्यक्ताभिमानः क गत इत्यविज्ञाता गतिर्यस्य स धीरः प्राप्तदुःखस्य स्वयं सहनेन मुक्तिप्राप्तेः ॥ २५ ॥ ❁ ❁ नरोत्तमस्तु ततः प्रागेव कृतप्रतीकारः स्वकात्स्वत एव परतः परोपदेशतो वा ॥ २६ ॥ ❁ ❁ त्वं तु नरोत्तमो नाभूरत इदानीं धीरो भवेत्याह अथेति । अर्वागर्वाचीन एष्यन्नित्यर्थः । गुणान् धैर्यदयादीन् विकर्षत्याच्छिनत्तीति तथा ॥ २७ ॥ ❁ ❁ आजमीढः अजमीढवंशजः । प्रज्ञाचक्षुरंधः । एवं बोधितः सन् । द्रढिम्नश्चित्तदार्ढ्यात् । भ्रात्रा संदर्शितोऽध्वा बंधमोक्षयोर्मार्गो यस्य सः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु प्रथममेव पतिष्यतीति देहमुपेक्षमाणस्यात्महननाख्यदोषानुषंग इति तत्राह–गतस्वार्थमकृतकृष्णभजनत्वेन शोकमोहजरादिव्याकुलं मुक्तबंधनस्त्यक्तधनपुत्रादिः । अविज्ञाताऽन्यजनैरनवबुद्धारण्यगतिर्यस्य स तथा सन् जह्यात् । कापि तीर्थे देहं त्यक्त्वैव यः तिष्ठेत्स धीर इति । तस्मात्पुरुषार्थसाधनायोग्यदेहहानौ न दोषः । निर्जनवनं गत्वा तपश्चर्यया शरीरमिदं साधितस्वार्थं कुर्विति भावः ॥ २५ ॥ ❁ ❁ धनं हृदि कृत्वा वणिग्यातीतिवत् हरिं हृदि कृत्वा हरिं प्राप्तुमिति भावः । जातनिर्वेद उत्पन्नवैराग्यः । आत्मवान्वशीकृतमनाः । पूर्वश्लोकेन त्वातुरसंन्यासो द्वितीये सदसद्विवेकवत्त्वेन हरिशरणतया संन्यासोऽसूचीति ॥ २६ ॥ ❁ ❁ अथ तस्माद्भवानुदीचीमुत्तराम् । स्वैरज्ञातगतिर्विविक्तगतिर्न तु स्वैः पांडवैरविज्ञातगतिः । पाण्डवानुज्ञयैव तस्य महाभारते वनवासाय गत्युक्तेः । स्वैरेणेच्छानुसारेण ज्ञाता गतिर्यस्य न परेच्छातः स तथोक्त इति विवरणोपपत्तेः । अन्यथाऽविज्ञातगतिरित्यपहसितं स्यात् । इतोऽर्वाक् प्राक्तनः कालः पुंसामधिकारिणां ज्ञानभक्त्या दिगुणसामग्र्यापादकः । अर्वागित्यस्यार्थान्तरमादायाह–इत उपरितनः काल एष्यन्निति स्वामिचरणैरुक्तत्वादिति । यद्वाऽर्वागित्यव्ययं तस्यानेकार्थत्वोपपत्तेः ॥ २७ ॥ ❁ ❁ आजेन ज्ञानेन मीढः सिक्तः । मिह सेचनेऽतः क्तप्रत्यये रूपम् । प्रज्ञयाचष्टे पश्यति न तु मांसदृष्ट्येति वा, अध्वा लौकिको वैदिको वा । द्रढिम्नो दृढतरान् । निर्जगाम गृहादिति शेषः ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

प्राप्तेत्यत्र–'यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥' इति श्रीमद्भगवद्गीतान्तर्गतद्वितीयाध्यायोक्तवचनार्थोऽनुसन्धेयः ॥ २५–४० ॥

श्रीमद्वीरराघवव्याख्या

तर्हि ज्ञातिसन्निधावत्रैव परैत्वित्यत्राह गतेति । गतः स्वार्थः स्वापेक्षितपुरुषार्थो यस्मात्तमिमं देहं यो जह्यात्त्यजेत् कथंभूतः विरक्तः देहादिषु स्पृहारहितः मुक्तानि बंधनानि संसृतिबंधकानि पुण्यपापात्मकानि येन अविज्ञाता ज्ञातिभिरज्ञाता गतिर्देहत्यागलोकांतरप्राप्तिरूपा यस्य सः स एव धीरः योगी उदाहृतः ॥ २५ ॥ ❁ ❁ किंच स्वकात्परत अन्यस्मादन्योपदेशाद्वा इह जातो निर्वेदो वैराग्यं यस्य सः यः पुमानात्मवान् जितेंद्रियः हरिमाश्रितानां संसृतिबंधहरं भगवंतं हृदि कृत्वा विधाय ध्यानेन सन्निधाप्य गेहात्प्रव्रजेत्स एव नरेषूत्तमः, त्वमेवं कुर्विति भावः ॥ २६ ॥ ❁ ❁ तदेवाह अथ इति । अतः स्वैर्ज्ञातिभिरज्ञाता गतिर्यस्य स भवानुदीचीं दिशं यातु, तत्र हेतुमाह–इतोऽर्वागितोनंतरं कालः प्रायशः पुंसां गुणानात्मगुणान् अक्रोधादीन् विकर्षत्यपनुदत इति तथाभूतः नंद्यादित्वाल्ल्युः । यद्वा इतोऽनंतरकालात् अर्वागधरः निकृष्टः कलिकाल इति यावत् , अर्वाक्त्वमेवाह गुणविकर्षणः उक्तार्थः ॥ २७ ॥ ❁ ❁ एवमित्थमनुजेन विदुरेण बोधित आजमीढः अजमीढवंशजत्वात्तच नवमे स्फुटं प्रज्ञैव चक्षुर्यस्य अंध इति भावः । यद्वांधत्वेऽपि प्रज्ञया चक्षुःस्थानीयया सर्वं साक्षात्कुर्वाणः राजा धृतराष्ट्रः भ्रात्रा विदुरेण संदर्शितः अध्वा गंतव्यदेशाध्वा यस्य सः । अनेन विदुरोऽपि तेनैव सह निरगादिति सूच्यते । द्रढिम्नः नितरां दृढान् दृढमूलान् स्वेषु देहतदनुबंध्यादिषु स्नेहा अनुरागास्त एव पाशाः पाशवद्बंधहेतुत्वात्तान् छित्वा निश्चक्राम गृहादिति शेषः ॥ २८ ॥

१. प्रा० पा०–मति० । २. प्रा० पा०–सम्यक् प्रव्र० ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु प्रथममेव पतिष्यतीति देहमुपेक्षमाणस्य आत्महननाख्यदोषानुषंग इति तत्राह गतेति । गत स्वार्थः ऐहिकामुष्मिकसुखसाधनो यस्मात् स तथोक्तः तमिमं देहं देहाभिमानं मुक्तस्तदनुभार्यादिस्नेहानुबंधान्मुक्तः अविज्ञातगतिरन्यैर्जनैरनवबुद्धारण्यादिगतिः जह्यात्स वै एव धीरो विवेकज्ञान्युदाहृतः तस्मात् पुरुषार्थसाधनायोग्यदेहहानौ दोषाभावात् निर्जनवनं गत्वा तपश्चर्यया शरीरमिदं साधितस्वार्थं कुर्वितिं भावः ।। २५ ।। ❀ ❀ इतोऽपि प्राप्तवनस्य तव तपःसाधनमेव श्रेयस्करमिति वक्तीत्याह य इति । यः स्वतः स्वबुद्ध्या परतः परबोधनेन वा जातनिर्वेद उत्पन्नवैराग्य आत्मवान् वशीकृतमना हरिं हृदि कृत्वा गेहात् प्रव्रजेत् स नरोत्तमः पुरुषश्रेष्ठ इत्येकान्वयः ।। २६ ।। ❀ ❀ अथ तस्माद्भवानुदीचीं दिशं यातु कथंभूतः स्वैरज्ञातगतिः न तु स्वैः पाण्डवैरविज्ञातगतिः पाण्डवानुज्ञयैव तस्य वनवासाय गत्युक्तेः, कथं तर्हि शब्दयोजना स्वैरिणीशब्दार्थवत् स्वेच्छानुसारेण ज्ञाता गतिर्यस्य न परेच्छातः स तथोक्त इति विवरणोपपत्तेः । अन्यथा अविज्ञातगतिरित्येतदपहसितं स्यात् । इतोऽर्वाक् पूर्वतनः कालः पुंसामधिकारिणां ज्ञानभक्त्यादिगुणसामग्र्यापादकः, इत उपरितनः कालः प्रायेण गुणेषु विषयेषु विकृष्य नाशयतीति गुणविकर्षणः विविच्य दर्शयतीति वा वेदस्य वाविकर्षणमित्युक्तेः ।। २७ ।। ❀ ❀ एवमुक्तप्रकारेणानुजेन विदुरेण बोधितोऽतः प्रज्ञानमेव चक्षुर्यस्य स तथा स्वतो जात्यंधः प्रज्ञयाचष्टे पश्यति न तु मांसदृष्ट्येति वा आजमीढः अजमीढवंशोद्भवः, आजेन ज्ञानेन मीढः सिक्त इति वा मिह सेचन इति धातोः, द्रढिम्नः दृढतरान् स्वेषु स्नेहाख्यपाशान् छित्वा भ्रात्रा विदुरेण सम्यग्दर्शित उभयविधो वैदिकलौकिकाख्योऽध्वा मार्गो यस्य स तथोक्तः राजा धृतराष्ट्रः निश्चक्राम निर्गतो बभूवेत्येकान्वयः, गृहादिति शेषः ।। २८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः ।

गतस्वार्थमिमं देहमित्यादिद्वयम्, पूर्वं आतुरसन्न्यासी, परस्तु सद्विवेकेन भगवच्छरणतया सन्न्यासीति तारतम्यं ज्ञेयम् ।। २६-३१ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गतस्वार्थम् अकृतकृष्णभजनत्वेन शोकमोहजरादिव्याकुलम् । मुक्तबन्धनः त्यक्तधनपुत्रादिः । क्व गत इत्यविज्ञाता गतिर्यस्य सः । जह्यात् क्वापि तीर्थे देहं भक्त्यैव यस्त्यजेत् स धीरः ।। २५ ।। ❀ ❀ नरोत्तमस्तु प्रागेव कृतप्रतीकारः । तल्लक्षणमाह स्वकात् स्वत एव परतः परोपदेशतो वा आत्मवान् विवेकी । धनं हृदि कृत्वा वणिक् यातीतिवत् हरिं हृदि कृत्वा हरिं प्राप्तुमिति भावः । स नरोत्तमः । तत्रातुरसंन्यासी धीरः भक्तिविवेकी नरोत्तम इति भेदः ।। २६ ।। ❀ ❀ त्वन्तु नरोत्तमो नाभूरेवातो धीरो भवेत्याह अथ इति । अर्वाक् अर्वाचीनः एष्यन् काल इत्यर्थः । गुणान् धैर्यदयादीन् विकर्षति आच्छिनत्तीत्यर्थः ।। २७ ।। ❀ ❀ बोधितः मुक्त्यर्थं भक्तिमिश्रज्ञानोपदेशेनेत्यर्थः । आजमीढः अजमीढवंशजः । द्रढिम्नश्चित्तदार्ढ्याद्धेतोः । भ्रात्रा सन्दर्शितः अध्वा बन्धमोक्षयोर्मार्गो यस्य सः ।। २८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

धीरलक्षणमाह गतस्वार्थमिति ।। २५ ।। ❀ ❀ नरोत्तमलक्षणमाह य इति ।। २६ ।। ❀ ❀ तत्र तवानुरूपो धीरत्वसम्पादनावसरो वर्ततेऽतो धीरत्वं सम्पादयेत्याह अथेति । अथ देहस्य गतस्वार्थत्वनिश्चयानन्तरमेवेति यावत् स्वैर्वैराग्यविरोधिभिर्ज्ञातिभिरविज्ञातगतिरुदीचीमुत्तरां दिशं यातु । विलम्बे दोषमाह—इतोऽनन्तरम् प्रायशोऽर्वाक् अपकृष्टः अत एव गुणान् धैर्यादीन् विकर्षत्याच्छिनत्तीति गुणविकर्षणः कालः ।। २७ ।। ❀ ❀ प्रज्ञाचक्षुर्बुद्धिनेत्रः, आजमीढोऽजमीढवंश्यः ।। २८ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तर्हि किं कर्त्तव्यमित्यत्राह गतस्वार्थमिममिति । विषयदोषदर्शनेन वैराग्यविवेकोत्पत्तौ अग्रिमबाधाभावाय वृक्षधर्मत्वादयं देहः तत्र त्यक्तव्यः यत्र त्यक्तं कोऽपि न जानाति । अपरित्यागदशायामेवास्यापकारजनकत्वात् । परित्यागो हि भर्जनवत् बीजस्य अंकुरोत्पत्तौ प्रतिबंधकः । तावदयं रक्ष्यः यावत्स्वस्य कार्यं सिद्ध्यति सिद्धे कार्ये त्यक्तव्य इति । गतस्वार्थमित्युक्तं ज्ञातस्वार्थमित्यर्थः । अथवा पूर्वोक्तन्यायेन गताः स्वार्था ज्ञानधर्मादयो येन अतोऽपकारिणमिममस्मिन् रागं परित्यज्य तस्य शृंखलापुत्रादिभिः विमुक्तः सन् दुष्टत्वादस्य देहस्य जह्यात् इमं देहं परित्यजेत् । न विज्ञाता गतिर्यस्य शृंखलानां पुनः संबंधाभावाय किं ततः स्यात्तत्राह सवै धीर उदाहृत इति । धीरस्य यत् फलं तत्फलं लभेत "द्वौ संमताविह मृत्यू दुरापावि"ति धैर्यं तत्फलं ननु तादृशमेव फलं तत्फले प्रयुज्यत इत्यत आह—वै निश्चयेन यत्फलार्थं धैर्यगणना कृता तत्रैतादृशमपि धैर्यं गणितं निश्चितफलत्वेन तस्मात् यथा तयोर्धैर्ययोः

फलं तथा अस्यापीत्यर्थः ॥ २५ ॥ ❀ ❀ एवमेकेन प्रकारेण देहपरित्याग उक्तः, प्रकारांतरमप्याह यः स्वकादिति । स्वकीयात् बंधोर्हितकर्तुः परतः शत्रुवक्तृगतगुणे दोषराहित्येन य अस्मिन्नर्थे कार्यदृष्टिः सन् जातवैराग्यः देहेंद्रियादिकमज्ञानादन्यार्थं विनियुज्यते सर्वस्वनाशे तत्त्यागः प्रथमपक्षः प्रथम एव भोगार्थमकृत्वा यादृशैरपि तादृशैर्वाक्यैस्तृष्णाभावाय जातवैराग्यः । तेन देहादिना भगवंतं सपरिकरं ज्ञात्वा तं हृदि स्थाप्य देहत्यागेच्छां परित्यज्य तेन दुर्लभं भगवत्स्मरणं कुर्वाणः गृहस्य बाधकत्वात् संबंधाभावाय प्रव्रजेत् संन्यस्य गच्छेत् स नरोत्तमः सर्वेभ्यः प्राणिभ्य उत्तम इत्यर्थः ॥ २६ ॥ ❀ ❀ तर्हि मया किं कर्तव्यं तदाह अथेति । भवतस्त्वन्य एव मार्गः न देहपरित्यागः नवान्यत्र विनियोगाभावः तस्मात् एतत्स्थानपरित्याग एवोत्तमः । नन्वनुभयरूपत्वात् किमेवं परित्यागेन तत्राह-उदीचीं दिशं यात्विति महाप्रस्थानमप्येको मार्ग उक्तः, अदोषतैव सगुणः विगुण इति न्यायात् । अत्र स्थितौ दोषसंभवात् "एषा वै देवमनुष्याणां शांता दिगि"त्युत्तरदिश उत्कृष्टत्वात् तत्र स्थितौ न देवा बुद्धिनाशं कुर्वंति, न स्वतः परस्मिन्नर्थे स्वकीयाः प्रतिबंधका इति । तैर्यथा न ज्ञायते तथा गंतव्यं ततो यथाधिकारमग्रे वक्ष्याम इति भावः । ननु दोषाभावार्थमेव चेद्गमनं तदात्रैव स्थित्वा दोषो दूरीकर्त्तव्यः, किं गमनेन विवेकधैर्यसत्संगभगवद्गुणानामत्रैव संभवात् तत्राह इतोऽर्वागिति । सर्वत्रैव प्रथमपुरुषवचनं हीनत्वबोधनाय अयमेव कालः सर्वेषां बुद्धिनाशकत्वदृष्टांतात् इतोऽप्यर्वाक् यः कालः बाहुल्येन स्वतंत्राणां विवेकादिमतामपि विवेकनाशकः तत्र कथं विवेकोत्पत्तिरिति भावः । देशसापेक्ष एव कालस्य दोषजननात् । अत एव चोत्तरदेशस्य ऋषीणां न कालिकादिना बुद्धिभ्रंशः । परित्यागवैयर्थ्यापत्तेश्च तस्यैव हेतोरित्यत्र सर्वोत्कृष्टफलकालस्याहेतुत्वप्रतिपादने देशस्याप्रयोजकता उक्ता 'भयं प्रमत्तस्य वनेष्वपि स्यादि'त्यत्र तु ईश्वरेच्छाया नियामकत्वात् न केवलेन विरोधः । तदिदानीमेतत् स्थानं परित्यज्य उत्तरदेशे गंतव्यमिति सिद्धम् ॥ २७ ॥ ❀ ❀ तत्तथैव कृतवानित्याह एवमिति । राजेति कथाकरणे सामर्थ्यम्, अनुजेनेत्यप्रतारकत्वं प्रज्ञाचक्षुरिति उत्तमाधिकारित्वम्, आजमीढः आजमीढवंशोत्पन्नः तस्य हस्तिनापुरपरित्यागे पितृकृतनगरपरित्यागेन सर्ववंशधर्मपरित्यागो बोधितः । तदुक्तप्रकारेणैव गत इति ज्ञापयितुमाह छित्वा स्वेष्विति द्रढिम्नो दृढतरान् भ्रात्रा विदुरेण सम्यग्दर्शितः बहिरंतरमार्गो यस्य । केचिदेवं प्रथमपक्षस्थं मन्यते ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

इतोऽर्वागित्यत्र । हीनत्वबोधनायेति । धृतराष्ट्रस्येत्यर्थः । स्वतन्त्राणामिति । पुंसामित्यस्य विवरणम् । देशसापेक्ष इति । पुरुष इति शेषः । तथा च देशापेक्षां परित्यज्य यात्वित्यर्थः । अत एवेति । स्वदेशापेक्षात्यागादेव । परित्यागवैयर्थ्यापत्तेरिति । देशत्यागोत्तरमपि बुद्धिभ्रंशे तथात्वापत्तेरित्यर्थः । ननु तस्यैव हेतोरित्यत्र देशस्य परमफलासाधकत्वमुक्तम्, तथा 'भयं द्वितीये' त्यत्र वनस्यापि तथात्वमुक्तम्, तथा सति कोविदत्वस्य प्रमादाभावस्य च तत्साधकत्वं फलतीति ताभ्यामत्रैव फलार्थं प्रयतनीयम्, त्यागे को विशेष अत आहुः तस्यैवेत्यादि । तथा च तत्र तयोरसाधकत्वमात्रमुक्तम्, न तु बाधकत्वम्, अतस्तत्र केवलेन कालेन देशेन च न परमफलविरोध इत्यर्थः । तथा च तत्र तथास्तु, प्रकृते तु कालस्य बाधकतायाः प्रत्यक्षानुमानाभ्यां सिद्धत्वात्तन्नियम्यैः स्वैव्योम्नस्यापि तथात्वाद्विरोध एवेति देशस्त्याज्य एवेत्यर्थः । एतदेवाहुः तदित्यादि । केचिदित्यादि श्रीधरबोपदेवाद्याः गतस्वार्थेति श्लोकव्याख्यातपक्षस्थं धीरं मन्यन्त इत्यर्थः ॥ २६-२८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु क्षीयते तर्हि क्षीयताम्, इतो निर्गमनेऽपि क्षीयेतैव किं निर्गमनेनेत्याशङ्क्य यथा युद्धे सम्मुखहतस्य पलायमानस्य पृष्ठतो हतस्य च मरणतौल्येऽपि सम्मुखहतस्यैव शुभगतिः लोके कीर्त्तिश्च श्रूयते न पृष्ठतो हतस्य तथा वने गृहे वा मरणतौल्येऽपि गृहान्निस्सृत्य मृतस्यैव गतिः कीर्त्तिश्च, न गृहासक्त्या तत्र मृतस्येत्याशयेनाह-गतेति । वा एवकारार्थे । गतः स्वार्थः स्वापेक्षितपुरुषार्थो यस्मात्तं गृहधनपुत्राद्यासक्त्या भगवदुक्तादिरहितमिमं मनुष्यदेहं सर्वतो विरक्तः अत एव मुक्तबन्धनः धनपुत्रादिष्वासक्तिरहितः क्व गत इत्यविज्ञाता गतिर्यस्य तथाभूतश्च सन् भगवदाराधनादिसाधनानि अनुष्ठाय यो जह्यात् त्यजेत्स एव धीर इत्युदाहृतः, तत्त्वज्ञैरुदाहरणे प्रदर्शित इत्यर्थः ॥ २५ ॥ ❀ ❀ यो गृहे भक्त्यादिसाधनरहितो बहिर्निर्गत्य साधनान्यनुष्ठाय कृतार्थः स्यात्स धीर इत्युक्तम्, यस्तु गृह एव भक्त्यादिसाधनसम्पन्नो गृहात् प्रव्रजेत्स नरोत्तम इत्याह-य इति । यः स्वकात्स्वत एव परतोऽन्योपदेशाद्वा इह संसारे धनपुत्रलोकादाविच्छाविषये जातो निर्वेदो वैराग्यं यस्य स आत्मवान् विज्ञातात्मपरमात्मतत्त्वो हरिमाश्रितानां संसारदुःखहरं भगवन्तं हृदिकृत्य ध्यानेन हृदि स्थिरीकृत्य गेहात् प्रव्रजेन्निर्गच्छेत्स नरेषूत्तम इत्यन्वयः ॥ २६ ॥ ❀ ❀ तर्हि मया किं कर्त्तव्यमित्यपेक्षायामाह-अथेति । स्वैर्ज्ञातिभिरज्ञाता गतिर्यस्य तथाभूतो भवान् अथानन्तरं शीघ्रमेव उदीचीं "एषा देवमानुषाणां शान्ता दिक्" इति श्रुतौ उत्कृष्टत्वेनोक्तामुत्तरां दिशं यातु । तत्र हेतुमाह-इत इति । इतोऽर्वागितोऽनन्तरं कालः प्रायशः पुंसां गुणानां विवेकधैर्यादीनां विकर्षणः विनाशक एष्यतीति ॥ २७ ॥ ❀ ❀ एवमनुजेन विदुरेण बोधितो राजा धृतराष्ट्रः स्वेषु धनपुत्रादिषु स्नेहरूपान् पाशांश्छित्वा गृहान्निश्चक्रामेत्यन्वयः । साधारणपुरुषेण तच्छेदनं अशक्यमित्याशयेनाह-द्रढिम्न इति, अतिदृढतरानित्यर्थः । तर्हि तस्य कथं तच्छेदने सामर्थ्यं जातमित्यपेक्षायामाह-भ्रात्रेति, भ्रात्रा विदुरेण सन्दर्शितः

अध्वा निवृत्तिमार्गो यस्य सः । एवं विदुरेण प्रतिबोधे कृतेऽपि सोऽनधिकारी चेत्कथं बोधः स्यादित्याशङ्क्य तस्याधिकारित्वमाह- प्रज्ञाचक्षुरिति, बहिरन्धोऽपि तस्मिन् समये भगवताऽन्तर्यामिणा सम्पादिता प्रज्ञैव चक्षुर्यस्य सः । तत्र हेतुमाह-हि यस्मादाजमीढः अजमीढवंशजः तद्वंशे एवमेव भगवत्कृपेति भावः ॥ २८ ॥

हिन्दी अनुवाद

अब इस शरीरसे आपका कोई स्वार्थ सधनेवाला नहीं है; इसमें फँसिये मत, इसकी ममताका बन्धन काट डालिये । जो संसारके सम्बन्धियोंसे अलग रहकर उनके अनजानमें अपने शरीरका त्याग करता है, वही धीर कहा गया है ॥ २५ ॥ ❀ ❀ चाहे अपनी समझसे हो या दूसरेके समझानेसे-जो इस संसारको दुःखरूप समझकर इससे विरक्त हो जाता है और अपने अन्तःकरणको वशमें करके हृदयसे भगवान्‌को धारणकर संन्यासके लिये घरसे निकल पड़ता है, वही उत्तम मनुष्य है ॥ २६ ॥ ❀ ❀ इसके आगे जो समय आनेवाला है, वह प्रायः मनुष्योंके गुणोंको घटानेवाला होगा; इसलिये आप अपने कुटुम्बियोंसे छिपकर उत्तराखण्डमें चले जाइये' ॥ २७ ॥ ❀ ❀ जब छोटे भाई विदुरने अंधे राजा धृतराष्ट्रको इस प्रकार समझाया, तब उनकी प्रज्ञाके नेत्र खुल गये; वे भाई-बन्धुओंके सुदृढ स्नेहपाशोंको काटकर अपने छोटे भाई विदुरके दिखलाये हुए मार्गसे निकल पड़े ॥ २८ ॥

पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ।
हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामिव सत्सम्प्रहारः[1] ॥ २९ ॥
अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्[2] नत्वा तिलगोभूमिरुक्मैः[3] ।
गृहं प्रविष्टो गुरुवन्दनाय न[4] चापश्यत्पितरौ सौबलीं च ॥ ३० ॥
तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः । गावल्गणे क्व नस्तातो[5] वृद्धो हीनश्च नेत्रयोः ॥ ३१ ॥
अम्बा च हतपुत्राऽऽर्ता पितृव्यः क्व गतः सुहृत्[6] । अपि मय्यकृतप्रज्ञे हतबन्धुः स भार्यया ।
आशंसमानः शमलं गङ्गायां दुःखितोऽपतत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुबलस्य पुत्री गान्धारी साध्वी सुशीला हिमालयं प्रयान्तं पतिमनुजगाम । ननु कथं सा सुकुमारी हिमादिदुःखबहुलं हिमवन्तं गता अत आह । न्यस्तदण्डानां प्रहर्षो यस्मिंस्तम् । दुःखदमपि केषांचित्तत्प्रहर्षहेतुर्भवतीत्यत्र दृष्टान्तः-मनस्विनां शूराणां युद्धे संस्तीव्रः संप्रहारो यथा । पाठान्तरे सत्संप्रहारं युद्धं यथेति ॥ २९ ॥ ❀ ❀ कृतं मैत्रं मित्रदैवत्यं संध्यावंदनं येन । नत्वा संपूज्य । पितरौ विदुरधृतराष्ट्रौ ॥ ३० ॥ ❀ ❀ हे गावल्गणे गवल्गणस्य पुत्र संजय ॥ ३१ ॥ ❀ ❀ अकृतप्रज्ञे मन्दमतौ शमलमपराधमाशंसमान आशंकमानः । भार्यया सह ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

पत्युः शुश्रूषैव व्रतं यस्याः सा तथोक्ता । वैयधिकरणबहुव्रीहित्वान्मध्यमपदलोपः । चकारात्कुंती चानुजगामेत्यवधेयम् । महाभारते तथैवोक्तत्वात् । ननु सा सुकुमारी दुःखबहुलं हिमाद्रिं कथं गतेति चेदाह-न्यस्तदण्डानां कायवाङ्मनोभिस्त्यक्तभूतद्रोहाणां प्रहर्षो यत्र तं "संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः" इत्यमरः । सत्संप्रहारमिति पाठे क्लीबत्वमार्षम् ॥ २९ ॥ ❀ ❀ तिलगोभूमिरुक्मैः संपूज्येति प्रविश पिण्डीमितिवदाक्षेपलब्धम् । गुरुवंदनाय गुरूणां धृतराष्ट्रादीनां नमस्काराय चात्कुन्तीञ्च ॥ ३० ॥ ❀ ❀ तत्र गृहे नेत्रयोरिति षष्ठी तृतीयार्थे । नेत्राभ्यामित्यर्थः । इह महाभारतविरोधस्तु कल्पान्तरव्यवस्थयैव वार्यः । यद्वा राजः हि धृतराष्ट्रादीनां गमनानन्तरमपि प्रतिदिनं तदुपवेशस्थानवन्दनाय पितृगृहं यात्येव । "गुरौ भक्तेन कर्त्तव्यमन्वहं गुरुवन्दनम् । गुरौ मृते प्रवसिते गत्वा च गुरुमन्दिरम् ॥ उपवेशभुवं तस्य पूजयित्वा नमेत्सदा । य एवं कुरुते विप्राः स लोकसुखमश्नुते ॥" इति वारतन्तवोक्तेः । एकस्मिन्दिवसे मृतधृतराष्ट्रादिगतिं निवेदितुं धृतराष्ट्रगृहागतं संजयं तत्र दृष्ट्वा पितरौ कुंतीधृतराष्ट्रौ सौबलीं गान्धारीञ्च अहो अयं तैस्साकं गतोऽधुनाऽत्रागतोऽतस्ते मृता इति मनसा न चापश्यत् ? काकापश्यदेवेत्यर्थः । अत्र पितृशब्देन विदुरो न ग्राह्यः, तस्य धृतराष्ट्रादिमृतेः पूर्वं तद्दर्शनार्थं वनं गतेन युधिष्ठिरेणैकीभूतत्वात् ।

---

१. प्रा० पा०—सम्प्रसारम् । २. प्रा० पा०—कृतमैत्रसत्क्रियो विप्रान् । ३. प्रा० पा०—वसु । ४. प्रा० पा०—परं न पश्यत् पितरौ सौबलीं च । ५ प्रा० पा०—यातोऽसौ । ६. प्रा० पा०—सुकृत् ।

अथ प्रकृतसंबुद्ध्यर्थमाह–हे गावल्गण इति। परंपरागतभृत्यानामयमेव धर्मो यदापदि प्रभुर्यावदायुर्न त्याज्यो मृते तस्मिंस्तत्पुत्रादिरपि न त्याज्य इति भावः। ततो धृतराष्ट्रः क कं लोकं गतः। अंबा कुन्ती वा हतपुत्रार्ता गान्धारी च परत्र कं प्रति गतेति। पितृव्यो धृतराष्ट्रः क गत इति पुनः प्रश्नस्तात्पर्यातिशयात्॥ ३१॥ ❀ ❀ धृतराष्ट्रस्य मरणकाले स्वस्मिन्प्रियाप्रियविवेकमस्य मरणप्रकारञ्च पृच्छति अपीति। अकृतप्रज्ञेऽशिक्षितबुद्धौ मयि स्वभार्यया सह शमलं पापमपराधमाशंसमानः दुःखितः सन् गंगायामपतदपि बन्धून्सर्वान्मारयित्वा स्वयं राज्यमादाय मां निष्कासितवानिति शमलबुद्धिर्नाभवत्किं तद्दुःखातिशयादेव गंगायां पतित्वा मृतो नन्विति भावः। चक्रवर्ती तु–अहो युधिष्ठिरेण ममैकोऽपि पुत्रो न रक्षितस्तत्किं मे जीवितेनेति मनसानुलपन्निर्विद्यमान इत्यर्थः। यद्वा मद्वधात्मकमपि पापं भवत्विति व्यंजयन्नित्यर्थः॥ ३२॥

श्रीमद्वीरराघवव्याख्या

पतिमिति। सुबलस्य पुत्री गांधारी न्यस्तस्त्यक्तो दंडो भूतद्रोहो यैस्तेषां सर्वभूतसुहृदां योगिनां प्रहर्षकरं हिमालयं प्रतियांतं गच्छन्तं पतिमनुजगाम। युक्तं चैतदित्यभिप्रायेण तां विशिनष्टि पतिव्रता साध्वी चेति मनस्विनामिवेति स धृतराष्ट्रनिर्गमः इत्यध्याहारः सनिर्गमः मनस्विनां विवेकिनां संप्रहार इव स्थितः मनस्विनामुद्बोधक इवावर्त्ततेत्यर्थः॥ २९॥ ❀ ❀ ततोऽजातशत्रुर्हुता अग्नय आहवनीयादयो येन तथाभूतः, अनेन रात्रावेव धृतराष्ट्रो निरगादिति सूचितं, तिलादिभिः सत्कृत्य विप्रान्नत्वा कृतं मैत्रं येन सः अत एव गुर्वोर्गांधारीधृतराष्ट्रयोर्वंदनाय तयोर्गेहं प्रविष्टः पितरौ धृतराष्ट्रविदुरौ सौबलीं गांधारीं च नापश्यन्न ददर्श। पितराविति द्विवचनेन विदुरो विवक्षितः, सौबल्याः गांधार्याः पृथगुपादानात्॥ ३०॥ ❀ ❀ ततस्तत्र धृतराष्ट्रगृहेष्वासीनमुपविष्टं संजयं धृतराष्ट्रस्य गीतोपदेष्टारमजातशत्रुः पप्रच्छ कथंभूत उद्विग्नं भीतं मानसं यस्य तथाभूतः प्रश्नमेवाह–गावल्गणे इत्यादिभिस्त्रिभिः। हे गावल्गणे! संजय! नोऽस्माकं तातः पिता नेत्रयोर्नेत्राभ्यां हीनः रहितः वृद्धश्च क गतः? हताः पुत्रा यस्याः साऽत एवार्त्ता दुःखिता च माता गांधारी च क गता तथा पितृव्यः पितृभ्राता सुहृच्च विदुरः क गतः? अपीत्यपिशब्दः संभावनाद्योतकः प्रश्नद्योतको वा॥ ३१॥ ❀ ❀ हता मया हताः बंधवः पुत्रा यस्य सोऽत एव दुःखितो भार्यया सहाकृतप्रज्ञे विवेकरहिते मयि दोषं शमलमपराधमिति यावत् आशंसमानः चिंतयन् गंगायामपतत्पतितवान्स्यात्पतितवान्किमिति वार्थः॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सुबलस्य पुत्री गांधारी पतिशुश्रूषैव व्रतं यस्याः सा तथोक्ता प्रयांतं पतिमनुजगामेत्यन्वयः। चकारात्कुंती च गत्वा कुत्रावसदिति तत्राह हिमालयमिति। कायवाङ्मनोभिर्न्यस्तः परित्यक्तः भूतद्रोहलक्षणो दंडो यैस्तेषां प्रकर्षेण हर्षं जनयतीति न्यस्तदंडप्रहर्षमत एव मनस्विनां वशीकृतेंद्रियग्रामाणां संन्यासिनां सम्यग्विहारं क्रीडास्थानं हिमालयं हिमवंतं पर्वतं गत्वा तत्र बदरिकाश्रमेऽवसदित्यन्वयः॥ २९॥ ❀ ❀ इदानीं युधिष्ठिरस्य मनसि तपस्तपतो धृतराष्ट्रस्य प्रायेण मृतिरभूत् तथाविधशकुनप्रतिभासादित्यभिप्रेत्याह अजातशत्रुरिति। मित्रः सूर्यः तद्विषयं कर्म मैत्रं संध्योपासनादि तत्कृतं येन स कृतमैत्रः गार्हपत्याद्यग्निषु हुतं येन स हुताग्निः तिलगोवस्त्ररुक्मैः विप्रांस्तर्पयित्वा रुक्मं सुवर्णं च दत्वा पित्राद्युपवेशनस्थले पित्रादिगुरुवंदनाय पितृगृहान्प्रविष्टोऽजातशत्रुस्तदायतनं नमस्कुर्वन् पितरौ कुंतीधृतराष्ट्रौ सौबलीं गांधारीं मनसा जीवंतौ नापश्यत् संप्रति ते मृता इति तस्य मनसि तथा प्रत्यभादित्यन्वयः। पितरावित्यत्र पितृशब्देन विदुरोऽत्र नाभिप्रेतः, तस्य शूद्रजातित्वेनावद्यत्वात् धृतराष्ट्रादिमृतेः पूर्वं युधिष्ठिरेणैकीभूतत्वाच्च न चापश्यदित्यस्यानुक्त्वा धृतराष्ट्रगमनार्थांगीकारे भारतादौ युधिष्ठिराद्यनुज्ञया गत्युक्तेः तद्विरोधो दुर्वारः॥ ३०॥ ❀ ❀ मनसि प्रतीतपितृस्वर्याणस्य युधिष्ठिरस्य तन्मरणानंतरं तदवसरे तत्रागत्यासीनं संजयं प्रति पारलौकिकगतिप्रश्नमाह तत्रेति। गवल्गणस्यापत्यं गावल्गणिः तस्य संबुद्धिः हे गावल्गणे! नस्तातः क कं लोकं प्रति गतः? कथंभूतः नेत्रयोरिति तृतीयार्थे षष्ठी, नेत्राभ्यां हीनः नेत्रयोर्योगेन वा वृद्धः जरया च ग्रस्तः अंबा कुंती वा हतपुत्रत्वादार्ता गांधारी च परत्र लोकं कं प्रति गते? पितृव्यो धृतराष्ट्रः क गत इति पुनः प्रश्नस्तात्पर्यातिशयात्॥ ३१॥ ❀ ❀ धृतराष्ट्रस्य मरणकाले स्वस्मिन् प्रियाप्रियविवेकं तस्य मरणप्रकारं च पृच्छति अपीति। अकृतप्रज्ञे अशिक्षितबुद्धौ मयि स्वभार्यया सह शमलं पापमपराधमाशंसमानः हतबंधुर्दुःखितः सन् गंगायामपतदपि? बंधून् मारयित्वा स्वयं राज्यमादाय मां निष्कासितवानिति शमलबुद्धिः नाभवत् किं तद्दुःखातिशयादेव गंगायां पतित्वा मृतो नन्विति भावः॥ ३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अपीति। शमलम् अस्य मद्वधात्मकमपि पापं भवत्विति वाञ्छयेत्यर्थः॥ ३२-३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सुबलस्य पुत्री गान्धारी। साध्वी सुशीला। ननु सा सुकुमारी हिमाद्रिं दुःखबहुलं कथं गतेत्यत आह। न्यस्तदण्डानां प्रहर्षो यत्र तं दुःखदमपि केषाञ्चिदुत्साहवतां प्रहर्षहेतुर्भवतीति। अत्र दृष्टान्तः–मनस्विनां शूराणां परमसुकुमाराणामपि युद्धवी

राणां सन् उत्कृष्टः संप्रहारो युद्धमिव। सत्संप्रहारमिति पाठे क्लीबत्वमार्षम्। "संप्रहाराभिसम्पातकलिसंस्फोटसंयुगाः" इत्यमरः ॥ २९ ॥ ❀ ❀ कृतं मैत्रं मित्रदैवत्यं सन्ध्यावन्दनादिकं येन सः। नत्वा तिलादिभिः संपूज्येति प्रविश पिण्डीमिति-वदाक्षेपलब्धम्। नापश्यत् चकारात् न ज्ञातवांश्च। पितरौ धृतराष्ट्रविदुरौ ॥ ३० ॥ ❀ ❀ (ज्ञाननिरूपणार्थमुपन्यासविशेषः पिण्डीत्युच्यते।) गवल्गणस्य पुत्र सञ्जय! ॥ ३१ ॥ ❀ ❀ धृतराष्ट्रः शमलं मत्कर्तृकमपराधम् आशंसमानं युधिष्ठिरेण मम एकोऽपि पुत्रो न रक्षितस्तत् किं मे जीवितेनेति मनसानुलपन् निर्विद्यमान इत्यर्थः। यद्वा अस्य मद्वधात्मकमपि पापं भवत्विति वाञ्छन्नित्यर्थः ॥ ३२-३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

सुबलस्य पुत्री गांधारी न्यस्तदण्डानां परित्यक्तप्राणिद्रोहाणां प्रहर्षो यस्मिन् तम्। ननु न्यस्तदण्डानामपि हिमालयः प्रहर्षकरः केषां क इव तत्राह मनस्विनां शूराणां सत्संप्रहार इव ॥ २९ ॥ ❀ ❀ कृतं मैत्रं शौचादिसंध्यावंदनांतं कर्म येन सः। पितरौ विदुरधृतराष्ट्रौ ॥ ३० ॥ ❀ ❀ हे गावल्गणे संजय! ॥ ३१ ॥ ❀ ❀ मयि शमलमपराधमाशंसमानः स्वकीयया भार्यया सह गंगायां किमपतदित्यन्वयः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भार्यायामपि तेन मोहस्त्यक्त एव तथापि स्वधर्मत्वेन तया गतमित्याह पतिमिति। सुबलस्य पुत्रीति क्षत्रियाभिमानः तेजोजातिधर्मेणापि गमनमुक्तं, नन्वतिदुःखदेशे चित्तस्थैर्याभावात् परलोकार्थिनां कथं गमनं तत्राह न्यस्तदंडप्रहर्षमिति, न्यस्तस्त्यक्तः भूतेषु दंडो यैः भूताभयदातारः तेषां प्रकर्षेण हर्षो यत्र अन्या सर्वा भूर्जीवव्याप्ता, तत्र स्थितः अनिच्छयापि बहून् मारयति, ततो व्रतं भज्येत, हिमे तु सर्वजीवपरिहारात् शरीरेऽपि कृमिसंबंधाभावात् परमहंसानां हिमस्थानमतिप्रियं सर्वपरित्यागी देहपरित्यागार्थ-मपि प्रवृत्तः। तत्र तु देहपरित्यागसाधनानि सुगमानि यथा युद्धे मनस्विनां तत्र देहपरित्यागेच्छूनां सन् सत्कर्तृकसम्यक्प्रहारो यत्र युद्धे शस्त्रलक्ष्यभूतां वा स्यादिति स्मृतेः। अथवा वीररसाविष्टस्य यथा युद्धभूमिः तथा वैराग्यरसाविष्टस्य सर्वविषयरहितहिमस्थानम्। एवमुत्तमदेशपर्यंतमुक्तम् अग्रिमकृत्यं त्वनुवादात् स्पष्टीभविष्यति साक्षाद्विदुरोपदेशकथने मर्यादायां विरोध आपद्येत, यावत् कस्यापि हृदयं यस्मिन् सर्वात्मना भवेत् "सुहृदां वधसद्भावात् न समुच्येत कर्हिचित्" अत एवेष्टवर्गेच्छा यथा गच्छेत्तथा चरेत् धृतराष्ट्रे तथा बंधो माभूदिति हरेः प्रियः। युधिष्ठिरादिमोहस्य नाशमाह-स नारदः 'मोहाभावः स्वतो नास्ति तस्येति प्राक्कथातता' ॥२९॥ ❀ ❀ एवमर्धरात्रसमये धृतराष्ट्रे निर्गते उदयानंतरप्रहरपर्यंतं जिज्ञासा नाभूत् तदाह अजातशत्रुरिति। नाम्नैव वैराभावो निरूपितः। कृतमैत्र इति देवपितृऋषिभूततर्पणेन सर्वत्र मैत्री कृता। अथवा प्रातःसंध्या मित्रदैवत्या "मित्रस्य चर्षणीधृत" इत्युपस्थानात् अनुद्धरणाभ्युदये च मैत्रचरुविधानाच्च अतः कृतसंध्यावंदन इत्यर्थः, कृतावश्यको वा गुदस्य मित्रदैवत्यात् क्रमेण त्रयं ज्ञातव्यं हुताग्निः कृताग्निहोत्रः राज्ञो हि दानं नित्यं तत्रापि तिलपात्रं गोदानं स्वर्णदानमिति च आज्यावेक्षणं स्वर्णदान एवोक्तम् "तिलैर्विष्णुर्गवा रुद्रः भूम्या चैव प्रजापतिः। सर्वे प्रीताः सुवर्णेन सत्पात्रेषु समर्पणात्" इति दानानि कृत्वा ब्राह्मणेभ्यो नमस्कृत्य परंपरागतं गृहं प्रविष्टः राजगृहं राजशब्दवाच्यत्वं च धृतराष्ट्रे धृतमिति तद्गृहं प्रविष्टः गुर्वादिवन्दनमपि नित्यं नष्टाश्वदग्धरथन्यायेन धृतराष्ट्रस्य पितृत्वं युधिष्ठिरस्य च पुत्रत्वमिति। गुरुषु मातुर्मुख्यत्वात् न चापश्यत् कुंतीं नत्वा धृतराष्ट्रविदुरनमस्कारार्थं प्रविष्टः तौ सौबलीं च दृष्टवानपि न नमस्कारो दूरे महानुद्वेगो जातः ॥ ३० ॥ ❀ ❀ अतो विचार्यैव संजयं पृष्टवान् गवल्गणस्य पुत्रः गावल्गणिः पित्रादिक्रमेण त्वमेतेषामेव सेवकः कथमप्रमत्त इति नस्तात इति परमपूज्यत्वं वृद्ध इति धर्मः नेत्रयोर्हीन इति दया, संबंधमात्र-विवक्षया षष्ठी ॥ ३१ ॥ ❀ ❀ भार्यासहितत्वेन सुखित्वमाशंक्याह अंबा चेति गांधारी च पुत्रशोकेन भर्तृव्रतचर्यया च आर्ता पीडिता गमनसंभावनाभावत्वेनेत्युक्तं पितृव्यो विदुरः सोऽपि च सुहृत् शुद्धांतःकरणः, अतो वंचनं न करिष्यतीति भावः। गमनाभावात् अदर्शनाच्च गंगोपर्येव गृहस्य अत उभयाभावात् शास्त्रतः पुत्रत्वेऽपि यदि पुत्रत्वं न मृष्यते तदास्मासु शत्रुत्वमेव स्थितमिति कदाचिदस्मानपि मारयेदिति शमलं पापमाशंसमानः अपमृत्युषु गंगामरणं श्रेष्ठमिति अपमृत्युमरणात् दुःखितः मारणा-पेक्षया मरणमुत्तममिति गंगायाम् अपतत्। विदुरस्तु लज्जया अनुक्त्वैव गत इति भावः ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

पतिमित्यत्र। पौनरुक्त्यपरिहारायाहुः अबाधिकेति। 'विप्रस्य वै संन्यसतो' इत्यत्रोक्तैर्बाधकैर्दैवैरनाविष्टेत्यर्थः। अनुवादा-दिति। नारदकृतानुवादात्। ननु नारदेन विदुरोपदेशाद्गत इति कुतो नोक्तम्, तत्राहुः साक्षादित्यादि। विरोध इति। विदुरोऽस्मासु पूर्वं स्निग्धः, इदानीमस्मद्दोषदर्शी जात इत्याकारको विरोधो युधिष्ठिरस्य मनस्यापद्येत, तदनुचितम्, विदुरस्यान्यत्र तात्पर्यात्, अतस्तदभावार्थं नोक्तवानित्यर्थः। नन्वस्मिन्नध्याये धृतराष्ट्रस्य मुक्तिमात्रं वक्तव्यम्, तत्तु 'धृतराष्ट्रः सह भ्रात्रे' त्यादिना वक्ष्यति, ततः पूर्वं युधिष्ठिरप्रश्नादिकं व्याससूताभ्यां किमित्युक्तमित्याकांक्षायां युधिष्ठिरादिमुक्तिर्यग्रिमाध्याययोर्वक्ष्यते, तदुपोद्घातत्वे-

नात्रेदमुक्तम्। तथा धृतराष्ट्रमुक्तेः प्रकृतत्वात्तदुपयुक्तत्वेनाप्युक्तम्, तथान्योपदेशायाप्युक्तमित्याशयं कारिकाभिराहुः यावदित्यादि। प्राक्कथेति। युधिष्ठिरप्रश्नादिकथा ॥ २९ ॥ ❀ ❀ अजातशत्रुरित्यत्र। अनुद्धरणाभ्युदयेति। गार्हपत्यादिकं कुण्डादग्नीनामुद्धरणात्पूर्वं सूर्योदये तत्प्रायश्चित्तत्वेन तद्विधानमित्यर्थः। क्रमेणेति। आवश्यकं पूर्वं ततः सन्ध्या ततस्तर्पणमिति क्रमेण ॥ ३० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

सुबलस्य पुत्री गान्धारी च हिमालयं प्रयान्तं पतिमनुजगामेत्यन्वयः। कथं सुकुमारी हिमादिदुःखबहुलं हिमवन्तं गतेत्याशङ्क्य तं विशिनष्टि–न्यस्तस्त्यक्तो दण्डो भूतद्रोहो यैस्तेषां सर्वभूतसुहृदां प्रकृष्टो हर्षो यस्मिंस्तम्। दुःखदमपि केषाञ्चित्प्रहर्षहेतुर्भवतीत्यत्र दृष्टान्तमाह–मनस्विनां शूराणां युद्धे सन् तीव्रः सम्प्रहारो यथा तथेत्यर्थः। 'सत्सम्प्रहारम्' इति पाठान्तरे सन्सम्प्रहारो यत्र तद्युद्धं यथा तथेत्यर्थः। तस्यास्तु तेन सह गमनमुचितमेवेत्याशयेन तां विशिनष्टि–पतिव्रतेति, साध्वी सुशीला चेति ॥ २९ ॥ ❀ ❀ कृतं मैत्रं मित्रदैवत्यं कर्म सन्ध्यावन्दनं येन सः हुता अग्नयः आहवनीयादयो येन सः अजातशत्रुर्युधिष्ठिरः तिलादिभिः सत्कृत्य विप्रान्नत्वा गुरूणां पूज्यानां धृतराष्ट्रादीनां वन्दनाय धृतराष्ट्रस्य गृहं प्रविष्टः संस्तत्र पितरौ धृतराष्ट्रविदुरौ सौबलीं गान्धारीं च नापश्यदित्यन्वयः। कृतमैत्र इत्यनेन रात्रावेव धृतराष्ट्रो निरगादिति ज्ञेयम् ॥ ३० ॥ ❀ ❀ तत्र धृतराष्ट्रगृहे आसीनमुपविष्टं सञ्जयनामानं सूतमुद्विग्नं मानसं मनो यस्य स युधिष्ठिरः पप्रच्छेत्यन्वयः। प्रश्नमेव दर्शयति–गावल्गणे इत्यादिभिस्त्रिभिः। हे गावल्गणे गवल्गणस्य सूतस्य पुत्र सञ्जय नोऽस्माकं तातः पितृस्थानीयो धृतराष्ट्रः क्व गतः ? । दयापरवशस्तस्य दैन्यं द्योतयन् विशिनष्टि–नेत्रयोर्नेत्राभ्यां हीनो वृद्धश्चेति। अम्बा वा गान्धारी च क्व गता ? तस्या अपि दैन्यमाह–मया हताः पुत्रा यस्याः साऽत एवार्त्ता दुःखितेति। पितृव्यो विदुरश्च क्व गतः ? तस्य भगवद्भक्तत्वं परोपकारित्वादिकं च सूचयन् विशिनष्टि–सुहृदिति ॥ ३१ ॥ ❀ ❀ स्वभार्यया सह दुःखितो स धृतराष्ट्रो मयि शमलमपराधं मत्पुत्रान् हतवान् मामपि हनिष्यतीत्याशंसमानः आशङ्कमानः एवं परहस्तापमृत्योर्गङ्गायां मरणमुत्तममिति मत्वापि किं गङ्गायामपतदित्यन्वयः। तस्य दुःखितत्वे आशङ्कायां च हेतुमाह–हतबन्धुरिति, मया हता बन्धवः पुत्रादयो यस्य सः। तर्हि किमिति त्वया तत्पुत्रा हता इत्यपेक्षायामाह–अकृतप्रज्ञ इति विवेकहीन इत्यर्थः ॥ ३२ ॥

हिन्दी अनुवाद

जब परम पतिव्रता सुबलनन्दिनी गान्धारीने देखा कि मेरे पतिदेव तो उस हिमालयकी यात्रा कर रहे हैं, जो संन्यासियोंको वैसा ही सुख देता है; जैसा वीर पुरुषोंको लड़ाईके मैदानमें अपने शत्रुके द्वारा किये हुए न्यायोचित प्रहारसे होता है, तब वे भी उनके पीछे-पीछे चल पड़ीं ॥ २९ ॥ ❀ ❀ अजातशत्रु युधिष्ठिरने प्रातःकाल सन्ध्यावन्दन तथा अग्निहोत्र करके ब्राह्मणोंको नमस्कार किया और उन्हें तिल, गौ, भूमि और सुवर्णका दान दिया। इसके बाद जब वे गुरुजनोंकी चरणवन्दनाके लिये राजमहलमें गये, तब उन्हें धृतराष्ट्र, विदुर तथा गान्धारीके दर्शन नहीं हुए ॥ ३० ॥ ❀ ❀ युधिष्ठिरने उद्विग्नचित्त होकर वहीं बैठे हुए सञ्जयसे पूछा–'सञ्जय! मेरे वे वृद्ध और नेत्रहीन पिता धृतराष्ट्र कहाँ हैं? ॥ ३१ ॥ ❀ ❀ पुत्रशोकसे पीड़ित दुखिया माता गान्धारी और मेरे परम हितैषी चाचा विदुरजी कहाँ चले गये? ताऊजी अपने पुत्रों और बन्धु-बान्धवोंके मारे जानेसे दुःखी थे। मैं बड़ा मन्दबुद्धि हूँ–कहीं मुझसे किसी अपराधकी आशङ्का करके वे माता गान्धारीसहित गङ्गाजीमें तो नहीं कूद पड़े ॥ ३२ ॥

पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून्। अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ ३३ ॥

सूत उवाच

कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः। आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥ ३४ ॥

विमृज्याश्रूणि[1] पाणिभ्यां विष्टभ्यात्मानमात्मना। अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३५ ॥

सञ्जय उवाच[2]

नाहं[3] वेद व्यवसितं पित्रोर्वः कुलनन्दन। गान्धार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥ ३६ ॥

---

१. प्रा० पा०—विमृज्य पाणिनाश्रूणि विष्ट०। २. —प्राचीने पाठे 'संजय उवाच' पाठो न। ३. प्राचीने पाठे 'नाहं वेद...' इत्यारभ्य वहन्ति बलिमीशितुः ॥' पर्यन्तं पञ्च श्लोका एवम्प्रकारका उपलभ्यन्ते—

'अहं व्यवसितं रात्रौ पित्रोस्ते कुलनन्दन। न वेद साध्व्या गान्धार्या मुषितोऽस्मि महात्मभिः ॥
एतस्मिन्नन्तरे विप्र नारदः प्रत्यदृश्यत। वीणां वितन्त्रीं ध्वनयन् भगवान् सहतुम्बुरुः ॥
शेषश्लोकत्रयं ५९४ पृष्ठे वर्तते।

श्रीधरस्वामिविरचिता भावार्थदीपिका

यावरक्षतां तौ । इतः स्थानात् ॥ ३३ ॥ ❀ ❀ कृपया स्नेहवैक्लव्याच्चातिपीडित आत्मेश्वरं धृतराष्ट्रमपश्यन् विरहकर्शितश्च सूतः संजयो न प्रत्युत्तरमाह ॥ ३४ ॥ ❀ ❀ आत्मना बुद्ध्यात्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा प्रभोर्धृतराष्ट्रस्य ॥ ३५ ॥ ❀ ❀ गांधार्याश्च व्यवसितं निश्चितम् । यतो मुषितो वञ्चितोऽस्मीति ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वस्याकृतप्रज्ञत्वमुपपादयति–पितरीति । नोऽस्माकं पितरि पाण्डौ उपरते स्वर्गं गते सति यौ गांधारीधृतराष्ट्रौ शिशून्सर्वान् व्यसनतोऽरक्षताम् । सुहृत्त्वं शिशुत्वं च रक्षणीयत्वे हेतुः । तौ पितृव्यौ मृत्वेतोऽस्माल्लोकात्परत्र कं लोकं गताविल्यन्वयः । तयोरनवरतशुश्रूषणाभावादेवमप्यकृतप्रज्ञत्वमिति भावः ॥ ३३ ॥ ❀ ❀ ननु आत्मनः स्वस्येश्वरं स्वामिनं धृतराष्ट्रमचक्षाणो मृतत्वादेवापश्यन् अत एव विरहेण वियोगेन कर्शितः कृशतरः कुतः स्नेहपारवश्याद्दाक्षिण्याच्च संजयो युधिष्ठिरवाक्योत्तरं वक्तुं नाशकदित्यन्वयः । यद्वा कृपया हा वृद्धानामनाथानां का दशा भविष्यतीति चेतोद्रवेण । स्नेहस्त्वत्र संबंधहेतुक एव ॥ ३४–३५ ॥ ❀ ❀ प्रजा रंजयित्वा कुलं नन्दयतीति निरुक्त्या कुलनन्दनता त्वय्यस्तीति सापेक्षा संबुद्धिः । हे महाबाहो इति सम्बुद्धिरपि धन्यौ ते भुजौ यत्प्रभावेण धृतराष्ट्रादेरियं व्यवस्था जातेति भावः । मुषितोस्मि मामपीह त्यक्त्वा गतास्ते इत्यर्थः । बहुत्वं गांधार्यपेक्षया ॥ ३६ ॥

श्रीमद्वीरराघवव्याख्या

वात्सल्ययुक्तत्वात्सापराधेष्वपि दोषमनवेक्ष्योपकारकत्वेन चिंतयन्पृच्छति–पितरि पांडावुपरते सति सर्वान्नोऽस्मान्सुहृदः पुत्रान् शिशून् व्यसनतः आपद्भ्यः यावरक्षतां तौ पितृव्यौ पितुर्भ्रातरौ धृतराष्ट्रविदुरावितः क्व गतौ छत्रिन्यायेन विदुराभिप्रायाद्वा व्यसनतोऽरक्षतामित्युक्तम् ॥ ३३ ॥ ❀ ❀ एवमुक्तः सूतः संजयः आत्मनः स्वस्येश्वरं प्रभुं धृतराष्ट्रमचक्षाणः अपश्यमानः अत एवातीव पीडितो दुःखितः तद्विरहेण कर्शितः क्षणादेव कृशीभूतः सन्कृपया स्नेहवैक्लव्यात् धार्ष्ट्याच्च तावन्न प्रत्याह प्रत्युत्तरं वक्तुं न प्रबभूवेत्यर्थः ॥ ३४ ॥ ❀ ❀ ततः शनैः पाणिभ्यामश्रूणि विमृज्यात्मना विवेकात्मिकया धियात्मानं संकल्पविकल्पात्मकं मनो विष्टभ्य प्रतिबध्य स्थिरीकृत्य प्रभोर्धृतराष्ट्रस्य पादावनुस्मरन्नजातशत्रुं प्रत्यूचे ॥ ३५ ॥ ❀ ❀ उक्तिमेवाह नेति । हे कुरुनंदन ! वो युष्माकं पित्रोर्विदुरधृतराष्ट्रयोर्गांधार्याश्च व्यवसितं निश्चितं नाहं वेद्मि । हे महाबाहो ! त्वमिवाहमपि महात्मभिः तैर्मुषितोऽस्मि वंचितोऽस्मि ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वस्याकृतप्रज्ञत्वमुपपादयति पितरीति । नः अस्माकं पितरि पाण्डौ उपरते स्वर्गं गते सति यौ गांधारीधृतराष्ट्रौ शिशून् सर्वान् व्यसनतोऽरक्षतां सुहृत्त्वं शिशुत्वं च रक्षणीयत्वे हेतुः तौ पितृव्यौ गांधारीधृतराष्ट्रौ मृत्वेतः अस्माल्लोकात्परत्र कं लोकं गताविल्यन्वयः । तयोरनवरतशुश्रूषणादेव कृतप्रज्ञता तदभावादकृतप्रज्ञत्वमिति भावः ॥ ३३ ॥ ❀ ❀ अतिपीडितः दुःखेनेति शेषः, स्वस्य ईश्वरं स्वामिनं धृतराष्ट्रमचक्षाणः मृतत्वादेवापश्यन् अत एव विरहेण वियोगेन कर्शितः वक्तुं नाशकदित्यन्वयः ॥ ३४ ॥ ❀ ❀ आत्मना मनसा आत्मानं विष्टभ्य संस्थाप्य प्रभोर्धृतराष्ट्रस्य ॥ ३५ ॥ ❀ ❀ प्रजा रंजयित्वा कुलं नंदयति न त्वन्यथा इत्यतः पदद्वयं प्रायोजि । न केवलं त्वमेव व्यसितोऽहं वियोजित इति चार्थः, पित्रोः कुंतीधृतराष्ट्रयोः परलोकगतिमिति शेषः । मुषितः वंचितोऽस्मि ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सञ्जय उवाचेति कचिन्नास्ति । नाहं वेद्मीत्यादौ–'अहं व्यवसितं राजन् पित्रोस्ते कुलनन्दन । न वेद साध्व्या गान्धार्या मुषितोऽस्मि महात्मभिः ॥' इति कचित् पाठः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृपया हा वृद्धयोरनाथयोः किं भविष्यतीति चेतोद्रवेण सम्बन्धहेतुको यः स्नेहस्तेन वैक्लव्याच्च ॥ ३४ ॥ ❀ ❀ आत्मना बुद्ध्या आत्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा ॥ ३५ ॥ ❀ ❀ वेद वेद्मि । मुषितो वञ्चितः । मन्निद्रासमये ते गता इति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यसनतः आपद्भ्यः यावरक्षतां तौ पितृव्यौ पितुर्भ्रातरौ इतः स्थानात् ॥ ३३ ॥ ❀ ❀ आत्मन ईश्वरमन्नादिना रक्षकं धृतराष्ट्रमचक्षाणोऽपश्यमानः ॥ ३४ ॥ ❀ ❀ प्रभोः सर्वसंयोगवियोगहेतोः परमेश्वरस्य ॥ ३५ ॥ ❀ ❀ मुषितोऽस्मि वंचितोऽस्मि ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तदप्यसंभावितमिति मत्वाह पितर्युपरत इति। वस्तुतस्तु उभाभ्यामेव रक्षितौ लाक्षागृहात् दास्याच एवमन्यदपि ज्ञातव्यं तदाह अरक्षतां व्यसनत इति ॥ ३३ ॥ ❀ ❀ संजयस्तु पूर्वमेव तदभावं ज्ञात्वा भयादपि मूर्च्छित एव स्थितः, अतो नो नूनं दत्तवानित्याह कृपयेति। दानत्वात् कृपा स्नेहः सहजः कृपयाच स्नेहाधिक्याद्वैक्लव्यमात्मेश्वरमिति नीतिः अतिपीडायां हेतुः। यद्यपि युधिष्ठिर ईश्वरः तथापि स्वयं धृतराष्ट्र एव अवचने अतिपीडैव हेतुः न त्वज्ञानादिः, तथापीश्वरसांनिध्यात् तूष्णींभावोनुचित इति। "वैक्लवश्च न वदेदि"ति स्मृतेः ॥ ३४ ॥ ❀ ❀ निर्गतानि अश्रूणि पाणिना विमृज्य अन्येषामनिर्गमार्थं चात्मानं विष्टभ्य गुर्वंतराभावेऽपि स्वयमेव गुरुर्भूत्वा प्रमादकथनेऽपि दंडं न करिष्यतीति अजातशत्रुं प्रति धृष्टतौदासीन्यहेलनाद्यभावाय प्रभोर्धृतराष्ट्रस्य पादावनुस्मरन् भक्त्या भगवतो वा दंडाभावाय प्रत्यूचे प्रतिकूलमुत्तरं दत्तवान् ॥ ३५ ॥ ❀ ❀ नहि न जानामीति क्के राज्ञः प्रियं भवति अज्ञाने हेतुः आत्मव्यवसितमिति न केनचित्सह मंत्रणं कृतं किंतु आत्मन्येव व्यवसितमवसितं "वष्टिभागुरिरल्लोपमि"ति। पित्रोर्वे इति कदाचिद्धवद्भिर्ज्ञायेत आत्मत्वात् कुलनन्दनत्वाच्च चिकीर्षितमिति कदाचित् सूचयेत्। अथवा कुलनन्दनेति तव तु दोषो नास्तीत्यर्थः। महाबाहो! इति। तव तु क्रियाशक्तेराधिक्येऽपि यदि त्वं न जानासि कुतो मम ज्ञानमिति भावः। महात्मभिरिति महानात्मा आत्मनि वा यस्य स्वत एव वचनसामर्थ्यं भगवदीयत्वेन वा उभयथाप्यहं वंचित इत्यर्थः ॥ ३६ ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न

श्रीगिरिधरकृता बालप्रबोधिनी

अजातशत्रुत्वात् सापराधेष्वपि दोषानपेक्ष्योपकारं मत्वाऽऽह—पितरीति। पितरि पाण्डावुपरते मृते सति सर्वाञ्जोऽस्मान् सुहृदः पुत्रान् शिशून् व्यसनतो नानाविधापद्भ्यो यावरक्षतां तौ पितृव्यौ पितृभ्रातराविता स्थानात् क्व गतावित्यन्वयः ॥ ३३ ॥ एवमुक्तः सूतः सञ्जयो न प्रत्याह प्रत्युत्तरं न दत्तवानित्यन्वयः। तत्र हेतुमाह—कृपया वृद्धस्य नेत्रहीनस्य निर्गतस्य का गतिर्भविष्यती-त्यालोचनेन स्नेहेन यद्वैक्लव्यं व्याकुलत्वं तस्माच्चातिपीडित इत्यन्वयः। यस्माच्च आत्मनः स्वस्येश्वरं स्वामिनं धृतराष्ट्रमचक्षाणः अपश्यंस्तद्विरहेण कर्शितः कृशीकृत इत्यन्वयः ॥ ३४ ॥ ❀ ❀ ततश्च शनैर्निर्गतान्यश्रूणि पाणिभ्यां विमृज्य अन्येषामनिर्गमार्थम् आत्मना विवेकात्मिकया धियाऽऽत्मानं सङ्कल्पविकल्पात्मकं मनो विष्टभ्य स्थिरीकृत्य प्रभोर्धृतराष्ट्रस्य पादावनुस्मरन् अजातशत्रुं प्रत्यूचे उत्तरं दत्तवानित्यन्वयः ॥ ३५ ॥ ❀ ❀ तदुक्तिमाह—नाहमिति। तव तु न कश्चिदप्यपराध इति सूचयन् सम्बोधयति—हे कुलनन्दनेति। समस्तकुलपालने तव सामर्थ्यमस्तीति सूचयन् पुनः सम्बोधयति—हे महाबाहो इति। वो युष्माकं पित्रोर्विदुरधृत-राष्ट्रयोर्गान्धार्याश्च व्यवसितं निश्चितमहं न वेद न जानामि, यतः त्वमिवाहमपि महात्मभिर्महाबुद्धिभिः तैर्मुषितो वञ्चितोऽस्मीत्यन्वयः ॥ ३६ ॥

हिन्दी अनुवाद

जब हमारे पिता पाण्डुकी मृत्यु हो गयी थी और हमलोग नन्हे-नन्हे बच्चे थे, तब इन्हीं दोनों चाचाओंने बड़े-बड़े दुःखोंसे हमें बचाया था! वे हमपर बड़ा ही प्रेम रखते थे। हाय! वे यहाँसे कहाँ चले गये?' ॥ ३३ ॥ ❀ ❀ सूतजी कहते हैं—सञ्जय! अपने स्वामी धृतराष्ट्रको न पाकर और कृपा और स्नेहकी विकलतासे अत्यन्त पीड़ित और विरहातुर हो रहे थे। वे युधिष्ठिरको कुछ उत्तर न दे सके ॥ ३४ ॥ ❀ ❀ फिर धीरे-धीरे बुद्धि द्वारा उन्होंने अपने चित्तको स्थिर किया, हाथोंसे आँखोंके आँसू पोंछे और अपने स्वामी धृतराष्ट्रके चरणोंका स्मरण करते हुए युधिष्ठिरसे कहा ॥ ३५ ॥ ❀ ❀ संजय बोले—कुरुनन्दन! मुझे आपके दोनों चाचा और गान्धारीके सङ्कल्पका कुछ भी पता नहीं है। महाबाहो! मुझे तो उन महात्माओंने ठग लिया ॥ ३६ ॥

अथाजगाम भगवान् नारदः सहतुम्बुरुः। प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्निव ॥ ३७ ॥

युधिष्ठिर उवाच

नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः। अम्बा वा हतपुत्राऽऽर्ता क्व गता च तपस्विनी ॥ ३८ ॥
कर्णधार इवापारे भगवान् पारदर्शकः। अथाबभाषे भगवान् नारदो मुनिसत्तमः ॥ ३९ ॥
मा कंचन शुचो राजन् यदीश्वरवशं जगत्। लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः ॥
स संयुनक्ति भूतानि स एव वियुनक्ति च ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं कंचित्कालं शोचति तस्मिन्नथ नारद आजगाम। अत्रास्ति कचित्पुस्तके पाठान्तरं तदुल्लंघ्य यथासंप्रदायं व्याख्यायते। शोकवेगादभ्यर्चयन्निवाह राजा न त्वभ्यर्चयत्॥ ३७॥ ❀ ❀ नाहं वेद वेद्मि। तपस्विनी दुःखयुक्ता। अपारे शोकार्णवे भगवांस्त्वमेव पारदर्शकः। अतो ब्रूहीति शेषः॥ ३८॥ ❀ ❀ आदावेव यथावृत्तकथने शोकेन मूर्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति। कंचन मा शुचो मा शोचः। न केवलं तानेव। यद्यस्मादीश्वराधीनं जगत्॥ ३९॥ ❀ ❀ तदेवाह लोका इति। संयुनक्ति संयोजयति वियुनक्ति वियोजयति च॥ ४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ युधिष्ठिरसंवादे प्रवृत्ते पाठान्तरम् अभ्यर्चयन्मुनिमित्येवंरूपम्। तुम्बुरुर्गन्धर्वविशेषः॥ ३७॥ ❀ ❀ हे भगवन्निति। श्रीनारदस्य सर्वज्ञतां द्योतयन्नाह–मृतयोः पित्रोः परलोकगतिं न वेद तां भवन्तं पृच्छामि तौ मृत्वेतः कं लोकं प्रति गताविति॥ ३८॥ ❀ ❀ धृतराष्ट्रादिषु कञ्चन मा शुचः। यद्यतः कर्मानुसारेण भूतानि संयोजयतीश्वरो वियोजयति च, तस्मादस्ववशत्वाच्छोको वृथैवेति भावः॥ ३९॥ ❀ ❀ ईश्वरजीवस्वातन्त्र्यपारतन्त्र्यं सोदाहरणमाह–यथेति। इत्यर्थ इति। बलिं यज्ञादिलक्षणां पूजां वहन्ति कुर्वन्ति। तस्मात्स एव स्वतन्त्रो जीवास्तदधीना इति शोकपरिहाराय स ईशः स्वविहितकर्मणा पूज्य इति भावः॥ ४०॥

श्रीमद्वीरराघवव्याख्या

अथ तस्मिन्नेव समये तुंबुरुणा सहितो भगवान्नारदः तत्राजगाम। तमवलोक्य सानुजो युधिष्ठिरः प्रत्युत्थायाभिवाद्याभ्यर्चयन्नेवाह॥ ३७॥ ❀ ❀ उक्तिमेवाह नाहमिति द्वाभ्याम्। भगवन्! पित्रोर्गतिं नाहं वेदाहं न जाने तावितः क गतौ तथा हतपुत्रा आर्त्ता च तपस्विनी पतिव्रता चांबा क गता॥ ३८॥ ❀ ❀ दिष्ट्येत्यानंदद्योतकमव्ययं चादेराकृतिगणत्वान्निपातसंज्ञायां "स्वरादिनिपातमव्ययमि"त्यव्ययसंज्ञा, व्यसनार्णवे पितृविश्लेषजदुःखार्णवमग्नानामस्माकं कर्त्तरि षष्ठी, नोऽस्माभिर्भगवांस्त्वं दिष्ट्या दृष्टः। त्वद्दर्शनेन व्यसनमपगतमेवानन्दश्च भविष्यति इति भावः। कथं दृष्टः अपारे दुःप्रापतीरे मोहसमुद्रे तारयिता कर्णधार इव नाविक इव नस्त्वं पित्रोर्गतिं ब्रूहि तव प्रीतिं मा वोच इत्यभिप्रायेण तं विशिनष्टि–पारदर्शनः सर्वस्यावध्यवधिदर्शनः सर्वज्ञ इति यावत्। हे भार्गव! इत्थं धर्मपुत्रेण युधिष्ठिरेण पृष्टः सर्वज्ञो भगवान् मुनिश्रेष्ठो नारदः तमाबभाषे॥ ३९॥ ❀ ❀ भाषणमेवाह मा कंचनेति विंशत्या। यत्पृष्टं पित्रोर्गतिं ब्रूहि त्वमिति तस्योत्तरं विवक्षुस्तावत्तत्तज्जीवकर्म्मानुगुणसुखदुःखादिफलप्रदानप्रवृत्तेश्वरायत्तत्वात्कृत्स्नस्य जगतस्तदंतर्गतस्त्वं कर्माधीनत्वादिह तदनुबन्ध्यादिसंश्लेषनिमित्तं शोकं मा कुर्विति वैराग्योत्पादनायाह चतुर्भिः। हे राजन्! कंचन देहं तदनुबन्धिनं वा कंचिदपि मा शुचः शोकं मा कार्षीः। कुतः यद्यस्मादिदं जगदीश्वरवशं कर्मानुगुणफलदानप्रवृत्तेश्वरायत्तं वियोगमित्यर्थः। कोसावीश्वर इत्यत्राह सपाला इन्द्रादिलोकपालैः सहिताः लोका विरिंचिप्रभृत्यकिंचनपर्यंता इमे जना यस्येशितुः बलिं पूजां वहन्ति किंकरा भवंतीत्यर्थः॥ ४०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एतस्मिन्नंतरे युधिष्ठिरसंजयसंवादमध्ये त्रितन्त्रीं तन्त्रीत्रयमेलनोपेतां वीणां ध्वनयन् वादयन् तुंबुरुणा सह वर्तमानः भगवान्हरेः षड्गुणवेत्ता पूज्यो वा॥ ३७॥ ❀ ❀ राज्ञादरेणोपनीतं दत्तमर्घ्यं यस्मै स तथा तं प्रत्युत्थानं कृत्वाभिवंदितं परमासने सिंहासनसमानपीठे आसीनमुपविष्टं नारदं कौरवेंद्रो युधिष्ठिरोऽभ्यभाषत इत्यन्वयः॥ ३८॥ ❀ ❀ हे भगवन्! मृतयोः पित्रोः परलोकगतिं न वेद तां भवंतं पृच्छामि तौ मृत्वेतः कं लोकं प्रतिगताविति अपारे संसारे सीदतां बिभ्यतां कर्णधारो नाविक इव तस्मात्त्वं दुःखार्णवे मग्नानां पारं परं तीरं दुःखशमनोपायं दर्शयतीति पारदर्शनः॥ ३९॥ ❀ ❀ धृतराष्ट्रादिषु कंचन मा शुचः शोकं मा कार्षीः। कुतः जगदीश्वरवशमिति यद्यस्मात्स एवेश्वरः भूतानि संयुनक्ति स्वकर्मानुसारेण संयोजयति स एव स्वकर्मावसाने वियुनक्ति वियोजयति। एतस्मादस्ववशत्वान्मा शुच इति भावः॥ ४०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

अथाजगाम इत्यादौ–'एतस्मिन्नन्तरे विप्रा नारदः प्रत्यदृश्यत। वीणां त्रितन्त्रीं ध्वनयन् भगवान् सहतुम्बुरुः। राजदत्तोपनीतार्घ्यं प्रत्युत्थायाभिनन्दितम्। परमासन आसीनं पौरवेन्द्रः स्म भाषते।' इति पुण्यारण्यचित्सुखयोः सम्मतः पाठः॥ ३७-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

शोकवेगादभ्यर्च्चयन्निवाह न त्वभ्यच्च्चर्य ॥ ३७–३८ ॥ ❀ ❀ अपारे शोकार्णवे । भगवान् सर्व्वज्ञस्त्वमतो ब्रूहीति भावः ॥ ३९ ॥ ❀ ❀ आदावेव यथावृत्तकथने शोकेन मूर्च्छितः पतेदिति प्रथमं तावत् शोकमुपशमयति । मा शुचः मा शोचः तयोर्विच्छेदेन सीदामीति चेदप्रतिकार्य्यमेतत् संयोगवियोगयोरीश्वराधीनत्वादित्याह स इति ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मुनिमभ्यर्चयन्नाह ॥ ३७ ॥ ❀ ❀ वेद वेद्मि ॥ ३८–३९ ॥ ❀ ❀ तत्र सर्वं भगवदधीनमिति वदन् शोकं निराकरोति मा कंचनेति दशभिः । हे राजन् ! कंचन मा शुचः कमपि प्राकृतमर्थमुद्दिश्य शोकं मा कृथाः, यतो जगदीश्वरवशं, बलिं पूजां भूतानि देवमनुष्यादीनि ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं पूर्वकथां निरूप्य विवक्षितकथामारभते । तत्र गावल्गणिवाक्यं श्रुत्वा महामोहग्रस्तो राजा प्रमादं वा कुर्यादित्याशंक्य एतादृशकार्ये नियुक्तो नारदः तदा समागत इत्याह अथेति । अथ मोहानंतरं तदपगमार्थमागत इत्यर्थः । तुंबुरुरन्यो ऋषिः शोकापनोदे हि संमतिरपेक्ष्यते । अधिकारिण उद्वेगात् हीनत्वात् तदा प्रमादं कर्तुं विचारयन् ॥ ३७ ॥ ❀ ❀ नारदं दृष्ट्वा अनेन निर्णयो भविष्यतीति उत्थाय पूर्वावस्थां त्यक्त्वा ऋषिमभिवाद्य स्वागतादिकमपृष्ट्वैव धृतराष्ट्रं पृच्छति नाहं वेदेति । अमङ्गलसंभावनं नोक्तवान् अयुक्तत्वात् ॥ ३८ ॥ ❀ ❀ शीघ्रकथनार्थमाह कर्णधार इति । शोकसमुद्रे मग्ना वयं तत्र सर्वज्ञ नौका तस्या निर्वाहको भवानेव केवलनाविकवन्न किंतु पारदर्शनः गंतव्यदेशं पश्यसि पर्यवसानं जानासीत्यर्थः । एवमर्द्धवचने स्थितः उपसंहाराकथनात् तदा नारदः । तस्य कथनहेतुं ज्ञात्वा स्वयमेव बभाषे ज्ञाने हेतुर्भगवानिति अनुबंधे वा मुनिसत्तमेति संबोधनं, पाठांतरेऽपि प्रकाराणामुक्तत्वात् आभासाद्यूहनेन स्वयमूहनीयं, मुनयः कृपालवो भवंति । अतः कृपया नारदः अपृष्टमप्याहेत्यर्थः ॥ ३९ ॥ ❀ ❀ भगवान् संसारिजीवेषु यदज्ञानं करोति तत्सहसा कृतिव्यावृत्त्यर्थम् । अतस्त्वयापि सहसा न किंचित् कर्त्तव्यं प्रथमतो मोहं दूरीकुरु पश्चात् पृष्टं वक्ष्यामीत्यभिप्रायेणाह मा कंचन शुच इति । शोको हि अनिष्टज्ञानसाध्यस्वन्यूनतादृक् अनिष्टपदार्थनिदध्यासनविशेषः कोऽप्यनिष्टभावनया न चिंतनीय इत्यर्थः । राजन्निति सम्बोधनात् महाकुटुंबित्वमुक्तं तेन महति राज्ये सर्वदेष्टानिष्टोत्पत्तेः । शोके कदाचिदपि राज्यसुखं न स्यात् । अतो राजा न शोचति, किंच शोको निष्फलः विरुद्धश्च तत्र हेतुः यदीश्वरवशं जगदिति । यस्मात् कारणात् सर्वं जगत् ईश्वरवश्यं, भगवता हि सर्वः पदार्थः क्रियते स च न कस्य विद्विष्ट इष्टो वा स स्वार्थं परार्थं करोति । तत्र परार्थपक्षे भगवता तस्य हिते क्रियमाणे स्वयं चेच्छोचेत् तदा निषिद्धं भगवतश्च कोपो भवेत् , भगवल्लीलायां तु सुतरामेव क्रोधः अनौचित्यं च स्वस्यापि ममतास्पददूरीकरणे पूर्वोक्त एव न्यायः । अतो भगवदधीनत्वात् आत्मानं परं वा कंचन मा शुचः । ननु अग्नेरिव संयोगवियोगाभ्यां दुःखजननात् स्वदुःखेन शोक इति चेत्तत्राह— स संयुनक्तीति भूतानि स एव योजयति वियोजयति च तस्मात् कृताविव संयोगेऽपि सैव युक्तिरनुसंधेया । उभयथापि सर्वथा भगवान् हितं करोतीति ज्ञातव्यम् ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथाजगामेत्यत्र । प्रमादमिति आत्मघातादिरूपमनर्थम् । उद्वेगाद्धीनत्वादिति उद्वेगेन हीनत्वात् । अधिकारजाघन्यादित्यर्थः ॥ ३७ ॥ ❀ ❀ मा कञ्चनेत्यत्र । शोको हीत्यादि । शोको हि यथा मानभङ्गादौ स्वन्यूनतायां तस्य मननेन विशिष्टज्ञानम् । तत्र च शत्रुनाशादिनिदिध्यासनेति व्याप्तिवारणाय विशेषणदलम् , स्वन्यूनतापादकमनिष्टज्ञानं शोक इत्युक्ते पुत्रादिनाशश्रवणजन्यशाब्दमात्रेति व्याप्तिरिति तद्वारणाय विशेष्यदलम् । तादृशशाब्दस्यापि लक्ष्यत्वाङ्गीकारे तु प्रयोगप्रसिद्धयोर्विरोध एव दोष इति समुदितोपादानम् । निदिध्यासनं प्रयत्नपूर्वकं विशिष्टज्ञानम् , तदेतदभिसन्धायाहुः कोपीत्यादि । शोकाकरणे हेत्वन्तरमाहुः किञ्चेत्यादि । ननु स्वपुत्रनाशादौ कथं हितकरणानुसन्धानं स्वार्थपक्षे इत्यत आहुः ममतास्पदेत्यादि । सैवेति स्वहितकरणरूपा । लीलात्वेन विचारेपि सैवानुसन्धेयेत्याशयेनाहुः । उभयथेत्यादि ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अथानन्तरं तस्मिन्नेव समये तुम्बुरुणा सहितो भगवान् सर्वज्ञो नारदस्तत्राजगाम । तमवलोक्य सानुजो युधिष्ठिरः प्रत्युत्थायाभिवाद्य चाभ्यर्चयन्निवाहेत्यन्वयः । यथोचितं पूजनं तु न कृतवानिति सूचनायेवशब्दः । 'शोकाक्रान्तः शुचाऽऽविष्टः श्रद्धया रहितः पुमान् । गुरुदेवद्विजातीनां पूजनं न समाचरेत्' इति स्मृत्या तन्निषेधात् ॥ ३७ ॥ ❀ ❀ तत्प्रश्नमेव दर्शयति— नाहमिति सार्द्धेन । हे भगवन् पित्रोर्धृतराष्ट्रविदुरयोर्गतिं पदवीमहं न वेद न जाने, तावितः क गतौ तदप्यहं न जाने । अतस्त्वं

वदेति शेषः । सन्तापे हेतुमाह–आर्त्ता पीडावती । तत्र हेतुमाह–हतपुत्रेति । न च वक्तव्यमहमपि न जानामीति यतोऽपारे समुद्रे निमग्नानां पारदर्शकः कर्णधार इव पितृविरहदुःखनिमग्नानाम् अस्माकं तद्गतिप्रदर्शको भगवान् सर्वज्ञस्त्वं, आगत इति शेषेणान्वयः ॥ ३८ ॥ ❀ ❀ अथ राज्ञः प्रश्नानन्तरमेव नारद आबभाषे, उत्तरदाने विचारश्रमरहित एवोत्तरं दत्तवानित्यर्थः । तत्र तस्य सामर्थ्ये हेतुमाह–मुनिसत्तम इति । तत्रापि हेतुमाह–भगवानिति, सर्वज्ञ इत्यर्थः । तत्रादावेव तथा वृत्तकथने शोकेन मूर्च्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति–मा कञ्चनेति । हे राजन् कञ्चनापि जनं मा शुचः शोकं मा कार्षीः । यत् यस्मात् सर्वमपि जगत् ईश्वरवशं तत्तत्कर्मानुरूपफलदानप्रवृत्तभगवदधीनम् । सम्बोधनेन महति राज्ये तत्तत्कर्मानुसारेण सर्वदैव इष्टानिष्टोत्पत्तिसम्भवाच्छोके क्रियमाणे कदाचिदपि राज्यसुखं न स्यादतः शोकोऽनुचित एवेति सूचितम् ॥ ३९ ॥ ❀ ❀ ईश्वराधीनत्वमेव स्पष्टयति लोका इति त्रिभिः । यस्येशितुः परमेश्वरस्य लोकपाला इन्द्रादयस्तत्सहिता लोकाश्चिलोकस्था जना बलिं वहन्ति पूजासत्कारपूर्वकमाज्ञां पालयन्ति । स भूतानि प्राणिनः संयुनक्ति संयोजयति, स एव वियुनक्ति वियोजयति चेत्यन्वयः ॥ ४० ॥

हिन्दी अनुवाद

सञ्जय इस प्रकार कह ही रहे थे कि तुम्बुरुके साथ देवर्षि नारदजी वहाँ आ पहुँचे । महाराज युधिष्ठिरने भाइयोंसहित उठकर उन्हें प्रणाम किया और उनका सम्मान करते हुए बोले ॥ ३७ ॥ ❀ ❀ युधिष्ठिर ने कहा—'भगवन् ! मुझे अपने दोनों चाचाओंका पता नहीं लग रहा है; न जाने वे दोनों और पुत्र-शोकसे व्याकुल तपस्विनी माता गान्धारी यहाँसे कहाँ चले गये ॥ ३८ ❀ ❀ भगवन् ! अपार समुद्रमें कर्णधारके समान आप ही हमारे पारदर्शक हैं ।' तब भगवान्‌के परमभक्त भगवन्मय देवर्षि नारदने कहा—॥ ३९ ॥ ❀ ❀ 'धर्मराज ! तुम किसीके लिए शोक मत करो; क्योंकि यह सारा जगत् ईश्वरके वशमें है । सारे लोक और लोकपाल विवश होकर ईश्वरकी ही आज्ञाका पालन कर रहे हैं । वही एक प्राणीको दूसरेसे मिलाता है और वही उन्हें अलग करता है ॥ ४० ॥

यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः । वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः ॥ ४१ ॥
यथा क्रीडोपस्कराणां संयोगविगमाविह । इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥ ४२ ॥
यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम् । सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४३ ॥
तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः । कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गावो बलीवर्दा नसि नासिकायां प्रोतास्तंत्यां दीर्घतंत्यां दामभिर्बद्धाः स्वामिनो बलिं वहन्ति यथा एवं वाक्तंत्यां कर्तव्याकर्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणो ब्रह्मचारीत्यादिवर्णाश्रमलक्षणैर्बद्धाः परमेश्वरस्य बलिं तेन प्रेरिताः सर्वे वहन्तीत्यर्थः ॥ ४१ ॥ ❀ ❀ प्रवृत्तौ पारतन्त्र्यमुक्त्वा संयोगवियोगयोरप्याह यथेति । क्रीडोपस्कराणां क्रीडासाधनानाम् ॥ ४२ ॥ ❀ ❀ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तम् । लोकतत्त्वे च विचार्यमाणे निर्विषयोऽयं शोक इत्याह । यद्यदि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण । न चेति न ध्रुवं नाप्यध्रुवम् । शुद्धब्रह्मरूपेणानिर्वचनीयत्वेन वा उभयं वा चिज्जडांशतः । सर्वथा चतुर्ष्वपि पक्षेषु ते पित्रादयो न शोच्याः । स्नेहादन्यत्र । स्नेह एव केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः ॥ ४३ ॥ ❀ ❀ तस्मान्मां विना कथं ते वर्तेरन्नित्यात्मनो मनसो वैक्लव्यं व्याकुलतां त्यज ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु वेदस्यानेकार्थत्वेन तात्पर्यस्य दुर्ज्ञेयत्वाद्धौरेयाणां च गोण्यादिपातनेन स्वामिकार्याविज्ञानदर्शनाद्विषमोऽयं दृष्टान्तोऽतो निदर्शनान्तरमाह–यथेति । तथैवेशेच्छया नृणां संयोगवियोगौ स्यातामिति । अनेन वेदस्य मुख्योऽर्थः श्रीनारायण एवेत्यसूचि । तस्मात्पराधीनत्वात्तव शोकोऽयुक्त इति भावः ॥ ४१-४२ ॥ ❀ ❀ इत्यर्थ इति । अहं ममेति मोहो बुद्धिभ्रमस्तस्माज्जातात्स्नेहादन्यत्र शोककारणं नास्ति । तस्माद् भ्रमजन्यस्नेह एव हेतुरिति । तथा च भक्तिसम्बन्धिस्नेहोत्थशोको हि करुणारसस्थायी भावः परमोपादेय इति भावः ॥ ४३ ॥ ❀ ❀ यतः शोकोऽज्ञानमूलकस्तस्माद्धेतोः । अंगेत्यव्ययमामन्त्रणे ॥ ४४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वाक्तन्त्यामिति । वाक् त्रयीरूपैव तन्त्री तस्याम् । नामभिः ब्राह्मणक्षत्रियादिभिरिति प्राञ्चः ॥ ४१-४२ ॥ ❀ ❀ चतुर्ष्वपीति । ध्रुवमध्रुवं वेति पक्षद्वयम् । न वेत्युभयमिति पक्षद्वयम् । अयमर्थः–ध्रुवस्य नाशाभाव एव । अध्रुवस्य

विनाशित्वमेव न ध्रुवमिति । ध्रुवमपि वक्तुं न शक्यते । अध्रुवमपि वक्तुं न शक्यते । उभयमिति । चिद्रूपेण ध्रुवम् । देहाध्यासात् जडरूपेणाध्रुवमिति ॥ ४३-४५ ॥

श्रीमद्वीरराघवव्याख्या

बलिवहनमेव सदृष्टांतमुपपादयति तथेति । तंती तिरश्चीना महती रज्जुस्तत्र बद्धाः क्षुद्ररज्जव उपदानानि यद्वा तन्तीनां सा रज्जुस्तत्सम्बद्धा आकर्षणपाशा दामानि यथा गावः चतुष्पादः नसि रंध्रीकृतायां नासिकायां प्रोताः संयुक्तरज्जवस्ततस्तंत्या-मुपदामभिर्बद्धाः द्विपदे किं कुर्वंति तथा वाक्तंत्यां वेदाख्यतंत्यां नामभिर्वर्णाश्रमविशेषान्वयात्मकनामभिरुपदामस्थानीयैर्बद्धाः सपाला लोका ईशितुरीशस्य बलिं वहन्ति ॥ ४१ ॥ ❀ ❀ किं देहतदनुबन्ध्यादीन्नित्यान्मत्वा शोचसि किं वाऽनित्यानथ-वोभयथापि तथापि न ते शोकविषया इति वक्तुं तावदेहादिश्लेषविश्लेषौ क्रीडार्थं जगद्व्यापारे प्रवृत्तेश्वरस्येच्छया तत्र कर्मानुगुणेन संपद्यत इति सदृष्टांतमाह–यथेह लोके कस्यचित्क्रीडितुः पुंस इच्छया क्रीडोपस्कराणां क्रीडासाधनानां संयोगवियोगा-वन्यथा च भगवतः यथा क्रीडोपस्कराः क्रीडितुरिच्छया कदाचित्संश्लिष्य पुनस्तदिच्छयैव विश्लिष्टाश्च भवंति तथेश्वरेच्छया नृणामपि संयोगवियोगौ स्याताम् ॥ ४२ ॥ ❀ ❀ उक्तं शिरस्त्रयमनुवादपूर्वकं प्रतिक्षिपति–यदि लोकं ध्रुवं स्थिरं मन्यसे यद्वाऽध्रुवमथवोभयम् ? तत्र तावत्तृतीयः कल्पोऽसम्भवादेव निरस्त इत्यभिप्रायेणाह न चोभयमिति । न हि द्व्यात्मकं वस्तु दृष्टं श्रुतं वेत्यर्थः । परस्परविरुद्धयोर्ध्रुवत्वाध्रुवत्वयोरेकत्र समावेशोऽसम्भवनिरस्त इति भावः । तदभ्युपगम्यापि तेन सहेतरशिरोद्वयं प्रतिक्षिपति सर्वथेति–ध्रुवत्वे चोभयविधत्वे च ते देहादयः तत्त्वमेवेति न शोच्याः, न हि वस्तुनो यावदात्मभाविधर्मः केनाप्यपनेतुं शक्य इति भावः । एवं सति तच्छोकहेतुः केवलं देहात्मभ्रममूलको देहादिष्वनुराग एवेत्यभिप्रायेण स्नेहादन्यत्र मोहजादिति । मोहजाद्देहात्मभ्रमजात् स्नेहादन्यत्रान्यस्मिन् शोकमोहहेतुत्वं नास्तीति शेषः ॥ ४३ ॥ ❀ ❀ तस्माद्धे राजन्नज्ञानकृतं देहात्मभ्रमकृतमात्मनः स्वस्य स्वमनसो वा वैक्लव्यं दैन्यं जह्यपनय । तदभिप्रेतं प्रश्नान्तरं सर्वज्ञत्वात् स्वयमेवाविष्कृत्य प्रतिवक्ति कथमिति सार्द्धद्वयेन । तत्र कथमित्यर्द्धेन प्रश्नाविष्कारः, ततः श्लोकद्वयेन तस्य प्रतिवचनमिति विवेकः । मां विनाऽनाथा रक्षितृहीना अत एव दीनास्ते कथं वर्त्तेरन् जीवेरन् इति शब्दोऽत्राध्याहर्त्तव्यः, कथं जीवेरन्निति पृच्छसि चेदित्यर्थः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

ईश्वरजीवस्वातंत्र्यपारतंत्र्ये सोदाहरणं दर्शयति यथेति । यथा गावो बलीवर्दाः नसि नासिकायां त्रिवृत्कृततंतुदामभिः प्रोताः स्यूता नासिकाच्छिद्रस्यूतह्रस्वदामभिः आधारभूतायां दीर्घायां तंत्यां बद्धाः ईशितुः स्वामिनो व्रीह्यादिगोणीर्वहंति तथा ब्राह्मणक्षत्रियवैश्यशूद्रब्रह्मचारिगृहस्थवानप्रस्थयतय इति नामात्मकदामभिर्वाक्तंत्यां विधिनिषेधात्मकवेदलक्षणायां बद्धाः स्ववर्णाश्रम-विहितकर्मभिरीश्वरस्य बलिं यज्ञादिलक्षणपूजां वहंति कुर्वंति । तस्मात्स एव स्वतंत्रो जीवास्तदधीना इति शोकपरिहाराय स ईशः स्वविहितकर्मणा पूज्य इति भावः ॥ ४१ ॥ ❀ ❀ वेदस्यानेकार्थत्वेन तात्पर्यस्य दुर्ज्ञेयत्वाद्धौरेयाणां च गोण्यादिपातनेन स्वामिकार्यविज्ञानदर्शनाद्विषमोयमुपन्यास इत्यतो निदर्शनांतरमाह यथेति । यथा क्रीडोपस्कराणां लीलासाधनानां संयोगविगमौ क्रीडितुः पुरुषस्येच्छया तथैवेशेच्छया पितृपुत्रादिरूपाणां नृणां मिथः संयोगविगमौ स्यातामित्यन्वयः । अनेन वेदस्य मुख्यार्थः श्रीनारायण एवेति निरणायि । तस्मात्पराधीनत्वान्न शोकेन प्रयोजनं तवेति भावः ॥ ४२ ॥ ❀ ❀ "यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः" इति स्मृतेरुक्तार्थनिर्णये केयं युक्तिरिति तत्राह यदिति । यत् यदि लोकं शरीरं ध्रुवं मन्यसे अध्रुवमनित्यं वा अथवोभयं नित्यानित्यं मनुष इति विकल्प्य परिहरति सर्वथेति । सर्वप्रकारेण ते पितरो न शोच्याः । तथाहि नित्यत्वे नाशाभावात्तस्य चादर्शना-दनित्यमिति वक्तव्यं यस्यापरिहार्यत्वात्तृतीयोऽनुपपन्नः व्याहतत्वात्तर्हि शोके किं कारणमिति तत्राह स्नेहादिति । अहं–ममेति मोहो बुद्धिभ्रमः तस्माज्जातस्नेहादन्यत्र ऋते शोककारणं नास्ति भ्रमजन्यस्नेह एव तस्य हेतुरिति भावः ॥ ४३ ॥ ❀ ❀ ननु "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति श्रुतेः गुरुविषयस्नेहलक्षणभक्तेः पुरुषार्थहेतुत्वेनोपयोगात् कथं तस्य मोहजन्यत्व-मित्याशंक्य तस्य वैलक्षण्यान्मम तत्पोषणकर्तृत्वेन मन्नाथत्वान्मदृते जीवनमेव नास्ति तेषामीशरक्ष्यत्वादिज्ञानाभावादित्यात्मा-न्यथाभिमाननिमित्तकातर्यं त्वया त्यक्तव्यमित्याह तस्मादिति । आत्मनः परमात्मनोऽज्ञानेन जातं वैक्लव्यं जहि त्यजेत्यन्वयः । परमात्मनः स्वातंत्र्यपरामर्शेनेति शेषः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथा गाव इति पद्यं क्वचिन्नास्ति । यथा क्रीडेत्यादेरवतारिकानुसारेण तु स्वामिसम्मतमिति लक्ष्यते । मा कञ्चनेत्यादौ हि पारतन्त्र्यमात्रमुक्तं ततश्चेदं विना प्रवृत्तौ पारतन्त्र्यमुक्त्वेति पारतन्त्र्यविशेषोक्तिर्न घटते । स संयुनक्तीत्याद्यर्द्धं च क्वचिन्नास्ति । किन्तु वहन्ति बलिमीशितुरिति स्थानद्वयपाठेनैव प्रथमलेखकभ्रमोऽयं क्वचित् सम्प्रदायेऽनुवृत्त इति लक्ष्यते ॥४१-४४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

लोका बलिं वहन्ति स एव संयुनक्तीत्युक्तमर्थद्वयमुक्तपोषन्यायेन सदृष्टान्तं क्रमेणाह–गावस्तन्त्र्यामेकस्यामेव दीर्घायां रज्ज्वां सर्व्व एव बद्धाः तत्र पृथक् दामभिर्नसि प्रोताः। ननु प्रकृते का वा तन्त्री दामानि वा कानीत्यपेक्षायामाह–वाक् वेद एव तन्त्री तस्यां नामभिर्ब्राह्मणक्षत्रिय इति ब्रह्मचारी गृहस्थ इत्यादिभिरेव दामभिर्बद्धा बलिम् "अहरहः सन्ध्यामुपासीतेत्या"दिलक्षणं शासनम्॥ ४१॥ ❀ ❀ क्रीडोपस्कराणां क्रीडासाधनानाम् अक्षादीनाम्॥ ४२॥ ❀ ❀ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तम्, लोकतत्त्वे तु विचार्यमाणे निर्विषयोऽयं शोक इत्याह। यद्यदि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण न उभयं न ध्रुवं नाप्यध्रुवं ब्रह्मरूपेण वा शब्दादुभयं च चिज्जडांशरूपेण। सर्वथा चतुर्ष्वपि पक्षेषु ते पित्रादयो न शोच्याः स्नेहादन्यत्र विवेकादौ सति। स्नेह एव केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः। मोहजादित्यनेन भगवद्भक्तिसम्बन्धी स्नेहो व्यावृत्तः। तदुत्थं शोकं तु करुणरसस्थायिभावं परमोपादेयं मन्यते॥ ४३॥ ❀ ❀ तस्मान्मां विना कथं ते वर्त्तेरन्निति मनसो वैक्लव्यं त्यज॥४४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यथा गावो बलीवर्दाः नसि नासिकायां दामभिः क्षुद्ररज्जुभिः प्रोताः पुनर्दीर्घतंत्यां बद्धा ईशितुः स्वनियंतुर्बलिं वहंति तथा भूतानि नामभिः क्षुद्ररज्जुस्थानीयैर्देवदत्तादिभिः प्रोतानि विधिनिषेधरूपायां वाक्तंत्यां दीर्घतंतीस्थानीयायां बद्धानि परमेश्वरस्य बलिं वहंतीत्यर्थः॥ ४१॥ ❀ ❀ क्रीडाया उपस्कराणामुपकरणानाम्॥ ४२॥ ❀ ❀ लोकं यद्युपादानमात्रानुसंधानेन ध्रुवं नित्यं मन्यसे उपादेयमात्रानुसंधानेनाध्रुवमनित्यं वा मन्यसे किं वा ध्रुवं वाऽध्रुवं वा च मन्यसे एकदेशित्वप्रसंगादपि तूभयविधं मन्यसे सर्वथा पक्षत्रयेऽपि स्नेहजान्मोहादन्यत्र ते लोकप्रवाहपतिता धृतराष्ट्रादयो न हि शोच्या इत्यर्थः॥ ४३॥ ❀ ❀ तस्मात्त्रिष्वपि पक्षेषु तच्छोच्यत्वाभावात् अज्ञानकृतं भगवदायत्तज्ञानाभावकृतं मां विनाऽनाथाः कथं वर्तेरन् जीवेरन्निति मनसो वैक्लव्यं जहि अपनय॥ ४४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु स्वार्थपक्षे कथं शोकपरिहारः भगवांस्तु स्वलीलार्थं करोति जीवास्त्वयुक्ते योजितत्वात् दुःखेन शोचंति भगवल्लीलाया बहुकालविततत्वात् स्वस्य दुःखपरंपरायां शोकस्यावश्यकत्वात् तत्राह यथा गाव इति तद्दुःखं पंचभिः, सहेति तदर्थमेव सृष्टा वयमिति तदर्थमेव महद्भिर्विषयैर्योज्यंत इति च अवसरे स्वामिद्रोहस्यायुक्तत्वात् ज्ञात्वा दुःखमपि सोढ्वा अग्रे कृतार्था भविष्याम इति बुद्ध्या भगवल्लीलामेव संपादयेत्, अन्यथा दुःखं बहु प्रयच्छेदिति वा दृष्टांतः–नसि नासिकायां प्रोताः तदा हि बलीवर्दाः वशीभवंति अहंताममतारज्ज्वा विषयलक्षणनासिकायां प्रोताः इंद्रिययुक्ताः भगवद्वशे भवंतीत्यर्थः। दृष्टान्तेनैव सामान्यबंधनमुक्त्वा विशेषबंधनमाह वाक्तंत्यां नामभिर्बद्धा इति वेदलक्षणा दीर्घरज्जुः ब्राह्मणक्षत्रियरूपो योनिसंबंधः इन्द्रियाणि बलीवर्दाः वेदो मर्यादारज्जुः भगवदिच्छा स्तंभः। एवं सति स्वस्येंद्रियासाध्ये बलीवर्दत्वम् अन्यथा स्वस्याधारत्वं त्रिविधपापविमोकश्च फलम्। इंद्रियाणि तु देवताधिकृतानि वैदिककर्मणि प्रवर्त्तंते, तेन स्वस्य मलापकरणं भवति पुनर्निरतसमाधिना प्राकृतदोषे अपगते ज्ञानाग्निना पक्वाः कांचनत्वं संपद्यन्ते दामभिर्बद्धाः ब्राह्मणोऽयं ब्रह्मचारी गृहस्थ इति ये यत्र योजितास्ते तत्रैव परिभ्रमंते कार्यं तु प्रभोः कुर्वंति न तु प्रेरकस्य। तस्मादिंद्रियाणां भगवदर्थं सृष्टत्वात् तैर्भगवत्कार्ये क्रियमाणे स्वयं वृथाध्यासं कृत्वा शोको न कर्तव्य इत्यर्थः॥ ४१॥ ❀ ❀ किंच भगवता हि क्रीडार्थं सृष्टाः यथा बालः प्रतिमादिभिः क्रीडति स यथासुखं प्रतिमां स्थापयति कुतश्चिद्योजयति तथा सर्वे पुरुषाः भगवतः क्रीडाप्रतिमाः। ते केनचित्संयुज्यंते वियुज्यन्ते च अत एवं ज्ञात्वा संबंधिषु ममतया शोकहर्षौ न विधेयः। करेति समुदायेन विवेकः पूर्वं तु तत्त्वानां प्रत्येकं विवेकः॥ ४२॥ ❀ ❀ पूर्वं तत्त्वानां विवेक उक्त एवमीश्वरार्थसृष्टपक्षे शोकोऽनुचित इत्युक्तं, निरीश्वरादिमतेऽपि बाह्यमतेषु कुत्रापि शोकः सार्थो न भवतीत्याह यन्मन्यस इति। सर्वे हि वादिनश्चतुर्धा सांख्याः सर्वं ध्रुवं मन्यंते आविर्भावतिरोभावावेवोत्पत्तिप्रलयौ, बाह्यास्तु सर्वमनित्यं कृतकत्वादिति अध्रुवं मन्यंते, बाह्यभेदा एव केचन माध्यमिकादयो नासीन्नास्ति न भविष्यतीति ध्रुवं नाध्रुवं मिथ्येति मन्यंते। नैयायिकास्तु उभयं मन्यंते आकाशादयः परमाणवश्च ध्रुवाः, अन्ये अध्रुवा इति। चतुर्ष्वपि पक्षेषु सर्वथा ते न शोच्याः। नहि नित्यः शोकमर्हति, नवा बुद्बुदरूपे अनित्ये शोकः संभवति। तत्राप्युत्तरमुच्यते–शत्रुमरणे कथं न शोचति मित्रमरणे शोचति तत् कुत इति प्रष्टव्यः स्नेहादिति चेत् स्नेह एव शोकहेतुरपकारी स त्यक्तव्यः। ननु कदाचित् सुखं प्रयच्छतीति कथं त्यक्तुं शक्यत इति चेत्तत्राह मोहजादिति अज्ञानाज्जातः स्नेहः कथं सुखं प्रयच्छेद्वा? न हि संनिपाताज्जातं शैत्यं तापापनोदनं करोति। तस्मान्मूर्च्छायां मोहात् दुःखं सुखमिव मन्यते, अन्यथा तन्निराकरणार्थं न यतेत॥४३॥ ❀ ❀ फलितमाह तस्मादिति। हे अंग! वैक्लव्यम् इंद्रियाणामंतःकरणस्य च विकलतां केवलं पदार्थाज्ञानेन जातं त्वं विदिततत्त्वार्थो जहि नाशयेत्यर्थः। अयमेकांशेनापि स्थितः पुनर्दुःखं दास्यतीति भावः॥ ४४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यथा गाव इत्यत्र। तदर्थमिति लीलार्थम्। अन्यथेति लीलायां दोषत्वाद्यभिसन्धाने। दीर्घरज्जुरिति। यस्यां रज्जौ बलीवर्दान्नसि प्रोतान् कृत्वा रज्ज्वन्तरेण बध्यन्ते, सा तन्ती तद्रूपेत्यर्थः। आधारत्वमिति। प्राकृतक्रियारूपतुषाधारत्वम्। असंस्कृ-

तान्नरूपत्वमित्यर्थः । अनध्यासे कथमिन्द्रियव्यापार इत्यत आहुः इन्द्रियाणीत्यादि । प्रेरकस्येति इन्द्रियाधिष्ठातुः । अध्यासं कुर्वेति । देहादिषु तत्सम्बन्धिषु च यथायथमहन्तां ममतां चेत्यर्थः । किञ्च भगवतेत्यादि । इत आरभ्य यथा क्रीडोपस्कराणामित्यस्य व्याख्यानम् । कुतश्चिच्चोजयतीत्यत्र सार्वविभक्तिकस्तसिः । केनचिदित्यर्थः ॥ ४१ ॥ ❀ ❀ यन्मन्यस इत्यत्र । न चेति मूलस्यार्थमाहुः नासीदस्ति भविष्यतीति । अत्र त्रिष्वपि नञोऽन्वयः ॥ ४४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एतदेव दृष्टान्तद्वयेनोपपादयति–यथेति । नसि नासिकायां प्रोताः संयुक्तरज्जवो गावो बलीवर्दाः तन्त्यां तिरश्चीनायां महत्यां रज्ज्वां दामभिः स्वस्वासाधारणप्रग्रहैर्बद्धा यथा स्वामिनो भारं वहन्ति तथा वाक्तन्त्यां कर्त्तव्याकर्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणब्रह्मचारीत्यादिभिर्वर्णाश्रमलक्षणैर्बद्धा अधिकारिणो जीवा ईशितुः परमेश्वरस्य बलिं वहन्ति, स्वस्वाधिकारानुरूपाणि कर्माणि कुर्वन्तः तदाज्ञां पालयन्तीत्यर्थः । अत्र यथा स्वामिना अन्याग्रे निक्षिप्तं तृणादिकमन्येन भोक्तुं न शक्यते तद् दृष्ट्वा तदर्थं प्रयत्नं कुर्वन्दण्डभाग्भवति तथाऽन्यभोगार्थमीश्वरेण सम्पादिता विषया अन्येन भोक्तुं न शक्यन्ते तद् दृष्ट्वा वेदमर्यादामुलङ्घ्य तदर्थं प्रयत्नं कुर्वन्नपि जनो दण्डभाग्भवतीत्यादि सूचितम् ॥ ४१ ॥ अनेन दृष्टान्तेन प्रवृत्तौ भागे च पारतन्त्र्यमुक्तं संयोगवियोगयोरपि पारतन्त्र्ये दृष्टान्तमाह–यथेति । इह लोके यथा कस्यचित् क्रीडितुः पुंसः इच्छया क्रीडोपस्कराणां क्रीडासाधनानां संयोगविगमौ भवतः तथैवेश्वरेच्छया नृणामपि संयोगवियोगौ स्यातामित्यन्वयः ॥ ४२ ॥ ❀ ❀ ईश्वराधीनत्वाच्छोको न कार्य इत्युक्तं शिष्टव्यवहारानुसारेणापि निर्विषयोऽयं शोक इत्याह– यदिति । लोकं देहेन्द्रियादि सर्वमपि जगत् साङ्ख्या ध्रुवमाविर्भावतिरोभाववन्नित्यं मन्यन्ते । नास्तिकास्तु अध्रुवं कृतकत्वादनित्यं मन्यन्ते । नास्तिकभेदा एव केचन माध्यमिकादयो न चोभयं न ध्रुवं नाप्यध्रुवं किन्तु अनिर्वचनीयं मिथ्याभूतं मन्यन्ते । तत्र यत् यदि त्वं ध्रुवं मन्यसे तदा ध्रुवत्वादेव शोको निरर्थकः । यदि त्वमध्रुवं मन्यसे तदा शोकेनापि ध्रुवत्वसम्पादनस्याशक्यत्वान्निरर्थक एव शोकः । यदि त्वं मिथ्या मन्यसे तदापि तथात्वादेव शोको निरर्थक इति सर्वथा त्रिष्वपि पक्षेषु ते धृतराष्ट्रादयो न शोच्याः । तर्हि शोकस्य को हेतुर्येन लोके शोको दृश्यते इत्यपेक्षायामाह–स्नेहादिति । मोहजात् देहेन्द्रियाद्यात्मभ्रममूलकाद् देहादिषु स्नेहादन्यत्र अन्यस्मिन् शोकहेतुत्वं नास्तीति शेषः ॥ ४३ ॥ ❀ ❀ भगवद्भक्ततयाऽस्मदङ्गतुल्यत्वाद्यथार्थमेवोच्यते नान्यथेति सूचयन् सम्बोधयति–हे अङ्गेति । तस्मान्निरर्थक एव शोकस्तस्मादज्ञानकृतं देहाद्यात्माध्यासमूलकं वनमाश्रिता अत एव अनाथा रक्षकहीना अत एव कृपणाः दीनाः कथं तु वर्त्तेरन् जीवेरन्नित्यात्मनो मनसो वैक्लव्यं जहि त्यजेत्यन्वयः ॥ ४४ ॥

हिन्दी अनुवाद

जैसे बैल बड़ी रस्सीमें बँधे और छोटी रस्सीसे नथे रहकर अपने स्वामीका भार ढोते हैं, उसी प्रकार मनुष्य भी वर्णाश्रमादि अनेक प्रकारके नामोंसे वेदरूप रस्सीमें बँधकर ईश्वरकी ही आज्ञाका अनुसरण करते हैं ॥ ४१ ॥ ❀ ❀ जैसे संसारमें खिलाड़ीकी इच्छासे ही खिलौनोंका संयोग और वियोग होता है, वैसे ही भगवान्‌की इच्छासे ही मनुष्योंका मिलना-बिछुड़ना होता है ॥ ४२ ॥ ❀ ❀ तुम लोगोंको जीवरूपसे नित्य मानो या देहरूपसे अनित्य अथवा जडरूपसे अनित्य और चेतनरूपसे नित्य अथवा शुद्धब्रह्मरूपमें नित्य-अनित्य कुछ भी न मानो–किसी भी अवस्थामें मोहजन्य आसक्ति के अतिरिक्त वे शोक करने योग्य नहीं हैं ॥ ४३ ॥ ❀ ❀ इसलिये धर्मराज ! वे दीन-दुःखी चाचा-चाची असहाय अवस्थामें मेरे बिना कैसे रहेंगे, इस अज्ञानजन्य मनकी विकलताको छोड़ दो ॥ ४४ ॥

कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः । कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परम् ॥ ४५ ॥
अहस्तानि सहस्तानामपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥ ४६ ॥
तदिदं भगवान् राजन्नेक आत्माऽऽत्मनां स्वदृक् । अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा ॥ ४७ ॥
सोऽयमद्य महाराज भगवान् भूतभावनः । कालरूपोऽवतीर्णोऽस्यामभावाय सुरद्विषाम् ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र त्वद्देहतस्तेषां वृत्तिरेतत्तावन्नास्तीत्याह । कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनः पांचभौतिको जडस्तद्विभागे नाशवांश्च सर्पग्रस्तोऽजगरगिलितो यथाऽन्यं न रक्षति तद्वत् ॥ ४५ ॥ ❀ ❀ ईश्वरेण विहिता वृत्तिश्च सर्वतः सुलभैवेत्याह । अहस्तानि पश्वादीनि । अपदानि तृणादीनि । तत्र तेष्वहस्तादिष्वपि फल्गून्यल्पानि । एवं जीवः सर्वोऽपि जीवस्य सर्वस्य जीवनं जीविका । एतेनैव सर्वतो मृत्युग्रासत्वं चोक्तम् ॥ ४६ ॥ ❀ ❀ मोहनिवृत्त्यर्थं द्वैतस्यावस्तुत्वमाह ।

तदिदमहस्तसहस्तादिरूपं जगत् स्वदृग्भगवानेव न ततः पृथक्। स चैक एव न तु नाना। ननु सजातीयविजातीयभेदे प्रत्यक्षे कुत एतत्तत्राह-आत्मनां भोक्तृणामात्मा स्वरूपम्। अतो न सजातीयभेदः। अंतरोऽनंतरश्चान्तर्बहिश्च भोक्तृभोग्यरूपश्च भाति। अतो न विजातीयभेदोऽपि। नन्वेकः कथं तथा प्रतीयतेऽत आह मायया बहुधा भातीति तं पश्येति ॥ ४७ ॥ ❀ ❀ कासावस्तीदृशो महामायावी द्वारकायामित्याह सोऽयमिति। अस्यां भूम्याम्। अभावाय नाशाय ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किञ्च तवायं देहः स्वाधीनः पराधीनो वा स्वाधीनत्वे भोगभोग्यदुःखनिवारणाक्षमता कथम्। न हि कश्चिद् दुःखं मे स्यादित्याकांक्षते विचक्षणस्तस्मात्पराधीन इति वक्तव्यम्। तथा च पररक्षणसामर्थ्यं न घटते इत्याह-कालेति। अतो न कोपि कंचिद् वृत्तिदानादिना विनेश्वरं रक्षितुं प्रभुरस्तीति भावः। अतः स्वामिचरणैरस्य वृत्तस्यावतरणिकायामुक्तं तत्र त्वद्देहत इत्यादि। तत्रेति वाक्यालंकारे। अतो ममायं पित्रादिर्मां विनैतान्को रक्षितेत्यभिमतिर्न कार्या "स रक्षिता रक्षति यो हि गर्भे" इत्याद्युक्तेरीशप्रेरितकालाद्यधीन एव जीवनादिरिति ध्येयं सुधियेति ॥ ४५ ॥ ❀ ❀ ननु भगवन्सत्यमेतत्तथापि वृद्धाना-मन्धानाञ्चान्नादिदौर्लभ्यात्तज्जीवने मम संदेह इति चेत्तत्राह-ईश्वरविहिता वृत्तिरिति। अहस्तानि शशपारावतपक्षिप्रभृतीनि सहस्तानां मनुष्यादीनां जीवनं देहधारणसाधनं तत्रापि अहस्तसहस्तेष्वपि राक्षसाद्यपेक्षया मनुष्या अप्यणव एवेति जीवस्य जीव एव साहजिकी जीविका। अन्नादीनामजीवत्वे तद्वापेन पुनरुत्पत्तिस्तेषां न भवेद्वर्जितकथितादेरप्युत्पत्तिर्भवेच्च। अतः सर्वं सजीवमेव। एवं तपस्विनामपि पत्रपुष्पादिरीश्वरकल्पितैवानिषिद्धा जीविकास्तीति किमर्थं वृथा विषीदसीति भावः। एतेन जीवस्य जीव एव जीविकेति कथनेन ॥ ४६ ॥ ❀ ❀ ननु यदीश्वरवशं जगदित्यादिना यत्त्वयोक्तं भगवदधीनं सर्वं चेत्तर्हि कथं कालकर्मगुणाधीनो देह इत्युच्यते। सत्यम्। कालकर्मादिकस्य सर्वस्य जगतो भगवच्छक्तिकार्यत्वात्सर्वं भगवानेवेत्याह-तदिदमिति। स्वरूपशक्त्यात्मनां जीवानामात्मान्तर्यामिरूपेण स्वदृक् स्वयंप्रकाशः। अत्र स्वामिचरणैराक्षिप्तं नन्विति। सजातीयोऽ-श्वत्थस्याम्रा उभयत्र वृक्षत्वसत्त्वात्। विजातीयोऽश्वत्थस्य पाषाणादिरितिरीतिसजातीयादिज्ञाने। पुनराक्षिपति नन्विति। उरुधा देवतिर्यगादिरूपेण वा ॥ ४७ ॥ ❀ ❀ हे महाराजेति। यत्कृपया त्वं महाराजो जातस्सोयमिति भावः। स्वयं तु परमानंद-रूपत्वेन भूतभावनोपि सुरद्विषामभावाय सोयं कालरूप इति सम्बन्धः ॥ ४८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

सजातीयेष्वन्योऽन्यतः तथा अतस्तैरपि सहस्तानां नाशदर्शनादाह फल्गूनीति ॥ ४६-५५ ॥

श्रीमद्वीरराघवव्याख्या

तव तत्तुल्ययोगक्षेमे स्वस्मिंस्तद्रक्षकत्वाभिमानं त्यजेत्यभिप्रायेणाह कालेति। कर्मादृष्टम्, गुणाः सत्त्वादयः पृथिव्यादि-पंचभूतारब्धोऽयं देहः कालाद्यधीनः। अयमित्यनेन त्वद्देहोऽप्येवंविधदेहः कथमन्यान् गोपायेद्रक्षेन्न रक्षेदेवेत्यर्थः। यथा स्वयं सर्पग्र-स्तोऽन्यांस्तद्ग्रस्तान्न गोपायति तद्वत् ॥ ४५ ॥ ❀ ❀ अस्त्वेवमथापि जीविकावति गृहे स्थितानामस्माकं जीवनं सुशकम्, कथमतो गतानां तेषां जीवनं स्यादित्यत आह-अहस्तानीति, अहस्तानि भूतानि सहस्तानां तेषां जीवनं यथालाभं यथायोग्यमौषधिफल-मूलपशुमृगादीनि जीवनमित्यर्थः। तथा हस्तरहितानामपि चतुष्पदामपदान्यविद्यमानपादादिभूतानि जीवनं तत्राप्यपदेष्वपि महता-मजगरादीनां भूतानां फल्गूनि क्षुद्राणि भूतानि जीवनम्। किं बहुना जीवस्य भूतस्य जीवः जीवनम्। जीवनशब्दो भक्ष्यपरः ॥४६॥ सर्वत्र वने गृहे वा भगवानेव रक्षितेत्यभिप्रायेण तदुपयुक्ततया भगवतः सार्वात्म्यं कृत्स्नजगतस्तदात्मकतया तदनन्यत्वं चाह तदिति। हे राजन्! तदीश्वरवशत्वेनोक्तमिदं परिदृश्यमानं चिदचिदात्मकं जगद्भगवानेक एव मृदयं घट इतिवत्स्वरूपाभेदशंकां वारयितुं विशिनष्टि-आत्मनां देवमनुष्यादिदेहभृतां जीवानामात्माऽतः प्रविश्य प्रशासनधारकत्वाभ्यामवस्थितः, आत्मशब्देन तदेव हि प्रवृत्तिनिमित्तं वदति प्रविश्य प्रशासनधारकत्वाभ्यामवस्थानम्। अनेन शरीरात्मभावनिबन्धनं जगद्ब्रह्मणोरनन्यत्वमित्युक्तं भवति। शरीरात्मभावनिबन्धनश्चानन्यत्वव्यपदेशो दृष्टचरः-आत्मा देवो जातः मनुष्यो जात इति व्याप्यवस्तुगतदोषसंस्पर्शशंकां निराकुर्वन् विशिनष्टि-स्वदृगात्मनामात्मतयावस्थितोऽपि स्वात्मयाथात्म्यदर्शी, अतो नास्य दोषसंस्पर्श इति भावः। तथाच श्रूयते "अनश्नन्नन्यो अभिचाकशीति" न केवलमन्तरात्मैवापि त्वंतराप्यनन्तरो भाति बहिश्च भाति। नन्वेकस्य कथं देवमनुष्यादिरूपेण बहुधावस्थानमित्यत्राह पश्य तं माययोरुधेति। मायया देवमनुष्यादिरूपेण परिणतया शरीरभूतया जीवसंसृष्टया तं भगवतं उरुधा बहुधा पश्य चिदचिदात्मकदेवादिशरीरभेदेनैवावस्थित इति विजानीहीत्यर्थः ॥ ४७ ॥ ❀ ❀ न केवलं त्वत्पितरः स्वार्थमेव निर्गता अपि तु युष्माभिरेवमेव निर्गंतव्यमिति भवतां प्रदर्शनार्थमपीत्यभिप्रायेणाह सोऽयमिति द्वाभ्याम्। हे महाराज! सः निखिल-जगदन्तरात्मा वशीकृतलोकत्रयः कालशरीरकोऽयं भगवान् श्रीकृष्णः भूतानि स्वाज्ञानुवर्त्तीनि भावयत्यभ्युदययुक्तानि करोतीति तथा हेतुगर्भमिदं साधुपरित्रातृत्वादिति भावः। सुरद्विषां दुष्कृतामभावाय नाशाय कालरूपो मृत्युरूपोऽस्यां भुव्यवतीर्णः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किंच तवायं देहः स्वाधीनः पराधीनो वा, स्वाधीनत्वे भोगयोग्यदुःखनिवारणाक्षमता कथं, न हि कश्चिद्दुःखं मे स्यादित्याकांक्षति विचक्षणः। तस्मात्पराधीन इति च वक्तव्यम्। तथा च तस्य पररक्षणसामर्थ्यं न घटत इत्याह कालेति। कालः पक्षमासादिलक्षणः, कर्म फलपाचकं पुण्यपापलक्षणमदृष्टं, गुणाः सत्त्वादयः, निमित्तोपादानकारणजन्यत्वेन कालाद्यधीनः सजीवोऽयं देहः पंचभिः भूतैरारब्धः स्वव्यतिरिक्तान् कथं गोपायेत् रक्षेत्? तत्र दृष्टांतः सर्पग्रस्तो मंडूकः सर्पग्रस्तं परं रक्षितुं न समर्थः तथेति। तुशब्देनानुभवसिद्धमेवेदमिति द्योतयति, तस्मादहं पित्रादिरक्षाकर्तेत्यज्ञानं त्यजेति भावः॥ ४५॥ ❀ ❀ ननु भगवन्! सत्यमेतत्तथापि वृद्धानामंधानां चान्नादिदौस्थ्यात्तज्जीवने मम संदेह इति चेत्तत्राह अहस्तानीति। हे तात! वत्स अहस्तानि शशपारावतपक्षिप्रभृतीनि सत्त्वानि सहस्तानां मनुष्याणां जीवनं देहधारणसाधनं द्विचतुष्पदां चान्नं तृणादयः, तत्र द्विपत्स्वपि अणूनि मनुष्यादीनि महतां राक्षसादीनां जीवनमित्यनुवर्तते। एवं जीवस्य जीवनं विधात्रा विहितमतो न तान् प्रति चिंता कर्तव्येत्यर्थः॥ ४६॥ ❀ ❀ इतोऽपि न शोकः कर्तव्यः, किंतु अखिलस्य हर्यधीनत्वात्तद्भजनमेवावश्यं कर्तव्यमित्याह तदिति। एवमिदं हरेरितरत् सर्वमनित्यमस्वतंत्रं चेति तत्तस्मात् हे राजन्! भगवानात्मनां जीवानामात्माऽऽदानादिकर्ता एकोऽद्वितीयः स्वदृक् स्वयंप्रकाशः विवेकज्ञानिनामन्तरः अस्य जगतोऽतः स्थित्वा रतिकृत् अनंतरो गुणगुण्यादिभेदरहितो भाति। तस्मात्त्वमपि देवोत्तमावतारत्वेन बिंबेन विवेकित्वान्मायया स्वेच्छया कृतामुरुतामनेकावतारताम् अन्तर्याम्याद्यात्मिकां निर्भेदां हरेर्विभूतिं पश्यंश्च तमेव भजेति वाक्यशेषः। स्वदृक् भगवानात्मा स एक एवेदं जगद्भाति कथं भोक्तृरूपेणांतरः भोग्यरूपेणानंतरः। नित्यस्यानेकत्वं कथं तत्राह पश्येति। तं परमेश्वरं मायया बहुधा वर्तमानं पश्येति केचिद्योजयंति। एकस्य भोक्तृभोग्यरूपत्वानुपपत्तेरनिर्वाच्यमायाया अप्रामाणिकत्वेनानंगीकार्यत्वादनादरणीयमेव तदिति॥ ४७॥ ❀ ❀ ननु भगवतेश्वरवशं जगदित्युक्तं तमीश्वरं वयं कथं बुध्यामह इति तत्राह सोऽयमिति। यः सकलं स्ववशं विधायास्ते सोऽयमद्य देवैः प्रार्थितोऽस्यामुर्व्यां यदुकुलेऽवतीर्ण इत्यन्वयः। कथंभूतः भूतानां भावनो वर्धनः कालरूपः संहाररूपः किमर्थं सुरद्विषामभावाय विनाशाय॥ ४८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ममायं पित्रादिर्मया रक्ष्य इत्यभिमानो न कर्त्तव्य इत्याह कालेति॥ ४५॥ ❀ ❀ व्याघ्रादिभिर्भक्षिते च तस्मिन दुःखं न कर्त्तव्यमित्याह अहस्तानीति॥ ४६॥ ❀ ❀ एतच्च जगत् भगवद्दुर्वितर्क्यशक्तिमयकार्यत्वात् तदधीनमेवेत्याह तदिदमिति। मायया दुर्वितर्क्यशक्त्या भगवानेव इदं भाति एतद्रूपेण परिणमते स्वयं तु स्वरूपेणैव तिष्ठति चिन्तामणिवत्॥ ४७॥ ❀ ❀ सोऽयमद्येति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति न्यायेन सुरद्विषामभावायैव कालरूपः स्वयं तु परमानंदरूप एवेत्यर्थः॥ ४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नहि कश्चिदपि कमपि वृत्तिदानादिना रक्षितुं प्रभवतीत्याह। कालः सामान्यतो निमित्तम्। कर्म जन्मनिमित्तम्। गुणा उपादानम् तदधीनः पांचभौतिक इति तद्विभागे सद्य एव नाशवानित्यर्थः। एकः सर्पदष्टं गोपायितुं नैव शक्नोतीत्यर्थः॥ ४५॥ ❀ ❀ अतो जीविकामपि ईश्वर एव सर्वेषामेव प्रथममेव व्यवस्थापितवानित्याह-अहस्तानि मृगादीनि। अपदानि तृणादीनि। तत्रापि महतां मत्स्यादीनां फल्गूनि मत्स्यादीनि। अतो जीवस्य जीव एव जीविका साहजिकी। तेन तपस्विनां पत्रपुष्पफलादिरीश्वरकल्पितैवानिषिद्धा जीविकास्ति। किमर्थं त्वं विषीदसीति भावः॥ ४६॥ ❀ ❀ ननु यदीश्वरवशं जगदित्यादिना त्वयोक्तं भगवदधीनं सर्वं चेत् कथं कालकर्मगुणाधीनो देह इत्युच्यते। सत्यम्। कालकर्मादिकस्य सर्वस्य जगतो भगवच्छक्तिकार्यत्वात् सर्वं भगवानेवेत्याह तदिदमिति। स्वरूपशक्त्या आत्मनां जीवानाम् आत्मा अन्तर्यामिरूपेण। स्वदृक् स्वप्रकाशः। अन्तरो भोक्तृरूपेण जीवः। अनन्तरो बहिर्भोग्यरूपेण सुखदुःखादि। माययेति। भगवानेव शक्तित्रयरूपेण भाति। अतस्तमेवैकं मायया शक्त्या उरुधा देवतिर्यगादिदेहरूपेण बहुधा॥ ४७॥ ❀ ❀ कासावस्तीदृशो मायावी? द्वारकायामित्याह सोऽयमिति। अस्यां भूमौ सुरद्विषाम् अभावाय नाशाय कालरूपस्तैरेव कालरूपत्वेनानुभूयमानः स्वयं तु परमानन्दरूप एवेत्यर्थः॥ ४८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पित्रादेः-पालनं तु देहद्वारैव भवति सोऽयं देहः भगवन्नियम्यकालाद्यधीनोऽन्यान् कथं गोपायेन्न कथमपि। तत्र दृष्टांतः सर्पग्रस्त इति॥ ४५॥ ❀ ❀ वृत्तितोऽपि सर्वे भगवदधीनाः, वृत्तेः सर्वत्र भगवत्कृतत्वादित्याह-अहस्तानि भूतानि सहस्तानां

मनुष्यादीनाम् अपदानि, चतुष्पदां गवादीनाम्। तत्र तेषु फल्गूनि महताम्, एवं जीवस्य जीवो जीवनम्॥ ४६॥ ❀ ❀ अथ चिदचिदात्मकस्य सर्वस्य विश्वस्य भगवदधीनत्वं वक्तुं स्वाभाविकं भेदाभेदसंबंधमाह–हे राजन्! इदं चिदचिदात्मकं विश्वं भगवान् भगवदभिन्नम् "सर्वं खल्विदं ब्रह्मे"ति श्रुतेः। कथंभूतो भगवान् आत्मनां जीवानामुपलक्षणं चैतत् प्रकृतिकालादेः आत्मा स्थितिप्रवृत्तिशासनादिहेतुः यतश्चिदचिच्छक्तेर्जीवप्रकृतिकालादयो भावाः पृथक् न संति सः अत एव एकः, तत्तस्मादेव कार्यस्य कारणात्मकत्वादेव हेतोः अन्तरोऽनंतरः बाह्याभ्यंतर एक एव भगवान् भाति, यथा कांचनं कुंडलादौ पृथ्वी गिरिवृक्षादौ द्रुमः शाखापत्रादौ कार्ये कारणतयांऽतरोऽनंतरो भाति तद्वत्। अनेन पदेन स्वरूपतो भेदोऽपि दर्शितः चिदचित्पदार्थयोः शक्तिभूतयोः। स्वरूपेण स्वाभाविको भेदोऽपि शक्तिमतः पृथक्स्थितिप्रवृत्त्याद्यभावादभेदोऽपि स्वाभाविकः। एवं व्यष्टिभेदाभेदः कारणावस्थायां कार्यावस्थायां च सर्वत्र बोध्यः। अथ कार्यकारणयोरपि स्वाभाविकौ भेदाभेदौ दर्शयति–तमेकवचननिर्दिष्टं कारणमेकमेव मायया चिच्छक्तिगर्भया चिच्छक्त्योरुधा नानाब्रह्मांडरूपेण बहुधा पश्य कारणावस्थमेकं कार्यावस्थमनेकमित्यर्थः। विस्तरस्त्वाकरे द्रष्टव्यः॥ ४७॥ ❀ ❀ भगवन्नेवंभूतो भगवान्क इत्यपेक्षायामाह स इति। यस्य प्रभावो वर्णितः सोऽयमस्यां पृथिव्यां कालरूपः कालात्माऽसुरद्विषामभावायावतीर्णः श्रीकृष्णः॥ ४८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

मध्ये राजा शंकते कथं त्वनाथा इति रक्षकरहिताः, वने हि रक्षा अपेक्ष्यते विषयाभावाच्च कृपणाः, यस्य वाश्रयं कृतवंतः तन्नपुंसकमचेतनमिति॥ ४४॥ ❀ ❀ उत्तरमाह कालकर्मगुणाधीन इति। किं त्वमेव रक्षकः तत्र न तिष्ठतीति शोकः आहोस्वित् रक्षकमात्राभावात्? तत्राद्यं निराकरोति त्वं रक्षक इति। पक्षस्त्वयुक्तः, राजशब्दस्य देहवाचकत्वात् न ह्येकेन गृहेण गृहांतरं रक्षितुं शक्यते, किं च व्यवहारानुसारेणापि रक्षकत्वे अन्याधीनः कथं रक्षेत्, अयं देहः कालाधीनः कालप्रेरणां विना कथं रक्षेत् कालस्तु निमित्तमित्यस्मिन् पक्षेऽपि कर्माधीनः। कालप्रेरणया यत्कर्म कृतवान् तत्फलभोगस्यावश्यकत्वात् कर्मापि नित्यमेवादृष्टसापेक्षत्वादिति चेत् तत्रापि कर्मैव चेत् दृष्टसामग्रीमपि संपादयति तदापि पूर्वोक्त एव दोषः। अथांत्यश्चेत् स्वभावभूतास्ते गुणाः अतस्त्रिदोषव्याप्तः स्वयं पंचभूतविकारः भूतानि तु भक्षकाणि यैरात्मैव भक्षितः, तद्विकारः कथमन्यान् गोपायेत्। अन्ये त्वेतद्व्यतिरिक्ता देहाद्यध्यासरहिताः तुशब्देन कालाधीनाः भवदीया जाताः। किंच कालग्रस्तः सर्वथा न रक्षतीति दृष्टांतमाह सर्पग्रस्त इति, अजगरगिलितः परं बहिःस्थितमतस्त्वां धृतराष्ट्रः शोचितुमर्हति न तु त्वं धृतराष्ट्रमित्यर्थः॥ ४५॥ ❀ ❀ भक्ष्याभावस्तु न शंकनीयः। सर्वत्रैव भगवता भक्ष्यं क्लृप्तमिति वदन् कोऽपि रक्षको नास्तीति पक्षं दूषयति अहस्तानीति। आदौ स्रष्टव्यत्वेन जीवा एवोपस्थिताः। तेषां सृष्टिर्नाम देहनिर्माणेन तत्र प्रवेशनं तत्रोत्तरत्र वृद्ध्याद्यर्थम् अन्नसंगे कर्त्तव्ये जीवातिरिक्तमलभमानः सर्वमेवान्नमत्तारं च कृतवान्। तत्र सामान्यप्रकारो विशेषश्च सामान्यं लौकिकः विशेषो वैदिकः तत्र सामान्यप्रकारे व्यवस्थामाह अहस्तानि सहस्तानामिति। उपलक्षणमेतत् बलवतां दुर्बलं भक्ष्यं तद्बलं क्रिययेति हस्तपादौ क्रियायां कारणाविति तयोर्ग्रहणं सहस्ता अप्यहस्तानां भक्ष्या भवंति, यथा मनुष्या अजगरादीनां, महांतोऽपि फल्गूनां भक्ष्या भवंति यथा पिपीलिकानां सर्पाः। अतो बलाभिप्रायेण एतदुक्तं प्रायिकाभि प्रायेण वा अहस्तानि मत्स्यादीनि अपदानि तृणादीनि यत्पुनर्जीवाधिष्ठानं नास्ति तदेव नास्ति, भावे वा घटादेरिव न भक्ष्यता, अत एव भगवता सर्वत्र भक्ष्यं क्लृप्तमिति न चिंता कार्या, नीवारफलादेररण्येऽपि सत्त्वात्॥ ४६॥ ❀ ❀ ननु कथमेवं भगवान् करोति स्वसृष्टमन्यं खादयति तत्राह तदिदं भगवानिति। वैषम्यनैर्घृण्ये भगवतो न स्तः स्वात्मानमेव करोतीति तदाह–इदं जगत् भगवान्, तत्र हेतुः तदिति यस्मात् कारणात् सर्वं सर्वस्य भक्ष्यं तस्मात् न ह्यन्यमन्यो भक्षयितुं शक्तो राजन्निति संबोधनम् अन्याये दंडार्थं, तत्र यद्यन्यमन्यो भक्षयेत् राजदंडादिः स्यात्। ननु भगवतोऽप्यनुचितं यत्स्वयं कृत्वा स्वयं भक्षयतीति तत्राह आत्मेति। अतति व्याप्नोतीत्यात्मा सर्वमेव व्याप्नोतीति बहिःस्थितमंतःप्रवेशयति अंतःस्थितं च बहिः स्वस्मिन्नेव स्वयम् अंतर्बहिर्भवतीति वस्तुवृत्तं, तत्र भक्ष्यादिव्यवहारस्तु लौकिकः। अथवा आत् अभजनात् मा निषेधात्मको भवति। न हि सृष्टस्याभक्षणे आत्मैवावतिष्ठते। ननु जीवाधिष्ठितं कथं भक्षयति तत्राह आत्मनामात्मेति स्वरूपमित्यर्थः। ननु तथापि जीवदयया न भक्षयेदित्यत आह–स्वस्मिन्नेव दृष्टिर्यस्य अन्यानप्यात्मनैव जानाति स्वभोगार्थं वा अन्यान् न पश्यतीत्यर्थः। ननु स क्वास्तीत्याशंक्याह अंतरोऽनंतरो भातीति। अंतरः अनंतरश्च बाह्याभ्यंतरभावेन स एव भातीत्यर्थः। स सर्वत्र भक्षकत्वेनोपस्थित इति भावः। उपदेशं भेदप्रकारेण फलपर्यवसितं मन्यमान आह पश्य तमिति तमेव सर्वत्र भासमानं च पश्येदित्यर्थः। नन्वेकस्य कथमनेकप्रकारत्वं तत्राह माययोरुधेति, मायायाः प्रतिरूपत्वेनोक्तत्वात् तत्र संबंधः जलचंद्रवदग्निवद्वा अनेकधा भातीत्यर्थः॥ ४७॥ ❀ ❀ एवं रक्षकत्वाभावमाशंक्य भगवतः सर्वरूपेण रक्षकत्वमुक्त्वा तस्येदानीं संसारलीलापरत्वमाह सोऽयमद्येति। महाराजेति संबोधनात् न भयं कर्त्तव्यम्, इतोऽप्यधिकं स्वराज्यं दास्यतीति भावः। सोऽयमिति ज्ञानदृष्ट्या प्रदर्शयन्नाह दृश्यस्यान्यत्वं वारयति भगवानिति। नन्वागतस्य किं प्रयोजनं तत्राह भूत-

भावन इति । भूतानि भावयति पालयतीति दोषदूरीकरणेनेति, स्वयं स्वतंत्रतया संहर्त्तापि विशेषाधिकारित्वात् कालस्य पालतीति ज्ञापनार्थं भक्तिसिद्धये कालस्य रूपमिव रूपं कृत्वा सुरद्विषामभावायावतीर्णः । वामनव्यावृत्त्यर्थमाह अस्यामिति ॥ ४८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

कालकर्मेत्यत्र । राजशब्दस्य देहवाचकत्वादिति । इदं देहोयमित्यस्येदमो व्याख्यानं निमित्तमिति, न रक्षाकर्तेत्यर्थः ॥ ४५ ॥ ❀ ❀ अहस्तानीत्यत्र । दूषयतीति द्वाभ्यां दूषयतीत्यर्थः । तत्र सामान्यप्रकार इति । अत्रात्तृभावे सामान्यप्रकारः । भात्रे वेति जीवानधिष्ठितस्य सत्त्वेपि ॥ ४६ ॥ ❀ ❀ तदिदमित्यत्र । तत्राहेति । तादृश्यां शङ्कायां खाद्यानां खादकानां चाभेदमाहेत्यर्थः । सष्टानामपीति परस्परमभेदादित्यर्थः । बहिरिति । प्रकटयतीति शेषः । लौकिक इति । तथा च वस्तुविचारे कूर्माङ्गवदन्तः प्रवेशान्न दोष इत्यर्थः । आदित्यादि । आसमन्ताददनमात् आतः भक्षणान्मा निषेधात्मकः केवलो भवत्यवतिष्ठते इत्यर्थः । 'परोनुनासिको वे'ति सन्त्रेवैकल्पिकत्वान्नत्वाभावः । पृषोदरादित्वाद्वा दत्वनत्वयोरभावः, तेनात्मेत्यतिपरोक्षवृत्त्या सिद्ध्यतीति ज्ञेयम् । आत् अभजनादिति पाठो न भाति । नहीत्याद्यग्रिमग्रन्थानुरोधादित्यपि ज्ञेयम् ॥ ४७ ॥ ❀ ❀ सोयमेत्यत्र । सर्वरूपेण रक्षकत्वमिति । व्यापकत्वेन भक्षकभक्षकत्वेन सर्ववस्तुस्वरूपत्वेन चेत्यर्थः । संहारलीलायां कथं पालकत्वमित्यत आहुः–दोषदूरीकरणेनेति । तथा च तदापि पालकत्वमव्याहतमिति भावः । विशेषाधिकारित्वादिति संहरणे विशेषाधिकारित्वात् । मौसलस्य जातत्वात्कथमेवमुक्तिरित्यत आहुः मोहान्तरेत्यादि । निवारकत्वेनेति । स्थापनीयानां मृत्युनिवारकत्वेन मोहनिवारकत्वेन वा ॥ ४८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

किमात्मानं तेषां रक्षकं मत्वा तत्रात्मनोऽभावाच्छोचसि आहोस्वित्तत्र रक्षकमात्राभावादिति विकल्प्याद्यं पक्षं निराकरोति–कालेति । कालो गुणपरिणामहेतुः, कर्माणि पापपुण्यात्मकानि, गुणाः सत्त्वादयो मूलं कारणम् , तदधीनः पञ्चमहाभूतकार्यात्मको जडोऽयं दृश्यमानस्त्वदन्यस्य वा देहोऽन्यांस्तथाभूतान् देहान् कथं तु गोपायेत् संरक्षेत् न गोपायेदेवेत्यर्थः । तत्र दृष्टान्तमाह–सर्पेति । यथा स्वयं सर्पेणाजगरेण ग्रस्तो गिलितो जनोऽपरं तथाविधं न रक्षितुं शक्नोति तथेत्यर्थः ॥ ४५ ॥ ❀ ❀ ईश्वरेण सर्वत्र रक्षासम्भवात् द्वितीयं पक्षमपि नेत्याशयेनाह–अहस्तानि मत्स्यफलादीनि सहस्तानां मनुष्यादीनां जीवनमिति सर्वत्रान्वयः । अपदानि तृणादीनि चतुष्पदां गवादीनाम् । तत्र तेष्वहस्तादिष्वपि मत्स्यादिषु फल्गूनि अल्पानि महताम् । एवं जीव एव जीवस्य जीवनं जीविका । एतत्प्रायिकाभिप्रायेणोक्तम्, सहस्तानामपि मनुष्यादीनां अहस्ताजगरादिभक्ष्यत्वदर्शनात् । महतामपि फल्गुपिपीलिकादिभक्ष्यत्वदर्शनाच्चेति ज्ञेयम् ॥ ४६ ॥ ❀ ❀ सर्वत्र नवे गृहे च जीविकासम्पादनेन भगवानेव रक्षतीत्युक्तं तत्कथं सम्भवतीत्यपेक्षायां भगवतः सर्वरूपत्वादित्यभिप्रायेणाह–तदिति । अधिकारित्वात् तवातिरहस्यमपि कथ्यते इति सूचयन् सम्बोधयति–हे राजन् तदीश्वरवशत्वेनोक्तमिदं परिदृश्यमानं जडचेतनात्मकं जगद्भगवानेव अन्तरो भोक्तृरूपो बहिर्भोग्यरूपश्च भातीत्यन्वयः । तत्र हेतुमाह–एक इति । ननु जीवानां नानात्वप्रसिद्धेः कथं तस्यैकत्वमित्याशङ्क्याह–आत्मनां जीवानामात्मा स्वरूपमेवेति । एवं भगवतो विकारित्वं स्यादित्याशङ्क्याह–स्वदृगिति, स्वप्रकाशरूप इत्यर्थः । ननु कथमेक एव नाना प्रतीयते तत्राह–तमेकमेव मायया स्वेच्छया उरुधा नानाविधं जातं पश्येति ॥ ४७ ॥ ❀ ❀ एवम्भूतो भगवानिदानीं कास्तीत्यपेक्षायामाह–स इति । महाराजेत्यनेन तत्कृपयैव तव सर्वा समृद्धिरिति सूचयन्सम्बोधयति । हे महाराज ! स भगवान् अद्यास्यां भूमौ अवतीर्णोऽयं श्रीकृष्ण एव इत्यन्वयः । किमर्थमवतीर्ण इत्यपेक्षायामाह–अभावायेति । सुरद्विषां दैत्यानामभावाय विनाशायेत्यर्थः । दैत्यविनाशोऽपि किमर्थ इत्यपेक्षायामाह–भूतभावन इति, भूतानि भक्तजनान् भावयति पालयतीति तथा । भक्तजनपालनायेति भावः । कथं दैत्यविनाशे शक्त इत्यपेक्षायामाह–कालरूप इति ॥ ४८ ॥

हिन्दी अनुवाद

यह पाञ्चभौतिक शरीर काल, कर्म और गुणोंके वशमें है । अजगरके मुँहमें पड़े हुए पुरुषके समान यह पराधीन शरीर दूसरोंकी रक्षा ही क्या कर सकता है ॥ ४५ ॥ ❀ ❀ हाथवालोंके बिना हाथवाले, चार पैरवाले पशुओंके बिना पैरवाले (तृणादि) और उनमें भी बड़े जीवोंके छोटे जीव आहार हैं । इस प्रकार एक जीव दूसरे जीवके जीवनका कारण हो रहा है ॥४६॥ ❀ ❀ इन समस्त रूपोंमें जीवोंके बाहर और भीतर वही एक स्वयम्प्रकाश भगवान्, जो सम्पूर्ण आत्माओंके आत्मा हैं, मायाके द्वारा अनेकों प्रकारसे प्रकट हो रहे हैं । तुम केवल उन्हींको देखो ॥ ४७ ॥ ❀ ❀ महाराज ! समस्त प्राणियोंको जीवन दान देनेवाले वे ही भगवान् इस समय इस पृथ्वीतलपर देवद्रोहियोंका नाश करनेके लिये कालरूपसे अवतीर्ण हुए हैं ॥ ४८ ॥

निष्पादितं देवकृत्यमवशेषं प्रतीक्षते । तावद् यूयमवेक्षध्वं भवेद् यावदिहेश्वरः ॥ ४९ ॥
धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया[1] । दक्षिणेन हिमवत[2] ऋषीणामाश्रमं गतः ॥ ५० ॥
स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात्[3] । सप्तानां प्रीतये नाना सप्तस्रोतः[4] प्रचक्षते ॥ ५१ ॥
स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि । अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तर्हि श्रीकृष्णोऽत्रास्तीत्यत्रैवास्थां मा कृथा इत्याह । तत्र देवानां कार्यं तेन निष्पादितम् । केवलमवशेषं प्रतीक्षते । यदुकुलक्षयमिति हृदिस्थम् । ततो निजं धाम यास्यति ततो यूयमपि गच्छतेत्यर्थः । तत्र भूतमपि विदुरवदेव नावर्णयत् ॥ ४९ ॥ ❀ ❀ तदेवं शोकमास्थां च निवार्य जिज्ञासवे तस्मै यथावृत्तं कथयति धृतराष्ट्र इति षड्भिः । हिमवतो दक्षिणे भागे ॥ ५० ॥ ❀ ❀ तदपि कुत्रेत्याह स्रोतोभिरिति । या वै प्रसिद्धा स्वर्धुनी सा आत्मानं यत्र सप्तधा व्यधात् । किमर्थम् । नाना पृथक्सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये । अत एव तत्तीर्थं सप्तस्रोतो वदन्ति ॥ ५१ ॥ ❀ ❀ तत्र तेन कृतमष्टांगयोगमाह स्नात्वेति चतुर्भिः । तत्र स्नानं होमोऽब्भक्षणं चेति नियमा उक्ताः, भक्षस्थानेऽपां स्वीकारादब्भक्षः उपशांत आत्मा यस्य सः । विगताः पुत्राद्येषणा यस्मादिति यमा उक्ताः ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अवेक्षध्वमिति । कर्माश्रवणादहंतास्पदं ममतास्पदं च सर्वं लभ्यते । तदन्तर्द्धाने श्रुते सति सर्वमेवोपेक्षध्वमिति भावः ॥ ४९ ॥ ❀ ❀ "नाहं वेद गतिं पित्रोः" इति प्रश्नं परिहरिष्यन्धृतराष्ट्रस्य तपश्चर्याश्रमतीर्थनामाद्याह-धृतराष्ट्र इति । दक्षिणेनेति । दक्षिणस्यामित्यर्थः । निर्गमनावसरे भ्रात्रा विदुरेण चात्कुन्त्या सह हस्तिनापुरान्निर्गम्य हिमवतो गिरेर्दक्षिणदिग्गत-मृषीणामाश्रमं सप्तस्रोतो नाम गतोभूदित्यन्वयः ॥ ५० ॥ ❀ ❀ कस्मात्सप्तस्रोतस्त्वं तस्येति तत्राह-यत्राश्रमे । स्वामिव्याख्याने तदपि कुत्रेत्यस्य दक्षिणस्यामपि कुत्र गत इत्यर्थः । अत एव सप्तप्रवाहवत्त्वादेव ॥ ५१ ॥ ❀ ❀ तेन धृतराष्ट्रेण । तत्राष्टां-गेषु । आदिना लोकैषणावित्तैषणाग्रहः । आस्ते इति भूते लट् । अन्यथोक्तार्थविरोधः स्यात् । अनुसवनं त्रिकालम् ॥ ५२ ॥

श्रीमद्वीरराघवव्याख्या

तेन च देवकृत्यं देवार्थं कर्त्तव्यं कृत्यं प्रयोजनं तद्विपक्षक्षपणरूपं निष्पादितम् , अधुना त्वयं भगवानवशेषं स्वकुलविनाशा-त्मकमिति गूढाभिसन्धिः प्रतीयते । अतो यावदिह भूर्लोके भगवानीश्वरः कृष्णो भवेद्वर्त्तेत तावदेव यूयमप्यवेक्षध्वं ततः पितृवन्नि-र्गच्छतेति भावः ॥ ४९ ॥ ❀ ❀ ब्रूहि त्वमिति प्रकृतप्रश्नस्योत्तरमाह धृतराष्ट्र इति द्वाभ्याम् । स्वभार्यया गांधार्या भ्रात्रा वा विदुरेण च सह धृतराष्ट्रो हिमवतो दक्षिणेन ऋषीणामाश्रमं गतः हिमवतो दक्षिणपार्श्वानंतरवर्त्तिनमाश्रमं गत इत्यर्थः, 'एनबन्य-तरस्यामदूरपंचम्याः' इत्यवधिमतः सामीप्ये एनप्प्रत्यये व्युत्पन्नमिदं दक्षिणेनेत्यव्ययम् ॥ ५० ॥ ❀ ❀ कोऽसावा-श्रम इत्यत्राह स्रोतोभिरिति । यं सप्तस्रोत इति प्रचक्षते तमाश्रमं गत इत्यन्वयः । तत्रात्मनः प्रवृत्तौ निमित्तमाह यत्रेति प्रसिद्धस्वर्धुनी स्वर्गनदी गंगा सप्तानामृषीणां प्रीतये यतः सप्तभिः स्रोतोभिः प्रवाहैर्नाना बहुधा सुविभक्ता बभूवातस्तं देशं सप्त-स्रोत इत्याचक्षते यमेवमाचक्षते तं गता इत्यर्थः ॥ ५१ ॥ ❀ ❀ तत्र किं करिष्यति कथं वा वर्त्तिष्यते इत्यत्राह-तत्रानुसवनं त्रिसंध्यं स्नात्वाऽग्नीन् यथाविधि हुत्वा चाब्भक्षः अप एव भक्षयति शांतः रागाद्यकलुषित आत्मा मनो यस्य विगता ईषणा-दारेषणा धनेषणा पुत्रेषणा यस्य तथाभूत आस्ते आसिष्यते ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अवतारप्रयोजनं च संपन्नप्रायमिति ब्रूत इत्याह निष्पादितमिति । भूभारदैत्यसंहाराख्यं देवकार्यं तेन निष्पादितं स पुन-रवशेषमवशिष्टं यदुकुलक्षयं प्रतीक्षते पश्चाद्वैकुंठमेष्यतीति शेषः । श्रीकृष्ण इह भूतले यावंतं कालं तिष्ठति यूयमपि तावंतं समय-मनुवर्तध्वमित्यन्वयः ॥ ४९ ॥ ❀ ❀ 'नाहं वेद गतिमि'ति प्रश्नं परिहरिष्यन् धृतराष्ट्रस्य तपश्चरणाश्रमतीर्थनाम वक्तीत्याह धृतराष्ट्र इति । भ्रात्रा विदुरेण चशब्दात् कुंत्या सह गतः हस्तिनपुरान्निर्गम्य हिमवतः पर्वतस्य दक्षिणेन दक्षिणदिशि गतमृषीगा-

---

५८१ पृष्ठटिप्पण्यंशोऽयम्—

राजा तत्वोपनीतार्घ्यः प्रत्युत्थायाभिवन्दितम् । परमासन आसीनं पौरवेन्द्रोऽभ्यभाषत ॥
नाहं वेद गतिं पित्रोर्भगवन् क्व गताविति । कर्णधार इवापारे सीदतां पारदर्शकः ॥
नारद उवाच—मा कञ्चन शुचो राजन् यदीश्वरवशं जगत् । लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः ॥'

१. प्रा० पा०—सुभार्यया । २. प्रा० पा०—दक्षिणे हिमवत्पार्श्वे । ३. प्रा० पा०—सप्तधाभवत् । ४. प्रा० पा०—सप्तस्रोताः ।

माश्रमं सप्तस्रोतो नाम गतोऽभूदित्यन्वयः ॥ ५० ॥ ❀ ❀ कस्मात्सप्तस्रोतस्त्वं तस्येति तत्राह स्रोतोभिरिति । तत्र यस्मिन्नाश्रमे स्वर्धुनी भागीरथी सप्तानामृषीणां प्रीतये सप्तभिः स्रोतोभिः जलस्यंदनधाराभिः सप्तधा सप्तभिः द्रोणिभिरभ्यगात् समुद्रमिति शेषः, इति यस्मात्तेन विचक्षणाः सप्तस्रोत इति संज्ञां प्रचक्षत इत्यन्वयार्थः ॥ ५१ ॥ ❀ ❀ उपशांत आत्मा अंतःकरणं यस्य स तथोक्तः विगतेषणः नष्टमांसदृष्टिः वौ परमात्मनि गतं प्राप्तमीक्षणं निरंतरचिंतनं यस्येति वा । अब्भक्षः कृतजलाहारः स धृतराष्ट्रस्तस्मिन्नाश्रमे स्नात्वा यथाविधि अग्नींश्च हुत्वाऽऽस्त इत्यन्वयः । आस्त इति लट् भूतार्थे अन्यथोक्तार्थविरोधः स्यात् ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अवशेषं भवतामाकर्णणपूर्वमिति हृत्स्थम् ॥ ४९–५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

केवलमवशेषं प्रतीक्षत इति यदुकुलानामन्तर्धापनमिति हृदिस्थम् । तच भूतमपि विदुरवदेव नावर्णयत् । अवेक्षध्वमित्यस्य कर्माप्रयोगादहन्तास्पदं ममतास्पदं च सर्वमेव लभ्यते । तदन्तर्द्धाने श्रुते सति सर्वमेवोपेक्षध्वमिति भावः ॥ ४९ ॥ ❀ ❀ तदेवं शोकं निवार्य जिज्ञासवे तस्मै यथावृत्तं कथयति धृतराष्ट्र इति षड्भिः । दक्षिणेन दक्षिणस्यां दिशि ॥ ५० ॥ ❀ ❀ या वै प्रसिद्धा स्वर्धुनी गंगा सा आत्मानं सप्तधा व्यधात् । किमर्थं सप्तानाम् ऋषीणां प्रीतये । अतस्तत्तीर्थं सप्तस्रोत एव नाम मरीचिगंगा अत्रिगंगेत्यादि नानानाम्ना वदन्ति ॥ ५१ ॥ ❀ ❀ तेन कृतमष्टांगयोगमाह स्नात्वेति चतुर्भिः । तत्र स्नानं होमोऽब्भक्षणं च नियमा उक्ताः । उपशान्तात्मा विगतैषण इति यमः । जितासन इत्यादिना आसनप्राणायामप्रत्याहाराः । हरिभावनयेति धारणाध्याने उक्ते ॥ ५२–५३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेन देवकृत्यं देवद्विट्क्षयरूपं निष्पादितम्, अवशेषमीश्वरः प्रतीक्षते निजलोके स्थितस्तव महाप्रस्थानं प्रतीक्षते । तावद्यूयमवेक्षध्वं यावदिह हस्तिनापुरे भवेत् प्राप्तो भवेत्तत्संदेशहर इति शेषः । अर्जुन इहागत्य स्फुटं यदुकुलक्षयं भगवत्प्रयाणं च प्रतिपादयिष्यति तदा भवद्भिरपि गंतव्यमिति गूढोऽर्थः राज्ञा नावधारितः, अपितु ईश्वरः यावदिह लोके भवेत्तावद्यूयमवेक्षध्वमित्येव वाक्यार्थो ज्ञातः ॥ ४९ ॥ ❀ ❀ यदुक्तं 'नाहं वेद गतिं पित्रोर्भगवन् क गतावितः' इति तत्राह धृतराष्ट्रइत्यादिसार्धेनवभिः । हिमवतो दक्षिणेन तस्य दक्षिणपार्श्वे आश्रमं गतः प्राप्तः ॥ ५० ॥ ❀ ❀ यत्र स्वर्धुनी सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये सप्तधा व्यधादात्मानमिति शेषः, अतस्तमाश्रमं नाम्ना सप्तस्रोतरिति प्रचक्षते ॥ ५१ ॥ ❀ ❀ अनुसवनं त्रिसंध्यं स्नात्वा, अनेन स्नानादयो नियमा उक्ताः, उपशांतः रागाद्यनभिभूत आत्मा मनो यस्य विगता ईषणा पुत्रधनादिपिपासा यस्य इति यमोक्तिः ॥ ५२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं कृष्णचरित्रमुक्त्वा उपसंहरन् राजानमुपदिशति निष्पादितमिति । "मया निष्पादितं ह्यत्र देवकार्यमशेषत" इति वाक्यात् अवशेषं भारहारकभारदूरीकरणं मोहांतरानुत्पत्तये तथोक्तं वस्तुतस्तु तदपि जातमेव तावत्तच्छ्रवणपर्यंतमवश्यभावित्वादवेक्षध्वं यावद्भगवानिह निवारकत्वेनाधिगच्छेत् । नन्वस्मान् स्थापयित्वा गतः कथं निवारयेत्तत्राह ईश्वर इति सर्वकरणसमर्थः ॥ ४९ ॥ ❀ ❀ एवं भगवद्वचनेन मोहाभावं भयं चोत्पाद्य पृष्टे उत्तरमाह धृतराष्ट्र इति । हिमवतो दक्षिणेन हिमालयस्य दक्षिणे भागे पूर्वमेव सिद्धम् ऋषीणामाश्रमं गतः गंगादक्षिणभागात् राजगृहात् दक्षिणभागे ऋषिगृहे गत इत्याधिक्यं 'गांगं करिकराद्भ्रष्टं वायुना पल्लवीकृतम् । पुण्यवंतं विद्धि राघवे'ति वाक्यात् हिमसंमुखतया शीतेनातिपीडितश्च तिष्ठतीत्यर्थः ॥ ५० ॥ ❀ ❀ तत्र ऋषीणामनुभावं गंगां चाह स्रोतोभिरिति । तस्याश्रमस्य सप्तस्रोत इति नाम । तत् सार्थकमित्याह यत्राश्रमे ऋषीणामुत्कर्षस्थापनाय प्रत्येकं ऋषीणां समीपे प्रवाहरूपेणागता वक्रतया गमने तु उच्चैर्नीचता स्यात् ऋषीणां वैमनस्यं च, अतः स्रोतोभिरित्युक्तं व्यधात् जाता आत्मानं वा स्रोतोभिरिति तृतीया "बहुलं छंदसी"ति कर्मार्थे तृतीया, तेन स्रोतांसि व्यधादित्यर्थः । स्वर्धुनीति स्वतंत्रतया आकाशगंगा समागतेति ज्ञायते । तेन जलांतरामिश्रणेनातिपावित्र्यमुक्तं नाम्ना सप्तस्रोत इति । नामेति पाठे सप्तानां प्रीतये नाना अनेन यथासंख्यं ज्ञातम् ॥ ५१ ॥ ❀ ❀ तत्र तस्य कृत्यमाह तूष्णींभावव्यावृत्त्यर्थं स्नात्वेति । स्नानादयो नियमाः, उपशांत्यादयो यमाः, अनुसवनं त्रिकालः सवनानुकल्पतया वा अग्नीन् गार्हपत्यादीन् अंधस्यापि यथागार्हस्थ्यं होम इति चादोषः । होमेनाग्नय एव संस्क्रियंत इति । संस्कार्यत्वेन कर्मता आधानं कृत्वेत्यर्थः चकारादग्निहोत्रमपि हुत्वा यथाविधि पंचाग्निविधानमनतिक्रम्य अप एव भक्षयतीत्यब्भक्षः । वानप्रस्थाश्रमे अकृष्टपच्यादिवायुभक्षांतमाहारा विहिताः, तत्र उपांतमब्भक्षः उपभगवत्समीपे प्रतीचि वा शांत आत्मा अंतःकरणं यस्य ज्ञानार्थं भगवदाविर्भावार्थं वा एषणापरित्यागेन मुक्तियोग्यता सूचिता । आस्त इति सत्तातिरिक्तधर्मराहित्यं सूचितं लोकैषणात्र मुख्या ॥ ५२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

धृतराष्ट्र इत्यत्र । पल्लवीकृतमिति पल्लववदीषद्धूनीकृतम् ॥ ५० ॥ ❀ ❀ स्नात्वेत्यत्र । अग्नय एव संस्क्रियन्ते इति । न फलार्थं होम इत्यर्थः । त्रिमुख्येति । तथा च सापि त्यक्तेत्यर्थः ॥ ५२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदपि स्वभक्तानां देवानां कृत्यं कार्यं तेन निष्पादितम्, अवशेषं यदुकुलविनाशरूपं प्रतीक्षते, स ईश्वरो यावदिह भूमौ भवेत् वर्त्तते तावद्यूयमप्यवेक्षध्वं, तदनन्तरमितो निर्गच्छतेत्यर्थः ॥ ४९ ॥ ❀ ❀ एवं जगत ईश्वराधीनत्वकथनेन राज्ञः शोकं निवार्य पितरौ क्व गताविति इति राज्ञः प्रश्नस्योत्तरमाह–धृतराष्ट्र इति । भ्रात्रा विदुरेण स्वभार्यया गान्धार्या च सह धृतराष्ट्रो हिमवतो दक्षिणेन दक्षिणस्यां दिशि ऋषीणामाश्रमं गत इत्यन्वयः ॥ ५० ॥ ❀ ❀ कोऽसावाश्रम इत्यपेक्षायामाह–स्रोतोभिरिति । या वै प्रसिद्धा स्वर्धुनी गङ्गा सा नाना पृथक् सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये यत्रात्मानं सप्तधा व्यधात् । अत एव यं सप्तस्रोतः प्रचक्षते वदन्ति तमगादिति पूर्वेणैवान्वयः ॥ ५१ ॥ ❀ ❀ तत्र तेन कृतमष्टाङ्गयोगमाह–स्नात्वेति चतुर्भिः । तस्मिन्नाश्रमेऽनुसवनं त्रिकालं स्नात्वा यथाविधि पञ्चाग्निविधानम् अनतिक्रम्य अग्नीन् गार्हपत्यादीन् हुत्वा–चकारादग्निहोत्रं च कृत्वा–अप एव भक्षयतीत्यब्भक्षः विगता धनसुतलोकविषयैषणा यस्मात्सः-तत्र हेतुः-उपशान्तः कामक्रोधादिवेगरहित आत्माऽन्तःकरणं यस्य स आस्ते । तत्र स्नानं होमः स्रोतोऽब्भक्षणं चेति नियमा उक्ताः । उपशान्तात्मेति यमा उक्ताः ॥ ५२ ॥

हिन्दी अनुवाद

अब वे देवताओंका कार्य पूरा कर चुके हैं । थोड़ा-सा काम और शेष है, उसीके लिए वे रुके हुए हैं । जबतक वे प्रभु यहाँ हैं, तबतक तुमलोग भी उनकी प्रतीक्षा करते रहो ॥ ४९ ॥ ❀ ❀ धर्मराज ! हिमालयके दक्षिण भागमें, जहाँ सप्तर्षियोंकी प्रसन्नताके लिये गङ्गाजीने अलग-अलग सात धाराओंके रूपमें अपनेको सात भागोंमें विभक्त कर दिया है, जिसे 'सप्तस्रोत' कहते हैं, वहीं ऋषियोंके आश्रमपर धृतराष्ट्र अपनी पत्नी गान्धारी और विदुरके साथ गये हैं ॥ ५०-५१ ॥ ❀ ❀ वहाँ वे त्रिकाल स्नान और विधिपूर्वक अग्निहोत्र करते हैं । अब उनके चित्तमें किसी प्रकारकी कामना नहीं है, वे केवल जल पीकर शान्तचित्तसे निवास करते हैं ॥ ५२ ॥

जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः । हरिभावनया ध्वस्तरजःसत्त्वतमोमलः ॥ ५३ ॥
विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् । ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥ ५४ ॥
ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः । निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ।
तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥ ५५ ॥
स वा अद्यतनाद् राजन् परतः पञ्चमेऽहनि । कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जितासन इत्यादिना आसनप्राणायामप्रत्याहारा उक्ताः । हरिभावनयेति धारणोक्ता । ध्वस्ता रजःसत्त्वतमोरूपा मला यस्येति फलतो ध्यानमुक्तम् ॥ ५३ ॥ ❀ ❀ समाधिमाह विज्ञानेति द्वाभ्याम् । आत्मानं मनोऽहंकारास्पदं स्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ संयोज्यैकीकृत्य तं च विज्ञानात्मानं दृश्यांशाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं द्रष्ट्रंशाद्वियोज्याधार आश्रयसंज्ञे ब्रह्मणि प्रविलाप्य घटांबरं घटोपाधेर्वियोज्य यथा महाकाशे प्रविलाप्यते तद्वत् ॥ ५४ ॥ ❀ ❀ व्युत्थानाभावमाह ध्वस्तेति । अंतर्गुणक्षोभाद्वा बहिरिंद्रियविक्षेपाद्वा व्युत्थानं भवेत्तदुभयं तस्य नास्ति यतो ध्वस्तो मायागुणानामुदर्क उत्तरफलं वासना यस्य सः । निरुद्धानि करणानि चक्षुरादीन्याशयो मनश्च यस्य सः । अत एव निवर्तितोऽखिल आहारो भोज्यमिंद्रियैर्विषयाहरणं वा येन सः । स्थाणुरिव निश्चल आस्ते ॥ ५५ ॥ ❀ ❀ तथाभूतमप्यानेतुमुद्यतं प्रत्याह तस्येति । अंतरायो विघ्नः । मैवाभूरित्यडागमश्छांदसः । दर्शनमपि तावत्कुर्यामित्युद्यतं प्रत्याह । स वा अद्यतनादह्नः परत उत्तरत्र । स्वं स्वाधीनम् । तर्हि तद्दाहार्थं गमिष्यामि नेत्याह तच्चेति ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अपि मयीति मृत्युकालीननिष्ठाविषयप्रश्नं परिहरन्नाह–धृतराष्ट्र उक्तविधिना तपः कुर्वन्नभ्यासपाटवेन जितासनः स्वस्तिकाद्यासनजयवान् जितश्वासः प्राणजयवान् । विषयेभ्यः प्रत्याहृतानि निवर्त्तितानि षडिन्द्रियाणि येन स इति । प्रत्याहार उक्तः ॥ ५३ ॥ ❀ ❀ स्वदेहगतानि भूतानि क्रमेण कारणेषु प्रवेश्यात्मानमहंकारं विज्ञानात्मनि महत्तत्वे संयोज्य भावयित्वा ।

तञ्च विज्ञानात्मानं क्षेत्रज्ञे जीवे प्रविलाप्य संयुक्तं विभाव्य तञ्च क्षेत्रज्ञं ब्रह्मणि संयोज्यात्मानं स्वदेहस्थमन्तर्यामिणमाधार आश्रयतत्त्वे भगवत्यंशिनि संयुक्तं विभाव्य। नन्वन्तर्यामिभगवतोरैक्यमेव प्रसिद्धम्। सत्यम्। ऐक्येप्यौपचारिको भेदो विवक्षित एवेति सदृष्टांतमाह–घटांबरमिवेति। उपाधिस्थमाकाशं निरुपाधावाकाश इव तयोश्च घटाकाशमहाकाशयोर्वस्तुतः सर्वव्यापकत्वादैक्यमेवेत्यर्थः॥ ५४॥ ❋ ❋ अधुना स्थाणुरिवाचल आस्ते तदा मृतिकाले आसीदित्येकान्वयः। अतस्त्वयि शमलमाशंसमानो गंगायां नापतदिति भावः। ब्रह्मार्पणबुद्ध्या संन्यस्तसमस्तकर्मणस्तस्य धृतराष्ट्रस्य त्वमपि तपोविघ्नो मा भूरिति तात्पर्यम्॥ ५५॥ ❋ ❋ इदानीं तन्मृतिकालमाह–स वा इति। अद्यतनादह्नः परतः पूर्वस्मिन्पंचमेहनि कलेवरं हास्यति जहौ। भूते लट्। तच्च भस्मीभविष्यति भस्मसादभूत्। लट् पूर्ववत्। अत्र स्कांदीयवाक्यमपि प्रमाणम् "तांस्तदा नारदो विद्वाञ्छमयामास धर्मवित्। उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथा" इति। तथा च तत्कलेवरमेव भस्मीभविष्यति न तु स शून्यतामेष्यति, चेतनस्य नित्यत्वात्। "परः स्यात्पूर्वपरयोरीशे शत्रौ च पालने" इति निरुक्तिः॥ ५६॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अन्तरायो नवविधस्तथा चात्र विशेषप्रतिपत्तये सभाष्यं महामुनिभगवत्पतंजलिप्रणीतं सूत्रमिदं प्रदर्श्यते। अथ के अन्तरायाः। ये चित्तस्य विक्षेपकाः। के पुनस्ते कियन्तो वेति (भा०) 'व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपाः तेऽन्तरायाः (पातंजलदर्शने समाधिपादे ३० सू.)' नवान्तरायाश्चित्तस्य विक्षेपाः सहैते चित्तवृत्तिभिर्भवन्त्येव। तेषामभावे न भवन्ति। पूर्वोक्ताश्चित्तवृत्तयः व्याधिर्धातुरसकरणवैषम्यं स्त्यानमकर्मण्यता चित्तस्य। संशयः उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति। प्रमादः समाधिसाधनानामभावनम्। आलस्यं कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। अविरतिश्चित्तस्य विषयसंयोगात्मा गर्द्धः। भ्रांतिदर्शनं विपर्ययज्ञानम्। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा समाधिप्रतिलम्भे हि सति तदवस्थितं स्यादिति। एते चित्तविक्षेपा नव योगमला योगप्रतिपक्षा योगान्तराया इत्यभिधीयन्ते (भा०) इति॥ ५६-५९॥

इति प्रथमस्कंधे त्रयोदशाध्याये श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या समाप्ता

श्रीमद्वीरराघवव्याख्या

जितमासनं येन सः चिरमासीनोऽपि क्लमरहित इत्यर्थः। जिताः श्वासाः प्राणादिवायवो येन सः, प्रत्याहृतानि शब्दादिविषयेभ्यो नियमितानि षडिंद्रियाणि येन, हरिभावनया भगवद्रूपानुस्मृत्या ध्वस्तानि निरस्तानि रजआदिगुणत्रयकार्याणि मुक्तिप्रतिबन्धकानि पुण्यादिरूपाणि मलानि यस्य तथाभूतः॥ ५३॥ ❋ ❋ विज्ञानात्मनि विज्ञानस्वरूपे क्षेत्रज्ञे प्रत्यगात्मन्यभिसंयोज्य पूर्वं प्रस्तुतानींद्रियाणीत्यर्थात्सिद्धम् इन्द्रियाणि संयोज्येंद्रियैरनाकृष्टचित्त इत्यर्थः, तमात्मानं क्षेत्रज्ञमाधारे धारके ब्रह्मणि विलाप्य विलीनं कृत्वोपाधिविधूननेन ब्रह्मसमानाकारतयाऽनुसंधायेति यावत्। तत्र दृष्टांतमाह घटांबरमिवांबर इति, महाकाशे घटाकाशमिव ब्रह्मण्यात्मानं प्रविलाप्य स्थाणुरिवास्त इत्युत्तरेणान्वयः। अम्बरदृष्टांतेन जीवब्रह्मणोः स्वरूपैक्यमनुसंधायेति न भ्रमितव्यं घटाद्युपाध्यपगमेन घटनाशस्य महाकाशसंश्लेषेऽपि स्वरूपभेदसद्भावात् पंचीकरणादाकाशेऽप्यंशभेदस्य वेदांतिभिरवश्यमंगीकृतत्वात् यद्याकाशेंऽशभेदो नाभ्युपगम्येत तदा कृत्स्नस्याप्याकाशस्य घटाद्युपहितत्वप्रसंगः। न चेष्टापत्तिः, घटाकाशयोर्व्याप्यव्यापकताया वैपरीत्यापातात्कात्स्न्येंनाकाशस्य घटोपहितत्वे हि तत्परिच्छिन्नस्याकाशस्य व्याप्यत्वं सुस्पष्टम्। अतः संश्लेषदशायामपि घटाकाशमहाकाशयोः प्रदेशभेदोऽस्त्येव, उपाध्यपगमेन समानाकारत्वमात्राभिप्रायक एवायं दृष्टांत इत्यवगंतव्यम्॥ ५४॥ ❋ ❋ ध्वस्तमायागुणानां रजआदीनामुदर्को रागद्वेषादिकार्यं यस्य, निरुद्धानि करणानि इंद्रियाण्याशयवासनांतःकरणं वा येन, निवर्तिता अखिला अब्भक्षणादयोऽपि येन, तथाभूतः स्थाणुरिवाचलो निश्चल आस्ते आसिष्यते। प्रत्याहृतषडिंद्रिय इत्यनेनेंद्रियाणां विषयेभ्य आकर्षणमात्रमुक्तं निरुद्धकरणाशय इत्यनेन तु पुनर्विषयेषु प्रवृत्तिप्रतिबंध उक्तः। अतो न पौनरुक्त्यं तथा ध्वस्तरजस्तमोमल इत्यनेन पुण्यपापाद्यभाव उक्तः। ध्वस्तमायागुणोदर्क इत्यनेन पुण्यापुण्यमूलकरागद्वेषाद्यभाव उक्तः। तथा तावदब्भक्षस्ततो निवर्त्तिताखिलाहार इति॥ ५५॥ ❋ ❋ कथंचित्तमानयिष्यामीति युधिष्ठिराभिप्रायमालक्ष्याह तस्येति। संन्यस्तानि त्यक्तान्यखिलानि देहधारणार्थान्यपि कर्माणि येन तस्य धृतराष्ट्रस्यांतरायो विघ्नभूतस्त्वं मा भूः न भव हे राजन्! स धृतराष्ट्रः अद्यतनाद्वर्त्तमानदिनादारभ्य परतः पंचमेऽहनि स्वं कलेवरं हास्यति वै नूनं त्यक्ष्यति तच्च कलेवरं योगाग्निनैव भस्मीभविष्यतीति॥ ५६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अपि मयीति मृत्युकालीनवैमनस्यविषयं प्रश्नं परिहरतीत्याह जितासन इति। धृतराष्ट्र उक्तविधिना तपः कुर्वन्नभ्यासपाटवेन जितासनः स्वस्तिकाद्यासनजयवाञ्जितश्वासः प्राणजयवान्विषयेभ्यः प्रत्याहृतश्रोत्रादिषडिंद्रियः सन् हरिभावनया हरिनिर्-

तद्ध्यानेन ध्वस्तं सत्त्वरजस्तमोनिमित्तं मनोमलं येन स तथा ॥ ५३ ॥ ❀ ❀ स्वरूपज्ञानेन स्वस्वरूपमारभ्य परतत्त्वपर्यन्तानि अशेषतत्त्वान्यपरोक्षीकृत्य सर्वं जगद्विज्ञानात्मनि विज्ञानतत्त्वाभिमानिनि विरिंचे संयोज्य तत्र प्रविलाप्य लयमेष्यतीति ध्यात्वा तं विरिंचं क्षेत्रज्ञे स्वहृदि स्थिते हरावंतर्यामिणि प्रविलाप्य घटांबरमंबर इव उत्पद्यमानघटवर्तिमहाकाशस्वरूपतद्भिन्नजायमानाकाशयोर्मध्ये महाकाशस्वरूपघटाकाशो महाकाशे घटे भिन्ने यथैकीभवति तथात्मानं स्वांतर्यामिणं हरिमाधारे सर्वाधारे ब्रह्मणि सर्वगते प्रविलाप्यैकीभावेन चिंतयन् ॥ ५४ ॥ ❀ ❀ अत एव ध्वस्तमायागुणोद्रेक इति हेतुगर्भं निरस्तप्रतिसत्त्वादिगुणोद्रेकत्वाद्धरावेव निरुद्धाशेषकरणमना अत एव निवर्तिताखिलाऽशनोऽधुना स्थाणुरिवाचल आस्ते तदा मृतिकाले आसीदित्येकान्वयः । तस्मान्न त्वयि शमलमाशंसमानो नापि दुःखितो गंगायामभ्यपतदिति भावः । ब्रह्मार्पणबुद्ध्या संन्यस्तसमस्तकर्मणः तस्य धृतराष्ट्रस्य तपोविघ्नो माभूरित्यन्वयः ॥ ५५ ॥ ❀ ❀ इदानीं धृतराष्ट्रमृतिकालं वक्तीत्याह स वा इति । स धृतराष्ट्रः अद्यतनादह्नः परतः पूर्वस्मिन्पंचमेऽहनि कलेवरं हास्यति जहौ तच्च भस्मीभविष्यति भस्मसादभूत् हशब्देन "सुप्तिङुपग्रहलिंगनराणामि"ति व्याकरणसूत्रमत्र प्रमाणीकरोति इतिहासं वा सूचयति । वा इत्यनेन "तांस्तदा नारदो विद्वाञ्छमयामास धर्मवित् । उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथे" ति स्कंदपुराणोक्तं वाक्यं सूचयति, चशब्द एवार्थे तत्कलेवरमेव भस्मीभविष्यति न तु सः स्वयं शून्यतामेष्यति चेतनस्य नित्यत्वात् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मानमहंकारास्पदं सूक्ष्मदेहं स्थूलदेहाद् वियोज्य क्षेत्रज्ञे देहद्वयाभिमान्यवस्थजीवे प्रविलाप्य तं च क्षेत्रज्ञं विज्ञानात्मनि शुद्धजीवस्वरूपे प्रविलाप्य तं च ब्रह्मणि संयोज्य घटाम्बरमिति चिद्रूपत्वेनैवाभेदांशे दृष्टान्त इति ज्ञेयम् ॥ ५४-५७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

विज्ञानेति । स्वदेहगतानि भूतानि क्रमेण कारणेषु प्रवेश्य आत्मानमहंकारे विज्ञानात्मनि महत्तत्त्वं संयोज्य संयुक्तं भावयित्वा तं च विज्ञानात्मानं क्षेत्रज्ञे जीवे प्रविलाप्य संयुक्तं विभाव्येत्यर्थः । तं च क्षेत्रज्ञं ब्रह्मणि संयोज्य आत्मानं स्वदेहस्थमन्तर्यामिणम् आधारे आश्रयतत्त्वे भगवत्यंशिनि संयुक्तं विभाव्य । नन्वन्तर्यामिभगवतोरैक्यमेव प्रसिद्धम् । सत्यम् । ऐक्येऽपि औपचारिको भेदो विवक्षित एवेति सदृष्टांतमाह घटाम्बरमिवाम्बर इति । उपाधिस्थमाकाशं निरुपाधावाकाशे इव । तयोश्च घटाकाशमहाकाशयोर्वस्तुतः सर्वव्यापकत्वादैक्यमेवेत्यर्थः । व्युत्थानाभावमाह ध्वस्तेति । अन्तर्गुणक्षोभाद्वा बहिरिन्द्रियविक्षेपाद्वा व्युत्थानं भवेत् । तदुभयं तस्य नास्ति । यतो ध्वस्तो मायाया गुणानामुदर्क उत्तरफलं वासना यस्य सः । अत एव निरुद्धेत्यादि ॥ ५४-५५ ॥ ❀ ❀ तथाभूतमप्यानेतुमुद्यतं प्रत्याह तस्येति । अन्तरायो विघ्नो मैवाभूः । अडागमश्छान्दसः । तद्दर्शनमपि तावत् कुर्यामित्युद्यतं प्रत्याह स वा इति । तर्हि तद्दाहार्थं गमिष्यामि नेत्याह तच्चेति ॥ ५६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जितमासनं येनेत्यासनोक्तिः जितः श्वासो येनेति प्राणायामोक्तिः प्रत्याहृतानि नियमितानि शब्दादिभ्यः श्रोत्रादीनीन्द्रियाणि येनेति प्रत्याहारकथनम् । हरिभावनयेति धारणा दर्शिता । ध्वस्ता रजआदयो मला यस्येति फलतो ध्यानं सूचितम् ॥ ५३ ॥ ❀ ❀ समाधिमाह विज्ञानात्मनीति । आत्मानं बुद्धींद्रियाद्यचेतनवर्गप्रकाशकं धर्मभूतं विज्ञानमचेतनवर्गाद्वियोज्य विज्ञानस्यात्मनि धर्मिणि क्षेत्रज्ञे संयोज्य तं क्षेत्रज्ञं देहादिभोक्तारमंशभूतं घटांबरमिव नित्यमात्मरूपं देहादेर्विलक्षणं निर्मलं संचिंत्य ब्रह्मणि अंशिनि नित्यं निर्मलेऽम्बरस्थानीये प्रविलाप्य सर्वदा निर्मलस्य ब्रह्मणोऽशभूतस्तद्वदेव निर्मलोऽस्मीति संचिंत्यास्ते इत्युत्तरेणान्वयः । न च घटाबरशुद्धांबरयोः स्वरूपैक्यवज्जीवब्रह्मणोरपि स्वरूपैक्यमिति वाच्यम्, जीवब्रह्मणोर्नैर्मल्ये जीवस्याल्पत्वे ब्रह्मणोऽनल्पत्वे च दृष्टांतसंभवात् अन्यथाऽबरवद्ब्रह्मणि जडत्वभौतिकत्वप्रसंगापत्तेश्च । वस्तुतस्तु घटांबरशुद्धांबरयोः पंचीकृतपदार्थत्वेन स्वरूपैक्यमपि नास्तीति विज्ञेयम् ॥ ५४ ॥ ❀ ❀ नित्यसमाधितोऽन्यसमाधेर्विशेषतामाह ध्वस्तो मायागुणानां रजआदीनामुदर्कः उत्तरोत्तरप्रसृतो वासनाप्रवाहो यस्येति गुणतो व्युत्थानाभाव उक्तः, निरुद्धकरणाशय इति बाह्याभ्यंतरेंद्रियनिमित्तकव्युत्थानाभाव उक्तः । अतो निवर्तिता अखिला अब्भक्षणादयोऽपि आहारा येन सः अतः स्थाणुरिवाचल आस्ते ॥ ५५ ॥ ❀ ❀ करुणावशात्तदानयनं मा कुर्वित्याशयेनाह तस्येति ॥ ५६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं यमनियमावुक्त्वा अष्टांगयोगं वक्तुमासनादिकमाह जितासन इति । आसनजयः प्राणायामजयः प्रत्याहारश्च क्रमेणोक्तः । षडिंद्रिय इति कर्मेंद्रियाणि नियम एव प्रत्याहृतानि । ध्यानमाह हरिभावनयेति । ध्यानधारणे एकीकृत्योक्ते, एकदेशसमुदायभेदेन तयोर्भेदात् गुणत्रयमलानि रागादीनि यस्य ॥ ५३ ॥ ❀ ❀ निर्विकल्पसमाध्यर्थमाह विज्ञानात्मनीति अंते । स एव कर्त्तव्यः । अत्र ह्युत्तरोत्तरं पंचात्मानः उत्क्रांतिगत्यागतिकर्ता जीवः प्रथमः दैह्यमानसभेदेन भिन्न एक एव स व्यष्ट्यात्मा, ततो महान्

ब्रह्मांडाभिमानः विज्ञानात्मा समष्टिः, तस्मात्परः प्रकृत्यधिष्ठाता पुरुषः, ततोऽपि महान् अक्षरात्मा ततः पुरुष इति। तत्र स्वात्मानं प्रथमं क्रमविलापनेन ब्रह्मपर्यंतं गत इत्याह स्वात्मानं विज्ञानात्मनि संयोज्य तं च क्षेत्रज्ञे अथवा विज्ञानात्मा महत्तत्त्वं चित्ताविर्भूतचैतन्यं तं क्षेत्रज्ञे पुरुषे तं ब्रह्मणि अक्षरे तस्यानात्मत्वे प्रलापनं व्यर्थमित्यत आह आत्मानमिति। ननु पुरुषाक्षरयोः स्वरूपे वैलक्षण्याभावात् किं प्रविलापनेनेत्यत आह घटांबरमिति। घटे भिन्ने यथा आकाशमाकाशं स्यात् अतः प्रकृत्यधिष्ठातृत्वं दूरीकृतमित्यर्थः ॥ ५४ ॥ ❀ ❀ तस्याक्षरधर्माविर्भावेन दोषनिवृत्तिमुपसंहरति ध्वस्तेति। मायागुणानामुदर्कः प्रकृतौ व्यामोहेन संबंधः नितरां रुद्धाः पुनरुद्गमनसामर्थ्यरहिताः इंद्रियांतःकरणानि करणाशया यस्य निवर्तिताखिलाहार इति प्राणवृत्तिनिवारणम्। एवं चतुर्णां देहेन्द्रियप्राणांतःकरणानां बीजभूतमायागुणसहितानां व्यापारे निवृत्ते अक्षररूपं प्राप्तस्यात्मनः स्वतो व्यापाराभावात्स्थाणुरिवासीदित्याह आस्त इति। बहिः स्थितवाय्वाद्यचालने दृष्टांतः "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमि"ति श्रुतेः तत्तुल्यो वा जात इत्यर्थः ॥ ५५ ॥ ❀ ❀ तर्ह्ययं बहुकालं स्थास्यतीति विचार्य समाधिविरतौ समानेय इत्याशंकायामाह तस्यांतराय इति। परपुरुषार्थे संनिहितस्य विघ्नरूपत्वं मा भूः त्वद्दर्शनादिना मोह उत्पन्ने सर्वनाशो भविष्यति। किंच त्वया गतेन विषयसंपादनं कर्त्तव्यं तच्च संन्यासिनो निषिद्धमित्याह-संन्यस्तानि अखिलानि कर्माणि येन अनेन कर्मार्थमपि विषयग्रहणं निवारितं तर्हि रक्षार्थं प्रयत्नः कर्तव्य इत्याशंक्याह स वा इति। प्रथमं बहुकालं स्थितिरेव नास्ति, विनियोगश्च स्वतः सिद्धः, अद्यतनात् पंचमेऽह्नि राजन्निति संबोधनाद्गमनसंभूतावपि तावान् कालो गमिष्यतीति सूचितं परत इति। अद्यदिनं परित्यज्य पंचदिनानि तत्र पंचमेऽहनि कलेवरं हास्यति ॥ ५६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

विज्ञानात्मनीत्यत्र। स एवेति निर्विकल्पसमाधिरेव। अत्रेति आत्मविचारे। देह्यमानसभेदेनेति देहाभिमानित्वमनोभिमानित्वभेदेन। ब्रह्माण्डाभिमानेति ब्रह्माण्डे अहमित्यभिमानो यस्य सः। प्रकृत्यधिष्ठातृत्वमित्यादि। तथा च चतुर्थे आत्मनि प्रविलीन इत्यर्थः ॥ ५४ ॥ ❀ ❀ स वा इत्यत्र। आग्नेय्याः धारणाया यजमानस्यावश्यकत्वायाहुः आधानेत्यादि। तथा च तस्य तदभिन्नत्वात्तेन साधारणा कार्यैवैत्यर्थः ॥ ५६ ॥

इति प्रथमस्कन्धे सुबोधिनीप्रकाशे त्रयोदशाध्यायविवरणम् ॥ १३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

जितं वशीकृतमासनं येन सः, चिरमासीनोऽपि क्लमरहित इत्यर्थः। जिताः श्वासाः प्राणादिवायवो येन स इति प्राणायाम उक्तः। प्रत्याहारमाह-प्रत्याहृतानि शब्दादिविषयेभ्यो व्यावर्त्तितानीन्द्रियाणि येन सः। धारणाध्यानं वैकीकृत्याह-हरिभावनया। ध्वस्ताः रजस्सत्त्वतमोरूपा मलाः यस्य सः। समाधिमाह-विज्ञानेति द्वाभ्याम्। आत्मानं अहङ्कारास्पदस्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं दृश्यांशाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं द्रष्टृंशाद्वियोज्य आधारे आश्रयसञ्ज्ञे ब्रह्मणि प्रविलाप्य स्थाणुरिव निश्चल आस्ते इति त्रयाणामन्वयः। देहाद्युपाधिकृत एवात्मपरमात्मनोर्भेदो न स्वत इति सूचयन् दृष्टान्तमाह-घटेति। यथा घटाम्बरं घटोपाधेर्वियोज्य महाकाशे प्रविलाप्यते तथाऽऽत्मानं देहाद्युपाधेर्वियोज्य ब्रह्मणि प्रविलापितवानित्यर्थः। कुत एवं तस्य निश्चलतेत्यपेक्षायां व्युत्थानकारणस्यान्तर्गुणक्षोभस्य बहिरिन्द्रियविक्षेपस्य चाभावादित्याशयेन तं विशिनष्टि-ध्वस्तेति, ध्वस्तो मायागुणानामुदर्कः उत्तरफलं वासना यस्य सः। निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य सः। अत एव निवर्त्तितोऽखिल आहार इन्द्रियैर्विषयाहरणं येन सः ॥ ५३-५५ ॥ ❀ ❀ तथाभूतमपि तं कथञ्चिदानेष्यामीति युधिष्ठिराभिप्रायमालक्ष्याह-तस्येति। सन्न्यस्तानि त्यक्तानि अखिलानि देहधारणार्थान्यपि कर्माणि येन तस्य धृतराष्ट्रस्यान्तरायो विघ्नभूतस्त्वं मैवाभूरिति। अडागमश्छान्दसः। एवमनुष्ठितसाधनस्य तस्य पुनर्गृहानयने पुरुषार्थहानिः स्यादिति भावः। तर्हि तस्य दर्शनार्थमेव गन्तव्यमित्यभिप्रायमालक्ष्याह-स इति। हे राजन् स धृतराष्ट्रोऽद्यतनाद्वर्तमानदिनादारभ्य परतः पञ्चमेऽहनि स्वं कलेवरं हास्यति वै निश्चयेन त्यक्ष्यति। राजत्वात्तव गमनसम्भूतावेव तावान् कालो गमिष्यतीति सम्बोधनेन सूचितम्। तर्हि तद्दाहार्थमेव गमिष्यामीत्याशङ्क्याह-तच्च कलेवरं योगाग्निनैव भस्मीभविष्यतीति ॥ ५६ ॥

हिन्दी अनुवाद

आसन जीतकर प्राणोंको वशमें करके उन्होंने अपनी छहों इन्द्रियोंको विषयोंसे लौटा लिया है। भगवान्‌की धारणासे उनके तमोगुण, रजोगुण और सत्त्वगुणके मल नष्ट हो चुके हैं ॥ ५३ ॥ ❀ ❀ उन्होंने अहङ्कारको बुद्धिके साथ जोड़कर और उसे क्षेत्रज्ञ आत्मामें लीन करके उसे भी महाकाशमें घटाकाशके समान सर्वाधिष्ठान ब्रह्ममें एक कर दिया है। उन्होंने अपनी समस्त इन्द्रियों और मनको रोककर समस्त विषयोंको बाहरसे ही लौटा दिया है और माया के गुणोंसे होनेवाले परिणामोंको सर्वथा मिटा दिया है। समस्त कर्मोंका संन्यास करके वे इस समय ठूँठकी तरह स्थिर होकर बैठे हुए हैं, अतः तुम उनके मार्गमें

विघ्नरूप मत बनना* ॥ ५४-५५ ॥ धर्मराज! आजसे पाँचवें दिन वे अपने शरीरका परित्याग कर देंगे और वह जलकर भस्म हो जायगा ॥ ५६ ॥

दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे। बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ ५७ ॥
विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन। हर्षशोकयुतस्तस्माद् गन्ता तीर्थनिषेवकः ॥ ५८ ॥
[1]इत्युक्त्वाथारुहत् स्वर्गं नारदः सहतुम्बुरुः। युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने त्र[2]योदशोऽध्यायः ॥ १३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तर्हि गांधार्यानयनाय गमिष्यामि नेत्याह पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सह गार्हपत्यादिभिर्दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमन्वग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५७ ॥ ❀ ❀ तर्हि विदुरानयनार्थं गंतव्यमेव नेत्याह। विदुरस्तु तन्निशाम्य दृष्ट्वा भ्रातुः सुगत्या हर्षस्तन्मृत्युना शोकश्च ताभ्यां युक्तस्तस्मात्स्थानात्तीर्थानि सेवितुं गंता गमिष्यति ॥ ५८ ॥ ❀ ❀ शुचः शोकान् ॥ ५९ ॥

इति श्रीमद्भा० महा० प्र० टी० त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पत्युर्धृतराष्ट्रस्य पत्नी गान्धारी। साध्वीशब्देन कुंती ग्राह्या। तस्य गार्हपत्याद्यग्नयोपि वनं दग्धुं दावानले प्रवृत्ते तत्रैव मिलिता इति महाभारतीयाश्रमवासपर्वणीत्युक्तमतो न विरोधः। तस्मादुत्तमगतिं प्राप्तांस्तान्प्रति परलोकमुद्दिश्य न शोचितव्यमिति भावः ॥ ५७ ॥ ❀ ❀ ऐश्यज्ञस्य विदुरस्य धृतराष्ट्रवनप्रवेशात्पूर्वतनाचरणप्रकारमाह–विदुर इति। सर्वज्ञो विदुरो दिव्यज्ञानेन भविष्यदाश्चर्यं धृतराष्ट्रपांडवयादवानां निर्याणं निशाम्य दृष्ट्वा हरिसामर्थ्यस्मरणेन बन्धुमरणस्मरणेन च हर्षशोकान्वितः सर्वमनित्यमीश एव नित्यस्ततस्तीर्थयात्रादितत्सेवैव पुरुषार्थप्रदेत्यतस्तीर्थनिषेवको गंता। गंगादितीर्थानां भागवतादिशास्त्राणां च सेवनाय ययौ। तुशब्दो गंतेति लुटो भूतार्थत्वभेदमाह। "तु स्याद्भेदेवधारणे" इत्यभिधानात्। स पुनर्धृतराष्ट्रपरिसरमागतोभूत्। धृतराष्ट्रादिदिदृक्षया वनं गतेषु भवत्सु भवंतं प्रविश्यैकत्वमागतो हि तस्मान्न तस्य गतिर्मया वर्णनीयेति भावः। यथाश्रुतार्थपरिग्रहे तु कल्पांतरीयव्यवस्थयैव व्यवस्था। सा चागतिकगतिरेव। ऋजुमार्गेण सिध्यतोर्थस्य वक्रेण दर्शनायोगादिदमेव व्याख्यानं कृतिजनानंदकरमिति ॥ ५८ ॥ ❀ ❀ इतीत्थम्। प्रायेण नारदतुंबुरुगंधर्वयोः सदैव संगतिरस्तीति द्योतनाय सतुंबुरुरिति वक्तव्ये सहतुंबरुरित्युक्तम् ॥ ५९ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवव्याख्या

तदा सहोटजे पर्णशालासहिते भर्तुर्देहेऽग्निभिर्दह्यमाने सति तस्य पत्नी साध्वी पतिव्रता गांधारी बहिःस्थिता तमग्निमनुवेक्ष्यत्यनुप्रवेक्ष्यति ॥ ५७ ॥ ❀ ❀ हे कुरुनंदन! ततस्तदाश्चर्यं निशाम्य दृष्ट्वा विदुरः हर्षशोकाभ्यां भ्रातुर्मुक्तिविश्लेषजाभ्यां युक्तः तस्माद्देशात्तीर्थनिषेवकः सेवितुमिच्छन् गंता गमिष्यति ॥ ५८ ॥ ❀ ❀ इतीत्थमुक्त्वा सहतुंबुरुर्भगवान्नारदः स्वर्गमारुरोह स्वर्गं प्रत्यूर्ध्वं जगामेत्यर्थः। युधिष्ठिरस्तु तस्य नारदस्य वचः हृदि कृत्वा निधाय शुचः शोकान् अजहात्तत्याज ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उटजेन पर्णशालया सह वर्तमानः सहोटजः तस्मिन् प्रवेक्ष्यति प्राविशत्। साध्वीशब्देन कुंती च सा चाग्निमाविशत् तस्मादुत्तरगतिप्राप्तान् प्रति परलोकमुद्दिश्य न शोचितव्यमिति भावः ॥ ५७ ॥ ❀ ❀ ऐश्यज्ञस्य विदुरस्य धृतराष्ट्रवनप्रवेशा-

---

* देवर्षि नारदजी त्रिकालदर्शी हैं। वे धृतराष्ट्रके भविष्य जीवनको वर्तमानकी भाँति प्रत्यक्ष देखते हुए उसी रूपमें वर्णन कर रहे हैं। धृतराष्ट्र पिछली रातको ही हस्तिनापुरसे गये हैं, अतः यह वर्णन भविष्यका ही समझना चाहिये। १. प्रा० पा०—इत्युक्त्वा चारुहत्। २. प्रा० पा०—प्राचीने पाठे अतः पूर्वं 'पारीक्षिते' इत्यधिकम्।

त्पूर्वतनाचरणप्रकारमाह विदुर इति । सर्वज्ञो विदुरो दिव्यज्ञानेन भविष्यदाश्चर्यं धृतराष्ट्रपांडवयादवानां स्वर्निर्याणं निशम्य हरिसामर्थ्यस्मरणेन च हर्षशोकान्वितः सर्वमनित्यमीश एव नित्यस्ततस्तीर्थयात्रादितत्सेवैव पुरुषार्थप्रदेत्यतः कारणात्तीर्थनिषेवणको गंता गङ्गादितीर्थानां भागवतादिशास्त्राणां च सेवमानो ययौ । तुशब्दो गंतेतिलुट् भूतार्थत्वभेदमाह "तुः स्याद्भेदेऽवधारणे" इत्यभिधानात्स च पुनर्धृतराष्ट्रपरिसरमागतोऽभवत् धृतराष्ट्रदिदृक्षया वनं गतेषु भवंतं प्रविश्य एकत्वमागतो हि तस्मान्न तस्य गतिर्मया वर्णनीयेति भावः । पुरा दिदृक्षार्थं वनमागतेषु पांडवेषु राजानं प्रविश्य एकत्वमागत इति स्कांदकथितार्थभेदे वा वर्तते तुशब्दः ॥ ५८ ॥ ❀ ❀ सतुंबुरुरिति वक्तव्ये सहतुंबुरुरिति नारदः सर्वदा तुंबुरुणा सहैव वर्तते न तं विहायेति द्योतनार्थः । कुंत्यादिविषयाः शुचः ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विदुर इति । हर्षोऽयं धृतराष्ट्रस्य सद्गतिप्राप्तेः हर्षप्राय एव ज्ञेयः । शोकस्तु मूलतो यः स एव ज्ञेयः ॥ ५८–५९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तर्हि गान्धार्यानयनाय गमिष्यामि नेत्याह । पत्युर्देहे सहोटजे पर्णशालासहिते अग्निभिः योगाग्निगार्हपत्यादिभिर्दह्यमाने तस्य पत्नी बहिःस्थिता पतिमनु अग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५७ ॥ ❀ ❀ तर्हि विदुरानयनार्थं गन्तव्यमेव नेत्याह । विदुरस्तु तन्निशाम्य दृष्ट्वा । तन्मुक्त्या हर्षः लोकव्यवहारेण शोकश्च । तस्मात् स्थानात् तीर्थानि निषेवितुं गन्ता गमिष्यति । अत्र भक्तापराधिनि धृतराष्ट्रे विदुरस्य तादृशकृपाभावान्मुक्तिरेवाभून्न तु प्रेमभक्तिरिति ज्ञेयम् ॥ ५८ ॥ ❀ ❀ इत्युक्त्वा समादधे अथारुहत् । शुचः शोकान् ॥ ५९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । त्रयोदशोऽपि प्रथमे सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अग्निभिः सहोटजे पर्णशालासहिते भर्तुर्देहे दह्यमाने बहिःस्थितापि साध्वी पतिव्रता पत्नी गांधारी पतिमन्वग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५७ ॥ ❀ ❀ सभार्यस्य भ्रातुः सुरहस्यतो देहत्यागदर्शनात् हर्षेण कारुण्याच्छोकेन च युतः ॥ ५८–५९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अहनीति शुक्लपक्षादिकमपि सूचितं कलेवरपरित्यागे हेतुः स्वमिति दग्धपटन्यायेन अभिमानशेषस्य विद्यमानत्वात् "भस्मांतमिदं शरीरमि"ति श्रुतेः तस्य प्रतिपत्तिमाह तच्चेति । ब्रह्मणि स्थितोऽपि प्रयत्नशेषेण प्राणदेहादिकं धृत्वा तिष्ठति तस्य त्यागसमये आग्नेयीं धारणां कृत्वा त्यक्तवान्, अतस्तद्भस्म जातमित्यर्थः । आधानप्रभृतियजमानोऽग्नयो भवंतीति श्रुतेः अंतःस्थिताग्निप्राकट्ये बहिस्थितैरपि संसर्गात् महत्यग्नौ संजाते पर्णशालायामपि दग्धायां पातिव्रत्यधर्मेण "प्रविशेद्वा हुताशनमि"ति बहिः स्थितापि पत्नी अग्न्युपयाता भावाय साध्वी तमेव वाग्निमनुप्रवेशं करिष्यतीत्यर्थः ॥ ५७ ॥ ❀ ❀ एवं दंपत्योर्विनियोगमुक्त्वा तद्धेतुभूतविदुरविनियोगमाह विदुरस्त्विति । तुशब्देन तयोरवस्थां तस्य निवारयति । ननु सहागतानां मध्ये द्वयोरेव सा गतिर्न तृतीयस्येत्यत आह तदाश्चर्यमिति । पूर्वं तु तत्क्रियायामेव आसक्तं चित्तमासीत् किं भविष्यतीति, निष्पन्ने तु कार्ये तदाश्चर्यत्वेन स्फुरितं न कर्तव्यत्वेन न ह्यद्भुतं सर्वस्य संभवतीति तर्हि किं कृतवानित्यत आह गंतेति । कुरुनंदनेति संबोधनं तवैतन्न कर्तव्यमिति सूचयति सर्वाह्लादकरत्वात् पारलौकिकैहिकविचारणे हर्षशोकयुतस्तस्माद्देहपातनपर्यंतं परिभ्रमेदिति विध्यनुसारेण प्रवृत्तत्वात् मध्ये प्रासंगिकं समाप्य प्रक्रांतमेव कृतवानित्याह तीर्थनिषेवक इति ॥ ५८ ॥ ❀ ❀ एतावता राज्ञः शोको निवृत्त इति नारदगमने पूर्वोक्तस्य समाप्तिमाह इतीति । अथेति भिन्नप्रक्रमेण पूजितः संतुष्टहृदयः अतः परं भूमौ तस्य कार्यं नास्तीति ज्ञापयति आरुहत्स्वर्गमिति तुंबुरुणा कथांतरसूचनमाशंक्य सहतुंबुरुरिति उपाख्यानफलमाह युधिष्ठिर इति । शुचः शोकान् वाक्यस्य शोकबाधकत्वाद्वाक्ये स्थिते शोकानि गतानीत्यर्थः ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे सुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां प्रथमस्कंधविवरणे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तर्हि गान्धार्यानयनार्थं गमिष्यामीत्याशङ्क्याह-दह्यमान इति । सहोटजे पर्णशालासहिते भर्तुर्देहे अग्निभिर्योगाग्निना सह गार्हपत्यादिभिर्दह्यमाने सति तस्य पत्नी गान्धारी बहिःस्थिता सती तं पतिमनु अग्निं वेक्ष्यति प्रवेक्ष्यति । यतः साध्वी पतिव्रता ॥ ५७ ॥ ❀ ❀ तुशब्देन विदुरस्य देहत्यागाभावं सूचयति । हे कुरुनन्दनेति सम्बोधनेन तव कुलोचितैव गतिस्तस्य भविष्यति । तत्र विघ्नाचरणं तव नोचितमिति सूचयति । तत् सदा दुराचारनिष्ठस्य भगवद्विमुखस्यापि धृतराष्ट्रस्य विमुक्तिरूपमाश्चर्यं निशाम्य दृष्ट्वा भ्रातुर्विमुक्त्या हर्षस्तद्वियोगेन शोकश्च ताभ्यां युतस्तीर्थनिषेवकः तीर्थानि सेवितुं विदुरस्तस्मात्स्थानाद्गन्ता गमिष्यतीत्यन्वयः ॥ ५८ ॥ ❀ ❀ इत्येवमुक्त्वाऽथानन्तरं तुम्बुरुणा सह नारदः स्वर्गमारुहत् । युधिष्ठिरस्तु तस्य वचो हृदि कृत्वा निधाय शुचः शोकानजहात् तत्याज ॥ ५९ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ त्रयोदशो गतो वृत्तिं धृतराष्ट्रविमुक्तिकः ॥ ३ ॥

हिन्दी अनुवाद

गार्हपत्यादि अग्नियोंके द्वारा पर्णकुटीके साथ अपने पतिके मृतदेहको जलते देखकर बाहर खड़ी हुई साध्वी गान्धारी भी पतिका अनुगमन करती हुई उसी आगमें प्रवेश कर जायँगी ॥ ५७ ॥ ❀ ❀ धर्मराज ! विदुरजी अपने भाईका आश्चर्यमय मोक्ष देखकर हर्षित और वियोग देखकर दुःखित होते हुए वहाँसे तीर्थ-सेवनके लिये चले जायँगे ॥ ५८ ॥ ❀ ❀ देवर्षि नारद यों कहकर तुम्बुरुके साथ स्वर्गको चले गये । धर्मराज युधिष्ठिरने उनके उपदेशोंको हृदयमें धारण करके शोकको त्याग दिया ॥ ५९ ॥

तेरहवाँ अध्याय समाप्त

अथ चतुर्दशोऽध्यायः

सूत उवाच

सम्प्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ १ ॥
व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः। ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥ २ ॥
कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः। पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ॥ ३ ॥
जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम्। पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः। अशृणोदर्जुनात्कृष्णतिरोधानमितीर्यते ॥ १ ॥

श्रीकृष्णस्य चेति चकारेणाभिप्रायं च ज्ञातुम् ॥ १ ॥ ❋ ❋ कतिचित्सप्त। तदा कालातिक्रमेऽपि ततो द्वारकातो नायान्नागतः। निमित्तान्युत्पातान्। कुरूद्वहो युधिष्ठिरः ॥ २ ॥ ❋ ❋ रौद्रां घोराम्। तदेवाह। विपर्यस्ता ऋतुधर्मा यस्मिंस्तस्य वार्तां जीविकाम्। क्रोधलोभानृतैर्युक्त आत्मा येषाम् ॥ ३ ॥ ❋ ❋ जिह्मप्रायं कपटबहुलम्। व्यवहृतं व्यवहारं शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यम्। पित्रादीनां स्वप्रतियोगिभिः कल्कनं कलहादि ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अरिष्टानि दुर्निमित्तानि। तिरोधानमंतर्द्धानम् (१) संप्रस्थिते इति। अश्वमेधार्थे श्रीकृष्णस्य पुनरागमनं गमनानंतरं ज्ञेयम् ॥ १ ॥ ❋ ❋ अत्र तीर्थेन मासशब्देन दिनं गृहीतं तत्र च "अहस्तु मासशब्दोक्तं यत्र चिन्तायुतं व्रजेत्" इति प्रमाणञ्च न्यस्तम् ॥ २ ॥ ❋ ❋ पापीयसीं पाप- भूयिष्ठाम् ॥ ३ ॥ ❋ ❋ व्यवहारं हानोपादानादिरूपम् ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अशृणोत् अनुमितवानित्यर्थः, धातूनामनेकार्थत्वात्। अनुमानं तु चरमश्लोके द्रष्टव्यम् ॥ १-९ ॥

श्रीमद्वीरराघवव्याख्या

संप्रस्थित इति। बंधूनां यदूनां दिदृक्षया पुण्यश्लोकस्य पुण्ययशसः श्रीकृष्णस्य विचेष्टितं ज्ञातुं च जिष्णावर्जुने द्वारकायां संप्रस्थिते प्रस्थानपूर्वकं द्वारकायां प्रविष्टे सति द्वारकायां बंधूनां दिदृक्षयेति वान्वयः ॥ १ ॥ ❋ ❋ कतिचिन्मासा व्यतिक्रांता बभूवुः, तथापि ततो द्वारकातोऽर्जुनो नागच्छत्तदा कुरुद्वहो युधिष्ठिरः घोररूपाणि निमित्तान्यरिष्टानि ददर्श ॥ २ ॥ ❋ ❋ विपरीता ऋतूनां वसंतादीनां धर्मा यस्य तस्य रौद्रां घोरां गतिं च द्वितीयांतानां पूर्वेण दृष्ट्वेत्युत्तरेणान्वयः, क्रोधादिप्रवण आत्मा मनो येषां नृणां पापीयसीं वार्त्तां जीवनार्थप्रवृत्तिम् ॥ ३ ॥ ❋ ❋ जिह्मप्रायं कौटिल्यप्रचुरं व्यवहृतं व्यवहारं शाठ्यमिश्रं मौर्ख्ययुक्तं सौहृदं च पित्रादीनां परस्परं कल्कनं रागादिदोषं च ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दुर्निमित्तादिसंसारयात्राप्रतिपादनात्तस्यानित्यत्वज्ञापनेन हरौ परा भक्तिर्जायत इत्यर्थो निरूप्यतेऽस्मिन्नध्याये। तत्रावशेषं प्रतीक्षत इत्युक्तयदुकुलसंहारकथनपूर्वकं श्रीकृष्णस्य स्वधामप्राप्तिं वक्तुमुपक्रमते संप्रस्थित इति। नारदोक्तपरामर्शेन वीतशोकतया

---

१. प्रा० पा०—ज्ञातुं मायामनुष्यस्य वासुदेवस्य चेष्टितम्। २. प्रा० पा०—पाण्डुसुतो नृपः। ३. प्रा० पा०—भृगूद्वह। ४. प्रा० पा०—धर्मणः।

राज्यं पालयन्नृपः स्वानुमतेन जिष्णावर्जुने द्वारकायां स्थितानां बंधूनां दर्शनेच्छया माययेच्छया गृहीतमनुष्यवेषस्य वासुदेवस्य ईहितं चेष्टितं च ज्ञातुं द्वारकां प्रति संप्रस्थिते गते ॥ १ ॥ ❀ ❀ यदा कतिचिन्मासाः दिवसाः व्यतीताः अतिक्रांताः तदा शतशः सहस्राणि घोररूपाणि भयंकराणि निमित्तान्याध्यात्मिकाधिभौतिकाधिदैविकानुत्पातान् ददर्शेत्यन्वयः । "अहस्तु मासशब्दोक्तं यत्र चिंतायुतं व्रजेदि"त्यभिधानं तुशब्देन गृहीतम् ॥ २ ॥ ❀ ❀ उत्पातं दृष्ट्वा किं चकार नृप इति तत्राह कालस्येति । कालगत्यादिकं दृष्ट्वा नृपोऽनुजं भीमसेनमित्यभाषतेत्यन्वयः । विपर्यस्ताः वसंतादीनामृतूनां धर्माः पुष्पोद्गमाः अस्य संतीति विपर्यस्तर्तुधर्मस्य कालस्य रौद्रामिति पाठात् गतेरपरिहार्यत्वं वक्ति क्रोधादिष्वात्मा मनो येषां ते तथोक्ताः तेषां नृणां वार्त्तां श्रुत्वा जीवनोपायं प्रवृत्तिं पापीयसीं पापभूयिष्ठां दृष्ट्वा ॥ ३ ॥ ❀ ❀ व्यवहृतं दानोपादानादिव्यवहारं जिह्मप्रायं कापट्यप्रचुरं सौहृदं स्नेहं शाठ्यमिश्रं स्वप्रयोजनोपेतं पित्रादीनां कलिकतां कलंकतां कलहं वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

संप्रस्थिते इति । अश्वमेधार्थं श्रीकृष्णस्य पुनरागमनानन्तरमिति ज्ञेयम् ॥ १ ॥ ❀ ❀ ददर्शेति । विदुरागमनात् पूर्व्वं परञ्च वृत्तमिदं ज्ञेयम् ॥ २-७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

चतुर्दशे नृपोऽपश्यदरिष्टानि बहूनि यत् । विवेद तत्फलं दृष्ट्वैवार्ज्जुनं खिन्नमागतम् ॥

कृष्णस्य चेति चकारेणाभिप्रायञ्च ज्ञातुम् ॥ १ ॥ ❀ ❀ कतिचित् सप्त । निमित्तानि दुःखकारणानि ॥ २ ॥ ❀ ❀ विपर्य्यस्ता ऋतुधर्म्मा यस्मिन् तस्य । वार्त्तां जीविकाम् । पापीयसीमतिपापवतीम् ॥ ३ ॥ ❀ ❀ कल्कनं कलहादि ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्वारकायां बंधूनां वसुदेवादीनां दिदृक्षया पुण्यकीर्त्तेः कृष्णस्य च विचेष्टितं ज्ञातुं जिष्णावर्ज्जुने प्रस्थिते ॥ १ ॥ ❀ ❀ कतिचिन्मासाः व्यतीताः व्यतिक्रांतास्तदपि कतिचिन्मासेषु व्यतिक्रांतेष्वपि ततो द्वारकातोऽर्ज्जुनो नायात्नागच्छत् तदानीं कुरूद्वहो युधिष्ठिरः घोररूपाणि अप्रियकराणि निमित्तानि ददर्श ॥ २ ॥ ❀ ❀ विपर्य्यस्ताः विपरीताः ऋतुधर्मा यस्मिन् तस्य रौद्रां गतिं दृष्ट्वानुजमुवाचेत्यग्रिमेणान्वयः । क्रोधादिभिर्युक्त आत्मा मनो येषां तेषां वार्त्तां वृत्तिम् ॥ ३ ॥ ❀ ❀ जिह्मप्रायं कपटबहुलम् । व्यवहृतं व्यवहारम् । शाठ्यमिश्रं मौढ्यमिश्रम् । पित्रादीनां कल्कनानर्हाणां कल्कनं कलहादि ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या ।

एवं तां धृतराष्ट्रस्य मुक्तिमुक्त्वा त्रयोदशे । पांडवानामतो द्वाभ्यां हेतुपूर्वमुदीर्यते ॥ १ ॥
तेषां निष्ठो ब्रह्मभावः सायुज्यं परमीप्सितम् । तत्तस्माद्भूतले कृष्णे सखिभावेन बंधनात् ॥ २ ॥
अतश्चतुर्दशे हेतुं भगवद्गमनं महत् । यो वदेत्तस्य संदर्शः प्रश्नश्च विनिरूप्यते ॥ ३ ॥
संभावनायां हेतुत्वनिश्चये किमुतेति च । भगवद्गमनं तस्मादुभयत्रोच्यते द्विधा ॥ ४ ॥

एवं पूर्वाध्याये तावद्यूयमवेक्षध्वमिति वाक्याद्भगवन्निर्याणस्यावश्यकत्वं श्रुत्वा धृतराष्ट्रगमनकृतक्लेशं परिहृत्य स्वगमनहेतुभूतं भगवद्गमनं प्रति चिंताकुलितः पर्यालोचनं करोतीति वक्तुं तस्य पीठिकामाह संप्रस्थित इति । शापात् पूर्वं भगवान् किं करोतीति ज्ञानार्थमर्जुनः प्रेषितस्तस्मिन्नपि गते बहवो मासा जाता इति । विलंबे कारणाभावाच्चिंतानिमित्तदर्शनाच्च तत्राद्यं द्वाभ्यामाह गमनागमस्य निरूपणात् द्वारकायां गतस्य न कापि चिंता तत्रापि सम्यगागतस्य स्वसुगृहे समाह्वानात् तत्रापि स्वयं जिष्णुर्जयशीलस्तत्रापि बंधूनां दर्शनार्थे न कलहाद्यर्थे ॥ १ ॥ ❀ ❀ तत्रापि सर्वानिष्टनिवारकस्य कृष्णस्य विशेषचरित्रं चेष्टितं ज्ञातुं कतिचित्सप्त मासाः । स नायात् पाण्डुसुतः दीर्घसदृशविचारावश्यकत्वाय च नृप आगमने अपशकुनानि दृष्टवान् घोराणि रूपाणि येषां फलतो भयजनकत्वं दूरे, तेषामेव दर्शने भयं भवतीत्यर्थः । न च तावन्मात्रत्वं तानि पुनर्निमित्तानि अदृष्टसूचकानि शकुनशास्त्रे तथा प्रतिपादनात् स्वतोऽपि ज्ञानं संभवति महापुरुषवंशोत्पन्नत्वादित्याह कुरूद्वह इति ॥ २ ॥ ❀ ❀ ज्योतिःशास्त्रात् कालगतिश्च क्रूरा जाता कलेर्दुष्टस्य प्रवेशात् किंच विपर्यस्ता ऋतुधर्मा यत्र अनेनापि कालगतिर्दुष्टेति ज्ञातम् । अनापद्यपि प्राणिनां जीविका पापीयसी साधुजुगुप्सिता कर्तृधर्मेषु क्रोधलोभावेव प्रकटौ यत्किंचित्क्रियते तत्राधिकारिविशेषणमेतद्द्वयं ताभ्यामावृत आत्मा येषाम् ॥ ३ ॥ ❀ ❀ कालस्य कालस्थानां च दोषा उक्ताः, व्यवहारे बुद्धिदोषमाह–बुद्धिर्द्विधा हि समीचीना व्यवसायात्मिका सर्वप्राणिषु सौहार्दजनिका च । तत्रोभयत्रापि कौटिल्यं चंचलता च प्रविष्टा, बुद्धिर्हि बहिः चेष्टाभिरनुमीयते, सा कुटिलस्य न

शक्या वंचकस्य च सौहार्दं तस्मादेतद् द्वयं लोके भीतमित्यर्थः । लौकिकधर्मे दोषमाह पित्रादिभिः कलहः येषु सहजः स्नेहः धर्म्यः तैः सह कलहः पित्रादीनां संबंधिभिः सह कलहः दंपतीनां परस्परम् ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ चतुर्दशाध्यायं विवरिषवोऽवसररूपसङ्गतिबोधनाय पूर्वाध्यायार्थमनुवदन्तः प्रस्तुताग्रिमयोरर्थमाहुः एवं हीत्यादि । अत इति । एतदनन्तरम् । ननु द्वाभ्यां हेतुपूर्वं कथनस्य किं प्रयोजनमत आहुः तेषामित्यादिद्वयम् । महदिति । भूमित्यागरूपम् । तथा च तद्धेतुत्वेनात्र तत्कथनमित्यर्थः । ननु तथापि तत्तु द्वितीये वाच्यम्, तथात्वस्य कथं हेतुबोधकत्वमित्यत आहुः सम्भावनाया-मित्यादि । इति चेति । एवं प्रकारेण तत्र हेत्वन्तराणि समुच्चेतुं विनिरूप्यत इति पूर्वेण संबन्धः । एतदेव निगमयन्ति भगवद्ग-मनं तस्मादित्यादि । सम्प्रस्थित इत्यत्र । यदा नायादिति । व्यतीता इत्यस्यार्थः ॥ १ ॥ ❀ ❀ जिह्मप्रायमित्यत्र । न शक्येति । नानुमातुं शक्या । सौहार्दमिति । नानुमातुं शक्यमिति शेषः । तस्मा इति युधिष्ठिरार्थम् । तत्कृतार्थत्वार्थं तस्यैतद् द्वयं भातमित्यर्थः ॥ ४ ॥

पञ्चमश्लोकतः श्लोक ३३ पर्यन्तं सुबोधिनीप्रकाशो न

श्रीगिरिधरकृता बालप्रबोधिनी

चतुर्दशे त्वरिष्टानि दृष्ट्वा भीमेन संवदन् । अर्जुनं शोकसन्तप्तं पप्रच्छेति निरूप्यते ॥ १ ॥

ततो युधिष्ठिरः किं कृतवानित्यपेक्षायां 'तावद्यूयमवेक्षध्वम्' इति नारदवचनेन भगवन्निर्याणस्यावश्यकत्वनिश्चयाद्धृत-राष्ट्रनिर्गमनक्लेशं परित्यज्य स्वगमनहेतुभूतं भगवद्गमनं प्रतीक्षमाणस्तच्च् छ्रुत्वा स्वयमपि गमनं कृतवानिति वक्तुं तत्पीठिकामाह-सम्प्रस्थिते इति । द्वारकायां बन्धूनां दिदृक्षया पुण्यश्लोकस्य पापनिवारकपुण्यजनकयशसः श्रीकृष्णस्य विचेष्टितं-चकारादभिप्रायं च ज्ञातुं जिष्णौ जयशीलेऽर्जुने सम्प्रस्थिते हस्तिनापुरतो गमने कृते सति ॥ १ ॥ ❀ ❀ कतिचित् सप्त मासा व्यतीताः । ततो द्वारकायाः सकाशात् अर्जुनो न आयात् तदा घोररूपाणि दुःखसूचकतया भयङ्कराणि निमित्तानि उत्पातान् कुरुद्वहः कुरुकुलनिर्वा-हको युधिष्ठिरो ददर्शेति द्वयोरन्वयः ॥ २ ॥ ❀ ❀ विपर्यस्ता विपरीता ऋतूनां वसन्तादीनां धर्माः फलपुष्पादयः शीतोष्णा-दयश्च यस्य तस्य कालस्य रौद्रामनिष्टसूचकत्वेन भयङ्करां गतिं रीतिं च ददर्शेति द्वितीयान्तानां सर्वत्र पूर्वेणैवान्वयः । नृणां वार्ता जीविकां पापीयसीं हिंसाबहुलाम् । तत्र हेतुमाह-क्रोधादियुक्त आत्मा मनो येषां तेषामिति ॥ ३ ॥ ❀ ❀ जिह्मप्रायं कौटिल्य-प्रचुरं व्यवहारम् । शाठ्यमिश्रं च सौहृदं मैत्र्यम् । पित्रादीनां च परस्परं कलकनं कलहम् । तत्र पितुः पुत्रेण सह, मातुश्च पुत्रेण सह, सुहृदोः मित्रयोः, भ्रात्रोर्दम्पत्योश्च परस्परं कलह इति बोध्यम् ॥ ४ ॥

हिन्दी अनुवाद

अपशकुन देखकर महाराज युधिष्ठिरका शंका करना और अर्जुनका द्वारकासे लौटना

सूतजी कहते हैं—स्वजनोंसे मिलने और पुण्यश्लोक भगवान् श्रीकृष्ण अब क्या करना चाहते हैं-यह जाननेके लिये अर्जुन द्वारका गये हुए थे ॥ १ ॥ ❀ ❀ कई महीने बीत जानेपर भी अर्जुन वहाँसे लौटकर नहीं आये । धर्मराज युधिष्ठिर को बड़े भयङ्कर अपशकुन दीखने लगे ॥ २ ॥ ❀ ❀ उन्होंने देखा कालकी गति बड़ी विकट हो गयी है । जिस समय जो ऋतु होनी चाहिये उस समय वह नहीं होती और उनकी क्रियाएँ भी उल्टी ही होती हैं । लोग बड़े क्रोधी, लोभी और असत्य-परायण हो गये हैं । अपने जीवन-निर्वाहके लिये लोग पापपूर्ण व्यापार करने लगे हैं ॥ ३ ॥ ❀ ❀ सारा व्यवहार कपटसे भरा हुआ होता है, यहाँतक कि मित्रतामें भी छल मिला रहता है । पिता, माता, सगे-सम्बन्धी भाई और पति-पत्नीमें भी झगड़ा-टंटा रहने लगा है ॥ ४ ॥

निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम् । लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥ ५ ॥

युधिष्ठिर उवाच

सम्प्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया । ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ ६ ॥

गताः सप्ताधुना मासा भीमसेन तवानुजः । नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ॥ ७ ॥

अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः । यदाऽऽत्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्यरिष्टान्यत्यंतमशुभानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमम् ॥ ५-६ ॥ ❀ ❀ वेति वितर्के । कस्माद्धेतोर्नायातीत्यहं न वेद्मि ॥ ७ ॥ ❀ ❀ अपि किं यदा आत्मन आक्रीडं क्रीडासाधनमंगं मनुष्यनाट्यम् उत्स्रष्टुमिच्छति स कालः प्राप्तः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"अरिष्टं पापाशुभयोः" इत्यभिधानात् ॥ ५-६ ॥ ❀ ❀ भीमसेनेति । तदा राज्ञा तन्नामोच्चारणेन प्रीत्यतिशयो द्योतितः ॥ ७ ॥ ❀ ❀ यदात्मनोंऽगमिति । युधिष्ठिरस्य बंधुशोकानुरूपैवोक्तिर्न तु सिद्धांतस्पर्शिनी । सरस्वती तु तन्मुखे समुचितमेवाह "नारायणोंऽगं नरभूजलायनात्" इति ब्रह्मोक्तेः । यदात्मनोंऽगमंशरूपं नारायणमुत्सिसृक्षति ऊर्ध्वं वैकुंठं प्रति सिसृक्षति प्रस्थापयितुमिच्छति । कीदृशमंगम् । आ ईषदेव क्रीडा यस्मिंस्तदिति । विश्वनाथः । अंगं स्वधामगमनेन विराड्रूपं त्यक्ष्यतीति संदर्भः । आत्मनः स्वस्याक्रीडं क्रीडास्थानमंगं पृथिवीम् । "यस्य पृथिवी शरीरम्" इति श्रुतेरिति तीर्थः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

कन्यां विक्रीणातीति तथा तातं पितरं पित्रोरपोषकं सुतं च वेदेभ्यो विमुखान् ब्राह्मणान् ब्रह्मवादिनो वेदपाठकान् शूद्रांश्च ॥ ५ ॥ तथात्यरिष्टानि निमित्तानि दुःखसूचकानि काले स्वनुगते निमित्तभूतविपरीतकालानुसारिणीत्यर्थः । नृणां लोभाद्य-धर्मस्वभावं च दृष्ट्वा लोभादीत्यादिशब्देन क्रोधादिसंग्रहः, नृपो युधिष्ठिरः अनुजं भीमं प्रोवाच ॥ ५ ॥ ❀ ❀ तदेवाह सम्प्रेषित-इति षोडशभिः । द्वारकायां ये बाधास्तेषां दिदृक्षया कृष्णस्य विचेष्टितं ज्ञातुं च जिष्णुः संप्रेषितः प्रस्थापितः ॥ ६ ॥ ❀ ❀ हे भीमसेन ! सप्तमासाः ऽव्यतिक्रान्ताः अधुनापि कस्माद्धेतोस्तवानुजोऽर्जुनो नायाति इदमनागमननिमित्तमंजसा न वेद । अंजसेत्यव्ययं तत्त्वशीघ्रार्थयोर्वर्त्तते ॥ ७ ॥ ❀ ❀ अपीत्यपिशब्दः सम्भावनाद्योतकः देवर्षिणा नारदेनादिष्टः सूचितः स कालोऽधुनाऽनु-पस्थितोऽप्युपस्थितः स्यात्किमित्यर्थः, कोऽसौ यस्मिन्काले भगवान्कृष्ण आत्मनः स्वस्याक्रीडं क्रीडांगमुत्सिसृक्षति त्यक्तुमिच्छति स कालः आक्रीडं क्रीडार्थं मनुष्यसंस्थानभागं शुद्धसत्त्वमयमप्राकृतं शरीरमुत्सिसृक्षति भूमेर्विश्लेषयितुमिच्छतीत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अरिष्टानि अशुभानि "अरिष्टं पापशुभयोररिष्टमशुभेऽपि च" त्यभिधानमपिशब्देनाग्राहि पूर्वकालवैलक्षण्यद्योतकस्तुशब्दः, लोभादिना अधर्मस्वभावम् ॥ ५-६ ॥ ❀ ❀ अत्रापि मासाः दिवसाः अहमंजसेदं कारणं न वेद त्वमिदं वेत्थ किमिति वाक्यशेषः ॥ ७ ॥ ❀ ❀ आत्मनः स्वस्याक्रीडं क्रीडास्थानमंगं निजां भूमिं "यस्य पृथिवी शरीरमि" त्यादेः यद्यदा देवर्षिणा नारदेन 'यूयं तावदवेक्षध्वमि'ति निर्दिष्टः स कालः प्रत्युपस्थितः आसन्नः अपि किम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अपीति । अङ्गं स्वधामगमनेन विराड्रूपं त्यक्ष्यतीत्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्व्वत्र हेतुः अनुगते काले स्वसमये अनुप्राप्ते सति लोभाद्यधर्म्मरूपां प्रकृतिं स्वभावम् । अनुजं भीमम् ॥५-७॥ ❀ ❀ यदात्मनोऽङ्गमिति युधिष्ठिरस्य बन्धुशोकानुरूपैवोक्तिर्न्न तु सिद्धान्तस्पर्शिनी । सरस्वती तु तन्मुखे समुचितमेवाह यदात्मनोऽङ्गम् अंशरूपं नारायणम् उत्सिसृक्षति ऊर्ध्वं वैकुण्ठं प्रति सिसृक्षति प्रस्थापयितुमिच्छति । कीदृशमङ्गम् आ ईषदेव क्रीडा यस्मिंस्तम् ॥८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तातं पितरं कन्याविक्रयिणम् ॥ ५ ॥ ❀ ❀ अनुजं भीमम् ॥ ६ ॥ ❀ ❀ न वेद न वेद्मि ॥ ७ ॥ ❀ ❀ यद्यस्मिन् भगवान् अंगं स्नेहास्पदमंगं तातादिपदवाच्यमस्मदादिजनम् आक्रीडम् क्रीडास्थानं लोकं च उत्सिसृक्षति स देवर्षिणा-दिष्टः 'निष्पादितं देवकृत्यमवशेषं प्रतीक्षते' इत्यादिना सूचितः कालः समुपस्थितः संप्राप्तोऽपि किम् ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवमेतानि निमित्तानि अन्यानि च अत्यनिष्टसूचकानि समूलानि चेत्याह काले त्वनुगत इति । दोषेषु कालः सानुकूलः किंच नृणां प्राणिनां सर्वेषां पूर्वयुगेषु ब्राह्मणादीनां ज्ञानादय इव लोभाद्यधर्माः स्वाभाविका जाताः प्रकृतित्वे च विगानमपि नास्तीति भावः । अनुजो भीमः ॥ ५ ॥ ❀ ❀ आसन्यस्त्वपहतपाप्मा अतः कालादिदोषसंभ्रमाभावात् तेन सह विचारो युक्त इति भीमेन सह विचारयति संप्रेषित इति । चकारादभिप्रायं द्वितीयचकारादन्येषामपि कालादीनाम् ॥ ६ ॥ ❀ ❀ तस्य स्वतोऽनिष्टं नास्तीत्याह भीमसेनेति । भीमा सेना यस्य अनु पश्चाज्जातत्वात् सोऽपि तादृशः जिज्ञासितसंदेहेऽपि आगमनाभावे हेत्वभावात् कुतो नायातीत्याह ॥ ७ ॥ ❀ ❀ शुद्धांतःकरणत्वात् स्वस्यैव निमित्तं स्फुरितं संभावनायामाह-अपीति । आसमंतात् क्रीडासाधनमाक्रीडासाधनं वा, अन्यथा एवं न भवेदिति भावः ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमुक्तान्यनुक्तानि च दुःखनिमित्तानि अत्यरिष्टानि प्रबलोत्पातरूपाणि तथा नृणां लोभाद्यधर्मेषु प्रकृतिं स्वभावं च दृष्ट्वा नृपो युधिष्ठिरोऽनुजं भीममुवाचेत्यन्वयः । आदिपदेन क्रोधादिसङ्ग्रहः । एवं सर्वविपर्यये हेतुमाह–काले त्वनुगत इति, काले सर्वदोषानुकूले सतीत्यर्थः ।। ५ ।। ❀ ❀ युधिष्ठिरवाक्यान्येव दर्शयति–षोडशभिः । द्वारकायां ये बान्धवास्तेषां दिदृक्षया पुण्यश्लोकस्य कृष्णस्य विचेष्टितं ज्ञातुं च जिष्णुः अर्जुनः सम्प्रेषितः प्रस्थापितः ।। ६ ।। ❀ ❀ तस्य सप्त मासा गता अतिक्रान्ताः । हे भीमसेन अधुनाऽपि कालातिक्रमेऽपि तवानुजोऽर्जुनः कस्य वा हेतोः कस्मात्कारणान्नाऽऽयाति तदिदं अनागमनकारणं अहमञ्जसा तत्त्वेन न वेद न वेद्मीति द्वयोरन्वयः ।। ७ ।। ❀ ❀ अपीति सम्भावनायाम् । देवर्षिणा नारदेनादिष्टः 'तावद्यूयमवेक्षध्वं' इति य उक्तः स कालोऽयमेवोपस्थितः प्राप्तः किम् ? । स क इत्यपेक्षायामाह–यदिति । यत् यस्मिन् काले भगवान् श्रीकृष्ण आत्मनः स्वस्य आक्रीडं क्रीडासाधनमङ्गं मनुष्यनाट्यरूपं देहमुत्सिसृक्षति अन्तर्हितं कर्तुमिच्छति ।। ८ ।।

हिन्दी अनुवाद

कलिकालके आ जानेसे लोगोंका स्वभाव ही लोभ, दम्भ आदि अधर्मसे अभिभूत हो गया है और प्रकृतिमें भी अत्यन्त अरिष्टसूचक अपशकुन होने लगे हैं, यह सब देखकर युधिष्ठिरने अपने छोटे भाई भीमसेनसे कहा ।। ५ ।। ❀ ❀ युधिष्ठिरने कहा–भीमसेन ! अर्जुनको हमने द्वारका इसलिये भेजा था कि वहाँ जाकर, पुण्यश्लोक भगवान् श्रीकृष्ण क्या कर रहे हैं—इसका पता लगा आये और सम्बन्धियोंसे मिल भी आये ।। ६ ।। ❀ ❀ तबसे सात महीने बीत गये, किन्तु तुम्हारे छोटे भाई अब तक नहीं लौट रहे हैं । मैं ठीक-ठीक यह नहीं समझ पाता हूँ कि उनके न आनेका क्या कारण है ? ।। ७ ।। ❀ ❀ कहीं देवर्षि नारदके द्वारा बतलाया हुआ वह समय तो नहीं आ पहुँचा है, जिसमें भगवान् श्रीकृष्ण अपने लीला-विग्रहका संवरण करना चाहते हैं ।। ८ ।।

यस्मान्नः सम्पदो राज्यं दाराः प्राणाः कुलं प्रजाः । आसन् सपत्नविजयो लोकाश्च यदनुग्रहात् ।। ९ ।।
पश्योत्पातान्नरव्याघ्र दिव्यान् भौमान् सदैहिकान् । दारुणान् शंसतोऽदूराद्भयं नो[1] बुद्धिमोहनम् ।। १० ।।
ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः । वेपथुश्चापि हृदये आराद्दास्यन्ति विप्रियम् ।। ११ ।।
शिवैषोद्यन्तम[2]ादित्यमभि[3] रौत्यनलानना । म[4]ामङ्ग सारमेयोऽयमभिरेभत्यभीरु[5]वत् ।। १२ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्माकं सर्वपुरुषार्थत्वे हेतुः श्रीकृष्णोऽतस्तद्वियोगं विनानिष्टं न स्यादित्याशयेनाह । यस्माच्छ्रीकृष्णाद्धेतोः । एतच्चोपरिष्टादर्जुनः स्पष्टीकरिष्यति । लोकाश्च यज्ञकरणानुरूपा यस्यानुग्रहात् ।। ९ ।। ❀ ❀ अदूरात्संनिहितं नो अस्माकं शंसत उत्पातान् ।। १० ।। ❀ ❀ दैहिकानाह । ऊर्विति । ऊर्वादयो वामाः स्फुरंति वेपथुः कंपश्च हृदये वर्तते । एते मह्यमारात्संनिहितं विप्रियं दास्यंति ।। ११ ।। ❀ ❀ भौमानाह सार्धैस्त्रिभिः । शिवा क्रोष्ट्री आदित्यमभिरौत्युद्यत्सूर्याभिमुखं क्रोशति । अनलानना अग्निं मुखेन वमंती । अंग हे भीम । मामभिलक्ष्य सारमेयः श्वाऽभिरौति प्लुतं भषति । अभीरुवन्निःशंकम् ।। १२ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्यानुग्रहाल्लोकाश्च वशीकृता आसन्निति संदर्भः ।। ९ ।। ❀ ❀ हे नरव्याघ्रेति । नरकृतोपद्रवशमनसमर्थोऽप्येतान्निवर्त्तयितुं न समर्थोऽसीति भावः । बुद्धिमोहनं बुद्धिभ्रंशकम् ।। १० ।। ❀ ❀ नृणां शुभं दक्षिणांगस्फुरणं स्त्रीणाञ्च वामांगस्फुरणं तद्विपरीतं विपरीतफलकमिति शाकुनिकाः ।। ११ ।। ❀ ❀ "देवतायतनानि कंपंते देवताप्रतिमा हसंति रुदंति स्फुटंति स्विद्यंति उन्मीलंति प्रतियांति" इति सामवेदे षड्विंशब्राह्मणेऽद्भुतशांतिप्रकरणप्रोक्तमर्थमनुवदति । शांतिरपि तत्र प्रोक्ता "इदं विष्णुर्विचक्रमे" इति स्थालीपाकं हुत्वा पंचभिरेभिर्जुहोति विष्णवे स्वाहा । सर्वभूताधिपतये स्वाहा । चक्रपाणये स्वाहा । सर्वपापशमनाय स्वाहा इति व्याहृतिभिर्जुहोति" इति ।। १२ ।।

---

१. प्रा० पा०–घोरमाशंसतो । २. प्रा० पा०–मे । ३. प्रा० पा०–मरुणमभि० । ४. प्रा० पा०–ममाग्रे । ५. प्रा० पा०–भीत० ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मूलस्थ-शंसतः इत्यस्यैवार्थमाह आशंसत इति ॥ १०-११ ॥ ❀ ❀ उद्यन्तम् उद्गच्छन्तं प्रकाशमानमिति भावः । प्लुतं दीर्घं भषति स्वजातीयशब्दविशेषं करोतीत्यर्थः ॥ १२-१४ ॥

श्रीमद्वीरराघवव्याख्या

भगवंतं विशिनष्टि यस्माद्भगवतो हेतोः नोऽस्माकं सम्पदादयो बभूवुः यस्य चानुग्रहात्पुण्यलोका भविष्यन्ति स भगवानुत्सिसृक्षतीत्यन्वयः । संपदः भोग्यभोगोपकरणादिसमृद्धयः । सपत्नविजयः शत्रुविजयः ॥ ९ ॥ ❀ ❀ हे नरव्याघ्र ! दिव्यान् दिवि भवान् भौमान् भूमौ भवान् देहे च भवान् दारुणान् घोरान् दूरात् समनंतरमेव नोऽस्माकं बुद्धिं मोहयतीति तथाभूतं भयं शंसतः सूचकानुत्पातान् पश्य ॥ १० ॥ ❀ ❀ तावद्दैहिकानुत्पातान् दर्शयति ऊर्विति । अंग हे भीम ! मम वामोर्वादयः पुनः पुनः स्फुरंति चलंति हृदये वेपथुः कंपश्च भवति तान्येतान्यूर्वादिस्फुरणानि आरात्समनंतरकालमेव मह्यमप्रियं दास्यंति मम विप्रियसूचकानि भवंतीत्यर्थः ॥ ११ ॥ ❀ ❀ एषा शिवा शृगालविशेषा अनलज्वलदाननं यस्याः सा आदित्यमभिमुखं रौति अंग ! हे भीम अयं सारमेयः श्वा अभिमुखमभीरुवदभीतवद्रोदिति रोदनं करोति ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यस्य कृष्णस्यानुग्रहात् येषामस्माकं संपदादय आसंस्तेषां नः स कालः आसन्न इत्यन्वयः । दाराः भार्याः सपत्नानां शत्रूणां विजयो लोकाः स्वर्गादयः प्रजाः पुत्राः ॥ ९ ॥ ❀ ❀ कुत आशंकसे इति तत्राह पश्येति । दिव्यान् सूर्यप्रकाशादीन् भौमान् भूकंपादीन् देहभवा दैहिकास्तत्रोरुस्फुरणादयः तैः सह वर्तमानाः सदैहिकास्तान् इति त्रिविधान् द्रव्यातिरिक्तकारणशून्यानशुभसूचकानुत्पातान् पश्य इत्यन्वयः । कीदृशान्बुद्धिमोहनं भयमदूरादिदानीमेव आशंसतः कथयतस्तस्मादाशंक इति भावः ॥ १० ॥ ❀ ❀ दैहिकान्वक्तीत्याह ऊर्वक्षीति । ममोत्संगादयः पुनः पुनः स्फुरंति कंपंते, एते आरात् क्षिप्रं विप्रियं मह्यं दास्यंतीत्यन्वयः ॥ ११ ॥ ❀ ❀ अनलोऽग्निराननने यस्याः सा तथोक्ता मुखादग्निज्वालामुद्गिरंतीत्यर्थः, एषा शिवा शृगाली उपगच्छन्तमरुणमादित्यमभिमुखं रौति रटति । रट-सृगालाक्रोशे काकाह्वाने च, सारमेयः श्वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्मादिति । यस्यानुग्रहमात्रात् लोकाश्च वशीकृता आसन् ॥ ९ ॥ ❀ ❀ भयं शंसतः कथयत उत्पातान् ॥ १०-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीकृष्णवियोगं विनैतादृशमरिष्टं न स्यादित्याशयेनाह यस्मादित्यादि । लोकाः यज्ञादिप्राप्याः ॥ ९ ॥ ❀ ❀ भयं शंसतः सूचयतः ॥ १० ॥ ❀ ❀ दैहिकानुत्पातानाह ऊर्विति । वामा इत्यर्थः, बहुवचनमार्षम् ॥ ११ ॥ ❀ ❀ भौमानाह । शिवा क्रोष्ट्री आदित्यम् अभि उद्यत्सूर्याभिमुखं क्रोशति । अनलानना अग्निं मुखेन वमन्ती । अङ्ग हे भीम ! मामभिवीक्ष्य सारमेयः श्वा प्लुतं रौति रोदिति ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्माद्भगवतः ॥ ९ ॥ ❀ ❀ नोऽस्माकमदूरात् अल्पेन कालेन ॥ १० ॥ ❀ ❀ तत्र दैहिकानुत्पातानाह ऊर्वक्षीति । आरात्त्वरितम् ॥ ११ ॥ ❀ ❀ भौमान्दर्शयति शिवेति सार्द्धैस्त्रिभिः । अनलवद्रौद्राः शब्दा आनने यस्याः एषा शिवा फेरुः उद्यंतमादित्यमभि उद्यदादित्याभिमुखं रौति । अंग हे भ्रातः ! सारमेयः श्वा अभीरुवदभीतवत् मामभिमुखं रोदिति रोदनं करोति ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत्र हेतुमाह यस्मादिति । लोकाः स्वर्गादयः राजसूयादिकरणादवगम्यते ॥ ९ ॥ ❀ ❀ हे नरव्याघ्रेति । दर्शनमामात्रेण न भयमिति सूचितम् । उत्पाताः अनिष्टसूचकानि निमित्तानि त्रिविधान्यपि स्वतः क्रूराणि अतः आरात् दूरादेव भयं शंसंति, बुद्ध्या हि भयं निवर्त्तयितुं शक्यते, इदं तु भयं बुद्धिमेव मोहयति ॥ १० ॥ ❀ ❀ तत्राध्यात्मिकं निमित्तमाह ऊर्वक्षीति-प्राण्यंगत्वेऽपि नैकवद्भावः भिन्नस्वभावत्वेन दोषख्यापनार्थः । वेपथुः कंपः चकाराच्चिंतादयः आरात्समीपे ॥ ११ ॥ ❀ ❀ भौतिकमनिष्टमाह शिवेति । एषा इदानीमपि दृष्टिगोचरा अनलानना स्वभावत एवाग्निमुखा अभितो रौति परीत्य परीत्येत्यर्थः । सारमेयः श्वा अभि परितः रोदिति दुष्टशब्दं करोति मत्तो भयं न मन्यते ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अस्माकं तु सर्वपुरुषार्थहेतुः श्रीकृष्ण एव अतस्तद्वियोगं विनैवं अनिष्टसूचका उत्पाता न स्युरित्याशयेनाह–यस्मादिति । यस्माच्छ्रीकृष्णाद्धेतोः नोऽस्माकं सम्पदादय आसन् स भगवानङ्ग उत्स्रक्ष्यति किम् ? इति पूर्वेणैवान्वयः । सम्पदो भोग्यभोगोपस्करणादिसमृद्धयः, प्राणा आपद्भ्यो रक्षया जीवनम्, कुलं परीक्षिद्रक्षया सन्ततिः, सपत्नानां शत्रूणां विजयः, लोका यज्ञादिसाध्याः स्वर्गादयो यस्यानुग्रहादासन् । भगवदनुग्रहेण तत्र सन्देहाभावाद्भविष्यतामपि भूतवन्निर्देशः ॥ ९ ॥ ❋ ❋ कठिनहृदयत्वात्तव तावद्भयं नोत्पद्यते इति सूचयन् सम्बोधयति–हे नरव्याघ्रेति । दिव्यान् दिवि भवान् भौमान् भूमौ भवान् दैहिकान् देहे भवान् दारुणान् घोररूपान् । अदूरात् समनन्तरकालमेव नोऽस्माकं बुद्धिं मोहयतीति तथाभूतं भयं शंसतः सूचकान् उत्पातान् पश्येत्यन्वयः ॥ १० ॥ ❋ ❋ तत्र तावद्दैहिकानुत्पातान् दर्शयति–ऊर्विति । यन्ममानिष्टं तत्तवाप्यनिष्टमेव भ्रातृत्वेनाङ्गतुल्यत्वादिति सूचयन् सम्बोधयति–हे अङ्गेति । मह्यं मम वामा ऊर्वादयः पुनः पुनः स्फुरन्ति प्रचलन्ति, हृदये वेपथुः कम्पश्च भवति, अत एव उत्पाताः आरात् समनन्तरकालमेव मह्यं विप्रियं दुःखं दास्यन्तीत्यन्वयः ॥ ११ ॥ ❋ ❋ भौमानुत्पातानाह–शिवेति सार्द्धैस्त्रिभिः । हे अङ्ग अनलवज्ज्वलदाननं यस्याः सैषा शिवा शृगालविशेषा, उद्यन्तमादित्यमभि उद्यदादित्याभिमुखं रौति आक्रोशति । अयं सारमेयः श्वा मामभिलक्ष्य अभीरुवदभीतवत् रोदिति ॥ १२ ॥

हिन्दी अनुवाद

उन्हीं भगवान्‌की कृपासे हमें यह सम्पत्ति, राज्य, स्त्री, प्राण, कुल, संतान, शत्रुओंपर विजय और स्वर्गादि लोकोंका अधिकार प्राप्त हुआ है ॥ ९ ॥ ❋ ❋ भीमसेन ! तुम तो मनुष्योंमें व्याघ्रके समान बलवान् हो; देखो तो सही आकाशमें उल्कापातादि, पृथ्वीमें भूकम्पादि और शरीरोंमें रोगादि कितने भयंकर अपशकुन हो रहे हैं ! इनसे इस बातकी सूचना मिलती है कि शीघ्र ही हमारी बुद्धिको मोहमें डालनेवाला कोई उत्पात होनेवाला है ॥ १० ॥ ❋ ❋ प्यारे भीमसेन ! मेरी बायीं जाँघ, आँख और भुजा बार-बार फड़क रही हैं । हृदय जोरसे धड़क रहा है, अवश्य ही बहुत जल्दी कोई अनिष्ट होनेवाला है ॥ ११ ॥ ❋ ❋ देखो, यह सियारिन उदय होते हुए सूर्यकी ओर मुँह करके रो रही है । अरे ! उसके मुँहसे तो आग भी निकल रही है ! यह कुत्ता बिलकुल निर्भय-सा होकर मेरी ओर देखकर चिल्ला रहा है ॥ १२ ॥

शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे । वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥
मृत्युदूतः कपोतोऽयमुलूकः कम्पयन् मनः । प्रत्युलूकश्च कुह्वानैरनिद्रौ[1] शून्यमिच्छतः ॥ १४ ॥
धूम्रा दिशः परिधयः कम्पते भूः सहाद्रिभिः । निर्घातश्च[2] महांस्तात साकं च स्तनयित्नुभिः ॥ १५ ॥
वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः । असृग् वर्षन्ति जलदा बीभत्समिव सर्वतः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

शस्ता गवादयो मां सव्यं वामं कुर्वंति । अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति । वाहानश्वान् ॥ १३ ॥ ❋ ❋ अयं कपोतो मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकस्तत्प्रतिपक्षो घूकः काको वा कुह्वानैः कुत्सितशब्दैर्विश्वं शून्यं कर्तुमिच्छतः ॥ १४ ॥ ❋ ❋ धूम्रा धूसरा दिशः परिधयोऽग्निमिव लोकमावृण्वंति । दिव्यानाह सार्धाभ्याम् । निर्घातो निरभ्रवज्रपातः स्तनयित्नवोऽत्र गर्जितानि तैः सह ॥ १५ ॥ ❋ ❋ तमोविशेषेण सृजन् असृग् रक्तम् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संबुद्धिः पूर्ववत्पुरुषव्याघ्रेति ॥ १३ ॥ ❋ ❋ उलूकः कपोतः । उलूकाख्यः पक्षीति योज्यम् । "कपोतस्तु चित्रकण्ठपारावतविहंगयोः" इति मेदिनी । तत्प्रतिपक्ष उलूकशत्रुः बक इति लेखप्रमादात् । घूक इति सम्यक् । बकोलूकविरोधस्याप्रसिद्धत्वात् । तीर्थस्तु कपोतः शिलाकणाशनपक्षी अग्नौ पदं करोति । "यत्कपोतः पदमग्नौ" इति मंत्रात् । इदं स्वप्रदर्शनमिति ज्ञातव्यम् । अत्र पक्षे कपोतोऽग्नावुलूक इति पाठः ॥ १४ ॥ ❋ ❋ परिधय इवेति । मूले लुप्तोपमा ज्ञेया । तत्प्रयोजकं साधर्म्यञ्चावरकत्वेनेत्येतत्फलितम् । परिधयो ह्यत्र वेद्याः कुंडस्य च परितः क्रियन्ते । यद्वा परिधयः समिधः । "परिधिर्नायज्ञियद्रुशाखायामुपसूर्यके । वह्निकुंडाद्यावरणे समुद्रे परिखातके" इति रुद्रः ॥ १५ ॥ ❋ ❋ खरस्पर्शो निष्ठुरस्पर्शः । सर्वतो दिशं बीभत्सं भीषकमिव रक्तं वर्षन्ति ॥ १६-१७ ॥

---

१. प्रा० पा०–कुह्वानो रौद्रोऽसौ शून्यमिच्छति । २. प्रा० पा० दीताः । ३. प्रा० पा०–तः सुमहां० ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

परिधय इति। अग्निं यज्ञाग्निं यथा परिधयः यज्ञाग्निवेष्टनास्तत्कुशा आवरणं कुर्वन्ति तदिव तद्वदित्यर्थः ॥ १५-१७ ॥

श्रीमद्वीरराघवव्याख्या

प्रशस्ता गवाश्वादयः पशवो मां सव्यमात्मनां सव्यपार्श्वस्थं कुर्वन्त्यपरे अप्रशस्ताः खरमहिष्यादयः तु दक्षिणं कुर्वन्ति हे पुरुषव्याघ्र! मम वाहान् गजाश्वादीन् रुदतो रोदनं कुर्वाणान् लक्षये ॥ १३ ॥ ❀ ❀ अयमुलूको मृत्योर्दूतः तद्वदनिष्टकरः स च प्रत्युलूकश्च मदभिमुखमन्यश्च उलूकश्वानावेतौ अनिद्रौ निद्रारहितौ कुह्वानैः कुकुइत्येवंविधैर्ह्वानैः शब्दैः किंति तच्छब्दानुकारः इमं देशं शून्यमिच्छतः सूचयतः ॥ १४ ॥ ❀ ❀ दिशो धूम्राः परिधयश्च दृश्यन्ते इति शेषः, अद्रिभिः सह भूः पृथ्वी कम्पते स्तनयित्नुभिर्मेघैरकालिकैः सह महान्निर्घातोऽशनिनिर्घातश्चासीत् ॥ १५ ॥ ❀ ❀ खरः कठिनः स्पर्शो यस्य स वायुर्धूलिं बहुशः विसृजन् विशेषेण सृजन्वाति जलदा मेघाः सर्वतो बीभत्समिवासृग् रुधिरं वर्षन्ति मुंचन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शस्ताः भारद्वाजादयः मां सव्यमप्रदक्षिणम् अपरे पशवो बस्तगर्दभादयः मां प्रदक्षिणं कुर्वंति वाहानश्वादींश्च रोदनं कुर्वतः मनसा निरूपयामि ॥ १३ ॥ ❀ ❀ मृत्युदूतः मरणसूचकः कपोतः शिलाकणाशनपक्षी अग्नौ पदं करोति यत्करोति 'यत्कपोतः पदमग्नौ कृणोती'ति मंत्रात् इदं स्वप्ने दर्शनमिति ज्ञातव्यं, मे मनः कंपयन्नुलूकः प्रत्युलूकश्च मिथो हुंकारैर्जगच्छून्यमिच्छतः। सर्वनाशे यथा तथाह्वानं कुरुत इत्यर्थः। कुह्वानमिति केचित्पठंति कुह्वानं नाम तज्जातिध्वनिविशेषः ॥ १४ ॥ ❀ ❀ परिधयः दिशः धूम्राः धूम्रवर्गाः ज्वलिताः परिवेषा वा स्तनयित्नुभिरशनिभिरकालमेघैर्वा साकं महान्निर्घातः निर्मेघगर्जितम् ॥ १५ ॥ ❀ ❀ वायुः शंसत्यपकर्षकालमित्याह वायुरिति। रजसा धूल्या तमोऽधकारं विसृजन्निष्ठुरस्पर्शः वायुर्वाति। अथ दिव्यानाह असृगिति, जलदा सर्वतोदिशं बीभत्समिव भीषकमिव असृग्रुधिरं वर्षंति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शस्ता इति। मम वाहानित्यन्वयः ॥ १३ ॥ ❀ ❀ उलूकस्तथा तत्प्रतिपक्षोऽन्य उलूकश्च यो मनः कम्पयन् वर्त्तते तौ द्वावनिद्रौ सन्तौ ॥ १४ ॥ ❀ ❀ दिशः सूर्यादिपरिधयश्च धूम्राः ॥ १५ ॥ बीभत्सं बीभत्सितव्यं यथा स्यात् तथा। इवेति वाक्यालंकारे ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शस्ताः गवादयः। सव्यं वामम्। अपरे गर्दभाद्याः प्रदक्षिणम्। वाहान् अश्वान् ॥ १३ ॥ ❀ ❀ प्रत्युलूकः उलूकप्रतिपक्षो घूकः काको वा ॥ १४ ॥ ❀ ❀ धूम्रा धूम्रवर्णा दिशः परिधयः परिधितुल्याः। निर्घातः आकस्मिकघोरशब्दः। स्तनयित्नवो निरभ्रगर्जितानि ॥ १५ ॥ ❀ ❀ तमोऽन्धम्। विशेषेण सृजन्। असृक् रक्तम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे पुरुषव्याघ्र! शस्ताः गवादयः मां सव्यं वामं कुर्वंति अपरे अशस्ताः खरादयः ॥ १३ ॥ ❀ ❀ अयं समीपे कपोतः क्षुद्रकपोतः मृत्युदूत इति मम मनः कंपयन् वर्त्तते उलूको घूकः प्रत्युलूकस्तदभिमुखं प्रतिपक्षो घूकश्च तावेतावनिद्रौ निद्रारहितौ कुह्वानैः कुत्सितैः शब्दैर्विश्वं शून्यमिच्छतः ॥ १४ ॥ ❀ ❀ धूम्राः धूसराः परिधयः परिध्याकाराः दिशो लक्ष्यंते। दिव्यानाह निर्घात इति सार्द्धद्वाभ्याम्। स्तनयित्नुभिरकालिकैर्मेघैः सह निर्घातो वज्रपात आसीत् ॥ १५ ॥ ❀ ❀ खरस्पर्शः कठिनस्पर्शः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

शस्ताः अश्वादयः अपरे गर्दभादयः वाहाः अश्वाः चकाराद्गवादयः पुरुषव्याघ्रेति संबोधनं तस्य शंकाभावसूचकं ममापि अश्वाः सर्वसुखेन विद्यमाना अपि रोदनं कुर्वंत इति लक्ष्यंते ॥ १३ ॥ ❀ ❀ अयं कपोतो मृत्युदूतः मृत्युसमीपे आकारणार्थमागतः दक्षिणदिशामागत्य शब्दकरणादवसीयते। कपोतोऽयमिति भिन्नवाक्यम् उलूकादिभिन्नः प्रत्युलूकः काकजातिविशेषो वा। चकारादन्येऽपि येषां शाश्वतिको विरोधः कुह्वैः कुत्सितशब्दैः न विद्यते निद्रा याभ्यां तौ शून्यं जगदिच्छतः ॥ १४ ॥ ❀ ❀ आधिदैविकानाह धूम्रा दिश इति। धूमयुक्ता दिश एव परिधयः मध्ये त्रैलोक्यं ज्वलदग्निरित्यर्थः। निर्घातः निरभ्रविद्युत्पातः मेघाभावेऽपि गर्जितानि च ॥ १५ ॥ ❀ ❀ खरस्तीक्ष्णः स्पर्शो यस्य रजसा पांसुवृष्ट्या तमः अंधकारम् असृक् रुधिरं बीभत्समिव विष्ठारूपमिव पश्येति ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

प्रशस्ता गवादयः पशवो मां सव्यमात्मनां सव्यपार्श्वस्थं कुर्वन्ति । अपरे अप्रशस्ताः खरमहिषादयस्तु दक्षिणं दक्षिणपार्श्वस्थं कुर्वन्ति । हे पुरुषव्याघ्र मम वाहान् अश्वान् रुदतो लक्षये पश्यामीत्यन्वयः ॥ १३ ॥ ❀ ❀ अयं कपोतो मृत्युदूतः विपरीतशब्दवत्त्वेन मृत्युदूत इव प्रतिभाति । उलूको घूकः प्रत्युलूकः काकश्चानिद्रौ कुशब्दैः कुत्सितशब्दैर्मनः कम्पयन् विश्वं शून्यमिच्छतः ॥ १४ ॥ ❀ ❀ दिशो धूम्राः धूम्रवर्णाः परिधयः सूर्यचन्द्रपरिमण्डलानि च दृश्यन्ते इति शेषः । अद्रिभिः सहिता भूः पृथ्वी च कम्पते । दिव्यानुत्पातानाह निर्घात इति सार्द्धाभ्याम् । स्तनयित्नुभिः गर्जितैः साकं सह महान् निर्घातो निरभ्रवज्रपातश्चासीदित्यन्वयः ॥ १५ ॥ ❀ ❀ खरः कठिनः स्पर्शो यस्य तथाभूतो वायुर्धूलिना तमो विसृजन् प्रवर्तयन् वाति । जलदा मेघाः सर्वतः सर्वत्र असृग्रुधिरं वर्षन्ति । अतः सर्वत्र बीभत्सं निन्द्यमेव जातम् । इवशब्द एवकारार्थकः ॥ १६ ॥

हिन्दी अनुवाद

भीमसेन ! गौ आदि अच्छे पशु मुझे अपने बायें करके जाते हैं और गधे आदि बुरे पशु मुझे अपने दाहिने कर देते हैं । मेरे घोड़े आदि वाहन मुझे रोते हुए दिखायी देते हैं ॥ १३ ॥ ❀ ❀ यह मृत्युका दूत पेडुखी, उल्लू और उसका प्रतिपक्षी कौआ रातको अपने कर्णकठोर शब्दोंसे मेरे मनको कँपाते हुए विश्वको सूना कर देना चाहते हैं ॥ १४ ॥ ❀ ❀ दिशाएँ धुँधली हो गयी हैं, सूर्य और चन्द्रमाके चारों ओर बार-बार मण्डल बैठते हैं । यह पृथ्वी पहाड़ोंके साथ काँप उठती है, बादल बड़े जोर-जोरसे गरजते हैं और जहाँ-तहाँ बिजली भी गिरती ही रहती है ॥ १५ ॥ ❀ ❀ शरीरको छेदनेवाली एवं धूलिवर्षासे अंधकार फैलानेवाली आँधी चलने लगी है । बादल बड़ा डरावना दृश्य उपस्थित करके सब ओर खून बरसाते हैं ॥ १६ ॥

सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि । ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥ १७ ॥
नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च । न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥ १८ ॥
न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः । रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे ॥ १९ ॥
दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च । इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ।
भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ग्रहाणां मर्दं युद्धम् । भूता रुद्रानुचरास्तेषां गणैः संकुलैर्व्यामिश्रैः । प्राणिभिः सहितैः रोदसी द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव च पश्येति ॥ १७ ॥ ❀ ❀ पुनर्भौमानाह नद्य इति सार्धैस्त्रिभिः । प्राणिनां मनांसि च ॥ १८ ॥ ❀ ❀ दुह्यंतीति कर्मकर्तर्यार्षम् । न प्रस्नुवंतीत्यर्थः ॥ १९ ॥ दैवतानि प्रतिमाः । अघं दुःखम् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नद्यो गंगाद्या अत्र न ज्ञेयाः तासां दिव्यत्वात् । नदाः शोणादयः ॥ १८ ॥ ❀ ❀ इत्यर्थ इति । धातोरर्थांतरवृत्तित्वादकर्मत्वमपीति भावः ॥ १९ ॥ ❀ ❀ जनपदा देशाः ॥ २०-२१ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

सरांसि च मनांसि चेत्यत्र क्षुभिता इत्यस्य लिङ्गव्यत्ययेन क्षुभितानीति प्रयोज्यम् । किं चात्र पुनर्भौमानाहेति स्वाम्युक्त्याभासेन मनसः पार्थिवत्वे दर्शितेऽपि शास्त्रान्तरेण तद्विरोधो नाशङ्कनीयः । मनसः अपंचीकृतपंचमहाभूतसत्त्वकार्यत्वेऽपि अन्नमशितं त्रेधा विधीयते इत्यारभ्य अन्नमयं हि सौम्य मन इत्यन्तेन छान्दोग्योपनिषदीयषष्ठप्रपाठकान्तर्गतपंचमखण्डस्थब्राह्मणचतुष्टयेन तस्यान्नोपचितत्वेन भौतिकत्वदर्शनादिति ॥ १८-२४ ॥

श्रीमद्वीरराघवव्याख्या

हता प्रभा यस्य तथाभूतं सूर्यं पश्य, दिवि ग्रहाणां भृग्वंगिरादिनां परस्परं विमर्दं कलहं पश्य सुनितरां संकुलैर्भूतानां पिशाचानां गणैः-रोदसीत्यव्ययं द्यावापृथिव्योर्वर्तते-ज्वलिते इव दृश्येते ॥ १७ ॥ ❀ ❀ नदाः प्राक्स्रोतसः सरांसि भूतानां मनांसि च क्षुभिताः संचलिता भवन्ति शुष्का भवंतीति वा अग्निराहवनीयादिराज्येन न ज्वलत्ययं कालः किं दुःखं विधास्यत्यहं

न वेद्मीति भावः ॥ १८ ॥ ❋ ❋ वत्साः स्तनं स्तन्यं न पिबन्ति मातरश्च वत्सान्प्रति न दुह्यन्ति स्तन्यमिति शेषः, गावः अश्रूणि मुखे यासां ताः रुदन्ति व्रजे गोष्ठे ऋषभा न हृष्यन्ति च ॥ १९ ॥ ❋ ❋ दैवतानि देवप्रतिमा रुदन्तीव स्विद्यन्ति गात्रप्रस्वेदं मुंचंति उच्चलन्तीव उत्प्लुत्य पतन्तीव दृश्यन्ते पुरादीनामाश्रया इमे जनपदा देशाः ग्रामाश्च भ्रष्टा श्रीर्येभ्यो निर्गत आनंदो येभ्यः तथाभूता दृश्यन्ते नोऽस्माकं किमघं दुःखं दर्शयिष्यंति वयं तु न विद्म इति भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दिवि व्योम्नि परस्परं ग्रहमर्दं ग्रहयुद्धं भगणे नक्षत्रसमूहे ससंकुले सांकर्यसहिते भावप्रधानत्वद्योतनाय ससंकुल इत्युक्तं तेनापि भयप्रापकत्वमाह-तुशब्देनैवं चेदेवं स्यादिति ज्योतिःशास्त्रं प्रमाणीकरोति रोदसी द्यावापृथिव्यौ ज्वालाकुले इव भातः ॥ १७ ॥ ❋ ❋ पुनश्च भौमानाह नद्य इति । स्वर्नद्यादीनां दिव्यत्वसंग्रहार्थमत्र नापाठि, नदाः पुनद्यः शोणादयः क्षुभिताः निमित्तमंतरेण कलुषाः । नित्यमाज्येन ज्वलनस्वभावो वह्निः आज्येन न ज्वलतीति यस्मादतोऽयं कालः किं शमलं विधास्यति ॥ १८ ॥ ❋ ❋ व्रजे गोष्ठे अश्रु मुखे यासां तास्तथोक्ताः न हृष्यन्ति नाविष्किरन्ति तटाघातं न कुर्वन्तीत्यर्थः, दैवतानि प्रतिमाः रोदनादौ यो भावः तं कुर्वन्ति ॥ १९ ॥ ❋ ❋ भ्रष्टश्रियः अत एव निरानन्दाः समृद्धिरहिताः सुखमुक्ता वा अघं व्यसनम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स संकुलैरित्यत्र स इति स एव त्वमित्यर्थः ॥ १७-२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ससंकुलैः प्राण्यन्तरसहितैः रोदसी द्यावापृथिव्यौ ॥ १७ ॥ ❋ ❋ पुनर्भौमानाह नद्य इति ॥ १८ ॥ ❋ न दुह्यन्तीति कर्मकर्त्तर्यार्षं, न प्रस्नुवन्तीत्यर्थः ॥ १९ ॥ ❋ ❋ दैवतानि प्रतिमाः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ग्रहमर्दं ग्रहयुद्धम्, सुसंकुलैर्नानाजातितया व्यामिश्रैर्भूतगणैः रोदसीत्यव्ययं द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव पश्य ॥ १७ ॥ ❋ ❋ पुनर्भौमानाह नद्यइति सार्द्धैस्त्रिभिः । अग्निराहवनीयादिः ॥ १८ ॥ ❋ ❋ वत्साः स्तनं न पिबंति बलात्प्रेर्यमाणान्वत्सान्प्रति मातरोऽपि न दुह्यन्ति स्तन्यमिति शेषः ॥ १९ ॥ ❋ ❋ दैवतानि प्रतिमारूपाणि स्विद्यंतीव प्रस्वेदं मुंचंतीव दृश्यंते । जनपदादयो निर्गत आनन्दो येभ्यस्तेऽतो भ्रष्टश्रियो दृश्यंते । अत एव नोऽस्माकं किमघं दुःखं दर्शयंति दर्शयिष्यंति ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

नात्र तिरोहितमिव ग्रहाणां शुक्रादीनां युद्धं पश्येत्युभयत्र संबंधः । दिवि आकाशे नतु शास्त्रमात्रे सम्यक् संकुलैः भूतप्रेत-पिशाचादीनां गणैः हेतुभिर्द्यावापृथिवी ज्वलिते एव ते हि मध्ये स्थिता घातुका रुद्रगणाः उपर्यधश्च ज्वालयंतीत्यर्थः । वाद्यादिहेतु-व्यतिरेकेणापि क्षुधिताः पंकिला वर्त्तमानजलाः । मनांसि वास्मदादीनाम् ॥ १७ ॥ ❋ ❋ अग्निः आज्येन न ज्वलति जलेनेव एवं सर्वस्यान्यथा कर्त्ता कालः किं विधास्यतीति न ज्ञायत इत्यर्थः ॥ १८ ॥ ❋ ❋ तेषां निमित्तानामवांतरफलमपि जातमित्याह न पिबंतीति । क्षुधिता अपि वत्साः स्तनं न पिबंतीत्यर्थः, मातरः गावः सर्वेषामेव दुग्धोपजीवनात् न दुह्यंति दोहनं न कारयंतीत्यर्थः, अश्रूणि मुखे यासां, ऋषभाः पुष्टा बलीवर्दाः ॥ १९ ॥ ❋ ❋ दैवतानि प्रतिमाः स्विद्यंति स्वेदयुक्तानि भवंति उच्चलंति देशांतरे गच्छन्ति भ्रष्टा श्रीर्येषां निर्गतः आनंदो येभ्यः अघं दुःखजनकं पापं नः अस्मभ्यम् ॥ २० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

दिवि अन्तरिक्षे हता प्रभा यस्य तथाभूतं सूर्यं पश्य । ग्रहाणां भृग्वङ्गारकादीनां मिथो विमर्दं कलहं पश्य । ससङ्कुलैः प्राण्यन्तरसहितैर्भूतानां रुद्रानुचराणां प्रेतपिशाचादीनां गणैः रोदसी द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव च पश्येत्यन्वयः ॥ १७ ॥ ❋ ❋ पुनरपि भौमानाह-नद्य इति सार्द्धैस्त्रिभिः । नद्यादयः सङ्क्षुभितास्त्यक्तमर्यादा जाताः । अग्निराहवनीयादिः आज्येन धृतेनापि न ज्वलति । अतोऽयं विपरीतधर्मा कालः किं दुःखं विधास्यतीत्यहं न वेद्मीति शेषेणान्वयः ॥ १८ ॥ ❋ ❋ वत्साः क्षुधिता अपि स्तनं स्तन्यं दुग्धं न पिबन्ति । वत्सा इति बालानामप्युपलक्षणम् । पशुमनुष्यादीनां मातरश्च न दुह्यन्ति स्तन्यं वत्सबालादीन् न पाययन्ति । ऋषभाः श्रेष्ठा अपि गावो व्रजे गोष्ठे न हृष्यन्ति किन्तु अश्रूणि मुखे यासां तथा सत्यो रुदन्ति ॥ १९ ॥ ❋ ❋ दैवतानि देवप्रतिमाः रुदन्तीव स्विद्यन्ति गात्रप्रस्वेदं कुर्वन्ति च उत्प्लुत्य पतन्ति च । अत्र सन्देहो नास्ति दृष्टत्वादिति सूचयन्नाह-हीति । भ्रष्टा श्रीः शोभा येषां तथा निर्गत आनन्दो येभ्यस्ते इमे जनपदादयो नोऽस्माकं किमघं दुःखं

दर्शयन्ति दर्शयिष्यन्ति वयं न जानीम इत्यन्वयः। तत्र पुराणि राजधान्यः, जनपदास्तदाश्रयाः देशविशेषाः, ग्रामाः कर्षकनिवासाः, उद्यानानि वाटिकाः, आकराः सुवर्णाद्युद्गमस्थानानि, आश्रमाः मुनिजननिवासस्थानानि ॥ २०॥

हिन्दी अनुवाद

देखो ! सूर्यकी प्रभा मन्द पड़ गयी है। आकाशमें ग्रह परस्पर टकराया करते हैं। भूतोंकी घनी भीड़से पृथ्वी और अन्तरिक्षमें आग-सी लगी हुई है ॥ १७ ॥ ❀ ❀ नदी, नद, तालाब और लोगोंके मन क्षुब्ध हो रहे हैं। घीसे आग नहीं जलती। यह भयङ्कर काल न जाने क्या करेगा ॥ १८ ॥ ❀ ❀ बछड़े दूध नहीं पीते, गौएँ दुहने नहीं देतीं। गोशालामें गौएँ आँसू बहा-बहाकर रो रही हैं। बैल भी उदास हो रहे हैं ॥ १९ ॥ ❀ ❀ देवताओंकी मूर्तियाँ रो-सी रही हैं, उनमेंसे पसीना चूने लगता है और वे हिलती-डोलती भी हैं। भाई ! ये देश, गाँव, शहर, बगीचे, खानें और आश्रम श्रीहीन और आनन्दरहित हो गये हैं। पता नहीं ये हमारे किस दुःखकी सूचना दे रहे हैं ॥ २० ॥

मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः। अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥ २१ ॥
इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा। राज्ञः प्रत्यागमद् ब्रह्मन् यदुपुर्याः कपिध्वजः ॥ २२ ॥
तं पादयोर्निपतितमयथापूर्वमातुरम्। अधोवदनमब्बिन्दून् सृजन्तं नयनाब्जयोः ॥ २३ ॥
विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः। पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतैर्महोत्पातैः कृत्वा न विद्यतेऽन्येषु पुरुषेषु श्रीर्वज्रांकुशादिशोभा येषां तैर्भगवतः पदैर्हीना भूरित्यहं मन्ये ॥ २१ ॥ ❀ ❀ तस्य राज्ञ इत्येवं दृष्टान्यरिष्टानि येन तेन चेतसा चिंतयतः सतः ॥ २२ ॥ ❀ ❀ अयथापूर्वं निपतितम्। तदेवाह आतुरमित्यादि। अपां बिंदूनश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः ॥ २३ ॥ उद्विग्नं हृदयं कंपितं यस्य सः विच्छायं विगतकांतिम् ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यदुपुर्या द्वारकायाः ॥ २२ ॥ ❀ ❀ अयथापूर्वं पूर्वं यथा न भवतीत्यर्थः। तदेव अयथापूर्वत्वमेव। आतुरं संभ्रांतं रोगिकल्पं वा। इत्यर्थ इति पंचम्यर्थे सप्तमीयमिति भावः ॥ २३ ॥ ❀ ❀ नारदेनेरितं "तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः" इत्येवंरूपं वचनम् ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

इदं त्वहमुद्भावयामीत्याह मन्य इति। एतैर्महोत्पातैरिदन्त्वहं मन्ये उद्भावयामि किमनन्यपुरुषश्रीभिर्न विद्यतेऽन्यपुरुषेषु श्रीर्येषु तैरन्यपुरुषेष्वसम्भावितकान्तिभिर्भगवतः श्रीकृष्णस्य पदैः पादविन्यासैर्हीना रहिता अत एव हतं सौभगं सौंदर्यं यस्यां तथाभूता भूः पृथ्वी नूनं भविष्यतीति ॥ २१ ॥ ❀ ❀ इत्थं दृष्टानि ज्ञातान्यरिष्टानि येन तेन चेतसा राज्ञो युधिष्ठिरस्य चिंतयतः हे ब्रह्मन्! कपिध्वजोऽर्जुनः यदुपुर्याः द्वारकायाः प्रत्यागमत् आगतवान् ॥ २२ ॥ ❀ ❀ तमागतं पादयोर्निपतितमनुजं नृपो युधिष्ठिरः विलोक्योद्विग्नं भीतं हृदयं यस्य तथा भूत्वा नारदोक्तं संस्मरन् सुहृदां मध्ये पृच्छति स्मापृच्छत्। कथंभूतं यथापूर्ववदनवस्थितमातुरं दुःखितमधोवदनमवाङ्मुखं नयनाब्जयोरश्रुबिन्दून्सृजन्तं मुंचन्तं विच्छायं विगतकान्तिम् ॥ २३-२४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एषामुत्पातानां फलं स्वयमेवानुमिनोमीत्याह मन्य इति। एतैर्महोत्पातैः प्रायेण यादवेंद्रस्य भगवतः पदैर्हीना त्यक्ता अत एव हतसौभगा भूर्महीति मन्ये। कथंभूतैः पदैः अनन्यपुरुषस्त्रीभिर्नान्ये पुरुषाः स्त्रियश्च सौन्दर्ये साम्ये आधिक्ये च वर्तंते येषां तान्यनन्यपुरुषस्त्रीणि तैः दीर्घश्छांदसः। अनन्यैर्भगवदेकशरणैः पुरुषैः स्त्रीभिश्च हीनेति वा ॥ २१ ॥ ❀ ❀ दृष्टारिष्टेन दृष्टाशुभेन व्यसनमनुमिमानेन चेतसा तस्य युधिष्ठिरस्य राज्ञ इति चिंतयतोऽनुजं प्रति कथयतश्च सत इति शेषः कपिध्वजोऽर्जुनः यदुपुर्याः द्वारकायाः हस्तिनपुरं प्रत्यागमदित्यन्वयः ॥ २२ ॥ ❀ ❀ अयथापूर्वं पूर्वं यथा तथा न भवतीति आतुरं संभ्रांतं रोगिकल्पं वा अधोवदनमवाङ्मुखं अब्बिन्दून् जलबिन्दून् ॥ २३ ॥ ❀ ❀ विच्छायं विगतश्रीकमनुजं निरीक्ष्योद्विग्नहृदयः त्वरितमनाः पृच्छति स्म अपृच्छदित्यन्वयः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतैः कृत्वा न विद्यते अन्येषु पुरुषेषु श्रीर्वज्रांकुशादिशोभा येषां तैर्भगवतः पदैर्हीना भूरित्यहं मन्ये ॥ २१-२३ ॥ ❀ ❀ विच्छायं विगतकान्तिम् ॥ २४-२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नास्त्यन्यपुरुषेषु श्रीः शोभा येषां तैर्भगवतः पदैर्भूर्हीनाऽत एव हतसौभगेति एतैर्महोत्पातैरहं मन्ये ॥ २१ ॥ ❋ ❋ दृष्टान्यरिष्टानि येन तेन चेतसा ॥ २२-२३ ॥ ❋ ❋ विच्छायं विगतकांतिम् ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एतेषां पापं संभावयति मन्य इति । महोत्पातैर्हेतुभिः कृत्वा भूः पदैर्हीनेति मन्ये, न विद्यते अन्यपुरुषेषु श्रीः ध्वजवज्रादिरूपा येषाम् ॥ २१ ॥ ❋ ❋ एवमन्वयव्यतिरेकाभ्यां सामीचीन्यं सर्वं भगवदन्वयात् सर्वमेवानिष्टं तत्सांनिध्याभावादिति निरूपितं सूचकानां शीघ्रफलमाह इति चिंतयत इति । दृष्टमालोचनेन अरिष्टं येन तादृशचेतसा राज्ञः सतः यदुपुर्याः द्वारकायाः कपिध्वज इति शीघ्रागमनं सूचितम् ॥ २२ ॥ ❋ ❋ प्रतिकूलतया आगमने आगत्य वचनादिकमनुक्त्वैव पादयोः पतितं सर्वदा यथायाति न तथेत्ययथापूर्वमातुरं विच्छायं कृशं दुःखविकाराभावेऽपि बहुकालाभ्यासात् स्वत एवाब्बिदवः नेत्रकमलाभ्यां पतंति कमलपदं जलावतरणसूचकम् ॥ २३ ॥ ❋ ❋ विगता छाया कांतिर्यस्य एतादृशेन सह संभाषणस्यानुचितत्वमपि अनुजत्वात्तथा नृपत्वाद्बहु निमित्तज्ञानं तेन दर्शनमात्रेण भाव्यर्थनिश्चयज्ञानमिति पृच्छति सुहृदां मध्ये एकांततुल्ये 'दृष्टश्रुताभ्यामनुमानशंकी' अनेनार्जुनतुल्योऽयमपीत्युक्तं भवति, स्मेति प्रसिद्धे अनेन सर्वजनीनं तस्य भगवत्परत्वमित्युक्तम् ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु त्वमपि महाबुद्धिमानसि एतैरुत्पातैस्तव बुद्धौ किं प्रतिभातीत्यपेक्षायामाह–मन्य इति । एतैर्महोत्पातैर्नूनं भगवतः पदैर्भूर्हीना जातेत्यहं मन्ये इत्यन्वयः । ननु भगवत्पदराहित्यमात्रेण कथमेवं आनन्दादिभ्रंश इत्याशङ्क्य विशिनष्टि–अनन्येति । न विद्यतेऽन्येषु पुरुषेषु श्रीर्वज्राङ्कुशादिशोभा येषां तैरिति । तत्र कारणमाह–हृतं सौभगं सौभाग्यं यस्याः सेति ॥ २१ ॥ ❋ ❋ इत्थयं दृष्टानि ज्ञातान्यरिष्टानि येन तेन चेतसा तस्य राज्ञो युधिष्ठिरस्य चिन्तयतः सतः हे ब्रह्मन् यदुपुर्याः द्वारकायाः सकाशात् कपिध्वजोऽर्जुनः प्रत्यागमत् आगतवान् ॥ २२ ॥ ❋ ❋ तमागतं अनुजमर्जुनं आतुरं व्याकुलं विलोक्य स्वयमप्युद्विग्नं भीतं हृदयं यस्य तथाभूतः सुहृदां मध्ये स्थितो नृपो युधिष्ठिरः 'तावद्यूयमवेक्षध्वं यावदास्त इहेश्वरः' इति नारदेनेरितमुक्तं वचनं संस्मरन् पृच्छति स्मेति द्वयोरन्वयः । तस्यातुरत्वमेव विशेषणैः स्पष्टयति–अयथापूर्वमिति । पूर्वं कदापि यथा न भवति तथा शोकेन कण्ठनिरोधान्मुखेन किञ्चिदनुक्त्वैव पादयोर्निपतितमित्यर्थः । अधो वदनं यस्य तम् । नयनाब्जयोर्नेत्रकमलाभ्यामब्बिन्दून् अश्रूणि विमुञ्चन्तम् । विच्छायं विगतकान्तिम् ॥ २३-२४ ॥

हिन्दी अनुवाद

इन बड़े-बड़े उत्पातोंको देखकर मैं तो ऐसा समझता हूँ कि निश्चय ही यह भाग्यहीना भूमि भगवान्‌के उन चरणकमलों से, जिनका सौन्दर्य तथा जिनके ध्वजा, वज्र, अंकुशादि विलक्षण चिह्न और किसीमें भी नहीं हैं, रहित हो गयी है ॥ २१ ॥ ❋ ❋ शौनकजी! राजा युधिष्ठिर इन भयङ्कर उत्पातोंको देखकर मन-ही-मन चिन्तित हो रहे थे कि द्वारकासे लौटकर अर्जुन आये ॥ २२ ॥ ❋ ❋ युधिष्ठिरने देखा, अर्जुन इतने आतुर हो रहे हैं जितने पहले कभी नहीं देखे गये थे। मुँह लटका हुआ है, कमल-सरीखे नेत्रोंसे आँसू बह रहे हैं और शरीरमें बिल्कुल कान्ति नहीं है। उनको इस रूपमें अपने चरणोंमें पड़ा देखकर युधिष्ठिर घबरा गये। देवर्षि नारदकी बातें याद करके उन्होंने सुहृदोंके सामने ही अर्जुनसे पूछा ॥ २३-२४ ॥

युधिष्ठिर उवाच

कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते । मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः ॥ २५ ॥

शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः । मातुलः सानुजः कच्चित्कुशल्यानकदुन्दुभिः ॥ २६ ॥

सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः । आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयम् ॥ २७ ॥

कच्चिद्राजाऽऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः । हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वजना बांधवाः ॥ २५ ॥ ❋ ❋ किं वक्ष्यतीति शंकया व्यवहितक्रमेण पृच्छति शूर इत्यादिना । मारिषो मान्यो मातामहः शूरो नाम यादवः कुंत्याः पिता । आनकदुन्दुभिर्वसुदेवः ॥ २६ ॥ ❋ ❋ स्वसारः परस्परम् ।

---

१. प्रा० पा०—दशार्हास्ते कुकुरान्धक० ।

वसुदेवक्षेमेण तासामपि क्षेमं पृष्टमेव तथापि पृथक् पृच्छति । स्वयमिति ॥ २७ ॥ ❀ ❀ आहुक उग्रसेनः । असन्पुत्रो यस्य । अत एव जीवनमात्रमेव पृष्टम् । अनुजश्च देवकः हृदीकः । सुतः कृतवर्मा । जयन्तादयः कृष्णभ्रातरः ॥२८-२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मध्वादीनामर्हान्तानां द्वन्द्वो वृष्ण्यन्तानां वा ॥ २५ ॥ ❀ ❀ "मारिषः शाकभिद्यार्ये" इति मेदिनी ॥ २६-२७ ॥ ❀ ❀ असन्कृष्णद्वेषी कंसः पुत्रो यस्य स तादृशपुत्रत्वादद्यापि लज्जितोसौ कदाचिद्देहं त्यक्तवानित्यभिप्रायेणोक्तमसत्पुत्र इति । अत एवासत्पुत्रत्वादेव ॥ २८-२९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मधुभोजादयः सर्व्वे यदुवंशजाताः । एतेषां संक्षिप्तपरिचयो नवमस्कन्धीयत्रयोविंशाध्याये विशेषस्तु महाभारते द्रष्टव्य इति ॥ २५-३६ ॥

श्रीमद्वीरराघवव्याख्या

प्रश्नमेवाह कच्चिदित्यादिना यावदध्यायसमाप्ति । कच्चिदितीष्टप्रश्नद्योतकमव्ययं तावत्सामान्यतः सर्वानिष्टान् बन्धून् पृच्छति कच्चिदिति मध्वादयो यादवांतरविशेषाः । तत्र नवमे स्फुटं नोऽस्माकं स्वजनबन्धवः आनर्तपुर्यां द्वारकायां सुखं यथा तथा आसते कच्चिदासते किं तत्र मदिष्टमिति कच्चिच्छब्दं प्रयुंजानस्य भावः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ २५ ॥ ❀ ❀ अथोक्तविधार्जुनदर्शनेन कृष्णनिर्याणं सम्भाव्य तच्छ्रवणजो विषादः पश्चादेव भवत्वित्यभिप्रायेण तावत्क्रमशो विशेषेण पृच्छति शूर इत्यादिना । अस्माकं मातामहः शूरः हे पार्थ ! हे मारिष ! सविसर्गपाठे शूरविशेषणं मारिषशब्दः सौम्यशब्दपर्यायः, स्वस्ति तथा तथास्ते कच्चित्तथा नो मातुल आनकदुंदुभिर्वसुदेवः सानुजः कुशली कुशलमस्यास्तीति तथाभूत आस्ते कच्चित् वसुदेवस्यानुजास्तु देवभागो देवश्रवा आनकः संजयः शामकः कंकः समिको वत्सरो वृकश्चेति नव ॥ २६ ॥ ❀ ❀ सप्तेति स्वसार उग्रसेनस्येति शेषः, सप्त भगिन्यः तस्यानकदुन्दुभेः पत्न्यः मातुलान्यः अस्मन्मातुलस्य वसुदेवस्य स्त्रियः 'इन्द्रवरुणभवशर्वरुद्रेत्या'नुगागमे ङीपि च मातुलानीति शब्दो व्युत्पादितः, आत्मजैः सहिताः स्नुषाभिः सुतभार्याभिः सहिता देवकीप्रभृतयः देवकी श्रुतदेवा शान्तिदेवोपदेवा श्रीदेवा देवरक्षिता सहदेवाख्याः स्वयं क्षेमं यथा तथा आसते कच्चित् ॥ २७ ॥ ❀ ❀ असन् दुरात्मा कंसः पुत्रो यस्य स आहुकः उग्रसेनो राजा जीवति कच्चित् अस्याहुकस्य चानुजो देवकश्च जीवति कच्चिदित्यन्वयः । हृदीकस्य श्वफल्कस्य सुतोऽक्रूरः जयंतादयो ये च सत्यजिदादयो वसुदेवपुत्राः ते सर्वे कुशलमासते कच्चित् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आनर्तपुर्यां द्वारवत्यां मधवश्च भोजाश्च दशार्हाश्च अर्हाश्च सात्वताश्च अन्धकाश्च वृष्णयश्च मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः ॥ २५ ॥ ❀ ❀ मारिषः आर्यः मातामहः, मातुः सहोदरः आनकदुंदुभिर्वसुदेवः कच्चिच्छब्दः प्रश्नार्थे कुशली-सुखी ॥ २६ ॥ ❀ ❀ वसुदेवस्य सप्त स्वसारः सहोदर्यः कुशलवत्यः, किं तस्य वसुदेवस्य पत्न्यः अस्माकं मातुलभार्याः आत्मजैः सह वर्तमानाः, अनेन तत्पुत्राणां च कुशलप्रश्नः कृत इति ज्ञातव्यं, स्नुषाभिः पुत्रभार्याभिः सहिताः ॥ २७ ॥ ❀ ❀ असन् दुष्टः पुत्रः कंसनामा यस्य सोऽसत्पुत्रः आहुक उग्रसेनोऽस्यानुजो देवकः ससुतः कृतवर्माख्यपुत्रसहितो हृदीकः पुत्रैः सहितो अक्रूरो वा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।

असन् कृष्णद्वेषी पुत्रो यस्य सः । तादृशपुत्रत्वात् अद्यापि लज्जितोऽसौ कदाचिद्देहं वा त्यक्तवानित्यभिप्रायेण जीवतीत्युक्तम् ॥ २८-३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मारिषो मान्यः ॥ २६ ॥ ❀ ❀ स्वसारः परस्परं भगिन्यः ॥ २७ ॥ ❀ ❀ आहुकः उग्रसेनः । असन् पुत्रो यस्य अत एव जीवनमात्रं पृष्टम् । अनुजो देवकः । हृदीकसुतः कृतवर्मा । जयन्तादयः कृष्णभ्रातरः ॥ २८-२९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कच्चिदित्यव्ययमिष्टप्रश्नद्योतकम् ॥ २५ ॥ ❀ ❀ मारिषो मान्यः ॥ २६-२७ ॥ ❀ ❀ असन् दुष्टः कंसः पुत्रो यस्य सः आहुक उग्रसेनः तदनुजो देवकः सुतेन कृतवर्मणा सह हृदीकः जयन्तादयः श्रीकृष्णभ्रातरः ॥ २८-२९ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

आनर्तपुरी द्वारका । येन पूर्वं रक्षकत्वेन षड्विधा उक्ताः ते सुखिनः कच्चित् ? ते चेत् सुखिनः तदा समूलत्वात्स्वास्थ्यं स्वयमेव ज्ञानं भविष्यतीति प्रश्नः ॥ २५ ॥ ❋ ❋ तान् सामान्यतः प्रश्नविशेषेण पृच्छति शूर इति । मारिषः सूरः संबोधनं वा वाशब्देन वृद्धत्वात् तदकौशलेऽपि न चिंतेति सूचितम् । अत एव पूर्ववैलक्षण्याय अथ अग्रिमाणां कुशलमपेक्षत एव आनकदुंदुभिरिति सूचितम् ॥ २६ ॥ ❋ ❋ सहात्मजा इति समस्तं पदं परं न सादेशः ॥ २७ ॥ ❋ ❋ आहुकः पितृनाम्ना निरूपितः उग्रसेनः असन् पुत्रो वा अत एव दुःखापनोदनार्थं राज्येऽधिकृतः । हृदीकः ससुतः अक्रूरोऽपि जयंतादयो भ्रातरः सर्वे नवमे स्पष्टा भविष्यंति ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी ।

तत्प्रश्नमेव दर्शयति—कच्चिदिति विंशत्या यावदध्यायसमाप्ति । कच्चिदितीष्टप्रश्नद्योतकमव्ययम् । तावत्सामान्यतः सर्वानिष्टान् बन्धून्पृच्छति—मध्वादयो यादवावान्तरविशेषा नोऽस्माकं स्वजनाः बन्धवः आनर्तपुर्यां द्वारकायां सुखं यथा भवति तथा कच्चिदासते ? तच्च मदिष्टमिति कच्चिच्छब्देन द्योतितमेवमुत्तरत्रापि द्रष्टव्यम् ॥२५॥ ❋ ❋ अथोक्तविधार्जुनदर्शनेन कृष्णनिर्याणं सम्भाव्यापि तच्छ्रवणजो विषादः पश्चादेव भवत्वित्यभिप्रायेण व्यवहितक्रमेण पृच्छति–शूर इत्यादिना । मारिषः मान्योऽस्माकं मातामहः कच्चित्स्वस्ति सुखमास्ते ? । वाशब्दोऽनादरद्योतकस्तेन वृद्धत्वादकौशलेऽपि न चिन्तेति सूचयति । अथ सानुजः अनुजैर्देवभागादिभिः सहितोऽस्माकं मातुल आनकदुन्दुभिर्वसुदेवः कुशलमस्यास्तीति कुशली कच्चिदास्ते ? इत्यन्वयः ॥ २६ ॥ ❋ ❋ तस्य वसुदेवस्य पत्न्योऽस्मन्मातुलान्यः स्वसार उग्रसेनकन्याः परस्परं भगिन्यः देवकीप्रमुखाः देवकीश्रुतदेवोपदेवाशान्तिदेवाश्रीदेवादेवरक्षितासहदेवाख्याः सप्त आत्मजैः प्रद्युम्नादिभिः सहिताः सस्नुषाः स्नुषाभिः पुत्रभार्याभिः सहिताश्च कच्चित्स्वयं क्षेमं यथा भवति तथा आसते ? इत्यन्वयः ॥ २७ ॥ ❋ ❋ असन् दुष्टः कंसः पुत्रो यस्य स राजा आहुकः उग्रसेनो जीवति कच्चित् ? । अनेनासत्पुत्रत्वात्तस्य जीवनमपि दुर्लभमिति सूचितम् । अस्याहुकस्यानुजो देवकश्च कच्चिज्जीवति ? । हृदीकादयः कच्चित्कुशलमासते ? इत्युत्तरेणान्वयः । हृदीकसुतः कृतवर्मा । जयन्तादयः श्रीकृष्णभ्रातरः ॥ २८ ॥

हिन्दी अनुवाद

युधिष्ठिरने कहा—'भाई ! द्वारकापुरीमें हमारे स्वजनसम्बन्धी मधु, भोज, दशार्ह, आर्ह, सात्वत, अन्धक और वृष्णिवंशी यादव कुशलसे तो हैं ? ॥ २५ ॥ ❋ ❋ हमारे माननीय नाना शूरसेनजी प्रसन्न हैं ? अपने छोटे भाई सहित मामा वसुदेव जी तो कुशलपूर्वक हैं ? ॥ २६ ॥ ❋ ❋ उनकी पत्नियाँ हमारी मामी देवकी आदि सातों बहिनें अपने पुत्रों और बहुओंके साथ आनन्दसे तो हैं ? ॥ २७ ॥ ❋ ❋ जिनका पुत्र कंस बड़ा ही दुष्ट था, वे राजा उग्रसेन अपने छोटे भाई देवकके साथ जीवित तो हैं न ? हृदीक, उनके पुत्र कृतवर्मा, अक्रूर, जयन्त, गद, सारण तथा शत्रुजित् आदि यादव वीर सकुशल हैं न ? यादवोंके प्रभु बलरामजी तो आनन्दसे हैं ? ॥ २८-२९ ॥

आसते कुशलं कच्चिद्ये च शत्रुजिदादयः । कच्चिदास्ते सुखं रामो भगवान् सात्वतां प्रभुः ॥ २९ ॥
प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः । गम्भीररयोऽनिरुद्धो वर्धते भगवानुत ॥ ३० ॥
सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः । अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥ ३१ ॥
तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः । सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

सर्ववृष्णीनां मध्ये महारथः । गंभीररयो युद्धे महावेगः वर्धते मोदत इत्यर्थः ॥ ३० ॥ ❋ ❋ कृष्णस्यापत्यानि कार्ष्णयस्तेषु प्रवराः ॥ ३१ ॥ ❋ ❋ सुनन्दनन्दौ शीर्षण्यौ मुख्यौ येषां ते ॥ ३२-३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

गंभीररयोऽगाधज्ञानः । "रय गतौ" धातुः ॥ ३०-३१ ॥ ❋ ❋ शौरेः कृष्णस्य ॥ ३२-३३ ॥

श्रीमद्वीरराघवव्याख्या

सात्वतां भक्तानां पतिः सात्वच्छब्दो भक्तवाचकः सात्त्वतशब्दस्तु यादववाचक इति विवेकः । भगवान् बलरामः सुखमास्ते कच्चित् ॥ २९ ॥ ❋ ❋ अथ श्रीकृष्णपुत्रान्पृच्छति सर्ववृष्णीनां महारथः प्रद्युम्नः सुखमास्ते कच्चित् तथा भगवान्

गम्भीरवेगोऽनिरुद्धश्च वर्द्धते ॥ ३० ॥ ❀ ❀ जांबवतीसुत इति सांबस्य विशेषणं सुषेणादयः अन्ये च ऋषभादयः कार्ष्णिप्रवराः श्रीकृष्णसुतश्रेष्ठाः सपुत्रा अपि सुखमासत इत्युपरिष्टादन्वयः ॥ ३१ ॥ ❀ ❀ तथैव शौरेर्भगवतोऽनुचराः श्रुतदेवोद्धवादयः ये चान्ये सात्वतर्षभाः यादवश्रेष्ठाः सुनन्दादयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

ये शत्रुजिदादयः ते च सुखमासते किं रामो बलभद्रः ॥ २९ ॥ ❀ ❀ सर्ववृष्णीनां मध्ये महारथः गंभीररय उग्रवेगः अगाधज्ञानो वा रय-गतौ गतिर्ज्ञानम् ॥ ३० ॥ ❀ ❀ कार्ष्णीनां कृष्णसुतानां प्रवराः कार्ष्णिप्रवराः ॥ ३१ ॥ ❀ ❀ श्रुतसेनोद्धवादयः शौरेरनुचराः भृत्याः सुनन्दौ शीर्षण्यौ प्रधानौ येषां ते सुनन्दनन्दप्रधाना इत्यर्थः । नन्दशीर्षाद्या इति पाठे सुनन्दः नन्दशीर्षश्च आद्यौ येषान्ते तथोक्ता इति योजनीयम् । शीर्षशब्दः प्रधानवाची पार्षदेषु प्रधानौ सुनन्दनन्दौ आद्ये येषान्ते तथोक्ता इति वा ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गम्भीरयः युद्धे महावेगः ॥ ३०-३१ ॥ ❀ ❀ सुनन्दनंदौ शीर्षण्यौ मुख्यौ येषां ते ॥ ३२-३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवत्पुत्रपौत्रकुशलं पृच्छति प्रद्युम्न इत्यादिना । गम्भीररयो गम्भीरवेगः वर्द्धते मोदते ॥ ३०-३१ ॥ ❀ ❀ सुनन्दनंदौ शीर्षण्यौ शिरोमणी येषान्ते तथा ॥ ३२-३४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

रामो बलभद्रः सर्वेषां सौख्यं तन्मूलकमिति ते त्रयो भिन्नतया स्वातंत्र्येण निरूप्यंते ॥ २९ ॥ ❀ ❀ बलभद्रः प्रद्युम्नः अनिरुद्धश्च भगवानिति महारथ इति । भगवानिति च ॥ ३० ॥ ❀ ❀ सुषेणादयः पुत्राः कार्ष्णिप्रवराः कृष्णपुत्राः प्रवरा येषां प्रद्युम्नादिमित्राणि ऋषभादयः कार्ष्णिषु वा प्रवराः ॥ ३१ ॥ ❀ ❀ शौरेर्भगवतः सुनंदनंदौ शीर्षण्यौ श्रेष्ठौ येषां ते ॥ ३२-३३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

सात्वतां भक्तानां यादवानां च प्रभुः पालको भगवान् रामः कच्चित्सुखमास्ते ? इत्यन्वयः ॥ २९ ॥ ❀ ❀ सर्ववृष्णीनां महारथः प्रद्युम्नः कच्चित्सुखमास्ते ? उत तथा युद्धे गम्भीरो महान् रयो वेगो यस्य स भगवान् अनिरुद्धो वर्द्धते मोदते किम् ? ॥ ३० ॥ ❀ ❀ सुषेणादयः अन्ये च ऋषभादयः कार्ष्णिप्रवराः श्रीकृष्णपुत्रश्रेष्ठाः सपुत्राः स्वस्त्यासते ? इत्युपरिष्टादन्वयः ॥ ३१ ॥ ❀ ❀ तथैव शौरेः श्रीकृष्णस्यानुचराः सेवकाः श्रुतदेवोद्धवादयोऽन्ये च ये सुनन्दनन्दप्रमुखाः सात्वतर्षभा यादवश्रेष्ठाः ॥ ३२ ॥

हिन्दी अनुवाद

वृष्णिवंशके सर्वश्रेष्ठ महारथी प्रद्युम्न सुखसे तो हैं ? युद्धमें बड़ी फुर्ती दिखलानेवाले भगवान् अनिरुद्ध आनन्दसे हैं न ? ॥ ३० ॥ ❀ ❀ सुषेण, चारुदेष्ण, जाम्बवतीनन्दन साम्ब और अपने पुत्रोंके सहित ऋषभ आदि भगवान् श्रीकृष्णके अन्य सब पुत्र भी प्रसन्न हैं न ? ॥ ३१ ॥ ❀ ❀ भगवान् श्रीकृष्णके सेवक श्रुतदेव, उद्धव आदि और दूसरे सुनन्द-नन्द आदि प्रधान यदुवंशी, जो भगवान् श्रीकृष्ण और बलरामके बाहुबलसे सुरक्षित हैं, सबके सब सकुशल हैं न ? हमसे अत्यन्त प्रेम करनेवाले वे लोग कभी हमारा कुशल-मङ्गल भी पूछते हैं ? ॥ ३२-३३ ॥

अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः । अपि स्मरन्ति कुशलमस्माकं बद्धसौहृदाः ॥ ३३ ॥
भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः । कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥ ३४ ॥
मङ्गलाय च लोकानां क्षेमाय च भवाय च । आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् ॥ ३५ ॥
यद्बाहुदण्डगुप्तायां स्वपुर्यां यदवोऽर्चिताः । क्रीडन्ति परमानन्दं महापौरुषिका इव ॥ ३६ ॥

१. प्रा० पा०—हि । २. प्रा० पा०—दण्डैर्गु० । ३. प्रा० पा०—यदवोऽजिताः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

भगवति सुखमास्त इति प्रश्नस्यानौचित्यमाशंक्याह । पुर इत्यादि ॥ ३४ ॥ ❀ ❀ भगवतोऽत्रावस्थाने हि लोकानां मंगलं नान्यथेत्याशयेनाह चतुर्भिः । मंगलाय शुभाय क्षेमाय लब्धपालनाय भवायोद्भवाय । अनन्तसखो बलभद्रसहायः ॥ ३५ ॥ ❀ ❀ अर्चिताः सर्वैः पूजिताः परमानन्दं यथा भवति तथा । महापुरुषो विष्णुस्तदीया महापौरुषिका वैकुंठनाथानुचरा इव ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

भगवति कुशलप्रश्नस्यानौचित्यं मत्वाह-पुर इति । ब्रह्मणा वेदेन गम्यत इति ब्रह्मण्यः ब्रह्मशब्दोदिताः ब्राह्मणाः प्रिया अस्येति वा ब्रह्मण्यः । भवार्थविहिततद्धितप्रत्ययानां पाक्षिकवृद्ध्यभावार्थणित्वं वैकल्पिकमेव । "ब्रह्मण्यो ब्रह्मसाधौ स्याद्ब्रह्मदारुशनैश्चरे" इति मेदिनी ॥ ३४ ॥ ❀ ❀ मंगलाय प्रेमदानाय । क्षेमाय मुक्तये ॥ ३५-३६ ॥

श्रीमद्वीरराघवव्याख्या

कृष्णरामभुजा एवाश्रया येषां ते सर्वेऽपि आसते बद्धसौहृदाः तेऽस्माकमपि कुशलं स्मरंति किमित्यर्थः ॥ ३३ ॥ ❀ ❀ अथ भगवतः कुशलं पृच्छति । भगवान् कृष्णोऽपि पुरे सुधर्मायां सुहृद्भिर्वृतः सुखमास्ते कच्चित् ॥ ३४ ॥ ❀ ❀ ब्रह्मण्यो भक्तवत्सल इति विशेषणद्वयाभिप्रेतं पृच्छति मंगलायेति लोकानां भक्तजनानां मंगलार्थमनंतस्य सखा आद्यः पुमान्परमपुरुषः यदकुलांभोधावास्ते कच्चित् अनंतसख इत्यनेन बलरामसहित आस्ते किमिति पृष्टं भवति । क्षेमो लब्धसुखपरिपालनं, योगः स चालब्धसुखलाभरूपः तदुभयविधाय मंगलायेत्यर्थः ॥ ३५ ॥ ❀ ❀ तदेव प्रपंचयति यद्बाह्विति त्रिभिः । यस्य कृष्णस्य भगवतो बाहुदंडगुप्तायां स्वपुर्यां द्वारकायामर्चिताः सर्वैर्लोकैर्बहुमताः यादवाः परमानंदं यथा तथा क्रीडंति महापौरुषिका इव यक्षा इव ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सुधर्मायां सभायां ब्रह्मणा वेदेन गम्यत इति ब्रह्मण्यः विप्रप्रियो वा नित्यसुखस्य हरेः कुशलोद्देशे न मे प्रश्नः किंतु लोकसुखकरत्वोद्देश इत्ययमर्थोऽपिशब्देन दर्शितः ॥ ३४ ॥ ❀ ❀ एतमेवार्थं दर्शयति मंगलायेति, सः अनंतः शेषः सखा यस्य सोऽनंतसखः आद्यः पुमान् लोकानां मंगलाय शुभाय क्षेमाय प्राप्तपरिपालनाय भवाय वृद्धये यदुकुलसमुद्रे आस्ते कच्चिदित्यन्वयः । चशब्दाः मिथः समुच्चयार्थाः मंगलायनेकप्रयोजनार्थाः ॥ ३५ ॥ ❀ ❀ यदवो यस्य कृष्णस्य बाहुदंडैः रक्षितायां स्वपुर्यां क्रीडंतीत्यन्वयः । क इव परमानंदं प्राप्य महापौरुषिका इव मुक्ता इव परमानंदापरपर्यायं वा वैश्रवणबाहुदण्गुप्तं चैत्ररथं प्राप्य महापौरुषिका यक्षा इव वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मङ्गलायेति तैः ॥ ३५ ॥ ❀ ❀ यदिति । इवेति लौकिकदृष्ट्या । एवमग्रेऽपि ॥ ३६-३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवति कुशलप्रश्नस्यानौचित्यमाशंक्याह पुर इति ॥ ३४ ॥ ❀ ❀ मङ्गलाय प्रेमप्रदानाय । क्षेमाय केषाञ्चित् मुक्तिदानाय । भवाय सम्पदे च । अनन्तसखः बलभद्रसहायः ॥ ३५ ॥ ❀ ❀ अर्चिता देवैरपि । महापौरुषिकाः वैकुंठनाथानुचरा इव महद्भिः पौरुषैर्विजयिन इवेति वा ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आद्यः सर्वेभ्यः पूर्वो भगवान् श्रीकृष्णः मंगलाय केषांचिद्भवाय भोगरूपाय मंगलाय यदुकुलांभोधावास्ते ॥ ३५ ॥ ❀ ❀ परमानंदं यथा स्यात्तथा यद्बाहुमूलदण्डगुप्तायां क्रीडंति स यदुकुलांभोधावास्ते इति पूर्वेण सम्बन्धः । एवमग्रेऽपि महापौरुषिका इव जयविजयादय इव यद्वा अनन्वयालंकारः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भगवदीयत्वेन तेषां प्रश्न इत्यभिप्रायेणाह । स्वस्त्यासत इति रामपदं आवेशाभिप्रायेणाप्रतीच्याभिप्रायेण वा । यथा तेषां कुशलमस्माभिः स्मर्यते तेऽप्यस्मत्कुशलं स्मरंतीति संभावना । अनेन कुशलं सकामास्पृष्टं स्वयमतिकुशलाः परकुशलं स्मरंतीति ॥ ३३ ॥ ❀ ❀ भगवतः प्रश्नकुशलस्य कर्तुमयुक्तत्वेऽपि बहूनां रक्षणीयत्वेनोपस्थितत्वात् आराध्यानां ब्राह्मणानां

कालवशेनोत्पथानां रक्षणवैयग्र्यसंभवात् भक्तानामपि तथात्वाच्च शत्रुवधार्थमन्यत्र गमनसंभावनात् बहिर्मुखानां यादवानां परस्परं कलहसंभावनाच्च गोविंदोऽस्मदादीनामिंद्रः ब्रह्मण्यः ब्राह्मणहितः भक्तेषु वत्सलः पुरे द्वारकायां सुधर्मायां सभायां सुहृद्वृतः सुखमास्त इति । सुहृदां सुखं कुर्वन् आस्त इत्यर्थः ॥ ३४ ॥ ❀ ❀ स्यमंतकप्रसंगवत् असुखसंभावनात् किमनेन प्रश्नेनेत्यत आह मंगलाय चेति । भगवतो यद्द्वारकायां निवसनं तत्सर्वप्राणिनां विशेषतो द्वारकावासिनां निविष्टपदरक्षणाय च आधिक्याय च । ननु यदि तेषां भाग्यं मंगलजनकं न भवेत् तदा किं भगवत्स्थित्या इत्यत आह आद्य इति । मूलकारणभूत इत्यर्थः, कालं कर्म-स्वभावं चेति वाक्यात् सृष्टिसमये भगवता कार्यार्थं परिगृहीताः कालादयः । ततो जीवान् दृष्ट्वा तेभ्योऽदृष्टरूपं कर्म विभक्तम्, अतस्ते तादृशा एव अथवा यथापूर्वं विभक्ता इदानीमपि स्वेच्छया विभज्यंते तस्यैव विभाजकत्वात् । ननु कालेन यथा स्थानस्थिताः सर्वेऽप-कृष्यंते तद्भगवता कथं क्षेमस्तत्राह अनंतसख इति । अनंतः कालस्तस्य सखा । अनेन भगवदभिप्रेतस्य स्थानं नापकर्षतीत्युक्तम् । ननु प्राकृतस्योद्भवः पूर्वमेव सिद्धो यथा प्रकृतिपरिणामं कथमिदानीमुद्भवो भवेत्तत्राह पुमानिति, पूरुषाधिष्ठानेनैव नित्या प्रकृतिस्तथा परिणमति तस्येदानीमपि विद्यमानत्वादुद्भवेन परिणता भविष्यतीत्यर्थः । अतो भगवत्स्थितेरेतदर्थत्वात् कार्यं कुर्वन् तिष्ठतीति प्रश्नः । न ह्यस्य कर्हिचिदिति वाक्यात् द्वितीयः पक्षः स्थितौ क्लेशाभावश्च ध्वनिना सूचितः । अंभोधावनंतसख इति शेषशायी समुद्रे तिष्ठतीत्यर्थः ॥ ३५ ॥ ❀ ❀ एतस्मिन्नर्थे निदर्शनमाह पुरुषाणां स्त्रीणां श्लोकद्वयेन क्रमेण द्वारकायां सर्वे यादवाः स्वर्चिता एव तिष्ठंति चौरदशि शत्रुभयाभावात् स्व इति । कार्यांतराभावात् क्रीडंति भोजनशयनादिकमपि क्रीडनं कुर्वंति परमानंदो भवति तथा यथा परस्परं क्रीडाकर्तृणां स्वरूपं क्रीडया व्यज्यते तथा परमानन्दं परस्परार्थे विनियुंजत इत्यर्थः । भगवत्यात्मीयत्वस्य दृढत्वात् भगवत्कृतमात्मकृतमेव मन्यमानाः महापौरुषयुक्ता इव निःशंकाः क्रीडंतीत्यर्थः ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

भगवानपीत्यत्र अयुक्तत्वेपीति । भगवत्त्वादेवायुक्तत्वेपि । बहूनामिति । अस्मादृशामन्यदेशवासिनाम् । आराध्यानामित्यादि-नोक्तहेतुद्वयेनान्यत्र गमनसम्भवात् पुर आस्ते इति बहिर्मुखेत्यादिहेतोः सुधर्मायामास्ते इति भक्तानामपि कालवशेन तथात्वाच्च सुहृद्वृत इति प्रकारविशेषं पृच्छतीत्यर्थः । सुखपदप्रयोजनमाहुः स्यमन्तकेत्यादि ॥ ३४ ॥ ❀ ❀ मङ्गलायेत्यत्र, 'क्षेमाय भवाये' त्यत्र साधारणानामधिकाराभावं हृदि कृत्वाहुः निविष्टपदरक्षणायेति । ये द्वारकादौ निविष्टाः, तेषां स्थानरक्षार्थमधिकपदप्राप्त्यर्थं चेत्यर्थः । तादृशा इति । मङ्गलजनकादृष्टवन्त एव सृष्टाः सन्तीत्यर्थः । अथवेत्यादि । तथा चादृष्टाभावेपि तत्सम्पादनसामर्थ्यान्न दोष इत्यर्थः । यथा प्रकृतिपरिणाममित्येकं पदं सिद्ध इति क्रियाया विशेषणम्, ध्वनिनेति । काव्याङ्गप्रधानवाक्येन वा ॥ ३५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

रामकृष्णयोर्भुजावेव आश्रयो येषां ते सर्वेऽपि किं स्वस्त्यासते ? इति त्रयाणामन्वयः । अपि किं तेऽस्माकं कुशलं स्मरन्ति वाञ्छन्ति ? तत्र हेतुमाह-यतोऽस्मासु बद्धं सौहृदं प्रेम यैस्ते ॥ ३३ ॥ ❀ ❀ भगवान् ऐश्वर्यादिषड्गुणपूर्णो गोविन्दः प्राप्तकामधेन्वाद्यभिषेकः श्रीकृष्णोऽपि कच्चित् सुखमास्ते ? इत्यन्वयः । न च भगवतः परमानन्दस्वरूपस्यैव सुखप्रश्नासम्भव इति शङ्कनीयं, मनुष्यनाट्यानुसारेण कार्यार्थव्यग्रता सम्भवति तदप्यनिष्टं श्रमावहत्वादिति तद्व्यावृत्त्यर्थमाह-पुरे द्वारकायां तत्रापि सुधर्मायां सभायामिति । तत्रापि विरोधसम्भवात् तद्व्यावृत्त्यर्थमाह-सुहृद्भिर्मित्रैर्वृत इति । किमर्थमेवं मनुष्यनाट्यं स्वीकृतवानित्य-पेक्षायामाह-ब्रह्मण्य इति, ब्राह्मणभक्त इत्यर्थः । ब्राह्मणानां भक्तिप्रवर्त्तनेन लोकानां पुरुषार्थसिद्ध्यर्थमिति भावः । ननु भगवत-स्तेन किं प्रयोजनमित्यपेक्षायामाह-भक्तवत्सल इति । भक्तजनेषु कृपावत्त्वस्वभावेनैव तेषां पुरुषार्थसिद्धये तथा करोति, न स्वप्रयोजनमुद्दिश्येति भावः ॥ ३४ ॥ ❀ ❀ उक्तमेव स्पष्टयति-मङ्गलायेति । लोकानां भक्तजनानां मङ्गलाय परमानन्दाय क्षेमाय लब्धेष्टपरिपालनाय भवाय अलब्धेष्टलाभाय चानन्तः शेषावतारो बलभद्रः सखा सहायो यस्य सः आद्यः पुमान् श्रीकृष्णो यदुकुलमेव विस्तृतत्वादम्भोधिः समुद्रस्तस्मिन् कच्चिदास्ते ? इत्यन्वयः ॥ ३५ ॥ ❀ ❀ भक्तानां परमानन्दमेव प्रपञ्चयति-यदिति त्रिभिः । यस्य भगवतः श्रीकृष्णस्य बाहुदण्डगुप्तायां संरक्षितायां पुर्यां द्वारकायामर्चिताः सर्वैर्लोकपालादिभिरपि बहुमता महापौरुषिका भगवत्पार्षदा इव परमानन्दं यथा भवति तथा यदवः क्रीडन्ति यथेष्टभोगेन विलसन्तीत्यन्वयः ॥ ३६ ॥

हिन्दी अनुवाद

भक्तवत्सल ब्राह्मणभक्त भगवान् श्रीकृष्ण अपने स्वजनोंके साथ द्वारकाकी सुधर्मा-सभामें सुखपूर्वक विराजते हैं न ? ॥ ३४ ॥ ❀ ❀ वे आदिपुरुष बलरामजीके साथ संसारके परम मङ्गल, परम कल्याण और उन्नतिके लिये यदुवंशरूप क्षीरसागरमें विराजमान हैं । उन्हींके बाहुबलसे सुरक्षित द्वारकापुरीमें यदुवंशी लोग सारे संसारके द्वारा सम्मानित होकर बड़े आनन्दसे विष्णुभगवान्के पार्षदोंके समान विहार कर रहे हैं ॥ ३५-३६ ॥

यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ।
निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति वज्रायुधवल्लभोचिताः ॥ ३७ ॥
यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः ।
अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम् ॥ ३८ ॥
कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे । अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ॥ ३९ ॥
कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमङ्गलैः । न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यस्य पादशुश्रूषणमेव मुख्यं तपआदिभ्यः श्रेष्ठं यत्कर्म तेन । सत्यभामादयः । संख्ये युद्धे श्रीकृष्णबलेन त्रिदशान्देवान्निर्जित्य तदाशिषो देवभोग्यान्पारिजातादीन् वज्रायुधस्य वल्लभा शची तस्या उचिताः ॥ ३७ ॥ ❀ ❀ यद्बाहुदण्डप्रभावोपजीविनः सुधर्मामंघ्रिभिरधिक्रामन्ति स गोविन्दः सुखमास्ते इति गतपंचमश्लोकेनान्वयः ॥ ३८ ॥ ❀ ❀ इदानीं तस्यैव कुशलं पृच्छति कच्चिदिति षड्भिः । अनामयमारोग्यम् । न लब्धो मानो येन बन्धुभ्यः सकाशात् किं वा तैः प्रत्युतावज्ञातस्तिरस्कृतः । यतश्चिरोषितो बहुकालं तत्र स्थितः ॥ ३९ ॥ ❀ ❀ अभावैरिति छेदः । प्रेमशून्यैः । अमंगलैः परुषैः शब्दादिभिर्नाभिहतो न ताडितोऽसि किम् । यद्वा अर्थिभ्यः किमपि दास्यामीति नोक्तं किम् । यद्वा आशया सह यथा आशा भवति तथा दास्यामीति प्रतिश्रुतं यत्तन्न दत्तं किम् ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्य कृष्णस्य ॥ ३७ ॥ ❀ ❀ अत्र पूर्वत्राग्रे चांघ्रिशब्दस्थाने अंह्रिशब्द उपलभ्यते । प्राचीनपुस्तकेषु सोपि युक्त एव । उणादिषु चतुर्थपादे "एवं क्रयादयश्च" इत्यनेनोभयोरपि निपातनात् "अंह्रिरंघ्रिश्च चरणे" इति व्याख्यातत्वाच्च ॥ ३८ ॥ ❀ ❀ आदरातिशयेन संबुद्धिद्वयमत्र ॥ ३९ ॥ ❀ ❀ आदिना इंगितक्रिययोर्ग्रहः । वाचेंगितेन क्रियया वा न ताडित इत्यर्थः ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

मूलस्थितसत्याशब्दः सत्यभामावाचकः "विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य" इति 'ठाजादावूर्ध्वं द्वितीयादचः' इति सूत्रस्थवार्त्तिकेन भामेत्युत्तरपदस्य लुप्तत्वादिति ॥ ३७–४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीराधारमणदासगोस्वामिविरचितायां दीपनीव्याख्या-टिप्पण्यां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवव्याख्या

यस्य भगवतः पादयोः शुश्रूषणं परिचरणं मुख्यं कर्म तेन हेतुना सत्यभामादयः षोडशसहस्रयोषितः संख्ये युद्धे त्रिदशान् देशान् निर्जित्य वज्रमायुधं यस्य स इंद्रो वल्लभः प्रियो यासां तासां शच्यादीनामुचिताः आशिषः अभीष्टार्थाः पारिजातादयः भगवता आहृता इति शेषः तदित्यव्ययं सामान्याभिप्रायमेकत्वं नपुंसकत्वं वा ता आशिषः हरंति स्वीकुर्वंति ॥ ३७ ॥ ❀ ❀ यस्य भगवतो बाहुदंड एवाभ्युदयो येषां ते तदुपजीविनः तद्भृत्या यदुप्रवीराः न विद्यते कुतोऽपि भयं येषां तथाभूताः संतः सुरसत्तमानामिन्द्रादीनामुचिता तान्निर्जित्य बलादाहृतां सुधर्माख्यां सभामंघ्रिभिर्मुहुर्मुहुरधिक्रमंति ॥ ३८ ॥ ❀ ❀ तस्य निस्तेजस्कत्वादिहेतून्विकल्पयन् पृच्छति हे तात ! तवानामायमारोग्यं कच्चित् , मे मम भ्रष्टं तेजो यस्मात्तथाभूतो विभासि लक्ष्यसे । हे तात ! त्वं तत्र चिरमुषितः हेतुगर्भमिदं चिरमुषितत्वादलब्धो मानः संमानं येन तथाभूतः किम् अथवा तैरवज्ञातः । अवमतः किम् ॥ ३९ ॥ ❀ ❀ अभावैरिति च्छेदः, न विद्यते भावः सद्भावो येषां तैरमंगलैः वा शब्दादिविषयैर्नाभिहतः आशयाऽर्थिभ्यो याचकेभ्यः यत्प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तत्तेभ्यः किं वा न दत्तम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यस्य हरेः पादयोः शुश्रूषणं सेवालक्षणं तदेव मुख्यं कर्म तेन साधनेन सत्यादयः सत्यभामापुरःसराः द्व्यष्टसहस्रयोषितः षोडशसहस्रसंख्याः स्त्रियः संख्ये युद्धे त्रिदशानिंद्रादीन् निर्जित्य वज्रायुधस्येंद्रस्य वल्लभायाः शच्याः उचितास्तदाशिषस्तेषामिंद्रादीनामाशिषः पारिजातादिकाः हरंति आच्छिद्य स्वीकुर्वंतीत्यन्वयः ॥ ३७ ॥ ❀ ❀ यस्य हरेर्बाहुदंडानामभ्युदयो

दिग्विजयश्रीस्तामनुजीवितुं शीला अत एवाकुतोभयाः युदुप्रवीराः सुरसत्तमस्येंद्रस्य उचितां बाहुबलाहृतामानीतां सुधर्माख्यां सभामंघ्रिभिरनुदिनमधिक्रमंत्याक्रम्य तिष्ठंतीत्यन्वयः ॥ ३८ ॥ ❀ ❀ तव किमेतादृशदुःखनिमित्तमिति पृच्छतीत्याह कच्चिदिति । हे तात ! ते तव अनामयं कच्चित् सुखं किं ? कुतः कुशलप्रश्न इति तत्राह भ्रष्टतेजस्त्वे कारणं पृच्छति अलब्धेति अलब्धो मानो येन स तथोक्तः न केवलं मानाभावः, किंतु अवज्ञातश्च किमित्याह अवज्ञात इति पूर्वं चिरोषितोऽत्र किं वाक्षिप्रमादतः तद् ब्रूहीत्यर्थः ॥ ३९ ॥ ❀ ❀ अवज्ञा च इंगितैः क्रियया वाचा वा स्यात्तत्र तवैकेन सर्वैः किंवेत्यभिप्रेत्य पृच्छति कच्चिदिति । आदिशब्देनेंगितक्रिये गृहीते शब्दादिभिरवज्ञाने कारणं स्वदोषः परदोषो वा तत्र स्वदोषो नास्ति हीति पृच्छति न दत्तमिति । वित्ताशया प्राप्तेभ्योऽर्थिभ्यो युक्तं योग्यं दास्यामीति प्रतिज्ञातं तन्न दत्तं किमितीयं वै स्वदोषात् दत्वापि तदाशापूर्तिपर्यंतं न दत्तमितीयं परदोषात् उभयं च न प्राप्तं हीति वा वाक्यार्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कच्चित् ते इति । तेषां भवत्त्वमङ्गलं किञ्चिदस्यैव वा भवत्वित्यपेक्षायां प्रकरणमिदम् ॥ ३९ ॥ ❀ ❀ नाभिहतः किम् अपि त्वभिहत एवेत्यर्थः ॥ ४०–४४ ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निर्जित्य कृष्णबलेनैवेत्यर्थः त्रिदशान् तदाशिषः परिजातादीन् । वज्रायुधवल्लभा शची ॥ ३७ ॥ ❀ ❀ अभ्युदयं प्रभावमनुजीवितुं शीलं येषां ते । आहृतां स्वर्गलोकादित्यर्थः ॥ ३८ ॥ ❀ ❀ इदानीं किञ्चिदप्यवदतस्तस्यैव कुशलं पृच्छति कच्चिदिति षड्भिः । अनामयमारोग्यम् । बन्धुभ्यः सकाशादलब्धादरः प्रत्युतावज्ञातः चिरोषितः बहुकालं तत्र स्थितः ॥ ३९ ॥ ❀ ❀ अभावैः प्रेमशून्यैः नाभिहतः न ताडितोऽसि किम् । अर्थिभ्य आशया प्राप्त्याशया वर्त्तमानेभ्यो यद्दातुं प्रतिश्रुतं तन्न दत्तं न च उक्तं किमपि मौनं कृतमिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सत्यादयः सत्यभामादयः तत्तेन श्रीकृष्णेन भर्त्रा हेतुभूतेन संख्ये त्रिदशान्निर्जित्येन्द्रपत्न्युचिताः आशिषः पारिजातादीनिष्टार्थान् यस्य कृष्णस्य पादशुश्रूषणमुख्यकर्मणा हरंति कुर्वंति ॥ ३७ ॥ ❀ ❀ यस्य बाहुदण्डयोरभ्युदयः प्रभावस्तदनुजीविनः ॥ ३८ ॥ ❀ ❀ तदानीं तं निस्तेजस्कं दृष्ट्वा तमेव पृच्छति कच्चिदिति षड्भिः । हे तात ! मे मम त्वमपि तावद् भ्रष्टतेजा विभासि लक्ष्यसे । भ्रष्टतेजस्कत्वे हेतुं पृच्छति कच्चित्तेऽनामयमारोग्यम् ? बन्धुभ्योऽलब्धमानः किं वा तैरवज्ञातोऽसि किं वा यतश्चिरोषितस्तत्र ॥ ३९ ॥ ❀ ❀ अभावैर्भाववर्जितैरत एवामंगलैः शब्दादिभिर्वचनकर्मप्रेक्षणादिभिर्नाभिहतो न ताडितोऽसि किम् ? असौ दातुं समर्थ इत्याशयार्थिभिरुक्तं प्रार्थितं भवता न दत्तं किम् , कदाचित्स्वत एव प्रतिश्रुतमिदं दास्यामीति प्रतिज्ञातं न तद्दत्तं किम् ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

स्त्रीणामपि तथात्वमाह यत्पादेति । पादशुश्रूषणमेव मुख्यं कर्म अन्यत्तु लौकिकं लौकिकापेक्षया विहितस्यैव मुख्यतया करणात् स्वर्गे भोक्तव्ये धर्मपरित्यागेन भोगो मा भवत्विति विषयबलात् अत्रैव स्वर्गमानयेति सत्या सत्यभामा तस्याः प्रियत्वप्रसिद्धेः तद्भावमेवान्या अपि शिक्षंतीति सत्यादय इत्युक्तं, द्व्यष्टानां सहस्राणां समाहारः स्त्रीविवक्षाभावान्न ङीप् , त्रिदशान् स्वयं निर्जित्येति स्वेच्छया गरुडप्रेरणया अवगम्यते । स्त्रीणां स्त्रीकर्तृकभोगः स्वर्ग एव वांछित इति वज्रायुधवल्लभोचिता इत्याह । वज्रायुधस्य इन्द्रस्य वल्लभा इन्द्राणी तस्या उचितं परिजातादि ॥ ३७ ॥ ❀ ❀ एवमैहिकामुष्मिके एकत्र भुंजत इत्युक्तं पुरुषाणां त्वामुष्मिकस्य अनुक्तत्वात् । सत्यादिवदेकीकृत्य भोगासंभवात् आमुष्मिकं पृथगाह यद्बाहुदंडाभ्युदयानुजीविन इति । अन्यः स्वर्गतुल्यो विषयः स्वतः सिद्धः सभा परं न्यूनेति तद्भोगमाह बाहुदंडयोरभ्युदयः सर्वोत्कर्षस्तमनुजीवनं यस्य येषां ते यदुश्रेष्ठत्वेन स्वर्गे हि देवाः सकृत्स्नाताः तस्यां सभायां सकृदुपविशंति पादावस्पर्शयित्वा तादृशीं सभां मुहुः अंघ्रिभिराक्रमंति तत्रापि बलात् न हि लौकिकक्रियया सा लभ्या शताश्वमेधकर्तृलभ्यत्वात् तदाह सुरसत्तमोचितामिति सुरसत्तमा इन्द्रादयः ॥ ३८ ॥ ❀ ❀ एवं सर्वान् पृष्ट्वा अर्जुनगतवैक्लव्यहेतुमुद्भावयति कच्चित्तेनामयमिति । अनामयमारोग्यं कच्चिद् रोगेणाप्येवं भवति किंच तेजोऽपि तव गतमिति लक्ष्यते तत्र मम दृष्टिरेव प्रमाणमित्याह विभासीति तेजोगमनमंतःशोकात् पापाच्च भवति तत्र प्रथममंतःशोकहेतून् गणयति अलब्धमान इति । परगृहे मानाभावः अंतस्तापे हेतुः अवज्ञा च सुतराम् । अवज्ञायां हेतुः चिरोषित इति । श्वशुरगृहे बहुकालवासे अवज्ञा भवति, अवज्ञातः किं वेति संबंधः । अथवा चिरवास एव शोकहेतुः ॥ ३९ ॥ ❀ ❀ एवमंतःकरणशरीरकृतदोषेण ताप उपपादित इन्द्रियकृतदोषमाह कच्चिन्नाभिहत इति । अभावैः स्नेहशून्यैः रुक्षैः अमंगलैर्वा गालिदानैः

आदिशब्देन पंचापि गृहीताः। इदानीमधर्माणि संभावयति न दत्तमिति आशया यत् प्रतिश्रुतं "चतुर्थ्यर्थे बहुलं छंदसि" इति आशायै दास्यामीति प्रतिज्ञातं तदाशाभंगहेतुत्वाददानं सर्वमिष्टं दत्तवृत्तमिति ते तेजोहर्तृ भवति ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यत्पादशुश्रूषणेत्यत्र। अन्यथेति। भोगात्मकं तु। विषयबलादिति। शुश्रूषणविषयस्य भगवतो बलात् ॥ ३७ ॥ ❀ ❀ न दत्तमित्यत्र। अधर्माणीति 'स्याद्धर्ममस्त्रियामि'त्यमरः। तद्विरुद्धमधर्मम् ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यस्य भगवतः पादयोः शुश्रूषणं परिचरणमेव मुख्यं यत्कर्म तेन हेतुना सत्यभामादयो ह्यष्टसहस्रयोषितो भगवद्भार्याः सङ्ख्ये युद्धे त्रिदशान् देवान्निर्जित्य तदाशिषस्तेषां भोग्यान् पारिजातादीन् हरन्ति, भगवताऽऽहृता भुञ्जत इत्यर्थः। तासां देवोत्तमभोग्यत्वेन मनुष्यदुर्लभत्वं सूचयन्नाह–वज्रेति, वज्रमायुधं यस्य स इन्द्रो वल्लभः प्रियो यासां तासां शच्यादीनामुचिता इत्यर्थः ॥ ३७ ॥ ❀ ❀ यस्य भगवतो बाहुदण्डयोरभ्युदयः प्रभावस्तदनुजीविनो यदुप्रवीरा न विद्यते कुतोऽपि भयं येषां तथाभूताः सन्तः सुरसत्तमानामिन्द्रादीनामुचिताम् अत एव बलात् स्वप्रभावेणैव भगवताऽऽहृतां सुधर्माख्यां सभामङ्घ्रिभिर्मुहुर्मुहुः अधिक्रमन्ति इत्यन्वयः। प्रसिद्धमेवैतदिति द्योतयन्नाह–हीति ॥ ३८ ॥ ❀ ❀ इदानीमर्जुनं तेजस्त्वादिगुणरहितं दृष्ट्वा तद्धेतून् विकल्पयन् पृच्छति–कच्चिदिति षड्भिः। यथार्थमेव निर्भयतया त्वया वक्तव्यं ममाग्रे कथने तव न काचिच्चिन्ता यतस्त्वमनुजत्वेन पुत्रतुल्योऽसीति सूचयन् सम्बोधयति–हे तातेति। ते तव कच्चिदनामयमारोग्यमस्तीति शेषः। एवं प्रश्ने हेतुमाह–यतो मे मम त्वं भ्रष्टं तेजो यस्य तथाभूतो विभासीति। आदरातिशयं द्योतयन् पुनः सम्बोधयति–हे तातेति। वाऽथवा न लब्धं मानं सम्मानं येन तथाभूतः सन् प्रत्युत तैरेवावज्ञातः तिरस्कृतः। तत्रापि हेतुमाह–चिरोषित इति, यतो बहुकालं तत्र निवासं कृतवानित्यर्थः ॥ ३९ ॥ ❀ ❀ अभावैरिति च्छेदः। न विद्यते भावः प्रेमा येषां तैः प्रेमशून्यैः पुरुषैरमङ्गलैः कुत्सितैः शब्दादिभिः साधनैर्नाभिहतो न ताडितोऽसि कच्चित्? यद्वा आशया सह यथा आशा भवति तथा यदर्थिभ्यो याचमानेभ्यः प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तत्तेभ्यो न दत्तं किम्? यद्वा तेभ्यो दास्यामीति नोक्तमित्यन्वयः ॥ ४० ॥

हिन्दी अनुवाद

सत्यभामा आदि सोलह हजार रानियाँ प्रधानरूपसे उनके चरणकमलोंकी सेवामें ही रत रहकर उनके द्वारा युद्धमें इन्द्रादि देवताओंको भी हराकर इन्द्राणीके भोगयोग्य तथा उन्हींकी अभीष्ट पारिजातादि वस्तुओंका उपभोग करती हैं ॥ ३७ ॥ ❀ ❀ यदुवंशी वीर श्रीकृष्णके बाहुदण्डके प्रभावसे सुरक्षित रहकर निर्भय रहते हैं और बलपूर्वक लायी हुई बड़े-बड़े देवताओंके बैठने योग्य सुधर्मासभाको अपने चरणोंसे आक्रान्त करते हैं ॥ ३८ ॥ ❀ ❀ भाई अर्जुन! यह भी बताओ कि तुम स्वयं तो कुशलसे हो न? मुझे तुम श्रीहीन-से दीख रहे हो; वहाँ बहुत दिनोंतक रहे, कहीं तुम्हारे सम्मानमें तो किसी प्रकार की कमी नहीं हुई? किसीने तुम्हारा अपमान तो नहीं कर दिया? ॥ ३९ ॥ ❀ ❀ कहीं किसीने दुर्भावपूर्ण अमङ्गल शब्द आदिके द्वारा तुम्हारा चित्त तो नहीं दुखाया? अथवा किसी आशासे तुम्हारे पास आये हुए याचकोंको उनकी माँगी हुई वस्तु अथवा अपनी ओरसे कुछ देनेकी प्रतिज्ञा करके भी तुम नहीं दे सके? ॥ ४० ॥

कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम्। शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥ ४१ ॥
कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियम्। पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ॥ ४२ ॥
अपि स्वित्पर्यभुङ्क्थास्त्वं सम्भोज्यान् वृद्धबालकान्। जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमम् ॥ ४३ ॥
कच्चित् प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना। शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे युधिष्ठिरवितर्को नाम चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्यद्वा शरणागतं सत्त्वं प्राणिमात्रं न त्यक्तवानसि किम्। यतस्त्वं पूर्वं शरणप्रद आश्रयप्रदः ॥ ४१ ॥ ❀ ❀ अगम्यामिति छेदः। निन्दितां स्त्रियं नागमः किं न गतवानसि। असत्कृतां मलिनवस्त्रादिना नागमः किम्। नोत्तमैरनुत्तमैः

---

१. प्रा० पा०–रुदन्तं। २. प्रा० पा०–शरण्यो०। ३. प्रा० पा०–प्राचीने पाठे बालवृद्धकान्। ततः पश्चादयं श्लोकार्धोऽधिकः। 'उपेक्ष्यातिथिभृत्यांश्च गर्भिण्यातुरकन्यकाः।' ४. प्रा० पा०–कृतं वा यद्। ५. प्रा० पा०–पारीक्षितोपाख्याने युधिष्ठिरारिष्टदर्शनं चतु०।

समैरित्यर्थः। असमैरधमैर्वा किं न पराजितोऽसीत्यर्थः ॥ ४२ ॥ ❀ ❀ संभोजनार्हान्वृद्धान्बालकांश्च किंस्वित्पर्यभुङ्क्था-स्त्यक्त्वा भुक्तवानसि किम्। अक्षमं कर्तुमयोग्यं यत्तन्न कृतवानसि किम् ॥ ४३ ॥ ❀ ❀ नित्यं सदा प्रेष्ठतमेन हृदयेनांतरंगेण स्वबंधुना श्रीकृष्णेन रहितः शून्योऽस्मीति मन्यसेऽन्यथा ते रुक् मनःपीडा न घटेत ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"यस्याः पाणिर्न दत्तो वै पित्राद्यैश्च यथाविधि। सा चागम्या भवेन्नारी तां गत्वा नारकी भवेत्" इति स्मृतेः ॥ ४१ ॥ ❀ ❀ असत्कृतामित्यनेन रजोवती लक्ष्यते। तस्या एव संस्काराविधानात्। इत्यर्थ इति। नाकादित्वादत्रानादेशाभाव इति भावः। इत्यर्थ इति। नीचजातितोपि पराभवो महतां तेजोहानिकर इति भावः ॥ ४२ ॥ ❀ ❀ अक्षमं कर्तुमशक्यं शास्त्रनिषिद्धमेकादशीभोजनस्वर्णस्तेयेत्यादि किंचिज्जुगुप्सितं कर्म कृतवानित्यर्थः ॥ ४३ ॥ ❀ ❀ किं चैता आशंकास्त्वयि न संभवंति। संभवति चेदमिति नारदोक्तिं स्मरन्नाह–कच्चिदिति। इत्यर्थ इति। प्राणहीनदेहवद्दीपहीनमन्दिरवदहं प्रकाशहीनो जात इत्यात्मानं मन्यस इति भावः। किञ्च लोकशास्त्रविरुद्धाकर्तुर्विज्ञस्य तव श्रीकृष्णवियोगं विना विच्छायत्वं न घटत इत्याह। अन्यथा ते रुङ् मनोव्यथा नेत्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवव्याख्या

ब्राह्मणादीनन्यं च शरणोपसृतं शरणागतं जंतुं शरणप्रदः रक्षकस्त्वं नात्याक्षीः कच्चित् ॥ ४१ ॥ ❀ ❀ अगम्यां स्त्रियं त्वं नागमः न गतवान् कच्चित् गम्यामप्यसत्कृतां वा नागमः कच्चित्? अथ ननु भवान्पथ्युत्तमैरधमैर्वा जनैः पराजितो वा किम् ॥ ४२ ॥ ❀ ❀ संभोज्यान्सह भोक्तुं योग्यान् वृद्धान् बालकांश्च परीत्यऽयं वर्जनार्थं परित्यज्य त्वम् अभुंक्थाः अपि भुक्तवान् किं नोऽस्माकमक्षममसह्यं किंचिन्निंदितं कर्म कृतवान् किम् ॥ ४३ ॥ ❀ ❀ हृदयेन हृदयंगमेन नित्यं प्रियतमेनात्म-बंधुना श्रीकृष्णेन रहितः अत एव शून्यो निरानंदोऽसीति मन्यसे कच्चित्? अन्यथा उक्तहेतूनामन्यतमस्याभावे तव रुग्रोगः आधिर्न स्यात्। यद्वा रुग्दीप्तिरन्यथा प्रागिव नास्त्यतः केनचिदुक्तान्यतमेन हेतुना भवितव्यमित्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुर्दशोऽध्यायः ॥१४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ब्राह्मणादि सत्त्वं जीवजातं शरण्योपसृतं शरणार्थितया प्राप्तं शरणप्रदस्त्वं नात्याक्षीः रक्षामकृत्वा त्यक्तवानसि किम् अरक्षितैस्तैरवज्ञात इति वाक्यार्थः ॥ ४१ ॥ ❀ ❀ अगम्यां विधवां परस्त्रियं वा गम्याम् असत्कृतां वा स्नानादिसंस्कार-रहितां प्रदानकर्मरहितां वा स्त्रियं नागमः न गतवानसि किं, इयं च पार्थ एवंविधं कर्म करोतीति काचित्स्वदोषनिमित्तावज्ञा ॥ ४२ ॥ ❀ ❀ आवृद्धबालकान् बालावधि सर्वान् अभोज्यान् भोजयित्वा पर्यभुंक्थाः भुक्तवानसि किं, संभोज्यानिति पाठे सह भोक्तुं योग्यान् वर्जयित्वा भुक्तवानसीत्यर्थः। अक्षमं कर्तुमशक्यं तादृशं किंचित् शास्त्रे निषिद्धं कर्म कृतवान् किम् एकादशी-भोजनं स्वर्णस्तेयं निधानोद्धरणमित्यादि जुगुप्सितं कर्म ॥ ४३ ॥ ❀ ❀ उक्तं सर्वं विच्छायत्वे न पूर्णमिति मत्वा कारणांतरं पृच्छति अथेति। अथ यं नित्यं प्रेष्ठादिगुणत्वेन मन्यसे तेन सर्वतः प्रेष्ठेन प्रियतमेन हृदयेन मनोहारिणाऽऽत्मबंधुना स्वाभाविक-बंधुना कृष्णेन रहितो वियुक्तः सन् शून्योऽमङ्गलोऽसि कच्चित्ते तव शरीरकांतिस्त्वन्यथा न पूर्ववद्धि यस्मात्तस्मात्तेन वियुक्तोऽमङ्गलो भवितुमर्हसीति मन्ये नित्यं प्रेष्ठतमेन रहितः शून्योऽसीत्यात्मानं हृदयेन मन्यसे सर्वथा तव शरीरकांतिस्त्वन्यथा न पूर्ववदिति वा। प्रेष्ठेन तेन रहितः शून्योऽस्मीति मन्यसे अन्यथा तथा मननाभावे रुक् रोगो मनोव्यथा कथमिति वा। त्वं मन्निष्ठत्वादात्मैकनिष्ठत्वाच्च कृष्णप्रेष्ठत्वाच्च लोकशास्त्रनिषिद्धे न करोषि हि। तस्मात्तेन कृष्णेन वियुक्तत्वात्तव विच्छायत्वमिति मन्य इति हि-शब्दार्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शरणोपसृतं शरणागतं सत्त्वं प्राणिनम् ॥ ४१ ॥ ❀ ❀ अगम्यामिति छेदः। असत्कृतां मलिनवस्त्रादिकाम्। असमैर्बलेनातुल्यैर्न्यूनैरित्यर्थः। तत्रापि नोत्तमैर्जात्यापि न श्रेष्ठैर्नीचजातिभिरित्यर्थः ॥ ४२ ॥ ❀ ❀ परिवर्जने, वृद्धादीन् वर्जयित्वा भुक्तवानसि। अक्षममनुचितम् ॥ ४३ ॥ ❀ ❀ किञ्चैता आशङ्कास्त्वयि न सम्भवन्ति। सम्भवति चेदमिति

नारदोक्तं स्मरन्नाह कच्चिदिति। नित्यं सदा प्रेष्ठतमेनात्मनो बन्धुना कृष्णेन रहितोऽहं हृदयेन चेतसा शून्यो मूर्च्छितोऽस्मीति मन्यसे आत्मानमिति शेषः। सत्यं सत्यमेतदेव कारणं सत्यमिति भावः। अन्यथा ते रुक् मनःपीडा न घटते॥ ४४॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। चतुर्दशश्च प्रथमे सङ्गतः सङ्गतः सताम्॥ १४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नात्याक्षीर्न त्यक्तवानसि किम्॥ ४१॥ ❀ ❀ त्वमगम्यां स्त्रियं नागमः न गतवानसि किं कच्चित् गम्यां वाप्यसत्कृतां दूषितां नागमः कच्चित् न उत्तमाः नोत्तमाः इत्यर्थः, तथा च समैरसमैर्वा किं पराजितो भवान्॥ ४२॥ ❀ ❀ सम्भोज्यान् सहैव भोक्तुमर्हान् त्वमपि स्वित्पर्य्यभुंक्थाः वर्जयित्वा भुक्तवानसि? परिवर्जनार्थमव्ययम्॥ ४३॥ ❀ ❀ अथवा नित्यं प्रेष्ठतमेन हृदयेन हृदयंगमेन आत्मबन्धुना श्रीकृष्णेन रहितस्तस्मादेव शून्योऽस्मि निरानन्दोऽसीति त्वं मन्यसे कच्चित्। अन्यथोक्तहेत्वन्यतमाभावे ते रुङ् मनःपीडा न भवेत्॥ ४४॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्दशोध्यायः॥ १४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

दानं शरणागतरक्षा च क्षत्रियस्य मुख्यं शरणागतानामपि मध्ये त्वमेतान्न कच्चित्परिपालितवानसीत्याह कच्चिदिति। ब्राह्मणः सर्वावस्थासु परिपाल्यः स्त्रियश्च अन्ये वृद्धबालरोगिणः, अन्यदपि शरणोपसृतं सत्त्वं हरिणादीन्नात्याक्षीर्न त्याजितवानसि अन्यैः पीडायां समुपस्थितायां ततस्त्याजनमकृतमित्यर्थः॥ ४१॥ ❀ ❀ धर्मसूक्ष्माभावमाह—त्वन्ना पुरुषो भूत्वा अगम्याम्गमः कामवशेन अगम्यागमनं कृतं गम्यां वा असत्कृताम् अपमानं कृत्वा अगम्यामगम इति। शत्रुपराजयोऽप्येतद्धेतुरिति तमाह पराजित इति। अस्य पूर्वोक्तानुरूपत्वात् अथेति नोत्तमैर्नसमासः नासमैः अधमैः समैर्वा अधमैर्वा पराजित इत्यर्थः॥ ४२॥ ❀ ❀ मिष्टान्नादिकं पाचकेभ्यो बालादिभ्यः अदत्वा भोजनेऽप्येवं भवतीति लौकिकमाशंकते अपिस्विदिति। परिवर्जनात् संभोज्यान् वृद्धबालकानिति पाठे भोज्याः स्त्रियः संभोज्याः अथ तावुत्तरे विभाग इति न्यायेन ह्रस्वः आवृद्धबालकान् वा अन्यदपि जुगुप्सितं पश्चाज्जुगुप्साजनकम् अक्षमं च पश्चात्सोढुमशक्यं च॥ ४३॥ ❀ ❀ मुख्यं कारणमुत्प्रेक्षते कच्चिदिति। हृदयेन हृत् अयते प्रविशतीति हृदयः अंतर्यामी अथेति पूर्वव्यावृत्त्यर्थः आत्मत्वेन बंधुरहितः तादृशेन विरहितः शून्योऽसि अनित्यं मन्यसे आत्मनि गते देहादिस्थितेर्नित्यत्वात् अतिशोकेऽप्ययमेव हेतुः, अन्यथा ते न रुक् अन्यस्याविवेकिनः यादृशेऽपि चिंता भवति तव त्वयमेव हेतुरित्यर्थः॥ ४४॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे चतुर्दशोऽध्यायः॥ १४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

पराजितेत्यत्र। नसमास इति। नैकधेत्यादिवन्नशब्देन सह सुप्सुपेति समास इत्यर्थः॥ ४२॥ ❀ ❀ अपिस्वित् पर्यभुङ्क्था इत्यत्र। सम्भोज्येति ह्रस्वान्तपाठे प्रयोगसम्भवप्रकारमाहुः अथादावुत्तरे विभाग इति। इदं लक्षणग्रन्थस्य प्रातिशाख्यस्य सूत्रम्। तथा च 'अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनं परं' इति सूत्रेण यथा देवयते शीकयते इत्येवमादेः पदस्य देवाय ते यजमानाय शर्म, शीकाय ते स्वाहेत्येवं संहिताध्ययनदशायां दीर्घो बोध्यते, तेन न्यायेनात्रापि पदविभागे ह्रस्वः, संहितायामेव दीर्घ इत्यर्थः। सूत्रार्थस्तु, अथेत्यधिकारे। आदावुत्तरे पदादौ पदान्ते च संहितायां वर्तमानो दीर्घो यदि व्यञ्जनपरः स्यात्, तदा विभागे पदपाठे ह्रस्वमापद्यत इति त्रिभाष्यरत्ने व्याख्यातः। तत्र स्वारसिकमेकपद्यम्, अत्र तु समासकृतमित्यतोत्र न्यायपदमुक्तं ज्ञेयम्॥ ४३॥

इति श्रीप्रथमस्कन्धे सुबोधिनीप्रकाशेऽध्यायचतुर्दशविवरणम्॥ १४॥

श्रीगिरिधरकृता बालप्रबोधिनी

ब्राह्मणादीनन्यद्वा शरणोपसृतं शरणागतं सत्त्वं प्राणिमात्रं त्वं नात्याक्षीः न त्यक्तवानसि किम्? तत्त्यागेऽपि तव शोकेन निस्तेजस्त्वं सम्भवति यतस्त्वं शरणप्रदः आश्रयप्रदः, रक्षक इत्यर्थः॥ ४१॥ ❀ ❀ कच्चित् अगम्यां गन्तुमयोग्यां ब्राह्मणराजादीनां स्त्रियं नागमः न गतवानसि? असत्कृतां मलिनवस्त्रादिकां गम्यां वा स्त्रियं नागमः किम्? अथवा भवान् नोत्तमैः अनुत्तमैः समैः असमैरधमैर्वा जनैः पथि न पराजितोऽसीत्यर्थः॥ ४२॥ ❀ ❀ सम्भोज्यान् सहभोजनार्हान् वृद्धान् बालकांश्च अपिस्वित् किंस्वित् पर्यभुंक्थाः परिरत्र वर्जने परित्यज्य भुक्तवानसि किम्? अक्षमं कर्त्तुमयोग्यं यत्तत्किञ्चिज्जुगुप्सितं निन्दितं

कर्म तु न कृतवानसि किम् ? ॥ ४३ ॥ ❀ ❀ नैताः शङ्का एतस्मिन् सम्भवन्ति, सम्भवन्ति चेदिदमेवेति निश्चित्य मुख्यं कारणं पृच्छति–कच्चिदिति । अथवा नित्यं सर्वदा प्रेष्ठतमेन प्रियतमेन आत्मबन्धुना श्रीकृष्णेन रहितोऽत एव हृदयेन शून्यो निश्चेतनोऽस्मीति कच्चिन्मन्यसे ? अन्यथा एतद्विना ते तव महाधीरस्य रुक् मनःपीडा न सम्भवतीत्यर्थः ॥ ४४ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ चतुर्दशो गतो वृत्ति राज्ञः प्रश्ननिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

तुम सदा शरणागतोंकी रक्षा करते आये हो; कहीं किसी भी ब्राह्मण, बालक, गौ, बूढ़े, रोगी, अबला अथवा अन्य किसी प्राणीका, जो तुम्हारी शरणमें आया हो, तुमने त्याग तो नहीं कर दिया ? ॥ ४१ ॥ ❀ ❀ कहीं तुमने अगम्या स्त्रीसे समागम तो नहीं किया ? अथवा गमन करने योग्य स्त्रीके साथ असत्कारपूर्वक समागम तो न किया ? कहीं मार्गमें अपनेसे छोटे अथवा बराबरीवालोंसे हार तो नहीं गये ? ॥ ४२ ॥ ❀ ❀ अथवा भोजन कराने-योग्य बालक और बूढ़ोंको छोड़कर तुमने अकेले ही तो भोजन नहीं कर लिया ? मेरा विश्वास है कि तुमने ऐसा कोई निन्दित काम तो नहीं किया होगा, जो तुम्हारे योग्य न हो ॥ ४३ ॥ ❀ ❀ हो-न-हो अपने परम प्रियतम अभिन्न हृदय परम सुहृद् भगवान् श्रीकृष्णसे तुम रहित हो गये हो । इसीसे अपनेको शून्य मान रहे हो । इसके सिवा दूसरा कोई कारण नहीं हो सकता, जिससे तुमको इतनी मानसिक पीड़ा हो ॥ ४४ ॥

चौदहवाँ अध्याय समाप्त

अथ पञ्चदशोऽध्यायः

सूत उवाच

एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञाऽऽविकल्पितः। नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः ॥ १ ॥
शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः। विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुम् ॥ २ ॥
कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रयोः। परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ॥ ३ ॥
सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्। नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कलिप्रवेशमालक्ष्य धुरं न्यस्य परीक्षिति। आरुरोह नृपः स्वर्गमिति पंचदशेऽब्रवीत् ॥ १ ॥

कृष्णोऽर्जुनः। आविकल्पित इति छेदः। नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः। प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः। तत्र हेतवः—कृष्णविश्लेषेण कर्शितः कृशः कृतः ॥ १ ॥ ❀ ❀ शोकेन हेतुना वदनं च हृच्च ते एव सरोजे शुष्यती वदनहृत्सरोजे यस्य सः। हता प्रभा तेजो यस्य सः ॥ २ ॥ ❀ ❀ शुचः शोकाश्रूणि यान्युद्गच्छन्ति तानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिनामृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्धमधिकं यत्प्रेमौत्कण्ठ्यं तेन कातरो व्याकुलः सन्नृपमित्याहेत्युत्तरेणान्वयः ॥ ३ ॥ ❀ ❀ सख्यं हितैषिताम्। मैत्रीमुपकारिताम्। सौहृदं सुहृत्त्वं चात्सम्बन्धितां च। बाष्पेण कंठावरोधाद्गद्गदया ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

धुरं राज्यभारम्। न्यस्य स्थापयित्वा (१) भगवति भक्तिविधानार्थं दुःखकथनव्याजेन तन्महिमा प्रतिपाद्यतेऽत्राध्याये। इत्यर्थ इति। एवंभूतस्त्वमेवंभूतो वेत्यनेककोटिविषयीकृत इति भावः। तत्राप्रतिभाषणे। आपदेन लक्ष्येति तदर्थत्वेन लभ्यतेऽव्ययानामनेकार्थत्वादिति ॥ १-४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

धुरमिति। विपुलराज्यभारमित्यर्थः ॥ (१) १-३० ॥

श्रीमद्वीरराघवव्याख्या

एवमिति कृष्णस्य भगवतः सखा कृष्णोऽर्जुनो भ्रात्रा राज्ञा युधिष्ठिरेण नानाविधानां शंकानामास्पदं निमित्तं रूपं तेजोहीनं स्वकीयं रूपं प्रति विकल्पितः कृष्णस्य भगवतो विश्लेषेण वियोगेन कर्शितः ॥ १ ॥ ❀ ❀ विश्लेषजशोकेन शुष्यद्वदनं हृदयकमलं च यस्य सोऽत एव हता प्रभा यस्य तथाभूतः तमेव विभुं श्रीकृष्णमभिध्यायन्प्रतिभाषितुं प्रतिवक्तुं नाशक्नोन्न शशाक ॥ २ ॥ ❀ ❀ ततः कृच्छ्रेण महता प्रयत्नेन शुचः शोकान् संस्तभ्य नेत्रयोर्नेत्रे कर्मणि षष्ठी, पाणिना आमृज्य यद्वा संस्तभ्य मन इति शेषः, नेत्रयोः शुचः शोकाश्रूणि पाणिभ्यां संमृज्य परोक्षेणातिसमुन्नद्धः उत्कटः प्रणयः स्नेह औत्कण्ठ्यं प्रेमपूर्वकानुध्यानं विरहासहत्वदशा वा ताभ्यां कातरः अधीरः ॥ ३ ॥ ❀ ❀ बाष्पैर्गद्गदया कुण्ठीभूतया गिराऽग्रजं नृपतिमितीत्थं वक्ष्यमाणया रीत्याहेत्यन्वयः। कथंभूतः सन्सारथ्यादिषु कर्मसु सख्यादीन्संस्मरन् तत्र सौहृदं हितैषित्वं मित्रत्वं प्रियैषिता समानशीलत्वं सखित्वं नियोगादिकरणार्हत्वं वा मैत्रत्वम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवति भक्तिविधानार्थं दुःखकथनव्याजेन तन्महिमा प्रतिपाद्यतेऽस्मिन्नध्याये। कृष्णस्य विश्लेषेण वियोगेन कर्षितः उक्तनानाशंकाया आस्पदं शोकाग्निना शुष्यती वदनहृत्सरोजे यस्य तत्तथोक्तः। अत एव हतप्रभं नष्टकांतिरूपं आकारं दृष्ट्वा भ्रात्रा राज्ञा

---

१. प्रा० पा०—न शशाकास्य गदितुम्। २. प्रा० पा०—सुसंनद्ध०।

विकल्पितः एवं वा एवं वेति बहुकोटिविषयीकृतः तमेव विभुमनुध्यायन् निरंतरं चिन्तयन् कृष्णस्य सखार्जुनः प्रतिभाषितुं नाशक्नोदित्येकान्वयः ॥ १-२ ॥ ❀ ❀ शोकहेतूनामनेकत्वाद् बहुवचनं शुचः शोकान् कृच्छ्रेण संस्तभ्य पाणिना नेत्रजमश्रु आमृज्य कृष्णस्य पारोक्ष्येणाप्रत्यक्षत्वेन सन्नद्धेन प्रणयेन कदा नु पश्येयमित्यौत्कण्ठ्येन कातरः विवशः ॥ ३ ॥ ❀ ❀ सारथ्यादिषु कर्म सख्यादिकं सम्यक् स्मरन् अर्जुनो बाष्पेण निमित्तेन गद्गदया स्खलंत्या गिरा अग्रजं नृपमिति वक्ष्यमाणप्रकारेणाहेत्येकान्वयः ॥ ४ ॥

प्रथमतो नवमश्लोकावधि क्रमसन्दर्भो न (सं०)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रुत्वा नृपः पञ्चदशे विलापं धनञ्जयस्याथ कलेः प्रवेशम् । आलक्ष्य राज्येष्वभिषिच्य पौत्रं विरज्य भीमादियुतः प्रतस्थे ॥ १ ॥

कृष्णोऽर्ज्जुनः विकल्पितः एवंभूतो वा त्वमेवंभूतो वा इति विकल्पविषयीकृतः । तत्र हेतुः नानाशङ्कास्पदं रूपं दधात इति शेषः । कर्शितः कृशः कृतः ॥ १-२ ॥ ❀ ❀ शुचः शोकाश्रूणि यान्युद्गच्छन्ति तानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिना आमृज्य परोक्षेण परोक्षीभूतेन कृष्णेन हेतुनेत्यर्थः ॥ ३ ॥ ❀ ❀ प्रेम्णा परस्परप्राणत्वं परस्परहितैषित्वं सख्यम् । मैत्रीं दास्यमिश्रं सख्यम् । सौहृदं वात्सल्यमिश्रं सख्यम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं भ्रात्रा नानाशंकास्पदं निस्तेजस्कं रूपं प्रति विकल्पितोऽपि कृष्णस्य वियोगे कर्शितः कृष्णोऽर्जुनः तमेवानुध्यायन्प्रतिभाषितुं नाशक्नोदिति द्वितीयेनान्वयः ॥ १ ॥ ❀ ❀ कृष्णस्य विश्लेषजनितेन शोकेन हेतुना शुष्यती वदनहृत्सरोजे यस्य सः प्रतिभाषितुं प्रतिवक्तुं नाशक्नोन्न शशाक ॥ २ ॥ ❀ ❀ कृच्छ्रेण संस्तभ्य आत्मानमिति शेषः । नेत्रयोश्शुचः शोकाश्रूणि पाणिनामृज्य परोक्षेण हेतुना समुन्नद्धाभ्यां वृद्धाभ्यां प्रणयौत्कण्ठ्याभ्यां स्नेहवैक्लव्याभ्यां कातरो विह्वलोऽग्रजमित्याहेत्यग्रिमेणान्वयः ॥ ३ ॥ ❀ ❀ सारथ्यादिषु सारथ्यदौत्यानुगमनादिषु कर्मसु सख्यं समानशीलत्वं मैत्रीमुपकारित्वे सति प्रत्युपकारानपेक्षतां सौहृदं हितैषित्वं बाष्पेण कण्ठावरोधहेतुना गद्गदया स्खलिताक्षरया अग्रजं युधिष्ठिरमाह ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं चतुर्दशे हेतुं संभाव्याथ विनिश्चयात् । कृतकार्यः शास्त्ररीत्या मुक्तोऽभूदिति वर्ण्यते ॥ १ ॥
भार्याभ्रातृभिरत्रैव सहितो मुक्तिमेयिवान् । पंचदशे महाराजकृष्णभक्तिर्निरूप्यते ॥ २ ॥
प्रेमोपकारज्ञानानि जिष्णौ राजार्थमाह हि । एवं दृष्ट्वैव राजापि तथा बाभूवतः परः ॥ ३ ॥

प्रथममर्जुनप्रेमौत्कण्ठ्यमाह एवमिति त्रिभिः । एवं कृष्णोऽर्जुनः नानाशंकास्पदरूपं विकल्पितोऽपि नाशक्नोदिति संबंधः । कृष्णस्य भगवतः सखा सखिस्मरणेन व्याकुल इति एतद्द्वारा वा भयवानेतानुपसंहर्तुमागत इति कृष्णपदप्रयोगः । अत एव कृष्णसखः अन्यथा तत एव गमनमुचितं स्यात् । अर्जुनेनान्विताः सर्व इति भगवद्वाक्येऽपि तत एव गमनमुचितं स्यात् तावद्यूयमवेक्षध्वमिति नारदवाक्यं च सत्यं स्यात् । कृष्णौ यदुकुरूद्वहाविति च अवस्थाप्रकटनं तु विश्वासार्थं भगवतैव लीला, अन्यथा भगवतः सावशेषकार्यकर्तृत्वं स्यात् । अर्जुनस्य तेजःशोकश्चायुक्तः स्यात् । अत एव कृष्ण एवार्ज्जुने समाविष्टः समागत इति युधिष्ठिरमुक्तिरुचिता । नानाशंकानां पूर्वोक्तानामास्पदं रूपं प्रतिकल्पितः रूपमेवार्ज्जुन इति वा प्रतिभाषितुं नाशक्नोदिति वा संबंधः कृष्णस्य यो विश्लेषो वा तेन कर्शितः क्षीणः ॥ १ ॥ ❀ ❀ अनुत्तरे दृष्ट उपाय उक्तः, शोकेन शुष्यत् शोषमयत् शोकं प्राप्नुवत् हृत्सरोजं वदनसरोजं च यस्य अत एव हतप्रभः अंतस्तापे बहिः कांतेर्नाशनात् उत्तरध्यानयोर्युगपदुपस्थितावपि तमेव ध्यायन् उत्तरं वक्तुं नाशक्नोत्, तत्र हेतुः विभुमिति ॥ २ ॥ ❀ ❀ उत्तरापेक्षया न विषयस्य समर्थत्वात् शोकसहकृतं ध्यानं जायत इति शोकं दूरीकरोतीत्याह कृच्छ्रेणेति, शोकस्तु स्मरणहेतुक इति । स्मरणे विद्यमाने शोकनिवृत्तिः शक्या तथापि तादृशधर्मविशिष्टं भगवंतं तभ्यो धर्मेभ्यः पृथक्कृत्य पूर्वधर्मैः सह संयोज्य शोकदूरीकरणात् कृच्छ्रेणेत्युक्तं शुचः शोकाश्रूणि अभ्यंतरात्समागच्छंति तत्रैव स्तंभितानि नेत्रयोः समागतानि तानि पाणिनामृज्य आसमंतात् मृष्ट्वा एवं कृते पूर्वोक्तधर्मयोजनात् गतकालसहितः परोक्षशब्दवाच्यः अर्ज्जुनस्यांतःप्रविष्ट इत्याह परोक्षेणेति । अक्षात्परः परोक्षः स्वेच्छयैव पूर्वमिंद्रियगोचरोऽपि सांप्रतमिच्छाया अभावात् सौख्य एव तेन समुन्नद्धः आविष्टः सम्यङ्नद्ध अयोगोलकं वह्निनेव । अनेनांतः कथने बलमुक्तं भक्तिरपि पूर्वं प्रविष्टा स्वकार्यं करोतीत्याह–प्रणयेन स्नेहेन यदौत्कण्ठ्यं उद्गतकण्ठता कण्ठाभावः कण्ठमुद्रणमिति यावत्, तेन कातरः कदा वा वक्ष्यामीत्याकुलः भगवान् वर्तते इति वक्तव्यं भक्तिर्वर्तते इति न वक्तव्यमिति । एवं सति भगवत्स्मरणस्य प्राबल्यात् भक्तिहेतुकभगवत्स्मरणेन भगवति पुष्टे तत्तेजसा कण्ठमुद्रणे अपगते उद्गतेन बाष्पेण कण्ठे उद्गतता जाता ॥ ३ ॥ ❀ ❀ ततो भक्तिं दूरीकृत्य भगवंतमेवोररीकृत्य पूर्वधर्मयोगात् नातिस्मरन्नाहेत्याह सख्यमिति । समानशीलव्यसनत्वं सख्यं, गुह्यगोपन-

गुणप्रकटीकरणापद्गतात्यागादिधर्मवत्त्वं मैत्री, सारथ्यादिषु भगवता द्वयं कृतं सौहृदं च सुहृदो भावः सतामिव कृत्यं बंधुकृत्यं वा इदमपि प्रकटीकृत्य चकारात् स्वामित्वगुरुत्वे आदिशब्देन पार्षदसेवनदौत्यरीत्या सेवनअनुगमनादि असमासनिर्देशः पृथक्-स्मरणार्थ इति । वक्ष्यमाणं प्रकारं गिरा न त्वभिनयेन शोके तस्यापि संभवात् ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ पञ्चदशाध्यायं विवरिषवः सङ्गतेः प्रागेवोक्तत्वात्तां स्मारयन्तः प्रस्तुतस्यार्थमाहुः एवमित्यादि । विनिश्चयादिति ल्यब्लोपे पञ्चमी । शाबरीतावपि विशेषमाहुः भार्येत्यादि । तथा च यथा 'ये देवा यज्ञहन' इत्यादीन् मन्त्रानुक्त्वा 'इत्याहेमानेव लोकांस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेती'ति तत्पाठेन सपरिकरस्य यजमानस्य सुवर्गो लोकः श्राव्यते, तथात्र भक्त्येति निरूप्यत इत्यर्थः । अवान्तरवाक्यतात्पर्यमाहुः प्रेमेत्यादि । आहेति सूत आह । पर इति उत्कृष्ट भक्तः । एवं कृष्णसख इत्यत्र । भगवतो जनार्दनत्वेन कालरूपत्वेन च मुक्त्यवसरे देहत्यागे च तस्यावश्यकतया 'स्वलङ्कृताः कान्तसखावरूथशः' इत्यादिषु बहुव्रीहौ सखिशब्दस्य साहित्येपि प्रयोगात्तमाश्रित्य पक्षान्तरमाहुः एतद्द्वारा वेत्यादि । कृष्णसखः कृष्णसहित इत्यर्थः । एतस्यार्थस्याभिप्रेतत्वाय विपक्षे बाधकांस्तर्कानाहुः अन्यथेत्यादि । यद्यर्जुने भगवत्साहित्यं न स्यात्, तदा पूर्वोपदेशस्मरणस्येदानीमिव तदानीमपि सम्भवात्तत एव वैराग्यादेरपि सिद्धेस्तस्मादेव स्थानान्महा-प्रस्थानगमनमुचितं स्यात् । ननु 'अर्जुनेनान्विता' इति भगवद्वाक्याद्द्वाद्यानयनायागमनमिति नानेन साहित्यसिद्धिरित्यत आहुः अर्जुनेत्यादि । उक्तवाक्य इन्द्रप्रस्थस्योक्तत्वादिन्द्रप्रस्थादेव तथा स्यात्, न तु गजाह्वयात्तथेत्यर्थः । बाधकतर्कमुक्त्वा साधकतर्क-माहुः तावदित्यादि । नारदेन 'ह्यवशेषं प्रतीक्षत' इति भगवत्कृतां प्रतीक्षामुक्त्वैतेषां प्रतीक्षणमुक्तम् । मौसलस्यैवावशेषत्वाङ्गीकारे तस्य वृत्तत्वेन तद्वाक्यमप्यप्रमाणं स्यादिति तदर्थं तथेत्यर्थः । युक्त्यन्तरमाहुः कृष्णाविति । अश्विनोरिव नरनारायणयोरपि साहित्यस्य नियतत्वात्तदपि सत्यं स्यादित्यर्थः । ननु यदि सार्वदिकं साहित्यम्, तदा पराजयाद्यवस्था न स्युरिति नेदं युक्तमिति शङ्कायामाहुः अवस्थेत्यादि । सर्वत्र भगवत्तेजसैव कार्यसिद्धिः नान्यथेत्यर्जुनस्य विश्वासार्थं भगवतैव लीला सा कृता, अन्यथा असुरमोहाद्यर्थं अज्ञत्वादिकं स्वस्मिन् पूर्वं प्रकटीकृतं तथेत्यर्थः । अवस्थाप्रकटनस्य लीलात्वे विश्वासार्थत्वे च युक्तिमाहुः अन्यथे-त्यादि । यद्येवमर्जुनावस्थां न प्रकटयेत्, तदा तस्याहङ्कारे मुख्यभावेन तथा स्यादित्यर्थः । ननु मुक्तेर्दैवकार्यत्वात्तदानेपि न सावशेषकर्तृत्वमिति शङ्कायामाहुः अर्जुनस्येत्यादि । तदभावे मास्तु सावशेषकर्तृत्वम्, तथापि तस्याहङ्कारसत्तायां तेजःशोकस्ते-जोविषयको यः शोकः स न युक्तः स्यात्, अतो विश्वासार्थं सा लीलेत्यर्थः । फलमपि गमकत्वेनात्राहुः अत एवेति । 'एवं गृहेषु सक्ताना'मित्याद्युक्तं संसारवेशं प्राप्यापीत्यर्थः । रूपमेवार्जुन इति । 'इन्द्रो देवते'तिवल्लिङ्गभेदेपि विशेषणविशेष्यभावः ॥ १ ॥ ❀ ❀ कृच्छ्रेणेत्यत्र । ननु भगवतो नित्यत्वव्यापकत्वे अनुभवन्तमर्जुनं प्रति भगवतः परोक्षत्वाभावात् कथं तदुक्तिरित्यत आहुः स्वेच्छयेत्यादि । तथा च तदानीं तादृशेच्छया तथेत्यर्थः ॥ ३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कृष्णस्य गमनं श्रुत्वा राज्यं दत्त्वा परीक्षिते । मुक्तो युधिष्ठिरश्चेति पञ्चदशे निरूप्यते ॥ १ ॥

अत्रा राज्ञा युधिष्ठिरेणैवं नानाशङ्कानामास्पदं निमित्तभूतं स्वकीयं रूपमालक्ष्य विकल्पितो विकल्पेन पृष्टोऽपि कृष्णोऽ-र्जुनः तमेव विभुं व्यापकं श्रीकृष्णमनुध्यायन् प्रतिभाषितुमुत्तरं वक्तुं नाशक्नोदिति द्वयोरन्वयः । अशक्तौ हेतुमाह–कृष्णेति । कृष्णस्य यो विश्लेषो वियोगस्तेन कर्शितः कृशीकृत इत्यर्थः । कृष्णविश्लेषशोकेन हेतुना वदनं च हृच्च ते एव सरोजे, शुष्यती वदनहृत्सरोजे यस्य सः । अत एव हता प्रभा तेजो यस्य सः ॥ १-२ ॥ ❀ ❀ ततश्च कृच्छ्रेण अतिप्रबलेन शुचः शोकाश्रूणि यान्युद्गच्छन्ति तानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिनाऽऽमृज्य परोक्षेण दर्शनागोचरेण कृष्णेन हेतुना समुद्भवमधिकं यत्प्रणयौत्कण्ठ्यं तेन कातरो व्याकुलो नृपमित्याहेत्युत्तरेणान्वयः ॥ ३ ॥ ❀ ❀ सख्यं समानशीलत्वम्, मैत्रीमुपकारम्, सौहृदं बन्धुकृत्यं च सारथ्यादिषु कर्मसु यद्भगवता कृतं तत्संस्मरन् अत एव बाष्पेण गद्गदया कुण्ठीभूतया गिरा नृपमग्रजं युधिष्ठिरं प्रति इति वक्ष्यमाणमाहेत्यन्वयः ॥ ४ ॥

हिन्दी अनुवाद

कृष्णविरहव्यथित पाण्डवोंका परीक्षित्को राज्य देकर स्वर्ग सिधारना

सूतजी कहते हैं—भगवान् श्रीकृष्णके प्यारे सखा अर्जुन एक तो पहले ही श्रीकृष्णके विरहसे कृश हो रहे थे, इसपर राजा युधिष्ठिरने उनकी विषादग्रस्त मुद्रा देखकर उसके विषयमें कई प्रकारकी आशङ्काएँ करते हुए प्रश्नोंकी झड़ी लगा दी ॥ १ ॥ ❀ ❀ शोकसे अर्जुनका मुख और हृदय-कमल सूख गया था, चेहरा फीका पड़ गया था । वे उन्हीं भगवान् श्रीकृष्णके ध्यानमें ऐसे डूब रहे थे कि बड़े भाईके प्रश्नोंका कुछ भी उत्तर न दे सके ॥ २ ॥ ❀ ❀ श्रीकृष्णकी आँखोंसे ओझल हो

जानेके कारण बढ़ी हुई प्रेमजनित उत्कण्ठाके परवश हो रहे थे। रथ हाँकने, टहलने आदिके समय भगवान्‌ने उनके साथ जो मित्रता, अभिन्नहृदयता और प्रेमसे भरे हुए व्यवहार किये थे, उनकी याद-पर-याद आ रही थी; बड़े कष्टसे उन्होंने अपने शोक-का वेग रोका, हाथसे नेत्रोंके आँसू पोंछे और फिर रुँधे हुए गलेसे अपने बड़े भाई महाराज युधिष्ठिरसे कहा ॥ ३-४ ॥

अर्जुन उवाच

वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा । येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥ ५ ॥
यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः । उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥ ६ ॥
यत्संश्रयाद् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ।
तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥ ७ ॥
यत्संनिधावहमु खाण्डवमग्नयेऽदामिन्द्रं च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

येन मां वंचयता । देवान्विस्मापयति यत् ॥ ५ ॥ ❀ ❀ यस्य क्षणवियोगेनेत्यादियच्छब्दानां तेनाहमद्य मुषित इति सप्तमश्लोकस्थेन तच्छब्देन सम्बन्धः । प्रियस्याप्यप्रियत्वे दृष्टान्तः । उक्थेन प्राणेन । एष पित्रादिः ॥ ६ ॥ ❀ ❀ श्रीकृष्णो-पकारानतनुस्मरति यत्संश्रयादिति दशभिः । यस्य संश्रयाद्बलात्स्मरेण कामेन दुर्मदानामतिमत्तानां तेजः प्रभावो हृतं धनुर्ग्रहणे-नैव पश्चात्तद्धनुः सज्जीकृतं च तेन च मत्स्यो यन्त्रोपरि भ्रमन्विद्धस्ततस्तान्विजित्य द्रौपदी प्राप्ता च ॥ ७ ॥ ❀ ❀ उ इति विस्मये, खाण्डवमिन्द्रस्य वनमग्नयेऽदां दत्तवानस्मि । खांडवदाहे रक्षितेन मयेन कृता च सभा लब्धा। अद्भुतशिल्परूपा माया यस्यां सा । तेऽध्वरे यागे राजसूये ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महाराजेति । तवापि महाराजत्वं तत्कृतमेवेति भावः ॥ ५ ॥ ❀ ❀ "उक्थं कर्मफले प्राणे वेदभागे वचस्यपि" इति निरुक्तिः ॥ ६ ॥ ❀ ❀ द्रुपदगेहं पाञ्चालपुरम् । राज्ञां जरासन्धादीनाम् । अधिगता वेदाध्ययनवदादरेण प्राप्तेत्यर्थः । "कृष्णा स्याद्द्रौपदी कालिन्दी सुभद्रा कणा स्त्रियाम् । नीली द्राक्षा कृष्णपत्नी" इति निरुक्तिः ॥ ७ ॥ ❀ ❀ अद्भुतानि शिल्पानि जले स्थलप्रत्ययादीनि कौशलानि यस्यां सा माया यस्यां सा सभेति । यत्सभायामिति शेषः । नृपतयस्तेऽ-ध्वरे बलिमहरन् ॥ ८-९ ॥

श्रीमद्वीरराघवव्याख्या

उक्तिमेवाह वंचित इति त्रयोविंशत्या । हे महाराज ! अहं बंधुरूपतां प्राप्तेन हरिणा आश्रितार्तिहरेण साक्षाद्भगवता वंचितोऽस्मि रहितोऽस्मीत्यर्थः । येनेत्यादीनां यच्छब्दानां तेनाहमस्मि मुषितः पुरुषेण भूम्नेत्युपरिष्टादन्वयः । देवानामपि विस्मापन-माश्चर्यकरं यन्महन्मत्तेजो येनापहृतं, देवेति राज्ञः सम्बोधनं वा ॥ ५ ॥ ❀ ❀ यस्य च भगवतः क्षणमात्रवियोगेनाप्यप्रियं दर्शनं यस्य तथाभूतोऽयं मत्प्रभृतिलोको भवति तथैव लोकः उक्थेन प्राणेन रहितः मृतकः शव प्रोच्यते अपिशब्दाददर्शनयोग्यश्च प्रोच्यते तद्वत् ॥ ६ ॥ ❀ ❀ यत्संश्रयादिति अस्मदीयशौर्यादिकं यदधीनं तेन वंचितोऽस्मीति समुदायार्थः । द्रुपदगेहे द्रौपद्याः स्वयंवराख्ये स्वयंवरप्रारम्भे स्मरेण कामेन हेतुना दुष्टो मदो येषान्तेषामुपागतानां राज्ञां तेजो मया यस्य भगवतः संश्रयाद्धेतोरपहृतं खलु तथा सज्जीकृतेन समारोपितज्यागुणकेन धनुषा मत्स्याकारो यंत्रविशेषश्चाभिहतश्छिन्नः कृष्णा द्रौपदी चाधिगता लब्धा च ॥७॥ ❀ ❀ यत्संनिधाविति । यस्य भगवतः संनिधौ हेतुभूतेऽमरगणैः सहितमिंद्रं जवेन विजित्य खाण्डवाख्यं वनमहमग्नयेऽदाम् दत्तवानस्मि अहमु इति छेदः उशब्दः निपातो विस्मयद्योतकः । अत्याश्चर्यमयमेवंविधं कर्म कृतवानस्मीति भावः । तथा मयकृता मयेन निर्मिता अद्भुतान्याश्चर्यभूतानि शिल्पानि प्रतिमादीनि माया अन्यान्यप्याश्चर्याणि यस्यां सा सभा मया लब्धा अद्भुतानि शिल्पानि पाणिपादादिनैपुण्यानि यासु ता माया आश्चर्यरूपाः प्रतिमादयो यस्यामिति वा, तथा मत्संनिधौ ते तवाध्वरेऽश्वमेधे नृपतयो दिग्भ्यो बलिमुपाहरन् आहृत्य समर्पयामासुः ॥ ८ ॥

---

१. प्राचीने पुस्तके नास्ति । २. प्रा॰ पा॰—धनुषा विजिता ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

देवानपि विस्मापयतीति देवविस्मापनं महत्तेजः सामर्थ्यलक्षणं येन कृष्णेनापहृतं सहैव नीतं तेन बंधुरूपिणा प्रधानबंधुना हरिणा अर्जुनोऽहं वंचित इत्येकान्वयः। वंचित इति हरौ न दोष आरोप्यते, किंतु तेन वियुक्त इति तद्वियोगमात्रं वियोगोऽपि गृहीतमानुषाकारेण न साक्षात्सर्वहृदि सन्निहितत्वात्तस्येत्यभिप्रायेण बंधुरूपिणेत्युक्तं तस्माच्छोकाच्छून्योऽस्मीति भावः ॥ ५ ॥ ❀ ❀ एतमर्थं सदृष्टांतमाह यस्येति । यथोक्थेन प्राणेन रहित एष देहो मृतकः कुणप इति प्रोच्यते तथा यस्य कृष्णस्य क्षणवियोगेन लोकोऽप्यप्रियममंगलं पश्यतीत्यप्रियदर्शनः यस्मात्तस्माच्छून्यत्वमित्यर्थः। प्राणत्यागे पित्रादिशरीरमपि पुत्रादेरप्रियत्वात् बहिर्भूमौ निक्षिप्यते यथा तथाहमपि बंधुभिरप्रियत्वादवज्ञात इव दृष्ट इति भावः। ममायं लोको देहोऽप्रियदर्शनो जात इति वा । प्रथमहिशब्देन प्राणवियुक्तदेहस्य कुणपत्वं श्रुतिसिद्धमिति दर्शयति न केवलमहमेवाप्रियदर्शनः, किं त्वयं लोको बंधुजनो द्वारवत्यादिप्रदेशो वा उक्थेन पित्रादिना वियुक्त एवं बंधुजनोऽपीति दृष्टांतयोजना ॥ ६ ॥ ❀ ❀ यत्संश्रयात् सन्निधावित्यादियदनुभावनिरस्तचित्ताइत्यंतानां श्लोकानां तेनाहमद्य मुषित इति मध्यगतेन श्लोकेन मध्यकुलकन्यायेनान्वयः। यत्संश्रयाद्यस्य कृष्णस्य सेवाबलात् द्रुपदगृहे पांचालपुरे स्वयंवरमुखे स्वयंवरश्रेष्ठ उपागतानां मिलितानां सत्कारणेन जातो दृष्टो मदो येषां ते तथोक्ताः तेषां राज्ञां जरासंधादीनां तेजोऽभिमानलक्षणं मयेदृशेन हृतं, किंच सज्जीकृतेन धनुषा यंत्रविहितो मत्स्यो विहतः पातितश्च, किंच मया कृष्णा द्रौपदी चाधिगता वेदाध्ययनवदादरेण प्राप्तेत्येकान्वयः ॥ ७ ॥ ❀ ❀ यस्य सन्निधावहमेवामरगणैः सह वर्त्तमानमिन्द्रं च तरसा वेगेन बलेन च विजित्य खांडवाख्यं वनमपि याचमानाय अग्नये अदां दत्तवानस्मि अद्भुतानि शिल्पानि स्थले जलप्रत्ययादीनि मायाश्च यस्यां संति सा तथोक्ता मयनाम्ना तक्ष्णा कृता सभा मया लब्धा यत्सन्निधानविशेषादिति योज्यम्। ते तवाध्वरे यज्ञे राजसूयलक्षणे दिग्भ्य आगतनृपतयो बलिं ते तुभ्यमहरन् ददुरित्यन्वयः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

वञ्चितस्त्यक्तः येन मां त्यक्तवता मम तेजोऽपहृतं तेन तद्दत्तमेव तेज इति भावः ॥ ५ ॥ ❀ ❀ यस्य क्षणवियोगेनेत्यादि । यच्छब्दानां तेनाहमद्य मुषित इति सप्तमश्लोकस्थेन तच्छब्देनान्वयः। प्रियस्याप्यप्रियत्वे दृष्टान्तः उक्थेन प्राणेन । एष पित्रादिः ॥ ६ ॥ ❀ ❀ यस्याश्रयात् स्वयंवरे राज्ञां तेजो हृत्वा द्रौपदी प्राप्ता ॥ ७ ॥ ❀ ❀ उ इति विस्मये । खाण्डवमिन्द्रस्य वनम् । खाण्डवदाहे रक्षितेन मयेन कृता सभा लब्धा । अद्भुते शिल्पमाये यस्यां सा अध्वरे राजसूये ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेवाह वंचितोऽस्मीति चतुर्विंशतिश्लोकैः। हरिणा वञ्चितोऽस्मि येनेत्यादियच्छब्दानां तेनाहं मुषित इत्यनेनान्वयः ॥५॥ ❀ ❀ उक्थेन प्राणेन ॥ ६ ॥ ❀ ❀ स्वयंवरस्य मुखे प्रारम्भे उपागतानां राज्ञां यत्संश्रयात्तेजो हृतमपहृतं तथा सज्जीकृतेन धनुषा मयाभिहतः छिन्नः तथा कृष्णा द्रौपदी अधिगता लब्धा ॥ ७ ॥ ❀ ❀ यथा मणिविशेषसंनिधावयो नृत्यति तथा यस्य संनिधिमात्रतो मयेदं कृतमिति विस्मिततयाह यदिति। यद्यस्य संनिधौ उ इति विस्मये अहमग्नये विप्ररूपेण याचमानाय खाण्डवमिंद्रवनमदां दत्तवानस्मि तत्राग्निदाहभयत्रातमयकृताद्भुतशिल्पैर्माया आश्चर्यता यस्यां सा सभा च लब्धा ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

राज्ञा द्वयं पृष्टं यादवानां कुशलमर्जुनशोकहेतुश्च तत्र सन्निहितत्वात् उक्तन्यायेन भक्तेस्तिरोहितत्वाच्च शोकहेतूनाह वंचित इत्यादि । 'भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्' इत्यनेन भगवता वंचितस्य ममेयं गतिरित्यर्थः। वचनप्रकारमाह येनेति । ननु भगवान् परमकृपालुः कथं वंचयति तत्राह हरिणेति, सर्वदुःखहर्त्ता यदि इदानीमर्जुनस्य तेजोहरणनिमित्तसांनिध्यं किमर्थं कृतमित्याशंक्याह बंधुरूपिणेति । तत्रापि भगवतो वचनं कृतं बंधुरूपमस्यास्तीति बंधुरूपी मातुलपुत्र इव, ततो लौकिकव्यवहारेण निकटे तेजोऽपहृतमित्यर्थः। ननु स्थितेऽपि तेजसि देवानां रक्षकत्वात् किमनेनानिष्टं भवेदित्यत आह देवविस्मापनमिति, देवान् विस्मापयतीति । ननु वा मन्यमानत्वात् न शंकेत्यत आह महदिति ॥ ५ ॥ ❀ ❀ ननु तेजसि गते मंत्रादीनां विद्यमानत्वात् का तव चिंतेत्यत आह यस्येति । यस्य तेजसः क्षणवियोगेन सर्वोऽपि लोकः अप्रियदर्शनो जातः, अप्रियं दर्शनं यस्य । तेजसि गते जगद् द्रष्टुमपि न रोचते किं मंत्रादिना क्षुदभावेऽन्नमिव कामाभावे कामिनीमिव । किंच तेजसा हीनः मल्लक्षणः पुरुषः उक्थेन प्राणेन रहितः, प्राणकार्यं हि बलं तद्गतमेव तस्मिन् गते वृक्षादाविव प्राणः अकिंचित्कर इत्यर्थः। किंच लोकप्रतीत्याप्यहं तथैव जातः तदाह मृतकः प्रोच्यते यथेति यथा मृतकः लोकैः प्रोच्यते नायमत्र स्थापनीयः ज्वालनीयो दूरीकर्त्तव्य इति तथा मल्लक्षणोऽपि जनो लोकैरुक्त इत्यर्थः। एवं तेजोपहरणेन मृतप्राय एवाहं जात इत्युक्तम् । नन्वस्य वंचकत्वं ज्ञातं चेत्कथं सख्यं कथं वा शाश्वतो भजनीयतेत्याशंक्य वचनमद्यैव कृतं न पूर्वमित्याह यत्संश्रयादित्यादि तेनाहमद्य मुषितः पुरुषेण भूम्नेत्यंतेन "गुणस्वभाव-

भेदेन कृष्णेनोपकृता वयम्। गुणैस्तु नवधा योगान् स्वभावेन त्रिधा पुनः॥ एवं द्वादशधा कृष्णः कृतार्थीकृत्य सांप्रतम्। अवंचयदिति ह्येकं तेनैवास्य च संक्षयः॥" एवं चतुर्दशश्लोकैः पांडवेषु हरेर्गुणाः तावद्भिरेव स्वज्ञातैश्चतुर्दशे गतिं ययुः॥ ६॥ ❀ ❀ तत्र प्रथमं सत्त्वगुणभेदान् वक्तुं रजोमिश्रत्वेन भगवता य उपकारः कृतः रजोमिश्रितात् दूरस्थेन उपकारफलं च स्त्रीप्राप्तिरिति तदाह यत्संश्रयादिति। सम्यगाश्रयात् कृष्णस्येति न ह्यतींद्रियाश्रयव्यतिरेकेण अतींद्रियार्थज्ञानं भवति। तत्र हि एकचक्रनगरात् पलायिताः ब्रह्मचारिरूपेण स्थिताः। तत्र द्रौपदीस्वयंवरप्रस्तावे अदृश्यराधावेधे प्रतिज्ञायामस्मत्प्राप्त्यर्थमेव भगवता कृतायां सर्वे समाहूताः अस्मत्तेजसः प्राकट्यार्थं भगवतैव ततस्तत्कृपया त्रयं प्राप्तं तेषां तेजः लक्ष्यज्ञानं द्रौपदी च। तस्याः कृष्णेति-नामतः स्वसाम्यं मन्यमानः सखिष्वस्मासु तां योजितवान् अतीन्द्रियं च तेषां च तेजः स्वकीयमपि तदपि च अतस्तेनैव तेजो दत्तं प्रथमे अंते तेनैवापहृतमिति तेजसां मध्ये सर्वापहरणेन सर्वनाशश्च स्वयंवरस्य। मुख आरंभे तदाहि सर्वे मिलंति। ननु परब्रह्मस्वरूपस्य भगवतः समाश्रयणे कथं प्राणिनामनिष्टकरणं तदाह स्मरदुर्मदानामिति, स्मरेण दुष्टो मदो येषाम् अतस्तेषां तेजोहरणे दोषरूपमदहरणात् उपकार एव तेषां कृतः खल्विति राज्ञः संमतिः। अभिहतश्चेति ज्ञातः अभिहतश्च धनुषोऽपि सज्जीकरणं ज्ञातं तत उक्तं सज्जीकृतेनेति चकारादिंद्रप्रस्थानम्॥ ७॥ ❀ ❀ सत्त्वमिश्रसत्त्वेनोपकारमाह यत्सन्निधाविति। सत्त्वमिश्रणात् भगवत्सांन्निध्यम् उ इति वितर्के कुत्राहं कुत्र तत् कर्मेति खांडवं वनं सर्वौषधिसहितमग्नये पावकाय इन्द्रस्य वनमिति। तं विजित्य सभा राजसूयसभा तत्र•दुर्योधनमोहः। खांडववने स्थितस्य मयस्य प्राणरक्षणात् स्वप्राणपरिवर्त्तनरूपं सर्वमायामयम् अद्भुतशिल्पं रचनारूपं च कार्यं दत्तवान्। विश्वकर्मा शिल्पमेव जानाति मयस्तु मायामपि। अत्रापि प्राप्तदानसामर्थ्यमगादि इंद्रादीनां तेजः स्वभावः। ततस्तत्राप्युपकारो जात इत्याह। दिग्भ्योऽहरन्निति ते अध्वरे राजसूये बलिं पूजामुपढौकनद्रव्यरूपम्॥ ८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यत्संश्रयादित्यत्र। गुणस्वभावभेदेनेति। गुणा इतरेतरसङ्कीर्णाः सत्त्वादयः स्वभावोऽर्जुनस्य प्रकृतिः ताभ्यां कृतो यो भेदो वैषम्यं तेनेत्यर्थः। चतुर्दशस्यार्थमाहुः तेनान्यस्य च सङ्क्षय इति। अन्यस्येति तेजसः। चतुर्दशगतिमिति चतुर्दशप्रकारम्। तेजसं मध्ये सर्वमिति। ह्रियमाणेन तेजसा मन्मध्यस्थं सर्वमेव हृतमित्यर्थः॥ ७॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदुक्तिमेव दर्शयति वञ्चितोऽहमिति त्रयोविंशत्या। हे महाराजेति सम्बोधनेन तव तु महाराजत्वात्किञ्चिद्धैर्यमप्यस्ति मम तन्नास्तीति सूचयति। अहं बन्धुरूपेण मातुलपुत्रत्वाद्बन्धुरूपतां प्राप्तेन हरिणाऽऽश्रितजनार्तिहरेण कृष्णेन वञ्चितोऽस्मीत्यन्वयः। तेन तव किमपहृतमित्यपेक्षायामाह-येनेति। येनेत्यादि यच्छब्दानां तेनाहं मुषितोऽस्मीति नवमश्लोकस्थेन तच्छब्देनान्वयः। देवानामपि विस्मापनं आश्चर्यकरं यन्महन्मम तेजस्तद्येनापहृतम्॥ ५॥ ❀ ❀ यस्य च भगवतः क्षणमात्रवियोगेनैव अप्रियं दर्शनं यस्य तथाभूतोऽयं सर्वोऽपि लोको जातः, अत्र न सन्देह इति सूचयति। प्रियस्याप्यप्रियत्वे दृष्टान्तमाह-उक्थेनेति। उक्थेन प्राणेन रहित एष पित्रादिर्यथा मृतकः प्रोच्यते तद्वदित्यर्थः॥ ६॥ ❀ ❀ अस्मदीयं शौर्यवीर्यादिकं सर्वं भगवदधीनमेवेति सूचयंस्तदुपकारांश्च स्मरन्नाह-यदिति। खल्वित्येवकारार्थकः। यस्य भगवतः संश्रयादेव हेतोर्द्रौपद्याः स्वयंवरमुखे स्वयंवरप्रारम्भे स्मरेण कामेन हेतुना दुष्टो मदो येषां तेषां द्रुपदगेहमुपागतानां राज्ञां तेजो मया हृतमित्यन्वयः। कथमित्यपेक्षायामाह-यतः सज्जीकृतेन आरोपितज्याबाणकेन धनुषा मत्स्यो मत्स्याकारो यन्त्रविशेषश्च मयाऽभिहतः कृष्णा द्रौपदी चाधिगता लब्धेति॥ ७॥ ❀ ❀ यस्य सन्निधौ हेतुभूते सति तरसा वेगेन अमरगणैः सहितमिन्द्रमहं विजित्य खाण्डवाख्यं तस्य वनमग्नयेऽदाम् अजीर्णनिवृत्त्यर्थं दत्तवानस्मीत्यर्थः। उ इति निपातो विस्मयद्योतकः। अत्याश्चर्यमेवंविधं कर्म कृतवानस्मीति भावः। तत्र खाण्डवदाहे रक्षितेन मयेन कृता निर्मिता अद्भुतान्याश्चर्यभूतानि शिल्पानि प्रतिमादीनि माया जलादिषु स्थलादिप्रतीतिनिमित्तभूता च यस्यां सा सभा मया लब्धा। तथा यत्सन्निधौ ते तवाध्वरे राजसूये दिग्भ्यो नृपतयो बलिमहरन् आनीय समर्पयामासुः॥ ८॥

हिन्दी अनुवाद

अर्जुन बोले-महाराज! मेरे ममेरे भाई अथवा अत्यन्त घनिष्ठ मित्रका रूप धारण कर श्रीकृष्णने मुझे ठग लिया। मेरे जिस प्रबल पराक्रमसे बड़े-बड़े देवता भी आश्चर्यमें डूब जाते थे, उसे श्रीकृष्णने मुझसे छीन लिया॥ ५॥ ❀ ❀ जैसे यह शरीर प्राणसे रहित होनेपर मृतक कहलाता है, वैसे ही उनके क्षणभरके वियोगसे यह संसार अप्रिय दीखने लगता है॥ ६॥ ❀ ❀ उनके आश्रयसे द्रौपदी-स्वयंवरमें राजा द्रुपदके घर आये हुए कामोन्मत्त राजाओंका तेज मैंने हरण कर लिया, धनुषपर बाण चढ़ाकर मत्स्यवेध किया और इस प्रकार द्रौपदीको प्राप्त किया था॥ ७॥ ❀ ❀ उनकी सन्निधिमात्रसे मैंने समस्त देवताओंके साथ इन्द्रको अपने बलसे जीतकर अग्निदेवको उनकी तृप्तिके लिये खाण्डव वनका दान कर दिया और मय दानव

की निर्माण की हुई, अलौकिक कलाकौशलसे युक्त मायामयी सभा प्राप्त की और आपके यज्ञमें सब ओरसे आ-आकर राजाओंने अनेकों प्रकारकी भेंटें समर्पित कीं ॥ ८ ॥

यत्तेजसा नृपशिरोऽङ्घ्रिमहन्मखार्थे आर्योऽनुजस्तव गजायुतसत्त्ववीर्यः ।
तेनाहृताः प्रमथनाथ मखाय भूपा यन्मोचितास्तदनयन् बलिमध्वरे ते ॥ ९ ॥
पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायाम् ।
स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तस्त्रियोऽकृत हतेशविमुक्तकेशाः ॥ १० ॥
यो नो जुगोप वन एत्य दुरन्तकृच्छ्राद् दुर्वाससोऽरिरचितादयुताग्रभुग् यः ।
शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनिमग्नसङ्घः ॥ ११ ॥
यत्तेजसाथ भगवान् युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ।
अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्धम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनन्तरश्लोको विगीतस्तथापि व्याख्यायते। नृपशिरःस्वङ्घ्रिर्यस्य तं जरासन्धं तवानुजो भीमो मखार्थमहन् हतवान्। तन्निर्जयं विना राजसूयमखानुपपत्तेः। गजायुतस्येव सत्त्वमुत्साहशक्तिर्वीर्यं बलं च यस्य सः। तं हत्वा प्रमथनाथो महाभैरवस्तस्य मखाय ये राजानस्तेनाहृतास्ते च यद्यस्मान्मोचितास्ततस्मात्तेऽध्वरे बलिमानीतवन्तः॥ ९॥ ❋ ❋ यैः कितवैर्दुःशासनादिभिस्तव पत्न्याः कबरं विकीर्योन्मुच्य स्पृष्टमाकृष्टं तेषां स्त्रियो हतेशा अत एव वैधव्याद्विमुक्तकेशा अकृत चकार। कथंभूतं कबरम्। अधिमखं राजसूयमधिकृत्य क्लृप्तो रचितो यो महाभिषेकस्तेन श्लाघ्यतमम्। चारु रम्यम्। यत्स्मरणात्तदानीमेवासत्कृपया प्राप्तस्य श्रीकृष्णस्य नमने पदयोः पतितान्यश्रूणि मुखाद्यस्याः पत्न्याः। पदशब्दसापेक्षस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षितत्वात्॥ १०॥ ❋ ❋ शिष्याणामयुतस्याग्रे तत्पंक्तौ भुंक्ते यस्तस्माद्दुर्वाससो हेतोररिणा दुर्योधनेन रचितं यद्दुरन्तं कृच्छ्रं शापलक्षणं तस्मात्सकाशान्नोऽस्मान्वनमेत्य जुगोप। किं कृत्वा शाकमेवान्नं तस्मिन्नेव पात्रेऽवशिष्टमुपयुज्य जग्ध्वा। यत उपयोगात्सलिले विनिमग्नो मुनीनां संघस्त्रिलोकीं तृप्राममंस्त। एवं हि भारते कथा। कदाचिद्दुर्वाससो दुर्योधनेनातिथ्यं कृतम्। तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वाससः शापात्पांडवा नश्येयुरिति मनसि निधाय दुर्योधनेनोक्तं युधिष्ठिरोऽस्मत्कुलमुख्योऽतस्तस्यापि भवतैवमेव शिष्यायुतसहितेनातिथिना भवितव्यम्, किंतु द्रौपदी यथा क्षुधा न सीदेत्तथा तस्यां भुक्तवत्यां तद्गृहं गंतव्यमिति। ततश्च तथैव दुर्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघोऽघमर्षणाय जले निममज्ज। तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णोंकस्थां रुक्मिणीं हित्वा तत्क्षणमेव भक्तवत्सलतया चागतः। तया चावेदिते वृत्तांते भगवतोक्तं हे द्रौपद्यहं च बुभुक्षितोस्मि प्रथमं मां भोजयेति। तया चातिलज्जयोक्तं स्वामिन् मद्भोजनपर्यंतमक्षय्यमप्यन्नं सूर्यदत्तस्थाल्यां मया च सर्वान्संभोज्य भुक्तमतो नास्त्यन्नमिति। तथाप्यतिनिर्बंधेन स्थालीमानाय्य तत्कंठलग्नं किंचिच्छाकान्नं प्राश्योक्तमनेन विश्वात्मा भगवान्प्रीयताम्। अथ भोक्तुं मुनिसंघमाह्वयेति भीमं प्रहितवान्। स च तावतातितृप्तो वृथा पाकभयेन पलायित इति॥ ११॥ ❋ ❋ गिरिजासहितो विस्मापितः सन्निजं पाशुपतमस्त्रम्। अन्येपि लोकपाला निजान्यस्त्राण्यदुः। अन्यदप्याश्चर्यमाह। अमुनेति महत इंद्रस्यासनार्धम्॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पदयोः पतिता चासावश्रुमुखी चेति पतिताश्रुमुखी तस्या इति वा॥ १०॥ ❋ ❋ यः कृष्णः॥ ११॥ ❋ ❋ यस्य कृष्णस्य तेजसा युधि वराहनिमित्तयुद्धे इंद्रकीलगिरौ॥ १२॥

श्रीमद्वीरराघवव्याख्या

तवानुजो ममार्योऽग्रजः गजानामयुतस्य सत्त्वं बलं तत्तुल्यं वा वीर्यं च यस्य भीमः तव मखार्थं यज्ञार्थं यस्य भगवतः संश्रयाद्धेतोर्नृपस्य जरासंधस्य शिरोऽङ्घ्रिमिति प्राण्यंगत्वात्समाहारद्वन्द्वैक्येन शिरोऽङ्घ्रि चाहतेन नृपेणाहृताः। नृपास्ततो विमोचिताः संतो यत्प्रमथस्य रुद्रस्य भैरवस्य वा मखाय मखार्थं संभृतं धनं तवाध्वरे बलिं करमतयन्नानीतवन्तः। नृपाणां शिरस्सु अंघ्रिर्यस्य तं जरासंधमिति वा॥ ९॥ ❋ ❋ पत्न्या इति। तव पत्न्या द्रौपद्याः अधिमखं राजसूयाख्ये यज्ञे विभक्त्यर्थेऽव्ययीभावः क्लृप्तः कारितो यो महाभिषेकः तेन श्लाघिष्ठमत्यन्तश्लाघ्यं चारु सुन्दरं धम्मिल्लं विकीर्य विक्षिप्य यैर्दुःशासनादिभिः स्पृष्टं तेषां स्त्रियः

१. प्राचीने पाठे 'यत्तेजसा' इत्यारभ्य 'बलिमध्वरे ते' इत्येकः श्लोको न। २. प्रा० पा०—गात्रः ३. ऽस्त्रवरं ददन्मे।

स्त्रीः हता मृता ईशाः पतयो यासां ताश्च विमुक्ताः केशा यासां ताश्च तथाभूताः। यो अकृत कृतवान्स तवानुजो नृपशिरोंऽघ्रिमहन्निति पूर्वेणान्वयः। कथंभूतायाः पत्न्याः पदयोर्दुःशासनस्य भगवतो वा स्वस्य वा पदयोः पतितानि अश्रूणि मुखाद्यस्याश्च तथाभूतायाः ॥१०॥ ❀ ❀ यो न इति। योऽयुताग्रभुगयुतेन विप्राणामयुतेन सहाग्रे भुंक्ते इति तथा अयुतस्याग्रे वा तस्मादरिणा दुर्योधनेन विहितात् दुर्वाससः हेतोरागतात् दुरन्तकृच्छ्रादपारसंकटाद्यो भगवान्नोऽस्मान् शाकात्मकान्नावशिष्टमवलेपमुपयुज्य भुक्त्वा जुगोप शाकावशिष्टमुपभुक्तवतो भगवतो हेतोः सलिले निमग्नः संघो भूतसंघरूपो देहो यस्य स दुर्वासाः त्रिलोकीमपि तृप्तामममंस्तामन्यत तेन भगवता मुषितोऽस्मीत्यन्वयः। एषा चान्यत्र कथा सूच्यते "दुर्वासा मुनिवर्योऽथ दुर्योधनगृहं गतः। तं राजा पूजयामास सार्घ्यपाद्यासनादिभिः। निमन्त्रयामास स तं भोजनाय नराधिपः। ते बाढमिति चामन्त्र्य कृत्वा नित्यादिकाः क्रियाः। बुभुजेऽन्नं बहुगुणं ब्राह्मणैः सह धर्मवित्॥ अब्रवीच्च स राजानं भुक्त्वा तुष्टमना मुनिः। वरं वरय भद्रं ते वरदोऽस्मि नराधिप! याचयाम्यद्य किमहं वरमेतं मुनीश्वरम्॥ इति चिन्तासमापन्नो राजा दुर्योधनस्तदा। मुहूर्तं चिन्तयित्वाथ प्रतिपेदे मनोगतम्॥ वनवासं गता ये तु पाण्डवाः शंसितव्रताः। तेषामस्य मुनेः शापं जनये यं लवान्नृपः॥ मद्गृहे भुक्तवान् सर्वं यदा वांछति भोजनम्। तत्र दातुं शक्नुवन्ति ते वने क्लेशभागिनः। तदा कोपपरीतात्मा शापं दास्यत्यसंशयम्॥ इत्येवं दुरभिप्रायो वरं वव्रे सुदारुणम्। वने मे भ्रातरः सन्ति पाण्डवा दुःखभागिनः। भोक्तव्यं तद्गृहं गत्वा मद्गृहे भुक्तवान्यथा॥ तथेति मुनिरुक्त्वा तं गत्वाऽयाचत भोजनम्। अयुतब्राह्मणाग्रे मां भोजयाशु युधिष्ठिर!॥ श्रुत्वैतद्वचनं राजा हृदि संजातवेपथुः। भुक्तमस्माभिरधुना शिष्टमन्नं न विद्यते॥ तथा न ब्राह्मणाः सन्ति सामग्री च कदाचन। यद्यहं न ददाम्यन्नं शापं दास्यंति कोपतः॥ तथाप्येनं निमन्त्र्यैवमुपायं मृगयेऽधुना। इत्येवं मनसा ध्यायन्राजा मुनिमथाब्रवीत्॥ भगवन्नित्यकर्मादि कृत्वा स्नानादिकर्म च। शीघ्रमागमनं कार्यं सिद्धं सर्वं तथा मम॥ तत ओमित्यनुज्ञाय गत्वा चाप्सु विवेश ह। तत्राघमर्षणं कुर्वन् दध्यौ तद् ब्रह्म निष्कलम्॥ एतस्मिन्नेव काले तु भगवान्यदुनन्दनः। आजगाम कुरुश्रेष्ठसन्निधौ क्लेशनाशनः॥ विषण्णवदनान् दृष्ट्वा पाण्डवान् मधुसूदनः॥ उवाच राजन्! किं दीर्घं ध्यायसे क्लेशभागिव। सोऽसौ न्यवेदयत्सर्वं मुनेरागमनादिकम्॥ श्रुत्वैतद्भगवान् कृष्णो दुर्योधनविचेष्टितम्। श्रुत्वोवाचावशिष्टं तदन्नं किं किंचिदस्ति वै॥ शाकमात्रावशिष्टो मे पाक इत्यब्रवीन्नृपः॥ उवाच भगवान् शिष्टं शाकमानीयतामिति॥ आनीतं भक्षयामास राज्ञो दुःखोपशान्तये। दुर्वासास्तु मुनिर्मेने तृप्तं स्थावरजंगमम्॥" इत्यादिका कथा वर्तते॥ ११॥ ❀ ❀ यत्तेजसेति। यस्य भगवतस्तेजसा मया हितेन हेतुना भगवान् शूलपाणिः शम्भुः किरातरूपो युद्धे विस्मापितः मयेति शेषः। विस्मयं प्राप्तः स च गिरिशो रुद्रः मे मह्यमस्त्रं पाशुपताख्यं ददौ। तथाप्यन्ये च शक्त्यादयो विस्मापिता इत्यर्थः, तथाहममुनैवाधुना तेजोहीनकलेवरेणैव महेन्द्रस्य भवने महदासनस्यार्द्धं प्राप्तः। इन्द्रासनस्यार्धमधिष्ठितवानस्मीत्यर्थः। महदिति पृथक्पदम्। अन्यथा 'आन्महत' इत्यात्वापत्तिः। आर्षत्वात्तदभावे महत्यासने इत्यप्यन्वेतुं शक्यम्॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गदाख्यमायुधं च सत्त्वं च हृदयसारश्च वीर्यं वीरभावश्च सत्त्वं मानसबलं च वीर्यं कायबलं च वा यस्य स गदायुधसत्त्ववीर्यः तवानुजो मम ज्येष्ठो भीमसेनो नृपशिरःस्वंघ्रिर्यस्य स तथोक्तः तं जरासंधं यत्संनिधावहन् हतवानित्यन्वयः। किमर्थं मखार्थे राजसूययज्ञमुद्दिश्य जरासंधेन तेन प्रमथनाथमखाय रुद्रमुद्दिश्य पुरुषमेधाख्ययज्ञायाहृता गृहीता येन कृष्णेन मोचिताः जरासंधवधेनेति शेषः। भूयस्ते तवाध्वरे बलिं भ्युदयन् अभिगम्यानीतवंत इत्यन्वयः। "वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यत्र "अभेरप्युपसंख्यानं कर्तव्यम्"॥ ९॥ ❀ ❀ कुरुसभायां तव पत्न्या द्रौपद्या अपि राजसूयनाम्नि मखे क्लृप्तेन कृतेन महाभिषेकेण श्लाघिष्ठमतिशयेन श्लाघ्यतममत एव चारु रुचिरं कबरं केशबंधने यैरक्षकितवैर्दुःशासनादिभिः स्पृष्टं यत्तत्कबरं विकीर्य यत्पदयोः पतितायाः अश्रुमुख्याः अश्रुप्रधानो यः सः तत्पदयोः पतितत्वादेव तत्स्त्रियः तेषां कितवानां स्त्रियो भार्याः विमुक्तकेश्यः भीमाविद्धगदाभग्नोरुदंडान् स्वपतीनालिंग्य रुदतीर्विकीर्णकेशपाशा न्यकृत नितरामकार्षीदित्येकान्वयः। अश्रुशब्द उभयलिंगोऽप्यस्ति धनुःशब्दवत्॥ १०॥ ❀ ❀ यस्य तेजसा युधि वराहनिमित्तयुद्धे विस्मापितः विस्मयं गमितः शूलं पाणौ यस्य सः शूलपाणिः स गिरिशः निजमस्त्रं पाशुपताख्यं मे मह्यमदादित्यन्वयः। अन्ये लोकपाला अपि स्वं स्वमस्त्रं ददुरिति शेषः। अपि चार्जुनोऽहममुनैव कलेवरेण मान्येन महेन्द्रभवने अमरावत्यां महतो देवेन्द्रस्यासनार्धं प्राप्त इत्येकान्वयः। अथान्यच्च श्रीकृष्णमाहात्म्यं वक्ष्यामि विशेषत इत्यथशब्दार्थः॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्तव पत्न्याः सम्बन्धे तेषां कितवानां स्त्रियो हतेशविमुक्तकेशा अकृत। कीदृश्याः पत्न्याः कबरं विकीर्य्य पश्चाद्वनान्तर्गतस्य कृष्णस्य पदयोः पतिताश्रुमुख्याः। कीदृशं कबरं कितवैः स्पृष्टं द्यूतसभायामाकृष्टमिति योज्यम्॥ १०-११॥ ❀ ❀ यत्तेजसेति पूर्ववल्लौकिकलीलामयत्वेनैव॥ १२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नृपाणां तत्सजातीयानां प्राकृतानां शिरःसु अंघ्रिर्यस्य तं जरासन्धम्। तवानुजो भीमः। मखार्थं तन्निर्जयं विना राजसूयमखानुपपत्तेः गजायुतस्येव सत्त्वम् उत्साहशक्तिः वीर्यं बलं च यस्य सः। प्रमथनाथो भैरवस्तस्य मखाय ये राजानः तेनाहृताः यद्यस्मान्मोचिताः तत्तस्मात्तेऽध्वरे बलिम् आनीतवन्तः॥ ९॥ ❀ ❀ यैः कितवैर्दुःशासनादिभिः तव पत्न्याः अधिमखं राजसूये कृतमहाभिषेकेण प्रशस्तं कबरं विकीर्य्ये उन्मुच्य स्पृष्टम् आकृष्टम्, तेषां स्त्रियो हतेशा अत एव वैधव्याद्विमुक्तकेशाश्च अकृत यस्तवानुज इति पूर्व्वस्यैवानुषङ्गः। कीदृश्याः स्मरणात् प्राप्तस्य कृष्णस्य नमने पदयोः पतितानि अश्रूणि मुखाद्यस्याः। पदशब्दसापेक्षस्यापि पतितशब्दस्य अश्रुपदेन समासो नित्यसापेक्षत्वात्। पदयोः पतिता चासौ अश्रुमुखी चेति तस्या इति वा॥ १०॥ ❀ ❀ दुर्व्वाससो हेतोररिणा रचितं यद्दुरन्तं कृच्छ्रं शापलक्षणं तस्मात् सकाशान्नोऽस्मान् वने एत्य जुगोप। यः शिष्याणाम् अयुतस्य अग्रे अग्रपङ्क्तौ भुङ्क्ते। शाकमेवान्नं तस्मिन् पात्रेऽवशिष्टम् उपयुज्य जग्ध्वा। यत उपयोगात् सलिले विनिमग्नो मुनीनां सङ्घस्त्रिलोकीं तृप्ताममंस्त। एवं हि भारते कथा—"कदाचित् दुर्व्वाससो दुर्य्योधनेनातिथ्यं कृतम्। तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्व्वाससः शापात् पाण्डवा नश्येयुरिति मनसि विधाय दुर्य्योधनेनोक्तम्। युधिष्ठिरोऽस्मत्कुलमुख्यः, अतस्तस्यापि भवतैवं शिष्यायुतसहितेनातिथिना भवितव्यम्। किन्तु द्रौपदी यथा क्षुधया न सीदेत्तथा तस्यां भुक्तवत्यां तद्गृहं गन्तव्यमिति। ततश्च तथैव दुर्व्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसङ्घोऽघमर्षणाय जले निममज्ज। तत्र चिन्तातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णः अङ्कस्थां रुक्मिणीं हित्वा तत्क्षण एव भक्तवत्सल आगतः। तया चावेदिते वृत्तान्ते भगवतोक्तम्। द्रौपद्यहं बुभुक्षितोऽस्मि प्रथमं मां भोजय। तया चातिलज्जया अहो मदीयमभाग्यं भाग्यं च यतस्त्रैलोक्यनाथो यज्ञपुरुषो मद्गृहमागतो भोजनं प्रार्थयतीति मनसि विधायोक्तम्—स्वामिन्! मद्भोजनपर्य्यन्तमक्षय्यमन्नं सूर्य्यदत्तस्थाल्याम्। मया च सर्व्वान् भोजयित्वा भुक्तम्। अतो नास्त्यन्नमिति अश्रुपातं चकार। तथाप्यतिनिर्ब्बन्धनेन पाकस्थालीमानाय्य तत्कण्ठलग्नं शाकान्नं प्राश्योक्तं भोक्तुं मुनिसङ्घमाह्वयेति। अथ भीमञ्च प्रहितवान्। भीमेन गत्वोक्तं स्वामिन्! भोजनार्थमागम्यतां कथं विलम्बः क्रियते। स च तावता अतितृप्तः वृथा पाकभयात् पलायितः" इति॥ ११॥ ❀ ❀ गिरिजया दुर्गया सहितः विस्मापितः सन् निजं पाशुपतमस्त्रम्। अन्येऽपि लोकपालाः निजास्त्राण्यदुः। महत इन्द्रस्य आसनार्द्धम्॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यद्यस्य श्रीकृष्णस्य तेजसा ममार्योऽग्रजस्तवानुजो भीमः नृपशिरःस्वंघ्रिर्यस्य तं जरासंधं मखार्थं राजसूयार्थं राजसूयाख्ययज्ञार्थम् अहन् हतवान्। किंच प्रमथनाथमखाय महाभैरवमखाय तेन जरासन्धेन ये भूपा आहृताः। यद्यतो मोचितास्ततो हेतोस्ते भूपास्तवाध्वरे राजसूये बलिम् अनयन् आनीतवन्तः॥ ९॥ ❀ ❀ तव पत्न्या कृष्णायाः अधिमखं मखे विभक्त्यर्थे अव्ययीभावः। क्लृप्तेन महाभिषेकेण हेतुना श्लाघिष्ठचारु एवंभूतं कबरं यैः कितवैर्दुश्शासनादिभिर्विकीर्य्ये विक्षिप्य स्पृष्टम् तत्तेषां हतेशविमुक्तकेशाः हता ईशा विमुक्ता वैधव्यसूचनार्थं केशा यासां ता एवंभूताः स्त्रियः यः श्रीकृष्णः अकृत कृतवान्। कथंभूतायाः पत्न्याः तदा द्रौपद्याः स्मरणेन सभायां प्राप्तस्य अन्यैरदृष्टस्य द्रौपदीसमीपे स्थितस्य पदयोः पतितान्यश्रूणि मुखाद्यस्याः। तदुक्तं केशग्रहणानन्तरं वस्त्रापकर्षणावसरे सभापर्वणि "आकृष्यमाणे वसने द्रौपद्याश्चिंतितो हरिः। गोविन्द द्वारिकावासिन् कृष्णगोपीजनप्रिय॥ कौरवैरभिभूतां मां किं न जानासि केशव! याज्ञसेन्या वचः श्रुत्वा श्रीकृष्णो गह्वरोऽभवत्। त्यक्त्वा शय्यासनं पद्भ्यां तत्रैव कृपयाभ्यगादि"त्यादि॥ १०॥ ❀ ❀ यो मुनिः शिष्यायुतस्याग्रे गुरुत्वाद् भुंक्ते तस्मादरिभिर्दुर्योधनादिभिर्विहिताद्दुर्वाससः हेतोरुपस्थिताद्दुरंतादपारात् कृच्छ्रात्संकटात् यः श्रीकृष्णः वनमेत्य शाकान्नशिष्टं शाकमेवान्नमदनीयं तदेव शिष्टमवशिष्टं स्थाल्यां लग्नं तदुपयुज्य नोऽस्मान् जुगोप यतः शाकलेशोपयुक्तवतः श्रीकृष्णात्सलिले विनिमग्नो मुनिसंघस्त्रिलोकीमपि तृप्ताममंस्त अमन्यत। अस्यार्थस्य विस्तरो वनपर्वणि द्रष्टव्यः॥ ११॥ ❀ ❀ धृतकिरातवेशः स गिरिजः सोमः भगवान् शूलपाणिः शिवः वनपर्वणि प्रसिद्धेऽर्ज्जुनकिरातीये युद्धे यस्य श्रीकृष्णस्य तेजसा हेतुभूतेन मया विस्मापितः निजं पाशुपतमस्त्रमदात् तदनन्तरमेवान्ये लोकपाला अपि निजास्त्राण्यपि ददुः। किंचामुनैव कलेवरेण लोकपालास्त्रप्राप्त्यनन्तरं महेंद्रभवने महतः स्वपितुरिन्द्रस्यासनार्धं प्राप्तः प्राप्तवानस्मि। चकारादिंद्रदत्तास्त्रादिकं च प्राप्तवानस्मीति सूचितम्॥ १२॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या।

यत्तेजसेति विगीतश्लोको मध्ये अधिकः, सोऽपि व्याख्यायते। तस्य भगवतस्तेजसा नृपशिरोंऽघ्रिं नृपशिरस्सु अंघ्रिर्यस्य जरासंधस्य तव मखार्थमहन् आर्यो मम ज्येष्ठभ्राता भीमः तव अनुजः ये च मोचिताः यस्मात्ते मोचिताः तस्मात्ते अध्वरे बलिमनयन् आनीतवंतः। अहमपि भीमोऽपि भगवत्सांनिध्यात् श्लोकोक्तं फलं प्राप्तवानित्यर्थः॥ ९॥ ❀ ❀ तमोमिश्रसत्त्वेनोपकारमाह पत्न्यास्तवेति। रजसा तस्य तमसो नाश उचितः। तथापि सत्त्वेन तस्योपकारः कर्तृस्त्रीषु दत्तः तथाकरणे हेतुः

अधिमखेति । राजसूयमध्ये महाभिषेकप्रस्तावे यजमानपत्न्याः क्लृप्तो योऽयं महाभिषेकः तेन श्लाघिष्ठं सर्वसभास्तुत्यं चारुमनोहरं च वेदलोकयोरुत्कृष्टं यत् कबरं तत् कितवैर्वंचकैः दुर्द्यूतैः अपणितमपि पणत्वमारोप्य भीष्मादिस्थितसभायां पापप्राकट्याय यैः स्पृष्टं तत्स्त्रियः हतेशविमुक्तकेशाः कृताः, हतः ईशो यो भर्त्ता तेन मृतभर्त्रा विमुक्ताः केशा यासाम् । ननु भगवत एवं करणे को हेतुस्तत्राह विकीर्य पदयोः पतिता अश्रुमुख्या इति । दुष्टस्पर्शेन दोषसंबंधात् तन्निराकरणार्थं गाढं भक्तिहृदयेन 'हा नाथ द्वारकावासिन्नि'ति रूपेण स्मरणे तदानीमेवोपस्थितस्य भगवतः अन्येषां महापातकित्वात् द्रौपदीमात्रप्रत्यक्षस्य पादयोर्दुष्टस्पृष्टं कबरं विकीर्य पतिता याश्रुमुखी तस्याः इदानीं भगवान् द्वारिकातः समागत्य तस्या अग्रे स्थितः सोऽपि तां दृष्ट्वा तस्याः पादयोः पतित्वा अश्रूण्यवर्तयत् । अत एव "या त्वरा द्रौपदीत्राण" इति वाक्यं संगच्छते । एवं गुप्ततयापि सर्वदा सर्वं करोतीत्यवगंतव्यम् ॥ १० ॥ ❀ ❀ रजोमिश्रतमसा य उपकारः कृतस्तमाह यो न इति । एवं ह्याख्यायिका कदाचित् दुर्वासाः षण्मासोपवासी पारणादिवसे सर्वदैत्यप्रार्थनया दुर्योधनगृहे गतः । तेन चातिथ्येन संतोषितः अयुतशिष्यसहितः । वरं वृणीष्वेत्याह । तदा भगवता व्यामोहितो दुर्योधनः सहसा पाण्डूनां नाशः प्रार्थयितुमशक्य इति मन्यमानः व्याजेन प्रार्थयिष्यामीति संचिन्त्य "यथास्मद्गृहे समागतं शिष्यैः सह तथास्मज्ज्येष्ठभ्रातुर्युधिष्ठिरस्य गृहे गन्तव्यं परं द्रौपदीभोजनानंतरम् । अन्यथा सा खेदं प्राप्स्यती"ति वरमयाचत ततस्तथेत्युक्त्वा तथैव गतो दुर्वासाः । पाण्डवानां चारण्ये भोजनाभावे भगवदुपदेशात् सूर्यप्रार्थनायां सर्वान्नपूर्णस्थालीं ददत् सूर्य आह–द्रौपदीभोजनावधि अक्षय्यमन्नं भविष्यतीति । ततः प्रभृति सातिथ्यागमनकालमतिक्रम्य भुंक्ते । एवं जाते सति प्रहररात्र्यनन्तरं द्रौपदीभोजनं योगेन ज्ञात्वा तथैवागतः । तदा पाण्डवाः द्रौपदी च सर्वनाशं मेनिरे । तदा ध्यातः कृष्णः समागतः । बहिरेव द्रौपदीमदृष्ट्वैव ऋषिं प्रत्युक्तवान् । जातः पाकः स्नानं क्रियतामिति । तथेत्यावश्यकं कर्त्तुं दुर्वाससि गते अन्तःप्रविष्टो भगवान् द्रौपदीवैक्लव्यं दृष्ट्वा कवलमात्रावशिष्टे भोजने स्थाल्यामपि तावच्छिष्टं शाकान्नं प्राश्य त्रिलोकीमेव तृप्तामकृत तदाह–यो नो जुगोपेति । यो भगवान् वनमेत्य नः अस्मान् जुगोप दुर्वाससः तथा हेतुत्वात्पंचमी दुरन्तं कृच्छ्रं यस्मात् । अरिविहितात् दुर्योधनेन प्रेरितात् यो दुर्वासाः अयुतं ब्राह्मणाः अग्रे भुंजते यस्य शाकेन शिष्टमन्नमुष्टिं प्रथमत एव भगवदर्थस्थापितां नियतकृत्यं हि तत् तदुपयुज्य स्वीकृत्य जुगोपेति संबंधः । कथमेतावता गोपनं तत्राह यतः सलिले निमग्न ऋषिसंघः यः पूर्वमावश्यकं कर्त्तुं गतः सलिले निमग्न उत्थानसमये त्रिलोकीमेव तृप्ताममंस्त किमुत आत्मानमित्यर्थः ॥ ११ ॥ ❀ ❀ सत्त्वमिश्रतमसा कृतमाह यत्तेजसेति । अथेति भिन्नप्रक्रमे । श्लोकद्वयेन द्रौपदीनिमित्तरक्षणस्योक्तत्वात् । स्वपौरुषाभावाच्च तदपहाय केवलं स्वपौरुषं साध्यचरित्रमिति भगवानिति संतोषे वरदानहेतुः । शूलपाणिरिति विपरीते मारणहेतुः । एवं दुर्योधनविषयत्वाभावात् कुश्लिष्टत्वाच्च । अतः सत्त्वतमोभिः श्लोकत्रयपरिपाट्यैव भगवच्चरित्रमुक्त्वा तोषश्चतुर्थे प्रतिपाद्यते । लोकत्रयजयस्यैव अभीष्टत्वात् दैत्यजयः साधनप्राप्त्या निरूपणीयोऽपि भोगस्य प्राधान्यात् स एव निरूपितः । अर्थान्निरूपितोऽपि संहारे अनुवदनवचनशेषतया निरूपितः दैत्यानां तत्प्राधान्यात् मायेत्यसुरा इति श्रुतेः । यत्पुनरग्रे भगवच्चरित्रकथनं तदवतारकार्यमिति । नात्यंतमर्ज्जुनानुग्रहः सिध्यति भूभारहरणस्य स्वापेक्षितत्वात् "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भवसव्यसाचिन्नि"ति भगवद्वाक्याच्च अतोऽर्ज्जुनेन भगवत उपकारत्रयमेवानुगुणरूपं दोषाभावत्रयं चाग्रे वक्ष्यते 'सौत्ये वृत' इत्यादिभिस्त्रिभिः "कारणं करणं चैव प्रतिबंधश्च कथ्यते । स्वकृतत्वज्ञापनाय माहात्म्यज्ञापनाय तत् ॥ दोषाभावेन सहितं दोषेणापि विमिश्रितम् ॥" कृष्णमाहात्म्यज्ञापनं त्रिभिः त्रिभिश्च दोषास्पर्शोऽपि महादेवः यत्तेजसा विस्मापितः । नहि जीवसामर्थ्ये ब्रह्मणो विस्मयो भवेत् तत्रापि गिरिजया पार्वत्या सहितः पर्वतपुत्री हि पर्वतादप्यधिकेन पदार्थेन विस्मिता भवतीति सूचितम् । अत्रापि किरातार्जुनकथानुसंधेया । परीक्षार्थं समागतो महादेवः सर्वव्रतोद्यापनरूपचिह्नसहितस्यार्जुनस्य चिह्नप्रदर्शनार्थं पार्वतीमप्यानीतवान् । तत्र शस्त्रबाहुमुष्टियुद्धेषु स्वयं भूमौ पतितार्ज्जुनपृष्ठस्थचिह्ने पार्वत्या दृष्टे दंपत्योर्हास्यमुखमवलोक्य भीतोऽर्जुनः स्तोत्रं कृतवान् । ततः प्रीतो महादेवः पाशुपतास्त्रं दत्तवान् । मे मह्यम् अन्येऽपींद्रादयः तदानीं समागत्य शस्त्राणि दत्तवंतः चकाराच्छत्रुजयश्च । किंच तस्यास्त्रस्य प्रयोगसिध्यर्थं महेंद्रप्रस्थितमातलिप्रार्थनया तेनैव नीतः । महेंद्रभवने वर्षपंचकमिंद्रासनस्यार्द्धमहद्रिंद्रोपवेशभागादधिकम् । शरीरांतरोपभोग्यममुनैव कलेवरेण अतेजोगमेन प्राप्तवानस्मीत्यर्थः । अत्रापि त्रयं प्राप्तं महादेवसंतोषः अस्त्रप्राप्तिः इंद्रासनप्राप्तिश्चेति ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यत्तेजसेत्यत्र । चरित्रमितीति । इति हेतोर्भिन्नः प्रक्रम इत्यर्थः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यस्य तेजसा युक्तः अत एव गजानामयुतस्य सत्त्वमुत्साहो वीर्यं बलं च यस्य स तवानुजो ममार्यः पूज्यो भीमो नृपाणां शिरस्सु अङ्घ्रिर्यस्य तं महाबलप्रतापं जरासन्धं मखार्थं तद्विजयं विना राजसूयासम्भवात् तव राजसूययज्ञार्थं अहन् । तं हत्वा प्रमथनाथो महाभैरवस्तस्य मखाय ये दिग्विजये नम्रतां न गता भूपास्तेन बलादाहृताः निरुद्धाश्च ते च यद्यस्मात् तद्वधाद्विमोचिताः तत्तस्मात् ते तवाध्वरे राजसूये बलिं तत्साधनभूतं द्रव्यमनयन् समर्पितवन्तः ॥ ९ ॥ ❀ ❀ तव पत्न्या द्रौपद्या अधिमखं

राजसूयमखमधिकृत्य कृतो विरचितो यो महाभिषेकस्तेन श्लाघिष्ठमत्यन्तश्लाघ्यं चारु सुन्दरं कबरं धम्मिल्लं विकीर्य विक्षिप्य यैः कितवैर्धूर्तैः दुश्शासनादिभिः स्पृष्टमाकृष्टं तेषां स्त्रियः स्त्रीः हता ईशाः पतयो यासां ताश्च विमुक्ताः केशा यासां ताश्च तथाभूता यो भगवान् कृष्णः अकृत कृतवान् । लोकदृष्ट्या दुश्शासनादयो युद्धेऽस्मदादिभिर्हता अपि 'कालोऽस्मि लोकक्षयकृत्' इति भगवद्वचनात् तथैव सम्भवाच्च भगवानेव तान् हतवानिति निश्चीयते इति भावः । ननु भगवान् कथं तद्धनने प्रवृत्त इत्यपेक्षायां भक्तवत्सलतया तत्पक्षपातादित्याशयेनाह-पदयोरिति, स्मरणात्तदानीमेव प्राप्तस्य श्रीकृष्णस्य नमने पदयोः पतितान्यश्रूणि मुखे यस्यास्तस्या इत्यर्थः ॥ १० ॥ ❀ ❀ शिष्याणामयुतस्याग्रे तत्पङ्क्तौ तथाभूतो यस्तस्मात् दुर्वाससो हेतोः अरिणा दुर्योधनेन रचितात् दुरन्तकृच्छ्रादपारसङ्कटात् शापरूपात् नोऽस्मान् वनमेत्य आगत्य शिष्टं स्थालीलग्नं शाकमेवान्नमुपयुज्य जग्ध्वा जुगोप रक्षितवान् । शाकान्नभोजनेन कथं रक्षा जातेत्यपेक्षायामाह-यत इति । यतः शाकान्नभोजनात् स्नानार्थं सलिले विनिमग्नो मुनीनां सङ्घः समूहस्त्रिलोकीं तृप्तामसंस्त अमन्यतेत्यर्थः । अत्र चैषा भारतकथा सूच्यते-"दुर्वासा मुनिवर्योऽथ दुर्योधनगृहं गतः । तं राजा पूजयामास साध्यपाद्यासनादिभिः ॥ निमन्त्रयामास स तं भोजनाय नराधिपः । तं बाढमिति चामन्त्र्य कृत्वा नित्यादिकाः क्रियाः ॥ बुभुजेऽन्नं बहुगुणं ब्राह्मणैः सह धर्मवित् । अब्रवीच्च स राजानं भुक्त्वा तुष्टमना मुनिः ॥ वरं वरय भद्रं ते वरदोऽस्मि नराधिप । याचयाम्यथ किमहं वरमेतं मुनीश्वरम् ॥ इति चिन्तां समापन्नो राजा दुर्योधनस्तदा । मुहूर्तं चिन्तयित्वाऽथ प्रतिपेदे मनोगतम् ॥ वनवासं गता ये तु पाण्डवाः शंसितव्रताः । तेषामस्य मुनेः शापं जनये यत्नवान्नृपः ॥ मद्गृहे भुक्तसदृशं यदा वाञ्छति भोजनम् । तत्र दातुं शक्नुवन्ति तत्र ते क्लेशभागिनः ॥ तदा कोपपरीतात्मा शापं दास्यत्यसंशयम् । इत्येवं दुरभिप्रायो वरं वव्रे सुदारुणम् ॥ वने मे भ्रातरः सन्ति पाण्डवा दुःखभागिनः । भोक्तव्यं ते गृहे स्वामिन् मद्गृहे भुक्तवान् यथा ॥ तथेति मुनिरुक्त्वा तं गत्वाऽयाचत भोजनम् । अयुतब्राह्मणाग्रे मां भोजयाशु युधिष्ठिर ॥ श्रुत्वैतद्वचनं राजा हृदि सञ्जातवेपथुः । भुक्तमस्माभिरधुना शिष्टमन्नं न विद्यते ॥ तथा न ब्राह्मणाः सन्ति सामग्री च कदाचन । यद्यहं न ददाम्यन्नं शापं दास्यति कोपनः ॥ तथाप्येवं निमन्त्र्यैनमुपायं मृगयेऽधुना । इत्येवं मनसा ध्यात्वा राजा मुनिमथाब्रवीत् ॥ भगवन्नित्यकर्मादि कृत्वा स्नानादिकर्म च । शीघ्रमागमनं कार्यं सिद्धं सर्वं तथा मम । तत ओमित्यनुज्ञाय गत्वा चाप्सु विवेश ह । तत्राघमर्षणं कुर्वन् दध्यौ तद्ब्रह्म निष्कलम् ॥ एतस्मिन्नेव काले तु भगवान् यदुनन्दनः । आजगाम कुरुश्रेष्ठसन्निधौ क्लेशनाशनः ॥ विषण्णवदनान् दृष्ट्वा पाण्डवान् मधुसूदनः । उवाच राजन् किं दीर्घं ध्यायसे क्लेशभागिव ॥ सोऽस्मै न्यवेदयत् सर्वं मुनेरागमनादिकम् । श्रुत्वैतद्भगवान् कृत्स्नं दुर्योधनविचेष्टितम् ॥ ज्ञात्वोवाचावशिष्टं तदन्नं किं किञ्चिदस्ति वा । शाकमात्रावशिष्टो मे पाक इत्यब्रवीन्नृपः ॥ उवाच भगवान् शिष्टं पाकमानीयतामिति । आनीतं भक्षयामास राज्ञो दुःखोपशान्तये ॥ दुर्वासास्तु मुनिर्मेने तृप्तं स्थावरजङ्गमम्" इति ॥ ११ ॥ ❀ ❀ यस्य तेजसा सगिरिजो गिरिजा पार्वती तत्सहितः शूलपाणी रुद्रो मया युद्धे विस्मापितः विस्मयं प्रापितः सन् निजं पाशुपताख्यमस्त्रं मे मह्यमदात् । तद्विस्मयेऽपि कोऽतिशय इत्यपेक्षायामाह-भगवानपीति । चकारोऽप्यर्थे । नहि देवदेवो रुद्रो मनुष्येण विस्मितो भवितुमर्हतीति भावः । तथा अन्येऽपि शक्रादयो लोकपालाः विस्मापिताः निजान्यस्त्राणि ददुः । अन्यदप्याश्चर्यं शृण्विव्याह-अहमिति । यस्य तेजसाऽहं अमुनैव कलेवरेण मनुष्यदेहेन महेन्द्रभवने महतो महेन्द्रस्यासनार्धं प्राप्त इत्यन्वयः ॥ १२ ॥

हिन्दी अनुवाद

दस हजार हाथियोंकी शक्ति और बलसे सम्पन्न आपके इन छोटे भाई भीमसेनने उन्हींकी शक्तिसे राजाओंके सिरपर पैर रखनेवाले अभिमानी जरासन्धका वध किया था; तदनन्तर उन्हीं भगवान्ने उन बहुत-से राजाओंको मुक्त किया, जिनको जरासन्धने महाभैरव-यज्ञमें बलि चढ़ानेके लिये बन्दी बना रक्खा था। उन सब राजाओंने आपके यज्ञमें अनेकों प्रकारके उपहार दिये थे ॥ ९ ॥ ❀ ❀ महारानी द्रौपदी राजसूय यज्ञ के महान् अभिषेकसे पवित्र हुए अपने उन सुन्दर केशोंको, जिन्हें दुष्टोंने भरी सभामें छूनेका साहस किया था, बिखेरकर तथा आँखोंमें आँसू भरकर जब श्रीकृष्णके चरणोंमें गिर पड़ी, तब उन्होंने उसके सामने उसके उस घोर अपमानका बदला लेनेकी प्रतिज्ञा करके उन धूर्तोंकी स्त्रियोंकी ऐसी दशा कर दी कि वे विधवा हो गयीं और उन्हें अपने केश अपने हाथों खोल देने पड़े ॥ १० ॥ ❀ ❀ वनवासके समय हमारे वैरी दुर्योधनके षड्यन्त्रसे दस हजार शिष्योंको साथ बिठाकर भोजन करनेवाले महर्षि दुर्वासाने हमें दुस्तर सङ्कटमें डाल दिया था। उस समय उन्होंने द्रौपदीके पात्रमें बची हुई शाककी एक पत्तीका ही भोग लगाकर हमारी रक्षा की। उनके ऐसा करते ही नदीमें स्नान करती हुई मुनि-मण्डलीको ऐसा प्रतीत हुआ मानो उनकी तो बात ही क्या, सारी त्रिलोकी ही तृप्त हो गयी है* ॥ ११ ॥ ❀ ❀ उनके

---

*एक बार राजा दुर्योधनने महर्षि दुर्वासाकी बड़ी सेवा की। उससे प्रसन्न होकर मुनिने दुर्योधनसे वर माँगनेको कहा। दुर्योधनने यह सोचकर कि ऋषिके शापसे पाण्डवोंको नष्ट करनेका अच्छा अवसर है, मुनिसे कहा—"ब्रह्मन् ! हमारे कुलमें युधिष्ठिर प्रधान हैं, आप अपने दस सहस्र शिष्योंसहित उनका आतिथ्य स्वीकार करें। किंतु आप उनके यहाँ उस समय जायँ जब कि द्रौपदी भोजन कर चुकी हो, जिससे उसे

प्रतापसे मैंने युद्धमें पार्वतीसहित भगवान् शङ्करको आश्चर्यमें डाल दिया; तथा उन्होंने मुझको अपना पाशुपत नामक अस्त्र दिया; साथ ही दूसरे लोकपालोंने भी प्रसन्न होकर अपने-अपने अस्त्र मुझे दिये। और तो क्या, उनकी कृपासे मैं इसी शरीरसे स्वर्गमें गया और देवराज इन्द्रकी सभामें उनके बराबर आधे आसन पर बैठनेका सम्मान मैंने प्राप्त किया॥ १२॥

तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणमरातिवधाय देवाः।
सेन्द्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना॥ १३॥
यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहमतार्यसत्त्वम्।
प्रत्याहृतं बहु धनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः॥ १४॥
यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु।
अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्च्छत्॥ १५॥
यद्दोष्षु मा प्रणिहितं गुरुभीष्मकर्णनप्तृत्रिगर्तशल्यसैन्धवबाह्लिकाद्यैः।
अस्त्राण्यमोघमहिमानि निरूपितानि नो पस्पृशुर्नृहरिदासमिवासुराणि॥ १६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्रैव स्वर्गे क्रीडतः। गांडीवं लक्षणं चिह्नं यस्य तत्। अरातयो निवातकवचा दैत्यास्तेषां वधार्थमाश्रितवंतः। येनानुभावितं प्रभावयुक्तं कृतम्। हे आजमीढ युधिष्ठिर तेन मुषितो वंचितोस्मि। कथंभूतेन। भूम्ना निजमहिमावस्थानेन॥ १३॥ ❋ ❋ यद्बांधव इत्यादिश्लोकत्रयस्यापि तेन मुषितोहमिति पूर्वेणैव संबंधः। श्रीकृष्णबांधव एक एवाहं कौरवसैन्याब्धिं नास्त्यंतो गांभीर्येण पारं च देशतो यस्य तं ततरे तीर्णवानुत्तरगोग्रहे। अतीर्याणि दुस्तराणि सत्त्वानि तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन्। परैर्नीतं गोधनं प्रत्याहृतम्। परेषां च शिरोभ्यः सकाशात्तेजास्पदं प्रभावस्यास्पदमुष्णीषरूपं मणिमयं मुकुटरत्नरूपं च बहुधनं तान्मोहनास्त्रेण मोहयित्वा हृतं यद्बांधवेन मया॥ १४॥ ❋ ❋ अदभ्रा अनल्पा ये राजन्यवर्यास्तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयूथपानामायुरादीनि यो दृशा दृष्ट्यैवाच्र्छद्धृतवान्। मनांसीत्युत्साहादिशक्तिम्। सहो बलम्। ओजः अस्त्रादिकौशलम्॥ १५॥ ❋ ❋ यस्य दोष्षु भुजेषु मा मां प्रणिहितं स्थापितं तैरेव गुर्वादिभिर्निरूपितानि प्रयुक्तान्यस्त्राणि न स्पृशंति स्म। गुरुर्द्रोणः। त्रिगर्तस्त्रिगर्तदेशाधिपतिः सुशर्मा। शलः शल्यः, सैंधवः सिंधुदेशाधिपतिर्जयद्रथः। बाह्लिकः शंतनोर्भ्राता। अमोघो महिमा येषां तथाभूतान्यपि। पाठांतरेऽपि स एवार्थः। प्रतीकाराकरणेऽप्यस्पर्शे दृष्टांतः। नृहरिदासं प्रह्लादमिवेति॥ १६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे अजमीढवंशोद्भूतेति। अजमीढस्य हरिभक्तिनिष्ठत्वाच्छोकाकुलो हि हरिं तद्भक्तांश्च सोच्छ्वासं स्मरन्नेव किञ्चिद्वक्ति यथा तथाऽर्जुनोपि राजानं हरिभक्तसंबंधेनामंत्रयामासेति भावः॥ १३॥ ❋ ❋ उत्तरगोग्रहे विराटनगरे। उत्तरकर्तृकपरहृतगोग्रहनिमित्तं युद्धे। ततरे तेजास्पदमिति पदद्वयमार्षम्। अत्र चेयं कथानुसंधेया। विराटे सुशर्मादिभिर्हृतगोधनार्थं भीमादिभिः सह युद्धाय गते पश्चाद्दुर्योधनादिपरिहृतगोधनार्थं बृहन्नटीभूतमर्जुनं सारथिं विधाय युद्धार्थं विराटात्मज उत्तरनामा गतः। स च

भूखका कष्ट न उठाना पड़े।'' द्रौपदीके पास सूर्यकी दी हुई एक ऐसी बटलोई थी, जिसमें सिद्ध किया हुआ अन्न द्रौपदीके भोजन कर लेनेसे पूर्व शेष नहीं होता था; किन्तु उसके भोजन करनेके बाद वह समाप्त हो जाता था। दुर्वासाजी दुर्योधनके कथनानुसार उसके भोजन कर चुकनेपर मध्याह्नमें अपनी शिष्यमण्डलीसहित पहुँचे और धर्मराजसे बोले—''हम नदीपर स्नान करने जाते हैं, तुम हमारे लिए भोजन तैयार रखना।'' इससे द्रौपदीको बड़ी चिन्ता हुई और उसने अति आर्त होकर आर्तबन्धु भगवान् श्रीकृष्णकी शरण ली। भगवान् तुरन्त ही अपना विलासभवन छोड़कर द्रौपदीकी झोंपड़ीपर आये और उनसे बोले—''कृष्णे! आज बड़ी भूख लगी है, कुछ खानेको दो।'' द्रौपदी भगवान्‌की इस अनुपम दयासे गद्गद हो गयी और बोली, ''प्रभो! मेरा बड़ा भाग्य है, जो आज विश्वम्भरने मुझसे भोजन माँगा; परन्तु क्या करूँ? अन्न तो कुटीमें कुछ भी नहीं है।'' भगवान्‌ने कहा—''अच्छा, वह पात्र तो लाओ, उसमें कुछ होगा ही।'' द्रौपदी बटलोई ले आयी; उसमें कहीं शाकका एक कण लगा था। विश्वात्मा हरिने उसीको भोग लगाकर त्रिलोकीको तृप्त कर दिया और भीमसेनसे कहा कि मुनिमण्डलीको भोजनके लिये बुला लाओ किन्तु मुनिगण तो पहले ही तृप्त होकर भाग गये थे। (महाभारत)

१. प्रा० पा०—पुरु। २. प्रा० पा०—कृप। ३. प्रा० पा०—सह उज्जहार।

तान्दृष्ट्वातीवाकुलोऽर्जुनेन सारथिः कृतः । स्वयं रथी भूत्वा ताञ्जित्वा गोधनमानयामासेति निर्णयं महाभारतविराटपर्वतः ॥ १४ ॥ ❀ ❀ हे विभो इति । अधुना त्वमपि माहीनो जात इत्यभिप्रायः । पृषोदरादित्वाद्भाशब्दस्य म्वादेशो ज्ञेयोत्र ॥ १५ ॥ ❀ ❀ पाठांतरेऽमोघमहितानीति पाठे । आसुराणि हिरण्यकशिपुप्रेरितान्यस्त्राणि ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

तत्रैव महेन्द्रभवने विहरतो मम गाण्डीवलक्षणं गाण्डीवेन सह लक्ष्यते इति तथा येन भगवताऽनुभावितं प्रभावं प्रतिनीतं भुजदंडयोर्युग्मं सेंद्रा देवा अरातिवधाय कालेयनिवातकवचाद्यसुरवधार्थं श्रिताः सहायत्वेनाश्रिताः हे आजमीढ ! तेन भूम्नाऽपरिमितानन्दरूपेण परमपुरुषेण श्रीकृष्णेनाहं मुषितोऽस्मि वंचितोऽस्मि । मां विहाय स्वलोकं जगामेत्यर्थः ॥ १३ ॥ ❀ ❀ यद्बान्धव इति । यच्छब्दानामध्याहृततच्छब्दवता लुठंति हृदयं मम माधवस्येत्यनेनान्वयः । यो भगवान् बान्धवो यस्य सोऽहमेक एवातीर्यमतार्यं सत्त्वं बलं यस्य तमनंतपारं निरवधिकं कुरूणां बलरूपमब्धिं रथेन साधनेन ततरे तीर्णवानस्मि आर्षत्वात् "तृफलभजत्रपश्च" इत्येत्वाभ्यासलोपाभाव आत्मनेपदं च, तथा यद्बान्धवेन मया परेषां शत्रूणां बहुधनं प्रत्याहृतं तथा तेषां शिरोभ्यः तेजस्पदं तेजःसुपदमाश्रयं मणिमयं मण्यात्मकं च धनं प्रत्याहृतम् ॥ १४ ॥ ❀ ❀ य इति । हे विभो ! अदभ्राणामनल्पवीर्य्याणां बहूनां राजन्यश्रेष्ठानां रथजालैः मण्डितासु भीष्मादीनां सेनासु यो भगवान्ममाग्रेचरः अवस्थितः दृशा दृष्टिमात्रेण रथयूथपानामोजसा सहितमायुर्मनांसि चार्च्छत् हृतवान् तेनाहं मुषितोऽस्मीति सम्बन्धः ॥ १५ ॥ ❀ ❀ यद्दोःष्विति । यस्य भगवतो दोःषु बाहुषु प्रणिहितं प्रणिधापितं त्वयेति शेषः । त्वया यद्भुजैकशरणत्वेन कृतं तं मामित्यर्थः गुरुभिर्द्रोणिप्रभृतिभिर्निरूपितानि प्रयुक्तान्यप्रतिहतमहिमान्यस्त्राणि नोपास्पृशन् यथा आसुरान्यसुरेण कशिपुना कारिताण्यस्त्रघातादीनि नृसिंहदासं प्रह्लादं नास्पृशंस्तद्वत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

येन कृष्णेनानुभावितं प्रवृद्धबलवत्कृतं गांडीवज्याघातलांछनभुजदंडयुग्मं श्रिताः इन्द्रेण सह वर्तमानाः देवा अरातिवधाय निवातकवचनाम्नां शत्रूणां हननाय कस्य भुजदंडयुग्मं तत्र महेंद्रभवन एव विहरतः क्रीडमानस्य मे मम ॥ १३ ॥ ❀ ❀ येषां बांधवोऽहं कुरुभिर्विराटगोग्रहणे अनंतपारमदृश्यतीरांतरम् अनंतः अपरिच्छिन्नः पारः पूर्तिर्यस्य स तथा तं कुरुसेनासमुद्रं रथेन तरसा वेगेनातरं तीर्णवानस्मीत्यन्वयः, कथंभूतः एकोऽसहायः आर्यसत्त्वः पूज्यबलः किंच यद्बांधवेन मया विराटपुरे गोधनं च प्रत्याहृतं पुनरानीतं तथा परेषां शत्रुभूतानां भीष्मादीनां शिरोभ्यो मणिमयं धनमुष्णीषलक्षणं न केवलं हृतं किंतु परं केवलं तेजोऽभिमानलक्षणं सामर्थ्यमेवापहृतमित्यन्वयः ॥ १४ ॥ ❀ ❀ राजन्यवर्याणां श्रेष्ठानां रथानां मंडलैः समूहैर्मंडितासु अलंकृतासु भीष्मश्च कर्णश्च गुरुश्च शल्यश्च ते तथोक्ताः तेषां सेनापतीनां चमूषु सेनासु मध्ये मम यो रथः तस्मिन् रथे यः अग्रेचरः सारथित्वात्पुरोभागवर्ती तेषामेव रथयूथपानां भीष्मादीनाम् आयुर्मनांसि च सहसा शीघ्रं दृशा दर्शनेनार्च्छत् अपाहरदित्येकान्वयः । चशब्द एवार्थे यदार्च्छत्तद्दृशैव नायुधादिना समुच्चये वा ॥ १५ ॥ ❀ ❀ गुरुभिर्भीष्मादिभिर्निरूपितानि प्रयुक्तानि अमेयमहिमानि अचिंत्यसामर्थ्यानि अस्त्राणि यस्य दोःषु भुजेषु प्रणिहितं निक्षिप्तं मां नोपस्पृशुः न तापं चक्रुरित्यन्वयः । स्पृश उपतापे इति धातुः, कानि कमिव आसुराणि हिरण्यकशिपुप्रेरितानि असुरप्रयुक्तानि नृहरिदासं प्रह्लादं यथा न व्यथयंति तथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भूम्ना सर्व्वमहत्तमेन ॥ १३–१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अरातयो निवातकवचादयो दैत्यास्तेषां वधाय । येन कृष्णेन अनुभावितं प्रभावयुक्तं कृतम् । भूम्ना अतिशयेनाहं मुषितस्त्यक्तः ॥ १३ ॥ ❀ ❀ यः श्रीकृष्ण एव बान्धवो यस्य सोऽहमेक एव कुरुसैन्याब्धिं ततरे तीर्णवान् उत्तरगोग्रहे । नास्त्यन्तो गाम्भीर्य्येण पारश्च देशतो यस्य तम् । अतार्य्याणि दुस्तराणि सत्त्वानि भीष्मादितिमिङ्गिलादीनि यस्मिंस्तम् । गोधनं प्रत्याहृतम् । तथा तान् मोहनास्त्रेण मोहयित्वा शिरोभ्यः सकाशात् तेजस्पदमुष्णीषञ्च हृतम् ॥ १४ ॥ ❀ ❀ अग्रेचरः सारथिरूपेणाग्रे स्थितः सन् हे विभो ! स्वाचिन्त्यप्रभावेण आयुः प्रारब्धकर्म्म स्वसौन्दर्य्येण भीष्मादीनां तेषां मनांसि स्वसामर्थ्यज्ञापनेन सहो मनःपाटवलक्षणं युद्धोत्साहं तेज इन्द्रियपाटवलक्षणं शस्त्रादिग्रहणसामर्थ्यं दृशा स्वदृष्ट्यैव आर्च्छत् जहार ॥ १५ ॥ यस्य दोःषु भुजेषु मा मां प्रणिहितं स्थापितं तेनैवेत्यर्थः, गुर्व्वादिभिर्निरूपितानि प्रयुक्तानि अस्त्राणि न स्पृशन्ति स्म । गुरुर्द्रोणः

नप्ता भूरिश्रवाः । त्रिगर्त्तः त्रिगर्त्तदेशाधिपतिः सुशर्म्मा । शलः शल्यः । सैन्धवः सिन्धुदेशाधिपतिः जयद्रथः । बाह्लीकः शंतनोर्भ्राता, अमोघमहिमानि महितानि चेति पाठश्च । प्रतीकाराकरणेऽप्यस्पर्शे दृष्टान्तः नृहरिदासं प्रह्लादमिवेति ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच इंद्रसहिताः देवाः तत्रैव महेन्द्रभवने विहरतः मे मम येन श्रीकृष्णेनानुभावितं सर्वपराभवशक्तियुक्तं कृतं गाण्डीव-धनुर्लक्षणं चिह्नं यस्य तद्भुजदण्डम् अरातयो हिरण्यपुरादिगता असुरास्तद्वधाय श्रिताः आश्रितवंतः तेन मुषितोऽस्मि असंमन्त्र्य त्यक्तोऽस्मि ॥ १३ ॥ ❀ ❀ यद्बांधव इत्यादिश्लोकत्रयगतानां यच्छब्दानां तेनाहमद्य मुषित इति पूर्वेणैव सम्बन्धः । यः श्रीकृष्णः बान्धवो यस्य सोऽहम् एकोऽसहायः उत्तरगोग्रहे अतीर्याणि दुर्ल्लंघ्यानि भीष्मद्रोणादिरूपाणि सत्त्वानि तिमिंगिलादीनि यस्मिन् तत् अनन्तपारं विपुलं कुरुबलाब्धिं रथेन ततरे तीर्णवानस्मि तन्नीतं बहुधनं च मया यद्बांधवेन प्रत्याहृतम् , परेषां शिरोभ्यस्तेजस्पदन्ते-जसामाश्रयं मणिमयं मुकुटादिकं च हृतम् ॥ १४ ॥ ❀ ❀ हे विभो ! यः श्रीकृष्णः अनल्पराजन्यश्रेष्ठरथसमूहैर्मण्डितासु भीष्मादीनां सेनापतीनां नियम्यासु चमूषु दशसु द्वयोः पंचसु दिवसेषु दिनार्द्धे च ममाग्रेचरः सारथिः सन् दृशा दृष्टिमात्रेणैव रथयूथपानां भीष्मकर्णादीनाम् आयुर्मनांसि जीवनानि मनोवीर्य्याणि सहो बुद्धिसामर्थ्यम् ओज इन्द्रियसामर्थ्यं च आच्छैत् हृतवान् ॥ १५ ॥ ❀ ❀ यद्यस्य चतुर्भुजस्य दोःषु भुजेषु यद्वयास्त्वया प्रणिहितं निधिवत्स्थापितं मां तैर्गुर्वादिभिर्निरूपिता-न्यमोघमहिमान्यस्त्राणि आसुराणि प्रह्लादमिव नोपसस्पृशुः न स्पृशन्ति स्म त्रिगर्तस्त्रैगर्तः सुशर्मा सैंधवो जयद्रथः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तमोमिश्रतमसा सत्त्वमाह तत्रैवेति । तत्रैव स्वर्ग एव विहरतो भुजदंडयुग्मं स्वयं चतुर्भुजा अपि केचनाधिकभुजाः केचन ततोऽप्यधिकभुजा आश्रयणे हेतुः गांडीवलक्षणमिति गांडीवं लक्षणं चिह्नं यस्य अनेन उभयोश्रिह्नितायुधधनुष्टंकारकारणादौ हस्तद्वयं सर्वदा व्याप्रतमिति ज्ञापितं न चैतावता कार्यं सिध्यति महेंद्रपुत्रत्वात् बलं स्ववायुजन्यत्वात् गांडीवस्य च आग्नेयत्वात् इंद्रादीनां मूलभूतानामेव तत्र सत्त्वात् हेत्वंतरं वक्तव्यमित्याकांक्षायामाह–यदनुभावितमिति आजमीढेति वैक्लव्याभावाय, स हि त्रिभिः पुरुषैः सह युक्तः तमसा मिलिततमसा वंचितस्याभिप्रेतत्वात् उपकारासमाप्तावेव कारणगुणनिरूपणादाह–मोषे हेतुः पुरुषे-णेति ब्रह्मांडविग्रहत्वात् रोगनाशे औषधत्यागवत् तेजोहरणेऽपि भगवतो व्यापकत्वात् ज्ञानद्वारा मोक्षं दास्यतीति नानाप्तत्वमित्याह भूम्नेति । वस्तुतस्तु यत्तेजसा नृपशिरोंऽघ्रिश्लोकवत् पत्न्यास्तव यो नो जुगोपेत्येतावपि विगीतौ अर्ज्जुनविषयत्वाभावात् कुश्लिष्ट-त्वाच्च अतः सत्त्वतमोभिरेव श्लोकत्रयप्रतिपाद्यैर्भगवच्चरित्रमुक्त्वा मोषश्चतुर्थे प्रतिपाद्यते लोकत्रयजयस्यैव अभीष्टत्वात् दैत्यजयः साधनप्राप्त्या निरूपणीयोऽपि भोग्यस्य प्राधान्यात् स एव निरूपितः । अर्थान्निरूपितोऽपि संहारे अनुवदनवंचनशेषतया निरूपितः । दैत्यानां तत्प्राधान्यात् मायेत्यसुरा इति श्रुतेः, यत्पुनरग्रे भगवच्चरित्रकथनं तदवतारकार्यमिति नात्यन्तमर्ज्जुनानुग्रहः सिद्ध्यति । भूभारहरणस्य स्वापेक्षितत्वात् "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्नि"ति भगवद्वाक्याच्च । अतोऽर्जुनेन भगवतः उपकारत्रयमेवानुगुणानुरूपं दोषाभावायाग्रे त्रयं वक्ष्यते सौत्ये वृत इत्यादिभिस्त्रिभिः । 'कारणं करणं चैव प्रतिबन्धश्च कथ्यते । स्वकृतत्वज्ञापनाय माहात्म्यज्ञापनाय तत्' दोषाभावेन सहितं दोषेणापि विमिश्रितम् ॥ कृष्णमाहात्म्यज्ञापनं त्रिभिः त्रिभिश्च दोषाभावः द्वयेन दैन्यमिति अन्तर्बहिः साधनहरणात् इति युक्तमुत्पश्यामः ॥ १३ ॥ ❀ ❀ ततो मिश्ररजसा चरित्रमाह यद्बान्धव इति । हेतुत्वेन कारणं वा यस्य भगवतो बान्धवः भगवद्बन्धुत्वेनैव भजनसांनिध्याभावेऽपि कुरुबलाब्धितरणं सेनाया नित्यनूतनत्वाय अब्धि-त्वमनन्तपारमिति देशकालानवच्छिन्नन्तत्रत्या अवध्या इति कालानवच्छिन्नता अनुल्लंघ्या इति देशानवच्छिन्नता तत्र एकः असहायः उत्तरे ग्रहणे उत्तरस्य भीतस्य दर्शनार्थं स्थापितत्वात् रथेनेति प्लवनशंका निवारिता तेन निलीयगमनं परास्तं अतार्याः कर्णादयः त एव सत्त्वानि जलचरादयो यस्मिन् । अनेन तैस्तत्र पतितस्य पुनरनावृत्तिः सूचिता कुतस्तरणमिति भावः, न केवलं तरणं कृतं किन्तु तत्रत्यानि रत्नान्यपाहृतानीत्यभिप्रायेणाह–प्रत्याहृतं पुरु धनं चेति वस्तुतस्तु तत् भव्यमर्जुनस्यैव राज्यस्वामित्वात् तैः परं बलात् गृहीतं तत् पुनः प्रत्याहृतमिति प्रतिशब्दार्थः । चकाराद्वस्त्राणि तेजस्पदन्तेजःसंस्थानं तद्व्याजेन तेजोऽप्यपहृतमित्यर्थः, मणिम-यममूल्यं सर्वपुरुषार्थसाधकं वा अनेन च सर्वस्वं सर्वे च पुरुषार्था हृता इति ज्ञापितं, चकारात् शिरोरत्नं रत्नानि च सहजानि शिरोभ्य इति तद्व्याजेन शिरांस्येवापहृतानीत्यर्थः संमोहनास्त्रेण मोहयित्वा सर्वं हृतमत्र बन्धुत्वमेव निमित्तम् ॥ १४ ॥ ❀ ❀ सत्त्वमिश्ररजसा कृतमाह यो भीष्मकर्णेति । पूर्वपरीक्षार्थं गतत्वात् असावधानैर्गतमिदानीं युद्धार्थं शस्त्रास्त्रादिसम्पन्नाः मंत्रादियुक्त-कवचादिमंतःकालेनापि मारयितुमशक्याः कालकामपरशुरामादिजेतारः अशक्या इति मत्वा स्वयमग्रेचरो भूत्वा तेषामायुर्मनांसि च उत्साहशक्तीः चकारात् विवेकधैर्यादिकं च दृशा दृष्टिमात्रेणैव आच्छैत् आहृतवान् ओजसा सहेत्यर्थः। अथवा सहः अन्तःकरणशक्तिः ओजः इन्द्रियशक्तिः तदपि हृतवानित्यर्थः गुरुर्द्रोणः चत्वार एव सेनापतयो जाताः तेषां चमूषु भीष्मगुरुमध्ये कर्णकथनमतिसामर्थ्य-द्योतनार्थमदभ्रा ये राजन्यवर्याः कुत्रापि मारणार्थं छिद्ररहिताः तेषां रथमंडलानि तैर्मंडितासु अनेन तासु प्रविष्टो वशीकरो भवतीति सूचितम्। एवं सेनाचतुष्टयेऽपि भगवतैव सर्वं कृतं न मयेत्युक्तम् अनेन स्वयं करणमुक्तम् ॥१५॥ ❀ ❀ रजोमिश्ररजसा कृतमाह

परकृतप्रतिबंधं वा यद्दोःषु मामिति प्रणिहितं स्थापितं द्रौणिरश्वत्थामा त्रिगर्त्तः सुशर्मा शलः शल्यः सैंधवः जयद्रथः अमोघो महिमा येषां निरूपितानि मद्वधार्थं प्रक्षिप्तान्यपि मां नोपास्पृशन् समीपे रथादिकमपि तस्य दृष्टवतः नोपास्पृशन्निति भावः, नृहरिदासं प्रह्लादं प्रसिद्धो दृष्टांतः प्रमेयबले प्रमाणबलदृष्टांतः दास्यभक्तेः शास्त्रीयत्वात् यद्दोःष्विति प्रमेयबलत्वम् आसुराणि असुरकृतानि शूलादीनि गुणकृतमुक्त्वा स्वभावकृतेषु नीचकर्मणि नियुक्तः तदपराधं सोढवानित्यर्थः ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तत्रैवेत्यत्र । ननु पूर्वश्लोकवदुत्तरश्लोकानामपि यत्पदोपबन्धवतां सत्त्वादस्मिन्नेवमध्यस्य किमिति मोष उच्यत इत्याकाङ्क्षायामाहुः तमसेत्यादि । गुणनिरूपणादिति । आजमीढपदेन मोक्षदाननिरूपणात् । तथा चैवं हेतुद्वयात् परोक्षत्वं मोक्षदातृत्वञ्च वक्तुं मोषमाहेत्यर्थः । ब्रह्माण्डविग्रहत्वादिति । तथा च तेन रूपेणातिपरोक्षतया मोपहेतुत्वमित्यर्थः । तेजोपहरणेपीति । कार्यकारणोत्तरं तेजोपहरणेपीत्यर्थः । एवं सर्वसम्मतपाठमादृत्य मोषोक्तिः समर्थिता । अतः परं सिद्धान्तपक्षेण समर्थयन्ति वस्तुत इत्यादि । ननु गुणैः कार्यान्तरमपि जायत एवेति त्रयेणैव निरूपणं कुत इत्याकाङ्क्षायामाहुः लोकत्रयेत्यादि । नृदेवदैत्यात्मककाये लोकास्तज्जयस्यैवार्जुनेष्यमाणत्वादित्यर्थः । यत्तेजसेति श्लोके दैत्यजयस्यास्पष्टत्वात्तत्स्फुटीकर्तुमाहुः दैत्येत्यादि । अत्र दैत्यजय इत्यादौ सप्तम्यन्तः पाठः प्रतिभाति । तथा च तस्मिन्नेवं निरूपणीयेपि अभीष्टेषु भोगस्य प्राधान्यात्स एव तत्र निरूपित इत्यर्थः । तर्हि तन्निरूपणे किं मानमत आहुः अर्थादित्यादि । आसनार्द्धप्राप्तिरूपस्यार्थस्य देवारातिवधादेव जातत्वात्तन्निरूपणेनार्थादेव निरूपितोपि देवलोकवृत्तान्तोपसंहारे तदनुवदनभगवत्कृतवञ्चनयोः शेषतयाङ्गतयाग्रिमश्लोके निरूपितः । तथा चाग्रेनुवाद एव मानमित्यर्थः । ननु तथापि मध्ये वञ्चननिरूपणस्य तात्पर्यमाहुः दैत्यानामित्यादि । तत्प्राधान्यादिति वञ्चनप्राधान्यात् । तथा चेदानीं संहारकालत्वात्तत्र च 'अन्ते त्वधर्महरमन्युवशासुराद्या' इति वाक्येनासुराणामुपकरणरूपत्वादिदानीं तदनुगुणत्वबोधनाय तदुक्तिरित्यर्थः । नन्वेवं सत्यग्रे भगवच्चरित्रनिरूपणस्य किं प्रयोजनम् , प्रश्नोत्तरस्य तावतैव जातत्वादित्याकाङ्क्षायामाहुः यदित्यादि । नात्यन्तमिति । आपाततः प्रतीयमानोपि तेषु श्लोकेषु सोत्यन्तं न सिध्यतीत्यर्थः । अनुग्रह उपकारः । अत्यन्तासिद्धौ गमकद्वयमाहुः भूभारेत्यादि । सिद्धमाहुः अत इति । यद्बान्धवेत्यादिपद्यत्रयस्यावतारकार्यबोधनमात्रार्थत्वात् । नन्वेवं सति मध्ये एतेषां किं प्रयोजनमित्याकाङ्क्षायां तत्तात्पर्यं कारिकाभ्यामाहुः कारणमित्यादि । इतरसंहारस्यार्जुनद्वारा कारणं स्वयं तत्करणं अर्जुनसंहारप्रतिबन्धश्चेति त्रयं भगवतस्तूष्णीकत्वेपि भगवत्कृतत्वमेषां ज्ञापयितुं कथ्यते । वदिति स्वकृतत्वज्ञापनम् । एवं कथनस्य प्रयोजनमाहुः दोषेत्यादि । सिद्धमाहुः अत इत्यादि । अन्तःसाधनं बलम् , बहिःसाधनं धन्वादिसामर्थ्यम् , तथा चैवमुपपत्तौ तेषां श्लोकानां विगीतत्वं युक्तमेवेत्यर्थः । सर्वसम्मतपक्षमाश्रित्याहुः तमोमिश्रेत्यादि । विगीतत्वाभिप्रायेणाहुः हेतुत्वेनेत्यादि । एवमग्रेपि ॥ १३ ॥ ❀ ❀ यद्बान्धव इत्यत्र । कथं निवारितेत्यत आहुः तेनेत्यादि । निलीय गमननिरासे एकस्य तत्राशक्तत्वान्निवारितेत्यर्थः ॥ १४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्रैवेन्द्रभवने विहरतो मे येनानुभावितं प्रभावयुक्तं कृतं गाण्डीवलक्षणं गाण्डीवेन सह लक्ष्यते इति तथाभूतं भुजदण्डयोर्युग्मं सेन्द्रा देवा अरातिवधाय कालकेयनिवातकवचाद्यसुरवधार्थं श्रिताः सहायत्वेनाश्रिताः हे आजमीढ हे राजन् तेन भूम्ना परिपूर्णतमेन पुरुषेण श्रीकृष्णेनाहमद्य मुषितोऽस्मि वञ्चितोऽस्मि, मां विहाय स्वलोकं जगामेत्यर्थः ॥ १३ ॥ ❀ ❀ यद्बान्धव इत्यादियच्छब्दानां स सौत्ये वृत इत्यध्याहृतेन तच्छब्देनान्वयः । यो भगवान् बान्धवः सहायभूतो भ्राता यस्य सोऽहं एक एव कुरूणां बलाब्धिं सेनारूपं समुद्रं ततरे तीर्णवानित्यन्वयः । केन साधनेनेत्यपेक्षायामाह–रथेनेति । सेनायाः समुद्रत्वमुपपादयति–अनन्तेति । नास्त्यन्तो गाम्भीर्येण पारं च देशतो यस्य तम् । अतीर्याणि दुस्तराणि सत्त्वानि भीष्मादिरूपाणि तिमिङ्गिलादीनि यस्मिंस्तम् । कथं तीर्णं इत्यपेक्षायामाह–प्रत्याहृतमिति, उत्तरगोग्रहे भीष्मादीन् विनिर्जित्य तैर्नीतं गोधनं प्रत्याहृतमित्यर्थः । न चैतावत् किन्तु यद्बान्धवेन मया परेषां शत्रूणां शिरोभ्यः सकाशात् तेजःपदं प्रभावस्य व्यञ्जकं मणिमयं मुकुटोष्णीषादिरूपं च हृतमित्यन्वयः ॥ १४ ॥ ❀ ❀ हे विभो युधिष्ठिर अदभ्राणामनल्पवीर्याणां बहूनां राजन्यश्रेष्ठानां रथसमूहैर्मण्डितासु भीष्मादीनां सेनासु यो भगवान् सारथिरूपेण ममाग्रेचरः अवस्थितः सन् दृशा दृष्टिमात्रेणैव तेषां रथयूथपानामायुरादीनि आच्छैत् हृतवान् 'कालोऽस्मि लोकक्षयकृत् प्रवृद्धः' इति वाक्यात् । मनांसीत्युत्साहादिशक्तीः । सहो बलम् । ओजः अस्त्रादिकौशलम् ॥१५॥ ❀ ❀ यस्य दोष्षु भुजेषु मध्ये प्रणिहितं तेनैव कृपया स्थापितं मा माममोघः अप्रतिहतो महिमा येषां तथाभूतान्यपि गुर्वादिभिर्निरूपितानि प्रयुक्तान्यस्त्राणि नोपस्पृशुर्न स्पृशन्ति स्मेत्यन्वयः । प्रतीकाराकरणेऽप्यस्पर्शे दृष्टान्तमाह–नृहरिदासं प्रह्लादं यथा आसुराणि असुरैः प्रयुक्तान्यस्त्राणि न स्पृशन्ति स्म तथेत्यर्थः । गुरुर्द्रोणः । द्रौणिरश्वत्थामा । त्रिगर्तः त्रिगर्तदेशाधिपतिः सुशर्मा । शलः शल्यः । सैन्धवः सिन्धुदेशाधिपतिर्जयद्रथः । बाह्लिकः शन्तनोर्भ्राता ॥ १६ ॥

हिन्दी अनुवाद

उनके आग्रहसे जब मैं स्वर्गमें ही कुछ दिनोंतक रह गया तब इन्द्रके साथ समस्त देवताओंने मेरी इन्हीं गाण्डीव धारण करनेवाली भुजाओंका निवातकवच आदि दैत्योंको मारनेके लिये आश्रय लिया। महाराज! यह सब जिनकी महती कृपाका फल था, उन्हीं पुरुषोत्तम भगवान् श्रीकृष्णने मुझे आज ठग लिया ॥ १३ ॥ ❀ ❀ महाराज! कौरवोंकी सेना भीष्म-द्रोण आदि अजेय महामत्स्योंसे पूर्ण अपार समुद्रके समान दुस्तर थी, परन्तु उनका आश्रय ग्रहण करके अकेले ही रथपर सवार हो मैं उसे पार कर गया। उन्हींकी सहायतासे, आपको याद होगा, मैंने शत्रुओंसे राजा विराटका सारा गोधन तो वापिस ले ही लिया, साथ ही उनके सिरों परसे चमकते हुए मणिमय मुकुट तथा अङ्गोंके अलङ्कारतक छीन लिये थे ॥ १४ ॥ ❀ ❀ भाईजी! कौरवोंकी सेना भीष्म, कर्ण, द्रोण, शल्य तथा अन्य बड़े-बड़े राजाओं और क्षत्रिय वीरोंके रथोंसे शोभायमान थी। इसके सामने मेरे आगे-आगे चलकर वे अपनी दृष्टिसे ही उन महारथी यूथपतियोंकी आयु, मन, उत्साह और बलको छीन लिया करते थे ॥ १५ ॥ ❀ ❀ द्रोणाचार्य, भीष्म, कर्ण भूरिश्रवा, सुशर्मा, शल्य, जयद्रथ और बाह्लीक आदि वीरोंने मुझपर अपने कभी न चूकनेवाले अस्त्र चलाये थे; परन्तु जैसे हिरण्यकशिपु आदि दैत्योंके अस्त्र-शस्त्र भगवद्भक्त प्रह्लादका स्पर्श नहीं करते थे, वैसे ही उनके शस्त्रास्त्र मुझे छूतक नहीं सके। यह श्रीकृष्णके भुजदण्डोंकी छत्रछायामें रहनेका ही प्रभाव था ॥ १६ ॥

सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजन्ति भव्याः ।
मां श्रान्तवाहमरयो रथिनो भुविष्ठं न प्राहरन् यदनुभावनिरस्तचित्ताः ॥ १७ ॥
नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति ।
संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥ १८ ॥
शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ।
सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥ १९ ॥
सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः ।
अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वापराधमनुस्मरन् संतप्यमान आह। सौत्ये सारथ्ये कुमतिना मे मया स वृतः। कुमतित्वमेवाह आत्मद इत्यादिना। अभवाय मोक्षाय। भव्याः श्रेष्ठाः। श्रांता वाहा अश्वा यस्य तं माम्। जयद्रथवधे हि जलपानं विनाश्वाः श्रांतास्ततो रथादवतीर्य बाणैर्भुवं भित्त्वा मया जलं संपादितं तदा यस्यानुभावेन निरस्तचित्ता अरयो मां न प्रहृतवंतः स सौत्ये वृत इति कुमतित्वम् ॥ १७ ॥ ❀ ❀ हे नरदेव उदारं गंभीरं रुचिरं च यत्स्मितं तेन शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रस्तावेषु हे पार्थेत्यादीनि मधुराक्षराणि संजल्पितानि च हृदिस्पृशानि मनोज्ञानि माधवस्य यान्येतानि तानीदानीं स्मर्तुर्मम हृदयं लुठंति लोठयंति। क्षोभयंति। णिजभाव आर्षः ॥ १८ ॥ ❀ ❀ विकत्थनं स्वगुणश्लाघनादि। शय्यादिष्वैक्यादव्यतिरेकाद्धेतोः कदाचिद्व्यभिचारं दृष्ट्वा हे वयस्य ऋतवान् सत्ययुक्तस्त्वमिति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि। ऋभुमानिति पाठे ऋभवो देवाः सेवकाः संति यस्य सः। असौ महानपि मया वयस्य इति मत्वा विप्रलब्धस्तिरस्कृत इत्यर्थः। ऋतमानिति पाठे वत्त्वाभाव आर्षः। मेऽघमपराधमसहत। महितया महत्त्वेन ऐकपद्येऽतिमहत्त्वेनेत्यर्थः। सख्युरघं सखेव तनयस्याघं पितेव ॥ १९ ॥ ❀ ❀ त्वया शंकितं पराजयं चापि प्राप्तोऽहमित्याह। तेन सख्या रहितोऽतो हृदयेन शून्यः। अंग हे राजन्! उरुक्रमस्य परिग्रहं षोडश-सहस्रस्त्रीलक्षणम्। असद्भिर्नीचैः। अबला योषेव ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आत्मद इति। "आत्मदा बलदा" इति श्रुतेः ॥ १७ ॥ ❀ ❀ हे नरदेवेति। भगवत्सांनिध्ये हि त्वं देवैरपि दीव्यस्यधुना केवलं नरदेव एव जात इति भावः। यद्वा पूर्वं त्वं नरनारायणाभ्यामुभाभ्यामावाभ्यां दीव्यन्नासीरधुना केवलेन मया नरेणैव दीव्यसीति भावः ॥ १८ ॥ ❀ ❀ व्यभिचारं लीलया स्वोक्तिविलंघनादिरूपम्। इत्यर्थ इति। न हि सर्वेश्वरं प्रति वयस्यादिरूपा संबुद्धिरुचितेति भावः। आदिशब्देन विरुद्धभाषणादिग्रहः। ऐकपद्ये महामहितयेत्येवमैकपद्ये। इत्यर्थ इति। महती चासौ महिता चेति तथा। सामानाधिकरण्ये महतष्टेराकारः पुंवद्भावश्च ॥ १९ ॥ ❀ ❀ हे नृपेन्द्रेति। तवापि

नृपेंद्रत्वं तत्कृतमेवेति भावः । त्वया शंकितं पराजयं च प्राप्तोस्मीत्याह-तेन सख्या रहितः । अतो हृदयेन मनसा शून्यो मूर्च्छितप्राय इत्यर्थः । उरुक्रमस्य परिग्रहं षोडशस्त्रीसहस्रलक्षणम् । असद्भिर्नीचैः । वस्तुतस्तु न विद्यंते संतो येभ्यस्तैर्गां पृथ्वीं द्यां च पांतीति तैः गोपजातित्वाच्च गोपैः वाः स्वप्रेयसीव प्रकटप्रकाशे प्रवेशनार्थं तत्तद्रूपेण भगवतैव तासामाकर्षणात् । "न वयं साध्वि साम्राज्यम्" इत्यादौ कामयामह एतस्येत्यनेन "व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥" इति । तासां वाक्येन व्रजस्त्रीवांछित एव भगवत्स्वरूपे तासां भगवदुपभुक्तदेहानां साक्षाल्लक्ष्मीरूपाणां नीचस्पर्शे सद्य एवांतर्द्धानं स्यादित्यतः प्रकारांतरेण तासां व्रजस्त्रीत्वप्राप्तिरिति ज्ञेयम् । विष्णुपुराणब्रह्मपुराणयोरप्यत्रैवार्थे तात्पर्यमवगम्यते । यथा तत्र तत्रार्जुनं प्रति व्यासवचनम्-"एवं तस्य मुनेश्शापादष्टावक्रस्य केशवम् । भर्त्तारं प्राप्य ता याता दस्युहस्ता वरांगनाः" इति पुरा देव्योऽष्टावक्रमुनिं स्तुत्वा विष्णुर्वः पतिर्भविष्यतीति तस्माद्वरं प्राप्य तदंगवक्रिमदर्शनोत्थादुपहासात् "दस्युहस्ता भविष्यथ" इत्यभिशापं च प्राप्य पुनः प्रसादितात्च तस्माच्छापांतं च प्राप्येता भर्त्तारं प्राप्य दस्युहस्तं गता इति मुनेः शापप्रसादयोरमोघत्वाद्दस्युहस्तगतत्वं भर्तुः प्राप्तिश्च तासां तंत्रेणैवाभूत्स्वभर्तुः कृष्णस्यैव दस्युरूपत्वात् । अतस्तत्रैव पुनर्वचनांतरञ्च यथा "तत्त्वया न हि कर्त्तव्यः शोकोल्पोपि हि पांडव । तेनाप्यखिलनाथेन सर्वं तदुपसंहृतम्" इति । अखिलः पूर्ण एव नाथः पतिः कृष्णस्तेन तत्सर्वप्रियावृन्दमुप निकट एव सम्यक् हृतमर्जुनसकशाद् गृहीतमित्येव व्याख्येयम् ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

सौत्य इति । यस्य भगवतः पादपद्मं भव्याः साधवो भवाय मुक्तये भजन्ति य आत्मद आत्मपर्यन्तवदान्यः "य आत्मदो बलदायक एको बहूनां यो विदधाति कामानि" ति श्रुतेः, ईश्वरः सर्वनियंता कुबुद्धिना मे मया सौत्ये सारथ्ये निमित्ते वृतः श्रांतैर्वाहैः सहितमत एव भुविष्ठमपि मां यस्य भगवतः प्रभावेण निरस्तं विमोहितं चित्तं येषां ते नृपा न प्राहरन्न प्रहृतवन्तः ॥ १७ ॥ ❀ ❀ नर्माणीति हे नरदेव ! तस्य माधवस्य श्रीकृष्णस्य उदारेण रुचिरेण सुन्दरेण च स्मितेन शोभितानि नर्माणि परिहासवाक्यानि हे पार्थेत्यादिरूपाणि सम्बोधनात्मकानि जल्पितानि च स्मरतो मम हृदयं लुठन्ति छिंदन्ति ॥ १८ ॥ ❀ ❀ शय्येति । शय्यादिव्यापारेष्वैक्यं साधारण्यं साम्यमिति यावत् , तेन न विद्यते द्वयं द्वैविध्यमन्यतरस्य व्यापारांतरं यस्य तस्य कुमतेर्मे मम सख्युरघं सखेव तनयस्याघं पितृवत्पितेवेत्युक्तप्रकारेण विप्रलब्धोऽधिक्षिप्तः ऋभुमान् ऋभवो देवास्तद्वान् धनवानितिवत् देवानां स्वामीत्यर्थः । महामहितया महामहिमत्वात् , महान् महितयेति पाठे महिता माहात्म्यं तेन महान् सर्वमघमपराधं सेहे सोढवान् । ऋतवानिति पाठे ऋतं सत्यं वाचिकं काकुगर्भं विवक्षितं त्वं सत्यवादी किलेत्येवमादिरूपेण विप्रलब्धोऽपीत्यर्थः ॥१९॥ ❀ ❀ सोऽहमिति । स ऐक्यद्वयोऽहं हे नृपेंद्र ! सख्या मित्रेण प्रियेण निरतिशयप्रीतिविषयेण हृदयते गच्छतीति हृदयः अय गताविति धातुः, हृदयंगमेन सुहृदा हितैषिणा पुरुषोत्तमेन शून्यो रहितः अंग हे राजन् ! अध्वनि उरुक्रमस्य श्रीकृष्णस्य परिग्रहं कलत्रमंडलं रक्षन् गोपैरप्यसद्भिर्दुर्जनैरबलेव योषिदिव निर्जितोऽस्मीति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे नरेंद्र ! दर्शी सर्वज्ञो य ईशो रणमूर्ध्नि अलब्धरूपं केनाप्यज्ञातपूर्वरूपं मे अवदत् सूत्रादयः मुख्यप्राणमुखा देवास्तं न विदुरिति यद्यस्मात्तस्मादीशोऽवतर्क्यविहारः अचिंत्यक्रीड इत्यन्वयः । लब्धरूपमानन्दरूपमिति वा कथंभूताः सूत्रादयः यस्य मायया मोहकशक्त्या आवृतदृशः पिहितनेत्राः नष्टज्ञाना इति यावत् । कथमावृतदृश इति तत्राह अहमहमिति भव्याः ज्ञातुं योग्यतावंतः सकलमङ्गलरूपा इति वा । (भिन्नपाठस्येयं टीकेति विभाव्यते-सं०) भव्या मुमुक्षवो यत्पादपद्ममभवाय भजंति यस्य श्रीकृष्णस्यानुभावेन महिम्ना निरस्तं मुग्धं चित्तं येषां ते तथोक्ता अरयः कर्णादयो मां न प्राहरन्नायुध्यन् , कथंभूताः रथिनः रथादियुद्धसाधनोपेताः, किंविशिष्टं मां भुविष्ठं भूमौ स्थितं सम्यक् श्रांताः वाहा अश्वा यस्य स तथोक्तः तं, श्रांतानां वाहानां जलपानाय रथादवरुह्य युद्धसाधनमन्तरेण भूमितले स्थितमित्यर्थः, सोऽयमीश्वरः कुमतिना मया मे मत्संबंधिनि सौत्ये सारथ्यकर्मणि वृतः, किंविशिष्टः आत्मानं ददातीत्यात्मदः "य आत्मदाबलदा" इति श्रुतेः अद्य तेन भूम्ना पुरुषेण मुषितोऽस्मीति परमोऽन्वयः ॥ १७ ॥ ❀ ❀ हे नरदेव ! माधवस्य हृदिस्पृशानि मनोहराणि हे पार्थ अर्जुनेत्यादीनि गोष्ठ्यां संजल्पितानि नर्माणि परिहासलक्षणानि स्मर्तुर्मम हृदयं लुठंति परिवर्तंते हृदयान्न निर्गच्छंति, कथंभूतानि उदारं गंभीरं रुचिरं यत्स्मितं तेन शोभनानि मङ्गलानि ॥ १८ ॥ ❀ ❀ ममायं कृष्णो वयस्यः, अहमेतादृशेन कृष्णेन समानवयस्कत्वादृभुमान् सदैव इति भावेन परमेष्ठदेवेन श्रीकृष्णेन शय्यादिष्वैक्यात्तेन वंचितः तादृशबुद्धेस्तदधीनत्वात्परदेवतया शय्याद्यैक्यमपराधो हि यस्मात्तस्माद्वंचितोऽस्मि । शय्या शयनं विकत्थनं गालीवचनं स्तवनं वा तथापि स कृष्णो महतो महित्वेन सख्युरघमपराधं सखेव पुत्रस्याघं पितेव कुत्सितबुद्धेर्मेऽघं मया विप्रलब्धोऽपि संवंचितोऽपि महामहितया कुमतेर्मेऽघं सेह इति वा । शय्यादिषु ऋभुमान्महात्मा मया विप्रलब्धस्तिरस्कृतः किमिति वयस्यः सखेत्यैक्यव्यवहारात्तथापि महामाहात्म्येन ममापराधं सेह

इति वा ॥ १९ ॥ ❀ ❀ शून्योऽस्मीति विकल्पं पुनः स्पष्टं परिहरतीत्याह सोऽहमिति । हे नृपेंद्र ! सख्या जन्मप्रभृति-सहवर्तमानेन प्रियेण विषयादिसुखप्रापकेण सुहृदा अनिमित्तबंधुना हृदयेनातिस्निग्धेन अतिक्रांतेन वा पुरुषोत्तमेन क्षराक्षरमतीत्य वर्तमानेन कृष्णेन रहितः शून्योऽमङ्गलोऽस्मीत्येकान्वयः । येन मेऽपहृतं तेज इत्येतद्विवृणोति अध्वनीति, अंग राजन् ! उरुक्रमस्य हरेः परिग्रहं कलत्रं रक्षन्नागच्छन्नसद्भिरसाधुभिर्गोपैरबला योषेव विनिर्जितोऽस्मि । तस्मात्तेन मम तेजोपहृतमिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सोऽहमित्येकादशक्रमव्याख्यायां त्वं तु मद्धर्म्ममास्थायेत्यादौ राजन् परस्येत्यादौ मायिकलीलामयत्वेनैवेति दर्शयिष्यते । ब्रह्मपुराणस्यात्रैवार्थे तात्पर्यमवगम्यते । अर्जुनं प्रति व्यासवचनम् यथा–'तत् त्वया न हि कर्त्तव्यः शोकोऽल्पोऽपि हि पाण्डव । केनाप्यखिलनाथेन सर्व्वं तदुपसंहृतमि'ति । अखिलः पूर्ण एव नाथः पतिः कृष्णस्तेन तत्सर्व्वं स्वप्रियावृन्दम् उप निकट एव सम्यक् प्रकारेण हृतम् अर्ज्जुनात् सकाशात् गृहीतमित्येव व्याख्येयम् ॥ २०–२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तद्विरहेण तदैश्वर्य्यस्मृत्या दास्यभावस्यैवोदयात् स्वाभाविकस्य सख्यभावस्यापलापात् तत्कार्यसारथ्यादिकमपराधत्वेन निश्चिन्वन् अनुतप्यमान आह । सौत्ये सारथ्ये अभवाय मोक्षाय भव्या भजन्ति अहन्त्वभव्यस्तमेव भजनमकारयम् । एतावदपराधवत्यपि मयि तस्य दयां शृण्वन्नाह । श्रान्ता वाहा अश्वा यस्य तं मां–जयद्रथवधे हि जलपानं विना अश्वाः श्रान्ताः ततो रथादवतीर्य बाणैर्भुवं भित्त्वा जलं सम्पादितं मया तदा यस्यानुभावेन निरस्तचित्ता अरयो न प्राहरन् ॥ १७ ॥ ❀ ❀ मधुराक्षरत्वात् हृदिस्पृशानि लुठन्ति लोठयन्ति, णिजभाव आर्षः ॥ १८ ॥ ❀ ❀ ऐक्यात् परस्परप्राणैक्याद्दतवांस्त्वमेव सत्यवादीति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि । ऋभुमानिति पाठे ऋभवो देवाः सेवकाः सन्ति यस्य, असावपि तिरस्कृतः । तदपि महितया स्वमहत्त्वेन ॥ १९ ॥ ❀ ❀ त्वया शङ्कितं पराजयञ्च प्राप्तोऽस्मीत्याह–तेन सख्या रहितः अतो हृदयेन मनसा शून्यः मूर्छितप्राय इत्यर्थः, उरुक्रमस्य परिग्रहं षोडशसहस्रस्त्रीलक्षणम् असद्भिर्नीचैः वस्तुतस्तु न विद्यन्ते सन्तो येभ्यस्तैर्गां पृथ्वीं द्याञ्च पान्तीति तैः गोपजातित्वाच्च गोपैः ताः स्वप्रेयसीरप्रकटप्रकाशे प्रवेशनार्थं तत्तद्रूपेण भगवतैव तासामाकर्षणात् । 'न वयं साध्वि साम्राज्यमित्या'दौ कामयामह एतस्येत्यनेन 'व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥' इति तासां वाक्येन व्रजस्त्रीवाञ्छित एव भगवत्स्वरूपः तासां मनोरथोऽवगतः । अन्यथा तासां भगवदुपभुक्तदेहानां साक्षाल्लक्ष्मीरूपाणां नीचस्पर्शे सद्य एवान्तर्धानं स्यादित्यतः प्रकाशान्तरेण तासां व्रजस्त्रीत्वप्राप्तिरिति ज्ञेयम् । विष्णुपुराणब्रह्मपुराणयोरप्यत्रैवार्थे तात्पर्यमवगम्यते । यथा तत्र तत्रार्ज्जुनं प्रति व्यासवचनम्–'एवं तस्य मुनेः शापादष्टावक्रस्य केशवम् । भर्त्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः ॥' इति पुरा देव्योऽष्टावक्रमुनिं स्तुत्वा विष्णुर्वः पतिर्भविष्यतीति तस्माद्वरं प्राप्य तदङ्गवक्रिमदर्शनोत्थादुपहासाद्दस्युहस्ता भविष्यथ इत्यभिशापञ्च प्राप्य पुनः प्रसादिताच्च तस्माच्छापान्तञ्च प्रापुस्ता भर्त्तारं प्राप्य दस्युहस्तं गता इति मुनेः शापप्रसादयोरमोघत्वाद्दस्युहस्तगतत्वं भर्त्तुः प्राप्तिश्च तासां तन्त्रेणैवाभूत् , स्वभर्त्तुः कृष्णस्यैव दस्युरूपत्वात् । अतस्तत्रैव पुनर्वचनान्तरञ्च यथा 'तत् त्वया न हि कर्त्तव्यः शोकोऽल्पोऽपि हि पाण्डव । तेनाप्यखिलनाथेन सर्व्वं तदुपसंहृतमि'ति । अखिलः पूर्ण एव नाथः पतिः कृष्णस्तेन तत् सर्व्वं स्वप्रियावृन्दम् उप निकट एव सम्यक् प्रकारेण हृतम् अर्ज्जुनात् सकाशात् गृहीतमित्येव व्याख्येयम् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकाहसाध्ये जयद्रथवधे आदित्यास्तमनात्पूर्वकाले जयद्रथमहत्वा सरथोऽग्नौ प्रवेशं करिष्यामीति प्रतिज्ञाय परसैन्ये प्रविष्टं मध्याह्ने जलादिना स्वश्रमापनोदनार्थं दिव्यास्त्राभिमंत्रितैर्बाणैर्जलाशयं कर्तुं रथादवतीर्णमत एव भुविष्ठं मां यदनुभावेन प्रभावेण निरस्तचित्ता अरयो न प्राहरन् न प्रहृतवंतः स ईश्वरः "य आत्मदो बलद" इति श्रुतिविध आत्मदः मे मया कुमतिना सौत्ये सूतकर्मणि वृतः ॥ १७ ॥ ❀ ❀ हे नरदेव ! माधवस्य उदारेण गम्भीरेण रुचिरेण मन्दतरेण च स्मितेन शोभितानि नर्माणि परिहासवाक्यानि हे पार्थेत्यादीनि संजल्पितानि प्रतिकार्यमभिमुखीकरणार्थकानि संबोधनानि च हृदिस्पृशानि श्रोतॄणां हृदयंगमानि स्मर्तुर्मम हृदयं लुठंति क्षोभयंति ॥ १८ ॥ ❀ ❀ शय्यादिष्वैक्यात्साम्याद्धेतोः हे वयस्य ऋतवांस्त्वं सत्यवानसि इति विप्रलब्धोऽपि उपहसितोऽपि कुमतेर्मेऽघमपराधं सर्वं सेहे असहत, यतो महितया माहात्म्येन महान् अक्षोभ्यः ॥ १९ ॥ ❀ ❀ हे नृपेंद्र ! यो महारथतया सर्वगुणसंपन्नतया लोके प्रसिद्धः सोऽहं पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन हृदयंगमेन रहितः अत एव शून्यः तेजोवीर्यादिवर्जितोऽस्मि अत एव हे अंग ! उरुक्रमपरिग्रहं रक्षन् गोपैरसद्भिरबलेव योषिदिवाध्वनि मार्गे विनिर्जितोऽस्मि ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सौत्ये वृत इति। सूतकर्मणि वृतस्तत्र हेतुः–कुमतिना फलं तु कुत्सितं साध्यसाधनत्वेन नियोजितत्वात् सहने हेतुः आत्मन इति। सहि तुष्टः स्वात्मानं प्रयच्छति ततः स कुत्रापि नियोगं करोतु प्राप्तत्वादित्यर्थः। तर्हि को दोषस्तत्राह ईश्वर इति। यद्यप्यात्मदस्तथापीश्वरः कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थः। अनेन तेजोहरणमल्पमेव जातमिति भावः, मे मया मह्यं वा न हि सौत्येन किंचित्कार्यं सिद्धं प्रतिष्ठामात्रपरं कुमतित्वं प्रकटयति। यत्पादपद्ममिति भव्याः सत्तायां परिनिष्ठिताः संत इति यावत्। अभवाय मोक्षाय पादेन प्रणिहितमित्यत्र निरूपितमिति शब्दाद्यस्पर्शलोकरीत्या स्पष्टसंभावनाभावात्। पुनर्ज्जयद्रथवधे मध्याह्ने श्रांतवाहानां विशल्यकरणार्थमुत्तीर्णं मां न प्राहरन्नित्याह–संश्रांतवाहमिति साधनाभावः सूचितः। अरय इति मारणावश्यकत्वं रथिनो भुविष्ठमिति साधनाभ्यां बहुवचनैकवचनाभ्यां च कामयमानानामपि शत्रूणां दुर्ल्लभावस्था सूचिता, यस्य भगवतः अनुभावेन अलौकिकसामर्थ्येन निरस्तं चित्तं मारणीयोऽयमिति ज्ञानं येषां ते। अनेन अपकारेऽप्यानुषंगिकं फलमेतादृशमिति सूचितम्॥ १७॥ ❀ ❀ किंच एतादृशेऽप्यपकारिणि परिहासदशायामपि वचनेनापि नापकारः कृत इत्याह नर्माणीति। अपराधाभावेऽपि स्मरणार्थं सर्वावस्थासु तथा वचनान्युक्तवान् यथा हृदये प्रविष्टानि हृदयं लुठंति लोठयन्ति लुनन्तीति पाठः। नर्माणि सुखकराणि परिहासवचनानि अर्थानुसन्धानाभावेऽपि स्वरूपतः सुखकराणीत्याह–उदारं यत् रुचिरं स्मितं सर्वपुरुषार्थदानायोदारं रुचिरं रसोत्पत्त्या रसानुभावे पुरुषार्थारामत्वाय स्मितेनाल्पव्यामोहनं सूचितं स्वभावसुन्दराणां स्मितेन शोभातिशयः वशीकरणार्थो भवति। तत्रानैकांतिकं दृष्ट्वा हे पार्थेति सम्बोधयति धाष्टर्यं दृष्ट्वार्ज्जुनेति वृक्षवाचकत्वात् वंचनाकरणादि दृष्ट्वा हे सखेति अचातुर्यं दृष्ट्वा कुरुनन्दनेति क्षेत्रकर्षकत्वात्कुरोः, अत एव भगवद्वाक्यानां संजिल्पतत्वमुक्तं नरदेवेति गूढप्रतिबोधनार्थं सम्बोधनं, वचनानां समर्थत्वात् मर्मस्पर्शित्वात् हृदिस्पृशानीत्युक्तं मम हृदयं हृदयं मम माधवस्य अस्मत्स्वामिनः संजल्पितानीति सम्बन्धः॥ १८॥ ❀ ❀ एवमपराधापनोदनार्थं प्रतिकारे कृते तद्धेतुका अन्येऽप्यपराधाः कृतास्तानपि दूरीकृतवानित्याह शय्येति। शय्यायां शय्याविषये आसनादिविषयेषु तामसादिस्थानानि शय्यासनाटनानि विकत्थनानि संनिपातकार्यैश्च श्लाघारूपभोजनादीन्यावश्यकलौकिकादिष्वैक्यात् कश्चित् न हि स्वस्मात् कश्चित् कदाचित् शंकते ऐक्यकरणं भगवदुपकारः दुष्टस्य ततो मदात् विप्रलम्भः वक्रोक्त्या वचनं तत्र वचनशब्दमाह–हे वयस्येति। वयसा तुल्ययोर्मध्ये कुतस्तवाधिक्यं कथं वा मित्रमिति वा, किंवा ऋतवानिति सत्यवानित्यर्थः, असत्यकरणं कृत्वा तथा वचनं सर्वं च न मनसि रोषम्लापनेन सह्यदोषे मातृदृष्टान्तः। असह्यदोषे तु पितृदृष्टान्तः–अन्यासह्यदोषसंग्रहार्थं सर्वमिति सहने प्रयोजकं रूपमाह महानिति, न हि पिपीलिकादीनामपराधं गजो मन्यते। उपढौकनाद्यभावाय महितयेति स्वमहिम्नैव हेत्वंतरमाह कुमतेरिति॥ १९॥ ❀ ❀ एवं सर्वचरित्रमुक्त्वा सर्वोपसंग्रहार्थं तत्कृतांजलिनानुस्मरति सोऽहमिति। नृपेन्द्रेति सम्बोधनं अस्य विचारस्त्वयावश्यं कर्त्तव्य इत्येतदर्थं पुरुषेणापि रहितः प्राणी स्त्र्यादिरूपः सर्वकार्यबहिः कृतो भवति, किमुत पुरुषोत्तमेन अनेनोत्तमकार्योपसंहारो ज्ञापितः। सख्येति मध्यमकार्योपसंहारः प्रियेणेति प्रियजनः परः प्रियस्य निकृष्टमपि करोति एवं स्वानिष्टकार्याभावहेतूनुक्त्वा भगवन्निष्ठाभावायाह तद्राहित्यस्य फलमाह हृदयेन शून्य इति। उत्कृष्टधर्माणां तत्सहभावात् तदपगमे सर्वमप्यपगतमिति शून्यं जातमित्यर्थः। तेनान्यदपि कार्यं जातमिति वदन् पराजितो वाथ भवानिति संभावना सत्या जातेत्याह–अध्वनीति। परिग्रहः स्त्रीवर्गः अज्ञातसम्बोधनं प्रतीकारकरणाभावाय अबला स्त्री सेव॥ २०॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

सौत्य इत्यत्र। फलस्येति आनन्दरूपस्य भगवतः। ततः स इति जीवः। प्राप्तत्वादिति यथेष्टविनियोगे हेतुः। अल्पमिति अल्पं फलम्॥ १७॥ ❀ ❀ नर्माणीत्यत्र। अयथार्थत्वादिति अपुरुषार्थत्वादित्यर्थः। तत्रानैकान्तिकमिति स्मिते वशीकरणव्यभिचारम्। सम्बोधयतीति वशीकरणार्थं सम्बन्धित्वेन सम्बोधयति। सञ्जल्पितत्वमिति। प्रतिवादिजयमात्रफलककथाया जल्पत्वेन तथेत्यर्थः॥ १८॥ ❀ ❀ शय्येत्यत्र। प्रतिकारे कृत इति भगवता कृते। अन्ये इति अर्जुनकृताः। वक्ष्यापीति पितुरपीत्यर्थः॥ १९॥ ❀ ❀ सोहमित्यत्र। अस्य विचार इति। वक्ष्यमाणे कार्ये प्रतीकारस्य विचार इत्यर्थः। ततः पराणां कार्याणां का सम्भावनेत्यत आहुः प्रियस्येत्यादि। यथा सारथ्यमित्यर्थः, स्वनिष्ठाः कार्याभावहेतवस्त्रिविधभगवद्राहित्यानि भगवन्निष्ठकार्याभावहेतुः सुहृत्त्वाभावः॥ २०॥

श्रीगिरिधरकृता बालप्रबोधिनी

'सन्निकर्षो हि मर्त्यानामनादरणकारणम्' इति सिद्धान्ताद्भगवत्सन्निधाने तत्प्रभावास्फुरणेऽपीदानीं तद्विरहेण तदैश्वर्यस्फुरणेन दास्यभावस्यैवोदयात् सख्यभावस्यापलापाच्च सारथ्यादौ तन्नियोगस्यापराधत्वं निश्चिन्वन्ननुतप्यमान आह–सौत्य इति। भव्याः मङ्गलरूपा विवेकिनो भक्ता अभवाय संसारदुःखनिवृत्तिपूर्वकपरमानन्दप्राप्तिरूपमोक्षाय यस्य पादपद्मं भजन्ति स ईश्वरो

मे मया सौत्ये सारथ्ये वृतः स्थापित इत्यन्वयः। कथं तत्पादभजनमात्रेण मोक्ष इत्यपेक्षायामाह–आत्मद इति, यतो भक्तेभ्यः स्वात्मानमपि ददातीति तथा सः। तर्हि कथं त्वया सौत्ये वृत इत्यपेक्षायामाह–कुमतिनेति। स्वबुद्धिदोषेणेति भावः। स तु मय्येवमपराधवत्यपि दयामेव कृतवानित्याशयेनाह–मामिति। जयद्रथवधे हि जलपानं विना वाहा अश्वाः श्रान्ता जातास्तदा रथादवतीर्य मया बाणैर्भुवं भित्त्वा जलं सम्पादितं तदा भुविष्ठमपि मां यस्यानुभावेन निरस्तं चित्तं मारणीय इति ज्ञानं येषां ते तथाभूताः सन्तोऽरयो रथिनोऽपि न प्राहरन् न प्रहृतवन्तः॥ १७॥ ❀ ❀ तवापि नाविदितं किञ्चिदिति सूचयन् सम्बोधयति। हे नरदेव उदारं स्वैकपरत्वव्यवस्थापकतया परमपुरुषार्थप्रदं रुचिरं यत्स्मितं तेन शोभितानि अत एव हृदिस्पृशानि मनोज्ञानि माधवस्य नर्माणि परिहासवाक्यानि तथा हे पार्थ हे अर्जुन हे सखे हे कुरुनन्दनेति सञ्जल्पितानि मधुरवाक्यानि इदानीं स्मर्तुर्मम हृदयं लुठन्ति लोठयन्ति क्षोभयन्तीत्यन्वयः। णिजभाव आर्षः॥१८॥ ❀ ❀ विकत्थनं स्वगुणश्लाघनादि। शय्यादिष्वैक्यात् अव्यतिरेकाद्धेतोः कदाचिद् व्यभिचारं दृष्ट्वा हे वयस्य ऋतवान् सत्ययुक्तस्त्वमिति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि सर्वं मेऽघमपराधं सेहे इत्यन्वयः। सह्यदोषसहने दृष्टान्तमाह–सख्युरपराधं यथा सखा सहते तद्वदिति। तर्ह्यसह्यापराधान्न सेहे किमिति शङ्कानिरासायासह्यापराधसहने दृष्टान्तान्तरमाह–तनयस्यापराधान्यथा पिता सहते तद्वदिति। तत्सहने हेतुमाह–महानिति। यतोऽसौ महानतो महितया स्वमहत्त्वेन मेऽघं सेहे इत्यन्वयः। तर्हि किमिति एवमपराधं कृतवानित्यपेक्षायां दुर्बुद्धित्वादिति हेतुमाह–कुमतेरिति। ऋभुमानिति पाठे तु ऋभवो देवाः सेवकत्वेन सन्ति यस्य तथाभूतोऽपि मया विप्रलब्ध इत्यन्वयः॥ १९॥ ❀ ❀ त्वया शङ्कितं पराजयमपि प्राप्तोऽहमित्याह–सोहमिति। हे नृपेन्द्र हे अङ्गेति सम्बोधनद्वयेन महत्त्वादन्तरङ्गत्वाच्च तवाग्रे सुगोप्यमपि कथयामीति सूचयति। स भगवत्कृपापात्रभूतोऽहं प्रियेण प्रीतिविषयेण। अत्र हेतुः–सख्या मित्रेण। तत्र हेतुः–सुहृदा हितैषिणा पुरुषोत्तमेन श्रीकृष्णेन रहितः अत एव हृदयेन शून्य उरुक्रमस्य विविधलीलापरस्य तस्य कृष्णस्य परिग्रहं षोडशसहस्रस्त्रीरूपं रक्षन् अध्वनि मार्गे असद्भिर्नीचैरतितुच्छैश्च गोपैरबलेवादेव विनिर्जितोऽस्मीत्यन्वयः। न च भगवत्परिगृहीतानां कथं नीचहस्ते गमनमिति शङ्कनीयम्, उरुक्रमपदेन तल्लीलाया अचिन्त्यत्वसूचनात्। एता हि देवाङ्गनाः स्नानं कुर्वन्तं अष्टावक्रमृषिं स्तुत्वा ततो विष्णुर्वः पतिर्भविष्यतीति वरं प्राप्य तस्य जलाद्बहिर्निस्सरणे तदङ्गवक्रिमदर्शनरूपादुपहासात् 'दस्युहस्तगता भविष्यथे'ति शापं च प्रापुः, अतः शापवशान्नीचहस्तगमनम्। तथा च व्यासवचनम्–'एवं तस्य मुनेः शापादष्टावक्रस्य केशवम्। भर्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः' इति बोध्यम्॥ २०॥

हिन्दी अनुवाद

श्रेष्ठ पुरुष संसारसे मुक्त होनेके लिये जिनके चरणकमलोंका सेवन करते हैं, अपने-आपतकको दे डालनेवाले भगवान्‌को मुझ दुर्बुद्धिने सारथितक बना डाला! अहा! जिस समय मेरे घोड़े थक गये थे और मैं रथसे उतरकर पृथ्वीपर खड़ा था, उस समय बड़े-बड़े महारथी शत्रु भी मुझपर प्रहार न कर सके; क्योंकि श्रीकृष्णके प्रभावसे उनकी बुद्धि मारी गयी थी॥ १७॥ ❀ ❀ महाराज! माधवके उन्मुक्त और मधुर मुसकानसे युक्त, विनोदभरे एवं हृदयस्पर्शी वचन और उनका मुझे 'पार्थ, अर्जुन, सखा, कुरुनन्दन' आदि कहकर पुकारना, मुझे याद आनेपर मेरे हृदयमें उथल-पुथल मचा देते हैं॥ १८॥ ❀ ❀ सोने, बैठने, टहलने और अपने सम्बन्धमें बड़ी-बड़ी बातें करने तथा भोजन आदि करनेमें हम प्रायः एकसाथ रहा करते थे। किसी-किसी दिन मैं व्यंगसे उन्हें कह बैठता–'मित्र! तुम तो बड़े सत्यवादी हो!' उस समय भी वे महापुरुष अपनी महानुभावताके कारण, जैसे मित्र अपने मित्रका और पिता अपने पुत्रका अपराध सह लेता है, उसी प्रकार मुझ दुर्बुद्धिके अपराधोंको सह लिया करते थे॥ १९॥ ❀ ❀ महाराज! जो मेरे सखा, प्रिय मित्र–नहीं-नहीं मेरे हृदय ही थे, उन्हीं पुरुषोत्तम भगवान्‌से मैं रहित हो गया हूँ। भगवान्‌की पत्नियोंको द्वारकासे अपने साथ ला रहा था, परन्तु मार्गमें दुष्ट गोपोंने मुझे एक अबलाकी भाँति हरा दिया और मैं उनकी रक्षा नहीं कर सका॥ २०॥

तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आनमन्ति।
सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्॥ २१॥
राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे। विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः॥ २२॥
वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम्। अजानतामिवान्योन्यं चतुःपञ्चावशेषिताः॥ २३॥
प्रायेणैतद् भगवत ईश्वरस्य विचेष्टितम्। मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः॥ २४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह तद्वेति। यतो येभ्यो हेतुभ्यो नृपतय आनमंति। ईशेन रिक्तं शून्यमसत्कार्याक्षमं सन्मंत्रविधानैरपि भस्मनि हुतमिव। अतिप्रीतादपि कुहकान्मायाविनः सकाशाद्राद्धं लब्धं यथा असत् सम्यक्कर्षणादिनाप्यूषर-

भूमावुप्तं बीजमिव ॥ २१ ॥ ❀ ❀ सुहृत्पुरे त्वया पृष्टानां नः सुहृदां मध्ये चत्वारः पंच वावशेषिताः। तत्र हेतुर्विप्रशापेत्यादि। वारुणीमन्नमयीम्। अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नताम् ॥ २२-२३ ॥ ❀ ❀ अवशेषिता इत्यनेनोक्तं हेतुकर्तारमाह त्रिभिः। प्रायेणेति। भावयंति पालयंति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भस्मनि हुतमिति निष्फलत्वे कुहकराद्धमित्यवस्तुभूतत्वे उप्तमिति नश्यदवस्थत्वे च दृष्टांतः। कुहकोऽत्रैंद्रजालिकः। स यथा कपालिकां मुद्रां विधायान्येभ्यो ददाति सा चावस्तुभूतैवेति। यद्वा कुहकाय वंचकायासत्पात्राय दांभिकतपसे राद्धं दत्तं यथाऽसद्भवतीति "दंभे स्याद्दांभिके पापे छले विस्मापके स्मये। कुहको दैत्यभेदे च" इति निरुक्तिः। क्षणेन श्रीकृष्णवियोगाव्यवहितक्षणेनेत्यर्थः ॥ २१ ॥ ❀ ❀ सुहृत्पुरे द्वारकायाम्। हे राजन्निति। राज्ञामावसानिकधर्मस्मरणार्थमधुना भवतापि सर्वं त्यक्त्वा गंतव्यमिति भावः। तत्र चतुःपञ्चावशेषत्वे विमूढानां कृत्याकृत्यज्ञानरहितानाम् ॥ २२-२३ ॥ ❀ ❀ प्रायेण निश्चयेन। प्रायपदमत्रावधारणार्थकमेव। यद्वा प्रायेणेति लौकिकरीत्योक्तं न तु सिद्धांतरीत्येत्यत आह-मिथ इति। यद्यतो निमित्तभूताद्भावयंति ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

तदिति। ये भगवता सहावस्थानदशायां धनुरादयस्त एवाधुनापि रथी चाहं स एवाधुनापि यतो येभ्यो धनुरादिभ्यो नृपतय आनमंति बलिष्ठं रथिनं मां मन्यंत इत्यर्थः यद्यप्येवं तथापि तत्सर्वं धनुरादिकमीशरिक्तं श्रीकृष्णरहितं सत् क्षणेनासदसत्प्रायमभूत् यथा भस्मनि हुतं यथा कुहकराद्धं दोषवद्विप्रस्य राद्धं राधनं दानादिसत्कारः यथा चोष्यामूषरभूमावुप्तं बीजं तद्वत् ॥ २१ ॥ ❀ ❀ हे राजन्! सुहृत्पुरे द्वारकायां त्वयाभिपृष्टानां नोऽस्माकं सुहृदां मध्ये चतुःपंचावशेषिताः चत्वारः पंच वावशिष्टाः, अन्ये तु सर्वेऽपि नष्टा इत्यर्थः। तत्र हेतुं वदन् विशिनष्टि विप्राणामृषीणां शापेन विमोहितचित्तानाम् ॥ २२ ॥ ❀ ❀ वारुणीं मदिरां सुरां पीत्वा तेनोन्मथितं विभ्रांतं चेतो येषामत एवान्योऽन्यमजानतामिव मिथो मुष्टिभिर्निघ्नताम् ॥ २३ ॥ ❀ ❀ तन्मिथो निहननमपि प्रायश ईश्वरस्य कृष्णस्य विचेष्टितमेतत्संकल्पमूलकमेवेति भावः। तदेव सदृष्टांतमाह-यद्यथा यत्संकल्पान्मिथो भूतानि भावयंति वर्द्धयामासुः तथा तत्सङ्कल्पादेव मिथो निघ्नंति विनिर्जघ्नुः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तदेव स्पष्टयतीत्याह तदिति। धनुस्तद्वै तदेव त इषवः तादृशाः शराः स रथः तादृशो रथः ते हयाः तादृशा अश्वाः रथी सोऽहं नान्यः-यतः यस्मै नृपतयः आमनंति-तत्सर्वमीशरिक्तं श्रीकृष्णतेजसा विहीनं क्षणेन असत् नाशवत् अप्रयोजकमभूत्। कथमिव भस्मनि हुतमिव कुहकेन राद्धं चौरेण सिद्धमिव ऊपे ऊषरे उप्तमिव भस्मनि हुतस्य मंत्रोच्चारणादिना किंचित्फलं स्यादित्यतः कुहकेति ऐंद्रजालिकेन कुटुम्बभरणमुद्दिश्य द्रव्याहरणात्तज्जीवनेनैहिकफलदर्शनादित्यत उक्तमुप्तमूष इति। न तत्र किंचित् बीजं प्ररोहतीत्यभिप्रायेण निदर्शनत्रयमुक्तमिति वेदितव्यम् ॥ २१ ॥ ❀ ❀ कच्चिदानर्तपुर्यामित्यादिबांधवकुशलप्रश्नं परिहरतीत्याह राजन्निति। सुहृत्पुरे द्वारवत्याम् ॥ २२ ॥ ❀ ❀ नाम्ना वारुणीं वरुणनिर्मितां मदिरां मदकरीं सुरां पीत्वा अन्यच्च निमित्तमस्तीत्याह विप्रशापेति, ब्राह्मणशापेन विमूढानां कृत्याकृत्यज्ञानरहितानामत एवात्मानमजानताम् ॥ २३ ॥ ❀ ❀ इदं यादवनिधनमपि श्रीकृष्णकृतमित्यभिप्रेत्य ब्रूत इत्याह प्रायेणेति। भूतानि मिथो निघ्नंति भावयंति उत्पादयंति चेतीति यत्तदीश्वरस्य भगवतो विशिष्टचेष्टितमिति मन्ये। प्रायःशब्दस्य प्राचुर्यार्थवाचित्वेऽप्यत्रावधारणार्थ एव। चशब्दः समुच्चयार्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रायेणेति। दुःखोक्तिरियं तादृशलीलादृष्टयनुसारेणैव ॥ २४-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह तदिति। यतो धनुरादिभ्यो हेतुभ्यो माम् आनमन्ति तत् सर्व्वम् ईशेन रिक्तमसत् कार्य्याक्षमम्। भस्मनि हुतमिति निष्फलत्वे कुहकान्मायाविनः सकाशात् राद्धं प्राप्तमित्यवस्तुभूतत्वे ऊष्याम् ऊषरभूमौ उप्तमिति नश्यदवस्थत्वे दृष्टान्तः ॥ २१-२२ ॥ ❀ ❀ एरकामुष्टिभिर्मिथो निघ्नतां सुहृदां मध्ये चत्वारः पञ्च वा अवशेषिताः ॥ २३ ॥ ❀ ❀ केनावशेषिता इत्यपेक्षायामाह प्रायेणेति। एतद्यदुकुलसंहरणम्। प्रायग्रहणं लोकोक्तिरीत्यैव न तु सिद्धान्तरीत्येत्याह मिथ इति। यत् यतो निमित्तभूताद्भावयन्ति पालयन्ति ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

धनुराद्यात्मपर्यंतस्य सर्ववस्तुनो नैष्फल्यं तत्संनिधिं विनाभूदित्याह तद्वा इति । यतो येभ्यो धनुरादिभ्यो नृपतय आनमंति तदिदं धनुरात्मपर्यंतं वस्तु ईशेन श्रीकृष्णेन रिक्तं क्षणेनासदभूत् स्वस्वकार्याक्षममभूत् । यथा भस्मनि विधिवदपि हुतमसद्भवति यथा च कुहकाय पुत्रं धनं दास्यामीति जीविकार्थं परधनमादातुं प्रवृत्ताय राद्धं विधिवद्दत्तमसद्भवति यथा चोषरभूतायामुर्व्यां सम्यगुप्तं बीजमसद्भवति तथा ॥ २१ ॥ ❀ ❀ हे राजन् ! त्वया सुहृत्पुरे द्वारकाख्ये पृष्टानां नः सुहृदां मध्ये चत्वारः पंच वा अवशेषिताः । भगवदिच्छया तेषु विप्रशापो न प्रादुरभूदित्यर्थः । तदितरविनाशे हेतुगर्भं विशेषणमाह-विप्रशापाभिमूढानामिति ॥ २२ ॥ ❀ ❀ विप्रशापजां मूढतामाह वारुणीमिति । मुष्टिभिः एरकामुष्टिभिः ॥ २३ ॥ ❀ ❀ भगवदिच्छयैतदभूदित्याह प्रायेणेति त्रिभिः । एतन्मिथो मुष्टिभिर्निहननं प्रायेण भगवतः श्रीकृष्णस्य विचेष्टितम् । कर्मसापेक्षत्वाभिप्रायेण प्रायग्रहणम् यद्यतो हेतुभूताद्भगवतस्तत्संकल्पाद्भूतानि मिथो भावयंति पालयंति च अदंति भक्षयंति ॥ २४-२५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सर्वनाशमाह तद्वै धनुरिति । गांडीवलक्षणमित्युक्तं त इषवः अर्ज्जुनस्य इमे बाणा इति स रथः अप्रतिहताः ते हयाः सर्वत्र गंतारः सोऽहं रथी भीष्मादिहंता आनमंति सर्वतो नमंति आमनन्तीति वा पाठः कीर्तयंतीति वा तत्र गारेभ्याभ्युपगमे इमा लध्यं सम्पद्यते तदारूपं देवत्वं दाहकत्वं सर्वमेवापगच्छति तथा पूर्वोक्तेषु ईशः प्रविष्टः तदा तत्सर्वं कार्यं निष्पन्नं तदपगमे सर्वं नष्टमिति अन्वयव्यतिरेकाभ्यां प्राप्ताप्राप्तविवेके तत्सर्वं भगवत्कृतमिति सिद्धं भवति । केवलान्वयविशेषेण तदेकसाध्यानि नियामकाभावात् इदानीं तु तदाराधकत्वेनान्यथासिद्धमित्यभिप्रायेणाह असदिति । ईशरिक्तं सर्वमसदभूदित्यर्थः कार्याकर्तृत्वेनासत्त्वं तेषां फलसाधकत्वमेव रूपमिति तदभावो वा तत एव तत्प्रसिद्धेः । अत्रासाधकत्वे दृष्टान्तमाह लोकभेदेन द्वयं वेदे तु तत् समुदितमेकत्रैव द्वयम् अतो दृष्टान्तत्रयमाह तत्र वैदिको दृष्टान्तः भस्मनि हुतमिति । यदि पूर्वस्यामाहुतायां यजमानो म्रियेत दक्षिणतः शीते भस्मन्युत्तरामाहुतिं निनयेत् भस्मोत्करं वा गमयेदिति भस्मनि होम उक्तः, स यथास्थित इति असति विनियुतभस्मोत्करं वा गमयेदिति भस्म त्यज्यते तथा गोष्ठेष्वस्माभिर्विनियुक्त इत्यर्थः । न वा ईश्वराराधनं न वा धर्मः । लोके ईश्वराराधनमस्ति तेन कार्यं सिद्ध्यति तत्कार्यमीश्वराराधनमित्युच्यते स चेदीश्वरः कुहको भवेत् तत्फलमसत् भवेत् कुल्माषदानवत् अनेनाधिकर्तृदेवानां विपरीतफलदानेन असत्त्वमुक्तम् । एवं फलवैकल्यं साध्यवैकल्यं चोक्तं साधनवैफल्यमाह इवोप्तमूष्यामिति ऊषा ऊषररूपा पृथिवी गौरादित्वान्ङीष् सा हि बीजशक्तिदाहिका तत्र गतं बीजं स्वरूपतोऽपि विनश्यति तथात्रापि लौकिककृषित्वमस्य ॥ २१ ॥ ❀ ❀ एवं द्वितीये उत्तरमुक्त्वा प्रथमस्योत्तरमाह राजन्निति । सुहृदां यत् कुशलं पृष्टं सुहृत्पुरे तत्रोत्तरं शापो जातः ॥ २२ ॥ ❀ ❀ ननु विप्रशापविमूढानां देशान्तरे गत्वा मुष्टिभिर्विनिघ्नतां मिथो युद्धे हेतुः वारुणीं मदिरां पीत्वेति । अमृतमथनादुद्भूता मदिरा वारुणी सा तालाद्यधिष्ठिता तालप्रसूता वारुणीत्युच्यते । तेन मदेन उन्मथितचेतसां गतविवेकानां मध्ये चतुःपंचावशेषिता इति सम्बन्धः । चतुर्नियुक्ताः पंच चतुःपंचव्यसुयादवशरीरसंघातं प्रविष्टेषु चतुर्विधैः परमाणुभिः सह आकाशादयः पंच उर्वरिताः । ननु स्नेहकत्वात्कथमेवमत आह अजानतामिति युद्धार्थज्ञानमन्यार्थमज्ञानमित्यर्थः ॥२३॥ ❀ ❀ अत्र कर्त्तारं सम्भावयति प्रायेणेति । सर्वकर्तृत्वेन रक्षकत्वेन च भगवत्कर्तृकत्वं निश्चीयते कालेनापि सम्भावयतीति प्रायग्रहणं, तत्रापि भगवतो विद्यमानत्वात् उत्कटकोटिः दृष्टार्थमन्यथात्वेन व्याख्यास्यन् सर्वत्रैव लोककर्तृकं कार्यं भगवत्कार्यमित्याह-मिथो निघ्नंतीति तुल्यानां मारणलक्षणे प्रयोजककार्ये स्वत उत्कर्षात् चकारादुत्पादयंति पुत्रगृहे स्वयमुत्पन्नः पिता पुत्रत्वमापद्येत ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तद्वै धनुरित्यत्र । प्राप्ताप्राप्तविवेकेनेति । कार्यनिष्पत्तिकारणत्वेन किं प्राप्तं किं वाप्राप्तमिति विचारेण । इदानीं त्वित्यादिव्यतिरेकदशायां तु तद्धनुरादिकमाधारत्वेन ईशाधारत्वेन हेतुना अन्यथासिद्धं तत्स्वरूपस्य स्वातन्त्र्येणान्वयव्यतिरेकाभावादीशशक्त्यैव तद्ग्रहणात्स्वरूपतो जयाकारणत्वेन सिद्धमित्यर्थः । तदभावो वेति । स्वरूपाभाव एव वा असत्त्वमित्यर्थः । फलसाधकस्य तद्रूपत्वे मानमाहुः तत एवेत्यादि । स्थित इतीति । अवशिष्ट इति हेतोरित्यर्थः । विनियुक्त इति धनुरादिर्विनियुक्तः । कुहक इति सकपटः । फलवैफल्यमित्यादि । परिग्रहरक्षणाभावेनाराधनवैयर्थ्यं साध्यवैफल्यं रक्षावैयर्थ्यं साधनवैफल्यं धन्वादिवैयर्थ्यम् ॥ २१ ॥ ❀ ❀ राजन्नित्यत्र । द्वितीय इति । स्वास्वास्थ्ये प्रथमस्येति । सर्वप्रश्नस्य । निश्चीयत इति । अत्रापि निश्चीयते ॥ २२-२४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ननु यैः पूर्वं राजानो विनिर्जितास्ते धनुरादयस्तव क्व गताः येन त्वमेवं विनिर्जित इत्यपेक्षायामाह-तद्वा इति । वा इत्यवधारणे । यतो येभ्यो धनुरादिभ्यो नृपतयो मामानमन्ति त एवाधुनापि सन्ति रथी च स एवाहं तथापीशरिक्तं श्रीकृष्णरहितं

तद्धनुरादिकं सर्वं क्षणेनासत्प्रायमभूदित्यन्वयः। तत्र दृष्टान्तमाह–कुहकराद्धमिवेति। यथाऽतिप्रीतादपि कुहकात् मायाविनः सकाशात् राद्धं लब्धं पदार्थं कार्यक्षमं न भवति तद्वदित्यर्थः। गोपैष्वकिञ्चित्करत्वे दृष्टान्तमाह–भस्मन्हुतमिति। भस्मनि हुतं वस्तु यथा लौकिकालौकिकं किमपि फलं न साधयति तद्वदित्यर्थः। प्रत्युत बाणादीनामेव विनाशो जात इत्यत्र दृष्टान्तमाह–ऊष्यामुप्तमिवेति। ऊष्यां ऊषरभूमावुप्तं बीजमेव यथा विनश्यति तद्गोपेषु निःक्षिप्ता बाणादय एव विनष्टा इत्यर्थः॥ २१॥ ❀ ❀ एवं स्वशोककारणमुक्त्वा स्वजनकुशलप्रश्नस्योत्तरमाह–राजन्निति, सम्बोधनेन राज्यग्रहणमेव न युक्तं, तद्ग्रहणादेव सर्वत्र स्नेहाधिक्येन पश्चात्तद्वियोगे महादुःखं भवतीति सूचयति। सुहृत्पुरे द्वारकायां त्वयाऽभिपृष्टानां नोऽस्माकं सुहृदां बन्धूनां मध्ये चतुःपञ्चावशेषिताः, भगवतेति शेषः। चत्वारः पञ्च वाऽवशिष्टा अन्ये तु सर्वे विनष्टा इत्यर्थः। कथं विनष्टा इत्यपेक्षायां परस्परयुद्धेनेत्याह–निघ्नतां मुष्टिभिर्मिथ इति। ननु परस्परस्नेहवतां कथमेवं कलहस्तत्राह–अन्योन्यमजानतामिति। एवं विमोहोऽपि कथं जात इत्यपेक्षायामाह–वारुणीत्यादि। तत्पानेऽपि कथं प्रवृत्तिरित्यत आह–विप्रशापविमूढानामिति॥ २२-२३॥ अवशेषिता इत्यनेनोक्तं हेतुकर्तारमाह–प्रायेणेति। एतत् यादवकुलोपसंहाररूपं भगवत ईश्वरस्य कृष्णस्यैव विचेष्टितं लीला। कुतः? यत् यस्मात् सर्वप्रेरकेश्वरादेव भूतानि व्याघ्रमनुष्यादीनि पितृपुत्रादीनि च मिथो निघ्नन्ति मिथो भावयन्ति पालयन्ति च। कालकर्मादीनां हेतुत्वेऽपि ईश्वरेच्छाया मुख्यत्वात् प्रायग्रहणम्॥ २४॥

हिन्दी अनुवाद

वही मेरा गाण्डीव धनुष है, वे ही बाण हैं, वही रथ है, वही घोड़े हैं और वही मैं रथी अर्जुन हूँ, जिसके सामने बड़े-बड़े राजालोग सिर झुकाया करते थे। श्रीकृष्णके बिना ये सब एक ही क्षणमें नहींके समान सारशून्य हो गये—ठीक उसी तरह, जैसे भस्ममें डाली हुई आहुति कपटभरी सेवा और ऊसरमें बोया हुआ बीज व्यर्थ जाता है॥ २१॥ ❀ ❀ राजन्! आपने द्वारकावासी अपने जिन सुहृद् सम्बन्धियोंकी बात पूछी है, वे ब्राह्मणोंके शापवश मोहग्रस्त हो गये और वारुणी मदिराके पानसे मदोन्मत्त होकर अपरिचितोंकी भाँति आपसमें ही एक-दूसरेसे भिड़ गये और घूँसोंसे मार-पीट करके सब-के सब नष्ट हो गये। उनमेंसे केवल चार-पाँच ही बचे हैं॥ २२-२३॥ वास्तवमें यह सर्वशक्तिमान् भगवान्‌की ही लीला है कि संसारके प्राणी परस्पर एक-दूसरेका पालन-पोषण भी करते हैं और एक दूसरेको मार भी डालते हैं॥ २४॥

जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः। दुर्बलान्बलिनो राजन्महान्तो बलिनो मिथः॥ २५॥
एवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः। यदून् यदुभिरन्योन्यं भूभारान् संजहार ह॥ २६॥
देशकालार्थयुक्तानि हृत्तापोपशमानि च। हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे॥ २७॥

सूत उवाच

एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम्। सौहार्देनातिगाढेन शान्ताऽऽसीद्विमला मतिः॥ २८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जलौकसां मत्स्यादीनां मध्ये महांतः स्थूला अणीयसः सूक्ष्मान्यथा अदंति भक्षयंति॥ २५॥ ❀ ❀ एवं बलिष्ठैर्महद्भिः पांडवैर्दुर्योधनजरासंधादीन्निहत्य यदुभिरितरान् शाल्वादीन्निहत्य यदून्यदुभिरन्योन्यं निहत्य भगवान् भुवो भारभूतान् यदून् संहृतवान्॥ २६॥ ❀ ❀ अतः परं वक्तुं न शक्नोमीति सूचयन्नाह। देशकालोचितार्थयुक्तानि मनःपीडोपशमकराणि च गोविंदस्य वचनानि स्मरतो मे मम चित्तं हरंत्याकर्षंति॥ २७॥ ❀ ❀ एवमिति सूतोक्तिः। अतिदृढेन स्नेहेन कृष्णपादसरोरुहं चिंतयतोऽर्जुनस्य मतिः शांता विशोका विमला विरक्ता चासीत्॥ २८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जलौकसां मध्ये बलिनस्तुल्यबलास्तु मिथः परस्परमेव ये यान् शक्नुवंतीत्यर्थः। भूभारान्भूभारभूतान् यदून्संजहार इत्यर्जुनादीन्प्रति भगवता तल्लीलायास्तथैव प्रत्यायितत्वात्। तत्कारणं तत्रैवैकादशांते व्यक्तीभविष्यति। किञ्च तदपि भूभारभूतान्यदूनित्यर्जुनोक्त्या न तु भुवोलंकारभूतान् यदून्। तन्नित्यपरिकरानित्यर्थस्तूपलभ्यत एव। नारी खल्वलंकाराणां भारं भारत्न मन्यते यथा तथैव भूर्नित्यपरिकराणां यदूनां ये तु देवास्तत्रैव यदुष्वंशावतारेण प्रविश्योद्भूतास्तेषामपि रजस्तमोरहितानां भारत्वेन वक्तुमनुचितानामपि स्वस्वपदप्रापणाय तन्मिषेणैवोपसंहारार्थम्। "अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम्" इत्युक्तवता भगवता भारत्वारोपः कृतः॥ २५॥ ❀ ❀ एवं बलिष्ठैर्महद्भिः पांडवैर्दुर्योधनजरासंधादीन्निहत्य यदुभिरितरान्शाल्वादीन्निहत्य यदून्यदुभिरन्योन्यं निहत्य भुवो भारभूतान्संहृतवान्॥ २६॥ ❀ ❀ देशकालार्थयुक्तानि तत्तद्देशवत्त-

त्कालतत्तद्वस्तूचितानि । अतस्त्वमपि मा पृच्छेति भावः ॥ २७ ॥ ❀ ❀ मतिस्तद्विरहसंतप्तापि शान्ता निरंतरतच्चिंतनजनितस्फूर्तिलब्धेन तेन निर्वापितदाहत्वाच्छीतलेत्यर्थः । अत एव विमलाऽस्थैर्यलक्षणमालिन्यमपि तस्या गतमित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

युक्तं चैतत्तस्य भूभारावतारायावतीर्णस्येत्यभिप्रायेण स्वयमुदासीन एव सन् भारं संजहारेत्याह जलौकसामिति द्वाभ्याम् । तत्र विवक्षितार्थोपयोगितया दृष्टान्तमाह जले जलौकसां मत्स्यादीनां मध्ये यथाऽणीयसः सूक्ष्मान् जलौकसो महांतस्ते अदन्ति भक्षयन्ति । यथा च दुर्बलांस्तान् बलिनो घ्नन्ति यथा च हे राजन् ! महान्तो बलिनश्च ते मिथो निघ्नन्ति ॥ २५ ॥ ❀ ❀ एवं विभुर्बलिष्ठैर्महद्भिश्च यदुभिरितरान् दुर्बलानन्यांश्च भूतान् ततोऽन्योन्यं यदुभिर्यदूनेव मिथो भुवो भाररूपान्संजहार संहृतवान् ॥ २६ ॥ ❀ ❀ देशकालार्थः । देशकालानुगुणकर्त्तव्यं प्रयोजनं तद्युक्तानि तत्प्रकाशकानि शृण्वतां हृदयगतदुःखोपशमानि गोविन्दस्याभिहितानि भावे क्तः, भाषणानि गीतादिरूपाणि स्मरतो मम चित्तं हरन्ति ॥ २७ ॥ ❀ ❀ इत्थमिति । गाढेनापरेण सौहार्देन कृष्णस्य पादसरोरुहं चिन्तयतोऽर्जुनस्यात एव विमला शान्ता रागाद्यकलुषिता च मतिर्बभूव ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इममर्थं सोदाहरणं स्पष्टयतीत्याह जलौकसामिति । जलौकसां यादसां मध्ये महान्तोऽणीयसोऽणुतरानदन्ति बलिनो दुर्बलान् भक्षयन्ति । ये महान्तः ये च बलिनः ते मिथोऽन्योन्यं भक्षयंति यथा ॥ २५ ॥ ❀ ❀ एवं विभुर्बलिष्ठैर्महद्भिर्यदुभिरितरान् हत्वा यदुभिरेव यदूनन्योन्यं हत्वा भूभारं दैत्यकुलं संजहारेत्येकान्वयः । भूभारहरणमेवावतारप्रयोजनमित्येतत् हशब्देनाह । यद्बाहुदण्डाभ्युदयानुजीविनः । यदून् यदुभिरन्योऽन्यमित्याद्युक्तं पालनं संहरणं च हरेर्विषममिति चेत्तत्राह द्वयमिति, तत्तत्कर्मानुसारिफलदातुरीश्वरस्याप्तकामस्य तेषां संजीवनं मरणं चेति द्वयं सममेव जीवनेनोपादेयाभावान्मरणेन हान्यभावाद्यतः द्वयं न विषममिति भावः ॥ २६ ॥ ❀ ❀ स्वदुःखकारणं ब्रूत इत्याह देशेति । देशकालार्थयुक्तानि तत्तद्देशतत्तत्कालतत्तद्वस्तूचितानि हृत्तापोपशमनानि अहंकाराश्रितसंसारसमुद्रशोषणकारणानि गोविन्दस्याभिहितानि वचनानि स्मरतो मम चित्तं हरन्तीति यस्मात्तस्मात्तद्रहितत्वेन शोचामीत्येकान्वयः ॥ २७ ॥ ❀ ❀ बान्धवनिमित्तस्नेहलक्षणभक्त्यतिशयेन तच्चरणस्मरणमाह एवमिति । अतिगाढेनातिशयेन दृढेन तत्रैवातिशयेन मग्नेन वा सौहार्देन प्रेमलक्षणभक्तिसाधनेन कृष्णपादपद्ममेवमुक्तप्रकारेण स्मरतो जिष्णोर्निर्मला मतिर्मननसमर्था बुद्धिः शान्ता सुखपूर्णा पूर्वस्मादतिशयेन भगवन्निष्ठावती आसीदित्येकान्वयः ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे बिजयध्वजकृतटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

एषामधार्म्मिकत्वेन भारत्वं च 'भूभारराजपृतना यदुभिर्निरस्ये'त्यत्रैकादशे परिहरिष्यते ॥ २६-२७ ॥ ❀ ❀ एवमिति । शान्ता चेतसि चक्षुषीव भगवदाविर्भावेन दुःखरहिता अत एव विमला तद्वृत्तिभूता ये कालुष्यविशेषास्तैरपि रहिता ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जलौकसां मत्स्यादीनां मध्ये महान्तः स्थूलाः अणीयसः सूक्ष्मान् यथा भक्षयन्ति । बलिनस्तुल्यबलास्तु मिथः परस्परमेव ये यान् शक्नुवन्तीत्यर्थः ॥ २५ ॥ ❀ ❀ भूभारान् भूभारभूतान् यदून् संजहार इत्यर्ज्जुनादीन् प्रति भगवता तल्लीलायास्तथैव प्रत्यायितत्वात् । तत्कारणं तत्रैव एकादशान्ते व्यक्तीभविष्यति । किञ्च तदपि भूभारभूतान् यदूनित्यर्जुनोक्त्या न तु भुवोऽलङ्कारभूतान् यदून् तन्नित्यपरिकरानित्यर्थस्तूपलभ्यत एव । नारी खल्वलङ्काराणां भारं भारं न मन्यते यथा तथैव भूर्नित्यपरिकराणां यदूनाम् । ते तु देवास्तत्रैव यदुष्वंशावतारेण प्रविश्योद्भूतास्तेषामपि रजस्तमोरहितानां भारत्वेन वक्तुमनुचितानामपि स्वस्वपदप्रापणाय तन्मिषेणैवोपसंहारार्थम् । 'अष्टादशाक्षौहिणिकासदंशैरास्ते बलं दुर्विषहं यदूनामि'त्युक्तवता भगवता भारत्वारोपः कृतः ॥ २६ ॥ ❀ ❀ अतः परं वक्तुं न शक्नोमि त्वमपि किञ्चिन्मा पृच्छेत्याह देशेति । यस्मिन् देशे यस्मिन् वा काले यस्मिन् वा अर्थे युक्तानि समुचितानि यानि यानि गोविन्दस्याभिहितानि वचनानि तानि स्मरतो मम हृदयं हरन्ति लुम्पन्ति ॥ २७ ॥ ❀ ❀ मतिस्तद्विरहसन्तप्तापि शान्ता निरन्तरतच्चिन्तनजनितस्फूर्तिलब्धेन तेन निर्व्वापितदाहत्वात् शीतलेत्यर्थः । अत एव विमला अस्थैर्य्यलक्षणमालिन्यमपि तस्या विगतमित्यर्थः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विभुर्व्यापकः श्रीकृष्णः संजहार संहृतवान् देशकालानुरूपार्थयुक्तानि गोविन्दस्य अभिहितानि भाषणानि स्मरतो मे चित्तं हरन्ति एकाग्रं कुर्वन्ति ॥ २६-२७ ॥ ❋ ❋ जिष्णोरर्ज्जुनस्य अतिगाढेनाचलेन सौहार्देन स्नेहेन शांता पादसरोरुहैकनिष्ठा अत एव विमला तदितररागमलरहिता मतिरासीत् ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु प्रकृते कथं भगवत्कार्यत्वं श्रुत्यप्रतिपादितत्वादित्याशंक्याह जलौकसामिति । यथा मत्स्यानामग्निशापविमूढानामन्योऽन्यघातकत्वं मात्स्यो न्यायः । महान्तोऽदन्त्यणीयस इति तथा प्रकृते दुर्बलान् बलिनः राजन्निति संमत्यर्थं महान्तस्त्वन्योऽन्यं परस्पराघातेन मृताः । तत्राह विभुरिति सर्वकरणसमर्थः । तैरेव तान् मारितवान् । महान् साधनैः करोति महत्तरस्त्वाज्ञया, विभुरिच्छया, अन्योऽन्यमिति च यथा विवाहे उत्सवादिषु अन्योऽन्यपरिवेषणं जातमित्यर्थः । एवं सामान्याकारेण संक्षेपतः कथामुक्त्वा विस्तरेण कथनीयमित्याकांक्षायां पुनस्त्यक्तधर्मविशिष्टभगवत्स्मरणेन वैक्लव्ये जाते वक्तुं न शक्यत इत्याह । देशकालाभ्यां विशेषिता ये अर्थाः ते तद्युक्तानि इति । वाक्यानि हृत्तापोपशमानि चकारात् भगवन्माहात्म्यबोधकानि एवं त्रिविधान्यपि वाक्यानि । भगवता बोधितानि देशकालानुसारेण सर्वं कर्त्तव्यमिति नीतिः । आत्मनिष्ठतया बाह्यधर्मास्त्यक्तव्याः । भगवद्विषयकमोहः भगवन्माहात्म्यज्ञानात् । एतानि वाक्यानि भगवदुक्तानि सांप्रतं स्मृतानि सन्ति चित्तं हरंति, अर्थानुसंधाने हि शोकापनोदः स्वरूपेणैव शोकजनकत्वं भगवदीयत्वात् तस्मात् शब्दप्राबल्यात् शोकेन तूष्णींभावः । एवं धर्मपुरःसरेण भगवता भक्तिजननात् भक्त्या च भगवच्चरणारविन्दस्मरणे दृढप्रेमोत्पत्तौ जीवभगवतोः सांनिध्ये सति सत्त्वगुणावेशात् परमानन्दाविर्भावाच्च रजस्तमोदोषेष्वपहृतेषु शांता विमला च बुद्धिरासीत् । शान्ता सत्त्वेन विमलान्ययोरपगमेन मतित्वात् स्वभावत्वात् । एवं ज्ञानरूपत्वम् ॥ २५-२७ ॥ ❋ ❋ एतत्सर्वं जातमित्याह । एवमिति न ह्यापाततः शोकापगमेऽपि सुषुप्ताविव सर्वथा नापगत इति ज्ञानप्रकाशमाह । आत्मरूपज्ञानं भगवत्स्वरूपज्ञानं च नोपदेशापेक्षकं प्रमाणवस्तुपरतन्त्रत्वात् । परं प्रमाणवस्तुनोरावरणं दूरीकर्त्तव्यं तत्र प्रमाणावरणं दूरीकृतमेव रजस्तमसोरपगमेन सत्त्वतमःप्राकट्यात् । जीवात्मावरणं माया भगवदिच्छा तत्र जीवावरणं भक्तिसहितज्ञानेनापगच्छति । भगवन्माहात्म्यज्ञानपूर्वकभगवद्विषयकपरमप्रेम्णा भगवत्सेवायां भगवदावरणमपगच्छति । तदा निर्मलदृष्टेः सवितृप्रकाशसाक्षात्कार इव भगवत्स्वरूपयोर्मनसा साक्षात्कारो भवति ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

देशकालेत्यत्र । भगवदीयत्वादिति । वाक्यानां भगवदीयत्वात् भगवान् हि अन्यत्करोत्यन्यत्सम्पद्यते तथा वाक्यान्यपीत्यर्थः । अत्र तूष्णीम्भावः कण्ठतोनुक्तोपि अग्रे चिन्तनोक्त्यार्थबलादेव पूर्ववाक्यशेषत्वेनावगन्तव्यः ॥ २७ ॥ ❋ ❋ एवमित्यत्र । स्वभावत एव ज्ञानरूपत्वमिति । 'बुद्धिर्विज्ञानरूपिणी' ति वाक्याद्विशिष्टज्ञानसमानाकारत्वम् ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

उक्तमेव दृष्टान्तेन स्पष्टयति-जलौकसामिति द्वयेन । जले जलौकसां मत्स्यादीनां मध्ये यथा अणीयसः सूक्ष्मान्महान्तोऽदन्ति भक्षयन्ति । यथा च दुर्बलान् बलिनो घ्नन्ति । यथा च महान्तो बलिनश्च मिथो घ्नन्ति । राजत्वात्तवाप्येतद्विदितमेवेति सूचयन् सम्बोधयति-हे राजन्निति ॥ २५ ॥ ❋ ❋ एवं विभुः सर्वव्यापकोऽन्तर्यामी भगवान् कृष्णो बलिष्ठैर्महद्भिश्च यदुभिरितरान् दुर्बलान् दुष्टान् सञ्जहार, यदूंस्तु यदुभिरन्योन्यं सञ्जहार, एवं भूभारान् सञ्जहार इति । भगवच्चरितं कोऽपि न जानातीत्याश्चर्यं सूचयन्नाह-हेति ॥ २६ ॥ ❋ ❋ अतः परं वक्तुं न शक्नोमीति सूचयन्नाह-देशेति । यस्मिन् देशे यस्मिन् काले यस्मिन् वाऽर्थे यानि युक्तानि समुचितानि तानि अत एव हृदि ये तापाः आध्यात्मिकाधिदैविकाधिभौतिकभेदेन त्रिविधास्तानुपशमयन्तीति तथाभूतानि गोविन्दस्याभिहितानि भाषणानि गीतादिरूपाणि स्मरतो मम चित्तं हरन्ति ॥ २७ ॥ ❋ ❋ एवमतिगाढेनापारेण सौहार्देन प्रेम्णा श्रीकृष्णस्य पादसरोरुहं चिन्तयतो जिष्णोरर्जुनस्य मतिर्विमला रागादिमलरहिता अत एव शान्ता भगवच्चरणारविन्द एव निश्चला चासीदित्यन्वयः ॥ २८ ॥

हिन्दी अनुवाद

राजन् ! जिस प्रकार जलचरोंमें बड़े जन्तु छोटोंको, बलवान् दुर्बलोंको एवं बड़े और बलवान् भी परस्पर एक दूसरेको खा जाते हैं, उसी प्रकार अतिशय बली और बड़े यदुवंशियोंके द्वारा भगवानने दूसरे राजाओंका संहार कराया । तत्पश्चात् यदुवंशियोंके द्वारा ही एकसे दूसरे यदुवंशीका नाश कराके पूर्णरूपसे पृथ्वीका भार उतार दिया ॥ २५-२६ ॥ ❋ ❋ भगवान् श्रीकृष्णने मुझे जो शिक्षाएँ दी थीं, वे देश, काल और प्रयोजनके अनुरूप तथा हृदयके तापको शान्त करनेवाली थीं; स्मरण

आते ही वे हमारे चित्तका हरण कर लेती हैं ॥ २७ ॥ ❀ ❀ सूतजी कहते हैं—इस प्रकार प्रगाढ़ प्रेमसे भगवान् श्रीकृष्णके चरण-कमलोंका चिन्तन करते करते अर्जुनकी चित्तवृत्ति अत्यन्त निर्मल और प्रशान्त हो गयी ॥ २८ ॥

वासुदेवाङ्घ्र्यनुध्यानपरिबृंहितरंहसा । भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ २९ ॥
गीतं भगवता ज्ञानं यत् तत् संग्राममूर्धनि । कालकर्मतमोरुद्धं पुनरध्यगमत् प्रभुः ॥ ३० ॥
विशोको ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः । लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः ॥ ३१ ॥
निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च । स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मतिवैमल्यफलमाह । वासुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्यास्तया भक्त्या निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्यस्य स ज्ञानं पुनरध्यगमदित्युत्तरेणान्वयः ॥ २९ ॥ ❀ ❀ कालेन कर्मभिस्तमसा भोगाभिनिवेशेन च रुद्धमावृतं सत् ॥ ३० ॥ ❀ ❀ ज्ञानफलमाह विशोक इति । एतदेव शोकहेत्वभावेनोपपादयति शोकस्य हि हेतुर्द्वैतभ्रमस्तस्य देहस्तस्य लिंगं तस्य गुणास्तेषामविद्या । तत्र ब्रह्मसंपत्त्या वेदान्तश्रवणेन ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तन्नैर्गुण्यं भवति, न तु सुषुप्तिप्रलययोरिवाविद्याशेषः । तस्मान्नैर्गुण्याद् गुणकार्यलिंगनाशः । अलिंगत्वाच्चासंभवः सम्यग्भोगाय भवति पुनः पुनरिति संभवः स्थूलदेहस्तद्रहितस्ततश्च तत्परिच्छेदाभावात्संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य स विशोको जात इति ॥ ३१ ॥ ❀ ❀ भगवतो मार्गमालक्ष्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु कामादयः कषाया अपि मलशब्देनोच्यन्ते । सत्यम् । अर्जुनस्य भगवन्नित्यपरिकरत्वेन साक्षान्नरावतारत्वेन च तदसंभव एव । महेंद्रांशोद्भवत्वेन कषायः संभवति चेत्तदपि नेत्याह—वासुदेवेति । जन्मारभ्यैवोत्पन्नया भक्त्या प्रथमत एव निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा यस्य तथाभूत एवार्जुनः ॥ २९ ॥ ❀ ❀ किन्तु "प्रियस्य विच्छेददवे प्रियोक्तिस्मृत्यैव संधुक्षणमातुरस्य" इति रीत्या तन्मुखचंद्रविनिर्गतं सर्वसंतापोपशमकं श्रीगीतामृतमेव पातुमारेभे इत्याहुः—गीतमिति ॥ ३० ॥ ❀ ❀ अत्र विश्वनाथः—तत्र च "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे" इत्यत्र पद्ये एष्यसीति भविष्यन्निर्देशेनेदं द्योतितम् । हे कौन्तेय संप्रति त्वं मामेष्यस्येव यदा तु तव मद्वियोगो महान्भावी तदा मां प्राप्तुं यतिष्यमाणस्य तव तदुपायमहमधुनैव स्नेहेन ब्रवीमीति स्वप्राप्त्यर्थं यद्ध्यानमुक्तं संप्रति तेन मुहुरत्यंतेन ध्यानेनैव तत्पार्श्वगतमेवात्मानमभिमन्यमानस्यापि मम देह एवांतरायो यतोयं मध्ये मध्ये बहिर्वृत्तिमनुभाव्य मां शोकार्णवे क्षिपति । तदस्माद्देहादात्मनः पार्थक्यमापादयितुं सर्वशास्त्रविद्यावत्पूर्वाभ्यस्तं योगमेव रक्षणमनुशीलयामीति मनसि निश्चित्य चिन्मयशरीरोप्यात्मानं श्रीकृष्णनित्यप्रियसखत्वेन नारायणसखत्वेन वा नानुसंदधानः प्रेमवैवश्येन प्राकृतनरमेव जानंस्तद्भावापलापाय क्षणमात्रेणैव योगारूढो बभूवेत्याह—विशोक इति । ब्रह्मसंपत्त्या प्राप्तया विशोकोभूदिति । तदभिमत्यनुसारेणैव सूतोक्तिः । वस्तुतस्तु प्रपंचगतां संपत्तिं त्यक्त्वा ब्रह्मसंपत्त्याऽप्रकटप्रकाशगतया श्रीकृष्णप्रियसखत्वप्राप्त्या विशोको विगतशोकः संछिन्नो द्वैतसंशयो देहेन सह मम संबंधोस्ति नास्ति वेति संदेहो यस्य सः । वस्तुतस्तु द्वैते सख्युः श्रीकृष्णात्सकाशात्स्वस्य छिन्नत्वे सति संशयः पूर्वमावयोः परस्परसख्यादैक्यमासीत्संप्रति द्वैतं वृत्तं तदधुना स कृष्णः किं पुनरपि सख्यसुखमयाद्वैते एव मां नेष्यति । किं वा पार्थक्यलक्षणद्वैतदुःखसिंधौ निमज्जयिष्यतीति भावनामयः संदेहः संछिन्नो यस्य सः । न च तस्य प्राकृतलोकस्येव पुनः संसार आशंकनीय इत्याह—लीन इति । स्पष्टम् । वस्तुतस्तु लीनं सुश्लिष्टं दुर्लक्ष्यं यत्प्रकृतितः स्वभावादेव नैर्गुण्यं कृष्णसखत्वेन गुणातीतत्वं तस्मादेवालिंगत्वं लिंगदेहाभावस्तत एव न सम्यग्भवः संसारो यस्य सः । यद्वा महेंद्रांशभूतोऽर्जुनस्तु जीवन्मुक्तोभूदित्याह—विशोक इति । संछिन्नो द्वैतसंशयः प्रपंचानुसंधानगतशोकमोहादिर्यस्य सः । तत्र हेतुः—लीना ईश्वरे लीनीकृता या प्रकृतिस्तत एव तन्नैर्गुण्यं तस्मात् । अत एवालिंगत्वाल्लिंगदेहापगमादसंभवः अपुनर्जन्मेत्यर्थः । अत्र सन्दर्भः—ब्रह्मसंपत्त्या श्रीमन्नराकारब्रह्मसाक्षात्कारेण संछिन्न इयं मच्चेतसि स्फूर्तिरेव साक्षात्कारस्त्वन्य इति द्वैतसंशयो येन सः । तदा भगवत्प्राप्तौ नान्यवज्जन्मांतरप्राप्तिकालसंधिरप्यन्तरायोभवदित्याह—लीनेति । लीना पलायिता प्रकृतिर्गुणकारणं यस्मादेवंभूतं यन्नैर्गुण्यं तस्माद्धेतोः गुणकारणातीतत्वादित्यर्थः । तथैवालिंगत्वात्प्राकृतशरीररहितत्वाच्चासंभवो जन्मांतररहितः तस्मादनंतरं चक्षुष्याविर्भविष्यतीत्येवं स्फूर्तिविशेष इति भावः । अत एव कलिं प्रति श्रीपरीक्षिद्वचनं "यस्त्वं कृष्णे गते दूरं सह गांडीवधन्वना" इति । एवं "येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इति श्रीमुनिवृंदवाक्यं च । तस्मात्सर्वेषां

पांडवानां तदीयानां च सैव गतिर्व्याख्येया ॥ ३१ ॥ ॐ ॐ मार्गं पदवीं चातुर्य्यपरिपाटीमिति यावत्। संस्थां वक्ष्यमाण-सिद्धांतानुसारेणाप्रकटप्रकाशगतत्वेन सम्यक्स्थितिं स्वांतर्दशायां, तद्बहिर्दशायां तु नाशं च स्वः कृष्णधाम "येऽध्यासनं राजकिरीट-जुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इत्युक्तत्वात्। तथा संपदः क्रतवो लोका इत्यादिभ्यश्च। युधिष्ठिर इत्युपलक्षणम्। पंचैव पांडवाः स्वःपथाय श्रीकृष्णधामपथं गंतुं मतिं चक्रुः। निभृतात्माऽन्यालक्षितचित्तव्यापारः। संदर्भस्तु–संस्थां श्रीकृष्णस्य नित्यसामीप्येन सम्यक्स्थितिं वितर्क्येति वास्तवोऽर्थः। स्वःपदं श्रीकृष्णधामपरमेव "ब्रह्मादयो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः" इति भगवद्वाक्यात्॥ ३२॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

विशोक इति। सोऽर्ज्जुनः विशोको जात इति योजना। कथं विशोकत्वं हेत्वभावादिति दर्शयति। ब्रह्मसम्पत्त्या ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् तादृग्नैर्गुण्यात् अलिङ्गत्वं लिङ्गदेहराहित्यं लिङ्गदेहाभावादसम्भवः सम्भवः स्थूलदेहस्तदभिमानरहितः। यद्वा पुनर्देहान्तरग्रहणाभावः। यतो लिङ्गदेहादेव पुनः पुनः स्थूलदेहो भवति तद्बीजरहितः। ततश्च स्थूलदेहाभिमानाभावात् संछिन्नः संशयो द्वैतभ्रमो यस्य। स्थूलदेहाभिमानेन द्वैतभ्रमादिति व्याख्यालेशः। लिङ्गनाश इति। सप्तदशावयवात्मकस्य लिङ्गशरीरस्य पूर्ववत् कार्य्यकारित्वनाश इत्यर्थः। तद्रहित इति स्थूलशरीराभिमानरहित इत्यर्थः ॥३१-३२॥

श्रीमद्वीरराघवव्याख्या

वासुदेवस्यांघ्र्योरनुध्यानेन परिबृंहितं बृंहितं वर्द्धितं रयो वेगः प्रावण्यं यस्यास्तया वासुदेवभक्त्याऽविच्छिन्नस्मृति-संतानरूपया प्रीत्यात्मिकया निर्मथिता निरस्ताः अशेषाः कषायाः कषायवदुर्मोच्या रागादयो यस्याः सा धिषणा बुद्धिर्यस्य सोऽर्जुनः ॥ २९॥ ॐ ॐ संग्राममूर्द्धनि युद्धारंभे यद्भगवता गीतं गीतोपनिषद्रूपेणोपदिष्टं ज्ञानं स्वात्मपरमात्मतत्प्राप्तिसाधनादि-याथात्म्यगोचरं ज्ञानं तन्महता कालेन कर्मणा तमोगुणेन चावरुद्धं तिरोहितमपि विभुस्तत्त्वावधारणसमर्थः। अत्र निर्मथिताशेष-कषायत्वं हेतुः पुनरप्यध्यगमदध्यवस्यत्॥ ३०॥ ॐ ॐ ब्रह्मसंपत्त्या, पत्लृ-गतौ गत्यर्था च बुद्ध्यर्था, ब्रह्मविषयकसम्यग्ज्ञानेन ह्यर्जुनस्तदानीं मुक्तः तेनोपलक्षितः। यद्वा तेन हेतुना च्छिन्नद्वैतसंशयः आत्मनि देहगतदेवादिभेदभ्रमरहित इति। गीतोपनिषत्पूर्व-षट्कोक्तबुद्ध्युन्मेषः ब्रह्मसंपत्त्येति मध्यषट्कार्थज्ञानोन्मेष उक्तः। यद्वा ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः ब्रह्मज्ञानेन संछिन्नदेवादिद्वैतस्व-निष्ठद्वैतसंशय इत्यर्थः। अलिंगत्वादिति स्थूलदेहविरहानुसंधानमुक्तं लीनप्रकृतिनैर्गुण्याद्विनष्टसूक्ष्मप्रकृतितया गुणत्रयविरहात्तदन-नुसंधानादित्यर्थः। देहे वर्त्तमानत्वादर्जुनस्यासंभवः, अत एव पुनर्जन्मरहितः, ततो विशोकोऽभवदित्यर्थः। विशोकग्रहणमपहतपाप्म-त्वादिगुणाष्टकयुक्तस्वरूपोपलक्षणम्॥ ३१॥ ॐ ॐ भगवतो मार्गं स्वर्लोकगमनप्रकारं यदुकुलसंस्थामंतं नाशं चेति यावत् श्रुत्वा युधिष्ठिरः निभृतात्मा समाहितः स्वःपथाय–स्वःशब्दः सुखपरः–निरतिशयसुखरूपलोकमार्गाय मतिं चक्रे॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नन्वर्जुनस्य नानाविधक्षत्रहत्यापापोपरक्तायास्तामस्या बुद्धेर्नैर्मल्यं कथं युज्यते इत्याशंक्य जीवन्मुक्तेष्वेकत्वात् भगवदर्पण-बुद्ध्या कृतदुष्टक्षत्रहत्यस्य तस्य मतेर्नैर्मल्यं युक्तमिति दर्शयति वासुदेवेति। ब्रह्मसंपत्त्या ब्रह्मणोऽवगत्या ब्रह्मापरोक्षज्ञानेन विशोकस्त-स्मादेव छिन्नो निवृत्तो द्वैतसंशयौ यस्मात्स तथोक्तः, द्वे इतं द्वीतं द्विधा गतं ज्ञानं तस्य भावः द्वैतमन्यथा ज्ञानमिति यावत्संशय इदं वाऽदो वेत्युभयकोटिविषयं ज्ञानं विच्छिन्नो जीवब्रह्मभेदविषयः संशयो येनेति वा लीना अपसारिता प्रकृतिरहंकारात्मिका यस्मात्स तथोक्तः भावप्रधानो निर्देशः, तस्माल्लीनप्रकृतित्वान्निर्गतानि सत्त्वादिगुणकार्याणि यस्मात्स तथोक्तः तस्य भावो नैर्गुण्यं तस्मादलिंगत्वात्सूक्ष्मशरीररहितत्वान्न संभवोऽनारब्धकर्ममूला या पुनरुत्पत्तिस्तया वर्जितः, अनारब्धकर्मणां ज्ञानोदयेन नाशा-दारब्धकर्मणामेवावशेषितत्वाज्ज्ञानोदयकाल एवंभूतः सन्नर्जुनो रणमूर्धन्यारब्धकर्मणा स्वधर्मे अधर्मबुद्धये स्वात्मने भगवता यत् ज्ञानगीतमुपदिष्टं तदारब्धकर्ममूलैः कालकर्मतमोभिः रुद्धं कालेन कर्मणा तमसा चावृतं पुनरध्यगमदवगतवानावर्तितवानित्यन्वयः। कीदृशः वासुदेवस्यांघ्र्योरभितः सम्यग्ध्यानेन परितो बृंहितं वृद्धं रंहो वेगो यस्याः सा तथोक्ता तया भक्त्या निर्मथिता अशेषाः समूलाः कषायाः पापलक्षणाः रागलक्षणा वा यस्याः सा तथोक्ता निर्मथिताशेषकषाया धिषणा बुद्धिर्यस्य स तथा। अत्र न सर्वारब्ध-कर्मणां निमर्थनमभिप्रेतं किंतु महता भगवत्कारुण्यादिना कारणेन केषांचिदेव। अन्यथा "भोगेन त्वितरे क्षपयित्वाथ संपत्स्यते" 'तस्य तावदेव चिरमि'त्यादिसूत्रश्रुतिविरोधः स्यात् "महता कारणेनैव प्रारब्धान्यपि कानिचित्कर्माणि क्षयमायांति ब्रह्मदृष्टिमतः क्वचिदि"त्युक्तत्वाच्च। अतोऽत्राशेषशब्दो निर्मथनयोग्याशेषप्रारब्धविषय इति भावः॥ १-३॥ ॐ ॐ एवं यादवसंस्थां श्रीकृष्णस्वधामप्राप्तिं चाभिधाय पांडवस्वर्याणमुपक्रमते निशम्येति। भगवतः श्रीकृष्णस्य स्वधामगमनप्रकारं यदुकुलस्य संस्थां विनाशं च श्रुत्वा निवृत्तात्मा राज्यादिभ्य उपावृत्तमनाः नितरां वृत्ते सदाचारे आत्मा यस्येति वा युधिष्ठिरः काम-क्रोधादिजयलक्षणयुद्धे स्थिरः स्वःपथाय स्वर्गमार्गाय वीराध्वने मतिं चक्र इत्यन्वयः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वासुदेवेति । पूर्व्वस्यैव विवरणमिदं पद्यद्वयम् । तत्रानुध्यानं पूर्वोक्ता चिन्तैव । कषायः पूर्व्वोक्तं मलमेव ॥ २९ ॥ ❀ ❀ गीतं मामेवैष्यसीत्यन्तम् । कालो भगवल्लीलेच्छामयः । कर्म्म तल्लीला । तमस्तल्लीलावेशेन तदननुसन्धानम् । अध्यगमत् तन्महाविच्छेदस्य तस्यान्तेऽपि तथा तत्प्राप्तेः पुनर्मामेवैष्यसीत्येतद्वाक्यं यथार्थत्वेनानुभूतवान् ॥ ३० ॥ ❀ ❀ ततश्च कृतार्थोऽभवदित्याह विशोक इत्यादि । ब्रह्मसम्पत्त्या श्रीमन्नराकारपरब्रह्मसाक्षात्कारेण संछिन्न इयं मम चेतसि स्फूर्त्तिरेव साक्षात्कारस्त्वन्य इति द्वैत संशयो येन सः । तदा भगवत्प्राप्तौ नान्यवजन्मान्तरप्राप्तिकालसन्धिरप्यन्तरायोऽभवदित्याह लीनेति । लीना पलायिता प्रकृतिर्गुणकारणं यस्मात् एवम्भूतं यन्नैर्गुण्यं तस्माद्धेतोः गुणतत्कारणातीतत्वादित्यर्थः । तथैवालिङ्गत्वात् प्राकृतशरीरहितत्वाच्च असम्भवो जन्मान्तररहितः । तस्मादनन्तरं चक्षुष्याविर्भेष्यतीत्येव स्फूर्त्तिविशेषः (विशेषः) इति भावः । अत एव कलिं प्रति श्रीपरीक्षिद्वचनं–'यस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वने'ति । एवं–'येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः' इति श्रीमुनिवृन्दवाक्यञ्च । तस्मात् सर्वेषां पाण्डवानां तदीयानां च सैव गतिर्व्याख्येया ॥ ३१ ॥ ❀ ❀ भगवन्मार्गं निशम्य वितर्क्य । यदुकुलस्य च संस्थां निशम्य श्रुत्वा । श्रीकृष्णस्य नित्यसामीप्येन सम्यक् स्थितिं वितर्क्येति वास्तवोऽर्थः । स्वः श्रीकृष्णधाम येऽध्यासनमित्यादौ सद्यो जहुर्भगवत्पार्श्वकामा इत्यनेन तदर्थमेव कृतप्रयत्नत्वात् 'ब्रह्मादयो लोकपालाः स्वर्वासमभिकाङ्क्षिणः' इति श्रीभगवद्वाक्याच्च ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु कामादयः कषाया अपि मलशब्देनोच्यन्ते, सत्यम् । अर्ज्जुनस्य भगवन्नित्यपरिकरत्वेन साक्षान्नरावतारत्वेन च तदसम्भव एव, महेन्द्रांशत्वेन कषायः सम्भवति चेत् तदपि नैवेत्याह वासुदेवेति । जन्मारभ्यैवोत्पन्नया भक्त्या प्रथमत एव निर्म्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्यस्य तथाभूत एवार्ज्जुनः ॥ २९ ॥ ❀ ❀ किन्तु "प्रियस्य विच्छेददवे प्रियोक्तिस्मृत्यैव संधुक्षणमातुरस्ये"ति रीत्या तन्मुखचन्द्रविनिर्गतं सर्व्वसन्तापोपशमनं गीतामृतमेव पातुमारेभे इत्याह गीतमिति । कालादिभिरवरुद्धमविस्मृतम् । तत्र तमोऽन्धकारसमस्तद्विरह एव ॥ ३० ॥ ❀ ❀ तत्र च 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि कौन्तेय प्रतिजाने प्रियोऽसि मे ॥' इत्यत्र पद्ये एष्यसीति भविष्यन्निर्देशेनेदं द्योतितम्– हे कौन्तेय संप्रति त्वं मामेष्यस्येव यदा तु तव मद्वियोगो महान् भावी तदा मां प्राप्तुं यतिष्यमाणस्य तव तदुपायमहमधुनैव स्नेहेन ब्रवीमि इति स्वप्राप्त्यर्थं यत् ध्यानमुक्तं संप्रति तेन मुहुरभ्यस्तेन ध्यानेनैव तत्पार्श्वगतमेवात्मानमभिमन्यमानस्यापि मम देह एवान्तरायो यतोऽयं मध्ये मध्ये बहिर्वृत्तिमनुभाव्य मां शोकार्णवे क्षिपति । तदस्माद्देहादात्मनः पार्थक्यमापादयितुं सर्व्वशास्त्रविद्यावत् पूर्व्वाभ्यस्तं योगमेव लक्षणम् (रक्षणम्) अनुशीलयामीति मनसि निश्चित्य चिन्मयशरीरोऽपि आत्मानं श्रीकृष्णनित्यप्रियसखत्वेन नारायणसखत्वेन वा नानुसन्दधानः प्रेमवैवश्येन प्राकृतं नरमेव जानंस्तद्भावापलापाय क्षणमात्रेणैव योगारूढो बभूवेत्याह विशोक इति । ब्रह्मसम्पत्त्या प्राप्तया विशोकोऽभूदिति तदभिमत्यनुसारेणैव सूतोक्तिः, वस्तुतस्तु प्रपंचगतां सम्पत्तिं त्यक्त्वा ब्रह्मसम्पत्त्या अप्रकटप्रकाशगतया श्रीकृष्णप्रियसखत्वप्राप्त्या विशोकः विगतशोकः संछिन्नो द्वैते संशयः देहेन सह मम सम्बन्धोऽस्ति नास्ति वेति सन्देहो यस्य सः । वस्तुतस्तु द्वैते सख्युः श्रीकृष्णात् सकाशात् स्वस्य भिन्नत्वे सति संशयः पूर्व्वमावयोः परस्परसख्यादैक्यमासीत् संप्रति तु द्वैतं वृत्तम् । तदधुना स कृष्णः किं पुनरपि सख्यसुखमयाद्वैत एव मां नेष्यति किंवा पार्थक्यलक्षणद्वैतदुःखसिन्धौ निमज्जयिष्यतीति भावनामयः सन्देहः संछिन्नो यस्य सः । न च तस्य प्राकृतलोकस्येव (प्राकृताप्राकृतलोकस्येव) पुनः संसार आशङ्कनीय इत्याह । लीन इति स्पष्टम् । वस्तुतस्तु लीनं सुश्लिष्टं दुर्लक्ष्यं यत् प्रकृतितः स्वभावादेव नैर्गुण्यं कृष्णसखत्वेन गुणातीतत्वं तस्मादेवालिङ्गत्वं लिङ्गदेहाभावस्तत एव न सम्यग्भवः संसारो यस्य सः । यद्वा महेन्द्रांशभूतोऽर्ज्जुनस्तु जीवन्मुक्तोऽभूदित्याह विशोक इति । संछिन्नो द्वैतसंशयः प्रपंचानुसंधानगतशोकमोहादिर्यस्य सः । तत्र हेतुः लीना ईश्वरे लीनीकृता या प्रकृतिस्तत एव यन्नैर्गुण्यं तस्मात् । अत एवालिङ्गत्वाल्लिङ्गदेहापगमादसंभवः अपुनर्जन्मेत्यर्थः ॥ ३१ ॥ ❀ ❀ मार्गं पदवीं चातुर्य्यपरिपाटीमिति यावत् । संस्थां वक्ष्यमाणसिद्धान्तानुसारेण अप्रकटप्रकाशगतत्वेन सम्यक् स्थितिं स्वान्तर्दशायां तद्बहिर्दशायान्तु नाशञ्च । स्वः श्रीकृष्णधाम । 'येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः' इत्युक्तत्वात् । तथा 'सम्पदः क्रतवो लोका' इत्यादिभ्यश्च । युधिष्ठिर इत्युपलक्षणम् । पञ्चैव भ्रातरः स्वःपथाय श्रीकृष्णधामपथं गन्तुं मतिं चक्रुः । निभृतात्मा अन्यालक्षितचित्तव्यापारः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पादसरोरुहैकनिष्ठायाः फलमाह वासुदेवेति द्वाभ्याम् । वासुदेवांघ्र्यनुध्यानेन परिबृंहितं संवर्द्धितं रयो गङ्गाप्रवाहवद्वेगो यस्यास्तया भक्त्याऽखंडया निर्मथिताः निर्मूलिताः अशेषाः कषायाः रागादयो यस्याः सा धिषणा बुद्धिर्यस्य सोऽर्जुनः ज्ञानमध्यगम-

दित्युत्तरेणान्वयः ॥ २९ ॥ ❀ ❀ संग्राममूर्द्धनि तदारंभे भगवता यद्गीतमुपदिष्टम् "क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति तत्त्वत्रयविषयकं कालेन बहुसंवत्सरात्मकेन अश्वमेधादिकर्माभिनिवेशेन तदर्थं दिग्विजयादिवशादुत्पन्नेन तमसा क्षत्रियोचिततमोगुणे रुद्धं ज्ञानं तत्पुनर्विभुस्तत्त्वावधारणसमर्थः अध्यगमत् अध्यवस्यत् । तत्र क्षरशब्दवाच्यमनात्मभूतं तत्त्वम् कूटस्थं प्रकृतिभिन्नमात्मतत्त्वम् उत्तमपुरुषस्तदुभयनियंता चिदचिच्छक्तिमान् तत्र स्वात्मपरमात्मनोः स्वरूपतो भिन्नत्वेऽपि सर्वथांशांशिनोः पृथगवस्थानाभावादभेदोऽपीति विवेकः ॥ ३० ॥ ❀ ❀ उक्तज्ञानभक्तिभ्यां कृतार्थस्य स्थितिमाह विशोक इति । लीना तत्पृथक्कूटस्थस्वरूपाध्यवसायेन विस्मृता प्रकृतिः शरीरादिसकलक्षरपदार्थमूलभूता यस्य स लीनप्रकृतिः कार्यकारणरूपप्रकृतिभिन्नस्वरूपवित् तस्य नैर्गुण्यं सत्त्वादिगुणशून्यत्वं तस्मात् अत एवालिङ्गत्वाच्च सूक्ष्मशरीरभिन्नत्वाच्च असंभवः नास्ति संभवः पुनर्जन्म यस्य सः कार्यकारणरूपप्रकृतिभिन्नस्वरूपोऽहं न पुनः प्राकृतदेहवान् भविष्यामीत्यध्यवसायवान् ब्रह्मणि भगवति वासुदेवे संपत्तिर्ज्ञानं तादात्म्यलक्षणं पूर्वश्लोके संक्षेपतः प्रतिपादितं तया च छिन्नद्वैतसंशयः ब्रह्मात्मकोऽस्मीति ज्ञानसंपन्नः, इत्थं विशोको जात इति दिक् ॥ ३१ ॥ ❀ ❀ तथैव युधिष्ठिरनिश्चयमाह निशम्येति । भगवतः श्रीकृष्णस्य मार्गं निजधामगमनप्रकारं यदुकुलस्य संस्थां संहारं च निशम्य श्रुत्वा स्वःपथाय स्वरित्यव्ययं सुखवाचकं परमसुखात्मकधामपथाय मतिं चक्रे ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत्रार्जुनस्य द्वयं जातमित्याह श्लोकद्वयेन वासुदेवेति । शांतापि बुद्धिः सवासनेति पुनरुद्गमननिराकरणार्थं वासुदेवांघ्र्यनुध्यानस्य यत् परिबृंहितमालिंगनं तदेव रंहो वेगो यस्याः तादृशभक्त्या निर्मथिताः उद्धृतसाराः स्वरूपेण नाशिता वा अशेषकषाया यस्याः तादृशी धिषणा यस्य सोऽर्जुनो जात इत्यर्थः ॥ २९ ॥ ❀ ❀ अनेन सवासनं बुद्धेरावरणं गतमित्युक्तं, जीवावरणदूरीकरणार्थमुपायमाह गीतमिति । शुद्धे ह्यंतःकरणे प्रमाणेनोत्पादितं ज्ञानम् आत्मावरणं दूरीकरोति तत् पूर्वमेव गीताख्येन प्रमाणेन भगवता उपदिष्टेन ज्ञानं जातमेवास्ति परं कालकर्मतमोभिस्त्रिगुणात्मकैः सज्ञाना बुद्धिरावृता तदिदानीमावरणापगमे स्वयमेव ज्ञानं जातमित्याह गीतमिति । गीतायां भगवता उक्तं ज्ञानं यत् तत् पुनरध्यगमदिति सम्बन्धः । ननु वृत्तिरूपं ज्ञानं त्रिक्षणावस्थायीति सकारणस्य स्वतस्तिरोहितत्वात् कथं प्राप्तवान् तत्राह–विभुरिति समर्थत्वात् ज्ञानतिरोभावं दूरीकृतवानित्यर्थः ॥ ३० ॥ ❀ ❀ ततो यथात्मावरणं दूरीभूतं तदाह क्रमेण विशोक इति ज्ञानेन ब्रह्मसंपत्तिर्जाता 'ब्रह्म वेद ब्रह्मैव भवती'ति शोको हि विषयाप्राप्तौ भवति । ब्रह्मत्वेन सर्वविषयप्राप्तौ सत्यां शोकाभाव इति । सर्वविषयप्राप्तिमाह संछिन्नद्वैतसंशय इति । सम्यक् छिन्ना द्वैतप्रपंचे देहादौ संशया यस्य स्वस्यैव सर्वरूपत्वे न कोऽपि संदेहो भवतीति । अथवा अद्वैते सर्वत्रात्मनः प्रवेशात् सर्वस्यात्मना स्वरूपनाशसंशयाः स्थिताः सखण्डभावात् तदात्मनो ब्रह्मभावात् अंतःप्रवेशेन बहिःसम्बन्धसंदेहा निवारिता इत्यर्थः । ननु बाह्ये विषये स्थिते पुनः सम्बन्धेन संशया भविष्यन्तीत्याशंक्याह लीना या प्रकृतिस्तया कृतत्वात् जातं यदूनैर्गुण्यं निर्गुणावस्था तया कृतत्वात् लिंगापगमे जाते मूलदोषाणां निवृत्तत्वात् असम्भवे न पुनरुद्गम इत्यर्थः । अत उद्गमाद्यभावादेव न सम्बन्धः । लिंगस्य च निवृत्तत्वात् एवं सर्वदोषापगमपूर्वकब्रह्मभावे जाते सर्वे शोका निवृत्ता इति भावः ॥ ३१ ॥ ❀ ❀ एवमर्ज्जुनस्य कृतार्थत्वमुक्त्वा राज्ञः कृतार्थत्वं वक्तुं तस्याध्यवसायमाह भगवन्मार्गं ज्ञात्वा वैकुण्ठे गत इति । यदुकुलस्य संस्थां मृत्युं स्वःपथाय देवमार्गाय निभृतात्मा दृढांतःकरणः गंतुं मतिं चक्र इत्यर्थः ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः ।

वासुदेवाङ्घ्रीत्यत्र । भगवत्स्वरूपयोरिति जीवपरमात्मनोरित्यर्थः । जीवभगवत्स्वरूपयोरिति वा पाठः प्रतिभाति । सोर्जुनो जात इति । 'वलक्षो धवलोर्जुनः' शुद्धो जात इत्यर्थः । त्रिक्षणावस्थायीति । मतान्तरानुसारेण पूर्वपक्षतयोक्तम् । मूले ज्ञानस्य रुद्धत्वकथनेन चिरकालस्थायित्वस्यैवाभिप्रेतत्वात् ज्ञानतिरोभावं दूरीकृतवानिति । पुनः प्राप्तिस्वरूपव्याख्यानाच्चेति ज्ञेयम् ॥ २९ ॥ ❀ ❀ विशोक इत्यत्र । तत इति ज्ञानानुसन्धानानन्तरम् । अन्तः प्रवेशेनेति सर्वान्तः प्रवेशेन । असम्भव इति न विद्यते संशयानां सम्भवो यस्मिन्निति सप्तम्यर्थे बहुव्रीहिः, न पुनरुद्गम इति तात्पर्यार्थः ॥ ३१ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

वासुदेवस्य वसुदेवनन्दनस्य कृष्णस्याङ्घ्र्योरनु निरन्तरं ध्यानेन परिबृंहितं वर्द्धितं रंहो वेगो यस्यास्तया भगवद्भक्त्या परमप्रीत्यात्मिकया निर्मथिताः निरस्ता अशेषाः कषायाः कषायवद् दुर्मोच्या भोगवासना यस्याः सा धिषणा बुद्धिर्यस्य तथाभूतोऽर्जुनः ॥ २९ ॥ ❀ ❀ अत एव विभुः समर्थः सन् सङ्ग्राममूर्द्धनि युद्धसमारम्भे यद्भगवता गीतं गीतोपनिषन्मुखेनोपदिष्टं स्वात्मपरमात्मतत्प्राप्तिसाधनादियाथात्म्यगोचरं ज्ञानं तन्महता कालेन कर्मणा लौकिकालौकिकव्यापारेण तमसा अज्ञानेन चावरुद्धं

तिरोहितमपि पुनरध्यगमत् प्रापेत्यन्वयः ॥ ३० ॥ ❋ ❋ ज्ञानफलमाह–विशोक इति। एतदेव शोकहेत्वभावेनोपपादयति–शोकस्य हि हेतुर्द्वैतभ्रमः, तस्य स्थूलदेहः, तस्य लिङ्गदेहः, तस्य सत्त्वादयो गुणाः, तेषां प्रकृतिः, तत्र ब्रह्मसम्पत्त्या "सर्वं खल्विदं ब्रह्म, अहं ब्रह्मास्मि" इति ब्रह्मात्मज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तन्नैर्गुण्यं भवति, तस्मान्नैर्गुण्याद् गुणकार्यलिङ्गनाशः अलिङ्गत्वाच्चासम्भवः सम्यग्भोगाय पुनः पुनर्भवतीति सम्भवः स्थूलशरीरं तदभिमानरहितः ततश्च तत्परिच्छेदाभावात् सञ्छिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य सोऽर्जुनो विशोको जात इत्यन्वयः ॥ ३१ ॥ ❋ ❋ एवमर्जुनस्य कृतार्थत्वमुक्त्वा राज्ञोऽपि तद्वक्तुं तस्याध्यावसायमाह–निशम्येति। भगवतो मार्गं वैकुण्ठगमनं यदुकुलस्य संस्थां विनाशं च निशम्य निभृतात्मा भगवन्तं विनाऽत्र न स्थेयमिति निश्चलचित्तः युधिष्ठिरः स्वःपथाय 'येध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः' इति वक्ष्यमाणत्वाद्भगवद्धाममार्गाय मतिं चक्रे इत्यन्वयः ॥ ३२ ॥

हिन्दी अनुवाद

उनकी प्रेममयी भक्ति भगवान् श्रीकृष्णके चरण-कमलोंके अहर्निश चिन्तनसे अत्यन्त बढ़ गयी। भक्तिके वेगने उनके हृदयको मथकर उसमेंसे सारे विकारोंको बाहर निकाल दिया ॥ २९ ॥ ❋ ❋ उन्हें युद्धके प्रारम्भमें भगवान्के द्वारा उपदेश किया हुआ गीता-ज्ञान पुनः स्मरण हो आया, जिसकी कालके व्यवधान और कर्मोंके विस्तारके कारण प्रमादवश कुछ दिनोंके लिये विस्मृति हो गयी थी ॥ ३० ॥ ❋ ❋ ब्रह्मज्ञानकी प्राप्तिसे मायाका आवरण भङ्ग होकर गुणातीत अवस्था प्राप्त हो गयी। द्वैतका संशय निवृत्त हो गया। सूक्ष्मशरीर भङ्ग हुआ। वे शोक एवं जन्ममृत्युके चक्रसे सर्वथा मुक्त हो गये ॥ ३१ ॥ ❋ ❋ भगवान्के स्वधाम-गमन और यदुवंशके संहारका वृत्तान्त सुनकर निश्चलमति युधिष्ठिरने स्वर्गारोहणका निश्चय किया ॥ ३२ ॥

पृथाप्यनुश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिं च ताम्।
एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥ ३३ ॥
य[1]याहरद् भुवो भारं तां तनुं विजहावजः। कण्टकं कण्टकेनेव द्वयं चापीशितुः समम् ॥ ३४ ॥
यथा मत्स्यादिरूपाणि धत्ते जह्याद् यथा नटः। भूभारः क्षपितो येन जहौ तच्च कलेवरम् ॥ ३५ ॥
यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः।
तदाहरेवाप्रतिबुद्धचेतसामभ[2]द्रहेतुः कलिरन्ववर्तत ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका।

तां दुर्विज्ञेयाम्। वक्ष्यति ह्येकादशे। "सौदामन्या यथाकाशे यांत्या हित्वाभ्रमंडलम्। गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥" इति। संसृतेरुपरराम जीवन्मुक्ता बभूव। देहं जहाविति वा ॥ ३३ ॥ ❋ ❋ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमबुद्ध्वा तत्साम्यं वदतो मंदमतीन्प्रति वैलक्षण्यं स्पष्टयति द्वाभ्याम्। यया यादवरूपया तन्वा भुवो भारं कंटकेन कंटकमिवाहरत्। यादवतनुर्भूभारतनुश्चेति द्वयमपीश्वरस्य संहार्यत्वेन सममेव ॥ ३४ ॥ ❋ ❋ श्रीकृष्णमूर्तेर्विशेषमाह यथेति। तान्यपि यथा धत्ते जहाति च। तदाह–यथा नटो निजरूपेण स्थितो रूपांतराणि धत्तेऽतर्धत्ते च तथा तदपि कलेवरं जहौ अंतरधादित्यर्थः ॥ ३५ ॥ ❋ ❋ युधिष्ठिरस्य स्वर्गारोहप्रसंगाय कलिप्रवेशमाह यदेति। स्वतन्वा जहौ सतनोरेव वैकुंठारोहात्। श्रवणार्हा सती कथा यस्य तदा यदहस्तस्मिन्नेव अहरिति लुप्तसप्तम्यंतं पदम्। अप्रतिबुद्धचेतसामविवेकिनामिति विवेकिनां तु न प्रभुरित्युक्तम्। अन्ववर्ततेति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पृथा हि हिमालयगमनात्पूर्वमेव स्वगृहागतान्नारदाद्भावियदुकुलसंस्थां भगवदंतर्द्धानादिकं च श्रुत्वा जीवन्मुक्तिं प्राप्यैव धृतराष्ट्रेण साकं हिमालयं गतेति ध्येयमत्र। तथाहि–धं धैर्यं नाशयतीति धनमविवेकस्तं जयति विचारेणेति धनंजयो नारदः।

---

१. प्राचीनपुस्तके 'ययाहरद्भुवो भारं' इत्यतः 'जहौ तच्च कलेवरम्।' इत्यन्तं पद्यद्वयं न वर्तते, विजयध्वजाचार्योऽपि इमे पद्ये तथा पूर्ववर्ति पद्यमपि न व्याख्यत्। भगवतः श्रीकृष्णस्य चिन्मयशरीरत्यागः न संभवी। अत एव भक्ता एतत् पद्यद्वयं नाङ्गीचक्रुः। २. प्रा० पा०–अभद्रहेतुः।

यद्वा धं धैर्यं नयति प्रापयतीति। धनं विवेकस्तेन जयति सर्वत्रोत्कर्षं प्राप्नोतीति धनंजयः। धशब्दोपपदादंतर्भावितणिजर्थान्नेर्नयतेश्च ड प्रत्ययः। "धं धैर्यं धनमुच्यते" इत्येकाक्षरीनाममालोक्तेः। धनशब्दोपपदाज्जयतेः खश् तत एव पूर्वपदस्य मुम्। धनंजयेनोदितं लोकदृष्ट्या नाशं वस्तुतस्त्वदर्शनमेव। ननु जीवन्मुक्ता चेत्तर्हि कथं हिमालयं गता। "तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा। ज्ञानसंप्राप्तिसमये विमुक्तो विशदाशयः" इत्यादिस्मृतेस्तत्राह-देहं जहौ वेति। देहहेतुं लिङ्गदेहम्, न तु स्थूलम्। महाभारतविरोधात्। यथाश्रुतार्थस्वीकारे तु कल्पांतरमादायैव व्यवस्था ज्ञेया॥ ३३॥ ❀ ❀ यादववादीनामंतिमदशाश्रवणेन विषीदतः शौनकादीनाश्वासयन्सिद्धांतरहस्यमाह-ययेति। यया यादवादितन्वा भुवः स्वपादभूताया भारं कंटकेन सूच्यग्रेण कंटकमिवाहरत् तामेव तनूं विजहौ। देवदत्तो वसनं विजहाविवितिवत्स्वसंगाद्विच्युतीचकारेत्यर्थः। न तु यया नित्यं क्रीडति तामपीति भावः। तेनांशावतरणसमये ये देवा नित्यभूतेषु यादवेषु प्रविष्टास्त एव तेभ्यो योगबलेन निष्कास्य प्रभासं गमितास्तद्देहत्यागं लोकान्मायथैव दर्शयता भगवता मधुपानानंतरं देवरूपीकृताः स्वर्गं प्रापयामासिरे इत्येकादशांतव्याख्यानुसृत्या ज्ञेयम्। नित्यलीलापरिकरा यादवास्तु प्रापंचिकलोकाऽलक्षिताः श्रीकृष्णेन समं द्वारकायामेव यथापूर्वमेव खेलंतीति भागवतामृतोक्तसिद्धान्तादवगंतव्यम्। द्वयमिति। भूभारभूता असुरा यादवादिरूपा देवाश्चेति द्वयमीशितुः परमेश्वरस्य सममेव। किं तु दृष्टान्ते कंटकत्वेन साम्येपि कारणभूतस्य सूच्यग्रस्योपकारकत्वेनांतरंगत्वं कर्मभूतस्य कंटकस्यापकारकत्वेन बहिरंगत्वमित्यपि ज्ञापितम्। "सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च कंटकः" इत्यमरः। संदर्भस्तु—ययेति तनुरूपकलेवरशब्दैरत्र श्रीभगवतो भूभारजिहीर्षालक्षणो देवादिपिपालयिषालक्षणश्च भाव एवोच्यते। यथा तृतीये विंशतितमेऽध्याये तनुशब्दैर्ब्रह्मणो भाव एवोक्तः। यदि तत्रैव तथा व्याख्येयं तदा सुतरामेव श्रीभगवतीति ततश्च तस्य भावस्य भगवति तदाभासरूपत्वात्। कंटकदृष्टान्तस्तु सुसंगत एव। तथा द्वयमेवेशितुः साम्यमपि तत्तु तृतीयसन्दर्भे विवृतमस्ति॥ ३४॥ ❀ ❀ कृष्णस्त्वैन्द्रजालिकनट इव स्वदेहत्यागं मिथ्याभूतमेव प्रत्याययामासेत्याह-यथेति। भगवान्धत्ते जह्यात्। ननु धृत्वा जह्यादिति तनुत्यागकालेपि तत्तदनुधारणमस्त्येव। ननु कथमेतद्बोद्धव्यमित्यत आह-यथा नट ऐन्द्रजालिकः छेददाहमूर्च्छादिभिः स्वदेहं त्यजति तस्य त्यागं सर्वान्दर्शयति प्रत्याययति च अथ च स्वदेहं धत्त एव न तु म्रियते तथैव मत्स्यादिरूपाणि मत्स्यादिशरीराणि स्वीयानि भगवान्धत्ते जह्यात्। दधान एव जहाति तेन नटस्य शरीरधारणं सत्यमेव तत्त्यागस्तु मिथ्यैव यथा तथैव भगवतोऽपि मत्स्यादिस्वीयशरीरधारणं सत्यमेव तत्त्यागो मिथ्यैवेत्यर्थः। यथा च मत्स्यादिशरीराणि जहाति तथैव येन भूभारः क्षपितस्तत्र कलेवरं जहाविति श्रीकृष्णकलेवरत्यागो मिथ्यैवेति नराकृतिपरब्रह्मत्वादिकमपि नटरूपनरधर्ममेव भगवान्करोति न तु तत्त्वेन। स्वदेहस्याभौतिकत्वेन नाशासंभवात्। तदुक्तं महाभारते "न भूतसंघसंस्थानो देहोस्य परमात्मनः" इति। बृहद्वैष्णवेपि "यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः। स सर्वस्माद्बहिः कार्यः श्रौतस्मार्त्तविधानतः॥ मुखं तस्यावलोक्यापि सचैलः स्नानमाचरेत्"। इति। वैशंपायनसहस्रनामनि च-"अमृतांशोऽमृतवपुः" इति। अमृतं मरणवर्जितं वपुर्यस्येति तत्र श्रीशंकराचार्यव्याख्या च प्रसिद्धा। अत्र श्लेषेण जह्यादिति जहातेस्त्यागार्थत्वात्त्यागस्य च दानार्थत्वात्। वैकुण्ठादिधाम तेभ्यो भक्तेभ्यः स्वशरीरप्रविष्टचरं नारायणादिरूपं तेषां पालनार्थं ददावित्येकादशान्ते व्याख्यास्यते इति विश्वनाथः। संदर्भस्तु-मत्स्यादिरूपाणि मत्स्याद्यवतारेषु तत्तद्भावान्। अथ नटदृष्टान्तेपि नटः श्राव्यरूपकाभिनेता व्याख्यातं तैः प्रथमस्यैकादशे 'नटा नवरसाभिनयचतुरा' इति। ततो यथा श्राव्यरूपकाभिनेता नटः नटस्वरूपेण स्ववेशेन च स्थित एव पूर्ववृत्तमभिनयेन गायन् नायकनायिकादिभावं धत्ते जहाति च तथेति। अथ वा "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतावाक्येन "योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित्। द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः" इति पाद्मोत्तरखण्डनिर्णयेन "मल्लानामशनिः" इति श्रीभागवतदर्शनेन "आत्मविनाशाय भगवदस्त्रचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमं ब्रह्मभूतमपगतद्वेषादिदोषो भगवन्तमद्राक्षीत्" इति शिशुपालमुद्दिश्य श्रीविष्णुपुराणगद्येन चासुरेषु यद्रूपं स्फुरितं तत्तस्य स्वरूपं न भवति किं तु मायाकल्पितमेव। स्वरूपे दृष्टे द्वेषश्चापयातीति। ततश्चासुरेषु स्फुरन्त्या यया तन्वा भुवो भाररूपमसुरवृन्दमहरत्तां तनुं विजहौ। पुनस्तत्प्रत्यायनं न चकारेत्यर्थः। भक्तिदृश्या तनुस्तु तस्य नित्यसिद्धैवेत्याह-अज इति। "देवक्यां देवरूपिण्याम्" इत्यादेः। "कृष्णश्च तत्र च्छन्दोभिः" इत्यत्र गोलोकाधिष्ठातृत्वनिर्देशाच्च। ततश्च यथा नट ऐन्द्रजालिकः कश्चित्स्वभक्षकाणां बकादीनां निग्रहाय मत्स्याद्याकारान्धत्ते स्वस्मिन्प्रत्याययति इति तन्निग्रहे सति यथा च तानि जहाति तथा सोयमजोऽपि येन मायिकेन लक्ष्यतां प्रापितेन रूपेण भूभाररूपोऽसुरवर्गः क्षपितस्तद्वर्गं क्षपितवानित्यर्थः। तच्च कलेवरमजो जहौ अन्तर्द्धापितवानित्यर्थः। किं तु गीतापद्ये "योगमायासमावृतः" इति सर्पकंचुकवन्मायारचितवपुरात्मा समावृत इत्यर्थः॥ ३५॥ ❀ ❀ तनुत्यागस्यावास्तवत्वं स्पष्टयन्नाह-यदा स्वतन्वा जहौ स्वतनोरेव वैकुण्ठारोहादिति स्वामिचरणाः। त्यागोऽत्र स्वतनुकरणक एव न तु स्वतन्वा सह महीं जहाविति कुव्याख्यावकाशः। "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात्। "प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम्। आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम्" इत्यत्रापि लोकलोचनरूपं स्वबिंबं निजमूर्त्तिं प्रदर्श्य पुनरादायैव चान्तरधात् न तु त्यक्त्वेति। संदर्भश्च-तदा यदहस्तदभिव्याप्येत्यर्थः। अप्रबुद्धचेतसामिति। चौरो हि निद्रितस्यैव धनं हरति प्रतिबुद्धाद्बिभेति चेत्यर्थः॥ ३६॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

सौदामन्या इति । एकादशस्कन्धीयैकत्रिंशाध्यायस्य नवमश्लोकः ॥ ३३ ॥ ❀ ❀ यादवतनुर्भूभारतनुश्चेति । यादवाः प्रद्युम्नसात्यक्यादयः तद्रूपा तनुः मूर्त्तिः । भूभाराः शम्बरादयः तद्रूपा तनुः । ईश्वरस्य सर्व्वमयत्वात् । तत्र संहार्या तनुरसुरादयः हेयतनुः प्रद्युम्नसात्यक्यादिमूर्त्तिः द्वयमेव समं त्याज्यत्वेन । तत्र दृष्टान्तः कण्टकमित्यादि । यथा कण्टकविद्धपादः कण्टकान्तरमानीय पादस्थकण्टकमुद्धृत्य द्वयमपि प्रक्षिपति तथा यादवमूर्त्त्या भूभारमुर्त्तिमसुरसमूहं हत्वा द्वयमपि त्यक्तवान् इति व्याख्यालेशः ॥ ३४ ॥ ❀ ❀ यथा मत्स्यादीति । येन श्रीकृष्णरूपेण भूभारः क्षपितः । तच्चेति चकारस्त्वर्थे । तत्तु तत् पुनर्नराकृतिरूपं जहौ अन्तरधात् यदुवंशनाशानन्तरं चतुर्भुजरूपमाविष्कृत्यान्तर्धानात् न तु देहं त्यक्त्वा गतः दृष्टान्तस्यासम्भवात् एकादशस्कन्धोक्ततत्संवादाच्च—इति व्याख्यालेशः ॥ ३५-३८ ॥

श्रीमद्वीरराघवव्याख्या

अर्जुनोदितं यदूनां नाशं तां भगवतो गतिं च श्रुत्वा कुंत्यपि भगवत्यधोक्षजेऽनन्यप्रयोजनया भक्त्या निवेशित आत्मा मनो यया तथाभूता संसृतेरुपरराम विरक्ता बभूव ॥ ३३ ॥ ❀ ❀ भगवन्मार्गमिति । भगवद्गतिमित्यनेन चोक्ता भगवतः स्वलोकं प्रति गतिः किं कृष्णस्य तनुत्यागपूर्विका उत तयैवेति शौनकाभिप्रेतं विशदयति ययेति । अजो भगवान्यया तन्वा भुवो भारमहर्त्तां तनुं विजहौ मनुष्यसंस्थानं विजहौ स्वासाधारणया चतुर्भुजादिमत्या तन्वावतीर्य पित्रोः प्रार्थनया यां मनुष्यसंस्थानस्थितां तनूं भूभारमपनेतुं जग्राह तां तनुं तिरोधाय स्वासाधारणतन्वा जगामेत्यर्थः । मनुष्यसंस्थानस्य भूभारापनोदनौपाधिकत्वेन यावदुपाधितत्संस्थानमपनुद्य स्वासाधारणयैव जगामेति भावः । मनुष्यसंस्थानेनैव किं न जगामेत्याकांक्षायां तत्र दृष्टांतमुखेनोत्तरमाह-यथा कंटकविद्धचरणः पुमान्यावत्तदपनोदककंटकांतरं परिगृह्य तेन तदपनुद्य ततोपनुत्तमपनोदकमपि कंटकद्वयं जहाति तद्वदीशितुर्भगवतः द्वयमपि सममपनोद्यं दुष्कृततच्छरीरजालमपनोदकं मनुष्यसंस्थानं चोभयमपि समं हातव्यत्वेन सममपनोदकशरीरस्यापि यावदुपाधिधार्यत्वादिति भावः, ईशितुरुभयमित्यनेन दुष्कृच्छरीरेष्वप्यंतः प्रविश्य नियंतुर्भगवतः तान्यपि शरीराणि भगवत एव स्वस्यैवेति सूचितम् । कंटकदृष्टांतेन चैतदभिप्रेतं यथोभयोः कंटकयोः कंटकत्वमविशिष्टमेवमुभयोरपि शरीरयोः स्वशरीरत्वमविशिष्टमिति ॥ ३४ ॥ ❀ ❀ इदमेव प्रसिद्धं दृष्टांतांतरेणाप्याह यथेति । यथा नटो नाट्योपयुक्तानि वेषांतराणि परिगृह्य नाट्यानंतरं स्वेन रूपेणैवावतस्थे तथा येन शरीरेण भूभारः क्षपितो निरस्तः तत्कलेवरं जहौ तत्तिरोधाय स्वासाधारणेनैव जगामेत्यर्थः ॥ ३५ ॥ ❀ ❀ यदेति श्रोतव्याः सत्याः कथा यस्य स भगवान्मुकुंदः स्वतन्वा स्वाधारणदिव्यमंगलविग्रहोपेतः महीं यदा यस्मिन्नहनि जहौ तदहरेव तस्मिन्नहन्येव विवेकिनामभद्रहेतुरशुभहेतुः कलिरवर्त्तत ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वर्याणनिर्णये कारणमाह यदेति । यदा श्रवणीयसत्कथो मुकुन्दः स्वतन्वा स्वाभिमतया मूर्त्या इमां महीं जहौ त्यक्तवांस्तदहरेव प्रतिबुद्धचेतसां हरिविषयबोधरहितबुद्धीनां पुंसामभद्रहेतुः पापकारणकलिरन्ववर्ततेत्यन्वयः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

नाशं लोकदृष्ट्या वस्तुतस्त्वदर्शनमेव । भगवत्यधोक्षजे निवेशितात्मेति भगवतः पृथाध्यानालम्बनत्वं दर्शयित्वा पृथयानुभूतां स्थितिमेव दर्शयति । तत्र सौदामिन्या इत्याद्येकादशस्कन्धपद्यात्मकं शास्त्रं सौदामिन्या अपि नाशं निषेधयति चेत् तर्ह्यत्रापि तद्दृष्ट्या सुतरामेव तन्मन्तव्यम् । तदुक्तं तत्रैव—"देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि । अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः" इति । संसृतेः प्रपंचावतारात् ॥ ३३ ॥ ❀ ❀ ययेति । तनुरूपकलेवरशब्दैरत्र श्रीभगवतो भूभारजिहीर्षालक्षणो देवादिपिपालयिषालक्षणश्च भाव एवोच्यते । यथा तृतीये विंशतितमेऽध्याये तत्तच्छब्दैर्ब्रह्मणो भाव एवोक्तः । यदि तत्रैव तथा व्याख्येयं तदा सुतरामेव श्रीभगवतीति । ततश्च तस्य भारस्य भगवति तदाभासरूपत्वात् कंटकदृष्टांतः सुसङ्गत एव । तथा द्वये एव ईशितुः साम्यमपि ॥ ३४ ॥ ❀ ❀ मत्स्यादिरूपाणि मत्स्याद्यवतारेषु तत्तद्भावान् । अथ नटदृष्टान्तेऽपि नटः श्रव्यरूपकाभिनेता । व्याख्यातं च तैः प्रथमस्यैकादशे नटा नवरसाभिनयचतुरा इति । ततो यथा श्रव्यरूपकाभिनेता नटः स्वरूपेण स्ववेशेन च स्थित एव पूर्व्ववृत्तमभिनयेन गायन् नायकनायिकादिभावं धत्ते जहाति च तथेति । अथवा "नाहं प्रकाशः सर्व्वस्य योगमायासमावृतः" इति श्रीगीतावाक्येन 'योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित् । द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्द्दनः ॥' इति पाद्मोत्तरखण्डनिर्णयेन मल्लानामशनिरिति श्रीभागवतदर्शनेन 'आत्मविनाशाय भगवद्धस्तचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमब्रह्मभूतमपगतद्वेषादिदोषो भगवन्तमद्राक्षीत्' इति शिशुपालमुद्दिश्य श्रीविष्णुपुराणगद्येन चासुरेषु यद्रूपं स्फुरति तत्तस्य स्वरूपं न भवति किन्तु मायाकल्पितमेव । स्वरूपे दृष्टे द्वेषश्चापयातीति । ततश्चासुरेषु स्फुरन्त्या यया तन्वा भुवो भाररूपमसुरवृन्दमहरत् तां तनुं विजहौ पुनस्तत्प्रत्यायनं न चकारेत्यर्थः । भक्तिदृश्या तनुस्तु तस्य नित्यसिद्धैवेत्याह अज इति । देवक्यां देव-

रूपिण्यामित्यादेः कृष्णश्च तत्र छन्दोभिः स्तूयमानमित्यत्र गोलोकाधिष्ठातृत्वनिर्देशाच्च। ततश्च यथा नट ऐन्द्रजालिकः कश्चित् स्वभक्षकाणां बकादीनां निग्रहाय मत्स्याद्याकारान् धत्ते स्वस्मिन् प्रत्याययति तन्निग्रहे सति यथा च तानि जहाति तथा सोऽयमजोऽपि येन मायिकेन लक्ष्यतां प्रापितेन रूपेण भूभाररूपः असुरवर्गः क्षपितः तद्वर्गं क्षपितवानित्यर्थः। तच्च कलेवरं जहौ अन्तर्धापितवानित्यर्थः। किन्तु गीतापद्ये योगमायासमावृत इति सर्पकञ्चुकवन्मायारचितवपुराभाससमावृत इत्यर्थः॥ ३५॥ ❀ ❀ यद्येति। त्यागोऽत्र स्वतनुकरणक इति न तु स्वतन्वा सहेति व्याख्येयं सह इत्यध्याहार्य्यापेक्षागौरवात् 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति न्यायाच्च॥ ३६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तां प्रसिद्धाम् अन्तर्द्धानलक्षणाम्। संसृतेः सम्यक्सरणात् प्रपञ्चेऽवतारात् उपरराम सद्य एव वांतर्दधावित्यर्थः। तच्छ्रवणक्षण एव तद्वियोगजनितां दशमीमपि दशां दर्शयामासेति वा॥ ३३॥ ❀ ❀ यादवादीनामन्तिमदशाश्रवणेन विषीदतः शौनकादीनाश्वासयन् सिद्धान्तरहस्यमाह ययेति। यया यादवादितन्वा भुवः स्वपादभूताया (स्वपादमूलायाः) भारं कण्टकेन सूच्यग्रेण कण्टकमिव अहरत् तामेव तनुं विजहौ। देवदत्तो वसनं विजहावितिवत् स्वसङ्गाद्विच्युतीचकारेत्यर्थः। न तु यया नित्यं क्रीडति तामपीति भावः। तेन अंशावतरणसमये ये देवा नित्यभूतेषु प्रविष्टास्ते एव तेभ्यो योगबलेन निष्कास्य प्रभासं गमितास्तद्देहत्यागं लोकान् माययैव दर्शयता भगवता मधुपानानन्तरं देवरूपीकृत्य स्वर्गं प्रापयामासिरे इत्येकादशान्तव्याख्यानुसृत्या ज्ञेयम्। नित्यलीलापरिकरा यादवास्तु प्रापञ्चिकलोकालक्षिताः श्रीकृष्णेन समं द्वारकायामेव यथापूर्व्वमेव खेलन्तीति भागवतामृतोक्तसिद्धान्तादवगन्तव्यम्। द्वयमिति। भूभारभूता असुरा यादवादिरूपा देवाश्चेति द्वयम् ईशितुः परमेश्वरस्य सममेव। किन्तु दृष्टान्ते कण्टकत्वेन साम्येऽपि करणभूतस्य सूच्यग्रस्य उपकारकत्वेनान्तरङ्गत्वं कर्म्मभूतस्य कण्टकस्यापकारकत्वेन साम्येऽपि बहिरङ्गत्वमित्यपि ज्ञापितम्। "सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च कण्टक" इत्यमरः॥ ३४॥ ❀ ❀ कृष्णस्त्वैन्द्रजालिकनट इव स्वदेहत्यागं मिथ्याभूतमेव प्रत्याययामासेत्याह यथेति। भगवान् धत्ते जह्यात् न तु धृत्वा जह्यादिति तनुत्यागकालेऽपि तत्तत्तनुधारणमस्त्येव। ननु कथमेतद्बोद्धव्यमित्यत आह-यथा नट ऐन्द्रजालिकः छेददाहमूर्च्छादिभिः स्वदेहं त्यजति तस्य त्यागं सर्व्वान् दर्शयति प्रत्याययति च अथ च स्वदेहं धत्ते एव न तु म्रियते तथैव मत्स्यादिरूपाणि मत्स्यादिशरीराणि स्वीयानि भगवान् धत्ते जह्यात् दधान एव जहाति। तेन नटस्य स्वशरीरधारणं सत्यमेव तत्त्यागस्तु मिथ्यैव यथा तथैव भगवतोऽपि मत्स्यादिस्वीयशरीरधारणं सत्यमेव तत्तत्त्यागो मिथ्यैवेत्यर्थः। यथा च मत्स्यादिशरीराणि दधान एव जहाति तथैव येन भूभारः क्षपितस्तच्च कलेवरं जहाविति श्रीकृष्णकलेवरत्यागो मिथ्यैवेति। नराकृतिपरब्रह्मत्वादिकमपि नटरूपनरधर्म्ममेवं भगवान् करोति न तु तत्त्वेन। स्वदेहस्याभौतिकत्वेन नाशासम्भवात्। यदुक्तं महाभारते-'न भूतसंघसंस्थानो देहोऽस्य परमात्मन' इति। बृहद्वैष्णवेऽपि-"यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः। स सर्व्वस्माद्बहिः कार्य्यः श्रौतस्मार्त्तविधानतः। मुखं तस्यावलोक्यापि सचैलः स्नानमाचरेदि"ति। वैशम्पायनसहस्रनामनि च-अमृतांशोऽमृतवपुरिति। अमृतं मरणरहितं वपुर्यस्येति तत्र श्रीशङ्कराचार्य्यव्याख्या च प्रसिद्धा। अत्र श्लेषेण जह्यादिति जहातेस्त्यागार्थत्वात् त्यागस्य च दानार्थत्वात् वैकुण्ठादिधामस्थेभ्यो भक्तेभ्यः स्वशरीरप्रविष्टचरं नारायणादिरूपं तेषां पालनार्थं ददावित्येकादशान्ते व्याख्यास्यते॥ ३५॥ ❀ ❀ तनुत्यागस्यावास्तवत्वं स्पष्टयन्नाह। यदा स्वतन्वा जहौ स्वतनोरेव वैकुण्ठारोहादिति श्रीस्वामिचरणाः। त्यागोऽत्र स्वतनुकरणक एव न तु स्वतन्वा सह महीं जहाविति कुव्याख्याया अवकाशः "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"ति न्यायात्। 'प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम्। आदायान्तरधाद्यस्तु स्वबिंबं लोकलोचनमि'त्यत्रापि लोकलोचनरूपं स्वबिंबं निजमूर्त्तिं प्रदर्श्य पुनरादायैव च अन्तरधात् न तु त्यक्त्वेति सन्दर्भश्च-तदा यदहः तदभिव्याप्येत्यर्थः। अप्रतिबुद्धचेतसामिति विवेकिनां तु न प्रभुरित्यर्थः। चौरो हि निद्रितस्यैव धनमपहरति प्रतिबुद्धात्तु बिभेतीत्यर्थः॥ ३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कुन्त्या मुक्तिमाह पृथापीति। संसृतेः संसारात्॥ ३३॥ ❀ ❀ ननु भूभारराजपृतनां यदुभिर्निरस्येति वचनाद्भूभारहरणौपयिकान् 'तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः। शान्ताः प्रियास्ते ह्यवितुं सतां स्थातुश्च ते धर्मपरीप्सयेह' त इति वक्ष्यमाणात्स्वकीयशांततनुभूतान् 'यदून् यदुभिरन्योऽन्यं भूभारान्संजहार हे'ति यदुक्तं तत् कथं संहृतवान् तत्राह ययेति अज इति। नित्यशरीरः स्वरूपतस्तु भूभाररूपा राजन्याः तदुपसंहाराय संवर्धिताः यादवाश्च सर्वे अजा एव द्विभुजचतुर्भुजशतभुजसहस्रभुजाकारेण स्थातुं समर्थेन गिर्य्याद्याकारेण बालतरुणाद्याकारेण एकधा दशधा शतधा सहस्रधा विश्वरूपेण च दृश्यत्वेनादृश्यत्वेन च भवितुमर्हेण श्रीविग्रहेणाप्यज इत्यर्थः। स च विग्रहश्चतुर्भुजो द्विभुजो भवति न तत्र मुख्यत्वकल्पनावकाशः। एवंभूतः अजो नित्यानन्दाचिन्त्यस्वाभाविकविग्रहः श्रीकृष्णः यया यादवभूतया शांतया भुवो भारमशांतशरीरं कंटकं कंटकेनेवाहरत् तां तनुं विजहौ। शान्ता यादवतनुरशान्ता भूभारतनुश्चेति द्वयमपीशितुर्भौतिकतया संहार्यत्वे समम्। यादवानामपि भगवल्लीला-

दर्शनव्यतिरिक्तं भौतिकदेहैर्न किमपि कृत्यम्, यथा मुनीनां भगवल्लीलादर्शनादृते 'प्रायोबचमुनयो विहगा वनेऽस्मिन्नि'त्यादिवक्ष्यमाणेषु विहगादिरूपेषु न किमपि प्रयोजनं तद्वदिति भावः। शांतान्यशांतानि च शरीराणि कृष्णस्येत्यत्र प्रमाणम् 'स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मे'त्यपि वक्ष्यमाणं बोध्यम् ॥ ३४ ॥ ❀ ❀ ननु 'निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च 'पृथाप्युपश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिं च तामि'त्युक्तं भगवद्गमनं यथा वृन्दावनान्मथुरां प्रति प्रत्यक्षमुत यथा रासक्रीडायामंतर्द्धानपूर्वकं तद्वदित्यत आह तथेति। येन नित्येन शरीरेणोभयविधो भूभारः क्षपितः तच "यदात्मको भगवांस्तदात्मिका व्यक्तिः न भूतसंघसंस्थानो देहोऽस्य परमात्मनः" इत्यादिश्रुतिस्मृतिप्रतिपादितं स्वरूपवन्नित्यानन्ताचिन्त्यं कार्यकारणरूपप्रकृतिसम्बन्धवर्जितमप्राकृतं कलेवरं स्वाभाविकं शरीरम् 'तासां तत्सौभगमदं वीक्ष्य मानं च केशवः। प्रशमाय प्रसादाय तत्रैवांतरधीयत हरिरि'तिवज्जहौ प्रत्यक्षतां त्यक्त्वांतर्हितोऽभूदित्यर्थः। प्रसंगान्मत्स्यादिप्रादुर्भावेषु यथोपयोगमाविष्कृतेषु श्रीमूर्तेर्नित्यतां दर्शयति- यथा नट एकेनैव देहेन स्थितो रूपं धत्ते जह्याच तथैकेन देहेन एव भगवान् यथेच्छं मत्स्यादिरूपाणि धत्ते जह्यादन्तर्धत्ते च ॥ ३५ ॥ ❀ ❀ पांडवानां गृहान्निर्गमनं वक्तुं कलिप्रवेशकालमाह यदेति। श्रवणीया श्रवणार्हा सती कथा यस्य सः यथा चरणे पादुकां जनो जहाति तद्वत् यदा स्वतन्वा श्रीमूर्त्या इमां महीं जहौ तदैव अहरहनि कलिरन्ववर्त्तत ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

क्रमेण मुक्तिं वक्तुं पृथाया मुक्तिमाह पृथापीति ॥ ३३ ॥ ❀ ❀ भगवतो यादवोपसंहारे आत्मत्वात् दोषाभाव इति वक्तुं यया यादवतन्वा सहायार्थमानीतया भुवो भारमहरत् तां तनुं विजहौ क्लेशाभावार्थमाह अज इति। नहि तेन जातोऽस्ति तत्र दृष्टांतमाह कंटकमिति सर्वथात्मीयाभावः सूचितः। तथापि अभिमानिनां जीवानां क्लेशात् कथमेवमत आह द्वयं चापीशितुः सममिति ॥ ३४ ॥ ❀ ❀ भगवति विशेषमाह यथेति। यथा नटाः स्वरूपमेव नानाविधक्रीडार्थं स्त्र्यादिरूपेण प्रदर्शयंति निवृत्ते च कार्ये तानि रूपाण्युपसंहरंति एवमिदमपीत्यर्थः ॥ ३५ ॥ ❀ ❀ एतत्कथनस्य प्रकृतोपयोगं वक्तुमाह यदा मुकुंद इति। सर्वेषां मोक्षदानार्थमवतीर्णो भगवान् दत्त्वा मोक्षं यदा निवृत्तः कलिरन्ववर्त्तत तदा मोक्षबाधकत्वेन कलिधर्माणां निरूपणात् तेष्वागतेषु स्थितस्य मोक्षो नास्तीति निर्गमनमेव शरणमिति। कालव्याप्तिरहितदेशे भक्ति हे तोर्भागवतादेरभावात् भगवतैव सह गंतव्यमिति मतिं कृतवानित्याह यदा मुकुंद इति। "कलिकालमलं सर्वं कालस्वामी तु माधवः। यतो निवर्त्तते तत्र वह्नाविव निकृष्टता॥ दारौ तु तथा तेन देशांतरगतिर्मता। अग्निभावेऽपि काष्ठेन साध्य इति निश्चयः। मुकुंदो भगवानि"ति वचनात्। मुक्त्यर्थमेव भगवदवतार इत्युपसंहारः। यद्यपि भगवतः नित्यसंबंधात् क्वापि त्यागो नास्ति तथापि प्रकटितपरमानन्दरूपस्य परिच्छिन्नतया प्रदर्शनात् तन्वा जहौ तनुद्वारा जहावित्यर्थः। भूमित्यागस्य पूर्वमनुक्तत्वान्नटवत् तनुत्यागस्योक्तत्वात् त्यक्तस्य वस्तुत्वाभावात् अपूर्वविधौ अनुवादे वा सहार्थतृतीया न सम्भवति। नन्वग्रे उत्पत्स्यमानानां भक्तानां कथमुद्धार इत्याशंक्याह श्रवणीयसत्कथ इति। तदा तस्मिन्नित्यर्थे अव्ययम् अहरिति लुप्तसप्तम्यन्तमव्ययं वा, प्रातः काले भगवद्गमनमिति सम्प्रदायविदः तदैव प्रातःकाले कलिः प्रवृत्तः। ननु भगवत्कृपावलोकितानां भगवन्मार्गानुवर्त्तिनां विद्यमानत्वात् कथं कलिप्रवृत्तिरित्यत आह अप्रतिबुद्धचेतसामभद्रहेतुरिति सर्वागमने प्रकर्षेण विकसितकमलानां मुकुलसंभावनारहितानामयेन कंचित् कृतिः अन्येषामस्तमये अन्धकारादिना कीटनिवासः स्यादेव ज्ञानेन विनाशः भक्त्या मुकुलसम्भावनाभावः ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यथाहरदित्यत्र। आभासे। आत्मत्वादिति। नियन्तृत्वादित्यर्थः। न दोषाभाव इति अत्र न दोष इत्येव पाठः प्रतिभाति। विजहाविति। तथा च कार्ये निर्वृत्ते प्रयोजनाभावादेवं कृतमित्यर्थः। द्वयमिति भूभारभूततनुस्तद्धर्तितनुश्चेति द्वयम्। अत्र तयोस्तन्वोः सत्यत्वम्, कण्टकदृष्टान्ताद् द्वयोः साम्यकथनाच। अनित्यत्वं परम् ॥ ३४ ॥ ❀ ❀ यथेत्यत्र। एवमिदमपीति। तथा च भूभारक्षपणार्थं यो मर्त्यवेशस्तमपीत्यर्थः। अत्र कलेवरस्यावस्तुत्वम्, त्यक्तरि नटदृष्टान्तात्। 'कृष्णो ह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत्। आत्मानं दर्शयामास स्वरूपसदृशाकृतिमि'ति ब्रह्माण्डवाक्याच ज्ञेयम् ॥ ३५ ॥ ❀ ❀ यदा मुकुन्द इत्यत्र। निर्गमनस्यैव शरणत्वे हेतुः तदतिरिक्तेत्यादि। प्रत्यन्तस्य गन्तव्यपदेनान्वयः। सर्वेषु युगेषु कालत्वाविशेषेपि कलिधर्माणामेव मोक्षबाधकत्वम्, तथा सर्वेषु देशेषु देशत्वाविशेषेपि देशविशेषस्य कुतस्तद्व्याप्तिराहित्यं येन युधिष्ठिरस्य तत्र गमने बुद्धिरित्याकाङ्क्षायां व्याख्येयश्लोकद्वयस्य तात्पर्यमाहुः कलिरित्यादि। 'त्वं कालमल' इत्युक्तो 'मले शुद्धिर्न विद्यते' इति ब्रह्मवैवर्तीयकाशीमाहात्म्ये कलिं प्रति ब्रह्मणो वाक्यात्। कलिः कालमलम्, अतो मलत्वरूपाद्विशेषात्तद्धर्माणां मोक्षबाधकत्वमिति भावः। कालस्य सर्वोपादानत्वात् सर्वं कालस्तेन मूल[1]स्य सर्वत्र व्याप्तिसम्भवेपि स्वामी 'कालस्वामी तु माधवः कालोपादेयाद्यतो यस्माद्देशान्निवर्तते तिरोहितो भवति, तत्र तस्मिन् देशे निकृष्टता। तत्र दृष्टान्तः वह्नाविवेति। यथा निवृत्ते वह्नौ पार्थिवस्य

---

१. मलेति पाठः।

भस्मतया निकृष्टता, भस्मनोऽग्निपुरीषत्वात् । 'अग्नेर्भस्मास्यग्नेः पुरीषमसीति' श्रुतेः । तर्हि देशान्तरस्य कथं शुद्धत्वम्, तत्राहुः दारावित्यादि । तदन्तर्वह्नेः सत्त्वेन न तथा निकृष्टता, एवं देशान्तरेऽन्तर्भगवतः सत्त्वेन न निकृष्टत्वम् । अतो देशान्तर्गतिर्युधिष्ठिरस्य मता बुद्धावारूढेत्यर्थः । दाराविति पुल्लिङ्गनिर्देशस्तु लिङ्गस्य लोकाश्रयत्वेनाशिष्यत्वात् । 'नित्यं शलाका स्त्रिया' मिति ज्ञापकात् । ननु भगवत्सत्त्वैव चेत्सन्निकर्षाभावः, तर्हि भक्तत्वेन युधिष्ठिरेपि तत्सत्त्वान्निर्गमनमनर्थकमित्याकाङ्क्षायामाहुः अग्निभावेपीत्यादि । यथारणौ वह्निसत्त्वेपि काष्ठेन मथनद्वारा प्रकाशनात् स (अग्निः) साध्यः, तथात्र भगवत्सत्त्वेपि देशान्तरगत्या स प्रकाश्य इति हेतोर्युधिष्ठिरस्य गमननिश्चय इत्यर्थः । ननु भगवतो व्यापकत्वात्पूर्वोक्तं सर्वमसम्भवीत्यत आहुः यद्यपीत्यादि । केचिदत्र 'स्वतन्वा सह महीं जहावि'ति व्याकुर्वते, तद्दूषयन्ति भूमीत्यादि । तथा चैवं व्याख्याने जहाविति त्यागवाचकपदे विध्यनुवादवैरूप्यापत्तिः । सा ह्यस्यानुपपद्यमानत्वात् तृतीयाया अप्यसम्भव इत्यर्थः ॥ ३६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कुन्तीमुक्तिमाह–पृथेति । पृथाऽपि धनञ्जयेनोदितमुक्तं यदूनां नाशं तां 'सौदामिन्या यथाकाशे यान्त्या हित्वाऽभ्रमण्डलम् । गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः' इति दुर्लक्ष्यत्वेन वक्ष्यमाणां भगवतो गतिं स्वधामगमनं च निशम्य श्रुत्वा अधोक्षजे इन्द्रियजन्यज्ञानाविषयेऽपि भगवति श्रीकृष्णे एकान्तभक्त्या परप्रेम्णा निवेशित आत्मा मनो यया सा तथाभूता सती संसृतेरुपरराम जीवन्मुक्ता बभूवेत्यन्वयः ॥ ३३ ॥ ❃ ❃ वैराग्यार्थमाह–ययेति । अजः श्रीकृष्णः यया यादवरूपया तन्वा भुवो भारमहरत्तां तनुं विजहावित्यन्वयः । परमोपकारकत्वात् कथं तत्त्याग इत्याशङ्क्याह–द्वयमिति । भूभारभूततनुस्तद्धर्तृतनुश्चेति द्वयमीश्वरस्यापमानास्पदत्वेन सममेव । तर्हि किमिति तदङ्गीकृतवानित्याकाङ्क्षायां तद्विना तद्भारोद्धारासम्भवादिति दृष्टान्तेन स्पष्टयति–कण्टकमिति । यथा कण्टकं गृहीत्वा तेन पादादौ प्रविष्टं कण्टकमुद्धृत्य पुनः कण्टकद्वयं दूरादेव विसृज्यते तथेत्यर्थः ॥ ३४ ॥ ❃ ❃ नन्वेवं देहग्रहणत्यागाभ्यां भगवतः श्रीकृष्णस्यापि विकारप्रतीतेः कथं तस्याजत्वं निर्विकारत्वं चेत्याशङ्क्य तद्दृष्टान्तेन तस्य निर्विकारित्वमाह–यथेति । नटो यथा निजरूपेण स्थित एव मत्स्यादिरूपाणि धत्ते यथा च पुनस्तानि जहाति तथा भगवानपि निजरूपे स्थित एव भूभारावतारार्थं मनुष्यकलेवरं धृत्वा येन भूभारः क्षपितोऽवतारितस्तदपि कलेवरं जहावन्तर्द्धानं कृतवानित्यन्वयः । भगवद्विग्रहस्य सच्चिदानन्दरूपत्वे भौतिकविग्रहवत् त्यागासम्भवात्, भौतिकत्वाङ्गीकर्तुर्निन्दाश्रवणाच्च । तथाहि महाभारतबृहद्वैष्णवादौ श्रूयते–'न भूतसङ्घसंस्थानो देवस्य परमात्मनः । यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः ॥ स सर्वस्माद्बहिः कार्यः श्रौतस्मार्त्तविधानतः । मुखं तस्यावलोक्यापि सचैलः स्नानमाचरेत्' इति ॥ ३५ ॥ ❃ ❃ ननु युधिष्ठिरस्तत्र कं वा दोषं दृष्टवान् येन ततो निर्गमननिश्चयं कृतवानित्यपेक्षायां कलिप्रवेशं तद्दोषांश्चाह–यदेति द्वयेन । मुकुन्दो भक्तानां मुक्तिदानार्थमवतीर्णो भगवान् श्रीकृष्णो यदा स्वतन्वा इमां महीं जहौ तदा तस्मिन्नेव अहः अहनि अधर्महेतुः कलिरन्ववर्त्तत, ततः पूर्वमंशेन प्रविष्टोऽपि सर्वतः प्रसृतवानित्यन्वयः । एवं चेदुत्पत्स्यमानानां भक्तानां कथं मुक्तिरित्याशङ्क्याह–श्रवणीयसत्कथ इति, श्रवणार्हा सती कथा यस्य सः । कथाश्रवणान्मुक्तिरित्यर्थः । नन्वधर्महेतोः कलेर्विद्यमानत्वात् कथं कथाश्रवणमपि सम्भवतीत्याशङ्क्याह–अप्रतिबुद्धचेतसामिति, अविवेकिनामधर्महेतुरित्यर्थः । तथा च विवेकिनां कथाश्रवणं सम्भवतीति भावः ॥ ३६ ॥

हिन्दी अनुवाद

कुन्तीने भी अर्जुनके मुखसे यदुवंशियोंके नाश और भगवान्‌के स्वधाम-गमनकी बात सुनकर अनन्य भक्तिसे अपने हृदयको भगवान् श्रीकृष्णमें लगा दिया और सदाके लिये इस जन्म-मृत्युरूप संसारसे अपना मुँह मोड़ लिया ॥ ३३ ॥ ❃ ❃ भगवान् श्रीकृष्णने लोक-दृष्टिमें जिस यादवशरीरसे पृथ्वीका भार उतारा था, उसका वैसे ही परित्याग कर दिया, जैसे कोई काँटे-से-काँटा निकालकर फिर दोनोंको फेंक दे । भगवान्‌की दृष्टिमें दोनों ही समान थे ॥ ३४ ॥ ❃ ❃ जैसे वे नटके समान मत्स्यादि रूप धारण करते हैं और फिर उनका त्याग कर देते हैं, वैसे ही उन्होंने जिस यादवशरीरसे पृथ्वीका भार दूर किया था, उसे त्याग भी दिया ॥ ३५ ॥ ❃ ❃ जिनकी मधुर लीलाएँ श्रवण करने योग्य हैं, उन भगवान् श्रीकृष्णने जब अपने मनुष्यके-से शरीरसे इस पृथ्वीका परित्याग कर दिया, उसी दिन विचारहीन लोगोंको अधर्ममें फँसानेवाला कलियुग आ धमका ॥ ३६ ॥

युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथाऽऽत्मनि ।
विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३७ ॥

---

१. प्रा० पा०—बुधो गृहे सराष्ट्रे च पुरे तदा० ।

स्वराट् पौत्रं विन¹यिनमात्मनः सुसमं गुणैः। तोयनीव्याः पतिं भूमेरभ्यषिञ्चद् गजाह्वये ॥ ३८ ॥
मथुरायां तथा वज्रं शूरसेनपतिं ततः। प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥ ३९ ॥
विसृज्य तत्र तत् सर्वं दुकूलवलयादिकम्। निर्ममो निरहंकारः संछिन्नाशेषबन्धनः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बुधो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य। कथंभूतम्। लोभाद्यधर्मचक्रं यस्मिन्। जिह्मं कौटिल्यम्। पर्यधात्तदुचितं परिधानमकरोत् ॥ ३७ ॥ ❀ ❀ आत्मनः स्वस्य गुणैः सुसममतिसदृशं तोयं सर्वतः स्थितं समुद्रोदकमेव नीवी परिधानविशेषो यस्यास्तस्या भूमेः पतित्वेनाभिषिक्तवान् ॥ ३८ ॥ ❀ ❀ वज्रमनिरुद्धस्य पुत्रम्। निरूप्य कृत्वेत्यर्थः। अपिबदात्मन्यारोपयामास। ईश्वरः समर्थः ॥ ३९ ॥ ❀ ❀ संछिन्नान्यशेषाणि बन्धनान्युपाधयो येन ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

युधिष्ठिर इत्यत्र तस्य त्यागे कलिपरिसर्पणं तूद्दीपनमात्रम्। वस्तुतस्तु भगवत्पार्श्वकामत्वमेव कारणं ज्ञेयम्। पर्यधान्निश्चितवान्। "प्रणिधानं तु निक्षेपः परिधानं तु निश्चयः" इत्यभिधानादिति तीर्थः। आदिना परुषादिग्रहः समासे ॥ ३७ ॥ ❀ ❀ विनयो नम्रता तद्वान्विनयी तं, सुसमं सोः पूजायां षत्वनिषेधः "सुः पूजायाम्" इति कर्मप्रवचनीयविधेः। स्वराट् चक्रवर्त्ती युधिष्ठिरः। "स्वराट् सम्राट् चक्रवर्त्ती सार्वभौमश्च राजराट्। सामन्तेशोऽखिलेशश्च राजसूयकरो वशी" इति निरुक्तिः ॥ ३८ ॥ ❀ ❀ इत्यर्थ इति। धातूनामनेकार्थत्वादिति भावः। "प्राजापत्या भवेदिष्टिस्सर्वस्वं यत्र दक्षिणा। परिव्रज्यापक्रमे सा विहिता पूर्वसूरिभिः" इत्युक्तेः। यद्यपि "ब्राह्मणः परिव्रजेत्" इति श्रुतेर्ब्राह्मणस्यैव परिव्रज्या विहिता। युधिष्ठिरस्य क्षत्रियत्वात्स कथं तां चकारेति चेत् तत्र देवलस्मृत्यवलोकनतो व्यवस्था लभ्यते। तथाहि "मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्। बाहुजातोरुजातानां नायं धर्मो विधीयते" इत्यत्र हि विष्णुलिंगं दण्डकमण्डल्वादि तद्धारणमेव क्षत्रियवैश्ययोर्निषिद्धं न तु त्यागरूपपरिव्रज्यानिषेध इति। एतच्चाद्यपद्यव्याख्याशत्यां बहुधा प्रपञ्चितमत उपरम्यते। समर्थो राज्यादित्यागे शक्तः ॥ ३९ ॥ ❀ ❀ तत्र गृहे। आदिना किरीटादिग्रहः ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

तथा-अभ्यषिञ्चदिति शेषः। शूरसेनः स्वनामकदेशविशेषः तस्य पतिम् अधिपतिमित्यर्थः ॥ ३९-४० ॥

श्रीमद्वीरराघवव्याख्या

ततो युधिष्ठिरः पुरे राष्ट्रे गृहे आत्मनि जनानां देहेषु च तस्य कलेः परिसर्पणमनुवर्त्तनं बुधः जानन् तन्मूलकं लोभाद्यधर्माणां चक्रं जालमवलोक्य गमनाय गृहान्निर्गमनाय पर्यधात्परिहित उद्युक्तो बभूवेत्यर्थः ॥ ३७ ॥ ❀ ❀ ततः स्वराट् राजा युधिष्ठिरः गुणैरात्मनः स्वस्य समं तुल्यं विनयिनं च पौत्रं परीक्षितं हस्तिनपुरे तोयनीव्याः समुद्रमेखलाया भूमेः पतिमभ्यषिञ्चदभिषिक्तवान्। विनिमयमिति पाठे विनिमयं विनिमयार्हं सदृशमनवममन्यूनमित्यर्थः ॥ ३८ ॥ ❀ ❀ तथा मथुरायां वज्राख्यं यदुकुलकुमारं शूरसेनानां जनपदानां पतिमभ्यषिञ्चत्। ततः प्राजापत्यां प्रजापतिदेवताकामिष्टिं निरूप्य कृत्वा ईश्वरो युधिष्ठिरोऽग्नीनाहवनीयादीनपिबन् आत्मन्यारोपितवान् ॥ ३९ ॥ ❀ ❀ तत्र स्वगृह एव तत्प्रसिद्धं दुकूलादिकं त्यक्त्वा वाचं जुहावेत्यन्वयः। कथंभूतः निर्ममः देहाद्यनुबंधिषु स्वकीयत्वाभिमानरहितः निरहंकारः देहात्मभ्रमरहितः संछिन्नान्यशेषाणि बंधनानि प्रकृत्यादीनि येन तथाभूतः प्रकृत्यादिमोक्षमनुसंहितवानित्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

बुधः विवेकज्ञानी युधिष्ठिरः राज्ये पुरे च गृहे भार्यादौ च तथात्मनि स्वस्मिन् तस्य कलेः परितः सर्पणं व्याप्तिं विभाव्य ज्ञात्वा कलिव्याप्तिमूलं लोभाद्यधर्मसमुदायं च विज्ञाय गमनाय वीराध्वगमनाय पर्यधान्निश्चितवानित्येकान्वयः, "परिधानं तु निश्चय" इत्यभिधानम्। लोभश्चानृतं च जिह्मं कौटिल्यं च हिंसनं च लोभानृतजिह्महिंसनानि आदिर्यस्य पुरुषादेस्तत्तथोक्तम् ॥ ६ ॥ ❀ ❀ स्वराट् चक्रवर्ती स्वपौत्रं तं गुणैरनवमं योग्यं पौत्रमभिमन्योः सुतं परीक्षितं तोयमेव नीवी वसनं यस्याः सा तथोक्ता तस्याः ॥ ७ ॥ ❀ ❀ मधुपुर्यामनिरुद्धपुत्रं नाम्ना वज्रं शूरसेनविषयपतिमभ्यषिञ्चदिति शेषः। प्राजापत्यां प्रजापतिदैवत्यामिष्टिं निरूप्य सर्वस्वदक्षिणामिष्टिं कृत्वा श्रौताग्नीनपिबत् आत्मनि समारोपयामास। स कीदृश ईश्वरः राज्यादिषु निर्विद्य संन्यसने समर्थः ॥ ८ ॥ ❀ ❀ तदेवाह विसृज्येति संछिन्नाशेषपापादिबन्धनः ॥ ९ ॥

---

१. प्रा० पा०—विनियतमात्मनः।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

युधिष्ठिर इत्यत्र तस्य त्यागे कलिपरिसर्पणमुद्दीपनमात्रम्। वस्तुतस्तु भगवत्पार्श्वकामित्वमेव कारणं ज्ञेयम् ॥ ३७ ॥ ❀ ❀ विनियतं समर्य्यादम्। टीकायां सुसममतिसदृशमिति व्याख्यानात् सोः पूजायां षत्वनिषेधः 'सुः पूजायाम्' इति कर्म्मप्रवचनीयविधेः ॥ ३८ ॥ ❀ ❀ प्राजापत्यां चेष्टिं निरूप्येत्यन्वयः ॥ ३९-४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पर्य्यधात् तदुचितपिधानमकरोत् ॥ ३७ ॥ ❀ ❀ विनियमं राजोचितविशिष्टनियमयुक्तम् आत्मनः स्वस्य गुणैः सुसमम् अतिसदृशं तोयं समुद्रोदकमेव नीवी परिधानविशेषो यस्यास्तस्या भूमेः पतित्वेनाभिषिक्तवान् ॥ ३८ ॥ ❀ ❀ वज्रमनिरुद्धपुत्रम्। निरूप्य कृत्वा। अपिबत् आत्मन्यारोपयामास। ईश्वरः समर्थः ॥ ३९-४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः।

युधिष्ठिरः पुरादौ तस्य कलेः परिसर्पणं प्रसरणं बुधः जानन् तत्कृतं लोभानृतजिह्महिंसनाद्यधर्मचक्रं च विभाव्य विलोक्य गृहान्निर्गमनाय पर्यधात् निर्गमनानुरूपं परिधानमकरोत् ॥ ३७ ॥ ❀ ❀ पौत्रं परीक्षितं तोयनीव्याः जलधिवस्त्रावृतायाः भूमेः पतिं गजाह्वयेऽभ्यषिंचदभिषिक्तवान् ॥ ३८ ॥ ❀ ❀ ईश्वरः समर्थः तथैव मथुरायामनिरुद्धात्मजं शूरसेनानां पतिमभ्यषिञ्चत् ततः प्रजापतिदेवताकामिष्टिं निरूप्य कृत्वाऽग्नीनपि तदात्मन्यारोपयामास ॥ ३९ ॥ ❀ ❀ संछिन्नानि अशेषाणि देहगेहादिष्वहं ममेत्यादिरूपाणि बन्धनानि येन सः वाचं जुहावेत्युत्तरेणान्वयः ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तर्हि स्वस्य न काचित् चिन्तेत्याशंक्याह युधिष्ठिर इति। विकलत्वाभावेन दृढस्थित्या अविकाशं मन्यते कालः। सन् युधिष्ठिरादीनपि तथा मन्यते। अतस्तद्देशेष्वपि महदल्पप्रभेदभिन्नेषु राष्ट्रनगरगृहशरीरेषु प्रविष्टः। अल्पविकाशाच्च तत् ज्ञातवानित्याह बुध इति। तत्रापि विचारः किं स्थातुमागतः द्रष्टुं चेति। तत्रापि युधिष्ठिरस्य निश्चयो जात इत्याह विभाव्य इति। ससामग्रीकस्य समागतत्वात् ततोऽगमनं कलेः तस्य सामग्री प्रथमतो लोभः सर्वदोषाणामाश्रयः अन्तःकरणधर्मः अनृतं वाग्दोषः। प्रायेण स्वरूपनाशकः प्रामाण्यकोटेः स्वरूपनिर्वाहकस्य नाशात् कुटिलता बुद्धिदोषः हिंसा शरीरस्य अत्र क्रमे शिष्टं स्वयमूह्यम्। आदिशब्देन रोगादयोऽपि हिंसाद्यधर्मचक्रं विभाव्य गमनाय पूर्वोक्तामेव गतिं पर्यधादित्यर्थः ॥ ३७ ॥ ❀ ❀ अशक्तस्य परित्यागोऽनुचितः त्यक्तानां वासनाजनकत्वात् अतः कलिभयात् युधिष्ठिरगमनमनुचितमित्याशंक्याह स्वराट्पौत्रमिति। न हि कलिनिराकरणसमर्थो युधिष्ठिरो गतः। तन्निराकरणार्थं पौत्रस्य स्थापितत्वात् किंतु शास्त्रस्य प्रामाण्यात् इत्यभिप्रेत्याह स्वराट्पौत्रमिति। भ्रातृणामेकजातानामिति न्यायात् राजदानाच्च स्वेति। पौत्रग्रहणं पुत्रनामस्थापनार्थं गुणैर्भगवदीयत्वादिभिः आत्मनः अनवमसन्यूनं अनेन दोषाभावस्तत्रागत इत्युक्तं भवति। हीनस्थापने प्रजाशापः प्रसज्येत। तोयनीव्याः समुद्रावरणायाः। अन्ये तु राजान्स्त्रियो वस्त्ररहितामपि स्त्रियैकदेशचरणसम्वाहनादिना पतित्वं मन्यन्ते इति। सूचितं नीवीपदेन पतिमित्यनुवादः भगवतैव तदर्थकृतत्वात् पतित्वार्थमिति लक्षणा च स्यात्, अतः स्वयमभिषेकमात्रं कृतवान् ॥ ३८ ॥ ❀ ❀ एवमेव वज्रमपि कृतवान् अनिरुद्धपुत्रो वज्रः शूरसेनदेशस्यापि पतित्वज्ञापनायाह शूरसेनपतिमिति। अनेन मर्यादायां यावान् देशः तावान् दत्त इत्युक्तं ततस्तेषां राज्यस्वीकारानन्तरं प्राजापत्यामिष्टिं निरूप्य प्रव्राजं कृतवानित्याह वैश्वानरी प्राजापत्या वा विकल्पेन विहिता, ईश्वर इति। तथा वारणसमर्थः यथाशास्त्रकरणात् गृह एव सर्वपरित्यागस्योक्तत्वात् अंशपरित्यागस्याशास्त्रत्वाच्च ॥ ३९ ॥ ❀ ❀ सर्वपरित्यागनिरूपणार्थमाह विसृज्येति। देहातिरिक्तपरित्यागः सुगमः यदाह आदिशब्देन दुकूलवलययोर्विद्यमानत्वेन ग्रहणं मनुः शेषाभ्यनुज्ञापकत्वेन वारयामासेति यदग्रे वक्ष्यते न तत्परित्यागतुल्यत्वेन तद्ज्ञापनार्थं त्यक्तानामात्मीयत्वं निराकरोति निर्मम इति। परित्यागाभिमानाभावायैतदुक्तम् अन्तस्त्यागाय वा उभयोः कर्तव्यत्वात् अन्योऽन्यं हेतुमद्भावाच्च देहस्य सपरिकरस्य त्यागमाह निरहंकार इति। देहे अहंतां त्यक्त्वा ममतायाः स्वरूपतो नाशात् मध्ये तिष्ठति देहादिः तस्य त्यागप्रकारमाह संछिन्नाशेषबन्धन इति। बाह्यावरणं सम्यक् छिन्नमित्याह संछिन्नेति पुत्रादीनामुपकारित्वबुद्धिरधुना निवृत्ता, अत एव न प्रतिबन्धकः ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

युधिष्ठिर इत्यत्र। स त्वित्यादि। युधिष्ठिरे ज्ञानाविकासमन्ता कलिर्युधिष्ठिरादीन् पाण्डवानपि भगवत्कृपानवलोकितान् मन्यत इत्यर्थः ॥ ३७ ॥ ❀ ❀ सः स्वपौत्रमित्यत्र। नीवीपदसूचितमर्थमाहुः अन्ये त्वित्यादि। स्त्रिया कृतेन चरणसंवाहनादिना एकदेशे भुज्यमाने वस्त्ररहिताया अपि स्त्रियः पतित्वं स्वस्मिन् मन्यन्त इति योजना। वस्त्ररहिता इत्यत्र वस्त्ररहिताया इति षष्ठ्यन्तः पाठः प्रतिभाति। षिचो द्विकर्मकत्वाभावेन स्वपौत्रं पतिमभ्यषिञ्चदिति प्रयोगानुपपत्तिमाशङ्क्य तदुपपत्त्यर्थमाहुः पतिमित्यादि। अनुवादानङ्गीकारे दोषमाहुः पतित्वेत्यादि। अनुशासनाभावेन द्वितीयायाश्चतुर्थ्यर्थे लक्षणाज्ज्ञातोर्द्विकर्मकत्वकल्पना

च स्यादित्यर्थः ॥ ३९ ॥ ❀ ❀ विसृज्येत्यत्र । अशास्त्रत्वादिति । न विद्यते शास्त्रमस्मिन्नित्यशास्त्रं तथात्वादशास्त्रीयत्वादित्यर्थः । ननु शेषाभ्यनुज्ञानङ्गीकारे चीरवासस्त्वोक्तिर्विरोत्स्यत इत्यतः आहुः चीरेत्यादि । तत्परित्यागतुल्यत्वेन वस्त्रपरित्यागानुकल्पत्वेन वस्त्रपरित्यागज्ञापनार्थमिति न विरोध इत्यर्थः । ननु प्राजापत्येष्टिकथनादिनैव सन्न्यासारम्भे सिद्धे दुकूलादिष्वात्मीयतापि निराकृतैवेति पुनर्निर्ममत्वोक्तेः किं प्रयोजनमत आहुः परित्यागेत्यादि । नन्वहन्तात्यागकथनस्य किं प्रयोजनमत आहुः मध्य इति । अहन्तामध्ये । ननु ब्रह्मवादे 'मत्तः स्मृतिर्ज्ञानमपोहनं चे' ति वाक्याद्ध्यासस्येश्वरकर्तृकत्वात् किमिति कुतो वा त्याग इत्यत आहुः भगवत्कृतेत्यादि । तदाज्ञयेति ' वाचं यच्छ मनो यच्छ प्राणान् यच्छेन्द्रियाणि च । आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने' इत्यादिरूपया ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

युधिष्ठिरः पुरादिषु तस्य कलेः प्रसर्पणं विभाव्य पर्यालोच्य गमनाय पर्यधात्तदुचितं परिधानं कर्त्तव्यं कृतवानित्यन्वयः । कलिप्रवृत्तिज्ञाने निर्गमनपरिधानकरणे च हेतुमाह-बुध इति, यतो विवेकीत्यर्थः । कलिप्रसरणं कथं ज्ञातवानित्यपेक्षायां लोभाद्यधर्मदर्शनेन अनुमानादित्याशयेन तत्परिसर्पणं विशिनष्टि-लोभाद्यधर्माणां चक्रं समूहो यत्र तदित्यर्थः । आत्मनि मनसि लोभो नाम विषयलाभेऽपि तृष्णाधिक्यम् । अनृतमनृतभाषणम् । जिह्मं कौटिल्यम् । हिंसनं पीडनम् ॥ ३७ ॥ ❀ ❀ तत्कृतमेव दर्शयति-स्वराडिति सार्द्धैः सप्तभिः । स्वराट् स्वतन्त्रो राजा युधिष्ठिरः स्वपौत्रं परीक्षितं तोयं सर्वतः स्थितं समुद्रोदकमेव नीवी परिधानविशेषो यस्यास्तस्या भूमेः पतित्वेन गजाह्वये हस्तिनापुरेऽभ्यषिञ्चत् अभिषिक्तवानित्यन्वयः । पौत्रत्वेऽपि यदि तस्य राज्ययोग्यता न स्यात्तदा किं तदभिषेकेणेति चोद्यनिरासायाह-विनयिनमिति । विशिष्टो नयो नीतिरस्यास्तीति विनयी तम् । 'विनियमम्' इति पाठे तु विशिष्टनियमयुक्तमित्यर्थः । गुणैर्भगवदीयत्वादिभिरात्मनः स्वस्य सुसममतिसदृशम् ॥ ३८ ॥ ❀ ❀ तथैव मथुरायां वज्रनामकं अनिरुद्धस्य पुत्रं शूरसेनदेशस्य पतित्वेनाभ्यषिञ्चदित्यन्वयः । ततस्तदनन्तरमीश्वरः एतत्सर्वकरणे समर्थः प्राजापत्यामिष्टिं निरूप्य कृत्वा अग्नीन् गार्हपत्यादीनपिबत् आत्मन्यारोपयामास ॥ ३९ ॥ ❀ ❀ तत्र गृहे एव तद्राजोचितं दुकूलवलयादिकं सर्वं विसृज्य त्यक्त्वा मनसि वाचं जुहावेत्युत्तरेणान्वयः । उपरितः परित्यागेऽपि तत्र ममता स्यात्तर्हि त्यागफलं नैव स्यादित्यत आह-निर्मम इति । एवमप्यहं त्यागीत्यभिमानोऽप्ययुक्त एवेति तस्य सोऽपि नास्तीत्याह-निरहङ्कार इति । तत्र हेतुमाह-सञ्छिन्नेति, सम्यक् समूलं छिन्नमशेषबन्धनं अविद्यालक्षणं यस्य सः ॥ ४० ॥

हिन्दी अनुवाद

महाराज युधिष्ठिरसे कलियुगका फैलना छिपा न रहा । उन्होंने देखा-देशमें, नगरमें, घरोंमें और प्राणियोंमें लोभ, असत्य, छल, हिंसा आदि अधर्मोंकी बढ़ती हो गयी है । तब उन्होंने महाप्रस्थानका निश्चय किया ॥ ३७ ॥ ❀ ❀ उन्होंने अपने विनयी पौत्र परीक्षित्को, जो गुणोंमें उन्हींके समान थे, समुद्रसे घिरी हुई पृथ्वीके सम्राट्-पदपर हस्तिनापुरमें अभिषिक्त किया ॥ ३८ ॥ ❀ ❀ उन्होंने मथुरामें शूरसेनाधिपतिके रूपमें अनिरुद्धके पुत्र वज्रका अभिषेक किया । इसके बाद समर्थ युधिष्ठिरने प्राजापत्य यज्ञ करके आहवनीय आदि अग्नियोंको अपनेमें लीन कर दिया अर्थात् गृहस्थाश्रमके धर्मसे मुक्त होकर उन्होंने संन्यास ग्रहण किया ॥ ३९ ॥ ❀ ❀ युधिष्ठिरने अपने सब वस्त्राभूषण आदि वहीं छोड़ दिये, एवं ममता और अहंकारसे रहित होकर समस्त बन्धन काट डाले ॥ ४० ॥

वाचं जुहाव मनसि तत्प्राण इतरे च तम् । मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ॥ ४१ ॥
त्रित्वे हुत्वाथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः । सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ॥ ४२ ॥
चीरवासा निराहारो बद्धवाङ्मुक्तमूर्धजः । दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥ ४३ ॥
अनपेक्षमाणो निरगादशृण्वन्बधिरो यथा । उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ।
हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेव दर्शयति द्वाभ्याम् । वाचमित्युपलक्षणम् । सर्वेन्द्रियाणि मनसि प्रविलापितवानित्यर्थः । तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् । तं च प्राणमितरेऽपाने तेनाकर्षणात् । अपानव्यापार उत्सर्गस्तत्सहितमपानं मृत्यौ तदधिष्ठातृदेवतायाम् । अनेनैव वागादिष्वपि तत्तत्कर्मसाहित्यं ज्ञेयम् । तं मृत्युं पंचत्वे पंचभूतानामैक्यं देहे देहस्यैव मृत्युनात्मन इति भावितवानित्यर्थः । अजोहवीदिति यङ्लुगंताल्लुङि रूपम् ॥ ४१ ॥ ❀ त्रित्वे गुणत्रये पंचत्वं देहम् । तच्च त्रित्वमेकत्वेऽविद्यायाम् । सर्वं सर्वारोप-

हेतुमविद्यामात्मनि जीवे। अजोहवीदिति वक्तव्येऽजुहवीदित्यार्षम्। एवं शोधितमात्मानं ब्रह्मण्यव्यये कूटस्थे न तस्यान्यत्र लय इत्यर्थः॥ ४२॥ ❀ ❀ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासा इति द्वाभ्याम्। बद्धवाङ् मौनी॥ ४३॥ ❀ ❀ अनवेक्षमाणोऽनुजादिप्रतीक्षामकुर्वन्। आशां दिशम्। गतपूर्वां पूर्वं प्रविष्टाम्। महात्मभिर्विवेकवद्भिः। यतो यां दिशम्॥ ४४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेव संच्छिन्नाशेषबंधनत्वमेव। युधिष्ठिरोऽप्यर्जुनवद्बहिरनुसंधाननिवृत्त्यर्थं यतते स्मेत्याह-वाचमिति। इत्यर्थ इति। मनोधनीवृत्तित्वात्। "यन्मनसा मनुते तद्वाचा वदति" इति श्रुतेरिति भावः। प्राण एव समर्पयामास जुहोतेर्दानार्थत्वात्। हे मनस्तुभ्यमेवेंद्रियाणि दत्तानि। तवैवैतानि संतु। सांप्रतं न ममैतैः प्रयोजनमिति भावयामास। तेषु स्वत्वाभावेन वस्तुतः संप्रदानाभावान्न चतुर्थी। एवमग्रेपि सर्वत्र ज्ञेयम्। नन्वहं कस्य भवामीत्यत आह-तन्मनः प्राणे। इत्यर्थ इति। हे मृत्यो त्वं देहस्यैव भवेति भावितवान्, आत्मनो नित्यत्वान्मरणं नास्तीति भावः॥ ४०-४१॥ इत्यर्थ इति। ब्रह्मणः परमावधिभूतत्वात् "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति श्रुतेरयं भावः, ततश्च पृथिव्या भूतपंचकं क स्थास्यतीत्यत आह—त्रित्व इति। अविद्यायां व्यष्टिरूपे मायांशे। हे जीव तवैतन्मायांशकृतमुपाधित्रिकमेतस्मात्त्वं पृथग्भूत एव विराजस्व। नैतस्याधीनो भवेति भावः। एवं परीक्षिति स्वराज्यभारं वज्रे च मथुरां समर्प्य तत्संबंधमात्मनो दूरीकृत्य बहिर्निश्चिन्त इवेन्द्रियादीन्यपि तत्तद्वशयितरि योग्ये समर्प्यान्तर्निश्चिन्तो बभूव। तथाहि ब्रह्मणः श्रीकृष्णस्यैव जीवस्यैव व्यष्टिर्माया तस्या एव गुणत्रयं गुणत्रयस्यैव पंचभूतात्मको देहो देहस्यैव मृत्युर्मृत्योरेवापानोऽपानस्यैव प्राणः प्राणस्यैव मनो मनस एवेंद्रियाणि इंद्रियाणामेव विषया राज्यादिभोगास्तेषां च भोक्ता संप्रति परीक्षिदेव न त्वहमिति विचारयामास। किं तु भगवन्नित्यपरिकरत्वान्नित्यविग्रहाणामपि तदादीनामात्मानं प्राकृतशरीरं मत्वैवायं विचारोप्यकिञ्चित्कर एवेति ज्ञेयम्॥ ४२॥ ❀ ❀ तदेवं सर्वथा निश्चिन्तस्य तस्य बाह्यस्थितिमाह-चीरेति। "चीरं स्याद्गोस्तने वस्त्रभेदे चीवरवल्कयोः" इति कोशाच्चीरवासा वल्कलवस्त्रः निराहारो मनुष्यान्नवर्जितः॥ ४३॥ ❀ ❀ गता पूर्वं या सा गतपूर्वा तां प्रथमार्थे बहुव्रीहिः। यद्वा पूर्वं गता गतपूर्वा। राजदन्तादित्वात्परनिपातः। महात्मभिर्विवेकवद्भिः। विश्वनाथस्तु-अधुना न्यस्तसमस्तभारोहमव्यग्रः क्वापि विविक्ते देशे श्रीकृष्णप्राप्त्यर्थं "मन्मना भव मद्भक्तः" इति भगवदुपदिष्टमेवोपायं करिष्यामीति निश्चिततत्त्वस्य चेष्टामाह-उदीचीमिति। परं ब्रह्म श्रीकृष्णं ध्यायन्ध्यातुमित्याह। तीर्थस्तु यावच्छरीरपातं भुवं प्रदक्षिणीकृत्य निरंतराटनमेव संकल्प्य हृदि परं ब्रह्म ध्यायन्महात्मभिः क्षत्रियैर्गतपूर्वामुत्तरां दिशं प्रविवेश। वीरगतिं गमिष्यन् यतो यां वीरगतिङ्गतो वीरसंन्यासं प्राप्तः पुनर्नायाति तामित्याह॥ ४४-४६॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

प्राणे इति। प्रागुगमनवति नासाग्रस्थानवर्त्तिनि वायावित्यर्थः॥ ४१॥ ❀ ❀ मुनिः मननशीलो युधिष्ठिर इति यावत्॥ ४२-४८॥

श्रीमद्वीरराघवव्याख्या

तत्प्रकारमाह वाचमित्यादिना। वाचं वागादिकर्मज्ञानोभयेन्द्रियव्यापारं मनसि जुहाव मनोधीनममन्यत। मनस इन्द्रियप्रकृतित्वाभावादित्यर्थः। तन्मनः प्राणे जुहाव मनःप्रवृत्तिं प्राणाधीनां मेने तथा प्राणसंवादादिषु दर्शनादत एव हि तस्य मुख्यप्राणत्वं प्राणादीनां लयानुसंधानप्रकारमाह-इतरे च तं मृत्यावपानं सोत्सर्गमिति तं प्राणमितरे इतरस्मिन्नपाने सोत्सर्गमपानमुदान इति शेषः। उत्सर्गशब्दो वृत्तिपंचकप्रदर्शनार्थः। स्वस्ववृत्तिविशिष्टानामेव तेषु तेषु लयमनुसंहितवानित्यर्थः। ततस्तूदानं मृत्यौ मृत्युसंज्ञके समाने तं समानं पंचत्वे प्राणादिपंचककारणे वायावित्यर्थः। अवस्थाविशेषवायुर्हि प्राणः न वायुमात्रं स चैकोऽपि प्राणनादिवृत्तिपंचकविधः। अतो वृत्तिपंचकनिरोधेन प्राणस्य तत्कारणे वायौ लयानुसंधानप्रकार उक्तः॥ ४१॥ ❀ ❀ एवमिन्द्रियवर्गप्राणतद्वृत्तिनिरोधानुसन्धानमुक्तम्। अथ वायुना सहितानि पंचभूतानि इन्द्रियवर्गश्चाहंकारकार्यमिति तदुभयं त्रित्वे सात्त्विकराजसतामसरूपत्रिविधाहंकारे जुहावेत्यर्थः। सर्वत्र त्वप्रत्ययः स्वार्थिकः यथायथमिंद्रियाणां सात्त्विकाहंकारे लयः भूतानां तामस इति विवेकः। तच्चाहंकारत्रयं एकत्वे एकस्मिन्प्रकृतितत्त्वे महत्तत्त्वद्वारा जुहावेत्यर्थः। सर्वं वागादिप्रकृत्यंतमात्मनि जीवेऽजुहवीच्चेतनो ह्यचेतनप्रकृतिः अत एवमुक्तं न हि जीवः प्रकृतेरुपादानमात्मानं जीवमव्यये ब्रह्मण्यजुहोत् जीवस्य ब्रह्माधीनवृत्तित्वात्तस्मिंस्तं स्थापितवानित्यर्थः॥ ४२॥ ❀ ❀ ततश्चीरं वल्कलं वासो वस्त्रं यस्य स निराहारः बद्धवाग्मौनी मुक्ता विक्षिप्ता मूर्द्धजाः केशाः येन सः जडादिवदात्मनः स्वस्य रूपमाकारं दर्शयन् लोकस्येति शेषः॥ ४३॥ ❀ ❀ यथा बधिरस्तद्वदशृण्वन्नन्ध इवानवेक्षमाणः निरगाद् गृहादिति शेषः, पूर्वं गतां गतपूर्वां यतो यां गतः पुनर्नावर्तेत तां महात्मभिर्विरक्तैः गतपूर्वां उदीचीं दिशं हृदि परं ब्रह्म ध्यायन् प्रविवेश॥ ४४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वमरणकाल एतच्च चिंतनीयमित्यभिप्रेत्य तत्कृतमित्याह वाचमिति । वाचं च वागभिमानिनीमुमां मनसि मनोभिमानिनि रुद्रेऽजुहोत् अस्या अस्मिन् लयो भवतीत्यचिंतयत् न तु तदानीं कृतवानित्यर्थः । तन्मनः प्राणे मनःकारणे जुहाव मनसः परं उत्तमं प्राणं इतरे इतरस्मिन् अपाने उत्सर्गकर्माभिमानिनि जुहाव धृत्या मनस एकाग्रतया सोत्सर्गं सवृत्तिकमपानं तत्परत्वे तस्माद-पानात्पूर्वभाविनि व्याने अजोहवीद्धि तथाहि ग्रन्थांतरप्रसिद्धिः ॥ १० ॥ ❀ ❀ अथ व्यानापानचिंतनानंतरमवशिष्टावुदान-समानौ त्रित्वे त्रित्वसंख्याविशिष्टेषु स्वकारणेषु प्राणापानव्यानेषु हुत्वा लयं विचिंत्य तच्च पंचत्वं पंचत्वसंख्याविशिष्टान्प्राणापान-व्यानोदानसमानांश्चैकत्वे एकत्वसंख्याविशिष्टे पंचानां कारणे मूलप्राणे अजुहोन्मुनिर्मौनी तत्पूर्वोक्तं सर्वं तस्य मूलप्राणस्यापि कारणे आत्मनि स्वहृदि स्थिते विष्णावजुहोत् तं चात्मानमव्यये विनाशरहिते ब्रह्मणि सर्वगते तदभिव्यक्तिकारणे विष्णावजुहो-दित्येकान्वयः । अत्र वागादींद्रियाणां तदभिमानिदेवानां देवशरीराणां चाग्न्यावाज्यलयवत्स्वकारणेषु विलय एवेति ज्ञातव्यम् ॥ ११ ॥ ❀ ❀ चीरवासाः वल्कलवस्त्रः निराहारः मनुष्याज्ञवर्जितः बद्धवाग्वचनवृत्तिविधुरः, मूर्धजाः केशाः, जडादिवदात्मनो रूपं दर्शयन्बधिरो यथा तथा अशृण्वन्नत एवानपेक्षमाणः स्वयं गेहान्निरगादित्येकान्वयः ॥ १२ ॥ ❀ ❀ यावच्छरीरपातं भुवं प्रदक्षिणीकृत्य निरंतराटनमेव संकल्प्य हृदि परं ब्रह्म ध्यायन् क्षत्रियैर्महात्मभिः गतपूर्वामुदीचीमाशामुत्तरां दिशं प्रविवेश वीरगतिं गमिष्यन् यतो गतो नावर्तेत यां वीरगतिं गतः पुनर्नावर्तेत तामित्यन्वयः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वाचमिति । तत् मनः व्यवहारात्मकं मनोहंसं न तु परमार्थात्मकमपि अग्रेऽनुसन्धानान्तरविधानात् । पञ्चत्वे पञ्च-भूतानामैक्यरूपो यो देहस्तस्मिन् न तु श्रीकृष्णपार्षदरूपे स्वदेहे इत्यर्थः ॥ ४१ ॥ ❀ ❀ एकत्वे अव्यक्ते । तदेवमयोग्यं तत् सर्व्वम् अव्यक्ते एव भावयित्वा योग्यं यत् सर्व्वं तत् आत्मनि भगवत्पार्षदरूपे अजुहवीत् धारयामास । तञ्चात्मानं नराकृतिं परब्रह्मणि समर्पयामास ॥ ४२–४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अर्ज्जुनवद् युधिष्ठिरोऽपि बहिरनुसन्धाननिवृत्त्यर्थं प्रयतते स्मेत्याह । वाचमित्युपलक्षणं सर्व्वेन्द्रियाणि मनसि मनोऽधीन-वृत्तित्वात् तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् तस्मिन्नेव जुहाव समर्पयामास जुहोतेर्दानार्थत्वात् । हे मनस्तुभ्यमेवेन्द्रियाणि दत्तानि, तवैवैतानि सन्तु, साम्प्रतं ममैतैः प्रयोजनं नास्तीति धारयामास । तेषु स्वत्वाभावेन वस्तुतः सम्प्रदानाभावात् न चतुर्थी । एवमग्रेऽपि सर्व्वत्र ज्ञेयम् । नन्वहं कस्य भवामीत्यत आह । तन्मनः प्राणे जुहाव । तं प्राणम् इतरे अपाने तेनाकर्षणात् । अपानव्या-पार उत्सर्गस्तत्सहितमपानं मृत्यौ तदधिष्ठातृदेवतायाम् । अनेनैव वागादिष्वपि तत्तत्कर्म्मसाहित्यं ज्ञेयम् । तं मृत्युं पञ्चत्वे पञ्चभूतानामैक्ये देहे । मृत्यो त्वं देहस्यैव भव इति भावितवानित्यर्थः ॥ ४१ ॥ ❀ ❀ ततश्च पृथिव्यादिभूतपञ्चकं क्व स्थास्यतीत्यत्राह । त्रित्वे गुणत्रये तच्च त्रित्वम् एकत्वे व्यष्टिरूपे मायांशे तत् सर्वमात्मनि जीवे अजुहवीदित्यार्षम् अजोहवी-दित्यर्थः । हे जीव तवैतन्मायांशकृतमुपाधित्रिकम् एतस्मात् त्वं पृथग्भूत एव विराजस्व, नैतस्याधीनो भवेति भावः । तञ्चात्मानं ब्रह्मणि । एवं परीक्षिति स्वराज्यभावं वज्रे च मथुरां समर्प्य तत्सम्बन्धमात्मनो दूरीकृत्य बहिर्निश्चिन्त इव इन्द्रियादीनपि तत्त-द्वशयितरि योग्ये समर्प्य अन्तर्निश्चिन्तो बभूव । तथाहि ब्रह्मणः कृष्णस्यैव जीवो जीवस्यैव व्यष्टिमाया तस्या एव गुणत्रयं गुणत्रयस्यैव पञ्चभूतात्मको देहः देहस्यैव मृत्युर्मृत्योरेवापानः अपानस्यैव प्राणस्तस्यैव मनः मनस एव इन्द्रियाणि इन्द्रियाणामेव विषया राज्यादिभोगाः तेषाञ्च भोक्ता संप्रति परीक्षिदेव न तु अहमिति विचारयामास । किन्तु भगवन्नित्यपरिकरत्वान्नित्यविग्रहाणा-मपि तदानीमात्मानं प्राकृतशरीरं मत्वैवायं विचारोऽप्यकिञ्चित्कर एवेति ज्ञेयम् ॥ ४२ ॥ ❀ ❀ तदेवं सर्व्वथा निश्चिन्तस्य तस्य बाह्यस्थितिमाह चीरेति । बद्धवाक् मौनी । अनपेक्षमाणः अनुजादिप्रतीक्षामकुर्व्वन् ॥ ४३ ॥ ❀ ❀ अधुना न्यस्तसम-स्तभारोऽहमव्यग्रः क्वापि विविक्ते देशे श्रीकृष्णप्राप्त्यर्थं "मन्मना भव मद्भक्त" इति भगवदुपदिष्टमेवोपायं करिष्यामीति निश्चिन्व-तस्तस्य चेष्टामाह उदीचीमिति । परं ब्रह्म श्रीकृष्णं ध्यायन् ध्यातुम् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बंधनसंछेदनप्रकारमाह वाचमिति द्वाभ्याम् । वाचं वागुपलक्षितानि सविषयाण्युभयेन्द्रियाणि मनसि अजोहवीत् जुहाव मनोऽधीनानि भावितवान् लयस्त्विन्द्रियाणां मनसि न शंक्यस्तेषां तत्कार्य्यत्वाभावात् , मनः प्राणेतरमितरेऽपाने सोत्सर्गेण स्वकीयेन व्यापारेण सहितमपानं मृत्यौ अधिष्ठातृदेवतायाम् , तं देहनाशकं मृत्युं पञ्चत्वे पञ्चभूतैक्ये देहे भावितवान् ॥ ४१ ॥ ❀ ❀ पञ्चत्वं पञ्चभूतैक्यं च सत्तन्मात्रपंचभूताहंकारादिद्वारा यथाक्रमं त्रित्वे गुणत्रये कारणे हुत्वा प्रविलाप्य तच्च त्रित्वमेकत्वे प्रकृतितत्त्वे जुहाव । सर्वस्य प्राकृतपदार्थस्य जीवभोग्यत्वभावनयाऽऽत्मनि जीवे अजुहवीदजोहवीत् , अजुहवीदित्यार्षं पदम् । तं

जीवात्मानं नियम्यभूतं नियंतर्य्यव्यये ब्रह्मणि अजोहवीत्समर्प्पयामास ॥ ४२ ॥ ❀ ❀ एवं चेतनाचेतनभूतं वस्तु ब्रह्मात्मकमित्यनुसंदधानस्य भ्रातृभिः सहितस्य भगवत्स्थानप्राप्तिमाह चीरवासा इति सार्द्धैः षड्भिः। बद्धवाग् मौनी निरगादित्युत्तरेणान्वयः ॥ ४३ ॥ ❀ ❀ नावेक्षमाणः भगवदितरपदार्थमात्रापेक्षाशून्यः निरगात् गृहादिति शेषः, महात्मभिर्महानुभावैर्गतपूर्वां यतः यस्यां दिशि गतो नावर्तेत तामुदीचीमाशां परं ब्रह्म श्रीकृष्णाख्यं हृदि ध्यायन् प्रविवेश ॥ ४४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इदानीमुर्वरितस्य शरीरमात्रस्य ज्ञानकर्मभ्यां लयं वक्तुं प्रथमतो ज्ञानेन लयमाह–अध्यासस्याज्ञानसाध्यत्वात् निवृत्त्यर्थं तत्त्वादिप्रकारेण ज्ञानसाध्यत्वात् तत्प्रकारेणैव निवर्त्तते भगवत्कृतत्वपक्षे तदाज्ञया परित्यागः, तत्रापि येन क्रमेण भगवता सम्पादितं क्रमकथनं चित्तप्रबोधनार्थमुचितं तदाह वाचमिति। वाक्सम्बन्धेन हि शरीरसम्बन्धः पुरंजनोपाख्याने तथा निरूपणात्। मनसो हि भार्या वाक् प्राकृता सा आत्मनो हि वाचः तया वाचा सम्बन्धात् न पृथग् निरूपणम्। अस्यां निवृत्तायां सा स्वे निष्ठा स्वत एव भविष्यति तस्या निर्बन्धः पश्चाद्वक्तव्यः, बद्धवागित्यनेन ईश्वरकर्तृके हि अधीने लयो मुख्यः, तत्र दुस्तरत्वं 'मनसो मनसी'ति श्रुतेः मनोधीनत्वं वाचः। वाक् काचित् सर्ववागधिष्ठात्री देवता, सा ह्यभिमानिनीयमेव तस्या निकृष्टत्वं मन्यते तत एव निवर्त्तते प्रजापतिरिव न ह्यस्मादपि निवर्त्तयिष्यन्तमिति भावः, तथा मनसोऽपि प्राणाधीनत्वं तद्गत्यागतिभ्यां निरूपणात् यद्यपि प्राणनिरोधेन मनसः कारणत्वं तथाप्यग्रे निरोधकत्वात् तदधीनत्वं तन्निरोधेन विरुद्धत्वाद्वा। तथा च देहबन्धकापगमः। अत एव योगशास्त्रे तन्मूलत्वकथनं देहस्य इतरे च तं इतरे अपाने, इतरस्मिन्निति वक्तव्ये इतर इति कथनमसर्वनामत्वज्ञापकं, तेन मलत्वेन परित्यागकथनात् भगवत्त्वमयुक्तमिति प्राणनियामकत्वेऽपि भगवद्दृष्टिः कर्त्तव्येति सूचितं, होमकथनं पंचाग्निविद्ययोत्पादितशरीरस्य ब्रह्मविद्योपयोगात् प्रकृतस्य पुनरपानेनाकर्षणात् प्राणस्यापानाधीनत्वं सांसर्गिकस्तु वायुः श्वासेन बहिर्निर्गच्छति अन्यथा सोऽपि निर्गच्छेत् अपानस्तु प्रयत्नाधीनगतिकः तस्य मृत्युरेव नियामक इति मृत्यौ तस्य लयमाह–मृत्यावपानमिति मृत्युनैव स ऊर्ध्वं क्रियते किंचन योगप्रमाणं बलिष्ठं विधाय अपानेन प्राणापकर्षणे कृते पुनः प्राणोत्कर्षणे सोपानमुत्कर्षति बहिर्गमनाभावाय च अन्योऽन्यबलिष्ठत्वात् गतिद्वयनिरोधं च कुर्वंति, तस्य प्रकारस्य फलार्थत्वात् न च प्रकृते निरूप्यते अतः सहजासुरे अपाने प्राणमजुहोत् अपानं तु मृत्याविति। ननु तेन प्रकारेण मृत्युना गृहीतेऽपाने दुर्गतिश्रवणात् किमित्यजुहोत् तत्राह सोत्सर्गमिति मृत्युरप्यत्रैव लीयते "मृत्युर्यस्योपसेचनमि"ति श्रुतेः मृतकदेहो मृत्युना धृतमिति तत्र हि मृत्युरपानश्च सोत्सर्गो गच्छतः तत्र उत्सर्गसहितस्यापानस्य मृत्यौ होमात् मृत्योस्तेन मार्गेण गमनाभावः अतो नाभीष्टदातृत्वम् अतो मृत्युरत्रैव निरुद्धः अशनया मृत्युरेवेति श्रुतेः स सर्वप्राणिषु वर्त्तते तस्य प्राणापानौ पोषकौ आहारदानमलापकर्षणाभ्यां तौ च तत्र निरुद्धौ देहमात्रपरिशिष्टौ देहार्धेन भवति पश्चाद्देहं भक्षयितुमारभते तदा तस्य नियामकानि पंचमहाभूतानि तं निबध्नंति। अतो योगिनो देहो न बध्यते न क्षीयते ॥ ४१ ॥ ❀ ❀ एवं पञ्चमहाभूताधारं मृत्युं प्राप्ताप्राप्तविवेकेन भूतप्रविष्टभगवत्कार्यत्वात् भूतांशधर्मिणं परित्यज्य प्रविष्टस्यैकस्य भगवतः पंचत्वात् पंचत्वे अजुहोत्। पूर्वोक्तयुक्तिर्हिशब्देन द्योत्यते। एवं तत्रापि स्वत एवाकृत्य भगवतः पंचत्वाभावात् द्विपदातिक्रमस्यैव शक्यत्वात् स्वस्मिन् काले च गच्छन् स्वेच्छया गरुडमतिक्रम्य लक्ष्म्यां समागतः स्त्रीत्वं प्राप्तः कालमतिक्रम्य प्रकृतौ वा। तदेवमस्मदादिमृत्युभक्षकत्वं पंचस्वरूपभूतमात्मानं भगवन्तं गुणत्रयरूपे भगवति अजुहोत्। तदधीनत्वात् भूतानां तत्रापि गुणत्रयनिविष्टो भगवान् प्रकृतिस्वरूपे हुतः। सा हि परंपरया सर्वकार्यरूपा तत्र हि सर्वप्रवाहाः प्रविशंति। अतः सर्वशब्दवाच्यता एकत्वरूपं भगवन्तं पुरुषरूपे आत्मनि अजुहोत्। तच्च पुरुषं कालादिनियामके अक्षरे ब्रह्मणि अजुहोत् तदधीनत्वात् तस्य तन्मायाफलरूपेणेति वाक्यात् अव्यय इति वेदब्राह्मणत्वजातिचतुर्मुखनिराकरणार्थम्। अथवा तस्यापि प्रकृतिपुरुषभावेन व्ययसम्भवात् तद्रहिते भगवति तदक्षरमजुहोदित्यर्थः ॥४२॥ ❀ ❀ एवं भगवन्मार्गेणबहुतया नवाग्नयः ततः स्वकीयक्रमेण हुत्वा सर्वं भगवति समर्प्य त्यक्तमलांशं देहमरण्ये त्यक्तुं बहिः स्थितिमाह चीरवासा इति। अतः परं यद्यस्य देह उत्पद्यते पार्षदवदुत्पद्यते पंचाग्नौ ब्रह्मविद्योपयोगिदेहिवत् एवमर्थस्य तूष्णीं परित्यागः सर्वनाशकः देहे पतितानि वस्त्राणि चीरवासांसि एतादृशेऽपि रक्षा विधेयेति त्रिदण्डमाह–निराहार इति प्राणदण्डः बद्धवागिति वाग्दण्डः मुक्तमूर्धज इति देहदण्डः चित्तदण्डो वा भ्रान्तत्वाज्ञापनात्। अनेन बीजस्यापहारे अंकुरोत्पादकत्वं सूचितम्। एतादृशस्य सर्वसाधनसाध्यसहितस्य प्रकारेणैतदपरित्यागे पुनः सर्वदोषः संभवति कूलंकषाप्रवाहपतितनौकोत्तरणवत् देहोत्तरणं कर्त्तव्यमिति तत्प्रकारमाह दर्शयन्निति। आत्मनो देहस्य जडोंऽतःकरणविवेकशून्यः जडभरतवत् उन्मत्त इंद्रियविकलः मदिरामत्तवत् पिशाचो भूतग्रस्तः देहविकलः। एवं देहेंद्रियांतःकरणानि यथा न परैराक्रम्यंते तथा विधेयानि। अन्यथाऽन्यत्र प्रविष्टानि बीजभावमापद्येरन् ॥ ४३ ॥ ❀ ❀ अनपेक्षमाण इति। अनवेक्षमाणः इतस्ततोऽनवलोकयन् तस्मिन्नेव दत्तचित्तः स्वभावत एवान्यवचनमशृण्वन् सर्वथा आत्मनि दत्तचित्तस्तत्त्वज्ञापनाय बधिरो यथेति दग्धपटवत् तस्य गमनसंस्कारः इयमेवावस्था ब्रह्मविदां बहिरिंद्रियाणां विषयाग्रहणे भवति शुकवत्। तदुक्तं गंतव्यदेशमाह उदीचीमिति। यद्यपि सर्वदेशेषु नास्य नाशः तथापि मर्यादया तत्रैव गतः महात्मभिरिति एतदपेक्षयापि ते महांत इति तेषामनुगमनं युक्तमिति भावः। शून्यवत् गमनं वारयति हृदि ब्रह्म

परं ध्यायन्निति, यद्यपि बाह्यानि त्यक्तानि तादृशस्य ध्यानं नापेक्ष्यते स्वत एव स्फुरति तथाप्यनभिव्यक्तिदशायां ध्यानं कर्त्तव्यं न तूष्णींभावो युक्त इति । कियद्दूरं गतमित्याकांक्षायामाह गतः प्राणी यतो नावर्तेत तत्पर्यंतं हिमे जले वा तावद्दूरं गत इत्यर्थः ॥४४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

वाचमित्यत्र । नन्वस्त्वाज्ञयाध्यासपरित्यागः, तथापि तन्निवृत्त्यर्थं देहादिलये भावनीये देहस्यान्नमयत्वाद् 'अन्ने प्रलीयते मर्त्य'मित्येकादशोक्तप्रकारेण लयो भावनीयः । अथ साग्निकत्वाद्यज्ञावश्यकत्वम्, तदा 'श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति'इत्यादिगीतोक्तप्रकारेषु केनचित्प्रकारेण होतव्यं किमित्ययं वागादिहोमप्रकार इत्याकाङ्क्षायां साग्नित्वेन द्वितीयस्यावश्यकत्वेपि गीतायां नानाप्रकारकथनात्तेषु नियम्यस्य नियामके होमः सर्वत्र सिद्ध्यतीति प्रकारान् वैकल्पिकत्वादनादृत्य सिद्धमादाय यथाकथञ्चिद्धोमेप्याज्ञासिद्धिरित्याशयेनाहुः तत्रापीत्यादि । सम्पादितमिति । यस्य यत्सम्बन्धित्वं सम्पादितम् । तदाहेति तस्माद्धेतोरेतं क्रममाहेत्यर्थः । सम्बन्धं प्रमाणेन स्फुटीकुर्वन्ति वागित्यादि । तथा च तस्यां हुतायां निमित्तापाये नैमित्तिकस्याप्यपाय इति शरीरसम्बन्धोप्यपैष्यतीति तदर्थं तथेत्यर्थः । वाचो मनःसम्बन्धित्वायाहुः मनस इत्यादि । ननु देवपत्नीकथनप्रस्तावे 'वाग्वायो'रिति श्रावणात्कथं मनोभार्यात्वमित्यत आहुः प्राकृती हि सेति । यतो हेतोः सात्र हूयमाना प्राकृती तेन मनोभार्या वैदिकीतोतिरिक्तेत्यर्थः । नन्वत्राहुतिरूपा स्ववक्तव्या वाक् स्वश्रोतव्या परस्य वाग्वा देवतारूपा वा । आद्ये बद्धवागित्यग्रिमवैयर्थ्यापत्तिः, द्वितीयतृतीययोस्तु तन्नियमासम्भवेनाहुतित्वासम्भव इति शङ्कायां तां निश्चेतुं व्यवच्छिन्दन्ति आत्मन इत्यादि । तयेत्याहुतिरूपया । नेति नाहुतित्वेन । भगवत्कर्तृकाध्यासपक्षेऽयमेव होमप्रकार आवश्यक इत्यत्र बीजमाहुः ईश्वरेत्यादि । हि यतो हेतोः ईश्वरकर्तृकेध्यासे आज्ञया निवर्तनीयेऽधीने लयो मुख्यः, अधिक इनः अधीनः निरङ्कुशेश्वर इति यावत् । तस्मिन् लयो मुख्यस्तत्सायुज्यसम्पादकः । अतोयं प्रकार आवश्यक इत्यर्थः । स त्वाहत्य न भवतीति क्रमस्यावश्यकत्वे यस्य यन्नियतत्वं तदाहुः तत्रेत्यादि । मनोधीनत्वं मनोनियम्यत्वम् । अभिमानिनीति । सगर्वा प्रजापतेरिवेति । इदमुपाख्यानं 'प्रजापते आशया वै श्राम्यसी'ति श्रुतौ प्रायोस्ति । एतेन दृष्टान्तेन तस्या आहुतिसम्पादने तन्निवृत्ते प्रमाणमुक्तम् । सिद्धमाहुः तथेत्यादि । निवर्तयिष्यत इति । भगवता निवर्तनीया । तथा चास्याहुतित्वे तत्सम्बन्धेन सर्वा एव वाच आहुतिभावं प्राप्य निवृत्ता भविष्यन्तीत्यर्थः । वाचः स्वनियामकाधीनत्वं तन्नियामके मनसि तथात्वमतिदिशन्ति तथेत्यादि । हेतुमुखेन तत्र प्रमाणमाहुः तद्गतागतिभ्यामिति । 'स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सौम्य मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते, प्राणबन्धनं हि सौम्य मन' इति छान्दोग्यश्रुतौ मनोगतागतिभ्यां मनसः प्राणाधीनत्वनिरूपणादित्यर्थः । विपरीतमुद्भाव्य समादधते यद्यपीत्यादि । अग्र इति निरोधानन्तरम् । ननु तथा सति तौल्यादाहुतिक्रमस्य वैकल्पिकत्वापत्तिरित्यरुच्या पक्षान्तरमाहुः तन्निरोधेनेत्यादि । प्राणनिरोधेनेत्यर्थः । तथापि दोषतादवस्थ्यमिति फलमुखेन स्मृतिप्रमाणत्वेनाहुः तथाचेत्यादि । तथा चेति चोवधारणे । प्राणनिरोधेन मनोनिरोध एव देहसम्बन्धापगमः । अत एवेति प्राणनिरोधेन देहसम्बन्धापगमादेव । तन्मूलत्वकथनमिति मनोमूलकत्वकथनम् । तथा च फलमेवास्य प्राणाधीनत्वगमकम्, अतो मनसः प्राणनिरोधकरणत्वम्, न प्राणस्य मनोधीनत्वप्रयोजकमित्यर्थः । नन्वत्रेश्वरे होमस्योपक्रान्तत्वादेतस्मिन् तद्दृष्टावस्मिन् होमकथनं विरोत्स्यत इत्याशंकायामाहुः होमेत्यादि । प्रकृतस्येति युधिष्ठिरदेहादेः । तथात्वसम्पादनार्थमिति मुक्तिसाधनाधिकारसम्पादनार्थम् । पूजायामित्यादि । यथैकादशे 'एवं जीवकलां ध्यायन्नादान्ते सिद्धभाविताम् । तयात्मभूतया पिण्डे व्याप्ते सम्पूज्य तन्मयः' इत्यादौ पूजायोग्यत्वार्थं भावनया केवलचिदात्मकदेहनिर्माणवदित्यर्थः । प्राणस्यापानाधीनत्वं स्फुटीकुर्वन्ति प्रयत्नेनेत्यादि । वायुनेति तस्य वायुना । अत्रापि 'प्राणो वै ग्रहः सोपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धान् जिघ्रति' इति श्रुतिरनुसन्धेया । ननु प्रमाणस्यानुपलम्भात् मृत्योः कथमपाननियामकत्वमित्यत आहुः मृत्युनेत्यादि । 'स ऊर्ध्वं क्रियत' इति अपानः प्राणकर्षणायोत्क्षिप्यते । प्राणेऽपानाधीनतायाः साहजिकत्वं बोधयितुं योगिविशेषाणां मतमनूद्य परिहरन्ति केचनेत्यादि । तत्रेति दुर्गतिस्थले । अत्रैवेति स्वनियामके । तस्मान्न दुर्गतिरित्यर्थः । स मृत्युः को वेत्यपेक्षायामाहुः अशनयेत्यादि । तस्य कथं पञ्चत्वाधीनत्वमित्यत आहुः स सर्वेत्यादि । तत्र निरुद्धाविति । देहे निरुद्धौ । तस्य नियामकानीति मृत्योर्नियामकानि । निबध्नन्तीति प्रतिबध्नन्ति । अत इति भक्षणपोषणयोरभावात् । नन्वेवं पञ्चभूताधीने मृत्यौ तस्य पञ्चसु होमो युक्तः, न पञ्चत्वे, अत्र दृष्टं यन्मृत्युनियामकत्वम्, तत्कस्य धर्म इति विमर्शेऽत्र होममाहुः एवमित्यादि । प्राप्ताप्राप्तविवेकेनेति । तस्य संख्यात्वेन मृत्युनियामकत्वायोगादित्याकांक्षायां तत्स्वरूपनिश्चायनपूर्वकं तदुपसेचनश्रुत्या भगवत एवेति प्राप्तम्, भूतानां तु प्रमाणभावेन न प्राप्तमिति तद्विवेकेन । भगवत्कार्यत्वादिति । ल्यब्लोपे पञ्चमी भगवत्कार्यत्वं निश्चित्य । तत्प्रविष्टस्येति तादृशव्यवहारनियामकसंख्यारूपेण प्रविष्टस्य । एवं मृत्युहोमपर्यन्तं व्याख्यायाग्रिमश्लोकं व्याकर्तुमतिदिशन्ति एवं तत्रापीति । एवं नियामके नियम्यलयभावनया, तत्रापि त्रित्वे तन्नियम्यस्य पञ्चत्वस्य होमार्थे निर्णयेपि प्राप्ताप्राप्तविवेकरूपा युक्तिश्चशब्देन समुच्चीयत इति शेषः । सा कथमित्याकांक्षायां तां युक्तिं स्फुटीकुर्वन्ति स्वत इत्यादि । पञ्चानां क्रमत उत्पत्तेस्ततः पूर्वं स्वत एव सहसा भगवतः पञ्चत्वाभावात्

तन्नियामकः पूर्वोऽवधिर्वक्तव्यः। स च विचार्यमाणस्त्रित्वं प्राप्तो भगवानेव पर्यवस्यति, तत्कथमित्याकांक्षायां भूतोत्पत्तेः पूर्वं द्विपदातिक्रमस्यैव, द्वे च ते पदे च द्विपदे गरुडकाली तयोरतिक्रमस्यैव शक्यत्वात् सुकरत्वात् स्वस्मिन्नित्यादिनोक्तरीत्या स्वकाललक्ष्मीभिस्त्रित्वं प्राप्तः स्वगरुडप्रकृतिभिर्वा त्रित्वं प्राप्तो भगवानेव प्राप्ताप्राप्तविवेकेन पञ्चभूतनियामकतया अग्नित्वं प्राप्त इत्यर्थः। अग्निं व्युत्पाद्य होममाहुः तदेवमित्यादि। तत्रैकत्वे जुहोदिति त्रित्वहोमं व्याकुर्वन्ति तत्रापीत्यादि। प्रकृतिस्वरूपे इति। तदात्मना एकत्वरूपे भगवतीत्यर्थः। 'सर्वमात्मन्यजुहवी'दित्यनेनोक्तमेकत्वहोमं व्याकुर्वन्ति स हीत्यादि। शेषं स्फुटम्। अथवेत्यादि। अस्मिन् पक्षे एकत्वस्यात्मपदवाच्येऽक्षरे होमः। प्रकृतिपुरुषयोस्तुल्यबलत्वेनैकस्मिन् नियामकताया अशक्यवचनत्वात्। एवं पक्षद्वयेपि नवाहुतयः, नवैवाग्नयः। तदिदमभिप्रेत्याहुः एवं भगवत्यादि॥ ४२॥ ❀ ❀ चीरवासा इत्यत्र। अतः परमित्यादि। अतः परं एवं प्रकारेण देहप्रतिपत्त्यादिना जातायाः परममुक्तेरनन्तरं यदि 'अक्षरधिया'मिति सूत्रोक्तन्यायेन भगवदिच्छया अस्य युधिष्ठिरस्य देह उत्पद्यते, तदा पार्षदवत् ब्राह्मो वा चिदात्मको वा भगवत्सेवार्थमुत्पत्स्यत इत्यर्थः। बीजस्येति। संसरणबीजस्य प्राणादेः। एतादृशस्येति बीजादिरहितस्य। एतदपरित्याग इति देहापरित्यागे। नौकोत्तारणवदिति नौकात्यागवत्। अनवेक्षमाण इत्यत्र। नन्वेवं देहाद्यध्यासाभावे 'निरगा' दित्यनेनोक्तस्य गमनस्य कथं सिद्धिरित्यत आहुः दग्धेत्यादि। दग्धे पटे पटत्वजातिवदनभिमानेपि संस्काररूपो गुणस्तिष्ठति, तेन सिद्धिरित्यर्थः॥ ४४॥

श्रीगिरिधरकृता बालप्रबोधिनी

वाचमित्युपलक्षणम्। सर्वाणीन्द्रियाणि मनसि जुहाव, मनोधीनवृत्तित्वात्तदभेदं भावयामासेत्यर्थः। तन्मनः प्राणाधीनवृत्तित्वात् प्राणे प्रविलापितवान्। तं प्राणं च इतरेऽपाने प्रविलापितवान्, अपानेन प्राणाकर्षणात्। उत्सर्गो नामापानव्यापाररूपस्तेन सहितमपानं मृत्यौ तदभिमानिदेवतायां जुहाव। अनेनैव वागादीन्द्रियेष्वपि तत्तत्कर्मसाहित्यं ज्ञेयम्। तं च मृत्युं पञ्चत्वे पञ्चमहाभूतानामैक्यरूपे देहेऽजोहवीत्, देहस्यैव मृत्युर्नात्मन इति भावितवानित्यर्थः। सर्वत्र युक्तिसम्भवं सूचयन्नाह-हीति॥ ४१॥ ❀ ❀ अथ तदनन्तरं पञ्चत्वं पृथिव्यादिभूतपञ्चकं त्रित्वे गुणत्रये हुत्वा तच्च त्रित्वमेकत्वे तत्कारणे प्रधाने मुनिः मननशीलो युधिष्ठिरोऽजुहोत्। तच्च सर्वं सर्वकारणभूतं प्रधानमात्मनि जडत्वेन चेतनाधीनप्रवृत्तित्वाज्जीवेऽजुहोत्। तं च शोधितमात्मानं ब्रह्मणि सर्वव्यापके सर्वाधिष्ठाने सर्वनियन्तरि परमात्मनि अजोहवीदिति वक्तव्ये अजुहवीदित्यार्षम्। ब्रह्मणस्तु निर्विकारत्वात्तस्यान्यत्रलयो नास्तीति सूचयन्विशिनष्टि-अव्यये इति॥ ४२॥ ❀ ❀ एवमन्तरवस्थामुक्त्वा बाह्यावस्थामाह-चीरेति। चीरमेव वासो वस्त्रं यस्य स इति बहिर्विषयभोगराहित्यं दर्शितम्। निराहार इति प्राणदण्ड उक्तः। बद्धवाक् मौनीति वागुपलक्षितसर्वेन्द्रियोपरम उक्तः। मुक्तमूर्द्धज इति देहदण्ड उक्तः। लोकसम्बन्धनिवृत्त्यर्थं जडादिवदात्मनः स्वस्य रूपं दर्शयन्। जडोऽन्तःकरणशून्यः। उन्मत्त इन्द्रियविकलः। पिशाचः प्रसिद्धः। अनवेक्षमाणः अनुजभार्यादिप्रतीक्षाम् अकुर्वन् यथा बधिरस्तथा केषामपि वचनमशृण्वन् गृहान्निरगादिति सार्द्धान्वयः॥ ४३॥ ❀ ❀ उदीचीमुत्तरामाशां दिशं प्रविवेश। तत्प्रवेशे हेतुमाह-स्वानुकूलां दिशं प्रतीक्ष्यैव कालो बाधको भवति तस्यास्तद्दिशः "एषा वै देवमनुष्याणां शान्ता दिग्" इति श्रुतेः शान्तत्वान्न तत्र तस्य बाधकत्वम्। अत एव महात्मभिर्गतपूर्वामित्यर्थः। अत एव यतो यां दिशं गतः पुनः संसारे नावर्त्तेत। एवं तत्प्रविष्टस्यापि भगवद्विमुखस्य न तद्धामप्राप्तिरिति सूचयन्नाह-हृदीति। परं ब्रह्म श्रीकृष्णं हृदि ध्यायन्नित्यन्वयः॥ ४४॥

हिन्दी अनुवाद

उन्होंने दृढ़ भावनासे वाणीको मनमें, मनको प्राणमें, प्राणको अपानमें और अपानको उसकी क्रियाके साथ मृत्युमें तथा मृत्युको पञ्चभूतमय शरीरमें लीन कर लिया॥ ४१॥ ❀ ❀ इस प्रकार शरीरको मृत्युरूप अनुभव करके उन्होंने उसे त्रिगुणमें मिला दिया, त्रिगुणको मूल प्रकृतिमें, सर्वकारणरूपा प्रकृतिको आत्मामें और आत्माको अविनाशी ब्रह्ममें बिलीन कर दिया। उन्हें यह अनुभव होने लगा कि यह सम्पूर्ण दृश्यप्रपञ्च ब्रह्मस्वरूप है॥ ४२॥ ❀ ❀ इसके पश्चात् उन्होंने शरीरपर चीर-वस्त्र धारण कर लिया, अन्न-जलका त्याग कर दिया, मौन ले लिया और केश खोलकर बिखेर लिये। वे अपने रूपको ऐसा दिखाने लगे जैसे कोई जड़, उन्मत्त या पिशाच हो॥ ४३॥ ❀ ❀ फिर वे बिना किसीकी बाट देखे तथा बहरेकी तरह बिना किसीकी बात सुने, घरसे निकल पड़े। हृदयमें उस परब्रह्मका ध्यान करते हुए, जिसको प्राप्त करके फिर लौटना नहीं होता, उन्होंने उत्तर दिशाकी यात्रा की, जिस ओर पहले बड़े-बड़े महात्मा जा चुके हैं॥ ४४॥

सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनिश्चयाः। कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि॥ ४५॥

ते साधुकृतसर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः। मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम्॥ ४६॥

---

१. प्रा० पा०—म्गुस्त्वरिताः। २. प्रा० पा०—सत्वार्थाः।

तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे । तस्मिन् नारायणपदे एकान्तमतयो गतिम्[१] ॥ ४७ ॥
अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः । विधूतकल्मषा स्थानं विरजेनात्मनैव हि ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अधर्मो मित्रं यस्य तेन ॥ ४५ ॥ ❀ ❀ साधुकृताः सर्वेऽर्था धर्मादयो यैः । अत एव वैकुंठस्य चरणांबुजमेवात्यंतिकं शरणं ज्ञात्वा ॥ ४६ ॥ ❀ ❀ कथंभूते पदे । विधूतकल्मषाणामास्थानं निवासस्थानं यत्तस्मिन् । विरजेनात्मनैव गतिं प्रापुर्न तु षोडशकलेन लिङ्गेन । गतेर्वा विशेषणम् । विरजेनात्मनैवावस्थानरूपां गतिं ते विधूतकल्मषाः प्रापुरिति ॥ ४७–४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मिन्निति । तच्छब्दानुरोधेन यच्छब्दाध्याहारः । अत्र पक्षे विधूतकल्मषाः स्थानमिति च्छेदः । "खर्परे शरि" इति पाक्षिको विसर्गलोपः । स्थानमित्यजहल्लिंगत्वात्क्लीबत्वम् । तदित्यादिपद्यद्वयस्यैकोन्वयः ॥ ४७ ॥ ❀ ❀ संदर्भस्तु–विधूतकल्मषं यत् आस्थानं नित्यश्रीकृष्णप्रकाशास्पदं तदीया सभा । आत्मना स्वशरीरेणैव । तत्र हेतुः । विरजेनाप्राकृतेन । हिशब्दोऽसंभावनानिवृत्त्यर्थः । यद्वा साधुना पुण्येन कर्मणा कृताः छिन्ना सर्वेऽर्थाश्शब्दादिविषया यैस्ते । 'कृती छेदने' धातुः ॥ ४८ ॥

श्रीमद्वीरराघवव्याख्या

तं युधिष्ठिरमनुसृत्य तद्भ्रातरः सर्वे कृतनिश्चया गमनाय कृतो निश्चयो यैस्ते कृतविवेका वा निर्जग्मुः ते भ्रातरः युधिष्ठिरादयो वा, अधर्मः मित्रं यस्य तेन कलिना स्पृष्टाः प्रजा भुवि दृष्ट्वा ॥ ४५ ॥ ❀ ❀ असाधुकृतास्तुच्छीकृताः सर्वे अर्था देहतदनुबंध्यादयो यैस्तथाभूताः आत्मनो देहस्यात्यंतिकं मरणं ज्ञात्वा भगवच्चरणाम्बुजं मनसा धारयामासुः युधिष्ठिरादयः ॥ ४६ ॥ ❀ ❀ तस्य वैकुण्ठपदाम्बुजस्य ध्यानेनोद्रिक्तया भक्त्या विशुद्धा धिषणा बुद्धिर्येषां ते नारायणपदवाच्ये परमपुरुषे एकान्ता गतिर्मतिर्येषां, मतेरैक्यं नाम विजातीयप्रत्ययाव्यवधानं विषयेषु शब्दादिषु प्रवण आत्मा मनो येषां तैरसद्भिर्दुरात्मभिर्दुःखेनाप्यवाप्तुमशक्यां गतिं मुक्त्यात्मिकामवापुः । तदेवोपपादयति विधूतानि निरस्तानि कल्मषाणि भगवत्प्राप्तिप्रतिबन्धकानि पूर्वोत्तराघानि येषां ते विरजेन रजस्तमोरहितेन आत्मना स्वरूपेण स्थानं श्रीनारायणस्य पदमवापुरित्यनुषंगः ॥ ४७–४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भ्रातरः भीमसेनादयः अधर्ममित्रेण अधर्मप्रधानेन ॥ १४ ॥ ❀ ❀ आत्मनः परमात्मनः । स्वरूपमात्यंतिकं सर्वातिशयमथवात्मनः स्वस्य आत्यंतिकमंतकाले कर्तव्यं ज्ञात्वा साधु सम्यक्कृतोऽनुष्ठितः सर्वार्थो धर्मादिर्यैस्ते तथा साधुना कर्मणा पुण्यलक्षणेन कृत्ताश्छिन्ना निरस्ताः सर्वे अर्थाः शब्दादिविषया यैस्ते तथोक्ता इति वा, कृती छेदन इति धातुः । अत्र हरौ मनोधारणं नामाखंडस्मरणमिति ज्ञातव्यम् ॥ १५ ॥ ❀ ❀ इत्थं नारायणचरणांबुजं हृदि संविधाय तद्ध्यानेनोद्रिक्तया भक्त्या विशुद्धमतयोऽहोभिः सप्तभिर्भुवं प्रदक्षिणीकृत्य गंधमादनगिरिविवरे बदर्याख्यं नारायणाश्रमं प्राप्य तस्मिन् परे नारायणपदे नारायणाश्रमे एकांतमतयः एकांतं नारायणं ध्यायंतस्ते पांडवाः अपतच्छरीराणि तत्यजुरित्यन्वयार्थः, एकमनस्का वा ॥ १६ ॥ ❀ ❀ शब्दादिविषयमनस्कैरसद्भिरमंगलैः पुरुषैर्दुरवापं गंतुमशक्यं निरस्तजरामरणादिकल्मषस्थानं स्वस्वमूलरूपं विरजेन रजआदिगुणात्मकलिंगशरीराभिमानरहितेनात्मना मनसा उपलक्षितास्ते प्राप्ता इत्येकान्वयः । एवकारस्तु देवदूतदर्शितमायया युधिष्ठिरदृष्टभीमादिरोदनापादकलोकं नापुरित्यस्मिन्नर्थेन तु रजोमिश्रितात्मनेत्यत्र हिशब्दस्तु न दोषात् देहपातः किंतु प्रारब्धकर्मनाशादित्यस्मिन्नर्थे श्रुतिप्रसिद्धिं द्योतयति । श्रुतिरपि सकलसुरोत्तमालिपुरःसरगणैराराधितचरणैः श्रीभगवत्पादैः सकलपुराणसारसंग्रहगृहे श्रीमहाभारततात्पर्यनिर्णये उदाहृता नास्माभिरत्रोदाह्रियते ग्रंथबाहुल्यभयादिति । विदुरोऽपि परित्यज्येति प्रक्षेपश्लोकः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ते इति । ते पाण्डवाः साधु यथा स्यात्तथा कृतसर्व्वार्थाः वशीकृतधर्म्मार्थकाममोक्षा अपि वैकुण्ठस्य श्रीकृष्णस्य चरणाम्बुजमेव आत्यन्तिकं परमपुरुषार्थं ज्ञात्वा तदेव मनसा धारयामासुः ॥ ४६ ॥ ❀ ❀ नारायणः श्रीकृष्णः ॥ ४७ ॥

१. प्रा० पा०—गतये ।

❀ ❀ पुनर्गतिमेव विशिनष्टि। विधूतकल्मषं यत् आस्थानं नित्य-श्रीकृष्णप्रकाशास्पदं तदीया सभा। आत्मना स्वशरीरेणैव। तत्र हेतुः विरजेनाप्राकृतेन। हिशब्दोऽसम्भावनानिवृत्त्यर्थः॥ ४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी।

श्रीकृष्णं प्राप्तुं वयमपि तन्मनस्का एव भवामेति कृतो निश्चयो यैस्ते॥ ४५॥ ❀ ❀ साधु यथा स्यात् तथा कृता अनुष्ठिताः सर्व्वेऽर्था धर्म्मादयो यैस्तथाभूता अपि आत्यन्तिकं तेभ्योऽप्यत्यन्ताधिकं श्रीकृष्णचरणाम्बुजमेव मनसा निर्द्धारयामासुः। साधुकृता धर्म्मार्थकाममोक्षा यैरत एव चरणाम्बुजमेवात्यन्तिकमिति श्रीस्वामिचरणाः॥ ४६॥ ❀ ❀ विशुद्धा ज्ञानयोगाद्यमिश्रा धिषणा बुद्धिर्येषां ते। अत एव एकान्तमतयः। गतिं कीदृशीं विधूतकल्मषाणाम् आस्थानं निवासस्थानम्। यद्वा विधूतकल्मषाणाम् आस्थानं सभा सुधर्म्माभिधाना यत्र तत् कृष्णधामैव गतिम् अवापुः। केन प्रकारेणेत्यत आह-विरजेन निर्म्मलेन गुणमयधर्म्मेन्द्रियांशराहित्यादप्राकृतेनात्मना स्वशरीरेणैव न तु देहभङ्गेनेत्यर्थः॥ ४७-४८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अधर्ममित्रेण कलिना स्पृष्टाः प्रजाः दृष्ट्वा॥ ४५॥ ❀ ❀ ते सर्वे युधिष्ठिरप्रमुखाः असाधुकृताः सर्वे ऐहिकामुष्मिका अर्था यैस्ते आत्मनः आत्यंतिकं परं प्राप्यं वैकुण्ठचरणांबुजं ज्ञात्वा मनसा धारयामासुः॥ ४६॥ ❀ ❀ तस्मिन्नारायणस्य चरणांबुजे परे सर्वत उत्कृष्टे एकांता तदेकविषया मतिर्येषां ते तस्य चरणांबुजस्य ध्यानेनोद्रिक्तया तीव्रया भक्त्या असद्भिर्दुरवापां गतिं मुक्तिं "योऽस्याध्यक्षः स परमे व्योमन्नि"ति श्रुतिप्रोक्तं परमव्योमाख्यं स्थानं च विरजेन कार्यकारणसंबंधरहितेनात्मना अवापुरिति द्वयोरन्वयः॥ ४७-४८॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अन्येषां निर्गममाह सर्व इति। अनेनैव प्रकारेण सर्वेषां गमनमाह तमन्विति। लौकिकशास्त्रीयसंमतिमाह भ्रातरः कृतनिश्चया इति। भ्रातॄणां यदन्यः करोति तत् सर्वे कुर्वंतीति लोके शास्त्रे तु निश्चितं कुर्वंतीति मुख्ये शास्त्रार्थसंभव इति न्यायेन सर्वेषु यदि शास्त्रार्थसंभवः स्यात् सर्वे मुख्याः स्युः। अथ लोकवद्वेदेऽपि ते गौणा इति तत् कथं तद्वदतिदेश इत्याशंक्य तथा शास्त्रार्थनिर्द्धारेऽपि स्थूलप्रकारेण तेषां निर्धारोऽस्तीति तदाह भगवद्भक्तेषु विषयाणां बाधकत्वाभावेऽपि दुःसंगसहितानां तेषां तथात्वात् कालेन दोषसम्भवात् कलिना धर्ममित्रेण सर्वाः प्रजा दृष्ट्वा गंतुं कृतधियो जाता इति॥ ४५॥ ❀ ❀ वैराग्यसाधनमाह ते साधुकृतसर्वार्था इति। धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्था साधु यथा भवति तथा कृताः चतुर्णां पुरुषार्थानां स्वसाधनसाध्यन्तेषु च भगवत्सेवासाध्यताप्यस्ति तत्रापि भगवत्सेवया साधिता निःप्रत्यूहमुत्तमा भवंति, अतस्तैः सर्वैः पुरुषार्थाः साधिताः। अथवा साधुषु कृताः सर्वे पुरुषार्थाः सिद्धाः अतस्तद्विरोधित्वेन असत्संगो हेय इति पूर्वेण सम्बन्धः। अथवा भक्तिः पंचमः पुरुषार्थः चत्वारस्तैरनुभूताः। भक्तिश्च पंचमः, तत्र तारतम्ये विचार्यमाणे अत्यन्तं सुखं सुखहेतुश्च भक्तिरेव, अत आत्यन्तिकं ज्ञात्वा श्रीकृष्णचरणारविन्दमेव मनसा धारयामासुः॥ ४६॥ ❀ ❀ ततः किं वृत्तमित्याह-तद्ध्यानेन उद्रिक्ता या भक्तिः सर्वांगे पूर्णा बहिरपि निर्गता तेन अंतस्थान् दोषान् दूरे बहिः करोति, अतो विशुद्धधिषणाः ततः परे पुरुषोत्तमे अनन्यशब्दवाच्ये तस्मिन् प्रसिद्धे नारायणपदे नारायणो ब्रह्मांडरूपः पदं यस्य अनेन शास्त्रार्थरूपे एकांतमतयो भूत्वा दोषादेव व्यभिचारव्युत्पत्तेः गतिर्गमनसामर्थ्यं गमनमेव अवापुः। पूर्वंशास्त्रतः साधनान्युक्तानि न फलमेतेषां तु फलमप्युक्तम्। अथवा ज्ञानमार्गेण यज्ञो गतिः, अन्येषां भक्तिमार्गेणेति। अथवा लोकेऽप्यस्ति भोगपर्यंतमसाधारण्येन गमनमुक्त्वा पश्चात् सर्वेषां साधारण्येन गमनं साधनं फलम्, अतः सर्व एव शास्त्रमार्गं परित्यज्य केवलविषयात्मभिः दुरवापां गतिमवापुरिति सर्वेषां भगवत्प्राप्तिः फलम्। असद्भिरित्याचारराहित्यं सिद्धेऽपि ज्ञाने अभिमानशेषस्य विद्यमानत्वात् तत्कृतो दोषः स्यादेव विषयात्मभिरिति अंतःकरणदोषः प्रत्येकगमने हेतुः पाखंडिविषयव्यावृत्त्यर्थं ततो गतिं प्रतिपद्य समीपे गच्छंतः क्रमेण तत्त्वांशातिक्रमेण यदा सर्वांशातिक्रमः तदा विधूतकल्मषत्वमात्मापेक्षयान्यस्य सर्वस्यैव कल्मषत्वात् स्थानस्य स्वस्य च एकरूपत्वं तदाह विरजेनेति। हि युक्तोऽयमर्थः न ह्यशुद्धाः शुद्धे गंतुमर्हंति शुद्धानां वा अशुद्धं स्थानं भवति। तस्मात् यथायोग्यं स्थानं प्राप्तवंत इत्यर्थः॥ ४७-४८॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ते साधुकृतेत्यत्र। अस्तीति। 'यत्कर्मभिर्यत्तपसे'त्यादिवाक्यादस्ति। भक्तिश्च पञ्चम इति। तैरनुभूत इति शेषः॥ ४५॥ ❀ ❀ तद्ध्यानेत्यत्र तेनेति। बहिर्निर्गमनेन॥ ४७॥ ❀ ❀ अवापुरित्यत्र। प्रत्येकमगमने हेतुरिति। आचारराहित्यमन्तःकरणदोषश्चेति द्वयं प्रत्येकं तथेत्यर्थः॥ ४८॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे पञ्चदशाध्यायविवरणम्॥ १५॥

श्रीगिरिधरकृता बालप्रबोधिनी

अस्माभिरप्यत्र न स्थेयं किन्तु भगवद्धाममार्गमेव गन्तव्यमिति कृतो निश्चयो यैस्ते तद्भ्रातरो भीमादयोऽपि सर्वे तमनु निर्जग्मुरित्यन्वयः । तथा निश्चये हेतुमाह–भुवि याः प्रजास्ताः कलिना स्पृष्टाः दृष्ट्वेति । तत्स्पर्शेऽपि किमित्यपेक्षायामाह–अधर्ममित्रेणेति । कलावधर्मबाहुल्येन नरकप्राप्तेरावश्यकत्वं पर्यालोच्य गमननिश्चयं कृतवन्त इत्यर्थः ॥ ४५ ॥ ❀ ❀ ते परमविवेकित्वेन प्रसिद्धा युधिष्ठिरादय आत्मन आत्यन्तिकं तापत्रयनिवर्त्तकं शरणं वैकुण्ठस्य भगवतः श्रीकृष्णस्य चरणाम्बुजं ज्ञात्वा तन्मनसा धारयामासुः निरन्तरं चिन्तितवन्त इत्यन्वयः । तथा तज्ज्ञाने हेतुमाह–साध्विति । साधु यथा भवति तथा कृता अनुष्ठिताः सर्वेऽर्था यज्ञादयः साधनानि यैस्ते । यद्वा असाध्विति च्छेदः । सर्वं त्यक्त्वा वैकुण्ठचरणाम्बुजध्याने हेतुमाह–असाध्विति । असाधुकृता असाधुत्वेन निश्चिताः सर्वे अर्था धर्मार्थकामादयः पुरुषार्थाः यैस्ते । तत्रापि हेतुमाह–वैकुण्ठचरणाम्बुजं आत्मन आत्यन्तिकं ज्ञात्वेति ॥ ४६ ॥ ❀ ❀ तेषां यत्तद्ध्यानफलं जातं तदाह–तद्ध्यानेति द्वयेन । ते धिष्ठिरादयो नारायणस्य पदे स्थाने चरणारविन्दसमीपे गतिं स्थानमवापुरिति द्वयोरन्वयः । तत्र हेतुमाह–हि यस्मात् विरजेन विशुद्धेन आत्मना मनसा हेतुना तस्मिन् सर्वशास्त्रतात्पर्यगोचरे अत एव परे सर्वोत्कृष्टे नारायणस्य पदे चरणारविन्दे एवैकान्ता निश्चला मतिर्येषां ते तथाभूताः । कथं तेषां विरजात्मत्वमित्यपेक्षायामाह–तस्य भगवतो ध्यानेनोद्रिक्तया वृद्धया भक्त्या विशुद्धा धिषणा बुद्धिर्येषां ते इति । तत्प्राप्तौ किमाश्रयेमित्यपेक्षायामाह–असद्भिर्दुरवापामिति । असन्तः के वेत्यपेक्षायां तान् विशिनष्टि–विषयात्मभिरिति । तर्हि पाण्डवाः कथमवापुरित्यपेक्षायां निर्दोषत्वादित्याशयेन गतिं विशिनष्टि–विधूतः कल्मषो येषां तेषामास्थानं निवासस्थानमित्यर्थः ॥ ४७–४८ ॥

हिन्दी अनुवाद

भीमसेन, अर्जुन आदि युधिष्ठिरके छोटे भाईयोंने भी देखा कि अब पृथ्वीमें सभी लोगोंको अधर्मके सहायक कलियुगने प्रभावित कर डाला है; इसलिये वे भी श्रीकृष्ण-चरणोंकी प्राप्तिका दृढ़ निश्चय करके अपने बड़े भाईके पीछे-पीछे चल पड़े ॥ ४५ ॥ ❀ ❀ उन्होंने जीवनके सभी लाभ भलीभाँति प्राप्त कर लिये थे; इसलिये यह निश्चय करके कि भगवान् श्रीकृष्णके चरण-कमल ही हमारे परम पुरुषार्थ हैं, उन्होंने उन्हें हृदयमें धारण किया ॥ ४६ ॥ ❀ ❀ पाण्डवोंके हृदयमें भगवान् श्रीकृष्णके चरण-कमलोंके ध्यानसे भक्ति-भाव उमड़ आया, उनकी बुद्धि सर्वथा शुद्ध होकर भगवान् श्रीकृष्णके उस सर्वोत्कृष्ट स्वरूपमें अनन्य भावसे स्थिर हो गयी; जिसमें निष्पाप पुरुष ही स्थिर हो पाते हैं । फलतः उन्होंने अपने विशुद्ध अन्तःकरणसे स्वयं ही वह गति प्राप्त की, जो विषयासक्त दुष्ट मनुष्योंको कभी प्राप्त नहीं हो सकती ॥ ४७–४८ ॥

विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान्[1] । कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥
द्रौपदी च तदाऽऽज्ञाय पतीनामनपेक्षताम् । वासुदेवे भगवति ह्येकान्तमतिराप तम् ॥५०॥
यः श्रद्धयैतद् भगवत्प्रियाणां पाण्डोः सुतानामिति सम्प्रयाणम् ।
शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥५१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे पाण्डवस्वर्गारोहणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विदुरोऽपि तीर्थान्यटन्प्रभासे श्रीकृष्णावेशेन कृष्णे चित्तमावेश्य देहं परित्यज्य तच्चित्त एव सन्तदानीं नेतुमागतैः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ॥ ४९ ॥ ❀ ❀ आत्मानं प्रत्यनपेक्षतां तदा ज्ञात्वा तमाप ॥ ५० ॥ ❀ ❀ इति एवं यत्संप्रयाणम् । अलमतिशयेन स्वस्त्ययनं मंगलास्पदम् । अलं पवित्रं च ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे भावार्थदीपिकायां टीकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विदुरस्य भूतपूर्वां धृतराष्ट्रादिदर्शनार्थं वनगतयुधिष्ठिरदेहं प्रवेक्ष्यमाणस्य गतिमाह–प्रकृष्टा चासौ भा दीप्तिर्बुद्धिर्वेति प्रभा तयाऽऽस्ते सदा तिष्ठति तामसत्याददाति वेति प्रभासो युधिष्ठिरस्तस्मिन्नात्मवान् प्रवेशितनिजात्मस्वरूपः सन् कृष्णावेशेन कृष्णा-

१. प्रा० पा०—देहमात्मनः ।

नुरागेण देहत्यागावसरे तच्चित्त एव श्रीकृष्णांघ्रिसमर्पितचित्तः देहं त्यक्त्वा श्रीकृष्णनित्यपरिकरत्वात्पितृभिः श्रीमैत्रेयेण बोधितः सन्स्वस्य क्षयं निलयनिवासं श्रीकृष्णं ययौ प्राप, बोधित इति शेषः । 'अस गतिदीप्त्यादानेषु' । मैत्रेयस्य ज्ञानदातृत्वात्पितृत्वं बहुत्वं गुरुत्वात् । "एकत्वं न प्रयुंजीत गुर्वात्मनि कदाचन" इति स्मृतेः । "अन्नदाता भयत्राता यश्च विद्यां प्रयच्छति । जनको ह्युपनेता च पंचैते पितरः स्मृताः ॥" इति स्मृतेश्च । यथाश्रुतार्थांगीकारे तु कल्पांतरीयैव व्यवस्थेति । संदर्भस्तु-विदुरस्य यमलोकगतिः स्वाधिकारपालनार्थं लीलया कायव्यूहेनेति गम्यते । तदित्थं भारतादिविरोधोपि न स्यादिति ॥ ४९ ॥ ❀ ❀ आत्मानं प्रति अनपेक्षमाणानां तत् श्रीकृष्णसंगमनमाज्ञाय सम्यग्ज्ञात्वा वासुदेवे श्रीवसुदेवनंदने । हि प्रसिद्धौ । यस्मिन्नेकांतमतिस्तमेव प्राप्तवती । अत्रान्येन पथा गच्छतोप्येतान्श्रीद्वारकानाथः स्वयं स्वभक्त्या स्वसमीपमेवानीतवानिति गम्यते, "नित्यं संनिहितः" इत्याद्युक्तेः । अत्र श्रीमहाभारतोक्तरीत्या मार्गे पतितां तां युधिष्ठिरादयो नाद्रिरे । सा च तदैव श्रीकृष्णावेशितचित्ता तमापेति ध्येयम् ॥ ५० ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

स्वाधिकारस्थानं यमलोकमिति प्राञ्चः ॥ ४९ ॥ ❀ ❀ अनपेक्षताम् अपेक्षाराहित्यमित्यर्थः । तं श्रीकृष्णम् ॥ ५०-५१ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-दीपन्याख्यदीपिकाटिप्पण्यां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवव्याख्या

विदुरोऽपि कंचित्कालं तीर्थान्यटित्वा पांडवादीनां गतिमाकर्ण्यात्मवान् भगवति समाहितचित्तः प्रभासे देहं परित्यज्य कृष्णावेशेन कृष्णसमाधानेन तच्चित्तः कृष्णैकविषयकचित्तः पितृभिः पितृदेवताभिः सह स्वयं स्वस्थानं ययौ पुनर्यम एव भूत्वा स्वलोकं ययावित्यर्थः । कृष्णोपदेश इति पाठे यदुकुलसंहाराय यत्र श्रीकृष्णः प्रविष्टस्तस्मिन्देशे प्रभासे इत्यर्थः, पुनरधःपतनाभावा-त्पाण्डवादीनां मुक्तत्वकथनं ते हि प्रारब्धकर्मावसाने विमोक्ष्यन्ते एवातो न विरोधः ॥ ४९ ॥ ❀ ❀ तदा द्रौपद्यपि पती-नामनपेक्षतामाज्ञाय ज्ञात्वा वासुदेवे भगवति एकान्ता विजातीयप्रत्ययान्तराव्यवहिता मतिर्यस्यास्तथाभूता तं वासुदेवमवाप ॥ ५० ॥ ❀ ❀ श्रीकृष्णादीनां प्रयाणप्रवणादिफलमाह य इति । इतीत्थमतितरां स्वस्त्ययनं शृण्वतां पठतां च शुभावहं पवित्रं च भगवतः प्रयाणं पांडोः सुतानां संप्रयाणं च यः पुमान्श्रद्धया शृणोति हरौ भक्तिं लब्ध्वा सिद्धिं मुक्तिमुपैति ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनपेक्षतां देहाद्यनभिमानवतामेकांतमतिरेकाग्रचेताः ॥ १८ ॥ ❀ ❀ श्रीकृष्णपांडवानां स्वधामप्रवेशश्रवणादिना किं प्रयोजनं येनात्रावश्यं वक्तव्यं स्यादिति तत्राह य इति । य एतद्भगवत्स्वधामप्रयाणं भक्तानां च पांडवानां च प्रयाणादिकं च शृणोति स हरौ भक्तिं लब्ध्वा शांतिं मुक्तिमुपैतीत्यन्वयः । अलं त्रिकरणशुद्ध्या ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतायां पदरत्नावल्यां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विदुरस्य यमलोकगतिः स्वाधिकारपालनार्थं लीलया कायव्यूहेनेति ज्ञेयम् । तदित्थमेव श्रीभागवतभारतयोर-विरोधः स्यादिति ॥ ४९ ॥ ❀ ❀ आत्मानं प्रति अनपेक्षमाणानां तत् श्रीकृष्णसङ्गमनम् आज्ञाय सम्यक् ज्ञात्वा । वासुदेवे श्रीवसुदेवनन्दने । हि प्रसिद्धौ । यस्मिन्नेकान्तमतिस्तमेव प्राप्तवती । अत्रान्येन पथा गच्छतोऽप्येतान् श्रीद्वारकानाथः स्वयं स्वशक्त्या स्वसमीपमेवानीतवानिति गम्यते । नित्यं सन्निहित इत्याद्युक्तेः ॥ ५०-५१ ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देहं परित्यज्येति । देवतारूप एव न तु पार्षदरूपः । अत एव पितृभिस्तदानीं नेतुमागतैः सह । स्वक्षयं स्वाधिकारस्थानम् ॥ ४९ ॥ ❀ ❀ द्रौपदीति । सुभद्रादीनामप्युपलक्षणम् । तम् आपेति देहत्यागानुक्त्या शरीरेणैवेति ॥ ५० ॥ ❀ ❀ इति एवं संप्रयाणमेव न तु प्रकारान्तरम् । सिद्धिं सिद्धिदशाम् ॥ ५१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमे पञ्चदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वक्षयं स्वाभीष्टस्थानम् ॥ ४९ ॥ ❀ ❀ द्रौपदी तदा पतीनामात्मानं प्रत्यनवेक्षतामाज्ञाय ज्ञात्वा भगवति एकांतमतिः सती तं भगवंतमाप ॥ ५० ॥ ❀ ❀ यः सुकृतिः एतत्पूर्वोक्तं श्रीकृष्णस्य भगवतो निजलोकगमनं तथा भगवत्प्रियाणां पांडोः सुतानां कुंत्यादिसहितानाम् इति पूर्वोक्तं प्रयाणम् । अलमत्यर्थं स्वस्त्ययनं पवित्रं शृणोति स हरौ भक्तिं लब्ध्वा सिद्धिमुपैति ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अधिकारिणां भक्तानामपि "यावदधिकारं स्वाधिकारिकाणामि"ति न्यायेन न भगवत्प्राप्तिः । किन्तु स्वस्थानप्राप्तिरेवेति । विदुरे तदाह विदुरोऽपीति । प्रभासो ह्यधिकारस्थानमार्गः । आत्मवान् इन्द्रियादिसहितः । पूर्वदेहसहितो वा मोक्षार्थमाश्रयकरणे हेतुः कृष्णावेशेनेति । तच्चित्त एव भगवदाज्ञया अधिकारं करोतीति पितृभिरिति । समानयनार्थमागतैः । स्वक्षयं वैवस्वतपुरं क्षयपदप्रयोगस्तु तत्र गतानां तथात्वात् ॥ ४९ ॥ ❀ ❀ द्रौपद्या भिन्नां गतिमाह द्रौपदीति । सा पूर्वमेव भगवदीया भगवच्चरणप्रवेशार्थमुद्यतापि भगवता पतिभ्यो दत्तत्वात् तद्धितार्थं स्थिता । तेषां चानपेक्षतां ज्ञात्वा स्वहृदय एव प्रकटे भगवति एकान्तगतित्वादस्याः । देहेन्द्रियादिसंघातादुत्क्रम्य भगवति आपतदित्यर्थः ॥ ५०-५१ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

विदुरोऽपि तीर्थानि पर्यटन् यत आत्मवान् उपास्यतयाऽऽत्मा परमात्मा श्रीकृष्णो विद्यते यस्य तथाभूतोऽतः कृष्णस्यावेशेन स्वान्तःप्रवेशेन हेतुना तस्मिन्नेव चित्तं यस्य तथाभूतः सन् प्रभासे तीर्थे देहं परित्यज्य तदानीमानेतुमागतैः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययावित्यन्वयः । न च तस्य परमभक्तस्य भगवत्प्राप्तिः कथं न जातेति शङ्कनीयम्, अधिकारिणां यावदधिकारं स्थितेर्नियमात् तस्याधिकारित्वाच्च, तत्समाप्त्यनन्तरं तत्प्राप्तौ तु न सन्देह इति ज्ञेयम् ॥ ४९ ॥ ❀ ❀ तदा द्रौपदी च पतीनामनपेक्षतां स्वापेक्षाराहित्यमाज्ञाय ज्ञात्वा भगवति वासुदेवे वसुदेवनन्दने श्रीकृष्णे एवैकान्ता विजातीयप्रत्ययान्तरायाव्यवहिता मतिर्यस्याः सा तथाभूता सती तं वासुदेवमेवापेत्यन्वयः । 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः' इत्यादिशास्त्रेणापि तथा निश्चयान्नात्र सन्देहः कार्य इति सूचयितुं हिशब्दः ॥ ५० ॥ ❀ ❀ एतदध्यायत्रयश्रवणस्य फलमाह–य इति । इत्येवं वर्णितप्रकारकं पाण्डोः सुतानां सत्प्रयाणं गृहान्निर्गमनं यः प्राणी श्रद्धया शृणोति सोऽपि हरौ तापत्रयवत्संसारहरणशीले भगवति श्रीकृष्णे भक्तिं लब्ध्वा सिद्धिं पूर्वोक्तां पाण्डवानां गतिमुपैति प्राप्नोतीत्यन्वयः । कथमेतच्छ्रवणस्यैवं फलमित्यपेक्षायामाह–अलं स्वस्त्ययनमिति । अतिशयेन शुभावहं पवित्रं पापापहं च । तत्र हेतुमाह–भगवत्प्रियाणामिति । यतो भगवद्भक्तानां सम्प्रयाणमित्यर्थः ॥ ५१ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ पञ्चदशो गतो वृत्तिं पाण्डवमुक्तिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

संयमी एवं श्रीकृष्णके प्रेमावेशसे मुग्ध भगवन्मय विदुरजीने भी अपने शरीरको प्रभास-क्षेत्रमें त्याग दिया। उस समय उन्हें लेनेके लिये आये हुए पितरोंके साथ वे अपने लोक (यमलोक) को चले गये ॥ ४९ ॥ ❀ ❀ द्रौपदीने देखा कि अब पाण्डवलोग निरपेक्ष हो गये हैं, तब वे अनन्य प्रेमसे भगवान् श्रीकृष्णका ही चिन्तन करके उन्हें प्राप्त हो गयीं ॥ ५० ॥ ❀ ❀ भगवान्के प्यारे भक्त पाण्डवोंके महाप्रयाणकी इस परम पवित्र और मङ्गलमयी कथाको जो पुरुष श्रद्धासे सुनता है, वह निश्चय ही भगवान्की भक्ति और मोक्ष प्राप्त करता है ॥ ५१ ॥

पञ्चदश अध्याय समाप्त

अथ षोडशोऽध्यायः

सूत उवाच

ततः परीक्षिद् द्विजवर्यशिक्षया महीं महाभागवतः शशास ह।
यथा हि सूत्यामभिजातकोविदाः समादिशन् विप्र महद्गुणस्तथा ॥ १ ॥
स उत्तरस्य तनयामुपयेम इरावतीम्। जनमेजयादींश्चतुरस्तस्यामुत्पादयत् सुतान् ॥ २ ॥
आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान्। [1]शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥ ३ ॥
निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित्। नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततश्च षोडशे भूमिधर्मयोः कलिखिन्नयोः। संवादे वर्ण्यते प्राप्तिः पालकस्य परीक्षितः ॥ १ ॥

द्विजवर्याणां शिक्षया। सूत्यां जन्मनि। अभिजातकोविदा जातकर्मविदः। हे विप्र महतां गुणा यस्मिन्सः ॥ १ ॥ ❀ ❀ जनमेजयादीनित्यक्षराधिक्यं छांदसम्। उत्पादयन्निति पाठे हेतौ शतृप्रत्ययः। सुतानुत्पादयितुमिरावतीमुपयेम इति वाक्ययोजना ॥ २ ॥ ❀ ❀ आजहार कृतवानित्यर्थः। शारद्वतं कृपम्। यत्र येष्वश्वमेधेषु देवा दृष्टिगोचरा बभूवुः ॥ ३ ॥ ❀ ❀ निजग्राह निगृहीतवान्। कलिमेव निर्दिशति। नृपेति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

खिन्नयोः खेदं प्राप्तवतोः (१) ततः पाण्डवनिर्याणानन्तरम्। हे विप्रेति। ब्राह्मणा हि सर्वकल्याणहेतवस्सन्ति। विशेषेण प्रान्ति पूरयन्ति स्वसेवकाभिलषितमिति निरुक्तेः। अतस्त्वं मदभिलषितसत्पुरुषसंगादिसंपादनार्थमेव विज्ञतरोऽपि सन्मां पृच्छसीति भावः। "अभिजातः कुलीने स्यान्न्याय्यपण्डितयोस्त्रिषु" इति कोशात्। पण्डितपण्डिता अत्राभिजातपदेन ग्राह्याः सर्वशास्त्रनिपुणा इत्यर्थः। यद्वाऽभितो जायते होराशास्त्रे कोविदाः। पृषोदरादित्वात्ककारलोपः ॥ १ ॥ ❀ ❀ अडभावश्चार्षः ॥ २ ॥ ❀ ❀ इत्यर्थ इति। अनेकार्थत्वादुपसर्गवशाद्वा हरतेः करणार्थतेति भावः ॥ ३ ॥ ❀ ❀ क्वचिदेकान्ते ॥ ४ ॥

अस्मिन्पर्याये दीपनी न (सं०)

श्रीमद्वीरराघवव्याख्या

तदेव संप्रस्थानं पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिज्ञातं पाण्डुपुत्रसंस्थानं परीक्षिज्जन्मोपेतमुपपाद्य परीक्षितोऽथ राजर्षेर्जन्म कर्मविलापनमिति प्रतिज्ञातं निर्वर्णयति। तत्र तज्जन्म पांडवपुत्रवृत्तांत एवांतर्भाव्याभिहितं विलापनं द्वादशे स्कन्धे वक्ष्यति। इतः परं चतुरध्यायैः कर्माणि वर्ण्यंते इति विवेकः तत इति। ततः पितृनिर्गमनानंतरं महांतो गुणा यस्य परीक्षित् हे द्विज! जन्मसूत्यां जन्मदिने जातककोविदाः विप्राः यथा समादिशन् तथैव द्विजवर्यशिक्षया महाभागवतः सन्महीं शशास पालयामास ॥ १ ॥ ❀ ❀ स परीक्षिदुत्तरस्य मातुलस्य तनयामिरावतीमुपयेमे उदुवाह। तस्यामिरावत्यां जनमेजयादींश्चतुरः सुतानुदपादयत् अडभाव आर्षः, आगमशास्त्रस्यानित्यत्वात् ॥ २ ॥ ❀ ❀ शारद्वतं कृपं गुरुं कृत्वा वृत्वा गङ्गायां गङ्गातीरे त्रीनश्वमेधानाजहार यत्र येष्वश्वमेधेषु देवा इन्द्रादयः अक्षिगोचरा बभूवुः तथाविधानाजहारेत्यर्थः ॥ ३ ॥ ❀ ❀ कदाचिद्दिग्विजये निमित्ते चरन् वीरः परीक्षित् क्वचिद्देशे यदा पादेन गोमिथुनं स्त्रीपुंसयोर्गवोर्युग्मं घ्नंतं शूद्रमपि नृपचिह्नधरं कलिमोजसा पराभिभवसामर्थ्यात्मकेन निगृहीतवान् ॥ ४ ॥

---

१. प्राचीने पाठे 'शारद्वतं' इत्यारभ्य 'यत्राक्षिगोचराः' पर्यन्तं नास्ति।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अत्र भवति भक्तिविधानार्थं भगवद्भक्तपरीक्षितः कलिबंधनादिमाहात्म्यवर्णनेन हरिमहिमैव प्रतिपाद्यत इति तन्महिमा प्रतिपाद्यतेऽस्मिन्नध्याये। तत्र प्रथमे राज्यपालनादिमहिमोच्यत इत्याह तत इति। ततः पांडवस्वर्याणानंतरं द्विजवर्यशिक्षया कृपादिब्राह्मणश्रेष्ठसदुपदेशेन शिक्ष-विद्योपादानम् अभिजातकोविदाः जातकज्ञानपटवः सूत्यामुत्पत्तौ यथा महद्गुणानुपादिशंस्तथा तदनुसारेण महीं शशासेत्यन्वयः॥ १॥ ❀ ❀ उत्तरस्य विराटपुत्रस्य पुत्रीं नाम्नेरावतीमुपयेमे, उपयमनं विवाहः। उत्पादयत् उदपादयत् अजनयत् चतुर इति पाठः॥ २॥ ❀ ❀ शारद्वतं कृपं, यत्र येषु अश्वमेधेषु देवा इंद्रादयः अक्षिगोचराः प्रत्यक्षास्तादृशानिति शेषः॥ ३॥ ❀ ❀ स धीरः दिशां जये ओजसा स्वाभाविकशक्त्या कलिं निगृहीतवानित्यन्वयः। नृपाणां लिंगं लक्षणं धारयतीति नृपलिंगधरः तं कर्मणा शूद्रं तदेवाह पदेति, पदा गोमिथुनं घ्नंतं ताडयंतं कचिदेकांतप्रदेशे॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स उत्तरस्य तनयामिति पूर्वकथा (राज्याभिषेकात् प्राक्) ब्रह्मचर्य्ये राज्याभिषेकायोगात्॥ १-५॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

परीक्षितो दिग्विजयो धर्म्मप्रश्नः क्षितिं प्रति। तस्याः कृष्णवियुक्तायाः शोकोक्तिः षोडशेऽभवत्॥ १॥

हे विप्र! तथैव महतां गुणा यस्मिन् सः अभूत्॥ १॥ ❀ ❀ जनमेजयादीनिति। "प्रधाने कर्म्मण्यभिधेयेन्यादीनाहुर्द्विकर्म्मणा"मितिवन्नवाक्षरैकपादोऽनुष्टुब्विशेषोऽयम्॥ २॥ ❀ ❀ शारद्वतं कृपम्॥ ३-४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

"संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदय"मिति यत्प्रतिज्ञातं तत्प्रतिपाद्य "अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम्। तस्य जन्ममहाश्चर्यं कर्माणि च गृणीहि न" इति चतुर्थाध्याये प्रश्नः कृतः। पुनः "अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा। उत्तराया हतो गर्भ ईशेनाजीवितः पुनः॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः। निधनं च यथैवासीत्स प्रेत्य गतवान्यथा॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे। ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुक" इति द्वादशाध्याये प्रश्नः कृतः। तत्र द्वादशाध्याये परीक्षितो जन्म वर्णितं निधनं संक्षेपतोऽष्टादशाध्याये विस्तरतो द्वादशस्कन्धे वक्ष्यति। इदानीं तस्य कर्माणि वर्णयति तत इति चतुर्भिरध्यायैः। ततोऽभिषेकानन्तरं महांतो द्वादशाध्यायोक्ता गुणा यस्मिन्सः परीक्षित् हे विप्र! यथा सूत्यां जन्मवेलायामभिजातकोविदाः जातकर्मविदः समादिशन् तथैव द्विजवर्याणां शिक्षया महीं शशास पालयामास॥ १॥ ❀ ❀ सः उत्तरस्य वैराटेस्तनयामुपयेमे उवाह तस्यां जनमेजयादीन् उत्पादयत्। जनान् शत्रून् एजयते इति जनमेजयः॥ २॥ ❀ ❀ शरद्वतोऽपत्यं कृपं गुरुं कृत्वा गङ्गायां गङ्गातटे यत्र येषु देवा इन्द्रादयः अक्षिगोचराः प्रत्यक्षा बभूवुः तानश्वमेधान् आजहार कृतवान्॥ ३॥ ❀ ❀ कचित् स्थले गोमिथुनं स्त्रीपुंरूपयोर्गवोर्युगलम्॥ ४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

"मुक्तिर्निरूपिता पूर्वमधिकारनिरूपणे। पारलौकिकबन्धस्य निवृत्त्यै पितृहेतुतः॥
ऐहिकस्यापि बन्धस्य निवृत्तिरधुनोच्यते। अधिकारस्य सम्प्राप्त्या लोकतो बन्धसम्भवः॥
कलिदोषाश्च ते नामक्रमेणैव निवार्य्यते। प्रथमं षोडशेऽध्याये स्वाधिकारेण यद्भवेत्॥
भूधर्मरक्षा सर्वापि सामान्येन विशेषतः। निरूप्यतेऽन्यथा स्वस्य दोषः स्याद् द्विविधोऽपि हि॥
अतः पुत्रान् समुत्पाद्य धर्मरक्षा निरूप्यते। आधिदैविकरक्षार्थं कलिनिग्रह ईर्य्यते॥
स्वभावतः स्थापितोऽपि मूलदोषान्न वर्धते। मूलनिर्हरणं तस्मात् कर्तव्यमिति निश्चयः॥
आधिदैविकरूपाणां साक्षात्कारी तदा न हि। भगवच्चरितस्यापि दैविकत्वात्सदैव हि॥
अतोऽधिकारसिद्ध्यर्थं दैविकानां निरूपणम्। अनुग्रहोऽनुग्रहश्चावतदानं तथैव च॥"

एवमध्यायत्रयस्य प्रासंगिकतां ज्ञापयितुं चरित्रश्रवणफलमाह। भगवतः सर्वांशश्रवणसहितस्य सर्वश्रवणे सर्वं फलमिति अंशे खण्डशः फलमनूद्यते कचित् पूर्वसहितं, अतो नान्यानर्थक्यं वैष्णवत्वात्तेषु श्रद्धा तेषां स्वातंत्र्यादिगुणवत्त्वं सुतेऽपीति द्योतयितुं पाण्डोरित्युक्तं, ऐहिकफलं स्वस्त्ययनं पवित्रमिति। इष्टप्राप्त्यनिष्टनिवृत्तिरूपमामुष्मिकं तु भक्तिः साधनं भगवत्प्राप्तिः फलं सिद्धमिति एवं परीक्षितः पाण्डवकृतप्रकृतिबन्धनिवृत्त्यर्थं तेषां मुक्तिमुक्त्वा 'आश्चर्यवत् पश्यति

कश्चि'देनमि'ति न्यायेन 'श्रुत्वाप्येवं वेद न चैव कश्चिदि'ति निर्धाराच्च तथा श्रवणं मा भूदिति पूर्वं तस्य आधिदैविकं साक्षात्कारादिकं निरूपयितुं जातके सूचितं स्वरूपं तस्यानुवदति ततः परीक्षिदिति। "यस्त्विच्छया कृतो धर्मः" इति वाक्यात् राज्यरक्षापि स्वेच्छया न कृतेत्याह द्विजवर्यशिक्षयेति। भगवद्भक्ताः ब्राह्मणाः द्विजवर्याः तेषामेव धर्मसूक्ष्मपरिज्ञानं "नारायणपरा विप्रा धर्मं गुह्यं परं विदुरि" ति वाक्यात् बोधितस्य हृदये समागमनार्थमाह महाभागवत इति। भगवद्भक्तेषु महान् अनेन त्रयं सूचितं सर्वत्र भगवद्भजनप्रवृत्तिः भूमेर्भगवद्भार्याया अपि हेतुवशादन्यपालनमिति हेत्वाश्रयं, भगवद्भक्तानां कार्यविशेषस्य अयुक्तत्वात् भगवद्वाक्यत्वेऽपि स्वरूपाविष्टत्वात् तथात्वे वा परमभागवतत्वं न भवेदिति उभयमत्रेत्याश्रयं समर्थयितुं कालकृतं तत्र भगवत्प्रेरणयेति ज्ञापयितुमाह यथा हीति, सूत्यां जन्मकाले अभिजातं तत्र कोविदा निपुणाः विप्रेषु महान् गुणो यस्य ब्रह्मण्यतेति यावत्, अतः कालकृतशुभसिद्धिः ॥ १ ॥ ❀ ❀ इदानीं तस्य कृतस्य भूरक्षणस्यानुवृत्तिसिद्धये पुत्रानुत्पादितवानित्याह–स उत्तरस्येति। मातुलकन्यापरिणयनं लोके विहितं स्मृतौ निषिद्धं लौकिकधर्माणां दृष्टांतीकरणप्रस्तावे मातुलस्येदं योषाभाग इत्यत्र निरूपणात् "मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेदि"ति स्मृतेः, अतः केवलधर्मार्थं तादृशो विवाहो न कर्त्तव्यः। लौकिकबलशौर्याद्यपेक्षायां तु कर्त्तव्य एव। अत उत्तरस्य मातुलस्य स्वसमानबलसिद्धये इरावतीमुपयेमे। नाम्ना च वैष्णवत्वं सूचितं श्रुतौ रोदसीति कथनात् भगवत्परिपाल्यत्वं च। तस्याः पुत्रा जाताः, सुतानिति स्वतः चतुर्दिक्षु रक्षा चतुर्विधपुरुषार्थसिद्धिश्च तावतैव भविष्यतीति नाधिकोत्पादनम् ॥ २ ॥ ❀ ❀ आधिदैविकप्रकारेणाश्वमेधकरणं पूर्ववदाह आजहारेति। त्रिविधोऽपि दोषस्तावतैव निवृत्त इति। नामकरणं गंगायामिति गंगागर्भभूमौ भूरिदक्षिणानिति सभार्यादक्षिणाः पुष्टा इति ज्ञापनार्थं धौमस्य पाण्डवैकनिष्ठत्वात् कुलाचार्यः कृप एव अनेन गुरुत्वेन स्वीकृत इत्याह शारद्वतमिति। शरस्तंबे जातः कृपः भुवि दक्षिणा ब्राह्मणसम्पत्तौ याग अधिदैविको जात इत्याह–देवा यत्राक्षिगोचरा इति। हविर्भागभुजो देवाः भगवदंशभूताः आधिदैविकाः त एव वैदिकमन्त्रे प्रतिपाद्या मन्त्रप्राधान्यपक्षेण आध्यात्मिकाः त एव ज्ञानरहितैः उत्तमास्तु भगवदंशभूताः भगवानिव प्रत्यक्षाः ॥ ३ ॥ ❀ ❀ एवं सामान्यधर्मं चोक्त्वा आधिदैविकत्वख्यापनार्थं धर्मप्रतिपक्षनिग्रहमाह निजग्राहौजसेति। अन्यथा पाण्डवानामिवास्यापि शमनमुचितं स्यात्, पाण्डवैः कलिभीतैर्गतं तु अपगतमपि निजग्राह इति पुरुषोत्कर्षः। क्वचिदिति कुरुक्षेत्रे, कलेरवस्थानरूपमाह–नृपलिंगधरमिति कलेः रूपत्रयं पापः शूद्रः उभयविशिष्टो राजा आधिदैविकरूपः तदाह नृपलिंगधरमिति सुपुत्रेणापि सहिता गोर्मिथुनत्वेन व्यपदिश्यते मातरमभिगच्छंतीति श्रुतेः। अत एव कल्पितस्पर्शयोग्यं रूपं प्रदर्शितं शकटमारुह्य गां बलीवर्दं च योजयित्वा लंबमानपादेन घ्नंतम् अथवा विजित्य गोमिथुनं स्वविषये नयंतं राजा यथाधिष्ठातृचोरान्। भूवाक्यानामनुश्रवणदर्शनं चानुग्रहसामर्थ्यम् ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः।

षोडशाध्यायं विवरिषवः सङ्गतिं वक्तुं पूर्वाध्यायत्रयार्थमनुवदन्ति मुक्तिरित्यादि। पूर्वमिति। पूर्वोक्तत्वात्पूर्वमित्यर्थः। पितृहेतुत इति पितृभ्यो हेतुभ्यः। इदं पारलौकिकबन्धस्येत्यनेनान्वेति। प्रस्तुताध्यायत्रयार्थमाहुः ऐहिकेत्यादि। अमुत्रेत्यस्मिन् प्रकरणे। तेनोभयोः प्रकरणयोरेककार्यत्वं सङ्गतिरित्यर्थः। अत्राध्यायद्वयप्रयोजनमाहुः अधिकारेत्यादि। निवार्यत इति बन्धो निवार्यते। अतो द्वैविध्यादध्यायद्वयमत्रेत्यर्थः। अवान्तरार्थानस्याध्यायस्याहुः प्रथममित्यादि। यज्ञवदिति। यद्भूरक्षादिकं राजत्वाद्भवेत्, सामान्येन तन्निरूप्यते। अश्वमेधादिकं तु विशेषत इत्यर्थः। विशेषतो निरूपणप्रयोजनमाहुः अन्यथेत्यादि। द्विविध इति लौकिको वैदिकश्च। पूर्वपक्षे न्यूनत्वं लौकिको दोषः। अयाज्ञिकत्वं च वैदिक इति। आधिदैविकरक्षायाः किं प्रयोजनमत आहुः स्थापित इत्यादि। धर्म इति शेषः। मूलदोषादिति। काले धर्मः क्रियत इति तस्य मूलं कालस्तद्दोषात्। शेषं स्फुटम् ॥ १ ॥ ❀ ❀ स उत्तरस्येत्यत्र। 'मातुलस्यैव योषे'ति वाक्यस्य विधायकत्वे, समानयोगक्षेमत्वाद्धन्वन्निवेत्यादीनामपि विधायकत्वापत्तिः, तथा च सति प्रत्यक्षश्रुत्यैव सर्वनिर्वाहान्नित्यानुमेयश्रुत्यङ्गीकारो व्यासादीनां मुधैव स्यादित्यत आहुः अत इत्यादि। तथा च यत्र स्मार्त्तः प्रतिषेधः, तत्र लौकिकपरत्वेन श्रुत्याशयो व्यवस्थाप्यः। कुमारशिखाधारणवत्तत्रापि विधेरुन्नेतुं शक्यत्वात्। अन्यथोभयोर्निरवकाशत्वेनान्यतरबाधापत्तिः। यत्तु भाट्टाः मातुलकन्यापरिणयस्य केवलशिष्टाचारमूलकत्वं स्मृतिपादपञ्चमाधिकरणद्वितीयवर्णके व्यवस्थापयन्ति, तदेतेन प्रत्युक्तं ज्ञेयम्। दूरतोपि श्रुत्याश्रयाभावे केवलस्य दुर्योधनाद्याचारवद् भ्रान्ताचारत्वेनाप्रामाण्याच्छिष्टानादरणीयत्वापत्तेः। अतः श्येनादिवत्तत्करणमिति युक्तमुत्पश्यामः। नाम्नेत्यादि। इराया मुख्यासु द्वादशभगवच्छक्तिषु 'श्रिया पुष्ट्ये'ति वाक्ये गणनात्तद्रूपत्वेन तथेत्यर्थः। श्रुताविति। 'इरावती धेनुमती हि भूतसूयवसिनी मनवे यशस्ये व्यस्कभ्नाद्रोदसी विष्णुरेते' इति श्रुतौ ॥ २ ॥ ❀ ❀ आजहारेत्यत्र। पूर्ववदिति। जातकोक्तकालगुणवशात्। अनेनेति परीक्षिता। ननु पूर्वतन्त्रे देवताया मन्त्रमयत्वप्रतिपादनात् कथमक्षिगोचरत्वमित्यत आहुः हविरित्यादि। क्रियमाणा इति मन्त्रमयत्वेन क्रियमाणाः। तथा चोत्तरतन्त्रे देवताविग्रहाधिकरणे तस्या विग्रहस्थापनात्पूर्वतन्त्रं मध्यमाधिकारिपरम्। अतो न विरोध इत्यर्थः ॥ ३ ॥ ❀ ❀ निजग्राहेत्यत्र। पापाधिष्ठातृत्वादिति कलेस्तथात्वात् ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

परीक्षितो विवाहादिकर्माणि हि तु षोडशे । धर्मप्रश्नश्च भूमेश्च शोकोक्तिर्विनिरूप्यते ॥ १ ॥

तदेवं 'संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम्' इति प्रतिज्ञातं पाण्डवप्रस्थानं निरूपितम्, अथ 'परीक्षितोऽथ राजर्षेर्जन्म कर्म विलापनम्' इति यत्परीक्षिज्जन्मादित्रयकथनं तत्र जन्म पाण्डववृत्तान्ते एवान्तर्भाव्याभिहितम्, विलापनं च द्वादशस्कन्धे वक्ष्यति, इदानीमितः परं चतुरध्याय्या कर्माणि वर्णयतीति विवेकः । राज्यं प्राप्तः परीक्षित्किमकरोदित्यपेक्षायां आह–तत इति । सूत्यां जन्मदिनेऽभिजातकोविदाः जातककर्मनिपुणाः ब्राह्मणाः यथा हि समादिशन् 'पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः' इत्यादिना यथैव गुणवत्त्वेनोक्तवन्तस्तथैव महान्तो गुणा यस्मिन् सः परीक्षित् ततः पितृनिर्गमनानन्तरं द्विजवर्याणां 'नारायणपरा विप्रा धर्मं गुप्तं परं विदुः' इति वाक्याद्भक्तब्राह्मणानां शिक्षया महीं शशास पालयामासेत्यन्वयः । एवं महद्गुणत्वे 'यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः । क एव भक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः' इति वाक्याद्भगवद्भक्तिरेव हेतुरित्याशयेन विशिनष्टि–महाभागवत इति भगवद्भक्तेष्वतिश्रेष्ठ इत्यर्थः । यो हि भगवद्भक्तोत्तमस्तेन महीपालनं सम्भवति विषयाभिनिवेशाभावात्, यस्तु राज्यभोगाविष्टस्तस्य भक्तिर्न निर्वहति विरोधात् परीक्षिति तु द्वयमपीत्याश्चर्यं सूचयति–हेति ॥ १ ॥ ❀ ❀ स परीक्षिदुत्तरस्य स्वमातुलस्य तनयामिरावतीमुपयेम उदुवाह । तस्यां चेरावत्यां जनमेजयादींश्चतुरः सुतानुदपादयत् । जनमेजयादीनित्यत्राक्षराधिक्यं छान्दसम् । उत्पादयदित्यत्र अडभावश्चार्षः ॥ २ ॥ ❀ ❀ शारद्वतं कृपं गुरुं कृत्वा वृत्वा गङ्गायां गङ्गातीरे त्रीनश्वमेधानाजहार कृतवान् । तेषामश्वमेधानामुत्कर्षं दर्शयति–भूरिदक्षिणानिति । यत्र येषु अश्वमेधेषु देवा इन्द्रादयः अक्षिगोचराः प्रत्यक्षा बभूवुरिति शेषः ॥ ३ ॥ ❀ ❀ वीरः परीक्षित् दिग्विजये निमित्ते विचरन् क्वचिद्देशे ओजसा बलात्कारेण कलिं निजग्राह स्ववशीकृतवान् । किं रूपमित्यपेक्षायामाह–कर्मणा रूपेण शूद्रमपि नृपलिङ्गधरमिति । तस्य कुत्सितं शूद्रकर्म दर्शयति–पदा पादेन गोमिथुनं स्त्रीपुंसयोर्गवोर्युग्मं घ्नन्तमिति ॥ ४ ॥

हिन्दी अनुवाद

परीक्षित्की दिग्विजय तथा धर्म और पृथ्वीका संवाद

सूतजी कहते हैं—शौनकजी ! पाण्डवोंके महाप्रयाणके पश्चात् भगवान्के परम भक्त राजा परीक्षित् श्रेष्ठ ब्राह्मणोंकी शिक्षाके अनुसार पृथ्वीका शासन करने लगे । उनके जन्मके समय ज्योतिषियोंने उनके सम्बन्धमें जो कुछ कहा था, वास्तवमें वे सभी महान् गुण उनमें विद्यमान थे ॥ १ ॥ ❀ ❀ उन्होंने उत्तरकी पुत्री इरावतीसे विवाह किया । उससे उन्होंने जनमेजय आदि चार पुत्र उत्पन्न किये ॥ २ ॥ ❀ ❀ तथा कृपाचार्यको आचार्य बनाकर उन्होंने गङ्गाके तटपर तीन अश्वमेध-यज्ञ किये, जिनमें ब्राह्मणोंको पुष्कल दक्षिणा दी गयी । उन यज्ञोंमें देवताओंने प्रत्यक्षरूपमें प्रकट होकर अपना भाग ग्रहण किया था ॥ ३ ॥ ❀ ❀ एक बार दिग्विजय करते समय उन्होंने देखा कि शूद्रके रूपमें कलियुग राजाका वेष धारण करके एक गाय और बैलके जोड़ेको ठोकरोंसे मार रहा है । तब उन्होंने उसे बलपूर्वक पकड़कर दण्ड दिया ॥ ४ ॥

शौनक उवाच

कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः । नृदेवचिह्नधृक् शूद्रकोऽसौ गां यः पदाहनत् ॥ ५ ॥
तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् । अथवास्य पदाम्भोजमकरन्दलिहां सताम् ॥ ६ ॥
किमन्यैरसदालापैरायुषो यदसद्व्ययः । क्षुद्रायुषां नृणामङ्ग मर्त्यानामृतमिच्छताम् ॥ ७ ॥
इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि । न कश्चिन्म्रियते तावद् यावदास्त इहान्तकः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कस्य हेतोरिति । अयमर्थः । कलिं कस्माद्धेतोः केवलं निजग्राह न तु हतवान्यतोऽसौ शूद्रः कोऽतिकुत्सितः यो गां पदाहनदहन्निति ॥ ५ ॥ ❀ ❀ अस्य विष्णोः पदाम्भोजयोर्यो मकरन्दस्तं लिहंत्यास्वादयन्ति ये तेषां सतां महतां वा कथाश्रयमिति समासान्निष्कृष्टस्यानुषंगस्तर्हि कथ्यताम् ॥ ६ ॥ ❀ ❀ नो चेत्किमन्यैरसद्भिरालापैर्यैरायुषो वृथा क्षयः । अस्माकमयं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह सार्धाभ्याम् । क्षुद्रमल्पमायुर्येषाम् अतो मर्त्यानां मरणधर्मवताम् । तथाप्यृतं सत्यं मोक्षमिच्छताम् ॥ ७ ॥ ❀ ❀ यो मृत्युः स इह सत्रे शमितुरिदं शामित्रं कर्म पशुहिंसनं तदर्थमुपहूतः । ततः किमत आह । न कश्चिदिति ॥ ८ ॥

---

१. प्रा० पा०–विष्णु० ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शूद्रकः कुत्सार्थे कप्रत्ययः। कुत्सितत्वाद्धन्तुमेवोचित इति भावः॥ ५॥ ❀ ❀ तत्कलिनिग्रहरूपं कर्म। हे महाभागेति। श्रीकृष्णकथासेविन एव महाभागा इति भावः। "ते धन्यास्ते महाभागा येषां कृष्णकथोत्सवः" इति संहितोक्तेः। समासान्निष्कृष्टस्यापि "भीष्मद्रोणप्रमुखो ह्यन्येषां च महीक्षिताम्" इतिवत्सम्बन्धो भवत्येव क्वचित्। मदं हर्षं करोतीति मकरः पृषोदरादित्वं भावं ददातीति मकरन्दः सेवनं तं लिहन्त्यास्वादयन्तीति तेषाम्॥ ६॥ ❀ ❀ ऋतं सत्यं श्रीकृष्णं वा॥ ७॥ ❀ ❀ ततो मृत्योराह्वानात् न म्रियते इति। निर्विघ्नता सूचिता॥ ८॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

'कुत्सिते' (पा० ५।३।७४) इत्यधिकारे 'संज्ञायां कन्' (पा० ५।३।७५) इति सूत्रेण कुत्सितार्थे शूद्रशब्दात् कनि शूद्रकशब्दः साधनीय इत्याशयेनाह शूद्रकः अतिकुत्सितः शूद्र इति॥ ५-७॥ ❀ ❀ अष्टमश्लोके-"यतेत बुद्धिमान् मृत्योरभावाय पुरैव हि।" इति तृतीयचतुर्थचरणौ क्वचित् दृश्येते॥ ८-१२॥

श्रीमद्वीरराघवव्याख्या

तत्र लब्धप्रश्नावसरः पृच्छति शौनकः कस्य हेतोरिति। नृपः परीक्षिद्दिग्विजये कस्माद्धेतोः कलिं निजग्राहेत्येकः प्रश्नः, यो गां पदाहनत् तताडासौ नृपचिह्नधारी शूद्रः क इत्यपरः। यद्यपि नृपलिङ्गधरं शूद्रं कलिमिति सामानाधिकरण्यनिर्देशेनैव कलिरेव नृपदेवचिह्नधृक् शूद्र इति ज्ञात एवेति प्रश्नानुपपत्तिस्तथापि क इत्यस्य किंगुणक इत्यभिप्रायः। अतः प्रश्नोपपत्तिः॥ ५॥ ❀ ❀ तत्कलिविनिग्रहादिकं केवलमस्माभिः पृष्टमित्येव वर्णय किं हे महात्मन्! यदि विष्णुकथाश्रयं भगवत्कथोपेतमथ-वास्य विष्णोः पदाम्बुजमकरन्दास्वादिनां साधूनां कथाश्रयं स्यात्तर्हि कथ्यताम्॥ ६॥ ❀ तत्र हेतुं वदन् विष्णुवद्भक्तकथाना-श्रयाणामश्रोतव्यत्वमवर्णनीयत्वं चाह किमन्यैरिति। अङ्ग हे सूत! यद्येभ्य आयुषोऽसद्व्ययः निरर्थकः क्षयो भवति तैः क्षुद्रायुषा-मल्पायुषामृतं कर्म फलमिच्छतां मर्त्यानां मरणशीलानां नृणां सम्बन्धिभिरन्यैर्विष्णुतद्भक्तजनाकथाश्रयैरतोऽत एवासद्भिरालापैः किं वर्णितैर्वा न किंचित्प्रयोजनं किंतु केवलमायुर्व्यय एवेति भावः। यद्वा ऋतं सत्यं परं ब्रह्म इच्छतां तत्प्राप्तिं कामयमानानां मरण-शीलानामल्पायुषां नृणामस्माकमन्यैरसदालापैः किं न किंचित्प्रयोजनमस्ति, यतो येभ्यः केवलमायुषोऽसद्व्ययो भवतीत्यन्वयः॥७॥ ❀ ❀ ननु क्षुद्रायुषां मर्त्यानामस्माकं यावत्त्वत्प्रश्नवर्णनश्रवणं जीवनमप्यवसातुं शक्यमित्यत्राह इहेति। इह नैमिषक्षेत्रे शामित्र-कर्मणि सत्रकर्मणि शमिच्छब्दः पशुसंज्ञपयितृत्ववाची शमयिता च भगवानस्त्विति श्रुतेः स चेह पापापनोदकभगवद्गुणानु-भवितृपरः तत्सम्बन्धे कर्मणि सत्रकर्मणि भगवद्गुणात्मकब्रह्मसत्र इत्यर्थः, भगवान्मृत्युराहूतः स चान्तका यावदिहास्ति तावदत्र न कश्चिन्म्रियते न मरणमेति॥ ८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नृपलिंगधृग्यः शूद्रः पदा गामहनत्तं कलिं दिग्विजये निजग्राह असौ कः कष्टकर्मा इत्याक्षेपः न प्रश्नः, कलिमित्युक्त्या ज्ञातत्वेन सिद्धप्रश्नत्वापातात्॥ ५॥ ❀ ❀ विष्णुकथा आश्रयो यस्य तत् एतादृशं कलिबन्धनं चेत्तर्हि कथ्यताम्। अथ पक्षांतरे वा यदि अस्य हरेः मकरन्दकरं भावं ददातीति मकरंदः तं लिहंति आस्वादयंति तेषां कथाश्रयं तर्हि कथ्यतामित्यन्वयः॥ ६॥ ❀ ❀ किमिति विष्णुवैष्णवकथाकथनमिति तत्राह किमन्यैरिति। असदालपैरमंगलसंगैः किं प्रयोजनं न किमपि, कुतः आयुषोऽसद्व्ययः व्यर्थक्षय इति यद्यस्मादत इत्यर्थः। यद्यैरसदालापैरायुषोऽसमीचीनो व्यय इति वा। इतोऽपीतरप्रसङ्गो नापेक्षित इति ब्रूत इत्याह-क्षुद्रायुषामल्पायुषां मर्त्यानां मरणधर्मोणामत एव मृतिमिच्छतां नृणां मारकः मृत्युः भगवान् नरसिंहः शामित्रकर्मणि पशुसंज्ञपनकर्मकर्ता शमिता तस्य कर्म शामित्रं तादर्थ्ये सप्तमी शामित्रकर्मार्थमृषिभिर्नैमिषारण्यवासिभिरिहोपहूतः आहूय प्रसाद्य स्थापितः अंतं करोतीत्यंतकः स भगवान् यावदिहास्ते न तावत्कश्चिन्म्रियत इत्यन्वयः॥ ७-८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यदि कृष्णकथाश्रयं भवति तर्हि तदन्यदपि कथ्यतामित्यर्थः॥ ६॥ ❀ ❀ ऋतं परमसत्यं श्रीभगवन्तमिच्छतां क्षुद्रायुषामन्यैः किम्। ननु तादृशानां श्रीभगवत्कथाश्रवणमपि सम्पन्नं न स्यादित्याशङ्क्याह इहेति॥ ७॥ ❀ ❀ यावदिह हरिकथायामास्ते तावदिह कश्चिन्न म्रियेत। तत्रैषां श्रोतॄणां मरणनिवारणकारणं मृत्व्याह्वानं निर्विघ्नहरिकथामृतपानार्थमेवेत्याह एतदर्थमिति॥ ८-९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निजग्राह न तु हतवान्। यतोऽसौ शूद्रकः अतिकुत्सितो हन्तुमेवोचितः॥ ५॥ ❀ ❀ तत् कलिनिग्रहणं सतां कथाश्रयमित्यनेन समासगतेनाप्यन्वयः॥ ६॥ ❀ ❀ ऋतं सत्यवस्तु श्रीकृष्णमित्यर्थः। ननु नश्वरदेहानां कृष्णकथाभाग्य-

लाभोऽपि कथं सेत्स्यतीति अत आह। इह क्षेत्रे शमितुरिदं शामित्रं कर्म पशुहिंसनं तत्र तदर्थं मृत्युरुपहूतः ॥ ७ ॥ ❀ ❀ ततः किमत आह न कश्चिदिति। ततोऽपि। किमत आह अहो इति ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कस्य हेतोः कस्माद्धेतोः कलिं निजग्राह केवलं यो गां पदा पादेन अहनत् ताडितवान्। किं च शूद्रः सन् नृदेवचिह्नधृक् अतो विपरीतकारितया वध्यः, अतोऽसौ कः केन गुणविशेषेणोपेक्षित इति भावः ॥ ५ ॥ ❀ ❀ तत्कलिनिग्रहादिकृष्णस्य कथाश्रयं कथोपेतम् अथवाऽस्य कृष्णस्य पदांभोजयोर्मकरन्दः सौंदर्यरसस्तं लिहंत्यास्वादयंति ये तेषां साधूनां कथोपेतं स्यात्तर्हि कथ्यताम् ॥ ६ ॥ ❀ ❀ हे अङ्ग सूत! क्षुद्रायुषामल्पायुषां मर्त्यानां मरणधर्मिणां मध्ये ये ऋतं सत्यं भगवत्पदमिच्छन्ति तेषामृतमिच्छतां मुमुक्षूणाम् अन्यैः कृष्णतद्दासकथावर्जितैरसदालापैः किं न किमपीत्यर्थः। यत् यैरसदालापैः आयुषोऽसद्व्ययः असाधुक्षयः तस्मात् कृष्णतद्दासकथाश्रयं चेत्तर्हि कथ्यताम् ॥ ७ ॥ ❀ ❀ इह सत्रे शामित्रकर्मणि शमितुरिदं शामित्रं पश्वालंभनं कर्म तदर्थं मृत्युर्भगवानुपहूत आहूतः, अतोऽतको यावदिहास्ते तावत्कश्चिदपि न म्रियते ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इदानींतनवत् भाषापरिज्ञानेऽपि दर्शननियमादिकं संभवति अस्मिन् वाक्ये शौनकस्य संदेहो जात इति कलिरन्यः शूद्रस्त्वन्य इति तस्मिन्वा आविष्टः कलिरिति अन्यायिनं वा मारयति अवध्यमानेऽपि चकारे पदार्थद्वयकथने एकक्रियायां समुच्चयप्रतीतिः। अतः पृच्छति कस्य हेतोरिति दिग्विजये हि राज्ञां जयः कर्त्तव्यः। ननु कालस्य स्वाधारत्वात् व्यर्थश्च कलिनिग्रहः कालस्य साधारणनिमित्तत्वात् कलिनिमित्ते च राज्यस्य प्राप्तत्वात् अतो हेत्वभावात् अशक्यत्वविग्रहनिग्रहे कालनिग्रहाभावात् प्रश्नः ॥ ५ ॥ ❀ ❀ तथापि नृपः कालावच्छिन्नराजा तद्विशेषणत्वेन शूद्रमजानन्नाह नृदेवचिह्नधृगिति, शूद्रस्य कथं सवेशं कुतो वा प्राप्तः तथाभूतस्य वा कथं पदा गोताडनम्। अतः संदेहनिवारणार्थं तत् कथयेत्याह तत् कथ्यतामिति किमन्यैरसदालापैरायुषो यदसद्व्ययः निषेधार्थं संबोधयति महाभागेति महत्तव भाग्यं यत् भगवत्कथायां नियुक्तः तदभिज्ञश्च। अतः स्वार्थाविरोधित्वे कथनीयमन्यथा नेत्याह-यदि कृष्णकथाश्रयमिति कृष्णकथाया आश्रयः तत् कथायां भगवत्कथा वर्त्तते यदि तदा कथ्यतां भगवत्कथाधारत्वाभावेऽपि वस्तुतो भगवदीया ये तत्संबंधिनी अन्यथापि या कथा तदाश्रयत्वेऽपि कथ्यतामित्याह अथवेति। भक्तिरसास्वादनमित्यनेन भक्तिरसस्पर्शाभावे कथाराहित्यं तेषां सूचितं सतामित्यनेन व्यामोहनार्थमप्यन्या कथा निवारिता, पुरुषसुखं ब्रह्मसुखमर्थसुखं ददातीति मकरंदः 'गमेश्च' इति संज्ञायां खश्, भगवच्चरणारविन्दैकनिष्ठः प्रेमसेवायामाविर्भावरूपः भक्त्यैकभोग्यः विशेषतो निर्वचनाशक्यः यदर्थं सर्वोऽपि भक्तिमार्गः शास्त्रं च तदास्वादनयुक्तानां कथया शास्त्रार्थपरिज्ञानं भवति। अतः प्रमाणकथा प्रमेयकथा वा तदाश्रिता चेत् कथनीया, अन्यथा अस्यापि संदेहापादकत्वादसतः असदालापः उभयस्योभयं प्रतियोगि तादृशैः किं प्रयोजनं न चोच्छिष्टलेपः पुष्टिकर इति कालगमनमेव प्रयोजनं तत्राह-आयुषो यदसद्व्यय इति। कोटिसुवर्णैरपि यदायुःक्षणमात्रमलभ्यं तादृशस्यायुषः असद्व्ययः अन्यायव्ययः। अत आयुःक्षयकरत्वात् तन्न वक्तव्यम् ॥ ६ ॥ ❀ ❀ सत्रारंभस्त्वायुर्वृद्ध्यर्थमेवेत्याह क्षुद्रायुषामिति। अल्पायुषां प्राणिनां मरणावश्यकत्ववतां मरणक्लेशनिवृत्त्यर्थममृतमिच्छतामर्थे मृत्युरिहोपहूत इति सम्बन्धः। क्षुद्रायुषां किमन्यैरसदालापैरिति सहस्रसंवत्सरसत्रैः अमृतमाविर्भवतीति निश्चयः विद्यमानानां च मृत्युबाधरूपः आधिदैविकश्च सः। अतो यज्ञभागभोगार्थमिहोपहूतः अवस्थाभेदेन पशूनां तद्भागत्वात् मृत्युरेवोपनीयते यत्पशुरिति श्रुतेः रौद्रं गवीति न्यायेन अवस्थाभेदेनापि हविर्भोक्तृशामित्रं पशुहिंसनं तत्र कर्मणि देवमायापेक्षा सूचिता, अधर्मकोटित्वाभावाय भगवानिति ॥ ७ ॥ ❀ ❀ किमतो यद्येवं तदाह न कश्चिदिति। ततोऽपि किम् एतदर्थमिति। अहो नृलोके पीयेत हरिलीलामृतं वचः ततोऽपि किम्? एतदर्थमिति लोके कोऽपि न म्रियतामस्मत्सत्रेणाविर्भूतेनामृतेन पीतेन अमरा एव भवंतु सर्वे मध्येऽपि न म्रियंतामिति अर्थं निश्चित्य तन्निर्वाहार्थं परमर्षिभिराहूतः समर्थः भगवानिहाहूतः स चादृश्यः कथारूपेण समागतः, अत एव अहो इत्याश्चर्यं यतः लोके हरिलीलामृतं वचः पीयेत। अयमर्थः-अस्माभिः सत्रं समारब्धं स्वापकीर्तिनिवारणार्थं सत्रे हि समारब्धे सर्वे म्रियंते 'यामात्रापागुरत' इति श्रुतेः, किमेते सत्रिण इति तद्दोषपरिहारार्थमृषिभिरेवं विचारितमत्र भगवानानेतव्यः योगश्च तत्र समर्पणीयः मृत्युश्च शामित्रकर्मणि ततश्चास्मदपकीर्तिर्गमिष्यतीति तत्र भगवति तथैव संपादितं स्वयमागतः कथारूपेण च समागतस्तद्वरप्रदत्वं त्वाश्चर्यम्। अतो दृष्टद्वारैव प्राणिनाममृतं भविष्यतीति अन्यथावतारादिद्वारे अदृष्टाद्वा तत् सिद्ध्येत्, अत आश्चर्यस्य सिद्धत्वात् भगवच्चरित्रमेव वक्तव्यं त्वया नान्यदिति ॥ ८-९ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कस्य हेतोरित्यत्र। समुच्चयप्रतीतिरिति। यथा ब्राह्मणाः शूद्राः प्रवेशनीया इत्यादौ तथेत्यर्थः। अशक्यत्वं विवृण्वन्ति विग्रहेत्यादि। तद्विशेषणत्वेनेति कलिविशेषणत्वेन ॥ ५ ॥ ❀ ❀ किमन्यैरित्यत्र। उभयस्योभयं प्रतियोगीति। उक्तालापद्वयं

भगवत्तद्भक्तकथयोः प्रतिकूलतया योगिविरुद्धत्वेन सम्बन्धीत्यर्थः ॥ ७ ॥ ❀ ❀ अमृतमिच्छतामिति । एतेन मूले मर्त्यानामृतमिच्छतामित्यत्र मर्त्यादमृतमिति पाठः सुबोधिन्यां प्रतिभाति । उक्तयोजनायामर्थपदाध्याहारसम्भवात्पक्षान्तरमाहुः पूर्वेण वेति । उक्तयोजनयोर्मध्ये पूर्वैव साधीयसी उत्तरश्लोकानां स्वारस्यादिति ज्ञापयितुमग्रिमं व्याकुर्वन्ति सहस्रेत्यादि । निश्चय इति । 'विश्वसृजः प्रथमा' इत्यत्र हिरण्मयशकुनिरूपब्रह्मप्रादुर्भावश्रावणात् तथेत्यर्थः । स इति मृत्युः । ननु यज्ञे मृत्युभागः को वा सर्वहविषां तत्तदेव तत्त्वेन तत्र मृत्योरप्रवेशात् क्वचित्प्रवेशेऽप्यसार्वत्रिकत्वादित्याशङ्कायामाहुः अवस्थाभेदेनेति । तथा च नीयमानावस्थानां पशूनां तद्भागत्वात् पशुयागे तत्प्रवेशात्तथेत्यर्थः । यागान्तरेऽपि प्रवेशायाहुः रौद्रमित्यादि । तथा च घृतस्य सर्वयागेषु सत्त्वान्मृत्योरुद्रावस्थया घृतस्य गोनिष्ठत्वावस्थया च यागमात्रे तस्य तथात्वमित्यर्थः । शामित्र इति वक्तव्ये यत्कर्मपदमधिकमुक्तं तत्तात्पर्यमाहुः तत्रेत्यादि । इह भगवानाहूतः । शामित्रकर्मणि मृत्युराहूतः । इत्युभयाह्वानपक्षमङ्गीकृत्याहुः अर्थमित्यादि । अर्थं निश्चित्येति । भाविनमर्थं निश्चित्य । न कश्चिदित्यत्र । स्वापकीर्तिनिवारणार्थमिति । अत्र प्रथमश्रुतावागुरणमुक्तम्, तत्रोद्यमनम् । 'सर्वे सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरतेयाः सत्रायागुरत' इति सर्वाभ्य इत्यादौ चतुर्थी । तथा चोक्तसर्वार्थमात्मानमुद्यमयतीत्यतोपकीर्तिः । द्वितीयस्यां तु 'सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात्पृच्छति किमेते सत्रिण' इति स्फुटैवापकीर्तिरिति तदर्थं तथेत्यर्थः । एवं विचारितमित्यग्रिमेणान्वयः ॥ ८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

लब्धावसरः शौनकः पृच्छति–कस्येति । नृपः परीक्षिद्दिग्विजये कलिं वधयोग्यमपि कस्माद्धेतोः केवलं निजग्राह, न तु हतवान् ? । कुतोऽस्य वधयोग्यतेत्यत आह–असौ कलिर्नृदेवचिह्नधृक् शूद्रकः शूद्रेष्वप्यतिकुत्सितः । कथमित्यपेक्षायामाह–योऽसौ गां पदा पादेनाहनत् अहन्निति शूद्रः कोऽसौ इति पाठान्तरे तु कस्माद्धेतोरित्यस्यैव प्रश्नस्य स्फुटीकरणम् । योऽसौ गां पदाऽहन्स नृदेवचिह्नधृक् शूद्रकः कथम्भूतदोषवानित्यर्थः । किं गोमिथुनताडनदोषेणैव तं निगृहीतवान् अन्येन वेति भावः ॥ ५ ॥ ❀ ❀ भगवद्भक्तत्वात् तत्राप्यभिप्रेतमेव पृच्छतीति सूचयन् सम्बोधयति–हे महाभागेति । तत्कलिनिग्रहादिकं यदि कृष्णकथाश्रयं भगवत्कथाप्रसञ्जकं अथवाऽस्य कृष्णस्य पदाम्बुजमकरन्दास्वादिनां सतां कथाश्रयं भवेत्तर्हि कथ्यताम्, अन्यथा तु न कथनीयम् ॥ ६ ॥ ❀ ❀ कुत इत्यपेक्षायां तत्र हेतुं वदन् कृष्णतद्भक्तकथानाश्रयाणामश्रोतव्यत्वं चाह–किमिति । सूते स्वप्रीतिं सूचयन् सम्बोधयति–हे अङ्गेति । ऋतं सत्यं परं ब्रह्म इच्छतां तत्प्रीतिं कामयमानानां क्षुद्रायुषामल्पायुषां मर्त्यानां मरणधर्माणां नृणाम् अस्माकं यत् येभ्य आयुषोऽसद्व्ययः निरर्थकः क्षयो भवति तैरन्यैः कृष्णतद्भक्तकथाश्रयव्यतिरिक्तैः असद्भिर्नरकहेतुभिरालापैर्वर्णितैः श्रुतैर्वा किं प्रयोजनं ? न किञ्चित् ॥ ७ ॥ ❀ ❀ नन्वल्पायुष्ट्वादेव अस्माकं त्वत्प्रष्टकथानकश्रवणपर्यन्तं जीवनमेव कथं सम्भवतीत्याशङ्क्याह–इहेति । इह नैमिशे क्षेत्रे सत्रयागे वा शामित्रकर्मणि–शमितृशब्दः पशुसंज्ञापयितृपरः–"शमयिता च भवानस्तु" इति श्रुतेः तस्य कर्मणि पशुहिंसनरूपे कार्ये निमित्ते भगवान् भगवद्दत्तसकलजनमारणसामर्थ्यवान् मृत्युरूप उपहूत आकारितोऽस्ति स चान्तको यावदिहास्ते तावदत्र कश्चिदपि न म्रियते न मरणमेतीत्यन्वयः ॥ ८ ॥

हिन्दी अनुवाद

शौनकजीने पूछा–महाभाग्यवान् सूतजी ! दिग्विजयके समय महाराज परीक्षित्ने कलियुगको दण्ड देकर ही क्यों छोड़ दिया–मार क्यों नहीं डाला ? क्योंकि राजाका वेष धारण करनेपर भी था तो वह अधम शूद्र ही, जिसने गायको लातसे मारा था ? यदि यह प्रसङ्ग भगवान् श्रीकृष्णकी लीलासे अथवा उनके चरणकमलोंके मकरन्द-रसका पान करनेवाले रसिक महानुभावोंसे सम्बन्ध रखता हो तो अवश्य कहिये । दूसरी व्यर्थकी बातोंसे क्या लाभ । उनमें तो आयु व्यर्थ नष्ट होती है ॥ ५-६ ॥ ❀ ❀ प्यारे सूतजी ! जो लोग चाहते तो हैं मोक्ष परन्तु अल्पायु होनेके कारण मृत्युसे ग्रस्त हो रहे हैं, उनके कल्याणके लिये भगवान् यमका आवाहन करके उन्हें यहाँ शान्तिकार्यमें नियुक्त कर दिया गया है ॥ ७-८ ॥

एतदर्थं हि भगवाना[1]हूतः परमर्षिभिः । अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ९ ॥
मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै । निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ १० ॥

सूत उवाच

यदा परीक्षित् कुरुजाङ्गले[2]ऽशृणोत् कलिं प्रविष्टं निजचक्रवर्तिते ।
निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौण्डि[3]राददे ॥ ११ ॥
स्वलंकृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजमाश्रितः पुरात् ।
वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥

१. प्रा० पा०–भगवानुपहूतो महर्षिभिः । २. प्रा० पा०–ऽवसत् । ३. प्रा० पा०–शौण्ड आददे ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततोऽपि किमत आह। अहो नृलोके हरिलीलामृतं वचः पीयेतेत्येतदर्थम्। हरिलीलैवामृतं यस्मिंस्तम्॥ ९॥ ❀ ❀ तदभावे वृथैव जीवनमित्याह। मन्दस्यालसस्य। नक्तं रात्रौ यद्वय आयुस्तन्निद्रया ह्रियते। दिवा अह्नि च यद्वयस्तद्व्यर्थकर्मभिरपह्रियते॥ १०॥ ❀ ❀ तत्र तावत्कलिनिग्रहप्रसंगमाह। तदेति। यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं शुश्राव तदा तामनतिप्रियां वार्तां किंचित्प्रियां च युद्धकौतुकसंपत्तेर्निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे। संयुगे शौण्डिर्युद्धे प्रगल्भः। पाठान्तरे युद्धे शौरिः कृष्णतुल्यः॥ ११॥ ❀ ❀ ततश्च दिग्विजयाय निर्गतः॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततोऽपि मरणाभावादपि॥ ९॥ ❀ ❀ तदभावे हरिलीलामृतपानाभावे। अत्र केचिदर्द्धश्लोकमधिकं पठन्ति। "यस्मिन्पीते कृतं सर्वमिष्टापूर्तादिकं भवेत्" इति "नृलोक एतदेव सारम्" इति मन्दस्यापि प्रज्ञाबाहुल्यादनेकशास्त्रश्रवणादिना शुभं स्यादित्यत आह-मन्दप्रज्ञस्येति। व्यर्थकर्मभिर्हिरण्याद्यर्थान्वेषणकर्मभिः। चो हेतौ। तस्मान्निद्रादिजयेन हरिकथा त्वया कथ्यतामिति भावः॥ १०॥ ❀ ❀ तत्र तावदिति वाक्यालंकारे। "चक्रः कोके पुमान्क्लीबं व्रजे सैन्यरथांगयोः। राष्ट्रे दम्भान्तरे कुंभकारोपकरणास्त्रयोः" इति मेदिनी। शुश्रावेति शेषः। अनतिप्रियां राष्ट्रविप्लवरूपां दुष्टनिग्रहार्थमित्युक्त्या कलिनिग्रह एवायाति। तस्य स्वयं दुष्टत्वादन्येषां दुष्टतापादकत्वाच्च। पाठांतरे संयुगशौरिरिति पाठे। शौरिः श्रीकृष्णः॥ ११॥ ❀ ❀ ततश्च शरासनग्रहणोत्तरञ्च मृगेन्द्रध्वजं सिंहलाञ्छनध्वजम्। चतुरंगिण्या सेनया॥ १२॥

श्रीमद्वीरराघवव्याख्या

किमर्थमाहूत इत्यत्राह एतदर्थमत्रावस्थितानामस्माकं मरणार्थमेव हि परमर्षिभिर्भगवान् मृत्युराहूत इत्यर्थः। मृत्य्वर्थः- मृत्युरपि स्वव्यापारं विहाय भगवद्गुणश्रवणायेह न किंचिदपि हन्यादित्यभिप्रायेणाहूत इति भावः। तत्कथ्यतां महाभाग! इत्यादिश्लोकद्वयेन तद्भक्तकथाश्रवणस्यैव वर्णनीयत्वं श्रोतव्यत्वं चोक्तं तदेव सहेतुकमुपपादयति अहो इति सार्द्धेन। नृलोके हरेर्लीला यस्मिन्प्रतिपाद्यास्तद्धरिलीलं तदमृततुल्यं वचः पीयेत पावकं श्रोतव्यमिति यावत् ये पिबंति तानभिनन्दति अहो इति, तेषां भाग्यमेतावदिति वक्तुमशक्यमिति भावः॥ ९॥ ❀ ❀ कुतः यद्यस्मान्मन्दस्य मन्दचेष्टस्य मन्दा प्रज्ञा बुद्धिर्यस्य मन्दमल्पमायुर्यस्य तस्य हरिलीलामृतं वचोऽशृण्वतो वयः कौमारादि केवलं नक्तं रात्रौ निद्रया ह्रियते ह्रस्यते, दिवाहनि तु व्यर्थैः पुरुषार्थशून्यैः कर्मभिः सांसारिककर्मभिः ह्रियते। हरिलीलामृतं वचः पिबतस्तु वयः सफलमिति भावः॥ १०॥ ❀ ❀ इत्थमापृष्टः सहेतुकं कलिनिग्रहादिकं वर्णयति सूतो यदेत्यादिना यावत्सप्तदशाध्यायसमाप्ति। यदा परीक्षिद्दिग्विजयार्थं गतः कुरूणां जांगलेषु च जनपदे वसन्निजचक्रेण स्वाज्ञाचक्रेण वर्तितेऽनुशिष्टे देशे स्वसेनाधिष्ठिते देशे वा प्रविष्टं कलिं तत्प्रवेशरूपामत्यन्तमप्रियां वार्तां निशम्याकर्ण्य ततः संयुगे युद्धे शौंडिः प्रवीणो राजा शरासनं धनुराददे जग्राह। निजचक्रवर्तिते कुरुजांगले वसन्निति वान्वयः॥ ११॥ ❀ ❀ ततः सुष्ठ्वलंकृतं श्यामैस्तुरंगैः संयोजितं मृगेन्द्रः सिंहोंकितो ध्वजो यस्मिंस्तं रथमाश्रितोऽधिष्ठितः तथा चतुरङ्गयुक्तया सेनया परिवृतो दिग्विजयाय निर्गतः। कुरुजांगलादिति शेषः॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनेन प्रकृते किमायातमिति तत्राह एतदर्थमिति। अतः संप्रति नृलोके मृत्युभयविधुरतया स्थितैर्मर्त्यैर्लीलामृतं वचः पीयेतैतदर्थं हि परमऋषिभिरिहाहूतः। अहो आश्चर्यं मरणधर्मिणामपि हरिलीलाऽमृतत्वपदं हि यस्मात्तस्माद्विष्णुवैष्णवकथाश्रयं चेत्तत्कथ्यतामिति भावः॥ ९॥ ❀ ❀ यथा मर्त्यस्यासत्प्रसंगात् आयुषो वैयर्थ्यं तथा निद्राद्यर्थादिपरस्यापीत्याह मंदस्येति। अल्पस्यापि प्रज्ञाबाहुल्यादनेकवेदशास्त्रतदर्थग्रहणं स्यादित्यतो मंदप्रज्ञस्येति, मंदप्रज्ञस्य कल्पायुषस्तत् स्यादित्यतो मंदायुष इति अल्पायुषोऽपि भाग्यवशात्तत्स्यादित्यतो मंदस्येति मंदस्य निर्भाग्यस्य एवंविधस्य मर्त्यस्य नक्तं रात्रिः निद्रया ह्रियते, हिरण्याद्यर्थान्वेषणकर्मभिर्दिवा दिनमपि ह्रियते। चशब्दो हेत्वर्थे, तस्मान्निद्रादिजयेन हरितत्परायणकथाऽत्र त्वया कथ्यतामिति भावः। वै इत्यनेनानुभवसिद्धमेतदिति दर्शयति सत्रदिदृक्षयात्रागतैर्मर्त्यैश्चाकर्ण्यताम्। मृत्यावत्रसद्भिर्वेत्यस्मिन्नर्थे आद्यश्चशब्दः॥ १०॥ ❀ ❀ कुरुजांगले कुरुविषये हस्तिनापुरे वसन् परीक्षिद्यदा निजचक्रवर्तिते निजचक्रेण स्वानुज्ञया निजानां पांडवानामाज्ञया वर्तिते राष्ट्रे प्रविष्टं कलिं शुश्रावेति शेषः, ततस्तदा संयुगरोचियुद्धेच्छुः राष्ट्रविप्लवरूपामनतिप्रियां वार्तां निशम्य शरासनमादद इत्यन्वयः। संयुगं रोचयतीति धनुर्विशेषणं वा॥ ११॥ ❀ ❀ श्यामैर्नवसु वीथिषु विशिष्टगतिभिः नीलवर्णैर्वा तुरंगैर्योजितं मृगेंद्रो ध्वजे यस्य स तथा तं सिंहलांछनध्वजं रथाश्च अश्वाश्च द्विपाश्च पत्तयश्च रथाश्वद्विपपत्तयः तैर्युक्तया पुरान्निर्गतोऽभूदित्यन्वयः॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अनतिप्रियाम् अतिशयेनाप्रियामित्यर्थः। टीकायां दुष्टनिग्रहार्थमादद इति तन्निग्रहेणैव कलिनिग्रहः स्यादित्यभिप्रायात् ॥ ११॥ ❀ ❀ अत एव दिग्विजयाय तत्तद्दिक्स्थितदुष्टराजादिवशीकाराय॥ १२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्यथा आयुषो वैयर्थ्यमित्याह मन्दस्येति ॥ १० ॥ ❀ ❀ यदा निजचक्रवर्त्तिते स्वसेनया पालिते देशे कलिं प्रविष्टमेव अनतिप्रियां वार्त्तां तज्जिघांसया किञ्चित् प्रियां च निशम्य शरासनम् आददे तदैव पुरात् दिग्विजयाय निर्गत इत्यन्वयः । अत्र प्रविष्टः कलिरेवानतिप्रिया वार्त्तेत्यनुवादविधेयभावो विवक्षितो ज्ञेयः । शौण्डिः (शौण्डः) प्रगल्भः । संयुगशौरिरिति पाठे संयुगे शौरितुल्यः ॥ ११-१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मृत्युप्रतिकारप्रयोजनमाह एतदर्थमिति अर्थमाह-हरिलीलैवामृतं यस्मिन् तद्वचः अहो नृलोके पीयेतेति ॥ ९ ॥ ❀ ❀ अन्यथा तु जीवनं निष्फलमित्याह मन्दस्येति । मन्दस्य प्रज्ञोत्पादने शिथिलप्रयत्नस्य मन्दप्रज्ञस्य मन्दा श्रोतव्याश्रोतव्यविवेकहीना प्रज्ञा यस्य मन्दायुषः अल्पायुषः तादृग्वचोऽशृण्वतः वय आयुर्नक्तं रात्रौ निद्रया दिवाऽहनि व्यर्थकर्मभिर्ह्रियते ॥ १० ॥ निजचक्रवर्तिते निजचक्रेण सेनात्मकेन आज्ञात्मकेन वा वर्तिते यदा कलिं प्रविष्टमशृणोत् शुश्राव तदाऽनतिप्रियां वार्तां निशम्य ततः हेतोः संयुगशौंडिः युद्धे प्रगल्भः शरासनमाददे ॥ ११ ॥ ❀ ❀ ततो दिग्विजयाय निर्गतः ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु ते स्वत एव स्वमृत्युं निवारयिष्यंति किं भवत्प्रयासेनेत्यत आह मन्दस्येति । मंदस्य अलसस्य अनेन कर्माभावः सूचितः, मंदा प्रज्ञा यस्येति ज्ञानाभावः, मंद आयुर्यस्येति भक्त्यभावः, तस्य नक्तं वयः रात्रिसंबंधि आयुः निद्रया ह्रियते दिवा चायुः व्यर्थकर्मभिरिति, अतः सर्वस्याप्यायुषोऽन्यत्र विनियोगात् न तेषां सामर्थ्यम् ॥ १० ॥ ❀ ❀ भगवत्कथाश्रयत्वं कलिनिग्रहस्य मत्वा तस्य प्रस्तावनामाह यदा परीक्षिदिति । कुरुजांगले देशे हस्तिनापुरे अवसत् तदा निजचक्रवर्तिते कलिं प्रविष्टं श्रुत्वा शरासनमादद इति संबंधः । सन्निति पाठे भवतीत्यर्थात् योजनीयम् । अभूदिति वा पांडवैरेव राज्यस्य साधितत्वात् निष्कंटके राज्ये स्वयमुपविष्टो नाममात्रेण राजेति हृदये दुःखमासीत् , तत्कलिप्रवेशे श्रुते विशेषतः शिक्षणे समागत इति प्रोत्साहो जातः, तथापि राज्ये अधर्मः प्रविष्ट इति अनतिप्रिया वार्ता राजाज्ञाकरणे कलिस्तत्प्रयोजकः तदकरणे त एव मारणीयाः दैत्यपक्षपाताभावे हृदयपूर्वकालोल्लंघनासामर्थ्यात् तस्मात् दैत्यवधेन दोष इति संयुगशौण्डिः युद्धशूरः शरासनमाददे । दूरादेव तान् मारयिष्यामीति देवाश्वानां दैत्याभिमुखता न संभविष्यतीति श्यामतुरङ्गयोजितं रथमारुरुहे ॥ ११ ॥ ❀ ❀ राजत्वज्ञापनाय स्वलंकृतमिति रथादिघटितं मृगेंद्रध्वज इति स्वस्यासाधारणं चिह्नं कलिश्च गजरूप इति गर्दभयुक्तो वा सिंहरूपेण भगवता दैत्येंद्रवधाद्वा पुमानिति असहायशूरत्वं पुरादिति पाठे नगरात् युद्धार्थमेव निर्गतः, ननु विचारं कृतवानिति दिग्विजये कृतेऽन्यदांतरालिकं स्वयमेव भविष्यतीति दिग्विजयायेत्युक्तम् । अस्य जंबूद्वीपाधिपत्यं तस्य नव खण्डाः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

मन्दस्येत्यत्र । सामर्थ्यमिति मृत्युनिवारणसामर्थ्यम् ॥ १० ॥ ❀ ❀ यदेत्यत्र । कलिनिग्रहस्येति कथ्यमानस्य तस्येत्यर्थः । यदा परीक्षिदित्यत्र कलिप्रवेशकथनादुक्तमेव ॥ ११ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

हीत्यवधारणे । एतदर्थमेव भगवान् मृत्युः परमर्षिभिराद्धयानसमर्थैरत्राहूतः । एतदिति किमित्यपेक्षायामाह-अहो इति । अत्याश्चर्यभूतं हरिलीलामृतं वचो नृलोके जनः पीयेतेत्येतदर्थे ॥ ९ ॥ ❀ ❀ तद्विना तु परमपुरुषार्थहेतुरपि मनुष्यायुर्व्यर्थमेव यातीत्याह-मन्दस्येति, मन्दस्य पूर्वसुकृतरहितस्य मन्दभाग्यस्येत्यर्थः । पूर्वसुकृताभावेऽपि भगवल्लीलामृतपाने प्रवृत्तिः कुतो नेत्यपेक्षायां 'जन्मान्तरसहस्रेषु योगध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इति वचनात् सुकृतं विना चित्तविशुद्ध्यभावात् तद्दोषेण न तत्प्रवृत्तिरित्याशयेनाह-मन्दप्रज्ञस्येति । इत्थम्भूतस्यापि कदाचिद् बुद्धिवैमल्यं स्यात्तदा तत्पानेन कृतार्थता स्यादित्याशङ्क्याह- मन्दायुषश्चेति । वै निश्चयेनैवम्भूतस्य हरिलीलैवामृतं यस्मिंस्तद्वचोऽशृण्वतो नक्तं रात्रौ यद्वयस्तन्निद्रया ह्रियते ह्रस्यते, दिवा अहनि च यद्वयस्तत्तु व्यर्थैः पुरुषार्थशून्यैः सांसारिककर्मभिर्ह्रियते । हरिलीलामृतं पिबतस्तु वयः सफलमित्यर्थादायाति ॥ १० ॥ ❀ ❀ इत्थमापृष्टः सूतः सहेतुकं कलिनिग्रहादिकं वर्णयति-यदेत्यादिना यावत्सप्तदशाध्यायसमाप्ति । कुरुजाङ्गले हस्तिनापुरे वसन् परीक्षित् निजचक्रवर्त्तिते स्वसेनापालिते देशे कलिं प्रविष्टं निशम्य श्रुत्वा तत्र तत्प्रवर्तितां नातिप्रियां अनृतवञ्चनहिंसनादिरूपां वार्तां च निशम्य ततस्तदनन्तरं तन्निग्रहाय यदा शरासनं धनुः आददे निजग्राह तदा रथमास्थितो रथादिचतुरङ्गयुक्तया स्वसेनया वृतश्च दिग्विजयाय स्वपुरान्निर्गत इति द्वयोरन्वयः । तस्य भयाभावं सूचयन्नाह-संयुगशौण्डिरिति, युद्धे शूर इत्यर्थः । अत एव युद्धकौतुकहेतुत्वात् किञ्चित्प्रियामपीत्यनतिशब्देन सूचितम् । रथं वर्णयति-सुष्ठ्वलंकृतम् । श्यामैः तुरङ्गैर्योजितम् । मृगेन्द्रः सिंहस्तेनाङ्कितो ध्वजो यस्मिंस्तम् ॥ ११-१२ ॥

हिन्दी अनुवाद

जबतक यमराज यहाँ इस कर्ममें नियुक्त हैं, तबतक किसीकी मृत्यु नहीं होगी। मृत्युसे ग्रस्त मनुष्यलोकके जीव भी भगवान्‌की सुधातुल्य लीला-कथाका पान कर सकें, इसीलिये महर्षियोंने भगवान् यमको यहाँ बुलाया है ॥ ९ ॥ ❀ ❀ एक तो थोड़ी आयु और दूसरे कम समझ। ऐसी अवस्थामें संसारके मन्दभाग्य विषयी पुरुषोंकी आयु व्यर्थ ही बीती जा रही है-नींदमें रात और व्यर्थके कामोंमें दिन ॥ १० ॥ ❀ ❀ सूतजीने कहा-जिस समय राजा परीक्षित् कुरुजाङ्गल देशके सम्राट्के रूपमें निवास कर रहे थे, उस समय उन्होंने सुना कि मेरी सेनाद्वारा सुरक्षित साम्राज्यमें कलियुगका प्रवेश हो गया है। इस समाचारसे उन्हें दुःख तो अवश्य हुआ; परन्तु यह सोचकर कि युद्ध करनेका अवसर हाथ लगा, वे उतने दुःखी नहीं हुए। इसके बाद युद्धवीर परीक्षित्‌ने धनुष हाथमें ले लिया ॥ ११ ॥ ❀ ❀ वे श्यामवर्णके घोड़ोंसे जुते हुए, सिंहकी ध्वजावाले सुसज्जित रथपर सवार होकर दिग्विजय करनेके लिये नगरसे बाहर निकल पड़े। उस समय रथ, हाथी, घोड़े और पैदल सेना उनके साथ-साथ चल रही थी ॥ १२ ॥

भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून् । किम्पुरुषादीनि वर्षाणि विजित्य जगृहे बलिम् ॥ १३ ॥
तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् । प्रगीयमाणं च यशः कृष्णमाहात्म्यसूचकम् ॥ १४ ॥
आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः । स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥ १५ ॥
तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः । महाधनानि वासांसि ददौ हारान् महामनाः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः समुद्रलग्नानि वर्षाणि। मेरोः सर्वत इलावृतम्। तत उत्तरतो रम्यकं हिरण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं च तानि विजित्य ॥ १३ ॥ ❀ ❀ प्रगीयमाणं यशः। यश आदीनि शृण्वंस्तेभ्यो ददाविति तृतीयेनान्वयः ॥ १४-१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बलिं करम्। "बलिः पूजोपहारयोः" इति विश्वः ॥ १३ ॥ ❀ ❀ तत्र तत्र वर्षेषु स्वपूर्वेषां पांडवानाम् ॥ १४ ॥ ❀ ❀ कथं माहात्म्यं सूच्यत इति। तत्किञ्चिदाह-आत्मानमिति। तेषामुभयेषाम् ॥ १५ ॥ ❀ ❀ क्वचित्पुस्तके-"यत्किंचिदस्य सैन्येषु वसुमात्रमनुत्तमम्। तत्सर्वमददात्प्रीतः कृष्णगाथाहृताशयः" इति प्रक्षिप्तश्लोकोऽप्यस्ति। तेभ्य इत्यादिश्लोकात्परत्र तेभ्यो गायकेभ्यः ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

भद्राश्वादीनि। अत्रादिपदात् केतुमाल-भारतवर्ष-उत्तरकुरुवर्षाणां ग्रहणम्। पूर्वपश्चिमदक्षिणोत्तरतः मेरोरिति शेषः। समुद्रलग्नानि पार्श्वे इति शेषः। तत इलावृतात् इति भावः। एतद्विशेषः पञ्चमस्कन्धीयषोडशाध्यायादौ द्रष्टव्य इति ॥ १३-१६ ॥

श्रीमद्वीरराघवव्याख्या

भद्राश्वादिवर्षाणि निर्जित्य बलिं करं जगृहे ॥ १३ ॥ ❀ ❀ तत्र तत्र देशेषु स्वपूर्वेषां युधिष्ठिरादीनां महात्मनां कृष्णस्य भगवतो माहात्म्यसूचकं प्रगीयमाणं यशः ॥ १४ ॥ ❀ ❀ अश्वत्थाम्नो ब्रह्मास्त्रतेजसा परिश्रान्तमात्मानं च वृष्णीनां पार्थानां च केशवे कृष्णे स्नेहमनुरागं च तथा तेषां तस्मिन् भक्तिं चोपशृण्वन् ॥ १५ ॥ ❀ ❀ नितरां हृष्टः प्रीत्या उज्जृम्भिते लोचने यस्य स महामना उदारबुद्धिर्वदान्यो राजा तेभ्यः श्रावयितृभ्यः महाधनानि बहुमूल्यद्रव्याणि वासांसि हारान्मुक्ताहारांश्च ददौ ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स परीक्षित् भद्रश्वादिवर्षाणि उत्तरकुर्वादिजनपदान् च विजित्य बलिं करं जगृह इत्यन्वयः ॥ १३ ॥ ❀ ❀ स महामनास्तत्र तत्र वर्षेषु विषयेषु च स्वपुरतो गायकैरुपगीयमानं कृष्णमाहात्म्यसूचकं महात्मनां स्वपूर्वेषां पाण्डवानां माहात्म्यमुप-

---

१. प्रा० पा०-गीयमानं च पुरतः। २. प्रा० पा०-सूचनम्।

शृण्वानः उपशृण्वन् ॥ १४ ॥ ❀ ❀ कथं माहात्म्यं सूच्यत इति तत्किंचिदाह आत्मानमिति । अश्वत्थाम्नोऽस्त्रतेजसः कृष्णेन परिरक्षितमात्मानं च वृष्णीनां पांडवानां मिथः स्नेहं च उभयेषां कृष्णे भक्तिं च शृण्वन् ॥ १५ ॥ ❀ ❀ तेभ्यो गायकेभ्यः परमसंतुष्टोऽत एव प्रीत्या उज्जृम्भिते विकसिते लोचने यस्य स तथोक्तः महाधनानि अनर्घ्याणि वस्त्राणि हारान् मौक्तिकमालास्तेभ्यो ददावित्यन्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततश्च तत्प्रभावेण निहृतत्प्रभावे सति भारतवर्षमात्राधिकारिणि कलौ प्रसङ्गतो भद्राश्वादीन्यपि जेतुं गतः । क्रमस्त्वत्र न विवक्षितः ॥ १३-१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आदिना हरिप्रभृतिवर्षग्रहणम् ॥ १३ ॥ ❀ ❀ तत्र तत्र यशआदि शृण्वानस्तेभ्यो ददाविति तृतीयेनान्वयः ॥ १४-१५ ॥ ❀ ❀ महामना अतिवदान्यः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तत्र प्रथमं परितः परिभ्रमणं कृतवान् । तत्र पश्चिमभागे भद्राश्वं नाम वर्षं केतुमालं पूर्वभागे भारतदक्षिणतः उत्तराः कुरवः उत्तरभागे अन्ये मध्यस्थाः किंपुरुषादयः । नवखण्डजयं कृत्वा स्वाज्ञां प्रचारितवान् । तत्र प्रमाणं बलिं गृहीतवानिति कलिस्त्वांतरालिक इति ज्ञापनार्थं प्रथमं तत्र भगवद्भक्तिः स्थितेति निरूपयति । यत्रैव गच्छति तत्रैव रथेनार्जुनस्य गतिं शृणोति तत्रत्याः कृष्णं दृष्टवंतः माहात्म्यं च गायंति पांडवभगवत्संबंधं च जानंति अतः परमेनं च ते जानंति ब्रह्मास्त्रतो भगवता परिपालितं स्नेहं च यावत् जानंति तावत्सर्वं गायंति । अतः प्रगीयमाणं शृण्वानः संहृष्टः तेभ्यो ददाविति संबंधः । अनेन प्राप्तस्य भागस्य तत्रैव विनियोग उक्तः, मात्सर्याभावश्च गुणपूर्वं धर्मस्थापनं चोक्तं प्रीत्युज्जृम्भितलोचन इति । तेषामपराधसहनमपि सूचितं महामना इति स्वकृतार्थता वा । एवं वर्त्तमाने किंचिदाश्चर्यं वृत्तं तद् वक्ष्यति मध्ये सारथ्येति श्लोकः प्रायेण विगीतः । तं केचन श्रुत्वेति पदमध्याहृत्य सेवादीनि कृतवानित्यर्थं व्याख्याय योजयंति । जगत्कर्तृक[illegible]प्रणतिं च श्रुत्वेति जगत्प्रणतस्येति पाठः । एवं कलिकार्यं दूरीकृत्य जगति धर्मं स्थापयित्वा विष्णुभक्तिं च कलिनिग्रहार्थम् ॥ १३-१७ ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न (सं०)

श्रीगिरिधरकृता बालप्रबोधिनी

भद्राश्वं नाम वर्षं पूर्वसमुद्रलग्नं, केतुमालं पश्चिमसमुद्रलग्नं वर्षम्, भारतं दक्षिणसमुद्रलग्नम्, उत्तराः कुरव उत्तरसमुद्रलग्नम्, मध्ये मेरोः सर्वत इलावृतम्, तत उत्तरतो रम्यकं हिरण्मयं च, दक्षिणतो हरिवर्षं किम्पुरुषं च, जम्बुद्वीपाधिपतित्वादेतानि तद्वर्षाणि विजित्य बलिं करं जगृहे ॥ १३ ॥ ❀ ❀ तत्र तत्र देशे प्रगीयमाणं स्वपूर्वेषां युधिष्ठिरादीनां तथा महात्मनां अन्येषां भगवद्भक्तानां कृष्णमाहात्म्यसूचकं यश उपशृण्वानः शृण्वन् ॥ १४ ॥ ❀ ❀ अश्वत्थाम्नो ब्रह्मास्त्रतेजसः सकाशादात्मानं कृष्णेन परित्रातं परिपालितं शृण्वन् । वृष्णीनां यादवानां पार्थानां च परस्परं स्नेहं च शृण्वन् । तेषां यादवपाण्डवानां केशवे को ब्रह्मा ईशो महादेवस्तयोर्वं सुखं यस्मात्तस्मिन् कृष्णे भक्तिं च शृण्वन् ॥ १५ ॥ ❀ ❀ परमसन्तुष्टो राजा तेभ्यः पूर्वोक्तयशआदि श्रावयितृभ्यो महाधनानि बहुमूल्यद्रव्याणि वासांसि मुक्तादिहारांश्च ददाविति त्रयाणामन्वयः । परमसन्तोषे चिह्नमाह-प्रीत्या उज्जृम्भिते प्रफुल्ले लोचने यस्य स इति । एवं सन्तुष्टोऽपि कदर्यश्चेत् कथं दद्यादिति शङ्कानिरासायाह-महामना इति, उदारबुद्धिरित्यर्थः ॥ १६ ॥

हिन्दी अनुवाद

उन्होंने भद्राश्व, केतुमाल, भारत, उत्तरकुरु और किम्पुरुष आदि सभी वर्षोंको जीतकर वहाँके राजाओंसे भेंट ली ॥ १३ ॥ ❀ ❀ उन्हें उन देशोंमें सर्वत्र अपने पूर्वज महात्माओंका सुयश सुननेको मिला । उस यशोगानसे पद-पदपर भगवान् श्रीकृष्णकी महिमा प्रकट होती थी ॥ १४ ॥ ❀ ❀ इसके साथ ही उन्हें यह भी सुननेको मिलता था कि भगवान् श्रीकृष्णने अश्वत्थामाके ब्रह्मास्त्रकी ज्वालासे किस प्रकार उनकी रक्षा की थी, यदुवंशी और पाण्डवोंमें परस्पर कितना प्रेम था तथा पाण्डवोंकी भगवान् श्रीकृष्णमें कितनी भक्ति थी ॥ १५ ॥ ❀ ❀ जो लोग उन्हें ये चरित्र सुनाते, उनपर महामना राजा परीक्षित् बहुत प्रसन्न होते; उनके नेत्र प्रेमसे खिल उठते । वे बड़ी उदारतासे उन्हें बहुमूल्य वस्त्र और मणियोंके हार उपहाररूपमें देते ॥ १६ ॥

सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् ।
स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविन्दे ॥ १७ ॥
तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहम् । नातिदूरे किलाश्चर्यं यदासीत् तन्निबोध मे ॥ १८ ॥
धर्मः पदैकेन चरन् विच्छायामुपलभ्य गाम् । पृच्छति स्माश्रुवदनां विवत्सामिव मातरम् ॥ १९ ॥

धर्म[2] उवाच

कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन ।
आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कञ्चनाम्ब ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च स्निग्धेषु पाण्डवेषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षिद्विष्णोश्चरणारविन्दे भक्तिं करोति स्म। पारषदमिति रेफषकारयोर्विश्लेषश्छान्दसः। तत्र पार्षदं सभापतित्वम्। सेवनं चित्तानुवृत्तिः। वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणम् ॥ १७ ॥ ❀ ❀ वृत्तिमनुवर्तमानस्य सतः। नातिदूरे शीघ्रमेव ॥ १८ ॥ ❀ ❀ धर्मो वृषरूपः। विच्छायां हतप्रभाम्। गां गोरूपां पृथ्वीम्। विवत्सां नष्टापत्याम् ॥ १९ ॥ ❀ ❀ ते आत्मनो देहस्य यद्यपि बहिरामयो न लक्ष्यते तथाप्यन्तर्मध्ये आधिः पीडा यस्यास्तां त्वामालक्षये केन यतो विच्छायासि। अत ईषन्म्लायता वैवर्ण्यं भजता मुखेन लिंगेन तत्र कारणानि कल्पयन्पृच्छति दूरे बन्धुमित्यादिपंचभिः। दूरे स्थिते बन्धुम् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भक्तवात्सल्यमाह–किं चेति। शृण्वन्निति शेषः ॥ १७ ॥ ❀ ❀ तस्य परीक्षितः पूर्वेषां पित्रादीनां वृत्तिं वृत्तमाचरितमिति यावत्। नातिदूरेऽस्मद्दृष्टिगोचर एव। निबोध शृणु ॥ १८ ॥ ❀ ❀ धर्म इति। युगारम्भक्षणत एव धर्मपृथ्वीकलयस्तथाभूतीभवन्तो लोकैरदृश्या अपि दिदृक्षणीयत्वादनुध्यायतः परीक्षितो योगजनेत्राभ्यां दृष्टा ज्ञेयाः। यथा कश्चिन्नष्टापत्यां स्वमातरं पृच्छति तथाऽपृच्छदित्यन्वयः ॥ १९ ॥ ❀ ❀ हे भद्रे इति। "भद्रा गौर्गोमतल्लिका" इत्यभिधानात्। भद्ररूपायास्तवैतन्नोचितमधुना तव भद्रमेवाहं कारयिष्यामीति भावः। हे अम्बेति "पुत्राणां हि परो धर्मो मातुराश्वासनं सदा" इत्युक्तेरहं तव पुत्रीभूतोऽस्म्यतो मदग्रे त्वया स्वदुःखमावेद्यमिति भावः ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

छान्दस इति। छान्दसत्वाश्रयणं प्रायशश्छन्दोऽनुरोधेनेति चिन्त्यम् ॥ १७-३४ ॥

श्रीमद्वीरराघवव्याख्या

स्निग्धेष्वनुरक्तेषु पाण्डुषु युधिष्ठिरादिषु विष्णोः श्रीकृष्णस्य सारथ्यादिकं जगत्कृतं प्रणामञ्च स्मृत्वेति शेषः, नृपतिः परीक्षिद्विष्णोश्चरणारविन्दे भक्तिं करोति स्म चकारेत्यर्थः। तत्र सारथ्यं प्रसिद्धं पारषदं सभ्यत्वं सेवनं भृत्यकर्म दौत्यं दूतकर्म वीरासनानुगमनं नृपासनाधिष्ठितं प्रत्यनुवर्त्तनं स्तवनं स्तुतिकर्म प्रणामो नमस्कारः विष्णुकर्तृकान्यविषयानेतान् स्मृत्वेत्यर्थः ॥ १७ ॥ ❀ ❀ तस्य परीक्षितः पूर्वेषां युधिष्ठिरादीनां वृत्तिमन्वहं वर्त्तमानस्य सतः तस्य नातिदूरे सन्निकृष्टदेशे यन्महदाश्चर्यमासीत्कथयिष्यतो मे मत्तः निबोध शृणु ॥ १८ ॥ ❀ ❀ धर्म इति धर्मः धर्माधिदेवो वृषरूपधर एकेन पदेन चरन् विच्छायां निस्तेजस्कां गां गोरूपधरां वत्सरहितां मातरमिवाश्रूणि वदने यस्यास्तां पृच्छति स्माप्रच्छत् ॥ १९ ॥ ❀ ❀ प्रश्नमेवाह कच्चिदित्यादिभिः षड्भिः। हे भद्रे! तवात्मनः देहस्यानामयमारोग्यमस्ति कच्चित्? ईषन्म्लायता हर्षक्षयमुपगतेन मुखेन विच्छाया निस्तेजस्का भवसि। अहं तु भवतीं त्वामन्तरा हृदयमध्ये आधिः क्लेशो यस्यास्तथाभूतामालक्षये म्लानविच्छायामुत्पश्यामि हे अम्ब! कंचन दूरस्थं बन्धुं शोचसि ॥ २० ॥

---

१. प्रा० पा०—स । २. प्राचीने पाठे 'धर्म उवाच' नास्ति ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नृपतिः परीक्षित् कृष्णे स्निग्धेषु पांडुपुत्रेषु मुक्तामुक्तप्रपंचप्रणतस्य विष्णोः सारथ्यादिना अहो हरिश्चरणनतजनतासु करुणार्णवो नन्विति तस्य चरणारविंदे विशेषतो भक्तिं करोतीत्येकान्वयः । सारथेः कर्म सारथ्यं पार्षदं सभापतिकर्म द्वाःस्थत्वं वा परिषदां कर्मेति वा सेवनं मुक्तकर्मकरणं सख्युः कर्म सख्यं दूतस्य कर्म संदेशहरत्वं दौत्यं, वीरासनं रात्रौ खड्गपाणिः स्थित्वा स्वामिरक्षार्थं जागरणं वीरोचितासनं गच्छतः पृष्ठतो गमनमनुगमनं स्तवनं स्तुतिः । प्रणामो नमस्कारः प्रह्वत्वं वा वीरासनानुगमनं सिंहासनोपसर्जनतया उपवेशनं वा ॥ १७ ॥ ❀ ❀ पूर्वेषां पित्रादीनां वृत्तमाचरितमनुदिनमेवं वर्तमानस्य नातिदूरे अस्मद्दृष्टिगोचरे यदाश्चर्यमासीत्तन्निबोधेत्येकान्वयः ॥ १८ ॥ ❀ ❀ किं तदिति तत्राह धर्म इति । सत्याख्येनैकेन पदेन चरन् धर्मः वृषभो भूत्वा वत्सरहितां मातरमिवाश्रुवदनामत एव विच्छायां विगतकांतिं गोरूपिणीं गां भूमिमुपलभ्यापृच्छदित्येकान्वयः ॥ १९ ॥ ❀ ❀ "भद्रा गौर्गोमतल्लिके"त्यभिधानं, हे भद्रे ! ते तवात्मनः देहस्यानामयमारोग्यं कच्चित् ? किं म्लायता म्लानिं गच्छता मुखेन विच्छाया विगतकांतिरसीति यद्यस्मात्तस्माद्भवतीमंतराधिं मनःपीडावतीमालक्षये पश्यामि । किंच कंचन दूरे बंधुं परोक्षप्रदेशे स्थितं बंधुं प्रति शोचसीवेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

जित्वा च निवृत्तिसमये कचिन्निह्नत्य भ्रमन् स्वराज्यस्य नातिदूर एव साक्षात् कलिं ददर्श । तद्दूरगमने पुनः कृतधाष्टर्यत्वादिति ज्ञेयम् । तथैवाह तस्येति ॥ १८ ॥ ❀ ❀ कामिव कां तत्राह विवत्सामिव मातरमिति । यथा नष्टापत्यां स्वमातरं कोऽपि पृच्छति तथा तामपृच्छदित्यर्थः ॥ १९ ॥ ❀ ❀ कच्चिदिति । अत्रेषच्छब्दोऽनायासे वर्त्तते 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इत्यत्रेषत्कर इतिवत् । ततश्चेषदनायासेनालक्षय इति योज्यम् ॥ २०-२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

किंच स्निग्धेषु पांडवेषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् । तत्र पार्षदं सभापतित्वम् । सेवनं चित्तानुवृत्तिः । वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणम् ॥ १७ ॥ ❀ ❀ अन्विति शेषः । अन्वहमनुवर्त्तमानस्य ॥ १८ ॥ ❀ ❀ धर्म इति । युगारम्भक्षणत एव धर्मपृथ्वीकलयस्तथाभूतीभवन्तो लोकैरदृश्या अपि दिदृक्षणीयत्वादनुध्यायतः परीक्षितो योगजनेत्राभ्यां दृष्टा ज्ञेयाः । धर्मो वृषरूपः विच्छायां हतप्रभाम् ॥ १९ ॥ ❀ ❀ आत्मनो देहस्य । अनामयमारोग्यम् । किंच अन्तुर्मध्ये आधिः पीडा यस्यास्ताम् तत्र कारणानि कल्पयन् पृच्छति दूरे बन्धुमिति ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्निग्धेषु स्नेहवत्सु विष्णोर्वासुदेवस्य सारथ्यादीनि कर्माणि शृण्वंस्तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन्नृपतिर्विष्णोश्चरणारविंदे भक्तिं करोति स्म चकारेत्यर्थः । तत्र सारथ्यं सौत्यं पारिषदं सभ्यत्वं दौत्यं दूतकर्म ॥ १७ ॥ ❀ ❀ अन्वहं पूर्वेषां राजर्षीणां वृत्तिं वर्तमानस्यानुवर्तमानस्य सतः नातिदूरे शीघ्रमेव यदाश्चर्यमासीत्तन्मे मत्तो निबोध शृणु ॥ १८ ॥ ❀ ❀ धर्मो वृषरूपः विच्छायां विगतप्रभां गोरूपधरां पृथ्वीं वत्सहीनां मातरमिव पृच्छति स्म अपृच्छदित्यर्थः ॥ १९ ॥ ❀ ❀ तदेवाह कच्चिदिति षड्भिः । हे भद्रे ! कच्चित्ते तव आत्मनः देहस्यानामयमारोग्यमस्ति ? अहं तु यतो विच्छायासि अतः ईषन्म्लायता दैन्यवता मुखेन च अन्तर्मध्ये आधिर्व्यथा यस्यास्तथाभूतां भवतीमालक्षये । तत्र बहून् हेतून् तर्कयन् पृच्छति हे अम्ब ! दूरे स्थितं कञ्चन बन्धुं शोचसि ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

आधिदैविकधर्मे उपकारमाह तस्यैवमिति । एवं वर्त्तमानस्य तस्य सतः निकट एव किञ्चित् जातं तत् निबोधेति सम्बन्धः । वर्तमानस्य नातिदूरे वा क्रियापेक्षया देशनैकट्यं कालनैकट्यं तूक्तमेव धर्मः पृथ्वी च राजानं बोधयितुमेव तादृशरूपेण समागता स्वस्वावस्थामन्योऽन्यमुखतो निरूपयति । कलिश्चाध्यात्मिके रूपे निराकृते स्थानं प्रार्थयितुं तद्रूपेण प्रकटः ॥ १८ ॥ ❀ ❀ राजान्वेषणार्थमेव प्रकृतिमध्ये मिलितौ तदाह धर्म इति । एकेन पदा चलन् सत्यात्मकेन अंशतो व्याख्याने श्रुतं देवतारूपत्वाच्च लौकिकानुपपत्तिः पादानां नामतश्च रूपतश्च भेदः युगभेदेन कल्पभेदेन च व्यवस्थापनीयः । विच्छायां विवर्णां चरणे पुरुषस्याधः छाया तिष्ठति तदभावे विच्छाया एव गां पृथ्वीं गोरूपां केचन कृष्णाद्यभावात् छायाभावमाहुः । कालेन भीतां वा अश्रुवदनामिति अश्रूणि वदने यस्याः, अनेनांतस्तापो भूमौ बाष्पजलमेव जलं न वृष्टिजलं वंशरहिता गौरिव केवलं पितृणामुपयोगिनीं तथा पृथिव्यपि पारणार्थमेवोपयुज्यते न जीवनार्थमिति मातृपदं व्याख्यातम् ॥ १९ ॥ ❀ ❀ आमयं ज्ञात्वा व्यवहारानुसारेण

पृच्छति कच्चिदिति भद्रे ! इति संबोधनं परीक्षिदस्ति पालक इति ज्ञापनार्थं वैकुंठे भगवद्भार्या सुखेन तिष्ठसि तथापि तवात्मनः पृथिवीरूपस्य अनामयं कच्चित् रोगस्तु तव नास्ति आधिः संभाव्यते तदाह ईषन्म्लायता मुखेन यतो विच्छायासि अतो भवतीमंतराधिं लक्षये अंतरा आधिर्यस्याः सा तां, तत्राधिहेतू नुत्प्रेक्षते दशेंद्रियाण्यंतः करणचतुष्टयं ततश्चतुर्दशशोकहेतू नुत्प्रेक्षते दूरे बंधुमित्यादिना । हे अंब दूरे स्थितं बंधुं भर्तारं वराहं हे अंब ! मां पुत्रं शोचसि ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्यैवमित्यत्र । उक्तमेवेति ॥ १७ ॥ ❀ ❀ धर्म इत्यत्र । प्रवृत्ताविति । पृथिवीधर्मयोर्विशेषणम् । छायापदस्यातपाभावार्थकत्वमभिप्रेत्य प्रकारान्तरेण वैवर्ण्यमाहुः चरण इत्यादि । वत्सरहिताया गोः पितृपयोगित्वं 'पितृभ्योऽग्निष्वात्तेभ्योभिवान्यायै दुग्धे मन्थमि'ति तद्धविर्बोधकश्रुत्या ज्ञेयम् । अभिवान्या मृतवत्सा । मन्थः सक्तुः । व्याख्यातमिति । पितृपयोगिकथनेनाभिवान्यात्वबोधनादेवोक्तार्थम् ॥ १८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

किञ्च पाण्डवेषु युधिष्ठिरादिषु विष्णोः श्रीकृष्णस्य यानि सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णौ जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षित् विष्णोश्चरणारविन्दे भक्तिं करोति स्मेत्यन्वयः । ननु साक्षाद्भगवान् भूत्वा कथं तेषां सारथ्यादिकं कृतवानित्यपेक्षायां तेषां स्नेहवशादिति सूचयन्नाह–स्निग्धेष्विति । सारथ्यं सूतकर्म । पारषदं सभापतित्वम् । रेफषकारयोर्विश्लेषश्छान्दसः । सेवनं चित्तानुवृत्तिः । वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणम् । अनुगमनं पश्चाच्चलनम् ॥ १७ ॥ ❀ ❀ तस्य परीक्षितः एवं पूर्वोक्तप्रकारेण पूर्वेषां युधिष्ठिरादीनां वृत्तिमन्वहं वर्तमानस्य ततो नातिदूरे समीपमेव शीघ्रं यदाश्चर्यमासीत्तन्मे मत्तः कथयतः निबोध शृणु ॥ १८ ॥ ❀ ❀ धर्मः धर्माधिदेवो वृषरूपधर एकेन पदा पादेन चरन् गां गोरूपधरां पृथ्वीं पृच्छति स्मेत्यन्वयः । प्रश्ने हेतुमाह–विच्छायां निस्तेजस्कामुपलभ्येति । तत्र हेतुमाह–अश्रुवदनामिति, रुदन्तीमित्यर्थः । तत्र दृष्टान्तमाह–विवत्सामिति, पुत्ररहिता माता यथा रोदिति तथा रुदन्तीमित्यर्थः ॥ १९ ॥ ❀ ❀ प्रश्नमेव दर्शयति–कच्चिदित्यादिभिः षड्भिः । सर्वथा सर्वोपकारिण्यास्तव भद्रमेव भविष्यतीति सूचयन् सम्बोधयति–हे भद्रे ते तवात्मनो देहस्यानामयमारोग्यं कच्चिदस्ति ? कथं तवैवं शङ्क्यत आह–यत ईषन्म्लायता हर्षक्षयमुपगतेन मुखेन विच्छाया निस्तेजस्काऽसि । अतोहं भवतीं त्वामन्तरा हृदयमध्ये आधिः क्लेशो यस्यास्तथाभूतामालक्षये तर्कयामि । तत्र कारणानि विकल्पयन् पृच्छति–ममाग्रे कथने त्वया सङ्कोचो न कार्य इति सूचयन्सम्बोधयति–हे अम्ब दूरे स्थितं कञ्चन बन्धुं किं शोचसि ? ॥ २० ॥

हिन्दी अनुवाद

वे सुनते कि भगवान् श्रीकृष्णने प्रेमपरवश होकर पाण्डवोंका सारथिका काम किया, उनके सभासद् बने–यहाँतक कि उनके मनके अनुसार काम करके उनकी सेवा भी की । उनके सखा तो थे ही, दूत भी बने । वे रातको शस्त्र ग्रहण करके वीरासनसे बैठ जाते और शिविरका पहरा देते, उनके पीछे-पीछे चलते, स्तुति करते तथा प्रणाम करते; इतना ही नहीं, अपने प्रेमी पाण्डवोंके चरणोंमें उन्होंने सारे जगत्‌को झुका दिया । तब परीक्षित्‌की भक्ति भगवान् श्रीकृष्णके चरण-कमलोंमें और भी बढ़ जाती ॥ १७ ॥ ❀ ❀ इस प्रकार वे दिन-दिन पाण्डवोंके आचरणका अनुसरण करते हुए दिग्विजय कर रहे थे । उन्हीं दिनों उनके शिविरसे थोड़ी ही दूरपर एक आश्चर्यजनक घटना घटी । वह मैं आपको सुनाता हूँ ॥ १८ ॥ ❀ ❀ धर्म बैलका रूप धारण करके एक पैरसे घूम रहा था । एक स्थानपर उसे गायके रूपमें पृथ्वी मिली । पुत्रकी मृत्युसे दुःखिनी माताके समान उसके नेत्रोंसे आँसुओंके झरने झर रहे थे । उसका शरीर श्रीहीन हो गया था । धर्म पृथ्वीसे पूछने लगा ॥ १९ ॥ ❀ ❀ धर्मने कहा–कल्याणि ! कुशलसे तो हो न ? तुम्हारा मुख कुछ-कुछ मलिन हो रहा है । तुम श्रीहीन हो रही हो । मालुम होता है । तुम्हारे हृदयमें कुछ-न-कुछ दुःख अवश्य है । क्या तुम्हारा कोई सम्बन्धी दूर देशमें चला गया है, जिसके लिये तुम इतनी चिन्ता कर रही हो ? ॥ २० ॥

पा[१]देन्यूनं शोचसि मैकपादमा[२]त्मानं वा वृषलैर्भोक्ष्यमाणम् ।
आहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यवर्षति ॥ २१ ॥
अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ।
वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥ २२ ॥

---

१. प्रा० पा०—पादन्यूनं । २. प्रा० पा०—युतात्मानं वृष० ।

किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ।
इतस्ततो वाशनपानवा सस्त्रानव्यवायोन्मुखजीवलोकम् ॥ २३ ॥
यद्वाम्ब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ।
अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रिभिः पादैर्न्यूनमत एवैकपादं मा मां मल्लक्षणं जनमित्यर्थः । वृषलैरित ऊर्ध्वं भोक्ष्यमाणम् । पुंस्त्वमात्मपदविशेषणत्वात् । हृता यज्ञभागा येषां तान् । यज्ञाद्यकरणात् ॥ २१ ॥ ❀ ❀ हे उर्वि पृथ्वि भर्तृभिररक्ष्यमाणाः स्त्रियः पितृभिररक्ष्यमाणान्बालान्प्रत्युत तैरेव पुरुषादैरिव निर्दयैरार्तान् क्लिष्टान् । वाचं देवीं सरस्वतीं कुकर्मणि दुराचारे स्थिताम् । कुलाढ्यान्ब्राह्मणोत्तमान्सेवकान् ॥ २२ ॥ ❀ ❀ उपसृष्टान् व्याप्तान् । अवरोपितान्युद्वासितानि । व्यवायो मैथुनम् । इतस्ततो निषेधानादरेण सर्वतोऽशनादिषून्मुखं प्रवर्तमानं जीवलोकं वा ॥ २३ ॥ ❀ ❀ हे अम्ब मातर्हे धरित्रि ! ते तव यो भूरिभारस्तस्यावतारणार्थं कृतावतारस्य कर्माणि स्मरन्ती तेन विसृष्टा सती शोचसि । निर्वाणं विलम्बितमाश्रितं येषु तानि । पाठान्तरे निर्वाणं विडम्बितमुपहसितं यैः । मोक्षादप्यधिकसुखानीत्यर्थः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वृषं धर्मं लुनन्तीति वृषला राजाभासाः शूद्रम्लेच्छाद्याः ॥ २१ ॥ ❀ ❀ हे उर्वीति ! दुष्टजनभराक्रान्तत्वाद्बहुभारवती जाताधुनेति भावः । कुकर्मणीति । ब्रह्मकुलराजकुलयोर्द्वयोर्विशेषणम् । एकत्र दुष्प्रतिग्रहादानाभक्ष्याशनादिना दुष्कर्मत्वमन्यत्र ब्राह्मणापमानवेदापमानादिना दुष्कर्मत्वञ्च । सेवकानिति "अज्ञानादथ वा प्रीत्या कैंकर्यं कारयेन्नरः । विप्रेण विप्रवर्जं यः स चिरं नरके वसेत् ॥" इति स्मृतेः । कुलाढ्यामिति पाठे तु श्रेष्ठकुलार्हां देवीं द्योतमानां वाचं वेदवाणीमाचारकुलहीना अध्येष्यन्तीति शोचसि किम् ॥ २२-२३ ॥ ❀ ❀ अम्बेति । वर्णिताभिप्राया सम्बुद्धिः । धरित्रीत्याश्वासनम् । हरिकृपया पुनर्धारणसमर्था भविष्यसीति भावः । पाठान्तरे निर्वाणविडम्बितानीति पाठे । इत्यर्थ इति "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानात्" इत्याद्युक्तेरयं भावः ॥ २४ ॥

श्रीमद्वीरराघवव्याख्या

किं वा पादैस्त्रिभिर्न्यूनम् एकः पादो यस्य तं मां प्रति शोचसि उत वृषलैः शूद्रप्रायै राजभिर्भोक्ष्यमाणं स्वात्मानं प्रत्येव शोचसि आहोस्विद्धृतः शून्यः यज्ञियहविर्भागो येषां तान् देवान्प्रति उतस्वित् मघवतींद्रेऽवर्षति सति दुर्भिक्षपीडिताः प्रजाः प्रति ॥ २१ ॥ ❀ ❀ यद्वा हे उर्वि ! पुरुषादै राक्षसैरिव नृशंसैरार्त्तान् पीडितान् बालकान् अरक्ष्यमाणाः स्त्रियः स्त्रीः प्रतिशोचसि किं ब्रह्मकुले कुकर्मणि दुर्वृत्ते सति देवस्य विष्णोः सम्बन्धिनीं वाचं त्रयीं प्रति उत राजकुलेऽब्रह्मण्ये ब्राह्मणेष्वसाधुनि सति कुलाढ्यान् ब्राह्मणान् प्रति ॥ २२ ॥ ❀ ❀ किंवा कलिनोपसृष्टान् क्षत्रियाधमान्प्रति यद्वा तैः क्षत्रबन्धुभिरवरोपितान्युपद्रुतानि राष्ट्राणि प्रति उत इत इतस्ततः निषिद्धदेशे जनेष्वशनाद्युन्मुखमशनाद्यभिलाषिणं जीवलोकं प्रति ॥ २३ ॥ ❀ ❀ यद्वा हे अम्ब ! हे धरित्रि तव भूरिभारस्यावताराय हरणाय कृतः अवतारो येन तस्य हरेरधुना तर्हि तस्य श्रीकृष्णस्य हरेरिति कर्त्तरि षष्ठी, तेन विसृष्टा त्यक्ता सती तस्य कर्माणि चेष्टितानि निर्वाणे मोक्षे विशेषेण लम्बितानि संनिहितानि साक्षात्कृतानीति याव यद्वा निर्वाणं सुखं विलम्बितमधुनांतरितं येभ्यस्तानि ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अपि च त्रिभिः पादैर्न्यूनं हीनमेकपादं मा मां प्रतिशोचसि उत पक्षांतरे आहोस्वित् वृषं धर्मं लीनं नष्टं कुर्वंतीति वृषलाः राजाभासाः शूद्रप्रायास्तैर्भोक्ष्यमाणमात्मानं शोचसि अथो अथवा हृतो यज्ञे भागो येषां ते तथोक्तास्तान् सुरादीन् शोचसि किम् मघवतींद्रेऽवर्षति यज्ञाभावाद्वर्षमकुर्वति सति सस्यादिसमृद्ध्यभावेन दरिद्राः प्रजा उद्दिश्य शोचस्युतस्वित् अपिस्वित् ॥ २१ ॥ ❀ ❀ अथवा हे उर्वि ! भूः राजकुले अब्रह्मण्ये अरक्ष्यमाणाः स्त्रिय उद्दिश्य शोचसि अथवा पुरुषादैर्मनुष्यभक्षकैरिव स्थितैरुपद्रवकरैरार्तान् दुःखितान् बालांश्च शोचसि किं ब्रह्मकुले ब्राह्मणकुले कुत्सितकर्मणि दुष्प्रतिग्रहोल्लेखनादिकर्म कुर्वति सति राजकुले

१. प्रा० पा०—वाससा उत व्यवा० ।

अब्रह्मण्ये ब्राह्मणबहुमानमकृत्वा तस्मात्करादीनाददाने सति च कुलाग्र्यां श्रेष्ठां कुलीने वर्तमानामिति वा देवीं द्योतमानां वाचं देववाणीमाचारकुलहीना अध्येष्यन्तीति शोचसि स्वित् । "बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यतीति" वचनात् ॥ २२ ॥ ❀ ❀ कलिनोपसृष्टानुपहतान् क्षत्रबंधून् शोचसि तैः क्षत्रबंधुभिः अवरोपितानि विनाशितानि राष्ट्राणि वा शोचसि ? यद्वा एवं वा इतस्ततः अनियमेनाशनं च पानं च वासः स्नानं च व्यवायो ग्राम्यधर्मश्च ते थोक्ताः तेषूत्सुकमुत्कंठावंतं जीवलोकं प्राणिसमूहं किं शोचसि ॥ २३ ॥ ❀ ❀ अथेति पक्षांतरारंभः । ते तव भूमेर्महतो भारतस्यावतारोऽवरोपणं तस्मै भूरिभारावताय कृतोऽवतारः स्वरूपप्रकाशो येन स तथोक्तः तस्यांतर्हितस्य निर्वाणं स्वस्वयोग्यं मोक्षं विशेषेण लंबयंति पुरःस्थितं कारयंतीति निर्वाणविलंबितानि निर्वाणं विलंबयंत्यपहरंतीति वा हरेः कर्माणि चरितानि स्मरंती हरिणाहमद्य विसृष्टा नन्विति शोचस्यपि किम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निर्वाणविडम्बितानीत्यत्र निर्वाणं विडम्बितं यैरिति विग्रहः । निर्वाणस्य सुखादित्वात् पूर्वनिपातः । डलयोरेकत्वात् पाठद्वयमपि समानार्थम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मा माम् । वृषलैर्म्लेच्छैरत ऊद्‌ध्र्वम् आत्मानं भोक्ष्यमाणम् । पुंस्त्वमात्मपदविशेषणत्वात् ॥ २१ ॥ ❀ ❀ भर्तृभिररक्ष्यमाणाः स्त्रियः । पितृभिररक्ष्यमाणान् बालान् प्रत्युत तैरेव पुरुषादैरिव निर्दयैरार्त्तान् क्लेशितान् । वाचं पाण्डित्यलक्षणां सरस्वतीं कुकर्म्मणि दुराचारे । ब्राह्मणभक्तिहीनेऽपि राजवंशे उत्पन्नान् कुलाग्र्यान् कुलीनत्वेन ख्यापितान् ॥ २२ ॥ ❀ ❀ उपसृष्टान् व्याप्तान् अवरोपितानि उद्वासितानि (भूमेः) भुवो (भरः) भारस्तस्य अवतारणार्थं कृतोऽवतारो येन तस्य कर्माणि स्मरन्ती । यतस्तेन त्वं विसृष्टा त्यक्ता । निर्वाणं कैवल्यं विडम्बितं स्वमाधुर्येण उपहासास्पदीकृतं यैस्तानि । डलयोरैक्यात् पाठद्वयमपि समानार्थम् ॥ २३-२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंवा त्रिभिः पादैर्न्यूनम् एकः पादो यस्य तथाभूतं मा मां शोचसि ? अथवातः परमात्मानं वृषलैः शूद्रप्रायै राजन्यैर्भोक्ष्यमाणं शोचसि आहोस्वित् हृता नष्टाश्छिन्ना यत्र भागा येषां तान् सुरादीन् देवर्षिपितृन् शोचसि उत प्रजाः दुर्भिक्षकर्शिताः ॥२१॥ ❀ ❀ हे उर्वि वसुंधरे! अरक्ष्यमाणा भर्त्रादिभिरिति शेषः, स्त्रियः शोचसि अथो अथवा पुरुषादैरिवातिनिर्दयैः पित्रादिभिर्बालान् क्लिष्टान् शोचसि कुकर्मणि कुत्सितकर्मपरे देवीं द्योतमानां वाचं सरस्वतीं किंवा शोचसि, अब्रह्मण्ये ब्राह्मणानामहितकारिणि कुलाग्र्यान् द्विजोत्तमान् जीविकार्थं स्थितान् शोचसि ॥ २२ ॥ ❀ ❀ किंवा कलिनोपसृष्टान् व्याप्तान् आहोस्वित् तैः कलिनोपसृष्टैरवरोपितानि किं वा इतस्ततः योग्यतामनपेक्ष्यैव अशनाद्युन्मुखं जीवलोकं शोचसि ॥ २३ ॥ ❀ ❀ यद्वा हे अम्ब ! मातः धरित्रि ते तव यो भूरिभरस्तस्यावताराय कृतोवतारो येन तस्य हरेः प्रत्यन्तर्हितस्य निर्वाणं मोक्षं विलम्बितमाश्रितं येषु तानि कर्माणि स्मरती सती त्वं शोचसि किं यतो विसृष्टा तेन त्यक्तासि ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

शोके हेतुः पादैर्न्यूनमिति । आत्मानं शरीरं वा पृथिवीरूपरसोऽत्र शोकहेतुः वृषलैः शूद्रैः हृतयज्ञभागा देवाः बहवः मघयति अवर्षति अन्नरहिताः प्रजाः ॥ २१ ॥ ❀ ❀ या वा अरक्ष्यमाणा स्त्रियः बालाश्च हे उर्वि ! संतोषाभावे मनोवैकल्यं मलमोक्षो वा पुरुषादैः राक्षसैरिव आर्त्तान् पीडितान् बालान् वाचं देवीं वेदरूपां चक्षुरेषां कुकर्मणि ब्राह्मणकुले ब्राह्मणा हि ते राजकुले कुलाग्र्यान् ब्राह्मणान् श्रोतृरूपान् ॥ २२ ॥ ❀ ❀ क्षत्रबंधून् क्षत्रियाधमान् कलिनोपसृष्टानिति सर्वदोषसहितान् ब्राह्मणरूपान् तैरवरोहितानि उद्वासितानि राष्ट्राणि देशाः बहुशः इतस्ततः विधिनिषेधपालनव्यतिरेकेण भोजनपानस्थितिस्नानसंभोगोन्मुखं जीवलोकं बुद्धिरूपम् ॥ २३ ॥ ❀ ❀ तव भूरिभारावतारार्थं कृतावतारस्य भगवतो वासुदेवस्य सर्वदुःखहर्तुः हे धरित्रि ! सांप्रतमंतर्हितस्य तेनैव विसृष्टा कर्माणि उदारचरित्राणि अनधिकारिषु वर्त्तमानानि वारणार्थं विलंबितानि निर्वाणप्रदत्वात् तूष्णीं स्थितानि चित्तरूपाणि स्मरती तानि शोचसि ॥ २४ ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न (सं०)

श्रीगिरिधरकृता बालप्रबोधिनी

किं वा पादैस्त्रिभिर्न्यूनम् अत एवैकः पादो यस्य तं मा शोचसि ? । अथवा वृषलैः शूद्रप्रायैः राजभिर्भोक्ष्यमाणमात्मानं शोचसि ? अहो अथवा हृतो विनष्टो यज्ञियो हविर्भागो येषां तान् देवान् शोचसि ? उतस्वित् अथवा मघवतीन्द्रेऽवर्षति सति

दुर्भिक्षपीडिताः प्रजाः शोचसि ? ॥ २१ ॥ ❀ ❀ पापिनां भाररूपत्वात् तव शोको युक्त इति सूचयन् सम्बोधयति-हे उर्वीति । पतिपुत्रादिभिररक्ष्यमाणाः स्त्रियः स्त्रीः शोचसि ? अथवा पुरुषादा राक्षसास्तत्तुल्यैः पित्रादिभिरार्त्तान् पीडितान् बालान् शोचसि ? अथवा कुत्सितं कर्म यस्य तस्मिन् ब्राह्मणकुले स्थितां देवीं देवस्य परब्रह्मणो निश्वाससरूपां वाचं वेदलक्षणां शोचसि ? अथवा अब्रह्मण्ये ब्राह्मणभक्तिहीने राजकुले लोभवशात् सेवकत्वेन स्थितान् कुलाढ्यान् ब्राह्मणान् शोचसि ? ॥ २२ ॥ ❀ ❀ कलिना नरकपातहेत्वधर्मबन्धुनोपसृष्टान् व्याप्तान् क्षत्रबन्धून् राजाधमान् किंवा शोचसि ? तैः राजाधमैरवरोपितानि उद्वासितानि राष्ट्राणि देशान् वा शोचसि ? किंवा इतस्ततो निषेधानादरेण सर्वतोऽशनादिषु उन्मुखमभिलाषयुक्तं जीवलोकं शोचसि ? अशनं भोजनम् । पानं प्रसिद्धम् । वासो वस्त्रम् । विसर्गरहितपाठे वासः स्थानम् । स्नानं प्रसिद्धम् । व्यवायो मैथुनम् ॥ २३ ॥ ❀ ❀ हे अम्ब हे धरित्रीति सम्बोधनद्वयेन तव शोकेनास्माकं सर्वेषां शोको भवति सर्वाधारत्वेन मातृत्वादिति सूचयति । यद्वा हरेः कर्माणि स्मरती सती शोचसि ? ननु तत्कर्मस्मरणेन कथं शोक इत्यपेक्षायां तत्कर्मणां स्वोपकाररूपत्वेन तत्स्मरणेन शोकसम्भवादित्याशयेनाह–ते तव यो भूरिभारस्तस्यावताराय कृतोऽवतारो येन तस्येदानीमन्तर्हितस्य अत एव तेन विसृष्टा त्यक्ता सती । सर्वथाऽपि तत्कर्माणि स्मरणार्हाणि मोक्षहेतुत्वादित्याशयेनाह–निर्वाणविलम्बितानीति । निर्वाणं मोक्षस्तद्विलम्बितमाश्रितं येषु तानीत्यर्थः । निर्वाणविडम्बितानीति पाठे तु निर्वाणं विडम्बितं स्वमाधुर्येणोपहासास्पदीकृतं यैस्तानीत्यर्थः ॥ २४ ॥

हिन्दी अनुवाद

कहीं तुम मेरी तो चिन्ता नहीं कर रही हो कि अब इसके तीन पैर टूट गये, एक ही पैर रह गया है ? सम्भव है, तुम अपने लिये शोक कर रही हो कि अब शूद्र तुम्हारे ऊपर शासन करेंगे । तुम्हें इन देवताओंके लिये भी खेद हो सकता है, जिन्हें अब यज्ञोंमें आहुति नहीं दी जाती, अथवा उस प्रजाके लिये भी, जो वर्षा न होनेके कारण अकाल एवं दुर्भिक्षसे पीड़ित हो रही है ॥ २१ ॥ ❀ ❀ देवि ! क्या तुम राक्षससरीखे मनुष्योंके द्वारा सतायी हुई अरक्षित स्त्रियों एवं आर्तबालकोंके लिये शोक कर रही हो ? सम्भव है विद्या अब कुकर्मी ब्राह्मणोंके चंगुलमें पड़ गयी है और ब्राह्मण विप्रद्रोही राजाओंकी सेवा करने लगे हैं और इसीका तुम्हें दुःख हो ॥ २२ ॥ ❀ ❀ आजके नाममात्रके राजा तो सोलहों आने कलियुगी हो गये हैं, उन्होंने बड़े-बड़े देशोंको भी उजाड़ डाला है । क्या तुम उन राजाओं या देशोंके लिये शोक कर रही हो ? आजकी जनता खान-पान, वस्त्र, स्नान और स्त्री-सहवास आदिमें शास्त्रीय नियमोंका पालन न करके स्वेच्छाचार कर रही है; क्या इसके लिये तुम दुःखी हो ? ॥ २३ ॥ ❀ ❀ मा पृथ्वी ! अब समझमें आया, हो-न-हो तुम्हें भगवान् श्रीकृष्णकी याद आ रही होगी; क्योंकि उन्होंने तुम्हारा भार उतारनेके लिये ही अवतार लिया था और ऐसी लीलाएँ की थीं, जो मोक्षका भी अवलम्बन हैं । अब उनके लीला संवरण कर लेनेपर उनके परित्यागसे तुम दुःखी रही हो ॥ २४ ॥

इदं ममाचक्ष्व तवाधिमूलं वसुन्धरे येन विकर्शितासि ।
कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमम्ब सौभगम् ॥ २५ ॥

ध[1]रण्युवाच

भवान् हि वेद[2] तत्सर्वं यन्मां धर्मानुपृच्छसि । चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥ २६ ॥
सत्यं शौचं दया क्षा[3]न्तिस्त्यागः सन्तोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २७ ॥
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो [4]बलं स्मृतिः । स्वातन्त्र्यं कौशलं का[5]न्तिर्धैर्यं मार्दवमेव च ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

हे अम्ब ते सौभाग्यं कालेन वा हृतम् ॥ २५ ॥ ❀ ❀ भवान् जानात्येव तथापि वक्ष्यामीत्याह । येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्तसे यत्र च सत्यादयो महागुणा न वियन्ति तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २६ ॥ ❀ ❀ सत्यं यथार्थभाषणम् । शौचं शुद्धत्वम् । दया परदुःखासहनम् । क्षान्तिः क्रोधप्राप्तौ चित्तसंयमनम् । त्यागोऽर्थिषु मुक्तहस्तता । संतोषोऽलंबुद्धिः । आर्जवमवक्रता । शमो मनोनैश्चल्यम् । दमो बाह्येन्द्रियनैश्चल्यम् । तपः स्वधर्मः । साम्यमरिमित्राद्यभावः । तितिक्षा परापराधसहनम् । उपरतिर्लाभप्राप्तावौदासीन्यम् । श्रुतं शास्त्रविचारः ॥ २७ ॥ ❀ ❀

---

१. प्रा० पा०–धरोवाच । २. प्रा० पा०–भवानेव हि तद्वेद यन्मां । ३. प्रा० पा०–दानं त्यागः । ४. प्रा० पा०–धृतिः । ५. प्रा० पा०–कान्तिः सौभाग्यं मार्दवं क्षमा ।

ज्ञानमात्मविषयम्। विरक्तिर्वैतृष्ण्यम्। ऐश्वर्यं नियन्तृत्वम्। शौर्यं संग्रामोत्साहः। तेजः प्रभावः। बलं दक्षत्वम्। स्मृतिः कर्तव्याकर्तव्यार्थानुसंधानम्। स्वातन्त्र्यमपराधीनता। कौशलं क्रियानिपुणता। कान्तिः सौन्दर्यम्। धैर्यमव्याकुलता। मार्दवं चित्ताकाठिन्यम्॥ २८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे वसुन्धरे इति। त्वं हि वसुन्धरासि न हि वसुन्धराणामीदृक् कार्श्यं भवतीति। किं वा वसु ते हृतं केनचिद्यत ईदृग्जातेति भावः॥ २५॥ ❀ ❀ हे धर्मेति। त्वमेव सर्वधर्त्ता यत ईदृग्जातस्तर्हि मे कार्श्ये किमद्भुतमिति भावः। यद्यप्यहं जानामि तथापि त्वन्मुखादेव श्रोतुमिच्छामीत्यत आह—चतुर्भिरिति॥ २६॥ ❀ ❀ परदुःखासहनेन शरणागतपालकत्वं भक्तसुहृत्त्वं चोक्तम्। मनोनैश्चल्योक्त्यैव सुदृढव्रतत्वमपि। तपः क्षत्रियत्वादिलीलावतारानुरूपं स्वधर्मः॥ २७॥ ❀ ❀ ज्ञानं पंचविधं बुद्धिमत्त्वकृतज्ञत्वदेशकालपात्रज्ञत्वसर्वज्ञत्वात्मज्ञत्वभेदात्। विरक्तिरसद्विषयवैतृष्ण्यम्। प्रभावेनैव प्रतापश्च स च प्रभावविख्यातिः। दक्षत्वं च दुष्करक्षिप्रकारित्वम्। धृतिरिति पाठे क्षोभकारणे प्राप्तेप्यव्याकुलत्वम्। कौशलं हि त्रिविधं क्रियानिपुणता-युगपद्भूरिसमाधानकारिता-लक्षणचातुरीकलाविलास-विद्वत्तालक्षणवैदग्धीभेदात्। कान्तिः कमनीयता। एषा चतुर्धाऽवयवस्य हस्ताद्यंकादिलक्षणस्य वर्णरसगंधस्पर्शशब्दानाम्। तत्र रसश्चाधरचरणस्पृष्टवस्तुनिष्ठो ज्ञेयः। वयसश्चेति विवेकः। एतया नारीगणमनोहरत्वमप्युक्तम्। चित्ताकाठिन्यं प्रेमार्द्रचित्तत्वम्। तेन प्रेमवश्यमपि॥ २८॥

श्रीमद्वीरराघवव्याख्या

हे वसुन्धरे! तवाधेर्मूलमिदमुपस्थितं मह्यमाचक्ष्वाख्याहि येन त्वं विकर्शिता कृशत्वं प्राप्तासि तस्याधेर्मूलमित्यर्थः। हे अम्ब! सुरैरपि बहुमन्तव्यं तव सौभगं स्पृहणीयं सौंदर्यं बलिनामपि बलीयसा कालेन किं वापहृतम्॥ २५॥ ❀ ❀ एवमुक्ता धरण्याह भवानित्यादिदशभिः। तन्ममाधिमूलं सर्वं नूनं भवान्वेद जानास्येव। कुतः यद्यस्माद्धर्मान्पृच्छसि अजानतो धर्मप्रश्नो नोपपन्न इति भावः। अथापि किं तदिति चेद्येन त्वं लोकानां सुखावहैश्चतुर्भिः पादैर्वर्त्तसेऽवर्तथाः, अधुना येन कारणेन विनैकपादेन वर्त्तसे तदेव ममाप्याधिमूलमित्यर्थः॥ २६॥ ❀ ❀ कारणविशेषजिज्ञासायां तदुपपादयति सत्यमित्यादिपंचभिः। सत्यादयोऽन्ये च बहवो महत्त्वमिच्छद्भिर्जनैः प्रार्थनीया गुणाः नित्याः कदाचिदपि यस्मिन्न वियंति न व्ययंति तेन गुणानां पात्रेण मुख्याश्रयेण श्रीनिवासेन श्रीकृष्णेन सांप्रतमधुना रहितमत एव पाप्मना पापेन कलिना ईक्षितं लोकं प्रत्यहं शोचामीत्यन्वयः। तत्र सत्यं भूतहितत्वं वाचिकं वा शौचं हेयप्रतिभटत्वं दया परदुःखासहिष्णुत्वं क्षांतिः परापराधसहिष्णुता त्यागः अनादरः पूर्णकामत्वप्रयुक्तः। तथाच श्रूयते "सर्वमिदमभ्यात्तो वाक्यानादर" इति आत्मपर्यंतवदान्यत्वं वा त्यागः, संतोषः कर्हिचिदपि क्लेशराहित्यम् आर्जवं मनोवाक्कायानामैक्यरूपं शमो मनोनिग्रहः दमो बाह्येंद्रियनिग्रहः तप आलोचनं जगद्व्यापारोपयुक्तं साम्यमरिमित्रादिराहित्यं तितिक्षा द्वंद्वाप्रतिहतत्वम् उपरतिर्वृथाव्यापारोपरतिः श्रुतं सर्वशास्त्रार्थयाथात्म्यवित्त्वम्॥ २७॥ ❀ ❀ ज्ञानमाश्रितानिष्टपरिहारेष्टप्रापणोपयुक्तं विरक्तिर्विषयेषु निस्पृहत्वं विषयानाकृष्टचित्तत्वं वा ऐश्वर्यं स्वातिरिक्तसर्वनियंतृत्वं शौर्यं युद्धेष्ववैमुख्यं तेजो धृष्टता बलं प्रसिद्धं स्मृतिः सत्स्वपि विपुलेषु "अहं प्रजापतीनां च सर्वेषामीश्वरः प्रभुः। मम विष्णुरचिंत्यात्मे"ति ब्रह्मवचनम् उपकारविषयस्मरणं स्वातंत्र्यमन्यानपेक्षत्वं कौशलं नैपुण्यं कांतिः "न तत्र सूर्यो भाती"ति श्रुत्युक्तविधा दीप्तिः धैर्यं वीर्यं तच्च युद्धे स्वगृह इव प्रवेशसामर्थ्यम् मार्दवमक्रूरत्वं स्वातंत्र्यमन्यानपेक्षकौशलमेव स्वातंत्र्यं सौभगं कांतिरिति पाठे सौभगं स्पृहणीयत्वम्॥ २८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

येन मनोदुःखेन विकर्शिता कृशतरासि हे वसुंधरे! तदिदमाधेर्मनःपीडाया मूलं ममाख्याहीत्यन्वयः। अथवा संप्रति प्रभुणा समर्थेन बलिना सर्वांगपुष्टेन कालेन तव सुरार्चितं सौभाग्यमवलीढं ग्रस्तं चेत्यन्वयः॥ २५॥ ❀ ❀ धर्मेण पृष्टा भूमिः तं प्रतिब्रूत इत्याह भवानिति। हे धर्म! यदाधिमूलं त्वं मामनुपृच्छसि तत्सर्वं भवान् वेद हि तथापि वक्ष्य इति शेषः, येन श्रीकृष्णेन त्वं लोकसुखावहैः तपःशौचदयासत्याख्यैश्चतुर्भिः पादैः कलावपि वर्तसे अवर्तथा इत्यर्थः॥ २६॥ ❀ ❀ यत्र यस्मिन् श्रीकृष्णे इमे उक्ताः सत्यादयोऽनुक्ता अन्ये च महागुणाः प्रत्येकमनन्ताः सन्ति कीदृशाः महत्त्वमिच्छद्भिः पुरुषैः प्रतिबिम्बे तादृशगुणलाभाय प्रार्थ्या उपास्यास्ते कर्हिचिद्यतो न यांति च अभिन्नत्वादित्येतमर्थं स्मेत्यनेन श्रुतिसिद्धं दर्शयति हे देवोत्तम! तेन गुणपात्रेण श्रीनिवासेन सांप्रतं रहितं पाप्मना कलिनेक्षितं दृष्टमात्मानं मां च भवन्तं च शोचामीत्यन्वयः। सत्यं निर्दुःखानन्दानुभवः भूतहितयथार्थभाषणं वा शौचं नित्यशुद्धिः प्रकृतिसम्बन्धाभावान्नित्यं बाह्याभ्यन्तरशुद्धिता हरेरेव अन्यत्र मृज्जलाभ्यां रागराहित्येन। दया सज्जनेष्वार्तप्राणिषु चित्तद्रवत्वं वा उभयत्र समम्। दानं भक्ताभक्तमध्यमेषु सुखदुःखमिश्र-

ज्ञानमात्मविषयम् । विरक्तिर्वैतृष्ण्यम् । ऐश्वर्यं नियन्तृत्वम् । शौर्यं संग्रामोत्साहः । तेजः प्रभावः । बलं दक्षत्वम् । स्मृतिः कर्तव्याकर्तव्यार्थानुसंधानम् । स्वातन्त्र्यमपराधीनता । कौशलं क्रियानिपुणता । कान्तिः सौन्दर्यम् । धैर्यमव्याकुलता । मार्दवं चित्ताकाठिन्यम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे वसुन्धरे इति । त्वं हि वसुन्धरासि न हि वसुन्धराणामीदृक् कार्श्यं भवतीति । किं वा वसु ते हृतं केनचिद्यत ईदृग्जातेति भावः ॥ २५ ॥ ❀ ❀ हे धर्मेति । त्वमेव सर्वधर्त्ता यत ईदृग्जातस्तर्हि मे कार्श्ये किमद्भुतमिति भावः । यद्यप्यहं जानामि तथापि त्वन्मुखादेव श्रोतुमिच्छामीत्यत आह–चतुर्भिरिति ॥ २६ ॥ ❀ ❀ परदुःखासहनेन शरणागतपालकत्वं भक्तसुहृत्त्वं चोक्तम् । मनोनैश्चल्योक्त्यैव सुदृढव्रतत्वमपि । तपः क्षत्रियत्वादिलीलावतारानुरूपं स्वधर्मः ॥ २७ ॥ ❀ ❀ ज्ञानं पंचविधं बुद्धिमत्त्वकृतज्ञत्वदेशकालपात्रज्ञत्वसर्वज्ञत्वात्मज्ञत्वभेदात् । विरक्तिरसद्विषयवैतृष्ण्यम् । प्रभावेनैव प्रतापश्च स च प्रभावविख्यातिः । दक्षत्वं च दुष्करक्षिप्रकारित्वम् । धृतिरिति पाठे क्षोभकारणे प्राप्तेप्यव्याकुलत्वम् । कौशलं हि त्रिविधं क्रियानिपुणतायुगपद्भूरिसमाधानकारिता-लक्षणचातुरीकलाविलास-विद्वत्तालक्षणवैदग्ध्यीभेदात् । कान्तिः कमनीयता । एषा चतुर्धाऽवयवस्य हस्ताद्यंकादिलक्षणस्य वर्णरसगंधस्पर्शशब्दानाम् । तत्र रसश्चाधरचरणस्पृष्टवस्तुनिष्ठो ज्ञेयः । वयसश्चेति विवेकः । एतया नारीगणमनोहरत्वमप्युक्तम् । चित्ताकाठिन्यं प्रेमार्द्रचित्तत्वम् । तेन प्रेमवश्यमपि ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

हे वसुन्धरे ! तवाधेर्मूलमिदमुपस्थितं मह्यमाचक्ष्वाख्याहि येन त्वं विकर्शिता कृशत्वं प्राप्तासि तस्याधेर्मूलमित्यर्थः । हे अम्ब ! सुरैरपि बहुमन्तव्यं तव सौभगं स्पृहणीयं सौंदर्यं बलिनामपि बलीयसा कालेन किं वापहृतम् ॥ २५ ॥ ❀ ❀ एवमुक्ता धरण्याह भवानित्यादिदशभिः । तन्ममाधिमूलं सर्वं नूनं भवान्वेद जानास्येव । कुतः यद्यस्माद्धर्मान्पृच्छसि अजानतो धर्मप्रश्नो नोपपन्न इति भावः । अथापि किं तदिति चेद्येन त्वं लोकानां सुखावहैश्चतुर्भिः पादैर्वर्त्तसेऽवर्तथाः, अधुना येन कारणेन विनैकपादेन वर्त्तसे तदेव ममाप्याधिमूलमित्यर्थः ॥ २६ ॥ ❀ ❀ कारणविशेषजिज्ञासायां तदुपपादयति सत्यमित्यादिपंचभिः । सत्यादयोऽन्ये च बहवो महत्त्वमिच्छद्भिर्जनैः प्रार्थनीया गुणाः नित्याः कदाचिदपि यस्मिन्न वियंति न व्ययंति तेन गुणानां पात्रेण मुख्याश्रयेण श्रीनिवासेन श्रीकृष्णेन सांप्रतमधुना रहितमत एव पाप्मना पापेन कलिना ईक्षितं लोकं प्रत्यहं शोचामीत्यन्वयः । तत्र सत्यं भूतहितत्वं वाचिकं वा शौचं हेयप्रतिभटत्वं दया परदुःखासहिष्णुत्वं क्षांतिः परापराधसहिष्णुता त्यागः अनादरः पूर्णकामत्वप्रयुक्तः । तथाच श्रूयते "सर्वमिदमभ्यात्तो वाक्यानादर" इति आत्मपर्यंतवदान्यत्वं वा त्यागः, संतोषः कर्हिचिदपि क्लेशराहित्यम् आर्जवं मनोवाक्कायानामैक्यरूपं शमो मनोनिग्रहः दमो बाह्येंद्रियनिग्रहः तप आलोचनं जगद्व्यापारोपयुक्तं साम्यमरिमित्रादिराहित्यं तितिक्षा द्वंद्वाप्रतिहतत्वम् उपरतिर्वृथाव्यापारोपरतिः श्रुतं सर्वशस्त्रार्थयाथात्म्यवित्त्वम् ॥ २७ ॥ ❀ ❀ ज्ञानमाश्रितानिष्टपरिहारेष्टप्रापणोपयुक्तं विरक्तिर्विषयेषु निस्पृहत्वं विषयानाकृष्टचित्तत्वं वा ऐश्वर्यं स्वातिरिक्तसर्वनियंतृत्वं शौर्यं युद्धेष्ववैमुख्यं तेजो धृष्टता बलं प्रसिद्धं स्मृतिः सत्स्वपि विपुलेषु"अहं प्रजापतीनां च :सर्वेषामीश्वरः प्रभुः । मम विष्णुरचिंत्यात्मे"ति ब्रह्मवचनम् उपकारविषयस्मरणं स्वातंत्र्यमन्यानपेक्षत्वं कौशलं नैपुण्यं कांतिः "न तत्र सूर्यो भाती"ति श्रुत्युक्तविधा दीप्तिः धैर्यं वीर्यं तच्च युद्धे स्वगृह इव प्रवेशसामर्थ्यम् मार्दवमक्रूरत्वं स्वातंत्र्यमन्यानपेक्षकौशलमेव स्वातंत्र्यं सौभगं कांतिरिति पाठे सौभगं स्पृहणीयत्वम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

येन मनोदुःखेन विकर्शिता कृशतरासि हे वसुंधरे ! तदिदमाधेर्मनःपीडाया मूलं ममाख्याहीत्यन्वयः । अथवा संप्रति प्रभुणा समर्थेन बलिना सर्वांगपुष्टेन कालेन तव सुरार्चितं सौभाग्यमवलीढं ग्रस्तं चेत्यन्वयः ॥ २५ ॥ ❀ ❀ धर्मेण पृष्टा भूमिः तं प्रतिब्रूत इत्याह भवानिति । हे धर्म ! यदाधिमूलं त्वं मामनुपृच्छसि तत्सर्वं भवान् वेद हि तथापि वक्ष्य इति शेषः, येन श्रीकृष्णेन त्वं लोकसुखावहैः तपःशौचदयासत्याख्यैश्चतुर्भिः पादैः कलावपि वर्तसे अवर्तथा इत्यर्थः ॥ २६ ॥ ❀ ❀ यत्र यस्मिन् श्रीकृष्णे इमे उक्ताः सत्यादयोऽनुक्ता अन्ये च महागुणाः प्रत्येकमनन्ताः सन्ति कीदृशाः महत्त्वमिच्छद्भिः पुरुषैः प्रतिबिम्बे तादृशगुणलाभाय प्रार्थ्या उपास्यास्ते कर्हिचिद्यतो न यांति च अभिन्नत्वादित्येतमर्थं स्मेत्यनेन श्रुतिसिद्धं दर्शयति हे देवोत्तम ! तेन गुणपात्रेण श्रीनिवासेन सांप्रतं रहितं पाप्मना कलिनेक्षितं दृष्टमात्मानं मां च भवन्तं च शोचामीत्यन्वयः । सत्यं निर्दुःखानन्दानुभवः भूतहितयथार्थभाषणं वा शौचं नित्यशुद्धिः प्रकृतिसम्बन्धाभावान्नित्यं बाह्याभ्यन्तरशुद्धिता हरेरेव अन्यत्र मृज्जलाभ्यां रागराहित्येन । दया सज्जनेष्वार्तप्राणिषु चित्तद्रवत्वं वा उभयत्र समम् । दानं भक्ताभक्तमध्यमेषु सुखदुःखमिश्र-

फलवितरणम्। अन्यत्र धर्मार्थं पात्रे वित्तविश्राणनं त्यागोऽस्वकीये स्वकीयताबुद्ध्यपरपर्यायमिथ्याभिमानोत्सन्नता। अन्यत्र संन्यासः। सन्तोषः स्वरूपानन्दपानेनान्यत्रालम्बुद्धिः, अन्यत्र यदृच्छया प्राप्तभोगेष्वलम्प्रत्ययः। आर्जवं व्यवहारेष्ववक्रता मनसि वचसि चैकविधता उभयत्र समानम्। शमः स्वतः प्रियरूपत्वादिदं प्रियमिदमप्रियमिति बुद्धिविधुरता शंरूपतया मीयत इति वा। अन्यत्र बुद्धेर्भगवन्निष्ठता दमः इन्द्रियाणां स्ववशत्वमुभयत्र समानं स्वतः परत इति विशेषः शत्रुनिग्रहो वा। तप आलोचनं मुक्तिज्ञानम्। अन्यत्र कृच्छ्रचांद्रायणाद्युपवासनियमः। साम्यं सर्वावतारांतर्यामिरूपेषु निर्दोषगुणपूर्णत्वेन समता यथास्थितवस्तुदर्शनं वा उभयत्र समानम् नतु सर्वत्र शत्रुमित्रभावराहित्यं, तितिक्षा महापराधसहनं यथा भृगोः पादाहत्यपराधम् अन्यत्र द्वन्द्वसहिष्णुता उपरतिः स्वरूपरतिः। उपः मुख्यप्राणः तस्मिन् रतिर्वा ऊ रुद्रः[1] अन्यत्र काम्यकर्मनिवृत्तिः कृतकृत्यतया व्यर्थसर्वव्यवहारोपरमो वा। श्रुतं सर्वत्र श्रवणशक्तिः श्रोतेत्यादेः श्रुतिप्रसिद्धता वा। अन्यत्र शास्त्रार्थतात्पर्यावधारणं श्रुत्यर्थविचारो वा॥ २७॥ ❀ ❀ ज्ञानं सर्वज्ञतान्यत्र परोक्षापरोक्षभेदेन परमार्थविषयं विरक्तिः स्वेतरविषये असारताबुद्धिः अन्यत्र शब्दादिविषयरागराहित्यम्। ऐश्वर्यं समस्तजगदीशितृत्वसामर्थ्यम् अन्यत्राणिमादिकं शौर्यं संग्रामेष्वपलायित्वमुभयत्र समानं तेजः परैरप्रधृष्यत्वम् अन्यत्र ब्रह्मवर्चसं धृतिः सर्वधारणम् "एष सेतुर्विधृतिरि"ति श्रुतेः, विकारहेतावविकारित्वं वा अन्यत्र जिह्वोपस्थजयः स्मृतिरतीतानागतानंतब्रह्माण्डादिस्मरणम् अन्यत्रावगतपदार्थानुसन्धानं स्वातंत्र्यमपराधीनत्वम् अन्यत्र स्वतन्त्रो विष्णुः तदधीनत्वं कुमारीकंकणवदेकाकित्वं वा कौशलं सर्वकर्मणि वैचित्र्यकरणबुद्धिः अन्यत्र शिल्पविद्यावैशारद्यं कांन्तिर्देहगता दीप्तिः अन्यत्र भगवद्भक्तिकामनं सौभगं शुभैकभागित्वम् अन्यत्र लोकमनोहरत्वं मार्दवं भक्तेषु मृदुत्वम् उभयत्र समानं क्षमा क्रोधासमुत्थितिः उभयत्र समम्॥२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विकर्शितासि विशेषेण कृशीकृतासि॥ २५-२६॥ ❀ ❀ तत्र सत्यमित्यादि। सत्यं यथार्थभाषणं १, शौचं शुद्धत्वं २, दया परदुःखासहनम् ३, अनेन शरणागतपालकत्वं ४, भक्तसुहृत्त्वञ्च ५, क्षान्तिः क्रोधोत्पत्तौ चित्तसंयमः ६, त्यागो वदान्यता ७, सन्तोषः स्वतस्तृप्तिः ८, आर्जवमक्रूरता ९, अनेन सर्व्वशुभङ्करता १०, शमो मनोनैश्चल्यम् ११, अनेन सुदृढव्रतत्वमपि १२, दमो बाह्येन्द्रियनैश्चल्यं १३, तपः क्षत्रियत्वादिलीलावतारानुरूपः स्वधर्म्मः १४, साम्यं शत्रुमित्रादिबुद्ध्यभावः १५, तितिक्षा स्वस्मिन् परापराधस्य सहनम्। १६, उपरतिर्लाभप्राप्तावौदासीन्यं १७, श्रुतं शास्त्रविचारः १८,॥ २८॥ ❀ ❀ ज्ञानं पञ्चविधं बुद्धिमत्त्वं १९, कृतज्ञत्वं २०, देशकालपात्रज्ञत्वं २१, सर्व्वज्ञत्वम् २२, आत्मज्ञत्वञ्च २३, विरक्तिरसद्विषयवैतृष्ण्यम् २४, ऐश्वर्य्यं नियन्तृत्वं २५, शौर्य्यं संग्रामोत्साहः २६, तेजः प्रभावः २७, अनेन प्रतापश्च स च प्रभावविख्यातिः २८, बलं दक्षत्वं तच्च दुष्करक्षिप्रकारित्वं २९, स्मृतिः कर्त्तव्यार्थानुसन्धानं धृतिरिति पाठे क्षोभकारणे प्राप्तेऽप्यव्याकुलत्वं ३०, स्वातन्त्र्यमपराधीनता ३१, कौशलं त्रिविधं क्रियानिपुणता ३२, युगपद्भूरिसमाधानकारितालक्षणा चातुरी ३३, कलाविलासविदग्धतालक्षणा वैदग्धी च ३४, कान्तिः कमनीयता एषा चतुर्विधा अवयवस्य ३५, हस्ताद्यङ्गादिलक्षणस्य ३६, वर्णरसगन्धस्पर्शशब्दानां तत्र रसश्चाधरचरणस्पृष्टवस्तुनिष्ठो ज्ञेयः ३७, वयसश्चेति;३८, एतया (कान्त्या) नारीगणमनोहारित्वमपि ३९, धैर्य्यमव्याकुलता ४०, मार्दवं प्रेमार्द्रचित्तत्वम् ४१, अनेन प्रेमवश्यत्वञ्च ४२॥ २८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विकर्शितासि विशेषेण कृशीकृतासि॥ २५॥ ❀ ❀ ननु यद्यप्यहं जानामि तदपि त्वन्मुखात् श्रोतुमिच्छामीत्यत आह चतुर्भिरिति। येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्त्तसे इति वर्त्तमानसामीप्ये वर्त्तमानप्रयोगः। तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः॥ २६॥ ❀ ❀ सत्यं यथार्थभाषणम्। शौचं शुद्धत्वम्। दया परदुःखासहनम्। अनेन शरणागतपालकत्वं भक्तसुहृत्त्वं च। क्षान्तिः क्रोधोत्पत्तौ चित्तसंयमः। त्यागो वदान्यता। संतोषः स्वतस्तृप्तिः। आर्जवमवक्रता। शमो मनोनैश्चल्यम् अनेन सुदृढव्रतत्वमपि। दमो बाह्येन्द्रियनैश्चल्यम्। तपः क्षत्रियत्वादिलीलारूपः स्वधर्मः। साम्यं शत्रुमित्रादिबुद्ध्यभावः। तितिक्षा स्वस्मिन् परापराधस्य सहनम्। उपरतिर्भोगप्राप्तावौदासीन्यम्। श्रुतं शास्त्रविचारः॥ २७॥ ❀ ❀ ज्ञानं सर्वज्ञत्वं कृतज्ञत्वादिकं च। विरक्तिर्वैतृष्ण्यम्। ऐश्वर्यं नियन्तृत्वम्। शौर्यं संग्रामोत्साहः। तेजः प्रभावः। बलं दक्षत्वम्। स्मृतिः कर्त्तव्यार्थानुसन्धानरूपा। स्वातन्त्र्यम् अपराधीनता। कौशलं कलाविलासादिवैदग्धी। कान्तिः कमनीयता। धैर्यमव्याकुलत्वम्। मार्दवं सुकुमारत्वं प्रेमार्द्रत्वं च॥ २८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे वसुन्धरे! येन आधिमूलेन त्वमाधिद्वारा विकर्शितासि तदिदमाचक्ष्व आख्याहि। हे अम्ब! सुरार्चितं सुरैरपि पूजितं तव सौभगं कालेन किं वा हृतम्॥ २५॥ ❀ ❀ एवमुक्ता धरण्युवाच भवानित्येकादशभिः यन्मामाधिमूलं पृच्छसि तत्सर्वं भवान्वेद जानात्येव तथापि शृणु येन भगवता हेतुभूतेन लोकसुखावहैश्चतुर्भिः पादैस्त्वं वर्तसे यत्र च सत्यादयो गुणा न वियंति तेन

१. अनेन उं रुद्रं पान्तीति उपः मुख्यप्राण इत्यसूचि।

श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २६ ॥ ❀ ❀ सत्यमाप्ततमत्वम् यथार्थबोधकवेदप्रवर्तकत्वात् १, शौचं नित्यशुद्धविग्रहादिमत्त्वम् २, दया परदुःखासहिष्णुत्वम् ३, क्षांतिर्जितक्रोधत्वम् ४, त्यागो वदान्यत्वम् ५, सन्तोषो नित्याप्तकामत्वं ६, आर्जवमवक्रत्वं ७, शमः स्थिरमनस्कत्वम् ८, दमो बाह्येंद्रियस्थैर्यम् ९, तपः आलोचनम् १०, साम्यमरिमित्रोदासीनराहित्यम् ११, तितिक्षा द्वेषशून्यत्वम् १२, अयुक्तव्यापारादुपरतिः १३, श्रुतं सर्ववेदशास्त्रार्थयाथात्म्यवित्त्वम् १४, ॥ २७ ॥ ❀ ❀ ज्ञानं भूतभविष्यद्वर्तमानसर्वपदार्थविषयकम् १५, विरक्तिर्विषयेषु वैराग्यम् १६, ऐश्वर्यं सर्वचेतननियंतृत्वम् १७, शौर्यं सर्वविजयसामर्थ्यम् १८, तेजः सर्वब्रह्मादिस्तंबपर्यंतैरजेयत्वे सति पराभिभवनसामर्थ्यम् १९, बलं विश्वधारणसामर्थ्यम् २०, स्मृतिः यथापूर्वं विश्वरचनानुसन्धानम् २१, स्वातन्त्र्यं सर्वनियंतृत्वे सति स्वायत्तत्वम् २२, कौशल्यं विश्वसर्जनपालनादिक्रियानैपुण्यम् २३, कान्तिर्निरतिशयसौन्दर्य्यम् २४, धैर्यमव्याकुलत्वे सति प्रतिज्ञापालकत्वम् २५, मार्दवं मनोवाक्कायव्यापारसाम्यम् २६, ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इदं वक्ष्यमाणं भवत्येव तवाधिमूलं तत्र संमतिमेव आचक्ष्व हे वसुंधरे ! सर्वरत्नादिसहिते शृंगारप्रिये येन रहितेन त्वं विकर्शितासि ततः स्वयमेवाह यत्कलिना कालेन बलिना सुरार्चितं तव सौभाग्यं भगवत्स्थितिरूपं तद्द्रूपमिति कालेन चिह्नादीनामपि हरणात् ॥ २५ ॥ ❀ ❀ तत्र धर्मोक्तं सर्वमेव हेतुमंगीकृत्य सर्वेषां मूलं भगवद्गमनमिति यत्रैव तद्राहित्यं तमेव शोचामीत्याह-भवान् हि वेदेति युक्तिरुक्तैव धर्मस्य ज्ञानमपि प्रमाणमुत्प्रेक्षितमिति प्रमितमेव स्वात्मनि प्रमितत्वात् अतस्तदाह चतुर्भिर्वर्तसे येनेति द्वापरांते स्वभावत एव पादत्रयं गच्छति तदापि त्वं येन भगवता कृत्वा चतुर्भिः पादैर्वर्तसे ते पादाः सर्वसुखहेतवः ॥ २६ ॥ ❀ ❀ ते च भगन्निष्ठाः तत्संबंधादेवान्यत्र भवंति तेन गुणपात्रेण रहितं सर्वमेव शोचामीति वक्तुं गुणान् गणयति भगवदीयान् सत्यमित्यादिना-सत्यं यथार्थभाषणं शौचं शुद्धत्वं दया परदुःखप्रहाणेच्छा क्षांतिः क्रोधप्राप्तौ चित्तसंयमनं त्यागः अर्थिषु मुक्तहस्तता संतोषः अलंबुद्धिः आर्जवमवक्रता शमो मनोनैश्चल्यं तपः स्वधर्मः साम्यमरिमित्राद्यभावः तितिक्षा अपराधसहनम् उपरतिः लाभप्राप्तावौदासीन्यं स्मृतं शास्त्रविचारः ॥ २७ ॥ ❀ ❀ ज्ञानमात्मविषयं विरक्तिर्वितृष्णता ऐश्वर्यं नियंतृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः बलं दक्षत्वं स्मृतिः कर्तव्यार्थानुसंधानं स्वातंत्र्यमपराधीनता कौशलं क्रियानिपुणता कांतिः सौन्दर्यं धैर्यमव्याकुलता मार्दवं चित्ताकाठिन्यम् ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

सत्यमित्यत्र । शोके हर्षे चेति । इदानींतनशोके प्राथमिकहर्षे चेत्यर्थः ॥ २६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

सर्वेषामपि बलिनां बलीयसा कालेन ते तव यत्सुरार्चितं देवैरपि बहुमतं सौभगमद्य हृतं तद्वा किं शोचसि ? त्वत्सौभाग्येनैवास्मकमपि सौभाग्यमिति सूचयन्सम्बोधयति-हे वसुन्धरे इति । येनाधिना विकर्शितासि कृशत्वं नीतासि तस्य तव आधेर्मनःपीडाया इदं मूलं कारणं ममाचक्ष्व मह्यं कथय ॥ २५ ॥ ❀ ❀ एवमुक्ता धरण्याह-भवानिति दशभिः । हीत्यवधारणे । हे धर्म यन्मम आधिकारणं त्वं मामनुपृच्छसि तत्सर्वं भवान् वेद जानात्येवेत्यन्वयः । तथापि त्वं वदेत्यपेक्षायामाह-येन हेतुभूतेन सर्वलोकसुखावहैश्चतुर्भिः पादैर्वर्तसे अवर्तथाः यत्र च सत्यादयो गुणाः कर्हिचिदपि न वियन्ति न क्षीयन्ते तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २६ ॥ ❀ ❀ गुणानेव दर्शयति-सत्यं यथार्थभाषणम् । शौचं शुद्धत्वम् । दया परदुःखपरिहारेच्छा । क्षान्तिः क्रोधोत्पत्तौ चित्तसंयमः । त्यागः अर्थिषु मुक्तहस्तता । सन्तोषः अलम्बुद्धिः । आर्जवमवक्रता । शमो मनोनैश्चल्यम् । दमो बाह्येन्द्रियनैश्चल्यम् । तपः स्वधर्मः । साम्यमरिमित्रादिबुद्ध्यभावः । तितिक्षा परापराधसहनम् । उपरतिर्विषयलाभेऽपि तत्रौदासीन्यम् । श्रुतं शास्त्रार्थविचारः ॥ २७ ॥ ❀ ❀ ज्ञानं सर्वज्ञत्वम् । विरक्तिः विषयेषु निस्पृहत्वम् । ऐश्वर्यं नियन्तृत्वम् । शौर्यं सङ्ग्रामोत्साहः । तेजः प्रभावः । बलं शरीरसामर्थ्यम् । स्मृतिः कर्तव्यार्थानुसन्धानम् । स्वातन्त्र्यमपराधीनत्वम् । कान्तिः सौन्दर्यम् । धैर्यम् अव्याकुलता । मार्दवं मृदुस्वभावः ॥ २८ ॥

हिन्दी अनुवाद

देवि ! तुम धन-रत्नोंकी खान हो । तुम अपने क्लेशका कारण, जिससे तुम इतनी दुर्बल हो गयी हो, मुझे बतलाओ । मालूम होता है, बड़े-बड़े बलवानोंको भी हरा देनेवाले कालने देवताओंके द्वारा वन्दनीय तुम्हारे सौभाग्यको छीन लिया है ॥ २५ ॥ ❀ ❀ पृथ्वीने कहा-धर्म ! मुझसे जो कुछ पूछ रहे हो, वह सब स्वयं जानते हो । जिन भगवान्के सहारे तुम सारे

संसारको सुख पहुँचानेवाले अपने चारों चरणोंसे युक्त थे; जिनमें सत्य, पवित्रता, दया, क्षमा, त्याग, सन्तोष, सरलता, शम, दम, तप, समता, तितिक्षा, उपरति, शास्त्रविचार, ज्ञान, वैराग्य, ऐश्वर्य, वीरता, तेज, बल, स्मृति, स्वतन्त्रता, कौशल, कान्ति, धैर्य, कोमलता ॥ २६–२८ ॥

प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ २९ ॥
एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥ ३० ॥
तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् । शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥ ३१ ॥
आत्मानं चानुशोचामि भवन्तं चामरोत्तमम् । देवान् पितॄनृषीन् साधून् सर्वान् वर्णांस्तथाऽऽश्रमान् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रागल्भ्यं प्रतिभातिशयः । प्रश्रयो विनयः । शीलं सुस्वभावः । सहओजोबलानि मनसो ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च पाटवानि । भगो भोगास्पदत्वम् । गांभीर्यमक्षोभ्यत्वम् । स्थैर्यमचंचलता । आस्तिक्यं श्रद्धा । कीर्तिर्यशः । मानः पूज्यत्वम् । अनहंकृतिर्गर्वाभावः ॥ २९ ॥ ❀ ❀ एते एकोनचत्वारिंशदन्ये च ब्रह्मण्यशरण्यत्वादयो महान्तो गुणा यस्मिन्नित्याः सहजा न वियन्ति न क्षीयन्ते स्म ॥ ३० ॥ ❀ ❀ तेन गुणपात्रेण गुणालयेन । पाप्मना पापहेतुना ॥ ३१–३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रतिभाशयेनैव वावदूकत्वम् । विनयेन ह्रीमत्त्वं यथोचितसर्वमानदातृत्वं चोक्तम् । सुस्वभावेन साधुसमाश्रयत्वं च भगस्त्रिधा भोगास्पदत्वसुखित्वसर्वसमृद्धित्वभेदात् । गाम्भीर्यं दुर्बोधाभिप्रायत्वमपि । आस्तिक्यं शास्त्रचक्षुष्ट्वम् । यशः साद्गुण्यख्यातिः रक्तलोकत्वं च ॥ २९ ॥ ❀ ❀ चकाराद्ब्रह्मण्यत्वसर्वसिद्धिनिषेवितत्वसच्चिदानन्दविग्रहत्वादयो ज्ञेयाः । अत्र संतोषादयः कतिचिद्गुणा भक्तसम्बन्धादन्यत्र ज्ञेयाः । महत्त्वमिच्छद्भिः प्रार्थ्या इति महागुणा इति च वरीयस्त्वमपि गुणान्तरम् । अनेन तेषां गुणानामन्यत्र स्वल्पत्वं चलत्वं च । अत्रैव पूर्णत्वमविनश्वरत्वं चोक्तम् । अत एव सूतवाक्यं "नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् । न वितृप्यन्ति हि दृशः श्रियो धामांगमच्युतम्" इति । तथा नित्या इति । न वियन्तीति । सदा स्वरूपसंप्राप्तमपि गुणान्तरम् । अन्ये च जीवा लभ्या यथा । तत्राविर्भावमात्रेऽपि सत्यसंकल्पत्वं वशीकृतचिन्त्यमानत्वम् । आविर्भावविशेषत्वेप्यखण्डसत्त्वे गुणस्य केवलस्वयमवलम्बनत्वं जगत्पालकत्वं तथा हतारेर्गतिदातृत्वं तथात्मारामजनाकर्षित्वं ब्रह्मरुद्रादिसेवितत्वं परमाचिन्त्यस्वरूपशक्तित्वम् । आनन्त्येन नित्यनूतनसौन्दर्याद्याविर्भाववत्त्वं पुरुषावतारत्वेऽपि मायानियन्तृत्वं जगत्सृष्ट्यादिकर्तृत्वं गुणावतारादिबीजत्वम् । अनन्तब्रह्माण्डाश्रयरोमविवरत्वं वासुदेवत्वनारायणत्वादिलक्षणभगवत्त्वाविर्भावेपि एवंभूतपरमाचिन्त्याखिलमहाशक्तिमत्त्वं स्वयं भगवल्लक्षणत्वे तु हतारिमुक्तिदातृत्वं स्वस्यापि विस्मापकस्वरूपमाधुर्यवत्त्वादि । तदित्थं दिङ्मात्रदर्शनमत एवोक्तं ब्रह्मणा "गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य" इति ॥ ३० ॥ ❀ ❀ सांप्रतमधुना ॥ ३१ ॥ ❀ ❀ न केवलमात्मानमेव शोचाम्यपि तु देवादीनपीत्याह–देवानिति । कलियुगे देवपितृविप्रसाधुभक्तिरहिताः सर्वे भविष्यन्तीति भावः ॥ ३२ ॥

श्रीमद्वीरराघवव्याख्या

प्रागल्भ्यं सभासु धार्ष्ट्यं प्रश्रयो महत्सु विनयः शीलं सद्वृत्तिः सहः प्राणस्य स्वाभाविकसामर्थ्यं ओज इंद्रियादिजनितबंधनधारणसामर्थ्यं भगो ज्ञानाद्युत्कर्षः गाम्भीर्यं दुःखग्राह्याभिप्रायत्वं स्थैर्यं क्रोधनिमित्तैरविकारः आस्तिक्यं शास्त्रार्थविश्वासः कीर्तिर्यशः मानः पूजार्हता अनहंकृतिर्देहात्माभिमानराहित्यम् ॥ २९–३० ॥ ❀ ❀ श्रीयते ब्रह्मादिभिरिति श्रीः लक्ष्मीः तस्याः निवासः इत्यभिप्रेतम् ॥ ३१ ॥ ❀ ❀ आत्मानं भवंतं चानुशोचामीत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली ।

प्रागल्भ्यं धाष्टर्यमुभयत्र समं प्रश्रयो विनयः समं शीलं लोकमनोहरस्वभावत्वं समं सहः सहनशक्तिः प्राणस्य स्वाभाविकसामर्थ्यं वा समम् ओजः पराभिभवशक्तिः अन्यत्र मानसबलम् । बलं स्वेच्छाकरणशक्तिः अन्यत्र शरीरादिधारणसामर्थ्यं वा

१. प्रा० पा०–इमे ।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुस्वभावः सह ओजो बलानि मनइन्द्रियशरीराणां पाटवानि भगः सौभाग्यास्पदत्वं गांभीर्यमक्षोभ्यत्वं धैर्यमचञ्चलता आस्तिक्यं श्रद्धा कीर्तिर्यशः मानः पूज्यत्वम् अनहंकृतिः गर्वाभावः ॥ २९ ॥ ❀ ❀ अन्ये च ब्रह्मण्यत्वभक्तवत्सलत्वादयः नित्याः सहजा इमे चान्ये चेति चकारद्वयं सांसर्गिकदोषनिवृत्त्यर्थं महागुणा इति। पराकाष्ठापन्नाः यथाज्ञानं निरतिशयं बलं निरतिशयमिति एकस्मिन्नपि हि गुणे जाते जगति महत्त्वं लभते जीवः। तेन विना न सर्वथा महत्त्वं भक्तिस्तु भगवद्रूपेति न तया व्यभिचारः। अत एव सर्वैरेते गुणाः प्राथ्याः, ते भगवति व्ययमपि न प्राप्नुवंति ईषदपि न क्षीयंते ॥ ३० ॥ ❀ ❀ एवं गुणनिरूपणस्य प्रयोजनमाह तेनाहमिति सर्वे गुणा एकतः लक्ष्मीश्चैकतः अतस्तां भिन्नतया निरूपयति श्रीनिवासेति भगवन्निर्गमने सर्वे भगवद्गुणाः लक्ष्मीः तद्गुणाश्च निवृत्ताः। अतः शोचामीत्याह। किंच तत्प्रतियोगिनो दोषाः सर्वे समागता इत्याह पाप्मना कलिनेक्षितमिति सर्वेषां पापानां हेतुभूतेन कलिना ईक्षितं दृष्टम् ॥ ३१ ॥ ❀ ❀ आत्मीयोऽयमिति के तदीक्षिता इत्याकांक्षायां त्वदुक्ताः सर्व एवेति तान् गणयति हे अमरोत्तम देवश्रेष्ठ धर्म! द्वितीयांतपाठो वा देवपितृऋषयः ऋणापकरणकर्त्रभावात्। सदाचाराः न संतीति साधुशोकः वर्णाश्रमाः स्वधर्माभावात् ॥ ३२ ॥

अस्मिन्पर्याये सुबोधिनीप्रकाशो न (सं०)

श्रीगिरिधरकृता बालप्रबोधिनी

प्रागल्भ्यं सभासु धाष्टर्यम्। प्रश्रयो महत्सु विनयः। शीलं सद्वृत्तिः। सहो मनसः सामर्थ्यम्। ओजः ज्ञानेन्द्रियसामर्थ्यम्। बलं कर्मेन्द्रियसामर्थ्यम्। भगो भोगास्पदत्वम्। गाम्भीर्यं दुरवगाह्याभिप्रायत्वम्। स्थैर्यं निमित्ते सत्यपि क्रोधादिविकार-राहित्यम्। आस्तिक्यं शास्त्रार्थविश्वासः। कीर्तिः सुयशः। मानः पूज्यत्वम्। अनहङ्कृतिः कार्ये कृतेऽपि गर्वाभावः ॥ २९ ॥ ❀ ❀ एते च पूर्वोक्ता एकोनचत्वारिंशत् अन्ये च ब्रह्मण्यत्वशरण्यत्वभक्तवत्सलत्वादयो महान्तः परमकाष्ठापन्ना अत एव महत्त्वमिच्छद्भिः प्राथ्या गुणा यत्र कर्हिचिदपि न वियन्ति स तेन गुणपात्रेण साम्प्रतं रहितं लोकं जनसमूहं शोचामीत्यन्वयः। गुणानामव्ययत्वे हेतुमाह–नित्या इति। हे भगवन्निति सम्बोधनेन ज्ञानित्वात् त्वमप्येतत्सर्वं जानासीति सूचितम् ॥ ३० ॥ ❀ ❀ सर्वे गुणा एकतो लक्ष्मीश्चैकत इत्याशयेनाह–श्रीनिवासेनेति। भगवति श्रीकृष्णे गते सर्वगुणसहिता लक्ष्मीरपि गता प्रत्युत पापहेतुना कलिना लोको व्याप्त इत्याह–पाप्मना कलिनेक्षितमिति ॥ ३१ ॥ ❀ ❀ यत्त्वयोत्प्रेक्षितं तत्सत्यमेव, तत्सर्वमपि शोचामीत्याह–आत्मानं चानुशोचामि वृषलैर्भोक्ष्यमाणत्वात्। अमरोत्तमं देवश्रेष्ठं भवन्तं चानुशोचामीत्यूनपदत्वात्। देवादीनपि शोचामि हृतयज्ञादिभागत्वात्। साधूनपि शोचामि दुर्जनपीडितत्वात्। तथा ब्राह्मणादिवर्णान् ब्रह्मचर्याद्याश्रमांश्च शोचामि नष्टधर्मत्वात् ॥ ३२ ॥

हिन्दी अनुवाद

निर्भीकता, विनय, शील, साहस, उत्साह, बल, सौभाग्य, गम्भीरता, स्थिरता, आस्तिकता, कीर्ति, गौरव और निरहङ्कारता—ये उन्तालीस अप्राकृत गुण तथा महत्त्वाकांक्षी पुरुषोंके द्वारा वाञ्छनीय (शरणागतवत्सलता आदि) और भी बहुत से महान् गुण उनकी सेवा करनेके लिये नित्य-निरन्तर निवास करते हैं, एक क्षणके लिये भी उनसे अलग नहीं होते–उन्हीं समस्त गुणोंके आश्रय, सौन्दर्यधाम भगवान् श्रीकृष्णने इस समय इस लोकसे अपनी लीला संवरण कर ली और यह संसार पापमय कलियुगकी कुदृष्टिका शिकार हो गया। यही देखकर मुझे बड़ा शोक हो रहा है। अपने लिये, देवताओंमें श्रेष्ठ तुम्हारे लिये, देवता, पितर, ऋषि, साधु और समस्त वर्णों तथा आश्रमोंके मनुष्योंके लिये मैं शोकग्रस्त हो रही हूँ ॥ २९-३२ ॥

ब्रह्मादयो बहु[1]तिथं यदपाङ्गमोक्षकामास्तपः[2] समचरन् भगवत्प्रपन्नाः।
सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ॥३३॥
तस्याहमब्जकुलिशाङ्कुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृताङ्गी।
त्रीनत्यरोच उपलभ्य [3]ततो विभूतिं लोकान् स मां व्यसृजदुत्स्मयतीं तदन्ते ॥३४॥
यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतन्त्रः।
त्वां दुःस्थमूनपदमात्मनि पौरुषेण सम्पादयन् यदुषु रम्यमबिभ्रदङ्गम् ॥३५॥

---

१. प्रा० पा०—यदनिशं। २. प्रा० पा०—तपोव्रतधरा भगव०। ३. प्रा० पा०—तपोविभूतिं।

का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ।
स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ॥३६॥
तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा । परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ॥३७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे [1]पृथिवीधर्मसंवादो नाम षोडशोऽध्यायः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ।

तस्य विरहो दुःसह इत्याह चतुर्भिः । ब्रह्मादयो यस्याः श्रियोऽपांगमोक्षः स्वस्मिन् दृष्टिपातस्तत्कामाः सन्तो बहुतिथं बहुकालं तपः समचरन्सम्यक् चरन्ति स्म । भगवद्भिरुत्तमैः प्रपन्ना आश्रितापि सा श्रीर्यस्य पादलावण्यमलमनुरक्ता सती सेवते ॥ ३३ ॥ ❀ ❀ तस्य भगवतः श्रीमद्भिः पदैः । केतुर्ध्वजः, अब्जादयः केताश्चिह्नानि येषां तैः । यद्वा अब्जादीनामाश्रयैः । सम्यगलंकृतमंगं यस्याः साहं ततो भगवतो विभूतिं संपदमुपलभ्य प्राप्य त्रीन् लोकानतिक्रम्यारोचे शोभितवत्यस्मि । पश्चात्तस्या विभूतेरन्ते नाशकाले प्राप्ते सत्युत्स्मयन्तीं गर्वं कुर्वाणां मां स व्यसृजत्त्यक्तवान् ॥ ३४ ॥ ❀ ❀ किं च । यो वै आसुरो वंशो येषां तेषां राज्ञामक्षौहिणीशतरूपं ममातिभरं भारमपनीतवान् । त्वां चोनपदत्वाद् दुःस्थं सन्तं पौरुषेण पुरुषकारेणात्मनि स्वस्मिन् संपूर्णपदं सुस्थं संपादयन् "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः, संपादयितुमित्यर्थः । अबिभ्रत् धृतवानित्यर्थः ॥ ३५ ॥ ❀ ❀ तस्य विरहं का वा सहेत । प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैर्मधुमानिनीनां सत्यभामादीनां समानं गर्वसहितं स्थैर्यं स्तब्धत्वं योऽहरत् । यस्यांघ्रिणा रजस्युत्थितेन विटंकिताया अलंकृतायाः सस्यादिमिषेण रोमोत्सवो भवति ॥ ३६ ॥ ❀ ❀ कथयतोः सतोः प्राचीं पूर्ववाहिनीं सरस्वतीं कुरुक्षेत्रे ॥ ३७ ॥

इति प्रथमस्कन्धे टीकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः ।

यत्पादेति । यस्य पादयोः सर्वारविन्दजातेः शोभाधिक्यमसूचीति ॥ ३३ ॥ ❀ ❀ "केतश्चिह्ने निकेते च" इति कोशात् । द्वितीयार्थमाश्रित्याह–यद्वेति । गर्वं कुर्वाणां वैकुण्ठेपि मत्सदृशो नास्तीति गर्ववतीम् ॥ ३४ ॥ ❀ ❀ इत्यर्थ इति । सम्पादयार्थमिति भावः । इत्यर्थ इति । आर्षत्वादत्र गुणाभावो [2]दिपोऽडागमश्चेति भावः ॥ ३५ ॥ ❀ ❀ यद्वा मधु मद्यं तद्वन्मादको मानो यासां सौन्दर्यादिगर्वितानामित्यर्थः, "अलंकारे विटंकस्स्यात्" इत्यभिधानात् ॥ ३६ ॥ ❀ ❀ तयोः पृथ्वीधर्मयोः ॥ ३७ ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे षोडशोऽध्यायः ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

लक्षणेति । इदं च सूत्रं पाणिनीयतृतीयाध्यायस्य द्वितीयपादीयषड्विंशत्यधिकशततमम् । अस्यार्थः—क्रियायाः परिचायके हेतौ चार्थे वर्त्तमानाद्धातोर्लटः शतृशानचौ स्त इति ॥ ३५-३७ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीराधारमणदासगोस्वामिविरचितायां दीपनीव्याख्या-
टिप्पण्यां षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

तदेव विशदयति ब्रह्मादय इति । चतुर्मुखप्रभृतयः यस्या अपांगमोक्षः ईषत्तिर्यक् प्रसारस्तद्विषयत्वमात्मानं कामयमानाः-बहुतिथं बहुकालं तपः समचरन् चक्रुः सा श्रीरपि कमलवनं स्वनिवासं विहाय भगवंतमेव प्रपन्ना च सती यस्य पादयोः सौभगं सौंदर्यमेवालं नितरां भजते सेवते ॥ ३३ ॥ ❀ ❀ तस्य भगवत अब्जादीनां केतूनां चिह्नानां केतैराश्रयभूतैः पदैः पादविन्यासैरलंकृतमङ्गं यस्याः साहं ततः अत एव विभूतिं लक्ष्मीमप्युपलभ्य त्वयाप्येवं भाग्यं न लब्धमित्याक्षिप्य विभूतिं सर्वसमृद्धिं प्राप्येति वा त्रीनपि लोकानत्यरोचे त्रिलोकीमतिक्रम्य ततोप्यधिकं दीप्तिमत्यस्मि एवमुत्स्मयन्तीं गर्वितां मां स भगवान् तदंते अवतारप्रयोजनांते व्यसृजत्तत्याज ॥ ३४ ॥ ❀ ❀ यो वा इति ममातीव भाररूपमासुरवंशेऽसुरसंपद्युक्तवंशे जातानां राज्ञामक्षौहिणीनां शत-

१. प्रा० पा०—पारीक्षिते षोड० । २. दिबर्थ सारस्वतव्याकरणोक्तः ।

मपानुदद्पनीतवान् तथा यश्चात्मतंत्रः स्वतंत्रः ऊनपदमूनं पदं पादद्वयं यस्य तमत एव दुःस्थं दुःखितं त्वामात्मनि स्वस्मिन्यत्पौरुषं सामर्थ्यं तेन सम्पादयन् पादचतुष्टयसम्पन्नं कर्तुमिच्छुर्यदुषु रमणीयमङ्गं शरीरमबिभ्रद्धृतवान् ।। ३५ ।। ❀ ❀ यश्च प्रेमपूर्वकावलोकनेन रुचिरेण सुन्दरेण स्मितेन सुन्दरैर्भाषणैश्च मधुमानिनीनां यादवस्त्रीणामितरावश्यत्वं सम्यक् हृतवान् यस्य चाङ्घ्रिभ्यां विटंकितायाः अलंकृतायाः मम रोमोल्लवो रोमोद्गमो बभूव, तस्य पुरुषोत्तमस्य श्रीकृष्णस्य विरहं का मादृशी सहेत न कापीत्यर्थः ।। ३६ ।। ❀ ❀ इत्थं तयोः पृथिवीधर्मयोः कथयतोर्मिथः संभाषमाणयोः सतोः तदा परीक्षिन्नाम राजर्षिः प्राचीं सरस्वतीं प्रभासतीर्थं प्राप्तः गतः ।। ३७ ।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रीकृष्णविरह एव ममाधिमूलमित्याख्याति ब्रह्मादय इति। यस्याः श्रियः अपांगः कटाक्षः तस्य मोक्ष उन्मीलनविशेषः तं कामयंत इति यदपांगमोक्षकामाः स्वेषु श्रियः कटाक्षनिपातमाकांक्षमाणा इत्यर्थः। शास्त्रोक्तप्रकारेण भगवत्प्रपन्नाः ब्रह्मादयो बहुतिथं बहुकालं भगवतीमभजन्निति शेषेणान्वयः, सा श्रीरनुरक्ता सद्भक्तिमती स्वनिवासमरविन्दवनं पद्मवनं विहाय यस्य श्रीकृष्णस्य पादयोः सौभगं सौभाग्यमलं भजत इत्यन्वयः ।। ३३ ।। ❀ ❀ उपलब्धा तपोविभूतिर्यया सा तथा तपसा विविधफलं प्राप्ता सती तस्य भगवतः अब्जं च कुलिशं चांकुशश्च केतुर्ध्वजश्च अब्जकुलिशांकुशकेतवः लेखारूपा एते केताश्चिह्नानि येषां तानि तैः श्रीमद्भिः पदैः सम्यगलंकृतसर्वांगाऽहं त्रीन् लोकानतिक्रम्यारोचं शोभितवती सः श्रीकांतः तदंते तपोविभूतेरवसाने उत्स्मयन्तीं कानु मत्सदृशी स्त्रीत्यहंकुर्वाणां मां व्यसृजदित्येकान्वयः। तदंत इति वितरपेक्षयोक्तं न तु भूमेः पुण्यावसानमस्ति भगवत्पत्नीत्वात् ।। ३४ ।। ❀ ❀ यो वै असुराणां सम्बन्धी वंश आसुरवंशः तस्मिन् जातानां राज्ञामक्षौहिणीशतं ममातिभरमपानुदद्पाहरत् शतमिति शब्दः सहस्रादिवाची, त्वयि चतुष्पदत्वेन पूर्णपदं सम्पादयन् आत्मतन्त्रो यदुषु रम्यं रमणीयमङ्गमबिभ्रत् ।।३५।। ❀ ❀ यश्च प्रेम्णावलोकश्च रुचिरं स्मितं च वल्गुर्मधुरा जल्पश्च ते तथोक्तास्तैर्मधुमानिनीनां समानमभिमानेन सह वर्तमानं स्थैर्यमहरत् यस्यांघ्रिभ्यां विटंकितायाश्चिह्निताया अलंकृताया वा मम रोमोत्सवः रोमांचोऽभूदिति शेषः, तस्य पुरुषोत्तमस्य विरहं का वा स्त्री सहेत न कापीत्यन्वयः ।। ३६ ।। ❀ ❀ तदवसरे तत्र परीक्षितो गमनमाह तयोरिति। परीक्षिन्नाम राजश्रेष्ठः कुरुक्षेत्रे प्राचीं दिशमुद्दिश्य स्यन्दमानां नाम्ना सरस्वतीं नदीं प्राप्त इत्यन्वयः ।। ३७ ।।

इति श्रीमद्भागवते प्रथमस्कन्धे श्रीविजयध्वजटीकायां रत्नावल्यां षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भगवन्तं प्रपन्ना अपि तस्या अपि प्रेयसीत्वात् यस्याः कृपाकटाक्षकामा ब्रह्मादयो बहुतिथं बहूनां कालानां पूरणं कालं व्याप्य तपः समचरन्, सा स्ववासमरविन्दवनं विहायेति तत्पादयोः सर्व्वारविन्दजातिशोभातिक्रमे तात्पर्य्यम्। सापि भजत इति ।। ३३ ।। ❀ ❀ तत्सम्बन्धेन स्वविभूत्यतिशयो युक्त एवेत्याह तस्य इति ।। ३४ ।। ❀ ❀ पूर्व्वे ये आसुरवंशा आसन् त एव राजानस्तेषाम्। छिन्नप्ररूढादिवत् समासः। पाठान्तरे आसुरवेशाः आसुरभावं प्रविष्टा इत्यर्थः। ऊनपदं त्वामात्मनि आश्रये सति सम्पादयन् सम्पन्नं पूर्णपदं कुर्व्वन् ।। ३५ ।। ❀ ❀ तस्य विरहं का वा सहेत। प्रेमवलोकश्च रुचिरं स्मितं च वल्गुजल्पश्च तैर्मधुमानिनीनां मधुवन्मादको मानः पातिव्रत्यादिगर्वो यासाम् अस्ति तासां सत्यभामादीनां समानं गर्व्वसहितं स्थैर्य्यं शुद्धत्वं यः अहरत्। यस्यांघ्रिणा रजस्युत्थितेन विटङ्कितायाः अलंकृतायाः शष्पादिमिषेण रोमोत्सवः भवति ।। ३६-३७ ।।

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बहुतिथं बहुकालं भगवन्तं प्रपन्ना अपि ब्रह्मादयः सकामभक्तत्वात् यदपाङ्गेत्यादि ।। ३३ ।। ❀ ❀ तस्य श्रीकृष्णस्य। केतं चिह्नं त्रीन् लोकान् अतिक्रम्य अरोचे शोभितवत्यस्मि। ततः श्रीकृष्णाद्विभूतिं सम्पदम् उपलभ्य प्राप्य तदन्ते विभूतेर्नाशकाले प्राप्स्यमाने उत्स्मयन्तीं मत्तुल्यो वैकुण्ठोऽपि न भवतीत्यन्तर्गर्व्ववतीम् ।। ३४ ।। ❀ ❀ पूर्व्वे ये आसुरवंशा आसन् त एव राजानस्तेषाम्। छिन्नप्ररूढादिवत् समासः। पाठान्तरे आसुरवेशाः आसुरभावं प्रविष्टा इत्यर्थः। ऊनपदं त्वामात्मनि आश्रये सति सम्पादयन् सम्पन्नं पूर्णपदं कुर्व्वन् ।। ३५ ।। ❀ ❀ मधुमानिनीनां सत्यभामादीनां स्थैर्य्यमचाञ्चल्यं मानसहितम्। विटङ्किताया अलंकृताया इति तेन तस्य सर्वास्वपि प्रेयसीषु मध्ये अहं सदैव स्वाधीनभर्तृका विरहरहितैवासमिति भावः ।। ३६ ।। ❀ ❀ प्राचीं पूर्व्ववाहिनीम् ।। ३७ ।।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। प्रथमे षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तद्विरहस्य दुःसहत्त्वमाह ब्रह्मेति चतुर्भिः । ब्रह्मादयः यस्याः अपांगमोक्षः स्वेषु दृष्टिपातस्तत्कामाः बहुतिथं बहुकालं तपः समचरन् सम्यक् चक्रुः सा श्रीः भगवत्प्रपन्ना सती स्ववासमरविंदवनं विहाय तस्य भगवतः पादयोः सौभगं सौन्दर्यम् अनुरक्ता नित्योद्युक्ता अलमत्यर्थं भजते सेवते ॥ ३३ ॥ ❀ ❀ तस्य श्रीकृष्णस्य युक्तैः पदैः कथंभूतैः अब्जकुलिशांकुशोपलक्षितानां यववेणुध्वजकुम्भादीनां केतूनां चिह्नानां केतैराश्रयैः अलंकृतमंगं यस्याः साऽहं तत एव विभूतिं समृद्धिमुपलभ्य प्राप्य त्रीन् लोकानत्यरोचं ताननतिक्रम्य शोभितवत्यस्मि तदित्थमुत्समर्तीं मां सः श्रीकृष्णस्तदंते समृद्धिक्षयकाले व्यसृजत्तत्याज ॥ ३४ ॥ यः श्रीकृष्णः असुराणामयमासुरः स वंशे येषां राज्ञां राजच्छद्मासुराणाम् अक्षौहिणीशतरूपं ममातिभरमपानुददपनीतवान् तथा त्वां चोनपदमत एव दुःस्थं संतं पौरुषेण सामर्थ्येन आत्मनि स्वस्मिन् संपूर्णपदं संपादयन् संपादयितुं-हेतौ शता-यदुषु रम्यं रमणीयमंगं श्रीविग्रहमबिभ्रद्धृतवान् आविश्चकार इति यावत् तस्य पुरुषोत्तमस्य विरहं का वा सहेतेत्युत्तरेणान्वयः ॥ ३५ ॥ ❀ ❀ प्रेमपूर्वकेणावलोकेनावलोकनेन रुचिरेण स्मितेन वल्गुजल्पैः मधुरसंभाषणैश्च मधुमानिनीनां मधुवंशराजन्यभार्याणां मानेन सहितं स्थैर्यं स्तब्धत्वम् अहरत् यदंघ्रिविटंकितायाः यस्य चरणाभ्यामलंकृताया मम रोमोत्सवः रोमोद्गमो बभूव तस्य श्रीपुरुषोत्तमस्य विरहं मादृशी का वा सहेत न काचिदपीत्यर्थः ॥ ३६ ॥ ❀ ❀ एवं तयोः पृथिवीधर्मयोः मिथः कथयतोः संभाषमाणयोः प्राचीं पूर्ववाहिनीं सरस्वतीं प्राप्तः ॥ ३७ ॥

इति श्रीमद्भागवतसिद्धान्तप्रदीपटीकायां प्रथमस्कन्धीये षोडशोऽध्यायार्थप्रकाशः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अलमेतैर्निरूपितैः मुख्यतया त्वात्मानमेवानुशोचामीत्याह ब्रह्मादय इति द्वाभ्याम् । अतः केचित् इमे गुणाः प्राकृतकार्य-गुणरूपाः गुणसंबंधादेव भगवति वर्त्तंते न सहजा इत्याहुः । ते प्रष्टव्याः कस्यैते गुणा इति सत्त्वादीनामात्मनो वा, आद्ये स्वातंत्र्या-दीनां तदीयत्वे गुणत्वमेव लुप्यते ब्रह्मत्वं वा भवेत् संयोगजत्वेऽपि प्राप्ताप्राप्तविवेकेन गुणसंबंधकृताश्चेत् गुणानामेव उत्पत्तिपक्षस्तु वैनाशिकप्रक्रियाया अनङ्गीकारात् न घटते इत्यादिवाक्यविरोधश्च सगुणो भगवानिति तु पक्षः निराकृतो निराकरिष्यते च । किंच यामनुपपत्तिं परिहर्तुं भगवति सत्त्वादीन् कल्पयंति तत्र सत्त्वादेः का शक्तिः यया भगवदनुपपत्तिमपि दूरीकुर्युः । यथा यावानर्थोऽ-स्माभिर्ब्रह्मण्युच्यते तावान् गुणेषु मायायां च मन्यते चेत् मायेत्यसुरा इति पक्षे तु व्यभिचरेयुरित्यलं विस्तरेण । बहुतिथं बहुकालं भगवत्त्यागस्य परमानिष्टत्वं शास्त्रार्थः तत् किं स्वभावत एव हेतुना वेति विचार्य्यते । तत्र भगवदीयानां भगवत्त्यागः सर्वानर्थः तदपेक्षया अन्येषां हीनत्वात् संघातप्रवेशेन सापेक्षत्वात् हीनापेक्षया स्वरूपनाशापत्तिः । अतो भगवदीयानां मध्ये मुख्या लक्ष्मीः ततः सामर्थ्यमपि तस्या अकिंचित्करमिति तन्निर्वाहार्थं च कार्यकारणे च उदासीना भगवंतमेव भजते, अन्ये च पुनः तत्सेवकाः अहं च सपत्नी ततो भगवत्त्यागे महाननर्थ इति वक्तुं लक्ष्म्याः कृत्यमाह–तस्या अपि कार्यवृत्तांत उच्यते, यदपांगमोक्षकामा यस्याः लक्ष्म्याः अपांगः कटाक्षः तस्य मोक्षः तत्कामा ब्रह्मादयः । अत्र कटाक्षपदेन भगवन्निष्ठा रागसहितभगवद्विषयकामभावसहित-स्वसामर्थ्याभावोद्गिरणसहितार्थदृष्टिरुच्यते, ततः तस्यां दृष्टौ भगवान् भगवद्विषयकामः भगवतः स्नेहः लक्ष्मीसृष्टिरिति पंच पदार्थाः संति । ते हि दुर्लभा एकत्र समुदिताः, अतो दृष्टिविषयतासिद्ध्यर्थं भगवत्प्रपन्ना भगवति शरणगता भगवंतं हृदये स्थापयित्वेत्यर्थः तादृशाः संतस्तपः कुर्वंति एतादृशाः कटाक्षाः लक्ष्म्याः प्रतिक्षणं सहस्रं भवंति, एवं माहात्म्ययुक्तापि सा लक्ष्मीः चरणारविंदं भजते भगवत्त्यागे तस्यैव हेतुत्वात् तस्यापि दुर्लभश्चरणः सर्वथा मे चरणप्राप्तिस्तु सुतरां दुर्लभा । एवं तस्याः कार्यमुक्त्वा चरणपरित्यागमाह स्ववासमरविंदवनं विहायेति शतांशेनाप्यन्यासक्तौ चरणसेवा दुर्लभेति स्वस्य जन्मस्थानमपि अरविंदवनं विहाय वनपदेन वास्तव्यत्वं सूचितं चरणसौभाग्यं भजते भक्तिनिष्ठा भवतीत्यर्थः । एतावता मम चरणत्वात् मत्सेवां सापि करोतीति अहं भगवदीयानामुत्तमेति भावः ॥ ३३ ॥ ❀ ❀ चरणसौभाग्ये एवं लालसा लक्ष्मीः तत्प्राप्तये तत्त्वाय वा अनुरागेणोत्पन्नतुष्टत्वं द्योतयति तन्मयि सर्वत्रास्थितमित्याह अब्जकुलिशांकुशकेतुकेतैरिति भगवच्चरणकमलाकृतिरेखा एकदेशस्य कमलत्वसंपादिकाः सन्ति तेन मकरंद-रूपामृतं तत्र फलं नियतमस्तीति सूचितं तत्राधिकारिणो दुर्लभाः सर्वथा दोषरहिताः सत्संघाते विद्यमानानामसंभावितं तदर्थं भगवच्चरणारविंद एव वज्राकारा रेखा वर्त्तते पापपर्वतानां छेदिका, अतस्तत्सेवायां प्रथमतः सर्वपापक्षयः, किंच मनोनैश्चल्ये सर्वमेतत् संभवति योगादिना तत्साधने बहिर्मुखता स्यात् अतः भगवच्चरणारविंद एव सेवकानां मनोवशीकरणार्थमंकुशाकारा रेखा वर्त्तते, अतो भगवच्चरणारविंदमाहात्म्यादेव तत्सेवकानां ततो मनो न गलति नापि मार्गविरोधेन चैतत् सर्वभजनानंतरं भवति भजनप्रवृत्तिरेव दुर्लभा कालकर्मस्वभावेभ्यो भयसंभवात् सर्वदा जीवानां भीतत्वात् न कापि स्वास्थ्यमित्याशंक्य भगवच्च-रणारविंद एव अभयपताकालक्षणा रेखा वर्त्तते, अत्रागमनमात्रेणैव न कुतश्चित् भयमिति ज्ञापिका । एतान्येव केतानि चिह्नानि येषां लक्ष्मीश्चापि तत्र संगे कटाक्षा ब्रह्मादयश्च तदाह श्रीमत्पदैरिति अत्रागतस्यान्यथाभावव्यावृत्त्यर्थमाह भगवत इति, सम्यक् अलं-कृतानि अंगानि यस्याः वैष्णवानां चक्रादिचिह्नैरेव सम्यक्त्वं भगवच्चरणारविंद एव स्पर्शे सात्त्विकभावेन तदंशे स्वतो रेखासहित-

चरणाभिव्यक्तिः स्फुटा एवमलंकरणसहिता लोकत्रयस्य चान्येषां चारित्रत्वयुक्तानामनलंकृतत्वात् अत्यरोचे अतिक्रम्य कांतियुक्ता जाता। किंच भगवतोऽपि विभूतिमुपलभ्य भगवानपि मयि शेते उपविशति भुंक्ते क्रीडति ऐश्वर्यं च करोति, एवं पूर्वसौभाग्ययुक्तां मामिदानीं व्यसृजत् त्यागे हेतुः उत्स्मयंतीमिति भूमिस्थानां यादवानां भूम्युत्पन्नभोजनगर्वदर्शनात् कारणगर्वानुमानम् अन्नेनैव सर्वभावानामुद्भवात् अतस्तदंते उत्स्मयनाशार्थं मां व्यसृजदित्यर्थः ॥ ३४ ॥ ❀ ❀ एवं मूलभूतामुपपत्तिं श्लोकद्वयेनोक्त्वा लौकिकीमुपपत्तिं श्लोकद्वयेनाह यो वै ममेति। ममातिभाररूपमक्षौहिणीशतमपानुदत् भूम्युत्पन्नानां तद्धारकत्वे हेतुः असुरेति वंशपदेन तेषां गोत्राण्यत्र संतीति ज्ञापितं स्वस्य साधनापेक्षायामाह आत्मतंत्र इति। अनेन यादवरूपभारहरणमपि सूचितं वंशोपकारमप्याह त्वां दुःस्थमिति रोगादिव्याप्तिवत् अधर्मप्राप्ता दुःस्थता जनपदत्वं कालात् आत्मनि पौरुषेणेति स्वयमंतः प्रविश्य स्वपुरुषेण गतानंशान्सम्यक् संपादितवानित्युक्तं त्वां संपादयन्निति सम्बन्धः। त्वं हि प्रथमतः पूर्ण इति त्वदर्थं मदर्थमेव यदुषु अंगमबिभ्रत् आवयोरेव रमणयोग्यं भगवदीया धर्मात्मानश्च रमंते ॥ ३५ ॥ ❀ ❀ फलितमाह–वेत्यनादरे या भगवद्विरहं सहते सा न कापीत्यर्थः। पुरुषमात्रविरहोऽपि सोढुमशक्यः किं पुनः तस्य इति उपकारपक्षो दूरे तिष्ठतु अकामेनापि विरहासहनमित्याह प्रेमेति त्रिभिः। ससाधनैः सर्वा एव वशीकृताः सात्त्विकाः तामसा राजसाश्च तत्र सात्त्विकाः प्रेमावलोकेन वशीकृताः तामसास्तु रुचिरस्मितेन मनोहारिमोहनेन राजसास्तु वल्गुजल्पैः मनोहरजल्पैः सात्त्विकेभ्यो भक्तिज्ञानं दत्वा वशीकृतवान् तामसेभ्यः मोहाभावं वैराग्यं च दत्वा राजसेभ्यः युक्तिप्रमाणे दत्त्वा अत एव मधुमानिनीनां समानं स्थैर्यमहरत् मधुरास्थानां मानिनीनां येन मानेन स्थिरोन्नतता कामे मार्गे वा आत्मस्थितिः मधु इति भिन्नं वा पदं मानिनीनां रसस्थैर्यादिवत् किंच ममापि यदंघ्रिचिह्निताया: सर्वदा रोमोत्सवः ॥ ३६ ॥ ❀ ❀ एवं भगवद्विरहेण क्लिष्टयोः सम्वादे ज्ञायमाने अदूरे श्रुत्वा देवताधर्मसांनिध्यं बुद्ध्वा विश्वामित्रः प्राचीं कुरुक्षेत्रस्थाम् ऋषित्वादावश्यकं कर्तुं गत इत्याह तयोरिति ॥ ३७ ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ब्रह्मादय इत्यत्र। सर्वसाधारण्येन सर्वशोकहेतुभूतयोर्भगवद्राहित्यकलीक्षितयोः कथनेन प्रश्नोत्तरपूर्तौ ब्रह्मादय इत्यादिकथनस्य प्रयोजनमाहुः अलमित्यादि। तत्रोक्तगुणवद्भगवद्राहित्यस्य शोकप्रयोजकत्वात्ते गुणाः सहजा इति मूलग्रन्थानुरोधाद्वक्तव्यमिति तद्दार्ढ्याय मतान्तरं दूषयितुमुपक्षिपन्ति अत्र केचिदिति मायावादिनः। तदीयत्वे गुणत्वमेव भज्येतेति। तमसः प्रलायकत्वेन स्वातन्त्र्यस्य तमोगुणत्वात् कौशलादीनां रजोगुणत्वाद्रजस्तमसोश्च हेयत्वेन तेषां गुणत्वमेव न स्यात्, विग्रहस्य सात्त्विकत्वाङ्गीकारेपि तत्र तेषां प्रवेशालाभादपि तद्गुणत्वं न स्यादित्यर्थः। ब्रह्मत्वं वा भवेदिति। सत्त्वादीनामसत्त्वादेतेषामपि तथात्वापत्त्या तत्राभावेन निर्विशेषब्रह्मत्वमेव भगवतः स्यात्, न त्वीश्वरत्वमित्यर्थः। तेषां सदसद्विलक्षणत्वे तु 'न सत्तन्नासदुच्यत' इतेति गीतावाक्येन ब्रह्मणस्तथात्वात्तेषामपि ब्रह्मत्वं स्यात्, न तु गुणत्वमिति वार्थः। नन्वेते गुणा भगवति नारोपिताः, किन्त्वागन्तुकाः, अतो निर्विशेषत्वाभावान्न ब्रह्मत्वम्, किन्त्वीश्वरत्वमिति चेत् तत्राहुः संयोगजस्य इत्यादि। तथा च तथा चेत्तदा वसनारुण्यवद्भगवति प्रतीयमाना अपि ते गुणानामेव स्युर्न भगवत इत्यर्थः। ननु घृतद्रवत्ववत्ते भगवत्युत्पद्यन्ते, न तूपरञ्जयन्ति अतो भगवदीया इति चेत्, तत्राहुः उत्पत्तीत्यादि। न च नित्यपदस्य यावदवतारभावित्वमर्थो युक्तः, 'न व्ययन्ति स्म कर्हिचित्' दिति चतुर्थपादवैयर्थ्यापत्तेः। अतस्तद्विरोधो दुरुद्धर एवेत्यर्थः। ननु गुणसम्बन्धः सार्वदिक एवाङ्गीक्रियत इति न पूर्वोक्तो दोष इत्यत आहुः सगुण इत्यादि। सत्त्वादिगुणस्वरूपविचारेण दूषणान्तरमाहुः किञ्चेत्यादि। अस्तु सगुणस्तथापि कानुपपत्तिर्यदर्थं भगवति सत्त्वादयः कल्प्यन्ते, निर्विशेषस्य जगत्कर्तृत्वायोगात् श्रुत्युक्तानां तेषामसम्भव इति चेद्बाढम्, तर्हि तेषां सत्त्वादीनां सामर्थ्यं विचारणीयम्, किमेते तां परिहर्त्तुं शक्ता न वेति। तत्राद्यस्तु न सङ्गच्छते तथाहि। ते जडाः किं ब्रह्मणि स्वत एव सम्बद्धाः, हेतुना वा। आद्ये त्रयाणामन्योन्यमिथुनवृत्तित्वेन सम्बन्धस्याविशिष्टत्वाद्युगपत्कार्यत्रयापत्त्या सृष्टिप्रलयादिव्यवस्थाभङ्गप्रसङ्गः। अथ चलत्वाद्रजः प्राक् संसृज्यते, ततोन्यस्तत इतर इति गुणस्वभाव एव व्यवस्थापक इति चेत्तर्हि सर्वप्रलयकत्वात्प्रबलं तमः कुतस्तूष्णीकं, वस्तस्वभावादिति चेत्, तर्हि उत्पद्यमानानेव द्वितीयक्षणे ग्रसतु। अथ सत्त्वेन प्रतिबन्धान्न तथेति चेत्, तर्हि सत्त्वस्यापि सर्वदा सत्त्वान्न जातु प्रलयोस्तु। अथान्योन्योपमर्दकत्वमपि तेषां स्वभाव इति सत्त्वोपमर्दोत्सुखेन प्रलय इति चेत्, तर्हि वैनाशिकप्रक्रियाया अनङ्गीकारात् ग्रस्यमानानां द्वितीयक्षणे उत्पत्तिरस्तु। स्वभावस्यानपेतत्वात् हेत्वन्तरस्यानुपेतत्वाच्च। अतोऽवधिनियमभङ्गादाकस्मिकवादान्तर्गतः स्वभाववादस्त्वसङ्गतः, अनीश्वरत्वापादकत्वात् 'यतो वा इमानी'त्यादिश्रुतिविरोधाच्च। अथ हेतुना सम्बद्धास्तर्हि सम्बन्धात्पूर्वमीश्वरस्याभावात्तस्य कार्यत्वापत्तिः, साङ्ख्यमतापत्तिश्च। हेतुश्च क इत्यपि विचारणीयम्। काल इति चेत्, अद्वैतहानिः। इच्छा चेत्, तदापि तथा। तत्रापि तस्याः क्रमानपेक्षायामव्यवस्थाप्रसङ्गः। अपेक्षायां तत्र हेतोरवश्यवाच्यत्वेन गुणानां तथात्वाङ्गीकारे स्वभाववादापत्त्या तद्दोषतादवस्थ्यम्। तेषामवस्तुत्वेनाङ्गीकारात्ततः कार्याभावे शून्यवादप्रसक्तिः। अतस्तेषां सामर्थ्यविचारे भगवति तत्सम्बन्धकल्पनमसङ्गतमित्यर्थः। ननु भेदवादमङ्गीकृत्य सत्त्वादीनां चेतनत्वं

चाङ्गीकृत्य तत्सम्बधं च नित्यमङ्गीकृत्य स्वातन्त्र्यादीनां गुणधर्माणां भगवति नित्यत्वमङ्गीक्रियते इति चेत्, तत्राहुः अथेत्यादि । प्रासङ्गिकं परिहृत्य प्रस्तुतमाहुः बहुतिथमित्यादि । विशेषेणात्मशोके को वा हेतुरित्याकाङ्क्षायामाहुः भगवत्त्यागस्येति । भगवत्कृतत्यागस्य विचार्येत इति । स्वतस्त्यागे भगवतः स्वतन्त्रत्वादल्पः, स्वात्मदोषेण त्यागे त्वधिक इति निश्चेतुं त्यागहेतुर्विचार्येत इत्यर्थः । सर्वानर्थायेत्यत्र कर्मधारयः तदित्यादि । एकेन त्यक्तं ह्यन्योपेक्षत इति तेन ग्रहणे सर्वेऽनर्था इत्यर्थः । हेत्वन्तरमाहुः संघातप्रवेशेनेति । व्युच्चरणोत्तरमपि यावन्न सङ्घातप्रवेशः, तावत् न तत्त्यागः, अतस्तेन सापेक्षत्वेऽपेक्षाया अनर्थमूलत्वात्तथेत्यर्थः । प्रकृते को वानर्थ इत्यत आहुः हीनेत्यादि । हीनेन हीनस्य वापेक्षायां भगवदीयत्वरूपमेव नश्यतीति स एवानर्थ इत्यर्थः । अत इति । एतत्सर्वमवगत्य । समर्थे । अन्यस्य हीनतानिवारणसमर्था । निर्वाहार्थं वेति । चकारात् स्वस्य भगवदीयताया अपि निर्वाहार्थम् । कार्यं कारणं चानुपदमत्रैव व्याख्यास्यते । अन्य इति ब्रह्मादयः । तत्सेवकाः भगवतः सेवकाः । सपत्नीति समानभाग्या । अत एवमस्माकं सर्वेषां भगवदीयत्वाद्विवक्षितं वक्तुं सर्वत्यागसूचकं भजनरूपं तस्याः कृत्यमाहेत्यर्थः । तस्या इत्यादि । तस्याः स्वकार्ये औदासीन्यं वक्तुं प्रथमतः स उच्यते इत्यर्थः । कटाक्षपदेनेति । तद्वाचकापाङ्गपदेन उच्यत इति । भावोद्गारिणान्तानां चतुर्णामभावे तादृशदृष्टेरसम्भवादर्थबलेन समर्प्यते । अत इति एषां दुर्लभानां लक्ष्मीदृष्ट्या सिद्धिमवगत्य । तादृशा इति । लक्ष्मीकटाक्षमोक्षकामाः । उक्त्वेति तत्रौदासीन्यबोधनायोक्त्वा । जन्मस्थानमिति । 'पुनश्च पद्मादुद्भूता । आदित्योऽभूद्यदा हरिः' इति विष्णुपुराणवाक्याज्जन्मस्थानम् । एतेन सिद्धमाहुः एतावतेत्यादि । तत्त्याय वेति भजत इति शेषः ॥ ३३ ॥ ❀ ❀ तस्येत्यत्र । भगवद्ग्रहणमिति । 'ततो विभूति' मित्युत्तरार्द्धे तच्छब्देन भगवद्ग्रहणम् । तदर्थमिति सङ्घाते विद्यमानानामप्यमृताधिकारार्थं त्रीनित्यत्र । विशेष्यभूतलोकोक्तावपि-पदसमभिव्याहारसूचितमर्थमाहुः अन्येषां च त्रित्वयुक्तानामिति । ते च ब्रह्मादयः सात्त्विकादिभेदभिन्नाः भक्ताश्च ज्ञेयाः ॥ ३४ ॥ ❀ ❀ यो वा इत्यत्र । मूलभूतामिति । भगवत्कृते त्यागे मुख्यहेतुभूताम् ॥ ३५ ॥

इति प्रथमस्कन्धे सुबोधिनीप्रकाशे षोडशाध्यायविवरणम् ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यत्पृष्टं 'इदं ममाचक्ष्व तवाधिमूलम्' इति तत्र दुस्सहः श्रीकृष्णविरह एव ममाधिमूलमित्याह-ब्रह्मादय इति चतुर्भिः । यस्याः श्रियः अपाङ्गमोक्षः स्वस्मिन् कृपादृष्टिपातस्तत्कामाः सन्तो ब्रह्मादयो बहुतिथं बहुकालं तपः समचरन् सा भगवद्भिरुत्तमैः प्रपन्ना आश्रिताऽपि श्रीर्लक्ष्मीः स्ववासं 'पुनश्च पद्मादुद्भूता आदित्योऽभूद्यदा हरिः' इति विष्णुपुराणवचनात् स्वजन्मस्थानमपि अरविन्दवनं विहाय अलमनुरक्ता अतिप्रेमयुक्ता सती यस्य भगवतः पादसौभगं भजते चरणसेवया तत्सौन्दर्यमनुभवति ततो भगवतः सकाशाद्विभूतिं सर्वसमृद्धिमुपलभ्य प्राप्याहं त्रीन् लोकान् अत्यरोचे अतिक्रम्य शोभितवत्यस्मीत्युत्तरेणान्वयः । भगवत्प्रपन्ना इति सविसर्गपाठे ब्रह्मादिविशेषणम् ॥ ३३ ॥ कथं ततो विभूतिर्लब्धेत्यपेक्षायां तच्चरणसम्बन्धादेवेत्याशयेनाह-यस्येति । यस्य भगवतः श्रीमद्भिः पदैः सम्यगलङ्कृतान्यङ्गानि यस्याः सेति । पदानां श्रीमत्त्वमेव विशदयति-अब्जादीनां केतैराश्रयैरिति । तत्र भगवच्चरणारविन्दे भक्तानां परमानन्दरूपमकरन्दास्वादनार्थं कमलाकारा रेखाऽस्ति, तदास्वादनमपि पापिनां दुर्लभमिति पापपर्वतविदारणार्थं वज्राकारा रेखाऽस्ति, तथापि मनोरूपगजस्य स्वभावतश्चञ्चलत्वात् दुर्दम्यत्वाच्च तद्वशीकारं विना तदास्वादनं दुर्लभमेवेति तद्वशीकारार्थमङ्कुशाकारा रेखाऽस्ति, तथापि तापत्रयोपद्रुतस्य तदास्वादनं न सम्भवतीति तन्निवारणार्थं ध्वजाकारा रेखाऽस्तीति गर्वं कुर्वतीमित्यर्थः । त्यागप्रयोजनमाह-तदन्ते इति, तस्य गर्वस्यान्ते विनाशे विनाशार्थमित्यर्थः ॥ ३४ ॥ ❀ ❀ यो वै भगवान् ममातीव भाररूपमासुरवंशेऽसुरसम्प्रयुक्ते वंशे जातानां राज्ञामक्षौहिणीनां शतं अपानुदत् अपनीतवान् । तथा ऊनपदं पादत्रयहीनम् अत एव दुस्स्थं त्वामात्मनि स्वस्मिन् यत्पौरुषं सामर्थ्यं तेन सम्पादयन् सम्पादयितुं पादचतुष्टयसम्पन्नं कर्तुं यदुषु रमणीयमङ्गं मूर्तिमबिभ्रत् भृतवान् अलंकरणे सामर्थ्यमाह-आत्मतन्त्र इति, स्वतन्त्र इत्यर्थः ॥ ३५ ॥ ❀ ❀ यश्च प्रेमपूर्वकावलोकनेन रुचिरेण मनोहरेण स्मितेन वल्गुभिर्मनोहरैः जल्पैर्भाषणैश्च मधुमानिनीनां मधुकुलस्त्रीणां सत्यभामादीनां समानं गर्वसहितं स्थैर्यं स्तब्धत्वमितरावश्यत्वमहरत् हृतवान्, यस्य चाङ्घ्रिभ्यां विटङ्किताया अलङ्कृताया मम रोमोत्सवः सत्यादिरूपरोमोद्गमो बभूव, तस्य पुरुषोत्तमस्य श्रीकृष्णस्य विरहं का [illegible] सहेत ? न काऽपीत्यन्वयः ॥ ३६ ॥ ❀ ❀ तयोः पृथिवीधर्मयोरेवं कथयतोर्मिथः सम्भाषणमाणयोः सतोस्तदा तस्मिन्नेव काले परीक्षिन्नाम राजर्षिः प्राचीं पूर्ववाहिनीं कुरुक्षेत्रस्थां सरस्वतीं तयोः संवादप्रदेशं प्राप्त आगतः ॥ ३७ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ षोडशो विवृतो राज्ञः कर्मादिविनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

जिनका कृपाकटाक्ष प्राप्त करनेके लिये ब्रह्मा आदि देवता भगवान्के शरणागत होकर बहुत दिनोंतक तपस्या करते रहे, वही लक्ष्मीजी अपने निवासस्थान कमलवनका परित्याग करके बड़े प्रेमसे जिनके चरणकमलोंकी सुभग छत्रछायाका सेवन करती हैं, उन्हीं भगवान्की कमल, वज्र, अंकुश, ध्वजा आदि चिह्नोंसे युक्त श्रीचरणोंसे विभूषित होनेके कारण मुझे महान् वैभव प्राप्त हुआ था और मेरी पूजा तीनों लोकोंसे बढ़कर हुई थी; परंतु मेरे सौभाग्यका अब अन्त हो गया! भगवान्ने मुझ अभागिनीको छोड़ दिया! मालूम होता है मुझे अपने सौभाग्यपर गर्व हो गया था, इसलिये उन्होंने मुझे यह दण्ड दिया है ॥ ३३-३४ ॥ ❀ ❀ तुम अपने तीन चरणोंके कम हो जानेसे मन-ही-मन कुढ़ रहे थे; अपने पुरुषार्थसे तुम्हें अपने ही अंदर पुनः सब अङ्गोंसे पूर्ण एवं स्वस्थ कर देनेके लिये वे अत्यन्त रमणीय श्यामसुन्दर विग्रहसे यदुवंशमें प्रकट हुए और मेरे बड़े भारी भारको, जो असुरवंशी राजाओंकी सैकड़ों अक्षौहिणियोंके रूपमें था, नष्ट कर डाला। क्योंकि वे परम स्वतन्त्र थे ॥ ३५ ॥ ❀ ❀ जिन्होंने अपनी प्रेमभरी चितवन, मनोहर मुसकान और मीठी-मीठी बातोंसे सत्यभामा आदि मधुमयी मानिनियोंके मानके साथ धीरजको भी छीन लिया था और जिनके चरण-कमलोंके स्पर्शसे मैं निरन्तर आनन्दसे पुलकित रहती थी, उन पुरुषोत्तम भगवान् श्रीकृष्णका विरह भला कौन सह सकती है ॥ ३६ ॥ ❀ ❀ धर्म और पृथ्वी इस प्रकार आपसमें बात-चीत कर ही रहे थे कि उसी समय राजर्षि परीक्षित् पूर्ववाहिनी सरस्वतीके तटपर आ पहुँचे ॥ ३७ ॥

सोलहवाँ अध्याय समाप्त

अथ सप्तदशोऽध्यायः

सूत उवाच

तत्र गोमिथुनं राजा हन्यमानमनाथवत् । दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम् ॥ १ ॥
वृषं मृणालधवलं मेहन्तमिव बिभ्यतम् । वेपमानं पदैकेन सीदन्तं शूद्रताडितम् ॥ २ ॥
गां च धर्मदुघां दीनां भृशं शूद्रपदाहताम् । विवत्सां साश्रुवदनां क्षामां यवसमिच्छतीम् ॥ ३ ॥
पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् । मेघगम्भीरया वाचा समारोपितकार्मुकः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः सप्तदशे राज्ञः कलेर्निग्रह उच्यते । तस्यैवं वीर्यभाजोऽपि वैराग्यं वक्तुमद्भुतम् ॥ १ ॥

हन्यमानं ताड्यमानम् ॥ १ ॥ ❋ ❋ मृणालं पद्मकंदस्तद्वद्धवलम् । भयान्मेहंतं मूत्रयंतम् । इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयन्निव प्रतिक्षणं क्षीयमाणांशस्तस्याप्यनिर्वाहात्कंपमान इवेति दर्शितम् ॥ २ ॥ ❋ ❋ धर्मदुघां हविर्दोग्ध्रीम् । क्षामां कृशाम् । यवसं तृणम् । अत्र सस्यादिप्रसवक्षयाद्विवत्सेव । यज्ञाद्यभावात्कृशा । अत एव यज्ञभागमिच्छंती पृथ्वीति सूचितम् ॥ ३ ॥ ❋ ❋ कार्तस्वरं सुवर्णं तन्मयः परिच्छदः परिकरो यस्य । स्वर्णनिबद्धमित्यर्थः । सज्जीकृतकार्मुकः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः प्राचीसरस्वतीप्राप्त्यनंतरं तस्य परीक्षितः । एवं वीर्यभाजः कलिदंडनसमर्थस्यापि (१) तत्र प्राचीतटे । सत्यत्रेताद्वापरयुगमर्यादाभंगे स्वातंत्र्यमाह–नृपलाञ्छनमिति । "मृणालं बिसम् ॥ १–४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

नृपाणामिव लांछनं चिह्नं यस्य स नृपलांछनस्तं नृपवेषधारिणमिति यावत् ॥ १–४ ॥

श्रीमद्वीरराघवव्याख्या

तत्रेति । तत्र प्राच्यां सरस्वत्यां पूर्वोक्तमनाथवद्धन्यमानं गोमिथुनं नृपस्येव लांछनानि यस्य दण्डो हस्ते यस्य तं वृषलं च राजा परीक्षिद्ददर्श ॥ १ ॥ ❋ ❋ तत्र गोमिथुने पुमांसं विशिनष्टि वृषमिति । वृषं मृणालधवलं मेहन्तमिव । मूत्रं मुञ्चन्तमिव बिभ्यतमुद्विजन्तमेकेन पादेन कम्पमानं शूद्रेण ताडितमतः सीदन्तं क्लिद्यन्तम् ॥ २ ॥ ❋ ❋ स्त्रियं विशिनष्टि गामिति । धर्मदुघां घृतपयोरूपक्षरणद्रव्यदोग्ध्रीं शूद्रस्य पादेन ताडितामत एव भृशं दीनां वत्सरहितामश्रुसहितं वदनं यस्यास्तां क्षामां कृशां यवसं तृणमिच्छन्तीं कामयमानां च चकाराद् वृषलं च पप्रच्छेत्यन्वयः ॥ ३ ॥ ❋ ❋ कार्त्तस्वराः स्वर्णमयाः परिच्छदाः परिकरा यस्मिंस्तं रथमारूढः । समारोपितं सज्जीकृतं कार्मुकं धनुर्येन स परीक्षिन्मेघगर्जितवद्गम्भीरया गिरा पप्रच्छ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अत्रापि भगवद्भक्तप्रधानस्य परीक्षितः कलिबन्धनादिमाहात्म्यवर्णनेन हरेर्महिमैव वर्ण्यत इति तन्महिमोच्यते । तत्र नातिदूर इति कथितमाश्चर्यमाह तत्रेति । तत्र कुरुक्षेत्रे प्राच्याः सरस्वत्यास्तीरे अनाथवत् नाथः स्वामी तेन रहिता यथा हन्यन्ते तथा ताड्यमानं गोमिथुनम् ॥ १ ॥ ❋ ❋ मिथुनं विविच्याह वृषमिति । मृणालधवलं कमलनालसूत्रवद्धवलं शुक्लवर्णं बिभ्यतं भीतमिव मेहन्तं शकृन्मुंचन्तं वेपमानमेकेन पदा स्थितत्वात्सीदन्तं भग्नांगवत्तिष्ठंतं शूद्रेण कलिना पीडितं

---

१. प्रा० पा०—पीडितम् । २. प्रा० पा०—कृशां ।

वृषमद्राक्षीत् ॥ २ ॥ ❀ ❀ यवसं तृणमाकांक्षमाणामत एव कृशामश्रुवदनामश्रुमुखीं विवत्सां वत्सरहितामिव स्थितां शूद्रस्य पदा ताडितां भृशमत्यर्थं हीनां कृपणां धर्मदुघां यज्ञयोग्यपयोदोग्ध्रीं गां चैवं विधामपश्यदित्यन्वयः ॥ ३ ॥ ❀ ❀ दृष्ट्वा च तां राजा पप्रच्छेत्यन्वयः । कथम्भूतः कार्तस्वरपरिच्छदं सुवर्णपरिकरपरिष्कृतं रथमारूढः समारोपितकार्मुकः । सज्जीकृतधन्वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्रैवाकस्माद् वृषले समागते राजा समागत इत्याह तत्रेति ॥ १-४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परीक्षिद्धर्मयोः प्रोक्तमुक्तिप्रत्युक्तिकौतुकम् । निग्रहानुग्रहौ राज्ञा कलेः सप्तदशे ततः ॥

हन्यमानं ताड्यमानम् । नृपलाञ्छनमिति सत्यत्रेताद्वापरद्वियुगमर्यादानां भंगे स्वातन्त्र्यसूचकम् ॥ १ ॥ ❀ ❀ मेहन्तं मूत्रयन्तमिवेति पादावशिष्टोऽपि धर्मः प्रतिक्षणं क्षरन्निवेत्युत्प्रेक्षायां नश्यदवस्थ इत्यर्थः । वेपमानमिति सोऽपि नानाविघ्नैरनिष्पन्न इव कलिना क्रियते इति सूच्यते ॥ २ ॥ ❀ ❀ धर्मदुघां हविर्दोग्ध्रीं शस्यादिप्रसवक्षयाद्विवत्सां धर्म्मक्षयेणाश्रुवदनां यज्ञाभावात् क्षामां कृशाम् । यवसं यज्ञभागम् ॥ ३ ॥ ❀ ❀ कार्त्तस्वरं सुवर्णम् । सज्जीकृतकार्म्मुक इति कलेः पलायनाशङ्कया ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततः प्राचीसरस्वतीतटे हन्यमानं ताड्यमानं गोमिथुनं गवोः स्त्रीपुंभूतयोर्युगलं ददृशे ददर्श ॥ १ ॥ ❀ ❀ तत्र पुमांसं विशिनष्टि वृषमिति । मृणालवत् पद्मकंदवद्धवलम् । मेहन्तमिव मूत्रोत्सर्गस्यानुकरणं कुर्वन्तं न तु मूत्रयन्तमित्यत्यन्तं दैन्यं सूचितं यतः शूद्रेण ताडितम् । अत एव बिभ्यन्तमुद्विजन्तम् वेपमानं कम्पमानम् । एकेन पदा सीदन्तं क्लिश्यन्तं च ॥ २ ॥ ❀ ❀ स्त्रियं विशिनष्टि गामिति । धर्मदुघां धर्मार्थं पयोघृतरूपं हविर्दोग्ध्रीं यवसं तृणम् ॥ ३ ॥ ❀ ❀ दंडहस्तं वृषलं च विशिनष्टि कार्तस्वरपरिच्छदमिति कार्तस्वराः स्वर्णमयाः नृदेवार्हाः परिच्छदा मुकुटकुण्डलादयो यस्य तं वृषलं वृषं गां च पप्रच्छेति त्रयाणामन्वयः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ततः सप्तदशे धर्मपृथिवीसांत्वनं विदः । भीतस्य स्थानदानं च कलेः शिक्षा च रूप्यते ॥
प्रथमं मारणे भीतिः तयोः स्वास्थ्यस्य च क्षयः । अतः सांत्वनमग्रे च स्थानदानं विचारतः ॥
विवेकस्थापनायैव धर्मवाक्यं ततोऽस्य हि । सर्वसामर्थ्यसंबोधवैराग्यं वक्तुमद्भुतम् ॥
मूर्तीभूतास्त्रयो राज्ञे स्वखेदख्यापनाय तौ । वेषान्तरेऽपि तत्पीडाख्यापनाय स मारकः ॥
संधानं वस्तुभूतस्य कृतन्तेनास्य च स्वयम् । कृतं भूमेस्तु हेतूनां शोकस्य विनिवारणात् ॥

एवं पूर्वाध्यायान्ते पूर्ववाहिन्यां सरस्वत्यां स्नातुं गत इत्युक्तं ततस्तत्र गतः । अधर्मं दृष्टवानित्याह तत्रेति । गोमिथुनं मिथुनवद्धासमानं वृषभं गां च अनाथवत् द्वितीयार्थे वतिः । नाथभावयुक्तं वा भगवतोऽप्रकटत्वात् । वृषलं शूद्रं महतां व्यक्तिदर्शनेनैव जातिपरिज्ञानात् । चिह्नानि तु राज्ञः नृपलांछनमिव लांछनं यस्य एवं पाखण्डधर्मं च दृष्टवानित्यर्थः ॥ १ ॥ ❀ ❀ मिथुनस्य दीनत्वज्ञापनाय तौ वर्णयति वृष इति । अन्यथा पक्षपातोऽपि दोषः स्यात् । प्रथमं वृषं वर्णयति मृणालधवलमिति । अब्जादिवत् कान्तियुक्तश्च तम् अनेन स्वभावतः शुद्ध इत्युक्तम् । अन्यानि पंचांगानि विकलानीत्याह तत्र प्रत्यहं बाह्यक्षयः । मेहनं मूत्रणं कर्मक्षय उक्तः । बिभ्यन्तमिति भयेन ज्ञानाभाव उक्तः । इत्येवमनुकरणात् । अथवा मूत्रस्थानातिरिक्तस्थानेऽन्यमूत्रइव निःसरति तेन रोगः सूचितः । एकेन पदत्रयस्य गमने एकपादस्थितौ कम्पो भवत्येव ज्ञानसहिततपःप्रभृतीनामभावात् केवलसत्ये धर्मस्थितिश्चपला भवति । जाड्येन वेपन्तं पदार्थोपरि नेन धर्मकृतिर्नतिः कम्पः शूद्रताडितमिति कालवशेन शूद्रकर्तृकधर्मस्य पाखण्डित्वेन धर्मकथाजननात् । ताडनं दण्डेन ताडनं केवलं पदा ताडनं पृथिव्याः । कलिः भूमिर्वधाय तिष्ठति पाखण्डमार्गैश्च धर्मं व्यथयन्तं ददृश इत्येव सम्बन्धः ॥ २ ॥ ❀ ❀ गां च वर्णयति चकारात् भयकम्पोऽस्या इति । स्वभावत उत्तमेत्याह धर्मदुघामिति । धर्ममग्निहोत्रादिकं दोग्धीति धर्मदुहामिति पाठे प्रवर्ग्यदुग्धं दोग्धीति अस्याः षडङ्गविकलत्वमाह । देशाः सम्पन्ना दुष्टा भवन्ति । तदभावे विकला देशानामुत्तमानां कालदुष्टस्थित्या नाशात् दीना कालेनापि पीडिता पाखण्डैरुपनुद्यमानत्वात् कलेः प्रथमपादत्वात् पदेत्येकवचनम् । एवं देशकालदोषौ निरूपितौ, विवत्सामिति कर्त्रभावः । वत्साः स्वधर्मे मुख्याः । पृथुदोहे निरूपितास्तेषां साम्प्रतमभावः । अत एव साश्रुवदनामश्रुभिः सहितं वदनं यस्याः । अनेन मन्त्राभाव

उक्तः। हर्षरूपास्ते अपशब्दाः अश्रूणि कृशां द्रव्याभावात्। यत्र यज्ञः तत्र न याज्ञिकानि द्रव्याणि यवसमिच्छन्ती यज्ञादिषु भागमिच्छन्ती एवमस्याः षडंगविकलत्वं सूचितम्, अत्रापि पूर्ववत् क्रियासम्बन्धः ॥ ३ ॥ ❀ ❀ एवं दृष्ट्वा मारकस्य पूर्वत्वात् तं पृच्छति मारयितुम्। अन्यथा अविचारितकर्तृत्वं स्यात्। अत एव ससामग्रीकः पृच्छतीत्याह पप्रच्छेति। कार्त्तस्वरेति स्वाराजत्वख्यापनं कार्त्तस्वरं सुवर्णं तस्य परिच्छदानि यस्य। अनेन महत्त्वज्ञानात्सहसा अनतिक्रमः सूचितः। मेघगम्भीरयेति तप्तानां कृपावर्षणात्। गम्भीरेति शब्दश्रवणेनैव शत्रूणां मज्जनम्। एवं वाक्ये दुष्टनिग्रहशिष्टपरिपालने सूचिते समारोपितकार्मुक इति ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथ सप्तदशाध्यायं विवरिषवोऽध्यायार्थस्य पूर्वमुक्तत्वेपि विशेषेणावान्तरार्थान् बोधयितुं पुनराहुः ततः सप्तदशे इत्यादि। विद इति तत्स्वरूपज्ञात् राज्ञः सकाशात्। प्रथमं सान्त्वननिरूपणतात्पर्यमाहुः प्रथममित्यादि। विचारत इति। अयमधर्मबन्धुरतस्तादृशान्येव स्थानान्यस्य देयानि, अन्यथान्यस्याप्यधर्मस्थानत्वापत्त्या महानेवानर्थ इति विचार्य धर्मवाक्यतात्पर्यमाहुः विवेकस्थापनायेति। नानावाक्यकृतो यो विमोहस्तन्निवारको योधिकारिविवेकस्तत्स्थापनाय। तस्यापि प्रयोजनं हि यतो हेतोः ततः विवेकादस्य राज्ञः सर्वसामर्थ्यसम्बन्धः। आधिदैविकं ज्ञातुं सामर्थ्यसत्ता बोध्यत इत्यर्थः। तस्यापि प्रयोजनम्, अग्रिमाध्यायेऽद्भुतं वैराग्यं वक्तुं तदुपोद्घातता। एतेनाग्रिमसङ्गतिरुक्ता। मूर्तीभूता इत्यादि अलौकिकसामर्थ्यमवगन्तुं प्रत्यक्षा जाता इति शेषः। ज्ञानानन्तरं धर्मप्रचारसामर्थ्यं बोधयितुं प्रतिसन्धानकथेत्याशयेनाहुः सन्धानमित्यादि। तेन हेतुनास्य धर्मस्य स्वयं स्वत एवाश्वासनं कृतम्, भूमेस्तु शोकस्य हेतूनां निवारणात् परम्परयेत्यर्थः। वृषमित्यत्र। तत्र प्रत्यहं बाह्यक्षय इति। पञ्चाङ्गवैकल्ये बाह्यस्य धर्मस्य क्षयः सूचित इत्यर्थः। तदुपपादयन्ति कर्मेत्यादि। कर्मक्षय उक्त इति। मूत्रणस्य विसर्गरूपत्वात् कर्मेन्द्रियसाध्यत्वाच्च बाह्यस्याचारादिरूपकर्मणः क्षय उक्त इत्यर्थः। इवेत्यनुकरणादिति इवपदबोधितादनुकरणात्। दम्भेन करणमिवपदेन बोध्यते इति बाह्यधर्मस्य क्रियारूपस्य क्षय उक्त इत्यर्थः। रोगः सूचित इति। तथा च दुष्कर्मभोगसूचनात्। तेनापि बाह्यधर्मेक्षय उक्त इत्यर्थः। चञ्चला भवतीति। तेन फलानुपयोगात् क्षयस्तस्योक्त इत्यर्थः। सीदन्तमित्यस्यार्थमाहुः जाड्येन वेपन्तमिति। इत्येव सम्बन्ध इति। पूर्वश्लोकोक्तक्रिययैव सम्बन्धः, नतु 'पप्रच्छे' त्युत्तरश्लोकोक्तया। तत्र मारणोद्योगस्यैव दर्शनादग्रे कलिं प्रत्येव पूर्वं प्रश्नाच्चेत्यर्थः ॥ १-४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

निग्रहानुग्रहोक्तिभ्यां कले राज्ञः परीक्षितः। सप्तदशे विशेषेण सामर्थ्यं विनिरूप्यते ॥ १ ॥

तत्र तस्मिन् देशे अनाथवत् स्वामिरहितवत् वृषलेन हन्यमानं ताड्यमानं गोमिथुनं गवोर्युग्मं नृपस्येव लाञ्छनानि चिह्नानि यस्य तथा दण्डो हस्ते यस्य तं गोमिथुनहन्तारं वृषलं शूद्रं च राजा परीक्षिद्ददर्शेत्यन्वयः ॥ १ ॥ ❀ ❀ तत्र गोमिथुने पुमांसं विशिनष्टि–वृषमिति। वृषरूपधरं धर्मं मृणालं पद्मकन्दस्तद्वद्धवलमिति शुद्धत्वं दर्शितम्। मेहन्तमिव मूत्रयन्तमिव, अनेनावशिष्टस्यापि धर्मस्य प्रतिक्षणं क्षीयमाणत्वं दर्शितम्। वेपमानं कम्पमानम्। तत्र हेतुमाह–बिभ्यतं भयं कुर्वन्तम्। तत्रापि हेतुमाह–सीदन्तमिति, क्लिश्यन्तमित्यर्थः। तत्रापि हेतुमाह–एकेन वेदोपलक्षितमिति। तत्र हेतुमाह–शूद्रताडितमिति। राजचिह्नधरेण शूद्ररूपेण कलिना निघ्नितमित्यर्थः ॥ २ ॥ ❀ ❀ स्त्रियं विशिनष्टि–गामिति। गोरूपधारिणीं पृथिवीं धर्मदुघां यज्ञादिसामग्रीसम्पादकत्वेन धर्महेतुभूतां दीनाम् अत एवाश्रुवदनाम्। तत्र हेतुमाह–भृशं पुनः पुनः शूद्रस्य पदा हतां ताडितामिति। विवत्सां सस्यादिप्रसवाभावात् यज्ञादिभागलाभाभावात् क्षामां कृशाम्, अत एव यवसं यज्ञभागमिच्छतीं ददर्शेत्यनेनैव श्लोकद्वयेऽप्यन्वयः ॥ ३ ॥ ❀ ❀ दृष्ट्वा च कार्त्तस्वराः स्वर्णमयाः परिच्छदाः परिकरा यस्मिंस्तं रथमारूढः समारोपितं सज्जीकृतं कार्मुकं धनुर्येन स परीक्षित् मेघगर्जितवद्गम्भीरया तप्तसन्तापनिवर्तिकया वाचा पप्रच्छेत्यन्वयः ॥ ४ ॥

हिन्दी अनुवाद

महाराज परीक्षित्‌के द्वारा कलियुगका दमन

सूतजी कहते हैं–शौनकजी ! वहाँ पहुँचकर राजा परीक्षित्‌ने देखा कि एक राजवेषधारी शूद्र हाथमें डंडा लिये हुए है और गाय-बैलके एक जोड़ेको इस तरह पीटता जा रहा है, जैसे उनका कोई स्वामी ही न हो ॥ १ ॥ ❀ ❀ वह कमल-तन्तुके समान श्वेत रंगका बैल एक पैरसे खड़ा काँप रहा था तथा शूद्रकी ताड़नासे पीड़ित और भयभीत होकर मूत्र-त्याग कर रहा था ॥ २ ॥ ❀ ❀ धर्मोपयोगी दूध, घी आदि हविष्य पदार्थोंको देनेवाली वह गाय भी बार-बार शूद्रके पैरोंकी ठोकरें खाकर अत्यन्त दीन हो रही थी। एक तो वह स्वयं ही दुबली-पतली थी, दूसरे उसका बछड़ा भी उसके पास नहीं था। उसे भूख लगी हुई थी और उसकी आँखोंसे आँसू बहते जा रहे थे ॥ ३ ॥ ❀ ❀ स्वर्ण जटित रथपर चढ़े हुए राजा परीक्षित्‌ने अपना धनुष चढ़ाकर मेघके समान गम्भीर वाणीसे उसको ललकारा ॥ ४ ॥

कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली। नरदेवोऽसि वेषेण नटवत्कर्मणाद्विजः ॥ ५ ॥
कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना। शोच्योऽस्यशोच्यान् रहसि प्रहरन् वधमर्हसि ॥ ६ ॥
त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन्। वृषरूपेण किं कश्चिद् देवो नः परिखेदयन् ॥ ७ ॥
न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते। भूतलेऽनुपतन्त्यस्मिन् विना ते प्राणिनां शुचः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हंसि घातयसि। राजाहमिति चेत्तत्राह। नट इव वेषमात्रेण नरदेवोऽसि कर्मणा त्वद्विजः शूद्रः ॥ ५ ॥ ❀ ❀ अशोच्यान्निरपराधान् रहसि यस्त्वं प्रहरन् प्रहरसि स शोच्यः सापराधोऽस्यतो वधमर्हसि ॥ ६ ॥ ❀ ❀ वृषं प्रत्याह। त्वं वा कः। स्वयमेव संभावयति। किं कश्चिद्देवो वृषरूपेणास्मान् परिखेदयन् वर्तसे ॥ ७ ॥ ❀ ❀ दोर्दंडैः परिरंभिते परिरंभितवत्सुरक्षिते ते शुचोऽश्रूणि विनान्येषामश्रूणि नानुपतंतीति खेदहेतुत्वं दर्शितम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नटो ह्यनुकार्यस्यैव कर्माभिनयन्भवतीति भावः ॥ ५ ॥ ❀ ❀ ; ननु यथा त्वं देशस्य राजा तथाहमपि संप्रति कालस्य राजेति मयि तव विक्रमो न भविष्यतीत्याह–कस्त्वमिति। गाण्डीवधन्वनाऽर्जुनेन सह कृष्णे दूरं गते सतीति। एतावद्दिनं त्वं कासीरिति भावः। नन्वासमेव किं तु ताभ्यां भयेन न प्राभूवमधुना तु कस्माद्बिभेमि। सत्यं सत्यं शोच्योसि। अधुना त्वं सर्तुमेवेच्छसीति भावः। संदर्भस्तु–सह गांडीवधन्वनेति। अत एव तथैव प्रतिज्ञातं "मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे" इति। स्वर्गापवर्गाणि तु तत्साक्षान्निर्दिष्टं "ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम्। तेनैव दृष्टपूर्वेण सादृश्येनोपसूचितम् ॥ दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्कृतम्। उपास्यमानं वीरेण फाल्गुनेन सुवर्चसा ॥ यथास्वरूपं कौंतेयस्तथैव मधुसूदनम्" इति। अत्र कौंतेयो युधिष्ठिरः ॥ ६ ॥ ❀ ❀ खेदयन् वर्त्तसे नैतादृशो दुःखी कृशो मया स्वप्नेऽपि दृष्ट इति भावः ॥ ७ ॥ ❀ ❀ त्वय्येव राजनि सति वयमेवं दुःखिनः सांप्रतमभूमेति चेत्तत्र सानुतापं साटोपं चाह–न जात्विति। परिरक्षिते परिरंभितवत्सुरक्षिते इति। "शुक्छोकेश्रुणि शौचे च" इत्यभिधानात् ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

प्रश्नमेवाह कस्त्वमित्यादिभिरेकादशभिः तावद्वृषलं प्रति प्रश्नमाह द्वाभ्याम्। कस्त्वं त्वं कः इति प्रश्नः। किमर्थं पृच्छसीत्यत्राह अहमेव शरणं रक्षिता यस्य तस्मिन्नस्मिँल्लोके बली सन् बलाद्धंस्यतः पृच्छामीति भावः। नृपोऽहमित्यत्राह नटवद्वेषेण नरदेवोऽसि कर्मणा त्वद्विजः शूद्रः ॥ ५ ॥ ❀ ❀ गांडीवधन्वना अर्जुनेन सह श्रीकृष्णे दूरं स्वलोकं प्रति गते सति त्वमेव शोकानर्हान् रहसि प्रहरन् वधमर्हसि. अतः शोच्योऽसि स्वजनेनेति शेषः ॥ ६ ॥ ❀ ❀ वृषभं पृच्छति त्वमिति। हे मृणालधवल! पादैस्त्रिभिर्न्यूनः पदैकेन चरन् त्वं वा कः नोऽस्मान् वृषरूपेण परिखेदयन्किं वा कश्चिद्देवः ॥ ७ ॥ ❀ ❀ कौरवेंद्राणां दोर्दण्डपरिरम्भिते आश्लिष्टे पालिते इति यावत्, अस्मिन् भूतले विना ते त्वां विना केषांचिदपि प्राणिनां शुचः शोकाश्रुबिंदवः कदाचिदपि न पतंति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र प्रथमं शूद्रं प्रति प्रश्नप्रकारमाह कस्त्वमिति। यस्त्वं नटवद्वेषेण नरदेवोऽसि न तु राजा कर्मणा अद्विजः शूद्रोऽसि। अद्विज इत्युक्त्या शूद्रत्वं कथं ज्ञातमिति चेत्कर्मणेत्यनेन क्षत्रियवैश्ययोः परिहृतत्वात् मच्छरणे अहमेव रक्षको यस्य स तथा तस्मिन् "शरणं गृहरक्षित्रोरि"त्यभिधानं बली त्वमबलौ दुर्बलौ गोवृषौ बलात्प्रसह्य हंसि पीडयसि त्वं कः ॥ ५ ॥ ❀ ❀ गांडीवधन्वना सह कृष्णे दूरं गते सति यः शोच्यो रहसि अशोच्यान् प्रहरन्नसि स त्वं वधमर्हसीत्यन्वयः ॥ ६ ॥ ❀ ❀ इदानीं वृषभं पृच्छति त्वं वेति। हे वृषभ! पादैर्न्यूनः यथा चरसि तथा त्रिभिः पादैर्न्यूनः एकेन चरन् मृणालवद्धवलस्त्वं को वा वृषभरूपेणास्मान् परिखेदयन् अस्मद्बुद्धेः परिघातं कुर्वन् गतस्त्वं कश्चिद्देवः किम् ॥ ७ ॥ ❀ ❀ कुतः परिखेदकत्वमिति तत्राह न जात्विति। कौरवेंद्राणां दोर्दंडैः परिरंभिते रक्षितेऽस्मिन् भूतले प्राणिनां शुचः शोकनिमित्ताश्रुबिंदवः जातु कचिदपि न निपतंति, त्वां विना, त्वं तु बाष्पकलाक्षः शोचसि यस्मात्तस्मात्परिखेदयसीति भावः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

अद्विजः द्विजविरोधी ॥ ५ ॥ ❀ ❀ यस्त्वमित्यत्र सह गाण्डीवधन्वनेति। तथैव प्रतिज्ञातं तं प्रति श्रीभगवता– 'मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे' इति। स्वर्गपर्वणि तु तत्साक्षादेव निर्दिष्टम् 'ददर्श तत्र गोविन्दं ब्राह्मेण वपु-

षान्वितम् । तेनैव दृष्टपूर्व्वेण सादृश्येनोपसूचितम् ॥ दीप्यमानं स्ववपुषा दिव्यैर्वस्त्रैरुपस्कृतम् । उपास्यमानं वीरेण फाल्गुनेन सुवर्चसा । यथास्वरूपं कौन्तेयस्तथैव मधुसूदनमि'ति । अत्र कौन्तेयो युधिष्ठिरः ॥ ६-१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कस्त्वं रे मदग्रे हंसि ? नरदेवोऽहमिति चेन्मयि नरदेवे विद्यमाने त्वं कुतस्त्यो नरदेवः ? नटवद्वेषेणेति चेन्नहि नहि कर्म्मणा त्वम् अद्विजः शूद्रः । नटो ह्यनुकार्य्यस्यैव कर्म्म अभिनयतीति भावः ॥ ५ ॥ ❀ ❀ ननु यथा त्वं देशस्य राजा तथैवाहमपि संप्रति कालस्य राजेति मयि तव विक्रमो न भविष्यतीत्यत आह यस्त्वमिति । गाण्डीवधन्वना अर्ज्जुनेन सह कृष्णे दूरं गते सतीति एतावद्दिनं त्वं कासीरिति भावः । नन्वासमेव किन्तु ताभ्यां भयेन न प्राभूवम् । अधुना तु कस्माद्बिभेमि इति सत्यम् । शोच्योऽसि अधुना त्वं मर्त्तुमेवेच्छसीति भावः ॥ ६ ॥ ❀ ❀ भवतु, क्षणं तव प्रथममपराधं विमृशामीति मनसि कृत्वा वृषं प्रत्याह त्वं वेति । नोऽस्मान् खेदयितुं किं कश्चिद्देवोऽसि । नैतादृशः कृशो (वृषो) दुःखी मया स्वप्नेऽपि दृष्ट इति भावः ॥ ७ ॥ ❀ ❀ त्वय्येव राजनि सति वयमेवं दुःखिनः सांप्रतं समभूमेति चेत् तत्र सानुतापं साटोपं चाह न जात्विति । परिरम्भिते परिरम्भितवत् सुरक्षिते तव शुचः अश्रूणि विना अन्येषामश्रूणि न पतन्ति ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रश्नप्रकारमाह क इत्यादि द्वादशभिः । अरे त्वं कोऽसि वेषेण स्वर्णमयमुकुटादिपरिच्छदेन नटवन्नरदेवः न तु वस्तुतः । तत्र हेतुमाह–यतः बली सन् अबलान् हंसि घातयसि । अनेन कर्मणाऽद्विजः द्विजभिन्नः प्रतीयसे ॥ ५ ॥ ❀ ❀ दूरं प्रकृतिमंडलतो दूरतरं निजलोकं दीनानुकंपिनि कृष्णे गांडीवधन्वना प्रवलदुर्जनदमनेनानुकंपिनि कृष्णे गांडीवधन्वना प्रवलदुर्जनदमनेनार्जुनेन सह गते सति शोच्यः सापराधस्त्वं कोऽसि अशोच्यान् निर्दोषान् रहसि प्रहरन्वधमर्हसि ॥ ६ ॥ ❀ ❀ मृणालधवल ! त्वं वा त्रिभिः पादैर्न्यूनः पदा एकेन पादेन चरन् नोऽस्मान्वृषरूपेण परिखेदयन्किं कश्चिद्देवोऽसि ॥ ७ ॥ ❀ ❀ खेदहेतुमाह–कौरवेंद्राणां दोर्दंडैर्भुजदंडैः परिरंभितेऽस्मिन्भूतले तव शुचोऽश्रूणि विनाऽन्येषां प्राणिनामश्रूणि जातु कदाचिदपि नानुपतंति ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अयुक्तवचनमात्रेणैव परिज्ञातो मारणीय इति प्रश्नमाह कस्त्वमिति द्वाभ्याम् अज्ञाननिश्चयभेदात् । अधिक्षेपार्थो वा द्वितीयः । अहमेव शरणं रक्षको यस्य तादृशे लोके बलात् विधिव्यतिरेकेण अबलान् अशत्रुभूतान् दीनान् बलीयनेन आपद्भावः सूचितः । चिह्नैरेव परिज्ञायतामित्याशंक्याह वेषेण केवलं नरदेवोऽसि । न राजा त्वं सामर्थ्याभावात् प्रसिद्धत्वाच्च नटवदिति । राज्ञामुपहासार्थं तादृशं रूपं कृत्वा धर्मभूरक्षायां कर्त्तव्यायां विपरीतकरणं न भवतीत्याह–कर्मणा अद्विजः गां पदा ताडयति । अद्विज इत्यनेन द्वितीयजन्मनि जाते कर्त्तव्याकर्त्तव्यविवेको भवेत् । कथं कृष्णे अर्जुने च विद्यमाने न प्रकटः, अतः धर्मकर्त्तरि कारयितरि च प्रचलिते त्वं कः कुत्सित एव तद्गमनानन्तरमयमहमित्यागतस्तर्हि चोरो भवसि ताभ्यां राज्ये अनिरूपणात् बलात् चेत् राजा भवितुमिच्छसि तदा शोच्योऽसि सापराधोऽसि । किंच अशोच्यान् अनपराधान् एकांते प्रहरन् सुतरां सापराधोऽसि । अतो वधमर्हसि नान्यं दण्डमिति भावः ॥ ५-६ ॥ ❀ ❀ एवं मारयितुं विचारयन् उत्तराकथनात् सन्दिग्धः तयोः सापराधत्वमाशंक्य सांत्वनार्थं सम्पृच्छति त्वं वा मृणालधवल इति । प्राकृतवृषभकांतियुक्तत्वे शुभ्रता दुर्लभा, एकपदा च गमनम् अत इदं प्राकृतपशोरसंभावितमिति कश्चित् देव एव किं भवान् । नहि पशुरूपा देवा एतादृशा भवंति हि तर्हि वृषरूपेण नः अस्मान् खेदयन् किं देवः पूर्वमपि श्रूयते शिविप्रभृतिषु अग्न्यादयो रूपांतरेणागता इति ॥ ७ ॥ ❀ ❀ कथमयं राजा अस्मान् ज्ञास्यतीति पदा भूस्पर्शात् नायं देव इति निश्चित्याह न जात्विति । त्वद्व्यतिरेकेण अन्योऽस्मद्राज्ये श्रुतो दृष्टो वा न कस्यचित् अश्रूणि पतन्ति तत्राप्यस्मिन् कौरवेन्द्राणां कुरुवंशराज्ञां दोर्दंडपरिरंभिते आलिङ्गिते भूतले न हि महाराजोपयुज्यमाना भूः क्लिष्टा भवति, तव तु स्वरूपं न ज्ञायत इति भावः, खेदो वा अनेन निवृत्तः ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

कस्त्वमित्यत्र । निश्चयभेदादिति । अद्विजत्वनिश्चयस्य पूर्ववाक्ये जातत्वेपि तद्विशेषनिश्चयस्य द्वितीयोक्तकर्मणा जातत्वात्तेन द्वितीय इत्यर्थः । पूर्ववाक्योक्तकर्मणापि तस्य सम्भवादित्यरुच्या पक्षान्तरमाहुः अधीत्यादि । द्वितीयस्याभासे । तथापीति । एवं प्रश्नोत्तरमपि ॥ ५-८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

प्रश्नमेव दर्शयति–कस्त्वमित्यादिभिरेकादशभिः । तावद्वृषलं पृच्छति–कस्त्वमिति द्वाभ्याम् । त्वं क इति प्रश्नः । किमर्थं पृच्छसीत्याकाङ्क्षायामाह–अहमेव शरणं रक्षिता यस्य तस्मिन् लोके बली सन् अबलान् दुर्बलान् यतस्त्वं बलाद्धंसि अतः पृच्छामि । नृपोऽहमिति चेत्तत्राह–नटवद्वेषमात्रेण नरदेवोऽसि, पदा गोताडनरूपकर्मणा त्वम् अद्विजः शूद्र एव ॥ ५ ॥ ❋ ❋ एवं पृष्टोऽपि यदा न वदति तदा पुनः पृच्छति–क इति । गाण्डीवधन्वनाऽर्जुनेन सह श्रीकृष्णे दुष्टशास्तरि दूरं स्वलोकं प्रति गते सति यस्त्वं शास्त्रभावं मत्वा रहस्येकान्तेऽशोच्यान् धर्मिष्ठान् प्रहरन् अस्माभिः शोच्यः वध्यत्वेन चिन्त्योऽसि स क इत्यन्वयः । यः को वा भव वधमेवार्हसि ॥ ६ ॥ ❋ ❋ अथ वृषं पृच्छति–त्वमिति । हे मृणालधवल पादैस्त्रिभिर्न्यूनः एकेन पदा चरन् त्वं वा क इत्यन्वयः । एवं दृष्ट्वा स्वयमेव सम्भावयति–किं कश्चिद्देवो वृषरूपेण नोऽस्मान् परिखेदयन् वर्त्तसे ? ॥ ७ ॥ ❋ ❋ ननु ममैतादृशरूपेण तव कथं खेद इत्यपेक्षायामाह–नेति । कौरवेन्द्राणां कुरुवंशराजानां दोर्दण्डैः परिरम्भिते परिपालितेऽस्मिन् भूतले ते तव शुचः अश्रूणि विनाऽन्येषां प्राणिनामश्रूणि जातु कदाचिदपि न पतन्ति अतोऽस्माकं खेदः ॥ ८ ॥

हिन्दी अनुवाद

अरे ! तू कौन है, जो बलवान् होकर भी मेरे राज्यके इन दुर्बल प्राणियोंको बलपूर्वक मार रहा है ? तूने नटकी भाँति वेष तो राजाका-सा बना रक्खा है, परंतु कर्मसे तू शूद्र जान पड़ता है ॥ ५ ॥ ❋ ❋ हमारे दादा अर्जुनके साथ भगवान् श्रीकृष्णके परमधाम पधार जानेपर इस प्रकार निर्जन स्थानमें निरपराधोंपर प्रहार करनेवाला तू अपराधी है, अतः वधके योग्य है ॥ ६ ॥ ❋ ❋ उन्होंने धर्मसे पूछा–कमलनालके समान आपका श्वेतवर्ण है। तीन पैर न होनेपर भी आप एक ही पैरसे चलते-फिरते हैं । यह देखकर मुझे बड़ा कष्ट हो रहा है । बतलाइये, आप क्या बैलके रूपमें कोई देवता हैं ? ॥ ७ ॥ ❋ ❋ अभी यह भूमण्डल कुरुवंशी नरपतियोंके बाहुबलसे सुरक्षित है। इसमें आपके सिवा और किसी भी प्राणीकी आँखोंसे शोकके आँसू बहते मैंने नहीं देखे ॥ ८ ॥

मा सौरभेयानुशुचो व्येतु ते वृषलाद् भयम् । मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥
यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते[1] साध्व्यसाधुभिः । तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः ॥ १० ॥
एष राज्ञां[2] परो धर्मो ह्यार्तानामार्तिनिग्रहः । अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥
कोऽवृश्चत् तव पादांस्त्रीन् सौरभेय चतुष्पद[3] । मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमुक्ते पुनरपि शोचंतं प्रत्याह । भो सुरभेः पुत्र मा शुचः शोकं मा कुरु । व्येत्वपयातु । गां प्रत्याह । अंब मातः शास्तरि मयि जीवति सति ते भद्रमेवातो मा रोदीः ॥ ९ ॥ ❋ ❋ मद्धितार्थमेवैनं हनिष्यामि न तवोपकारायेत्याह यस्येति द्वाभ्याम् । हे साध्वि सर्वा याः काश्चिदपीत्यर्थः । असाधुभिस्त्रस्यंते पीड्यंत इत्यर्थः । भगो भाग्यम् । गतिः परलोकः ॥ १०-११ ॥ ❋ ❋ पुनरपि शोचंतं वृषं प्रत्याह । कोऽवृश्चच्छिच्छेद । त्वादृशास्त्वद्विधा दुःखिताः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नन्वलीकमिदमिति स्वमिव रुदन्तीं गां दर्शयन्तं वृषं प्रत्याह–हे सौरभेयेति । अहो भूमिर्विष्णुपत्नीत्वेन स्वपतौ विष्णावंतर्हिते चेयं विधवा जाता । सा च गोरूपा तदात्मजस्त्वं विधवापुत्र इव दीनो रक्षितारं निरीक्षसे । रक्षिता चाधुनाऽहमेव स च दीनोपेक्षको नास्मि । ततस्त्वामधुनैनं दंडयित्वा रक्षामीति भावः । गां च विष्णुपत्नीत्वेनैव मातरं ज्ञात्वाश्वासयन्नाह–अंबेति । यत्र पुत्रे जीवति मातुर्दुष्टकृतार्तिर्भवेद्धिक्तं पुत्रमित्यतस्त्वामपि निर्दुःखां करिष्याम्येनं घातयित्वेति भावः ॥ ९ ॥ ❋ ❋ नन्वस्मत्संबंधेनैनं घातयन्नेतद्वधपापभागिनावावां मा कुर्वित्यत आ–यस्येति । हे साध्वीति । साधुरक्षणं विना राज्ञो मम सर्वस्वहानिस्स्यादिति भावः ॥ १० ॥ ❋ ❋ अत आर्तार्त्तिनिग्रहस्य राजधर्मत्वात् । एवं कलिम् ॥ ११ ॥ ❋ ❋ कोऽवृश्चत्त्वं वद ततो ज्ञात्वाहं तं हनिष्यामीति भावः । संबुद्धिरुक्तार्था ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

हे सौरभेय ! मानु शुचः शोकं मा कार्षीः, ते तव वृषलादस्माच्छूद्राद्भयमत्येतु नश्यतु, गामाश्वासयन्नाह मेति । हे अम्ब ! खलानां दुरात्मनां शास्तरि दंडधरे मयि तिष्ठति सति त्वं मा रोदीः । रोदनं मा कार्षीः, ते तव भद्रं सुखमेव भविष्यति ॥ ९ ॥ ❋ ❋

---

१. प्रा० पा०—मातर्हिस्यन्ते । २. प्रा० पा०—राज्ञः ३. प्रा० पा०—चतुष्पदः ।

हे साध्वि ! यस्य राष्ट्रे दुरात्मभिः सर्वाः प्रजास्त्रसन्ते बिभ्यति। असाधुभिरिति करणत्वविवक्षया तृतीया प्रयुक्ताऽतो न "भीत्रार्थानाम्" इत्यपादानत्वं, तस्य मत्तस्य राज्ञः कीर्त्यादयो नश्यन्ति। भगो भाग्यं गतिः पुण्यलोकगतिः ॥ १० ॥ ❀ ❀ आर्त्तानां दुःखितानामार्त्तिपरिहार इति यदेष राज्ञां परं उत्कृष्टो धर्मः। यत एवमतः भूतद्रोहकारिणमत एवासत्तममेनं वधिष्यामि ॥ ११ ॥ ❀ ❀ पुनर्वृषं पृच्छन्नाश्वासयति क इति सार्द्धैश्चतुर्भिः। हे सौरभेय चतुष्पद ! तव त्रीन्पादान्कोऽवृश्चदभिनत्कृष्णानुवर्त्तिनां राज्ञामस्माकं राष्ट्रे त्वादृशा दुःखिता मा भूवन्न सन्तु ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे सौरभेय ! सुरभिवंशोद्भव मा शुचः शोकं मा कार्षीः, ते तव वृषलाद्भयं व्येतु नश्यत्वित्यन्वयः। इदानीं सौरभेयीं पृच्छति मा रोदीरिति। हे सौरभेयि ! त्वमपि कासीत्यध्याहारः कर्तव्यः कस्त्वमित्युक्तत्वात्, हे अम्ब ! मा रोदीः। अश्रुविमोक्षणं मा कार्षीः, ते तुभ्यं भद्रमस्तु, कुतः मयि दुष्टानां शास्तरि सति ॥ ९ ॥ ❀ ❀ यस्य राष्ट्रे राज्येऽसाधुभिर्दुष्टैः प्रजाः साधु हिंस्यन्ते पीड्यंते मत्तस्य तस्य कीर्त्यादयो नश्यन्तीत्यन्वयः। गतिः परलोकः ॥ १० ॥ ❀ ❀ यः आर्त्तानामार्त्तिनिग्रहः एषः राज्ञः परो धर्मो हि यस्मादार्त्तिनिग्रहस्य स्वधर्मत्वादसत्तमं भूतद्रुहमेनं वृषलं वधिष्यामीत्यन्वयः। अनेन कस्य हेतोर्निजग्राहेति चोद्यं परिहृतम् ॥ ११ ॥ ❀ ❀ हे सौरभेय ! चतुष्पदस्तव त्रीन् पादान् कोऽवृश्चत् छेदितवान्स कः ज्ञातश्चेत्परिहरिष्यामीति शेषः। कुत इति तत्राह मा भूवन्निति। त्वादृशाः त्वद्विधाः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

नन्वलीकमिदमिति स्वामिव रुदन्तीं गां दर्शयन्तं वृषं साश्वासमाह। भोः सुरभेः पुत्र ! मा शुचः मा शोचः। भयं व्येत्विति अधुनैवेमं हन्मीति भावः। गां प्रत्याह मेति। मयि जीवति सति ॥ ९ ॥ ❀ ❀ नन्वस्मत्सम्बन्धेनैनं घातयन्नेतद्वधभागिनावावां मा कुर्वित्यत आह यस्येति। अतः स्वहितार्थमेवैनं हन्मि। न चात्र युष्मदनुरोध इति भावः ॥ १०-१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुनर्वृषमाश्वासयन्नाह हे सौरभेय ! मा शुचः शोकं मा कार्षीः वृषलात् शूद्रात्ते। भयं व्येतु अपयातु। गामाश्वासयन्नाह हे अम्ब मातः ! खलानां दुर्वृत्तानां शास्तरि मयि सति ते भद्रमेव भविष्यति। अतो मा रोदी रोदनं मा कार्षीः ॥ ९ ॥ ❀ ❀ हे साध्वि ! भगो बुद्ध्याद्यैश्वर्यं परलोकगतिश्च ॥ १० ॥ ❀ ❀ आर्त्तानां क्लेशाक्रान्तानामार्त्तिनिग्रहः क्लेशपरिहारः ॥ ११ ॥ ❀ ❀ पुनर्वृषं पृच्छन् स्वधर्ममाह क इति पंचभिः। अवृश्चदभिनत् त्वादृशस्त्वद्विधा दुःखिता मा भूवन्मा सन्तु ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु राज्ञा कथनमेवमनुचितमित्याशंक्याह हे सौरभेय ! सुरभ्याः पुत्र अनेनास्य मध्यमाभावो निरूपितः नायं देवो न प्राकृत इति। अतस्त्वं मा शुचः ते वृषलात् भयमपगच्छतु। वृषलं मारयिष्यामीति भावः। एवं वृषभसांत्वनमुक्त्वा सुरभिसांत्वनमाह मा रोदीरिति। हे अम्ब ! सर्वदा त्वदुग्धपानात् मातृत्वं स्नेहेन वा ते भद्रं मदागमनं तव कल्याणमित्यर्थः। अत एव मा रोदीः। तर्हि एतावत्कालं न ज्ञातं तत्राह मयीति शास्तरि सति यदाहमस्य शासनं करिष्यामीति। तदा तव भद्रं निमित्ताभावात् पूर्वं न जातमिति भावः ॥ ९ ॥ ❀ ❀ नन्वस्मन्निमित्तं त्वया किमर्थं मारणीयः तत्राह स्वार्थमेवायं मारणीयः। अस्मदपकारित्वादिति तस्यापकारमाह—हे साध्वि ! यस्य राष्ट्रे असाधुभिः प्रजा नश्यन्ते तस्य चत्वारि नश्यन्ति नाशाननुसंधाने हेतुमाह मत्तस्येति। चत्वारि गणयति कीर्त्तिरिति भगो भाग्यं गतिः परलोको ज्ञानं वा ॥ १० ॥ ❀ ❀ किंच न केवलमेतदरक्षणादौ दोष इति एतद्रक्षणं तथा सति काम्यता स्यात्। किन्तु एतद्रक्षणं विहितमपीति नित्यता। तस्मात् नियतविहितत्वादेव करिष्यामीत्याह एष राज्ञ इति। एष अंगुल्या निर्दिशति एतादृशानां रक्षणं राज्ञः परो धर्मः प्रजारक्षापेक्षया अयमेव परो धर्मः यदार्त्तानामार्त्तिनिग्रहः आर्तेभ्यो धनाद्यपेक्षाया अपि आर्त्तिनिग्रहः परो धर्मः। ततः किमत आह। ततः स्वधर्मपरिपालनार्थमेवैनं वधिष्यामि। ननु साक्षात् वधे अधर्मः। तत् कथं हनिष्यसीत्यत आह भूतद्रुहमिति। सर्वेभ्यो भूतेभ्यो द्रुह्यतीति एतद्वधे भूतानां जीवनं भवति एतदवधे बहूनां मरणम्। अतो लाघवादेकस्यैव मरणं वरम्। ननु साक्षात् निषेधविधिविषयोऽयम्। अन्ये तु न स्वकर्तृजहिंसाविषया अतो बहुत्वमप्रयोजकमित्याशंक्याह—असत्तममिति। न ह्यस्य वधः अधर्मोऽस्ति दुष्टनिग्रहादेर्विहितत्वात्। अत एव तद्वधे त्रयं सिद्ध्यति दुष्टनिग्रहविधिपरिपालनं भूतद्रोहनिषेधविधिपरिपालनमार्त्तानामार्त्तिनिग्रहविधिपरिपालनं च ॥ ११ ॥ ❀ ❀ इति सुरभिसांत्वनविधिप्रस्तावेन तद्वधमुक्त्वा सौरभेयार्थमपि तद्वधो भवत्विति पुनः पृच्छति कोऽवृश्चदिति। पादान् कः अवृश्चत् अच्छिनत् यथापराधं दण्डः कर्तव्यः, सुरभ्यास्ताडनमात्रमनेन

कृतं तन्निवारणपूर्वकताडनेनापि प्रतीकारो भवति, पादत्रयच्छेदे तु अस्यापि पादद्वयं हस्तश्च च्छेत्तव्यः ततः कथयेत्यर्थः । चतुः-पदेति सम्बोधनात् अवश्यं पूर्वं पादचतुष्टयं स्थितमिति ज्ञापितम्, ननु तस्यापि पादच्छेदेन मम कः पुरुषार्थः स्यात् तत्राह यथा भवान् जातः तथा अन्तेऽप्यस्मिन् जीवति मा भूवन्निति एव निग्रहः कर्त्तव्यः । ननु त्रिविधा राज्ये भवन्ति कोऽयमाग्रहः सर्वथा अयं मारणीय इति तत्राह-राज्ञां कृष्णानुवर्तिनामिति । अन्येषां राज्ये भवन्तु नाम भगवत्सेवकानां राज्ये न युक्ताः, ततोऽत्रत्यैः सर्वैरेव भगवान् सेव्यः ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

मा सौरभेयेत्यत्र । एवं कथनमिति । अवस्थानुवादेनास्मासु दुष्टत्वमिवारोपयत्कथनम् । एष इत्यत्र । स्वकर्तृकहिंसाविषया इति । परीक्षित्कर्तृकतद्विषयाः ॥ ११-१२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमुक्ते पुनरपि शोचन्तं प्रत्याह-मेति । हे सौरभेय सुरभेः पुत्र माऽनुशुचः शोकं मा कुरु । ननु शत्रोरग्रे विद्यमानत्वात् कथं शोको न स्यादित्याशङ्क्याह-व्येत्विति, वृषलात् शूद्रादस्मात् ते तव भयं व्येतु अपयातु । अधुनैवेमं दण्डयामीति भावः । गामाश्वासयन्नाह-मेति । हे अम्ब ! खलानां दुष्टानां शास्तरि दण्डधरे मयि विद्यमाने सति ते तव भद्रमेव भविष्यति । अतो मा रोदीः ॥ ९ ॥ ❀ ❀ न केवलं तवोपकारायैवैवं हनिष्यामि किन्तु मम हितार्थमपीत्याशयेनाह-यस्येति । हे साध्वि यस्य राज्ञो राष्ट्रे देशेऽसाधुभिर्दुष्टैः सर्वाः प्रजास्त्रस्यन्ते पीड्यन्ते तस्य मत्तस्य स्वकर्त्तव्यासाधुदमनानुसन्धानशून्यस्य कीर्त्यादयो नश्यन्ति । भगो भाग्यम् । गतिः पुण्यलोकप्राप्तिः ॥ १० ॥ ❀ ❀ कुत एवमित्यपेक्षायां स्वधर्मपरित्यागदोषादित्याह-एष इति । हि यस्मात् एष आर्त्तानां दुःखितानां आर्तिनिग्रहः दुःखपरिहारो राज्ञां पर उत्कृष्टो धर्मः, अतो भूतद्रोहकारिणम् अत एव असत्तममेनं वधिष्यामि ॥ ११ ॥ ❀ ❀ पुनरपि शोचन्तं वृषं प्रत्याह—क इति सार्द्धैश्चतुर्भिः । हे सौरभेय चतुष्पदस्तव त्रीन् पादान् कोऽवृश्चदभिनत् ? कृष्णानुवर्त्तिनां भगवद्भक्तानां राज्ञाम् अस्माकं राष्ट्रे देशे त्वादृशा दुःखिताः प्रजाः मा भूवन् ॥ १२ ॥

हिन्दी अनुवाद

धेनुपुत्र ! अब आप शोक न करें । इस शूद्रसे निर्भय हो जायँ । गोमाता ! मैं दुष्टोंको दण्ड देनेवाला हूँ । अब आप रोयें नहीं । आपका कल्याण हो ॥ ९ ॥ ❀ ❀ देवि ! जिस राजाके राज्यमें दुष्टोंके उपद्रवसे सारी प्रजा त्रस्त रहती है, उस मतवाले राजाकी कीर्ति, आयु, ऐश्वर्य और परलोक नष्ट हो जाते हैं ॥ १० ॥ ❀ ❀ राजाओंका परम धर्म यही है कि वे दुःखियोंका दुःख दूर करें । यह महादुष्ट और प्राणियोंको पीड़ित करनेवाला है । अतः मैं अभी इसे मार डालूँगा ॥ ११ ॥ ❀ ❀ सुरभिनन्दन ! आप तो चार पैरवाले जीव हैं । आपके तीन पैर किसने काट डाले ? श्रीकृष्णके अनुयायी राजाओंके राज्यमें कभी कोई भी आपकी तरह दुःखी न हो ॥ १२ ॥

आख्याहि वृष भद्रं वः साधूनामकृतागसाम् । आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम् ॥ १३ ॥
जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयम् । साधूनां भद्रमेव स्यादसाधुदमने कृते ॥ १४ ॥
अनागस्स्विह भूतेषु य आगस्कृन्निरङ्कुशः । आहर्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम् ॥ १५ ॥
राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम् । शासतोऽन्यान् यथाशास्त्रमनापद्युत्पथानिह ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वो भद्रमस्तु । आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवन्तं कीर्तिं दूषयतीति तथा तमाख्याहि ॥ १३ ॥ ❀ ❀ ननु तदाख्याने कृते कथं भद्रं स्यादित्यत आह । यस्मादनागसि जने योऽघं दुःखं युञ्जन् कुर्वन् भगवत्यस्यैवंभूतस्य मत्तः सकाशात्सर्वत्रापि भयं भवति, ततः साधूनां भद्रं भवेदेवेति ॥ १४ ॥ ❀ ❀ एतस्य दण्डेऽहमसमर्थ इति मा शंकीरित्याह । अनागःस्विति । आगस्कृदपराधकर्ता । तस्यामर्त्यस्य देवस्यापि भुजमाहर्तास्म्याहरिष्यामि । सांगदमित्यनेन मूलत उत्पाट्याहरिष्यामीति दर्शितम् ॥ १५ ॥ ❀ ❀ नन्वेकस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनं तत्राह राज्ञो हीति । अन्यानधर्मिष्ठान् । शासतो दण्डयतः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु मम किमपि न विवक्षितमस्तीति चेत्तत्राह-हे वृष वो युष्माकं साधूनां निरपराधानां भद्रं सुखेपि दुःखेपि सदा भद्रमेव । किं त्वस्माकं पार्थानां कीर्तिं दूषयति यस्तमाख्याहि । तमेव कम् । आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवन्तम् ।

हे वृषेति। सर्वाभीष्टवर्षकत्वान्ममाभीष्टमपि वदेति भावः ॥ १३ ॥ ❀ ❀ अत्राक्षिपति–नन्विति। अनागसि जनेऽघकर्त्तुः पुंसः सर्वत एव भयं न केवलं मत्त एवेति भावः ॥ १४ ॥ ❀ ❀ ननु यदि त्वत्तोपि बली स्यात्तर्हि किं तव निवेदनेन तत्राह–साक्षादमर्त्यस्यापीति। तथा च देवासुरमनुष्येषु कोपि मत्तो बलिष्ठो नास्तीति भावः ॥ १५ ॥ ❀ ❀ पुनराक्षिपति–नन्विति। परम इति। परो मा यस्मात्स परम इत्यत उत्कृष्टधर्म एव राज्ञो नास्तीति भावः। उत्पथान् स्वधर्ममुत्सृज्य वर्तमानान् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

निरंकुशः इति काकाक्षिगोलकन्यायेन राज्ञोऽपि विशेषणमिति ॥ १५ ॥ ❀ ❀ उत्पथान् मार्गमुत्सृज्य वर्त्तमानान्। इति विजयध्वजः ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

हे वृषभ! भद्रमेव भविष्यति किं त्वकृतागसां निरापराधिनां साधूनां युष्माकमात्मवैरूप्यकारिणं पार्थानां कीर्त्तिं दूषयतीति तथा तमाख्याहि ॥ १३ ॥ ❀ ❀ यः अनागसि निरपराधे जने द्रोहं युञ्जन्नास्ते तस्य सर्वतः सर्वत्र मम मत्तो भयं भविष्यति ॥ १४ ॥ ❀ ❀ योऽनागस्सु जनेषु निरंकुशः उत्पथः सन्नागस्कृद्द्रोहकृद्भवति तस्य साक्षादमर्त्त्यस्य देवस्याप्यंगदयुक्तं भुजमाहर्त्तास्मि आहरिष्यमाणोऽस्मि ॥ १५ ॥ ❀ ❀ स्वधर्मस्थानां पालनमेव राज्ञः परमो धर्मः, कथंभूतस्येह लोकेऽनापद्युत्पथान् दुर्वृत्तानन्यानसाधून् शासतः दंडयतः। अनापद्युत्पथानित्यनेनापदि दुर्वृत्तिर्न दोषावहेति सूचितम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अकृतागसामकृतापराधानां निर्दोषाणां वो युष्माकं भद्रमस्तु। पार्थानां कीर्त्तिदूषणम् आत्मवैरूप्यकर्तारं पुरुषमाख्याहीत्यन्वयः। हे गले सुरभि! योऽनागसि अघमपराधं युंजन् प्रयुंजानो वर्तते अस्य तत्तस्मादपराधात् सर्वत इह परलोके च भयं भवत्येवेति शेषः। "सौरभेयी गला धेनुर्भद्रा नंदाऽमृतस्रवे" त्यभिधानम् ॥ १३ ॥ ❀ ❀ निरंकुशः अनिवारितः, अंगदेन बाहुभूषणेन सह वर्त्तमानम् अमर्त्यस्य देवस्यापि आहर्तास्मि छेत्तास्मि ॥ १४–१५ ॥ ❀ ❀ कुत इति तत्राह राज्ञ इति। स्वविहितधर्ममनुतिष्ठतामनुपालनं तत्तद्योग्यतया रक्षणं राज्ञः परो धर्मो हि। किंविशिष्टस्य इहानापदि आपदभावेऽपि उत्पथान् मार्गमुत्सृज्य वर्तमानानन्यान् दुष्टान्यथाशास्त्रं शासतः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किन्तु तव मुखात् किञ्चित् श्रुत्वैवैनं वधिष्यामि इत्यत आह आख्याहीति। ननु मम किमपि विवक्षितं नास्तीति तत्राह—हे वृष! वो युष्माकं साधूनां निरपराधानां भद्रं सुखेऽपि दुःखेऽपि सदा भद्रमेव। किन्त्वस्माकं पार्थानां कीर्त्तिं दूषयति यस्तम् आख्याहि। तमेव कम्? आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवन्तम् ॥ १३ ॥ ❀ ❀ न च कथिते सति त्वत्त एवास्य भयं किन्त्वकथनेऽपि सर्व्वत एवेत्याह। निरागसि जने योऽघं युञ्जन् भवेत् अस्य सर्व्वत एव हेतुभ्यो मत्सकाशाद्भयम् ॥ १४ ॥ ❀ ❀ ननु यदि त्वत्तोऽपि महाप्रभावी बलवांश्च स्यात् तदा किं भवेदत आह अनागःस्विति। साक्षादमर्त्यस्यापि देवस्यापि। साङ्गदमिति मूलत एव छित्त्वा आहरिष्यामीति देवासुरनरादिषु मत्तुल्यो बलिष्ठः प्रभावी वा कोऽपि नास्तीति भावः ॥ १५ ॥ ❀ ❀ ननु एकस्य निग्रहे अन्यस्यानुग्रहे तव किं प्रयोजनं तत्राह राज्ञो हीति। अन्यान् अधर्म्मिष्ठान् शासतः दण्डयतः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे वृष! वो भद्रं भवतु, अकृतागसां निरपराधिनां पापवर्जितानां साधूनां पुण्यवतां युष्माकमात्मवैरूप्यकर्तारं पादच्छेदनेन शरीरवैरूप्यकर्तारम् अत एव पार्थानां कीर्त्तिं दूषयति तत्पौत्रपाल्यप्राणिपीडाजननद्वारा लोपयतीति तमाख्याहि ॥ १३ ॥ ❀ ❀ अनागसि निरपराधे जने योऽघं दुःखं युंजन्कुर्वन्वर्तेतास्य चकारात्तत्पक्षपातिनो मत्तः सकाशाद्भयं भवति सर्वतः सर्वेभ्यो यमादिभ्यश्च भयं भवति। ननु विरोधिन्यपि जने दण्ड्यमाने साधूनां को लाभ इत्यत आह साधूनामिति ॥ १४ ॥ ❀ ❀ यदि निरपराधिष्वपराधकर्ता कश्चिदमानुषोऽपि स्यात्तर्हि सोऽपि मे दंड्य एवेत्याह अनागस्स्विति। भूतेषु प्राणिमात्रेषु किं पुनः शिष्टेष्विति भावः निरंकुशः शासनातिगः, दण्डदाने आत्मनः कौशलं सूचयति यः साक्षादागस्कृदिति। आगस्कृत्तया साक्षात्परिज्ञात इत्यर्थः, तस्य भुजेन सांगदेन अपराधे कृते भुजमेव तत्राप्यंगदमप्यपरित्यज्यैवाहरिष्यामि, तत्र मित्रादयो वर्ज्या इति तु किं वक्तव्यम्, यजनार्हः सुरोऽपि न वर्जनीयोऽपि तु दंड्य एवेत्याह अमर्त्यस्यापीति ॥ १५ ॥ ❀ ❀ तादृशनिर्बन्धे कारणमाह राज्ञ इति। अन्यान् धार्मिकान् उत्पथान्धर्ममार्गातिगान् अविहितकर्तॄन् विहितोपेक्षकान् यथाशास्त्रेण शासतो दण्डयतो राज्ञः स्वधर्मस्थानुपालनं परमो धर्मः, आपदि तु विहिताविहितवैपरीत्यकारिणां व्यतिक्रमः सोढव्य इति सूचयन्नाह अनापदीति ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

इन्द्रियविकलास्तु सेवितुं नार्हंति । अतस्तादृशा न युक्ताः । अतः सर्वथा त्वया वक्तव्यमित्याह आख्याहीति । वृषत्वात्तव नानौचित्यं, ननु चास्मदीयाद्वाक्यात् कथिते मारयिष्यतीति शंका न विधेयेत्याशंक्याह भद्रं व इति, युष्माकं भद्रमेव । नन्वस्मिन् जीवति कथं भद्रं तत्राह साधूनामिति, एतस्य शिक्षार्थं दण्डकरणपक्षेऽपि धर्ममार्गवर्त्तिनामपराधरहितानां देहवैरूप्यकरणमनुचितं तथापि करणे को हेतुस्तत्राह पाण्डवानामेवायमघकारी सर्वान् दण्डयतीति लोकापवादजननात् पूर्वसिद्धां निःकलंककीर्त्तिं दूषयति । अतो भवतामप्येतदाख्याने कीर्त्तिस्थापनधर्मो भवति ॥ १३ ॥ ❀ ❀ मत्प्रतिज्ञा च सिद्धा भवतीत्याह जन इति । अनागसि जने अपराधं युंजन् सर्वतो मत्तो भयं प्राप्नोति देही धनैहिकामुष्मिकप्रकारैः मत्कृतं भयं प्राप्नोति, अस्य सम्बन्धी पुत्रादिभयं प्राप्नोतीत्यध्याहारः करणीयः । अनागसि जने अघं युंजन् भवति तस्य मत्तः सर्वतो भयं भवतीति भवतिद्वयमध्याहर्त्तव्यम् । वस्तुतस्तु धर्ममात्रं पूर्ववत् अग्रिमश्लोकेनोक्तार्थत्वात् ॥ १४ ॥ ❀ ❀ आख्याते किं करिष्यतीत्याकांक्षायामाह अनागस्स्विति । ननु सोऽप्यधिकारी कथं त्वया मारणीयस्तत्राह निरंकुश इति । नियामकरहितः अत एवोत्पथगामी कथं क्षम इत्यपेक्षायामाह आहर्त्तास्मीति, अमर्त्यस्य इन्द्रस्यापि बाहुमुत्पाटयामीत्यर्थः । साक्षादिति स्वयमेव गत्वा न चाभिचारद्वारा, सांगदमिति अंगदाद्याभरणैः सहितं सर्वैः पूजितमपि ॥ १५ ॥ ❀ ❀ ननु भवानत्र न नियुक्तः । अतो नियोगानुसारेण पालनं कर्त्तव्यं वयं तु यतः कुतश्चित्त्वद्राष्ट्रे समागताः, न त्वदीया इत्याशंक्याह–राज्ञो हि धर्मद्वयं सहजो धर्मः अधिकृतस्तु । सहजधर्मस्तु आर्त्तार्त्तिनिग्रहः स मुख्यः, अन्यस्तु गुणैः तत्र स्वराष्ट्रादिनियमो नास्ति भार्यामपि मारयन् निवारणीयः, परमशक्त्या तूर्ष्णीभावः, राज्ञस्त्वशक्त्यभावात् स मुख्यो धर्मः स्वधर्मानुपालनमेव, अन्यान् स्वधर्मरहितान् अनापदि उत्पथान् शासतः न तु विरक्तस्य, अतो ममार्त्तिहरणं स्वधर्मः । अतो वक्तव्यमिति कलिनिग्रहो बहिर्मुखेन कर्त्तुमशक्यः अभगवदीयेन वा ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

आख्याहीत्यत्र । एतस्य शिक्षार्थं दण्डकरणपक्षेपीति । अयं शूद्रो वृषस्य शिक्षायै दण्डं कृतवानिति पक्षेपि । तथापीति वैरूप्यकरणे । वैरूप्यकरणमेवास्योचितम्, न तु मारणमित्यर्थः । पूर्ववदिति प्रायेण विगीतम् । राज्ञ इत्यत्र त्यक्तशासनस्येति । दत्तभूताभयस्य एतद्व इत्यत्र । अयमिति राजा । तथा भातीति बहिर्मुखो भाति । सर्वप्रमाणार्थं इति । इदं भगवत्पदव्याख्यानम् ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

हे वृष आत्मनस्तव पादच्छेदनेन वैरूप्यकर्त्तारमाख्याहि । तदाख्यानेऽपि किमित्यपेक्षायामाह–वो युष्माकं भद्रमेव भविष्यति । कुत इत्यपेक्षायां साधुत्वादित्याह–साधूनामिति । कथं साधुत्वमित्यपेक्षायां निर्दोषत्वादित्याह–अकृतागसामिति । कथं भद्रं स्यादित्यपेक्षायामस्मत्कीर्तिदूषकत्वेनास्मत्कृतदण्डादित्याशयेनाह–पार्थानामस्माकं कीर्तिं दूषयतीति तथा तमिति ॥ १३ ॥ ❀ ❀ एतदेव स्पष्टयति–योऽनागसि निरपराधे जने अघं दुःखं युञ्जन् कुर्वन् भवति अस्यैवम्भूतस्य मत् मत्तः सकाशात्सर्वत्र सर्वस्मिन् काले सर्वस्मिन् देशे च भयं स्यात् । तथा चासाधूनां दमने कृते सति साधूनां युष्माकं भद्रमेव स्यात् ॥ १४ ॥ ❀ ❀ एतस्य दण्डेऽहमसमर्थ इति मा शङ्किष्ठा इत्याह–अनागस्स्विति । य इह लोके निरङ्कुशो निर्भयः सन् अनागस्सु जनेष्वागस्कृत् द्रोहकृद्भवति तस्य मनुष्यस्य का वार्त्ता ? साक्षादमर्त्यस्य देवस्यापि अङ्गदसहितं भुजमहमाहर्त्ता आहरिष्यमाणोऽस्मि । साङ्गदमित्यनेन मूलत उत्पाटनं सूचितम् ॥ १५ ॥ ❀ ❀ नन्वेवमेकस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनमित्यपेक्षायां स्वधर्मसंरक्षणमेवेत्याह–राज्ञ इति । अनापदि उत्पथान् अधर्मिष्ठानन्यान् असाधून् यथाशास्त्रं शासतो दण्डयतो राज्ञ इह नीतिमार्गे स्वधर्मस्थानामनु निरन्तरं पालनमेव परम उत्कृष्टो धर्म इत्यन्वयः । हीत्यवधारणे ॥ १६ ॥

हिन्दी अनुवाद

वृषभ ! आपका कल्याण हो । बताइये, आप-जैसे निरपराध साधुओंका अङ्गभङ्ग करके किस दुष्टने पाण्डवोंकी कीर्तिमें कलङ्क लगाया है ? ॥ १३ ॥ ❀ ❀ जो किसी निरपराध प्राणीको सताता है, उसे, चाहे वह कहीं भी रहे, मेरा भय अवश्य होगा । दुष्टोंका दमन करनेसे साधुओंका कल्याण ही होता है ॥ १४ ॥ ❀ ❀ जो उद्दण्ड व्यक्ति निरपराध प्राणियोंको दुःख देता है, वह चाहे साक्षात् देवता ही क्यों न हो, मैं उसकी बाजूबंदसे विभूषित भुजाको काट डालूँगा ॥ १५ ॥ ❀ ❀ बिना आपत्तिकालके मर्यादाका उल्लङ्घन करनेवालोंको शास्त्रानुसार दण्ड देते हुए अपने धर्ममें स्थित लोगोंका पालन करना राजाओंका परम धर्म है ॥ १६ ॥

धर्म उवाच

एतद् वः पांडवेयानां युक्तमार्तभयं वचः । येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः ॥ १७ ॥
न वयं क्लेशबीजानि यतः[1] स्युः पुरुषर्षभ । पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥ १८ ॥
केचिद् विकल्पवसना आहुरात्मानमात्मनः[2] । दैवमन्ये परे कर्म स्वभावमपरे प्रभुम्[3] ॥ १९ ॥
अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः । अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आर्तानामभयं यस्मात्तद्वचो वो युष्माकं युक्तमुचितमेव ॥ १७ ॥ ❀ ❀ वयं तु यतः पुरुषात्प्राणिनां क्लेशहेतवो भवेयुस्तं पुरुषं न विजानीमः । यतो वादिनां वाक्यभेदैर्विमोहिताः ॥ १८ ॥ ❀ ❀ वाक्यभेदानेवाह । विकल्पं भेदं वसत आच्छादयन्ति ये योगिनस्ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदमाहुः । तदुक्तम् "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" इति । यद्वा विकल्पैः कुतर्कैः प्रावृता नास्तिकाः । एवं हि ते वदन्ति-न तावद्देवतादीनां प्रभुत्वं कर्माधीनत्वात् । न च कर्मणः स्वाधीनत्वादचेतनत्वाच्च । अतः स्वयमेव प्रभुर्न चान्यः कश्चिदिति । अन्ये दैवज्ञा दैवं ग्रहादिरूपां देवताम् । परे तु मीमांसकाः कर्म । अपरे लौकायतिकाः स्वभावम् ॥ १९ ॥ ❀ ❀ केष्वपि सेश्वरेषु मध्ये । केष्वपीति दुर्लभत्वं दर्शितम् । निश्चय इति सिद्धान्तत्वम् । अप्रतर्क्यान्मनोऽगोचरादनिर्देश्याद्वचनागोचरात्परमेश्वरात्सर्वं भवतीति विमृश विचारय स्वबुद्ध्या ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पाण्डवेयानां पाण्डववंश्यानामेतत् । यथा मां प्रत्युक्तमीदृगित्यर्थः । येषां गुणगणैः प्रेमात्मकैरित्यर्थः । श्रीकृष्णस्य प्रेमैकवश्यत्वात् । तस्यार्जुनस्य पौत्रस्त्वं तत्तुल्य एवातस्तव गुणैरप्यधीन एव श्रीकृष्णो वर्तत इति तदशक्यं किमपि नास्तीति भावः ॥ १७ ॥ ❀ ❀ तत्र साक्षाद्धिंसाकर्तृगतः प्रश्नोयमिति ज्ञात्वापि सूचकता न युक्तेति मत्वा तत्प्रयोजककर्तृगतत्वेन सिद्धान्तयन्नप्यनिर्द्धारितमिवाह-न वयमिति त्रिभिः । वयमीश्वरवादिनो ये च वाक्यभेदे विमोहितास्ते सर्वेऽपि तं पुरुषमीश्वरं न जानीमस्तस्य सर्वागोचरत्वात् । हे पुरुषर्षभेति । त्वं तु सूचकतादोषं पुरुषश्रेष्ठत्वाज्जानास्येव । यद्वा पुरुषो हरिः स ऋषभः प्रियो यस्येति हरिभक्तत्वात्त्वं तु जानन्नेव स्वप्रश्रयबोधनार्थं मां पृच्छसीति भावः । ननु कथमेवमपलपसि त्वत्क्लेशदायी पुरुषोऽयं मया दृश्यत एव । सत्यम् । असौ मम क्लेशस्य बीजं किंचिद्भविष्यति यतोयं ममैव क्लेशदो नान्यस्येति । क्लेशबीजं यतो भवति तं पुरुषं न जानीम इत्यर्थः । ननु शास्त्रज्ञा यूयं कथं न जानीथ । सत्यम् । बहुशास्त्रज्ञानमेव तदनिर्द्धारणे कारणमित्याह-वादिनां वाक्यभेदैर्विमोहिता इति ॥ १८ ॥ ❀ ❀ वाक्यभेदविमोहितान् गणयति-केचिदित्येकेन । एते सर्वे वैदिका एव ग्राह्याः । वेदवाक्यस्यैव प्रामाण्यादिति संदर्भः । तदुक्तं श्रीगीतायामिति । यद्वा विकल्पं जीवेश्वरादिभेदं वसते आच्छादयन्ति येऽद्वैतवादिनः सुखदुःखादेरात्मज्ञानविजृम्भितस्य द्वैतस्य मिथ्यात्वान्न कोऽपि सुखदुःखप्रदो भवतीत्याहुः । संभवात्समासान्तरेणार्थान्तरमाह-यद्वा केचित्तार्किकाः आत्मनः सुखदुःखबीजमात्मानमेवाहुः । एवं ते वदन्तीति स्वामिचरणैरुक्तमेव । लौकायतिको नास्तिकावान्तरविशेषः । तीर्थस्तु-स्वस्य हरेर्भाव उत्पत्तिर्यस्य तं कालं प्रभुमाहुः । सर्वे "सर्वे निमिषा जज्ञिरे विद्युतः पुरुषात्" इति श्रुतेरित्याह । अत्र संदर्भस्तु-अपर इत्यनेन सांख्यानाहुः । स्वस्माद्भावः स्वभावः परिणामः स च गुणानामेव गुणपरिणाम एव सुखदुःखहेतुरित्याह ॥ १९ ॥ ❀ ❀ सेश्वरेषु वैष्णवेषु । परमेश्वरात्सर्वं भवतीति निश्चयः । तद्वक्ष्यति वेदस्तुतौ "त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान्" इति । तथा "सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोयशः ॥ भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" इति भगवद्गीताभिश्च । ननु तर्हि कथं निर्देष्टुमनर्हत्वम् । सत्यम् । कालकर्मस्वभावग्रहभूतनृपसर्परोगादिभ्य एव लोके क्लेशस्य दर्शनात्तेषामेव निर्देश्यत्वात् । वस्तुतस्तु तेषामस्वातन्त्र्याच्च भगवत एव सर्वं भवतीति सिद्धान्तात् । भगवतः सकाशाद् दुःखं भवतीत्युपासकानां वक्तुमनौचित्याच्च । नन्वेवमपि तस्य वैषम्यनैर्घृण्ये दुर्वारे एवेत्यत आह-अप्रतर्क्यादिति । अस्मत्तर्कागोचरत्वात्तस्य तत्तदपि न वैषम्यनैर्घृण्ये इति भावः । तदुक्तं भीष्मेण "न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यन्ते कवयोऽपि हि" इति । तदपि भक्ताभासस्य मम दैन्यवर्द्धनेन स्वविषयकस्मरणवृद्ध्यर्थं वा भक्तोत्तमस्य तव कलिनिग्रहादिकीर्त्तिख्यापनार्थं वेति हितायैव क्लेशदानमूह्यत इति । नन्वेषां मतानां मध्ये कस्योपादेयत्वमित्यत्राह-अत्रानुरूपं समुचितं सिद्धान्तं त्वमेव स्वमनीषया विचारय यतस्त्वं राजर्षिर्भवसीत्युक्तिभंग्या निश्चयशब्दात्सर्वान्ते कथनाच्च वैष्णवमतस्य सिद्धान्तत्वम् । अतः केष्वपीत्यनेन

---

१. प्रा० पा०—यतस्व । २. प्रा० पा०—मात्मना । ३. प्रा० पा०—विभुम् ।

मतस्यास्य दुर्लभत्वञ्च सूचितम्। तत्र विमृशेत्ययं राज्ञो विमर्शः। न तावत्क्लेशानां मिथ्यात्वं प्रकटमनुभूयमानत्वात्। न चात्मनस्तत्कारणत्वं जीवात्मनः पारतंत्र्यात्। न च ग्रहाणां तेषां कालचक्राधीनत्वात्। न च कर्मणः जाड्यात्। किञ्च साक्षाद्धर्मस्यास्य किं प्रारब्धमप्रारब्धं वा पापमस्ति। पापत्वे धर्मत्वस्यैवानुपपत्तेः। न च स्वभावस्य तस्यानैकान्तिकत्वात्। तस्माद्भगवत एव कारणत्वं सूचितम्। तद्विधित्सितत्वं सर्वैर्दुर्ज्ञेयमेवेति भीष्मोक्तिरेव प्रमाणम्॥ २०॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वृत इति पाठो विजयध्वजसम्मतः स एव प्रामाणिकः॥ १७-१८॥ ❀ ❀ लौकायतिकाः चार्वाका इत्यर्थः॥ १९-२३॥

श्रीमद्वीरराघवव्याख्या

एवमुक्तवंतमाह वृषः एतदिति त्रिभिः, तावद्वचोभिनंदति एतदिति। पांडुवंशजानां युष्माकमेतदार्त्तानां न भयं यस्मात्तद्वचो युक्तमेव। पांडवेयान्विशिनष्टि येषां पांडवेयानां गुणगणैर्हेतुभिर्भगवान् कृष्णो दौत्यादौ कर्मणि वृतः दौत्यादिकर्मार्थं वृत इत्यर्थः। येषामिति कर्त्तरि षष्ठी, यैः वृत इत्यर्थः। एवंविधगुणगणाश्रयाणामेतद्वचो युक्तमेवेति भावः॥१७॥ ❀ ❀ गाण्डीवधन्वनार्जुनेन सह श्रीकृष्णे दूरं स्वलोकं प्रति गते सति त्वमेव शोकानर्हान् रहसि प्रहरन्वधमर्हसि। अतः शोच्योऽसि स्वजने, कोवृश्चदिति यत्पृष्टं तत्रोत्तरमाह हे पुरुषर्षभ! यस्मात्पुंसः क्लेशबीजानि दुःखकारणानि स्युस्तं पुरुषं वयं न जानीमः। तत्र हेतुं वदन्नात्मनो विशिनष्टि वाक्यभेदविमोहिताः क्लेशकारणानि वदतां वाक्यभेदैर्नानाविधवाक्यैर्विमोहिताः॥ १८॥ ❀ ❀ वाक्यभेदानेव दर्शयति केचिदिति सार्धेन। क्लेशकारणवादिनां मध्ये केचिदेवं चैवं वेत्येवंविधो विकल्प एव वसनं वसनवन्निर्णेतव्यार्थापादकं येषां तथाभूता आत्मनः स्वस्यात्मानमेव क्लेशकारणमाहुः। अन्ये तु दैवमपरे तु कर्म प्राक्तनं कृतमितरे तु स्वभावं परे तु प्रभुं तत्र दैवं जीवादृष्टस्वभावः प्रकृतेः परिणामस्वभावः प्रभुरीश्वरः॥ १९॥ ❀ ❀ केचित्त्वप्रतर्क्यात्तर्कागोचरादनिर्देश्याद्वक्तुमशक्यात्कस्माच्चित्कारणादित्याहुरितीत्थं केषामपि निश्चयः नेत्यध्याहारः। यद्वा तदभिमानानुसारेणैव निश्चय इत्यर्थः। तत्रैव क्लेशकारणेषु विकल्पितेषु हे राजर्षे! यदनुरूपं प्रकृतक्लेशानुगुणकारणं तत्स्वमनीषया सूक्ष्मया धिया विमृश विचारय॥ २०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रीकृष्णो भगवान् येषां पांडवानां ज्ञानभक्तिविरक्त्यादिगुणगणैर्दौत्यादौ वृतः तेषां पांडवेयानां पांडुवंशोद्भवानां वः एतदार्त्तानामभयंकरं वचः युक्तमुचितमित्यन्वयः॥ १७॥ ❀ ❀ हे पुरुषर्षभ! यतो जीवानां क्लेशबीजानि स्युर्वयं तं पुरुषमयमेवेति न जानीमः, अनेकशोकबीजप्रतिपादकवेदवाक्यविमोहिताः॥ १८॥ ❀ ❀ वाक्यभेदमेवाह केचिदित्यादिना। केचिद्वैकल्पं विकल्पसमूहोपेतं वचो येषां ते तथोक्ताः संदिग्धवचस इत्यर्थः आत्मनः स्वस्य क्लेशबीजमात्मानं स्वयमेवाहुः। केचित्सांख्या आत्मानमंतःकरणं तत्कारणमाहुः। वैकल्पवचसः प्रकृतिपुरुषयोर्विवेकाग्रहवचना एके सम्यक् ज्ञानिनः दैवं सर्वदेवप्रधानं हरिं क्लेशबीजमाहुः "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादि"ति श्रुतेः स्वशब्दवाच्याद्विष्णोर्भावः यस्य सः स्वभावः॥ १९॥ ❀ ❀ अनंतत्वात्सर्वात्मनाऽप्रतर्क्यात्तर्काविषयादनिर्वाच्यात् प्रधानात् क्लेशपरंपरात्सर्वेषां जीवानां प्रकृत्या पिहितत्वादिति केष्वपि निश्चयः। अथवाऽप्रतर्क्यात् प्रकर्षेण तर्कायोग्यात् सत्त्वेनासत्त्वेन वा निर्वक्तुमशक्यात् भावरूपाज्ञानादिति केषु मायावादिषु निश्चयः। भो राजश्रेष्ठ! एषु पक्षेष्वनुरूपं श्रुतिस्मृत्यनुकूलं विमृश स्वबुद्ध्यालोच्य निश्चिन्विति॥ २०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र साक्षाद्धिंसाकर्त्तृगतः प्रश्नोऽयमिति ज्ञात्वापि सूचकता न युक्तेति तस्यापि गौणत्वं मत्वा तत्प्रयोजककर्त्तृगतत्वेन सिद्धान्तयन्नप्यनिर्द्धारितमिवाह न वयमिति त्रिभिः। वयमीश्वरवादिनो ये च वाक्यभेदविमोहितास्ते सर्व्वेऽपि तं पुरुषमीश्वरं न विजानीमः सर्व्वागोचरत्वात्॥ १८॥ ❀ ❀ वाक्यभेदविमोहितान् गणयति केचिदित्येकेन। एते सर्व्वे वैदिका एव ग्राह्याः। वेदवाक्यस्यैव प्रामाण्यात्। परे कर्म्मेति। अपरे सांख्याः॥ १९॥ ❀ ❀ स्वेषामीश्वरवादित्वं निश्चयेन दर्शयति अप्रतर्क्यादिति॥ २०-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

येषां गुणगणैरिति प्रेमात्मकैरित्यर्थः। कृष्णस्य प्रेमैकवश्यत्वात् तस्यार्जुनस्य पौत्रत्वं तत्तुल्य एव तत्रापि गुणैरधीन एव कृष्णो वर्त्तेत इति त्वदशक्यं किमपि नास्तीति भावः॥ १७॥ ❀ ❀ किञ्च यतः पुरुषात् क्लेशबीजानि स्युस्तं पुरुषं वयं न जानीमः। ननु कथमेवमपलपसि त्वत्क्लेशदायी पुरुषोऽयं मया दृश्यत एव। सत्यमसौ मम क्लेशदः, किन्तु मम क्लेशस्य बीजं किञ्चिदवश्यं भविष्यति। यतोऽयं ममैव क्लेशदो नान्यस्य। अतः क्लेशबीजं यतो भवति तं पुरुषं न जानीम इत्यर्थः।

ननु शास्त्रज्ञा यूयं कथं न जानीथ ? सत्यम्। बहुशास्त्रज्ञानमेव तदनिर्द्धारे कारणम् इत्याह। वादिनां वाक्यभेदैर्विमोहिता इति ॥ १८ ॥ ❀ ❀ वाक्यभेदानेवाह–केचिद्विकल्पं भेदं वसते आच्छादयन्ति ये योगिनस्ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदम् आहुः। यदुक्तम्–'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः' इति। यद्वा केचिद्विकल्पं जीवेश्वरादिभेदं वसते आच्छादयन्तीति तथाभूता भवन्तीत्यन्वयः। अत्रार्थे अद्वैतवादिनस्ते हि सुखदुःखादेरात्माज्ञानविजृम्भितस्य द्वैतस्य मिथ्यात्वात् न कोऽपि सुखदुःखप्रदो भवतीत्याहुः। केचिच्च तार्किका आत्मनः सुखदुःखबीजम् आत्मानमेवाहुः। एवं ते वदन्ति–न तावद्देवतानां प्रभुत्वं कर्म्माधीनत्वान्न च कर्म्मणः स्वाधीनत्वादतः स्वयमेव प्रभुर्न चान्यः कश्चिदिति। अन्ये दैवज्ञा दैवं ग्रहादिरूपां देवताम्। परे मीमांसकाः कर्म्म। अपरे लौकायतिकाः स्वभावम् ॥ १९ ॥ ❀ ❀ केष्वपि वैष्णवेषु अनिर्देश्यान्निर्देष्टुमनर्हात् परमेश्वरादेव सुखदुःखादीनि भवन्ति इति निश्चयः। यदुक्तं श्रुतिभिः–'त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयानि'ति। तथा 'सुखं दुःखं भवोऽभावो भयञ्चाभयमेव च। अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः॥ भवन्ति भावा भूतानां मत्त एव पृथग्विधाः।' इति भगवद्गीताभिश्च। ननु तर्हि कथं निर्देष्टुमनर्हत्वं सत्यम्, कालकर्म्मस्वभावग्रहभूतनृपसर्परोगादिभ्य एव लोके क्लेशस्य दर्शनात् तेषामेव निर्देश्यत्वात्। वस्तुतस्तु तेषामस्वातन्त्र्याच्च भगवत एव सर्व्वं भवतीति सिद्धान्तात् भगवतः सकाशात् दुःखं भवतीत्युपासकानां वक्तुमनौचित्याच्च। नन्वेवमपि तस्य वैषम्यनैर्घृण्ये दुर्व्वारे एव, इत्यत आह अप्रतर्क्यादिति। अस्मत्तर्कागोचरत्वात्तस्य तदपि न वैषम्यनैर्घृण्ये इति भावः। यदुक्तं भीष्मेण–'न चास्य कर्हिचिद्राजन् पुमान् वेद विधित्सितम्। यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि ही'ति। तदपि भक्ताभासस्य मम दैन्यवर्द्धनेन स्वविषयकस्मरणवर्द्धनार्थं वा भक्तोत्तमस्य तव कलिनिग्रहादिकीर्त्तिख्यापनार्थं वेति हितायैव क्लेशदानमूह्यत इति। नन्वेषां मतानां मध्ये कस्योपादेयत्वं तत्राह–अत्रानुरूपं समुचितं सिद्धान्तं त्वमेव स्वमनीषया विचारय। यतस्त्वं राजर्षिर्भवसि। इत्युक्तिभङ्ग्या निश्चयशब्दात् सर्व्वान्ते कथनाच्च वैष्णवमतस्य सिद्धांतत्वम्। अतः केष्वपीत्यनेन मतस्यास्य दुर्लभत्वञ्च सूचितम्। तत्र विमृशेत्ययं राज्ञो विमर्शः। न तावत् क्लेशानां मिथ्यात्वं प्रकटमनुभूयमानत्वात्। न चात्मनस्तत्कारणत्वं जीवात्मनः पारतन्त्र्यात्। न च ग्रहाणां तेषां कालचक्राधीनत्वात्। न च कर्म्मणः जाड्यात्। किञ्च साक्षाद्धर्म्मस्यास्य किं प्रारब्धमप्रारब्धं वा पापमस्ति पापवत्त्वे धर्म्मत्वस्यैवानुपपत्तेः। न च स्वभावस्य तस्यानैकान्तिकत्वात्। तस्माद्भगवत एव कारणत्वं सुस्थिरम्। तद्विधित्सितन्तु सर्व्वैर्दुर्ज्ञेयमेवेति भीष्मोक्तिरेव प्रमाणम् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वृषो राज्ञा यत्पृष्टं कोऽवृश्चत्तव पादानिति तदुत्तरं तद्वचोभिनन्दनपूर्वकमाह चतुर्भिः। पाण्डवेयानां पाण्डुवंश्यानां भवताम् आर्त्तानामभयं यस्मात्तद्वचो युक्तं योग्यमेव। आदिना साक्षात्त्वादादेर्ग्रहणम् ॥ १७ ॥ ❀ ❀ हे पुरुषर्षभ ! यतः प्राणिनां क्लेशबीजानि दुःखनिदानानि स्युस्तं पुरुषं वयं न विजानीमः, यतो वाक्यभेदैर्नानावाक्यैर्विमोहिताः ॥ १८ ॥ ❀ ❀ "कालः स्वभावो नियतिर्यदृच्छाभूतानि योनिः पुरुष इति चिन्त्यमि"ति वेदान्तवाक्यमुपबृंहयन् तानेव वाक्यभेदान् दर्शयति केचिदिति। श्रुतौ तावत्किं कारणमिति कारणमुपक्रम्य षट् पक्षाः दर्शिताः पञ्चपूर्वपक्षत्वेन हेयतयैकः सिद्धान्तत्वेनोपादेयतया। तथा हि कालो योनिः कारणमिति दैवज्ञाः। स्वभावः प्रकृतेः परिणामस्वभावो योनिरित्यज्ञात्मकप्रधानपरिणामवादिनः सांख्याः। नियतिर्योनिरिति कर्मवादिनो मीमांसकाः। यदृच्छा योनिरित्यनियमवादिन आर्हताः, भूतानि योनिरिति लोकायतिकाः। सिद्धांतपक्षमाह पुरुषोऽचिन्त्यानंतशक्तिः परब्रह्मादिशब्दाभिधेयः परमात्मैव जगद्योनिरिति वेदांतिन इति। अत्र तु क्लेशप्रदं पुरुषमुपक्रम्य ते पक्षा उच्यन्ते। तत्र सिद्धान्तपक्षं प्रथममाह–केचिद्विकल्पवसनाः विकल्पं नानाकारणवादं "नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"त्येवं वसते आच्छादयन्ति ये वेदान्तास्तद्विदो वा, ते आत्मनस्त्वंपदार्थस्य आत्मानं तत्पदार्थं प्रभुं सुखदुःखप्रदमाहुः। तथा च श्रुतिः "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते" इति। अन्ये दैवज्ञा दैवं प्रभुमाहुः। परे मीमांसकाः कर्मैव प्रभुमाहुः। अपरे सांख्याः अज्ञात्मकप्रधानस्य परिणामित्वरूपं स्वभावं प्रभुमाहुः ॥ १९ ॥ ❀ ❀ बाह्यपक्षद्वयमेकीकृत्याह केषु बाह्येषु यदृच्छाद्यपरपर्यायादप्रतर्क्यादत एवानिर्देश्यात्सर्वं भवतीति निश्चयः। अत्रैतेषु पक्षेषु अनुरूपं पक्षं विमृश विचारय स्वमनीषया स्वबुद्ध्या ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

यद्यप्ययमनुभयरूपः तथाप्यभिमानात्तथा भाति अतोंतर्मुखः कर्त्तव्य इत्यभिप्रायेण उत्तरं वक्तुं प्रथमं प्रोत्साहयति भगवदीयत्वज्ञानाय एतद्व इति। एतत् परदुःखदूरीकरणं परमकृपालूनां भवतामुचितमेव आर्त्तानामभयं यस्मात् तादृशं वचः। यद्यपि इदं वचनमभिमानसूचकं भवति तथापि परदुःखनिवारणार्थमुक्तं न तु स्वोत्कर्षख्यापनार्थं कृतिस्त्वयुक्तैवेति भावः। न ह्यन्यपीडया कृतः पदार्थो धर्मो भवति। आर्त्तिनिवारणरूपं भगवदीयं धर्मं पुरस्कृत्य भगवान् वशो जातः, तादृशाः गुणाः भवन्तु सहस्रशः यैः कृत्वा परमानन्दः साक्षात् पुरुषार्थः सर्वप्रमाणार्थः। अनेन भ्रान्तत्वमप्याक्षिप्तमतोऽत्यन्तं बहिर्मुखनिष्ठा त्यक्तव्येति

भावः ॥ १७ ॥ ❀ ❀ इति भगवत्परत्वमुपदिश्य धर्मसूक्ष्ममुपदिशति न वयमिति। अयमर्थः-एते त्रयोऽपि यदा आहत्यैकेनैव हताः। किंतु सत्यादिभिः स्वस्वनिवृत्त्या ते हि धर्मपादोपजीवकाः स्वयं निवर्त्तमानाः धर्मस्यैकैकम्पादमादाय निवर्त्तंते, द्वापरे च धर्मो द्विपदो जातः प्रमाणानां द्वैराश्यात्। अतो निर्णायकप्रमाणाभावात्। वस्तुतः केनाप्यकृतत्वात् कालेन भगवता वा कृतत्वात्। तादृशस्वभावधर्मकरात् उत्तरं न घटते, न हि काले वा भगवति वा अयं किंचित् कर्तुं शक्तः, तस्मात् प्रमाणबोधने स्वाधिकारानुसारेण पदार्थान् बुद्धया तथा करिष्यति। न त्वकथनं स्पष्टकथनं वा युक्तमिति हे पुरुषर्षभ! "पुरुषत्वे च मां धीरा" इति न्यायेन पुरुषमात्रस्यैवं भगवद्दृष्टिर्युक्ता त्वं तु पुरुषर्षभः। किंच क्लेशबीजानि पापानि भगवदपराधा वा तानि कुतो भवंतीति विचारः कर्त्तव्यः। पुरुष एव तत्र समवायिकारणम् अन्तःकरणं भूतसंस्कारपक्षे शरीरं वा निमित्तान्यन्यानि नियामको विचारणीयः केन नियमितां सामग्रीं वा जनयति तत्रानिश्चये हेतुः स हि पुरुषो भवति। अन्यस्य नियामकाभावात् ते च पुरुषाः पंच व्यष्टिसमष्टिपुरुषकालपुरुषोत्तमाः। तत्र निश्चयः विचारकस्य स्यात् तस्य वाक्यभेदैर्मोहितत्वात्। ते च पुरुषाः पंच वयमिति सर्वेषामेवात्र विचारे अशक्यता एकमेव वाक्यं स्वस्वबुद्ध्यनुसारेण अनेकधा योजयंति ते वाक्यभेदाः सर्वत्र युक्तिसहिताः। वाक्यभेदे निर्णीतान् पदार्थानाह-तत्र केचिन्मायावादिप्रभृतयः व्यष्टिमेव हेतुं मन्यंते। तदर्थं सर्वमेव विकल्प्य माययाच्छादयंति ते विकल्पवसनाः। विकल्पा वसनं येषामिति विविधकल्पनारूपमज्ञानं वासस्तेषामिति ते आत्मानमेव नियामकं मन्यंते "आत्मैव ह्यात्मनो बंधु"रिति वाक्यात् आत्मनोऽपि हेतुत्वेनात्मातिरिक्तकारणं मन्यंते किंतु आत्मनैव। अन्ये पुनः समष्टिकारणवादिनः पौराणिकाः ज्योतिःशास्त्रसहकृताः पुरुषशरीरं ब्रह्माण्डं मत्वा तत्र चेष्टारूपं च कालचक्रं स्वीकृत्य तदवयवैः बुधादिभिः अन्तः सर्वपरिज्ञानात् ग्रहसहितं समष्टिमेव कारणं मन्यंते। ततोऽपि पुरुषकारणवादिनः प्रकृत्यधिष्ठातारं पुरुषं मन्यन्ते सहायभूतं च कर्म नियामकत्वेनैव स्वीकुर्वन्ति अन्यथा प्रकृतिपुरुषयोर्नित्यत्वात्। अपेक्षाभावे सृष्टिर्न स्यात्। अतो नियामकस्य कर्मणोऽपेक्षा "प्रवृद्धकर्मा देवेने"ति वाक्याच्च यद्यपि कालः स्वभावश्चेति। तथापि न तयोर्नियामकत्वं सम्भवति अन्यत्वात् साधारणत्वाच्च तस्मात्कर्मसहितः पुरुषः क्लेशबीजहेतुः। अन्ये पुनः कालमेव हेतुत्वेन मन्यंते द्वारत्वेन स्वभावं स हि प्रकृत्यादीन् प्रेरयति स्वभावेन परिणमंते स्वभावादेव प्रेरयंति सुखं दुःखमिति कालरूपस्य भगवतो वाक्याच्च यद्यपि पुरुषोत्तम एव सः, तथापि सर्वरूपत्वात् तस्मिन् प्रकरणे कालरूपं ख्यापितवानिति तद्वाक्यानां तच्छेषत्वं "स कालो यद्वशे लोको वायोरिव घनावलिरि"ति वाक्याच्च। अन्ये तु पुरुषोत्तमं मन्यंते, स हि सर्वत्र प्रविष्टः सर्वं करोति कालादिष्वपि स एव प्रविष्टः। यद्यपि कालस्य सर्वप्रभुत्वं तथापि न तस्य स्वतस्तत् किन्तु भगवत्प्रेरणया अन्यथा तस्य सर्वार्थत्वाभावात् वैषम्यनैर्घृण्ये प्रसज्ज्येयातां, कालात्मनोश्च विवेचनमग्रे वक्ष्यामः। नियामकत्वमेव तस्य सर्वज्ञमिति च, तर्हि सर्वप्रविष्टो भगवान् सर्वैः कथं न लक्ष्यते तत्राह अप्रतर्क्यादिति। यद्यपि शास्त्रप्रामाण्यात् आपाततस्तर्क्यते सर्ववस्तुस्वरूप इति तत्त्वविदः पश्यंति तथापि शृङ्गग्राहिकया स्पष्टतया न प्रतर्क्यः। तर्हि ज्ञात्रैतत्कथं नोच्यते इदमित्थ इति तत्राह-अनिर्वाच्यादिति। शर्करादिमाधुर्यवत् केवलानुभवैकवेद्यं न स्पष्टतया वक्तुं शक्यं विशेषशब्दाभावात् संकेताभावाच्च अव्यवहार्यत्वात् यद्यपि विशेषाकारेण वक्तुमशक्यमुत्प्रेक्षितुं च, तथापि शास्त्रानुभवाभ्यां तन्निश्चयः, तादृशा विरला इत्याह-अत्र पञ्चपक्षेषु यथाधिकारं व्यवस्थापितत्वात् तत्रापि यथाधिकारः तदनुरूपेण व्यवस्थापयेत्याह अत्रानुरूपमिति। राजर्षे! इति सम्बोधनात् राजत्वात् विचारकत्वमृषित्वान्मंत्रद्रष्टृत्वं तेन वेदहृदयविचारेण निर्णयं कुर्विति ज्ञापितम्। अत्र सम्मतिः प्रष्टव्या, एकरूपत्वाभावेन स्वाधिकारानुसारेण कथनप्रसंगात् ततः स्वमनीषयैव विचारय ॥ १८-२० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

न वयमित्यत्र। उपदिशतीति परोक्षेणोपदिशति। नन्वेवं परोक्षेण किमित्युपदेश इत्यत आहुः अयमर्थ इत्यादि। द्वैराश्यादिति श्रुतिस्मृतिभेदेन द्वैराश्यात्। तादृक्स्वभावेति ह्रसत्स्वभावेत्यर्थः। पुरुष इति न्यायवैशेषिकमीमांसकमते। अन्तःकरणं साङ्ख्यपातञ्जलमते। शरीरं धर्मशास्त्रमते। अन्यानीति देशकालद्रव्यमन्त्रकर्माणि व्यष्टिमेव हेतुं मन्यन्ते इति। अस्मदादिशरीरमेव स्वक्लेशबीजं मन्यन्त इत्यर्थः। आत्मनैवेति पक्षान्तरेष्वियं तृतीया सहार्थे। तेन दैवकर्मस्वभावेषु सर्वत्रात्मपदान्वयो बोध्यः। प्रथमपक्षे तु करणार्थे। तथा च तेन क्लेशा भवन्तीति शेषः। समष्टिमिति ब्रह्माण्डशरीराभिमानिनम्। कारणमिति व्यष्टिक्लेशकारणम्। पुरुषकारणवादिनः पातञ्जलाद्याः पौराणिकविशेषा वा। पुरुषं मन्यन्त इति। तत्त्वात्मकं तथा मन्यन्ते। कर्मेति भिन्नं पदम्। अन्ये पुनरिति पौराणिकविशेषाः। विवेचनस्वरूपमाहुः नियामकत्वमित्यादि ॥ १७ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवमुक्तवन्तं वृषरूपो धर्म आह-एतदिति त्रिभिः। पाण्डवेयानां पाण्डुवंशजानां युष्माकमेतदार्त्तानामभयं यस्मात्तद्वचो युक्तमुचितमेव। कुत इत्यपेक्षायां पाण्डवेयान्विशिनष्टि-येषामिति। येषां पाण्डवेयानां युधिष्ठिरादीनां गुणगणैर्हेतुभिर्भगवान् कृष्णो दौत्यादौ कर्मणि कृतः स्थापित इत्यर्थः। आदिपदेन सारथ्यसेवनादिग्रहणम् ॥ १७ ॥ ❀ ❀ 'कोऽवृश्चत्तव पादांस्त्रीन्,

इति प्रश्नस्योत्तरमाह–नेति। भगवद्भक्तत्वेन पुरुषेषु श्रेष्ठत्वाद्यदि तवैव निश्चयो नास्ति तदा स मम कथं स्यादिति सूचयन् सम्बोधयति–हे पुरुषर्षभेति। यतो यस्मात् पुरुषात् मम क्लेशस्य बीजानि पादच्छेदादीनि स्युस्तं पुरुषं वयं न जानीमः। मम का वार्त्ताऽन्यः कोऽपि न जानातीति सूचयितुं बहुवचनम्। तदज्ञाने हेतुमाह–वाक्येति, क्लेशकारणवादिनां वाक्यभेदैः नानाविधवाक्यैः विमोहिता इत्यर्थः॥ १८॥ ❀ ❀ वाक्यभेदानेव दर्शयति–केचिदिति सार्द्धेन। क्लेशकारणवादिनां मध्ये केचित् विकल्पं भेदं वसत आच्छादयन्ति ये योगिनस्ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदमाहुः। तदुक्तं गीतासु–'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः' इति। अन्ये ज्योतिर्विदो दैवं ग्रहादिरूपां देवतामेवात्मनः प्रभुमाहुः। अपरे मीमांसकाः कर्मैवात्मनः प्रभुमाहुः। अपरे लोकायतिकास्तु स्वभावमेवात्मनः प्रभुमाहुः॥ १९॥ ❀ ❀ अप्रतर्क्यात् मनोऽगोचरात् अनिर्देश्यात् वचनागोचराच्च परमेश्वरादेव सर्वं सुखदुःखादिकं भवतीत्यपि केषु भगवद्भक्तेषु निश्चय इत्यस्य मतस्य दुर्लभत्वं सिद्धान्तत्वं च सूचितम्। अत्र विचारे त्वं समर्थोऽसीति सूचयन्सम्बोधयति–हे राजर्षे इति। अत्रैतेषु मतभेदेषु यदनुरूपं सुखदुःखादिदाने योग्यं तत् स्वमनीषया विमृश विचारय॥ २०॥

हिन्दी अनुवाद

धर्मने कहा–राजन्! आप महाराज पाण्डुके वंशज हैं। आपका इस प्रकार दुःखियोंको आश्वासन देना आपके योग्य ही है; क्योंकि आपके पूर्वजोंके श्रेष्ठ गुणोंने भगवान् श्रीकृष्णको इनका सारथि और दूत आदि बना दिया था॥ १७॥ ❀ ❀ नरेन्द्र! शास्त्रोंके विभिन्न वचनोंसे मोहित होनेके कारण हम उस पुरुषको नहीं जानते, जिससे क्लेशोंके कारण उत्पन्न होते हैं॥ १८॥ ❀ ❀ जो लोग किसी भी प्रकारके द्वैतको स्वीकार नहीं करते, वे अपने-आपको ही अपने दुःखका कारण बतलाते हैं। कोई प्रारब्धको कारण बतलाते हैं, तो कोई कर्मको। कुछ लोग स्वभावको, तो कुछ लोग ईश्वरको दुःखका कारण मानते हैं॥ १९॥ ❀ ❀ किन्हीं-किन्हींका ऐसा भी निश्चय है कि दुःखका कारण न तो तर्कके द्वारा जाना जा सकता है और न वाणीके द्वारा बतलाया जा सकता है। राजर्षे! अब इनमें कौन-सा मत ठीक है, यह आप अपनी बुद्धिसे ही विचार लीजिये॥ २०॥

सूत उवाच

एवं धर्मे प्रवदति स सम्राड् द्विजसत्तम[1]। समाहितेन मनसा विखेदः पर्यचष्ट[2] तम्॥ २१॥

राजोवाच[3]

धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्। यदधर्मकृतः[4] स्थानं सूचकस्यापि तद्भवेत्॥ २२॥
अथवा देवमायाया नूनं गतिरगोचरा। चेतसो[5] वचसश्चापि भूतानामिति निश्चयः॥ २३॥
तपः शौचं दया सत्यमिति पादाः कृते कृताः। अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव॥ २४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विखेदो गतमोहः पर्यचष्ट प्रत्यभाषत ज्ञातवानिति वा॥ २१॥ ❀ ❀ अनिर्धारितमिव ब्रुवन्घातकं जानन्नपि न सूचयेदित्येवंरूपं धर्मं ब्रवीष्यतो धर्मोऽसि। ननु घातकस्य सूचने को दोष इत्यत आह। यदिति स्थानं नरकादि॥ २२॥ ❀ ❀ यद्वा। अज्ञानादप्यकथनं भवतीत्याह। अथवेति। देवस्य मायाया गतिर्वध्यघातकलक्षणा वृत्तिर्भूतानां चेतसो वचसश्चागोचरा सुज्ञेया न भवतीति निश्चयः॥ २३॥ ❀ ❀ धर्मोऽसाविति ज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह। तप इति द्वाभ्याम्। अधर्मपादैस्तव त्रयः पादास्त्रिभिरंशैर्भग्नाः। स्मयो विस्मयः॥ २४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

समाहितेन लब्धसमाधानेन॥ २१॥ ❀ ❀ हे धर्मज्ञेति। स्वहंतृवृषलनामाग्रहणेन त्वमतीव सूक्ष्मं धर्मतत्त्वं जानासीति भावः। "असत्कृतमधर्मं तु वदन्नर्द्धमवाप्नुयात्" इति स्मृतिप्रोक्तधर्मग्राहित्वात्। अयं मां निरपराधमपि ताडयतीति मयि राजनि वक्तुमर्हन्नपि पृष्टोऽपि यन्न ब्रवीषि तद्धर्मं ब्रवीषि यतोऽधर्मकर्तुर्यत्स्थानं सूचकस्यापि तत्किं पुनरभिधायकस्यातः साक्षाद् धर्म एव मयानुमितस्त्वमिति॥ २२॥ ❀ ❀ अथ वेति। त्वया सर्वमुक्तमेवेत्यर्थः। देवमायेत्यादिना

---

१. प्रा० पा०—द्विजसत्तमाः। २. प्रा० पा०—प्रत्यचष्ट। ३. प्राचीने पाठे नास्ति। ४. प्रा० पा०—कृतं। ५. प्रा० पा०—वचसो मनसश्चापि।

अप्रतर्क्यादिति तदुक्तमनुमोदिता देवस्य भगवतो मायायाः सर्वजगत्पालनसंहारकारिण्या गतिर्भूतानां चेतसोऽगोचरेति अप्रतर्क्येत्यर्थः । वचसोगोचरेति अनिर्देश्येत्यर्थः । मायायास्तच्छक्तित्वात्स देवः पालनसंहारलक्षणे सुखदुःखे भूतेभ्यः कथं ददातीति ज्ञातुं वक्तुं च कः शक्नोतीत्यर्थः ॥ २३ ॥ ❀ ❀ अहं तु त्वयाऽकथितमपि तव भद्राभद्रं सर्वं जानाम्येव तत्त्वं शृण्वित्याह–तप इति द्वाभ्याम् । स्मयो गर्वः । संगः स्त्रीभिः । मदो मधुपानादिजः । उपलक्षणमेतद्धिंसादेरपि । तत्र स्मयेन तपोभंगः । स्त्रीसंगेन शौचभंगः । मदेन दयाभंगः ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

अधर्म्मपादैरिति । त्रिभिरंशैः स्मयसङ्गमदलक्षणैः अधर्म्मपादैस्तव त्रयः पादा भग्नाः तपोलक्षणैकः शौचलक्षणैको दयात्मकैकश्चेति तव पादास्त्रयो विनष्टा इत्यर्थः । तपः शौचं दया सत्यमिति चतुर्णां धर्म्मपादानां कलौ चतुर्थचतुर्थांशमात्रत्वेन अवस्थानार्हत्वेऽपि ताः समुदायेन न सन्ति सत्यात्मकैकपादस्य पादपरिमितचतुर्थांशमात्रमेवास्तीति अधुना दृश्यते इति भावः । एवं सति अस्याध्यायस्य वेपमानः पदैकेन इति द्वितीयश्लोकस्य पादैर्न्यूनः पदा चरन्निति सप्तमश्लोकस्य कोऽवृश्चत् तव पादांस्त्रीनिति द्वादशश्लोकस्य इदानीं धर्म्म पादस्ते इति पञ्चविंशश्लोकस्य वृषस्य नष्टांस्त्रीन् पादानिति द्विचत्वारिंशत्तमश्लोकस्य द्वादशस्कन्धीयतृतीयाध्यायोक्तश्लोकानाञ्च सङ्गतिर्भवतीति परमगुरवः । स्मय इत्यस्यार्थत्वेनोक्तः विस्मय इति । अस्यार्थो दर्पः मेदिनीकोषप्रमाणात् । अत एव स्मयो गर्व्वः गर्व्वद्वारा तपोनाशकत्वेनेति वक्ष्यमाणटीकासङ्गतिः ॥ २४–२६ ॥

श्रीमद्वीरराघवव्याख्या

इत्थं धर्मे प्रवदति सति हे द्विजसत्तमाः! सम्राट् सार्वभौमः परीक्षिद्विगतखेदः समाहितेन मनसा तं धर्मस्याभिप्रायं प्रत्यचष्ट । चक्षिङ् दर्शनेऽपि वर्तते दृष्ट्वालोच्य निर्णीतवानित्यर्थः ॥ २१ ॥ ❀ ❀ निर्णीतमेव तदभिप्रायं प्रत्याह धर्ममित्यादिभिः षड्भिः । तत्र क्लेशबीजावहे पुरुषे संनिहितेऽपि यदुक्तं क्लेशबीजानि यतः स्युस्तं पुरुषं न जानीम इति तत्र तदभिप्रायं निर्णीतमाह धर्ममिति । हे धर्मज्ञ ! साक्षात्त्वं वृषरूपधृग्धर्म एवासि अत एवापद्यपि पुरुषं तं न विजानीम इति धर्ममेव ब्रवीषि । अधर्मकारिणि पुरुषे संनिहिते यद्धर्मसूचकं वचस्तद्धर्ममेवेत्यर्थः । यद्यस्मादधर्मकृतोऽधर्मकारिणः स्थानं प्राप्यं स्थानं यत्सूचकस्यापि तत्स्थानं भवेत् 'पतितः पतितः' इत्युक्त्वा पतिष्यतीति शास्त्रादिति भावः ॥ २२ ॥ ❀ ❀ अथ विमृश स्वमनीषयेति यदुक्तं तदभिप्रायमाह अथवेति । देवमायाया ईश्वरसङ्कल्पस्य "माया वयुनं ज्ञानम्" इति ज्ञानपर्यायोऽत्र मायाशब्दः "मायया सततं वेत्ति प्राणिनां च शुभाशुभम्" इति प्रयोगाच्च गतिर्भूतानां चेतसो वचसश्चागोचरी अविषयभूतेति वा निश्चयः । न जानीम इति विमृशस्वेति च वदता त्वयायं पापकृदिति सूचनमधर्म ईश्वरसंकल्पश्च वाङ्मनसयोरगोचर इति वा दर्शितमित्यर्थः ॥ २३ ॥ ❀ ❀ धर्मोऽसीत्यनेन त्वं साक्षाद्धर्माधिदेवता एवेत्युक्तं यत एवमत एव तव पादा अपि न लौकिकवृषभपादसजातीया अपि तु विशिष्टा एवेति वदंस्तद्व्यंजकान् दर्शयति त्रय इति, धर्माधिदेवस्य तव पादास्तपआदयश्चत्वारः प्रकीर्तिताः । तत्र त्रयः पादाः अधर्मस्यांशैः त्रिभिः स्मयादिभिर्भग्नाः । तत्र स्वस्मिन्नुत्कर्षधीः स्मयः स च तपोनाशहेतुः, संगः शौचविरोधी, चित्तविकारः विवेकाक्षमत्वरूपः मदेनार्त्तानामार्त्तिमपश्यन्न दयां कुरुते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

धर्मे एवं प्रवदति सति सम्राट् समाहितेन एकाग्रेण मनसा आलोच्य स्वाधीनैः कर्मकालप्रधानैः दैवमेवास्वतंत्राणां जीवानां दुःखादिबीजं न त्ववांतरम्, स्वातंत्र्येण कर्मादीनां दुःखबीजपक्षो हेय एवेत्येव धर्मान् विदित्वा तं प्रत्याचष्टेत्येकान्वयः । आत्मादिशब्दवाच्यं परमात्मानं क्लेशबीजं विदित्वेति वा आदानादिकर्तृत्वादात्मा देवोत्तमत्वाद्दैवं क्रियाविषयत्वात्सकलकारणशक्तिमत्वाच्च कर्म स्वस्माद्भावः स्वभा स्वरूपभूतां भां प्रकाशं वाति गच्छति न परप्रकाशमिति स्वभावः स्वयंप्रकाश इत्यर्थः । अप्रतर्क्यात् दुस्तर्काविषयत्त्वादप्रसिद्धत्वादनिर्वाच्यात् असिद्धेरवाच्यं तदिति स्मृतेः इति । सर्वेषु पक्षेषु हरिरेवोच्यते क्लेशबीजत्वेन "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ अहिंसा समता तुष्टिस्तपो दानं यशोयशः । भवंति भावा भूतानां मत्त एव पृथग्विधाः" इत्यादेश्च 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव । न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते' इति स्मृतेः पृथक्कल्पनाया अज्ञानिविषयत्वादित्यादिकं समाहितेन सम्राडिति पदद्वयेनोक्तमिति ज्ञातव्यम् । सम्यग्राजते प्रकाशते सर्वमस्येति सम्राट् । अत एवात्मवैरूप्यकर्तारं न विजानीम इति वदंतं धर्ममब्रवीदित्यन्वयः । समाहितचेतसा ज्ञानेन तं धर्मं भगवंतं प्रत्यचष्ट दृष्टवान् । अपरोक्षदर्शनेन तस्य निजरूपमद्राक्षीदित्यर्थः दृष्ट्वा चाब्रवीदिति शेषः ॥ २१ ॥ ❀ ❀ किमब्रवीदिति तत्राह धर्ममिति । हे धर्मज्ञ ! धर्मं ब्रवीषि यस्मात्तस्मात्स धर्मोऽसि न वृषः, अपितु अज्ञजनमोहनाय वृषरूपं धत्से यदुक्तमात्मवैरूप्यकर्तारं न विजानीम इति तत्राह यदिति । 'असत्कृतमधर्मं तु वदन् धर्ममवाप्नुयादि'ति वचनादस्य वृषलस्यात्मवैरूप्यकर्तृत्वात्सूचने च दोषा-

भावेऽपि "यद्यधर्मः कृतः सद्भिर्न स वाच्यः कथंचने"ति वाक्यात्सज्जनेष्वधर्मकृतो यत्स्थानं नरकादिलक्षणं तत्सूचकस्यापि तत्स्थानं भवेदिति ज्ञापनात्त्वयाऽऽत्मवैरूप्यकर्ता न ज्ञापित इत्यतो धर्मं ब्रवीषीत्यर्थः ॥ २२ ॥ ❀ ❀ यतः क्लेशबीजानि तं न विजानीम इति वदतः तवाभिसंधिरयं वेति वक्तीत्याह—अथवेति मादृशानां गोचरापि नूनं प्रायेण भूतानां चेतसो वचसश्च देवमायायाः सर्वजीवानां मुख्यामुख्यक्लेशबीजस्य देवस्य हरेरिच्छाया गतिस्थितिरधर्मेण धर्मं शोचामीत्यादिका अगोचरेति ज्ञापयितुं सर्वज्ञेन भवता न विजानीम इत्युक्तमिति भावः अभिप्रायनिश्चय इति ॥ २३ ॥ ❀ ❀ तव तपआदिचत्वारः ये पादाः कृतयुगे कृताः पूर्णा अवर्तंत तेषां मध्ये त्रयः पादास्तपःशौचदयाख्याः अधर्मांगैरधर्मपादैः स्मयसंगमदैर्भग्नाः । स्मयेन तपोभंगः स्त्रीसंगेन शौचभंगः मदेन दयाभंगः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु यत्र कुत्रचिद्धर्म्मे विशेषतस्तु सर्व्वधर्म्मरक्षायां प्रमाणीकृतस्य यथार्थवचनमेव युक्तम् । तथा च वयमीश्वरवादिनोऽपि तं न विजानीम इति कथमुक्तवन्तस्तत्राह अथवेति । तस्मादधुना देवमायाकृते कलेः प्रभावे तवाप्ययं संशयो युक्त इति भावः । देवपदं त्वत्र तथापि द्योतमानत्वात्तस्य मायादोषास्पृष्टत्वनिगमनार्थं कृतम् ॥ २३ ॥ ❀ ❀ माया च धर्म्माधर्म्मलक्षणं क्रमवशात् समुदितीभवन्तं जीवानां कर्म्मविशेषमनुसृत्य तत्तद्युगे तत्तत् प्रवर्त्तयतीति तस्याश्च न वैषम्यमित्याह तप इति द्वाभ्याम् । स्मयो गर्व्वः । गर्व्वद्वारा तपोनाशकत्वेनेति वक्ष्यमाणटीकासङ्गतेः । सङ्गः स्त्रीभिः । मदस्तु पानादिजः । अभ्यर्थित इत्यत्र वक्ष्यमाणतत्तत्सङ्गतेरेव । अधर्म्मांशैः स्मयाद्यंशरूपैः । त्रय इति त्रयस्त्रयोंऽशाः भग्नाः । ततश्चतुर्थचतुर्थांशैरेक एव पादोऽवशिष्यते । तत्र च सत्यस्यैवांशोऽवशिष्यत इत्यर्थः ॥ २४–२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समाहितेन लब्धसमाधानेन मनसा पर्य्यचष्ट प्रत्यभाषत ॥ २१ ॥ ❀ ❀ अयं मां निरपराधमपि ताडयतीति मयि राजनि वक्तुमर्हन्नपि पृष्टोऽपि यन्न ब्रवीषि तद्धर्म्मं ब्रवीषि । यतोऽधर्मकर्त्तुर्यत् स्थानं सूचकस्यापि तत् किं पुनरभिधायकस्य अतस्त्वं साक्षाद्धर्म्म एव मयानुमितः ॥ २२ ॥ ❀ ❀ अथवेति । त्वया सर्व्वमुक्तमेवेत्यर्थः । देवमायेत्यादिना अप्रतर्क्यादिति तदुक्तमनुमोदितम् । देवस्य भगवतो मायायाः सर्व्वजगत्पालनसंहारकारिण्या गतिः भूतानां चेतसोऽगोचरा इति अप्रतर्क्येत्यर्थः । वचसोऽगोचरा इति अनिर्देश्येत्यर्थः । मायायास्तच्छक्तित्वात् स देवः पालनसंहारलक्षणे सुखदुःखे भूतेभ्यः कथं ददातीति ज्ञातुं वक्तुञ्च कः शक्नोतीत्यर्थः ॥ २३ ॥ ❀ ❀ अहन्तु त्वया अकथितमपि तव भद्राभद्रं सर्वं जानाम्येव तत् शृण्वित्याह तप इति द्वाभ्याम् । अधर्मस्य अंशः पादैः स्मयादिभिः । स्मयो गर्वः । संगः स्त्रीभिः । मदो मधुपानजः । उपलक्षणमेतद्धिंसादेरपि । ततः सत्यादिनाशकत्वं ज्ञेयम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तमृषिं पर्यचष्टाऽभाषत । यद्वा तं वृषं धर्मोऽयमिति ज्ञातवान् , चक्षिङ् दर्शनेऽप्यस्ति ॥ २१ ॥ ❀ ❀ हे धर्मज्ञ ! प्रत्यक्षप्रमाणप्राप्ते घातके संनिहितेऽपि हेयोपादेयपक्षद्वयगर्भं परदोषरहितं सत्यवचनात्मकं धर्मं ब्रवीषि, अतो धर्मोऽसि धर्माधिष्ठातृदेवतारूपोऽसि । सूचने दोषमाह अधर्मकृतोऽधर्मकारिणो यन्नरकादिस्थानं तत्सूचकस्यापि भवेत् ॥ २२ ॥ ❀ ❀ अथवेति । देवस्य विष्णोर्मायायाः प्रकृतेर्गतिः चेतसो वचसश्चागोचरा अविषया विष्णुमायामोहिताः सर्वे सर्वं न जानन्तीति भावः । तथोक्तं महाभारते "सर्वे सर्वं न जानंति सर्वज्ञो नास्ति कश्चने"ति वैष्णवे "ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा । विष्णुमायामहावर्तमोहांधतमसावृताः ॥" इति यद्वा भगवदिच्छयाप्यकथनं संभवतीत्याह अथवेति तस्य भगवतः वयुनात्मिकायाः गतिः प्रवृत्तिः सर्वज्ञानामपि कचिन्मोहे हेतुभूता सा च केषु केषु सर्वज्ञेषु कस्मिन्कस्मिन्कार्येऽस्तीति भूतानां जनानां गोचरा ग्राह्या न भवतीति निश्चये । त्रिगुणात्मिकया मायया सर्वे जगद्गता जीवा मोहिताः भगवदीयानां तु कचिन्मोहश्चेत्तत्र भगवदिच्छैव कारणमिति भावः ॥ २३ ॥ स्मयेन विस्मयेन तपः संगेन शौचं मदेन दया इति क्रमेणाधर्मस्यांशैः पादैः त्रयो धर्मपादाः भग्नाः ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं धर्मवाक्यं श्रुत्वा वाच्यवचनकर्तृनिर्धारं कृतवानित्याह एवमिति । न हि धर्मव्यतिरेकेणान्यः एवं वक्तुं शक्तः, स च सम्राट् विचारकः । हे द्विजसत्तमेति सम्बोधनं सूक्ष्मेक्षिकायां संवादार्थं तस्यैवं विचार उत्पन्नः व्यवहारानुसारेण पृष्टे यदयमन्यथोत्तरयति अस्मत्परीक्षार्थं परोक्षेण कथनं स्वस्य वा अव्यवहारत्वप्रतारकत्वमज्ञत्वं चेति एवं चतुःपक्षविचाराय चित्तं तत्र कुशाग्रबुद्धित्वात् वाच्यवाक्यज्ञानाभावेपि निश्चयस्य वक्तुश्च निर्धारं शीघ्रमेव कृतवान् । अस्तु यथाकथंचित् पंच पक्षाः तन्निर्धारो वा तथापि घातकोऽयम् । अनेनैवातिताडितः तथापि मत्तः कथयति व्याजेन चान्यत् कथयति अतो धर्म एवायम् ॥ २१ ॥ ❀ ❀ पूर्वं व्यवस्थायाः श्रुतत्वात् युगनिरूपणप्रस्तावे अतः स्वप्रयोजनमवसरं च विचार्य निर्धारितत्वात् तमर्थं पर्यचष्ट इति । तमेवाह धर्मं ब्रवीषीति । त्वं तु धर्मः धर्मस्त्वात् न हि अन्योऽन्यस्वरूपं जानासीति हेतोः स्वरूपासिद्धिमाशंक्य अयं धर्मज्ञः धर्मवक्तृत्वादिति

किंच वृषरूपधृक् अलौकिकमेव धर्मस्य वृषरूपित्वं धर्मकथकत्वं समर्थयते–यदधर्मकृतः स्थानमिति यस्त्वधर्मकृतः तस्य यत् स्थानं नरकादि सूचकस्यापि तत् भवेत् अर्थादधर्मः स्यात्, तस्मात् नरकभयात् धर्मसूक्ष्मदृष्ट्या धर्मं वदतीति धर्मः ॥ २२ ॥ ❀ ❀ नन्वयुक्तोयं निर्धारः, वाक्यानां स्वार्थपरित्यागात्, इदानींतनमीमांसकवत् तस्मात् वाक्यार्थं पुरस्कृत्य विचारणीयमित्याकांक्षायामाह अथवेति। यदुक्तमनेन न जानीम इति तत्तथैव "मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटमि"ति वाक्यात् युक्तीनामप्रयोजकत्वेन निर्धारस्याशक्यत्वात्। ननु मायां तत्प्रवृत्तिं वा प्रथमतो विचारयितुं ततोऽन्यो भ्राम्यतीत्याशंक्याह देवमायायाः भगवच्छक्तित्वेन तुल्याया वा गतिः प्रवृत्तौ न स्वानुभवगम्या न वेदवाक्यगम्या साधारणानां तदाह भूतानामिति ॥ २३ ॥ ❀ ❀ एवं धर्मोऽयं पृथिवीयं कलिरयमिति त्रितयं निश्चित्य तदनुरूपं करिष्यन् धर्माग्रे अनुवदति तपः शौचमिति। तत्तद्युगानुसारेण धर्मस्य नानारूपत्वात् तदानींतनपादान् गणयति द्वादशस्कंधेन्यथानिरूपणस्य प्रयोजनं तत्रैव वक्ष्यते, तपः कृच्छ्रादिशौचं सर्वथा शुद्धता तद्धेतुराचारः दया परदुःखप्रहाणेच्छा सत्यभाषणं च एभिश्चतुर्भिर्धर्मो ज्ञायते, प्रत्येकं कृतादिषु प्रधानाः। तस्य धर्मस्य प्रतिपक्षी अधर्मः तस्यापि चत्वारः पादाः स च गर्दभरूपः स चैकशः अधर्मो द्विशाकः प्रमाणप्रवृत्ती धर्माधर्मे तु न प्रमाणे इति निवृत्त्यर्थं परिज्ञापनम् अनुवादेन अन्यथा वाक्यभेदः स्यात्। भूमिः सर्वा एतस्य स्थितियोग्यामुभयोर्भूमिसमानपृथुत्वात् कालस्तु भयसमानः प्रवृत्तिनिवृत्तिभेदेन भयस्थापकः युगप्रवृत्तौ धर्मनिवृत्तावधर्म इति। ततः कालबलात् त्रीन् धर्मपादान् दूरीकृत्य अधर्मस्तस्य पादान् त्रीन् प्रस्थापयामासेत्याह अधर्मांशैरिति। अधर्मस्य पादाश्चत्वारः गर्वसंगमदानृतरूपाः। एतेषु दशाविशेषे धर्मप्रवेशात् अंशपदप्रयोगः। कलेर्दोषं वक्तुमाह इदानीं ते सत्यमेवैकः पादः यतो निवर्त्तयेत् स्वात्मानं नितरां वर्त्तयेत् तं त्वधर्मो जिघृक्षति कलेः कोऽपराधस्तत्राह अधर्मोयं कलिरिति। अपरिच्छिन्नः कालः तस्य कृतादिपदप्रयोगः अवच्छेदेन वक्तव्यः, तत्र स्वस्यावच्छेदकत्वात् अन्यस्याभावात् धर्मावच्छेदकत्वेन कृतादिप्रयोगः। तत्र केवलधर्मावच्छेदकं कृतं केवलमधर्मावच्छेदकः कलिभागः उभयावच्छेदकं त्रेतासमस्य उभयावच्छेदकं द्वापरमिति कालस्य द्वितीयराशिपरिच्छेदार्थमागमने अधर्मांशमप्यतिक्रम्य आगमनादधर्मांशप्रवेशः 'ये वै चत्वारः स्तोमाः कृतं तत् श्रयसे यं च कलिः स' इति। श्रुत्वा स्तोमचतुष्टयात्मकस्य ज्योतिष्टोमादेः कृतत्वनिरूपणात् धर्मावच्छेदकं कृतस्य। अथ तदतिरिक्तो यः कालः पंचात्मकः स कलिः एतदभावः चतुष्टयरूपत्वमतिरिक्तं च, अतः पंचत्वं समानस्याद्भिः पंचगुण्यानि नक्षत्राणीत्यत्र प्रसङ्गान्निर्धारितम्, अतो यथाकाशस्य परिच्छेदको घटादिः तस्य घटाकाशस्य प्रदर्शने घट एव प्रदर्श्यते मध्यभागेन तथायं कलिरित्यर्थः। पूर्वं कृतेन सह सहताहीनता च स्थिता उत्कृष्टतया पदत्रयप्रवेशात् तत्रापि सुतरां अनृतेन एधितः पुष्टितः स्वशत्रुं धर्मपादं जिघृक्षति शत्रुदोषस्यारक्षणीयत्वात् अत एवं वेदे उभयोरेव नाम त्रेता कृतशेषः द्वापरं कलिशेषः ॥ २४-२५ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

धर्मं ब्रवीषीत्यत्र। स्वरूपासिद्धिमिति पक्षे हेत्वभावम्। धर्मवक्तृत्वादिति द्वितीयमनुमानमुक्तमित्यर्थः। स्वरूपासिद्धिवारणायानुमानान्तरं वदतीत्याहुः किञ्चेत्यादि। तथा च वृषत्वेपि प्रयोजकान्तरमन्तरेण मनुष्यवाणीवक्तृत्वादनुमिते अलौकिकत्वे, तेषु तस्यैव तथात्वं ततोपि त्वं धर्म एवेत्यर्थः। अर्थादधर्मस्येति सूचकस्येत्यन्वयः। तथा चाधर्मस्य यः सूचकः 'अनेनाधर्मः कृतः' इति शृङ्गग्राहिकया वक्ता तस्येत्यर्थः। तप इत्यत्र। अन्यथा निरूपणस्येति 'सत्यं दया तपो दानमि'त्येवं कथनस्य। परदुःखप्रहाणेच्छेति। इदं न दयालक्षणम्। पूर्वं परदुःखासहनं दयेति लक्षितत्वात् एकादशस्कन्धसुबोधिन्यां तथा प्रतिपादयिष्यमाणत्वाच्च। ननु 'न हिंस्यादि'त्यादिश्रुतिभिर्निषेध्यत्वेन प्रतियोगिनोऽधर्मस्याप्यवगमात् कथमधर्मे प्रमाणाभाव इत्यत आहुः निवृत्त्यर्थमित्यादि। अनुवादे गमकमाहुः अन्यथेत्यादि। अधर्मस्यापि प्रमाणवाक्यार्थत्वे अर्थैक्याभावेन वाक्यभेदः स्यात्, अतो 'न हिंस्यादि'त्यादिष्वपि निषेधविधानार्थं हिंसादेरधर्मस्यानुवाद एव स्वीकार्य इत्यर्थः। भूमिरिति कर्मभूमिः। अधर्ममिति व्यवस्थापयतीति शेषः। दशाविशेष इति। भगवद्दासत्वाभिमानसत्सङ्गभगवद्दानादिकृतहर्षोत्कर्षे। गोब्राह्मणाद्यर्थकानृतदशायाम्। ननु सम्बुध्यन्ते धर्मपदे विभक्तिव्यत्यासात्त्वां निवर्तयेदिति व्याख्यानमयुक्तमित्यत आहुः विभक्तीत्यादि। व्यत्यासानङ्गीकारे स्वात्मानमित्यध्याहारः स्यादित्यर्थः। नन्वधर्मस्य पदार्थान्तरत्वेन कालभिन्नत्वात्कथमुद्देश्यविधेयभाव इत्याकांक्षायां तस्य पर्यवसानं विचारयन्ति अपरिच्छिन्न इत्यारभ्य कलिरित्यर्थ इत्यन्तेन। एवं युगविभागे उपपत्तिमाहुः कालस्येत्यादि। द्वितीयराशीति अधर्मराशीत्यर्थः। अधर्मांशप्रवेश इति। अवच्छेदके काले तत्प्रवेशः। तथा च यथा संवत्सररूपेण परिभ्रमन् सर्वमन्तः स्थापयति, तथाऽधर्मांशमपीति तथा विभाग इत्यर्थः। ननु कृतकल्योर्धर्माधर्मावच्छेदकत्वे किं मानमत आहुः ये वा इत्यादि। प्रसङ्गान्निर्द्धारितमिति। 'देवस्य सवितुः प्रात'रित्यनुवाके प्रातःसङ्गवमध्याह्नापराह्णसायाह्नानां सवितृमित्रबृहस्पतिभृगुवरुणदैवत्यत्वेन पुण्यत्वं वदन्त्या श्रुत्या तदवान्तराणां सम्बन्धिनां चतुर्णामग्निष्टोमोक्थ्यषोडश्यतिरात्रकरणेनात्तवीर्यत्वं च वदन्त्या चत्वार्यश्लीलानीति वदन्त्या चतुर्णां कालावयवानामेतदभावचतुष्टयरूपत्वं निर्द्धारितमित्यर्थः। मध्यभागेनेति। घटस्यान्तर्बहिराकाशो मध्ये घटस्तथोभयतः कालो मध्येऽधर्मः। एवं सत्युद्देश्यविधेयभावस्यावच्छेदकत्वे पर्यवसानमित्यर्थः। पूर्वमिति द्वापरत्रेतयोरित्यर्थः। ननु द्वापरत्रेतयोः कलिसद्भावे किं मानमित्याकांक्षायां पूर्वोक्तां श्रुतिमेव स्मारयन्ति अत एवेत्यादि ॥ २३ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

हे द्विजसत्तम शौनक ! धर्मे एवं प्रवदति सति प्रसिद्धः सम्राट् सार्वभौमः परीक्षित् विखेदः सन्समाहितेन सावधानेन मनसा तं धर्माभिप्रायं पर्यचष्ट पर्यालोचितवान्। यद्वा तं धर्मं पर्यचष्ट प्रत्यभाषत ॥ २१ ॥ ❀ ❀ तद्भाषणमेवाह–धर्ममिति षड्भिः। हे धर्मज्ञ यतो निर्धारितमिव ब्रुवन् घातकं जानन्नपि न सूचयेदित्येवं रूपं धर्ममेव त्वं ब्रवीषि अतो वृषरूपधृग्धर्मोऽसि। तत्सूचने को दोष इत्यपेक्षायामाह–अधर्मकृतो यन्नरकादि स्थानं भवति तत्सूचकस्यापि भवेदिति ॥ २२ ॥ ❀ ❀ अथवा देवस्य भगवतो मायायाः सङ्कल्परूपाया गतिः प्रवृत्तिर्भूतानां प्राणिनां चेतसः अगोचरा अतर्क्या वचसश्चागोचरा अनिर्देश्या चेति निश्चयः, अत्र सन्देहो नास्ति। अतोऽपि परापराधो निश्चयेन वक्तव्यः, तथाच तथा कथयन् धर्मोऽसीति ज्ञायसे इति भावः। नूनमिति पादपूरणे ॥ २३ ॥ ❀ ❀ एवं वदन् धर्मोऽसाविति निश्चित्य तस्य पादानुवादेन व्यवस्थामाह–तप इति द्वाभ्याम्। धर्माधिदेवस्य तव तपआदयश्चत्वारः पादाः प्रकीर्तिताः शास्त्रे निरूपिताः। तत्र त्रयः पादा अधर्मस्यांशैः स्मयादिभिस्त्रिभिर्भग्नाः। तत्र तपः कृच्छ्रचान्द्रायणादि तद्विरोधी च स्मयो विस्मयो बुद्धिविमोहरूपः तत्प्रतिबन्धकत्वात्, शौचं शुचित्वं तद्विनाशकश्च स्त्रीसङ्गः, दया परदुःखप्रहाणेच्छा तद्विरोधी च मदो गर्वः ॥ २४ ॥

हिन्दी अनुवाद

सूतजी कहते हैं—ऋषिश्रेष्ठ शौनकजी ! धर्मका यह प्रवचन सुनकर सम्राट् परीक्षित् बहुत प्रसन्न हुए, उनका खेद मिट गया। उन्होंने शान्त-चित्त होकर उनसे कहा ॥ २१ ॥ ❀ ❀ परीक्षित्‌ने कहा—धर्मका तत्त्व जाननेवाले वृषभदेव ! आप धर्मका उपदेश कर रहे हैं। अवश्य ही आप वृषभके रूपमें स्वयं धर्म हैं। (आपने अपनेको दुःख देनेवालेका नाम इसलिये नहीं बताया है कि) अधर्म करनेवाले को जो नरकादि प्राप्त होते हैं, वे ही चुगुली करनेवालेको भी मिलते हैं ॥ २२ ॥ ❀ ❀ अथवा यही सिद्धान्त निश्चित है कि प्राणियोंके मन और वाणीसे परमेश्वरकी मायाके स्वरूपका निरूपण नहीं किया जा सकता ॥ २३ ॥ ❀ ❀ धर्मदेव ! सत्ययुगमें आपके चार चरण थे—तप, पवित्रता, दया और सत्य। इस समय अधर्मके अंश गर्व, आसक्ति और मदसे तीन चरण नष्ट हो चुके हैं ॥ २४ ॥

इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः। तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥ २५ ॥
इयं च भूर्भगवता न्यासितोरुभरा सती। श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २६ ॥
शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना। अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥ २७ ॥
इति धर्मं महीं चैव सान्त्वयित्वा महारथः। निशातमाददे खड्गं कलयेऽधर्महेतवे ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इदानीं कलौ हे धर्म ते पादश्चतुर्थोंऽशस्तत्रापि सत्यमेवास्ति यतः सत्याद्भवानात्मानं निर्वर्तयेत्कथंचिद्धारयेत्। यद्वा पुरुषस्त्वां साधयेत्। तमपि पादमनृतेन संवर्धितः कलिरूपोऽयमधर्मो ग्रहीतुमिच्छति। तत्रेयं स्थितिः। कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मस्त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थोंऽशो हीयते। द्वापरे त्वर्धम्। कलौ चतुर्थोंऽशोऽवशिष्यते सोऽप्यन्ते नंक्ष्यतीति ॥ २५ ॥ ❀ ❀ न्यासितोऽन्योन्यद्वारेणावतारित उरुर्भरो भारो यस्याः। कृतं कौतुकं मंगलं यस्याः सा ॥ २६ ॥ ❀ ❀ अश्रूणि कलयति मुंचतीत्यश्रुकला तेन त्यक्ता सती शूद्रा भोक्ष्यन्ति मामिति शोचति ॥ २७ ॥ ❀ ❀ निशातं निशितम्। अधर्मस्य हेतुर्यः कलिस्तं हन्तुमित्यर्थः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे धर्मेति। पादावशेषत्वादेव मया त्वं धर्मोयमिति ज्ञात एवेति भावः। तत्रापि चतुर्थांशेऽपि प्राधान्येन व्यपदेशो भवतीति न्यायेन सत्यस्यैव प्राधान्यमाह–यद्वेति ॥ २५ ॥ ❀ ❀ "आश्चर्ये मंगले प्रोक्तमुत्सवेऽपि च कौतुकम्" इत्यभिधानात् ॥ २६ ॥ ❀ ❀ अब्रह्मण्या ब्राह्मणभक्तिरहिताः ॥ २७ ॥ ❀ ❀ इत्यर्थ इति। "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति कर्मणि चतुर्थीति भावः। ननु जीवानामधर्म एव तत्तद्दोषहेतुरित्युक्तं कथं कलिं हन्यात्तत्राह–अधर्मस्य हेतवे सहायायेत्यर्थः। वक्ष्यते च "त्वमधर्मबन्धुः" इति संदर्भः। खड्गादाने राज्ञोऽयमभिप्रायः–मत्पाणिस्थखड्गदर्शनादयमपि नृपचिह्नधारी मया सार्द्धं द्वंद्वशो योद्धुमायातु। ततश्चैनं शीघ्रमेव हनिष्यामीति ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

तेन भगवता इत्यर्थः ।। २७-३७ ।।

श्रीमद्वीरराघवव्याख्या

अथ वृषलं तच्चिकीर्षितं च निश्चित्याह इदानीमिति । हे धर्म ! यत्तव तुरीयं पादं सत्यं यद्यतो निर्वर्त्तयेत् यस्माद्धेतोर्निष्पाद्येत तमिदानीमनृतेनैधितः प्रवृत्तोऽयमधर्मरूपः कलिर्जिघृक्षति ग्रहीतुमिच्छति । तपआदीनां क्रमेण निर्वर्तकाः स्मयसङ्गमदानृतानां भावाः सन्त्यपि हि तपआदीनि विस्मयादिभिर्न व्यज्यन्ते ।। २५ ।। ❀ ❀ अथ गां तत्क्लेशहेतुं च निश्चित्याह इयमिति द्वाभ्याम् । इयं गौः साक्षाद्भूः पृथ्वी भगवता श्रीकृष्णेन न्यासितोपनीतः उरुभरो यस्यास्तथाभूता श्रीमद्भिरब्जादिविग्रहैः श्रीः शोभा येषामास्तीति तैस्तस्य भगवतः पादन्यासैः सर्वत्र कृतं कौतुकमुत्सवो यस्याः सा बभूव ।। २६ ।। ❀ ❀ अधुना तु भगवतोज्झिता त्यक्ता सती साध्वी भूरत एव भाग्यहीने वाब्रह्मण्या ब्रह्मकुलासाधवः नृपव्याजा नृपवेषमात्रधराः शूद्रा मां भोक्ष्यंतीति हेतोरश्रूणां कला बिन्दवो यस्यास्तथाभूता शोचति ।। २७ ।। ❀ ❀ इतीत्थं धर्मं महीं च सांत्वयित्वा महारथः परीक्षिदधर्महेतवे कलये तद्वधार्थं निशातं तीक्ष्णं खड्गमादधे उद्धृतवान् ।। २८ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदानीमस्मिन्युगे यतो येन पादेन निर्वर्तसे हे धर्म ! ते स पादः सत्यं सत्यात्मकस्त्ववशिष्टोऽनृतेनाधर्मपादेन एधितो वर्धितोऽधर्मात्मकः कलिः तं सत्याख्यं पादं जिघृक्षति तं ग्रहीतुमिच्छति ग्रसितुमाकांक्षते इत्यन्वयः ।। २५ ।। ❀ ❀ इयं भूश्च भगवता न्यासितावरोपित उरुर्महान् भरो भारो यस्याः सा तथोक्ता श्रीमद्भिस्तस्य हरेः पदन्यासैः पदपरिक्रमणैः सर्वतः कृत-कौतुकारचितालंकारारचितरोमांचेति वा सती निर्मलाभूत् ।। २६ ।। ❀ ❀ सेयं साध्वी अधुना तत्पदन्यासैरुज्झिता दुर्भगेव भाग्यहीना स्त्रीव शोचंती अश्रुकलासंततस्रुतनेत्रजलधाराऽऽस्त इत्यन्वयः । किं कृत्वा अब्रह्मण्या ब्राह्मणभक्तिरहिता नृपव्याजाः शूद्रा मां भोक्ष्यंति पालकव्याजेन भुंजत इति ।। २७ ।। ❀ ❀ अधर्महेतवे अधर्मकारणाय निशातं तेजितं हंतुमिति शेषः ।। २८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इतीति । ननु जीवानामधर्म एव तत्तद्दोषहेतुरित्युक्तम् । कथं कलिं हन्यात् तत्र अधर्मस्य हेतवे सहायापेक्षेत्यर्थः । वक्ष्यते च त्वमधर्मबन्धुरिति ।। २८-३० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इदानीं कलौ हे धर्म ते पादश्चतुर्णामेव तपआदिपापानां स्मयादिभिर्भागत्रयध्वंसात् अवशिष्टैश्चतुर्भिश्चतुर्थैरंशैरेकः । स च प्राधान्येन व्यपदेशा भवन्तीति न्यायेन सत्यम् । तपआदिषु सत्यस्यैव प्राधान्यात् । यतः सत्याद्भवानात्मानं निर्वर्त्तयेत् कथं-चिद्धारयेत् । यद्वा पुरुषस्त्वां साधयेत् । तदपि पादमनृतेन संवर्द्धितः कलिरूपोऽयमधर्मः ग्रहीतुमिच्छति । तत्रेयं द्वादशस्कन्धदृष्ट्या स्थितिः । कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः सङ्गेन शौचं मदेन दया अनृतेन सत्य-मित्येवं चतुर्थोऽशो हीयते । द्वापरे त्वर्द्धम् । कलौ चतुर्थोऽशोऽवशिष्यते । सोऽप्यन्ते नंक्ष्यतीति ।। २५ ।। ❀ ❀ न्यासितः अवतारितः स्वेनान्यद्वारा च उरुर्भरो भारो यस्याः सा ।। २६ ।। ❀ ❀ अश्रूणि कलयति दधातीति ।। २७ ।। ❀ ❀ कलये कलिं हन्तुं खड्गम् आददे इत्यत्र राज्ञोऽयमभिप्रायः—मत्पाणिस्थखड्गदर्शनेनायमपि नृपचिह्नधारी मया सार्द्धं द्वन्द्वशो योद्धु-मायातु, ततश्चैनं शीघ्रमेव हनिष्यामीति ।। २८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे धर्म ! इदानीं कलौ सत्यं ते पादोऽस्ति यतो भवानात्मानं निर्वर्तयेद्धारयेत् तमपि अधर्मोऽधर्महेतुरयं कलिः अनृते-नैधितो जिघृक्षति ग्रहीतुमिच्छति ।। २५ ।। ❀ ❀ गोरूपधारिणी भूरियमिति ज्ञात्वा तां प्रत्याह इयमिति द्वाभ्याम् । इयं गोरूपधरा भूः भगवता श्रीकृष्णेन न्यासितः अवतारित उरुर्भरो यस्याः सा श्रीयुक्तैस्तत्पदन्यासैः सर्वत्र कृतं कौतुकमुत्सवो यस्याः सा पूर्वमेवंभूतापि ।। २६ ।। ❀ ❀ अधुना तु भगवतोज्झिता त्यक्ताऽतोऽश्रूणां कलाः बिंदवो यस्याः सा साध्वी सदाचारा दुर्भगेवाब्रह्मण्या ब्रह्मब्राह्मणहितवर्जिताः नृपव्याजाः वृत्त्यर्थं नृपवेशधराः मां भोक्ष्यंतीति शोचति ।। २७ ।। ❀ ❀ अधर्महेतव इति । निशातं निशितम् ।। २८ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं धर्मस्वरूपमुक्त्वा भूमिस्वरूपज्ञानमाविःकरोति इयं चेति । चकारादतिरिक्तः कलिः तस्य विशेषतः अनिरूपणं चकारेण ज्ञापितम् । अस्या गुणत्रयं दोषत्रयम् , इयं हि षडंशा पूर्वं भगवता न्यासितः उत्तारितः उरुः अधिको भारो यस्याः भगवत्कृतोपकारत्वं गुणः ततः सती भगवदेकनिष्ठा भगवतैव स्वाङ्घ्रैरलंकृता च तदाह श्रीमद्भिरिति । न्यासः स्थापनं सर्वतः कृतं अनेन शृङ्गाररसत्वं च सूचितम् ॥ २६ ॥ ❀ ❀ दोषानाह शोचतीति । भगवत्परित्यागेन शोकदुर्भगात्वम् अब्रह्मण्यभोगेन पूर्वावस्थात्यागश्च अश्रूणि कलयतीत्यश्रुकला स्वकृतदोषाभावार्थमाह साध्वीति, भाग्यनाश एव हेतुः तदाह दुर्भगेति, अधुनेति त्यागनैकट्यं सूचितम् । ननु राज्ञां भगवद्रूपत्वात् भोगे को दोष इति तत्राह अब्रह्मण्या इति । भगवद्धर्मवैपरीत्यम् अब्रह्मण्यपदेन सूचितं, नृपत्वं वक्तुं योगाभावात् शूद्रा इति भगवद्विरोधिनः 'असुर्ये शूद्र' इति श्रुतेः ते भोक्ष्यंतीति शोको रोदनं च, अनेन स्वरसाविर्भावात् न तेषां योगः सेत्स्यतीति भावः सूचितः ॥ २७ ॥ ❀ ❀ उपसंहरतीति चकार उक्तसमुच्चयार्थः, एवकार कलिनिषेधार्थः, महारथ इति निग्रहसामर्थ्यं कालस्य देवतात्वात् तीक्ष्णखड्गेन शिरश्छेदो न युक्त इत्याशंक्याह अधर्महेतव इति । अधर्मकरणनिवृत्त्यर्थे चतुर्थी मशकेभ्यो धूम इतिवत् अदृश्यतयागमनेन प्रयोजनं न वा निस्तारः ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

इतीत्यत्र । उक्तसमुच्चयार्थ इति । स्वरूपतद्दुःखज्ञानसमुच्चयार्थः । तमित्यत्र । स्वकुटुम्बमिति । कलिकुटुम्बम् ॥ २८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

इदानीं कलौ हे धर्म ते पादश्चतुर्थांशस्तत्रापि सत्यमेवास्ति, यतः सत्यात् भवानात्मानं निर्वर्तयेत् कथञ्चिद्धारयेत् । यद्वा पुरुषस्त्वां साधयेत् । तमपि पादमनृतेनैधितः संवर्द्धितः कलिरूपोऽयमधर्मो जिघृक्षति ग्रहीतुमिच्छति । अत्र यद्यपि प्राधान्येन व्यपदेशा भवन्तीति न्यायेन सत्यस्य प्राधान्यमभिप्रेत्य सत्यमस्तीत्युक्तं, तथापीयं व्यवस्था बोध्या-कृतयुगे प्रथमं सम्पूर्णश्चतुष्पाद्धर्मः, त्रेतायां तु चतुर्णामपि पादानां मध्ये स्मयेन तपः सङ्गेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थांशो हीयते, द्वापरे त्वर्द्धांशः, कलौ चतुर्थांशोऽवशिष्यते सोऽप्यन्ते विनङ्क्ष्यतीति ॥ २५ ॥ ❀ ❀ अथ गां तत्क्लेशहेतुं च निश्चित्याह-इयमिति द्वयेन । इयं च गौः भूः पृथ्वी भगवता श्रीकृष्णेन न्यासितोऽन्योन्यविग्रहेणापनीतः उरुभरो यस्याः सा तथा श्रीमद्भिः अब्जादिशोभायुक्तैस्तस्य भगवतः पदन्यासैः सर्वत्र कृतं कौतुकं मङ्गलं यस्यास्तथाभूता च सती ॥ २६ ॥ ❀ ❀ अधुना तेनोज्झिता त्यक्ता अतः अश्रूणि कलयति मुञ्चतीति तथा सती अब्रह्मण्याः ब्राह्मणभक्तिहीना नृपव्याजा नृपवेषधारिणः शूद्रा मां भोक्ष्यन्तीति दुर्भगा भाग्यहीनेव शोचतीति द्वयोरन्वयः । न चैवं शोकार्हेयं परसर्वपुरुषार्थसाधकत्वादित्याशयेनाह-साध्वीति ॥ २७ ॥ ❀ ❀ महारथः परीक्षित् इत्येवं धर्मं महीं च सान्त्वयित्वा कलये कलिवधार्थं निशातं तीक्ष्णं खड्गमेवाददे गृहीतवान् । तद्वधमेवोचितमिति सूचयंस्तत्र हेतुमाह-अधर्महेतवे इति ॥ २८ ॥

हिन्दी अनुवाद

अब आपका चौथा चरण केवल 'सत्य' ही बच रहा है। उसीके बलपर आप जी रहे हैं। असत्यसे पुष्ट हुआ यह अधर्मरूप कलियुग उसे भी ग्रास कर लेना चाहता है ॥ २५ ॥ ❀ ❀ ये गौ माता साक्षात् पृथ्वी हैं। भगवान्‌ने इनका भारी बोझ उतार दिया था और ये उनके राशि-राशि सौन्दर्य बिखेरनेवाले चरणचिह्नोंसे सर्वत्र उत्सवमयी हो गयी थीं ॥ २६ ॥ ❀ ❀ अब ये उनसे बिछुड़ गयी हैं। ये साध्वी अभागिनीके समान नेत्रोंमें जल भरकर यह चिन्ता कर रही हैं कि अब राजाका स्वाँग बनाकर ब्राह्मणद्रोही शूद्र मुझे भोगेंगे ॥ २७ ॥ ❀ ❀ महारथी परीक्षित्‌ने इस प्रकार धर्म और पृथ्वीको सान्त्वना दी। फिर उन्होंने अधर्मके कारणरूप कलियुगको मारनेके लिये तीक्ष्ण तलवार उठायी ॥ २८ ॥

तं जिघांसुमभिप्रेत्य[1] विहाय नृपलाञ्छनम् । तत्पादमूलं शिरसा समगाद् भयविह्वलः ॥ २९ ॥
पतितं पादयोर्वीरः कृपया दीनवत्सलः । शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥ ३० ॥

राजोवाच

न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्वै[2] भयमस्ति किञ्चित् ।
न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबन्धुः ॥ ३१ ॥

---

१. प्रा० पा०—प्रेक्ष्य । २. प्रा० पा०—बद्धाञ्जलेस्ते ।

त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ।
लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अभिप्रेत्य ज्ञात्वा ॥ २९ ॥ ❀ ❀ शरण्य आश्रयार्हः । श्लोक्यः सत्कीर्त्यर्हः ॥ ३० ॥ ❀ ❀ गुडाकेशोऽर्जुनस्तस्य यशोधरा ये वयं तेषां तान्प्रति बद्धोंजलिर्येन तस्य ते । किं तु कथंचन केनाप्यंशेन न वर्तितव्यम् । यस्मात्त्वमधर्मस्य बन्धुः ॥ ३१ ॥ ❀ ❀ तदेवाह । राजदेहेषु वर्तमानं त्वामनु सर्वतः प्रवृत्तः । अनार्यं दौर्जन्यम् । अंहः स्वधर्मत्यागः । ज्येष्ठा अलक्ष्मीः । माया कपटम् ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विहाय नृपलांछनमिति । कलिनाप्येवं विचारितमनेन सह योद्धुं न मे शक्तिरस्ति न च क्षत्रियस्य शरणापत्तिरुचिताऽतो नृपचिह्नं विहायैवास्य पादयोः पतिष्याम्यन्यथा वेषस्य लज्जा भविष्यति । अत्र नटयतिन्यायोनुसन्धेयः । नाट्यं दर्शयता नटेन संन्यासवेषं विधाय नृपसदस्यागतं, तं च राजा सत्कृत्य रजतस्थाले सहस्रदीनारं कृत्वा समर्पयामास । स चाह–नाहमेतत्प्रशाम्य-पसारय मदग्रत एतदिति । ततश्च तं वेषं विहाय किञ्चिन्नाट्यं कृत्वा तत्समाप्य राजानमाह–देहि मेऽश्वं काश्मीरकंबलञ्च । ततो राजा तमाह–अहो सहस्रदीनारांस्त्यक्त्वाधुना किमल्पं याचसे ? तेनोक्तं तदा तद्ग्रहणे वेषो लज्जायितो भवेदतो वेषपूर्त्यर्थं न गृहीतमिति ॥ २९ ॥ ❀ ❀ नावधीच्छ्लोक्य इति । राज्ञापि विचारितं शरणागतोयं हंतुमनर्हस्तदपि दुष्टमेनं यदि हन्मि तर्हि शरणागतवधाज्जातमधर्ममवलंब्य मय्येवासौ प्रवेक्ष्यति, हसन्निवेति कोपानपगमात् । ईश्वरेण तादृश एव विधिर्निर्मितो यज्जिघांसोरपि हस्तात्त्वमद्य रक्षितोभूरिति मनोनुलापाच्च ॥ ३० ॥ ❀ ❀ स्वकार्यं विचार्याह–नेति । न वर्तितव्यं न स्थेयम् । देहमारभ्य राष्ट्रपर्यन्तस्थानविवक्षया क्षेत्रमित्युक्तम् । श्लेषोत्रालंकारः । अधर्मस्य बन्धुः सहकारी । यद्वाऽधर्मो बन्धुरिवात्याज्यो यस्येति वा ॥ ३१ ॥ ❀ ❀ तदेवाधर्मबन्धुत्वमेव । त्वत्प्रवृत्तौ बहवो दोषाः सन्तीत्याह–नराणां देवानां च देहेष्विति देवा अपि त्वदाक्रान्तदेहा लोभाद्यधर्मिष्ठा भवन्ति, किं पुनर्नरा इति भावः । लोभः परवित्ताभिलाषः । सद्व्यये प्राप्ते वित्तापरित्यागो वा ॥ ३२ ॥

श्रीमद्वीरराघवव्याख्या

तं परीक्षितं जिघांसुं हंतुमिच्छुमभिप्रेत्यालक्ष्य कलिः नृपलांछनानि किरीटादीनि विहायापनीय भयेन विह्वलगात्रः शिरसा तस्य परीक्षितः पादयोर्मूलं समगात्पपातेत्यर्थः ॥ २९ ॥ ❀ ❀ पादयोः पतितं कलिं वीरो दीनवत्सलः शरणमर्हः शरण्यः श्लोक्यः प्रशस्तो राजा कृपया नावधीन्न हतवान् किंतु हसन्निवेदं वक्ष्यमाणमाह ॥ ३० ॥ ❀ ❀ तदेवाह नेत्यादिभिश्चतुर्भिः । गुडाकेशयशोधराणामर्जुनकीर्त्तिवर्द्धनानामस्माकं सन्निधाविति शेषः, बद्धांजलेस्ते तव किंचिदपि भयं नास्ति, अस्मदीये क्षेत्रे कथंचन भवता न वर्तितव्यं, कुतः यतस्त्वमधर्मस्य बंधुरनुबंधी ॥ ३१ ॥ ❀ ❀ तदेव प्रपञ्चयति त्वामिति । नरदेवानां देहेषु वर्त्तमानं त्वामनुसृत्य प्रवृत्तो भवत्ययमधर्मसमुदायः, कोऽसावधर्मयूथ इत्यत्राह लोभ इति । अनार्यं शाठ्यमंहः पापं ज्येष्ठाऽलक्ष्मीः मायागुणकार्यं रागद्वेषादिकम् अपह्नवो वा दंभो वंचनम् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जिघांसुं हंतुकामं पादमूलं समगात् अष्टांगविशिष्टतयाऽऽसीदित्यन्वयः ॥ २९ ॥ ❀ ❀ श्लोक्यः कीर्तिकामः ॥ ३० ॥ ❀ ❀ गुडाकेशयशोधराणामर्जुनकीर्तिं बिभ्रतां कौरवाणामस्माकमर्थे बद्धोऽञ्जलिर्येन स तथोक्तस्तस्य गुडाकेशय शोधराणां सकाशात् भयं नास्तीति वा, किंतु हे कले त्वया मदीये क्षेत्रे कथंचिदपि न वर्तितव्यमित्यन्वयः । देहमारभ्य राष्ट्रपर्यंत-स्थानविवक्षया क्षेत्र इत्युक्तं कुत इति तत्राह त्वमिति अधर्म एव बंधुर्यस्य स तथोक्तः अधर्मबंधुत्वादिति भावः ॥ ३१ ॥ ❀ ❀ ततश्च किमिति तत्राह त्वामिति नरदेवानां धर्मपालकानां राज्ञां देहेषु वर्तमानं सन्निधानं त्वामन्वनंतरम् अयं लोभाद्यधर्मयूथः प्रवृत्तो भवतीति यस्मात्तस्मादधर्मबंधो हे कले सत्येन धर्मेण च वर्तितव्ये ब्रह्मावर्ते विंध्यहिमवत्पर्वतयोर्मध्ये पुण्यदेशे न वर्तितव्य-मित्यन्वयः । लुभ-गार्ध्ये इति धातोर्लोभः परवित्ताभिलाषः सद्व्यये प्राप्ते स्ववित्तापरित्यागो वा, ज्येष्ठा अलक्ष्मीः माया निकृतिः यत्र यस्मिन् ब्रह्मावर्ते स्वाध्यायादिर्ब्रह्मयज्ञश्चरुपुरोडाशादिद्रव्यलक्षणवितानयज्ञश्च येषां ते ब्रह्मवितानयज्ञाः मुनयः यज्ञैर्यज्ञेश्वरं यजंति ॥ ३२-३३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गुडाकेशस्य यद्यशस्तस्य रक्षणव्यग्राणामित्यर्थः ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विहाय नृपलांछनमिति । तदा कलिनाप्येवं विचारितम्-अनेन सह योद्धुं न मे शक्तिर्न च क्षत्रियस्य शरणापत्तिरुचिता, अतो नृपचिह्नं विहायैव पादयोरस्य पतामीति ॥ २९ ॥ ❀ ❀ नावधीत् श्लोक्य इति । राज्ञापि विचारितं-शरणागतोऽयं हन्तुमनर्हः, तदपि दुष्टमेवं यदि हन्मि तर्हि शरणागतवधाज्जातमधर्म्ममालम्ब्य मय्येवासौ प्रवेक्ष्यति न मरिष्यतीति हसन्निवेति कोपानपगमात् ईश्वरेण तादृश एव विधिर्निर्म्मितो यज्जिघांसोरपि मम हस्तात् त्वमद्य रक्षितोऽभूरिति मनोऽनुलापात्र ॥ ३० ॥ ❀ ❀ स्वकार्य्यं विचार्य्याह-गुडाकेशोऽर्ज्जुनस्तद्यशोधराणामस्माकमग्रतो बद्धाञ्जलेस्तव । किन्तु कथंचन केनाप्यंशेन न वर्त्तितव्यं न स्थेयम् ॥ ३१ ॥ ❀ ❀ त्वत्प्रवृत्तौ दोषान् शृण्वित्याह त्वामिति । नराणां देवानां च देहेष्विति । देवा अपि त्वदाक्रान्तदेहा लोभाद्यधर्म्मिष्ठा भवन्ति किं पुनर्नरा इति भावः । वर्त्तमानं त्वामनु सर्व्वतः प्रवृत्तः । अनार्य्यं दौर्जन्यम् । अंहः स्वधर्म्मत्यागः । ज्येष्ठा अलक्ष्मीः । माया कपटम् । दम्भोऽहङ्कारः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जिघांसुं हंतुमिच्छुम् अभिप्रेत्य ज्ञात्वा पादयोर्मूलं समगात् पपात ॥ २९ ॥ ❀ ❀ कृष्णशरण्यः शरणमाश्रयस्तदर्हः श्लोक्यः श्लोकाः यशांसि तदर्हः ॥ ३० ॥ ❀ ❀ तद्यशोधराणामस्माकमग्रे बद्धांजलेस्ते तव किंचिदपि भयं नास्ति तथापि त्वमधर्मस्य बंधुरनुकूलः, अतो मदीये क्षेत्रे कथंचन केनाप्यंशेन भवता न वर्तितव्यम् ॥ ३१ ॥ ❀ ❀ कलेरधर्मबंधुत्वं दर्शयति नरदेवदेहेषु वर्तमानं त्वामनु अधर्मपूगोऽयं प्रवृत्तः । कोऽसावित्याकांक्षायामाह लोभोऽन्यायेनाऽर्थाभिलाषः, अनृतमयथार्थ-भाषणम्, अनार्य्यं शाठ्यम्, अंहः पापाचरणम्, ज्येष्ठाऽलक्ष्मीः, माया तव संबंधनिबंधनाऽऽत्मपरमात्माद्यनभिज्ञताकापट्यं वा कलहः पित्रादिभिर्विवादः, दंभः धर्मध्वजित्वम् ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

धर्मवाक्यानां श्रवणात् तदर्थपर्यालोचनया राजनि अभिमानादिः स्वकुटुम्बमस्तीति ज्ञात्वा स्वनाशभयं परित्यज्य तच्छरणं गत इत्याह तं जिघांसुमिति । राजचिह्नं छत्रादि लोके आज्ञापनं त्यक्त्वेत्यर्थः । पादमूलमिति स्वस्य राजशेषत्वं ज्ञापितं शरणागतः भवत्सेवक इति भयविह्वल इति धर्मश्चेत् प्रेरयेत् तदा मारयिष्यतीति भयं कापट्यं वा ज्ञास्यति चरणपातव्याजेन राजानमपि पृच्छति तेन तस्याप्यग्रे दुर्बुद्धिरुत्पद्यते धर्मसांनिध्यादिममर्थं ज्ञास्यतीति भयम् ॥२९॥ ❀ ❀ चरणपातानन्तरं यज्जातं तदाह पतितमिति । पादयोरिति गतिनाशः सूचितः, सोऽपि बुद्धेरुपकाराय भविष्यति इहैव भगवत्सायुज्याद्वीर इति स्वधर्मनाशः प्रकृत इति विचारः धर्मसांनिध्यात् दयादिप्रवेशः धर्मसांनिध्यात्तत्र जातः । तदाह कृपयेति । इयं दया लौकिकीत्याह दीनवत्सल इति । वत्सं लातीति पशुः दानविषयेन विचारः कृत इत्यर्थः पूर्वजकीर्तिरक्षार्थं नास्य बुद्धिर्जाता स्वधर्म एव जातेति शरण्य इत्युक्तं लोकापवा-दभयादपि तदाह श्लोक्य इति, इदं वक्ष्यमाणम् आह च अनिष्टं तु नष्टमिष्टं च प्रयच्छतीत्यर्थः । हसन्निवेति मुखप्रसादः सर्वक्लेश-सम्बन्धो वा कलेः ॥ ३० ॥ ❀ ❀ कम्पं दृष्ट्वा कालान्तरे मारयिष्यतीति शंकास्य वर्तत इत्यनुमाय तन्निवृत्त्यर्थमाह न ते गुडाकेश इति । गुडाका निद्रा तस्या ईशोऽर्ज्जुनः अनेन मायामोहाभावान्न त्वत्कृतमस्माकं भयमिति सूचितं, यशोधराणामिति यशोऽर्थमप्यधर्मं न करिष्यामि इति भावः । सत्यप्रतिज्ञार्थं वा अहं तु पौत्र एव अन्येऽपि ये केचन अर्ज्जुनस्य यशोधारकाः तेषामप्यग्रे बद्धांजलेस्तव किमपि भयं नास्ति, इन्द्रादिरपि भयजननासमर्थ इत्यर्थः । परमस्मदीया आज्ञा परिपालनीयेत्याह न वर्त्तितव्यमिति । कथंचन केनाप्यंशेन तस्य जम्बूद्वीपराज्यमल्पमिव निरूपयति क्षेत्रमिति । उत्पत्तिस्थानं वा अतो यदेव बीजं पतिष्यति तदेवोत्पत्स्यत इति त्वया न स्थातव्यं तत्र हेतुः अधर्मबंधुरिति । अधर्मे निवार्ये दण्डे वा अपकारं करिष्यतीति सूचितम् । अत एवेदानीं पाखण्डितानिराकरणे निराकर्त्तुर्भयम् ॥३१॥ ❀ ❀ ननु राज्ञ एतत्कार्यं यत्प्रजाशिक्षणं दण्डश्च अतो लोभहेतुं मां कुतो निवारयसीत्यत आह त्वां वर्त्तमानमिति । यदि राजानस्त्वया त्यक्ताः स्युस्तदा तेषां लोभो भवेत् तेषामप्यधर्मत्वे स्वरूपनाशः स्यात् किं लाभेन स्वस्यापि तथात्वे तदनुमोदनादलाभश्च । अत एव नरदेवदेहेषु वर्त्तमानं त्वामनु अधर्मसमूहोऽपि प्रतिप्रविष्टः, स च प्रत्यक्षोऽस्मास्वपि वर्त्तत इति इदमा निर्दिशति तमधर्मपूगमेव गणयति भवतस्य प्राणः लोभः परद्रव्याभिलाषः ततस्तत्सिद्ध्यर्थमनृतं मिथ्यैवं कृतमिति वाच्यतापादनादिप्रतियोगिनो बलत्वे चौर्यं गुप्ततया वित्तहरणं दौर्बल्ये तु अनार्यं प्रत्यक्षत एव स्त्रीरत्नादिहरणम् आर्यविरुद्धशील-त्वात्तस्यानार्यत्वं तस्य शक्तो अंहः अपराधकरणम् अग्निदाहादि ततो ज्येष्ठा दारिद्र्यसम्पादनं चकारात्स्वस्यापि दारिद्र्यं ततो वचने चातुरी माया ततः कलहः पुनः विश्वासार्थं दंभश्च चकारात्कलहादनंतरं मारणं वा ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

पतितमित्यत्र । सोपीति गतिनाशोपि । तत्र जात इति अधर्ममारणावसरे जात इत्यर्थः । पशुरिति राजा पशुः । त्वामित्यत्र । ज्येष्ठा दारिद्र्यसम्पादनमिति । पुराणे अलक्ष्म्या लक्ष्मीज्येष्ठभगिनीत्वाज्ज्येष्ठेति नाम्ना प्रसिद्धेस्तथेत्यर्थः ॥ ३१ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तं परीक्षितं जिघांसुं हन्तुमिच्छुमभिप्रेत्य आलक्ष्य कलिर्नृपलाञ्छनं किरीटादि विहायापनीय भयेन विह्वलो व्याकुलः शिरसा तस्य पादयोर्मूलं समगात्पपातेत्यन्वयः ॥ २९॥ ❀ ❀ पादयोः पतितं कलिं कृपया नावधीत् न हतवान् किन्तु हसन्नेवेदं वक्ष्यमाणमाहेत्यन्वयः । इवशब्द एवकारार्थकः । एवं करणे हेतुमाह-श्लोक्य इति, यतः प्रशंसायोग्य इत्यर्थः । तत्र हेतुमाह-शरण्यः शरणार्ह इति । तत्रापि हेतुमाह-दीनवत्सल इति ॥ ३० ॥ ❀ ❀ तद्वाक्यान्येव दर्शयति-नेति चतुर्भिः । गुडाकेशोऽर्जुनस्तस्य यशोधराणां कीर्तिवर्धनानामस्माकमग्रे बद्धोऽञ्जलिर्येन तस्य तव किञ्चिदपि भयं नैवास्ति, परन्तु मदीये क्षेत्रे मत्पालिते देशे कथञ्चनापि केनाप्यंशेन भवता त्वया न वर्त्तितव्यम् । कुतो दोषादित्यपेक्षायामाह-यस्मात्त्वमधर्मस्य बन्धुः अनुबन्धीति ॥ ३१ ॥ ❀ ❀ अधर्मबन्धुत्वमेव प्रपञ्चयति-त्वामिति । नरदेवा ब्राह्मणा राजानो वा तेषां देहेषु वर्त्तमानं त्वाम् अनुसृत्य अयमधर्मस्य पूगः समुदायः प्रवृत्त इत्यन्वयः । कोऽसावधर्मपूग इत्यपेक्षायामाह-लोभ इत्यादि । लोभः परधनाद्यभिलाषः । अनृतं मिथ्याभाषणम् । चौर्यं गुप्ततया परधनादिहरणम् । अनार्यं दौर्जन्यम् । अंहः पापाचरणम् । ज्येष्ठा अलक्ष्मीः दारिद्र्यम् । माया कपटम् । कलहो विरोधः । दम्भो वञ्चनादि ॥ ३२ ॥

हिन्दी अनुवाद

कलियुग ताड़ गया कि ये तो अब मुझे मार ही डालना चाहते हैं; अतः झटपट उसने अपने राजचिह्न उतार डाले और भयविह्वल होकर उनके चरणोंमें अपना सिर रख दिया ॥ २९ ॥ ❀ ❀ परीक्षित् बड़े यशस्वी, दीनवत्सल और शरणागतरक्षक थे । उन्होंने जब कलियुगको अपने पैरोंपर पड़ा देखा तो कृपा करके उसको मारा नहीं, अपितु हँसते हुए उससे कहा ॥ ३० ॥ ❀ ❀ परीक्षित् बोले—जब तू हाथ जोड़कर शरण आ गया, तब अर्जुनके यशस्वी वंशमें उत्पन्न हुए किसी भी वीरसे तुझे कोई भय नहीं है । परंतु तू अधर्मका सहायक है, इसलिये तुझे मेरे राज्यमें बिल्कुल नहीं रहना चाहिये ॥ ३१ ॥ ❀ ❀ तेरे राजाओंके शरीरमें रहनेसे ही लोभ, झूठ, चोरी, दुष्टता, स्वधर्मत्याग, दरिद्रता, कपट, कलह, दम्भ और दूसरे पापोंकी बढ़ती हो रही है ॥ ३२ ॥

न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥ ३३ ॥
यस्मिन् हरिर्भगवानिज्यमान इज्या[1]मूर्तिर्यजतां शं तनोति ।
कामानमोघान् स्थिरजङ्गमानामन्तर्बहिर्वायुरिवैष आत्मा ॥ ३४ ॥

सूत उवाच

परीक्षितैवमादिष्टः स कलिर्जातवेपथुः । तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥ ३५ ॥

कलिरुवाच

यत्र क्व[3]चन वत्स्यामि सार्वभौम तवाज्ञया । लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्तस्माद्धर्मेण सत्येन च वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्ते देशे । यज्ञस्य वितानं विस्तारस्तत्र विज्ञा निपुणाः ॥ ३३ ॥ ❀ ❀ इज्या यागस्तद्रूपा मूर्तिर्यस्य शं क्षेमं कामांश्च । नन्विन्द्रादयो देवा इज्यन्ते न तु हरिस्तत्राह । एष स्थावरादीनामात्मेति । तथापि जीववत्र परिच्छिन्न इत्याह अन्तर्बहिरिति । यथा वायुः प्राणरूपेणान्तःस्थोऽपि बहिरप्यस्ति तद्वत्सर्वान्तर्यामीश्वरोऽपीति ॥ ३४ ॥ ❀ ❀ उद्यतासिमुद्धृतखड्गम् । दण्डपाणिं यमम् । उद्यतमुद्युक्तम् ॥ ३५ ॥ ❀ ❀ अत्र न वस्तव्यमिति या तवाज्ञा तया यत्र क्वापि वत्स्यामि किं तु तत्र तत्राप्यात्तो गृहीत इषुः शरासनं च येन तं त्वामेव लक्षये ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्त्वधर्मबन्धुस्तस्माद्धेतोः । ब्रह्मावर्त्ते आर्यावर्त्ते इत्यर्थः । ब्रह्मणो वेदस्यासमन्ताद्वर्त्तो वर्त्तनं यत्र यस्मिंस्तथा । अत एव जीवगोस्वामिनाप्युक्तम् ब्रह्मावर्त्त इति यज्ञियदेशोपलक्षणम् "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं

---

१. प्रा० पा०—इष्टात्ममूर्ति० । २. प्राचीने पाठे नास्ति । ३. प्रा० पा०—क्व चाथ ।

ब्रह्मावर्तं प्रचक्षते ॥" इति तल्लक्षणात् । धर्मेणेत्यनेनैव सिद्धे सत्येन चेति पृथगुक्तिः सत्यस्य धर्ममूलत्वव्यंजिका । स्कंधशाखादिकं विना केवलेन मूलेनापि न प्रयोजनसिद्धिरित्यतो धर्मेणेति चोक्तम् ॥ ३३ ॥ ❀ ❀ इज्यानामिन्द्रादिदेवानामात्ममूर्त्तिरन्तर्यामिरूपः । त आत्ममूर्त्तयो यस्येति वा, त्वयि वर्त्तमाने सति तथा नैव स्यादिति भावः ॥ ३४ ॥ ❀ ❀ उद्यतासिमुखीकृतखड्गम् । जातवेपथुरिति । स्वरक्षणार्थं बहुतरं बुद्धिबलं प्रकाशितं तदपि मम वध एवोपस्थित इति भावः । राज्ञो ह्ययमभिप्रायः । यदिमां मदाज्ञां न पालयति तदा यदभीष्टमस्य वधमधुनैव करिष्यामि । यदि च पालयते तदास्यावधेपि मम कापि क्षतिर्नास्तीति भावः ॥ ३५ ॥ ❀ ❀ हे सार्वभौमेति । सर्वस्या अपि भूमे राजन् । लक्षये साक्षादेवमेव त्वां पश्यामि । तेन सर्वेषां स्थावरजंगमानां युष्मत्प्रजात्वात् सर्वस्या अपि भूमेस्तवाधिकारात् मम वस्तुं स्थानाभावात्सम्प्रति त्वदग्रे वर्त्तमानं त्वत्पादयोः पतितं मां प्रति स्वहस्तेनैव जहीति भावः । "राजा तु प्रणताशेषसमान्तः स्यादधीश्वरः" इत्यमरः ॥ ३६ ॥

श्रीमद्वीरराघवव्याख्या

तत्तस्माद्धेऽधर्मबंधो ! धर्मेण सत्येन च वर्तितव्येऽस्मिन्ब्रह्मावर्ते क्षेत्रे त्वया न वर्तितव्यं "सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तद् ब्रह्मावर्तं" तथा यत्र यज्ञवितानविज्ञाः यज्ञानुशासनकोविदाः यज्ञैर्यज्ञेश्वरं परमपुरुषमाराधयंति तत्र ब्रह्मावर्ते न वर्तितव्यं भवतेत्यर्थः ॥ ३३ ॥ ❀ ❀ किं बहुना यस्मिन् देशे हरिर्भगवानिज्या आराध्या इंद्रादयस्ते मूर्तिः शरीरं यस्य यज्ञैरिज्यमानो वायुरिव स्थावराणां जंगमानां च भूतानामंतर्बहिश्च व्याप्येति शेषः । आत्मांतः प्रविश्य प्रशासनधरणे कुर्वन् यजतामाराधयितॄणामोघान्कामानिष्टार्थांश्च सुखं मोक्षाख्यं च तनोति प्रयच्छति तत्र सर्वत्रापि न भवता वर्तितव्यम् ॥ ३४ ॥ ❀ ❀ इत्थं परीक्षितानुशिष्टः कलिर्जातवेपथुः संजातगात्रकंपः उद्यतः उद्धृतोऽसिः खड्गो येन तं दंडपाणिं यममिवोद्यंतमुदुक्तमिदं वक्ष्यमाणमाह ॥ ३५ ॥ ❀ ❀ तदेवाह यत्रेति द्वाभ्याम् । हे सार्वभौम ! तवाज्ञया यत्र कचित् वत्स्यामि यत्स्थानं भवान्निर्दिशति तत्र कचिद्वत्स्यामि किंतु तत्र त्वामेव गृहीतशरासनमालक्षये ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यस्मिन्निच्छात्ममूर्तिः इच्छातनुः इज्यमानो हरिर्भगवान् यजतां पुंसां शं सुखं तनोति प्रपंचयति अमोघान् कामानपि तनोतीति । किंविशिष्टो हरिः स्थिरजंगमानामंतर्बहिश्च वर्तमानः क इव वायुरिवात्मा व्याप्तः ईशः प्रवर्तकः ॥ ३३ ॥ ❀ ❀ उद्यंतं सन्नद्धं दंडपाणिं यममिव स्थितमुद्यतासिमुद्धृतखड्गम् ॥ ३४ ॥ ❀ ❀ यत्र क वा त्वदुक्तस्थले वत्स्यामीत्यन्वयः, लक्षये पश्यामि ॥ ३५ ॥ ❀ ❀ हे धर्मभृतां श्रेष्ठ ! तत्स्थानं निर्देष्टुमर्हसीत्यन्वयः, आतिष्ठन् वत्स्ये वसामि ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मावर्त्त इत्युपलक्षणं यज्ञियदेशानाम् ॥ ३३-३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धर्म्मेणेत्यनेनैव सिद्धे सत्येन चेति पृथगुक्तिः सत्यस्य धर्म्ममूलत्वव्यञ्जिका । स्कन्धशाखादिकं विना केवलेन मूलेनापि न प्रायः प्रयोजनसिद्धिरित्यतो धर्म्मेणेति चोक्तम् । वर्त्तितव्ये वर्त्तितुं योग्ये ॥ ३३ ॥ ❀ ❀ नन्विन्द्रादयो देवता अपीज्यन्ते न केवलं भगवानेव तत्राह—इज्यानाम् इन्द्रादीनाम् आत्ममूर्त्तिरन्तर्य्यामिरूपः । ते आत्ममूर्त्तयो यस्येति वा । स्थिरजङ्गमानामस्मत्प्रजानां कामानैहिकान् शं पारत्रिकं सुखं च तनोति वायुरिवान्तर्बहिश्च साक्षादनुभूयमानः सन्नित्यर्थः । त्वयि वर्तमाने तु तथा नैव स्यादिति भावः ॥ ३४ ॥ ❀ ❀ उद्यतासिम् उद्यीकृतखड्गम् । जातवेपथुरिति स्वरक्षणार्थं बहुतरं बुद्धिबलं प्रकाशितम् । तदपि मम वध एवोपस्थित इति भावः । राज्ञो ह्ययमभिप्रायः—यदीमां मदाज्ञां न पालयति तदा मदभीष्टमस्य वधमधुनैव करिष्यामि, यदि च पालयति तदास्यावधेऽपि मम कापि क्षतिर्नास्तीति । दण्डपाणिं यमम् ॥ ३५ ॥ ❀ ❀ हे सार्वभौम ! सर्वस्या अपि भूमे राजन् ! लक्षये साक्षादेवमेव त्वां पश्यामि । तेन सर्वेषां स्थावरजंगमानां युष्मत्प्रजात्वात् सर्वस्या अपि भूमेस्तवाधिकारात् मम वस्तुं स्थानाभावात् सम्प्रति त्वदग्रे वर्त्तमानं त्वत्पादयोः पतितं मां स्वहस्तेनैव जहीति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ।

तत्तस्मात् धर्मेण सत्येन च वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्ते ब्रह्मावर्तोपलक्षितेऽस्मत्परिपाल्ये भूतले यत्र यज्ञेश्वरम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे" ति निजवाक्योक्तं श्रीकृष्णं यज्ञवितानस्य यज्ञेश्वरयजनविस्तारस्य विज्ञा अभिज्ञाः यज्ञैर्यजंति आराधयेति तस्मिन त्वया न वर्तितव्यम् ॥ ३३ ॥ ❀ ❀ यस्मिन्ब्रह्मावर्तोपलक्षिते भूमंडले इज्यामूर्तिः इज्यारूपा यागरूपा मूर्तिर्यस्य सः यथा वायुः प्राणरूपेणांतश्चरोऽपि बहिरपि धूयमानोऽस्ति तथा स्थिरजंगमानां स्थावराणां जंगमानां च अंतरात्मा बहिरपि वर्तमान एष हरिः यजतां शं मोक्षाख्यं सुखममोघान्सत्यानीप्सितान्कामांश्च तनोति ॥ ३४ ॥ ❀ ❀

दंडपाणिं धर्मराजमिवोद्यतमुद्युतमुद्यतासिमुद्धृतखड्गमिदं वक्ष्यमाणमाह ।। ३५ ।। ❀ ❀ तदेवाह द्वाभ्याम् । हे सार्वभौम ! सर्वभूमिपते न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये इति या तव सार्वभौमस्याज्ञा तया यत्र क्वचन वत्स्यामि आज्ञाबलात्कांश्चिन्मुख्यान्विहाय स्थानं विना वासासंभवात्सार्वभौमस्य भवत एव यस्मिन्कस्मिन् क्षेत्रेऽगत्या वासं करिष्यामि एवं चाज्ञाछेदकारिणं मां मत्वा प्रवृत्तं त्वाम् आत्तो गृहीत इषुः शरासनं च येन तं लक्षये ।। ३६ ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

उपसंहरति न वर्त्तितव्यमिति । अधर्मबन्धो ! तस्माद्धेतोर्न वर्तितव्यम् । अधिकरणस्य तद्विरोधित्वं प्रकटयति धर्मेणेति । धर्मेण कायिकेन सत्येन वाचिकेन चकारान् मानसिकेन कायवाङ्मनोभिर्धर्मकर्त्तारस्तेषामिह स्थानयोग्ये तत्रापि देशविशेषं निर्दिशति ब्रह्मावर्त्ते इति । तद्धिधर्मक्षेत्रं तत्र यदि निर्दुष्टो धर्म उत्पन्नः तदान्यत्र धर्ममपि नाशयेत्, अतः धर्मक्षेत्रे त्वया न स्थातव्यं न च कदाचिदपि तत्र धर्मशून्यता देवानामपि देवयजनत्वे निरन्तरयज्ञसम्भवात् तदाह यत्र यजंति यज्ञैरिति । तत्रापि मुख्यधर्मप्रकारेण यजंतीत्याह यज्ञेश्वरमिति "यज्ञेन यज्ञमयजन्त देवा" इति श्रुतिरनुसन्धेया । नन्वहमपि एकदेशे स्थास्यामीति चेत्तत्राह यज्ञवितानविज्ञा इति । यज्ञवितानो यज्ञविस्तारः तुष्टयादयः तत्र विशेषज्ञाः अनेन त्वयि प्रविष्टे तदानीमेव ज्ञास्यंति ततो न करिष्यंतीति सूचितम् ।। ३३ ।। ❀ ❀ ननु किं यज्ञैः ऐहिके सिद्धिस्त्वयैव कर्तव्या परलोकस्तु विचारणीयस्तत्राह यस्मिन्निति । यस्मिन् देवयजने हरिरित्यनुमान उद्देश्यो यज्ञपुरुषो विष्णुरेव साक्षाद्भगवान् । ननु देवा एव इन्द्रवाय्वादयः तत्र इज्यन्ते तत्राह इज्यात्ममूर्तिरिति इज्यानामात्मा मूर्तिश्च ततः किमत आह भजतां शं तनोति भक्तिमार्गानुसारि अस्ति देवकं ज्ञायते तत्र नादृष्टद्वारा फलं किंतु प्रीता देवताः फलं प्रयच्छन्तीत्यस्योद्देश्यत्वाभावाच्च भगवतश्च तथात्वात् अतः प्रीतिरेव द्वारं भौतिकेषु भूतसंस्कारद्वारा सर्वत्र वा भगवान् फलदाता "फलमत उपपत्तेः" (३ । २ ३७) इति तदाह-भजतां शं तनोतीति धर्मपक्षे विस्तारभावः अमोघाश्च न कामाः स्थिरजङ्गमानां चेत् फलसम्बन्धः । अतो यथा वेदं यज्ञकरणमत्रैव फलं च किंच यज्ञैः संतुष्टो भगवान् ज्ञानमपि प्रयच्छति अन्तर्बहिश्च प्रकाशो भवतीत्याह अन्तर्बहिरिति । एकस्यां भयत्वं सदृष्टांतमाह वायुरिवेति । ननु दृष्टांतेनैव भगवता तथास्तु सर्वत्वात् अत इत्याह प्राणवायुशब्द एवेति यथापदार्थस्य तथा भगवानन्तर्बहिः पदार्थत्वेन भवतीत्याह व्यवह्रियमाणोऽप्येक एवेत्यर्थः । ननु दृष्टान्तेनैव भगवान् तथास्तु सर्वत्वादत आह एष आत्मेति । न प्राणमात्रमस्य किन्त्वयमात्मा एष इति भक्त्या स्फुरन्तं भगवन्तं निर्दिशति ।। ३४ ।। ❀ ❀ एवं प्राप्ते जीवने विशेषं प्रार्थयितुं पुनर्यत्र भावनां कृत्वा वञ्चयितुमारभत इत्याह परीक्षितैवमिति । आदिष्ट आज्ञप्तः जातवेपथुः प्रतिज्ञां सत्यां करिष्यतीति दण्डपाणिमिवेति विलम्बस्तूष्णींभावो वा इत्याशंक्याह उद्यतमिति । कृतपूर्वापराधस्य अवश्यदण्डकर्तृत्वं ज्ञापयति दण्डपाणिमिवेति। सकृदपराधः सोढव्यः ततः परं मारयिष्यतीत्याह-उद्यतमिति। विज्ञापनामाह यत्रेति। हे सार्वसौम ! सर्वा भूमिस्तवैव अहमपि त्वदीयः अतो मदधिष्ठितः भूमेरेवेश्वर इति ज्ञापितम् ।। ३५ ।। ❀ ❀ पूर्वमस्माकं स्वातन्त्र्यं स्थितमधुना तवैवाज्ञा कर्त्तव्येत्याह अथेति भिन्नप्रक्रमे । त्वदाज्ञया यत्र क्वचन वत्स्यामि मम स्थितौ नास्ति संदेहः, परं त्वया रोषो न विधातव्यः, जीवता च क्वचित् स्थातव्यं जीवनं त्वयैव दत्तम् अतः स्पष्टतया त्वदाज्ञाव्यतिरेकेऽपि जीवनरक्षणात् देवज्ञामतत्कार्यदर्शनाच्च क्रोधं च करिष्यतीत्याह लक्षय इति ।। ३६ ।।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

यस्मिन्नित्यत्र । धर्मपक्षे विस्ताराभाव इति । धर्मादेव फलमदृष्टद्वारेति पक्षे शं तनोत्यनेनोक्तो यः सुखविस्तारस्तदभावः । फलस्य तददृष्टनियतत्वादित्यर्थः । तथास्त्विति एकोस्त्वित्यर्थः ।। ३३ ।।

श्रीगिरिधरकृता बालप्रबोधिनी

उपसंहरति-नेति । हे अधर्मबन्धो तत्तस्मादधर्मबन्धुत्वात् यत्र यज्ञवितानविज्ञा यज्ञानुष्ठानकोविदा यज्ञैर्यज्ञेश्वरं भगवन्तं यजन्ति तत्र धर्मेण कायिकेन सत्येन वाचनिकेन-चकाराद्ध्यानेन मानसिकेन च वर्तितव्ये मदीये देशे ब्रह्मावर्ते त्वया न वर्तितव्यमित्यन्वयः ।। ३३ ।। ❀ ❀ यस्मिंश्च ब्रह्मावर्ते सरस्वतीदृषद्वत्योर्देवनद्योर्मध्यदेशे भगवान् हरिर्विष्णुरिज्यमानः यज्ञैः सम्पूज्यमानो यजतां निष्कामानां शमात्मसुखं मोक्षं सकामानां तु अमोघान् उत्तमान् कामान् विषयांश्च तनोति प्रयच्छति तत्र न वर्तितव्यमित्यनुषङ्गेणान्वयः । ननु यज्ञैस्त्विन्द्रादयो देवा एवेज्यन्ते, न तु हरिरित्याशङ्क्याह-इज्येति । इज्याः पूज्या इन्द्रादयो देवा आत्मनः स्वस्य मूर्तयो यस्य स इत्यर्थः । इन्द्रादिरूपेण स एवेज्यते इति भावः । ननु भगवतो विष्णोर्वैकुण्ठे निवासः श्रूयते सोऽत्रत्यं फलं कथं प्रयच्छेदित्याशङ्क्याह-एष स्थिरजङ्गमानां अन्तर्बहिश्च व्याप्य वायुरिव स्थितो यतः सर्वात्मेति ।। ३४ ।। ❀ ❀ एवं परीक्षिता आदिष्ट आज्ञप्तः स कलिस्तमिदं वक्ष्यमाणं सविनयं वच आहेत्यन्वयः । तत्र हेतुमाह-जातवेपथुरिति, भयेन सञ्जातकम्प इत्यर्थः । तत्र हेतुमाह-स्ववधार्थमुद्यत उद्धृतोऽसिर्येन तम् , तत्प्रभावातिशयं सूचयन् दृष्टान्तमाह-दण्डपाणिं यममिवोद्यतमिति ।। ३५ ।। ❀ ❀ तद्वचनमेव दर्शयति-यत्रेति द्वयेन । हे सार्वभौम ब्रह्मावर्ते न वर्तितव्यमिति तवाज्ञया तं देशं

विहाय यत्र क्वचनापि वत्स्यामि परन्तु तव राज्यस्य सर्वत्र विद्यमानत्वात् तत्र तत्रापि मद्वधार्थमात्तो गृहीत इषुर्बाणः शरासनं धनुश्च येन तथाभूतं त्वां लक्षये बुद्ध्या पश्यामि ॥ ३६ ॥

हिन्दी अनुवाद

अतः अधर्मके साथी ! इस ब्रह्मावर्तमें तू एक क्षणके लिये भी न ठहरना; क्योंकि यह धर्म और सत्यका निवासस्थान है। इस क्षेत्रमें यज्ञविधिके जाननेवाले महात्मा यज्ञोंके द्वारा यज्ञपुरुष भगवान्‌की आराधना करते रहते हैं ॥ ३३ ॥ ❀ ❀ इस देशमें भगवान् श्रीहरि यज्ञोंके रूपमें निवास करते हैं, यज्ञोंके द्वारा उनकी पूजा होती है और वे यज्ञ करनेवालोंका कल्याण करते हैं। वे सर्वात्मा भगवान् वायुकी भाँति समस्त चराचर जीवोंके भीतर और बाहर एकरस स्थित रहते हुए उनकी कामनाओंको पूर्ण करते रहते हैं ॥ ३४ ॥ ❀ ❀ सूतजी कहते हैं—परीक्षित्‌की यह आज्ञा सुनकर कलियुग सिहर उठा। यमराजके समान मारनेके लिये उद्यत हाथमें तलवार लिये हुए परीक्षित्‌से वह बोला ॥ ३५ ॥ ❀ ❀ कलिने कहा—सार्वभौम ! आपकी आज्ञासे जहाँ कहीं भी मैं रहनेका विचार करता हूँ, वहीं देखता हूँ कि आप धनुषपर बाण चढ़ाये खड़े हैं ॥ ३६ ॥

तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि । यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥ ३७ ॥

सूत उवाच

अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ । द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥ ३८ ॥

पुनश्च याचमानाय जातरूपमदात्प्रभुः । ततोऽनृतं मदं[1] कामं रजो वैरं च पञ्चमम् ॥ ३९ ॥

अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः । औत्तरेयेण दत्तानि न्यवसत् तन्निदेशकृत् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्तस्मात् । नियतो निश्चलः । वत्स्ये वत्स्यामि ॥ ३७ ॥ ❀ ❀ पानं मद्यादेः । सूनाः प्राणिवधाः । द्यूतेऽनृतम् । पाने मदः । पूर्वं मदो दयानाशकत्वेनोक्तोऽत्र तु गर्वद्वारा तपोनाशकत्वेन । स्त्रीषु संगः । हिंसायां क्रौर्यं दयानाशकमिति ज्ञेयम् । यद्यपि सर्वं सर्वत्र संभवति तथापि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयम् । द्वादशस्कन्धे तु "सत्यं दया तपो दानमिति पादा विभोर्नृप" इत्यत्र दानशब्देन शौचमेवोक्तम् । मनःशुद्धिरूपत्वाद् भूताभयदानस्य । "त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः । अधर्मपादैरनृतहिंसासन्तोषविग्रहैः" इत्यत्र चासन्तोषशब्देन तस्य हेतुर्गर्वो लक्ष्यते, विग्रहशब्देन च तद्धेतुः स्त्रीसंग इत्यविरोधः ॥ ३८ ॥ ❀ ❀ चतुर्विधस्याप्येकत्रैवावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् । ततः सुवर्णदानादनृतं मदम् । काममिति स्त्रीषु संगम् । रज इति रजोमूलां हिंसाम् । एतानि चत्वारि पंचमं वैरं चादादिति ॥ ३९ ॥ ❀ ❀ औत्तरेयेण परीक्षिता अमून्यमीषु न्यवसदित्यर्थः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्त्वं सार्वभौमः शरणागतं न हंसि तर्हि धर्मभृतां श्रेष्ठोसीति भावः । तथापि त्वदाज्ञया नियतस्थानमेव वत्स्यामीत्याह–स्थानं मे इति ॥ ३७ ॥ ❀ ❀ स्त्रियश्च विवाहितेतराः । प्राणिहिंसायां तु चतुर्विध एवाधर्मः । न हि प्राणिहन्तृषु तपः शौचं दया सत्यवचनं च सन्तीत्यर्थः । परमार्थस्तु सर्वथा त्याग एवेति ॥ ३८ ॥ ❀ ❀ भो राजन्नेतद्वृत्तान्तं श्रुत्वा न कोपि द्यूतादिकमनुशीलयिष्यति । किञ्च प्रथमं मनसि मत्प्रवेशस्ततो लोकः प्रायो द्यूतादिकं भजते इति । ततश्च भवता दत्तमपि स्थानचतुष्कमदत्तमेवाभूत्तस्मात्किमपि स्थानमहं प्राप्नुयां यल्लोकैर्दुस्त्यजं स्यादिति याचमानाय कलये जातरूपं स्वर्णोपलक्षितं रजतादिकं द्रव्यमात्रमेव तद्वासत्वेनादात् । तत एव हेतोर्धनं वसु अनृतं मिथ्या । मदः पानादिजा मत्तता । कामः स्त्रीसंगः । रजो गर्व इति चतुर्विधोऽधर्मः तथा पञ्चमं वैरञ्च स्यात् । मदकामयोः क्लीबत्वमार्षम् । ततः स्थानपञ्चकप्राप्तेरनंतरम् । इत्यर्थ इति "कालभावाध्वदेशानाम्" इत्यादिकारिकाबलादत्र कर्मत्वमिति भावः ॥ ३९–४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

पूर्वमिति अस्याध्यायस्य पंचविंशश्लोके इति शेषः । सत्यमिति द्वादशस्कन्धीयतृतीयाध्यायस्याष्टादशश्लोकः । त्रेतायामिति द्वादशस्कन्धीयतृतीयाध्यायस्य विंशश्लोकः ॥ ३८ ॥ ❀ ❀ सुवर्णदानादिति । सुवर्णदानादेव तन्मूलकानृतमदादिपञ्चानां दानं सिद्धमिति भावः ॥ ३९–४० ॥

---

१. प्रा० पा०—मदः कामो ।

श्रीमद्वीरराघवव्याख्या

अतस्त्वामेवंविधं न यत्र लक्षये हे धर्मभृतां श्रेष्ठ ! तवानुशासनमाज्ञामातिष्ठन्न तु पालयन्नियमेन वत्स्ये तत्स्थानं निर्देष्टुं त्वमर्हसि ॥ ३७ ॥ ❀ ❀ इत्थमभ्यर्थितो राजा ततस्तस्मै कलये वासस्थानानि ददौ तान्येवाह द्यूतमिति । येषु स्थानेषु द्यूतादिरूपश्चतुर्विधोऽधर्मस्तानि ददौ इत्यर्थः । तत्र द्यूतमक्षैर्देवनं पानं मद्यपानं स्त्रियः स्त्रीणां संगः सूना भूतहिंसा ॥ ३८ ॥ ❀ ❀ पुनश्च याचमानाय कलये प्रभुः परीक्षिज्जातरूपं सुवर्णं स्थानमदात्ततः पुनरपि स्थानांतराणि याचमानायानृतादीनि पंच येषु तानि स्थानानि ददौ ॥ ३९ ॥ ❀ ❀ रजः क्रोधः प्रभवत्यस्मादिति प्रभवः अधर्मप्रभवः कलिरौत्तरेयेण परीक्षिता दत्तान्यमूनि पंचस्थानान्यनृतादीनि पूर्वोक्तानि द्यूतादीनि च तस्यौत्तरेयस्याज्ञानुवर्ती स कलिर्न्यवसत् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कानि तानि स्थानानीति तत्राह द्यूतमिति । द्यूतं देवनं पीयत इति पानं मद्यं सूना प्राणिहिंसनं यत्र येषु स्थानेषु चतुर्विधोऽधर्मः पापं स्यादिति शेषः ॥ ३७ ॥ ❀ ❀ जातरूपं सुवर्णं तत्फलमाह तत इति । ततो द्यूतादिभ्योऽनृतादीनि पापसाधनानि भवंतीति शेषः ॥ ३८ ॥ ❀ ❀ तस्य राज्ञो निदेशकृदाज्ञाकृत् अधर्मप्रभवः अधर्मोत्पादकः अमूनि द्यूतादीनि पंच स्थानानि ॥ ३९ ॥ ❀ ❀ बुभूषुः पुरुषार्थकामः लोकपतिर्लोकपालः गुरुरुपदेष्टा धर्मस्येति शेषः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पानं सौत्रामण्यादिविहितव्यतिरिक्तम् । स्त्रियः कामस्त्रियः न तु धर्म्मपत्न्यः । सूनाश्च धर्म्मव्यतिरिक्ताः । अत्र टीकायां पानेन मदगर्वौ गृहीतौ । मदे गर्वोऽपि दृश्यत इति एतदेवाह—गर्वद्वारेति । ततः पूर्व्ववदेव दयातपसोर्नाशकत्वेन तौ विवक्षितौ । द्यूतेनानृतं गृहीतं तच्च पूर्व्ववदेव सत्यनाशकम् । स्त्रीभिः सङ्गो विवक्षितः स च पूर्व्ववदेव शौचनाशकः । यत्तु सूनाभिः क्रौर्य्यं पूर्वतोऽधिकं गृह्यते तदपि भवतु दयानाशकमिति न पूर्वेण विरोध इत्यर्थः । एतदेवाह क्रौर्य्यं चेति । द्वादशस्कन्धवाक्यं तु मतान्तरं वा ज्ञेयम् ॥ ३८ ॥ ❀ ❀ जातरूपं सुवर्णादिकम् , पूर्ववद्धर्म्मार्थं विना । तत्र पूर्व्वोक्तचतुर्णां स्थानरूपेणादात् । विशेषतः पंचमस्य वैरस्य चेति । तदेवाह ततस्तद्दानहेतोरनृतादिपंचाप्यदादिति स्थाननिर्णयेन स्थानिनः प्राप्तेर्दुष्करता हि स्यादिति भावः ॥ ३९ ॥ ❀ ❀ ततश्च तत्क्षणादेव तत्र तत्र गतः कलिस्तान्यधिष्ठितवानित्याह अमूनीति । 'कालाध्वभावदेशानामि'त्यादिकारिकाबलेन कर्म्मत्वम् ॥ ४०–४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शरणागतं त्वामहं न हन्मीति चेत् तदा हे धर्मपालकानां श्रेष्ठ ! ॥ ३७ ॥ ❀ ❀ द्यूतं स्पष्टम् । पानं मद्यादेः । स्त्रियोऽविवाहिताः । सूनाः प्राणिवधाः । यत्र चतुर्विधोऽधर्म इति । द्यूतेऽनृतं सत्यनाशकं पाने मदो दयानाशकः स्त्रीषु सङ्गः शौचनाशकः प्राणिहिंसायान्तु समुदित एव चतुर्विधोऽधर्मः । न हि प्राणिहन्तृषु तपः शुचित्वं दया वा । सत्यवचनं तु तेषु नास्त्येवेति ॥ ३८ ॥ ❀ ❀ भो राजन्न तद् वृत्तान्तं श्रुत्वा द्यूतादिकं कोऽपि नानुशीलयिष्यति । किंच प्रथमं मनसि मत्प्रवेशस्तत एव लोकाः प्रायो द्यूतादिकं भजन्ते इति । तत्र भवता दीयमानमपि स्थानचतुष्टयमदत्तमेवाभूत् । तस्मादेवं किमपि स्थानमहं प्राप्नुयां यल्लोकैर्दुस्त्यजं स्यादिति याचमानाय कलये जातरूपं स्वर्णोपलक्षितं रजतादिकं द्रव्यमात्रमेव तद्वासस्थानत्वेन अदात् । तत एव हेतोर्धनवत्सु अनृतं मिथ्या मदः पानादिजनिता मत्तता कामः स्त्रीसङ्गः, रजो गर्व इति चतुर्विधोऽधर्मः तथा पंचमं वैरं च स्यात् । मदकामयोः क्लीबत्वमार्षम् ॥३९॥ ❀ ❀ अमूनि अमीष्वित्यर्थः । यद्वा 'कालभावाध्वदेशानामि'ति कारिकाबलात् कर्मत्वम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तस्माद्धर्मभृतां मध्ये श्रेष्ठ ! शरणागतपालक ! यत्र नियतो निश्चलस्तवानुशासनमनुतिष्ठन्पालयन् वत्स्यामि तत् स्थानं त्वं निर्देष्टुमर्हसि ॥ ३७ ॥ ❀ ❀ यत्र येषु चतुर्विधोऽधर्मस्तानि द्यूतादीनि स्थानानि ददौ । तत्र द्यूतेऽक्षादिभिर्देवने सत्यनाशकमनृतम् मद्यादिपाने तपोनाशको विस्मयः स्त्रीषु शौचनाशकः संगः सूनायां प्राणिपीडने दयानाशको मदः ॥ ३८ ॥ ❀ ❀ चतुर्विधस्याधर्मस्यैकत्र वासं याचमानाय जातरूपं सुवर्णमदात्दत्तवान् प्रभुः स्थानपंचकदाने समर्थः ततस्तस्मिन् जातरूपे दानद्वारैव अनृतं मदं कामशब्दवाच्यं संगं रजश्शब्देन विस्मयमेव चतुर्विधाधर्ममूलं वैरं च स्थापयामासेति शेषः ॥ ३९ ॥ ❀ ❀ औत्तरेयेण उत्तरापुत्रेण दत्तानि अमूनि द्यूतादिजातरूपांतानि पंच स्थानानि अधर्मप्रभवः अधर्मस्य प्रभवो यस्मिन्स तस्यौत्तरेयस्य युगचक्रस्येति वा निदेशकृत्कलिर्न्यवसत् "कालचक्रं जगच्चक्रं युगचक्रं च केशवः । अनादिनिधनो देवः परिवर्तयतेऽनिशमि" ति स्मृतेश्च ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

यत्रैव स्थास्यामि तत्रैव त्वामात्तशरासनं पश्यामि अतो यत्र स्थितः त्वामात्तशरासनं न द्रक्ष्यामि तत् स्थानं देहीत्याह तन्म इति। चातुर्येण प्रार्थितं त्वां द्रक्ष्यामि शरासनरहितम् अतो मद्दर्शनमात्रेणैव शासनं त्यक्तव्यमिति भावः। धर्मभृतां श्रेष्ठेति याचितदानं च सूचितं, यद्यप्यहं तत्र स्थास्यामि परं त्वया निर्देष्टव्यं त्वदाज्ञया चेतःस्थितिः स्यात् त्वदाज्ञा च परिपालिता स्यात्। अत्रापि वंचनं "शास्त्रफलं प्रयोक्तरि" (१।२।३) इति न्यायेन तत्पापं तवैव भविष्यतीति भावः। नियत इति वचनात् धर्मार्थेष्वपि द्यूतादिषु मम वास इति ज्ञापितम् ॥ ३७ ॥ ❀ ❀ तत्तथैव कृतवानित्याह तथेति। अस्यावश्यं स्थानं देयमिति द्यूतमक्षक्रीडा अनाधान-विषयं पानं मदिरायाः स्त्रियः साधारण्यः बहुवचनात् सूना हिंसा एतेषु यत्राधर्मो भवति तदस्य स्थानं न तु स्वभावतः शास्त्रतो वा यत्रैतानि भवंति तानि कलिस्थानानि भवंति। किंच चतुर्विधोऽधर्मः "ब्रह्महत्या सुरापानं स्तेयो गुर्वंगनागमः" स्तेयं द्यूते प्रविष्टम्। अतो महापातकस्थानभूतमेतत् चतुष्टयं कलेः स्थानमित्यर्थः। कलिना सर्व एव गृहीताः, य एतानि करोति यत्रेतिपदात् अधर्मस्यापदे-श्यत्वमेव ॥ ३८ ॥ ❀ ❀ ननु मम पंच स्थानानि श्रुतिबोधितानि अत एकमधिकं देयमित्याकांक्षायामाह-एकवारं स्थानचतुष्टयं दत्तं पुनर्याचमानाय जातरूपं सुवर्णमदात्। स्तेये सामान्यत्वेन सुवर्णमागतम्, अधुना सुवर्णस्तेयत्वेन स्वरूपेण स्वर्णं कलिस्थानं, नन्वयं महाननर्थः कथं सुवर्णं तस्मै दत्तवानिति तत्राह विभुरिति। चकारात् स्वतंत्रतयार्पितानि स्थानानि याचितानि एषां स्थानानां पुनः प्राप्तानां न स्वरूपेण स्थानत्वं किंतु कार्यत इति तानि कार्याणि क्रमेण गणयति तत इति। यस्मात् अधर्म इति वर्त्तते अतः अनृतरूपं द्यूतं मदरूपं पानं कामरूपाः स्त्रियः रजः क्रोधः तद्रूपा सूना सुवर्णं वैररूपं चकारादुभयविधं गृहीतं तत् पंचमं सुवर्णेऽपि वैरं हिंसायां च वैरमिति ॥ ३९ ॥ ❀ ❀ अमूनि पंच स्थानानि अधर्मप्रभवः अधर्मोत्पादक औत्तरेयेण उत्तरायाः पुत्रेण अविवेकः सूचितः, तेषु न्यवसदित्यर्थः। तन्निदेशकृत् परीक्षिदाज्ञाकर्त्ता ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

पुनश्चेत्यत्र। पुनः प्राप्तानामिति। स्वातन्त्र्येण प्राप्तानाम् ॥ ३८ ॥ ❀ ❀ अथेत्यत्र। पदार्थाग्रहेणेति पदार्थस्वरूपस्या-विचारेणापाततः पदार्थाप्रतीत्येत्यर्थः। यत्रेति स्त्रीसेवनादौ। न विधिर्न प्रतिषेध इति। लोके 'व्यवायामिषमद्यसेवे' ति वाक्या-त्तदाकांक्षानिवृत्तये नियम इत्यर्थः ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्तस्मात् हे धर्मभृतां श्रेष्ठ ते तवानुशासनमातिष्ठन् पालयन् यत्रैव नियतो निश्चलो निर्भयो वत्स्ये तत्स्थानं मे निर्देष्टुं नामग्रहणेन कथयितुं त्वमर्हसीत्यन्वयः। याचितदानं दत्तपरिपालनं च तवावश्यकमिति सम्बोधनेन सूचितम् ॥ ३७ ॥ ❀ ❀ एवमभ्यर्थितः सम्प्रार्थितो राजा तदा तस्मै कलये वासस्थानानि ददौ। तान्येव दर्शयति-द्यूतमिति। द्यूतं प्रसिद्धमक्षैर्देवनं, तत्रानृतं सत्यनाशकम्। पानं मद्यादेः, तच्च विस्मयजनकतया तपोनाशकम्। स्त्रियः स्त्रीषु सङ्गः शौचविनाशकः। सूना हिंसा, क्रौर्यं दयानाशकम्। इत्येवं चतुर्विधोऽधर्मो यत्र भवति तानि स्थानानि ददाविति सम्बन्धः। यद्यपि सर्वं सर्वत्र सम्भवति तथाप्य-नृतादीनां द्यूतादिष्वेव प्रधानत्वसम्भवाद्विशेषतस्तत्तदेवोक्तम्। द्वादशस्कन्धे तु 'सत्यं दया तपो दानमिति पादा विभोर्नृप।' इत्यत्र दानशब्देन शौचमेवोक्तम्, भूताभयप्रदानस्य मनःशुद्धिरूपत्वात्। 'त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः। अधर्मपादैरनृत-हिंसासन्तोषविग्रहैः' इत्यत्र त्वसन्तोषशब्देन तद्धेतुर्गर्वो लक्ष्यते। विग्रहशब्देन तद्धेतुः स्त्रीसङ्गः सुवर्णं वा लक्ष्यते इति न विरोधः कश्चित् ॥ ३८ ॥ ❀ ❀ चतुर्विधस्याप्येकत्रैवावस्थानं देहीति पुनर्याचमानाय कलये जातरूपं सुवर्णमदात् दत्तवान्, प्रभुः सर्वदानसमर्थः परीक्षित्। ननु कुतः सुवर्णदानादेकत्र चतुर्विधस्थानप्राप्तिरित्यपेक्षायामाह-तत इति। ततः सुवर्णदानात् पूर्वोक्ता-नृतादीनि चत्वारि पञ्चमं वैरं चादादित्यन्वयः। अनृतादीनां पञ्चानामपि सुवर्णमूलकत्वादिति भावः। कामं स्त्रीसङ्गम्। रजः रजोमूलां हिंसाम् ॥ ३९ ॥ ❀ ❀ अधर्मः प्रभवत्यस्मादिति तथाभूतः कलिस्तस्य परीक्षितो निदेशकृत् आज्ञानुवर्त्ती सन् औत्तरेयेण परीक्षिता दत्तानि अमूनि पूर्वोक्तानि पञ्च स्थानानि नितरामवसदित्यन्वयः। अत्र सन्देहो नास्तीति सूचयितुमाह-हीति ॥ ४० ॥

हिन्दी अनुवाद

धार्मिकशिरोमणे! आप मुझे वह स्थान बतलाइये, जहाँ मैं आपकी आज्ञाका पालन करता हुआ स्थिर होकर रह सकूँ ॥ ३७ ॥ ❀ ❀ सूतजी कहते हैं-कलियुगकी प्रार्थना स्वीकार करके राजा परीक्षित्‌ने उसे चार स्थान दिये-द्यूत, मद्यपान, स्त्री-सङ्ग और हिंसा। इन स्थानोंमें क्रमशः असत्य, मद, आसक्ति और निर्दयता-ये चार प्रकारके अधर्म निवास करते हैं ॥ ३८ ॥ ❀ ❀ उसने और भी स्थान माँगे। तब समर्थ परीक्षित्‌ने उसे रहनेके लिये एक और स्थान-'सुवर्ण'

(धन)—दिया। इस प्रकार कलियुगके पाँच स्थान हो गये—झूठ, मद, काम, वैर और रजोगुण ॥ ३९ ॥ ❀ ❀ परीक्षित्के दिये हुए इन्हीं पाँच स्थानोंमें अधर्मका मूल कारण कलि उनकी आज्ञाओंका पालन करता हुआ निवास करने लगा ॥ ४० ॥

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् । विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥ ४१ ॥
वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति । प्रतिसंदध आश्वास्य[1] महीं च समवर्धयत् ॥ ४२ ॥
स एष एतर्ह्यध्यास्त[2] आसनं पार्थिवोचितम् । पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥ ४३ ॥
आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसन् । गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥ ४४ ॥
इत्थम्भूतानुभावोऽयमभिमन्युसुतो नृपः । यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे[3] कलिनिग्रहो नाम सप्तदशोऽध्यायः ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ इति हेतोः। बुभूषुरुद्भवितुमिच्छुः। स्त्रीसुवर्णयोरसेवनं नाम तयोरनासक्तिः ॥ ४१ ॥ ❀ ❀ एवं कलिं निगृह्य वृषस्य पादान्प्रतिसन्दधे तपआदीनि प्रवर्तितवानित्यर्थः ॥ ४२ ॥ ❀ ❀ युष्मदीयसत्रप्रवृत्तिरपि तत्प्रभावादेवेत्याह त्रिभिः। एतर्हीदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छतोपन्यस्तं समर्पितमासनमध्यास्ते। अधुना आस्ते पालयत इति वर्तमानसामीप्ये वर्तमानवन्निर्देशः स्मेत्यध्याहारो वा ॥ ४३-४४ ॥ ❀ ❀ सत्राय सत्रं कर्तुं दीक्षिता दीक्षां कृतवन्तः ॥ ४५ ॥

इति प्रथमस्कन्धे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गुरुः स्ववृत्तेन प्रजाशिक्षयिता धर्मोपदेष्टेत्यर्थः ॥ ४१ ॥ ❀ ❀ राजा तु तस्मिन्वंचनामेव कृतवान् यतो गते तस्मिंस्तत्स्थानाभावमारचितवान्। जातरूपञ्च धर्मार्थं प्रयोजितवानित्यभिप्रेत्याह-वृषस्येति। पादस्य त्रिभिस्त्रिभिरंशैस्त्रीन्प्रति संदधे श्रीकृष्णभक्तिबलेनेति शेषः। साक्षात्तन्मूर्त्तेः संधानेन सर्वत्रापि प्रतिसंहितवान् तपआदि प्रवर्त्तितवानिति भावः। सत्यं तत्प्रभावेण न तादृशं नष्टमिति तथोक्तम् ॥ ४२ ॥ ❀ ❀ अध्यास्त इति। अधिपूर्वाणां शीङ्स्थासामिति कर्मत्वम्। प्रभावेण वा स एष इति बुद्धिसन्निहितत्वात् ॥ ४३-४४ ॥ ❀ ❀ सत्रमिदं बलदेवदृष्टादन्यज्ज्ञेयम् ॥ ४५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

गुरुः धर्म्मोपदेष्टा इति विजयध्वजः। उद्भवितुमिच्छुः अत्यर्थं सद्भावं प्राप्तुमिच्छुरित्यर्थः ॥ ४१-४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीराधारमणदासगोस्वामिविरचित-
दीपन्याख्यदीपिकाटिप्पण्यां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवव्याख्या

यतो द्यूतादीनि कलेरावासस्थानान्यथातः बुभूषुर्भवितुमिच्छुरात्मसत्तां लब्धुमिच्छुः पुमानेतानि द्यूतादीनि न सेवेत। बुभूषुरित्यनेनैतानि सेवमानोऽततः स्थावरतां प्राप्नुवन्नसत्प्रायो भवेदिति सूचितम्। राजा तु विशेषत एतानि न सेवेत, कुतः यतोऽयं धर्मशीलः धर्म एव शीलं वृत्तं यस्य सः तच्च कुतः लोकपतिर्लोकानां पतिः पालयिता, अन्यथा राजानमवलोक्य प्रजा अपि तथा कुर्वन्त्यो नश्येयुरिति भावः। एतच्च राज्ञोऽनुचितमित्यभिप्रायेण विशिनष्टि गुरुर्हितोपदेष्टा ॥ ४१ ॥ ❀ ❀ ततो वृषस्य वृषरूपधर्मस्य नष्टान् तपआदिरूपांस्त्रीन्पादान् प्रतिसंदधे संयोजयामास परीक्षिदिति शेषः। तथा महीं चाश्वास्य सांत्वयित्वा सम्यग्वर्द्धयत्पुपोष ॥ ४२ ॥ ❀ ❀ स इति। स उक्तविधप्रभाव एष परीक्षिदेतर्ह्यधुना अनतिकाले विप्रकृष्टकाले विविक्षता प्रवेष्टुमिच्छता पितामहेन राज्ञा युधिष्ठिरेण उपन्यस्तं प्रदत्तं पार्थिवस्य सार्वभौमस्यौचित्यं सिंहासनमध्यास्ते, वर्तमानवद्वेति भूते लट् ॥ ४३ ॥ ❀ ❀ कौरवश्रेष्ठः श्रिया सार्वभौमश्रियोल्लसन् प्रकाशमानो विपुलकीर्तिश्चक्रवर्ती चक्रं भूमंडलं वर्तयति पालयतीति तथाभूत

१. प्रा० पा०—आस्थाय। २. प्रा० पा०—एतदध्यास्त। ३. प्रा० पा०—'पारीक्षिते पर्वणि' एतदधिकम्।

राजर्षिर्महाराजः परीक्षिद्गजाह्वये पुरेऽधुना वर्तमानसन्निकृष्टे भूतकाले आस्ते आस्त ॥ ४४ ॥ ❀ ❀ न केवलमुक्त एव तस्य प्रभावः, किंत्वित्थंभूता अन्ये च प्रभावा यस्य तथाभूतोऽयमभिमन्योः सुतो नृपः परीक्षित् अत एवाधुना तस्याभावेऽपि तद्भयात्कलेरत्र देशे प्रवेशाभावादेव भवतामिदं सत्रं प्रवर्तत इत्याह यस्येति । यस्य परीक्षितः, क्षोणीं पालयतः अत्रापि वर्तमानसामीप्ये भूते लटः शत्रादेशः, पालितवतः सत अपनीतेपि घनसारे तत्पेटिकायां तद्वासनानुवृत्तिवत्तदा चक्रानुवृत्तेरेव हेतोर्यूयं सत्राय कृतसंकल्पा वर्तध्वे, अन्यथा कलिनाभिभूतं सत्रमिदं न प्रवर्ततेत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तदशोऽध्यायः ॥१७॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वृषस्य धर्मस्य ॥ ४२ ॥ ❀ ❀ एतर्हि तदानीं पार्थिवानां राज्ञामुचितमासनं सिंहासनमध्यास्त इति लट् लुङर्थः । अरं प्राप्तं रक्षतीत्यरण्यं वनं विविक्षता प्रवेष्टुकामेन पितामहेन पितुः पित्रा युधिष्ठिरेण उपन्यस्तं दत्तमासनमध्यास्त इति 'अधिशीङ्स्थासां कर्मे'ति सप्तम्यर्थे द्वितीया, बृहच्छ्रवाः महाकीर्तिः ॥ ४३-४४ ॥ ❀ ❀ यस्य क्षोणीं पालयतः सतः यूयं सत्राय यज्ञविशेषाय दीक्षिताः सोऽयमभिमन्युसुतो नृप इत्थंभूतानुभावः कल्यादिबंधनलक्षणसामर्थ्योपेत इत्यन्वयः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

राजा तु तस्मिन् वञ्चनामेव कृतवान् यतो गते तस्मिन् तत्तत्स्थानाभावमाचरितवान् । जातरूपं च धर्म्मार्थं प्रयोजितवानित्यभिप्रेत्याह वृषस्येति । पादस्य त्रिभिरंशैस्त्रीन् प्रतिसन्दधे भगवद्भक्तिबलेनेति शेषः । साक्षात्तन्मूर्त्तेः सन्धानेन सर्व्वत्रापि प्रतिसंहितवानिति भावः । सत्यं तत्प्रभावेन न तादृशं तदा नष्टमिति तथोक्तम् । दयेति वक्तव्ये दयामित्यार्षम् ॥ ४२ ॥ ❀ ❀ अध्यास्त इति प्रभावरूपेणेति ज्ञेयम् । एवमुत्तरत्रापि ॥ ४३-४४ ॥ ❀ ❀ यस्य पालयतः इत्यत्र सत्रं श्रीबलदेवदृष्टादन्यज्ज्ञेयम् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्त्रियं परकीयामेव न सेवेत । बुभूषुः स्वक्षेममिच्छुः । सुवर्णस्यासेवनं नाम तत्रानासक्तिरित्येके ॥ ४१ ॥ ❀ ❀ एवं कलिं निगृह्य वृषस्य पादान् प्रतिसन्दधे तपआदीनि प्रवर्त्तितवानित्यर्थः ॥ ४२ ॥ ❀ ❀ युष्मदीयसत्रप्रवृत्तिरपि तत्प्रभावादेवेत्याह स एष इति त्रिभिः । अध्यास्ते आस्तेऽधुना पालयत इत्येषु वर्त्तमानसामीप्ये वर्त्तमाननिर्देशः ॥ ४३-४४ ॥ ❀ ❀ सत्राय सत्रं कर्त्तुम् । सत्रमिदं श्रीबलदेवदृष्टादन्यदेव ज्ञेयम् ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमेऽयं सप्तदशः सङ्गतः सङ्गतः सताम् ॥ १७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथेति । अथशब्दो हेत्वर्थः, यतो द्यूतादीनि अधर्महेतोः कलेः वासस्थानानि तस्माद्धेतोर्बुभूषुरुद्भवितुमिच्छुर्न सेवेत धर्मे शीलं व्रतं यस्य स राजा विशेषतो न सेवेत तद्विभ्रंशे प्रजाभ्रंशप्रसंगात् तथाऽन्योपि लोकपतिः तथा गुरुश्च विशेषतो न सेवेत ॥ ४१ ॥ ❀ ❀ इत्थं कलिं निगृह्य तदनंतरं वृषस्य तपआदीन् त्रीन्पादान्प्रतिसंदधे संयोजयामास तथा महीं समवर्द्धयत् । अत्र पादत्रयस्य नष्टत्वं संयोजनं च कथासौंदर्यार्थमुक्तं, वस्तुतस्तु त्रेताप्रभृतिषु त्रिषु युगेषु चतुर्णां पादानां प्रत्येकं तुर्यांशनाशात्त्रयस्त्रयोंशा नष्टास्त एव राज्ञा संयोजिता इति ज्ञेयम् ॥ ४२ ॥ ❀ ❀ स एष उक्तप्रभावः परीक्षित् अरण्यं प्रवेष्टुमिच्छता पितामहेन युधिष्ठिरेणोपन्यस्तं समर्पितं पार्थिवस्य पृथिवीपतेरुचितमासनं एतर्हीदानीमध्यास्ते, वर्तमानवद्भेति भूते लट् ॥ ४३ ॥ ❀ ❀ राजा चासौ ऋषिश्च राजर्षिः कौरवेंद्रः कौरवश्रेष्ठः श्रिया महाराजश्रिया उल्लसन् शोभमानः चक्रमाज्ञां बलं वर्तयति प्रतिवर्तयतीति चक्रवर्ती बृहच्छ्रवाः बृहती कीर्तिर्यस्य स एवंभूतः यः परीक्षित् गजाह्वये आसीत् स अधुना आस्ते, मुक्तरूपेण इति शेषः ॥ ४४ ॥ ❀ ❀ इत्थंभूतानुभावः अयं बुद्धिस्थो नृपोऽभवदिति शेषः, यस्य पालयतः वर्तमानसामीप्ये लटः शत्रादेशः, पालितवतः सत्राय सत्रं कर्तुं यूयं दीक्षिताः दीक्षां कृतवंतः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तदशाध्यायार्थप्रकाशः ॥ १७ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं कलेः स्थानानि निर्दिश्य प्रसंगात् धर्मवर्त्तिनः उपदिशति अथेति। अनृतादिरूपाण्येतानि न सेवेत बुभूषुरुद्धविष्णुः क्वचित् प्रमादादिषु पाक्षिकोऽपि दोषः परिहरणीयानि पदार्थग्रहण सेवमाने कदाचित्कलिस्थानमेव सेवेत। ततो महाननर्थो भवेत् तस्मात् एतानि पंचापि दूरत एव परिहरणीयानि। कलिस्थानशंकया यत्र पुनर्व्यतिरेकनिश्चयः तत्र विधिर्न प्रतिषेधः सम्भावितमेतत् राज्ञ .इति। विशेषाकारेण निषेधं विशेषत इति धर्मशीलो राजा तस्याधर्मप्रतिपक्षत्वात् लोकगुरुः अन्येभ्य उपदेशकर्त्ता शिष्याणां तदाचारशिक्षणात् पतिरिति परिपालकराजधर्माः प्रजा इति॥४१॥ ❀ ❀ एवं कलिं प्रस्थाप्य राजा यत् कृतवान् तत् प्रकृतमाह वृषस्येति। कालेन धर्मस्य त्रयः पादाः पूर्वोक्ता गताः, ताननूद्य पुनः प्रतिसंदधे सम्यक् सन्धानं कृतवान् चतुर्विधमपि धर्मं प्रवर्तितवानित्यर्थः। पृथिव्याः सांत्वनमाह आश्वास्येति समवर्द्धयत् सर्वत्र भक्तिमार्गप्रकारेण कृष्यादिना च पाखंडदूरीकरणेन चकारात् धर्ममप्यवर्द्धयत्॥४२॥ ❀ ❀ तस्य शांतस्यापि कीर्त्त्यनुभावयोर्विद्यमानत्वात् वर्त्तमानवद्वेति न्यायेन श्रद्धातिशयजननार्थं दूरकथाव्यावृत्तये विद्यमानत्वेन निरूपयति स एष इति। भगवत्सायुज्यप्राप्तस्य सर्वत्र भगवतः स्फुरणात् एष इति निर्देशः। अत एतर्हि इदानीमपि पार्थिवोचितमासनमध्यास्ते, किंतु जनमेजयस्तत्स्थाने तदध्यासन उपविशति स एव भगवद्रूपो भूत्वा तत्रास्ते हीति सर्वेषां प्रतीतिः। अत एव पार्थिवोचितं राज्ञामुचितम् इदानीमप्यास्त इत्यर्थः। अन्यथा पार्थिवोचितमपि व्यर्थं स्यात् सिंहासनान्तरमपि नाध्यास्ते किंतु पितामहेन राज्ञा युधिष्ठिरेण परित्यागं च कृत्वा वनं विविक्षता उपन्यस्तम्॥४३॥ ❀ ❀ ननु किमेतदुपचारादुच्यते नेत्याह आस्ते अधुनेति। तथैवास्ते ननु देहान्तरम्प्राप्य नेत्याह स राजर्षिः राज्ञ एव राजर्षिरेव सादृश्यभ्रमं वारयति कौरवेन्द्रश्रियोल्लसदिति कौरवेन्द्राणां श्रिया राजलक्ष्म्या उल्लसद्यथा भवति तथा आसनं वा तत्रापि गजाह्वये महाराज इति राजश्रिया जुष्ट एव चक्रं वर्त्तयति आज्ञापयति तथैव बृहती कीर्त्तिर्यस्य॥४४॥ ❀ ❀ एवं भगवत्कृपया भागवतेन च अजरामरः ब्रह्मभूत एव भगवानिव रमत इत्युक्त्वा तद्दिदृक्षया निवृत्तये तस्यालौकिकमेव रूपमुक्तं, नतु लौकिकमित्यभिप्रायेणोपसंहरति इत्थंभूतानुभावोऽयमिति मृतोऽपि जीवन् तिष्ठतीतीत्थंभूतानुभावः कलिनिग्रहादिद्वारा अभिमन्युसुत इति महाशूरत्वमुक्तं, तद्राज्य एव भवद्भिः सत्रमारब्धमित्याह यस्य पालयत इति। अन्यथा भवन्तोऽपि भागवतस्य श्रवणार्थं गच्छेयुः, संवत्सरदीक्षायाः कृतत्वात् न कश्चिन् म्रियते तावदिति वाक्येन न विरोधः। अग्नीषोमीयप्रभृत्येव हिंसायामिति विधानात् क्षोणीं पालयतः सतः सत्राय सहस्रसंवत्सरायैव अन्यथा अल्पराजनि महत्कर्मारम्भो न घटते। अनेन कलौ महायोगनिषेधोऽपि समर्थितो भवति॥४५॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधे सप्तदशोऽध्यायः॥१७॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स एष इत्यत्र। शान्तस्येति। अविद्यमानस्य। भगवत इव स्फुरणादिति। यथा भगवतो व्यापकत्वं तथा सायुज्यं प्राप्तेपि व्यापकत्वाविर्भावात्॥४२॥ ❀ ❀ इत्थम्भूतेत्यत्र संवत्सरेत्यादि। तथा च दीक्षायां शामित्रस्याभावेन मृत्योराह्वानाभावादविरोध इत्यर्थः॥४४॥

इति श्रीप्रथमस्कन्धे सुबोधिनीप्रकाशे सप्तदशाध्यायविवरणम्॥१७॥

श्रीगिरिधरकृता बालप्रबोधिनी

यतो द्यूतादीनि कलेरावासस्थानानि अथ तस्मात् बुभूषुः भवितुमिच्छुः आत्मसत्तां लब्धुमिच्छुः पुरुषः कश्चित् कस्मिन्नपि काले देशे वा एतानि द्यूतादीनि न सेवेत। बुभूषुरित्यनेन तानि सेवमानोऽन्ततः स्थावरतां प्राप्नुवन्नसत्प्रायो भवेदिति सूचितम्। राजा तु विशेषतो हठादेवैतानि न सेवेत। कुत इत्यपेक्षायां यतो धर्म एव शीलं वृत्तं यस्य तस्य तथात्वमेवोचितमित्याह–धर्मशील इति। तच्च कुतः? यतो लोकगुरुः सर्वश्रेष्ठत्वात् स्ववृत्तेन प्रजाः शिक्षयिता। तत्र हेतुमाह–लोकपतिरिति, यतः सर्वलोकपालक इत्यर्थः॥४१॥ ❀ ❀ एवं कलिं निगृह्य यत्कृतवांस्तदाह–वृषस्येति। वृषरूपस्य नष्टान् तपआदिरूपांस्त्रीन पादान् परीक्षित् पुनः सन्दधे प्रतिसंयोजयामास, प्रवर्तितवानित्यर्थः। तथा महीं चाश्वास्य सान्त्वयित्वा सम्यक् भक्तिमार्गप्रवर्त्तनेन पाखण्डमतदूरीकरणेन कृष्यादिना चावर्धयत् पालयामास॥४२॥ ❀ ❀ युष्मदीयसत्रप्रवृत्तिरपि तत्कृतकलिनिग्रहादिप्रभावादेव। अन्यथा कलिनाऽभिभूतं स्यादित्याह–स इति त्रिभिः। स उक्तविधप्रभाव एष परीक्षित् एतर्हि अधुनाऽपि अरण्यं वनं विविक्षता प्रवेष्टुमिच्छता पितामहेन राज्ञा युधिष्ठिरेण उपन्यस्तं प्रदत्तं पार्थिवस्य सार्वभौमस्योचितं सिंहासनमध्यास्ते। प्रभावस्य विद्यमानत्वाद्भूतेऽपि वर्त्तमानसामीप्येन वर्तमानवन्निर्देशः॥४३॥ ❀ ❀ स कुत्रास्त इत्यपेक्षायामाह–आस्त इति चक्रं भूमण्डलं वर्त्तयति पालयतीति तथा। यद्वा चक्रमाज्ञां सेनां वा सर्वत्र वर्त्तयतीति तथा। बृहच्छ्रवा विपुलकीर्तिः स परीक्षित् कौरवेन्द्राणां

युधिष्ठिरादीनां श्रियोल्लसन् गजाह्वये हस्तिनापुरेऽधुनाऽऽस्ते इत्यन्वयः। बृहच्छ्रवस्त्वे हेतुमाह–राजर्षिरिति। राज्ञां मध्ये ऋषिवद्ब्रह्मवत्परत्वेन वर्तमान इत्यर्थः। न चेदानीमेव तथा किन्तु जन्मान्तरेऽपीत्याशयेनाह–महाभाग इति॥ ४४॥ ❀ ❀ अयमभिमन्युसुतो नृपः परीक्षिदित्थम्भूतानुभावः यस्य क्षोणीं पृथ्वीं पालयतः सतो यूयमपि सत्राय दीक्षिताः प्रवृत्ता इत्यन्वयः॥ ४५॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने। सप्तदशो गतो वृत्ति राजसामर्थ्यरूपकः॥ ३॥

हिन्दी अनुवाद

इसलिये आत्मकल्याणकामी पुरुषको इन पाँचों स्थानोंका सेवन कभी नहीं करना चाहिये। धार्मिक राजा, प्रजावर्गके लौकिक नेता और धर्मोपदेष्टा गुरुओंको तो बड़ी सावधानीसे इनका त्याग करना चाहिए॥ ४१॥ ❀ ❀ राजा परीक्षित्‌ने इसके बाद वृषभरूप धर्मके तीनों चरण—तपस्या, शौच और दया जोड़ दिये और आश्वासन देकर पृथ्वीका संवर्धन किया॥ ४२॥ ❀ ❀ वे ही महाराज परीक्षित् इस समय अपने राजसिंहासनपर, जिसे उनके पितामह महाराज युधिष्ठिरने वनमें जाते समय उन्हें दिया था, विराजमान हैं॥ ४३॥ ❀ ❀ वे परम यशस्वी सौभाग्यभाजन चक्रवर्ती सम्राट् राजर्षि परीक्षित् इस समय हस्तिनापुरमें कौरव-कुलकी राज्यलक्ष्मीसे शोभायमान हैं॥ ४४॥ ❀ ❀ अभिमन्युनन्दन राजा परीक्षित् वास्तवमें ऐसे ही प्रभावशाली हैं, जिनके शासनकालमें आपलोग इस दीर्घकालीन यज्ञके लिये दीक्षित हुए हैं[१]॥ ४५॥

सत्रहवाँ अध्याय समाप्त

१. ४३ से ४५ तकके श्लोकोंमें महाराज परीक्षित्‌का वर्तमानके समान वर्णन किया गया है 'वर्तमानसामीप्ये वर्तमानवद्वा' (पा० सू० ३।३।१३१) इस पाणिनिसूत्रके अनुसार वर्तमानके निकटवर्ती भूत और भविष्यके लिये भी वर्तमान का प्रयोग किया जा सकता है। जगद्गुरु श्रीवल्लभाचार्यजी महाराजने अपनी टीका में लिखा है कि यद्यपि परीक्षित्‌की मृत्यु हो गयी थी, फिर भी उनकी कीर्ति और प्रभाव वर्तमानके समान ही विद्यमान थे। उनके प्रति अत्यन्त श्रद्धा उत्पन्न करनेके लिये उनकी दूरी यहाँ मिटा दी गयी है। उन्हें भगवान्‌का सायुज्य प्राप्त हो गया था, इसलिये भी सूतजी को वे अपने सम्मुख ही दीख रहे हैं। न केवल उन्हींको, बल्कि सबको इस बातकी प्रतीति हो रही है। "आत्मा वै जायते पुत्रः" इस श्रुतिके अनुसार जनमेजयके रूपमें भी वही राजसिंहासनपर बैठे हुए हैं। इन सब कारणोंसे वर्तमानके रूपमें उनका वर्णन भी कथा के रसको पुष्ट ही करता है।

अथाष्टादशोऽध्यायः

सूत उवाच

यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः । अनुग्रहाद् भगवतः कृष्णस्याद्भुतकर्मणः ॥ १ ॥
ब्रह्मकोपोत्थिताद् यस्तु तक्षकात्प्राणविप्लवात् । न सम्मुमोहोरुभयाद् भगवत्यर्पिताशयः ॥ २ ॥
उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः । वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ॥ ३ ॥
नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् । स्यात्सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

राज्ञस्त्वष्टादशे तस्य ब्रह्मशापो निरूप्यते । स चानुग्रह एवास्य जातो वैराग्यमावहन् ॥ १ ॥

परीक्षितो निर्याणमत्याश्चर्यं वक्तुं तत्संभावनाय जन्माश्चर्यमनुस्मारयति यो वा इति । विप्लुष्टो निर्दग्धः सन् ॥ १ ॥ ❀ ❀ ब्रह्मकोपादुत्थितात्तक्षकाद्यः प्राणविप्लवः प्राणनाशस्तस्माद्यदुरुभयं तस्मान्न संमुमोह । तत्र हेतुर्यस्तु भगवत्येवार्पिताशय इति ॥ २ ॥ ❀ ❀ किं तु । उत्सृज्येति । वैयासकेः शुकस्य शिष्यः सन् । विज्ञाताऽजितस्य हरेः संस्थितिस्तत्त्वं येन सः ॥ ३ ॥ ❀ ❀ न चैतच्चित्रमित्याह । उत्तमश्लोकस्यैव वार्ता येष्वत एव नित्यं तत्कथारूपममृतं जुषतां संभ्रमो मोहो न स्यात् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स च शापः अनुग्रहत्वे हेतुः वैराग्यमिति (१) यः परीक्षित् मातुरुदरेः द्रौण्यस्त्रेण विप्लुष्टोपि दग्धोपि श्रीकृष्णस्यानुग्रहान्न मृतः किं तु पुनर्जीवितं प्राप्त इत्यर्थः । सुभद्रादिप्रार्थनया श्रीकृष्णेन मृतो जीवित इति महाभारताविरोधः । श्रीकृष्णेन कथं जीवित इत्यत्राह–अद्भुतकर्मण इति । अद्भुतकर्मत्वात्स मृतं जीवयेत् जीवन्तं मारयेच्चेत्यर्थः ॥ १ ॥ ❀ ❀ अत्रासंमोहे भगवत्यर्पितचेतसामन्यवस्त्वनुसंधानं न भवति । अनुसंधानहेतोश्चेतसोऽन्यत्र गमनाभावादित्यर्थः ॥ २ ॥ ❀ ❀ विज्ञातोऽनुभवगोचरीकृतोऽजितो विष्णुः संस्थितौ मरणकाले येन स तथेति वा ॥ ३ ॥ ❀ ❀ उत्तमश्लोकस्य वार्त्तैव वार्ता जीवनहेतुर्येषां मध्यमपदलोपी बहुव्रीहिर्वा । संभ्रमो भयं न । "संभ्रमः साध्वसेपि स्यात्संवेगादरयोरपि" इति मेदिनी । अत एवोत्तमश्लोकवार्त्तावत्त्वादेव । तच्छब्देन बुद्धिस्थ उत्तमश्लोक एव गृह्यत इत्याह–तत्कथामृतं श्रीकृष्णलीलामृतं सेवमानानाम् ॥ ४ ॥

प्रथमश्लोकतः सप्तमश्लोकावधि दीपनी न (सं०)

श्रीमद्वीरराघवव्याख्या

अथैतत्प्रबंधपिपृच्छिषामुद्बोधयितुं पारीक्षितमवशिष्टं वृत्तान्तं समासतो वदन्नुपसंहरति य इति दशभिः । यो वै परीक्षिन्मातुरुदरे द्रौण्यस्त्रेण विप्लुष्टो दग्धोऽप्यद्भुतकर्मणः कृष्णस्य भगवतोऽनुग्रहान्न मृतः ॥ १ ॥ ❀ ❀ यश्च ब्रह्मकोपेन ब्राह्मणशापात्मकेन उत्थितात्समुपस्थितात्प्राणानां विप्लवो नाशो यस्मादुरुभयं यस्मात्तक्षकान्न संमुमोह मोहं न प्राप्तः, नाबिभेदित्यर्थः । कथंभूतः भगवत्येवार्पितः आशयोऽतःकरणं येन तथाभूतः सन् ॥ २ ॥ ❀ ❀ स राजा सर्वतः सर्वत्र देहतदनुबंध्यादिषु संगमुत्सृज्य वैयासकेः शुकस्य शिष्यो भूत्वा विज्ञातेऽजिते भगवति संस्थितिर्निष्ठा यस्य सः स्वकलेवरं गंगायां जहौ तत्याज ॥ ३ ॥ मोहाभावमेव सहेतुकमुपपादयति नेति । उत्तमश्लोकस्य भगवतो वार्त्ता येषां तेषां न भयं मोहो वास्तीत्यर्थः, किमुत्तमस्योत्तमश्लोकस्य कथामृतं जुषतां सेवमानानां तत्पदांबुजं स्मरतामंतकालेऽपि संभ्रम एव स्यात् ॥ ४ ॥

---

१. प्रा० पा०—कुर्वतो ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पुनरपि भगवति भक्तिविधानार्थं तन्माहात्म्यमुच्यतेऽस्मिन्नध्याये । तदर्थं पारीक्षितं स्वर्याणमुपक्रमते य इति । योऽद्भुतकर्मणः श्रीकृष्णस्यानुग्रहात् द्रौण्यस्त्रदग्धोऽपि मातुरुत्तराया उदरे न मृतः ॥ १ ॥ ❀ ❀ यश्च ब्रह्मशापोत्थितात् ब्राह्मणशापप्रेरितात् तक्षकनागात्प्राणविप्लवे विनाशे प्राप्ते सति भगवत्यर्पितचित्तत्वान्मरणाख्योरुभयान्न संमुमोह ॥ २ ॥ ❀ ❀ स परीक्षित् सर्वतः सर्वेषु राज्यादिषु स्नेहलक्षणं संगमुत्सृज्य वैयासकेः श्रीशुकस्य शिष्यो भूत्वा तदुपदेशेनात्मयोग्यं विज्ञानं स्वरूपबिंबपरतत्त्वापरोक्षज्ञानं तेन अर्जिता संपादिता संस्थितिर्मुक्तिर्येन स तथोक्तः गंगायां प्रासादे स्वकलेवरं जहावित्यन्वयः ॥ ३ ॥ नैतदाश्चर्यमित्याह नेति । उत्तमश्लोकस्य वार्ता प्रसंगो येषां ते तथा उत्तमश्लोकस्य वार्ता जीविका येषां ते तथेति वा । तेषां श्रवणपुटेन तस्य हरेः कथामृतं जुषतां श्रवणव्याजेन सेवमानानां तस्य पादपद्मं च स्मरतामंतकाले संभ्रमो न स्यादित्यन्वयः । निरंतरं हरिचरणनिषेवणेनात्यंतिकप्रलये सर्वदेहविरहमिच्छतां दैनंदिनमरणभयं नास्तीति किं वर्णनीयमित्यपिशब्दार्थः । उत्तमश्लोकवार्तादिष्वेकमेवालं मिलितं किमु वर्णनीयमिति वा ॥ ४ ॥

अस्मिन्पद्यार्थे क्रमसंदर्भो न (सं०)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टादशे मुनेः कण्ठे सर्पं बद्ध्वा गृहागतः । अनुतप्यन् नृपस्तस्य पुत्राच्छापमथाशृणोत् ॥

परीक्षितः कलिनिग्रहश्रवणेनातिविस्मितान् मुनीन् प्रति तस्य जन्मावधि भगवत्प्राप्तिपर्य्यन्तं सर्व्वमेव चरित्रमत्यद्भुतं संक्षेपेण गणयन्नाह यो वा इति । विप्लुष्टो निर्दग्धः ॥ १-२ ॥ ❀ ❀ वैयासकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिस्तत्त्वं येन सः । विज्ञातोऽनुभवगोचरीकृतोऽजितः संस्थितौ मरणकाले येन स इति वा ॥ ३ ॥ ❀ ❀ नैतच्चित्रमित्याह नोत्तमेति । उत्तमश्लोकस्य वार्त्तैव वार्त्ता जीवनहेतुर्येषां तेषाम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अवशिष्टं परीक्षिद्वृत्तांतमास्कंधसमाप्तेर्वक्तुं तदद्भुतजन्मरहस्यस्मरणपूर्वकं तदुपाख्यानं निधनपर्यंतं संक्षिप्य दर्शयति य इति नवभिः । द्रौण्यस्त्रेण विप्लुष्टो निर्दग्धोऽपि न मृतः ॥ १ ॥ ❀ ❀ तुशब्द इतरेभ्यो जनेभ्यः परीक्षितो वैलक्षण्यं द्योतयति । यस्तु शृङ्गिमुनिकोपेनोत्थितात्तक्षकात् प्राणविप्लवः प्राणप्रयाणं ततो यदुरुभयं तस्मान्न मुमोह मोहं न प्राप्तः, यतो भगवति अर्पित आशयो येन सः ॥ २ ॥ ❀ ❀ एतद्विवृणोति सर्वतः सर्वेषु देहगेहादिषु संगमुत्सृज्य वैयासकेः शिष्यः सन् तदनुग्रहाद्विज्ञाते गुणशक्त्यादिविशेषविवेकेन सुज्ञातेऽजिते कालकर्माद्यस्पृष्टस्वभावे श्रीकृष्णे सम्यगात्मभरन्यासरूपा स्थितिर्यस्य सः गंगायां तत्तीरे स्वकलेवरं जहौ तत्याज ॥ ३ ॥ ❀ ❀ युक्तं चैतदित्याह उत्तमश्लोकस्य वार्त्ता येषु तेषां तस्योत्तमश्लोकस्य कथात्मकममृतं जुषतां ध्यानमार्गेण तस्योत्तमश्लोकस्य श्रीकृष्णस्य पदांबुजं स्मरतां च सम्भ्रमोऽन्तकालेऽपि न स्यादत्रोत्तरोत्तरं कैमुतिकन्यायोऽपि ज्ञेयः ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अथाध्यायद्वयेनास्य वृत्तमुत्तरमीर्यते । शापात् प्रायस्ततो राज्ये शापो वैराग्यबोधकः ॥ १ ॥
संक्षेपकथनं पूर्वं श्रोतृप्रीत्यनुसारतः । विस्तारोक्त्यै तयोः श्रद्धा श्लाघा चान्योऽन्यमीर्यते ॥ २ ॥
तादृशं फलवत्तान्यदिति स्थापयितुं द्विजात् । शापस्तु हरिणा प्रोक्तस्तक्षकाग्नेरलौकिकात् ॥ ३ ॥
ज्ञानिनो देहनाशाय नान्यथामृतवर्षणात् । यादवेभ्यस्तथोत्कर्षः शापमुग्धेभ्य ईर्यते ॥ ४ ॥

एवं तस्य राज्यस्थितिमुक्त्वा उत्तरस्थितिं संक्षेपेणाह यो वै द्रौण्यस्त्रेति । येन भगवता पूर्वं संरक्षितः तेनैव चेदानीमुपसंहृत इति बोधयति अद्भुतकर्मण इति । प्लुष्टो न मृतः अमृतं पीत्वा मृत इति । भगवतः कृष्णस्येति प्रकटाप्रकटब्रह्मनाम्नि मातुरुदरे न मृतः गंगायां तु मृत इति ॥ १ ॥ ❀ ❀ इदानीं मरणे विशेषमाह ब्रह्मकोपोत्थितादिति । तक्षकोऽप्यधस्तात् स्थातुमशक्तः ब्रह्मास्त्रमत्रागत्य सफलं जातमिति ब्रह्मशब्दप्रयोगः प्राणानां विप्लवो यस्मात् इति निरुद्धानामग्नौ प्रवेशात् महानुपद्रवः । सर्वत्र प्राणा नाग्निं स्पृशंति अत्र स्पर्शाद्वा विप्लवः अत एवोरुभयात् संमोहाभावे हेतुः भगवत्यर्पिताशय इति आशयस्य तक्षकाग्रहणार्थं भगवति समर्पणम् ॥ २ ॥ ❀ ❀ तस्य देहत्यागप्रकारमाह उत्सृज्येति । प्रथमतः परित्यागस्ततो गुरुकृपा तस्य तत्सम्प्रदायात् भगवत्स्वरूपविज्ञानं ततो गंगायां देहत्याग इति । विशेषेण ज्ञाता अजितस्य संस्थितिर्येन सम्यक् स्थितिर्व्यवस्था ॥ ३ ॥ ❀ ❀ कथं महाभ्रमे न सम्भ्रम इत्याकांक्षायामाह–उत्तमश्लोकस्यैव वार्त्ता येषां भगवत्सम्बन्धिनां सर्वदा तत्कथामृतं जुषतामुपनिबद्धां सद्भिः कथ्यमानां किंच तत्पदाम्बुजं सेवमानानां भ्रमस्तु सन्निपातकार्यं दोषा गुणाश्च एकीभूता यदैकत्वं सम्पद्यन्ते "संनिपातस्त्वहमिति ममेत्युद्धव या मतिः" व्यवहारश्च संनिपातः तेन यावत्संनिपातव्यवहारः, अन्तेऽपि

तत्कार्यं प्राप्नुवंति देहेन्द्रियांतःकरणैः भगवदीयकार्यकरणे पूर्वसंनिपातो निवर्त्तते। तत्र लौकिकी वार्त्ता तामसी आवश्यकी राजसी भगवद्भजनं सात्त्विकं विपरीतं वा आद्यं मानसं यद्धि मनसा ध्यायतीति श्रुतेः, अतो निरंतरं कार्येन्द्रियांतःकरणैः सबीजे दोषे निराकृते त्रयाणां स्वभावपरावृत्तौ संस्पर्शमणेर्लोहादेरिव सर्वस्य असंक्लिष्टभगवत्स्वरूपाभिनिवेशात् न भ्रमजनकत्वमित्यर्थः। यद्यप्यंतकाले देहेन्द्रियांतःकरणानां वैक्लव्यं सम्भवति तथापि तेषां कालस्य नांतकत्वमंतकसम्बंधित्वं वा अमृतपानेन नित्यत्वादिति भावः॥ ४॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथाष्टादशाध्यायं विवरिषवः पूर्वोत्तराध्यायसङ्गतिं बोधयितुमध्यायद्वयार्थमाहुः अथेत्यादि। अथाद्भुतवैराग्योपोद्घातत्वेनालौकिकसामर्थ्यबोधनानन्तरमध्यायद्वयेन वैराग्यदार्ढ्यबोधकं राज्ञश्चरित्रमीर्यते। तत्र प्रकारमाहुः शापादित्यादि। शापात्प्रायः, ततः प्रायं द्वारीकृत्य शापो राज्ये [1]वैराग्यबोधकः। तर्हि द्वयोः किमिति तत्कथनं तत्राहुः संक्षेपकथनं पूर्वमिति। तथा चैतयोः सूतवाक्ये सामान्यविशेषभावः सङ्गतिरित्यर्थः। किमिति संक्षेप इत्यत आहुः श्रोत्रित्यादि। सूतशौनकवाक्यानां तात्पर्यमाहुः। तयोरित्यादि स्थापयितुमित्यन्तम्। तयोरिति वक्तृश्रोत्रोः। तादृशमिति श्रद्धया प्रोत्साहेन चोक्तं श्रुतं च। ननु शापो यथा प्रायद्वारा वैराग्यरूपोत्कर्षबोधकः, तथा स्वरूपेणाधर्मस्यापि बोधक इति कथं तेनोत्कर्षसिद्धिरित्यत आहुः द्विजादित्यादि। हरिणा प्रोक्त इति। ब्राह्मणस्य मुखरूपत्वात्तथा। नान्यथामृतवर्षणादिति। शापाभावे श्रीभागवतात्मककथामृतवर्षणाज्ज्ञानिदेहनाशो नेत्यर्थः। तथा च तत्प्रतिपत्त्यर्थं स इति नोत्कर्षहानिरित्यर्थः। शेषं स्फुटम्। तथा सोधर्मोपि 'शापो मेऽनुग्रहायैवे'ति न्यायेन फलत उत्कर्षस्यैव साधक इति न कोपि दोष इत्यर्थः। यो वेत्यत्र प्रकटाप्रकटनामनी इति। प्रकटस्य कालरूपस्याप्रकटस्य सदानन्दरूपस्य नामनी इत्यर्थः॥ १॥ ❀ ❀ ब्रह्मकोपेत्यत्र। कोपपदतात्पर्यमाहुः तक्षक इत्यादि॥ २॥ ❀ ❀ नोत्तमेत्यत्र। अत्रान्तकाले भ्रमाभावबोधनात् कारणसद्भावे च भ्रमाभीक्ष्ण्यदर्शनादत्र कथं तदभाव इत्याशङ्कायां भगवच्छास्त्रानुसारेण तत्कारणमन्यत्र तत्सत्त्वमत्र तदभावं च साधयन्ति भ्रमस्त्वित्यादि। सन्निपातः कः कीदृशश्चेत्यत आहुः दोषा इत्यादि। दोषा रजस्तमसो वृत्तयः गुणाः सत्त्वस्य वृत्तयः। 'शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः। तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः॥ काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदासुखम्। मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं बलोद्यमः॥ क्रोधो लोभोऽनृतं हिंसा या आदम्भः क्लमः कलिः। शोकमोहौ विषादार्ती निद्राशाभीरनुद्यमः' इत्यत्रोक्तास्ते एकीभूता यथासम्भवमुद्भूतानुद्भूतरूपेण संहता एकत्वं पिण्डीभावेनैकत्वसङ्ख्यायोगं यदा प्राप्नुवन्ति, स तेषां पिण्डीभावः सन्निपातः, यथा वैद्यके पूर्वं त्रिदोषः, ततः सन्निपातस्तथेत्यर्थः। स च 'सन्निपातस्त्वहमि'ति भगवद्वाक्यात् 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिरि'ति भगवद्वाक्याच्चाहंममाभिमानरूपो मनोमात्रेन्द्रियप्राणस्वाभाविकव्यापारात्मकव्यवहाररूपश्चेति द्विप्रकारक इत्यर्थः। एवं भ्रमकारणमुक्त्वा तस्य सार्वदिकत्वं भ्रमाभीक्ष्ण्याय बोधयन्ति तेनेत्यादि। तेनाहंममाभिमानेन यावज्जीवं मनोमात्रेन्द्रियप्राणानामात्मसन्निधानपर्यन्तं सन्निपातात्मकः व्यवहारः। अतोन्तेपि देहादीनामात्मसन्निधानात्तैस्तत्कार्यं सन्निपातकार्यं भ्रमं प्राप्नुवन्ति, अतस्तेषां भ्रमस्याभीक्ष्ण्यम्। तर्हि तस्य सर्वत्र तौल्याद्भगवदीयेषु कुतो न भ्रमोत्पत्तिस्तत्राहुः भगवदीयेत्यादि। तथा च पूर्वसन्निपातनिवृत्त्या तदनुत्पत्तिरित्यर्थः। निवृत्तिरेव कथमित्यतस्तत्कारणमाहुः तत्रेत्यादि। तामसीति। स्वभावतः क्रियमाणत्वात् तथा। विपरीतमिति। तेषां सात्त्विकस्वभावेन भगवत्सम्बन्धितयैव क्रियमाणत्वाल्लौकिकी वार्ता सात्त्विकी। आग्रहदार्ढ्येन क्रियमाणत्वाद्भजनं सेवारूपं तामसम्। कथाजोषणं तु राजसमेव। आद्यमिति वार्ताकरणम्। तत्रोपपत्तिः यद्धीत्यादि। 'यद्धि मनसा ध्यायति तद्वाचा वदती'ति श्रुतौ वाचां मनःपूर्वकत्वप्रतिपादनादिति। अतः सत्त्वादिगुणकार्येष्वपि देहादिष्वेवं भगवत्सम्बन्धान्निरन्तरेत्याद्युक्तप्रकारेणाज्ञानसहिते सन्निपाते निराकृते तथेत्यर्थः। नन्वेवमन्यदास्तु, अन्तसमये तु कालेन स्वभावव्यत्यासाद्भ्रमः स्यादेवेति चेत्, तत्राहुः यद्यपीत्यादि। नित्यत्वादिति। देहादीनां कालानधीनत्वात्। तथा चातो महाभयेपि न भ्रम इत्यर्थः॥ ४॥

श्रीगिरिधरकृता बालप्रबोधिनी

तस्यैवं वीर्यभाजोऽपि हरिभक्तस्य मुक्तये। अष्टादशे विरक्त्यर्थो ब्रह्मशापो निरूप्यते॥ १॥

न च मनुष्यस्य परीक्षितः कथमेवं कलिनिग्रहादिसामर्थ्यं सम्भवतीति शङ्कनीयं, तस्य भगवद्भक्तत्वेन तदनुग्रहाजन्मप्रभृतिदेहत्यागपर्यन्तं सर्वमपि वृत्तमत्यलौकिकमेवेत्यभिप्रायेण तस्य जन्मप्रभृतिदेहत्यागपर्यन्तं वृत्तं सङ्क्षेपेणाह–यो वा इति दशभिः। यो वै परीक्षित् मातुरुदरे एव द्रौणेर्ब्रह्मास्त्रेण विप्लुष्टो दग्धोऽपि कृष्णस्यानुग्रहात् न मृतः। कृष्णानुग्रहेणापि दग्धस्य मरणं कथं न स्यादित्याशङ्क्य तस्य कर्त्तुमकर्तुमन्यथाकर्त्तुं समर्थत्वादित्याशयेन विशिनष्टि–अद्भुतकर्मण इति। तस्यैवं अद्भुतकर्मत्वमपि कथमित्याकाङ्क्षायामैश्वर्यादिषड्गुणपूर्णत्वादित्याशयेन पुनर्विशिनष्टि–भगवत इति॥ १॥ ❀ ❀ यस्तु ब्रह्मकोपेन ब्राह्मणस्य क्रोधपूर्वकशापेन उत्थितात् प्रेरितात् तक्षकात् यः प्राणस्य विप्लवो नाशः तस्मात् यदुरुभयं तस्मान्न सम्मुमोह। तत्र हेतुमाह–

---

१. व्यवहारबोधकः।

भगवत्यर्पित आशयोऽन्तःकरणं येन स इति ॥ २ ॥ ❀ ❀ एवं मोहाभावेऽपि तस्य पुरुषार्थसिद्धिर्जाता न वेत्याकाङ्क्षायामाह—उत्सृज्येति । सर्वतः सर्वत्र देहे तदनुबन्धिपुत्रादिषु च सङ्गमासक्तिं उत्सृज्य त्यक्त्वा भगवत्पादोद्भूतायां गङ्गायां स्वं कलेवरं जहौ तत्याजेत्यन्वयः । तेन भगवत्प्राप्तिरूपपुरुषार्थसिद्धिर्जातेति सूचितम् । सर्वसङ्गत्यागे हेतुमाह—विज्ञाता अजितस्य भगवतः संस्थितिस्तत्त्वं येन स इति । तत्रापि हेतुमाह—वैयासकेः शुकस्य शिष्यो भूत्वेति ॥ ३ ॥ ❀ ❀ नैतच्चित्रं शास्त्रसिद्धत्वादित्याशयेनाह—नेति । उद्गच्छति तमः सर्वसम्भ्रमकारणमविद्या यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य भगवत एव वार्त्ता येषाम् अत एव तस्य भगवतः कथारूपममृतं जुषतां सेवमानानाम् अत एव तस्य पदाम्बुजं स्मरताम् अन्तकाले मरणसमयेऽपि सम्भ्रमो न स्यात् नैव भवतीत्यन्वयः ॥ ४ ॥

हिन्दी अनुवाद

राजा परीक्षित्को शृङ्गी ऋषिका शाप

सूतजी कहते हैं—अद्भुतकर्मा भगवान् श्रीकृष्णकी कृपासे राजा परीक्षित् अपनी माताकी कोखमें अश्वत्थामाके ब्रह्मास्त्रसे जल जानेपर भी मरे नहीं ॥ १ ॥ ❀ ❀ जिस समय ब्राह्मणके शापसे उन्हें डसनेके लिये तक्षक आया, उस समय वे प्राणनाशके महान् भयसे भी भयभीत नहीं हुए; क्योंकि उन्होंने अपना चित्त भगवान् श्रीकृष्णके चरणोंमें समर्पित कर रक्खा था ॥ २ ॥ ❀ ❀ उन्होंने सबकी आसक्ति छोड़ दी, गङ्गातटपर जाकर श्रीशुकदेवजीसे उपदेश ग्रहण किया और इस प्रकार भगवान्के स्वरूपको जानकर अपने शरीरको त्याग दिया ॥ ३ ॥ ❀ ❀ जो लोग भगवान् श्रीकृष्णकी लीला-कथा कहते रहते हैं, उस कथामृतका पान करते रहते हैं और इन दोनों ही साधनोंके द्वारा उनके चरणकमलोंका स्मरण करते रहते हैं, उन्हें अन्तकालमें भी मोह नहीं होता ॥ ४ ॥

तावत्कलिर्न प्रभवेत् प्रविष्टोऽपीह सर्वतः । यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥ ५ ॥
यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् । तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥ ६ ॥
नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् । कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत् ॥ ७ ॥
किं नु बालेषु शूरेण कलिना धीरभीरुणा । अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मिन् राज्ञि सुतरां तन्न चित्रमित्याशयेनाह तावदिति । अभिमन्योः पुत्र एकराट् चक्रवर्तीशः पतिर्यावत् ॥ ५ ॥ ❀ ❀ ननु तदा कलेरप्रवेश एवास्तु प्रविष्टोऽपि न प्राभवदिति कुतस्तत्राह—यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीमनुवृत्तः प्रविष्टः । अधर्मस्य प्रभवो यस्मिन् ॥ ६ ॥ ❀ ❀ नन्वधर्महेतुं कलिं सर्वथा किं न हतवांस्तत्राह—नानुद्वेष्टीति सारंगो भ्रमर इव सारग्राही । सारमाह यद्यस्मिन्कुशलानि पुण्यान्याशु संकल्पमात्रेण फलंति इतराणि पापान्याशु न सिद्ध्यंति यतस्तानि कृतान्येव सिद्ध्यंति न तु संकल्पितमात्राणीति ॥ ७ ॥ ❀ ❀ ननु दोषाधिक्याद्द्वेष एव युक्तः । न धीरेषु तस्याकिंचित्करत्वादित्याह किं न्विति । किं नु तेन भवेत् । बालेष्वधीरेषु अप्रमत्तोऽवहितः सन्यो वृक इव वर्तते ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मदीये राष्ट्रे न वर्त्तितव्यमित्यस्याभिप्रायः । कलेः सामर्थ्यप्रकटनाभाव एव न तु प्रवेशनाभाव इति । किञ्च राज्ञा निगृहीतस्य कलेस्ततः परं कीदृक्स्थितिरभूदित्यपेक्षायामाह—तावदिति । एकराट् चक्रवर्ती पञ्चलक्षराजेंद्रशास्तेत्यर्थः । तदुक्तं ब्रह्मवैवर्त्ते "चतुर्योजनपर्यंतं शासिता नृप ईरितः । तस्माच्छतगुणो यो हि स ज्ञेयो मंडलेश्वरः ॥ तस्माद्दशगुणो यश्च राजेंद्रः स प्रकीर्त्तितः । राजेंद्राणां पंचलक्षं चक्रवर्ती प्रशास्ति यः ॥" इति । न प्रभवेदिति । दत्तानामपि स्थानानां तत्प्रभावेणानुद्भवात् ॥ ५-६ ॥ ❀ ❀ अत्राक्षिपति—नन्विति । कुशलानीति । "लोको विकर्मनिरतः कुशले प्रमत्तः" इत्याद्यनुसारेण सर्वमंगलमयानि भगवत्कीर्त्तनादीनि सिद्ध्यंत्येव । "कलिं सभाजयन्त्यार्याः" इत्यादेः "कृष्णचरितं कलिकल्मषघ्नम्" इत्यादेः "श्रुतोनुपठितो ध्यातः" इत्यादेः "सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिः" इत्यादेः "यस्यां वै श्रूयमाणायाम्" इत्यादेश्च । इतराणि तु कृतान्यपि न सिध्यंति "अतः कलौ तपो योगविद्यायज्ञादिकाः क्रियाः । सांगा भवन्ति न कृताः कुशलैरपि देहिभिः" इति ब्रह्मवैवर्त्तात् । अतो महाफलानां तत्कीर्त्तनादीनां सिद्धिश्चेन्मा सिद्ध्यंतु नाम तुच्छफलान्यन्यानीति तदभिप्रायः ॥ ७ ॥ ❀ ❀ पुनराक्षिपति नन्विति । धीरेषु विवेकिषु "धीरः स्यात् त्रिषु पंडितः" इति मेदिनी । वृक इति लुप्तोपमा ॥ ८-९ ॥

१. प्रा० पा०—नाभि० । २. प्रा० पा०—नृपो ।

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वृकः घोंघ इति ख्यातः । वत्सादन इति राजनिघण्टुः ॥ ८-९ ॥

श्रीमद्वीरराघवव्याख्या

सिंहावलोकनन्यायेन यस्य पालयतः क्षोणीमित्यनेनाभिप्रेतमुपपादयति तावदिति । इह लोके सर्वत्र प्रविष्टोऽपि कलिर्यावदुर्व्यामभिमन्युसुत एकराट् स्वतुल्यराजांतररहित ईश्वरोऽधिपतिर्बभूव तदाज्ञा वा यावदनुवृत्ता बभूव तावत्कलिर्न भवेन्न समर्थो बभूव ॥ ५ ॥ ❀ ❀ कदा प्रविष्ट इत्यत्राह यस्मिन्नहनि यर्ह्येव क्षणे भगवान् कृष्णो गां भूमिमुत्ससर्ज तत्याज तस्मिन्नेवाहनि क्षणे चासावधर्मप्रभवः कलिरनुप्रवृत्तः प्रविष्टो बभूव ॥ ६ ॥ ❀ ❀ ननु कलिं कुतो न हतवानित्यत्राह नेति । सम्राट् सार्वभौमः परीक्षित्कलिं नानुद्वेष्टि तन्मरणपर्यंतं द्वेषं न कृतवानित्यर्थः वर्त्तमानसमीप्ये लट् , कुतः यतः सारंग इव भृंगवत्सारभुक् सारानुभविता सारग्राहीति यावत् , सारंगो यथा कमलगतं सारं मकरंदं गृह्णाति न तु तन्नाशयति तद्वत्कलिगतसारग्राहित्वान्न तं जघानेत्यर्थः । कोऽसौ तद्गतसारः यज्जिघृक्षुस्तं नानुद्वेष्टीत्यत्राह कुशलानीति । यद्यस्मिन्कलौ कृतानि कुशलानि भगवन्नामकीर्त्तनादिरूपाणि पुण्यकर्माण्याशु सिध्यंति भगवत्प्राप्तिमावहंति इतराण्यकुशलकर्माणि पापानीति यावत् तान्याशु न सिध्यंति न फलदानि भवंति एतत्सारभुङ् नानुद्वेष्टि । अनेन कृतादियुगेषु कुशलानां चिरेण फलदत्वमितरेषां त्वाश्विति सूचितम् ॥ ७ ॥ ❀ ❀ ननु कलिनाभिभूतैर्जनैः कुशलानि न कृतान्येव स्युः येनाशु सिध्येयुरित्यत्राह किंन्विति । बालेषु मूर्खेषु विषयभूतेषु शूरेण धीरेषु विवेकिषु तु भीरुणा कलिना किंतु कृतं स्यान्न कोऽप्यनर्थः कृतः स्यादित्यर्थः । तदेव दृष्टांतेन दर्शयन् विशिनष्टि यः कलिरधीरेषु वृक इव भ्रमते तेष्वेव जनेषु सर्वतो वर्तते ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मदीये राष्ट्रे न वर्तितव्यमित्यस्याभिप्रायः कलेः सामर्थ्यप्रकटनाभावः, न तु प्रवेशाभाव इत्यभिप्रेत्याह तावदिति । आभिमन्यव अभिमन्योः पुत्रः परीक्षिदेकराट् चक्रवर्ती यावद्यावंतं कालमुर्व्यामास्त इत्यन्वयः । कीदृशः महानीशः सप्तद्वीपवत्याः भूमेरधिपतिः न मंडलेश इत्यर्थः तावत्तावंतं कालमिह संप्रविष्टोऽपि कलिः न प्रभवेत्स्वशक्तिप्रकटनसमर्थो नाभूदित्यन्वयः ॥ ५ ॥ ❀ ❀ कदा नूर्व्यां कलिः प्रविष्ट इति तत्राह यस्मिन्निति ॥ ६ ॥ ❀ ❀ सारंगो मधुकर इव सारभुक् सारग्राही सम्राट् कलिं न द्वेष्टीत्यन्वयः । कुत इति तत्राह कुशलानीति, कुशलानि सुकृतानि इतराणि पापानि यद्यस्मात् ॥ ७ ॥ ❀ ❀ इतोऽप्युदास्त इत्याह किम्विति । धर्मज्ञानादिकं वृणोतीत्यावृणोति नाशयतीति वृकः शूरेषु भीरुणा बालेषु शूरेण कलिना किमु किं प्रयोजनम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ।

राज्ञा निगृहीतस्य कलेस्ततः परं कीदृशी स्थितिरभूदित्यपेक्षायामाह तावदिति ॥ ५ ॥ ❀ ❀ कलेः प्रवेशकालमाह यस्मिन्निति । गां पृथ्वीम् ॥ ६ ॥ ❀ ❀ निगृहीते कलौ राज्ञः कीदृशो भाव आसीदित्यपेक्षायामाह । सारङ्गो भ्रमर इव सारग्राही । सारमाह–यत् यस्मिन् कुशलानि पुण्यानि आशु सङ्कल्पमात्रेण फलन्ति इतराणि पापानि आशु न सिद्ध्यन्ति । कृतान्येव सिध्यन्ति न त्वकृतानीति । तेन कुशलान्यकृतान्यपि सिध्यन्तीति लभ्यते । अकृतत्वं खल्विह सङ्कल्पितत्वं व्याख्यातम् ॥ ७ ॥ ❀ ❀ अन्योऽपि राज्ञोऽभिप्राय आसीदित्याह बालेष्वविवेकेषु शूरेण कलिना किं न किमप्यनिष्टम् । यतो धीरेषु विवेकिषु भक्तजनेषु च भीरुणा । बालकेष्वेव वृकः शूरः ॥ ८-९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इहास्मिन् लोके सर्वतः सर्वत्र प्रविष्टोऽपि कलिर्यावदभिमन्युपुत्रः एकराट् स्वसमनरेन्द्रान्तरवर्जितः सन्सम्राट् ईशः प्रजानियन्ताऽऽसीत्तावन्न प्रभवेत्समर्थो न बभूव ॥ ५ ॥ ❀ ❀ कलिप्रवेशकालमाह यस्मिन्नहनि यर्हि यस्मिन् क्षणे भगवान् गां भूमिमुत्ससर्ज तत्याज तस्मिन्नहनि तस्मिन्नेव क्षणेऽसावधर्मप्रभवः कलिरनुप्रवृत्तः प्रविष्टो बभूव ॥ ६ ॥ ❀ ❀ नन्वेवंभूतमनर्थहेतुं कलिं कुतो जीवन्तमेवोत्ससर्जेत्यत्राह नेति । सम्राट् कलिं नानुद्वेष्टि तस्मिन् द्वेषं न कृतवान् प्रत्युत स्थानपंचकदानेनानुग्रहं कृतवान् वर्तमानसामीप्ये लट् यतः सारंग इव भ्रमर इव सारभुक् गुणग्राही सारमेव दर्शयति यद्यस्मिन् कलौ आशुशब्दोऽल्पकालपरस्तदुपलक्षितमनोनिर्वर्त्त्यानि कुशलानि पुण्यानि सिद्धयन्ति मनसापि कृतानि फलन्तीति यावत् , इतराणि अपुण्यानि आशु न सिद्धयन्ति मनोनिर्वर्त्त्यानि तानि न फलन्ति किंतु कृतानि शरीरादिभिरनुष्ठितान्येव फलन्ति ॥ ७ ॥ ❀ ❀ किंच धीरेषु परमपुरुषध्याने लब्धस्थैर्य्येषु भीरुणा बालेषु अतत्त्वज्ञेषु शूरेण किन्वपकर्तव्यं न किमपीत्यर्थः । एतदेव दृष्टान्तेनोपपादयति यः कलिः वृक इवाऽप्रमत्तः सन् प्रमत्तेष्वनवहितेषु नृपु वर्त्तते ॥ ८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु कथं कालनियामकत्वं तेषां तत्राह तावत्कलिरिति । तस्य राज्येऽपि कालसम्बन्धो नास्ति । तत्र कथं तदायुषि सम्बन्धः । आधिदैविकत्वादस्य कालस्य ननु गुणानां गुण्यपेक्षया हीनत्वात् भगवत्कृतं कालं कथमयं निराकृतवानित्यत आह । प्रविष्टोऽपीति । मणिना यथाग्निस्तम्भः तथा राजनि विद्यमाने कलेः प्रतिष्टम्भः । भगवदीयत्वात् । विशेषेऽपि कार्यापेक्षया गुणानामुत्कृष्टत्वात् । प्रतिष्टंभ एव राज्ञा कृतः । न मुख्यदेशात् दूरीकरणं तदाह इह सर्वतः प्रविष्टोऽपीति, अनेन कालस्य देशपरिच्छेदो निवारितः । ननु प्रविष्टोऽपि वशीकर्तुं कथं शक्यः तत्राह ईश इति । भगवत्प्रवेशादैश्वर्यदानाद्वा ईशत्वं स हि कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थः, किंच भगवता कालोऽप्यधिकृतः । राजा च तयोः पुना राजा महान् कृतः, अतः प्रतिबन्धो युक्त एव किञ्च अयं भागिनेयपुत्रः । व्यवहारे मान्यः स तु वाहनरूपः । अतोऽप्यस्य महत्त्वं किंच कलिः षडंशः प्रवर्त्तते देशविषये अन्येष्वष्टवर्षेषु त्रेतायुगसमः । कालो वर्त्तत इति वचनात् । अयं च एकराट् अतः खण्डमण्डलाधिपतिः । महाखण्डमण्डलेश्वरात् प्रतिबद्धः ॥ ५ ॥ ❀ ❀ ननु भगवत्येव काल एव कलिर्न प्रवृत्त इति कुतो नांगीक्रियते । तस्यर्त्ते यः क्षणो नीत इति वाक्यानुरोधात् । सूर्यगत्या गणनायां काल एवोत्कृष्टः कस्मान्नोच्यत इत्याशंक्याह यस्मिन्नहनीति । सत्यमेताभ्यामुत्कर्षं कर्त्तुं शक्यते परं न सम्पन्नः तत्र द्वापरान्ते भगवानवतीर्णः । कलिश्च न प्रविष्टः तथा च भगवता सूर्यगतिरुत्कृष्टैव अथ प्रचलिते भगवति उत्कर्षकाभावात् । परीक्षितश्चाप्यधिकारात्प्रविष्टः । अतः परं प्रविष्टस्य च्छेदने मर्यादैव स्वदेशाच्च निराकरणे पश्चादागत्य पुनस्तावन्तं कालमनुभवेत् ततश्च कल्क्यवतारकाले बाध्येत, अतो भगवता सह अभ्यस्यमानबलत्वाभावात् नासौ उत्कर्ष इत्यभिप्रायेणाह । यस्मिन् दिवसे यस्मिन् क्षणे भगवान् त्यक्तवान् तदैवायं कलिरनुवृत्तः । तदपेक्षया स्थित एव भगवति चलिते स्वयमुपविष्टः तस्मिन्नुपविष्टे एव सर्वे अधर्माः प्रवृत्ताः ॥ ६ ॥ ❀ ❀ ननु तथापि दुष्टत्वात् मारणमेवोचितं निराकरणं वा भगवांश्च प्रार्थनीयः । सर्वेषां चोपकारः सिद्ध्यतीत्याशंक्याह नानुद्वेष्टीति । यद्यपि राजा सर्वं कर्त्तुं समर्थः । तथापि कलिं नानुद्वेष्टि नन्वधर्मप्रभवत्वात् प्रयुक्तो द्वेषः । तत्राह सारभुगिति व्रीहिषु तुषाः सन्तीति ते न निराक्रियन्ते । अपितु तुषविमोकेन तु तुद्यन्ते । तथायमपि राजा सारमेव भुंक्ते सारत्वं तु तदैव यदा असारत्वेन वेष्टितो भवति, अतः केनाप्यंशेन न विद्वेष्टि । ननु विषमधुसंयुक्तान्नत्यागवत् गुणदोषयोस्तुल्यत्वात् दोषस्य त्वधिकत्वात् कुतो न त्यागः तत्राह सारङ्ग इवेति । सारङ्गायतीति सारङ्गो भ्रमरः । स हि मधुना मत्तो गायति । तत्र केतक्यादिषु बहिः कंटकवेष्टितेषु मकरन्दप्राचुर्य्यात् । तत्र रमते तदेकजीवनत्वात् । तथा राजापि "कलौ खलु भविष्यन्ति नारायणपरायणाः" इति भगवद्गुणानां भक्तानां चात्र सुलभत्वात् स्वस्य तदेकजीवनत्वाच्च भक्तिसिद्ध्यर्थं न द्वेष्टीत्यर्थः । अधर्मांशनिराकरणं तु प्रतिबन्धेनापि सेत्स्यतीति भावः । किंच कृतस्यास्य च तुल्यता तस्मादपि न द्वेष्टीत्याह । कुशलानीति "कृते तात्क्षणिकः पापः त्रेतायां द्वादशेऽहनि । द्वापरे मासमात्रेण कलौ संवत्सरेण तत्" तद्वैपरीत्येन च धर्मसिद्धिः । तदाह कुशलानि पुण्यानि इतराणि पापानि कृतानि तानि प्रायेण कलौ संसर्गजानि न भवन्तीति ज्ञापितं यद्यस्मात् तान्येव इतराणि भवन्ति । अतो लोकोपकारार्थमपि न द्वेषः ॥ ७ ॥ ❀ ❀ किंच नायं कलिर्देशे वर्तते किन्तु पुरुषेषु तत्रापि प्रमत्तेषु । अतिशिक्षकत्वेन तस्य स्थितत्वात् । उपेक्ष्यैव तत्र न द्वेष इत्याह । किं त्विति तुशब्देन पूर्वपक्षोद्देशस्थितरूपो निवारितः । बालेषु धर्मार्थं प्रवृत्तेषु शीघ्रमेव फलसिद्धौ प्रपंचविलयः स्यात् । धर्मेणान्तःकरणशुद्धौ ज्ञानोदयेन सर्वत्यागप्रसंगात् । अत एव तत्प्रतिबन्धार्थं शूरेण ये तु मोक्षाधिकारिणो धीराः तेभ्यस्तु बिभेति । किञ्च वैराग्यहेतुश्चायं यतः प्रमत्तेषु अप्रमत्तः आयुःक्षरत्वात् । अत एव कलावल्पायुषो भवन्ति । ननु कथमेवं स्वभावस्तत्राह यो वृक इति । अयं तु वृकरूपः स रात्रौ शयानान् अरक्षितान् बालानेव गृह्णाति न व्याघ्रवत्सर्वभक्षकः । अत एव तद्वधार्थे महतां प्रवृत्तिः । एकवचनेनासहायता सूचिता । तत्रापि विशेषः नृषु वर्त्तते न नरोत्तमेष्वन्येषु वा ऋषिषु अत उपेक्षणीय इत्यर्थः ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तावदित्यत्र । ननु यदि राज्ञा कलिर्निराकृतः, तदा तदनधिष्ठितस्य कालस्य कलावप्रवेशाद्गणनायामाधिक्यं स्यादिति तन्निरासायाहुः आधिदैविकेत्यादि । निराकृतस्त्वाधिदैविकः, तेन तस्य प्रभुत्वाभावः । आध्यात्मिकस्तु वर्तत एवेति न गणनाधिक्यमित्यर्थः । गुणानां गुण्यपेक्षयेति । गुणानां राजनिष्ठानां गुण्यपेक्षया भगवदपेक्षया । गुणानामिति 'कलिं सभाजयन्त्यार्या' इत्यादिवाक्योक्तानां कलिगुणानां राजगुणानां च ॥ ५ ॥ ❀ ❀ यस्मिन्नित्यत्र । इति वाक्यानुरोधादिति । अस्मिन् वाक्ये उत्तमश्लोकवार्तावच्छिन्नस्य कालस्य हरणाभावकथनेन सूर्यपरिस्पन्दानवच्छिन्नत्वबोधनानुरोधादत्राप्युत्तमश्लोकवार्तावच्छिन्नस्य कालस्य सूर्यपरिस्पन्दानवच्छिन्नतायाः शक्यवचनत्वादित्यर्थः । सूर्यपरिस्पन्दानवच्छिन्नत्वे कथं कलिप्रवृत्त्यभावसिद्धिरित्यत आहुः सूर्येत्यादि । तथा च तदभावे तदभावात् प्रवृत्त्यभावसिद्धिरतस्तथेत्यर्थः । उत्कर्ष उद्धरणम् । तदायुषेति भगवद्वार्तावच्छिन्नेन राजायुषा । ननु विद्यमाने सामर्थ्ये कुतो न सम्पन्न इत्याकांक्षायां पूर्वं सामर्थ्यगमकमाहुः तत्रेत्यादि । उत्कृष्टैवेति । सूर्यपरिस्पन्दा-

वच्छेदे तत्कृतगुणदोषयोर्यथायथमावश्यकत्वेपि 'भूःकालभर्जितभगापि यदङ्घ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोखिलार्थानि'ति वाक्ये दोषनिवृत्तिकथनेन द्वापरनिवृत्तिबोधनादुत्कृष्टैव । तथा च सामर्थ्यमस्त्येवेत्यर्थः । तदसम्पत्तावुपपत्तिमाहुः अथेत्यादि । अस्य स्वसमानबलत्वाभावादिति पूर्वोक्तायुर्विशिष्टस्य राज्ञो मर्यादाभङ्गाभावपूर्वककल्क्यवतारकालबाधाभावपूर्वकगत्युत्कर्षणासामर्थ्येन तथात्वादित्यर्थः । तदपेक्षयेति भगवत्प्रचलनप्रतीक्षया ॥ ६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

राज्ञा निगृहीतस्य कलेस्ततः परं कीदृशी स्थितिरभूदित्यपेक्षायामाह–तावदिति । आभिमन्यवः अभिमन्युसुतो यावदुर्व्या-मीशोऽधिपतिर्बभूव तावदिह भारतवर्षे सर्वत्र प्रविष्टोऽपि कलिर्न प्रभवेत् स्वप्रभावं दम्भानृतादिदोषं न प्रकटितवानित्यन्वयः । कथं राज्ञ एवं प्रभाव इत्यपेक्षायामाह–महानिति, यतः कल्यपेक्षया महान् भगवत्सम्पादितोत्कर्षवानित्यर्थः । एतदेवोपपादयति–एकराडिति 'अन्येषु अष्टवर्षेषु त्रेतायुगसमः कालो वर्त्तते' इति पञ्चमे वक्ष्यमाणत्वात् कलेर्भारतवर्षमात्रे प्रवृत्तिः, राज्ञस्तु जम्बूद्वीपाधिपतित्वात्तदपेक्षया महत्त्वमेवेति भावः ॥ ५ ॥ ❀ ❀ ननु कदा कलिः प्रविष्ट इत्यपेक्षायामाह–यस्मिन्निति । यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे भगवान् श्रीकृष्णो गां भूमिमुत्ससर्ज तत्याज तदा तस्मिन्नेवाहनि क्षणे च अधर्मस्य प्रभवो यस्मिन् सोऽसौ कलिरिह भूमौ अनुवृत्तः प्रविष्टः ॥ ६ ॥ ❀ ❀ तर्ह्यधर्महेतुत्वात् कलिं कुतो न हतवानित्यपेक्षायामाह–नेति । सम्राट् सार्वभौमः परीक्षित्कलिं नानुद्वेष्टि तन्मरणपर्यन्तं द्वेषं न कृतवानित्यर्थः । वर्त्तमानसामीप्ये लट् । कुतः ? यतः सारङ्ग इव भ्रमरवत्सारभुक् सारग्राहीत्यर्थः । सारङ्गो यथा कमलगतं सारं मकरन्दं गृह्णाति तत्र कण्टकादिदोषसत्त्वेऽपि न तं नाशयति तथा कलिगतसारं गृहीत्वा तत्र दोषसत्त्वेऽपि न तं जघानेति भावः । कोऽसौ तद्गतसारो यं जिघृक्षुस्तं न जघानेत्यपेक्षायामाह कुशलानीति । यत् यस्मिन् कलौ कृतानि कर्माणि कुशलानि भगवन्नामसङ्कीर्त्तनादिरूपाणि पुण्यकर्माणि आशु सिद्ध्यन्ति शीघ्रमेव फलन्ति । इतराणि पापानि त्वाशु न सिद्ध्यन्ति शीघ्रं न फलन्ति । अनेन कृतादियुगेषु कुशलानां चिरेण फलदत्वं इतरेषां त्वाश्विति सूचितम् ॥ ७ ॥ ❀ ❀ ननु कलिनाऽभिभूतैर्जनैः कथं कुशलानि स्युः यान्याशु सिद्ध्येयुरित्याशङ्क्याह–किमिति । बालेष्वविवेकिषु शूरेण धीरेषु विवेकिषु भगवद्भक्तेषु भीरुणा कलिना किं नु अनिष्टं स्यात् ? न किमपि । एतदेव दृष्टान्तेन स्पष्टयन्विशिनष्टि–यः कलिः प्रमत्तेष्वेव नृष्वप्रमत्तः सावधानः सन् अवीषु वृक इव वर्त्तते ॥ ८ ॥

हिन्दी अनुवाद

जबतक पृथ्वीपर अभिमन्युनन्दन महाराज परीक्षित् सम्राट् रहे, तबतक चारों ओर व्याप्त हो जानेपर भी कलियुगका कुछ भी प्रभाव नहीं था ॥ ५ ॥ ❀ ❀ वैसे तो जिस दिन जिस क्षण श्रीकृष्णने पृथ्वीका परित्याग किया, उसी समय पृथ्वीमें अधर्मका मूलकारण कलियुग आ गया था ॥ ६ ॥ ❀ ❀ भ्रमरके समान सारग्राही सम्राट् परीक्षित् कलियुगसे कोई द्वेष नहीं रखते थे; क्योंकि इसमें यह एक बहुत बड़ा गुण है कि पुण्यकर्म तो संकल्पमात्रसे ही फलीभूत हो जाते हैं, परन्तु पापकर्मका फल शरीरसे करनेपर ही मिलता है; संकल्पमात्रसे नहीं ॥ ७ ॥ ❀ ❀ यह भेड़ियेके समान बालकोंके प्रति शूरवीर और धीर-वीर पुरुषोंके लिये बड़ा भीरु है। यह प्रमादी मनुष्योंको अपने वशमें करनेके लिये ही सदा सावधान रहता है ॥ ८ ॥

उपवर्णितमेतद् व[1]: पुण्यं पारीक्षितं मया । वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥ ९ ॥
या याः कथा भगवतः कथनीयोरुकर्मणः । गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः ॥ १० ॥

ऋषय ऊचुः

सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः । यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥ ११ ॥
कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् । आपाययति गोविन्दपादपद्मासवं मधु ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पारीक्षितमाख्यानमपृच्छत पृष्टवंतो यूयम् ॥ ९ ॥ ❀ ❀ किं बहुना नरैरेतावदेव कर्तव्यमिति सर्वशास्त्रार्थसारं कथयति या या इति । कथनीयान्युरूणि कर्माणि यस्य तस्य गुणकर्मविषयाः बुभूषुभिः सद्भावमिच्छद्भिः ॥ १० ॥ ❀ ❀ पुनर्विस्तरेण कथनार्थं सूतोक्तिं तत्संगं चाभिनंदति सूतेति त्रिभिः । शाश्वतीः समा अनंतान्वत्सरान् जीव । अत्यंतसंयोगे द्वितीया । विशुद्धं यशः कीर्तयसि । तच्चास्माकं मर्त्यानाममृतं मरणनिवर्तकम् ॥ ११ ॥ ❀ ❀ किं च अस्मिन्कर्मणि

१. प्रा० पा०—मेतद्धि ।

सत्रेऽनाश्वासेऽविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् धूमेन धूम्रो विवर्ण आत्मा शरीरं येषां तानस्मान्, कर्मणि षष्ठी। आसवं मकरंदम्। मधु मधुरम्॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बुभूषुभिः सद्भावं स्वसत्तामिच्छद्भिः। अन्यथा जीवन्मृतत्वं स्यादिति भावः॥ १०॥ ❋ ❋ सूत इति। सुवति प्रेरयति कथाश्रावणेन भगवद्धर्मे इति सूतपदस्यान्वर्थतां द्योतयंतस्तथा सौम्येति तस्य सुहृत्तां च तस्य कथाकथने उत्साहं वर्द्धयामासुरिति भावः। अमृतं मोक्षसाधनम्॥ ११॥ ❋ ❋ फलानिश्चयेन कृषिवत्त्वम्। तेन भक्तेर्विश्वसनीयत्वं ध्वनितम्। अत्र सत्रवत्कर्मांतरं यशःश्रवणवद्भक्त्यंतरं च ज्ञेयम्। तदेवं भक्तिं विना कर्मादिभिरस्माकं दुःखमेवासीदिति व्यतिरेकित्वमत्र गम्यते। तदुक्तं "यतः श्रियामेव परिश्रमः परः" इत्यादि। "अतो वै कवयो नित्यम्" इत्यादि च। ब्रह्मवैवर्त्ते च श्रीशिवं प्रति विष्णुवाक्यम् "यदि मां प्राप्तुमिच्छंति प्राप्नुवंत्येव नान्यथा। कलौ कलुषचित्तानां वृथायुःप्रभृतीनि च॥ भवंति वर्णाश्रमिणां न तु मच्छरणार्थिनाम्।" इति। भक्तेः साक्षात्फलदत्वमाह–मकरंदरूपं मधु मादकमिति। तदितरसर्वसुखदुःखाननुभवात् प्रतिक्षणं तदीयस्वादुत्वानुभवाच्च॥ १२॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

उरूणि महान्तीत्यर्थः॥ १०॥ ❋ ❋ अत्यन्तेति। 'कालाध्वनोरत्यन्तसंयोगे' (पा० २।३। ५) इति सूत्रेणेति यावत्॥ ११॥ ❋ ❋ कर्म्मणीति। 'उभयप्राप्तौ कर्म्मणि' (पा० २। ३। ६५) इति सूत्रेणेति यावत्॥ १२-४८॥

श्रीमद्वीरराघवव्याख्या

यद्यूयं मामपृच्छत तदेतद्वासुदेवस्य कथोपेतमत एव शृण्वतां वदतां च पुण्यावहमेतत्परीक्षितः सम्बन्धाख्यानं मया वो युष्मभ्यमुपवर्णितम्॥ ९॥ ❋ ❋ पिपृच्छिषामुद्बोधयितुमेव साकल्येन भगवत्कथानां श्रोतव्यतामाह या इति, कथनीयान्यनुरूपाणि बहूनि कर्माणि चेष्टितानि यस्य तस्य भगवतो गुणाः कर्माणि चाश्रया यासां ताः कथा बुभूषुभिः पुंभिः संसेव्याः॥ १०॥ ❋ ❋ यदुक्तम् 'उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यः' शुकोपदिष्टतत्पुराणजज्ञानेन मुक्तो बभूवेति तद्वैयासक्युपदिष्टपुराणश्रवणद्वारा तज्जन्यज्ञानलिप्सुः पृच्छति शौनकः सूतेति सप्तभिः। तावज्जन्ममरणाद्यनन्तदुःखावहदुःसहसंसृतिक्षपणद्वारा निरतिशयानन्दरूपपरब्रह्मप्राप्तिहेतुं तत्कथामृतं पाययन्तं महोपकर्तारं सूतमाशास्ते सूतेति। हे सूत! हे सौम्य त्वं शाश्वतीः समा वत्सरान् जीव, "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। कुत एवमास्वाद्य इत्यत्र तं विशिनष्टि यस्त्वं कृष्णस्य विपुलं विशदममृततुल्यं यशो मर्त्यानां नोऽस्मभ्यं शंससि कथयसि अतो हर्षातिशयादाशास इति भावः॥ ११॥ ❋ ❋ तदेव व्यनक्ति कर्मणीति। अनाश्वासेऽविश्वसनीये निर्भये निर्भयत्वनिमित्तेऽसिन्यज्ञादिकर्मणि निष्ठानामिति शेषः, धूमधूम्रात्मनामज्ञानावृतमनसां यद्वा धूमेन यज्ञियेन धूम्र आत्मा शरीरं येषां केवलकर्मजडानामिति भावः, भवान् गोविन्दस्य पादपद्मयोरासवममृतं मधु मधुरं पाययति॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उपसंहरति उपवर्णितमिति॥ ९॥ ❋ ❋ यथेयं पारीक्षिती कथा भगवतो गुणकर्माश्रयत्वात्सेव्यासीत्तथान्या अपि तादृशाः कथाः मुमुक्षुभिः सेव्या इत्याह या या इति। कथनीयानि उरूणि कर्माणि यस्य स तथोक्तः तस्य, बुभूषुभिः मोक्षैककामैः॥ १०॥ ❋ ❋ सूत! यस्त्वं श्रीकृष्णस्य विशदं यशोऽमृतं मरणधर्मिणां अस्माकं शंससि हि यस्मात्तस्मादाशीर्लक्षणं सोमार्हं भद्रेति वा सुमायाः वत्सेति वा सुमा महर्षिभार्या, शाश्वतीः समाः बहुवर्षान् जीव शतवर्षानुपर्यपि प्राणान् धारयेत्येकान्वयः॥ ११॥ ❋ ❋ 'कर्मणा ज्ञानमातनोती'त्यादिश्रुतिप्रत्ययादन्तःकरणशुद्धिद्वारा हरिज्ञानलब्धये यागपरंपराभिरनाश्वासे श्वासमोक्षानवसरे अन्यत्र संगावसरविधुरे वाऽत एव हरिकथावर्णने सावसरे अस्मिन्नुपक्रान्ते सत्राख्ये कर्मणि हर्युद्देशेन सुहुतविराज्याद्युद्भूतधूमेन धूम्र आत्मा मन आदीन्द्रियजातं येषां ते तथोक्ताः, कर्मणि षष्ठीदर्शनात्, तेन धूमेन धूम्रतया पवित्रीकृतशरीरानस्मान्मधु मधुरं गोविन्दपादपद्मासवं आपाययतीत्यन्वयः। पादपद्मादासूयत इत्यासवं मधु वा, अनेन सत्रयागः सफलो जात इत्युक्तं भवति॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

या यास्ताः सर्व्वा अपि किमुत श्रीवसुदेवनन्दनसम्बन्धिन्य इत्यर्थः। गुणकर्म्माश्रयास्तत्तद्गुणसूचककर्म्माश्रयाः॥ १०॥ ❋ ❋ जीवे मर्त्यलोके वर्त्तस्वेत्यर्थः॥ ११॥ ❋ ❋ अनाश्वासे अविश्वसनीये। वैगुण्यबाहुल्येन कृषिवत् फलनिश्चयाभावात्। अनेन भक्तेर्विश्वसनीयत्वं ध्वनितम्। धूमेन धूम्रौ विरञ्जितौ आत्मानौ शरीरचित्ते येषाम्, कर्मणि षष्ठी। तानस्मानित्यर्थः। पादपद्मस्य यशोरूपम् आसवं मकरन्दं मधु मधुरम्। अत्र सत्रवत् कर्मान्तरं यशःश्रवणवद्भक्त्यन्तरं च ज्ञेयम्। तदेवं

भक्तिं विना भूतानां कर्मादिभिरस्माकं दुःखमेवासीदिति व्यतिरेकित्वमात्रं गम्यते । तदुक्तं–'यशः श्रियामेव परिश्रमः पर' इत्यादि 'अतो वै कवयो नित्यमि'त्यादि च । ब्रह्मवैवर्त्ते च श्रीशिवं प्रति श्रीविष्णुवाक्यं–'यदि मां प्राप्तुमिच्छन्ति प्राप्नुवन्त्येव नान्यथा । कलौ कलुषचित्तानां वृथायुःप्रभृतीनि च । भवन्ति वर्णाश्रमिणां न तु मच्छरणार्थिनामि'ति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बुभूषुभिः स्वसत्तामिच्छद्भिः । अन्यथा जीवन्मृतत्वं स्यादिति भावः ॥ १०-११ ॥ ❀ ❀ कर्म्मण्यस्मिन् सत्रे अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् । तेन भक्तेर्विश्वसनीयत्वमुक्तम् । धूमेन धूम्रा विवर्णा आत्मानश्चक्षुराद्यवयवा देहाः तेषाम्, कर्म्मणि षष्ठी । भक्तेः साक्षात् फलदत्वमाह आपाययतीति । आसवं मकरन्दरूपम् । मधु मादकमिति तदितरसर्व्वसुखदुःखाननुभवात् प्रतिक्षणं तदीयस्वादुत्वानुभवाच्च ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यूयं यत् पृष्टवंतस्तत्पारीक्षितं परीक्षिदुपाख्यानं वो युष्मभ्यमुपवर्णितं मया ॥ ९ ॥ ❀ ❀ 'तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयमि'त्यादिमुनिवाक्येनैव तेषां श्रीकृष्णकथायां प्रीत्यतिशयं ज्ञात्वा स्वमतेनापि ता एव बुभूषुभिः श्रोतव्या इत्याह या या इति । कथनीयान्युरुणि बहूनि कर्माणि यस्य तस्य भगवतः या या गुणकर्मविषयाः कथास्तास्ताः बुभूषुभिरुद्धवितुमिच्छद्भिः पुंभिः सम्यक् सेव्याः ॥ १० ॥ ❀ ❀ एवं वादिनं सूतं शौनको विस्तरतः श्रीकृष्णकथाकीर्तनं प्रार्थयन्नभिनंदति सूतेति सप्तभिः । हे सूत ! त्वं शाश्वतीः समा अनंतान् संवत्सरान् जीव, 'कालाध्वनोरत्यंतसंयोगे द्वितीया' हे सौम्य ! यस्त्वं कृष्णस्य विशदं विपुलं मर्त्यानां मरणधर्मवतामम‍ृतममरत्वसंपादकं मोक्षदं यशः नोऽस्मभ्यं शंससि कीर्त्तयसि ॥ ११ ॥ ❀ ❀ अत्यंतोपकर्तृत्वेनाभिनंदति अनाश्वासे विघ्नशंकया वैगुण्यशंकया च समाप्तौ फले चाविश्वसनीये धूमेन धूम्रो विवर्ण आत्मा देहो येषां तेषामस्माकमस्मिन्कर्मणि सत्रे गोविन्दपादपद्मासवं मकरन्दं मधुमधुरमापाययति । कर्मणि व्यग्रा एते हरिचेष्टितश्रवणानर्हा इत्येवमुपेक्षां न करोषीति भावः ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं स्वरूपात्कलिस्वरूपं निरूप्य तत्कथामुपसंहरति उपवर्णितमिति । एवं षोडशे निरूपे तस्य प्रकृतोपयोगित्वाभावात् पुण्यमित्याह यथा गङ्गास्नानादिकं धर्मः तथैतदुपाख्यानमपि परीक्षित्सम्बन्धिकथने हेतुः वासुदेवकथोपेतमिति ॥ ९ ॥ ❀ ❀ किंच यदात्मानमपृच्छत्तत्कथ्यतामिति वाक्येन स्पष्टत्वादुत्तरं दत्तमन्यथा संक्षेपश्च यद्यनुक्तः प्रश्नः साक्षाद्भगवत्कथानिरूपकत्वात् तदा वयं तदैव वयं कथं न निवारिताः किं प्रासंगिकेनेति तत्राह या याः कथा इति । नात्यंतं कथा अनुपयोगिनी भगवत्कथाया आधारत्वात् उत्तमाश्रयत्वमेवाधिकारित्वमतो याः काश्चन कथा भगवतो गुणकर्माश्रयाः गुणाः कर्माणि च आश्रित्य प्रवृत्ताः ताः श्रोतव्याः तत्र हेतुः कथनीयोरुकर्मण इति । कथनीयानि उरु अधिकानि कर्माणि भगवत्कथाया आधिक्यं निरूपककथायाः सद्भावे भवति तदैव भक्तिजनकत्वमन्यथा सहस्रनामपाठवत् धर्मोपयोगित्वं स्यात् । कथनीयानि उरु यथा भवति तथा कर्माणि यस्य केवलनिर्देशेन भगवत्कर्माणि न कथनीयानि किंतु साधारणानि सप्रतिष्ठानि कथनीयानीत्यर्थः, पुंभिरिति स्वतन्त्रैस्तत्रापि बुभूषुभिः भवितुमिच्छति उद्धविष्णुः घृतसहितस्यान्नस्यैव पोषकत्वात् ॥ १० ॥ ❀ ❀ एवं निवृत्तं सूतं प्रतिबुध्य सर्वे ऋषयः अभिप्रेतार्थज्ञानार्थं तं प्रोत्साहयंति सूत ! जीवेति । ब्राह्मणानां हि सन्तोषदान आशिष एव द्रव्यं तदाह हे सूत ! शाश्वतीः समाः त्वं जीव । ननु भवतां कोपयोगस्तत्राहुः हे सौम्य ! हे बुध उत्पत्तिशिष्टं न ज्ञानं तुर्ये च अतो बहुकालं त्वज्जीवने अस्माकं महत् कार्यमिति भावः । समाः संवत्सराः शाश्वतीः नित्याः ते हि ब्रह्मणो भवंति अन्येषां वा नित्यानां पदार्थानाम् अनेनापरिमितं कालं जीवेत्युक्तं भवति । एवमाशीर्वादे हेतुमाहुः यस्मात् कारणात् विशदं कृष्णस्य यशः शंससि ॥ ११ ॥ ❀ ❀ प्रोगादिशंसनवत् नेदं कर्ममात्रोपयोगि किंतु अस्माकममृतं तत् मरणनिवर्त्तकं सुखकरं परमानन्दरूपं च तदर्थं हेतूनाह विशदं यशः कृष्णस्येति विशदं निर्मलं विषं यतीति वा संसारप्रवेशं दूरीकरोतीति अनेन मरणं निवर्त्तितं यशश्च सर्वेषां सुखजनकं कृष्णश्च परमानन्दः सदानन्दवाचकत्वात् "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । सदानन्दश्च भगवान् कृष्ण इत्यभिधीयते" अनेन परमानन्दत्वं परीक्षित्कथाश्रवणमात्रेण यदायमुदासीनः तदा कर्मप्रवृत्तिमस्मदीयां दृष्ट्वा न वक्ष्यतीत्याशंक्याहुः कर्मण्यस्मिन् यज्ञाख्ये कर्मणि फलनिश्चयाभावात्तदाश्वासो नास्ति 'को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेति दिक्ष्वतीकाशान् करोती'ति श्रुतेः यथा तत्र संदेहवचनमेवमत्रापीत्यर्थः । अत एव धूमधूम्रात्मनां धूमेन धूम्र आत्मा देहो येषां यज्ञकृतो दोषः स्फुटः गुणस्तु संदिग्धः, एतादृशे महति कष्टे गोविन्दपादपद्मं मधु आपाययति सहस्रसमयागेन कोऽपि रसो नानुभूतः त्वया चानुभूयते । अनेन योगापेक्षया भवानादरणीयः । आसमंतात् पानं हृदयप्रदेशपर्यन्तं गोविन्देति श्रोतॄणां रक्षकत्वं पादपद्मेति भक्तिमार्गप्रचारः, अनेन अग्रेऽपि पापं सूचितम् । आसवं हि देहविस्मारकम् अनेन ज्ञानमत्रानुषंगिकमिति ज्ञात्वा उत्कर्षः सूचितः । मध्विति मिष्टं स्वरूपतोऽपि एषा योग्यता उक्ता ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

या या इत्यत्र । केवलनिर्देशेनेति । निर्देशो लौकिकबुद्धिविषयीकरणम् । साधारणानीति लौकिकतौल्येन प्रतीयमानानि । सप्रतिष्ठानीति । तादृशान्यपि तत्प्रतिष्ठापूर्वकं कथनीयानीत्यर्थः ॥ १० ॥ ❀ ❀ सूत जीवेत्यत्र । प्रउगादिशंसनवदिति । प्रउगं शस्त्रविशेषः । 'प्रउगं शंसती'ति श्रुतेः । शस्त्रं चात्र (प्र) गीतमन्त्रसाध्या स्तुतिर्ज्ञेया । विषं द्यतीति पचाद्यच् । भावप्रधानो निर्देशः । तथा सति प्रवेशकर्तृत्वं द्यतीत्यर्थः सिद्धयति, तदाहुः संसारेत्यादि । यत एवमतः प्रवेशकर्तृत्वं द्यतीत्यर्थः । कर्मणीत्यत्र । यथा तत्रेत्यादि । मनुष्यलोकस्य प्रत्यक्षफलत्वेनोत्कृष्टत्वं वक्तुं यथा देवलोकफले सन्देहवचनम्, तथात्र भगवल्लीलाकथारसस्योत्कृष्टत्वाय कर्मणोऽनाश्वासत्वमुच्यते, न तु तस्य कर्मणो निन्दार्थमित्यर्थः ॥ १२ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

यद्भवन्तो मामपृच्छत तदेतत्परीक्षित्सम्बन्ध्याख्यानं मया वो युष्माकमुपवर्णितमित्यन्वयः । प्रश्नस्य वर्णनस्य चोचितत्वं सूचयन्नाख्यानं विशिनष्टि—पुण्यमिति, पृच्छतां शृण्वतां वदतां च पुण्यावहमित्यर्थः । तत्र हेतुमाह—वासुदेवकथोपेतमिति ॥ ९ ॥ ❀ ❀ एवं शौनकपृष्टमाख्यानं निरूप्य परमपुरुषार्थहेतुत्वात् पुनः पिपृच्छिषामुद्बोधयितुं भगवतः सर्वासां कथानां श्रोतव्यतामाह—या या इति । कथनीयानि उरूणि बहुलानि कर्माणि यस्य तस्य भगवतो गुणाः भक्तवात्सल्यादयः कर्माणि च गोवर्द्धनोद्धरणादीनि आश्रयो विषयो यासां तथाभूता या याः कथाः सन्ति ता बुभूषुभिः स्वरूपभूतसत्तामिच्छद्भिः पुम्भिः संसेव्या निरन्तरं श्रोतव्या इत्यन्वयः । अन्यथा स्वरूपतिरस्कारेण संसारदुःखानुभव एव स्यादिति भावः ॥ १० ॥ ❀ ❀ एवमुद्बुद्धपिपृच्छिषाः शौनकादयः पुनर्विस्तरेण कथनार्थं सूतोक्तिं तत्सङ्गं चाभिनन्दति—सूतेति त्रिभिः । तत्र तावत्परमादरेण सम्बोधयन्नाशिषं ददाति—हे सूत हे सौम्य प्रियदर्शन त्वं शाश्वतीः समाः अनन्तान्संवत्सरान् जीवेति । मम जीवनेन भवतां क उपकार इत्याकाङ्क्षायामाह—य इति । यस्त्वं नोऽस्माकं मर्त्यानां मरणधर्माणाममृतं मरणनिवर्त्तकं कृष्णस्य 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति वाक्यात्सदानन्दस्वरूपस्य यशः शंससि कथयसीत्यन्वयः । कथं तद्यशसो सरणनिवर्त्तकत्वमित्यपेक्षायामाह—विशदमिति । विशं संसारप्रवेशं द्यति खण्डयतीति तथेत्यर्थः ॥ ११ ॥ ❀ ❀ भगवत्कथायामत्यादरं द्योतयन्नुक्तमेव स्पष्टयति—कर्मणीति । अनाश्वासे वैगुण्यबाहुल्येन फलनिश्चयाभावात् अविश्वसनीयेऽस्मिन् सत्राख्ये कर्मणि सँल्लग्नानाम् अत एव धूमेन धूम्रा विवर्णा आत्मानो येषां तेषाम् अस्माकं भवान् गोविन्दस्य पादपद्मयोरासवं मादकत्वेन संसारदुःखविस्मारकं मधु मधुवत्स्वादु पराः आपाययति सम्यक् श्रावयतीत्यर्थः ॥ १२ ॥

हिन्दी अनुवाद

शौनकादि ऋषियो ! आपलोगोंको मैंने भगवान्की कथासे युक्त राजा परीक्षित्का पवित्र चरित्र सुनाया । आपलोगोंने यही पूछा था ॥ ९ ॥ ❀ ❀ भगवान् श्रीकृष्ण कीर्तन करने योग्य बहुत-सी लीलाएँ करते हैं । इसलिये उनके गुण और लीलाओंसे सम्बन्ध रखनेवाली जितनी भी कथाएँ हैं, कल्याणकामी पुरुषोंको उन सबका सेवन करना चाहिये ॥ १० ॥ ❀ ❀ ऋषियों ने कहा—सौम्यस्वभाव सूतजी ! आप युग-युग जीयें; क्योंकि मृत्युके प्रवाहमें पड़े हुए हमलोगोंको आप भगवान् श्रीकृष्णकी अमृतमयी उज्ज्वल कीर्तिका श्रवण कराते हैं ॥ ११ ॥ ❀ ❀ यज्ञ करते-करते उसके धूएँसे हमलोगोंका शरीर धूमिल हो गया है । फिर भी इस कर्मका कोई विश्वास नहीं है । इधर आप तो वर्तमानमें ही भगवान् श्रीकृष्णचन्द्रके चरण-कमलोंका मादक और मधुर मधु पिलाकर हमें तृप्त कर रहे हैं ॥ १२ ॥

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ १३ ॥

को नाम तृप्येद् रसवित्कथायां महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥ १४ ॥
तन्नो[1] भवान् वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ।
हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन्[2] ॥ १५ ॥
स वै महाभागवतः परीक्षिद् येनापवर्गाख्यमदभ्रबुद्धिः ।
ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥ १६ ॥

१. प्रा० पा०—ततो । २. प्रा० पा०—विद्वान् ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

भगवत्संगिनो विष्णुभक्तास्तेषां संगस्य यो लवोऽल्यल्पः कालस्तेनापि स्वर्गं न तुलयाम समं न पश्याम न चापवर्गम् । संभावनायां लोट् । मर्त्यानां तुच्छा आशिषो राज्याद्या न तुलयामेति किमु वक्तव्यम् ॥ १३ ॥ ❀ ❀ एवं सत्संगमभिनंद्य श्रवणौत्सुक्यमाविष्कुर्वंति । को नामेति । रसविद्रसज्ञः । महत्तमानामेकांतेन परमयनमाश्रयो यस्तस्य कथायाम् । अगुणस्य प्राकृतगुणरहितस्य । कल्याणगुणानामंतं ये योगेश्वरास्तेऽपि न जग्मुरेतावंत इति न परिगणयांचक्रुः । भवः शिवः पाद्मो ब्रह्मा च मुख्यौ येषां ते ॥ १४ ॥ ❀ ❀ नोऽस्माकं मध्ये भगवान्प्रधानं सेव्यो यस्य स भवान्नः शुश्रूषां हरेश्चरितं विस्तारयतु ॥ १५ ॥ ❀ ❀ तच्च शुकपरीक्षित्संवादेन कथयेत्याहुः स वा इति द्वाभ्याम् । वैयासकिना श्रीशुकेन शब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेनापवर्ग इत्याख्या यस्य तत् । खगेंद्रध्वजस्य हरेः पादमूलं भेजे ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मात्तादृशसाधुसंगमहानिधेर्माहात्म्यमस्मदनुभवगोचरीकृतं कियद् ब्रूम इत्याहुः । स्वर्गं कर्मफलमपवर्गं ज्ञानफलं च । यतः साधुसंगेन परमदुर्लभाया भक्तेरंकुरो हृदि उद्भवतीति भावः । तत्र भक्तेः साधनस्यापि साधुसंगलवेनापि कर्मज्ञानादेः फलं संपूर्णमपि न तुलयाम किमुत बहुकालव्यापिना साधुसंगेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन प्रेम्णेति च कैमुत्यातिशयो द्योतितो भवति । तथात्र संभावनार्थलोटा तोलने संभावनामेव न कुर्मः । न हि मेरुणा सर्षपं कश्चित्तुलयतीति द्योत्यते । बहुवचनेन बहूनां संमत्या नैषोर्थः केनचिदप्रमाणीकर्तुं शक्यत इति व्यज्यते । "भगवत्संगिसंगस्य" इत्यनेन "न तथास्य भवेत्क्लेशो बन्धश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसस्तथा तत्संगिसंगतः" इति योषित्संगादपि योषित्संगिनां यथा संगोऽतिनिंद्य उक्तस्तथैव भगवत्संगादपि भगवत्संगिनां संगोऽतिप्रशस्य इत्यभिलषणीय इति बोध्यते ॥ १३ ॥ ❀ ❀ ननु सत्यमेवं प्रशस्यते साधुसंगो यतस्तं विना श्रीकृष्णकथास्वादो न लभ्यते स युष्माभिर्लब्ध एवेति किं पुनस्तस्यैव पौनःपुन्येनेत्यत आह—क इति । कः तृप्येदिति महामाधुर्यमुक्तम् । महैश्वर्यमाह—नान्तमिति । परायाः सर्वोत्कृष्टशक्तेर्वाऽयनस्य "परास्य शक्तिर्विविधैव श्रूयते" इत्यादिश्रुतेः । यद्वा को ब्रह्मा नामेति प्रसिद्धम् । तृप्येन्नेत्यर्थः । यद्वा न कोपीत्यर्थः ॥१४॥ ❀ ❀ यतोऽलम्बुद्धिर्नास्ति तत्तस्माद्धेतोः । हे विद्वन्निति । सर्वथा ज्ञानवानसि त्वं वक्तुं समर्थ एवेति भावः । भगवतां सौभाग्यवतां पुंसां मध्ये प्रधानो भवान् उदारं चतुर्वर्गप्रदं शुद्धं मायातीतम् । महतां ब्रह्मादीनामतिशयेन श्रेष्ठो महत्तमः एक एवान्ते प्रलये यः स एकान्तः । यद्वांते एक एकान्तः, राजदन्तादिवत्समासः । पराणां मुक्तानामाश्रयो विचाराधारः महत्तमश्चासावेकान्तश्चेति महत्तमैकान्तः स चासौ परायणश्चेति तथा तस्य । शुश्रूषतामिति स्वेषां श्रवणौत्कण्ठ्यमुक्तम् ॥ १५ ॥ ❀ ❀ हरेरुदारचरितानामानन्त्यात्तेषां मध्ये किं वक्ष्यामीति प्रश्नो मा भूदिति स्वाभिलषितचरितमित्याहुः । तन्नेति । तीर्थेनेदमेव पद्यं पूर्वं पठितमित्याह—ननु ज्ञानादेव मोक्ष इति । ज्ञानाय तत्फलाय मोक्षाय च कथं न स्पृहयथेति चेदस्माकं भक्तानां भगवच्चरितास्वादनं ज्ञानं तत्फलं भगवत्पदप्राप्तिरेव मोक्ष इति परीक्षिद्दृष्ट्यैवाहुः । तच्चरितं भवान्वितनोतु येन स वै परीक्षित्खगेन्द्रध्वजस्य भगवतः पादमूलं प्राप । ननु द्वादशस्कन्धे परीक्षिदपवर्गं प्रापेति प्रसिद्धेः सत्यम् । अपवर्ग इत्याख्या यस्य तद्भक्तेर्भगवत्पादमूलमेवापवर्ग इत्युच्यते । वक्ष्यते च पंचमस्कन्धे "यथावर्णविधानमपवर्गश्च भवति योऽसौ भगवति भक्तियोगः" इति । येन कथंभूतेन । वैयासकिशब्दितेन । यथैव तत्पादमूलमपवर्गशब्देनोच्यते तथैव तच्चरितमपि ज्ञानशब्देन वैयासकिनोच्यते । अतो ज्ञानेन परीक्षिदपवर्गं प्रापेति प्रसिद्धिर्नानृतेत्यर्थः । एतेन "स प्रेत्य गतवान्यथा" इति प्रश्नस्योत्तरमुक्तम् ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

यत एवमत एव स्वर्गमोक्षादयोऽपि न भगवत्संगिसंगलेशेनापि तुल्या इत्यभिप्रायेणाह तुलयामेति । भगवत्संगिनः त्वादृशस्य यः संगः तस्य लवेन लेशमात्रेणापि स्वर्गमपुनर्भवं मोक्षं चापि न तुलयाम न तुल्यं मन्यामह इत्यर्थः, यतस्तेन स्वर्गमोक्षावेव न तुलयामः किं पुनर्मर्त्यानामाशिषोऽर्थकामादीन् तुलयामेति ॥ १३ ॥ ❀ ❀ न च श्रुतभगवद्गुणकर्मवत्किं पृच्छसि तत्राह क इति । महत्तमानामेकांतं परमुत्कृष्टमयनं प्राप्यःप्रापक आधारश्च ईयते इत्ययनमीयत्यनेनेत्ययनमीयत्यस्मिन्नित्ययनमिति त्रिधा व्युत्पन्नानामयनशब्दानां तंत्रेण निर्देशात्तस्य भगवतः कथायां विषयभूतायां रसज्ञश्चेत्को नाम पुमान् तृप्येत न कोऽपीत्यर्थः । श्रुतानामेव भगवद्गुणानां कर्मणां पुनः श्रवणेन को वा रसो निष्पद्यते इत्याशंकां निराकुर्वन् भगवंतं विशिनष्टि यस्यागुणस्य हेयगुणरहितस्य गुणानामंतमवधिं रुद्रचतुर्मुखादयो योगेश्वरा अपि न जग्मुः अश्रुतानामपि गुणकर्मणामानंत्याच्छ्रुतानामपि नवायमानत्वाच्च न कोऽपि तृप्येदिति भावः ॥ १४ ॥ ❀ ❀ यत एवमतो महत्तमैकांतपरायणस्य हरेरुदारं विपुलमाचरितं चेष्टितं विशुद्धं शृण्वतां वदतां च विशुद्ध्यावहं भगवानेव प्रधानं मुख्यः श्रेष्ठो यस्य स भवान् हे विद्वन् ! भगवद्गुणस्य हरेरुदारं श्रोतुमिच्छतां नः अस्मभ्यं वितनोतु विस्तारयतु, कथयतु इति यावत् ॥ १५ ॥ ❀ ❀ संप्रति प्रष्टव्यं पृच्छति

स वा इति द्वाभ्याम् । स उक्तविधो महाभागवतोऽनल्पबुद्धिः परीक्षिद्येन वैयासकिशब्दितेन शुकोपदिष्टपुराणजेन ज्ञानेन गरुडध्वजस्य भगवतः पादमूलं भेजे प्राप्तः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दीर्घकालीनसत्रकरणमंतरेणाल्पकालीनयज्ञकरणेन शुद्धांतःकरणजन्यज्ञानान्मोक्षः सुकर इत्याशंक्याह तुलयामेति । भगवत्संगिनां वैष्णवानां संगस्य सेवालक्षणस्य सकाशाद्यत्सुखं तस्य लवेनापि लवलक्षकालावच्छिन्नभागेन सह स्वर्गं दुःखासंभिन्नप्रदेशं नाकलक्षणमपुनर्भवं कैवल्यं सम्यक् स्वरूपाभिव्यक्तिजननाभावलक्षणं न तुलयाम तुलयितुं न प्रभवामः लडर्थे लोट् प्रार्थनायां वा । मर्त्यानां मर्त्यशरीरभोगराज्यादिसंपदः किमुत न तुलयामेति किं वक्तव्यं सायुज्यादिविशिष्टफलहेतुत्वं नांतरंगत्वाच्च सम इत्यर्थः । क्षिप्रमुक्तौ तदनंतरं पूर्वस्मादतिरिक्तफलविशेषाभावाच्चिरसमयसंचीर्णमहत्सेवादिलक्षणसंगस्यातिसुखहेतुत्वेन तस्य चेह दीर्घसत्रकरणव्याजेन संभवादिदमेव सर्वैरनुमंतव्यमित्युक्तमनेनेति भावः ॥ १३ ॥ ❀ ❀ श्रुतभगवत्कथानामप्यस्माकं न तत्कथायामलंबुद्धिरित्याशयवंत आहुरित्याह को नामेति । ये भवपाद्ममुख्याः भवः शिवः पाद्मो ब्रह्मा तौ मुख्यौ येषां ते तथोक्ताः योगेश्वराः तत्तदधिकारियोग्यमोक्षोपायोपदेष्टृप्रधानास्ते अगुणस्य सत्त्वादिगुणरहितस्य सर्वकार्येषु प्रधानस्य वा यस्य ज्ञानादिगुणानामंतमवसानं न जग्मुः को नाम पुमांस्तस्य मुक्तामुक्तब्रह्मादीनां महत्तमानामेकान्ततो नियमेन परायणस्य उत्तमाश्रयस्य महत्तमेभ्यः एकांततः पराया उत्कृष्टायाः श्रियोऽप्ययनस्य वा हरेः कथायां तृप्येदलम्बुद्धिमाप्नुयादित्यन्वयः । कीदृशः रसवित् सारज्ञानी विद्वान् ॥ १४ ॥ ❀ ❀ ततः किमिति तत्राह तत इति । अलंबुद्धिर्नास्तीति यतस्ततो हे विद्वन् ! भगवतां पुंसां प्रधानो भवान् हरेरुदारं चरितमस्माकं वितनोतु विस्तारयतु इत्यन्वयः । भगवानेव प्रधानो यस्य मते स तथेति वा महत्तमश्च एकांतश्च परायणश्चेति महत्तमैकांतपरायणः महतां ब्रह्मादीनामतिशयेन श्रेष्ठः अंते प्रलये एक एव न द्वितीयोऽस्ति परा मुक्तास्तेषामाश्रयः शुश्रूषतामित्यनेन श्रवणशीलत्वं स्वाभाविकमिति दर्शयति ॥ १५ ॥ ❀ ❀ हरेरुदाराचरितानामनंतत्वात्तेषां मध्ये किं वक्ष्यामीति प्रश्नो मा भूदित्यभिलषितचरितमिदमित्याहुरित्याह तन्न इति । तदाख्यानमस्माकं आख्याहीत्यन्वयः । परमुत्कृष्टं पुण्यं पुनानं असंवृतः स्पष्टोऽर्थः पुरुषार्थो यस्माद्भवति तथोक्तं तत् । अत्यद्भुतानां योगानां भक्तिज्ञानादिलक्षणानां निष्ठा प्रतिपाद्यतया नितरां स्थितिर्यस्मिंस्तत्तथोक्तं तत्कालतो देशतश्चानंतस्यापरिच्छिन्नस्य हरेश्चरितेनोपपन्नं सहितं तथा परीक्षित्संबंधि भागवतानामभिरामं मनोहरं भागवताः अभिरमंते यस्मिन्निति वा भगवत्संबंधित्वाद्वाऽभिरामम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तुलयामेति तैः । तत्र सम्भावनायां लोडिति । तुलयितुं सम्भावनामपि न कुर्मः किमुत तुलनां न कुर्म इत्यर्थः ॥ १३ ॥ ❀ ❀ योगस्य भक्तियोगस्य ईश्वराः दातुमदातुञ्च समर्थाः ॥ १४-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मात् त्वादृशसाधुसङ्गमहानिधेर्माहात्म्यमस्मदनुभवगोचरीकृतं कियद् ब्रूम इत्याहुः । भगवत्सङ्गिनो भक्तास्तेषां सङ्गस्य यो लवोऽत्यल्पः कालस्तेन स्वर्गं कर्म्मफलम् अपुनर्भवं मोक्षं च ज्ञानफलं न तुलयाम मर्त्यानां तुच्छा आशिषो राज्याद्याः किमुत वक्तव्यं न तुलयामेति । यतः साधुसङ्गेन परमदुर्लभाया भक्तेरंकुरो हृद्युद्भवतीति भावः । तत्र भक्तेः साधनस्यापि साधुसङ्गस्य लवेनापि कर्म्मज्ञानादेः फलं सम्पूर्णमपि न तुलयाम किमुत बहुकालव्यापिना साधुसङ्गेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन प्रेम्णेति च कैमुत्यातिशयो द्योतितो भवति । तथात्र सम्भावनार्थकलोटा तोलने सम्भावनामेव न कुर्म्मः । न हि मेरुणा सर्षपं कश्चित्तुलयतीति द्योत्यते । बहुवचनेन बहूनां सम्मत्या नैषोऽर्थः केनचिदप्रमाणीकर्त्तुं शक्यते इति व्यज्यते । भगवत्संगिसंगस्य इत्यनेन–'न तथास्य भवेत् क्लेशो बन्धश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसस्तथा तत्संगिसंगतः' इति । योषित्संगादपि योषित्संगिनां संगो यथातिनिन्द्य उक्तः तथैव भगवत्संगादपि भगवत्संगिनां संगोऽतिवन्द्योऽतिप्रशस्योऽत्यभिलषणीय इति बोध्यते ॥ १३ ॥ ❀ ❀ ननु सत्यमेव प्रशस्यते साधुसंगो यतस्तं विना कृष्णकथास्वादो न लभ्यते स युष्माभिर्लब्ध एवेति किं पुनस्तस्यैव पौनःपुन्येनेत्यत आह को नामेति । रसविद्रसज्ञश्चेत् तदा को नाम महत्तमानाम् एकान्तेन परम् अयनं आश्रयो यस्तस्य कथायां तृप्येदिति महामाधुर्य्यमुक्तम् । महैश्वर्य्यं चाह नान्तमिति । यतः अगुणस्य प्राकृतगुणरहितस्य गुणानां चिन्मयानाम् अन्तं ये योगेश्वरास्तेऽपि न जग्मुः ॥ १४ ॥ ❀ ❀ नोऽस्माकं मध्ये भगवान् प्रधानं सेव्यो यस्य सः भवान् । नोऽस्माकं शुश्रूषतां सम्बन्धेन । विशुद्धं मायातीतम् ॥ १५ ॥ ❀ ❀ ननु ज्ञानादेव मोक्ष इति ज्ञानाय तत्फलाय मोक्षाय च कथं न स्पृहयथेति चेदस्माकं भक्तानां भगवच्चरितास्वादनं ज्ञानं तत्फलं भगवत्पदप्राप्तिरेव मोक्ष इति परीक्षिद्दृष्टान्तेनैवाहुः । तच्चरितं भवान् वितनोतु येन स वै परीक्षित् खगेन्द्रध्वजस्य भगवतः पादमूलं आप । ननु द्वादशस्कन्धे परीक्षिदपवर्गं प्रापेति प्रसिद्धिः सत्यम् । अपवर्ग इत्याख्या यस्य तद्भक्तैर्भगवत्पादमूलमेवापवर्ग उच्यते । वक्ष्यते च पंचमस्कन्धे–'यथावर्णविधानमपवर्गश्च भवति

योऽसौ भगवति भक्तियोगः' इति। येन कथम्भूतेन वैयासकिशब्दितेन। यथैव तत्पादमूलमपवर्गशब्देनोच्यते तथैव तच्चरितमपि ज्ञानशब्देन वैयासकिनोच्यते। अतो ज्ञानेन परीक्षिदपवर्गं प्रापेति प्रसिद्धिर्नानृतेत्यर्थः एतेन स प्रेत्य गतवान् यथेति प्रश्नस्योत्तरमुक्तम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवत्संगिनां संगस्य लवेन लेशमात्रेण न स्वर्गं न चाऽपुनर्भवं मोक्षं तुलयाम सम्भावनायां लोट्, किं पुनर्मर्त्यानामाशिषः साम्राज्याद्याः न तुलयामेति ॥ १३ ॥ ❀ ❀ सत्सङ्गमाहात्म्यमुक्त्वा तत्फलभूते भगवत्कथाश्रवणे आत्मनः श्रद्धातिशयं सूचयति क इति "य आत्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपास" इत्यादिश्रुतिभ्योऽगुणस्य हेयगुणरहितस्य "अनंतकल्याणगुणात्मकोऽसावि'त्यादिश्रुतिप्रोक्तानां गुणानामंतमवधिं भवपाद्ममुख्याः रुद्रपाद्मप्रधाना न जग्मुः, यद्यपि तथापि महत्तमानामेकांतं निरतिशयावधिभूतं परममुत्कृष्टमीयते इत्ययनं प्राप्यं ब्रह्म तस्य कथायां यथाशक्ति यथोपदेशं गुणैकदेशवर्णनरूपायां रसविच्चेत्को नाम तृप्येत् न कोऽपीत्यर्थः ॥ १४ ॥ ❀ ❀ तत्तस्मात् हे विद्वन्! नोऽस्माकं मध्ये भगवत्प्रधानः शुश्रूषतां श्रोतुमिच्छतां नोऽस्मभ्यं हरेश्चरितं वितनोतु विस्तारयतु ॥ १५ ॥ ❀ ❀ शुकपरीक्षित्संवादद्वारा हरिचेष्टितं श्रावयेत्याह स इति द्वाभ्याम्। स उक्तभावः परीक्षित् येन वैयासकिशब्दितेन शुकोपदिष्टेन ज्ञानेन ज्ञानध्यानादिसाधनपरेणाख्यानेनापवर्गाख्यं गरुडध्वजपादमूलं भेजे प्राप्तः तत्र आख्याहीत्युत्तरेणान्वयः ॥ १६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं कथायामत्यादरमुक्त्वा तस्मिन्नत्यादरमाह तुलयामेति। भगवता सह संयोगस्य तादृशस्य यः संगः तस्यैकदेशेनापि स्वर्गं न तुलयाम यथा त्वत्सङ्गेन कथामृतपाने सुखं जातं तथा स्वर्गे भविष्यतीति न कल्पयामः। तदा समानत्वापादनेन अनादरः स्यात् स्वर्गे हि "यन्न दुःखेन संभिन्नमि"ति वाक्यात्। दुःखासंश्लिष्टः सुखविशेषः स च जीवोपभोग्यः। जीवात्मानंदात् न्यूनः। तस्यैव जीवावरणनिवृत्तिरूपः। अपुनर्भवः यतो न पुनर्भवतीति। स च मानुषानन्दापेक्षया उत्तमोऽपि ब्रह्मानन्दापेक्षया स एव वा उभयथापि आनन्दमयस्य भगवतस्तुल्यो न भवतीति संख्यया परिमितत्वेन निरूपणात्। अपरिमितो हि भगवदानन्दः विलक्षणश्च। अन्यथा जीवस्य ब्राह्मभावो नोच्यते। ब्रह्मभूतस्य वा भगवत्प्रवेशः नहि द्रोणमात्रेऽपि पिण्याके भक्षिते मुष्टिमात्रशर्करारसानुभवो भवति। ब्रह्मानन्दे ब्रह्मणोऽपि पूर्णज्ञानवतोऽपि सनकादेः भगवदानन्दाकांक्षणात् अतो भगवता सह स्वर्गापवर्गयोर्न तुल्यता। भ्रान्तस्तुलयतु नाम वयं तु न तुलयामः। मर्त्यानामाशिषश्चित्तवृत्तिः पित्राद्याशीः आशिष इति द्वितीयाबहुवचनं तासां निषेधो लौकिके तत्रादरविशेषात्। लौकिके तत्रादरविशेषात् लौकिकवैदिकमार्गापेक्षया पुष्टिमार्ग उत्कृष्ट इत्युक्तं भवति ॥ १३ ॥ ❀ ❀ एवं वक्तुः प्रोत्साहनमुक्त्वा स्वकीयं भाग्यातिशयमाह को नाम तृप्येदिति। न ह्येतादृशे अमृते कश्चित् तृप्यति अतृप्तिप्रकारस्तु पूर्वं निरूपितः सत्त्वेऽपि इच्छासाधकत्वनिरूपणात् तेन औषधवत् तृप्तिहेतुत्वं न केवलं न तद्रूपत्वं किंतु रसत्वमिति, अतः स्वस्मिन्नेव रुचिं जनयति। यद्यपि साधारण्येन श्रोत्रमात्रे रसं जनयति। तथापि परमसंसाररोगव्याप्तस्य अन्तःप्रवेशाभावेन सकृदपि रसाज्ञानात् तस्य रुचिर्मा भवतु यस्तु रसवित् स कथं तृप्यते इत्यर्थः। तत्रापि कथायां कथारसस्य अतृप्तिहेतुर्लोकेऽपि सिद्धः, कर्मज्ञाननिष्ठास्तृप्यंतीति चेत्तत्राह महत्तमाः भक्तिसहितज्ञानिनः तेषामेकान्तनियमेन परं यदयनमुत्कृष्टं यत्प्राप्तिस्थानं फलरूपमिति यावत् यस्य भगवतः यद्यपि केवलकर्मज्ञानिनः। रसवित्पदेनैव निवर्त्तिताः तथापि लोकप्रतीत्या साधनत्वेन तेषामपि रसवित्त्वं पदांतरेऽप्युत्कृष्टाः न निवर्त्तंते फलत्वात् तदा ते तदनुवर्त्तिनः कथं निवर्त्तेरन् अत्र निवृत्तिः केवलं रसाज्ञानादेव नान्यत इति सिद्धं तत्र संमतिमाह नांतमिति। अगुणस्य गुणानामंतं परिच्छेदं न जग्मुः। यथारुचि नित्यकथा कृतैव कथायां तथा गुणा अपि न परिच्छिन्नाः अतो नालंबुद्धिहेतवः अपेक्षितात् परिच्छिन्नादेव निवर्त्तते। अतः प्रमाणप्रमेययोः नित्यत्वात्। अपेक्षान्तराभावात् प्रतिबन्धकाभावाच्च नालं बुद्धि हेतवः अपेक्षितात् परीच्छिान्नादेव निवर्त्तते अतः प्रमाणप्रमेययोः नित्यत्वात् अपेक्षान्तराभावात् प्रतिबन्धकाभावाच्च नालंबुद्धिः संभवतीत्युक्तम्। अगुणस्य गुणानामिति विरोधाभावेन असंख्यता सूचिता। यो हि गुणवान् स परिमितगुणो भवति यथा देवदत्तादिः, अगुणस्येति गुणाः पर्वताम्रनदीजलवदपरिमिता एव भवंति न च ते अधिकाः रसानुभवात् प्रेक्षावतां च प्रवृत्तेः न च गुणवान् अद्वैतभङ्गापत्तेः, अतो भगवानेव स्वरूपेणैव अविक्रियमाण एव तादृशगुणरूपो भवतीति कारणस्य नित्यत्वात् प्रतिक्षणं ज्ञानानि गुणा अनंता एव भवंति। गणकानां गणनापर्यवसानाच्च अनन्तत्वं तदाह योगेश्वर इति। अलौकिका भगवद्गुणाः अलौकिकप्रमाणगम्या इति वा तत्रापि न साधारणयोगगम्या इति योगेश्वरा इत्युक्तं, भवो महादेवः पाद्मो ब्रह्मा नाभिकमले जातः भक्तियोगयोः महादेवस्य प्राधान्यात् प्रथमतो ग्रहणं प्रमाणमुख्यतया भवग्रहणं प्रमेयमुख्यतया पाद्मग्रहणं भवतीति व्युत्पत्त्या अभियुक्तब्रह्मरूपवद्रूपमेव भवस्य रूपमिति। 'वेद शिवः शिवो वेदे'ति वाक्यात्। भगवन्नाभि-

कमलोद्भवत्वात् ॥ १४ ॥ ❀ ❀ तज्जननत्वेन तत्त्वं, प्रमाणप्रमेयप्रमातृणामात्यंतेन योग्यत्वात् गुणान् कथयेत्याहुः तन्नो भवानिति। तव चैतदेव कृत्यं यतो भगवान् विनिश्चीयते येन भगवदीयानां मध्ये प्रधानो मुख्यः प्रधानशब्दः प्रकृतिवाचक एव नित्यनपुंसकः भगवान् प्रधानं यस्येति वा, किंच महत्तमानां भगवद्भक्तानामेकांततः परायणं परमप्राप्यफलम्। अतस्तवापि महत्त्वसिद्धये भगवद्गुणकथनमावश्यकमित्युक्तम्। कथनक्लेशोऽपि नास्तीत्याह हरेरिति। भगवद्व्यतिरेकेणापि गुणैरेव सर्वे पुरुषार्था दीयंत इति उदारं चरितमित्युक्तं विशुद्धमिति। विशुद्धमेव हि सर्वे प्रयासाः सर्वे चमत्काराः, चरित्रं च विशेषाकारेण शुद्धिः यस्मादिति। स्वस्य श्रोतृत्वमाह शुश्रूषतामिति। विशेषेण तनोतु विस्तारयतु प्रार्थनायां लोट्, वक्तृत्वयोग्यतामाह विद्वन्निति ॥ १५ ॥ ❀ ❀ एवं सामान्यतः कथनार्थं प्रार्थयित्वा श्रोतव्यं विशेषाकारेण पृच्छति स वै महाभागवत इति। साधनफलयोर्यत्र न व्यभिचारः तत्श्रोतव्यं तत्र श्रोतुरधिकारिविशेषणं महाभागवत इति। भगवद्भक्तो भागवतः। यस्तु भागवतानामुत्तमत्वेन गृहीतः। सफलमुख्यो महाभागवतः अत्यन्तं भगवत्कृपावलोकितः। श्रोता मुख्य इत्युक्तं भवति। तस्य तथात्वे हेतुमाह परीक्षिदिति। पूर्वदृष्टमनुध्यायन्निति निरुक्तथा परीक्षित्त्वं येनोपदेशेन खगेन्द्रध्वजपादमूलं भेजे तत्। कथयेत्यग्रेण सम्बन्धः। शास्त्रान्तरे ब्रह्म इति मोक्ष इति यत्स्वरूपं व्यपदिश्यते तदेवास्मिन् शास्त्रे वरणीयं तद्वैकुण्ठाख्यं 'तद्विष्णोः परमं पदमि'ति श्रुतेः। परमभागवतस्यापि भगवच्चरणारविन्दगमनेच्छया समं तदवश्यं श्रोतव्यं, महतामपि येन विना कार्यं न सिद्ध्यति तत्साधनमित्यभिधीयते। ननु तत् ज्ञानं भविष्यति, तत्साधनमिति निश्चीयते तच्च प्रसिद्धमेवेति किं कथनेनेत्याशंक्याह–अदभ्रबुद्धिः अनल्पा बुद्धिर्यस्य पूर्वमेव तस्य बुद्धिः स्थिता। अतो न बुद्धिरूपं ज्ञानं साधनं किंतु वैयासकिशब्दितेन ज्ञानेन तत्तु ज्ञानं नित्यं सिद्धमेव, वैयासकिना शुकेन केवलं शब्दितमुच्चरितं भागवताख्यं ज्ञानं चैतन्यरूपं खगेन्द्रो गरुडः स ध्वजे यस्य कालचिह्नतां प्राप्तः कालात्मकः। सोऽथ सुपर्ण आसीदिति वाक्यात् विष्णोः परमं पदमिति श्रुत्यनुरोधेनैतदुक्तं मूलपदं पुनरागमनाभावाय ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तुलयामेत्यत्र। ननु स्वर्गापवर्गयोः कथं न तत्समानत्वमित्याकाङ्क्षायां तयोः स्वरूपं क्रमेणाहुः स्वर्गो हीत्यादि। न्यूनत्वमेतस्य जन्यत्वात्पारक्यत्वाच्च बोध्यम्। तस्यैव जीवावरणनिवृत्तिरूप इति। 'जीवो जीवं विहाय मा मि'त्यादित्याज्यस्य लिङ्गस्यापि जीवत्वकथनात्। जीवरूपं यदावरणं तन्निवृत्तिरूप इत्यर्थो बोध्यः। स एवेति ब्रह्मानन्द एव। सङ्ख्ययेति आनन्दमीमांसास्थसङ्ख्यया। ब्रह्मानन्दस्य जीवानन्दाद्विलक्षणत्वे भगवदानन्दस्य तदुभयविलक्षणत्वे च मानमाहुः अन्यथेत्यादि। नन्वानन्दमीमांसायामिव 'यतो वाचो निवर्तन्ते' इति मन्त्रेपि ब्रह्मपदेनोभयत्रैकस्यैव ब्रह्मानन्दस्य प्रतीतेः ब्रह्मानन्दस्य कथं भगवदानन्दतो भेदावगतिः, कथं तत्र च न्यूनत्वावगतिरित्यत आहुः ब्रह्मानन्द इत्यादि। तथा च भगवदपेक्षया ब्रह्मानन्दे न्यूनता। ब्रह्मणो न्यूनतेत्युभयमप्येकेनैव कार्येणावगम्यते इति श्रुतौ शब्दसाधारण्येऽप्यर्थोवगन्तव्य इत्यर्थः। अन्यथा वदद्व्याघातापत्तेरिति। सिद्धमाहुः अत इत्यादि। ननु मास्तु भगवत्तुल्यत्वम्, तथापि भगवत्सङ्गिसङ्गतुल्यत्वे का वानुपपत्तिरित्यत आहुः साधनेत्यादि। भक्तिसाधनं भगवत्सङ्गिसङ्गः तत्तौल्यापगमेपि सा न वक्तुं शक्येत्यर्थः। तदुपपादयन्ति मुक्तो हीत्यादिना। इदमिति मुक्तत्वम्। मोक्ष इति। स्वरूपोपकारीति, शेषः। स्वतन्त्रनियतपाक्षिकयोरिति स्वतन्त्रनियतं च पाक्षिकं चेति द्वन्द्वः ॥ १३ ॥ ❀ ❀ को नामेत्यत्र। पूर्वमिति। प्रथमाध्यायस्थे 'वयं तु न वितृप्याम' इति श्लोके। तस्येति कथास्वरूपस्य। तद्रूपत्वमिति रसजनकत्वम्। तस्येति तद्रूपस्य उत्कृष्टफलरूपस्येत्यर्थः। साधनत्वेनेति। 'यस्य स्मृत्ये'ति 'ज्ञानं यतः प्रतिनिवृत्त' त्यादिवाक्यैः कर्मपूर्तिज्ञानयोः साधनत्वेन ज्ञानात्साधनत्वरूपे यो रसस्तद्वित्त्वम्, न तु फलत्वेन रूपेणेति तद्व्यावृत्तिरित्यर्थः। विरोधाभासत्वेनासंख्या तत्त्वमुपपादयन्ति यो हीत्यादि। पर्वताग्रनदीजलवदिति। यथा ब्रह्मगिरेः पतन्ती गोदा न कदापि विच्छिद्यत्यपरिमिता भवति तथेत्यर्थः। उपपत्तिमुक्त्वा प्रमाणमाहुः गणकानामित्यादि। भवस्य प्रमाणमुख्यरूपत्वमुपपादयन्ति भवतीत्यादि। 'वेदः शिवः शिवो वेदः, वेदाभ्यासी सदाशिवः' 'पाषाणः शिवतां याति वेदाभ्यासाद् द्विजः किम्वि' ति वाक्यं शिवपुराणीयम्, तस्माद्भवस्य मुख्यप्रमाणरूपत्वमित्यर्थः। तत्त्वमिति प्रमेयमुख्यत्वम्। यद्यपि निःश्वसितश्रुतेः 'प्रचोदिता येने'ति वाक्याच्च भगवत एव वेदोत्पत्तेस्तद्रूपस्य शिवस्यापि प्रमेयमुख्यत्वं सम्भवति, तथापि प्रमाणस्वरूपतया तत्कोटिप्राबल्यात् मूले पाद्मस्य पृथगुल्लेखाच्चात्र प्रमाणरूपत्वमेवादृतं ज्ञेयम् ॥ १४ ॥ ❀ ❀ तन्नो भवानित्यत्र। नित्यनपुंसक इति। सुहृद्वाचकमित्रशब्दवत्। तथा च मुख्यवाचकस्य पुल्लिङ्गत्वेप्यदोष इत्यर्थः। कोशानुरोधेन सम्बन्धं षष्ठ्यां सम्बन्धाध्याहारक्लेशेन च पक्षान्तरमाहुः भगवानित्यादि। स वा इत्यत्र। तद्विष्णोरिति 'सोध्वनः पारमाप्नोति विष्णोः परमं पद'मिति काठकादिवाक्येषु तथा निर्णयादित्यर्थः ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अतो भगवद्भक्तस्य तव सङ्गोऽप्यलौकिको भगवत्कृपयैव जात इत्याशयेनाहुः–तुलयामेति। भगवत्सङ्गिनो भगवद्भक्तास्तेषां सङ्गस्य यो लवः स्वल्पः कालस्तेनापि स्वर्गं कर्मफलमपुनर्भवं मोक्षं च ज्ञानफलं वयं न तुलयाम भगवद्भक्त-

सङ्गक्षणे स्वापरिमितभगवदानन्दाभिव्यञ्जिका भक्तिरुत्पद्यते स्वर्गे तु मानुषानन्दापेक्षयाऽधिकानन्दे सत्यपि न सर्वथा तापनिर्मोकः मोक्षे वाऽऽत्मानन्दस्य स्वर्गानन्दापेक्षयाऽऽधिक्येऽपि भगवदानन्दापेक्षया न्यूनत्वमेव । अतो न भक्तसङ्गक्षणतुल्यतया स्वर्गमोक्षौ पश्याम, तर्हि मर्त्यानां मनुष्याणामतितुच्छा आशिषो राज्यस्त्रीपुत्राद्यास्तत्तुल्यतया न पश्यामेति किमुत वक्तव्यमित्यन्वयः । अत्र भक्तेः साधनस्यापि साधुसङ्गस्य लवेनापि यदि कर्मज्ञानादेः फलं सम्पूर्णमपि न तुलयाम तर्हि किमुत बहुकालव्यापिना साधुसङ्गेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन परमप्रेम्णेति कैमुत्यातिशयो द्योतितः । तथाऽत्र सम्भावनार्थकलोट्लकारेण तोलने सम्भावनामपि न कुर्मः नहि मेरुणा सर्षपं कश्चिदपि तोलयितुमुत्सहते इति द्योत्यते । बहुवचनेन बहूनां सम्मत्या नैषोऽर्थः केनचिदप्यप्रमाणीकर्तुं शक्यते इति व्यज्यते । 'भगवत्सङ्गिसङ्गस्य' इत्यनेन 'न तथाऽस्य भवेत्क्लेशो बन्धश्चान्यप्रसङ्गतः । योषित्सङ्गाद्यथा पुंसस्तथा तत्सङ्गिसङ्गतः' इति योषित्सङ्गादपि योषित्सङ्गिनां सङ्गो यथाऽतिनिन्द्य उक्तस्तथैव भगवत्सङ्गादपि भगवत्सङ्गिनां सङ्गोऽतिवन्द्योऽतिप्रशस्योऽत्यभिलषणीयश्चेति बोध्यते ॥ १३ ॥ ❀ ❀ नन्वश्रुतभगवत्कथानां तत्कथाद्वारा परमानन्दजनकत्वाद्भवतु भगवत्सङ्गिसङ्गः सफलः, भवन्तस्तु श्रुतभगवत्कथा अन्यथा तन्माधुर्यानुभवाभावेनैवं प्रशंसा नैव घटेतातो भवतां किं तत्सङ्गेनेत्याशङ्क्याहुः—क इति । महत्तमाः परमविवेकिनो भगवद्भक्तास्तेषामेकान्तेनेतरपरित्यागेन परं सर्वत उत्कृष्टमयनमाश्रयो यस्तस्य भगवतः कथायां को नाम तृप्येत् ? न कोऽपीत्यर्थः । ननु बहवोऽपि कथायामुदासीना दृश्यन्ते इत्याशङ्क्याहुः—रसविदिति, कथारसानभिज्ञाः पशुतुल्यास्तृप्यन्तु रसाभिज्ञस्तु कस्तृप्येदित्यर्थः । नन्वश्रुतेषु भगवद्गुणेषु अभिनवरसानुभवात्तत्र तृप्तिर्मा भवतु, श्रुतेषु तु पुनः श्रवणेऽपि को वा रस उत्पद्यते येन तत्र तृप्तिर्न स्यादित्याशङ्क्याहुः—नान्तमिति । भवो महादेवः पाद्मो ब्रह्मा च मुख्यौ येषां ते ये योगेश्वरास्तेऽप्यगुणस्य लौकिकहेयगुणरहितस्य अलौकिकगुणानामन्तं न जग्मुः, एतावन्त इति परिगणनां न चक्रुरित्यर्थः । तथाच अश्रुतानामपि गुणानां कर्मणामानन्त्यात् श्रुतानां च नवनवायमानत्वान्न कोऽपि तृप्येदिति भावः ॥ १४ ॥ ❀ ❀ यस्मादस्माकं भगवत्कथायां तृप्तिर्नास्ति तत्तस्मात् हे विद्वन् महत्तमैकान्तपरायणस्य हरेश्चरितं नोऽस्माकं भवानेव वितनोतु विस्तरतः कथयत्वित्यन्वयः । वा इत्येवकारार्थे । भवानेवेत्यत्र तवाज्ञातमत्र किमपि नास्तीति हेतुः सम्बोधनेन सूचितः । तत्रापि हेतुमाहुः—नोऽस्माकं मध्ये भगवानेव प्रधानो मुख्यतया सेव्यो यस्य स भगवत्प्रधान इति । स्वेषां श्रवणाधिकारित्वमाहुः—शुश्रूषतां श्रोतुमिच्छतामिति । श्रवणयोग्यतां सूचयन्तश्चरितं विशिंषन्ति—उदारमिति, धर्मादिचतुर्विधपुरुषार्थप्रदमित्यर्थः । तत्रापि हेतुमाहुः—विशुद्धमिति, शृण्वतां वदतां च विशुद्धताबहमित्यर्थः ॥ १५ ॥ ❀ ❀ एवं सामान्यतो भगवच्चरितं पृष्ट्वा तच्च शुकपरीक्षित्संवादेन कथयेत्याहुः—स वा इति द्वाभ्याम् । स वै प्रसिद्धः परीक्षित् येन वैयासकिशब्दितेन शुकोपदिष्टेन ज्ञानेन ज्ञानसाधनेनाख्यानेन अपवर्गो मोक्ष इत्याख्या यस्य तत् खगेन्द्रध्वजो गरुडगामी भगवांस्तस्य पादमूलं भेजे प्राप तत् पारीक्षितं परीक्षिते कथितमाख्यानं नोऽस्मभ्यमाख्याहि कथयेति द्वयोरन्वयः । ननु परीक्षित् क्षत्रियो भवन्तस्तु ब्राह्मणा अतस्तत उत्कृष्टा अतः किं तदनुष्ठितसाधनेनेत्याशङ्क्य नत्वत्र भगवत्प्राप्तौ जात्युत्कर्षः कारणं किन्तु तद्भक्तिरेव अतस्तस्य परमभक्तत्वात्तदनुष्ठितमस्माभिरपि मुमुक्षुभिरनुष्ठेयमित्याशयेनाहुः—महाभागवत इति । ननु महाभागवतत्वं नाम विषयभोगवैमुख्येन भगवद्भजनपरत्वमेव, तच्च तस्य राज्ञः कथमभूदित्याकाङ्क्षायां तस्य परमविवेकित्वादित्याहुः—अदभ्रबुद्धिरिति । अदभ्रा अनल्पा महती बुद्धिर्यस्य सः ॥ १६ ॥

हिन्दी अनुवाद

भगवत्प्रेमी भक्तोंके लवमात्र के सत्सङ्गसे स्वर्ग एवं मोक्षकी भी तुलना नहीं की जा सकती; फिर मनुष्योंके तुच्छ भोगोंकी तो बात ही क्या है ॥ १३ ॥ ❀ ❀ ऐसा कौन रस-मर्मज्ञ होगा, जो महापुरुषोंके एकमात्र जीवन सर्वस्व श्रीकृष्णकी लीला-कथाओंसे तृप्त हो जाय ? समस्त प्राकृत गुणोंसे अतीत भगवान्के अचिन्त्य अनन्त कल्याणमय गुणगणोंका पार तो ब्रह्मा, शङ्कर आदि बड़े-बड़े योगेश्वर भी नहीं पा सके ॥ १४ ॥ ❀ ❀ विद्वन् ! आप भगवान्को ही अपने जीवनका ध्रुवतारा मानते हैं । इसलिये आप सत्पुरुषोंके एकमात्र आश्रय भगवान् उदार और विशुद्ध चरित्रोंका हम श्रद्धालु श्रोताओंके लिये विस्तारसे वर्णन कीजिये ॥ १५ ॥ ❀ ❀ भगवान्के परम प्रेमी महाबुद्धि परीक्षित्ने श्रीशुकदेवजीके उपदेश किये हुए जिस ज्ञानसे मोक्षस्वरूप भगवान्के चरणकमलोंको प्राप्त किया ॥ १६ ॥

तन्नः परं पुण्यमसंवितार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ।
आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम् ॥ १७ ॥

सूत उवाच

अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः ।
दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥

कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ।
योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद् यमनन्तमाहुः ॥ १९ ॥
एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ।
हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदसंवृतार्थं यथा तथा आख्याहि । तदेव निर्दिशन्ति । परीक्षिते कथितं पारीक्षितमाख्यानं श्रीभागवतं पुराणम् । परं पुण्यं सत्त्वशोधकम् । अत्यद्भुते योगे निष्ठा यस्य । अनन्तास्यचरितैरुपपन्नं युक्तम् । अत एव भागवतानामभिरामं प्रियम् एतैर्विशेषणैः कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितम् ॥ १७ ॥ ❀ ❀ श्रीभागवतव्याख्याने लब्धप्रसंगं महतामादरपात्रमात्मानं श्लाघते द्वाभ्याम् । अहो इत्याश्चर्ये । ह इति हर्षे । वयमिति बहुवचनं श्लाघायाम् । प्रतिलोमजा अप्यद्य जन्मभृतः सफलजन्मान आजाताः । वृद्धानामनुवृत्त्या आदरेण । ज्ञानवृद्धः शुकस्तस्य सेवयेति वा । यतो दुष्कुलत्वं तन्निमित्तमाधिं च मनःपीडां महत्तमानामभिधानयोगो लौकिकोऽपि संभाषणलक्षणः सम्बन्धः विधुनोत्यपनयति ॥ १८ ॥ ❀ ❀ कुतः पुनः किं पुनर्वक्तव्यं तस्यानन्तस्य नाम गृणतः पुंसो महत्तमानामभिधानयोगो दौष्कुल्यं विधुनोतीति । यद्वा नाम गृणतः पुनः कुतो दौष्कुल्यमिति । यद्वा गृणतः पुंसस्तस्य नाम दौष्कुल्यं विधुनोतीति किं वक्तव्यमिति कैमुत्यन्यायमेवाह । अनन्ताः शक्तयो यस्य । स्वतोऽप्यनन्तः । किं च महत्सु गुणा यस्य स महद्गुणस्तस्य भावस्तस्मात् । यं गुणतोऽप्यनन्तमाहुः ॥ १९ ॥ ❀ ❀ एतत्प्रपंचयति त्रिभिः । एतावतेति । तस्य यदसाम्यमनतिशायनं च गुणैस्तत्साम्यं तदाधिक्यं चान्यस्य नास्तीत्यस्यार्थस्य ज्ञानमेतावता सूचितेनालं पर्याप्तं कस्तद्विस्तरतो वक्तुं शक्नोति । तदेवाह इतरान्ब्रह्मादीन्प्रार्थयमानान् हित्वा विभूतिर्लक्ष्मीरनभीप्सोरपि यस्यांघ्रिरेणुं सेवत इति ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

असंवृतार्थमनाच्छादितार्थं परमित्यत्रावांतरतात्पर्येण धर्मज्ञानप्रकाशकत्वेपि मुख्यतात्पर्येण भक्तेरेव प्रकाशकत्वमाह–भागवताभिराममिति । अत एव प्रागुक्तम् "स वै महाभागवतः" इत्यादि । यद्वा परं पुण्यं परमशोधकं यतोऽत्यद्भुतयोगे भक्तियोगे निष्ठा तात्पर्यं यस्य तत् । अनन्तस्य हरेराचरितानि लीलास्तैरुपपन्नं युक्तम् ॥ १७ ॥ ❀ ❀ तादृशब्रह्मर्षीन्प्रति स्वयं तादृशमहापुराणमुपदेष्टुं संकुचंस्तत्र तन्महिमानमेवावलम्बते । अहो इति युग्मेन । विलोमजाताः सूतशब्दप्रयोगात् । अनुवृत्त्या सेवया स्वीकारेण वा ॥ १८ ॥ ❀ ❀ महत्तमाभिधानयोगस्याधिक्यकथनेन नाम्नो न्यूनतामाशंक्याह–यद्वेति । कर्मापेक्षया कर्तुरेव मुख्यत्वमतो नाम्नः कर्तृतामाह–यद्वेति । ननु दौष्कुल्यारम्भकं पापं प्रारब्धमेव तस्य नाशं विना कथं दौष्कुल्यधूननम् । प्रारब्धस्य तु भोगेनैव नाश इति प्रसिद्धेः । नामतः कथं खण्डयतीत्यत आह–यो भगवाननन्तशक्तिरिति । शक्तीनामानन्त्याद्भक्तप्रारब्धखण्डिन्यपि काचित्तस्य शक्तिरस्त्येवेति भावः । तथा च महत्सु स्वभक्तेषु गुणा यस्य स महद्गुणो यस्य तस्य भावस्तस्मात् । यमनन्तमाहुरिति । तेन स्वभक्तेषु तदीयगुणसंक्रमात्तस्मिन्निव तद्भक्तेष्वपि प्रारब्धं न तिष्ठति महान्तोऽनन्ता गुणा अप्राकृता भक्तवात्सल्यादयो यस्य तस्य भावस्तत्त्वं तस्मादिति वा । अत्र महच्छब्दो ह्यानन्त्ये वर्तते । "महती वल्लकीभेदे प्राज्ये तु स्यान्नपुंसकम्" इति मेदिनी । प्राज्यप्रभूताधिकबहुलानन्तशब्दाः पर्यायाः ॥ १९ ॥ ❀ ❀ एतन्महद्गुणत्वम् । ननु ते के गुणास्तत्र तान्वक्तुं कः शक्नोति किन्त्वेतावता सूचितेनालम् । तदेव सूचितमेव । अयं भावः–यद्गुणमाधुर्यमोहिता सती श्रीर्ब्रह्मादीन्महद्गुणानपीच्छतोपि त्यक्त्वा यमनिच्छन्तमपि स्वयमेव तत्पादरजो जुषते । एतेनैव विष्णुस्सर्वेभ्योधिकगुण इति ध्वनितम् ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

तदाख्यानं पुराणं नोऽस्मभ्यमाख्याहि कथय । कथंभूतं वदतां शृण्वतां च परं पुण्यं निरतिशयपुण्यावहं यद्वा परमुत्कृष्टं स्वतुल्याधिकपुराणांतररहितमसंवृता असंकुचिताः स्पष्टा वा अर्था मुमुक्षूणामुपादेयाः शास्त्रार्थाः प्रतिपाद्या यस्मिन् अत्यद्भुता भगवद्भक्तियोगनिष्ठा यस्मात् अनंतस्यापरिच्छिन्नस्वरूपस्वभावस्य भगवतः आचरितैः चेष्टितैः प्रतिपाद्यैरुपपन्नमत एव भागवतानामभिरामं श्रीभागवतमिति भावः भागवतशब्दस्यान्यगामित्वव्युदासाय विशिनष्टि पारीक्षितं परीक्षिता श्रुतम् ॥ १७ ॥ ❀ ❀ इत्थं भगवद्गुणानुवर्णने प्रवर्तितस्तावदात्मानं कृतार्थं मन्यते अहो इति स्वभाग्यं शिरःकम्पेनाविःकरोति तद्भाग्यमित्यत्र तदेव

---

१. प्रा० पा०—चत । २. प्रा० पा०—रसाम्यैरति० ।

दर्शयति वयं विलोमजाता अपि ब्राह्मण्यां क्षत्रियाज्जाता अपि वृद्धानां ज्ञानेन वयसा जन्मना च वृद्धानां भागवतानामनुवृत्त्या हेतुभूतया अधुना जन्मभृतः प्रशस्तदेहभृतः स्मः भवामः। हेत्याश्चर्ये हर्षे वा विलोमजानामपि हेत्वंतरेण प्राशस्त्यमूलको हर्षः आश्चर्यं च युक्तमेवेत्यभिप्रायेणाह दौष्कुल्यमिति। महत्तमानां त्वादृशानामभिधानयोगः श्रवणव्याख्यानसंबंधः दौष्कुल्यं दुष्कुलप्रभवत्वप्रयुक्तं हीनत्वमाधिं मनःक्लेशं वाशु धुनोति निरस्यति॥ १८॥ ❀ ❀ यतो महत्तमानामभिधानयोग एवाधिं दौष्कुल्यं च विधुनोति कुतः पुनः साक्षान्महत्तमैकांतपरायणस्य भगवतो नाम गृणतः कीर्त्तयतः पुंसो दौष्कुल्यमाधिश्च संभाव्येत। ननु कोऽसौ महत्तमैकांतपरायणभूतः के तस्य महिमानः तन्नामग्रहणमात्रस्यैव कथं दौष्कुल्यादिपरिहारकत्वं कथं तद्भक्ताभिधानयोगस्य तत्त्वमित्यतः तं विशिंषन्नाह–यो भगवान्पूर्णषाड्गुण्यः यश्चानंतशक्तिरनंताः शक्तयो यस्य तथाभूतः पावकस्य दाहकत्वशक्तिवन्नामाभिधातृगतदौष्कुल्याद्यपनोदकशक्तिरस्तीति भावः। यश्च स्वरूपेणानंतः यं च महद्गुणत्वादनंतगुणत्वादनंतमाहुः सत्यं ज्ञानमनंतमित्यादयो वेदांतास्तस्य नाम गृणत इत्यन्वयः। अनंतोऽनंतगुणत्वाच्चेत्यनेन तस्मिन् स्वरूपतो गुणतश्चानंत्यमनंतपदप्रवृत्तिनिमित्तमिति सूचितम्। अनेन भक्ताभिधानयोगस्य दौष्कुल्याद्यपनोदकत्वयुक्तानेकगुणाश्रयत्वमुक्तं गुणानां महत्त्वं नामानन्यमनितरसाधारण्यं वा न तु साधारणोऽनवधिकगुणत्वादित्यर्थः॥ १९॥ ❀ ❀ महद्गुणशब्दाभिप्रेतमेव विशदयंस्तत्संगृह्य दर्शयामीत्यभिप्रायेणाह एतावतेति। गुणैर्न विद्यते साम्यं यस्य तैर्न विद्यतेऽतिशायनमतिशयो यस्यासाम्यश्चासावनतिशायनस्तस्य निःसमाभ्यधिकगुणस्येत्यर्थः। सूचितेन दिङ्मात्रदर्शितेनैतावता महिम्नालं बहुना किं तद्दर्शनीयमिति भावः। कियता विभूतिर्लक्ष्मीः प्रार्थ्यमानानपि इतरान्ब्रह्मादीन् हित्वानभीप्सोरकामयमानस्यापि यस्य भगवतोऽङ्घ्रिरेणुं जुषते सेवते इति यथा श्रियः पतित्वमेव तन्मात्रप्रदर्शनायालमित्यर्थः॥ २०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तदिति किं तत्राह स वा इति। अदभ्रबुद्धिः पूर्णज्ञानः महाभागवतः परीक्षिद्वैयासकिना शुकेन शब्दितेनोपदिष्टेन श्रुतेन ज्ञानेन येनापवर्गाख्यं खगेंद्रध्वजस्य गरुडध्वजस्य पादमूलं भेज इत्यन्वयः। वा इत्यनेनाख्यानस्य इष्टसाधनावबोधकत्वेनोपादेयत्वं दर्शयतीति॥ १७॥ ❀ ❀ हे महात्मन् शौनक! विलोमजाताः हीनजन्मानोऽपि वयं ज्ञानवृद्धानामनुवृत्त्या सेवया जन्मभृतः सफलजन्मानोऽभूमेत्यन्वयः। अहो आश्चर्यमस्मद्भाग्यं कुतः महत्तमानामभिधानं गोष्ठी तस्य योगः संबंधः अभिधानेन नाम्ना योग इति वा दुष्कुलोत्पत्तिनिमित्तं दौष्कुल्यमाधिं मनोदुःखं शीघ्रं विधुनोतीत्येकान्वयः॥ १८॥ ❀ ❀ कैमुत्यमाह कुत इति महत्तमैकांतपरायणस्य हरेर्नाम गृणतः पुंसः आधिं विधुनोतीति कुतः पुनः किं वक्तव्यमित्यन्वयः। अनंता अपरिमिताः शक्तयो यस्य स तथा देशादितः परिच्छेदो न विद्यते यस्य सोऽनंतः यो भगवाननंतशक्तिरनंतश्च न केवलं ताभ्यामानंत्यं गुणानंत्यमप्यस्तीत्याह महदिति। महांतो गुणाः महद्गुणाः तेषां भावः महद्गुणत्वं तस्माच्छांदसत्वान्महच्छब्दस्य महादेशाभावः, यं भगवंतमनंतं गुणतः परिच्छेदरहितं सत्यं ज्ञानमनंतमित्यादिवेदांता आहुरित्यन्वयः॥ १९॥ ❀ ❀ प्रार्थयतः कटाक्षमोक्षमिति शेषः, इतरान् ब्रह्मादीन् हित्वा कटाक्षवीक्षामकृत्वा विभूतिर्महालक्ष्मीः स्वरतत्वादनभीप्सोरनिच्छोर्यस्य हरेरंघ्रिरेणुमनवरतं जुषते सेवते तस्यास्य हरेरसाम्ये अद्वितीये तथागुणैरनतिशयिते आधिक्यरहिते सर्वोत्तमत्वे च सूचितेन लक्ष्मीपतिरित्येतावता अलं नन्वित्येकान्वयः। 'अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।' 'श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेंद्रगंगाधरमि'त्यादिश्रुतिस्मृतिशतैरितरेषामशेषाणां लक्ष्म्या अवतारत्वाल्लक्ष्मीपतित्वं विष्णोः सर्वोत्तमत्वयुक्तिरिति भावः॥ २०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तन्नः परमित्यत्र अवान्तरतात्पर्य्येण धर्म्मज्ञानप्रकाशकत्वेऽपि मुख्यतात्पर्य्येण भक्तेरेव प्रकाशकत्वमाह भागवताभिराममिति। अत एतत् प्रागुक्तं स वै महाभागवत इत्यादि। यद्वा परं पुण्यं परमशोधकं यतोऽत्यद्भुतयोगो भक्तियोगस्तन्निष्ठमित्यादि॥ १७॥ ❀ ❀ तादृशब्रह्मर्षीन् प्रति स्वयं तादृशमहापुराणमुपदेष्टुं संकुचंस्तत्र तन्महिमानमेवालम्बते अहो इति युग्मकेन। विलोमजाता अपि वयमद्यैव जन्मभृतः उत्तमजन्मान्तरं लब्धवन्त आस्म द्विजत्ववत्। कथं वृद्धानां महत्तमानां भवतामनुवृत्त्या एतन्महापुराणकथनप्रवर्त्तनात्मकेनांगीकारेण। यद्वा केन कदा वृद्धानां श्रीशुकदेवादीनां भवतां यानुवृत्तिरनुगतिस्तया हेतुना। अद्य अस्मिन्नेव तादृशमहदंगीकारसमये। विलोमजत्वानुवृत्तौ तत्रायोग्यत्वादिति भावः। तत्र कैमुत्यं महत्तमानामभिधानयोगो नामश्रवणमपि दौष्कुल्यं तदाधिं च विधुनोतीति। तदेवं सति तस्य महत्तमाभिधानयोगवतः पुनर्म्महत्तमानामेकान्तपरायणस्य गाढवत्परस्य सतः। अत एव गृणतः तेषां महत्तमानां नाम कीर्त्तयतः पुंसः कीर्त्तितं नाम कर्तृदौष्कुल्यादिकं विधुनोतीति कुतः पुनर्वक्तव्यं सुतरामेव तत् स्यादिति भावः। तत्र हेतुः यो भगवाननन्तस्वरूपस्तथानन्तशक्तिश्च स्यात् तमपि यं महत्सु अभिव्यक्ता गुणा यस्य तादृशत्वादेव हेतोरनन्तमाहुः तत्तया वदन्ति सर्व्वे तेषु यदि तद्गुणा नाभिव्यक्ता अभविष्यन् तदा तदज्ञानात् तमपि तथा नावदिष्यन्नित्यर्थः। पूर्व्वेण यच्छब्देन तच्छब्दो लभ्यते। परेण तु प्रसिद्धः सूच्यते। तस्मात्तादृशगुणानां भवद्विधानामेव प्रभावोऽयं यद् वयमप्यत्र योग्या जाता इति भावः। येषां संस्मरणात् पुंसामित्यादिवत्। अत्र प्रस्तुतस्य वृद्धानु-

वृत्तिमहिम्न उपक्रान्तत्वेनोपसंहारेऽन्यमहिमपरत्वे वाक्यभेदः स्यादिति नान्यथा व्याख्यातम् । निजयोग्यतान्तरसूचने धाष्टर्यं स्यादिति च ।। १८-१९ ।। ❀ ❀ अथ तस्यानन्तगुणत्वं दर्शयति एतावतेति । असाम्यश्चासावनतिशायनश्चेति । गुणैरसाम्याधिक्यस्य तस्य एतावता विस्तृतेन माहात्म्यसूचनेन अलं न प्रयोजनमस्तीत्यर्थः । तदेव योजयति हित्वेति । विभूतिर्व्बहिरंगसम्पत्तिरूपा । यस्य स्वरूपशक्त्यादिभिः सम्पन्नस्य ।। २० ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

असंवृतार्थं यथा स्यात् तथाख्याहि । अत्यद्भुते योगे भक्तौ निष्ठा यस्य । आख्यानं श्रीभागवतम् । यतो भागवतानां भक्तानाम् अभिरामं प्रियं पारीक्षितं परीक्षिते कथितम् ।। १७ ।। ❀ ❀ श्रीभागवताख्याने ऋषिभिर्दत्तयोग्यताकमात्मानमभिनन्दति । विलोमजा निन्द्या अपि अद्य जन्मभृतः सफलजन्मानः आस्म जाता ह स्पष्टम् । वृद्धानां ज्ञानवृद्धस्य शुकस्य वा अनुवृत्त्या । यतो दुष्कुलत्वं तन्निमित्तमाधिं च मनःपीडां महत्तमानामभिधानयोगः लौकिकोऽपि संभाषणलक्षणसम्बन्धः विधुनोति । कुतः पुनः किं पुनः वक्तव्यं गृणतः कीर्त्तयतः पुंसः नाम कर्त्तृ दौष्कुल्यं विधुनोति । ननु दौष्कुल्यारम्भकं पापं प्रारब्धमेव, तस्य नाशं विना कथं दौष्कुल्यधूननं, प्रारब्धस्य तु भोगेनैव नाश इति प्रसिद्धेः नामतः कथं खण्डयत्वित्यत आह–यो भगवाननन्तशक्तिरिति । शक्तीनामानन्त्याद्भक्तप्रारब्धनाशिन्यपि काचित् शक्तिरस्त्येवेति भावः । तथाच महत्सु स्वभक्तेषु गुणा यस्य स महद्गुणस्तस्य भावस्तत्त्वम् । तस्माद्यमनन्तमाहुरिति । तेन तद्भक्तेषु तदीयगुणसंक्रमात् तस्मिन्निव तद्भक्तेऽपि प्रारब्धं न तिष्ठति ।। १८-१९ ।। ❀ ❀ ननु के ते गुणास्तत्र तान् वक्तुं कः समर्थः ? किन्तु एतावता सूचितेनालं यद्गुणैरसाम्यं न अतिशायनं यस्य तस्येति । यस्य सम एव नास्ति अधिकः कुतो भविष्यतीत्यर्थः । एवम्भूतस्य यस्यानभीप्सोरपि अंघ्रिरेणुं विभूतिर्लक्ष्मीः सर्व्वगुणपूर्णमन्विष्यन्ती जुषते सेवते इतरान् ब्रह्मादीन् प्रार्थयमानानपि त्यक्त्वा ।। २० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदाख्यानम् अत्यद्भुते वेदेनोपासनभजनध्यानाख्ये योगे भगवद्भावापत्तिसाधने निष्ठा यस्य तत् परं सर्वेभ्यः शास्त्रेभ्य उत्कृष्टं पुण्यं पुण्यावहम् असंवृतार्थमसंदिग्धसाध्यसाधनबोधकम् अनंतस्यापरिच्छिन्नस्याचरितैरुपपन्नं युक्तम् अत एव भागवतानामभिराममतिप्रियं परीक्षिते प्रोक्तं पारीक्षितं श्रीमद्भागवताभिधं महापुराणमाख्याहि कथय ।। १७ ।। ❀ ❀ एवं श्रीमद्भागवताख्याने महतादरेण महात्मभिः प्रवर्तितस्यात्मनः कृतार्थतामाह अहो इति द्वाभ्याम् । "ब्राह्मण्यां क्षत्रियाज्जातः स वै सूत उदाहृत" इति स्मृतिप्रसिद्धा विलोमजा अपि वृद्धानां ज्ञानादिभिः स्थविराणामनुवृत्त्या सेवयाऽद्य जन्मभृतः आस्म ह इति हर्षे, सफलजन्मानो भवामः अहो इत्याश्चर्ये, अहो महत्तमानामभिधानयोगः श्रवणकथनादिनिबन्धनः सम्बन्धः दौष्कुल्यं दुष्कुलजत्वं तन्निमित्तमाधिं मनोव्यथां च शीघ्रं विधुनोति अपनयति ।। १८ ।। ❀ ❀ यच्चरणशरणजनाभिधानयोगो दौष्कुल्यमाधिं च विधुनोति कुतः पुनस्तस्य महत्तमैकांतपरायणस्य नाम गृणतः कीर्तयतः पुंसो दौष्कुल्यं तन्निमित्त आधिश्च ? न कुतोऽपीत्यर्थः । ननु यन्नाम गृणतो दौष्कुल्यादि न स्यात्तादृशोऽन्योपि कश्चिदस्त्येवेत्यतो निःसमानातिशयत्वमाह योऽनंतशक्तिः अनंताः शक्तयो यस्य सः "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे"ति श्रुतेः, यश्च स्वाभाविकषडैश्वर्यसंपन्नो भगवान् स्वतोऽप्यनंतः "सत्यं ज्ञानमनंतं ब्रह्मे"ति श्रुतेः महांतः "अनंतकल्याणगुणात्मकोऽसौ तेजोबलैश्वर्यमहावबोधः" इत्यादिश्रुतिप्रोक्ताः गुणा यस्य समहद्गुणस्तस्य भावस्तत्त्वं तस्मान्महद्गुणवत्त्वादपि यमनंतमाहुर्मुनयो वेदा वा तस्य समानातिशयशून्यस्य नाम गृणत इत्यन्वयः ।। १९ ।। ❀ ❀ निःसमानातिशयत्वं प्रपंचयति त्रिभिः । गुणैरसाम्यानतिशायनस्य गुणैरित्युपलक्षणं शक्तिस्वरूपयोः गुणतः शक्तितः स्वरूपतश्च यदसाम्यमसमत्वमनतिशायनमनतिशयत्वं च तस्यैतावता सूचितेन माहात्म्यलेशमात्रेण दर्शितेनालम् , तल्लेशमेव दर्शयति–विभूतिः श्रीः इतरान् ब्रह्मादीन् प्रार्थयतोऽपि हित्वा यस्यानंतगुणशक्तिमतोऽनभीप्सोरकामयमानस्यापि भगवतोंऽघ्रिरेणुं भजते सेवते ।। २० ।।

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

यत्पादमूले कृतकेतन इति वाक्यात् भुवनांघ्रिपात् प्रवेशार्थं वा तत्कथयेत्याहुः तन्न इति । इदमाख्यानं सर्वैः श्रोतव्यं धर्मार्थकाममोक्षभक्तिनिष्ठैः अत्र तु पुण्यत्वात् धर्मनिष्ठैः श्रोतव्यं तत्सर्वतः अर्थो यस्मात् अस्मिन् श्रुते अर्थोऽपि सिद्ध्यति अद्भुतत्वात्कामः अद्भुता योगनिष्ठा यत्र अनेन मोक्षार्थिभिः श्रोतव्यमित्युक्तम् । आख्यानं तद्वृत्तान्तप्रतिपादकशब्दसंदर्भः । किंच अनंताचरितोपपन्नमनंतस्य यानि अनंतानि आचरितानि तैरुपपन्नं तस्याख्यानस्य एतानि विधेयविशेषणानि उद्देशांशः अन्यद्विधेयं भागवता अभितो रमंतेऽस्मिन्निति वा ।। १७ ।। ❀ ❀ एवं प्रोत्साहितश्रोतृन् प्रोत्साहयति अहो इति । अत्र स्वश्लाघा परस्तुत्यर्थः अन्योऽहमितिवत् अहो इत्याश्चर्ये । वयमिति श्लाघायां जन्मभृतः सफलजन्मानः अद्येत्यलभ्यलाभः, हेत्यद्भुतत्वं स्मृतिप्रसिद्धम् अकस्मादस्माकं सफलजन्मत्वं वृत्तं न हि असज्जन्म सफलं भवति । अतः सद्जन्मापि जातमिति आश्चर्यं, न त्वसतः उत्पन्नः सज्जन्मा भवति न त्वेकं बहवः प्रार्थयन्ते सतः अतो बहूनामुपकारकरणात् बहुभिर्निरूपितं बहुत्वं वा एकस्य जातमिति

श्लाघाप्रसंगात् जाते जन्मनि दैववशात् फलसम्बन्धः प्रायेण कश्चित्तरति कश्चनेति वाक्यात्, अस्माभिस्तु फलार्थमेव जन्म धृतं सूतत्वाभावे इदं नोपपद्येतेति ब्रह्मकल्पे इयं व्यवस्था अद्यैव जाता न पूर्वं कदाचन अयमर्थो युक्त्या च बोध्यते । अतः स्मर्तुर्विस्मयजनकः निन्दितस्योत्तमत्वेन सर्वजनीनत्वम् अत्याश्चर्यकरमतो भगवत इव भवत्कृपया ममापि षड्गुणा जाताः । विलोमजाता इति 'ब्राह्मण्यां क्षत्रियात् सूतः' वृद्धानुवृत्त्या एवं जाताः । अतो वृद्धानामनुवर्तनं सर्वपुरुषार्थदायि किंच दोषोऽपि निवृत्तः वयं दुष्कुले जाताः कथं भगवत्कृपया सत्कुले भविष्याम इति या मनःपीडा सापि निवृत्ता, महत्तमानामाज्ञा अभिधानयोगः भगवद्गुणविधानार्थं नियोगः स शीघ्रमेव आधिं विधुनोति । अतो भवतामनुवृत्तिनियोगौ मम सर्वपुरुषार्थसाधकौ जातौ ॥ १८ ॥ ❀ ❀ अतः परमुत्तरे किं भविष्यतीति न जाने प्रश्नादेवैतत्सिद्धिरित्याह कुतः पुनरिति । तस्य नाम गृणतः दौष्कुल्याधिः कुत्र तिष्ठतीति सम्बन्धः । इदं तु न स्वाभिप्रायेण अन्यथा स्वश्लाघायां गर्वः स्यात् । अतः केवलनामोच्चारणकर्तुः फलमुच्यते, कुलरहितानामुद्धाराय कुलीनानां गर्वाभावाय च एकवचननिर्देशाच्च न स्वाभिप्रायं नाम्नां माहात्म्यमाह महत्तमैकांतपरायणस्येति । महत्तमानामपि तन्नामोच्चारणे तस्याभीष्टस्थानत्वात् नामोच्चारयितुरपेक्षा भवति प्रायेणायमस्मदभीष्टं जानातीति ततस्तेऽप्यनुवृत्ता भविष्यन्तीति भावः । नाम भगवानिति उत्तरोत्तरमुत्कृष्टाः अतस्तस्मिन्निष्ठायां तथैव फलमिति ज्ञापनार्थम् अन्यथा नामोच्चारण एव शास्त्रं समाप्तं स्यात् ततश्च भागवतानारम्भः प्रसज्येत । अतो भगवन्माहात्म्यं वदति । योऽनंतशक्तिरिति वक्तव्ये नाममहत्त्वं च देशकालापरिच्छेदेन च तत् भगवतस्त्रयं जातं तादृशाः शक्तयः स्वरूपाणां गुणानां स्वरूपतः कार्यतः फलतश्च अतो नवधा अनन्तत्वं भगवति पश्यति तदाह योऽनंतशक्तिरिति । सर्वतः अनन्ताः शक्तयो यस्येति वा अनंतेषु शक्तिर्यस्येति वा, एवमुत्तरत्रापि भगवांश्चानन्तः अरूपस्याऽनंतत्वमुच्यते न विद्यते अंतो यस्य यस्मात् यस्मिन्निति वा तन्निष्ठानामप्यंताभावः । किंच गुणानां द्विरूपमनन्तत्वं महत्त्वेन गुणत्वेन च अनन्तावहत्वं च अनन्ता एकस्य गुणे महत्त्वस्य परिच्छेदो नास्ति, चकाराद्भगवत इव गुणानामपि अवांतरभेदाः । एकेन प्रकारेण अपरिच्छेदरूपेण माहात्म्यमुक्तम् ॥ १९ ॥ ❀ ❀ एवं माहात्म्यान्यनंतान्यपीति सूचितं माहात्म्यांतरं विशेषाकारेण वक्तव्यमित्याकांक्षायामाह एतावतालमिति । स्वभावतो माहात्म्यानि वक्तुमशक्यान्येव, सूचनं परं कर्त्तव्यम् अन्यथा महाराजाधिराजस्य स्वरूपं स्पष्टतया कथितमपराधाय भवति सूचनमपि बहु न कर्त्तव्यं तदाह एतावतालमिति । एतावदपि सूचनं न कर्त्तव्यमित्यर्थः । नन्विति सम्बोधनं संमत्यर्थमंतःकरणं सैव माहात्म्यरसाभिनिविष्टश्च वदति माहात्म्यं हि तरतमभावेन निरूपणीयं तत्सजातीयविजातीयतादृशपुरुषसम्भावनया भवति, तद्भगवति न सम्भवतीत्याह गुणैरसाम्यानतिशायनस्येति । गुणैर्हेतुभिः कृत्वा न साम्यमतिशयश्च यस्य एवं स्वरूपशक्तिभिश्च तथापि किंचित् सूच्यत इत्याह हित्वेतरानिति तया विना क देवत्वमित्यादिवाक्यन्यायेन लक्ष्मीमूलकं सर्वं विचारिका च, सा एवं स्वरूपतश्च महती यदि सर्वान् विहाय भगवन्तं भजते तदा सर्वोत्तमत्वं न विविच्य वक्तव्यम् । अनभीष्टं कथं भजेत तत्रापि अनभीप्सोः अंघ्रिरेणुं कथं भजेत भोगार्थं वा यदि तदा प्रार्थयतः अन्यानपि विहाय । अतः अंघ्रिरेणोरपि माहात्म्यं तदपेक्षया चान्येषां तस्मान्माहात्म्यनिरूपणं न कर्त्तव्यं न हि सर्षपात् मेरुर्महानिति कश्चिद्वदति अस्तिवा प्रकृतिरूपत्वादस्याः स्त्रीत्वाद्वा बुद्ध्यभावः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तन्नः परं पुण्यमित्यत्र । उद्देश्यविशेषणत्वे दूषणमुक्त्वा विधेयविशेषणत्वे गुणमाहुः एवं त्वयेत्यादि । एवं प्रकारकोपकाराय त्वया कथितमित्यर्थः । अहो इत्यत्र । ब्रह्मकल्पे इयं व्यवस्थेति । तत्र हि पृथोर्यज्ञे बृहस्पतेर्हविषि ऐन्द्रं हविः प्रमादतः पतितम्, ततः सूत उत्पन्नः, तस्य मुख्या वृत्तिः पुराणकथनम्, अन्या अश्वचिकित्साद्या जघन्या इत्युक्ताः । षड्गुणा इति । अहो वयमित्यादिश्लोकषट्कोक्ताः । कुतः पुनरित्यत्र । इत्याहेति । इति हेतोरुत्तरेऽधिकप्राप्तिं कैमुतिकेनाहेत्यर्थः । अपेक्षेति तत्रोपादेयबुद्धिः । अपेक्षायां हेतुमाहुः प्रायेणेत्यादि । तत इति । तेन न्यायेनैवं ज्ञापनार्थं स न्यायोत्रोच्यत इत्यर्थः । वक्तव्य इति उक्त इत्यर्थः । विपरीततया कथयन्निति । भगवत्कथनपूर्वकनाममाहात्म्यं कथयन् । उत्तरवाक्यगतमिति । उत्तरार्द्ध इत्यर्थः । किं भगवति माहात्म्यमित्याकाङ्क्षायामाहुः महतो भावो माहात्म्यमिति । महत्त्वमेव माहात्म्यमित्यर्थः । तद्विवृण्वन्ति महत्त्वमित्यादि । तादृशमिति । देशाद्यपरिच्छिन्नम् । अतो नवधेति । स्वरूपस्य त्रिधाऽपरिच्छिन्नत्वम्, शक्तिगुणयोस्तु कार्यस्य फलस्य च यथायथं सर्वत्र सर्वदा सर्वेषु दर्शनाच्छक्तीनां कार्यतस्त्रिधाऽपरिच्छिन्नत्वम्, गुणानां तु फलतस्तथात्वमतो नवधेत्यर्थः । पश्यतीति पाठे सूतः पश्यति इत्यर्थो बोध्यः । पर्यवस्यतीति प्राञ्जलः पाठः । उत्तरत्रेति । महद्गुणत्वादित्यनेनोक्तेषु गुणेष्वपीत्यर्थः । एतावतेत्यत्र । स्वरूपशक्तिभिरिति स्वरूपेण शक्तिभिश्चेत्यर्थः ॥ २० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

सर्ववेदेतिहाससारत्वात् काण्डत्रयात्मकवेदार्थस्यात्र गतार्थत्वं सूचयन्तो विशिंषन्ति, तत्र कर्मकाण्डार्थस्य गतार्थत्वमाहुः—परं पुण्यमिति । शृण्वतां वदतां च निरतिशयपुण्यावहमित्यर्थः । ज्ञानकाण्डार्थस्य गतार्थत्वमाहुः—अत्यद्भुतयोगनिष्ठमिति, अत्यद्भुतयोगे ज्ञानयोगे निष्ठा परिसमाप्तिर्यस्य तदित्यर्थः । उपासनाकाण्डार्थस्य गतार्थत्वमाहुः—अनन्तस्य भगवतश्चरितेनोपपन्नं

संयुक्तमिति । अत एव भागवतानां भगवद्भक्तानां अभिरामं आनन्दकरमित्यर्थः । वेदास्तुमहत्त्वमप्याहुः-असंवृतः स्पष्टः अर्थो यस्य तदित्यर्थः ॥ १७ ॥ ❀ ❀ एवं भगवद्गुणानुवर्णने प्रवर्त्तितः सूतो महतामादरपात्रमात्मानं कृतार्थं मन्यमानोऽभिनन्दति-अहो इति द्वाभ्याम् । अहो अस्मद्भाग्यं वयं विलोमजाता ब्राह्मण्यां क्षत्रियाज्जाता अपि वृद्धानां ज्ञानेन वयसा जन्मना च वृद्धानां शुकादीनां भवतां चानुवृत्त्या सेवया कृपया वा हेतुभूतया अद्याधुना जन्मभृतः प्रशस्तदेहधृत आस्म जाताः । हेति हर्षे । विलोमजातानामपि हेत्वन्तरेण प्रायशः समूलको हर्षो युक्त एव । उक्तमेव स्पष्टयति-महदिति । महत्तमानां त्वादृशानां अभिधानयोगो लौकिकोऽपि सम्भाषणसम्बन्धः दौष्कुल्यं दुष्कुलप्रभवत्वप्रयुक्तं हीनत्वमाधिं तन्निमित्तां मनःपीडां च शीघ्रं विधुनोति निरस्यति ॥ १८ ॥ ❀ ❀ कुतः पुनः किं पुनर्वक्तव्यं ? योऽसौ भगवान् ऐश्वर्यवीर्यादिषड्गुणपूर्णः अनन्ता अपरिमिता अविच्छिन्ना विनाशरहिता वा शक्तिर्यस्य सः । यश्च स्वयमप्यनन्तो देशकालवस्तुपरिच्छेदरहितः महत्सु विवेकिषु भक्तेषु गुणा यस्मात्सः तद्गुणस्तस्य भावस्तत्त्वं तस्मादपि ऋषयो यमनन्तमाहुस्तस्य महत्तमैकान्तपरायणस्य नाम गृणतः कीर्तयतः पुंसो महत्तमानामभिधानयोगः प्रश्नोत्तरादिसम्बन्धो दौष्कुल्यादि विधुनोतीति पूर्वेणैवान्वयः । यद्वा तस्य नाम गृणतः कुतः पुनर्दौष्कुल्यादीत्यन्वयः । यद्वा तस्य नाम गृणतः पुंसस्तस्य नामैव दौष्कुल्यादि विधुनोतीति किं वक्तव्यमित्यन्वयः ॥ १९ ॥ ❀ ❀ तस्यानन्तशक्तित्वे षड्गुणपूर्णत्वे वा किं प्रमाणमित्यपेक्षायामाह-एतावतेति । गुणैर्न विद्यते साम्यं यस्य न विद्यतेऽतिशायनमतिशयश्च यस्मात्तस्य पूर्णगुणस्य सूचितेन दिङ्मात्रप्रदर्शितेनैतावता महिम्नाऽलम् । विस्तरतो वक्तुं कः शक्नोतीति भावः । एतावतेति कियतेत्यपेक्षायामाह-विभूतिर्लक्ष्मीः प्रार्थयमानानपीतरान् ब्रह्मादीन् हित्वा विहाय अनभीप्सोरकामयमानस्यापि यस्याङ्घ्रिरेणुं जुषते सेवते इत्येतावतेति ॥ २० ॥

हिन्दी अनुवाद

आप कृपा करके उसी ज्ञान और परीक्षित्‌के परम पवित्र उपाख्यानका वर्णन कीजिये; क्योंकि उसमें कोई बात छिपाकर नहीं कही गयी होगी और भगवत्प्रेमकी अद्भुत योगनिष्ठाका निरूपण किया गया होगा। उसमें पद-पदपर भगवान् श्रीकृष्णकी लीलाओंका वर्णन हुआ होगा। भगवान्‌के प्यारे भक्तोंको वैसा प्रसङ्ग सुननेमें बड़ा रस मिलता है ॥ १७ ॥ ❀ ❀ सूतजी कहते हैं-अहो! विलोम[1] जातिमें उत्पन्न होनेपर भी महात्माओंकी सेवा करनेके कारण आज हमारा जन्म सफल हो गया। क्योंकि महापुरुषोंके साथ बातचीत करनेमात्रसे ही नीच कुलमें उत्पन्न होनेकी मनोव्यथा शीघ्र ही मिट जाती है ॥ १८ ॥ ❀ ❀ फिर उन लोगोंकी तो बात ही क्या है, जो सत्पुरुषोंके एकमात्र आश्रय भगवान्‌ का नाम लेते हैं! भगवान्‌ की शक्ति अनन्त है, वे स्वयं अनन्त हैं। वास्तवमें उनके गुणोंकी अनन्तता के कारण ही उन्हें अनन्त कहा गया है ॥ १९ ॥ ❀ ❀ भगवान्‌के गुणोंकी समता भी जब कोई नहीं कर सकता, तब उनसे बढ़कर तो कोई हो ही कैसे सकता है? उनके गुणोंकी यह विशेषता समझानेके लिये इतना कह देना ही पर्याप्त है कि लक्ष्मीजी अपनेको प्राप्त करनेकी इच्छासे प्रार्थना करनेवाले ब्रह्मादि देवताओंको छोड़कर भगवान्‌के न चाहनेपर भी उनके चरणकमलोंकी रजका ही सेवन करती हैं ॥ २० ॥

अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः ॥ २१ ॥
यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् ।
व्रजन्ति तत्पारमहंस्यमन्त्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥ २२ ॥
अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ।
नभः पतन्त्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥ २३ ॥
एकदा धनुरुद्यम्य विचरन् मृगयां वने । मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथेत्यर्थान्तरे । यस्य पादनखादवसृष्टं निःसृतमपि विरिंचिनोपहृतं समर्पितमर्हणाम्भोऽर्घोदकमीशसहितं जगत्पुनाति । विरिंचोपहृतं सेशमिति च तयोरप्युपासकत्वमुक्तम् । तस्मान्मुकुन्दव्यतिरिक्तः को नाम भगवत्पदस्यार्थः स एव सर्वेश्वर इत्यर्थः ॥ २१ ॥ ❀ ❀ धीराः संतः । ऊढं धृतम् । अन्त्यं परमकाष्ठापन्नम् । तदाह । यस्मिन्नहिंसोपशमश्च स्वाभाविको धर्मः ॥ २२ ॥ ❀ ❀ एवं स्वभाग्यमभिनन्द्य पारीक्षितोपाख्यानं वक्तुमाह । अहं हीति । हे अर्यमणो हे सूर्यास्त्रयीमूर्तयोऽत्र

---

१. उच्चवर्णकी माता और निम्न वर्णके पितासे उत्पन्न संतानको 'विलोमज' कहते हैं। सूत जातिकी उत्पत्ति इसी प्रकार ब्राह्मणी माता और क्षत्रिय पिताके द्वारा होनेसे उसे शास्त्रोंमें विलोमजाति माना गया है। २. प्रा० पा०—ते।

यावानात्मावगमो मम ज्ञानं तावदाचक्षे प्रवक्ष्यामि। तथा हि। यथा पक्षिणो नभ आत्मसमं स्वशक्त्यनुरूपमेवोत्पतन्ति न कृत्स्नं तथा विपश्चितोऽपि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव वदन्तीत्यर्थः॥ २३॥ ❀ ❀ सम्प्रति कथामुपक्षिपति। एकदेति॥ २४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्थान्तरमाह—यस्य वामनावतारे पादनखाद्वामपादनखनिर्भेदनान्निःसृतं ब्रह्मद्रवं ब्रह्मणा स्वकमण्डलौ धृत्वार्घीकृतं यज्जलं तदेव महादेवेन स्वशिरसि धृतं पुनर्भूम्यागतं गंगाभूदिति। तदुक्तं "आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्। भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या किल्बिषनाशिनी विजयते भागीरथी पावनी" इति भगवत्पूज्यपादैः वाल्मीकीयादौ च स्पष्टतरं प्रतिपादितमेतत्। इत्यर्थ इति। जगति सर्वोत्कृष्टा लक्ष्मी-ब्रह्मशिवा एव तत्पदं सेवमानास्तस्य महोत्कर्षं सूचयन्तीति वाक्यार्थः॥ २१॥ ❀ ❀ अथ दृश्यमाना मनीषिणोऽप्यत्र प्रमाणमित्याह—यत्रेति। यत्र मुकुन्दे स्मरणादिना मुक्तिप्रदे यद्यस्य पारमहंस्यं भागवतपरमहंसत्वं "मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने" इत्युक्तेः। यस्मिन् यदर्थम्। अहिंसया मात्सर्यादिराहित्येनोपशमो भगवन्निष्ठा विधीयत इत्यर्थः। यस्मिन्व्रजने इति चक्रवर्ती। तीर्थस्तु-धीराः विषयवार्त्तानिवृत्तायां धियि रताः सन्तो देहात्मज-वित्तादिषूढं संगमासक्तिं सहसा विमर्शज्ञानेन निरस्य परमहंसाश्रमप्राप्यमन्त्यं सर्वावधिभूतं मुकुन्दाख्यं ब्रह्म व्रजन्ति यस्मिन्परम-हंसाश्रमेऽहिंसा विहितातिरिक्तहिंसावर्जनमुपरमः। उं रुद्रं पाति पिबति संहरति वेत्युपो विष्णुः सर्वाधिकस्तत्र हरौ रमो रमणं रतिर्विषयनिवृत्तिर्वा धर्मो विहित इति शेषः। एतेन मुक्तिदातृत्वेनापि सर्वोत्कर्षो हरेरेवासूचीति॥ २२॥ ❀ ❀ आख्याहीति शौनकप्रश्नोत्तरं वक्ति—हे अर्यमण इति। अर्यं शुद्धधर्मं मीयते ज्ञायतेऽनेनेत्यर्यमा वेदः, अर्यं तमो मिनोति प्रक्षिपतीत्यर्यमा सूर्यो वा। "अर्यश्चन्द्रे रवौ वैश्ये रजताम्नाययोरपि। तमसि स्वामिनि श्रेष्ठे पुंस्त्वाद्यस्य तु लोकतः" इति निरुक्तिः। यूयं साक्षात्सूर्यरूपा एव भवतामग्रेऽहं ज्योतिरिंगणवत्किं प्रकाशयितुं समर्थः। यद्वा सर्वदा वेदाभ्यासतत्परत्वात्तद्रूपा यूयमहं तद्वक्तुं श्रोतुं वाप्यनधिकारित्वाद्बवदग्रे किं वदामि, तथापि भवदाज्ञया गुरुप्रसादावाप्तं किञ्चिद्वदिष्याम्येवेति भावः। इत्यर्थ इति। भगवद्गु-णानामानन्त्यात्सर्वात्मना ज्ञातुं तु न कोपीशः। पक्षिणो हि स्वशक्त्यनुसारेण पतन्ति नभसि गच्छन्ति। शक्त्यभावादेवोपरमन्ति न नभोवसानात्तस्यानन्तत्वादन्तं न तेऽवाप्नुवन्ति यथा तथा। ब्रह्मप्रभृतिज्ञानिनोपि स्वमत्यनुसारमेव विष्णुगुणगानं कुर्वन्तः शक्त्यभावादुपरमन्ति न गुणावसानात्तेषामानन्त्यादिति भावः॥ २३॥ ❀ ❀ अथ भगवानेव स्वपार्श्वं नेतुं ब्रह्मशापद्वारा तं विरक्तं सम्पादितवांस्तत्र च श्रीभागवतं प्रकाशितवानिति वक्तुं तच्चरितान्तरमाह—एकदेति। धनुरुद्यम्य सज्यं कृत्वा प्रगृह्य मृगयामुद्दिश्य वने विचरन्॥ २४॥

श्रीमद्वीरराघवव्याख्या

अन्यं प्रति तन्माहात्म्यदिशं दर्शयामीत्यभिप्रायेणाह अथापीति द्वाभ्याम्। अथाप्यपि च पुनरपि वेत्यर्थः, यस्य भगवतः वामपादांगुष्ठनखावसृष्टमर्वाक् प्रस्तुतं विरिंचेन ब्रह्मणोपहृतं समर्पितमर्हणांभोऽर्घ्यजलं गंगात्मकं कर्तृ सेशमिन्द्रादिलोकपालैः सहितं जगत्पुनातीत्येतावत् सूचितेन महिम्नालमित्यर्थः। एवंविधमहागुणगणयुक्ताच्छ्रीनिवासात्तीर्थपदान्मुकुंदादन्यः को वा लोके भगवत्पदार्थः भगवत्पदाभिधेयः ज्ञानशक्तिबलैश्वर्यतेजःप्रभृत्यसंख्येयकल्याणगुणपौष्कल्यवदभिधायकेन भगवच्छब्देन प्रवृत्ति-निमित्तानामाश्रयः पुरुषोत्तमादन्यः को वाभिधीयते न कोऽपीत्यर्थः। एतेन योऽनंतशक्तिर्भगवानित्याकांक्षा शामिता॥ २१॥ ❀ ❀ यत्रेति। यत्र यस्मिन्भगवति मुकुन्देऽनुरागयुक्ताः संतो धीराः जितेन्द्रियाः सहसाऽकस्मादेव देहे आदिशब्दात्तदनुबंध्यादिषु चोढं रूढं मूलं संगमपोह्य तत्पारमहंस्यमंत्यं तुरीयं परमहंसाश्रमं व्रजंति यस्मिन्पारमहंस्याश्रमेऽहिंसा उपशमश्च स्वानुरूपो धर्मः दयादिरस्ति॥ २२॥ ❀ ❀ एवंविधानंतमाहात्म्यशालिनो भगवतो माहात्म्यं वर्णयितुमहं न वर्णयामीत्यभिप्रायेणाह अहमिति। अर्यमणः हे ज्ञानाधिकाः! ऋ-गतौ गत्यर्था बुद्ध्यर्थाः, अत्र भगवन्माहात्म्ये भवद्भिः पृष्टोऽहं यद्वा हे अर्यमणः सूर्याः त्रयीमूर्त्तयः यावानात्मनो बुद्धेरवगमः प्रसरः यावन्महिमा मद्बुद्धिविषयो भवति तावंतं महिमानमाचक्षे वर्णयामि। तथाहि यथा पतत्रिणः पक्षिणो बाणा वा आत्मसमं स्वबलानुरूपमेव नभः प्रतिपतंति उत्प्लवंति तथा विपश्चितोऽपि समस्तबुद्धिबलानुरूपं विष्णुगतिं भगवन्महिमानं पतंति विषयीकुर्वंति, नहि पतत्रिणो नभसि उत्प्लवंतो नभसोऽभावान्निवर्तंते स्वबलक्षयान्निवर्त्तन्ते एवं विपश्चितो मतिक्षयादेव निवर्त्तंते न तु भगवन्महिम्नः क्षयादित्यर्थः। तच्चोक्तमन्यत्रापि "इषुक्षयान्निवर्त्तंते नांतरिक्षक्षितिक्षयात्। मतिक्षयान्निवर्त्तंते न गोविंदगुणक्षयादि"ति॥ २३॥ ❀ ❀ अथ तत्पृष्टं भागवताख्यं पुराणं परीक्षिच्छुकसंवादरूपं शुश्रावयिषुस्तावत्संवादप्रवृत्तिं तदुपोद्घातरूपं परीक्षिच्छुकयोः संगमं परीक्षितः प्रायोपवेशं च तन्मूलं विप्रशापं तन्निमित्तं चाह एकदेत्यादिना यावत्स्कंधसमाप्ति। तावच्छापनिमित्तमाह षड्भिः एकदेति। कदाचित्परीक्षिद्धनुरुद्यम्य उद्धृत्य वने मृगयां चरन् पश्यमानः श्रांतः नितरां तृषितः तृषा संजाता क्षुदस्य संजातेति तथा तारकादित्वादितच्॥ २४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथ सर्वोत्तमत्वाद्वितीयत्वसमर्थनस्य बहुयुक्तिसंदृष्टत्वप्रकटनायेदमपि भवतीत्याह अथापीति । यस्य पादनखावसृष्टं गलितं विरिंचेन ब्रह्मणा उपहृतं समर्पितमर्हणांभः अर्घ्यजलं श्रीपादावनेजनोदकमिति यावत् रुद्रेण सह वर्तमानं च जगच्चतुर्दशभुवनं पुनाति यस्मादथ तस्माल्लोके भुवने मुकुंदान्मोक्षप्रदान्नारायणादन्यतमः अन्यः स्वार्थे तमप्प्रत्ययः को नाम भगवत्पदार्थः निरतिशयज्ञानादिगुणवत्तया भगवानिति नामवाच्योऽस्ति सर्वेषां तदर्वाक्तनत्वान्न कोऽप्यस्तीत्यर्थः । अनेन विरिंचिपूज्यत्वशिवशुद्धिकरतीर्थपदत्वभगवन्नामवाच्यत्वाद्वितीयत्वानि सर्वोत्तमत्वसूचकानीति ज्ञातव्यम् ॥ २१ ॥ ❀ ❀ मुकुंदत्वं विवृणोति यत्रेति । यत्र मुकुंदे अनुरक्ताः स्निग्धाः धीरा विषयवार्तायां निवृत्तायां बुद्धौ रताः संतो देहादिषूढं प्ररूढं संगं स्नेहलक्षणं सहसा विमर्शज्ञानेन व्यपोह्य निरस्य तत्परमहंसाश्रमप्राप्यं सत्यं साधुगुणयुक्तं ब्रह्म मुकुंदाख्यं व्रजंति, यस्मिन्परमहंसाश्रमे अहिंसा विहितातिरिक्तहिंसावर्जनमुपरमम् । उं रुद्रं पाति पिबति हिनस्तीति वा उपो विष्णुः सर्वाधिकस्तस्मिन् हरौ रमो रमणं रतिर्विषयनिवृत्तिर्वा धर्मो विहित इति शेषः । अनेन मुक्तिदानमपि सर्वोत्तमत्वद्योतकमिति सूचितं भवति ॥ २२ ॥ ❀ ❀ आख्याहीति शौनकप्रश्नोत्तरं वक्ति अहं हीति । अस्य हरेर्गुणान् वक्तुं भवद्भिः पृष्टोऽहम् अत्र हरिगुणेषु यावानात्मावगम आत्मनो मम अवगमः ज्ञानं तावत् आचक्षे व्याकरिष्ये, गुणानामनंतत्वात्कस्यापि सर्वात्मना ज्ञातुं शक्तिर्नास्तीत्येतदर्थं हिशब्देनाह । न केवलमहमेवाशक्तः किंतु अतीतानागतवर्तमाना ब्रह्मादयः सर्वेऽप्येवमेव हरिगुणविषय इति सोदाहरणमाह नभ इति । यथा पतत्रिणः पक्षिणः नभः आत्मसमं स्वशक्त्यनुसारेण पतंति शक्त्यभावादेवोपरमंति न नभोऽवसानादनंतत्वादस्य तथा ब्रह्मादयो विपश्चितो ज्ञानिनो विष्णुगतिं विष्णुज्ञानं प्रति सममात्मशक्त्यनुसारेण यतंते शक्त्यभावादुपरमंति, न गोविंदगुणानां मितत्वादिति भावः ॥ २३ ॥ ❀ ❀ पारीक्षितमाख्यानं वक्ष्यंस्तस्य निर्वेदनिमित्तब्रह्मशापं वक्तुमुपक्रमते एकदेति । धनुरुद्यम्य सज्जं कृत्वा प्रगृह्य मृगयामुद्दिश्य वने विचरन् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्य चानन्तगुणस्य महत्त्वमभिव्यक्तत्वं दर्शयति अथेति । सेशं पुनातीत्यत्रेशस्यापि पवित्रीकरणमखण्डतमोगुणाधिष्ठानत्वेऽपि तदावेशखण्डनं ज्ञेयम् ॥ २१ ॥ ❀ ❀ तस्मात् तमेव भजेदित्यभिप्रेत्याह यत्रेति । अन्त्यं पारमहंस्यं भागवतपरमहंसत्वम्–'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इत्युक्तेः । यस्मिन् यदर्थम् ...या मात्सर्यादिराहित्येन उपशमो भगवन्निष्ठा विधीयत इत्यर्थः ॥ २२ ॥ ❀ ❀ नन्वनन्तगुणस्य तस्य कथं गुणगणने ...ऽसि तत्राह अहं हीति ॥ २३ ॥ ❀ ❀ अथ श्रीभगवानेव स्वपार्श्वं नेतुं ब्रह्मशापद्वारा तं विरक्तं सम्पादितवान् । ... श्रीमद्भागवतं प्रकाशितवानिति वक्तुं तच्चरितांतरमाह एकदेत्यादिना ॥ २४–२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ इत्यर्थान्तरे । यत्पादनखावसृष्टं निःसृतमपि विरिंचेनोपहृतं समर्पितमर्हणाम्भः अर्घ्योदकम् ईशो महादेवस्तत्सहितं सर्वं जगत् पुनाति तस्मान्मुकुन्दव्यतिरिक्तः को नाम भगवत्पदस्यार्थः सर्वेश्वरः स एवेत्यर्थः । एवञ्च जगति सर्वोत्कृष्टा लक्ष्मीब्रह्मशिवा एव तत्पदं सेवमानास्तस्य महोत्कर्षं सूचयन्तीति वाक्यार्थः ॥ २१ ॥ ❀ ❀ तथा दृश्यमाना मनीषिणोऽप्यत्रार्थे प्रमाणमित्याह यत्रेति । ऊढं धृतम् । अन्त्यं परमकाष्ठापन्नम् । यस्मिन् व्रजने ॥ २२ ॥ ❀ ❀ एवं स्वभाग्यमभिनन्द्य पारीक्षितोपाख्यानं वक्तुमाह अर्यमणः ! हे सूर्यास्तत्तुल्यास्त्रयीमूर्त्तयः अत्र यावानात्मावगमः मम ज्ञानं तावदाचक्षे प्रवक्ष्यामि । यथा पक्षिणः आत्मसमं स्वशक्त्यनुरूपमेव नभ उत्पतन्ति न तु कृत्स्नं तथा विपश्चितोऽपि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव ॥ २३–२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निःसमानातिशयत्वलेशांतरं दर्शयति अथेति । यस्य भगवतः पादनखादवसृष्टं निःसृतं विरिंचेन ब्रह्मणोपहृतं समर्पितमर्हणांभोऽर्घ्यजलं सेशं सशिवं जगत्पुनात्यतो मुकुंदाद्भगवतोऽन्यतमो भगवत्पदार्थः को नाम न कोऽपीत्यर्थः ॥ २१ ॥ ❀ ❀ यत्र श्रीमुकुंदेऽनुरक्ताः संतो धीराः स्थिरस्वभावा देहादिषूढं धृतं संगं 'संघोर्थे सहसे'ति यादवः, सहसा सद्य एवापोह्य यस्मिन्नहिंसया सहित उपरमः स्वधर्मः स्वासाधारणो धर्मस्तदंत्यं सर्वाश्रमेभ्योऽन्ते भवं पारमहंस्यं व्रजंति ॥ २२ ॥ ❀ ❀ शुकपरीक्षित्संवादद्वारा मुनिप्रश्नानुसारतो भागवतं वक्तुमाह अहं हीति । हे अर्यमणः ! सूर्याः अज्ञानतिमिरघ्नाः भवद्भिः पृष्टोऽहं यावदात्मनोऽवगमो ज्ञानं तावदाचक्षे यथा पतत्रिणः आत्मसमं स्वबलानुरूपं नभः पतंति तथा विपश्चितो विवेकिनो विष्णोर्गतिं लीलामात्मसमं वदंति एवमहमपि वर्णयामीत्यर्थः ॥ २३ ॥ ❀ ❀ शुकपरीक्षित्संवादं वक्तुं तन्निमित्तभूतवैराग्योदयकारणं विप्रशापं दर्शयति एकदेत्यादिना । क्षुदस्य संजाता क्षुधितः तृषितः आश्रमं प्रविवेशेत्युत्तरेणान्वयः ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तथाच महतो विचारपूर्वकं भजनं स्तवनार्थं वक्तव्यमिति चेत्तत्राह । यद्यपि विभूतित्वात् लक्ष्म्याः न स्त्रीत्वादिकृतदोषः संभवति । युक्तिश्चोक्ता अथापि तुष्यतु दुर्जन इति न्यायेन प्रकारांतरेण माहात्म्यसूचनं निरूप्यते । त्रयो हि महांतः ब्रह्मा विष्णुः रुद्रश्च तत्र ब्रह्मा चरणक्षालनकर्ता शिवश्चरणोदकधारकः, अतः परं को महान् भवेत् तदाह यत्पादनखावसृष्टमर्हणांभः चिरं विरंचेन ब्रह्मणा उपहृतं समर्पितमर्हणांभः पूजासाधनोदकं गंगेति यावत् सेशं महादेवसहितं जगत्पुनाति, तन्नखावसृष्टमिति भिन्नं वानेन ब्रह्मांडभेदेन यदि वा चरणजलमागतं नंदारूपं तदसंगृहीतं भवति अथवा भगवदपेक्षया तु लक्ष्म्या हीनत्वं ज्ञापयति नखावसृष्टमिति नखोदकं ख्यातिहीनं ईशस्य पावित्र्यमग्रे वक्ष्यते, सेशं पुनातीति पाठे भगवद्व्यतिरिक्तं आब्रह्मतृणस्तंबपर्यंतं पुनाति नखोदककर्तृकणवनापेक्षया यदान्येषां तदा भगवत्पदार्थः को वा भवेत् । ननु कोऽपि मास्तु अक्षरात् परस्यैव भगवत्त्वात् तत्राह लोक इति वेदे तु स भगवान् भवत्येव लोकसिद्धोऽपि वक्तव्यः । लोकस्तु ब्रह्मांडमात्रदृशा अतो ब्रह्मांडनायकः स भगवानित्युक्तं भवति भगवच्छब्दो निरतिशयब्रह्मवाचकः ॥ २१ ॥ ❀ ❀ एवं युक्त्या प्रमाणेन भगवत्त्वं स्थापयित्वानुभवेनापि भगवत्त्वमाह यथा नखोदकं अन्यदीयं सर्वार्थनाशकं तदेव भगवदीयं सर्वपुरुषार्थसाधकं तथान्यत्रानुरागः आत्मनाशकः भगवति तु अल्पोऽपि रागः सर्वपुरुषार्थसाधकस्तदाह यत्र भगवति अनुरक्ता ये केचन वा साधनांतरापेक्षाः तदाह सहसेति । एकमत्र बाधकं यत्कामनाबलादागतविषयभोगो वा तत्परिहारार्थमाह धीरा इति । आपाततः सुखकरत्वं तेषाम् अतो विवेकधैर्यं कर्त्तव्यम् । अथवा धीरा इति विभजंति । ननु राग एव असहायः साधनमपेक्षितं फलसाध्यं च साधयतीत्यर्थः, रागो ह्यन्तःकरणधर्मः स स्ववर्गं पुष्णाति भगवत्सम्बन्धं तु प्राप्य भगवता संस्कृतः स्ववर्गं सर्वमेव नाशयति यतो यदेव बाधकं संसारहेतुभूतं तदेव वर्गं नाशयित्वा भगवत्पदं प्रापयतीति उपलक्षणत्वाद्रागस्य न द्वेषादिभिः व्यभिचारः, देहादिषु रूढः संगः अहंताममतालक्षणः तादृशमूढं संगं व्यपोह्य ऊढपदेन वेदनादिबोधितत्वं सूचितम्, यथा विवाहितस्त्रियो न परित्यागः तद्वत् देहादिषु सङ्गेन त्याग इति आत्मानं सततं रक्षेत् 'शरीरमाद्यं खलु धर्मसाधनमि'ति पुरुषस्याखिलार्थदस्य एवंविधैर्वाक्यैर्जनितामपि बुद्धिं त्यजन्तीत्यर्थः । 'स जहाति मतिं लोके वेदे च परिनिष्ठितामि'ति वाक्यात् ज्ञाने तु तावानेव पुरुषार्थः अत्र तु सः अवान्तरव्यापार इत्याह व्रजन्तीति । यत्रानुरक्ताः तत् व्रजन्तीत्यर्थः । 'मद्भक्ता यांति मामपी'ति वाक्यात्, नन्वस्य गौणफलत्वं भविष्यतीत्याशंक्याह पारमहंस्यमिति । आनन्दमानंदमयोवसान इति वाक्यं प्रतिपादितं अतः परमन्यत् प्राप्तव्यं नास्तीत्यर्थः । नन्वस्य धर्महेतुत्वाभावात् अवेदप्रतिपाद्यत्वेन अप्रामाणिकं स्यात् अतः पूर्वं निरूपितः असन्मार्गः इत्याशंक्याह यस्मिन्नहिंसोपरमः स्वधर्म इति पूर्वकांडे धर्मः प्रतिपाद्यः उत्तरकाण्डे ज्ञानसाध्या उपरतिः अविद्याया एतत् द्वयम् अनुरागस्य स्वाभाविको धर्मः यथा जलस्य रसः अतो भक्तिधर्मप्रतिपादकत्वात् सर्ववेदानां न भक्तौ वेदविरोधः शंकनीयः, अहिंसापदेन च मुख्यो धर्मो निरूपितः आलभत इति न हि हिंसार्थं इत्यवोचाम, अतः सहजत्वाद्भक्तं प्रति विधिशक्तिरेव कुण्ठिता न तु विरोध इति भावः । एतावता भगवन्माहात्म्यमनंतं न कस्यापि वक्तुं योग्यमित्युक्तम् ॥ २२ ॥ ❀ ❀ तर्हि भवान्कथं वक्ष्यतीत्याशंक्याह अहं हीति । अर्यमणः ! सूर्यसंकाशाः, अनेन भवद्भिरेवोद्योतिताः स्मारिताः भगवद्गुणाः स्वमाहात्म्येन वा बोधिताः ते भवद्भ्यो वक्तव्याः, अतो न ममापूर्वकत्वं किं त्वनुवादकत्वमिति न ब्राह्मणोपदेशकृतोऽपि दोषः अत एवाह हीति । अहं पृष्टः भगवद्गुणवर्णने आज्ञप्तः भवद्भिरेव आचक्षे भवद्भिरित्युभयत्र सम्बध्यते परं स्वबुद्ध्यनुसारेण तदाह आत्मावगमोऽत्र यावानिति । यद्यप्यर्थं बुद्ध्वा वाक्यरचनमिति न्यायेन वाक्यावगमः समायात्येव तथापि वेदे यावत् कथनं व्यावर्तितं तथा सत्यर्थावबोधनं स्यादिति । ननु किमेतावता स्यात् भगवद्गुणानां सर्वेषामनिरूपणात् नभः पतन्तीति पतत्रिणः गरुडादयः नभः आकाशमात्मसममेवोत्पतंति न त्वाकाशविशालतानुरोधेन तथापि खेचरत्वं सिद्ध्यति तथापि मम भगवद्गुणवक्तृत्वं सेत्स्यतामिति भावः । ननु विषमो दृष्टान्तः क्रिया तु परिच्छिन्ने भवति ज्ञानं परिच्छिन्नविषयकमपि इत्याशंक्याह तथा सममिति । विपश्चितो ज्ञानिनोऽपि विष्णोर्व्यापकस्य गतिं चरित्रं स्वयोग्यतानुसारेणैवामनन्ति अन्यथा किंचिद्ज्ञत्वं न स्यात् भगवत्तुल्यता च स्यात् । गतिमित्येकवचनं सर्वोऽपि गुण आकाशतुल्य इति एकोऽपि गुणः न कैश्चित् सम्यक् गम्यत इत्युक्तम् ॥ २३ ॥ ❀ ❀ स्वभावप्रवृत्तेरनर्थहेतुत्वं बोधयति धनुरुद्यम्येति वधाभिनिवेशः सूचितः । वने मृगयायां विचचार धावतो मृगाननुगतः मृगसंगात्तच्छोकोऽस्यापि संजातः आरण्याः पशवः कनीयांसः श्रुता इति श्रुतेः, अत एव श्रान्तः देहवैक्लव्यं जातं, क्षुधितः तृषितो जातः दोषत्रयमुत्पन्नमित्यर्थः । अन्यथा महावीरस्य निरन्तरं युद्धकरणेऽप्यक्षीणबलस्य कथं श्रमादि स्यात् तस्मात् दुष्टानुगमनं न विधेयम् ॥ २४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

'त्वया विना क देवत्वमि'ति वाक्यं तु विष्णुपुराणे इन्द्रकृतलक्ष्मीस्तुतौ वर्तते । अथापीत्यत्र । युक्तिरिति । दोषसत्त्वेऽङ्घ्रिरेणुं न भजेदिति युक्तिः । भिन्नं वेति । पादश्च नखश्चे ति द्वन्द्वान्ते श्रूयमाणस्यावसृष्टशब्दस्य प्रत्येकमभिसम्बन्धात्तथेत्यर्थः । अग्रे इति । तृतीयस्कन्धे 'यच्छौचनिःसृत' इति कपिलोक्तौ नवमस्कन्धे शुकोक्तौ चेत्यर्थः । यत्रेत्यत्र । तेषामिति कामनादीनाम् ।

भवन्तीति अनुरागेणैव भवन्तीत्यर्थः । ननु यत्र देहादिसङ्गनाशकत्वम्, तत्र तत्र भगवद्विषयरागत्वमिति व्याप्तिरप्रयोजिका, ज्ञानद्वेषादौ व्यभिचारादित्यत आहुः उतेत्यादि । तथा च भगवद्विषयकत्वमात्रैव व्याप्तिरिति भावः । अवोचाम इति । कुण्ठितेति । तद्व्यापारात्प्रागेव तत्प्रतिपादितेऽर्थे प्रवृत्तेस्तथेत्यर्थः । अहं हीत्यत्र । अर्यमण इत्यत्र दीर्घाभावः छान्दसः । हीति मूले हिर्हेताविसर्थः । सम्बन्धत इति । पूर्ववाक्ये कर्तृत्वेन, द्वितीये प्रयोजकत्वेनेत्येवं सम्बन्ध्यते । वेदपाठवदिति आधुनिकवेदपाठवत् । एकदेत्यत्र । विचरन्निति, कुर्वन्नित्यर्थः । हता इति । हि यतो हेतोः हृताः प्राप्ताः गृहीता इत्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

प्रकारान्तरेणापि भगवत्त्वं सूच्यते–अथापीति । यतो विरिञ्चेन ब्रह्मणोपहृतं समर्पितमर्हणाम्भोऽर्घ्यजलं गङ्गात्मकं यस्य पादनखादवसृष्टं अर्वाक् प्रसृतं सत् सेशमीशेन महादेवेन ईशैरिन्द्रादिभिर्लोकपालैः सहितं वा जगत् पुनाति अथापि तस्मादपि हेतोर्मुकुन्दात् मुक्तिप्रदाद्वासुदेवात् अन्यतमो लोके भगवत्पदस्यार्थो वाच्यः को नाम ? न कोऽपि, स एव भगवानित्यर्थः ॥ २१ ॥ ❀ ❀ विवेकिप्राप्यत्वेनापि तस्य भगवत्त्वं ज्ञेयमित्याशयेनाह–यत्रेति । यत्र यस्मिन्ननुरक्ता अनुरागयुक्ता यत्प्राप्तये सहसा अकस्मादेव केनापि भाग्योदयेन धीरा जितेन्द्रियाः सन्तो देहे तदनुबन्धिपुत्रादिषु चोढं रूढमूलं सङ्गमासक्तिं व्यपोह्य त्यक्त्वा तत्प्रापकं अन्त्यमाश्रमेतरपश्चाद्भाविनं पारमहंस्यमाश्रमं विवेकिनो व्रजन्तीत्यन्वयः । इतराश्रमादस्योत्कृष्टत्वं सूचयन् विशिनष्टि–यस्मिन् पारमहंस्येऽन्त्याश्रमे अहिंसा उपशमश्च स्वानुरूपो धर्म इति ॥ २२ ॥ ❀ ❀ एवं भगवन्माहात्म्यं प्रदर्श्य तत्कार्त्स्न्येन वर्णयितुमहं न समर्थोऽतो यथामति प्रवक्ष्यामीत्याह–अहमिति । हे अर्यमणः ज्ञानाधिक्येन सूर्यतुल्याः, भवद्भिः पृष्टोऽप्यहं अत्र भगवन्महिम्न्यात्मनो मम बुद्धेर्यावानवगमः प्रसरः यावान्महिमा मद्बुद्धिविषयो भवति तावन्तं महिमानमाचक्षे वर्णयामि । न च केवलमहमेव तत्रासमर्थः, किन्त्वन्येषामपि ज्ञानिनामियमेव रीतिरिति सदृष्टान्तमाह–नभ इति । पतत्रिणो गरुडादयः पक्षिणो यथाऽऽत्मसमं स्वशक्त्यनुरूपमेव नभः पतन्ति उत्प्लुच्छन्ति, न तदन्तं लभन्ते तथा विपश्चितो ज्ञानिनोऽपि समं स्वबुद्धिशक्त्यनुरूपमेव विष्णुगतिं भगवन्महिमानं पतन्ति विषयीकुर्वन्ति वर्णयन्ति च तदन्तं न लभन्ते इत्यर्थः ॥ २३ ॥ ❀ ❀ अथ शुकपरीक्षित्संवादरूपं भागवतं वक्तुं तत्प्रासङ्गिकमाह–एकदेति । कदाचित् परीक्षिद्धनुरुद्यम्योद्धृत्य बने मृगयां चरन्मृगाननुगतः अतो भृशमत्यन्तं श्रान्तः क्षुधितस्तृषितश्च जात इत्यन्वयः ॥ २४ ॥

हिन्दी अनुवाद

ब्रह्माजीने भगवान्‌के चरणोंका प्रक्षालन करनेके लिये जो जल समर्पित किया था, वही उनके चरणनखोंसे निकलकर गङ्गाजीके रूपमें प्रवाहित हुआ । यह जल महादेवजीसहित सारे जगत्‌को पवित्र करता है । ऐसी अवस्थामें त्रिभुवनमें श्रीकृष्णके अतिरिक्त 'भगवान' शब्दका दूसरा और क्या अर्थ हो सकता है ॥ २१ ॥ ❀ ❀ जिनके प्रेमको प्राप्त करके धीर पुरुष बिना किसी हिचकके देह-गेह आदिकी दृढ़ आसक्तिको छोड़ देते हैं और उस अन्तिम परमहंस-आश्रमको स्वीकार करते हैं, जिसमें किसीको कष्ट न पहुँचाना और सब ओरसे उपशान्त हो जाना ही स्वधर्म होता है ॥ २२ ॥ ❀ ❀ सूर्यके समान प्रकाशमान महात्माओ ! आपलोगोंने मुझसे जो कुछ पूछा है, वह मैं अपनी समझके अनुसार सुनाता हूँ । जैसे पक्षी अपनी शक्तिके अनुसार आकाशमें उड़ते हैं, वैसे ही विद्वान् लोग भी अपनी-अपनी बुद्धिके अनुसार ही श्रीकृष्णकी लीलाका वर्णन करते हैं ॥ २३ ॥ ❀ ❀ एक दिन राजा परीक्षित् धनुष लेकर बनमें शिकार खेलने गये हुए थे । हरिणोंके पीछे दौड़ते-दौड़ते वे थक गये और उन्हें बड़े जोरकी भूख और प्यास लगी ॥ २४ ॥

जलाशयमचक्षाणः प्रविवेश तमाश्रमम् । ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥ २५ ॥
प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् । स्थानत्रयात् परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥ २६ ॥
विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च । विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥
अलब्धतृणभूम्यादिरसम्प्राप्तार्घ्यसूनृतः । अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अचक्षाणोऽपश्यन् । तं प्रसिद्धमाश्रमम् । तस्मिंश्च मुनिं शमीकम् ॥ २५ ॥ ❀ ❀ प्रतिरुद्धाः प्रत्याहृता इन्द्रियादयो येन तम् । अत एवोपरतम् । स्थानत्रयाज्जाग्रदादिलक्षणात्परं तुरीयं पदं प्राप्तम् । अत एव ब्रह्मभूतत्वादविक्रियम् ॥ २६ ॥ ❀ ❀ विप्रकीर्णाभिर्जटाभिराच्छन्नम् । रुरुर्मृगविशेषस्तस्य चर्मणा चाच्छन्नम् । विशेषेण शुष्यत्तालु यस्य सः । तथाभूतं मुनिमुदकमयाचत ॥ २७ ॥ ❀ ❀ न लब्धं तृणं तृणासनं भूम्याद्युपवेशस्थानं च येन सः । न संप्राप्तोऽर्घः सूनृतं प्रियवचनं च येन सः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स परीक्षित् आश्रममालस्यपरिहारकारणं स्थानं विवेशेत्यन्वयः । शान्तमसंप्रज्ञातसमाधिस्थम् । समाधिर्हि द्विधा संप्रज्ञातासंप्रज्ञातभेदात् । एकरसवस्तुमात्रत्वेन चित्तस्य तदाकारवृत्तिविशेषावस्थानं संप्रज्ञातसमाधिः । स एव सविकल्पक इति चोच्यते । स च पुनर्दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विविधः । दृश्यमिश्रो दृश्यानुविद्धः, शब्दमिश्रः शब्दानुविद्धः । वृत्तिमप्यखण्डैकरसमात्रत्वेनोपसंहृत्य वृत्तिमतश्चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रत्वेनावस्थानमसंप्रज्ञातसमाधिः । स एव निर्विकल्पक इति च गीयते । दृश्यानुविद्धशब्दानुविद्धनिर्विकल्पकसमाधय एव बाह्याभ्यन्तरभेदेन षट् समाधय इति व्यवह्रियन्ते । सत्त्वरजस्तमोगुणात्मिकाः शान्तघोरमूढवृत्तयः । तत्र' शान्तः सुखमौदार्यं वैराग्यञ्च, घोरस्तु कामः क्रोधो लोभस्तृष्णा मूढो मोहो भ्रान्तिः । एतासां वृत्तीनां हृदये यत्स्फुरणं तद्दृश्यं तस्य द्रष्टा साक्षी अनुस्यूतोहमिति दृश्यानुविद्ध आन्तरीयसविकल्पकसमाधिः १, वृत्तीनां त्रिगुणात्मकत्वादसंगोहमिति शब्दानुविद्धम् आन्तरीयसविकल्पकसमाधिः २, हृदये एतयोर्विकल्पयोरस्फुरणमसंप्रज्ञातसमाधिः ३, स एव निर्विकल्प इति चोच्यते । अथ बाह्यसूर्यादिकस्य द्रष्टा साक्षी अनुस्यूतोहमिति दृश्यानुविद्धो बाह्यसविकल्पकसमाधिः ४, सूर्यादिकादसंगोहमिति शब्दानुविद्धो बाह्यसविकल्पकः ५, एतदुभयविकल्पास्फुरणाद्बाह्यनिर्विकल्पकसमाधिरिति ६, ॥ २५ ॥ ❀ ❀ अत एव तुरीयपदप्राप्तत्वादेव अविक्रियं निश्चेष्टम् ॥ २६ ॥ ❀ ❀ आच्छन्नमिति । सापेक्षत्वात्समासान्तर्गतमप्याकृष्यते रौरवेणाच्छन्नमिति । पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायस्तु न नियतस्तदपवादभूतेन व्यक्तिन्यायेन तद्बाधात् । स्वीक्रियते हि जातिविशिष्टव्यक्तौ शब्दशक्तिमुपगच्छद्भिरपि तार्किकैर्गौरनित्येत्यादौ पदार्थैकदेशस्यापि व्यक्तेरनित्यत्वाद्यन्वयः । तत्सूत्रं च "जातिव्यक्त्याकृतयः पदार्थः" इह जात्यादित्रयस्यैव पदार्थत्वं विहितं न त्वेकैकस्येति । वस्तुतस्तु साकांक्षत्वनिराकांक्षत्वे एवान्वयानन्वयप्रयोजके न तु पदार्थतदेकदेशत्वे अपीत्यलं प्रसक्तानुप्रसक्त्या । तथाभूतं पूर्वोक्तशान्तादिविशेषणविशिष्टम् ॥ २७ ॥ ❀ ❀ आदिना स्वागतादिग्रहः । "तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" इति स्मृतेः ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

क्वचिदपि जलाकरमपश्यंस्तमाश्रमं प्रविवेश आंगिरसस्याश्रमं प्रविष्टवानित्यर्थः । तत्र मुनिमांगिरसं ददर्श, कथंभूतमासीनमुपविष्टं शांतं प्रसन्नं, मीलिते लोचने येन तम् ॥ २५ ॥ ❀ ❀ प्रतिरुद्धानि निर्व्यापारितानींद्रियादीनि येन तमत एवोपारतं बाह्यव्यापारादुपरतं स्थानत्रयाज्जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात्परं स्वात्मानं प्राप्तमनुसंदधतं ब्रह्मभूतं ब्रह्मविषयकभावनयान्वितमविक्रियं द्वंद्वप्रयुक्तविकाररहितम् ॥ २६ ॥ ❀ ❀ विप्रकीर्णाभिर्विक्षिप्ताभिर्जटाभिश्छन्नमावृतं रौरवेण रुरोर्मृगस्य संबंधिना चर्मणा च्छन्नम् एवंभूतं मुनिं विशुष्यत् तालुवदनं च यस्य तथाभूतो राजोदकं जलमयाचत ॥ २७ ॥ ❀ ❀ न लब्धं तृणं भूमिरादिशब्दादन्यच्चोपवेशार्थं येन न संप्राप्तमर्घ्यं सूनृतं च मधुरवचश्च येन तथाभूतोऽत एवावज्ञातमवहेलितमिवात्मानं मन्यमानो राजा चुकोप ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जलाशयं जलाधारं तटाकविशेषमचक्षाणोऽपश्यन् स परीक्षित् आश्रममालस्यपरिहारकारणं स्थानविशेषं प्रविवेशेत्यन्वयः । शांतमसंप्रज्ञातसमाधिस्थं किंचिन्मीलितनेत्रम् ॥ २५ ॥ ❀ ❀ प्रतिरुद्धाः परमात्मन्येव सन्निधापिताः श्रोत्रादींद्रियाणि च प्राणश्च मनश्च बुद्धिश्च येन स तथोक्तः तं प्राणरोधः कुंभके श्वासरोधः चेष्टानिवृत्तिर्वा अत एव शब्दादिज्ञानेभ्य उपारतं तदेव स्पष्टयति स्थानेति जाग्रदादिस्थानत्रयात् परमतीतं तुरीयं हरिं प्राप्तम् अत एव ब्रह्मणि भूतं प्रयत्नमंतरेण स्वत एव मनसा स्वबिंबरूपं परमात्मानमनुभवंतं अत एवाविक्रियं निश्चेष्टं निवातस्थदीपोपमं विरुद्धक्रियारहितं वा ॥ २६ ॥ ❀ ❀ विप्रकीर्णाभिर्जटाभिः छन्नं संवृतं रुरोः कृष्णमृगस्य विद्यमानेनाजिनेन च संवृतमासीनं वा विशुष्यत् नीरसं तालुजिह्वामूलं गूढजिह्वा यस्य स तथा स परीक्षित् तथाभूतमेवं विशिष्टं मुनिमुदकमयाचत प्रार्थितवानित्यन्वयः ॥ २७ ॥ ❀ ❀ स राजा चुकोपेत्यन्वयः, तस्मा इति शेषः । अलब्धं तृणभूम्यादि येन स तथोक्तः आदिशब्देन मधुपर्कादि गृह्यते स्वागतमित्यादि प्रियवचनं सूनृतं "तृणानि भूमिरुदकं वाक् चतुर्थी च सुनृते"ति स्मृतेः, आत्मानं मुनिनाऽवज्ञातमिव मन्यमानः क्षुधादिनिमित्तोऽयं कोप इत्यस्मिन्नर्थे हशब्दः इतिहासद्योतको वा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अलब्धेत्यादि । अत्र तस्येदृशभावो भगवदनुग्रहमयः श्रीभगवदिच्छयैवेति ज्ञेयम् । तस्यैव मेऽघस्येत्यादि वक्ष्यमाणात् ॥ २८-४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अचक्षाणोऽपश्यन् ॥ २५ ॥ ❀ ❀ मुनिं शमीकम् । स्थानत्रयात् जाग्रत्स्वप्नसुषुप्तितः परं तुरीयं समाधिं प्राप्तम् अत एव ब्रह्मभूतम् ॥ २६ ॥ ❀ ❀ रुरुर्मृगविशेषस्तस्य चर्मणा च आच्छन्नम् ॥ २७ ॥ ❀ ❀ अलब्धेति । ममातिथ्यमनेन किमपि न कृतमिति चुकोप ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जलाशयम् अचक्षाणः कचिदपि अपश्यमानः तं प्रसिद्धमाश्रमं प्रविवेश तत्र च मुनिं शमीकं ददर्श ॥ २५ ॥ ❀ ❀ प्रतिरुद्धा विषयेभ्यः प्रत्याहृता इन्द्रियादयो येन स तथा तम् अत एवोपरतं स्थानत्रयात् जाग्रदादेः परं तुरीयं स्थानं प्राप्तम् । तत्र ब्रह्म ध्येयं भूतं प्राप्तं येन तमित्यर्थः । विप्रकीर्णाभिः परितो लंबमानाभिर्जटाभिश्छन्नमजिनेन रुरुसंज्ञकमृगचर्मणा चाच्छन्नं तथाभूतं मुनिं विशुष्यत्तालु यस्य स नृपः उदकमयाचत ॥ २७ ॥ ❀ ❀ न लब्धं तृणं तन्मयमासनं भूमिरुपवेशस्थानमादिना जलादेर्ग्रहणम् न संप्राप्त आगते राज्ञि देयोऽर्घ्यो सूनृतं प्रियं वाक्यं च येन सः ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

भृशमिति सोढुमशक्यं दोषोत्पन्नस्य श्रमादेः दोषजनकत्वमेव न गुणजनकत्वमिति वक्तुं तादृशस्य दोषजनकत्वमेव न गुणजनकत्वमिति वक्तुं तादृशस्य दोषांतरमपि जातमित्याह जलाशयमिति । अचक्षाणः जलाशयानामपि देवत्वात् प्रतीतोऽपि तिरोहित इति भावः । प्रकर्षेण प्रवेशः अपृष्ट्वा अननुज्ञाप्य अन्तःस्थानपर्यन्तगमनं तमिति प्रसिद्धं पराभूतद्रौणिमंत्रस्थानं सतो दोषव्याप्तस्य सद्दर्शनेपि न सद्बुद्धिरुत्पन्ना यथा सन्निपातव्याप्तः हविषापि म्रियते तथा जातमित्याह ददर्शेति त्रिभिः सार्धैः । तत्र द्वयेन मुनेः स्वरूपं वर्णयति तस्य दोषाधिक्याय मुनिरिति । श्रवणमनने ब्रह्मविषयके सिद्धे तस्येति ज्ञापितम् आसीनमिति निदिध्यासनपरत्वं योगे चासनं तृतीयमंगम् , अतः पूर्वद्वयमपि अर्थादुक्तं भवति शान्तमिति । प्राणायामेन मनोनियमनमुक्तं मीलितलोचनमिति प्रत्याहारः ध्यानधारणे वक्तुं प्रत्याहारमेव दर्शयति प्रतिरुद्धेति । अथवा मीलितलोचनमिति विषयाणामप्रतिबन्धकत्वं सूचितं प्रतिलोमतया रुद्धाः अन्तर्नीताः इन्द्रियप्राणमनोबुद्धयो येन एवं बाह्यविषयश्रान्तविषयं निवृत्त्यनंतरं स्वस्वरूपे विद्यमाने भगवति आसमन्ताद्रक्तः तेन स्वरूपेण भगवत्स्वरूप इत्युक्तम् । अनेन ध्यानधारणे अपि सूचिते । समाधिमाह स्थानत्रयात्परं समाधिं प्राप्तस्य स्वरूपं भासत इत्यर्थः । न केवलं भानमात्रं किंतु फलमपि जातमित्याह ब्रह्मभूतमिति "ब्रह्म वेद ब्रह्मैव भवती"ति श्रुतेः, असंप्रज्ञातसमाधित्वज्ञापनायाह अविक्रियमिति । सर्वविकाररहितम् । अनेन देहायुर्वृद्धिक्षयादिकमपि निवर्त्तितं मनोव्यापारोऽपि निराकृतः केवलं स्वरूपेणैव भगवंतं सेवत इत्युक्तं भवति । बहिश्चोपघातनिराकरणप्रकारं पूर्वमेव कृतवानित्याह विप्रकीर्णेति । विप्रकीर्णाभिर्जटाभिश्छन्नं रुरुर्बहुशृंगमृगः रौरवेण चर्मणा कृष्णाजिनेन च उपरि आच्छन्नम् एतावता बहिरन्तर्व्यवस्थायास्तु न प्रार्थनीय इत्युक्तं तादृशमपि याचितवानित्याह विशुष्यत्तालुरिति । विशेषेण शुष्यत्तालु यस्य शोकेनैव तालुशोषणं तथाभूतमिति पूर्वोक्तधर्मयुक्तं याचनमपि दोष एव ॥ २५–२७ ॥ ❀ ❀ तेन दोषेण दोषान्तरमप्युत्पन्नमित्याह "तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यंते कदाचने"ति सद्धर्मः स तस्मिन्नदृष्ट्वा स्वस्य शिक्षकत्वं स्मृत्वा शिक्षार्थमपि कृतवान् न लब्धा तृणं भूमिः आदिशब्देनोदकं तृणं भूमिः आदिर्यस्येति जलस्यापेक्षितत्वादेवमुक्तं राजनिमित्तं विशेषधर्मः अर्घ्यादि न सम्प्राप्तम् अर्घ्यादि न सूनृतांता येन । राजसु ब्राह्मणैः पाद्यस्याकर्त्तव्यत्वात् अर्घ्यग्रहणं तदप्राप्तदोषेण हेत्वंतरं कल्पयति अवज्ञातमिति । निषेधाभावाच्च इवप्रयोगः, यदि स्वयमेव जलादिकं गृह्णीयात् तदापि न दोषः स्यात् आपद्धर्मत्वात् परमभिमानेन तदपि न कृतवान् । तदाह आत्मानं न मन्यमान इति दोषेण दुष्टेः प्रतिरुद्धत्वात् तत्स्वरूपमविचार्यैव केवलं चुकोप । हेत्याश्चर्ये क्रोधः शिक्षार्थमपि भवति, मन्युस्तु द्विष्ट एव ॥ २८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

जलाशयमित्यत्र । अननुज्ञात इति । तस्यान्तः प्रयोगः अननुज्ञयेत्यर्थः । स्थानत्रयादित्यत्र । कार्यद्वयमिति बाह्यमान्तरं चेत्यर्थः ॥ २६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

कचिदपि जलाशयमचक्षाणः अपश्यंस्तं प्रसिद्धं शमीकाश्रमं प्रविवेश तत्र च तं मुनिं ददर्श । तत्र राज्ञोऽपराधाधिक्यप्रदर्शनार्थं मुनिं विशिनष्टि–आसीनं बद्धासनम्, शान्तं रागलोभादिरहितं, मीलिते लोचने येन तम् ॥ २५ ॥ ❀ ❀ प्रतिरुद्धानि निर्व्यापारितानीन्द्रियादीनि येन तम् । अत एवोपारतं बाह्यव्यापाराद्युपरतम् । स्थानत्रयात् जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात् परं

तुरीयं स्वात्मानं प्राप्तमनुसन्दधतम् अत एव "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेर्ब्रह्मभूतम् । अत एवाविक्रियं द्वन्द्वप्रयुक्तविकाररहितम् ॥ २६ ॥ ❀ ❀ विप्रकीर्णाभिः जटाभिः आच्छन्नमावृतं रौरवेण रुरोर्मृगस्य सम्बन्धिना अजिनेन चर्मणा चाच्छन्नं ददर्शेति सम्बन्धः । दृष्ट्वा च तथाभूतमपि मुनिं राजा उदकमयाचत । तत्र हेतुमाह–विशुष्यत्तालुरिति ॥ २७ ॥ ❀ ❀ न लब्धं तृणं तृणासनं भूमिरुपवेशनस्थानं–आदिपदेनान्यच्चोपवेशसाधनं–येन, न सम्प्राप्तः अर्घः सूनृतं मधुरवचनं च येन सः, अत एव अवज्ञातं अवहेलितमिव आत्मानं मन्यमानो राजा चुकोप । हेत्याश्चर्ये, तस्य भगवद्भक्तस्य तदसम्भवात् ॥ २८ ॥

हिन्दी अनुवाद

जब कहीं उन्हें कोई जलाशय नहीं मिला, तब वे पासके ही एक ऋषिके आश्रममें घुस गये । उन्होंने देखा कि वहाँ आँखें बन्द करके शान्तभावसे एक मुनि आश्रमपर बैठे हुए हैं ॥ २५ ॥ ❀ ❀ इन्द्रिय, प्राण, मन और बुद्धिके निरुद्ध हो जानेसे वे संसारसे ऊपर उठ गये थे । जाग्रत्, स्वप्न, सुषुप्ति—तीनों अवस्थाओंसे रहित निर्विकार ब्रह्मरूप तुरीय पदमें वे स्थित थे ॥ २६ ॥ ❀ ❀ उनका शरीर बिखरी हुई जटाओंसे और कृष्ण मृगचर्मसे ढका हुआ था । राजा परीक्षित्‌ने ऐसी ही अवस्थामें उनसे जल माँगा, क्योंकि प्याससे उनका गला सूखा जा रहा था ॥ २७ ॥ ❀ ❀ जब राजाको वहाँ बैठनेके लिये तिनकेका आसन भी न मिला, किसीने उन्हें भूमिपर भी बैठनेको न कहा–अर्घ्य और आदरभरी मीठी बातें तो कहाँसे मिलतीं तब अपनेको अपमानित-सा मानकर वे क्रोधके वश हो गये ॥ २८ ॥

अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः । ब्राह्मणं प्रत्यभूद् ब्रह्मन् मत्सरो मन्युरेव च ॥ २९ ॥
स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा । विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत् ॥ ३० ॥
एष किं निभृताशेषकरणो मीलितेक्षणः । मृषासमाधिराहोस्वित्किं नु स्यात्क्षत्रबन्धुभिः ॥ ३१ ॥
तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः । राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मत्सरस्तदुत्कर्षासहनम् ॥ २९ ॥ ❀ ❀ गतासुं मृतम् । धनुष्कोट्या चापाग्रेण ॥ ३० ॥ ❀ ❀ सर्पनिधाने राज्ञोऽभिप्रायमाह । एष किं प्रत्याहृतसर्वेन्द्रियः सन्मीलितेक्षणः यद्वा क्षत्रबंधुभिरागतैर्गतैर्वा किं नु स्यादित्यवज्ञया मृषासमाधिः सन्निति जिज्ञासयेत्यर्थः ॥ ३१ ॥ ❀ ❀ तस्य पुत्रः शृंगी नाम । अतितेजस्वी तपोबलसंपन्नः । अघं दुःखम् । तत्रार्भकमध्ये ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभूतपूर्व इतः पूर्वं कदापि नोत्पन्नः मदुत्कर्षासहनमहो मद्राज्यस्थापि मत्प्रजा भूत्वा मां न सत्करोत्ययमित्येवंलक्षणम् ॥ २९ ॥ ❀ ❀ निधायेति । भो ब्रह्मंस्त्वयाहमतिथिर्यथा साधु संमानितस्तथा त्वामप्यनया सुकुमारमालया संमानयामीति वदन्निति भावः ॥ ३० ॥ ❀ ❀ निर्गमनसमये राजा परामृशति–एष इति । निभृताशेषकरणः प्रत्याहृतसर्वेन्द्रियः । अतः सत्यसमाधिकः आहोस्विन्मृषासमाधिस्तत्र हेतुः–किंन्विति । अत्र राज्ञो विकर्मेदमभाग्योत्थं न ज्ञेयं किन्तु तं शीघ्रं स्वपार्श्वं नेतुं ब्रह्मशापद्वारा विरक्तं विधाय शुकदेवेन संगतं कृत्वा तत्र श्रीभागवतस्वरूपेण स्वयमाविर्भूय जगदुद्धर्तुं च कलौ जनिष्यमाणानपि कांश्चन भक्तान्स्वकृतं रासलीलाद्यास्वादयितुं च भगवत एवेयमिच्छेति मनीषिण आहुः । तस्यैव मेघश्येत्यादिवक्ष्यमाणत्वात् । मच्छुद्धभक्तस्य दैवाद्विकर्मापि शुभोदर्कमेवेति ज्ञापयितुम् । "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" इति श्रीभागवतरूपेण स्वाविर्भावे कारणाभासं चोत्थापयितुं भगवतैव तस्य तथा भाव उद्भावितः । न च तस्य स्वप्नेपि स स्वभावः सम्भवति । "अभूतपूर्वः" इत्युक्तेः । न च दैवादभाग्यविशेषोत्थोयं तात्कालिको भावस्तत्फलस्य शुकसमागममहाभाग्यस्यानुपपत्तेः । न च तस्य पिपासातिशय एव हेतुरिति वाच्यम्, तत्क्षणानंतरमेव जलमपीतवत एवानुतापशतविदीर्यमाणस्य गृहागतस्य सद्य एव प्रायोपवेशादित्येवं च जन्मनि मरणे च ब्रह्मतेजसो मध्ये वयसि कालस्य च निर्जयात्तस्य राज्ञो भगवत्कृपामहाबलवत्त्वमसाधारणमेव द्रष्टव्यम् ॥ ३१ ॥ ❀ ❀ तस्य शमीकस्य ब्रह्मर्षेः तत्र तदा पुत्रः शृङ्गी नामाऽतितेजस्वी । तेजस्विवीर्योद्भूतशरीरत्वाद्बालको वयसैव न तु सामर्थ्येन । अर्भकैर्बालैः सह क्रीडन्निदं वक्ष्यमाणम् ॥ ३२ ॥

श्रीमद्वीरराघवव्याख्या

क्षुत्तृड्भ्यामर्दितः पीडित आत्मा शरीरं यस्य तस्य राज्ञोऽत एवाभूतपूर्वः पूर्वं भूतोभूतपूर्वः कदाचिदपि पूर्वं न जात इत्यर्थः, मत्सरो मन्युश्च हे ब्रह्मन् ! ब्राह्मणं मुनिं प्रत्यभूद्बभूव मन्युः क्रोधः अमर्ष इति यावत् । मत्सरो द्रोहोऽपचिकीर्षेति यावत् ।

---

१. प्रा० पा०—तस्य ब्रह्मर्षेरंसे । प्रा० पा०—मागतः ।

॥ २९ ॥ ❀ ❀ ततः स तु राजा निर्गच्छन्निर्गन्तुमुद्युक्तो रुषा ब्रह्मर्षेरंसे धनुःकोट्या धनुषोऽग्रभागेन गतप्राणं सर्पं निधाय पुरं ययौ ॥ ३० ॥ ❀ ❀ किमर्थं निहितवानित्यत्र राज्ञस्तात्पर्यमाविःकरोति एष इति । किमेष मुनिर्निर्वृत्तानि नियमितान्यशेषाणि करणानीन्द्रियाणि येन मीलिते ईक्षणे लोचने येन तथाभूतः यथार्थसमाधिनिष्ठः आहोस्वित्क्षत्रबन्धुभिरस्माकं किं प्रयोजनं विद्यते इति बुद्ध्या मृषा मिथ्याभूतः समाधिर्यस्य तथाभूत एवमास्ते इत्यभिप्रायेण निधाय गत इत्यर्थः ॥ ३१ ॥ ❀ ❀ ततस्तस्य मुनेः पुत्रः अतितेजस्वी ब्राह्मतेजःसंपन्नः बालकोऽर्भकैः सह क्रीडंस्तातं पितरं राज्ञाऽघं प्रापितमपराधविषयीकृतं श्रुत्वा तत्रैवेदं वक्ष्यमाणमब्रवीत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तस्य परीक्षितः ब्राह्मणं प्रति मन्युरभूत् न केवलं मन्युः किंतु मत्सरश्चाभूदित्यन्वयः । मन्युरेव न प्रसाद इत्येवशब्दार्थः । मत्सरो नायं मद्वश इत्यप्रीतिश्च कीदृशः अभूतपूर्वः इतः पूर्वमनुत्पन्नः कीदृशस्य क्षुत्तृड्भ्यामर्दितात्मनः पीडितमानसस्य ॥ २९ ॥ ❀ ❀ शापनिमित्तमाह स इति । स राजा तस्य ब्रह्मर्षेः स्कंधे गतासुं मृतं सर्पं धनुःकोट्या निधाय पुरमागमदित्यन्वयः ॥ ३० ॥ ❀ ❀ पुरमागच्छतस्तस्यालोचनप्रकारमाह एष इति । एष मुनिः विषयेभ्यः प्रत्यङ्मुखतया निभृताशेषकरणः परतत्त्वविषयीकृतसकलेंद्रियः मीलितेक्षणः किं नोऽस्माकं क्षत्रबंधुभिः किंस्यादिति मुधासमाधिर्मीलितेक्षणः आहोस्विदिति मनसापि तर्कयन् पुरमगादिति पूर्वेणान्वयः ॥ ३१ ॥ ❀ ❀ तस्य ब्रह्मर्षेः पुत्रः शृंगीनामकः तत्रेदमब्रवीदित्यन्वयः । इदमिति वक्ष्यमाणं किं कृत्वा राज्ञा परीक्षिताघमपराधं प्रापितं पितरं श्रुत्वा अशुचितां प्रापितमिति वा अतितेजस्वीत्यनेन शापदानसामर्थ्यमस्यास्तीति दर्शितम् । अर्भकैः बालैः सह विहरन् वयसा बालः न तु सामर्थ्येनेत्येतद्दर्शितं कप्रत्ययेन ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मत्सरस्तदुत्कर्षासहनम् ॥ २९ ॥ ❀ ❀ धनुष्कोट्या धनुरग्रेण निधायेति । भो ब्रह्मन् ! त्वयाहमतिथिर्यथा साधुसंमानितस्तथा त्वामप्यनया सुकुमारमालया सम्मानयामीति भावः ॥ ३० ॥ ❀ ❀ निर्गमनसमये राजा परामृशति एष इति । निभृताशेषकरणः प्रत्याहृतसर्व्वेन्द्रियः अतः सत्यसमाधिकः आहोस्विन्मृषासमाधिस्तत्र हेतुः किं न्विति । अत्र राज्ञो विकर्म्मेदमभाग्योत्थं न ज्ञेयं किन्तु तं शीघ्रं स्वपार्श्वं नेतुं ब्रह्मशापद्वारा विरक्तं विधाय शुकदेवेन सङ्गतं कृत्वा तत्र श्रीभागवतरूपेण स्वयमाविर्भूय जगदुद्धर्त्तुञ्च कलौ जनिष्यमाणानपि कांश्चन भक्तान् स्वकृतां रासादिलीलामास्वादयितुं च भगवत एवेयमिच्छेति मनीषिण आहुः । तस्यैव मेऽघस्येत्यादिवक्ष्यमाणात् । मच्छुद्धभक्तस्य दैवाद्विकर्म्मापि शुभोदर्कमेवेति ज्ञापयितुं 'यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहमि'ति श्रीभागवतरूपेण स्वाविर्भावे कारणाभासं चोत्थापयितुं भगवतैव तस्य तथा भाव उद्भावितः । न च तस्य स्वप्नेऽपि स स्वभावः अभूतपूर्व इत्युक्तेः । न च दैवाद्भाग्यविशेषोत्थोऽयं तात्कालिको भावस्तत्फलस्य शुकसमागममहाभाग्यस्यानुपपत्तेः । पिपासातिशय एव हेतुरिति वाच्यं, तत्क्षणानन्तरमेव जलमपीतवत एवानुतापशतविदीर्य्यमाणस्य गृहागतस्य सद्य एव प्रायोपवेशात् । इत्येवं च जन्मनि मरणे च ब्रह्मतेजसो मध्यवयसि कालस्य च निर्जयात् तस्य राज्ञो भगवत्कृपामहाबलवत्त्वं साधारणमेव द्रष्टव्यम् ॥ ३१ ॥ ❀ ❀ तस्य पुत्रः शृङ्गी ॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अर्दितः पीडित आत्मा देहो यस्य तस्य पूर्वं भूतो भूतपूर्वस्तद्विपरीतोऽभूतपूर्वः मत्सरस्तदुत्कर्षासहनात्मकश्चित्तविकारः मन्युः क्रोधः सहसाऽभूत् सद्य एव बभूव ॥ २९ ॥ ❀ ❀ स तु मत्सरमन्युभ्यां युक्तस्तु रुषा क्रोधेन मत्सरेण च ब्रह्मऋषेः पूज्यस्य निरपराधिनः गतासुं गतप्राणमुरगं धनुषोऽग्रेण निधाय पुरमागतः प्राप्तः, अत्राश्चर्यरूपात् क्रोधादेरुत्पत्तिः प्रवृत्तिश्चेति भावः ॥ ३० ॥ ❀ ❀ किमेष निभृतानि प्रत्याहृतान्यशेषाणि करणानि येन मीलिते ईक्षणे येन स तथाभूतः सन् सत्यसमाधिः आहोस्वित्क्षत्रबंधुभिः किंनु स्यात् इत्येवमस्मदुपेक्षया मृषासमाधिः—इति सर्पनिधाने तदाशयः ॥ ३१ ॥ ❀ ❀ पुत्रः शृंगी अघं दुःखं प्रापितं तातं पितरं श्रुत्वेदमब्रवीत् ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तदा तस्यान्यत् दोषद्वयमुत्पन्नमित्याह अभूतपूर्व इति । कदाप्येतादृशो दोषो नोत्पन्नः यस्तु ब्राह्मणे मत्सरः । सहसेति विचारोत्पत्तिर्निवारिता । देहधर्मा एवं प्रबला जाता इत्याह क्षुत्तृड्भ्यामिति । आत्मा अन्तःकरणं यस्य एवं ब्राह्मणातिक्रमं श्रुत्वा शौनकस्य क्षोभो जात इति ब्रह्मन्निति सम्बोधनं, ब्राह्म एव मत्सरो मन्युश्च जातः परोत्कर्षासहनं मत्सरः । एवं दशदोषाः समुत्पन्नाः चकारेण समुच्चिताः ॥ २९ ॥ ❀ ❀ उपसंहाराय दोषाणां फलमाह स तु ब्रह्मऋषेरिति । तुशब्देन पूर्वज्ञानं निवारितम् । कार्यस्य जातत्वात् कलेः स्थानप्रदानाद्धि ब्राह्मणातिक्रमे मतिः ब्रह्मभूतस्य ऋषेरिति प्रमेयप्रमाणबलवत्त्वं सूचितम् । तन्नित्यम् । अंस इति नीयमानः सर्पः शिरसः साक्षात् ब्रह्मत्वात् अंस एव पतितः तस्य वा हस्तोऽग्रे न चलितः, सर्पं हत्वा मरणानंतरं

गतासुं तम् उत्थाय विनिर्गच्छन् धनुःकोट्या उत्थाप्य अंसे निधाय स्वपुरमागतः मृगयां गतः धनुषः स्वस्य च कार्यं कृत्वा समागतः। तत्रैव निकटे तिष्ठेच्चेत् सांत्वयेदपि बालकम्॥ ३०॥ ❀ ❀ ननु तथाकरणे राज्ञः कोऽभिप्रायस्तत्राह एष किमिति। निभृतानि अशेषाणि करणानि यस्य तादृशो भूत्वा किं मीलितेक्षणः आहोस्विदज्ञानार्थं मृषासमाधिज्ञापको मीलितेक्षण इति। ननु तथा ज्ञापने किं प्रयोजनं तत्राह किं नु स्यादिति, नु इति वितर्के निश्चये वा, क्षत्रबंधुभिः किं स्यात् आगतैर्गतैर्वा क्षत्रबंधुत्वं ज्ञानयोगात् यद्यपि मृषासमाधित्वेन किंचिदनेन कर्तुं शक्यते तथापि चित्तसमाधानार्थमेवं विचार उत्पन्न इत्यर्थः॥ ३१॥ ❀ ❀ एवमविचारितकृतेः अनर्थपर्यवसायित्वमाह तस्येति। पुन्नाम्नो नरकात् त्रायत इति पुत्रः स चेदस्मान्न त्रायते पुत्रत्वादपगतः स्यात् अतितेजस्वी अनेन सामर्थ्यं द्योतितम्, अविवेकहेतुमप्याह अर्भकैः सह बालक एव आश्रमप्रांते विचरन् राज्ञा अपराधं पापं प्रापितं श्रुत्वा मृतसर्पस्पर्शेऽपि पापं भवति पापान्मरणमपि मरणं वा आश्रमस्य वधेन वा। अपराधपक्षे राजकर्तृकोऽपराधः मुनिपर्यवसायी जात इति। तातेति स्नेहनाम तत्रेति यत्र श्रुतं तत्रैवेदमब्रवीत्॥ ३२॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तस्य पुत्र इत्यत्र। पापप्रापणं कथमित्याकाङ्क्षायामाहुः मृतसर्पेत्यादि। आश्रमस्थवधेनेति। यथा सर्पो हतः, तथा अन्यं हन्यात्, तथा सति मरणमेवापतेदित्यर्थः। मुनिपर्यवसायी जात इति। यथा ब्रह्मघ्नो लिङ्गं कपालधारणम्, तथा सर्पघ्नस्य सर्पधारणमिति तथेत्यर्थः। अहो इत्यत्र। एतावतेति। पूजाया अकरणेन समाधिविघ्नेन च॥ ३२॥

श्रीगिरिधरकृता बालप्रबोधिनी

उक्तमेव स्पष्टयति—अभूतपूर्व इति। पूर्वं प्रथमं कदापि यो न भूतो न जातः सोऽभूतपूर्व एवम्भूतो मन्युः क्रोधः मत्सरस्तदुत्कर्षासहनरूपश्च ब्राह्मणं शमीकं मुनिं प्रति सहसा झटिति राज्ञोऽभूदेव, क्षमा नैव जाता। तत्र हेतुमाह—क्षुत्तृड्भ्यामर्दितः पीडित आत्माऽन्तःकरणं यस्य तस्येति॥ २९॥ ❀ ❀ स तु राजा ततो निर्गच्छन् रुषा क्रोधेन गतासुं मृतमुरगं सर्पं धनुषोग्रेण तस्य ब्रह्मऋषेरंसे स्कन्धे निधाय स्वपुरमागमदित्यन्वयः॥ ३०॥ ❀ ❀ नन्वेवं सर्पनिधाने राज्ञः कोऽभिप्राय इत्याकाङ्क्षायां तदाह—एष इति। किमेष मुनिः निभृतानि नियमितानि अशेषाणि करणानीन्द्रियाणि येन तथाभूतः सन् मीलितेक्षणः मुद्रितनयनो यथार्थसमाधिः? आहोस्विदागतैः क्षत्रबन्धुभिरस्माकं किन्नु प्रयोजनं स्यादिति बुद्ध्या मृषा वृथैव समाधिर्यस्य तथाभूत एवमास्ते इति जिज्ञासया सर्पनिधानमित्यर्थः॥ ३१॥ ❀ ❀ तस्य मुनेः पुत्रो बालकोऽप्यतितेजस्वी अर्भकैः सह विहरन् क्रीडन् तातं पितरं राज्ञा अघं सर्पनिधानेन दुःखं प्रापितं श्रुत्वा तत्र बालानां मध्ये एव इदं वक्ष्यमाणमब्रवीदित्यन्वयः॥ ३२॥

हिन्दी अनुवाद

शौनकजी! वे भूख-प्याससे छट-पटा रहे थे, इसलिये एकाएक उन्हें ब्राह्मणके प्रति ईर्ष्या और क्रोध हो आया। उनके जीवनमें इस प्रकारका यह पहला ही अवसर था॥ २९॥ ❀ ❀ वहाँ लौटते समय उन्होंने क्रोधवश धनुषकी नोकसे एक मरा साँप उठाकर ऋषिके गलेमें डाल दिया और अपनी राजधानीमें चले आये॥ ३०॥ ❀ ❀ उनके मनमें यह बात आयी कि उन्होंने जो अपने नेत्र बंद कर रक्खे हैं सो क्या वास्तवमें उन्होंने अपनी सारी इन्द्रियवृत्तियोंका निरोध कर लिया है अथवा इन राजाओंसे हमारा क्या प्रयोजन है, यों सोचकर इन्होंने झूठ-मूठ समाधिका ढोंग रच रक्खा है॥ ३१॥ ❀ ❀ उन शमीक मुनिका पुत्र बड़ा तेजस्वी था। वह दूसरे ऋषिकुमारोंके साथ पास ही खेल रहा था। जब उस बालकने सुना कि राजाने मेरे पिताके साथ दुर्व्यवहार किया है, तब वह इस प्रकार कहने लगा—॥ ३२॥

अहो अधर्मः पालानां पीव्नां बलिभुजामिव। स्वामिन्यघं यद् दासानां द्वारपानां शुनामिव॥ ३३॥

ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः। स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति॥ ३४॥

कृष्णे गते भगवति शास्तर्युत्पथगामिनाम्। तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम्॥ ३५॥

इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकः। कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह॥ ३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पालानां राज्ञाम्। पीव्नां पुष्टानाम्। अधर्ममेव निर्दिशति स्वामिनि दासानां यदघं पापाचरणं बलिभुजां काकानामिव शुनामिव चेति॥ ३३॥ ❀ ❀ दासत्वं दर्शयति। ब्राह्मणैरिति। सभाण्डं भाण्डे एव स्थितम्॥ ३४॥ ❀ ❀ तत्तद्-

१. प्रा० पा०—गृहपालो। २. प्रा० पा०—भङ्क्तु०। ३. प्रा० पा०—सेतुमद्या०।

नन्तरम् । अहं शास्मि दण्डयामि ॥ ३५ ॥ ❀ ❀ इति वयस्यानुक्त्वा रोषेण ताम्रे अक्षिणी यस्य सः । कौशिकी नदी तस्या अपः, सन्धिरार्षः । वाग्वज्रं शापम् ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वामिनि ब्राह्मणे दासानां दासानामिव द्वारपालानां राज्ञाम् । अयमपराधस्तदहो महानधर्मः ॥ ३३ ॥ ❀ ❀ द्वारपालः श्वा श्ववद्द्वाररक्षकः गृहं प्रविश्य सभाण्डं भाण्डस्थितं वस्तु घृतादि । तेन राज्ञां मुनीनामाश्रमे सहसा प्रवेशे तत्र जलादिप्रार्थने च का योग्यतेति भावः । तथा च दण्डोऽयमिति भावः ॥ ३४ ॥ ❀ ❀ तर्हि को दण्डकर्त्ता तत्राह–कृष्ण इति । उत्पथगामिनामनापदि विहितमार्गं परित्यज्य वर्त्तमानानां मे बलं पश्यत हे बाला इति शेषः ॥ ३५ ॥ ❀ ❀ कौशिकी कुशस्येदं कौशिकं पवित्रं तत् पाणौ विद्यतेऽस्येति कौशिकी प्रसिद्धम् अपो जलान्युपस्पृश्याचम्य वागेव वज्रं वज्रवन्नाशकं शापमित्यर्थः । यद्वा कौशिको विश्वामित्रो देवताऽस्या इति कौशिकी गायत्री तया उपस्पृश्य गायत्र्या विश्वामित्र ऋषिरिति संध्योपासनपद्धत्युक्तेः । तत्र कौशिकीनाम्नी नदी चाप्रसिद्धेति ॥ ३६ ॥

श्रीमद्वीरराघवव्याख्या

तदेवाह अहो इति पंचभिः । बलिभुजां शुनां वायसानामिव वा पीव्नां वर्धितानां पालानां राज्ञामहो अधर्मः पश्यतां कोऽसावधर्मः द्वारपालानां शुनामिव दासभूतानां राज्ञां स्वामिनि ब्राह्मणेऽघमपराध इति यदेष एवाधर्मः ॥ ३३ ॥ ❀ ❀ तदेवोपपादयति क्षत्रबन्धुर्हि ब्राह्मणैर्द्वारपालत्वेन श्वेव नियोजितः । स द्वाःस्थः क्षत्रबन्धुस्तद्गृहे ब्राह्मणगृहे श्वेव कथं सभांडमेकपात्रं यथा तथा भोक्तुमर्हति योग्यो भवेत् ॥ ३४ ॥ ❀ ❀ उत्पथप्रतिपन्नानां शास्तरि दंडयितरि कृष्णे भगवति स्वलोकं प्रति गते सति तान् भिन्नमर्यादानहमद्य शास्मि शिक्षये, मम बलं पश्यत ॥ ३५ ॥ ❀ ❀ वयस्यान्समानवयस्कान् बालकान्प्रतीत्थमुक्त्वा रोषेण ताम्रे ईक्षणे यस्य सः ऋषिबालकः कौशिक्या नद्या अप उपस्पृश्याचम्य वाग्वज्रं शापात्मकवाग्रूपं वज्रं ससर्ज प्रायुंक्त ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किमाहेति तत्राह अहो इति । बलिभुजां काकानामिव पृथ्व्याः पालानां राज्ञामधर्मोऽन्यायोऽद्यास्माभिर्दृष्टः अहो कष्टं तत्कुत इति तत्राह स्वामिनीति । शुनां स्वामिन्यघमिव ब्राह्मणदासानां तद्गृहद्वारपानां राज्ञां संप्रति स्वामिनि ब्राह्मणेऽघं दृष्टमिति यद्यस्मात्तस्मादिति ॥ ३३ ॥ ❀ ❀ राज्ञां विप्रदासत्वं कथमिति तत्राह ब्राह्मणैरिति । ब्राह्मणैर्दासतया द्वारपालो निरूपितः स राजा तस्य विप्रस्य गृहे द्वाःस्थो द्वारपालः कथं सभांडं भांडेन सह वर्तमानं गृहं भोक्तुं नाशयितुमर्हति नार्हत्येव । हि यस्मात्तस्मात् असौ स्वामिना दंड्य इत्यर्थः ॥ ३४ ॥ ❀ ❀ तर्हि संप्रति को दंडकर्तैतेषामिति तत्राह कृष्ण इति । उत्पथगामिनां विहितमार्गं परित्यज्य गच्छतां शास्तरि कृष्णे भगवति गते भिन्नसेतून् लंघितमर्यादांस्तानद्याहं शास्मि दंडयामीत्यन्वयः । मे बलं सामर्थ्यं पश्यत हे बालाः ! इति शेषः ॥ ३५ ॥ ❀ ❀ स च दंडः कीदृश इति तत्राह इतीति । रोषताम्राक्षः रक्तनेत्रः कौशिकी कुशपाणिः अप उपस्पृश्य आचम्य वाग्वज्रं शापलक्षणं विससर्ज दत्तवान् राज्ञ इति शेषः, इतिहासद्योतकेन हशब्देन कौशिकी नदी तस्या अप उपस्पृश्येत्यपव्याख्यानमपहस्तितमिति ज्ञातव्यम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पालानां राज्ञाम् । पीव्नां पुष्टानाम् । बलिभुजां काकानाम् ॥ ३३ ॥ ❀ ❀ गृहपालः श्वा गृहं प्रविश्य सभाण्डं भाण्डसहितं घृतादि वस्तु । तेन राज्ञां मुनीनामाश्रममध्ये सहसा प्रवेशे तत्र जलादिप्रार्थने च का योग्यतेति भावः ॥ ३४ ॥ ❀ ❀ तत् तदनन्तरमहं शास्मि दण्डयामि ॥ ३५ ॥ ❀ ❀ वयस्यानुक्त्वा । कौशिक्याप इति सन्धिरार्षः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेवाह अहो इत्यादिपंचभिः । अहो बलिभुजां काकानामिव पीव्नां द्वारपानां शुनामिव पुष्टानां पालानां रक्षायै नियुक्तानां दासानां भृत्यभूतानां स्वामिनि यदघं पापाचरणं तदेवंभूतोऽधर्मः पश्यताम् ॥ ३३ ॥ ❀ ❀ द्वारपालसादृश्यं दर्शयति ब्राह्मणैरिति । तद्गृहे यैर्निरूपितस्तेषां गृहे सः क्षत्रियः द्वाःस्थः सन् सभांडं भोक्तुं कथमर्हति योग्यो भवेत् ॥ ३४ ॥ ❀ ❀ तत्तस्मादुत्पथशास्तुरिहाविद्यमानत्वात् अहमेव शास्मि शिक्षये ॥ ३५ ॥ ❀ ❀ कौशिक्या नद्या अपः संधिरार्षः उपस्पृश्य आचम्य वाग्वज्रं शापं विससर्ज प्रायुंक्त ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अग्रे दण्डनिरूपणार्थं दण्डयोग्यतामाह त्रिभिः । अधर्मः स्वामिद्रोहो दण्डनिमित्तं राजनिष्ठं दण्डनसामर्थ्याय स्वनिष्ठं तत्र प्रथमं दोषमाह अहो इति आश्चर्ये । पालानामधर्मः धर्मपालका धर्मं निराकुर्वन्ति नतु कुर्वन्तीत्याश्चर्यं आश्चर्यनिविष्टो ध्यायन्

नेदमाश्चर्यमिति ज्ञातवान् अतः अधर्महेतुं वदन् स्थानविशेषं प्राप्य तस्य हेतुत्वं ज्ञापयन् दृष्टान्तमाह पीव्नामिति । बलवत्त्वमेव अधर्मकरणे हेतुः । नीचा राज्येन पुष्टा अधर्मं कृतवन्त इत्यर्थः यथा श्वानो बलिना पुष्टाः बलिदातारमेव भक्षयन्ति गृहं च प्रविशन्ति ब्राह्मणानां राज्यद्वयं स्वराज्यं बहीराज्यं च, बहीराज्यं स्वसामर्थ्येन भवतीति स्वराज्यसाधकत्वेन विनियुक्ताः अत एव क्षत्रियाः स्थापिताः । ब्रह्मणा निर्मिता भूः कश्यपेन च दत्ता तथा परशुरामेण रघुनाथेन च तथापि यत् ब्राह्मणैर्बहीराज्यं न कृतं तदंतस्तत्करणार्थं तदेवाह स्वामिन्यघमिति, दासानां यत् स्वामिन्यघमपराधकरणं पापं तच्छुनामिव जातिदोषेण च अविवेकेन जातं द्वारपालने ये विनियुक्ताः श्वानः द्वारपालनार्थं वा ते तथा अज्ञानात् स्वामिनमेव भक्षयन्ति गृहं मा प्रविशत्विति मा तथा समाध्यर्थमेव राजा विनियुक्तः समाधिं मा करोतु अस्मत्पूजां करोत्विति ॥ ३३ ॥ ❀ ❀ एतावता शुनस्तुल्यता राज्ञो निरूपिता । विषमदृष्टांतशंकामाह ब्राह्मणैरिति । अनेन स्वामिद्रोहः समर्थ्यते हीति चतुर्धा निरूपणं बोधितं शारीरादिबाह्यपदं द्वारं वस्तुतोऽत्र निरूपका भृगवः, अतो यैर्निरूपितं तेषामेव गृहे द्वाःस्थः सर्वदा द्वारपालकः सभांडभोजनं पाकं पाकस्थमन्नं भोक्तुमर्हति ब्राह्मणमाज्ञापयितुं नार्हति तेषामेव कृपया राज्यकरणात् । ब्रह्मणो हि गृहं ब्रह्मांडं तत्र सर्वपुरुषार्था भोगस्थानानि ब्राह्मणानां तदुपघातकनिराकरणात् द्वारपालको राजा राज्यं बलिस्थानं ब्राह्मणमपि कृषीवलवत् बलिमध्यपातनात् सभांडभोजनं समाधिस्थापराधात् गृहप्रवेशेन सभांडभोजनम् ॥ ३४ ॥ ❀ ❀ एवमपराधं समर्थयित्वा स्वस्य दंडनसामर्थ्यं वदन् प्रकारांतरं व्यावर्त्तयति कृष्णे गते भगवतीति । सदानन्दनरूपे स्वानुभवार्थमेव ब्राह्मणान्नियुज्य स्वस्थानं गते भगवत्त्वात् स्वानन्दानुभवस्य सम्पादनार्थं पूर्वं ब्राह्मणैरेव दंडः कर्त्तव्यः । कोटिद्वयस्य स्थापितत्वात् अतो द्वयमस्माभिरेव कर्त्तव्यमित्याह भिन्नसेतूनिति, भिन्नाः सेतवो मर्यादा यैः, अनेन स्वार्थपरित्याग उक्तः । ननु कदापि सेतुबन्धनं न श्रुतं तत्राह अद्येति । अद्यैव जातमद्यैव दंडनं कर्त्तव्यमित्यर्थः । स्वसामर्थ्यं तथाविधमस्तीति बालकान् बोधयति पश्यतेति । आविर्भूतब्रह्मतेजः स्वस्मिन् स्वयं पश्यन् स्वमित्रत्वात् तानपि प्रदर्शयति ॥ ३५ ॥ ❀ ❀ एवमध्यवसायं कृत्वा यत् कृतवान् तदाह इत्युक्त्वेति । राजभावनया पालकत्वाभावाद्रोषः तेन ताम्रे अक्षिणी यस्य अनेन पुनर्विचारांतरं न कृतवानिति ज्ञापितं कौशिकी नदी तस्याः अप उपस्पृश्य आचम्य स्वस्य ब्रह्मभावमाविर्भाव्य वाग्रूपं वज्रं विससर्ज वषट् फट् जहीत्यादि मंत्रानुक्त्वा दधीच्यस्थिनिर्मितः स वज्रः, अयं तु ब्राह्मणानां मूलभूतो वाग्वज्रः ॥ ३६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

ब्राह्मणैरित्यत्र । विषमदृष्टान्तशङ्क्येति । पुरुषविद्ब्राह्मणे 'क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमध उपास्ते' इति श्रुतेस्तथेत्यर्थः । चतुर्द्धा निरूपणमिति । स्वामिद्रोहस्य चतुर्द्धा निरूपणम् । प्रत्यक्षतो द्वारपालत्वाप्रत्ययात्तत्कथमित्याकाङ्क्षायां तदुपपादयन्ति शरीरादीत्यादिना । द्वारमिति समावेर्द्वारम् । तथा च तद्रक्षकत्वेन द्वारपालत्वमित्यतो न प्रत्यक्षविरोध इत्यर्थः । तर्हि कथं दृष्टान्तवैषम्यपरिहार इत्यत आहुः वस्तुत इत्यादि । तथा च पश्चादेवं भावान्न तद्वैषम्यमित्यर्थः । अर्हतीति । मूलस्थकथंशब्दोऽत्र योज्यः । एवमेकप्रकारेण स्वामिद्रोहो निरूपितः । द्वितीयमाहुः ब्राह्मणमित्यादि । तथा च कश्यपादिभिर्दत्तेपि राज्ये तैः क्षत्रियेभ्यो दानात् तथेत्यतोपि द्रोह इत्यर्थः । तृतीयमाहुः ब्रह्मण इत्यादि । सर्वपुरुषेत्यादि । द्वाराणीत्यर्थः । बलिस्थानमिति बलिदानस्य स्थानम् । स्थाने इति वा पाठः । ब्राह्मणमपीति । अत्र ब्राह्मण इति सप्तम्यन्तः पाठः प्रतिभाति, अन्यथा आज्ञापयतीत्यादेरध्याहारापत्तेः । चतुर्थमाहुः समाधीत्यादि ॥ ३३ ॥ ❀ ❀ कृष्ण इत्यत्र । मूले भगवतीति विशेषणं हेतुगर्भमिति ज्ञापयन्ति भगवत्त्वादिति । तथात्वे इति स्वानन्दानुभवप्रतिपक्षत्वे । कोटिद्वयस्येति पाल्यपालककोट्योरित्यर्थः । द्वयमिति सेतुपालनं तत्प्रतिपक्षशासनं च । स्वार्थपरित्याग इति स्वप्रयोजनत्यागः । स्वकार्यत्याग इति यावत् ॥ ३४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तद्वचनान्येव दर्शयति–अहो इति । पीव्नां पुष्टानां पालानां राज्ञामहो अधर्मः । एतदेव स्पष्टयति–स्वामिनि ब्राह्मणे यद्दासानां क्षत्रियाणामघं अपराधाचरणं तद्बलिभुजां काकानामिव द्वारपाणां शुनामिव चेति ॥ ३३ ॥ ❀ ❀ उक्तमेवोपपादयति–क्षत्रबन्धुर्हि ब्राह्मणैः श्वेव द्वारपालत्वेन निरूपितो नियोजितः स्वरक्षार्थमेव राज्येऽभिषिक्तः । स क्षत्रबन्धुर्द्वाःस्थः द्वारि स्थातुं योग्यः सन् तेषां ब्राह्मणानां गृहे सभाण्डं पात्रे स्थितं वस्तु कथं भोक्तुमर्हतीत्यन्वयः । तथाच ब्राह्मणदत्तराज्यभोगं कुर्वतो ब्राह्मणे जलाद्यर्थं नियोगस्यायोग्यत्वात् तन्नियोगे तददानेऽपि तस्मिन् क्रोधेन सर्पनिधानमनुचितमेव कृतमिति भावः ॥ ३४ ॥ ❀ ❀ उत्पथप्रतिपन्नानां शास्तरि दण्डयितरि भगवति श्रीकृष्णे स्वलोकं प्रति गते सति तान् भिन्नसेतून् मर्यादाभेदकर्तॄन् अद्याहं शास्मि शिक्षये, मम बलं पश्यत ॥ ३५ ॥ ❀ ❀ वयस्यान् बालकान् प्रति इत्येवमुक्त्वा रोषेण ताम्रे रक्ते अक्षिणी यस्य स ऋषिबालकः कौशिक्या नद्या अप उपस्पृश्याचम्य वाग्वज्रं शापं विससर्ज प्रायुङ्क्त । राज्ञः शापानर्हत्वं सरन्नाश्चर्यं द्योतयति–हेति । कौशिक्या अप इत्यत्र सन्धिरार्षः ॥ ३६ ॥

हिन्दी अनुवाद

'ये नरपति कहलानेवाले लोग उच्छिष्टभोजी कौओंके समान संड-मुसंड होकर कितना अन्याय करने लगे हैं ! ब्राह्मणोंके दास होकर भी ये दरवाजेपर पहरा देनेवाले कुत्तेके समान अपने स्वामीका भी तिरस्कार करते हैं ॥ ३३ ॥ ❀ ❀

ब्राह्मणोंने क्षत्रियोंको अपना द्वारपाल बनाया है। उन्हें द्वारपर रहकर रक्षा करनी चाहिये, घरमें घुसकर स्वामीके बर्तनोंमें खानेका उन्हें अधिकार नहीं है ॥ ३४ ॥ ❀ ❀ अतएव उन्मार्गगामियोंके शासक भगवान् श्रीकृष्णके परमधाम पधार जानेपर इन मर्यादा तोड़नेवालोंको आज मैं दण्ड देता हूँ। मेरा तपोबल देखो' ॥ ३५ ॥ ❀ ❀ अपने साथी बालकोंसे इस प्रकार कहकर क्रोधसे लाल-लाल आँखोंवाले उस ऋषिकुमारने कौशिकी नदीके जलसे आचमन करके अपने वाणीरूपी वज्रका प्रयोग किया ॥ ३६ ॥

इति[1] लङ्घितमर्यादं तक्षकः सप्तमेऽहनि । दङ्क्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम्[2] ॥ ३७ ॥

ततोऽभ्येत्याश्रमं बालो गले सर्पकलेवरम् । पितरं वीक्ष्य[3] दुःखार्तो मुक्तकण्ठो रुरोद ह ॥ ३८ ॥

स वा[4] आङ्गिरसो ब्रह्मन् श्रुत्वा सुतविलापनम् । उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वांसे[5] मृतोरगम् ॥ ३९ ॥

विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि । केन वा तेऽपकृतमित्युक्तः स न्यवेदयत् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इत्येवं सर्पनिक्षेपेण । दङ्क्ष्यति भक्षयिष्यति । पाठान्तरे भस्मीकरिष्यति । स्मेति पादपूरणे । कुलस्यांगारतुल्यं मे मया । ततेति ह्रस्वत्वमार्षम् ॥ ३७ ॥ ❀ ❀ गले सर्पकलेवरं यस्येत्यलुक्समासः । मुक्तकंठ उच्चैरित्यर्थः ॥ ३८-३९ ॥ ❀ ❀ तं सर्पं विसृज्य केनापकारः कृतः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पाठान्तरे धक्ष्यतीति पाठे । यतो मृतसर्पेणेन मत्पितुर्देहे निक्षिप्तस्ततो जीवन्नेव सर्पश्रेष्ठस्तक्षको दंशसमकालमेवायुस्तनूकरणसमर्थत्वेनान्वर्थनामा तं दंक्ष्यतीति भावः । सप्तमेहनीति । ननु राजा हि मृगयां गतः क्षुत्तृडार्त्तो मध्याह्ने मुनिवराश्रमं गत्वाऽलब्धार्घ्यः कुपितो मुनेर्गले मृतसर्पं निक्षिप्य पुनर्नगरमागतोऽनुतेपे । ततस्तद्दृषिपुत्रेणर्षिबालेभ्यो नृपकृतं पितृवृत्तं श्रुत्वा तं नृपं सप्तमेऽह्नि तक्षको दंक्ष्यतीति शेपे । पुनराश्रममागत्य पितरं तथाविधं दृष्ट्वा रुरोद । तच्छ्रुत्वा मुनिरात्मजं विनिन्द्य स्वशिष्यं गौरमुखनामानं नृपपार्श्वे शापवृत्तान्तं कथयितुं प्रेषयामास । तच्छ्रुत्वा नृपो मंत्रिभिः संमंत्र्य पुत्रं राज्येभिषिच्य गंगातटं नगरादागत्य भूशोधनपूर्वकमृषिसमाजं कृत्वा गृहीतानशन उपविवेश । ततो देशान्तराच्छ्रीशुक आगत्य तं श्रीभागवतं श्रावयामासेति एतच्चैकेन दिनेन समस्तेनापि कर्तुं न शक्यते किमुत दिनार्द्धेन । किञ्च श्रीशुकेनाप्यागत्य "सप्ताहं जीवितावधिः । उपकल्पय तत्सर्वं तावद्यत्सांपरायिकम्" इत्युक्तम् । तथा कथाश्रवणविधिरपि "आसूर्योदयमारभ्य" इत्यादिना प्रातः कालत एव । प्रथमदिने हि मनुकर्दमसंवादांता कथा कार्या—सापि न संभवतीति कथमत्र यथाश्रुतार्थग्रहणे निर्वाह इति चेत् अत्रेदमवधेयम्, सप्त च मश्चैषां सप्तमं तस्मिंस्तथा । मशब्दो हि केरलमते पंचसंख्यापरो विहितस्तेन सर्वमनवद्यम् । यद्वा सप्तसु मिलितो मः सप्तमः द्वादशेत्यर्थः । मध्यमपदलोपी समासो वा कार्यः । "पाद्याः पञ्च प्रकीर्त्तिताः" इति केरलोक्तेः । तथा च पञ्चभिर्दिनैः सर्वं कार्यं कृत्वा षष्ठदिनमारभ्य द्वादशदिनपर्यन्तं गाथा श्राविता श्रीशुकदेवेन । एवञ्च "सप्ताहं जीवितावधिः" इति तदुक्तिरपि संगता स्यादिति प्रतीयते । यद्वाऽचिंत्यशक्तिमता श्रीकृष्णेन तदेकदिनभागेनैव सर्वं संपादितमित्यवधेयम् ॥ ३७ ॥ ❀ ❀ ततो बालसमूहे शापदानोत्तरम् । इत्यर्थ इति । समाधिस्थो वाचा न बोधनीय इति विधेः कंठसंकोचे रोदनासंभवादिति भावः ॥ ३८-३९ ॥ ❀ ❀ हे वत्सेति । त्वं वत्सलोसि मे केन तेऽपकारः कृत इति एकदेशन्यायेन वत्सपदं वत्सलार्थकमत्र ज्ञेयम् । स शृङ्गी स्वकृतं राजशापं निवेदयामास ॥ ४० ॥

श्रीमद्वीरराघवव्याख्या

वाग्वज्रमेव दर्शयति इतीत्थम् उल्लंघिता मर्यादा येन तं मे ततद्रुहं ततस्तातः पिता तस्यापकारिणं कुलनाशकं राजानमितः सप्तमेऽहनि मया चोदितः प्रेरितस्तक्षकः सर्पो दंक्ष्यतीति ॥ ३७ ॥ ❀ ❀ ततो बालः पितुराश्रममागत्य गले कंठे सर्पो यस्य तत्कलेवरं यस्य तं पितरमालोक्य दुःखपीडितो मुक्तः कंठो येन सः उच्चैः स्वरयुक्त इत्यर्थः, रुरोद रोदनं कृतवान् ॥ ३८ ॥ ❀ ❀ ततो हे ब्रह्मन्स वै आंगिरसः सुतस्य विलापं श्रुत्वा शनैर्नेत्रे उन्मील्यांसे मृतमुरगं दृष्ट्वा ॥ ३९ ॥ ❀ ❀ तं परिहृत्य पुत्रं पप्रच्छ प्रश्नमेवाह हे वत्स ! कस्माद्धेतोस्त्वमिति शेषः विरोदिषि रोदनं करोषि, केन वा ते तवापकृतं भावे क्तः, इतीत्थमुक्तो बालकः सर्ववृत्तं न्यवेदयत् कथयामास ॥ ४० ॥

---

१. प्रा० पा०—अतो । २. प्रा० पा० —पितृद्रुहम् । ३. प्रा० पा०—प्रेक्ष्य । ४. प्रा० पा०—सवैवाङ्गिरसो । ५. प्रा० पा०—चांसे ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इतोऽद्यतनादह्नः धक्ष्यति स्म दग्धं कुर्यादित्येकान्वयः । सप्तमेऽह्नि मे मया चोदितः प्रेरितस्तक्षकः सर्पविशेषः लंघितमर्यादं कुलांगारं कुलनाशकं ममपितृद्रुहं परीक्षितं नाम राजानं धक्ष्यतीति लट् स्मशब्दसामर्थ्याल्लोडर्थे बोद्धव्यः, भागवतप्रधानराजदहनेऽपि सामर्थ्यद्योतनाय वायं व्यत्ययः ॥ ३७ ॥ ❋ ❋ आश्रमं गतः ततः गले सर्पकलेवरं कंठस्थितसर्पशरीरं पितरं दृष्ट्वा मुक्तकंठः उच्चै रुरोदेत्यन्वयः । समाधिस्थितो वाचा नो बोधनीय इत्यतो रोदनमुच्चैः कृतमित्यर्थद्योतको ह्यशब्दः ॥ ३८ ॥ ❋ ❋ वै अपि आंगिरसकुलोत्पन्नः स शमीकोऽपि सुतस्य विलापितं रोदनम् ॥ ३९ ॥ ❋ ❋ उरगं विसृज्य परिहृत्य कस्माद्धेतोः विरोदिषीति पुत्रं पप्रच्छेत्यन्वयः । विप्रकृतं विपरीतं कृतम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इति यतो मत्पितुर्देहे मृतसर्पो निक्षिप्तस्तस्माज्जीवन्नेव सर्पश्रेष्ठस्तक्षकस्तं दंक्ष्यति भक्षयिष्यति । धक्ष्यतीति पाठे भस्मीकरिष्यति । मे मया प्रेरितः । ततद्रुहं तातद्रुहम् ॥ ३७ ॥ ❋ ❋ गले इत्यलुक् समासः ॥ ३८-४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इतीत्थं सर्पनिक्षेपेण लंघिता मर्य्यादा येन ततद्रुहं ततस्तदपकारिणमितः सप्तमेऽह्नि मे मया चोदितः प्रेरितस्तक्षकः धक्ष्यति स्म ॥ ३७ ॥ ❋ ❋ गले सर्पो यस्य तद्गलेसर्पं तत्कलेवरं यस्य स गलेसर्पकलेवर इत्यलुक्समासस्तं वीक्ष्य मुक्तः कंठो येन स रुरोद ॥ ३८ ॥ ❋ ❋ स शमीकः आंगिरसः विलापनं श्रुत्वा नेत्रे उन्मील्य स्वांसे मृतोरगं दृष्ट्वा विसृज्य पुत्रं पप्रच्छेत्युत्तरेणान्वयः ॥ ३९ ॥ ❋ ❋ स च मृतोरगं परिहृत्य पुत्रं पप्रच्छ हे वत्स ! ते केन विप्रकृतमपकृतं भावे क्तः ॥ ४० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तस्य वाग्वज्रस्य अर्थमाह इतीति । एवं प्रकारेण त्यक्तमर्यादं तक्षकः सप्तमे दिने धक्ष्यति स्म, कुलांगारं नोदितो मे पितृद्रुहं धक्ष्यति भस्मसात् करिष्यति स्मेति प्रसिद्धे सर्वप्रसिध्या तं भक्षयिष्यतीत्यर्थः । अनेन तस्य प्रतीकारो न भविष्यतीति सूचितं "सप्त वै शीर्षण्याः प्राणा" इति श्रुतेः शिरसो रक्षितत्वात् प्राणघातकत्वेऽपि तावत्कालं जीवनमुक्तं यदि शिरसि स्थापयेत् तदैव म्रियेत । ननु पांडवकुलोत्पन्नं कथं धक्ष्यति तक्षकः तत्राह कुलांगारमिति । यदि इदानीं न दग्धः एतादृशापराधांतकरणे । कुलमेव नाशयिष्यति यादववत् अतः पांडवानामुपकारार्थमेवं धक्ष्यतीत्यर्थः । ननु प्रार्थितो न धक्ष्यतीत्याशंक्याह चोदितो म इति । यत्प्रेरितो नान्यथा करिष्यतीत्यर्थः, अन्यथा तमपि धक्ष्यामीति भावः । एवमाज्ञापने हेतुः पितृद्रुहमिति अस्मत्पित्रे द्रुह्यतीति ॥ ३७ ॥ ❋ ❋ एवं शप्त्वा तस्मिन् तेजसि शांते मानुषभावेन गृहमागत्य रोदनं कृतवानित्याह तत इति । गले इत्यलुक्समासः, बालत्वात् मृतो जीवति वेति न ज्ञातवान् तादृशं पितरं वीक्ष्य दुखेनार्त्तः मुक्तकंठः प्लावितेन स्वरेण पिता तु सर्पकंठ स्वयं मुक्तकंठ इति निश्चयो जातः ॥ ३८ ॥ ❋ ❋ किं वृत्तं तदाह स वा इति । आंगिरसः तद्गोत्रे उत्पन्नः सहि कुलीनत्वं च सूचितं ब्रह्मन्निति शंकांतरं वारितं, न हि ब्रह्मभूता अन्यथा कुर्वंति अतिस्वराघातेन समाधिर्नश्यति स्वप्नवत् तदा शनकैर्नेत्रे उन्मील्य उद्घाट्य अंसे च सर्पं दृष्ट्वा स्वभावात्तु प्रथमतो विसृज्य पुत्रत्वान्नान्यथा वचनं संभवति ॥ ३९ ॥ ❋ ❋ प्रश्नमेवाह वत्सेति । कृतमित्यंतेन वाक्यद्वयं कस्माद्रोदिषि केन वा ते अपकृतमिति विशेषकथने प्रयोजनाभावात् संक्षेपेणाह सर्वमिति ॥ ४० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

निशम्येत्यत्र । तस्येति पुत्रस्य ॥ ४० ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्प्रयुक्तं शापं दर्शयति—इत्येवं सर्पनिधानेन लङ्घिता मर्यादा येन तं मे मम ततद्रुहं पितृद्रोहकारिणम् अत एव कुलाङ्गारं स्वकुलविनाशकं शापयोग्यं राजानं मे मया चोदितस्तक्षक इतः सप्तमेऽहनि दङ्क्ष्यति भक्षयिष्यति । धक्ष्यतीति पाठे तु भस्मसात् करिष्यतीत्यर्थः । स्मेति पादपूरणे । ततेति ह्रस्वत्वमार्षम् ॥ ३७ ॥ ❋ ❋ तत एवं शापदानानन्तरं पितुराश्रममभ्येत्यागत्य गले कण्ठे सर्पो यस्य तत्कलेवरं यस्य तं स्वपितरं वीक्ष्य बालो दुःखेनार्त्तः पीडितो मुक्तकण्ठम् उच्चैः स्वरयुक्तो रुरोद । हेत्यनेन तस्याज्ञत्वं सूचयति—क शापदानं क च स्वयं रोदनमिति ॥ ३८ ॥ ❋ ❋ ततश्च हे ब्रह्मन् स वा आङ्गिरसः अङ्गिरोगोत्रोत्पन्नः शमीकः स्वसुतस्य विलापनं रोदनं श्रुत्वा शनकैर्नेत्रे उन्मील्य स्वांसे मृतमुरगं दृष्ट्वा तं विसृज्य प्रक्षिप्य पुत्रं पप्रच्छेति द्वयोरन्वयः । प्रश्नमेवाह—हे वत्स कस्मात् विशेषेण रोदिषि ? केन वा ते तव प्रतिकृतमपकारः कृतः ? इत्येवमुक्तः पृष्टः स बालकः सर्वं वृत्तं न्यवेदयत् कथयामास ॥ ३९-४० ॥

हिन्दी अनुवाद

'कुलाङ्गार परीक्षित्ने मेरे पिताका अपमान करके मर्यादाका उल्लङ्घन किया है, इसलिये मेरी प्रेरणासे आजके सातवें दिन उसे तक्षक सर्प डस लेगा' ॥ ३७ ॥ ❀ ❀ इसके बाद वह बालक अपने आश्रमपर आया और अपने पिताके गलेमें साँप देखकर उसे बड़ा दुःख हुआ तथा वह ढाड़ मारकर रोने लगा ॥ ३८ ॥ ❀ ❀ विप्रवर शौनकजी ! शमीक मुनिने अपने पुत्रका रोना-चिल्लाना सुनकर धीरे-धीरे अपनी आँखें खोलीं और देखा कि उनके गलेमें एक मरा साँप पड़ा है ॥ ३९ ॥ ❀ ❀ उसे फेंककर उन्होंने अपने पुत्रसे पूछा—'बेटा ! तुम क्यों रो रहे हो ? किसने तुम्हारा अपकार किया है ?' उनके इस प्रकार पूछनेपर बालकने सारा हाल कह दिया ॥ ४० ॥

निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो नात्मजमभ्यनन्दत् ।
अहो बतांहो महदज्ञ ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ॥ ४१ ॥
न वै नृभिर्नरदेवं पराख्यं सम्मातुमर्हस्यविपक्वबुद्धे[1] ।
यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥ ४२ ॥
अलक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।
तदा हि चौरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणोऽविवरूथवत् क्षणात् ॥ ४३ ॥
तदद्य नः पापमुपैत्यनन्वयं य[3]न्नष्टनाथस्य वसोर्विलुम्पकात् ।
परस्परं घ्नन्ति शपंति वृञ्जते पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनभिनन्दनवाक्यमहो इत्यादि । बत कष्टम् । ते त्वया महत्पापं कृतम् । द्रोहेऽपराधे । दमो दंडः ॥ ४१ ॥ ❀ ❀ परो विष्णुरित्याख्या ख्यातिर्यस्य तं नरदेवं नृभिः संमातुं समं द्रष्टुम् ॥ ४२ ॥ ❀ ❀ अलक्ष्यमाणेऽदृश्यमाने । अविवरूथवन्मेषसंघवत् ॥ ४३ ॥ ❀ ❀ नष्टो नाथो यस्य लोकस्य तस्य वसोर्वसुनो धनस्य विलुंपकादपहर्तुश्चोरादेर्हेतोर्यत्पापं भविष्यति तदस्मन्निमित्तत्वादस्मानुपैष्यति । अनन्वयं सम्बन्धशून्यमेव । तदेव पापं दर्शयति । परस्परमिति । शपंति परुषं वदन्ति । पश्वादीन्वृंजतेऽपहरन्ति । पुरुदस्यवश्चोरबहुलाः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे अज्ञेति । कर्तव्याकर्तव्यानुसंधानहीनोऽसीति भावः । "दमो दण्डे च ताडने" इति कोशात् ॥ ४१ ॥ ❀ ❀ हे अविपक्वबुद्धे इति । त्वमतीव बालिशोऽसि, यतः सर्वदेवांशविशिष्टं साक्षाद्विष्णुमूर्तिं राजानं नरसामान्यदृष्ट्या शप्तवानसीति भावः । दुर्विषहेण सोढुमशक्येन । यद्यस्य प्रजाः स्थावरजंगमात्मिकाः भद्राणि सुखानि प्राप्नुवन्ति ॥ ४२ ॥ ❀ ❀ हे अंगेति । हे पुत्रेति । अत्राप्यंगपदमंगजपरमिति भावः । "अविर्नाथे द्रुमे शैले रवौ मेषे च कम्बले । मूषिकस्य" इति कोशात् । केचित्तु रक्षाहीनसेनावदित्याहुः । "सेनारक्षा वरूथः स्यादवरोधो निवेशनम्" इत्यभिधानात् । अकारप्रश्लेषाभावेऽयमर्थः । तदा नरपत्यभावे ॥ ४३-४४ ॥

श्रीमद्वीरराघवव्याख्या

ततोऽतदर्हं शापानर्हं राजानं शप्तमाकर्ण्य ब्राह्मणः आंगिरसः पुत्रं नाभ्यनंदत् । तदेव दर्शयति अहो इति सार्द्धैः सप्तभिः । हे अज्ञ ! त्वया महदंहः पापमहो कृतं बत किं तदल्पीयसि द्रोहेऽल्पापराधे निमित्ते उरुर्दमो दंडो धृतः कृत इत्येतत् ॥ ४१ ॥ ❀ ❀ अपकृतेनापि राजा नापकार्य इत्याह न वा इति । हे अविपक्वबुद्धे ! नृभिरपकृतैर्नरदेवो नापकार्यः, अतस्त्वं नरदेवं पराख्यं परमपुरुषमिति सामर्थ्यलब्धोऽर्थः नरदेवनाम्नि रथांगपाणाविति वक्ष्यमाणानुगुणात् नरदेव इत्याख्यामात्रमेव स तु साक्षादीश्वर एवेति भावः, तं संमातुमेवार्हः न त्वपकर्तुं तत्र हेतुमाह यद्यस्मायद्विषयानपकारात् तस्य दुर्विषहेण शत्रुभिरसोढव्येन तेजसा गुप्ताः प्रजाः कुतश्चिदपि भयरहिताः भद्राणि मंगलानि सुखानीति यावत् विंदंति लभन्ते । तस्माल्लोके सुखावहो नरदेवो न हतंव्य इति भावः ॥ ४२ ॥ ❀ ❀ विपर्ययेऽनर्थमाह अलक्ष्यमाण इति त्रिभिः । नरदेवाख्ये चक्रपाणौ विष्णावलक्ष्यमाणेऽविद्यमाने सत्यंग हे पुत्र ! तदा ह्ययं लोकः अरक्ष्यमाणः अत एव चौरभूयिष्ठः सन् वृकप्रचुराविसंघ इव क्षणमात्रेण नंक्ष्यति नष्टो भविष्यति ॥ ४३ ॥

---

१. प्रा० पा०—बुद्धिः । २. प्रा० पा०—हि विरुद्धलक्षणात् । ३. प्रा० प्रा०—नष्टस्य नाथस्य ।

❀ ❀ नश्यतु का हानिरित्यत्राह तदिति। तत्पापमनन्वयमस्मत्संताननाशकमद्याधुना नोऽस्मानुपैति किं तत्पापं यद्विलुंपकाद्धेतोर्वसोर्द्धनस्य नष्टनाथस्य रक्षकरहितस्य सतः पुरवो बहवो दस्यवो येषां ते जनाः परस्परं घ्नंति शपंति वाक्पारुष्यं कुर्वंति वृंजते छिंदंत्यर्थान् वृंजते हरंतीत्येतत्॥ ४४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अतदर्हं तस्य शापस्यार्हो योग्यो न भवतीत्यतदर्हस्तं न केवलं नाभ्यनंददनिंदच्चेत्याह अहो इति। अंहः पापं बत खेदे। अल्पीयसि अणुतरे द्रोहे अपराधलक्षण उरुर्दमो महादंडः॥ ४१॥ ❀ ❀ कुत अनिंददिति तत्राह न वा इति। नराणां देवो राजा तदधीनैर्नृभिः नापराध्य इति दुर्विषहेण यस्य राज्ञस्तेजसा गुप्ताः रक्षिताः न कुतोऽपि भयं यासां ताः अकुतोभयाः प्रजाः भद्राणि विंदंति लभंत इति वै यतः बहुश्रेयोविवक्षया भद्राणीति बहुवचनम्॥ ४२॥ ❀ ❀ बाधकं चाह अरक्ष्यमाण इति। नरदेवांतर्यामित्वान्नरदेवनाम्नि रथांगपाणौ विष्णौ अरक्षमाणे पालनमकुर्वाणे सति तदानीमेवायमरक्ष्यमाणोऽपाल्यमानः चोरप्रचुरः लोको जनोऽविवरूथवत् रक्षारहितसेनावत् क्षणाद्विनंक्ष्यति हीत्येकान्वयः "सेना रक्षा वरूथः स्यादवरोधो निवेशनमि" त्यभिधानम्॥ ४३॥ ❀ ❀ नष्टनायकस्य पालकरहितस्य पशो राष्ट्रस्य चोरादयो विलुंपका नाशका इति यद्यस्मात्तस्माद्य नोऽस्माकमनन्वयमनुपमम् अन्वयविरोधिसंततिनाशकरं वा पापमुपैतीत्यन्वयः। उक्तमेव विवृणोति परस्परमिति वृंजते अपहरंति छिदंतीति वा, वसु हिंसायामिति धातोः नगरनाशकाः पुर गताविति धातोः, इतस्ततो यात्राविघ्नकरा वा पशून् घ्नंति स्त्रियः शपंति उपालभंते धर्षयंति अर्थान् वृंजत इति विवेकः॥ ४४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अलक्ष्येति। तदा हि तदैवेत्यर्थः॥ ४३-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतदर्हं शापायोग्यम्। अनभिनन्दनवाक्यमाह अहो इति। दमो दण्डः॥ ४१॥ ❀ ❀ परो विष्णुरित्याख्या ख्यातिर्यस्य तं नृभिः संमातुं समं द्रष्टुम्॥ ४२॥ ❀ ❀ अलक्ष्यमाणे अदृश्यमाने। अविवरूथवत् मेषसङ्घवत्॥ ४३॥ ❀ ❀ नष्टो नाथो यस्य तस्य लोकस्य वसोर्वसुनो धनस्य विलुम्पकादपहर्तुश्चौराद्धेतोर्यत् पापं भविष्यति तदस्मन्निमित्तत्वादस्मानुपैष्यति। अनन्वयं सम्बन्धशून्यमेव। तदेव पापं दर्शयति परस्परमिति। विशेषमाह वृंजते अपहरन्ति॥ ४४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदनर्हं शापायोग्यं नरेंद्रं शप्तं निशम्याकर्ण्यात्मजं नाभ्यनंदत्, अनभिनंदनप्रकारं दर्शयति अहो इति, करुणायां बतेति कष्टे, रे अज्ञ! ते त्वया महदंहः पापं कृतम् अल्पीयसि द्रोहे अपराधे उरुरनल्पः दमो दंडः धृतः॥ ४१॥ ❀ ❀ हे अपक्वबुद्धे! परो वासुदेव इत्याख्या ख्यातिर्यस्य तं नरदेवं नृभिः संमातुं समं द्रष्टुं नार्हसि॥ ४२॥ ❀ ❀ अलक्ष्यमाणे परलोकं गते अविवरूथवत् विनंक्ष्यति नष्टो भविष्यति॥ ४३॥ ❀ ❀ तत्पापम् अनन्वयं तव बाल्येतरसम्बन्धशून्यम् अद्य अधुना नोऽस्मानुपैति। किं तत् पापं यत् नष्टनाथस्य लोकस्य धनिनः सर्वधनस्य विलुंपकाच्चोरादेर्हेतोर्भविष्यति पुरवो दस्यवो येषु ते जनाः परस्परं घ्नंति हिंसंति शपंति वाक्पारुष्यं कुर्वंति पश्वादीन् वृंजते हरंति तत्सर्वं पापमस्मानुपैति॥ ४४॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

तदा शमीकः शृंगिवचनं श्रुत्वा विचार्य नासाधुकृतवानित्याह निशम्येति। अयुक्तत्वे हेतुः नरेन्द्रमिति। नन्वपराधिषु दण्डमेव कुतो नाभ्यनन्दत् तत्राह स ब्राह्मण इति। ब्राह्मणाः क्षमयार्हतां गताः क्षमाभावे ब्राह्मण्यं गच्छतीति भावः। न तु यथा राजा उपेक्षणीयः आत्मजत्वात् अप्रतिषिद्धमनुमतं भवतीति न्यायेन राज्ञः परलोकोऽपि गच्छेत् पितुरनुमत्या तक्षककृतमिति शब्दार्थमात्रेण सततानपर्यवसानतस्तथा फलमपि पुत्रस्यापि मन्युं त्याजयति युक्तिभिः अन्यथा तस्य दुर्मरणमेव स्यात्। अतो यथास्यानुतापो भवति तथा वचनान्याह अहो इति। राज्ञः शापः पुरुषार्थपंचकेनापि हानिर्भविष्यतीति भयप्रदर्शनेन अनुतापवचनं प्रथमतः अधर्मः कृत इत्याह-अहो आश्चर्ये बतेति खेदे, कृतं महदंहः त्वया कृतं महत्पापरूपं परमज्ञानात् अन्यथा प्रायश्चित्तमपि न स्यात्। तदेवाह अल्पीयसि द्रोहे अपराधे महान् दण्डः कृतः पर्यवसाने विचार्यमाणे अस्माखल्पोऽपराधः आश्रमस्य एकः सर्पो हतः सर्पस्पर्शः स्नानहेतुः कारितः भयं च जनितं तव। तस्य तु प्राणा एव हृताः न हि सर्पेण राज्ञस्तुल्यता भवति। न हि स्पर्शेन विषयव्याप्तेस्तुल्यता, न ह्यापाततो भयेन निकटोपस्थितप्राणहारिमहाभयस्य, तस्माद्यथापराधदण्डाभावात् अधर्मः॥ ४१॥ ❀ ❀ नन्वस्माभिस्तुल्यमेव कृतं मारणे मारणं सर्पस्पर्शः भये भयमिति तत्राह न वै नृभिरिति। हे अविपक्वबुद्धे! न हि पदार्थानां तुल्यता वर्त्तते मनुष्यैरेव राजा तुल्यो न भवति किं पुनः क्षुद्रजीवैः। ननु ब्रह्मविदां नेदं वचनं युक्तं "शुनि चैव श्वपाके च पंडिताः

समदर्शिनः" इति वाक्यात् तत्राह पराख्यमिति इदं त्वक्षरविचारेण जीवेषु ब्रह्मतुल्यमित्युक्तं, ननु भगवता सह जीवानां तुल्यता भगवतो गुणावतारत्वात् राज्ञः "स्थानेथ धर्ममखमन्वमरावनीशा" इति वाक्यात् "नाविष्णुः पृथिवीपतिरि"ति च । ननु तत् भाक्तं संमानानार्थमुक्तमिति चेत्तत्राह यत्तेजसेति, जीवानां सर्वत्र समत्वेन राजनि यत्तेजः या वा आज्ञाशक्तिः स्वरूपमात्रेणैव सर्वेषां भयनिवर्त्तनम् एते न जीवधर्माः । अतो नोपचार इत्यर्थः ॥ ४२ ॥ ❀ ❀ एवमधर्मकरणेन धर्मविरोधमाह अलक्ष्यमाण इति । एकस्मिन्नपि दिवसे राजनि अलक्ष्यमाणे अपश्यति (अदृश्यमाने ?) सति नरदेव इति नाममात्रे वस्तुतस्तु स चक्रपाणिः तदाह अङ्गपदार्थज्ञानं भवत्विति आग्रहपरित्यागेन श्रवणार्थे कोमलसम्बोधनं तस्य स्वरूपमात्रादर्शने अयं लोकश्चौरप्रचुरो भवति प्रायेण सर्वे चौरा एव भवन्ति विनश्यन्ति च बुद्धिभ्रंशश्च भवतीत्याह जना मेषसमूहवत् पालकाभावे सर्वतो गता नश्यंतीत्यर्थः । अतः सर्वेषां मर्यादानाशात् अर्थविरोधः ॥ ४३ ॥ ❀ ❀ ननु तेषामर्थविरोधे का नो हानिस्तत्राह तदद्येति । तस्माद्धेतोः अद्य पापमनन्वयमुपैति अस्मान् प्रति निष्कारणमेव अस्माभिरकृतमेव पापमुपैति । ननु कथमकारणमुपैति अन्यथा सर्वदैव स्यात् तत्राह यन्नष्टनाथस्येति । यस्मादस्मन्निमित्तं नष्टो नाथो यस्य लोकस्य तस्य वसुनस्तस्य विलुंपकात् चोरनिमित्तात् । यद्यपि साक्षादस्माभिर्नकृतं तथापि अस्मत्कृतेन कार्येण तथा जातमिति पापसम्बन्धः । न केवलमर्थनाश एव किंतु कामनाशोऽपीत्याह परस्परमिति । अन्योऽन्यमेव घ्नंति मारयन्ति शपंति गालीः प्रयच्छन्ति स्त्र्यादिपदार्थान् वृंजते अपहरंति, प्राणिनः सर्वस्वं त्रयं पशवः स्त्रियः अर्थाश्च । भूम्यादीनामेतत्साधकत्वम् एतदभावे सर्वमेव कामनोपभोग्यं नश्यतीत्याह तदार्यधर्मश्चेति । आर्याणां सतां धर्मः सदाचाररूपः सामान्यरूप एव वर्णाश्रमसहितः विशेषरूपः स एव पुनर्वेदत्रये प्रतिपाद्यो यज्ञरूपः, एतावता धर्मो नष्ट इत्युक्तम् ॥ ४४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तदार्यधर्मश्चेत्यत्र । निर्लज्जोपभोग इति द्वयं कामविशेषणत्वेन बोध्यम् ॥ ४४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अतदर्हं शापानर्हं नरेन्द्रं शप्तं निशम्य श्रुत्वा स ब्राह्मणः शमीक आत्मजं स्वपुत्रं शृङ्गिनामानं नाभ्यनन्दत् किन्तु निन्दितवान् । निन्दामेव दर्शयति–अहो इति सार्द्धैः सप्तभिः । हे अङ्ग ते त्वया महदंहः पापं कृतम् । अस्मत्कुले एतन्न सम्भवतीत्याश्चर्यं द्योतयति–अहो इति । तेन सखेदं सूचयति–बतेति । पापमेव दर्शयति–अल्पीयसि अतितुच्छे द्रोहे राजकृतापकारे निमित्ते सति उरुर्महान् दमो दण्डो धृतः कृतः ॥ ४१ ॥ ❀ ❀ हे अविपक्वबुद्धे नृभिः साधारणनरैः पराख्यं परमेश्वरांशभूतं नरदेवं राजानं सम्मातुं समं द्रष्टुमेव नार्हसि, तत्रापकारस्तु दूरत एव । कुत इत्यपेक्षायामाह–यदिति । यस्य दुर्विषहेण चोरादिदुष्टैः सोढुमशक्येन तेजसा गुप्ताः सुरक्षिताः अत एव न कुतश्चिदपि भयं यासां ताः प्रजाः भद्राणि सुखानि विन्दन्ति लभन्ते । अतो राजनि कृतो द्रोहः सर्वत्र कृतो भवतीति भावः ॥ ४२ ॥ ❀ ❀ तच्छापेनानर्थमाह–अलक्ष्यमाणे इति त्रिभिः । हे अङ्गेति सम्बोधनेन पुत्रत्वात् स्नेहेन त्वां प्रति यथार्थमेव वदामीति सूचयति । यदा हि शापेनायं राजा मरिष्यति तदा नरदेवनाम्नि रथाङ्गपाणौ विष्णावलक्ष्यमाणे सत्ययं दृश्यमानो लोकोऽरक्ष्यमाणः अत एव चौरप्रचुरः सन् क्षणादेव विनङ्क्ष्यतीत्यन्वयः । लोकप्रसिद्धोऽयमर्थ इति सूचयितुं हिशब्दः । तदेव दृष्टान्तेन स्पष्टयति–अविवरूथवदिति, अरक्ष्यमाणो मेषसङ्घो यथा वृकादिभ्य आशु विनश्यति तथेत्यर्थः ॥ ४३ ॥ ❀ ❀ लोको विनश्यतु तेन का नो हानिरित्यत्राह–तदिति । नष्टो नाथो रक्षको यस्य तस्य लोकस्य वसोर्वसुनो धनस्य विलुम्पकात् अपहर्तुश्चौराद्धेतोर्यत्पापं भविष्यति तदस्मत्कृतशापनिमित्तत्वान्नोऽस्मान् अद्य शीघ्रमेव उपैति उपैष्यति । यतः पुरत्रो बहुला दस्यवो येषु ते जनाः परस्परं घ्नन्ति शपन्ति परुषं वदन्ति पश्वादीन् वृञ्जतेऽपहरन्ति च ॥ ४४ ॥

हिन्दी अनुवाद

ब्रह्मर्षि शमीकने राजाके शापकी बात सुनकर अपने पुत्रका अभिनन्दन नहीं किया । उनकी दृष्टिमें परीक्षित् शापके योग्य नहीं थे । उन्होंने कहा–'ओह, मूर्ख बालक ! तूने बड़ा पाप किया ! खेद है कि उनकी थोड़ी-सी गलतीके लिये तूने उनको इतना बड़ा दण्ड दिया ॥ ४१ ॥ ❀ ❀ तेरी बुद्धि अभी कची है । तुझे भगवत्स्वरूप राजाको साधारण मनुष्योंके समान नहीं समझना चाहिये; क्योंकि राजाके दुस्सह तेजसे सुरक्षित और निर्भय रहकर ही प्रजा अपना कल्याण-सम्पादन करती है ॥ ४२ ॥ ❀ ❀ जिस समय राजाका रूप धारण करके भगवान् पृथ्वीपर नहीं दिखायी देंगे उस समय चोर बढ़ जायँगे और अरक्षित भेड़ोंके समान एक क्षणमें ही लोगोंका नाश हो जायगा ॥ ४३ ॥ ❀ ❀ राजाके नष्ट हो जानेपर धन आदि चुरानेवाले चोर जो पाप करेंगे; उसके साथ हमारा कोई सम्बन्ध न होनेपर भी वह हमपर भी लागू होगा । क्योंकि राजाके न रहनेपर लुटेरे बढ़ जाते हैं और वे आपसमें मार-पीट, गाली-गलौज करते हैं, साथ ही पशु, स्त्री और धन-सम्पत्ति भी लूट लेते हैं ॥ ४४ ॥

तदाऽऽर्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ।
ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ॥ ४५ ॥
धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः । साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ।
क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ॥ ४६ ॥
अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना । पापं कृतं तद्भगवान् सर्वात्मा क्षन्तुमर्हति ॥ ४७ ॥
तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि । नास्य तत् प्रतिकुर्वंति तद्भक्ताः प्रभवोऽपि हि ॥४८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आर्यधर्मः सदाचारः । शुनां कपीनामिवार्थकामयोरेवाभिनिवेशितचित्तानाम् ॥ ४५ ॥ ❀ ❀ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुते विशेषमाह धर्मपाल इति सार्धेन । हयमेधयाडश्वमेधयाजी । नन्वेवंभूतश्चेत्तत्कुतोपकृतवांस्तत्राह । क्षुत्तृडिति । स्वागतप्रश्नाद्यभावेनावज्ञातः प्रत्युत शापं कथमर्हतीत्यर्थः ॥ ४६ ॥ ❀ ❀ अस्य महापापस्यान्यत्प्रायश्चित्तमदृष्ट्वा पापमावेदयन् भगवन्तं प्रार्थयते । अपापेष्विति ॥ ४७ ॥ ❀ ❀ राजा चेत्प्रतिशापं दद्यात्तर्हि निष्कृतिर्भवेदपि तत्तु न सम्भवति तस्य महाभागवतत्वादित्याह । तिरस्कृता निन्दिताः । विप्रलब्धा वंचिताः । क्षिप्ता अवज्ञाताः । हतास्ताडिताः । अस्य तिरस्कारादिकर्तुः । न तत्प्रतीकारं कुर्वन्ति । तद्भक्ता विष्णुभक्ताः । प्रभवः समर्था अपि ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"आर्यः शिष्टे वैश्यवर्गे" इत्यभिधानात् । सदाचारश्शिष्टाचारः । कर्त्तव्यतांशे भ्रान्तिरहिता वेदविहितकर्मकर्तारः शिष्टाः । तदेवाह । त्रयीमयः त्रय्या वेदैर्मीयते ज्ञायते प्रतिपाद्यत इति त्रयीमय इति । अत एव वर्णाचारैराश्रमाचारैश्च युतः धर्मलयपरिपाकमाह । ततो वर्णाश्रमाचारयुतवैदिकार्यधर्मनाशानन्तरमर्थेषु कनकादिषु कामेषु स्रक्चन्दनवनितादिभोगेषु चाभिनिवेशित आत्मा मनो यैस्ते तथोक्तास्तेषां पुंसां शुनां कपीनां च यथा हीनजातीनामुत्तमजातिभिरुत्तमजातीनां हीनजातिभिर्भोगसंभोगादिना वर्णानां संकरः कलुषीभावो भविष्यतीत्यर्थः ॥ ४५ ॥ ❀ ❀ अत्र धर्मपालादिविशेषणानि हेतुगर्भाणि । धर्मपालनत्वान्महाभागवतत्वाद्राजर्षित्वाद्धयमेधयाजित्वाच्च सम्राट् न दुष्टः क्षुत्तृट्श्रमान्वितत्वेन बुभुक्षापिपासादिनास्मदाश्रमागतोऽर्घादिपूजायोग्यो नैवास्मत् अस्मत्तः शापमर्हति । तस्मादनिर्वार्यमघमापन्नमिति भावः । हयमेधैरिष्टवानिति हयमेधयाट् ॥ ४६ ॥ ❀ ❀ अस्य राजशापलक्षणस्य यत्पापं कृतं तत् सर्वात्मनान्तर्यामी ॥ ४७ ॥ ❀ ❀ हिशब्देन "क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा" इति प्रसिद्धिं द्योतयति ॥ ४८ ॥

श्रीमद्वीरराघवव्याख्या

किंच तदा नरदेवनाम्नि रथांगपाणावलक्ष्यमाणे सति वर्णाश्रमाचारयुतः त्रय्या आगतस्त्रयीमयः, तत आगत इत्यधिकारे "मयट्च" (४।३।८२) इति मयट् वैदिक इत्यर्थः, नृणामार्यधर्मः सतां धर्मश्च विलीयते नंक्ष्यति ततो धर्मलयादर्थकामयोर्निवेशितः अभिनिविष्टः आत्मा मनो येषां नृणां शुनामिव च संकरो भविष्यति ॥ ४५ ॥ ❀ ❀ एवं सामान्यनरदेवस्यानिग्राह्यत्वमुक्त्वाथ प्रकृतं परीक्षितं निर्दिश्याह धर्मपाल इति । स तु नृपतिः परीक्षिद्धर्मपालः वर्णाश्रमधर्ममर्यादापलकस्तथात्वेन विश्रुतः विपुलकीर्त्तिः सार्वभौमश्च तत्रापि महाभागवतः, अनेन ब्रह्मविदपकर्तॄणां नो गतिरेव नास्तीति भावः, राजर्षिः केवलं राजऋषिरेव न हयमेधयाट् हयमेधेन इष्टवान् ॥ ४६ ॥ ❀ ❀ क्षुत्तृड्भ्यां यः श्रमस्तेन युतः, अत एव दीनश्च तथाभूतः सर्वथाऽस्मच्छापं नार्हति एवमात्मजमनभिनंद्य तत्कृतादघादात्मनोऽनर्थमाशंक्य भगवंतं क्षमापयति अपापेष्विति । सर्वात्मा सर्वान्तरात्मा शप्तृशप्तयोरप्यंतरात्मतयावस्थित इति भावः, भगवानपापेषु स्वभक्तेष्वनेनापक्वबुद्धिना विवेकरहितेन कृतं पापमिदं क्षंतुमर्हति ॥ ४७ ॥ ❀ ❀ शास्त्रान्मद्विषयापराधः कथंचिन्मच्छरणवरणादिना सह्यः स्यान्मद्भक्तविषयापराधस्तु न कथंचिदपि किंतु तैरेव सह्यः इत्येवंविधं भगवदभिप्रायमालोच्य तानेव क्षमापयति तिरस्कृता इति । तिरस्कृताः परिभूता अपि प्रलब्धाः प्रतारिता अपि क्षिप्ता निंदिता अपि हतास्ताडिता अपि तद्भक्ताः भगवद्भक्ताः प्रभवोऽपि प्रत्यपकर्तुं समर्था अप्यस्य तिरस्कारकर्तुः न तिरस्कारादि कर्तॄन्प्रतिकुर्वंति, किन्तु केवलं क्षाम्यन्ति ॥ ४८ ॥

---

१. प्रा० पा०—तदाशु धर्मः सुविली० ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तस्य परिपाकमाह तदेति । यदा पश्चादिहंतृशिक्षा न क्रियते तदा आर्याणां शिष्टानां संमतो धर्मो धर्मेऽधिकृतानामनुष्ठातॄणां विलीयते क्रमेण ह्रसितस्तिरोभवति च । कीदृशः त्रय्या त्रिभिर्वेदैर्मीयते ज्ञायते प्रतिपाद्यत इति त्रयीमयः, अत एव वर्णाचारैराश्रमाचारैश्च युतः धर्मलयपरिपाकमाह तत इति । ततः वर्णाश्रमाचारयुतवैदिकार्थधर्मनाशानंतरं कनकाद्यर्थेषु स्रक्चंदनवनितादिभोगलक्षणकामेषु अभिनिवेशित आत्मा मनो येषां ते तथोक्ताः तेषां पुंसां यथा शुनां कपीनां च भक्षणभोगादावनवस्था तथा हीनजातीनामुत्तमजातिभिरुत्तमजातीनां हीनजातिभिर्भोगसंभोगादिना वर्णानां संकरः कलुषीभावो भविष्यतीन्येकान्वयः ॥ ४५ ॥ ❋ ❋ परीक्षितोऽदुष्टत्वे नन्विदं तदेव कथमिति तत्राह धर्मपाल इति । अत्र धर्मपालादिविशेषणानि हेतुगर्भाणि धर्मपालत्वान्महाभागवतत्वात् राजर्षित्वाद्धयमेधयाजित्वाच्च सम्राट् न दुष्टोऽतः क्षुत्तृट्श्रमान्वितत्वेन बुभुक्षापिपासया दीनोऽस्मदाश्रममागतोऽर्घ्यादिपूजायोग्यो नैवास्मत् अस्मत्तः शापमर्हति तस्मादनिवार्यमघमापन्नमिति भावः । हयमेधैरश्वमेधैरिष्टवानिति हयमेधयाट् ❋ ❋ इत्थमघस्य सिद्धत्वमापाद्यानुतापपूर्वकं तदघनिष्कृतिं करोति अपापेष्विति । सर्वात्मा सर्वान्तर्यामी श्रीनारायणः बालेन स्वभृत्येषु कृतं तत्पापं क्षंतुमर्हतीत्यन्वयः ॥ ४७ ॥ ❋ ❋ अस्मदाश्रममागतोऽवज्ञातः परीक्षित् प्रभुरपि न तत्प्रतिचक्र इत्याशयेनाह तिरस्कृता इति । तिरस्कृता निंदिताः विप्रलब्धाः वंचिताः शप्ताः उपालब्धाः क्षिप्ता अधिक्षिप्ताः हतास्ताडिताः अपिशब्दः प्रत्येकमभिसंबध्यते प्रभवोऽपि प्रतिकर्तुं समर्था अपि प्रतिशापं कर्तुं वा तद्भक्तास्तस्य हरेर्भक्ताः अस्य तिरस्कारादिकर्तुः संबंधितत्तिरस्काराद्युद्दिश्य न प्रतिकुर्वंति प्रतिक्रियां नैव कुर्वंतीत्यर्थः । हिशब्देन "क्षमा बलमशक्तानां शक्तानां भूषणं क्षमे"ति प्रसिद्धिं दर्शयति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

धर्मपाल इति । व्यवहारतोऽपि महानित्याह हयमेधयाडिति ॥ ४६ ॥ ❋ ❋ सर्वात्मेति । अत्र महतोऽपि तदात्मकत्वात् तद्द्वारा क्षमापणं युक्तमेवेत्यर्थः ॥ ४७–५० ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आर्यधर्मः सदाचारः ॥ ४५ ॥ ❋ ❋ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुतेऽतिविशेषमाह धर्मपाल इति ॥ ४६ ॥ ❋ ❋ अस्य महापापस्यान्यत् प्रायश्चित्तमदृष्ट्वा पापमेवावेदयन् भगवन्तं प्रार्थयते अपापेष्विति ॥ ४७ ॥ ❋ ❋ राजा चेत् प्रतिशापं दद्यात् तर्हि निष्कृतिर्भवेदपि तत्तु न सम्भवति तस्य महाभागवतत्वादित्याह । तिरस्कृता निन्दिताः । विप्रलब्धा वंचिताः । क्षिप्ता अवज्ञाताः । हतास्ताडिताः । प्रभवः समर्था अपि । अस्य तिरस्कारादिकर्तुर्न तत्प्रतीकारं कुर्वन्ति ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वर्णाश्रमाचारयुतः त्रयीमयः त्रय्या आगतः तत आगत इत्यधिकारे "मयट्च" (४ । ३ । ८२) इति मयट् प्रत्ययः । आर्यैर्मन्वादिभिर्निवृत्तिप्रवृत्तिभेदेनोपबृंहितत्वादार्याणां तेषां धर्मः तदा नरदेवनाम्नि रथांगपाणावलक्ष्यमाणे सति विलीयते । ततो धर्मविलयाद्धेतोः अर्थकामयोरेवाभिनिवेशितचित्तानां शुनां कपीनामिव वर्णसंकरः भविष्यति ॥ ४५ ॥ ❋ ❋ हयमेधयाट् हयमेधयाजी अस्य महापापस्य भगवत्प्रार्थनेतरप्रायश्चित्तमपश्यमानस्तं प्रार्थयते भगवान् सर्वात्मा क्षंतुमर्हतीति ॥ ४६–४७ ॥ ❋ ❋ प्रतिशापरूपं प्रायश्चित्तं तु न प्राप्स्यामीत्याह तिरस्कृता इति । तिरस्कृताः निरादृताः विप्रलब्धाः वंचिताः क्षिप्ताः निंदिताः हतास्ताडिता अपि तस्य भगवतो भक्ताः प्रभवः प्रतिकर्तुं तु समर्था अपि अस्य तिरस्कारादिकर्तुः न तत्प्रतिकुर्वंति ॥ ४८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

किमतो यद्येवं तत्राह तत इति । ऐहिके त्रयमेव धर्मार्थकामाख्यं तत्र धर्मे गते अर्थकामे अभिनिविष्टा एव भवन्ति ततश्चाधर्महेतुर्वर्णसंकरो भवति निर्लज्ज इति भावः । दुःखादिना भूतश्चेति शुनां दृष्टान्तः तेषामानुपूर्व्याः अप्रसिद्धत्वात् पुरुषद्वयेऽप्येकोन्वयो न स्यात् , ततश्च संकरधर्मा अपि गच्छेयुः, किंच वानरा वृक्षजीविकया जीवंतः मातृभगिनीविवेकरहिता बुद्धिमंतोऽपि एकस्यां शतं वर्तंते एकस्मिन्नपि पुरुषे वर्णत्वं नास्ति ग्राम्यारण्यपशूपलक्षके दृष्टान्तद्वयं तस्मात्सर्वमूलकामो गच्छतीत्युक्तम् ॥ ४५ ॥ एवं परंपरया दोषमुक्त्वा साक्षात् दोषमाह धर्मपाल इति । एकैकोऽपि गुणः अस्माभिः सर्वात्मना पूज्यः, अस्य तु सर्वे गुणाः धर्ममार्गेणायं पूज्यः तदाह धर्मपाल इति । ज्ञानमार्गेणाप्ययं पूज्यः नरपतिरिति, कामार्थमप्ययं पूज्यः सम्राडिति, साम्राज्यश्रिया जुष्टः सर्वं दातुं समर्थ इति । प्रसिद्धिरपि प्रजाहेतुः बृहच्छ्रवा इति । बृहत् श्रवः कीर्तिर्यस्य भक्तिमार्गेणाप्ययं पूज्यः साक्षात् महाभागवत

इति । अन्ये तु गुरुद्वारा भगवता अङ्गीकृता महाभागवता भवन्ति, अस्य तु भगवानेव गुरुः । अतः साक्षात् महाभागवतत्वं वैदिकविचारेणाप्ययं पूज्यः वेदार्थपालकत्वात् मंत्रद्रष्टृत्वात्तदाह राजर्षिरिति । कर्मणाप्ययं पूज्यः हयमेधयाडिति हयमेधेन इष्टवान्, किंच धर्मादिविचारव्यतिरेकेणापि केवललौकिकविचारेणापि पूजयितुं युक्तः तदाह क्षुत्तृट्श्रम इति । ते पूर्वमुक्ता योगाद् ज्ञाताः, विशुष्यत्तालुत्वात् दीनः एवं सर्वेण प्रकारेण पूज्यः शापं नार्हति तस्मात् पूज्यपूजाव्यतिक्रमादधर्मदोषदर्शनात् जीवितत्वं वृथा जातमित्यर्थः ॥ ४६ ॥ ❋ ❋ किंच भक्तद्रोहे भगवान् क्रुध्यति तेन सर्वनाशो भविष्यतीति भीतः सन् भगवन्तं प्रार्थयते अपापेष्विति । हे भगवन् ! स्वभृत्येषु तव भृत्येषु पालयभृत्येषु त्वया विचार्यमाणे अपापेषु अपक्वबुद्धिना अपूर्वदर्शिना "नवै शिशूनां गुणदोषयोः पदमि"ति ज्ञापनार्थमाह बालेनेति, पापं शापरूपं क्षमायां हेतुः सर्वात्मेति, सर्वेषामेव त्वमात्मा, अतः स्वकीयकृतवैषम्याभावः । ननु ब्राह्मणानां किं भयं तत्राह भगवानिति अनेन मोक्षविरोध उक्तः ॥ ४७ ॥ ❋ ❋ भक्तिविरोधं वदन् तेनापि शापे दत्ते समः समाधिर्भविष्यतीत्याशंकां परिहरति तिरस्कृता इति । गालिदानादिना तिरस्कृताः वक्रोक्त्या विप्रलब्धाः वंचिताः शप्ताः इदानीमेव क्षिप्ताः अधिक्षिप्ताः हतास्ताडिताः गुणक्रियास्वरूपाहंकारदेहनाशेऽपि न प्रतिकारं कुर्वंतीत्यर्थः । प्रतिकूलतया करणं तु दूरापास्तं तत्र हेतुः तद्भक्ता इति । अत एव समर्था इति हि युक्तोऽयमर्थः, शक्तौ क्षमाया उचितत्वात् ॥ ४८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

क्षुत्तृडित्यत्र । ते पूर्वमुक्ता इति । ते क्षुत्तृडादयः पूर्वं सूतोक्ता इत्यर्थः ॥ ४५ ॥ ❋ ❋ इतीत्यत्र । युक्तमेवेति । 'जिघांसन्तं जिघांसीयादि'ति लोकन्यायेन ॥ ४८ ॥

इति प्रथमस्कन्धे सुबोधिनीप्रकाशेऽष्टादशाध्यायविवरणम् ॥ १८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदा रक्षकाभावकाले वर्णाश्रमाचारयुतः त्रयीमयः त्रय्या आगतः वेदत्रयप्रतिपादितो नृणामार्यधर्मः सन्मार्गश्च विलीयते विनङ्क्ष्यति । ततश्च धर्मविनाशात् अर्थकामयोरभिनिवेशित आत्मा मनो येषां तेषां शुनामिव कपीनामिव च वर्णानां सङ्करो भविष्यति ॥ ४५ ॥ ❋ ❋ अतः स तु नरपतिः परीक्षिदस्मच्छापं नैवार्हतीति सार्द्धान्वयः । तुशब्देनान्यराजभ्योऽस्य वैलक्षण्यं सूचितम् । तदेव विशेषणैः स्पष्टयति–धर्मपालो वर्णाश्रमधर्ममर्यादापालकः, यतः सम्राट् सार्वभौमः, अत एव बृहच्छ्रवाः विपुलकीर्तिः साक्षात् फलाभिसन्धिमन्तरेणैव महाभागवतो निरन्तरं भगवत्सेवकः, राजर्षिः राज्ये स्थितोऽप्यृषिवद्विषयानासक्ततया वर्त्तमानः, हयमेधेन यजतीति हयमेधयाट् । तर्हि कथं तव कण्ठे सर्पं निक्षिप्तवानित्याकाङ्क्षायामाह–दीन इति । तत्र हेतुमाह–क्षुत्तृट्श्रमयुत इति ॥ ४६ ॥ ❋ ❋ एवमात्मजमनभिनन्द्य तत्कृतादघादात्मनोऽनर्थमाशङ्क्य अपराधं निवेदयन् भगवन्तं क्षमापयति–अपापेष्विति । अपापेषु निरपराधेषु स्वभृत्येषु बालेन यच्छापदानलक्षणं पापं कृतं तद्भगवान् क्षन्तुमर्हतीत्यन्वयः । पापकरणे हेतुं सूचयन् बालं विशिनष्टि–अपक्वबुद्धिनेति । क्षमायोग्यतां सूचयन् भगवन्तं विशिनष्टि–सर्वात्मेति ॥ ४७ ॥ ❋ ❋ नन्वस्मत्कृतापराधाधिक्यं चेत्तर्हि राजाऽपि पुनः किञ्चित्प्रतिकारं करिष्यति तेन तन्निष्कृतिर्भविष्यत्येव, किं भगवत्प्रार्थनयेति पुत्राभिप्रायमाशङ्क्य तं प्रत्याह–तिरस्कृताः परिभूता अपि, विप्रलब्धाः प्रतारिता अपि, शप्ताः शापविषयीकृता अपि, क्षिप्ताः निन्दिता अपि, हतास्ताडिता अपि, प्रभवोऽपि प्रतिकर्तुं समर्था अपि तस्य भगवतो भक्ता अस्य तिरस्कर्तुः तत् तत्कृततिरस्कारादि प्रति न प्रतिकुर्वन्ति स्वयं तिरस्कारादिकं नैव कुर्वन्ति ॥ ४८ ॥

हिन्दी अनुवाद

उस समय मनुष्योंका वर्णाश्रमाचारयुक्त वैदिक आर्यधर्म लुप्त हो जाता है, अर्थ-लोभ और काम-वासनाके विवश होकर लोग कुत्तों और बंदरोंके समान वर्णसङ्कर हो जाते हैं ॥ ४५ ॥ ❋ ❋ सम्राट् परीक्षित् तो बड़े ही यशस्वी और धर्मधुरन्धर हैं । उन्होंने बहुत-से अश्वमेध यज्ञ किये हैं और वे भगवान्के परम प्यारे भक्त हैं; वे ही राजर्षि भूख-प्याससे व्याकुल होकर हमारे आश्रमपर आये थे, वे शापके योग्य कदापि नहीं हैं ॥ ४६ ॥ ❋ ❋ इस नासमझ बालकने हमारे निष्पाप सेवक राजाका अपराध किया है, सर्वात्मा भगवान् कृपा करके इसे क्षमा करें ॥ ४७ ॥ ❋ ❋ भगवान्के भक्तोंमें भी बदला लेनेकी शक्ति होती है; परंतु वे दूसरोंके द्वारा किये हुए अपमान, धोखेबाजी, गाली-गलौज, आक्षेप और मार-पीटका कोई बदला नहीं लेते ॥ ४८ ॥

इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः । स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत् ॥ ४९ ॥

प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः । न व्यथन्ति न हृष्यंति यत आत्मागुणाश्रयः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे[१] विप्रशापोपलम्भनं नामाष्टादशोऽध्यायः ॥ १८ ॥

---

१. प्रा० पा०—'पारमहंस्यां संहितायां पारीक्षितोपाख्याने' एतदधिकम् । 'विप्र' शब्दस्य स्थाने 'ब्रह्म' शब्दः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

विप्रकृतोऽपकृतः । अघमपराधम् ॥ ४९ ॥ ❀ ❀ युक्तं चैतदित्याह । प्रायश इति । द्वंद्वेषु सुखदुःखादिषु । अगुणाश्रयः सुखदुःखाद्याश्रयो न भवति ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे टीकायामष्टादशोऽध्यायः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदघं तेन राज्ञा कृतमपराधम् । महामुनिरिति हेतुगर्भं विशेषणम् । सर्वज्ञतमत्वाच्छरीराभिमानिन एव दुःखादिप्राप्त्या कोपोत्पत्तिर्न त्वसंप्रज्ञातसमाधेस्तस्य पद्मपत्रपानीयवदश्लिष्टदुरितत्वादित्यर्थः ॥ ४९ ॥ ❀ ❀ साधूनामयं स्वभाव एवेत्याह–युक्तं चैतदिति । योजिताः संगमिताः साधवो यथास्थितवस्तुदर्शिनः कुतो ऽव्यथाद्यभावस्तत्राह–यत इति । अकारप्रश्लेषाप्रश्लेषाभ्यां गुणस्यागुणस्य दोषस्य चाश्रयो नेत्यर्थः । अत्र नेत्यध्याहर्त्तव्यम् ॥ ५० ॥

इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधेऽष्टादशोऽध्यायः ॥ १८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

महामुनिशब्दोऽत्र यौगिकः महामननशील इति यावत् ॥ ४९–५० ॥

इति दीपन्यामष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवव्याख्या

इतीत्थं स महामुनिः पुत्रकृतेनाघेनानुतप्तः राज्ञा स्वयं विप्रकृतोऽपि तद्राजकृतमघमपराधं नैवाचिंतयन्न चिंतितवान् ॥४९॥ ❀ ❀ कुतो नाचिंतयदित्यत्राह प्रायश इति । लोके परैरन्यैर्द्वंद्वेषु शीतोष्णसुखदुःखादिषु योजिताः संयोजिता अपि साधवः प्रायेण न व्यथंति न हृष्यंति च यथासुखे योजिता न हृष्यंति तथा दुःखे योजिता न व्यथंतीत्यर्थः कुतः । यतः आत्मा तेषां मनः गुणाश्रयः शीलाश्रयः । यद्वा अगुणाश्रय इति च्छेदः गुणकार्यरागद्वेषाद्यनाश्रयः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायामष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तदघं तेन राज्ञा कृतमपराधं महामुनिरिति हेतुगर्भं विशेषणं सर्वज्ञतमत्वाच्छरीराभिमानिन एव दुःखादिप्राप्त्या कोपोत्पत्तिः न त्वसंप्रज्ञातसमाधेस्तस्य पद्मपत्रपानीयवदश्लिष्टदुरितत्वादित्यादिविशेषत्वादित्यर्थः ॥ ४९ ॥ ❀ ❀ साधूनामयं स्वभाव इत्याह साधव इति । द्वंद्वेषु सुखदुःखादिषु योजिताः साधवः यथास्थितवस्तुदर्शिनः कुतो ऽव्यथाद्यभाव इति तत्राह यत इति । आत्मा गुणाश्रय इत्यस्याकारप्रश्लेषाप्रश्लेषाभ्यां पदच्छेदः कर्तव्यः, गुणस्यागुणस्य दोषस्य वात्मा कर्ता जीवः स्वयमेवाश्रयः तत्तस्मादिति ॥ ५० ॥

इति श्रीमद्भागवते प्रथमस्कन्धे श्रीविजयध्वजटीकायां रत्नावल्यामष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यद्विप्रकृतस्तिरस्कृतस्तत्तिरस्करणे अघम् अपराधं न अभावयत् ॥ ४९ ॥ ❀ ❀ युक्तं चैतदित्याह प्रायश इति । द्वन्द्वेषु सुखदुःखादिषु । अगुणाश्रयः प्राकृतसुखदुःखाद्याश्रयो न भवति ॥ ५० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । प्रथमेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

राजा स्वयं विप्रकृतोऽपकृतोऽपि तस्याघमपराधं नैवाचिंतयत् ॥ ४९ ॥ ❀ ❀ अचिंतने हेतुमाह प्रायश इति । अगुणाश्रयः रागद्वेषाद्याश्रयो न भवति ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं पितुरनुतापनिरूपणेन राज्ञो निर्दुष्टत्वं निरूप्य सदुष्टस्य सदुष्टानुमोदनं युक्तमेवेति इमामाशंकां परिहर्तुमृषिं स्तौति इतीति। अन्यकृतेनापि पापेन सोऽनुतप्तो जातः। तत्र हेतुः मुनिरिति। भगवताप्यनुचितं ज्ञातमिति भगवद्धृदयपरिज्ञानात् मुनित्वम्। किंच सर्पस्थापनेन स्वयं विप्रकृतः तदपराधं मनसापि न धृतवान्, अतः परंपरयापि पापानिरूपकत्वात् भगवद्धृदयज्ञानात् दोषदर्शित्वाच्च महान् मुनिः ॥ ४९ ॥ ❀ ❀ उभयोस्तुल्यतया उपसंहरति प्रायश इति। साधवः राजा मुनिश्चापकृते सामान्यतस्तु सर्वलोके सर्वत्रैव परैरसाधुभिः तदानींतनराज्ञा ऋषिबालकेन च साधारण्ये त्वन्यैः द्वंद्वेषु सुखदुःखादिषु योगं प्रापिता दुःखेन योजिता न व्यथंति सुखेन योजिता न हृष्यन्ति। तस्माद्यद्येतयोः पश्चात् क्षोभाभावः तद्युक्तमेव तत्रोपपत्तिमाह यत आत्मा अगुणाश्रय इति। गुणा हर्षादयः तेषामाश्रयः अंतःकरणमेव न आत्मा अतस्तेषामंतःकरणाध्यासाभावात् क्षोभाभाव उचित इति भावः ॥ ५० ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंधेऽष्टादशोऽध्यायः ॥ १८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी।

स शमीक इत्येवं पुत्रकृतेनापराधेन अनुतप्तः स्वयं च राज्ञा सर्पप्रक्षेपेण विप्रकृतोऽपि तस्याघमपराधं नैवाचिन्तयदित्यन्वयः। तत्र हेतुमाह–महामुनिरिति, यतो मननशील इत्यर्थः ॥ ४९ ॥ ❀ ❀ न केवलं तस्यैवायं स्वभावः किन्तु साधूनां सर्वेषामेवेत्याह प्रायश इति। परैः शत्रुमित्रादिभिर्द्वन्द्वेषु शीतोष्णसुखदुःखादिषु योजिता अपि ये लोके साधवो मननपूर्वकस्वपरकार्यसाधनपरास्ते दुःखे न व्यथन्ति सुखे च न हृष्यन्ति। यतस्तेषामात्माऽन्तःकरणं क्षमासन्तोषादिगुणाश्रयः। यद्वा अगुणाश्रय इति च्छेदः, गुणकार्यरागद्वेषाद्यनाश्रय इत्यर्थः ॥ ५० ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता प्रथमे तत्रोत्तमाधिकारवर्णने ॥ अष्टादशो गतो वृत्ति ब्रह्मशापनिरूपकः ॥ ३ ॥

हिन्दी अनुवाद

महामुनि शमीकको पुत्रके अपराधपर बड़ा पश्चात्ताप हुआ। राजा परीक्षित्‌ने जो उनका अपमान किया था, उसपर तो उन्होंने ध्यान ही नहीं दिया ॥ ४९ ॥ ❀ ❀ महात्माओंका स्वभाव ही ऐसा होता है कि जगत्‌में जब दूसरे लोग उन्हें सुख-दुःखादि द्वन्द्वोंमें डाल देते हैं, तब भी वे प्रायः हर्षित या व्यथित नहीं होते; क्योंकि आत्माका स्वरूप तो गुणोंसे सर्वथा परे है ॥ ५० ॥

१८ वाँ अध्याय समाप्त

अथैकोनविंशोऽध्यायः

सूत उवाच

महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ।
अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥
ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात् ।
तदस्तु कामं त्व[1]घनिष्कृताय मे यथा न कुर्यां पुनरेवम[2]द्धा ॥ २ ॥
अद्यैव राज्यं बलम[3]द्धकोशं प्रकोपितब्रह्मकुलानलो मे ।
दहत्वभद्रस्य पुनर्न मेऽभूत्[4] पापीयसी धीर्द्विजदेवगोभ्यः ॥ ३ ॥
स चिंतयन्नि[5]त्थमथाशृणोद् यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ।
स साधु मेने नचिरेण तक्षका[6]नलं प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रायोपविष्टे गंगायां राज्ञि योगिजनावृते । शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके ॥ १ ॥

स्वकृतं तत्कर्म मुनिस्कन्धे सर्पप्रक्षेपणं गर्ह्यं निंद्यं चिन्तयन्सुदुर्मना जातः । चिन्तामेवाह सार्धाभ्याम् अहो इति । नीचं पापम् । अमीवमिति पाठे स एवार्थः । ब्रह्मणि ब्राह्मणे गूढं गुप्तं तेजो यस्य तस्मिन् ॥ १ ॥ ❀ ❀ कृतं यद्देवहेलनमीश्वरावज्ञापापमित्यर्थः । तस्मान्मे व्यसनं भविष्यति तत्तु नातिदीर्घात्कालादचिरादेवास्तु, तत्राप्यद्धा साक्षान्ममैव न पुत्रादिद्वारेणेति प्रार्थना । काममसंकोचतः । एवं प्रार्थनायाः प्रयोजनमघस्य निष्कृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति च ॥ २ ॥ ❀ ❀ एवं साक्षात्स्वस्यैव व्यसनं संप्रार्थ्य ततः प्रागेव किञ्चित्प्रार्थयते । अद्यैव मे राज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः । पुनर्द्विजादीन्पीडयितुं धीर्मे मा भून्न भवेदित्यर्थः ॥ ३ ॥ ❀ ❀ इत्थं चिन्तयन्स राजा मुनेः सुतेनोक्तः सप्तमेऽहनि निर्ऋतिर्मृत्युर्यथा भविष्यति तथाशृणोत् । शमीकप्रेषितशिष्याच्छ्रुत्वा च स तक्षकस्य विषाग्निं साधु मेने । यतो विषयेषु प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रायेण मरणांतानशनेनोपविष्टे । तत्र गंगातटे (१) अथ गृहागमनोत्तरम् । निरागसि निरपराधे "ब्राह्मणो नावमन्तव्यो निरागास्तु विशेषतः" इति स्मृतेः गूढतेजसि अप्रकाशिततेजोलक्षणमहिम्नि ब्राह्मणे "ब्रह्म वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः" इत्यमरः । गूढतेजसीति प्रतिक्रियासामर्थ्यद्योतनाय ॥ १ ॥ ❀ ❀ तच्च दुष्कृतमपरिहार्यविपत्तिकरमिति चिंतयन्नाह–ध्रुवमिति । इत्यर्थ इति । ब्राह्मणावज्ञापि "सदाहं विप्ररूपेण विचरामि महीतले" इत्याद्युक्तेर्विष्णोरवज्ञैवेति भावः । ततो देवस्य हरेर्हेलनादवज्ञानात् । ध्रुवमवश्यं दुरत्ययमत्येतुमशक्यं व्यसनं दुःखम् "व्यसनं विपदि ध्वंसे" इत्यादिकोशात् । तद्व्यसनं मनसाभ्युपगच्छन्नाह–तदिति ॥ २ ॥ ❀ ❀ ब्रह्मकुलमेवानलः बहुदाहेऽप्यलम्बुद्धिर्नास्तीत्यनलः । मे मदीयत्वेनाभिमतम् । अद्यैव कालक्षेपमन्तरेण अभूदिति । व्यत्ययो राज्ञो महानुतापसूचनायैवेति । द्विजा विप्राश्च देवताश्चेति द्वन्द्वः । यद्वा द्विजेषु सन्निहिता देवता द्विजदेवताः । "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे सन्ति" इति श्रुतेः । अत एव ब्राह्मणस्य तप्तमुद्राधारणनिषेधः कल्पितेतरग्रन्थेषु वर्ण्यते । न विद्यते भा दीप्तिर्येषां तेऽभा निर्बुद्धयस्तान् द्राति कुत्सयतीत्यभद्रस्तस्य । एतच्च स्वकर्मापेक्षयोक्तम् । इत्यर्थ इति 'क्रियार्थोपपद'–इत्यादिना चतुर्थीति भावः ॥ ३ ॥ ❀ ❀ अथेत्थं शोकानन्तरम् । शिष्याद्गौरमुखात् । यथा भो राजन् अज्ञानेन बालकेन दत्तमभिशापं श्रुत्वा मुहुरनुतप्तस्तं च सन्तर्ज्यासद्गुरुः प्रतीकारमपश्यन्स्विद्यंस्त्वयि

---

१. प्रा० पा०—ह्यघ । २. प्रा० पा०—पुनरेव सद्यः । ३. प्रा० पा०—बलमूर्जं० । ४. प्रा० पा०—मेऽस्तु । ५. प्रा० पा०—न्नित्थमथा० । ६. प्रा० पा०—तक्षकादलं ।

कारुण्यपूर्णो मां प्राहिणोत्। राजा ज्ञात्वा परलोकार्थं किमपि यततामित्येतदर्थमित्युक्त्वा गते तस्मिन्राजा स्वापराधं क्षमयंस्तत्र जिगमिषुरपि मुनेर्जनिष्यमाणं लज्जासंकोचादिकं स्वस्य च शापान्तां निष्ठां विचार्य न जगामेति ॥ ४॥

१-३५ श्लोकावधि दीपनी न (सं०)

श्रीमद्वीरराघवव्याख्या

महीपतिरिति। अथ स्वपुरप्रवेशानंतरं महीपतिः परीक्षिदात्मकृतं तदुरगनिधानरूपं गर्ह्यं कर्म चिंतयन् दुर्मनाः आत्मनिंदापरो बभूवेत्यर्थः। तदेव दर्शयति सार्द्धद्वयेन। अहो मया मूर्खवन्निरागसि निरपराधिनि गूढमनभिव्यक्तं तेजः सामर्थ्यं यस्मिन् ब्रह्मणि ब्राह्मणविषयेऽमीवं निकृष्टं कर्म कृतममीवं पापम्॥ १॥ ❀ ततो नीचात्कृताद्देवहेलनरूपात्कर्मणो निमित्तात् न केवलं मया ब्राह्मणोऽवहेलितः, किंतु साक्षाद्देवो भगवानेवेत्यभिप्रायेण देवहेलनादित्युक्तं, मे मम नातिदीर्घात्सममनंतरकालमेव दुरत्ययमतिवर्त्तितुमशक्यं व्यसनं दुःखं ध्रुवं नूनं भविष्यति। तत्स्वस्य हितमेव मन्यते तदिति तद्व्यसनं ममाद्य निष्कृताय पापविशुद्धये कामं प्रकाममस्तु। किमनिष्टं प्रार्थयसे इत्यत्राह-यथा पुनरेवंविधमघं न कुर्यामद्धा न कुर्यामेव। अद्धेति स्फुटावधारणयोर्द्योतकमव्ययं शिक्षार्थमस्त्विति भावः। अस्त्वद्धाऽस्त्वेवेति वान्वयः॥ २॥ ❀ ❀ अद्येति। प्रकोपितं कोपं प्रापितं यद्ब्रह्मकुलं ब्रह्मकुलतत्कर्तृकनिग्रहात्मकोऽनलोऽग्निरद्यैव मम राज्यं बलं सैन्यं प्रभूतधनकोशं च दहतु। यथा पुनरभद्रस्य मम द्विजेभ्यो देवेभ्यो गोभ्यश्चापचिकीर्षायुक्ता चैवंविधा पापीयसी बुद्धिर्मा भूत्तथा शिक्षार्थं दहत्विति भावः॥ ३॥ ❀ ❀ इत्थं संचिंतयन् राजा यथा येन प्रकारेण तक्षकाख्यो निऋतिर्मृत्युर्मुनेः सुतेनोक्तः शापात्मकोक्त्या प्रचोदितस्तथैव शुश्राव ततः स राजा प्रसक्तस्य विषयेष्विति शेषः, विषयासक्तस्य स्वस्य विरक्तिकारणं हेतुगर्भमिदं विरक्तिकारणत्वादचिरेण तक्षकरूपमनलं साधु यथा तथा मेने॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विमुक्तिसाधनेषु प्रथमापाद्यसाधनत्वेन वैराग्यमवश्यमापाद्यं मुमुक्षुणेति परीक्षिता कथनापदेशेन तत्प्रतिपाद्यतेऽस्मिन्नध्याये। ननु परीक्षितो धर्मपालत्वादिकं न युज्यते। नृशंसवन्नीचकर्मकरणात् पश्चात्तापानुदयाच्चेत्याशंकापरिहारत्वेनाह महीपतिरिति। मुनेः स्कंधे मृतसर्पशरीरार्पणलक्षणमात्मना अनुष्ठितं यत्कर्म तच्चिंतयन् सुदुर्मनाः सुष्ठु दुःखितमना अभूदिति शेषः। तुशब्द ईश्वरेच्छाधीनत्वं दर्शयति "श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुरा" इति स्मृतेः कस्मिन्विषये अनुष्ठितं येन महती चिंता संभाव्यत इति। मया निरागसि निरपराधे गूढतेजसि अप्रकाशिततेजोलक्षणमहिम्नि ब्रह्मणि ब्राह्मणे अनार्यवत् मूर्खवत् नीचं कर्म कृतम् अहो कष्टमिति। महीपतेः कर्मणो गर्ह्यत्वद्योतनाय ब्रह्मणीति सोऽप्यपराधी चेत्कथंचिद्घटत इत्यतो निरागसीति। प्रतिक्रियासामर्थ्यप्रकटनाय गूढतेजसीति "ब्रह्म वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः"इत्यभिधानात् "ब्राह्मणो नावमंतव्यो निरागास्तु विशेषत" इति वचनात्॥ १॥ ❀ ❀ तच्च दुष्कृतमपरिहार्यविपत्तिकरमिति चिंतयतीत्याह ध्रुवमिति। ब्राह्मणस्यास्य अवज्ञा विष्णोरवज्ञैव यतस्तत्तस्माद्देवस्य हरेर्हेलनादवज्ञानात् ध्रुवमवश्यं दुरत्ययमत्येतुमशक्यं व्यसनं दुःखं नातिदीर्घादचिरान्मे मम भविष्यतीत्यन्वयः। तद्व्यसनं मनसाभ्युपगच्छतीत्याह तदिति। अघनिष्कृताय पापप्रायश्चित्ताय तद्व्यसनं काममस्तु। कुतः अद्धा निरंकुशतया अहं पुनरेवंविधमघं यथा न कुर्यां तथास्त्विति शेषः॥ २॥ ❀ ❀ नौपचारिकमिदमांतरमेवेत्यभिप्रेत्य तदेवाह अद्यैवेति। प्रकोपितब्रह्मकुलमेवानलः बहुदाहेऽप्यलंबुद्धिर्नास्तीत्यनलः मे मदीयत्वेन अभिमतं राज्यादिकमद्यैव कालक्षेपमंतरेण दहतु। भूयः अभद्रस्य मे द्विजदेवतासु पापीयसी बुद्धिर्नाभूत् न भूयादित्यन्वयः। अभूदिति व्यत्ययो राज्ञो महानुतापसूचनायेति ज्ञातव्यम्। द्विजाश्च देवताश्च द्विजदेवताः द्विजेषु सन्निहिता देवता वा द्विजरूपदेवता वा तासु न विद्यते भा दीप्तिर्येषां ते अभास्तान् द्राति कुत्सयतीत्यभद्रः-द्रा कुत्सायामिति धातुः-तद्वत् द्राणमज्ञानं यस्य स तथेति वा, द्रा निद्रायामिति धातुः तस्य॥ ३॥ ❀ ❀ अथेत्थं चिंतयन् स परीक्षित् तक्षकाख्यान्मुनेः सुतोक्तात् सुतेन प्रेरितात् विकृतिकृतापराधपरिहारं देहवियोगलक्षणं यथावदशृणोदित्यन्वयः। आकर्ण्य किमकार्षीदिति तत्राह स इति। स चाकर्ण्य तक्षकादचिरेण मरणं राज्यादिषु अलं प्रसक्तस्य विरक्तिकारणमभूदिति साधु मेन इत्यन्वयः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः।

अद्यैवेति। दहतु प्रकोपितब्राह्मणकुलं निमित्तीकृत्य राज्यादिकमद्यैव मे मत्तः सकाशाद्दग्धवदपयात्वित्यर्थः। राज्यादौ अपरेषां द्विजादीनां सद्भावेन तथाभिप्रेतुमयुक्तत्वात्॥ ३-५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राज्ञानुतप्य निर्विद्य कृते प्रायोपवेशने। ऊनविंशे मुनीन्द्राणां सदसि श्रीशुकागमः॥

अथ स्वगृहागमनकाल एव सुदुर्मना अभूत्। चिन्तामाह सार्द्धद्वाभ्याम्। नीचं निन्द्यं कर्म्म। अमीवमिति पाठे पापम्। ब्रह्मणि ब्राह्मणे॥ १॥ ❀ ❀ अद्धा साक्षादेवास्तु न तु पुत्रादिद्वारेण॥ २॥ ❀ ❀ द्विजदेवगा दुःखयितुं

धीर्न मेऽभून्न भवेत् ॥ ३ ॥ ❀ ❀ मुनेः सुतेनोक्तः सप्तमेऽहनि तक्षकाख्यो निर्ऋतिर्मृत्युर्यथा भविष्यति तथा अशृणोत् । शमीकप्रेषिताच्छिष्यात् गौरमुखात् । यथा–भो राजन् ! अज्ञानेन बालकेन दत्तमभिशापं श्रुत्वा मुहुरनुतप्तस्तं च सन्तर्ज्यासद्गुरुः प्रतीकारमपश्यन् खिद्यन् त्वयि कारुण्यपूर्णो मां प्राहिणोद्राजा ज्ञात्वा परलोकार्थं किमपि यततामित्येतदर्थम् । इत्युक्त्वा गते तस्मिन् राजा स्वापराधं क्षमयन् तत्र जिगमिषुरपि मुनेर्जनिष्यमाणं लज्जासङ्कोचादिकं स्वस्य च शापान्तानिच्छां विचार्य्य न जगाम, यतः स तक्षकस्य विषाग्निं साधु मेने । कीदृशं विषये प्रसक्तस्य मम विरक्तिकारणम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ पुरप्रवेशानन्तरं महीपतिस्तु आत्मकृतं मुन्यंसे सर्पप्रक्षेपरूपं गर्ह्यं निन्द्यं कर्म विचिन्तयन् सुदुर्मना बभूव । चिन्तामाह अहो इति सार्द्धद्वाभ्याम् । अहो आर्येण मयाऽनार्यवद् ब्रह्मणि ब्राह्मणे अमीवं पापं कृतम् ॥ १ ॥ ❀ ❀ ततस्तस्मान्निमित्तभूतात् कृताद्देवहेलनात् ध्यातृद्वारा ध्येयभूतभगवदवज्ञारूपात्पापात् दुरत्ययं दुर्निवार्य्यं व्यसनं दुःखं ध्रुवं भविष्यति तद्दीर्घात्कालान्नैवास्तु किंतु सद्योऽस्तु तत्रापि अद्धा साक्षादेवास्तु न तूपचारेण, साक्षात्पक्षेऽपि कामं यथेष्टमस्तु नतु सङ्कोचेन । तत्र प्रयोजनमाह मे अघनिष्कृताय पापप्रक्षालनाय इति यथा न कुर्यां पुनरिति च ॥ २ ॥ ❀ ❀ बलं सैन्यमृद्धकोशं समृद्धं धनागारं प्रकोपितः । मयैव प्रज्वालितः ब्रह्मकुलमेवानलः अद्यैव दहतु पुनर्भूयो मेऽभद्रस्य राजर्षिवंशे अशोभितस्य द्विजादिभ्यः पापीयसी पापचिकीर्षावती धीर्मा भूत् ॥ ३ ॥ ❀ ❀ स परीक्षित् इत्थं चिन्तयन् मुनेः सुतेन तक्षकाख्यो निर्ऋतिर्मृत्युः तक्षकः सप्तमेऽहनि धक्ष्यति स कुलांगारमित्येवं यथोक्तस्तथा शमीकप्रेषितात् गौरमुखाख्यात्तच्छिष्यादशृणोत् । अथ श्रवणानन्तरं स परीक्षित् तक्षकस्य विषानलं प्रसक्तस्य राज्याद्यासक्तस्यात्मनो विरक्तिकारणं साधु मेने स्वीकृतवान् , न तु तत्प्रतिकारं चिन्तितवानिति भावः । सप्तमेऽहनि धक्ष्यतीति चिरेण तु साधु न मेने ॥ ४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

सर्वदोषनिवृत्तिस्तु पूर्वाध्याये निरूपिता । प्रमादेपीश्वरेच्छाया व्यामोहाभाववर्णनात् ॥
अधुना पूर्णगुणता वैराग्यज्ञानभक्तिषु । यशःकर्मस्वभावेषु भावेषु च निरूप्यते ॥
एकोनविंशे वैराग्यात् प्राये मुनिगणागमः । तत्र पृष्टार्थसंदेहे शुकागम इतीर्यते ॥
मुनयो भगवद्भक्त्या तं द्रष्टुं हरेः कथाम् । श्रोतुं च भावितज्ज्ञानात् विवादस्तु शुकोन्नतौ ॥
वैराग्यस्य प्रकर्षेण प्रकर्षोऽत्र विवक्षितः । ज्ञाने तुल्येऽपि देवर्षेस्त्यागाभावान्न पात्रता ॥
भार्गवस्यापि रामस्य व्यासस्यापि हरेस्तनोः । गुरुणैव स्वरूपास्ति ज्ञानदानान्न वक्तृता ॥
द्वात्रिंशल्लक्षणोपेतः शुक एव ततो गुरुः । एतदर्थं हि भगवानवतीर्णो वृषध्वजः ॥
गर्भाधानोत्तरं रक्षा विष्णोरन्ते शिवात्मना ॥

पूर्वाध्याये राज्ञः शापो निरूपितः, इदानीमद्भुतकर्मणो भगवतः शापफलं निरूप्यते गङ्गासंगमे यत्र प्रथमं वैराग्यापरनाम नैरपेक्ष्यम् । अनुतापलक्षणं तपसा सह निरूप्यते चतुर्भिः "कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तं स्मृतं तस्य हरिसंस्मरणं परमि"ति हरिसंस्मरणांगभूतमनुतापं निरूपयन् भक्तस्तद्रूपमिति । तदङ्गेन निरपेक्षेण सह निरूपयति महीपतिरिति । ततः समागत्य श्रमापनोदनानन्तरं यदा राज्यविचारार्थं सिंहासनस्थो महीपतिर्जातः ब्राह्मणस्य गले सर्पदानलक्षणं तुशब्देन तु पूर्वपक्षवत् पूर्वभावो निवारितः गर्ह्यं निषिद्धत्वेऽप्यकीर्त्तिजनकं लोकद्वयनाशकमित्यर्थः । चिन्तान्तरपरित्यागेन विशेषाकारेण तदेव चिन्तयन् दुर्मना जातः । यद्यपि दण्डादिप्रकारेणैव चौरबन्धं करोति तद्याप्यन्यद्वारा कारयति न तु साक्षात् , इदन्तु स्वयमेव कृतमिति दुर्मना जातः, मनसः शोकजनकत्वात् दुष्टत्वं शोकेन भगवत्स्मरणात् सुष्ठुत्वम् अन्यथा मूर्च्छैव स्यात् तस्यानुतापाभिलाषमाह अहो इत्याश्चर्ये । मया भगवद्भक्तेन धर्मपालकेन अमीवं पापमपराधरूपं निःशंकमनार्यवत् स्वभावदुष्टवत्कृतं स्वभावदुष्टोऽपि नैतादृशे अपराधं करोतीति विषयं वर्णयति–निरागसि ब्रह्मणि गूढतेजसि प्रमाणविचारेण लोकविचारेण वा निरपराधे दण्डः क्रियते किंच प्रमेयविचारेणापि जीव एव दण्डो न ब्रह्मणि नीतिविचारेणापि यत्र सर्वनाशो न सम्भावितस्तत्र दण्डः, न तु गुप्ततेजसि सर्वनाशके गूढत्वात्तदेवाह अन्यथा तावन्मात्रदाहः स्यात् ॥ १ ॥ ❀ ❀ तर्हि किं कर्त्तव्यमित्याकांक्षायां विषय एव करिष्यति न मया किंचित्कर्त्तव्यमित्याह ध्रुवमिति । ननु वैष्णवस्य तव न किंचित् भविष्यतीत्याशंक्याह–देवहेलनादिति अन्तःस्थितो भगवानेव तेन ध्यायमानः स देवालयरूपः, अतो देवालयापकारे देव एवापकृतो भवतीति भक्तोऽपि भगवद्द्रोहमाचरन् नरकं व्रजेदिति न्यायात् ध्रुवं व्यसनं भविष्यति । व्यसनं नाम चिकीर्षितसर्वपुरुषार्थप्रतिबन्धकः स्वव्यापारसहित-

चित्तव्याकुलता स च द्विविधः स्वाश्रयदेहादिनाशकः उपायनिवर्त्यो वा । तत्र दुरत्ययं स्वाश्रयनाशकं व्यसनं दुःखेनात्ययो यस्येति दुःखरूपं फलं दत्वाऽत्येतीत्यर्थः । अत्युत्कटत्वात् शीघ्रमेव भविष्यतीत्याह नातिदीर्घादिति, तदैव न जात इत्यपिपदं प्रतीकारणानन्तरमेव सर्पस्याप्यप्रतीकार्यतापरिज्ञानात् प्रतीकारः क्रियतामित्याशंक्याह तदस्त्विति । यस्य देहादिः प्रियो भवति यस्य भगवदपराधेऽपि प्रियादेः रक्षणीयता भवति तस्य प्रतीकारप्रयत्नः, अस्यापि यदनुष्ठेयमिति न्यायेनास्माकं तदभीष्टमेव । अतः प्रार्थयते तदस्तु, काममिति व्यसनस्य संकोचो मास्तु, देहादिनाशस्य अस्माभिरेव चिकीर्षितत्वात् तथा प्रार्थनायां हेतुः अघनिष्कृतायेति । पापापनोदायेति मे इति साक्षात् ममैवास्तु । नन्वपराधो धर्मः तदर्थं धर्मिनाशोऽनुचितः असमानत्वात् तत्राह यथा न कुर्यामिति शरीरे विद्यमाने साक्षात्करणं सम्भवति शरीराद्यभावे तु राज्यपुत्रद्वारा अतः अद्धा साक्षादेवास्त्वित्यर्थः ॥ २ ॥ ❀ ❀ नन्वतिरागिणोऽप्येवमुक्तिः सम्भवतीति तद्व्यावृत्त्यर्थं पाक्षिकदोषपरिहारार्थं चाह अद्यैवेति । शेषरक्षार्थं नात्मनि प्रार्थना, किन्तु साक्षात्सम्बन्धाभावार्थमतो ब्राह्मणापराधार्थं नैमित्तिकं देशनाशः साक्षात् प्रकोपितो ब्राह्मणकुलानलः राज्यं सेनां धनं च नाशयेत् सात्त्विकराजसतामससुकृतात् एतत् त्रयं भवति, ततः तत्कारणादृष्टस्य समाप्तत्वात् निष्प्रत्यूहं दहतु, तत्र साधकमाह अभद्रस्येति । न विद्यते भद्रं यस्येति न हि कल्याणादृष्टे प्रबुद्धे विद्यमाने पापीयसी धीर्भवति अतः 'अदोषतैव विगुणस्य गुणः' इति न्यायेन पुण्याभावे राज्यादीनां दोषजनकत्वात् तदभावप्रार्थना युक्तेत्याह पुनर्न मे भूदिति । असकृत् जातं तस्मिन्निमित्तदाहार्थेषु उपयुज्यते अतः शमनं जातमिति विचारेण नैश्चिन्त्यं श्लोकत्रयार्थः । महतां हि फलप्राप्तौ स्पृहाभाव एव विलम्बहेतुः ॥ ३ ॥ ❀ ❀ अतः स्पृहाया जातत्वात् तत् कदा भविष्यतीति चिन्तयन् अथ तदनन्तरमेव शापमश्रृणोदित्याह स चिन्तयन्निति इत्थमिति । पूर्वोक्तप्रकारेण शमीकप्रेषितब्राह्मणमुखात् तक्षकाख्यो निऋतिरिति अश्रृणोत् । यद्यपि इतिपदं नास्ति न वा तथापदं तथापदस्य सम्बन्धिनः विद्यमानत्वात् यथा निऋतिस्तथा अश्रृणोदित्यर्थः । स्वरूपतः पदार्थस्य ज्ञातत्वात् प्रकारस्यैवाज्ञानात् अनधिगतार्थगंतृत्वेन प्रकारस्यैव श्रोतव्यत्वं 'सर्वस्य मृत्यवो नेष्टा' इति श्रुतेः मृत्य्वंतराभावादाह न तक्षकस्य मृत्युहेतुत्वमपि तु मृत्युत्वमेवेत्याह स साधु मेन इति । पूर्वोक्तो राजा अन्यथेदानीं विचारस्य कर्तव्यत्वे शीघ्रं साधुमननं न सम्भवेत्, ततश्च कर्त्तव्यनिर्धाराभावात् परिमितिकाले विलम्बो भवेत् तदाह न चिरेणेति, स न चिरेण साधु मेने किन्तु शीघ्रमेवेत्यर्थः । तक्षकानलस्य साधुत्वे हेतुः प्रसक्तस्य विरक्तिकारणमिति । विषयेषु प्रसक्तस्य विषयभोगस्याहेतुत्वं ज्ञापयन् असमासमाह नित्यसापेक्षत्वादसमर्थसमासः ॥ ४ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथोनविंशाध्यायं विवरिषवः सूतोक्तिसङ्गतेः पूर्वमुक्तत्वात्तामनुक्त्वा व्यासोक्तिसङ्गतेः स्फुटतयानुक्तत्वात्तामुभाभ्यां स्फुटीकुर्वन्ति सर्वदोषेत्यादि । निरूपितेति । 'प्रायशः' इति समाप्तिश्लोके निरूपिता । तथा चैककार्यत्वमधिकारे सङ्गतिरित्यर्थः । अवान्तरवाक्यतात्पर्यमाहुः एकोनविंशे इत्यादि । तत्रेति तेषु मुनिषु । विवाद इति । शुकस्य परम्परया भगवदवतारत्वान्नारदरामव्यासानां साक्षादवतारत्वाद्विवाद इत्यर्थः । प्रकर्ष इति उन्नतिप्रकर्षः । ननु मास्तु स प्रकर्षः, तथापि प्रश्नोत्तरवक्तृत्वं कुतो नेत्यत आहुः गुरुणेत्यादि । 'ईश्वराज्ज्ञानमन्विच्छे'दिति ज्ञानदाने गुरुत्वेन ईश्वरनियतत्वात्तेन गुरुणा ज्ञानदानात् स्वरूपाप्तिर्भवति 'मोक्षमिच्छेज्जनार्दना'दिति मोक्षो भवतीति साक्षादवताराणामत्र न वक्तृतेत्यर्थः । अन्ते शिवात्मनेति । संहारे शिवस्यैवाधिकृतत्वात्तथेत्यर्थः । ध्रुवमित्यत्र । विषय इति अपराधविषयः । स च द्विविध इत्यादि । अत्र नपुंसकपाठः प्रतिभाति । क्रियतामिति । अप्रतीकार्यत्वपरीक्षार्थं क्रियताम् । धर्म इति । वृत्तिमत्त्वेन धर्मिणः सकाशाद्धीन इत्यर्थः । अत इति साक्षादपराधकरणात् । तथा च पर्यवसानविचारे धर्मिनाशापेक्षया धर्मनाश एव ज्यायस्त्वादुचित इत्यर्थः । भवेत्यत्र पाक्षिकदोषपरिहारार्थमिति । देहादौ विद्यमाने तदध्यासात् कदाचित्पुनरेवमपराधकरणं पाक्षिको दोषस्तत्परिहारार्थमित्यर्थः । आहेति । विलम्बाभावं प्रार्थयत इत्यर्थः । नन्वत्रैव ग्लानौ स्वव्यसनसङ्कोचाभावः प्राक् प्रार्थित एवेति किमनेनेति शङ्कायां शेषे षष्ठीबोधितमर्थमाहुः शेषरक्षार्थमित्यादि । पूर्वं या व्यसनसङ्कोचाभावस्यात्मनि प्रार्थना, सा शेषरक्षार्थं न, किन्तु कुरुजाङ्गलातिरिक्ते स्वस्य साक्षात्सम्बन्धाभावबोधनार्थम् । तथा चात्रोक्तातिरिक्तानां श्रेयोर्थमियं प्रार्थनेति नानर्थक्यमित्यर्थः । सिद्धमाहुः अत इत्यादि । यतः साक्षात्सम्बद्धा एवान्तरापराधजनकाभिमानप्रयोजकाः, अतो ब्राह्मणापराधार्थं ब्राह्मणापराधनिवृत्तये नैमित्तिकापराधहेतुभूतमन्युमत्सरजनकाभिमाननिवर्त्तकतया तत्सम्बन्धी देशनाशः प्रार्थित इत्यर्थः । तस्य प्रार्थनस्याकारमाहुः साक्षादित्यादि । यत एतत्त्रयं नाशयेत्ततो निःप्रत्यूहं भवत्विति । अयमेवाशय इत्यत्र गमकमाहुः तत्रेत्यादि । तथा चेदं स्वविशेषणमेवाशयस्य गमकमित्यर्थः । तस्मिन्निमित्तदाहार्थे इत्यत्र तन्निमित्तदाहार्थे इति पाठः प्रतिभाति । स चिन्तयन्नित्यत्र । सर्वं ह्यस्य मृत्यवो वेष्टा इत्यादि । अत्र हिर्हेतौ । वा एवकारार्थे । तथाच हयमेधावभृथे मृत्यूनामिष्टत्वेनेतरेषामभावात्तथेत्यर्थः । अहेतुत्वमिति विरक्त्यहेतुत्वम् । ननु भावितत्सम्बन्धज्ञानस्यैव विरक्तिकारणत्वेनोदासीनस्य तक्षकानलस्य तथात्वाभावे परस्परापेक्षाभावेनासामर्थ्यात्कथमेवं समास इत्यत आहुः नित्येत्यादि । कारणशब्दस्य नित्यं कार्यसापेक्षत्वात् वक्तव्ये तस्मिन् विवक्षिताया विरक्तेरेवात्र परम्परया तथात्वेनोपस्थितत्वादयमसमर्थ एव समास इत्यर्थः ॥ ४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

ऊनविंशे तु निर्विद्य कृते प्रायोपवेशने । तत्सदसि मुनीन्द्राणां वर्ण्यते श्रीशुकागमः ॥ १ ॥

अथ स्वपुरागमनानन्तरं महीपतिः परीक्षिदात्मकृतं तन्मुनिस्कन्धे सर्पनिधानरूपं गर्ह्यं कर्म विचिन्तयन् सुदुर्मनाः सन्नात्मनि दण्डपरो जातः । तदेव दर्शयति–अहो इति सार्द्धद्वयेन । अपूर्वत्वेनाश्चर्यं द्योतयति–अहो इति । मया अनार्यवत् मूर्खवत् निरागसि निरपराधे गूढमनभिव्यक्तं तेजः सामर्थ्यं यस्य तस्मिन् ब्रह्मणि ब्राह्मणे विषये नीचं पापं कृतम् । अमीवमिति पाठेऽप्ययमेवार्थः ॥ १ ॥ ❀ ❀ तस्मिन् समाधिनिष्ठे कृतस्यापराधस्य भगवति कृतत्वं मत्वाऽऽह–ततः कृतात् देवस्य भगवतो हेलनादवज्ञारूपात् मे मम नातिदीर्घात् शीघ्रमेव दुरत्ययमतिवर्तितुमशक्यं व्यसनं दुःखं ध्रुवं निश्चितमेव भविष्यति । तद्व्यसनं तु मेऽघस्य निष्कृताय पापविनाशाय कामं यथेष्टमेवास्तु, यथा पुनरेवंविधं पापमहं न कुर्यामेव । अद्धेत्यवधारणार्थकमव्ययम् , तस्य न कुर्यामित्यनेन व्यवहितसम्बन्धः, अद्धा तु तत्पापं न कुर्यामेव । ...

अद्धेत्यवधारणार्थकमव्ययम् , तस्य न कुर्यामिवास्त्वेवेति वाऽन्वयः ॥ २ ॥ ❀ ❀ उक्तमेव स्पष्टयति–अद्येति । प्रकोपितं सर्पप्रक्षेपेण कोपं प्रापितं यद्ब्रह्मकुलं ब्राह्मणानां कुलं तदेवानलोऽद्यैव मे राज्यं च सैन्यमृद्धं प्रभूतधनं कोशं च दहतु । एवं प्रार्थने किं फलमित्यपेक्षायामाह–अभद्रस्य दुष्टस्य मे पुनर्द्विजेभ्यो देवेभ्यः गोभ्यश्चैवंविधा पापीयसी अपचिकीर्षायुक्ता धीर्न भवेदिति ॥ ३ ॥ ❀ ❀ स राजा इत्थं चिन्तयन्नथानन्तरमेव यथा येन प्रकारेण तक्षकाख्यो निर्ऋतिर्मृत्युर्मुनेः सुतेनोक्तः शापरूपेण प्रचोदितस्तथा शमीकप्रेषितशिष्याद्शृणोत् । स च राजा तक्षकस्य विषाग्निं साधु मेने । ननु मरणहेतोस्तस्य कथं साधुत्वमित्याशङ्क्याह–यतो विषयेषु प्रसक्तस्य नचिरेण शीघ्रमेव विरक्तिकारणमिति ॥ ४ ॥

हिन्दी अनुवाद

परीक्षित्का अनशनव्रत और शुकदेवजीका आगमन

सूतजी कहते हैं—राजधानीमें पहुँचनेपर राजा परीक्षित्को अपने उस निन्दनीय कर्मके लिये बड़ा पश्चात्ताप हुआ । वे अत्यन्त उदास हो गये और सोचने लगे–'मैंने निरपराध एवं अपना तेज छिपाये हुए ब्राह्मणके साथ अनार्य पुरुषोंके समान बड़ा नीच व्यवहार किया । बड़े खेदकी बात है ॥१॥ ❀ ❀ अवश्य ही उन महात्माके अपमानके फलस्वरूप शीघ्र-से-शीघ्र मुझपर कोई घोर विपत्ति आवेगी । मैं भी ऐसा ही चाहता हूँ; क्योंकि उससे मेरे पापका प्रायश्चित्त हो जायगा और फिर कभी मैं ऐसा काम करनेका दुःसाहस नहीं करूँगा ॥ २ ॥ ❀ ❀ ब्राह्मणोंकी क्रोधाग्नि आज ही मेरे राज्य, सेना और भरे-पूरे खजानेको जलाकर खाक कर दे–जिससे फिर कभी मुझ दुष्टकी ब्राह्मण, देवता और गौओंके प्रति ऐसी पाप-बुद्धि न हो ॥ ३ ॥ ❀ ❀ वे इस प्रकार चिन्ता कर ही रहे थे कि उन्हें मालूम हुआ–ऋषिकुमारके शापसे तक्षक मुझे डसेगा । उन्हें वह धधकती हुई आगके समान तक्षकका डसना बहुत भला मालूम हुआ । उन्होंने सोचा कि बहुत दिनोंसे मैं संसारमें आसक्त हो रहा था, अब मुझे शीघ्र वैराग्य होनेका कारण प्राप्त हो गया ॥ ४ ॥

अथो विहायेममभुं च लोकं विमर्शितौ हेयतया पुरस्तात् ।
कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत् प्रायममर्त्यनद्याम् ॥ ५ ॥
या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ।
पुनाति लोकानुभयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥
इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ॥ ७ ॥
तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।
प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथोऽनन्तरमुभौ लोकौ पुरस्ताद्राज्यमध्य एव हेयतया विचारितौ विहाय श्रीकृष्णांघ्रिसेवामेवाधिमन्यमानः सर्वपुरुषार्थाधिकां जानन्प्रायमनशनं तस्मिन्नित्यर्थः । तत्संकल्पेनोपाविशदिति यावत् । यद्वा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ॥ ५ ॥ ❀ ❀ अमर्त्यनद्यामिति विशेषणस्य फलमाह । या गंगा लसंती श्रीर्यस्यास्तुलस्यास्तया विमिश्रा ये कृष्णांघ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री तद्वाहिनी उभयत्रांतर्बहिश्च सेशाँल्लोकपालैः सहिताँल्लोकान्पुनाति । मरिष्यमाण आसन्नमरणः । मरणस्यानियतकालत्वात्सर्वोऽपि तथा । अतस्तां को न सेवेत ॥ ६ ॥ ❀ ❀ इत्येवं विष्णुपद्यां

गंगायाम्। प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य। पाण्डवेय इति तत्कुलौचित्यं दर्शयति। नास्त्यन्यस्मिन् भावो यस्य सः। कुतः मुनिव्रत उपशान्तः। तत्कुतः। मुक्तः समस्तः संगो येन सः ॥ ७ ॥ ❀ ❀ तत्र तदा तद्दर्शनार्थं मुनय उपागता न तु तीर्थस्नानार्थं कृतार्थत्वात्। ननु तादृशानामपि तीर्थयात्रा दृश्यते तत्राह प्रायेणेति। तीर्थयात्राव्याजैः ॥ ८-१० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति। अनशनं निमित्तीकृत्योपविवेशेति भावः। "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" इति मेदिनी। अथो ब्रह्मशापाकर्णनसमनन्तरमेव। ममायं शापो विरक्तिहेतुत्वात्साधुरिति मन्वानः पुरस्ताच्छापात्प्रागेव उभौ लोकौ चानित्यत्वदुःखमिश्रत्वाद्धेयतया निश्चितौ इमं भूलोकममुं स्वर्लोकं च विहायास्मिन्संसारे कृष्णांघ्रिसेवैवात्यन्तिकदुःखनिवृत्तिसुखसाधना कर्त्तव्येति सर्वसाधनेभ्योऽध्यधिकां मन्यमानः परीक्षिदमर्त्यनद्यां श्रीगंगायाम्। संभवत्वादर्थान्तरमाह-यद्वेति ॥ ५ ॥ ❀ ❀ प्रायोपवेशश्चायं तस्याममर्त्यनद्यामेव युक्तः। यतस्तस्यां तदभीष्टस्य श्रीकृष्णस्य सम्बन्धः। सर्वेषां पावनत्वं च स्फुटं दृश्यते इत्यास्ताम्। तस्य ब्राह्मणापराधकलुषभीतस्य श्रीकृष्णस्यांघ्रिसेवामेव च सर्वाधिकपुरुषार्थतया लिप्सोर्वार्त्ता सर्वस्यापि जीवस्य तत्राप्यासन्नमरणस्य सैवाश्रयितुं योग्येत्याह-या वा इति। या वैतादृशत्वेन स्वयं प्रसिद्धा पुनर्लसच्छ्रियस्तदानीं प्रचुरतया वृन्दावनजाता यास्तुलस्यस्ताभिर्विमिश्राः पूर्वं विमिश्रीकृता ऐक्यं प्राप्ता वा वृन्दावनस्थिताः स्वयं भगवतः श्रीकृष्णस्यांघ्रिरेणवस्तैरभ्यधिकं यमुनारूपमम्बु तस्यापि नेत्री वोढ्रीत्यर्थः। अभ्यधिकत्वं चोक्तमादिवाराहे "गंगा शतगुणा पुण्या माथुरे मम मण्डले। यमुना विश्रुता देवि नात्र कार्या विचारणा" इति। जलप्रवाहरूपा गंगा ह्यत्र वोढ्री बाह्यं च तादृगंबु ततो भिन्नामेवोपपद्यत इति नेत्रीति सदैवोन्नयनं लभ्यते इति च तथा व्याख्यातं कृष्णशब्दश्च रूढ्या श्रीगोपाल एवाधिकं प्रसिद्ध इति तथा व्याख्यातमेव। अभेदे हि तादृगम्बुरूपेत्येवावक्ष्यदिति संदर्भः। तीर्थस्तु-गंगायामेव प्रायोपवेशोऽन्यत्रापि किमिति न स्यादिति तत्राह-येति। लसंती श्रीमती तुलसी ब्रह्मज्ञानेन तुलां सिनोति बध्नातीति तुलसी ब्रह्मज्ञानसदृशी। ब्रह्मज्ञानस्य संसारनिवर्त्तकत्वं यन्माहात्म्यं तदस्या अप्यस्तीति "या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुःपावनी रोगाणामभिवंदिता निरसनी सिक्तांतकत्रासनी। प्रत्यासन्नविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः" इत्यादिपुराणोक्तेः। यद्वा तनोति मोक्षादिपुरुषार्थमिति तुर्विष्णुस्तत्र लसतीति तुलसी तस्या मंजरीरजोभिर्विमिश्राः कृष्णस्यांघ्रिरेणवस्तैः सहाधिकानि यान्यम्बूनि जलानि तेषां नेत्री लसच्छ्रीतुलसीमंजरीरजोविमिश्रश्रीकृष्णचरणरेणुसमधिगतमाहात्म्याभ्यधिकसलिलप्रवाहाकुलेत्यर्थः। या चात एवाशेषाँल्लोकानुभयत्रांतर्बहिश्च पुनाति। यद्वोभयत्रेह लोके शिष्टव्यवहारयोग्यतालक्षणां शुद्धिं परलोके नरकप्राप्त्यादिनिवर्तनरूपां च शुद्धिं करोतीति मरणस्यानियतत्वादात्मदेवतां सेवेतेति भावः ॥ ६ ॥ ❀ ❀ अतो मरिष्यमाणोहं तीर्थोत्तमत्वाद्विष्णुपद्यां गंगायामनशनव्रतं करिष्ये इति प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्यानन्यभावो राज्यभारादिचिन्तारहितान्तःकरणो विष्ण्वेकचेता मुनीनां निवृत्तानां ज्ञानिनां व्रतमिव व्रतं नियमो यस्य स तथा वाचालत्वरहितो वाऽत एव मुक्ताः समस्तेषु पुत्रधनादिषु संगा आसक्तयो येन। मुक्ते हरौ समस्तानां श्रोत्रादीन्द्रियाणां संगस्तत्कथनतच्छ्रवणतद्दर्शनादिष्वादरो यस्येति वा मुक्तसंगः ॥ ७ ॥ ❀ ❀ यत्र परीक्षित्तिष्ठति तत्रोपजग्मुः। प्रायेणेति। तीर्थयात्राव्याजैः तेन तीर्थेभ्योऽपि परीक्षिद्दर्शनं ते ह्यधिकं गूढं निरणैषुरिति भावः। अकस्मादुद्भूतप्रतिस्वानन्दान्यथानुपपत्त्या सर्वज्ञतया भाविवृत्तान्तं ज्ञात्वा श्रीभागवतामृतपानार्थमिति भावः ॥ ८ ॥

श्रीमद्वीरराघवव्याख्या

अथो ततः इमममुं च लोकं विहाय लोक्यत इति लोकः फलं सुखमिति यावत् ऐहिकामुष्मिकसुखस्पृहां विहायेत्यर्थः। इमममुं च लोकं विशिनष्टि-स्वेन पुरस्तात्पूर्वमेव हेयतया विमर्शितौ विचारपूर्वकं हेयत्वेन निश्चितौ विचारपूर्वकम् इमममुं च लोकं विहायेत्यन्वयः। ततः कृष्णस्य भगवतोऽङ्घ्रिसेवामधिमन्यमानः निरवधिपुरुषार्थसाधनतया मन्यमानः अमर्त्यनद्यां देवनद्यां गंगायां प्रायमनशनव्रतमुपाविशदनशनव्रतेन दीक्षितो बभूवेत्यर्थः ॥ ५ ॥ ❀ ❀ स्वगृहेऽन्यत्र वा प्रायमुपविशतु किं विशेषेणामर्त्यनद्यामेव तदुपाविशदित्यत्र तां विशिंषन्नाह या वा इति। लसंत्या श्रीतुलस्या मिश्रो यः कृष्णस्यांघ्रिरेणुस्ततोऽभ्यधिकस्य प्रशस्तस्यांबुनोंऽभसो नेत्री प्रवहंती याऽमर्त्यनदी उभयत्रेहामुत्र च सेशाँल्लोकपालैः सहिताँल्लोकान् जनान्पुनाति नदीं मरिष्यमाणः को वा पुमान्न सेवेत ? अपि तु सर्व इत्यभिप्रायेण तस्यामेव प्रायमुपाविशदित्यर्थः। लसच्छ्रीतुलसी श्रीकृष्णांघ्रिरेणुना हेतुना अभ्यधिकं स्वाधिकरहितमंबु तस्य नेत्रीति वार्थः ॥ ६ ॥ ❀ ❀ स पांडवेयः परीक्षिदित्थं विष्णुपद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य विनिश्चित्य संकल्पान्मुक्तः समस्तेषु देहतदनुबंध्यादिषु संगो येन मुनीनां व्रतं यस्य न विद्यतेऽन्यो भावः चिंता यस्य सः मुकुंदांघ्रिं दध्यौ ध्यातवान् ॥ ७ ॥ ❀ ❀ तदा तत्र राज्ञः संनिधौ महानुभावाः सशिष्या मुनयो लोकं पुनानाः पवित्रीकुर्वंतः आजग्मुः। भुवनं पुनाना इत्येतदेवोपपादयति प्रायेण संतः साधवः तीर्थयात्राव्याजैः स्वयमेव तीर्थानि पुनंति। हि यथा च पुनंति तथोपपादितं पुरस्तात्तीर्थीकुर्वंति तीर्थानीत्यत्रेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स सम्राट् कस्य वा हेतोरिति शौनकप्रश्नं परिहरति अथो इति । अथो ब्रह्मशापाकर्णनसमनंतरमेव ममायं शापोऽपि विरक्तिहेतुत्वात्साधुरिति मन्वानः पुरस्तात्प्रथमं ताविह लोकपरलोकावनित्यत्वदुःखमिश्रत्वादिना हेयतया विमृश्याधिराट् श्रीयुतमिमं भूलोकं तथा अमुं स्वर्गलोकं निर्विद्य विहायास्मिन्संसारे कृष्णांघ्रिसेवैवात्यंतिकदुःखनिवृत्तिसुखसाधनत्वात् कर्तव्येति च विमृश्य तामेव म्रियमाणस्यात्मनः कर्तव्यामभिमन्यमानः परीक्षित् अमर्त्यनद्यां गंगायां प्रायमुपाविशद्यावज्जीवमनशनव्रतं चकारेत्यन्वयः ॥ ५ ॥ ❀ ❀ किमिति गंगायामेव प्रायोपवेशोऽन्यत्रापि किं न स्यादिति तत्राह या वा इति । लसंती श्रीमती तुलसी लसच्छ्रीतुलसी ब्रह्मज्ञानेन तुलां सिनोतीति तुलसी ब्रह्मज्ञानसदृशी ब्रह्मज्ञानस्य संसारनिवर्तकत्वं यन्माहात्म्यं तदस्या अप्यस्तीति तत्सदृशी तनोति करोति मोक्षादिपुरुषार्थमिति तुर्विष्णुस्तत्र लसतीति वा तुलसी, तस्या मंजरीरजोभिर्विमिश्राः कृष्णस्यांघ्रिरेणवः तैः सहाधिकानि यान्यंबूनि जलानि तेषां नेत्री लसच्छ्रीतुलसीमंजरीरजोविमिश्रश्रीकृष्णचरणरेणुसमधिगतमाहात्म्याभ्यधिकसलिलप्रवाहाकुलेत्यर्थः । या चात एवाशेषान् लोकानुभयत्रान्तर्बहिश्च पुनातीति उभयत्र इह लोके शिष्टव्यवहारयोग्यतालक्षणां शुद्धिं परलोके नरकप्राप्त्यादिनिवर्तनलक्षणां करोतीति वा अतो मरिष्यमाणः पुमान् कस्तां गंगां न सेवेत ॥६॥ ❀ ❀ अतो मरिष्यमाणोऽहं तीर्थोत्तमत्वाद्विष्णुपद्यां गंगायामनशनव्रतं करिष्य इति प्रायोपवेशं प्रति व्यवस्याय निश्चित्यानन्यभावोऽनन्यचेता राज्यभारादिचिंतारहितांतःकरणो विष्ण्वेकचेता वा मुनीनां निवृत्तानां ज्ञानिनां व्रतमिव व्रतं यस्य स मुनिव्रतः वाचालत्वरहितो वा । अत एव मुक्ताः समस्ताः संगाः पुत्रादिविषयस्नेहा यस्य स मुक्तसमस्तसंगः श्रोत्रादींद्रियैरन्यप्रसंगमंतरेण तत्कथाश्रवणादिप्रसंगो यस्य स तथेति वा स पांडवेयः परीक्षित् विष्णुपद्यां प्रायोपवेशं प्रति स्थितः मुकुंदं तदंघ्रिं च एवं दध्यावित्येकान्वयः । चः समुच्चयेऽवधारणे वा ॥ ७ ॥ ❀ ❀ यत्र परीक्षित्तिष्ठति तत्रोपजग्मुः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रायोपवेशश्चायं तस्याममर्त्यनद्यामेव युक्तः । यतस्तस्यां तदभीष्टस्य श्रीकृष्णस्य सम्बन्धः सर्वेषां पावनत्वं च स्फुटं दृश्यते इत्यास्तां तस्य ब्राह्मणापराधकलुषभीतस्य श्रीकृष्णस्यांघ्रिसेवामेव च सर्वाधिकपुरुषार्थतया लिप्सोर्वार्त्ता, सर्वस्यापि जीवस्य तत्राप्यासन्नमरणस्य सैवाश्रयितुं योग्येत्याह या वै इति । या वै तादृशत्वेन स्वयं प्रसिद्धा पुनर्लसच्छ्रियस्तदानीं प्रचुरतया वृन्दावनजाता यास्तुलस्यस्ताभिर्विमिश्रा पूर्वं विमिश्रीभूता ऐक्यं प्राप्ता या वृन्दावनस्थिताः स्वयं भगवतः कृष्णस्यांघ्रिरेणवस्ताभिरभ्यधिकं यमुनारूपमम्बु तस्यापि नेत्री वोढ्रीत्यर्थः । अभ्यधिकत्वं चोक्तमादिवाराहे–'गङ्गा शतगुणा पुण्या माथुरे मम मण्डले । यमुना विश्रुता देवि ! नात्र कार्या विचारणा ॥' इति । जलप्रवाहरूपा गङ्गा ह्यत्र वोढ्री । वाह्यञ्च तादृगम्बु । ततो भिन्नत्वमेवोपपद्यत इति नेत्रीति सदैव तन्नयनं लभ्यत इति च तथा व्याख्यातम् । कृष्णशब्दश्च रूढ्या श्रीगोपाल एवाधिकं प्रसिद्ध इति तु तथा व्याख्यातमेव । अभेदे हि तादृगम्बुरूपेत्येवावक्ष्यदिति ॥ ६ ॥ ❀ ❀ कीदृशः सन् दध्यौ तत्राह मुक्तेति अनन्येति च ॥ ७ ॥ ❀ ❀ तत्रेति । साक्षाच्छ्रीभगवत्पादसम्बन्धीनि गंगादीनि विनेति ज्ञेयम् । तेषु तेषामपि परमादरात् । किं वा उत्प्रेक्षामात्रमिदं न तु तेषामप्यभिप्रायः । तामेवाह प्रायेणेति ॥ ८–११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इमम् अमुं च लोकं विहाय कुतः पुरस्तात् शापात् पूर्वमेव हेयतया उभौ विमर्शितौ विचारितौ । अतः अधि सर्व्वपुरुषार्थाधिकां मन्यमानः प्रायमनशनं प्रत्युपाविशत् संकल्पेनोपाविवेश ॥ ५ ॥ ❀ ❀ अमर्त्यनद्यां गंगायामेव कुतस्तत्राह । अभ्यधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री तद्वाहिनी । उभयत्र ऊर्ध्वाधोऽन्तर्बहिश्च ॥ ६ ॥ ❀ ❀ व्यवच्छिद्य निश्चित्य । प्रायोपवेशं प्रति लक्ष्यीकृत्येत्यर्थः । न अन्यस्मिन् कर्म्मज्ञानदेवतान्तरे भावो यस्य सः ॥ ७ ॥ ❀ ❀ तत्र तदा तद्दर्शनार्थं मुनय आगता न तु तीर्थस्नानार्थं कृतार्थत्वात् । ननु तादृशानामपि तीर्थयात्रा दृश्यते तत्राह प्रायेणेति । तीर्थयात्राव्याजैस्तेन तीर्थेभ्योऽपि परीक्षितो दर्शनं ते ह्यधिकं दृढं (गूढं) निरणैषुरिति भावः । अकस्मादद्भुतप्रतिघानन्दान्यथानुपपत्त्या सर्वज्ञतया भावि वृत्तान्तं ज्ञात्वा श्रीभागवतामृतपानार्थमिति भावः ॥ ८–१० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथो विरक्तिकारणात्तक्षकानलस्वीकारानन्तरं पुरस्तात् पूर्वत्रैव हेयतया विमर्शितौ चिन्तितौ इमममुं च लोकमैहिकामुष्मिकभोगायतनौ विहाय तदीयभोगवासनामपनीय कृष्णांघ्रिसेवामधीत्यधिकां सर्वोत्तमां मन्यमानः अमर्त्यनद्यां देवनदीतीरे प्रायमनशनाख्यं व्रतमुपाविशत् ॥ ५ ॥ ❀ ❀ देवनदीतीरे उपाविशदित्युक्तं तत्र हेतुमाह या वै इति । लसच्छ्रिया तुलस्या

विमिश्रैः कृष्णांघ्रिरेणुभिरभ्यधिकस्याम्बुनो नेत्री तद्वाहिनी उभयत्र बाह्यमभ्यन्तरं च स्नानपानादिना सेशान् ईशसहितान् लोकान् देवमनुष्यादीन्पुनाति या तां मरिष्यमाणः आसन्नमृत्युः को न सेवेत ॥ ६ ॥ ❀ ❀ स पाण्डवेयः महाभागवतकुलोत्पन्नः परीक्षित् इत्येवं विष्णुपद्यां गङ्गायां प्रायोपवेशं प्रति व्यवच्छिद्य विनिश्चित्य अनन्यः कृष्णैकविषयः भावो भक्तिर्यस्य मुनीनां शमदमादीनि व्रतानि यस्य त्यक्तः समस्तो देहतदनुबन्धिविषयकः संयोगो येन सः मुकुन्दांघ्रिं दध्यौ ध्यातवान् ॥ ७ ॥ ❀ ❀ तत्र राजर्षिसंनिधौ मुनय उपजग्मुः, कथम्भूताः भुवनं पुनानाः लोकं पवित्रीकुर्वन्तः यतः सन्तः साधवः प्रायेण तीर्थाभिगमापदेशैः तद्यात्राव्याजैः स्वयं तीर्थानि पुनन्ति श्रीगङ्गास्नानव्याजेन तद्गतजनतापापानि नाशयितुं परमभागवतराजर्ष्यनुग्रहार्थं चागता इत्यर्थः ॥ ८-१० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं निरपेक्षतां निरूप्य कर्त्तव्यत्वेन संन्यासलक्षणं वैराग्यमाह-अथो इहामुत्रार्थफलभोगविरागो न ज्ञानार्थः, किन्तु भगवत्सेवार्थ इति निरूपयितुमाह कृष्णांघ्रिसेवामधिमन्यमान इति । अत एव लोकपदप्रयोगः न तु लोके भोगपरित्यागः भक्तिमार्गेण भगवत्सेवायाः शरीरमात्रसाध्यत्वात् । ननु शापेनायमेवं करोति परित्यागमतः कथमस्य भक्तत्वमित्याशंक्याह विमर्शितौ हेयतया पुरस्तादिति पूर्वमेव त्यक्तव्याविति भगवत्सेवार्थं विचारितौ केवलशरीरेण भगवत्सेवां करिष्यन् तस्य शरीरस्य क्रियान्तरे विनियोगाभावार्थमनशनं कृतवानित्याह उपाविशत् प्रायमिति । प्रायमनशनं प्रायस्य सर्वथान्नपरित्यागरूपस्य भगवद्व्रतेनाभीष्टत्वात् प्रायस्य कर्मत्वमन्यथा तादर्थ्येचतुर्थी स्यात् , अन्नमयत्वात् शरीरस्य तदभावे वैक्लव्येन सर्वाभावमाशंक्य अमर्त्यानां नदीत्वात् न विद्यते मर्त्यं येषां देवानां तेषां नदी प्रत्यहमन्यलक्षणेन देहे वृद्धिक्षययोर्जायमानत्वात् पूर्वं साधनत्वेन गृहीतस्य देहस्य नाशात् देहान्तरस्य च साधकत्वसन्देहात् गङ्गायाश्च यथावस्तुस्थापकत्वात् गङ्गातीरे प्रायः अमर्त्यत्वं नदीकृतमेव । तत्तीरे जाता अमर्त्या भवन्तीति अत इदमपि शरीरमुत्तरोत्तरकेवलतेजसो निष्पाद्यमानं गङ्गासम्बन्धात् अमर्त्यत्वमापन्नं सत् भगवत्सेवायाः फलोपकारि भविष्यतीति तथा यत्नः । इदानींतनानामाधिभौतिकत्वात् आधिभौतिकरूपेण सा अभिव्यक्ता न तत्फलं साधयति ॥ ५ ॥ ❀ ❀ एवं योग्यदेहसाधकत्वेन गंगायाः परम्परोपयोगमुक्त्वा भक्तौ साक्षात्फलरूपयोगमाह या वै लसदिति । अधिकारिशरीरं प्राप्य भगवत्सेवायां प्रथमतश्चरणप्रक्षालनभावनायां तस्यां क्रियमाणायां प्रक्षालनं जातमित्यभिज्ञापिका गंगा अस्या अभिज्ञापकं रूपमाह या ब्रह्मसदने ब्रह्मकर्तृकचरणक्षालनात् पूर्वं नित्यपूजायां लक्ष्मीसमर्पिततुलसीचरणारविंदे स्थिता भक्तकार्यार्थं व्यावृतस्य भगवतः चरणस्पर्शभूतसंस्कारपक्षमाश्रित्य "तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः" (३।३।१) इति न्यायेन कृतपुण्यपुंजस्य सम्बन्धिनां भक्तत्वे सति भगवदीयशरीरनिष्पादनार्थं भगवच्चरणसम्बन्धे तादृशशरीरं निष्पादयितुं स्थितस्य चरणप्राप्तेः पूर्ववत् प्राप्तिसाधकत्वं गङ्गाया वदति कृष्णांघ्रिरेण्विति । श्रीतुलस्या विमिश्रः योंऽघ्रिरेणुः, अनेन तस्मिन् शरीरे भक्तभक्त्योः सहजसम्बन्धे हेतुरुक्तः । बहूनां भूमौ स्थितानां तादृशशरीरनिष्पादनार्थं कृष्णांघ्रिरेणव अभितः अधिका यस्य तादृशमंबु नयतीति अम्बुनेत्री परिमितं च गंगाजलं परिमितं च कमंडलुजलमपरिमिताश्चरणरेणव इति न सम्यक् प्रक्षालनपर्याप्तमंबु भवति, अतो रेणव एव अधिकाः, इदानींतनजलेऽपि भक्तं प्रत्येव तदभिव्यक्तीकरणं नान्यं प्रतीति नेत्रपदेन सूचितम् । तस्य प्रासंगिकफलद्वयमाह पुनातीति । त्रीनपि लोकान् उभयत्र अन्तर्बहिः सेशान् पुनाति सेशत्वपालकमहादेवसहितान् अनेन भक्तानां भूमावुत्पन्नानामधिकदोषसम्बन्धाभावः सूचितः । अत एव यो मरिष्यमाणः पूर्वदेहत्यागेच्छुः तादृशशरीरोत्पादिकां गंगां को वा न सेवेत ॥ ६ ॥ ❀ ❀ एवं गंगातीरे प्रायोपवेशनं कर्त्तव्यमिति युक्त्या निश्चित्य स्वस्याभक्तत्वे सर्वमन्यथा स्यादिति तद्दोषवत्त्वेन परिहरन् अग्रिमकर्त्तव्यमाह इत्थं व्यवच्छिद्येति । विष्णुनद्यां प्रायोपवेशनं प्रति पूर्वोक्तप्रकारेण पक्षांतरनिराकरणपूर्वकविशेषेण इमं पक्षमवच्छिद्य दध्याविति सम्बन्धः । यतः स पांडवेयः कदाचिदाध्यात्मिकस्य बलिष्ठत्वेन पूर्वोक्तं न भविष्यतीति पूर्वं सहायत्वेन मुकुदांघ्रिमेव दध्यौ । मोक्षदातृत्वेन स्वदातृतया ध्यानस्योपयोगं वारयति अंघ्रिमित्येकत्वसंख्या अविवक्षिता ग्रहवदुत्तरत्र योगार्थं तेन संनिधानात् पूर्वशेषत्वं फलिष्यति अनन्या भक्तिः पुरुषार्थसाधिकेति तां वक्तुमनन्यभाव इति न विद्यते अन्यस्मिन् भावो यस्य प्रायो गंगादीनामपेक्षितत्वात् स्वतन्त्रतया भवत्वि-त्येतदुक्तमनेन मनोदंडोऽप्युक्तः वाचनिकं कायिकं चाह मुनिव्रतो मुक्तसमस्तसंग इति मुनिवत् व्रतं यस्य वृथालापपरिवर्जनं मौनं मुनिव्यतिरिक्तैः सह वा भाषणनिषेधः, अन्यथा गृहीतव्रतस्य त्यागः प्रसज्येत मुक्ताः सर्वे संगा येन पुत्रमित्रादिभिः मनसा संगाः परित्यक्ताः आज्ञया शरीरादिभिर्व्यावर्त्तिताः ॥ ७ ॥ ❀ ❀ एवं स्वकर्त्तव्ये कृते शिष्टं भगवानेव करिष्यतीति भागवतं च शुकं च योजयन् समाज एव रस उत्पत्स्यत इति भक्तिरसोत्पत्त्यर्थं भगवत्कृतं मुनीनामागमनमाह तत्रोपजग्मुरिति । उपेति कालसामीप्यमद्यैव तदर्थं भगवता आज्ञप्तास्ते समागता इति न, किन्तु पूर्वमेव लोके तीर्थपावित्र्यार्थं भगवता नियुक्ताः तथा कुर्वन्तीत्याह भुवनं पुनाना इति, अन्यथा मुनीनामेतत्शेषत्वं स्यात् , पावने सामर्थ्यमाह महानुभावा इति, अनाहूतानामपि अत्र प्रयोजनज्ञाने हेतुः मुनय इति सशिष्या इति शिष्याणां पुनर्बोधनव्यावृत्त्यर्थं रसिकतयैवाग्रे कथाकरणार्थं प्रायेणेति स्वतन्त्रतया तीर्थाभिगमनरूपेणाश्रमधर्मकर्तृव्यावृत्त्यर्थं यद्यपि 'यद्यदाचरति श्रेष्ठ' इति न्यायेन लोकशिक्षार्थं तीर्थाभिगमनं भवति तथापि तन्न मुख्यप्रयोजनं तदाह अपदेशैरिति व्याजैरित्यर्थः ॥ ८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अथो इत्यत्र। अनशनमिति। 'प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपी'ति कोशादित्यर्थः। अत एवेति। त्यागस्य भगवत्सेवार्थत्वादेव। भगवद्व्रतत्वेनेति 'अनश्नन्नन्य' इति श्रुत्या तथात्वेन। एवं चात्रोपविशतेः क्रियार्थत्वं बोध्यम्। यथा 'सत्रमासते'-त्यत्रासतेः क्रियार्थत्वम्, तद्वत्। तत्तीर इति मन्दाकिनीतीरे। ननु गङ्गाया अमर्त्यत्वसाधकत्व इदानीं कथं तद्व्यभिचार इत्यत आहुः इदानीं त्वित्यादि॥ ५॥ ❀ ❀ या वै लसदित्यत्र। भक्ताविल्यादि। गङ्गायां कुत एवं सामर्थ्यमित्याकांक्षायां भक्ताविल्याद्याहेत्यर्थः। चरणक्षालनमिति। तथा च तत्करणत्वेन फलरूपोपयोग इत्यर्थः। ननु तथापि प्रकृतेः कथं स इत्यत आहुः भावनायामित्यादि। तस्यामिति सेवायाम्। अभिज्ञापिकेति स्मारिका। तथा च प्रकृते स्मारकत्वेन स इत्यर्थः। केन रूपेणाभिज्ञाजनकत्वमित्याकांक्षायामाहुः तस्या इत्यादि। तथा च विशेषणोक्तरूपेण तथेत्यर्थः। अत्र विमिश्रत्वकथनानुपपत्त्या तुलसीस्थितिरुत्क्षिप्तेपि चरणारविन्दे सिद्धा, तद्विमिश्ररेणुसम्बन्धेन क्षालनकरणतापि सिद्धा। तथा चैतद्विशेषणोक्तरूपेणाभिज्ञापकत्वमित्यर्थः। एवं फलरूपमुपयोगं प्रकृतोपयोगं च बोधयित्वा सेवोपयोगिदेहजननसामर्थ्यसाधनायाहुः भक्तकार्येत्यादि। अत्र भक्ता बलिर्देवाश्च, तत्कार्यमुद्धारस्त्रिविष्टपप्रापणं च, तदर्थं व्यापृतस्योत्क्षेपादिकां क्रियां तन्वानस्य भगवतश्चरणस्य वा, भूतसंस्कारकपक्षमाश्रित्य, कार्यव्यापाराभावे ततः सायुज्यादेरेव सम्भवात्, तद्व्यापारे तु स्वसेवायोग्यदेहसम्पादनरूपस्य भक्तान्तरकार्यस्यापि संभवात् देहनिष्पादकभूतसंस्कारकपक्षमादृत्य। तदन्तरेति साधनाध्यायारंभस्थितसूत्रोक्तन्यायेन। तत्र हि 'पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य मरणे सर्ववेदार्थरूपभगवत्स्वरूपज्ञानाभावेन यज्ञाभिव्यक्त्यभावाद् भूतसंस्कारक एव यज्ञो जात इति, निष्कामत्वाच्च यज्ञसचिवा देवास्तुष्टा इति, ततश्च तदधीनान्येव भूतानीति, ते देवास्तस्याग्रे ज्ञानयोग्यदेहसिद्ध्यर्थं तत्र तत्र हुत्वा पञ्चाग्निविद्याप्रकारेण तस्य शरीरं सम्पादयन्तीति प्रतिपादितम्, तेन न्यायेन कृतप्राणिपुण्यपुञ्जस्य पूर्वजन्मनि कृतो यः पुण्यपुञ्जः श्रवणादीनां साधनभक्तीनां साक्षान्मोक्षसाधनत्वं ज्ञात्वा तान्त्रिकदीक्षापूर्वकं विहितत्वेन कृतं यदुपासनामार्गीयं श्रवणादिनवकं तत्पूर्वोक्तयज्ञवत् भूतसंस्कारकमेव जातमिति तस्य यज्ञस्य स्वव्यापारभूतदेवाधीनानि देहजनकानि भूतानीति विद्यायोग्यदेहनिष्पादनार्थं देवसम्बन्धं प्राप्य पञ्चाग्निविद्योक्तहोमरूपेण स यज्ञस्तिष्ठति, तथा पूर्वोक्तनवकमपि सम्बन्धिनां निषेक्तृपोषकरूपाणां पित्रादीनां भक्तत्वे सति तद्द्वारा भगवदीयशरीरनिष्पादनार्थं चरणामृतचरणरेणुरूपेण भूतानि संस्कुर्वत् भगवच्चरणे सम्बन्धं प्राप्य तिष्ठतीति भक्तानां तादृशपुण्यश्रवणादिकृतां तत्सम्बन्धि तादृशशरीरं निष्पादयितुं चरणामृतचरणरेणुसम्बन्धिनं साक्षात्सेवायोग्यं निष्पादयितुं स्थितस्य नवकस्य चरणप्राप्तेः पूर्वमेव तत्प्राप्तिसाधकत्वं चरणामृतचरणरेणुसम्बन्धप्राप्तिसाधकत्वं गङ्गाया व्यासः सूतश्च वदति, तेन तस्याः तादृशसामर्थ्यमित्यर्थः। भक्त्योरिति विहिताविहितभक्त्योः। सेशानिति। अस्मिन् पक्षे उभयत्रेत्यस्य स्थितिदशायां संहारदशायां चेत्यर्थो बोध्यः॥ ६॥ ❀ ❀ इत्थं व्यवच्छिद्येत्यत्र। अन्यथा स्यादिति। आधिदैविकरूपानाविर्भावेन स्वविचारितकार्यानुपयोगि स्यात्। आध्यात्मिकस्येत्यादि। अन्तःकरणनिष्ठपापादेर्बलिष्ठत्वेन पूर्वोक्तं प्रायोपवेशनमित्यर्थः। ग्रहवदित्यादि। यथा 'ग्रहं सम्मार्ष्टी'ति सम्मार्गवाक्ये श्रूयमाणाप्येकत्वसङ्ख्या, ग्रहान्तराणामुत्तरत्र होमादिकर्मणि विनियोगार्थं उद्देश्यगतत्वादविवक्षितेत्याद्रियते, तथात्रापि चरणान्तरस्य ध्यानोपयोगार्थमविवक्षितेत्यर्थः। अविवक्षितत्वस्य फलमाहुः तेनेत्यादि। पूर्वशेषत्वमिति सेवायोग्यशरीरप्राप्तिशेषत्वम्। अनन्यभावत्वकथनप्रयोजनमाहुः प्रायेत्यादि। अपेक्षितत्वादिति। पूर्वश्लोकद्वये कर्मत्वेन शुद्धिजनकत्वादिना च तथात्वात्। आज्ञयेति गृहमेधे पुत्रादीनामाज्ञादानेन॥ ७॥ ❀ ❀ तत्रेत्यत्र। कालसामीप्यमिति। यस्मिन् काले प्रायोपवेशं कृतवान्, तदैवेत्यर्थः। पुनर्बोधनव्यावृत्त्यर्थमिति। एवं कथाकरणार्थं यत्पुनर्बोधनं तद्व्यावृत्त्यर्थम्। शिष्टाचारदर्शनादेव तत्सिद्धेरिति॥ ८॥

श्रीगिरिधरकृता बालप्रबोधिनी

तच्छ्रवणफलरूपविरक्तिस्तस्य जातैवेत्याह–अथो इति। अथो तच्छ्रवणानन्तरमेवेममनुं च लोकं विहाय इहलोके परलोके च सुखस्पृहां त्यक्त्वा प्रायमनशनं यथा भवति तथा तत्सङ्कल्पेनामर्त्यनद्यां देवनदी गंगा तत्तीरे उपाविशदित्यन्वयः। ततः पूर्वमेव तस्य विवेकित्वं सूचयँल्लोकौ विशिनष्टि–पुरस्तात्पूर्वमेव हेयतया विमर्शितौ विचारेण निश्चिताविति। तर्हि तत उत्कृष्टं किं फलमुद्दिश्य तत्रोपविवेशेत्याकाङ्क्षायामाह–श्रीकृष्णाङ्घ्रिसेवामधि सर्वपुरुषार्थादधिकामुत्कृष्टां मन्यमान इति। तत्प्राप्त्यर्थमेव तत्रोपविवेशेति भावः॥ ५॥ ❀ ❀ गङ्गा कथं तत्प्राप्तिहेतुरित्यपेक्षायां तच्चरणसम्बन्धादित्याशयेनाह–येति। प्रसिद्धोऽयमर्थ इत्याह–वा इति। या वै सेशान् ईशैर्लोकपालादिभिः सहितान् लोकान् जनान् उभयत्रान्तर्बहिश्च पुनाति तां मरिष्यमाणः आसन्नमरणः मरणकालस्यानिश्चितत्वात्सर्वदैव को वा न सेवेतेत्यन्वयः। न गङ्गाकृता विशुद्धिः स्वर्गादिप्राप्तिहेतुरेव किन्तु भगवत्प्राप्तिहेतुरपीत्याशयेन तां विशिनष्टि–लसच्छ्रीति। लसन्ती श्रीर्यस्यास्तया तुलस्या विमिश्राः ये कृष्णाङ्घ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री वाहिनीत्यर्थः॥ ६॥ ❀ ❀ स पाण्डवेयः परीक्षित् इति हेतोर्विष्णुपद्यां गङ्गायां प्रायोपवेशं प्रति व्यवच्छिद्य विनिश्चित्य सङ्कल्प्य मुक्तः समस्तेषु देहतदनुबन्ध्यादिषु पुत्रादिषु सङ्गो येन सः, मुनीनां व्रतं नियमो यस्य सः, न विद्यतेऽन्यस्मिन् भावो भावना यस्य सः मुकुन्दस्याङ्घ्रिं दध्याविल्यन्वयः॥ ७॥ ❀ ❀ तत्र गङ्गातीरे राज्ञ उपकारार्थं भुवनं पुनानाः पवित्रीकुर्वन्तः महानुभावाः सशिष्या मुनय उपजग्मुरागताः। ननु मुनयस्तु स्वयमेव पवित्रतीर्थं तीर्थपर्यटनं कुर्वन्ति कथं तेषां भुवनपवित्रत्व-

कर्तृत्वमित्याशङ्क्याह-प्रायेण सन्तः साधवस्तीर्थयात्राव्याजैः स्वयमेव तीर्थानि पुनन्तीति । तेषु निरन्तरं ध्यानेन भगवतः सान्निध्यादिति नवमस्कन्धोक्तरीत्या ज्ञेयम् ॥ ८ ॥

हिन्दी अनुवाद

वे इस लोक और परलोकके भोगोंको तो पहलेसे ही तुच्छ और त्याज्य समझते थे । अब उनका स्वरूपतः त्याग करके भगवान् श्रीकृष्णके चरणकमलोंकी सेवाको ही सर्वोपरि मानकर आमरण अनशन व्रत लेकर वे गङ्गातटपर बैठ गये ॥ ५ ॥ ❀ ❀ गङ्गाजीका जल भगवान् श्रीकृष्णके चरणकमलोंका वह पराग लेकर प्रवाहित होता है, जो श्रीमती तुलसीकी गन्धसे मिश्रित है । यही कारण है कि वे लोकपालोंके सहित ऊपर-नीचेके समस्त लोकोंको पवित्र करती हैं । कौन ऐसा मरणासन्न पुरुष होगा, जो उनका सेवन न करेगा ॥ ६ ॥ ❀ ❀ इस प्रकार गङ्गाजीके तटपर आमरण अनशनका निश्चय करके उन्होंने समस्त आसक्तियोंका परित्याग कर दिया और वे मुनियोंका व्रत स्वीकार करके अनन्यभावसे श्रीकृष्णके चरणकमलोंका ध्यान करने लगे ॥ ७ ॥ ❀ ❀ उस समय त्रिलोकीको पवित्र करनेवाले बड़े-बड़े महानुभाव ऋषि-मुनि अपने शिष्योंके साथ वहाँ पधारे । संतजन प्रायः तीर्थयात्राके बहाने स्वयं उन तीर्थस्थानोंको ही पवित्र करते हैं ॥ ८ ॥

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ।
पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ[1] ॥ ९ ॥
मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ।
मैत्रेय और्वः कवषः[2] कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥ १० ॥
अन्ये च देवर्षिब्रह्मर्षिवर्या[3] राजर्षिवर्या अरुणादयश्च ।
नानार्षेयप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥ ११ ॥
सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत्[4] ।
विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अरुणादयः कांडर्षित्वविशेषेण पृथङ् निर्दिष्टाः । नाना यान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् शिरसा भुवं स्पृष्ट्वा ववंदे ॥ ११ ॥ ❀ ❀ विज्ञापनार्थं पुनः कृतप्रणामः । विविक्तं शुद्धं चेतो यस्य । अभिगृहीतौ संयोजितौ पाणी येन सः । स्वचिकीर्षितं प्रायोपवेशनादि युक्तमयुक्तं वेति विज्ञापयामास ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुनीन्कांश्चिन्नामतो निर्दिशति अत्रिरिति । शरद्वान्कृपाचार्यपिता गाधिसुतो विश्वामित्रः रामः परशुरामः ॥ ९-१० ॥ ❀ ❀ काण्डर्षित्वं काण्डं ज्ञानकाण्डं तत्प्रधाना ऋषयः काण्डर्षयस्तेषां भावस्तत्त्वं तदेव विशेषो भेदस्तेन हेतुना पृथङ्निर्दिष्टाः कर्मोपास्तिप्रधानब्रह्मर्षिराजर्ष्यादिभ्यो भेदेन कथिताः ॥ ११ ॥ ❀ ❀ अथ प्रणतयुत्तरम् । विविक्तचेताः शुद्धमनाः ॥ १२ ॥

श्रीमद्वीरराघवव्याख्या

के चैते मुनय इत्यत्र दर्शयति अत्रिरिति सार्द्धद्वयेन । गाधिसुतो विश्वामित्रः रामो भार्गवः कुंभयोनिरगस्त्यः ॥ ९-१० ॥ ❀ ❀ अन्ये च देवर्षिश्रेष्ठा ब्रह्मर्षिश्रेष्ठा राजर्षिवर्या अरुणादयश्च ऋषयः तानागतान्नानाविधार्षेयप्रवरान्समेतान् संघीभूतानभ्यर्च्य राजा परीक्षित् शिरसा ववंदे ॥ ११ ॥ ❀ ❀ अथ तेषु सुखं यथातथोपविष्टेषु सत्सु पुनरपि कृतः प्रणामो येन स राजा उपस्थितस्तेषां समीपे तिष्ठन्नभिगृहीतपाणिः बद्धांजलिः विवेकयुक्तं चेतो यस्य तथाभूतः स्वचिकीर्षितं कर्त्तुमिष्टं यत्तद्विज्ञापयामास ॥ १२ ॥

---

१. प्रा० पा०—इन्द्रप्रमतिः सुबाहुः । २. प्रा० पा०—कवयः । ३. प्रा० पा०—देवर्षिमहर्षि० । ४. प्रा० पा०—नानर्षिसंघान्-पुरतः । प्रा० पा०—महत् ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मुनीनां नामानि निर्दिशतीत्याह-अत्रिरिति । गाधिसुतो विश्वामित्रः रामः परशुरामः इंद्रप्रमतिश्च इध्मवाहश्च इंद्रप्रमतीध्मवाहौ ॥ ९ ॥ ❀ ❀ कुंभयोनिरगस्त्यः ॥ १० ॥ ❀ ❀ अन्ये च प्रसिद्धाः प्रसिद्धनामानः नारदादयो देवर्षयः रामादयो ब्रह्मर्षयः विश्वामित्रादयो राजर्षयः जातिभेदकथनार्थं पुनर्वचनं अरुण आदिर्येषां ते तथोक्ताः ऋषीणां समूहः आर्षेयं तस्मिन् प्रवराः नानार्षेयप्रवराः तानभ्यर्च्य अर्घ्यपाद्यादिभिरिति शेषः । शिरसा वंदनं नाम नमस्कार एवात्राभिप्रेतः कृतप्रणाम इत्युत्तरवचनात् ॥ ११ ॥ ❀ ❀ ऋषीणामग्रे उपस्थितः अर्घ्यं गृहीतं पाणौ येन स तथा यत्स्वेन कर्तुमिष्टं तदेभ्यो विज्ञापयामासेत्यन्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विज्ञापयामासेति वक्ष्यमाणमित्येव ज्ञेयम् ॥ ९-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अरुणादयः काण्डर्षित्वविशेषेण पृथङ् निर्दिष्टाः ॥ ११ ॥ ❀ ❀ अभिगृहीतपाणिः कृताञ्जलिः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्ये च देवर्षिषु ब्रह्मर्षिषु च वर्याः श्रेष्ठा राजर्षिश्रेष्ठाश्च अरुणादयो ऋषिविशेषाश्चोपजग्मुः । नानाविधानि आर्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान्मुख्यान्समेतान्संघीभूतान् शिरसा ववंदे ॥ ११ ॥ ❀ ❀ अथ सुखं यथा स्यात्तथोपविष्टेषु सत्सु विविक्तं निर्मलं चेतो यस्य सः अभिगृहीतौ संयोजितौ पाणी येन सः अग्रे उपस्थितः विज्ञापनार्थं भूयः पुनः कृतः प्रणामो येन सः यत्स्वचिकीर्षितं प्रायोपवेशनादिकपूर्वकमुकुन्दांघ्रिध्यानादि तत् कथमनुष्ठेयं कथं नेति विज्ञापयामास ॥ १२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एतेषां पावनकर्तृत्वं साधुत्वेनैवेति तदाह । आत्रेयो ब्राह्मणेषु मुख्य इति प्रथममेवात्रिर्गणितः शारद्वान् कृपः अन्यो वा गाधिसुतो विश्वामित्रः रामः परशुरामः उतथ्यो गौतमपिता ब्रह्मशिष्यादिभगवद्भक्तांता गणिताः । अथेत्यंताः ज्ञानप्रतिपादकाः । रामादिपिप्पलादांताः धर्मप्रतिपादकाः । मैत्रेयादिनारदांता भक्तिप्रतिपादकाः । भक्तिः षड्विधा चकारात् नारदशिष्यास्तत्वेन गणिताः । अन्येऽप्येवं शेषाः प्रकीर्णकाः तानाह अन्ये चेति, अत एव ऋषित्रयग्रहणं अरुणः कश्चिदृषिः ॥ ९-१० ॥ ❀ ❀ तेष्वागतेषु राज्ञः कृत्यमाह तान्नतानिति आर्षेयेषु ऋषिवंशेषु प्रवराः श्रेष्ठाः यतनेवा एकदैव सर्वे समागता इति समुदायेनैव पूजनं यथायोगं तत्संमत्या वंदनातः पूजति पूजासमाप्ति पूजनं यस्त्विवच्छया कृत इति दोषपरिहारार्थमव्ययेषु तेषु विज्ञापनार्थं प्रणामं कृत्वा स्वचिकीर्षितं कर्त्तव्यं चेति निर्द्धारार्थं बहिर्दृष्ट्या उत्तरनिराकरणार्थं च अनन्यनिष्ठः सन् विनयार्थमुत्थितः ॥ ११ ॥ ❀ ❀ अंजलिं बध्वा विज्ञापयामासेत्याह सुखोपविष्टेष्विति । अथेति पूजासमाप्त्यनंतरं विविक्तः संघातात् पृथक्कृतं आत्मनि चेतो यस्य आभिमुख्येन गृहीतौ पाणी येन ॥ १२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अत्रिरित्यत्र । अन्यो वेति । कृपस्य शारद्वतत्वेन प्रसिद्धेर्गौतमस्याग्रे उक्तत्वाच्च तथेत्यर्थः । भगवद्भक्तान्ता इति नारदान्ताः । तेष्ववान्तरविभागमाहुः अथेत्यादि ॥ ९ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

के च ते मुनय इत्यपेक्षायामाह-अत्रिरिति सार्द्धद्वयेन । गाधिसुतो विश्वामित्रः । रामः परशुरामः ॥ ९ ॥ ❀ ❀ कुम्भयोनिः अगस्त्यः ॥ १० ॥ ❀ ❀ अरुणादयश्चर्षयः काण्डर्षित्वविशेषेण पृथङ्निर्दिष्टाः । नाना यान्यार्षेयाणि ऋषीणां गोत्राणि तेषु ये प्रवराः श्रेष्ठाः तान्समेतान् स्वसन्निधिं प्राप्तान् राजाऽभ्यर्च्य शिरसा भुवं स्पृशन् ववन्दे ॥ ११ ॥ ❀ ❀ अथ तेषु सुखं यथा तथोपविष्टेषु सत्सु भूयः पुनरपि विज्ञापनार्थं कृतः प्रणामो येन स उपस्थितस्तेषां समीपे तिष्ठन्नग्रेऽभिगृहीतपाणिः संयोजिताञ्जलिः राजा यत्स्वचिकीर्षितं तद्विज्ञापयामासेत्यन्वयः । ननु स्वयमेव विवेकी तान् कथं विज्ञापयामासेत्याशङ्क्याह-विविक्तचेता इति, विविक्तं शुद्धं स्वमहत्त्वाभिमानरहितं चेतो यस्य स इत्यर्थः ॥ १२ ॥

हिन्दी अनुवाद

उस समय वहाँ पर अत्रि, वसिष्ठ, च्यवन, शरद्वान, अरिष्टनेमि, भृगु, अङ्गिरा, पराशर, विश्वामित्र, परशुराम, उतथ्य, इन्द्रप्रमद, इध्मवाह, मेधातिथि, देवल, आर्ष्टिषेण, भारद्वाज, गौतम, पिप्पलाद, मैत्रेय, और्व, कवष, अगस्त्य, भगवान् व्यास,

नारद तथा इनके अतिरिक्त और भी कई श्रेष्ठ देवर्षि, ब्रह्मर्षि तथा अरुणादि राजर्षियोंका शुभागमन हुआ। इस प्रकार विभिन्न गोत्रोंके मुख्य-मुख्य ऋषियोंको एकत्र देखकर राजाने सबका यथायोग्य सत्कार किया और उनके चरणोंपर सिर रखकर वन्दना की॥ ९-११॥ ❋ ❋ जब सब लोग आरामसे अपने-अपने आसनोंपर बैठ गये, तब महाराज परीक्षित्ने उन्हें फिरसे प्रणाम किया और उनके सामने खड़े होकर शुद्ध हृदयसे अञ्जलि बाँधकर वे जो कुछ करना चाहते थे, उसे सुनाने लगे॥ १२॥

राजोवाच

अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः।
राज्ञां कुलं ब्राह्मणपादशौचाद्[1] दूराद् विसृष्टं बत गर्ह्यकर्म॥ १३॥
तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम्।
निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते॥ १४॥
तं मोपयातं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तमीशे।
द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः॥ १५॥
पुनश्च भूयाद्भगवत्यनन्ते रतिः[2] प्रसङ्गश्च तदाश्रयेषु।
महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः॥ १६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुमोदनेनानुग्रहमालक्ष्यात्मानं श्लाघते अहो इति। नृपाणां मध्ये महत्तमैरनुग्रहणीयं शीलं वृत्तं येषां ते। एतच्च राज्ञामतिदुर्लभमित्याह। ब्राह्मणानां पादशौचात्पादक्षालनोदकात्। 'दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेदि'ति स्मृतेर्दूरे हि तैस्तद्विसृज्यते ततोऽपि दूरादेव विसृष्टं क्षिप्तम्। तत्रापि स्थातुमयोग्यमित्यर्थः। गर्ह्यं कर्म यस्येत्यात्मानमुद्दिश्योक्तम्॥ १३॥ ❋ ❋ आस्तां तावदनुग्रहो ब्रह्मशापोऽपि भगवत्प्रसादादेव जात इत्याह। तस्य गर्ह्यकर्मण एव। अतोऽघस्य पापात्मनो गृहेष्वासक्तचित्तस्य मे स्वप्राप्तये परावराणामीश एव द्विजशापतया बभूव। यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं धत्ते निर्विण्णो भवति। यतो निर्वेदमूलो निर्वेदो वैराग्यमूलं प्राप्तिकारणं यस्मिन्। स्वस्य वैराग्यप्राप्यत्वात्तस्य च भयमूलत्वात्तदर्थं द्विजशापं कारितवानित्यर्थः॥ १४॥ ❋ ❋ तान्प्रार्थयते तमिति द्वाभ्याम्। तं मामुपयातं शरणागतं प्रतियन्तु जानन्तु। देवी देवतारूपा गंगा च प्रत्येतु। वाशब्दः प्रतिक्रियानादरे। गाथाः कथाः॥ १५॥ ❋ ❋ स आश्रयो येषां तेषु प्रकृष्टः संगो भूयात्। तस्यां तस्यां सृष्टौ जन्मनि॥ १६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

धन्यतमा न जाने कस्य पुण्यस्य फलमेतदहो भाग्यं मम इत्यर्थः। एतच्च महत्तमानुग्रहणीयशीलत्वं च तैर्विप्रैस्तद्राजकुलं ततोपि आश्रमाद् दूरस्थपादशौचस्थलादपि आराद् दूरे तत्रापि पादशौचस्थले। इत्यर्थ इति। अननुज्ञानादिति भावः। यस्य राजकुलस्य। गर्ह्यं सर्वतोऽप्यपवित्रमित्यर्थः। अत्र सन्दर्भः-अहो आश्चर्यं किमाश्चर्यं तत्राह नृपाणां मध्ये वयं पाण्डवाः महत्तमानां भवतामनुग्रहे शीलयति ये स्वायंभुवादयस्तादृशाः सन्तो धन्यतमा जाता इति शेषः। स्वतस्तु नृपाणां कुलमीदृशमित्याह-राज्ञामिति। यतो गर्ह्यं हिंसादिलक्षणं कर्म यस्य तादृशमित्यर्थः॥ १३॥ ❋ ❋ अतो गर्ह्यकर्मत्वात्। अघस्य ब्राह्मणगले सर्पनिवेशेनावमाननात्। एवं पतितपावनत्वख्यापनार्थं द्विजशापरूपस्सन्मत्पार्श्वमागतः। मूलशब्दस्य पुंस्त्वमार्षम्। भवत्समागमादनुमीयते। यत्र भगवानायाति तत्रैव तद्भक्ताः स्वत एवायांतीत्यर्थः। यत्र परावरेशे प्रसक्त आसक्तो जन आशु शीघ्रमेवाभयं भयाभावं धत्ते इति वा। तस्य च वैराग्यस्य च इत्यर्थ इति। स्वप्राप्तिसाधनवैराग्यकारणीभूतभयमुत्पादितवान्निजकृपयेति भावः। अत्र संदर्भः-तत्रापीदमाश्चर्यमित्याह—तस्यैव भगवदनुग्रहशीलानां वंशे गणनीयस्यापि मे ममाभीक्ष्णं गृहेषु व्यासक्तचित्तस्य तत्राप्यघस्य तादृशब्राह्मणापराधकर्तुः परावरेशस्तु नूनं भगवदनुगृहीतवंशजोऽयमित्यामृश्य स्वयं द्विजशापरूपः तदपदेशः सन् निर्वेदोऽन्यत्रानासंग एव मूलमवष्टम्भको यस्य स्वस्मिन्नासंगस्य तद्रूपोऽभवत्। तर्हि किं स्यात्तत्राह-यत्र परावरेशे प्रसक्तः शीघ्रमेवाभयं तच्चरणारविन्दप्राप्त्या भयाभावं धत्ते "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्यादेः। अतोऽकस्माद्भवतामप्यागमनं तत्प्रेरणयैव जातमिति भावः। वक्ष्यते च श्रीशुकदेवमुपलक्ष्य 'अपि मे भगवान्प्रीतः' इत्यादिद्वाभ्याम्॥ १४॥ ❋ ❋ योहमेवमुक्त-

---

१. प्रा० पा०—शौचादाराद्विसृष्टं। २. प्रा० पा०—रतिप्रसङ्गश्च।

मानुग्रहणीयशीलस्तं मा मां द्विजोपसृष्टश्शृङ्गिणा प्रेरितः कुहकः वेषांतरधारी। यद्वा सर्पजातिविशिष्टस्तक्षकः साक्षादेव दशतु भक्षयतु। युष्माभिस्त्वेतत्कार्यमित्याह—अलमिति। अलं देहवियोगपर्यंतं गाथाः "गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः" इति मेदिनी। श्लोके यशसीत्यर्थः। "श्लोकः पद्ये यशस्यपि" इत्यभिधानात्। तथा च विष्णुयशांसि गायत कथयत ॥ १५ ॥ ❀ ❀ पुनरपि जन्मांतरेऽपि यां यां सृष्टिं जन्म प्राप्नोमि तस्यां तस्यां भगवति रतिस्तद्भक्तेषु प्रकृष्टः संगः सर्वजीवेषु मैत्री इति मद्वाञ्छितत्रयं भूयादिति प्रार्थ्य प्रणमन्नाह—नम इति। यद्वा ब्राह्मणानादरानुतापादाह—ब्राह्मणेभ्यो नमो भूयादिति। वाञ्छित-चतुष्टयञ्च ॥ १६ ॥

श्रीमद्वीरराघवव्याख्या

तदेवाह अहो इति चतुर्भिः। नृणां मध्ये वयमहो धन्यतमाः उत्तमाः खलु, धन्यतमत्वे हेतुं वदन्नात्मनो विशिनष्टि महत्तमैर्भवद्भिरनुग्रहणीयमनुग्रहीतुं योग्यं शीलं येषां यद्वा महत्तमानुग्रहणीयं महत्तमानुग्रहलभ्यं शीलं येषां तथाभूताः। अनेवंभूतं राजकुलं निन्दति राज्ञामिति, ब्राह्मणानां भवतां पादशौचात्पादसेवामूलकविशुद्धेर्दूराद्विसृष्टं दूरात् त्यक्तं यद्राज्ञां कुलं तद्गर्ह्यं निंद्यं कर्म यस्य तथा भूतं भवति। बत इति खेदे ॥१३॥ ❀ ❀ ननु महत्तमानुग्रहणीयशीलस्य तव कथमधुना तन्निग्रहप्रवृत्तिरित्यत्र तन्निग्रहोऽप्यनुग्रहरूप एवेत्याह तस्येति। तस्यैव महत्तमानुग्रहणीयशीलस्यैवाभीक्ष्णं पुनः पुनः गृहेषु व्यासक्तं चित्तं यस्य तस्य ममाद्य प्रकृतब्रह्मविदपचाररूपस्य परिहारक इति शेषः, निर्वेदमूलः देहतदनुबंध्यादिषु वैराग्ये च मूलं हेतुः द्विजशापरूपः परावरेशो भगवानेव प्रसक्तः प्रवृत्तः मामनुग्रहीतुं भगवत्संकल्प एव द्विजशापव्याजेन प्रवृत्त इत्यर्थः। कथं तस्यानुग्रहरूपतेत्यत आह यत्र यस्मिन्मयि प्रसक्तो द्विजशापरूपः परावरेशः आश्वभयं धत्ते आदधाति ब्रह्मविदपचारपरिहारहेतुत्वान्निर्वेदमूलत्वात् सत्संगद्वारा मुक्त्याधायकत्वाच्चानुग्रहरूप एवेत्यर्थः ॥ १४ ॥ ❀ ❀ अस्त्वेवं प्रकृतं किमित्याह तमिति। हे विप्राः! भवंतः इयं देवी गंगा चेशे भगवति धृतं चित्तं येन तथाभूतं तमुक्तविधमुपायांतरानुवर्तिनं प्रतियंतु हेयोपादेयशुश्रूषुं जानंत्वित्यर्थः, द्विजेनोपसृष्टः प्रचोदितः तक्षकः कुहकः विस्मापकः मा वंचयत्वलं नितरां दशतु नाहं बिभेमीति भावः। किंतु यूयं विष्णोर्गाथाः कथाः गायत कथयत अलं गायतेति वान्वयः ॥ १५ ॥ ❀ ❀ पुनः किंच मम भगवत्यनंतेऽतिभक्तिस्तदाश्रयेषु भगवद्भक्तेषु संगश्च स्यादेवमनुगृह्णीतेति भावः। किंच यां यां सृष्टिं यद्यज्जन्म प्राप्नोमि तत्र सर्वत्र जन्मनि महत्सु भवादृशेषु मैत्री आनुकूल्यमस्तु द्विजेभ्यो वो नमः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

महत्तमैः महापुरुषैरनुग्रहणीयं शीलं येषां ते तथोक्ताः वयं नृपाणां मध्ये धन्यतमाः, अहो अस्मद्भागधेयं कुतः राज्ञां कुलं गर्ह्यकर्म निंद्यकर्मवत् तत्कष्टं येन राजकुलेन ब्राह्मणपादशौचमारात् दूराद्विसृष्टं विरहितं तदिति शेषः ॥ १३ ॥ ❀ ❀ स्वचिकीर्षितमाह तस्येति। परावरेशे मुक्तामुक्तप्रपंचनाथे हरौ व्यासक्तचित्तस्यानुरक्तबुद्धेर्मे तेषु गृहेषु अयं द्विजशापरूपो दंडोऽभीक्ष्णं अलं निर्वेदमूलो वैराग्यहेतुरस्तु। यत्र येषु गृहेषु प्रसक्तः संसारभयमेव धत्ते यत्र यस्मिन् भगवति प्रसक्तोऽभयं मोक्षमेव धत्ते प्राप्नोति तस्मिन् हराविति वा ॥ १४ ॥ ❀ ❀ योऽहमेवं महत्तमानुग्रहणीयशीलः तं मा मां द्विजोपसृष्टः द्विजकुमारेण प्रेरितः वेषांतरधारी यथा तथा कुहकः कपटी सर्पजातिविशिष्टो वा तक्षकः दशतु भक्षयतु युष्माभिरेतत्कर्तव्यमित्याह अलमिति। यूयं देवकीनंदनमित्यादिका विष्णुविषया गाथाश्श्रवणत्रयाद्युपलक्षितान् श्लोकानलं देहवियोगपर्यंतं गायत षड्जादिस्वरैरिति शेष इत्यन्वयः ॥ १५ ॥ ❀ ❀ न केवलमस्मिन् जन्मन्येव हर्यादौ मनो रतिप्रसंगोऽपि तु जन्मांतरेऽपीति प्रार्थय इत्याह पुनश्चेति। तदाश्रयेषु भगवद्भक्तेषु युष्मद्विधेषु मैत्री अस्तु, मदीयोऽयमिति चित्तवृत्तिलक्षणा। सृष्टिं जन्म ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अहो आश्चर्य्यम्। किमाश्चर्यं तत्राह—नृपाणां मध्ये वयं पाण्डवाः महत्तमानां भवतामनुग्रहं शीलयंति ये स्वायम्भुवादयस्तादृशाः सन्तो धन्यतमा जाता इति शेषः। स्वतस्तु नृपाणां कुलमीदृशमित्याह राज्ञामिति। यतो गर्ह्यं कर्म्म हिंसादिलक्षणं यस्य तादृशमिति ॥ १३ ॥ ❀ ❀ तत्रापीदमाश्चर्यमित्याह। तस्यैव भगवदनुग्रहशीलानां वंशे गणनीयस्यापि मे ममाभीक्ष्णं गृहेषु व्यासक्तचित्तस्य तत्राप्यघस्य तादृशब्राह्मणापराधकर्त्तुः। परावरेशस्तु नूनं यदनुगृहीतवंशजोऽयमित्यामृश्य स्वयं द्विजशापरूपः तदपदेशः सन् निर्व्वेदोऽन्यत्रानासङ्ग एव मूलमवष्टम्भको यस्य स्वस्मिन्नासङ्गस्य तद्रूपोऽभवत्। तर्हि किं स्यात्तत्राह। तत्र परावरेशे प्रसक्तः शीघ्रमेवाभयं तच्चरणारविन्दप्राप्त्या भयाभावं धत्ते। मर्त्यो मृत्युव्यालभीतः पलायन्नित्यादेः। अतोऽकस्माद्भवतामभ्यागमनं तत्प्रेरणयैव जातमिति भावः। वक्ष्यते च श्रीशुकदेवमुपलक्ष्य 'अपि मे भगवान् प्रीतः' इत्यादिद्वाभ्याम् ॥ १४ ॥ ❀ ❀ प्रतियन्तु अङ्गीकुर्व्वन्तु। तत एव हेतोरीशे धृतचित्तं सन्तं मां गंगादेवी चाङ्गीकरोतु ॥ १५ ॥ ❀ ❀ सृष्टिं जन्म। अन्यत्र सर्व्वत्र तु मैत्री अविषमा दृष्टिरस्तु। ब्राह्मणेषु त्वादरविशेषोऽस्त्वित्याह नम इति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वस्मिन् मुनीनां स्वाभाविकमनुग्रहमालक्ष्याह अहो इति। महत्तमानामनुग्रहणीयम् अनुग्रहार्हं शीलं येषां ते। एतच्च राज्ञामतिदुर्लभमित्याह राज्ञामिति। "दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेदि"ति स्मृतेः। आश्रमाद् दूरस्थपादशौचस्थलादपि आराद् दूरे राज्ञां कुलं विसृष्टं तैर्ब्राह्मणैस्तत्रापि स्थातुमननुज्ञानादित्यर्थः, यतो गर्ह्यकर्म्म सर्व्वतोऽप्यपवित्रम्॥ १३॥ ❀ ❀ तस्यैव गर्ह्यकर्म्मणो मम तत्रापि अघस्य ब्राह्मणगले सर्पनिक्षेपेण अवमाननात् एवं पतितपावनत्वख्यापनार्थं परावरेशो भगवानेव द्विजशापरूपः सन् तत्पार्श्वमागतः। निर्व्वेदमूलः निर्व्वेदस्य मूलं कारणमित्यर्थः। पुंस्त्वमार्षम्। भवद्विधमहत्समागमादनुमीयते यत्र भगवानायाति तत्रैव तद्भक्ताः स्वत एव आयान्तीत्यर्थः। यत्र परावरेशे प्रसक्त आसक्तो जन आशु शीघ्रमेवाभयं भयाभावं धत्ते॥ १४॥ ❀ ❀ तान् प्रार्थयते द्वाभ्याम्। तं मा माम् उपयातं शरणागतं प्रतियन्तु जानन्तु। देवी देवतारूपा गङ्गा च प्रत्येतु। वाशब्दः प्रतिक्रियानादरे। गाथाः कथाः॥ १५॥ ❀ ❀ पुनश्च पुनरपि यां यां सृष्टिं जन्म प्राप्नोमि तस्यां भगवति रतिः तद्भक्तेषु प्रकृष्टः संगः सर्वजीवेषु मैत्रीति मद्वाञ्छितत्रयं भूयात् इति प्रार्थ्य प्रणमन्नाह नम इति। यद्वा ब्राह्मणानादरजातानुताप आह ब्राह्मणेभ्यो नमो भूयादिति वाञ्छितचतुष्टयं च॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सिद्धान्ते स्ववृत्तत्त्वेन तदनुग्रहभाजनमात्मानं मत्त्वाऽऽत्मभाग्यं निवेदयन्नाह अहो इति। नृपाणां वयं धन्यतमा अतिभाग्यवन्तस्तत्र हेतुमाह महत्तमैर्भवद्भिरनुग्रहणीयमनुग्रहीतुं योग्यं शीलं वृत्तं येषां ते महत्तमसम्बन्धशून्यं राजकुलं त्वयुक्तमित्याह राज्ञां कुलं ब्राह्मणानां भवद्विधानां पादशौचात् पादप्रक्षालनतोयात् आरात् दूरात् विसृष्टं दैवेनापनीतं विमुखीकृतं चेत् बतेति खेदे तर्हि विगर्ह्यकर्म भवति विगर्ह्यं निन्द्यं कर्म यस्य तथाभूतं भवति॥ १३॥ ❀ ❀ महत्तमानुग्रहपात्रत्वमात्मन उक्त्वा द्विजशापोऽप्यनुग्रहायैव जात इति वदन् भगवदनुग्रहपात्रत्वं दर्शयति तस्येति। तस्य तद्ध्याननिष्ठमुनिस्कंधे मृतोरगनिक्षेपकर्तुः अत एवाघस्य पापबुद्धेः अभीक्ष्णं पुनः पुनः गृहेषु व्यासक्तं चित्तं यस्य स्वात्मभावापत्तये परावराणां परे अवरे येभ्यस्तेषां ब्रह्मादीनां, यद्वा परे चावरे चेति द्वंद्वस्तेषां ब्रह्मादिपिपीलिकांतानामीशो नियन्ता श्रीकृष्णः द्विजशापरूपः द्विजशापप्रवर्तकोऽभूत् यत्र यस्मिन् परावरेशे प्रसक्तोऽभयं तत्प्राप्तिसाधनं निर्वेदमाशु शीघ्रं धत्ते निर्विण्णो भवति यतः स्वयमपि निर्वेदमूलः निर्वेदो मूलं प्राप्तिसाधनं यत्र सः स्वात्मभावप्राप्तये वैराग्यार्थं शापप्रवर्तकोऽभूत्॥ १४॥ ❀ ❀ मुनीन् प्रार्थयते तमिति द्वाभ्याम्। हे विप्राः! भवंतः मामुक्तविधम् ईशे श्रीकृष्णे धृतचित्तं मामुपयातं शरणागतं प्रतियंतु जानंतु, देवी गंगा च प्रत्येतु। द्विजेनोपसृष्टस्तक्षकः साक्षात्कुहकः वंचकः सन् वा दशतु। यूयमलमत्यर्थं विष्णोर्गाथाः कथाः गायत कथयत॥ १५॥ ❀ ❀ किंच भगवति रतिर्भक्तिस्तदाश्रयेषु भगवानाश्रयो येषां तेषु प्रकृष्टः संगश्च भूयात् पुनश्च यां यां सृष्टिमुपयामि तस्यां सृष्टौ जन्मनि महत्सु मैत्री हितानुवर्तित्वमस्तु, संकल्पसिद्धये मुनीन्प्रणमति द्विजेभ्यो नमः॥ १६॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

प्रथमतः स्ववृत्तांतं कथयन् श्लोकद्वयेन ऐहिकामुष्मिकं च साधनद्वयं प्रार्थयते जातं द्वयं भगवत्कृपा महत्कृपा तथापि महत्कृपाया हेतुत्वात् प्रथममाह–अहो इति आश्चर्ये, वयमिति श्लाघायां धन्यतमाः धनं पुरुषार्थमर्हंतीति धन्याः तत्रातिशयः सर्वपुरुषार्थप्राप्तिः भवंतश्च पुरुषार्थरूपाः ते च संप्राप्ता इति न च गमनमात्रेणैव स्वाधीनत्वाभावात्–कथं पुरुषार्थप्राप्तिः तत्राह महत्तमेति, भगवदंतरंगाः अनुग्रहणीयं शीलं येषां तेषां शीलैः ऋषिभिरनुग्रहः कृतः यादृशतादृशोऽस्य स्वभावो भवतु च एतेषां पुरुषार्थसाधका भविष्याम इति अत एव नृपाणां मध्ये श्रेष्ठाः। ननु राज्ञां ब्राह्मणानां च तुल्यत्वात् एवंरूपतायुक्ते च किमाश्चर्यम् "अतो ह्यन्योऽन्यमात्मानं ब्रह्म क्षत्रं च रक्षत" इतिवाक्यात्तत्राह राज्ञां कुलमिति। तद्वाक्यं महापुरुषाणां कार्यप्रशंसापरं वस्तुतस्तु राज्ञां कुलमात्रं यत्र ब्राह्मणाश्चरणक्षालनं कृत्वा अन्तः प्रविशंति तच्छुद्धाशुद्धमध्ये वैदिकरूपं स्थानं भवति तत् पादशौचमित्युच्यते ततोऽपि दूराद्राज्ञां कुलं तत्रापि गंतुमयोग्यम् अंतर्गमनं दूरापास्तमित्यर्थः। बतेति हर्षे, इदानीं विपरीतं जातमिति तेषां निकृष्टत्वे हेतुः गर्ह्यं कर्मेति गर्ह्यं परहिंसालक्षणं कर्म यस्य॥ १३॥ ❀ ❀ एवं तेषां कृपामुक्त्वा भगवत्कृपामाह तस्यैवेति। राज्ञां कुले कस्यचित् गर्ह्यं कर्म न भवेदिति अहं तु स एव अतस्तस्य गर्ह्यकर्मणो मे तत्राप्यघस्य केवलं पापरूपस्य पूर्वं क्षत्रियत्वमपि अधुना कुलांगारत्वादघत्वमेतादृशस्यापि निर्वेदमूलः द्विजशापरूपो भगवानेव जातः, तस्यैवेति भगवतस्तथाभवने हेतुः परावरेश इति। अन्यथा परावरेश एव न स्यात् अन्यथा अवरेषामस्मदादीनामनुद्धारकः स्यात्। ननु शापस्य कथं भगवद्रूपत्वं तत्राह निर्वेदमूल इति। वैराग्यमूलः षड्गुणानां मध्ये पर्यवसानरूपस्य वैराग्यस्य न ह्यन्यो मूलं भवितुमर्हति। अत एकत्वाद्भगवतो द्विजशापोऽप्येवम्। ननु शापद्वारा कथं न भगवान् वैराग्यहेतुर्जातः, अघत्वं तु कृपायामप्रयोजकमत आह–गृहेषु व्यासक्तचित्तस्येति। बहुवचनं पुत्रादिषु गृहेष्वपि विशेषासक्तिः स्वस्यापि साधनत्वेन तद्योजनात् अभीक्ष्णमिति समयेऽपि श्रवणाभावः न तस्य तत्त्वमहणाय साक्षादिति-

न्यायात् अतः शास्त्राणामसामर्थ्यं न तु एकजनं मोचयति सर्वसमर्थत्वात् भगवतः तत्राह यत्र प्रसक्त इति। येषु गृहेषु प्रसक्तः शीघ्रं हृदये भयमेव धत्ते ननु भयापहारिणमतो भयनिवृत्त्यर्थं तथा जातमित्यर्थः ॥ १४ ॥ ❀ ❀ एवमुभयोरुपकारमुक्त्वा इदानीं स्वकर्त्तव्यमाह तं मोपयातमिति। एवमुपकारविषयं वा मामुपयातं भगवच्छरणमागच्छन्तं प्रतियंतु जानंतु हे विप्राः! विशेषेण पूरकाः मामपि पूरयिष्यंतीति भावः। देवतारूपा गङ्गा च मां शरणागतं जानातु, हे विप्राः! गङ्गाया जलप्रकृतित्वं लोकसिद्धमिति अनेन शरणागतैरयुक्तत्वात् देवीत्युक्तं भक्तचरणोदकशरणागतिः न भगवन्मार्गविरोधिनी। ननु किं शापविमोक्षार्थं प्रार्थयसे नेत्याह–ईशे भगवति धृतचित्तं मां द्विजेन बालकेन उपसृष्टः कुहको बंचकः कृत्रिमरूपेण तक्षक रूपेण वा तक्षको वा वेत्यनादरे अलमत्यर्थं दशतु न काचित् मम क्षतिरित्यर्थः। नन्वस्माकं तर्हि कोपयोगस्तत्राह गायत विष्णुगाथा इति। एतावता बहिश्चिन्ता निवारिता पाक्षिकोऽपि दोषः परिशंकनीय इति। चित्तस्य चंचलत्वादेवं प्रार्थना ॥ १५ ॥ ❀ ❀ एवमैहिकं प्रार्थयित्वा आमुष्मिकं प्रार्थयते पुनश्चेति। मुक्तिस्तु न संभाविता नापेक्षिता राज्यरसभक्तिरसयोः अन्यतरवैलक्षण्या-विरुद्धधर्माश्रयत्वाच्च भगवति रतिरेवास्तु, न राज्यादिजन्म त्ववश्यंभाविदेहजातिगुणक्रियासु न कोपि रसः। अतः यां यामेव सृष्टिमुपयामि तत्र तत्र भगवति रतिरस्तु। ननु सर्वस्यापि भगवत्त्वात् पुत्रादिषु रतिः सिद्धैव तदलं प्रार्थनयेत्यत आह-देशकालवस्तु-परिच्छिन्ने एतादृशत्वं न पुत्रादिषु तस्या रतेः कारणमपि प्रार्थयते प्रसंगश्चेति अन्यथासक्त इति क्षिप्तमुत्पाद्य कार्यार्थमाक्षिप्त-साधनमुपक्षिप्तं स्यात्। न च सर्वदैव रतिः प्रार्थ्या रतेर्मनोधर्मत्वेन सर्वदास्फुरणे देहादिनिर्वाहोऽपि न स्यात् तादृशरतौ प्रमाण-साधनत्वाभावाच्च वरस्यैव साधनत्वे उत्प्रेक्षायाश्च प्रमाणत्वेन प्रकारांतरे च युक्तिबाधात् भगवत्त्वं पर्यवस्यति, तच्च भक्तानामन-पेक्षितं रतिश्च अनित्या स्नेहत्वात् तस्य चांतःकरणधर्मत्वात् एवमध्यासेऽन्यत्र "वाक्यान्वयादि" त्यत्र एतदस्माभिः सम्यग् विवृतमतो भगवन्नैकट्यसाध्यत्वात् स्वतस्तस्यासंभवात् भगवद्भक्तेरेव तत्साधयितुं शक्यत इति तैः प्रसंगः सर्वथा भवत्वित्याह प्रसंगश्चेति। आश्रयो नैकट्यसूचकः नाश्रयमात्रेण अन्यस्य नैकट्यं संपादयितुं शक्यमिति महत्स्वित्युक्तं चकारात्तेष्वपि रतिः, एवं ससाधना भगवति रतिः प्रार्थिता। अस्या बाधकाभावं प्रार्थयते मे अस्तु संग इति। अहमुच्चावचैर्द्रव्यैरिति वाक्यात्। भूतग्रामा-वमानने भगवत्तोषाभावात् भक्त्यैव तुष्टिमभ्येतीति वाक्यात् फलप्रतिबंधकं भूतावमाननं स्वरूपप्रतिबंधकं च भगवदतोषे भक्त्य-नुपपत्तेः मे असेवनावमाननं भवति। सोन्येति तदवमानने अवमानकरणं तु सज्यते। ननु ब्राह्मणातिक्रमस्य कृतत्वात् कथं वरो देयः? तत्राह नमो द्विजेभ्य इति ॥ १६ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

अहो इत्यत्र। हेतुत्वादिति भगवत्कृपाहेतुत्वात्। अतो हीत्यादि। अतो हेतोः ब्रह्म क्षत्रं चेति द्वे अन्योन्यामात्मानं रक्षत इत्यन्वयः। तद्विपरीतमिति। उत्तमोत्तमम् ॥ १३ ॥ ❀ ❀ तस्यैवेत्यत्र। अन्यथेति। शापरूपत्वेन अभवने। एतस्यैव विवरणं अन्यथा श्रवरेषामित्यादि। समयाभाव इति शास्त्रश्रवणेऽवकाशाभावः। न तस्येति। इदं पञ्चमस्कन्धे जडवाक्यम्। 'न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेतावनुमितं स्वयं स्यात्' इति। अर्थस्तु यस्य गृहमेधिसौख्यं स्वप्नदृष्टान्तेन हेयतया अनुमितं स्वतो न स्यात् तस्य वरीयसः शास्त्रीया वाचोपि तस्य तत्त्वनिश्चयाय न बभूवुरिति। तन्न्यायादित्यर्थः। तथा जातमिति गृहे मोचनं न जातमित्यर्थः ॥ १४ ॥ ❀ ❀ तं मोपयातमित्यत्र। तयोरिति भगवदीयभगवतोः ॥ १५ ॥ ❀ ❀ पुनश्चेत्यत्र। ननु प्रवृत्तिपराणां स्वर्गस्येव निवृत्तिपराणां सर्वेषां मुक्तेरेवाभी-ष्टत्वात्सैवामुत्र कुतो न प्रार्थ्यते इत्याकाङ्क्षायामाहुः मुक्तिरित्यादि। अपराधित्वान्न सम्भाविता, भगवदीयत्वान्नापेक्षिता, अतो न प्रार्थ्यते इत्यर्थः। तर्हि भक्तिः कुतः प्रार्थ्यते इत्यत आहुः राज्येत्यादि। विरुद्धधर्माश्रयत्वादिति। भक्तौ बन्धरूपत्वेप्यबन्धरूपत्वस्य तृतीयस्कंधे व्युत्पादनाद् द्वयोर्धर्मयोस्तत्र सत्त्वेन तथात्वात्। तर्हि जनकादेरिव दोषाजनकं राज्यमेव कुतो न प्रार्थ्यते इत्याकाङ्क्षायां कैमुतिकेनाहुः जन्मेत्यादि। ननु सकृदुत्पन्नायामपि रतौ कार्यसिद्धेरव्याहतत्वाद्रतिकारणप्रार्थनस्य किं प्रयोजनमत आहुः अन्यथेत्यादि। अन्यथेति साधनप्रार्थनाभावे। साधनमिति रतिदानवररूपं महत्प्रसंगरूपं वा। उपक्षिप्तमित्यत्र उपक्षीणमिति पाठः प्रतिभाति। तथा चाक्षिप्तस्य साधनस्यैवोपक्षीणत्वे पुनर्जन्मान्तरे रत्यभावान्महदेवानिष्टमापद्येतेत्यतः कारणप्रार्थनं युक्तमित्यर्थः। नन्वेवं रतेरावश्यकत्वे सैव सर्वदास्त्विति प्रार्थनीयम्, तथा सति सकृज्जातेनैव साधनेन सर्वदा तस्याः सिद्धिरित्यत आहुः न चेत्यादि। अपिना सेवानिर्वाहः सङ्ग्राह्यः। ननु 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमि'ति भगवद्वाक्याद्भगवतैव देहादिनिर्वाहसम्भवान्न तदनुपपत्त्या असार्वदिकतत्प्रार्थनं युक्तमिति चेत्, तत्राहुः तादृशेत्यादि। सार्वदिकरतेः प्रमेयैकसाध्यत्वेन प्रमाणस्य साधनत्वाभावात्। यद्वा राजा हि भगवदनुभावानुभवात्तत्साक्षात्कारार्थं प्रयतते। स हि बाधयोग्यव्य-तिरिक्तज्ञानत्वेन प्रमाणम्, यथा 'आकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषमि'ति शुकस्य ज्ञानम्, तच्च कादाचित्कयैव सत्सङ्गजन्यया रत्या, न तु व्रजरत्नानामिव सार्वदिकया, तस्या विरहसहायत्वेन तदजनकतया तत्साधनत्वाभावात्। अतो न तत्प्रार्थनमित्यर्थः। ननु मास्तु सार्वदिकरतिप्रार्थनम्, तथापि प्रतिजन्मीनतत्साधनप्रार्थनमयुक्तम्, त्रिशङ्कूपाख्याने त्रिशङ्कोः स्वर्गसाधनीभूतपुण्याभावेपि सकृद्दत्ताद्विश्वामित्रवरादेव फलसिद्धेरुक्तत्वादत्रापि वरस्यैव विवक्षितरतिसाधनत्वस्य शक्यवचनत्वेन तत एव नानाजन्मसु

रतिसम्भवादिति शङ्कायामाहुः वरस्येत्यादि । एतज्जन्मीनवरस्यैव तादृशतत्साधनत्वेऽङ्गीकृते त्रिशंक्वादिवदत्रापि फलं भविष्यतीति सम्भावनायाः प्रमाणत्वेऽङ्गीकृते सति रत्यधिकरणस्य स्वस्य शापेन लौकिकतत्तुल्यतया प्रकारान्तरे त्रिशङ्कुन्यायेनोभयाभावे च प्रसक्ते युक्तिबाधात् उत्प्रेक्षायां प्रमाणत्वकल्पनस्यापेक्षिताभ्यागमस्यापातेन त्रिशङ्क्वादिवरन्यायबाधात् भगवत्त्ववरेण सायुज्यं पर्यवस्यति । तत्र भक्तानां भगवदीयत्वेनैव परिसमाप्तसर्वार्थानामनपेक्षितम्, अतः प्रतिजन्मीनरत्यर्थं प्रतिजन्मीनरतिकारणप्रार्थनं युक्तमेवेत्यर्थः । एवं वरस्वरूपविचारेण प्रतिजन्मीनसाधनप्रार्थनस्य युक्तत्वमुपपाद्य रतिस्वरूपविचारेणोपपादयन्ति रतिश्चेत्यादि । स्नेहत्वादिति । 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इति कोशेन प्रियतारूपत्वात् । तथा चान्तःकरणधर्मत्वेन सिद्धेऽनित्यत्वे प्रतिजन्मनि तत्कारणप्रार्थनं युक्तमित्यर्थः । ननु रतेः सविषयत्वेनेच्छारूपत्वात्तस्याश्चानुकूलबुद्धिवेद्याद्विषयादेव सिद्धेस्तत्साधनप्रार्थनमनर्थकमित्याकाङ्क्षायां रतेः स्वरूपं विवेक्तुं विकल्पयन्ति न वेत्यादि । पुत्रादिषु तदभावप्रसङ्गादिति । पुत्रादिविषयिण्या रतेः इच्छारूपत्वाभावेन रतित्वाभावप्रसङ्गादित्यर्थः । एतेनैव ज्ञानरूपतापि वारिता । यत्नरूपता च । अनुकूलबुद्धिवेद्यत्वेन द्वेषादिरूपतापि तथा प्रीणाम्यनुरज्यामीत्यनुव्यवसायगम्यत्वाददृष्टरूपतापि निवारिता । सविषयत्वाच्च न सुखरूपता । तदेतभिसन्धायाहुः अत इत्यादि । अतः अनुकूलबुद्धिवेद्यत्वेपि सविषयत्वरूपाद्विशेषात्प्रीणाम्यनुरज्यामि-स्निह्यामीत्यादिबुद्धिगम्यत्वाच्च रत्याद्यपरनामा स्नेहः पदार्थान्तरमेवेत्यर्थः । नन्वस्तु पदार्थान्तरत्वम्, तथापि प्रियत्वापरपर्यायस्य तस्य निरुपाधेरेव मुख्यत्वात्तादृशस्य च तस्य मैत्रेयीब्राह्मणे 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवती' त्यादिना आत्मधर्मत्वेनैव व्यवस्थापनाद्भगवद्विषयकस्य सोपाधेरेवान्तःकरणधर्मत्वमित्यात्मविषयकतदपेक्षया जघन्यत्वात् किं तत्प्रार्थनेन किं वा तत्साधनप्रार्थनेनेत्याशङ्कायामाहुः स इत्यादि । तथा च यथा चतुःश्लोकीस्थं ज्ञानमैश्वर्यं च भगवद्दत्तं तत्सम्बन्धाच्चतुर्मुखे तन्नैकट्यात्पार्षदादिषु च भासते, तावतापि न तस्य भगवद्धर्मत्वहानिः, तथा स्नेहस्यापि तस्य मनोधर्मप्रतीतावप्यागन्तुकत्वेन भगवत्सम्बन्धार्थं तत्साधनप्रार्थनं युक्तम्, भगवद्धर्मत्वेनाजघन्यत्वाच्च तत्प्रार्थनमपि युक्तमेवेत्यर्थः । नन्वेवमागन्तुकत्वे सर्वत्र तुल्य एव स्यात्, न तु न्यूनाधिक इत्यत आहुः उष्णस्पर्शवदित्यादि । तथा च वह्निनैकट्ये उष्णस्पर्शस्येव तस्यापि भगवन्नैकट्यात्तथेत्यर्थः । एतदेव निगमयन्ति शारीर इत्यादि । परमस्नेहत्वमिति । सप्तम्यर्थे बहुव्रीहिः । परमस्नेहविषयत्वमित्यर्थः । ननु परमस्नेहः श्रुतौ शारीरविषयक एव मैत्रेयीब्राह्मणे सिद्ध इति कथं तस्य भगवन्नैकट्यात्परमस्नेहविषयत्वमित्यत आहुः वाक्येत्यादि । इदमधिकरणं समन्वयाध्यायचतुर्थपादेऽस्ति । तत्र मैत्रेयीब्राह्मणं जीवबोधकं ब्रह्मबोधकं वेति संशयः । तत्रोपक्रमे अमृतत्वायात्मदर्शनतत्साधनयोरुपदेशार्थं स्वप्रतीत्या पत्यादिसर्वापेक्षया प्रियत्वलिङ्गकः स्वात्मैवाभ्यस्यते, उपसंहारे च 'एतावदरे खल्वमृतत्वमि'त्यनेन तस्यैव ज्ञानस्यामृतत्वं वदतीत्युपक्रमोपसंहाराभ्यासैरिदं जीवस्यैव बोधकम् । यत्पुनर्मध्ये आत्मज्ञानादीनां सर्ववेदनरूपफलसिद्ध्यर्थमात्मनः सर्वत्वमुक्तम्, तत्तस्य सोपाधिकस्य जगत्कर्तृत्वरूपोत्कर्षबोधनार्थमित्यार्द्रेन्धनाग्निदृष्टान्तादवसीयते, एवमेव समुद्रादिदृष्टान्तैराधारत्वं यदुक्तम्, तदपि तदर्थमेव । एवं श्रुत्यन्तरे या तस्य ब्रह्मता श्राव्यते, साप्युत्कर्षार्थमेवेत्यत इदं जीवबोधकमेवेति पूर्वः पक्षः । सिद्धान्तस्तु इदं ब्रह्मबोधकमेव, तत्र हेतुः वाक्यान्वयादिति । वाक्यानामन्वयो वाक्यान्वयस्तस्मात् । अत्रोपक्रमेऽमृतत्वायात्मदर्शनं तत्साधनानि चोपदिश्यन्ते, अमृतत्वं मोक्षः, तच्च ब्रह्मज्ञानादेवेति । 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये' ति सावधारणश्रुतौ मार्गान्तरनिषेधात् सिद्धमितीहापि तमेवात्मत्वेन परामृश्य दर्शनादिवाक्यानामन्वयो वाच्यः, अन्यथा तद्व्याकोपापत्तेः । एवञ्चोपसंहारवाक्यमपि युज्यते, उपक्रमश्चासञ्जातविरोधित्वात्प्रबलः एवं च ज्ञानफलादिवाक्यान्यप्यन्वेष्यन्ति । तस्यैव सर्वत्वात्सर्वाधारत्वाच्च । अन्यथा तु निःप्रयोजनमसदुत्कर्षबोधनान्नान्वियुः । न च प्रियत्ववाक्यानन्वयः शङ्क्यः । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिश्रुतिभिर्ब्रह्मण आनन्दरूपत्वे भूतानां सशरीरजीवानां च तत्कार्यत्वे 'सर्व एवात्मानो व्युच्चरन्ती'ति श्रुत्या केवलानामंशत्वे च सिद्धे 'एष ह्येवानन्दयाती'ति सावधारणश्रुत्या ब्रह्मण एवानन्दजनकत्वे च सिद्धेऽन्यत्र प्रियत्वाध्यासो जीवे प्रियत्वाधिक्यं तत्सम्बन्धतन्नैकट्याभ्यामेवेति तेषामपि तत्रैवान्वयः । एवं चाभ्यासोपि तस्यैवानुगुणः । अतः साक्षात्परम्परया च सर्वेषां वाक्यानां तत्रैवान्वयादिदं ब्रह्मवाक्यमेवेति । तथा चैतस्मिन्नधिकरणे प्रियत्वस्य भगवद्धर्मत्वेनैव सिद्धत्वाज्जीवे निरुपाधिप्रेमापि तन्नैकट्यादेवेति न श्रुतिविरोध इत्यर्थः । नन्वेवं सति तस्य स्वतः सिद्धत्वात् किं तत्साधनप्रार्थनेनेत्यत आहुः अत इत्यादि । अत इति । जैवप्रियत्वापेक्षयाप्यतितिरोहितत्वेन । तदिति नैकट्यम् । ननु जीवब्रह्मणोः स्वरूपविचारेऽतिनैकट्यस्यापि सिद्धत्वात् साधनप्रार्थना न युक्तेत्यत आहुः आश्रय इत्यादि । अन्यथा स्वाप्यये जीवस्यापि तदाश्रितत्वेन स्वत एव रतिः स्यात्, अतो नैकट्यार्थं सर्वदाश्रयोऽपेक्षित इति तथेत्यर्थः । ननु तेपि बहवः समीपेपि सन्तीति किं प्रार्थनेनेत्यत आहुः नेत्यादि । आश्रितमात्रेणेति । साधारणैराश्रितैः ॥ १६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तदेव दर्शयति-अहो इति चतुर्भिः । अलभ्यलाभेनाश्चर्यं सूचयति-अहो इति, नृपाणां मध्ये वयं धन्यतमाः, धनं पुरुषार्थमर्हन्तीति धन्याः, तत्रापि परमपुरुषार्थो भगवत्सेवा तमर्हन्तीति धन्यतमास्तथाभूता वयम् । कुतः ? यतो महत्तमैर्युष्माभिरनुग्रहणीयं शीलं वृत्तं येषां तथाभूताः । एतच्च राज्ञामतिदुर्लभमित्याशयेनाह-राज्ञां कुलमिति । 'दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत्'

इति स्मृतेः ब्राह्मणैः स्वपादशौचं पादक्षालनोदकं दूरे विसृज्यते, राज्ञां कुलं तु ततोऽपि दूरादेव विसृष्टं तत्रापि स्थातुमयोग्यमित्यर्थः । तत्र हेतुमाह-गर्ह्यं निन्द्यं दण्डशुल्कादिग्रहणरूपं कर्म यस्य तथाभूतमिति । बतेति हर्षे । यद्वा एवम्भूतं राजकुलं निन्दति-राज्ञां कुलमिति । यद्राज्ञां कुलं ब्राह्मणपादशौचादारात् दूराद्विसृष्टं दुःशीलत्वेन महदनुग्रहणीयं न भवति कदापि ब्राह्मणास्ततः स्वपादप्रक्षालनं न कारयन्ति तद्गर्ह्यकर्मेत्यन्वयः । बतेति खेदे ॥ १३ ॥ ❀ ❀ ननु महत्तमानुग्रहणीयशीलस्य तव कथमधुना तन्निग्रहे प्रवृत्तिर्येन शप्तोऽसीत्याशङ्क्य तन्निग्रहरूपेण प्रतीयमानोऽपि वस्तुतोऽनुग्रह एवेत्याह-तस्येति । तस्य महत्तमानुग्रहणीयशीलस्यैव अघस्य कृतब्राह्मणापराधत्वेन दुष्टस्यापि मे ममानुग्रहार्थं परावरेशो भगवानेव द्विजशापरूपेण प्रादुर्बभूव, को वा तव दोषो यन्निवारणेनानुग्रहः स्यादित्यपेक्षायां गृहपुत्राद्यासक्तिरेवेत्याशयेनाह-अभीक्ष्णं पुनः पुनर्गृहे तदनुबन्धिषु च विशेषेणासक्तं चित्तं यस्य तस्येति । शापेन कथं तदासक्तिनिवृत्तिरित्यपेक्षायामाह-यत्रेति । यत्र यस्मिन्सति गृहादिषु प्रसक्तो जन आशु भयं धत्ते, गृहादिभ्यो विरक्तो भवतीत्यर्थः । एवं वैराग्येणापि किमित्यत आह-निर्वेदमूल इति, निर्वेदो वैराग्यमेव मूलं प्राप्तिकारणं यस्मिन् सः । स्वस्य वैराग्यप्राप्यत्वात्तस्य च भयमूलत्वात् तदर्थं द्विजशापरूपेण जात इत्यर्थः ॥ १४ ॥ ❀ ❀ एवं भगवदीयानां भगवतश्चोपकारं प्रदर्श्य तान् प्रार्थयते-तमिति । अस्मत्प्रार्थनया किमित्याशङ्क्य विशेषेण पूरकत्वान्मामपि पूरयन्त्वित्याशयेन सम्बोधयति-हे विप्रा इति । तमुक्तविधं मा मामुपयातं शरणागतं प्रतियन्तु जानन्तु । तथा गङ्गा च देवी देवतारूपा मां शरणागतं जानातु । ननु शरणागतज्ञानमात्रेण तव क उपयोग इत्याशङ्क्याह-विष्णोर्भगवतः गाथाः कथाः गायतेति । द्विजेनोपसृष्टः प्रेरितः कुहको वेषान्तरधृक् तक्षको वा अलं यथेष्टं मां दशतु । वाशब्दः अनादरे । तत्प्रतिक्रियां न करिष्यामीति भावः । ननु न ब्रह्मदण्डदग्धस्येत्यादौ शापेन सर्पेण च मरणेऽपगतिश्रवणात्तद्भविष्यतीशङ्क्यान्ते भगवच्चित्तस्य सा न स्यादित्याशयेनाह-ईशे भगवति धृतचित्तमिति ॥ १५ ॥ ❀ ❀ एवमैहिकं प्रार्थ्य पारलौकिकं प्रार्थयते-पुनश्चेति । भूयोऽपि कदाचित्पापां सृष्टिं योनिमुपयामि गच्छामि, तत्रानन्ते अनन्तगुणे भगवति रतिस्तदाश्रयेषु महत्सु प्रसङ्गः प्रकृष्टः सङ्गो भक्तिश्च भूयात्, सर्वत्र सर्वजनेषु मैत्री च भवदनुग्रहेणास्तु । नमस्कारमन्तरेण भवत्प्रतिकारे नाहं समर्थ इति सूचयन्नमस्करोति । नमो द्विजेभ्य इति ॥ १६ ॥

हिन्दी अनुवाद

राजा परीक्षित्ने कहा-अहो ! समस्त राजाओंमें हम धन्य हैं । धन्यतम हैं । क्योंकि अपने शील-स्वभावके कारण हम आप महापुरुषोंके कृपापात्र बन गये हैं । राजवंशके लोग प्रायः निन्दित कर्म करनेके कारण ब्राह्मणोंके चरण-धोवनसे दूर पड़ जाते हैं-यह कितने खेदकी बात है ॥ १३ ॥ ❀ ❀ मैं भी राजा ही हूँ । निरन्तर देह-गेहमें आसक्त रहनेके कारण मैं भी पापरूप ही हो गया हूँ । इसीसे स्वयं भगवान् ही ब्राह्मणके शापके रूपमें मुझपर कृपा करनेके लिये पधारे हैं । यह शाप वैराग्य उत्पन्न करनेवाला है । क्योंकि इस प्रकारके शापसे संसारासक्त पुरुष भयभीत होकर विरक्त हो जाया करते हैं ॥ १४ ॥ ❀ ❀ ब्राह्मणो ! अब मैंने अपने चित्तको भगवान्के चरणोंमें समर्पित कर दिया है । आपलोग और मा गङ्गाजी शरणागत जानकर मुझपर अनुग्रह करें, ब्राह्मणकुमारके शापसे प्रेरित कोई दूसरा कपटसे तक्षकका रूप धरकर मुझे डस ले अथवा स्वयं तक्षक आकर डस ले; इसकी मुझे तनिक भी परवाह नहीं है । आपलोग कृपा करके भगवान्की रसमयी लीलाओंका गायन करें ॥ १५ ॥ मैं आप ब्राह्मणोंके चरणोंमें प्रणाम करके पुनः यही प्रार्थना करता हूँ कि मुझे कर्मवश चाहे जिस योनिमें जन्म लेना पड़े, भगवान् श्रीकृष्ण चरणोंमें मेरा अनुराग हो, उनके चरणाश्रितमहात्माओंसे विशेष प्रीति हो और जगत् के समस्त प्राणियोंके प्रति मेरी एक-सी मैत्री रहे । ऐसा आप आशीर्वाद दीजिये ॥ १६ ॥

इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ।
उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥ १७ ॥
एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसङ्घाः ।
प्रशस्य भूमौ व्यकिरन् प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥ १८ ॥
महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ।
ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् ॥ १९ ॥
न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ।
येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥ २० ॥

---

१. प्रा० पा०—तु । २. प्रा० पा०—महर्षयस्ते । ३. पा० पा०—गुणानुरूपम् । ४. प्रा० पा०—भवेद् ध्रुवं कृष्णमनुव्रतेषु ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अध्यवसायो निश्चयः। प्राचीनानि प्रागग्राणि मूलानि येषां तेषु प्रागग्रेषु कुशेष्वास्ते स्म। स्वसुते जनमेजये न्यस्तो भारो राज्यं येन सः ॥ १७ ॥ ❀ ❀ मुदा व्यकिरन्। देवसंघैर्वादिता दुन्दुभयो नेदुः ॥ १८ ॥ ❀ ❀ प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषाम्। उत्तमश्लोकगुणैरभिरूपं सुन्दरम् ॥ १९ ॥ ❀ ❀ भवत्सु पाण्डोर्वंश्येषु। ये जहुरिति युधिष्ठिराद्यभिप्रायेण ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"आदावन्ते च मूलं स्यात्तथांतस्तत्र वर्तते" इत्यभिधानान्मूलशब्दोऽग्रपरः ॥ १७ ॥ ❀ ❀ प्रसूनैः प्रसूनानि ॥ १८ ॥ ❀ ❀ इवशब्दः स्वामिचरणैर्वावाक्यालंकारे व्याख्यात उत्तमश्लोकस्य श्रीकृष्णस्य गुणैर्भक्तवात्सल्यादिभिरभिरूपं सुन्दरं राजानमूचुः। यद्वा यदुत्तमश्लोकस्य गुणानुरूपं भवेत्तदेवोचुः ॥ १९ ॥ ❀ ❀ भगवत्पार्श्वकामा इत्यत्र तत्सामीप्यकामनापि व्याख्येया। तत्प्रीतिविशेषातिशयवतां हि तेषां तत्कृतार्त्तिभरेणैव तत्स्फूर्त्तावप्यतृप्तौ सत्यां तत्सामीप्यप्राप्तेश्च। तत्प्राप्तिविघातकसंसारबन्धनत्रोटनस्य च प्रार्थनं दृश्यते पितृमातृप्रीत्येकसुखिनां विदूरबद्धानां बालकानामिव, एवमेवोक्तं प्रह्लादेन "त्रस्तोऽस्म्यहं कृपणवत्सल तेंघ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु" इति ॥ २० ॥

श्रीमद्वीरराघवव्याख्या

इतीत्थं निश्चययुक्तो राजा धीरः स्वसुते जनमेजये न्यस्तो निहितो राज्यभारो येन तथाभूतः समुद्रपत्न्या गंगाया दक्षिणकूले दक्षिणतीरे प्राचीनकूलेषु प्राचीनाग्रेषु कुशेष्वास्ते स्म उपविष्टवान् ॥ १७ ॥ ❀ ❀ इत्थं तस्मिन्नरदेवानां देवे परीक्षिति प्रायोपविष्टे सति दिवि सर्वदेवसंघाः तं प्रशस्य प्रस्तूय मुदा प्रसूनैः कुसुमैः पुनः पुनर्भूमौ व्यकिरन् दुंदुभयश्च नेदुर्दध्वनुः ॥ १८ ॥ ❀ ❀ ये समागता महर्षयस्ते सर्वे उत्तमैः श्लोक्याः प्रशंसनीया गुणास्तैरभिरूपं राजानं प्रशस्य साधु साध्वित्यनुमोदमानाः ऊचुः। कुतः यद्यतस्ते प्रजास्वनुग्रह एव शीलं स्वभावः स एव सारो येषां ते तथाभूतत्वात्प्रशस्यानुमोदमाना ऊचुरित्यर्थः ॥ १९ ॥ ❀ ❀ उक्तिमेवाह न वा इति। हे राजर्षिवर्य! नित्यं श्रीकृष्णमनुव्रतेष्वनुवर्तिषु भवत्स्विदं विचित्रं न वै न भवति किं तत् ये भवंतः भगवतः पार्श्वं सामीप्यं कामयमानाः संतो राज्ञां किरीटैर्जुष्टं सेवितमध्यासनं सार्वभौमसिंहासनं सद्यो जहुस्तत्यजुरित्येतत् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कुत्र गंगायां स्थित इति तत्राह। इति स्मेति। स्वसुते जनमेजये न्यस्तो निहितो राज्यभारो येन स तथोक्तः इत्युक्तप्रकारेण व्यवस्य निश्चित्य मनोयोगयुक्तः निश्चययुक्तो वा राजा परीक्षित् समुद्रपत्न्या गंगाख्याया नद्या उदक् एव किंचिद्दक्षिणकूले दक्षिणतीरभागे प्रासादे प्राचीनाग्रेषु कुशेषु उदङ्मुख आस्त इत्यन्वयः। मृत्युचिंतारहितत्वाद्धीर इत्युक्तं कूलशब्दस्य लक्षणार्थमनाश्रित्य मुख्यार्थांगीकारे भारतविरोधः स्यादन्यथा गंगापदेन तीरं लक्ष्यते कूलपदेनापि जले लक्षणोपपत्तेः। आस्त इति लङप्येवं विधिविशेषद्योतनार्थः ॥ १७ ॥ ❀ ❀ श्वेतच्छत्रचामरादिनरदेवचिह्नं न केवलं तावदेव किंतु केयूरादींश्च निरस्य त्यक्त्वा चर्म कृष्णाजिनादिमुनिवेषः ॥ १८ ॥ ❀ ❀ व्यकिरन्वर्षितवंतः ॥ १९ ॥ ❀ ❀ यदुत्तमश्लोकस्य हरेर्गुणानुरूपं गुणप्रकटनानुकूलं तदृषय ऊचुरित्यन्वयः। प्रजानुग्रहमंतरेणान्यस्वभावो नास्ति येषां ते तथोक्ताः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

मूलमन्तः (कूलमन्तः). अन्तश्चाग्रेऽपि। तस्माल्लक्षणया प्रागग्रेष्वित्येव व्याख्यातम् ॥ १७ ॥ ❀ ❀ प्रसूनैः प्रसूनानीत्यर्थः ॥ १८ ॥ ❀ ❀ सुन्दरमिवेति टीकायामिवशब्दो वाक्यालंकारे ॥ १९ ॥ ❀ ❀ भगवत्पार्श्वकामा इत्यत्र तत्सामीप्यकामनापि व्याख्येया। तत्प्रीतिविशेषातिशयवतां हि तेषां तत्कृतार्त्तिभरेणैव तत्स्फूर्तावप्यतृप्तौ सत्यां तत्सामीप्यप्राप्तेः तत्प्राप्तिविघातकसंसारबंधनत्रोटनस्य च प्रार्थनं दृश्यते पितृमातृप्रीत्येकसुखिनां विदूरबद्धानां बालकानामिव। एवमेवोक्तं श्रीप्रह्लादेन–त्रस्तोऽस्म्यहं कृपणवत्सलेत्यादौ तेंऽघ्रिमूलं प्रीतोऽपवर्गमरणं ह्वयसे कदा नु–इति ॥ २०–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समुद्रपत्न्या गंगायाः ॥ १७ ॥ ❀ ❀ व्यकिरन् वृष्टिमकुर्वन्। नेदुः स्वयमेव ॥ १८ ॥ ❀ ❀ यद्यतः प्रजानुग्रहे शीलं सारो बलं च येषां ते। तस्मात् उत्तमश्लोकस्यैव श्रीकृष्णस्यैव गुणैरभिरूपं सुन्दरं राजानमूचुः। यद्वा यदुत्तमश्लोकगुणानुरूपं भवेत् तदेवोचुः ॥ १९ ॥ ❀ ❀ ये युधिष्ठिराद्याः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्थमध्यवसाययुक्तो निश्चययुक्तः स्वसुते जनमेजये न्यस्तो राज्यभारो येन सः प्रागग्रेषु कुशेषु आस्ते स्म ॥ १७ ॥ ❀ ❀ एवं तस्मिन् राज्ञि प्रायोपविष्टे सति देवसंघास्तं प्रशस्य प्रस्तूय प्रसूनैः व्यकिरन् देवसंघैर्वादिताः दुदुंभयोऽभिनेदुः ॥ १८ ॥ ❀ ❀ प्रजानुग्रहे शीलं स्वभावः स एव सारो येषां ते महर्षयः उत्तमश्लोकानां ये गुणास्तैरभिरूपं सुंदरं राजानं प्रशस्य साधु साध्वित्यनुमोदमाना ऊचुः ॥ १९ ॥ ❀ ❀ भगवत्पार्श्वकामाः भगवत्सामीप्यकामाः जहुस्तत्यजुः ॥ २० ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

महतां प्रणिपात एव अपराधशमने हेतुः। तस्मात् निष्प्रत्यूहा ससाधना भगवति रतिः प्रार्थिता, तेषां संमतिमुखचेष्टामुपलभ्य एवमेव भविष्यतीत्यध्यवसायेन निश्चित्य स्थित इत्याह इतीति। स्मेति प्रसिद्धे सर्वैरेव ज्ञातमेवेति निश्चित्य स्थित इति। अध्यवसायो निश्चयः। भूमौ सर्वत्र राक्षसानां व्याप्तत्वेन तदावेशो मा भवत्विति कुशेषूपविष्टः। उत्तमभक्तैर्देवा अधिकारिण इति। पितृत्वव्यावृत्त्यर्थं देवत्वसिद्ध्यर्थं पूर्वाग्रेषु दर्भेषूपविष्टः तदाह प्राचीनमूलेष्विति। प्राचीनानि पश्चिमभागे स्थितानि मूलानि येषां तक्षकादिकृतभयाभावायाह धीर इति। उदङ्मुखो गंगाया उदङ्मुखः दक्षिणकूल अंतर्वेद्यामास्ते पूर्ववत् लट्प्रयोगः। समुद्रपत्न्या इति। इदानीं भगवन्निष्ठत्वात् नान्यत्र दृष्टिरिति भगवच्चरणारविंदोदकं परित्यज्य भगवत्प्राप्त्यर्थं लक्ष्मीपतेर्भगवतः समुद्रशयनात् तत्पत्नी दक्षिणकूलस्थिता भगवंतं वा समानयेत् इमं वा तत्र नयेत् ॥ १७ ॥ ❀ ❀ तदा देवैरनुमोदित इत्याह एवं त्विति। तुशब्देन तस्य संदेहो निवारितः, नरदेवत्वादिन्द्रतुल्यता अनेनैव मार्गेण वैकुंठं गमिष्यतीति महाराजागमननिमित्तं वाद्यं चक्रुः। इदं शकुनं मुदा हर्षेण दुंदुभयो देववाद्या निनेदुः वादयामासुः। चकारादन्यान्यपि तत्रोत्सवो जात इत्यर्थः। अनेन तस्य शापादिनापि निश्चयेन गत्यंतरं निवारितम् ॥ १८ ॥ ❀ ❀ महर्षीणां कृत्यमाह महर्षय इति। सम्यक् समुपागताः राजनिर्याणपर्यंतं तद्व्रितपूरकत्वेन समागताः, तेऽपि प्रशंसां कृत्वा विप्रशापं निरंगमपि सांगं सूचितमनुमोदमानाः साधु कृतमिति अनेनेच्छया कृतत्वदोषो निवारितः। तेषां कथाकथने हेतुमाह प्रजानुग्रहशीलसार इति। तेषामृषीणामेते राजानः प्रजाः तासु अनुग्रहरूपमेव यच्छीलमनुग्रहहेतुभूतं वा तदेव सारो येषामनेन ते यद्यनुग्रहं न कुर्युः निःसारा एव भवेयुरिति सूचितं किंच परमभक्ते राजनि तत्कर्त्तव्यमेवेत्यभिप्रायेणाह यदुत्तमश्लोकगुणानुरूपमिति उत्तमश्लोकस्य गुणेषु श्रवणार्थमभिरूपः योग्यः, अथवा उत्तमश्लोकगुणतुल्यः यथा गुणश्रवणार्थं स्थातव्यं तथा एतद्दर्शनार्थमपि प्रथमपक्षे मुख्योऽधिकारीति श्रोतृत्वात् तस्य प्रशंसनं कर्त्तव्यमित्यर्थः ॥ १९ ॥ ❀ ❀ प्रशंसनमेवाहुः न वा इति। हे राजर्षिवर्य ! इदं सर्वपरित्यागेन भगवत्परत्वं भवत्सूचितं तत्र हेतुः कृष्णं समनुव्रतेष्विति संबोधनेन मर्यादायाः परमसीमा सूचिता। कृष्णमनुव्रतं येष्विति यथा भगवान् सर्वकार्यं कृत्वा प्रचलितस्तदीयैरपि तथा कर्त्तव्यमिति तत्र निदर्शनं भवतां पितामहाः ये पांडवाः अध्यासनं सिंहासनं राजकिरीटैः जुष्टं सार्वभौमासनमप्रतिद्वंद्वभगवत्पार्श्वगमनेच्छया सद्य एव जहुः। तथा त्वयापि भगवत्पार्श्वे गंतव्यमित्यर्थः ॥ २० ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

एवं त्वित्यत्र। निश्चयेनेति। 'यस्य स्यादद्धा न विचिकित्सास्ती'ति श्रुतेस्तथेत्यर्थः ॥ १८ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

इत्येवं व्यवसायो निश्चयस्तद्युक्तो राजा समुद्रपत्न्या गङ्गाया दक्षिणकूले दक्षिणतीरे प्राचीनानि पश्चिमभागे स्थितानि मूलानि येषां तेषु कुशेषु उदङ्मुख आस्ते स्म उपविष्टवानित्यन्वयः। एवं चेत्तर्हि तद्राज्यनिर्वाहः कथमभूदित्याकाङ्क्षायामाह–स्वसुते जनमेजये न्यस्तो विहितो राज्यभारो येन स इति। मरणभयसमये कथं तस्यैवं करणे सावधानता जातेत्यत आह–धीर इति ॥ १७ ॥ ❀ ❀ एवं हि नरदेवानां राज्ञां देवे पूज्ये तस्मिन् परीक्षिति प्रायोपविष्टे सति दिवि स्वर्गे वर्त्तमाना देवसङ्घास्तं भूमौ स्थितं प्रशस्य संश्लाघ्य मुदा हर्षेण मुहुः प्रसूनैः कुसुमैर्व्यकिरन् दुन्दुभयश्च नेदुः वादिता देवैरित्यन्वयः ॥ १८ ॥ ❀ ❀ ये च महर्षयस्तत्र समागतास्ते साधु साध्वित्यनुमोदमानास्तं राजानं प्रशस्य उत्तमैः श्लोक्याः प्रशंसनीयाः गुणाः यस्य तस्य राज्ञोऽभिरूपं योग्यं यद्वचनं तदूचुरित्यन्वयः। किमर्थमेवं प्रशंसापूर्वकमूचुरित्यपेक्षायां न किञ्चित्प्रयोजनमुद्दिश्य किन्तु परानुग्रहस्वभावत्वादेवेत्याशयेनाह–प्रजासु राजादिसर्वजनेषु यदनुग्रहस्तस्मिन् शीलं स्वभाव एव सारो येषां ते तथेति ॥ १९ ॥ ❀ ❀ तदुक्तिमेवाह–न वा इति। हे राजर्षिवर्य ये भवन्तो भगवत्पार्श्वकामाः भगवतः सामीप्यं कामयमानाः सन्तो राजकिरीटैर्जुष्टं सेवितमध्यासनं सार्वभौमसिंहासनं सद्यो जहुस्तत्यजुस्तेषु कृष्णं समनुव्रतेषु श्रीकृष्णसेवकेषु भवत्सु इदं भगवत्कथाप्रार्थनं चित्रमाश्चर्यं नैव भवतीत्यन्वयः ॥ २० ॥

हिन्दी अनुवाद

महाराज परीक्षित् परम धीर थे। वे ऐसा दृढ़ निश्चय करके गङ्गाजीके दक्षिण तटपर पूर्वाग्र कुशोंके आसनपर उत्तरमुख होकर बैठ गये। राज-काजका भार तो उन्होंने पहले ही अपने पुत्र जनमेजयको सौंप दिया था ॥ १७ ॥ ❀ ❀ पृथ्वीके एकच्छत्र सम्राट् परीक्षित् जब इस प्रकार आमरण अनशनका निश्चय करके बैठ गये, तब आकाशमें स्थित देवतालोग बड़े आनन्द से उनकी प्रशंसा करते हुए वहाँ पृथ्वीपर पुष्पोंकी वर्षा करने लगे तथा उनके नगारे बार-बार बजने लगे ॥ १८ ॥ ❀ ❀ सभी उपस्थित महर्षियोंने परीक्षित्के निश्चयकी प्रशंसा की और 'साधु-साधु' कहकर उनका अनुमोदन किया। ऋषिलोग तो स्वभावसे ही लोगोंपर अनुग्रहकी वर्षा करते रहते हैं; यही नहीं उनकी सारी शक्ति लोकपर कृपा करनेके लिये ही होती है। उन लोगोंने भगवान् श्रीकृष्णके गुणोंसे प्रभावित परीक्षित् के प्रति उनके अनुरूप वचन कहे ॥ १९ ॥ ❀ ❀ 'राजर्षिशिरोमणे! भगवान् श्रीकृष्णके सेवक और अनुयायी आप पाण्डुवंशियोंके लिये यह कोई आश्चर्यकी बात नहीं है; क्योंकि आपलोगोंने भगवान्की सन्निधि प्राप्त करने की आकाङ्क्षासे उस राजसिंहासनका एक क्षण में ही परित्याग कर दिया, जिसकी सेवा बड़े-बड़े राजा अपने मुकुटों से करते थे ॥ २० ॥

सर्वे वयं तावदिहास्महेऽथ[1] कलेवरं यावदसौ विहाय ।
लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥ २१ ॥
आश्रुत्य तदृषिगण वचः[2] परीक्षित् समं मधुच्युद् गुरु चाव्यलीकम् ।
आभा[3]षतैनानभिनन्द्य युक्ता[4]न् शुश्रूषमाणश्चरितानि विष्णोः ॥ २२ ॥
समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृ[5]ष्ठे ।
नेहाथवामुत्र च कश्चनार्थं ऋते परानुग्रहमात्मशीलम् ॥ २३ ॥
ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इतिकृत्यतायाम् ।
सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

परस्परं सम्मन्त्रयन्ते सर्वे इति। परं श्रेष्ठं लोकम्। तत्र हेतुः। विरजस्कं निर्मायं विशोकं च यास्यतीति कुतस्तत्राह। अयमिति ॥ २१ ॥ ❀ ❀ आश्रुत्याकर्ण्य। समं पक्षपातशून्यम्। मधुच्युदमृतस्रावि। गुरु गम्भीरार्थम्। अव्यलीकं सत्यम् ॥ २२ ॥ ❀ ❀ त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके, वेदा यथा मूर्तिधरा भवन्ति तत्तुल्याः। ज्ञानातिशयमुक्त्वा कृपालुतामाह नेहेति। भवता प्रयोजनं परानुग्रहं विना नास्ति। तर्हि स एवार्थः स्यात्। न। आत्मशीलं स्वस्वभावम् ॥ २३ ॥ ❀ ❀ पृच्छ्यं प्रष्टव्यम्। विश्रभ्य विश्वासं कृत्वा। एवं कर्तव्यमित्यस्य भाव इतिकृत्यता तस्मिन्विषये। सर्वात्मना सर्वावस्थासु यत्कृत्यं विशेषतश्च म्रियमाणैस्तत्र शुद्धं पापसम्पर्करहितमामृशत विचारयत ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विरजस्कं लोकं भगवल्लोकमेव "न तत्र माया किमुतापरे" इति द्वितीये वक्ष्यमाणत्वात् ॥ २१ ॥ ❀ ❀ एतान्पूर्वोक्तान्मुनीन् ॥ २२ ॥ ❀ ❀ स एव परानुग्रह एवार्थः प्रयोजनं स्यात्। परानुग्रहश्च न विचारपूर्वकं इत्याह— आत्मशीलमिति ॥ २३ ॥ ❀ ❀ यतो यूयं परानुग्रहशीलाः स्थ ततो हेतोः हे विप्रा इति। यूयं विशेषेण प्रान्ति पूरयन्ति सेवकाभिलषितमित्यन्वर्थसंज्ञावन्त एवेत्यहं जानामीति भावः। इमं वो युष्माकं परानुग्रहं विपृच्छे किमाकारः स चिकीर्षितव्य इति पृच्छामि। पृच्छ्यं प्रष्टुमर्हं तत्रैवाध्यवसायार्थमिति भावः। तत्रैव मे विश्वासो भावीति जानीतेति भावः। इतिकृत्या एवंकर्तव्यास्तपोयोगज्ञानादयस्तेषां भाव इतिकृत्यता तस्यां सत्यां म्रियमाणैर्जनैस्तपोयोगादीनामेवं कर्तव्यत्वे सति मम यत्र शुद्धं कृत्यं तत्रामृशत विचारयत। सर्वैकवाक्यतया निश्चित्य कर्तुमाज्ञापयतेति भावः। सन्दर्भस्तु—विशुभ्येति। कृष्णांघ्रिसेवामेव त उपदेक्ष्यन्तीत्यभिप्रायात्। शुद्धमिति। कनिष्ठमध्यमसाधनमिश्रतारहितं सर्वोत्तममित्यर्थः। तच्च कृष्णांघ्रिसेवारूपमेवेति गूढोऽभिप्रायः। हे अभियुक्ताः! हे विद्वांसः "अभियुक्तः परे रुद्धे न्याय्यपण्डितयोस्त्रिषु। हरिभक्ते तत्परे च निर्भये चान्यलिंगकः" इति निरुक्तिः ॥ २४ ॥

---

१. प्रा० पा०—ऽथ। २. प्रा० पा०—तदृषिगणस्य वचः। ३. प्रा० पा०—अभा०। ४. प्रा० पा०—युक्तः। ५. प्रा० पा०—त्रिपिष्टे।

श्रीमद्वीरराघवव्याख्या

एवं राजानमुक्त्वाऽथ मिथ आहुः सर्व इति । यावद्भागवता एव प्रधाना नितरां सेव्या यस्य सोऽसौ राजा कलेवरं विहाय विरजस्कं शुद्धसत्त्वमयविलोकमिदमुपलक्षणमनपहतपाप्मत्वादिगुणाष्टकप्रादुर्भावं देशं परलोकं नित्यविभूत्याख्यं यास्यति तावत्सर्वे वयमिहैव राज्ञः सन्निधावेवास्महे आसीमहि ॥ २१ ॥ ❀ ❀ तत्सम्यं वैषम्यरहितममृतस्रावि गुर्वाशयगंभीरमव्यलीकं निष्कपटं च मुनीनां वचनमाकर्ण्य एतान् युक्तान् हितानात्महिताचरणोद्युक्तानृषीनभिनंद्य विष्णोश्चरितानि श्रोतुकामः परीक्षिद-भाषत ॥ २२ ॥ ❀ ❀ तदेवाह समागता इति । तदेव व्यनक्ति समागतानां वः परानुग्रहमात्मशीलं विना इहामुत्र च लोकेऽर्थः प्रयोजनं कश्चिदपि नास्ति हि परेषु मादृशेष्वनुग्रहरूपमात्मशीलं स्वस्वभावं स्ववृत्तं वा विनाऽन्यथागमनकारणं पृच्छामि नास्ति हीत्यर्थः ॥ २३ ॥ ❀ ❀ यतो भवदागमनमस्मदनुग्रहैकप्रयोजनं ततो हे विप्राः ! वो युष्मान् विश्रभ्य विश्वस्येतिकृत्यतायामितिकर्तव्यतायां द्रष्टव्यमिमं वक्ष्यमाणं पृच्छामि कर्त्तव्यव्यापारप्रकार इतिकृत्यता तस्यां निमित्तभूतायामितिकर्त्तव्यताज्ञानार्थं प्रष्टव्यं पृच्छामीत्यर्थः । पृच्छां दर्शयंस्तत्सम्यक् निर्णीय कथयतेत्याह म्रियमाणैर्मुमूर्षुभिर्जनैः सर्वात्मना सर्वप्रकारेण करणत्रयेण कर्तव्यं शुद्धं संसृत्य निमित्तं च यत्तत्कर्म तत्राभियुक्ताः तद्विमर्शनाभिमुख्ययुक्ताः संतो यूयं मृशत विमृश्य उपदिशत हेऽभियुक्ता इति संबोधनं वा ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अध्यासनं सिंहासनं राज्ञां मंडलपतीनां किरीटैर्जुष्टं सेवितं, कालक्षेपराहित्यद्योतनार्थः सद्यःशब्दः ॥ २१ ॥ ❀ ❀ असावयं विशोकं नित्यनिर्दुःखं कुतः विरजस्कम् अशोभने शोभनाध्यासबुद्धिरहितं कुतः परं त्रिगुणातीतं पूर्णं वा कुतः अजं जन्म-जरामरणरहितं हरिं यास्यतीत्यन्वयः ॥ २२ ॥ ❀ ❀ मधु अमृतं च्युत् श्रवणसुखमत एव गुरोर्ब्राह्मणकुमारस्य शापं व्यलीकयति अनृतं करोति फलत इति गुरुशापव्यलीकम् अनेन दुर्मरणदोषपरिहारो लक्ष्यते, न तु तक्षकदंशनाभावः, तत्कृतदंशनदर्शनात् ऋषि-गणवच आश्रुत्य एतान् ऋषीनाभाषतेत्यन्वयः ॥ २३ ॥ ❀ ❀ त्रिपृष्ठे सत्यलोके शील समाधाविति धातोः परमात्मसमाधिमंतः वो युष्माकमिह लोके अथवा अमुत्र च परलोके कश्चनार्थः साध्यं प्रयोजनं नास्तीति यतस्ततः परानुग्रहकरणस्वभावात् वो युष्मानिमं प्रश्नं विपृच्छे पृच्छामीत्यन्वयः । किं कृत्वा इति कृत्यतायामित्थंकर्तव्यतायां विप्रा विशिष्टज्ञानिनः अकुटिलबुद्धयः सात्त्विकप्रकृतय इति विश्रभ्य विश्वस्य कोऽसाविति तत्राह सर्वात्मनेति । तत्र कृत्यशतेषु म्रियमाणैः पुरुषैः सर्वप्रकारेण शुद्धं निर्दोषं पुरुषार्थपर्यवसायिकृत्यं कर्तव्यं चाभियुक्ता आग्रहयुक्तास्तात्पर्योपेता आमृशत आलोचयत आलोच्य वास्माकं ब्रूतेति तुशब्दः ॥ २४–२५ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मधुच्युत् मनोहरशब्दम् । गुरु महतार्थेन युक्तम् ॥ २२ ॥ ❀ ❀ अर्थः प्रार्थनीयं वस्तु । परानुग्रहश्च न विचार-पूर्वक इत्याह आत्मशीलमिति ॥ २३ ॥ ❀ ❀ विश्रभ्येति । कृष्णाङ्घ्रिसेवामेवैते उपदेक्ष्यन्तीत्यभिप्रायात् । शुद्धमिति कनिष्ठमध्यमसाधनमिश्रतारहितं सर्वोत्तममित्यर्थः । तत्र कृष्णाङ्घ्रिसेवारूपमेवेति गूढोऽभिप्रायः ॥ २४–३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राज्ञोऽध्यवसायं श्रुत्वा स्वेषामप्यध्यवसायं राजानं श्रावयन्तः परस्परं मन्त्रयन्ते सर्वे इति ॥ २१ ॥ ❀ ❀ समं पक्षपातशून्यं वयमास्महे इति । मधुच्युत् अमृतस्रावि, भागवतप्रधान इति । गुरु गम्भीरार्थं विरजस्कं लोकमिति । अव्यलीकं सत्यं लोकं यास्यतीति । ऋषिगणवचश्चतुष्टयम् आश्रुत्य । विरजस्कं लोकं भगवल्लोकमेवेति पूर्वश्लोकोक्ताभ्यां भवत्विति भगवत्-पार्श्वकामा इति पदाभ्यां व्याख्येयम् ॥ २२ ॥ ❀ ❀ त्रयाणां लोकानाम् उपरि पृष्ठे सत्यलोके । ज्ञानातिशयतामुक्त्वा कृपालुता-तिशयतामाह नेहेति । परानुग्रहं विना । तर्हि स एवार्थः स्यात् न आत्मशीलं स्वस्वभावम् ॥ २३ ॥ ❀ ❀ इमं वो युष्माक-मप्यनुग्रहं विपृच्छे किमाकारः स चिकीर्षितव्य इति पृच्छामि । पृच्छ्यं प्रष्टुमहं तत्रैवाध्यवसायार्थमिति भावः । विश्रभ्य तत्रैव मे विश्वासो भावीति जानीतेति भावः । इतिकृत्या एवंकर्त्तव्यास्तपोयोगज्ञानादयस्तेषां भाव इतिकृत्यता यस्यां सत्यां म्रियमाणै-र्जनैस्तपोयोगादीनामेवंकर्त्तव्यत्वे सति सर्वात्मना मम यत्र शुद्धं कृत्यं तत्र आमृशत विचारयत सर्वैकवाक्यतया निश्चित्य कर्तुमाज्ञापयतेति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्योऽन्यमाहुः सर्वे इति। असौ भागवतप्रधानः यावत्परं प्राकृतविभूतिभिन्नमप्राकृतम् अत एव विरजस्कं विशोकं च लोकं यास्यति तावदिह आस्महे आसीमहि ॥ २१ ॥ ❀ ❀ परीक्षित् तेषां मुनीनां सममविषमम् मधुच्युदमृतस्रावि गुरुगंभीराशयम् अव्यलीकं निष्कपटं वचनमाश्रुत्याकर्ण्य युक्तान् समाहितानभिवंद्य अभाषत ॥ २२ ॥ ❀ ❀ त्रयाणां लोकानां पृष्ठे सत्यलोके यथा वेदा मूर्तिधरा भवंति तथा सर्वज्ञाः यूयं सर्वतः सर्वाभ्यो दिग्भ्यः मदनुग्रहार्थं सर्वे एव समागताः। स्वार्थनिरपेक्षपरार्थपरत्वं तेषां दर्शयति परेष्वनुग्रहरूपमात्मशीलं स्ववृत्तमृते इह लोकेऽथवामुत्र लोके भवतां कश्चनार्थः कोऽप्यर्थः प्रयोजनं नास्ति ॥ २३ ॥ ❀ ❀ यतो भवंतः सर्वज्ञाः परानुग्रहशीलाश्च ततो हेतोर्हे विप्राः! वो युष्मान् विश्रभ्य विश्वस्य इदमित्थं कर्तव्यमित्यस्य भाव इतिकर्तव्यता तस्यामिदं वक्ष्यमाणं पृच्छ्यं प्रष्टुमिच्छामि सर्वात्मना सर्वावस्थासु विशेषतश्च म्रियमाणैर्मुमूर्षुभिः शुद्धं निर्दोषं यत्कृत्यं तत्र कृत्यविचारेऽभियुक्ताः कुशला यूयं विमृशत विचार्य विचारयित्वा तदुपदिशत ॥ २४ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं तं स्तुत्वा तस्यानुरोधमिव ज्ञापयंतो गूढाभिसंधानेनाहुः सर्वे वयमिति। अस्माभिः स्वोक्तं निर्वाह्य गंतव्यं तावत्स्थातव्यमिति तदेवाहुः सर्व एव वयं भगवतः स्थानं गच्छति तावदिहैवास्महे स्थास्यामः, किं कृत्वा कुत्र गमिष्यतीत्याकांक्षायामाह अथेति। सप्तदिनानंतरं कलेवरं विहाय असौ संघातपरित्यागेनैकः परं लोकं व्यापि वैकुण्ठं यत्र रजःसंबंध एव नास्ति तत्र हेतुः भागवतेषु प्रधानः भागवताः प्रधानं यस्येति वा तावत् स्थातव्यमिति संबंधः ॥ २१ ॥ ❀ ❀ एवं तेषामनुग्रहं श्रुत्वा बहुकालं स्थास्यंतीति ज्ञात्वा तावन्मया सर्वे संदेहा निवारणीया इति तदर्थं प्रष्टुं यत्नं कृतवान् तदाह आश्रुत्येति। परीक्षित्त्वात् तदीयवचनस्य निर्धारता तेषां वचसि चत्वारो गुणाः संति पुरुषार्थचतुष्टयहेतवः तत्र समं स्वस्य राज्ञश्च तुल्यतया हितचिंतनम्, अनेन मामरूपता उक्ता मधुच्युत् सर्वथा भगवत्समीपं यास्यतीति मधु च्योतति अनेन कामरूपता गुरु च अर्थे गौरवं तावत् स्थास्याम इति। सर्वहितं तावत् करिष्याम इति। अर्थरूपता चकारात् प्रशंसा च अव्यलीकं निष्कपटं सद्यो जहुरिति अनेन धर्मरूपता। एवं सर्वपुरुषार्थरूपं तेषां वचनं श्रुत्वा एतानभिवंद्य विष्णोश्चरितानि शुश्रूषमाणः ॥ २२ ॥ ❀ ❀ वक्ष्यमाणमुक्तवान् तदेवाह समागता इति। अत्र सन्देहे नान्यत्र गंतव्यं यतः सर्वत एव यूयं सर्वे समागताः प्रामाण्यं च भवत्स्वेव निर्णीतमित्याह वेदा यथेति। त्रिपृष्ठे सत्यलोके मूर्तिधराः अधिष्ठातृदेवतारूपविग्रहवन्तः ॥ २३ ॥ ❀ ❀ हेतुश्च भगवद्वाक्ये नास्ति अतः किंचित् पृच्छामीत्याह तत इति। वो युष्मान् पृच्छ्यं प्रष्टव्यमेव "नापृष्टः कस्यचिद् ब्रूयादि" ति श्रुतेः इमं बुद्धिस्थं विशेषेण पृच्छे विश्रभ्य भवत्सु विश्वासं कृत्वा युक्तिमप्यविचार्य विप्रा इति। पूर्ववत् इतिकृत्यतायामित्येवंप्रकारेण कर्त्तव्यं तत इतिवक्तव्यं तस्य भावः इतिकर्त्तव्यता तस्यां तन्निमित्तं कर्त्तव्यनिर्धारः साधनप्रकारनिर्धारश्च वक्तव्य इति भावः। तत्र कालविशेषेण कर्त्तव्यं पृच्छति सर्वात्मना सर्वप्रकारेण नित्यतया जीवनदशायां म्रियमाणैश्च अन्तकाले कृत्यं किं कर्त्तव्यमिति फलितं तादृशं नास्तीति न वक्तव्यं यतो भवंतः अभियुक्ताः, अतस्तादृशे अर्थे आमृशत सर्वतः प्रमाणानि विचारयतेत्यर्थः ॥ २४ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

एवं राजानमुक्त्वा परस्परमाहुः। असौ राजा यावत् कलेवरं विहाय सर्वोत्कृष्टं वैकुण्ठलोकं यास्यति तावद्वयं सर्वेऽप्यत्रैवास्म ह इत्यन्वयः। कथमेवं निश्चय इत्यपेक्षायामाह–यतोऽयं भागवतेषु भगवद्भक्तेषु प्रधानः श्रेष्ठ इत्यर्थः। लोकस्य परत्वमुपपादयन्ति–विरजस्कं शुद्धसत्त्वमयम्। विशोकं आध्यात्मिकादितापत्रयरहितम् ॥ २१ ॥ ❀ ❀ समं पक्षपातशून्यम्, मधुच्युत् अमृतस्रावि, गुरु गम्भीरार्थम्, अव्यलीकं यथार्थं तत्पूर्वोक्तमृषिगणानां वचः परीक्षित् आश्रुत्य विष्णोश्चरितानि शुश्रूषमाणः श्रोतुकामः युक्तः सावधानः सन्नेनानृषीनभिवन्द्याऽभाषतेत्यन्वयः ॥ २२ ॥ ❀ ❀ तदेव दर्शयति–समागता इति द्वयेन। त्रिपृष्ठे सत्यलोके यथा मूर्तिधरा वेदाः सन्ति तद्वदवभासमाना यूयं सर्वे सर्वतः सर्वाभ्यो दिग्भ्य एवेह मदनुग्रहार्थं समागताः; न स्वार्थम्। एवं कुत इत्यपेक्षायामाह–येषां भवतां परेषु मादृशेषु दीनेष्वनुग्रहमृते विनेह लोकेऽथवाऽमुत्र च स्वर्गादिलोके कश्चनाप्यर्थः प्रयोजनं नास्तीति लोकेऽनुग्रहकर्तॄणां प्रयोजनोद्देशो दृश्यत इत्याशङ्क्याह–आत्मशीलं स्वतस्सिद्धस्वभावरूपमित्यर्थः ॥ २३ ॥ ❀ ❀ यतो भवदागमनमस्मदनुग्रहैकप्रयोजनं ततस्तस्मात् हे विप्राः हे परमपुरुषार्थपूरकाः विश्रभ्य भवद्विश्वासं कृत्वा इत्येवं कर्त्तव्यमित्यस्य भाव इतिकृत्यता तस्यां विषये इमं पृच्छ्यं द्रष्टव्यं वो युष्मान् अहं विपृच्छे विशेषतः पृच्छामि। किं तत्? म्रियमाणैरासन्नमृत्युभिः शुद्धं पापसम्बन्धरहितं सर्वात्मना सर्वप्रकारेण देहेन्द्रियान्तःकरणेन यत्कृत्यं तद्विपृच्छे इत्यन्वयः। तत्रामृशत विचारयत। यतो भवन्तोऽभियुक्ताः सर्वज्ञाः ॥ २४ ॥

हिन्दी अनुवाद

हम सब तबतक यहीं रहेंगे जबतक ये भगवान्‌के परम भक्त परीक्षित् अपने नश्वर शरीरको छोड़कर माया-दोष एवं शोकसे रहित भगवद्धाममें नहीं चले जाते' ॥ २१ ॥ ❀ ❀ ऋषियों के ये वचन बड़े ही मधुर, गम्भीर, सत्य और समतासे युक्त

थे। उन्हें सुनकर राजा परीक्षित्‌ने उन योगयुक्त मुनियोंका अभिवन्दन किया और भगवान्‌के मनोहर चरित्र सुननेकी इच्छासे ऋषियोंसे प्रार्थना की ॥ २२ ॥ ❀ ❀ 'महात्माओ! आप सभी सब ओरसे यहाँ पधारे हैं। आप सत्यलोकमें रहनेवाले मूर्तिमान् वेदोंके समान हैं। आपलोगोंका दूसरोंपर अनुग्रह करनेके अतिरिक्त, जो आपका सहज स्वभाव ही है, इस लोक या परलोकमें और कोई स्वार्थ नहीं है ॥ २३ ॥ ❀ ❀ विप्रवरो! आपलोगोंपर पूर्ण विश्वास करके मैं अपने कर्तव्यके सम्बन्धमें यह पूछने योग्य प्रश्न करता हूँ। आप सभी विद्वान् परस्पर विचार करके बतलाइये कि सबके लिये सब अवस्थाओंमें, और विशेष करके थोड़े ही समयमें मरनेवाले पुरुषोंके लिये अन्तःकरण और शरीरसे करने योग्य विशुद्ध कर्म कौन-सा है'[1] ॥ २४ ॥

तत्राभवद्भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ २५ ॥
तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।
चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं[2] कम्बुसुजातकण्ठम् ॥ २६ ॥
निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरं च ।
दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥ २७ ॥
श्यामं सदापीच्य[3]वयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन[4] ।
प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र तेषु यागयोगतपोदानादिभिर्विवदमानेषु सत्सु यदृच्छया गां पर्यटन्व्यासपुत्रस्तत्राभवत्प्राप्तः। न लक्ष्यमाश्रमादिलिंगं यस्य। अवधूतोऽवज्ञया जनैस्त्यक्तो यस्तस्येव वेषो यस्य सः ॥ २५ ॥ ❀ ❀ तमित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः। द्विगुणान्यष्टौ वर्षाणि यस्य सुकुमारौ पादौ करावूरू अंसौ कपोलौ गात्रं च यस्य। चारुणी आयते अक्षिणी यस्मिन् उन्नता नासा यस्मिन् लम्बह्रस्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् शोभने च भ्रुवौ यस्मिन् एवंभूतमाननं यस्य। कम्बुवद्रेखात्रयांकितः सुष्ठु जातः कण्ठो यस्य ॥ २६ ॥ ❀ ❀ कण्ठस्याधोभागयोः स्थिते अस्थिनी जत्रुणी, मांसेन निगूढे जत्रुणी यस्य। पृथु विस्तीर्णं तुंगमुन्नतं च वक्षो यस्य आवर्तवन्नाभिर्यस्य वलिभिस्तिर्यङ्निम्नरेखाभिर्वल्गु रम्यमुदरं यस्य। दिश एवाम्बरं यस्य। वक्त्रा विकीर्णाः केशा यस्य। प्रलम्बौ बाहू यस्य स्वमरेषु श्रेष्ठदेवेषूत्तमो हरिस्तद्वदाभा यस्य तम् ॥ २७ ॥ ❀ ❀ सदा अपीच्यमत्युत्तमं यद्वयो यौवनं तेन यांगलक्ष्मीर्देहकांतिस्तया रुचिरस्मितेन च। गूढवर्चसमपि प्रत्युत्थिताः तं दृष्ट्वा प्रत्युद्गमं कृतवन्त इत्यर्थः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तेषु सर्वेषु मुनिषु विवदमानेषु तदैव स्वस्य मनसा श्रीशुकागमनमीहमानेषु नेत्रैश्च तद्वर्त्म निरीक्षमाणेषु। यद्वा यत्र परीक्षिता मुनिभिश्च स्थितं तत्र तस्यामवस्थायां वा व्यासपुत्रः शुको भगवान् यदृच्छया दैवेच्छयाऽभवदित्यन्वयः। पूर्वस्मात्कान्तिविशेषद्योतनायाभवदित्युक्तम्। आगमनस्य तावता चरितार्थत्वात्। अटनस्य स्वाधीनताप्रकाशनायाटमान इति। शानच्प्रत्ययः। तर्ह्यर्थाभिलाषी किमटतीत्यत आह-अनपेक्ष इति। बाह्यविषयापेक्षारहितः तत्कुत इत्यस्याप्येतदेवोत्तरम्। अनिति चेष्टतेऽनेनेत्यनः प्राणस्तं पातीति अनपः प्राणनाथः श्रीविष्णुस्तस्येक्षा दर्शनं यस्य स तथा न हि करतलामलकवत्सततमपरोक्षीकुर्वाणस्य तस्य बाह्यविषयापेक्षास्तीति बाह्यपदार्थापेक्षाभावे शरीरयात्रा कथमित्यत्राप्येतदेवोत्तरम्। अनं प्राणं पिबतीत्यनपाः प्राणपदेन बाह्यवायुर्लक्ष्यते अत्र सैवेक्षा ज्ञानं यस्य स तथा। शरीरनिर्वाहार्थं बाह्यवायुपानमात्रस्यैव ज्ञानमस्ति नाधिकवस्तुग्रहणस्येत्यर्थः। श्रीप्रसादाभावादशनदारिद्र्यं किमस्येत्यस्यापीदमेवोत्तरम्। हरिपादाब्जतः शश्वदपगता न भवतीत्यनपा लक्ष्मीस्तस्या ईक्षणं यस्मिन्स तथा। तत्कटाक्षपात्रीभूत इत्यर्थः। सततगमनस्वभावेन वायुना तृप्तिः कथं स्यादिति तत्राह-निजेति। स्वरूपानन्देनालम्बुद्धिमान् यदृच्छालाभेन तृप्तः किमाश्रमस्स इति तत्राह। न लक्ष्याण्याश्रमादिलिंगानि यस्य स तथा। तत्कुत इति तत्राह-अवधूत इति। अवधूतानां दिगंबराणां वेषो यस्यावधूतस्त्यक्तो वेषो ज्ञापकचिह्नं वा येन स तथाऽत एव

---

१. इस जगह राजाने ब्राह्मणसे दो प्रश्न किये हैं; पहला प्रश्न यह है कि जीवको सदा-सर्वदा क्या करना चाहिये और दूसरा यह कि जो थोड़े ही समयमें मरनेवाले हैं, उनका क्या कर्तव्य है? ये ही दो प्रश्न उन्होंने श्रीशुकदेवजीसे भी किये तथा क्रमशः इन्हीं दोनों प्रश्नोंका उत्तर द्वितीय स्कन्धसे लेकर द्वादशपर्यन्त श्रीशुकदेवजीने दिया है। २. प्रा० पा०—चार्वारुणाक्षोन्नसतुल्यकर्ण शुभ्राननम्। ३. प्रा० पा०—पीनवयो। ४. प्रा० पा०—स्मयेन।

स्त्रिबालैर्वृतः । स्त्रियो हि सौरूप्यात् "स्त्रीणां मनोज्ञं रुचिरस्मितेन" इति वक्ष्यमाणत्वात् बालाश्चावधूतवेषत्वात्तेन साकं गच्छन्तीति भावः । स्त्रीशब्दस्य ह्रस्वत्वं छान्दसम् ॥ २५ ॥ ❀ ❀ द्विगुणान्यष्टौ षोडश भवन्ति गूढवर्चसमाच्छादितनिजतेजोलक्षणमहिमानमपि । सुकुमारौ कोमलौ ॥ २६-२७ ॥ ❀ ❀ "अपीच्यं सुन्दरतरे" इत्यभिधानात् । तस्य शुकस्य यानि लक्षणानि चिह्नानि तानि जानन्तीति तथा ॥ २८ ॥

श्रीमद्वीरराघवव्याख्या

तत्रैवं पृच्छतो राज्ञः संनिधौ भगवान् व्यासस्य पुत्रः श्रीशुकोऽभवदागत्य तस्थौ कथंभूतः यदृच्छया गां भूमिमटमानः तत्र हेतुरनपेक्षः कृत्यपेक्षारहितः तत्र हेतुः निजलाभेन ब्रह्मात्मकस्वात्मानुभवेनैव तुष्टः अलक्ष्यमृषिरिति ज्ञातुमशक्यलिंगं रूपं यस्य तत्र हेतुरवधूतवेषः अभिभाव्यवेशः, अत एव बालैर्वृतः परिवृतः ॥ २५ ॥ ❀ ❀ तमिति । तमागतं गूढमपि संवृतमणिवत्तिरोहितं वर्चो यस्य तथाभूतमपि तस्य शुकस्य चिह्नाभिज्ञा मुनयः स्वासनेभ्यः प्रत्युत्थिता बभूवुरित्यन्वयः । कथंभूतं त्र्यष्टवर्षं षोडशवर्षवयस्कमिव स्थितं द्विरावृत्ता अष्टौ वर्षाणि यस्य तमिति समाः सुकुमाराः पादादयो यस्मिंस्तद्गात्रं यस्य चारुणी सुंदरे आयते विशाले अक्षिणी यस्मिन् उदग्रा नासिका यस्मिन् तुल्यौ समौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिंस्ततस्तेषां कर्मधारयः तदाननं यस्य कंबुवच्छंखवद्वर्तुलरेखात्रयोपेतश्च कंठो यस्य ॥ २६ ॥ ❀ ❀ निगूढे मांसलत्वेनाप्रकाशे जत्रुणी अंसद्वयसंधिगतास्थिनी यस्य पृथु विशालं तुंगमुन्नतं वक्षो यस्य आवर्ता आवर्तवद्वर्तुला विविक्ता रंध्रयुक्ता च नाभिर्यस्य वलिभिस्त्रिभिर्वल्गु सुंदरमुदरं यस्य दिगंबरं दिगेवांबरं वस्त्रं यस्य चीरधरत्वेन प्रशस्तांबररहितमित्यर्थः, उपरि वाससा रहितं वा अन्यथा मोक्षधर्मादिषूक्तप्रकारविरोधात् वक्रा विकीर्णाश्च केशा यस्य प्रलंबा वा जानुलंबौ बाहू यस्य स्वमरोत्तमस्यामरश्रेष्ठस्येवाभा यस्य ॥ २७ ॥ ❀ ❀ अपीच्यं कमनीयं वयो यस्मिंस्तस्यांगस्य लक्ष्म्या कांत्या सुंदरस्मितेन च सदा स्त्रीणां मनोज्ञं स्पृहणीयम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ज्ञानादिनैव सत्संगत्या सकलपापक्षयो भवतीति प्रतिपाद्यतेस्मिन्नध्याये । तत्रादौ शुकागमनं वक्ति तत्रेति । यत्र परीक्षिता मुनिभिश्च स्थितं तत्र तस्यामवस्थायां वा व्यासपुत्रः शुको भगवान् यदृच्छया दैवेच्छयाऽभवदित्यन्वयः । पूर्वस्मात्कान्तिविशेषद्योतनायाभवदित्युक्तं आगमनस्य तावता चरितार्थत्वात् अटनस्य स्वाधीनत्वप्रकाशनायाटमान इति शानच्प्रत्ययः, तर्ह्यर्थाभिलाषी किमटतीत्यत उक्तमनपेक्ष इति । बाह्यविषयापेक्षारहितः, तत्कुतः इत्यस्यापि तदेवोत्तरं अनपः प्राणनाथः श्रीविष्णुः तद्विषये ईक्षा ईक्षणं दर्शनं यस्य स तथोक्तः नहि करतलामलकवत्सततमपरोक्षीकुर्वाणस्य तस्य बाह्यपदार्थापेक्षा भवतीति वा, बाह्यपदार्थापेक्षाभावे शरीरयात्रा कथमित्यस्याप्येतदेवोत्तरमनं प्राणं पिबतीत्यनपा ईक्षा दर्शनं काकचंचुपुटेन वायुपानज्ञानं यस्यास्ति स तथा कथित इति वा । श्रीप्रसादाभावादशनदारिद्र्यं किमित्यस्येदमप्युत्तरं शश्वदपगता न भवतीत्यनपा लक्ष्मीः तस्याः ईक्षणं यस्यास्ति स तथेति वा तत्कटाक्षस्य पात्रीभूत इत्यर्थः, संततगमनागमनस्वभावेन वायुना तृप्तिः कथं स्यादिति तत्राह निजेति, स्वरूपानंदेनालं बुद्धिमान्यदृच्छालाभेन तृप्तः किमाश्रम इति तत्राह अलक्ष्येति, न लक्ष्याण्याश्रमादिलिंगानि यस्य स तथोक्तः तत्कुत इति तत्राह अवधूतेति । अवधूतानां दिगंबराणां वेषो यस्य स तथोक्तः अवधूतः परित्यक्तः वेषोऽलंकारो येन स तथेति वा अत एव बालैश्च वृतः ॥ १ ॥ ❀ ❀ मुनयस्तं दृष्ट्वा आसनेभ्यः प्रत्युत्थिता इत्यन्वयः । चशब्दादन्ये च तत्राश्रिता उत्तस्थुरिति माह्यं गूढवर्चसं आच्छादितनिजतेजोलक्षणमहिमानमपि तल्लक्षणज्ञाः किं त्र्यष्टवर्षं द्विः कृत्वाऽष्टवर्षाणि यस्य तथोक्तः तं षोडशवर्षं सुकुमाराणि कोमलानि पादादीनि यस्य स तथोक्तस्तं पादौ च करौ च ऊरू च बाहू अंसौ च कपोलौ च गात्रं च तानि तथोक्तानि चारुणी ईषदरुणे रक्ते च अक्षिणी यस्य स तथा उन्नता नासिका यस्य स तथा तुल्यौ परस्परसमौ कर्णौ यस्य स तथा तं शुभ्रं शोभनं आननं यस्य स तथा तं कंबुवत्त्रिरेखांकितशंखवत् सुजातः लक्षणवत्तमः कंठो यस्य स तथा तम् ॥ २ ॥ ❀ ❀ अंसवक्षस्थलयोर्मध्यं जत्रु निगूढं पूरितविवरं पीबरं जत्रु यस्य स तथा तं पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य स तथा तं, आवर्तः पयसां भ्रमः तद्वन्निम्ना वृत्ता नाभिर्यस्य स तथा तं वलिभिः रेखाभिर्वल्गु सुंदरं उदरं यस्य तं तथा तम् ॥ ३ ॥ ❀ ❀ आपीच्यं षोडशवर्षीयं वयो यस्य तदापीच्यवयः तच्चांगं तस्य लक्ष्म्या स्त्रीणां मनोज्ञं मनोहरं रुचिरस्मितेन च मनोहरमिति शेषः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र यागयोगतपोदानादिव्यवस्थास्वैकमत्याभावेन सर्व्वेषु मुनिषु तदैव स्वस्वमनसा श्रीशुकागमनमीहमानेषु नेत्रैश्च तद्वर्त्म निरीक्षमाणेषु सत्सु व्यासपुत्रस्तत्राभवत् प्राप्तः ॥ २५ ॥ ❀ ❀ षोडशवर्षवयस्कम् । चारुणी आयते अक्षिणी यस्मिन् उन्नता नासा यस्मिन् लम्बह्रस्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिन् तथाभूतमाननं यस्य तम् । कम्बुः शङ्खस्तद्वद्रेखात्रयाङ्कितः सुजातः कंठो यस्य तम् ॥ २६ ॥ ❀ ❀ निगूढे मांसले जत्रुणी कण्ठस्याधोभागयोः स्थिते अस्थिनी यस्य तम् । स्वमरेषु देवश्रेष्ठेष्वप्युत्तमः श्रीकृष्णस्तुल्यकान्तिम् ॥ २७ ॥ ❀ ❀ यतः सदा स्थिरमेव यदपीच्यम् अत्युत्तमं वयः नवयौवनं तेन या अङ्गस्य लक्ष्मीः शोभा तया रुचिरेण स्वाभाविकेन स्मितेन स्त्रीणां मनोज्ञं मनोहरं गूढवर्च्चसमपि तं दृष्ट्वा ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र तेषु नानापक्षानुसारिषु सत्सु भगवान् व्यासपुत्रोऽभवत्प्राप्तः यदृच्छया गां पृथ्वीमटमानः अनपेक्षः प्राकृतवस्त्वपेक्षाशून्यः न लक्ष्यमाश्रमविशेषसूचकं लिंगं यस्य सः निजलाभेन कृष्णध्यानेनैव तुष्टः अवधूताः निरस्ताः शिश्नोदरपराभिमताः वेषा यस्मात्सः अत एव स्त्रीबालैर्वृतः ॥ २५ ॥ ❀ ❀ तल्लक्षणज्ञाः मुनयः स्वासनेभ्यः तं श्रीशुकं प्रत्युत्थिता इति तृतीयेनान्वयः । कथंभूतं द्विगुणान्यष्टौ वर्षाणि यस्य तम् । सुकुमाराणि पादादीनि यस्य तम् । चारुणी शोभने आयते विशाले अक्षिणी यस्मिन्नुन्नता तिलपुष्पाकारा नासा यस्मिन् तुल्यौ समौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिन् तदाननं यस्येति बहुव्रीहिः, कंबुवच्छंखवद्रेखात्रययुक्तः सुष्ठु जातः कंठो यस्य ॥ २६ ॥ ❀ ❀ निगूढे जत्रुणी यस्य पृथु विशालं तुंगमुन्नतं वक्षो यस्य आवर्तवन्नाभिर्यस्य वलिभिस्त्रिभिर्वल्गु सुंदरमुदरं यस्य दिगेवांबरं वस्त्रं यस्य वक्रा विकीर्णाश्च केशा यस्य प्रलंबौ करिकरोपमौ बाहू यस्य स्वमरा देवमुख्यास्तेषूत्तमो विष्णुः"अग्निर्वै देवानामवमो विष्णुर्वै देवानां परम"इत्यादिश्रुतेः तद्वदाभा यस्य ॥ २७ ॥ ❀ ❀ श्यामं घनश्यामं सदापीच्यं कमनीयं यद्वयो यौवनं तेन अंगेषु लक्ष्मीः कांतिस्तया रुचिरेण स्मितेन च स्त्रीणां मनोज्ञं स्पृहणीयं गूढं वर्चो यस्य तं ते पूर्वोक्ता मुनयः स्वासनेभ्य उत्थिता बभूवुः ॥ २८ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं पृष्टे सर्वपरित्यागकर्तुः अपरित्यागी गुरुर्न भवतीति भगवत्प्रेरणया शुकः समागत इत्याह तत्राभवदिति । तत्रैव अभवत् प्रादुर्भूतः तथा सामर्थ्ये हेतुः भगवानिति । भगवत्त्वे हेतुः व्यासपुत्र इति । तेषां दृष्टौ तथा भानं मास्त्विति अन्यथा प्रदर्शनमाह गामटमान इति । पृथिवीपर्यटनं परमहंसानां धर्मः अनपेक्ष इति पर्यटनधर्मेण न हि किंचिदपेक्षते अतो राजवत् लीलया पर्यटनमित्यर्थः । अलक्ष्याणि लिंगानि महापुरुषचिह्नानि यस्य द्वात्रिंशल्लक्षणान्यपि तस्मिन् वर्त्तंते तेषु ज्ञातेषु लोका राजत्वं सम्पादयेयुः षोडशलक्षणानि राज्ञः द्वात्रिंशल्लक्षणानि महाराजाधिराजस्य स भगवान् ब्रह्मविद्वा भवति तेषां फलमाह निजलाभतुष्ट इति । निजलाभस्तोषश्चेति फलद्वयं निजलाभेन तुष्टः उभयोर्हेतुहेतुमद्भावात् । अत आत्मलाभान्न परं विद्यत इति न श्रुतिविरोधः । क्रीडारूपं पर्यटनमिति ज्ञापयन् लक्षणापरिज्ञाने हेतुमाह वृतश्च बालैरिति । चकारात् स्त्रीभिः अबुधैश्च लक्षणानां परीक्षाभावायाह अवधूतस्येव वेषो यस्य देहसंस्काररहितो जडोऽवधूतः तत्र जडत्वांशो नास्तीति ज्ञापयितुं वेषपदम् ॥ २५ ॥ ❀ ❀ तत्र द्वात्रिंशल्लक्षणान्यपि वक्तुमाह द्व्यष्टवर्षमिति । तत्र कानिचिदंतःस्थानि कानिचिद्बहिःस्थितानि तत्र सर्वत्र स्थितस्य स्वेच्छया प्रादुर्भावसामर्थ्यं षड्गुणैश्वर्यसम्पत्तिः भगवदीयत्वं स्वेच्छया लीलाकरणं निरपेक्षता तिरोभावसामर्थ्यमात्मलाभः सन्तोषश्च एवमष्टौ गुणाः पूर्वोक्ताः । अन्यानाह द्व्यष्टवर्षं द्विगुणा अष्टौ वर्षा यस्य षोडशवार्षिकमित्यर्थः, वर्षा हि शरीरस्य वृद्धिक्षयहेतवः तत्र षोडश वर्षाः केवलं वृद्धिहेतवः श्मश्रूत्पत्त्या अवसीयन्ते 'मृता वा एषा त्वमगमध्ये'ति श्रुतेः केशानामपि तथात्वेऽपि उत्पत्तिशिष्टत्वात् न ते मृतत्वज्ञापकाः।अतः कालगुण एव तस्य न तत्कृतो दोष इति । अत उभयज्ञापनाय द्व्यष्टपदम् । अग्रिमव्याप्त्यभावाय सम्पन्नस्थापनाय भगवद्विस्मरणहेतवो वा ते अतो बहुकालीनस्य तादृशं गात्रं यस्य अनेन षड्गुणाः चारु यथा भवति तथा आयते अक्षिणी यस्य ऊर्ध्वा नासिका यस्य तुल्यौ कर्णौ यस्य शोभने भ्रुवौ आननं यस्य कम्बुवत् शंखवत् त्रिवलीयुक्तः सुष्ठु जातः कण्ठो यस्य, अनेन पंचनिगूढं जत्रु यस्य कण्ठे कण्ठमालाजत्रु पृथु तुंगं वक्षो यस्य आवर्त्ता नाभिर्यस्य वलिभिः अश्वत्थपत्रवत् उदरं यस्य एते चत्वारः चकारात् गूढवस्त्रम् ॥ २६ ॥ ❀ ❀ एवं षट्त्रिंशत् लक्षणानि उक्तानि । मध्ये तस्य लोकोपकारकं कार्यद्वयमाह वक्रविकीर्णकेशमिति तस्य हि शरीरं ब्रह्मभावात् भगवत इव व्यापकं तस्य वस्त्रं दिश एव भवंति लौकिकपरिधाने अन्तरा परिच्छेदो लोकपीडा च स्यात्, अतो दिगम्बरत्वं वक्राः विकीर्णाः केशा यस्य ब्रह्मकेशात्मकास्तस्य केशाः, तत्र अनुत्पादनार्थं वक्रता अन्यथा ब्रह्मभावमपि प्रसेदीशः वक्रत्वं गुणश्च प्रकर्षेण लम्बौ बाहू यस्य आजानुबाहुं स्वमरोत्तमः भगवान् देवरूपो विष्णुः तस्येव आभा कांतिर्यस्य श्यामं श्यामवर्णं सर्वदा अपीच्यं स्त्रीणां हितकरं यद्वयस्तारुण्यं तेन अङ्गस्य या लक्ष्मीस्तया स्त्रीणां मनोज्ञं सुखकरं, अनेन सौंदर्यातिशय उक्तः । तत्र स्त्रीदृष्टेर्युतत्वात् तथोक्तं रुचिरं च स्मितं तेन च स्त्रीणां मनोज्ञं स्त्रियो हि द्विविधाः चतुरा अचतुराश्च, उभयोः परिग्रहार्थे द्वयमेवं वक्रकेशादयः षट् एवं लक्षणसम्पन्नं दृष्ट्वा सर्वे मुनय उत्थिता इत्याह प्रत्युत्थिता इति स्वासनेभ्यस्तं प्रत्युत्थिताः, न त्वन्यथा तत्र ज्ञानमाह तल्लक्षणज्ञा इति । उत्थाने ज्ञानस्य हेतुत्वं ज्ञाने मुनित्वस्य तु तल्लक्षणं लौकिकप्रमाणगम्यमित्याह गूढं वर्चः तेजो यस्य ॥ २७–२८ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

तमित्यत्र । श्मश्रूत्पत्त्यावसीयन्ते इति । अग्रे तदुत्पत्त्या तथा निश्चीयन्ते, तत्र गमकं श्रुतेति । मृतत्वज्ञापका इति । त्वङ्मृतत्वज्ञापकाः । तेन सिद्धमाहुः अत इत्यादि । अमेध्यस्पर्शाभावात् कालकृतो बलवत्त्वादिरूपो गुण एव, न तु कामवत्त्वादिरूपः कालजो दोषस्तत्रेत्यर्थः । उभयज्ञापनायेति । गुणदोषाभावरूपगुणद्वयज्ञापनाय । अन्यथा षोडशाब्दमित्येव वदेदित्यर्थः । तयोः

प्रयोजनमाहुः अग्रिमेत्यादि । कामजरादिदोषव्याप्त्यभावाय गुणसूचनं सम्पन्नस्य ज्ञानभक्त्यादिरूपगुणस्य स्थापनाय दोषाभावसूचनमित्यर्थः । अस्मिन् पक्षे तमितिपदस्य विशेषार्थाभावात् पक्षान्तरमाहुः भगवदित्यादि । त इति अग्रिमा वर्षाः । ताभ्यां सिद्धमाहुः अत इत्यादि । तथा चामेध्यत्वकृत्स्पर्शाभावाच्छिष्टकाले भगवत्स्मरणं द्व्यष्टवर्षपदेन सूच्यते द्वितीयस्तमितिपदेन । प्रकान्तविषयत्ववत्प्रसिद्धार्थविषयत्वेपि बाधकाभावादिति । तथा च तद्गुणद्वयसूचनायेदं पदद्वयमत्रेत्यर्थः । गूढचिह्नमिति पुंव्यञ्जनम् ॥ २६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

तत्रैवं पृच्छतो राज्ञः सन्निधाने भगवान्भगवदाविष्टो व्यासपुत्रः श्रीशुकः अभवदागतः । तस्य भगवत्त्वं तु 'कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा । योगेन्द्राय तदात्मनाऽथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि' इति द्वादशे उक्तं ज्ञेयम् । कथमागतस्तत्राह—गां पृथ्वीं परमहंसधर्मेण पर्यटमान इति । किमर्थमागतस्तत्राह—यदृच्छयेति, आकस्मिकेन राजन्यनुग्रहेणैव न किञ्चित्प्रयोजनमुद्दिश्येत्यर्थः । तत्र हेतुं वदन्भगवत्त्वमुपपादयति—अनपेक्षः भोगापेक्षारहितो विरक्त इति । तत्र हेतुमाह—निजस्वरूपपरमानन्दलाभेनैव तुष्ट इति । तर्ह्यन्यैः कथं न भगवत्त्वेन ज्ञात इत्यत्राह—अलक्ष्येति, अलक्ष्याणि लिङ्गानि महापुरुषचिह्नानि यस्य सः । तत्र हेतुमाह—अवधूतः अभिभाव्यो वेषो यस्य सः, अत एवाबुद्धैः स्त्रीबालैर्वृतः परिवृत इति ॥ २५ ॥ ❀ ❀ आगतशुकस्वरूपं वर्णयति—तमिति सार्द्धद्वयेन । गूढमसीसंवृतमणिवत्तिरोहितं वर्चस्तेजो यस्य तथाभूतमपि तं दृष्ट्वा तल्लक्षणाभिज्ञास्ते मुनयः स्वासनेभ्यः प्रत्युत्थिता इति द्वयोरन्वयः । द्विगुणान्यष्टौ वर्षाणि यस्य तम् । षोडशवर्षवयस्कमिव स्थितम् । सुकुमारौ पादौ करौ ऊरू बाहू अंसौ कपोलौ च यस्मिंस्तद्गात्रं यस्य तम् । चारुणी मनोहरे आयते दीर्घे अक्षिणी यस्मिन् , उन्नता नासिका यस्मिन् , लम्बह्रस्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् , शोभने भ्रुवौ यस्मिन् , एवम्भूतमाननं यस्य तम् । कम्बुवद्रेखात्रयाङ्कितः सुष्ठु जातः कण्ठो यस्य तम् ॥ २६ ॥ ❀ ❀ कण्ठस्याधो भागयोः स्थिते अस्थिनी जत्रुणी । मांसेन निगूढे जत्रुणी यस्य तम् । पृथु विस्तीर्णं तुङ्गमुन्नतं च वक्षो यस्य तम् । आवर्त्तवद्गतुला विविक्तरन्ध्रा च नाभिर्यस्य तम् । बलिभिस्तिर्यङ्निम्नरेखाभिर्वल्गु रम्यमुदरं यस्य तम् । दिश एवाम्बरं यस्य तम् । वक्रा विकीर्णाः केशा यस्य तम् । प्रलम्बौ बाहू यस्य तम् । स्वमरेषु श्रेष्ठेषु देवेषु उत्तमो हरिस्तद्वदाभा यस्य तम् ॥ २७ ॥ ❀ ❀ तदेवाह—श्याममिति । सदा अपीच्यमतिकमनीयं यद्वयो यौवनं तेन या अङ्गलक्ष्मीर्देहकान्तिस्तया रुचिरेण स्मितेन च स्त्रीणां मनोज्ञं स्पृहणीयम् ॥ २८ ॥

हिन्दी अनुवाद

उसी समय पृथ्वीपर स्वेच्छासे विचरण करते हुए, किसीकी कोई अपेक्षा न रखनेवाले व्यासनन्दन भगवान् श्रीशुकदेवजी महाराज वहाँ प्रकट हो गये । वे वर्ण अथवा आश्रमके बाह्य चिह्नोंसे रहित एवं आत्मानुभूतिमें संतुष्ट थे । बच्चों और स्त्रियोंने उन्हें घेर रक्खा था । उनका वेष अवधूतका था ॥ २५ ॥ ❀ ❀ सोलह वर्षकी अवस्था थी । चरण, हाथ, जङ्घा, भुजाएँ, कंधे, कपोल और अन्य सब अङ्ग अत्यन्त सुकुमार थे । नेत्र बड़े-बड़े और मनोहर थे । नासिका कुछ ऊँची थी । कान बराबर थे । सुन्दर भौंहें थीं, इनसे मुख बड़ा ही शोभायमान हो रहा था । गला तो मानो सुन्दर शङ्ख ही था ॥ २६ ॥ ❀ ❀ हँसली ढकी हुई, छाती चौड़ी और उभरी हुई, नाभि भँवरके समान गहरी तथा उदर बड़ा ही सुन्दर, त्रिवलीसे युक्त था । लंबी-लंबी भुजाएँ थीं, मुखपर घुँघराले बाल बिखरे हुए थे । इस दिगम्बर वेषमें वे श्रेष्ठ देवताके समान तेजस्वी जान पड़ते थे ॥ २७ ॥ ❀ ❀ श्याम रंग था । चित्तको चुरानेवाली भरी जवानी थी । वे शरीरकी छटा और मधुर मुसकानसे स्त्रियोंको सदा ही मनोहर जान पड़ते थे । यद्यपि उन्होंने तेजको छिपा रक्खा था, फिर भी उनके लक्षण जाननेवाले मुनियोंने उन्हें पहचान लिया और वे सब-के-सब अपने-अपने आसन छोड़कर उनके सम्मानके लिये उठ खड़े हुए ॥ २८ ॥

स विष्णुरातोऽतिथय[1] आगताय तस्मै सपर्यां शिरसाऽऽजहार ।
ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥ २९ ॥
स संवृतस्तत्र महान् महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसङ्घैः ।
व्यरोचतालं भगवान् यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥ ३० ॥

---

१. प्रा० पा०—रातो मुनये ।

प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ।
प्रणम्य मूर्ध्नावहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत् ॥ ३१ ॥

परीक्षिदुवाच

अहो अद्य वयं ब्रह्मन् सत्सेव्याः क्षत्रबन्धवः । कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शिरसैव सपर्यामाजहारात्मनिवेदनं कृतवान् । तेन सहागताः स्त्र्यादयो निवृत्ताः स चोपविवेश । सन्धिरार्षः ॥ २९ ॥ ❀ ❀ स भगवान्ब्रह्मर्ष्यादिसंघैः संवृतः सन्नलं व्यरोचत । ग्रहाः शुक्रादयः । ऋक्षाण्यश्विन्यादीनि । अन्यास्ताराः ॥ ३० ॥ ❀ ❀ न कुण्ठा सर्वार्थेषु मेधा यस्य तम् । प्रणम्य प्रश्नार्थं पुनर्नत्वा ॥ ३१ ॥ ❀ ❀ सूनृतां गिरमाह अहो इति पंचभिः । सतां सेव्या जाताः । यतोऽतिथिरूपेण हेतुना तीर्थका योग्याः कृताः ॥ ३२-३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न विद्यते तिथिरागमनसंकेतितदिनविशेषो यस्य तस्मै यदृच्छयागताय ततो राजकृतपूजादर्शनादनन्तरं स्त्रियो युवतयस्साक्षात्स्मर एवायमिति अर्भका विक्षिप्तोयमित्यबुधा निवृत्ता मुनिभ्यस्तेभ्यो भीत्येत्यर्थः । स शुकः पूजा यथोचितप्रणामप्रश्रयप्रणयपरिष्वंगकुशलप्रश्नादिलक्षणा मुनिजनकर्तृका मुनिजन्मकर्मका च संजाता यस्येति । तारकादित्वादितच् । तेन सर्वे मुनयः प्रणेमुः । व्यासनारदाद्यास्तु सास्रं सगद्गदं प्रणयपरिष्वंगशिरोघ्राणकुशलप्रश्नादिकं चक्रुः । स च तान्प्रणनामेति द्योतितम् । महासन इति । "आज्ञा गुरूणां ह्यविचारणीया" इत्युक्तेः ॥ २९ ॥ ❀ ❀ स शुकदेवः । अत्र व्यासनारदपरशुरामादिभ्यो भगवदवतारेभ्योऽपि तस्योत्कर्षो भक्त्युत्कर्षेणैवेति ज्ञेयम् । "वैयासकिश्च भगवान्वासुदेवपरायणः" इत्युक्तेः । तीर्थेन तु स परीक्षित् महीयसां महत्तराणां मध्ये महान् संवृतः गूढः महत्त्वप्रकाशनाय राजब्रह्मर्ष्यादिभिः परीतो व्यरोचतेत्युक्तम् । तक्षकान्मरिष्य इति मरणभिया मुखांगकान्तिम्लानिर्नास्तीति यस्मात्तस्मादित्यर्थ इत्थं व्याख्यातम् ॥ ३० ॥ ❀ ❀ सूनृतया प्रियवाचा ॥ ३१ ॥ ❀ ❀ सन्तः सेव्या येषां ते क्षत्रबन्धवोऽपि सत्सेवायामधिकारिणो जाता इत्यर्थः । तीर्थका इति । यद्भवन्त आयांति तन्निन्द्यस्थलमपि तीर्थं जनतापावनं भवतीति वयं निन्द्या अपि तीर्थकाः प्रशस्ततीर्थानि । स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्त्तन्त इति पुंस्त्वम् । तत्र कृपैव कारणमित्याह–कृपयेति ॥ ३२ ॥

श्रीमद्वीरराघवव्याख्या

अथ स विष्णुरातः परीक्षिदागतायातिथये तस्मै श्रीशुकाय शिरसा नम्रेणेति शेषः । सपर्यां पूजां जहार चकार शिरसा प्रणामपूर्वकं पूजां चक्रे इत्यर्थः । तथा तमनुसृत्यागता अज्ञा बालकाः प्रतिनिवृत्ता बभूवुः, ततः स पूजितः शुकः महासने महति राज्ञा समर्पिते आसने उपविवेश ॥ २९ ॥ ❀ ❀ तत्रासने उपविष्टः स महीयसामपि महीयान्माहात्म्ययुक्तः भगवान् शुकः ब्रह्मर्षिप्रभृतीनां संघैरलं नितरां व्यरोचत यथा ग्रहादीनां निकरैः समूहैः परिवृतश्चंद्रस्तद्वत् । ग्रहा अंगारकादयः ऋक्षाण्यश्विन्यादीनि नक्षत्राणि तदुभयेतराणि नक्षत्राणि ताराः ॥ ३० ॥ ❀ ❀ प्रशांतं सात्त्विकवेषमकुंठा आवरणरहिता मेधा धीर्यस्य तं यद्यपि "नित्यमसिच्प्रजामेधयोः" (५।४।१२२) इत्यत्र 'नञ् दुःसुभ्य एवे'ति नियमस्तथाप्यार्षत्वादसिच्, आसीनमुपविष्टं मुनिं शुकमभिमुखं समीपमागत्य महाभागवतो नृपः परीक्षिन्मूर्ध्ना प्रणम्य बद्धांजलिरवहितस्तदुपयुक्तश्रवणोपयुक्तावधानयुक्तः सूनृतया मधुरया गिरान्वपृच्छत् ॥ ३१ ॥ ❀ ❀ तदेवाह अहो इति । यावत् समाप्ति तावत्समागमनेनात्मनः कृतार्थतामाविष्करोति अहो इति हे ब्रह्मन् ! वयं क्षत्रबंधवोऽप्यद्याहो सत्सेव्याः संतः सेव्या येषां तथाभूताः अभूम यद्वा सतां सेव्या अनुग्राह्या अभूम । तत्र हेतुमाह कृपया भवद्भिरतिथिरूपेणातिथिव्याजेन वयं तीर्थकाः कृताः पवित्रीकृताः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ज्ञानादिनैव सत्संगत्या सकलपापक्षयो भवतीति प्रतिपाद्यतेऽस्मिन्नध्याये । तत्रादौ शुकागमनं वक्ति तत्रेति । यत्र परीक्षिता मुनिभिश्च स्थितं तत्र तस्यामवस्थायां वा व्यासपुत्रः शुको भगवान् यदृच्छया दैवेच्छयाभवदित्यन्वयः । पूर्वस्मात्कांतिविशेषद्योतनाया-भवदित्युक्तम् । आगमनस्य तावता विष्णुरातः विष्णुदत्तः न तिथिर्दिनविशेषो यस्य स तथा तस्मै आजहार चकार । द्विजवदो बुधत्वे

हेतुः, अनेन कथमालक्षितः पौरैः कथं वा पांडवेयस्येति प्रश्नः परिहृत इति ज्ञातव्यम् ॥ ५ ॥ ❀ ❀ सः परीक्षित् महीयसां महत्तराणां मध्ये महान् संवृतः गूढः महत्त्वप्रकाशनाय राजा ब्रह्मर्ष्यादिभिः परीतो व्यरोचतेत्युक्तं तक्षकान्मरिष्य इति मरणभिया मुखांगकांतिम्लानिर्नास्तीति यस्मात्तस्मादित्यर्थः ॥ ६ ॥ ❀ ❀ सूनृतया गिरा प्रियवचनेन ॥ ७ ॥ ❀ ❀ हे ब्रह्मन् ! ब्रह्मज्ञानिन् क्षत्रबंधवो वयमद्य सद्भिः सेव्या अभूम अहो भाग्यं कुतः अतिथिरूपेण आगतैर्भवद्भिस्तीर्थकाः तीर्थेषु प्रशस्तास्तीर्थाः कृताः, यथा भवंतो निष्कलुषत्वाय तीर्थानि भवंति तथा वयमपि युष्मत्संगत्येत्यर्थः, तत्र कृपैव कारणमित्यतः कृपयेत्युक्तम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सतां सदाचाराणां सेव्या आदरयोग्याः ॥ ३२-३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्त्रियो युवतयः साक्षात् स्मर एवायमिति अर्भका विक्षिप्तोऽयमित्यबुधा निवृत्ता मुनिभ्यस्तेभ्योऽतिभीत्येत्यर्थः । स उपविवेश । पूजा यथोचितप्रणामप्रश्रयप्रणयपरिष्वङ्गकुशलप्रश्नादिलक्षणा मुनिजनकर्तृका मुनिजनकर्म्मका च सञ्जाता यस्येति तारकादित्वादितच् । तेन सर्व्वे मुनयः प्रणेमुः । व्यासनारदाद्यास्तु सास्रं सगद्गदं प्रणयपरिष्वङ्गशिरोघ्राणकुशलप्रश्नादिकं चक्रुः । स च तान् प्रणनामेति द्योतितम् । महासन इत्याज्ञा गुरूणां ह्यविचारणीयेत्याद्युक्तेः ॥ २९ ॥ ❀ ❀ ग्रहाः शुक्रादयः । ऋक्षाणि अश्विन्यादीनि नक्षत्राणि । तदन्यास्ताराः । अत्र व्यासनारदपरशुरामादिभ्योऽवतारेभ्योऽपि तस्योत्कर्षो भक्त्युत्कर्षेणैवेति ज्ञेयम् ॥ ३० ॥ ❀ ❀ न कुण्ठा सर्वार्थेषु मेधा यस्य तम् । प्रश्नार्थं पुनर्नत्वा ॥ ३१ ॥ ❀ ❀ सन्तो महान्तः सेव्या येषां ते क्षत्रबन्धवोऽपि महत्सेवायामधिकारिणोऽभूमेत्यर्थः । तीर्थका इति यद्भवन्त आयान्ति तन्निन्द्यस्थलमपि तीर्थं जनतापावनं भवतीति वयं निन्द्या अपि तीर्थकाः तीर्थानि प्रशस्ततीर्थानि । स्वार्थिकाः प्रकृतिलिंगवचनान्यतिवर्त्तन्त इति पुंस्त्वम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विष्णुरातः परीक्षित् शिरसा सपर्यामाजहार नतिपूर्विकां पूजां चकार, ततः स्त्र्यादयो निवृत्ता बभूवुः, स च शुको महासने विष्णुरातेन पूजांगत्वेनार्पिते उपविवेश । संधिरार्षः ॥ २९ ॥ ❀ ❀ तत्र तस्मिन्महासने उपविष्टः महीयसामपि महान्स भगवान् शुकः ब्रह्मर्ष्यादिभिः संवृतः यथा ग्रहादिभिः परीते इंदुस्तद्वदलं व्यरोचत । ग्रहाः शुक्राद्याः नक्षत्राण्यश्विन्यादीनि तारास्तदन्याः ब्रह्मर्षयो वशिष्ठादयः राजर्षय आर्ष्टिषेणादयः देवर्षयो नारदादयः ॥ ३० ॥ ❀ ❀ प्रश्नार्थं पुनर्नत्वा सूनृतया मधुरया गिराऽकुंठमेधसं न कुंठा सर्वार्थेषु मेधा यस्य तमन्वपृच्छत् ॥ ३१ ॥ ❀ ❀ तदेवाह अहो इत्यष्टभिः । हे ब्रह्मन् ! क्षत्रबंधवो वयं सतां सेव्या आदरणीया जाताः, यतोऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः पवित्रीकृताः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

एवं प्रश्नसमये समागत इति राजा उत्थितः एवं स्थितः तत्पदेन परामृश्यते विष्णुरात इति । एतदर्थमेव भगवता अहं रक्षित इति तस्य ज्ञानं सूचितं स चातिथिः आगमने नियतकालरहितः तस्मै किं देयमित्याकांक्षायां स आत्मानमेवार्हतीति तस्मै सपर्यां शिरसा सपर्यामाजहार शिरस्तस्मै समर्पितमित्यर्थः । ततोऽन्यथाभासनार्थं परिगृहीतानां पदार्थानां त्यागं कृतवानित्याह तत इति । गुणाः कार्याश्रयोऽपि निवृत्ताः, ततः स पूजितो महासने राजोपवेशने उपविवेश ॥ २९ ॥ ❀ ❀ ततः सर्वे ऋषयो दूरस्थिता अपि तस्य परितः समीपे उपविष्टा इत्याह स संवृत इति । ननु सर्वैः संवृतत्वे को हेतुः तत्राह महान् महीयसामिति ज्ञानिनामपि ज्ञानप्रद इत्यर्थः । अलमत्यर्थं पूर्त्यर्थं वा भगवानेव तद्रूपेण समागतः तदा तस्य महत्त्वं सर्वजनीनं जातमिति दृष्टान्तमाह यथा आकाशे चंद्रमाः ग्रहैर्बुधादिभिः ऋक्षैरश्विन्यादिभिः प्रकीर्णकैः तारानिकरैश्च व्याप्तः दृष्टान्तदार्ष्टांतिकयोः तुल्यतार्थास्त्रिविधा उक्ताः ॥ ३० ॥ ❀ ❀ इदानीं प्रष्टा समय एव समागत इति अयमेव प्रष्टव्यो नान्य इति भगवदिच्छां ज्ञात्वा तं पृष्टवानित्याह प्रशांतेति । गुरुशिष्यधर्मा उच्यंते प्रशांतादिपदैः, तत्र चत्वारो गुरुधर्माः ज्ञानं ज्ञानकार्यं च अव्यग्रत्वं च साधनमिति प्रकृष्टशांतिर्ज्ञानकार्या आसीनमित्यव्यग्रम् अकुंठं मेधो ज्ञानं यस्य, बुद्धेः प्राकृतत्वसम्भावनया तन्निराकरणाय मेधश्शब्दः प्रयुक्तः । समनन्तरं ससाधनं शिष्यगुणान् वक्तुं महतः शिष्यत्वं गूढार्थकथनमपि भवतीति नृपत्वभागवतत्वं चाह नृपो भागवत इति । ततः शिष्यस्य षट् धर्माः तानाह अभ्युपेत्येत्यादिभिः । प्रथमतः गुरोराभिमुख्येन गमनं ततः कायिकसाष्टांगनमस्कारः ॥ ३१ ॥ ❀ ❀ ततो मधुरया वाचा पृष्ट इति सत्यवाचा वा प्रश्नार्थं प्रथमतस्तं स्तौति अहो इति । अहो अद्य वयमिति पूर्ववत् ब्रह्मन्निति हेतुः ब्रह्मसाक्षात्कारो बहिर्जात इति आश्चर्यं वयं महांतो जाता इति किंच सद्भिरपि सेव्या वयं जाताः । अतः परमुपदेष्टृत्वमपि भविष्यतीत्यर्थः, स्वभावतस्तु वयं क्षत्रबन्धवः क्षत्रिया बान्धवा येषां क्षत्रियवंशे परमुत्पन्नाः न तु धर्मवन्तः नैव ब्राह्मणपादशौचादारात्

विसृष्टाः सेव्यता जाता.तत्राह कृपयेति । यथा तीर्थानां गङ्गादीनां भवनसम्बन्धेन तीर्थत्वं स्नातृरूपेण तथा वयं गृहस्थाः अतिथिरूपेण कृपयानुकरणाभ्यां भवद्भिः कर्तृकैः तीर्थीकृताः स्वार्थोऽत्र विवक्षित इति ज्ञापनार्थः, तेनास्मासु नौपचारिकं तीर्थत्वम् ॥ ३२ ॥

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणविरचितः सुबोधिनीप्रकाशः

स विष्णुरात इत्यत्र । आगमने नियतकालरहित इति । 'अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते' इति तथेत्यर्थः । परिगृहीतानामिति शुकेन परिगृहीतानाम् । अहो इत्यत्र । पूर्ववदिति 'अहो वय'मित्यत्र यथा परश्लाघार्थे स्वश्लाघा तथेत्यर्थः । उपदेष्टृत्वमिति । जनकादेरिवेत्यर्थः । तद्गतं पापमित्यादि । देहगतं पापं जलसंयोगद्वारा जले गच्छतीत्यर्थः ॥ ३० ॥ ❀ ❀ पुरुषस्येत्यत्र । अधिकारिद्वैरूप्यं स्वतन्त्रम्रियमाणभेदेन कर्मणां श्रोतव्यादीनां तत्तदभावभेदेनेति मूलवाक्य एव स्फुटति । विपरीतेत्यादि । स्वतन्त्रकर्तृसम्बन्धिकर्मपञ्चके म्रियमाणसम्बन्धाभावो अन्यस्यान्यसम्बन्धितदभाव इत्यर्थः । विशकलिततयेति । कर्तृभेदेन द्विधा कर्मभेदेन दशवेत्यर्थः । यद्वा विपर्ययमित्यस्यार्थमाहुः अथवेत्यादि । उभयकरणमिति । नित्यद्वयकरणं नित्यनैमित्तिककरणं च । ननु नियमविध्यङ्गीकारे नोभयकरणप्रसक्तिरिति किमर्थं विपरीतकथनप्रश्न इत्यत आहुः आवश्यकेत्यादि ॥ ३१ ॥

एवं श्रीवल्लभाचार्यनखचन्द्रमरीचिभिः । निरस्ते हृदयध्वान्ते विवृताद्य सुबोधिनी ॥ १ ॥
समर्पितः तत्पदयोरेष पुष्पाञ्जलिर्गिराम् । तेन तुष्यन्तु दयया दासेऽस्मिन् सहसूनवः ॥ २ ॥
यदत्र सदसद्वापि जीवबुद्ध्या मयोदितम् । आशयाज्ञानतस्तन्मे क्षन्तव्यं दीनवत्सलाः ॥ ३ ॥

बद्ध्वाञ्जलिं मूर्ध्नि बुधेषु नत्वा मुहुस्तदीयेषु निवेदयामि ।
असद्यदस्मिन् भवति क्वचित्तत्कृपापरैर्वीक्ष्य निवारणीयम् ॥ ४ ॥

इति श्रीमदाचार्यचरणकमलैकतानश्रीपीताम्बरतनुजपुरुषोत्तमप्रकाशितप्रथमस्कन्धसुबोधिनीप्रकाशे ऊनविंशाध्यायविवरणम् ।

श्रीगिरिधरकृता बालप्रबोधिनी

अथ स विष्णुरातः परीक्षित् आगताय अतिथये तस्मै शुकाय शिरसा सपर्यां आजहार प्रणामेनैव तत्पूजां कृतवान् । ततो हि अबुधाः अर्भकादयो ये तेन सहागतास्ते निवृत्ताः । स च शुकः राज्ञा पूजितो महति आसने राज्ञा समर्पिते उपविवेश । सोपविवेशेति सन्धिरार्षः ॥ २९ ॥ ❀ ❀ तत्रासने उपविष्टो महीयसामपि महान्स भगवान् शुकः ब्रह्मर्षिप्रभृतीनां सङ्घैः परीतः अलमतिशयेन व्यरोचतेत्यन्वयः । तत्र दृष्टान्तमाह-ग्रहादीनां निकरैः समूहैः परिवृतो यथेन्दुश्चन्द्रो विरोचते तथेति । ग्रहा आदित्यादयः । ऋक्षाणि अश्विन्यादीनि नक्षत्राणि । तदुभयेतरास्ताराः ॥ ३० ॥ ❀ ❀ तमासीनं सुखमुपविष्टं मुनिं नृपः परीक्षिदभ्युपेत्य अभिमुखं समीपमागत्य मूर्ध्ना प्रणम्य बद्धाञ्जलिरवहितः सावधानश्च सन् प्रश्नार्थं पुनर्नत्वा सूनृतया मधुरया गिरा अन्वपृच्छदित्यन्वयः । सर्वोत्कृष्टात्ततः प्रश्ने कुतो न बिभियादित्याशङ्क्याह-प्रशान्तमिति । क्रोधादिदोषरहितमित्यर्थः । तत एव प्रश्ने हेतुमाह-अकुण्ठमेधसमिति । अकुण्ठा सर्वशास्त्रार्थे आवरणरहिता मेधा बुद्धिर्यस्य तमित्यर्थः । राज्ञोऽपि प्रश्नयोग्यतामाह-भागवत इति ॥ ३१ ॥ ❀ ❀ प्रश्नमेव दर्शयति-अहो इति यावत्समाप्ति । श्रीशुकसमागमेनात्मनः कृतार्थतामाविष्करोति-अहो इति पञ्चभिः । हे ब्रह्मन् सर्वज्ञ वयं क्षत्रबन्धवोऽप्यहो आश्चर्यमद्य सतां सेव्या आदरणीया जाताः । कुतः ? यतो भवद्भिरतिथिरूपेण कृपयैव तीर्थकाः कृताः पवित्रीकृता इति ॥ ३२ ॥

हिन्दी अनुवाद

राजा परीक्षित्ने अतिथिरूपसे पधारे हुए श्रीशुकदेवजीको सिर झुकाकर प्रणाम किया और उनकी पूजा की। उनके स्वरूपको न जाननेवाले बच्चे और स्त्रियाँ उनकी यह महिमा देखकर वहाँसे लौट गये; सबके द्वारा सम्मानित होकर श्रीशुकदेवजी श्रेष्ठ आसनपर विराजमान हुए ॥ २९ ॥ ❀ ❀ ग्रह, नक्षत्र और तारोंसे घिरे हुए चन्द्रमाके समान ब्रह्मर्षि, देवर्षि और राजर्षियोंके समूहसे आवृत श्रीशुकदेवजी अत्यन्त शोभायमान हुए। वास्तवमें वे महात्माओंके भी आदरणीय थे ॥ ३० ॥ ❀ ❀ जब प्रखरबुद्धि श्रीशुकदेवजी शान्तभावसे बैठ गये, तब भगवान्के परम भक्त परीक्षित्ने उनके समीप आकर और चरणोंपर सिर रखकर प्रणाम किया। फिर खड़े होकर हाथ जोड़कर नमस्कार किया। इसके पश्चात् बड़ी मधुर वाणीसे उनसे यह पूछा ॥ ३१ ॥ ❀ ❀ परीक्षित्ने कहा—ब्रह्मरूप भगवन्! आज हम बड़भागी हुए; क्योंकि अपराधी क्षत्रिय होनेपर भी हमें

संत-समागमका अधिकारी समझा गया। आज कृपापूर्वक अतिथिरूपसे पधारकर आपने हमें तीर्थके तुल्य पवित्र बना दिया ॥ ३२ ॥

येषां संस्मरणात् पुंसां¹सद्यः शुद्ध्यन्ति वै गृहाः। किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ३३ ॥
सांनिध्यात्ते महायोगिन्पातकानि महान्त्यपि। सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥
अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः। पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः ॥ ३५ ॥
अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम्। नितरां म्रियमाणानां संसिद्धस्य वनीय²सः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विष्णोः सान्निध्यादसुरादय इव ॥ ३४ ॥ ❀ ❀ पाण्डुसुतानां प्रियोऽतस्तेषां पैतृष्वस्रेयानां प्रीत्यर्थं तद्गोत्रस्य मे आत्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन सः ॥ ३५ ॥ ❀ ❀ अन्यथा श्रीकृष्णप्रसादं विना अव्यक्ता गतिर्यस्य म्रियमाणानां नितरां कथं स्यात्। वनयिता याचयिता। वनयितृतमो वनीयांस्तस्य वनीयसः। अत्युदारतया मां याचेथा इति प्रवर्तकस्येत्यर्थः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

येषां स्मरणात् यत्कर्तृकात् यत्कर्मकाद्वा। गृहा अपि शुध्यन्ति किं पुनः कलत्रपुत्रदेहाः। येषां स्मरणात्किं पुनर्दर्शनादिनेत्यर्थः ॥ ३३ ॥ ❀ ❀ हे महायोगिन्निति। योगिदर्शनादेव महापातकक्षयो भवति किमुत महायोगिनस्तवेति कैमुत्यद्योतिकेयं सम्बुद्धिरिति भावः ॥ ३४ ॥ ❀ ❀ बन्धुकृत्यं स्वयं दर्शनदानादि। तस्मात्तेनैव त्वं मन्निस्तारार्थं प्रेषितोसीत्यनुमीयत इति भावः ॥ ३५ ॥ ❀ ❀ वनीयानिति। "तुरिष्ठेमेयस्सु" इति तृशब्दस्य लोपः ततो निमित्तापाये नैमित्तिकस्याप्यपायात् टेर्लोपाच्च सिध्यति। इत्यर्थ इति। "चतुरर्थान्प्रदास्यामि याचतेति मुहुर्मुहुः। प्रेरयेद्याचकान्यो वै वनीयान्स प्रकीर्तितः" इत्यभिधानचिंतामण्युक्तेरयं भावः ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

वनीयस इति। 'तुश्छन्दसि' (पा० ५।३।५९) इति हि तृन् तृजन्तादिष्ठेयसुनौ भवतः। 'तुरिष्ठेमेयःस्विति' च (पा०६।४।१५४) तृशब्दस्य लोपः स्यात् ॥ ३६-३८ ॥

श्रीमद्वीरराघवव्याख्या

कथमतिथिरूपेणास्मदागमनरूपेण वस्तीर्थभूतता इत्यत्र तत्कैमुत्यन्यायेन दर्शयति येषां भवतां स्मरणादेव सद्यः पुंसां स्मतॄणां गृहाः शुद्ध्यंति किं पुनर्भवतां दर्शनादिभिः शुद्ध्यंतीति वक्तव्यं पादशौचं पादजलम् ॥ ३३ ॥ ❀ ❀ यत एवमतो हे महायोगिंस्तव सान्निध्यादेव हेतोः पुंसां मादृशानां महांत्यपि सर्वाणि पातकानि सद्य एव नश्यंति ॥ ३४ ॥ ❀ ❀ किंच भगवतः श्रीकृष्णस्य अनुग्रहकारितं भगवद्दर्शनादिकमन्यथा तद्दुर्लभमित्याह अपीति द्वाभ्यां तावदनुग्रहस्त्वस्माकं सुलभ इति संभावयामीत्यभिप्रायेणाह अपीति। अपिशब्दः संभावनाद्योतकः भगवान् कृष्णः प्रीतः प्रसन्नः स्यात्तत्र हेतुं वदंस्तं विशिनष्टि पांडुसुताः प्रिया यस्य सः पांडुसुतानां च प्रियः अस्तु पांडुसुतप्रियः त्वत्प्रियस्तु कथमित्यत्रोभयत्रानुगतं हेतुं वदन्विशिनष्टि पितुर्भगिनी-पितृष्वसा कुंती तस्या अपत्यानि पितृष्वस्रेयास्तेषां प्रीत्यर्थं तद्गोत्रस्य पैतृष्वस्रेयसंतानस्याप्तबाधवः पितृष्वसुः प्रियस्तत्प्रीत्यर्थं तत्पुत्रेषु नस्तत्प्रीत्यर्थं तत्पुत्रादिष्वित्येवं यावत्तत्संतानप्रिय इत्यर्थः। आत्तबांधव इति पाठे आत्ता उपात्ताः परिगृहीता बांधवा येन इष्टबांधव इत्यर्थः। भगवत्प्रसादेन त्वद्दर्शनं जातं तत्प्रसादस्तु तत्पितृष्वसुः संतानप्रभावत्वादिति भावः ॥ ३५ ॥ ❀ ❀ अन्यथा भगवतः प्रीत्यभावेऽव्यक्तगतेः सांसारिकैरलक्ष्यगतेर्वनीयसः अतिशयेन वनवासिनः संसिद्धस्य कृतकृत्यस्य ते तव दर्शनं नृणां संसारिणां तत्रापि नितरां म्रियमाणानां नोऽस्माकं कथं स्यात् वनमस्यास्तीति वनी वनवान् वनवासी, प्रकृतऋषिसंघापेक्षयातिशयेन वनीति वनीयांस्तस्य वनीयसः ॥ ३६ ॥

---

१. प्रा० पा०—पुंसः। २. प्रा० पा०—वरीयसः।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तीर्थीकरणमेव विशिनष्टि येषां भवतां संस्मरणात् पुंसो गृहाः सद्यः शुध्यंति वै यस्मात् अतो दर्शनादिना शुध्यंतीति किं पुनर्वक्तव्यमित्यन्वयः ॥ ९ ॥ ❀ ❀ भवत्संगत्या विशेषोऽप्यस्तीत्याह सान्निध्यादिति । अनेन ब्रह्महत्यादिपापपरिहारो भवतीत्युक्तं भवति ज्ञानात्पूर्वतनानि भस्मीभवंति पश्चात्तनानि न श्लिष्यंतीति शास्त्रनिश्चितं वैशब्देनाह न केवलमस्मत्पापहानिरेव किंतु अस्मत्संगतानामपीति ॥ १० ॥ ❀ ❀ पांडुसुतानां प्रियः पांडुसुताः प्रिया यस्येति वा कृष्णो भगवान् मे मह्यं प्रीतोऽपि प्रीत एव कुतः पिता वसुदेवः तस्य स्वसा कुंती तस्याः पुत्राः पैतृष्वस्रेयाः युधिष्ठिरादयः तेषां प्रीतये तेषां गोत्रं यस्य सोऽहं तद्गोत्रः तस्य मे आत्तबांधवो जात इति यस्मादत इति ॥ ११ ॥ ❀ ❀ अन्यथा तत्प्रीत्यभावे अव्यक्तगतेरज्ञातगमनस्य संसिद्धस्य ब्रह्मज्ञानितया कृतकृत्यस्य वरीयसः वरणीयेषु पूज्यस्य ते दर्शनं नृणां नः कथं घटते म्रियमाणानां नितरां न घटत इति शेषः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वनीयस इति । 'तुश्छन्दसि' (५।३।५९) इति हि तृन् तृजन्तादिष्ठेयसुनौ भवतः । 'तुरिष्ठेमेयःसु' (६।४।१५४) इति च तृशब्दस्य लोपः स्यात् ततो निमित्ताभावे नैमित्तिकस्याप्यभावात् टेर्लोपाच्च सिद्ध्यति ॥ ३६-४० ॥

इति श्रीमद्भागवतप्रथमस्कन्धस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनविंशोऽध्यायः ॥ १९ ॥

इति कलियुगपावन स्वभजन-विभजन-प्रयोजनावतार-श्रीभगवत्कृष्णचैतन्यदेवचरणानुचर-
विश्ववैष्णवराजसभाजनभाजन-श्रीरूपसनातनानुशासनभारतीगर्भे सससन्दर्भा-
त्मकश्रीभागवतसन्दर्भे प्रथमस्कन्धस्य क्रमसन्दर्भः समाप्तः ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

येषां स्मरणात् यत्कर्त्तृकात् यत्कर्म्मकाद्वा । गृहा अपि किं पुनः कलत्रपुत्रदेहाः ॥ ३३-३४ ॥ ❀ ❀ पैतृष्वस्रेयादीनां युधिष्ठिरादीनां तद्गोत्रस्यापि मे आत्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन सः । तस्मात् तेनैव त्वं मन्निस्तारार्थं प्रेषितोऽसीत्यनुमीयत इति भावः ॥ ३५ ॥ ❀ ❀ वनयिता याचयिता वनयितृतमो वनीयान् । 'तुरिष्ठे मेयस्सु' इति तृशब्दस्य लोपः । ततो निमित्तापाये नैमित्तिकस्याप्यपायात् टेर्लोपाच्च वनीयानिति सिद्ध्यति । तस्य अत्युदारतया मां याचस्वेति प्रवर्त्तकस्येत्यर्थः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

येषां भवतां स्मरणात्स्मरणमात्रतः पुंसां गृहाः सद्यः शुध्यंति किं पुनस्ते स्मर्तारः, अथ किं पुनर्भवतां दर्शनादिभिः शुध्यंतीति वाच्यम् ॥ ३३ ॥ ❀ ❀ विष्णोः सांनिध्यात् सुरेतराः असुरा इव ॥ ३४ ॥ ❀ ❀ अद्य भगवान् कृष्णः मे प्रीतः अतिप्रसन्नो जातः, पैतृष्वस्रेयाः पाण्डवास्तेषां प्रीत्यर्थं यतः पांडुसुताः प्रिया यस्य सः तेषां पांडवानां गोत्रस्य संतानस्य मे आत्तं बांधवं बंधुकृत्यं येन सः ॥ ३५ ॥ ❀ ❀ अन्यथा मद्विषयककृष्णप्रसन्नताभावे अव्यक्तगतेर्दुर्लक्ष्यगतेः वनीयसः अतिशयेन वनवासिनस्ते नोऽस्माकं नृणां दर्शनं कथं भवेन्न कथमपीत्यर्थः ॥ ३६ ॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

ननु स्नाने जलस्य देहस्य संयोगात् तद्गतपापं तद्द्वारा तेषु गच्छतीति जलस्य तीर्थत्वं भवति गृहस्थस्य तु कथमागमनमात्रेण तीर्थत्वं तत्राह येषामिति । येषु गृहेषु स्थित्वा भवतां स्मरणं क्रियते तेन स्मरणेन सूर्येणेव सर्वेषां गृहाणामशुद्धिलक्षणं तमो दूरीक्रियते तत्र किं पुनर्वक्तव्यं भवतां दर्शनं कोटिसूर्याधिकप्रकाशं ज्ञानेंद्रियाणां सर्वशोधकं स्पर्शस्तु जलस्पर्शवत् साक्षात्पापहारकः चरणोदकं पुनः भव एवालौकिकजन्महेतुः आसनादयश्च पूजावयवाः सर्वपुरुषार्थसाधकाः । अतस्तीर्थत्वं युक्तमेवेत्यर्थः ॥ ३३ ॥ ❀ ❀ नन्वयुक्तप्रायश्चित्तानि पापानि गच्छंतु नाम, येषां तु प्रायश्चित्तं विहितं तानि न गच्छंतीत्यवसीयते प्रायश्चित्तवैयर्थ्यापत्तेरित्याशंक्याह सान्निध्यादिति । प्रमाणबलेन हि प्रायश्चित्तानि युक्तानि अत्र प्रमेयबलमित्याह हे महायोगिन्निति । योगोऽस्यास्तीति योगी योगेन स्वार्थपुरुषार्थसाधकः महायोगी तु स्वयोगबलेन अन्येषामपि सर्वसाधकः तत्र पापनिवृत्तिस्तत्वानुषंगिककार्यमित्याह महांत्यपि पातकानि तव संनिधिमात्रेणैव सद्यो नश्यंति सान्निध्यस्यावृत्तिमपि नापेक्षंते स्थितिं वा तत्र प्रमेयबलमिव दृष्टांतयति विष्णोरिवेति । यथा विष्णोः संनिधिमात्रेणैव सुरस्पर्धिनोऽपि महांतो दैत्या नश्यंति तद्वदित्यर्थः । किंच भगवतैवायमुपायः कृतः ।

अन्यथा ब्रह्मदग्धस्य निस्तारो न भविष्यतीति तथापि प्राप्तः सन्नेव कृतवान् अन्येनैव पापनिवृत्तेः अन्यथा स्वकर्त्तव्यत्वमापद्येत ॥३४॥ ❀ ❀ ननु तुभ्यं केन कर्मणा प्रीत इत्याशङ्क्याह पांडुसुतप्रिय इति। पांडुसुताः प्रीतिविषया यस्य । ननु तावता तव किमागतं तत्राह पैतृष्वस्रेयेति । पितृष्वसुः पुत्राः पांडवाः तेषां प्रीत्यर्थमनेन पितुः तत्स्वसुश्च प्रीतिराक्षिप्ता भवति तद्गोत्रस्य यद्वा बांधवं बंधुत्वं तदात्तं स्वीकृतं येन तत्प्रीत्यर्थं तद्वंशीयेषु हितं कृतवानित्याह ॥ ३५ ॥ ❀ ❀ अस्मिन्नर्थे साधकं तर्कमाह अन्यथेति । लोके अव्यक्ता गतिर्यस्य स्वस्थानामपि मनुष्याणां त्वद्दर्शनं दुर्लभं कुतः पुनर्मृत्युग्रस्तानां येनादृष्टेन तुच्छनरत्वं मृत्युसंबंधं च प्राप्ताः तदुभयनिवर्त्तकस्य तस्य तव दर्शनं नादृष्टसाध्यं किंतु भगवत्साध्यमेव । उभयनिवर्त्तकं रूपमाह संसिद्धस्य वनीयस इति । सम्यक्सिद्धस्य अन्यस्यापि मृत्युनिवारकस्य यथा सम्यक्सिद्धो रसः सर्वमृत्युनिवारको भवति तथायमपीत्यर्थः । किंच वनयिता याचयिता वनयितृतमो वनीयान् स्वयं तत्तद्गृहे गत्वा भवद्भ्यः सर्वपुरुषार्थान् दास्यामि प्रार्थयतेति वदन् यो गच्छति स तथा तादृशस्य तव क्षुद्रनरत्वादिनिवारकस्य दर्शनं भगवत्साध्यमेवेत्यर्थः ॥ ३६ ॥

श्रीगिरिधरकृता बालप्रबोधिनी

अस्मदागमनमात्रेणैव कथं पवित्रता जातेत्यपेक्षायामाह–येषामिति । येषां भवतां सम्यक् स्मरणादेव पुंसां स्मर्तॄणां सकुटुम्बा गृहाः सद्य एव शुद्ध्यन्ति तेषां दर्शनादिभिर्वयं विशुद्धा जाता इति किं पुनर्वक्तव्यम् । पादशौचं पादजलम् ॥ ३३ ॥ यत एवमतो हे महायोगिन् तव सान्निध्यादेव हेतोः पुंसां महान्त्यपि पातकानि सद्य एव नश्यन्ति । तत्र दृष्टान्तमाह–यथा विष्णोः सान्निध्यात् सुरेतरा दैत्यराक्षसादयो नश्यन्ति तथेत्यर्थः ॥ ३४ ॥ ❀ ❀ अस्मिन् समये त्वद्दर्शनमतिदुर्लभमपि मम जातं ततो भगवत्प्रसादोऽनुमीयते इत्याह–अपीति द्वयेन । अपीति सम्भावनायामेव सम्भवतीत्यर्थः । मे मह्यं श्रीकृष्णः प्रीतः प्रसन्नो जातः । तत्प्रसादेऽपि मम दर्शनं कथं स्यादित्यपेक्षायां तस्य सर्वान्तर्यामित्वादित्याशयेनाह–भगवानिति । केन हेतुना प्रीत इत्यपेक्षायां मम यद्यपि तादृशं भाग्यं नास्ति तथापि युधिष्ठिरादिसन्तोषार्थं प्रीत इत्याह–पैतृष्वस्रेयाणां प्रीत्यर्थमित्यर्थः । तत्रापि हेतुमाह–तद्गोत्रेति । तेषां युधिष्ठिरादीनां गोत्रस्यात्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन सः । तत्रापि हेतुस्तद्भक्तिरेवेत्याह–पाण्डुसुतप्रिय इति, पाण्डुसुतानां प्रिय इत्यर्थः ॥ ३५ ॥ ❀ ❀ अस्मिन्नर्थे साधकं तर्कमाह–अन्यथेति । अन्यथा श्रीकृष्णप्रसादं विना ते तव दर्शनं नोऽस्माकं नृणां कथं स्यादित्यर्थः । यदि सर्वदैव तव दर्शनं दुर्लभं तदाऽस्मिन् मरणसमये तव दर्शनं मम दुर्लभमिति किं वक्तव्यमित्याशयेनाह–नितरां म्रियमाणानामिति, आसन्नमृत्यूनामित्यर्थः । दर्शनस्य दुर्लभत्वे हेतुमाह–अव्यक्तगतेरिति । तत्रापि हेतुमाह–संसिद्धस्येति । एवम्भूतोऽपि यदि कृपणः स्यात्तर्हि तद्दर्शनेऽपि किं स्यादित्यत आह–वनीयस इति । वनयिता याचयिता वनयितृतमो वनीयांस्तस्यात्युदारतया मां याचस्वेति प्रवर्त्तकस्येवागतस्येत्यर्थः ॥ ३६ ॥

हिन्दी अनुवाद

आप-जैसे महात्माओंके स्मरणमात्रसे ही गृहस्थोंके घर तत्काल पवित्र हो जाते हैं; फिर दर्शन, स्पर्श, पादप्रक्षालन और आसनदानादिका सुअवसर मिलनेपर तो कहना ही क्या है ॥ ३३ ॥ ❀ ❀ महायोगिन्! जैसे भगवान् विष्णुके सामने दैत्यलोग नहीं ठहरते, वैसे ही आपकी सन्निधिसे बड़े-बड़े पाप भी तुरन्त नष्ट हो जाते हैं ॥ ३४ ॥ ❀ ❀ अवश्य ही पाण्डवोंके सुहृद् भगवान् श्रीकृष्ण मुझपर अत्यन्त प्रसन्न हैं; उन्होंने अपने फुफेरे भाइयोंकी प्रसन्नताके लिये उन्हीं के कुलमें उत्पन्न हुए मेरे साथ भी अपनेपनका व्यवहार किया है ॥ ३५ ॥ ❀ ❀ भगवान् श्रीकृष्णकी कृपा न होती तो आप-सरीखे एकान्त वनवासी अव्यक्तगति परम सिद्ध पुरुष स्वयं पधारकर इस मृत्युके समय हम-जैसे प्राकृत मनुष्योंको क्यों दर्शन देते ॥ ३६ ॥

अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् । पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥
यच्छ्रोतव्यमथो जप्यं यत्कर्तव्यं नृभिः प्रभो । स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ ३८ ॥
नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम् । न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥

सूत उवाच

एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा । प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्र्यां पारमहंस्यां संहितायां
प्रथमस्कन्धे शुकागमनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

इति प्रथमः स्कन्धः समाप्तः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

सम्यक्सिद्धिर्यस्मात्तम्। कार्यं कर्तुं योग्यम्। कर्तव्यं त्वावश्यकमिति भेदः। अत एव सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन्कृते संसिद्धिर्मोक्षलक्षणा सिद्धिर्भवति तत्त्वां योगिनां गुरुं पृच्छामि॥ ३७॥ ❀ ❀ यच्छ्रोतव्यं यज्जाप्यं यत्कर्तव्यं यत्स्मर्तव्यं यदाराध्यं तद् ब्रूहि। विपर्ययमश्रोतव्यादि॥ ३८॥ ❀ ❀ तव दर्शनस्य पुनर्दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह। नूनमिति। गोदोहनमात्रकालमपि। अस्माकं भाग्यवशात्त्वद्दर्शनं जातमिति भावः॥ ३९॥ ❀ ❀ एवमहो इत्यादिकया श्लक्ष्णया मधुरया गिरा आभाषितोऽभिमुखीकृतः पृष्टश्च॥ ४०॥

आर्यं धर्मजमाहतारिमवनौ कृत्वा परीक्षिन्नृपं ब्रह्मास्त्रादभिरक्षितं कलिजयख्यातं च कृत्वा भुवि।

अन्ते यः शुकरूपतः स्वपरमज्ञानोपदेशेन तं शापादावदमुं नमामि परमानन्दाकृतिं माधवम्॥ १॥

इति श्रीमद्भागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां प्रथमस्कन्धटीकायामेकोनविंशोऽध्यायः॥ १९॥

समाप्तोऽयं प्रथमः स्कन्धः॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो भवद्दर्शनं दुर्लभमतो दैवात्प्राप्तं योगिनां ज्ञानयागभक्तियोगवतां परमं गुरुम्। सम्यक्सिद्धिः का तां पृच्छामि इह संसिद्धौ यत्सर्वथा कर्तव्यं साधनं तत्पृच्छामीति चक्रवर्ती॥ ३७॥ ❀ ❀ तदेव विशेष्याह—यच्छ्रोतव्यमिति। श्रवणरसनामनोविषयीकर्तव्यं पाण्यादीन्द्रियविषयं किं भजनीयं वेति देवेषु को देव उपास्य इत्यर्थः। आदिनाऽजप्यास्मर्तव्यग्रहः॥ ३८॥ ❀ ❀ हे ब्रह्मन्निति। कथनसामर्थ्यमाह—साक्षाद्वेदरूपोसीति भावः॥ ३९॥ ❀ ❀ धर्मज्ञो हरिभक्तिधर्मज्ञः तस्यैव सर्वश्रेष्ठधर्मत्वात्। "एष मे सर्वधर्माणां धर्मोधिकतमो मतः। यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा" इति शान्तनवोक्तेः। भगवान्सर्वज्ञः आर्यं श्रेष्ठं धर्मजं युधिष्ठिरमाह। ना अरयो यस्य तादृशमवनौ भूमौ परीक्षिन्नृपञ्च भुवि बलिजयेन प्रथितं कृत्वा स्वस्य परमं ज्ञानं श्रीभागवतं तदुपदेशेन शापाच्छापजन्यतक्षकदंशजनरकादावत् रक्षितवान्। अमुं परमानन्दाकृतिं मद्गुरुरूपं माधवमहं नमामीति योज्यम्। नन्वेतच्छ्रीपरीक्षितः शापोत्तरं श्रीशुकदेवकृतश्रीभागवतश्रावणं श्रीमहाभारतविरुद्धं तत्रैतद्वृत्तस्याश्रवणात्। तथाहि श्रीमहाभारतादिपर्वण्युक्तम्—

"शृंग्युवाच

योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य च। स्कंधे मृतं समास्राक्षीत्पन्नगं राजकिल्बिषी।
तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः। आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः॥
सप्तरात्रादितो नेता यमस्य सदनं प्रति॥"

इत्यारभ्याग्रिमैकचत्वारिंशाध्यायस्थशमीकप्रेषितगौरमुखात्स्वशापं श्रुत्वा तत्प्रतीकारार्थं सभ्यैर्मंत्रयामास। तथाहि।

"तस्मिंश्च गतमात्रेऽथ राजा गौरमुखे तदा। मंत्रिभिर्मंत्रयामास सह संविग्नमानसः॥
संमंत्र्य मंत्रिभिश्चैव तं तथा मंत्रतत्त्ववित्। प्रासादं कारयामास एकस्तंभं सुरक्षितम्॥
रक्षां च विदधे तत्र भिषजश्चौषधानि च। ब्राह्मणान्मंत्रसिद्धांश्च सर्वतो वै न्ययोजयत्॥
राज्यकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः। मंत्रिभिः सह धर्मज्ञः समंतात्परिरक्षितः॥
न चैनं कश्चिदारूढं लभते राजसत्तमम्। वातोपि निश्चरंस्तत्र प्रवेशे विनिवार्य्यते॥"

इति। एषां पञ्चश्लोकानामयमर्थः। राजानं प्रति शृंगिदत्ततक्षकदंशलक्षणशापं कथयित्वा शमीकशिष्ये गौरमुखे गते सति राजा परीक्षिदथ मंत्रास्तत्तद्देवताराधनोपयुक्तास्त्र्यम्बकमित्याद्यास्तज्ज्ञातारो मंत्रिणः श्रोत्रियास्तैः सह संविग्नमानसो मृत्युभीतेराकुलः मंत्रयामास अधुना किं कर्तव्यं मयेति विचारयामास॥ २८॥ स्वयमपि मंत्रेषु तत्त्वं हरिनाम "मंत्रमुख्यं हरेर्नाम तीर्थमुख्यं च जाह्नवी" इत्याद्युक्तेस्तद्वित् तत्प्रभाववित् "कलौ नामैव केवलम्" इत्यादिशास्त्रज्ञः प्राति पूरयत्यर्थिजनाभिलषितमिति प्राः अत्युदारः कारुणिकश्च स चात्र श्रीशुक एव 'संसिद्धस्य वनीयसः' इति श्रीभागवतोक्तेः। यद्वा 'नंदनंदनरूपोऽसौ श्रीशुको भगवान्मुनिः' इति स्कान्दोक्तेस्तस्य श्रीनंदनंदनरूपत्वादुदारत्वकारुणिकत्वे

साहजिके एवेति । प्रा-पूरणेऽस्मात्क्विबन्तात्टाप्रत्यये तृतीयैकवचने "आतो लोपः" इत्यालोपे प्रा इति रूपं सिध्यति। सानां सप्तानां दीनां दिनानां समाहारः सदम्। समासांतोत्र डः। "समाहारे नपुंसकम्" इति क्लीबत्वम्। नामैकदेशोच्चारणेन सर्वनामग्रहणमिति न्यायेन सशब्देन सप्तानां दिशब्देन दिनानाञ्च ग्रहः। यद्वा यादयोष्टाविति केरलमतानुसारेण स-शब्दः केवलोपि सप्तसंख्यां वदतीति तथा च सदपदं सप्ताहं वक्ति सदमेव सादम्। स्वार्थिकोण्। तथा च सप्तभिर्दिनैरित्यर्थो लभ्यते। सुरक्षितं सुरेभ्यः क्षित्तमदत्तमर्थाच्छ्रीमद्भागवतमायाति। तदुक्तं पाद्मे "परीक्षिते कथां वक्तुं सभायां संस्थिते शुके" इत्यारभ्य "श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा" इत्यंतेन श्लोकपंचकेन। यद्वा सुरा देवाः क्षियंति निवसंत्यत्रेति सुरक्षितं गंगातटं "जाह्नव्यास्तु तटे सर्वे वसंति देवतागणाः" इत्यादेः। द्वितीयेयं सप्तम्यर्थे। गंगातटे श्रीशुकेन सादं सप्ताहं यथा स्यात्तथा एकस्तंभं श्रीभागवतं कारयामास वाचयामासेति तात्पर्यम्। एकं सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मार्थाच्छ्रीहरिः "हरिरेव परं ब्रह्म" इत्याद्युक्तेः। तत्स्तभ्नाति चित्ते रुणद्धीत्येके स्तंभं श्रीमद्भागवतं "सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा। यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत्" इति पाद्मात्। "सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्" इत्यत्रैवोक्तेश्च ॥ २९ ॥ तत्र तदा गंगातटे वा रक्षति प्रायश्चित्तोपदेशेनेति रक्षा ब्रह्मसभा तां विदधे चक्रे भिषजश्च विषवैद्यान् औषधानि सर्पविषहरान् मंत्रैः सिद्धान् सिद्धमतो ब्राह्मणांश्च न्ययोजयत्स्थापयामासेत्यर्थः ॥ ३० ॥ राजकार्याणि राजभिः कर्तुं योग्यानि सांपरायिकमहादानादीनि सर्वाण्येव तत्रस्थः श्रोत्रियसमाजगतः सहधर्मज्ञः "हेतुर्दामोदरः सहः" इति सहस्रनामसु सहशब्दो विष्णुपरो दृश्यते। तद्धर्मज्ञः विष्णुभक्त इत्यर्थः। मंत्रिभिः श्रोत्रियैः समं सार्द्धमकरोत्कारेत्यर्थः। "ब्राह्मणान्मंत्रसिद्धांश्च" इत्युक्तेः। "तदिति ब्रह्मणो नाम" इति श्रुतेः। तद्ब्रह्म परं प्राप्यं येन स तत्परोऽध्यात्मविचारस्स एव तात्परः सोऽस्यास्तीति तात्परः श्रीशुकस्तेन रक्षितस्तत्त्वोपदेशेन संसाराद्रक्षितः ॥ ३१ ॥ कश्चित्प्राकृतो जन एनं श्रीमद्भागवतविचारमारूढं न लभते प्राप्तात्मतत्त्वोऽयमिति नाजानात्। तत्रात्मविचारप्रवेशे सति वातः प्राणोऽपि निश्चरन्बहिर्निर्गच्छन्विशेषेण वार्यते निषिध्यते। कर्मकर्त्तरि प्रयोगः। "न तस्य प्राणा उत्क्रामंति अत्रैव समवलीयन्ते" इति श्रुतेः। इत्थं व्याख्याने न कदाचिदपि विरोधः संभवेदिति तत्त्वम् ॥ ३२ ॥ किञ्च वाराहेप्येतद्वृत्तं वर्ण्यते परीक्षितः शापकथनप्रसंगे—

तत्राजग्मुर्महाभागा मुनयः शंसितव्रताः। शुकश्च व्यासतनयो महाभागवतो मुनिः॥
संहितां श्रावयामास राज्ञे भागवतीं शुभाम्॥"

इत्यादिकं श्रीवाराहदेवेनोक्तम। ब्रह्मांडेऽपि—

"शुकवागमृताब्धीन्दुः परीक्षित्स्वांतगं तमः। निरस्यन्दिद्युते विप्र श्रीमद्भागवताख्यया।"

इति शेषदेवेनोक्तमतः श्रीमहाभारतेऽपि गोपयित्वा वर्णितमेवैतद्वृत्तमिति तत्त्वम्॥ अथ प्रथमस्कंधश्रवणफलम्—

मातृसंगमने चैवं यत्पापं प्राप्यते नरैः। प्रथमस्कन्धश्रवणात्तस्मात्पापात्प्रमुच्यते॥
पादादिजानुपर्यंतं ममांगं प्रथमो विधे। ब्रह्मोवाच—मातृगाम्यभवत्कौ वा कस्मिन्देशे स्थितश्च सः।
प्रथमस्कंधश्रवणात्कथं मुक्तो वद प्रभो। हरिरुवाच—अवंतीनगरे रम्ये राजा सच्छ्रीकरो महान्॥
तस्य भार्याद्वयं चासीत्सिंधुसौवीरदेशजम्। तयोर्मध्ये च या ज्येष्ठा नाम्ना केसरिणीति च॥

अजा नाम्ना कनिष्ठा तु सौवीराधिपतेः सुता। पतिधर्मरता ज्येष्ठा कनिष्ठा न पतिप्रिया॥
सर्वाङ्गसुंदरी सा हि शापदोषेण दुःखिता। ब्रह्मोवाच—ब्रूहि विष्णो कथं शापोऽभूत्तस्याः कीदृशोथ वा॥

हरिरुवाच—पुराघौघहरं नाम तीर्थं लोकमलापहम्। तत्र विप्रः सुधर्माख्यस्तपस्वी न्यवसत्पुरा॥
ग्रीष्मे तपति पंचाग्नीन्वर्षास्वासारषाड् जले। आकंठमग्नः शिशिरे वर्षाणामयुतायुतम्॥

एकपाद ऊर्ध्वपादः पादांगुष्ठाश्रितावनिः। वायुभक्षः पर्णभक्षो वर्षाणामयुतायुतम्॥
एवंविधो द्विजस्तत्र तताप परमं तपः। दृष्ट्वा तस्य तपो जिष्णुर्भयमापेदिवान्बहु॥
इन्द्रासने स्पृहा ह्यस्य संचिन्त्येत्यब्रवीत्तदा। अप्सरसं पुष्पवतीं समाहूय पितामहः॥

इन्द्र उवाच

भो भो पुष्पवति देवि मम कार्यं समाचार । अघौघनाशने तीर्थे सुधर्मा नामतो द्विजः ॥
तत्तपोव्याकुलीभूतं त्रैलोक्यं सचराचरम् । यथा मोही भवेत्तस्य तथा कार्यं त्वया लघु ॥

हरिरुवाच

इति वाक्यं समाकर्ण्य सहस्राक्षस्य धीमतः । ऋषेः शापात् त्रस्तमनाश्चिन्तयामास साप्सराः ॥
गमने विप्रशापः स्यादन्यथा दण्ड इन्द्रतः । सा जगाम ततो दिव्यं मुनेस्तस्य तपोवनम् ॥
नानाद्रुमैः पक्षिगणैर्वृतं दृष्ट्वा च तं मुनिम् । तया नृत्यं समारेभे गीतवाद्यमनोहरम् ॥
तस्या नादेन रम्येण तत्रासीन्मधुसंभवः । कामो रत्या समागत्य दध्रे पुष्पमयं धनुः ॥
तत् श्रुत्वा निनदं तस्याः प्रबुद्धो मुनिपुंगवः । तां च दृष्ट्वा स धर्मात्मा वाक्यमाह वराननाम् ॥
का त्वं कस्यासि किं कार्यं ब्रूहि यन्मनसेप्सितम् । पुष्पवत्युवाच
देवकन्यां सुगीतज्ञां लीलया त्वत्समीपगाम् । त्वं विद्धि मां च पत्नीत्वे मया सह सुखं भज ॥
विमानमिदमास्थाय देवानां पानभूमिषु । एते मत्सहगा विप्र त्वां भजेयुः सुखं भज ॥

सुधर्मोवाच

नाहं कामीह सुभगे मा कुरुष्व तपोव्ययम् । पुनः सा प्रार्थयामास भजस्व सुमध्यमाम् ॥
विज्ञाय तद्धठं विप्रस्तस्यै शापद्वयं ददौ । संसारार्णवमग्नानां प्रलोभयसि मां यतः ।
अतस्त्वं मानुषे लोके भव स्वात्मजगामिनी । सौवीराधिपतेः पुत्री सा जाता मुनिशापतः ॥
तामजासंज्ञिकां राज्ञे श्रीकराय ददौ पिता । कदाचिच्छ्रीकरो राजा निर्जनं वनमध्यगात् ॥
ययाभ च तया सार्द्धं मृगयासक्तमानसः । राज्ञी पुत्रं समालेभे नृपसंगान्मनोहरम् ॥
जाते पुत्रे मृतो राजा तत्पुत्रस्तु नृपोऽभवत् । सपत्नीपुत्रराज्येन सा दुःखं प्राप्य दारुणम् ॥
जगाम वणिजा सार्धं रत्यासक्तमतिः सदा । सोपि वैश्यो मृतिं प्राप ततः सातीव दुःखिता ॥
अहो कष्टमहो दुःखं मया प्राप्तमभाग्यया । श्रीकरो हि मृतो राजा जारोपि निधनं गतः ॥
एतस्मिन्नंतरे दैवान्मृते केसरिणीसुते । अजापुत्रोऽभवद्राजा कीर्तिमानिति विश्रुतः ॥
तदा संचिंत्य मनसा जीवनं मे कथं त्विह । बभूव नर्तकी ब्रह्मन्सा संकेतोपजीविनी ॥
तत्सुतो दिग्जये व्यग्रो दैवात्तत्र जगाम ह । यत्र माता ह्यजा नाम नर्त्तकीभावमाश्रिता ॥
एकदा स वने राजा तया सार्द्धं ययाभ ह । कामार्तश्च निशापाये प्रातः स्वस्थानमाययौ ॥
द्वौ द्विजौ ज्ञानसंपन्नौ तत्रस्थौ तं समूचतुः । समागतं नृपं दृष्ट्वा कृतं पापं महन्नृप ॥

राजोवाच

किं कृतं हि मया पापं प्रायश्चित्तं च किं ततः । विप्रावूचतुः ।
न वक्तुं शक्यते तच्च यन्निशायां त्वया कृतम् । यया साकं कृतं पापं तामेव प्रष्टुमर्हसि ॥
त्वं तस्याः कोऽभवत्पूर्वं तव सा काभवत्पुरा । इत्युक्त्वा तौ गतौ विप्रौ राजा वेश्यागृहं गतः ॥
विकोशमसिमादाय प्रोवाच गणिकां प्रति । का त्वं दुष्टे कस्य पुत्री कस्य भार्याभवत्पुरा ॥
सर्वमेतत्समाचक्ष्व यदि कल्याणमिच्छसि । सौवीराधिपतेः पुत्री श्रीकरस्य प्रिया ह्यहम् ॥

पुत्रे जाते दशाहे तु श्रीकरः पञ्चतामितः। राज्यं प्राप्तं सपत्न्याश्च पुत्रेण तेन दुःखिता।
गताहं वणिजा सार्द्धं सोपि मद्दैवतो मृतः। महीपतेः पुरा चाहं पुत्ररत्नमवाप ह॥
कीर्तिमंतमिति ख्यातं तं त्यक्त्वात्र समागता। वैद्याभवं वैश्यमृतौ वृत्तमेतन्मम प्रभो॥

राजोवाच

श्रीकरो मे पिता चासीत्त्वं मे मातेति निश्चितम्। धिक्त्वां मातृगमं मां धिगित्युक्त्वा निर्ययौ वनम्॥
गते पुत्रेऽनुगा साभूत्तीर्थयात्रां प्रचक्रतुः। एकदा यमुनातीरे स्नानार्थं तौ समागतौ॥
ताभ्यां तत्र श्रुता गाथा प्रथमस्कंधसंभवा। तत्पुण्येन गतौ तौ तु वैकुंठं योगिदुर्लभम्"॥
इति पाद्मोत्तरखंडत उद्धृतम्। वन्देहं राधिकानाथं यशोदानन्दनं हरिम्॥
यत्कृपालवसंलब्धधिया चैष प्रकाशकः। श्रीभागवतभावार्थदीपिकायाः कृतो मया॥
श्रीभागवतव्याख्यानरूपां मालां कृतां गुरोः। कृपया लातु गोविंदः श्रीवंशीधरशर्मणा॥
यद्यपि लोके बह्व्यः संति हि टीकाः पुरातन्यः। तथापि चैनां कृपया पश्यंतु कामदां सुधियः॥ ४०॥

इति कौशिकगोत्रखण्डनगरवासिवंशीधरशर्मकृते श्रीधरस्वामिकृतभावार्थदीपिकाप्रकाशे प्रथमस्कंधः समाप्तिमगात्॥ श्रीकृष्णो मे मंगलं संददातु॥

श्रीराधारमणदासगोस्वामिविरचिता दीपनी व्याख्या

गोदोहनकालं पञ्चदशपलपरिमितमिति व्याख्यालेशः॥ ४९-३०॥

इति श्रीभागवतभावार्थदीपिकादीपिन्यां प्रथमस्कन्धः समाप्तिमगात्

श्रीमद्वीरराघवव्याख्या

यतो दुर्लभमपि त्वद्दर्शनमभूदतो योगिनामपि परमं गुरुं त्वां संसिद्धिं पृच्छामि संसिद्धशब्दो मुक्तिसाधनोपचरितः मुक्तिसाधनं पृच्छामीत्यर्थः। तदेव विशदयति इह लोके पुरुषस्य मुमुक्षोः सर्वदा तत्रापि म्रियमाणस्य यत्कर्त्तव्यं मुक्तिसाधनतयेति शेषः। तत्पृच्छामीत्यन्वयः तद्ब्रूहीत्युत्तरेणान्वयः॥ ३७॥ ❁ ❁ कर्त्तव्यमेव विभज्य पृच्छंस्तद्विपर्ययमकर्तव्यं च ब्रूहीत्याह यदिति। हे प्रभो! नृभिर्मुमुक्षुभिः तत्रापि मुमुक्षुभिर्यच्छ्रोतव्यादिकं यच्च विपर्ययमश्रोतव्यादि च तत्सर्वं ब्रूहि कथय यत्कर्तव्यमित्युपात्तच्छ्रोत्रादिकरणं व्यतिरिक्तकरणाभावे प्रश्नः स्मर्तव्यं मंतव्यं भजनीयं प्रीतिपूर्वकमनुध्येयमतो न पौनरुक्त्यमथोऽपिचेत्यर्थः॥ ३८॥ ❁ ❁ यावत् स्मृत्यागतं तत्पृष्टं प्रतिवदताऽनियतावस्थानेनापि त्वया व्यवस्थातव्यमित्यभिप्रायेण तदवस्थानमनियतत्वेन स्तौति नूनमिति। हे ब्रह्मन्! गृहमेधिनां गृहाश्रमिणां गृहेषु क्वचिदपि भगवतस्तवावस्थानं गोदोहमपि गौर्दुह्यते यावता कालेन तावान् कालो गोदोहनशब्देन विवक्षितः तावत्कालमपि न लक्ष्यते हि॥ ३९॥ ❁ ❁ एवमिति इत्थं राज्ञा भाषितः अहो अद्य वयं ब्रह्मन्नित्यादिनोक्तः पृष्टः अतः पृच्छामि संसिद्धिमित्यादिना पृष्टश्च भगवान् धर्मज्ञः मुमुक्षूणां मुमूर्षूणां कर्तव्यधर्मयाथात्म्याभिज्ञो बादरायणिः श्रीशुकः श्लक्ष्णया विशुद्धया समृद्धया गिरा प्रत्यभाषत प्रश्नानामुत्तराण्युवाचेत्यर्थः॥ ४०॥

इति श्रीवत्सान्वयपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्यप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णदासेन वीरराघवविदुषा विलिखितायां श्रीमद्भागवतचन्द्रिकायां प्रथमस्कन्धदीपिकायां टीकायामेकोनविंशोऽध्यायः॥ १९॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भवद्दर्शनं दुर्लभमिति यतोऽतः दैवात्प्राप्तं योगिनां परमगुरुं संसिद्धं कैवल्यभूतं भवंतमिह म्रियमाणस्य पुंसः सदा यत्कार्यं यच्च श्रोतव्यमथो यच्च जाप्यमथवा नृभिर्यत्कर्तव्यं भजनीयं वा यद्वा विपर्ययमकर्तव्यं स्मर्तव्यादि तच्च पृच्छामि तदस्माकं

ब्रूहीत्येकान्वयः ॥ १३-१४ ॥ ❀ ❀ गृहमेधिनां गृहस्थानां गृहेषु कचिदेकत्रापि गोदोहनक्षणमपि भवतोऽवस्थानं न लक्ष्यते नूनं निश्चितो हि यस्मात्तस्मात् ज्ञानिनि स्वतः प्राप्ते सति कर्तव्याद्यज्ञानेऽस्माकं महासुरत्वं स्यादिति भवंतं पृच्छामीति भावः ॥१५॥ ❀ ❀ एवमाभाषितः पृष्टः संबोध्य कृतप्रष्टव्यः गुरुशिष्यसंवादलक्षणधर्मज्ञो बादरायणिः शुकः श्लक्ष्णया मधुरया गिरा राजानं प्रत्यभाषतेत्येकान्वयः ॥ १६ ॥

भागवतविवरणमिदं तुलसीदलमिव समर्पयामि हरेः । चरणनलिनयुगलेऽहं प्रथमस्कन्धोपगं सतां प्रीत्यै ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां श्रीमद्विजयध्वजतीर्थविरचितप्रथमस्कन्ध-
टीकायां विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

संसिद्धिं सम्यक् सिद्धिः का तां पृच्छामि । इह संसिद्धौ यत् सर्व्वथा कर्त्तव्यं साधनं तत् पृच्छामि ॥ ३७ ॥ ❀ ❀ तदेव विशिष्याह यच्छ्रोतव्यमिति । कर्तव्यमिति श्रोतव्यादिषु चतुर्ष्वेवान्वेति । यत् श्रोतव्यं श्रवणार्हं कर्त्तव्यं यज्जप्यं जपार्हं कर्त्तव्यं यत् स्मर्त्तव्यं स्मरणार्हं कर्त्तव्यं यत् भजनीयं भजनार्हं कर्त्तव्यमित्येवम् । विपर्ययमश्रोतव्यादि ॥ ३८ ॥ ❀ ❀ त्वद्दर्शनस्य पुनर्दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह नूनमिति । गोदोहनमात्रकालमपि ॥ ३९ ॥ ❀ ❀ श्लक्ष्णया मधुरया गिरा ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकोनविंशः प्रथमे सङ्गतः सङ्गतः सताम् ॥ १९ ॥

श्रीधरस्वामिनां श्रीमत्प्रभूणां श्रीमुखाद् गुरोः । व्याख्यासु सारग्रहणादियं सारार्थदर्शिनी ॥

इति श्रीमहामहोपाध्यायश्रीमद्विश्वनाथचक्रवर्तिकृतायां सारार्थदर्शिन्यां
टीकायां प्रथमस्कन्धः समाप्तः ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यतः श्रीकृष्णकृपया प्राप्तो भवानतः सम्यक् श्रीकृष्णप्राप्तिरूपा सिद्धिर्यस्मात्तं त्वां पृच्छामि । किं पृच्छसि यत्पुरुषस्य सदा कार्यं कर्तुं योग्यं म्रियमाणस्य विशेषतश्च तत्कृष्णप्राप्त्युपायं पृच्छामि ॥ ३७ ॥ ❀ ❀ कर्तव्यमेव विविच्य पृच्छति यच्छ्रोतव्यमिति पादत्रयेण हे प्रभो नृभिर्मुमुक्षुभिः यच्छ्रोतव्यम् १ अथ यज्जप्यम् २ यत्स्मर्तव्यं वा ३ यद्भजनीयं वा ४ अथवा श्रोतव्यादिभ्यश्चतुर्विधकर्तव्यभेदेभ्योऽन्यत्किंचित्कर्तव्यं तद् ब्रूहीति पंचमः प्रश्नः ५ यद्वा विपर्ययमश्रोतव्यादि तद् ब्रूहीति षष्ठः ॥ ३८ ॥ ❀ ❀ ममोपकारार्थं स्थिरो भूत्वा प्रत्युत्तरं देहीत्याशयेनाह नूनमिति । हे ब्रह्मन्! यावता कालेन गौर्दुह्यते तावत् कालमपि भगवतस्तव गृहमेधिनां गृहेषु अवस्थानं कचिन्न लक्ष्यतेऽतो मदनुग्रहार्थं स्थिरो भव ॥ ३९ ॥ ❀ ❀ एवमनेन प्रकारेण अहो अद्य वयं ब्रह्मन्सत्सेव्या इत्यादिकया श्लक्ष्णया गिरा भाषितोभिमुखीकृतः 'अतः पृच्छामि संसिद्धिं योगिनां परमं गुरु-मि'त्यादिना पृष्टश्च बादरायणिः प्रत्यभाषत प्रश्नोत्तराण्युवाच ॥ ४० ॥

इति श्रीमद्भागवतसिद्धान्तप्रदीपे श्रीसनत्कुमारसंततिप्रवर्तकश्रीमद्भगवन्निम्बार्कचरणचिन्तकशुकसुधीप्रणीते
प्रथमस्कन्धीये एकोनविंशतितमाध्यायार्थप्रकाशः ॥ १९॥

श्रीमद्वल्लभाचार्यविरचिता सुबोधिनी व्याख्या

अतस्तद्दर्शनं दृष्टद्वारैव पुरुषार्थसाधकं भवत्विति किंचित् पृच्छामीत्याह अत इति । ननु योगीश्वराणां विद्यमानत्वात् । तान् विहाय कथं मामेव पृच्छसीत्याशंक्याह योगिनां संसिद्धिं सम्यक् सिद्धिरूपं यथा बहुकालयोगेन काचिदलौकिकी सिद्धि-र्भवति तथैव भवान् योगिनां जातः तेषां सर्वपुरुषार्थदातृत्वात् । किंच तेषां त्वमेव गुरुः ज्ञानदाता तद्द्वारा मोक्षप्रद इत्यर्थः । किंच तेषां त्वमेव परमः । परो वासुदेवो मीयते अनेनेति भक्तिदानात् श्रेष्ठो वा एवं तत्प्रश्ने हेतुमुक्त्वा प्रश्नमाह । पुरुष-स्येति । अत्र द्वादशप्रश्नाः अधिकारिणो द्वैरूप्यात् । कर्मणां पंचविधानां च द्वैरूप्यात् यद्यपि विंशतिभेदा भवंति तथापि कर्तृ-भेदस्य नियतत्वात् विपरीतपंचके संबंधाभावात् विशकलिततया प्रश्ना इति । द्वादशविधत्वं तत्र प्रथममाह इहैव गृहस्थाश्रमे स्थितस्य ज्ञानवतः पुरुषस्य यत्कार्यं कृतिसाध्यं तत् कथयेति । द्वितीयमाह म्रियमाणस्येति । म्रियमाणस्य सर्वथा आवश्यकं यत् कर्त्तव्यं तदाहेति । इदानीं साधारण्येनाह । म्रियमाणेन जीवता वा यत्श्रोतव्यं श्रोत्रेंद्रियं कुत्र व्यापारणीयम् । अनेन ज्ञानेंद्रियाणा-

मन्येषामन्येऽपि भेदा अर्थादुक्ताः इदानीं प्रक्रियांतरेण बाह्यमानसस्य मिथुनस्य कर्त्तव्यो यो जपः स च वक्तव्यः ॥ ३७ ॥ ❀ ❀ एवं ज्ञानेंद्रियद्वयस्य कृत्यं पृष्ट्वा केवलकर्मेन्द्रियाणां कर्तव्यं पृच्छति यत्कर्त्तव्यमिति। नृभिरिति साधारण्येन तथा कथने सामर्थ्यं सूचयति प्रभो इति। एवं त्रयं वैदिकमार्गेण पृष्ट्वा भक्तिमार्गेण द्वयं पृच्छति स्मर्त्तव्यमांतरं भजनीयं बाह्यं चेत्यनियमे। आंतरमपि भजनीयम्। अथवा निषेधमुखेन वक्तव्यमितरनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात्। अन्यथोभयकरणं प्रसज्येत नियमविधौ आवश्यक-दैहिकानां बाधः प्रसज्येत अतस्तद्वैपरीत्ये मया वक्तव्यमित्याह यद्वेति। विपर्ययमिदं न कर्त्तव्यमित्यादिरूपम् ॥ ३८ ॥ ❀ ❀ नन्वेकदैव किमिति पृच्छयते तत्राह नूनमिति। हे ब्रह्मन्! क्षोभाभावाय सम्बोधनं गृहमेधिनां गृहेषु भगवतस्तवावस्थानं न लक्ष्यते कदाचित् दैवगत्या भवेत् चेदवस्थानं तदापि गोदोहनमात्रं गौर्दुह्यते यावत्कालेन स कालो गोदोहनं क्वचिदिति भिक्षोत्तरादान-गृहे। यद्यपि परमहंसानां भिक्षादिनियमो नास्ति योगिनां सुतरामेव तत्रापि साक्षाद्भगवद्भावं प्राप्तस्य तत्रापि गृहे मेधा बुद्धिर्येषां केवलप्रवृत्तिस्वभावानां तत्रापि पुत्रादिगृहेष्वपि मोहाधिक्ययुक्तेषु तिरस्कारसम्भवात् "वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरे-दि"ति वाक्यात्। भिक्षार्थमागतस्य भिक्षादाने सर्वमेव सुकृतं गच्छेदिति तच्छंकया कार्यव्यावृत्तत्वं सम्भाव्यधर्मकार्यत्वबोधनाय गोदोहनमात्रं तिष्ठेत् अनेनाग्निहोतृणां गृहस्थानां गृहे कदाचित्तिष्ठेदित्युक्तं भवति ॥ ३९ ॥ ❀ ❀ एवं पृष्टे उत्तरं दातुं यत्नं कृतवानित्याह सूतः। एवमाभाषित इति श्लक्ष्णया स्नेहप्रकाशिकया अवक्रया वा प्रत्यभाषत प्रतिपन्नमुत्तरं दत्तवान् ब्रह्मविदस्तथा कथने हेतुः धर्मज्ञ इति "अब्रुवन् विब्रुवन्वापी"ति निषेधतः उत्तरदानेऽपि स्वस्य कापि क्षतिर्नास्तीति ज्ञापयितुमाह भगवानिति। आवश्यकत्वायाह बादरायणिरिति। अन्यथा व्यासस्य भागवतकरणं व्यर्थं स्यात्, अतः शरीरं तत उत्पथमप्युक्तवानित्यर्थः। एवमुत्तरावधिकृत्यं प्रथमस्कंधे निरूपितमिति ॥ ४० ॥

आद्यस्कन्धस्य विवृतिः श्रीकृष्णचरणाम्बुजे। निवेदितातियत्नेन वाक्पुष्पांजलिरुत्तमः ॥

सुज्ञेषु हस्तयुगलं पुरतो निधाय विज्ञापयामि मुरवैरिपदाब्जनिष्ठः ।

उच्छृङ्खलापि विवृतिर्मम चिंतनीया श्रीकृष्णपादयुगले विनिवेशितेति ॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां प्रथमस्कंध-विवरणे एकोनविंशतितमोऽध्यायः ॥१९॥

श्रीगिरिधरकृता बालप्रबोधिनी

यतस्त्वमेवम्भूतोऽतो योगिनां परमं गुह्यं श्रेष्ठमुपद्रष्टारं त्वां संसिद्धिं सम्यक् सिद्धिर्मोक्षलक्षणा यस्मात्तमुपायं पृच्छामी-त्यन्वयः। प्रश्नमेव विवृणोति-पुरुषस्येति सार्द्धेन। इह वेदमार्गे सर्वथा म्रियमाणस्य आसन्नमरणस्य पुरुषस्य यत्कार्यं कर्तुं योग्यम् ॥ ३७ ॥ ❀ ❀ यच्छ्रोतव्यमथो यच्च जाप्यं जप्तव्यं यच्च नृभिरवश्यं कर्तव्यं भजनीयमाराध्यं च यद्वा यच्च विपर्ययम् अकार्यम् अश्रोतव्यम् अजाप्यम् अकर्त्तव्यम् अस्मर्तव्यम् अभजनीयं च तत्सर्वं ब्रूहीति द्वयोरन्वयः। तव त्वत्र सन्देहाभावात्। कथं मे परबो-धने च सामर्थ्यमस्तीति सूचयन् सम्बोधयति, हे प्रभो इति ॥ ३८ ॥ ❀ ❀ नन्वेकदैव किमिति पृच्छयते इत्याशङ्क्य तवावस्थिते-र्दुर्लभत्वादित्याशयेनाह-नूनमिति। त्वया कोपो न कार्यो ब्रह्मज्ञत्वादिति सूचयन् सम्बोधयति-हे ब्रह्मन्निति। गृहे मेधा बुद्धिर्येषां गृहस्थानां तेषां गृहेषु भगवतः सर्वज्ञस्य तवावस्थानं गोदोहनं यावता कालेन गौर्दुह्यते तावत्कालमात्रमपि क्वचिदपि न लक्ष्यते न दृश्यते इत्यन्वयः। अत्र सन्देहो नास्तीत्याह-नूनमिति। तत्र हेतुमाह-हीति, प्रसिद्धत्वादित्यर्थः ॥ ३९ ॥ ❀ ❀ एवं पृष्ट उत्तरं दत्तवानित्याह-एवमिति। एवमुक्तप्रकारेण श्लक्ष्णया मधुरया स्नेहप्रकाशिकया गिरा राज्ञा आभाषितोऽभिमुखीकृतः पृष्टश्च स पूर्वोक्तो बादरायणिः श्रीशुकः प्रत्यभाषत उत्तरं दत्तवान्। तस्योत्तरदानमावश्यकमिति बादरायणिपदेन सूचितमन्यथा व्यासस्य श्रीभागवतकरणं व्यर्थं स्यादिति भावः। स्वतोऽपि तस्योत्तरदानसामर्थ्यमस्तीत्याशयेनाह-भगवानिति। भगवदाविष्टः सर्वज्ञ इत्यर्थः। तथापि किमर्थमुत्तरं दत्तवानित्यपेक्षायामाह-धर्मज्ञ इति। 'अब्रुवन्विब्रुवन् वाऽपि नरः किल्बिषमश्नुते' इति धर्मशास्त्रो-क्ततूष्णीम्भावस्य दोषज्ञ इत्यर्थः ॥ ४० ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥

रचिता प्रथमे तत्रोत्तमाधिकारवर्णने। ऊनविंशो गतो वृत्तिं शुकागमनिरूपकः ॥ ३ ॥

योऽन्तर्गतोऽपि सर्वस्य सर्वरूपो निरञ्जनः। स तुष्यत्वनया वृत्त्या शरण्यो भक्तवत्सलः ॥ ४ ॥

हिन्दी अनुवाद

आप योगियोंके परम गुरु हैं, इसलिये मैं आपसे परमसिद्धिके स्वरूप और साधनके सम्बन्धमें प्रश्न कर रहा हूँ। जो पुरुष सर्वथा मरणासन्न है, उसको क्या करना चाहिये ? ॥ ३७ ॥ ❀ ❀ भगवन् ! साथ ही यह भी बतलाइये कि मनुष्य-मात्रको क्या करना चाहिये। वे किसका श्रवण, किसका जप, किसका स्मरण और किसका भजन करें तथा किसका त्याग करें ? ॥ ३८ ॥ ❀ ❀ भगवत्स्वरूप मुनिवर ! आपका दर्शन अत्यन्त दुर्लभ है; क्योंकि जितनी देर एक गाय दुही जाती है, गृहस्थोंके घरपर उतनी देर भी तो आप नहीं ठहरते ॥ ३९ ॥ ❀ ❀ सूतजी कहते हैं—जब राजाने बड़ी ही मधुर वाणीमें इस प्रकार सम्भाषण एवं प्रश्न किये, तब समस्त धर्मोंके मर्मज्ञ व्यासनन्दन भगवान् श्रीशुकदेवजी उनका उत्तर देने लगे ॥ ४० ॥

१९ वाँ अध्याय समाप्त

समाप्तोऽयं प्रथमः स्कन्धः



अनेकव्याख्यासमलंकृतस्य

श्रीमद्भागवतस्य

प्रथमः स्कन्धः समाप्तः